आचाराङ्गसूत्रं सूत्रकृताङ्गसूत्रं च

ĀCĀRĀNGASŪTRAM
AND
SŪTRAKṚTĀNGASŪTRAM

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियुक्ति-टीकासमलङ्कृतं

आचाराङ्गसूत्रं सूत्रकृताङ्गसूत्रं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Lālā Sundarlāl Jain Āgamagranthamālā Vol. I

ĀCĀRĀṄGASŪTRAM
AND
SŪTRAKṚTĀṄGASŪTRAM

WITH THE NIRYUKTI OF ĀCĀRYA BHADRABĀHU SVĀMĪ
AND THE COMMENTARY OF ŚĪLĀṄKĀCĀRYA

THE TEXT ORIGINALLY EDITED BY
LATE ĀCĀRYA SĀGARĀNANDASŪRIJĪ MAHĀRĀJA

Re-edited with appendices etc. by
Muni Jambūvijayajī
the disciple of Late H. Holiness Munirāja Śrī Bhuvanavijayaji Mahārāja

MOTILAL BANARSIDASS
INDOLOGICAL TRUST
DELHI

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लाला सुन्दरलाल जैन आगमग्रन्थमाला भाग १

पञ्चमगणधर-श्रीमत्सुधर्मस्वामिविरचितं
श्रीभद्रबाहुस्वामिविरचितनिर्युक्ति-श्रीशीलाङ्काचार्यविरचितटीकासमन्वितम्

आचाराङ्गसूत्रं सूत्रकृताङ्गसूत्रं च

निर्युक्ति-टीकासमन्वितसूत्रद्वयस्य सम्पादकाः संशोधकाश्च

आगमोद्धारकाः स्व० आचार्यमहाराजश्रीसागरानन्दसूरीश्वराः

आगमप्रभाकरस्व० मुनिराजश्रीपुण्यविजयजीमहाराजसंगृहीतप्राचीनसामग्र्यनुसारेण
शुद्धि-वृद्धिपत्रकादिविविधपरिशिष्टादिभिः परिष्कर्ता

आचार्यमहाराजश्रीमद्विजयसिद्धिसूरीश्वरपट्टालंकार-
आचार्यमहाराजश्रीमद्विजयमेघसूरीश्वरशिष्य-
मुनिराजश्रीभुवनविजयान्तेवासी

मुनिः जम्बूविजयः

सहायको मुनिः **धर्मचन्द्रविजयः**

मोतीलाल बनारसीदास
इण्डोलाजिक ट्रस्ट
दिल्ली

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुख्य वितरक

मोतीलाल बनारसीदास

भारतीय संस्कृति के प्रमुख प्रकाशक एवं पुस्तक-विक्रेता

प्रधान कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली-७

शाखाएँ : (१) चौक, वाराणसी-१ (उ० प्र०)

२ अशोक राजपथ, पटना-४ (बिहार)

प्रथम संस्करण, दिल्ली १९७८

मूल्य रु० १२०.००

मोतीलाल बनारसीदास इण्डोलाजिकल ट्रस्ट, बंगलो रोड, जवाहर नगर, दिल्ली-११०००७ द्वारा प्रकाशित तथा शान्तिलाल जैन, श्री जैनेन्द्र प्रेस, ए-४५, फेस-१, इण्डस्ट्रियल एरिया, नारायणा, नई दिल्ली-२८ द्वारा मुद्रित।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकाशक-विज्ञप्तिः

जैनसङ्घे शास्त्रदृष्ट्याऽऽगमशास्त्रस्य भूयानुत्कर्षः इति विदितचरमेव विदुषाम् । भगवता महावीरस्वामिना जीवनकाले यदुपदिष्टं तदुत्तरवर्तिभिश्च जैनाचार्यैर्यदाचार्यपरम्परया गृहीतं तदत्र निवेशितम् । इत्थं पुण्यश्लोकस्य महनीयकीर्तेर्भगवतो महावीरस्य पुण्यवचसामागमशास्त्रेषु सङ्ग्रहो जातः ।

सङ्ग्रहात्मका एते पुण्यग्रन्था व्याख्यासहिताः पुरा प्राकाश्यमिताः कालान्तरेण च दुर्लभाः सञ्जाताः । कदाचित् क्वचिदुपलब्धा अपि नेष्टसिद्धिकरा असंस्कृतपाठप्रचुरत्वात्संशोधनमपेक्षन्त इति मत्वा लालासुन्दरलालमहाभागास्तेषां प्रकाशनाय समुत्सुका आसन् । संशोधनकार्यविधये तत्रभवन्तमाचार्यवरं श्रीजम्बूविजयमुनिं साग्रहं प्रार्थितवन्तः । तैश्च पुण्यात्मभिर्धर्मानुष्ठानपरैर्यथाकथञ्चिदधिगतसमयैः सुश्रावकाग्रहेण स्वधर्माङ्गत्वेन च जैनागमशास्त्रस्य शुद्धिवृद्धिपत्रकादि परिशिष्टकार्यं सम्पाद्य बहूपकृतं जिज्ञासूनाम् ।

आचाराङ्गसूत्रकृताङ्गसूत्रद्वयात्मकोऽयं प्रथमो भागः श्रीमति लालासुन्दरलालमहाभागे जीवत्येव मुद्रापितोऽभूत्, केवलमुद्घाटनविधिरेवावशिष्ट आसीत् । कालवशात्पूर्वमेव दिवङ्गतोऽसौ महाभाग इति तस्यानुपस्थितावेव ग्रन्थोऽयं प्रकाश्यते । शासनदेवश्च तदेषणां परिपूरयतु, जैनागमग्रन्थमालां च निर्बाधं प्राकाश्यमियादिति परमकृपालुं देवं प्रार्थयामहे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Lala Sundarlal Jain

born : February 15, 1900 *died : January 23, 1978*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लाला सुन्दरलाल जैनः

स्थिरप्रतिज्ञस्य परोपकारिणो धर्मकर्मनिष्ठस्य लाला सुन्दरलाल महोदयस्यास्मिन् 1978 वर्षे जनवरीमासे त्रयोविंशे दिवसेऽतर्कितोपगतं निधनं न केवलं बन्धुजनस्य, परं तत्सम्पर्कवतो निखिलस्य विद्यावतो मानवसमुदायस्य महतीं व्यथां जनयति। शोकाकुलस्य परिवारस्यैव न क्षतिरियम्, अपितु निखिलस्य सहृदयवर्गस्य, यस्याः पूर्तिर्न केवलं कठिना परमसम्भवैव।

अयं महाभागः प्राचीनर्षिवत् संस्कृतसेवापरायण आसीत्। सत्यमेवायं "मोतीलाल बनारसीदास" इति नाम्ना लब्धख्यातेः प्रकाशनसंस्थानस्याधारस्तम्भ आसीत्। स्वयं प्रकाशितेन साहित्येन भारतीयसंस्कृतेर्धर्मदर्शनयोश्च देशे विदेशे प्रसारमकरोत्। तद्द्वारा प्रकाशिताः सर्वे ते ग्रन्था विश्वसाहित्यस्यामूल्यनिधयो गण्यन्ते। कर्मयोगिनोऽस्य निस्स्वार्थभावेन परिपोषितेयं प्रकाशनसंस्था साकारा स्मृतिः सञ्जाता।

चिरस्मरणीयस्य कर्मयोगिनोऽस्य ख्रिस्तसंवत्सरस्यैकोनविंशतिशततमे वर्षे फरवरीमासे पञ्चदशे दिवसे पाञ्चनदराजधान्यां लवपुरे (लाहौर) नगरे 'ओसवाल' जातौ जन्माभूत्। अस्य पूर्वजः श्रीमान् बूटाशाहमहोदयस्तत्रभवतो महाराजरणजीतसिंहस्य रत्नपरीक्षाध्यक्ष आसीदिति कुलपरम्पराप्रसिद्धम्। सिक्खराज्यभ्रंशादनन्तरमप्ययं महानुभावो ब्रिटिशराज्येऽमुलभं नगरनिगमसदस्यपदमलञ्चकारेति राजकीयपत्रेषु लिखितम्।

एतत्संस्थानस्य संस्थापकस्त्वस्य पिता श्रीमान् मोतीलालमहोदय आसीत्। अयञ्च वंशपरम्परायातं रत्नव्यवसायमनुसरन्नपि लवपुरे प्राच्यविद्याग्रन्थप्रकाशनव्यवसायमारभत, तत्कार्ये च स्वं प्रियमात्मजं बनारसीदासमहाभागं न्ययुङ्क्त। अल्पीयस्येव वयसि दिवङ्गते श्रीमति बनारसीदासमहाभागे नवोपात्तमदृढमूलमेतत्संस्थानकार्यं द्रढियतुं तदनुजं स्वतनयं सुन्दरलालमहाभागमादिशत्। अप्राप्तयौवनोऽप्ययं बालः स्वर्गतस्य ज्येष्ठभ्रातुस्तनयस्य शान्तिलालमहाभागस्य साहचर्येण प्राच्यग्रंथप्रकाशनकार्यमारभत।

अथोपरते पितरि सर्वात्मना कार्यभारमुद्वहन् पण्डितभगवद्दत्तनिर्दिष्टया सरण्या श्रीमतां मजूमदारजायस्वालस्वरूपकैलेण्डजालीटामसप्रभृतीनां विद्यावारिधिपयोनिष्णातानामनेकेषां विदुषां प्रशस्ताः कृतीः प्राकाशयत्, गुणग्राहिताञ्च बहुमन्यमानो व्यवसायमार्गे शुद्धाचारमवलम्ब्य तथा प्रावर्तत यथा स्वल्पैरेव वर्षैः प्रकाशनसंस्थाया दिशिदिशि यशः प्रासरत्, स्वयञ्च महता श्रमेण परमया च निष्ठया समुपार्जितं प्राच्यविद्याप्रकाशकेष्वपूर्वं यशोऽलभत।

सन् 1915 वर्षादारभ्य सन् 1928 वर्षपर्यन्तमयं प्रकाशनालयो महतीमुन्नतिमासन्नः। मुद्रणालयश्च प्रचुरं प्रसृतः। प्रकाशनसंस्थानस्य व्यवहारशुद्धता चर्चा च देशदेशान्तरेषु व्याप्ता। अस्य सेवाकार्यञ्च ईशवीये 1928 तमे वर्षे लवपुरेऽखिलभारतीयप्राच्यविद्यागोष्ठीसम्मेलनसभापतिपदमलङ्कुर्वाणैस्तत्रभवद्भिर्महामहोपाध्याय डाक्टर हरप्रसाद शास्त्रिभिः सुष्ठु श्लाघितम्। ई० 1930-1947 वर्षेषु एतद् व्यवसायगृहस्य भूयान्प्रचारो जातः। अस्यैका शाखा बिहारप्रान्ते पटनानगरे संस्थापिता। तत्रायमाशैशवात्परिपालितमेकं बान्धवं प्रबन्धकार्ये नियुक्तवान्। बहुप्रसृतस्य व्यवसायस्योद्वहनाय स्वभ्रातृतनयं शान्तिलालमहाभागं नियुज्य निरीक्षणकार्यं कुर्वाणः समाजोन्नयनकार्ये सविशेषमात्मानं व्यापारितवान्

अथ ईशवीये 1947 तमे वर्षे विधिवशाद् जाते देशभङ्गे, प्रवृत्ते भीषणे चोपप्लवे, दग्धे मुद्रणालये, वह्निसात्कृते च व्यवसायालये यथाकथञ्चिदात्मानं परिरक्षन् सपरिवारो वाराणसीमुपेतः तत्रैकं व्यवसायालयं मुद्रणालयं च संस्थाप्य प्रकाशनकार्यं समारब्धवान्। अत्र निरन्तरेणौजसा, परया भक्त्या, अनुपमेनावधानेन रात्रिन्दिवं कार्यपरायणो व्यवसायालयं पुनरपि स्वं गौरवमलम्भयत्।

ततश्च ईशवीये 1957 तमे वर्षे मुख्यो व्यवसायकार्यालयोऽनेन महाभागेन दिल्लीनगर्यां संस्थापितः। तत्राखिलभारतीयप्राच्यविद्यागोष्ठीसम्मेलने सभापतिपदमलङ्कुर्वाणाः श्रीमन्तो डा०एस०एल० अल्तेकर महोदया दिल्लीविश्वविद्यालयक्षेत्रे बंगलोमार्गेऽस्य संस्थानस्य नवनिर्मितं सुन्दरं बहुभूमिकं व्यवसायालयम् उद्घाटितवन्तः। तत आरभ्य अद्यावधि व्यतीतेषु विंशेषु वर्षेषु महाभागेनानेन महता श्रमेणात्मा व्यापारितः। नगर्या उपकण्ठं नारायणाख्ये चौद्योगिकक्षेत्रे महान् मुद्रणालयः संस्थापितो यत्र प्राच्यविद्याग्रन्थाः प्रकाश्यन्ते। अत्र "सेक्रेड बुक्स् आफ् दि ईस्ट, लिंग्विस्टिक सर्वे आफ् इंडिया," "एन्शियन्ट इण्डियन ट्रेडिशन एण्ड माइथोलाजी" प्रभृतयो ग्रन्थमालाः प्रका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिताः । अस्मिन् महति कार्येऽद्यत्वेऽस्य व्यवसायगृहस्याधिष्ठातृणां श्रीमतां शान्तिलालमहाभागानां, सोत्साहानां कुशलानामेषामात्मजानाञ्च भूयान् योग आसीत् । साम्प्रतं ते कुलक्रमागतं प्रकाशनकार्यं परमया निष्ठयाऽनुभूतियुतया धियाऽनुतिष्ठन्ति ।

समाजोन्नयनाय विद्याप्रसाराय प्राच्यसंस्कृतिप्रचाराय चास्य महान्त्याश्चर्याणि श्रूयन्ते । सामाजिकसंस्थानेभ्यो धार्मिकसंस्थाभ्यश्चानेन भूरि द्रव्यं वितीर्णम् । अर्थानामर्जने, अर्जितानाञ्च सम्यग् वितरणेऽनेन स्वं कौशलं प्रदर्शितम् । औचित्यमवगम्यैवार्थिनामिष्टपूर्तिर्विहिताऽनेन । वृत्तिभाजोऽनेके छात्राः साम्प्रतमुच्चपदासीना अस्य गौरवगाथा गायन्ति । श्री आत्मानन्दजैनसभायाः सदस्यत्वेन, दिल्ली-श्रीसङ्घस्य प्रमुखनेतृत्वेन, श्री आत्मानन्द जैन विद्यालयस्याद्यसंस्थापकत्वेन, 'हस्तिनापुरतीर्थकमेटी हस्तिनापुर', 'श्री आनन्दजी कल्याणजी बोर्ड अहमदाबाद,' 'श्वेताम्बर जैन तीर्थसभा वाराणसी' 2500 महावीरनिर्वाणोत्सवसभा दिल्ली, प्रभृतीनां सदसां सदस्यत्वेन च चिरस्मरणीयमस्य नाम जातम् ।

जैनधर्मेऽस्य कुलक्रमागता प्रगाढा निष्ठा । अयं हि तत्रभवतामाचार्यप्रवराणां श्री 1008 विजयवल्लभसूरीणां परमभक्तः, एवमेव निखिलस्य विद्वद्वर्गस्यापि । साधुप्रकृतिरयं प्रकाशनसंस्थानकार्येषु नितरां सक्तोऽप्यसक्त इवासीत् । ऋषीणां मुनीनां सम्पर्कमासाद्यास्य बहुगामिनी धीर्नानास्रोतोभ्यो ज्ञानमर्जितवती । व्यवसायव्यापृतोऽपि समयविभागेन प्रातःसायमात्मचिन्तनपरोऽभूत् । अपूर्व एव कश्चित्प्रभावोऽस्य संविधेऽन्वभूयत जनेन । एतद्गोष्ठ्या प्रभाविता जना अस्य दाक्षिण्यं सौजन्यमौदार्यं गाम्भीर्यमभ्यन्यन्ततराम् ।

अस्य निधनेन न केवलं जैनसमाजस्य बहुमूल्यं रत्नं विलुप्तम्, अपितु मानववर्गस्यादर्शमानवो विनष्टः । एतादृशा जनाः कालत्रितयेऽपि विरला एव जायन्ते । धर्मनिष्ठः समाजोत्कर्षाभिलाषी जनप्रियः सत्यवक्ता भारतीयसाहित्यस्य प्रकाशने प्रचारे च सततं कृतप्रयासोऽयं महानुभावो जैनसमाजे व्यावसायिकक्षेत्रे बुद्धिवादिक्षेत्रे च चिरस्मरणीयः स्थास्यति ।

शासनदेवश्चास्य मायामोहानुपहितं चैतन्यं शाश्वतशान्ति नयेदिति प्रार्थयामहे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

LALA SUNDARLAL JAIN

Lala Sundarlal Jain, a solid and strong pillar to the house of Messrs Motilal Banarsidass, Delhi, Varanasi, Patna, passed away on 23-1-78 at his residence 41 U.A. Bungalow Road, Delhi.

Calm and serene, assiduous and alert, interprising and vigilant, this grand old man of Indological publishers was the most beloved of all. His sudden and unexpected demise is an irreparable loss to the family, the international community of scholars and publishers associated with him.

He was born on 15-2-1900 in the Oswal Jain family of Lahore, the capital of undivided punjab where all facets of religious movements flourished, reviving the ancient glory of India and giving a fillip to traditional and modern learning of Sanskrit and Indic studies. His ancestor, Lala Buta Shah Jauhari, was the court-jeweller of Maharaja Ranjit Singh of Punjab. Even in the crucial days of political turmoil, following the fall of Sikh rule, the family maintained its social status. It is recorded that Lala Buta Shah was nominated a municipal commissioner by the British regime.

The hereditary profession of the family continued for generations till Lala Motilal Jauhari diverted his mind to book trade and opened a book shop at Lahore in 1903. He set up his son Banarsidass at the shop and himself continued the profession of jewellery.

After the passing away of Lala Banarsidass at young age, the boy Sundarlal, the younger brother of Banarsidass, was called from school and initiated to the trade. He took charge of business at the age of fifteen and worked under the direction of his father who also desolated him in 1930. The sole survivor of seven brothers, given to devotion and saintly life he shouldered the management of the firm for his loving nephew Shantilal Jain, son of his elder brother Lala Banarsidass. What was undertaken as a duty became a hobby with him and then a national mission. In the publication of books he received guidance from the great Indological scholar Pandit Bhagavaddatta whose direction he always acknowledged with gratitude.

By the grace of god and under the guidance of scholars he started the Punjab Oriental Series, published works of distinguished scholars like Drs. Majumdar, Jayaswal, Law, Sarup, Caland, Jolly, Thomas and others. His missionary zeal, singular devotion to work and policy of integrity in business played a conspicuous role in creating good will for the firm. By dint of hard labour infused with faith and devotion he earned reputation in the field of Indological Publications. In all his activities he received complete cooperation from his nephew Shantilal Jain, the present head of the family and the senior partner of the firm Messrs Motilal Banarsidass.

During 1915-1928 the publishing house made rapid strides. The printing press of the firm had also developed by this time. Eminent scholars in India and abroad began to admire its services and extended cooperation by recommending its valuable publications to their institutions for purchase. The services were recognized by no less authority than Mahāmahopādhyāya Dr. Har Prasad Shastri in his presidential address at the All India Oriental Conference, held at Lahore in 1928.

From 1930 to 1941 was the period of intense activity. While he entrusted the task of administration to his nephew Shantilal Jain, he applied himself to bringing social reforms in Jain commu-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

nity which he did through practice rather than precept. He opened a branch of the firm at Patna and appointed as a manager, a near relative whom he had nurtured from childhood.

Then came a crash with the partition of the country. The firm suffered complete destruction at the hands of fanatics who set fire to the entire stock of books and the printing press. In 1947, the family, homeless and hearthless, migrated to Varanasi where they opened a book house and set up a printing press. Here he worked with unabated vigour and unswerving devotion and restored the firm to its former glory and excellence.

In 1957 he established permanent head office at Delhi when on the occasion of All India Oriental Conference Dr. A. S. Altekar opened the firm's splendid mansion at the Bungalow Road. Since then, during the twenty years from 1958 to 1978 he had been very active. He set up a big printing press in the suburbs of Delhi and published over 1200 books including the Sacred Books of the East, Linguistic Survey of India, Ancient Indian Tradition and Mythology Series. In this he was assisted by his co-partners Lala Shantilal Jain and his sons who worked shoulder to shoulder with him and are discharging responsibility with the spirit of devotion and zeal.

A versatile genius and a humane man he devoted his life for the betterment of society, diffusion of knowledge, propagation of ancient culture. Large-hearted and liberal-minded he gave large sums of money to social and religious institutions. To the needy and deserving individuals his purse was always open. He contributed splendidly to the progress of S. A. Jain College and as a founder member played a crucial role in bringing it to the present form and position. He was attached to several societies which received the benefit of his sound advice and wholesome direction. He was a member of Shri Atmanand Jain Mahasabha, Panjab, S. A. Jain College Committee, Ambala, Hastinapur Jain Tirth Committee, Hastinapur, Seth Anand Ji Kalyana Ji Board, Ahmedabad, Shri Atmanand Jain Sabha, Roop Nagar, Delhi, Svetambara Jain Tirth Society, Varanasi, 2500 years Mahavir Nirvana Celebration Committee, Delhi, and a founder Trustee of Atma Vallabha Jain Smaraka Trust.

An ardent believer in the preachings of Acarya Shri Vijaya Vallabha Suri, he developed a multi-dimensional personality by his constant association with seers and saints preaching different religions and advocating various ways of Sâdhanâ. He could read 'sermons in stones, books in running brooks' and receive knowledge from whatever source it came. He was a man of pragmatic nature, religious and benevolent in words and deeds. His quest of truth was inward. He devoted most of his precious time, snatched from business tangles, to meditation for Self-realization. There was a kind of halo around him and anyone who came to see him could not have left his presence without a very real sense of having been in touch with a very special mind and a most superior person.

His sweet memory will long be cherished by us all. May his soul rest in peace.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीगौतमस्वामिकेवलज्ञानकल्याणकदिनम् ॥

समर्पणम्

प्रातःस्मरणीयानां परमोपकारिणां परमपूज्यानां गृहावस्थायां पितृचरणानां सम्प्रति श्रमणावस्थायां श्रीसद्गुरुदेवानां मुनिराज श्रीभुवनविजयजीमहाराजानां, तथा परमोपकारिण्याः परमवत्सलायाः परमपूज्यायाः पूर्वावस्थायां जनन्याः सम्प्रति श्रमण्याः साध्वीजी श्री मनोहरश्रिय इत्येवम् अनन्तोपकारिणोर्माता-पित्रोः पवित्रकरकमलयोरेतद् ग्रन्थरत्नं समर्प्याऽद्य परममानन्दं कृतार्थतां चानुभवामि ।

—तत्रभवतां शिशुः जम्बूविजयः

विक्रम संवत् २०३४ कार्त्तिकशुक्लप्रतिपद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थानुक्रमः

	पृष्ठ
प्रस्तावना-परिशिष्टोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च	14-15
प्रस्तावना	17-42
आचाराङ्गसूत्रस्य विषयानुक्रमः	1-16
श्रीआचाराङ्गसूत्रं निर्युक्ति-टीकासमेतम्	1-288
प्रथमः श्रुतस्कन्धः (नवाध्ययनात्मकः)	1-212
द्वितीयः श्रुतस्कन्धः (षोडशाध्ययनानि)	212-288
सूत्रकृताङ्गस्य विषयानुक्रमः	1-14
श्रीसूत्रकृताङ्गसूत्रं निर्युक्ति-टीकासमेतम्	1-285
प्रथमः श्रुतस्कन्धः (षोडशाध्ययनात्मकः)	1-178
द्वितीयः श्रुतस्कन्धः (सप्ताध्ययनात्मकः)	178-285
आचाराङ्गसूत्रस्य निर्युक्ति-टीकासमेतस्य परिशिष्टानि	287-341
वृद्धिपत्रकम्	289-305
शुद्धिपत्रकम्	305-320
अङ्कशुद्धिपत्रकम्	320
टीकायामुद्धृताः पाठाः	321-326
आचाराङ्गसूत्राणां गद्यरूपाणामकारादिक्रमः	327-332
आचाराङ्गसूत्रान्तर्गतानां गाथानामकारादिक्रमः	333-335
आचाराङ्गनिर्युक्तीनामकारादिक्रमः	336-341
सूत्रकृताङ्गस्य निर्युक्ति-टीकासमेतस्य परिशिष्टानि	343-400
वृद्धिपत्रकम्	345-357
शुद्धिपत्रकम्	358-378
टीकायामुद्धृताः पाठाः	379-385
सूत्रकृताङ्गसूत्राणां गद्यरूपाणामकारादिक्रमः	386-387
सूत्रकृताङ्गगाथानामकारादिक्रमः	388-397
सूत्रकृताङ्गनिर्युक्तीनामकारादिक्रमः	398-400

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रस्तावना-परिशिष्टोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च

ग्रन्थाः	प्रकाशकादि
अनुयोगद्वारसूत्रम्	आगमोदयसमितिः
अनुयोगद्वारवृत्तिः [मलधारिहेमचन्द्रसूरिविरचिता]	,,
आचाराङ्गसूत्रम्	श्रीमहावीर जैन विद्यालयः, बम्बई, ईसवीय सन् १९७७
आचाराङ्गचूर्णिः	श्रीऋषभदेवजी केशरीमलजी, रतलाम
आचाराङ्गनिर्युक्तिः	अत्र मुद्रिता
आचाराङ्गवृत्तिः [शीलाचार्यविरचिता]	अत्र मुद्रिता
आवश्यकचूर्णिः	श्रीऋषभदेवजी केशरीमलजी, रतलाम
उपनिषदः	मोतीलाल बनारसीदास, दिल्ली
जयधवला (वीरसेनाचार्यविरचिता कसायपाहुडटीका)	भा० दिगम्बरजैनसंघ ग्रन्थमाला, मथुरा
जैन आगमधर और प्राकृत वाङ्मय	मुनि श्री हजारीमल स्मृतिग्रन्थ, ब्यावर
तत्त्वार्थसूत्रम्	
तत्त्वार्थभाष्यम्	श्री ऋषभदेवजी केशरीमलजी, रतलाम
तत्त्वार्थसूत्रस्य व्याख्या सर्वार्थसिद्धिः	भारतीय ज्ञानपीठ, काशी
तत्त्वार्थसूत्रस्य व्याख्या राजवार्त्तिकम्	भारतीय ज्ञानपीठ, काशी
त्रिषष्टिशलाकापुरुषचरित्रम् (दशमं पर्व)	गंगाबाई जैन चेरिटेबल ट्रस्ट, मुंबई-५६
दशवैकालिकचूर्णिः (अगस्त्यसिंहविरचिता)	प्राकृतटेक्स्ट सोसायटी
धवला (षट्खण्डागमटीका वीरसेनाचार्यविरचिता)	जैन संस्कृति संरक्षक संघ, शोलापुर
नन्दीसूत्रम्	प्राकृतटेक्स्ट सोसायटी
नन्दीसूत्रचूर्णिः	प्राकृतटेक्स्ट सोसायटी
नन्दीसूत्रस्य हारिभद्री वृत्तिः	प्राकृतटेक्स्ट सोसायटी
नन्दीवृत्तिटिप्पनकम्	प्राकृतटेक्स्ट सोसायटी
परिशिष्टपर्व	जैनधर्म प्रसारकसभा, भावनगर
पालित्रिपिटिकान्तर्गता ग्रन्थाः	नवनालन्दामहाविहार, नालन्दा, बिहार
थेरगाथा	
दीघनिकाय	
बुद्धवंस	
मज्झिमनिकाय	
सुत्तपिटक	
सुत्तनिपात	
सुत्तनिपात-अट्ठकथा	
संयुत्तनिकाय	
प्रतिक्रमणग्रन्थत्रयी	जिनसेन भट्टारक, पट्टाचार्य महास्वामी-संस्थान मठ, कोल्हापुर
प्रमाणवार्त्तिकम्	बौद्धभारती, वाराणसी
प्रशमरतिः	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रस्तावना-परिशिष्टोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च

बृहत्कल्पसूत्रम्	जैन आत्मानन्दसभा, भावनगर
मूलाराधनाटीका विजयोदया अपराजितसूरिविरचिता,	स्वामी देवेन्द्रकीर्ति दिगम्बर जैनग्रन्थमाला, कारंजा, ईसवीय सन् १९३५
श्रावकभूमिः	काशीप्रसाद जायस्वाल रिसर्च इन्स्टीट्यूट, पटना, बिहार
समवायाङ्गसूत्रम्	आगमोदयसमितिः
समवायाङ्गवृत्तिः [अभयदेवसूरिविरचिता]	,,
सांख्यकारिका	
सूत्रकृताङ्गसूत्रम्	श्री महावीरजैन विद्यालयः, बम्बई, सन् १९७८।
सूत्रकृताङ्गचूर्णिः (प्रथमश्रुतस्कन्धः)	प्राकृतटेक्स्ट सोसायटी
सूत्रकृताङ्गचूर्णिः (द्वितीयश्रुतस्कन्धः)	श्री ऋषभदेवजी केशरीमलजी, रतलाम
सूत्रकृताङ्गनिर्युक्तिः	अत्र मुद्रिता
सूत्रकृताङ्गवृत्तिः [शीलाचार्यविरचिता]	अत्र मुद्रिता
स्त्रीमुक्तिकेवलिभुक्तिप्रकरणे	जैन आत्मानन्दसभा, भावनगर
स्थानाङ्गसूत्रम्	आगमोदयसमितिः

टि०=टिप्पणम्। नि०=निर्वाणसम्वत्। पृ०=पृष्ठम्। पं०=पंक्तिः। प्र०=प्रत्यन्तरे (हस्तलिखितादर्शान्तरे)। भा०=भागः। सू०=सूत्रम्

P=Page, L=Line

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीशङ्खेश्वरपार्श्वनाथाय नमः ।
श्रीअजितनाथस्वामिने नमः ।
आचार्यमहाराजश्रीमद्विजयसिद्धिसूरीश्वरजीपादपद्मेभ्यो नमः ।
आचार्यमहाराजश्रीमद्विजयमेघसूरीश्वरजीपादपद्मेभ्यो नमः ।
सद्गुरुदेवमुनिराजश्रीभुवनविजयजीपादपद्मेभ्यो नमः ।

प्रस्तावना

परमकृपालोः परमात्मनः सद्गुरुदेवानां च कृपया **भद्रबाहुस्वामि**विरचित**निर्युक्ति-शीलाचार्य**विरचितवृत्तिसहितं श्री **आचाराङ्गसूत्रं** श्री **सूत्रकृताङ्गसूत्रं** चेति **आगम**शास्त्रद्वयं विदुषां पुरत उपन्यस्यते ।

केवलज्ञानप्रादुर्भावानन्तरं चतुर्विंशतितमजैनतीर्थकरेण श्रमणेन भगवता **महावीरस्वामिना** (श्रीवर्धमानस्वामिना) अपापापुर्यां **महासेन**वने प्रारब्धां धर्मदेशनामनुसृत्य भगवच्छिष्यैः श्री **इन्द्रभूतिगौतमादि**भिर्गणधरैरर्धमागध्यां प्राकृतभाषायां द्वादश अङ्गसूत्राणि प्रणीतानि, तद्यथा—

प्राकृते नाम	संस्कृते नाम	प्राकृते नाम	संस्कृते नाम
१. **आयारो**[1]	आचारः	७. **उवासगदसाओ**	उपासकदशाः
२. **सूयगडो**	सूत्रकृतम्	८. **अंतगडदसाओ**	अन्तकृद्दशाः
३. **ठाणं**	स्थानम्	९. **अणुत्तरोववाइयदसाओ**	अनुत्तरौपपातिकदशाः
४. **समवाओ**	समवायः	१०. **पण्हावागरणाइं**[5]	प्रश्नव्याकरणम्
५. **वियाहपण्णत्ती**[2]	व्याख्याप्रज्ञप्तिः	११. **विवागसुयं**[6]	विपाकश्रुतम्[7]
६. **णायाधम्मकहाओ**[3]	ज्ञातधर्मकथाः[4]	१२. **दिट्ठिवाओ**	दृष्टिवादः[8]

इयं च द्वादशाङ्गी 'द्वादशाङ्गं गणिपिटकम्' इत्यपि शास्त्रेषु[9] गीयते । श्रुतपुरुषस्य अङ्गस्थानीयत्वादमीषाम् **आचार-सूत्रकृत-**

१. नन्दीसूत्रानुसारेणेमानि नामानि ॥
२. भगवईसुत्त (भगवतीसूत्र) नाम्नाप्यस्य प्रसिद्धिः ॥
३. दिगम्बरग्रन्थेषु जयधवला [पृ० ११४] दिषु 'णाहधम्मकहा' इत्यपि उल्लेखः ॥
४. तत्त्वार्थभाष्ये [१।२०] इदं नाम । अन्यत्र नन्दी [हारिभद्री] वृत्त्यादौ ज्ञाताधर्मकथाः इत्यपि उल्लेखः । तत्त्वार्थसूत्र [१।१२०]-व्याख्यासर्वार्थसिद्ध्यादौ ज्ञातृधर्मकथा इत्यपि नाम ॥
५. 'पण्हवायरणं' इति जयधवलादौ [पृ० ११९] ॥
६. 'विवागसुत्तं' इति जयधवलादौ [पृ० ११९] ॥
७. 'विपाकसूत्रम्' इति तत्त्वार्थभाष्यादौ १।२० ॥
८. 'दृष्टिपातः' इति तत्त्वार्थभाष्ये १।२० ॥

इदं दृष्टिवादाख्यं द्वादशमङ्गसूत्रं चिराद् व्यवच्छिन्नम् । किन्तु यदा तदासीत् तदा महासमुद्रवदतिविशालमासीत् । अस्मिन् १ परिकर्म, २ सूत्राणि, ३ पूर्वगतम्, ४ चूलिका, ५ प्रथमानुयोग इति विभागा आसन्, तेषु पूर्वगते **उत्पादपूर्वा**दीनि उत्तरोत्तरम् अतिमहान्ति चतुर्दश पूर्वाणि आसन् ॥

९. नन्दीसूत्रादिषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानादीनां द्वादशानामागमग्रन्थानाम् 'अङ्ग' सूत्रत्वेन[1] व्यवहारः प्रवर्तते, यथा—१. आचाराङ्गसूत्रम्, २. सूत्रकृताङ्गसूत्रम्, ३. स्थानाङ्ग-सूत्रमित्यादि ।

एतद् द्वादशाङ्गीश्रुतम् 'अङ्गप्रविष्टम्'[2] उच्यते, यत्तु प्राय एतदुपजीव्य तत्कालीनैः पश्चात्कालीनैश्च स्थविरैर्यानि सूत्राणि विरचितानि तद् 'अङ्गबाह्यम्' श्रुतमुच्यते । श्वेताम्बरमूर्तिपूजकजैनपरम्परायां[3] सम्प्रति अधस्ताद् निर्दिष्टा ग्रन्था अङ्गबाह्येषु आगमग्रन्थेषु परिगण्यन्ते—

---

१. "पायदुगं २ जंघो २ रू २ गातदुगद्धं (गातद्दुयगं—हरिभद्रसूरिरचितवृत्तौ पाठः) २ तु दो य बाहुयो २ । गीवा १ सिरं च १ पुरिसो बारसअंगो सुयविसिट्ठो ॥ १ ॥" इति नन्दीसूत्रस्य चूर्णौ । "इह पुरुषस्य द्वादश अंगानि भवन्ति, तद्यथा—द्वौ पादौ, द्वे जङ्घे, द्वे उरुणी, द्वे गात्रार्धे, द्वौ बाहू, ग्रीवा, शिरश्च । एवं श्रुतरूपस्यापि परमपुरुषस्य आचारादीनि द्वादश अङ्गेन क्रमेण वेदितव्यानि ।..... श्रुतपुरुषस्य अङ्गेषु प्रविष्टम् अङ्गभावेन व्यवस्थितमित्यर्थः । यत् पुनरेतस्यैव द्वादशाङ्गात्मकस्य श्रुतपुरुषस्य व्यतिरेकेण स्थितम् अङ्गबाह्यत्वेन व्यवस्थितं तदनङ्गप्रविष्टम्" इति मलयगिरिसूरिविरचितायां वृत्तौ ।

२. "गणधर-थेरकतं वा आतेसा मुक्कवागरणतो वा ।
ध्रुव-चलविसेसतो वा अंगाणंगेसु णाणत्तं ॥ ५४७ ॥
गणधर० गाहा । गणधरकृतमङ्गप्रविष्टमाचारादि अर्थादेशनियतं च, स्थविरकृतमङ्गबाह्यम् उत्सृष्ट-व्याकरणमात्रोपसंहृतं वा । अथवा सर्वतीर्थेषु नियतमङ्गप्रविष्टम्, अनियतमितरत् ।"—विशेषावश्यकभाष्यस्वोपज्ञवृत्ति पृ० ११५ ।
गणधरकतमंगगतं जं कतं थेरेहिं बाहिरं तं च ।
णियतं वंगपविट्ठं अणियतसुतं बाहिरं भणितं ॥—नंदीचूर्णि पृ० ५७ ।

"अथ श्रुतज्ञानस्य द्विविधमनेक-द्वादशविधमिति किंकृतः प्रतिविशेष इति ? अत्रोच्यते—वक्तृविशेषाद् द्वैविध्यम् । यद् भगवद्भिः सर्वज्ञैः सर्वदर्शिभिः परमर्षिभिरर्हद्भिः तत्स्वाभाव्यात् परमशुभस्य च प्रवचनप्रतिष्ठापनफलस्य तीर्थकरनामकर्मणोऽनुभावादुक्तं भगवच्छिष्यैरतिशयवद्भिरुक्तमातिशयवाग्बुद्धिसम्पन्नैर्गणधरैर्दृब्धं तदङ्गप्रविष्टम्, गणधरानन्तर्यादिभिस्त्वत्यन्तविशुद्धागमैः परमप्रकृष्ट वाङ्मतिशक्तिभिराचार्यैः काल-संहनना-ऽऽयुर्दोषादल्पशक्तीनां शिष्याणामनुग्रहाय यत् प्रोक्तं तदङ्गबाह्यमिति"—तत्त्वार्थभाष्य १।२०। "किंकृतोऽयं विशेषः ? वक्तृविशेषकृतः । सर्वज्ञस्तीर्थंकर इतरो वा, श्रुतकेवली, आरातीयश्चेति । तत्र सर्वज्ञेन परमर्षिणा परमाचिन्त्य-केवलज्ञानविभूतिविशेषेण अर्थतः आगम उद्दिष्टः, तस्य प्रत्यक्षदर्शित्वात् प्रक्षीणदोषत्वाच्च प्रामाण्यम् । तस्य साक्षाच्छिष्यैर्बुद्ध्यतिशयर्द्धि-युक्तैर्गणधरैः श्रुतकेवलिभिरनुस्मृतग्रन्थरचनमङ्गपूर्वलक्षणम् । तत् प्रमाणम्, तत्प्रामाण्यात् । आरातीयैः पुनराचार्यैः कालदोषात् संक्षिप्तायुर्मतिबलशिष्यानुग्रहार्थं दशवैकालिकाद्युपनिबद्धम् । तत् प्रमाणमर्थतस्तदेवेदमिति क्षीरार्णवजलं घटगृहीतमिव"—तत्त्वार्थसूत्रस्य व्याख्या सर्वार्थसिद्धिः १।२०।।

३. "महावीरोऽर्थकर्ता । तेण महावीरेण केवलणाणिणा कहिदत्थो ..... बम्हणेण गोदमगोत्तेण ..... इंदभूदिणा-वहारिदो । .....पुणो तेणिंदभूदिणा बारहंगाणं चोद्दसपुव्वाणं च गंथाणमेक्केण चेव मुहुत्तेण कमेण रयणा कदा । ..... तेण वि गोदमेण दुविहमवि सुदणाणं लोहज्जस्स संचारिदं । तेण वि जंबूसामिस्स संचारिदं ...गोदमथेरो लोहज्जाइरियो जंबूसामी य एदे तिण्णि वि सत्तविहलद्धिसंपण्णा सयलसुयसायरपारया होऊण केवलणाणमुप्पाइय णिव्वुइं पत्ता । तदो विण्हू णंदिमित्तो अवराइदो गोवद्धणो भद्दबाहू त्ति एदे पुरिसोलीकमेण पंच वि चोद्दसपुव्वहरा । तदो विसाहाइरियो पोट्ठिलो खत्तियो जयाइरियो णागाइरियो सिद्धत्थथेरो धिदिसेणो विजयाइरियो बुद्धिल्लो गंगदेवो धम्मसेणो त्ति एदे पुरिसोलीकमेण एक्कारसवि आइरिया एक्कारसण्हमंगाणं उप्पायपुव्वादिदसण्हं पुव्वाणं च पारया जादा । सेसो वरिमचदुण्हं पुव्वाणमेगदेसधरा य तदो णक्खत्ताइरियो जयपालो पांडुसामी धुवसेणो कंसाइरियो त्ति एदे पुरिसोलीकमेण पंच वि आइरिया एक्कारसंगधारया जादा चोद्दसण्हं पुव्वाणमेगदेसधरा य । तदो सुभद्दो जसभद्दो जसबाहू लोहज्जो त्ति एदे चत्तारि वि आइरिया आयारंगधरा सेसंगपुव्वाणमेगदेसधरा य । तदो सव्वेसिमंगपुव्वाणमेगदेसो आइरियपरंपराए आगच्छमाणो धरसेणाइरियं संपत्तो"—धवला पृ० ६५-६८ । "तेण महावीर भडारएण इंदभूदिस्स ..... अत्थो कहिओ । तदो तेण गोअमगोत्तेण इंदभूदिणा अंतोमुहुत्तेणावहारियदुवालसंगत्थेण तेणेव कालेण कयदुवालसंगगंथरयणेण गुणेहि सगसमाणस्स सुहम्माइरियस्स गंथो वक्खाणिदो । तदो केत्तिएण वि कालेण केवलणाण-मुप्पाइय बारस १२ वासाणि केवलविहारेण विहरिय इंदभूदिभडारओ णिव्वुइं संपत्तो । तद्दिवसे चेव सुहम्माइरियो जंबूसामियादीणमणेयाण-माइरियाणं वक्खाणिददुवालसंगो घाइचउक्कखएण केवली जादो । तदो सुहम्मभडारओ वि बारह १२ वस्साणि केवलविहारेण विहरिय णिव्वुइं पत्तो । तद्दिवसे चेव जंबूसामिभडारओ विण्हुआइरिआदीणमणेयाणं वक्खाणिददुवालसंगो केवली जादो । सो वि अट्ठत्तीस ३८ वासाणि केवलविहारेण विहरिदूण णिव्वुइं गदो । एसो एत्थोसप्पिणीए अंतिमकेवली । एदम्हि णिव्वुइं गदे विण्हुआइरिओ सयलसिद्धंतिओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादश उपाङ्गानि—

१. **ओवाइयं**	औपपातिकम्	७. **चंदपण्णत्ती**	चन्द्रप्रज्ञप्तिः
२. **रायपसेणियं**	राजप्रश्नीयम्	८. **निरयावलिया**	निरयावलिका
३. **जीवाभिगमो**	जीवाभिगमः	९. **कप्पवडिंसिया**	कल्पावतंसिका
४. **पण्णवणा**	प्रज्ञापना	१०. **पुप्फिया**	पुष्पिता
५. **सूरपण्णत्ती**	सूर्यप्रज्ञप्तिः	११. **पुप्फचूलिया**	पुष्पचूला
६. **जंबुद्दीवपण्णत्ती**	जम्बूद्वीपप्रज्ञप्तिः	१२. **वण्हिदसा**	वृष्णिदशा

दश प्रकीर्णकाः (पइण्णगा)

१. **चउसरणं**	चतुःशरणम्	६. **संथारगो**	संस्तारकः
२. **आउरपच्चक्खाणं**	आतुरप्रत्याख्यानम्	७. **गच्छाचारो**	गच्छाचारः
३. **महापच्चक्खाणं**	महाप्रत्याख्यानम्	८. **गणिविज्जा**	गणिविद्या
४. **भत्तपरिण्णा**	भक्तपरिज्ञा	९. **देविंदथवो**	देवेन्द्रस्तवः
५. **तंदुलवेयालियं**	तन्दुलवैचारिकम्	१०. **मरणसमाही**	मरणसमाधिः

'चंदावेज्झय' प्रकीर्णकमपि केचित् परिगणयन्ति ।

षट् छेदसूत्राणि—

१. **दसाओ**	दशाश्रुतस्कन्धः	४. **निसीहं**	निशीथम्
२. **कप्पो**	कल्पः	५. **महानिसीहं**	महानिशीथम्
३. **ववहारो**	व्यवहारः	६. **जीयकप्पो**	जीतकल्पः

द्वे चूलिकासूत्रे—

१. **नन्दी**	नन्दिः	२. **अणुओगदाराइं**	अनुयोगद्वाराणि

चत्वारि मूलसूत्राणि—

१. **उत्तरज्झयणाइं**	उत्तराध्ययनानि	३. **आवस्सयं**	आवश्यकम्
२. **दसवेयालियं**	दशवैकालिकम्	४. **ओघणिज्जुत्ती**	ओघनिर्युक्तिः

छवसमियचउकसायो णंदिमित्ताइरियस्स समप्पियदुवालसंगो देवलोअं गदो । पुणो एदेण कमेण अवराइयो गोवद्धणो भद्दबाहु त्ति एदे पंच पुरिसोलीए सयलसिद्धंतिया जाया । एदेसिं पंचण्हं पि सुदकेवलीणं कालो वस्सपदं १०० । तदो भद्दबाहुभयवंते सग्गं गदे सयलसुदणाणस्स वोच्छेदो जादो । णवरि विसाहाइरियो तक्काले आयारादीणमेक्कारसण्हमंगाणमुप्पायपुव्वाईणं दसण्हं पुव्वाणं च पच्चक्खाण—पाणावाय—किरियाविसाललोगबिंदुसारपुव्वाणमेगदेसाणं च धारओ जादो । पुणो अत्तुट्टसंताणेण पोट्ठिल्लो खत्तिओ जयसेणो नागसेणो सिद्धत्थो धिदिसेणो विजयो बुद्धिल्लो गंगदेवो धम्मसेणो त्ति एदे एक्कारस जणा दसपुव्वहरा जादा । तेसिं कालो तेसीदिसदवस्साणि १८३ । धम्मसेणे भयवंते सग्गं गदे बारहवस्से दसण्हं पुव्वाणं वोच्छेदो जादो । णवरि णक्खन्ताइरियो जसपालो पांडू ध्रुवसेणो कंसाइरियो चेदि एदे पंच जणा जहाकमेण एक्कारसंगधारिणो चोद्दसण्हं पुव्वाणमेगदेसधारिणो च जादा । एदेसिं कालो वीसुत्तरविसदवासमेत्तो २२० । पुणो एक्कारसंगधारए कंसाइरिए सग्गं गदे एत्थ भरहखेत्ते णत्थि कोइ वि एक्कारसंगधारओ । णवरि तक्काले पुरिसोलीकमेण सुहद्दो जसभद्दो जहबाहू लोहज्जो चेदि एदे चत्तारि वि आयारंगधरा सेसंगपुव्वाणमेगदेसधरा य जादा । एदेसिमायारंगधारीणं कालो अट्ठारसुत्तरं वाससदं ११८ । पुणो लोहाइरिए सग्गं गदे आयारंगस्स वोच्छेदो जादो । एदेसिं सव्वेसिं कालाणं समासो छस्सदवासाणि तेसीदिवासेहि समहियाणि ६८३ । वड्ढमाणजिणिंदे णिव्वाणं गदे पुणो एत्तिएसु सेसेसु अइक्कंतेसु एदम्हि भरहखेत्ते सव्वे आइरिया सव्वेसिमंगपुव्वाणमेगदेसधारया जादा । तदो अंगपुव्वाणमेगदेसो चेव आइरियपरंपराए आगंतूण गुणहराइरियं संपत्तो ।"—**जयधवला** पृ० ७५-७९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशमङ्गं दृष्टिवादः सम्प्रति नास्ति, अतः ११ अङ्गानि+१२ उपाङ्गानि+१० प्रकीर्णकाः+६ छेदसूत्राणि+द्वे चूलिकासूत्रे+४ मूलसूत्राणि—इत्येवं ४५ आगमाः श्वेताम्बरमूर्तिपूजकजैनपरंपरायां सम्प्रति प्रसिद्धाः। तेषु आद्यमङ्गसूत्रद्वयमस्मिन् ग्रन्थे प्रकाश्यते।

भाषा—यद्यपि सर्वेऽपीमे ४५ आगमग्रन्था अर्धमागध्यां भाषायां गणधरभगवद्भिर्विरचितास्तथापि कालक्रमेण केचिद् भाषायाः संस्कारास्तेषु सञ्जाताः। किन्तु आचाराङ्ग-सूत्रकृताङ्गयोरुपलभ्यमाना भाषा अतिप्राचीनेति ऐतिह्यविदो वदन्ति। अनयोः किञ्चित् स्वरूपमत्र क्रमेण प्रस्तूयते—

आचाराङ्गसूत्रम्

द्वादशाङ्ग्यां प्रथममाचाराङ्गसूत्रं जैनानां किल वेदः। अस्य प्राथम्यं[1] प्राधान्यं च जिनप्रवचनसारभूतत्वादिना हेतुकलापेन आचाराङ्गनिर्युक्तौ [गाथाः ८-११] भगवता भद्रबाहुस्वामिना परमेण बहुमानेन वर्णितम्, दृश्यतां पृ. ४।

विभागाः—आचाराङ्गसूत्रस्य द्वौ मुख्यविभागौ, एतौ च 'श्रुतस्कन्धौ' इति व्यपदिश्येते। तत्र प्रथम **आचाराग्र्यः** श्रुतस्कन्धः, असौ च **ब्रह्मचर्यनाम्नापि**—नवाध्ययनात्मकत्वाद् नवब्रह्मचर्यनाम्नापि—प्रसिद्धः। तस्यैव पञ्चचूलिकारूपो[2] द्वितीयः श्रुतस्कन्धः,

---

१. "सव्वेसिं आयारो तित्थस्स पवत्तणे पढमयाए। सेसाइं अंगाइं एक्कारस आणुपुव्वीए ॥ ८ ॥
आयारो अंगाणं पढमं अंगं दुवालसण्हं पि। एत्थ य मोक्खोवाओ एत्थ य सारो पवयणस्स ॥ ९ ॥
आयारम्मि अहीए जं णाओ होई समणधम्मो उ। तम्हा आयारधरो भण्णइ पढमं गणिट्ठाणं ॥ १० ॥
नवबंभचेरमइओ अट्ठारसपयसहस्सिओ वेदो। हवइ य स पंचचूलो बहु-बहुतरओ पयग्गेणं ॥ ११ ॥"—आचाराङ्गनिर्युक्तिः।

"से किं तं पुव्वगतं ? ति, उच्यते—जम्हा तित्थकरो तित्थपवत्तणकाले गणधराण सव्वसुताधारत्तणतो पुव्वं पुव्वगतसुत्तत्थं भासति तम्हा पुव्व त्ति भणिता, गणधरा पुण सुत्तरयणं करेंता आयाराइक्कमेण रयंति ठवेंति य। अण्णायरियमतेणं पुण पुव्वगतसुत्तत्थो पुव्वं अरहता भासितो, गणहरेहि वि पुव्वगतसुत्तं चेव पुव्वं रइतं, पच्छा आयाराइ। एवमुक्ते चोदक आह—णणु पुव्वावरविरुद्धं, कम्हा ? जम्हा आयारनिज्जुत्तीए भणितं "सव्वेसिं आयारो०" गाहा [आचाराङ्गनिर्युक्ति गा० ८]। आचार्याऽऽह—सत्यमुक्तं, किंतु सा ठवणा, इमं पुण अक्खररयणं पडुच्च भणितं, पुव्वं पुव्वा कता इत्यर्थः।" —नन्दीचूर्णिः पृ० ७५। नन्दीवृत्तिः हारिभद्री पृ० ८८। समवायांगवृत्तिः पृ० १३०–१३१।

"इयाणिं पवत्तणं—सव्वेसिं आयारो० (गा० ८) गाहा। सव्वतित्थगरा वि आयारस्स अत्थं पढमं आइक्खंति, ततो सेसगाणं एक्कारसण्हं अंगाणं, ताए चेव परिवाडीए गणहरा वि सुत्तं गंथंति। इयाणिं पढमंगं ति, किंनिमित्तं आयारो पढमं ठवियो ? एत्थ गाहा—आयारो अंगाणं० (गा० ९)। जेण कारणेण एत्थ आयारो चरणं चेव मोक्खस्स सारो, तत्थ य ठितो सेसाणि अंगाणि अहिज्जइ, तेण सो पढमं कतो।" —आचारांगचूर्णिः।

"इदानीं प्रवर्तनाद्वारम्। कदा पुनर्भगवताऽऽचारः प्रणीत इत्यत आह—सव्वेसिमित्यादि। सर्वेषां तीर्थङ्कराणां तीर्थप्रवर्तनादावाचारार्थः प्रथमतयाऽभवद् भवति भविष्यति च ततः शेषाङ्गार्थ इति। गणधरा अप्यनयैवानुपूर्व्या सूत्रतया ग्रथ्नन्तीति। इदानीं प्रथमत्वे हेतुमाह—आयारो इत्यादि।"—आचाराङ्गवृत्ति पृ० ६।

"प्रथममङ्गं स्थापनामधिकृत्य, रचनापेक्षया तु द्वादशमङ्गम्"—समवायाङ्गवृत्ति पृ० १०१।

२. "जावोग्गहपडिमाओ पढमा १, सत्तिक्कगा बिइअचूला २। भावण ३ विमुत्ती ४ आयारपकप्पा ५ तिन्नि इअ पंच ॥ २९७ ॥"
—आचाराङ्गनिर्युक्तिः पृ० ३२०।

"आयारस्स णं भगवओ सचूलियागस्स पंचासीई उद्देसणकाला पण्णत्ता" (समवायाङ्गसूत्र)।

वृत्तिः—"तत्र आचारस्य प्रथमाङ्गस्य नवाध्ययनात्मकप्रथमश्रुतस्कन्धस्य सचूलियागस्स त्ति, द्वितीये हि तस्य श्रुतस्कन्धे पञ्च चूलिकाः, तासु च पञ्चमी निशीथाख्येह न गृह्यते भिन्नप्रस्थानरूपत्वात् तस्याः, तदन्याश्चतस्रः, तासु च प्रथमद्वितीये सप्तसप्ताध्ययनात्मिके, तृतीयचतुर्थ्यविकैकाध्ययनात्मिके, तदेवं सह चूलिकाभिर्वर्तत इति सचूलिकाकः, तस्य पञ्चाशीतिरुद्देशनकाला भवन्तीति।"—समवायाङ्गवृत्तिः पृ० ९२।

"पुव्वाणुपुव्वीए इच्चेयं णिसीहचूलज्झयणं छव्वीसइमं"—निशीथचूर्णिः भा० १ पृ० ४।

"आयारस्स णं भगवओ सचूलियायस्स पणवीसं अज्झयणा पण्णत्ता, तं जहा—सत्थपरिण्णा १ लोगविजओ २ सीओसणीअ ३ सम्मत्तं ४। आवंति ५ धुय ६ विमोहो ७ उवहाणसुयं ८ महपरिण्णा ९ ॥ १॥ पिंडेसण १० सिज्जिरिया ११-१२ भासज्झयणा १३ य वत्थपाएसा १४-१५। उग्गहपडिमा १६ सत्तिक्कसत्तया २३ भावण २४ विमुत्ती २५ ॥२॥ निसीहज्झयणं पणवीस (छव्वीस) इमं।"—समवायाङ्गसूत्रम्।

Jain Education International · For Private & Personal Use Only www.jainelibrary.org

स च उपकारकत्वादुपचाररूपत्वाद्वा[1] 'अग्र'नाम्ना 'आचाराङ्ग'नाम्ना वा व्यपदिश्यते। द्वितीये श्रुतस्कन्धे पञ्च चूलाः,[2] तासु पञ्चमी **निशीथाख्या** चूला आचाराङ्गसूत्रात् पृथक्कृत्य 'निशीथ'सूत्रनाम्ना पृथक् सूत्ररूपेण चिराद् व्यवह्रियते, चूर्णिकृतः शीलाचार्यादयो वृत्तिकृतश्चापि आचाराङ्गसूत्रस्य चतुर्थचूलिकापर्यन्तं व्याख्यां विहितवन्तः। अतः प्रथमः श्रुतस्कन्धः, चूलाचतुष्टयात्मको द्वितीयश्च श्रुतस्कन्धः सम्प्रति **आचाराङ्गसूत्ररूपेण** प्रसिद्धः।

"तिण्हं गणिपिडगाणं आयारचूलियावज्जाणं सत्तावन्नं अज्झयणा पण्णत्ता, तं जहा—आयारे सूयगडे ठाणे।" —समवायाङ्गसूत्रम्। अस्य वृत्तिः—"गणिपिडगाणं ति गणिनः—आचार्यस्य पिटकानीव पिटकानि सर्वस्वभाजनानीति गणिपिटकानि तेषाम्। आचारस्य श्रुतस्कन्धद्वयरूपस्य प्रथमाङ्गस्य चूलिका सर्वान्तिममध्ययनं विमुक्त्यभिधानमाचारचूलिका, तद्वर्जानाम्। तत्राचारे प्रथमश्रुतस्कन्धे नवाध्ययनानि, द्वितीये षोडश, निशीथाध्ययनस्य प्रस्थानान्तरत्वेनेहानाश्रयणात्, षोडशानां मध्ये एकस्य आचारचूलिकेति परिहृतत्वात् शेषाणि पञ्चदश, सूत्रकृते द्वितीयाङ्गे प्रथमश्रुतस्कन्धे षोडश, द्वितीये सप्त, स्थानाङ्गे दशेत्येवं सप्तपञ्चाशदिति।"—समवायाङ्गवृत्ति पृ० ७३।

"से किं तं आयारे? से णं अंगट्ठयाए पढमे अंगे, दो सुयक्खंधा, पणुवीसं अज्झयणा, पंचासीती उद्देसणकाला, पंचासीती समुद्देसणकाला, अट्ठारस पयसहस्साइं पदग्गेणं . . .। से त्तं आयारे १।"—नन्दीसूत्र ८७, समवायाङ्गसूत्र।

१. "निर्युक्तिकृदाह—' ' ' ' **अग्गं भावे उ पहाण-बहुय-उवया (गा-प्र०) रओ तिविहं ॥**. . . . भावाग्रं तु त्रिविधम्—प्रधानाग्रं प्रभूताग्रम् २ उपकाराग्रं ३ च। तत्र प्रधानाग्रं सचित्तादि त्रिधा' ' ' '। प्रभूताग्रं त्वापेक्षिकं तद्यथा—जीवा पोग्गल समया दव्व पएसा य पज्जवा चेव। थोवाऽणंताणंता विसेसमहिया दुवे णंता। अत्र च यथोत्तरमग्रम्, पर्यायाग्रं तु सर्वाग्रमिति। उपकाराग्रं तु यत् पूर्वोक्तस्य विस्तरतोऽनुक्तस्य च प्रतिपादनादुपकारे वर्तते तद् यथा दशवैकालिकस्य चूडे, अयमेव वा श्रुतस्कन्ध आचारस्येति अतोऽत्रोपकाराग्रेणाधिकार इति। आह च निर्युक्तिकारः—**उवयारेण उ पगयं आयारस्सेव उवरिमाइं तु। रुक्खरस य पव्वयस्स य जह अग्गाइं तहेयाइं।** उपकाराग्रेणात्र प्रकृतम्—अधिकारः, यस्मादेतान्याचारस्यैवोपरि वर्तन्ते तदुक्तविशेषवादितया तत्सम्बद्धानि यथा वृक्ष-पर्वतादेरग्राणीति।"—आचाराङ्गवृत्ति पृ० ३१८-३१९।

"भावग्गं वि (ति) विहं पहाणग्गं १, बहु अग्गं २, उवचारग्गं ३। पहाणग्गं खाइओ भावो। बहुअग्गे जीवादीणं छण्हं पज्जवग्गं। उवचारेण (चारणे-प्र०) णव बंभचेराणि उवचरितं आचारग्गाणि विज्जंति (दिज्जंति-प्र०), अतो आयारस्सेव अग्गाणि आयारग्गाणि, जहा रुक्खस्स पव्वयस्स वा अग्गाणि तधेयाणि आयारस्स अग्गाणि। जहा रुक्खग्गं पव्वतग्गं वा ण रुक्खा पव्वता वा अत्थंतरभूतं एवं ण आयारा आयारग्गाणि अत्थंतरभूयाणि। एत्थ पुण भावेण अहीगारो। तत्थ वि आयारउवयारभावग्गेण। उवचर (रि) तं ति वा अहीयं ति वा म (गि?) ज्झितं ति वा एगट्ठं।" —आचाराङ्गचूर्णिः (द्वितीयश्रुतस्कन्धप्रारम्भे)।

"अग्गं भावो तु पहाण-बहुय-उपचारतो तिविधं ॥४९॥

. . . . . पहाणो खाइगो भावो।

जीवादिछक्कए पुण बहुयग्गं पज्जवा होंति ॥५५॥

"अग्गं भावो' त्ति, तं एवं वत्तव्वं भावो अग्गं।' ' 'पहाणभावग्गं बहुयभावग्गं उवचारभावग्गं एवं तिविहं।' ' 'तत्थ पहाणभावग्गं उदइयादीण भावाण समीवाओ पहाणो खातितो भावो। पहाणे ति गयं। इयाणिं बहुयग्गं भण्णति—जीवो आदि जस्स छक्कगस्स तं जीवाइछक्कगं। तं चिमं—जीवा पोग्गला समया दव्वा पदेसा पज्जया चेति। एयम्मि छक्कगे सव्वत्थो वा जीवा' ' ' ' पज्जवा अणंतगुणा।' ' 'बहुयग्गं पज्जवा होंति। बहुत्तेण अग्गं बहुयग्गं, बहुत्वेनाग्रं पर्याया भवंतीति' ' ' ' गतं बहुअग्गं। इयाणिं उवचारग्गं—उवचरणं उवचारो। उवचारो नाम ग्रहणम् अधिगमेत्यर्थः।' ' ' ' पिट्ठिमो जो घेप्पइ सो उवचारग्गं भावग्गं भवति।' ' ' ' तं चिमं चेव पकप्पज्झयणं। कहं? जम्हा भणति—

पंचण्ह वि अग्गाणं उवयारेणेदं पंचमं अग्गं। जं उवचरित्तु ताइं तस्सुवयारो ण इहरा तु ॥ ' ' ' ' उपचरणं उपचारः। तेण उवचारेण करणभूतेण इदमित्याचारप्रकल्पः पंचमं अग्गं ति। ' ' ' ' शिष्याह—कथं? आचार्याह—जं उवचरित्तु ताइं। जं यस्मात् कारणात् उवचरित्तु गृहीत्वा ताइं ति चउरो अग्गाइं तस्सेति आचारप्रकल्पस्य उपचारो ग्रहणम्। ण इति प्रतिषेधे, इतरहा तु तेष्वगृहीतेषु। सीसो पुच्छति—दसविहवक्खाणे कथमेण अग्गेणाहिकारो? भण्णति—**उपचारेण तु पगतं उवचरिताधीतगमितमेगट्ठा।** उवचारो वक्खातो। पगतं अहिगारः प्रयोजनमित्यर्थः।' ' ' ' उवचारो त्ति वा अहितं ति वा आगमियं ति वा गृहीतं ति वा एगट्ठं।"—निशीथचूर्णि भा० १, पृ० २७-३०। "शिष्याह—कालियसुयं आयारादि एक्कारस अंगा, तत्थ पकप्पो आयारगतो। जे पुण अंगबाहिरा छेयसुयज्झयणा ते कत्थ अणुओगे वत्तव्वा? उच्यते—जं च महाकप्पसुयं जाणि य सेसाइं छेदसुत्ताए। चरणकरणाणुयोगो त्ति कालित्थेउवगयाणि य ॥६१९०॥"—निशीथचूर्णि भा० ४, पृ० २५४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२. एतासु चत्वारश्चूला आचाराङ्गसूत्रस्य प्रथमश्रुतस्कन्धत एव निर्यूढाः, केवलं पञ्चमी निशीथाख्या चूला नवमपूर्वतो निर्यूढा। एतच्च आचाराङ्गनिर्युक्ति-चूर्णि-वृत्तिषु विस्तरेणेत्थं वर्णितम्—

बिइअस्स य पंचमए अट्ठमगस्स बिइयम्मि उद्देसे।
१ भणिओ पिंडो सेज्जा२वत्थं ५ पाउग्गहो ६-७ चेव ॥७॥
पंचमगस्स चउत्थे इरिया ३ वण्णिज्जई समासेणं।
छट्ठस्स य पंचमए भासज्जायं ४ वियाणाहि ॥८॥
सत्तिक्कगाणि ८-१४ सत्त वि निज्जूढाइं महापरिन्नाओ।
सत्थपरिन्ना भावण १५ निज्जूढा उ धुय विमुत्ती १६ ॥९॥
आयारपकप्पो पुण पच्चक्खाणस्स तइयवत्थूओ।
आयारनामधेज्जा वीसइमा पाहुडच्छेया ॥१०॥"—आचाराङ्गनिर्युक्तिः

"सो पुण कतरेहिंतो कतो ? बितियस्स अज्झयणस्स पंचमगातो उद्देसातो **'जमिणं विरूवरूवेहिं सत्थेहिं लोगस्स कम्मसमारंभा कज्जंति, तं जहा—अप्पणो से पुत्ताणं धूयाणं'** [सू० ८७]। **सव्वामगंधं वा परिण्णाय** (सू० ८८) **वत्थ(त्थं) पडिग्गह(हं) कंबल(लं) पादपुंछणं तो(ओ) ग्गहं च कट्ठा (डा)सणं** [सू० ८९]। अट्ठमस्स बितियातो उद्देसगातो **तं भिक्खू उवस(संक) मित्तु गाहावई बूया—आउसंतो समणा ! अहं खलु तव अट्ठाए असणं वा पाणं वा खाइमं वा साइमं वा वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पाणाइं भूयाइं जीवाइं सत्ताइं समारंभ समुद्दिस्सा कीयं पामिच्चं अच्छिज्जं अणिसट्ठं अभिहडं आहट्टु चेतेमि आवसहं वा समुस्सिणेमि** (सू० २४०) एतेहिंतो पिंडेसणा सेज्जा वत्थेसणा पादेसणा उग्गहपडिमा णिज्जूढा। पंचमस्स लोगसार[ज्झ]यणस्स चउत्थाओ उद्देसगाओ **गामाणुगामं दूइज्जमाणस्स० तद्दिट्ठीए० पलिबाहिरे पासित पाणे गच्छिज्जा से अभिक्कममाणे पडिक्कममाणे संकुचेमाणे पसारेमाणे विणियट्टमाणे संपलिज्जमाणे** [सू० १६२] एत्तो रिया णिज्जूढा। छट्ठस्स पंचमातो उद्देसगातो **पाइन्नं (ईणं) पडिन्नं (डीणं) दाहिणं उदीणं आइक्खे विभए किट्टे** [सू० १९६] एत्तो भासज्जाया। सत्तिक्कगाइं सत्त वि महापरिण्णातो एक्केक्कं उद्देसाओ। सत्थपरिण्णाओ भावणा। धुयाओ विमुत्ती। आयार[प्र]कप्पो पच्चक्खाणपुव्वस्स ततियवत्थूतो आयारणामधिज्जातो वीसतिमातो पाहुडछेदातो। अहवा बितियादेसेणं सयातो आयारातो आयारग्गाइं णिज्जूढाइं, बितियातो **जहा पुण्णस्स कत्थति तहा तुच्छस्स कत्थति**[सू० १०२]।"—आचाराङ्गचूर्णि।

"द्वितीयमध्ययनं लोकविजयाख्यं, तत्र पञ्चमोद्देशक इदं सूत्रम्—**सव्वामगंधं परिन्नाय निरामगंधो परिव्वए** (सू० ८८)। तत्र 'आम'-ग्रहणेन हननाद्यास्तिस्रः कोटयो गृहीताः, गन्धोपादानादपरास्तिस्रः, एताः षडपि अविशोधिकोटयः।····तत्रैव सूत्रम्—**—अदिस्समाणो कयविक्कएहिं** [सू० ८८], अनेनापि तिस्रो विशोधिकोटयो गृहीताः।····अष्टमस्य विमोहाध्ययनस्य द्वितीयोद्देशक इदं सूत्रम्—**भिक्खू परक्कमेज्ज वा चिट्ठेज्ज वा निसीएज्ज वा तुयट्टेज्ज वा सुसाणंसि वा** [सू० २०४] इत्यादि यावद् बहिया **विहरेज्जा, तं भिक्खुं गाहावती उवसंकमित्तु वएज्जा—अहमाउसंतो समणा तुब्भट्ठाए असणं वा पाणं वा खाइमं वा साइमं वा पाणाइं भूयाइं जीवाइं सत्ताइं समारंभ समुद्दिस्स कीयं पामिच्चं** [सू० २०४] इत्यादि। एतानि सर्वाण्यपि सूत्राण्याश्रित्य एकादश पिण्डैषणा निर्यूढाः। तथा तस्मिन्नेव द्वितीयाध्ययने पञ्चमोद्देशके सूत्रम्—**से वत्थं पडिग्गहं कंबलं पायपुंछणं उग्गहं च कडासणं** [सू० ८९] इति। तत्र वस्त्र-कम्बल-पादपुञ्छनग्रहणाद् वस्त्रैषणा निर्यूढा, पतद्ग्रहपदात् पात्रैषणा निर्यूढा, अवग्रह इत्येतस्मादवग्रहप्रतिमा निर्यूढा, कटासनमित्ये-तस्माच्छय्येति। तथा पञ्चमाध्ययनावन्त्याख्यस्य चतुर्थोद्देशके सूत्रम्—**गामाणुगामं दूइज्जमाणस्स दुज्जायं दुप्परिक्कंतं** [सू० १६२] इत्यादिना ईर्या सङ्क्षेपेण व्यावर्णितेत्यत एव ईर्याध्ययनं निर्यूढम्। तथा षष्ठाध्ययनस्य धूताख्यस्य पञ्चमोद्देशके सूत्रम्—**आइक्खइ विहयइ किट्टइ धम्मकामी** [सू० १९६] इत्येतस्माद् भाषाध्ययनमाकृष्टमित्येवं विजानीयास्त्वमिति। तथा महापरिज्ञाध्ययने सप्तोद्देशकाः, तेभ्यः प्रत्येकं सप्तापि सप्तैकका निर्यूढाः। तथा शस्त्रपरिज्ञाध्ययनाद् भावना निर्यूढा। तथा धूताध्ययनस्य द्वितीयचतुर्थोद्देशकाभ्यां विमुक्त्यध्ययनं निर्यूढ-मिति। तथा आचारप्रकल्पो निशीथः, स च प्रत्याख्यानपूर्वस्य यत् तृतीयं वस्तु तस्यापि यदाचाराख्यं विंशतितमं प्राभृतं ततो निर्यूढ इति। ब्रह्मचर्याध्ययनेभ्य आचाराग्राणि निर्यूढानि, अतो निर्यूहनाधिकारादेव तान्यपि शस्त्रपरिज्ञाध्ययनाद् निर्यूढानीति दर्शयति—अव्वोगडो इत्यादि।"—आचाराङ्गवृत्ति पृ० ३१९-३२०।

"अयं संधि [सू० ८८] **इत्यारभ्य कालेणुट्ठाइ** [सू० ८८] त्ति यावदेतेभ्यः सूत्रेभ्य एकादश पिण्डैषणा निर्यूढा इति···। वस्त्रग्रहणेन **वस्त्रैषणा** सूचिता।··पात्रम्, एतद्ग्रहणेन **पात्रैषणा** सूचिता।···एतेभ्य एव **वस्त्रैषणा पात्रैषणा** च निर्यूढा।····अवग्रहः····अनेन चावग्रहप्रतिमाः सर्वाः सूचिताः, अत एवासौ निर्यूढा।···आसनग्रहणेन शय्या सूचिता, अत एव निर्यूढेति।"—आचाराङ्गवृत्ति पृ० १३३-१३४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्ययनानि—आचाराङ्गसूत्रस्य प्रथमे श्रुतस्कन्धे नवाध्ययनानि। तेषाम् आचाराङ्गनिर्युक्तौ[1] समवायाङ्गसूत्रादौ[2] च कश्चिन्नामभेदः क्रमभेदश्च दृश्यते सोऽप्यत्र प्रदर्श्यते—

आचाराङ्गनि०[1]	समवायाङ्ग०	आचाराङ्गनि०	समवायाङ्ग०
१. **सत्थपरिण्णा**	सत्थपरिण्णा	६. **धुतं**	धुतं
२. **लोगविजयो**	लोगविजओ	७. **महापरिण्णा**	विमोहायणं
३. **सीओसणिज्जं**	सीओसणीअं	८. **विमोक्खो**	उवहाणसयं
४. **सम्मत्तं**	सम्मत्तं	९. **उवहाणसुयं**	महपरिण्णा
५. **लोगसारो**	आवंति		

अत्र 'आवंति'[4] इति पञ्चमस्य लोकसाराध्ययनस्यैव नामान्तरम्। 'विमोक्खो' इति विमोहायतनस्यैव नामान्तरम्। वस्तुतः ७-८-९ अध्ययनेषु क्रमभेदो वर्तते। ७ विमोहो, ८ महापरिन्ना, ९ उवहाणसुयं—इत्येवमपि क्रमः नन्दीवृत्ति[3]-समवायाङ्गवृत्त्यादौ दृश्यते। उमास्वातिविरचिते प्रशमरतिप्रकरणेऽपि समवायाङ्गसूत्रनिर्दिष्टः क्रमोऽभिप्रेत इति भाति।

१. "सत्थपरिण्णा १ लोगविजओ २ य सीओसणिज्ज ३ सम्मत्तं ४।
तह लोगसारनामं ५ धुतं ६ तह महापरिण्णा ७ य ॥३१॥
अट्ठमए य विमोक्खो ८ उवहाणसुयं ९ च नवमगं भणियं।
इच्चेसो आयारो आयारग्गाणि सेसाणि ॥३२॥"—आचाराङ्गनिर्युक्ति पृ० ९।

२. "नव बंभचेरा पण्णता, तंजहा—सत्थपरिण्णा १ लोगविजओ २ सीओसणिज्ज ३ सम्मत्तं ४। आवंती ५ धुतं ६ विमोहायणं ७ उवहाणसुयं ८ महपरिण्णा ९॥"—समवायाङ्गसूत्र।
"णव बंभचेरा पण्णत्ता, तंजहा—सत्थपरिन्ना लोगविजओ जाव उवहाणसुयं महपरिण्णा॥"—स्थानाङ्गसूत्र।

३. १ शस्त्रपरिज्ञा, २ लोकविजयः, ३ शीतोष्णीयम्, ४ सम्यक्त्वम्, ५ लोकसारः, ६ धूतम्, ७ महापरिज्ञा, ८ विमोक्षः, ९ उपधानश्रुतम्॥

४. "द्विधा नाम—आदानपदेन गौणं चेति। एतद् द्विविधमपि निर्युक्तिकारः प्रतिपादयितुमाह—आयाणपएणावंति गोण्णनामेण लोगसारु त्ति ॥२३९॥ आदीयते प्रथममेव गृह्यत इत्यादानं, तच्च तत् पदम् आदानपदं, तेन कारणभूतेन 'आवंती' इत्येतद् नाम, अध्ययनादौ 'आवन्ती' शब्दस्योच्चारणात्। गुणैर्निष्पन्नं गौणं, तच्च तन्नाम च गौणनाम, तेन हेतुना लोकसार इति।"—आचाराङ्गवृत्ति पृ० १९६।

"से किं त आयाणपदेणं ? आयाणपदेणं आवंती"—अनुयोगद्वारसूत्र २६६।

"आवंतीत्याचारस्य पञ्चमाध्ययनम्, तत्र ह्यादावेव आवंती केयावंती इत्यालापको विद्यते इत्यादानपदेनैतन्नाम"—अनुयोगद्वारवृत्ति पृ० १३०। "'आवंती' ति आद्यपदेन, नामान्तरेण तु लोकसारः"—स्थानाङ्गवृत्ति पृ० ४४४।

५. "द्वौ श्रुतस्कन्धावध्ययनसमुदायलक्षणौ। पञ्चविंशतिरध्ययनानि। तद्यथा—
सत्थपरिन्ना १ लोगविजयो य २ सीतोसणिज्ज ३ सम्मत्तं ४। आवंति ५ धुय ६ विमोहो ७ महापरिन्नो ८ वहाणसुयं ९॥१॥ पढमो सुयक्खंधो।
पिंडेसण १ सेज्जि २ रिया ३ भासज्जाया ४ य वत्थ ५ पाएसा ६। उग्गहपडिमा ७ सत्त य सत्तिकया १४ भावण १५ विमुत्ती १६॥२॥
एवमेतानि निशीथवर्जानि पञ्चविंशतिरध्ययनानि। तथा पञ्चाशीत्युद्देशनकालाः। कथम् ? उच्यते—अङ्गस्य श्रुतस्कन्धस्याध्ययनस्योद्देशकस्य च एतेषां चतुर्णामप्येक एव, एवं सत्थपरिन्नाए सत्त उद्देसणकाला ४, लोगविजयस्स ६ (फा), सीओसणिज्जस्स चउरो ४ (ट्क), लोगसारस्स छ ६ (फुं), धुतस्स पंच ५ (ना), विमोहज्झयणस्स ८ (ह्व), महापरिन्नाए सत्त ७ (ग्र), उवहाणसुतस्स चउरो ४ (ट्क), पिंडेसणाए एक्कारस ११, सेज्जाए तिन्नि ३, इरियाए तिन्नि ३, भासज्जाए दोन्नि २, वत्थेसणाए दोन्नि २, पाएसणाए दोन्नि २, उग्गहपडिमाए दोन्नि २, सत्तिकयाए सत्त ७, भावणाए एक्को १, विमुत्तीए एक्को १, एवमेय सपिंडिया पंचासीई भवंति।''''एवं समुद्देसणकाला वि भाणियव्वा।"—नन्दिवृत्ति हारिभद्री पृ० ७६।

"सत्थपरिन्नेत्यादिगाथायामत्र चतुर्थपादो **'महापरिन्नोवहाणसुय'**मिति वक्ष्यमाणव्याख्यानेनायमेवात्र पाठः। अन्यत्र च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमं **महापरिज्ञाध्ययनं** सम्प्रति[1] 'व्यवच्छिन्नम्' इति शीलाचार्यैः स्पष्टमेव वृत्तौ [पृ० 173] अभिहितम्। आचाराङ्ग-चूर्णिकारेण "संपतं महापरिण्णा ण पढिज्जइ" इति अष्टमाध्ययनप्रारम्भेऽभिहितमिति चूर्णिकृतां समयेऽपि तस्य पठनपाठनपरंपरा नासीदिति स्पष्टमवसीयते।

द्वितीये श्रुतस्कन्धे चतुर्षु[2] चूलासु प्रथमायां चूलायां सप्ताध्ययनानि,[3] तद्यथा—

१. पिंडेसणा, २. सेज्जा, ३. इरिया, ४. भासज्जायं, ५. वत्थेसणा, ६. पाएसणा, ७. ओग्गहपडिमा।

द्वितीयायां चूलायां सप्तैककाभिधानानि **सप्ताध्ययनानि**[4] तद्यथा—

१. ठाणसत्तिक्कओ, २. णिसीहियासत्तिक्कओ, ३. उच्चारपासवणसत्तिक्कओ, ४. सद्दसत्तिक्कओ, ५. रूवसत्तिक्कओ, ६. परकिरियासत्तिक्कओ, ७. अण्णमण्णकिरियासत्तिक्कओ[4]।

अत्र आचाराङ्गचूर्ण्यनुसारेण तु '४ रूवसत्तिक्कओ, ५ सद्दसत्तिक्कओ' इति क्रमोऽभिप्रेतः. तथैव च तत्र व्याख्या वर्तते। विशेषतो जिज्ञासुभिः श्री महावीरजैनविद्यालय(मुंबई)प्रकाशितस्य आचाराङ्गसूत्रस्य पृ० २३९ टि० १, पृ० २४७ टि० ८ इत्यत्र, प्रस्तावनायां पृ० २९ इत्यत्र च विलोकनीयम्।

तृतीयायां चूलायामेकमेवाध्ययनम् — १ भावणा (भावना)।

चतुर्थ्यामपि चूलायामेकमेवाध्ययनम् — १ विमुत्ती (विमुक्तिः)।

प्रथमे श्रुतस्कन्धे ९+द्वितीये श्रुतस्कन्धे प्रथमचूलायां ७+द्वितीयचूलायां ७+तृतीयचूलायाम् १+चतुर्थचूलायाम् १=इत्येवं सर्वसंख्यया **आचाराङ्गसूत्रे** २५अध्ययनानि।

अध्ययने	उद्देशकाः	अध्ययने	उद्देशकाः
१	७	१०	११
२	६	११	३
३	४	१२	३
४	४	१३	२
५	६	१४	२
६	५	१५	२
७	७	१६	२
८	८		
९	४	१७—२५	०

उपधानसुयं महापरिज्ञेति पठ्यते तच्चेह नोपपद्यते उद्देशनकालसंख्याया विघटनात् महापरिज्ञायास्तत्र प्रथममुपादानात् पश्चादुपधान-श्रुतस्येति। 'हवइ य स पंचचूलो' त्ति द्वितीयश्रुतस्कन्धे पञ्च चूडाः"—नन्दिवृत्तिदुर्गपदव्याख्या पृ० १६३-१६४।

"द्वौ श्रुतस्कन्धौ अध्ययनसमुदायलक्षणौ, पञ्चविंशतिरध्ययनानि। तद्यथा—'सत्थपरिण्णा १ ..... **महापरिण्णो** ८ **वहाणसुयं** ९ ॥' इति प्रथमः श्रुतस्कन्धः। 'पिंडेसण १ .... विमुत्ती १६ ॥' इति द्वितीयः श्रुतस्कन्धः। एवमेतानि निशीथवर्जानि पञ्चविंशतिरध्ययनानि।" —समवायांगवृत्ति पृ० १०८।

१. वज्रस्वामिनां समये तु महापरिज्ञाध्ययनमासीत्, यथोक्तम्—

"जेणुद्धरिया विज्जा आगाससमा महापरिन्नाओ। वंदामि अज्जवइरं अपच्छिमो जो सुयधराणं ॥" ॥७६९॥—आवश्यकनिर्युक्ति।

"महापरिज्ञाध्ययनादाचाराङ्गान्तरस्थितात्। श्रीवज्रेणोद्धृता विद्या तदा गगनगामिनी ॥१४८॥"—प्रभावकचरित, वज्रप्रबन्ध।

२. १ पिण्डैषणा, २ शय्या, ३ ईर्या, ४ भाषाजातम्, ५ वस्त्रैषणा, ६ पात्रैषणा, ७ अवग्रहप्रतिमा।

३. "सत्तेक्कगाणि इक्कसरगाणि पुव्वभणियं तहिं ठाणं।" —आचाराङ्गनिर्युक्ति पृ० ४०७।

"सत्तिका(क्का?) बितिया चूला, दारा—आणुपुव्वीए अहिगारा एगसरण(रेण? रगा?)। उद्धट्ठाणे पगतं, तं पुव्वभणितं लोगविजए।"—आचाराङ्गचूर्णि। "कीदृशे स्थाने कायोत्सर्ग-स्वाध्यायोच्चार-प्रश्रवणादि विधेयमित्येतत्प्रतिपादनाय द्वितीया चूडा, सा च सप्ताध्ययनात्मिकेति निर्युक्तिकृद् दर्शयितुमाह—**सत्ते**० गाहा। सप्तैककानि(सप्तैकैकानि—शीखं २) एकसराणीति सप्ताध्ययनानि उद्देशकरहितानि भवन्तीत्यर्थः। तत्रापि पूर्वं प्रथमं स्थानाख्यमभिहितमित्यतस्तद् व्याख्यायते।"—आचाराङ्गवृत्ति पृ ४०७।

४. १ स्थानसप्तैककः, २ निषीधिकासप्तैककः, ३ उच्चार-प्रश्रवणसप्तैककः, ४ शब्दसप्तैककः, ५ रूपसप्तैककः, ६ परक्रियासप्तै-ककः, ७ अन्योन्यक्रियासप्तैककः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१७ तः २५ पर्यन्तेष्वध्ययनेषु उद्देशकविभागो नास्ति । अतः सर्वसंख्यया २५ अध्ययनेषु ८५ उद्देशनकालाः समुद्देशनकालाश्च ।

परिमाणम्[1]—प्रथमश्रुतस्कन्धस्य १८००० अष्टादश सहस्राणि पदानि परिमाणम् । शास्त्रेषु यत् १८००० पदानि परिमाणं निर्दिष्टं तत् प्रथमश्रुतस्कन्धस्यैव, दृश्यतामत्र पृ० 4 पं० ३४ । 'यत्रार्थोपलब्धिस्तत् पदम्' इति पदस्य स्वरूपं नन्दीसूत्रस्य हारिभद्र्यां वृत्तौ [पृ० ७६] निर्दिष्टम् । अन्या अपि श्वेताम्बर-दिगम्बर ग्रन्थेषु पदस्य पारिभाषिक्यो व्याख्या उपलभ्यन्ते । यथा सूत्रान्तरेषु पाठपरिहाण्या कालान्तरेण किञ्चिद् न्यूनत्वं जातं तथा आचाराङ्गेऽपि ज्ञातव्यम् ।

सम्प्रति तु ३२ अक्षराणामेकोऽनुष्टुप् श्लोक इति गणनया आचाराङ्गसूत्रस्य सं० दी० प्रतौ प्रथमश्रुतस्कन्धान्ते 'ग्रन्थाग्रं ८००' इति उल्लेखदर्शनात् प्रथमश्रुतस्कन्धस्य ८०० श्लोकाः परिमाणं प्रतीयते, दृश्यतां श्रीमहावीरजैनविद्यालयप्रकाशितमाचाराङ्गसूत्रं पृ० ४१८ पं० ५ । सम्पूर्णस्य आचाराङ्गस्य श्लोकपरिमाणं २४५४, २५५४, २६४४, २६५४ इति विविधासु प्रतिषु भिन्नं भिन्नं लिखितं दृश्यते, दृश्यतां श्रीमहावीरजैनविद्यालयप्रकाशिते आचाराङ्गसूत्रे पृ० २९८ टि० ७ ।

रचनाशैली—प्रथमश्रुतस्कन्धस्य सामान्यतो रचना गद्य-पद्यमिश्रा विलोक्यते । 'अष्टमाध्ययनस्य अष्टम उद्देशकः, संपूर्णं च नवममध्ययनम्' एतत् पद्यनिबद्धमेव । प्रथमे श्रुतस्कन्धे प्रभूतानि वाक्यानि पद्यांशसदृशानि[2] प्रतीयन्ते, 'पूर्वं सम्पूर्णानि पद्यानि तत्र भवेयुः, कालान्तरेण तु कस्यचिदंशस्य परिगलनात् खण्डितपद्यरूपाणि वाक्यानि तत्र सञ्जातानि' इत्यपि संभवेत्, यथा सूत्रकृताङ्गे [१३ । २] "अहो य राओ य ·· " [पृ० 155] इति सम्पूर्णा गाथोपलभ्यते, आचाराङ्गे तु तस्या उत्तरार्धमेव सम्प्रति "समाहिमाघातमजोसयंता सत्थारमेव फरुसं वयंति" [पृ० 166] इत्युपलभ्यते ।

रचयितारः—आचाराङ्गसूत्रस्य प्रथमः श्रुतस्कन्धस्तावत् पञ्चमेन गणधरेण भगवता सुधर्मस्वामिना प्रणीत इति सर्वसम्मतम् । द्वितीयस्य तु श्रुतस्कन्धस्य रचनायां विविधा निर्देशाः प्राप्यन्ते । 'आचाराग्राणि स्थविरैर्विरचितानि' इति आचाराङ्गनिर्युक्तौ भद्रबाहुस्वामिनः,[3] दृश्यतां पृ० 213 । अत्र "थेरा गणधरा" इति चूर्णावुक्तम्, वृत्तौ [पृ० 213 पं० ११] तु "स्थविरैः श्रुतवृद्धैश्चतुर्दशपूर्ववित्कैः" इत्युक्तम् । तृतीय-चतुर्थौ चूलिके स्थूलभद्रस्य भगिन्या यक्षया साध्व्या महाविदेहक्षेत्रतः [भगवतः सीमन्धरस्वामिनः सकाशात्] आनीते इत्यपि आवश्यकचूर्णौ[4] [भाग २, पृ० १८८] परिशिष्टपर्वणि[5] [९ । ९७—१०१] च श्रूयते प्रवादरूपेण । आचाराङ्गस्य पञ्चमी चूला

---

१. "अष्टादश पदसहस्राणि पदाग्रेण, इह यत्रार्थोपलब्धिस्तत् पदम्, चोदक आह—जदि दो सुतक्खंधा, पणुवीसं अज्झयणाणि, अट्ठारस पदसहस्साणि पदग्गेणं भवंति, तो जं भणियं "णवबंभचेरमइओ अट्ठारसपदसहस्सिओ वेओ।' [आचाराङ्गनि० गा० ११] त्ति एयं विरुज्झइ । आचार्य आह—णणु एत्थ वि भणियं "हवइ य सपंचचूलो बहु-बहुअयरो पयग्गेणं" [आचाराङ्गनि० गा० ११] ति, इह सुत्तालावयपदेहिं सहितो बहू बहुयरो य वत्तव्य इत्यर्थः, अथवा "दो सुयक्खंधा, पणुवीसं अज्झयणाणि' एयं आयारग्गसहितस्स आयारस्स पमाणं भणियं, अट्ठारस पयसहस्साणि उण पढमसुयक्खंधस्स णवबंभचेरमतियस्स पमाणं, विचित्तत्थबद्धाणि य सुत्ताणि, गुरूवदेसतो तेसिं अत्थो जाणियव्वो।"—नन्दिवृत्ति हारिभद्री पृ० ७६ । "चोदक आह—जदि दो ··· गुरूवदेसतो सि अत्थो भाणितव्वो"—नन्दीचूर्णि पृ० ६२ । "अष्टादश पदसहस्राणि पदाग्रेण प्रज्ञप्तः । इह यत्रार्थोपलब्धिस्तत् पदम् । ननु यदि ··· गुरूपदेशतस्तेषामर्थोऽवसेय इति ।"—समवायाङ्गवृत्ति पृ० १०८ ।

२. "गाथा कतमा ? या न गद्येन भाषिता, अपि तु पादोपनिबन्धेन द्विपदा वा चतुष्पदा वा पंचपदा वा षट्पदा वा इयमुच्यते गाथा" इति बौद्धाचार्यासङ्गविरचितायां श्रावकभूमौ पृ० १३७ ।

३. थेरेहिंऽणुग्गहट्ठा सीसहिअं होउ पागडत्थं च । आयाराओ अत्थो आयारग्गेसु पविभत्तो ॥२८७॥

[चूर्णिः]—एयाणि पुण आयारग्गाणि आयारा चेव णिज्जूढाणि । केण णिज्जूढाणि ? थेरेहिं । थेरा गणधरा । किंनिमित्तं ? अणुग्गहत्थं साहूणं, सिस्साण हियत्थं, पागडत्थं च भवउ त्ति आयारस्स अत्थो आयारग्गेसु णिज्जूढो ठवितो विभत्तो पिंडीकृतो पृथक् पृथक्, पिंडस्स पिंडेसणासु कतो, सेज्जत्थो सेज्जासु, एवं सेसाण वि ।

[वृत्तिः]—"तत्रेदमिदानीं वाच्यम्—केनैतानि निर्यूढानि किमर्थं कुतो वेति, अत आह—थेरेहीत्यादि । स्थविरैः श्रुतवृद्धैश्चतुर्दशपूर्ववित्कैर्निर्यूढानि । किमर्थम् ? शिष्यहितं भवत्विति कृत्वाऽनुग्रहार्थम्, तथाऽप्रकटोऽर्थः प्रकटो यथा स्यादित्येवमर्थं च । कुतो निर्यूढानि? आचारात् सकाशात् समस्तोऽप्यर्थ आचाराग्रेषु विस्तरेण प्रविभक्त इति ।" [—पृ० ३१९] ।

४. "थूलभद्दस्स य ताओ भगिणी ओसत्त वि पव्वइतिकाओ भणंति—आयरिका ! भाउकं वंदका वच्चामो ··· ताहे गताओ, वंदिओ य, खेमकुसलं पुच्छति, जथा सिरिओ पव्वइतो अब्भत्तट्ठेणं कालगतो, महाविदेहे य पुच्छिका गता अज्जा, दो वि अज्झयणाणि भावणा विमोत्ती य आणितागि । वंदित्ता गताओ" ।—आवश्यकचूर्णिः ।

५. "श्रीसङ्घायोपदां प्रैषीन्मन्मुखेन प्रसादभाक् । श्रीमान् सीमन्धरस्वामी चत्वार्यध्ययनानि च ॥९७॥
भावना च विमुक्तिश्च रतिकल्पमथापरम् । तथा विविक्तचर्या च तानि चैतानि नामतः ॥९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निशीथसूत्रम्, आचारप्रकल्पो निशीथस्यैव नामान्तरम्, दृश्यतामत्र पृ० 213 पं० ३४ । "तेण भगवता आयारपकप्प-दसा-कप्प-ववहारा नवमपुव्वनीसंदभूता णिज्जूढा" इति हि पञ्चकल्पभाष्यचूर्णावुक्तम् । अत आचारप्रकल्पो नवमपूर्वतो भगवता भद्रबाहुस्वामिना निर्यूढ इति पञ्चकल्पभाष्यचूर्णेरभिप्रायः । निशीथचूर्ण्यभिप्रायेण[1] तु गणधररचितत्वं निशीथसूत्रस्य ।

विषयः—सामान्यत आचाराङ्गस्य विषयः समवायाङ्गसूत्रादौ[2] वर्णितः । विशेषतस्तु अत्रैव मुद्रिताद् विषयानुक्रमाज्ज्ञातव्यः । भगवता उमास्वातिनापि प्रशमरतिप्रकरणे संक्षेपत आचाराङ्गस्य पञ्चविंशतेरध्ययनानां क्रमशो विषय इत्थं वर्णितः —

"इति गुणदोषविपर्यासदर्शनाद्विषयमूर्छितो ह्यात्मा । भवपरिवर्तनभीरुभिराचारमवेक्ष्य परिरक्ष्यः । ११२ ॥

सम्यक्त्वज्ञानचारित्रतपोवीर्यात्मको जिनैः प्रोक्तः । पञ्चविधोऽयं विधिवत् साध्वाचारः समनुगम्यः ॥ ११३ ॥

षड्जीवकायसंयतना [१] लौकिकसन्तानगौरवत्यागः [२] । शीतोष्णादिपरीषहविजयः [३] सम्यक्त्वमविकम्प्यम् [४] ॥ ११४ ॥

संसारादुद्वेगः [५] क्षपणोपायश्च कर्मणां निपुणः [६] । वैयावृत्योद्योग [७] स्तपोविधि [८] र्योषितां त्यागः [९] ॥ ११५ ॥

विधिना भैक्ष्यग्रहणं [१०] स्त्रीपशुपण्डकविवर्जिता शय्या [११] । ईर्या[१२]भाषा[१३]म्बर[१४]भाजनैषणा[१५]ऽवग्रहाः शुद्धाः[१६] ॥ ११६ ।

स्थान[१७]निषद्या[१८]–व्युत्सर्ग[१९]शब्द–[२०]रूप–[२१] क्रियाः परा-ऽन्योन्याः[२२–२३] । पञ्चमहाव्रतदार्ढ्यं [२४] विमुक्तता सर्वसङ्गेभ्यः [२५] ॥ ११७ ॥

साध्वाचारः खल्वयमष्टादशपदसहस्रपरिपठितः । सम्यगनुपाल्यमानो रागादीन् मूलतो हन्ति ॥ ११८ ॥

आचाराध्ययनोक्तार्थभावनाचरणगुप्तहृदयस्य । न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् ॥ ११९ ॥"—प्रशमरतिः ।

प्रशमरतौ सप्तमा–ऽष्टम–नवमाध्ययनानां विषयवर्णनं '७ विमोहायतनम्, ८ उपधानश्रुतम्, ९ महापरिज्ञा' इति समवायाङ्गसूत्राभिमतक्रमानुसारेण ज्ञेयम् ।

अप्येकया वाचनया मया तानि धृतानि च । उद्गीतानि च सङ्घाय तत्तथाख्यानपूर्वकम् ॥९९॥

आचाराङ्गस्य चूले द्वे आद्यमध्ययनद्वयम् । दशवैकालिकस्यान्यदथ सङ्घेन योजितम् ॥१००॥

इत्याख्याय स्थूलभद्रानुज्ञाता निजमाश्रयम् । ता ययुः स्थूलभद्रोऽपि वाचनार्थमगाद् गुरुम् ॥१०१॥"—परिशिष्टपर्व ।

१. "आगमो तिविहो—अत्तागमो १ अणंतरागमो २ परंपरागमो ३ । इच्चेयस्स णिसीहचूलज्झयणस्स तित्थगराणं अत्थस्स अत्तागमे । गणहराणं सुत्तस्स अत्तागमे । गणहराणं अत्थस्स अणंतरागमे । गणहरसिस्साणं सुत्तस्स अणंतरागमे, अत्थस्स परंपरागमे । तेण परं सेसाणं सुत्तस्स वि अत्थस्स वि णो अत्तागमे, णो अणंतरागमे, परंपरागमे । से त्तं आगमो ।"—निशीथचूर्णि भा० १, पृ० ४ ।

२. "से किं तं आयारे ? आयारे णं समणाणं निग्गंथाणं आयार-गोयर-विणय-वेणइय-ट्ठाण-गमण-चंकमण-पमाण-जोग-जुंजण-भासासमिति-गुत्ती-सेज्जोवहि-भत्त-पाण-उग्गमउप्पायणएसणाविसोहि-सुद्धासुद्धगहण-वय-णियम-तवोवहाणसुप्पसत्थमाहिज्जइ, से समासओ पंचविहे पण्णत्ते, तं जहा—णाणायारे दंसणायारे चरित्तायारे तवायारे विरियायारे ।"—समवायाङ्गसूत्र ॥१३६॥

"से किं तं आयारे ? आयारे णं समणाणं णिग्गंथाणं आयार-गोयर-विणय-वेणइय-सिक्खा-भासा-अभासा-चरण-करण-जाया-माया-वित्तीओ आघविज्जंति । से समासओ पंचविहे पण्णत्ते, तं जहा—णाणायारे १ दंसणायारे २ चरित्तायारे ३ तवायारे ४ वीरियायारे"———नन्दीसूत्र ८७ । "आचारे चर्याविधानं शुद्धयष्टकपञ्चसमितित्रिगुप्तिविकल्पं कथ्यते"—तत्त्वार्थराजवार्त्तिक १।२० ।

"जिअसंजमो अ १ लोगो जह बज्झइ जह य तं पजहियव्वं २ । सुहदुक्खतितिक्खा वि य ३ सम्मत्तं ४ लोगसारो य ५ ॥३३॥

निस्संगया य छट्ठे ६ मोहसमुत्था परीसहुवसग्गा ७ । निज्जाणं अट्ठमए ८ नवमे य जिणेण एवं ति ९ ॥३४॥"—आचाराङ्गनिर्युक्ति ।

"एत्थायारंगमट्ठारहपदसहस्सेहि "कधं चरे कधं चिट्ठे कधमासे कधं सए । कधं भुंजेज्ज भासेज्ज कधं पावं ण बज्झई ॥ जदं चरे जदं चिट्ठे जदमासे जदं सए । जदं भुंजेज्ज भासेज्ज एवं पावं ण बज्झई ॥" एवमादियं मुणीणमायारं वण्णेदि"—धवला पृ० १००। "तत्थ आयारंगं "जदं चरे जदं चिट्ठे जदमासे जदं सए । जदं भुंजेज्ज भासेज्ज एवं पावं ण बज्झइ ॥" इच्चाइयं साहूणमाचारं वण्णेदि"—**जयधवला**, पृ० ११२-११३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाठपरंपरा––भगवतो महावीरस्वामिनः शिष्या **इन्द्रभूतिगौतमादयः** सर्वेऽपि गणधराः[1] द्वादशाङ्गीं प्रणीतवन्तः। भगवतो महावीरस्य गणधरा एकादश, [2]गणास्तु नवैव, इति द्वादशाङ्ग्या नव वाचना बभूवुः। नवस्वपि वाचनासु द्वादशाङ्गी अर्थत एकरूपैवासीदित्यत्र न मतभेदः। किन्तु सर्वा वाचनाः सूत्रत एकरूपा न वेत्यत्र विप्रतिपत्तिः। अर्थत एकरूपत्वेऽपि सूत्रतो भिन्नरूपत्वाद् नवसु वाचनासु [3]नवविधा द्वादशाङ्गी अभूदित्येके।

"जदा य गणहरा सव्वे पव्वजिता ताहे किर एगनिसज्जाए एगारस अंगाणि चोद्दसहिं चोद्दस पुव्वाणि, एवं ता भगवता अत्थो कहितो, ताहे भगवंतो एगपासे सुत्तं करे(रें)ति, तं अक्खरेहिं पदेहिं वंजणेहिं समं, पच्छा सामी जस्स जत्तियो गणो तस्स तत्तियं अणुजाणति। आतीय सुहम्मं करेति, तस्स महल्लमाउयं, एत्तो तित्थं होहिति त्ति" [आवश्यकचूर्णि पृ० ३३७]

इति आवश्यकचूर्णिवचनानुसारेण सूत्रतोऽपि सर्वेषां गणधराणां द्वादशाङ्गी एकरूपा प्रतीयत इत्यपरे।

पञ्चमगणधरस्य भगवतः सुधर्मस्वामिनो दीर्घायुष्कत्वात् सर्वेऽन्यान्ये गणधराः स्वं स्वं शिष्यगणं तस्मै समर्प्य निर्वाणमासादयामासुः।[4] अतो भगवतो महावीरस्य शासने शिष्यपरम्परायां प्रवर्तमाना द्वादशाङ्गी सुधर्मस्वामिद्वारैव प्रवृत्ता, अतोऽस्माकं वाचना सुधर्मस्वामिसत्का इत्यत्र न कोऽपि विवादः।

---

१. "'अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं। सासणस्स हियट्ठाए तओ सुत्तं पवत्तइ ॥१९२॥'"––आवश्यकनिर्युक्ति।

"एक्कारस वि गणहरे पवायए पवयणस्स वंदामि।.....॥१०६२॥ यथा अर्हन्नर्थस्य वक्तेति पूज्यस्तथा गणधरा गौतमादयः सूत्रस्य वक्तार इति पूज्यन्ते मङ्गलत्वाच्च"––विशेषावश्यकभाष्यस्वोपज्ञटीका। "तत्र सर्वज्ञेन परमर्षिणा परमाचिन्त्य-केवलज्ञानविभूतिविशेषेण अर्थत आगम उद्दिष्टः।.....तस्य साक्षाच्छिष्यैः बुद्ध्यतिशयर्द्धियुक्तैः गणधरैः श्रुतकेवलिभिरनुस्मृतग्रन्थरचनमङ्गपूर्वलक्षणम्" ––तत्त्वार्थसूत्र [१।२०] सर्वार्थसिद्धिः। इत्येवं सर्वेषु श्वेताम्बरग्रन्थेषु बहुषु दिगम्बरग्रन्थेषु च सामान्येन गणधरकृतत्वं द्वादशाङ्गचा वर्णितम्।

केषुचिद् दिगम्बरग्रन्थेषु 'द्वादशाङ्गी इन्द्रभूतिना गौतमस्वामिना विरचिता' इत्यपि वर्णितम्। तथाहि––

"तेण महावीरभडारएण इंदभूदिस्स.....अत्थो कहिओ। तदो तेण गोअमगोत्तेण इंदभूदिणा अंतोमुहुत्तेणावहारियदुवालसंगत्थेण तेणेव कालेण कयदुवालसंगगंथरयणेण गुणेहि सगसमाणस्स सुहम्माइरियस्स गंथो वक्खाणिदो। तदो केत्तिएण वि कालेण केवलणाणमुप्पाइय बारसवासाणि केवलविहारेण विहरिय इंदभूदिभडारओ णिव्वुइं संपत्तो। तद्दिवसे चेव सुहम्माइरियो जंबूसामियादीणमणेयाणमाइरियाणं वक्खाणिददुवालसंगो घाइचउक्कखएण केवली जादो"––जयधवला पृ० ७५-७६।

"महावीरोऽर्थकर्ता। तेण महावीरेण केवलणाणिणा कहिदत्थो तम्हि चेव काले तत्थेव खेत्ते खयोवसमजणिदचउरमलबुद्धिसंपण्णेण बम्हणेण गोदमगोत्तेण सयलदुस्सुदिपारएण जीवाजीवविसयसंदेहविणासट्ठमुवगयवड्ढमाणपादमूलेण इंदभूदिणावहारिदो।..... पुणो तेणिंदभूदिणा भावसुदपज्जयपरिणदेण बारहंगाणं चोद्दसपुव्वाणं च गंथाणमेक्केण चेव मुहुत्तेण कमेण रयणा कदा। तदो भावसुदस्स अत्थपदाणं च तित्थयरो कत्ता। तित्थयरादो सुदपज्जाएण गोदमो परिणदो त्ति दव्वसुदस्स गोदमो कत्ता, तत्तो गंथरयणा जादेत्ति। तेण वि गोदमेण दुविहमवि सुदणाणं लोहज्जस्स संचारिदं। तेण वि जंबूसामिस्स संचारिदं। परिवाडिमस्सिदूण एदे तिण्णि वि सयलसुदधारया भणिया। अपरिवाडिए पुण सयलसुदपारगा संखेज्जसहस्सा"––धवला पृ० ६५-६७॥

२. "तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स नव गणा इक्कारस गणहरा हुत्था।.....थेरे अकंपिए गोयमसगुत्तेणं थेरे अयलभाया हारियायणे गुत्तेणं ते दुन्नि वि थेरा तिण्णि तिण्णि समणसयाइं वाएंति। थेरे मेअज्जे थेरे पभासे एए दुन्नि वि थेरा कोडिन्ना गुत्तेणं तिण्णि तिण्णि समणसयाइं वाएंति। से तेणट्ठेणं अज्जो एवं वुच्चइ समणस्स भगवओ महावीरस्स नव गणा इक्कारस गणहरा हुत्था"––कल्पसूत्र।

३. "एवं रचयतां तेषां सप्तानां गणधारिणाम्। परस्परमजायन्त विभिन्नाः सूत्रवाचनाः ॥१७३॥

अकम्पिता-ऽचलभ्रातॄः श्रीमेतार्य-प्रभासयोः। परस्परमजायन्त सदृक्षा एव वाचनाः ॥१७४॥

श्रीवीरनाथस्य गणधरेष्वेकादशस्वपि। द्वयोर्द्वयोर्वाचनयोः साम्यादासन् गणा नव ॥१७५॥"––त्रिषष्टिशलाकापुरुषचरित्र, पर्व १०, सर्ग ५।

"तीर्थंकरगणभृतां मिथोभिन्नवाचनत्वेऽपि साम्भोगिकत्वं भवति न वा। तथा सामाचार्यादिकृतो भेदो भवति न वा? इति प्रश्ने उत्तरम्––गणभृतां परस्परं वाचनाभेदेन सामाचार्या अपि कियान् भेदः सम्भाव्यते, तद्भेदे च कथञ्चिदसाम्भोगिकत्वमपि सम्भाव्यते"––––सेनप्रश्न, उल्लास ३, प्रश्न ८१।

४. "जे इमे अज्जत्ताए समणा निग्गंथा विहरंति एए णं सव्वे अज्जसुहम्मस्स आवच्चिज्जा, अवसेसा गणहरा निरवच्चा वुच्छिन्ना"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवतो महावीरात् १६० वर्षेषु गतेषु चतुर्दशपूर्वधरस्य भगवतो भद्रबाहुस्वामिनः समये[1] द्वादशवर्षीयदुर्भिक्षवशाद् द्वादशाङ्ग्या अनेकेऽंशा विस्मृताः साधुभिः, अतः पाटलिपुत्रे श्रमणसङ्घो मिलितः, तत्र च यस्य साधोः समीपे यदङ्गाध्ययनोद्देशकादि अविस्मृतमासीत् तत् तत आदाय एकादशाङ्ग्याः संघटनं श्रमणसंघेन विहितम्। द्वादशाङ्गस्य दृष्टिवादस्याध्ययनार्थं तु **स्थूलभद्रादयो** मुनयो **नेपालदेशमार्ग-स्थस्य भद्रबाहुस्वामिनोऽन्तिकं** गताः। सुधर्मस्वामिनः पश्चात् **प्रथमोऽयं** वाचनोद्धारः शास्त्रेषु श्रूयते।

भगवतो महावीरस्वामिनो निर्वाणात् ८२७ वर्षेषु गतेषु पुनरपि द्वादशवर्षीयदुर्भिक्षवशात् साधूनां पूर्वाधीतं श्रुतज्ञानं खण्डखण्डीभूतम्। अतो दुर्भिक्षावसाने[2] **आर्यस्कन्दिलाचार्यसन्निधौ मथुरायाम्, नागार्जुनाचार्यसन्निधौ वलभ्यां** (सौराष्ट्रदेशे) पुनरपि श्रमणसंघेन एकत्रीभूय कालिकश्रुतं संघटितम्। किन्तु परस्परं क्वचित् क्वचिद् वाचनाभेदः संजातः, द्वयोरपि आचार्ययोः ततः परं परस्परं मिलनं कदाचिदपि न जातमिति स वाचनाभेदस्तथैव स्थितः। मथुरायां या वाचना जाता सा माथुरीति भण्यते, या तु वलभीपुर्यां नागार्जुनाचार्यसन्निधौ प्रवृत्ता सा नागार्जुनीया इति गीयते।

—कल्पसूत्रस्थविरावली। "सामिस्स जीवंते णव कालगता, जो य कालं करेति सो सुधम्मसामिस्स गणं देति, इंदभूती सुधम्मो य सामिम्मि परिनिव्वुए परिनिव्वुता"—आवश्यकचूर्णि पृ० ३३९॥

१. "तम्मि य काले बारवरिसो दुक्कालो उवट्ठितो, संजता इतो इतो य समुद्दतीरे गच्छित्ता पुणरवि पाडलिपुत्ते मिलिता। तेसिं अण्णस्स उद्देसो, अण्णस्स खंडं, एवं संघाडितेहिं एक्कारस अंगाणि संघातिताणि, दिट्ठिवादो नत्थि। नेपाल-वत्तिणीए य भद्दबाहुसामी अच्छंति चोद्दसपुव्वी, तेसिं संघेण पत्थवितो संघाडओ 'दिट्ठिवादं वाएहि' त्ति गतो, निवेदितं संघकज्जं। तं ते भणंति दुक्कालनिमित्तं महापाणं न पविट्ठो मि, इयाणिं पविट्ठो मि, तो न जाति वायणं दातुं। पडिनियत्तेहिं संघस्स अक्खातं। तेहिं अण्णो वि संघाडओ विसज्जितो, जो संघस्स आणं अतिक्कमति तस्स को दंडो? ते गता, कहितं। तो अक्खाइ—उग्घाडिज्जइ, ते भणंति मा उग्घाडेह, पेसेह मेधावी, सत्त पडिपुच्छ-गाणि देमि"।—आवश्यकचूर्णि, भाग २, पृ० १८७। "इतश्च तस्मिन् दुष्काले कराले कालरात्रिवत्। निर्वाहार्थं साधुसङ्घस्तीरं नीरनिधेर्ययौ ॥५५॥ अगुण्यमानं तु तदा साधूनां विस्मृतं श्रुतम्। अनभ्यसनतो नश्यत्यधीतं धीमतामपि ॥५६॥ सङ्घोऽथ पाटलिपुत्रे दुष्कालान्ते-ऽखिलोऽमिलत्। यदङ्गाध्ययनोद्देशाद्यासीद् यस्य तदाददे ॥ ५७ ॥ ततश्चैकादशाङ्गानि श्रीसङ्घोऽमेलयत् तदा। दृष्टिवादनिमित्तं च तस्थौ किञ्चिद् विचिन्तयन् ॥५८॥ नेपालदेशमार्गस्थं भद्रबाहुं च पूर्विणम्। ज्ञात्वा सङ्घः समाह्वातुं ततः प्रैषीन्मुनिद्वयम् ॥५९॥ गत्वा नत्वा मुनी तौ तमित्यूचाते कृताञ्जली। समादिशति वः सङ्घस्तत्रागमनहेतवे ॥६०॥ सोऽप्युवाच महाप्राणध्यानमारब्धमस्ति यत्। साध्यं द्वादशभि-र्वर्षैर्नागमिष्याम्यहं ततः ॥६१॥ ' ' ' सप्त दास्यामि वाचनाः ॥८६॥ तत्रैकां वाचनां दास्ये भिक्षाचर्यात आगतः। तिसृषु कालवेलासु तिस्रोऽन्या वाचनास्तथा ॥६८॥ सायाह्नप्रतिक्रमणे जाते तिस्रोऽपराः पुनः। सेत्स्यत्येवं सङ्घकार्यं मत्कार्यस्याविबाधया ॥६९॥"—परिशिष्टपर्व, नवम सर्ग।

२. "जेसिं इमो अणुओगो पयरइ अज्जावि अड्ढभरहम्मि। बहुनगरनिग्गयजसे ते वंदे खंदिलायरिए ॥३२॥" इति नन्दीसूत्र-गाथाया व्याख्यायां चूर्णिकारेण इत्थमभिहितम्—"कहं पुण तेसिं अणुओगो? उच्यते—बारससंवच्छरिए महंते दुब्भिक्खकाले भत्तट्ठा अण्णण्णतो फिडिताणं गहण-गुणणा-ऽणुप्पेहाभावातो सुते विप्पणट्ठे पुणो सुभिक्खकाले जाते मधुराए महंते साहुसमुदए खंदिलायरियप्पमुहसंघेण 'जो जं संभरति' ति एवं संघडितं कालिय-सुतं। जम्हा य एतं मधुराए कतं तम्हा माधुरा वायणा भण्णति। सा य खंदिलायरियसम्मय त्ति कातुं तस्संतियो अणुओगो भण्णति। सेसं कंठं। अण्णे भणंति जहा—सुतं ण णट्ठं, तम्मि दुब्भिक्खकाले जे अण्णे पहाणा अणुओगधरा ते विणट्ठा, एगे खंदिलायरिए संधरे, तेण मधुराए अणुओगो पुणो साधूणं पवत्तितो त्ति माधुरवायणा भण्णति। तस्संतितो य अणुयोगो भण्णति ॥३२॥"—नन्दीचूर्णि पृ० ६।

"अत्थि महुराउरीए सुयसमिद्धो खंडिलो नाम सूरी, तहा वलहिनयरीए नागज्जुणो णाम सूरी। तेहिं य जाए बारसवरिसिए दुक्काले निव्वउभावओ विफुट्टिं (?) काऊण पेसिया दिसोदिसिं साहवो। गमिउं च कहवि दुत्थं ते पुणो मिलिया सुगाले। जाव सज्झायंति ताव खंडखरुडीभूयं पुव्वाहीयं। ततो मा सुयवोच्छित्ती होउ त्ति पारद्धो सूरिहिं सिद्धंतुद्धारो। तत्थ वि जं न वीसरियं तहेव संठवियं। पम्हुट्ठाणं उण पुव्वावरावडंतसुत्ताणुसारओ कया संघडणा।"—कहावली।

"परोप्परमसंपण्णमेलावा य तस्समयाओ खंदिल्ल-नागज्जुणायरिया कालं काउं देवलोगं गया। तेण तुल्लयाए वि तदुद्धरियसिद्धं-ताणं जो संजाओ कत्थ य वायणाभेओ सो य न चालिओ पच्छिमेहिं, तओ विवरणकारेहिं पि 'नागज्जुणीया उण एवं पढंति' त्ति समुल्लिगिया तहेवायाराइसु।"—कहावली।

"दुर्भिक्षातिक्रमे सुभिक्षप्रवृत्तौ द्वयोः सङ्घयोर्मेलापकोऽभवत्, तद्यथा—एको वलभ्याम् एको मथुरायाम्, तत्र च सूत्रार्थसंघटनेन परस्परवाचनाभेदो जातः।"—ज्योतिष्करण्डकटीका मलयगिरिसूरि-विरचिता पृ० ४१।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माथुर-नागार्जुनीयवाचनयोर्मध्ये यः पाठभेदः संजातस्तस्य कतिपया उल्लेखा आचाराङ्गचूर्णि–सूत्रकृताङ्गचूर्णि-शीलाचार्यविरचित-वृत्ति–उत्तराध्ययनचूर्णि–दशवैकालिकचूर्णिषु दृश्यन्ते । आचाराङ्गचूर्णौ पञ्चदशकृत्वः,[1] शीलाचार्यविरचितायामाचाराङ्गवृत्तौ दशकृत्वः,[2] सूत्रकृताङ्गचूर्णौ त्रयोदशकृत्वः,[3] शीलाचार्यविरचितसूत्रकृताङ्गवृत्तौ तु चतुर्षु[4] स्थानेषु चाचाराङ्ग-सूत्रकृताङ्गसंबन्धिनां नागार्जुनीय-वाचनागतानां पाठभेदानां नामग्राहमुल्लेखो दृश्यते ।

भगवतो[5] महावीरस्य निर्वाणात् ९८० वर्षे वलभ्यां **देवर्धिगणिक्षमाश्रमणप्रमुखसंघेनागमग्रन्थाः** पुस्तकेषु लिखिताः । देवर्धि-गणिक्षमाश्रमणाः माथुरसंघस्य आचार्याः । पुस्तकलेखनसमये माथुरी वाचना तैः प्रामुख्येनानुसृता इति साम्प्रतकालीनाः संशोधका विद्वांसः संभावयन्ति । तदभिप्रायेण सम्प्रति वर्तमाना आचाराङ्ग-सूत्रकृताङ्गादीनां बहूनामागमग्रन्थानां पाठपरंपरा माथुरीं वाचनामनुसरति ।

मुनिराजश्रीपुण्यविजयजीमहाभागैः 'जैन आगमधर और 'प्राकृत वाङ्मय' इत्यस्मिन् निबन्धे माथुर-वालभीवाचनादिविषये हिन्दीभाषायां यच्चर्चितं तदप्यत्र उपयोगित्वादक्षरश उद्धृयते—

"स्कन्दिलाचार्य व नागार्जुनाचार्य (वीर नि. ८२७ से ८४०)—ये स्थविर क्रमशः माथुरी या स्कान्दिली और वालभी या नागार्जुनी वाचना के प्रवर्तक थे. दोनों ही समकालीन स्थविर आचार्य थे. इनके युग में भयंकर दुर्भिक्ष उपस्थित होने के कारण जैन श्रमणों को इधर-उधर विप्रकीर्ण छोटे-छोटे समूहों में रहना पड़ा. श्रुतधर स्थविरों की विप्रकृष्टता एवं भिक्षा की दुर्लभता के कारण जैन-श्रमणों का अध्ययन-स्वाध्यायादि भी कम हो गया. अनेक श्रुतधर स्थविरों का इस दुर्भिक्ष में देहावसान हो जाने के कारण जैनआगमों का बहुत अंश नष्ट-भ्रष्ट, छिन्न-भिन्न एवं अस्त-व्यस्त हो गया, दुर्भिक्ष के अंत में ये दोनों स्थविर, जो कि मुख्य रूप से श्रुतधर थे, बच रहे थे किन्तु एक-दूसरे से बहुत दूर थे. आर्य स्कन्दिल मथुरा के आसपास थे और आर्य नागार्जुन सौराष्ट्र में. दुर्भिक्ष के अन्त में इन दोनों स्थविरों ने वी. सं. ८२७ से ८४० के बीच किसी वर्ष में क्रमशः मथुरा व वलभी में संघसमवाय एकत्र करके जैन आगमों को जिस रूप में याद था उस रूप में ग्रन्थरूप से लिख लिया. दोनों स्थविर वृद्ध होने के कारण परस्पर मिल न सके. इसका परिणाम यह हुआ कि दोनों के शिष्यप्रशिष्यादि अपनी-अपनी परम्परा के आगमों को अपनाते रहे और उनका अध्ययन करते रहे. यह स्थिति लगभग डेढ सौ वर्ष तक रही. इस समय तक कोई ऐसा प्रतिभासम्पन्न व्यक्ति नहीं हुआ जो आगमों के इस पाठभेद का समन्वय कर पाता. इसी कारण आगमों का व्यवस्थित लेखन आदि भी नहीं हो सका. जो कुछ भी हो आज जो जैनागम विद्यमान हैं वे इन दोनों स्थविरों की देन है····

देवर्धिगणि व गन्धर्व वादिवेताल शान्तिसूरि (वीर नि. ९९३)—देवर्धिगणि क्षमाश्रमण माथुरी वाचनानुयायी प्रतिभासम्पन्न समर्थ आचार्य थे. इन्हीं की अध्यक्षता में वलभी में माथुरी एवं नागार्जुनी वाचनाओं के वाचनाभेदों का समन्वय करके जैनआगम व्यव-स्थित किये गये और लिखे भी गये. गन्धर्व वादिवेताल शान्तिसूरि वालभी वाचनानुयायी मान्य स्थविर थे. इनके विषय में—

---

१. दृश्यतां श्रीमहावीरजैनविद्यालयप्रकाशिते आचाराङ्गसूत्रे पृ० २१ टि० १,८, पृ० ३३ टि० १०, पृ० ३५ टि० १३, पृ० ४० टि० १२, पृ० ४६ टि० १, पृ० ४७ टि० २, पृ० ६० टि० १, पृ० ६३ टि० ११, पृ० ६४ टि० ९, पृ० ६६ टि० १०, पृ० ६७ टि० ६, पृ० ६८ टि० १८, पृ० ८४ टि० ५, पृ० ९० टि० १०, पृ० ९४ टि० १० ॥

२. दृश्यतामस्मिन् ग्रन्थे आचाराङ्ग वृत्तौ पृ० 79, 111, 122, 132, 134, 159, 163, 171, 202 ॥

३. दृश्यतां श्रीमहावीरजैनविद्यालयप्रकाशिते सूत्रकृताङ्गसूत्रे पृ० ११ टि० १२, पृ० १६ टि० ७, पृ० २१ टि० १९, पृ० २२ टि० ८, पृ० १९१ टि० ८, पृ० १९४ टि० ७, पृ० १९५ टि० ४, पृ० २१२ टि० ४९, पृ० २४० टि० १७, २३, पृ० २४५ टि० १५, पृ० ५४२ टि० १६ ॥

४. दृश्यतामस्मिन् ग्रन्थे सूत्रकृताङ्गवृत्तौ पृ० 43, 43, 233, 243 ॥

५. "श्रीदेवर्द्धिगणिक्षमाश्रमणेन श्रीवीरादशीत्यधिकनवशतवर्षे (९८०) जातेन द्वादशवर्षीयदुर्भिक्षवशाद् बहुतरसाधुव्यापत्तौ बहुश्रुतविच्छित्तौ च जातायां ··· भविष्यद्भव्यलोकोपकाराय श्रुतभक्तये च श्रीसङ्घाग्रहाद् मृतावशिष्टतदाकालीनसर्वसाधून् वलभ्यामाकार्य तन्मुखाद् विच्छिन्नावशिष्टान् न्यूनाधिकान् त्रुटितानुत्रुटितानागमालपकाननुक्रमेण स्वमत्या संकलय्य पुस्तकारूढाः कृताः"—इति सामाचारी-शतके उपाध्यायसमयसुन्दररचिते । "तथोक्तं—वल्लहिपुरम्मि णयरे देवड्ढिपमुहसयलसंघेहिं । पुत्थे आगमलिहिओ नवसयअसियाओ वीराओ ।"—कल्पसूत्रसुबोधिका पृ० १२६ ।

"जिनवचनं च दुष्षमाकालवशादुच्छिन्नप्रायमिति मत्वा भगवद्भिर्नागार्जुन-स्कन्दिलाचार्यप्रभृतिभिः पुस्तकेषु न्यस्तम् ।"—योग-शास्त्रवृत्ति,पृ० २०७ । एतदनुसारेण नागार्जुनाचार्याणां समयेऽपि पुस्तकलेखनमभूदिति हेमचन्द्रसूरीणामभिप्रायः प्रतीयते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वालब्भसंघकज्जे उज्जमियं जुगपहाणतुल्लेहिं ।
गंधव्ववाइवेयालसंतिसूरीहिं वलहीए ॥

इस प्रकार का प्राचीन उल्लेख भी पाया जाता है. इस गाथा में 'वलभी में वालभ्यसंघ के कार्य के लिए गन्धर्व वादिवेताल शांतिसूरि ने प्रयत्न किया था' ऐसा जो उल्लेख है वह वालभ्यसंघकार्य वालभी-वाचना को लक्ष्य करके ही अधिक संभावित है. अन्यथा 'वालब्भसंघकज्जे' ऐसा उल्लेख न होकर 'संघकज्जे' इतना ही उल्लेख काफी होता. इस उल्लेख से प्रतीत होता है कि श्री देवर्धिगणि क्षमाश्रमण को माथुरी-वाचनाओं को व्यवस्थापित करने में इनका प्रमुख साहाय्य रहा होगा. दिगंबराचार्य देवसेनकृत दर्शनसारनामक ग्रन्थ में श्वेताम्बरों की उत्पत्ति के वर्णनप्रसंग में—

छत्तीसे वरिससए विक्कमरायस्स मरणपत्तस्स
सोरट्ठे उप्पण्णो सेवडसंघो हु वलहीए ॥ ४२ ॥
एवक पुण संतिणामो संपत्तो वलहीणामणायरीए ।
वहुसीससंपउत्तो विसए सोरट्ठए रम्मे ॥ ४६ ॥

इस प्रकार का उल्लेख है. यद्यपि इस उल्लेख में दिया हुआ संवत् मिलता नहीं है तथापि उपर्युक्त 'वालब्भसंघकज्जे' गाथा में निर्दिष्ट वालभ्यसंघकार्य, शांतिसूरि, वलभी आदि उल्लेख के साथ तुलना करने के लिए दर्शनसार का यह उल्लेख जरूर उपयुक्त है.

देवर्धिगणि जो स्वयं माथुर संघ के युग प्रधान थे, उनकी अध्यक्षता में वलभीनगर में एकत्रित संघसमवाय में दोनों वाचनाओं के श्रुतधर स्थविरादि विद्यमान थे, इस संघसमवाय में सर्वसम्मति से माथुरी वाचना को प्रमुख स्थान दिया गया होगा, इसका कारण यह हो सकता है कि माथुरी-वाचना के जैनआगमों की व्यवस्थितता एवं परिमाणाधिकता थी. इसमें ज्योतिष्करंडक जैसे ग्रन्थों को भी स्थान दिया गया जो केवल वालभी-वाचना में ही थे. इतना ही नहीं अपितु माथुरी-वाचना से भिन्न एवं अतिरिक्त जो सूत्रपाठ एवं व्याख्यान्तर थे उन सबका उल्लेख नागार्जुनाचार्य के नाम से तत्तत् स्थान पर किया भी गया. आचारांग आदि की चूर्णिओं में ऐसे उल्लेख पाए जाते हैं. समझ में नहीं आता कि जिस समय जैन आगमों को पुस्तकारूढ किया गया होगा उस समय इन वाचनाभेदों का संग्रह किस ढंग से किया गया होगा? जैनआगम की कोई ऐसी हस्तप्रति मौजूद नहीं है जिसमें इन वाचना भेदों का संग्रह या उल्लेख हो. आज हमारे सामने इस वाचनाभेद को जानने का साधन प्राचीन चूर्णिग्रन्थों के अलावा अन्य एक भी ग्रन्थ नहीं है. चूर्णियाँ भी सब आगमों की नहीं किन्तु केवल आवश्यक, नन्दी, अनुयोगद्वार, दशवैकालिक, उत्तराध्ययन, आचारांग, सूत्रकृतांग, भगवती, जीवाभिगम, जम्बूद्वीपप्रज्ञप्ति, निशीथ, कल्प, पंचकल्प व्यवहार एवं दशाश्रुतस्कन्ध की ही मिलती हैं.

ऊपर जिन आगमों की चूर्णियों के नाम दिए गए हैं उनमें से नागार्जुनीय—वाचनाभेद का उल्लेख केवल आचारांग, सूत्रकृतांग उत्तराध्ययन व दशवैकालिक की चूर्णियों में ही मिलता है. अन्य आगमों में नागार्जुनीय वाचना की अपेक्षा न्यूनाधिक्य या व्याख्याभेद क्या था, इसका आज कोई पता नहीं लगता. बहुत संभव है, ये वाचनाभेद चूर्णि-वृत्ति आदि व्याख्याओं के निर्माण के बाद में सिर्फ पाठभेद के रूप में परिणत हो गए हों. यही कारण है कि चूर्णिकार और वृत्तिकारों की व्याख्या में पाठों का कभी-कभी बहुत अन्तर दिखाई देता है."—पृ० ७२१–७२३ ।

"आचाराङ्गसूत्र की चूर्णि में नागार्जुनीय वाचना का उल्लेख पंद्रह जगह पाया जाता है

	चूर्णि पृ०	वृत्तिपत्र		चूर्णि पृ०	वृत्तिपत्र
१ भदन्त नागार्जुनीयास्तु पढंति	६२	११८	९ भदन्तणागज्जुणा तु	२१९	२४५
२ णागज्जुणिया पढंति	६४		१० णागज्जुणिया उ	२१९	
३ भदंत णागज्जुणिया तु पढंति	११३		११ णागज्जुणा	२३२	२५३
४ भदंत णागज्जुणिया	१२०	१६६	१२ णागज्जुणा तु	२३७	२५६
५ भदंतणागज्जुणिया पढंति	१३९	१८३	१३ णागज्जुणा	२८७	
६ एत्थ सक्खी भदन्तनागार्जुनाः	१५७	१९८	१४ णागज्जुणा तु पढंति	३०२	३०३
७ नागार्जुनीयास्तु	१६१	२०१	१५ भदन्तनागार्जुनीया तु	३१३	
८ णागज्जुणीया	२०७	२३९			

यहाँ पर आचारांगचूर्णि और शीलांकाचार्यरचित वृत्ति के जो पृष्ठ–पत्रांक आदि दिये गये हैं वे आगमोद्धारक पूज्य आचार्य श्री सागरानन्दसूरि सम्पादित आवृत्ति के हैं । उपर्युक्त पंद्रह उल्लेखों में से पांच उल्लेख शीलांकीय वृत्ति में नहीं हैं । बाकी के दस उल्लेख शीलांकाचार्य ने दिये हैं । वे सभी उल्लेख आचारांग के प्रथम श्रुतस्कन्ध की चूर्णि-वृत्ति में ही हैं । द्वितीय श्रुतस्कन्ध की चूर्णि-वृत्ति में

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

नागार्जुनीय वाचना का कोई उल्लेख नहीं है। यहां आचारांग चूर्णि में से नागार्जुनीय वाचना के जो पंद्रह उल्लेख उद्धृत किये गये हैं उनमें सात जगह अतिपूज्यतासूचक 'भदन्त' विशेषण का प्रयोग किया है जो अन्य किसी चूर्णि-वृत्ति आदि में नहीं है। इससे अनुमान होता है कि इस चूर्णि के प्रणेता, जिनके नाम का उल्लेख कहीं भी नहीं मिलता, कम से कम नागार्जुनीय परंपरा के प्रति आदर रखने वाले थे।

सूत्रकृतांग की चूर्णि में नागार्जुनीय वाचना के जो उल्लेख मिलते हैं उन सभी स्थानों पर 'नागार्जुनीयास्तु' ऐसा लिखकर ही नागार्जुनीय वाचनाभेद का उल्लेख किया गया है जो प्रथम श्रुतस्कन्ध में चार जगह व दूसरे श्रुतस्कन्ध में नौ जगह पाया गया है। आचार्य शीलांक ने अपनी वृत्ति में 'नागार्जुनीयास्तु पठन्ति' लिखकर नागार्जुनीय वाचना का उल्लेख चार जगह किया है। संभव है पिछले जमाने में नागार्जुनीय वाचनाभेद का कोई खास महत्त्व रहा न होगा।

उत्तराध्ययनसूत्र की चूर्णि में चूर्णिकार आचार्य ने पाँच स्थानों पर नागार्जुनीय वाचनाभेद का उल्लेख किया है। पाइयटीकाकार वादिवेताल शान्तिसूरिजी ने भी इन पांचों स्थानों पर नागार्जुनीय वाचनाभेद का उल्लेख किया है, किन्तु सिर्फ एक स्थान पर नागार्जुनीय वाचना का नाम न लेकर पठ्यते च [पत्र २६४–४] ऐसा लिखकर नागार्जुनीय वाचनाभेद का उल्लेख किया है।

कुछ विद्वान् स्थविर आर्य देवर्धिगणि के आगम-व्यवस्थापन व आगम-लेखन को वालभी वाचनारूप से बतलाते हैं किंतु ऊपर वालभी वाचना के विषय में जो कुछ कहा गया है उससे उसका यह कथन भ्रान्त सिद्ध होता है, वास्तव में वालभी वाचना वही है जो माथुरी वाचना के समय में स्थविर आर्य नागार्जुन ने वलभीनगर में संघसमवाय एकत्र कर जैन आगमों का संकलन किया था।

स्थविर आर्य देवर्द्धिगणि ने वलभी में संघसमवाय को एकत्रित कर जैन आगमों को व्यवस्थित किया व लिखवाया····उस समय लेखन की प्रारंभिक प्रवृत्ति किस रूप में हुई इसका स्पष्ट उल्लेख कहीं भी नहीं मिलता। सामान्यतया मुखोपमुख कहा जाता है कि वलभी में हजारों की संख्या में ग्रंथ लिखे गए थे, किन्तु हमारे सामने शीलांकाचार्य, नवांगवृत्तिकार अभयदेवसूरि आदि व्याख्याकार आचार्यों के जो विवादपूर्ण उल्लेख विद्यमान हैं उनसे तो यह माना नहीं जा सकता कि इतने प्रमाण में ग्रंथलेखन हुआ होगा।

श्री शीलांकाचार्य ने सूत्रकृतांग की अपनी वृत्ति में इस प्रकार लिखा है :

"इह च प्रायः सूत्रादर्शेषु नानाविधानि सूत्राणि दृश्यन्ते, न च टीकासंवादी एकोऽप्यादर्शः समुपलब्धः, अतः एकमादर्शमङ्गीकृत्यास्माभिर्विवरणं क्रियत इति, एतदवगम्य सूत्रविसंवाददर्शनाच्चित्तव्यामोहो न विधेय इति।" (मुद्रित पत्र ३३६–१)

अर्थात् चूर्णिसंमत मूलसूत्र के साथ तुलना की जाय ऐसी एक भी मूलसूत्र की हस्तप्रति आचार्य शीलांक को नहीं मिली थी। श्री अभयदेवाचार्य ने भी स्थानांग, समवायांग व प्रश्नव्याकरण इन तीनों अंग आगमों की वृत्ति के प्रारम्भ एवं अंत में इसी आशय का उल्लेख किया है जो क्रमशः इस प्रकार है।

१. वाचनानामनेकत्वात्, पुस्तकानामशुद्धितः। सूत्राणामतिगांभीर्याद् मतभेदाच्च कुत्रचित् ॥ २ ॥

२. यस्य ग्रंथवरस्य वाक्यजलधेर्लक्षं सहस्राणि च, चत्वारिंशदहो ! चतुर्भिरधिका मानं पदानामभूत्।
तस्योच्चैश्चुलुकाकृति विदधतः कालादिदोषात् तथा, दुर्लेखात् खिलतां गतस्य कुधियः कुर्वन्तु किं मादृशाः ? ॥ २ ॥

३. अज्ञा वयं शास्त्रमिदं गभीरं, प्रायोऽस्य कूटानि च पुस्तकानि। सूत्रं व्यवस्थाप्यमतो विमृश्य, व्याख्यानकल्पादित एव नैव ॥५॥

ऊपर उदाहरण के रूप में श्री शीलांकाचार्य व श्री अभयदेवाचार्य के जो उल्लेख दिए हैं उनसे प्रतीत होता है कि वलभी में स्थविर आर्य देवर्द्धिगणि, गंधर्ववादिवेताल शांतिसूरि आदि के प्रयत्न से जो जैन आगमों का संकलन एवं व्यवस्थापन हुआ और उन्हें पुस्तकारूढ किया गया, यह कार्य जैन स्थविर श्रमणों की जैनआगमादि को ग्रंथारूढ करने की अल्परुचि के कारण बहुत संक्षिप्त रूप में ही हुआ होगा तथा निकट भविष्य में हुए वलभी के भंग के साथ ही वह व्यवस्थित किया हुआ आगमों का लिखित छोटा-सा ग्रंथ-संग्रह नष्ट हो गया होगा। परिणाम यह हुआ कि आखिर जो स्थविर आर्य स्कन्दिल एवं स्थविर आर्य नागार्जुन के समय की हस्तप्रतियां होंगी, उन्हीं की शरण व्याख्याकारों को लेनी पड़ी होगी। यही कारण है कि प्राचीन चूर्णियां एवं व्याख्याग्रंथों में सैकड़ों पाठभेद उल्लिखित पाये जाते हैं जिनका उदाहरण के रूप में मैं यहाँ संक्षेप में उल्लेख करता हूं।

आचारांगसूत्र की चूर्णि में चूर्णिकार ने नागार्जुनीय वाचना के उल्लेख के अलावा 'पढिज्जइ य' ऐसा लिखकर उन्नीस स्थानों पर पाठभेद का उल्लेख किया है। आचार्य श्री शीलांक ने भी अपनी वृत्ति में उपलब्ध हस्तप्रतियों के अनुसार कितने ही सूत्रपाठभेद दिये हैं।

इसी प्रकार सूत्रकृतांगचूर्णि में भी नागार्जुनीय वाचनाभेद के अलावा 'पठ्यते च, पठ्यते चान्यथा सद्भिः, अथवा, अथवा इह तु, मूलपाठस्तु, पाठविशेषस्तु, अन्यथा पाठस्तु, अयमपरकल्पः, पाठान्तरम्' आदि वाक्यों का उल्लेख कर केवल प्रथमश्रुतस्कन्ध की चूर्णि में ही लगभग सवासौ जगह जिन्हें वास्तविक पाठभेद माना जाय ऐसे उल्लेखों की गाथा की गाथाएं, पूर्वार्ध के पूर्वार्ध व चरण के चरण पाये जाते हैं। द्वितीय श्रुतस्कन्ध के पाठभेद तो इसमें शामिल ही नहीं किये गये हैं। आचार्य शीलांक ने भी बहुत से पाठभेद दिये हैं, फिर भी चूर्णिकार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

की अपेक्षा ये बहुत कम हैं। यहां पर एक बात विशेष ध्यान देने योग्य है कि स्वयं आचार्य शीलांक ने स्वीकार किया है कि 'हमें चूर्णिकार-स्वीकृत आदर्श मिला ही नहीं।[1] यही कारण है कि उनकी टीका में चूर्णि की अपेक्षा मूल सूत्रपाठ एवं व्याख्या में बहुत अन्तर पड़ गया है। इसके साथ मेरा यह कथन है कि आज हमारे सामने जो प्राचीन सूत्रप्रतियां विद्यमान हैं उनके पाठभेदों का संग्रह किया जाय तो सीमातीत पाठभेद मिलेंगे। इनमें अगर भाषाप्रयोग के पाठभेदों को शामिल किया जाय तो मैं समझता हूं कि पाठभेदों का संग्रह करने वाले का दम निकल जाय। फिर भी यह कार्य कम महत्त्व का नहीं है।"

देवर्धिगणिक्षमाश्रमणप्रमुखसंघेन **बलभ्यां** पुस्तकेषु लिखितायामपि आगमवाचनायां कालान्तरेण बहवः पाठभेदाः संजाता इति संभाव्यते, यतः चूर्णिषु वृत्तिषु च तत्र तत्र बहवः पाठभेदा निर्दिष्टाः। किञ्च, आचाराङ्ग-सूत्रकृताङ्गचूर्णिकृतां समक्षं या पाठपरम्परा आसीत् ततोऽप्यनेकेषु स्थानेषु अल्पीयसा भूयसा वांशेन भिन्ना पाठपरम्परा वृत्तिकृतां शीलाचार्याणां समक्षमासीत्। अतएव शीलाचार्यैः

"इह च प्रायः सूत्रादर्शेषु नानाविधानि सूत्राणि दृश्यन्ते, न च टीका(चूर्णि)संवादी एकोऽप्यादर्शः समुपलब्धः। अत एकमादर्शमङ्गीकृत्यास्माभिर्विवरणं क्रियत इति, एतदवगम्य सूत्रविसंवाददर्शनाच्चित्तव्यामोहो न विधेय इति।" (सूत्रकृताङ्गवृत्ति पृ० ३३६) इति वचनेन स्वकीयं मानसिकं कष्टं स्पष्टमेवावेदितम्।

एवं च चूर्णिकृद्भिः तेषां समक्षं यः पाठ आसीत् तदनुसारेण चूर्णिर्विरचिता, वृत्तिकृद्भिः शीलाचार्यैस्तु तेषां समक्षं य पाठ आसीत् तदनुसारेण टीका विरचिता। तत उभयोः पाठयोराचाराङ्गसूत्रस्य प्रथमे श्रुतस्कन्धे क्वचित् क्वचित् स्वल्पो भेदो दृश्यते, द्वितीये श्रुतस्कन्धे तु भूयान् पाठभेदः, तत्रापि दशमाध्ययनादारभ्य अनेकेषु स्थानेषु अतीव अतीव पाठभेदो दृश्यते। वृत्तिकृच्छीलाचार्यानुसृतपाठपरम्परापेक्षया आचाराङ्गचूर्णिकृदनुसृता पाठपरम्परातीव प्राचीना प्रायः शोभनतरा च वर्तते। सम्प्रति या आचाराङ्गसूत्रस्य पाठपरम्परा हस्तलिखितादर्शेषु दृश्यते सा वृत्तिकृदनुसृतपाठपरम्परयैव प्रायशः संवदति। चूर्णिकृदनुसृतपाठपरम्परासम्बद्धा बहव आचारांगसूत्रप्रतीकाश्चूर्णौ समुपलभ्यन्ते, तदनुसारेण चूर्णिकृदभिमताः पाठभेदाः, श्रीमहावीरजैनविद्यालयप्रकाशित आचाराङ्गसूत्रे टिप्पणेषु विस्तरेण दर्शिता इति तत्रैव विलोकनीयाः विशेषतो जिज्ञासुभिः।[2]

किञ्चान्यत्, आचाराङ्गसूत्रस्य द्वितीये श्रुतस्कन्धे द्वितीयायां चूलायां सप्तैककाख्यानि सप्ताध्ययनानि वर्तन्ते तत्र चूर्णिकृता चतुर्थो 'रूप'सप्तैकक: पञ्चमश्च 'शब्द'सप्तैकको निर्दिष्टो व्याख्यातश्च तथा, शीलाचार्यादिभिर्वृत्तिकारैस्तु चतुर्थः 'शब्द'सप्तैककः पञ्चमस्तु 'रूप'सप्तैकको निर्दिष्टस्तथैव व्याख्यातश्च, अतोऽत्र चूर्णि-वृत्तिनिर्दिष्टयोः पाठयोर्मध्ये परस्परमत्यन्तं भेदो वर्तते। द्वितीये श्रुतस्कन्धे षोडशे भावनाध्ययने चूर्णिकृता व्याख्यातः 'छिन्नसोते निरुवलेवे कंसपादी व मुक्कतोये' इत्यादिर्भूयान् पाठः सम्प्रति भावनाध्ययने नोपलभ्यते, भावनाध्ययनप्रान्तभागे चूर्णिकृता व्याख्याताः 'रियासु नित्यं समितो सता जते' इत्यादयः षड् गाथा अपि सम्प्रति भावनाध्ययने न दृश्यन्ते। जिज्ञासुभिर्महावीरजैनविद्यालयप्रकाशितमाचाराङ्गसूत्रं द्रष्टव्यम्।

केनचिदंशेन दिगम्बरैस्तुल्यः केनचिच्चांशेन श्वेताम्बरैस्तुल्यो यापनीयसंघोऽपि पुरातनकाले आसीत्। यापनीयसंघस्य भूयांसो ग्रन्था मन्दिर-मूर्त्यादिकं च सम्प्रति दिगम्बरसंघे समाविष्टम्। यापनीयसंघे दिगम्बरसंघे वा आचाराङ्गस्य किंभिन्ना विशिष्टा वा पाठपरम्परा-ऽऽसीदित्यपि दिगम्बरेषु बहुमतस्य **मूलाराधना**ग्रन्थस्य अपराजितसूरिविरचितायाः[3] विजयोदयायाष्टीकाया अवलोकनात् प्रतीयते। तथाहि तत्तुलना—

---

१. स्थानाङ्गसूत्रे तु नवमेऽध्ययने **जहा भावणाए** इति भावनाध्ययनस्थस्यास्य पाठस्यातिदेशो दृश्यते॥

२. दृश्यतां स्त्रीनिर्वाण-केवलि-भुक्तिप्रकरणप्रस्तावना॥

३. अयं टीकाकारो दिगम्बरः, प्रासङ्गिकवस्त्रपात्रादिस्वीकाराद् यापनीयसंघानुयायी वा प्रतीयते। तथा चायं तट्टीकागतः पाठः—

"अथैवं मन्यसे पूर्वागमेषु वस्त्रपात्रादिग्रहणमुपदिष्टम्। तथाहि आचारप्रणिधौ भणितम्—'प्रतिलिखेत् पात्रकम्बलं ध्रुवम्' [ध्रुवं च पडिलेहेज्जा जोगसा पायकम्बलं। दशवै० ८।१७] इति। असत्सु पात्रादिषु कथं प्रतिलेखना ध्रुवं क्रियते? आचारस्यापि द्वितीयोऽध्यायो लोकविच(ज?)यो नाम, तस्य पञ्चमे उद्देशे एवमुक्तम्—"पडिलेहणं पादपुंछणं उग्गहं कडासणं अण्णदरं उवधिं पावेज्ज" इति। तथा वत्थेसणाए उक्तं—"तत्थ ए(ये) से हिरिमणे सेगं वत्थं वा धारेज्ज पडिलेहणगं बिदियं। तत्थ ए से जुग्गिदे दे(?)से दुवे वत्थाणि धारिज्ज, पडिलेहणगं तदियं। तत्थ ए से परिस्सहं अणधिहासस्स तओ वत्थाणि धारेज्ज पडिलेहणं चउत्थं।" तथा पायेसणाए कथितं। —"हिरिमणे वा जुग्गिदे वा विअण्णगे वा तस्स णं कप्पदि वत्थादिकं पादं चारित्तए" इति। पुनश्चोक्तं तत्रैव—"अलाबुपत्तं वा दारुगपत्तं वा मट्टिगपत्तं वा अप्पपाणं अप्पस(ह)रिदं तथाप्पकारं पात्रं लाभे सति पडिग्गहिस्सामि" इति। वस्त्र-पात्रे यदि न ग्राह्ये, कथमेतानि सूत्राणि नीयन्ते? भावनायां चोक्तम्—"वरिसं चीवरधारी तेण परमचेलके तु जिणे" इति। तथा सूत्रकृतस्य पुण्डरीकेऽध्याये कथितम्—"ण कहेज्जा धम्मकहं वत्थपत्तादिहेदुं" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलाराधनाटीका

तथाचोक्तमाचाराङ्गे—सुदं मे आउस्संतो भगवदा एवमक्खादं —इह खलु संयमाभिमुखा दुविहा इत्थीपुरिसा(स)जादा भवंति, तं जहा—सव्वसम णागदे, णोसव्वसमा(मण्णा)गदे चेव । तत्थ जे सव्वसमण्णागदे थिरांग-हत्थ-पाणि-पादे सव्विंदियसमण्णागदे तस्स णं णो कप्पदि एगमवि वत्थं धारिउं, एवं परिहिउं, एवं अण्णत्थ एगेण पडिलेहगेण ।

अह पुण एवं जाणिज्जा—उपातिकंते हेमंते, घिसु पडिवण्णे, से अथ परिजुण्णमुवधिं पदिट्ठावेज्ज ।

—४।४२१ टीका, पृ० ६१२

पडिलेहणं पादपुंछणं उग्गहं कडासणं अण्णदरं उवधिं पावेज्ज ।

—४।४२१ टीका, पृ० ६११

तथा वत्थेसणाए वुत्तं—"तत्थ ये से हिरिमणे सेगं वत्थं वा धारेज्ज, पडिलेहणगं बिदियं । तत्थ ये से जुग्गिदे दे से दुवे वत्थाणि धारिज्ज, पडिलेहणगं तदियं । तत्थ ये से परिसा(सहा)इं अणधिहास(से) स्स(से) तओ वत्थाणि धारेज्ज, पडिलेहणं चउत्थं ।"

—४।४२१ टीका, पृ० ६११

तथा पाएसणाए कथितं—हिरिमणे वा जुग्गिदे वा विअण्णगे वा तस्स णं कप्पदि वत्थादिकं पाद(दं) चा(धा)रित्तए । पुनश्चोक्तं तत्रैव—अलाबुपत्तं वा दारुगपत्तं वा मट्टिगपत्तं वा अप्पपाणंअप्पबीजं अप्पस(ह)रिदं तथाप्पकारं पात्रं लाभे सति पडिग्गहिस्सामि ।"

—४।४२१ टीका, पृ० ६११

भावनायां चोक्तम्—"वरिसं चीवरधारी तेण परमचेलके तु जिणे ।"

—४।४२१ टीका, पृ० ६११

आचाराङ्गसूत्रम्

अह पुण एवं जाणेज्जा 'उवातिक्कंते खलु हेमंते, गिम्हे पडिवण्णे' अहापरिजुण्णाइं वत्थाइं परिट्ठवेज्जा । (सू० २१२)

वत्थं पडिग्गहं कंबलं पादपुंछणं उग्गहं च कडासणं एतेसु चेव जाणेज्जा (सू० ८९)

जे णिग्गंथे तरुणे जुगवं बलवं अप्पायंके थिरसंघयणे से एगं वत्थं धारेज्जा, णो बितियं । (पृ० 262 सू० १४१)

से भिक्खू वा २ अभिकंखेज्जा पायं एसित्तए। से ज्जं पुण पायं जाणेज्जा, तंजहा—लाउयपायं वा दारुपायं वा मट्टियापायं वा तहप्पगारं पायं जे णिग्गंथे तरुणे जाव थिरसंघयणे से एगं पायं धारेज्जा णो बितियं । (पृ० 266 सू० १५२)

. **निषेधे (निशीथे)**ऽप्युक्तम्—'कसिणाइं वत्थ-कंबलाइं जो भिक्खू पडिग्गहिदि पज्जदि मासिगं लहुगं ।' एवं सूत्रनिर्दिष्टे चेले अचेलता कथम् ? इत्यत्रोच्यते—आर्यिकाणामागमे अनुज्ञातं वस्त्रं, कारणापेक्षया भिक्षूणां, ह्रीमान् अयोग्यशरीरावयवो दुश्चर्माऽभिलम्बमानबीजो वा परीषहसहने वा अक्षमः स गृह्णाति । तथा चोक्तमाचाराङ्गे—

'सुदं मे आउसत्तो(न्तो) ! भगवदा एवमक्खादं—इह खलु संयमाभिमुखा दुविहा इत्थी-पुरिसजादा भवंति, तं जहा—सव्वसमण्णागदे णोसव्वसमागदे चेव । तत्थ जे सव्वसमण्णागदे थिरांगहत्थपाणिपादे सव्विंदियसमण्णागदे तस्स णं णो कप्पदि एगमवि वत्थं धारिउं, एवं परिहिउं, एवं अण्णत्थ एगेण पडिलेह[ण]गेण । तथा चोक्तं कल्पे—हिरिहेतुकं व होइ देहदुगुंछंति देहे जुग्गिदगे । धारेज्ज सियं वत्थं परिस्सहाणं चउण्हाधिहासी ति । द्वितीयमपि सूत्रं कारणमपेक्ष्य वस्त्रग्रहणमित्यस्य प्रसाधकम् **आचारे** विद्यते—'अह पुण एवं जाणेज्ज उपातिकंते हेमंते हिं(घिं)सु पडिवण्णे से अथ परिजुण्णमुवधिं पदिट्ठावेज्ज' इति । हिमसमये शीतबाधाऽसहः परिगृह्य चेलं तस्मिन्निष्क्रान्ते ग्रीष्मे समायाते प्रतिष्ठापयेदिति कारणापेक्षं ग्रहणमाख्यातम् । परिजीर्णविशेषोपादानाद् दृढानामपरित्याग इति चेत्, अचेलतावचनेन विरोधः । प्रक्षालनादिकसंस्कारविरहात् परिजीर्णता वस्त्रस्य कथिता न तु दृढस्य(स्या) त्यागकथनार्थम् । पात्रप्रतिष्ठापना सूत्रे णो-(नो)क्तेति संयमार्थं पात्रग्रहणं सिध्यति इति मन्यसे, नैव, अचेलता नाम परिग्रहत्यागः, पात्रं च परिग्रह इति तस्यापि त्यागः सिद्ध एवेति । तस्मात् कारणापेक्षं वस्त्रपात्रग्रहणम् । यदु(द्यु)पकरणं गृह्यते कारणमपेक्ष्य ग्रहणविधिः गृहीतस्य च परिहरणमवश्यं वक्तव्यमेव । तस्माद् वस्त्रं पात्रं चार्थाधिकारमपेक्ष्य सूत्रेषु बहुषु यदुक्तं तत् कारणमपेक्ष्य निर्दिष्टमिति ग्राह्यम्।"—पृ० ६११-१२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुलना–आचाराङ्गसूत्रे विद्यमानाः केचन विचाराः शब्दाश्च बौद्धादिग्रन्थेष्वपि दृश्यन्ते, यथा—पृ० 11 मध्ये 'नत्थि मे आया उववाइए' इति वर्तते। बौद्धग्रन्थे दीघनिकायादौ (भाग १, पृ ४८) 'नत्थि सत्ता ओपपातिका' इति अजितकेशकम्बलमतं वर्णितमस्ति। पृ० 87 मध्ये 'सव्वामगंधं परिन्नाय निरामगंधो परिव्वए' इति द्वितीयाध्ययने पञ्चमोद्देशके वर्तते। बौद्धानां सुत्तपिटके सुत्तनिपाते (पृ० ३०५-३०६) आमगन्धसुत्तं वर्तते, तत्र पुनः पुनः 'आमगंध' शब्दो वर्तते, 'निरामगन्ध' शब्दोऽपि वर्तते। "आमगन्धो नाम मंस-मच्छम्" इति व्याख्यापि बुद्धघोषाचार्यविरचितायां सुत्तनिपात-अट्ठकथायां (भाग २, पृ० ४६) वर्तते। पृ० 101 मध्येऽत्र 'सुत्ता अमुणी सया मुणिणो जागरंति' इति सूत्रं वर्तते। भगवद्गीतायां "या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥२।६९॥" इति वर्तते। पृ० 106-107 मध्येऽत्र 'तिविज्ज' शब्दो वर्तते, वृत्तौ चूर्णौ च 'अतिविद्वान्' 'अतिविद्यः' इति चार्थद्वयमस्य दर्शितम्। वेदत्रयज्ञाता त्रैविद्य उच्यते वैदिकशास्त्रेषु। बौद्धग्रन्थे सुत्तनिपाते [पृ० २४८-२५०] तेविज्जसुत्तं वर्तते, १ पूर्वजन्मज्ञानं, २ जन्ममरणज्ञानम्, ३ आस्रवक्षयज्ञानं चेति विद्यात्रयं तत्राभिप्रेतम्, तद्वांश्च तेविज्ज उच्यते बौद्धग्रन्थेषु।

पृ० 111 मध्ये 'दोहि वि अंतेहिं अदिस्समाणेहिं' इति वर्तते, पृ० 129 मध्ये च "जस्स नत्थि पुरा पच्छा मज्झे तस्स कुओ सिया" इति वर्तते। तेजोबिन्दूपनिषदि "आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते। येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ १।२३॥" इति वर्तते। गौडपादकारिकायाम् "आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा। २।६।" इति वर्तते। बौद्धग्रन्थे सुत्तनिपाते [पृ० ३६७] "यस्स पुरे च पच्छा च मज्झे च नत्थि किञ्चनं। अकिञ्चनं अनादानं तमहं ब्रूमि ब्राह्मणम् ॥" इति वर्तते। पृ० 111 मध्ये 'से न छिज्जइ न भिज्जइ न डज्झइ न हंमइ कंचणं सव्वलोए' इति वर्तते। भगवद्गीतायामपि "न हन्यते हन्यमाने शरीरे ॥२।२०॥ ···अच्छेद्योऽयमदाह्योऽय-मक्लेद्योऽशोष्य एव च ॥··· २।२४॥" इत्यादि वर्तते। "न भिद्यते न दह्यते न छिद्यते न कम्पते न कुप्यते, सर्वदहनोऽयमात्मा" इति सुबालोपनिषदि नवमखण्डे दृश्यते। पृ० 140 मध्येऽत्र 'पुव्वुट्ठाई पच्छानिवाई' इति वर्तते। बौद्धग्रन्थे दीघनिकायेऽपि (भाग १, पृ० ५३) 'पुब्बुट्ठायी पच्छानिपाती' इति दृश्यते। पृ० 150 मध्येऽत्र "तुमं सि नाम सच्चेव" इत्यादि सूत्रं वर्तते। छान्दोग्योपनिषदि (६।८।७इत्यादौ) "तत् त्वमसि" इति महावाक्यं वर्तते। पृ० 153 मध्ये "सव्वे सरा नियट्टंति" इत्यादि सिद्धस्वरूपवर्णनमत्र वर्तते। एतेन किञ्चित् किञ्चित्तुल्यं ब्रह्मणः स्वरूपं बृहदारण्यकोपनिषदि (३।८।३) अन्यासु च केन-कठ-माण्डूक्य-तैत्तिरीयाद्युपनिषत्सु संक्षेपेण दृश्यते।

आचाराङ्गसूत्रस्य व्याख्याः

निर्युक्तिः—आचाराङ्गसूत्रस्य सम्प्रति उपलभ्यमानासु व्याख्यासु चतुर्दशपूर्वविदा भगवता भद्रबाहुस्वामिना प्राकृतभाषायां विरचिता निर्युक्तिः प्राचीनतमा व्याख्या। अस्याश्च परिमाणं ३६७ गाथाः। सप्तमं महापरिज्ञाध्ययनं सूत्रतो व्यवच्छिन्नम्, किंतु तस्य १८ निर्युक्तिगाथाः सन्ति। तासु उपयोगिन्यः सप्तैव गाथा अत्र ग्रन्थप्रान्ते [पृ०288] मुद्रिताः। गाथात्रयं पृ० 239 मध्येऽनवधानादमुद्रितम्, तदपि पृ० 320 मध्येऽस्माभिः शुद्धिपत्रके निर्दिष्टम्। क्वचिद्धस्तलिखितादर्शे तु पृ० 288 इत्यत्र निर्दिष्टं "सत्तहिं छहिं" इत्यादि अन्त्यं गाथाद्वयं नोपलभ्यत इत्यपि ध्येयम्।

विवरणम्—ततः परं विक्रमनृपतो द्विशतवर्षेषु व्यतीतेषु गन्धहस्तिविरचितम् आचाराङ्गसूत्रविवरणमासीदिति **हिमवंत-[1] थेरावलीवचनादवसीयते**। शीलाचार्यैस्तु आचाराङ्गसूत्रस्य प्रारम्भे [पृ० 1 पं० ४] "**शस्त्रपरिज्ञाविवरणमतिबहु गहनं च गन्धहस्ति-कृतम्। तस्मात् सुखबोधार्थं गृह्णाम्यहमञ्जसा सारम् ॥३॥**" इत्युक्तम्, द्वितीयाध्ययनप्रारम्भे (पृ० 55 पं० २) च "**शस्त्रपरिज्ञाविवरण-मतिगहनमितीव किल वृत्तं पूज्यैः। श्रीगन्धहस्तिमिश्रैर्विवृणोमि ततोऽहमवशिष्टम् ॥२॥**" इत्यभिहितम्, अतः शीलाचार्यवचनानुसारेण शस्त्रपरिज्ञाख्यस्य प्रथमाध्ययनस्यैव विवरणं गन्धहस्तिना विरचितम्। यद्वा तेषां समये प्रथमाध्ययनपर्यन्तमेव गन्धहस्तिविरचितं विवरणमभूत्। सम्प्रति तु विवरणमिदं नोपलभ्यते।

---

१. "आर्यरेवतीनक्षत्राणाम् आर्यसिंहाख्याः शिष्या अभूवन्, ते च ब्रह्मद्वीपिकाशाखोपलक्षिता अभूवन्। तेषामार्यसिंहानां स्थविराणां मधुमित्राऽऽर्यस्कन्दिलाचार्यनामानौ द्वौ शिष्यावभूताम्। आर्यमधुमित्राणां शिष्या आर्यगन्धहस्तिनोऽजीव विद्वांसः प्रभावकाश्चा-भूवन्। तैश्च पूर्वस्थविरोत्तंसोमास्वातिवाचकरचिततत्त्वार्थोपरि अशीतिसहस्रश्लोकप्रमाणं महाभाष्यं रचितम्। एकादशाङ्गोपरि चार्य-स्कन्दिलस्थविराणामुपरोधतस्तैर्विवरणानि रचितानि। यदुक्तं तद्रचिताचाराङ्गविवरणान्ते यथा—

थेरस्स महुमित्तस्स, सेहेहिं तिपुव्वनाणजुत्तेहिं। मुणिगणविवंदिएहिं, ववगयरागाइदोसेहिं ॥१॥

बंभद्दीवियसाहामउडेहिं गंधहत्थिविबुहेहिं। विवरणमेयं रइयं दोसयवासेसु विक्कमओ ॥२॥"—हिमवंतथेरावली। बृहत्कल्पसूत्रस्य षष्ठभागस्य प्रस्तावनायाम् आमुखे (पृ० ३-४) उद्धृतोऽयं हिमवंतथेरावलीपाठः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चूर्णिः—आचाराङ्गसूत्रस्य निर्युक्तेश्च प्राचीनतमेयं व्याख्या,[1] इयं च संस्कृतमिश्रितप्राकृतभाषायां लिखिता। यापनीयानां[2] निर्देशः, शून्यवादिबौद्धानां[3] बौद्धाचार्यदिङ्नागमतस्य, सांख्यकारिकादेश्चोल्लेख इत्यादि बहुतरमैतिह्योपयोग्यपि अत्र दृश्यते। अस्याः प्रकाशनम ऋषभदेवजी केसरीमलजी—रतलाम—इत्यनया संस्थया कृतमस्ति, तथापि तत्र पदे पदे प्रचुरा अशुद्धयो दृश्यन्ते,[4] अतोऽस्य ग्रन्थस्य संशोधनं विधाय पुनर्मुद्रणमावश्यकम्।

टीका—ततः परं शीलाचार्यैः संस्कृतभाषायां विरचिता महती वृत्तिरुपलभ्यते। सा चास्मिन् ग्रन्थे प्रकाश्यते। इमामेव महतीं वृत्तिमुपजीव्य कालान्तरे विरचिता दीपिकादयोऽनेकाः संक्षिप्ता वृत्तयः समुपलभ्यन्ते। बहूनां विषयाणां वादानां चाकररूपेयं वृत्तिः।

अस्या वृत्तेः रचयितॄणां शीलाचार्याणां 'शीलाङ्काचार्य'[5] नाम्ना प्रसिद्धिः सम्प्रति वर्तते, तथापि आचाराङ्गटीकायां पृ० 211-212 मध्ये सूत्रकृताङ्गटीकायां च पृ० 285 मध्ये 'शीलाचार्य' नाम्नैव स्वोल्लेखस्तैरेव विहित इति वयमपि 'शीलाचार्य' नाम्ना निर्दिशामः। तत्त्वादित्य इत्यपि तेषामपरं नाम।

खंभातनगरे श्रीशान्तिनाथतालपत्रीयजैनज्ञानभाण्डागारे विद्यमानायां विक्रमसंवत् १३२७ वर्षे पौषशुदि १० भौमे लिखितायां प्राचीनतरायां प्रतौ—

"शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुरशीत्यधिकेषु वैशाखपञ्चम्यामाचारटीका दृब्धेति।

---

१. निशीथचूर्णिर्जिनदासगणिमहत्तरविरचिता। निशीथचूर्णेः प्रारम्भे भणिया "विमुत्तिचूला अहुणावसरो णिसीहचूलाए। को संबंधो तस्सा? भण्णइ इणमो णिसामेहि ॥४॥" इति गाथा विलोक्यते, तदनुसारेण आचाराङ्गचूर्णिरपि एककर्तृकाऽतश्च जिनदासगणिमहत्तरविरचितेति प्रतिभाति॥

२. "आह—जइ एवं अप्प-बहु-अणु-थुल्लचेयणाचेयणदव्वआदाणातो परिग्गहो भवति, तेण जे इमे सरीरमित्तपरिग्गहा पाणिपुडभोइणो ते णाम अपरिग्गहा, तं जहा—उदुंडग-बोडिय-सरक्खमादि, तेसिं अप्पादिपरिग्गहवियप्पा णत्थि, तं च [ऽ]परिग्गहं भत्तं (वतं) लद्धं सेसाणि वि वयाणि तेसिं भविस्संति, वतित्ते य संजमो, ततो मोक्ख इति। तं च ण भवति, जम्हा **एतदेवेगेसिं महब्भयं भवति**। जे बोडियादि आउक्काया रसगादि तिविहेंति (आउक्काय-उद्देसिगादि गिण्हेंति?) **तेसिं तदेव** सरीरं **महब्भयं**। जे वि आउक्काय-उद्देसिगादि परिहरंति **जावणिज्जाइणो ते** वि अपडिलेहितं भुंजंति अपडिलेहिते य ठाणादीणि करेंति"—१४९ सूत्रस्य आचाराङ्गचूर्णिः।

३. "अततीति अप्पा, हेउ-पच्चयसामग्गिपिहब्भावेसु अहावा (=अभावा), हेतुर्वीर्यं, पच्चओ पाणियं भूमी आगासं कालो एवमादि, एतेहिं कुहेऊहिं 'अत्थि अप्पा' एवं एगेसिं णो परिण्णातं भवति"—प्रथमसूत्रस्य आचाराङ्गचूर्णिः।

"पुव्वुत्तरविरुद्धं भासित्ता तो (ते) य विणासेंति ' ' ' केति भणंति—अत्थि लोगो। णणु अत्थिमेव लोगो, तेण कहं विणासितं? भणिज्जइ—लोगअत्थितं पति अविरोधो (धा?) णाणाविहेहिं सच्छंद-विगप्पेहिं विणासेंति, तंजहा—लोगो किर वामतो केसिंचि णिच्चं भवति आदिच्चे। अवट्ठियमेव तं आदिच्चमंडलं। दूरत्थाओ जे पुव्वं पासंति तेसिं आइच्चोदयो, आइच्चमंडलहिट्ठियाणं मज्झण्ह (ण्हं), जे तु दूरातिक्कंता आइच्चमंडलं ण पस्संति तेसिं अत्थमिओ। ' ' ' णत्थि लोए त्ति **वइत्तलिया** पडिवन्ना, तंजहा—'गंधव्वनगरतुल्लं मातागारग हेतु-पच्चय-सामग्गिपिहब्भावेहि अभावा' एवमादि हेऊहिं णत्थि लोगो पडिवज्जंति। **धुवो लोगो वायं** वियुंजंति सत्कार्यकारणत्वात्, तेसिं ण किंचि उप्पज्जति विणस्सती वा।

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्॥ [सांख्यकारिका ९]

एगे भणंति "जातिरेव भावानां विनाशहेतु" मि (रि) ति।"—१९९ सूत्रस्य आचाराङ्गचूर्णिः।

हेतुप्रत्ययसामग्रीपृथग्भावेष्वभावात् सर्वभावानां शून्यत्वं विग्रहव्यावर्तन्यादौ नागार्जुनेन सिद्धान्तितम्। वैदल्यप्रकरणमपि नागार्जुनेन विरचितम्॥

४. "प्रत्नानामप्यादर्शानामशुद्धतमत्वात् कृतेऽपि यथामति शोधने न सन्तोषः, परं प्रवचनभक्तिरसिकताप्रसारणेऽस्याः प्रयोजिकेति विद्वद्भिः शोधनीयैषा चूर्णिः, क्षाम्यतु चापराधं श्रुतदेवीति।" इत्येवमाचाराङ्गचूर्णेः प्रान्ते तत्सम्पादकैः श्रीसागरानन्दसूरिपादैः स्वयमेवाभिहितम्॥

५. खंभातनगरे श्रीशान्तिनाथतालपत्रीयजैनज्ञानभाण्डागारे विद्यमानायां विक्रमसंवत् १३२७ वर्षे लिखितायां प्रतौ "आचार्यश्रीशीलांगविरचितायामाचारटीकायां द्वितीयश्रुतस्कन्धः समाप्तः" [पृ० ३६६] इत्युल्लेखोपि दृश्यते, पत्तन (पाटण) नगरे विद्यमानायां संघवीपाडाजैनज्ञानभाण्डागारसत्कायां विक्रमसंवत् १४६७ वर्षे लिखितायां प्रतावपि "आचार्यश्रीशीलांगविरचितायामाचारटीकायां द्वितीयश्रुतस्कन्धः परिसमाप्तः" [पृ० ३६६] इति शीलांगनाम्नोऽपि उल्लेखो दृश्यते, 'शीलाचार्य'नाम्नस्तु उल्लेख उभयत्रापि वर्तत एव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीलाचार्येण कृता गम्भूतायां स्थितेन टीकैषा । सम्यगुपयुज्य शोध्या मात्सर्यविनाकृतैरार्यैः ॥"[1]
इत्युल्लेख आचारांगटीकासमाप्तौ दृश्यते। तदनुसारेण ७८४ शकसंवत्सरे [विक्रमसंवत् ९१८ वर्षे] शीलाचार्येरियं वृत्तिविरचिता प्रथमश्रुतस्कन्धान्ते तु तत्र "ब्रह्मचर्याख्यश्रुतस्कन्धस्य निर्वृतिकुलीनश्रीशीलाचार्येण तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति। ग्रन्थप्रमाण ९६६१ ।

सत्त सहस्सा पंच य सयाइं अहियाइं णेय णूणाइं । गन्थस्स य रइयाइं विहिणा कम्मक्खयट्ठाए ॥
अक्खर मत्ता बिन्दू वयण पयं तह य गाह वित्तं च । जं एत्थ ण मे लिहियं तं समयविऊहिं खमियव्वं ॥
कृतिः शीलाचार्यस्येति" इत्युल्लेखस्तत्र दृश्यते ।

एवमेव अन्यास्वपि प्रतिषु प्रथमश्रुतस्कन्धान्ते समयनिर्देशो नास्ति, किन्तु केवलं द्वितीयश्रुतस्कन्धान्ते—
"आचारटीकाकरणे यदाप्तं पुण्यं मया मोक्षगमैकहेतु । तेनापनीयाशुभराशिमुच्चैराचारमार्गप्रवणोऽस्तु लोकः ॥
शकनृपकालातीतसंवत्सरशतेषु सप्तसु अष्टानवतीत्यधिकेषु वैशाखशुद्धपञ्चम्यामाचारटीका कृतेति "
इत्युल्लेखो दृश्यते, तदनुसारेण ७९८ शकसंवत्सरे [विक्रमसंवत् ९३२ वर्षे] वृत्तिरियं शीलाचार्यैर्विरचिता ।

कस्याञ्चिद्ध्स्तलिखितायां प्रतौ आचाराङ्गसूत्रप्रथमश्रुतस्कन्धटीकान्ते—
"द्वासप्तत्यधिकेषु हि शतेषु सप्तसु गतेषु गुप्तानाम् । संवत्सरेषु मासि च भाद्रपदे शुक्लपञ्चम्याम् ॥१॥
शीलाचार्येण कृता गम्भूतायां स्थितेन टीकैषा । सम्यगुपयुज्य शोध्यं मात्सर्यविनाकृतैरार्यैः ॥२॥"

इत्यपि पाठ उपलभ्यते, अत्रापि पृ० 212 मध्येऽयं पाठो मुद्रितः । अयं च गुप्तसंवत्सरो यदि शकसंवत्सर एव तर्हि ७७२ शकसंवत्सरे [९०६ विक्रमसंवत्सरे] प्रथमश्रुतस्कन्धटीका विरचिता ।

सूत्रकृताङ्गवृत्तौ [पृ० 231] यापनीयसंघाग्रणीशाकटायनाचार्यविरचितात् **केवलिभुक्तिप्रकरणात्** "अपवर्ततेऽकृतार्थं नायुर्ज्ञानादयो न हीयन्ते । ..... ॥१६॥" इति कारिका उद्धृता । शाकटायनस्य समयो वैक्रमस्य नवमस्य शतकस्योत्तरार्धे दशमस्य शतकस्य प्रारम्भे च वर्तते, अतस्तेनापि सह संवदति शीलाचार्याणामुपरि निर्दिष्टः समयः । दृश्यतां स्त्रीनिर्वाण-केवलिभुक्तिप्रकरणयोः प्रस्तावना पृ० 16, 22-23

(१) **दीपिका**—खरतरगच्छीयाचार्यजिनसमुद्रसूरिपट्टशिष्यैः श्रीजिनहंससूरिभिः १५८२ विक्रमसंवत्सरे विरचिता।
(२) **दीपिका**—अञ्चलगच्छीयमेरुतुङ्गसूरिशिष्यमाणिक्यशेखरसूरिविरचिता ।
तत्त्वावगमा—प्रायः १६०६ विक्रमसंवत्सरे **हर्षकल्लोल**शिष्य**लक्ष्मीकल्लोल**विरचिता ।

अथ सूत्रकृताङ्गं प्रस्तूयते—

सूत्रकृताङ्गस्य नाम—सूत्रकृताङ्गनिर्युक्तौ[2] [गाथा २ पृ० 2] प्राकृतभाषायां '१ सूतगडं २ सुत्तगडं ३ सूयगडं' इति त्रीणि नामान्यस्य सूत्रस्य विलोक्यन्ते । क्रमेणास्य नामत्रयस्य '१ सूतकृतं २ सूत्रकृतं, ३ सूचाकृतम्' इति त्रयः पर्यायाः संस्कृतभाषायां भवन्ति । चूर्णि-

---

१. एतदनन्तरं खंभातनगरस्थायां प्रतौ "इति भद्रम् । यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते । १॥ उदकानलचौरेभ्यो मूषकेभ्यो विशेषतः । रक्षणीया प्रयत्नेन यतः कष्टेन लिख्यते ॥२॥ श्री भद्रमस्तु । शुभं भवतु लेखकपाठकावधारणादिसमस्तलोकजनश्रावकसंघस्य ॥ सं० १३२७ वर्षे पोष शुदि १० भौमे आचारांगपुस्तकं ठ० विक्रमसिंहेन लिखितमिदमिति । मंगलमस्तु ॥ छ ॥" इत्युल्लेखो दृश्यते ॥

२. "सूयगडं अंगाणं बितियं तस्स य इमाणि नामाणि । सूतगडं सुत्तगडं सूयगडं चेव गोण्णाइं ॥२॥"—सूत्रकृताङ्गनिर्युक्तिः । "सुअपुरुसस्स बारसंगाणि मूलत्थाणीयाणि । सेससुतक्खंधा उवंगाणि कलाच्यङ्गुष्ठादिवत् । तेसिं बारसण्हं अंगाणं एतं बितियं अंगं । णामाणि एगट्ठियाणि इन्द्र-शक्र-पुरन्दरवत्, तं जधा—**सूतकडं** ति वा **सुत्तकडं** ति वा **सूयकडं** ति वा । णामं पुण दुविधं गोण्णं इतरं च, गुणेभ्यो जायते गौणम्, जधा तवतीति तवणो, जलतीति जलणो एवमादि, तत्थेताणि एगट्ठियणामाणि गोण्णाणि । तत्थ **सूतकडं** "षूङ् प्राणिप्रसवे" [पा० धा० ११३२] ..... भावप्रसवो गणधरेभ्य इदं प्रसूतम्, अथवा "अत्थं भासति अरहा" [आव० नि० गा० ९२], ततः सूत्रं प्रसवति । **सूत्तकड** त्ति ..... भावसूत्रेण तु सूत्रानुसारेण निर्वाणपथं गम्यते । **सूतकडं** भावे ससमय-परसमयसूयणामेत्तं ।"—**सूत्रकृतांगचूर्णि** पृ० ४। "सूत्रकृतमित्येतदङ्गानां द्वितीयम्, तस्य चामून्येकार्थिकानि, तद्यथा **सूतम्** उत्पन्नमर्थरूपतया तीर्थकृद्भ्यः, ततः **कृतं** ग्रन्थरचनया गणधरैरिति । तथा सूत्रकृतमिति सूत्रानुसारेण तत्त्वावबोधः क्रियतेऽस्मिन्निति । तथा **सूचाकृतमिति** स्वपरसमयसूचना साऽस्मिन् कृतेति । एतानि चास्य गुणनिष्पन्नानि नामानीति ।"—शीलाचार्यविरचिता **सूत्रकृताङ्गवृत्तिः**, पृ० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृता चूर्णौ वृत्तिकृता शीलाचार्येण च वृत्तौ त्रयाणामप्येतेषां नाम्नामर्थः सम्यक् स्पष्टीकृतः। 'सोऊण जिणवरमयं'[1] [गा० १८ पृ० 4] इति निर्युक्तौ उल्लेखदर्शनात् 'श्रुत(त्वा)कृतम्' इत्यपि संस्कृतपर्यायः संभवेत्। तथापि 'सूयगड' इति प्राकृतनाम्नैव 'सूत्रकृतम्' इति संस्कृतनाम्नैव चास्य सर्वत्र प्रसिद्धिः श्वेताम्बरपरम्परायाम्। समवायाङ्ग-नन्दीसूत्रादिष्वागमशास्त्रेष्वपि[2] 'सूयगड' नाम्नोल्लेखोऽस्य दृश्यते। यद्यपि 'सूयगड' शब्दस्य व्युत्पत्त्यर्थोऽन्येष्वपि सूत्रेषु घटते तथापि रूढ्या द्वितीयमेवाङ्गं 'सूयगड' शब्देन 'सूत्रकृत' शब्देन वोच्यते। एतच्च नन्दी-सूत्रवृत्त्यादौ स्पष्टम्।

दिगम्बरपरम्परायां[3] '१ सुद्दयडं, २ सूदयडं, ३ सूदयदं' इति त्रिधा नामनिर्देशः प्राकृतभाषायामुपलभ्यते, तत्र **सुद्द** इति 'सूत्र' शब्दस्य रूपम्। **सूद** इत्यपि 'सूत्र' शब्दस्य 'सूत' शब्दस्य वा रूपम्, **यड** इति **यद** इति च 'कृत' शब्दस्य प्राकृते रूपम्। संस्कृतभाषायां सर्वत्र 'सूत्र-कृत' नाम्नैव निर्देशः।

विभागा :—सूत्रकृताङ्गस्य द्वौ मुख्यविभागौ, तौ च 'श्रुतस्कन्धौ' इति व्यपदिश्येते। तत्र षोडशाध्ययनात्मके प्रथमश्रुतस्कन्धे **गाथाध्ययनं** षोडशं वर्तते, अतो **'गाहासोलसग** (गाथाषोडशक)' नाम्नापि तत्प्रसिद्धिः। द्वितीये श्रुतस्कन्धे वर्तमानानि पुण्डरीकादीनि सप्ताध्ययनानि महान्ति, अतो 'महज्झयण'शब्देनापि तेषां व्यपदेशः, दृश्यतां पृ० 178

प्रथमे श्रुतस्कन्धे षोडश अध्ययनानि, द्वितीये तु सप्त, इति सर्वसंख्यया सूत्रकृताङ्गे त्रयोविंशतिरध्ययनानि। तेषां प्राकृतभाषायां संस्कृतभाषायां चाभिधानानि इत्थं वर्तन्ते—

	प्राकृतनाम	संस्कृतनाम		प्राकृतनाम	संस्कृतनाम
१	समय	समय	१४	गंथ	ग्रन्थ
२	वेयालिय	वैतालीय	१५	आयाणिज्ज	आदानीय
	वेयालिय	वैदारिक		संकलित	संकलिका
३	उवसग्गपरिण्णा	उपसर्गपरिज्ञा		जमतीत	यमकीय
४	इत्थीपरिण्णा	स्त्रीपरिज्ञा	१६	गाहा	गाथा
५	णिरयविभत्ति	नरकविभक्ति	१७	पोंडरीय	पौण्डरीक
				"	पुण्डरीक
६	महावीरत्थव	महावीरस्तव	१८	किरियाठाण	क्रियास्थान
७	कुसीलपरिभासिय	कुशीलपरिभाषित	१९	आहारपरिण्णा	आहारपरिज्ञा
	कुसीलपरिभासा	कुशीलपरिभाषा	२०	पच्चक्खाणकिरिया	प्रत्याख्यानक्रिया
८	वीरिय	वीर्य	२१	आयारसुत	आचारश्रुत
९	धम्म	धर्म		अणगारसुय	अनाचारश्रुत
१०	समाहि	समाधि		अणगारसुय	अनगारश्रुत
११	मग्ग	मार्ग	२२	अद्दइज्ज	आर्द्रकीय
१२	समोसरण	समवसरण	२३	णालंदइज्ज	नालन्दीय
१३	आहत्तहिय	याथातथ्य			

---

१. "सोऊण जिणवरमतं गणहारी काउ तक्खओवसमं। अज्झवसाणेण कयं सुत्तमिणं तेण सूयगडं ॥१८॥ . . . . अक्खरगुणमति-संघायणाए कम्मपरिसाडणाए य। तदुभयजोगेण कयं सुत्तमिणं तेण **सुत्तगडं** ॥२०॥"—सूत्रकृताङ्गनिर्युक्ति ॥ "श्रुत्वा निशम्य जिनवराणां तीर्थकराणां मतम् अभिप्रायं मातृकादिपदं गणधरैः गौतमादिभिः, कृत्वा ग्रन्थरचने क्षयोपशमं, ... शुभाध्यवसायेन च सता कृतमिदं सूत्रं तेन सूत्रकृतमिति" सूत्रकृताङ्गवृत्तिः पृ० ६।

२. "से किं तं सूयगडे ? सूयगडे णं ससमया सूइज्जंति . . . . . "—समवायांगसूत्र। "से किं तं सूयगडे ? सूयगडे णं लोए सूइज्जति . . . . . "—नन्दीसूत्र। "**से किं तं सूयगडेत्यादि सुत्तं। सूइज्जइ त्ति जधा णट्ठा सूई तंतुणा सूइज्जइ उवलब्भतेत्यर्थः। अहवा जहा सूयी पडं सूतेइ तहा सूयगडे जीवादिपदत्था सूइज्जंति**"—नन्दीचूर्णि पृ० ६३। "से किं तं सूयगडे ? सूच् सूचायाम् [ ], सूचनात् सूत्रम्, सूत्रेण कृतं **सूत्रकृतं** रूढ्योच्यते"—नन्दीवृत्ति हारिभद्री पृ० ७७। "**सूयगडेत्यादि** रूढ्योच्यते इति **सूत्रकृत**शब्देन द्वितीयमेवाङ्गमुच्यते नान्यत्"—नन्दीवृत्तिटिप्पनक पृ० १६४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		P.
२८७	सू० साण्डाद्येकबहुसाधर्मिकश्रमणभिक्ष्वाद्युद्दिष्टादिशय्यायां स्थानादिवर्जनम्	241
२८८	" साधूद्देशेन महाद्वारकरणे कन्दपीठादिसङ्क्रमणे स्थानादिनिषेधः	241
२८९	" विनाऽऽगाढानागाढकारणैः स्कन्धमञ्चादावस्थानं, स्थाने यतना च	241
२९०	" स्त्रीक्षुल्लकादियुक्ते उपाश्रये व्याघाव-भ्यङ्गादिप्रसङ्गादस्थानम् ।	242
२९१	,, गाथापत्याद्याक्रोशादेः शुभाशुभमनोभावात् तथाविधोपाश्रये स्थानादिनिषेधः ।	242
२९२	,, साग्निकस्थाननिषेधः ।	242
२९३	,, सकुण्डलादिके निषेधः ।	242
२९४	,, गाथापतिस्त्र्यादियुक्ते स्थानादिनिषेधः ।	243
	॥ द्वितीये प्रथमः २-१-२-१ ॥	243
२९५	,, शौचवाद्युपाश्रये स्थानादिनिषेधः ।	243
२९६	,, पुनरशनाद्युपस्कृते सागारिकोपाश्रयेऽस्थानम् ।	243
२९७	,, दारुभेद-क्रयणाद्यग्निकायातापनादिप्रसङ्गात्तथाविधेऽस्थानम् ।	243
२९८	,, द्वारोद्घाटने स्तेनप्रसङ्गेऽस्थानम् ।	243
२९९	,, सतृणादावस्थानम् ।	244
३००	,, भूयः साधर्मिकावपातेऽस्थानम् ।	244
३०१	,, कालातिक्रान्तशय्या	244
३०२	,, उपस्थानक्रिया ।	244
३०३	,, अभिक्रान्तशय्या ।	244
३०४	,, अनभिक्रान्तशय्या ।	244
३०५	,, वर्ज्यक्रिया वसतिः ।	245
३०६	,, महावर्ज्यक्रिया ।	245
३०७	,, सावद्यक्रिया ।	245
३०८	,, महासावद्यक्रिया	245
३०९	,, अल्पक्रिया वसतिः	245
	॥ द्वितीये द्वितीयः २-१-२-२ ॥	
३१०	,, प्रचुरप्रासुकान्ने ग्रामे शुद्धवसतिकथनम् ।	246
३११	,, लघूपाश्रयेऽन्यच्छत्राद्यसंघट्टेन गमनादि ।	246-247
३१२	,, वसतियाच्ञाविधिः ।	247
३१३	,, शय्यातरपिण्डवर्जनम ।	247
३१४	सू० साग्निके वसत वस्थानम् ।	247
३१५	,, कुलमध्यगमनयुक्तेऽस्थानम् ।	247
३१६-३१९	,, गाथापत्यादेः परस्परमाक्रोशाद्यभ्यङ्गाद्युघर्षणादिस्नानादियुक्तेष्वस्थानम् ।	247
३२०	,, नग्नादिगृहपत्यादियुक्तेऽस्थानम् ।	248
३२१-३२२	,, साण्डादिसंस्तारकस्य निषेधः (४) इतरस्य ग्रहः (५)	248
३२३	,, उद्दिष्टकसंस्तारकप्रतिमा ।	248
३२४	,, प्रेक्ष्यसंस्तारकप्रतिमा शय्यातरसंस्तारकप्रतिमा च ।	248
३२५	,, यथासंस्तृतप्रतिमा ।	249
३२६	,, प्रतिपन्नसंस्तारकप्रतिमापालनम् ।	249
३२७-३२८	,, संस्तारकप्रत्यर्पणविधिः ।	249
३२९	,, उच्चारादिभूमिप्रतिलेखनम् ।	249
३३०	,, आचार्यादिभूमीर्मुक्त्वा संस्तारकः ।	249
३३१	,, संस्तारारोहशयनविधिः ।	249
३३२	,, अन्योऽन्यहस्तादिस्पर्शनिषेधः उच्छ्वासादिनिषेधश्च ।	249
३३३	,, समविषमादौ साम्येन स्थानम्	249
	॥ द्वितीये तृतीयः २-१-२-३ ॥	
	॥ इति शय्यैषणाध्ययनम् २-१-२ ॥	
३०८	नि० ईर्याया नामादिनिक्षेपेण षड्विधत्वम् ।	250
३०९	नि० द्रव्यक्षेत्रकालेर्याप्रतिपादनम् ।	250
३१०-३११	,, भावेर्या, भावेर्या आलम्बनादिभङ्गैः षोडशधा ।	250
३१२	,, साधोर्गमनस्य कारणचतुष्टयेन परिशुद्धत्वम् ।	250
३१३	,, ईर्योद्देशार्थाधिकारः ।	250
३१४-३१५	,, उद्देशकत्रयाधिकारः ।	250
	१ वर्षाकालादौ स्थानं शरत्कालादौ निर्गमश्च ।	250
	२ नावादावारूढस्य प्रक्षेपणं, जङ्घासन्तारे यतना, नानाप्रकारप्रश्ने विधेयविधिश्च ।	250
	३ उदकादिप्रश्ने जानताऽप्यप्रदर्शनता विधेया, उपधावप्रतिबन्धः, तदपहरणे स्वजनराजगृहगमनादिनिषेधश्च ।	250

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		P.
३३४ सू०	अभिप्रवृष्टे पयोमुचि साधोरनागताषाढ-चतुर्मासकेऽपि ग्रामानुग्रामविहारप्रतिषेधः, तत्प्रयोजनं च ।	250
३३५ ,,	लघुविहारभूम्यादियुक्ते वर्षावासनिषेधः ।	251
३३६ ,,	निवृत्तवर्षाकाले यदा यथा च गमनं तत्प्रकारः ।	251
३३७ ,,	ग्रामानुग्रामविहारे मार्गयतना ।	251
३३८ ,,	प्रात्यन्तिकादिम्लेच्छस्थानेषु संयमात्म-विराधनाप्रसङ्गाद्विहारप्रतिषेधः ।	251-252
३३९ ,,	अराजादिस्थाने विहारप्रतिषेधः ।	252
३४० ,,	अनेकाहगमनीयपथि विहारप्रतिषेधः ।	252
३४१-३४२ ,,	नावारोहणप्रतिषेधः, कारणजाते तदा-रोहणविधिः, आरूढस्य विधिरुपसंहार-श्च ।	252-253
	॥ तृतीये प्रथमः २-१-३-१ ॥	
३४३ सू०	नावारूढसाधोर्गृहस्थकथितच्छत्रादिधारण-प्रतिषेधः ।	253
३४४ ,,	तदकरणे प्रद्विष्टैर्नावि: प्रक्षिप्तस्य कर्त्तव्यम् ।	253
३४५ ,,	उदके प्लवमानस्य विधिः ।	253
३४६ ,,	उदकनिःसृतस्य गमनविधिः ।	253
३४७ ,,	मार्गान्तराले जङ्घासंतरणविधिः ।	254
३४८ ,,	उदकोत्तीर्णस्य गमनविधिः ।	254
३४९ ,,	अन्तराले गच्छतः प्रातिपथिकैर्ग्रामस्वरूपे पृष्टे निरुत्तरत्वम् ।	254-255
	॥ तृतीये द्वितीयः २-१-३-२ ॥	
३५० ,,	प्राणिसंत्रासदोषभयात्साधोर्वप्रादीनाम-प्रदर्शनम्, आचार्यादिभिः सह विहरणं च ।	255
३५१ ,,	आचार्यादिना सह गच्छतः साधोर्विधिः	255
३५२ ,,	प्रातिपथिकप्रश्नेषु साधोर्निरुत्तरत्वम् ।	255
३५३ ,,	पथि हिंसकप्राणिभयाद्दीर्घाध्वनि स्तेनादि-भयाच्चोन्मार्गगमनादिनिषेधः ।	256
३५४ ,,	पथि स्तेनादिना लुण्टिते ग्रामे गृहस्था-दिभ्योऽकथनम् ।	256
	॥ तृतीये तृतीयः २-१-३-३ ॥	
	॥ इति तृतीयमीर्याध्ययनम् २-१-३-३ ॥	
३१६ नि०	भाषाजातशब्दयोर्निक्षेपाः ।	257
३१७ ,,	उद्देशकद्वयार्थाधिकारः ।	257
	१ एकवचनादिषोडशविधवचनविभागः ।	257
	२ क्रोधाद्युत्पत्तिर्यथा न भवति तथा भाषणविधिः ।	257
३५५ सू०	क्रोधादिवाग्निषेधः, षोडशधा वचनं भाषा-चतुष्कं च ।	257
३५६ ,,	शब्दस्य कृतकत्वाविष्करणम्	257
३५७ सू०	पुरुषादीन् प्रति साधोर्भाषणविधिः ।	259
३५८ ,,	साधोः 'नभोदेव इति वा' इत्यादिभाषा-निषेधः ।	259
	॥ चतुर्थे प्रथमः २-२-४-१ ॥	
३५९ ,,	गण्डीकुष्ठ्यादिभाषानिषेधः ।	259
३६० ,,	अशनादिगतसावद्यभाषानिषेधः ।	260
३६१ ,,	मनुष्यादीन् प्रति पुष्टापुष्टादिभाषा-निषेधः ।	260
३६२ ,,	शब्दादिविषयो भाषाभाषणविधिः ।	261
३६३ ,,	क्रोधादित्यागेन निष्ठादिभाषित्वम् ।	261
	॥ चतुर्थे द्वितीयः ॥ २-१-४-२	
	॥ इति भाषाध्ययनम् ॥ २-१-४ ॥	
३१८ नि०	वस्त्रैषणोद्देशद्वयार्थाधिकारः ।	262
	१ वस्त्रग्रहणविधिः	262
	२ वस्त्रधारणविधिः ।	262
	पात्रनिक्षेपः, गुणधारिसाधोरेव भाव-पात्रत्वं च ।	262
३६४ सू०	वस्त्रग्रहणधारणविधिः ।	262
३६५ ,,	वस्त्रार्थं दूरगमननिषेधः ।	262
३६६ ,,	आधाकर्मिकप्रकारः ।	262
३६७ ,,	साधुनिमित्तक्रीतधौतादिकवस्त्रनिषेधः ।	262
३६८ ,,	बहुमूल्यवस्त्रग्रहणनिषेधः ।	262
३६९ ,,	वस्त्रप्रतिमाचतुष्कं, वस्त्रग्रहण-विधिश्च ।	263
३७० ,,	साण्डादिकनिषेधः, अभिनववस्त्रनिषेधः, मलापनयनार्थं निषिद्धं तद्दानं च ।	264
३७१ ,,	धौतस्य प्रतापनविधिः ।	264
	पञ्चमे प्रथमः ॥ २-१-४-१ ॥	
३७२ सू०	वस्त्रधारणविधिः ।	265
३७३ ,,	प्रातिहारिकोपहृतवस्त्रविधिः ।	265

Jain Education International For Private & Personal Use Only www.jainelibrary.org

P.

३७४ ,, वर्णान्तराद्यकरणं स्तेनादिप्रसङ्गेऽगोपनं च । 265
॥ पञ्चमे द्वितीयः ॥ २-१-५-२ ॥
॥ इति वस्त्रैषणाध्ययनम् ॥ २-१-५ ॥

३७५ ,, पात्रग्रहणधारणविधिः । 266-267
॥ षष्ठे प्रथमः ॥ २-१-६-१ ॥

३७६ ,, पात्रप्रत्युपेक्षणानन्तरं पिण्डग्रहणम् । 267

३७७ ,, पात्रेषु पानकग्रहणविधिः । 267
॥ षष्ठे द्वितीयः ॥ २-१-६-२ ॥
॥ इति पात्रैषणाध्ययनम् ॥ २-१-६ ॥

३१९ नि० अवग्रहप्रतिमाया द्रव्यादिनिक्षेपचतुष्टयम् । 268

३२० ,, द्रव्याद्यवग्रहप्रतिपादनम् । 268

३२१ ,, भावावग्रहः 268

३२२ ,, ग्रहणावग्रहः 268

३७८ सू० अदत्तादाननिषेधः, छत्रादीनामनुज्ञाप्य ग्रहणं च । 268

३७९ ,, अवग्रहयाचनविधिः, तत्रागतप्राघूर्णक-साधुविधिश्च । 269

३८० ,, परप्रत्ययिकपीठादिना प्रातिहारिक-सूच्यादिना परनिमन्त्रणम् दानविधिश्च । 269

३८१ ,, सपृथिवीकादौ स्थूणादौ कुलिकादौ स्कन्धादौ सस्त्रीकादौ गृहमध्यमार्गे परस्पराक्रोशादिमति गृहेऽवग्रहग्रहण-निषेधः । 269-270
॥ सप्तमे प्रथमः ॥ २-१-७-१ ॥

३८२ ,, यथालन्दिकावग्रहे श्रमणादेश्छत्रादेर-परावर्त्तनम् । 270

३८३ ,, ईक्ष्वाम्रलशुनवनेषु स्थानविधिः । 270

३८४ ,, अवग्रहभेदसप्तकम् । 270-271

३८५ ,, देवेन्द्राद्यवग्रहाः । 271
॥ सप्तमे द्वितीयः ॥ २-१-७-२ ॥
॥ इत्यवग्रहप्रतिमाऽध्ययनम् ॥ २-१-७ ॥
॥ इति प्रथमा आचाराङ्गचूला ॥ १ ॥

३२३ नि० स्थानसप्ततिकायामूर्द्धस्थानेन प्रकृतं, निशीथ-निक्षेपषट्कं च । 271

३८६ सू० अनण्डादिके स्थाने चतुर्धा प्रतिमा 271-272
॥ इति स्थानसप्तैककाख्यमष्टमाध्ययनम् ॥
॥२-२-८॥

३८७ सू० अनण्डादिके स्वाध्याये आलिङ्गनादि-निषेधः 272
॥ इति निषीधिकासप्तैककाध्ययनम् ॥
॥ २-२-९ ॥

३२४-३२५ नि० उच्चारप्रश्रवणशुद्धिः तत्करणविधिश्च 273

३८८ सू० याचितपात्रेऽनाण्डादिके उच्चारादि-करणम्, 273

३८९ ,, सबीजादिके सरन्धनादिके आरामा-ट्टालकलिकाङ्गारदाहनद्यायतनमृत्खनि-डागाशनवनादिषूच्चारादिनिषेधः । 273-274

३९० ,, उच्चारप्रश्रवणविधिः । 274
॥ इत्युच्चारप्रश्रवणसप्तैककाध्ययनम् ॥
॥ २-२-१० ॥

३२६ नि० शब्दस्य द्रव्यभावनिक्षेपौ 275

३९१ सू० भिक्षोर्वितताद्यशब्दश्रवणार्थं गमननिषेधः 275

३९२ ,, वप्रादिस्थानवर्णकश्रव्यगेयादिशब्द-श्रवणप्रतिज्ञया तत्र गमननिषेधः । 275

३९३ ,, कथानकतद्वर्णनस्थानादिश्रवणार्थं गमन-निषेधः । 275
॥इति शब्दसप्तैककाध्ययनम् ॥ २-२-११॥

३२७ नि० रूपस्य द्रव्यभावनिक्षेपौ 276

३९४ सू० ग्रथितवेष्टिमादि रूपं, तद्दर्शनार्थं गमन-निषेधः । 276

३२७ नि० परशब्दस्य निक्षेपषट्कम् । 277
॥ इति रूपसप्तैककाध्ययनम् ॥ २-२-१२ ॥

३९५ सू० परकृतक्रियायाः (शुश्रूषायाः) त्रिविधेन निषेधः । 277

३९६ ,, साधोर्वाग्बलादिभिः परकृतचिकित्सा-निषेधः । 278
॥ इति परक्रियासप्तैककाध्ययनम् ॥
॥ २-२-१३ ॥

३२८ नि० अन्यशब्दस्य निक्षेपषट्कम् 278

३२९ ,, गच्छनिर्गतानामन्यक्रियाया अप्रयोजनम् 278

३९७ सू० अन्योऽन्यक्रियानिषेधः । 278
॥ इत्यन्योऽन्यक्रियासप्तैककाध्ययनम् ॥
॥ २-२-१४ ॥
॥ इति सप्तसप्तैककाख्या द्वितीया चूला ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		P.
३३०	नि० भावनायां द्रव्यभावभावनयोर्निक्षेपौ, भावे द्विविधत्वम् ।	279
३३१	,, अप्रशस्तभावना ।	279
३३२	,, प्रशस्तभावना ।	279
३३३	,, दर्शनभावना ।	279
३३४-३३५	नि० जन्मभूम्यादिगतजिनचैत्येष्वभिगमनादि कुर्वतो दर्शनशुद्धिः ।	279
३३६-३३७	नि० प्रावचनिकाचार्यादेः प्रशंसागुणमाहात्म्यादि कुर्वतो दर्शनशुद्धिः ।	279
३३८-३४०	,, ज्ञानभावना ।	279
३४१-३४२	,, चारित्रभावना	280
३४३-३४४	,, तपोभावना ।	280
३९८	सू० सङ्क्षिप्त-मध्यमवाचनया वीरचरित्रम्	280
३९९	,, च्यवनाद् यौवनं यावत् श्रीवीरवर्णनम् ।	281
४००	,, श्रीवीरतत्पितृमातृपितृव्यभ्रातृभगिनी-भार्यादुहितृनप्त्रभिधानानि ।	281
४०१	,, श्रीवीरमातापित्रोरन्त्याराधना देवगतिश्च ।	281-282
४०२	सू०, ११२-१३५ सू० गा०, दीक्षोपसर्गकेवलसभावनाकमहाव्रतदेशना ।	282-286
	॥ इति भावनाध्ययनम् ॥ २-३-१५ ॥	
	॥ इति भावनाख्या तृतीया चूला ॥ ३ ॥	
३४५	नि० अनित्य-पर्वत-रूप्य-भुजगत्वक्-समुद्राधिकाराः ।	286
३४६	,, साधुसिद्धयोर्देशसर्वविमुक्तत्वम् ।	286
१३६	सू० गा० अनित्यावासः ।	286
१३८	,, पर्वतदृष्टान्तः ।	286
१४३	,, रूप्यदृष्टान्तः ।	287
१४४	,, भुजगत्वग्दृष्टान्तः ।	287
१४५-१४७	,, समुद्रदृष्टान्तः ।	287
	॥ इति विमुक्तयध्ययनं समाप्तम् ॥ ॥ २-३-१६ ॥	
	॥ इति चतुर्थचूला समाप्ता ॥ ४ ॥	
३४७	नि० चतुर्थचूलोपसंहारः पञ्चमचूलाप्रतिज्ञा ।	288
३४८	,, नवाध्ययनोद्देशसंख्या ।	288
३४९	,, द्वितीयश्रुतस्कन्धाध्ययनोद्देशसङ्ख्या ।	288
३५०-३५२	,, महच्छब्दनिक्षेपः ।	288
३५३-३५६	,, परिज्ञाशब्दनिक्षेपाः ।	288
	॥ इत्याचाराङ्गसूत्रस्य विषयानुक्रमः ॥	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

श्रीसुधर्मस्वामिविरचितं ।

श्रीश्रुतकेवलिभद्रबाहुस्वामिदृब्धनिर्युक्तियुतं ।

श्रीशीलाङ्काचार्यविहितविवरणसमन्वितं ।

श्रीआचाराङ्गसूत्रम् ।

ॐ नमः सर्वज्ञाय ॥ जयति समस्तवस्तुपर्यायविचारापास्ततीर्थिकं, विहितैकैकतीर्थनयवादसमूहवशात्प्रतिष्ठितम् । बहुविधभङ्गिसिद्धसिद्धान्तविधूनितमलमलीमसं, तीर्थमनादिनिधनगतमनुपममादिनतं जिनेश्वरैः ॥१॥ (स्कन्दकच्छन्दः) आचारशास्त्रं सुविनिश्चितं यथा, जगाद वीरो जगते हिताय यः । तथैव किञ्चिद्गदतः स एव मे, पुनातु धीमान् विनयार्पिता गिरः ॥ २ ॥ शस्त्रपरिज्ञाविवरणमतिबहुगहनं च गन्धहस्तिकृतम् । तस्मात् सुखबोधार्थं गृह्णाम्यहमञ्जसा सारम् ॥ ३ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १ ॥

अध्ययनं १ उद्देशकः १

इह हि रागद्वेषमोहाद्यभिभूतेन सर्वेणापि संसारिजन्तुना शारीरमानसानेकातिकदुकदुःखोपनिपातपीडितेन तदपनयनाय हेयोपादेयपदार्थपरिज्ञाने यत्नो विधेयः, स च न विशिष्टविवेकमृते, विशिष्टविवेकश्च न प्राक्षाशेषातिशयकलापाप्तोपदेशमन्तरेण, आप्तश्च रागद्वेषमोहादीनां दोषाणामात्यन्तिकप्रक्षयात्, स चार्हत एव, अतः प्रारभ्यतेऽर्हद्वचनानुयोगः, स च चतुर्धा, तद्यथा—धर्मकथानुयोगो गणितानुयोगो द्रव्यानुयोगश्चरणकरणानुयोगश्चेति, तत्र धर्मकथानुयोग उत्तराध्ययनादिकः, गणितानुयोगः सूर्यप्रज्ञप्त्यादिकः, द्रव्यानुयोगः पूर्वाणि सम्मत्यादिकश्च, चरणकरणानुयोगश्चाचारादिकः, स च प्रधानतमः, शेषाणां तदर्थत्वात्, तदुक्तम्—"चरणपडिवत्तिहेउं जेणियरे तिण्णि अणुओग"त्ति, तथा "चरणपडिवत्तिहेउं धम्मकहाकालदिक्खमादीया । दविए दंसणसोही दंसणसुद्धस्स चरणं तु ॥ १ ॥" गणधरैरप्यत एव तस्यैवादौ प्रणयनमकारि, अतस्तत्प्रतिपादकस्याचाराङ्गस्यानुयोगः समारभ्यते, स च परमपदप्राप्तिहेतुत्वात्सविघ्नः, तदुक्तम्—"श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥ १ ॥" तस्मादशेषप्रत्यूहोपशमनाय मङ्गलमभिधेयं, तच्चादिमध्यावसानभेदात्त्रिधा, तत्रादिमङ्गलं 'सुयं मे आउसंतेणं भगवया एवमक्खाय'मित्यादि, अत्र च भगवद्वचनानुवादो मङ्गलम्, अथवा श्रुतमिति श्रुतज्ञानं, तच्च नन्द्यन्तःपातित्वान्मङ्गलमिति, एतच्चाविघ्नेनाभिलषितशास्त्रार्थपारगमनकारणं, मध्यमङ्गलं लोकसाराध्ययनपञ्चमोद्देशकसूत्रं 'से जहा० कुंविं हरए पडिपुण्णे चिट्ठइ समंसि भोमे उवसन्तरए सारक्खमाणे'इत्यादि, अत्र च हृदगुणैराचार्यगुणोत्कीर्त्तनम्, आचार्याश्च पञ्चनमस्कारान्तःपातित्वान्मङ्गलमिति, एतच्चाभिलषितशास्त्रार्थस्थिरीकरणार्थम्, अवसानमङ्गलं नवमाध्ययनेऽवसानसूत्रम् 'अभिनिव्वुडे अमाई आवकहाए भगवं समियासी' अत्राभिनिर्वृतग्रहणं संसारमहातरुकन्दोच्छेदेऽविप्रतिपत्त्या ध्यानकारित्वान्मङ्गलमिति, एतच्च शिष्यप्रशिष्यसन्तानाव्यवच्छेदार्थमिति, अध्ययनगतसूत्रमङ्गलत्वप्रतिपादनेनैवाध्ययनानामपि मङ्गलत्वमुक्तमेवेति न प्रतन्यते, सर्वमेव वा शास्त्रं मङ्गलं, ज्ञानरूपत्वात्, ज्ञानस्य च निर्जरार्थत्वात्, निर्जरार्थत्वेन च तस्याविप्रतिपत्तिः, यदुक्तम्—"जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं । तं नाणी तिहिं गुत्तो खवेइ उस्सासमित्तेणं ॥ १ ॥" मङ्गलशब्दनिरुक्तं च मां गालयत्यपनयति भवादिति मङ्गलं, मा भूद्गलो विघ्नो गालो वा नाशः शास्त्रस्येति मङ्गलमित्यादि, शेषं त्वाक्षेपपरिहारादिकमन्यतोऽत्रसेयमिति ।

साम्प्रतमाचारानुयोगः प्रारभ्यते—आचारस्यानुयोगः-अर्थकथनमाचारानुयोगः, सूत्रादनु-पश्चादर्थस्य योगोऽनुयोगः, सूत्राध्ययनात्पश्चादर्थकथनमिति भावना, अणोर्वा लघीयसः सूत्रस्य महताऽर्थेन योगोऽनुयोगः, स चामीभिर्द्वारैरनुगन्तव्यः, तद्यथा-निक्खेवेगट्ठनिरुत्तिविहिपवित्ती य केण वा कस्स । तद्दारभेयलक्खण तदरिहपरिसा य सुत्तत्थो ॥ १ ॥ तत्र निक्षेपो—नामादिः सप्तधा, नामस्थापने क्षुण्णे, द्रव्यानुयोगो द्वेधा-आगमतो नोआगमतश्च, तत्रागमतो ज्ञाता तत्र चानुपयुक्तो, नोआगमतो ज्ञशरीरभव्यशरीरतत्व्यतिरिक्तोऽनेकधा, द्रव्येण-सेटिकादिना द्रव्यस्य-आत्मपरमाण्वादेर्द्रव्ये-निषद्यादौ वा अनुयोगो द्रव्यानुयोगः, क्षेत्रानुयोगः क्षेत्रेण क्षेत्रस्य क्षेत्रे वाऽनुयोगः क्षेत्रानुयोगः, एवं कालेन कालस्य

॥ १ ॥

१ चरणप्रतिपत्तिहेतवो येनेतरे त्रयोऽनुयोगाः । चरणप्रतिपत्तिहेतवो धर्मकथाकालदीक्षादिकाः । द्रव्ये दर्शनशुद्धिर्दर्शनशुद्धस्य चरणं तु ॥ १ ॥

* प्रतिशिष्येति प्र. १ यदज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटीभिः । तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काले वाऽनुयोगः कालानुयोगः, वचनानुयोग एकवचनादिना, भावानुयोगो द्वेधा–आगमतो नोआगमतश्च, तत्रागमतो ज्ञातोपयुक्तो, नोआगमतस्तु औपशमिकादिभावैः, तेषां चानुयोगोऽर्थकथनं भावानुयोगः, शेषमावश्यकानुसारेण ज्ञेयं, केवलमिहानुयोगस्य प्रस्तुतत्वात्तस्य चाचार्याधीनत्वात् केनेति द्वारं विचिन्त्यते, तथोपक्रमादीनि च द्वाराणि प्रचुरतरोपयोगित्वात्प्रदर्श्यन्ते, तत्र केनेति कथम्भूतेन ?, यथाभूतेन च सूरिणा व्याख्या कर्त्तव्या तथा प्रदर्श्यते–"देसकुलजाइरूवी संघयणी धिइजुओ अणासंसी । अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ॥ १ ॥ जियपरिसो जियनिद्दो मज्झत्थो देसकालभावन्नू । आसन्नलद्धपइभो णाणाविहदेसभासण्णू ॥ २ ॥ पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिन्नू । आहरणहेउकारणणयणिउणो गाहणाकुसलो ॥ ३ ॥ ससमयपरसमयविऊ गंभीरो दित्तिमं सिवो सोमो । गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ॥ ४ ॥ आर्यदेशोद्भूतः सुखावबोधवचनो भवतीत्यतो देशग्रहणं, पैतृकं कुलमिश्वाकादि ज्ञातकुलश्च यथोक्षिप्तभारवहने न श्राम्यतीति, मातृकी जातिस्तत्संपन्नो विनयादिगुणवान् भवति, 'यत्राकृतिस्तत्र गुणा वसन्ती'ति रूपग्रहणं, संहननधृतियुतो व्याख्यानादिषु न खेदमेति, अनाशंसी श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति, अविकत्थनो हितमितभाषी, अमायी सर्वत्र विश्वास्यः, स्थिरपरिपाटिः परिचितग्रन्थस्य सूत्रार्थगलनासंभवात्, ग्राह्यवाक्यः सर्वत्रास्खलिताज्ञः, जितपर्षद् राजादिसदसि न क्षोभमुपयाति, जितनिद्रोऽप्रमत्तत्वान्निद्राप्रमादिनः शिष्यान् सुखेनैव प्रबोधयति, मध्यस्थः शिष्येषु समचित्तो भवति, देशकालभावज्ञः सुखेनैव गुणवद्देशादौ विहरिष्यति, आसन्नलब्धप्रतिभो द्राक् परवाद्युत्तरदानसमर्थो भवति, नानाविधदेशभाषाविधिज्ञस्य नानाविधदेशजाः शिष्याः व्याख्यानं सुखमवभोत्स्यन्ते, ज्ञानाद्याचारपञ्चकयुक्तः श्रद्धेयवचनो भवति, सूत्रार्थतदुभयविधिज्ञ उत्सर्गापवादप्रपञ्चं यथावद् ज्ञापयिष्यति, हेतूदाहरणनिमित्तनयप्रपञ्चज्ञः अनाकुलो हेत्वादीनाचष्टे, ग्राहणाकुशलो बहुभिर्युक्तिभिः शिष्यान् बोधयति, स्वसमयपरसमयज्ञः सुखेनैव तत्स्थापनोच्छेदौ करिष्यति, गम्भीरः खेदसहः, दीप्तिमान् पराधृष्यः, शिवहेतुत्वात् शिवः, तदधिष्ठितदेशे माय्यादुपशमनात्, सौम्यः सर्वजननयनमनोरमणीयः, गुणशतकलितः प्रश्रयादिगुणोपेतः, एवंविधः सूरिः प्रवचनानुयोगे योग्यो भवति ॥ तस्य चानुयोगस्य महापुरुषेव चत्वार्यनुयोगद्वाराणि–व्याख्याङ्गानि भवन्ति, तद्यथा–उपक्रमो निक्षेपोऽनुगमो नयः, तत्रोपक्रमणमुपक्रमः उपक्रम्यतेऽनेनास्मादस्मिन्निति वोपक्रमः–व्याचिख्यासितशास्त्रस्य समीपानयनमित्यर्थः, स च शास्त्रीयलौकिकभेदाद् द्विधा, तत्र शास्त्रीयः आनुपूर्वी नाम प्रमाणं वक्तव्यताऽर्थाधिकारः समवतारश्चेति षोढा, लौकिको नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् षोढैव । निक्षेपणमनेनास्मादस्मिन्निति वा निक्षेपः, उपक्रमानीतस्य व्याचिख्यासितशास्त्रस्य नामादिन्यसनमित्यर्थः, स च त्रिविधः, तद्यथा—ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च, तत्रौघनिष्पन्नोऽङ्गाध्ययनादिसामान्याभिधानन्यासः, नामनिष्पन्न आचारशस्त्रपरिज्ञादिविशेषाभिधाननामादिन्यासः, सूत्रालापकनिष्पन्नश्च सूत्रालापकानां नामादिन्यसनमिति । अनुगमनमनेनास्मादस्मिन्निति वाऽनुगमः, अर्थकथनमित्यर्थः, स च द्विधा–निर्युक्त्यनुगमः सूत्रानुगमश्चेति, तत्र निर्युक्त्यनुगमस्त्रिविधः, तद्यथा–निक्षेपनिर्युक्त्यनुगमः उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्चेति, तत्र निक्षेपनिर्युक्त्यनुगमो निक्षेप एव सामान्यविशेषाभिधानयोरोघनिष्पन्ननामनिष्पन्नाभ्यां निक्षेपाभ्यामनुगतः सूत्रापेक्षया वक्ष्यमाणलक्षणश्चेति, उपोद्घातनिर्युक्त्यनुगमश्चाभ्यां द्वारगाथाभ्यामनुगन्तव्यः, तद्यथा–"उद्देसे णिद्देसे य णिग्गमे खेत्तकालपुरिसे य । कारणपच्चयलक्खण णए समोयारणाऽणुमए ॥ १ ॥ किं कतिविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं । कइ संतरमविरहियं भवागरिस फासणणिरुत्ती ॥ २ ॥" सूत्रस्पर्शिकनिर्युक्त्यनुगमः सूत्रावयवानां नयैः साक्षेपपरिहारमर्थकथनं, स च सूत्रे सति भवति, सूत्रं च सूत्रानुगमे, स च सूत्रोच्चारणरूपः पदच्छेदरूपश्चेति । अनन्तधर्माध्यासितं वस्त्वेकेनैव धर्मेण नयन्ति-परिच्छिन्दन्तीति ज्ञानविशेषा नयाः, ते च नैगमादयः सप्तेति । साम्प्रतमाचाराङ्गस्योपक्रमादीनामनुयोगद्वाराणां यथायोगं किञ्चिद् बिभणिषुरशेषप्रत्यूहोपशमनाय मङ्गलार्थं प्रेक्षापूर्वकारिणां च प्रवृत्त्यर्थं सम्बन्धाभिधेयप्रयोजनप्रतिपादिकां निर्युक्तिकारो गाथामाह—

वंदित्तु सव्वसिद्धे जिणे अ अणुओगदायए सव्वे । आयारस्स भगवओ निज्जुत्तिं किंचिहस्सामि ॥ १ ॥

तत्र वन्दित्वा सर्वसिद्धान् जिनांश्चेति मङ्गलवचनम्, अनुयोगदायकानित्येतच्च सम्बन्धवचनमपि, आचारस्येत्यभिधेयवचनं, निर्युक्तिं करिष्ये इति प्रयोजनकथनमिति तात्पर्यार्थः, अवयवार्थस्तु 'वन्दित्वे'ति 'वदि अभिवादनस्तुत्यो'रित्यर्थद्वयाभिधायी धातुः, तत्राभिवादनं कायेन स्तुतिर्वाचा, अनयोश्च मनःपूर्वकत्वात्करणत्रयेणापि नमस्कार आवेदितो भवति, सितं ध्मातमेषामिति सिद्धाः–प्रक्षीणाशेषकर्माणः, सर्वे च ते सिद्धाश्च सर्वसिद्धाः, सर्वग्र-

१ उद्देशो निर्देशश्च निर्गमः क्षेत्रं कालः पुरुषश्च । कारणं प्रत्ययः लक्षणं नयाः समवतारः अनुमतम् ॥ १ ॥ किं कतिविधं कस्य क्व केषु कथं कियच्चिरं भवति कालम् । कति सान्तरमविरहितं भवाकर्षाः स्पर्शना निरुक्तिः ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हणं तीर्थातीर्थानन्तरपरम्परादिसिद्धप्रतिपादकं, तान्वन्दित्वेति सम्बन्धः सर्वत्र योज्यः, रागद्वेषजितो जिनाः—तीर्थकृतस्तानपि सर्वान् अतीतानागतवर्त्तमानसर्वक्षेत्रगतानिति, अनुयोगदायिनः—सुधर्मस्वामिप्रभृतयो यावदस्य भगवतो निर्युक्तिकारस्य भद्रबाहुस्वामिनश्चतुर्दशपूर्वधरस्याचार्योऽतस्तान् सर्वानिति, अनेन चाम्नायकथनेन स्वमनीषिकाव्युदासः कृतो भवति, 'वन्दित्वे'ति क्त्वाप्रत्ययस्योत्तरक्रियासव्यपेक्षत्वादुत्तरक्रियामाह—'आचारस्य' यथार्थनाम्नः 'भगवत' इति अर्थधर्मप्रयत्नगुणभाजस्तस्यैवंविधस्य, निश्चयेनार्थप्रतिपादिका युक्तिर्निर्युक्तिस्तां 'कीर्त्तयिष्ये' अभिधास्ये इति अन्तस्तत्त्वेन निष्पन्नां निर्युक्तिं बहिस्तत्त्वेन प्रकाशयिष्यामीत्यर्थः ॥१॥ यथाप्रतिज्ञातमेव बिभणिषुर्निक्षेपार्हाणि पदानि तावत् सुहृद्भूत्वाऽऽचार्यः संपिण्ड्य कथयति—

आयार अंग सुयखंध बंभ चरणे तहेव सत्थे य । परिण्णाए संणाए निक्खेवो तह दिसाणं च ॥ २ ॥

आचाराङ्गश्रुतस्कन्धब्रह्मचरणशस्त्रपरिज्ञासंज्ञादिशामित्येतेषां निक्षेपः कर्त्तव्य इति । तत्राचारब्रह्मचरणशस्त्रपरिज्ञाशब्दा नामनिष्पन्ने निक्षेपे द्रष्टव्याः, अङ्गश्रुतस्कन्धशब्दा ओघनिष्पन्ने, संज्ञादिकशब्दौ सूत्रालापकनिष्पन्ने निक्षेपे द्रष्टव्याविति ॥ २ ॥ एतेषां मध्ये कस्य कतिविधो निक्षेप इत्यत आह—

चरणदिसावज्जाणं निक्खेवो चउक्कओ य नायव्वो । चरणंमि छव्विहो खलु सत्तविहो होइ उ दिसाणं ॥३॥

---

१ चान्द्रमतेन पिज उभयपदभावात् ।

चरणदिग्वर्जानां चतुर्विधो निक्षेपः, चरणस्य षड्विधः, दिक्शब्दस्य सप्तविधो निक्षेपः, अत्र च क्षेत्रकालादिकं यथासम्भवमायोज्यम् ॥ ३ ॥ नामादिचतुष्टयं सर्वव्यापीति दर्शयितुमाह—

जत्थ य जं जाणिज्जा निक्खेवं निक्खिवे निरवसेसं । जत्थवियं न जाणिज्जा चउक्कयं निक्खिवे तत्थ ॥ ४ ॥

'यत्र' चरणदिक्शब्दादौ यं निक्षेपं-क्षेत्रकालादिकं जानीयात्तं तत्र निरवशेषं निक्षिपेदू, यत्र तु निरवशेषं न जानीयादाचाराङ्गादौ तत्रापि नामस्थापनाद्रव्यभावचतुष्कात्मकं निक्षेपं निक्षिपेदित्युपदेश इति गाथार्थः ॥ ४ ॥ प्रदेशान्तरप्रसिद्धस्यार्थस्य लाघवमिच्छता निर्युक्तिकारेण गाथाऽभ्यधायि—

आयारे अंगंमि य पुव्वुद्दिट्ठो चउक्कनिक्खेवो । नवरं पुण नाणत्तं भावायारंमि तं वोच्छं ॥ ५ ॥

क्षुल्लिकाचारकथायामाचारस्य पूर्वोद्दिष्टो निक्षेपः अङ्गस्य तु चतुरङ्गाध्ययन इति, यश्चात्र विशेषः सोऽभिधीयते-'भावाचारविषय' इति ॥ ५ ॥ यथाप्रतिज्ञातमाह—

तस्सेगट्ठ पवत्तण पढमंग गणी तहेव परिमाणे । समोयारे सारो य सत्तहि दारेहि नाणत्तं ॥ ६ ॥

'तस्य' भावाचारस्य एकार्थाभिधायिनो वाच्याः, तथा केन प्रकारेण प्रवृत्तिः—प्रवर्त्तनमाचारस्याभूत् तच्च वाच्यं, तथा प्रथमाङ्गता च वाच्या, तथा गणी—आचार्यस्तस्य कतिविधं स्थानमिदमिति च वाच्यं, तथा 'परिमाणम्' इयत्ता वाच्या, तथा किं क्व समवतरतीत्येतच्च वाच्यं, तथा सारश्च वाच्यः, इत्येभिर्द्वारैः पूर्वस्माद्भावाचारादस्य भेदो-नानात्वमिति पिण्डार्थः ॥ ६ ॥ अवयवार्थं तु निर्युक्तिकृदेवाभिधातुमाह—

आयारो आचालो आगालो आगरो य आसासो । आयरिसो अंगंति य आइण्णाऽऽजाइ आमोक्खा ॥७॥

आचर्य्यते आसेव्यत इत्याचारः, स च नामादिचतुर्द्धा, तत्र ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तो द्रव्याचारोऽनया गाथयाऽनुसर्त्तव्यः—'णामणधोयणवासणसिक्खावणसुकरणाविरोहीणि । दव्वाणि जाणि लोए दव्वायारं वियाणाहि ॥ १ ॥' भावाचारो द्विधा-लौकिको लोकोत्तरश्च, तत्र लौकिकः पाषण्डिकादयः पञ्चरात्रादिकं यत् कुर्व्वन्ति स विज्ञेयो, लोकोत्तरस्तु पञ्चधा ज्ञानादिकः, तत्र ज्ञानाचारोऽष्टधा, तद्यथा—'काले विणए बहुमाणे उवहाणे तहा अणिण्हवणे । वंजणअत्थतदुभए अट्ठविहो णाणमायारो ॥ १ ॥' दर्शनाचारोऽप्यष्टधैव, तद्यथा—'निस्संकियनिक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य । उववूहथिरीकरणे वच्छल्लपभावणे अट्ठ ॥ २ ॥' चारित्राचारोऽप्यष्टधैव,—'तिन्नेव य गुत्तीओ पंच समिइओ अट्ठ मिलियाओ । पवयणमाईउ इमा तासु ठिओ चरणसंपन्नो ॥ ३ ॥' तपआचारो द्वादशधा, तद्यथा—'अणसणमूणोयरिया वित्तीसंखेवणं रसच्चाओ । कायकिलेसो संलीणया य

---

१ नामनधावनवासनशिक्षणसुकरणाविरोधीनि । द्रव्याणि यानि लोके द्रव्याचारं विजानीहि ॥ १ ॥

२ कालो विनयः बहुमानः उपधानं तथा अनिह्नवः । व्यञ्जनमर्थस्तदुभयकिल अष्टविधो ज्ञानाचारः ॥ १ ॥ निश्शङ्कितो निष्काङ्क्षितो निर्विचिकित्सोऽमूढदृष्टिश्च । उपबृंहा स्थिरीकरणं वात्सल्यं प्रभावनाऽष्टौ ॥ २ ॥ तिस्र एव च गुप्तयः पञ्च समितयोऽष्ट मिलिताः । प्रवचनमातर इमास्तासु स्थितश्चरणसंपन्नः ॥ ३ ॥ अनशनमवमौदर्यं वृत्तिसंक्षेपणं रसत्यागः । कायक्लेशः संलीनता च बाह्यं तपो भवति ॥ ४ ॥ प्रायश्चित्तं विनयो वैयावृत्त्यं तथैव स्वाध्यायः । ध्यानमुत्सर्गोऽपि च अभ्यन्तरं तपो भवति ॥ ५ ॥ अनिगूहितबलवीर्यः पराक्रमते यो यथोक्तमायुक्तः । युनक्ति च यथास्थाम ज्ञातव्यः स वीर्याचारः ॥ ६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जज्झो तवो होइ ॥ ४ ॥ पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ । झाणं उस्सग्गोविय अब्भिंतरओ तवो होइ ॥ ५ ॥' वीर्याचारस्त्वनेकधा—'अणिगूहियबलविरिओ परक्कमइ जो जहुत्तमाउत्तो । जुंजइ य जहाथामं नायव्वो वीरियायारो ॥ ६ ॥' एष पञ्चविध आचारः, एतत्प्रतिपादकश्चायमेव ग्रन्थविशेषो भावाचारः, एवं सर्वत्र योज्यम् । इदानीमाचालः, आचाल्यतेऽनेनातिनिबिडं कर्मादीत्याचालः, सोऽपि चतुर्धा, व्यतिरिक्तो वायुः, भावाचालस्त्वयमेव ज्ञानादिः पञ्चधा । इदानीमागालः, आगालनमागालः-समप्रदेशावस्थानं, सोऽपि चतुर्धा, व्यतिरिक्त उदकादेर्निम्नप्रदेशावस्थानं, भावागालो ज्ञानादिक एव, तस्यात्मनि रागादिरहितेऽवस्थानमितिकृत्वा । इदानीमाकरः, आगत्य तस्मिन् कुर्वन्तीत्याकरः, नामादिः, तत्र व्यतिरिक्तो रजतादिः, भावाकरोऽयमेव ज्ञानादिः, तत्प्रतिपादकश्चायमेव ग्रन्थो, निर्जरादिरत्नानामत्र लाभात् । इदानीमाश्वासः, आश्वसन्त्यस्मिन्नित्याश्वासो नामादिः, तत्र व्यतिरिक्तो यानपात्रद्वीपादिः, भावाश्वासो ज्ञानादिरेव । इदानीमादर्शः, आदृश्यते अस्मिन्नित्यादर्शो नामादिः, व्यतिरिक्तो दर्पणः, भावादर्श उक्त एव, यतोऽस्मिन्नितिकर्त्तव्यता दृश्यते । इदानीमङ्गम्, अश्यते-व्यक्तीक्रियते अस्मिन्नित्यङ्गं, नामाद्येव, तत्र व्यतिरिक्तं शिरोबाह्वादि, भावाङ्गमयमेवाचारः । इदानीमाचीर्णम्-आसेवितं, तच्च नामादिषोढा, तत्र व्यतिरिक्तं द्रव्याचीर्णं सिंहादेस्तृणादिपरिहारेण पिशितभक्षणं, क्षेत्राचीर्णं वाल्हीकेषु सक्तवः कोङ्कणेषु पेया, कालाचीर्णं त्विदं—'सरसो चंदणपंको अगुरुइ सरसा य गंधकासाई । पाडलिसिरीसमल्लिय पियाइँ काले निदाहंमि ॥ १ ॥' भावाचीर्णं तु ज्ञानादिपञ्चकं, तत्प्रतिपादकश्चाचा-

१ सरसश्चन्दनपङ्कोऽगुरुति सरसा च गन्धकाषायिकी । पाटलशिरीषमल्लिकाः प्रियाः काले निदाघे ॥ १ ॥

रम्रन्थः । इदानीमाजातिः, आजायन्ते तस्यामित्याजातिः, साऽपि चतुर्द्धा, व्यतिरिक्ता मनुष्यादिजातिः, भावाजातिस्तु ज्ञानाद्याचारप्रसूतिरयमेव ग्रन्थ इति । इदानीमामोक्षः, आमुच्यन्तेऽस्मिन्नित्यामोक्षणं वाऽऽमोक्षो, नामादिः, तत्र व्यतिरिक्तो निगडादेः, भावामोक्षः कर्माष्टकोद्वेष्टनमशेषमेतत्साधकश्चायमेवाचार इति । एते किञ्चिद्विशेषादेकमेवार्थं विशिंषन्तः प्रवर्त्तन्त इत्येकार्थिकाः, शक्रपुरन्दरादिवत्, एकार्थाभिधायिनां च छन्दश्चितिबन्धानुलोम्यादिप्रतिपत्त्यर्थमुद्घट्टनम्, उक्तं च—"बंधाणुलोमया खलु सत्थंमि य लाघवं असम्मोहो । संतगुणदीवणावि य एगट्ठगुणा हवंतेए ॥१॥" ॥७॥ इदानीं प्रवर्त्तनाद्वारं, कदा पुनर्भगवताऽऽचारः प्रणीत इत्यत आह—

सव्वेसिं आयारो तित्थस्स पवत्तणे पढमयाए । सेसाइं अंगाइं एक्कारस आणुपुव्वीए ॥ ८ ॥

सर्वेषां तीर्थङ्कराणां तीर्थप्रवर्त्तनादावाचारार्थः प्रथमतयाऽभवद्भवति भविष्यति च, ततः शेषाङ्गार्थ इति, गणधरा अप्यनयैवानुपूर्व्या सूत्रतया ग्रथ्नन्तीति ॥ ८ ॥ इदानीं प्रथमत्वे हेतुमाह—

आयारो अंगाणं पढमं अंगं दुवालसण्हंपि । इत्थ य मोक्खोवाओ एस य सारो पवयणस्स ॥ ९ ॥

अयमाचारो द्वादशानामप्यङ्गानां प्रथममङ्गमित्यनूद्य कारणमाह—यतोऽत्र मोक्षोपायः-चरणकरणं प्रतिपाद्यते, एष च प्रवचनस्य सारःप्रधानमोक्षहेतुप्रतिपादनाद्, अत्र च स्थितस्य शेषाङ्गाध्ययनयोग्यत्वाद् अस्य प्रथमतयोपन्यास इति ॥९॥ इदानीं गणिद्वारं, साधुवर्गो गुणगणो वा गणः सोऽस्यास्तीति गणी, आचारायत्तं च गणित्वमिति प्रदर्शयन्नाह—

१ बन्धानुलोमता खलु शास्त्रे च लाघवमसंमोहः । सद्गुणदीपनमपि च एकार्थगुणा भवन्त्येते ॥ १ ॥

आयारम्मि अहीए जं नाओ होइ समणधम्मो उ । तम्हा आयारधरो भण्णइ पढमं गणिट्ठाणं ॥ १० ॥

यस्मादाचाराध्ययनात् क्षान्त्यादिकश्चरणकरणात्मको वा श्रमणधर्मः परिज्ञातो भवति, तस्मात्सर्वेषां गणित्वकारणानामाचारधरत्वं प्रथमम् आद्यं प्रधानं वा गणिस्थानमिति ॥१०॥ इदानीं परिमाणं—किं पुनरस्याध्ययनतः पदतश्च परिमाणमित्यत आह—

णवबंभचेरमइओ अट्ठारसपयसहस्सिओ वेओ । हवइ य सपंचचूलो बहुबहुतरओ पयग्गेणं ॥ ११ ॥

तत्राध्ययनतो नवब्रह्मचर्य्याभिधानाध्ययनात्मकोऽयं पदतोऽष्टादशपदसहस्रात्मको 'वेद' इति विदन्त्यस्माद्धेयोपादेयपदार्थानिति वेदः-क्षायोपशमिकभाववर्त्त्यमाचार इति । सह पञ्चभिश्चूडाभिर्वर्त्तत इति सपञ्चचूडश्च भवति, उक्तशेषानुवादिनी चूडा, तत्र प्रथमा *"पिंडेसण सेज्जिरियाभासज्जाया य वत्थपाएसा उग्गहपडिमत्ति' सप्ताध्ययनात्मिका, द्वितीया सप्तसप्तिकया, तृतीया भावना, चतुर्थी विमुक्तिः, पञ्चमी निशीथाध्ययनं, 'बहुबहुरओ पदग्गेणं'ति तत्र चतुश्चूलिकात्मकद्वितीयश्रुतस्कन्धप्रक्षेपाद्बहुः, निशीथाख्यपञ्चमचूलिकाप्रक्षेपाद्बहुतरोऽनन्तगमपर्य्यायात्मकतया बहुतमश्च, पदाग्रेण-पदपरिमाणेन भवतीति ॥११॥ इदानीमुपक्रमान्तर्गतं समवतारद्वारं, तत्रैताश्चूडा नवसु ब्रह्मचर्याध्ययनेष्ववतरन्तीति दर्शयितुमाह—

(१) (२) (३) (४) (५) (६) (७)

* पिंडेसणसिज्जिरिया भासा वत्थेसणा य पाएसा इति प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयारग्गाणत्थो बंभचेरेसु सो समोयरइ। सोऽवि य सत्थपरिण्णाएँ पिंडिअत्थो समोयरइ ॥ १२ ॥
सत्थपरिण्णाअत्थो छस्सुवि कायेसु सो समोयरइ। छज्जीवणियाअत्थो पंचसुवि वएसु ओयरइ ॥ १३ ॥
पंच य महव्वयाइं समोयरंते य सव्वदव्वेसुं। सव्वेसिं पज्जवाणं अणंतभागम्मि ओयरइ ॥ १४ ॥

उत्तानार्थाः, नवरम् 'आचाराग्राणि'चूलिकाः द्रव्याणि-धर्मास्तिकायादीनि पर्याया-अगुरुलघ्वादयः तेषामनन्तभागे व्रतानामवतार इति ॥ १२-१३-१४ ॥ कथं पुनर्महाव्रतानां सर्वद्रव्येष्ववतार इति?, तदाह—

छज्जीवणिया पढमे बीए चरिमे य सव्वदव्वाइं। सेसा महव्वया खलु तदेकदेसेण दव्वाणं ॥ १५ ॥

'छज्जीवणिया'इत्यादिसष्टा, कथं पुनर्महाव्रतानां सर्वद्रव्येष्ववतारो न सर्वपर्यायेष्विति उच्यते, येनाभिप्रायेण चोदकवांस्तमाविष्कर्तुमाह—"णणु सव्वणभपएसाणंतगुणं पढमसंजमट्ठाणं। छव्विहपरिवुड्ढीए छट्ठाणासंखया सेढी ॥ ६ ॥ अन्ने के पज्जाया? जेणुवउत्ता चरित्तविसयम्मि। जे तत्तोऽणंतगुणा जेसिं तमणंतभागम्मि ॥ ७ ॥ अन्ने केवलगम्मत्ति ते मई ते य के तदब्भहिया?। एवंपि होज्ज तुल्ला णाणंतगुणत्तणं जुत्तं ॥ ८ ॥ चो०। सेढीसु णाणदंसणपज्जाया तेण तप्पमाणेसा। इह पुण चरित्तमेत्तोवओगिणो तेण ते थोवा ॥ ९ ॥ अयमासामर्थो लेशतः—नन्वित्यसूयायां, संयमस्थानान्यसंख्यातानि तावद्भवन्ति, तेषां यज्जघन्यं तदविभागपलिच्छेदेन बुद्ध्या खण्ड्यमानं पर्यायैरनन्तविभागपलिच्छेदात्मकं भवति, तच्च पर्यायसंख्यया निर्दिष्टं सर्वाकाशप्रदेशसंख्याया अनन्तगुणं, सर्वनभःप्रदेशवर्गीकृतप्रमाणमित्यर्थः, ततो द्वितीयादिस्थानैरसंख्यातगच्छगतैरनन्तभागादिकया वृद्ध्या षट्स्थानकानामसंख्येयस्थानगता श्रेणिर्भवति, एवं चैकमपि स्थानं सर्वपर्यायान्वितं न शक्यते परिच्छेत्तुं, किं पुनः सर्वाण्यपीत्यतः केऽन्ये पर्यायाः? येषामनन्तभागे व्रतानि वर्तेरन्निति। स्वान्मतिः, अन्ये केवलगम्या इति, इदमुक्तं भवति—केवलगम्याप्रज्ञापनीयपर्य्यायाणामपि तत्र प्रक्षेपाद्बहुत्वम्, एवमपि ज्ञानज्ञेययोस्तुल्यत्वात्तुल्या एव नानन्तगुणा इति। अत्राचार्य्य आह—याऽसौ संयमस्थानश्रेणिर्निरूपिता सा सर्वा चारित्रपर्य्यायैर्ज्ञानदर्शनपर्यायसहितैः परिपूर्णा तत्प्रमाणा—सर्वाकाशप्रदेशानन्तगुणा, इह पुनश्चारित्रमात्रोपयोगित्वात्सर्वायानन्तभागवृत्तित्वमित्यदोषः। इदानीं सारद्वारं, कः कस्य सार इत्याह—

अंगाणं किं सारो? आयारो. तस्स हवइ किं सारो?। अणुओगत्थो सारो तस्सवि य परूवणा सारो॥१६॥

स्पष्टा, केवलमनुयोगार्थो—व्याख्यानभूतोऽर्थस्तस्य प्ररूपणा—यथास्वं विनियोग इति। अन्यच्च—

सारो परूवणाए चरणं तस्सवि य होइ निव्वाणं। निव्वाणस्स उ सारो अव्वाबाहं जिणा विंति ॥ १७॥

स्पष्टैव। इदानीं श्रुतस्कन्धपदयोर्नामादिनिक्षेपादिकं पूर्ववद्विधेयं, भावेन चेहाधिकारः, भावश्रुतस्कन्धश्च ब्रह्मचर्यात्मक इत्यतो ब्रह्मचरणशब्दौ निक्षेप्तव्यावित्याह—

बंभम्मी य चउक्कं ठवणाए होइ बंभणुप्पत्ती। सत्तण्हं वण्णाणं नवण्ह वण्णंतराणं च ॥ १८ ॥

तत्र ब्रह्म नामादिचतुर्धा, तत्र नामब्रह्म ब्रह्मेत्यभिधानम्, असद्भावस्थापना अक्षादौ सद्भावस्थापना प्रतिविशिष्टयज्ञोपवीताद्याकृतिमूलेप्यादौ द्रव्ये, अथवा स्थापनायां व्याख्यायमानायां ब्राह्मणोत्पत्तिर्वक्तव्या, तत्प्रसङ्गेन च सप्तानां वर्णानां नवानां च वर्णान्तराणामुत्पत्तिर्भणनीयेति। यथाप्रतिज्ञातमाह—

एक्का मणुस्सजाई रज्जुप्पत्तीइ दो कया उसभे। तिण्णेव सिप्पकरणिए सावगधम्मम्मि चत्तारि ॥ १९ ॥

यावन्नाभेयो भगवान्नाद्यापि राजलक्ष्मीमध्यास्ते, तावदेकैव मनुष्यजातिः, तस्यैव राज्योत्पत्तौ भगवन्तमेवाश्रित्य ये स्थितास्ते क्षत्रियाः, शेषाश्च शोचनाद्रोदनाच्च शूद्राः, पुनरुद्युक्तवयस्कारादिशिल्पवाणिज्यवृत्त्या वेशनाद्वैश्याः, भगवतो ज्ञानोत्पत्तौ भरतकाकणीलाञ्छनाच्छावका एव ब्राह्मणा जज्ञिरे, एते शुद्धाख्यश्चान्ये गाथान्तरितगाथया प्रदर्शयिष्यन्ते॥ साम्प्रतं वर्णवर्णान्तरनिष्पन्नं संख्यानमाह—

संजोगे सोलसगं सत्त य वण्णा उ नव य अंतरिणो। एए दोवि विगप्पा ठवणा बंभस्स णायव्वा ॥२०॥

संयोगेन षोडश वर्णाः समुत्पन्नाः, तत्र सप्त वर्णा नव तु वर्णान्तराणि, एतच्च वर्णवर्णान्तरविकल्पद्वयं स्थापनाब्रह्मेति ज्ञातव्यम्॥ साम्प्रतं पूर्वसूचितं वर्णत्रयमाह—यदि वा प्रागुद्दिष्टान् सप्त वर्णानाह—

पगई चउक्कगाणंतरे य ते हुंति सत्त वण्णा उ। आणंतरेसु चरमो वण्णो खलु होइ णायव्वो ॥ २१ ॥

---

१ षड्जीवनिकायः प्रथमे द्वितीये चरमे च सर्वद्रव्याणि। शेषाणि महाव्रतानि खलु तदेकदेशेन द्रव्याणाम्।

१ आचार्या आहुः प्र.

१ जे राय अस्सिता ते खत्तिआ जाया, अणस्सिया गिहवइणो जाया, जया अग्गी उप्पण्णो तया पागभावस्सिता सिप्पिया वाणियगा जाया, तेहिं तेहिं सिप्पकारणिज्जेहिं विसंतीति वइस्सा उप्पण्णा। भद्दाए पव्वइए भरहे अभिसित्ते सावगधम्मे उप्पण्णे बंभणा जाया, णिस्सिता बंभणा जाया, माहणत्ति उक्कस्सगभावा धम्मपिआ जं च किंचिवि हणंतं पिच्छंति तं निवारेंति मा हण भो मा हण, एवं ते जणेण सुकम्मनिव्वत्तितसण्णा बंभणा जाया। जे पुण अणस्सिता असिप्पिणो असावगा ते वयं खला इतिकाउं तेसु तेसु पओयणेसु हिंसाचोरियादियासु दुन्भमाणा सोगदोहणसीला सुद्दा संवुत्ता (इति चूर्णिः).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकृतयश्चतस्रः—ब्राह्मणक्षत्रियवैश्यशूद्राख्या आसामेव चतसृणामनन्तरयोगेन प्रत्येकं वर्णत्रयोत्पत्तिः, तद्यथा—द्विजेन क्षत्रिययोषितो जातः प्रधानक्षत्रियः संकरक्षत्रियो वा, एवं क्षत्रियेण वैश्ययोषितो वैश्येन शूद्र्याः प्रधानसंकरभेदौ वक्तव्यावित्येवं सप्त वर्णा भवन्ति, अनन्तरेषु भवा आनन्तरास्तेषु योगेषु चरमवर्णव्यपदेशो भवति—ब्राह्मणेन क्षत्रियायाः क्षत्रियो भवतीत्यादि, स च स्वस्थाने प्रधानो भवतीतिभावः ॥ इदानीं वर्णान्तराणां नवानां नामान्याह—

अंबट्ठुग्गनिसाया य अजोगवं मागहा य सूया य। खत्ता(य) विदेहावि य चंडाला नवमगा हुंति ॥ २२ ॥

अम्बष्ठ उग्रः निषादः अयोगवं मागधः सूतः क्षत्ता विदेहः चाण्डालश्चेति ॥ कथमेते भवन्तीत्याह—

एगंतरिए इणमो अंबट्ठो चेव होइ उग्गो य। बिइयंतरिअ निसाओ परासरं तं च पुण वेंगे ॥ २३ ॥

पडिलोमे सुद्दाई अजोगवं मागहो य सूओ अ। एगंतरिए खत्ता वेदेहा चेव नायव्वा ॥ २४ ॥

बितियंतरे नियमा चण्डालो सोऽवि होइ णायव्वो। अणुलोमे पडिलोमे एवं एए भवे भेया ॥ २५ ॥

आसामर्थो यन्त्रकादवसेयः, तच्चेदम्—

ब्रह्मपुरुषः वैश्या स्त्री अम्बष्ठः	क्षत्रियः पुरुषः शूद्री स्त्री उग्रः	ब्राह्मणः पुरुषः शूद्री स्त्री निषादः पारासरो वा	शूद्रः पुरुषः वैश्या स्त्री अयोगवम्	वैश्यपुरुषः क्षत्रिया स्त्री मागधः	क्षत्रियः पुरुषः ब्रह्मस्त्री सूतः	शूद्रः पुरुषः क्षत्रिया स्त्री क्षत्ता	वैश्यपुरुषः ब्राह्मस्त्री वैदेहः	शूद्रपुरुषः ब्राह्मस्त्री चाण्डालः

॥ ८ ॥

एतानि नव वर्णान्तराणि, इदानीं वर्णान्तराणां संयोगोत्पत्तिमाह—

उग्गेणं खत्ताए सोवागो वेणवो विदेहेणं। अंबट्ठीए सुद्दीय बुक्कसो जो निसाएणं ॥ २६ ॥

सूएण निसाईए कुक्कुरओ सोवि होइ णायव्वो। एसो बीओ भेओ चउव्विहो होइ णायव्वो ॥ २७ ॥

अनयोरप्यर्थो यन्त्रकादवसेयः, तच्चेदम्।

उग्रपुरुषः क्षत्ता स्त्री श्वपाकः	विदेहः पुरुषः क्षत्ता स्त्री वैणवः	निषादः पुरुषः अम्बष्ठी स्त्री शूद्री स्त्री वा बुक्कसः	शूद्रः पुरुषः निषादस्त्री कुक्कुरकः

गतं स्थापनाब्रह्म, इदानीं द्रव्यब्रह्मप्रतिपादनाय आह—

दव्वं सरीरभविओ अन्नाणी वत्थिसंजमो चेव। भावे उ वत्थिसंजम णायव्वो संजमो चेव ॥ २८ ॥

ज्ञशरीरभव्यशरीरव्यतिरिक्तं शाक्यपरिव्राजकादीनामज्ञानानुगतचेतसां वस्तिनिरोधमात्रं विधवाप्रोषितभर्तृकादीनां च कुलव्यवस्थार्थं कारितानुमतियुक्तं द्रव्यब्रह्म, भावब्रह्म तु साधूनां वस्तिसंयमः, अष्टादशभेदरूपोऽप्ययं संयम एव, सप्तदशविधसंयमाभिन्नरूपत्वादस्येति, अष्टादश भेदास्त्वमी—'दिव्यात्कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम्। औदारिकादपि तथा तद्ब्रह्माष्टादशविकल्पम् ॥ १ ॥'[1] चरणनिक्षेपार्थमाह—

चरणंमि होइ छक्कं गहमाहारो गुणो व चरणं च। खित्तंमि जंमि खित्ते काले कालो जहिं जाओ(जो उ) ॥२९॥

---

१ तच्च प्रथमचतुष्कोष्टकादवगन्तव्यम् प्र.

चरणं नामादिषोढा, व्यतिरिक्तं द्रव्यचरणं त्रिधा भवति—गतिभक्षणगुणभेदात्, तत्र गतिचरणं गमनमेव, आहारचरणं मोदकादेः, गुणचरणं द्विधा—लौकिकं लोकोत्तरं च, लौकिकं यत् द्रव्यार्थं हस्तिशिक्षादिकं वैद्यकादिकं वा शिक्षन्ते, लोकोत्तरं साधूनामनुपयुक्तचरणमुदायिनृपमारकादेर्वा, क्षेत्रचरणं यस्मिन् क्षेत्रे गत्याहारादि चर्य्यते व्याख्यायते वा, शब्दसामान्यान्तर्भावाद्वा शालिक्षेत्रादिचरणमिति, कालेऽप्येवमेव ॥ भावचरणमाह—

भावे गहमाहारो गुणो गुणवओ पसत्थमपसत्था। गुणचरणे पसत्थेण बंभचेरा नव हवंति ॥ ३० ॥

भावचरणमपि गत्याहारगुणभेदात् त्रिधा, तत्र गतिचरणं साधोरुपयुक्तस्य युगमात्रदत्तदृष्टेर्गच्छतः, भक्षणचरणमपि शुद्धं पिण्डमुपभुञ्जानस्य, गुणचरणमप्रशस्तं मिथ्यादृष्टीनां सम्यग्दृष्टीनामपि सनिदानं, प्रशस्तं तेषामेव कर्मोद्वेष्टनार्थं मूलोत्तरगुणकलापविषयम्, इह चाननैवाधिकारो, यतो नवाप्यध्ययनानि मूलोत्तरगुणस्थापकानि निर्जरार्थमनुशील्यन्ते ॥ एतेषां चान्वार्थाभिधानानि दर्शयितुमाह—

सत्थपरिण्णा १ लोगविजओ २ य सीओसणिज्ज ३ सम्मत्तं ४। तह लोगसारनामं ५ धुयं ६ तह महापरिण्णा ७ य ॥ ३१ ॥
अट्ठमए य विमोक्खो ८ उवहाणसुयं ९ च नवमगं भणियं। इचेसो आयारो आयारग्गाणि सेसाणि ॥ ३२ ॥

स्पष्टे, केवलमित्येष नवाध्ययनरूप आचारो, द्वितीयश्रुतस्कन्धाध्ययनानि तु शेषाणि—आचाराग्राणीति ॥ साम्प्रतमुपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राद्यमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिअसंजमो१ अ लोगो जह बज्झइ जह य तं पजहियव्वं २। सुहदुक्खतितिक्खावियऽसम्मत्तं४लोगसारो ५य ३३ निस्संगया ६ य छट्ठे मोहसमुत्था परीसहुवसग्गा ७। निज्जाणं ८ अट्ठमए नवमे य जिणेण एवं ति ९ ॥ ३४ ॥

तत्र शस्त्रपरिज्ञायामयमर्थाधिकारो—'जिणसंजमो'त्ति जीवेषु संयमो जीवसंयमः–तेषु हिंसादिपरिहारः, स च जीवास्तित्वपरिज्ञाने सति भवत्यतो जीवास्तित्वविरतिप्रतिपादनमत्रार्थाधिकारः। लोकविजये तु 'लोगो जह बज्झइ जह य तं पजहियव्वं'ति, विजितभावलोकेन संयमस्थितेन लोको यथा बध्यते अष्टविधेन कर्मणा यथा च तन्मोक्तव्यं तथा ज्ञातव्यमित्ययमर्थाधिकारः। तृतीये त्वयम्–संयमस्थितेन जितकषायेणानुकूलप्रतिकूलोपसर्गनिपाते सुखदुःखतितिक्षा विधेयेति। चतुर्थे त्वयम्–प्राक्तनाध्ययनार्थसंपन्नेन तापसादिकष्टतपःसेवितानष्टगुणैश्वर्यमुद्वीक्ष्यापि दृढसम्यक्त्वेन भवितव्यमिति। पञ्चमे त्वयम्–चतुरध्ययनार्थस्थितेनासारपरित्यागेन लोकसाररत्नत्रयोद्युक्तेन भाव्यमिति। षष्ठे त्वयम्–प्रागुक्तगुणयुक्तेन निसङ्गतायुक्तेनाप्रतिबद्धेन भवितव्यम्। सप्तमे त्वयम्–संयमादिगुणयुक्तस्य कदाचिन्मोहसमुत्थाः परीषहा उपसर्गा वा प्रादुर्भवेयुस्ते सम्यक् सोढव्याः। अष्टमे त्वयम्–निर्याणम्–अन्तक्रिया सा सर्वगुणयुक्तेन सम्यग्विधेयेति। नवमे त्वयम्–अष्टाध्ययनप्रतिपादितोऽर्थः सम्यगेवं वर्द्धमानस्वामिना विहित इति, तद्प्रदर्शनं च शेषसाधूनामुत्साहार्थं,

१ उद्दओ भावो लोगो कसाया जाणियव्वा (इति चूर्णिः).

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १० ॥

तदुक्तम्—"तित्थयरो चउणाणी सुरमहिओ सिज्झियव्वयधुवंमि। अणिगूहियबलविरिओ सव्वत्थामेसु उज्जमइ ॥ १ ॥ किं पुण अवसेसेहिं दुक्खक्खयकारणा सुविहिएहिं। होंति न उज्जमियव्वं सपच्चवायंमि माणुस्से ॥ २ ॥"॥ साम्प्रतमुद्देशार्थाधिकारः शस्त्रपरिज्ञाया अयम्—

अध्ययनं १ उद्देशकः १

जीवो छक्कायपरुवणा य तेसिं वहे य बंधोत्ति। विरईए अहिगारो सत्थपरिण्णाएँ णायव्वो ॥ ३५ ॥

तत्र प्रथमोद्देशके सामान्येन जीवास्तित्वं प्रतिपाद्यं, शेषेषु तु षट्सु विशेषेण पृथिवीकायाद्यस्तित्वमिति, सर्वेषां चाद्याने बन्धविरतिप्रतिपादनमिति, एतच्चान्ते उपात्तत्वात्प्रत्येकमुद्देशार्थेषु योजनीयं, प्रथमोद्देशके जीवास्तद्बधे बन्धो विरतिश्चेत्येवमिति ॥ तत्र शस्त्रपरिज्ञेति द्विपदं नाम, शस्त्रस्य निक्षेपमाह—

दव्वं सत्थग्गिविसस्नेहंबिलखारलोणमाईयं। भावो य दुप्पउत्तो वाया काओ अविरई या ॥ ३६ ॥

शस्त्रस्य निक्षेपो नामादिश्चतुर्धा, व्यतिरिक्तं द्रव्यशस्त्रं खड्गाद्यग्निविषस्नेहाम्लक्षारलवणादिकं, भावशस्त्रं दुष्प्रयुक्तो भावः–अन्तःकरणं तथा वाक्कायावविरतिश्चेति, जीवोपघातकारित्वादितिभावः ॥ परिज्ञापि चतुर्धेत्याह—

दव्वं जाणण पच्चक्खाणे दविए सरीर उवगरणे। भावपरिण्णा जाणण पच्चक्खाणं च भावेणं ॥ ३७ ॥

॥ १० ॥

१ तीर्थकरश्चतुर्ज्ञानी सुरमहितः ध्रुवं सेधितव्ये। अनिगूहितबलवीर्यः सर्वस्थाम्नोद्यच्छति ॥ १ ॥ किं पुनरवशेषैर्दुःखक्षयकारणात्सुविहितैः। भवति नोद्यन्तव्यं सप्रत्यपाये मानुष्ये ॥ २ ॥

तत्र द्रव्यपरिज्ञा द्विधा–ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च, ज्ञपरिज्ञा आगमनोआगमभेदाद्विधा, आगमतो ज्ञाताऽनुपयुक्तः, नोआगमतस्त्रिधा, तत्र व्यतिरिक्ता द्रव्यपरिज्ञा यो यत् द्रव्यं जानीते सचित्तादि सा परिच्छेद्यद्रव्यप्राधान्यात् द्रव्यपरिज्ञेति, प्रत्याख्यानपरिज्ञाऽप्येवमेव, तत्र व्यतिरिक्तद्रव्यप्रत्याख्यानपरिज्ञा देहोपकरणपरिज्ञानम्, उपकरणं च रजोहरणादि, साधकतमत्वात्, भावपरिज्ञापि द्विधैव–ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च, तत्रागमतो ज्ञातोपयुक्तश्च, नोआगमतस्त्विदमेवाध्ययनं ज्ञानक्रियारूपं, नोशब्दस्य मिश्रवाचित्वात्, प्रत्याख्यानभावपरिज्ञापि तथैव, आगमतः पूर्ववत्, नोआगमतस्तु प्राणातिपातनिवृत्तिरूपा मनोवाक्कायकृतकारितानुमतिभेदात्मिका ज्ञेयेति। गतो नामनिष्पन्नो निक्षेपः, साम्प्रतमाचारादिप्रदानस्य सुखप्रतिपत्तये दृष्टान्तोपन्यासेन विधिराख्यायते–यथा कश्चिद्राजा अभिनवनगरनिवेशेच्छया भूखण्डानि विभज्य समतया प्रकृतिभ्यो दत्तवान्, तथा कचवरापनयने शल्योद्धारे भूस्थिरीकरणे पक्केष्टकापीठप्रासादरचने रत्नाद्युपादाने चोपदेशं दत्तवान्, ताश्च प्रकृतयस्तदुपदेशानुसारेण तथैव कृत्वा यथाऽभिप्रेतान् भोगान् बुभुजिरे, अयमत्रार्थोपनयः–राजसदृशेन सूरिणा प्रकृतिसदृशस्य शिष्यगणस्य भूखण्डसदृशः संयमो मिथ्यात्वकचवराद्यपनीय सर्वोपाधिशुद्धस्यारोपणीयः, तं च सामायिकसंयमं स्थिरीकृत्य पक्केष्टिकापीठतुल्यानि व्रतान्यारोपणीयानि, ततः प्रासादकल्पोऽयमाचारो विधेयः, तत्रस्थश्चाशेषशास्त्रादिरत्नान्यादत्ते, निर्वाणभाक् भवति। साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणलक्षणोपेतं सूत्रमुच्चारणीयं, लक्षणं त्विदम्—'अप्पग्गंथमहत्थं बत्तीसादोसविरहियं जं च। लक्खणजुत्तं

१ अल्पग्रन्थं महार्थं द्वात्रिंशद्दोषविरहितं यच्च। लक्षणयुक्तं सूत्रमष्टभिश्च गुणैरुपपेतम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ सुयं मे आउसं ! तेणं भगवया एवमक्खायं–इहमेगेसिं णो सण्णा भवइ (सू० १)

सुत्तं अट्ठहि य गुणेहिं उववेयं ॥ १ ॥' इत्यादि, तच्चेदं सूत्रम्—'सुयं मे आउसं ! तेणं भगवया एवमक्खायं–इहमेगेसिं णो सण्णा भवति' अस्य संहितादिक्रमेण व्याख्या–संहितोच्चारितैव, पदच्छेदस्त्वयम्–श्रुतं मया आयुष्मन् ! तेन भगवता एवमाख्यातम्–इह एकेषां नो संज्ञा भवति । एकं तिङन्तं शेषाणि सुबन्तानि, गतः सपदच्छेदः सूत्रानुगमः, साम्प्रतं सूत्रपदार्थः समुन्नीयते–भगवान् सुधर्मस्वामी जंबूनाम्न इदमाचष्टे यथा–'श्रुतम्' आकर्णितमवगतमवधारितमितियावद्, अनेन स्वमनीषिकाव्युदासो, 'मये'ति साक्षान्न पुनः पारम्पर्येण 'आयुष्मन्निं'ति जात्यादिगुणसंभवेऽपि दीर्घायुष्कत्वगुणोपादानं दीर्घायुरविच्छेदेन शिष्योपदेशप्रदायको यथा स्यात्, इहाचारस्य व्याचिख्यासितत्वात्तदर्थस्य च तीर्थकृत्प्रणीतत्वादिति सामर्थ्यप्रापितं तेनेति तीर्थकरमाह, यदि वा—आमृशता भगवत्पादारविन्दम्, अनेन विनय आवेदितो भवति, आवसता वा तदन्तिक इत्यनेन गुरुकुलवासः कर्त्तव्य इत्यावेदितं भवति, एतच्चार्थद्वयं 'आमुसंतेण आवसंतेणे'त्येतत्पाठान्तरमाश्रित्यावगन्तव्यमिति, 'भगवते'ति भगः–ऐश्वर्य्यादिषडर्थात्मकः सोऽस्यास्तीति भगवान् तेन, 'एव'मिति वक्ष्यमाणविधिना 'आख्यात'मित्यनेन कृतकत्वव्युदासेनार्थरूपतया आगमस्य नित्यत्वमाह, 'इहे'ति क्षेत्रे प्रवचने आचारे शस्त्रपरिज्ञायां वा आख्यातमितिसंबन्धो, यदि वा–'इहे'ति संसारे 'एकेषां' ज्ञानावरणीयावृतानां प्राणिनां 'नो संज्ञा

॥ ११ ॥

१ चूर्ण्यभिप्रायेण द्वितीयसूत्रावतरणमेतत्.

२ पत्तेयं पत्तेयं (गणहरा) तिम्मेहिं पज्जवासिज्जमाणा एवं भणंति–'सुयं मे० (इति चूर्णिः)

भवति' संज्ञानं संज्ञा स्मृतिरवबोध इत्यनर्थान्तरं, सा नो जायत इत्यर्थः, उक्तः पदार्थः, पदविग्रहस्य तु सामासिकपदाभावादप्रकटनम् । इदानीं चालना–ननु चाकारादिकप्रतिषेधकलघुशब्दसंभवे सति किमर्थं नोशब्देन प्रतिषेधः इति ?, अत्र प्रत्यवस्था, सत्यमेवं, किंतु प्रेक्षापूर्वकारितया नोशब्दोपादानं, सा चेयम्–अन्येन प्रतिषेधेन सर्वनिषेधः स्याद्, यथा न घटोऽघट इति चोक्ते सर्वात्मना घटनिषेधः, स च नेष्यते, यतः प्रज्ञापनायां दश संज्ञाः सर्वप्राणिनामभिहितास्तासां सर्वासां प्रतिषेधः प्राप्नोतीतिकृत्वा, ताश्चेमाः—"कइ णं भंते ! सण्णाओ पण्णत्ताओ ?, गोयमा ! दस सण्णाओ पण्णत्ताओ, तंजहा–आहारसण्णा भयसण्णा मेहुणसण्णा परिग्गहसण्णा कोहसण्णा माणसण्णा मायासण्णा लोभसण्णा ओहसण्णा लोगसण्ण"त्ति, आसां च प्रतिषेधे स्पष्टो दोषः, अतो नोशब्देन प्रतिषेधनमकारि, यतोऽयं सर्वनिषेधवाची देशनिषेधवाची च, तथाहि–नोघट इत्युक्ते यथा घटाभावमात्रं प्रतीयते, तथा प्रकरणादिप्रसक्तस्य विधानं, स पुनर्विधीयमानः प्रतिषेध्यावयवो ग्रीवादिः प्रतिषेध्यादन्यो वा पटादिः प्रतीयत इति, तथा चोक्तम्—"प्रतिषेधयति समस्तं प्रसक्तमर्थं च जगति नोशब्दः । स पुनस्तदवयवो वा तस्मादर्थान्तरं वा स्यादु ॥ १ ॥" इति, एवमिहापि न सर्वसंज्ञानिषेधः, अपितु विशिष्टसंज्ञानिषेधो, ययाऽऽत्मादिपदार्थस्वरूपं गत्यागत्यादिकं ज्ञायते तस्या निषेध इति ॥ साम्प्रतं निर्युक्तिकृत्सूत्रावयवनिक्षेपार्थमाह—

१ कति भदन्त ! संज्ञाः प्रज्ञप्ताः ?, गौतम ! दश संज्ञाः प्रज्ञप्ताः, तद्यथा–आहारसंज्ञा भयसंज्ञा मैथुनसंज्ञा परिग्रहसंज्ञा क्रोधसंज्ञा मानसंज्ञा मायासंज्ञा लोभसंज्ञा ओघसंज्ञा लोकसंज्ञा. ..

२ ०क्ते घटाभावमात्रं प्रतीयते अर्थप्रसक्तनिषेधेन चाप्रसक्तस्य प्र.

दव्वे सचित्ताई भावेऽणुभवणजाणणा सण्णा । मति होइ जाणणा पुण अणुभवणा कम्मसंजुत्ता ॥३८॥

संज्ञा नामादिभेदाच्चतुर्धा, नामस्थापने क्षुण्णे, द्रव्यशरीरभव्यशरीरव्यतिरिक्ता सचित्ताचित्तमिश्रभेदात्त्रिधा, सचित्तेन हस्तादिद्रव्येण पानभोजनादिसंज्ञा अचित्तेन ध्वजादिना मिश्रेण प्रदीपादिना संज्ञानं–संज्ञा अवगम इतिकृत्वा, भावसंज्ञा पुनर्द्विधा–अनुभवनसंज्ञा ज्ञानसंज्ञा च, तत्राल्पव्याख्येयत्वात्तावत् ज्ञानसंज्ञा दर्शयति–'मइ होइ जाणणा पुण'त्ति मननं मतिः–अवबोधः सा च मतिज्ञानादिः पञ्चधा, तत्र केवलसंज्ञा क्षायिकी शेषास्तु क्षायोपशमिक्यः, अनुभवनसंज्ञा तु स्वकृतकर्मोदयादिसमुत्था जन्तोर्जायते, सा च षोडशभेदेति दर्शयति–

आहार भय परिग्गह मेहुण सुख दुक्ख मोह वितिगिच्छा । कोह माण माय लोहे सोगे लोगे य धम्मोहे ॥३९॥

आहाराभिलाष आहारसंज्ञा, सा च तैजसशरीरनामकर्मोदयादसातोदयाच्च भवति, भयसंज्ञा त्रासरूपा, परिग्रहसंज्ञा मूर्छारूपा, मैथुनसंज्ञा स्त्र्यादिवेदोदयरूपा, एताश्च मोहनीयोदयात्, सुखदुःखसंज्ञे सातासातानुभवरूपे वेदनीयोदयजे, मोहसंज्ञा मिथ्यादर्शनरूपा मोहोदयात्, विचिकित्सासंज्ञा चित्तविप्लुतिरूपा मोहोदयात् ज्ञानावरणीयोदयाच्च, क्रोधसंज्ञा अप्रीतिरूपा, मानसंज्ञा गर्वरूपा, मायासंज्ञा वक्रतारूपा, लोभसंज्ञा गृद्धिरूपा, शोकसंज्ञा विप्रलापवैमनस्यरूपा, एता मोहोदयजाः, लोकसंज्ञा स्वच्छन्दघटितविकल्परूपा लौकिकाचरिता, यथा–न सन्त्यनपत्यस्य लोकाः, श्वानो यक्षाः, विप्रा देवाः, काकाः पितामहाः, बर्हिणां पक्षवातेन गर्भ इत्येवमादिका ज्ञानावरणक्षयोपशमान्मोहोदयाच्च भवति, धर्मसंज्ञा क्षमाद्यासेवनरूपा मोहनीयक्षयोपशमाज्जायते, एताश्चाविशेषोपादानात्सञ्ज्ञेन्द्रियाणां सम्यग्मिथ्यादृशां

॥ १२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रष्टव्याः, ओघसंज्ञा तु अव्यक्तोपयोगरूपा वल्लिवितानारोहणादिलिङ्गा ज्ञानावरणीयाल्पक्षयोपशमसमुत्था द्रष्टव्येति । इह पुनर्ज्ञानसंज्ञयाऽधिकारो, यतः सूत्रे सैव निषिद्धा 'इह एकेषां नो संज्ञा ज्ञानम्–अवबोधो भवती'ति ॥ १ ॥

प्रतिषिद्धज्ञानविशेषावगमार्थमाह सूत्रम्—

तंजहा–पुरत्थिमाओ वा दिसाओ आगओ अहमंसि, दाहिणाओ वा दिसाओ आगओ अहमंसि, पच्चत्थिमाओ वा दिसाओ आगओ अहमंसि, उत्तराओ वा दिसाओ आगओ अहमंसि, उड्ढाओ वा दिसाओ आगओ अहमंसि, अहोदिसाओ वा आगओ अहमंसि, अण्णयरीओ वा दिसाओ अणुदिसाओ वा आगओ अहमंसि, एवमेगेसिं णो णायं भवति (सू० २)

"तंजहेत्यादि णो णायं भवतीति यावत्" तद्यथेति प्रतिज्ञातार्थोदाहरणं, 'पुरत्थिमाउ'त्ति प्राकृतशैल्या मागधदेशीभाषानुवृत्त्या पूर्वस्या दिशोऽभिधायकात् पुरत्थिमशब्दात्सञ्चम्यन्तात्तसा निर्देशः, वाशब्द उत्तरपक्षापेक्षया विकल्पार्थः, यथा लोके भोक्तव्यं वा शयितव्यं वेति, एवं पूर्वस्या वा दक्षिणस्या वेति। दिशतीति दिक्, अतिसृजति व्यपदिशति द्रव्यं द्रव्यभागं वेति भावः ॥ तां निर्युक्तिकृन्निक्षेक्षुमाह—

आ. सू. २
श्रीआचाराङ्गवृत्तिः (शी०)
॥ १३ ॥

नामं ठवणा दविए खित्ते तावे य पण्णवग भावे। एस दिसानिक्खेवो सत्तविहो होइ णायव्वो ॥ ४० ॥

अध्ययनं १
उद्देशकः १

नामस्थापनाद्रव्यक्षेत्रतापप्रज्ञापकभावरूपः सप्तधा दिग्निक्षेपो ज्ञातव्यः, तत्र सचित्तादेर्द्रव्यस्य दिगित्यभिधानं नामदिक्, चित्रलिखितजम्बूद्वीपादेर्दिग्विभागस्थापनं स्थापनादिक् । द्रव्यदिग्निक्षेपार्थमाह—

तेरसपएसियं खलु तावइएसुं भवे पएसेसुं । जं दव्वं ओगाढं जहण्णयं तं दसदिसागं ॥ ४१ ॥

द्रव्यदिग् द्वेधा–आगमतो नोआगमतश्च, आगमतो ज्ञाताऽनुपयुक्तो, नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तात्वियम्–त्रयोदशप्रदेशिकं द्रव्यमाश्रित्य या प्रवृत्ता, खलुरवधारणे, त्रयोदशप्रदेशिकमेव दिक्, न पुनर्दशप्रदेशिकं यत् कैश्चिदुक्तमिति, प्रदेशाः–परमाणवस्तैर्निष्पादितं कार्यद्रव्यं तावत्स्वेव क्षेत्रप्रदेशेष्ववगाढं जघन्यं द्रव्यमाश्रित्य दशदिग्विभागपरिकल्पनातो द्रव्यदिगियमिति । तत्स्थापना (२) । त्रिबाहुकं नवप्रदेशिकमभिलिख्य चतसृषु दिक्ष्वेकैकगृहवृद्धिः कार्या ॥ क्षेत्रदिशमाह—

अट्ठ पएसो रुयगो तिरियं लोयस्स मज्झयारंमि । एस पभवो दिसाणं एसेव भवे अणुदिसाणं ॥ ४२ ॥

तिर्यग्लोकमध्ये रत्नप्रभापृथिव्या उपरि बहुमध्यदेशे मेर्वन्तर्द्वौ सर्वक्षुल्लकप्रतरौ तयोरुपरितनस्य चत्वारः प्रदेशा गोस्तनाकारसंस्थाना अधस्तनस्यापि चत्वारस्तथाभूता एवेत्येषोऽष्टाकाशप्रदेशात्मकश्चतुरस्रो रुचको दिशामनुदिशां च प्रभव–उत्पत्तिस्थानमिति । स्थापना (३) । आसामभिधानान्याह—

॥ १३ ॥

इंदग्गेई जम्मा य नेरुती वारुणी य वायव्वा । सोमा ईसाणावि य विमला य तमा य बोद्धव्वा ॥ ४३ ॥

आसामाद्यैन्द्री विजयद्वारानुसारेण शेषाः प्रदक्षिणतः सप्तावसेयाः, ऊर्ध्वं विमला तमा बोद्धव्या इति ॥ आसामेव स्वरूपनिरूपणायाह—

दुपएसाइ दुरुत्तर एगपएसा अणुत्तरा चेव । चउरो चउरो य दिसा चउराइ अणुत्तरा दुण्णि ॥ ४४ ॥

चतस्रो महादिशो द्विप्रदेशाद्या द्विद्विप्रदेशोत्तरवृद्धाः, विदिशश्चतस्र एकप्रदेशरचनात्मिकाः 'अनुत्तरा'वृद्धिरहिताः, ऊर्ध्वाधोदिगद्वयं त्वनुत्तरमेव चतुष्प्रदेशादिरचनात्मकम् ॥ किञ्च—

अंतो साईआओ बाहिरपासे अपज्जवसिआओ । सव्वाणंतपएसा सव्वा य भवंति कडजुम्मा ॥ ४५ ॥

सर्वाऽप्यन्तः–मध्ये सादिका रुचकाद्या इतिकृत्वा बहिश्च अलोकाकाशाश्रयणादपर्यवसिताः, 'सर्वाश्च' दशाप्यनन्तप्रदेशात्मिका भवन्ति, 'सव्वा य हवंति कडजुम्म'त्ति सर्वासां दिशां प्रत्येकं ये प्रदेशास्ते चतुष्ककेनापहियमाणाश्चतुष्कावशेषा भवन्तीतिकृत्वा, तत्प्रदेशात्मिकाश्च दिश आगमसंज्ञया कडजुम्मत्तिशब्देनाभिधीयन्ते, तथा चागमः—"कई णं भंते ! जुम्मा पण्णत्ता ?, गोयमा ! चत्तारि जुम्मा पण्णत्ता, तंजहा–कडजुम्मे तेउए दावरजुम्मे कलिओए। से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! जे णं रासी चउक्कगावहारेणं अवहीरमाणे अवहीरमाणे चउपज्जवसिए सिया, से णं कडजुम्मे. एवं तिपज्जवसिए तेउए, दुपज्जवसिए दावरजुम्मे, एगपज्जवसिए कलिओए"त्ति ॥ पुनरप्यासां संस्थानमाह—

---

१ कति भदन्त ! युग्माः प्रज्ञप्ताः ?, गौतम ! चत्वारो युग्माः प्रज्ञप्ताः, तद्यथा–कृतयुग्मः त्र्योजः द्वापर युग्मः कल्योजः । अथ केनार्थेन भदन्तैवमुच्यते ?, गौतम ! योराशश्चतुष्ककापहारेणापहियमाणोऽपहियमाणश्चतुष्पर्यवसितः स्यात् स कृतयुग्मः, एवं त्रिपर्यवसितस्त्र्योजः, द्विपर्यवसितो द्वापर युग्मः, एकपर्यवसितः कल्योजः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सगडुद्धीसंठिआओ महादिसाओ हवंति चत्तारि । मुत्तावली य चउरो दो चेव हवंति रुयगनिभा ॥ ४६ ॥

महादिशश्चतस्रोऽपि शकटोर्द्धिसंस्थानाः, विदिशश्च मुक्तावलिनिभाः, ऊर्द्ध्वाधोदिग्द्वयं रुचकाकारमिति ॥ तापदिशमाह—

जस्स जओ आइच्चो उदेइ सा तस्स होइ पुव्वदिसा । जत्तो अ अत्थमेइ उ अवरदिसा सा उ णायव्वा ॥ ४७ ॥
दाहिणपासंमि य दाहिणा दिसा उत्तरा उ वामेणं । एया चत्तारि दिसा तावखित्ते उ अक्खाया ॥ ४८ ॥

तापयतीति तापः—आदित्यः, तदाश्रिता दिक् तापदिक् शेषं सुगमं, केवलं दक्षिणपार्श्वादिव्यपदेशः पूर्वाभिमुखस्येति द्रष्टव्यः ॥ तापदिगङ्गीकरणेनान्योऽपि व्यपदेशो भवतीति प्रसङ्गत आह—

जे मंदरस्स पुव्वेण मणुस्सा दाहिणेण अवरेण । जे आवि उत्तरेणं सव्वेसिं उत्तरो मेरू ॥ ४९ ॥
सव्वेसिं उत्तरेणं मेरू लवणो य होइ दाहिणओ । पुव्वेणं उट्ठेई अवरेणं अत्थमइ सूरो ॥ ५० ॥

ये 'मन्दरस्य' मेरोः पूर्वेण मनुष्याः क्षेत्रदिगङ्गीकरणेन, रुचकापेक्षं पूर्वादिदिक्त्वं वेदितव्यं, तेषामुत्तरो मेरुर्दक्षिणेन लवण इति तापदिगङ्गीकरणेन, शेषं स्पष्टम् ॥ प्रज्ञापकदिशमाह—

जत्थ य जो पण्णवओ कस्सवि साहइ दिसासु य णिमित्तं । जत्तोमुहो य ठाई सा पुव्वा पच्छओ अवरा ॥ ५१ ॥

प्रज्ञापको यत्र क्वचित् स्थितः दिशां बलात्कस्यचिन्निमित्तं कथयति स यदभिमुखस्तिष्ठति सा पूर्वा, पृष्ठतश्चापरेति, निमित्तकथनं चोपलक्षणमन्योऽपि व्याख्याता ग्राह्य इति ॥ शेषदिक्साधनार्थमाह—

दाहिणपासंमि उ दाहिणा दिसा उत्तरा उ वामेणं । एयासिमन्तरेणं अण्णा चत्तारि विदिसाओ ॥ ५२ ॥
एयासिं चेव अट्ठण्हमंतरा अट्ठ हुंति अण्णाओ । सोलस सरीरउस्सयबाहल्ला सव्वतिरियदिसा ॥ ५३ ॥
हेट्ठा पायतलाणं अहोदिसा सीसउवरिमा उड्ढा । एया अट्ठारसवी पण्णवगदिसा मुणेयव्वा ॥ ५४ ॥
एवं पकप्पिआणं दसण्ह अट्ठण्ह चेव य दिसाणं । नामाइं वुच्छामी जहक्कमं आणुपुव्वीए ॥ ५५ ॥
पुव्वा य पुव्वदक्खिण दक्खिण तह दक्खिणावरा चेव । अवरा य अवरउत्तर उत्तर पुव्वुत्तरा चेव ॥ ५६ ॥
सामुत्थाणी कविला खेलिज्जा खलु तहेव अहिधम्मा । परियाधम्मा य तहा सावित्ती पण्णवित्ती य ॥ ५७ ॥
हेट्ठा नेरइयाणं अहोदिसा उवरिमा उ देवाणं । एयाइं नामाइं पण्णवगस्सा दिसाणं तु ॥ ५८ ॥

एताः सप्त गाथाः कण्ठ्याः, नवरं द्वितीयगाथायां सर्वतिर्यग्दिशां बाहल्यं—पिण्डः शरीरोच्छ्रयप्रमाणमिति ॥ साम्प्रतमासां संस्थानमाह—

सोलस तिरियदिसाओ सगडुद्धीसंठिया मुणेयव्वा । दो मल्लगमूलाओ उड्ढे अ अहेवि य दिसाओ ॥ ५९ ॥

षोडशापि तिर्यग्दिशः शकटोर्द्धिसंस्थाना बोद्धव्याः, प्रज्ञापकप्रदेशे सङ्कटा बहिर्विशालाः, नारकदेवाख्ये द्वे एव ऊर्द्ध्वाधोगामिन्यौ शरावाकारे भवतः, यतः शिरोमूले पादमूले च स्वल्पत्वान्मल्लकबुध्नाकारे गच्छन्त्यौ च विशाले भवत इति ॥ आसां सर्वासां तात्पर्यं यन्त्रकादवसेयं, तच्चेदम् (४) ॥ भावदिग्निरूपणार्थमाह—

मणुया तिरिया काया तहऽग्गबीया चउक्कगा चउरो । देवा नेरइया वा अट्ठारस होंति भावदिसा ॥ ६० ॥

मनुष्याश्चतुर्भेदास्तद्यथा—सम्मूर्च्छनजाः कर्मभूमिजा अकर्मभूमिजाः अन्तरद्वीपजाश्चेति, तथा तिर्यञ्चो द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाश्चेति चतुर्द्धा, कायाः पृथिव्यप्तेजोवायवश्चत्वारः, (१) (२) (३) (४) तथाऽग्रमूलस्कन्धपर्वबीजाश्चत्वार एव, एते षोडश देवनारकप्रक्षेपादष्टादश, एभिर्भावैर्भवनाज्जीवो व्यपदिश्यत इति भावदिगष्टादशभेदेति ॥ अत्र च सामान्यदिग्ग्रहणेऽपि यस्यां दिशि जीवानामविगानेन गत्यागती स्पष्टे सर्वत्र सम्भवतस्तयैवेहाधिकार इति तामेव निर्युक्तिकृत्साक्षाद्दर्शयति, भावदिक्काविनाभाविनी सामर्थ्यादधिकृतैव, यतस्तदर्थमन्या दिशश्चिन्त्यन्त इत्यत आह—

पण्णवगदिसट्ठारस भावदिसाओऽवि तत्तिया चेव । इक्किक्कं विंधेज्जा हवंति अट्ठारसऽट्ठारा ॥ ६१ ॥
पण्णवगदिसाए पुण अहिगारो एत्थ होइ णायव्वो । जीवाण पुग्गलाण य एयासु गयागई अत्थि ॥ ६२ ॥

प्रज्ञापकापेक्षया अष्टादशभेदा दिशः, अत्र च भावदिशोऽपि तावत्प्रमाणा एव प्रत्येकं सम्भवन्तीत्यतः एकैकां प्रज्ञापकदिशं भावदिगष्टादशकेन 'विन्ध्येत्' ताडयेद्, अतोऽष्टादशाष्टादशकाः, ते च संख्यया त्रीणि शतानि चतुर्विंशत्यधिकानि भवन्तीति, एतच्चोपलक्षणं तापदिगादावपि यथासम्भवमायोजनीयमिति । क्षेत्रदिशि तु चतसृष्वेव महादिक्षु सम्भवो न विदिगादिषु, तासामेकप्रदेशिकत्वाच्चतुष्प्रदेशिकत्वाच्चेति गाथाद्वयार्थः ॥ अयं च दिक्संयोगकलापः 'अण्णयरीओ दिसाओ आगओ अहमंसी'त्यनेन परिगृहीतः, सूत्रावयवार्थश्चायम्—इह दिग्ग्रहणात् प्रज्ञापकदिशश्चतस्रः पूर्वादिका ऊर्द्ध्वाधोदिशौ च परिगृह्यन्ते, भावदिशस्त्वष्टादशापि, अनुदिग्ग्रहणात्तु प्रज्ञापकविदिशो द्वादशेति, तत्रासंज्ञिनां नैषोऽवबो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धोऽस्ति, संज्ञिनामपि केषाञ्चिद्भवति केषाञ्चिन्नेति, यथाऽहममुष्या दिशः समागत इहेति। 'एवमेगेसिं णो णायं भवइत्ति' 'एव' मित्यनेन प्रकारेण, प्रतिविशिष्टदिग्विदिगागमनं नैकेषां विदितं भवतीत्येतदुपसंहारवाक्यम्, एतदेव निर्युक्तिकृदाह—

केसिंचि नाणसण्णा अत्थि केसिंचि नत्थि जीवाणं। कोऽहं परंमि लोए आसी कयरा दिसाओ वा? ॥६३॥

केषाञ्चिज्जीवानां ज्ञानावरणीयक्षयोपशमवतां ज्ञानसंज्ञाऽस्ति, केषाञ्चित्तु तदावृतिमतां न भवतीति। यादृग्भूता संज्ञा न भवति तां दर्शयति—कोऽहं परस्मिन् 'लोके' जन्मनि मनुष्यादिरासम्, अनेन भावदिग् गृहीता, कतरस्या वा दिशः समायात इत्यनेन तु प्रज्ञापकदिगुपात्तेति, यथा कश्चिन्मदिरामदघूर्णितलोललोचनोऽव्यक्तमनोविज्ञानो रथ्यामार्गनिपतितस्तच्छर्याकृष्टश्वगणापलिह्यमानवदनो गृहमानीतो मदात्यये न जानाति कुतोऽहमागत इति, तथा प्रकृतो मनुष्यादिरपीति गाथार्थः॥ न केवलमेषैव संज्ञा नास्ति अपराऽपि नास्तीति सूत्रकृदाह—

अत्थि मे आया उववाइए, नत्थि मे आया उववाइए, के अहं आसी? के वा इओ चुए इह पेच्चा भविस्सामि? (सू० ३)

'अस्ति' विद्यते 'ममे'त्यनेन षष्ठ्यन्तेन शरीरं निर्दिशति, ममास्य शरीरकस्याधिष्ठाता, अतति—गच्छति सततगतिप्रवृत्त आत्मा—जीवोऽस्तीति, किंभूतः?—'औपपातिकः' उपपातः—प्रादुर्भावो जन्मान्तरसंक्रान्तिः, उपपाते भव औपपातिक इति,

१ औपपातिकशब्दाभिप्रायेणैव तृतीयसप्तम्यन्तकरणभागः चूर्ण्यभिप्रायेण तु 'भविस्सामि' इति पर्यन्त उपसंहारः 'भवति' इति 'लंबहा' इति चाधिकम्

अनेन संसारिणः स्वरूपं दर्शयति, स एवंभूत आत्मा ममास्ति नास्तीति च एवंभूता संज्ञा केषाञ्चिदज्ञानावष्टब्धचेतसां न जायत इति। तथा 'कोऽहं' नारकतिर्यग्मनुष्यादिः पूर्वजन्मन्यासं?, को वा देवादिः 'इतो' मनुष्यादेर्जन्मनः 'च्युतो' विनष्टः 'इह' संसारे 'प्रेत्य' जन्मान्तरे 'भविष्यामि' उत्पत्स्ये इति, एषा च संज्ञा न भवतीति॥ इह च यद्यपि सर्वत्र भावदिशाऽधिकारः प्रज्ञापकदिशा च, तथापि पूर्वसूत्रे साक्षात्प्रज्ञापकदिगुपात्ताऽत्र तु भावदिगित्यवगन्तव्यम्। ननु चात्र संसारिणां दिग्विदिगागमनादिजा विशिष्टा संज्ञा निषिध्यते न सामान्यसंज्ञेति, एतच्च संज्ञिनि धर्म्मिण्यात्मनि सिद्धे सति भवति, 'सति धर्म्मिणि धर्म्माश्चिन्त्यन्त' इति वचनात्, स च प्रत्यक्षादिप्रमाणगोचरातीतत्वाद्दुरुपपादः, तथाहि—नासावध्यक्षेणार्थसाक्षात्कारिणा विषयीक्रियते, तस्यातीन्द्रियत्वाद्, अतीन्द्रियत्वं च स्वभावविप्रकृष्टत्वाद्, अतीन्द्रियत्वादेव च तदव्यभिचारिकार्यादिलिङ्गसम्बन्धग्रहणासम्भवात् नाप्यनुमानेन, तस्याप्रत्यक्षत्वे तत्सामान्यग्रहणशक्त्यनुपपत्तेः नाप्युपमानेन, आगमस्यापि विवक्षायां प्रतिपाद्यमानायामनुमानान्तर्भावाद् अन्यत्र च बाह्येऽर्थे सम्बन्धाभावादप्रमाणत्वं, प्रमाणत्वे वा परस्परविरोधित्वान्नाप्यागमेन, तमन्तरेणापि सकलार्थोपपत्तेर्नाप्यर्थापत्त्या, तदेवं प्रमाणपञ्चकातीतत्वात्षष्ठप्रमाणविषयत्वादभाव एवात्मनः। प्रयोगश्चायम्—नास्त्यात्मा, प्रमाणपञ्चकविषयातीतत्वात्, खरविषाणवदिति, तदभावे च विशिष्टसंज्ञाप्रतिषेधाभावसम्भवेनानुत्थानमेव सूत्रस्येति, एतत्सर्वमनुपालितगुरोर्वचः, तथाहि—प्रत्यक्ष एवात्मा, तद्ग्राह्यस्य ज्ञानस्य स्वसंवित्तिसिद्धत्वात्, स्वसंविदितिष्ठाश्च विषयव्यवस्थितयो, घटपटादीनामपि रूपादिगुणप्रत्यक्षत्वादेवाध्यक्षत्वमिति, मरणाभावप्रसङ्गाच्च न भूतगुणश्चैतन्यमाशङ्कनीयं, तेषां सदा सन्निधानसम्भवादिति, हेयोपादेयपरिहारोपादानप्रवृत्तेश्चानुमानेन परात्मनि सिद्धिर्भवतीति, एवमनयैव दिशोपमानादिकमपि स्वधिया स्वविषये यथासम्भवमायोज्यं, केवलं मौनीन्द्रेणानेनैवागमेन विशिष्टसंज्ञानिषेधद्वारेणाहमिति चात्मोल्लेखेनात्मसद्भावः प्रतिपादितः, शेषागमानां चानाप्तप्रणीतत्वादप्रामाण्यमेवेति। अत्र चास्त्यात्मेत्यनेन क्रियावादिनः सप्रभेदा नास्तीत्यनेन चाक्रियावादिन एतदन्तःपातित्वाज्ज्ञानिकवैनयिकाश्च सप्रभेदा उपक्षिप्ताः, ते चामी—'असियसयं किरियाणं अकिरियवाईण होइ चुलसीई। अन्नाणिय सत्तट्ठी वेणइयाणं च बत्तीसा॥ १॥' तत्र जीवाजीवाश्रवबन्धपुण्यपापसंवरनिर्जरामोक्षाख्या नव पदार्थाः स्वपरभेदाभ्यां नित्यानित्यविकल्पद्वयेन च कालनियतिस्वभावेश्वरात्माश्रयणादशीत्युत्तरं भेदशतं भवति क्रियावादिनाम्, एते चास्तित्ववादिनोऽभिधीयन्ते, इयमत्र भावना—अस्ति जीवः स्वतो नित्यः कालतः १ अस्ति जीवः स्वतोऽनित्यः कालतः २ अस्ति जीवः परतो नित्यः कालतः ३ अस्ति जीवः परतोऽनित्यः कालतः ४ इत्येवं कालेन चत्वारो भेदा लब्धाः, एवं नियतिस्वभावेश्वरात्मभिरप्येकैकेन चत्वारश्चत्वारो विकल्पा लभ्यन्ते, एते च पञ्च चतुष्का विंशतिर्भवति, इयं च जीवपदार्थेन लब्धा, एवमजीवादयोऽप्यष्टौ प्रत्येकं विंशतिभेदा भवन्ति, ततश्च नव विंशतयः शतमशीत्युत्तरं भवति १८०। तत्र स्वत इति स्वेनैव रूपेण जीवोऽस्ति, न परोपाध्यपेक्षया ह्रस्वत्वदीर्घत्वे इव, नित्यः—शाश्वतो न क्षणिकः, पूर्वोत्तरकालयोरवस्थितत्वात्, कालत इति काल एव विश्वस्य स्थित्युत्पत्तिप्रलयकारणम्, उक्तं च—"कालः पचति भूतानि, कालः संहरते प्रजाः। कालः सुप्तेषु जागर्त्ति, कालो हि दुरतिक्रमः॥ १॥" स चातीन्द्रियो युगपच्चिरक्षिप्रक्रियाभिव्यङ्ग्यो हिमोष्णवर्षाव्यवस्थाहेतुः क्षणलवमुहूर्त्तयामाहोरात्रमासर्तुअयनसंवत्सरयुगकल्पपल्योपम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागरोपमोत्सर्पिण्यवसर्पिणीपुद्गलपरावर्त्तातीतानागतवर्त्तमानसर्वाद्धादिव्यवहाररूपः १ । द्वितीयविकल्पे तु कालादेवात्मनोऽस्तित्वमभ्युपेयं, किं त्वनित्योऽसाविति विशेषोऽयं पूर्वविकल्पात् २ । तृतीयविकल्पे तु परत एवास्तित्वमभ्युपगम्यते, कथं पुनः परतोऽस्तित्वमात्मनोऽभ्युपेयते?, नन्वेतत्प्रसिद्धमेव सर्वपदार्थानां परपदार्थस्वरूपापेक्षया स्वरूपपरिच्छेदो, यथा दीर्घत्वापेक्षया ह्रस्वत्वपरिच्छेदो ह्रस्वत्वापेक्षया च दीर्घत्वस्येति, एवमेव चानात्मनः स्तम्भकुम्भादीन् समीक्ष्य तद्व्यतिरिक्ते वस्तुन्यात्मबुद्धिः प्रवर्त्तत इति, अतो यदात्मनः स्वरूपं तत्परत एवावधार्य्यते न स्वत इति ३ । चतुर्थविकल्पोऽपि प्राग्वदिति चत्वारो विकल्पाः ४ । तथाऽन्ये नियतित एवात्मनः स्वरूपमवधारयन्ति, का पुनरियं नियतिरिति, उच्यते, पदार्थानामवश्यंतया यद्यथाभवने प्रयोजककर्त्री नियतिः, उक्तं च–"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥" इयं च मस्करिपरिव्राण्मतानुसारिणी प्राय इति । अपरे पुनः स्वभावादेव संसारव्यवस्थामभ्युपयन्ति, कः पुनरयं स्वभावः?, वस्तुनः स्वत एव तथापरिणतिभावः स्वभावः, उक्तं च–"कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च । स्वभावतः सर्व्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः? ॥ १ ॥ स्वभावतः प्रवृत्तानां, निवृत्तानां स्वभावतः । नाहं कर्त्तेति भूतानां, यः पश्यति स पश्यति ॥ २ ॥ केनाञ्जितानि नयनानि मृगाङ्गनानां, कोऽलङ्करोति रुचिराङ्गरुहान्मयूरान् । कश्चोत्पलेषु दलसन्निचयं करोति, को वा दधाति विनयं कुलजेषु पुंस्सु? ॥ ३ ॥" तथाऽन्येऽभिदधते–समस्तमेतज्जीवादीश्वरात्प्रसूतं, तस्मादेव स्वरूपेऽवतिष्ठते, कः पुनरयमीश्वरः?, अणिमाद्यैश्वर्ययोगादीश्वरः, उक्तं च–"अज्ञो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेच्छभ्रं वा स्वर्गमेव वा ॥ १ ॥" तथाऽन्ये ब्रुवते –न जीवादयः पदार्थाः कालादिभ्यः स्वरूपं प्रतिपद्यन्ते, किं तर्हि?, आत्मनः, कः पुनरयमात्मा?, आत्माद्वैतवादिनां विश्वपरिणतिरूपः, उक्तञ्च–"एक एव हि भूतात्मा, भूते भूते व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥१॥" तथा–"पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्य"मित्यादि । एवमस्त्यजीवः, स्वतः नित्यः कालत इत्येवं सर्वत्र योज्यम् ॥

तथा अक्रियावादिनो–नास्तित्ववादिनः, तेषामपि जीवाजीवाश्रवबन्धसंवरनिर्जरामोक्षाख्याः सप्त पदार्थाः. स्वपरभेदद्वयेन तथा कालयदृच्छानियतिस्वभावेश्वरात्मभिः षड्भिर्गुण्यमानाश्चतुरशीतिविकल्पा भवन्ति, तद्यथा–नास्ति जीवः स्वतः कालतः नास्ति जीवः परतः कालत इति कालेन द्वौ लब्धौ, एवं यदृच्छानियत्यादिष्वपि द्वौ द्वौ भेदौ प्रत्येकं भवतः, सर्वेऽपि जीवपदार्थे द्वादश भवन्ति, एवमजीवादि'वपि प्रत्येकं द्वादशैते, सप्त द्वादशकाश्चतुरशीतिरिति ८४ । अयमत्रार्थः–नास्ति जीवः स्वतः कालत इति, इह पदार्थानां लक्षणेन सत्ता निश्चीयते कार्यतो वा?, न चात्मनस्तादृगस्ति किञ्चिल्लक्षणं येन सत्तां प्रतिपद्येमहि, नापि कार्य्यमणूनामिव महीध्रादि सम्भवति, यच्च लक्षणकार्याभ्यां नाभिगम्यते वस्तु तन्नास्त्येव, वियदिन्दीवरवत्, तस्मान्नास्त्यात्मेति । द्वितीयविकल्पोऽपि यच्च स्वतो नात्मानं बिभर्त्ति गगनारविन्दादिकं तत्परतोऽपि नास्त्येव, अथवा सर्वपदार्थानामेव परभागादर्शनात्सर्वावांग्भागसूक्ष्मत्वाच्चोभयानुपलब्धेः सर्वानुपलब्धितो नास्तित्वमध्यवसीयते, उक्तं च–"यावद् दृश्यं परस्तावद्भागः स च न दृश्यते" इत्यादि, तथा यदृच्छातोऽपि नास्तित्वमात्मनः, का पुनर्यदृच्छा?, अनभिसन्धिपूर्विकाऽर्थप्राप्तिर्यदृच्छा, "अतर्कितोपस्थितमेव सर्वं, चित्रं जनानां सुखदुःखजातम् । काकस्य तालेन यथाऽभिघातो, न बुद्धिपूर्वोऽत्र वृथाऽभिमानः ॥ १ ॥ सत्यं पिशाचाः स्म वने वसामो, भेरिं कराग्रैरपि न स्पृशामः । यदृच्छया सिद्ध्यति लोकयात्रा, भेरीं पिशाचाः परिताडयन्ति ॥ २ ॥" यथा काकतालीयमबुद्धिपूर्वकं, न काकस्य बुद्धिरस्ति- मयि तालं पतिष्यति, नापि तालस्याभिप्रायः–काकोपरि पतिष्यामि, अथ च तत्तथैव भवति, एवमन्यदप्यतर्कितोपनतमजाकृपाणीयमातुरभेषजीयमन्धकण्टकीयमित्यादि द्रष्टव्यम्, एवं सर्वं जातिजरामरणादिकं लोके यादृच्छिकं काकतालीयादिकल्पमवसेयमिति । एवं नियतिस्वभावेश्वरात्मभिरप्यात्मा निराकर्त्तव्यः ॥

तथाऽज्ञानिकानां सप्तषष्टिर्भेदाः, ते चामी–जीवादयो नव पदार्था उत्पत्तिश्च दशमी सत् असद् सदसत् अवक्तव्यः सदवक्तव्यः असदवक्तव्यः सदसदवक्तव्य इत्येतैः सप्तभिः प्रकारैर्विज्ञातुं न शक्यन्ते न च विज्ञातैः प्रयोजनमस्ति, भावना चेयम्–सन् जीव इति को वेत्ति? किं वा तेन ज्ञातेन?, असन् जीव इति को जानाति? किं वा तेन ज्ञातेनेत्यादि, एवमजीवादिष्वपि प्रत्येकं सप्त विकल्पाः, नव सप्तकास्त्रिषष्टिः, अमी चान्ये चत्वारस्त्रिषष्टिमध्ये प्रक्षिप्यन्ते, तद्यथा–सती भावोत्पत्तिरिति को जानाति? किं वाऽनया ज्ञातया? एवमसती सदसती अवक्तव्या भावोत्पत्तिरिति को वेत्ति? किं वाऽनया ज्ञातयेति, शेषविकल्पत्रयमुत्पत्त्युत्तरकालं पदार्थावयवापेक्षमतोऽत्र न सम्भवतीति नोक्तम्, एतच्चतुष्टयप्रक्षेपात्सप्तषष्टिर्भवन्ति । तत्र सन् जीव इति को वेत्ति? इत्यस्यायमर्थः–न कस्यचिद्विशिष्टं ज्ञानमस्ति योऽतीन्द्रियान् जीवादीनवभोत्स्यते, न च तैर्ज्ञातैः किञ्चित्फलमस्ति, तथाहि–यदि नित्यः सर्वगतो मूर्त्तो ज्ञानादिगुणोपेत एतद्गुणव्यतिरिक्तो वा? ततः कतमस्य पुरुषार्थस्य सिद्धिरिति, तस्मादज्ञानमेव श्रेयः । अपि च–तुल्येऽप्यपराधे अका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मकरणे लोके स्वल्पो दोषो, लोकोत्तरेऽपि आकुट्टिकानाभोगसहसाकारादिषु क्षुल्लकभिक्षुस्थविरोपाध्यायसूरीणां यथाक्रममुत्तरोत्तरं प्रायश्चित्तमित्येवमन्येष्वपि विकल्पेष्वायोज्यम् ॥ तथा वैनयिकानां द्वात्रिंशद्भेदाः, ते चानेन विधिना भावनीयाः-सुरनृपयतिज्ञातिस्थविराधममातृपितृष्वष्टसु मनोवाक्कायप्रदानचतुर्विधविनयकरणात्, तद्यथा-देवानां विनयं करोति मनसा वाचा कायेन तथा देशकालोपपन्नेन दानेनेत्येवमादि । एते च विनयादेव स्वर्गापवर्गमार्गमभ्युपयन्ति, नीचैर्वृत्त्यनुत्सेकलक्षणो विनयः, सर्वत्र चैवंविधेन विनयेन देवादिषूपतिष्ठमानः स्वर्गापवर्गभाग् भवति, उक्तं च-"विणया णाणं णाणाओ दंसणं दंसणाहि चरणं च । चरणाहिंतो मोक्खो मोक्खे सोक्खं अणाबाहं ॥ १ ॥" अत्र च क्रियावादिनामस्तित्वे सत्यपि केषाञ्चित्सर्वगतो नित्योऽनित्यः कर्त्ताऽकर्त्ता मूर्त्तोऽमूर्त्तः श्यामाकतण्डुलमात्रोऽङ्गुष्ठपर्वमात्रो दीपशिखोपमो हृदयाधिष्ठान इत्यादिकः, अस्ति चौपपातिकश्च, अक्रियावादिनां त्वात्मैव न विद्यते, कुतः पुनरौपपातिकत्वम्?, अज्ञानिकास्तु नात्मानं प्रति विप्रतिपद्यन्ते, किन्तु तज्ज्ञानमकिञ्चित्करमेषामिति, वैनयिकानामपि नात्मास्तित्वे विप्रतिपत्तिः, किन्त्वन्यन्मोक्षसाधनं विनयादृते न सम्भवतीति प्रतिपन्नाः । तत्रानेन सामान्यात्मास्तित्वप्रतिपादनेनाक्रियावादिनो निरस्ता द्रष्टव्याः, आत्मास्तित्वानभ्युपगमे च-"शास्ता शास्त्रं शिष्यः प्रयोजनं वचनहेतुदृष्टान्ताः । सन्ति न शून्यं ब्रुवतस्तदभावाच्चाप्रमाणं स्यात् ॥ १ ॥ प्रतिषेद्धृप्रतिषेधौ स्तश्चेच्छून्यं कथं भवेत्सर्वम्? । तदभावेन तु सिद्धा अपतिषिद्धा जगत्यर्थाः ॥ २ ॥" एवं शेषाणामप्यत्रैव यथासम्भवं निराकरणमुत्प्रेक्ष्यमिति ॥ ३ ॥ गतमानुषङ्गिकं,

आ. सू. ४

१ विनयात् ज्ञानं ज्ञानाद्दर्शनं दर्शनात् (ज्ञानदर्शनाभ्यां) चरणं च । चरणात् (ज्ञानदर्शनचारित्रेभ्यः) मोक्षो मोक्षे सौख्यमनाबाधम् ॥ १ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १९ ॥

अध्ययनं १ उद्देशकः १

प्रकृतमनुस्रियत-तत्रेह 'एवमेगेसिं णो णायं भवइ' इत्यनेन केषाञ्चिदेव संज्ञानिषेधात्केषाञ्चित्तु भवतीत्युक्तं भवति, तत्र सामान्यसंज्ञायाः प्रतिप्राणि सिद्धत्वात्तत्कारणपरिज्ञानस्य चेहाकिञ्चित्करत्वाद्विशिष्टसंज्ञायास्तु केषाञ्चिदेव भावात् तस्याश्च भवान्तरगाम्यात्मस्वष्टप्रतिपादने सोपयोगित्वाद् सामान्यसंज्ञाकारणप्रतिपादनमनादृत्य विशिष्टसंज्ञायाः कारणं सूत्रकृदर्शयितुमाह—

> से जं पुण जाणेज्जा सह संमइयाए परवागरणेणं अण्णेसिं अंतिए वा सोच्चा तं-जहा-पुरत्थिमाओ वा दिसाओ आगओ अहमंसि जाव अण्णयरीओ दिसाओ अणुदिसाओ वा आगओ अहमंसि, एवमेगेसिं जं णायं भवति-अत्थि मे आया उववाइए, जो इमाओ (दिसाओ) अणुदिसाओ वा अणुसंचरइ, सव्वाओ दिसाओ अणुदिसाओ, सोऽहं (सू० ४)

'से जं पुण जाणेज्जत्ति सूत्रं यावत् सोऽहं'मिति 'से' इति निर्देशो मागधशैल्या प्रथमैकवचनान्तः, स इत्यनेन च यः प्राग्निर्दिष्टो ज्ञाता विशिष्टक्षयोपशमादिमान् स प्रत्यवमृश्यते, यदित्यनेनापि यत्प्राग्निर्दिष्टं दिग्विदिगागमनं, तथा कोऽहमभूवमतीतजन्मनि देवो नारकस्तिर्यग्योनो मनुष्यो वा? स्त्री पुमान्नपुंसको वा?, को वाऽमुतो मनुष्यजन्मनः प्रभ्रष्टो-

॥ १९ ॥

१ अणुसंसरइ (इति पा०)

ऽहं प्रेत्य देवादिर्भविष्यामीत्येतत्परामृश्यते, 'जानीयाद्' अवगच्छेद्, इदमुक्तं भवति-न कश्चिदनादौ संसृतौ पर्यटन्नसुमान् दिगागमनादिकं जानीयात्, यः पुनर्जानीयात्स एवं 'सह सम्मइयाए'त्ति सहशब्दः सम्बन्धवाची, सदिति प्रशंसायां, मतिः-ज्ञानम्, अयमत्र वाक्यार्थः-आत्मना सह सदा या सन्मतिर्वर्त्तते तया सन्मत्या कश्चिज्जानीते, सहशब्दविशेषणाच्च सदाऽऽत्मस्वभावत्वं मतेरावेदितं भवति, न पुनर्यथा वैशेषिकाणां व्यतिरिक्ता सती समवायवृत्त्याऽऽत्मनि समवेतेति । यदि वा 'सम्मइए'त्ति स्वकीयया मत्या स्वमत्येति, तत्र भिन्नमप्यश्वादिकं स्वकीयं दृष्टमतः सहशब्दविशेषणं, सहशब्दश्चासमस्त इति, सत्यपि चात्मनः सदा मतिसन्निधाने प्रबलज्ञानावरणावृतत्वान्न सदा विशिष्टोऽवबोध इति, सा पुनः सन्मतिः स्वमतिर्वा अवधिमनःपर्यायकेवलज्ञानजातिस्मरणभेदाच्चतुर्विधा ज्ञेया, तत्रावधिमनःपर्यायकेवलानां स्वरूपमन्यत्र विस्तरेणोक्तं, जातिस्मरणं त्वाभिनिबोधिकविशेषः, तदेवं चतुर्विधया मत्याऽऽत्मनः कश्चिद्विशिष्टदिग्गत्यागती जानाति, कश्चिच्च परः-तीर्थकृत्सर्वज्ञः, तस्यैव परमार्थतः परशब्दवाच्यत्वात्परत्वं, तस्य तेन वा व्याकरणम्-उपदेशस्तेन जीवांस्तद्भेदांश्च-पृथिव्यादीन् तद्गत्यागती च जानाति, अपरः पुनः 'अन्येषां' तीर्थकरव्यतिरिक्तानामतिशयज्ञानिनामन्तिके श्रुत्वा जानातीति, यच्च जानाति तत् सूत्रावयवेन दर्शयति-तद्यथा-पूर्व्वस्या दिश आगतोऽहमस्मि, एवं दक्षिणस्याः पश्चिमायाः उत्तरस्या ऊर्ध्वदिशोऽधोदिशोऽन्यतरस्या दिशोऽनुदिशो वाऽऽगतोऽहमस्मीत्येवमेकेषां विशिष्टक्षयोपशमादिमतां तीर्थकरान्यातिशयज्ञानिबोधितानां च ज्ञानं भवति, तथा प्रतिविशिष्टदिगागमनपरिज्ञानान्तरमेषामेतदपि ज्ञानं भवति-यथा अस्ति मेऽस्य शरीरकस्याधिष्ठाता ज्ञानदर्शनोपयोगलक्षण 'उपपादुको' भवान्तरसंक्रांतिभाग् असर्वगतो भोक्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूर्त्तिरहितोऽविनाशी शरीरमात्रव्यापीत्यादिगुणवानात्मेति । स च द्रव्यकषाययोगोपयोगज्ञानदर्शनचारित्रवीर्यात्मभेदादष्टधा, तत्रोपयोगात्मना बाहुल्येनेहाधिकारः, शेषास्तु तदंशतयोपयुज्यन्त इति उपन्यस्ताः । तथा अस्ति च ममात्मा, योऽमुष्या दिशोऽनुदिशश्च सकाशाद् 'अनुसञ्चरति' गतिप्रायोग्यकर्मोपादानादनु-पश्चात् सञ्चरत्यनुसञ्चरति, पाठान्तरं वा 'अणुसंसरइ'त्ति दिग्विदिशां गमनं भावदिगागमनं वा स्मरतीत्यर्थः । साम्प्रतं सूत्रावयवेन पूर्वसूत्रोक्तमेवार्थमुपसंहरति-सर्वस्या दिशः सर्वस्याश्चानुदिशो य आगतोऽनुसञ्चरति अनुसंस्मरतीति वा सः 'अह' मित्यात्मोल्लेखः, अहंप्रत्ययग्राह्यत्वादात्मनः, अनेन पूर्वाद्याः प्रज्ञापकदिशः सर्वा गृहीताः भावदिशश्चेति । इममेवार्थं निर्युक्तिकृद्दर्शयितुमना गाथात्रितयमाह—

जाणइ सयं मईए अन्नेसिं वावि अन्तिए सोच्चा । जाणगजणपण्णविओ जीवं तह जीवकाए वा ॥ ६४ ॥
इत्थ य सह संमइअत्ति जं एअं तत्थ जाणणा होई । ओहीमणपज्जवनाणकेवले जाइसरणे य ॥ ६५ ॥
परवइ वागरणं पुण जिणवागरणं जिणा परं नत्थि । अण्णेसिं सोच्चंतिय जिणेहिं सव्वो परो अण्णो ॥ ६६ ॥

कश्चिदनादिसंसृतौ पर्यटन्नवध्यादिकया चतुर्विधया स्वकीयया मत्या जानाति । अनानुपूर्व्यान्यायप्रकटनार्थं पश्चादुपात्तमप्यन्येषामित्येतत्तदं तावदाचष्टे—'अन्येषां वा' अतिशयज्ञानिनामन्तिके श्रुत्वा जानाति, तथा 'जाणगजणपण्णविओ' इत्यनेन परव्याकरणमुपात्तं, तेनायमर्थो—ज्ञापकः—तीर्थकृत्तत्प्रज्ञापितश्च जानाति, यज्जानाति तत् स्वत एव दर्शयति-सामान्यतो 'जीव'मिति, अनेन चाधिकृतोद्देशकस्यार्थाधिकारमाह, तथा 'जीवकायांश्च' पृथ्वीकायादीन् इत्यनेन चोत्तरेषां षण्णामप्युद्देशकानां यथाक्रममधिकारार्थमाहेति, अत्र च 'सह सम्मइए'त्ति सूत्रे यत्तदं, तत्र जाणणत्ति ज्ञानमुपात्तं भवति, 'मनि ज्ञाने' मननं मतिरितिकृत्वा, तच्च किंभूतमिति दर्शयति—'अवधिमनःपर्यायकेवलजातिस्मरणरूप'मिति, तत्रावधिज्ञानी संख्येयानसंख्येयान्वा भवान् जानाति, एवं मनःपर्यायज्ञान्यपि, केवली तु नियमतोऽनन्तान्, जातिस्मरणस्तु नियमतः संख्येयानिति, शेषं स्पष्टम् । अत्र च सहसम्मत्यादिपरिज्ञाने सुखप्रतिपत्त्यर्थं त्रयो दृष्टान्ताः प्रदर्श्यन्ते, तद्यथा-वसन्तपुरे नगरे जितशत्रू राजा, धारणी नाम महादेवी, तयोर्द्धर्मरुच्यभिधानः सुतः, स च राजाऽन्यदा तापसत्वेन प्रव्रजितुमिच्छुर्द्धर्मरुचिं राज्ये स्थापयितुमुद्यतः, तेन च जननी पृष्टा-किमिति तातो राज्यश्रियं त्यजति ?, तयोक्तम्-किमनया चपलया नारकादिसकलदुःखहेतुभूतया स्वर्गापवर्गमार्गार्गलया अवश्यमपायिन्या परमार्थत इहलोकेऽप्यभिमानमात्रफलयेत्यतो विहायैनां सकलसुखसाधनं धर्मं कर्त्तुमुद्यतः, धर्मरुचिस्तदाकर्ण्योक्तवान्-यद्येवं किमहं तातस्यानिष्टो ? येनैवंभूतां सकलदोषाश्रयिणीं मयि नियोजयति, सकलकल्याणहेतोर्द्धर्मात्प्रच्यावयतीत्यभिधाय पित्राऽनुज्ञातस्तेन सह तापसाश्रममगात्, तत्र च सकलास्तापसक्रिया यथोक्ताः पालयन्नास्ते, अन्यदाऽमावास्यायाः पूर्वाह्णे केनचित्तापसेनोद्घुष्टम्—यथा भो भोः तापसाः ! श्वोऽनाकुट्टिर्भविता, अतोऽद्यैव समित्कुसुमकुशकन्दफलमूलाद्याहरणं कुरुत, एतच्चाकर्ण्य धर्मरुचिना जनकः पृष्टः—तात ! केयमनाकुट्टिरिति, तेनोक्तम्—पुत्र ! कन्दफलादीनामच्छेदनं, तद्व्य-

१ °या चैत्यतो प्र० २ एकेन प्र० ३ लतादीनामच्छे० प्र०

मावास्यादिके विशिष्टे पर्वदिवसे न वर्त्तते, सावद्यत्वाच्छेदनादिक्रियायाः, श्रुत्वा चैतदसावचिन्तयत्—यदि सर्वदाऽनाकुट्टिः स्याच्छोभनं भवेद्, एवमध्यवसायिनस्तस्यामावास्यायां तपोवनासन्नपथेन गच्छतां साधूनां दर्शनमभूत्, ते च तेनाभिहिताः—किमद्य भवतामनाकुट्टिर्न सञ्जाता ? येनाटवीं प्रस्थिताः, तैरप्यभिहितम्—'यथाऽस्माकं यावज्जीवमनाकुट्टि'रित्यभिधायातिक्रान्ताः साध्वः, तस्य च तदाकर्ण्येहापोहविमर्शेन जातिस्मरणमुत्पन्नं—यथाऽहं जन्मान्तरे प्रव्रज्यां कृत्वा देवलोकसुखमनुभूयेहागत इति, एवं तेन विशिष्टदिगागमनं स्वमत्या—जातिस्मरणरूपया विज्ञातं, प्रत्येकबुद्धश्च जातः, एवमन्येऽपि वल्कलचीरिश्रेयांसप्रभृतयोऽत्र योज्या इति । परव्याकरणे त्विदमुदाहरणम्—गौतमस्वामिना भगवान्वर्द्धमानस्वामी पृष्टो—भगवन् ! किमिति मे केवलज्ञानं नोत्पद्यते ?, भगवता व्याकृतं—भो गौतम ! भवतोऽतीव ममोपरि स्नेहोऽस्ति, तद्भशात्, तेनोक्तम्—'भगवन्नेवमेवं, किंनिमित्तः पुनरसौ मम भगवदुपरि स्नेहः ?, ततो भगवता तस्य बहुषु भवान्तरेषु पूर्वसम्बन्धः समावेदितः 'चिरसंसिट्ठोऽसि मे परिचिओऽसि मे गोयमे'त्येवमादि, तच्च तीर्थकृद्व्याकरणमाकर्ण्य गौतमस्वामिनो विशिष्टदिगागमनादिविज्ञानमभूदिति । अन्यश्रवणे त्विदमुदाहरणम्—मल्लिस्वामिना षण्णां राजपुत्राणामुद्वाहार्थमागतानामवधिज्ञानेन तत्प्रतिबोधनार्थं यथा जन्मान्तरे सहितैरेव प्रव्रज्या कृता, यथा च तत्फलं देवलोके जयन्ताभिधानविमानेऽनुभूतं तथाऽऽख्यातं, तच्चाकर्ण्य ते लघुकर्म्मत्वात्प्रतिबुद्धा विशिष्टदिगागमनविज्ञानं च

१ °मेतत् प्र० २ चिरसंसट्ठोऽसि भया गौतम ! चिरपरिचितोऽसि मम गौतम !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सञ्जातं, उक्तं च—'किं थं तेयं पम्हुट्ठं जं च तया भो ! जयंतपवरंमि । वुच्छा समयनिबद्धं देवा ! तं संभरह जातिं ॥१॥ इति गाथात्रयतात्पर्यार्थः ॥ ४ ॥

साम्प्रतं प्रकृतमनुस्रियते—यो हि सोऽहमित्यनेनाहङ्कारज्ञानेनात्मोल्लेखेन पूर्वादेर्दिश आगतमात्मानमविच्छिन्नसंततिपतितं द्रव्यार्थतया नित्यं पर्यायार्थतया त्वनित्यं जानाति स परमार्थतः आत्मवादीति सूत्रकृद्दर्शयति—

से आयावादी लोयावादी कम्मावादी किरियावादी (सू० ५)

'स' इति यो भ्रान्तः पूर्वं नारकतिर्यग्नरामराद्यासु भावदिक्षु पूर्वाद्यासु च प्रज्ञापकदिक्षु अक्षणिकामूर्त्तादिलक्षणोपेतमात्मानमैवैति, स इत्थंभूतः 'आत्मवादी'ति आत्मानं वदितुं शीलमस्येति, यः पुनरेवंभूतमात्मानं नाभ्युपगच्छति सोऽनात्मवादी नास्तिक इत्यर्थः । योऽपि सर्वव्यापिनं नित्यं क्षणिकं वाऽऽत्मानमभ्युपैति सोऽप्यनात्मवाद्येव, यतः सर्वव्यापिनो निष्क्रियत्वाद्भवान्तरसंक्रान्तिर्न स्यात्, सर्वथा नित्यत्वेऽपि 'अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्य'मितिकृत्वा मरणाभावेन भवान्तरसंक्रान्तिरेव न स्यात्, सर्वथा क्षणिकत्वेऽपि निर्मूलविनाशात्सोऽहमित्यनेन पूर्वोत्तरानुसन्धानं न स्यात् । य एव चात्मवादी स एव परमार्थतो लोकवादी, यतो लोकयतीति लोकः—प्राणिगणस्तं वदितुं शीलमस्येति, अनेन चात्माद्वैतवादिनिरासेनात्मबहुत्वमुक्तं, यदिवा 'लोकापाती'ति लोकः—चतुर्दशरज्ज्वात्मकः प्राणिगणो वा, तत्रापतितुं

१ च. प्र० २ किमथ तद्विस्मृतं यच्च तदा भो जयन्तप्रवरे । उषिताः निवद्धसनयं देवास्तां स्मरत जातिम् ॥ १ ॥ ३ ०नं वेति.

शीलमस्येति, अनेन च विशिष्टाकाशखण्डस्य लोकसंज्ञाऽऽवेदिता, तत्र च जीवास्तिकायस्य सम्भवेन जीवानां गमनागमनमावेदितं भवति, य एव च दिगादिगमनपरिज्ञानेनात्मवादी लोकवादी च संवृत्तः, स एवासुमान् 'कर्मवादी' कर्मज्ञानावरणीयादि तद्वदितुं शीलमस्य, यतो हि प्राणिनो मिथ्यात्वाविरतिप्रमादकषाययोगैः पूर्वं गत्यादियोग्यानि कर्माण्याददते, पश्चात्तासु तासु विरूपरूपासु योनिषूत्पद्यन्ते, कर्म च प्रकृतिस्थित्यनुभावप्रदेशात्मकमवसेयमिति । अनेन च कालयदृच्छानियतीश्वरात्मवादिनो निरस्ता द्रष्टव्याः । तथा य एव कर्मवादी स एव क्रियावादी, यतः कर्म योगनिमित्तं बध्यते, योगश्च व्यापारः, स च क्रियारूपः, अतः कर्मणः कार्यभूतस्य वदनात्तत्कारणभूतायाः क्रियाया अप्यसावेव परमार्थतो वादीति, क्रियायाश्च कर्मनिमित्तत्वं प्रसिद्धमागमे, स चायमागमः—"जावं णं भंते ! एस जीवे सया समियं एयइ वेयइ चलति फंदति घट्टति तिप्पति जाव तं तं भावं परिणमति तावं च णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा णो णं अबंधए"त्ति, एवं च कृत्वा य एव कर्मवादी स एव क्रियावादीति, अनेन च सांख्याभिमतमात्मनोऽक्रियावादित्वं निरस्तं भवति ॥ ५ ॥ साम्प्रतं पूर्वोक्तां क्रियामात्मपरिणतिरूपां विशिष्टकालाभिधायिना तिङ्प्रत्ययेनाभिदधदहंप्रत्ययसाध्यस्यात्मनस्तद्भव एवावधिमनःपर्यायकेवलज्ञानजातिस्मरणव्यतिरेकेणैव त्रिकालसंस्पर्शिना मतिज्ञानेन सद्भावावगमं दर्शयितुमाह—

१ यावद् भदन्त ! एष जीवः सदा समितमेजते व्येजते चलति स्पन्दते तिप्यति यावत् तं तं भावं परिणमति तावच्च अष्टविधबन्धको वा सप्तविधबन्धको वा षड्विधबन्धको वा एकविधबन्धको वा, नाबन्धकः.

अकरिस्सं चऽहं, कारवेसुं चऽहं, करओ आवि समणुन्ने भविस्सामि (सू० ६)

इह भूतवर्त्तमानभविष्यत्कालापेक्षया कृतकारितानुमतिभिर्नव विकल्पाः संभवन्ति, ते चामी—अहमकार्षमचीकरमहं कुर्वन्तमन्यमनुज्ञासिषमहं करोमि कारयाम्यनुजानाम्यहमिति करिष्याम्यहं कारयिष्याम्यहं कुर्वन्तमन्यमनुज्ञास्याम्यहमिति, एतेषां च मध्ये आद्यन्तौ सूत्रेणैवोपात्तौ, तदुपादानाच्च तन्मध्यपातिनां सर्वेषां ग्रहणम्, अस्यैवार्थस्याविष्करणाय द्वितीयो विकल्पः 'कारवेसुं चऽहं'मिति सूत्रेणोपात्तः, एते च चकारद्वयोपादानादपिशब्दोपादानाच्च मनोवाक्कायैश्चिन्त्यमानाः सप्तविंशतिर्भेदा भवन्ति, अयमत्र भावार्थः—अकार्षमहमित्यत्राहमित्यनेनात्मोल्लेखिना विशिष्टक्रियापरिणतिरूप आत्माऽभिहितः, ततश्चायं भावार्थो भवति—स एवाहं येन मयाऽस्य देहादेः पूर्वं यौवनावस्थायामिन्द्रियवशगेन विषयविषमोहितान्धचेतसा तत्तदकार्य्यानुष्ठानपरायणेनाऽऽनुकूल्यमनुष्ठितम्, उक्तं च—"विहेवाधलेवनडिएहिं जाइं कीरंति जोव्वणमएणं । वयपरिणामे सरियाइं ताइं हियए खुडुक्कंति ॥ १ ॥" 'तथा अचीकरमह'मित्यनेन परोऽकार्यादौ प्रवर्त्तमानो मया प्रवृत्तिं कारितः, तथा कुर्वन्तमन्यमनुज्ञातवानित्येवं कृतकारितानुमतिभिर्भूतकालाभिधानं, तथा 'करोमी'त्यादिना वचनत्रिकेण वर्त्तमानकालोल्लेखः, तथा करिष्यामि कारयिष्यामि कुर्वतोऽन्यान् प्रति समनुज्ञापरायणो भविष्यामीत्यनागतकालोल्लेखः, अनेन च कालत्रयसंस्पर्शेन देहेन्द्रियातिरिक्तस्यात्मनो भूतवर्त्तमानभविष्यत्कालपरिणतिरू-

१ चकारद्वयापिशब्दोपादानान्मनो० प्र० २ विभवावलेपनटितैर्यानि क्रियन्ते यौवनमदेन । वयःपरिणामे स्मृतानि तानि हृदये शल्यायन्ते ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पस्यास्तित्वावगतिरावेदिता भवति, सा च नैकान्तक्षणिकनित्यवादिनां सम्भवतीत्यतोऽनेन ते निरस्ताः, क्रियापरिणामेनात्मनः परिणामित्वाभ्युपगमादिति, एतदनुसारेणैव सम्भवानुमानादतीतानागतयोरपि भवयोरात्मास्तित्वमवसेयम् । यदिवा–अनेन क्रियाप्रबन्धप्रतिपादनेन कर्मण उपादानभूतायाः क्रियायाः स्वरूपमावेदितमिति ॥ ६ ॥ अथ किमेतावत्य एव क्रिया उतान्या अपि सन्तीति, एता एवेत्याह—

एयावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणियव्वा भवंति (सू० ७)

एतावन्तः सर्वेऽपि 'लोके' प्राणिसङ्घाते 'कर्म्मसमारम्भाः' क्रियाविशेषा ये प्रागुक्ताः अतीतानागतवर्त्तमानभेदेन कृतकारितानुमतिभिश्च अशेषक्रियानुयायिना च करोतिना सर्वेषां सङ्ग्रहादिति, एतावन्त एव परिज्ञातव्या भवन्ति नान्य इति । परिज्ञा च ज्ञप्रत्याख्यानभेदाद्द्विधा, तत्र ज्ञपरिज्ञयाऽऽत्मनो बन्धस्य चास्तित्वमेतावद्भिरेव सर्वैः कर्म्मसमारम्भैर्ज्ञातं भवति, प्रत्याख्यानपरिज्ञया च सर्वे पापोपादानहेतवः कर्म्मसमारम्भाः प्रत्याख्यातव्या इति । इयता सामान्येन जीवास्तित्वं प्रसाधितमधुना तस्यैवात्मनो दिगादिभ्रमणहेतूपदर्शनपुरस्सरमपायान् प्रदर्शितुमाह–यदिवा यस्तावदात्मकर्मादिवादी स दिगादिभ्रमणान्मोक्ष्यते, इतरस्य तु विपाकान् दर्शयितुमाह—

अपरिण्णायकम्मा खलु अयं पुरिसे जो इमाओ दिसाओ अणुदिसाओ अणुसंचरइ, सव्वाओ दिसाओ सव्वाओ अणुदिसाओ साहेति (सू०)

॥ २३ ॥

योऽयं पुरि शयनात्पूर्णः सुखदुःखानां वा पुरुषो-जन्तुर्मनुष्यो वा, प्राधान्याच्च पुरुषस्योपादानम्, उपलक्षणं चैतत्, सर्वोऽपि चतुर्गत्यापन्नः प्राणी गृह्यते, दिशोऽनुदिशो वाऽनुसञ्चरति, सः 'अपरिज्ञातकर्मा' अपरिज्ञातं कर्मानेनेत्यपरिज्ञातकर्म्मा, खलुरवधारणे, अपरिज्ञातकर्मैव दिगादौ भ्राम्यति नेतर इति, उपलक्षणं चैतद्, अपरिज्ञातात्मापरिज्ञातक्रियश्चेति, यश्चापरिज्ञातकर्मा स सर्वा दिशः सर्वाश्चानुदिशः 'साहेति' स्वयंकृतेन कर्मणा सहानुसञ्चरति, सर्वग्रहणं सर्वासां प्रज्ञापकदिशां भावदिशां चोपसङ्ग्रहार्थम् ॥ ८ ॥ स यदाप्नोति तद्दर्शयति—

अणेगरूवाओ जोणीओ संधेइ, विरूवरूवे फासे पडिसंवेदेइ (सू० ९)

अनेकं संकटविकटादिकं रूपं यासां तास्तथा, योनि-मिश्रीभवत्यौदारिकादिशरीरवर्गणापुद्गलैरसुमान् यासु ता योनयः–प्राणिनामुत्पत्तिस्थानानि, अनेकरूपत्वं चासां संवृतविवृतोभयशीतोष्णोभयरूपतया, यदिवा चतुरशीतिलक्षभेदेन, ते चामी चतुरशीतिर्लक्षाः—'पुढवीजलजलणमारुय एकेके सत्त सत्त लक्खाओ । वण पत्तेय अणंते दस चोद्दस जोणिलक्खाओ ॥ १ ॥ विगलिंदिएसु दो दो चउरो चउरो य णारयसुरेसुं । तिरिएसु हुंति चउरो चोद्दस लक्खा य

१ पृथ्वीजलज्वलनमारुतेषु एकैकस्मिन् सप्त सप्त लक्षाः । प्रत्येकवने अनन्ते दश चतुर्दश योनिलक्षाः ॥ १ ॥ विकलेन्द्रियेषु द्वे द्वे चतसृणां चतसृणां नारकसुरेषु । तिरश्चि भवन्ति चतस्रश्चतुर्दश लक्षाश्च मनुष्येषु ॥ २ ॥

मणुएसु ॥ २ ॥ तथा शुभाशुभभेदेन योनीनामनेकरूपत्वं गाथाभिः प्रदर्श्यते—'सीयादी जोणीओ चउरासीती य सयसहस्साइं । असुभाओ य सुभाओ तत्थ सुभाओ इमा जाण ॥ १ ॥ अस्संखाउमणुस्सा राईसर संखमादिआऊणं । तित्थगरनामगोत्तं सव्वसुहं होइ नायव्वं ॥ २ ॥ तत्थवि य जाइसंपन्नतादि सेसाउ हुंति असुभाओ । देवेसु किब्बिसादी सेसाओ हुंति उ सुभाओ ॥ ३ ॥ पंचिंदियतिरिएसुं हयगयवरयणे हवंति उ सुभाओ । सेसाओ अ सुभाओ सुभवण्णेगिंदियादीया ॥ ४ ॥ देविंदचक्कवट्टित्तणाइं मोत्तुं च तित्थगरभावं । अणगारभावितावि य सेसा उ अणंतसो पत्ता ॥ ५ ॥" एताश्चानेकरूपा योनीर्दिगादिषु पर्यटन्नपरिज्ञातकर्माऽसुमान् 'संधेइ'त्ति सन्धयति-सन्धिं करोत्यात्मना, सहाविच्छेदेन संघट्टयतीत्यर्थः, 'संधावइ'त्ति वा पाठान्तरं, 'सन्धावति' पौनःपुन्येन तासु गच्छतीत्यर्थः, तत्सन्धाने च यदनुभवति तद्दर्शयति–विरूपं-बीभत्समममनोज्ञं रूपं-स्वरूपं येषां स्पर्शानां दुःखोपनिपातानां ते तथा, स्पर्शाश्रिता दुःखोपनिपाताः स्पर्शा इत्युक्ताः, 'तात्स्थ्यात्तच्छब्दोपदेश' इतिकृत्वा, उपलक्षणं चैतन्मानस्योऽपि वेदना ग्राह्याः, अतस्तानेवम्भूतान् स्पर्शान् 'प्रतिसंवेदयति' अनुभवति, प्रतिग्रहणात्प्रत्येकं शारीरान्मानसांश्च दुःखो-

१ शीताया योनयश्चतुरशीतिश्च शतसहस्राणि । अशुभाः शुभाश्च तत्र शुभा इमा जानीहि ॥ १ ॥ असंख्यायुर्मनुष्याः संख्यायुष्काणां राजेश्वराद्याः । तीर्थकरनामगोत्रं सर्वशुभं भवति ज्ञातव्यम् ॥ २ ॥ तत्रापि च जातिसम्पन्नताद्याः शेषा भवन्त्यशुभाः । देवेषु किल्बिषाद्याः शेषा भवन्ति च शुभाः ॥ ३ ॥ पञ्चेन्द्रियतिर्यक्षु हयगजरत्नयोर्भवति शुभा । शेषाश्च शुभाः शुभवर्णैकेन्द्रियाद्याः ॥४॥ देवेन्द्रचक्रवर्तित्वे मुक्त्वा तीर्थकरभावं च । भावितानगारतामपि च शेषास्त्वनन्तशः प्राप्ताः ॥५॥

२ ताः प्र०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पनिपाताननुभवतीत्युक्तं भवति, स्पर्शग्रहणं चेह सर्वसंसारान्तर्वर्त्तिजीवराशिसङ्ग्रहार्थं, स्पर्शनेन्द्रियस्य सर्वजीवव्यापित्वाद्, अत्रेदमपि वक्तव्यं-सर्वान्विरूपरूपान् रसगन्धरूपशब्दान् प्रतिसंवेदयतीति, विरूपरूपत्वं च स्पर्शानां कार्यभूतानां विचित्रकर्मोदयात्कारणभूताद्भवतीति वेदितव्यं, विचित्रकर्मोदयाच्चापरिज्ञातकर्मा संसारी स्पर्शादीन्विरूपरूपांस्तेषु तेषु योन्यन्तरेषु विपाकतः परिसंवेदयतीति, अन्ह च—"तैः कर्मभिः स जीवो विवशः संसारचक्रमुपयाति । द्रव्यक्षेत्राद्धाभावभिन्नमावर्त्तते बहुशः ॥ १ ॥ नरकेषु देवयोनिषु तिर्यग्योनिषु च मनुजयोनिषु च । पर्यटति घटीयन्त्रवदात्मा बिभ्रच्छरीराणि ॥ २ ॥ सततानुबद्धमुक्तं दुःखं नरकेषु तीव्रपरिणामम् । तिर्यक्षु भयक्षुत्तृड्वधादिदुःखं सुखं चाल्पम् ॥ ३ ॥ सुखदुःखे मनुजानां मनःशरीराश्रये बहुविकल्पे । सुखमेव हि देवानां दुःखं स्वल्पं च मनसि भवम् ॥ ४ ॥ कर्मानुभावदुःखित एवं मोहान्धकारगहनवर्ति । अन्ध इव दुर्गमार्गे भ्रमति हि संसारकान्तारे ॥ ५ ॥ दुःखप्रतिक्रियार्थं सुखाभिलाषाच्च पुनरपि तु जीवः । प्राणिवधादीन् दोषानधितिष्ठति मोहसंछन्नः ॥ ६ ॥ बध्नाति ततो बहुविधमन्यत्पुनरपि नवं सुबहु कर्म । तेनार्त्त पच्यते पुनरग्नेरग्निं प्रविश्येव ॥ ७ ॥ एवं कर्माणि पुनः पुनः स बध्नंस्तथैव मुञ्चंश्च । सुखकामो बहुदुःखं संसारमनादिकं भ्रमति ॥ ८ ॥ एवं भ्रमतः संसारसागरे दुर्लभं मनुष्यत्वम् । संसारमहत्त्वाधार्मिकत्वदुष्कर्म्मबाहुल्यैः ॥ ९ ॥ आर्यो देशः कुलरूपसम्पदायुश्च दीर्घमारोग्यम् । यतिसंसर्गः श्रद्धा धर्म्मश्रवणं च मतितैश्ण्यम् ॥ १० ॥ एतानि दुर्लभानि प्राप्तवतोऽपि दृढमोहनीयस्य । कुपथाकुलेऽर्हदुक्तोऽतिदुर्लभो

---

१ तत्रे० प्र०.

जगति सन्मार्गः ॥ ११ ॥" यदि वा योऽयं पुरुषः सर्वा दिशोऽनुदिशश्चानुसञ्चरति तथाऽनेकरूपा योनीः सन्धावति विरूपरूपांश्च स्पर्शान् प्रतिसंवेदयति, सः 'अविज्ञातकर्मा' अविज्ञातम्-अविदितं कर्म-क्रिया व्यापारो मनोवाक्कायलक्षणः, अकार्षमहं करोमि करिष्यामीत्येवंरूपः जीवोपमर्दात्मकत्वेन बन्धहेतुः सावद्यो येन सोऽयमविज्ञातकर्मा, अविज्ञातकर्मत्वेन च तत्र तत्र कर्मणि जीवोपमर्दादिके प्रवर्त्तते येन येनास्याष्टविधकर्म्मबन्धो भवति, तदुदयाच्चानेकरूपयोन्यनुसन्धानं विरूपरूपस्पर्शानुभवश्च भवतीति ॥ ९ ॥ यद्येवं ततः किमित्यत आह—

तत्थ खलु भगवता परिण्णा पवेइआ (सू० १०)

'तत्र' कर्मणि व्यापारे अकार्षमहं करोमि करिष्यामीत्यात्मपरिणतिस्वभावतया मनोवाक्कायव्यापाररूपे 'भगवता' वीरवर्द्धमानस्वामिना परिज्ञानं परिज्ञा सा प्रकर्षेण प्रशस्ताऽऽदौ वा वेदिता प्रवेदिता, एतच्च सुधर्म्मस्वामी जम्बूस्वामिनाम्ने कथयति, सा च द्विधा-ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च, तत्र ज्ञपरिज्ञया सावद्यव्यापारेण बन्धो भवतीत्येवं भगवता परिज्ञा प्रवेदिता, प्रत्याख्यानपरिज्ञया च सावद्ययोगा बन्धहेतवः प्रत्याख्येया इत्येवंरूपा चेति ॥ अमुमेवार्थं निर्युक्तिकृदाह—

तत्थ अकारि करिस्संति बंधचिंता कया पुणो होइ । सहसम्मइया जाणइ कोइ पुण हेतुजुत्तीए ॥ ६७ ॥

'तत्र' कर्मणि क्रियाविशेषे, किम्भूत इत्याह—'अकारि करिस्संति' अकारीति कृतवान् करिस्सन्ति-करिष्यामीति, अनेनातीतानागतोपादानेन तन्मध्यवर्तिनो वर्त्तमानस्य कारितानुमत्योश्चोपसङ्ग्रहान्नवापि भेदा आत्मपरिणामत्वेन यो-

गरूपा उपात्ता द्रष्टव्याः, तत्रानेनात्मपरिणामरूपेण क्रियाविशेषेण 'बन्धचिन्ता कृता भवति' बन्धस्योपादानमुपात्तं भवति, 'कर्म योगनिमित्तं बध्यते' इति वचनात्, एतच्च कश्चिज्जानाति आत्मना सह या सम्मतिः स्वमतिर्वा-अवधिमनःपर्यायकेवलजातिस्मरणरूपा तया जानाति, कश्चिच्च पक्षधर्मान्वयव्यतिरेकलक्षणया हेतुयुक्त्येति । अथ किमर्थमसौ कटुकविपाकेषु कर्माश्रवहेतुभूतेषु क्रियाविशेषेषु प्रवर्त्तत इत्याह—

इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाईमरणमोयणाए दुक्खपडिघायहेउं (सू० ११)

तत्र जीवितमिति-जीवन्त्यनेनायुःकर्म्मणेति जीवितं-प्राणधारणम्, तच्च प्रतिप्राणि स्वसंविदितमितिकृत्वा प्रत्यक्षासन्नवाचिनेदमा निर्दिशति, चशब्दो वक्ष्यमाणजात्यादिसमुच्चयार्थः, एवकारोऽवधारणे, अस्यैव जीवितस्यार्थे परिफल्गुसारस्य तडिल्लताविलसितचञ्चलस्य बह्वपायस्य दीर्घसुखार्थं क्रियासु प्रवर्त्तते, तथाहि-जीविष्याम्यहमरोगः सुखेन भोगान् भोक्ष्ये ततो व्याध्यपनयनार्थं स्नेहापानलावकपिशितभक्षणादिषु क्रियासु प्रवर्त्तते, तथाऽन्यस्य सुखस्य कृते अभिमानग्रहाकुलितचेता बह्वारम्भपरिग्रहाद्बह्वशुभं कर्मादत्ते, उक्तं च—"द्वे वाससी प्रवरयोषिदपायशुद्धा, शय्याऽऽसनं करिवरस्तुरगो रथो वा । काले भिषग्नियमिताशनपानमात्रा, राज्ञः पराक्यमिव सर्वमवेहि शेषम् ॥ १ ॥ पुष्ट्यर्थमन्नमिह यत्प्रणिधिप्रयोगैः, संत्रासदोषकलुषो नृपतिस्तु भुङ्क्ते । यन्निर्भयः प्रशमसौख्यरतिश्च भैक्षं, तत् स्वादुतां भृशमुपैति न पार्थिवान्नम् ॥ २ ॥ भृत्येषु मन्त्रिषु सुतेषु मनोरमेषु, कान्तासु वा मधुमदाङ्कुरितेक्षणासु । विश्रम्भमेति न कदाचिदपि क्षितीशः, सर्वाभिशङ्कितमतेः कतरत्तु सौख्यम् ॥ ३ ॥" तदेवमनवबुद्धतरुणकिशलयपलाशचञ्चलजीवितरतयः कर्मा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रवेषु जीवितोपमर्दादिरूपेषु प्रवर्त्तन्ते, तथाऽस्यैव जीवितस्य परिवन्दनमाननपूजनार्थं हिंसादिषु प्रवर्त्तन्ते, तत्र 'परिवन्दनं' संस्तवः प्रशंसा तदर्थमाचेष्टते, तथाहि–अहं मयूरादिपिशिताशनाद्बली तेजसा देदीप्यमानो देवकुमार इव लोकानां प्रशंसास्पदं भविष्यामीति 'माननम्' अभ्युत्थानासनदानाञ्जलिप्रग्रहादिरूपं तदर्थं वा चेष्टमानः कर्माचिनोति तथा पूजनं पूजा–द्रविणवस्त्रान्नपानसत्कारप्रणामसेवाविशेषरूपं तदर्थं च प्रवर्त्तमानः क्रियासु कर्माश्रवैरात्मानं सम्भावयति, तथाहि—'वीरभोग्या वसुन्धरे'ति मत्वा पराक्रमते, दण्डभयाच्च सर्वा प्रजा विभ्यतीति दण्डयति, इत्येवं राज्ञामन्येषामपि यथासम्भवमायोजनीयम्, अत्र च वन्दनादीनां द्वन्द्वसमासं कृत्वा तादर्थ्ये चतुर्थी विधेया, परिवन्दनमाननपूजनाय जीवितस्य कर्माश्रवेषु प्रवर्त्तन्त इति समुदायार्थः । न केवलं परिवन्दनाद्यर्थमेव कर्मादत्ते, अन्यार्थमप्यादत्त इति दर्शयति–जातिश्च मरणं च मोचनं च जातिमरणमोचनमिति समाहारद्वन्द्वात्तादर्थ्ये चतुर्थी, एतदर्थं च प्राणिनः क्रियासु प्रवर्त्तमानाः कर्मादत्ते, तत्र जात्यर्थं कौञ्चारिवन्दनादिकाः क्रिया विधत्ते, तथा यान् यान् कामान् ब्राह्मणादिभ्यो ददाति तांस्तानन्यजन्मनि पुनर्जातो भोक्ष्यते, तथा मनुनाऽप्युक्तम्—"वारिदस्तृप्तिमाप्नोति, सुखमक्षयमन्नदः । तिलप्रदः प्रजामिष्टामायुष्कमभयप्रदः ॥ ११ ॥" अत्र चैकमेव सुभाषितम्—'अभयप्रदान'मिति तुषमध्ये कणिकावदिति, एवमादिकुमार्गोपदेशाद्धिंसादौ प्रवृत्तिं विदधाति । तथा मरणार्थमपि पितृपिण्डदानादिषु क्रियासु प्रवर्तते, यदिवा ममानेन सम्बन्धी व्यापादितस्तस्य वैरनिर्यातनार्थं वधबन्धादौ प्रवर्त्तते, यदिवा मरणनिवृत्त्यर्थमात्मनो

१ कार्तिकेयः.

दुर्गाद्युपयाचितमजादिना वलिं विधत्ते यशोधर इव पिष्टमयकुक्कुटेन, तथा मुक्त्यर्थमज्ञानाकृतचेतसः पञ्चाग्नितपोऽनुष्ठानादिकेषु प्राण्युपमर्दकारिषु प्रवर्त्तमानाः कर्मादत्ते, यदिवा जातिमरणयोर्विमोचनाय हिंसादिकाः क्रियाः कुर्वते । 'जाइमरणभोयणाए'त्ति वा पाठान्तरं, तत्र भोजनार्थं कृष्यादिकर्मसु प्रवर्त्तमाना वसुधाजलज्वलनपवनवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियव्यापत्तये व्याप्रियन्त इति । तथा दुःखप्रतिघातमुररीकृत्यात्मपरित्राणार्थमारभ्य नानासेवन्ते, तथाहि–व्याधिवेदनार्त्ता लावकपिशितमदिराद्यासेवन्ते, तथा वनस्पतिमूलत्वक्पत्रनिर्यासादिसिद्धशतपाकादितैलार्थमद्यादिसमारम्भेण पापं कुर्वन्ति स्वतः कारयन्त्यन्यैः कुर्वतोऽन्यान् समनुजानत इत्येवमतीतानागतकालयोरपि मनोवाक्काययोगैः कर्मादानं विदधतीत्यायोजनीयम् । तथा दुःखप्रतिघातार्थमेव सुखोत्पत्त्यर्थं च कलत्रपुत्रगृहोपस्करादाददते, तल्लाभपालनार्थं च तासु तासु क्रियासु प्रवर्त्तमानाः पापकर्मासेवन्त इति. उक्तं च—"आदौ प्रतिष्ठाऽधिगमे प्रयासो, दारेषु पश्चाद्गृहिणः सुतेषु । कर्तुं पुनस्तेषु गुणप्रकर्षं, चेष्टा तदुच्चैःपदलङ्घनाय ॥ १ ॥" तदेवंभूतैः क्रियाविशेषैः कर्मोपादाय नानादिक्ष्वनुसञ्चरन्ति अनेकरूपासु च योनिषु सन्धावन्ति विरूपरूपांश्च स्पर्शान् प्रतिसंवेदयन्ति, इत्येतज्ज्ञात्वा क्रियाविशेषनिवृत्तिर्विधेयेति ॥ १० ॥ एतावन्त एव च क्रियाविशेषा इति दर्शयितुमाह—

एयावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणियव्वा भवंति (सू० १२)

'एआवन्ती सव्वावन्ती'ति एतौ द्वौ शब्दौ मागधदेशीभाषाप्रसिद्ध्या एतावन्तः सर्वेऽपीत्येतत्पर्यायौ, एतावन्त एव

१ मोक्षाय प्र.

सर्वस्मिन् 'लोके' धर्माधर्मास्तिकायावच्छिन्ने नभःखण्डे ये पूर्वं प्रतिपादिताः 'कर्मसमारम्भाः' क्रियाविशेषाः, नैतेभ्योऽधिकाः केचन सन्तीत्येवं परिज्ञातव्या भवन्ति, सर्वेषां पूर्ववोपादानादिति भावः तथाहि–आत्मपरोभयैहिकामुष्मिकातीतानागतवर्त्तमानकालकृतकारितानुमतिभिरारम्भाः क्रियन्ते, ते च सर्वेऽपि प्रागुपात्ता यथासम्भवमायोज्या इति ॥ १२ ॥ एवं सामान्येन जीवास्तित्वं प्रसाध्य तदुपमर्दकारिणां च क्रियाविशेषाणां बन्धहेतुत्वं प्रदर्श्योपसंहारद्वारेण विरतिं प्रतिपादयन्नाह—

जस्सेते लोगंसि कम्मसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे (सू० १३) त्तिबेमि ॥ प्रमथोद्देशकः १ ॥

भगवान् समस्तवस्तुवेदी केवलज्ञानेन साक्षादुपलभ्यैवमाह—'यस्य' मुमुक्षोः 'एते' पूर्वोक्ताः 'कर्मसमारम्भाः' क्रियाविशेषाः कर्मणो वा–ज्ञानावरणीयाद्यष्टप्रकारस्य समारम्भा-उपादानहेतवस्ते च क्रियाविशेषा एव, परि-समन्तात् ज्ञाताः –परिच्छिन्नाः कर्मबन्धहेतुत्वेन भवन्ति, हुरवधारणे, मनुते मन्यते वा जगतस्त्रिकालावस्थामिति मुनिः स एव मुनिर्ज्ञपरिज्ञया परिज्ञातकर्मा प्रत्याख्यानपरिज्ञया च प्रत्याख्यातकर्मबन्धहेतुभूतसमस्तमनोवाक्कायव्यापार इति, अनेन च मोक्षाङ्गभूते ज्ञानक्रिये उपात्ते भवतो, न ह्याभ्यां विना मोक्षो भवति, यत उक्तम्—"ज्ञानक्रियाभ्यां मोक्षः" इति । इतिशब्द एतावानयमात्मपदार्थविचारः कर्मबन्धहेतुविचारश्च सकलोद्देशकेन परिसमापित इति प्रदर्शकः, यदिवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इति' एतदहं ब्रवीमि यत्प्रागुक्तं यच्च वक्ष्ये तत्सर्वं भगवदन्तिके साक्षात् श्रुत्वेति शस्त्रपरिज्ञायां प्रशमोद्देशकः समाप्तः ॥

उक्तः प्रथमोद्देशकः साम्प्रतं द्वितीयः प्रस्तूयते—अस्य चायमभिसम्बन्धः-प्रथमोद्देशके सामान्येन जीवास्तित्वं प्रसाधितम्, इदानीं तस्यैवैकेन्द्रियादिपृथिव्याद्यस्तित्वप्रतिपिपादयिषयाऽऽह—यदिवा प्राक् परिज्ञातकर्मत्वं मुनित्वकारणमुपादेशि, यः पुनरपरिज्ञातकर्मत्वान्मुनिर्न भवति-विरतिं न प्रतिपद्यते स पृथिव्यादिषु बम्भ्रमीति, अथ क एते पृथिव्यादय इत्यतस्तद्विशेषास्तित्वज्ञापनार्थमिदमुपक्रम्यत इति । अनेनाभिसम्बन्धेनायातस्यास्योद्देशकस्य चत्वार्यनुयोगद्वाराणि वाच्यानि, यावन्नामनिष्पन्ने निक्षेपे पृथिव्युद्देशक इति, तत्रोद्देशकस्य निक्षेपादेरन्यत्र प्रतिपादितत्वान्नेह प्रदर्श्यते, पृथिव्यास्तु यन्निक्षेपादि सम्भवति तन्निर्युक्तिकृद्दर्शयितुमाह—

पुढवीए निक्खेवो परूवणालक्खणं परीमाणं । उवभोगो सत्थं वेयणा य वहणा निवित्ती य ॥ ६८ ।

प्राग् जीवोद्देशके जीवस्य प्ररूपणा किं न कृतेत्येतच्च नाशङ्कनीयं, यतो जीवसामान्यस्य विशेषाधारत्वात् विशेषस्य च पृथिव्यादिरूपत्वात् सामान्यजीवस्य चोपभोगादेरसम्भवात् पृथिव्यादिचर्चयैव तस्य चिन्तितत्वादिति । तत्र पृथिव्या नामादिनिक्षेपो वक्तव्यः, प्ररूपणा-सूक्ष्मबादरादिभेदा, लक्षणं-साकारानाकारोपयोगकाययोगादिकं, परिमाणं-संवर्त्तितलोकप्रतरासंख्येयभागमात्रादिकम्, उपभोगः—शयनासनचङ्क्रमणादिकः, शस्त्रं-स्नेहाम्लक्षारादि, वेदना-स्वशरीराव्यक्तचेतनानुरूपा सुखदुःखानुभवस्वभावा, वधः—कृतकारितानुमतिभिरुपमर्दनादिकः, निवृत्तिः—अप्रमत्तस्य मनोवाक्काययुक्त्याऽनुपमर्दादिकेति समासार्थः । व्यासार्थं तु निर्युक्तिकृद्यथाक्रममाह—

नामंठवणापुढवी दव्वपुढवी य भावपुढवी य । एसो खलु पुढवीए निक्खेवो चउविहो होइ ॥ ६९ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २८ ॥

अध्ययनं १ उद्देशकः २

स्पष्टा, नामस्थापने श्रुण्णत्वादनाहत्याह—

दव्वं सरीरभविओ भावेण य होइ पुढविजीवो उ । जो पुढविनामगोयं कम्मं वेएइ सो जीवो ॥ ७० ॥

द्रव्यपृथिवी आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चानुपयुक्तः, नोआगमतस्तु पृथिवीपदार्थज्ञस्य शरीरं जीवापेतं तथा पृथिवीपदार्थज्ञत्वेन भव्यो-बालादिस्ताभ्यां विनिर्मुक्तो द्रव्यपृथिवीजीवः—एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, भावपृथिवीजीवः पुनर्यः पृथिवीनामादिकर्मोदीर्णं वेदयति । गतं निक्षेपद्वारं, साम्प्रतं प्ररूपणाद्वारम्—

दुविहा य पुढविजीवा सुहुमा तह बायरा य लोगंमि । सुहुमा य सव्वलोए दो चेव य बायरविहाणा ॥ ७१ ॥

पृथिवीजीवा द्विविधाः—सूक्ष्मा बादराश्च, सूक्ष्मनामकर्मोदयात् सूक्ष्माः, बादरनामकर्मोदयात्तु बादराः, कर्मोदयजनिते एवैषां सूक्ष्मबादरत्वे न त्वापेक्षिके बदरामलकयोरिव ॥ तत्र सूक्ष्माः समुद्गकपर्याप्तप्रक्षिप्तगन्धावयववत् सर्वलोकव्यापिनः, बादरास्तु मूलभेदाद्विविधा इत्याह—

दुविहा बायरपुढवी समासओ सण्हपुढवि खरपुढवी । सण्हा य पंचवण्णा अवरा छत्तीसइविहाणा ॥ ७२ ॥

'समासतः' संक्षेपाद्विविधा बादरपृथिवी-श्लक्ष्णबादरपृथिवी खरबादरपृथिवी च, तत्र श्लक्ष्णबादरपृथिवी कृष्णनीललोहितपीतशुक्लभेदात्पञ्चधा, इह च गुणभेदाद्गुणिभेदोऽप्युपगन्तव्यः, खरबादरपृथिव्यास्त्वन्येऽपि षट्त्रिंशद्विशेषभेदाः सम्भवन्तीति ॥ तानाह— ॥ २८ ॥

पुढवी य सक्करा वालुगा य उवले सिला य लोणूसे । अय तंब तउअ सीसग रुप्प सुवण्णे य वइरे य ॥ ७३ ॥
हरियाले हिंगुलए मणोसिला सासगंजण पवाले । अब्भपडलब्भवालुअ बायरकाए मणिविहाणा ॥ ७४ ॥
गोमेज्जए य रुयगे अंको फलिहे य लोहियक्खे य । मरगय मसारगल्ले भुयमोयग इंदनीले य ॥ ७५ ॥
चंदप्पह वेरुलिए जलकंते चेव सूरकन्ते य । एए खरपुढवीए नामं छत्तीसयं होइ ॥ ७६ ॥

अत्र च प्रथमगाथया पृथिव्यादयश्चतुर्दश भेदाः परिगृहीताः, द्वितीयगाथया त्वष्टौ हरितालादयः, तृतीयगाथया दश गोमेदकादयः, तुर्यगाथया चत्वारश्चन्द्रकान्तादयः । अत्र च पूर्वगाथाद्वयेन सामान्यपृथिवीभेदाः प्रदर्शिताः, उत्तरगाथाद्वयेन मणिभेदाः प्रदर्शिताः, एताः स्पष्टा इति कृत्वा न विवृताः ॥ एवं सूक्ष्मबादरभेदान् प्रतिपाद्य पुनर्वर्णादिभेदेन पृथिवीभेदान् दर्शयितुमाह—

वण्णरसगंधफासे जोणिप्पमुहा भवंति संखेज्जा । णेगाइ सहस्साइं हुंति विहाणंमि इक्किक्के ॥ ७७ ॥

तत्र वर्णाः शुक्लादयः पञ्च रसास्तिक्तादयः पञ्च गन्धौ सुरभिदुरभी स्पर्शाः मृदुकर्कशादयः अष्टौ, तत्र वर्णादिके एकैकस्मिन् 'योनिप्रमुखा' योनिप्रभृतयः संख्येया भेदा भवन्ति, संख्येयस्थानेकरूपत्वाद्विशिष्टसंख्यार्थमाह—अनेकानि सहस्राणि एकैकस्मिन् वर्णादिके 'विधाने' भेदे भवन्ति, योनितो गुणतश्च भेदानामिति । एतच्च सप्तयोनिलक्षणप्रमाणत्वात्

१ चंदण गेरुय हंसगब्भ भुयमोय मसारगल्ले य प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथिव्या एवं सम्भावनीयमिति । उक्तं च प्रज्ञापनायाम्—"तत्थ णं जे ते पज्जत्तगा एएसि णं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं जोणिपमुहसयसहस्साइं पज्जत्तयणिस्साए अपज्जत्तया वक्कमंति, तं जत्थेगो तत्थ नियमा असंखेज्जा, से त्तं खरबायरपुढविकाइया" इह च संवृतयोनयः पृथिवीकायिका उक्ताः, सा पुनः सांचित्ता अचित्ता मिश्रा वा, तथा पुनश्च शीता उष्णा शीतोष्णा वेत्येवमादिका द्रष्टव्येति ॥ एतदेव भूयो निर्युक्तिकृत् स्पष्टतरमाह—

वण्णंमि य इक्किके गंधंमि रसंमि तह य फासंमि । नाणत्ती कायव्वा विहाणए होइ इक्किक्कं ॥ ७८ ॥

वर्णादिके एकैकस्मिन् 'विधाने' भेदे सहस्राग्रशो नानात्वं विधेयं, तथाहि—कृष्णो वर्ण इति सामान्यं, तस्य च भ्रमराङ्गारकोकिलगवलकज्जलादिषु प्रकर्षाप्रकर्षविशेषाद्भेदः कृष्णः कृष्णतरः कृष्णतम इत्यादि, एवं नीलादिष्वप्यायोज्यं, तथा रसगन्धस्पर्शेषु सर्वत्र पृथिवीभेदा वाच्याः, तथा वर्णादीनां परस्परसंयोगाद्धूसरकेसरकर्बुरादिवर्णान्तरोत्पत्तिरेवमुत्प्रेक्ष्य वर्णादीनां प्रत्येकं प्रकर्षाप्रकर्षतया परस्परानुवेधेन च बहवो भेदा वाच्याः ॥ पुनरपि पर्याप्तकादिभेदाभेदमाह—

जे बायरे विहाणा पज्जत्ता तत्तिआ अपज्जत्ता । सुहुमावि हुंति दुविहा पज्जत्ता चेव अपज्जत्ता ॥ ७९ ॥

॥ २९ ॥

---

१ भावनीयमिति प्र. २ तत्र ये ते पर्याप्तकाः एतेषां वर्णादेशेन गन्धादेशेन रसादेशेन स्पर्शादेशेन सहस्राग्रशो विधानानि संख्येयानि योनिप्रमुखानि शतसहस्राणि, पर्याप्तकनिश्रयाऽपर्याप्तका व्युत्क्रामन्ति, तद् यत्रैकस्तत्र नियमादसंख्येयाः इत्येते खरबादरपृथ्वीकायिकाः.

यानि बादरपृथिवीकाये 'विधानानि' भेदाः प्रतिपादितास्तानि यावन्ति पर्याप्तकानां तावन्त्येवापर्याप्तकानामपि, अत्र च भेदानां तुल्यत्वं द्रष्टव्यं न तु जीवानां, यत एकपर्याप्तकाश्रयेणासंख्येया अपर्याप्तका भवन्ति, सूक्ष्मा अपि पर्याप्तकापर्याप्तकभेदेन द्विविधा एव, किन्तु अपर्याप्तकनिश्रया पर्याप्तकाः समुत्पद्यन्ते, यत्र चैकोऽपर्याप्तकस्तत्र नियमादसंख्येयाः पर्याप्तकाः स्युः । पर्याप्तिस्तु 'आहारसरीरिन्दियऊसासवओमणोऽहिनिव्वत्ती । होति जतो दलियाओ करणं पइ सा उ पज्जत्ती ॥ १ ॥' जन्तुरुत्पद्यमानः पुद्गलोपादानेन करणं निर्वर्त्तयति तेन च करणविशेषेणाहारमवगृह्य पृथग् खलरसादिभावेन परिणतिं नयति स तादृक्करणविशेष आहारपर्याप्तिशब्देनोच्यते, एवं शेषपर्याप्तयोऽपि वाच्याः, तत्रैकेन्द्रियाणामाहारशरीरेन्द्रियोच्छ्वासाभिधानाश्चतस्रो भवन्ति, एताश्चान्तर्मुहूर्त्तेन जन्तुरादत्ते, अनाप्तपर्याप्तिरपर्याप्तकोऽवाप्तपर्याप्तिस्तु पर्याप्तक इति, अत्र च पृथिव्येव कायो येषामिति विग्रहः ॥ यथा सूक्ष्मबादरादयो भेदाः सिद्ध्यन्ति तथा प्रसिद्धभेदेनोदाहरणेन दर्शयितुमाह—

रुक्खाणं गुच्छाणं गुम्माण लयाण वल्लिवलयाणं । जह दीसइ नाणत्तं पुढवीकाए तहा जाण ॥ ८० ॥

यथा वनस्पतेर्वृक्षादिभेदेन स्पष्टं नानात्वमुपलभ्यते, तथा पृथिवीकायिकेऽपि जानीहि, तत्र वृक्षाः—चूतादयो गुच्छा-वृन्ताकीसल्लकीकर्प्पास्यादयः, गुल्मानि-नवमालिकाकोरण्टकादीनि, लताः—पुन्नागाशोकलताद्याः, वल्ल्यः—त्रपुषीवालुङ्की-कोशातक्याद्याः, वलयानि-केतकीकदल्यादीनि ॥ पुनरपि वनस्पतिभेददृष्टान्तेन पृथिव्या भेदमाह—

---

१ आहारः शरीरमिन्द्रियाणि उच्छ्वासो वचः मनः (एषां) अभिनिर्वृत्तिः । भवति यतो दलिकात् करणं प्रति सैव पर्याप्तिः ॥ १ ॥

ओसहि तण सेवाले पणगविहाणे य कंद मूले य । जह दीसइ नाणत्तं पुढवीकाए तहा जाण ॥ ८१ ॥

यथा हि वनस्पतिकायस्य ओषध्यादिको भेद एवं पृथिव्या अपि द्रष्टव्यः, तत्र ओषध्यः—शाल्याद्याः, तृणानि-दर्भादीनि, सेवालं-जलोपरि मलरूपं, पनकः-काष्ठादावुल्लीविशेषः पञ्चवर्णः, कन्दः—सूरणकन्दादिः, मूलम्—उशीरादीति ॥ एते च सूक्ष्मत्वान्नैकध्यादिकाः समुपलभ्यन्ते, यत्संख्यास्तूपलभ्यन्ते तद्दर्शयितुमाह—

इक्कस्स दुण्ह तिण्ह व संखिज्जाण व न पासिउं सक्का । दीसंति सरीराइं पुढविजियाणं असंखाणं ॥ ८२ ॥

स्पष्टा ॥ कथं पुनरिदमवगन्तव्यम् ?, सन्ति पृथिवीकायिका इति, उच्यते, तदधिष्ठितशरीरोपलब्धेः अधिष्ठातरि प्रतीतिर्गवाश्वादाविव इति, एतद्दर्शयितुमाह—

एएहिं सरीरेहिं पचक्खं ते परूविया हुंति । सेसा आणागिज्झा चक्खुफासं न जं इंति ॥ ८३ ॥

'एभिः' असंख्येयतयोपलभ्यमानैः पृथिवीशर्करादिभेदभिन्नैः शरीरैस्ते शरीरिणः शरीरद्वारेण 'प्रत्यक्षं' साक्षात् 'प्ररूपिताः' ख्यापिता भवन्ति, शेषास्तु सूक्ष्मा आज्ञाग्राह्या एव द्रष्टव्याः, यतस्ते चक्षुःस्पर्शं नागच्छन्ति, स्पर्शशब्दो विषयार्थः ॥ प्ररूपणाद्वारानन्तरं लक्षणद्वारमाह—

उवओगजोग अज्झवसाणे मइसुय अचक्खुदंसे य । अट्ठविहोदयलेसा सन्नुस्सासे कसाया य ॥ ८४ ॥

॥ ३० ॥

तत्र पृथिवीकायादीना स्त्यानर्ध्यादयाद्या च यावती चोपयोगशक्तिरव्यक्ता ज्ञानदर्शनरूपेत्येवमात्मक उपयोगो लक्षणं, तथा योगः—कायाख्य एक एव, औदारिकतन्मिश्रकार्म्मणात्मको वृद्ध्यष्टिकल्पो जन्तोः सकर्मकस्यालम्बनाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याप्रियते, तथा अध्यवसायाः–सूक्ष्मा आत्मनः परिणामविशेषाः, ते च लक्षणम्, अव्यक्तचैतन्यपुरुषमनःसमुद्भूतचिन्ताविशेषा इवानभिलक्ष्यास्तेऽभिगन्तव्याः, तथा साकारोपयोगान्तःपातिमतिश्रुताज्ञानसमन्विताः पृथिवीकायिका बोद्धव्याः, तथा स्पर्शनेन्द्रियेणाचक्षुर्दर्शनानुगता बोद्धव्याः, तथा ज्ञानावरणीयाद्यष्टविधकर्मोदयभाजस्तावद्बन्धभाजश्च, तथा लेश्या-अध्यवसायविशेषरूपाः कृष्णनीलकापोततैजस्यश्चतस्रः ताभिरनुगताः, तथा दशविधसंज्ञानुगताः, ताश्च आहारादिकाः प्रागुक्ता एव, तथा सूक्ष्मोच्छ्वासनिःश्वासानुगताः, उक्तं च—"पुढविकाइया णं भंते! जीवा आणवन्ति वा पाणवन्ति वा ऊससन्ति वा नीससंति वा?, गोयमा! अविरहियं सततं चेव आणवन्ति वा पाणवन्ति वा ऊससन्ति वा नीससन्ति वा" कषाया अपि सूक्ष्माः क्रोधादयः। एवमेतानि जीवलक्षणान्युपयोगादीनि कषायपर्यवसानानि पृथिवीकायिकेषु सम्भवन्तीति, ततश्चैवंविधजीवलक्षणकलापसमनुगतत्वात् मनुष्यवत्सचित्ता पृथिवीति। ननु च तदिदमसिद्धमसिद्धेन साध्यते, तथाहि–न ह्युपयोगादीनि लक्षणानि पृथिवीकायेषु व्यक्तानि समुपलक्ष्यन्ते, सत्यमेतद्, अव्यक्तानि तु विद्यन्ते, यथा कस्यचित्पुंसः हृत्पूरकव्यतिमिश्रमदिरातिपानपित्तोदयाकुलीकृतान्तःकरणविशेषस्याव्यक्ता चेतना, न चैतावता तस्याचिद्रूपता, एवमत्राप्यव्यक्तचेतनासम्भवोऽभ्युपगन्तव्यः, ननु चात्रोच्छ्वासादिकमव्यक्तचेतनालिङ्गमस्ति, न चेह तथाविधं किञ्चिच्चेतनालिङ्गमस्ति, नैतदेवम्, इहापि समानजातीयलतोद्भेदादिकमर्शोमांसाङ्कुरवच्चेतना-

१ पृथिवीकायिका भदन्त! जीवा आनन्ति वा प्राणन्ति वा उच्छ्वसन्ति वा निःश्वसन्ति वा?, गौतम! अविरहितं सततमेव चानन्ति वा प्राणन्ति वा उच्छ्वसन्ति वा निःश्वसन्ति वा.

आ. सू. ६

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३१ ॥

चिह्नमस्त्येव, अव्यक्तचेतनानां हि सम्भावितैकचेतनालिङ्गानां वनस्पतीनामिव चेतनाऽभ्युपगन्तव्येति, वनस्पतेश्च चैतन्यं विशिष्टर्तुपुष्पफलप्रदत्वेन स्पष्टं साधयिष्यते च, ततोऽव्यक्तोपयोगादिलक्षणसद्भावात् सचित्ता पृथिवीति स्थितम्॥ ननु चाश्मलतादेः कठिनपुद्गलात्मिकायाः कथं चेतनत्वमित्यत आह—

अध्ययनं १

उद्देशकः २

अट्ठी जहा सरीरंमि अणुगयं चेयणं खरं दिट्ठं। एवं जीवाणुगयं पुढविसरीरं खरं होइ॥ ८५॥

यथाऽस्थि शरीरानुगतं सचेतनं खरं दृष्टम्, एवं जीवानुगतं पृथिवीशरीरमपीति॥ साम्प्रतं लक्षणद्वारानन्तरं परिमाणद्वारमाह—

जे बायरपज्जत्ता पयरस्स असंखभागमित्ता ते। सेसा तिन्निवि रासी वीसुं लोया असंखिज्जा॥ ८६॥

तत्र पृथिवीकायिकाश्चतुर्धा, तद्यथा–बादराः पर्याप्ता अपर्याप्ताश्च तथा सूक्ष्मा अपर्याप्ताः पर्याप्ताश्च, तत्र ये बादराः पर्याप्तकास्ते संवर्त्तितलोकप्रतरासंख्येयभागमात्रवर्त्तिप्रदेशराशिप्रमाणा भवन्ति, शेषास्तु त्रयोऽपि राशयः प्रत्येकमसंख्येयानां लोकानामाकाशप्रदेशराशिप्रमाणा भवन्ति, यथानिर्दिष्टक्रमेण चैते यथोत्तरं बहुतराः, यत उक्तम्—"सव्वत्थोवा बादरपुढविकाइया पज्जत्ता, बादरपुढविकाइया अपज्जत्ता असंखेज्जगुणा सुहुमपुढविकाइया अपज्जत्ता असंखेज्जगुणा सुहुमपुढविकाइया पज्जत्ता असंखेज्जगुणा"[1]॥ प्रकारान्तरेणापि राशित्रयस्य परिमाणं दर्शयितुमाह—

१ सर्वस्तोका बादरपृथ्वीकायिकाः पर्याप्ताः बादरपृथ्वीकायिका अपर्याप्ता असंख्येयगुणाः सूक्ष्मपृथ्वीकायिकाः अपर्याप्ता असंख्येयगुणाः सूक्ष्मपृथ्वीकायिकाः पर्याप्ता असंख्येयगुणाः.

॥ ३१ ॥

पत्थेण व कुडवेण व जह कोइ मिणिज्ज सव्वधन्नाइं। एवं मविज्जमाणा हवंति लोया असंखिज्जा॥ ८७॥

यथा प्रस्थादिना कश्चित्सर्वधान्यानि मिनुयाद्, एवमसद्भावप्रज्ञापनाङ्गीकरणाल्लोकं कुडवीकृत्याजघन्योत्कृष्टावगाहनान् पृथिवीकायिकजीवान् यदि मिनोति ततोऽसंख्येयान् लोकान् पृथिवीकायिकाः पूरयन्ति॥ पुनरपि प्रकारान्तरेण परिमाणमाह—

लोगागासपएसे इक्किक्कं निक्खिवे पुढविजीवं। एवं मविज्जमाणा हवंति लोआ असंखिज्जा॥ ८८॥

स्पष्टा॥ साम्प्रतं कालतः प्रमाणं निर्दिदिक्षुः क्षेत्रकालयोः सूक्ष्मबादरत्वमाह—

निउणो उ होइ कालो तत्तो निउणयरयं हवइ खित्तं। अंगुलसेढीमित्ते ओसप्पिणीओ असंखिज्जा॥ ८९॥

'निपुणः' सूक्ष्मः 'कालः' समयात्मकः, ततोऽपि सूक्ष्मतरं क्षेत्रं भवति, यतोऽङ्गुलीश्रेणिमात्रक्षेत्रप्रदेशानां समयापहारेणासंख्येया उत्सर्पिण्यवसर्पिण्योऽपक्रामन्तीत्यतः कालात् क्षेत्रं सूक्ष्मतरम्॥ प्रस्तुतं कालतः परिमाणं दर्शयितुमाह—

अणुसमयं च पवेसो निक्खमणं चेव पुढविजीवाणं। काए कायट्ठिइया चउरो लोया असंखिज्जा॥ ९०॥

तत्र जीवाः पृथिवीकायेऽनुसमयं प्रविशन्ति निष्क्रामन्ति च, एकस्मिन् समये कियतां निष्क्रमः प्रवेशश्च १–२, तथा विवक्षिते च समये कियन्तः पृथिवीकायपरिणताः सम्भवन्ति ३, तथा कियती च कायस्थिति ४ रित्येते चत्वारो विकल्पाः कालतोऽभिधीयन्ते, तत्रासंख्येयलोकाकाशप्रदेशपरिमाणाः समयेनोपद्यन्ते विनश्यन्ति च, पृथिवीत्वेन परि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णता अप्यसंख्येयलोकाकाशप्रदेशप्रमाणाः, तथा कायस्थितिरपि मृत्वा मृत्वाऽसंख्येयलोकाकाशप्रदेशपरिमाणं कालं तत्र तत्रोत्पद्यन्त इति, एवं क्षेत्रकालाभ्यां परिमाणं प्रतिपाद्य परस्परावगाहप्रतिपिपादयिषयाऽऽह—

गायरपुढविक्काइयपज्जत्तो अन्नमन्नमोगाढो । सेसा ओगाहंते सुहुमा पुण सव्वलोगंमि ॥ ९१ ॥

बादरपृथिवीकायिकः पर्याप्तो यस्मिन्नाकाशखण्डे अवगाढः तस्मिन्नेवाकाशखण्डेऽपरस्यापि बादरपृथिवीकायिकस्य शरीरमवगाढमिति, शेषास्तु अपर्याप्तकाः पर्याप्तकनिश्रया समुत्पद्यमाना अनन्तरप्रक्रियया पर्याप्तकावगाढाकाशप्रदेशावगाढाः, सूक्ष्माः पुनः सर्वस्मिन्नपि लोकेऽवगाढा इति ॥ उपभोगद्वारमाह—

चंकमणे य ट्ठाणे निसीयण तुयट्टणे य कयकरणे । उच्चारे पासवणे उवगरणाणं च निक्खिवणे ॥ ९२ ॥
आलेवण पहरण भूसणे य कयविक्कए किसीए य । भंडाणंपि य करणे उवभोगविही मणुस्साणं ॥ ९३ ॥

चङ्क्रमणोर्ध्वस्थाननिषीदनत्वग्वर्त्तनकृतकपुत्रककरणउच्चारप्रश्रवणउपकरणनिक्षेपआलेपनप्रहरणभूषणक्रयविक्रयकृषीकरणभण्डकघट्टनादिषूपभोगविधिर्मनुष्याणां पृथिवीकायेन भवतीति ॥ यद्येवं ततः किमित्यत आह—

एएहिं कारणेहिं हिंसंति पुढविकाइए जीवे । सायं गवेसमाणा परस्स दुक्खं उदीरंति ॥ ९४ ॥

एभिश्चङ्क्रमणादिभिः कारणैः पृथिवीजीवान् हिंसन्ति, किमर्थमिति दर्शयति-'सातं' सुखमात्मनोऽन्वेषयन्तः परदुःखान्यजानानाः कतिपयदिवसरमणीयभोगाशाकर्षितसमस्तेन्द्रियग्रामा विमूढचेतस इति, 'परस्य' पृथिव्याश्रितजन्तुराशेः 'दुःखम्' असातलक्षणं तदुदीरयन्ति—उत्पादयन्तीति, अनेन भदानजनितः शुभफलोदयः प्रत्युक्त इति ॥ अधुना शस्त्र-

॥ ३२ ॥

द्वारं—शस्यतेऽनेनेति शस्त्रं, तच्च द्विधा—द्रव्यशस्त्रं भावशस्त्रं च, द्रव्यशस्त्रमपि समासविभागभेदाद्विधैव, तत्र समासद्रव्यशस्त्रप्रतिपादनायाह—

हलकुलियविसकुद्दालालित्तयमिगसिंगकट्ठमग्गी य । उच्चारे पासवणे एयं तु समासओ सत्थं ॥ ९५ ॥

तत्र हलकुलिकविषकुद्दालालित्रकमृगशृङ्गकाष्ठाग्न्युच्चारप्रश्रवणादिकमेतत् 'समासतः' संक्षेपतो द्रव्यशस्त्रम् ॥ विभागद्रव्यशस्त्रप्रतिपादनायाह—

किंची सकायसत्थं किंची परकाय तदुभयं किंचि । एयं तु दव्वसत्थं भावे अ असंजमो सत्थं ॥ ९६ ॥

किञ्चित्स्वकायशस्त्रं पृथिव्येव पृथिव्याः, किञ्चित्परकायशस्त्रमुदकादि, तदुभयं किञ्चिदिति भूदकं मिलितं भव इति । तच्च सर्वमपि द्रव्यशस्त्रं, भावे पुनः 'असंयमः' दुष्प्रयुक्ता मनोवाक्कायाः शस्त्रमिति ॥ वेदनाद्वारमाह-

पायच्छेयण भेयण जंघोरु तहेव अंगुवंगेसुं । जह हुंति नरा दुहिया पुढविकाए तहा जाण ॥ ९७ ॥

यथा पादादिकेष्वङ्गप्रत्यङ्गेषु छेदनभेदादिकया क्रियया नरा दुःखिताः, तथा पृथिवीकायेऽपि वेदनां जानीहि ॥ यद्यपि पादशिरोग्रीवादीन्यङ्गानि पृथिवीकायिकानां न सन्ति तथापि तच्छेदनानुरूपा वेदनाऽस्त्येवेति दर्शयितुमाह—

नत्थि य सि अंगुवंगा तयाणुरूवा य वेयणा तेसिं । केसिंचि उदीरंती केसिंचऽतिवायए पाणे ॥ ९८ ॥

पूर्वार्द्धं गतार्थं, केषाञ्चित्पृथिवीकायिकानां तदारम्भिणः पुरुषा वेदनामुदीरयन्ति, केषाञ्चित्तु प्राणानप्यतिपातयेयुरिति । तथा हि भगवत्यां दृष्टान्त उपात्तो यथा—चतुरन्तचक्रवर्त्तिनो गन्धपेषिका यौवनवर्त्तिनी बलवती आर्द्रामलक-

प्रमाणं सचित्तपृथिवीगोलकमेकविंशतिकृत्वो गन्धपट्टके कठिनशिलापुत्रकेण पिंष्यात्, ततस्तेषां पृथिवीजीवानां कश्चित्सङ्घट्टितः कश्चित्परितापितः कश्चिद्व्यापादितोऽपरः किल तेन शिलापुत्रकेण न स्पृष्टोऽपीति ॥ वधद्वारमाह—

पवयंति य अणगारा ण य तेहिं गुणेहिं जेहिं अणगारा । पुढविं विहिंसमाणा न हु ते वायाहि अणगारा ॥९९॥

इह ह्येके कुतीर्थिका यतिवेषमास्थाय एवं च प्रवदन्ति—वयम् 'अनगाराः' प्रव्रजिताः, न च 'तेषु गुणेषु' निरवद्यानुष्ठानरूपेषु प्रवर्त्तन्ते, येष्वनगाराः, यथा चानगारगुणेषु न प्रवर्त्तन्ते तद्दर्शयति—यतस्तेऽहर्निशं पृथिवीजन्तुविपत्तिकारिणो दृश्यन्ते गुदपाणिपादप्रक्षालनार्थम्, अन्यथापि निर्लेपनिर्गन्धत्वं कर्तुं शक्यम्, अतश्च यतिगुणकलापशून्या न वाङ्मात्रेण युक्तिनिरपेक्षेणानगारत्वं बिभ्रतीति, अनेन प्रयोगः सूचितः, तत्र गाथापूर्वार्द्धेन प्रतिज्ञा, पश्चार्द्धेन हेतुः, उत्तरगाथार्द्धेन साधर्म्यदृष्टान्तः, स चायं प्रयोगः—कुतीर्थिका यत्किमानवादिनोऽपि यतिगुणेषु न प्रवर्तन्ते, पृथिवीहिंसाप्रवृत्तत्वाद्, इह ये ये पृथिवीहिंसाप्रवृत्तास्ते ते यतिगुणेषु न प्रवर्त्तन्ते, गृहस्थवत् ॥ साम्प्रतं दृष्टान्तगर्भं निगमनमाह—

अणगारवाइणो पुढविहिंसगा निग्गुणा अगारिसमा । निद्दोसत्ति य मइला विरइदुगंछाइ मइलतरा ॥ १०० ॥

'अनगारवादिनो' वयं यतय इति वदनशीलाः पृथिवीकायविहिंसकास्सन्तो निर्गुणा यतोऽतः 'अगारिसमा' गृहस्थतुल्या भवन्ति, अभ्युच्चयमाह—सचेतना पृथिवीत्येवं ज्ञानरहितत्वेन तत्समारम्भवर्त्तिनः सदोषा अपि सन्तो वयं निर्दोषा इत्येवं मन्यमानाः स्वदोषप्रेक्षाविमुखत्वात् 'मलिनाः' कलुषितहृदयाः, पुनश्चातिप्रगल्भतया साधुजनाश्रिताया निरवद्यानुष्ठानात्मिकाया विरतेः 'जुगुप्सया' निन्दया मलिनतरा भवन्ति, अनया च साधुनिन्दयाऽनन्तसंसारित्वं प्रदर्शितं भव-

॥ ३३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीति ॥ एतच्च गाथाद्वयं सूत्रोपात्तार्थानुसार्यपि वधद्वारावसरे निर्युक्तिकृताऽभिहितं, तस्य स्वयमेवोपात्तत्वेन तद्व्याख्यानस्य न्याय्यत्वात्, तच्चेदं सूत्रम् 'लज्जमाणा पुढो पास अणगारा मोत्ति एगे पवयमाणे'त्यादि ॥ अयं च वधः कृतकारितानुमतिभिर्भवतीति तदर्थमाह—

केई सयं वहंती केई अन्नेहिं उ वहावेंती । केई अणुमन्नंती पुढविकायं वहेमाणा ॥ १०१ ॥

स्पष्टा, तद्वधे अन्येषामपि तदाश्रितानां वधो भवतीति दर्शयितुमाह—

जो पुढवि समारंभइ अन्नेऽवि य सो समारभइ काए । अनियाए अ नियाए दिस्से य तहा अदिस्से य ॥१०२॥

यः पृथ्वीकायं 'समारभते' व्यापादयति सः 'अन्यानपि' अप्कायद्वीन्द्रियादीन् 'समारभते' व्यापादयति उदुम्बरवटफलभक्षणप्रवृत्तः तत्फलान्तःप्रविष्टत्रसजन्तुभक्षणवदिति, तथा 'अणियाए य नियाइ'त्ति अकारणेन कारणेन च, यदिवाऽसङ्कल्पेन सङ्कल्पेन च पृथिवीजन्तून् समारभते तदारम्भवांश्च 'दृश्यान्' दर्दुरादीन् 'अदृश्यान्' पनकादीन् 'समारभते' व्यापादयतीत्यर्थः ॥ एतदेव स्पष्टतरमाह—

पुढविं समारभंता हणंति तन्निस्सिए य बहुजीवे । सुहुमे य बायरे य पज्जत्ते या अपज्जत्ते ॥ १०३ ॥

स्पष्टा, अत्र च सूक्ष्माणां वधः परिणामाशुद्धत्वात्तद्विषयनिवृत्त्यभावेन द्रष्टव्य इति ॥ विरतिद्वारमाह—

एयं वियाणिऊणं पुढवीए निक्खिवंति जे दंडं । तिविहेण सव्वकालं मणेण वायाए काएणं ॥ १०४ ॥

'एवमि'त्युक्तप्रकारानुसारेण पृथिवीजीवान् विज्ञाय तद्वधं बन्धं च विज्ञाय पृथिवीतो निक्षिपन्ति ये दण्डं-पृथिवीसमारम्भाद्व्युपरमन्ति, ते ईदृक्षा अनगारा भवन्तीत्युत्तरगाथायां वक्ष्यति, 'त्रिविधेने'ति कृतकारितानुमतिभिः 'सर्वकालं' यावज्जीवमपि मनसा वाचा कायेनेति ॥ अनगारभवने उक्तशेषमाह—

गुत्ता गुत्तीहिं सव्वाहिं समिया समिईहिं संजया । जयमाणगा सुविहिया एरिसया हुंति अणगारा ॥ १०५ ॥

तिसृभिर्मनोवाक्कायगुप्तिभिर्गुप्ताः, तथा पञ्चभिरीर्यासमित्यादिभिस्समिताः, सम्यक्-उत्थानशयनचङ्क्रमणादिक्रियासु यताः संयताः 'यतमानाः' सर्वत्र प्रयत्नकारिणः, शोभनं विहितं-सम्यग्दर्शनाद्यनुष्ठानं येषां ते तथा, ते ईदृक्षा अनगारा भवन्ति, न तु पूर्वोक्तगुणाः पृथिवीकायसमारम्भिणः शाक्यादय इति ॥ गतो नामनिष्पन्नो निक्षेपः, अधुना सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चार्यते, तच्चेदं सूत्रम्—

अट्टे लोए परिजुण्णे दुस्संबोहे अविजाणए अस्सिं लोए पव्वहिए तत्थ तत्थ पुढो पास आतुरा परितावेंति (सू० १४)

अस्य चायमभिसम्बन्धः—इहानन्तरसूत्रे परिज्ञातकर्मा मुनिर्भवतीत्युक्तं, यस्त्वपरिज्ञातकर्मा स भावार्त्तो भवतीति, तथाऽऽदिसूत्रेण सह सम्बन्धः—सुधर्मस्वामी जम्बूनाम्ने इदमाचष्टे—'श्रुतं मया' किं तच्छ्रुतं? पूर्वोद्देशकार्थं प्रदर्श्येदमपीति, 'अट्टे' इत्यादि, परम्परसम्बन्धस्तु 'इह एगेसिं णो सन्ना भवती'त्युक्तं, कथं पुनः संज्ञा न भवतीति, आर्त्तत्वात्, तदाह— 'अट्टे'इत्यादि, आर्त्तो नामादिश्चतुर्धा, नामस्थापने क्षुण्णे, ज्ञशरीरभव्यशरीरव्यतिरिक्तो नोआगमतो द्रव्यार्त्तः शकटादिचक्राणामुद्धिमूले वा यो लोहमयः पट्टो दीयते स द्रव्यार्त्तः, भावार्त्तस्तु द्विधा—आगमतो नोआगमतश्च, तत्रागमतो ज्ञाता—आर्त्तपदार्थज्ञस्तत्र चोपयुक्तो, नोआगमतस्तु औदयिकभाववर्ती रागद्वेषग्रहपरिगृहीतान्तरात्मा प्रियविप्रयोगादिदुःखसङ्कटनिमग्नो भावार्त्त इति व्यपदिश्यते, अथवा शब्दादिविषयेषु विषविपाकसदृशेषु तदाकाङ्क्षित्वाद्धितविचारशून्यमना भावार्त्तः कर्मोपचिनोति, यत उक्तम्—"सोइंदियवसट्टे णं भंते! जीवे किं बंधइ? किं चिणाइ? किं उवचिणाइ?, गोयमा! अट्ठ कम्मपगडीओ सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ पकरेइ, जाव अणादियं च णं अणवदग्गं दीहमद्धं चाउरन्तसंसारकन्तारमणुपरियट्टइ" एवं स्पर्शनादिष्वप्यायोजनीयम्, एवं क्रोधमानमायालोभदर्शनमोहनीयचारित्रमोहनीयादिभिर्भावार्त्ताः संसारिणो जीवा इति, उक्तं च—"रागद्दोसकसाएहिं, इंदिएहि य पञ्चहिं। दुहा वा मोहणिज्जेण, अट्टा संसारिणो जिया ॥ १ ॥" यदिवा ज्ञानावरणीयादिना शुभाशुभेनाष्टप्रकारेण कर्मणाऽऽर्त्तः, कः पुनरेवंविध इत्यत्राह—लोकयतीति लोकः—एकद्वित्रिचतुष्पञ्चेन्द्रियजीवराशिरित्यर्थः, अत्र लोकशब्दस्य नामस्थापनाद्रव्यक्षेत्रकालभवभावपर्यायभेदादष्टधा निक्षेपं प्रदर्श्याप्रशस्तभावोदयवर्त्तिना लोकेनेहाधिकारो वाच्यः, यस्माद्यावानार्त्तः स सर्वोऽपि परिद्यूनो नाम परिपेलवो निस्सारः औपशमिकादिप्रशस्तभावहीनोऽव्यभिचारिमोक्षसाधनहीनो वेति, स च द्विधा—द्रव्यभावभेदात्, तत्र सचित्तद्रव्यपरिद्यूनो जीर्णशरीरः स्थविरकः जीर्णवृक्षो वा, अचित्तद्रव्यपरिद्यूनो जीर्णपटादिः,

१ श्रोत्रेन्द्रियवशार्त्तो भदन्त! जीवः किं बध्नाति? किं चिनोति? किमुपचिनोति?, गौतम! अष्ट कर्मप्रकृतीः शिथिलबन्धनबद्धा गाढबन्धनबद्धाः प्रकरोति, यावदनादिकमनवदग्रमनन्तमं दीर्घाध्वानं चातुरन्तसंसारकान्तारमनुपर्यटति. २ रागद्वेषकषायैरिन्द्रियैश्च पञ्चभिः । द्विधा मोहनीयेन वा आर्त्ताः संसारिणो जीवाः ॥ १ ॥

॥ ३४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावपरिद्यून औदयिकभावोदयात्प्रशस्तज्ञानादिभावविकलः, कथं विकलः?, अनन्तगुणपरिहाण्या, तथाहि-पञ्चचतुस्त्रिद्व्येकेन्द्रियाः क्रमशो ज्ञानविकलाः, तत्र सर्वनिकृष्टज्ञानाः सूक्ष्मनिगोदापर्याप्तकाः प्रथमसमयोत्पन्ना इति, उक्तं च—"सर्वनिकृष्टो जीवस्य दृष्ट उपयोग एष वीरेण । सूक्ष्मनिगोदापर्याप्तकानां स च भवति विज्ञेयः ॥ १ ॥ तस्मात्प्रभृति ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानाम् । लब्धिनिमित्तैः करणैः कायेन्द्रियवाङ्मनोदृग्भिः ॥ २ ॥" स च विषयकषायार्त्तैः प्रशस्तज्ञानद्यूनः किमवस्थो भवतीति दर्शयति—'दुस्संबोध' इति, दुःखेन सम्बोध्यते-धर्मचरणप्रतिपत्तिं कार्यत इति दुस्सम्बोधो, मेतार्यवदिति, यदिवा दुस्सम्बोधो यो बोधयितुमशक्यो ब्रह्मदत्तवत्, किमित्येवम्?, यतः 'अवियाणए'त्ति विशिष्टावबोधरहितः, स चैवंविधः किं विदध्यादित्याह—'अस्मिन्' पृथिवीकायलोके 'प्रव्यथिते' प्रकर्षेण व्यथिते, सर्वस्यारम्भस्य तदाश्रयत्वादिति प्रकर्षार्थः, तत्तत्प्रयोजनतया खननादिभिः पीडिते नानाविधशस्त्राक्रीते वा 'व्यथ भयचलनयो'रितिकृत्वा व्यथितं भीतमिति, 'तत्थ तत्थे'ति तेषु तेषु कृषिखननगृहकरणादिषु 'पृथग्'विभिन्नेषु कार्येषूत्पन्नेषु 'पश्ये'ति विनेयस्य लोकाकार्यप्रवृत्तिः प्रदर्श्यते, सिद्धान्तशैल्या एकादेशेऽपि प्राकृते बह्वादेशो भवतीति, 'आतुरा' विषयकषायादिभिः 'अस्मिन्' पृथिवीकाये विषयभूते सामर्थ्यात् पृथिवीकार्यं 'परितापयन्ति' परि-समन्तात्तापयन्ति-पीडयन्तीत्यर्थः, बहुवचननिर्देशस्तु तदारम्भिणां बहुत्वं गमयति, यदिवा-लोकशब्दः प्रत्येकमभिसम्बध्यते, कश्चिल्लोको विषयकषायादिभिरार्त्तोऽपरस्तु कायपरिजीर्णः कश्चिद्दुःखसम्बोधः तथाऽपरो विशिष्टज्ञानरहितः, एते सर्वेऽप्यातुरा विषयजीर्णदेहादिभिः सुखा- ॥ ३५ ॥

१ कश्चित्तु प्र० अपरो दुःसम्बोधः नास्तीदं.

मयेऽस्मिन्-पृथिवीकायलोके विषयभूते पृथिवीकायं नानाविधैरुपायैः 'परितापयन्ति' परि-समन्तात्तापयन्ति-पीडयन्तीति सूत्रार्थः ॥ १४ ॥ ननु चैकदेवतावविशेषावस्थिता पृथिवीति शक्यं प्रतिपत्तुं न पुनरसंख्येयजीवसङ्घातरूपेत्येतत्परिहर्त्तुकाम आह—

संति पाणा पुढो सिया लज्जमाणा पुढो पास अणगारा मोत्ति एगे पवयमाणा जमिणं विरूवरूवेहिं सत्थेहिं पुढविकम्मसमारंभेणं पुढविसत्थं समारंभेमाणा अणेगरूवे पाणे विहिंसइ (सू० १५)

'सन्ति' विद्यन्ते 'प्राणाः' सत्त्वाः 'पृथग्' पृथग्भावेन, अङ्गुलासंख्येयभागस्वदेहावगाहनया पृथिव्याश्रिताः सिता वा-सम्बद्धा इत्यर्थः, अनेनैतत्कथयति-नैकदेवता पृथिवी, अपि तु प्रत्येकशरीरपृथिवीकायात्मिकेति, तदेवं सचेतनत्वमनेकजीवाधिष्ठितत्वं च पृथिव्या आविष्कृतं भवतीति । एतच्च ज्ञात्वा तदारम्भनिवृत्तान् दर्शयितुमाह—'लज्जमाणा पुढो पास'त्ति, लज्जा द्विविधा-लौकिकी लोकोत्तरा च, तत्र लौकिकी स्नुषासुभटादेः श्वशुरसङ्गामविषया, लोकोत्तरा सप्तदशप्रकारः संयमः, तदुक्तम्—"लज्जा दया संजम बंभचेर"मित्यादि, लज्जमानाः-संयमानुष्ठानपराः, यदिवा

१ लज्जा दया संयमो ब्रह्मचर्यम्.

-पृथिवीकायसमारम्भरूपादसंयमानुष्ठानाल्लज्जमानाः 'पृथगि'ति प्रत्यक्षज्ञानिनः परोक्षज्ञानिनश्च, अतस्तान् लज्जमानान् पश्येत्यनेन शिष्यस्य कुशलानुष्ठानप्रवृत्तिविषयः प्रदर्शितो भवतीति । कुतीर्थिकास्त्वन्यथावादिनोऽन्यथाकारिण इति दर्शयितुमाह-'अणगारा' इत्यादि,नविद्यतेऽगारं-गृहमेषामित्यनगारा-यतयः स्मो वयमित्येवं प्रकर्षेण वदन्तः प्रवदन्त इति, 'एके' शाक्यादयो ग्राह्याः, ते च वयमेव जन्तुरक्षणपराः क्षपितकषायाज्ञानतिमिरा 'इति' एवमादि प्रतिज्ञामात्रमनर्थकमारटन्ति, यथा कश्चिदत्यन्तशुचिर्वोद्रश्वतुःषष्टिमृत्तिकाक्षायी गोशवस्थाशुचितया परित्यागं विधाय पुनः कर्मकरवाक्याच्चर्मास्थिपिशितस्नाय्वादेर्यथास्वमुपयोगार्थं सङ्ग्रहं कारितवान्, तथा च तेन शुच्यभिमानमुद्वहताऽपि किं तस्य परित्यक्तम्!, एवमेतेऽपि शाक्यादयोऽनगारवादमुद्वहन्ति,न चानगारगुणेषु मनागपि प्रवर्त्तन्ते, न च गृहस्थचर्यां मनागप्यतिलङ्घयन्तीति दर्शयति-'यद्' यस्माद् 'इम'मिति सर्वजनप्रत्यक्षं पृथिवीकायं 'विरूपरूपैः' नानाप्रकारैः 'शस्त्रैः' हलकुद्दालखनित्रादिभिः पृथिव्याश्रयं कर्म-क्रियां समारभमाणा विहिंसन्ति, तथाऽनेन च पृथिवीकर्मसमारम्भेण पृथिवीशस्त्रं 'समारभमाणो' व्यापारयन् पृथिवीकायं नानाविधैः शस्त्रैर्व्यापादयन् 'अनेकरूपान्' तदाश्रितानुदकवनस्पत्यादीन् विविधं हिनस्ति, नानाविधैरुपायैर्व्यापादयतीत्यर्थः, एवं शाक्यादीनां पार्थिवजन्तुवैरिणामयतित्वं प्रतिपाद्य सम्प्रतं स्वलाभिलाषितया कृतकारितानुमतिभिर्मनोवाक्कायलक्षणां प्रवृत्तिं दर्शयितुमाह—

तत्थ खलु भगवया परिण्णा पवेइया, इमस्स चेव जीवियस्स परिवंदणमाणणपूय- ॥ ३६ ॥

१ येषां ते प्र० २ सम्प्रति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णाए जाइमरणमोयणाए दुक्खपडिघायहेउं स सयमेव पुढविसत्थं समारंभइ अण्णेहिं वा पुढविसत्थं समारंभावेइ अण्णे वा पुढविसत्थं समारंभंते समणुजाणइ (सू० १५)

तत्र पृथिवीकायसमारम्भे खलुशब्दो वाक्यालङ्कारे 'भगवता' श्रीवर्द्धमानस्वामिना परिज्ञानं परिज्ञा सा प्रवेदितेति, इदमुक्तं भवति–भगवतेदमाख्यातं–यथैभिर्वक्ष्यमाणैः कारणैः कृतकारितानुमतिभिः सुखैषिणः पृथिवीकायं समारभन्ते, तानि चामूनि–अस्यैव जीवितस्य परिपेलवस्य परिवन्दनमाननपूजनार्थं, तथा जातिमरणमोचनार्थं दुःखप्रतिघातहेतुं च स सुखलिप्सुर्दुःखद्विट् स्वयमात्मनैव पृथिवीशस्त्रं समारभते, तथाऽन्यैश्च पृथिवीशस्त्रं समारम्भयति, पृथिवीशस्त्रं समारभमाणानन्यांश्च स एव समनुजानीते, एवमतीतानागताभ्यां मनोवाक्कायकर्मभिरायोजनीयम्। तदेवं प्रवृत्तमतेर्यद्भवति तद्दर्शयितुमाह—

तं से अहिआए तं से अबोहीए से तं संबुज्झमाणे आयाणीयं समुट्ठाय सोच्चा खलु भगवओ अणगाराणं इहमेगेसिं णातं भवति-एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णरए इच्चत्थं गड्ढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं पुढविकम्मसमारंभेण पुढविसत्थं समारंभमाणे अण्णे अणेगरूवे पाणे विहिंसइ, से बेमि अप्पेगे अंधमब्भे अप्पेगे अंधमच्छे अप्पेगे पायमब्भे अप्पेगे पायमच्छे अप्पेगे गुप्फमब्भे अप्पेगे गुप्फमच्छे अप्पेगे जंघमब्भे २ अप्पेगे जाणुमब्भे २ अप्पेगे ऊरुमब्भे २ अप्पेगे कडिमब्भे २ अप्पेगे णाभिमब्भे २ अप्पेगे उदरमब्भे २ अप्पेगे पासमब्भे २ अप्पेगे पिट्ठिमब्भे २ अप्पेगे उरमब्भे २ अप्पेगे हिययमब्भे २ अप्पेगे थणमब्भे २ अप्पेगे खंधमब्भे २ अप्पेगे बाहुमब्भे २ अप्पेगे हत्थमब्भे २ अप्पेगे अंगुलिमब्भे २ अप्पेगे णहमब्भे २ अप्पेगे गीवमब्भे २ अप्पेगे हणुमब्भे २ अप्पेगे होट्ठमब्भे २ अप्पेगे दंतमब्भे २ अप्पेगे जिब्भमब्भे २ अप्पेगे तालुमब्भे २ अप्पेगे गलमब्भे २ अप्पेगे गंडमब्भे २ अप्पेगे कण्णमब्भे २ अप्पेगे णासमब्भे २ अप्पेगे अच्छिमब्भे २ अप्पेगे भमुहमब्भे २ अप्पेगे णिडालमब्भे २ अप्पेगे सीसमब्भे २ अप्पेगे संपसारए अप्पेगे उद्दवए, इत्थं सत्थं समारंभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति (सू० १६)

'तं से अहियाए तं से अबोहीए' तत् पृथिवीकायसमारम्भणं 'से' तस्य कृतकारितानुमतिभिः पृथ्वीशस्त्रं समारभमाणस्यागामिनि काले अहिताय भवति, तदेव चाबोधिलाभायेति, न हि प्राणिगणोपमर्दनप्रवृत्तानामणीयसाऽपि हितेनाऽऽत्मना योगो भवतीत्युक्तं भवति, यः पुनर्भगवतः सकाशात्तच्छिष्यानगारेभ्यो वा विज्ञाय पृथ्वीसमारम्भं पापात्मकं भावयति स एवं मन्यत इत्याह–'से त'मित्यादि, 'सः' ज्ञातपृथिवीजीवत्वेन विदितपरमार्थः 'तं' पृथ्वीशस्त्रसमारम्भमहितं सम्यगवबुध्यमानः 'आदानीयं' ग्राह्यं सम्यग्दर्शनादि सम्यगुत्थाय–अभ्युपगम्य, केन प्रत्ययेनेति दर्शयति–'श्रुत्वा' अवगम्य साक्षाद्भगवतोऽनगाराणां वा समीपे, ततः 'इह' मनुष्यजन्मनि 'एकेषां' प्रतिबुद्धतत्त्वानां साधूनां ज्ञातं भवतीति, यत् ज्ञातं भवति तद्दर्शयितुमाह—'एसे'त्यादि, एष पृथ्वीशस्त्रसमारम्भः खलुरवधारणे कारणे कार्योपचारं कृत्वा 'नड्वलोदकं पादरोग' इति न्यायेनैष एव ग्रन्थः–अष्टप्रकारकर्मबन्धः, तथैष एव पृथ्वीसमारम्भो मोहहेतुत्वान्मोहः–कर्मबन्धविशेषो दर्शनचारित्रभेदोऽष्टाविंशतिविधः, तथैष एव मरणहेतुत्वान्मारः–आयुष्ककर्मक्षयलक्षणः, तथैष एव नरकहेतुत्वान्नरकः–सीमन्तकादिर्भूभागः, अनेन चासातावेदनीयमुपात्तं भवति, कथं पुनरेकप्राणिव्यापादनप्रवृत्तावष्टविधकर्मबन्धं करोतीति, उच्यते, मार्यमाणजन्तुज्ञानावरोधित्वात् ज्ञानावरणीयं बध्नात्येवमन्यत्राप्यायोजनीयमिति, अन्यदपि तेषां ज्ञातं भवतीति दर्शयितुमाह—'इच्चत्थमित्यादि, 'इत्येवमर्थम्' आहारभूषणोपकरणार्थं तथा परिवन्दनमाननपूजनार्थं दुःखप्रतिघातहेतुं च 'गृद्धो' मूर्छितो 'लोकः' प्राणिगणः, एवंविधेऽप्यतिदुरितनिचयविपाकफले पृथ्वीकायसमारम्भे अज्ञानवशान्मूर्च्छितस्त्वेतद्विधत्त इति दर्शयति–'यद्' यस्माद् 'इमं' पृथ्वीकायं विरूपरूपैः शस्त्रैः पृथ्वी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म समारभमाणो हिनस्ति, पृथिवीकायसमारम्भेण च पृथिव्येव शस्त्रं स्वकायादेः पृथिव्या वा शस्त्रं हलकुद्दालादि तत्समारभते, पृथिवीशस्त्रं समारभमाणश्चान्याननेकरूपान् 'प्राणिनो' द्वीन्द्रियादीन्विविधं हिनस्तीति । स्यादारेका, ये हि न पश्यन्ति न शृण्वन्ति न जिघ्रन्ति न गच्छन्ति कथं पुनस्ते वेदनामनुभवन्तीति ग्रहीतव्यम् ?, अमुष्यार्थस्य प्रसिद्धये दृष्टान्तमाह—'से बेमी' त्यादि, सोऽहं पृष्टो भवता पृथिवीकायवेदनां ब्रवीमि, अथवा 'से' इति तच्छब्दार्थे वर्त्तते, यत्त्वया पृष्टस्तदहं ब्रवीमि, अपिशब्दो यथानामशब्दार्थे, यथा नाम कश्चिज्जात्यन्धो बधिरो मूकः कुष्ठी पङ्गुः अनभिनिर्वृत्तपाण्याद्यवयवविभागो मृगापुत्रवत् पूर्वकृताशुभकर्मोदयाद्धिताहितप्राप्तिपरिहारविमुखोऽतिकरुणां दशां प्राप्तः, तमेवंविधमन्धादिगुणोपेतं कश्चित्कुन्ताग्रेण 'अब्भे' इति आभिन्द्यात् तथाऽपरः कश्चिदन्धमाच्छिन्द्यात्, स च भिद्यमानाद्यवस्थायां न पश्यति न शृणोति मूकत्वान्नोच्चैः रारटीति, किमेतावता तस्य वेदनाऽभावो जीवाभावो वा शक्यो विज्ञातुम् ?, एवं पृथिवीजीवा अप्यव्यक्तचेतना जात्यन्धबधिरमूकपङ्ग्वादिगुणोपेतपुरुषवदिति, यथा वा पञ्चेन्द्रियाणां परिसष्टचेतनानां 'अप्पेगे पायमब्भे' इति यथा नाम कश्चित्पादमाभिन्द्यादाच्छिन्द्याद्वेत्येवं गुल्फादिष्वप्यायोजनीयमिति दर्शयति, एवं जङ्घाजानूरुकटीनाभ्युदरपार्श्वपृष्ठउरोहृदयस्तनस्कन्धबाहुहस्ताङ्गुलिनखग्रीवाहनुकौष्ठदन्तजिह्वातालुगलगण्डकर्णनासिकाक्षिभ्रूललाटशिरःप्रभृतिष्ववयवेषु भिद्यमानेषु छिद्यमानेषु वा वेदनोत्पत्तिर्लक्ष्यते, एवमेषामुत्कटमोहाज्ञानभाजां स्त्यानर्द्ध्याद्युदयादव्यक्तचेतनानामव्यक्तैव वेदना भवतीति ग्राह्यम् । अत्रैव दृष्टान्तान्तरं दर्शयितुमाह—'अप्पेगे ॥ ३८ ॥

१ कार्यं प्र.

संपमारए अप्पेगे उद्दवए' यथा नाम कश्चित् 'सम्' एकीभावेन प्रकर्षेण प्राणानां मारणम्—अव्यक्तत्वापादनं कस्यचित् कुर्यात्, मूर्च्छामापादयेदित्यर्थः, तथाऽवस्थं च यथा नाम कश्चिदपद्रापयेत् प्राणेभ्यो व्यपरोपयेत् न चासौ तां वेदनां स्फुटमनुभवति, अस्ति चाव्यक्ता तस्यासौ वेदनेति, एवं पृथिवीजीवानामपि द्रष्टव्यमिति । पृथिवीकायिकानां जीवत्वं प्रसाध्य तथा नानाविधशस्त्रसंपाते वेदनां चाविर्भाव्य अधुना तद्वधे बन्धं दर्शयितुमाह—

एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति, तं परिण्णाय मेहावी नेव सयं पुढविसत्थं समारंभेज्जा णेवण्णेहिं पुढविसत्थं समारंभावेज्जा णेवण्णे पुढविसत्थं समारंभंते समणुजाणेज्जा, जस्सेते पुढविकम्मसमारंभा परिण्णाता भवंति से हु मुणी परिण्णातकम्मेत्ति बेमि (सू० १७) इति द्वितीय उद्देशकः ॥

'अत्र' पृथिवीकाये 'शस्त्रं' द्रव्यभावभिन्नं, तत्र द्रव्यशस्त्रं स्वकायपरकायोभयरूपं, भावशस्त्रं त्वसंयमो दुष्प्रणिहितमनोवाक्कायलक्षणः, एतद्विविधमपि शस्त्रं समारभमाणस्येति 'एते' खननकृष्याद्यात्मकाः समारम्भाः बन्धहेतुत्वेन 'अपरिज्ञाता' अविदिता भवन्ति[1], एतद्विपरीतस्य परिज्ञाता भवन्तीति दर्शयितुमाह—'एत्थे' त्यादि, 'अत्र' पृथिवीकाये द्विविधमपि शस्त्रम् 'असमारभमाणस्य' अव्यापारयत इति, 'एते' प्रागुक्ताः कर्मसमारम्भाः 'परिज्ञाता' विदिता भ-

१ चेतनेति. २ प्रतिपादयन्. ३ °तीति.

वन्ति, अनेन च विरत्यधिकारः प्रतिपादितो भवतीति, तामेव विरतिं स्वनामग्राहमाह—'त'मित्यादि, तं पृथिवीकायसमारम्भे बन्धं परिज्ञाय असमारम्भे वाऽबन्धमिति 'मेधावी' कुशलः एतत् कुर्यादिति दर्शयति-नैव पृथिवीशस्त्रं द्रव्यभावभिन्नं समारभेत, नापि तद्विषयोऽन्यैः समारम्भः कारयितव्यः, न चान्यान् पृथिवीशस्त्रं समारभमाणान् समनुजानीयात् इति, एवं मनोवाक्कायकर्म्मभिरतीतानागतकालयोरप्यायोजनीयमिति, ततश्चैवं कृतनिवृत्तिरसौ मुनिरिति व्यपदिश्यते, न शेष इति दर्शयन्नुपसञ्जिहीर्षुराह—'यस्य' विदितपृथिवीजीववेदनास्वरूपस्य, 'एते' पृथिवीविषयाः कर्म्मसमारम्भाः खननकृष्याद्यात्मकाः कर्मबन्धहेतुत्वेन परिज्ञाता भवन्ति ज्ञपरिज्ञया तथा प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति, हुरवधारणे, स एव मुनिर्द्विविधयाऽपि परिज्ञया परिज्ञातं कर्म—सावद्यानुष्ठानमष्टप्रकारं वा कर्म येन स परिज्ञातकर्मा, नापरः शाक्यादिः, ब्रवीमि पूर्ववदिति शस्त्रपरिज्ञायां द्वितीय उद्देशकः समाप्तः ॥

गतः पृथिव्युद्देशकः, साम्प्रतमप्कायोद्देशकः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके पृथिवीकायजीवाः प्रतिपादितास्तद्वधे बन्धो विरतिश्च, साम्प्रतं क्रमायातस्याप्कायस्य जीवत्वं तद्वधे बन्धो विरतिश्च प्रतिपाद्यते इति, अनेन सम्बन्धेनायातस्यास्योद्देशकस्य चत्वार्यनुयोगद्वाराणि वाच्यानि, तत्र नामनिष्पन्ने निक्षेपे अप्कायोद्देशकः, तत्र पृथिवीकायजीवस्वरूपसमधिगतये यानि नव निक्षेपादीनि द्वाराण्युक्तानि, अप्कायेऽपि तान्येव समानतयाऽतिदेष्टुकामः कानिचिद्विशेषाभिधित्सयोद्घर्तुकामश्च निर्युक्तिकारो गाथामाह— ॥ ३९ ॥

आउस्सवि दाराइं ताइं जाइं हवंति पुढवीए । नाणत्ती उ विहाणे परिमाणुवभोगसत्थे य ॥ १०६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्कायस्यापि तान्येव द्वाराणि भवन्ति यानि पृथिव्याः प्रतिपादितानीति, 'नानात्वं' भेदरूपं विधानपरिमाणोपभोगशस्त्रविषयं द्रष्टव्यं, चशब्दाल्लक्षणविषयं च, तुशब्दोऽवधारणार्थः, एतद्गतमेव नानात्वं नान्यगतमिति ॥ तत्र विधानं –प्ररूपणा, तद्गतं नानात्वं प्रदर्शयितुमाह—

दुविहा उ आउजीवा सुहुमा तह बायरा य लोगंमि । सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥ १०७ ॥

स्पष्टा ॥ तत्र पञ्च बादरविधानानि दर्शयितुमाह—

सुद्धोदए य उस्सा हिमे य महिया य हरतणू चेव । बायर आउविहाणा पंचविहा वण्णिया एए ॥ १०८ ॥

'शुद्धोदकं' तडागसमुद्रनदीह्रदावटादिगतमवश्यायादिरहितमिति, 'अवश्यायो' रजन्यां यस्नेहः पतति, हिमं तु शिशिरसमये शीतपुद्गलसम्पर्काज्जलमेव कठिनीभूतमिति, गर्भमासादिषु सायं प्रातर्वा धूमिकापातो महिकेत्युच्यते, वर्षाशरत्कालयोर्हरिताङ्कुरमस्तकस्थितो जलबिन्दुर्भूमिस्नेहसम्पर्कोद्भूतो हरतनुशब्देनाभिधीयते, एवमेते पञ्च बादराप्कायविधयो व्यावर्णिताः । ननु च प्रज्ञापनायां बादराप्कायभेदा बहवः परिपठिताः, तद्यथा–करकशीतोष्णक्षारक्षत्रकट्वम्ललवणवरुणकालोदपुष्करक्षीरघृतेक्षुरसादयः, कथं पुनस्तेषामत्र सङ्ग्रहः ?, उच्यते, करकस्तावत्कठिनत्वाद्धिमान्तःपाती, शेषास्तु स्पर्शरसस्थानवर्णमात्रभिन्नत्वान्न शुद्धोदकमतिवर्त्तन्ते, यद्येवं प्रज्ञापनायां किमर्थोऽपरभेदानां पाठः ?, उच्यते, स्त्रीबालमन्दबुद्ध्यादिप्रतिपत्त्यर्थमिति, इहापि कस्मान्न तदर्थं पाठः ?, उच्यते, प्रज्ञापनाध्ययनमुपाङ्गत्वादार्ष, तत्र युक्तः सकलभेदोपन्यासः रूयाद्यनुग्रहाय, निर्युक्तयस्तु सूत्रार्थं पिण्डीकुर्वन्त्यः प्रवर्तन्त इत्यदोषः । त एते बादराप्कायाः

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ४० ॥

समासतो द्वेधाः– पर्याप्तका अपर्याप्तकाश्च, तत्रापर्याप्तका वर्णादीनसम्प्राप्ताः, पर्याप्तकास्तु वर्णगन्धरसस्पर्शादेशैः सहस्राग्रशो भिद्यन्ते, ततश्च सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भवन्ति भेदानामित्यवगन्तव्यं, संवृतयोनयश्चैते, सा च योनिः सचित्ताचित्तमिश्रभेदात् त्रिधा, पुनश्च शीतोष्णोभयभेदात्त्रिविधैव, एवं गण्यमानाः योनीनां सप्त लक्षा भवन्तीति ॥ प्ररूपणानन्तरं परिमाणद्वारमाह—

अध्ययनं १ उद्देशकः ३

जे बायरपज्जत्ता पयरस्स असंखभागमित्ता ते । सेसा तिन्निवि रासी वीसुं लोगा असंखिज्जा ॥ १०९ ॥

ये बादरापकायपर्याप्तकास्ते संवर्त्तितलोकप्रतरासङ्ख्येयभागप्रदेशराशिपरिमाणाः, शेषास्तु त्रयोऽपि राशयो 'विष्वक्' पृथगसङ्ख्येयलोकाकाशप्रदेशराशिपरिमाणा इति, विशेषश्चायम्–बादरपृथिवीकायपर्याप्तकेभ्यो बादराप्कायपर्याप्तका असङ्ख्येयगुणाः बादरपृथ्वीकायापर्याप्तकेभ्यो बादराप्कायिकापर्याप्तका असंख्येयगुणाः सूक्ष्मपृथिवीकायापर्याप्तकेभ्यः सूक्ष्माप्कायापर्याप्तका विशेषाधिकाः सूक्ष्मपृथ्वीकायपर्याप्तकेभ्यः सूक्ष्माप्कायपर्याप्ता विशेषाधिकाः ॥ साम्प्रतं परिमाणद्वारानन्तरं चशब्दसूचितं लक्षणद्वारमाह—

जह हत्थिस्स सरीरं कललावत्थस्स अहुणोववन्नस्स । होइ उदगंडगस्स य एसुवमा सव्वजीवाणं ॥ ११० ॥

अथवा पर आक्षिपति-नाप्कायो जीवः, तल्लक्षणायोगात् प्रश्रवणादिवदित्यस्य हेतोरसिद्धतोद्भावनार्थं दृष्टान्तद्वारेण लक्षणमाह–जहेत्यादि, यथा हस्तिनः शरीरं कललावस्थायामधुनोत्पन्नस्य द्रवं चेतनं च दृष्टम्, एवमप्कायोऽपीति, यथा वा उदकप्रधानमण्डकमुदकाण्डकमधुनोत्पन्नमित्यर्थः, तन्मध्यव्यवस्थितं रसमात्रमसञ्जातावयवमनभिव्यक्तचक्ष्वादिप्रावेभागं चेतनावद् दृष्टम्, एषा एवोपमा अप्कायजीवानामपीति, हस्तिशरीरकललग्रहणं च महाकायत्वात्सद्धु भवतीत्यतः सुखेन प्रतिपद्यते, अधुनोपपन्नग्रहणं सप्ताहपरिग्रहार्थं, यतः सप्ताहमेव कललं भवति, परतस्त्वर्बुदादि, अण्डकेऽप्युदकग्रहणमेवमर्थमेव, प्रयोगश्चायम्–सचेतना आपः, शस्त्रानुपहतत्वे सति द्रवत्वात्, हस्तिशरीरोपादानभूतकललवत्, विशेषणोपादानात्प्रश्रवणादिव्युदासः, तथा सात्मकं तोयम्, अनुपहतद्रवत्वाद्, अण्डकमध्यस्थितकललवदिति, तथा आपो जीवशरीराणि, छेद्यत्वाद्भेद्यत्वाद्युत्क्षेप्यत्वाद्भोज्यत्वाद्भोग्यत्वात् प्रेयत्वाद्रसनीयत्वात् स्पर्शनीयत्वात् दृश्यत्वाद् द्रव्यत्वाद् एवं सर्वेऽपि शरीरधर्मा हेतुत्वेनोपन्यसनीयाः, गगनवर्जभूतधर्माश्च रूपवत्त्वाकारवत्त्वादयः, सर्वत्र चायं दृष्टान्तः–सास्नाविषाणादिसङ्गतवदिति, ननु च रूपवत्त्वाकारवत्त्वादयो भूतधर्माः परमाणुष्वपि दृष्टा इत्यनैकान्तिकता, नैतदेवं, यदत्र छेद्यत्वादिहेतुत्वेनोपन्यस्तं तत्सर्वमिन्द्रियव्यवहारानुपाति, न च तथा परमाणवः, अतः प्रकरणादतीन्द्रियपरमाणुव्यवच्छेदः, यदिवा नैत्रासौ विपक्षः, सर्वस्य पुद्गलद्रव्यस्य द्रव्यशरीराभ्युपगमात्, जीवसहितासहितत्वं तु विशेषः, उक्तं च—"तणवोऽण्णभातिविगार मुत्तजाइत्तओऽणिलंता उ । सत्थासत्थहयाओ निज्जीवसजीवरूवाओ ॥ १ ॥" एवं शरीरत्वे सिद्धे सति प्रमाणं–सचेतना हिमादयः, क्वचित् अप्कायत्वाद्, इतरोदकवत् इति, तथा सचेतना आपः, क्वचित् खातभूमिस्वाभाविकसम्भवत्वाद्, दर्दुरवत्, अथवा सचेतना अन्तरिक्षोद्भवा

॥ ४० ॥

१ तनवोऽण्वभ्रादिविकारा मूर्त्तजातित्वतः अनिलान्तास्तु । शस्त्राशस्त्रहता निर्जीवसजीवरूपाः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आपः, स्वाभाविकव्योमसम्भूतसम्पातित्वात्, मत्स्यवत्, अत एते एवंविधलक्षणभाक्त्वाज्जीवा भवन्त्यप्कायाः ॥ साम्प्रतमुपभोगद्वारमाह—

ण्हाणे पिअणे तह धोअणे य भत्तकरणे अ सेए अ । आउस्स उ परिभोगो गमणागमणे य जीवाणं ॥ १११ ॥

स्नानपानधावनभक्तकरणसेकयानपात्रोडुपगमनागमनादिरुपभोगः ॥ ततश्च तत्परिभोगाभिलाषिणो जीवा एतानि कारणान्युद्दिश्याप्कायवधे प्रवर्त्तन्त इति प्रदर्शयितुमाह—

एएहिं कारणेहिं हिंसंती आउकाइए जीवे । सायं गवेसमाणा परस्स दुक्खं उदीरंति ॥ ११२ ॥

'एभिः' स्नानावगाहनादिकैः कारणैरुपस्थितैः विषयविषमोहितात्मानो निष्करुणा अप्कायिकान् जीवान् 'हिंसन्ति' व्यापादयन्ति, किमर्थमित्याह—'सातं' सुखं तदात्मनः 'अन्वेषयन्तः' प्रार्थयन्तः हिताहितविचारशून्यमनसः कतिपयदिवसस्थायिरम्ययौवनदर्पाध्मातचेतसः सन्तः सद्विवेकरहिताः तथा विवेकिजनसंसर्गविकलाः 'परस्य' अवादेर्जन्तुगणस्य 'दुःखम्' असातलक्षणं तद् 'उदीरयन्ति' असातवेदनीयमुत्पादयन्तीत्यर्थः, उक्तं च—"एकं हि चक्षुरमलं सहजो विवेकस्तद्वद्भिरेव सह संवसतिर्द्वितीयम् । एतद्द्वयं भुवि न यस्य स तत्त्वतोऽन्धस्तस्यापमार्गचलने खलु कोऽपराधः ? ॥ १ ॥ इदानीं शस्त्रद्वारमुच्यते—

उस्सिंचणगालणधोवणे य उवगरणमत्तभंडे य । बायरआउक्काए एयं तु समासओ सत्थं ॥ ११३ ॥

शस्त्रं द्रव्यभावभेदात् द्विधा—द्रव्यशस्त्रमपि समासविभागभेदात् द्विधैव, तत्र समासतो द्रव्यशस्त्रमिदम्-ऊर्द्धं सेचनमुत्सेचनं-कूपादेः कोशादिनोत्क्षेपणमित्यर्थः, 'गालनं' घनमसृणवस्त्राद्यन्तेन 'धावनं' वस्त्राद्युपकरणचर्मकोशकटाहादिभण्डकविषयम्, एवमादिकं बादराप्काये 'एतत्' पूर्वोक्तं 'समासतः' सामान्येन शस्त्रं, तुशब्दो विभागापेक्षया विशेषणार्थः ॥ विभागतस्त्विदम्—

किंची सकाय सत्थं किंची परकाय तदुभयं किंचि । एयं तु दव्वसत्थं भावे य असंजमो सत्थं ॥ ११४ ॥

किञ्चित् स्वकायशस्त्रं नादेयं तडागस्य, किञ्चित्परकायशस्त्रं मृत्तिकास्नेहक्षारादि, किञ्चिच्चोभयं उदकमिश्रा मृत्तिकोदकस्येति, भावशस्त्रमसंयमः प्रमत्तस्य दुष्प्रणिहितमनोवाक्कायलक्षण इति ॥ शेषद्वाराणि पृथिवीकायवन्नेतव्यानि इति दर्शयितुमाह—

सेसाइं दाराइं ताइं जाइं हवंति पुढवीए । एवं आउद्देसे निज्जुत्ती किंचिया एसा (होइ) ॥ ११५ ॥

'शेषाणी' त्युक्तशेषाणि निक्षेपवेदनावधनिवृत्तिरूपाणि, तान्येवात्रापि द्रष्टव्यानि यानि पृथिव्यां भवन्तीति, 'एवम्' उक्तप्रकारेणाप्कायोद्देशके 'निर्युक्तिः' निश्चयेनार्थघटना 'कीर्त्तिता' प्रदर्शिता भवतीति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से बेमि जहा अणगारे उज्जुकडे नियायपडिवण्णे[1] अमायं कुव्वमाणे वियाहिए (सू० १८)

१ निकायं पडिवन्ने इति पा.

'से बेमी'त्यादि अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके परिसमाप्तिसूत्रे 'पृथिवीकायसमारम्भव्यावृत्तो मुनि'रित्युक्तं, न चैतावता सम्पूर्णो मुनिर्भवति, यथा च भवति तथा दर्शयति, तथाऽऽदिसूत्रेणायं सम्बन्धः—सुधर्मस्वामी इदमाह—श्रुतं मया भगवदन्तिके यत् प्राक् प्रतिपादितमन्यच्चेदमित्येवं परम्परसूत्रसम्बन्धोऽपि प्राग्वद्वाच्यः । सेशब्दस्तच्छब्दार्थो, स यथा पृथिवीकायसमारम्भव्यावृत्त्युत्तरकालं सम्पूर्णानगारव्यपदेशभाग् भवति तदहं ब्रवीमि, अपिः समुच्चये, स यथा वाऽनगारो न भवति तथा च ब्रवीमि 'अणगारा मो त्ति एगे पयवमाणे'त्यादिनेति, न विद्यते अगारं—गृहमस्येत्यनगारः, इह च यत्यादिशब्दव्युदासेनानगारशब्दोपादानेनैतदाचष्टे—गृहपरित्यागः प्रधानं मुनित्वकारणं, तदाश्रयत्वात्सावद्यानुष्ठानस्य, निरवद्यानुष्ठायी च मुनिरिति दर्शयति—'उज्जुकडे'त्ति ऋजुः-अकुटिलः संयमो दुष्प्रणिहितमनोवाक्कायनिरोधः सर्वसत्त्वसंरक्षणप्रवृत्तत्वाद्यैकरूपः, सर्वत्राकुटिलगतिरितियावत्, यदिवा मोक्षस्थानगमनर्जुश्रेणिप्रतिपत्तिः सर्वसंवरसंयमात्, कारणे कार्योपचारं कृत्वा संयम एव सप्तदशप्रकार ऋजुः तं करोतीति ऋजुकृत्, ऋजुकारीत्यर्थः । अनेन चेदमुक्तं भवति—अशेषसंयमानुष्ठायी सम्पूर्णोऽनगारः, एवंविधश्चेदृग् भवतीति दर्शयति—'नियागपडिवन्ने'त्ति, यजनं यागः नियतो निश्चितो वा यागो नियागो-मोक्षमार्गः, सङ्गतार्थत्वाद्धातोः सम्यग्ज्ञानदर्शनचारित्रात्मतया गतं सङ्गतमिति, तं नियागं—सम्यग्दर्शनज्ञानचारित्रात्मकं मोक्षमार्गं प्रतिपन्नो नियाग प्रतिपन्नः, पाठान्तरं वा 'निकायप्रतिपन्नो' निर्गतः कायः—औदारिकादिर्यस्माद्यस्मिन्वा सति स निकायो—मोक्षस्तं प्रतिपन्नो निकायप्रतिपन्नः, तत्कारणस्य सम्यग्दर्शनादेः स्वशक्त्याऽनुष्ठानात्, स्वशक्त्याऽनुष्ठानं चामायाविनो भवतीति दर्शयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—'अमायं कुव्वमाणे'त्ति माया-सर्वत्र स्ववीर्यनिगूहनं, न माया अमाया तां कुर्वाणः, अनिगूहितबलवीर्यः संयमानुष्ठाने पराक्रममाणोऽनगारो व्याख्यात इति, अनेन च तज्जातीयोपादानादशेषकषायापगमोऽपि द्रष्टव्य इति, उक्तं च —"सोही य उज्जुयभूयस्स, धम्मो सुद्धस्स चिट्ठइ"त्ति ॥ तदेवमसावुद्धृतसकलमायाबलीवितानः किं कुर्यादित्याह—

जाए सद्धाए निक्खंतो तमेव अणुपालिज्जा, वियहित्ता विसोत्तियं (सू० १९)

'यया श्रद्धया' प्रवर्द्धमानसंयमस्थानकण्डकरूपया 'निष्क्रान्तः' प्रव्रज्यां गृहीतवान् 'तामेव' श्रद्धामश्रान्तो यावज्जीवम् अनुपालयेद्' रक्षेदित्यर्थः, प्रव्रज्याकाले च प्रायशः प्रवृद्धपरिणाम एव प्रव्रजति, पश्चात्तु संयमश्रेणीं प्रतिपन्नो वर्द्धमानपरिणामो वा हीयमानपरिणामो वा अवस्थितपरिणामो वेति, तत्र वृद्धिकालो हानिकालो वा समयाद्युत्कर्षेणान्तर्मौहूर्त्तिकः, नातः परं सङ्क्लेशविशुद्ध्यद्धे भवतः, उक्तं च—"नान्तर्मुहूर्त्तकालमतिवृत्य शक्यं हि जगति सङ्क्लेष्टुम् । नापि विशोद्धुं शक्यं प्रत्यक्षो ह्यात्मनः सोऽर्थः ॥ १ ॥ उपयोगद्वयपरिवृत्तिः सा निर्हेतुका स्वभावत्वात् । आत्मप्रत्यक्षो हि स्वभावो व्यर्थोऽत्र हेतूक्तिः ॥ २ ॥" अवस्थितकालश्च द्वयोर्वृद्धिहानिलक्षणयोर्यवमध्यवज्रमध्ययोरष्टौ समयाः, तत ऊर्द्ध्वमवश्यं पातात्, अयं च वृद्धिहान्यवस्थितरूपः परिणामः केवलिनां निश्चयेन गम्यो न छद्मस्थानामिति । यद्यपि च प्रव्रज्याभिगमोत्तरकालं श्रुतसागरमवगाहमानः संवेगवैराग्यभावनाभावितान्तरात्मा कश्चित्प्रवर्द्धमानमेव परिणामं

आ. सू. ८

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ४३ ॥

---

१ शोधिर्ऋजुभूतस्य धर्मः शुद्धस्य तिष्ठति. २ पुव्वसंजोयं इति पा.

भजते, तथा चोक्तम्—"जह जह सुयमवगाहइ अइसयरसपसरसंजुयमउव्वं । तह तह पल्हाइ मुणी नवनवसंवेगसद्धाए ॥ १ ॥" तथापि श्लोक एव तादृक् बहवश्च परिपतन्ति अतोऽभिधीयते 'तामेवानुपालयेदि'ति, कथं पुनः कृत्वा श्रद्धामनुपालयेदित्याह—'विजहे'त्यादि, 'विहाय' परित्यज्य 'विस्रोतसिकां'शङ्कां, सा च द्विधा-सर्वशङ्का देशशङ्का च, तत्र सर्वशङ्का किमस्ति आर्हतो मार्गो नवेति, देशशङ्का तु किं विद्यन्ते अप्कायादयो जीवाः ?, विशेष्य प्रवचनेऽभिहितत्वात् स्पष्टचेतनात्मलिङ्गाभावान्न विद्यन्ते इति वा, इत्येवमादिकामाकारेकां विहाय सम्पूर्णानगारगुणान् पालयेत्, यदिवा विस्रोतांसि द्रव्यभावभेदात् द्विधा-तत्र द्रव्यविस्रोतांसि नद्यादिस्रोतसां प्रतीपगमनानि, भावविस्रोतांसि तु मोक्षं प्रति सम्यग्दर्शनादिस्रोतसा प्रस्थितानां विरूपाणि, प्रतिकूलानि गमनानि भावविस्रोतांसि, तानि विहाय सम्पूर्णानगारगुणभाग् भवति, श्रद्धां वाऽनुपालयेदिति, पाठान्तरं वा 'विजहित्ता पुव्वसंजोगं' पूर्वसंयोगः-मातापित्रादिभिः, अस्य चोपलक्षणार्थत्वात्पश्चात्संयोगोऽपि श्वशुरादिकृतो ग्राह्यस्तं 'विहाय' त्यक्त्वा 'श्रद्धामनुपालयेदि'ति भीलनीयं ॥ तत्र यस्यायमुपदेशो दीयते यथा 'विहाय विस्रोतांसि तदनु श्रद्धानुपालनं कार्यं' स एवाभिधीयते—न केवलं भवानेवापूर्वमिदमनुष्ठानमेवंविधं करिष्यति, किं त्वन्यैरपि महासत्त्वैः कृतपूर्वमिति दर्शयितुमाह—

पणया वीरा महावीहिं (सू० २०)

---

१ यथा यथा श्रुतमवगाहतेऽतिशयरसप्रसरसंयुतमपूर्वम् । तथा तथा प्रह्लादते मुनिर्नवनवसंवेगश्रद्धया ॥ १ ॥ २ मार्ग उत नेति प्र.

'प्रणताः' प्रह्लाः 'वीराः' परीषहोपसर्गकषायसेनाविजयात् वीथिः-पन्थाः महांश्चासौ वीथिश्च महावीथिः—सम्यग्दर्शनादिरूपो मोक्षमार्गो जिनेन्द्रचन्द्रादिभिः सत्पुरुषैः प्रहृतः, तं प्रति प्रह्लाः—वीर्यवन्तः संयमानुष्ठानं कुर्वन्ति, ततश्चोत्तमपुरुषप्रहृतोऽयं मार्ग इति प्रदर्श्य तज्जनितमार्गविघ्नम्भो विनेयः संयमानुष्ठाने सुखेनैव प्रवर्त्तयिष्यते ॥ उपदेशान्तरमाह—लोकं चेत्यादि, अथवा यद्यपि भवतो मतिर्न क्रमतेऽप्कायजीवविषये, असंस्कृतत्वात्, तथापि भगवदाज्ञेयमिति श्रद्धातव्यमित्याह—

लोगं च आणाए अभिसमेच्चा अकुओभयं (सू० २१)

अत्राधिकृतत्वादप्कायलोको लोकशब्देनाभिधीयते, तमप्कायलोकं चशब्दादन्यांश्च पदार्थान् 'आज्ञया' मौनीन्द्रवचनेनाभिमुख्येन सम्यगित्वा—ज्ञात्वा, यथाऽप्कायादयो जीवाः, इत्येवमवगम्य न विद्यते कुतश्चिद्धेतोः—केनापि प्रकारेण जन्तूनां भयं यस्मात् सोऽयमकुतोभयः—संयमस्तमनुपालयेदिति सम्बन्धः, यद्वा 'अकुतोभयः' अप्कायलोको, यतोऽसौ न कुतश्चिद्भयमिच्छति, मरणभीरुत्वात्, तमाज्ञयाऽभिसमेत्यानुपालयेद्-रक्षेदित्यर्थः ॥ अप्कायलोकमाज्ञया अभिसमेत्य यत्कर्त्तव्यं तदाह—

से बेमि णेव सयं लोगं अब्भाइक्खिज्जा णेव अत्ताणं अब्भाइक्खिज्जा, जे लोयं अ-

॥ ४३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्भाइक्खइ से अत्ताणं अब्भाइक्खइ, जे अत्ताणं अब्भाइक्खइ से लोयं अब्भाइक्खइ (सू० २२)

सोऽहं ब्रवीमि, सेशब्दस्य युष्मदर्थत्वात्त्वां वा ब्रवीमि, न 'स्वयम्' आत्मना 'लोकः' अप्कायलोकोऽभ्याख्यातव्यः, अभ्याख्यानं नामासदभियोगः, यथाऽचौरं चौरमित्याह, इह तु जीवा न भवन्त्यापः, केवलमुपकरणमात्रं, घृततैलादिवत्, एषोऽसदभियोगः, हस्त्यादीनामपि जीवानामुपकरणत्वात्, स्यादारेका-नन्वेतदेवाभ्याख्यानं यदजीवानां जीवत्वापादनं, नैतदस्ति, प्रसाधितमपां प्राक् सचेतनत्वं, यथा हि अस्य शरीरस्याहंप्रत्ययादिभिर्हेतुभिरधिष्ठाताऽऽत्मा व्यतिरिक्तः प्राक् प्रसाधित एवमप्कायोऽप्यव्यक्तचेतनया सचेतन इति प्राक् प्रसाधितः, न च प्रसाधितस्याभ्याख्यानं न्याय्यम्, अथापि स्याद्, आत्मनोऽपि शरीराधिष्ठातुरभ्याख्यानं कर्त्तव्यं, न च तत्क्रियमाणं घटामियर्त्तीति दर्शयति —'नेव अत्ताणं अब्भाइक्खेज्जा' नैव 'आत्मानं' शरीराधिष्ठातारमहंप्रत्ययसिद्धं ज्ञानाभिन्नगुणं प्रत्यक्षं 'प्रत्याचक्षीत' अपह्नवीत, ननु चैतदेव कथमवसीयते-शरीराधिष्ठाताऽऽत्माऽस्तीति, उच्यते, विस्मरणशीलो देवानां प्रिय उक्तमपि भाणयति, तथाहि—आहृतमिदं शरीरं केनचिदभिसन्धिमता, कफरुधिराङ्गोपाङ्गादिपरिणतेः, अन्नादिवत्, तथोत्सृष्टमपि केनचिदभिसन्धिमतैव, आहृतत्वाद्, अन्नमलवदिति, तथा न ज्ञानोपलब्धिपूर्वकः परिस्पन्दो भ्रान्तिरूपः, परिस्पन्दत्वात्, त्वदीयवचनपरिस्पन्दवत्, तथा विद्यमानाधिष्ठातृव्यापारभाञ्जीन्द्रियाणि, करणत्वात्, दात्रादिवत्, एवं कुत-

र्कमार्गानुसारिहेतुमालोच्छेदः स्याद्वादपरशुना कार्यः, अत एवंविधोपपत्तिसमधिगतमात्मानं शुभाशुभफलभाजं न प्रत्याचक्षीत, एवं च सति यो ह्यज्ञः कुतर्ककैतिमिरोपहतज्ञानचक्षुरप्कायलोकमभ्याख्याति-प्रत्याचष्टे स सर्वप्रमाणसिद्धमात्मानमभ्याख्याति, यश्चात्मानमभ्याख्याति—नास्म्यहं, स सामर्थ्यादप्कायलोकमभ्याख्याति, यतो ह्यात्मनि पाण्याद्यवयवोपेतशरीराधिष्ठायिनि प्रस्पष्टलिङ्गेऽभ्याख्याते सत्यव्यक्तचेतनालिङ्गोऽप्कायलोकस्तेन सुतरामभ्याख्यातः ॥ एवमनेकदोषोपपत्तिं विदित्वा नायमप्कायलोकोऽभ्याख्यातव्य इत्यालोच्य साधवो नाप्कायविषयमारम्भं कुर्वन्तीति, शाक्यादयस्त्वन्यथोपस्थिता इति दर्शयितुमाह—

लज्जमाणा पुढो पास-अणगारा मो त्ति एगे पवयमाणा जमिणं विरूवरूवेहिं सत्थेहिं उदयकम्मसमारंभेणं उदयसत्थं समारंभमाणे अणेगरूवे पाणे विहिंसइ । तत्थ खलु भगवता परिण्णा पवेदिता । इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाइमरणमोयणाए दुक्खपडिघायहेउं से सयमेव उदयसत्थं समारभति अण्णेहिं वा उदयसत्थं समारंभावेति अण्णे उदयसत्थं समारंभंते समणुजाणति । तं से अहियाए तं से अबोहीए । से तं संबुज्झमाणे आयाणीयं समुट्ठाय सोच्चा भगवओ अणगाराणं अंतिए इहमेगेसिं णायं भवति—एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णरए, इच्चत्थं गड्ढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं उदयकम्मसमारम्भेणं उदयसत्थं समारंभमाणे अण्णे अणेगरूवे पाणे विहिंसइ । से बेमि संति पाणा उदयनिस्सिया जीवा अणेगे (सू० २३)

'लज्जमानाः' स्वकीयं प्रव्रज्याभासं कुर्वाणाः यदिवा सावद्यानुष्ठानेन लज्जमानाः-लज्जां कुर्वाणाः 'पृथग्'विभिन्नाः शाक्योलूकक्षपणभुक्तकपिलादिशिष्याः, पश्येति शिष्यचोदना, अविवक्षितकर्मका अपि अकर्मका भवन्ति, यथा—पश्य मृगो धावतीति, द्वितीयार्थे वा प्रथमा सुब्व्यत्ययेन द्रष्टव्या, ततश्चायमर्थः—शाक्यादीन् गृहीतप्रव्रज्यानपि सावद्यानुष्ठानरतान् पृथग्विभिन्नान् पश्य, किं तैरसदाचरितं ? येनैवं प्रदर्शयन्त इति दर्शयति-अनगारा वयमित्येके शाक्यादयः प्रवदन्तो 'यदिदं' यदेतत्, काङ्का दर्शयति—'विरूपरूपैः' उत्सेचनाग्निविध्यापनादिशस्त्रैः स्वकायपरकायभेदभिन्नैरुदककर्म समारभन्ते, उदककर्मसमारम्भेण च उदके शस्त्रं उदकमेव वा शस्त्रं समारभन्ते, तच्च समारभमाणोऽनेकरूपान्वनस्पतिद्वीन्द्रियादीन्विविधं हिनस्ति, तत्र खलु भगवता परिज्ञा प्रवेदिता, यथा अस्यैव जीवितव्यस्य परिवन्दनमाननपूजनार्थं जातिमरणमोचनार्थं दुःखप्रतिघातहेतुं यत् करोति तद्दर्शयति—स स्वयमेवोदकशस्त्रं समारभते अन्यैश्चोदकशस्त्रं समारम्भयति अन्यांश्चोदकशस्त्रं समारभमाणान् समनुजानीते, तच्चोदकसमारम्भणं तस्याहिताय भवति, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवाबोधिलाभाय भवति, स एतत्सम्बुध्यमान आदानीयं-सम्यग्दर्शनादि सम्यगुत्थाय-अभ्युपगम्य श्रुत्वा भगवतोऽनगाराणां वाऽन्तिके इहैकेषां साधूनां यत् ज्ञातं भवति तद्दर्शयति-'एषः' अप्कायसमारम्भो ग्रन्थ एष खलु मोह एष खलु मार एष खलु नरक इत्येवमर्थं गृद्धो लोको यदिदं विरूपरूपैः शस्त्रैः उदककर्मसमारम्भेणोदकशस्त्रं समारभमाणोऽन्याननेकरूपान् प्राणिनो विविधं हिनस्तीत्येतद्भगवत् व्याख्येयं, पुनरप्याह—'से बेमी'त्यादि, सेशब्द आत्मनिर्देशे, सोऽहमेवमुपलब्धानेकाप्कायतत्त्ववृत्तान्तो ब्रवीमि-'सन्ति' विद्यन्ते प्राणिन उदकनिश्रिताः-पूतरकमत्स्यादयो यानुदकारम्भप्रवृत्तो हन्यादिति, अथवाऽपरः सम्बन्धः-प्रागुक्तमुदकशस्त्रं समारभमाणोऽन्यानप्यनेकरूपान् जन्तून् विविधं हिनस्तीति, तत् कथमेतच्छक्यमभ्युपगन्तुमित्यत आह-'सन्ति पाणा' इत्यादि पूर्ववत्, कियन्तः पुनस्त इति दर्शयति-'जीवा अणेगा' पुनर्जीवोपादानमुदकाश्रितप्रभूतजीवभेदज्ञापनार्थं, ततश्चेदमुक्तं भवति-एकैकस्मिन् जीवभेदे उदकाश्रिता 'अनेके' असंख्येयाः प्राणिनो भवन्ति, एवं चाप्कायविषयारम्भभाजः पुरुषास्ते तन्निश्रितप्रभूतसत्त्वव्यापत्तिकारिणो द्रष्टव्याः ॥ शाक्यादयस्तूदकाश्रितानेव द्वीन्द्रियादीन् जीवानिच्छन्ति नोदकमित्येतदेव दर्शयति—

इहं च खलु भो ! अणगाराणं उदयजीवा वियाहिया (सू० २४)

खलुशब्दोऽवधारणे 'इहैव' ज्ञातपुत्रीये प्रवचने द्वादशाङ्गे गणिपिटके 'अनगाराणां' साधूनाम् 'उदकजीवा' उदकरूपा जीवाश्चशब्दात्तदाश्रिताश्च पूतरकछेदनकलोदृणकभ्रमरकमत्स्यादयो जीवा व्याख्याताः, अवधारणफलं च नान्येषामुदकरूपा जीवाः प्रतिपादिताः ॥ यद्येवमुदकमेव जीवास्ततोऽवश्यं तत्परिभोगे सति प्राणातिपातभाजः साधव

श्रीआ.चाराङ्गवृत्तिः (शी०) ॥ ४६ ॥

इति, अत्रोच्यते, नैतदेवं, यतो वयं त्रिविधमप्कायमाचक्ष्महे-सचित्तं मिश्रमचित्तं च, तत्र योऽचित्तोऽप्कायस्तेनोपयोगविधिः साधूनां, नेतराभ्यां, कथं पुनरसौ भवत्यचित्तः ? किं स्वभावादेवाहोस्विच्छस्त्रसम्बन्धात् ?, उभयथाऽपीति, तत्र यः स्वभावादेवाचित्तीभवति न बाह्यशस्त्रसम्पर्कात्, तमचित्तं जानाना अपि केवलमनःपर्यायावधिश्रुतज्ञानिनो न परिभुञ्जते, अनवस्थाप्रसङ्गभीरुतया, यतो नु श्रूयते-भगवता किल श्रीवर्द्धमानस्वामिना विमलसलिलसमुल्लसत्तरङ्गः शैवलपटलत्रसादिरहितो महाह्रदो व्यपगताशेषजलजन्तुकोऽचित्तवारिपरिपूर्णः स्वशिष्याणां तृड्बाधितानामपि पानाय नानुजज्ञे, तथा अचित्ततिलशकटस्थपिण्डलपरिभोगानुज्ञा चानवस्थादोषसंरक्षणाय भगवता न कृतेति, श्रुतज्ञानप्रामाण्यज्ञापनार्थं च, तथाहि-सामान्यश्रुतज्ञानी बाह्येन्धनसम्पर्कारुषितस्वरूपमेवाचित्तमिति व्यवहरति जलं, न पुनर्निरिन्धनमेवेति, अतो यद्बाह्यशस्त्रसम्पर्कात् परिणामान्तरापन्नं वर्णादिभिस्तदचित्तं साधुपरिभोगाय कल्पते, किं पुनस्तच्छस्त्रमित्यत आह—

सत्थं चेत्थं अणुवीइ पासा, पुढो सत्थं पवेइयं (सू० २५)

शस्यन्ते-हिंस्यन्तेऽनेन प्राणिन इति शस्त्रं, तच्चोत्सेचनगालनउपकरणधावनादि स्वकायादि च वर्णाद्यापत्तयो वा पूर्वावस्थाविलक्षणाः शस्त्रं, तथाहि-अग्निपुद्गलानुगतत्वादीषत्स्निग्धं जलं भवत्युष्णं गन्धतोऽपि धूमगन्धि रसतो विरसं स्पर्शत उष्णं तच्चोद्वृत्तत्रिदण्डम्, एवंविधावस्थं यदि ततः कल्पते, नान्यथा, तथा कचवरकरीषगोमूत्रोषादीन्धनसम्बन्धात् स्तोकमध्यबहुभेदात् . स्तोकं स्तोके प्रक्षिप्तीत्यादिचतुर्भङ्गिकाभावना कार्या, एवमेतत् त्रिविधं शस्त्रं, चशब्दोऽवधारणार्थः, अन्यतमशस्त्रसम्पर्कविध्वस्तमेव ग्राह्यं, नान्यथेति, 'एत्थ'त्ति एतस्मिन् अप्काये प्रस्तुते 'अनुविचिन्त्य' विचार्य इदमस्य शस्त्रमित्येवं ग्राह्यं, 'पश्ये' त्यनेन शिष्यस्य चोदनेति । तदेवं नानाविधं शस्त्रमप्कायस्यास्तीति प्रतिपादितम्, एतदेव दर्शयति—'पुढो सत्थं पवेदितं' 'पृथग्' विभिन्नमुत्सेचनादिकं शस्त्रं 'प्रवेदितम्' आख्यातं भगवता, पाठान्तरं वा 'पुढोऽपासं पवेदितं' एवं पृथग्विभिन्नलक्षणेन शस्त्रेण परिणामितमुदकग्रहणमपाशं प्रवेदितम्-आख्यातं भगवता, अपाशः-अबन्धनं शस्त्रपरिणामितोदकग्रहणमबन्धनमाख्यातमितियावत् ॥ एवं तावत्साधूनां सचित्तमिश्राप्कायपरित्यागेनाचित्तपयसा परिभोगः प्रतिपादितः, ये पुनः शाक्यादयोऽप्कायोपभोगप्रवृत्तास्ते नियमत एवाप्कायं विहिंसन्ति, तदाश्रितांश्चान्यानिति, तत्र न केवलं प्राणातिपातापत्तिरेव तेषां, किमन्यदित्यत आह—

अदुवा अदिन्नादाणं (सू० २६)

'अथवे'ति पक्षान्तरोपन्यासद्योतनार्थः, अशस्त्रोपहतापकायोपभोगकारिणां न केवलं प्राणातिपातः, अपि त्वदत्तादानमपि तत्तेषां, यतो यैरप्कायजन्तुभिर्यानि शरीराणि निर्वर्तितानि तैरदत्तानि ते तान्युपभुञ्जते, यथा कश्चित् पुमान् सचित्तशाक्यभिक्षुकशरीरकात् खण्डमुत्कृत्य गृह्णीयाद्, अदत्तं हि तस्य तत्, परपरिगृहीतत्वात्, परकीयगवाद्यादानवत्, एवं तानि शरीराण्यब्जीवपरिगृहीतानि गृह्णतोऽदत्तादानमवश्यम्भावि, स्वाम्यनुज्ञानाभावादिति, ननु यस्य तत्तडागकूपादि तेनानुज्ञातं सकृत्तस्य इति, ततश्च नादत्तादानं, स्वामिनाऽनुज्ञातत्वात्, परानुज्ञातपश्वादिघातवत्, नन्वेतदपि साध्यावस्थमेवोपन्यस्तं. यतः पशुरपि शरीरप्रदानविमुख एव भिन्नार्यमर्यादैरुच्चैरारटन्विशस्यते,

अध्ययनं १ उद्देशकः ३

॥ ४६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च कथमिव नादत्तादानं स्यात्?, न चान्यदीयस्यान्य. स्वामी दृष्टः परमार्थचिन्तायां, नन्वेवमशेषलोकप्रसिद्धगोदानादिव्यवहारस्तुष्यति, बुध्यतु नामैवंविधः पापसम्बन्धः, तद्धि देयं यद्दुःखितं स्वयं न भवति दासीबलीवर्दादिवत्, न चान्येषां दुःखोत्पत्तेः कारणं हलखड्गादिवत्, एतद्व्यतिरिक्तं दातृपरिगृहीत्रोरेकान्तत एवोपकारकं देयं प्रतिजानते जिनेन्द्रमतावलम्बिनः, उक्तं च—"यत् स्वयमदुःखितं स्यान्न च परदुःखे निमित्तभूतमपि। केवलमुपग्रहकरं धर्मकृते तद्भवेद्देयम् ॥ १ ॥" इति, तस्मादवस्थितमेतत्—तेषां तददत्तादानमपीति ॥ साम्प्रतमेतद्दोषद्वयं स्वसिद्धान्ताभ्युपगमद्वारेण परः परिजिहीर्षुराह—

कप्पइ णे कप्पइ णे पाउ, अदुवा विभूसाए (२७ सू०)

अशस्त्रोपहतोदकारम्भिणो हि चोदिताः सन्त एवमाहुः-यथा नैतत् स्वमनीषिकाताः समारम्भयामो वयं, किं त्वागमे निर्जीवत्वेनानिषिद्धत्वात् 'कल्पते' युज्यते 'नः' अस्माकं 'पातुम्' अभ्यवहर्तुमिति, वीप्सया च नानाविधप्रयोजनविषय उपभोगोऽभ्यनुज्ञातो भवति, तथाहि—आजीविकभस्मस्नाय्यादयो वदन्ति—पातुमस्माकं कल्पते न स्नातुं वारिणा, शाक्यपरिव्राजकादयस्तु स्नानपानावगाहनादि सर्वं कल्पते इति प्रभाषन्ते, एतदेव स्वनामग्राहं दर्शयति—अथवोदकं विभूषार्थमनुज्ञातं नः समये, विभूषा—करचरणपायूपस्थमुखप्रक्षालनादिका वस्त्रभण्डकादिप्रक्षालनात्मिका वा, एवं स्नानादिशौचानुष्ठायिनां नास्ति कश्चिद्दोष इति ॥ एवं ते परिफल्गुवचसः परिव्राजकादयो निजराद्धान्तोपन्यासेन मुग्धजनमुद्भाव्य किं कुर्वन्तीत्याह—

पुढो सत्थेहिं विउट्टन्ति (सू० २८)

'पृथग्' विभिन्नलक्षणैः नानारूपैरुत्सेचनादिशस्त्रैस्ते अनगारायमाणाः 'विउट्टन्ति'त्ति अप्कायजीवान् जीवनाद्भावर्त्तयन्ति—व्यपरोपयन्तीत्यर्थः, यदिवा पृथग्विभिन्नैः शस्त्रैरप्कायिकान्विविधं कुट्टन्ति-छिन्दन्तीत्यर्थः, कुट्टेर्द्धातोः छेदनार्थत्वात् ॥ अधुनैषामागमानुसारिणामागमासारत्वप्रतिपादनायाह—

एत्थऽवि तेसिं नो निकरणाए (सू० २९)

'एतस्मिन्नपि' प्रस्तुते स्वागमानुसारेणाभ्युपगमे सति 'कप्पइ णे कप्पइ णे पाउं, अदुवा विभूसाए'त्ति एवंरूपस्तेषामयमागमो यद्बलादप्कायपरिभोगे ते प्रवृत्ताः स स्याद्वादयुक्तिभिरभ्याहतः सन् 'नो निकरणाए'त्ति नो निश्चयं कर्त्तुं समर्थो भवति, न केवलं तेषां युक्तयो न निश्चयायालम्, अपि त्वागमोऽपीत्यपिशब्दः, कथं पुनस्तदागमो निश्चयाय नालमिति, अत्रोच्यते, त एवं प्रष्टव्याः—कोऽयमागमो नाम ? यदादेशात्कल्पते भवतामप्कायारम्भः, त आहुः—प्रतिविशिष्टानुपूर्वीविन्यस्तवर्णपदवाक्यसङ्घात आप्तप्रणीत आगमः, नित्योऽकर्तृको वा?, ततश्चैवमभ्युपगते यो येन प्रतिपन्न आप्तः स निराकर्त्तव्यः, अनाप्तोऽसौ अप्कायजीवापरिज्ञानात् तद्घातानुज्ञानाद्वा भवानिव, जीवत्वं चापां प्राक् प्रसाधितमेव, ततस्तत्प्रणीतागमोऽपि सद्धर्मचोदनायामप्रमाणम्, अनाप्तप्रणीतत्वाद्, रथ्यापुरुषवाक्यवत्, अथ नित्योऽकर्तृकः समयोऽभ्युपगम्यते ततो नित्यत्वं दुष्प्रतिपादं. यतः शक्यते वक्तुं—भवदभ्युपगतः समयः सकर्तृको वर्णपदवाक्यात्मकत्वात्, विधिप्रतिषेधात्मकत्वात्, उभयसम्मतसकर्तृकग्रन्थसन्दर्भवदिति, अभ्युपगम्य वा ब्रूमः—अप्रमाणमसौ, नित्यत्वादाकाशवत्, यच्च प्रमाणं तदनित्यं दृष्टं प्रत्यक्षादिवदिति, तथा विभूषासूत्रावयवेऽपि पृष्टा न प्रत्युत्तरदाने क्षमाः, यतियोग्यं स्नानं न भवति, कामाङ्गत्वात्, मण्डनवत्, कामाङ्गता च सर्वजनप्रसिद्धा, तथा चोक्तम्—"स्नानं मददर्पकरं, कामाङ्गं प्रथमं स्मृतम्। तस्मात्कामं परित्यज्य, नैव स्नान्ति दमे रताः ॥ १ ॥" शौचार्थोऽपि . पुष्कलो, वारिणा बाह्यमलापनयनमात्रत्वात्, न ह्यन्तर्व्यवस्थितकर्ममलक्षालनसमर्थं वारि दृष्टं, तस्माच्छरीरवाङ्मनसामकुशलप्रवृत्तिनिरोधो भावशौचमेव कर्मक्षयायालं, तच्च वारिसाध्यं न भवति, कुतः?, अन्वयव्यतिरेकसमधिगम्यत्वात्सर्वभावानां, न हि मत्स्यादयः तत्र स्थिता मत्स्यादित्वकर्मक्षयभाक्त्वेनाभ्युपगम्यन्ते, विना च वारिणा महर्षयो विचित्रतपोभिः कर्म क्षपयन्तीति, अतः स्थितमेतत्—तत्समयो न निश्चयाय प्रभवतीति ॥ तदेवं निःसपत्नमप्यं जीवत्वं प्रतिपाद्य तत्प्रवृत्तिनिवृत्तिविकल्पफलप्रदर्शनद्वारेणोपसंजिहीर्षुः सकलमुद्देशार्थमाह—

एत्थ सत्थं समारभमाणस्स इच्चेए आरंभा अपरिण्णाया भवंति, एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति, तं परिण्णाय मेहावी णेव सयं उदयसत्थं समारम्भेज्जा णेवण्णेहिं उदयसत्थं समारंभावेज्जा उदयसत्थं समारंभंतेऽवि

॥ ४७ ॥

॥ ४८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अण्णे ण समणुजाणेज्जा, जस्सेते उदयसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णातकम्मे (सू० ३०) त्ति बेमि ॥ इति तृतीयोऽप्कायोद्देशकः ॥

'एतस्मिन्' अप्काये 'शस्त्रं' द्रव्यभावरूपं समारभमाणस्येत्येते समारम्भा बन्धकारणत्वेनापरिज्ञाता भवन्ति, अत्रैवाप्काये शस्त्रमसमारभमाणस्येत्येते आरम्भा ज्ञपरिज्ञया परिज्ञाता भवन्ति प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति, तामेव प्रत्याख्यानपरिज्ञां विशेषतो ज्ञपरिज्ञापूर्विकां दर्शयति—'तद्' उदकारम्भणं बन्धायेत्येवं परिज्ञाय मेधावी-मर्यादाव्यवस्थितो नैव स्वयमुदकशस्त्रं समारभेत, नैवान्यैरुदकशस्त्रं समारम्भयेत्, नैवान्यानुदकशस्त्रं समारभमाणान्समनुजानीयात्, यस्यैते उदकशस्त्रसमारम्भाः द्विधा परिज्ञाता भवन्ति स एव मुनिः परिज्ञातकर्मा भवति । ब्रवीमीति पूर्ववद् । इति शस्त्रपरिज्ञायां तृतीयोद्देशकः समाप्तः ॥

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके मुनित्वप्रतिपत्तये अप्कायः प्रतिपादितः, तदधुना तदर्थमेव क्रमायातस्तेजस्कायप्रतिपादनायायमुद्देशकः समारभ्यते—तस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि वाच्यानि तावद्यावन्नामनिष्पन्ने निक्षेपे तेजउद्देशक इति नाम, तत्र तेजसो निक्षेपादीनि द्वाराणि वाच्यानि, अत्र च पृथिवीविकल्पतुल्यत्वात् केषाञ्चिदतिदेशो द्वाराणामपरेषां तद्विलक्षणत्वात् अपोद्धार इत्येतत् द्वयमुररीकृत्य निर्युक्तिकृद् गाथामाह—

आ. सू. १ श्रीआचाराङ्गवृत्तिः (शी०) ॥ ४९ ॥

तेउस्सवि दाराइं ताइं जाइं हवंति पुढवीए । णाणत्ती उ विहाणे परिमाणुवभोगसत्थे य ॥ ११६ ॥

'तेजसोऽपि' अग्नेरपि 'द्वाराणि' निक्षेपादीनि यानि पृथिव्याः समधिगमेऽभिहितानि तान्येव वाच्यानि, अपवादं दर्शयितुमाह—'नानात्वं' भेदो विधानपरिमाणोपभोगशस्त्रेषु, तुरवधारणे, विधानादिष्वेव च नानात्वं नान्यत्रेति, चशब्दाल्लक्षणद्वारपरिग्रहः ॥ यथाप्रतिज्ञातनिर्वहणार्थमादिद्वारव्याचिख्यासयाऽऽह—

अध्ययनं १ उद्देशकः ४

दुविहा य तेउजीवा सुहुमा तह बायरा य लोगंमि । सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥ ११७ ॥

स्पष्टा ॥ बादरपञ्चभेदप्रतिपादनायाह—

इंगाल अगणि अची जाला तह मुम्मुरे य बोद्धव्वे । बायरतेउविहाणा पंचविहा वण्णिया एए ॥ ११८ ॥

दग्धेन्धनो विगतधूमज्वालोऽङ्गारः—, इन्धनस्थः श्लोषक्रियाविशिष्टरूपः तथा विद्युदुल्काऽशनिसङ्घर्षसमुत्थितः सूर्यमणिसंसृतादिरूपश्चाग्निः, दाह्यप्रतिबद्धो ज्वालाविशेषोऽर्चिः, ज्वाला छिन्नमूलाऽनङ्गारप्रतिबद्धा, प्रविरलाग्निकणानुविद्धं भस्म मुर्मुरः, एते बादरा अग्निभेदाः पञ्च भवन्तीति ॥ एते च बादराग्नयः स्वस्थानाङ्गीकरणान्मनुष्यक्षेत्रेऽर्द्धतृतीयेषु द्वीपसमुद्रेष्वव्याघातेन पञ्चदशसु कर्मभूमिषु व्याघाते सति पञ्चसु विदेहेषु, नान्यत्र, उपपाताङ्गीकरणेन लोकासङ्ख्येयभागवर्तिनः, तथा चागमः—"उववाएणं दोसु उड्ढकवाडेसु तिरियलोयतट्टे (ट्ठे) य" अस्यायमर्थः—अर्द्धतृतीयद्वीपसमुद्रबाहल्ये पूर्वापरदिक्षणोत्तरस्वयम्भूरमणपर्यन्तायते ऊर्ध्वाधोलोकप्रमाणे कपाटे तयोः प्रविष्टा बादराग्निभूत्यद्यमानकास्तव्यपदेशं लभन्ते, तथा 'तिरियलोयतट्टे (ट्ठे) य'त्ति तिर्यग्लोकस्थालके च व्यवस्थितो बादराग्निभूत्यद्यमानो बादराग्निव्यपदेशभाग् भवति । अन्ये तु व्याचक्षते—तयोस्तिष्ठतीति तत्स्थः, तिर्यग्लोकश्चासौ तत्स्थश्च तिर्यग्लोकतत्स्थः, तत्र च स्थित उत्पित्सुर्बादराग्निव्यपदेशमासादयति, अस्मिंश्च व्याख्याने कपाटान्तर्गत एव गृह्यते, स च द्वयोरूर्द्धकपाटयोरित्यनेनैवोपात्त इति तद्व्याख्यानाभिप्रायं न विद्मः । कपाटस्थापना चेयम् । समुद्घातेन सर्वलोकवर्त्तिनः, ते च पृथिव्यादयो मारणान्तिकसमुद्घातेन समवहता बादराग्निभूत्यद्यमानास्तव्यपदेशभाजः सर्वलोकव्यापिनो भवन्ति, यत्र च बादराः पर्याप्तकास्तत्रैव बादरा अपर्याप्तकाः, तन्निश्रया तेषामुत्पद्यमानत्वात्, तदेवं सूक्ष्मा बादराश्च पर्याप्तकापर्याप्तकभेदेन प्रत्येकं द्विधा भवन्ति, एते च वर्णगन्धरसस्पर्शादेशैः सहस्राग्रशो भिद्यमानाः सङ्ख्ययोनिप्रमुखशतसहस्रभेदपरिमाणा भवन्ति, तत्रैषां संवृता योनिरुष्णा च सचित्ताचित्तमिश्रभेदात् त्रिधा, सप्त चैषां योनिलक्षा भवन्ति ॥ साम्प्रतं चशब्दसमुच्चितं लक्षणद्वारमाह—

॥ ४९ ॥

जह देहप्परिणामो रत्तिं खज्जोयगस्स सा उवमा । जरियस्स य जह उम्हा तओवमा तेउजीवाणं ॥ ११९ ॥

'यथे'ति दृष्टान्तोपन्यासार्थः 'देहपरिणामः' प्रतिविशिष्टा शरीरशक्तिः 'रात्रा'विति विशिष्टकालनिर्देशः 'खद्योतक' इति प्राणिविशेषपरिग्रहः, यथा तस्यासौ देहपरिणामो जीवप्रयोगनिर्वृत्तशक्तिराविश्चकास्ति, एवमङ्गारादीनामपि प्रतिविशिष्टा प्रकाशादिशक्तिरनुमीयते जीवप्रयोगविशेषाविर्भाविताति । यथा वा—ज्वरोष्मा जीवप्रयोगं नातिवर्त्तते, जीवाधिष्ठितशरीरकानुपात्यैव भवति, एषैवोपमाऽऽश्रेयजन्तूनां, न च मृता ज्वरिणः क्वचिदुपलभ्यन्ते, एवमन्वयव्यतिरेकाभ्यामग्नेः सचित्तता मुक्तकग्रन्थोपपत्तिमुखेन प्रतिपादिता, सम्प्रति प्रयोगमारोप्यते अयमेवार्थः—जीवशरीराङ्गभूतारादयः, छेद्यत्वादिहेतुगुणान्वितत्वात्, सास्नाविषाणादिसङ्घातवत्, तथा आत्मसंयोगाविर्भूतोऽङ्गारादीनां प्रकाशपरिणामः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरस्थत्वात्, खद्योतकदेहपरिणामवत्, तथा आत्मसम्प्रयोगपूर्वकोऽङ्गारादीनामूष्मा, शरीरस्थत्वात्, ज्वरोष्मवत्, न चादित्यादिभिरनेकान्तः, सर्वेषामात्मप्रयोगपूर्वकं यत उष्णपरिणामभाक्त्वं तस्मान्नानेकान्तः, तथा सचेतनं तेजो, यथायोग्याहारोपादानेन वृद्धिविशेषतद्विकारवत्त्वात्, पुरुषवत्, एवमादिना लक्षणेनाग्नेया जन्तवो निश्रेया इति ॥ उक्तं लक्षणद्वारं, तदनन्तरं परिमाणद्वारमाह—

जे बायरपज्जत्ता पलिअस्स असंखभागमित्ता उ । सेसा तिण्णिवि रासी वीसुं लोगा असंखिज्जा ॥ १२० ॥

ये बादरपर्याप्तानलजीवाः क्षेत्रपल्योपमासङ्ख्येयभागमात्रवर्त्तिप्रदेशराशिपरिमाणाः भवन्ति, ते पुनर्बादरपृथिवीकायपर्याप्तकेभ्योऽसङ्ख्येयगुणहीनाः, शेषास्त्रयोऽपि राशयः पृथ्वीकायवद्भावनीयाः, किन्तु बादरपृथिवीकायापर्याप्तकेभ्यो बादराप्यपर्याप्तका असंख्येयगुणहीनाः सूक्ष्मपृथिवीकायापर्याप्तकेभ्यः सूक्ष्माग्नेयापर्याप्तका विशेषहीनाः सूक्ष्मपृथिवीकायपर्याप्तकेभ्यः सूक्ष्माग्नेयपर्याप्तका विशेषहीना इति ॥ साम्प्रतमुपभोगद्वारमाह—

दहणे पयावण पगासणे य सेए य भत्तकरणे य । बायरतेउक्काए उवभोगगुणा मणुस्साणं ॥ १२१ ॥

दहनं—शरीराद्यवयवस्य बाह्योपनयनार्थं प्रकृष्टं तापनं प्रतापनं—शीतापनोदाय प्रकाशकरणमुद्योतकरणं—प्रदीपादिना भक्तकरणम्—ओदनादिरन्धनं स्वेदो—ज्वरविसूचिकादीनाम्, इत्येवमादिष्वनेकप्रयोजनेषूपस्थितेषु मनुष्याणां बादरतेजस्कायविषया उपभोगरूपा गुणा उपभोगगुणा भवन्तीति ॥ तदेवमेवमादिभिः कारणैः समुपस्थितैः सततमारम्भप्रवृत्ता गृहिणो यत्किञ्चाभासा वा सुखैषिणस्तेजस्कायजन्तून् हिंसन्तीति दर्शयितुमाह—

एएहिं कारणेहिं हिंसंती तेउकाइए जीवे । सायं गवेसमाणा परस्स दुक्खं उदीरंति ॥ १२२ ॥

'एतैः' दहनादिभिः कारणैस्तेजस्कायिकान् जीवान् 'हिंसन्ती'ति सङ्घट्टनपरितापनापद्रावणानि कुर्वन्ति 'सातं' सुखं तदात्मनोऽन्विष्यन्तः 'परस्य' बादराग्निकायस्य दुःखम् 'उदीरयन्ति' उत्पादयन्तीति ॥ साम्प्रतं शस्त्रद्वारं, तच्च द्रव्यभावशस्त्रभेदात् द्विधा, द्रव्यशस्त्रमपि समासविभागभेदात् द्विधैव, तत्र समासतो द्रव्यशस्त्रप्रतिपादनायाह—

पुढवी आउक्काए उल्ला य वणस्सई तसा पाणा । बायरतेउक्काए एयं तु समासओ सत्थं ॥ १२३ ॥

'पृथिवी' धूलिः अप्कायश्च आर्द्रश्च वनस्पतिः त्रसाश्च प्राणिनः, एतद्बादरतेजस्कायजन्तूनां 'समासतः' सामान्येन शस्त्रमिति ॥ विभागतो द्रव्यशस्त्रमाह—

किंची सकायसत्थं किंची परकाय तदुभयं किंची । एयं तु दव्वसत्थं भावे य असंजमो सत्थं ॥ १२४ ॥

किञ्चिच्छस्त्रं स्वकाय एव—अग्निकाय एव अग्निकायस्य, तद्यथा—तार्णोऽग्निः पार्णाग्नेः शस्त्रमिति, किञ्चिच्च परकायशस्त्रम्—उदकादि, उभयशस्त्रं पुनः—तुषकरीषादिव्यतिमिश्रोऽग्निरपराग्नेः, तुशब्दो भावशस्त्रापेक्षया विशेषणार्थः, 'एतत्तु' पूर्वोक्तं समासविभागरूपं पृथिवीस्वकायादि द्रव्यशस्त्रमिति । भावशस्त्रं दर्शयति-भावे शस्त्रम् असंयमो—दुष्प्रणिहितमनोवाक्कायलक्षण इति ॥ उक्तव्यतिरिक्तद्वारातिदेशद्वारेणोपसञ्जिहीर्षुर्निर्युक्तिकृदाह—

सेसाइं दाराइं ताइं जाइं हवंति पुढवीए । एवं तेउद्देसे निज्जुत्ती कित्तिया एसा ॥ १२५ ॥

उक्तशेषाणि द्वाराणि तान्येव यानि पृथिव्युद्देशकेऽभिहितानि 'एवम्' उक्तप्रकारेण तेजस्कायाभिधानोद्देशके निर्युक्तिः 'कीर्त्तिता' व्यावर्णिता भवतीति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से बेमि णेव सयं लोगं अब्भाइक्खेज्जा णेव अत्ताणं अब्भाइक्खेज्जा, जे लोयं अब्भाइक्खइ से अत्ताणं अब्भाइक्खइ, जे अत्ताणं अब्भाइक्खइ से लोयं अब्भाइक्खइ (सू० ३१)

अस्य च सम्बन्धः प्राग्वद्वाच्य इति, येन मया सामान्यात्मपदार्थपृथिव्यप्कायजीवप्रविभागव्यावर्णनमकारि स एवाहमव्यवच्छिन्नज्ञानप्रवाहस्तेजोजीवस्वरूपोपलम्भसमुपजनितजिनवचनसम्मदो ब्रवीमि, किं पुनस्तदिति दर्शयति—'नैवे'त्यादि, इह हि प्रकरणसम्बन्धाल्लोकशब्देनाग्निकायलोकोऽभिधित्सितः, अतस्तमग्निलोकं जीवत्वेन नैव 'स्वयम्' आत्मनाऽभ्याचक्षीत-नैवापह्नवीतेत्यर्थः, एतदभ्याख्याने ह्यात्मनोऽपि ज्ञानादिगुणकलापानुमितस्याभ्याख्यानमवाप्नोति, अथ च प्राक् प्रसाधितत्वादभ्याख्यानं नैवात्मनो न्याय्यम्, एवं तेजस्कायस्यापि प्रसाधितत्वात् अभ्याख्यानं क्रियमाणं न युक्तिपथमवतरति, एवं चास्य युक्त्यागमबलप्रसिद्धस्याभ्याख्याने क्रियमाणे सत्यात्मनोऽप्यहंप्रत्ययसिद्धस्याभ्याख्यानं भवतःप्राप्तम् । एवमस्त्विति चेत्, तन्नेति दर्शयति—'नेव अत्ताणं अब्भाइक्खेज्जा' नैवात्मानं—शरीराधिष्ठातारं ज्ञानगुणं प्रत्यात्मसंवेद्यं प्रत्याचक्षीत, तस्य शरीराधिष्ठातृत्वेन आहृतमिदं शरीरं केनचिदभिसन्धिमता, तथा त्यक्तमिदं शरीरं केनचिदभिसन्धिमतैवेत्येवमादिभिर्हेतुभिः प्रसाधितत्वात्, न च प्रसाधितप्रसाधनं पिष्टपेषणवत् विद्वज्जनमनांसि रञ्जयति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च सत्यात्मवत्प्रसाधितमग्निलोकं यः प्रत्याचक्षीत सोऽतिसाहसिक आत्मानमभ्याख्याति-निराकरोति, यश्चात्माभ्याख्यानप्रवृत्तः स सदैवाग्निलोकमभ्याख्याति, सामान्यपूर्वकत्वाद्विशेषाणां, सति ह्यात्मसामान्ये पृथिव्याद्यात्मविभागः सिद्ध्यति, नान्यथा, सामान्यस्य विशेषव्यापकत्वात्, व्यापकविनिवृत्तौ च व्याप्यस्याप्यवश्यंभाविनी विनिवृत्तिरितिकृत्वा । एवमयमग्निलोकः सामान्यात्मवन्नाभ्याख्यातव्य इति प्रदर्शितम्, अधुनाऽग्निजीवप्रतिपत्तौ सत्यां तद्विषयसमारम्भकटुकफलपरिहारोपन्यासाय सूत्रमाह—

जे दीहलोगसत्थस्स खेयण्णे से असत्थस्स खेयण्णे जे असत्थस्स खेयण्णे से दीहलोगसत्थस्स खेयण्णे (सू० ३२)

'य' इति मुमुक्षुर्दीर्घलोको-वनस्पतिर्यस्मादसौ कायस्थित्या परिमाणेन शरीरोच्छ्रयेण च शेषैकेन्द्रियेभ्यो दीर्घो वर्त्तते, तथाहि-कायस्थित्या तावत् 'वणस्सइकाइए णं भंते ? वणस्सइकाइएत्ति कालओ केवच्चिरं होइ ?, गोयमा ! अणंतं कालं अणंताओ उस्सप्पिणिअवसप्पिणिओ खेत्तओ अणंता लोया असंखेज्जा पोग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइभागे' परिमाणतस्तु 'पडुप्पन्नवणस्सइकाइयाणं भंते ! केवतिकालस्स निल्लेवणा सिया ?, गोयमा !

१ वनस्पतिकायो भदन्त ! वनस्पतिकाय इति कालतः कियच्चिरं भवति ?, गौतम ! अनन्तं कालम्, अनन्ता उत्सर्पिण्यवसर्पिण्यः, क्षेत्रतोऽनन्ता लोकाः, असंख्येयाः पुद्गलपरावर्त्ताः, ते पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येये भागे. २ प्रत्युत्पन्नवनस्पतिकायिकानां भदन्त ! कियता कालेन निर्लेपना स्यात् ?, गौतम ! प्रत्युत्पन्नवनस्पतिकायिकानां नास्ति निर्लेपना.

पडुप्पन्नवणस्सइकाइयाणं नत्थि निल्लेवणा' तथा शरीरोच्छ्रयाच्च दीर्घो वनस्पतिः 'वणस्सइकाइयाणं भंते ! केमहालिया सरीरोगाहणा पण्णत्ता ?, गोयमा ! साइरेगं जोयणसहस्सं सरीरोगाहणा' न तथाऽन्येषामेकेन्द्रियाणाम्, अतः स्थितमेतत्-सर्वथा दीर्घलोको वनस्पतिरिति, अस्य च शस्त्रमग्निः, यस्मात्स हि प्रवृद्धज्वालाकलापाकुलः सकलतरुगणप्रध्वंसनाय प्रभवति, अतोऽसौ तदुत्सादकत्वाच्छस्त्रं, ननु च सर्वलोकप्रसिद्ध्या कस्मादग्निरेव नोक्तः?, किं वा प्रयोजनमुरीकृत्योक्तं दीर्घलोकशस्त्रमिति, अत्रोच्यते, प्रेक्षापूर्वकारितया, न निरभिप्रायमेतत्कृतमिति, यस्मादयमुत्पाद्यमानो ज्वाल्यमानो वा हव्यवाहः समस्तभूतग्रामघाताय प्रवर्त्तते, वनस्पतिदाहप्रवृत्तस्तु बहुविधसत्त्वसंहतिविनाशकारी विशेषतः स्यात्, यतो वनस्पतौ कृमिपिपीलिकाभ्रमरकपोतश्वापदादयः सम्भवन्ति, तथा पृथिव्यपि तरुकोटरव्यवस्थिता स्यात्, आपोऽप्यवश्यायरूपाः, वायुरपीषच्चञ्चलस्वभावकोमलकिशलयानुसारी सम्भाव्यते, तदेवमग्निसमारम्भप्रवृत्तः एतावतो जीवान्नाशयति, अस्यार्थस्य सूचनाय दीर्घलोकशस्त्रग्रहणमकरोत् सूत्रकार इति, तथा चोक्तम्—"जायतेयं न इच्छन्ति, पावगं जलइत्तए । तिक्खमन्नयरंसत्थं, सव्वओऽवि दुरासयं ॥ १ ॥ पाईणं पडिणं वावि, उड्ढं अणुदिसामवि । अहे दाहिणओ वावि, दहे उत्तरओऽवि य ॥ २ ॥ भूयाणमेसमाघाओ, हव्ववाहो न संसओ । तं पईवपयावट्ठा,

१ वनस्पतिकायिकानां भदन्त ! का महती शरीरावगाहना प्रज्ञप्ता ?, गौतम ! सातिरेकं योजनसहस्रं शरीरावगाहना. २ जाततेजसं नेच्छन्ति पावकं ज्वलयितुम् । तीक्ष्णमन्यतरत् शस्त्रं सर्वतोऽपि दुराश्रयम् ॥ १ ॥ प्राचीनं प्रतीचीनं वापि ऊर्ध्वमनुदिश्वपि । अधो दक्षिणतो वापि दहति उत्तरतोऽपि च ॥२॥ भूतानामेष आघातो हव्यवाहो न संशयः । तत् प्रदीपप्रतापार्थं संयतः किञ्चिन्नारभेत ॥ ३ ॥

संजओ किंचि नारभे ॥ ३ ॥" अथवा बादरतेजस्कायाः पर्याप्तकाः स्तोकाः, शेषाः पृथिव्यादयो जीवकाया बहवः, भवस्थितिरपि त्रीण्यहोरात्राणि स्वल्पा इतरेषां पृथिव्यप्वायुवनस्पतीनां यथाक्रमं द्वाविंशतिसप्तत्रिदशवर्षसहस्रपरिमाणा दीर्घा अवसेया इति, अतो दीर्घलोकः-पृथिव्यादिस्तस्य शस्त्रम्-अग्निकायस्तस्य 'क्षेत्रज्ञो'निपुणः अग्निकायं वर्णादितो जानातीत्यर्थः, 'खेदज्ञो वा' खेदः-तद्व्यापारः सर्वसत्त्वानां दहनात्मकः पाकाद्यनेकशक्तिकलापोपचितः प्रवरमणिरिव जाज्वल्यमानो लब्धाग्निव्यपदेशः यतीनामनारम्भणीयः, तमेवंविधं खेदम्-अग्निव्यापारं जानातीति खेदज्ञः, अतो य एव दीर्घलोकशस्त्रस्य खेदज्ञः स एव 'अशस्त्रस्य' सप्तदशभेदस्य संयमस्य खेदज्ञः, संयमो हि न कञ्चिज्जीवं व्यापादयति अतोऽशस्त्रम्, एवमनेन संयमेन सर्वसत्त्वाभयप्रदायिनाऽनुष्ठीयमानेनाग्निजीवविषयः समारम्भः शक्यः परिहर्तुं पृथिव्यादिकायसमारम्भश्चेत्येवमसौ संयमे निपुणमतिर्भवति, ततश्च निपुणमतित्वाद्विदितपरमार्थोऽग्निसमारम्भाद्व्यावृत्य संयमानुष्ठाने प्रवर्त्तते । इदानीं गतप्रत्यागतलक्षणेनाविनाभावित्वप्रदर्शनार्थं विपर्ययेण सूत्रावयवपरामर्शं करोति—'जे असत्थस्से' त्यादि, यश्चाशस्त्रे-संयमे निपुणः स खलु दीर्घलोकशस्त्रस्य-अग्नेः क्षेत्रज्ञः खेदज्ञो वा, संयमपूर्वकं ह्यग्निविषयखेदज्ञत्वम्, अग्निविषयखेदज्ञतापूर्वकं च संयमानुष्ठानम्, अन्यथा तदसम्भव एवेत्येतद्गतप्रत्यागतफलमाविर्भावितं भवति ॥ कैः पुनरिदमेवमुपलब्धमित्यत आह—'वीरेहीं'त्यादि, अथवा सद्वृत्तप्रसिद्धौ सत्यां वाक्यप्रसिद्धिर्भवतीत्यत उपदिश्यते—

वीरेहिं एयं अभिभूय दिट्ठं, संजएहिं सया जत्तेहिं सया अप्पमत्तेहिं (सू० ३३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घनघातिकर्मसङ्घातविदारणानन्तरप्राप्तातुलकेवलश्रिया विराजन्त इति वीराः—तीर्थकरास्तैर्वीरैरर्थतो दृष्टमेतत्तथा सूत्रतोऽग्निशस्त्रं दृष्टम् अशस्त्रं संयमस्वरूपं चेति । किं पुनरनुष्ठायेदं तैरुपलब्धमिति, अत्रोच्यते, 'अभिभूये'ति अभिभवो नामादिश्चतुर्द्धा, द्रव्याभिभवो—रिपुसेनादिपराजयः आदित्यतेजसा वा चन्द्रग्रहनक्षत्रादितेजोऽभिभवः, भावाभिभवस्तु परीषहोपसर्गानीकज्ञानदर्शनावरणमोहान्तरायकर्म्मनिर्दलनं, परीषहोपसर्गादिसेनाविजयाद्विमलं चरणं, चरणशुद्धेर्ज्ञानावरणादिकर्मक्षयः, तत्क्षयाच्चिरावरणमप्रतिहतमशेषज्ञेयग्राहि केवलज्ञानमुपजायते, इदमुक्तं भवति—परीषहोपसर्गज्ञानदर्शनावरणीयमोहान्तरायाण्यभिभूय केवलमुत्पाद्य तैरुपलब्धमिति । यथाभूतैस्तैरिदमुपलब्धं तद्दर्शयति—'संजएहिं' सम्यग् यताः संयताः प्राणातिपातादिभ्यस्तैः, तथा 'सदा' सर्वकालं चरणप्रतिपत्तौ मूलोत्तरगुणभेदायां निरतिचारत्वाद्यत्नवन्तस्तैः, तथा 'सदा' सर्वकालं न विद्यते प्रमादो—मद्यविषयकषायविकथानिद्राख्यो येषां तेऽप्रमत्तास्तैः, एवंभूतैर्महावीरैः केवलज्ञानचक्षुषेदं दीर्घलोकशस्त्रम् अशस्त्रं च संयमो दृष्टम्—उपलब्धमिति । अत्र च यत्नग्रहणादीर्यासमित्यादयो गुणा गृह्यन्ते, अप्रमादग्रहणात्तु मद्यादिनिवृत्तिरिति । तदेवमेतत्प्रधानपुरुषप्रतिपादितमग्निशस्त्रमपायदर्शनादप्रमत्तैः साधुभिः परिहार्यमिति ॥ एवं प्रत्यक्षीकृतानेकदोषजालमप्यग्निशस्त्रमुपभोगलोभात्प्रमादवशगा ये न परिहरन्ति तानुद्दिश्य विपाकदर्शनायाह—

जे पमत्ते गुणट्ठीए से हु दंडेत्ति पवुच्चइ (सू० ३४)

यो हि प्रमत्तो भवति मद्यविषयादिप्रमादैरसंयतो 'गुणार्थी' रन्धनपचनप्रकाशातापनाद्यग्निगुणप्रयोजनवान् स दुष्प्रणिहितमनोवाक्कायोऽग्निशस्त्रसमारम्भकतया प्राणिनां दण्डहेतुत्वाद्दण्डः प्रकर्षेणोच्यते प्रोच्यते, आयुर्घृतादिव्यपदेशवदिति ॥ यतश्चैवं ततः किं कर्त्तव्यमित्यत आह—

तं परिण्णाय मेहावी इयाणिं णो जमहं पुव्वमकासी पमाएणं (सू० ३५)

'तम्' अग्निकायसमारम्भं दण्डफलं परिज्ञाय-ज्ञपरिज्ञाप्रत्याख्यानपरिज्ञाभ्यां 'मेधावी' मर्यादाव्यवस्थितो वक्ष्यमाणप्रकारेण व्यवच्छेदमात्मन्याचिनोतीति । तमेव प्रकारं दर्शयितुमाह—'इयाणी' त्यादि, यमहमग्निसमारम्भं विषयप्रमादेनाकुलीकृतान्तःकरणः सन् पूर्वमकार्षं तमिदानीं जिनवचनोपलब्धाग्निसमारम्भदण्डतत्त्वः नो करोमीति ॥ अन्ये त्वन्यथावादिनोऽन्यथाकारिण इति दर्शयितुमाह—

लज्जमाणा पुढो पास-अणगारा मोत्ति एगे पवदमाणा जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारम्भेणं अगणिसत्थं समारभमाणे अण्णे अणेगरूवे पाणे विहिंसंति । तत्थ खलु भगवता परिण्णा पवेदिता, इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाइमरणमोयणाए दुक्खपडिघायहेउं से सयमेव अगणिसत्थं समारभइ अण्णेहिं वा अगणिसत्थं समारंभावेइ अण्णे वा अगणिसत्थं समारभमाणे समणुजाणइ, तं से अहियाए तं से अबोहियाए से तं संबुज्झमाणे आयाणीयं समुट्ठाय सोच्चा भगवओ अणगाराणं इहमेगेसिं णायं भवति-एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णरए, इच्चत्थं गड्ढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारंभमाणे अण्णे अणेगरूवे पाणे विहिंसइ (सू० ३६)

अस्य ग्रन्थस्योक्तार्थस्यायमर्थो लेशतः प्रदर्श्यते—'लज्जमानाः' स्वागमोक्तानुष्ठानं कुर्वाणाः सावद्यानुष्ठानेन वा लज्जां कुर्वाणाः 'पृथग्' विभिन्नाः शाक्यादयः 'पश्ये'ति संयमानुष्ठाने स्थिरीकरणार्थं शिष्यस्य चोदना, अनगारा वयमित्येके प्रवदमानाः, किं तैर्विरूपमाचरितं येनैवं प्रदर्श्यन्त इति दर्शयति—यदिदं विरूपरूपैः शस्त्रैरग्निकर्मसमारम्भेण अग्निशस्त्रं समारभमाणः सन्नन्यानप्यनेकरूपान् प्राणिनो विहिनस्ति, तत्र खलु भगवता परिज्ञा प्रवेदिता, यथाऽस्यैव परिफल्गुजीवितस्य परिवन्दनमाननपूजनार्थं जातिमरणमोचनार्थं दुःखप्रतिघातहेतुं यत्करोति तद्दर्शयति—'स' परिवन्दनाद्यर्थी स्वत एवाग्निशस्त्रं समारभते तथा अन्यैश्चाग्निशस्त्रं समारम्भयति तथाऽन्यांश्च अग्निशस्त्रं समारभमाणान् समनुजानीते, तच्चाग्नेः समारम्भणं 'से' तस्य सुखलिप्सोरमुत्रान्यत्र चाहिताय भवति, तथा तदेव च तस्याबोधिलाभाय भवति, 'स' इति यस्यैतदसदाचरणं प्रदर्शितं, स तु शिष्यस्तदग्निसमारम्भणं पापायेत्येवं सम्बुध्यमान 'आदानीयं' ग्राह्यं सम्यग्दर्शनादि 'सम्यगुत्थाय' अभ्युपगम्य श्रुत्वा भगवदन्तिकेऽनगाराणां वा इहैकेषां साधूनां ज्ञातं भवति, किम्?, तद्दर्शयति—'एष'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अग्निसमारम्भः ग्रन्थः—कर्महेतुत्वाद् एष एव मोह एष एव मार एष एव नरकस्तद्धेतुत्वादिति भावः, इत्येवमर्थं च गृद्धो लोको यत्करोति तद्दर्शयति—यदिदं विरूपरूपैः शस्त्रैरग्निकर्म समारभते तदारम्भेण चाग्निशस्त्रं समारभते तच्चारभमाणोऽन्याननेकरूपान् प्राणिनो विहिनस्तीति ॥ कथं पुनरग्निसमारम्भप्रवृत्ता नानाविधान् प्राणिनो विहिंसन्तीति दर्शयितुमाह—

से बेमि—संति पाणा पुढवीनिस्सिया तणणिस्सिया पत्तणिस्सिया कट्ठनिस्सिया गोमयणिस्सिया कयवरणिस्सिया, संति संपातिमा पाणा आहच्च संपयंति, अगणिं च खलु पुट्ठा एगे संघायमावज्जंति, जे तत्थ संघायमावज्जंति ते तत्थ परियावज्जंति, जे तत्थ परियावज्जंति ते तत्थ उद्दायंति (सू० ३७)

तदहं ब्रवीमि यथा नानाविधजीवहिंसनमग्निकायसमारम्भेण भवतीति। यथाप्रतिज्ञातार्थं दर्शयति—'सन्ति' विद्यन्ते 'प्राणा' जन्तवः, पृथिवीकायनिश्रिताः पृथिवीकायत्वेन परिणता इत्यर्थः, तदाश्रिता वा कृमिकुन्थुपिपीलिकागण्डूपदाहिमण्डूककृश्चिककर्कटकादयः, तथा वृक्षगुल्मलतावितानादयः, तथा तृणपत्रनिश्रिताः पत्तङ्गेलिकादयः, तथा काष्ठनिश्रिता—घुणोद्देहिकापिपीलिकाऽण्डादयः, गोमयनिश्रिताः—कुन्थुपनकादयः, कचवरः—पत्रतृणधूलिसमुदायस्तन्निश्रिताः

कृमिकीटपतङ्गादयः। तथा 'सन्ति' विद्यन्ते सम्पतितुमुत्प्लुत्योत्प्लुत्य गन्तुमागन्तुं वा शीलं येषां ते सम्पातिनः प्राणिनो—जीवा मक्षिकाभ्रमरपतङ्गमशकपक्षिवातादयः, एते च सम्पातिनः 'आहत्य' उपेत्य स्वत एव, यदिवा अत्यर्थं कदाचिद्वा अग्निशिखायां सम्पतन्ति च। तदेवं पृथिव्यादिनिश्रितानां जीवानां यद्भवति तद्दर्शयितुमाह—'अगणिं चे'त्यादि, रन्धनपचनतापनाद्यग्निगुणार्थिभिरवश्यमग्निसमारम्भो विधेयः, तत्समारम्भे च पृथिव्यादिनिश्रितानां जीवानामेता वक्ष्यमाणा अवस्था भवन्ति, छान्दसत्वात् तृतीयार्थे द्वितीया, ततश्चायमर्थः—अग्निना 'स्पृष्टाः'छुप्ता एके केचन सङ्घातम्—अधिकं गात्रसङ्कोचनं मयूरपिच्छवदापद्यन्ते, चशब्दस्याधिक्यार्थत्वात्, खलुशब्दोऽवधारणे, अग्नेरेवायं प्रतापो नापरस्येति, यदिवा सप्तम्यर्थे द्वितीया स्पृष्टशब्दश्च पतितवचनः, ततश्चायमर्थो भवति-अग्नावेव स्पृष्टाः—पतिता 'एके'शलभादयः 'सङ्घातं' समेकीभावेनाधिकं गात्रसङ्कोचनम् 'आपद्यन्ते' प्राप्नुवन्ति, ये च 'तत्र'अग्नौ पतिताः सङ्घातमापद्यन्ते ते प्राणिनः 'तत्र'अग्नौ पर्यापद्यन्ते, पर्यापत्तिः—सम्मूर्छनम्, ऊष्माभिभूता मूर्छामापद्यन्ते इत्यर्थः। अथ किमर्थं सूत्रकृता विभक्तिपरिणामोऽकारीति, उच्यते, मागधदेशीसमनुवृत्तेः व्याख्याविकल्पप्रदर्शनार्थं वा, अध्याहारादयोऽपि व्याख्याङ्गानीत्यनेन शिष्यो ज्ञापितो भवति। अथ के पुनस्तेऽध्याहारादय इति?, उच्यन्ते, अध्याहारो विपरिणामो व्यवहितकल्पना गुणकल्पना लक्षणा वाक्यभेदश्चेति, इह च द्वितीयाविभक्तेः सप्तमीपरिणामः कृत इति। ये च 'तत्र'अग्नौ पर्यापद्यन्ते ते प्राणिनः कृमिपिपीलिकाभ्रमरनकुलादयस्तत्राग्नावपद्रावन्ति-प्राणान् मुञ्चन्तीत्यर्थः, तदेवमग्निसमारम्भे सति न केवलमग्निजन्तूनां विनाशः किं त्वन्येषामपि पृथिवीतृणपत्रकाष्ठगोमयकचवराश्रितानां सम्पातिनां च व्यापत्तिरवश्यम्भाविनीति, अत एव च भगवत्यां भगवतोक्तम्—"दो पुरिसा सरिसवया अन्नमन्नेहिं सद्धिं अगणिकायं समारंभंति, तत्थ णं एगे पुरिसे अगणिकायं समुज्जालेति, एगे विज्झवेति, तत्थ णं के पुरिसे महाकम्मयराए? के पुरिसे अप्पकम्मयराए?, गोयमा! जे उज्जालेति से महाकम्मयराए, जे विज्झवेति से अप्पकम्मयराए"[1] ॥ तदेवं प्रभूतसत्त्वोपमर्दैनकरमग्न्यारम्भं विज्ञाय मनोवाक्कायैः कृतकारितानुमतिभिश्च तत्परिहारः कार्य इति दर्शयितुमाह—

एत्थ सत्थं असमारंभमाणस्स इच्चेते आरंभा परिण्णाया भवंति, तं परिण्णाय मेहावी णेव सयं अगणिसत्थं समारंभे नेवऽण्णेहिं अगणिसत्थं समारंभावेज्जा अगणिसत्थं समारंभमाणे अण्णे न समणुजाणेज्जा, जस्सेते अगणिकम्मसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे (सू० ३८) त्ति बेमि ॥ इति चतुर्थ उद्देशकः ॥

'अत्र' अग्निकाये 'शस्त्रं' स्वकायपरकायभेदभिन्नं 'समारभमाणस्य' व्यापारयत इत्येते आरम्भाः पचनपाचनादयो बन्धहेतुत्वेनापरिज्ञाता भवन्ति, तथा अत्रैवाग्निकाये शस्त्रमसमारभमाणस्यैते आरम्भाः परिज्ञाता भवन्ति, यस्यैते अग्नि-

[1] द्वौ पुरुषौ सदृशवयसौ अन्योऽन्यं समकमग्निकायं समारम्भयतः, तत्रैकः पुरुषोऽग्निकायं समुज्ज्वलयति, एको विध्यापयति, तत्र कः पुरुषो महाकर्मा कः पुरुषोऽल्पकर्मा?, गौतम! य उज्ज्वलयति स महाकर्मा यो विध्यापयति सोऽल्पकर्मा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायसमारम्भा ज्ञपरिज्ञया ज्ञाता भवन्ति प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति स एव मुनिः परमार्थतः परिज्ञातकर्मेति ब्रवीमीति पूर्ववत्। इति शस्त्रपरिज्ञायां चतुर्थोद्देशकटीका समाप्ता ॥

उक्तश्चतुर्थोद्देशकः, साम्प्रतं पञ्चमः समारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके तेजस्कायः प्रतिपादितः, तदनन्तरमविकलसुसाधुगुणप्रतिपत्तये क्रमायातवायुकायप्रतिपादनावसरे वनस्पतिकायजीवस्वरूपमाविर्भाव्यते, किं पुनः क्रमोल्लङ्घनकारणमिति, उच्यते, एष हि वायुरचाक्षुषत्वाद्दुःश्रद्धानः, अतः समधिगताशेषपृथिव्याद्येकेन्द्रियप्राणिगणस्वरूपः शिष्यः सुखमेव वायुजीवस्वरूपं प्रतिपत्स्यते, स एव च क्रमो येन शिष्याः जीवादितत्त्वं प्रति प्रोत्सहन्ते यथावत्प्रतिपत्तुमिति, वनस्पतिकायस्तु समस्तलोकप्रत्यक्षपरिस्फुटजीवलिङ्गकलापोपेतः, अतः स एव तावत्प्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्य चत्वार्यनुयोगद्वाराणि वाच्यानि यावन्नामनिष्पन्ने निक्षेपे वनस्पत्युद्देशकः, तत्र वनस्पतेः स्वभेदकलापप्रतिपादनाय पूर्वप्रसिद्धार्थातिदेशद्वारेण निर्युक्तिकृदाह—

पुढवीए जे दारा वणसइकाएऽवि हुंति ते चेव। नाणत्ती उ विहाणे परिमाणुवभोगसत्थे य ॥ १२६ ॥

यानि पृथ्वीकायसमधिगतये द्वाराण्युक्तानि तान्येव वनस्पतौ द्रष्टव्यानि, नानात्वं तु प्ररूपणापरिमाणोपभोगशस्त्रेषु चशब्दाल्लक्षणे च द्रष्टव्यमिति ॥ तत्रादौ प्ररूपणास्वरूपनिर्ज्ञापनायाह—

दुविह वणस्सइजीवा सुहुमा तह बायरा य लोगंमि। सुहुमा य सव्वलोए दो चेव य बायरविहाणा ॥१२७॥

वनस्पतयो द्विविधाः–सूक्ष्मा बादराश्च, सूक्ष्माः सर्वलोकापन्नाश्चक्षुर्ग्राह्याश्च न भवन्त्येकाकारा एव, बादराणां पुनर्द्वे विधाने ॥ के पुनस्ते बादरविधाने इत्यत आह—

पत्तेया साहारण बायरजीवा समासओ दुविहा। बारसविहऽणेगविहा समासओ छव्विहा हुंति ॥ १२८ ॥

बादराः समासतः द्विविधाः–प्रत्येकाः साधारणाश्च, तत्र पत्रपुष्पमूलफलस्कन्धादीन् प्रति प्रत्येको जीवो येषां ते प्रत्येकजीवाः, साधारणास्तु परस्परानुविद्धानन्तजीवसङ्घातरूपशरीरावस्थानाः, तत्र प्रत्येकशरीरा द्वादशविधानाः, साधारणास्त्वनेकभेदाः, सर्वेऽप्येते समासतः षोढा प्रत्येतव्याः ॥ तत्र प्रत्येकतरुद्वादशभेदप्रत्यायनायाह—

रुक्खा गुच्छा गुम्मा लया य वल्ली य पव्वगा चेव। तणवलयहरियओसहिजलरुहकुहणा य बोद्धव्वा ॥१२९॥

वृक्षयन्त इति वृक्षाः, ते द्विविधाः–एकास्थिका बहुबीजकाश्च, तत्रैकास्थिकाः–पिचुमन्दाम्रकोशम्बशालाङ्कोलपीलुशल्लक्यादयः, बहुबीजकास्तु–उदुम्बरकपित्थास्तिकतिन्दुकबिल्वामलकपनसदाडिममातुलिङ्गादयः, गुच्छास्तु–वृन्ताकीकर्पासीजपाआढकीतुलसीकुसुम्भरीपिप्पलीनील्यादयः, गुल्मानि तु–नवमालिकासेरियककोरण्टकबन्धुजीवकबाणकरवीरसिन्दुवारविचकिलजातियूथिकादयः, लतास्तु–पद्मनागाशोकचम्पकचूतवासन्तीअतिमुक्तककुन्दलताद्याः, वल्यस्तु–कुष्माण्डीकालिङ्गीत्रपुषीतुम्बीवालुङ्कीएलालुकीपटोल्यादयः, पर्वगाः पुनः–इक्षुवीरणशुण्ठशरवेत्रशतपर्ववंशनलवेणुकादयः तृणानि तु–श्वेतिकाकुशदर्भपर्वकाज्जुनसुरभिकुरुविन्दादीनि, वलयानि च–तालतमालतककलीशालसरलकेतकीकदलीक-

१ शतपत्री. प्र. २ वर्चका. प्र.

न्दल्यादीनि, हरितानि–तन्दुलीयकाधूयारुहवस्तुलवदरकमार्जारपादिकाचिल्लीपालक्यादीनि, औषध्यस्तु–शालीव्रीहिगोधूमयवकलममसूरतिलमुद्गमाषनिष्पावकुलत्थातसीकुसुम्भकोद्रवकङ्गवादयः, जलरुहा–उदकावकपनकशैवलकलम्बुकापावकककशेरुकउत्पलपद्मकुमुदनलिनपुण्डरीकादयः, कुहुणास्तु–भूमिस्फोटकाभिधानाः आयकायकुहुणकुण्डुकोदेहलिकाशालाकासर्पच्छत्रादयः, एषां हि प्रत्येकजीवानां वृक्षाणां मूलस्कन्धकन्दत्वक्शालप्रवालादिष्वसंख्येयाः प्रत्येकं जीवाः, पत्राणि पुष्पाणि चैकजीवानि मन्तव्यानि, साधारणास्त्वनेकविधाः, तद्यथा–लोहीनिहुस्तुभायिकाअश्वकर्णीसिंहकर्णीशुक्लवेरमालुकामूलककृष्णकन्दसूरणकन्दकाकोलीक्षीरकाकोलीप्रभृतयः ॥ 'सर्वेऽप्येते संक्षेपात् षोढा भवन्ती'त्युक्तं, के पुनस्ते भेदा इत्याह—

अग्गबीया मूलबीया खंधबीया चेव पोरबीया य। बीयरुहा समुच्छिम समासओ वणसईजीवा ॥ १३० ॥

तत्र कोरिण्टकादयोऽग्रबीजाः, कदल्यादयो मूलबीजाः, निहुशल्लकथरणिकादयः स्कन्धबीजाः, इक्षुवंशवेत्रादयः पर्वबीजाः, बीजरुहाः शालिव्रीह्यादयः, सम्मूर्च्छनजाः पद्मिनीशृङ्गाटकपाठशैवलादयः, एवमेते समासात्तरुजीवाः षोढा कथिताः, नान्ये सन्तीति प्रतिपत्तव्यं ॥ किंलक्षणाः पुनः प्रत्येकतरवो भवन्तीत्यत आह—

जह सगलसरिसवाणं सिलेसमिस्साण वत्तिया वट्टी। पत्तेयसरीराणं तह हुंति सरीरसंघाया ॥ १३१ ॥

यथेति दृष्टान्तोपन्यासार्थः, यथा सकलसर्षपाणां श्लेष्यतीति श्लेषः–सर्जरसादिस्तेन मिश्रितानां 'वर्त्तिता' बलिता वर्त्तिः

१ °त्रिहरी° प्र. २ °पावाक° प्र. ३ कुहणेति वि०. ४ °वेरा° प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां च वर्तौ प्रत्येकप्रदेशाः क्रमेण सिद्धार्थकाः स्थिताः, नान्योऽन्यानुवेधेन, चूर्णितास्तु कदाचिदन्योऽन्यानुवेधभाजोऽपि स्युरित्यतः सकलग्रहणं, यथाऽसौ वर्त्तिस्तथा प्रत्येकतरुशरीरसङ्घातः, यथा च सर्षपास्तथा तदधिष्ठायिनो जीवाः, यथा श्लेषविमिश्रितास्तथा रागद्वेषप्रचितकर्मपुद्गलोदयमिश्रिताः जीवाः, पश्चिमार्द्धेन गाथाया उपन्यस्तदृष्टान्तेन सह साम्यं प्रतिपादितं, तथेति शब्दोपादानादिति ॥ अस्मिन्नेवार्थे दृष्टान्तान्तरमाह—

जह वा तिलसक्कुलिया बहुएहिं तिलेहिं मेलिया संती । पत्तेयसरीराणं तह होंति सरीरसंघाया ॥ १३२ ॥

यथा वा तिलशष्कुलिका–तिलप्रधाना पिष्टमयपोलिका बहुभिस्तिलैर्निष्पादिता सती भवति, तथा प्रत्येकशरीराणां तरूणां शरीरसङ्घाता भवन्तीति द्रष्टव्यमिति ॥ साम्प्रतं प्रत्येकशरीरजीवानामेकानेकाधिष्ठितत्वप्रतिपिपादयिषयाऽऽह—

नाणाविहसंठाणा दीसंती एगजीविया पत्ता । खंधावि एगजीवा तालसरलनालिएरीणं ॥ १३३ ॥

नानाविधं–भिन्नं संस्थानं येषां तानि नानाविधसंस्थानानि पत्राणि यानि चैवंभूतानि दृश्यन्ते तान्येकजीवाधिष्ठितान्यवगन्तव्यानि, तथा स्कन्धा अप्येकजीवाधिष्ठितास्तालसरलनालिकेर्यादीनां, नात्रानेकजीवाधिष्ठितत्वं सम्भवतीति, अवशिष्टानां त्वनेकजीवाधिष्ठितत्वं सामर्थ्यात्प्रतिपादितं भवति ॥ साम्प्रतं प्रत्येकतरुजीवराशिपरिमाणाभिधित्सयाऽऽह—

पत्तेया पज्जत्ता सेढीएँ असंखभागमित्ता ते । लोगासंखप्पज्जत्तगाण साहारणाणंता ॥ १३४ ॥

प्रत्येकतरुजीवाः पर्याप्तकाः संवर्त्तितचतुरस्रीकृतलोकश्रेण्यसंख्येयभागवर्त्याकाशप्रदेशराशितुल्यप्रमाणाः, एते च पुनर्बादरतेजस्कायपर्याप्तकराशेरसङ्खेयगुणाः, ये पुनरपर्याप्तकाः प्रत्येकतरुजन्तवः ते ह्यसङ्खेयानां लोकानां यावन्तः प्रदेशास्तावन्त इति, एतेऽप्यपर्याप्तका बादरतेजस्कायजीवराशेरसङ्खेयगुणाः, सूक्ष्मास्तु वनस्पतयः प्रत्येकशरीरिणः पर्याप्तका अपर्याप्तका वा न सन्त्येव, साधारणास्त्वनन्ता इति विशेषानुपादानात्, साधारणाः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदेन चतुर्विधा अपि पृथक् पृथगनन्तानां लोकानां यावन्तः प्रदेशास्तावन्त इति, अयं तु विशेषः–साधारणबादरपर्याप्तकेभ्यो बादरा अपर्याप्तका असंख्येयगुणाः बादरापर्याप्तकेभ्यः सूक्ष्माः अपर्याप्तका असङ्खेयगुणास्तेभ्योऽपि सूक्ष्माः पर्याप्तकाः असङ्खेयगुणा इति ॥ सम्प्रत्येषां तरूणां यो जीवत्वं नेच्छति तं प्रति जीवत्वप्रतिपादनेच्छया निर्युक्तिकृदाह—

एएहिं सरीरेहिं पच्चक्खं ते परूविया जीवा । सेसा आणागिज्झा चक्खुणा जे न दीसंति ॥ १३५ ॥

'एतैः' पूर्वप्रतिपादितैस्तरुशरीरैः प्रत्यक्षप्रमाणविषयैः 'प्रत्यक्षं' साक्षात् 'ते' वनस्पतिजीवाः 'प्ररूपिताः' प्रसाधिताः, तथाहि—न ह्येतानि शरीराणि जीवव्यापारमन्तरेणैवंविधाकारभाञ्जि भवन्ति, तथा च प्रयोगः–जीवशरीराणि वृक्षाः, अक्षाद्युपलब्धिभावात्, पाण्यादिसङ्घातवत्, तथा कदाचित् सचित्ता अपि वृक्षाः, जीवशरीरत्वात्, पाण्यादिसङ्घातवदेव, तथा मन्दविज्ञानसुखादिमन्तस्तरवः, अव्यक्तचेतनानुगतत्वात्, सुप्तादिपुरुषवत्, तथा चोक्तम्—"वृक्षादयोऽक्षाद्युपलब्धिभावात्पाण्यादिसङ्घातवदेव देहाः । तद्वत्सजीवा अपि देहतायाः, सुप्तादिवत् ज्ञानसुखादिमन्तः ॥ १ ॥" 'शेषा' इति सूक्ष्मास्ते च चक्षुषा नोपलभ्यन्त इत्याज्ञया ग्राह्या इति, आज्ञा च भगवद्वचनमवितथमरक्तद्विष्टप्रणीतमिति श्रद्धातव्यमिति ॥ साम्प्रतं साधारणलक्षणमभिधित्सुराह—

साहारणमाहारो साहारण आणपाणगहणं च । साहारणजीवाणं साहारणलक्खणं एयं ॥ १३६ ॥

समानम्–एकं धारणम्–अङ्गीकरणं शरीराहारादेर्येषां ते साधारणाः तेषां साधारणानाम्–अनन्तकायानां जीवानां 'साधारणं' सामान्यमेकमाहारग्रहणं तथा प्राणापानग्रहणं च साधारणमेव, एतत्साधारणलक्षणम्, एतदुक्तं भवति–एकस्मिन्नाहारितवति सर्वेऽप्याहारितवन्तस्तथैकस्मिन्नुच्छ्वसिते निःश्वसिते वा सर्वेऽप्युच्छ्वसिता निःश्वसिता वेति ॥ अमुमेवार्थं स्पष्टयितुमाह—

एगस्स उ जं गहणं बहूण साहारणाण तं चेव । जं बहुयाणं गहणं समासओ तंपि एगस्स ॥ १३७ ॥

एको यदुच्छ्वासनिःश्वासयोग्यपुद्गलोपादानं विधत्ते बहूनामपि साधारणजीवानां तदेव भवति, तथा यच्च बहवो ग्रहणमकार्षुरेकस्यापि तदेवेति ॥ अथ ये बीजात्प्ररोहन्ति वनस्पतयस्तेषां कथमाविर्भाव इत्यत आह—

जोणिब्भूए बीए जीवो वक्कमइ सो व अन्नो वा । जोऽवि य मूले जीवो सो चिय पत्ते पढमयाए ॥ १३८ ॥

अत्र भूतशब्दोऽवस्थावचनः, योन्यवस्थे बीजे योनिपरिणाममजहतीत्यर्थः, बीजस्य हि द्विविधावस्था–योन्यवस्था अयोन्यवस्था च, यदा योन्यवस्थां न जहाति बीजमुज्झितं च जन्तुना तदा योनिभूतमुच्यते, योनिस्तु जन्तोरुत्पत्तिस्थानमविनष्टमिति, तस्मिन् बीजे योनिभूते जीवो 'व्युत्क्रामति' उत्पद्यते, स एव पूर्वको बीजजीवोऽन्यो वाऽऽगत्य तत्रोत्पद्यते, एतदुक्तं भवति–यदा जीवेनायुषः क्षयाद्बीजपरित्यागः कृतो भवति, तस्य च यदा बीजस्य क्षित्युदकादिसंयोगस्तदा कदाचित्स एव प्राक्तनो जीवस्तत्रागत्य परिणमते कदाचिदन्य इति, यश्च मूलतया जीवः परिणमते स एव प्रथम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्रतयाऽपीति, एकजीवकर्तृके मूलपत्रे इतियावत्, प्रथमपत्रकं च याऽसौ बीजस्य समुच्छ्वनावस्था भूजलकालापेक्षा सैवोच्यत इति, नियमप्रदर्शनमेतत्, शेषं तु किशलयादि सकलं न मूलजीवपरिणामाविर्भावितमेवेत्यवगन्तव्यमिति ॥ यत उक्तम्—"सव्वोऽवि किसलओ खलु उग्गममाणो अणन्तओ भणिओ"[1] इत्यादि ॥ तथाऽपरं साधारणलक्षणमभिधित्सुराह—

चक्कागं भज्जमाणस्स गंठी चुण्णघणो भवे । पुढविसरिसभेएणं अणंतजीवं वियाणेहि ॥ १३९ ॥

यस्य मूलकन्दत्वक्पत्रपुष्पफलादेर्भज्यमानस्य चक्रकं भवति, चक्राकारः समच्छेदो भङ्गो भवतीतियावत्, यस्य च ग्रन्थिः-पर्व भङ्गस्थानं वा 'चूर्णेन' रजसा 'घनो' व्याप्तो भवति, यो वा भिद्यमानो वनस्पतिः पृथिवीसदृशेन भेदेन केदारोपरिशुष्कत्वरिकावत् पुटभेदेन भिद्यते, तमनन्तकायं विजानीहि ॥ तथा लक्षणान्तरमाह—

गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं । जं पुण पणट्ठसंधिय अणंतजीवं वियाणाहि ॥ १४० ॥

स्पष्टार्था ॥ एवं साधारणजीवान् लक्षणतः प्रतिपाद्य सम्प्रति नामग्राहमनन्तान् वनस्पतीन् दर्शयितुमाह—

सेवालकत्थभाणियअवए पणए य किंनए य हढे । एए अणंतजीवा भणिया अण्णे अणेगविहा ॥ १४१ ॥

सेवालकत्थभाणिकाऽवकपनककिण्वहठादयोऽनन्तजीवा गदिता अनेकप्रकाराश्चान्येऽपीत्थमवगन्तव्या इति ॥ सम्प्रति प्रत्येकतरूणामेकादिजीवपरिगृहीतशरीरदृश्यत्वं प्रतिपिपादयिषयाह—

एगस्स दुण्ह तिण्ह व संखिज्जाण व तहा असंखाणं । पत्तेयसरीराणं दीसंति सरीरसंघाया ॥ १४२ ॥

१ सर्वोऽपि किशलयः खल्वुच्छ्वसनन्तको भणितः.

एकजीवपरिगृहीतशरीरं तालसरलनालिकेर्यादिस्कन्धः, स च चक्षुर्ग्राह्यः, तथा बिसमृणालकर्णिकाकुणककटाहानामेकजीवपरिगृहीतत्वं चक्षुर्दृश्यत्वं च, द्वित्रिसङ्ख्येयासङ्ख्येयजीवपरिगृहीतत्वमप्येवं दृश्यतया भावनीयमिति ॥ किमनन्तानामप्येवं ?, नेत्यत आह—

इक्कस्स दुण्ह तिण्ह व संखिज्जाण व न पासिउं सक्का । दीसंति सरीराइं निओयजीवाणऽणंताणं ॥ १४३ ॥

नैकादीनामसङ्ख्येयावसानानामनन्ततरुजीवानां शरीराण्युपलभ्यन्ते, कुतः ?, अभावात्, न ह्येकादिजीवपरिगृहीतान्यनन्तानां शरीराणि सन्ति, अनन्तजीवपिण्डत्वादेव, कथं तर्ह्युपलभ्यास्ते भवन्तीति दर्शयति—दृश्यन्ते शरीराणि बादरनिगोदानामनन्तजीवानां, सूक्ष्मनिगोदानां तु नोपलभ्यन्ते, अनन्तजीवसङ्घातत्वे सत्यप्यतिसूक्ष्मत्वादिति भावः, निगोदास्तु नियमत एवानन्तजीवसङ्घाता भवन्तीति, उक्तं च—"गोला य असंखेज्जा हुंति णिओआ असङ्खया गोले । एक्केको य निओए अणंतजीवो मुणेयव्वो ॥ १ ॥" एवं वनस्पतीनां वृक्षादिप्रत्येकादिभेदात्तथा वर्णगन्धरसस्पर्शभेदात् सहस्राग्रशो विधानानि सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भेदानामवसेयानीति, तथाहि-वनस्पतीनां संवृता योनिः, सा च सचित्ताचित्तमिश्रभेदात् त्रिधा, तथा शीतोष्णमिश्रभेदाच्च, तथा प्रत्येकतरूणां दश लक्षा योनिभेदानां, साधारणानां च चतुर्दश, कुलकोटीनां, द्वयोरपि पञ्चविंशतिकोटिशतसहस्राणीति ॥ उक्तं विधानद्वारम्, इदानीं परिमाणमभिधीयते—तत्र प्रथमं सूक्ष्मानन्तजीवानां दर्शयितुमाह—

१ गोलाश्चासङ्ख्येया भवन्ति निगोदा असङ्ख्येया गोले । एकैकश्च निगोदोऽनन्तजीवो मुणितव्यः ॥ १ ॥

पत्थेण व कुडवेण व जह कोइ मिणिज्ज सव्वधण्णाइं । एवं मविज्जमाणा हवंति लोया अणंता उ ॥ १४४ ॥

प्रस्थकुडवादिना यथा कश्चित्सर्वधान्यानि प्रमिणुयात्, मित्वा चान्यत्र प्रक्षिपेद्, एवं यदि नाम कश्चित्साधारणजीवराशिं लोककुडवेन मित्वाऽन्यत्र प्रक्षिपेत् तत एवं मीयमाना अनन्ता लोका भवन्तीति ॥ इदानीं बादरनिगोदपरिमाणाभिधित्सयाऽऽह—

जे बायरपज्जत्ता पयरस्स असंखभागमित्ता ते । सेसा असंखलोया तिन्निवि साहारणाणंता ॥ १४५ ॥

ये पर्याप्तकबादरनिगोदास्ते संवर्तितचतुरश्रीकृतसकललोकप्रतरासङ्ख्येयभागवर्तिप्रदेशराशिपरिमाणा भवन्ति, एते पुनः प्रत्येकशरीरबादरवनस्पतिपर्याप्तकजीवेभ्योऽसङ्ख्येयगुणाः, शेषास्त्रयोऽपि राशयः प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशपरिमाणाः, के पुनस्त्रय इति ?, उच्यन्ते, अपर्याप्तकबादरनिगोदा अपर्याप्तकसूक्ष्मनिगोदाः पर्याप्तकसूक्ष्मनिगोदाः, एते च क्रमशो बहुतरका द्रष्टव्या इति, साधारणजीवास्तेभ्योऽनन्तगुणाः, एतच्च जीवपरिमाणं, प्राक्तनं तु राशिचतुष्टयं निगोदपरिमाणमिति ॥ परिमाणद्वारानन्तरमुपभोगद्वारमभिधित्सुराह—

आहारे उवगरणे सयणासण जाण जुग्गकरणे य । आवरण पहरणेसु अ सत्थविहाणेसु अ बहुसु ॥१४६॥

आहारः—फलपत्रकिशलयमूलकन्दत्वगादिनिर्वर्त्यः, उपकरणं व्यजनकटककवलकार्गलादि, शयनं—खट्वाफलकादि, आसनम्—आसन्दकादि, यानं—शिबिकादि, युग्यं—गन्त्रिकादि, आवरणम्—फलकादि, प्रहरणं—लकुटमुसुण्ढ्यादि, शस्त्रविधानानि च बहूनि तन्निर्वर्त्यानि, शरदात्रखड्गक्षुरिकादिगण्डोपयोगित्वादिति ॥ तथाऽपरोऽपि परिभोगविधिः, तद्दर्शनायाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आउज्ज कट्ठकम्मे गंधंगे वत्थ मल्ल जोए य । झावणविप्पावणेसु अ तिल्लविहाणे अ उज्जोए ॥ १४७ ॥

आतोद्यानि–पटहभेरीवंशवीणाझल्लर्यादीनि, काष्ठकर्म्म–प्रतिमास्तम्भद्वारशाखादि, गन्धाङ्गानि–वालकप्रियङ्गुपत्रकदमनकत्वक्कन्दनोशीरदेवदार्वादीनि, वस्त्राणि–वल्कलकार्पासमयादीनि, माल्ययोगा–नवमालिकाबकुलचम्पकपुन्नागाशोकमालतीविचकिलादयः, ध्मापनं–दाहो भस्मसात्करणमिन्धनैः, तापनं–शीताभ्यर्दितस्य शीतापनयनाय काष्ठप्रज्वालनात्, तैलविधानं–तिलातसीसर्षपेङ्गुदीज्योतिष्मतीकरञ्जादिभिः, उद्योतो–वर्त्तितृणचूडाकाष्ठादिभिरिति ॥ एवमेतान्युपभोगस्थानानि प्रतिपाद्य तदुपसञ्जिहीर्षुराह—

एएहिं कारणेहिं हिंसंति वणस्सई बहू जीवे । सायं गवेसमाणा परस्स दुक्खं उदीरंति ॥ १४८ ॥

'एतैः' गाथाद्वयोपात्तैः 'कारणैः' प्रयोजनैः 'हिंसन्ति' व्यापादयन्ति प्रत्येकसाधारणवनस्पतिजीवान् बहून् वनस्पतिसमारम्भिणः पुरुषाः, किंभूतास्त इति दर्शयति—'सातं' सुखं तदन्वेषिणः 'परस्य' वनस्पत्याद्येकेन्द्रियादेः 'दुःखं' बाधामुत्पादयन्ति ॥ साम्प्रतं शस्त्रमुच्यते–तच्च द्विधा-द्रव्यभावभेदात्, द्रव्यशस्त्रमपि समासविभागभेदात् द्विधैव, तत्र समासद्रव्यशस्त्राभिधित्सयाऽऽह—

कप्पणिकुहाणिअसियगदत्तियकुद्दालचासिपरसू अ । सत्थं वणस्सईए हत्था पाया मुहं अग्गी ॥ १४९ ॥

कल्प्यते–छिद्यते यया सा कल्पनी–शस्त्रविशेषः, कुठारी प्रसिद्धैव, असियगं–दात्रं, दात्रिका–प्रसिद्धा, कुदालकवासिपरशवश्च, एते वनस्पतेः शस्त्रं, तथा हस्तपादमुखाग्नयश्च इत्येतत्सामान्यशस्त्रमिति ॥ विभागशस्त्राभिधित्सयाऽऽह—

आ. सू. ११

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ६१ ॥

किंची सकायसत्थं किंची परकाय तदुभयं किंचि । एयं तु दव्वसत्थं भावे य असंजमो सत्थं ॥ १५० ॥

किञ्चित् स्वकायशस्त्रं–लकुटादि किञ्चिच्च परकायशस्त्रं–पाषाणाश्यादि तथोभयशस्त्रं–दात्रदात्रिकाकुठारादि, एतद् द्रव्यशस्त्रं, भावशस्त्रं पुनरसंयमः दुष्प्रणिहितमनोवाक्कायलक्षण इति ॥ सकलनिर्युक्त्यर्थपरिसमाप्तिप्रचिकटयिषयाऽऽह—

अध्ययनं १

उद्देशकः ५

सेसाइं दाराइं ताइं जाइं हवंति पुढवीए । एवं वणस्सईए निज्जुत्ती कित्तिया एसा ॥ १५१ ॥

उक्तव्यतिरिक्तशेषाणि तान्येव द्वाराणि यानि पृथिव्यामभिहितानि ततस्तद्वाराभिधानाद्वनस्पतौ निर्युक्तिः 'कीर्त्तिता' व्यावर्णितेति ॥ साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

तं णो करिस्सामि समुट्ठाए, मत्ता मइमं, अभयं विदित्ता, तं जे णो करए, एसोवरए, एत्थोवरए, एस अणगारेत्ति पवुच्चई (सू० ३९)

॥ ६१ ॥

अस्य चानन्तरपरम्परादिसूत्रैः सम्बन्धः प्राग्वद्वाच्यः, उक्तं प्राक् 'सातान्वेषिणो हि वनस्पतिजन्तूनां दुःखमुदीरयन्ति, ततश्च तन्मूलमेव दुःखगहने संसारसागरे भ्राम्यन्ति सत्त्वाः' इत्येवं विदितकटुकविपाकः समस्तवनस्पतिसत्त्वविषयविमर्दनिवृत्तिमात्यन्तिकीमात्मनि दर्शयन्नाह—'तत्' वनस्पतीनां दुःखमहं दृष्टप्रत्यपायो न करिष्ये, यदिवा तद्दुःखोत्पत्तिनिमित्तभूतं वनस्पतावारम्भं–छेदनभेदनादिरूपं नो करिष्ये मनोवाक्कायैः, तथाऽपरैर्न कारयिष्ये, तथा कुर्व्वतश्चान्यान्नानुमंस्ये, किं कृत्वेति दर्शयति–सर्वज्ञोपदिष्टमार्गानुसृत्या सम्यक् प्रव्रज्योत्थानेनोत्थाय समुत्थाय, प्रव्रज्यां प्रतिपद्येत्यर्थः, तदेवं वर्जितसकलसावद्यारम्भकलापः संस्तद्वनस्पतिदुःखं तदारम्भं वा नो करिष्यामीति, अनेन च संयमक्रिया दर्शिता, न च क्रियात एव मोक्षावाप्तिः, किं तर्हि?, ज्ञानक्रियाभ्यां, तदुक्तम्—"नाणं किरियारहियं किरियामेत्तं च दोऽवि एगन्ता । न समत्था दाउं जे जम्ममरणवुक्खदाहाइं ॥ १ ॥"[1] यत एवमतो विशिष्टमोक्षकारणभूतज्ञानप्रतिपिपादयिषयाऽऽह—'मत्ता मइमं' मत्वा–ज्ञात्वा अवबुध्य यथावत् जीवान्, मतिरस्यास्तीति मतिमान्, मतिमानेवोपदेशार्हो भवतीत्यतस्तद्वारेणैव शिष्यामन्त्रणं हे मतिमन्! प्रव्रज्यां प्रतिपद्य जीवादिपदार्थांश्च ज्ञात्वा मोक्षमवाप्नोतीति, सम्यग्ज्ञानपूर्विका हि क्रिया फलवतीति दर्शितं भवति । पुनरत्रैवाह—'अभयं विदित्ता' अविद्यमानं भयमस्मिन्सत्त्वानामित्यभयः–संयमः, स च सप्तदशविधानस्तं चाभयं–सर्वभूतपरिपालनात्मकं संसारसागरान्निर्वाहकं विदित्वा वनस्पत्यारम्भान्निवृत्तिर्विधेयेति । एतदेव दर्शयितुमाह—'तं जे नो करए' इत्यादि, 'तं' वनस्पत्यारम्भं 'यो' विदितततदारम्भकटुकविपाकः नो कुर्यात्, तस्य प्रतिविशिष्टेष्टफलावाप्तिर्नान्यस्यान्धमूढया प्रवर्त्तमानस्य, अभिलषितविप्रकृष्टस्थानप्राप्तिप्रवृत्तान्धक्रियाव्याघातवदिति मन्तव्यं, ज्ञानमपि क्रियाहीनं न मोक्षाय, गृहान्तर्दह्यमाननिनङ्क्षुपङ्गुचक्षुर्ज्ञानवदिति, एवं ज्ञात्वाऽभ्युपेत्य च तत्परिहारः कर्त्तव्य इति दर्शितं भवति । एवं यः सम्यग्ज्ञानपूर्विकां निवृत्तिं करोति स एव समस्तारम्भनिवृत्त इति दर्शयति—'एसोवरए'त्ति एष एव सर्वस्मादारम्भाद्वनस्पतिविषयादुपरतो यो यथावत् ज्ञात्वाऽऽरम्भं न करोतीति, स पुनरेवंविधनिवृत्तिभाङ्किं शाक्यादिष्वपि सम्भवत्युतेहैव प्रवचन इति दर्शयति—'एत्थोव-

[1] ज्ञानं क्रियारहितं क्रियामात्रं च द्वे अप्येकान्तात् । न समर्थे दातुं यानि जन्ममरणदुःखदाहकानि ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रए'त्ति एतस्मिन्नेव जैनेन्द्रे प्रवचने परमार्थत उपरतो नान्यत्र, यथाप्रतिज्ञातनिरवद्यानुष्ठायित्वादुपरतव्यपदेशभाग् भवति न शेषाः शाक्यादयः, तद्विपरीतत्वाद्, एष एव च सम्पूर्णानगारव्यपदेशमश्नुते इति दर्शयति—'एस अणगारेत्ति पवुच्चई' 'एषः' अतिक्रान्तसूत्रार्थव्यवस्थितोऽविद्यमानागारोऽनगारः प्रकर्षेण उच्यते प्रोच्यते इति, किंकृतः प्रकर्षः ?, अनगारव्यपदेशकारणभूतगुणकलापसम्बन्धकृतः प्रकर्षः, इतिशब्दोऽनगारव्यपदेशकारणपरिसमाप्तिद्योती, एतावदनगारलक्षणं नान्यदिति, ये पुनः प्रोज्झितपारमार्थिकानगारगुणाः शब्दादीन्विषयानङ्गीकृत्य प्रवर्त्तन्ते ते तु नापेक्षन्ते वनस्पतीन् जीवान्, यतो भूयांसः शब्दादयो गुणा वनस्पतिभ्य एव निष्पद्यन्ते, शब्दादिगुणेष्वेव वर्त्तमाना रागद्वेषविषमविषविघूर्णमानलोललोचना नरकादिचतुर्विधगत्यन्तःपातिनो बोद्धव्याः, तदन्तःपातिन एव च शब्दादिविषयाभिष्वङ्गिणो भवन्तीति ॥ अस्यार्थस्य प्रसिद्धये गतप्रत्यागतलक्षणमितरेतरावधारणफलं सूत्रमाह—

जे गुणे से आवट्टे जे आवट्टे से गुणे (सू० ४०)

यो 'गुणः' शब्दादिकः स आवर्त्तः, आवर्त्तन्ते—परिभ्रमन्ति प्राणिनो यत्र स आवर्त्तः—संसारः, इह च कारणमेव कार्यत्वेन व्यपदिश्यते यथा नड्वलोदकं पादरोगः, एवं य एते शब्दादयो गुणाः स आवर्त्तः, तत्कारणत्वात्, अथवैकवचनोपादानात्पुरुषोऽभिसम्बध्यते, यः शब्दादिगुणे वर्त्तते स आवर्त्ते वर्त्तते, यश्चावर्त्ते वर्त्तते स गुणे वर्तत इति, अत्र कश्चिद्योद्यचञ्चुराह—यो गुणेषु वर्त्तते स आवर्त्ते वर्त्तत इति साधु, यः पुनरावर्त्ते वर्त्तते नासौ नियमत एव गुणेषु वर्त्तते, यस्मात्साधवो वर्त्तन्त आवर्त्ते न गुणेषु तदेतत्कथमिति, अत्रोच्यते, सत्यम्, आवर्त्ते यतयो वर्त्तन्ते न गुणेषु, किन्तु रागद्वेषपूर्वकं गुणेषु वर्तनमिहाधिक्रियते, तच्च साधूनां न सम्भवति, तदभावात्, आवर्त्तोऽपि संसरणरूपो दुःखात्मको न सम्भवति, सामान्यतस्तु संसारान्तःपातित्वं सामान्यशब्दादिगुणोपलब्धिश्च सम्भवत्येवातो नोपलब्धिः प्रतिषिध्यते, रागपरिणामो द्वेषपरिणामो वा यस्तत्र स प्रतिषिध्यते, तथा चोक्तम्—"कण्णसोक्खेहिं सद्देहिं पेम्मं नाभिनिवेसए" इत्यादि, तथा—"न शक्यं रूपमद्रष्टुं, चक्षुर्गोचरमागतम् । रागद्वेषौ तु यौ तत्र, तौ बुधः परिवर्जयेत् ॥ १ ॥" कथं पुनर्गुणभूयस्त्वं वनस्पतिभ्य इति प्रदर्श्यते—वेणुवीणापटहमुकुन्दादीनामातोद्यविशेषाणां वनस्पतेरुत्पत्तिः, ततश्च मनोहराः शब्दा निष्पद्यन्ते, प्राधान्यमत्र वनस्पतेर्विवक्षितं, अन्यथा तु तन्त्रीचर्मपाण्यादिसंयोगाच्छब्दनिष्पत्तिरिति, रूपं पुनः काष्ठकर्म्मस्त्रीप्रतिमादिषु गृहतोरणवेदिकास्तम्भादिषु च चक्षूरमणीयं, गन्धा अपि हि कर्पूरपाटलालवलीलवङ्गकेतकीसरसचन्दनागुरुककोलकेलाजातिफलपत्रिकाकेसरमांसीत्वक्पत्रादीनां सुरभयो गन्धेन्द्रियाह्लादकारिणः प्रादुर्भवन्ति, रसास्तु बिसमृणालमूलकन्दपुष्पफलपत्रकण्टकमञ्जरीत्वगङ्कुरकिसलयारविन्दकेसरादीनां जिह्वेन्द्रियप्रह्लादिनो निष्पद्यन्ते अतिबहव इति, तथा स्पर्शाः पद्मिनीपत्रकमलदलमृणालवल्कलदुकूलशाटकोपधानतूलिकाप्रच्छादनपटादीनां स्पर्शनेन्द्रियसुखाः प्रादुष्यन्ति, एवमेतेषु वनस्पतिनिष्पन्नेषु शब्दादिगुणेषु यो वर्त्तते स आवर्त्ते वर्त्तते, यश्च आवर्त्तवर्त्ती स रागद्वेषात्मकत्वात् गुणेषु वर्त्तत इति, स चावर्त्तो नामादिभेदाच्चतुर्द्धा, नामस्थापने क्षुण्णे, द्रव्यावर्त्तः स्वामित्वकरणाधिकरणेषु यथासम्भवं योज्यः, स्वामित्वे नद्यादीनां क्वचिल्लविभागे जलपरिभ्रमणं द्रव्यस्यावर्त्तः,

१ कर्णसौख्येषु शब्देषु प्रेम नाभिनिवेशयेत् .

द्रव्याणां वा हंसकारण्डवचक्रवाकादीनां व्योम्नि क्रीडतामावर्त्तनादावर्त्तः, करणे तु तेनैव जलद्रव्येण भ्रमता यदन्यदावर्त्तते तृणकलिञ्जादि स द्रव्येणावर्त्तः, तथा त्रपुसीसकलोहरजतसुवर्णैरावर्त्यमानैर्यदन्यत्तदन्तःपात्यावर्त्यते स द्रव्यैरावर्त्तत इति, अधिकरणविवक्षायामेकस्मिन् जलद्रव्ये आवर्त्तस्तथा रजतसुवर्णरीतिकात्रपुसीसकेष्वेकस्थीकृतेषु बहुषु द्रव्येष्वावर्त्तः, भावावर्त्तो नामान्योऽन्यभावसङ्क्रान्तिः, औदयिकभावोदयाद्वा नरकादिगतिचतुष्टयेऽसुमानावर्त्तते, इह च भावावर्त्तेनाधिकारो न शेषैरिति ॥ अथ य एते गुणाः संसारावर्त्तकारणभूताः शब्दादयो वनस्पतेरभिनिर्वृत्तास्ते किं नियतदिग्देशभाजः उत सर्व्वदिक्षु इत्यत आह—

उड्ढं अहं तिरियं पाईणं पासमाणे रूवाइं पासति, सुणमाणे सद्दाइं सुणेति, उड्ढं अहं पाईणं मुच्छमाणे रूवेसु मुच्छति, सद्देसु आवि (सू० ४१)

प्रज्ञापकदिगङ्गीकरणादूर्द्ध्वदिग्व्यवस्थितं रूपगुणं पश्यति प्रासादतलहर्म्यादिषु, 'अध'मित्यवाङ् अधस्तात् गिरिशिखरप्रासादाधिरूढोऽधोव्यवस्थितं रूपगुणं पश्यति, अधःशब्दार्थे अवाङित्यर्थं वर्त्तते, गृहभित्त्यादिव्यवस्थितं रूपगुणं तिर्यक् पश्यति, तिर्यक्शब्देन चात्र दिशोऽनुदिशश्च परिगृह्यन्ते, ताश्चेमाः—'प्राचीन'मिति पूर्वा दिग्, एतच्चोपलक्षणम्, अन्या अप्येतदाद्यास्तिर्यग्दिशो द्रष्टव्या इति, एतासु दिक्षु पश्यन् चक्षुर्ज्ञानपरिणतो रूपादिद्रव्याणि चक्षुर्ग्राह्यतया परिणतानि पश्यति—उपलभत इत्यर्थः, तथा तासु च शृण्वन् शृणोति शब्दानुपयुक्तः श्रोत्रेण नान्यथेति ॥ अत्रोपलब्धिमात्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादितं, न चोपलब्धिमात्रात्संसारप्रपातः, किन्तु यदि मूर्च्छां रूपादिषु करोति, ततोऽस्य बन्ध इति दर्शयितुमाह— 'उड्ढ'मित्यादि पुनरूर्ध्वादेर्मूर्छासम्बन्धनार्थमुपादानं, मूर्छन् रूपेषु मूर्छति, रागपरिणामं यान् रज्यते रूपादिष्वित्यर्थः, एवं शब्देष्वपि मूर्छति, अपिशब्दः सम्भावनायां समुच्चये वा, रूपशब्दविषयग्रहणाच्च शेषा अपि गन्धरसस्पर्शा गृहीता भवन्ति, 'एकग्रहणे तज्जातीयानां ग्रहणाद्, आद्यन्तग्रहणाद्वा तन्मध्यग्रहणमवसेयमिति ॥ एवं विषयलोकमाख्याय विवक्षितमाह—

एस लोए वियाहिए एत्थ अगुत्ते अणाणाए (सू० ४२)

'एष' इति रूपरसगन्धस्पर्शशब्दविषयाख्यो लोको व्याख्यातः, लोक्यते परिच्छिद्यते इतिकृत्वा, एतस्मिंश्च प्रस्तुते शब्दादिगुणलोकेऽगुप्तो यो मनोवाक्कायैः मनसा द्वेष्टि रज्यते वा वाचा प्रार्थनं शब्दादीनां करोति कायेन शब्दादिविषयदेशमभिसर्पति, एवं यो ह्यगुप्तो भवति सोऽनाज्ञायां वर्त्तते, न भगवत्प्रणीतवचनानुसारीतियावदिति ॥ एवंगुणश्च यत्कुर्यात्तदाह—

पुणो पुणो गुणासाए, वंकसमायारे (सू० ४३)

ततश्चासावसकृच्छब्दादिगुणलुब्धो न शक्नोत्यात्मानं शब्दादिगृद्धेर्निवर्त्तयितुम्, अनिवर्त्तमानश्च पुनः पुनर्गुणास्वादो भवति, क्रियासातत्येन शब्दादिगुणानास्वादयतीत्यर्थः, तथा च यादृशो भवति तदर्शयति-वक्रः—असंयमः कुटिलो

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ६४ ॥

अध्ययनं १ उद्देशकः५

नरकादिगत्याभिमुख्यप्रवणत्वात्, समाचरणं समाचारः—अनुष्ठानं, वक्रः समाचारो यस्यासौ वक्रसमाचारः, असंयमानुष्ठायीत्यर्थः, अवश्यमेव शब्दादिविषयाभिलाषी भूतोपमर्दकारीत्यतो वक्रसमाचारः, प्राक् शब्दादिविषयलवसमास्वादनाद्गृद्धः पुनरात्मानमाचारयितुमसमर्थत्वादपथ्यामफलभोजिराजवद्विनाशमाशु संश्रयत इति ॥ एवं चासौ नितरां जितः शब्दादिविषयसमास्वादनात् 'खंतपुत्तोव्व' इदमाचरति—

पमत्तेऽगारमावसे (सू० ४४)

प्रमत्तो विषयविषमूर्छितः 'अगारं' गृहमावसति, योऽपि द्रव्यलिङ्गसमन्वितः शब्दादिविषयप्रमादवान् असावपि विरतिरूपभावलिङ्गरहितत्वात् गृहस्थ एवेति ॥ अन्यतीर्थिकाः पुनः सर्वदा सर्वथाऽन्यथावादिनोऽन्यथाकारिण इति दर्शयितुमाह—

लज्जमाणा पुढो पास, अणगारा मोत्ति एगे पवदमाणा जमिणं विरूवरूवेहिं सत्थेहिं वणस्सइकम्मसमारंभेणं वणस्सइसत्थं समारभमाणा अण्णे अणेगरूवे पाणे विहिंसंति, तत्थ खलु भगवया परिण्णा पवेदिता, इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जातीमरणमोयणाए दुक्खपडिघायहेउं से सयमेव वणस्सइसत्थं समारंभइ अण्णेहिं वा वणस्सइसत्थं समारंभावेइ अण्णे वा वणस्सइसत्थं समारभमाणे समणुजाणइ, तं से अहियाए तं से अबोहीए, से तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवओ अणगाराणं वा अंतिए इहमेगेसिं णायं भवति—एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णरए, इच्चत्थं गड्ढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं वणस्सइकम्मसमारंभेणं वणस्सइसत्थं समारंभमाणे अण्णे अणेगरूवे पाणे विहिंसंति (सू० ४५)

॥ ६४ ॥

प्राग्वत् ज्ञेयं, नवरं वनस्पत्यालापो विधेय इति ॥ साम्प्रतं वनस्पतिजीवास्तित्वे लिङ्गमाह—

से बेमि इमंपि जाइधम्मयं एयंपि जाइधम्मयं इमंपि वुड्ढिधम्मयं एयंपि वुड्ढिधम्मयं इमंपि चित्तमंतयं एयंपि चित्तमंतयं इमंपि छिण्णं मिलाइ एयंपि छिण्णं मिलाइ इमंपि आहारगं एयंपि आहारगं इमंपि अणिच्चयं एयंपि अणिच्चयं इमंपि असासयं एयंपि असासयं इमंपि चओवचइयं एयंपि चओवचइयं इमंपि विपरिणामधम्मयं एयंपि विपरिणामधम्मयं (सू० ४६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽनुपलब्धतत्त्वो ब्रवीमि, अथवा वनस्पतिचैतन्यं प्रत्यक्षप्रमाणसमधिगम्यमानस्वरूपं यत्तदहं ब्रवीमि, यथाप्रतिज्ञातमर्थं दर्शयति—'इमंपि जाइधम्मयं'ति इहोपदेशदानाय सूत्रारम्भस्तद्योग्यश्च पुरुषो भवत्यतस्तस्य सामर्थ्येन सन्निहितत्वात्तच्छरीरं प्रत्यक्षासन्नवाचिनेदमा परामृशति, इदमपि—मनुष्यशरीरं, जननं-जातिरुत्पत्तिस्तद्धर्मकम्, एतदपि वनस्पतिशरीरं तद्धर्म्मकं—तत्स्वभावमेव, इतिपूर्वकोऽपिशब्दः सर्वत्र यथाशब्दार्थे द्वितीयस्तु समुच्चये व्याख्येयः, ततश्चायमर्थः—यथा मनुष्यशरीरं बालकुमारयुवावृद्धतापरिणामविशेषवत् चेतनावत्सदाधिष्ठितं प्रस्पष्टचेतनाकमुपलभ्यते, तथेदमपि वनस्पतिशरीरं, यतो जातः केतकतरुर्बालको युवा वृद्धश्च संवृत्त इति, अतस्तुल्यत्वादेतदपि जातिधर्मकं, न च कश्चिद्विशेषोऽस्ति, येन सत्यपि जातिधर्मत्वे मनुष्यादिशरीरमेव सचेतनं न वनस्पतिशरीरमिति, ननु च जातिधर्मत्वं केशनखदन्तादिष्वप्यस्ति, अव्यभिचारि च लक्षणं भवत्यस्ति च व्यभिचारः, तस्मादयुक्तं कल्पयितुं जातिधर्मत्वं जीवलिङ्गमिति, उच्यते, सत्यमस्ति जननमात्रं, किन्तु मनुष्यशरीरप्रसिद्धबालकुमारकाद्यवस्थानामसम्भवः केशादिष्वस्ति स्फुटः, तस्मादसमञ्जसमेतद्, अपि च-केशनखं चेतनावत्सदार्थाधिष्ठितशरीरस्थं जातमित्युच्यते, वर्द्धते इति वा, न पुनस्त्वयैवं तरवोऽपि चेतनावत्सदार्थाधारस्था इष्यन्ते, त्वन्मते भुवोऽचेतनत्वात्तस्मादयुक्तमिति । अथवा जातिधर्मत्वादीनि समुदितानि सूत्रोक्तान्येक एव हेतुः, न पृथक् हेतुता, न च समुदायहेतुः केशादिष्वस्ति तस्माददोष इति । तथा यथेदं मनुष्यशरीरकमनवरतं बालकुमाराद्यवस्थाविशेषैर्वर्द्धते, तथैतदपि वनस्पतिशरीरमङ्कुरकिशलयशाखाप्रशाखादिभिर्विशेषैर्वर्द्धत इति, तथा यथेदं मनुष्यशरीरं चित्तवदेवं वनस्पतिशरीरमपि चित्तवत्, कथम्?, चेतयति येन तच्चित्तं—ज्ञानं, ततश्च यथा मनुष्यशरीरं ज्ञानेनानुगतमेवं वनस्पतिशरीरमपि, यतो धात्रीप्रपुन्नाटादीनां स्वापविबोधसद्भावः तथाऽधोनिखातद्रविणराशेः स्वप्ररोहेणावेष्टनं प्रावृड्जलधरनिनादशिशिरवायुसंस्पर्शादङ्कुरोद्भेदः, तथा मदमदनसङ्कस्खलद्गतिविघूर्णमानलोललोचनविलासिनीसञ्चूपुरसुकुमारचरणताडनादशोकतरोः पल्लवकुसुमोद्गमः, तथा सुरभिसुरागण्डूषसेकाद्बकुलस्य स्पृष्टप्ररोहिकादीनां च हस्तादिसंस्पर्शात्सङ्कोचादिका परिस्फुटा क्रियोपलब्धिः, न चैतदभिहिततरुसम्बन्धि क्रियाजालं ज्ञानमन्तरेण घटते, तस्मात्सिद्धं चित्तवत्त्वं वनस्पतेः इति । तथा यथेदं छिन्नं म्लायति तथैतदपि छिन्नं म्लायति, मनुष्यशरीरं हि हस्तादि छिन्नं म्लायति—शुष्यति, तथा तरुशरीरमपि पल्लवफलकुसुमादि छिन्नं शोषमुपगच्छत् दृष्टं, न चाचेतनानामयं धर्म्म इति । तथा यथेदं मनुष्यशरीरं स्तनक्षीरव्यञ्जनौदनाद्याहाराभ्यवहारादाहारकं तथैतदपि वनस्पतिशरीरं भूजलाद्याहाराभ्यवहारकं, न चैतदाहारकत्वमचेतनानां दृष्टम्, अतस्तद्भावात्सचेतनत्वमिति । तथा यथेदं मनुष्यशरीरमनित्यकं—न सर्वदाऽवस्थायि तथैतदपि वनस्पतिशरीरमनित्यं नियतायुष्कत्वात्, तथाहि—अस्य दश वर्षसहस्राणि उत्कृष्टमायुः । तथा यथेदं मनुष्यशरीरमशाश्वतं—प्रतिक्षणमावीचीमरणेन मरणात् तथैतदपि वनस्पतिशरीरमिति । तथा यथेदमिष्टानिष्टाहारादिप्राप्त्या 'चयापचयिकं' वृद्धिहान्यात्मकं तथैतदपि इति । तथा यथेदं मनुष्यशरीरं विविधपरिणामः—तत्तद्रोगसम्पर्कात् पाण्डुत्वोदरवृद्धिशोफकृशत्वाङ्गुलिनासिकाप्रवेशादिरूपो बालादिरूपो वा, तथा रसायनस्नेहाद्युपयोगाद्विशिष्टकान्तिबलोपचयादिरूपो विपरिणामः तद्धर्मकं—तत्स्वभावकं तथैतदपि वनस्पतिशरीरं तथाविधरोगोद्भवात्पुष्पपत्रफलत्वगाद्यन्यथाभवनात् तथा विशिष्टदौहृदप्रदानेन पुष्पफलाद्युपचयाद्विपरिणामधर्मकम् । एवमनन्तरोक्तधर्मकलापसद्भावादसंशयं गृहाणैतत्—सचेतनास्तरव इति ॥ एवं वनस्पतेश्चैतन्यं प्रदर्श्य तदारम्भे बन्धं तत्परिहाररूपविरत्यासेवनेन च मुनित्वं प्रतिपादयन्नुपसञ्जिहीर्षुराह—

एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति, एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति, तं परिण्णाय मेहावी णेव सयं वणस्सइसत्थं समारंभेज्जा णेवण्णेहिं वणस्सइसत्थं समारंभावेज्जा णेवण्णे वणस्सइसत्थं समारंभंते समणुजाणेज्जा, जस्सेते वणस्सतिसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे (सू० ४७) त्ति बेमि ॥ पञ्चम उद्देशकः समाप्तः ॥

'एतस्मिन्' वनस्पतौ शस्त्रं द्रव्यभावाख्यमारभमाणस्येत्येते आरम्भा अपरिज्ञाता—अप्रत्याख्याता भवन्ति, एतस्मिंश्च वनस्पतौ शस्त्रमसमारभमाणस्येत्येते आरम्भाः परिज्ञाताः—प्रत्याख्याता भवन्तीति पूर्ववच्चर्चः, यावत् स एव मुनिः परिज्ञातकर्मेति ब्रवीमि पूर्ववदिति । शस्त्रपरिज्ञाध्ययने पञ्चमोद्देशकटीका परिसमाप्तेति ।

उक्तः पञ्चमोद्देशकः, साम्प्रतं षष्ठः समारभ्यते—अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके वनस्पतिकायः प्रतिपादितः, तदनन्तरं च त्रसकायस्यागमे परिपठितत्वात् तत्स्वरूपाधिगमायायमुद्देशकः समारभ्यते, तस्य चोपक्रमादीनि चत्वार्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुयोगद्वाराणि वाच्यानि, यावन्नामनिष्पन्ने निक्षेपे त्रसकायोद्देशकः, तत्र त्रसकायस्य पूर्वप्रसिद्धद्वारक्रमातिदेशाय तद्विभिन्नलक्षणद्वाराभिधानाय च निर्युक्तिकृदाह—

तसकाए दाराइं ताइं जाइं हवंति पुढवीए । णाणत्ती उ विहाणे परिमाणुवभोगसत्थे य ॥ १५२ ॥

त्रस्यन्तीति त्रसास्तेषां कायस्त्रसकायस्तस्मिंस्तान्येव द्वाराणि भवन्ति यानि पृथिव्यां प्रतिपादितानि, नानात्वं तु विधानपरिमाणोपभोगशस्त्रद्वारेषु, चशब्दाल्लक्षणे च प्रतिपत्तव्यमिति ॥ तत्र विधानद्वारमाह—

दुविहा खलु तसजीवा लद्धितसा चेव गइतसा चेव । लद्धीय तेउवाऊ तेणऽहिगारो इहं नत्थि ॥ १५३ ॥

'द्विविधा' द्विभेदाः, खलुरवधारणे, त्रसत्वं प्रति द्विभेदत्वमेव, त्रसनात्—स्पन्दनात् त्रसाः, जीवनात्प्राणधारणाज्जीवाः, त्रसा एव जीवास्त्रसजीवाः, लब्धित्रसा गतित्रसाश्च, लब्ध्या तेजोवायू त्रसौ, लब्धिस्तच्छक्तिमात्रं, लब्धित्रसाभ्यामिहाधिकारो नास्ति, तेजसोऽभिहितत्वाद्वायोश्चाभिधास्यमानत्वाद्, अतः सामर्थ्याद्गतित्रसा एवाधिक्रियन्ते ॥ के पुनस्ते कियद्भेदा वेत्यत आह—

नेरइयतिरियमणुया सुरा य गइओ चउव्विहा चेव । पज्जत्ताऽपज्जत्ता नेरइयाई अ नायव्वा ॥ १५४ ॥

नारका—रत्नप्रभादिमहातमःपृथ्वीपर्यन्तनरकावासिनः सप्तभेदाः, तिर्यञ्चोऽपि द्वित्रिचतुष्पञ्चेन्द्रियाः, मनुष्याः सम्मूर्छनजाः गर्भव्युत्क्रान्तयश्च, सुरा भवनपतिव्यन्तरज्योतिष्कवैमानिकाः, एते गतित्रसाश्चतुर्विधाः, नामकर्मोदयाभिनिर्वृत्तगतिलाभाद्गतित्रसत्वम्, एते च नारकादयः पर्याप्तापर्याप्तभेदेन द्विविधा ज्ञातव्याः, तत्र पर्याप्तिः पूर्वोक्तैव षोढा, तया यथासम्भवं निष्पन्नाः पर्याप्ताः, तद्विपरीतास्त्वपर्याप्तका अन्तर्मुहूर्त्तकालमिति ॥ इदानीमुत्तरभेदानाह—

तिविहा तिविहा जोणी अंडापोअअजराउआ चेव । बेइंदिय तेइन्दिय चउरो पंचिंदिया चेव ॥१५५॥ दारं ॥

अत्र हि शीतोष्णमिश्रभेदात्तथा सचित्ताचित्तमिश्रभेदात्तथा संवृतविवृततदुभयभेदात्तथा स्त्रीपुंनपुंसकभेदाच्चेत्यादीनि बहूनि योनीनां त्रिकाणि सम्भवन्ति, तेषां सर्वेषां सङ्ग्रहार्थं त्रिविधा त्रिविधेति वीप्सानिर्देशः, तत्र नारकाणामाद्यासु तिसृषु भूमिषु शीतैव योनिः चतुर्थ्यामुपरिततनरकेषु शीता अधस्ततनरकेषूष्णा पञ्चमीषष्ठीसप्तमीष्वूष्णैव नेतरे, गर्भव्युत्क्रान्तितिर्यङ्मनुष्याणामशेषदेवानां च शीतोष्णा योनिर्नेतरे, द्वित्रिचतुःपञ्चेन्द्रियसंमूर्छनजतिर्यङ्मनुष्याणां त्रिविधाऽपि योनिः शीता उष्णा शीतोष्णा चेति, तथा नारकदेवानामचित्ता नेतरे, द्वीन्द्रियादिसम्मूर्छनजपञ्चेन्द्रियतिर्यङ्मनुष्याणां त्रिविधाऽपि योनिः सचित्ताचित्ता मिश्रा च, गर्भव्युत्क्रान्तितिर्यङ्मनुष्याणां मिश्रा योनिर्नेतरे, तथा देवनारकाणां संवृता योनिर्नेतरे, द्वित्रिचतुरिन्द्रियसम्मूर्छनजपञ्चेन्द्रियतिर्यङ्मनुष्याणां विवृता योनिर्नेतरे, गर्भव्युत्क्रान्तिकतिर्यग्मनुष्याणां संवृतविवृता योनिर्नेतरे, तथा नारका नपुंसकयोनय एव, तिर्यञ्चस्त्रिविधाः—स्त्रीपुंनपुंसकयोनयोऽपि, मनुष्या अप्येवं त्रैविध्यभाजः, देवाः स्त्रीपुंयोनय एव, तथाऽपरं मनुष्ययोनेस्त्रैविध्यं, तद्यथा—कूर्मोन्नता, तस्यां चार्हत्चक्रवर्त्या-

१ शीता शीतोष्णेति । तत्र नारकाणामाद्यासु तिसृषु भूमिषूष्णैव योनिः चतुर्थ्यामुपरिततनरकेषूष्णाऽधस्ततनरकेषु शीता पञ्चमीषष्ठीसप्तमीषु शीतैव नेतरे इति पा., मतान्तराभिप्रायकक्षार्थं पाठः अस्ति सङ्ग्रहणीवृत्तावेवं मतद्वयमपि.

दिसत्पुरुषाणामुत्पत्तिः, तथा शङ्खावर्त्ता, सा च स्त्रीरत्नस्यैव, तस्यां च प्राणिनां सम्भवोऽस्ति न निष्पत्तिः, तथा वंशीपत्रा, सा च प्राकृतजनस्येति, तथाऽपरं त्रैविध्यं निर्युक्तिकृद्दर्शयति—तद्यथा—अण्डजाः पोतजाः जरायुजाश्चेति, तत्राण्डजाः पक्ष्यादयः, पोतजाः वल्गुलीगजकलभकादयः, जरायुजा गोमहिषीमनुष्यादयः, तथा द्वित्रिचतुःपञ्चेन्द्रियभेदाश्च भिद्यन्ते, एवमेते त्रसास्त्रिविधयोन्यादिभेदेन प्ररूपिताः, एतद्योनिसङ्ग्राहिण्यौ च गाथे—'पुढविदगअगणिमारुयपत्तेयनिओयजीवजोणीणं । सत्तग सत्तग सत्तग सत्तग दस चोद्दस य लक्खा ॥ १ ॥ विगलिंदिएसु दो दो चउरो चउरो य नारयसुरेसु । तिरियाण होन्ति चउरो चोद्दस मणुआण लक्खाइं ॥ २ ॥' एवमेते चतुरशीतियोनिलक्षा भवन्ति, तथा कुलपरिमाणं 'कुलकोडिसयसहस्सा बत्तीसट्ठनव य पणवीसा । एगिंदियबितिइंदियचउरिंदियहरियकायाणं ॥ १ ॥ अद्धत्तेरस बारस दस दस नव चेव कोडिलक्खाइं । जलयरपक्खिचउप्पयउरभुयपरिसप्पजीवाणं ॥ २ ॥ पणुवीसं छव्वीसं च सयसहस्साइं नारयसुराणं । बारस य सयसहस्सा कुलकोडीणं मणुस्साणं ॥ ३ ॥ एगा कोडाकोडी सत्ताणउतिं च सयसहस्साइं । पञ्चासं च सहस्सा कुलकोडीणं मुणेयव्वा ॥ ४ ॥ अङ्कतोऽपि १९७ ५०००००००००० सकलकुलसङ्ग्रहोऽयं बोद्धव्य इति ॥ उक्ता परूपणा, तदनन्तरं लक्षणद्वारमाह—

१ पृथ्व्युदकाग्निमारुतप्रत्येकनिगोदजीवयोनीनाम् । सप्त सप्त सप्त सप्त दश चतुर्दश च लक्षाः ॥ १ ॥ विकलेन्द्रियेषु द्वे द्वे चतस्रश्चतस्रश्च नारकसुरयोः । तिरश्चां भवन्ति चतस्रश्चतुर्दश मनुष्याणां लक्षाः ॥ २ ॥ २ कुलकोटिशतसहस्राणि द्वार्त्रिंशद् अष्टाष्टनव च पञ्चविंशतिः । एकेन्द्रियद्वित्रीन्द्रियत्रीन्द्रियचतुरिन्द्रियहरितकायानाम् ॥ १ ॥ अर्धत्रयोदश द्वादश दश दश नव चैव कोटीलक्षाः । जलचरपक्षिचतुष्पदोरोभुजपरिसर्पजीवानाम् ॥२॥ पञ्चविंशतिः षड्विंशतिश्च शतसहस्राणि नारकसुरयोः । द्वादश च शतसहस्राणि कुलकोटीनां मनुष्याणाम् ॥ ३ ॥ एका कोटीकोटी सप्तनवतिश्च शतसहस्राणि । पञ्चाशच्च सहस्राणि कुलकोटीनां मुणितव्यानि ॥ ४ ॥ ३ सत्तट्ठ य नव य अट्ठवीसं च । बेइन्दियतेइन्दिय. प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दंसणनाणचरित्ते चरियाचरिए अ दाणलाभे अ । उवभोगभोगवीरिय इंदियविसए य लद्धी य ॥ १५६ ॥
उवओगजोगअज्झवसाणे वीसुं च लद्धि ओदइया(णं उदया)। अट्ठविहोदय लेसा सत्तुसासे कसाए अ १५७

'दर्शनं' सामान्योपलब्धिरूपं चक्षुरचक्षुरवधिकेवलाख्यं, मत्यादीनि ज्ञानानि स्वपरपरिच्छेदिनो जीवस्य परिणामाः ज्ञानावरणविगमव्यक्तास्तत्त्वार्थपरिच्छेदाः, सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातानि चारित्रं, चारित्राचारित्रं देशविरतिः स्थूलप्राणातिपातादिनिवृत्तिलक्षणं श्रावकाणां, तथा दानलाभभोगोपभोगवीर्यश्रोत्रचक्षुर्घ्राणरसनस्पर्शनाख्याः दश लब्धयः जीवद्रव्याव्यभिचारिण्यो लक्षणं भवन्ति, तथोपयोगः–साकारोऽनाकारश्चाष्टचतुर्भेदः, योगो मनोवाक्कायाख्यस्त्रिधा, अध्यवसायाश्चानेकविधाः सूक्ष्माः मनःपरिणामसमुत्थाः, विष्वग्–पृथग् लब्धीनामुदयाः–प्रादुर्भावाः क्षीरमध्वास्रवादयः, ज्ञानावरणाद्यन्तरायावसानकर्माष्टकस्य स्वशक्तिपरिणाम उदयः, लेश्याः–कृष्णादिभेदा अशुभाः शुभाश्च कषाययोगपरिणामविशेषसमुत्थाः, संज्ञास्त्वाहारभयपरिग्रहमैथुनाख्याः, अथवा दशभेदाः–अनन्तरोक्ताश्चतस्रः क्रोधाद्याश्च चतस्रस्तथौघसंज्ञा लोकसंज्ञा च, उच्छ्वासनिःश्वासौ प्राणापानौ, कषायाः कषः–संसारस्तस्यायाः क्रोधादयोऽनन्तानुबन्ध्यादिभेदात् षोडशविधाः । एतानि गाथाद्वयोपन्यस्तानि द्वीन्द्रियादीनां लक्षणानि यथासम्भवमवगन्तव्यानीति, न चैवंविधलक्षणकलापसमुच्चयो घटादिष्वस्ति, तस्मात्तत्रा चैतन्यमध्यवस्यन्ति विद्वांसः ॥ अभिहितलक्षणकलापोपसङ्ग्रहीर्षया तथा परिमाणप्रतिपादनार्थं गाथामाह—

लक्खणमेवं चेव उ पयरस्स असंखभागमित्ता उ । निक्खमणे य पवेसे एगाईयावि एमेव ॥ १५८ ॥

तुशब्दः पर्यायवचनः, द्वीन्द्रियादिजीवानां लक्षणं–लिङ्गमेतावदेव दर्शनादि परिपूर्णं, नातोऽन्यदधिकमस्तीति । परिमाणं पुनः क्षेत्रतः संवर्त्तितलोकप्रतरासङ्ख्येयभागवर्त्तिप्रदेशराशिपरिमाणास्त्रसकायपर्याप्तकाः, एते च बादरतेजस्कायपर्याप्तकेभ्योऽसङ्ख्येयगुणाः, त्रसकायपर्याप्तकेभ्यस्त्रसकायिकापर्याप्तकाः असङ्ख्येयगुणाः, तथा कालतः प्रत्युत्पन्नत्रसकायिकाः सागरोपमलक्षपृथक्त्वसमयराशिपरिमाणा जघन्यपदे, उत्कृष्टपदेऽपि सागरोपमलक्षपृथक्त्वपरिमाणा एवेति, तथा चागमः—"पडुप्पन्नतसकाइया केवतिकालस्स निलेवा सिया?, गोयमा! जहन्नपए सागरोवमसयसहस्सपुहुत्तस्स उक्कोसपदेऽवि सागरोवमसयसहस्सपुहुत्तस्स" । उद्वर्त्तनोपपातौ गाथाशकलेनाभिदधाति–निष्क्रमणम्–उद्वर्त्तनं प्रवेशः–उपपातः जघन्येनैको द्वौ त्रयो वा उत्कृष्टतस्तु 'एवमेवे'ति प्रतरस्यासङ्ख्येयभागप्रदेशपरिमाणा एवेत्यर्थः ॥ साम्प्रतमविरहितप्रवेशनिर्गमाभ्यां परिमाणविशेषमाह—

निक्खमपवेसकालो समयाई इत्थ आवलीभागो । अंतोमुहुत्तऽविरहो उदहिसहस्साहिए दोन्नि ॥१५९॥ दारं॥

जघन्येन अविरहिता संतता त्रसेषु उत्पत्तिर्निष्क्रमो वा जीवानामेकं समयं द्वौ त्रीन् वेत्यादि, उत्कृष्टेनात्रावलिकाऽसङ्ख्येयभागमात्रं कालं सततमेव निष्क्रमः प्रवेशो वा, एकजीवाङ्गीकरणेनाविरहश्चिन्त्यते गाथापश्चिमार्द्धेन–अविरहः सातत्येनावस्थानम्, एकजीवो हि त्रसभावेन जघन्यतोऽन्तर्मुहूर्तमासित्वा पुनः पृथिव्याद्येकेन्द्रियेषूत्पद्यते, प्रकर्षेणाधिकं सागरोपमसहस्रद्वयं च त्रसभावेनावतिष्ठते सन्ततमिति ॥ उक्तं प्रमाणद्वारं, साम्प्रतमुपभोगशस्त्रवेदनाद्वारत्रयप्रतिपादनायाह—

१ प्रत्युत्पन्नत्रसकायिकाः कियता कालेन निर्लेपाः स्युः ?, गौतम ! जघन्यपदे सागरोपमशतसहस्रपृथक्त्वेन उत्कृष्टपदेऽपि सागरोपमशतसहस्रपृथक्त्वेन ।

मंसाईपरिभोगो सत्थं सत्थाइयं अणेगविहं । सारीरमाणसा वेयणा य दुविहा बहुविहा य ॥ १६० ॥ दारं ॥

मांसचर्मकेशरोमनखपिच्छदन्तस्नाय्वस्थिविषाणादिभिस्त्रसजीवसम्बन्धिभिरुपभोगो भवति, शस्त्रं पुनः 'शस्त्रादिकमिति' (शस्त्रं) खड्गतोमरक्षुरिकादि तदादिर्यस्य जलानलादेस्तच्छस्त्रादिकमनेकविधं–स्वकायपरकायोभयद्रव्यभावभेदभिन्नमनेकप्रकारं त्रसकायस्येति, वेदना चात्र प्रसङ्गेनोच्यते–सा च शरीरसमुत्था मनःसमुत्था च द्विविधा यथासम्भवं, तत्राद्या शल्यशलाकादिभेदजनिता, इतरा प्रियविप्रयोगाप्रियसम्प्रयोगादिकृता, बहुविधा च ज्वरातीसारकासश्वासभगन्दरशिरोरोगशूलगुदकीलकादिसमुत्था तीव्रेति ॥ पुनरप्युपभोगप्रपञ्चाभिधित्सयाऽऽह—

मंसस्स केइ अट्ठा केइ चम्मस्स केइ रोमाणं । पिच्छाणं पुच्छाणं दंताणऽट्ठा वहिज्जंति ॥ १६१ ॥
केई वहंति अट्ठा केइ अणट्ठा पसंगदोसेणं । कम्मपसंगपसत्ता बंधंति वहंति मारंति ॥ १६२ ॥

मांसार्थं मृगशूकरादयो वध्यन्ते, चर्मार्थं चित्रकादयः, रोमार्थं मूषिकादयः, पिच्छार्थं मयूरगृद्धकपिञ्जलुरुदुकादयः, पुच्छार्थं चमर्यादयः, दन्तार्थं वारणवराहादयः, वध्यन्त इति सर्वत्र सम्बध्यते इति ॥ तत्र केचन पूर्वोक्तप्रयोजनमुद्दिश्य घ्नन्ति, केचित्तु प्रयोजनमन्तरेणापि क्रीडया घ्नन्ति, तथा परे प्रसङ्गदोषात् मृगलक्षक्षिप्तेषुलेलुकादिना तदन्तरालव्यवस्थिता अनेके कपोतकपिञ्जलशुकसारिकादयो हन्यन्ते, तथा कर्म–कृष्याद्यनेकप्रकारं तस्य प्रसङ्गः–अनुष्ठानं तत्र प्रसक्ताः–सन्निष्ठाः सन्तस्त्रसकायिकान् बहून् घ्नन्ति रज्ज्वादिना, घ्नन्ति–कशलकुटादिभिः ताडयन्ति, मारयन्ति–प्राणैर्वियोजयन्तीति ॥ एवं विधानाद्द्वारकलापमुपवर्ण्य सकलनिर्युक्त्यर्थोपसंहारायाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेसाइं दाराइं ताइं जाइं हवंति पुढवीए । एवं तसकायंमी निज्जुत्ती कित्तिया एसा ॥ १६३ ॥

उक्तव्यतिरिक्तानि शेषाणि द्वाराणि तान्येव वाच्यानि यानि पृथ्वीस्वरूपसमधिगमे निरूपितानि, अत एवमशेषद्वाराभिधानान्नसकाये निर्युक्तिः कीर्त्तितैषा सकला भवतीत्यवगन्तव्येति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से बेमि संतिमे तसा पाणा, तंजहा–अंडया पोयया जराउआ रसया संसेयया संमुच्छिमा उब्भियया उववाइया, एस संसारेत्ति पवुच्चई (सू० ४८)

अस्य चानन्तरपरम्परादिसूत्रसम्बन्धः प्राग्वद्वाच्यः, सोऽहं ब्रवीमि येन मया भगवद्वदनारविन्दविनिसृतार्थजातावधारणात् यथावदुपलब्धं तत्त्वमिति, 'सन्ति' विद्यन्ते त्रस्यन्तीति त्रसाः–प्राणिनो द्वीन्द्रियादयः, ते च कियद्भेदाः किंप्रकाराश्चेति दर्शयति—'तद्यथे'ति वाक्योपन्यासार्थः, यदिवा 'तत्' प्रकारान्तरमर्थतो यथा भगवताऽभिहितं तथाऽहं भणामीति, अण्डाज्जाताः अण्डजाः–पक्षिगृहकोकिलादयः, पोता एव जायन्ते पोतजाः 'अन्येष्वपि दृश्यते' (पा-३-२-१०१) इति जनेर्डप्रत्ययः, ते च हस्तिवल्गुलीचर्मजलूकादयः, जरायुवेष्टिता जायन्त इति जरायुजाः, पूर्ववत् डप्रत्ययः, गोमहिष्यजाविकमनुष्यादयः, रसाज्जाता रसजाः–तक्रारनालदधितीमनादिषु पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति, संस्वेदाज्जाताः संस्वेदजाः–मत्कुणयूकाशतपदिकादयः, सम्मूर्छनाज्जाताः सम्मूर्छनजाः–शलभपिपीलिकामक्षिकाशालिकादयः, उद्भेदनमुद्भित्ततो जाता उद्भिजाः, पृषोदरादित्वाद्लोपः, पतङ्गखञ्जरीटपारीप्रवादयः, उपपाताज्जाता उपपातजाः, अथवा उपपाते भवा औपपातिकाः–देवा नारकाश्च, एवमष्टविधं जन्म यथासम्भवं संसारिणो नातिवर्तन्ते, एतदेव शास्त्रान्तरे त्रिविधमुपन्यस्तं "सम्मूर्छनगर्भोपपाता जन्म" (तत्त्वार्थ०अ० २ सू० ३२) रसस्वेदजोद्भिज्जानां सम्मूर्छनजान्तःपातित्वात् अण्डजपोतजजरायुजानां गर्भजान्तःपातित्वात् देवनारकाणामौपपातिकान्तःपातित्वात् इति त्रिविधं जन्मेति, इह चाष्टविधं सोत्तरभेदत्वादिति । एवमेतस्मिन्नष्टविधे जन्मनि सर्वे त्रसजन्तवः संसारिणो निपतन्ति, नैतद्व्यतिरेकेणान्ये सन्ति, एते चाष्टविधयोनिभाजोऽपि सर्वलोकप्रतीता बालाङ्गनादिजनप्रत्यक्षप्रमाणसमधिगम्याः, 'सन्ति च' अनेन शब्देन त्रैकालिकमस्तित्वं प्रतिपाद्यते त्रसानां, न कदाचिदेतैर्विरहितः संसारः सम्भवतीति, एतदेव दर्शयति—'एस संसारोत्ति पवुच्चति' एषः–अण्डजादिप्राणिकलापः संसारः प्रोच्यते, नातोऽन्यत्रसानामुत्पत्तिप्रकारोऽस्तीत्युक्तं भवति ॥ कस्य पुनरत्राष्टविधभूतग्रामे उत्पत्तिर्भवतीत्याह—

मंदस्साविवाणओ (सू० ४९)

मन्दो द्विधा–द्रव्यभावभेदात्, तत्र द्रव्यमन्दोऽतिस्थूलोऽतिकृशो वा, भावमन्दोऽप्यनुपचितबुद्धिर्बालः कुशास्त्रवासितबुद्धिर्वा, अयमपि सद्बुद्धेरभावाद्बाल एव, इह भावमन्देनाधिकारः, 'मन्दस्ये'ति बालस्याविशिष्टबुद्धेः अत एव अविजानतो–हिताहितप्राप्तिपरिहारशून्यमनसः इत्येषोऽनन्तरोक्तः संसारो भवतीति ॥ यद्येवं ततः किमित्याह—

निज्झाइत्ता पडिलेहित्ता पत्तेयं परिनिव्वाणं सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं अस्सायं अपरिनिव्वाणं महब्भयं दुक्खं तिबेमि, तसंति पाणा पदिसो दिसासु य (सू० ५०)

एवमिमं त्रसकायमागोपालाङ्गनादिप्रसिद्धं निश्चयेन ध्यात्वा निर्ध्याय चिन्तयित्वेत्यर्थः, क्त्वाप्रत्ययस्योत्तरक्रियापेक्षत्वाद् ब्रवीमीत्युत्तरक्रिया सर्व्वत्र योजनीयेति । पूर्व्वं च मनसाऽऽलोच्य ततः प्रत्युपेक्षणं भवतीति दर्शयति–'पडिलेहेत्त'त्ति प्रत्युपेक्ष्य–दृष्ट्वा यथावदुपलभ्येत्यर्थः, किं तदिति दर्शयति—'प्रत्येक'मित्येकमेकं त्रसकायं प्रति परिनिर्वाणं–सुखं प्रत्येकसुखभाजः सर्वेऽपि प्राणिनः, नान्यदीयमन्य उपभुञ्जते सुखमित्यर्थः, एष च सर्व्वप्राणिधर्म्म इति दर्शयति–सर्वेषां प्राणिनां–द्वित्रिचतुरिन्द्रियाणां, तथा सर्व्वेषां भूतानां–प्रत्येकसाधारणसूक्ष्मबादरपर्याप्तकापर्याप्तकतरूणामिति, तथा सर्व्वेषां जीवानां–गर्भव्युत्क्रान्तिकसम्मूर्च्छनजौपपातिकपञ्चेन्द्रियाणां, तथा सर्व्वेषां सत्त्वानां–पृथिव्याद्येकेन्द्रियाणामिति, इह च प्राणादिशब्दानां यद्यपि परमार्थतोऽभेदस्तथापि उक्तन्यायेन भेदो द्रष्टव्यः, उक्तं च—'प्राणा द्वित्रिचतुः प्रोक्ताः, भूतास्तु तरवः स्मृताः । जीवाः पञ्चेन्द्रियाः प्रोक्ताः, शेषाः सत्त्वा उदीरिताः ॥ १ ॥" इति, यदिवा शब्दव्युत्पत्तिद्वारेण समभिरूढनयमतेन भेदो द्रष्टव्यः, तद्यथा–सततप्राणधारणात्प्राणाः कालत्रयभवनाद् भूताः त्रिकालजीवनात् जीवाः सदाऽस्तित्वात्सत्त्वा इति, तदेवं विचिन्त्य प्रत्युपेक्ष्य च यथा सर्वेषां जीवानां प्रत्येकं परिनिर्वाणं–सुखं तथा प्रत्येकमसातम्–अपरिनिर्वाणं महाभयं दुःखमहं ब्रवीमि, तत्र दुःखयतीति दुःखं, तद्विशिष्यते–किं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशिष्टम् ?-'असातम्' असद्वेद्यकर्मांशविपाकजमित्यर्थः, तथा 'अपरिनिर्वाण'मिति समन्तात् सुखं परिनिर्वाणं न परिनिर्वाणमपरिनिर्वाणं समन्तात् शरीरमनःपीडाकरमित्यर्थः, तथा 'महाभय'मिति महच्च तद्भयं च महाभयं, नातः परमन्यद् भयमस्तीति महाभयं, तथाहि-सर्व्वेऽपि शारीरान्मानसाच्च दुःखादुद्विजन्ते प्राणिन इति, इति शब्दएवमर्थे, एवमहं ब्रवीमि सम्यगुपलब्धतत्त्वो यत्नागुक्तमिति । एतच्च ब्रवीमीत्याह—'तसंती' त्यादि, एवंविधेन च असातादिविशेषणविशिष्टेन दुःखेनाभिभूतास्त्रस्यन्ति-उद्विजन्ति प्राणा इति प्राणिनः, कुतः पुनरुद्विजन्तीति दर्शयति-प्रगता दिक् प्रदिग्विदिक् इत्यर्थः, ततः प्रदिशः सकाशादुद्विजन्ति, तथा प्राच्यादिषु च दिक्षु व्यवस्थितास्त्रस्यन्ति, एताश्च प्रज्ञापकविधिविभक्ता दिशोऽनुदिशश्च गृह्यन्ते, जीवव्यवस्थानश्रवणात्, ततश्चायमर्थः प्रतिपादितो भवति काश्चा-न काचिद्दिगनुदिग्वा यस्यां न सन्ति त्रसाः त्रस्यन्ति वा यस्यां स्थिताः कोशिकारकीटवत्, कोशिकारकीटो हि सर्वदिग्भ्योऽनुदिग्भ्यश्च बिभ्यदात्मसंरक्षणार्थं वेष्टनं करोति शरीरस्येति, भावदिगपि न काचित्तादृश्यस्ति यस्यां वर्त्तमानो जन्तुर्न त्रस्येत्, शारीरमानसाभ्यां दुःखाभ्यां सर्वत्र नरकादिषु जंघन्यन्ते प्राणिनोऽतस्त्रासपरिगतमनसः सर्वदाऽवगन्तव्याः ॥ एवं सर्वत्र दिक्ष्वनुदिक्षु च त्रसाः सन्तीति गृहीमः, दिग्विदिग्व्यवस्थितास्त्रसास्त्रस्यन्तीत्युक्तं, कुतः पुनस्त्रस्यन्ति ?-यस्मात्तदारम्भवद्भिस्ते व्यापाद्यन्ते, किं पुनः कारणं ?, ते तानारम्भन्त इत्यत आह—

तत्थ तत्थ पुढो पास आतुरा परितावंति, संति पाणा पुढो सिया (सू० ५१)

'तत्र तत्र' तेषु तेषु कारणेषूत्पन्नेषु वक्ष्यमाणेषु अर्चाजिनशोणितादिषु च पृथग्विभिन्नेषु प्रयोजनेषु, पश्येति शिष्यचोदना, किं तत्पश्येति दर्शयति—'मांसभक्षणादिगृद्धा आतुराः-अस्वस्थमनसः परि-समन्तात्तापयन्ति-पीडयन्ति नानाविधवेदनोत्पादनेन प्राणिव्यापादनेन वा तदारम्भिणस्त्रसानिति, येन केनचिदारम्भेण प्राणिनां सन्तापनं भवतीति दर्शयन्नाह—'संती'त्यादि, 'सन्ति' विद्यन्ते प्रायः सर्वत्रैव प्राणाः-प्राणिनः 'पृथक्' विभिन्नाः द्वित्रिचतुःपञ्चेन्द्रियाः 'श्रिताः' पृथिव्यादिश्रिताः, एतच्च ज्ञात्वा निरवद्यानुष्ठायिना भवितव्यमित्यभिप्रायः ॥ अन्ये पुनरन्यथावादिनोऽन्यथाकारिण इति दर्शयन्नाह—

लज्जमाणा पुढो पास अणगारा मोत्ति एगे पवयमाणा जमिणं विरूवरूवेहिं सत्थेहिं तसकायसमारंभेण तसकायसत्थं समारभमाणा अण्णे अणेगरूवे पाणे विहिंसति, तत्थ खलु भगवया परिण्णा पवेइया, इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाईमरणमोयणाए दुक्खपडिघायहेउं से सयमेव तसकायसत्थं समारभति अण्णेहिं वा तसकायसत्थं समारंभावेइ अण्णे वा तसकायसत्थं समारभमाणे समणुजाणइ, तं से अहियाए तं से अबोहीए, से तं संबुज्झमाणे आयाणीयं समुट्ठाय सोच्चा भगवओ अणगाराणं अंतिए इहमेगेसिं णायं भवति-एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णरए, इच्चत्थं गड्ढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं तसकायसमारंभेण तसकायसत्थं समारंभमाणे अण्णे अणेगरूवे पाणे विहिंसति (सू० ५२)

पूर्ववत् व्याख्येयं, यावत् 'अण्णे अणेगरूवे पाणे विहिंसइ'त्ति ॥ यानि कानिचित्कारणान्युद्दिश्य त्रसवधः क्रियते तानि दर्शयितुमाह—

से बेमि अप्पेगे अच्चाए हणंति, अप्पेगे अजिणाए वहंति, अप्पेगे मंसाए वहंति, अप्पेगे सोणियाए वहंति, एवं हिययाए पित्ताए वसाए पिच्छाए पुच्छाए बालाए सिंगाए विसाणाए दंताए दाढाए णहाए णहारुणीए अट्ठीए अट्ठिमिंजाए अट्ठाए अणट्ठाए, अप्पेगे हिंसिंसु मेत्ति वा वहंति अप्पेगे हिंसंति मेत्ति वा वहंति अप्पेगे हिंसिस्संति मेत्ति वा वहंति (सू० ५३)

तदहं ब्रवीमि यदर्थं प्राणिनस्तदारम्भप्रवृत्तैर्व्यापाद्यन्त इति, अप्येकेऽर्चायै घ्नन्ति, अपिरुत्तरापेक्षया समुच्चयार्थः, 'एके' केचन तदर्थित्वेनातुराः, अर्च्यतेऽसावाहारालङ्कारविधानैरित्यर्चा-देहस्तदर्थं व्यापादयन्ति, तथाहि-लक्षणवत्पुरु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पमक्षतमल्यङ्गं व्यापाद्य तच्छरीरेण विद्यामन्त्रसाधनानि कुर्वन्ति उपयाचितं वा यच्छन्ति दुर्गादीनामग्रतः, अथवा विषं येन भक्षितं स हस्तिनं मारयित्वा तच्छरीरे प्रक्षिप्यते पश्चाद्विषं जीर्यति, तथा अजिनार्थं-चित्रकव्याघ्रादयः व्यापादयन्ति, एवं मांसशोणितहृदयपित्तवसापिच्छपुच्छवालशृङ्गविषाणदन्तदंष्ट्रानखस्नाय्वस्थ्यस्थिमिञ्जादिष्वपि वाच्यं, मांसार्थं सूकरादयः, त्रिशूलालेखार्थं शोणितं गृह्णन्ति, हृदयानि साधका गृहीत्वा भक्षन्ति, पित्तार्थं मयूरादयः, वसार्थं व्याघ्रमकरवराहादयः, पिच्छार्थं मयूरगृध्रादयः, पुच्छार्थं रोझादयः, वालार्थं चमर्यादयः, शृङ्गार्थं मरुत्पृष्ठादयः, तत्किल शृङ्गं पवित्रमिति याज्ञिका गृह्णन्ति, विषाणार्थं हस्त्यादयः, दन्तार्थं श्रृगालादयः तिमिरापहत्वात्तद्दन्तानां, दंष्ट्रार्थं वराहादयः, नखार्थं व्याघ्रादयः, स्नाय्वर्थं गोमहिष्यादयः, अस्थ्यर्थं शङ्खशुक्त्यादयः, अस्थिमिञ्जार्थं महिषवराहादयः, एवमेके यथोपदिष्टप्रयोजनकलापापेक्षया घ्नन्ति, अपरे तु कृकलासगृहकोकिलादीन् विना प्रयोजनेन व्यापादयन्ति, अन्ये पुनः 'हिंसिसु मेत्ति' हिंसितवानेषोऽस्मत्स्वजनानिंसिष्यति सर्पोऽरिर्वाऽतो घ्नन्ति, मम वा पीडां कृतवन्त इत्यतो हन्ति, तथा अन्ये वर्त्तमानकाल एव हिनस्ति अस्मान् सिंहोऽन्यो वेति घ्नन्ति, तथाऽन्येऽस्मानयं हिंसिष्यतीत्यनागतमेव सर्पादिकं व्यापादयन्ति ॥ एवमनेकप्रयोजनोपन्यासेन हननं त्रसविषयं प्रदर्श्य उद्देशकार्थमुपसञ्जिहीर्षुराह—

एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाया भवंति, एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवन्ति, तं परिण्णाय मेहावी णेव सयं तसकायसत्थं समारंभेज्जा णेवऽण्णेहिं तसकायसत्थं समारंभावेज्जा णेवऽण्णे तसकायसत्थं समारंभंते समणुजाणेज्जा, जस्सेते तसकायसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे (सू० ५४) त्तिबेमि ॥ इति षष्ठ उद्देशकः ॥

१ विषाणार्थं श्रृगालादयः, दन्तार्थं हस्त्यादयः इति प्र०, परं 'विषाणं तु श्रृङ्गे कोलेभदन्तयोः' इत्यनेकार्थवचनात्तायमसुन्दरः.

प्राग्वद्व्याख्येयं, यावत्स एव मुनिस्त्रसकायसमारम्भविरतत्वात् परिज्ञातकर्म्मत्वात्प्रत्याख्यातपापकर्म्मत्वादिति ब्रवीमि भगवतः त्रिलोकबन्धोः परमकेवलालोकसाक्षात्कृतसकलभुवनप्रपञ्चस्योपदेशादिति षष्ठोद्देशकः समाप्तः ॥

उक्तः षष्ठोद्देशकः, साम्प्रतं सप्तमः समारभ्यते, अस्य चायमभिसम्बन्धः—अभिनवधर्म्माणां दुःश्रद्धानकादिव्यपरिभोगत्वादुत्क्रमायातस्योक्तशेषस्य वायोः स्वरूपनिरूपणार्थमिदमुपक्रम्यते—तदनेन सम्बन्धेनायातस्यास्योद्देशकस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि वाच्यानि यावन्नामनिष्पन्ने निक्षेपे वायूद्देशक इति, तत्र वायोः स्वरूपनिरूपणाय कतिचिद्द्वारातिदेशगर्भां निर्युक्तिकृद्गाथामाह—

वाउस्सऽवि दाराइं नाइं जाइं हवंति पुढवीए । नाणत्ती उ विहाणे परिमाणुवभोगसत्थेय ॥ १६४ ॥

वातीति वायुस्तस्य वायोरपि तान्येव द्वाराणि यानि पृथिव्यां प्रतिपादितानि, नानात्वं—भेदः, तच्च विधानपरिमाणोपभोगशस्त्रेषु, चशब्दाल्लक्षणे च द्रष्टव्यमिति ॥ तत्र विधानप्रतिपादनायाह—

१ व्याख्यानाय प्र.

दुविहा उ वाउजावा सुहुमा तह बायरा उ लोगंमि । सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥१६५॥

वायुरेव जीवा वायुजीवाः, ते च द्विविधाः—सूक्ष्मबादरनामकर्मोदयात् सूक्ष्मा बादराश्च, तत्र सूक्ष्माः सकललोकव्यापितया अवतिष्ठन्ते, दत्तकपाटसकलवातायनद्वारगेहान्तर्द्भवत् व्याख्या स्थिताः, बादरभेदास्तु पञ्चैवानन्तरगाथया वक्ष्यमाणा इति ॥ बादरभेदप्रतिपादनायाह—

उक्कलिया मंडलिया गुंजा घणवाय सुद्धवाया य । बायरवाउविहाणा पंचविहा वण्णिया एए ॥ १६६ ॥

स्थित्वा स्थित्वोत्कलिकाभिर्यो वाति स उत्कलिकावातः, मण्डलिकावातस्तु वातोलीरूपः, गुञ्जा—भम्भा तद्वत् गुञ्जन् यो याति स गुञ्जावातः, घनवातोऽत्यन्तघनः पृथिव्याद्याधारतया व्यवस्थितो हिमपटलकल्पो, मन्दस्तिमितः शीतकालादिषु शुद्धवातः, ये त्वन्ये प्रज्ञापनादौ प्राच्यादिवाता अभिहितास्तेषामेष्वेव यथायोगमन्तर्भावो द्रष्टव्य इति, एवमित्थेते बादरवायुविधानानि—भेदाः 'पञ्चविधाः' पञ्चप्रकारा व्यावर्णिता इति ॥ लक्षणद्वाराभिधित्सयाऽऽह—

जह देवस्स सरीरं अंतद्धाणं व अंजणाईसुं । एओवम आएसो वाएऽसंतेऽवि रूवंमि ॥ १६७ ॥

यथा देवस्य शरीरं चक्षुषाऽनुपलभ्यमानमपि विद्यते चेतनावद्भाध्यवसीयते, देवाः स्वशक्तिप्रभावात्तथाभूतं रूपं कुर्वन्ति यच्चक्षुषा नोपलभ्यते, न चैतद्वक्तुं शक्यते-नास्त्यचेतनं चेति, तद्वद्वायुरपि चक्षुषो विषयो न भवति, अस्ति च चित्तवांश्चेति, यथा वाऽन्तर्द्धानमञ्जनविद्यामन्त्रैर्भवति मनुष्याणां, न च नास्तित्वमचेतनत्वं चेति, एतदुपमानो वायावपि भवति

१ एतदुपमानेन प्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आदेशो' व्यपदेशोऽसत्यपि रूप इति, अत्र चासच्छब्दो नाभावत्ववचनः, किं त्वसद्रूपं वायोरिति चक्षुर्ग्राह्यं तद्रूपं न भवति, सूक्ष्मपरिणामात्, परमाणोरिव, रूपरससस्पर्शात्मकश्च वायुरिष्यते, न यथाऽन्येषां वायुः स्पर्शवानेवेति, प्रयोगार्थश्च गाथया प्रदर्शितः, प्रयोगश्चायं–चेतनावान् वायुः, अपरप्रेरिततिर्यगनियमितगतिमत्त्वात्, गवाश्वादिवत्, तिर्यगेव गमननियमाभावात् अनियमितविशेषणोपादानाच्च परमाणुनाऽनेकान्तिकासंभवः, तस्य नियमितगतिमत्त्वात्, जीवपुद्गलयोः 'अनुश्रेणिगति' (तत्त्वा० अ० २ सू० २७) रिति वचनात्, एवमेष वायुः–घनशुद्धवातादिभेदोऽशस्त्रोपहतश्चेतनावानवगन्तव्य इति ॥ परिमाणद्वारमाह—

जे बायरपज्जत्ता पयरस्स असंखभागमित्ता ते । सेसा तिन्निवि रासी वीसुं लोगा असंखिज्जा ॥ १६८ ॥ (दारं)

ये बादरपर्याप्तका वायवस्ते संवर्त्तितलोकप्रतरासङ्ख्येयभागवर्त्तिप्रदेशराशिपरिमाणाः, शेषास्त्रयोऽपि राशयो विष्वक्पृथगसङ्ख्येयलोकाकाशप्रदेशपरिमाणा भवन्ति, विशेषश्चायमत्रावगन्तव्यः–बादरापकायपर्याप्तकेभ्यो बादरवायुपर्याप्तका असङ्ख्येयगुणाः बादरापकायापर्याप्तकेभ्यो बादरवायुकायापर्याप्तका असङ्ख्येयगुणाः सूक्ष्मापकायापर्याप्तकेभ्यः सूक्ष्मवाय्वपर्याप्तका विशेषाधिकाः सूक्ष्मापकायपर्याप्तकेभ्यः सूक्ष्मवायुपर्याप्तका विशेषाधिकाः ॥ उपभोगद्वारमाह—

वियणधमणाभिधारण उस्सिंचणफुसणआणुपाणू अ । बायरवाउक्काए उवभोगगुणा मणुस्साणं ॥ १६९ ॥

व्यजनभस्त्राध्मानाभिधारणोत्सिञ्चनफूत्कारप्राणापानादिभिर्बादरवायुकायेन उपभोग एव गुण उपभोगगुणो मनुष्याणामिति ॥ शस्त्रद्वाराभिधित्सयाऽऽह, तत्र शस्त्रं द्रव्यभावभेदाद्विविधं, द्रव्यशस्त्राभिधित्सयाऽऽह— ॥ ७४ ॥

विअणे अ तालवंटे सुप्पसियपत्त चेलकण्णे य । अभिधारणा य वाहिं गंधग्गी वाउसत्थाइं ॥ १७० ॥

व्यजनं-तालवृन्तं सूर्पसितपत्रचेलकर्णादयः द्रव्यशस्त्रमिति, तत्र सितमिति चामरं, प्रस्विन्नो यद्बहिरवतिष्ठते वातागमनमार्गे साऽभिधारणा, तथा गन्धाः–चन्दनोशीरादीनां अग्निर्ज्वाला प्रतापश्च, तथा प्रतिपक्षवातश्च शीतोष्णादिकः, प्रतिपक्षवायुग्रहणेन स्वकायादिशस्त्रं सूचितमिति, एवं भावशस्त्रमपि दुष्प्रणिहितमनोवाक्कायलक्षणमवगन्तव्यमिति ॥ अधुना सकलनिर्युक्त्यर्थोपसञ्जिहीर्षुराह—

सेसाइं दारारं ताइं जाइं हवंति पुढवीए । एवं वाउद्देसे निज्जुत्ती कित्तिया एसा ॥ १७१ ॥

'शेषाणि' उक्तव्यतिरिक्तानि तान्येव द्वाराणि पृथिवीसमधिगमे यान्यभिहितानीति, एवं सकलद्वारकलापव्यावर्णनाद् वायुकायोद्देशके निर्युक्तिः कीर्त्तितैषाऽवगन्तव्येति ॥ गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—'पहू एजस्स दुगुंछणाए'त्ति, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके पर्यन्तसूत्रे त्रसकायपरिज्ञानं तदारम्भवर्जनं च मुनित्वकारणमभिहितम्, इहापि तदेव द्वयं वायुकायविषयं मुनित्वकारणमेवोच्यते, तथा परम्परसूत्रसम्बन्धः 'इहमेगेसिं णो णायं भवइ'त्ति, किं तत् ज्ञातं भवति ?, 'पहु एजस्स दुगुंछणाए'त्ति, तथा आदिसूत्रसम्बन्धश्च 'सुयं मे आउसंतेण' मित्यादि, किं तत् श्रुतं ?, यदायुष्मदादिष्टं, तथैतच्च—

पहू एजस्स दुगुंछणाए (सू० ५५)

'दुगुञ्छण'त्ति जुगुप्सा प्रभवतीति प्रभुः-समर्थः योग्यो वा, कस्य वस्तुनः समर्थ इति ?, 'एजृ कम्पने' एजतीत्येजो-

वायुः कम्पनशीलत्वात् तस्यैजस्य जुगुप्सा–निन्दा तदासेवनपरिहारो निवृत्तिरितियावत् तस्या–तद्विषये प्रभुर्भवति, वायुकायसमारम्भनिवृत्तौ शक्तो भवतीतियावत्, पाठान्तरं वा 'पहू य एगस्स दुगुंछणाए' उद्रेकावस्थावर्त्तिनैकेन गुणेन स्पर्शाख्येनोपलक्षित इत्येको–वायुस्तस्यैकस्य एकगुणोपलक्षितस्य वायोर्जुगुप्सायां प्रभुः, चशब्दात् श्रद्धाने च प्रभुर्भवतीति, अर्थात् यदि श्रद्धाय जीवतया जुगुप्सते ततः ॥ योऽसौ वायुकायसमारम्भनिवृत्तौ प्रभुरुत्कर्षं दर्शयति—

आयंकदंसी अहियंति णच्चा, जे अज्झत्थं जाणइ से बहिया जाणइ, जे बहिया जाणइ से अज्झत्थं जाणइ, एयं तुलमन्नेसिं (सू० ५६)

'तंकि कृच्छ्रजीवन' इत्यातङ्कनमातङ्कः–कृच्छ्रजीवनं–दुःखं, तच्च द्विविधं–शारीरं मानसं च, तत्राद्यं कण्टकक्षारशस्त्रगण्डलूतादिसमुत्थं, मानसं प्रियविप्रयोगाप्रियसम्प्रयोगेप्सितालाभदारिद्र्यदौर्मनस्यादिकृतम्, एतदुभयमातङ्कः, एनमातङ्कं पश्यति तच्छीलश्चेत्यातङ्कदर्शी, अवश्यमेतदुभयमपि दुःखमापतति मय्यनिवृत्तवायुकायसमारम्भे, ततश्चैतद्वायुकायसमारम्भणमातङ्कहेतुभूतमहितमिति ज्ञात्वैतस्मान्निवर्त्तने प्रभुर्भवतीति । यदिवाऽऽतङ्को द्वेधा–द्रव्यभावभेदात्, तत्र द्रव्यातङ्के इदमुदाहरणम्—जंबुदीवे दीवे भरहे वासंमि अत्थि सुपसिद्धं । बहुणयरगुणसमिद्धं रायगिहं णाम णयरंति ॥ १ ॥ तत्थासि गरुयदरियारिमद्दणो भुयणनिग्गयपयावो । अभिगयजीवाजीवो राया णामेण जियसत्तू ॥ २ ॥ अण- ॥ ७५ ॥

१ °मापतितमप्यनिवृत्त० प्र. अत्रार्थीति सम्बोधनेऽन्यस्याक्षर्वे वा. २ जम्बूद्वीपे द्वीपे भरते वर्षेऽस्ति सुप्रसिद्धम् । बहुनगरगुणसमृद्धं राजगृहं नाम नगरमिति ॥ १ ॥ तत्रासीत् गुरुदर्पारिमर्दनो भुवननिर्गतप्रतापः । अभिगतजीवाजीवो राजा नाम्ना जितशत्रुः ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेरयगरुयसंवेगभाविओ धम्मघोसपामूले । सो अन्नया कयाई पमाइणं पासए सेहं ॥ ३ ॥ चोइज्जंतमभिक्खं अवराहं तं पुणोऽवि कुणमाणं । तस्स हियट्ठं राया सेसाण य रक्खणट्ठाए ॥ ४ ॥ आयरिणाणुण्णाए आणावइ सो उ णियययपुरिसेहिं । तिव्वुक्कडदव्वेहिं संधियपुव्वं तहिं खारं ॥ ५ ॥ पक्खित्तो जत्थ णरो णवरं गोदोहमेत्तकालेणं । णिज्जिण्णमंससोणिय अट्ठियसेसत्तणमुवेइ ॥ ६ ॥ दो ताहे पुव्वमए पुरिसे आणावए तहिं राया । एगं गिहत्थवेसं बीयं पासंडिणेवत्थं ॥ ७ ॥ पुव्वं चिय सिक्खविए ते पुरिसे पुच्छए तहिं राया । को अवराहो एसिं ? भणंति आणं अइक्कमइ ॥ ८ ॥ पासंडिओ जहुत्तं ण वट्टइ अत्तणो य आयारे । पक्खिवह खारमज्झे खित्ता गोदोहमेत्तस्स ॥ ९ ॥ दट्ठूणऽट्ठिवसेसे ते पुरिसे अलियरोसरत्तच्छो । सेहं आलोयंतो राया तो भणइ आयरियं ॥ १० ॥ तुम्हवि कोऽवि पमादी ? सासेमि य तंपि णत्थि भणइ गुरू । जइ होही तो साहे तुम्हे चिय तस्स जाणिहिह ॥११॥ सेहो गए णिवंमी भणई ते साहुणो उ ण पुणत्ति । होहं पमायसीलो तुम्हं सरणागओ धणियं ॥ १२ ॥ जइ पुण होज्ज पमाओ पुणो ममं सद्दुभावरहियस्स । तुम्ह गुणेहिं

१ अनवरतगुरुसंवेगभावितो धर्मघोषपादमूले । सोऽन्यदा कदाचित्प्रमादिनं पश्यति शिष्यम् ॥ ३ ॥ चोद्यमानमभीक्ष्णमपराधं तं पुनरपि कुर्वन्तम् । तस्य हिताय राजा शीघ्राणां च रक्षणार्थाय ॥ ४ ॥ आचार्यानुज्ञया आनयति स तु निजपुरुषैः । तीव्रोत्कटद्रव्यैः संधुक्षपूर्वं तत्र क्षारम् ॥ ५ ॥ प्रक्षिप्तो यत्र नरो नवरं गोदोहमात्रकालेन । निर्जीर्णमांसशोणितोऽस्थिशेषत्वमुपैति ॥ ६ ॥ द्वौ तदा पूर्वमृतौ पुरुषावानयति तत्र राजा । एकं गृहस्थवेषं द्वितीयं पाषण्डिनेपथ्यम् ॥ ७ ॥ पूर्वमेव शिक्षितान् तान् पुरुषान् पृच्छति तत्र राजा । कोऽपराधोऽनयोः ? भणन्ति आज्ञामतिक्रामति ॥८॥ पाखण्डिको यथोक्तं न वर्त्तते आत्मनश्चाचारे । प्रक्षिपत क्षारमध्ये क्षिप्तौ गोदोहमात्रेण ॥ ९ ॥ दृष्ट्वाऽस्थिवशेषौ तौ पुरुषौ अलिकरोषरक्ताक्षः । शैक्षकमालोकयन् राजा ततो भणत्याचार्यम् ॥ १० ॥ युष्माकमपि कोऽपि प्रमादी ?, शासयामि च तमपि नास्ति भणति गुरुः । यदि भविष्यति तदा कथयिष्यामि यूयमेव तं ज्ञास्थथ ॥ ११ ॥ शैक्षको गते नृपे भणति तान् साधूंस्तु न पुनरिति । भविष्यामि प्रमादशीलो युष्माकं शरणागतोऽत्यर्थम् ॥ १२ ॥ यदि पुनर्भवेत्प्रमादः पुनर्मम शठ(श्राद्ध) भावरहितस्य । युष्माकं गुणैः

सुविहिय! तो सावगरक्खसा मुच्चे ॥ १३ ॥ आयंकभओविग्गो ताहे सो णिच्चउज्जुओ जाओ । कोवियमती य समए रण्णा मरिसाविओ पच्छा ॥ १४ ॥ दव्वायंकादंसी अत्ताणं सव्वहा णियत्तेइ । अहियारंभाउ सया जह सीसो धम्मघोसस्स ॥ १५ ॥ भावातङ्कादर्शी तु नरकतिर्यङ्मनुष्यामरभवेषु प्रियविप्रयोगादिशारीरमानसातङ्कभीत्या न प्रवर्त्तते वायुसमारम्भे, अपि त्वहितमेतद्वायुसमारम्भणमिति मत्वा परिहरति, अतो य आतङ्कदर्शी भवति विमलविवेकभावात् स वायुसमारम्भस्य जुगुप्सायां प्रभुः, हिताहितप्राप्तिपरिहारानुष्ठानप्रवृत्तेः, तदन्यैर्वंविधपुरुषवदिति । वायुकायसमारम्भनिवृत्तेः कारणमाह—'जे अज्झत्थ'मित्यादि, आत्मानमधिकृत्य यद्वर्त्तते तदध्यात्मं, तच्च सुखदुःखादि, तद्यो जानाति—अवबुध्यते स्वरूपतोऽवगच्छतीत्यर्थः, स बहिरपि प्राणिगणं वायुकायादिकं जानाति, यथैषोऽपि हि सुखाभिलाषी दुःखाद्भीद्विजते, यथा मयि दुःखमापतितमतिकटुकमसद्वेद्यकर्मोदयादशुभफलं स्वानुभवसिद्धं एवं यो वेत्ति स्वात्मनि सुखं च सद्वेद्यकर्मोदयात् शुभफलमेवं च योऽवगच्छति स खल्वध्यात्मं जानाति, एवं च योऽध्यात्मवेदी स बहिर्व्यवस्थितवायुकायादिप्राणिगणस्यापि नानाविधोपक्रमजनितं स्वपरसमुत्थं च शरीरमनःसमाश्रयं दुःखं सुखं वा वेत्ति, स्वप्रत्यक्षतया परत्राप्यनुमीयते, यस्य पुनः स्वात्मन्येव विज्ञानमेवंविधं न सनस्ति कुतस्तस्य बहिर्व्यवस्थितवायुकायादिष्वपेक्षा ?, यश्च बहिर्जानाति सोऽध्यात्मं यथावदवैति, इतरथाव्यभिचारादिति । परात्मपरिज्ञानाच्च यद्विधेयं तद्दर्शयितुमाह—'एयं

१ सुविहिताः ततः श्रावकराक्षसात् मुच्येयम् ॥ १३ ॥ आतङ्कभयोद्विग्नस्तदा स नित्यमुद्युक्तो जातः । कोविदमतिश्च समये राज्ञा क्षमितः पश्चात् ॥ १४ ॥ द्रव्यातङ्कादर्शी आत्मानं सर्वथा निवर्त्तयति । अहितारम्भात् सदा यथा शिष्यो धर्मघोषस्य ॥ १५ ॥

तुलमन्नेसि'मित्यादि, एतां तुलां यथोक्तलक्षणाम् अन्वेषयेदू—गवेषयेदिति, का पुनरसौ तुला ?, यथाऽऽत्मानं सर्व्वथा सुखाभिलाषितया रक्षसि तथाऽपरमपि रक्ष, यथा परं तथाऽऽत्मानमित्येतां तुलां तुलितस्वपरसुखदुःखानुभवोऽन्वेषयेदू—एवं कुर्यादित्यर्थः, उक्तं च—"कट्ठेण कंटएण व पाए विद्धस्स वेयणट्टस्स । जह होइ अनिव्वाणी सव्वत्थ जिएसु तं जाण ॥ १ ॥" तथा "मरिष्यामीति यद् दुःखं, पुरुषस्योपजायते । शक्यस्तेनानुमानेन, परोऽपि परिरक्षितुम् ॥ १ ॥"॥ अतश्च यथाऽभिहिततुलातुलितस्वपरा नराः स्थावरजङ्गमजन्तुसङ्घातरक्षणायैव प्रवर्त्तन्ते, कथमिति दर्शयति—

इह संतिगया दविया णावकंखंति जीविउं (सू० ५७)

'इह' एतस्मिन् दयैकरसे जिनप्रवचने शमनं शान्तिः—उपशमः प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणसम्यग्दर्शनज्ञानचरणकलापः शान्तिरुच्यते, निराबाधमोक्षाख्यशान्तिप्राप्तिकारणत्वात्, तामेवंविधां शान्तिं गताः—प्राप्ताः शान्तिगताः, शान्तौ वा स्थिताः शान्तिगताः, द्रविका नाम रागद्वेषविनिर्मुक्ताः, द्रवः—संयमः सप्तदशविधानः कर्मकाठिन्यद्रवणकारित्वाद्—विलयहेतुत्वात् स येषां विद्यते ते द्रविकाः, नावकाङ्क्षन्ति—न वाञ्छन्ति नाभिलषन्तीत्यर्थः, किं नावकाङ्क्षन्ति ?—'जीवितुं' प्राणान् धारयितुं, केनोपायेन जीवितुं नाभिकाङ्क्षन्ति ?, वायुजीवोपमर्दनेनेत्यर्थः, शेषपृथिव्यादिजीवकायसंरक्षणं तु पूर्वोक्तमेव, समुदायार्थस्त्वयम्—इहैव जैने प्रवचने यः संयमस्तद्व्यवस्थिता एवोन्मूलितातितुङ्गरा-

१ काष्ठेन कण्टकेन वा पादे विद्धस्य वेदनार्त्तस्य । यथा भवत्यनिर्वाणी (असाता) सर्वत्र जीवेषु तां जानीहि ॥ १ ॥ २ स्वपरान्तराः. प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गद्धेषद्रुमाः परभूतोपमर्दनिष्पन्नसुखजीविकानिरभिलाषाः साधवो, नान्यत्र, एवंविधक्रियावबोधाभावादिति ॥ एवं व्यवस्थिते सति—

लज्जमाणे पुढो पास अणगारा मोत्ति एगे पवयमाणा जमिणं विरूवरूवेहिं सत्थेहिं वाउकम्मसमारंभेणं वाउसत्थं समारंभमाणे अण्णे अणेगरूवे पाणे विहिंसति । तत्थ खलु भगवया परिण्णा पवेइया । इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाईमरणमोयणाए दुक्खपडिघायहेउं से सयमेव वाउसत्थं समारभति अण्णेहिं वा वाउसत्थं समारंभावेइ अण्णे वाउसत्थं समारंभंते समणुजाणति, तं से अहियाए तं से अबोहीए, से तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवओ अणगाराणं अंतिए इहमेगेसिं णायं भवति–एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णिरए, इच्चत्थं गड्ढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं वाउकम्मसमारंभेणं वाउसत्थं समारंभमाणे अण्णे अणेगरूवे पाणे विहिंसति (सू० ५८)

॥ ७७ ॥

से बेमि संति संपाइमा पाणा आहच्च संपयंति य फरिसं च खलु पुट्ठा एगे संघायमावज्जंति, जे तत्थ संघायमावज्जंति ते तत्थ परियावज्जंति, जे तत्थ परियावज्जंति ते तत्थ उद्दायंति, एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाया भवंति, एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति, तं परिण्णाय मेहावी णेव सयं वाउसत्थं समारंभेज्जा णेवऽण्णेहिं वाउसत्थं समारंभावेज्जा णेवऽण्णे वाउसत्थं समारंभंते समणुजाणेज्जा, जस्सेते वाउसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे (सू० ५९) त्तिबेमि

पूर्ववन्नेयं ॥ सम्प्रति षड्जीवनिकायविषयवधकारिणामपायदिदर्शयिषया तन्निवृत्तिकारिणां च सम्पूर्णमुनिभावप्रदर्शनाय सूत्राणि प्रक्रम्यन्ते—

एत्थंपि जाणे उवादीयमाणा, जे आयारे ण रमंति, आरंभमाणा विणयं वयंति, छंदोवणीया अज्झोववण्णा, आरंभसत्ता पकरंति संगं (सू० ६०)

एतस्मिन्नपि–प्रस्तुते वायुकाये, अपिशब्दात् पृथिव्यादिषु च समाश्रितमारम्भं ये कुर्वन्ति ते उपादीयन्ते–कर्मणा

वध्यन्त इत्यर्थः, एकस्मिन् जीवनिकाये वधप्रवृत्तः शेषनिकायवधजनितेन कर्मणा वध्यते, किमिति ?–यतो न ह्येकजीवनिकायविषय आरम्भः शेषजीवनिकायोपमर्दमन्तरेण कर्तुं शक्यत इत्यतस्त्वमेवं जानीहि, श्रोतुरमेन परामर्शः, अत्र च द्वितीयार्थे प्रथमा, 'ततश्चैवमन्वयो लगयितव्यः–पृथिव्याद्यारम्भिणः शेषकायारम्भकर्मणा उपादीयमानान् जानीहि, के पुनः पृथिव्याद्यारम्भिणः शेषकायारम्भकर्म्मणोपादीयन्ते ? इति, आह—'जे आयारे ण रमंति' ये ह्यविदितपरमार्था ज्ञानदर्शनचरणतपोवीर्याख्ये पञ्चप्रकाराचारे 'न रमन्ते'न धृतिं कुर्वन्ति, तदधृत्या च पृथिव्याद्यारम्भिणः, तान् कर्म्मभिरुपादीयमानान् जानीहि, के पुनराचारे न रमन्ते ?, शाक्यदिगम्बरपार्श्वस्थादयः । किमिति ?, यत आह—'आरंभमाणा विणयं वयंति' आरम्भमाणा अपि पृथिव्यादीन् जीवान् विनयं–संयममेव भाषन्ते, कर्माष्टकविनयनाद्विनयः–संयमः, शाक्यादयो हि वयमपि विनयव्यवस्थिता इत्येवं भाषन्ते, न च पृथिव्यादिजीवाभ्युपगमं कुर्वन्ति, तदभ्युपगमे वा तदाश्रितारम्भित्वात् ज्ञानाद्याचारविकलत्वेन नष्टशीला इति । किं पुनः कारणं ?, येनैवं ते दुष्टशीला अपि विनयव्यवस्थितमात्मानं भाषन्ते इत्यत आह—'छन्दोवणीया अज्झोववण्णा' छन्दः–स्वाभिप्रायः इच्छामात्रमनालोचितपूर्वापरं विषयाभिलाषो वा, तेन छन्दसा उपनीताः–प्रापिता आरम्भमार्गमविनीता अपि विनयं भाषन्ते, अधिकमत्यर्थमुपपन्ना तच्चित्तास्तदात्मकाः अध्युपपन्नाः–विषयपरिभोगायत्तजीविता इत्यर्थः, य एवं विषयाशाकर्षितचेतसस्ते किं कुर्युरित्याह—'आरंभसत्ता पकरंति संगं' आरम्भणमारम्भः–सावद्यानुष्ठानं तस्मिन् सक्ताः–तत्पराः प्रकर्षेण कुर्वन्ति, सञ्यन्ते

॥ ७८ ॥

१ छन्दोनोपनीताः प्र. 'अभिप्रायवशे छन्दो' इत्यमरोक्तेः 'छन्दो वशेऽभिप्राये च' इति सकारान्तेऽनेकार्थोक्तेर्नायमसाधुः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येन संसारे जीवाः स सङ्गः–अष्टविधं कर्म्म विषयसङ्गो वा तं सङ्गं प्रकुर्व्वन्ति, सङ्गाच्च पुनरपि संसारः, आजवंजवीभावरूपैः, एवंप्रकारमपायमवाप्नोति षड्जीवनिकायघातकारीति ॥ अथ यो निवृत्तस्तदारम्भात्स किंविशिष्टो भवतीत्यत आह—

से वसुमं सव्वसमण्णागयपण्णाणेणं अप्पाणेणं अकरणिज्जं पावं कम्मं णो अण्णेसिं, तं परिण्णाय मेहावी णेव सयं छज्जीवनिकायसत्थं समारंभेज्जा णेवऽण्णेहिं छज्जीवनिकायसत्थं समारंभावेज्जा णेवऽण्णं छज्जीवनिकायसत्थं समारंभंते समणुजाणेज्जा, जस्सेते छज्जीवनिकायसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे (सू० ६१) त्तिबेमि ॥ इति सप्तमोद्देशकः । इति प्रथममध्ययनम् ॥

'से' इति पृथिव्युद्देशकाद्यभिहितनिवृत्तिगुणभाक् षड्जीवनिकायहननिवृत्तो 'वसुमान्' वसूनि द्रव्यभावभेदाद्द्विधा–द्रव्यवसूनि–मरकतेन्द्रनीलवज्रादीनि भाववसूनि–सम्यक्त्वादीनि तानि यस्य यस्मिन्वा सन्ति स वसुमान् द्रव्यवानित्यर्थः, इह च भाववसुभिर्वसुमत्त्वमङ्गीक्रियते, प्रज्ञायन्ते यैस्तानि प्रज्ञानानि–यथावस्थितविषयग्राहीणि ज्ञानानि सर्वाणि समन्वागतानि प्रज्ञानानि यस्यात्मनः स सर्वसमन्वागतप्रज्ञानः–सर्वावबोधविशेषानुगतः सर्वेन्द्रियज्ञानैः षट्टुभिर्यथावस्थितविषयग्राहिभिरविपरीतैरनुगत इतियावत्, तेन सर्वसमन्वागतप्रज्ञानेनात्मना, अथवा सर्वेषु द्रव्यपर्यायेषु सम्यगनुगतं प्रज्ञानं

आ. सू. १४

१ इतः प्राक् 'पुनः पुनस्तत्रैवोत्पत्तिः' इति प्र. न च पुस्तकः. २ पुनः पुनस्तत्रैव सङ्गः कर्मोत्पत्तिरूपः.

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ७९ ॥

यस्यात्मनः स सर्वसमन्वागतप्रज्ञान आत्मा, भगवद्वचनप्रामाण्यादेवमेतत् द्रव्यपर्यायजातं नान्यथेति सामान्यविशेषपरिच्छेदान्निश्चिताशेषज्ञेयप्रपञ्चस्वरूपः सर्वसमन्वागतप्रज्ञान आत्मेत्युच्यते, अथवा–शुभाशुभफलसकलकलापपरिज्ञानान्नरकतिर्यक्नरामरमोक्षसुखस्वरूपपरिज्ञानाच्चापरितुष्यन्ननैकान्तिकादिगुणयुक्ते संसारसुखे मोक्षानुष्ठानमाविष्कुर्व्वन् सर्वसमन्वागतप्रज्ञान आत्माऽभिधीयते, तेनैवंविधेनात्मना 'अकरणीयम्' अकर्त्तव्यमिहपरलोकविरुद्धत्वादकार्यमिति मत्वा नान्वेषयेत्–न तदुपादानाय यत्नं कुर्यादित्यर्थः, किं पुनः तदकरणीयं नान्वेषणीयमिति ?, उच्यते, 'पापं कर्म' अधःपतनकारित्वात्पापं क्रियत इति कर्म, तच्चाष्टादशविधं प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहक्रोधमानमायालोभप्रेमद्वेषकलहाभ्याख्यानपैशून्यपरपरिवादरत्यरतिमायामृषामिथ्यादर्शनशल्याख्यमिति, एवमेतत् पापमष्टादशभेदं नान्वेषयेत्–न कुर्यात् स्वयं न चान्यं कारयेत् न कुर्वाणमन्यमनुमोदेत । एतदेवाह—'तं परिण्णाय मेहावी'त्यादि 'तत्' पापमष्टादशप्रकारं परिः–समन्तात् ज्ञात्वा मेधावी–मर्यादावान् नैव स्वयं षड्जीवनिकायशस्त्रं स्वकायपरकायादिभेदं समारभेत नैवान्यैः समारम्भयेत् न चान्यान् समारभमाणान् समनुजानीयात्, एवं यस्यैते सुपरीक्ष्यकारिणः षड्जीवनिकायशस्त्रसमारम्भाः तद्विषयाः पापकर्म्मविशेषाः परिज्ञाता ज्ञेपरिज्ञया प्रत्याख्यानपरिज्ञया च, स एव मुनिः प्रत्याख्यातकर्म्मत्वात्–प्रत्याख्याताशेषपापागमत्वात्, तदन्यैर्वंविधपुरुषैर्यदिति । इतिशब्दोऽध्ययनपरिसमाप्तिप्रदर्शनाय, ब्रवीमीति सुधर्मस्वाम्याह स्वमनीषिकाव्यावृत्तये, भगवतोऽपनीतघनघातिकर्म्मचतुष्टयस्य समासादिताशेषपदार्थाविर्भावकदिव्यज्ञानस्य प्रणताशेषगीर्वाणाधिपतेश्चतुस्त्रिंशदतिशयसमन्वितस्य श्रीवर्द्धमानस्वामिन उपदेशात्सर्वमेतदाख्यातं यदन्तेकान्तं मयेति । उक्तः सूत्रानुगमः निक्षेपश्च ससूत्रस्पर्शनिर्युक्तिः । सम्प्रति नया नैगमादयः, ते चान्यत्र सुविचारिताः, सङ्क्षेपतस्तु सर्वेऽपि एते द्वेधा भवन्ति, ज्ञाननयाश्चरणनयाश्च, तत्र ज्ञाननया ज्ञानमेव प्रधानं मोक्षसाधनमित्यध्यवस्यन्ति, हिताहितप्राप्तिपरिहारकारित्वात् ज्ञानस्य, तत्पूर्वकसकलदुःखप्रहाणाच्च ज्ञानमेव न तु क्रिया, चरणनयास्तु चरणस्य प्राधान्यमभिदधति, अन्वयव्यतिरेकसमधिगम्यत्वात्सकलपदार्थानां, तथाहि–सत्यपि ज्ञाने सकलवस्तुग्राहिणि समुल्लसिते न चरणमन्तरेण भवधारणीयकर्मोच्छेदः, तदनुच्छेदाच्च मोक्षालाभः, तस्मान्न ज्ञानं प्रधानं, चरणे पुनः सति सर्वमूलोत्तरगुणाख्ये घातिकर्मोच्छेदः, तदुच्छेदात् केवलावबोधप्राप्तिः, ततश्च यथाख्यातचारित्रवह्निज्वालाकलापप्रतापितसकलकर्म्मकन्दोच्छेदः, तदुच्छेदादव्याबाधसुखलक्षणमोक्षावाप्तिरिति, तस्माच्चरणं प्रधानमित्यध्यवस्यामः । अत्रोच्यते, उभयमप्येतन्मिथ्यादर्शनं, यत उक्तम्—"हयं नाणं कियाहीणं, हया अन्नाणओ किया । पासंतो पंगुलो दड्ढो, धावमाणो य अंधओ ॥ १ ॥" तदेवं सर्वेऽपि नयाः परस्परनिरपेक्षा मिथ्यात्वरूपतया न सम्यग्भावमनुभवन्ति, समुदितास्तु यथावस्थितार्थप्रतिपादनेन सम्यक्त्वं भवन्ति, यत उक्तम्—"एवं सव्वेवि णया मिच्छादिट्ठी सपक्खपडिबद्धा । अण्णोण्णणिस्सिया पुण हवंति ते चेव सम्मत्तं ॥ १ ॥" तस्मादुभयं परस्परसापेक्षं मोक्षप्राप्तये अलं, न प्रत्येकं ज्ञानं चरणं चेति, निर्दोषः खल्वेष पक्ष इति व्यवस्थितं । तथा चोभयप्राधान्यदिदर्शयिषयाह–सव्वेसिंपि णयाणं बहुविधवत्त-

शस्त्र.परि १ उद्देशकः ७

॥ ७९ ॥

१ हतं ज्ञानं क्रियाहीनं हताऽज्ञानतः क्रिया । पश्यन् पङ्गुर्दग्धो धावंश्चान्धः ॥ १ ॥ २ एवं सर्वेऽपि नयाः मिथ्यादृष्टयः स्वपक्षप्रतिबद्धाः । अन्योऽन्यनिश्रिताः पुनर्भवन्ति त एव सम्यक्त्वम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्वयं णिसामेत्ता । तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ १ ॥ चरणं[1]च गुणश्च चरणगुणौ तयोः स्थितश्चरणगुणस्थितः, गुणशब्दोपादानात् ज्ञानमेव परिगृह्यते, यतो न कदाचिदात्मनो गुणिनस्तेन ज्ञानाख्येन गुणेन वियोगोऽस्ति, ततोऽसौ सहभावी गुणः, अतो बहुविधवक्तव्यं नयमार्गमवधार्यापि सङ्क्षेपात् ज्ञानचरणयोरेव स्थातव्यमिति निश्चयो विदुषां, न चाभिलषितप्राप्तिः केवलेन चरणेन, ज्ञानहीनत्वात्, अन्धगमिक्रियाप्रतिविशिष्टप्रदेशप्राप्तिवत्, न च ज्ञानमात्रेणाभीष्टप्राप्तिः, क्रियाहीनत्वात्, चक्षुर्ज्ञानसमन्वितपङ्गुपुरुषअर्धदग्धनगरमध्यावस्थितयथावस्थितदर्शीज्ञानवत्, तस्मादुभयं प्रधानं, नगरदाहनिर्गमे पङ्ग्वन्धसंयोगक्रियाज्ञानवत् ॥ एवमिदमाचाराङ्गसन्दोहभूतं प्रथमाध्ययनं षड्जीवनिकायस्वरूपरक्षणोपायगर्भमादिमध्यावसानेषु दयैकरसमेकान्तहितापत्तिकारि मुमुक्षुणा यदाऽधीतं भवति सूत्रतः शिक्षकेणार्थतश्चावधृतं भवति श्रद्धानसंवेगाभ्यां च यथावदात्मीकृतं भवति ततोऽस्य महाव्रतारोपणमुपस्थापनं परीक्ष्य निशीथाद्यभिहितक्रमेण सचित्तपृथिवीमध्यगमनादिना श्रद्दधानस्य सर्वं यथाविधि कार्यम् । कः पुनरुपस्थापने विधिरिति[1], अत्रोच्यते, शोभनेषु तिथिकरणनक्षत्रमुहूर्त्तेषु द्रव्यक्षेत्रभावेषु च भगवतां प्रतिकृतीरभिवन्द्य प्रवर्द्धमानाभिः स्तुतिभिः अथ पादपतितोत्थितः सूरिः सह शिक्षकेण महाव्रतारोपणप्रत्ययं कायोत्सर्गमुत्सार्यैकैकं महाव्रतमादित आरभ्य त्रिरुच्चारयेद् यावन्निशिभुक्तिविरतिरविकला त्रिरुच्चारिता, पश्चादिदं त्रिरुच्चरितव्यम्—'इच्चेइयाइं पंच महव्वयाइं राइभोयणवेरमणछट्ठाइं अत्तहियट्ठयाए उपसंपज्जित्ता णं विहरामि' पश्चाद्वन्दनकं दत्त्वोत्थितोऽभिधत्ते अवनताङ्ग- ॥ ८० ॥

१ इत्येतानि पञ्च महाव्रतानि रात्रिभोजनविरमणषष्ठानि आत्महितार्थायोपसंपद्य विहरामि.

यष्टिः—'संदिशत किं भणामी'ति ?, सूरिः प्रत्याह—'वन्दित्वाऽभिधत्स्वे'त्येवमुक्तोऽभिवन्द्योत्थितो भणति—'युष्माभिर्मम महाव्रतान्यारोपितानि इच्छाम्यनुशिष्टि'मिति, आचार्योऽपि प्रणिगदति—'निस्तारकपारगो भवाचार्यगुणैर्वर्द्धस्व' वचनविरतिसमनन्तरं च सुरभिवासचूर्णमुष्टिं शिष्यस्य शिरसि किरति, पश्चाद्वन्दनकं दत्त्वा प्रदक्षिणीकरोत्याचार्यं नमस्कारमावर्त्तयन्, पुनरपि वन्दते, तथैव च करोति सकलक्रियानुष्ठानम्, एवं त्रिप्रदक्षिणीकृत्य विरमति शिष्यः, शेषाः साधवश्चास्य मूर्ध्नि युगपद्वासमुष्टिं विमुञ्चन्ति सुरभिपरिमलां यतिजनसुलभकेसराणि वा, पश्चात्कारितकायोत्सर्गः सूरिरभिदधाति—गणस्तव कोटिकः स्थानीयं कुलं वैराख्या शाखा अमुकाभिधान आचार्य उपाध्यायश्च, साध्व्याः प्रवर्त्तिनी तृतीयोद्देष्टव्या, यथाऽऽसन्नं चोपस्थाप्यमाना रत्नाधिका भवन्ति, पश्चादाचाम्लं निर्विकृतिकं वा स्वगच्छसन्ततिसमायातमाचरन्तीति । एवमेतदध्ययनमादिमध्यान्तकल्याणकलापयोगि भव्यजनतामनःसमाधानाधायि प्रियविप्रयोगादिदुःखावर्त्तबहुलकषायझषादिकुलाकुलविषमसंसृतिसरित्तारणसमर्थममलदयैकरसमसकृदभ्यसितव्यं मुमुक्षुणेति ॥ आचार्यश्रीशीलाङ्कविरचिता शस्त्रपरिज्ञाध्ययनटीका समाप्तेति (ग्रन्थाग्रं श्लोकाः २२२१) ॥

इत्याचाराङ्गे शस्त्रपरिज्ञाध्ययनम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमः श्रीवर्द्धमानाय, वर्द्धमानाय पर्षदे । उत्काचारप्रपञ्चाय, निष्प्रपञ्चाय तायिने ॥ १ ॥
शस्त्रपरिज्ञाविवरणमतिगहनमितीव किल वृत्तं पूर्व्यैः । श्रीगन्धहस्तिमिश्रैर्विवृणोमि ततोऽहमवशिष्टम् ॥ २ ॥

उक्तं प्रथमाध्ययनं, साम्प्रतं द्वितीयमारभ्यते, अस्य चायमभिसम्बन्धः—इह हि मिथ्यात्वोपशमक्षयक्षयोपशमान्यतरावाप्तसम्यग्दर्शनज्ञानकार्यस्यात्यन्तिकैकान्तानाबाधपरमानन्दस्वतत्त्वसुखानावरणज्ञानदर्शनलक्षणलक्षितमोक्षकारणस्याश्रवनिरोधनिर्जरारूपस्य मूलोत्तरगुणभेदभिन्नस्य चारित्रस्यापराशेषव्रततृतिकल्पनिष्पादितनिष्प्रत्यूहसकलप्राणिगणसङ्कटनपरितापनापद्रावणनिवृत्तिरूपस्य संसिद्धये मरणाभावप्रसङ्गादभूतगुणात्मधर्म्मज्ञानोपलब्धेर्बाहस्पत्यमतनिरासेन सामान्यतो जीवास्तित्वं प्रतिपाद्य विशेषतश्च बौद्धादिमतनिरासेनैकेन्द्रियावनिवनानलपवनवनस्पतिभेदांश्च जीवान् प्रकटय्य यथाक्रमं समानजातीयाश्मलताद्युद्भेददर्शनादशोमांसाङ्कुरवत् अविकृतभूमिखननोपलब्धेर्म्मण्डूकवत् विशिष्टाहारोपचयापचयशरीराभिवृद्धिक्षयान्वयव्यतिरेकगतेरर्भकशरीरवत् अपरप्रेरितापतिहतानियततिरश्चीनगमनाद्वाश्वादिवत् सालक्तकनूपुरालङ्कारकामिनीचरणताडनविकाराधिगतेः कामुकवदित्यादिभिः प्रयोगैः तथोर्द्ध्वैः शिर उद्घाट्य सूक्ष्मबादरद्वित्रिचतुष्पञ्चेन्द्रियसंज्ञीतरपर्याप्तकापर्याप्तकभेदांश्च प्रदर्श्य शस्त्रं च स्वकायपरकायभेदभिन्नं तद्वधे बन्धं विरतिं च प्रतिपाद्य पुनरपि तदेव चारित्रं यथा सम्पूर्णभावमनुभवति तथाऽनेनाध्ययनेनोपदिश्यते, तथाहि—अधिगतशस्त्रपरिज्ञासूत्रार्थस्य तत्प्रतिपादितैकेन्द्रियपृथिवीकायादि श्रद्दधानस्य सम्यक् तद्रक्षापरिणामवतः सर्वोपाधिशुद्धस्य तद्योग्यतयाऽऽरोपितपञ्चमहाव्रतभारस्य साधोर्यथा रागादिकषायलोकस्य शब्दादिविषयलोकस्य वा विजयो भवति तथाऽनेनाध्ययनेन प्रतिपाद्यते ।

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ८२ ॥

तथा च निर्युक्तिकारेणाध्ययनार्थाधिकारः शस्त्रपरिज्ञायां प्राग्नरदेशि—" लोओ जह वज्झइ जह य तं विजहिअव्वं"ति, इत्यनेन सम्बन्धेनायातस्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति । तत्र सूत्रार्थकथनमनुयोगः, तस्य द्वाराणि उपाया व्याख्याङ्गानीत्यर्थः, तानि चोपक्रमादीनि, तत्रोपक्रमो द्वेधा—शास्त्रानुगतः शास्त्रीयः लोकानुगतो लौकिक इति, निक्षेपश्चिधा—ओघनामसूत्रालापकनिष्पन्नभेदात्, अनुगमो द्वेधा—सूत्रानुगमो निर्युक्त्यनुगमश्च, नया—नैगमादयः । तत्र शास्त्रीयोपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारोऽध्ययनसम्बन्धे शस्त्रपरिज्ञायां प्रागेव निरदेशि, उद्देशार्थाधिकारं तु स्वयमेव निर्युक्तिकारः प्रचिकटयिषुराह—

लोक.वि.२ उद्देशकः१

सयणे य अदढत्तं बीयगंमि माणो अ अत्थसारो अ । भोगेसु लोगनिस्साइ लोगे अममिज्जया चेव ॥ १६३ ॥

तत्र प्रथमोद्देशकार्थाधिकारः 'स्वजने' मातापित्रादिके अभिष्वङ्गोऽधिगतसूत्रार्थेन न कार्य इत्यध्याहारः, तथा च सूत्रम्—'माया मे पिया मे' इत्यादि १, 'अदढत्तं बीयगंमि'त्ति द्वितीय उद्देशके अदृढत्वं संयमे न कार्यमिति शेषः, विषयकषायादौ चादृढत्वं कार्यमिति, वक्ष्यति च—'अरइं आउट्टे मेहावी' २, तृतीय उद्देशके 'माणो अ अत्थसारो अ'त्ति जात्याद्युपेतेन साधुना कर्म्मवशाद्विचित्रतामवगम्य सर्वमदस्थानानां मानो न कार्यः, आह च—'के गोआवाई? के माणावादी'त्यादि, अर्थसारस्य च निस्सारता वर्ण्यते, तथा च—'तिविहेण जाऽवि से तत्थ मत्ता अप्पा वा बहुगा वे'त्यादि ३, चतुर्थे तु 'भोगेषु'त्ति भोगेष्वभिष्वङ्गो न कार्य इति शेषः, यतो भोगिनामपायान् वक्ष्यति, सूत्रं च—'थीहिं लोए पव्वहिए' ४, पञ्चमे तु 'लोगणिस्साए'त्ति त्यक्तस्वजनधनमानभोगेनापि साधुना संयमदेहप्रतिपालनाय स्वार्थारम्भप्रवृत्तलोकनिश्रया विहर्त्तव्यमिति शेषः, तथा च सूत्रम्—'समुट्ठिए अणगारे' इत्यादि जाव परिव्वए' ५, षष्ठोद्देशके तु—' लोए अममिज्जया चेव' लोकनिश्रयाऽपि विहरता साधुना तस्मिन् लोके पूर्वापरसंस्तुतेऽसंस्तुते च न ममत्वं कार्यं, पङ्कजवत्तदाधारस्वभावानभिष्वङ्गिणा भाव्यमिति, तथा च सूत्रम्—जे ममाईयमई जहाति से जहाति ममातियं' गाथातात्पर्यार्थः ॥ नामनिष्पन्ने तु निक्षेपे लोकविजय इति द्विपदं नाम, तत्र लोकविजययोर्निक्षेपः कार्यः, सूत्रालापकनिष्पन्ने च निक्षेपे यानि निक्षेपार्हाणि सूत्रपदानि तेषां च निक्षेपः कार्यः, सूत्रपदोपन्यस्तमूलशब्दस्य च कषायाभिधायकत्वात् कषायाश्च निक्षेप्तव्याः, तदेवं नामनिष्पन्नं भविष्यत्सूत्रालापकनिष्पन्ननिक्षेपोपक्षिप्तं सामर्थ्यायातं च यन्निक्षेप्तव्यं तन्निर्युक्तिकारो गाथया सम्पिण्ड्याऽऽचष्टे—

॥ ८२ ॥

लोगस्स य विजयस्स य गुणस्स मूलस्स तह य ठाणस्स । निक्खेवो कायव्वो जंमूलागं च संसारो ॥ १६४ ॥

कण्ठ्या, केवलं 'जंमूलागं च संसार' इति यन्मूलकः संसारस्तस्य च निक्षेपः कार्यः, तच्च मूलं कषायाः, यतः नारकतिर्यग्नरामरगतिस्कन्धस्य गर्भनिषेककललार्बुदमांसपेश्यादिजन्मजरामरणशाखस्य दारिद्र्याद्यनेकव्यसनोपनिपातपत्रगहनस्य प्रियविप्रयोगाप्रियसम्प्रयोगार्थनाशानेकव्याधिशतपुष्पोपचितस्य शारीरमानसोपचिततीव्रतरदुःखोपनिपातफलस्य संसारतरोर्मूलम्—आद्यं कारणं कषायाः—कषः—संसारस्तस्याऽऽया इतिकृत्वा ॥ तदेवं यान्यत्र नामनिष्पन्ने यानि च सूत्रालापकनिष्पन्ने निक्षेप्तव्यपदानि सम्भवन्ति तानि निर्युक्तिकारः सुहृद्भूत्वा विवेकेनाऽऽचष्टे—

लोगोत्ति य विजअत्ति य अज्झयणे लक्खणं तु निप्फण्णं । गुणमूलं ठाणंति य सुत्तालावे य निप्फण्णं ॥१६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कण्ठ्या, तत्र 'यथोद्देशस्तथा निर्देश'इति न्यायाल्लोकविजययोर्निक्षेपमाह—

लोगस्स य निक्खेवो अट्ठविहो छव्विहो उ विजयस्स । भावे कसायलोगो अहिगारो तस्स विजएणं ॥ १६६ ॥

तत्र लोक्यत इति लोकः, 'लोकृ दर्शन' इत्यस्माद्धातोः 'अकर्तरि च कारके संज्ञायां (पा. ३-३-१९) मिति घञ्, स च धर्माधर्मास्तिकायव्यवच्छिन्नमशेषद्रव्याधारं वैशाखस्थानस्थकटिन्यस्तकरयुग्मपुरुषोपलक्षितमाकाशखण्डं पञ्चास्तिकायात्मको वेति, तस्य निक्षेपोऽष्टधा—नामस्थापनाद्रव्यक्षेत्रकालभवभावपर्यवभेदात्, 'छव्विहो उ विजयस्स'त्ति विजयः अभिभवः पराभवः पराजय इति पर्यायाः, तस्य निक्षेपः षड्विधो वक्ष्यते, तत्राष्टप्रकारे लोके येनाधिकारस्तमाह—'भावे कसायलोगो'त्ति भावलोकेनाधिकारः, स च भावः षट्प्रकार औदयिकादिः, तत्राप्यौदयिकभावकषायलोकेनाधिकारः, तन्मूलत्वात् संसारस्य, यद्येवं ततः किमत आह—'अहिगारो तस्स विजएणं'ति अधिकारो—व्यापारः, तस्य—औदयिकभावकषायलोकस्य 'विजयेन' पराजयेनेति गाथार्थः ॥ तत्र लोकोऽष्टधा निक्षेपार्थं प्रागुपदेक्ष्यते विजयश्च षोढा, तन्निक्षेपार्थमाह—

लोगो भणिओ दव्वं खित्तं कालो अ भावविजओ अ । भव लोग भावविजओ पगयं जह बज्झई लोगो १६७

तत्र लोकश्चतुर्विंशतिस्तवे विस्तरतोऽभिहितः, ननु च केयं वाचो युक्तिः? 'लोकश्चतुर्विंशतिस्तवेऽभिहित' इति, किमत्रानुपात्तम्?, उच्यते, इह ह्यपूर्वकरणप्रक्रमाधिरूढक्षपकश्रेणिध्यानाग्निदग्धघातिकर्मेन्धनेनोत्पन्ननिरावरणज्ञानेन विपच्यमानतीर्थकरनामाविर्भूतचतुस्त्रिंशदतिशयोपेतेन श्रीवर्द्धमानस्वामिना हेयोपादेयार्थाविर्भावनाय सदेवमनुजायां परिषद्याचा-

र्थो चभाषे, गणधरैश्च महामतिभिरचिन्त्यशक्त्युपेतैर्गौतमादिभिः प्रवचनार्थमशेषानुग्रहकारिणं स एवाचाराङ्गतया ग्रथितः, आवश्यकान्तर्भूतश्चतुर्विंशतिस्तवस्त्वारातीयकालभाविना भद्रबाहुस्वामिनाऽकारि, ततश्चायुक्तः पूर्वकालभाविन्याचाराङ्गे व्याख्यायमाने पश्चात्कालभाविना चतुर्विंशतिस्तवेनातिदेश इति कश्चित् सुकुमारमतिः, अत्राह—नैष दोषो, यतो भद्रबाहुस्वामिनाऽयमतिदेशोऽभ्यधायि, स च पूर्वमावश्यकनिर्युक्तिं विधाय पश्चादाचाराङ्गनिर्युक्तिं चक्रे, तथा चोक्तम्—"आवस्सयस्स दसकालियस्स तह उत्तरज्झमायारे"त्ति सूक्तम् । विजयस्य तु निक्षेपं नामस्थापने श्रुण्णत्वादनादृत्य द्रव्यादिकमाह—'दव्व'मित्यादिना, द्रव्यविजयो व्यतिरिक्तो द्रव्येण द्रव्यात् द्रव्ये वा विजयः कटुतिक्तकषायादिना श्लेष्मादेर्नृपतिमल्लादेर्वा, क्षेत्रविजयः षट्खण्डभरतादेर्यस्मिन् वा क्षेत्रे विजयः प्ररूप्यते, कालविजय इति कालेन विजयो यथा षष्टिभिर्वर्षसहस्रैर्भरतेन जितं भरतं, कालस्य प्राधान्यात्, भृतककर्मणि वा मासोऽनेन जित इति, यस्मिन् वा काले विजयो व्याख्यायत इति, भावविजय औदयिकादेर्भावस्य भावान्तरेण औपशमिकादिना विजयः । तदेवं लोकविजययोः स्वरूपमुपदर्श्य प्रकृतोपयोग्याह—'भवे'त्यादि, अत्र हि भवलोकग्रहणेन भावलोक एवाभिहितः, छन्दोभङ्गभीत्या ह्रस्व एवोपादायि, तथा चावादि—"भावे कसायलोगो अहिगारो तस्स विजएणं'ति, तस्य औदयिकभावकषायलोकस्य औपशमिकादिभावलोकेन विजयो यत एतदत्र प्रकृतम्, इदमत्र हृदयम्—अष्टविधलोकषड्विधविजययोः प्रा-

१ आवश्यकस्य दशकालिकस्य तथोत्तराध्ययनेष्वाचारे

ग्व्यावर्णितस्वरूपयोर्भावलोकभावविजयाभ्यामत्रोपयोग इति, यथा चाष्टप्रकारेण कर्म्मणा लोकः-प्राणिगणो बध्यते, बन्धस्योपलक्षणत्वाद्यथा च मुच्यत इत्येतदप्यत्राध्ययने प्रकृतमिति गाथार्थः ॥ तेनैव भावलोकविजयेन किं फलमित्याह—

विजिओ कसायलोगो सेयं खु तओ नियत्तिउं होइ । काममियत्तमई खलु संसारा मुच्चई खिप्पं ॥ १६८ ॥

व्याख्या—'विजितः' पराजितः, कोऽसौ?—कषायलोकः औदयिकभावकषायलोक इत्यादवत्, विजितकषायलोकः सन् किमवाप्नोतीत्याह—संसारान्मुच्यते क्षिप्रम्, अतस्तस्मान्निवर्त्तितुं श्रेयः, खुर्वाक्यालङ्कारे अवधारणे वा, निवर्त्तितुं श्रेय एव, किं कषायलोकादेव निवृत्तः संसारान्मुच्यते आहोश्विदन्यस्मादपि पापोपादानहेतोरिति दर्शयति—'काम'इत्यादि गाथार्द्धं सुगमम् । गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सति भवति, तत्रास्खलितादिगुणोपेतं सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—'जे गुणे से मुलट्ठाणे जे मूलट्ठाणे से गुणे' इत्यादि ॥

अस्य च निक्षेपनिर्युक्त्यनुगमेन प्रतिपदं निक्षेपः क्रियते, तत्र गुणस्य पञ्चदशधा निक्षेपः-

दव्वे खित्ते काले फल पज्जव गणण करण अब्भासे । गुणअगुणे अगुणगुणे भव सीलगुणे य भावगुणे ॥१६९॥

नामगुणः स्थापनागुणः द्रव्यगुणः क्षेत्रगुणः कालगुणः फलगुणः पर्यवगुणः गणनागुणः करणगुणः अभ्यासगुणः गुणागुणः अगुणगुणः भवगुणः शीलगुणः भावगुणश्चेति गाथासमासार्थः ॥ तदेवं सूत्रानुगमेन सूत्रे समुच्चरिते निक्षेपनिर्युक्त्यनुगमेन तदवयवे निक्षिप्ते सत्युपोद्घातनिर्युक्तेरवसरः, सा च 'उद्देसे'त्यादिना द्वारगाथाद्वयेनानुगन्तव्या । साम्प्रतं सूत्रस्पर्शिकनिर्युक्तेरवसरः, तत्रापि सुगमनामस्थापनाव्युदासेन द्रव्यादिकमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वगुणो दव्वं चिय गुणाण जं तंमि संभवो होइ । सचित्ते अचित्ते मीसंमि य होइ दव्वंमि ॥ १७० ॥

तत्र द्रव्यगुणो नाम द्रव्यमेव, किमिति ?, गुणानां यतो गुणिनि तादात्म्येन सम्भवात् (वः), ननु च द्रव्यगुणयोर्लक्षण-विधानभेदाद्भेदः, तथाहि–द्रव्यलक्षणं–गुणपर्यायवद् द्रव्यं, विधानमपि–धर्म्माधर्म्माकाशजीवपुद्गलादिकमिति, गुणल-क्षणं–द्रव्याश्रयिणः सहवर्त्तिनो निर्गुणा गुणा इति, त्रिधानमपि–ज्ञानेच्छाद्वेषरूपरसगन्धस्पर्शादयः स्वगतभेदभिन्ना इति, नैष दोषो, यतो द्रव्ये सचित्ताचित्तमिश्रभेदभिन्ने स गुणस्तादात्म्येन स्थितः, तत्राचित्तद्रव्यं द्विधा–अरूपि रूपि च, तत्रारूपिद्रव्यं त्रिधा–धर्म्माधर्म्माकाशभेदभिन्नं, तच्च गतिस्थित्यवगाहदानलक्षणं, गुणोऽप्यस्यामूर्त्तत्वागुरुलघुपर्या-यलक्षणः, तत्रामूर्त्तत्वं त्रयस्यापि स्वं रूपं न भेदेन व्यवस्थितम्, अगुरुलघुपर्यायोऽपि, तत्पर्यायत्वादेव, मृदो मृत्पिण्ड-स्थासकोशकुशूलपर्यायवत्, रूपिद्रव्यमपि स्कन्धतद्देशप्रदेशपरमाणुभेदं, तस्य च रूपादयो गुणाः अभेदेन व्यवस्थिताः, भेदेनानुपलब्धेः, संयोगविभागाभावात्, स्वात्मवत् । तथा सचित्तमप्यन्योगलक्षणलक्षितं जीवद्रव्यं, न च तस्माद्भिन्ना ज्ञानादयो गुणाः, तद्भेदे जीवस्याचेतनत्वप्रसङ्गात्, तत्सम्बन्धाद्धविष्यतीति चेत्, अनुपासितगुरोरिदं वचो, यतो न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते, न ह्यन्धः प्रदीपशतसम्बन्धेऽपि रूपावलोकनायालमिति । अनयैव दिशा मिश्रद्रव्येऽ-प्येकत्वसंयोजना स्वबुद्ध्या कार्येति गाथार्थः ॥ तदेवं द्रव्यगुणयोरेकान्तेनैकत्वे प्रतिपादिते सत्याह शिष्यः–तत्किमिदा-नीमभेदोऽस्तु ?, नैतदप्यस्ति, यतः सर्वथाऽभेदेऽभ्युपगम्यमाने सत्येकेनैवेन्द्रियेण गुणान्तरस्याप्युपलब्धेरपरेन्द्रियवैफल्यं स्यात्, तथाहि–चूतफलरूपादौ चक्षुराद्युपलभ्यमाने रूपाद्यात्मभूतावयविद्रव्याव्यतिरिक्तरसादेरप्युपलब्धिः स्यात्, रू-

पादिस्वरूपवत्, एवं ह्यभेदः स्यात्–यदि रूपादौ समुपलभ्यमानेऽन्येऽपि समुपलभ्येरन्, अन्यथा विरुद्धधर्म्माध्यासा-द्विश्येरन् घटपटवदिति । तदेवं भेदाभेदोपपत्तिभिर्व्याकुलितमतिः शिष्यः पृच्छति–उभयथाऽपि दोषापत्तिदर्शनात्कथं गृह्णीमः ?, आचार्य आह–अत एव भेदाभेदोऽस्तु, तत्राभेदपक्षे द्रव्यं गुणो भेदपक्षे तु भावो गुण इति, तथाहि–गुणगु-णिनोः पर्यायपर्यायिणोः सामान्यविशेषयोरवयवावयविनोर्भेदाभेदव्यवस्थानेनैवात्मभावसद्भावात्, आह हि–"दव्वं पज्जवविजुयं दव्वविउत्ता य पज्जवा णत्थि । उप्पायट्ठिइभंगा हंदि दवियलक्खणं एयं ॥ १ ॥ नयास्तव स्यात्पदलाञ्छिता इमे, रसोपविद्धा इव लोहधातवः । भवन्त्यभिप्रेतफला यतस्ततो, भवन्तमार्याः प्रणता हितैषिणः ॥ २ ॥" इत्यादि स्वयूथ्यैरत्र बहु विजृम्भितमित्यलं विस्तरेण । एतदेव निर्युक्तिकारः समस्तद्रव्यप्रधाने जीवद्रव्ये गुणभेदेन व्यव-स्थितमाह—

संकुचियवियसियत्तं एसो जीवस्स होइ जीवगुणो । पूरेइ हंदि लोगं बहुप्पएसत्तणगुणेणं ॥ १७१ ॥

जीवो हि सयोगिवीर्यसद्द्रव्यतया प्रदेशसंहारविसर्गाभ्यामाधारवशात् प्रदीपवत् सङ्कुचति विकसति च, एष जीव-स्यात्मभूतो गुणो, भेदं विनाऽपि षष्ठ्युपलब्धेः, तद्यथा–राहोः शिरः शिलापुत्रकस्य शरीरमिति, तद्भव एव वा सप्तस-मुद्घातवशात् सङ्कुचति विकसति च, सम्यक्–समन्ततः उत्–प्राबल्येन हननम्–इतश्चेतश्चात्मप्रदेशानां प्रक्षेपणं समु-द्घातः, स च कषायवेदनामारणान्तिकवैक्रियतैजसाहारककेवलिसमुद्घातभेदात् सप्तधा, तत्र कषायसमुद्घातोऽनन्ता-

१ द्रव्यं पर्यायवियुतं द्रव्यवियुताश्च पर्यवा न सन्ति । उत्पादस्थितिभङ्गा हन्दि द्रव्यलक्षणमेतत् ॥ १ ॥

नुबन्धिक्रोधाद्युपहतचेतस आत्मप्रदेशानामितश्चेतश्च प्रक्षेपः, इत्येवं तीव्रतरवेदनोपहतस्यापि वेदनासमुद्घातः, मारणा-न्तिकसमुद्घातो हि मुमूर्षोरसुमत आदित्सितोत्पत्तिप्रदेशे आलोकान्तादात्मप्रदेशानां भूयो भूयः प्रक्षेपसंहाराविति, वैक्रि-यसमुद्घातो वैक्रियलब्धिमतो वैक्रियोत्पादनाय बहिरात्मप्रदेशप्रक्षेपः, तैजससमुद्घातस्तैजसशरीरनिमित्तं तेजोलेश्याल-ब्धिमतस्तेजोलेश्याप्रक्षेपावसरे इति, आहारकसमुद्घातश्चतुर्दशपूर्वविद आहारकलब्धिमतः क्वचित्सन्देहापगमनाय तीर्थ-ङ्करान्तिकगमनार्थमाहारकशरीरं समुपादातुं बहिरात्मप्रदेशप्रक्षेपः, केवलिसमुद्घातं तु समस्तलोकव्यापितयाऽन्तर्नीता-न्यसमुद्घातं निर्युक्तिकारः स्वत एवाचष्टे—'पूरयति' व्याप्नोति हन्दीत्युपप्रदर्शने, किम् ?—'लोकं' चतुर्दशरज्ज्वात्मक-माकाशखण्डं, कुतो ?, बहुप्रदेशगुणत्वात्, तथाहि–उत्पन्नदिव्यज्ञान आयुषोऽल्पत्वमवधार्य वेदनीयस्य च प्राचुर्यं दण्डादिक्रमेण लोकप्रमाणत्वादात्मप्रदेशानां लोकमापूरयति, तदुक्तम्—"दंडे कवाडे मंथंतरे य'त्ति गाथार्थः ॥ गतो द्रव्यगुणः, क्षेत्रादिकमाह—

देवकुरु सुसमसुसमा सिद्धी निब्भय दुगादिया चेव । कल भोअणुज्जु वंके जीवमजीवे य भावंमि ॥ १७२ ॥

क्षेत्रगुणः देवकुर्वादिः, कालगुणे सुषमसुषमादिः, फलगुणे सिद्धिः, पर्यवगुणे निर्भजना, गणनागुणे द्विकादि, करण-गुणे कलाकौशल्यम्, अभ्यासगुणे भोजनादि, गुणागुणे ऋजुता, अगुणगुणे वक्रता, भवगुणशीलगुणयोर्भावगुणार्थमु-पात्तेन जीवग्रहणेन गतार्थत्वाद्गाथायां पृथगनुपादानं, भवगुणो जीवस्य नारकादिर्भवः, शीलगुणो जीवः क्षान्त्याद्यु-

१ दण्डः कपाटो मन्था अन्तराणि च.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पेतो, भावगुणो जीवाजीवयोः, इति संयोज्यैकैको व्याख्यायते–तत्र देवकुरूत्तरकुरुहरिवर्षरम्यकहैमवतहैरण्यवतषट्पञ्चाशदन्तरद्वीपकाकर्म्मभूमीनामयं गुणो, यदुत तत्रत्यमनुजा देवकुमारोपमाः सदावस्थितयौवना निरुपक्रमायुषो मनोज्ञशब्दादिविषयोपभोगिनः स्वभावमार्दवार्जवप्रकृतिभद्रकगुणासन्नदेवलोकगतयश्च भवन्ति । कालगुणोऽपि भरतैरावतयोस्तिसृष्वप्येकान्तसुषमादिषु समासु स एव सदावस्थितयौवनादिरिति । फलमेव गुणः फलगुणः, फलं च क्रियाया भवति, तस्याश्च क्रियायाः सम्यग्दर्शनज्ञानचारित्ररहिताया ऐहिकामुष्मिकार्थं प्रवृत्ताया अनात्यन्तिकोऽनैकान्तिको भवन् फलगुणोऽप्यगुण एव भवति, सम्यग्दर्शनज्ञानचारित्रक्रियायास्त्वैकान्तिकात्यन्तिकानाबाधसुखाख्यसिद्धिफलगुणोऽवाप्यते, एतदुक्तं भवति–सम्यग्दर्शनादिकैव क्रिया सिद्धिफलगुणेन फलवती, अपरा तु सांसारिकसुखफलाभास एव, फलाध्यारोपान्निष्फलेत्यर्थः । पर्यायगुणो नाम द्रव्यस्यावस्थाविशेषः पर्यायः स एव गुणः पर्यायगुणः, गुणपर्याययोर्नयवादान्तरेणाभेदाभ्युपगमात्, स च निर्भजनारूपो, निश्चिता भजना निर्भजना–निश्चितो भाग इत्यर्थः, तथाहि–स्कन्धद्रव्यं देशप्रदेशेन भिद्यमानं परमाण्वन्तं भेदं ददाति, परमाणुरप्येकगुणकृष्णद्विगुणकृष्णादिना अनन्तशोऽपि भिद्यमानो भेददायीति । गणनागुणो नाम द्विकादिकः, तेन च सुमहतोऽपि राशेर्गणनागुणेनेयत्ताऽवधार्यते । करणगुणो नाम कलाकौशलं, तथाहि–उदकादौ करणपाटवार्थं गात्रोत्क्षेपादिकां क्रियां कुर्वन्ति । अभ्यासगुणो नाम भोजनादिविषयः, तद्यथा–तदहर्जातबालकोऽपि भवान्तराभ्यासात् स्तनादिकं मुख एव प्रक्षिपति उपरतरुदितश्च भवति, यदिवाऽभ्यासवशात् सन्तमसेऽपि कवलादेर्मुखविवरप्रक्षेपाद्व्या(पो व्या)कुलितचेतसोऽपि च तुदद्वात्रकण्डूयनमिति । गुणागुणो नाम गुण

एव कस्यचिदगुणत्वेन विपरिणमते, यथाऽऽर्जवोपेतस्यार्जुत्वाख्यो गुणो मायाविनः प्रत्यगुणो भवति, उक्तं च—"शाठ्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं, शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियाभाषिणि । तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे, तत्को नाम गुणो भवेत् स विदुषां यो दुर्जनैर्नाङ्कितः ? ॥ १ ॥" । अगुणगुणो नामागुण एव च कस्यचित् गुणत्वेन विपरिणमते, स च वक्रविषयो, यथा गौर्गलिरसञ्जातकिणस्कन्धो गोगणस्य मध्ये सुखेनैवास्ते, तथा च—"गुणानामेव दौर्जन्याद्धुरि धुर्यो नियुज्यते । असञ्जातकिणस्कन्धः, सुखं जीवति गौर्गलिः ॥ १ ॥" । भवगुणो नाम भवन्ति–उत्पद्यन्ते तेषु तेषु स्थानेष्विति नारकादिर्भवः, तत्र तस्य वा गुणो भवगुणः, स च जीवविषयः, तद्यथा–नारकास्तीव्रतरवेदनासहिष्णवस्तिलशश्छिन्नसन्धानिनोऽवधिमन्तश्च भवगुणादेव भवन्ति, तिर्यञ्चश्च सदसद्विवेकविकला अपि सन्तो गगनगमनलब्धिमन्तो, गवादीनां च तृणादिकमभ्यशनं शुभानुभावेनापद्यते, मनुजानां चाशेषकर्म्मक्षयो, देवानां च सर्वशुभानुभावो भवगुणादेवेति । शीलगुणो नाम परैराक्रुश्यमानोऽपि शीलगुणादेव न क्रोधवशो भवति, अथवा शब्दादिके शोभने अशोभने वा स्वभावादेव विदितवेद्यवन्माध्यस्थ्यमवलम्बते । भावगुणो नाम भावाः–औदयिकादयस्तेषां गुणो भावगुणः, स च जीवाजीवविषयः, तत्र जीवविषय औदयिकादिः षोढा, तत्रौदयिकः प्रशस्तोऽप्रशस्तश्च, तीर्थकराहारकशरीरादिः प्रशस्तः, अप्रशस्तस्तु शब्दादिविषयोपभोगहास्यरत्यरतीत्यादिः, औपशमिक उपशमश्रेण्यन्तर्गतायुष्कक्षयानुत्तरविमानप्राप्तिलक्षणस्तथा सत्कर्म्मानुदयलक्षणश्चेति, क्षायिकभावगुणश्चतुर्द्धा, तद्यथा–क्षीणसप्त-

१ ऽऽर्जवे प्र. २ दौरात्म्यात् प्र.

कस्य पुनर्मिथ्यात्वागमनं १ क्षीणमोहनीयस्यावश्यंभाविशेषघातिकर्म्मक्षयः २ क्षीणघातिकर्म्मणोऽनावरणज्ञानदर्शनाविर्भावः ३ अपगताशेषकर्म्मणोऽपुनर्भवस्तशाऽऽत्यन्तिकैकान्तिकानाबाधपरमानन्दलक्षणसुखावाप्ति ४ श्चेति, क्षायोपशमिकः क्षायोपशमिकदर्शनाद्यवाप्तिरिति, पारिणामिको भव्यत्वादिरिति, सान्निपातिकस्त्वौदयिकादिपञ्चभावसमकालनिष्पादितः, तद्यथा–मनुष्यगत्युदयादौदयिकः सम्पूर्णपञ्चेन्द्रियत्वावाप्तेः क्षायोपशमिकः दर्शनसप्तकक्षयात् क्षायिकः चारित्रमोहनीयोपशमादौपशमिकः भव्यत्वात्पारिणामिक इति, उक्तो जीवभावगुणः । साम्प्रतमजीवभावगुणः, स चौदयिकपारिणामिकयोरेव सम्भवति, नान्येषां, तत्रौदयिकस्तावद् उदये भव औदयिकः, स चाजीवाश्रयोऽनया विवक्षया, यदुत–काश्चित् प्रकृतयः पुद्गलविपाकिन्य एव भवन्ति, काः पुनस्ताः ?, उच्यन्ते, औदारिकादीनि शरीराणि पञ्च षट् संस्थानानि त्रीण्यङ्गोपाङ्गानि षट् संहननानि वर्णपञ्चकं गन्धद्वयं पञ्च रसा अष्टौ स्पर्शा अगुरुलघुनाम उपघातनाम पराघातनाम उद्योतनाम आतपनाम निर्म्माणनाम प्रत्येकनाम साधारणनाम स्थिरनाम अस्थिरनाम शुभनाम अशुभनाम, एताः सर्वा अपि पुद्गलविपाकिन्यः, सत्यपि जीवसम्बन्धित्वे पुद्गलविपाकित्वादासामिति, पारिणामिकोऽजीवगुणस्तु द्वेधा–अनादिपारिणामिकः सादिपारिणामिकश्चेति, तत्रानादिपारिणामिको धर्म्माधर्म्माकाशानां गतिस्थित्यवगाहलक्षणः, सादिपारिणामिकस्त्वभ्रेन्द्रधनुरादीनां परमाणूनां च वर्णादिगुणान्तरापत्तिरिति गाथातात्पर्यार्थः ॥ उक्तो गुणो, मूलनिक्षेपार्थमाह—

मूले छक्कं दव्वे ओदइउवएस आइमूलं च । खित्ते काले मूलं भावे मूलं भवे तिविहं ॥ १७३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलस्य षोढा निक्षेपो, नामस्थापनाद्रव्यक्षेत्रकालभावभेदात्, नामस्थापने गतार्थे, द्रव्यमूलं ज्ञशरीरभव्यशरीरव्यतिरिक्तं त्रिधा–औदयिकमूलमुपदेशमूलमादिमूलं चेति, तत्रौदयिकद्रव्यमूलं वृक्षादीनां मूलत्वेन परिणतानि यानि द्रव्याणि, उपदेशमूलं यच्चिकित्सको रोगप्रतिघातसमर्थं मूलमुपदिशत्यातुरायेति, तच्च पिप्पलीमूलादिकं, आदिमूलं नाम यद्वृक्षादिमूलोत्पत्तावाद्यं कारणं, तद्यत् स्थावरनामगोत्रप्रकृतिप्रत्ययान्मूलनिर्वर्त्तनोत्तरप्रकृतिप्रत्ययाच्च मूलमुत्पद्यते, एतदुक्तं भवति–तेषामौदारिकशरीरत्वेन मूलनिर्वर्त्तकानां पुद्गलानामुदयिष्यतां कार्म्मणं शरीरमाद्यं कारणं, क्षेत्रमूलं यस्मिन् क्षेत्रे मूलमुत्पद्यते व्याख्यायते वा, एवं कालमूलमपि, यावन्तं वा कालं मूलमास्ते, भावमूलं तु त्रिधेति गाथार्थः ॥ तथाहि—

ओदइयं उवदिट्ठा आइ तिगं मूलभाव ओदइअं । आयरिओ उवदिट्ठा विणयकसायादिओ आई ॥ १७४ ॥

भावमूलं त्रिविधम्–औदयिकभावमूलम् उपदेष्टृमूलम् आदिमूलं चेति, तत्रौदयिकभावमूलं वनस्पतिकायमूलत्वमनुभवन्नामगोत्रकर्म्मोदयात् मूलजीव एव, उपदेष्टृभावमूलं त्वाचार्य उपदेष्टा–यैः कर्म्मभिः प्राणिनो मूलत्वेनोत्पद्यन्ते, तेऽपि मोक्षसंसारयोर्द्वा यदादिभावमूलं तस्य चोपदेष्टेत्येतदेव दर्शयति—'विणयकसाआइओ आई' तत्र मोक्षस्यादिमूलं ज्ञानदर्शनचारित्रतपऔपचारिकरूपः पञ्चधा विनयः, तन्मूलत्वान्मोक्षावाप्तेः, तथा चाह—"विणया णाणं णाणाउ दंसणं दंसणाहि चरणं तु । चरणाहिंतो मोक्खो मुक्खे सुक्खं अणाबाहं ॥ १ ॥ विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् । ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥ २ ॥ संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।

१ विनयात् ज्ञानं ज्ञानाद्दर्शनं दर्शनाच्चरणं तु । ज्ञानदर्शनचरणैर्भवस्तु मोक्षो मोक्षे सौख्यमनाबाधम् ॥ १ ॥

तस्मात्क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥ ३ ॥ योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः । तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥ ४ ॥" इत्यादि, संसारस्य त्वादिमूलं विषयकषाया इति ॥ मूलमुक्तमिदानीं स्थानस्य पञ्चदशधा निक्षेपमाह—

णामंठवणादविए खित्तद्धा उड्ढ उवरई वसही । संजम पग्गह जोहे अयल गणण संधणा भावे ॥ १७५ ॥

तत्र द्रव्यस्थानं ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्याणां सचित्ताचित्तमिश्राणां स्थानम्–आश्रयः, क्षेत्रस्थानं भरतादि ऊर्द्धाधस्तिर्यग्लोकादिर्वेति, यत्र वा क्षेत्रे स्थानं व्याख्यायते, अद्धा–कालः तत्स्थानं द्विधा–कायस्थितिभवस्थितिभेदात्, तत्र कायस्थितिः पृथिव्यप्तेजोवायूनामसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, वनस्पतेस्तु ता एवानन्ताः, विकलेन्द्रियाणाम(णां)-सङ्ख्येया वर्षसहस्राः, पञ्चेन्द्रियतिर्यग्मनुजानां सप्ताष्टौ वा भवाः । भवस्थितिस्तु वायूदकवनस्पतिपृथिवीनां त्रिसप्तदशद्वाविंशतिवर्षसहस्रात्मिका, तेजसस्त्रीण्यहोरात्राणि, द्वीन्द्रियाणां शङ्खादीनां द्वादश वर्षाणि, त्रीन्द्रियाणां पिपीलिकादीनामेकोनपञ्चाशदहोरात्राणि, चतुरिन्द्रियाणां भ्रमरादीनां षण्मासाः, पञ्चेन्द्रियतिर्यग्मनुष्याणां त्रीणि पल्योपमानि, देवानां नारकाणां च कायस्थितेरभावाद्भवस्थितिः त्रयस्त्रिंशत्सागरोपमाणीति, इयमुत्कृष्टा द्विरूपापि, जघन्या तु सर्वेषामन्तर्मुहूर्त्तात्मिका, नवरं देवनारकयोर्दश वर्षसहस्राणीति, अथवा अद्धास्थानं–समयावलिकामुहूर्त्ताहोरात्रपक्षमासर्त्वयनसंवत्सरयुगपल्योपमसागरोपमोत्सर्पिण्यवसर्पिणीपुद्गलपरावर्त्तातीतानागतसर्वाद्धारूपमिति । ऊर्द्धस्थानं तु कायोत्सर्गादिकम्, अस्योपलक्षणत्वान्निषण्णाद्यपि गृह्यते । उपरतिः–विरतिः, तत्स्थानं देशे सर्वत्र च श्रावकसाधुविषयं । वसतिस्थानं यो यत्र ग्रामगृहादौ वसति । संयमस्थानं संयमः–सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिसूक्ष्मसम्परायययाख्यातरूपः, तस्य पञ्चविधस्याप्यसङ्ख्येयानि संयमस्थानानि, कियदसङ्ख्येयमिति चेत् अतीन्द्रियत्वादर्थस्य न साक्षान्निर्देष्टुं शक्यते, आगमानुसारोपमया तूच्यते–इहैकसमयेन सूक्ष्माग्निजीवा असङ्ख्येयलोकाकाशप्रदेशप्रमाणा उत्पद्यन्ते, तेभ्योऽग्निकायत्वेन परिणता असङ्ख्येयगुणाः, ततोऽपि तत्कायस्थितिरसङ्ख्येयगुणाः, ततोऽप्यनुभागबन्धाध्यवसायस्थानान्यसङ्ख्येयगुणानि, संयमस्थानान्यप्येतावन्त्येवेति सामान्यतः, विशेषतस्तूच्यते–सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धीनां प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशतुल्यानि संयमस्थानानि, सूक्ष्मसम्परायस्य त्वान्तर्मुहूर्त्तिकत्वादन्तर्मुहूर्त्तसमयतुल्यान्यसङ्ख्येयानि संयमस्थानानि, यथाख्यातस्य त्वेकमेवाजघन्योत्कृष्टं संयमस्थानम्, अथवा संयमश्रेण्यन्तर्गतानि संयमस्थानानि ग्राह्याणि, सा चानेन क्रमेण भवति, तद्यथा–अनन्तचारित्रपर्यायनिष्पादितमेकं संयमस्थानम्, असङ्ख्येयसंयमस्थाननिर्वर्त्तितं कण्डकं, तैश्चासङ्ख्येयैर्जनितं षट्स्थानकं, तदसङ्ख्येयात्मिका श्रेणीति । प्रग्रहस्थानं तु प्रकर्षेण गृह्यते वचोऽस्येति प्रग्रहः–ग्राह्यवाक्यो नायक इत्यर्थः, स च लौकिको लोकोत्तरश्च, तस्य स्थानं प्रग्रहस्थानं, लौकिकं तावत्पञ्चविधं, तद्यथा–राजा युवराजो महत्तरः अमात्यः कुमारश्चेति, लोकोत्तरमपि पञ्चविधं, तद्यथा–आचार्योपाध्यायप्रवृत्तिस्थविरगणावच्छेदकभेदादिति । योधस्थानं पञ्चधा, तद्यथा–आलीढप्रत्यालीढवैशाखमण्डलसमपादभेदात् । अचलस्थानं तु चतुर्द्धा–सादिसपर्यवसानादिभेदात्, तद्यथा–सादिसपर्यवसानं परमाण्वादेर्द्रव्यस्यैकप्रदेशादाववस्थानं जघन्यत एकं समयमुत्कृष्टतश्चासङ्ख्येयकालमिति, साद्यपर्यवसानं सिद्धानां भविष्यदद्धारूपम्, अनादिसपर्यवसानमतीताद्धारू-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ८८ ॥

लोक.वि.२ उद्देशकः१

॥ ८८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पस्य शैलेश्यवस्थान्त्यसमये कार्म्मणतैजसशरीरभव्यत्वाना चेति, अनाद्यपर्यवसानं धर्म्माधर्म्माकाशानामिति । गणनास्थानमेकद्व्यादिकं शीर्षप्रहेलिकापर्यन्तं । सन्धानस्थानं द्विधा–द्रव्यतो भावतश्च, पुनरप्येकैकं द्विधा–छिन्नाच्छिन्नभेदात्, तत्र द्रव्यच्छिन्नसन्धानं कञ्चुकादेः, अच्छिन्नसन्धानं तु पक्ष्मोत्पद्यमानतन्त्वादेरिति, भावसन्धानमपि प्रशस्ताप्रशस्तभेदात् द्वेधा, तत्र प्रशस्ताच्छिन्नभावसन्धानमुपशमक्षपकश्रेण्यामारोहतो जन्तोरपूर्वसंयमस्थानान्यच्छिन्नान्येव भवन्ति, श्रेणिव्यतिरेकेण वा प्रवर्द्धमानकण्डकस्येति, छिन्नप्रशस्तभावसन्धानं पुनरौपशमिकादिभावादौदयिकादिभावान्तरगतस्य पुनरपि शुद्धपरिणामवतः तत्रैव गमनम्, अप्रशस्ताच्छिन्नभावसन्धानमुपशमश्रेण्याः प्रतिपततोऽविशुद्ध्यमानपरिणामस्यानन्तानुबन्धिमिथ्यात्वोदयं यावत्, उपशमश्रेणिमन्तरेणापि कषायवशात् बन्धाध्यवसायस्थानान्युत्तरोत्तराण्यवगाहमानस्य वा इति, अप्रशस्तच्छिन्नभावसन्धानं पुनरौदयिकभावादौपशमिकादिभावान्तरसङ्क्रान्तौ सत्यां पुनस्तत्रैव गमनमिति । इह द्वारद्वयं यौगपद्येन व्याख्यातं, तत्र सन्धानस्थानं द्रव्यविषयमितरत्तु भावविषयमित्युक्तं स्थानम् ॥ अथवा भावस्थानं कषायाणां यत् स्थानं तदिह परिगृह्यते, तेषामेव जेतव्यत्वेनाधिकृतत्वात्, तेषां किं स्थानं?, यदाश्रित्य च ते भवन्ति, शब्दादिविषयानाश्रित्य च ते भवन्तीति तदर्शयति—

पंचसु कामगुणेसु य सद्दप्फरिसरसरूवगंधेसुं । जस्स कसाया वट्टंति मूलट्ठाणं तु संसारे ॥ १७६ ॥

तत्रेच्छानङ्गरूपः कामस्तस्य गुणा यानाश्रित्यासौ चेतसो विकारमादर्शयति, ते च शब्दस्पर्शरसरूपगन्धास्तेषु पञ्चस्वपि व्यस्तेषु समस्तेषु वा विषयभूतेषु 'यस्य' जन्तोर्विषयसुखपिपासोन्मुखस्यापरमार्थदर्शिनः संसाराभिष्वङ्गिणो राग-

द्वेषपलिमिरोपप्लुतदृष्टमनोज्ञेतरविषयोपलब्धौ सत्यां कषाया 'वर्त्तन्ते' प्रादुर्भवन्ति, तन्मूलश्च संसारपादपः प्रादुर्भवतीत्यतः शब्दादिविष्योद्भूत(ताः)कषायाः 'संसारे' संसारविषयं मूलस्थानमेवेति, एतदुक्तं भवति–रागाद्युपहतचेताः परमार्थमजानानोऽतत्स्वभावेऽपि तत्स्वभावारोपणेनान्धादप्यन्धतमः कामी मोदते, यत आह—"दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं, रागान्धस्तु यदस्ति तत्परिहरन् यन्नास्ति तत् पश्यति । कुन्देन्दीवरपूर्णचन्द्रकलशश्रीमल्लतापल्लवानारोप्याशुचिराशिषु प्रियतमागात्रेषु यन्मोदते ॥ १ ॥" द्वेषं वा कर्कशशब्दादौ व्रजतीति, ततश्च मनोज्ञेतरशब्दादिविषयाः कषायाणां मूलस्थानं, ते च संसारस्येति गाथातात्पर्यार्थः ॥ यदि नाम शब्दादिविषयाः कषायाः कथं तेभ्यः संसार इति?, उच्यते, यतः कर्म्मस्थितेः कषाया मूलं, साऽपि संसारस्य, संसारिणश्चावश्यंभाविनः कषाया इति, एतदेवाह—

जह सव्वपायवाणं भूमीए पइट्ठियाइं मूलाइं । इय कम्मपायवाणं संसारपइट्ठिया मूला ॥ १७७ ॥

यथा सर्वपादपानां भूमौ प्रतिष्ठितानि मूलानि, एवं कर्मपादपानां संसारे कषायरूपाणि मूलानि प्रतिष्ठितानीति गाथार्थः ॥ ननु च कथमेतच्छ्रद्धेयं–कर्म्मणः कषाया मूलमिति?, उच्यते, यतो मिथ्यात्वाविरतिप्रमादकषाययोगा बन्धहेतवः, तथा चागमः—"जीवे णं भंते! कतिहिं ठाणेहिं णाणावरणिज्जं कम्मं बंधइ?, गोयमा! दोहिं ठाणेहिं, तंजहा–रागेण य दोसेण य । रागे दुविहे–माया लोभे य, दोसे दुविहे–कोहे य माणे य । एएहिं चउहिं ठाणेहिं वीरिओवग्गूहिएहिं

१ जीवो भदन्त! कतिभिः स्थानैर्ज्ञानावरणीयं कर्म बध्नाति?, गौतम! द्वाभ्यां स्थानाभ्यां, तद्यथा–रागेण वा द्वेषेण वा । रागो द्विविधो–माया लोभश्च, द्वेषो द्विविधः–क्रोधश्च मानश्च. एतैश्चतुर्भिः स्थानैर्वीर्योपगूढैर्ज्ञानावरणीयं कर्म बध्नाति.

णाणावरणिज्जं कम्मं बंधइ" एवमष्टानामपि कर्म्मणां योज्यमिति । ते च कषाया मोहनीयान्तःपातिनोऽष्टप्रकारस्य च कर्म्मणः कारणं, मोहनीयं कामगुणानां च (इति) दर्शयति—

अट्ठविहकम्मरुक्खा सव्वे ते मोहणिज्जमूलागा । कामगुणमूलगं वा तम्मूलागं च संसारो ॥ १७८ ॥

यदवादि प्राक्—'इय कम्मपायवाणं' तत्र कतिप्रकाराः ते कर्म्मपादपाः किंकारणाश्चेति?, उच्यते, अष्टविधकर्म्मवृक्षाः, ते सर्वेऽपि मोहनीयमूलाः, न केवलं कषायाः, कामगुणा अपि मोहनीयमूलाः, यस्माद्वेदोदयात् कामाः, वेदश्च मोहनीयान्तःपातीत्यतस्तन्मोहनीयं मूलम्–आद्यं कारणं यस्य संसारस्य स तथा इति गाथार्थः ॥ तदेवं पारम्पर्येण संसारकषायकामानां कारणत्वान्मोहनीयं प्रधानभावमनुभवति, तत्क्षये चावश्यम्भावी कर्म्मक्षयः, तथा चाभाणि—"जह मत्थयसूईए, हयाए हम्मए तलो । तहा कम्माणि हम्मंति, मोहणिज्जे खयं गए ॥ १ ॥" तच्च द्विधा–दर्शनचारित्रमोहनीयभेदात्, एतदेवाह—

दुविहो अ होइ मोहो दंसणमोहो चरित्तमोहो अ । कामा चरित्तमोहो तेणऽहिगारो इहं सुत्ते ॥ १७९ ॥

मोहनीयं कर्म द्वेधा भवति, दर्शनमोहनीयं चारित्रमोहनीयं चेति, बन्धहेतोर्द्वैविध्यात्, तथाहि–अर्हत्सिद्धचैत्यतपःश्रुतगुरुसाधुसङ्घप्रत्यनीकतया दर्शनमोहनीयं कर्म्म बध्नाति, येन चासावनन्तसंसारसमुद्रान्तःपात्येवावतिष्ठते, तथा तीव्रकषायबहुरागद्वेषमोहाभिभूतः सन् देशसर्वविरत्युपघाति चारित्रमोहनीयं कर्म्म बध्नाति, तत्र मिथ्यात्वसम्यग्मिथ्यात्वस-

१ यथा सूचकसूच्यां हतायां हन्यते तालः । तथा कर्म्माणि हन्यन्ते मोहनीये क्षयं गते ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

म्यक्त्वभेदात्त्रेधा दर्शनमोहनीयं, तथा षोडशकषायनवनोकषायभेदाच्चारित्रमोहनीयं पञ्चविंशतिधा, तत्र कामाः शब्दादयः पञ्च चारित्रमोहः, तेन चात्र सूत्रेऽधिकारो, यतः कषायाणां स्थानमत्र प्रकृतं, तच्च शब्दादिकपञ्चगुणात्मकमिति गाथार्थः ॥ तत्र चारित्रमोहनीयोत्तरप्रकृतिस्त्रीपुंनपुंसकवेदहास्यरतिलोभाश्रितकामाश्रयिणः कषायाः संसारमूलस्य च कर्म्मणः प्रधानं कारणमिति प्रचिकटयिषुराह—

संसारस्स उ मूलं कम्मं तस्सावि हुंति य कसाया ।

'संसारस्य' नारकतिर्यग्नरामरगतिसंसृतिरूपस्य(मूलं)कारणमष्टप्रकारं कर्म,तस्यापि कर्म्मणः कषायाः—क्रोधादयो निमित्तं भवन्ति । तेषां च प्रतिपादितशब्दादिस्थानानां प्रचुरस्थानत्वप्रतिपादनाय पुनरपि स्थानविशेषं गाथाशकलेनाह—

ते सयणपेसअन्थाइएसु अज्झत्थओ अ ठिआ ॥ १८० ॥

स्वजनः—पूर्वापरसंस्तुतो मातापितृश्वशुरादिकः प्रेष्यो—भृत्यादिरर्थो—धनधान्यकुप्यवास्तुरत्नभेदरूपः ते स्वजनादयः कृतद्वन्द्वा आदिर्येषां मित्रादीनां तेषु स्थिताः कषाया विषयरूपतया, अध्यात्मनि च विषयिरूपतया प्रसन्नचन्द्रेकेन्द्रियादीनामिति गाथार्थः ॥ तदेवं कषायस्थानप्रदर्शनेन सूत्रपदोपात्तं स्थानं परिसमाप्य तेषामेव कषायाणां सूत्रमूलपदोपात्तानां क्षेत्रव्यत्याधिकृतानां निक्षेपमाह—

णामंठवणादविए उप्पत्ती पच्चए य आएसो । रसभावकसाए या तेण य कोहाइया चउरो ॥ १८१ ॥

यथाभूतार्थनिरपेक्षमभिधानमात्रं नाम, सद्भावासद्भावरूपा प्रतिकृतिः स्थापना, कृतभीमभ्रूकुट्यत्कटललाट(पट)घटितत्रि-

शूलरक्तस्यनयनसन्दष्टाधरस्पन्दमानस्वेदसलिलचित्रपुस्ताद्यक्षवराटकादिगतेति, द्रव्यकषाया ज्ञशरीरभव्यशरीराभ्यां व्यतिरिक्ताः कर्म्मद्रव्यकषाया नोकर्म्मद्रव्यकषायाश्चेति, तत्रादित्सितात्तानुदीर्णोदीर्णाः पुद्गला द्रव्यप्राधान्यात् कर्म्मद्रव्यकषायाः, नोकर्म्मद्रव्यकषायास्तु बिभीतकादयः, उत्पत्तिकषायाः शरीरोपधिक्षेत्रवास्तुस्थाण्वादयो यदाश्रित्य तेषामुत्पत्तिः, तथा चोक्तम्—'किं ऐत्तो कट्ठयरं जं मूढो थाणुअम्मि आवडिओ । थाणुस्स तस्स रूसइ न अप्पणो दुप्पओगस्स ॥१॥" प्रत्ययकषायाः कषायाणां ये प्रत्ययाः—यानि बन्धकारणानि, ते चेह मनोज्ञेतरभेदाः शब्दादयः, अत एवोत्पत्तिप्रत्ययोः कार्यकारणगतो भेदः, आदेशकषायाः कृत्रिमकृतभ्रूकुटीभङ्गादयः, रसतो रसकषायः कटुतिक्तकषायपञ्चकान्तर्गतः, भावकषायाः शरीरोपधिक्षेत्रवास्तुस्वजनप्रेष्यार्चादिनिमित्ताविर्भूताः शब्दादिकामगुणकारणकार्यभूतकषायकर्मोदयात्मपरिणामविशेषाः क्रोधमानमायालोभाः, ते चैकैकशोऽनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनभेदेन भिद्यमानाः षोडशविधा भवन्ति, तेषां च स्वरूपानुबन्धफलानि गाथाभिरभिधीयन्ते, ताश्चेमाः—"जलरेणुपुढविपव्वयराईसरिसो चउव्विहो कोहो । तिणिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो ॥ १ ॥ मायावलेहिगोमुत्तिमेंढसिंगघणवंसमूलसमा । लोभो हलिद्दकद्दमखंजणकिमिरायसामाणो ॥ २ ॥ पक्खचउमासवच्छरजावज्जीवाणुगामिणो कमसो । देवणरतिरियणारयगइसाहणहेयवो भणिया ॥ ३ ॥" एषां च नामाद्यष्टविधकषायनिक्षेपाणां कतमो नयः कमिच्छतीत्येतदभिधीयते—तत्र नैग-

१ किमतस्मात्कष्टकरं यन्मूढः स्थाणावापतितः । स्थाण्वे तस्मै रुष्यति नात्मनो दुष्प्रयोगाय ॥ १ ॥ २ जलरेणुपृथ्वीपर्वतराजीसदृशश्चतुर्विधः क्रोधः । तिनिशलताकाष्ठास्थिशैलस्तम्भोपमो मानः ॥ १ ॥ मायाऽवलेखिकागोमूत्रिकामेषशृङ्गघनवंशीमूलसमा । लोभो हरिद्राकर्दमखञ्जनकृमिरागसमानः ॥ २ ॥ पक्षचतुर्मासकसंवत्सरयावज्जीवानुगामिनः क्रमशः । देवनरतिर्यग्नारकगतिसाधनहेतवो भणिताः ॥ ३ ॥

मस्य सामान्यविशेषरूपत्वान्नैकगमत्वाच्च तदभिप्रायेण सर्वेऽपि साधवो नामादयः, सङ्ग्रहव्यवहारौ तु कषायसम्बन्धाभावादादेशसमुत्पत्ती नेच्छतः, ऋजुसूत्रस्तु वर्त्तमानार्थनिष्ठत्वादादेशसमुत्पत्तिस्थापना नेच्छति, शब्दस्तु नाम्नोऽपि कथञ्चिद्भावान्तर्भावान्नामभावाविच्छतीति गाथातात्पर्यार्थः ॥ तदेवं कषायाः कर्म्मकारणत्वेनोक्ताः, तदपि संसारस्य, स च कतिविध इति दर्शयति—

दव्वे खित्ते काले भवसंसारे अ भावसंसारे । पंचविहो संसारो जत्थेते संसरंति जिआ ॥ १८२ ॥

द्रव्यसंसारो व्यतिरिक्तो द्रव्यसंसृतिरूपः, क्षेत्रसंसारो येषु क्षेत्रेषु द्रव्याणि संसरन्ति, कालसंसारः यस्मिन् काल इति, नारकतिर्यग्नरामरगतिचतुर्विधानुपूर्व्युदयाद्भवान्तरसङ्क्रमणं भवसंसारः, भावसंसरस्तु संसृतिस्वभाव औदयिकादिभावपरिणतिरूपः, तत्र च प्रकृतिस्थित्यनुभागप्रदेशबन्धानां प्रदेशविपाकानुभवनम्, एवं द्रव्यादिकः पञ्चविधः संसारः, अथवा द्रव्यादिकश्चतुर्धा संसारः, तद्यथा—अश्वाङ्कस्तिनं ग्रामान्नगरं वसन्ताद् ग्रीष्मं औदयिकादौपशमिकमिति गाथार्थः ॥ तस्मिंश्च संसारे कर्मवशगाः प्राणिनः संसरन्तीत्यतः कर्म्मनिदर्शनार्थमाह—

णामंठवणाकम्मं दव्वकम्मं पओगकम्मं च । समुदाणिरियावहियं आहाकम्मं तवोकम्मं ॥ १८३ ॥
किइकम्म भावकम्मं दसविह कम्मं समासओ होइ ।

नामकर्म्म कर्म्मार्थशून्यमभिधानमात्रं, स्थापनाकर्म्म पुस्तकपत्रादौ कर्मवर्गणानां सद्भावासद्भावरूपा स्थापना, द्रव्यकर्म व्यतिरिक्तं द्विधा—द्रव्यकर्म नोद्रव्यकर्म च, तत्र द्रव्यकर्म कर्मवर्गणान्तःपातिनः पुद्गलाः बन्धयोग्या बध्यमाना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बद्धाश्चानुदीर्णा इति, नोद्रव्यकर्म्म कृषीवलादिकर्म्म । अथ कर्म्मवर्गणान्तःपातिनः पुद्गला द्रव्यकर्म्मेत्यवाचि, काः पुनस्ता वर्गणा इति सङ्कीर्त्यन्ते?, इह वर्गणाः सामान्येन चतुर्विधाः–द्रव्यक्षेत्रकालभावभेदात्, तत्र द्रव्यत एकद्व्यादिसङ्ख्येयासङ्ख्येयानन्तप्रदेशिकाः क्षेत्रतोऽवगाढद्रव्यैकद्व्यादिसङ्ख्येयासङ्ख्येयप्रदेशात्मिकाः कालत एकद्व्यादिसङ्ख्येयासङ्ख्येयसमयस्थितिकाः भावतो रूपरसगन्धस्पर्शस्वगतभेदात्मिकाः सामान्यतः, विशेषतस्तूच्यन्ते–तत्र परमाणूनामेका वर्गणा, एवमेकैकपरमाणूपचयात् सङ्ख्येयप्रदेशिकानां स्कन्धानां सङ्ख्येयाः असङ्ख्येयप्रदेशिकानामसङ्ख्येयाः, एताश्चौदारिकादिपरिणामाग्रहणयोग्याः, अनन्तप्रदेशिकानामप्यनन्ता अग्रहणयोग्याः, ता उल्लङ्घ्य औदारिकग्रहणयोग्यास्त्वनन्तानन्तप्रदेशिकाः स्वल्पनन्ता एव भवन्ति, तत्रायोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते औदारिकशरीरग्रहणयोग्या जघन्या वर्गणा भवति, पुनरेकैकप्रदेशवृद्ध्या प्रवर्द्धमाना औदारिकयोग्योत्कृष्टवर्गणा यावदनन्ता भवन्ति, अथ जघन्योत्कृष्टयोः को विशेषः?, जघन्यात् उत्कृष्टा विशेषाधिकाः, विशेषस्त्वस्या एवौदारिकजघन्यवर्गणाया अनन्तभागः, तस्य चानन्तपरमाणुमयत्वादेकैकोत्तरप्रदेशोपचये सत्यप्यौदारिकयोग्यवर्गणानां जघन्योत्कृष्टमध्यवर्त्तिनीनामानन्त्यं, तत औदारिकयोग्योत्कृष्टवर्गणायां रूपप्रक्षेपेणायोग्यवर्गणा जघन्या भवन्ति, एता अप्येकैकप्रदेशवृद्ध्योत्कृष्टान्ता अनन्ता भवन्ति, जघन्योत्कृष्टवर्गणानां को विशेषः?, जघन्याभ्योऽसङ्ख्येयगुणा उत्कृष्टाः, ताश्च बहुप्रदेशत्वादतिसूक्ष्मपरिणामत्वाच्चौदारिकस्यानन्ता एवाग्रहणयोग्या भवन्ति, अल्पप्रदेशत्वाद्बादरपरिणामत्वाच्च वैक्रियस्यापीति, अत्र च यथा यथा प्रदेशोपचयस्तथा तथा विस्रसापरिणामवशाद्वर्गणानां सूक्ष्मतरत्वमवसेयम् । एतदेवोत्कृष्टोपरि ॥ ९२ ॥

रूपप्रक्षेपयोग्यायोग्यादिकं वैक्रियशरीरवर्गणानां जघन्योत्कृष्टविशेषलक्षणं चावसेयं, तथा वैक्रियाहारकान्तरालवर्त्तयोग्यवर्गणानां जघन्योत्कृष्टविशेषासङ्ख्येयगुणत्वमिति, पुनरप्ययोग्यवर्गणोपरि रूपप्रक्षेपात् जघन्याहारकशरीरयोग्यवर्गणा भवन्ति, ताश्च प्रदेशवृद्ध्या वर्द्धमाना उत्कृष्टां यावदनन्ता भवन्ति, अथ जघन्योत्कृष्टयोः कियदन्तरमिति? उच्यते, जघन्याभ्य उत्कृष्टा विशेषाधिकाः, को विशेष इति चेत्?, जघन्यवर्गणाया एवानन्तभागः, तस्याप्यनन्तपरमाणुत्वादाहारकशरीरयोग्यवर्गणानां प्रदेशोत्तरवृद्धानामानन्त्यमिति भावना, तस्यामेवोत्कृष्टवर्गणायां रूपे प्रक्षिप्ते जघन्या आहारकाग्रहणयोग्यवर्गणाः, ततः प्रदेशवृद्ध्या वर्द्धमाना उत्कृष्टां यावदनन्ता एव आहारकस्य सूक्ष्मत्वाद् बहुप्रदेशत्वाच्चायोग्या एव भवन्ति, बादरत्वादल्पप्रदेशत्वाच्च तैजसस्येति, जघन्योत्कृष्टयोः कियदन्तरमिति? उच्यते, जघन्याभ्य उत्कृष्टा अनन्तगुणाः, केन गुणकारेणेति चेत्, अभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभाग इति, तदुपरि रूपे प्रक्षिप्ते तैजसशरीरवर्गणा जघन्याः, एता अपि प्रदेशवृद्ध्या वर्द्धमाना उत्कृष्टां यावदनन्ता भवन्ति, अथ जघन्योत्कृष्टयोः कियदन्तरं?, जघन्याभ्य उत्कृष्टा विशेषाधिका, विशेषस्तु जघन्यवर्गणानन्तभागः, तस्याप्यनन्तप्रदेशत्वाज्जघन्योत्कृष्टान्तरालवर्गणानामानन्त्यं भवति, तैजसोत्कृष्टवर्गणोपरि रूपे प्रक्षिप्ते सत्यग्रहणवर्गणा भवन्ति, एवमेकादिवृद्ध्योत्कृष्टान्ता अनन्ताः, ताश्चातिसूक्ष्मत्वाद् बहुप्रदेशत्वाच्च तैजसस्याग्रहणयोग्याः, बादरत्वात् अल्पप्रदेशत्वाच्च भाषाद्रव्यस्यापीति, जघन्योत्कृष्टयोरनन्तगुणत्वेन विशेषो, गुणकारश्चाभव्येभ्योऽनन्तगुणः सिद्धानामनन्तभाग इति, तस्यामयोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते जघन्या भाषाद्रव्यवर्गणा भवति, तस्याश्च प्रदेशवृद्ध्या उत्कृष्टवर्गणापर्यन्तान्यनन्तानि स्थानानि

भवन्ति, जघन्योत्कृष्टयोर्विशेषो जघन्यवर्गणानन्तभागाधिकोत्कृष्टवर्गणा भवति, अत्राप्यनन्तभागस्यानन्तपरमाण्वात्मकत्वाद्भाषाद्रव्ययोग्यवर्गणानामानन्त्यमवसेयं, तदनेनैकादिप्रदेशवृद्धिप्रक्रमेणायोग्यवर्गणानां जघन्योत्कृष्टादिकं ज्ञातव्यं, नवरं जघन्योत्कृष्टयोर्भेदोऽयम्–अभव्यानन्तगुणः सिद्धानन्तभागात्मकः, तासां च पूर्वहेतुकदम्बकादेव भाषाद्रव्यानापानद्रव्ययोरयोग्यत्वमवसेयम्, अयोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते आनापानवर्गणा जघन्या, ततो रूपोत्तरवृद्ध्योत्कृष्टवर्गणान्ता अनन्ता भवन्ति, जघन्यातउत्कृष्टा जघन्यानन्तभागाधिका, तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदेनाग्रहणवर्गणा, विशेषस्त्वभव्येभ्योऽनन्तगुणः सिद्धानामनन्तभागः, पुनरप्ययोग्योत्कृष्टवर्गणोपरि प्रदेशादिवृद्ध्या जघन्योत्कृष्टभेदा मनोद्रव्यवर्गणा, जघन्यवर्गणानन्तभागो विशेषः, पुनरपि प्रदेशोत्तरक्रमेणाग्रहणवर्गणा, विशेषश्चाभव्यानन्तगुणादिकः, ताश्च प्रदेशबहुत्वादतिसूक्ष्मत्वाच्च मनोद्रव्ययोग्याः, अल्पप्रदेशत्वाद् बादरत्वाच्च कार्म्मणस्यापि, तदुपरि रूपे प्रक्षिप्ते जघन्याः कार्म्मणशरीरवर्गणाः, पुनरप्येकैकप्रदेशवृद्ध्या वर्द्धमाना उत्कृष्टा यावदनन्ताः भवन्ति, अथ जघन्योत्कृष्टयोः कः प्रतिविशेष इति?, उच्यते, जघन्यवर्गणानन्तभागाधिकोत्कृष्टवर्गणा, स चानन्तभागोऽनन्तानन्तपरमाण्वात्मकोऽत एवानन्तभेदभिन्नाः कर्म्मद्रव्यवर्गणा एवं भवन्ति, आभिरात्र प्रयोजनं, द्रव्यकर्म्मणो व्याख्यास्यितत्वादिति । शेषा अपि वर्गणाः क्रमायाताः विनेयजनानुग्रहार्थं व्युत्पाद्यन्ते–पुनरप्युत्कृष्टकर्म्मवर्गणोपरि रूपादिप्रक्षेपेण जघन्योत्कृष्टभेदभिन्ना ध्रुववर्गणाः, जघन्याभ्य उत्कृष्टाः सर्व्वजीवेभ्योऽनन्तगुणाः, तदुपरि रूपप्रक्षेपादिक्रमेणानन्ता एव जघन्योत्कृष्टभेदा अध्रुववर्गणाः, अध्रुवत्वादध्रुवाः, पारिभाषिकसञ्ज्ञावाद्ध्रुवत्वं, जघन्योत्कृष्टभेदोऽनन्तरोक्त एव, तदुत्कृष्टो- ॥ ९३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परि रूपादिप्रवृद्ध्या जघन्योत्कृष्टभेदा अनन्ता एव शून्या वर्गणा भवन्ति, जघन्योत्कृष्टविशेषः पूर्ववत्, तासां संसारेऽप्यभावात् शून्यवर्गणा इत्यभिधानम्, एतदुक्तं भवति–अध्रुववर्गणोपरि प्रदेशवृद्ध्याऽनन्ता अपि न सम्भवन्तीति प्रथमा शून्यवर्गणा, तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदाः प्रत्येकशरीरवर्गणा भवन्ति, जघन्यातः क्षेत्रपल्योपमासङ्ख्येयभागप्रदेशगुणोत्कृष्टा, तदुपरि रूपोत्तरादिवृद्ध्या जघन्योत्कृष्टभेदा अनन्ता एव शून्यवर्गणा भवन्ति, जघन्यवर्गणात उत्कृष्टा स्वसङ्ख्येयभागप्रदेशगुणा, तदसङ्ख्येयभागोऽप्यसङ्ख्येयलोकात्मक इति द्वितीया शून्यवर्गणा, तदुपरि रूपादिवृद्ध्या बादरनिगोदशरीरवर्गणा जघन्यातः क्षेत्रपल्योपमासङ्ख्येयभागप्रदेशगुणोत्कृष्टा, तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदा तृतीया शून्यवर्गणा, उत्कृष्टा जघन्यासोऽसङ्ख्येयगुणा, को गुणकार इति?, उच्यते, अङ्गुलासङ्ख्येयभागप्रदेशराशेरावलिकाकालासङ्ख्येयभागसमयप्रमाणकृतपौनःपुन्यवर्गमूलस्यासङ्ख्येयभागप्रदेशप्रमाण इति, तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदा सूक्ष्मनिगोदशरीरवर्गणा, जघन्यात उत्कृष्टा आवलिकाकालासंख्येयभागसमयगुणा, तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदा चतुर्थी शून्यवर्गणा, जघन्यात उत्कृष्टा चतुरस्रीकृतलोकस्यासङ्ख्येयाः श्रेण्यः, ताश्च प्रतरासङ्ख्येयभागतुल्या इति, तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदा महास्कन्धवर्गणा, जघन्यात उत्कृष्टा क्षेत्रपल्योपमस्यासङ्ख्येयगुणा संख्येयगुणा वेति । उक्ताः समासतो वर्गणाः, विशेषार्थिना तु कर्मप्रकृतिरवलोकनीयेति । साम्प्रतं प्रयोगकर्म, वीर्यान्तरायक्षयोपशमाविर्भूतवीर्येणात्मना प्रकर्षेण युज्यत इति प्रयोगः, स च मनोवाक्कायलक्षणः पञ्चदशधा, कथमिति?, उच्यते, तत्र मनोयोगः सत्यासत्यमिश्रानुभयरूपश्चतुर्धा, एवं वाग्योगोऽपि, काय-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ९४ ॥

योगः सप्तधा–औदारिकौदारिकमिश्रवैक्रियवैक्रियमिश्राहारकाहारकमिश्रकार्मणयोगभेदात्, तत्र मनोयोगो मनःपर्याप्तस्य पर्याप्तस्य मनुष्यादेः, वाग्योगोऽपि द्वीन्द्रियादीनाम्, औदारिकयोगस्तिर्यग्मनुजयोः शरीरपर्याप्तेरूर्ध्वं, तदारतस्तु मिश्रः, केवलिनो वा समुद्घातगतस्य द्वितीयषष्ठसप्तमसमयेषु, वैक्रियकाययोगो देवनारकबादरवायूनाम्, अन्यस्य वा वैक्रियलब्धिमतः, तन्मिश्रस्तु देवनारकयोरुत्पत्तिसमयेऽन्यस्य वा वैक्रियं निर्वर्त्तयतः, आहारककाययोगश्चतुर्दशपूर्वविद आहारकशरीरस्थस्य, तन्मिश्रस्तु निर्वर्त्तनाकाले, कार्मणयोगो विग्रहगतौ केवलिसमुद्घाते वा तृतीयचतुर्थपञ्चमसमयेष्विति । तदनेन पञ्चदशविधेनापि योगेनात्माऽष्टौ प्रदेशान् विहायोत्तप्तभाजनोदकवदुद्वर्त्तमानैः सर्वैरेवात्मप्रदेशैरात्मप्रदेशावष्टब्धाकाशदेशस्थं कार्मणशरीरयोग्यं कर्मदलिकं यद् बध्नाति तत्प्रयोगकर्मेत्युच्यते, उक्तं च—"जाव णं एस जीवे एयइ वेयइ चलइ फंदइत्यादि ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा नो णं अबंधए"[1] । समुदानकर्म सम्पूर्वादाङ्पूर्वाच्च ददातेर्ल्युडन्तात् पृषोदरादिपाठेन आकारस्योकारादेशेन रूपं भवति, तत्र प्रयोगकर्मणैकरूपतया गृहीतानां कर्मवर्गणानां सम्यग्मूलोत्तरप्रकृतिस्थित्यनुभावप्रदेशबन्धभेदेनाङ्–मर्यादया देशसर्वोपघातिरूपया तथा स्पृष्टनिधत्तनिकाचितावस्थया च स्वीकरणं समुदानं तदेव कर्म समुदानकर्म, तत्र मूलप्रकृतिबन्धो ज्ञानावरणीयादिः, उत्तरप्रकृतिबन्धस्तूच्यते–उत्तरप्रकृतिबन्धो ज्ञानावरणीयं पञ्चधा–मतिश्रुतावधिमनःपर्यायकेवलावरणभेदात्, तत्र केवलावारकं सर्वघाति शेषाणि तु देशसर्वघातीन्यपि, दर्शनावरणीयं नवधा–निद्रापञ्चकदर्शनचतुष्टयभेदात्, तत्र

लोक.वि.२ उद्देशकः१ ॥ ९४ ॥

१ यावदेष जीव एजते व्येजते चलति स्पन्दते, तावदष्टविधबन्धको वा सप्तविधबन्धको वा षड्विधबन्धको वा एकविधबन्धको वा, नैवाबन्धकः.

निद्रापञ्चकं प्राप्तदर्शनलब्ध्युपयोगोपघातकारि, दर्शनचतुष्टयं तु दर्शनलब्धिप्राप्तेरेव, अत्रापि केवलदर्शनावरणं सर्वघाति शेषाणि तु देशतः, वेदनीयं द्विधा–सातासातभेदात्, मोहनीयं द्विधा–दर्शनचारित्रभेदात्, तत्र दर्शनमोहनीयं त्रिधा–मिथ्यात्वादिभेदात्, बन्धतस्त्वेकविधं, चारित्रमोहनीयं षोडशकषायनवनोकषायभेदात्पञ्चविंशतिविधम्, अत्रापि मिथ्यात्वं सञ्ज्वलनवर्जा द्वादश कषायाश्च सर्वघातिन्यः, शेषास्तु देशघातिन्य इति, आयुष्कं चतुर्धा–नारकादिभेदात्, नाम द्विचत्वारिंशद्भेदं गत्यादिभेदात्, त्रिनवतिभेदं चोत्तरोत्तरप्रकृतिभेदात्, गतिश्चतुर्धा जातिरेकेन्द्रियादिभेदात्सप्तधा शरीराणि औदारिकादिभेदात्पञ्चधा औदारिकवैक्रियाहारकभेदादङ्गोपाङ्गं त्रिधा निर्म्माणनाम सर्वजीवशरीरावयवनिष्पादकमेकधा बन्धननाम औदारिकादिकर्म्मवर्गणैकत्वापादकं पञ्चधा सङ्घातनामौदारिकादिकर्म्मवर्गणारचनाविशेषसंस्थापकं पञ्चधा संस्थाननाम समचतुरस्रादि षोढा संहननंनाम वज्रऋषभनाराचादि षोढैव स्पर्शोऽष्टधा रसः पञ्चधा गन्धो द्विधा वर्णः पञ्चधा आनुपूर्वी नारकादिश्चतुर्धा विहायोगतिः प्रशस्ताप्रशस्तभेदात् द्विधा अगुरुलघूपघातपराघातातपोद्योतोच्छ्वासप्रत्येकसाधारणत्रसस्थावरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरसूक्ष्मबादरपर्याप्तकापर्याप्तकस्थिरास्थिरादेयानादेययशःकीर्त्तिअयशःकीर्त्तितीर्थकरनामानि प्रत्येकमेकविधानीति, गोत्रमुच्चनीचभेदात् द्विधा, अन्तरायं दानलाभभोगोपभोगवीर्यभेदात् पञ्चधेत्युक्तः प्रकृतिबन्धो, बन्धकारणानि तु गाथाभिरुच्यन्ते—"पंडिणीयमंतराइय उवघाए

१ सप्तधा–अनन्तानुबन्धिमिथ्यात्वादिभेदात् बन्धतस्तु पञ्चधा प्र. २ द्वादश प्र. ३ एकविंशतिविधम् प्र. ४ प्रत्यनीकत्वेऽन्तराय उपघाते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तप्पओस णिण्हवणे । आवरणदुगं बन्धइ भूओ अच्चासणाए य ॥ १ ॥ भूयाणुकंपवयजोगउज्जुओ खंतिदाणगुरुभत्तो । बन्धइ भूओ सायं विवरीए बन्धई इयरं ॥ २ ॥ अरहंतसिद्धचेइयतवसुअगुरुसाधुसंघपडिणीओ । बंधइ दंसणमोहं अणंतसंसारिओ जेणं ॥ ३ ॥ तिव्वकसाओ बहुमोहपरिणतो रागदोससंजुत्तो । बंधइ चरित्तमोहं दुविहंपि चरित्तगुणघाई ॥ ४ ॥ मिच्छद्दिट्ठी महारंभपरिग्गहो तिव्वलोभ णिस्सीलो । निरआउयं निबंधइ पावमती रोद्दपरिणामो ॥ ५ ॥ उम्मग्गदेसओ मग्गणासओ गूढहियय माइल्लो । सढसीलो अ ससल्लो तिरिआउं बंधई जीवो ॥ ६ ॥ पगतीएँ तणुकसाओ दाणरओ सीलसंजमविहूणो । मज्झिमगुणेहिं जुत्तो मणुयाउं बन्धई जीवो ॥ ७ ॥ अणुव्वयमहव्वएहि य बालतवोऽकामनिज्जराए य । देवाउयं णिबंधइ सम्मद्दिट्ठी उ जो जीवो ॥ ८ ॥ मणवयणकायवंको माइल्लो गारवेहिँ पडिबद्धो । असुभं बंधइ नामं तप्पडिपक्खेहिँ सुभनामं ॥ ९ ॥ अरिहंतादिसु भत्तो सुत्तरुई पयणुमाण गुणपेही । बन्धइ

१ तत्प्रद्वेषे निह्नवने । आवरणद्विकं बध्नाति भूतोऽत्याशातनया च ॥१॥ भूताद्यनुकम्पाव्रतयोगोद्युक्तः क्षान्ति (मान्) दानी गुरुभक्तः । बध्नाति भूतः सातं विपरीतो बध्नातीतरत् ॥ २ ॥ अर्हत्सिद्धचैत्यतपःश्रुतगुरुसाधुसङ्घप्रत्यनीकः । बध्नाति दर्शनमोहमनन्तसंसारिको येन ॥३॥ तीव्रकषायो बहुमोहपरिणतो रागद्वेषसंयुक्तः । बध्नाति चारित्रमोहं द्विविधमपि चारित्रगुणघाति ॥ ४ ॥ मिथ्यादृष्टिर्महारम्भपरिग्रहस्तीव्रलोभो निरनुक्रोशः । नरकायुष्कं निबध्नाति पापमतिः रौद्रपरिणामः ॥ ५ ॥ उन्मार्गदेशको मार्गनाशको गूढहृदयो मायावी । शाठ्यशीलश्च सशल्यस्तिर्यगायुर्बध्नाति जीवः ॥ ६ ॥ प्रकृत्या तनुकषायो दानरतः शीलसंयमविहीनः । मध्यमगुणैर्युक्तो मनुजायुर्बध्नाति जीवः ॥ ७ ॥ अणुव्रतमहाव्रतैश्च बालतपोऽकामनिर्जरया च । देवायुर्निबध्नाति सम्यग्दृष्टिश्च यो जीवः ॥ ८ ॥ मनोवचनकायवक्रो मायावी गौरवैः प्रतिबद्धः । अशुभं बध्नाति नाम तत्प्रतिपक्षैः शुभनाम ॥ ९ ॥ अर्हदादिषु भक्तः सूत्ररुचिः प्रतनुमानो गुणप्रेक्षी ।

उच्चागोयं विवरीए बंधई इयरं ॥ १० ॥ पाणवहादीसु रतो जिणपूयामोक्खमग्गविग्घयरो । अज्जेइ अंतरायं ण लहइ जेणिच्छियं लाभं ॥ ११ ॥" स्थितिबन्धो मूलोत्तरप्रकृतीनामुत्कृष्टजघन्यभेदः, तत्रोत्कृष्टो मूलप्रकृतीनां ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायाणां त्रिंशत्सागरोपमकोटीकोट्यः, यस्य च यावत्यः कोटीकोट्यः स्थितिस्तस्य तावन्त्येव वर्षशतान्यबाधा, ततुपरि प्रदेशतो विपाकतो वा अनुभवः, एतदेव प्रतिकर्म्मस्थिति योजनीयं, सप्ततिर्म्मोहनीयस्य, नामगोत्रयोर्विंशतिः, त्रयस्त्रिंशत्सागरोपमाण्यायुषः पूर्वकोटीत्रिभागोऽबाधा । अधन्यो ज्ञानदर्शनावरणमोहनीयान्तरायाणामन्तर्मुहूर्त्तं, नामगोत्रयोरष्टौ मुहूर्त्ताः, वेदनीयस्य द्वादश, आयुषः क्षुल्लकभवः, स चानापानसप्तदशभागः । साम्प्रतमेतदेव बन्धद्वयमुत्तरप्रकृतीनामुच्यते–तत्रोत्कृष्टो मतिश्रुतावधिमनःपर्यायकेवलावरणनिद्रापञ्चकचक्षुर्दर्शनादिचतुष्कसद्वेद्यदानाद्यन्तरायपञ्चकभेदानां विंशतेरुत्तरप्रकृतीनां त्रिंशत्सागरोपमकोटीकोट्यः, स्त्रीवेदसातवेदनीयमनुजगत्यानुपूर्वीणां चतसृणां पञ्चदश, मिथ्यात्वस्थौधिकमोहनीयवत्, कषायषोडशकस्य चत्वारिंशत् कोटीकोट्यः, नपुंसकवेदारतिशोकभयजुगुप्सानरकतिर्यग्गत्येकेन्द्रियपञ्चेन्द्रियजात्यौदारिकवैक्रियशरीरतदङ्गोपाङ्गहुण्डतैजसकार्म्मणसंस्थानानन्यसंहननवर्णगन्धरसस्पर्शनरकतिर्यगानुपूर्वीअगुरुलघूपघातपराघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसस्थावरबादरपर्याप्तकप्रत्येकास्थिरशुभदुर्भगदुःस्वरानादेययशःकीर्त्तिनिर्माणनीचैर्गोत्ररूपाणां त्रिचत्वारिंशत उत्तरप्रकृतीनां विंशतिः, पुंवेदहास्यरतिदेवगत्यानुपूर्वीद्वयाद्यसंस्थानसंहननप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्ररूपाणां प-

१ बध्नात्युच्चैर्गोत्रं विपरीतो बध्नातीतरत् ॥ १० ॥ प्राणवधादिषु रतो जिनपूजामोक्षमार्गविघ्नकरः । अर्जयत्यन्तरायं न लभते येनेप्सितं लाभम् ॥ ११ ॥

ञ्चदशानामुत्तरप्रकृतीनां दश, न्यग्रोधसंस्थानद्वितीयसंहननयोर्द्वादश तृतीयसंस्थाननाराचसंहननयोश्चतुर्दश कुब्जसंस्थानार्धनाराचसंहननयोः षोडश वामनसंस्थानकीलिकासंहननद्वित्रिचतुरिन्द्रियजातिसूक्ष्मापर्याप्तकसाधारणानामष्टानामुत्तरप्रकृतीनामष्टादश, आहारकतदङ्गोपाङ्गतीर्थकरनाम्नां सागरोपमकोटीकोटिर्भिन्नान्तर्मुहूर्त्तमबाधा, देवनारकायुषोरौधिकवत्, तिर्यग्मनुष्यायुषः पल्योपमत्रयं पूर्वकोटित्रिभागोऽबाधा । उक्त उत्कृष्टः स्थितिबन्धो, जघन्य उच्यते–मत्यादिपञ्चकचक्षुर्दर्शनाद्यावरणचतुष्कसञ्ज्वलनलोभदानाद्यन्तरायपञ्चकभेदानां पञ्चदशानामन्तर्मुहूर्त्तमन्तर्मुहूर्त्तमेवाबाधा, निद्रापञ्चकासातावेदनीयानां षण्णां सागरोपमस्य त्रयः सप्तभागाः पल्योपमासङ्ख्येयभागन्यूनाः, सातावेदनीयस्य द्वादश मुहूर्त्ता अन्तर्मुहूर्त्तमबाधा, मिथ्यात्वस्य सागरोपमं पल्योपमासङ्ख्येयभागन्यूनम्, आद्यकषायद्वादशकस्य चत्वारः सप्तभागाः सागरोपमस्य पल्योपमासङ्ख्येयभागन्यूनाः, सञ्ज्वलनक्रोधस्य मासद्वयं, मानस्य मासः, तदर्धं मायायाः, पुंवेदस्याष्टौ संवत्सराः, सर्वत्रान्तर्मुहूर्त्तमबाधा, शेषनोकषायमनुष्यतिर्यग्गतिपञ्चेन्द्रियजात्यौदारिकतदङ्गोपाङ्गतैजसकार्म्मणषट्संस्थानसंहननवर्णगन्धरसस्पर्शतिर्यग्मनुजानुपूर्व्यागुरुलघूपघातपराघातोच्छ्वासातपोद्योतप्रशस्ताप्रशस्तविहायोगतियशःकीर्त्तिवर्जत्रसादिविंशतिकनिर्म्माणनीचैर्गोत्रदेवगत्यानुपूर्वीद्वयनरकगत्यानुपूर्वीद्वयवैक्रियशरीरतदङ्गोपाङ्गरूपाणामष्टषष्ट्युत्तरप्रकृतीनां सागरोपमस्य द्वौ सप्तभागौ पल्योपमासङ्ख्येयभागन्यूनौ अन्तर्मुहूर्त्तमबाधा, वैक्रियषट्कस्य तु सागरोपमसह-

१ गतिजातिपञ्चकौदा० प्र. २ देवद्विकनरकद्विकवैक्रियद्विकआहारकद्विकयशःकीर्त्तितीर्थकरनामकर्मरहितानां शेषनामप्रकृतीनां तथा नीचैर्गोत्रस्य चेत्यासामुत्तरप्रकृतीनां प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रस्य द्वौ सप्तभागौ पल्योपमासङ्ख्येयभागन्यूनावन्तर्मुहूर्त्तमबाधा, आहारकतदङ्गोपाङ्गतीर्थकरनाम्नां सागरोपम-
टीकोटिर्भिन्नान्तर्मुहूर्त्तमबाधा, ननु चोत्कृष्टोऽप्येतावन्मात्र एवाभिहितस्ततः कोऽनयोर्भेद इति?, उच्यते, उत्कृष्टाद् अल्प-
ख्येयगुणहीनो जघन्य इति, यशःकीर्त्युच्चैर्गोत्रयोरष्टमुहूर्त्तान्यन्तर्मुहूर्त्तमबाधा, देवनारकायुषोर्देश वर्षसहस्राण्यन्तर्मु-
हूर्त्तमबाधा, तिर्यग्मनुजायुषोः क्षुल्लकभवोऽन्तर्मुहूर्त्तमबाधेति, बन्धनसङ्घातयोरौदारिकादिशरीरसहचरितत्वात्तद्वत एवो-
त्कृष्टजघन्यभेदोऽवगन्तव्य इति। उक्तः स्थितिबन्धः, अनुभावबन्धस्तूच्यते—तत्र शुभाशुभानां कर्मप्रकृतीनां प्रयोगकर्म-
णोपात्तानां प्रकृतिस्थितिप्रदेशरूपाणां तीव्रमन्दानुभावतयाऽनुभवनमनुभावः, स चैकद्वित्रिचतुःस्थानभेदेनानुगन्तव्यः,
तत्राशुभप्रकृतीनां कोशातकीरससमक्कथ्यमानार्द्धत्रिभागपादावशेषतुल्यतया तीव्रानुभावोऽवगन्तव्यो, मन्दानुभावस्तु
जातिरसैकद्वित्रिचतुर्गुणोदकप्रक्षेपास्वादतुल्यतयेति, शुभानां तु क्षीरेक्षुरसदृष्टान्तः पूर्ववद्योजनीयः, अत्र च कोशात-
कीक्षुरसादावुदकबिन्दुादिप्रक्षेपात् व्यत्ययाद्वा भेदानामानन्त्यमवसेयमिति। अत्र चायूंषि भवविपाकीनि आनुपूर्व्यः
क्षेत्रविपाकिन्यः शरीरसंस्थानाङ्गोपाङ्गसङ्घातसंहननवर्णगन्धरसस्पर्शागुरुलघूपघातपराघातोद्योतातपनिर्म्माणप्रत्येकसा-
धारणस्थिरास्थिरशुभाशुभरूपाः पुद्गलविपाकिन्यः, शेषास्तु ज्ञानावरणादिका जीवविपाकिन्य इत्युक्तोऽनुभावबन्धः।
प्रदेशबन्धस्त्वेकविधादिबन्धकापेक्षया भवति, तत्र यदैकविधं बध्नाति तदा प्रयोगकर्मणैकसमयोपात्ताः पुद्गलाः सातावे-
दनीयभावेन विपरिणमन्ते, षड्विधबन्धकस्य त्वायुर्म्मोहनीयवर्जाः षोढा, सप्तविधबन्धकस्य सप्तधा, अष्टविधबन्धकस्याष्ट-
धेति, तत्राद्यसमयप्रयोगात्ताः पुद्गलाः समुदानेन द्वितीयादिसमयेष्वल्पबहुप्रदेशतयाऽनेन क्रमेण व्यवस्थाप्यन्ति-तथा-

आ. स. १७

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ९७ ॥

युषः स्तोकाः पुद्गलाः, तद्विशेषाधिकाः प्रत्येकं नामगोत्रयोः, परस्परं तुल्याः, तद्विशेषाधिकाः प्रत्येकं ज्ञानदर्शनावरणा-
न्तरायाणां, तेभ्यो विशेषाधिका मोहनीये। ननु च तेभ्यो विशेषाधिका इत्यत्र निर्द्धारणे पञ्चमी, सा च "पञ्चमी विभक्ते"
(पा०२-३-४२) इत्यनेन सूत्रेण विधीयते, अस्य चायमर्थो—विभागो विभक्तं तत्र पञ्चमी विधीयमाना यत्रात्यन्तविभागस्तत्रैव
भवति, यथा माथुरेभ्यः पाटलिपुत्रका अभिरूपतराः, इह च कर्म्मपुद्गलानां सर्वदैकत्वं, तथावस्थानामेव च बुद्ध्या बहु-
प्रदेशादिगुणेन पृथक्करणं चिकीर्षितं, तत्र षष्ठी सप्तमी वा न्याय्या, तद्यथा—गवां गोषु वा कृष्णा सम्पन्नक्षीरतमेति,
नैष दोषो, यत्रावध्यवधिमतोः सामान्यवाची शब्दः प्रयुज्यते तत्रैव पञ्चीसप्तम्यौ, "यतश्च निर्द्धारण (पा०२-३-४१) मित्य-
नेन सूत्रेण विधीयेते, यथा गवां कृष्णा सम्पन्नक्षीरतमा, मनुष्येषु पाटलिपुत्रकाः आढ्यतराः, कर्म्मवर्गणापुद्गलानां
वेदनीये बहुतरा इति, यत्र पुनर्विशेषवाची शब्दोऽवधित्वेनोपादीयते तत्र पञ्चम्येव, यथा खण्डमुण्डशबलशाबलेयध-
वलधावलेयव्यक्तिभ्यः कृष्णा सम्पन्नक्षीरतमेति, अतो नात्र विभागः कारणमविभागो वा, ततो माथुरपाटलिपुत्र-
कादिविभागेन विभक्तानामपि सामान्यमनुष्यादिशब्दोच्चारणे षष्ठीसप्तम्यौ भवतो, यत्र तु पुनर्म्माथुरादिविशेषोऽव-
धित्वेनोपादीयते तत्र कार्यवशादेकस्यानामपि पञ्चम्येव, तदिह सत्यपि कर्म्मत्वेन वर्गणानामेकत्वे तद्विशेषाणामवधित्वेनोपादा-
नात्पञ्चम्येव न्याय्येति, तद्विशेषाधिका वेदनीये। उक्तः प्रदेशबन्धः समुदानकर्म्मापीति। साम्प्रतमीर्यापथिकं, "इर गति-
प्रेरणयोः" अस्माद्भावे ण्यत्, ईरणमीर्या तस्याः पन्था ईर्यापथस्तत्र भवमीर्यापथिकं, कश्चेर्यायाः पन्था भवति?, यदा-
श्रिता सा भवतीति?, एतच्च व्युत्पत्तिनिमित्तं यतस्तिष्ठतोऽपि तद्भवति. प्रवृत्तिनिमित्तं तु स्थित्यभावः, तच्चोपशान्तक्षीण-

॥ ९७ ॥

मोहसयोगकेवलिनां भवति, सयोगकेवलिनोऽपि हि तिष्ठतोऽपि सूक्ष्मगात्रसञ्चारा भवन्ति, उक्तं च—"केवली णं भंते! अस्सिं समयंसि जेसु आगासपदेसेसु हत्थं वा पायं वा ओगाहित्ता णं पडिसाहरेज्जा, पभू णं भंते! केवली तेसु चेवागासप-
देसेसु पडिसाहरित्तए?, णो इणट्ठे समट्ठे, कहं?, केवलिस्स णं चलाइं सरीरोवगरणाइं भवंति, चलोवगरणत्ताए केवली
णो सक्काएति तेसु चेवागासपदेसेसु हत्थं वा पायं वा पडिसाहरित्तए" तदेवं सूक्ष्मतरगात्रसञ्चाररूपेण योगेन यत्कर्म
बध्यते तदीर्यापथिकम्-ईर्याप्रभवं, ईर्याहेतुकमित्यर्थः, तच्च द्विसमयस्थितिकम्—एकस्मिन् समये बद्धं द्वितीये वेदितं,
तृतीयसमये तदपेक्षया चाकर्म्मतेति, कथमिति?, उच्यते, यतस्तत्कृतितः सातावेदनीयमकषायत्वात् स्थित्यभावेन व्यय-
मानमेव परिशटति, अनुभावतोऽनुत्तरोपपातिकसुखातिशायि प्रदेशतः स्थूलरूक्षशुष्कादिबहुप्रदेशमिति, उक्तं च—"अप्पं
बायरमउयं बहुं च लुक्खं च सुक्किलं चेव। मंदं महव्वतंतिय सातबहुलं च तं कम्मं ॥ १ ॥" अल्पं स्थितितः स्थितेरे-
वाभावात्, बादरं परिणामतोऽनुभावतो मृद्वनुभावं, बहु च बहुप्रदेशैः, रूक्षं स्पर्शतो, वर्णेन शुक्लं, मन्दं लेपतः, स्थूल-
चूर्णमुष्टिमृष्टकुड्यापतितलेपवत् महाव्ययमेकसमयेनैव सर्वापगमात्, सातावहुलमनुत्तरोपपातिकसुखातिशायीति। उक्त-
मीर्यापथिकम्, अधुना आधाकर्म्म, यदाधाय-निमित्तत्वेनाश्रित्य पूर्वोक्तमष्टप्रकारमपि कर्म्म बध्यते तदाधाकर्म्मेति,
तच्च शब्दस्पर्शरसरूपगन्धादिकमिति, तथाहि—शब्दादिकामगुणविषयाभिष्वङ्गवान् सुखलिप्सुर्मोहोपहतचेताः परमार्थो-

१ केवली भदन्त! अस्मिन् समये तेष्वाकाशप्रदेशेषु हस्तं वा पादं वाऽवगाह्य प्रतिसंहरेत्, प्रभुर्भदन्त! केवली तेष्वेवाकाशप्रदेशेषु प्रतिसंहर्तुम्?, नैवा-
र्थः समर्थः, कथम्?, केवलिनश्चलानि शरीरोपकरणानि भवन्ति, चलोपकरणतया केवली न शक्नोति तेष्वेवाकाशप्रदेशेषु हस्तं वा पादं वा प्रतिसंहर्तुम्.

लोक वि.२

उद्देशकः १

सुखमयेष्वपि सुखाध्यारोपं विदधाति, तदुक्तम्—"दुःखात्मकेषु विषयेषु सुखाभिमानः, सौख्यात्मकेषु नियमादिषु दुःखबुद्धिः । उत्कीर्णवर्णपदपङ्क्तिरिवान्यरूपा, सारूप्यमेति विपरीतगतिप्रयोगात् ॥ १ ॥" एतदुक्तं भवति–कर्म्मनिमित्तभूता मनोज्ञेतरशब्दादय एवाधाकर्म्मेत्युच्यन्ते इति । तपःकर्म्म तस्यैवाष्टप्रकारस्य कर्म्मणो बद्धस्पृष्टनिधत्तनिकाचितावस्थस्यापि निर्जराहेतुभूतं बाह्याभ्यन्तरभेदेन द्वादशप्रकारं तपःकर्म्मेत्युच्यते । कृतिकर्म्म तस्यैव कर्म्मणोऽपनयनकारकमर्हत्सिद्धाचार्योपाध्यायविषयमवनामादिरूपमिति । भावकर्म्म पुनरबाधामुल्लङ्घ्य स्वोदयेनोदीरणाकरणेन वोदीर्णाः पुद्गलाः प्रदेशविपाकाभ्यां भवक्षेत्रपुद्गलजीवेष्वनुभावं ददतो भावकर्म्मशब्देनोच्यन्त इति । तदेवं नामादिनिक्षेपेण दशधा कर्म्मोक्तम्, इह तु समुदानकर्म्मोपात्तेनाष्टविधकर्म्मणाऽधिकार इति गाथावयवेन दर्शयति—

अट्ठविहेण उ कम्मेण एत्थ होई अहीगारो ॥ १८४ ॥

गाथार्द्धं कण्ठ्यमिति गाथाद्वयपरमार्थः ॥ तदेवं सूत्रानुगमेन सूत्रे समुच्चारिते निक्षेपनिर्युक्त्यनुगमेन प्रतिपदं निक्षिप्ते नामादिनिक्षेपे च व्याख्याते सत्युत्तरकालं सूत्रं विवियते—

जे गुणे से मूलट्ठाणे, जे मूलट्ठाणे से गुणे । इति से गुणट्ठी महया परियावेणं पुणो पुणो रत्ते पमत्ते–माया मे पिया मे भज्जा मे पुत्ता मे धूआ मे णत्तुआ मे सहिसयणसंगंथसंथुआ मे विवित्तुवगरणपरिवट्टणभोयणच्छायणं मे । इच्चत्थं गढिए लोए

॥ ९८ ॥

अहो य राओ य परितप्पमाणे कालाकालसमुट्ठाई संजोगट्ठी अट्ठालोभी आलुंपे सहसाकारे विणिविट्ठचित्ते, एत्थ सत्थे पुणो पुणो, अप्पं च खलु आउयं इहमेगेसिं माणवाणं तंजहा–॥ ६२ ॥

अस्य चानन्तरपरम्परादिसूत्रैः सम्बन्धो वाच्यः, तत्रानन्तरसूत्रसम्बन्धः–'से हु मुणी परिण्णायकम्मे'ति, स मुनिः परिज्ञातकर्म्मा भवति यस्यैतद्व्रणमूलादिकमधिगतं भवति, परम्परसूत्रसम्बन्धस्तु 'से जं पुण जाणिज्जा सहसंमुइयाए परवागरणेणं अण्णेसिं वा सोच्चा' स्वसम्मत्या परव्याकरणेन तीर्थकरोपदेशादन्येभ्यो वाऽऽचार्यादिभ्यः श्रुत्वा जानीयात्–परिच्छिन्द्यात्, किं तदित्युच्यते—'जे गुणे से मूलट्ठाणे', आदिसूत्रसम्बन्धस्तु 'सुयं मे आउसंतेणं भगवया एवमक्खायं' किं तत् श्रुतं भवता यद्भगवता आयुष्मताऽऽख्यातमिति?, उच्यते, 'जे गुणे से मूलट्ठाणे,' 'य' इति सर्वनाम प्रथमान्तं मागधदेशीवचनत्वादेकारान्तं सामान्योद्देशार्थाभिधायीति, गुण्यते–भिद्यते विशेष्यतेऽनेन द्रव्यमिति गुणः, स चेह शब्दरूपरसगन्धस्पर्शादिकः, 'स' इति सर्वनाम प्रथमान्तमुद्दिष्टनिर्देशार्थाभिधायीति, 'मूल'मिति निमित्तं कारणं प्रत्यय इति पर्यायाः, तिष्ठन्त्यस्मिन्निति स्थानं, मूलस्य स्थानं मूलस्थानं, 'व्यवच्छेदफलत्वाद् वाक्याना'मिति न्यायात् य एव शब्दादिकः कामगुणः स एव संसारस्य–नारकतिर्यग्नरामरसंसृतिलक्षणस्य यन्मूलं कारणं कषायास्तेषां स्थानम्–आश्रयो वर्त्तते, यस्मान्मनोज्ञेतरशब्दाद्युपलब्धौ कषायोदयः, ततोऽपि संसार इति, अथवा मूलमिति–कारणं, तच्चाष्टप्रकारं कर्म्म, तस्य स्थानम्–आश्रयः कामगुण इति, अथवा मूलं–मोहनीयं तद्भेदो वा कामस्तस्य स्थानं शब्दादिको विषयगुणः, अथवा मूलं–शब्दादिको विषयगुणस्तस्य स्थानमिष्टानिष्टविषयगुणभेदेन व्यवस्थितो गुणरूपः संसार एव, आत्मा वा शब्दाद्युपयोगानन्यत्वाद् गुणः, अथवा मूलं–संसारस्तस्य शब्दादयः स्थानं कषाया वा, गुणोऽपि शब्दादिकः कषायपरिणतो वाऽऽत्मेति, यदिवा मूलं संसारस्य शब्दादिकषायपरिणतः सन्नात्मा तस्य स्थानं शब्दादिकं, गुणोऽप्यसावेवेति, ततश्च सर्वथा य एव गुणः स एव मूलस्थानं वर्त्तते । ननु च वर्त्तनक्रियायाः सूत्रेऽनुपादानात् कथं प्रक्षेप इति?, उच्यते, यत्र हि काचिद्विशेषक्रिया नैवोपादायि तत्र सामान्यक्रियामस्ति भवति विद्यते वर्त्तत इत्यादिकामुपादाय वाक्यं परिसमाप्यते, एवमन्यत्रापि द्रष्टव्यमिति । अथवा मूलमित्याद्यं प्रधानं वा, स्थानमिति कारणं, मूलं च तत्कारणं चेति विगृह्य कर्म्मधारयः, ततश्च य एव शब्दादिको गुणः स एव मूलस्थानं संसारस्य आद्यं प्रधानं वा कारणमिति, शेषं पूर्ववदिति । साम्प्रतमनयोरेव गुणमूलस्थानयोर्नियम्यनियामकभावं दर्शयंस्तदुपात्तानां विषयकषायादीनां बीजाङ्कुरन्यायेन परस्परतः कार्यकारणभावं सूत्रेणैव दर्शयति—'जे मूलट्ठाणे से गुणे'त्ति, यदेव संसारमूलानां कर्ममूलानां वा कषायाणां स्थानम्–आश्रयः शब्दादिको गुणोऽप्यसावेव, अथवा कषायमूलानां शब्दादीनां यत् स्थानं कर्म्म संसारो वा तत्तत्स्वभावापत्तेः गुणोऽप्यसावेवेति, अथवा शब्दादिकषायपरिणाममूलस्य संसारस्य कर्म्मणो वा यत् स्थानं–मोहनीयं कर्म्म शब्दादिकषायपरिणतो वाऽऽत्मेति तद्गुणावाप्तेः गुणोऽप्यसावेव, यदिवा–संसारकषायमूलस्यात्मनो यत् स्थानं–विषयाभिष्वङ्गोऽसावपि शब्दादिविषयत्वाद् गुणरूप एवेति । अत्र च विषयोपादानेन विषयिणोऽप्याक्षेपात् सूचनार्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वाच्च सूत्रस्येत्येवमपि द्रष्टव्यं–यो गुणे गुणेषु वा वर्त्तते स मूलस्थाने मूलस्थानेषु वा वर्त्तते, यो मूलस्थानादौ वर्त्तते स एव गुणादौ वर्त्तत इति, य एव जन्तुः शब्दादिके प्राग्व्यावर्णितस्वरूपे गुणे वर्त्तते स एव संसारमूलकषायादिस्थानादौ वर्त्तते, एतदेव द्वितीयसूत्रापेक्षया व्यत्ययेन प्राग्वदायोज्यम्, अनन्तगमपर्यायत्वात् सूत्रस्यैवमपि द्रष्टव्यं–यो गुणः स एव मूलं स एव च स्थानं, यन्मूलं तदेव गुणः स्थानमपि तदेव, यत् स्थानं तदेव गुणो मूलमपि तदेवेति, यो गुणः शब्दादिकोऽसावेव संसारस्य कषायकारणत्वान्मूलं स्थानमप्यसावेव इत्येवमन्येष्वपि विकल्पेषु योज्यं, विषयनिर्देशे च विषयव्याक्षिप्तो, यो गुणे वर्त्तते स मूले स्थाने चेत्येवं सर्व्वत्र द्रष्टव्यम्, इह च सर्व्वज्ञप्रणीतत्वादनन्तार्थता सूत्रस्यावगन्तव्या, तथाहि–मूलमत्र कषायादिकमुपन्यस्तं, कषायाश्च क्रोधादयश्चत्वारः, क्रोधोऽप्यनन्तानुबन्ध्यादिभेदेन चतुर्द्धा, अनन्तानुबन्धिनोऽप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि बन्धाध्यवसायस्थानान्यनन्ताश्च तत्पर्यायास्तेषां च प्रत्येकं स्थानगुणनिरूपणेनानन्तार्थता सूत्रस्य सम्पद्यते, सा च छद्मस्थेन सर्वायुषाऽप्यविषयत्वा(दनन्तत्वा)च्छाशक्या दर्शयितुं, दिग्दर्शनं तु कृतमेवातोऽनया दिशा कुशाग्रीयधिया गुणमूलस्थानानां परस्परतः कार्यकारणभावः संयोजना च कार्येति । तदेवं य एव गुणः स एव मूलस्थानं यदेव मूलस्थानं स एव गुण इत्युक्तं, ततः किमित्यत आह—'इति से गुणट्ठी महया' इत्यादि, इतिर्हेतौ यस्माच्छब्दादिगुणपरीत आत्मा कषायमूलस्थाने वर्त्तते, सर्वोऽपि च प्राणी 'गुणार्थी' गुणप्रयोजनो गुणानुरागीत्यतस्तेषां गुणानामप्राप्तौ प्राप्तिनाशे वा काङ्क्षाशोकाभ्यां स प्राणी 'महता' अपरिमितेन परि–समन्तात्तापः परितापस्तेन–शारीरमानसस्वभावेन दुःखेनाभिभूतः सन् पौनःपुन्येन तेषु तेषु स्थानेषु 'वसेत्' तिष्ठेदुत्पद्येत, किम्भूतः

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १०० ॥

सन्?—प्रमत्तः । प्रमादश्च रागद्वेषात्मको, द्वेषश्च प्रायो न रागमृते, रागोऽप्युत्पत्तेरारभ्यानादभ्यासान्मातापित्रादिविषयो भवतीति दर्शयति—'माया मे' इत्यादि, तत्र मातृविषयो रागः संसारस्वभावादुपकारकर्तृत्वाद्वोपजायते, रागे च सति मदीया माता क्षुत्पिपासादिकां वेदनां मा प्रापदित्यतः कृषिवाणिज्यसेवादिकां प्राण्युपघातरूपां क्रियामारभते, तदुपघातकारिणि वा तस्यां वाऽकार्यप्रवृत्तायां द्वेष उपजायते, तद्यथा–अनन्तवीर्यप्रसक्तायां रेणुकायां रामस्येति, एवं पिता मे, पितृनिमित्तं रागद्वेषौ भवतो, यथा रामेण पितरि रागात्तदुपहन्तरि च द्वेषात् सप्तकृत्वः क्षत्रिया व्यापादिताः, सुभूमेनापि त्रिसप्तकृत्वो ब्राह्मणा इति, भगिनीनिमित्तेन च क्लेशमनुभवति प्राणी, तथा भार्यानिमित्तं रागद्वेषोद्भवः, तद्यथा–चाणाक्येन भगिनीभगिनीपत्याद्यवज्ञातया भार्यया चोदितेन नन्दान्तिकं द्रव्यार्थमुपगतेन कोपान्नन्दकुलं क्षयं निन्ये, तथा पुत्रा मे न जीवन्तीति आरम्भे प्रवर्त्तते, एवं दुहिता मे दुःखिनीति रागद्वेषोपहतचेताः परमार्थमजानानस्तत्तद्विधत्ते येन ऐहिकामुष्मिकान् अपायान् अवाप्नोति, तद्यथा–जरासन्धो जामातरि कंसे व्यापादिते स्वबलावलेपादपसृतवासुदेवपदानुसारी सबलवाहनः क्षयमगात्, स्नुषा मे न जीवन्तीत्यारम्भादौ प्रवर्त्तते, 'सखिस्वजनसंग्रन्थसंस्तुता मे' सखा–मित्रं स्वजनः–पितृव्यादिः संग्रन्थः–स्वजनस्यापि स्वजनः पितृव्यपुत्रशालादिः संस्तुतो–भूयो भूयो दर्शनेन परिचितः, अथवा पूर्वसंस्तुतो मातापित्रादिरभिहितः पश्चात्संस्तुतः शालकादिः स इह ग्राह्यः, स च मे दुःखित इति परितप्यते, विविक्तं शोभनं प्रचुरं वा उपकरणं–हस्त्यश्वरथासनमञ्चकादि परिवर्त्तनं–द्विगुणत्रिगुणादिभेदभिन्नं तदेव, भोजनं–मोदकादि आच्छादनं–पट्टयुग्मादि तच्च मे भविष्यति नष्टं वा । 'इच्चत्थ'मिति इत्येवमर्थं गृद्धो लोकः तेष्वेव मातापित्रादिरागादिनिमित्तस्थानेष्वामरणं प्रमत्तो ममेदमहमस्य स्वामी पोषको वेत्येवं मोहितमना 'वसेत्' तिष्ठेदिति, उक्तं च—"पुत्रा मे भ्राता मे स्वजना मे गृहकलत्रवर्गो मे । इति कृतमेमेशब्दं पशुमिव मृत्युर्जनं हरति ॥ १ ॥ पुत्रकलत्रपरिग्रहममत्वदोषैर्नरो व्रजति नाशम् । कृमिक इव कोशकारः परिग्रहाद्दुःखमाप्नोति ॥ २ ॥" अमुमेवार्थं निर्युक्तिकारो गाथाद्वयेनाह—

लोक.वि.२ उद्देशकः१

॥ १०० ॥

संसारं छेत्तुमणो कम्मं उम्मूलए तदट्ठाए । उम्मूलिज्ज कसाया तम्हा उ चइज्ज सयणाई ॥ १८५ ॥
माया मेत्ति पिया मे भगिणी भाया य पुत्तदारा मे। अत्थंमि चेव गिद्धा जम्मणमरणाणि पावंति॥१८६॥

'संसारं' नारकतिर्यङ्नरामरलक्षणं मातापितृभार्यादिस्नेहलक्षणं वा 'छेत्तुमना' उन्मूलयितुमना[1] कर्म्मोन्मूलयेत्, तदुन्मूलनार्थं च तत्कारणभूतान् कषायानुन्मूलयेत्, कषायापगमनाय च मातापित्रादिगतं स्नेहं जह्यात्, यस्मान्मातापित्रादिसंयोगाभिलाषिणोऽर्थे–रत्नकुप्यादिके गृद्धाः–अध्युपपन्ना जन्मजरामरणादिकानि दुःखान्यसुभृतः प्राप्नुवन्तीति गाथाद्वयार्थः ॥ तदेवं कषायेन्द्रियप्रमत्तो मातापित्राद्यर्थमर्थोपार्जनरक्षणतत्परो दुःखमेव केवलमनुभवतीत्याह–'अहो' इत्यादि, अहश्च सम्पूर्णं रात्रिं च, चशब्दात्पक्षं मासं च, निवृत्तशुभाध्यवसायः परि–समन्तात्तप्यमानः परितप्यमानः सन् तिष्ठति, तद्यथा—"कइया वच्चइ सत्थो? किं भण्डं कत्थ कित्तिया भूमी । को कयविक्कयकालो निव्विसइ किं कहिं केण? ॥१॥"

---

१ कदा व्रजति सार्थः किं भाण्डं कुत्र कियती भूमिः । कः क्रयविक्रयकालो निर्विशति (निर्विशति) किं क्व केन ? ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, स च परितप्यमानः किम्भूतो भवतीत्याह—'काले'त्यादि, कालः—कर्त्तव्यावसरस्तद्विपरीतोऽकालः सम्यगुत्थातुम्—अभ्युद्यन्तुं शीलमस्येति समुत्थायीति पदार्थः, वाक्यार्थस्तु—काले कर्त्तव्यावसरे अकालेन तद्विपर्यासेन समुत्तिष्ठते—अभ्युद्यतमनुष्ठानं करोति तच्छीलश्चेति, कर्त्तव्यावसरे न करोत्यन्यदा च विदधातीति, यथा वा काले करोत्येवमकालेऽपीति, यथा वाऽनवसरे न करोत्येवमवसरेऽपीति, अन्यमनस्कत्वादपगतकालाकालविवेक इति भावना, यथा प्रद्योतेन मृगापतिरपगतर्भतृका सती ग्रहणकालमतिवाह्य कृतप्राकारादिरक्षा जिघृक्षितेति, यस्तु पुनः सम्यक्कालोत्थायी भवति स यथाकालं परस्परानाबाधया सर्वाः क्रियाः करोतीति, तदुक्तम्—"मासैरष्टभिरह्ना च, पूर्वेण वयसाऽऽयुषा। तत् कर्त्तव्यं मनुष्येण, येनान्ते सुखमेधते ॥ १ ॥" धर्म्मानुष्ठानस्य च न कश्चिदकालो मृत्योरिवेति । किमर्थं पुनः कालाकालसमुत्थायी भवतीत्याह—'संजोगट्ठी' संयुज्यते संयोजनं वा संयोगोऽर्थः—प्रयोजनं संयोगार्थः सोऽस्यास्तीति संयोगार्थी, तत्र धनधान्यहिरण्यद्विपदचतुष्पदराज्यभार्यादिः संयोगस्तेनार्थी—तत्प्रयोजनो, अथवा शब्दादिविषयः संयोगो मातापित्रादिभिर्वा तेनार्थी कालाकालसमुत्थायी भवतीति । किं च—'अट्ठालोभी' अर्थो—रत्नकुप्यादिस्तत्र आ—समन्ताल्लोभोऽर्थालोभः स विद्यते यस्येत्यसावपि कालाकालसमुत्थायी भवति, मम्मणवणिग्वत्, तथाहि—असावतिक्रान्तार्थोपार्जनसमर्थयौवनवया जलस्थलपथप्रेषितनानादेशभाण्डभृतबोहित्थगन्त्रीकोष्टमण्डलिकासम्भृतसम्भारोऽपि प्रावृषि सप्तरात्रावच्छिन्नमुशलप्रमाणजलधारावर्षनिरुद्धसकलप्राणिगणसञ्चारमनोरथायां महानदीजलपूरानीतकाष्ठानि जिघृक्षुरुपभोगधर्म्मावसरे निवृत्तापराशेषशुभपरिणामः केवलमर्थोपार्जनप्रवृत्त इति, उक्तं च—"उक्कूसेण[1] खणइ निहणइ रत्तिं ण सुअति दियावि य ससंको। लिंपइ ठएइ सययं लंछियपडिलंछियं कुणइ ॥ १ ॥ भुंजसु न ताव रिक्को जेमेउं नवि य अज्ज मज्जीहं। नवि य वसीहामि घरे कायव्वमिणं बहुं अज्जं ॥ २ ॥" पुनरपि लोभिनोऽशुभव्यापारानाह—'आलुंपे' आ—समन्ताल्लुम्पतीत्यालुम्पः, स हि लोभाभिभूतान्तःकरणोऽपगतसकलकर्त्तव्याकर्त्तव्यविवेकोऽर्थलोभैकदत्तदृष्टिरैहिकामुष्मिकविपाककारिणीर्निर्लाञ्छनगलकर्त्तनचौर्यादिकाः क्रियाः करोति, अन्यच्च—'सहसक्कारे' करणं कारः, असमीक्षितपूर्वापरदोषं सहसा करणं सहसाकारः स विद्यते यस्येत्यर्श आदिभ्योऽच्, (पा० ५-२-१२७) अथवा छान्दसत्वात्कर्त्तर्येव घञ्, करोतीति कारः, तथाहि—लोभतिमिराच्छादितदृष्टिरर्थैकमनाः शकुन्तवच्छराघातमनालोच्य पिशिताभिलाषितया सन्धिच्छेदनादितो विनश्यति, लोभाभिभूतो ह्यर्थैकदृष्टिस्तन्मनास्तदर्थोपयुक्तोऽर्थमेव पश्यति नापायान्, आह च—'विणिविट्ठचित्ते' विविधम्—अनेकधा निविष्टं—स्थितमवमाढमर्थोपार्जनोपाये मातापित्राद्यभिष्वङ्गे वा शब्दादिविषयोपभोगे वा चित्तम्—अन्तःकरणं यस्य स तथा, पाठान्तरं वा 'विणिविट्ठचिट्ठे'त्ति, विशेषेण निविष्टा कायवाङ्मनसां परिस्पदात्मिकाऽर्थोपार्जनोपायादौ चेष्टा यस्य स विनिविष्टचेष्टः। तदेवं मातापित्रादिसंयोगार्थी अर्थालोभी आलुम्पः सहसाकारो विनिविष्टचित्तो विनिविष्टचेष्टो वा किम्भूतो भवतीत्याह—'इत्थ' इत्यादि, 'अत्र' अस्मिन्मातापित्रादौ शब्दादिविषयसंयोगे वा विनिविष्टचित्तः

[1] उत्खनति खनति निदधाति (हन्ति) रात्रौ न स्वपिति दिवाऽपि च सशङ्कः। लिम्पति स्थगयति सततं लाञ्छितप्रतिलाञ्छितं करोति ॥ १ ॥ भुङ्क्ष्व न तावन्निर्व्यापारो जिमितं नापि चाद्य मङ्क्ष्यामि। नापि च वत्स्यामि गृहे कर्त्तव्यमिदं बहव्य ॥ २ ॥

सन् पृथिवीकायादिजन्तूना यच्छस्त्रम्—उपघातकारि तत्र पुनः पुनः प्रवर्त्तते, एवं पौनःपुन्येन शस्त्रे प्रवृत्तो भवति यदि पृथिवीकायादिजन्तूनामुपघाते वर्त्तते, तथाहि—'शसु हिंसाया'मित्यस्माच्छस्यते हिंस्यत इति करणे ष्ट्रन्विहितः, तच्च स्वकायपरकायादिभेदभिन्नमिति । पाठान्तरं वा 'एत्थ सत्ते पुणो पुणो,' 'अत्र' मातापितृशब्दादिसंयोगे लोभार्थी सन् 'सक्तो' गृद्धः अध्युपपन्नः पौनःपुन्येन विनिविष्टचेष्ट आलुम्पकः सहसाकारः कालाकालसमुत्थायी वा भवतीति । एतच्च साम्प्रतेक्षिणामपि युज्येत यद्यजरामरत्वं दीर्घायुष्कं वा स्यात्, तच्चोभयमपि नास्तीत्याह—'अप्पं च' इत्यादि, अल्पं—स्तोकं चशब्दोऽधिकवचनः, खलुरवधारणे, आयुरिति भवस्थितिहेतवः कर्म्मपुद्गलाः 'इहे'ति संसारे मनुष्यभवे वा 'एकेषां' केषाञ्चिदेव 'मानवानां' मनुजानामिति पदार्थः, वाक्यार्थस्तु—इह अस्मिन् संसारे केषाञ्चिन्मनुजानां क्षुल्लकभवोपलक्षितान्तर्मुहूर्त्तमात्रमल्पं—स्तोकमायुर्भवति, चशब्दादुत्तरोत्तरसमयादिवृद्ध्या पल्योपमत्रयावसानेऽप्यायुषि खलुशब्दस्यावधारणार्थत्वात्संयमजीवितमल्पमेवेति, तथाहि—अन्तर्मुहूर्तादारभ्य देशोनपूर्वकोटिं यावत्संयमायुष्कं, तच्चाल्पमेवेति, अथवा त्रिपल्योपमस्थितिकमप्यायुरल्पमेव, यतस्तदप्यन्तर्मुहूर्त्तमपहाय सर्वमपवर्त्तते, उक्तं च—"अद्धा जोगुक्कोसे बंधित्ता भोगभूमिएसु लहुं। सव्वप्पजीवियं वज्जइत्तु उव्वट्टिया दोण्हं ॥ १ ॥" अस्या अयमर्थः—उत्कृष्टे योगे—बन्धाध्यवसायस्थाने आयुषो यो बन्धकालोऽद्धा उत्कृष्ट एव तं बद्ध्वा, क्व?—'भोगभूमिकेषु' देवकुर्व्वादिजेषु, तस्य क्षिप्रमेव सर्वाल्पमायुर्वर्जयित्वा 'द्वयोः' तिर्यग्मनुष्ययोरपवृत्तिका—अपवर्त्तनं भवति, एतच्चापर्याप्तकान्तर्मुहूर्त्तान्तर्द्रष्टव्यं, तत ऊर्ध्वमनपवर्त्तनमेवेति । सामान्येन वाऽऽयुः सोपक्रमायुषां सोपक्रमं निरुपक्रमायुषां निरुपक्रमं, यदा ह्यसुमान् स्वायुषस्त्रि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागे त्रिभागत्रिभागे वा जघन्यत एकेन द्वाभ्यां वोत्कृष्टतः सप्तभिरष्टभिर्वा वर्षैरन्तर्मुहूर्त्तप्रमाणेन कालेनात्मप्रदेशरचनानाडिकान्तर्वर्त्तिन आयुष्ककर्मवर्गणापुद्गलान् प्रयत्नविशेषेण विधत्ते तदा निरुपक्रमायुर्भवतीति, अन्यदा तु सोपक्रमायुष्क इति, उपक्रमश्चोपक्रमणकारणैर्भवति, तानि चामूनि—"दंडकससत्थरज्जू अग्गी उदगपडणं विसं वाला । सीउण्हं अरइ भयं खुहा पिवासा य वाही य ॥ १ ॥ मुत्तपुरीसनिरोहे जिण्णाजिण्णे य भोयणे बहुसो । घंसणधोलणपीलण आउस्स उवक्कमा एते ॥ २ ॥" उक्तं च—"स्वतोऽन्यत इतस्ततोऽभिमुखधावमानापदामहो निपुणता नृणां क्षणमपीह यज्जीव्यते । मुखे फलमतिक्षुधा सरसमल्पमायोजितं, कियच्चिरमचर्वितं दशनसङ्कटे स्थास्यति?॥ १ ॥ उच्छ्वासनिश्वासयः प्राणाः, स चोच्छ्वासः समीरणः । समीरणाच्चलं नान्यत्, क्षणमप्यायुरद्भुतम् ॥ २ ॥" इत्यादि । येऽपि दीर्घायुष्कस्थितिका उपक्रमणकारणाभावे आयुःस्थितिमनुभवन्ति तेऽपि मरणादप्यधिकां जराभिभूतविग्रहा जघन्यतमामवस्थामनुभवन्तीति तद्यथेत्यादिना दर्शयति—

तंजहा—सोयपरिण्णाणेहिं परिहायमाणेहिं चक्खुपरिण्णाणेहिं परिहायमाणेहिं घाणपरिण्णाणेहिं परिहायमाणेहिं रसणापरिण्णाणेहिं परिहायमाणेहिं फासपरिण्णाणेहिं

१ दण्डः कशा शस्त्रं रज्जुरग्निरुदकं पतनं विषं व्यालाः । शीतमुष्णमरतिर्भयं क्षुत्पिपासा च व्याधिश्च ॥ १ ॥ मूत्रपुरीषनिरोधः जीर्णेऽजीर्णे च भोजने बहुशः । पर्षणं घोलनं पीडनमायुष उपक्रमा एते ॥ २ ॥

आ. सू. १८

श्रीआचाराङ्गवृत्तिः (शी०)

॥ १०३ ॥

परिहायमाणेहिं अभिकंतं च खलु वयं स पेहाए तओ से एगदा मूढभावं जणयंति ॥ ६३ ॥

लोक.वि.२

उद्देशकः ६

शृणोति भाषापरिणतान् पुद्गलानिति श्रोत्रं, तच्च कदम्बपुष्पाकारं द्रव्यतो भावतो भाषाद्रव्यग्रहणलब्ध्युपयोगस्वभावमिति, तेन श्रोत्रेण परिः-समन्ताद् घटपटशब्दादिविषयाणि ज्ञानानि परिज्ञानानि तैः श्रोत्रपरिज्ञानैर्जराग्रभावात्परिहीयमानैः सद्भिस्ततोऽसौ—प्राणी 'एकदा' वृद्धावस्थायां रोगोदयावसरे वा 'मूढभावं' मूढतां कर्त्तव्याकर्त्तव्याज्ञतामिन्द्रियपाटवाभावादात्मनो जनयति, हिताहितप्राप्तिपरिहारविवेकशून्यतामापद्यत इत्यर्थः, जनयन्तीति चैकवचनावसरे 'तिडां तिडो भवन्ती'ति बहुवचनमकारि, अथवा तानि वा श्रोत्रविज्ञानानि परिक्षीयमाणान्यात्मनः सदसद्विवेकविकलतामापादयन्तीति, श्रोत्रादिविज्ञानानां च तृतीया प्रथमार्थे सुव्व्यत्ययेन द्रष्टव्येति, एवं चक्षुरादिविज्ञानेष्वपि योज्यम्, अत्र च करणत्वादिन्द्रियाणामेवं सर्वत्र द्रष्टव्यं—श्रोत्रेणात्मनो विज्ञानानि चक्षुषाऽऽत्मनो विज्ञानानीति, ननु च तान्येव द्रष्टृणि कुतो न भवन्ति?, उच्यते, अशक्यमेवं विज्ञातुं, तद्विनाशे तदुपलब्धार्थस्मृत्यभावात्, दृश्यते च हृषीकोपघातेऽपि तदुपलब्धार्थस्मरणं, तद्यथा—धवलगृहान्तर्वर्त्तिपुरुषपञ्चवातायनोपलब्धार्थस्य तदन्यतरस्थगनेऽपि तदुपपत्तिरिति, तथाहि—अहमनेन श्रोत्रेण चक्षुषा वा मन्दमर्थमुपलभे, अनेन च स्फुटतरमिति स्पष्टैव करणत्वावगतिरक्षाणां, यद्येवमन्यान्यपि करणानि सन्ति तानि किं नोपात्तानि?, कानि पुनस्तानि?, उच्यन्ते, वाक्पाणिपादपायूपस्थमनांसि वचनादानविहरणोत्सर्गानन्दसङ्कल्पव्यापाराणि, ततश्चैतेषामात्मोपकारकत्वेन करणत्वं, करणत्वादिन्द्रियत्वमिति, एवं चैकादशेन्द्रियसद्भावे सति पञ्चानामेवोपादानं किमर्थमिति, आहाचार्यो—नैष दोषः, इह ह्यात्मनो विज्ञानोत्पत्तौ यत् प्रकृष्टमुपकारकं तदेव करणत्वादिन्द्रियम्, एतानि तु वाक्पाण्यादीनि नैवात्मनोऽनन्यसाधारणतया करणत्वेन व्याप्रियन्ते, अथ यां काञ्चन क्रियामुपादाय करणत्वमुच्यते एवं तर्हि भ्रूदरादेरप्युत्क्षेपादिसम्भवात्करणत्वं स्यात्, किं च—इन्द्रियाणां स्वविषये नियतत्वात् नान्येन्द्रियकार्यमन्यदिन्द्रियं कर्तुमलं, तथाहि—चक्षुरेव रूपावलोकनायालं न तदभावे श्रोत्रादीनि, यस्तु रसाद्युपलम्भे शीतस्पर्शादेरप्युपलम्भः स सर्वव्यापित्वात् स्पर्शनेन्द्रियस्येत्यनाशङ्कनीयम्, इह तु पुनः पाणिच्छेदेऽपि तत्कार्यस्यादानलक्षणस्य दशनादिनाऽपि निर्वर्त्त्यमानत्वाद्यत्किञ्चिदेतत्, मनसस्तु सर्वेन्द्रियोपकारकत्वादन्तःकरणत्वमिष्यत एव, तस्य च बाह्येन्द्रियविज्ञानोपघातेनैव गतार्थत्वान्न पृथगुपादानमिति, प्रत्येकोपादानं च क्रमोत्पत्तिविज्ञानोपलक्षणार्थं, तथाहि—यैनैवेन्द्रियेण सह मनः संयुज्यते तदेवात्मीयविषयगुणग्रहणाय प्रवर्त्तते नेतरदिति, ननु च दीर्घशष्कुलीभक्षणादौ पञ्चानामपि विज्ञानानां यौगपद्येनोपलब्धिरनुभूयते, नैतदस्ति, केवलिनोऽपि द्वावुपयोगौ न स्तः, आस्तां तावदारातीयभागदर्शिनः पञ्चोपयोग इति, एतच्चान्यत्र न्यक्षेण प्रतिपादितमिति नेह प्रतायते, यस्तु यौगपद्येनानुभवाभासः स द्रागवृत्तित्वान्मनसो भवतीति, उक्तं च—"आत्मा सहैति मनसा मन इन्द्रियेण, स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः । योगोऽयमेव मनसः किमगम्यमस्ति?, यस्मिन्मनो व्रजति तत्र गतोऽयमात्मा ॥ १ ॥" । इह चायमात्मेन्द्रि-

॥ १०३ ॥

१ स्वपक्षे भावमनो व्याप्रियते इत्यर्थः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यलब्धिमान् आदित्सितजन्मोत्पत्तिदेशे समयेनाहारपर्याप्तिं निर्वर्त्तयति, तदनन्तरमन्तर्मुहूर्त्तेन शरीरपर्याप्तिं, ततोऽपीन्द्रियपर्याप्तिं तावतैव कालेन, तानि च पञ्चेन्द्रियाणि–स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीति, तान्यपि द्रव्यभावभेदात् प्रत्येकं द्विविधानीति, तत्र द्रव्येन्द्रियं निर्वृत्त्युपकरणभेदात् द्विधा, निर्वृत्तिरप्यान्तरबाह्यभेदात् द्विधैव, निर्वर्त्यत इति निर्वृत्तिः, केन निर्वर्त्यते?, कर्म्मणा, तत्रोत्सेधाङ्गुलासङ्ख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थिता या वृत्तिरभ्यन्तरा निर्वृत्तिः, तेष्वेवात्मप्रदेशेष्विन्द्रियव्यपदेशभाक् यः प्रतिनियतसंस्थानो निर्म्माणनाम्ना पुद्गलविपाकिना वर्द्धकिसंस्थानीयेन आरचितः कर्णशष्कुल्यादिविशेषः अङ्गोपाङ्गनाम्ना च निष्पादित इति बाह्या निर्वृत्तिः, तस्या एव निर्वृत्तेर्द्विरूपायाः येनोपकारः क्रियते तदुपकरणं, तच्चेन्द्रियकार्यसमर्थं, सत्यामपि निर्वृत्तावनुपहतायां मसूराकृतिरूपायां निर्वृत्तौ तस्योपघाताच्च पश्यति, तदपि निर्वृत्तिवद् द्विधा, तत्राभ्यन्तरमक्ष्णस्तावत् कृष्णशुक्लमण्डलं बाह्यमपि पत्रपक्ष्मभ्रूयादि, एवं शेषेष्वप्यायोजनीयमिति, भावेन्द्रियमपि लब्ध्युपयोगभेदात् द्विधा, तत्र लब्धिर्ज्ञानदर्शनावरणीयक्षयोपशमरूपा यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते, तन्निमित्त आत्मनो मनस्याचिव्यादर्थग्रहणं प्रति व्यापार उपयोग इति, तदत्र सत्यां लब्धौ निर्वृत्त्युपकरणोपयोगाः, सत्यां च निर्वृत्तावुपकरणोपयोगौ, सत्युपकरण उपयोग इति, एतेषां च श्रोत्रादीनां कदम्बकमसूरकलम्बुकापुष्पक्षुरप्रनानासंस्थानताऽवगन्तव्येति, विषयश्च श्रोत्रेन्द्रियस्य द्वादशभ्यो योजनेभ्य आगतं शब्दं गृह्णाति चक्षुरप्येकविंशतिषु लक्षेषु सातिरेकेषु व्यवस्थितं प्रकाशकं प्रकाश्यं तु सातिरेकयोजनलक्षस्थितं रूपं गृह्णाति, शेषाणि तु नवभ्यो योजनेभ्य आगतं स्वविषयं गृह्णन्ति, ॥ १०४ ॥

जघन्यतस्त्वङ्गुलासङ्ख्येयभागविषयत्वं सर्वेषाम्, अत्र च 'सोयपरिण्णाणेहिं परिहायमाणेही'त्यादि य उत्पत्तिं प्रति व्यत्ययेनेन्द्रियाणामुपन्यासः स एवमर्थं द्रष्टव्यः–इह संज्ञिनः पञ्चेन्द्रियस्य उपदेशदानेनाधिकृतत्वादुपदेशश्च श्रोत्रेन्द्रियविषय इतिकृत्वा तत्पर्याप्तौ च सर्वेन्द्रियपर्याप्तिः सूचिता भवति। श्रोत्रादिविज्ञानानि च वयोऽतिक्रमे परिहीयन्ते, तदेवाह–'अभिकंत'मित्यादि, अथवा श्रोत्रादिविज्ञानैरुपचितैः करणभूतैः सद्भिः 'अभिकंतं च खलु वयं स पेहाए' तत्र प्राणिनां कालकृता शरीरावस्था यौवनादिर्वयः तज्जरामभि मृत्युं वा क्रान्तमभिक्रान्तम्, इह हि चत्वारि वयांसि–कुमारयौवनमध्यमवृद्धत्वानि, उक्तं च–"प्रथमे वयसि नार्जितं, द्वितीये नार्जितं धनम्। तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति? ॥ १ ॥" तत्राद्यवयोद्वयातिक्रमे जराभिमुखमभिक्रान्तं वयो भवति, अन्यथा वा त्रीणि वयांसि–कौमारयौवनस्थविरत्वभेदाद्, उक्तं च–"पिता रक्षति कौमारे, भर्त्ता रक्षति यौवने। पुत्राश्च स्थाविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥ १ ॥" अन्यथा वा त्रीणि वयांसि, बालमध्यवृद्धत्वभेदात्, उक्तं च–आषोडशाद्भवेद्बालो, यावत्क्षीरान्नवर्त्तकः। मध्यमः सप्ततिं यावत्परतो वृद्ध उच्यते ॥ १ ॥" एतेषु वयस्सु सर्वेष्वपि योपचयवत्यवस्था तामतिक्रान्तोऽतिक्रान्तवया इत्युच्यते, चः समुच्चये, न केवलं श्रोत्रचक्षुर्घ्राणरसनस्पर्शनविज्ञानैर्व्यस्तसमस्तैर्दशतः सर्वतो वा परिहीयमाणैर्वा मौढ्यमापद्यते, वयश्चातिक्रान्तं 'प्रेक्ष्य' पर्यालोच्य 'स' इति प्राणी खलुरिति विशेषणे विशेषेण–अत्यर्थं मौढ्यमापद्यत इति, आह च–'ततो से' इत्यादि, 'तत' इति तस्मादिन्द्रियविज्ञानापचयाद्वयोऽतिक्रमणाद्वा स इति प्राणी 'एकदे'ति वृद्धाव-

१ चक्षुषः संख्येयभागे यद्यपि तथापि सर्वेषां विषयस्य सामान्येन विवक्षणादित्युक्तं.

स्थायां मूढभावो मूढत्वं–किंकर्त्तव्यताभावमात्मनो जनयति, अथवा 'से'तस्यासुभृतः श्रोत्रादिविज्ञानानि परिहीयमाणानि मूढभावं जनयन्तीति ॥ स एवं वार्द्धक्ये मूढस्वभावः सन् प्रायेण लोकावगीतो भवतीत्याह–

जेहिं वा सद्धिं संवसति ते वि णं एगदा णियगा पुव्विं परिवयंति, सोऽवि ते णियए पच्छा परिवएज्जा, णालं ते तव ताणाए वा सरणाए वा, तुमंपि तेसिं णालं ताणाए वा सरणाए वा, से ण हासाय ण किड्डाए ण रतीए ण विभूसाए (सू० ६४)

वाशब्दः पक्षान्तरद्योतकः, आस्तां तावदपरो लोको 'यैः' पुत्रकलत्रादिभिः 'सार्द्धं' सह संवसति, त एव भार्यापुत्रादयो णमिति वाक्यालङ्कारे 'एकदे'ति वृद्धावस्थायां 'नियगा' आत्मीया ये तेन समर्थावस्थायां पूर्वमेव पोषिताः ते तं 'परिवदंति' परि–समन्ताद्वदन्ति–यथाऽयं न म्रियते नापि मञ्चकं ददाति, यदिवा परिवदन्ति–परिभवन्तीत्युक्तं भवति, अथवा किमनेन वृद्धेनेत्येवं परिवदन्ति, न केवलमेषां, तस्यात्मापि तस्यामवस्थायामवगीतो भवतीति, आह च–"वलिसन्ततमस्थिशेषितं, शिथिलस्नायुधृतं कडेवरम्। स्वयमेव पुमान् जुगुप्सते, किमु कान्ता कमनीयविग्रहा? ॥१॥" गोपालबालाङ्गनादीनां च दृष्टान्तद्वारेणोपन्यस्तोऽर्थो बुद्धिमधितिष्ठतीत्यतस्तदाविर्भावनाय कथानकम्–कौशाम्ब्यां नगर्यां अर्थवान् बहुपुत्रो धनो नाम सार्थवाहः, तेन चैकाकिना नानाविधैरुपायैः स्वापतेयमुपार्जितं, तच्चातीवदुःखितबन्धुजनस्वजनमित्रकलत्रपुत्रादिभोग्यतां निन्ये, ततोऽसौ कालपरिपाकवशाद्वृद्धभावमुपगतः सन् पुत्रेषु सम्यक्प्रपालनो- ॥ १०५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचितकलाकुशलेषु समस्तकार्यचिन्ताभारं निचिक्षेप । तेऽपि वयमनेनेदृशीमवस्थां नीताः सर्वजनाग्रेसरा विहिता इति कृतोपकाराः सन्त कुलपुत्रतामवलम्बमानाः स्वतः क्वचित् कार्यव्यासङ्गात् स्वभार्याभिस्तमकेल्पं वृद्धं प्रत्यजजागरन्, ता अप्युद्वर्त्तनस्नानभोजनादिना यथाकालमक्षुण्णं विहितवत्यः । ततो गच्छत्सु दिवसेषु वर्द्धमानेषु पुत्रभाण्डेषु प्रौढीभवत्सु भर्तृषु जरद्वृद्धे च विवशकरणपरिचारे सर्वाङ्गकम्पिनि गलदशेषश्रोतसि सति शनैः शनैरुचितमुपचारं शिथिलतां निन्युः । असावपि मन्दप्रतिजागरणतया चित्ताभिमानेन विश्रसया च सुतरां दुःखसागरावगाढः सन् पुत्रेभ्यः स्नुषाभ्यश्चान्याचचक्षे, ताश्च स्वभर्तृभिश्चेखिद्यमानाः सुतरामुपचारं परिहृतवत्यः, सर्वाश्च पर्यालोच्यैकवाक्यतया स्वभर्तृनभिहितवत्यः—म्रियमाणेऽप्ययं प्रतिजागरणे वृद्धभावाद्विपरीतबुद्धितयाऽपह्नुते, यदि भवतामप्यस्माकमुपर्यविस्रम्भस्ततोऽन्येन विश्वसनीयेन निरुपयत, तेऽपि तथैव चक्रुः, तास्तु तस्मिन्नवसरे सर्वा अपि सर्वाणि कार्याणि यथाऽवसरं विहितवत्यः, असावपि पुत्रैः पृष्टः पूर्वविरुक्षितचेतास्तथैव ता अपवदति, नैता मम किञ्चित्सम्यक् कुर्वन्ति, तैस्तु प्रत्ययिकवचनादवगततत्त्वैर्यथाऽयमुपचर्यमाणोऽपि वार्द्धक्याद्रोरुद्यते, ततस्तैरप्यवधीरितोऽन्येषामपि यथावसरे तद्भण्डनस्वभावतामाचचक्षिरे । ततोऽसौ पुत्रैरवधीरितः स्नुषाभिः परिभूतः परिजनेनावगीतो वाङ्मात्रेणापि केनचिदप्यननुवर्त्यमानः सुखितेषु दुःखितः कष्टतरामायुःशेषामवस्थामनुभवतीति । एवमन्योऽपि जराभिभूतविग्रहस्तृणकुब्जीकरणेऽप्यसमर्थः सन् कार्यैकनिष्ठलोकात्परिभवमाप्नोतीति, आह—"गात्रं सङ्कुचितं गतिर्विगलिता दन्ताश्च नाशं गता, दृष्टिर्भ्रश्यति रूपमेव

१ स्तूतोपकाराः २ असमर्थं.

हसते वक्त्रं च लालायते । वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते, धिक्कष्टं जरयाऽभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥ १ ॥" इत्यादि । तदेवं जराभिभूतं निजाः परिवदन्ति, असावपि परिभूयमानस्तद्विरक्तचेतास्तदपवादाज्जनायाचष्टे, आह च—'सो वा' इत्यादि, वाशब्दः पूर्वापेक्षया पक्षान्तरं दर्शयति, ते वा निजास्तं परिवदन्ति, स वा जराजर्जरितदेहस्तान्निजाननेकदोषोद्घट्टनतया परिवदेत्—निन्देद्, अथवा खिद्यमानार्थतया तानसाववगायति—परिभवतीत्यर्थः । येऽपि पूर्वकृतधर्म्मवशात्तं वृद्धं न परिवदन्ति तेऽपि तदुःखापनयनसमर्था न भवन्ति, आह च—'नाल'मित्यादि, नालं—न समर्थाः ते—पुत्रकलत्रादयः, तवेति प्रत्यक्षभावमुपगतं वृद्धमाह, त्राणाय शरणाय वेति, तत्रापत्तरणसमर्थं त्राणमुच्यते, यथा महाश्रोतोभिरुह्यमानः सुकर्णधाराधिष्ठितं प्लवमासाद्यापस्तरतीति, शरणं पुनर्यदवष्टम्भान्निर्भयैः स्थीयते तदुच्यते, तत् पुनर्दुर्गं पर्वतः पुरुषो वेति, एतदुक्तं भवति—जराभिभूतस्य न कश्चित् त्राणाय शरणाय वा, त्वमपि तेषां नालं त्राणाय शरणाय वेति, उक्तं च—"जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते । जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥ १ ॥" इत्यादि, स तु तस्यामवस्थायां किम्भूतो भवतीत्याह—'से ण हस्साए' इत्यादि, 'स' जराजीर्णविग्रहो न हास्याय भवति, तस्यैव हसनीयत्वात् न परान् हसितुं योग्यो भवतीत्यर्थः, स च समक्षं परोक्षं वा एवमभिधीयते जनैः—किं किलास्य हसितेन हास्यास्पदस्येति, न च क्रीडायै—न च लङ्घनवल्गनास्फोटनक्रीडानां योग्योऽसौ भवति, नापि रत्यै भवति, रतिरिह विषयगता गृह्यते, सा पुनर्ललनावगूहनादिका, तथाभूतोऽप्यवज्ञागूहिष्युः स्त्रीभिरभिधीयते—न लज्जते

१ तद्व्यतिरिक्त० प्र० २ विद्यमाना० प्र०

भवान् न पश्यति आत्मानं नावलोकयति शिरः पलितभस्मावगुण्डितं मां दुहितृभूतमेवं गूहितुमिच्छसीत्यादिवचसामास्पदत्वान्न रत्यै भवति, न विभूषायै, यतो विभूषितोऽपि प्रततचर्म्मवलीकः स नैव शोभते, उक्तं च—"न विभूषणमस्य युज्यते, न च हास्यं कुत एव विभ्रमः? । अथ तेषु च वर्त्तते जनो, ध्रुवमायाति परां विडम्बनाम् ॥ १ ॥ जं[1] जं करेइ तं तं न सोहए जोव्वणे अतिक्कंते । पुरिसस्स महिलियाइ व एक्कं धम्मं पमुत्तूणं ॥ २ ॥" गतमप्रशस्तं मूलस्थानं, साम्प्रतं प्रशस्तमुच्यते—

इच्चेवं समुट्ठिए अहोविहाराए अंतरं च खलु इमं सपेहाए धीरे मुहुत्तमवि णो पमायए वओ अच्चेति जोव्वणं व (सू० ६५)

अथवा यत एवं ते सुहृदो नालं त्राणाय शरणाय वा अतः किं विदध्यादित्याह—'इच्चेव' मित्यादि, 'इतिः' उपप्रदर्शने, अप्रशस्तमूलगुणस्थाने वर्तमानो जराभिभूतो न हास्याय न क्रीडायै न रत्यै न विभूषायै प्रत्येकं च शुभाशुभकर्म्मफलं प्राणिनामित्येवं मत्वा समुत्थितः—सम्यगुत्थितः शस्त्रपरिज्ञोक्तं मूलगुणस्थानमधितिष्ठन् अहो—इत्याश्चर्ये विहरणं विहारः आश्चर्यभूतो विहारो अहोविहारो—यथोक्तसंयमानुष्ठानं तस्मै अहोविहारायोत्थितः सन् क्षणमपि नो प्रमादयेदित्युत्तरेण सण्टङ्कः, किंच—'अंतरं चे'त्यादि, अन्तरमित्यवसरः, तच्चार्यक्षेत्रसुकुलोत्पत्तिबोधिलाभसर्वविरत्यादिकं, चः समुच्चये, खलु-

१ यद्यत्करोति तत्तत्र शोभते यौवनेऽतिक्रान्ते । पुरुषस्य महिलाया वा एकं धर्म्मं प्रमुच्य ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धारणे, 'इम'मित्यननदमाह-विनेयस्तपःसंयमादावसीदन् प्रत्यक्षभावापन्नमार्यक्षेत्रादिकमन्तरमवसरमुपदर्श्याभिधीयते—लब्धायमेवम्भूतोऽवसरोऽनादौ संसारे पुनरतीव सुदुर्लभ एवेति, अतस्तमवसरं 'संप्रेक्ष्य'पर्यालोच्य धीरः सन्मुहूर्त्तमप्येकं नो 'प्रमादयेत्' प्रमादवशगो भूयादिति, सम्प्रेक्ष्येत्यत्र अनुस्वारलोपश्छान्दसत्वादिति, अन्यदप्यलाक्षणिकमेवंजातीयमस्मादेव हेतोरवगन्तव्यमिति, आन्तर्मौहूर्त्तिकत्वाच्च छाद्मस्थिकोपयोगस्य मुहूर्त्तमित्युक्तम्, अन्यथा समयमप्येकं न प्रमादयेदिति वाच्यं, तदुक्तम्—"सम्प्राप्य मानुषत्वं संसारासारतां च विज्ञाय । हे जीव ! किं प्रमादान्न चेष्टसे शान्तये सततम् ? ॥ १ ॥ ननु पुनरिदमतिदुर्लभमगाधसंसारजलधिविभ्रष्टम् । मानुष्यं खद्योतकतडिल्लताविलसितप्रतिमम् ॥ २ ॥" इत्यादि, किमर्थं च तं प्रमादयेदित्याह—'वयो अच्चेइ'त्ति, वयः—कुमारादि अत्येति—अतीव एति—याति अत्येति, अन्यच्च—'जोव्वणं च'त्ति अत्यन्तमनुवर्त्तते, यौवनं वाऽत्येति—अतिक्रामति, वयोग्रहणेनैव यौवनस्य गतत्वात्तदुपादानं प्राधान्यख्यापनार्थं, धर्मार्थकामानां तन्निबन्धनत्वात्सर्ववयसां यौवनं साधीयः, तदपि त्वरितं यातीति, उक्तं च—"नइवेगसमं चवलं च जीवियं जोव्वणं च कुसुमसमं । सोक्खं च जं अणिच्चं तिण्णिवि तुरमाणभोज्जाइं ॥ १ ॥" तदेवं मत्वा अहोविहारसंयमानं श्रेय इति ॥ ये पुनः संसाराभिष्वङ्गिणोऽसंयमजीवितमेव बहु मन्यन्ते ते किंभूता भवतीत्याह—

जीविए इह जे पमत्ता से हंता छेत्ता भेत्ता लुंपित्ता विलुंपित्ता उद्दवित्ता उत्तासइत्ता,

॥ १०७ ॥

---

१ नदीवेगसमं चपलमेव जीवितं यौवनं च कुसुमसमम् । सौख्यं च यदनित्यं त्रीण्यपि त्वरमाणभोज्यानि ॥ १ ॥

अकडं करिस्सामित्ति मण्णमाणे, जेहिं वा सद्धिं संवसइ ते वा णं एगया नियगा तं पुव्विं पोसेंति, सो वा ते नियगे पच्छा पोसिज्जा, नालं ते तव ताणाए वा सरणाए वा, तुमंपि तेसिं नालं ताणाए वा सरणाए वा (सू० ६६)

ये तु वयोऽतिक्रमणं नावगच्छन्ति, ते 'इहे'त्यस्मिन्नसंयमजीविते 'प्रमत्ताः' अध्युपपन्ना विषयकषायेषु प्रमाद्यन्ति, प्रमत्ताश्चहर्निशं परितप्यमानाः कालाकालसमुत्थायिनः सन्तः सत्त्वोपघातकारिणीः क्रियाः समारम्भत इति, आह च—'से हंता' इत्यादि, 'से'इत्यप्रशस्तगुणभूलस्थानवान्विषयाभिलाषी प्रमत्तः सन् स्थावरजङ्गमानामसुमतां हन्ता भवतीति, अत्र च बहुवचनप्रक्रमेऽपि जात्यपेक्षयैकवचननिर्देश इति, तथा छेत्ता कर्णनासिकादीनां भेत्ता शिरोनयनोदरादीनां लुम्पयिता ग्रन्थिच्छेदादिभिः विलुम्पयिता ग्रामघातादिभिः अपद्रावयिता प्राणव्यपरोपको विषशस्त्रादिभिः अवद्रापयिता वा, उत्त्रासको लोष्टप्रक्षेपादिभिः । स किमर्थं हननादिकाः क्रियाः करोतीत्याह—'अकडं' इत्यादि, अकृतमिति, यदन्येन नानुष्ठितं तदहं करिष्यामीत्येवं मन्यमानोऽर्थोपार्जनाय हननादिषु प्रवर्त्तते । स एवं क्रूरकर्म्मातिशयकारी समुद्रलङ्घनादिकाः क्रियाः कुर्वन्नप्यलाभोदयादपगतसर्व्वस्वः किंभूतो भवतीत्याह—'जेहिं वा' इत्यादि, वाशब्दो भिन्नक्रमः पदान्तरद्योतकः 'यैः'मातापितृस्वजनादिभिः सार्द्धं संवसत्यसौ त एव वा'ण'मिति वाक्यालङ्कारे 'एकदे'त्यर्थनाशाद्यादि शैशवे वा'निजाः' आत्मीया बान्धवाः सुहृदो वा 'पुव्विं' पूर्वमेव 'तं' सत्त्वोपायक्षीणं पोषयन्ति, स वा प्राप्तेष्टमनोरथलाभः संस्तान्निजान् पश्चात् 'पोषयेद्' अर्थदानादिना सन्मानयेदिति । ते च पोषकाः पोष्या वा तव आपद्गतस्य न त्राणाय भवन्तीत्याह—'नालं' इत्यादि, 'ते' निजा मातापित्रादयः, तवेत्युपदेशविषयापन्न उच्यते, 'त्राणाय' आपद्रक्षणार्थं 'शरणाय'निर्भयस्थित्यर्थं 'नालं' न समर्थाः, त्वमपि तेषां त्राणशरणे कर्त्तुं नालमिति ॥ तदेवं तावत्स्वजनो न त्राणाय भवतीत्येतत्प्रतिपादितं, अर्थोऽपि महता क्लेशेनोपात्तो रक्षितश्च न त्राणाय भवतीत्येतत्प्रतिपिपादयिषुराह—

उवाईयसेसेण वा संनिहिसंनिचओ किज्जई, इहमेगेसिं असंजयाण भोयणाए, तओ से एगया रोगसमुप्पाया समुप्पज्जंति, जेहिं वा सद्धिं संवसइ ते वा णं एगया नियगा तं पुव्विं परिहरंति, सो वा ते नियगे पच्छा परिहरिज्जा, नालं ते तव ताणाए वा सरणाए वा, तुमंपि तेसिं नालं ताणाए वा सरणाए वा (सू० ६७)

उपादिते'ति 'अद भक्षणे' इत्यतस्मादुपपूर्व्वान्निष्ठाप्रत्ययः, तत्र 'बहुलं छन्दसी'तीडागमः, उपादितम्-उपभुक्तं, तस्य शेषमुपभुक्तशेषं, तेन वा, वाशब्दादनुपभुक्तशेषेण वा सन्निधानं—सन्निधिस्तस्य संनिचयः सन्निधिसन्निचयः, अथवा सम्यग् निधीयते—अवस्थाप्यत उपभोगाय योऽर्थः स सन्निधिस्तस्य सन्निचयः—प्राचुर्य्येणोपभोग्यद्रव्यनिचय इत्यर्थः, स 'इह' अस्मिन्संसारे 'एकेषाम्' असंयतानां संयताभासानां वा केषाञ्चिद् 'भोजनाय' उपभोगार्थं 'क्रियते' विधीयत

॥ १०८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, असावपि यदर्थमनुष्ठितोऽन्तरायोदयात्तत्संपत्तये न प्रभवतीत्याह–'तओ से' इत्यादि, 'ततो' द्रव्यसन्निधिसन्निचयादुत्तरकालमुपभोगावसरे 'से'तस्य बुभुक्षोः 'एकदे'ति द्रव्यक्षेत्रकालभावनिमित्ताविर्भावितवेदनीयकर्म्मोदये 'रोगसमुत्पादाः' ज्वरादिप्रादुर्भावाः 'समुत्पद्यन्त' इत्याविर्भवन्ति । स च तैः कुष्ठराजयक्ष्मादिभिरभिभूतः सन्मग्ननासिको गलत्पाणिपादोऽविच्छेदप्रवृत्तश्वासाकुलः किंभूतो भवति इत्याह–'जेहिं' इत्यादि, 'यैः'मातापित्रादिभिर्निजैः सार्द्धं संवसति त एव वा निजाः 'एकदा'रोगोत्पत्तिकाले पूर्वमेव तं परिहरन्ति, स वा तान्निजान्पश्चात्परिभवोत्थापितविवेकः 'परिहरेत्' त्यजेत्, तन्निरपेक्षः सेडुकवत् स्यादित्यर्थः, ते च स्वजनादयो रोगोत्पत्तिकाले परिहरन्तोऽपरिहरन्तो वा न त्राणाय भवन्तीति दर्शयति–'नाल'मित्यादि, पूर्ववद्, रोगाद्यभिभूतान्तःकरणेन चापगतत्राणेन च किमालम्ब्य सम्यक्करणेन रोगवेदनाः सोढव्याः? इत्याह—

जाणिसु दुक्खं पत्तेयं सायं (सू० ६८)

ज्ञात्वा प्रत्येकं प्राणिनां दुःखं तद्विपरीतं सातं वाऽदीनमनस्केन ज्वरादिवेदनोत्पत्तिकाले स्वकृतकर्म्मफलमवश्यमनुभवनीयमिति मत्वा न वैक्लव्यं कार्यमिति, उक्तं च–"सह कलेवर! दुःखमचिन्तयन्, स्ववशता हि पुनस्तव दुर्लभा । बहुतरं च सहिष्यसि जीव हे!, परवशो न च तत्र गुणोऽस्ति ते ॥ १ ॥" यावच्च श्रोत्रादिभिर्विज्ञानैः परिहीयमानैः जराजीर्णं न निजाः परिवदन्ति यावच्चानुकम्पया न पोषयन्ति रोगाभिभूतं च न परिहरन्ति तावदात्मार्थोऽनुष्ठेय इत्येतद्दर्शयति—

आ. सू. १९

श्रीआचाराङ्गवृत्तिः (शी०)

॥ १०९ ॥

अणभिक्कंतं च खलु वयं संपेहाए (सू० ६९)

चशब्द आधिक्ये खलुशब्दः पुनरर्थे पूर्वमभिक्रान्तं वयः समीक्ष्य मूढभावं व्रजतीति प्रतिपादितम्, अनभिक्रान्तं च पुनर्वयः संप्रेक्ष्य "आयट्ठं समणुवासेज्जासि" इत्युत्तरेण सम्बन्धः, 'आत्मार्थम्' आत्महितं 'समनुवासयेत्' कुर्यादित्यर्थः। किमनतिक्रान्तवयसैवात्महितमनुष्ठेयमुतान्येनापि इति?, परेणापि लब्धावसरेणात्महितमनुष्ठेयमित्येतद्दर्शयति—

लोक.वि.२

उद्देशकः १

खणं जाणाहि पंडिए (सू० ७०)

क्षणः–अवसरो धर्म्मानुष्ठानस्य, स चार्यक्षेत्रसुकुलोत्पत्त्यादिकः, परिवादपोषणपरिहारदोषदुष्टानां जराबालभावरोगाणामभावे सति, तं क्षणं 'जानीहि' अवगच्छ 'पण्डित' आत्मज्ञ!। अथवाऽवसीदन् शिष्यः प्रोत्साह्यते–हे अनतिक्रान्तयौवन! परिवादादिदोषत्रयास्पृष्ट! पण्डित! द्रव्यक्षेत्रकालभावभेदभिन्नं 'क्षणम्' अवसरमेवंविधं 'जानीहि' अवबुध्यस्व, तथाहि–द्रव्यक्षणो द्रव्यात्मकोऽवसरो जङ्गमत्वपञ्चेन्द्रियत्वविशिष्टजातिकुलरूपबलारोग्यायुष्कादिको मनुष्यभावः संसारोत्तरणसमर्थचारित्रावाप्तियोग्यस्त्वयाऽवाप्तः, स चानादौ संसारे पर्यटतोऽसुमतो दुरापो भवति, अन्यत्र तु नैतच्चारित्रमवाप्यते, तथाहि–देवनारकभवयोः सम्यक्त्वश्रुतसामायिके एव, तिर्यक्षु च कस्यचिद्देशविरतिरेवेति । क्षेत्रक्षणः क्षेत्रात्मकोऽवसरो यस्मिन् क्षेत्रे चारित्रमवाप्यते, तत्र सर्वविरतिसामायिकस्याधोलौकिकग्रामसमन्वितं तिर्यक्क्षेत्रमेव, तत्राप्यर्द्धतृतीयद्वीपसमुद्राः, तत्रापि पञ्चदशसु कर्मभूमिषु, तत्रापि भरतक्षेत्रमपेक्ष्य अर्द्धषड्विंशेषु जनपदेष्वित्यादिकः क्षेत्रक्षणः-क्षेत्ररूपोऽवसरोऽधिगन्तव्यः, अन्यस्मिंश्च क्षेत्र आद्ये एव सामायिके । कालक्षणस्तु कालरूपः क्षणोऽवसरः, स चावसर्पिण्यां

॥ १०९ ॥

तिसृषु समासु सुषमदुष्षमादुष्षमसुषमादुष्षमाख्यासु उत्सर्पिण्यां तु तृतीयचतुर्थारकयोः सर्वविरतिसामायिकस्य भवति, एतच्च प्रतिपद्यमानकं प्रत्यभ्यधायि, पूर्वप्रतिपन्नास्तु सर्वत्र तिर्यगूर्द्ध्वाधोलोके सर्वासु च समासु द्रष्टव्याः, भावक्षणस्तु द्वेधा-कर्म्मभावक्षणो नोकर्म्मभावक्षणश्च, तत्र कर्म्मभावक्षणः कर्मणामुपशमक्षयोपशमक्षयान्यतरावाप्तावसर उच्यते, तत्रोपशमश्रेण्यां चारित्रमोहनीय उपशमितेऽन्तर्मौहूर्त्तिक औपशमिकश्चारित्रक्षणो भवति, तस्यैव मोहनीयस्य क्षयेणान्तर्मौहूर्त्तिक एव छद्मस्थयथाख्यातचारित्रक्षणो भवति, क्षयोपशमेन तु क्षायोपशमिकचारित्रावसरः, स चोत्कृष्टतो देशोनां पूर्वकोटिं यावदवगन्तव्यः, सम्यक्त्वक्षणस्त्वजघन्योत्कृष्टस्थितावायुषो वर्त्तमानस्य, शेषाणां तु कर्म्मणां पल्योपमासङ्ख्येयभागन्यूनान्तःसागरोपमकोटिकोटीस्थितिकस्य जन्तोर्भवति, स चानेन क्रमेणेति, ग्रन्थिकसत्त्वेभ्योऽभव्येभ्योऽनन्तगुणया शुद्ध्या विशुद्ध्यमानो मतिश्रुतविभङ्गान्यतरसाकारोपयुक्तः शुद्धलेश्यात्रिकान्यतरलेश्योऽशुभकर्म्मप्रकृतीनां चतुःस्थानिकं रसं द्विस्थानिकतामापादयन् शुभानां च द्विस्थानिकं चतुःस्थानिकतां नयन् बध्नंश्च ध्रुवप्रकृतीः परिवर्त्तमानाश्च भवप्रायोग्या बध्नन्निति, ध्रुवकर्म्मप्रकृतयश्चेमाः–पञ्चधा ज्ञानावरणीयं नवधा दर्शनावरणीयं मिथ्यात्वं कषायषोडशकं भयं जुगुप्सा तैजसकार्मणशरीरे वर्णगन्धरसस्पर्शागुरुलघूपघातनिर्म्माणनामानि पञ्चधाऽन्तरायः, एताः सप्तचत्वारिंशद् ध्रुवप्रकृतयः, आसां सर्वदा बध्यमानत्वात्, मनुष्यतिरश्चोरन्यतरः प्रथमं सम्यक्त्वमुत्पादयन्नेता एकविंशतिः(मू)परिवर्त्तमाना बध्नाति, तद्यथा–देवगत्यानुपूर्वीद्वयपञ्चेन्द्रियजातिवैक्रियशरीराङ्गोपाङ्गद्वयसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतिप्रशस्तत्रसादिदशकसातावेदनीयोच्चैर्गोत्ररूपा इति, देवनारकास्तु मनुष्यगत्यानुपूर्वीद्वयौदारिकद्वयप्रथमसंहननसहितानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुभानि बध्नन्ति, तमतमानारकास्तु तिर्यग्गत्यानुपूर्व्याद्वियनीचैर्गोत्रसहितानीति, तदध्यवसायोपपन्नः सन्नायुष्कमबध्नन् यथाप्रवृत्तेन करणेन ग्रन्थिमासाद्यापूर्वकरणेन भित्त्वा मिथ्यात्वस्यान्तरकरणं विधायानिवृत्तिकरणेन सम्यक्त्वमवाप्नोति, तत ऊर्ध्वं क्रमेण क्षीयमाणे कर्म्मणि प्रवर्द्धमानेषु कण्डकेषु देशविरत्यादेरवसर इति । नोकर्म्मभावक्षणस्त्वालस्यमोहावर्णवादस्तम्भाद्यभावे सम्यक्त्वाद्यवाप्त्यवसर इति, आलस्यादिभिस्तूपहतो लब्धाऽपि संसारलङ्घनक्षमं मनुष्यभवं बोध्यादिकं नाप्नोतीति, उक्तं च—"आलस्समोहऽवन्ना थंभा कोहा पमाय किविणत्ता । भयसोगा अन्नाणा विक्खेव कुऊहला रमणा ॥१॥ एएहिं कारणेहिं लद्धूण सुदुल्लहंपि माणुस्सं । न लहइ सुइं हिअकरिं संसारुत्तारणिं जीवो ॥२॥" तदेवं चतुर्विधोऽपि क्षण उक्तः, तद्यथा–द्रव्यक्षणो जङ्गमत्वादिविशिष्टं मनुष्यजन्म क्षेत्रक्षण आर्यक्षेत्रं कालक्षणो धर्म्मचरणकालो भावक्षणः क्षयोपशमादिरूपः । इत्येवंभूतमवसरमवाप्यात्मार्थं समनुवासयेदित्युत्तरेण सम्बन्धः । किं च—

जाव सोयपरिण्णाणा अपरिहीणा नेत्तपरिण्णाणा अपरिहीणा घाणपरिण्णाणा अपरिहीणा जीहपरिण्णाणा फरि०, इच्चेएहिं विरूवरूवेहिं पण्णाणेहिं अपरिहीणेहिं आयट्ठं संमं समणुवासिज्जासि (सू० ७१) त्तिबेमि ॥ प्रथमोद्देशः ॥

---

१ आलस्यं मोहोऽवर्णः स्तम्भः क्रोधः प्रमादः कृपणता । भयशोकौ अज्ञानं विक्षेपः कौतूहलं रमणम् ॥ १ ॥ एतैः कारणैर्लब्ध्वा सुदुर्लभमपि मानुष्यं । न लभते श्रुतिं हितकरीं संसारोत्तारिणीं जीवः ॥ २ ॥

यावदस्य विशरारोः कायापशदस्य श्रोत्रविज्ञानानि जरसा रोगेण वा अपरिहीनानि भवन्ति, एवं नेत्रघ्राणरसनस्पर्शविज्ञानानि न विषयग्रहणस्वभावतया मान्द्यं प्रतिपद्यन्ते, इत्येतैः 'विरूपरूपैः' इष्टानिष्टरूपतया नानारूपैः 'प्रज्ञानैः' प्रकृष्टैर्ज्ञानैरपरिक्षीयमाणैः सद्भिः किं कुर्याद्? इत्याह—'आयट्ठं' इत्यादि, आत्मनोऽर्थ आत्मार्थः, स च ज्ञानदर्शनचारित्रात्मकः, अन्यस्त्वनर्थ एव, अथवाऽऽत्मने हितं–प्रयोजनमात्मार्थं, तच्च चारित्रानुष्ठानमेव, अथवा आयतः अपर्यवसानान्मोक्ष एव, स चासावर्थश्चायतार्थोऽतस्तं, यदि वाऽऽयत्तो–मोक्षः अर्थः–प्रयोजनं यस्य दर्शनादित्रयस्य तत्तथा 'समनुवासयेत्' इति 'वस निवासे' इत्येतस्माद्धेतुमण्णिजन्ताल्लिङ्सिप् सं–सम्यग् यथोक्तानुष्ठानेन अनु–पश्चादनभिक्रान्तं वयः संप्रेक्ष्य क्षणम्–अवसरं प्रतिपद्य श्रोत्रादिविज्ञानानां वा प्रहीणतामधिगम्य तत आत्मार्थं 'समनुवासयेः' आत्मनि विदध्याः । अथवा 'अर्थवशाद् विभक्तिपुरुषपरिणाम'इतिकृत्वा तेन वा आत्मार्थेन ज्ञानदर्शनचारित्रात्मकेनात्मानं 'समनुवासयेद्'भावयेद्व्रजयेत्, आयतार्थं वा मोक्षाख्यं सम्यग्–अपुनरागमनेनान्विति–यथोक्तानुष्ठानात्सश्चादात्मना 'समनुवासयेद्'अधिष्ठापयेद् । 'इतिः' परिसमाप्तौ, ब्रवीमीति सुधर्मस्वामी जम्बूस्वामिनमिदमाह, यद्भगवता श्रीवर्द्धमानस्वामिनाऽर्थतोऽभ्यधायि तदेवाहं सूत्रात्मना वच्मीति । द्वितीयाध्ययनस्य प्रथम उद्देशकः समाप्तः ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयस्य व्याख्या प्रतन्यते, अस्य चायमभिसम्बन्धः, इह विषयकषायमातापित्रादिलोकविजयेन मोक्षावाप्तिहेतुभूतं चारित्रं यथा सम्पूर्णभावमनुभवत्येवंरूपोऽध्ययनार्थाधिकारः प्राङ्निरदेशि, तत्र मातापित्रादिलोकविजयेन रोगजराद्यनभिभूतचेतसाऽऽत्मार्थः–संयमोऽनुष्ठेय इत्येतदर्थमोद्देशकेऽभिहितम् । इहापि तस्मिन्नेव संयमे वर्त्तमानस्य कदाचिन्मोहनीयोदयादरतिः स्याद्, अज्ञानकर्म्मलोभोदयाद्वाऽध्यात्मदोषेण संयमे न दृढत्वं भवेदित्यतोऽरत्यादिव्युदासेन यथा संयमे दृढत्वं भवति तथाऽनेन प्रतिपाद्यते, अथवा यथाऽष्टप्रकारं कर्म्मापहीयते तथाऽस्मिन्नध्ययने प्रतिपाद्यते इत्यध्ययनार्थाधिकारेऽभ्यधायि, तच्च कथं क्षीयत इत्याह—

अरइं आउट्टे से मेहावी, खणंसि मुक्के (सू० ७२)

अस्य चानन्तरसूत्रेण सम्बन्धो वाच्यः, स चायम्—'आयट्ठं समणुवासेज्जासि' आत्मार्थं संयमं सम्यक्तया कुर्यात्, तत्र कदाचिदरत्युद्भवो भवेत्तदर्थमाह–'अरइं' इत्यादि, परम्परसूत्रसम्बन्धस्तु 'खणं जाणाहि पंडिए' क्षणं–चारित्रावसरमवाप्यारतिं न कुर्यादित्याह—'अरइं' इत्यादि, आदिसूत्रसम्बन्धस्तु 'सुअं मे आउसंतेणं भगवया एवमक्खायं' किं तच्छ्रुतमित्याह–'अरइं आउट्टे से मेहावी' रमणं रतिस्तदभावोऽरतिस्तां पञ्चविधाचारविषयां मोहोदयात् कषायाभिष्वङ्गजनितां मातापितृकलत्राद्युत्थापितां 'स' इत्यरतिमान् 'मेधावी' विदितासारसंसारस्वभावः सन् आवर्त्तेत अपवर्त्तेत निवर्त्तयेदित्युक्तं भवति, संयमे चारतिर्न विषयाभिष्वङ्गरतिमृते कण्डरीकस्येवेत्यत इदमुक्तं भवति–विषयाभिष्वङ्गे रतिं निवर्त्तेत, निवर्त्तनं चैवमुपजायते यदि दशविधचक्रवालसामाचारीविषया रतिरुत्पद्यते पौण्डरीकस्येवेति, ततश्चेदमुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति-संयमे रतिं कुर्वीत, तद्विहितरतेस्तु न किञ्चिद्बाधायै, नापीहापरसुखोत्तरबुद्धिरिति, आह च-"क्षितितलशयनं वा प्रान्तभैक्षाशनं वा, सहजपरिभवो वा नीचदुर्भाषितं वा। महति फलविशेषे नित्यमभ्युद्यतानां, न मनसि न शरीरे दुःखमुत्पादयन्ति ॥ १ ॥ तणसंथारनिसण्णोऽवि मुणिवरो भट्ठरागमयमोहो। जं पावइ मुत्तिसुहं तं कतो चक्कवट्टीवि? ॥ २ ॥" इत्यादि च। अत्र हि चारित्रमोहनीयक्षयोपशमादवाप्तचारित्रस्य पुनरपि तदुदयादवदिधाविषोरनेन सूत्रेणोपदेशो दीयते, तच्चावधावनं संयमात् यैर्हेतुभिर्भवति तान्निर्युक्तिकारो गाथयाऽऽचष्टे—

विइउद्देसे अदढो उ संजमे कोइ हुज्ज अरईए। अन्नाणकम्मलोभाइएहिं अज्झत्थदोसेहिं ॥ १९७ ॥

इह हि प्रथमोद्देशके ऽह्वयो निर्युक्तिगाथा आसिंस्त्रिवयमेवैकत्वतो मन्दबुद्धेः स्यादारेका यथा इयमपि तत्रत्यैवेत्यतो विनेयसुखप्रतिपत्त्यर्थं द्वितीयोद्देशकग्रहणमिति, कश्चित्कण्डरीकदेशीयः 'संयमे' सप्तदशभेदभिन्ने 'अदृढः' शिथिलो मोहनीयोदयादरत्युद्भवाद्भवेत्, मोहनीयोदयोऽप्याध्यात्मिकैर्दोषैर्भवेत्, ते चाध्यात्मदोषा अज्ञानलोभादयः, आदिशब्दादिच्छामदनकामानां परिग्रहो, मोहस्याज्ञानलोभकामाद्यात्मकत्वात्तेषां चाध्यात्मिकत्वादिति गाथार्थः ॥ [द्वितीयाध्ययने द्वितीयोद्देशकनिर्युक्तिः] ॥ ननु चारतिमतो मेधाविनोऽनेन सूत्रेणोपदेशो दीयते यथा-संयमारतिमपवर्त्तेत, मेधावी चात्र विदितसंसारस्वभावो विवक्षितो, यश्चैवंभूतो नासावरतिमान् तद्वांश्चेन्न विदितवेद्य इत्यनयोः सहानवस्थानलक्षणेन विरोधेन विरोधाच्छायातपयोरिव नैकत्रावस्थानम्, उक्तं च-"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः।

१ तणसंथारनिषण्णोऽपि मुनिवरो भ्रष्टरागमदमोहः। यत्प्राप्नोति मुक्तिसुखं कुतस्तत् चक्रवर्त्यपि ? ॥ २ ॥

॥ ११२ ॥

तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम्? ॥ १ ॥" इत्यादि, यो ह्यज्ञानी मोहोपहतचेताः स विषयाभिष्वङ्गात्संयमे सर्वद्वन्द्वप्रत्यनीके रत्यभावं विदध्याद्, आह च-अज्ञानान्धाश्चटुलवनितापाङ्गविक्षेपितास्ते, कामे सक्तिं दधति विभवाभोगतुङ्गार्जने वा। विद्वच्चित्तं भवति हि महन्मोक्षमार्गैकतानं, नाल्पस्कन्धे विटपिनि कपत्यंसभित्तिं गजेन्द्रः ॥ १ ॥" नैतन्मृष्यामहे, यतो ह्यवाप्तचारित्रस्यायमुपदेशो दित्सितः, चारित्रावाप्तिश्च न ज्ञानमृते, तत्कार्यत्वाच्चारित्रस्य, न च ज्ञानारत्योर्विरोधः, अपि तु रत्यरत्योः, ततश्च संयममता रतिरेवारत्या बाध्यते न ज्ञानम्, अतो ज्ञानिनोऽपि चारित्रमोहनीयोदयात्संयमे स्यादेवारतिः, यतो ज्ञानमप्यज्ञानस्यैव बाधकं, न संयमारतेः, तथा चोक्तम्-ज्ञानं भूरि यथा-यैवस्तुविषयं स्वस्य द्विषो बाधकं, रागारतिशमाय हेतुमपरं युङ्क्ते न कर्तृ स्वयम्। दीपो यत्तमसि व्यनक्ति किमु नो रूपं स एवेक्षतां, सर्वः स्वं विषयं प्रसाधयति हि प्रासङ्गिकोऽन्यो विधिः ॥ १ ॥" तथेदमपि भवतो न कर्णेषिवरमगाद् यथा-'बलवानिन्द्रियग्रामः, पण्डितोऽप्यत्र मुह्यती'त्यतो यत्किञ्चिदेतत्, अथवा नारत्यापन्न एवैवमुच्यते, अपि त्वयमुपदेशो मेधावी संयमविषये मा विधादरतिमिति। संयमारतिनिवृत्तश्च सन् कं गुणमवाप्नोतीत्याह-'खणंसि मुक्के'परमनिरुद्धः कालः क्षणः जरत्पट्टशाटिकापाटनदृष्टान्तेनायमाश्रितः तत्र मुक्के विभक्तिपरिणामाद्वा क्षणेन-अष्टप्रकारेण कर्मणा संसारबन्धनैर्वा विषयाभिष्वङ्गस्नेहादिभिर्मुक्तो भवतवदिति, ये पुनरनुपदेशवर्त्तिनः कण्डरीकाद्यास्ते चतुर्गतिकसंसारान्तर्वर्त्तिनो दुःखसागरमधिवसन्तीत्याह च—

॥ ११३ ॥

अणाणाय पुट्ठावि एगे नियट्टंति, मंदा मोहेण पाउडा, अपरिग्गहा भविस्सामो समुट्ठाय लद्धे कामे अभिगाहइ, अणाणाए मुणिणो पडिलेहंति, इत्थ मोहे पुणो पुणो सन्ना नो हव्वाए नो पाराए (सू० ७३)

आज्ञाप्यत इत्याज्ञा-हिताहितप्राप्तिपरिहाररूपतया सर्वज्ञोपदेशस्तद्विपर्ययोऽनाज्ञा तया अनाज्ञया सत्या 'स्पृष्टाः' परीषहोपसर्गैः, अपिशब्दः सम्भावनायां स च भिन्नक्रमो निवर्त्तन्त इत्यसादनन्तरं द्रष्टव्यः, 'एके' मोहनीयोदयात्कण्डरीकादयो न सर्वे संयमात्समस्तद्वन्द्वोपशमरूपात् निवर्त्तन्ते अपीति, सम्भाव्यत एतन्मोहोदयस्येत्यपिशब्दार्थः, किंभूताः सन्तो निवर्त्तन्त इत्याह-'मन्दा' जडा अपगतकर्त्तव्याकर्त्तव्यविवेकाः, कुत एवंभूता?, यतो 'मोहेन प्रावृता' मोहः-अज्ञानं मिथ्यात्वमोहनीयं वा तेन प्रावृता-गुण्ठिताः, उक्तं च-"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः। अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥ १ ॥" इत्यादि, तदेवमवाप्तचारित्रोऽपि कर्मोदयात्परीषहोदयेऽक्लीकृतलिङ्गः पश्चाद्भावतामालम्बत इत्युक्तम्। अपरे तु स्वरुचिविरचितवृत्तयो नानाविधैरुपायैर्लोकार्थं जिघृक्षवः किल वयं संसारोद्विग्ना मुमुक्षवस्तेषु तेषु आरम्भभिष्वङ्गेषु प्रवर्त्तन्त इति दर्शयति-'अपरिग्गहा' इत्यादि, परिः-समन्तात् मनोवाक्कायकर्मभिर्गृह्यत इति परिग्रहः स येषां नास्तीत्यपरिग्रहा एवंभूता वयं भविष्याम इति शाक्यादिमतानुसारिणः स्वयूथ्या वा 'समुत्थाय' चीवरादिग्रहणं प्रतिपद्य, ततो लब्धान् कामान् 'अभिगाहन्ते' सेवन्ते, तिङ्व्यत्ययेन चैकवचनमिति, अत्र चान्यव्रतोपादानात् शेषाण्यपि ग्राह्याणि, अहिंसका वयं भविष्याम एवममृषावादिन इत्याद्यप्यायोज्यम्। तदेवं शैलूषा इवान्यथावादिनोऽन्यथाकारिणः कामार्थमेव तांस्तान् प्रव्रज्याविशेषान्बिभ्रति, उक्तं च-"स्वेच्छाविरचितशास्त्रैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ११३ ॥

लोक.वि.२ उद्देशकः २

प्रव्रज्यावेषधारिभिः क्षुद्रैः । नानाविधैरुपायैरनाथवन्मुप्यते लोकः ॥ १ ॥" इत्यादि । तदेवं प्रव्रज्यावेषधारिणो लब्धान्कामानवगाहन्ते तल्लाभार्थं च तदुपायेषु प्रवर्त्तन्ते इत्याह–'अणाणाए' इत्यादि, 'अनाज्ञया' स्वैरिण्या बुद्ध्या 'मुनय' इति मुनिवेषविडम्बिनः कामोपायान् 'प्रत्युपेक्षन्ते' कामोपायारम्भेषु पौनःपुन्येन लगन्तीति, आह च–'एत्थ' इत्यादि, 'अत्र' अस्मिन् विषयाभिष्वङ्गाज्ञानमये भावमोहे पौनःपुन्येन 'सन्नाः' विषण्णा निमग्नाः पङ्कावमग्ना नागा इवात्मानमाकृष्टुं नालमिति, आह च–'नो हव्वाए नो पाराए' यो हि मध्येमहानदीपूरं निमग्नो भवत्यसौ नातीयतीराय नापि पारेमहानदीपूरमिति, एवमत्रापि कुतश्चिन्निमित्तात्त्यक्तगृहगृहिणीपुत्रधनधान्यहिरण्यरत्नकुप्यदासीदासादिविभव आकिञ्चन्यं प्रतिज्ञायातीयतीरदेश्याद्गृहवासमौख्यान्निर्गतः सन् नो हव्वाएत्ति भवति, पुनरपि वान्तभोगाभिलाषितया यथोक्तसंयमाभावेन तत्क्रियाया विफलत्वात् नो पाराए त्ति भवति, उभयतो मुक्तबन्धना मुक्तोलीवोभयभ्रष्टो न ग्रहस्थो नापि प्रव्रजित इत्युक्तं भवति, उक्तं च–"इन्द्रियाणि न गुप्तानि, लालितानि न चेच्छया । मानुष्यं दुर्लभं प्राप्य, न भुक्तं नापि शोषितम् ॥ १ ॥" इति । ये पुनरप्रशस्तरतिनिवृत्ताः प्रशस्तरतिमधिशयानास्ते किंभूता भवन्तीत्याह—

विमुत्ता हु ते जणा जे जणा पारगामिणो, लोभमलोभेण दुगुंछमाणे लद्धे कामे नाभिगाहइ (सू० ७४)

॥ ११३ ॥

विविधम्–अनेकप्रकारं द्रव्यतो धनस्वजनानुषङ्गाद्भावतो विषयकषायादिभ्योऽनुसमयं मुच्यमाना एव भाविनि भूतवदुपचारान्मुक्ता विमुक्ताः ते जना ये जनाः सर्वस्वजनभूता निर्ममत्वाः पारगामिनो भवन्ति, पारो-मोक्षः संसाराण्णवतट-

वृत्तित्वात्तत्कारणानि ज्ञानदर्शनचारित्राण्यपि पार इति, भवति हि तादर्थ्यात्तच्छब्द्यं यथा तन्दुलान् वर्षति पर्जन्यः, अतस्तत्पारं–ज्ञानदर्शनचारित्राख्यं गन्तुं शीलं येषां ते पारगामिनः, ते मुक्ता भवन्तीति पूर्वेण सम्बन्धः । कथं पुनः सम्पूर्णपारगामित्वं भवतीत्याह–'लोभं' इत्यादि, इह हि लोभः सर्वसङ्गानां दुस्त्यजो भवति, तथाहि–क्षपकश्रेण्यन्तर्गतस्यापगताशेषकषायस्यापि खण्डशः क्षिप्यमाणोऽप्यनुबध्यत इति, अतस्तं लोभं, तद्विपक्षेण अलोभेन 'जुगुप्समानो' निन्दन्परिहरन् किं करोतीत्याह–'लद्धे' इत्यादि, 'लब्धान्' प्राप्तानिच्छामदनरूपान् कामान् 'नाभिगाहते' न सेवते, यो हि शरीरादावपि निवृत्तलोभः स कामाभिष्वङ्गवान्न भवति, ब्रह्मदत्तामन्त्रितचित्रवदिति, प्रधानान्त्यलोभपरित्यागेन चोपसर्जनाधस्तनपरित्यागो द्रष्टव्यः, तद्यथा–क्रोधं क्षान्त्या जुगुप्समानो मानं मार्दवेन मायामार्जवेनेत्याद्यप्ययोज्यं, लोभोपादानं तु सर्वकषायप्राधान्यख्यापनार्थमुपाददे, तथाहि–तत्प्रवृत्तः साध्यासाध्यविवेकविकलः कार्याकार्यविचाररहितः सन्नर्थैकदत्तदृष्टिः पापोपादानमास्थाय सर्वाः क्रियाः अधितिष्ठतीति, तदुक्तम्–"धावेइ रोहणं तरइ सायरं भमइ गिरिणिगुंजेसुं । मारेइ बंधवंपिहु पुरिसो जो होइ धणलुद्धो ॥ १ ॥ अडइ बहुं वहइ भरं सहइ छुहं पावमायरइ धिट्ठो । कुलसीलजाइपच्चयधिइं च लोभहुओ चयइ ॥ २ ॥" इत्यादि, तदेवं कुतश्चिन्निमित्तात्सहापि लोभादिना निष्क्रम्य पुनर्लोभादिपरित्यागः कार्यः, अन्यस्तु लोभं विनापि प्रव्रज्यां प्रतिपद्यत इति दर्शयति—

---

१ धावति रोहणं तरति सागरं भ्राम्यति गिरिनिकुञ्जेषु । मारयति बान्धवमपि पुरुषो यो भवति धनलुब्धः ॥ १ ॥ अटति बहु वहति भारं सहते क्षुधां पापमाचरति धृष्टः । कुलशीलजातिप्रत्ययधृतीश्च लोभाभिद्रुतस्त्यजति ॥ २ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ११४ ॥

लोक.वि.२ उद्देशकः २

विणावि लोभं निक्खम्म एस अकम्मे जाणइ पासइ, पडिलेहाए नावकंखइ, एस अणगारित्ति पवुच्चइ, अहो य राओ परितप्पमाणे कालाकालसमुट्ठाइ संजोगट्ठी अट्ठालोभी आलुंपे सहक्कारे विणिविट्ठचित्ते इत्थ सत्थे पुणो पुणो से आयबले से नाइबले से मित्तबले से पिच्चबले से देवबले से रायबले से चोरबले से अतिहिबले से किविणबले से समणबले, इच्चेएहिं विरूवरूवेहिं कज्जेहिं दंडसमायाणं संपेहाए भया कज्जइ, पावमुक्खुत्ति मन्नमाणे, अदुवा आसंसाए (सू० ७५)

॥ ११४ ॥

कश्चिद्धरत्नादिर्निःशेषतो लोभापगमाद्विनापि लोभं 'निष्क्रम्य' प्रव्रज्यां प्रतिपद्य, पाठान्तरं वा 'विणइत्तु लोभं' सञ्ज्वलनसंज्ञकमपि लोभं 'विनीय' निर्मूलतोऽपनीय एष एवंभूतः सन् 'अकर्मा' अपगतघातिकर्मचतुष्टयाविर्भूतानावरणज्ञानो विशेषतो जानाति सामान्यतः पश्यति, एतदुक्तं भवति–एवंभूतो लोभो येन तत्क्षये मोहनीयक्षये चावश्यं घातिकर्मक्षयस्तस्मिंश्च निरावरणज्ञानसद्भावस्ततोऽपि भवोपग्राहिकर्मोपगम इत्यतो लोभापगमे अकर्मेत्युक्तम् । यतश्चैवम्भूतो लोभो दुरन्तस्तद्धानौ चावश्यं कर्मक्षयस्ततः किं कर्त्तव्यमित्याह–'पडिलेहाए' इत्यादि, प्रत्युपेक्षणया–गुणदोषपर्यालोचनयोपपन्नः सन्नथवा लोभविपाकं प्रत्युपेक्ष्य–पर्यालोच्य तदभावे गुणं च लोभं 'नावकाङ्क्षति' नाभिलषतीति, यश्चाज्ञानोपहतान्तःकरणोऽप्रशस्तमूलगुणस्थानवर्ती विषयकषायाद्युपपन्नस्तस्य पूर्वोक्तं विपरीततया सर्वं संतिष्ठते, तथाहि–अलोभं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोभेन जुगुप्समानो लब्धान् कामानवगाहते, लोभमनपनीय निष्क्रम्य पुनरपि लोभैकमनाः सकर्म्मा न जानाति नापि पश्यति, अपश्यंश्चाप्रत्युपेक्षणयाऽभिकाङ्क्षति। यच्च प्रथमोद्देशकेऽप्रशस्तमूलगुणस्थानमवाचि तच्च वाच्यमिति, आह च-'अहो य राओ' इत्यादि, अहोरात्रं परितप्यमानः कालाकालसमुत्थायी संयोगार्थी अर्थालोभी आलुम्पः सहसाकारो विनिविष्टचित्तः अत्र-शस्त्रे पृथिवीकायाद्युपघातकारिणि पौनःपुन्येन वर्त्तते। किं च-'से आयबले' आत्मनो बलं-शक्त्युपचय आत्मबलं तन्मे भावीतिकृत्या नानाविधैरुपायैरात्मपुष्टये तास्ताः क्रियाः ऐहिकामुष्मिकोपघातकारिणीर्विधत्ते, तथाहि-'मांसेन पुष्यते मांस'मितिकृत्वा पञ्चेन्द्रियघातादावपि प्रवर्त्तते, अपराश्च लुम्पनादिकाः सूत्रेणैवाभिहिताः, एवं च 'ज्ञातिबलं' स्वजनबलं मे भावीति, तथा तन्मित्रबलं मे भविष्यति येनाहमापदं सुखेनैव निस्तरिष्यामि, तत्प्रेत्यबलं भविष्यतीति वस्त्रादिकमुपहन्ति, तद्वा देवबलं भावीति पचनपाचनादिकाः क्रिया विधत्ते, राजबलं वा मे भविष्यतीति राजानमुपचरति, चौरग्रामे वा वसति चौरभागं वा प्राप्स्यामीति चौरानुपचरति, अतिथिबलं वा मे भविष्यतीत्यतिथीनुपचरति, अतिथिर्हि निःस्पृहोऽभिधीयते इति, उक्तं च-"तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना। अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥ १ ॥" एतदुक्तं भवति-तद्बलार्थमपि प्राणिषु दण्डो न निक्षेप्तव्यः इति, एवं कृपणश्रमणार्थमपि वाच्यमिति, एवं पूर्वोक्तैः 'विरूपरूपैः'नानाप्रकारैः पिण्डदानादिभिः कार्यैः 'दण्डसमादान'मिति दण्ड्यन्ते-व्यापाद्यन्ते प्राणिनो येन स दण्डस्तस्य सम्यगादानं-ग्रहणं समादानं, तदात्मबलादिकं मम नाभविष्यत् यद्यहमेतन्नाकरिष्यमित्येवं 'संप्रेक्षया' पर्यालोचनया एवं संप्रेक्ष्य वा भयात् क्रियते, एवं तावदिहभवमाश्रित्य दण्ड-

आ. सू. २०

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ११५ ॥

समादानकारणमुपन्यस्तम्, आमुष्मिकार्थमपि परमार्थमजानानैर्दण्डसमादानं क्रियत इति दर्शयति-'पावमोक्खो'त्ति इत्यादि, पातयति पासयतीति वा पापं तस्मान्मोक्षः पापमोक्षः, 'इति' हेतौ, यस्मात्स मम भवीष्यतीति मन्यमानः दण्डसमादानाय प्रवर्त्तत इति, तथाहि-हुतभुजि षड्जीवोपघातकारिणि शस्त्रे नानाविधोपायप्राण्युपघातात्तपापविध्वंसनाय पिप्पलशमीसमित्तिलाज्यादिकं शठव्युद्ग्राहितमतयो जुह्वति, तथा पितृपिण्डदानादौ बस्तादिमांसोपस्कृतभोजनादिकं द्विजातिभ्य उपकल्पयन्ति तद्भुक्तशेषानुज्ञातं स्वतोऽपि भुञ्जते, तदेवं नानाविधैरुपायैरज्ञानोपहतबुद्धयः पापमोक्षार्थं दण्डोपादानेन तास्ताः क्रियाः प्राण्युपघातकारिणीः समारभमाणाः अनेकभवशतकोटीदुर्म्मोचमघमेवोपाददत इति। किञ्च-'अदुवा' इत्यादि, पापमोक्ष इति मन्यमानो दण्डमादत्त इत्युक्तम्, अथवा आशंसनम् आशंसा-अप्राप्तप्रापणाभिलाषस्तदर्थं दण्डसमादानमादत्ते, तथाहि-ममैतत् परलोकारि वा प्रेत्य वोपस्थास्यते इत्याशंसया क्रियासु प्रवर्त्तते, राजानं वाऽर्थाशाविमोहितमना अवलगति, उक्तं च-"आराध्य भूपतिमवाप्य ततो धनानि, भोक्ष्यामहे किल वयं सततं सुखानि। इत्याशया धनविमोहितमानसानां, कालः प्रयाति मरणावधिरेव पुंसाम् ॥ १ ॥ एहि गच्छ पतोत्तिष्ठ, वद मौनं समाचर। इत्याद्याशाग्रहग्रस्तैः, क्रीडन्ति धनिनोऽर्थिभिः ॥ २ ॥" इत्यादि ॥ तदेवं ज्ञात्वा किं कर्त्तव्यमित्याह—

लोक.वि.२

उद्देशकः २

॥ ११५ ॥

तं परिण्णाय मेहावी नेव सयं एएहिं कज्जेहिं दंडं समारंभेज्जा नेव अन्नं एएहिं कज्जेहिं दंडं समारंभाविज्जा एएहिं कज्जेहिं दंडं समारंभंतंपि अन्नं न समणुजाणिज्जा, एस मग्गे आरिएहिं पवेइए, जहेत्थ कुसले नोवलिंपिज्जासि त्तिबेमि (सू०७६) लोगविजयस्स बितिओ उद्देसो ॥ २ ॥

'तदि'ति सर्वनाम प्रक्रान्तपरामर्शि, 'तत्' शस्त्रपरिज्ञोक्तं स्वकायपरकायादिभेदभिन्नं शस्त्रम्, इह वा यदुक्तम् अप्रशस्तगुणमूलस्थानं-विषयकषायमातापित्रादिकं, तथा कालाकालसमुत्थानक्षणपरिज्ञानश्रोत्रादिविज्ञानप्रहाणादिकं तथाऽऽत्मबलाधानाद्यर्थं च दण्डसमादानं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरेत् 'मेधावी' मर्यादावर्त्ती, ज्ञातहेयोपादेयः सन् किं कुर्यादित्याह—'नेव सयं' इत्यादि, नैव 'स्वयम्' आत्मना एतैः-आत्मबलाधानादिकैः 'कार्यैः' कर्त्तव्यैः समुपस्थितैः सद्भिः 'दण्डं' सत्त्वोपघातं समारभेत्, नाप्यन्यमपरमेभिः कार्यैर्हिंसानृतादिकं दण्डं समारम्भयेत्, तथा समारभमाणमप्यपरं योगत्रिकेण न समनुज्ञापयेद्। एष चोपदेशस्तीर्थकृद्भिरभिहित इत्येतत् सुधर्म्मस्वामी जम्बूस्वामिनमाहेति दर्शयति—'एस' इत्यादि, 'एष' इति ज्ञानादियुक्तो भावमार्गो योगत्रिककरणत्रिकेण दण्डसमादानपरिहारलक्षणो वा 'आर्यैः' आराद्याताः सर्वहेयधर्म्मेभ्य इत्यार्याः-संसारार्णवतटवर्त्तिनः क्षीणघातिकर्म्मांशाः संसारोदरविवरवर्त्तिभावविदः तीर्थकृतस्तैः 'प्रकर्षेण' सदेवमनुजायां पर्षदि सर्वस्वभाषानुगामिन्या वाचा यौगपद्याशेषसंशीतिच्छेत्र्या प्रकर्षेण वेदितः-कथितः प्रतिपादित इतियावत्, एवम्भूतं च मार्गं ज्ञात्वा किं कर्त्तव्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्याह—'जहेत्थ' इत्यादि, तेषु तेष्वात्मबलोपधानादिकेषु कार्येषु समुपस्थितेषु सत्सु दण्डसमुपादानादिकं परिहरन् 'कुशलो' निपुणः अवगततत्त्वो यथैतस्मिन् दण्डसमुपादाने स्वमात्मानं 'नोपलिम्पयेः' न तत्र संश्लेषं कुर्या इति, विभक्तिपरिणामाद्वा एतेन दण्डसमुपादानजनितकर्म्मणा यथा नोपलिप्यसे तथा सर्वैः प्रकारैः कुर्यास्त्वम् । इतिशब्दः परिसमाप्तौ, ब्रवीमीति पूर्ववत् । लोकविजये द्वितीय उद्देशकः समाप्तः ॥

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके संयमे दृढत्वं कार्यमसंयमे चाहढत्वमुक्तं, तच्चोभयमपि कषायव्युदासेन सम्पद्यते, तत्रापि मान उत्सत्तेरारभ्य उच्चैर्गोत्रोत्थापितः स्यात् अतस्तद्व्युदासार्थमिदमभिधीयते । अस्य चानन्तरसूत्रेण सम्बन्धः—'जहेत्थ कुसले नोवलिंपेज्जासि' कुशलो निपुणः सन्नस्मिन्नुच्चैर्गोत्राभिमाने यथाऽऽत्मानं नोपलिम्पयेस्तथा विदध्यास्त्वं, किं मत्वा ?, इत्यतस्तदभिधीयते—

से असइं उच्चागोए असइं नीआगोए, नो हीणे नो अइरित्ते, नोऽपीहए, इय संखाय को गोयावाई को माणावाई ?, कंसि वा एगे गिज्झा, तम्हा नो हरिसे नो कुप्पे भूएहिं जाण पडिलेह सायं (सू० ७७)

'से असइं उच्चागोए असइं नीआगोएत्ति' 'स' इति संसारीसुमान् 'असकृद्' अनेकशः उच्चैर्गोत्रे मानसत्कारार्हे उत्पन्न इति शेषः, तथा असकृन्नीचैर्गोत्रे सर्वलोकावगीते, पौनःपुन्येनोत्पन्न इति, तथाहि—नीचैर्गोत्रोदयादनन्तमपि कालं तिर्यक्ष्वास्ते, तत्र च पर्यटन् द्विनवतिनामोत्तरप्रकृतिसत्कर्म्मा संस्तथाविधाध्यवसायोपपन्नः आहारकशरीरतत्सङ्घातबन्धनाङ्गोपाङ्गदेवगत्यानुपूर्वीद्वयनरकगत्यानुपूर्वीद्वयवैक्रियचतुष्टयरूपा एता द्वादशकर्म्मप्रकृतीर्निर्लेप्याशीतिसत्कर्म्मा तेजोवायुषूत्पन्नः सन् मनुजगत्यानुपूर्वीद्वयमपि निर्लेप्य तत उच्चैर्गोत्रमुद्वलयति पल्योपमासंख्येयभागेन, अतस्तेजोवायुष्वाद्य एव भङ्गकः, तद्यथा—नीचैर्गोत्रस्य बन्ध उदयोऽपि तस्यैव सत्कर्म्मताऽपीति, ततोऽप्युद्वृत्तस्यापरैकेन्द्रियगतस्यायमेव भङ्गः, त्रसेष्वप्यपर्याप्तकावस्थायामयमेव, अनिर्लेपिते[1] तूच्चैर्गोत्रे द्वितीयचतुर्थौ भङ्गौ, तद्यथा—नीचैर्गोत्रस्य बन्ध उदयोऽपि तस्यैव सत्कर्म्मता तूभयरूपस्यैवेति द्वितीयः, तथा उच्चैर्गोत्रस्य बन्धो नीचस्योदयः सत्कर्म्मता तूभयरूपस्येति चतुर्थः, शेषास्तु चत्वारो न सन्त्येव, तिर्यक्ष्वुच्चैर्गोत्रस्योदयाभावादिति भावः, तदेवमुच्चैर्गोत्रोद्वलनेन कलंकलीभावमापन्नोऽनन्तं कालमेकेन्द्रियेष्वास्ते, अनुद्वलिते वा तिर्यक्ष्वास्तेऽनन्ता उत्सर्पिण्यवसर्पिणीः, आवलिकाकालासङ्ख्ये-

१ ०स्यान्यत्रापि आदावयः प्र. २ अनिर्लेपिते तूच्चैर्गोत्रे द्वितीयो भङ्गकः, कस्यचित्प्रथमसमय एवापरस्यान्तर्मुहूर्ताद्वोर्ध्वमुच्चैर्गोत्रसम्बन्धसद्भावे चतुर्थः भङ्गकः, तद्यथा-नीचैर्गोत्रस्य बन्ध उदयोऽपि तस्यैव सत्कर्म्मता तूभयरूपस्यैवेति द्वितीयः, तथोच्चैर्गोत्रस्य बन्धो नीचस्योदयः सत्कर्म्मता तूभयरूपस्येति चतुर्थः, शेषास्तु चत्वारो न सन्त्येव, तिर्यक्ष्वुच्चैर्गोत्रस्योदयाभावादिति भावः । तदेवमुच्चैर्गोत्रोद्वलनेन कलंकलीभावमापन्नोऽसंख्येयमपि कालं सूक्ष्मत्रसेष्वास्ते, ततोऽप्युद्वृत्त उच्चैर्गोत्रोदयाभावे सति द्वितीयचतुर्थभङ्गकस्योऽनन्तमपि कालं तिर्यक्ष्वास्ते इति, स च अनन्ता उत्सर्पिण्यवसर्पिणीः, आवलिकाकालासंख्येयभागसमयसंख्यान् पुद्गलपरावर्त्तानिति प्र. ३ नीचैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदयः उच्चनीचैर्गोत्रे सती ३ उच्चैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदय उच्चनीचैर्गोत्रे सती ५ उच्चैर्गोत्रस्योदय उच्चनीचैर्गोत्रे सती ६ उच्चैर्गोत्रस्योदय उच्चैर्गोत्रं सत् ७ इत्येवंरूपाः शेषास्तृतीयपञ्चमषष्ठसप्तमभङ्गरूपाश्चत्वारः. प्र.

यभागसमयसंख्यान् पुद्गलपरावर्त्तानिति, कीदृशः पुनः पुद्गलपरावर्त्त इति ? उच्यते, यदौदारिकवैक्रियतैजसभाषानापानमनःकर्मसप्तकेन संसारोदरविवरवर्त्तिनः पुद्गलाः आत्मसात्परिणामिता भवन्ति तदा पुद्गलपरावर्त्त इत्येके, अन्ये तु द्रव्यक्षेत्रकालभावभेदाच्चतुर्द्धा वर्णयन्ति, प्रत्येकमसावपि बादरसूक्ष्मभेदात् द्वैविध्यमनुभवति, तत्र द्रव्यतो बादरो यदौदारिकवैक्रियतैजसकार्म्मणचतुष्टयेन सर्वपुद्गला गृहीत्वोज्झितास्तदा भवति, सूक्ष्मः पुनर्यदैकशरीरेण सर्वपुद्गलाः स्पर्शिता भवन्ति तदा द्रष्टव्यः १, क्षेत्रतो बादरो यदा क्रमोत्क्रमाभ्यां म्रियमाणेन सर्वे लोकाकाशप्रदेशाः स्पृष्टा भवन्ति तदा विज्ञेयः, सूक्ष्मस्तु तदा विज्ञेयो यदैकस्मिन् विवक्षिताकाशखण्डके मृतः पुनर्यदा तस्यानन्तरप्रदेशवृद्ध्या सर्वं लोकाकाशं व्याप्नोति तदा ग्राह्यः २, कालतो बादरो यदोत्सर्पिण्यवसर्पिणीसमयाः क्रमोत्क्रमाभ्यां म्रियमाणेनालिङ्गिता भवन्ति तदा विज्ञेयः, सूक्ष्मस्तूत्सर्पिणीप्रथमसमयादारभ्य क्रमेण सर्वसमया म्रियमाणेन यदा स्पृष्टा भवन्ति तदाऽवगन्तव्यो ३, भावतो बादरो यदाऽनुभागबन्धाध्यवसायस्थानानि क्रमोत्क्रमाभ्यां म्रियमाणेन व्याप्तानि भवन्ति तदाऽभिधीयते, अनुभागबन्धाध्यवसायप्रमाणं तु संयमस्थानावसरे प्रागेवाभ्यधायीति, सूक्ष्मस्तु जघन्यानुभागबन्धाध्यवसायस्थानादारभ्य यदा सर्वेष्वपि क्रमेण मृतो भवति तदाऽवसेय इति । तदेवं कलंकलीभावमापन्नोऽन्यो वा नीचैर्गोत्रोदयादनन्तमपि कालं तिर्यक्ष्वास्ते, मनुष्येष्वपि तदुदयादेवाचगीतेषु स्थानेषूत्पद्यते, तथा कलंकलीसत्त्वोऽपि द्वीन्द्रियादिषूत्पन्नः सन् प्रथमसमये एव पर्याप्तुस्तरकालं वोच्चैर्गोत्रं बद्ध्वा मनुष्येष्वसकृदुच्चैर्गोत्रमास्कन्दति, तत्र कदाचित्तृतीयभङ्गकस्थः पञ्चमभङ्गोपपन्नो वा भवति, ताविमौ—नीचैर्गोत्रं बध्नात्युच्चैर्गोत्रस्योदयः सत्कर्म्मता तभयस्य तृतीयः, पञ्चमस्तूच्चैर्गोत्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वध्नाति तस्यैवोदयः सत्कर्मता तूभयस्य, षष्ठसप्तमभङ्गौ तूपरतबन्धस्य भवतः, अविषयत्वान्न ताभ्यामिहाधिकारः, तौ चेमौ-बन्धोपरमे उच्चैर्गोत्रोदयः सत्कर्मता तूभयस्येति षष्ठः, सप्तमस्तु शैलेश्यवस्थायां द्विचरमसमये नीचैर्गोत्रे क्षपिते उच्चै-र्गोत्रोदयस्तस्यैव सत्कर्मतेति, तदेवमुच्चावचेषु गोत्रेषु असकृदुत्पद्यमानेनासुमता पञ्चमङ्गकान्तर्वर्त्तिना न मानो विधेयो नापि दीनतेति । तयोश्चोच्चावचयोः गोत्रयोर्बन्धाध्यवसायस्थानकण्डकानि तुल्यानीत्याह—'णो हीणे णो अइरित्ते' यावन्त्युच्चैर्गोत्रेऽनुभावबन्धाध्यवसायस्थानकण्डकानि नीचैर्गोत्रेऽपि तावन्त्येव, तानि च सर्वाण्यप्यसुमताऽनादिसंसारे भूयो भूयः स्पर्शितानि, तत उच्चैर्गोत्रकण्डकार्थतयाऽसुभृन्न हीनो नाप्यतिरिक्तः, एवं नीचैर्गोत्रकण्डकार्थतयाऽपीति । नागार्जुनीयास्तु पठन्ति—"एगमेगे खलु जीवे अईअद्धाए असइं उच्चागोए असइं नीआगोए, कंडगट्ठयाए नो हीणे नो अइरित्ते" एकैको जीवः खलुशब्दो वाक्यालङ्कारे अतीते काले ऽसकृदुच्चावचेषु गोत्रेषूत्पन्नः, स चोच्चावचानुभागकण्ड-कापेक्षया न हीनो नाप्यतिरिक्त इति, तथाहि—उच्चैर्गोत्रकण्डकेभ्य एकभविकेभ्योऽनेकभविकेभ्यो वा नीचैर्गोत्रकण्ड-कानि न हीनानि नाप्यतिरिक्तानीत्यतोऽवगम्योत्कर्षापकर्षौ न विधेयौ, अस्य चोपलक्षणार्थत्वात् सर्वेष्वपि मदस्थानेष्वे-तदायोज्यं । यतश्चोच्चावचेषु स्थानेषु कर्म्मवशादुत्पद्यन्ते, बलरूपलाभादिमदस्थानानां चासमञ्जसतामवगम्य किं कर्त्त-व्यमित्याह—'नोऽपीहए' अपिः सम्भावने स च भिन्नक्रमो, जात्यादीनां मदस्थानानामन्यतमदपि नो 'ईहेतापि' ना-भिलषेदपि अथवा नो स्पृहयेत्—नावकाङ्क्षेदिति । तत्र यद्युच्चावचेषु स्थानेष्वसकृदुत्पन्नोऽसुमांस्ततः किमित्याह—'इय संखाय' इत्यादि, इतिरुपप्रदर्शने 'इति' एतत्पूर्वोक्तनीत्योच्चावचस्थानोत्पादादिकं 'परिसंख्याय' ज्ञात्वा 'को गोत्रवादी

भवेद्?' यथा ममोच्चैर्गोत्रं सर्वलोकमान्यनीयं नापरस्येत्येवंवादी को बुद्धिमान् भवेत्?, तथाहि—मयाऽन्यैश्च जन्तुभिः सर्वाण्यपि स्थानान्यनेकशः प्राप्तपूर्वाणीति, तथोच्चैर्गोत्रनिमित्तमानवादी वा को भवेत्?, न कश्चित्संसारस्वरूपपरिच्छेदी-त्यर्थः, किं च—'कंसि वा एगे गिज्झे' अनेकशोऽनेकस्मिन् स्थानेऽनुभूते सति तन्मध्ये कस्मिन्वा एकस्मिन्नुच्चैर्गोत्रादिकेऽ-नवस्थितस्थानके रागादिविरहादेकः कथं गृध्येत्?, तात्पर्यम्—आसेवां विदितकर्मपरिणामो विदध्यात्, युज्येत गार्द्धं यदि तत्स्थानं प्राक्तपूर्वं नाभविष्यत्, तच्चानेकशः प्राक्तपूर्वम्, अतस्तल्लाभालाभयोः नोत्कर्षापकर्षौ विधेयाविति, आह च—'तम्हा' इत्यादि, यतोऽनादौ संसारे पर्यटताऽसुमताऽदृष्टायत्तान्यसकृदुच्चावचानि स्थानान्यनुभूतानि तस्मात्कथञ्चिदु-च्चावचादिकं मदस्थानमवाप्य 'पण्डितो' हेयोपादेयतत्त्वज्ञो 'न हृष्येत्' न हर्षं विदध्याद्, उक्तं च—"सर्वसुखान्यपि बहुशः प्राप्तान्यटता मयाऽत्र संसारे । उच्चैःस्थानानि तथा तेन न मे विस्मयस्तेषु ॥ १ ॥ जइ सोऽवि णिज्जरमओ पडि-सिद्धो अट्ठमाणमहणेहिं । अवसेस मयट्ठाणा परिहरिअव्वा पयत्तेणं ॥ २ ॥" नाप्यवगीतस्थानावाप्तौ वैमनस्यं विदध्याद्, आह च—'नो कुप्पे' अदृष्टवशात्तथाभूतलोकासम्मतं जातिकुलरूपबललाभादिकमधममवाप्य 'न कुप्येत्' न क्रोधं कुर्यात्, कतरन्नीचस्थानं शब्दादिकं वा दुःखं मया नानुभूतमित्येवमवगम्य नोद्वेगवशगेन भाव्यम्, उक्तं च—"अवमाना-त्परिभ्रंशाद्बधबन्धधनक्षयात् । प्राप्ता रोगाश्च शोकाश्च, जात्यन्तरशतेष्वपि ॥ १ ॥ संते यं अविम्हइउं असोइउं पंडिएण

१ यदि सोऽपि निर्जरामदः प्रतिषिद्धोऽष्टमानमथनैः । अवशेषाणि मदस्थानानि परिहर्त्तव्यानि प्रयत्नेन ॥ १ ॥ २ सत्सु च विस्मेतुमशोचितुं पण्डितेन नासत्सु । शक्यं हि दुर्गोपमितहृदयेन हितं धरता ॥ १ ॥ भूत्वा चक्रवर्ती पृथ्वीपतिर्विमलपाण्डुरच्छत्रः । स एव नाम भूयोऽनाथशालालयो भवति ॥ २ ॥

य असंते । सक्का हु दुग्गोवमिअहिअएण हिअं धरंतेण ॥ २ ॥ होऊण चक्कवट्टी पुहइवई विमलपंडरच्छत्तो । सो चेव नाम भुज्जो अणाहसालालओ होइ ॥ ३ ॥" एकस्मिन् वा जन्मनि नानाभूतावस्था उच्चावचाः कर्म्मवशतोऽनुभवति । तदेवमुच्चनीचगोत्रनिर्विकल्पमनाः अन्यदपि अविकल्पेन किं कुर्यादित्याह—'भूएहिं' इत्यादि, भवन्ति भविष्यन्त्यभूव-न्निति च भूतानि—असुभृतस्तेषु 'प्रत्युपेक्ष्य' पर्यालोच्य विचार्य कुशाग्रीयया शेमुष्या जानीहि—अवगच्छ, किं जानीहि?—'सातं' सुखं तद्विपरीतमसातमपि जानीहि, किं च कारणं सातासातयोः? एतज्जानीहि, किं चाभिलषन्त्यविगानेन प्राणिन इति, अत्र जीवजन्तुप्राण्यादिशब्दानुपयोगलक्षणद्रव्यस्य मुख्यान् वाचकान्विहाय सत्तावाचिनो भूतशब्दस्योपादानेनेदमा-विर्भावयति—यथाऽयमुपयोगलक्षणपदार्थोऽवश्यं सत्तां बिभर्त्ति, सातमभिलाष्यसातं च जुगुप्सते, सातमभिलाषश्च शुभ-प्रकृतित्वाद् अतोऽपरासामपि शुभप्रकृतीनामुपलक्षणमेतदवसेयम्, अतः शुभनामगोत्रायुराद्याः कर्म्मप्रकृतीरनुधावत्य-शुभाश्च जुगुप्सते सर्वोऽपि प्राणी । एवं च व्यवस्थिते सति किं विधेयमित्याह—

समिए एयाणुपस्सी, तंजहा-अन्धत्तं बहिरत्तं मूयत्तं काणत्तं कुंटत्तं खुज्जत्तं वडभत्तं सामत्तं सबलत्तं सह पमाएणं अणेगरूवाओ जोणीओ संधायइ विरूवरूवे फासे प-रिसंवेयइ (सू० ७८)

१ कर्मवशगो० प्र. २ बुध्यस्व.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा भूतेषु शुभाशुभरूपं कर्म्म प्रत्युपेक्ष्य यत्तेषामप्रियं तन्न विदध्यात् इत्ययमुपदेशो, नागार्जुनीयास्तु पठन्ति-"पुरिसेणं खलु दुक्खुव्वेअसुहेसए" 'पुरुषो' जीवः णमिति वाक्यालङ्कारे 'खलुः' अवधारणे दुःखात् उद्वेगो यस्य स दुःखोद्वेगः, सुखस्यैषकः सुखैषकः, याजकादित्वात्समासश्छान्दसत्वाद्वा, दुःखोद्वेगश्चासौ सुखैषकश्च दुःखोद्वेगसुखैषकः, सर्वोऽपि प्राणी दुःखोद्वेगसुखैषक एव भवत्यतो जीवप्ररूपणां कार्यं, तच्चावनिवनपवनानलवनस्पतिसूक्ष्मबादरविकलपञ्चेन्द्रियसंज्ञीतरपर्याप्तकापर्याप्तकरूपं शस्त्रपरिज्ञायामकार्येव, तेषां च दुःखपरिजिहीर्षूणां सुखलिप्सूनामात्मौपम्यमाचरता तदुपमर्दकानि हिंसादिस्थानानि परिहरताऽऽत्मा पञ्चमहाव्रतेष्वास्थेयः, तत्परिपालनार्थं चोत्तरगुणा अप्यनुशीलनीयाः, तदर्थमुपदिश्यते—'समिए एयाणुपस्सी' पञ्चभिः समितिभिः समितः सन् एतत्-शुभाशुभं कर्म्म वक्ष्यमाणं चान्धत्वादिकं द्रष्टुं शीलं यस्येत्येतदनुदर्शी भूतेषु सातं जानीहीति सण्टङ्कः, तत्र 'समिति'रिति 'इण् गता' वित्यस्मात्सम्पूर्वात् क्तिन्नन्ताद्भवति, सा च पञ्चधा, तद्यथा-ईर्याभाषैषणाऽऽदाननिक्षेपोत्सर्गरूपाः, तत्रेर्यासमितिः प्राणव्यपरोपणव्रतपरिपालनाय, भाषासमितिरसदभिधाननियमसंसिद्धये, एषणासमितिरस्तेयव्रतपरिपालनाय, शेषद्वयं तु समस्तव्रतप्रकृष्टस्याहिंसाव्रतस्य संसिद्धये व्याप्रियते इति, तदेवं पञ्चमहाव्रतोपपेतस्तद्वृत्तिकल्पसमितिभिः समितः सन् भावत एतद्भूतसातादिकमनुपश्यति, अथवा यदनुदर्श्यसौ भवति तद्यथेत्यादिना सूत्रेणैव दर्शयति 'अन्धत्वमित्यादिना यावत् विरूपरूपे फासे परिसंवेएइ' संसारोदरे पर्यटन् प्राणी अन्धत्वादिका अवस्था बहुशः परिसंवेदयते, स चान्धो द्रव्यतो भावतश्च, तत्रैकेन्द्रियद्वीन्द्रियत्रीन्द्रिया द्रव्यभावान्धाः, चतुरिन्द्रियादयस्तु मिथ्यादृष्टयो भावान्धाः, उक्तं च—"एकं हि चक्षुरमलं सहजो विवेकस्तद्वद्भिरेव सह संवसतिर्द्वितीयम्। एतद्वयं भुवि न यस्य स तत्त्वतोऽन्धस्तस्यापमार्गचलने खलु कोऽपराधः?॥१॥" सम्यग्दृष्टयस्तूपहतनयना द्रव्यान्धाः, त एवानन्धा न द्रव्यतो न च भावतः, तदेवमन्धत्वं द्रव्यभावभिन्नमेकान्तेन दुःखजननमवाप्नोतीति, उक्तं च—"जीवन्नेव मृतोऽन्धो यस्मात्सर्वक्रियासु परतन्त्रः। नित्यास्तमितदिवाकरस्तमोऽन्धकारार्णवनिमग्नः॥ १॥ लोकद्वयव्यसनवह्निविदीपिताङ्गमन्धं समीक्ष्य कृपणं परयष्टिनेयम्। को नोद्विजेत भयकृज्जननादिवोग्रात्कृष्णाहिनैकनिचितादिव चान्धगर्त्तात्? ॥ २॥" एवं बधिरत्वमप्यदृष्टवशादनेकशः परिसंवेदयते, तदावृतश्च सदसद्विवेकविकलत्वादैहिकामुष्मिकेष्टफलक्रियानुष्ठानशून्यतां बिभर्त्ति इति, उक्तं च—"धर्म्मश्रुतिश्रवणमङ्गलवर्जितो हि, लोकश्रुतिश्रवणसंव्यवहारबाह्यः। किं जीवतीह बधिरो? भुवि यस्य शब्दाः, स्वप्नोपलब्धधननिष्फलतां प्रयान्ति? ॥ १॥ स्वकलत्रबालपुत्रकमधुरवचःश्रवणबाह्यकरणस्य। बधिरस्य जीवितं किं जीवन्मृतकाकृतिधरस्य? ॥ २॥" एवं मूकत्वमप्येकान्तेन दुःखावहं परिसंवेदयते, उक्तं च—"दुःखकरमकीर्त्तिकरं मूकत्वं सर्वलोकपरिभूतम्। प्रत्यादेशं मूढाः कर्म्मकृतं किं न पश्यन्ति? ॥ १॥" तथा काणत्वमप्येवंरूपमिति, आह च—"काणो निमग्नविषमोन्नतदृष्टिरेकः, शक्तो विरागजनने जननातुराणाम्। यो नैव कस्यचिदुपैति मनःप्रियत्वमालेख्यकर्म्मलिखितोऽपि किमु स्वरूपः? ॥१॥" एवं 'कुण्टत्वं' पाणिवक्रत्वादिकं 'कुब्जत्वं' वामनलक्षणं 'वडभत्वं' विनिर्गतपृष्ठीवडभलक्षणं 'श्यामत्वं' कृष्णलक्षणं 'शबलत्वं' श्वित्रलक्षणं सहजं पश्चाद्वा वि वा कर्म्मवशगो भूरिशो दुःखराशिदेशीयं परिसंवेदयते। किं च-सह 'प्रमादेन' विषयक्रीडाभिष्वङ्गरूपेण श्रेयस्यनुद्यमात्मकेन 'अनेकरूपाः' सङ्कटविकटशीतोष्णादिभेदभिन्ना योनीः 'संदधाति'संधत्ते

चतुरशीतियोनिलक्षसम्बन्धाविच्छेदं विदधातीति भावः, सम्यग् धावतीति वा, तासु तास्वायुष्कबन्धोत्तरकालं गच्छतीत्यर्थः, तासु च नानाप्रकारासु योनिषु 'विरूपरूपान्' नानाप्रकारान् 'स्पर्शान्' दुःखानुभवान् परिसंवेदयते, अनुभवतीत्यर्थः ॥ तदेवमुच्चैर्गोत्रोत्थापितमानोपहतचेता नीचैर्गोत्रविहितदीनभावो वाऽन्धबधिरभूयं वा गतः सन्नावबुध्यते कर्त्तव्यं न जानाति कर्म्मविपाकं नावगच्छति संसारापसदतां नावधारयति हिताहिते न गणयति औचित्यमित्यनवगततत्त्वो मूढस्तत्रैवोच्चैर्गोत्रादिके विपर्यासमुपैति, आह च—

से अबुज्झमाणे हओवहए जाईमरणं अणुपरियट्टमाणे, जीवियं पुढो पियं इहमेगेसिं माणवाणं खित्तवत्थुममायमाणाणं, आरत्तं विरत्तं मणिकुंडलं सह हिरण्णेण इत्थियाओ परिगिज्झति तत्थेव रत्ता, न इत्थ तवो वा दमो वा नियमो वा दिस्सइ, संपुण्णं बाले जीविउकामे लालप्पमाणे मूढे विप्परियासमुवेइ (सू० ७९)

'से' इत्युच्चैर्गोत्राभिमानी अन्धबधिरादिभावसंवेदको वा कर्म्मविपाकमनवबुध्यमानो हतोपहतो भवति, नानाव्याधिसन्नावक्षतशरीरत्वाद्धतः समस्तलोकपरिभूतत्वादुपहतः, अथवोच्चैर्गोत्रगर्वाध्मातत्यक्तोचितविधेयविद्वज्जनवदनसमुद्भूतशब्दायशःपटहहतत्वाद्धतः अभिमानोत्पादितानेकभवकोटिनीचैर्गोत्रोदयादुपहतः, मूढो विपर्यासमुपैतीत्युत्तरेण सम्बन्धः, तथा जातिश्च मरणं च समाहारद्वन्द्वस्तद् 'अनुपरिवर्त्तमानः' पुनर्जन्म पुनर्मरणमित्येवमरहट्टघटीयन्त्रन्यायेन संसारोदरे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवर्त्तमानः, आबीचीमरणाद्वा प्रतिक्षणं जन्मविनाशावनुभवन् दुःखसागरावगाढो विशरारुण्यपि नित्यताकृतमतिः हितेऽप्यहिताध्यवसायो विपर्यासमुपैति, आह च—'जीवितम्' आयुष्कानुपरमलक्षणमसंयमजीवितं वा 'पृथग्' इति प्रत्येकं प्रतिप्राणि 'प्रियं' दयितं वल्लभम् 'इहे'ति अस्मिन् संसारे 'एकेषाम्' अविद्योपहतचेतसां मानवानामिति, उपलक्षणार्थत्वात् प्राणिनां, तथाहि—दीर्घजीवनार्थं तास्ता रसायनादिकाः क्रियाः सत्त्वोपघातकारिणीः कुर्वते, तथा 'क्षेत्रं' शालिक्षेत्रादि 'वास्तु' धवलगृहादि मम इदमित्येवमाचरतां सतां तत्क्षेत्रादिकं प्रेयो भवति, किं च—'आरक्तम्' ईषद्रक्तं वस्त्रादि 'विरक्तं' विगतरागं विविधरागं वा 'मणिः' इति रत्नवैडूर्येन्द्रनीलादि 'कुण्डलं' कर्णाभरणं हिरण्येन सह स्त्रीः परिगृह्य 'तत्रैव' क्षेत्रवास्त्वारक्तविरक्तवस्त्रमणिकुण्डलरूप्यादौ 'रक्ता' गृद्धा अध्युपपन्ना मूढा विपर्यासमुपयान्ति, वदन्ति च—नात्र 'तपो वा' अनशनादिलक्षणं 'दमो वा' इन्द्रियनोइन्द्रियोपशमलक्षणो 'नियमो वा' अहिंसाव्रतलक्षणः फलवान् दृश्यते, तथाहि—तपोनियमोपेतस्यापि कायक्लेशभोगादिवञ्चनां विहाय नान्यत्फलमुपलभ्यते, जन्मान्तरे भविष्यतीति चेद्व्युद्ग्राहितस्योल्लापः, किं च—दृष्टहानिरदृष्टकल्पना च पापीयसीति, तदेवं साम्प्रतेक्षी भोगसङ्गविहितैकपुरुषार्थबुद्धिः सम्पूर्णं यथावमरसम्पादितविषयोपभोगं 'बालः' अज्ञः 'जीवितुकामः' आयुष्कानुभवनमभिलषन् 'लालप्यमानः' भोगार्थमत्यर्थं लपन् वाग्दण्डं करोति, तद्यथा—अत्र तपो दमो नियमो वा फलवान्न दृश्यत इत्येवमर्थं ब्रुवन् मूढः अबुध्यमानो हतोपहतो जातिमरणमनुपरिवर्त्तमानो जीवितक्षेत्ररूप्यादिलोभपरिमोहितमनाः 'विपर्यासमुपैति' तत्त्वेऽतत्त्वाभिनिवेशम् अतत्त्वे च तत्त्वाभिनिवेशं हितेऽहितबुद्धिमित्येवं सर्वत्र विपर्ययं विदधाति, उक्तं च—"दाराः परिभवकारा बन्धुजनो बन्धनं विषं विषयाः। कोऽयं जनस्य मोहो?, ये रिपवस्तेषु सुहृदाशा ॥ १ ॥" इत्यादि ॥ ये पुनरुन्मज्जत्शुभकर्म्मापादिताध्यवसायपुरस्कृतमोक्षास्ते किंभूता भवन्तीत्याह—

इणमेव नावकंखंति, जे जणा धुवचारिणो। जाईमरणं परिन्नाय, चरे संकमणे दढे (१) नत्थि कालस्स णागमो, सव्वे पाणा पियाउया, सुहसाया दुक्खपडिकूला अप्पियवहा पियजीविणो जीविउकामा, सव्वेसिं जीवियं पियं, तं परिगिज्झ दुपयं चउप्पयं अभिजुंजिया णं संसिंचिया णं तिविहेण जाऽवि से तत्थ मत्ता भवइ अप्पा वा बहुया वा, से तत्थ गड्ढिए चिट्ठइ, भोअणाए, तओ से एगया विविहं परिसिट्ठं संभूयं महोवगरणं भवइ, तंपि से एगया दायाया वा विभयन्ति, अदत्तहारो वा से अवहरति, रायाणो वा से विलुंपंति, नस्सइ वा से विणस्सइ वा से, अगारदाहेण वा से डज्झइ इय, से परस्सऽट्ठाए कूराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण संमूढे विप्परियासमुवेइ, मुणिणा हु एयं पवेइयं, अणोहंतरा एए नो य ओहं तरित्तए, अतीरंगमा एए नो य तीरं गमित्तए, अपारंगमा एए नो य पारं गमित्तए, आयाणिज्जं च आयाय तंमि ठाणे न चिट्ठइ, वितहं पप्पऽखेयन्ने तंमि ठाणंमि चिट्ठइ (सू० ८०)

'इणमेव' इत्यादि, इदमेव पूर्वोक्तं सम्पूर्णजीवितं क्षेत्राङ्गनापरिभोगादिकं वा 'नावकाङ्क्षन्ति' नाभिलषन्ति, ये जना 'ध्रुवचारिणो' ध्रुवो—मोक्षस्तत्कारणं च ज्ञानादि ध्रुवं तदाचरितुं शीलं येषां ते तथा, धूतचारिणो वा धुनातीति धूतं—चारित्रं तच्चारिण इति। किं च—'जाई' इत्यादि, जातिश्च मरणं च समाहारद्वन्द्वः तत् 'परिज्ञाय' परिच्छिद्य ज्ञात्वा 'चरेत्' उद्युक्तो भवेत्, क?—'सङ्क्रमणे' सङ्क्रस्यतेऽनेनेति सङ्क्रमणं—चारित्रं तत्र 'दृढो' विश्रोतसिकारहितः परीषहोपसर्गैः निष्प्रकम्पो वा यदि वा अशङ्कमनाः सन् संयम चर, न विद्यते शङ्का यस्य मनसस्तदशङ्कम् अशङ्कं मनो यस्यासावशङ्कमनाः—तपोदमनियमनिष्फलत्वाशङ्कारहित आस्तिक्यमत्युपपेतस्तपोदमादौ प्रवर्त्तेत, यतस्तद्वान् राजराजादीनां पूजाप्रशंसार्हो भवति, न चौपशमिकसुखावाप्तफलस्य तपस्विनः समस्तद्वन्द्वदवीयसोऽसत्यपि परलोके किञ्चित् श्रूयते, उक्तं च—"संदिग्धेऽपि परे लोके, त्याज्यमेवाशुभं बुधैः। यदि नास्ति ततः किं स्यादस्ति चेन्नास्तिको हतः ॥ १ ॥" इत्यादि। तस्मात् स्वायत्ते संयमसुखे दृढेन भाव्यं, न चैतद्भावनीयं यथा—परुत्परारि वृद्धावस्थायां वा धर्म्मं करिष्यामीति, यतः—'नत्थि' इत्यादि, 'नास्ति' न विद्यते 'कालस्य' मृत्योरनागमः—अनागमनमनवसर इतियावत्, तथाहि—सोपक्रमायुषोऽसुमतो न काचित्साऽवस्था यस्यां कर्म्मेषावकान्तर्वर्त्ती जन्तुर्जतुगोलक इव न विलीयेत इति, उक्तं च—"शिशुम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिशुं कठोरमकठोरमपण्डितमपि च पण्डितं, धीरमधीरं मानिनममानिनमपगुणमपि च बहुगुणम् । यतिमयतिं प्रकाशमवलीनमचेतनमथ सचेतनं, निशि दिवसेऽपि सान्ध्यसमयेऽपि विनश्यति कोऽपि कथमपि ॥ १ ॥" तदेवं सर्वकषत्वं मृत्योरवधार्याहिंसादिषु दत्तावधानेन भाव्यं, किमिति?, यतः—'सव्वे पाणा पियाउया' प्राणशब्देनात्राभेदोपचारात् तद्वन्त एव गृह्यन्ते, सर्वे प्राणिनो–जन्तवः 'प्रियायुषः' प्रियमायुर्येषां ते तथा, ननु च सिद्धैर्व्यभिचारो, न हि ते प्रियायुषस्तदभावात्, नैष दोषो, यतो मुख्यजीवादिशब्दव्युदासेन प्राणशब्दस्योपचरितस्य ग्रहणं संसारप्राण्युपलक्षणार्थमिति यत्किञ्चिदेतत्, पाठान्तरं वा 'सव्वे पाणा पियायया' आयतः–आत्माऽनाद्यनन्तत्वात् स प्रियो येषां ते तथा, सर्वेऽपि प्राणिनः प्रियात्मानः । प्रियात्मता च सुखदुःखप्राप्तिपरिहारतया भवतीति आह च–'सुहसाया दुक्खपडिकूला' सुखम्–आनन्दरूपमास्वादयन्तीति सुखास्वादाः–सुखभोगिनः सुखैषिण इत्युक्तं भवति, दुःखम्–असातं तत्प्रतिकूलयन्तीति दुःखप्रतिकूलाः–दुःखद्वेषिण इत्युक्तं भवति, तथा 'अप्पियवधा' अप्रियं–दुःखकारणं तत् घ्नन्त्यप्रियवधाः, तथापि 'पियजीविणो' प्रियं–दयितं जीवितम्–आयुष्कमसंयमजीवितं येषां ते तथा, 'जीविउकामा' यत एव प्रियजीविनोऽत एव दीर्घकालं जीवितुकामाः–दीर्घकालमायुष्काभिलाषिणो दुःखाभिभूता अप्यन्त्यां दशामापन्ना जीवितुमेवाभिलषन्ति, उक्तं च—"रमइ विहवी विसेसे ठितिमित्तं थेववित्थरो महई । मग्गइ सरीरमहणो रोगी जीए च्चिय कयत्थो ॥ १ ॥"[1] तदेवं सर्वोऽपि प्राणी सुखजीवितामिलाषी, तच्च नारम्भमृते, असावपि प्राण्युपघातकारी, प्राणिनां च जीवितमत्यर्थं दयि- ॥ १२२ ॥

१ रमते विभववान् विशेषे स्थितिमात्रं स्तोकविस्तारोऽभिलषति । मार्गयति शरीरमधनो रोगी जीवित एव कृतार्थः ॥ १ ॥

तमित्यतो भूयो भूयस्तदेवोपदिश्यत इत्याह—'सव्वेसिं' इत्यादि, सर्वेषामविगानेन 'जीवितम्' असंयमजीवितं 'प्रियं' दयितं, यद्येवं ततः किमित्यत आह—'तं परिगिज्झ' तद्–असंयमजीवितं 'परिगृह्य' आश्रित्य, किं कुर्वन्तीत्याह—'दुपयं' इत्यादि, 'द्विपदं' दासीकर्म्मकरादि 'चतुष्पदं' गवाश्वादि 'अभियुज्य' योजयित्वा अभियोगं ग्राहयित्वा व्यापारयित्वेत्युक्तं भवति, ततः किमित्यत आह—'संसिंचिया णं' इत्यादि, प्रियजीवितार्थमर्थाभिवृद्धये द्विपदचतुष्पदादिव्यापारेण 'संसिच्य' अर्थनिचयं संवर्द्ध्य 'त्रिविधेन' योगत्रिककरणत्रिकेण यापि काचिदल्पा परमार्थचिन्तायां बह्वपि फल्गुदेश्या 'से' तस्यार्थारम्भिणः सा चार्थमात्रा 'तत्र' इति द्विपदाद्यारम्भे 'मात्रा' इति सोपस्कारत्वात्सूत्राणां अर्थमात्रा–अर्थाल्पता 'भवति' सत्तां बिभर्त्ति, किंभूता?, सा सूत्रेणैव कथयति—अल्पा वा बह्वी वा, अल्पबहुत्वं चापेक्षिकमतः सर्वाऽप्यल्पा सर्वाऽपि वह्वी 'स' इत्यर्थवान् 'तत्र' तस्मिन्नर्थे 'गृद्धः' अध्युपपन्नस्तिष्ठति, नालोचयत्यर्थस्योपार्जनक्लेशं न गणयति रक्षणपरिश्रमं न विवेचयति तरलतां नावधारयति फल्गुताम्, उक्तं च–कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं, निरुपमरसप्रीत्या खादन्नरास्थि निरामिषम् । सुरपतिमपि श्वा पार्श्वस्थं सशङ्कितमीक्षते, न हि गणयति क्षुद्रो लोकः परिग्रहफल्गुताम् ॥ १ ॥" इत्यादि, स च किमर्थमर्थमर्थयत इत्यत आह—'भोयणाए' भोजनम्–उपभोगस्तस्मै अर्थमर्थयते, तदर्थं च क्रियासु प्रवर्त्तते, क्रियावतश्च किं भवतीत्याह—'तओ से' इत्यादि, ततः 'से' तस्यावलगनादिकाः क्रियाः कुर्वतः 'एकदा' लाभान्तरायकर्म्मक्षयोपशमे 'विविधं' नानाप्रकारं 'परिशिष्टं' प्रभूतत्वाद्भुक्तोद्धरितं 'सम्भूतं' सम्यक्परिपालनाय भूतं–संवृत्तं, किं तत्?, महच्च तत्परिभोगाङ्गत्वादुपकरणं च महोपकरणं–द्रव्यनिचय

इत्यर्थः, स कदाचिल्लाभोदये भवति, असावप्यन्तरायोदयान्न तस्योपभोगायेत्याह—'तंपि से' इत्यादि, तदपि समुद्रोत्तरणरोहणखननबिलप्रवेशरसेन्द्रमर्दनराजावलगनकृषीवलादिकाभिः क्रियाभिः स्वपरोपतापकारिणीभिः स्वोपभोगायोपार्जितं सत् 'से'तस्यार्थोपार्जनोपायक्लेशकारिणः 'एकदा'भाग्यक्षये 'दायादाः' पितृपिण्डोदकदानयोग्याः 'विभजन्ते' विलुम्पन्ति, 'अदत्तहारो वा' दस्युर्वा अपहरति, राजानो वा 'विलुम्पन्ति' अवच्छिन्दन्ति 'नश्यति वा' स्वत एवाटवीतः 'से'तस्य 'विनश्यति वा' जीर्णभावापत्तेः 'अगारदाहेन वा' गृहदाहेन वा दह्यते, कियन्ति वा कारणान्यर्थनाशे वक्ष्यन्ते इत्युपसंहरति—'इति' एवं बहुभिः प्रकारैरुपार्जितोऽप्यर्थो नाशमुपैति, नैवोपार्जयितुरुपतिष्ठत इत्युपदिश्यते, सः अर्थस्योत्पादयिता परस्मै–अन्यस्मै अर्थाय–प्रयोजनाय अन्यप्रयोजनकृते 'क्रूराणि' गलकर्त्तनादीनि 'कर्म्माणि' अनुष्ठानानि 'बालः' अज्ञः 'प्रकुर्वाणः' विदधानः 'तेन' कर्म्मविपाकापादितेन 'दुःखेन' असातोदयेन '(सं) मूढः' अपगतविवेकः 'विपर्यासमुपैति' अपगतसदसद्विवेकत्वात्कार्यमकार्यं मन्यते व्यत्ययं चेति, उक्तं च—"रागद्वेषाभिभूतत्वात्कार्याकार्यपराङ्मुखः । एष मूढ इति ज्ञेयो, विपरीतविधायकः ॥ १ ॥" तदेवं मौढ्यान्धतमसाच्छादितालोकपथाः सुखार्थिनो दुःखमृच्छन्ति जन्तव इति ज्ञात्वा सर्वज्ञवचनप्रदीपमशेषपदार्थस्वरूपाविर्भावकमाललम्बिरे मुनयः, अदश्च मया न स्वमनीषिकयोच्यते सुधर्म्मस्वामी जम्बूस्वामिनमाह, यदि स्वमनीषिकया नोच्यते कौतस्त्यं तर्हीदमित्यत आह—'सुणिणा' इत्यादि, मनुते जगतस्त्रिकालावस्थामिति मुनिः–तीर्थकृत्तेन 'एतद्' असकृदुच्चैर्गोत्रभवनादिकं प्रकर्षेणादौ वा सर्वस्वभावानुगामिन्या वाचा वेदितं–कथितं वक्ष्यमाणं च प्रवेदितं, किं तदित्याह—'अणोहं' इत्यादि, ओघो द्विधा– ॥ १२३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यभावभेदात्, द्रव्यौघो नदीपूरादिको भावौघोऽष्टप्रकारं कर्म्म संसारो वा, तेन हि प्राण्यनन्तमपि कालमुह्यते, तम्-ओघं ज्ञानदर्शनचारित्रबोहित्थस्थाःतरन्तीत्योघन्तरा न ओघन्तरा अनोघन्तराः, तरतेश्छान्दसत्वात् खश्, खित्त्वान्मुमागमः, एते कुतीर्थिकाः पार्श्वस्थादयो वा ज्ञानादियानविकलाः यद्यपि तेऽप्योघतरणायोद्यतास्तथापि सम्यगुपायाभावात् न ओघतरणसमर्था भवन्तीति, आह च—'नो य ओहं तरित्तए' 'न च' नैवोघं-भावौघं तरितुं समर्थाः, संसारौघतरणप्रत्यला न भवन्तीत्यर्थः, तथा 'अतीरंगमा' इत्यादि, तीरं गच्छन्तीति तीरङ्गमाः पूर्ववत् खशप्रत्ययादिकं, न तीरङ्गमा अतीरङ्गमाः एत इति प्रत्यक्षभावमापन्नान् कुतीर्थिकादीन् दर्शयति, न च ते तीरगमनायोद्यता अपि तीरं गन्तुमलं सर्वज्ञोपदिष्टसन्मार्गाभावादिति भावः, तथा 'अपारंगमा' इत्यादि, पारः-तटः परकूलं तद्गच्छन्तीति पारङ्गमा न पारङ्गमा अपारङ्गमाः 'एत' इति पूर्वोक्ताः, पारगतोपदेशाभावादपारङ्गता इति भावनीयं, न च ते पारगतोपदेशमृते पारगमनायोद्यता अपि पारं गन्तुमलम्, अथवा गमनं गमः पारस्य पारे वा गमः पारगमः, सूत्रे त्वनुस्वारोऽलाक्षणिको, न पारगमोऽपारगमस्तस्मा अपारगमाय, असमर्थसमासोऽयं, तेनायमर्थः-पारगमनाय ते न भवन्तीत्युक्तं भवति, ततश्चानन्तमपि कालं संसारान्तर्वर्त्तिन एवासते, यद्यपि पारगमनायोद्यमयन्ति तथापि ते सर्वज्ञोपदेशविकलाः स्वरुचिविरचितशास्त्रप्रवृत्तयो नैव संसारपारं गन्तुमलम्, अथ तीरपारयोः को विशेष इति, उच्यते, तीरं मोहनीयक्षयः पारं शेषघातिक्षयः, अथवा तीरं घातिचतुष्टयापगमः पारं भवोपग्राह्यभाव इत्यर्थः, स्यात्-कथमोघतारी कुतीर्थादिको न भवति तीरपारगामी चेत्याह—'आयाणिज्जं' इत्यादि, आदीयन्ते-गृह्यन्ते सर्वभावा अनेनेत्यादानीयं-श्रुतं तदादाय

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १२४ ॥

तदुक्ते तस्मिन् संयमस्थाने न तिष्ठति, यदि वा-आदानीयम्-आदातव्यं भोगाङ्गं द्विपदचतुष्पदधनधान्यहिरण्यादि तदादाय-गृहीत्वा, अथवा-मिथ्यात्वाविरतिप्रमादकषाययोगैरादानीयं-कर्म्मादाय, किंभूतो भवतीत्याह—'तस्मिन्' ज्ञानादिमये मोक्षमार्गे सम्यगुपदेशे वा प्रशस्तगुणस्थाने न तिष्ठति-नात्मानं विधत्ते, न केवलं सर्वज्ञोपदेशस्थाने न तिष्ठति विपर्ययानुष्ठायी च भवतीति दर्शयति-'वितहं' इत्यादि, वितथम्-असद्भूतं दुर्गतिहेतुं तत्तथाभूतमुपदेशं प्राप्याखेदज्ञः-अकुशलः खेदज्ञो वाऽसंयमस्थाने तस्मिंश्च साम्प्रतेक्ष्याचरित उपदिष्टे वा तिष्ठति, तत्रैवासंयमस्थानेऽध्युपपन्नो भवतीतियावत्, अथवा वितथमिति आदानीयभोगाङ्गव्यतिरिक्तं संयमस्थानं तत्प्राप्य खेदज्ञो-निपुणस्तस्मिन् स्थाने आदानीयस्य हन्तृणि तिष्ठति, सर्वज्ञाज्ञायामात्मानं व्यवस्थापयन्तीत्यर्थः। अयं चोपदेशोऽनवगततत्त्वस्य विनेयस्य यथोपदेशं प्रवर्त्तमानस्य दीयते, यस्त्ववगतहेयोपादेयविशेषः स यथावसरं यथाविधेयं स्वत एव विधत्त इत्याह च—

लोक.वि.२ उद्देशकः३

उद्देसो पासगस्स नत्थि, बाले पुण निहे कामसमणुन्ने असमियदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ (सू० ८१) त्तिबेमि ॥ लोकविजये तृतीयोद्देशकः ॥

उद्दिश्यते इत्युद्देशः-उपदेशः सदसत्कर्त्तव्यादेशः स पश्यतीति पश्यः स एव पश्यकस्तस्य न विद्यते, स्वत एव विदितवेद्यत्वात्तस्य, अथवा पश्यतीति पश्यकः-सर्वज्ञस्तदुपदेशवर्ती वा तस्य उद्दिश्यत इत्युद्देशो-नारकादिव्यपदेशः उच्चावचगोत्रादिव्यपदेशो वा स तस्य न विद्यते, तस्य द्रागेव मोक्षगमनादिति भावः, कः पुनर्यथोपदेशकारी न भवतीत्याह—'बाले' इत्यादि, बालो नाम रागादिमोहितः, स पुनः कषायैः कर्म्मभिः परीषहोपसर्गैर्वा निहन्यत इति निहः, निपूर्वाद्धन्तेः कर्म्मणि डः, अथवा स्निह्यत इति स्निहः-स्नेहवान् रागीत्यर्थः, अत एवाह—'कामसमणुन्ने' कामाः-इच्छामदनरूपाः सम्यग् मनोज्ञा यस्य स तथा, अथवा सह मनोज्ञैर्वर्त्तत इति समनोज्ञो, गमकत्वात्सापेक्षस्यापि समासः, कामैः सह मनोज्ञः कामसमनोज्ञो, यदिवा कामान् सम्यगनु-पश्चात् स्नेहानुबन्धाज्जानाति सेवत इति कामसमनुज्ञः, एवंभूतश्च किंभूतो भवतीत्याह—'असमियदुक्खे' अशमितम्-अनुपशमितं विषयाभिष्वङ्गकषायोत्थं दुःखं येन स तथा, यत एवाशमितदुःखोऽत एव दुःखी शारीरमानसाभ्यां दुःखाभ्यां, तत्र शारीरं कण्टकशस्त्रगण्डलूतादिसमुत्थं मानसं प्रियविप्रयोगाप्रियसंप्रयोगेप्सितालाभदारिद्र्यदौर्भाग्यदौर्मनस्यकृतं तद्विरूपमपि दुःखं विद्यते यस्यासौ दुःखी, एवंभूतश्च सन् किमवाप्नोतीत्याह—'दुक्खाणं' इत्यादि, दुःखानां-शारीरमानसानामावर्त्त-पौनःपुन्यभवनमनुपरिवर्त्तते, दुःखावर्त्तावमग्नो वंभ्रम्यत इत्यर्थः, । इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ लोकविजयस्य तृतीयोद्देशकटीका समाप्ता ॥ ३ ॥

॥ १२४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तओ से एगया रोगसमुप्पाया समुप्पज्जंति, जेहिं वा सद्धिं संवसइ ते व णं एगया नियया पुव्विं परिवयंति, सो वा ते नियगे पच्छा परिवइज्जा, नालं ते तव ताणाए वा सरणाए वा, तुमंपि तेसिं नालं ताणाए वा सरणाए वा, जाणित्तु दुक्खं पत्तेयं सायं, भोगा मे व अणुसोयन्ति इहमेगेसिं माणवाणं (सू० ८२)

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थस्य व्याख्या प्रस्तूयते–भोगेष्वनभिषक्तेन भाव्यं, यतो भोगिनामपाया दर्श्यन्ते (इति) प्रागुक्तं, ते चामी–'तओ से एगया' इत्यादि, अनन्तरसूत्रसम्बन्धः 'दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ' त्ति, तानि चामूनि दुःखानि 'तओ से' इत्यादि, परम्परसूत्रसम्बन्धस्तु 'बाले पुण निहे कामसमणुण्णे', ते च कामा दुःखात्मका एव, तत्र चासक्तस्य धातुक्षयभगन्दरादयो रोगाः समुत्पद्यन्ते इत्यतोऽपदिश्यते—'तत' इति कामानुषङ्गात् कर्म्मोपचयस्ततोऽपि पञ्चत्वं तस्मादपि नरकभवो नरकान्निषेककललार्बुदपेशीव्यूहगर्भप्रसवादिर्जातस्य च रोगाः प्रादुर्भवन्ति, 'से' तस्य कामानुषक्तमनसः 'एकदे'त्यसातावेदनीयविपाकोदये 'रोगसमुत्पादा' इति रोगाणां–शिरोऽर्त्तिशूलादीनां समुत्पादाः–प्रादुर्भावाः 'समुत्पद्यन्ते' प्रादुर्भवन्ति, तस्यां च रोगावस्थायां किंभूतो भवत्यसावित्यत आह—'जेहिं' इत्यादि, यैर्वा 'सार्द्धमसौ संवसति, त एवैकदा निजाः पूर्वं परिवदन्ति, स वा तान्निजान् पश्चात्परिवदेत्, नालं 'ते' तव त्राणाय वा शरणाय वा, त्वमपि तेषां नालं त्राणाय वा शरणाय वा, इति ज्ञात्वा दुःखं प्रत्येकं सातं च स्वकृतकर्म्मफलभुजः सर्वेऽपि प्राणिन इति मत्वा रोगोत्पत्तौ न दौर्मनस्यं भावनीयं, न भोगाः शोचनीया इति, आह च—'भोगा मे' इत्यादि, भोगाः–शब्दरूपरसगन्धस्पर्शविषयाभिलाषास्तानेवानुशोचयन्ति–कथमस्यामप्यवस्थायां वयं भोगान् भुङ्क्ष्महे?, एवंभूता वाऽस्माकं दशाऽभूद्येन मनोज्ञा अपि विषया उपनता नोपभोगायेति । ईदृक्षश्चाध्यवसायः केषाञ्चिदेव भवतीत्याह—'इहमेगेसिं' इत्यादि, 'इह' संसारे एकेषामनवगतविषयविपाकानां ब्रह्मदत्तादीनां मानवानामेवंभूतोऽध्यवसायो भवति, न सर्वेषां, सनत्कुमारादिना व्यभिचारात्, तथाहि—ब्रह्मदत्तो मारणान्तिकरोगवेदनाभिभूतः सन्तापातिशयात् स्पृशन्तीं प्रणयिनीमिव विश्वासभूमीं मूर्च्छां बहुमन्यमानः तथा हस्तीकृतो विहस्ततया विषयीकृतो वैषम्येण गोचरीकृतो ग्लान्या दृष्टो दुःखासिकया क्रोडीकृतो कालेन पीडितः पीडाभिर्निरूपितो नियत्या आदिस्तितो दैवेन अन्तिकेऽन्त्योच्छ्वासस्य मुखे महाप्रवासस्य द्वारि दीर्घनिद्राया जिह्वाग्रे जीवितेशस्य वर्त्तमानो विरलो वाचि विह्वलो वपुषि प्रचुरः प्रलापे जितो जृम्भिकाभिरित्येवंभूतामवस्थामनुभवन्नपि महामोहोदयात् भोगांश्चिकाङ्क्षिषुः पार्श्वोपविष्टां भार्यामनवरतवेदनावेशविगलदश्रुरक्तनयनां कुरुमति! कुरुमतीत्येवं तां व्याहरन्नधः सप्तमीं नरकपृथ्वीमगात्, तत्रापि तीव्रतरवेदनाभिभूतोप्यऽवगण्य वेदनां तामेव कुरुमतीं व्याहरतीत्येवंभूतो भोगाभिष्वङ्गो दुस्त्यजो भवति केषाञ्चित्, न पुनरन्येषां महापुरुषाणामुदारसत्त्वानाम् आत्मनोऽन्यच्छरीरमित्येवमवगततत्त्वानां सनत्कुमारादीनामिव यथोक्तरोगवेदनासद्भावे सत्यपि मयैवैतत्कृतं सोढव्यमपि मयैवेत्येवं जातनिश्चयानां कर्म्मक्षपणोद्यतानां न मनसः पीडोत्पद्यते इति, उक्तं च–"उत्तो यः स्वत एव मोहसलिलो जन्मालवालोऽशुभो, रागद्वेषकषायसन्ततिमहास्निर्विघ्नबीजस्त्वया ।

रोगैरङ्कुरितो विपत्कुसुमितः कर्म्मद्रुमः साम्प्रतं, सोढा नो यदि सम्यगेष फलितो दुःखैरधोगामिभिः ॥ १ ॥ पुनरपि सहनीयो दुःखपाकस्त्वयाऽयं, न खलु भवति नाशः कर्म्मणा संचितानाम् । इति सह गणयित्वा यद्यदायाति सम्यग्, सदसदिति विवेकोऽन्यत्र भूयः कुतस्त्यः? ॥ २ ॥" अपि च–भोगानां प्रधानं कारणमर्थोऽतस्तत्स्वरूपमेव निर्दिदिक्षुराह—

तिविहेण जाऽवि से तत्थ मत्ता भवइ अप्पा वा बहुगा वा, से तत्थ गड्ढिए चिट्ठइ, भोयणाए, तओ से एगया विपरिसिट्ठं संभूयं महोवगरणं भवइ, तंपि से एगया दायाया विभयंति, अदत्तहारो वा से हरति, रायाणो वा से विलुंपंति, नस्सइ वा से विणस्सइ वा से, अगारडाहेण वा से डज्झइ इय, से परस्स अट्ठाए कूराणि कम्माणि बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परियासमुवेइ (सू० ८३)

त्रिविधेन याऽपि तस्य तत्रार्थमात्रा भवति अल्पा वा बह्वी वा, स तस्यामर्थमात्रायां गृद्धस्तिष्ठति, सा च भोजनाय किल भविष्यति, ततस्तस्यैकदा विपरिशिष्टं सम्भूतं महोपकरणं भवति, तदपि 'से' तस्यैकदा दायादा विभजन्ते, अदत्तहारो वा तस्य हरति, राजानो वा विलुम्पन्ति, नश्यति वा विनश्यति वा, अगारदाहेन वा दह्यते इति, स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्मै अर्थाय क्रूराणि कर्म्माणि बालः प्रकुर्वाणस्तेन दुःखेन मूढो विपर्यासमुपैति, एतच्च प्रागेव व्याख्यातमिति नेह प्रतायते ॥ तदेवं दुःखविपाकान् भोगान् प्रतिपाद्य यत् कर्त्तव्यं तदुपदिशतीत्याह—

आसं च छन्दं च विगिंच धीरे!, तुमं चेव तं सल्लमाहट्टु, जेण सिया तेण नो सिया, इणमेव नावबुज्झंति जे जणा मोहपाउडा, थीभि लोए पव्वहिए, ते भो! वयंति एयाइं आययणाइं, से दुक्खाए मोहाए माराए नरगाए नरगतिरिक्खाए, सयं मूढे धम्मं नाभिजाणइ, उआहु वीरे, अप्पमाओ महामोहे, अलं कुसलस्स पमाएणं, संतिमरणं संपेहाए भेउरधम्मं संपेहाए, नालं पास अलं ते एएहिं (सू० ८४)

'आशां' भोगाकाङ्क्षां, चः समुच्चये, छन्दनं छन्दः–परानुवृत्त्या भोगाभिप्रायस्तं च, चशब्दः पूर्वापेक्षया समुच्चयार्थः, तावाशाछन्दौ 'वेविक्ष्व' पृथक्कुरु त्यज 'धीर!' धीः–बुद्धिस्तया राजत इति, भोगाशाछन्दापरित्यागे च दुःखमेव केवलं न तत्प्राप्तिरिति, आह च—'तुमं चेव' इत्यादि, विनेय उपदेशगोचरापन्न आत्मा वा उपदिश्यते–त्वमेव तद्भोगाशादिकं शल्यमाहृत्य–स्वीकृत्य परमशुभमादत्से, न तु पुनरुपभोगं, यतो भोगोपभोगो यैरेवार्थाद्युपायैर्भवति तैरेव न भवतीत्याह—'जेण सिआ तेण नो सिया' येनैवार्थोपार्जनादिना भोगोपभोगः स्यात् तेनैव विचित्रत्वात् कर्म्मपरिणतेर्न स्याद्, अथवा येन केनचिद्धेतुना कर्म्मबन्धः स्यात्तन्न कुर्यात्, तत्र न वर्त्तेतेत्यर्थः, यदिवा येनैव राज्योपभोगादिना कर्म्मबन्धो येन वा निर्ग्रन्थत्वादिना मोक्षः 'स्याद्' भवेत्तेनैव तथाभूतपरिणामवशान्न स्यादिति । एतच्चानुभवावधारितमपि मोहाभिभूता नावगच्छन्तीत्याह—'इणमेव' इत्यादि, इदमेव हेतुवैचित्र्यं 'न बुध्यन्ते' न संजानते, के?—ये जना मौनोन्द्रोपदेशविकला मोहेन–अज्ञानेन मिथ्यात्वोदयेन वा प्रावृताः–छादितास्तत्त्वविपर्यस्तमतयो मोहनीयोदयाद्भवन्ति । मोहनीयस्य च तद्भेदकामानां च स्त्रियो गरीयः कारणमिति दर्शयति—'थीभि' इत्यादि, स्त्रीभिः–अङ्गनाभिर्भ्रूक्षेपादिविभ्रमैरसौ लोकः आशाच्छन्दाभिभूतात्मा क्रूरकर्म्मविधायी नरकविपाकफलं शल्यमाहृत्य तत्फलमबुध्यमानो मोहाच्छादितान्तरात्मा प्रकर्षेण व्यथितः पराजितो वशीकृत इतियावत्, न केवलं स्वतो विनष्टाः, अपरानपि असकृदुपदेशदानेन विनाशयन्तीत्याह—'ते भो!' इत्यादि, 'ते' स्त्रीभिः प्रव्यथिता भो! इत्यामन्त्रणे एतद्वदन्ति–यथैतानि–रूपादीनि 'आयतनानि' उपभोगास्पदभूतानि वर्त्तन्ते, एतैश्च विना शरीरस्थितिरेव न भवतीति । एतच्च प्रव्यथनमुपदेशदानं वा तेषामपायाय स्यादित्याह—'से' इत्यादि, तेषां 'से' इत्येतत् प्रव्यथनमायतनभणनं वा 'दुःखाय' भवति–शारीरमानसासातवेदनीयोदयाय जायते, किं च–'मोहाए' मोहनीयकर्म्मबन्धनाय अज्ञानाय वेति, तथा 'माराए' मरणाय, ततोऽपि 'नरगाए' नरकाय नरकगमनार्थं, पुनरपि 'नरगतिरिक्खाए' ततोऽपि नरकादुद्वृत्य तिरश्चेतत्प्रभवति, तिर्यग्योन्यर्थं तत् स्त्रीप्रव्यथनं भोगायतनवदनं वा सर्वत्र सम्बन्धनीयं । स एवमङ्गनापाङ्गविलोकनाक्षिप्तासु तासु योनिषु पर्यटन्नात्महितं न जानातीत्याह—'सयं' इत्यादि, सततम्–अनवरतं दुःखाभिभूतो मूढो 'धर्म्मं' क्षान्त्यादिलक्षणं दुर्गतिप्रसृतिनिषेधकं 'न जानाति' न वेत्ति । एतच्च तीर्थकृदाहेति दर्शयति—'उदाहु' इत्यादि, उत्प्राबल्येनाह उदाह–उक्तवान्, कोऽसौ?–वीरः–अपगतसंसारभयस्तीर्थकृदित्यर्थः, किमुक्तवान्?, तदेव पूर्वोक्तं वाचा दर्शयति—'अप्रमादः' कर्त्तव्यः, क्व?–'महामोहे' अङ्गनाभिष्वङ्ग एव, महामोहकारणत्वान्महामोहः, तत्र प्रमादवता न भाव्यम्। आह च—'अलम्' इत्यादि, 'अलं' पर्याप्तं, कस्य?—'कुशलस्य' निपुणस्य सूक्ष्मेक्षिणः, केनालं?–मद्यविषयकषायनिद्राविकथारूपेण पञ्चविधेनापि प्रमादेन, यतः प्रमादो दुःखाद्यभिगमनायोक्त इति । स्यात्–किमालम्ब्य प्रमादेनालमिति?, उच्यते—'सन्ति' इत्यादि, शमनं शान्तिः–अशेषकर्म्मापगमोऽतो मोक्ष एव शान्तिरिति, म्रियन्ते प्राणिनः पौनःपुन्येन यत्र चतुर्गतिके संसारे स मरणः–संसारः शान्तिश्च मरणं च शान्तिमरणं, समाहारद्वन्द्वस्तत् 'संप्रेक्ष्य' पर्यालोच्य, प्रमादवतः संसारानुपरमस्तत्परित्यागाच्च मोक्ष इत्येतद्विचार्येति हृदयं, स वा कुशलः प्रेक्ष्य विषयकषायप्रमादं न विदध्याद्, अथवा शान्त्या–उपशमेन मरणं–मरणाविधिं यावत् तिष्ठतो यत्फलं भवति तत्पर्यालोच्य प्रमादं न कुर्यादिति । किं च–'भेउर' इत्यादि, प्रमादो हि विषयकषायाभिष्वङ्गरूपः शरीराधिष्ठानः, तच्च शरीरं भिदुरधर्म्मं, स्वत एव भिद्यत इति भिदुरं स एव धर्म्मः–स्वभावो यस्य तद्भिदुरधर्म्मं एतत् 'समीक्ष्य' पर्यालोच्य प्रमादं न कुर्यादिति सम्बन्धः, एते च भोगा भुज्यमाना अपि न तृप्तये भवन्तीत्याह—'नालं' इत्यादि, 'नालं' न समर्था अभिलाषोच्छित्तये यथेष्टावाप्तावपि भोगाः एतत् 'पश्य' जानीहि, अतोऽलं तव कुशल! 'एभिः' प्रमादमयैर्दुःखकारणस्वभावैर्विषयैरुपभोगैरिति, न चैते बहुशोऽप्युपभुज्यमाना उपशमं विदधतीति, उक्तं च—"यल्लोके ह्रीहियवं, हिरण्यं पशवः स्त्रियः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नालमेकस्य तत्सर्वमिति मत्वा शमं कुरु ॥ १ ॥ उपभोगोपायपरो वाञ्छति यः 'शमयितुं विषयतृष्णाम् । धावत्याकमितुमसौ, पुरोऽपराह्णे निजच्छायाम् ॥ २ ॥" तदेवं भोगलिप्सूनां तत्प्राप्तावप्राप्तौ च दुःखमेवेति दर्शयति—

एयं पस्स मुणी! महब्भयं, नाइवाइज्ज कंचणं, एस वीरे पसंसिए, जे न निव्विज्जइ आयाणाए, न मे देइ न कुप्पिज्जा थोवं लद्धुं न खिंसए, पडिसेहिओ परिणमिज्जा, एयं मोणं समणुवासिज्जासि (सू० ८५) त्तिबेमि ॥

'एतत्' प्रत्यक्षमेव भोगाशामहाज्वरगृहीतानां कामदशावस्थात्मकं महद्भयं भयहेतुत्वात् दुःखमेव महाभयं, तच्च मरणकारणमिति महदित्युच्यते, एतत् मुने! 'पश्य' सम्यगैहिकामुष्मिकापायापादकत्वेन जानीहीत्युक्तं भवति । यद्येवं तत्किं कुर्यादित्याह—'नाइवाएज्ज' इत्यादि, यतो भोगाभिलषणं महद्भयमतस्तदर्थं 'नातिपातयेत्' न व्यथेत 'कञ्चन' कमपि जीवमिति, अस्य च शेषव्रतोपलक्षणार्थत्वान्न प्रतारयेत् कञ्चनेत्याद्यप्यायोज्यं । भोगनिरीहः प्राणातिपातादिव्रतारूढश्च कं गुणमवाप्नोतीत्याह—'एस' इत्यादि, 'एष' इति भोगाशाच्छन्दविवेचकोऽप्रमादी पञ्चमहाव्रतभारारोहणोन्नामितस्कन्धो वीरः कर्म्मविदारणात् 'प्रशंसितः' स्तुतो देवराजादिभिः, क एष वीरो नाम? योऽभिष्ट्रयत इत्यत आह—'जे' इत्यादि, यो 'न निर्विद्यते' न खिद्यते न जुगुप्सते, कस्मै?—'आदानाय' आदीयते गृह्यतेऽवाप्यते आत्मस्वतत्त्वमशेषावारककर्म्मक्षयाविर्भूतसमस्तवस्तुग्राहिज्ञाना(ना)बाधसुखरूपं येन तदादानं—संयमानुष्ठानं तस्मै न जुगुप्सते, तद्वा कुर्वन् सिकताकवलचर्वणदेशीयं क्वचिदलाभादौ न खेदमुपयातीति, आह—'न मे' इत्यादि, ममायं गृहस्थः सम्भृतसंभारोऽप्युपस्थितेऽपि दानावसरे न ददातीतिकृत्वा 'न कुप्येत्' न क्रोधवशगो भूयाद्, भावनीयं च—ममैवैषा कर्म्मपरिणतिरित्यलाभोदयोऽयम्, अनेन चालाभेन कर्म्मक्षयायोद्यतस्य मे तत्क्षपणसमर्थं तपो भावीति न किञ्चित्क्षूयते, अथापि कथञ्चित् स्तोकं प्रान्तं वा लभेत तदपि न निन्देदित्याह—'थोवं' इत्यादि, 'स्तोकम्' अपर्याप्तं 'लब्धुं' लब्ध्वा न निन्देद्दातारं दत्तं वा, तथाहि—कतिचित्सिक्थानयने ब्रवीति—सिद्ध ओदनो भिक्षामानय लवणाहारो वा अस्माकं नास्तीत्यन्नं ददस्वेत्येवं अत्युद्वृत्तच्छात्रवन्न विदध्यात् । किं च—'पडिसेहिओ' इत्यादि, 'प्रतिषिद्धः' अदित्सितस्तस्मादेव प्रदेशात् 'परिणमेत्' निवर्त्तेत, क्षणमपि न तिष्ठेन्न दौर्मनस्यं विदध्यान्न रुण्टन्नपगच्छेत् न तां सीमन्तिनीमपवदेद्—धिक्ते गृहवासमिति, उक्तं च—"दिट्ठोऽसि कसेरुमई! अणुभूयासि कसेरुमइ!। पीयं चिय ते पाणियय वरि तुह नाम न दंसणं ॥१॥" इत्यादि । पठ्यते च—'पडिलाभिओ परिणमेज्जा" प्रतिलाभितः—प्राप्तभिक्षादिलाभः सन् परिणमेत्, नोच्चावचालापैः तत्रैव संस्तवं विदध्याद्, वैतालिकवद्दातारं नोल्लासयेदिति । उपसंहरन्नाह—'एयं' इत्यादि, 'एतत्' प्रव्रज्यानिर्वेदरूपं अदानाकोपनं स्तोकाजुगुप्सनं प्रतिषिद्धनिवर्त्तनं मुनेरिदं मौनं—मुनिभिर्मुमुक्षुभिराचरितं त्वमप्यवासानेकभवकोटिदुरापसंयमः सन् 'समनुवासयेः' सम्यग् विधत्स्वानुपालयेति विनेयोपदेश आत्मानुशासनं वा । इतिः परिसमाप्तौ, ब्रवीमि पूर्ववत् ॥ लोकविजयाध्ययनचतुर्थोद्देशकटीका समाप्ता ॥

---

१ दृष्टोऽसि उदारमते! अनुभूतोऽसि उदारमते!। पीतमेव ते पानीयं वरं तव नाम न दर्शम् ॥ १ ॥

उक्तश्चतुर्थोद्देशकः, साम्प्रतं पञ्चमस्य व्याख्या प्रतन्यते, तस्य चायमभिसम्बन्धः, इह भोगान् परित्यज्य लोकनिश्रया संयमदेहप्रतिपालनार्थं विहर्त्तव्यमित्युक्तं तदत्र प्रतिपाद्यते, इह हि संसारोद्वेगवता परित्यक्तभोगाभिलाषेण मुमुक्षुणोत्क्षिप्तपञ्चमहाव्रतभारेण निरवद्यानुष्ठानविधायिना दीर्घसंयमयात्रार्थं देहपरिपालनाय लोकनिश्रया विहर्त्तव्यं, निराश्रयस्य हि कुतो देहसाधनानि?, तदभावे धर्मश्चेति, उक्तं हि—"धर्मं चरतः साधोर्लोके निश्रापदानि पञ्चापि । राजा गृहपतिरपरः षट्टाया गणशरीरे च ॥ १ ॥" साधनानि च वस्त्रपात्रान्नासनशयनादीनि, तत्रापि प्रायः प्रतिदिनमुपयोगित्वादाहारो गरीयानिति, स च लोकादन्वेष्टव्यो, लोकश्च नानाविधैरुपायैरात्मीयपुत्रकलत्राद्यर्थं आरम्भे प्रवृत्तः, तत्र साधुना संयमदेहनिमित्तं वृत्तिरन्वेषणीयेति दर्शयति—

जमिणं विरूवरूवेहिं सत्थेहिं लोगस्स कम्मसमारंभा कज्जंति, तंजहा—अप्पणो से पुत्ताणं धूयाणं सुण्हाणं नाईणं धाईणं राईणं दासाणं दासीणं कम्मकराणं कम्मकरीणं आएसाए पुढोपहेणाए सामासाए पायरासाए, संनिहिसंनिचओ कज्जइ, इहमेगेसिं माणवाणं भोयणाए (सू० ८६)

'यैः' अविदितवेद्यैः 'इद'मिति सुखदुःखप्राप्तिपरिहारत्वमुद्दिश्य 'विरूपरूपैः' नानाप्रकारस्वरूपैः 'शस्त्रैः' प्राण्युपघातकारिभिर्द्रव्यभावभेदभिन्नैः 'लोकाय' शरीरपुत्रदुहितृस्नुषाज्ञात्याद्यर्थं कर्म्मणां—सुखदुःखप्राप्तिपरिहारक्रियाणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायिकाधिकरणिकाप्रादोषिकापारितापनिकाप्राणातिपातरूपाणां कृषिवाणिज्यादिरूपाणां वा, समारम्भा इति मध्यग्रहणाद्बहुवचननिर्देशाच्च संरम्भारम्भयोरप्युपादानं, तेनायमर्थः–शरीरकलत्राद्यर्थं संरम्भसमारम्भारम्भाः 'क्रियन्ते' अनुष्ठीयन्ते, तत्र संरम्भ इष्टानिष्टप्राप्तिपरिहाराय प्राणातिपातादिसङ्कल्पावेशः, तत्साधनसन्निपातकायवाग्व्यापारजनितपरितापनादिलक्षणः समारम्भः, दण्डत्रयव्यापारापादितचिकीर्षितप्राणातिपातादिक्रियानिर्वृत्तिरारम्भः, कर्म्मणो वा–अष्टप्रकारस्य समारम्भाः–उपार्जनोपायाः क्रियन्त इति, लोकस्येति चतुर्थ्यर्थे षष्ठी, साऽपि तादर्थ्ये, कः पुनरसौ लोको? यदर्थं संरम्भसमारम्भारम्भाः क्रियन्त इत्याह—'तंजहा अप्पणो से' इत्यादि, यदिवा लोकस्य तृतीयार्थे षष्ठी, यदिति हेतौ, यस्माल्लोकेन नानाविधैः शस्त्रैः कर्म्मसमारम्भाः क्रियन्त इत्यतस्तस्मिन् लोके साधुर्वृत्तिमन्वेषयेत्, यदर्थं च लोकेन कर्म्मसमारम्भाः क्रियन्ते तद्यथेत्यादिना दर्शयति—'तंजहा अप्पणो से' इत्यादि, 'तद्यथे'त्युपप्रदर्शनार्थो, नोक्तमात्रमेवान्यदप्येवंजातीयकं मित्रादिकं द्रष्टव्यं, 'से'तस्यारम्भारिप्सोर्य आत्मा–शरीरं तस्मै अर्थ तदर्थं कर्म्मसमारम्भाः–पाकादयः क्रियन्ते, ननु च लौकार्थमारम्भाः क्रियन्त इति प्रागभिहितं, न च शरीरं लोको भवति, नैतदस्ति, यतः परमार्थदृशां ज्ञानदर्शनचारित्रात्मकमात्मतत्त्वं विहायान्यत्सर्वं शरीराद्यपि पराक्यमेव, तथाहि–बाह्यस्य पौद्गलिकस्याचेतनस्य कर्म्मणो विपाकभूतानि पञ्चापि शरीराणीत्यतः शरीरात्माऽपि लोकशब्दाभिधेय इति, तदेवं कश्चिच्छरीरनिमित्तं कर्म्मारभते, परस्तु पुत्रेभ्यो दुहितृभ्यः स्नुषाः–वध्वस्ताभ्यो ज्ञातयः–पूर्वापरसम्बद्धाः स्वजनाः तेभ्यो धात्रीभ्यो राजभ्यो दासेभ्यो दासीभ्यः कर्म्मकरेभ्यः कर्म्मकरीभ्यः आदिश्यते परिजनो यस्मिन्नागते तदातिथेयायेत्यादेशः–प्राघूर्णकस्तदर्थं कर्म्मसमारम्भाः क्रियन्त इति सम्बन्धः, तथा 'पुढो पहेणाए' इत्यादि, पृथक् पृथक् पुत्रादिभ्यः प्रहेणकार्थं तथा 'सामासाए'त्ति श्यामा–रजनी तस्यामशनं श्यामाशः तदर्थं, तथा 'पायरासाए'त्ति प्रातरशनं प्रातराशस्तस्मै, कर्म्मसमारम्भाः क्रियन्त इति सामान्येनोक्तावपि विशेषार्थमाह—'सन्निहि' इत्यादि, सम्यग्निधीयत इति सन्निधिः–विनाशिद्रव्याणां दध्योदनादीनां संस्थापनं, तथा सम्यग् निश्चयेन चीयत इति सन्निचयः–अविनाशिद्रव्याणां अभयासितामृद्वीकादीनां सङ्ग्रहः, सन्निधिश्च सन्निचयश्च सन्निधिसन्निचयं, प्राकृतशैल्या पुलिङ्गता, अथवा सन्निधेः सन्निचयः सन्निधिसन्निचयः, स च परिग्रहसंज्ञोदयादाजीविकाभ्यासाद्वा धनधान्यहिरण्यादीनां क्रियत इति । स च किमर्थमित्याह—'इह' इत्यादि, 'इहे'ति मनुष्यलोके 'एकेषा'मिहलोके कृतपरमार्थबुद्धीनां 'मानवानां' मनुष्याणां 'भोजनाय' उपभोगार्थमिति । तदेवं विरूपरूपैः शस्त्रैरात्मपुत्राद्यर्थं कर्म्मसमारम्भप्रवृत्ते लोके पृथक्प्रहेणकाय श्यामाशाय प्रातराशाय केषाञ्चिन्मानवानां भोजनार्थं सन्निधिसन्निचयकरणोद्यते सति साधुना किं कर्त्तव्यमित्याह—

समुट्ठिए अणगारे आरिए आरियपन्ने आरियदंसी अयंसंधित्ति अदक्खु, से नाईए नाइयावए न समणुजाणइ, सव्वामगंधं परिन्नाय निरामगंधो परिव्वए (सू० ८७)

सम्यक् सततं सङ्गतं वा संयमानुष्ठानेनोत्थितः समुत्थितो, नानाविधशस्त्रकर्म्मसमारम्भोपरत इत्यर्थः, न विद्यतेऽगारं–गृहमस्येत्यनगारः, पुत्रदुहितृस्नुषाज्ञातिधाव्यादिरहित इत्यर्थः, सोऽनगारः आराद्यातः सर्वहेयधर्म्मेभ्यः इत्यार्यः–चारित्रार्हः, आर्या प्रज्ञा यस्यासावार्यप्रज्ञः, श्रुतविशेषितशेमुषीक इत्यर्थः, आर्यं–प्रगुणं न्यायोपपन्नं पश्यति तच्छीलश्चेत्यार्यदर्शी पृथक्प्रहेणकश्यामाशनादिसङ्कल्परहित इत्यर्थः, 'अयंसंधीति' सन्धानं सन्धीयते वाऽसाविति सन्धिरयं सन्धिर्यस्य साधोरसावयंसन्धिः, छान्दसत्वाद्विभक्तेरलुगित्ययंसन्धिः–यथाकालमनुष्ठानविधायी यो यस्य वर्त्तमानः कालः कर्त्तव्यतयोपस्थितस्तत्करणतया तमेव सन्धत्त इति, एतदुक्तं भवति–सर्वाः क्रियाः प्रत्युपेक्षणोपयोगस्वाध्यायभिक्षाचर्याप्रतिक्रमणादिकाः असप्रज्ञा अन्योऽन्याबाधया आत्मीयकर्त्तव्यकाले करोतीत्यर्थः, इतिः हेतौ, यस्माद्यथाकालानुष्ठानविधायी तस्मादसावेव परमार्थं पश्यतीत्याह—'अदक्खु'त्ति, तिङ्व्यत्ययेन एकवचनावसरे बहुवचनमकारि, ततश्चायमर्थः–यो ह्यार्य आर्यप्रज्ञ आर्यदर्शी कालज्ञश्च स एव परमार्थमद्राक्षीन्नापर इति, पाठान्तरं वा 'अयं संधिमदक्खु' 'अयम्' अनन्तरविशेषणविशिष्टः साधुः 'सन्धिं' कर्त्तव्यकालम् 'अद्राक्षीद्' दृष्टवान्, एतदुक्तं भवति–यः परस्पराबाधया हिताहितप्राप्तिपरिहाररूपतया विधेयावसरं वेत्ति विधत्ते च स परमार्थं ज्ञातवानिति, अथवा भावसन्धिः–ज्ञानदर्शनचारित्राणामभिवृद्धिः स च शरीरमृते न भवति, तदपि नोपष्टम्भकारणमन्तरेण, तस्य च सावद्यस्य परिहारः कर्त्तव्य इत्यत आह—'से णाईए' इत्यादि, 'स' भिक्षुस्तद्वाऽकल्प्यं 'नाददीत' न गृह्णीयान्नाप्यपरमादापयेत्–ग्राहयेत्, नाप्यपरमनेषणीयमाददानं समनुजानीयादपि, अथवा सइङ्गालं सधूमं वा नाद्यात्–न भक्षयेत्नाप्यपरमादापयेददन्तं वा न समनुजानीयादिति, आह—'सव्वामगंधं' इत्यादि, आमं च गन्धश्च आमगन्धं समाहारद्वन्द्वः, सर्वं च तदामगन्धं च सर्वामगन्धं, सर्वशब्दः प्रकारकात्स्न्यैऽत्र गृह्यते न द्रव्यकात्स्न्यैं, आमम्–अपरिशुद्धं, गन्धग्रह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णेन तु पूतिर्गृह्यते, ननु च पूतिद्रव्यस्याप्यशुद्धत्वात् आमशब्देनैवोपादानात्किमर्थं भेदेनोपादानमिति ?, सत्यम्, अशुद्धसामान्याद्गृह्यते, किं तु पूतिग्रहणेनेहाधाकर्म्माद्यविशुद्धकोटिरुपात्ता, तस्याश्च गुरुतरत्वात् प्राधान्यख्यापनार्थं पुनरुपादानं, ततश्चायमर्थः–गन्धग्रहणेनाधाकर्म्म १ औद्देशिकत्रिकं २ पूतिकर्म्म ३ मिश्रजातं ४ बादरप्राभृतिका ५ अध्यवपूरक ६ श्वेते षडुद्गमदोषा अविशुद्धकोट्यन्तर्गता गृहीताः, शेषास्तु विशुद्धकोट्यन्तर्भूता आमग्रहणेनोपात्ता द्रष्टव्या इति, सर्वशब्दस्य च प्रकारकात्स्न्यर्याभिधायकत्वाद् येन केनचित् प्रकारेण आमम्–अपरिशुद्धं पूति वा भवति तत्सर्वं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया 'निरामगन्धः' निर्गतावामगन्धौ यस्मात्स तथा 'परिव्रजेत्' मोक्षमार्गे ज्ञानदर्शनचारित्राख्ये परिः–समन्ताद्गच्छेत् संयमानुष्ठानं सम्यगनुपालयेदितियावत् । आमग्रहणेन प्रतिषिद्धेऽपि क्रीतकृते तथाप्यल्पसत्त्वानां विशुद्धकोट्यालम्बनतया मा भूत्तत्र प्रवृत्तिरतस्तदेव नामग्राहं प्रतिषिषेधिषुराह—

अदिस्समाणे कयविक्कयेसु, से ण किणे न किणावए किणंतं न समणुजाणइ, से भिक्खू कालन्ने बालन्ने मायन्ने खेयन्ने खणयन्ने विणयन्ने ससमयपरसमयन्ने भावन्ने परिग्गहं अममायमाणे कालाणुट्ठाई अपडिण्णे (सू० ८८)

भोगी भवतीति, आह च—'से ण किणे' इत्यादि, 'स'मुमुक्षुरकिञ्चनो धर्म्मोपकरणमपि न क्रीणीयात् स्वतो नाप्यपरेण क्रापयेत् क्रीणन्तमपि न समनुजानीयाद्, अथवा निरामगन्धः परिव्रजेदित्यत्रामग्रहणेन हननकोटित्रिकं गन्धग्रहणेन पचनकोटित्रिकं क्रयणकोटित्रिकं तु पुनः स्वरूपेणैवोपात्तम्, अतो नवकोटिपरिशुद्धमाहारं विगताङ्गारधूमं भुञ्जीत, एतद्गुणविशिष्टश्च किंभूतो भवतीत्याह—'से भिक्खू कालन्ने' कालः–कर्त्तव्यावसरस्तं जानातीति कालज्ञः–विदितवेद्यः, तथा 'बालण्णे' बलज्ञः बलं जानातीति बलज्ञः, छान्दसत्वाद्दीर्घत्वं, आत्मबलं सामर्थ्यं जानातीति यथाशक्त्यनुष्ठानविधायी, अनिगूहितबलवीर्य इत्यर्थः, तथा 'मायन्ने' यावद्द्रव्योपयोगिता मात्रा तां जानातीति तज्ज्ञः, तथा 'खेयन्ने' खेदः–अभ्यासस्तेन जानातीति खेदज्ञः अथवा खेदः–श्रमः संसारपर्यटनजनितस्तं जानातीति, उक्तं च—"जरामरणदौर्गत्यव्याधयस्तावदासताम् । मन्ये जन्मैव धीरस्य, भूयो भूयस्त्वपाकरम् ॥ १ ॥" इत्यादि, अथवा 'क्षेत्रज्ञः' संसक्तविरुद्धद्रव्यपरिहार्यकुलादिक्षेत्रस्वरूपपरिच्छेदकः, तथा 'खणयन्ने' क्षण एव क्षणकः–अवसरो भिक्षार्थमुपसर्पणादिकस्तं जानातीति, तथा 'विणयन्ने' विनयो–ज्ञानदर्शनचारित्रौपचारिकरूपस्तं जानातीति, तथा 'ससमयपरसमयण्णे' स्वसमयपरसमयौ जानातीति, स्वसमयज्ञो गोचरप्रदेशादौ पृष्टः सन् सुखेनैव भिक्षादोषानाचष्टे, तद्यथा–षोडशोद्गमदोषाः, ते चामी–आधाकर्म्म १ औद्देशिकं २ पूतिकर्म्म ३ मिश्रजातं ४ स्थापना ५ प्राभृतिका ६ प्रकाशकरणं ७ क्रीतं ८ उद्यतकं ९ परिवर्त्तितं १० अभ्याहृतं ११ उद्भिन्नं १२ मालापहृतं १३ आच्छेद्यं १४ अनिसृष्टं १५ अध्यवपूरकश्चेति १६ । षोडशोत्पादनदोषाः, ते चामी–धात्रीपिण्डः १ दूतीपिण्डः २ निमित्तपिण्डः ३ आजीवपिण्डः ४

वनीपकपिण्डः ५ चिकित्सापिण्डः ६ क्रोधपिण्डः ७ मानपिण्डः ८ मायापिण्डः ९ लोभपिण्डः १० पूर्वसंस्तवपिण्डः ११ पश्चात्संस्तवपिण्डः १२ विद्यापिण्डः १३ मन्त्रपिण्डः १४ चूर्णयोगपिण्डः १५ मूलकर्म्मपिण्डश्चेति १६ । तथा दशैषणादोषाः, ते चामी–शङ्कित १ म्रक्षित २ निक्षिप्त ३ पिहित ४ संहृत ५ दायको ६ न्मिश्रा ७ ऽपरिणत ८ लिप्तो ९ ज्झित-१० दोषाः । एषां चोद्गमदोषा दातृकृता एव भवन्ति, उत्पादनादोषास्तु साधुजनिताः, एषणादोषाश्चोभयोत्पादिता इति । तथा परसमयज्ञो ग्रीष्ममध्याह्नतीव्रतरतरणिकरनिकरावलीढगलत्स्वेदबिन्दुकः क्लिन्नवपुष्कः साधुः केनचिद् धिग्जातिदेश्येनाभिहितः–किमिति भवतां सर्वजनाचीर्णं स्नानं न सम्मतमिति ?, स आह–प्रायः सर्वेषामेव यतीनां कामाङ्गत्वाज्जलस्नानं प्रतिषिद्धं, तथा चार्षम्—"स्नानं मददर्पकरं, कामाङ्गं प्रथमं स्मृतम् । तस्मात्कामं परित्यज्य, नैव स्नान्ति दमे रताः ॥ १ ॥" इत्यादि, तदेवमुभयज्ञस्तद्विषये प्रश्ने उत्तरदानकुशलो भवति, तथा 'भावन्ने' भावः–चित्ताभिप्रायो दातुः श्रोतुर्वा तं जानातीति भावज्ञः, किं च—'परिग्गहं अममायमाणे' परिगृह्यत इति परिग्रहः–संयमातिरिक्तमुपकरणादिः तममममीकुर्वन्–अस्वीकुर्वन् मनसाऽप्यनाददान इतियावत्, स एवंविधो भिक्षुः कालज्ञो बलज्ञो मात्रज्ञः क्षेत्रज्ञः खेदज्ञो क्षणज्ञः विनयज्ञः समयज्ञो भावज्ञः परिग्रहममीकुर्वाणश्च किंभूतो भवतीत्याह—'कालाणुट्ठाई' यद्यस्मिन् काले कर्त्तव्यं तत्तस्मिन्नेवानुष्ठातुं शीलमस्येति कालानुष्ठायी–कालानतिपातकर्त्तव्योद्यतो, ननु चास्यार्थस्य 'से भिक्खू कालन्ने' इत्यनेनैव गतार्थत्वात् किमर्थं पुनरभिधीयते इति ?, नैष दोषः, तत्र हि ज्ञपरिज्ञैव केवलाऽभिहिता, कर्त्तव्यकालं जानाति, इह पुनरासेवनापरिज्ञा कर्त्तव्यकाले कार्यं विधत्त इति । किं च–'अपडिण्णे' नास्य प्रतिज्ञा विद्यते इत्यप्रतिज्ञः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिज्ञा च कषायोदयादविरस्ति, तद्यथा–क्रोधोदयात् स्कन्दाचार्येण स्वशिष्ययन्त्रपीलनव्यतिकरमालोक्य सबलवाहन-राजधानीसमन्वितपुरोहितोपरि विनाशप्रतिज्ञाऽकारि, तथा मानोदयात् बाहुबलिना प्रतिज्ञा व्यधायि–कथमहं शिशून् स्वभ्रातॄनुत्पन्ननिरावरणज्ञानांश्छद्मस्थः सन् द्रक्ष्यामीति ?, तथा मायोदयात् मल्लिस्वामिजीवेन यथाऽपरयतिविप्रलम्भनं भवति तथा प्रत्याख्यानपरिज्ञा जगृहे, तथा लोभोदयाच्चाविदितपरमार्थाः साम्प्रतेक्षिणो यत्याभासा मासक्षपणादिका अपि प्रतिज्ञाः कुर्वते, अथवा अप्रतिज्ञः–अनिदानो वसुदेववत् संयमानुष्ठानं कुर्वन् निदानं न करोतीति, अथवा गोचरादौ प्रविष्टः सन्नाहारादिकं ममैवैतद्भविष्यतीत्येवं प्रतिज्ञां न करोतीत्यप्रतिज्ञो, यदिवा स्याद्वादप्रधानत्वान्मौनीन्द्रागमस्यैकपक्षावधारणं प्रतिज्ञा तद्रहितोऽप्रतिज्ञः, तथाहि–मैथुनविषयं विहायान्यत्र न क्वचिन्नियमवती प्रतिज्ञा विधेया, यत उक्तम्—"नेव य किंचि अणुण्णायं पडिसिद्धं वावि जिणवरिंदेहिं । मोत्तुं मेहुणभावं न तं विणा रागदोसेहिं ॥ १ ॥ तथा

१ नापि किञ्चिदकल्पनीयमनुज्ञातं कारणे च समुत्पन्ने नापि किञ्चित् प्रतिषिद्धं, किन्तु एषा तेषां तीर्थकृतां निश्चयव्यवहारनयद्वयाश्रिता सम्यगाज्ञा मन्तव्या यदुत कार्ये ज्ञानाद्यालम्बने सत्येन सद्भावसारेण साधुना भवितव्यं, न मातृस्थानतो यत्किञ्चिदालम्बनीयमित्यर्थः, तात्त्विकज्ञानाद्यालम्बनसिध्यैव मोक्षपथसिद्धेर्मोक्षानुष्ठानस्य अनेकान्तिकत्वादनात्यन्तिकत्वाच्च, इत्थमेव तस्य द्रव्यत्वसिद्धेः, अथवा सत्यं नाम संयमस्तेन कार्ये समुत्पन्ने भवितव्यं, यथा यथा संयम उपसर्पति तथा तथा कर्त्तव्यं, तदुत्सर्पणं च शक्त्यनिगूहनेनैव निर्वहतीति, सर्वत्र यथाशक्ति यतितव्यमेवेति भावः, आह च बृहद्भाष्यकारः—"कज्जं नाणादीयं सच्चं पुण होइ संजमो नियमा । जह जह सोहेइ चरणं तह तह कायव्वयं होइ ॥१॥" दोषा रागादयो निरुध्यन्ते–सन्तोऽप्यप्रवृत्तिमन्तो जायन्ते येनानुष्ठानविशेषेण पूर्वकर्माणि प्राग्-भवोपात्तज्ञानावरणादिकर्म्माणि च येन क्षीयन्ते स सोऽनुष्ठानविशेषो मोक्षोपायो ज्ञातव्यः, रोगावस्थासु–ज्वरादिरोगप्रकारेषु शमनमिवोचितौषधप्रदानापथ्यपरिहारा-यनुष्ठानमिव, यथा तेन विधीयमानेन ज्वरादिरोगः क्षयमुपगच्छति, एवमुत्सर्गे उत्सर्गमपवादे चापवादं समाचरतो रागादयो निरुध्यन्ते पूर्वकर्म्माणि च क्षीयन्ते,

आ.सू. २१

श्रीआचाराङ्गवृत्तिः (शी०)

॥ १३३ ॥

"दोसा जेण निरुज्झंति जेण जिज्झंति पुव्वकम्माइं । सो सो मुक्खोवाओ, रोगावत्थासु समणं व ॥ २ ॥ जे जत्तिया उ हेऊ भवस्स ते चेव तत्तिया मुक्खे । गणणाइया लोया दुण्हवि पुण्णा भवे तुल्ला ॥ ३ ॥" इत्यादि । 'अयंसन्धी-त्यारभ्य काले अणुट्ठाइ'त्ति यावदेतेभ्यः सूत्रेभ्य एकादश पिण्डैषणा निर्यूढा इति । एवं तर्ह्यप्रतिज्ञ इत्यनेन सूत्रेणेद-मापन्नं–न क्वचित्केनचित्प्रतिज्ञा विधेया, प्रतिपादिताश्चागमे नानाविधा अभिग्रहविशेषाः, ततश्च पूर्वोत्तरव्याहतिरिव लक्ष्यत इत्यत आह—

लोक-वि.२

उद्देशकः ५

॥ १३३ ॥

दुहओ छेत्ता नियाइ, वत्थं पडिग्गहं कंबलं पायपुंछणं उग्गहणं च कडासणं एएसु चेव जाणिज्जा (सू० ८९)

'द्विधे'ति रागेण द्वेषेण वा या प्रतिज्ञा तां छित्त्वा निश्चयेन नियतं वा याति नियाति ज्ञानदर्शनचारित्राख्ये मोक्ष-मार्गे संयमानुष्ठाने वा भिक्षाद्यर्थं वा, एतदुक्तं भवति–रागद्वेषौ छित्त्वा प्रतिज्ञा गुणवती, व्यत्यये व्यत्यय इति, स एवम्भूतो भिक्षुः कालज्ञो बलज्ञो यावद्विधा छिन्दन् किं कुर्यादित्याह—'वत्थं पडिग्गहं इत्यादि यावत् एएसु चेव

अथवा यथा कस्यापि रोगिणोऽधिकृतपथ्यौषधादिकं प्रतिषिध्यते कस्यापि पुनस्तदेवानुज्ञायते, एवमत्रापि यः समर्थस्तस्याकल्पमन्यस्य तु तदेवानुज्ञायते, तथोक्तं भिक्षुवरणाध्ये–"उत्पद्यते हि साऽवस्था, देशकालामयान् प्रति । यस्यामकार्यं कार्यं स्यात्, कर्मकार्यं च वर्जये ॥ १ ॥" इति. । २ नैव किञ्चिदनुज्ञातं प्रतिषिद्धं वापि जिनवरेन्द्रैः । मुक्त्वा मैथुनभावं न तद् विना रागद्वेषाभ्याम् ॥ १ ॥ दोषा येन निरुध्यन्ते येन क्षीयन्ते पूर्वकर्माणि । स स मोक्षोपायो रोगावस्थासु समनमिव ॥ २ ॥ ये यावन्तो हेतवो भवस्य तं एव तावन्तो मोक्षस्य । गणनातीता लोका द्वयोरपि पूर्णा भवेयुस्तुल्याः ॥ ३ ॥

जाणेज्जा' एतेषु पुत्राद्यर्थमारम्भप्रवृत्तेषु सन्निधिसन्निचयकरणोद्यतेषु जानीयात्–शुद्धाशुद्धतया परिच्छिन्द्यात्, परिच्छेद-श्चैवमात्मकः–शुद्धं गृह्णीयादशुद्धं परिहरेदितियावत्, किं तद्विजानीयात् ?–वस्त्रं वस्त्रग्रहणेन वस्त्रैषणा सूचिता, तथा पतद्ग्रहं–पात्रम्, एतद्ग्रहणेन च पात्रैषणा सूचिता, कम्बलमित्यनेनाऽऽविकः पात्रनिर्योगः कल्पश्च गृह्यते, पादपुञ्छनकमित्य-नेन च रजोहरणमिति, एभिश्च सूत्रैरोघोपधिरौपग्रहिकश्च सूचितः, तथैतेभ्य एव वस्त्रैषणा पात्रैषणा च निर्यूढा, तथा अवगृह्यत इत्यवग्रहः, स च पञ्चधा–देवेन्द्रावग्रहः १ राजावग्रहः २ गृहपत्यवग्रहः ३ शय्यातरावग्रहः ४ साधर्मिका-वग्रहश्चेति, अनेन चावग्रहप्रतिमाः सर्वाः सूचिताः, अत एवासौ निर्यूढाः, अवग्रहकल्पिकश्चास्मिन्नेव सूत्रे कल्प्यते, तथा कटासनं, कटग्रहणेन संस्तारो गृह्यते, आसनग्रहणेन चासन्दकादिविष्टरमिति, आस्यते–स्थीयते अस्मिन्निति वाऽऽ-सनं–शय्या, ततश्च आसनग्रहणेन शय्या सूचिता, अत एव निर्व्यूढेति । एतानि च सर्वाण्यपि वस्त्रादीन्याहारादीनि चैतेषु स्वारम्भप्रवृत्तेषु गृहस्थेषु जानीयात्, सर्वामगन्धं परिज्ञाय निरामगन्धो यथा भवति तथा परिव्रजेरिति भावार्थः । एतेषु च स्वारम्भप्रवृत्तेषु गृहस्थेषु परिव्रजन् यावल्लाभं गृह्णीयादुत कश्चिन्नियमोऽप्यस्तीत्याह—

लद्धे आहारे अणगारो मायं जाणिज्जा, से जहेयं भगवया पवेइयं, लाभुत्ति न मज्जिज्जा, अलाभुत्ति न सोइज्जा, बहुंपि लद्धुं न निहे, परिग्गहाओ अप्पाणं अवसक्किज्जा (सू०९०)

'लब्धे' प्राप्ते सत्याहारे, आहारग्रहणं चोपलक्षणार्थम् अन्यस्मिन्नपि वस्त्रौषधादिके 'अनगारः' भिक्षुः 'मात्रां जानी-यात्' यावन्मात्रेण गृहीतेन गृहस्थः पुनरारम्भे न प्रवर्त्तते यावन्मात्रेण चात्मनो विवक्षितकार्यनिष्पत्तिर्भवति तथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतां मात्रामवगच्छेदिति भावः, एतच्च स्वमनीषिकया नोच्यत इत्यत आह—'से जहेयं' इत्यादि, तद्यथा—इदमुद्देशकादेरारभ्यानन्तरसूत्रं यावद्भगवता—ऐश्वर्यादिगुणसमन्वितेनार्द्धमागधया भाषया सर्वस्वभाषानुगतया सदेवमनुजायां परिषदि केवलज्ञानचक्षुषाऽवलोक्य 'प्रवेदितं' प्रतिपादितं, सुधर्मस्वामी जम्बूस्वामिने इदमाचष्टे । किं चान्यत्—'लाभो'त्ति इत्यादि, लाभो वस्त्राहारादेर्मम संवृत्त इत्यतोऽहो ! अहं लब्धिमानित्येवं मदं न विदध्यात्, न च तदभावे शोकाभिभूतो विमनस्को भूयादिति, आह च—'अलाभो'त्ति इत्यादि, अलाभे सति शोकं न कुर्यात्, कथं ?—धिग्मां मन्दभाग्योऽहं येन सर्वदानोद्यतादपि दातुर्न लभेऽहमिति, अपि तु तयोर्लाभालाभयोर्माध्यस्थ्यं भावनीयमिति, उक्तं च—"लभ्यते लभ्यते साधु, साधुरेव न लभ्यते । अलब्धे तपसो वृद्धिर्लब्धे तु प्राणधारणम् ॥ १ ॥" इत्यादि, तदेवं पिण्डपात्रवस्त्राणामेषणाः प्रतिपादिताः, साम्प्रतं सन्निधिप्रतिषेधं कुर्वन्नाह—'बहुंपी'त्यादि, 'बहुंपि' बहूपि लब्ध्वा 'न निहे'त्ति न स्थापयेत्—न सन्निधिं कुर्यात्, स्तोकं तावन्न सन्निधीयत एव, बहूपि न सन्निदध्यादित्यपिशब्दार्थः, न केवलमाहारसन्निधिं न कुर्याद्, अपरमपि वस्त्रपात्रादिकं संयमोपकरणातिरिक्तं न बिभृयादिति, आह—'परि' इत्यादि, परिगृह्यत इति परिग्रहो—धर्मोपकरणातिरिक्तमुपकरणं तस्मादात्मानमपष्वष्केद्—अपसर्पयेद्, अथवा संयमोपकरणमपि मूर्छया परिग्रहो भवति, 'मूर्च्छा परिग्रहः' (तत्त्वा० अ० ८ सू०) इतिवचनात्, तत आत्मानं परिग्रहादपसर्पयन्नुपकरणे तुरगवत् मूर्च्छां न कुर्यात्, ननु च यः कश्चिद्धर्मोपकरणाद्यपि परिग्रहो, न स चित्तकालुष्यमृते भवति, तथाहि—आत्मीयोपकारिणि राग उपघातकारिणि च द्वेषः, ततः परिग्रहे सति रागद्वेषौ नेदिष्ठौ, ताभ्यां च कर्मबन्धः, ततः कथं न परिग्रहो धर्मोपकरणम् ?, उक्तं च—"ममाहमिति चैष यावदभिमानदाहज्वरः, कृतान्तमुखमेव तावदिति न प्रशान्त्युन्नयः । यशःसुखपिपासितैरयमसावनर्थोत्तरैः, परैरपसदः कुतोऽपि कथमप्यपाकृष्यते ॥ १ ॥" नैष दोषः, न हि धर्मोपकरणे ममेदमिति साधूनां परिग्रहाग्रहयोगोऽस्ति, तथा ह्यागमः—"[1]अवि अप्पणोऽवि देहंमि, नायरंति ममाइउं", यदिह परिगृहीतं कर्मबन्धायोपकल्पते स परिग्रहो, यत्तु पुनः कर्मनिर्जरणार्थं प्रभवति तत्परिग्रह एव न भवतीति । आह च—

अन्नहा णं पासए परिहरिज्जा, एस मग्गे आयरिएहिं पवेइए, जहित्थ कुसले नोवलिंपिज्जासि त्तिबेमि (सू० ९१)

णमिति वाक्यालङ्कारे, 'अन्यथे'त्यनेन प्रकारेण पश्यकः सन् परिग्रहं परिहरेत्, यथा हि अविदितपरमार्था गृहस्थाः सुखसाधनाय परिग्रहं पश्यन्ति न तथा साधुः, तथाहि अयमस्याशयः—आचार्यसत्कमिदमुपकरणं न ममेति, रागद्वेषमूलत्वात् परिग्रहाग्रहयोगोऽत्र निषेध्यो, न धर्मोपकरणं, तेन विना संसारार्णवपारागमनादिति, उक्तं च—"साध्यं यथा कथञ्चित् स्वल्पं कार्यं महच्च न तथेति । प्लवनमृते न हि शक्यं पारं गन्तुं समुद्रस्य ॥ १ ॥" अत्र चार्हताभासैर्बोटिकैः सह महान्विवादोऽस्तीत्यतो विवक्षितमर्थं तीर्थकराभिप्रायेणापि सिसाधयिषुराह—'एस मग्गे' इत्यादि, धर्मोपकरणं न परिग्रहायेत्येषः—अनन्तरोक्तो मार्गः आराद्याताः सर्वहेयधर्मेभ्य इत्यार्याः—तीर्थकृतस्तैः 'प्रवेदितः' कथितो, न तु यथा बोटिकैः कुण्डिका तट्टिका लम्बणिका अश्ववालधिवालादि स्वरुचिविरचितो मार्ग इति, न वा यथा मौद्गलिस्वातिपुत्राभ्यां

१ अप्यात्मनोऽपि देहे नाचरन्ति ममायितुम्.

शौद्धोदनिं ध्वजीकृत्य प्रकाशितः, इत्यनया दिशा अन्येऽपि परिहार्या इति । इह तु स्वशास्त्रगौरवमुत्पादयितुमार्यैः प्रवेदित इत्युक्तम्, अस्मिंश्चार्यप्रवेदिते मार्गे प्रयत्नवता भाव्यमिति, आह च—'जहेत्थ' इत्यादि, लब्ध्वा कर्मभूमिं मोक्षपादपबीजभूतां च बोधिं सर्वसंवरचारित्रं च प्राप्य तथा विधेयं यथा 'कुशलो' विदितवेद्यः 'अत्र' अस्मिन्नार्यप्रवेदिते मार्गे आत्मानं पापेन कर्मणा नोपलिम्पयेत् इति । एवं चोपलिम्पनं भवति यदि यथोक्तानुष्ठानविधायित्वं न भवति, सतां चायं पन्था यदुत—यत्स्वयं प्रतिज्ञातं तदन्त्योच्छ्वासं यावद्विधेयमिति, उक्तं च—"लज्जां गुणौघजननीं जननीमिवार्यामत्यन्तशुद्धहृदयामनुवर्त्तमानाः । तेजस्विनः सुखमसूनपि सन्त्यजन्ति, सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ १ ॥" इतिशब्दोऽधिकारसमाप्त्यर्थो, 'ब्रवीमि' इति सोऽहं ब्रवीमि येन मया भगवत्पादारविन्दमुपासता अश्रावीति ॥ परिग्रहादात्मानमपसर्पयेदित्युक्तं, तच्च न निदानोच्छेदमन्तरेण, निदानं च शब्दादिपञ्चगुणानुगामिनः कामाः, तेषां चोच्छेदोऽसुकरो, यत आह—

कामा दुरतिक्कमा, जीवियं दुप्पडिवूहगं, कामकामी खलु अयं पुरिसे, से सोयइ जूरइ तिप्पइ परितप्पइ (सू० ९२)

कामा द्विविधाः—इच्छाकामा मदनकामाश्च, तत्रेच्छाकामा मोहनीयभेदहास्यरत्युद्भवाः, मदनकामा अपि मोहनीयभेदवेदोदयात् प्रादुष्यन्ति, ततश्च द्विरूपाणामपि कामानां मोहनीयं कारणं, तत्सद्भावे च न कामोच्छेद इत्यतो दुःखेनातिक्रमः—अतिलङ्घनं विनाशो येषां ते तथा, ततश्चेदमुक्तं भवति—न तत्र प्रमादवता भाव्यं । न केवलमत्र जी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वितेऽपि न प्रमादवता भाव्यमिति, आह च—'जीवियं' इत्यादि, जीवितम्–आयुष्कं तत् क्षीणं सत् 'दुष्प्रतिबृंहणीयं' दुरभावार्थे, नैव वृद्धिं नीयते इतियावत्, अथवा जीवितं–संयमजीवितं तद्दुष्प्रतिबृंहणीयं, कामानुषक्तजनान्तर्वर्त्तिना दुःखेन वृद्धिं नीयते, दुःखेन निष्प्रत्यूहः संयमः प्रतिपाल्यते इति, उक्तं च—"आगासे गंगसोउव्व, पडिसोउव्व दुत्तरो। बाहाहिं चेव गंभीरो, तरिअव्वो महोअही ॥ १ ॥ वालुगाकवलो चेव, निरासाए हु संजमो। जवा लोहमया चेव, चावेयव्वा सुदुक्करं ॥ २ ॥" इत्यादि, येन चाभिप्रायेण कामा दुरतिक्रमा इति प्रागभ्यधायि तमभिप्रायमाविष्कुर्वन्नाह—'कामकामी' इत्यादि, कामान् कामयितुम्–अभिलषितुं शीलमस्येति कामकामी 'खलुः' वाक्यालङ्कारे 'अयम्' इत्यध्यक्षः 'पुरुषः' जन्तुः। यस्त्वेवंविधोऽविरतचेताः कामकामी स नानाविधान् शारीरमानसान् दुःखविशेषाननुभवतीति दर्शयति—'से सोयई'त्यादि, 'स' इति कामकामी ईप्सितस्यार्थस्याप्राप्तौ तद्वियोगे च स्मृत्यनुषङ्गः शोकस्तमनुभवति अथवा शोचत इति काममहाज्वरगृहीतः सन् प्रलपतीति, उक्तं च—"गते प्रेमाबन्धे प्रणयबहुमाने च गलिते, निवृत्ते सद्भावे जन इव जने गच्छति पुरः। तमुल्लेक्ष्योल्लेक्ष्य प्रियसखि! गतांस्तांश्च दिवसान्, न जाने को हेतुर्दलति शतधा यन्न हृदयम्? ॥ १ ॥" इत्यादि शोचते, तथा 'जूरइ'त्ति हृदयेन खिद्यते, तद्यथा—"प्रथमतरमथेदं चिन्तनीयं तवासीद्बहुजनदयितेन प्रेम कृत्वा जनेन। हृतहृदय! निराश! क्लीब! संतप्यसे किं?, न हि जडगततोये सेतुबन्धाः क्रियन्ते ॥ १ ॥"

१ आकाशे गङ्गास्रोत इव, प्रतिस्रोत इव दुस्तरः। बाहुभ्यामेव गम्भीरस्तरीतव्यो महोदधिः ॥ १ ॥ वालुकाकवल इव, निरास्वाद एव संयमः। यवा लोहमया एव, चर्वयितव्याः सुदुष्करम् ॥ २ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १३६ ॥

इत्येवमादि, तथा 'तिप्पइ'त्ति 'तिपृ तेपृ प्रक्षरणार्थौ' तेपते–क्षरति सञ्चलति मर्यादातो भ्रश्यति निर्मर्यादो भवतीतियावत्, तथा शारीरमानसैर्दुःखैः पीड्यते, तथा परिः–समन्ताद्बहिरन्तश्च तप्यते परितप्यते, पश्चात्तापं वा करोति, यथेष्टे पुत्रकलत्रादौ कोपात् क्वचिद्गते स मया नानुवर्त्तित इति परितप्यते, सर्वाणि चैतानि शोचनादीनि विषयविषावष्टब्धान्तःकरणानां दुःखावस्थासंसूचकानि, अथवा शोचत इति यौवनधनमदमोहाभिभूतमानसो विरुद्धानि निषेव्य पुनर्वयःपरिणामेन मृत्युकालोपस्थानेन वा मोहापगमे सति किं मया मन्दभाग्येन पूर्वमशेषशिष्टाचीर्णः सुगतिगमनैकहेतुर्दुर्गतिद्वारपरिघो धर्म्मो नाचीर्णः? इत्येवं शोचत इति, उक्तं च—"भविष्यन्तीं भूतानां परिणतिमनालोच्य नियतां, पुरा यद्यत् किञ्चिद्विहितमशुभं यौवनमदात्। पुनः प्रत्यासन्ने महति परलोकैकगमने, तदेवैकं पुंसां व्यथयति जराजीर्णवपुषाम् ॥ १ ॥" तथा जूरतीत्यादीन्यपि स्वबुद्ध्या योजनीयानि, उक्तं च—"सगुणमपगुणं वा कुर्वता कार्यजातं, परिणतिरवधार्या यत्नतः पण्डितेन। अतिरभसकृतानां कर्म्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ १ ॥" इत्यादि ॥ कः पुनरेवं न शोचत इत्याह—

लोक.वि २ उद्देशकः ५

आययचक्खू लोगविपस्सी लोगस्स अहो भागं जाणइ उड्ढं भागं जाणइ तिरियं भागं जाणइ, गड्ढिए लोए अणुपरियट्टमाणे, संधिं विइत्ता इह मच्चिएहिं, एस वीरे पसंसिए जे बद्धे पडिमोयए जहा अंतो तहा बाहिं जहा बाहिं तहा अंतो, अंतो अंतो पूइ देहंतराणि पासइ पुढोवि सवंताइं पंडिए पडिलेहाए (सू० ९३)

॥ १३६ ॥

आयतं–दीर्घमैहिकामुष्मिकापायदर्शि चक्षुः–ज्ञानं यस्य स आयतचक्षुः, कः पुनरित्येवंभूतो भवति? यः कामानेकान्तेनानर्थभूयिष्ठान् परित्यज्य शमसुखमनुभवति, किं च—'लोगविपस्सी' लोकं विषयानुषङ्गावेशात्तदुःखातिशयं तथा त्यक्तकामावाप्तप्रशमसुखं विविधं द्रष्टुं शीलमस्येति लोकविदर्शी, अथवा लोकस्य ऊर्ध्वाधस्तिर्यग्भागगतिकारणायुष्कसुखदुःखविशेषान् पश्यतीति, एतदर्शयति—'लोगस्स' इत्यादि, लोकस्य–धर्माधर्मास्तिकायावच्छिन्नाकाशखण्डस्याधोभागं जानातीति–स्वरूपतोऽवगच्छति, इदमुक्तं भवति–येन कर्म्मणा तत्रोत्पद्यन्तेऽसुमन्तः यादृक् तत्र सुखदुःखविपाको भवति तं जानाति, एवमूर्ध्वतिर्यग्भागयोरपि वाच्यं, यदिवा लोकविदर्शीति–कामार्थमर्थोपार्जनप्रसक्तं गृद्धमध्युपपन्नं लोकं पश्यतीति। एतदेव दर्शयितुमाह—'गड्ढिए' इत्यादि, अयं हि लोको 'गृद्धः' अध्युपपन्नः कामानुषङ्गे तदुपाये वा तत्रैवानुपरिवर्त्तमानो भूयो भूयस्तदेवाचरंस्तज्जनितेन वा कर्म्मणा संसारचक्रेऽनुपरिवर्त्तमानः–पर्यटन्नायतचक्षुषो गोचरीभवन् कामाभिलाषनिवर्त्तनाय न प्रभवति?, यदिवा कामगृद्धान् संसारेऽनुपरिवर्त्तमानानसुमतः पश्येत्येवमुपदेशः, अपि च—'संधिं' इत्यादि, इह 'मर्त्येषु' मनुजेषु यो ज्ञानादिको भावसन्धिः, स च मर्त्येष्वेव सम्पूर्णो भवतीति मर्त्यग्रहणम्, अतस्तं विदित्वा यो विषयकषायादीन् परित्यजति स एव वीर इति दर्शयति–'एस' इत्यादि, 'एषः' अनन्तरोक्तः आयतचक्षुर्यथावस्थितलोकविभागस्वभावदर्शी भावसन्धेर्वेत्ता परित्यक्तविषयतर्षो वीरः कर्म्मविदारणात् 'प्रशंसितः' स्तुतः विदिततत्त्वैरिति। स एवंभूतः किमपरं करोतीति चेदित्याह—'जे बद्धे' इत्यादि, यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बद्धान् द्रव्यभावबन्धनेन स्वतो विमुक्तोऽपरानपि मोचयतीत्येतदेव द्रव्यभावबन्धनविमोक्षं वाक्योपन्यासेनाऽऽह—'जहा अंतो तहा बाहिं' इत्यादि, यथाऽन्तर्भावबन्धनमष्टप्रकारकर्मनिगडनं मोचयति एवं पुत्रकलत्रादि बाह्यमपि, यथा वा बाह्यं बन्धुबन्धनं मोचयति एवं मोक्षगमनविघ्नकारणमान्तरमपीति, यदिवा—कथमसौ मोचयतीति चेत्तत्त्वाविर्भावनेन, स्यादेतत्—तदेव किंभूतमित्याह—'जहा अंतो' इत्यादि, यथा स्वकायस्यान्तः-मध्ये अमेध्यकललपिशितासृक्पूत्यादिपूर्णत्वेनासारत्वमित्येवं बहिरप्यसारता द्रष्टव्या, अमेध्यपूर्णघटवदिति, उक्तं च—"यदि नामास्य कायस्य, यदन्तस्तद्बहिर्भवेत् । दण्डमादाय लोकोऽयं, शुनः काकांश्च वारयेत् ॥ १ ॥" इति, यथा वा बहिरसारता तथाऽन्तरपीति । किं च—'अन्तो अन्तो' इत्यादि, देहस्य मध्ये मध्ये पूत्यन्तराणि-पूतिविशेषान् 'देहान्तराणि' देहस्यावस्थाविशेषान्, इह मांसमिह रुधिरमिह मेदो मज्जा चेत्येवमादि पूतिदेहान्तराणि 'पश्यति' यथावस्थितानि परिच्छिन्नत्तीत्युक्तं भवति, यदिवा देहान्तराण्येवंभूतानि पश्यति—'पुढो' इत्यादि, 'पृथगपि' प्रत्येकमपि अपिशब्दात्कुष्ठाद्यवस्थायां यौगपद्येनापि स्रवन्ति नवभिः श्रोत्रोभिः कर्णाक्षिमलश्लेष्मलालाप्रश्रवणोच्चारादीन् तथाऽपरव्याधिविशेषापादितव्रणमुखपूतिशोणितरसिकादीनि चेति । यद्येतानि ततः किं ?—'पंडिए पडिलेहाए' एतान्येवंभूतानि गलच्छोतोव्रणरोमकूपानि 'पण्डितः' अवगततत्त्वः 'प्रत्युपेक्षेत' यथावस्थितमस्य स्वरूपमवगच्छेदिति, उक्तं च—"मंसट्ठिरु-

१ मांसास्थिरुधिरस्नाय्ववनद्धकलमषमेदमज्जाभिः । पूर्णे चर्मकोशे दुर्गन्धेऽशुचिबीभत्से ॥ १ ॥ संचारक(श्रवत्)यन्त्रगलद्वर्चोमूत्रान्तस्वेदपूर्णे । देहे भवेत् किं रागकारणं अशुचिदोषौ ॥ २ ॥

हिरण्हारुवणद्धकलमलयमेयमज्जासु । पुण्णंमि चम्मकोसे दुग्गंधे असुइबीभच्छे ॥ १ ॥ संचारिमजंतगलंतवच्चमुत्तंतसेअपुण्णंमि । देहे हुज्जा किं रागकारणं असुइहेउम्मि ? ॥ २ ॥" इत्यादि । तदेवं पूतिदेहान्तराणि पश्यन् पृथगपि स्रवन्तीत्येवं प्रत्युपेक्ष्य किं कुर्यादित्याह—

से मइमं परिन्नाय मा य हु लालं पच्चासी, मा तेसु तिरिच्छमप्पाणमावायए, कासंकासे खलु अयं पुरिसे, बहुमाई कडेण मूढे, पुणो तं करेइ लोहं वेरं वड्ढेइ अप्पणो, जमिणं परिकहिज्जइ इमस्स चेव पडिवूहणयाए, अमरा य महासड्ढी अट्टमेयं तु पेहाए अपरिण्णाए कंदइ (सू० ९४)

'स' पूर्वोक्तो यतिर्मतिमान्-श्रुतसंस्कृतबुद्धिर्यथावस्थितं देहस्वरूपं कामस्वरूपं च द्विविधयाऽपि परिज्ञया परिज्ञाय किं कुर्यादित्याह—'मा य हु' इत्यादि, 'मा' प्रतिषेधे चः समुच्चये हुर्वाक्यालङ्कारे, ललतीति लाला-अनुद्यन्मुखश्लेष्मसन्ततिः तां प्रत्यशितुं शीलमस्येति प्रत्याशी, वाक्यार्थस्तु यथा हि बालो निर्गतामपि लालां सदसद्विवेकाभावात् पुनरप्यश्नातीत्येवं त्वमपि लालावत्त्यक्त्वा मा भोगान् प्रत्यशान, वान्तस्य पुनरप्यभिलाषं मा कुर्वित्यर्थः । किं च—'मा तेसु तिरिच्छं' इत्यादि, संसारश्रोतांसि अज्ञानाविरतिमिथ्यादर्शनादीनि प्रतिकूलेन वा तिरश्चीनेन वाऽतिक्रमणीयानि, निर्वाणश्रोतांसि तु ज्ञानादीनि तत्रानुकूल्यं विधेयं, मा तेष्वात्मानं तिरश्चीनमापादयेः, ज्ञानादिकार्ये प्रतिकूलतां मा

विदध्याः, तत्राप्रमादवता भाव्यं, प्रमादवांश्चैव शान्तिं न लभते, यत आह—'कासंकासे' इत्यादि, यो हि ज्ञानादिश्रोतसि तिरश्चीनवर्त्ती भोगाभिलाषवान् स एवंभूतोऽयं पुरुषः सर्वदा किंकर्त्तव्यताकुल इदमहमकार्षमिदं च करिष्ये इत्येवं भोगाभिलाषक्रियाव्यापृतान्तःकरणो न स्वास्थ्यमनुभवति, खलुशब्दोऽवधारणे, वर्तमानकालस्यातिसूक्ष्मत्वादसंव्यवहारित्वमतीतानागतयोश्चेदमहमकार्षमिदं च करिष्य इत्येवमातुरस्य नास्त्येव स्वास्थ्यमिति, उक्तं च—"इदं तावत् करोम्यद्य, श्वः कर्त्ताऽस्मीति चापरम् । चिन्तयन्निह कार्याणि, प्रेत्यार्थं नावबुध्यते ॥ १ ॥" अत्र दधिघटिकाद्रमकदृष्टान्तो वाच्यः, स चायं—द्रमकः कश्चित् क्वचिन्महिषीरक्षणावाप्तदुग्धः तद्दधीकृत्य चिन्तयामास, ममातो घृतवेतनादि यावद्गार्या अपत्योत्पत्तिस्ततश्चिन्ता, कलहे पार्ष्णिप्रहारेणैव दधिघटिकाव्यापत्तिरित्येवंचिन्तामनोरथव्याकुलीकृतान्तःकरण इति तद्दध्यानयने शिरोविष्टलीकाचीवरे आदीयमाने इव शिरो विधूयास्फोटिता दधिघटिकेत्येवं यथा तेन न तद्दधि भक्षितं नापि कस्मैचित्पुण्याय दत्तम्, एवमन्योऽपि कासंकसः-किंकर्त्तव्यतामूढो निष्फलारम्भो भवतीति, अथवा कस्यतेऽस्मिन्निति कासः-संसारस्तं कषतीति-तदभिमुखो यातीति कासंकषः, यो ज्ञानादिप्रमादवान् वक्ष्यमाणो वेत्याह—'बहुमायी' कासंकषो हि कषायैर्भवति, तन्मध्यभूताया मायाया ग्रहणे तेषामपि ग्रहणं द्रष्टव्यमिति, ततः क्रोधी मानी मायी लोभीति द्रष्टव्यमिति । अपि च-'कडेण मूढं' करणं कृतं तेन मूढः-किंकर्त्तव्यताकुलः सुखार्थी दुःखमश्नुते इति, उक्तं हि—"सोउं सोवणकाले मज्जणकाले य मज्जिउं लोलो । जेमेउं च

१ स्वपितुं शयनकाले मज्जनकाले च मज्जितुं लोलः (चपलः) । जेमितुं च वराको जेमनकाले न शक्नोति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वराओ जेमणकाले न चाएइ ॥ १ ॥" अत्र मम्मणवणिग्दृष्टान्तो वाच्यः, स चैवं कासंकषः बहुमायी कृतेन मूढस्तत्करोति येनात्मनो वैरानुषङ्गो जायत इति, आह च—'पुणो तं करेई'त्यादि, मायावी परवञ्चनबुद्ध्या पुनरपि तत्—लोभानुष्ठानं तथा करोति येनात्मनो वैरं वर्द्धते, अथवा तं लोभं करोतीति—अर्जयति येन जन्मशतेष्वपि वैरं वर्द्धत इति, उक्तं च—"दुःखार्त्तः सेवते कामान्, सेवितास्ते च दुःखदाः। यदि ते न प्रियं दुःखं, प्रसङ्गस्तेषु न क्षमः ॥ १ ॥" किं पुनः कारणमसुमांस्तत्करोति येनात्मनो वैरं वर्द्धते ?, इत्याह—'जमिणं' इत्यादि, 'यदि'ति यस्मादस्यैव—विशरारोः शरीरकस्य परिबृंहणार्थं प्राणघातादिकाः क्रियाः करोतीति, ते च तेनोपहताः प्राणिनः पुनः शतशो घ्नन्ति, ततो मयेदं कथ्यते—कासंकषः खल्वयं पुरुषो बहुमायी कृतेन मूढः पुनस्तत्करोति येनात्मनो वैरं वर्द्धयतीति, यदिवा यदिदं मयोपदेशप्रायं पौनःपुन्येन कथ्यते तदस्यैव संयमस्य परिबृंहणार्थम्, इदं चापरं कथ्यते—'अमराय' इत्यादि, अमरायतेऽनमरः सन् द्रव्ययौवनप्रभुत्वरूपावसक्तोऽमर इवाचरति अमरायते, कोऽसौ ?—'महाश्रद्धी' महती चासौ श्रद्धा च महाश्रद्धा सा विद्यते भोगेषु तदुपायेषु वा यस्य स तथा. अत्रोदाहरणं—राजगृहे नगरे मगधसेना गणिका, तत्र कदाचिद्धनः सार्थवाहो महता द्रव्यनिचयेन समन्वितः प्रविष्टः, तद्रूपयौवनगुणगणद्रव्यसम्पदाक्षिप्तया मगधसेनयाऽसावभिसरितः, तेन चायव्ययाक्षिप्तमानसेनासौ नावलोकिताऽपि, अस्याश्चात्मीयरूपयौवनसौभाग्यावलेपान्महती दुःखासिकाऽभूत्, ततश्च तां परिम्लानवदनामवलोक्य जरासन्धेनाभ्यधायि—किं भवत्या दुःखासिका कारणं ?, केन वा सार्द्धमुषितेति, सा त्ववादीद्—अमरेणेति, कथमसावमर इत्युक्ते तया सद्भावः कथितो निरूपितश्च यावत्तथैवाद्या-

आ. सू. २४ श्रीआचाराङ्गवृत्तिः (शी०) ॥ १३९ ॥

प्यास्त इत्यतो भोगार्थिनोऽर्थे प्रसक्ता अजरामरवत्क्रियासु प्रवर्त्तन्त इति । यश्चामरायमाणः कामभोगाभिलाषुकः स किंभूतो भवतीत्याह—'अट्ट' इत्यादि, आर्त्तिः—शारीरमानसी पीडा तत्र भव आर्त्तस्तमार्त्तममरायमाणं कामार्थं महाश्रद्धावन्तं 'प्रेक्ष्य' दृष्ट्वा पर्यालोच्य वा कामार्थयोर्न मनो विधेयं इति, पुनरमरायमाणभोगश्रद्धावतः स्वरूपमुच्यते —'अपरिण्णाए' इत्यादि, कामस्वरूपं तद्विपाकं वा अपरिज्ञाय तत्र दत्तावधानः कामस्वरूपापरिज्ञया वा 'क्रन्दते' भोगेष्वप्राप्तनष्टेषु काङ्क्षाशोकावनुभवतीति, उक्तं च—"चिन्ता गते भवति साध्वसमन्तिकस्थे, मुक्ते तु तस्मिरधिका रमितेऽप्यवृप्तिः। द्वेषोऽन्यभाजि वञ्चवर्त्तिनि दग्धमानः, प्राप्तिः सुखस्य दयिते न कथञ्चिदस्ति ॥ १ ॥" इत्यादि। तदेवमनेकधा कामविपाकमुपदर्श्य उपसंहरति—

लोक.वि.२ उद्देशकः ५

॥ १३९ ॥

से तं जाणह जमहं बेमि, तेइच्छं पंडिए पवयमाणे से हंता छित्ता भित्ता लुंपइत्ता विलुंपइत्ता उद्दवइत्ता, अकडं करिस्सामित्ति मन्नमाणे, जस्सवि य णं करेइ, अलं बालस्स संगेणं, जे वा से कारइ बाले, न एवं अणगारस्स जायइ (सू० ९५) त्तिबेमि ॥

'से'त्ति तदर्थे तदपि हेत्वर्थे, यस्मात्कामा दुःखैकहेतवः तस्मात्त्वजानीत यदहं ब्रवीमि, मदुपदेशं कामपरित्यागविषयं कर्णे कुरुतेति भावार्थः। ननु च कामनिग्रहोऽत्र चिकीर्षितः, स चान्योपदेशादपि सिद्ध्यत्येवेत्येतदाशङ्क्याह—'तेइच्छं' इत्यादि, कामचिकित्सां 'पण्डितः' पण्डिताभिमानी ब्रवदन्नपरव्याधिचिकित्सामिवोपदिशन्नपरः—तीर्थिको जीवोपमर्दे वर्त्तत इति, आह—'से हंता' इत्यादि, 'स' इत्यविदिततत्त्वः कामचिकित्सोपदेशकः प्राणिनां हन्ता दण्डादिभिः छेत्ता कर्णादीनां भेत्ता शूलादिभिः लुम्पयिता ग्रन्थिच्छेदनादिना विलुम्पयिता अवस्कन्दादिना अपद्रावयिता प्राणव्यपरोपणादिना, नान्यथा कामचिकित्सा व्याधिचिकित्सा वा अपरमार्थदृशां सम्पद्यते, किं च—'अकृतं' यदपरेण न कृतं कामचिकित्सनं व्याधिचिकित्सनं वा तदहं करिष्य इत्येवं मन्यमानः हननादिकाः क्रियाः करोति, ताभिश्च कर्म्मबन्धः, अतो य एवंभूत उपदिशति यस्याप्युपदिश्यते उभयोरप्येतयोरपथ्यत्वादकार्यमिति, आह च—'जस्सवि य णं' इत्यादि, यस्याप्यसावेवंभूतां चिकित्सां करोति, न केवलं स्वस्येत्यपिशब्दार्थः, तयोर्ह्योरपि कर्तुः कारयितुश्च हननादिकाः क्रियाः, अतो 'अलं' पर्याप्तं 'बालस्य' अज्ञस्य 'सङ्गेन' कर्म्मबन्धहेतुना कर्तुरिति, योऽप्येतत् कारयति 'बालः' अज्ञस्तस्याप्यलमिति सण्टङ्कः, एतच्चैवम्भूतमुपदेशदानं विधानं वाऽवगततत्त्वस्य न भवतीत्याह—'न एवं' इत्यादि, एवम्भूतं प्राण्युपमर्देन चिकित्सोपदेशदानं करणं वा 'अनगारस्य' साधोः ज्ञातसंसारस्वभावस्य न जायते—न कल्पते, ये तु कामचिकित्सां व्याधिचिकित्सां वा जीवोपमर्देन प्रतिपादयन्ति ते बालाः—अविज्ञाततत्त्वाः, तेषां वचनमवधीरणीयमेवेति भावार्थः। इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववदिति लोकविजयस्य पञ्चमोद्देशकटीका समाप्तेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तः पञ्चमोद्देशकः, साम्प्रतं षष्ठ आरभ्यते, अस्य चायमभिसम्बन्धः–संयमदेहयात्रार्थं लोकमनुसरता साधुना लोके ममत्वं न कर्त्तव्यमित्युद्देशार्थाधिकारोऽभिहितः, सोऽधुना प्रतिपाद्यते–अस्य चानन्तरसूत्रसम्बन्धो वाच्यो 'नैवमनगारस्य जायत' इत्यभिहितम्, एतदेवात्रापि प्रतिपिपादयिषुराह—

से तं संबुज्झमाणे आयाणीयं समुट्ठाय तम्हा पावकम्मं नेव कुज्जा न कारवेज्जा (सू० ९६)

यस्यानगारस्यैतत्पूर्वोक्तं न जायते सोऽनगारस्तत्–प्राण्युपघातकारि चिकित्सोपदेशदानमनुष्ठानं वा संबुद्ध्यमानः–अवगच्छन् ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च परिहरन्नादातव्यम् आदानीयं तच्च परमार्थतो भावादानीयं ज्ञानदर्शनचारित्ररूपं तद् 'उत्थाये'त्यनेकार्थत्वादादाय–गृहीत्वा अथवा सोऽनगार इत्येतदादानीयं–ज्ञानाद्यपवर्गैककारणमित्येवं सम्यगवबुद्ध्यमानः सम्यक्संयमानुष्ठाननोत्थाय–सर्वं सावद्यं कर्म्म न मया कर्त्तव्यमित्येवं प्रतिज्ञामन्दरमारुह्य, क्त्वाप्रत्ययस्य पूर्वकालाभिधायित्वात् किं कुर्यादित्याह—'तम्हा' इत्यादि, यस्मात् संयमः सर्वसावद्यारम्भनिवृत्तिरूपः तस्मात्तमादाय पापं–पापहेतुत्वात् कर्म्म क्रियां न कुर्यात् स्वतो मनसाऽपि न समनुजानीयादित्यवधारणफलं, अपरेणापि न कारयेदिति, आह च—'न कारवे' इत्यादि, अपरेणापि कर्म्मकरादिना पापसमारम्भं न कारयेदित्युक्तं भवति, प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहक्रोधमानमायालोभरागद्वेषकलहाभ्याख्यानपैशून्यपरपरिवादारतिरतिमायामृषावादमिथ्यादर्शनशल्यरूपमष्टादशप्रकारं पापं कर्म्म स्वतो न कुर्यान्नाप्यपरेण कारयेदेवकाराच्चापरं कुर्वन्तं न समनुजानीयाद्योगत्रिकेणापि भावार्थः। स्यादेतत्–किमेकं प्राणातिपातादिकं पापं कुर्वतोऽपरमपि ढौकते आहोस्विन्नेत्याह—

सिया तत्थ एगयरं विप्परामुसइ छसु अन्नयरंमि, कप्पइ सुहट्ठी लालप्पमाणे, सएण दुक्खेण मूढे विप्परियासमुवेइ, सएण विप्पमाएण पुढो वयं पकुव्वइ, जंसिमे पाणा पव्वहिया, पडिलेहाए नो निकरणयाए, एस परिन्ना पवुच्चइ, कम्मोवसंती (सू० ९७)

'स्यात्तत्र' कदाचित्तत्र पापारम्भे 'एकतरं' पृथिवीकायादिसमारम्भं विपरामृशति–पृथिवीकायादिसमारम्भं करोति, एकतरं वाऽऽश्रवद्वारं परामृशति–आरभते स षट्स्वन्यतरस्मिन् कल्प्यते, यस्मिन्नेवालोच्यते तस्मिन्नेव प्रवृत्तो द्रष्टव्यः, इदमुक्तं भवति–पृथिवीकायादिषु षट्सु जीवनिकायेष्वाश्रवद्वारेषु वा मध्येऽन्यतरस्मिन्नपि प्रवर्त्तमानो यस्मिन्नेव पर्यालोच्यते तस्मिन्नेव कल्प्यते, सर्वस्मिन्नेव वर्त्तत इति भावार्थः। कथमन्यतरस्मिन् पृथिवीकायादिसमारम्भे वर्त्तमानोऽपरकायसमारम्भे सर्वपापसमारम्भे वा वर्त्तते इत्येवं मन्यते?, कुम्भकारशालोदकस्रावनदृष्टान्तेनैककायसमारम्भकोऽपरकायसमारम्भको भवति, अथवा प्राणातिपातास्रवद्वारविधटनादेकजीवातिपातादेककायातिपाताद्वा अपरजीवातिपाती द्रष्टव्यः, प्रतिज्ञालोपाच्चानृतो, न च तेन व्यापाद्यमानेनासुमताऽऽत्मा व्यापादकाय दत्तस्तीर्थकरेण चानुज्ञातोऽतः प्राणिनः प्राणान् गृह्णन्नदत्तग्राही, सावद्योपादानाच्च पारिग्राहिकः, परिग्रहाच्च मैथुनरात्रीभोजने अपि गृहीते, यतो नापरिगृहीतमुपभुज्यते परिभुज्यते चेत्यतोऽन्यतरारम्भे षण्णामप्यारम्भोऽथवा अनावृतचतुराश्रवद्वारस्य कथं चतुर्थषष्ठव्रतावस्थानं स्याद्?, अतः षट्स्वन्यतरस्मिन् प्रवृत्तः सर्वेष्वपि प्रवृत्त इति, अथवैकतरमपि पापसमारम्भं य आरभते स षट्स्वन्यतरस्मिन् कल्पते–योग्यो भवति, अकर्त्तव्यप्रवृत्तत्वाद्, अथवैकतरमपि यः पापारम्भं करोत्यसावष्टप्रकारं कर्म्मादाय षट्

स्वन्यतरस्मिन् कल्पते–प्रभवति, पौनःपुन्येनोत्पद्यत इत्यर्थः, स्यात्–किमर्थमेवंविधं पापकं कर्म्म समारभते?, तदुच्यते—'सुहट्ठी लालप्पमाणे' सुखेनार्थः सुखार्थः स विद्यते यस्यासाविति मत्वर्थीयः, स एवम्भूतः सन्नत्यर्थं लपति पुनः पुनर्वा लपति लालप्यते वाचा कायेन भावनवलग्नादिकाः क्रियाः करोति मनसा च तत्साधनोपायांश्चिन्तयति, तथाहि–सुखार्थी सन् कृष्यादिकर्म्मभिः पृथिवीं समारभते स्नानार्थमुदकं वितापनार्थमग्निं घर्मापनोदार्थं वायुं आहारार्थी वनस्पतिं त्रसकायं वेत्यसंयतः संयतो वा रससुखार्थी सञ्चित्तं लवणवनस्पतिफलादि गृह्णात्येवमन्यदपि यथासंभवमायोज्यं। स चैवं लालप्यमानः किंभूतो भवतीत्याह—'सएण'इत्यादि, यत्तदुक्षमन्यजन्मनि दुःखतरुकर्म्मबीजं तदात्मीयं दुःखतरुकार्यमाविर्भावयति, तच्च तेनैव कृतमित्यात्मीयमुच्यते, अतस्तेन स्वकीयेन 'दुःखेन' स्वकृतकर्म्मोदयजनितेन 'मूढः' परमार्थमजानानो 'विपर्यासमुपैति' सुखार्थी प्राण्युपघातकारणमारम्भमारभते, सुखस्य च विपर्यासो दुःखं तदुपैति, उक्तं च—"दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः। यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥ १ ॥" यदिवा 'मूढो' हिताहितप्राप्तिपरिहाररहितो विपर्यासमुपैति–हितमप्यहितबुद्ध्याऽधितिष्ठत्यहितं च हितबुद्ध्येति, एवं कार्याकार्यपथ्यापथ्यवाच्यावाच्यादिष्वपि विपर्यासो योज्यः, इदमुक्तं भवति–मोहोऽज्ञानं मोहनीयभेदो वा, तेनोभयप्रकारेणापि मोहेन मूढोऽल्पसुखकृते तत्तदारभते येन शारीरमानसदुःखव्यसनोपनिपातानामनन्तमपि कालं पात्रतां व्रजतीति। पुनरपि मूढस्यानर्थपरम्परां दर्शयितुमाह—'सएण' इत्यादि, स्वकीयेनात्मना कृतेन प्रमादेन–मद्यादिना 'विविध'मिति मद्यविषयकषायविकथानिद्राणां स्वभेदग्रहणं, तेन पृथग्–विभिन्नं अस्तं करोति, यदिवा पृथु विस्तीर्णं 'वय'मिति वयन्ति–पर्यटन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणिनः स्वकीयेन कर्म्मणा यस्मिन् स वधः—संसारस्तं प्रकरोति, एकैकस्मिन् काये दीर्घकालावस्थानाद्, यदिवा कारणे कार्योपचारात् स्वकीयेन नानाविधप्रमादकृतेन कर्म्मणा वधः—अवस्थाविशेषस्तमेकेन्द्रियादिकललार्बुदादितदहर्जातबालादिव्याधिगृहीतदारिद्र्यदौर्भाग्यव्यसनोपनिपातादिरूपं प्रकर्षेण करोति—विधत्त इति । तस्मिंश्च संसारेऽवस्थाविशेषे वा प्राणिनः पीड्यन्ते इति दर्शयितुमाह—'जंसिमे' इत्यादि, यस्मिन् स्वकृतप्रमादापादितकर्म्मविपाकजनिते चतुर्गतिकसंसारे एकेन्द्रियाद्यवस्थाविशेषे वा 'इमे' प्रत्यक्षगोचरीभूताः 'प्राणा'इत्यभेदोपचारात्प्राणिनः 'प्रव्यथिताः' नानाप्रकारैर्व्यसनोपनिपातैः पीडिताः, सुखार्थिभिरारम्भप्रवृत्तैर्मोहाद्विपर्यस्तैः प्रमादवद्भिश्च गृहस्थैः पाषण्डिकैर्यत्राभासैश्चेति वा । यदि नामात्र प्रव्यथिताः प्राणिनस्ततः किमित्याह—'पडि' इत्यादि, एतत् संसारचक्रवाले स्वकृतकर्म्मफलेश्वराणामसुमतां गृहस्थादिभिः परस्परतो वा कर्म्मविपाकतो वा प्रव्यथनं प्रत्युपेक्ष्य विदितवेद्यः साधुर्निश्चयेन नितरां वा नियतं वा क्रियन्ते नानादुःखावस्था जन्तवो येन तन्निकरणं निकारः—शारीरमानसदुःखोत्पादनं तस्मै नो कर्म्म कुर्याद्, येन प्राणिनां पीडोत्पद्यते तमारम्भं न विदध्यादिति भावार्थः । एवं च सति किं भवतीत्याह—'एस' इत्यादि, येयं सावद्ययोगनिवृत्तिरेषा परिज्ञा—एतत्त्वतः परिज्ञानं प्रकर्षेणोच्यते प्रोच्यते, न पुनः शैलूषस्येव ज्ञानं निवृत्तिफलरहितमिति । एवं द्विविधयाऽपि ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च प्राणिनिकारपरिहारे सति किं भवतीत्याह—'कम्मोवसंती'त्ति कर्म्मणाम्—अशेषद्वन्द्वव्रातात्मकसंसारतरुबीजभूतानामुपशान्तिः—उपशमः, कर्म्मक्षयः प्राणिनिकारक्रियानिवृत्तेर्भवतीत्युक्तं भवति । अस्य च कर्म्मक्षयप्रत्यूहस्य प्राणिनिकरणस्य मूलमात्मात्मीयग्रहः, तदपनोदार्थमाह—

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १४२ ॥

जे ममाइयमइं जहाइ से चयइ ममाइयं, से हु दिट्ठपहे मुणी जस्स नत्थि ममाइयं, तं परिन्नाय मेहावी विइत्ता लोगं वंता लोगसन्नं से मइमं परिक्कमिज्जासि त्तिबेमि॥

नारइं सहई वीरे, वीरे न सहई रतिं। जम्हा अविमणे वीरे, तम्हा वीरे न रज्जइ॥१॥(सू०९८)

लोक.वि.२ उद्देशकः ६

॥ १४२ ॥

ममायितं—मामकं तत्र मतिर्ममायितमतिस्तां यः परिग्रहविपाकज्ञो 'जहाति' परित्यजति स 'ममायितं' स्वीकृतं परिग्रहं 'जहाति' परित्यजति, इह द्विविधः परिग्रहो—द्रव्यतो भावतश्च, तत्र परिग्रहमतिनिषेधादान्तरो भावपरिग्रहो निषिद्धः, परिग्रहबुद्धिविषयप्रतिषेधाच्च बाह्यो द्रव्यपरिग्रह इति । अथवा काक्का नीयते, यो हि परिग्रहाध्यवसायकलुषितं ज्ञानं परित्यजति स एव परमार्थतः सबाह्याभ्यन्तरं परिग्रहं परित्यजति, ततश्चेदमुक्तं भवति—सत्यपि सम्बन्धमात्रे चित्तस्य परिग्रहकालुष्याभावान्नगरादिसम्बन्धः पृथ्वीसम्बन्धेऽपि जिनकल्पिकस्येव निष्परिग्रहतैव, यदि नामैवं ततः किमित्याह—'से हु' इत्यादि, यो हि मोक्षैकविघ्नहेतोः संसारभ्रमणकारणात् परिग्रहान्निवृत्ताध्यवसायः, हुः अवधारणे, स एव मुनिः दृष्टो ज्ञानादिको मोक्षपथो येन स दृष्टपथः, यदिवा दृष्टभयः—अवगतसप्तप्रकारभयः शरीरादेः परिग्रहात्साक्षात्तारम्पर्येण वा पर्यालोच्यमानं सप्तप्रकारमपि भयमापनीपद्यत इत्यतः परिग्रहपरित्यागे ज्ञातभयत्वमवसीयत इति । एतदेव पूर्वोक्तं स्पष्टयितुमाह—'जस्स' इत्यादि, यस्य 'ममायितं' स्वीकृतं परिग्रहो न विद्यते स दृष्टभयो मुनिरिति सम्बन्धः, किं च—'तं' इत्यादि, 'तं' पूर्वव्यावर्णितस्वरूपं परिग्रहं द्विविधयाऽपि परिज्ञया परिज्ञाय 'मेधावी' ज्ञात- ॥ १४२

ज्ञेयो विदित्वा 'लोकं' परिग्रहाग्रहयोगविपाकिनमेकेन्द्रियादिप्राणिगणं 'वान्त्वा' उद्गीर्य 'लोकस्य' प्राणिगणस्य संज्ञा दशप्रकारा अतस्तां 'स' इति मुनिः, किंभूतो?—'मतिमान्' सदसद्विवेकज्ञः 'पराक्रमेथाः' संयमानुष्ठाने समुद्यच्छेः, संयमानुष्ठानोद्योगं सम्यग्विदध्या इतियावद्, अथवाऽष्टप्रकारं कर्म्मारिषड्वर्गं वा विषयकषायान् वा पराक्रमस्वेति, इतिरधिकारसमाप्तौ, ब्रवीमीति पूर्ववत् । स एवं संयमानुष्ठाने पराक्रममाणस्त्यक्तपरिग्रहाग्रहयोगो मुनिः किंभूतो भवतीत्याह—तस्य हि त्यक्तगृहगृहिणीधनहिरण्यादिपरिग्रहस्य निष्किञ्चनस्य संयमानुष्ठानं कुर्वतः साधोः कदाचिन्मोहनीयोदयादरतिरविः स्यात्, तामुत्पन्नां संयमविषयां 'न सहते' न क्षमते, कोऽसौ?—विशेषेणेरयति—प्रेरयतीति अष्टप्रकारं कर्म्मारिषड्वर्गं वेति वीरः—शक्तिमान्, स एव वीरोऽसंयमे विषयेषु परिग्रहे वा या रतिरुत्पद्यते तां 'न सहते' न मर्षयति, या चारतिः संयमे विषयेषु च रतिस्ताभ्यां विमनीभूतः शब्दादिषु न रज्यति, अतो रत्यरतिपरित्यागान्न विमनस्को भवति नापि रागमुपयातीति दर्शयति-यस्मात्त्यक्तरत्यरतिरविमना वीरस्तस्मात् कारणाद्धीरो 'न रज्यति' शब्दादिविषयग्रामे न गार्द्धं विदधाति। यत एवं ततः किमित्याह—

सद्दे फासे अहियासमाणे निव्विंद नंदिं इह जीवियस्स। मुणी मोणं समायाय, धुणे कम्मसरीरगं ॥ २ ॥ पंतं लूहं सेवंति वीरा संमत्तदंसिणो। एस ओहंतरे मुणी तिन्ने मुत्ते विरए वियाहिए त्तिबेमि (सू० ९९)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १४३ ॥

यस्माद्धीरो रत्यरती निराकृत्य शब्दादिषु विषयेषु मनोज्ञेषु न रागमुपयाति, नापि दुष्टेषु द्वेषं, तस्माच्छब्दान् स्पर्शांश्च मनोज्ञेतरभेदभिन्नान् 'अहियासमाणे'त्ति सम्यक् सहमानो निर्विन्द नन्दीत्युत्तरसूत्रेण सम्बन्धः, एतदुक्तं भवति–मनोज्ञान् शब्दान् श्रुत्वा न रागमुपयाति, नापीतरान् द्वेष्टि, आद्यन्तग्रहणाच्चेतरेषामप्युपादानं द्रष्टव्यं, तत्राप्यतिसहनं विधेयमिति, उक्तं–"सद्देसु अ भद्दयपावएसु, सोयविसयमुवगएसु । तुट्ठेण व रुट्ठेण व समणेण सया न होअव्वं ॥ १ ॥ एवं रूवेसु अ भद्दयपावएसु० । तहा गंधेसु अ० ॥" इत्यादि वाच्यं, ततश्च शब्दादीन्विषयानतिसहमानः किं कुर्यादित्याह–'निर्विंद' इत्यादि, इहोपदेशगोचरापन्नो विनेयोऽभिधीयते, सामान्येन वा मुमुक्षोरयमुपदेशः, निर्विन्दस्व–जुगुप्सस्व ऐश्वर्यविभवात्मिका मनसस्तुष्टिर्नन्दिस्ताम् 'इह' मनुष्यलोके यज्जीवितमसंयमजीवितं वा तस्य या नन्दिः–तुष्टिः प्रमोदो यथा ममैतत्समुद्भवादिकमभूद्भवति भविष्यति वेत्येवंविकल्पजनितां नन्दीं जुगुप्सस्व–यथा किमनया पापोपादानहेतुभूतयाऽस्थिरयेति?, उक्तं च–विभव इति किं मदस्ते?, च्युतविभवः किं विषादमुपयासि?। करनिहितकन्दुकसमाः, पातोत्पाता मनुष्याणाम् ॥ १ ॥" एवं रूपबलादिष्वपि वाच्यं, सनत्कुमारदृष्टान्तेनेति, अथवा पञ्चानामप्यतीचाराणामतीतं निन्दति प्रत्युत्पन्नं संवृणोत्यनागतं प्रत्याचष्टे, स्यादेतत्–किमालम्ब्य करोतीत्याह–'मुणी' त्यादि, मुनिस्त्रिकालवेदी यतिरित्यर्थः, मुनेरयं मौनः–संयमो, यदिवा मुनेर्भावः मुनित्वं तदप्यसावेव मौनं वा वाचः संयमनम्, अस्य चोपलक्षणार्थत्वात् कायमनसोरपि, अतः सर्वथा संयममादाय, किं कुर्यात्?–धुनीयात् कर्म्मशरीरकं औदारिकादिश- ॥ १४३ ॥

१ शब्देषु च भद्रकपापकेषु श्रोत्रविषयमुपगतेषु । तुष्टेन वा रुष्टेन वा श्रमणेन सदा न भवितव्यम् ॥ १ ॥ एवं रूपेषु च भद्रकपापकेषु । तथा गन्धेषु च.

रीरं वा, अथवा 'धुनीहि' विवेचय पृथक्कुरु तदुपरि ममत्वं मा विधत्स्वेति भावार्थः । कथं तच्छरीरकं धूयते, ममत्वं वा तदुपरि न कृतं भवतीत्याह–'प्रान्तं' स्वाभाविकरसरहितं स्वल्पं वा 'रूक्षम्' आगन्तुकस्नेहादिरहितं द्रव्यतो भावतोऽपि प्रान्तं–द्वेषरहितं विगतधूर्मं रूक्षं–रागरहितमपगताङ्गारं 'सेवन्ते' भुञ्जते, के?–'वीराः' साधवः, किंभूताः?–'समत्वदर्शिनः' रागद्वेषरहिताः सम्यक्त्वदर्शिनो वा–सम्यक् तत्त्वं सम्यक्त्वं तद्दर्शिनः परमार्थदृशः, तथाहि–इदं शरीरकं कृतघ्नं निरुपकारि, एतत्कृते प्राणिनः ऐहिकामुष्मिककक्लेशभाजो भवन्ति, अनेकादेशे चैकादेश इतिकृत्वा, प्रान्तरूक्षसेवी समत्वदर्शी च कं गुणमवाप्नोतीत्याह–'एस' इत्यादि, एष इति प्रान्तरूक्षाहारसेवनेन कर्म्मादिशरीरं धुनानो भावतो भवौघं तरतीति । कोऽसौ?–'मुनिः' यतिः, अथवा क्रियमाणं कृतमितिकृत्वा तीर्ण एव भवौघं, कश्च भवौघं तरति?–यो 'मुक्तः' सबाह्याभ्यन्तरपरिग्रहरहितः, कश्च परिग्रहान्मुक्तो भवति?–यो भावतः शब्दादिविषयाभिष्वङ्गाद्विरतः, ततश्च यो मुक्तत्वेन विरतत्वेन वा विख्यातो मुनिः स एव भवौघं तरति, तीर्ण एवेति वा स्थितम् । इतिरधिकार परिसमाप्तौ, ब्रवीमीति पूर्ववत् । यश्च मुक्तत्वविरतत्वाभ्यां न विख्यातः स किंभूतो भवतीत्याह–

दुव्वसुमुणी अणाणाए, तुच्छए गिलाइ वत्तए, एस वीरे पसंसिए, अच्चेइ लोयसंजोगं, एस नाए पवुच्चइ (सू० १००)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १४४ ॥

वसु–द्रव्यमेतच्च भव्येऽर्थे व्युत्पादितं 'द्रव्यं च भव्य' इत्यनेन, भव्यश्च–मुक्तिगमनयोग्यः, ततश्च मुक्तिगमनयोग्यं यद्द्रव्यं तद्वसु, दुष्टं वसु दुर्वसु दुर्वसु चासौ मुनिश्च दुर्वसुमुनिः–मोक्षगमनायोग्यः, स च कुतो भवति?–अनाज्ञयातीर्थकरोपदेशशून्यः स्वैरीत्यर्थः, किमत्र तीर्थकरोपदेशे दुष्करं येन स्वैरित्वमभ्युपगम्यते?, तदुच्यते–उद्देशकादेरारभ्य सर्वं यथासम्भवमायोज्यं, तथाहि–मिथ्यात्वमोहिते लोके संबोद्धुं दुष्करं व्रतेष्वात्मानमध्यारोपयितुं रत्यरती निग्रहीतुं शब्दादिविषयेष्विष्टानिष्टेषु मध्यस्थतां भावयितुं प्रान्तरूक्षाणि भोक्तुम्, एवं यथोद्दिष्टया मौनीन्द्राज्ञया असिधारकल्पया दुष्करं सञ्चरितुं, तथाऽनुकूलप्रतिकूलांश्च नानाप्रकारानुपसर्गान् सोढुम्, असहने च कर्म्मोदयोऽनाद्यतीतकालसुखभावना च कारणं, जीवो हि स्वभावतो दुःखभीरुरनिरोधसुखप्रियः, अतो निरोधकल्पायामाज्ञायां दुःखं वसति, अवसंश्च किंभूतो भवतीत्याह–'तुच्छ' इत्यादि, तुच्छो-रिक्तः, स च द्रव्यतो निर्द्धनो घटादिर्वा जलादिरहितो भावतो ज्ञानादिरहितः, ज्ञानादिरहितो हि क्वचित्संशीतिविषये केनचित्पृष्टोऽपरिज्ञानात् ग्लायति वक्तुं, ज्ञानसमन्वितो वा चारित्ररिक्तः पूजासत्कारभयात् शुद्धमार्गप्ररूपणावसरे ग्लायति यथावस्थितं प्रज्ञापयितुं, तथाहि–प्रवृत्तसन्निधिः सन्निधेर्निर्दोषतामाचष्टे, एवमन्यत्रापीति । यस्तु कषायमहाविषागदकल्पभगवदाज्ञोपजीवकः स सुवसुर्मुनिर्भवत्यरिक्तो न ग्लायति च वक्तुं, यथावस्थितवस्तुपरिज्ञानादनुष्ठानाच्च, आह च–'एस' इत्यादि, 'एष' इति सुवसुमुनिर्ज्ञानाद्यरिक्तो यथावस्थितमार्गप्ररूपको वीरः कर्म्मविदारणात् 'प्रशंसितः' तद्विद्भिः श्लाघित इति । किं च–'अच्चेई'त्यादि, स एवं भगवदाज्ञानुवर्त्तको वीरोऽत्येति-अतिक्रामति, कं?–'लोकसंयोगं' लोकेनासंयतलोकेन संयोगः–सम्बन्धः ॥ १४४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ममत्वकृतस्तमत्ये ते, अथवा लोको बाह्योऽभ्यन्तरश्च, तत्र बाह्यो धनहिरण्यमातृपित्रादिः आन्तरस्तु रागद्वेषादिस्तत्कार्यं वा अष्टप्रकारं कर्म्म तेन सार्द्धं संयोगमत्येति–अतिलङ्घ्यतीत्युक्तं भवति । यदि नामैवं ततः किमित्याह—'एस' इत्यादि, योऽयं लोकसंयोगातिक्रमः 'एष न्यायः' एष सन्मार्गः मुमुक्षूणामयमाचारः 'प्रोच्यते' अभिधीयते, अथवा परम् आत्मानं च मोक्षं नयतीति छान्दसत्वात्कर्त्तरि घञ् नायः, यो हि त्यक्तलोकसंयोग एष एव परात्मनो मोक्षस्य न्यायः प्रोच्यते–मोक्षप्रापकोऽभिधीयते सदुपदेशात् । स्यादेतत्–किंभूतोऽसावुपदेश इत्यत आह—

जं दुक्खं पवेइयं इह माणवाणं तस्स दुक्खस्स कुसला परिन्नमुदाहरंति, इइ कम्मं परिन्नाय सव्वसो जे अणन्नदंसी से अणन्नारामे जे अणण्णारामे से अणन्नदंसी, जहा पुण्णस्स कत्थइ तहा तुच्छस्स कत्थइ जहा तुच्छस्स कत्थइ तहा पुण्णस्स कत्थइ (सू० १०१)

यद्दुःखं दुःखकारणं वा कर्म्म लोकसंयोगात्मकं वा 'प्रवेदितं' तीर्थकृद्भिरावेदितं 'इह' अस्मिन् संसारे 'मानवानां' जन्तूनां, ततः किं?–तस्य 'दुःखस्य' असातलक्षणस्य कर्मणो वा 'कुशला' निपुणा धर्म्मकथालब्धिसम्पन्नाः स्वसमयपरसमयविद उद्युक्तविहारिणो यथावादिनस्तथाकारिणो जितनिद्रा जितेन्द्रिया देशकालादिक्रमज्ञास्ते एवंभूताः परिज्ञाम्–उपादानकारणपरिज्ञानं निरोधकारणपरिच्छेदं चोदाहरन्ति ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च परिहरन्ति परिहारयन्ति च । किं च—'इति कम्मं' इत्यादि, इतिः पूर्वप्रक्रान्तपरामर्शको यत्तद्दुःखं प्रवेदितं मनुजानां यस्य च दुःखस्य परिज्ञां कुशला उदाहरन्ति तद्दुःखं कर्म्मकृतं तत्कर्म्माष्टप्रकारं परिज्ञाय तदाश्रवद्वाराणि च, तद्यथा–ज्ञानप्रत्यनीकतया ज्ञानावरणीयमित्यादि, प्रत्याख्यानपरिज्ञया प्रत्याख्याय तदाश्रवद्वारेषु 'सर्वशः' सर्वैः प्रकारैर्योगत्रिककरणत्रिकरूपैर्न वर्त्तेत, अथवा सर्वशः परिज्ञाय कथयति, सर्वशः परिज्ञानं च केवलिनो गणधरस्य चतुर्दशपूर्वविदो वा, यदिवा सर्वशः कथयति आक्षेपण्याद्या चतुर्विधया धर्मकथयेति । सा च कीदृक्कथेत्याह—'जे' इत्यादि, अन्यद्रष्टुं शीलमस्येत्यन्यदर्शी यस्तथा नासावनन्यदर्शी–यथावस्थितपदार्थद्रष्टा, कश्चैवंभूतो?–यः सम्यग्दृष्टिर्मौनीन्द्रप्रवचनाविर्भूततत्त्वार्थो, यश्चानन्यदृष्टिः सोऽनन्यारामो–मोक्षमार्गादन्यत्र न रमते । हेतुहेतुमद्भावेन सूत्रं लगयितुमाह—'जे' इत्यादि, यश्च भगवदुपदेशादन्यत्र न रमते सोऽनन्यदर्शी, यश्चैवम्भूतः सोऽन्यत्र न रमत इति, उक्तं च—"शिवमस्तु कुशास्त्राणां वैशेषिकपटिलतन्त्रबौद्धानाम् । येषां दुर्विहितत्वाद्भगवत्यनुरज्यते चेतः ॥ १ ॥" इत्यादि । तदेवं सम्यक्त्वस्वरूपमाख्यातं कथयंश्चारक्तद्विष्टः कथयतीति दर्शयति—'जहा पुण्णस्स' इत्यादि, तीर्थकरगणधराचार्यादिना येन प्रकारेण 'पुण्यवतः' सुरेश्वरचक्रवर्त्तिमाण्डलिकादेः 'कथ्यते' उपदेशो दीयते 'तथा' तेनैव प्रकारेण 'तुच्छस्य' द्रमकस्य काष्ठहारकादेः कथ्यते, अथवा पूर्णो–

१ कथाचतुष्टयलक्षणं त्विदं—स्याप्यते हेतुदृष्टान्तैः, स्वमतं यत्र पण्डितैः । स्याद्वादध्वनिसंयुक्तं, सा कथाऽऽक्षेपणी मता ॥ १ ॥ मिथ्यादृशां मतं यत्र, पूर्वापरविरोधकृत् । तन्निराक्रियते सद्भिः, सा च विक्षेपणी मता ॥२॥ यस्याः श्रवणमात्रेण, भवेन्मोक्षाभिलाषिता । भव्यानां सा च विद्वद्भिः, प्रोक्ता संवेदनी कथा ॥३॥ यत्र संसारभोगाङ्गस्थितिलक्षणवर्णनम् । वैराग्यकारणं भव्यैः, सोक्ता निर्वेदनीकथा ॥ ४ ॥

जातिकुलरूपाद्युपेतस्तद्विपरीतस्तुच्छो, विज्ञानवान् वा पूर्णस्ततोऽन्यस्तुच्छ इति, उक्तं च—"ज्ञानैश्वर्यधनोपेतो, जात्यन्वयबलान्वितः । तेजस्वी मतिमान् ख्यातः, पूर्णस्तुच्छो विपर्ययात् ॥ १ ॥" एतदुक्तं भवति–यथा द्रमकादेस्तदनुग्रहबुद्ध्या प्रत्युपकारनिरपेक्षः कथयत्येवं चक्रवर्त्त्यादेरपि, यथा वा चक्रवर्त्त्यादेः कथयत्यादरेण संसारोत्तरणहेतुमेवमितरस्यापि, अत्र च निरीहता विवक्षिता, न पुनरयं नियमः–एकरूपतयैव कथनीयं, तथा हि–यो यथा बुध्यते तस्य तथा कथ्यते, बुद्धिमतो निपुणं स्थूलबुद्धेस्त्वन्यथेति, राज्ञश्च कथयता तदभिप्रायमनुवर्त्तमानेन कथनीयं, किमसावभिगृहीतमिथ्यादृष्टिरनभिगृहीतो वा संशीत्यापन्नो वा?, अभिगृहीतोऽपि कुतीर्थिकैर्व्युद्ग्राहितः स्वत एव वा?, तस्य चैवम्भूतस्य यद्येवं कथयेद्यथा—"दशसूनासमश्चक्री, दशचक्रिसमो ध्वजः । दशध्वजसमा वेश्या, दशवेश्यासमो नृपः ॥१॥" तद्रुक्किविषयरुद्रादिदेवताभवनचरितकथने च मोहोदयात्तथाविधकर्म्मोदये कदाचिदसौ प्रद्वेषमुपगच्छेद्, द्विष्टश्चैतद्विदध्यादित्याह च—

अवि य हणे अणाइयमाणे, इत्थंपि जाण सेयंति नत्थि, केयं पुरिसे कं च नए?, एस वीरे पसंसिए, जे बद्धे पडिमोयए, उड्ढं अहं तिरियं दिसासु, से सव्वओ सव्वपरिन्नाचारी, न लिप्पई छणपएण, वीरे, से मेहावी अणुग्घायणखेयन्ने, जे य बन्धपमुक्खमन्नेसी कुसले पुण नो बद्धे नो मुक्के (सू० १०२)

१ तादारुवन०. प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपिः सम्भावने, आस्तां तावद्बाधा तर्जनम्, अनादियमाणो हन्यादपि, चशब्दादन्यदप्येवंजातीयकोधाभिभूतो दण्डकशादिना ताडयेदिति, उक्तं च—"तत्थेव य निद्धवणं बंधण निच्छुभण कडगमद्दो वा । निव्विसयं व नरिंदो करेज्ज संघंपि सो कुद्धो ॥ १ ॥" तथा तच्चनिकोपासको नन्दबलात् बुद्धोत्पत्तिकथानकाद्भागवतो वा भल्लिगृहोपाख्यानाद्बौद्धो वा पेढालपुत्रसत्यक्युमाख्यतिकरार्कर्णनात् प्रद्वेषमुपगच्छेत्, द्रमककाणकुण्टादिर्वा कश्चित्तमेवोद्दिश्योद्दिश्य धर्म्मफलोपदर्शनेनेति । एवमविधिकथनेनेहैव तावद्बाधा, आमुष्मिकोऽपि न कश्चिद्गुणोऽस्तीत्याह च—'एत्थं पि' इत्यादि, मुमुक्षोः परहितार्थं धर्मकथां कथयतस्तावत्पुण्यमस्ति, परिषदं त्वविदित्वाऽनन्तरोपवर्णितस्वरूपकथने 'अत्रापि' धर्म्मकथायामपि 'श्रेयः' पुण्यमित्येतन्नास्तीत्येवं जानीहि, यदिवाऽसौ राजादिरनाद्रियमाणस्तं साधुं धर्म्मकथिकमपि हन्यात् । कथमित्याह—'एत्थंपी'त्यादि, यद्यदसौ पशुवधतर्पणादिकं धर्म्मकारणमुपन्यस्यति तत्तदसौ धर्म्मकथिकोऽत्रापि श्रेयो न विद्यते इत्येवं प्रतिहन्ति, यदिवा यद्यदविधिकथनं तत्र तत्रेदमुपतिष्ठते—अत्रापि श्रेयो नास्तीति, तथाहि—अक्षरकोविदपरिषदि पक्षहेतुदृष्टान्ताननादृत्य प्राकृतभाषया कथनमविधिरितरस्यां चान्यथेति । एवं च प्रवचनस्य हीलनैव केवलं कर्म्मबन्धश्च, न पुनः श्रेयो, विधिमजानानस्य मौनमेव श्रेय इति, उक्तं च—"सावज्जणवज्जाणं वयणाणं जो न याणइ विसेसं । वुत्तुंपि तस्स न खमं किमंग पुण देसणं काउं? ॥ १ ॥" स्यादेतत्—कथं तर्हि धर्म्मकथा कार्येत्युच्यते—'कोऽयं'

१ तत्रैव निष्कासनं बन्धनं निष्काशनं कटकर्मर्द वा । निर्विषयं वा नरेन्द्रः कुर्यात्सङ्घमपि स क्रुद्धः ॥ १ ॥ २ सावद्यानवद्ययोर्वचनयोर्यो न जानाति विशेषम् । वक्तुमपि तस्य न क्षमं किमङ्ग पुनर्देशनां कर्तुम्? ॥ १ ॥

इत्यादि, यो हि वश्येन्द्रियो विषयविषपराङ्मुखः संसारोद्विग्नमना वैराग्याकृष्यमाणहृदयो धर्म्मं पृच्छति, तेनाचार्यादिना धर्म्मकथिकेनासौ पर्यालोचनीयः—कोऽयं पुरुषो?, मिथ्यादृष्टिरुत भद्रकः, केन वाऽऽशयेनायं पृच्छति, कं च देवताविशेषं नतः, किमनेन दर्शनमाश्रितमित्येवमालोच्य यथायोग्यमुत्तरकालं कथनीयं, एतदुक्तं भवति—धर्म्मकथाविधिज्ञो ह्यात्मना परिपूर्णः श्रोतारमालोचयति द्रव्यतः—क्षेत्रतः किमिदं क्षेत्रं तच्चनिकैर्भागवतैरन्यैर्वा तज्जातीयैः पार्श्वस्थादिभिर्वोत्सर्गरुचिभिर्वा भावितं, कालतो दुष्षमादिकं कालं दुर्लभद्रव्यकालं वा, भावतोऽरक्तद्विष्टमध्यस्थभावापन्नमेवं पर्यालोच्य यथायथाऽसौ बुध्यते तथा तथा धर्म्मकथा कार्या, एवमसौ धर्म्मकथायोग्यः, अपरस्य त्वधिकार एव नास्तीति, उक्तं च—"जो हेउवायपक्खंमि हेउओ आगमम्मि आगमिओ । सो ससमयपण्णवओ सिद्धंतविराहओ अण्णो ॥ १ ॥" य एवं धर्म्मकथाविधिज्ञः स एव प्रशस्त इत्याह च—'एस' इत्यादि, यो हि पुण्यापुण्यवतोर्धर्म्मकथासमदृष्टिर्विधिज्ञः श्रोतृविवेचकः 'एषः' अनन्तरोक्तो 'वीरः' कर्म्मविदारकः 'प्रशंसितः' श्लाघितः । किंभूतश्च यो भवतीत्याह—'जे बद्धे' इत्यादि, यो ह्यष्टप्रकारेण कर्म्मणा स्नेहनिगडादिना वा बद्धानां जन्तूनां प्रतिमोचकः धर्म्मकथोपदेशदानादिना, स च तीर्थकृद्गणधर आचार्यादिर्वा यथोक्तधर्म्मकथाविधिज्ञ इति । क्व पुनर्व्यवस्थितान् जन्तून् मोचयतीत्याह—'उड्ढं' इत्यादि, ऊर्द्धं ज्योतिष्कादीन् अधो भवनपत्यादीन् तिर्यक्षु मनुष्यादीनिति । किं च—'से सव्वओ' इत्यादि, 'स' इति वीरो बद्धप्रतिमोचकः 'सर्वतः' सर्वकालं सर्वपरिज्ञया द्विविधयाऽपि चरितुं शीलमस्येति सर्वपरिज्ञाचारी—विशिष्टज्ञानान्वितः सर्वसंवरचारित्रो-

१ यो हेतुवादपक्षे हेतुक आगमे आगमिकः । स स्वसमयप्रज्ञापकः सिद्धान्तविराधकोऽन्यः ॥ १ ॥

पेतो वा, स एवंभूतः कं गुणमवाप्नोतीत्याह—'न लिप्पई'त्यादि, 'न लिप्यते' नावगुण्ठयते, केन?—'क्षणपदेन' हिंसास्पदेन प्राण्युपमर्दजानेतेन, 'क्षणु हिंसायामि'त्यस्यैतद्रूपं। कोऽसौ?, वीर इति। किमेतावदेव वीरलक्षणमुतान्यदप्य(स्त्य)स्तीत्याह—'से मेहावी'त्यादि, स 'मेधावी' बुद्धिमान् यः 'अणोदूघातनस्य खेदज्ञः' अणत्यनेन जन्तुगणश्चतुर्गतिकं संसारमित्यर्णं—कर्म्म तस्योत्—प्राबल्येन घातनम्—अपनयनं तस्य तत्र वा खेदज्ञो—निपुणः, इह हि कर्म्मक्षपणोद्यतानां मुमुक्षूणां यः कर्म्मक्षपणविधिज्ञः स मेधावी कुशलो वीर इत्युक्तं भवति, किं चान्यत्—'जे य'इत्यादि, यश्च प्रकृतिस्थित्यनुभावप्रदेशरूपस्य चतुर्विधस्यापि बन्धस्य यः प्रमोक्षः तदुपायो वा तमन्वेष्टुं—मृगयितुं शीलमस्येत्यन्वेषी, यश्चैवम्भूतः स वीरो मेधावी खेदज्ञ इति पूर्वेण सम्बन्धः, अणोदूघातनस्य खेदज्ञ इत्यनेन मूलोत्तरप्रकृतिभेदभिन्नस्य योगनिमित्तायातस्य कषायस्थितिकस्य कर्म्मणो बध्यमानावस्थां बद्धस्पृष्टनिधत्तनिकाचितरूपां तदपनयनोपायं च वेत्तीत्येतदभिहितं, अनेन चापनयनानुष्ठानमिति न पुनरुक्तदोषानुषङ्गः प्रसजति । स्यादेतत्—योऽयमणोदूघातनस्य खेदज्ञो बन्धमोक्षान्वेषको वाऽभिहितः स किं छद्मस्थ आहोस्वित् केवली?, केवलिनो यथोक्तविशेषणासम्भवात् छद्मस्थग्रहणं, केवलिनस्तर्हि का वार्त्तेति?, उच्यते—'कुसले' इत्यादि, कुशलोऽत्र क्षीणघातिकर्म्मांशो विवक्षितः, स च तीर्थकृत् सामान्यकेवली वा छद्मस्थो हि कर्म्मणा बद्धो मोक्षार्थी तदुपायान्वेषकः, केवली तु पुनर्घातिकर्म्मक्षयाज्जो बद्धो भवोपग्राहिकर्म्मसद्भावाज्जो मुक्तो, यदिवा छद्मस्थ एवाभिधीयते—'कुशलः' अवासज्ञानदर्शनचारित्रो मिथ्यात्वद्वादशकषायोपशमसद्भावात् तदुद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यवानिव न बद्धोऽद्यापि तत्सत्कर्म्मतासद्भावान्नो मुक्त इति । एवम्भूतश्च कुशलः केवली छद्मस्थो वा यदाचीर्णवानाचरति वा तदपरेणापि मुमुक्षुणा विधेयमिति दर्शयति—

से जं च आरभे जं च नारभे, अणारद्धं च न आरभे, छणं छणं परिण्णाय लोगसन्नं च सव्वसो (सू० १०३)

'स' कुशलो यदारभत आरब्धवान् वा अशेषकर्म्मक्षपणोपायं संयमानुष्ठानं यच्च नारभते मिथ्यात्वाविरत्यादिकं संसारकारणं, तदारब्धव्यमारम्भणीयमनारब्धमनारम्भणीयं चेति, संसारकारणस्य च मिथ्यात्वाविरत्यादेः प्राणातिपाताद्यष्टादशरूपस्य चैकान्तेन निराकार्यत्वात्, तन्निषेधे च विधेयस्य संयमानुष्ठानस्य सामर्थ्यायातत्वात्तन्निषेधमाह—'अणारद्धं च' इत्यादि, अनारब्धम्—अनाचीर्णं केवलिभिर्विशिष्टमुनिभिर्वा तन्मुमुक्षुर्नारभते—न कुर्यादित्युपदेशो, यच्च मोक्षाङ्गमाचीर्णं तत्कुर्यादित्युक्तं भवति । यत्तद्भगवदनाचीर्णं परिहार्यं तन्नामग्राहमाह—'छणं छणं' इत्यादि, 'क्षणु हिंसायां' क्षणनं क्षणो—हिंसनं कारणे कार्योपचारात् येन येन प्रकारेण हिंसोत्पद्यते तत्तज्ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेद्, यदिवा क्षणः—अवसरः कर्त्तव्यकालस्तं तं ज्ञपरिज्ञया ज्ञात्वाऽऽसेवनापरिज्ञया च आचरेदिति । किं च—'लोयसन्नं' इत्यादि, 'लोकस्य' गृहस्थलोकस्य संज्ञानं संज्ञा—विषयाभिष्वङ्गजनितसुखेच्छा परिग्रहसंज्ञा वा तां च ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च परिहरेत्, कथं?—'सर्वशः' सर्वैः प्रकारैर्योगत्रिककरणत्रिकेणेत्यर्थः, तस्यैवं-

विधस्य यथोक्तगुणावस्थितस्य धर्म्मकथाविधिज्ञस्य बद्धप्रतिमोचकस्य कर्म्मोद्घातनखेदज्ञस्य बन्धमोक्षान्वेषिणः सत्यध्यवस्थितस्य कुमार्गनिराचिकीर्षोर्हिंसाद्यष्टादशपापस्थानविरतस्यावगतलोकसंज्ञस्य यद्भवति तद्दर्शयति—

उद्देसो पासगस्स नत्थि, बाले पुणे निहे कामसमणुन्ने असमियदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ (सू० १०४) त्ति बेमि ॥ लोकविजयाध्ययनम् २ ॥

उद्दिश्यते नारकादिव्यपदेशेनेत्युद्देशः स 'पश्यकस्य' परमार्थदृशो न विद्यते इत्यादीनि च सूत्राण्युद्देशकपरिसमाप्तिं यावत्तृतीयोद्देशके व्याख्यातानि, तत एवार्थोऽवगन्तव्यः, आक्षेपपरिहारौ चेति । तानि चामूनि बालः पुनर्निहः कामसमनुज्ञः अशमितदुःखः दुःखी दुःखानामेवावर्त्तमनुपरिवर्त्तते । इतिः परिसमाप्तौ ब्रवीमीति पूर्ववत् ॥ (ग्रन्थाग्रम् २५००) ॥ उक्तः षष्ठोद्देशकः ॥ तत्परिसमाप्तौ चोक्तः सूत्रानुगमः सूत्रालापकनिष्पन्ननिक्षेपश्च ससूत्रस्पर्शनिर्युक्तिकः । साम्प्रतं नैगमादयो नयाः, ते चान्यत्र न्यक्षेण प्रतिपादिता इति नेह प्रतन्यन्ते, संक्षेपतस्तु ज्ञानक्रियानयद्वयान्तर्गतत्वात्तेषां तावेव प्रतिपाद्येते, तयोरप्यात्मीयपक्षसावधारणतया मोक्षाङ्गत्वाभावात् प्रत्येकं मिथ्यादृष्टित्वम्, अतः पङ्ग्वन्धवत् परस्परसापेक्षतयेष्टकार्यावाप्तिरवगन्तव्येति उपगम्यते ॥ इति लोकविजयाध्ययनस्य टीका समाप्ता ॥ २ ॥

श्रीआचाराङ्गे इनिश्रीशीलाङ्काचार्यवृत्तियुतं लोकविजयाध्ययनं द्वितीयम्

अथ तृतीयमध्ययनं शीतोष्णीयं ।

उक्तं द्वितीयमध्ययनं, साम्प्रतं तृतीयमारभ्यते, अस्य चायमभिसम्बन्धः, तत्र शस्त्रपरिज्ञायामस्यार्थाधिकारोऽभाणि, यथा शीतोष्णयोरनुकूलप्रतिकूलपरिषहयोरतिसहनं कर्त्तव्यं, तदधुना प्रतिपाद्यते, अध्ययनसम्बन्धस्तु शस्त्रपरिज्ञोक्तमहाव्रतसम्पन्नस्य लोकविजयाध्ययनप्रसिद्धसंयमव्यवस्थितस्य विजितकषायादिलोकस्य मुमुक्षोः कदाचिदनुलोमप्रतिलोमाः परीषहाः प्रादुष्यन्ति, तेऽविकृतान्तःकरणेन सम्यक् सोढव्या इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमेऽर्थाधिकारो द्वेधा, तत्राप्यध्ययनार्थाधिकारोऽभिहितः, उद्देशार्थाधिकारप्रतिपादनार्थं तु निर्युक्तिकार आह—

पढमे सुत्ता अस्संजयत्ति १ बिइए दुहं अणुहवंति २। तइए न हु दुक्खेणं अकरणयाए व समणुत्ति ३ ॥१९८॥ उद्देसंमि चउत्थे अहिगारो उ वमणं कसायाणं। पावविरईओ विउणो उ संजमो इत्थ मुक्खुत्ति ४ ॥ १९९ ॥

प्रथमोद्देशकेऽयमर्थाधिकारो, यथा—भावनिद्रया सुप्ताः—सम्यग्विवेकरहिताः, के?—असंयताः—गृहस्थास्तेषां च भावसुप्तानां दोषा अभिधीयन्ते, जाग्रतां च गुणाः, तद्यथा—'जरामच्चुवसोवणीए नरे' इत्यादि १, द्वितीये तु त एवासंयता यथा भावनिद्रापन्ना दुःखमनुभवन्ति तथोच्यते, तद्यथा—'कामेसु गिद्धा निचयं करंति' २, तृतीये तु 'न हु' नैव दुःखसहनादेव केवलाच्छ्रमणः अकरणतयैव—अक्रिययैव संयमानुष्ठानमन्तरेणेत्यर्थः, वक्ष्यति च—'सहिए दुक्खमायाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेणेव य पुट्ठो नो झंझाए' इ, चतुर्थोद्देशके त्वयमधिकारो, यथा-कषायाणां वमनं कार्यं, पापस्य च कर्म्मणो विरतिः, 'विदुषो' विदितवेद्यस्य संयमोऽत्रैव प्रतिपाद्यते, क्षपकश्रेणिप्रक्रमात् केवलं भवोपग्राहिक्षयान्मोक्षश्चेति गाथाद्वयार्थः ॥ नामनिष्पन्ने तु निक्षेपे शीतोष्णीयमध्ययनमतः शीतोष्णयोर्निक्षेपं निर्दिदिक्षुराह—

नामं ठवणा सीयं दव्वे भावे य होइ नायव्वं । एमेव य उण्हस्सवि चउव्विहो होइ निक्खेवो ॥ २०० ॥

सुगमा । तत्र नामस्थापने अनादृत्य द्रव्यशीतोष्णे दर्शयितुमाह—

दव्वे सीयलदव्वं दव्वुण्हं चेव उण्हदव्वं तु । भावे उ पुग्गलगुणो जीवस्स गुणो अणेगविहो ॥ २०१ ॥

ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यशीतं शीतगुणोपेतं गुणगुणिनोरभेदात् शीतकारणं वा यद्द्रव्यं द्रव्यप्राधान्याच्छीतलद्रव्यमेव द्रव्यशीतं-हिमतुषारकरकादि, एवं द्रव्योष्णमपीति । भावतस्तु द्वेधा-पुद्गलाश्रितं जीवाश्रितं च, गाथाशकलेनाचष्टे-तत्र पुद्गलाश्रितं भावशीतं पुद्गलस्य शीतो गुणो गुणस्य प्राधान्यविवक्षयेति, एवं भावोष्णमपि, जीवस्य तु शीतोष्णरूपोऽनेकविधो गुणः, तद्यथा-औदयिकादयः षड् भावाः, तत्रौदयिकः कर्म्मोदयाविर्भूतनारकादिभवकषायोत्पत्तिलक्षणः उष्णः, औपशमिकः कर्म्मोपशमावाप्तसम्यक्त्वविरतिरूपः शीतः, क्षायिकोऽपि शीत एव, क्षायिकसम्यक्त्वचारित्रादिरूपत्वाद्, अथवाऽशेषकर्म्मदाहान्यथानुपपत्तेरुष्णः, शेषा अपि विवक्षातो द्विरूपा अपीति ॥ अस्य च जीवभावगुणस्य शीतोष्णविवेकं स्वत एव निर्युक्तिकारः प्रचिकटयिषुराह—

सीयं परीसहपमायुवसमविरई सुहं चउण्हं तु । परीसहतवुज्जमकसाय सोगाहिवेयारई दुक्खं ॥ २०२ ॥ दारं ।

'शीत'मिति भावशीतं, तच्चेह जीवपरिणामस्वरूपं गृह्यते, स चायं परिणामो-मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः 'प्रमादः' कार्यशैथिल्यं शीतलविहारता 'उपशमो' मोहनीयोपशमः, स च सम्यक्त्वदेशविरतिसर्वविरतिलक्षणः, उपशमश्रेण्याश्रितो वा, तत्क्षयो वेति, 'विरति'रिति प्राणातिपातादिविरत्युपलक्षितः सप्तदशविधः संयमः 'सुखं च' सातावेदनीयविपाकाविर्भूतमिति । एतत् सर्वं परीषहादि शीतमुष्णं च गाथाशकलेनाह-परीषहाः-पूर्वव्यावर्णितस्वरूपाः तपस्युद्यमो-यथाशक्ति द्वादशप्रकारतपोऽनुष्ठानं 'कषायाः' क्रोधादयः 'शोक' इष्टाप्राप्तिविनाशोद्भवः आधिः 'वेदः' स्त्रीपुंनपुंसकवेदोदयः 'अरतिः' मोहनीयविपाकाच्चित्तदौःस्थ्यं 'दुःखं च' असातावेदनीयोदयादीनि, एतानि परीषहादीनि पीडाकारित्वादुष्णमिति गाथासमासार्थः । व्यासार्थं तु निर्युक्तिकारः स्वत एवाचष्टे-तत्र परीषहाः शीतोष्णयोर्द्वयोरप्यभिहिताः, ततो मन्दबुद्धेरनध्यवसायः संशयो विपर्ययो वा स्याद् अतस्तदपनोदार्थमाह—

इत्थी सक्कारपरीसहो य दो भावसीयला एए । सेसा वीसं उण्हा परीसहा हुंति नायव्वा ॥ २०३ ॥

स्त्रीपरीषहः सत्कारपरीषहश्च द्वावप्येतौ शीतौ, भावमनोऽनुकूलत्वात्, शेषास्तु पुनर्विंशतिरुष्णा ज्ञातव्या भवन्ति, मनसः प्रतिकूलत्वादिति गाथार्थः ॥ यदिवा परीषहाणां शीतोष्णत्वमन्यथा आचष्टे—

जे तिव्वप्परिणामा परीसहा ते भवंति उण्हा उ । जे मंदप्परिणामा परीसहा ते भवे सीया ॥ २०४ ॥ दारं ।

तीव्रो-दुःसहः परिणामः-परिणतिर्येषां ते तथा, य एवम्भूताः परीषहास्ते उष्णाः, ये तु मन्दपरिणामास्ते शीता इति, इदमुक्तं भवति-ये शरीरदुःखोत्पादकत्वेनोदीर्णाः सम्यक्सहनाभावाच्चाधिविधायिनस्ते तीव्रपरिणामत्वादुष्णाः, ये पुनरुदीर्णाः शारीरमेव केवलं दुःखमुत्पादयन्ति महासत्त्वस्य न मानसं ते भावतो मन्दपरिणामाः, यदिवा ये तीव्रपरिणामाः-प्रबलाविर्भूतस्वरूपास्ते उष्णाः, ये तु मन्दपरिणामाः-ईषल्लक्ष्यमाणस्वरूपास्ते शीता इति । यत्परीषहानन्तरं प्रमादपदमुपन्यस्तं शीतत्वेन यच्च तपस्युद्यम इत्युष्णत्वेन तदुभयं गाथयाऽऽचष्टे—

धंमंमि जो पमायइ अत्थे वा सीअलुत्ति तं बिंति । उज्जुत्तं पुण अन्नं तत्तो उण्हंति णं बिंति ॥ २०५ ॥ दारं ।

'धर्म्मे' श्रमणधर्म्मे यः 'प्रमाद्यति'नोद्यमं विधत्ते 'अर्थे वा' अर्थ्यत इत्यर्थो-धनधान्यहिरण्यादिस्तत्र तदुपाये वा शीतल इत्येवं तं 'ब्रुवते' आचक्षते, उद्युक्तं पुनरन्यं ततः-संयमोद्यमात् कारणादुष्णमित्येवं ब्रुवते, णमिति वाक्यालङ्कार इति गाथार्थः ॥ उपशमपदव्याचिख्यासयाऽऽह—

सीईभूओ परिनिव्वुओ य संतो तहेव पण्हाणो (ल्हाओ)। होउवसंतकसाओ तेणुवसंतो भवे जीवो ॥२०६॥ दारं।

उपशमो हि क्रोधाद्युदयाभावे भवति, ततश्च कषायाद्युपशमात् शीतीभूतो भवति, क्रोधादिज्वालानिर्वाणात् परिनिर्वृतो भवति, चः समुच्चये, रागद्वेषपावकोपशमादुपशान्तः, तथा क्रोधाविपरितापोपशमात् 'प्रह्लादितः' आपन्नसुखो, यतो ह्युपशान्तकषाय एव एवम्भूतो भवति तेनोपशान्तकषायः शीतो भवतीति, एकार्थिकानि वैतानीति गाथार्थः ॥ अधुना विरतिपदव्याख्यामाह—

अभयकरो जीवाणं सीयघरो संजमो भवइ सीओ। अस्संजमो य उण्हो एसो अन्नोऽवि पज्जाओ ॥२०७॥ दारं।

अभयकरण शीलः, केषां?-जीवानां, शीतं-सुखं तद्गृहं-तदावासः, कोऽसौ?-संयमः सप्तदशभेदः, अतोऽसौ शीतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति, समस्तदुःखहेतुद्वन्द्वोपरमाद्, एतद्विपर्ययस्त्वसंयम उष्णः, 'एष' शीतोष्णलक्षणः संयमासंयमयोः पर्यायोऽन्यो वा सुखदुःखरूपो विवक्षावशाद्भवतीति गाथार्थः ॥ साम्प्रतं सुखपदविवरणायाह—

निव्वाणसुहं सायं सीईभूयं पयं अणाबाहं । इहमवि जं किंचि सुहं तं सीयं दुक्खमवि उण्हं ॥ २०८ ॥

सुखं शीतमित्युक्तं, तच्च समस्तद्वन्द्वोपरमादात्यन्तिकैकान्तिकानाबाधलक्षणं निरुपाधिकं परमार्थचिन्तायां मुक्तिसुखमेव सुखं नापरम्, एतच्च समस्तकर्मोपतापाभावाच्छीतमिति दर्शयति—'निर्वाणसुख'मिति, निर्वाणम्—अशेषकर्मक्षयस्तदवासौ वा विशिष्टाकाशप्रदेशः तेन तत्र वा सुखं निर्वाणसुखम्, अस्य चैकार्थिकानि—सातं शीतीभूतं पदमनाबाधमिति । इहापि संसारे यत्किञ्चित् सातावेदनीयविपाकोद्भूतं सातं—सुखं तदपि शीतं मनआल्हादाद्, एतद्विपर्ययस्तु दुःखं, तच्चोष्णमिति गाथार्थः ॥ कषायादिपदव्याचिख्यासयाह—

डज्झइ निव्वकसाओ सोगभिभूओ उइन्नवेओ य । उण्हयरो होइ तवो कसायमाईवि जं डहइ ॥ २०९ ॥

'दह्यते' परिपच्यते, कोऽसौ ?- 'तीव्रा' उत्कटा उदीर्णा विपाकानुभवेन कषाया यस्य स तथा, न केवलं कषायाग्निना दह्यते, 'शोकाऽभिभूतश्च' इष्टवियोगादिजनितः शोकस्तेनाभिभूतः तिरोहितशुभव्यापारोऽसावपि दह्यते, तथा उदीर्णविपाकापन्नो वेदो यस्य स तथा, उदीर्णवेदो हि पुमान् स्त्रियं कामयते, साऽपीतरं, नपुंसकस्तूभयमिति, तत्साध्यभावे काङ्क्षोद्भूतारतिदाहेन दह्यते, चशब्दादिच्छाकामाप्राप्तिजनितारतिपावकेन दह्यते, तदेवं कषायाः शोको वेदोदयश्च दाहकत्वादुष्णः, सर्वं वा मोहनीयमष्टप्रकारं वा कर्म्मोष्णं, ततोऽपि तद्दाहकत्वादुष्णतरं तप इति गाथाशकलेन

आ. सू. २१
श्रीआचाराङ्गवृत्तिः (शी०)
॥ १५१ ॥

दर्शयति—उष्णतरं तपो भवति, किमिति ?—यतः कषायादिकमपि दहति, आदिशब्दाच्छोकादिपरिग्रह इति गाथार्थः । येनाभिप्रायेण द्रव्यभावभेदभिन्ने परीषहप्रमादोद्यमादिरूपे शीतोष्णे जगादाचार्यस्तमभिप्रायमाविष्करोति—

शीतो० ३
उद्देशकः १

सीउण्हफाससुहदुहपरीसहकसायवेयसोयसहो । हुज्ज समणो सया उज्जुओ य तवसंजमोवसमे ॥ २१० ॥

शीतं चोष्णं च शीतोष्णे तयोः स्पर्शः तं सहत इति सम्बन्धः, शीतस्पर्शोष्णस्पर्शजनितवेदनामनुभवन्नार्त्तध्यानोपगतो भवतीतियावत्, शरीरमनसोरनुकूलं सुखमिति, तद्विपरीतं दुःखं, तथा परीषहकसायवेदशोकान् शीतोष्णभूतान् सहत इति । तदेवं शीतोष्णादिसहः सन् भवेत् 'श्रमणः' यतिः सदोद्युक्तश्च, क्व ?—तपःसंयमोपशमे इति गाथार्थः ॥ साम्प्रतमुपसंहारव्याजेन साधुना शीतोष्णातिसहनं कर्त्तव्यमिति दर्शयति—

सीयाणि य उण्हाणि य भिक्खूणं हुंति विसहियव्वाइं । कामा न सेवियव्वा सीओसणिज्जस्स निज्जुत्ती ॥२११॥

'शीतानि' परीषहप्रमादोपशमविरतिसुखरूपाणि यान्यभिहितानि 'उष्णानि च' परीषहतपउद्यमकषायशोकवेदारत्यात्मकानि प्रागभिहितानि तानि 'भिक्षूणां' मुमुक्षूणां विषोढव्यानि, न सुखदुःखयोः उत्सेकविषादौ विधेयौ, तानि चैवं सम्यग्दृष्टिना सह्यन्ते यदि कामपरित्यागो भवतीति गाथाशकलेनाह—'कामा' इत्यादि गाथार्द्धं सुगमं । गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतमशेषदोषव्रातविकलं सूत्रमुच्चारयितव्यं, तच्चेदम्—

॥ १५१ ॥

सुत्ता अमुणी सया मुणिणो जागरंति (सू० १०५)

अस्य चानन्तरसूत्रेण सम्बन्धो वाच्यः, स चायम्—इह दुःखी दुःखानामेवावर्त्तमनुपरिवर्त्तत इत्युक्तं, तदिहापि भावसुप्ता अज्ञानिनो दुःखिनो दुःखानामेवावर्त्तमनुपरिवर्त्तन्ते इति, उक्तं च—"नातः परमहं मन्ये, जगतो दुःखकारणम् । यथाऽज्ञानमहारोगो, दुरन्तः सर्वदेहिनाम् ॥ १ ॥" इत्यादि, इह सुप्ता द्विधा—द्रव्यतो भावतश्च, तत्र निद्राप्रमादवन्तो द्रव्यसुप्ताः, भावसुप्तास्तु मिथ्यात्वाज्ञानमयमहानिद्राव्यामोहिताः, ततो ये 'अमुनयः' मिथ्यादृष्टयः सततं भावसुप्ताः सद्विज्ञानानुष्ठानरहितत्वात्, निद्रया तु भजनीयाः, मुनयस्तु सद्बोधोपेता मोक्षमार्गादचलन्तस्ते सततम्—अनवरतं 'जाग्रति' हिताहितप्राप्तिपरिहारं कुर्वते, अतो द्रव्यनिद्रोपगता अपि क्वचिद्वितीयपौरुष्यादौ सततं जागरूका एवेति ॥ एनमेव भावस्वापं जागरणं च विषयीकृत्य निर्युक्तिकारो गाथां जगाद—

सुत्ता अमुणिओ सया मुणिओ सुत्तावि जागरा हुंति । धम्मं पडुच्च एवं निद्दासुत्तेण भइयव्वं ॥ २१२ ॥

सुप्ता द्विधा—द्रव्यतो भावतश्च, तत्र निद्रया द्रव्यसुप्तान् गाथान्ते वक्ष्यति, भावसुप्तास्त्वमुनयो—गृहस्था मिथ्यात्वाज्ञानावृता हिंसाद्याश्रवद्वारेषु सदा प्रवृत्ताः, मुनयस्त्वपगतमिथ्यात्वादिनिद्रतयाऽवाप्तसम्यक्त्वादिबोधा भावतो जागरूका एव, यद्यपि क्वचिदाचार्यानुज्ञाता द्वितीयपौरुष्यादौ दीर्घसंयमाधारशरीरस्थित्यर्थं निद्रावशोपगता भवन्ति तथापि सदा जागरा एव, एवं च धर्म्मं प्रतीत्योक्ताः सुप्ता जाग्रदवस्थाश्च । द्रव्यनिद्रासुप्तेन तु भाज्यमेतद्—धर्म्मः स्याद्वा न वा, यद्यसौ भावतो जागर्त्ति ततो निद्रासुप्तस्यापि धर्म्मः स्यादेव, यदिवा भावतो जाग्रतो निद्राप्रमादावष्टब्धान्तःकरणस्य न स्यादपि, यस्तु द्रव्यभावसुप्तस्तस्य न स्यादेवेति भजनार्थः । अथ किमिति द्रव्यसुप्तस्य धर्म्मो न भवतीति ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते, द्रव्यसुप्तो हि निद्रया भवति, सा च दुरन्ता, किमिति ?, यतः स्त्यानर्द्धिनिद्रोदये सम्यक्त्वावाप्तिर्भवसिद्धिकस्यापि न भवति, तद्बन्धश्च मिथ्यादृष्टिसास्वादनयोरनन्तानुबन्धिबन्धसहचरितः, क्षयस्त्वनिवृत्तिबादरगुणस्थानकालसंख्येयभागेषु कियत्स्वपि गतेषु सत्सु भवति, निद्राप्रचलयोरपि उदये प्राग्वदेव, बन्धोपरमस्त्वपूर्वकरणकालसंख्येयभागान्ते भवति, क्षयः पुनः क्षीणकषायद्विचरमसमये, उदयस्तूपशमकोपशान्तमोहयोरपि भवतीत्यतो दुरन्तो निद्राप्रमादः । यथा च द्रव्यसुप्तो दुःखमवाप्नोत्येवं भावसुप्तोऽपि (इति) दर्शयितुमाह—

जह सुत्त मत्त मुच्छिय असहीणो पावए बहुं दुक्खं । तिव्वं अपडियारंपि वट्टमाणो तहा लोगो ॥ २१३ ॥

सुप्तो निद्रया मत्तो मदिरादिना मूर्च्छितो गाढमर्म्मप्रहारादिना अस्वाधीनः—परायत्तो वातादिदोषोद्भवग्रहादिना यथा बहु दुःखमप्रतीकारमवाप्नोति, तथा भावस्वापे—मिथ्यात्वाविरतिप्रमादकषायादिकेऽपि 'वर्त्तमानः' अवतिष्ठमानो 'लोकः' प्राणिगणो नरकभवादिकं दुःखमवाप्नोतीति गाथार्थः ॥ पुनरपि व्यतिरेकदृष्टान्तद्वारेणोपदेशदानायाह—

एसेव य उवएसो पदित्त पयलाय पंथमाईसुं । अणुहवइ जह सचेओ सुहाइं समणोऽवि तह चेव ॥ २१४ ॥

'एष एव' पूर्वोक्त उपदेशो यो विवेकाविवेकजनितः, तथाहि—सचेतनो विवेकी प्रदीप्ते सति प्रपलायमानः सुखमनुभवति, पथिविषये च सापायनिरपायविवेकज्ञः, आदिग्रहणादन्यस्मिन्वा दस्युभयादौ समुपस्थिते सति, यथा विवेकी सुखेनैव तमपाय्यं परिहरन् सुखभाग् भवति, एवं श्रमणोऽपि भावतः सदा विवेकित्वाज्जाग्रदवस्थामनुभवन् समस्तकल्याणास्पदीभवति । अत्र च सुप्तासुप्ताधिकारगाथाः—"जागरह णरा णिच्चं जागरमाणस्स वड्ढए बुद्धी । जो सुअइ न सो धण्णो जो जग्गइ सो सया धन्नो ॥ १ ॥ सुअइ सुअंतस्स सुअं संकियखलियं भवे पमत्तस्स । जागरमाणस्स सुअं थिरपरिचिअमप्पमत्तस्स ॥ २ ॥ नालस्सेण समं सुक्खं, न विज्जा सह निद्दया । न वेरग्गं पमाएणं, नारंभेण दयालुया ॥ ३ ॥ जागरिआ धम्मीणं आहम्मीणं तु सुत्तया सेआ । वज्जाहिवभगिणीए अकहिंसु जिणो जयंतीए ॥ ४ ॥ सुयइ य अयगरभूओ सुअंपि से नासई अमयभूअं । होहिइ गोणब्भूओ नट्ठंमि सुए अमयभूए ॥ ५ ॥" तदेवं दर्शनावरणीयकर्म्मविपाकोदयेन क्वचित्स्वपन्नपि यः संविग्नो यतनावांश्च स दर्शनमोहनीयमहानिद्रापगमाज्जाग्रदवस्थ एवेति । ये तु सुप्तास्तेऽज्ञानोदयाद्भवन्ति, अज्ञानं च महादुःखं, दुःखं च जन्तूनामहितायेति दर्शयति—

लोयंसि जाण अहियाय दुक्खं, समयं लोगस्स जाणित्ता, इत्थ सत्थोवरए, जस्सिमे सद्दा य रूवा य रसा य गंधा य फासा य अभिसमन्नागया भवंति (सू० १०६)

'लोके' षड्जीवनिकाये 'जानीहि' परिच्छिन्द्या दुःखहेतुत्वाद्दुःखम्—अज्ञानं मोहनीयं वा तदहिताय—नरकादिभव्यसनोपनिपाताय, इह वा बन्धवधशारीरमानसपीडायै जायत इत्येतज्जानीहि, परिज्ञानाच्चैतत्फलं यदुत—द्रव्यभावस्वापादज्ञानरूपाद्दुःखहेतोरपसर्प्पणमिति, किं चान्यत्—'समय'मित्यादि, समयः—आचारोऽनुष्ठानं तं लोकस्यासुमद्वातस्य ज्ञात्वा अत्र शस्त्रोपरतो भवेदित्युत्तरसूत्रेण सम्बन्धो, लोको हि भोगाभिलाषितया प्राण्युपमर्दादिकषायहेतुकं कर्म्मोपादाय नरकादियातनास्थानेषूत्पद्यते, ततः कथञ्चिदुद्वृत्त्यावाप्य चाशेषक्लेशघातनं धर्म्मकारणमार्यक्षेत्रादौ मनुष्यजन्म पुनरपि महामोहमोहितमतिस्तत्तदारभते येन येनाधोऽधो व्रजति, संसारान्नोन्मज्जतीति, अयं लोकाचारस्तं ज्ञात्वा, अथवा समभावः समता तां ज्ञात्वा, 'लोकस्ये'ति सप्तम्यर्थे षष्ठी, ततश्चायमर्थो—'लोके' जन्तुसमूहे 'समतां' समशत्रुमित्रतां समात्मपरतां वा ज्ञात्वा, यदिवा सर्वेऽप्येकेन्द्रियादयो जन्तवः सदा स्वोत्पत्तिस्थानरिरंसवो मरणभीरवः सुखेप्सवो दुःखद्विष इत्येवम्भूतां समतां ज्ञात्वा, किं कुर्यादित्याह—'एत्थ सत्थोवरए', 'अत्र' अस्मिन् षट्कायलोके शस्त्राद्द्रव्यभावभेदादुपरतो धर्म्मजागरणेन जागृहि, यदिवा यद्यत्संयमशस्त्रं प्राणातिपाताद्यास्रवद्वारं शब्दादिपञ्चप्रकारकामगुणाभिष्वङ्गो वा तस्माद्य उपरतः स मुनिरिति, आह च—'जस्सिमे' इत्यादि, यस्य मुनेरिमे—प्रत्यात्मवेद्याः समस्तप्राणिगणेन्द्रियप्रवृत्तिविषयभूताः शब्दरूपरसगन्धस्पर्शा मनोज्ञेतरभेदभिन्ना 'अभिसमन्वागता' इति, अभिः—आभिमुख्येन सम्यग्—इष्टानिष्टावधारणतयाऽन्विति—शब्दादिस्वरूपावगमात् पश्चादागताः—ज्ञाताः परिच्छिन्ना यस्य मुनेर्भवन्ति स लोकं जानातीति सम्बन्धः, इदमुक्तं भवति—इष्टेषु न रागमुपयाति नापीतरेषु द्वेषम्, एतदेवाभिसमन्वागमनं तेषां नान्यथेति, यदिवेष्टैव शब्दादयो दुःखाय भवन्त्वास्तां तावत्परलोक इति, दृष्टं च—"रक्तः शब्दे हरिणः स्पर्शे

१ जागृत नरा नित्यं जाग्रतो वर्धते बुद्धिः । यः स्वपिति न स धन्यः को जागर्ति स सदा धन्यः ॥ १ ॥ स्वपिति स्वपतः श्रुतं क्षयितस्खलितं भवेत्प्रमत्तस्य । जागरतः श्रुतं स्थिरपरिचितमप्रमत्तस्य ॥ २ ॥ नालस्येन समं सौख्यं न विद्या सह निद्रया । न वैराग्यं प्रमादेन नारम्भेण दयालुता ॥ ३ ॥ जाग्रता धर्मिणां अधर्मिणां तु सुप्तता श्रेयसी । वज्राधिपभगिन्या अकथयत् जिनो जयन्त्याः ॥ ४ ॥ स्वपिति यो जागरभूतः श्रुतमपि तस्य नश्यत्यमृतभूतम् । भविष्यति गोभूतो नष्टे श्रुतेऽश्रुतभूते ॥ ५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नागो रसे च वारिचरः। कृपणपतङ्गो रूपे भुजगो गन्धे ननु विनष्टः ॥ १ ॥ पञ्चसु रक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः। एकः पञ्चसु रक्तः प्रयाति भस्मान्ततामबुधः ॥२॥" अथवा शब्दे पुष्पशालाद्वारा ननाश रूपे अर्जुनकतस्करः गन्धे गन्धप्रियकुमारः रसे सौदासः स्पर्शे सत्यकिः सुकुमारिकापतिर्वा ललिताङ्गकः, परत्र च नारकादियातनास्थानभयमिति ॥ एवं शब्दादीनुभयदुःखस्वभावानवगम्य यः परित्यजेदसौ कं गुणमवाप्नुयादित्याह—

से आयवं नाणवं वेयवं धंमवं बंभवं पन्नाणेहिं परियाणइ लोयं, मुणीति वुच्चे, धम्मविऊ उज्जू, आवट्टसोए संगमभिजाणइ (सू० १०७)

यो हि महामोहनिद्रावृते लोके दुःखमहिताय जानानो लोकसमयदर्शी शस्त्रोपरतः सन् शब्दादीन् कामगुणान् दुःखैकहेतूनभिसमन्वागच्छति ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च प्रत्याचष्टे 'स' मुमुक्षुरात्मवान्-आत्मा ज्ञानादिकोऽस्यास्तीत्यात्मवान्, शब्दादिपरित्यागेन ह्यात्माऽनेन रक्षितो भवति, अन्यथा नारकैकेन्द्रियादिपाते सत्यात्मकार्याकरणात्कुतोऽस्यात्मेति, पाठान्तरं वा 'से आयवी नाणवी' आत्मानं स्वभ्रादिपतनरक्षणद्वारेण वेत्तीत्यात्मवित्, तथा ज्ञानं-यथावस्थितपदार्थपरिच्छेदकं वेत्तीति ज्ञानवित्, तथा वेद्यते जीवादिस्वरूपम् अनेनेति वेदः-आचाराद्यागमः तं वेत्तीत्ति वेदवित्, तथा दुर्गतिप्रसृतजन्तुधरणस्वभावं स्वर्गापवर्गमार्गं धर्मं वेत्तीति धर्मवित्, एवं ब्रह्म-अशेषमलकलङ्कविकलं योगिशर्म्म वेत्तीति ब्रह्मवित्, यदिवा अष्टादशधा ब्रह्मेति, एवम्भूतश्चासौ प्रकर्षेण ज्ञायते ज्ञेयं यैस्तानि प्रज्ञानानि-मत्यादीनि तैर्लोकं यथावस्थितं जन्तुलोकं तदाधारं वा क्षेत्रं जानाति-परिच्छिनत्तीत्युक्तं भवति, य एव शब्दादिविषयसङ्गस्य परिहर्त्ता स एव यथावस्थितलोकस्वरूपपरिच्छेदीति। यश्चानन्तरगुणोपेतः स किं वाच्य? इत्यत आह—'मुणी' त्यादि, यो ह्यात्मवान् ज्ञानवान् वेदवान् धर्म्मवान् ब्रह्मवान् प्रज्ञानैर्यैस्तैः समस्तैर्वा लोकं जानाति स मुनिर्वाच्यो, मनुते मन्यते वा जगतस्त्रिकालावस्थां मुनिरितिकृत्वा, किं च—'धम्म' इत्यादि, धर्म्मं-चेतनाचेतनद्रव्यस्वभावं श्रुतचारित्ररूपं वा वेत्तीति धर्मवित्, 'ऋजु'रिति ऋजोः-ज्ञानदर्शनचारित्राख्यस्य मोक्षमार्गस्यानुष्ठानादकुटिलो यथावस्थितपदार्थस्वरूपपरिच्छेदाद्वा ऋजुः सर्वोपाधिशुद्धोऽवक्र इतियावत्। तदेवं धर्म्मविदृजुर्मुनिः किम्भूतो भवतीत्याह—'आवट्ट' इत्यादि, भावावर्त्तो-जन्मजरामरणरोगशोकव्यसनोपनिपातात्मकः संसार इति, उक्तं हि—"रागद्वेषवशाविद्धं, मिथ्यादर्शनदुस्तरम्। जन्मावर्त्ते जगत्क्षिप्तं, प्रमादाद्भ्राम्यते भृशम् ॥ १ ॥" भावश्रोतोऽपि शब्दादिकामगुणविषयाभिलाषः, आवर्त्तश्च श्रोतश्चावर्त्तश्रोतसी तयो रागद्वेषाभ्यां सम्बन्धः-सङ्गस्तमभिजानाति-आभिमुख्येन परिच्छिनत्ति-यथाऽयं सङ्गः आवर्त्तश्रोतसोः कारणं, जानानश्च परमार्थतः कोऽभिधीयते?, योऽनर्थं ज्ञात्वा परिहरति, ततश्चायमर्थः-संसारश्रोतःसङ्गं रागद्वेषात्मकं ज्ञात्वा यः परिहरति स एव आवर्त्तश्रोतसोः सङ्गस्याभिज्ञाता ॥ सुप्तजाग्रतां दोषगुणपरिच्छेदी कं गुणमवाप्नुयादित्याह—

सीउसिणच्चाई से निग्गंथे अरइरइसहे, फरुसयं नो वेएइ, जागर वेरोवरए, वीरे एवं दुक्खा पमुक्खसि, जरामच्चुवसोवणिए नरे सययं मूढे धम्मं नाभिजाणइ (सू० १०८)

सबाह्याभ्यन्तरग्रन्थरहितः सन् शीतोष्णत्यागी सुखदुःखानभिलाषुकः शीतोष्णरूपौ वा परीषहावतिसहमानः संयमासंयमरत्यरतिसहः सन् परुषतां-कर्कशतां पीडाकारितां परीषहाणामुपसर्गाणां वा कर्मक्षपणायोद्यतः साह्यां मन्यमानो 'नो वेत्ति' न तान् पीडाकारित्वेन गृह्णातीत्युक्तं भवति, यदिवा संयमस्य तपसो वा परुषतां शरीरपीडोत्पादनात् कर्म्मलेपापनयनाद्वा संसारोद्विग्नमना मुमुक्षुर्निराबाधसुखोन्मुखो 'न वेत्ति' न संयमतपसी पीडाकारित्वेन गृह्णातीतियावत्। किं च—'जागर' इत्यादि, असंयमनिद्रापगमाज्जागर्तीति जागरः, अभिमानसमुत्थोऽमर्षावेशः परापकाराध्यवसायो वैरं तस्मादुपरतो वैरोपरतो, जागरश्चासौ वैरोपरतश्चेति विगृह्य कर्म्मधारयः, क एवम्भूतो?—'वीरः' कर्म्मापनयनशक्त्युपेतः, एवम्भूतश्च त्वं वीर! आत्मानं परं वा दुःखाद्दुःखकारणाद्वा कर्म्मणः प्रमोक्ष्यसीति। यश्च यथोक्ताद्विपरीतः आवर्त्तश्रोतसोः सङ्गमुपगतोऽजागरः स किमाप्नुयादित्याह—जरा च मृत्युश्च ताभ्यामात्मवशमुपनीतो 'नरः' प्राणी 'सततम्' अनवरतं 'मूढो' महामोहमोहितमतिर्द्धर्म्मं-स्वर्गापवर्गमार्गं नाभिजानीते-नावगच्छति, तत् संसारे स्थानमेव नास्ति यत्र जरामृत्यू न स्तः, देवानां जराऽभाव इति चेत्, न, तत्राप्युपान्त्यकाले लेश्याबलसुखप्रभुत्ववर्णहान्युपपत्तेरस्त्येव च तेषामपि जरासद्भावः, उक्तं च—"देवा णं भंते! सव्वे समवण्णा?, नो इणट्ठे समट्ठे, सेकेणं ट्ठेणं भंते! एवं

१ देवा भदन्त! सर्वे समवर्णाः?, नैषोऽर्थः समर्थः, तत् केनार्थेन भदन्त! एवमुच्यते?, गौतम! देवा द्विविधाः-पूर्वोत्पन्नकाश्च पश्चादुपपन्नकाश्च। तत्र ये ते पूर्वोत्पन्नकास्तेऽविशुद्धवर्णाः, ये पश्चादुत्पन्नास्ते विशुद्धवर्णाः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वुच्चइ?, गोयमा! देवा दुविहा–पुव्वोववण्णगा य पच्छोववण्णगा य। तत्थ णं जे ते पुव्वोववण्णगा ते णं अविसुद्धवण्णयरा, जे णं पच्छोववण्णगा ते णं विसुद्धवण्णयरा" एवं लेश्याद्यपीति, च्यवनकाले तु सर्वस्यैवैतद्भवति, तद्यथा—"माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्रीह्रीनाशो वाससां चोपरागः। दैन्यं तन्द्रा कामरागाङ्गभङ्गौ, दृष्टिभ्रान्तिर्वेपथुश्चारतिश्च ॥ १ ॥" यतश्चैवमतः सर्वं जरामृत्युवशोपनीतमभिसमीक्ष्य किं कुर्यादित्याह—

पासिय आउरपाणे अप्पमत्तो परिव्वए, मंता य मइमं, पास आरंभजं दुक्खमिणंति णच्चा, माई पमाई पुण एइ गब्भं, उवेहमाणो सद्दरूवेसु उज्जू माराभिसंकी मरणा पमुच्चई, अप्पमत्तो कामेहिं, उवरओ पावकम्मेहिं, वीरे आयगुत्ते खेयन्ने, जे पज्जवजायसत्थस्स खेयण्णे से असत्थस्स खेयन्ने, जे असत्थस्स खेयण्णे से पज्जवजायसत्थस्स खेयन्ने, अकम्मस्स ववहारो न विज्जइ, कम्मुणा उवाही जायइ, कम्मं च पडिलेहाए (सू० १०९)

स हि भावजागरस्तैस्तैर्भावस्वापजनितैः शारीरमानसैर्दुःखैरातुरान्–किंकर्त्तव्यतामूढान् दुःखसागरावगाढान् प्राणानभेदोपचारात् प्राणिनो 'दृष्ट्वा' ज्ञात्वाऽप्रमत्तः परिव्रजेद्–उद्युक्तः सन् संयमानुष्ठानं विदध्यात्। अपि च—'मंता' इत्यादि, हे मतिमन्!–सश्रुतिक! भावसुप्तातुरान् पश्य, मत्वा चैतज्जाग्रत्सुप्तगुणदोषापादनं मा स्वापमतिं कुरु, किं च—'आरंभज'मित्यादि, आरम्भः–सावद्यक्रियानुष्ठानं तस्माज्जातमारम्भजं, किं तद्?–दुःखं तत्कारणं वा कर्म्म। 'इद'मिति प्रत्यक्षगोचरापन्नमशेषारम्भप्रवृत्तप्राणिगणानुभूयमानमित्येतत् 'ज्ञात्वा' परिच्छिद्य निरारम्भो भूत्वाऽऽत्महिते जागृहि। यस्तु विषयकषायाच्छादितचेता भावशायी स किमामुयादित्याह—'माई' इत्यादि, मध्यग्रहणाच्चाद्यन्तयोर्ग्रहणं, तेन क्रोधादिकषायवान् मद्यादिप्रमादयोगारकदुःखमनुभूय पुनस्तिर्यक्षु गर्भमुपैति। यस्त्वकषायी प्रमादरहितः स किम्भूतो भवतीत्याह—'उवेह' इत्यादि, बहुवचननिर्देशादाद्यर्थो गम्यते, शब्दरूपादिषु यौ रागद्वेषौ तावुपेक्षमाणः–अकुर्वन् ऋजुर्भवति–यतिर्भवति, यतिरेव परमार्थत ऋजुः, अपरस्त्वन्यथाभूतः रुग्णादिपदार्थान्यथाग्रहणाद्वक्रः, किं च–स ऋजुः शब्दादीनुपेक्षमाणो मरणं मारस्तदभिशङ्की–मरणाद्विजिगंसुस्तत्करोति येन मरणात् प्रमुच्यते। किं तत्करोतीत्याह—'अप्पमत्त' इत्यादि, कामैर्यः प्रमादस्तत्राप्रमत्तो भवेत्। कश्चाप्रमत्तः स्याद्?, य कामारम्भकेभ्यः पापेभ्य उपरतो भवतीति दर्शयति—'उवरओ' इत्यादि, उपरतो मनोवाक्कायैः, कुतः?–पापोपादानकर्म्मभ्यः, कोऽसौ?–वीरः, किम्भूतो?–गुप्तात्मा, कश्च गुप्तो भवति?, यः खेदज्ञो, यश्च खेदज्ञः स कं गुणमवाप्नुयादित्याह—'जे पज्जव' इत्यादि, शब्दादीनां विषयाणां पर्यवाः–विशेषास्तेषु–तन्निमित्तं जातं शस्त्रं पर्यवजातशस्त्रं–शब्दादिविशेषोपादानाय यत्प्राण्युपघातकार्यनुष्ठानं तत्पर्यवजातशस्त्रं तस्य पर्यवजातशस्त्रस्य यः खेदज्ञो–निपुणः सोऽशस्त्रस्य–निरवद्यानुष्ठानरूपस्य संयमस्य खेदज्ञो, यश्चाशस्त्रस्य संयमस्य खेदज्ञः स पर्यवजातशस्त्रस्य खेदज्ञः, इदमुक्तं भवति–यः शब्दादिपर्यायानिष्टानिष्टात्मकान् तत्प्राप्तिपरिहारानुष्ठानं च

शस्त्रभूतं वेत्ति सोऽनुपघातकत्वात्संयममप्यशस्त्रभूतमात्मपरोपकारिणं वेत्ति, शस्त्राशस्त्रे च जानानस्तत्प्राप्तिपरिहारौ विधत्ते, एतत्फलत्वात् ज्ञानस्येति, यदिवा शब्दादिपर्यायेभ्यस्तज्जनितरागद्वेषपर्यायेभ्यो वा जातं यज्ज्ञानावरणीयादि कर्म्म तस्य यच्छस्त्रं दाहकत्वात् तपसस्य यः खेदज्ञः तज्ज्ञानानुष्ठानतः सोऽशस्त्रस्य संयमस्यापि खेदज्ञः, पूर्वोक्तादेव हेतोः, हेतुहेतुमद्भावाच्च योऽशस्त्रस्य खेदज्ञः स पर्यवजातशस्त्रस्यापि खेदज्ञ इति, तस्य च संयमतपःखेदज्ञस्यास्रवनिरोधादनादिभवोपात्तकर्म्मक्षयः। कर्म्मक्षयाच्च यद्भवति तदप्यतिदिशति—'अकम्मस्स' इत्यादि, न विद्यते कर्म्माष्टप्रकारमस्येत्यकर्म्मा तस्य 'व्यवहारो न विद्यते' नासौ नारकतिर्यग्नरामरपर्याप्तकापर्याप्तकबालकुमारादिसंसारिव्यपदेशभाग् भवति। यश्च सकर्म्मा स नारकादिव्यपदेशेन व्यपदिश्यत इत्याह—'कम्मुणा' इत्यादि, उपाधीयते–व्यपदिश्यते येनेत्युपाधिः–विशेषणं स उपाधिः कर्म्मणा–ज्ञानावरणीयादिना जायते, तद्यथा–मतिश्रुतावधिमनःपर्यायवान् मन्दमतिस्तीक्ष्णो वेत्यादि, चक्षुर्दर्शनी अचक्षुर्दर्शनी निद्रालुरित्यादि, सुखी दुःखी वेति, मिथ्यादृष्टिः सम्यग्मिथ्यादृष्टिः स्त्री पुमान्नपुंसकः कषायीत्यादि, सोपक्रमायुष्को निरुपक्रमायुष्कोऽल्पायुरित्यादि, नारकः तिर्यग्योनिक एकेन्द्रियो द्वीन्द्रियः पर्याप्तकोऽपर्याप्तकः सुभगो दुर्भग इत्यादि, उच्चैर्गोत्रो नीचैर्गोत्रो वेति, कृपणस्त्यागी निरुपभोगो निर्वीर्यः, इत्येवं कर्म्मणा संसारी व्यपदिश्यते। यदि नामैवं ततः किं कर्त्तव्यमित्याह—'कम्मं च इत्यादि, कर्म्म–ज्ञानावरणीयादि तत्प्रत्युपेक्ष्य बन्धं वा प्रकृतिस्थित्यनुभावप्रदेशात्मकं पर्यालोच्य, तत्सत्ताविपाकापन्नांश्च प्राणिनो यथा भावनिद्रया शेरते तथाऽवगम्याकर्म्मतोपाये भावजागरणे यतितव्यमिति, तदभावश्चानेन प्रक्रमेण भवति, तद्यथा–अष्टविधसत्कर्म्मापूर्वादिकरणक्ष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पकश्रेणिप्रक्रमेण मोहनीयक्षयं विधायान्तर्मुहूर्त्तमजघन्योत्कृष्टं कालं सप्तविधसत्कर्म्मा, ततः शेषघातित्रये क्षीणे चतुर्विधभवोपग्राहिसत्कर्म्मा जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टतो देशानां पूर्वकोटिं यावत्, पुनरूर्द्धं पञ्चह्रस्वाक्षरोच्चिरणकालीयां शैलेश्यवस्थामनुभूयाकर्म्मा भवति । साम्प्रतमुत्तरप्रकृतीनां सदसत्कर्म्मताविधानमुच्यते—तत्र ज्ञानावरणीयान्तराययोः प्रत्येकमुपात्तपञ्चभेदयोश्चतुर्दशस्वपि जीवस्थानकेषु गुणस्थानकेषु च मिथ्यादृष्टेरारभ्य केवलिगुणस्थानादारतोऽपरविकल्पाभावात् पञ्चविधसत्कर्म्मता । दर्शनावरणस्य त्रीणि सत्कर्म्मतास्थानानि, तद्यथा—नवविधं निद्रापञ्चकदर्शनचतुष्टयसमन्वयाद् एतत् सर्वजीवस्थानानुयायि, गुणस्थानेष्वप्यनिवृत्तिबादरकालसङ्ख्येयभागान् यावत् १, ततः कतिचित्सङ्ख्येयभागावसाने स्त्यानर्द्धित्रयक्षयात् षट्सत्कर्म्मतास्थानं २, ततः क्षीणकषायद्विचरमसमये निद्राप्रचलाद्वयक्षयाच्चतुःसत्कर्म्मतास्थानं, तस्यापि क्षयः क्षीणकषायकालान्त इति ३ । वेदनीयस्य द्वे सत्कर्म्मतास्थाने, तद्यथा—द्वे अपि सातासाते इत्येकं, अन्यतरोदयारूढशैलेश्यवस्थेतरद्विचरमक्षणक्षये सति सातमसातं वा कर्म्मेति द्वितीयं २ । मोहनीयस्य पञ्चदश सत्कर्म्मतास्थानानि, तद्यथा—षोडश कषाया नव नोकषाया दर्शनत्रये सति सम्यग्दृष्टेरष्टाविंशतिः १, सम्यक्त्वोद्वलने सम्यग्मिथ्यादृष्टेः सप्तविंशतिः २, दर्शनद्वयोद्वलनेऽनादिमिथ्यादृष्टेर्वा षड्विंशतिः ३, सम्यग्दृष्टेरष्टाविंशतिसत्कर्म्मणोऽनन्तानुबन्ध्युद्वलने क्षपणे वा चतुर्विंशतिः ४, मिथ्यात्वक्षये त्रयोविंशतिः ५, सम्यग्मिथ्यात्वक्षये द्वाविंशतिः ६, क्षायिकसम्यग्दृष्टेरेकविंशतिः ७, अप्रत्याख्यानप्रत्याख्यानावरणक्षये त्रयोदश ८, अन्यतरवेदक्षये द्वादश ९, द्वितीयवेदक्षये सत्येकादश १०, हास्यादिषट्कक्षये पञ्च ११, पुंवेदाभावे चत्वारि १२, सञ्ज्वलनक्रोधक्षये त्रयः १३, मानक्षये द्वौ १४,

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १५७ ॥

शीतो० ३ उद्देशकः १

मायाक्षये सत्येको लोभः १५, तत्क्षये च मोहनीयासत्तेति । आयुषो द्वे सत्कर्म्मतास्थाने सामान्येन, तद्यथा—परभवायुष्कबन्धोत्तरकालमायुष्कद्वयमेकं १, द्वितीयं तु तद्बन्धाभाव इति । नाम्नो द्वादश सत्कर्म्मतास्थानानि, तद्यथा—त्रिनवतिः १ द्विनवतिः २ एकोननवतिः ३ अष्टाशीतिः ४ षडशीतिः ५ अशीतिः ६ एकोनाशीतिः ७ अष्टसप्ततिः ८ षट्सप्ततिः ९ पञ्चसप्ततिः १० नव ११ अष्टौ १२ चेति, तत्र त्रिनवतिः—गतयश्चतस्रः ४ पञ्च जातयः ५ पञ्च शरीराणि ५ पञ्च सङ्घाताः ५ बन्धनानि पञ्च ५ संस्थानानि षट् ६ अङ्गोपाङ्गत्रयं ३ संहननानि षट् ६ वर्णपञ्चकं ५ गन्धद्वयं २ रसाः पञ्च ५ अष्टौ स्पर्शा ८ आनुपूर्वीचतुष्टयं ४ अगुरुलघूपघातपराघातोच्छ्वासातपोद्योताः षट् ६ प्रशस्तेतरविहायोगतिद्वयं २ प्रत्येकशरीरत्रसशुभसुभगसुस्वरसूक्ष्मपर्याप्तकस्थिरादेययशांसि सेतराणीति विंशतिः २० निर्म्माणं तीर्थकरत्वमित्येवं सर्वसमुदाये त्रिनवतिर्भवति ९३, तीर्थकरनामाभावे द्विनवतिः ९२, त्रिनवतेराहारकशरीरसङ्घातबन्धनाङ्गोपाङ्गचतुष्टयाभावे सत्येकोननवतिः ८९, ततोऽपि तीर्थकरनामाभावेऽष्टाशीतिः ८८, देवगतितदानुपूर्वीद्वयोद्वलने षडशीतिः ८६, यदिवा अशीतिसत्कर्मणो नरकगतिप्रायोग्यं बध्नतः तद्गत्यानुपूर्वीद्वयवैक्रियचतुष्कबन्धकस्य षडशीतिः, देवगतिप्रायोग्यबन्धकस्य वेति, ततो नरकगत्यानुपूर्वीद्वयवैक्रियचतुष्टयोद्वलनेऽशीतिः ८०, पुनर्मनुष्यगत्यानुपूर्वीद्वयोद्वलनेऽष्टसप्ततिः ७८, एतान्यक्षपकाणां सत्कर्म्मतास्थानानि । क्षपकश्रेण्यन्तर्गतानां तु प्रोच्यन्ते, तद्यथा—त्रिनवतेर्नरकतिर्यग्गतितदानुपूर्वीद्वयैकद्वित्रिचतुरिन्द्रियजात्यातपोद्योतस्थावरसूक्ष्मसाधारणरूपैर्नरकतिर्यग्गतिप्रायोग्यैस्त्रयोदशभिः कर्म्मभिः क्षपितैरशीतिर्भवति, द्विनवतेस्त्वेभिस्त्रयोदशभिः क्षपितैरेकोनाशीतिः, याऽसावाहारकचतुष्टयापगमेनैकोननवतिः सञ्जाता ततस्त्रयोदशनाम्नि क्षपिते षट्सप्ततिर्भवति, तीर्थकरनामाभावापादिताऽष्टाशीतिः, अष्टाशीतेस्त्रयोदशनामाभावे पञ्चसप्ततिः, तत्राशीतेः षट्सप्ततेर्वा तीर्थकरकेवलिशैलेश्यायपद्विचरमसमये तीर्थकरनाम्नः प्रक्षेपात् वेद्यमाननवकर्म्मप्रकृतिव्युदासेन क्षयमुपगते शेषनाम्नि अन्त्यसमये नवसत्कर्म्मतास्थानं, ताश्च वेद्यमाना नवेमाः, तद्यथा—मनुजगति १ पञ्चेन्द्रियजाति २ त्रस ३ बादर ४ पर्याप्तक ५ सुभगादेय ६–७ यशःकीर्त्ति ८ तीर्थकररूपाः ९, एता एव शैलेश्यन्त्यसमये सत्तां बिभ्रति, शेषास्तु एकसप्ततिः सप्तषष्टिर्वा द्विचरमसमये क्षयमुपयान्ति, एता एव नव अतीर्थकरकेवलिनस्तीर्थकरनामरहिता अष्टौ भवन्ति, अतोऽन्त्यसमयेऽष्टसत्कर्म्मतास्थानमिति । सामान्येन गोत्रस्य द्वे सत्कर्म्मतास्थाने, तद्यथा—उच्चनीचगोत्रसद्भावे सत्येकं सत्कर्म्मतास्थानं, तेजोवायूच्चैर्गोत्रोद्वलने कालकलीभावावस्थायां नीचैर्गोत्रसत्कर्म्मतेति द्वितीयं, यदिवा अयोगिद्विचरमसमये नीचैर्गोत्रक्षये सत्युच्चैर्गोत्रसत्कर्म्मता, एवं द्विरूपगोत्रावस्थाने सत्येकं सत्कर्म्मतास्थानमन्यतरगोत्रसद्भावे सति द्वितीयमित्येवं कर्म्म प्रत्युपेक्ष्य तत्सत्तापगमाय यतिना यतितव्यमिति । किं च—

॥ १५७ ॥

कम्ममूलं च जं छणं, पडिलेहिय सव्वं समायाय दोहिं अंतेहिं अदिस्समाणे तं परिन्नाय मेहावी विइत्ता लोगं वंता लोगसन्नं से मेहावी परिक्कमिज्जासि (सू० ११०) त्तिबेमि ॥ शीतोष्णीयोद्देशः १ ॥

कर्मणो मूलं—कारणं मिथ्यात्वाविरतिप्रमादकषाययोगाः, चः समुच्चये, कर्म्ममूलं च प्रत्युपेक्ष्य 'यत्क्षण'मिति 'क्षणु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिंसायां' क्षणनं–हिंसनं यत्किमपि प्राण्युपघातकारि तत् कर्म्ममूलतया प्रत्युपेक्ष्य परित्यजेत्, पाठान्तरं वा 'कम्ममाहूय जं छणं' य उपादानक्षणोऽस्य कर्म्मणः तत्क्षणं कर्म्माहूय–कर्म्मोपादाय तत्क्षणमेव निवृत्तिं कुर्याद्, इदमुक्तं भवति–अज्ञानप्रमादादिना यस्मिन्नेव क्षणे कर्म्महेतुकमनुष्ठानं कुर्यात्तस्मिन्नेव क्षणे लब्धचेताः तदुपादानहेतोर्निवृत्तिं विदध्यादिति, पुनरप्युपदेशदानायाह—'पडिलेहिअ' इत्यादि, 'प्रत्युपेक्ष्य' पूर्वोक्तं कर्म्म तद्विपक्षमुपदेशं च सर्वं 'समादाय' गृहीत्वा अन्तहेतुत्वादन्तौ–रागद्वेषौ ताभ्यां सहादृश्यमानः ताभ्यामनपदिश्यमानो वा तत्कर्म तदुपादानं वा रागादिकं ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति, रागादिमोहितं लोकं विषयकषायलोकं वा ज्ञात्वा वान्त्वा च 'लोकसंज्ञां' विषयपिपासासंज्ञितां धनायाग्रहग्रहरूपां वा 'स' मेधावी मर्यादाव्यवस्थितः सन् 'पराक्रमेत' संयमानुष्ठाने उद्युक्तो भवेत् विषयपिपासामरिषड्वर्गं वाऽष्टप्रकारं वा कर्म्मावष्टभ्याद् । इतिः परिसमाप्तौ ब्रवीमीति पूर्ववत । इति शीतोष्णीयाध्ययनप्रथमोद्देशकटीका समाप्ता ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीय आरभ्यते, अस्य चायमभिसम्बन्धः, पूर्वोद्देशके भावसुप्ताः प्रदर्शिताः, इह तु तेषां स्वापविपाकफलमसातमुच्यते इत्यनेन सम्बन्धेनायातस्यास्य सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—

जाइं च वुड्ढिं च इहज्ज! पासे, भूएहिं जाणे पडिलेह सायं । तम्हाऽतिविज्जे परमंति णच्चा, संमत्तदंसी न करेइ पावं ॥ १ ॥

॥ १५८ ॥

जातिः–प्रसूतिः बालकुमारयौवनवृद्धावस्थावसाना वृद्धिः 'इह' मनुष्यलोके संसारे वा अद्यैव कालक्षेपमन्तरेण, जातिं च वृद्धिं च 'पश्य' अवलोकय, इदमुक्तं भवति–जायमानस्य यद्दुःखं वृद्धावस्थायां च यच्छारीरमानसमुत्पद्यते तद्विवेकचक्षुषा पश्य, उक्तं च—"जायमाणस्स जं दुक्खं, मरमाणस्स जंतुणो । तेण दुक्खेण संतत्तो, न सरइ जाइमप्पणो ॥ १ ॥ विरसरसियं रसंतो तो सो जोणीमुहाउ निप्फिडइ । माऊए अप्पणोऽविअ वेअणमउलं जणेमाणो ॥ २ ॥" तथा—'हीणभिण्णसरो दीणो, विवरीओ विचित्तओ । दुब्बलो दुक्खिओ वसइ, संपत्तो चरिमं दसं ॥ ३ ॥' इत्यादि, अथवा आर्य इत्यामन्त्रणं भगवान् गौतममामन्त्रयति, इह आर्य! जातिं वृद्धिं च तत्कारणं कर्म्म कार्यं च दुःखं पश्य, दृष्ट्वाऽवबुद्धस्व, यथा च जात्यादिकं न स्यात् तथा विधत्स्व । किं चापरं—'भूएहि'मित्यादि, भूतानि–चतुर्दशभूतग्रामास्तैः सममात्मनः सातं–सुखं 'प्रत्युपेक्ष्य' पर्यालोच्य जानीहि, तथाहि–यथा त्वं सुखप्रिय एवमन्येऽपीति, यथा च त्वं दुःखद्विडेवमन्येऽपि जन्तवः, एवं मत्वाऽन्येषामसातोत्पादनं न विदध्याः, एवं च जन्मादिदुःखं न प्राप्स्यसीति, उक्तं च—"यथेष्टविषयाः सातमनिष्टा इतरत्तव । अन्यत्रापि विदित्वैवं, न कुर्यादप्रियं जने ॥ १ ॥" यद्येवं ततः किमित्याह—'तम्हा' इत्यादि, 'तस्माद्' जातिवृद्धिसुखदुःखदर्शनादतीव विद्वान्–तत्त्वपरिच्छेत्री यस्मात्सावतिविद्वः स

---

१ जायमानस्य यद्दुःखं म्रियमाणस्य जन्तोः । तेन दुःखेन संतप्तो न स्मरति जातिमात्मनः ॥ १ ॥ विरसरसितं रसन् ततः स योनिमुखात् निस्सरति । मातुरात्मनोऽपि च वेदनामतुलां जनयन् ॥ २ ॥ हीनभिन्नस्वरो दीनो विपरीतो विचित्तकः । दुर्बलो दुःखितो वसति संप्राप्तः चरमां दशाम् ॥ ३ ॥

'परमं' मोक्षं ज्ञानादिकं वा तन्मार्गं ज्ञात्वा सम्यक्त्वदर्शी सन् पापं न करोति, सावद्यमनुष्ठानं न विदधातीत्युक्तं भवति । पापस्य च मूलं स्नेहपाशास्तदपनोदार्थमाह—

उम्मुंच पासं इह मच्चिएहिं, आरंभजीवी उभयाणुपस्सी । कामेसु गिद्धा निचयं करंति, संसिच्चमाणा पुणरिंति गब्भं ॥ २ ॥

'इह' मनुष्यलोके चतुर्विधकषायविषयविमोक्षक्षमाधारे मर्त्यैः सार्द्धं द्रव्यभावभेदभिन्नं पाशमुत्–प्राबल्येन 'मुञ्च' अपाकुरु, स हि कामभोगलालसस्तदादानहेतोर्हिंसादीनि पापान्यारभते अतोऽपदिश्यते—'आरंभ' इत्यादि, आरम्भेण जीवितुं शीलमस्येत्यारम्भजीवी–महारम्भपरिग्रहपरिकल्पितजीवनोपायः उभयं–शारीरमानसमैहिकामुष्मिकं वा द्रष्टुं शीलमस्येति स तथा, किं च—'कामेसु' इत्यादि, कामा–इच्छामदनरूपास्तेषु गृद्धाः–अध्युपपन्ना निचयं–कर्म्मोपचयं कुर्वन्ति । यदि नामैवं ततः किमित्याह—'संसिच्च' इत्यादि, तेन कामोपादानजनितेन कर्म्मणा 'संसिच्यमानाः' आपूर्यमाणा गर्भाद्गर्भान्तरमुपयान्ति, संसारचक्रवालेऽरघट्टघटीयन्त्रन्यायेन पर्यटन्ते, आसत इत्युक्तं भवति । तदेवमनिभृतात्मा किंभूतो भवतीत्याह—

अवि से हासमासज्ज, हंता नंदीति मन्नई। अलं बालस्स संगेण, वेरं वड्ढेइ अप्पणो ॥३॥

॥ १५९ ॥

हीमयादिनिमित्तश्चेतोविप्लवो हासस्तमासाद्य–अङ्गीकृत्य 'स' कामगृद्धुर्हत्वाऽपि प्राणिनो 'नन्दी'ति क्रीडेति मन्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वदति च महामोहावृतोऽशुभाध्यवसायो यथा एते पशवो मृगयार्थं सृष्टाः, मृगया च सुखिनां क्रीडायै भवति, इत्येवं मृषावादादत्तादानादिष्वप्यायोज्यं । यदि नामैवं ततः किमित्याह—'अल'मित्यादि, अलं–पर्याप्तं बालस्य–अज्ञस्य यः प्राणातिपातादिरूपः सङ्गो विषयकषायादिमयो वा तेनालं, बालस्य हास्यादिसङ्गेनालं, किमिति चेद्?, उच्यते, 'वेर'मित्यादि, पुरुषादिवधसमुत्थं वैरं तद्बालः सङ्गानुषङ्गी सन्नात्मनो वर्द्धयति, तद्यथा–गुणसेनेन हास्यानुषङ्गादग्निशर्म्माणं नानाविधैरुपायैरुपहसता नवभवानुषङ्गि वैरं वर्द्धितं, एवमन्यत्रापि विषयसङ्गादावायोज्यं ॥ यतश्चैवमतः किमित्याह—

तम्हातिविज्जो परमंति णच्चा, आयंकदंसी न करेइ पावं । अग्गं च मूलं च विगिंच धीरे, पलिच्छिंदिया णं निक्कम्मदंसी ॥ ४ ॥

यस्माद्बालसङ्गिनो वैरं वर्द्धते तस्मादतिविद्वान् परमं–मोक्षपदं सर्वसंवररूपं चारित्रं वा सम्यग्ज्ञानं सम्यग्दर्शनं वा, एतत्परमिति ज्ञात्वा किं करोतीत्याह—'आयंके'त्यादि, आतङ्को–नरकादिदुःखं तद्द्रष्टुं शीलमस्येत्यातङ्कदर्शी स 'पापं' पापानुबन्धि कर्म्म न करोति, उपलक्षणार्थत्वान्न कारयति नानुमन्यते । पुनरप्युपदेशदानायाह—'अग्गं च'इत्यादि, अग्रं–भवोपग्राहिकर्म्मचतुष्टयं मूलं–घातिकर्म्मचतुष्टयं, यदिवा मोहनीयं मूलं शेषाणि त्वग्रं, यदिवा मिथ्यात्वं मूलं शेषं त्वग्रं, तदेवं सर्वमग्रं मूलं च 'विगिंच' इति त्यजापनय पृथक्कुरु, तदनेनेदमुक्तं भवति–न कर्म्मणः पौद्गलिकस्यात्यन्तिकः क्षयः, अपि त्वात्मनः पृथक्करणं, कथं मोहनीयस्य मिथ्यात्वस्य वा मूलत्वम्? इति चेत्, तद्बशाच्छेषप्रकृतिबन्धो यतः,

उक्तं च—"न मोहमावृत्य बन्ध उदितस्त्वया कर्म्मणां, न चैकावेधबन्धनं प्रकृतिबन्धविभवो महान् । अनादिभवहेतुरेष न च बध्यते नासकृत्त्वयाऽतिकुटिला गतिः कुशल! कर्म्मणां दर्शिता ॥ १ ॥" तथा चागमः—"कहण्णं भंते! जीवा अट्ठ कम्मपगडीओ बंधंति?, गोयमा! णाणावरणिज्जस्स उदएणं दरिसणावरणिज्जं कम्मं नियच्छइ, दरिसणावरणिज्जस्स कम्मस्स उदएणं दंसणमोहणीयं कम्मं नियच्छइ, दंसणमोहणिज्जस्स कम्मस्स उदएणं मिच्छत्तं नियच्छइ, मिच्छत्तेणं उदिण्णेणं एवं खलु जीवे अट्ठकम्मपगडीओ बंधइ", क्षयोऽपि मोहनीयक्षयाविनाभावी, उक्तं च—"नायगंमि हते संते, जहा सेणा विणस्सई । एवं कम्मा विणस्संति, मोहणिज्जे खयं गए ॥ १ ॥" इत्यादि, अथवा मूलम्–असंयमः कर्म्म वा, अग्रं–संयमतपसी मोक्षो वा ते मूलाग्रे 'धीरः' अक्षोभ्यो धीविराजितो वा विवेकेन दुःखसुखकारणतयाऽवधारय । किं च—'पलिच्छिंदिया ण'मित्यादि, तपःसंयमाभ्यां रागादीनि बन्धनानि तत्कार्याणि वा कर्म्माणि छित्त्वा निष्कर्म्मदर्शी भवति, निष्कर्म्माणमात्मानं पश्यति तच्छीलश्च निष्कर्म्मत्वाद्धा अपगतावरणः सर्वदर्शी सर्वज्ञानी च भवति ॥ यश्च निष्कर्म्मदर्शी भवति सोऽपरं किमाश्रयादित्याह—

---

१ कथं भदन्त! जीवा अष्ट कर्मप्रकृतीर्बध्नन्ति?, गौतम! ज्ञानावरणीयस्योदयेन दर्शनावरणीयं कर्म बध्नन्ति, दर्शनावरणीयस्य कर्मण उदयेन दर्शनमोहनीयं कर्म बध्नन्ति, दर्शनमोहनीयस्य कर्मण उदयेन मिथ्यात्वं बध्नन्ति, मिथ्यात्वेनोदितेनैवं खलु जीवा अष्ट कर्मप्रकृतीर्बध्नन्ति ॥ २ नायके हते सति यथा सेना विनश्यति । एवं कर्माणि विनश्यन्ति मोहनीये क्षयं गते ॥ १ ॥

एस मरणा पमुच्चइ, से हु दिट्ठभए मुणी, लोगंसि परमदंसी विवित्तजीवी उवसंते समिए सहिए सया जए कालकंखी परिव्वए, बहुं च खलु पावं कम्मं पगडं (सू० १११)

'एष' इत्यनन्तरोक्तो मूलाग्रेक्षको निष्कर्म्मदर्शी मरणाद्–आयुःक्षयलक्षणात् मुच्यते, आयुषो बन्धनाभावाद्, यदिवा आजवंजवीभावादावीचीमरणाद्धा सर्व एव संसारो मरणं तस्मान्मुच्यते । यश्चैवं स किम्भूतो भवतीत्याह—'से हु' इत्यादि, 'सः' अनन्तरोक्तो मुनिर्दृष्टं संसाराद्भयं सप्तप्रकारं वा येन स तथा, हुरवधारणे दृष्टभय एव । किं च—'लोयंसि' इत्यादि, लोके द्रव्याधारे चतुर्दशभूतग्रामात्मके वा परमो–मोक्षस्तत्कारणं वा संयमः तं द्रष्टुं शीलमस्येति परमदर्शी, तथा 'विविक्तं' स्त्रीपशुपण्डकसमन्वितशय्यादिरहितं द्रव्यतः भावतस्तु रागद्वेषरहितमसङ्क्लिष्टं जीवितुं शीलमस्येति विविक्तजीवी, यश्चैवम्भूतः स इन्द्रियनोइन्द्रियोपशमादुपशान्तो, यश्चोपशान्तः स पञ्चभिः समितिभिः सम्यग्वा इतो–गतो मोक्षमार्गे समितः, यश्चैवं स ज्ञानादिभिः सहितः–समन्वितो, यश्च ज्ञानादिसहितः स सदा यतः–अप्रमादी । किमवधिश्चायमनन्तरोक्तो गुणोपन्यास इत्याह—'काल' इत्यादि, कालो–मृत्युकालस्तमाकाङ्क्षितुं शीलमस्येति कालाकाङ्क्षी स एवम्भूतः परिः–समन्तात्त्रजेत्परिव्रजेत्, यावत्पर्यायागतं पण्डितमरणं तावदाकाङ्क्षमाणो विविक्तजीवित्वादिगुणोपेतः संयमानुष्ठानमार्गे परिव्व्रष्केदिति । स्यादेतत्–किमर्थं एवं क्रियते? इत्याह—मूलोत्तरप्रकृतिभेदभिन्नं प्रकृतिस्थित्यनुभावप्रदेशबन्धात्मकं बन्धोदयसत्कर्म्मताव्यवस्थामयं तथा बद्धस्पृष्टनिधत्तनिकाचितावस्था-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतं कर्म्म तच्च न इसीयसा कालेन क्षयमुपयातीत्यतः कालाकाङ्क्षीत्युक्तं, तत्र बन्धस्थानापेक्षया तावन्मूलोत्तरप्रकृतीना बहुत्वं प्रदर्श्यते, तद्यथा–सर्वमूलप्रकृतीर्बध्नतोऽन्तर्मुहूर्त्तं यावदष्टविधं, आयुष्कवर्जं सप्तविधं, तज्जघन्येनान्तर्मुहूर्त्तमुत्कृष्टतस्त्रिद्रहितानि त्रयस्त्रिंशत्सागरोपमाणि पूर्वकोटित्रिभागाभ्यधिकानि, सूक्ष्मसंपरायस्य मोहनीयबन्धोपरमे आयुष्कबन्धाभावात् षड्विधम्, एतच्च जघन्यतः सामयिकमुत्कृष्टतस्त्वन्तर्मुहूर्त्तमिति, तथोपशान्तक्षीणमोहसयोगिकेवलिनां सप्तविधबन्धोपरमे सातमेकं बध्नतामेकविधं बन्धस्थानं, तच्च जघन्येन सामयिकमुत्कृष्टतो देशोनपूर्वकोटिकालीयं । इदानीमुत्तरप्रकृतिबन्धस्थानान्यभिधीयन्ते–तत्र ज्ञानावरणान्तरायथोः पञ्चभेदयोरप्येकमेव ध्रुवबन्धित्वाद्बन्धस्थानं, दर्शनावरणीयस्य त्रीणि बन्धस्थानानि–निद्रापञ्चकदर्शनचतुष्टयसमन्वयाद् ध्रुवबन्धित्वान्नवविधं १, ततः स्त्यानर्द्धित्रिकस्यानन्तानुबन्धिभिः सह बन्धोपरमे षड्विधं २, अपूर्वकरणसङ्ख्येयभागे निद्राप्रचलयोर्बन्धोपरमे चतुर्विधं बन्धस्थानं ३ । वेदनीयस्यैकमेव बन्धस्थानं–सातमसातं वा बध्नतः, उभयोरपि यौगपद्येन विरोधितया बन्धाभावात् । मोहनीयबन्धस्थानानि दश, तद्यथा–द्वाविंशतिः–मिथ्यात्वं १ षोडश कषाया १७ अन्यतरवेदो १८ हास्यरतियुग्मारतिशोकयुग्मयोरन्यतर २० द्भयं २१ जुगुप्सा २२ चेति १, मिथ्यात्वबन्धोपरमे सास्वादनस्य सैवैकविंशतिः २, सैव सम्यग्मिथ्यादृष्टेरविरतसम्यग्दृष्टेर्वा अनन्तानुबन्ध्यभावे सप्तदशविधं बन्धस्थानं ३, तदेव देशविरतस्याप्रत्याख्यानबन्धाभावे त्रयोदशविधं ४, तदेव प्रमत्ताप्रमत्तापूर्वकरणानां यतीनां प्रत्याख्यानावरणबन्धाभावान्नवविधं ५, एतदेव हास्यादियुग्मस्य भयजुगुप्सयोश्चापूर्वकरणचरमसमये बन्धोपरमात्पञ्चविधं ६, ततोऽनिवृत्तिकरणसङ्ख्येयभागावसाने पुंवेदबन्धोपरमाच्चतुर्विधं ७, ततोऽपि तस्मिन्नेव सङ्ख्येयभागे क्षयमुपगच्छति सति क्रोधमानमायालोभसञ्ज्वलनानां क्रमेण बन्धोपरमात्त्रिविधं ८ द्विविध ९ मेकविधं १० चेति, तस्याप्यनिवृत्तिकरणचरमसमये बन्धोपरमान्मोहनीयस्याबन्धकः । आयुषः सामान्येनैकविधं बन्धस्थानं चतुर्णामन्यतरत्, द्वयादेर्यौगपद्येन बन्धाभावो विरोधादिति । नाम्नोऽष्टौ बन्धस्थानानि, तद्यथा–त्रयोविंशतिस्तिर्यग्गतिप्रायोग्यं बध्नतस्तिर्यग्गतिरेकेन्द्रियजातिरौदारिकतैजसकार्म्मणानि हुण्डसंस्थानं वर्णगन्धरसस्पर्शास्तिर्यग्गतिप्रायोग्यानुपूर्वी अगुरुलघूपघातं स्थावरं बादरसूक्ष्मयोरन्यतरदपर्याप्तकं प्रत्येकसाधारणयोरन्यतरत् अस्थिरं अशुभं दुर्भगं अनादेयं अयशःकीर्त्तिर्निर्माणमिति, इयमेकेन्द्रियापर्याप्तकप्रायोग्यं बध्नतो मिथ्यादृष्टेर्भवति १, इयमेव पराघातोच्छ्वाससहिता पञ्चविंशतिः, नवरमपर्याप्तकस्थाने पर्याप्तकमेव वाच्यं २, इयमेव चातपोद्योतान्यतरसमन्विता षड्विंशतिः, नवरं[1] बादरप्रत्येक एव वाच्ये ३, तथा देवगतिप्रायोग्यं बध्नतोऽष्टाविंशतिः, तथाहि–देवगतिः १ पञ्चेन्द्रियजातिः २ वैक्रिय ३ तैजस ४ कार्म्मणानि ५ शरीराणि समचतुरस्रं ६ अङ्गोपाङ्गं ७ वर्णादिचतुष्टयं ११ आनुपूर्वी १२ अगुरुलघु १३ पघात १४ पराघात १५ उच्छ्वासाः १६ प्रशस्तविहायोगतिः १७ त्रसं १८ बादरं १९ पर्याप्तकं २० प्रत्येकं २१ स्थिरास्थिरयोरन्यतरत् २२ शुभाशुभयोरन्यतरत् २३ सुभगं २४ सुस्वरं २५ आदेयं २६ यशःकीर्त्ययशःकीर्त्योरन्यतरत् २७ निर्माणमिति २८, एषैव तीर्थकरनामसहिता एकोनत्रिंशत्, साम्प्रतं त्रिंशत्–देवगतिः १ पञ्चेन्द्रियजातिः २ वैक्रिया ३ हारका ४ ङ्गोपाङ्ग ६ चतुष्टयं तैजस ७ कार्म्मणे ८ संस्थानमाद्यं ९

१ स्थिरं. २ शुभं.

वर्णादिचतुष्कं १३ आनुपूर्वी १४ अगुरुलघु १५ पघातं १६ पराघातं १७ उच्छ्वासं १८ प्रशस्तविहायोगतिः १९ त्रसं २० बादरं २१ पर्याप्तकं २२ प्रत्येकं २३ स्थिरं २४ शुभं २५ सुभगं २६ सुस्वरं २७ आदेयं २८ यशःकीर्त्तिं २९ निर्माण–३० मिति च बध्नत एकं बन्धस्थानं ६, एषैव त्रिंशत्तीर्थकरनामसहिता एकत्रिंशत् ७, एतेषां च बन्धस्थानानामेकेन्द्रियद्वीन्द्रियत्रीन्द्रियनरकगत्यादिभेदेन बहुविधता कर्म्मग्रन्थादवसेया, अपूर्वकरणादिगुणस्थानकत्रये देवगतिप्रायोग्यबन्धोपरमाद्यशःकीर्त्तिमेव बध्नतः एकविधं बन्धस्थानमिति ८, तत ऊर्द्धं नाम्नो बन्धाभाव इति । गोत्रस्य सामान्येनैकं बन्धस्थानं–उच्चनीचयोरन्यतरत्, यौगपद्येनोभयोर्बन्धाभावो विरोधादिति । तदेवं बन्धद्वारेण लेशतो बहुत्वमावेदितं कर्म्मणां, तच्च बहु कर्म्म प्रकृतं बद्धं प्रकटं वा, तत्कार्यप्रदर्शनात्, खलुशब्दो वाक्यालङ्कारेऽवधारणे वा, बहुरेव तत्कर्म्म । यदि नामैवं ततस्तदपनयनार्थं किं कर्त्तव्यमित्याह—

सच्चंमि धिइं कुव्वहा, एत्थोवरए मेहावी सव्वं पावं कम्मं जोसइ (सू० ११२)

सत्यो हितः सत्यः–संयमस्तत्र धृतिं कुरुध्वं, सत्यो वा मौनीन्द्रागमो यथावस्थितवस्तुस्वरूपाविर्भावनात्, तत्र भगवदाज्ञायां धृतिं कुमार्गपरित्यागेन कुरुध्वमिति, किं च—'एत्थोवरए' इत्यादि, 'अत्र' अस्मिन् संयमे भगवद्वचसि वा उपसामीप्येन रतो–व्यवस्थितो 'मेधावी' तत्त्वदर्शी 'सर्वम्' अशेषं 'पापं' कर्म्म संसारार्णवपरिभ्रमणहेतुं शोषयति–शोषयति क्षयं नयतीतियावत् । उक्तोऽप्रमादः, तत्प्रत्यनीकस्तु प्रमादः, तेन च कषायादिप्रमादेन प्रमत्तः किंगुणो भवतीत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणेगचित्ते खलु अयं पुरिसे, से केयणं अरिहए पूरिण्णए, से अण्णवहाए अण्णपरियावाए अण्णपरिग्गहाए जणवयवहाए जणवयपरियावाए जणवयपरिग्गहाए (सू०११३)

अनेकानि चित्तानि कृषिवाणिज्यावलगनादीनि यस्यासावनेकचित्तः, खलुरवधारणे, संसारसुखाभिलाष्यनेकचित्त एव भवति, 'अयं पुरुष' इति प्रत्यक्षगोचरीभूतः संसार्यपदिश्यते, अत्र च प्रागुपन्यस्तदधिघटिकया कपिलदरिद्रेण च दृष्टान्तो वाच्य इति । यश्चानेकचित्तो भवति स किं कुर्यादित्याह—'से केयण'मित्यादि, द्रव्यकेतनं चालिनी परिपूर्णकः समुद्रो वेति भावकेतनं लोभेच्छा, तदसावनेकचित्तः केनाप्यभूतपूर्वं पुरयितुमर्हति, अर्थितया शक्याशक्यविचाराक्षमोऽशक्यानुष्ठानेऽपि प्रवर्त्तत इत्युक्तं भवति, स च लोभेच्छापूरणव्याकुलितमतिः किं कुर्यादित्याह—'से अण्णवहाए' इत्यादि, स लोभपूरणप्रवृत्तोऽन्येषां प्राणिनां वधाय भवति, तथाऽन्येषां शारीरमानसपरितापनाय, तथाऽन्येषां द्विपदचतुष्पदादीनां परिग्रहाय, जनपदे भवा जानपदाः कालप्रष्टादयो राजादयो वा तद्वधाय, मगधादिजनपदा वा तद्वधाय, तथा जनपदानां लोकानां परिवादाय-दस्युरयं पिशुनो वेत्येवं मर्मोद्घट्टनाय, तथा जनपदानां-मगधादीनां परिग्रहाय, प्रभवतीति सर्वत्राध्याहारः ॥ किं य एते लोभप्रवृत्ता वधादिकाः क्रियाः कुर्वन्ति ते तथाभूता एवामते उतान्यथाऽपीति दर्शयति—

आसेवित्ता एतं (वं) अट्ठं इच्चेवेगे समुट्ठिया, तम्हा तं बिइयं नो सेवे, निस्सारं पासिय णाणी, उववायं चवणं णच्चा, अणण्णं चर माहणे, से न छणे न छणावए छणंतं नाणुजाणइ, निव्विंद नंदिं, अरए पयासु, अणोमदंसी, निसण्णे पावेहिं कम्मेहिं (सू०११४)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १६३ ॥

शीतो० ३ उद्देशकः २

एवम्-अनन्तरोक्तमर्थमन्यवधपरिग्रहपरितापनादिकमासेव्य 'इत्येवे'ति लोभेच्छाप्रतिपूरणायैव 'एके' भरतराजादयः 'समुत्थिताः' सम्यग्योगत्रिकेणोत्थिताः संयमानुष्ठानेनोद्यतास्तेनैव भवेन सिद्धिमासादयन्ति । संयमसमुत्थानेन च समुत्थाय कामभोगान् हिंसादीनि चाश्रवद्वाराणि हित्वा किं विधेयमित्याह—'तम्हा' यस्माद्वान्तभोगतया कृतप्रतिज्ञस्तस्माद्भोगलिप्सुतया तं द्वितीयं मृषावादमसंयमं वा नासेवेत । विषयार्थमसंयमः सेव्यते, ते च विषया निःसारा इति दर्शयति—'निस्सारं' इत्यादि, सारो हि विषयगणस्य तत्प्राप्तौ तृप्तिस्तदभावान्निःसारत्वं दृष्ट्वा 'ज्ञानी' तत्त्ववेदी न विषयाभिलाषं विदध्यात् । न केवलं मनुष्याणां, देवानामपि विषयसुखास्पदमनित्यं जीवितमिति च दर्शयति—'उववायं चवणं णच्चा' उपपातं-जन्म च्यवनं-पातस्तच्च ज्ञात्वा न विषयसङ्गोन्मुखो भवेदिति, यतो निःसारो विषयग्रामः समस्तः संसारो वा सर्वाणि च स्थानान्यशाश्वतानि, ततः किं कर्त्तव्यमित्याह—'अणण्ण'मित्यादि, मोक्षमार्गादन्योऽसंयमो नान्योऽनन्यः-ज्ञानादिकस्तं चर 'माहण' इति मुनिः । किं च—'से न छणे' इत्यादि, स मुनिरनन्यसेवी प्राणिनो न क्षणुयात्-न हन्यात् नाप्यपरं घातयेत् घातयन्तं न समनुजानीयात् । चतुर्थव्रतसिद्धये त्विदमुपदिश्यते—'निर्विंद' इत्यादि, निर्विन्दस्व-जुगुप्सस्व विषयजनितां 'नंदीं' प्रमोदं, किम्भूतः सन्? 'प्रजासु' स्त्रीषु अरक्तो-रागरहितो, भावयेच्च यथैते विषयाः किम्पाकफलोपमास्तत्पुषीफलनिबन्धनकटवः, अतस्तदर्थे परिग्रहाग्रहयोगपराङ्मुखो भवेदिति, उत्तमधर्म्मपालनार्थमाह—'अणोम' इत्यादि, अवमं-हीनं मिथ्यादर्शनाविरत्यादि तद्विपर्यस्तमनवमं तद्द्रष्टुं शीलमस्येत्यनवमदर्शी सम्यग्दर्शनज्ञानचारित्रवान्, एवम्भूतः सन् प्रजानुगां नन्दिं निर्विन्दस्वेति सण्टङ्कः । यश्चानवमसंदर्शी स किम्भूतो भवतीत्याह—'निसन्न' इत्यादि, पापोपादानेभ्यः कर्म्मभ्यो निषण्णो-निर्विण्णः पापकर्म्मभ्यः पापकर्म्मसु वा कर्त्तव्येषु निवृत्त इतियावत् ॥ किं च—

कोहाइमाणं हणिया य वीरे, लोभस्स पासे निरयं महंतं । तम्हा य वीरे विरए वहाओ, छिंदिज्ज सोयं लहुभूयगामी ॥ १ ॥ गंथं परिण्णाय इहज्ज! धीरे, सोयं परिण्णाय चरिज्ज दंते । उम्मज्ज लद्धुं इह माणवेहिं, नो पाणिणं पाणे समारभिज्जा ॥२॥ सि त्तिबेमि । द्वितीय उद्देशकः ३-२ ॥

॥ १६३ ॥

क्रोध आदिर्येषां ते क्रोधादयः मीयते-परिच्छिद्यतेऽनेनेति मानं-स्वलक्षणं अनन्तानुबन्ध्यादिविशेषः, क्रोधादीनां मानं क्रोधादिमानं, क्रोधादिर्वा यो मानो-गर्वः क्रोधकारणस्तं हन्यात्, कोऽसौ?-वीरः, द्वेषापनोदमुक्त्वा रागापनोदार्थमाह—'लोहस्स' इत्यादि, लोभस्यानन्तानुबन्ध्यादेश्चतुर्विधस्यापि स्थितिं विपाकं च पश्य, स्थितिर्महती सूक्ष्मसम्परायानुयायित्वाद् विपाकोऽप्यप्रतिष्ठानादिनरकापत्तेर्महान्, यत आगमः—"मच्छा मणुआ य सत्तमिं पुढविं" ते च महा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोभाभिभूताः सप्तमपृथिवीभाजो भवन्तीति भावार्थः । यद्येवं ततः किं कर्त्तव्यमित्याह—'तम्हा' इत्यादि, यस्माल्लोभाभिभूताः प्राणिवधादिप्रवृत्तितया महानरकभाजो भवन्ति, तस्माद्धीरो लोभहेतोः—वधाद्विरतः स्यात्, किं च—'छिंदिज्ज' इत्यादि, शोकं भावस्रोतो वा छिन्द्यात्—अपनयेत्, किम्भूतो?—लघुभूतो—मोक्षः संयमो वा तं गन्तुं शीलमस्येति लघुभूतगामी, लघुभूतं वा कामयितुं शीलमस्येति लघुभूतकामी, पुनरप्युपदेशदानायाह—'गन्थ' मित्यादि, 'ग्रन्थं' बाह्याभ्यन्तरभेदभिन्नं ज्ञपरिज्ञया परिज्ञाय इहाद्यैव कालानतिपातेन धीरः सन् प्रत्याख्यानपरिज्ञया परित्यजेत्, किं च—'सोय' मित्यादि, विषयाभिष्वङ्गः संसारस्रोतस्तत् ज्ञात्वा दान्त इन्द्रियनोइन्द्रियदमेन संयमं चरेदिति, किमभिसन्धाय संयमं चरेदित्याह—'उम्मज्ज लद्धु'मित्यादि, इह मिथ्यात्वादिशैवलाच्छादितसंसारह्रदे जीवकच्छपः श्रुतिश्रद्धासंयमवीर्यरूपमुन्मज्जनमासाद्य—लब्ध्वा, अन्यत्र सम्पूर्णस्रोक्षमार्गासम्भवात् मानुष्येष्वित्युक्तं, क्त्वाप्रत्ययस्योत्तरक्रियासव्यपेक्षत्वादुत्तरक्रियामाह—'नो पाणिण' मित्यादि, प्राणा विद्यन्ते येषां ते प्राणिनस्तेषां प्राणान्—पञ्चेन्द्रियत्रिविधबलोच्छ्वासनिश्वासायुष्कलक्षणान् 'नो समारभेथाः' न व्यपरोपयेः, तदुपघातकार्यनुष्ठानं मा कृथा इत्युक्तं भवति, इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् । शीतोष्णीयाध्ययने द्वितीयोद्देशकटीका समाप्तेति ।

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके दुःखं तत्सहनं च प्रतिपादितं, न च तत्सहनेनैव संयमानुष्ठानरहितेन पापकर्म्माकरणतया वा श्रमणो भवतीत्येतत् प्रागुद्देशार्थाधिकारनिर्दिष्टमुच्यते, ततोऽनेन सम्बन्धेनायातस्यास्योद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—

॥ १६४ ॥

संधिं लोयस्स जाणित्ता, आयओ बहिया पास, तम्हा न हंता न विघायए, जमिणं अन्नमन्नवितिगिच्छाए पडिलेहाए न करेइ पावं कम्मं, किं तत्थ मुणी कारणं सिया? (सू० ११५)

तत्र सन्धिर्द्रव्यतो भावतश्च, तत्र द्रव्यतः कुड्यादिविवरं भावतः कर्म्मविवरं, तत्र दर्शनमोहनीयं यदुदीर्णं तत्क्षीणं शेषमुपशान्तमित्येवं सम्यक्त्वावाप्तिलक्षणो भावसन्धिः, यदिवा ज्ञानावरणीयं विशिष्टक्षायोपशमिकभावमुपगतमित्येवं सम्यग्ज्ञानावाप्तिलक्षणः सन्धिः, अथवा चारित्रमोहनीयक्षयोपशमात्मकः सन्धिस्तं ज्ञात्वा न प्रमादः श्रेयानिति, यथा हि लोकस्य चारकाद्यवरुद्धस्य कुड्यनिगडादीनां सन्धि—छिद्रं ज्ञात्वोपलभ्य न प्रमादः श्रेयान्, एवं मुमुक्षोरपि कर्मविवरमासाद्य लवक्षणमपि पुत्रकलत्रसंसारसुखव्यामोहो न श्रेयसे भवतीति, यदिवा सन्धानं सन्धिः, स च भावसन्धिर्ज्ञानदर्शनचारित्राध्यवसायस्य कर्म्मोदयात् त्रुट्यतः पुनः सन्धानं—मीलनम्, एतत्क्षायोपशमिकादिभावलोकस्य विभक्तिपरिणामाद्वा लोके ज्ञानदर्शनचारित्रार्हं भावसन्धिं ज्ञात्वा तदक्षुण्णप्रतिपालनाय विधेयमिति, यदिवा सन्धिः—अवसरो धर्मानुष्ठानस्य तं ज्ञात्वा लोकस्य—भूतग्रामस्य दुःखोत्पादनानुष्ठानं न कुर्यात् । सर्वत्रात्मौपम्यं समाचरेदित्याह—'आयओ' इत्यादि, यथा ह्यात्मनः सुखमिष्टमितरत्त्वन्यथा तथा बहिरपि—आत्मनो व्यतिरिक्तानामपि जन्तूनां सुखप्रियत्वमसुखाप्रियत्वं च 'पश्य' अवधारय । तदेवमात्मसमतां सर्वप्राणिनामवधार्य किं कर्त्तव्यमित्याह—'तम्हा' इत्यादि, यस्मात्सर्वेऽपि जन्तवो दुःखद्विषः सुखलिप्सवस्तस्मात्तेषां 'न हन्ता' न व्यापादकः स्यान्नाप्यपरैस्तान् जन्तून् त्रिविधैः—नानाप्रकारैरुपा-

धैर्घातयेत् विघातयेदिति, यद्यपि कांश्चित् स्थूलान् सत्त्वान् स्वयं पाषण्डिनो न घ्नन्ति तथाऽप्यौद्देशिकसन्निध्यादिपरिभोगानुमतेरपरैर्घातयन्ति । न चैकान्तेन पापकर्म्माकरणमात्रतया श्रमणो भवतीति दर्शयति—'जमिण' मित्यादि, यदिदं—यदेतत् पापकर्म्माकरणताकारणं, किं तद्?, दर्शयति—अन्योऽन्यस्य परस्परं या विचिकित्सा—आशङ्का परस्परतो भयं लज्जा वा तया तां वा प्रत्युपेक्ष्य परस्पराशङ्क्याऽपेक्षया वा पापं—पापोपादानं कर्म्मानुष्ठानं 'न करोति' न विधत्ते, किं प्रश्ने क्षेपे वा, 'तत्र' तस्मिन् पापकर्म्माकरणे किं मुनिः कारणं स्यात्?, किं मुनिरितिकृत्वा पापकर्म्म न करोति?, काङ्क्षा पृच्छति, यदिवा यदि नामासौ यथोक्तनिमित्तासापानुष्ठानविधायी न सञ्जाते किमेतावतैव मुनिरसौ?, नैव मुनिरित्यर्थः, अद्रोहाध्यवसायो हि मुनिभावकारणं, स च तत्र न विद्यते, अपरोपाध्यावेशात्, विनेयो वा पृच्छति—यदिदं परस्पराशङ्कया आधाकर्म्मादिपरिहरणं तन्मुनिभावाङ्गतां यात्याहोस्विन्नेति?, आचार्य आह—सौम्य! निरस्तापरव्यापारः शृणु—'जमिण'—मित्यादि, अपरोपाधिनिरस्तहेयव्यापारत्वमेव मुनिभावकारणमिति भावार्थः, यतः शुभान्तःकरणपरिणामव्यापारापादितक्रियस्य मुनिभावो नान्यथेति, अयं तावन्निश्चयनयाभिप्रायो व्यवहाराभिप्रायेण तूच्यते—यो हि सम्यग्दृष्टिरुत्क्षिप्तपञ्चमहाव्रतभारस्तद्वहने प्रमाद्यन्नप्यपरसमानसाधुलज्जया गुर्व्वाद्याराध्यभयेन गौरवेण वा केनचिदाधाकर्म्मादि परिहरन् प्रत्युपेक्षणादिकाः क्रियाः करोति, यदि च तीर्थोद्भासनाय मासक्षपणातापनादिका जनविज्ञाताः क्रियाः कराति, तत्र तस्य मुनिभाव एव कारणं, तच्छुभापारापादितपारम्पर्यशुभाध्यवसायोपपत्तेः ॥ तदेवं शुभान्तःकरणव्यापारविकलस्य मुनित्वे सदसद्भावः प्रदर्शितः, कथं तर्हि नैश्चयिको मुनिभाव इत्यत आह—

॥ १६५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समयं तत्थुवेहाए अप्पाणं विप्पसायए–अणन्नपरमं नाणी, नो पमाए कयाइवि। आयगुत्ते सया वीरे, जायामायाइ जावए ॥ १ ॥ विरागं रूवेहिं गच्छिज्जा महया खुड्डुएहि य, आगइं गइं परिण्णाय दोहिवि अंतेहिं अदिस्समाणेहिं से न छिज्जइ न भिज्जइ न डज्झइ न हंमइ कंचणं सव्वलोए (सू० ११६)

समभावः समता तां तत्रोल्लेख्य–पर्यालोच्य समताव्यवस्थितो यद्यत्करोति येन केनचित्प्रकारेणानेषणीयपरिहरणं लज्जादिना जनविदितं चोपवासादि तत्सर्वं मुनिभावकारणमिति, यदिवा समयम्–आगमं तत्रोल्लेख्य यदागमोक्तविधिनानुष्ठानं तत्सर्वं मुनिभावकारणमिति भावार्थः, तेन चागमोल्लेखनेन समतोत्प्रेक्षया वाऽऽत्मानं 'विप्रसादयेद्' विविधं प्रसादयेदागमपर्यालोचनेन समताहृष्टया वा आत्मानं विविधैरुपायैरिन्द्रियप्रणिधानाप्रमादादिभिः प्रसन्नं विदध्याद्। आत्मप्रसन्नता च संयमस्थस्य भवति, तत्राप्रमादवता भाव्यमित्याह च—'अणण्णपरम'मित्याद्यनुष्टुप्, न विद्यतेऽन्यः परमः–प्रधानोऽस्मादित्यनन्यपरमः–संयमस्तं 'ज्ञानी' परमार्थवित् 'नो प्रमादयेत्' तस्य प्रमादं न कुर्यात्कदाचिदपि, यथा चाप्रमादवत्ता भवति तथा दर्शयितुमाह—'आयगुत्ते' इत्यादि, इन्द्रियनोइन्द्रियात्मना गुप्तः आत्मगुप्तः 'सदा' सर्वकालं यात्रा–संयमयात्रा तस्यां मात्रा यात्रामात्रा, मात्रा च 'अक्षाहारो न सहे' इत्यादि, तयाऽऽत्मानं यापयेद्यथा विषयानुदीरणेन दीर्घकालं संयमाधारदेहप्रतिपालनं भवति तथा कुर्यादित्युक्तं भवति, उक्तं च–"आहारार्थं कर्म्म कुर्यादनिन्द्यं,

स्यादाहारः प्राणसन्धारणार्थम्। प्राणाः धार्यास्तत्त्वजिज्ञासनाय, तत्त्वं ज्ञेयं येन भूयो न भूयात् ॥ १ ॥" सैवात्मगुप्तता कथं स्यादिति चेदाह—'विराग' मित्यादि, विरज्यनं विरागस्तं विरागं रूपेषु मनोज्ञेषु चक्षुर्गोचरीभूतेषु 'गच्छेद्' यायात्, रूपमतीवाऽऽक्षेपकारी अतो रूपग्रहणम्, अन्यथा शेषविषयेष्वपि विरागं गच्छेदित्युक्तं स्यात्, महता–दिव्यभावेन यद्व्यवस्थितं रूपं क्षुल्लकेषु वा मनुष्यरूपेषु सर्वत्र विरागं कुर्यादिति, अथवा दिव्यादि प्रत्येकं महत् क्षुल्लं चेति क्रिया पूर्ववत्, नागार्जुनीयास्तु पठन्ति—"विसयंमि पंचगंमीवि, दुविहंमि तियं तियं। भावओ सुट्ठु जाणित्ता, से न लिप्पइ दोसुवि ॥ १ ॥" शब्दादिविषयपञ्चकेऽपि इष्टानिष्टरूपतया द्विविधे हीनमध्यमोत्कृष्टभेदभिन्नेतत् भावतः–परमार्थतः सुष्ठु ज्ञात्वा स मुनिः पापेन कर्म्मणा द्वाभ्यामपि–रागद्वेषाभ्यां न लिप्यते, तदकरणादिति भावः, स्यात्–किमालम्ब्यैतत्कर्त्तव्यमित्याह—'आगइ' मित्यादि, आगमनम्–आगतिः सा च तिर्यङ्मनुष्ययोश्चतुर्द्धा, चतुर्विधनरकादिगत्यागमनसद्भावाद्, देवनारकयोर्द्वेधा, तिर्यग्मनुष्यगतिभ्यामेवागमनसद्भावाद्, एवं देवगतिरपि, मनुष्येषु तु पञ्चधा, तत्र मोक्षगतिसद्भावाद्, अतस्तामागतिं गतिं च परिज्ञाय संसारचक्रवालेऽरघट्टघटीयन्त्रन्यायमवेत्य मनुष्यत्वे च मोक्षगतिसद्भावमाकलय्यान्तहेतुत्वादन्तौ–रागद्वेषौ ताभ्यां द्वाभ्यामन्ताभ्यामदृश्यमानाभ्यामनपदिश्यमानाभ्यां वा, कत्थाप्रत्ययस्योत्तरक्रियामाह—'से' इत्यादि, सः–आगतिगतिपरिज्ञाता रागद्वेषाभ्यामनपदिश्यमानो न छिद्यतेऽस्यादिना न भिद्यते कुन्तादिना न दह्यते पावकादिना न हन्यते नरकगत्यानुपूर्व्यादिना बहुशः, अथवा रागद्वेषाभावात् सिद्ध्यत्येव, तदवस्थस्य चैतानि छेदनादीनि विशेषणानि 'कंचण' मिति विभक्तिपरिणामात् केनचित्सर्वस्मिन्नपि लोके न छिद्यते नापि भिद्यते रागद्वेषोपशमादिति,

तदेवमागतिगतिपरिज्ञानाद्रागद्वेषपरित्यागस्तदभावाच्च छेदनादिसंसारदुःखाभावः। अपरे च साम्प्रतेक्षिणः कुतो वयमागताः? क्व यास्यामः? किं वा तत्र नः सम्पत्स्यते?, नैवं भावयन्त्यतः संसारभ्रमणपात्रतामनुभवन्तीति दर्शयितुमाह—

अवरेण पुव्विं न सरंति एगे, किमस्स तीयं किं वाऽऽगमिस्सं। भासंति एगे इह माणवाओ, जमस्स तीयं तमागमिस्सं ॥ १ ॥ नाईयमट्ठं न य आगमिस्सं, अट्ठं नियच्छन्ति तहागया उ। विहुयकप्पे एयाणुपस्सी, निज्झोसइत्ता खवगे महेसी ॥ २ ॥

रूपकं, 'अपरेण' पश्चात्कालभाविना सह पूर्वमतिक्रान्तं न स्मरन्त्येकेऽन्ये मोहाज्ञानावृतबुद्धयो यथा किमस्य जन्तोर्नरकादिभवोद्भूतं बालकुमारादिवयोपचितं वा दुःखाद्यतीतं किं वाऽऽगमिष्यति आगामिनि काले किमस्य सुखाभिलाषिणो दुःखद्विषो भावीति, यदि पुनरतीतागामिपर्यालोचनं स्यान्न तर्हि संसाररतिः स्यादिति, उक्तं च—"केण ममेत्थुप्पत्ती कहं इओ तह पुणोऽवि गंतव्वं? । जो एत्तियंपि चिंतइ इत्थं सो को न निव्विण्णो? ॥ १ ॥" एके पुनर्महामिथ्याज्ञानिनो भाषन्ते–'इह' अस्मिन् संसारे मनुष्यलोके वा मानवा–मनुष्या यथा यदस्य जन्तोरतीतं स्त्रीपुंनपुंसकसुभगदुर्भगश्वगोमायुब्राह्मणक्षत्रियविट्शूद्रादिभेदावेशात् पुनरप्यन्यजन्मानुभूतं तदेवागमिष्यम्–आगामीति, यदिवा न विद्यते परः–प्रधानोऽस्मादित्यपरः–संयमस्तेन वासितचित्ताः सन्तः 'पूर्वं' पूर्वानुभूतं विषयसुखोपभोगादि

१ केन ममात्रोत्पत्तिः? कुतः तथा पुनरपि गन्तव्यम्। य इयदपि चिन्तयति अत्र स कः न निर्विण्णः? ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'न स्मरन्ति' न तदनुस्मृतिं कुर्वते, एके रागद्वेषविप्रमुक्ताः, तथाऽनागतदिव्याङ्गनाभोगमपि नाकाङ्क्षन्ति, किं च-अस्य जन्तोरतीतं सुखदुःखादि किं वाऽऽगमिष्यम्-आगामीत्येतदपि न स्मरन्ति, यदिवा कियान् कालोऽतिक्रान्तः कियानेष्यति, लोकोत्तरास्तु भाषन्ते-एके रागद्वेषरहिताः केवलिनश्चतुर्दशपूर्वविदो वा यदस्य जन्तोरनादिनिधनत्वात् कालशरीरसुखाद्यतीतमागामिन्यपि तदेवेति, अपरे तु पठन्ति—"अवरेण पुव्वं किह से अतीतं, किह आगमिस्सं न सरंति एगे। भासन्ति एगे इह माणवाओ, जह स अईअं तह आगमिस्सं ॥ १ ॥" अपरेण-जन्मादिना सार्द्धं पूर्वम्-अतिक्रान्तं जन्मादि न स्मरन्ति, 'कथं वा' केन वा प्रकारेणातीतं सुखदुःखादि, कथं चैष्यमित्येतदपि न स्मरन्ति, एके भाषन्ते-किमत्र ज्ञेयं?, यथैवास्य रागद्वेषमोहसमुत्थैः कर्म्मभिर्बद्धमानस्य जन्तोस्तद्विपाकांश्चानुभवतः संसारस्य यदतिक्रान्तमागाम्यपि तत्प्रकारमेवेति, यदिवा प्रमादविषयकषायादिना कर्म्माण्युपचित्येष्टानिष्टविषयाननुभवतः सर्वज्ञवाक्सुधास्वादासंविदो यथा संसारोऽतिक्रान्तस्तथागाम्यपि यास्यति, ये तु पुनः संसारार्णवतीरभाजस्ते पूर्वोक्तरवेदिन इत्येतद्दर्शयितुमाह—'नाईय' मित्यादि, तथैव-अपुनरावृत्त्या गतं-गमनं येषां ते तथागताः-सिद्धाः, यदिवा यथैव ज्ञेयं तथैव गतं-ज्ञानं येषां ते तथागताः-सर्वज्ञाः, ते तु नातीतमर्थमनागतरूपतयैव नियच्छन्ति-अवधारयन्ति नाप्यनागतमतिक्रान्तरूपतयैव, विचित्रत्वात् परिणतेः, पुनरर्थग्रहणं पर्यायरूपार्थं, द्रव्यार्थतया त्वेकत्वमेवेति, यदिवा नातीतमर्थं विषयभोगादिकं नाप्यनागतं दिव्याङ्गनासङ्गादिकं स्मरन्त्यभिलषन्ति वा, के?, तथागताः-रागद्वेषाभावात् पुनरावृत्तिरहिताः, तुशब्दो विशेषमाह, यथा मोहोदयादेके पूर्वमागामि वाऽभिलषन्ति, सर्वज्ञास्तु नैवमिति। तन्मा- ॥ १६७ ॥

गर्गानुयाय्यप्येवम्भूत एवेति दर्शयितुमाह—'विहूय कप्पे' इत्यादि, विविधम्-अनेकधा धूतम्-अपनीतमष्टप्रकारं कर्म्म येन स विधूतः, कोऽसौ? कल्पः-आचारो, विधूतः कल्पो यस्य साधोः स विधूतकल्पः स एतदनुदर्शी भवति, अतीतानागतसुखाभिलाषी न भवतीतियावत्, एतदनुदर्शी च किंगुणो भवतीत्याह—'निज्झोस' इत्यादि, पूर्वोपचितकर्म्मणां निर्झोषयिता-क्षपकः क्षपयिष्यति वा तृजन्तमेतल्लुडन्तं वा। कर्म्मक्षपणायोद्यतस्य च धर्म्मध्यायिनः शुक्लध्यायिनो वा महायोगीश्वरस्य निरस्तसंसारसुखदुःखविकल्पाभासस्य यत्स्यात्तद्दर्शयति—

का अरई के आणंदे?, इत्थंपि अग्गहे चरे, सव्वं हासं परिच्चज्ज आलीणगुत्तो परिव्वए, पुरिसा!-तुममेव तुमं मित्तं किं बहिया मित्तमिच्छसि? (सू० ११७)

इष्टाप्राप्तिविनाशोत्थो मानसो विकारोऽरतिः, अभिलषितार्थावाप्तावानन्दः, योगिचित्तस्य तु धर्म्मशुक्लध्यानावेशावष्टब्धध्येयान्तरावकाशस्यारत्यानन्दयोरुपादानकारणाभावादनुत्थानमेवेत्यतोऽपदिश्यते-केयमरतिर्नाम को वाऽऽनन्द इति?, नास्त्येवेतरजनक्षुण्णोऽयं विकल्प इति। एवं तर्ह्यरतिरसंयमे संयमे चानन्द इत्येतदन्यत्रानुमतमनेनाभिप्रायेण न विधेयमित्येतदनिच्छतोऽप्यापन्नमिति चेत्, न, अभिप्रायापरिज्ञानाद् यतोऽत्रारतिरतिविकल्पाध्यवसायो निषिषित्सितः, न प्रसङ्गायाते अप्यरतिरती, तदाह—'एत्थंपी'त्यादि, अत्राप्यरतावानन्दे चोपसर्जनप्राये न विद्यते 'ग्रहो' गार्द्ध्यं तात्पर्यं यस्य सोऽग्रहः, स एवम्भूतश्चरेद्-अवतिष्ठेत, इदमुक्तं भवति-शुक्लध्यानादारतोऽरत्यानन्दौ कुतश्चिन्नि-

मित्तादायातौ तदाग्रहमहरहितस्तावप्यनुचरेदिति। पुनरप्युपदेशदानायाह—'सव्व' मित्यादि, सर्वं हास्यं तदास्पदं वा परित्यज्याङ्-मर्यादयेन्द्रियनिरोधादिकया लीनः आलीनो गुप्तो मनोवाक्कायकर्म्मभिः कूर्म्मवद्वा संवृतगात्रः, आलीनश्चासौ गुप्तश्चालीनगुप्तः स एवम्भूतः परिः-समन्ताद्व्रजेत् परिव्रजेत्-संयमानुष्ठानविधायी भवेदिति। तस्य च मुमुक्षोरात्मसामर्थ्यात् संयमानुष्ठानं फलवद्भवति न परोपरोधेनेति दर्शयति—'पुरिसा' इत्यादि, यदिवा त्यक्तगृहपुत्रकलत्रधनधान्यहिरण्यादितया अकिञ्चनस्य समतृणमणिमुक्तालेष्टुकाञ्चनस्य मुमुक्षोरुपसर्गव्याकुलितमतेः कदाचिन्मित्राद्याशंसा भवेत्तदपनोदार्थमाह—'पुरिसा' इत्यादि, पूर्णः सुखदुःखयोः पुरि शयनाद्वा पुरुषो-जन्तुः, पुरुषद्वारामन्त्रणं तु पुरुषस्यैवोपदेशार्हत्वात्तदनुष्ठानसमर्थत्वाच्चेति, कश्चित्संसारोद्विग्नो विषमस्थितो वाऽऽत्मानमनुशास्ति, परेण वा साध्वादिनाऽनुशास्यते-यथा हे पुरुष-हे जीव! तव सदनुष्ठानविधायित्वात्त्वमेव मित्रं, विपर्ययाच्चामित्रः, किमिति बहिर्मित्रमिच्छसि?-मृगयसे, यतो ह्युपकारि मित्रं, स चोपकारः पारमार्थिकात्यन्तिकैकान्तिकगुणोपेतं सन्मार्गपतितमात्मानं विहाय नान्येन शक्यो विधातुं, योऽपि संसारसाहाय्योपकारितया मित्राभासाभिमानस्तन्मोहविजृम्भितं, यतो महाव्यसनोपनिपातार्णवपतनहेतुत्वादमित्र एवासौ, इदमुक्तं भवति-आत्मैवात्मनोऽप्रमत्तो मित्रम्, आत्यन्तिकैकान्तिकपरमार्थसुखोत्पादनात्, विपर्ययाच्च विपर्ययो, न बहिर्मित्रमन्वेष्टव्यमिति, यस्त्वयं बाह्यो मित्रामित्रविकल्पः सोऽदृष्टोदयनिमित्तत्वादौपचारिक इति, उक्तं हि—"दुप्पत्थिओ अमित्तं अप्पा सुपत्थिओ अ ते मित्तं। सुहदुक्खकारणाओ ॥ १६८ ॥

१ दुष्प्रस्थितोऽमित्र आत्मा सुप्रस्थितश्च ते मित्रम्। सुखदुःखकारणात् आत्मा मित्रममित्रश्च ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्पा मित्तं अमित्तं च ॥ १ ॥" तथा—"अप्येकं मरणं कुर्यात्, संक्रुद्धो बलवानरिः । मरणानि त्वनन्तानि, जन्मानि च करोत्ययम् ॥ १ ॥" यो हि निर्वाणनिर्वर्त्तकं व्रतमाचरति स आत्मनो मित्रं, स चैवम्भूतः कृतोऽवगन्तव्यः ? किंफलश्चेत्याह—

जं जाणिज्जा उच्चालइयं तं जाणिज्जा दूरालइयं, जं जाणिज्जा दूरालइयं तं जाणिज्जा उच्चालइयं, पुरिसा ! अत्ताणमेवं अभिणिगिज्झ एवं दुक्खा पमुच्चसि, पुरिसा ! सच्चमेव समभिजाणाहि, सच्चस्स आणाए से उवट्ठिए मेहावी मारं तरइ, सहिओ धम्ममायाय सेयं समणुपस्सइ (सू० ११८)

'यं' पुरुषं 'जानीयात्' परिच्छिन्द्यात्कर्म्मणां विषयसङ्गानां चोच्चालयितारम्–अपनेतारं तं जानीयाद् 'दूरालयिक'मिति, दूरे सर्वहेयधर्म्मेभ्य इत्यालयो दूरालयः–मोक्षसन्मार्गो वा स विद्यते यस्येति मत्वर्थीयष्ठन् दूरालयिकस्तमिति, हेतुहेतुमद्भावं दर्शयितुं गतप्रत्यागतसूत्रमाह—'जं जाणेज्जे'त्यादि, यं जानीयादूरालयिकं तं जानीयादुच्चालयितारमिति, एतदुक्तं भवति–यो हि कर्म्मणां तदास्रवद्वाराणां चोच्चालयिता–अपनेता स मोक्षमार्गव्यवस्थितो मुक्तो वेति, यो वा सन्मार्गानुष्ठायी स कर्म्मणामुच्चालयितेति, स च आत्मनो मित्रमतोऽपदिश्यते—'पुरिसा' इत्यादि, हे जीव ! आत्मानमेवाभिनिगृह्य धर्म्मध्यानाद्बहिर्विषयाभिष्वङ्गाय निःसरन्तमवरुध्य ततः 'एवम्' अनेन प्रकारेण दुःखात्सकाशादात्मानं

आ. सू. २९ लोकाचाराङ्गवृत्तिः (शी०) ॥ १६९ ॥

प्रमोक्ष्यसि, एवमात्मा कर्म्मणां उच्चालयिताऽऽत्मनो मित्रं भवति । अपि च—'पुरिसा' इत्यादि, हे पुरुषः सच्चो हितः सत्यः–संयमस्तमेवापरव्यापारनिरपेक्षः समभिजानीहि–आसेवनापरिज्ञया समनुतिष्ठ, यदिवा सत्यमेव समभिजानीहि–गुरुसाक्षिगृहीतप्रतिज्ञानिर्वाहको भव, यदिवा सत्यः–आगमस्तत्परिज्ञानं च मुमुक्षोस्तदुक्तप्रतिपालनं । किमर्थमेतदिति चेदाह—'सच्चस्से'त्यादि, सत्यस्य–आगमस्याज्ञयोपस्थितः सन् मेधावी 'मारं' संसारं तरति, किं च—'सही'त्यादि, सहितो–ज्ञानादियुक्तः सह हितेन वा युक्तः सहितः 'धर्म्मं' श्रुतचारित्राख्यं 'आदाय' गृहीत्वा, किं करोतीत्याह—'श्रेयः' पुण्यमात्महितं वा सम्यग्–अविपरीततयाऽनुपश्यति समनुपश्यति । उक्तोऽप्रमत्तः तद्गुणाश्च, तद्विपर्ययमाह—

शीतो० ३ उद्देशकः ३

दुहओ जीवियस्स परिवंदणमाणणपूयणाए, जंसि एगे पमायंति (११९)

द्विधा–रागद्वेषप्रकारद्वयेनात्मपरनिमित्तमैहिकामुष्मिकार्थं वा यदिवा द्वाभ्यां–रागद्वेषाभ्यां हतो द्विहतो दुष्टं हतो वा दुर्हतः, स किं कुर्याद् ?–जीवितस्य कदलीगर्भनिःसारस्य तडिल्लतासमुल्लसितचञ्चलस्य परिवन्दनमाननपूजनार्थं हिंसादिषु प्रवर्त्तते, परिवन्दनं–परिसंस्तवस्तदर्थमाचेष्टते, लावकादिमांसोपभोगपुष्टं सर्वाङ्गोपाङ्गसुन्दरमालोक्य मां जनाः सुखमेव परिवन्दिष्यन्ते, श्रीमान् जीयास्त्वं बहूनि वर्षशतसहस्राणीत्येवमादि परिवन्दनं, तथा माननार्थं कर्म्मोपचिनोति, दृष्टौरसबलपराक्रमं मामन्येऽभ्युत्थानविनयासनदानाञ्जलिप्रग्रहैर्मानयिष्यन्तीत्यादि माननं, तथा पूजनार्थमपि प्रवर्त्तमानाः कर्मास्रवैरात्मानं भावयन्ति, मम हि कृतविद्यस्योपचितद्रव्यप्राग्भारस्य परो दानमानसत्कारप्रणामसेवाविशेषैः पूजां करिष्यतीत्यादि पूजनं, तदेवमर्थं कर्मोपचिनोति । किं च—'जंसि एगे'इत्यादि, यस्मिन् परिवन्दनादिनिमित्ते एके रागद्वेषोपहताः प्रमाद्यन्ति, न ते आत्मने हिताः ॥ एतद्विपरीतं त्वाह—

॥ १६९ ॥

सहिओ दुक्खमत्ताए पुट्ठो नो झंझाए, पासिमं दविए लोकालोकपवंचाओ मुच्चइ (१२०) त्तिबेमि ॥ तृतीय उद्देशो ३–३ ॥

सहितो–ज्ञानादिसमन्वितो हितयुक्तो वा दुःखमात्रया उपसर्गजनितया व्याध्युद्भवया वा स्पृष्टः सन् 'नो झंझाए'त्ति नो व्याकुलितमतिर्भवेत्, तदपनयनाय नोद्यच्छेद्, इष्टविषयावाप्तौ रागझञ्झाऽनिष्टावाप्तौ च द्वेषझञ्झेति, तामुभयप्रकारामपि व्याकुलतां परित्यजेदिति भावः । किं च—'पासिम' मित्यादि, यदुक्तमुद्देशकादेरारभ्यानन्तरसूत्रं यावत् तमिममर्थं पश्य–परिच्छिन्द्धि कर्त्तव्याकर्त्तव्यतया विवेकेनावधारय, कोऽसौ ?–द्रव्यभूतो–मुक्तिगमनयोग्यः साधुरित्यर्थः, एवम्भूतश्च कं गुणमवाप्नोति ?–आलोक्यत इत्यालोकः, कर्म्मणि घञ्, लोके चतुर्दशरज्वात्मके आलोको लोकालोकस्तस्य प्रपञ्चः–पर्याप्तकापर्याप्तकसुभगादिद्वन्द्वविकल्पः, तद्यथा–नारको नारकत्वेनावलोक्यते, एकेन्द्रियादिरेकेन्द्रिय(यादि)त्वेन, एवं पर्याप्तकापर्याप्तकाद्यपि वाच्यं, तदेवम्भूतात्प्रपञ्चान्मुच्यते–चतुर्दशजीवस्थानान्यतरव्यपदेशार्हो न भवतीतियावद् । इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ इति शीतोष्णीयाध्ययने तृतीयोद्देशकटीका समाप्ता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तस्तृतीयोद्देशकः. साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके पापकर्माकरणतया दुःखसहनादेव केवलाच्छ्रमणो न भवतीति अपि तु निष्प्रत्यूहसंयमानुष्ठानादित्येतत्प्रतिपादितं, निष्प्रत्यूहता च कषायवमनाद्भवति, तदधुना प्रागुद्देशार्थाधिकारनिर्दिष्टं प्रतिपाद्यते, तदनेन सम्बन्धेनायातस्यास्योद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—

से वंता कोहं च माणं च मायं च लोभं च, एयं पासगस्स दंसणं, उवरयसत्थस्स पलियंतकरस्स, आयाणं सगडब्भि (सू० १२१)

'स' ज्ञानादिसहितो दुःखमात्रास्पृष्टोऽव्याकुलितमतिर्द्रव्यभूतो लोकालोकप्रपञ्चात् मुक्तदेश्यः स्वपरापकारिणं क्रोधं च वमिता 'टुवम् उद्गिरणे' इत्यस्मात्ताच्छीलिकस्तृन्, तद्योगे च षष्ठ्याः प्रतिषेधे क्रोधशब्दाद् द्वितीया, लुडन्तं वैतत्, यो हि यथोक्तसंयमानुष्ठायी सोऽचिरात् क्रोधं वमिष्यति, एवमुत्तरत्रापि यथासम्भवमायोज्यं, तत्रात्मात्मीयोपघातकारिणि क्रोधकर्म्मविपाकोदयात्क्रोधः, जातिकुलरूपबलादिसमुत्थो गर्वो मानः, परवञ्चनाध्यवसायो माया, तृष्णापरिग्रहपरिणामो लोभः, क्षपणोपशमक्रममाश्रित्य च क्रोधादिक्रमोपन्यासः, अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनस्वगतभेदाविर्भावनाय व्यस्तनिर्देशः, चशब्दस्तु पर्वतपृथ्वीरेणुजलराजिलक्षणलक्षकः क्रोधस्य, शैलस्तम्भास्थिकाष्ठतिनिशलतालक्षणलक्षको मानस्य, वंशकुडङ्गीमेषशृङ्गगोमूत्रिकाऽवलेखकलक्षणलक्षको मायायाः, कृमिरागकर्दमखञ्जनहरिद्रालक्षणसूचको लोभस्य, तथा यावज्जीवसंवत्सरचातुर्मासपक्षस्थित्याविर्भावकश्चेति । तदेवं क्रोधमानमायालोभवमनादेव पारमार्थिकः श्रमणभावो, न तत्सम्भवे सति, यत उक्तम्—सामण्णमणुचरंतस्स कसाया जस्स उक्कडा हुंति । मन्नामि उच्छुपुप्फं व निप्फलं तस्स सामण्णं ॥ १ ॥ जं अज्जिअं चरित्तं देसूणाएवि पुव्वकोडीए । तंपि कसाइयमेत्तो हारेइ नरो मुहुत्तेणं ॥ २ ॥" । स्वमनीषिकापरिहारार्थं गौतमस्वाम्याह—'एय' मित्यादि, 'एतद्' यत्कषायवमनमनन्तरमुपादेशि तत् 'पश्यकस्य दर्शनं' सर्वं निरावरणत्वात्पश्यति—उपलभत इति पश्यः स एव पश्यकः—तीर्थकृत् श्रीवर्द्धमानस्वामी तस्य दर्शनम्—अभिप्रायो यदिवा दृश्यते यथावस्थितं वस्तुतत्त्वमनेनेति दर्शनम्—उपदेशो, न स्वमनीषिका, किम्भूतस्य पश्यकस्य दर्शनमित्याह—'उवरय' इत्यादि, उपरतं द्रव्यभावशस्त्रं यस्यासावुपरतशस्त्रः शस्त्राद्वोपरतः शस्त्रोपरतः, भावे शस्त्रं त्वसंयमः कषाया वा, तस्मादुपरतः, इदमुक्तं भवति—तीर्थकृतोऽपि कषायवमनमृते न निरावरणसकलपदार्थग्राहिपरमज्ञानावाप्तिः, तदभावे च सिद्धिवधूसमागमसुखाभावः, एवमन्येनापि मुमुक्षुणा तदुपदेशवर्त्तिना तन्मार्गानुयायिना कषायवमनं विधेयमिति, शस्त्रोपरमकार्यं दर्शयन् पुनरपि तीर्थकरविशेषणमाह—'पलियंतकरस्स' पर्यन्तं कर्म्मणां संसारस्य वा करोति तच्छीलश्चेति पर्यन्तकरस्तस्यैतद् दर्शनमिति सण्टङ्कः । यथा च तीर्थकृत् संयमापकारिकषायशस्त्रोपरमात्कर्म्मपर्यन्तकृदेवमन्योऽपि तदुक्तानुसारीति दर्शयितुमाह—'आयाण' मित्यादि, आदीयते—गृह्यते

१ श्रामण्यमनुचरतः कषाया यस्योत्कटा भवन्ति । मन्ये इक्षुपुष्पवत् निष्फलं तस्य श्रामण्यम् ॥ १ ॥ यदर्जितं चारित्रं देशोनयाऽपि पूर्वकोट्या । तदपि

आत्मप्रदेशैः सह श्लिष्यतेऽष्टप्रकारं कर्म्म येन तदादानं—हिंसाद्याश्रवद्वारमष्टादशपापस्थानरूपं वा तस्थितेर्निमित्तत्वात्कषाया वाऽऽदानं तद्भिदा स्वकृतभिद्भवति, स्वकृतमनेकजन्मोपात्तं कर्म्म भिनत्तीति स्वकृतभित्, यो ह्यादानं कर्म्मणां कषायादि निरुणद्धि सोऽपूर्वकर्म्मप्रतिषिद्धप्रवेशः स्वकृतकर्म्मणां भेत्ता भवतीति भावः, तीर्थकरोपदेशेनापि परकृतकर्म्मक्षपणोपायाभावात् स्वकृतग्रहणं, तीर्थकरेणापि परकृतकर्म्मक्षपणोपायो न व्यज्ञायीति चेत्, तन्न, तज्ज्ञानस्य सकलपदार्थसत्ताव्यापित्वेनावस्थानात् ॥ ननु च हेयोपादेयपदार्थहानोपादानोपदेशज्ञोऽसौ न सर्वज्ञ इति सङ्गिरामहे, एतावतैव परोपकारकर्तृत्वेन तीर्थकरत्वोपपत्तेः, तदेतन्न सतां मनांस्यानन्दयति, युक्तिविकलत्वात्, यतः सम्यग्ज्ञानमन्तरेण हिताहितप्राप्तिपरिहारोपदेशासम्भवो, यथावस्थितैकपदार्थपरिच्छेदश्च न सर्वज्ञतामन्तरेणेति दर्शयितुमाह—

जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ (सू० १२२)

'यः' कश्चिदविशेषितः 'एकं' परमाण्वादि द्रव्यं पश्चात्पुरस्कृतपर्यायं स्वपरपर्यायं वा 'जानाति' परिच्छिनत्ति स सर्वं स्वपरपर्यायं जानाति, अतीतानागतपर्यायद्रव्यपरिज्ञानस्य समस्तवस्तुपरिच्छेदाविनाभावित्वाद्, इदमेव हेतुहेतुमद्भावेन लगयितुमाह—'जे सव्व' मित्यादि, यः सर्वं संसारोदरविवरवर्त्ति वस्तु जानाति स एकं घटादि वस्तु जानाति, तस्यैवातीतानागतपर्यायभेदैस्तत्तत्स्वभावापत्त्याऽनाद्यनन्तकालतया समस्तवस्तुस्वभावगमनादिति, तदुक्तम्—"एगदवियस्स जे

१ एकद्रव्यस्य येऽर्थपर्यया वचनपर्यया वाऽपि । तीतानागत भूता(वर्तमाना) तावत्तद् भवति द्रव्यम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थपज्जवा वयणपज्जवा वावि । तीयाणागयभूया तावइयं तं हवइ दव्वं ॥ १ ॥" तदेवं सर्वज्ञस्तीर्थकृत्, सर्वज्ञश्च सम्भविनमेव सर्वसत्त्वोपकारिणमुपदेशं ददातीति दर्शयति—

सव्वओ पमत्तस्स भयं, सव्वओ अप्पमत्तस्स नत्थि भयं, जे एगं नामे से बहु नामे, जे बहुं नामे से एगं नामे, दुक्खं लोगस्स जाणित्ता वंता लोगस्स संजोगं जंति धीरा महाजाणं, परेण परं जंति, नावकंखंति जीवियं (सू० १२३)

सर्वतः—सर्वप्रकारेण द्रव्यादिना यद्भयकारि कर्मोपादीयते ततः 'प्रमत्तस्य' मद्यादिप्रमादवतो 'भयं' भीतिः, तद्यथा—प्रमत्तो हि कर्मोपचिनोति द्रव्यतः सर्वैरात्मप्रदेशैः क्षेत्रतः षड्दिग्व्यवस्थितं कालतोऽनुसमयं भावतो हिंसादिभिः, यदिवा 'सर्वत्र' सर्वतो भयमिहामुत्र च, एतद्विपरीतस्य च नास्ति भयमिति, आह च—'सव्वओ' इत्यादि, 'सर्वतः' ऐहिकामुष्मिकापायाद् 'अप्रमत्तस्य' आत्महितेषु जाग्रतो नास्ति भयं संसारापसदात्सकाशात्कर्मणो वा, अप्रमत्तता च कषायाभावाद्भवति, तदभावाच्चाशेषमोहनीयाभावः, ततोऽप्यशेषकर्मक्षयः, तदेवमेकाभावे सति बहूनामभावसम्भवः, एकाभावोऽपि बहुवभावानान्तरीयक इत्येवं गतप्रत्यागतसूत्रेण हेतुहेतुमद्भावं दर्शयितुमाह—'जे एग' मित्यादि, यो हि प्रवर्द्धमानशुभाध्यवसायाधिरूढकण्डकः एकम्—अनन्तानुबन्धिनं क्रोधं 'नामयति' क्षपयति स बहूनपि मानादीन्नामयति—क्षपयति अप्रत्याख्यानादीन् वा स्वभेदान्नामयति, मोहनीयं चैकं यो नामयति स शेषा अपि प्रकृतीर्नामयति, यो वा

श्रीआचाराङ्गवृत्तिः (शी०) ॥ १७२ ॥

बहून् स्थितिशेषान्नामयति साऽनन्तानुबन्धिनमेकं नामयति मोहनाय वा, तथाहि—एकोनसप्ततिभिर्मोहनीयकोटीकोटिभिः क्षयमुपागताभि ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायाणामेकोनत्रिंशद्भिः नामगोत्रयोरेकोनविंशतिभिः शेषकोटीकोट्याऽपि देशोनया मोहनीयक्षपणार्हो भवति, नान्य इत्यतोऽपदिश्यते—यो बहुनामः स एव परमार्थत एकनाम इति, नाम इति क्षपकोऽभिधीयते उपशामको वा, उपशमश्रेण्याश्रयेणैकबहूपशमता बहूनेकोपशमता वा वाच्येति, तदेवं बह्वेककर्म्माभावमन्तरेण मोहनीयक्षयस्योपशमस्य वाऽभावः, तदभावे च जन्तूनां बहुदुःखसम्भव इति दर्शयति—'दुक्ख' मित्यादि, 'दुःखम्' असातोदयस्तत्कारणं वा कर्म्म तत् 'लोकस्य' भूतग्रामस्य ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च यथा तदभावो भवति तथा विदध्यात्, कथं तदभावः? का वा तदभावे गुणावाप्तिरित्युभयमपि दर्शयितुमाह—'वंता' इत्यादि, 'वान्त्वा'त्यक्त्वा लोकस्य—आत्मव्यतिरिक्तस्य धनपुत्रशरीरादेः 'संयोगं' ममत्वपूर्वकं सम्बन्धं शारीरदुःखादिहेतुं तद्धेतुकर्म्मोपादानकारणं वा 'यान्ति' गच्छन्ति 'धीराः' कर्म्मविदारणसहिष्णवः यान्त्यनेन मोक्षमिति यानं—चारित्रं तच्चानेकभवकोटिदुर्लभं लब्धमपि प्रमाद्यतस्तथाविधकर्म्मोदयात् स्वप्नावाप्तनिधिसमतामवाप्नोत्यतो महच्छब्देन विशेष्यते, महच्च तद्यानं च महायानं, यदिवा महद्यानं—सम्यग्दर्शनादित्रयं यस्य स महायानो—मोक्षस्तं यान्तीति सम्बन्धः । स्यात्—किमेकेनैव भवेनावाप्तमहायानदेश्यचारित्रस्य मोक्षावाप्तिरुत पारम्पर्येण?, उभयथाऽपि क्रमः, तद्यथा—अवाप्ततद्योग्यक्षेत्रकालस्य लघुकर्म्मणस्तेनैव भवेन मुक्त्यवाप्तिरपरस्य त्वन्यथेति दर्शयति—'परेण पर' मित्यादि, सम्यक्त्वप्रतिपिद्धनरकगतितिर्य्यग्गतयो ज्ञानावाप्तियथाशक्तिप्रतिपालितसंयमा आयुषः क्षयात् सौधर्म्मादिकं देवलोकमवाप्नुवन्ति, ततोऽपि पुण्यशेषतया कर्म्मभूम्यार्यक्षेत्रसुकुलोत्पत्त्यारोग्यश्रद्धाश्रवणसंयमादिकमवाप्य विशिष्टतरं स्वर्गमनुत्तरोपपातिकपर्यन्तमधितिष्ठन्ति, पुनरपि ततश्च्युत्वावाप्तमनुष्यादिसंयमभावस्त्वाशेषकर्म्मक्षयान्मोक्षः, तदेवं परेण—संयमेनोद्दिष्टविधिना 'परं' स्वर्गं पारम्पर्येणापवर्गमपि यान्ति, यदिवा 'परेण' सम्यग्दृष्टिगुणस्थानेन 'परं' देशविरत्याद्ययोगिकेवलिपर्यन्तं गुणस्थानकमधितिष्ठन्ति, परेण वाऽनन्तानुबन्धिक्षयेणोल्लसत्कण्डकस्थानाः 'परं' दर्शनमोहनीयचारित्रमोहनीयक्षयं घातिभवोपग्राहिकर्म्मणां वा क्षयमवाप्नुवन्ति, एवंविधाश्च कर्म्मक्षपणोद्यता जीवितं कियन्तं किं वा शेषमित्येवं नावकाङ्क्षन्ति, दीर्घजीवित्वं नाभिलषन्तीत्यर्थः, असंयमजीवितं वा नावकाङ्क्षन्तीति, यदिवा परेण परं यान्तीत्युत्तरोत्तरां तेजोलेश्यामवाप्नुवन्तीति, उक्तं च—"जे इमे अज्जत्ताए समणा निग्गंथा विहरंति एए णं कस्स तेयलेस्सं वीईवयंति?, गोयमा!, मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेयलेस्सं वीइवयइ, एवं दुमासपरियाए असुरिंदवज्जियाणं भवणवासीणं देवाणं, तिमासपरियाए असुरकुमाराणं देवाणं चउमासपरियाए गहगणनक्खत्ततारारूवाणं जोइसियाणं देवाणं, पंचमासपरियाए चंदिमसूरियाणं जोइसिंदाणं जोइसराईणं तेउलेस्सं, छम्मासपरियाए सोहम्मीसाणाणं देवाणं,

॥ १७२ ॥

शीलो० ३
उद्देशकः ४

१ य इमे अद्यतया श्रमणा निर्ग्रन्था विहरन्ति, एते कस्य तेजोलेश्यां व्यतिव्रजन्ति?, गौतम! मासपर्यायः श्रमणो निर्ग्रन्थो व्यन्तराणां देवानां तेजोलेश्यां व्यतिव्रजति, एवं द्विमासपर्यायः असुरेन्द्रवर्जितानां भवनवासिनां देवानां, त्रिमासपर्यायोऽसुरकुमाराणां देवानां चतुर्मासपर्यायः ग्रहगणनक्षत्रतारारूपाणां ज्योतिष्कानां देवानां, पञ्चमासपर्यायः चन्द्रसूर्ययोर्ज्योतिष्केन्द्रयोर्ज्योतीराजयोस्तेजोलेश्यां, षण्मासपर्यायः सौधर्मेशानानां देवानां, सप्तमासपर्यायः सनत्कुमारमाहेन्द्राणां देवानां, अष्टमासपर्यायो ब्रह्मलोकलान्तकानां देवानां, नवमासपर्यायो महाशुक्रसहस्राराणां देवानां, दशमासपर्याय आनतप्राणतारणाच्युतानां देवानां, एकादशमासपर्यायो ग्रैवेयकाणां, द्वादशमासपर्यायः श्रमणो निर्ग्रन्थोऽनुत्तरोपपातिकानां देवानां तेजोलेश्यां व्यतिव्रजति, ततः परं शुक्रः शुक्राभिजातिर्भूत्वा भू०)त्वा ततः पश्चात्सिध्यति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तमासपरिआए सणंकुमारमाहिंदाणं देवाणं, अट्ठमासपरियाए बंभलोगलंतगाणं देवाणं, नवमासपरिआए महासुक्कसहस्साराणं देवाणं, दसमासपरियाए आणयपाणयआरणच्चुआणं देवाणं, एगारसमासपरियाए गेवेज्जाणं, बारसमासे समणे निग्गंथे अणुत्तरोववाइयाणं देवाणं तेयलेसं वीयवयइ, तेण परं सुक्के सुक्काभिजाई भवित्ता तओ पच्छा सिज्झइ।" यश्चानन्तानुबन्ध्यादिक्षपणोद्यतः स किमेकक्षयादेव प्रवर्त्तते उत नेत्याह—

एगं विगिंचमाणे पुढो विगिंचइ, पुढोवि, सद्धी आणाए मेहावी लोगं च आणाए अभिसमिच्चा अकुओभयं, अत्थि सत्थं परेण परं, नत्थि असत्थं परेण परं (सू० १२४)

'एकम्' अनन्तानुबन्धिनं क्रोधं क्षपकश्रेण्यारूढः क्षपयन् 'पृथग्' अन्यदपि दर्शनादिकं क्षपयति, बद्धायुष्कोऽपि दर्शनसप्तकं यावत्क्षपयति, पृथगन्यदपि क्षपयन्नवश्यमनन्तानुबन्धिनामकं क्षपयति पृथग्–अन्यद् क्षयान्यथानुपपत्तेः, किंगुणः क्षपकश्रेणियोग्यो भवतीत्याह—'सद्धी' इत्यादि, श्रद्धा–मोक्षमार्गोद्यमेच्छा विद्यते यस्यासौ श्रद्धावान् 'आज्ञया' तीर्थकरप्रणीतागमानुसारेण यथोक्तानुष्ठानविधायी 'मेधावी' अप्रमत्तयतिः मर्यादाव्यवस्थितः श्रेण्यर्हो नापर इति। किं च—'लोगं च' इत्यादि, चः समुच्चये 'लोकं' षड्जीवनिकायात्मकं कषायलोकं वा 'आज्ञया' मौनीन्द्रागमोपदेशेन 'अभिसमेत्य' ज्ञात्वा षड्जीवनिकायलोकस्य यथा न कुतश्चिन्निमित्ताद्भयं भवति तथा विधेयं, कषायलोकप्रत्याख्यानपरिज्ञानाच्च तस्यैव परिहर्तुर्न कुतश्चिद्भयमुपजायत इति, लोकं वा चराचरमाज्ञया–आगमाभिप्रायेणाभिसमेत्य न कुतश्चिदैहिकामुष्मिकापायसन्दर्शनतो भयं भवति। तच्च भयं शस्त्राद्भवति, तस्य च शस्त्रस्य प्रकर्षगतिरस्त्युत नेति?, अस्तीति दर्शयति—'अत्थि' इत्यादि, तत्र द्रव्यशस्त्रं कृपाणादि तत्परेणापि परमस्ति–तीक्ष्णादपि तीक्ष्णतरमस्ति, लोहकर्तृसंस्कारविशेषात्, यदिवा शस्त्रमित्युपघातकारि तत एकस्मात्पीडाकारिणोऽन्यत् पीडाकार्युत्पद्यते ततोऽप्यपरमिति, तद्यथा–कृपाणाभिघाताद्भावोत्कोपः ततः शिरोऽर्त्तिः तस्मा ज्वरः ततोऽपि मुखशोषमूर्च्छादय इति, भावशस्त्रपारम्पर्यं त्वेकसूत्रान्तरितं स्वत एव प्रत्याख्यानपरिज्ञाद्वारेण वक्ष्यति, यथा च शस्त्रस्य प्रकर्षगतिरस्ति पारम्पर्यं वा विद्यते अशस्त्रस्य तथा नास्तीति दर्शयितुमाह—'नत्थि' इत्यादि, 'नास्ति' न विद्यते, किं तद्?—'शस्त्रं' संयमः तत् 'परेण पर'मिति प्रकर्षगत्यापन्नमिति, तथाहि–पृथिव्यादीनां सर्वं तुल्यता कार्या न मन्दतीव्रभेदोऽस्तीति, पृथिव्यादिषु समभावत्वात् सामायिकस्य, अथवा शैलेश्यवस्थासंयमादपि परः संयमो नास्ति, तदूर्द्धं गुणस्थानाभावादिति भावः। यो हि क्रोधमुपादानतो बन्धतः स्थितितो विपाकतोऽनन्तानुबन्धिलक्षणतः क्षयमाश्रित्य प्रत्याख्यानपरिज्ञया जानाति सोऽपरमानादिदर्श्यपीत्येतदेव प्रतिसूत्रं लगयितव्यमित्याह—

जे कोहदंसी से माणदंसी, जे माणदंसी से मायादंसी, जे मायादंसी से लोभदंसी, जे लोभदंसी से पिज्जदंसी, जे पिज्जदंसी से दोसदंसी, जे दोसदंसी से मोहदंसी, जे मोहदंसी से गब्भदंसी, जे गब्भदंसी से जम्मदंसी, जे जम्मदंसी से मारदंसी, जे मारदंसी से नरयदंसी, जे नरयदंसी से तिरियदंसी, जे तिरियदंसी से दुक्खदंसी। से मेहावी अभिणिवट्टिज्जा कोहं च माणं च मायं च लोभं च पिज्जं च दोसं च मोहं च गब्भं च जम्मं च मारं च नरयं च तिरियं च दुक्खं च। एयं पासगस्स दंसणं उवरयसत्थस्स पलियंतकरस्स, आयाणं निसिद्धा सगडब्भि, किमत्थि ओवाही पासगस्स? न विज्जइ?, नत्थि(सू० १२५) त्तिबेमि॥ शीतोष्णीयाध्ययनम् ३॥

यो हि क्रोधं स्वरूपतो वेत्ति अनर्थपरित्यागरूपत्वाज्ज्ञानस्य परिहरति च स मानमपि पश्यति परिहरति चेति, यदिवा यः क्रोधं पश्यन्नाचरति स मानमपि पश्यति, मानाध्मातो भवतीत्यर्थः, एवमुत्तरत्रापि आयोज्यं, यावत् स दुःखदर्शीति, सुगमत्वान्न विव्रियते। साम्प्रतं क्रोधादेः साक्षान्निवर्त्तनमाह—'से' इत्यादि, स मेधावी 'अभिनिवर्त्तयेद्' व्यावर्त्तयेत्, किं तत्?–'क्रोधमित्यादि यावद्दुःखं', सुगमत्वान्नाख्यानाभावः, स्वमनीषिकापरिहारार्थमाह—'एय' मित्यादि, 'एतद्' अनन्तरोक्तमुद्देशकादेरारभ्य पश्यकस्य–तीर्थकृतो दर्शनम्–अभिप्रायः, किम्भूतस्य?–उपरतशस्त्रस्य पर्यन्तकृतः, पुनरपि किम्भूतोऽसौ?—'आयाण'मित्यादि, आदानं कर्म्मोपादानं निषेध्य पूर्वस्वकृतकर्म्मभिदसाविति, किं चास्य भवतीत्याह—'किमत्थी'त्यादि, 'पश्यकस्य' केवलिनः 'उपाधिः' विशेषणं उपाधीयत इति वोपाधिः, द्रव्यतो हिरण्यादिर्भावतोऽष्टप्रकारं कर्म्म, स द्विविधोऽप्युपाधिः किमस्त्याहोस्विन्न विद्यते?, नास्तीति, एतदहं ब्रवीमि, सुधर्म्मस्वामी जम्बू-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वामिनं कथयति, यथा सोऽहं ब्रवीमि येन मया भगवत्पादारविन्दमुपास(य)ता सर्वमेतदश्रावि तद्भवते तदुपदिष्टार्थानुसारितया कथयामि, न पुनः स्वमतिविकल्पशिल्परचनयेति । गतः सूत्रानुगमः, तद्गतौ च समाप्तश्चतुर्थोद्देशकः ॥ तत्समाप्तौ चातीतानागतनयविचारातिदेशात् समाप्तं शीतोष्णीयाध्ययनमिति ॥ ग्रन्थाग्रम् ७९० ॥

अथ चतुर्थं सम्यक्त्वाख्यमध्ययनम् ।

उक्तं तृतीयमध्ययनं, साम्प्रतं चतुर्थमारभ्यते, अस्य चायमभिसम्बन्धः—इह शस्त्रपरिज्ञायामन्वयव्यतिरेकाभ्यां षड्जीवनिकायान् व्युत्पादयता जीवाजीवपदार्थद्वयं व्युत्पादितं, तद्बधे च बन्धं विरतिं च भणताऽऽस्रवसंवरपदार्थद्वयमूचे, तथा लोकविजयाध्ययने लोको यथा वध्यते यथा च मुच्यत इति वदता बन्धनिर्जरे गदिते, शीतोष्णीयाध्ययने तु शीतोष्णरूपाः परीषहाः सोढव्या इति भणता तत्फललक्षणो मोक्षोऽभिहितः, ततश्चाध्ययनत्रयेण सप्तपदार्थात्मकं तत्त्वमभिहितं, तत्त्वार्थश्रद्धानं च सम्यक्त्वमुच्यते, तदधुना प्रतिपाद्यते, अनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि व्यावर्ण्योपक्रमेऽर्थाधिकारो द्वेधा, तत्राध्ययनार्थाधिकारः सम्यक्त्वाख्यः शस्त्रपरिज्ञायां प्रागेवाभाणि, उद्देशकार्थाधिकारप्रतिपादनाय तु निर्युक्तिकार आह—

आ. सू. ३०

पढमे सम्मावाओ बीए धम्मप्पवाइयपरिक्खा । तइए अणवज्जतवो न हु बालतवेण मुक्खुत्ति ॥ २१५ ॥
उद्देसंमि चउत्थे समासवयणेण णियमणं भणियं । तम्हा य नाणदंसणतवचरणे होइ जइयव्वं ॥ २१६ ॥

श्रीआचाराङ्गवृत्तिः (शी०)

॥ १७५ ॥

सम्य० ४ उद्देशकः १

प्रथमोद्देशके सम्यग्वाद इत्ययमर्थाधिकारः, सम्यग्-अविपरीता वादः सम्यग्वादो-यथावस्थितवस्त्वाविर्भावनं, द्वितीये तु धर्म्मप्रवादिकपरीक्षा, धर्म्मं प्रवदितुं शीलं येषा ते धर्म्मप्रवादिनस्त एव धर्म्मप्रवादिकाः, धर्म्मप्रावादुका इत्यर्थस्तेषां परीक्षा-युक्तायुक्तविचारणमिति, तृतीयेऽनवद्यतपोव्यावर्णनं, न च बालतपसा-अज्ञानितपश्चरणेन मोक्ष इत्ययमर्थाधिकारः, चतुर्थोद्देशके तु 'समासवचनेन' सङ्क्षेपवचनेन 'नियमनं भणितं' संयत उक्त इति । तदेवं प्रथमोद्देशके सम्यग्दर्शनमुक्तं, द्वितीये तु सम्यग्ज्ञानं, तृतीये बालतपोव्युदासेन सम्यक्तपः, चतुर्थे तु सम्यक्चारित्रमिति, तस्माच्चशब्दो हेतौ, यतश्चतुष्टयमपि मोक्षाङ्गं प्रागुक्तं तस्मात् ज्ञानदर्शनतपश्चरणेषु 'मुमुक्षुणा यतितव्यं' तत्प्रतिपालनाय यावज्जीवं यत्नो विधेय इति गाथाद्वयार्थः ॥ अधुना नामनिष्पन्ननिक्षेपायातस्य सम्यक्त्वाभिधानस्य निक्षेपं चिकीर्षुराह—

नामंठवणासम्मं दव्वसम्मं च भावसम्मं च । एसो खलु सम्मस्सा निक्खेवो चउव्विहो होइ ॥ २१७ ॥

अक्षरार्थः सुगमः, भावार्थं तु सुगमनामस्थापनाव्युदासेन द्रव्यभावगतं निर्युक्तिकारः प्रतिपिपादयिषुराह—

अह दव्वसम्म इच्छाणुलोमियं तेसु तेसु दव्वेसुं । कयसंखयसंजुत्तो पउत्त जढ भिण्ण छिण्णं वा ॥ २१८ ॥

'अथे'त्यानन्तर्ये ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यसम्यक्त्वमित्याह, 'ऐच्छानुलोमिकं' इच्छा-चेतःप्रवृत्तिरभिप्रायस्तस्यानुलोमम्-अनुकूलं तत्र भवमैच्छानुलोमिकं तच्च तेषु तेष्विच्छा भावानुकूल्यताभाक्षु द्रव्येषु कृताद्युपाधिभेदेन सप्तधा भवति, तद्यथा-कृतम्-अपूर्वमेव निर्वर्त्तितं रथादि, तस्य यथाऽवयवलक्षणनिष्पत्तेर्द्रव्यसम्यक्कर्तुस्तन्निमित्तचित्तस्वास्थ्योत्पत्तेः

॥ १७५ ॥

यदर्थं वा कृतं तस्य शोभनाशुकरणतया समाधानहेतुत्वाद्वा द्रव्यसम्यग् १, एवं संस्कृतेऽपि योज्यं, तस्यैव रथादेर्भग्नजीर्णोपोढापरावयवसंस्कारादिति २, तथा ययोर्द्रव्ययोः संयोगो गुणान्तराधानाय नोपमर्दाय उपभोक्तुर्वा मनःप्रीत्यै पयःशर्करयोरिव तत्संयुक्तद्रव्यसम्यक् ३, तथा यत्प्रयुक्तं द्रव्यं लाभहेतुत्वादात्मनः समाधानाय प्रभवति तत्प्रयुक्तद्रव्यसम्यक् ४, पाठान्तरं वा—'उवउत्त'त्ति यदुपयुक्तम्-अभ्यवहृतं द्रव्यं मनःसमाधानाय प्रभवति तदुपयुक्तद्रव्यसम्यक् ४, तथा जढं-परित्यक्तं यद्वारादि तत्त्यक्तद्रव्यसम्यक् ५, तथा दधिभाजनादि भिन्नं सत् काकादिसमाधानोत्पत्तेर्भिन्नद्रव्यसम्यक् ६, तथाऽधिकमांसादिच्छेदाच्छिन्नसम्यक् ७, सर्वमप्येतत्समाधानकारणत्वाद्द्रव्यसम्यक्, विपर्ययादसम्यगिति गाथार्थः ॥ भावसम्यक्प्रतिपादनायाह—

तिविहं तु भावसम्मं दंसण नाणे तहा चरित्ते य । दंसणचरणे तिविहं नाणे दुविहं तु नायव्वं ॥ २१९ ॥

त्रिविधं भावसम्यक्-दर्शनज्ञानचारित्रभेदात्, पुनरप्येकैकं भेदत आचष्टे-तत्र दर्शनचरणे प्रत्येकं त्रिविधे, तद्यथा-अनादिमिथ्यादृष्टेरकृतत्रिपुञ्जस्य यथाप्रवृत्तकरणक्षीणशेषकर्म्मणो देशोनसागरोपमकोटिकोटीस्थितिकस्यापूर्वकरणभिन्नग्रन्थेर्मिथ्यात्वानुदयलक्षणमन्तरकरणं विधायानिवृत्तिकरणेन प्रथमं सम्यक्त्वमुत्पादयत औपशमिकं दर्शनम् १, उक्तं च—"ऊसरदेसं दड्ढेलयं च विज्झाइ वणदवो पप्प । इय मिच्छत्ताणुदए उवसमसम्मं लहइ जीवो ॥ १ ॥" उपशमश्रेण्यां चौपशमिकमिति २, तथा सम्यक्त्वपुद्गलोपष्टम्भजनिताध्यवसायः क्षायोपशमिकं २, दर्शनमोहनीयक्षयात् क्षायिकं ३,

१ ऊषरदेशं दग्धं च विध्याति वनदवः प्राप्य । एवं मिथ्यात्वानुदये औपशमिकसम्यक्त्वं लभते जीवः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चारित्रमप्युपशमश्रेण्यामौपशमिकं १ कषायक्षयोपशमात् क्षायोपशमिकं चारित्रं २ चारित्रमोहनीयक्षयात्क्षायिकं ३, ज्ञाने तु भावसम्यग् द्विधा ज्ञातव्यं, तद्यथा-क्षायोपशमिकं क्षायिकं च, तत्र चतुर्विधज्ञानावरणीयक्षयोपशमात् मत्यादि चतुर्विधं क्षायोपशमिकं ज्ञानं, समस्तक्षयात्क्षायिकं केवलज्ञानमिति । तदेवं त्रिविधेऽपि भावसम्यक्त्वे दर्शिते सति परश्चोदयति-यद्येवं त्रयाणामपि सम्यग्वादसम्भवे कथं दर्शनस्यैव सम्यक्त्ववादो रूढो ? यदिहाध्ययने व्यावर्ण्यते, उच्यते, तद्भावभावित्वादितरयोः, तथाहि-मिथ्यादृष्टेस्ते न स्तः, अत्र च सम्यक्त्वप्राधान्यख्यापनाय अन्धेतरराजकुमारद्वयेन बालाङ्गनाद्यवबोधार्थं दृष्टान्तमाचक्षते-तद्यथा-उदयसेनराज्ञो वीरसेनसूरसेनकुमारद्वयं, तत्र वीरसेनोऽन्धः, स च तत्प्रायोग्या गान्धर्वादिकाः कला ग्राहितः, इतरस्त्वभ्यस्तधनुर्वेदो लोकश्लाघ्यां पदवीमगमत्, एतच्च समाकर्ण्य वीरसेनेनापि राजा विज्ञप्तो यथाऽहमपि धनुर्वेदाभ्यासं विदधे, राज्ञाऽपि तदाग्रहमवगम्यानुज्ञातः, ततोऽसौ सम्यगुपाध्यायोपदेशात् प्रज्ञातिशयादभ्यासविशेषाच्च शब्दवेधी सञ्जज्ञे, तेन चारूढयौवनेन स्वभ्यस्तधनुर्वेदविज्ञानक्रियेणागणितचक्षुर्दर्शनसदसद्भावेन शब्दवेधित्वावष्टम्भात्सरबलोपस्थाने सति राजा युद्धायादेशं याचितः, तेनापि याच्यमानेन वितेरे, वीरसेनेन च शब्दानुवेधितया परानीके जघृम्भे, परैश्चावगतकुमारान्धभावैर्मूकतामालम्ब्यासौ जग्रहे, सूरसेनेन च विदितवृत्तान्तेन राजानमापृच्छ्य निशितशरशतजालावष्टब्धपरानीकेन मोचितः । तदेवमभ्यस्तविज्ञानक्रियोऽपि चक्षुर्विकलत्वान्नालमभिप्रेतकार्यसिद्धये इति । एतदेव निर्युक्तिकारो गाथयोपसंहर्त्तुमाह—

कुणमाणोऽवि य किरियं परिवयंतोवि सयणधणभोए । दिंतोऽवि दुहस्स उरं न जिणइ अंधो पराणीयं ॥२२०॥

कुर्वन्नपि क्रियां परित्यजन्नपि स्वजनधनभोगान् दददपि दुःखस्योरः न जयत्यन्धः परानीकमिति गाथार्थः ॥ तदेवं दृष्टान्तमुपदर्श्य दार्ष्टान्तिकमाह—

कुणमाणोऽवि निवित्तिं परिवयंतोऽवि सयणधणभोए । दिंतोऽवि दुहस्स उरं मिच्छदिट्ठी न सिज्झइ उ ॥२२१॥

कुर्वन्नपि निवृत्तिम्-अन्यदर्शनाभिहितां, तद्यथा-पञ्च यमाः पञ्च नियमा इत्यादिकां तथा परित्यजन्नपि स्वजनधनभोगान् पञ्चाग्नितपआदिना दददपि दुःखस्योरः मिथ्यादृष्टिर्न सिध्यति, तुरवधारणे, नैव सिध्यति, दर्शनविकलत्वात्, अन्धकुमारवत् असमर्थः कार्यसिद्धये । यत एवं ततः किं कर्त्तव्यमित्याह—

तम्हा कम्माणीयं जेउमणो दंसणंमि पयइज्जा । दंसणवओ हि सफलाणि हुंति तवनाणचरणाइं ॥ २२२ ॥

यस्मात्सिद्धिमार्गमूलास्यदं सम्यग्दर्शनमन्तरेण न कर्मक्षयः स्यात्, तस्मात्कारणात्कर्म्मानीकं जेतुमनाः सम्यग्दर्शने प्रयतेत, तस्मिंश्च सति यद्भवति तद्दर्शयति-दर्शनवतो हि 'हिः' हेतौ यस्मात्सम्यग्दर्शनिनः सफलानि भवन्ति तपोज्ञानचरणान्यतस्तत्र यत्नवता भाव्यमिति गाथार्थः ॥ प्रकारान्तरेणापि सम्यग्दर्शनस्य तत्पूर्वकाणां च गुणस्थानकानां गुणमाविर्भावयितुमाह—

सम्मत्तुप्पत्ती सावए य विरए अणंतकम्मंसे । दंसणमोहक्खवए उवसामन्ते य उवसंते ॥ २२३ ॥
खवए य खीणमोहे जिणे अ सेढी भवे असंखिज्जा । तव्विवरीओ कालो संखिज्जगुणाइ सेढीए ॥ २२४ ॥

सम्यक्त्वस्योत्पत्तिः सम्यक्त्वोत्पत्तिस्तस्यां विवक्षितायामसङ्ख्येयगुणा श्रेणिर्भवेदित्युत्तरगाथार्द्धान्ते क्रियामपेक्ष्य स-

म्बन्धो लगयितव्यः, कथमसङ्ख्येयगुणा श्रेणिर्भवेदिति ?, अत्रोच्यते, इह मिथ्यादृष्टयो देशोनकोटीकोटिकर्म्मस्थितिका ग्रन्थिकसत्त्वास्ते कर्म्मनिर्जरामाश्रित्य तुल्याः, धर्म्मप्रच्छनोत्पन्नसंज्ञास्तेभ्योऽसङ्ख्येयगुणनिर्जरकाः, ततोऽपि पिपृच्छिषुः सन् साधुसमीपं जिगमिषुस्तस्मादपि क्रियाविष्टः पृच्छन्, ततोऽपि धर्म्मं प्रतिपित्सुः, अस्मादपि क्रियाविष्टः प्रतिपद्यमानः, तस्मादपि पूर्वप्रतिपन्नोऽसङ्ख्येयगुणनिर्जरक इति सम्यक्त्वोत्पत्तिर्व्याख्याता, तदनन्तरं विरताविरतिं प्रतिपित्सुप्रतिपद्यमानपूर्वप्रतिपन्नानामुत्तरोत्तरस्यासङ्ख्येयगुणा निर्जरा योज्या, एवं सर्वविरतावपीति, ततोऽपि पूर्वप्रतिपन्नसर्वविरतेः सकाशात् 'अणंतकम्मंसे'त्ति 'पदैकदेशे पदप्रयोग' इति यथा भीमसेनो भीमः सत्यभामा भामा एवमनन्तशब्दोपलक्षिता अनन्तानुबन्धिनः, ते हि मोहनीयस्यांशाः-भागाः तांश्चिक्षपयिषुरसङ्ख्येयगुणनिर्जरकः, ततोऽपि क्षपकः, तस्मादपि क्षीणानन्तानुबन्धिकषायः, एतदेव दर्शनमोहनीयत्रयेऽभिमुखक्रियारूढापवर्गत्रयमायोज्यं, ततोऽपि क्षीणसप्तकात्क्षीणसप्तक एवोपशमश्रेण्यारूढोऽसङ्ख्येयगुणनिर्जरकः, ततोऽप्युपशान्तमोहः, तस्मादपि चारित्रमोहनीयक्षपकः, ततोऽपि क्षीणमोहः, अत्र चाभिमुखादित्रयं यथासम्भवमायोजनीयम्, अस्मादपि 'जिनो' भवस्थकेवली, तस्मादपि शैलेश्यवस्थोऽसङ्ख्येयगुणनिर्जरकः । तदेवं कर्म्मनिर्जरायै असङ्ख्येयलोकाकाशप्रदेशप्रमाणनिष्पादितसंयमस्थानप्रचयोपात्तश्रेणिः सोत्तरोत्तरेषामसङ्ख्येयगुणा, उत्तरोत्तरप्रवर्द्धमानाध्यवसायकण्डकोपपत्तेरिति, कालस्तु तद्विपरीतोऽयोगिकेवलिन आरभ्य प्रतिलोमतया सङ्ख्येयगुणया श्रेण्या ज्ञेयः, इदमुक्तं भवति-यावत्कालेन यावत्कर्मायोगिकेवली क्षपयति तावन्मात्रं कर्म्म सयोगिकेवली सङ्ख्येयगुणेन कालेन क्षपयति एवं प्रतिलोमतया यावद्धर्मं पिपृच्छिषुस्तावन्नेयमिति गाथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयार्थः ॥ एवमन्तरोक्तया नीत्या दर्शनवतः सफलानि तपोज्ञानचरणान्यभिहितानि, यदि पुनः केनचिदुपाधिना विद्धाति ततः सफलत्वाभावः, कश्चासावुपाधिरित्याह—

आहारउवहिपूआइड्ढीसु य गारवेसु कइतविअं । एमेव बारसविहे तवंमि न हु कइतवे समणो ॥ २२५ ॥

आहारश्च उपधिश्च पूजा च ऋद्धिश्च—आमर्षौषध्यादिका आहारोपधिपूजर्द्धयस्तासु निमित्तभूतासु ज्ञानचरणक्रियां करोति, तथा गारवेषु त्रिषु प्रतिबद्धो यत्करोति तत्कृत्रिममित्युच्यते, यथा च ज्ञानचरणयोराहाराद्यर्थमनुष्ठानं कृत्रिमं सन्न फलवद्भवति एवं सबाह्याभ्यन्तरे द्वादशप्रकारे तपस्यपीति, न च कृत्रिमानुष्ठायिनः श्रमणभावो, न चाश्रमणस्यानुष्ठानं गुणवदिति, तदेवं निरुपधेर्दर्शनवतस्तपोज्ञानचरणानि सफलानीति स्थितमतो दर्शने यतितव्यं, दर्शनं च तत्त्वार्थश्रद्धानं, तत्त्वं चोत्पन्नापगतकलङ्काशेषपदार्थसत्ताव्यापिज्ञानैस्तीर्थकृद्भिर्यदभाषि, तदेव सूत्रानुगमायातेन सूत्रेण दर्शयति—

से बेमि जे अईया जे य पडुप्पन्ना आगमिस्सा अरहंता भगवंतो ते सव्वे एवमाइक्खन्ति एवं भासंति एवं पण्णविंति एवं परूविंति—सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता न हंतव्वा न अज्जावेयव्वा न परिघित्तव्वा न परियावेयव्वा न उद्दवेयव्वा, एस धम्मे सुद्धे निइए समिच्च लोयं खेयण्णेहिं पवेइए, तंजहा—उट्ठिएसु वा अणुट्ठिएसु वा उवट्ठिएसु वा अणुवट्ठिएसु वा उवरयदंडेसु वा अणुवरयदंडेसु वा सोवहिएसु वा अणोवहिएसु वा संजोगरएसु वा असंजोगरएसु वा, तच्चं चेयं तहा चेयं अस्सिं चेयं पवुच्चइ (सू० १२६)

सम्य० ४ उद्दे ॥ १७८ ॥

गौतमस्वाम्याह—यथा सोऽहं ब्रवीमि योऽहं तीर्थकरवचनावगततत्त्वः श्रद्धेयवचन इति, यदिवा शौद्धोदनिशिष्याभिमतक्षणिकत्वव्युदासेनाह—येन मया पूर्वमभाणि सोऽहमद्यापि ब्रवीमि नापरो, यदिवा सेशब्दस्तच्छब्दार्थे यच्छब्दाने सम्यक्त्वं भवति तदहं तत्त्वं ब्रवीमीति, येऽतीताः—अतिक्रान्ता ये च प्रत्युत्पन्नाः—वर्त्तमानकालभाविनो ये चागामिनः त एवं प्ररूपयन्तीति सम्बन्धः, तत्रातिक्रान्तास्तीर्थकृतः कालस्यानादित्वादनन्ता अतिक्रान्ता अनागता अप्यनन्ता आगामिकालस्यानन्तत्वात्तेषां च सर्वदैव भावादिति; वर्त्तमानतीर्थकृतां च प्रज्ञापकापेक्षितया अनवस्थितत्वे सत्यप्युत्कृष्टजघन्यपदिन एव कथ्यन्ते, तत्रोत्सर्गतः समयक्षेत्रसम्भविनः सप्तत्युत्तरशतं, तच्चैवं—पञ्चस्वपि विदेहेषु प्रत्येकं द्वात्रिंशत्क्षेत्रात्मकत्वादेकैकस्मिन् द्वात्रिंशत् द्वात्रिंशत् पञ्चस्वपि भरतेषु पञ्चैवमैरावतेष्वपीति, तत्र द्वात्रिंशत्पञ्चभिर्गुणिताः षष्ट्युत्तरशतं (१६०) भरतैरावतदशप्रक्षेपेण सप्तत्यधिकं शतमिति, जघन्यतस्तु विंशतिः, सा चैवं—पञ्चस्वपि महाविदेहेषु महाविदेहान्तर्महानद्युभयतटसद्भावात्तीर्थकृतां प्रत्येकं चत्वारः, तेऽपि पञ्चभिर्गुणिता विंशतिर्भरतैरावतयोस्त्वेकान्तसुषमादावभाव एवेति, अन्ये तु व्याचक्षते—मेरोः पूर्वापरविदेहयोरेकैकसद्भावान्महाविदेहे द्वावेव, ततः पञ्चस्वपि दशैवेति, तथा च ते आहुः—"सत्तरसयमुक्कोसं इअरे दस समयखेत्तजिणमाणं । चोत्तीस पढमदीवे अणंतरऽद्धे य ते दुगुणा ॥ १ ॥" के इमे?—'अर्हन्तो' अर्हन्ति पूजासत्कारादिकमिति, तथा ऐश्वर्याद्युपेता भगवन्तः, ते सर्व एव परप्रश्नावसरे एवमाचक्षते यदुत्तरत्र वक्ष्यते, वर्त्तमाननिर्देशस्योपलक्षणार्थत्वादिदमपि द्रष्टव्यम्—एवमाचचक्षिरे एवमाख्यास्यन्ति, एवं सामान्यतः सदेवमनुजायां परिषदि अर्द्धमागधया सर्वसत्त्वस्वभाषानुगामिन्या भाषया भाषन्ते, एवं प्रकर्षेण संशीत्यपनोदायान्तेवासिनो जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षपदार्थान् ज्ञापयन्ति प्रज्ञापयन्ति, एवं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः मिथ्यात्वाविरतिप्रमादकषाययोगा बन्धहेतवः स्वपरभावेन सदसती तत्त्वं सामान्यविशेषात्मकमित्यादिना प्रकारेण प्ररूपयन्ति, एकार्थिकानि वैतानीति, किं तदेवमाचक्षते इति दर्शयति—यथा 'सर्वे प्राणाः' सर्व एव पृथिव्यप्तेजोवायुवनस्पतयः द्वित्रिचतुःपञ्चेन्द्रियाश्चेन्द्रियबलोच्छ्वासनिश्वासायुष्कलक्षणप्राणधारणात् प्राणाः, तथा सर्वाणि भवन्ति भविष्यन्त्यभूवन्निति च भूतानि चतुर्दशभूतग्रामान्तःपातीनि, एवं सर्व एव जीवन्ति जीविष्यन्ति अजीविषुरिति जीवाः—नारकतिर्यग्नरामरलक्षणाश्चतुर्गतिकाः, तथा सर्व एव स्वकृतसातासातोदयसुखदुःखभाजः सत्त्वाः, एकार्था वैते शब्दाः 'तत्त्वभेदपर्यायैः प्रतिपादन'मितिकृत्वेति, एते च सर्वेऽपि प्राणिनः पर्यायशब्दावेदिता न हन्तव्याः दण्डकशादिभिः नाज्ञापयितव्याः प्रसह्याभियोगदानतो न परिग्राह्या भृत्यदासदास्यादिममत्वपरिग्रहतो न परितापयितव्याः शारीरमानसपीडोत्पादनतो नापद्रावयितव्याः प्राणव्यपरोपणतः 'एषः' अनन्तरोक्तो 'धर्मो' दुर्गत्यर्गलासुगतिसोपानदेश्यः, अस्य च प्रधानपुरुषार्थत्वाद्विशेषणं दर्शयति—'शुद्धः' पापानुबन्धरहितः न शाक्यधिग्जातीनामिवैकेन्द्रियपञ्चेन्द्रियवधानुमतिकलङ्काङ्कितः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'नित्यः' अप्रच्युतिरूपः, पञ्चस्वपि विदेहेषु सदाभवनात्, तथा 'शाश्वतः' शाश्वतगतिहेतुत्वात् यदिवा नित्यत्वाच्छाश्वतो, न तु नित्यं भूत्वा न भवति, भव्यत्ववत्, अभूत्वा च नित्यं भवति घटाभाववदिति, अयं तु त्रिकालावस्थायीति, अमुं च 'लोकं' जन्तुलोकं दुःखसागरावगाढं 'समेत्य' ज्ञात्वा तदुत्तरणाय 'खेदज्ञैः' जन्तुदुःखपरिच्छेत्तृभिः 'प्रवेदितः' प्रतिपादित इति, एतच्च गौतमस्वामी स्वमनीषिकापरिहारेण शिष्यमतिस्थैर्यार्थं बभाषे ॥ एनमेव सूत्रोक्तमर्थं निर्युक्तिकारः सूत्रसंस्पर्शकेन गाथाद्वयेन दर्शयति—

जे जिणवरा अईया जे संपइ जे अणागए काले। सव्वेवि ते अहिंसं वादंसु वदिहिंति विवदिंति ॥२२६॥
छप्पिय जीवनिकाए णोवि हणे णोऽवि अ हणाविज्जा। नोऽवि अ अणुमन्निज्जा सम्मत्तस्सेस निज्जुत्ती ॥२२७॥

[चतुर्थेऽध्ययने प्रथमोद्देशकनिर्युक्तिः] गाथाद्वयमपि कण्ठ्यं । तीर्थकरोपदेशश्च परोपकारितया तत्स्वाभाव्यादेव प्रवर्त्तमानो भास्करोदय इव प्रबोध्यविशेषनिरपेक्षतया प्रवर्त्तते(तत्)तद्यथेत्यादिना दर्शयति—'तंजहा—उट्ठिएसु वा' इत्यादि, धर्म्मचरणायोद्यता उत्थिता—ज्ञानदर्शनचारित्रोद्योगवन्तः, तद्विपर्ययेणानुत्थिताः तेषु निमित्तभूतेषु तानुद्दिश्य भगवता सर्ववेदिना त्रिजगत्पतिना धर्म्मः प्रवेदितः, एवं सर्वत्र लगयितव्यं, यदिवा उत्थितानुत्थितेषु द्रव्यतो निष्पण्णानिष्पण्णेषु, तत्रैकादशसु गणधरेषूत्थितेष्वेव वीरवर्द्धमानस्वामिना धर्म्मः प्रवेदितः, तत उपस्थिता धर्म्मं शुश्रूषवो जिघृक्षवो वा तद्विपर्ययेणानुपस्थितास्तेष्विति, निमित्तसप्तमी चेयं, यथा चर्म्मणि द्वीपिनं हन्तीति, ननु च भावोपस्थितेषु चिलातिपुत्रादिष्विव धर्म्मकथा युक्तिमती अनुपस्थितेषु तु कं गुणं पश्यति?, अनुपस्थितेष्वपीन्द्रनागादिषु विचित्रत्वात्कर्म्म- ॥ १७९ ॥

परिणतेः क्षयोपशमापादनाद्गुणवत्त्वेवेति यत्किञ्चिदेतत्, प्राणिन आत्मानं वा दण्डयतीति दण्डः, स च मनोवाक्कायलक्षणः, उपरतो दण्डो येषां ते तथा, तद्विपर्ययेणानुपरतदण्डाः, तेषूभयरूपेष्वपि, तत्रोपरतदण्डेषु तत्स्थैर्यगुणान्तराधानार्थं देशना, इतरेषु तूपरतदण्डत्वार्थमिति, उपधीयते—सङ्कुच्यत इत्युपधिः, द्रव्यतो हिरण्यादिः भावतो माया, सह उपधिना वर्त्तन्त इति सोपधिकास्तद्विपर्ययेणानुपधिकास्तेष्विति, संयोगः—सम्बन्धः पुत्रकलत्रमित्रादिजनितस्तत्र रताः संयोगरतास्तद्विपर्ययेणैकत्वभावनाभाविता असंयोगरतास्तेष्विति, तदेवमुभयरूपेष्वपि यद्भगवता धर्म्मदेशनाऽकारि तत् 'तथ्यं' सत्यमेतदिति, चशब्दो नियमार्थः, तथ्यमेवैतद्भगवद्वचनं, यथाप्ररूपितवस्तुसद्भावात्तथ्यता वचसो भवतीत्यतो वाच्यमपि तथैवेति दर्शयति—तथा चैतद्भस्तु यथा भगवान् जगाद, यथा—सर्वे प्राणा न हन्तव्या इत्यादि, एवं सम्यग्दर्शनं श्रद्धानं विधेयम्, एतच्चास्मिन्नेव मौनीन्द्रप्रवचने सम्यग्मोक्षमार्गविधायिनि समस्तदम्भप्रबन्धोपरते प्रकर्षेणोच्यते प्रोच्यत इति, न तु यथा अन्यत्र 'न हिंस्यात्सर्वभूतानी'त्यभिधायान्यत्र वाक्ये यज्ञपशुवधाभ्यनुज्ञानात् पूर्वोत्तरबाधेति ॥ तदेवं सम्यक्त्वस्वरूपमभिधाय तदवाप्तौ यद्विधेयं तद्दर्शयितुमाह—

तं आइत्तु न निहे न निक्खिवे जाणित्तु धम्मं जहा तहा, दिट्ठेहिं निव्वेयं गच्छिज्जा, नो लोगस्सेसणं चरे (सू० १२७)

'तत्' तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनमादाय—गृहीत्वा तत्कार्याकरणतो 'न निहे'ति न गोपयेत् तथाविधसंसर्गा-

दिनिमित्तोत्थापितमिथ्यात्वोऽपि जीवसामर्थ्यगुणान्न त्यजेदपि, यथा वा शैवशाक्यादीनां गृहीत्वा व्रतानि पुनरपि व्रतेश्वरयागादिविधिना गुरुसमीपे निक्षिप्योल्लप्रजनं, एवं गुर्वादेः सकाशादवाप्य सम्यग्दर्शनं 'न निक्षिपेत्' न त्यजेत्, किं कृत्वा?—यथा तथाऽवस्थितं धर्म्मं ज्ञात्वा श्रुतचारित्रात्मकमवगम्य, वस्तूनां वा धर्म्मं—स्वभावमवबुध्येति । तदवगमे तु किं चापरं कुर्यादित्याह—'दिट्ठेहिं' इत्यादि, दृष्टैरिष्टानिष्टरूपैर्निर्वेदं गच्छेद्, विरागं कुर्यादित्यर्थः, तथाहि—शब्दैः श्रुतैः रसैरास्वादितैर्गन्धैराघ्रातैः स्पर्शैः स्पृष्टैः सद्भिरेवं भावयेत्—यथा शुभेतरतापरिणामवशाद्भवतीत्यतः कस्तेषु रागो द्वेषो वेति । किं च—'नो लोयस्स' इत्यादि, 'लोकस्य' प्राणिगणस्यैषणा—अन्वेषणा इष्टेषु शब्दादिषु प्रवृत्तिरनिष्टेषु तु हेयबुद्धिस्तां 'न चरेत्' न विदध्यात् ॥ यस्य चैषा लोकैषणा नास्ति तस्यान्याप्यप्रशस्ता मतिर्नास्तीति दर्शयति—

जस्स नत्थि इमा जाई अण्णा तस्स कओ सिया?, दिट्ठं सुयं मयं विण्णायं जं एयं परिकहिज्जइ, समेमाणा पलेमाणा पुणो पुणो जाइं पकप्पंति (सू० १२८)

यस्य मुमुक्षोरेषा ज्ञातिः—लोकैषणाबुद्धिः 'नास्ति' न विद्यते, तस्यान्या सावद्यारम्भप्रवृत्तिः कुतः स्यात्?, इदमुक्तं भवति—भोगेच्छारूपां लोकैषणां परिजिहीर्षोर्नैव सावद्यानुष्ठानप्रवृत्तिरुपजायते, तदर्थत्वात्तस्या इति, यदिवा 'इमा' अनन्तरोक्तत्वात् प्रत्यक्षा सम्यक्त्वज्ञातिः प्राणिनो न हन्तव्या इति वा यस्य न विद्यते तस्यान्या अविवेकिनी बुद्धिः कुमार्गसावद्यानुष्ठानपरिहारद्वारेण कुतः स्यात्? । शिष्यमतिस्थैर्यार्थमाह—'दिट्ठ'मित्यादि, यदेतन्मया परिकथ्यते तत्स- ॥ १८० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्द्धैः केवलज्ञानावलोकेन दृष्टं, ततः शुश्रूषुभिः श्रुतं, लघुकर्म्मणां भव्यानां मतं, ज्ञानावरणीयक्षयोपशमाद्विशेषेण ज्ञातं विज्ञातम्, अतो भवताऽपि सम्यक्त्वादिके मत्कथिते यत्नवता भवितव्यमिति । ये पुनर्यथोक्तकारिणो न स्युः ते कथम्भूता भवेयुरित्याह—'समेमाणा' इत्यादि, तस्मिन्नेव मनुष्यादिजन्मनि 'शाम्यन्तो' गार्ध्येनात्यर्थमासेवां कुर्वन्तः तथा 'प्रलीयमानाः' मनोज्ञेन्द्रियार्थेषु पौनःपुन्येनैकेन्द्रियद्वीन्द्रियादिकां जातिं प्रकल्पयन्ति, संसाराविच्छित्तिं विदधतीत्यर्थः ॥ यद्येवमविदितवेद्याः साम्प्रतेक्षिणो यथाजन्मकृतरतय इन्द्रियार्थेषु प्रलीनाः पौनःपुन्येन जन्मादिकृतसन्धाना जन्तवस्ततः किं कर्त्तव्यमित्याह—

अहो अ राओ य जयमाणे धीरे सया आगयपण्णाणे पमत्ते बहिया पास अप्पमत्त सया परिक्कमिज्जासि त्तिबेमि (सू० १२९) ॥ सम्यक्त्वाध्ययने प्रथमोद्देशकः ४–१ ॥

अहश्च रात्रिं च यतमान एव यत्नवानेव मोक्षाध्वनि 'धीरः' परीषहोपसर्गाक्षोभ्यः 'सदा' सर्वकालम् 'आगतं' स्वीकृतं 'प्रज्ञानं' सदसद्विवेको यस्य स तथा, 'प्रमत्तान्' असंयतान् परतीर्थिकान्वा धर्म्माद्बहिर्व्यवस्थितान् पश्य, तांश्च तथाभूतान् दृष्ट्वा किं कुर्यादित्याह—'अप्पमत्ते' इत्यादि, अप्रमत्तः सन्निद्राविकथादिप्रमादरहितोऽक्षिनिमेषोन्मेषादावपि सदोपयुक्तः पराक्रमेथाः कर्म्मरिपून् मोक्षाध्वनि वा । इतिरधिकारसमाप्तौ, ब्रवीमीति पूर्ववत् । इति सम्यक्त्वाध्ययने प्रथमोद्देशकटीका परिसमाप्ता ।

उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीयव्याख्या प्रतन्यते, अस्य चायमभिसम्बन्धः—इह अनन्तराद्देशके सम्यग्वादः प्रतिपादितः, स च प्रत्यनीकमिथ्यावादव्युदासेनात्मलाभं लभते, व्युदासश्च न परिज्ञानमन्तरेण, परिज्ञानं च न विचारभृते, अतो मिथ्यावादभूततीर्थिकमतविचारणायेदमुपक्रम्यते, अनेन सम्बन्धेनायातस्यास्योद्देशकस्येदमादिसूत्रं—'जे आसवा' इत्यादि, यदिवेह सम्यक्त्वमधिकृतं, तच्च सप्तपदार्थश्रद्धानात्मकं, तत्र मुमुक्षुणाऽवगतशस्त्रपरिज्ञाजीवाजीवपदार्थेन संसारमोक्षकारणे निर्णेतव्ये, तत्र संसारकारणमास्रवस्तद्ग्रहणाच्च बन्धग्रहणं, मोक्षकारणं तु निर्जरा तद्ग्रहणाच्च संवरस्तत्कार्यभूतश्च मोक्षः सूचितो भवतीत्यत आश्रवनिर्जरे संसारमोक्षकारणभूते सम्यक्त्वविचाराद्याते दर्शयितुमाह—

जे आसवा ते परिस्सवा जे परिस्सवा ते आसवा, जे अणासवा ते अपरिस्सवा जे अपरिस्सवा ते अणासवा, एए पए संबुज्झमाणे लोयं च आणाए अभिसमिच्चा पुढो पवेइयं (सू० १३०)

'य' इति सामान्यनिर्देशः, आश्रवत्यष्टप्रकारं कर्म्म यैरारम्भैस्ते आस्रवाः, परिः—समन्तात्स्रवति—गलति यैरनुष्ठानविशेषैस्ते परिस्रवाः, य एवास्रवाः—कर्म्मबन्धस्थानानि त एव परिस्रवाः—कर्म्मनिर्जरास्थानानि, इदमुक्तं भवति—यानि इतरजनाचरितानि स्नगङ्गनादीनि सुखकारणतया तानि कर्म्मबन्धहेतुत्वादास्रवाः, पुनस्तान्येव तत्त्वविदां विषयसुखपराङ्मुखानां निःसारतया संसारसरणिदेश्यानीतिकृत्वा वैराग्यजनकानि अतः परिस्रवाः—निर्जरास्थानानि । सर्ववस्तुनामनैकान्तिकतां दर्शयितुमेतदेव विपर्ययेणाह—'जे परिस्सवा' इत्यादि, य एव परिश्रवाः—निर्जरास्थानानि—अर्हत्साधुतपश्चरणदशविधचक्रवालसामाचार्यनुष्ठानादीनि, तान्येव कर्म्मोदयावष्टब्धशुभाध्यवसायस्य दुर्गतिमार्गप्रवृत्तसार्थवाहस्य जन्तोर्महाशातनावतः सातर्द्धिरसगारवप्रवणस्यास्रवा भवन्ति—पापोपादानकारणानि जायन्ते, इदमुक्तं भवति—यावन्ति कर्म्मनिर्जरार्थं संयमस्थानानि तद्बन्धनायासंयमस्थानान्यपि तावन्त्येव, उक्तं च—"यथाप्रकारा यावन्तः, संसारावेशहेतवः । तावन्तस्तद्विपर्यासान्निर्वाणसुखहेतवः ॥ १ ॥" तथाहि—रागद्वेषवासितान्तःकरणस्य विषयसुखोन्मुखस्य दुष्टाशयत्वात्सर्वं संसाराय, पित्तुमन्दरसवासितास्यस्य दुग्धशर्करादिकटुकत्वापत्तिवदिति, सम्यग्दृष्टेस्तु विदितसंसारोदन्वतः न्यक्कृतविषयाभिलाषस्य सर्वमशुचि दुःखकारणमिति च भावयतः सञ्जातसंवेगस्येतरजनसंसारकारणमपि मोक्षायेति भावार्थः । पुनरेतदेव गतप्रत्यागतसूत्रं सप्रतिषेधमाह—'जे अणासवा' इत्यादि, प्रसज्यप्रतिषेधस्य क्रियाप्रतिषेधपर्यवसानतया परिस्रवा इत्यनेन सह सम्बन्धाभावात् पर्युदासोऽयम्, आस्रवेभ्योऽन्येऽनास्रवाः—व्रतविशेषाः, तेऽपि कर्म्मोदयादशुभाध्यवसायिनोऽपरिस्रवाः कर्म्मणः, कोद्रवकृणार्यप्रभृतीनामिवेति, तथाऽपरिस्रवाः—पापोपादानकारणानि केनचिदुपाधिना प्रवचनोपकारादिना क्रियमाणाः कणवीरलताद्यात्मकक्षुल्लकस्येवानास्रवाः—कर्म्मबन्धनानि न भवन्ति, यदिवा आस्रवन्तीत्यास्रवाः, पचाद्यच्, एवं परिस्रवन्तीति परिस्रवाः, अत्र चतुर्भङ्गिका—तत्र मिथ्यात्वाविरतिप्रमादकषाययोगैर्य एव कर्म्मणामास्रवाः—बन्धकाः त एवापरेषां परिस्रवाः—निर्जरकाः, एते च प्रथमभङ्गपतिताः सर्वेऽपि संसारिणश्चतुर्गतिकाः, सर्वेषां प्रतिक्षणमुभयसद्भावात्, तथा ये आस्रवास्तेऽपरिस्रवा इति शून्योऽयं द्वितीयभङ्गको, बन्धस्य शाटावि-

॥ १८१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाभावित्वाद्, एवं येऽनास्रवास्ते परिस्रवाः, एते चायोगिकेवलिनस्तृतीयभङ्गपतिताः, चतुर्थभङ्गपतितास्तु सिद्धाः, तेषामनास्रवत्वादपरिस्रवत्वाच्चेति, अत्र चाद्यन्तभङ्गौ सूत्रोपात्तौ, तदुपादाने च मध्योपादानस्यावश्यंभावित्वात् मध्यभङ्गकद्वयग्रहणं द्रष्टव्यमिति । यद्येवं ततः किमित्याह—'एए पए' इत्यादि, एतानि–अनन्तरोक्तानि पद्यते–गम्यते येभ्योऽर्थेभ्यस्तानि पदानि, तद्यथा–ये आस्रवा इत्यादीनि, परस्य चार्थावगत्यर्थं शब्दप्रयोगादेतत्पदवाच्यानर्थांश्च सम्यग्–अविपर्यासेन बुध्यमानस्तथा 'लोकं' जन्तुगुणमास्रवद्वारायातेन कर्म्मणा बध्यमानं तपश्चरणादिना च मुच्यमानमाज्ञया–तीर्थकरप्रणीतागमानुसारेणाभिसमेत्य–आभिमुख्येन सम्यक् परिच्छिद्य चशब्दो भिन्नक्रमः पृथक् प्रवेदितं चाभिसमेत्य पृथगास्रवोपादानं निर्ज्जरोपादानं चेत्येतच्च ज्ञात्वा को नाम धर्म्माचरणं प्रति नोद्यच्छेदिति?, कथं प्रवेदितमिति चेत्?, तदुच्यते, आस्रवस्तावज्ज्ञानप्रत्यनीकतया ज्ञाननिह्नवेन ज्ञानान्तरायेण ज्ञानप्रद्वेषेण ज्ञानात्याशातनया ज्ञानविसंवादेन ज्ञानावरणीयं कर्म्म बध्यते, एवं दर्शनप्रत्यनीकतया यावद्दर्शनविसंवादेन दर्शनावरणीयं कर्म्म बध्यते, तथा प्राणिनामनुकम्पनतया भूतानुकम्पनतया जीवानुकम्पनतया सत्त्वानुकम्पनत्वेन बहूनां प्राणिनामदुःखोत्पादनतया अशोचनतया अजूरणतया अपीडनतया अपरितापनतया सातावेदनीयं कर्म्म बध्यते, एतद्विपर्ययाच्चासातावेदनीयमिति, तथाऽनन्तानुबन्ध्युत्कटतया तीव्रदर्शनमोहनीयतया प्रबलचारित्रमोहनीयसद्भावान्मोहनीयं कर्म्म बध्यते, महारम्भतया महापरिग्रहतया पञ्चेन्द्रियवधात् कुणिमाहारेण नरकायुष्कं बध्यते, मायावितया अनृतवादेन कूटतुलाकूटमानव्यवहारात्तिर्यगायुर्बध्यते, प्रकृतिविनीततया सानुक्रोशतया अमात्सर्यान्मनुष्यायुष्कं, सरागसंयमेन देशविरत्या बालतपसा अकामनिर्जरया देवायुष्कमिति, कायर्जुतया भावर्जुतया भाषर्जुतया अविसंवादनयोगेन शुभनाम बध्यते, विपर्ययाच्च विपर्यय इति, जातिकुलबलरूपतपःश्रुतलाभैश्वर्यमदाभावादुच्चैर्गोत्रं, जात्यादिमदात् परपरिवादाच्च नीचैर्गोत्रं, दानलाभभोगोपभोगवीर्यान्तरायविधानादान्तरायिकं कर्म्म बध्यते, एते ह्यास्रवाः, साम्प्रतं परिस्रवाः प्रतिपाद्यन्ते–अनशनादि सबाह्याभ्यन्तरं तप इत्यादि, एवमास्रवकनिर्ज्जरकाः सप्रभेदा जन्तवो वाच्याः, सर्वेऽपि च जीवादयः पदार्था मोक्षावसाना वाच्याः । एतानि च पदानि सम्बुध्यमानैस्तीर्थकरगणधरैर्लोकमभिसमेत्य पृथक् पृथक् प्रवेदितम्, अन्योऽपि तदाज्ञानुसारी चतुर्दशपूर्वविदादिः सत्त्वहिताय परेभ्य आवेदयतीत्येतद्दर्शयितुमाह—

सम्य० ४ उद्देशकः२

॥ १८२ ॥

आघाइ नाणी इह माणवाणं संसारपडिवण्णाणं संबुज्झमाणाणं विन्नाणपत्ताणं, अट्टावि संता अदुवा पमत्ता अहा सच्चमिणं तिबेमि, नाणागमो मच्चुमुहस्स अत्थि, इच्छ पणीया वंकानिकेया कालगहिया निचयनिविट्ठा पुढो पुढो जाइं पकप्पयंति (सू० १३१)

ज्ञानं सकलपदार्थाविर्भावकं विद्यते यस्यासौ ज्ञानी स 'आख्याति' आचष्टे 'इहे'ति प्रवचने केषां?–मानवानां, सर्वसंवरचारित्रार्हत्वात्तेषाम्, अथवोपलक्षणं चैतद्देवादीनां, तत्रापि केवल्यादिव्युदासाय विशेषणमाह—'संसार' इत्यादि, संसारं–चतुर्गतिलक्षणं प्रतिपन्नाः संसारप्रतिपन्नाः, तत्रापि ये धर्म्मं भोत्स्यन्ते ग्रहीष्यन्ते च मुनिसुव्रतस्वामिघोटकदृष्टान्तेन तेषामेवाख्यातीत्येतद्दर्शयति—'सम्बुध्यमानानां' यथोपदिष्टं धर्म्मं सम्यगवबुध्यमानानां, छद्मस्थेन त्वज्ञात-

बुध्यमानेतरविशेषेण यादृग्भूतानां कथयितव्यं तान् सूत्रेणैव दर्शयति—'विज्ञानप्राप्तानां' हिताहितप्राप्तिपरिहाराध्यवसायो विज्ञानं तत्प्राप्ता विज्ञानप्राप्ताः, समस्तपर्यायैर्वा पर्याप्ताः, संज्ञिन इत्यर्थः, नागार्जुनीयास्तु पठन्ति—"आघाइ धम्मं खलु से जीवाणं, तंजहा–संसारपडिवन्नाणं माणुसभवत्थाणं आरंभविणईणं दुक्खुव्वेअसुहेसगाणं धम्मसवणगवेसयाणं सुस्सूसमाणाणं पडिपुच्छमाणाणं विण्णाणपत्ताणं" एतच्च प्रायो गतार्थमेव, नवरमारम्भविनयिनामित्यारम्भविनयः–आरम्भाभावः स विद्यते येषामिति मत्वर्थीयस्तेषामिति । यथा च ज्ञानी धर्म्ममाचष्टे तथा दर्शयति—'अट्टावि' इत्यादि, विज्ञानं प्राप्ता धर्म्मं कथ्यमानं कुतश्चिन्निमित्तादार्त्ता अपि सन्तः चिलातिपुत्रादय इव अथवा प्रमत्ता विषयाभिष्वङ्गादिना शालिभद्रादय इव तथाविधकर्म्मक्षयोपशमापत्तेर्यथा प्रतिपद्यन्ते तथाऽऽचष्टे–यदिवाऽऽर्त्ताः–दुःखिनः प्रमत्ताः–सुखिनः, तेऽपि प्रतिपद्यन्ते धर्म्मं, किं पुनरपरे?, अथवा आर्त्ताः–रागद्वेषोदयेन प्रमत्ता विषयैः, ते च तीर्थिका गृहस्था वा संसारकान्तारं विशन्तः कथं भवतां विज्ञातज्ञेयानां करुणास्पदानां रागद्वेषविषयाभिलाषोन्मूलनाय न प्रभवन्ति । एतच्चान्यथा मा मंस्था इति दर्शयितुमाह—'अहा सच्च' मित्यादि, इदं यन्मया कथितं कथ्यमानं च तद्यथासत्यं, याथातथ्यमित्यर्थः, इत्येतदहं ब्रवीमि, यथा दुर्लभमवाप्य सम्यक्त्वं चारित्रपरिणामं वा प्रमादो न कार्यः, स्यात्–किमालम्ब्य प्रमादो न कार्यस्तदाह—'नाणागमो' इत्यादि, न ह्यनागमो मृत्योर्मुखस्य कस्यचिदपि संसारोदरवर्त्तिनोऽस्तीति, उक्तं च—"वदत यदीह कश्चिदनुसंततसुखपरिभोगलालितः । प्रयत्नशतपरोऽपि विगतव्यथमायुरवाप्तवान्नरः ॥ १ ॥ न खलु नरः सुरौघसिद्धासुरकिन्नरनायकोऽपि यः । सोऽपि कृतान्तदन्तकुलिशाक्रमेण कृशितो न नश्यति ॥२॥"

सम्य० ४ उद्देशकः२

॥ १८३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथोपायोऽपि मृत्युमुखप्रतिषेधस्य न कश्चिदस्तीति, उक्तं च—"नश्यति नौति याति वितनोति करोति रसायनक्रियां, चरति गुरुव्रतानि विवराण्यपि विशति विशेषकातरः। तपति तपांसि खादति मितानि करोति च मन्त्रसाधनं, तदपि कृतान्तदन्तयन्त्रकचक्रमणैर्विदार्यते ॥ १ ॥" ये पुनर्विषयकषायाभिष्वङ्गात् प्रमत्ता धर्म्मं नावबुध्यन्ते ते किम्भूता भवन्तीत्याह—'इच्छा' इत्यादि, इन्द्रियमनोविषयानुकूला प्रवृत्तिरिहेच्छा तया विषयाभिमुखमभिकर्म्मबन्धं संसाराभिमुखं वा प्रकर्षेण नीता इच्छाप्रणीताः, ये चैवम्भूतास्ते 'वंकानिकेता' वङ्कस्य-असंयमस्य आ-मर्यादया संयमावधिभूतया निकेतभूताः-आश्रया वङ्कानिकेताः, वङ्को वा निकेतो येषां ते वङ्कानिकेताः, पूर्वपदस्य दीर्घत्वं, ये चैवम्भूतास्ते 'कालगृहीताः' कालेन-मृत्युना गृहीताः कालगृहीताः, पौनःपुन्यमरणभाज इत्यर्थः, धर्मचरणाय वा गृहीतः-अभिसन्धितः कालो यैस्ते कालगृहीताः, आहिताग्निदर्शनादार्षत्वाद्वा निष्ठान्तस्य परनिपातः, तथाहि—पाश्चात्ये वयसि परुत्परारि वा अपत्यपरिणयनोत्तरकालं वा धर्म्मं करिष्याम इत्येवं गृहीतकालाः, ये चैवम्भूतास्ते निचये निविष्टा-निचये कर्म्मनिचये तदुपादाने वा सावद्यारम्भनिचये निविष्टाः-अध्युपपन्नाः, ये चेच्छाप्रणीता वङ्कानिकेताः कालगृहीता निचये निविष्टास्ते तद्धर्माणः किमपरं कुर्वन्तीति दर्शयितुमाह—'पुढो पुढो' इत्यादि, पृथक्पृथगेकेन्द्रियद्वीन्द्रियादिकां जातिमनेकशः 'प्रकल्पयन्ति' प्रकुर्वन्ति, पाठान्तरं वा 'एत्थ मोहे पुणो पुणो' 'अत्र' अस्मिन्निच्छाप्रणीतादिके हृषीकानुकूले मोहे कर्म्मरूपे वा मोहे निमग्नाः पुनः पुनस्तत्कुर्वन्ति येन तदप्रच्युतिः स्यात् ॥ तदप्रच्युतौ च किं स्यादित्याह—

इहमेगेसिं तत्थ तत्थ संथवो भवइ अहोववाइए फासे पडिसंवेयंति, चिट्ठं कम्मेहिं कूरेहिं चिट्ठं परिचिट्ठइ, अचिट्ठं कूरेहिं कम्मेहिं नो चिट्ठं परिचिट्ठइ, एगे वयंति अदुवावि नाणी नाणी वयंति अदुवावि एगे (सू० १३२)

'इह' अस्मिंश्चतुर्दशरज्ज्वात्मके लोके 'एकेषां' मिथ्यात्वाविरतिप्रमादकषायवतां 'तत्र तत्र' नरकतिर्यग्गत्यादिषु यातनास्थानकेषु 'संस्तवः' परिचयो भूयोभूयोगमनाद्भवति, ततः किमित्याह—'अहोववाइए' इत्यादि, त एवमिच्छया प्रणीतत्वादिन्द्रियवशगास्तद्वशित्वात्तदनुकूलमाचरन्तो नरकादियातनास्थानजातसंस्तवास्तीर्थिका अप्यौद्देशिकादि निर्दोषमाचक्षाणा 'अधऔपपातिकान्' नरकादिभवान् 'स्पर्शान्' दुःखानुभवान् 'प्रतिसंवेदयन्ति' अनुभवन्ति, तथाहि-लोकायतिका ब्रुवते—"पिब खाद च चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते। न हि भीरु ! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥ १ ॥" वैशेषिका अपि सावद्ययोगारम्भिणः, तथाहि ते भाषन्ते—'अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानमौ(प्रो)क्षणदिग्नक्षत्रमन्त्रकालनियमाः' इत्यादि, अन्येऽपि सावद्ययोगानुष्ठायिनोऽनया दिशा वाच्याः, स्यात् किं सर्वोऽपीच्छाप्रणीतादिर्यावत्तत्र तत्र कृतसंस्तवोऽधऔपपातिकान् स्पर्शान् प्रतिसंवेदयत्याहोस्वित्कश्चिदेव तद्योग्यकर्म्मकार्येवानुभवति ?, न सर्व इति दर्शयति—'चिट्ठं' इत्यादि, चिट्ठं-भृशमत्यर्थं 'क्रूरैः' वधबन्धादिभिः 'कर्म्मभिः' क्रियाभिः 'चिट्ठ'मिति भृशमत्यर्थमेव विरूपां दशां वैतरणीतरणासिपत्रवनपत्रपाताभिघातशाल्मलीवृक्षारोहणादिजनितामनुभवंस्तमस्तमादिस्थानेषु परितिष्ठति, यस्तु नात्यर्थं हिंसादिभिः कर्म्मभिर्वर्त्तते सोऽत्यन्तवेदनानिचितेष्वपि नरकेषु नोत्पद्यते, स्यात्-क एवं वदतीत्याह—'एगे वयंती' त्यादि, 'एके' चतुर्दशपूर्वविदादयो 'वदन्ति' ब्रुवतेऽथवाऽपि ज्ञानी वदति, ज्ञानं-सकलपदार्थाविर्भावकम् अस्यास्तीति ज्ञानी, स चैतद् ब्रवीति, यद्दिव्यज्ञानी केवली भाषते श्रुतकेवलिनोऽपि तदेव भाषन्ते, यच्च श्रुतकेवलिनो भाषन्ते निरावरणज्ञानिनोऽपि तदेव वदन्तीत्येतद्गतप्रत्यागतसूत्रेण दर्शयति-'नाणी' इत्यादि, 'ज्ञानिनः' केवलिनो यद्वदन्त्यथवाऽप्येके-श्रुतकेवलिनो यद्वदन्ति तत्यथार्थभाषित्वादेकमेव, एकेषां सर्वार्थप्रत्यक्षत्वादपरेषां तदुपदेशप्रवृत्तेरिति, वक्ष्यमाणेऽप्येकवाक्यतेति। तदाह—

आवंती केयावंती लोयंसि समणा य माहणा य पुढो विवायं वयंति, से दिट्ठं च णे सुयं च णे मयं च णे विण्णायं च णे उड्ढं अहं तिरियं दिसासु सव्वओ सुपडिलेहियं च णे-सव्वे पाणा सव्वे जीवा सव्वे भूया सव्वे सत्ता हन्तव्वा अज्जावेयव्वा परियावेयव्वा परिघेत्तव्वा उद्दवयव्वा, इत्थवि जाणह नत्थित्थ दोसो अणारियवयणमेयं, तत्थ जे आरिआ ते एवं वयासी-से दुदिट्ठं च भे दुस्सुयं च भे दुम्मयं च भे दुविण्णायं च भे उड्ढं अहं तिरियं दिसासु सव्वओ दुप्पडिलेहियं च भे, जं णं तुब्भे एवं आइक्खह एवं भासह एवं परूवेह एवं पण्णवेह-सव्वे पाणा ४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हंतव्वा ५, इत्थवि जाणह नत्थित्थ दोसो, अणारियवयणमेयं, वयं पुण एवमाइक्खामो एवं भासामो एवं परूवेमो एवं पण्णवेमो–सव्वे पाणा ४ न हंतव्वा १ न अज्जावेयव्वा २ न परिघित्तव्वा ३ न परियावेयव्वा ४ न उद्दवेयव्वा ५, इत्थवि जाणह नत्थित्थ दोसो, आयरियवयणमेयं पुव्वं निकाय समयं पत्तेयं पत्तेयं पुच्छिस्सामि, हंभो पवाइया! किं भे सायं दुक्खं असायं? समिया पडिवण्णे यावि एवं बूया–सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं असायं अपरिनिव्वाणं महब्भयं दुक्खं तिबेमि (सू० १३३) ॥ चतुर्थाध्ययने द्वितीय उद्देशकः ४–२ ॥

'आवन्ती'ति यावन्तः 'केआवन्ती'ति केचन 'लोके' मनुष्यलोके 'श्रमणाः' पाषण्डिकाः 'ब्राह्मणा' द्विजातयः पृथक्पृथग् विरुद्धो वादो विवादस्तं वदन्ति, एतदुक्तं भवति–यावन्तः केचन परलोकं क्षीप्सवस्ते आत्मीयदर्शनानुरागितया पाराक्यं दर्शनमपवदन्तो विवदन्ते, तथाहि–भागवता ब्रुवते—"पञ्चविंशतितत्त्वपरिज्ञानान्मोक्षः, सर्वव्याप्यात्मा निष्क्रियो निर्गुणश्चैतन्यलक्षणो, निर्विशेषं सामान्यं तत्त्व"मिति, वैशेषिकास्तु भाषन्ते—"द्रव्यादिषट्पदार्थपरिज्ञानान्मोक्षः, समवायिज्ञानगुणेनेच्छाप्रयत्नद्वेषादिभिश्च गुणैर्गुणवानात्मा, परस्परनिरपेक्षं सामान्यविशेषात्मकं तत्त्व"मिति

शाक्यास्तु वदन्ति—"यथा परलोकानुयाय्यात्मैव न विद्यते, निःसामान्यं वस्तु क्षणिकं चे"ति, मीमांसकास्तु मोक्षसर्वज्ञाभावेन व्यवस्थिता इति, तथा केषाञ्चित् पृथिव्यादय एकेन्द्रिया जीवा न भवन्ति, अपरे वनस्पतीनामप्यचेतनतामाहुः, तथा द्वीन्द्रियादीनामपि कृम्यादीनां न जन्तुस्वभावं प्रतिपद्यन्ते, तद्भावे वा न तद्वधे बन्धोऽल्पबन्धता वेति, तथा हिंसायामपि भिन्नवाक्यता, तदुक्तम्–प्राणी प्राणिज्ञानं घातकचित्तं च तन्नता चेष्टा । प्राणैश्च विप्रयोगः पञ्चभिरापद्यते हिंसा ॥ १ ॥" इत्येवमादिक औद्देशिकपरिभोगाभ्यनुज्ञादिकश्च विरुद्धो वादः स्वत एवाभ्यूह्यः । यदिवा ब्राह्मणाः श्रमणा धर्म्मविरुद्धं वादं यद्वदन्ति तत्सूत्रेणैव दर्शयति—'से दिट्ठं च णे' इत्यादि यावत् 'नत्थित्थ दोसो'त्ति, 'से'त्ति तच्छब्दार्थे यदहं वक्ष्ये तत् 'दृष्टम्' उपलब्धं दिव्यज्ञानेनास्माभिरस्माकं वा सम्बन्धिना तीर्थकृता आगमप्रणायकेन चशब्द उत्तरापेक्षया समुच्चयार्थः, श्रुतं चास्माभिर्गुर्वादेः सकाशात्, अस्मद्गुरुशिष्यैर्वा तदन्तेवासिभिर्वा मतम्–अभिमतं युक्तियुक्तत्वादस्माकमस्मत्तीर्थकराणां वा विज्ञातं च तत्त्वभेदपर्यायैरस्माभिरस्मत्तीर्थकरेण वा, स्वतो न परोपदेशदानेन, एतच्चोर्ध्वाधस्तिर्यक्षु दशस्वपि दिक्षु सर्वतः सर्वैः–प्रत्यक्षानुमानोपमानागमार्थापत्त्यादिभिः प्रकारैः सुष्ठु प्रत्युपेक्षितं च–पर्यालोचितं च, मनःप्रणिधानादिना अस्माभिरस्मत्तीर्थकरेण वा, किं तदित्याह–सर्वे प्राणाः सर्वे जीवाः सर्वे भूताः सर्वे सत्त्वा हन्तव्या आज्ञापयितव्याः परिगृहीतव्याः परितापयितव्या अपद्रापयितव्याः, 'अत्रापि' धर्म्मचिन्तायामप्येवं जानीथ, यथा नास्त्यत्र यागार्थं देवतोपयाचितकतया वा प्राणिहननादौ 'दोषः' पापानुबन्ध इति, एवं यावन्तः केचन पाषण्डिका औद्देशिकभोजिनो ब्राह्मणा वा धर्म्मविरुद्धं परलोकविरुद्धं वा वादं भाषन्ते । अयं

च जीवोपमर्दकत्वात् पापानुबन्धी अनार्यप्रणीत इति, आह च—आराद्याताः सर्वहेयधर्म्मेभ्यः इत्यार्यास्तद्विपर्यासादनार्याः–क्रूरकर्म्माणस्तेषां प्राण्युपघातकारीदं वचनं, ये तु तथाभूता न ते किम्भूतं प्रज्ञापयन्तीत्याह—'तत्थ' इत्यादि, 'तत्रे'ति वाक्योपन्यासार्थे निर्धारणे वा, ये ते आर्या देशभाषाचारित्रार्यास्त एवमवादिषुर्यथा यत्तदनन्तरोक्तं दुर्दृष्टमेतदुष्टं दृष्टं दुर्दृष्टं 'मे' युष्माभिर्युष्मत्तीर्थकरेण वा, एवं यावदुष्प्रत्युपेक्षितमिति । तदेवं दुर्दृष्टादिकं प्रतिपाद्य दुष्प्रज्ञापनानुवादद्वारेण तदभ्युपगमे दोषाविष्करणमाह—'जं ण'मित्यादि, णमिति वाक्यालङ्कारे, यदेतद्वक्ष्यमाणं यूयमेवमाचक्ष्वमित्यादि यावदत्रापि यागोपहारादौ जानीथ यूयं यथा नास्त्येवात्र–प्राण्युपमर्दानुष्ठाने दोषः–पापानुबन्ध इति, तदेवं परवादे दोषाविर्भावनेन धर्म्मविरुद्धतामाविर्भाव्य स्वमतवादमार्या आविर्भावयन्ति–'वय' मित्यादि, पुनःशब्दः पूर्वस्माद्विशेषमाह, वयं पुनर्यथा धर्म्मविरुद्धवादो न भवति तथा पञ्जापयाम इति, तान्येव पदानि सप्रतिषेधानि हन्तव्यादीनि यावन्न केवलमत्र–अस्मदीये वचने नास्ति दोषोऽत्रापि–अधिकारे जानीथ यूयं यथा 'अत्र' हननादिप्रतिषेधविधौ नास्ति दोषः–पापानुबन्धः, सावधारणत्वाद्वाक्यस्य नास्त्येव दोषः, प्राण्युपघातप्रतिषेधाच्चार्यवचनमेतत्, एवमुक्ते सति ते पाषण्डिका ऊचुः–भवदीयमार्यवचनमस्मदीयं त्वनार्यमित्येतन्निरन्तराः सुहृदः प्रत्येष्यन्ति, युक्तिविकलत्वात्, तदत्राचार्यो यथा परमतस्यानार्यता स्यात्तथा दिदर्शयिषुः स्ववाग्यन्त्रिता वादिनो न विचलयिष्यन्तीतिकृत्वा प्रत्येकमतप्रच्छनार्थमाह—'पुव्व' मित्यादि, 'पूर्वम्' आदावेव 'समयम्' आगमं यद्यदीयागमेऽभिहितं तत् 'निकाय्य' व्यवस्थाप्य पुनस्तद्विरूपापादनेन परमतानार्यता प्रतिपाद्येत्यतस्तदेव परमतं प्रश्नयति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदिवा पूर्वं प्राश्निकान्निकाच्य ततः पाषण्डिकान् प्रश्नयितुमाह—'पत्तेय' मित्यादि, एकमेकं प्रति प्रत्येकं भोः प्रावादुकाः! भवतः प्रश्नयिष्यामि, किं 'भे' युष्माकं 'सातं' मनआह्लादकारि दुःखमुतासातं–मनःप्रतिकूलं?, एवं पृष्टाः सन्तो यदि सातमित्येवं ब्रूयुः ततः प्रत्यक्षागमलोकबाधा स्याद्, अथ चासातमित्येवं ब्रूयुः ततः 'समिया' सम्यक् प्रतिपन्नांस्तान् प्रावादुकान् स्ववाग्यन्त्रितानप्येवं ब्रूयात्–'अपिः' सम्भावने, सम्भाव्यते एतद्गणनं–यथा न केवलं भवतां दुःखमसातं, सर्वेषामपि प्राणिनां दुःखमसातं मनसोऽनभिप्रेतम् अपरिनिर्वाणम्–अनिर्वृत्तिरूपं महद्भयं दुःखमित्येतत् परिगणय्य सर्वेऽपि प्राणिनो न हन्तव्या इत्यादि वाच्यं, तद्ग्रहने च दोषः, यस्त्वदोषमाह तदनार्यवचनम्। इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत्, तदेवं प्रावादुकानां स्ववाग्नियन्त्रणयाऽनार्यता प्रतिपादिता, अत्रैव रोहगुप्तमन्त्रिणा विदितागमसद्भावेन माध्यस्थ्यमवलम्बमानेन तीर्थिकपरीक्षाद्वारेण यथा निराकरणं चक्रे तथा निर्युक्तिकारो गाथाभिराचष्टे—

खुड्डग पायसमासं धम्मकहंपि य अजंपमाणेणं। छलेण अन्नलिंगी परिच्छिया रोहगुत्तेणं ॥ २२७ ॥

अनया गाथया सङ्क्षेपतः सर्वं कथानकमावेदितं क्षुल्लकस्य, 'पादसमासो' गाथापादसङ्क्षेपस्तमजल्पता धर्मकथां च 'छलेन' प्रकटेन 'अन्यलिङ्गिनः' प्रावादुकाः 'परीक्षिताः' निरूपिताः 'रोहगुप्तेन' रोहगुप्तनाम्ना मन्त्रिणेति गाथासमासार्थः। भावार्थस्तु कथानकादवसेयः, तच्चेदम्–चम्पायां नगर्यां सिंहसेनस्य राज्ञो रोहगुप्तो नाम महामन्त्री, स चार्हद्दर्शनभावितान्तःकरणो विज्ञातसदसद्भावः, तत्र च कदाचिद्राजाऽऽस्थानस्थो धर्मविचारं प्रस्तावयति, तत्र यो यस्याभिमतः स तं शोभनमुवाच, स च तूष्णीभावं भजमानो राज्ञोक्तः–धर्मविचारं प्रति किमपि न ब्रूते भवान्?, स त्वाह–

आ. सू. ३२

श्रीआचाराङ्गवृत्तिः (शी०)

॥ १८७ ॥

किमाभः पक्षपातवचोभिः?, विमर्शामः स्वत एव धर्मं परीक्षामहे तीर्थकानित्यभिधाय राजानुमत्या 'सकुण्डलं वा वदनं न व'त्ति, अयं गाथापादो नगरमध्ये आलम्बे, सम्पूर्णा तु गाथा भाण्डागारिता, नगर्यां चोद्घुष्टं, यथा–य एनं गाथापादं पूरयिष्यति तस्य राजा यथेप्सितं दानं दास्यति तद्भक्तश्च भविष्यतीति, तं च गाथापादं सर्वेऽपि गृहीत्वा प्रावादुका निर्जग्मुः, पुनश्च सप्तमेऽहनि राजानमास्थानस्थमुपस्थिताः, तत्रादावेव परिव्राड् ब्रवीति—

भिक्खं पविट्ठेण मएऽज्ज दिट्ठं, पमयामुहं कमलविसालनेत्तं।
वक्खित्तचित्तेण न सुट्ठु नायं, सकुंडलं वा वयणं न वत्ति ॥ २२८ ॥

सम्य० ४ उद्देशकः२

सुगमं, नवरमपरिज्ञाने व्याक्षेपः कारणमुपन्यस्तं न पुनर्वीतरागतेति पूर्वगाथाविसंवादादसौ तिरस्कृत्य निर्द्धाटितः। पुनस्तापसः पठति—

फलोदएणं मि गिहं पविट्ठो, तत्थासणत्था पमया मि दिट्ठा।
वक्खित्तचित्तेण न सुट्ठु नायं, सकुंडलं वा वयणं न वत्ति ॥ २२९ ॥

सुगमं पूर्ववत्। तदनन्तरं शौद्धोदनिशिष्यक आह—

मालाविहारंमि मएऽज्ज दिट्ठा, उवासिया कंचणभूसियंगी।
वक्खित्तचित्तेण न सुट्ठु नायं, सकुंडलं वा वयणं न वत्ति ॥ २३० ॥

॥ १८७ ॥

पूर्ववद्, एवमनया दिशा सर्वेऽपि तीर्थिका वाच्याः, आर्हतस्तु पुनर्न कश्चिदागत इति राज्ञाऽभाणि, मन्त्रिणा त्वाहे-तक्षुल्लकोऽप्येवम्भूतपरिणाम इत्येवं संप्रत्यय एषां स्यादित्यतो भिक्षार्थं प्रविष्टः प्रत्युषस्येव क्षुल्लकः समानीतः, तेनापि गाथापादं गृहीत्वा गाथा बभाषे, तद्यथा—

खंतस्स दंतस्स जिइंदियस्स, अज्झप्पजोगे गयमाणसस्स।
किं मज्झ एएण विचिंतिएणं?, सकुंडलं वा वयणं न वत्ति ॥ २३१ ॥

सुगमा, अत्र च क्षान्त्यादिकमपरिज्ञाने कारणमुपन्यस्तं न पुनर्व्याक्षेप इत्यतो गाथासंवादात् क्षान्तिदमजितेन्द्रियत्वाध्यात्मयोगाधिगतेश्च कारणाद्राज्ञो धर्मं प्रति भावोल्लासोऽभूत्, क्षुल्लकेन च धर्मप्रश्नोत्तरकालं पूर्वगृहीतशुष्केतरकर्दमगोलकद्वयं भित्तौ निक्षिप्य गमनमारेभे, पुनर्गच्छन् राज्ञोक्तं–किमिति भवान् धर्मं पृष्टोऽपि न कथयति?, स चाधोचत्–हे मुग्ध! ननु कथित एव धर्मो भवतः शुष्केतरगोलकदृष्टान्तेन। एतदेव गाथाद्वयेनाह—

उल्लो सुक्खो य दो छूढा, गोलया मट्टियामया। दोवि आवडिया कुड्डे, जो उल्लो तत्थ (सोऽत्थ) लग्गइ ॥
एवं लग्गंति दुम्मेहा, जे नरा कामलालसा। विरत्ता उ न लग्गंति, जहा से सुक्कगोलए ॥ २३३ ॥

अयमत्र भावार्थः–ये ह्यङ्गप्रत्यङ्गनिरीक्षणव्यासङ्गात् कामिनीनां मुखं न पश्यन्ति तदभावे तु पश्यन्ति ते कामगृद्धुतया सार्द्राः, सार्द्रतया च संसारपङ्के कर्म्मकर्दमे वा लगन्ति, ये तु पुनः क्षान्त्यादिगुणोपेताः संसारसुखपराङ्मुखाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काष्ठमुनयस्ते शुष्कगोलकसन्निभा न क्वचिल्लगन्तीति गाथाद्वयार्थः । सम्यक्त्वाध्ययने द्वितीयोद्देशकनिर्युक्तिः । इति सम्यक्त्वाध्ययने द्वितीयोद्देशकः समाप्तः ॥ ४-२ ॥

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशके परमतव्युदासद्वारेण सम्यक्त्वमविचलं प्रतिपादयता तत्सहचरितं ज्ञानं तत्फलभूता च विरतिरभिहिता, सत्यपि चास्मिंस्त्रये न पूर्वोपात्तकर्म्मणो निरवद्यतपोऽनुष्ठानमन्तरेण क्षयो भवतीत्यतस्तदधुना प्रतिपाद्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

उवेहि णं बहिया य लोगं, से सव्वलोगंमि जे केइ विण्णू, अणुवीइ पास निक्खित्तदंडा, जे केइ सत्ता पलियं चयंति, नरा मुयच्चा धम्मविउत्ति अंजू, आरंभजं दुक्खमिणंति णच्चा, एवमाहु संमत्तदंसिणो, ते सव्वे पावाइया दुक्खस्स कुसला परिण्णमुदाहरंति इय कम्मं परिण्णाय सव्वसो (सू० १३४)

याऽयमनन्तरं प्रतिपादितः पाषण्डिलोकः एनं धर्म्माद्बहिर्व्यवस्थितमुपेक्षस्व-तदनुष्ठानं मा अनुमंस्थाः, चशब्दोऽनुक्तसमुच्चयार्थः, तदुपदेशमभिगमनपर्युपासनदानसंस्तवादिकं च मा कृथा इति । यः पाषण्डिलोकोपेक्षकः स कं गुणमवाप्नु- ॥ १८८ ॥

यादित्याह—'से सव्वलोए' इत्यादि, यः पाषण्डिलोकमनार्यवचनमवगम्य तदुपेक्षां विधत्ते स सर्वस्मिंल्लोके-मनुष्यलोके ये केचिद्विद्वांसस्तेभ्योऽग्रणीर्विद्वत्तम इति स्यात्, लोके केचन विद्वांसः सन्ति? येभ्योऽधिकः स्यादित्यत आह—'अणुवीइ' इत्यादि, ये केचन लोके 'निक्षिप्तदण्डाः' निश्चयेन क्षिप्तो निक्षिप्तः-परित्यक्तः कायमनोवाङ्मयः प्राण्युपघातकारी दण्डो यैस्ते विद्वांसो भवन्त्येव एतदनुविचिन्त्य-पर्यालोच्य पश्य-अवगच्छ । के चोपरतदण्डा इत्यत आह—'जे केइ' इत्यादि, ये केचनावगतधर्म्माणः सत्त्वाः-प्राणिनः 'पलित'मिति कर्म्म तत्त्यजन्ति, ये चोपरतदण्डा भूत्वाऽष्टप्रकारं कर्म्म घ्नन्ति ते विद्वांस इत्येतदनुविचिन्त्य-अक्षिनिमीलनेन पर्यालोच्य 'पश्य' विवेकिन्या मत्याऽवधारय । के पुनरशेषकर्म्मक्षयं कुर्वन्ति? इत्यत आह—'नरे' इत्यादि, नराः-मनुष्यास्त एवाशेषकर्म्मक्षयायालं नान्ये, तेऽपि न सर्वे अपि तु मृतार्चा-मृतेव मृता संस्काराभावादर्चा शरीरं येषां ते तथा, निष्प्रतिकर्म्मशरीरा इत्यर्थः, यदिवा अर्चा-तेजाः, स च क्रोधः, स च कषायोपलक्षणार्थः, ततश्चायमर्थो-मृता-विनष्टा अर्चा कषायरूपा येषां ते मृतार्चाः, अकषायिण इत्यर्थः, किं च—'धर्म्मं' श्रुतचारित्राख्यं विदन्तीति धर्म्मविदः, इति हेतौ, यत एव धर्म्मविदोऽत एव ऋजवः-कौटिल्यरहिताः । स्यादेतत्-किमालम्ब्यैतद्विधेयमित्यत आह—'आरंभज' मित्यादि, सावद्यक्रियानुष्ठानमारम्भस्तस्माज्जातमारम्भजं, किं तद्?-दुःखमिदमिति सकलप्राणिप्रत्यक्षं, तथाहि-कृषिसेवावाणिज्याद्यारम्भप्रवृत्तो यच्छारीरमानसं दुःखमनुभवति तद्वाचामगोचरमित्यतः प्रत्यक्षाभिधायिनेदमोक्तम्, 'इतिः' उपप्रदर्शने, इत्येतदनुभवसिद्धं दुःखं ज्ञात्वा मृतार्चा धर्म्मविद ऋजवश्च भवन्तीति । एतच्च समस्तवेदिनो भाषन्त इति दर्शयति—'एव'मित्यादि, 'एवं' पूर्वोक्तप्रकारेण 'आहः' उक्तवन्तः, के एव-

माहुः?-समत्वदर्शिनः सम्यक्त्वदर्शिनो वा, यदुद्देशकादेरारभ्योक्तं तदेवमूचुरित्यर्थः, कस्मात्त ऊचुरित्याह—'ते सव्वे' इत्यादि, यस्मात्ते सर्वेऽपि सर्वविदः 'प्रावादिकाः' प्रकर्षेण मर्यादया वदितुं शीलं येषां ते प्रावादिनः, त एव प्रावादिकाः-यथावस्थितार्थस्य प्रतिपादनाय वावदूकाः, 'दुःखस्य' शारीरमानसलक्षणस्य तदुपादानस्य वा कर्म्मणः 'कुशला' निपुणास्तदपनोदोपायवेदिनः सन्तः ते सर्वेऽपि ज्ञपरिज्ञया परिज्ञाय हेयार्थस्य प्रत्याख्यानपरिज्ञामुदाहरन्ति, 'इतिः' उपप्रदर्शने, इत्येवं पूर्वोक्तनीत्या कर्म्मबन्धोदयसत्कर्म्मताविधानतः परिज्ञाय 'सर्वशः' सर्वैः प्रकारैः कुशलाः प्रत्याख्यानपरिज्ञामुदाहरन्ति, यदिवा मूलोत्तरप्रकृतिप्रकारैः सर्वैः परिज्ञायेति मूलप्रकारा अष्टौ उत्तरप्रकृतिप्रकारा अष्टपञ्चाशदुत्तरं शतम्, अथवा प्रकृतिस्थित्यनुभावप्रदेशप्रकारैः, यदिवोदयप्रकारैर्बन्धसत्कर्म्मताकार्यभूतैरागामिबन्धसत्कर्म्मताकारणैश्च कर्म्म परिज्ञायेति, ते चामी उदयप्रकाराः, तद्यथा-मूलप्रकृतीनां त्रीण्युदयस्थानानि, अष्टविधं सप्तविधं चतुर्विधमिति, तत्राष्टापि कर्म्मप्रकृतीर्यौगपद्येन वेदयतोऽष्टविधं, तच्च कालतोऽनादिकमपर्यवसितमभव्यानां भव्यानां त्वनादिसपर्यवसितं सादिसपर्यवसितं चेति, मोहनीयोपशमे क्षये वा सप्तविधं, घातिक्षये चतुर्विधमिति । साम्प्रतमुत्तरप्रकृतीनामुदयस्थानान्युच्यन्ते, तत्र ज्ञानावरणीयान्तराययोः पञ्चप्रकारं एकमुदयस्थानं, दर्शनावरणीयस्य द्वे, दर्शनचतुष्कस्योदयाच्चत्वारि अन्यतरनिद्रया सह पञ्च, वेदनीयस्य सामान्येनैकमुदयस्थानं सातमसातं वेति, विरोधाद्यौगपद्योदयाभावः, मोहनीयस्य सामान्येन नवोदयस्थानानि, तद्यथा-दश नव अष्टौ सप्त षट् पञ्च चत्वारि द्वे एकं चेति, तत्र दश मिथ्यात्वं १ अनन्तानुबन्धी क्रोधोऽप्रत्याख्यानः प्रत्याख्यानावरणः सञ्ज्वलनश्चेत्येतत्क्रोधचतुष्टयम् ५ एवं मानादि- ॥ १८९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुष्टयमपि योज्यं अन्यतरो वेदः ६ हास्यरतियुग्मम् अरतिशोकयुग्मं वा ८ भयं ९ जुगुप्सा १० चेति, भयजुगुप्सयोरन्यतराभावे नव, द्वयाभावेऽष्टौ, अनन्तानुबन्ध्यभावे सप्त, मिथ्यात्वाभावे षट्, अप्रत्याख्यानोदयाभावे पञ्च, प्रत्याख्यानावरणाभावे चत्वारि, परिवर्त्तमानयुगलाभावे सञ्ज्वलनान्यतरवेदोदये सति द्वे, वेदाभावे एकमिति, आयुषोऽप्येकमेवोदयस्थानं चतुर्णामायुषामन्यतरदिति, नाम्नो द्वादशोदयस्थानानि, तद्यथा—विंशतिः एकविंशतिः चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिः अष्टाविंशतिः एकोनत्रिंशत् त्रिंशत् एकत्रिंशत् नव अष्टौ चेति, तत्र संसारस्थानां सयोगिनां जीवानां दशोदयस्थानानि नाम्नो भवन्ति, अयोगिनां तु चरमद्वयमिति, अत्र च द्वादश ध्रुवोदयाः कर्म्मप्रकृतयः, तद्यथा—तैजसकार्म्मणे शरीरे २ वर्णगन्धरसस्पर्शचतुष्टय ६ अगुरुलघु ७ स्थिरं ८ अस्थिरं ९ शुभं १० अशुभं ११ निर्म्माण १२ मिति, तत्र विंशतिरतीर्थकरकेवलिनः समुद्घातगतस्य कार्मणशरीरयोगिनो भवति, तद्यथा—मनुष्यगतिः १ पञ्चेन्द्रियजातिः २ त्रसं ३ बादरं ४ पर्याप्तकं ५ सुभगं ६ आदेयं ७ यशःकीर्त्तिरिति ८ ध्रुवोदय १२ सहिता विंशतिः २०, एकविंशत्यादीनि तूदयस्थानानि एकत्रिंशत्पर्यन्तानि जीवगुणस्थानभेदादनेकभेदानि भवन्ति, तानि चेह ग्रन्थगौरवभयात् प्रत्येकं नोच्यन्त इत्यत एकैकभेदावेदनं क्रियते, तत्रैकविंशतिः गतिः १ जातिः २ आनुपूर्वी ३ त्रसं ४ बादरं ५ पर्याप्तापर्याप्तयोरन्यतरत् ६ सुभगदुर्भगयोरन्यतरत् ७ आदेयानादेययोरन्यतरत् ८ यशःकीर्त्ययशःकीर्त्योरन्यतरत् ९, एताश्च नव ध्रुवोदय १२ सहिता एकविंशतिः २१, चतुर्विंशतिस्तु तिर्यग्गतिः १ एकेन्द्रियजातिः २ औदारिकं ३ हुण्डसंस्थानं ४ उपघातं ५ प्रत्येकसाधारणयोरन्यतरत् ६ स्थावरं ७ सूक्ष्मबादरयोरन्यतरत् ८ दुर्भगं ९ अनादेयं १० अपर्याप्तकं ११ यशःकीर्त्ययशःकीर्त्योरन्यतर १२ दिति, तत्रैवापर्याप्तकापनयने पर्याप्तकपराघाताभ्यां प्रक्षिप्ताभ्यां पञ्चविंशतिः २५, षड्विंशतिस्तु याऽसौ केवलिनो विंशतिरभिहिता सैवौदारिकशरीराङ्गोपाङ्गद्वयान्यतरसंस्थानाद्यसंहननोपघातप्रत्येकसहिता वेदितव्या मिश्रकाययोगे वर्त्तमानस्य २६, सैव तीर्थकरनामसहिता केवलिसमुद्घातवतो मिश्रकाययोगिन एव सप्तविंशतिः २७, सैव प्रशस्तविहायोगतिसमन्विताऽष्टाविंशतिः २८, तत्र तीर्थकरनामापनयने उच्छ्वास १ सुस्वर २ पराघात ३ प्रक्षेपे सति त्रिंशद्भवति ३०, तत्र सुस्वरे निरुद्धे एकोनत्रिंशत् २९, सैव त्रिंशत्तीर्थकरनामसहिता एकत्रिंशत् ३१, नवोदयस्तु मनुष्यगतिः १ पञ्चेन्द्रियजातिः २ त्रसं ३ बादरं ४ पर्याप्तकं ५ सुभगं ६ आदेयं ७ यशःकीर्त्तिं ८ स्त्रीतीर्थकरमिति ९, एता अयोगितीर्थकरकेवलिनः, एता एव तीर्थकरनामरहिता अष्टाविति ८, गोत्रस्यैकमेव सामान्येनोदयस्थानं, उच्चनीचयोरन्यतरत्, यौगपद्येनोदयाभावो विरोधादिति, तदेवमुदयभेदैरनेकप्रकारतां कर्म्मणः परिज्ञाय प्रत्याख्यानपरिज्ञामदाहरन्तीति ॥ यदि नाम कर्म्मपरिज्ञामुदाहरन्ति ततः किं कार्यमित्याह—

इह आणाकंखी पंडिए अणिहे, एगमप्पाणं संपेहाए धुणे सरीरं, कसेहि अप्पाणं जरेहि अप्पाणं,—जहा जुन्नाइं कट्ठाइं हव्ववाहो पमत्थइ । एवं अत्तसमाहिए अणिहे, विगिंच कोहं अविकंपमाणे (सू० १२५)

'इह' अस्मिन् प्रवचने आज्ञामाकाङ्क्षितुं शीलमस्येति आज्ञाकाङ्क्षी—सर्वज्ञापदेशानुष्ठायी, यश्चैवम्भूतः स 'पण्डितो' विदितवेद्यः अस्निहो भवति, स्निह्यते—श्लिष्यतेऽष्टप्रकारेण कर्म्मणेति स्निहो न स्निहोऽस्निहः, यदिवा स्निह्यतीति स्निहो—रागवान् यो न तथा सोऽस्निहः, उपलक्षणार्थत्वाच्चास्य रागद्वेषरहित इत्यर्थः, अथवा निश्चयेन हन्यत इति निहतः भावरिपुभिरिन्द्रियकषायकर्म्मभिः यो न तथा सोऽनिहतः, इह प्रवचने आज्ञाकाङ्क्षी पण्डितो भावरिपुभिरनिहतो, नान्यत्र, यश्चानिहतः स परमार्थतः कर्म्मणः परिज्ञाता । यश्चैवम्भूतः स किं कुर्यादित्याह—'एगमप्पाण' मित्यादि, सोऽनिहतोऽस्निहो वा आत्मानमेकं धनधान्यहिरण्यपुत्रकलत्रशरीरादिव्यतिरिक्तं 'संप्रेक्ष्य' पर्यालोच्य धुनीयाच्छरीरकं, सम्भावनायां लिङ्, सर्वस्मादात्मानं व्यतिरिक्तं पश्यतः सम्भाव्यत एतच्छरीरविधूननमिति, तच्च कुर्वता संसारस्वभावैकत्वभावनैवंरूपा भावयितव्येति—"संसार एवायमनर्थसारः, कः कस्य कोऽत्र स्वजनः परो वा ? । सर्वे भ्रमन्तः स्वजनाः परे च, भवन्ति भूत्वा न भवन्ति भूयः ॥ १ ॥ विचिन्त्यमेतद्भवताऽहमेको, न मेऽस्ति कश्चित्पुरतो न पश्चात् । स्वकर्म्मभिर्भ्रान्तिरियं ममैव, अहं पुरस्तादहमेव पश्चात् ॥ २ ॥ सदैकोऽहं न मे कश्चित्, नाहमन्यस्य कस्यचित् । न तं पश्यामि यस्याहं, नासौ भावीति यो मम ॥ ३ ॥" तथा—एकः प्रकुरुते कर्म्म, भुनक्त्येकश्च तत्फलम् । जायते म्रियते चैक, एको याति भवान्तरम् ॥ १ ॥ इत्यादि, किं च—'कसेहि अप्पाणं जरेहि अप्पाणं' परव्यतिरिक्त आत्मा शरीरं तत् कष्टतपश्चरणादिना कृशं कुरु, यदिवा 'कष' कस्मै कर्म्मणेऽलमित्येवं पर्यालोच्य यच्छक्नोषि तत्र नियोजयेदित्यर्थः, तथा 'जर' शरीरकं जरीकुरु, तपसा तथा कुरु यथा जराजीर्णमिव प्रतिभासते, विकृतिपरित्यागद्वारेणात्मानं निःसारतामापादयेदित्यर्थः, किमर्थमित्येतदिति चेदाह—'जहा' इत्यादि, यथा 'जीर्णानि' निःसाराणि काष्ठानि 'हव्यवाहो' हुतभुक्प्रमथ्नाति—शीघ्रं

॥ १९० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भस्मसात् करोति, दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमाह—'एवं अत्तसमाहिए' 'एवम्' अनन्तरोक्तदृष्टान्तप्रकारेणात्मना समाहितः आत्मसमाहितः, ज्ञानदर्शनचारित्रोपयोगेन सदोपयुक्त इत्यर्थः, आत्मा वा समाहितोऽस्येत्यात्मसमाहितः, सदा शुभव्यापारवानित्यर्थः, आहिताग्न्यादिदर्शनादार्षत्वाद्वा निष्ठान्तस्य परनिपातः, यदिवा प्राकृते पूर्वोत्तरनिपातोऽतस्त्रः, समाहितात्मेत्यर्थः, 'अस्निहः' स्नेहरहितः संस्तपोऽग्निना कर्म्मकाष्ठं दहतीति भावार्थः ॥ एतदेव दृष्टान्तदार्ष्टान्तिकगतमर्थं निर्युक्तिकारो गाथयोपसङ्गिघृक्षुराह—

जह खलु झुसिरं कट्ठं सुचिरं सुक्कं लहुं डहइ अग्गी। तह खलु खवंति कम्मं सम्मचरणे ठिया साहू ॥ २३४॥

गतार्था। अत्र चास्निहपदेन रागनिवृत्तिं विधाय द्वेषनिवृत्तिं विधित्सुराह—'विगिंच कोह'मित्यादि, कारणेऽकारणे वाऽतिक्रूराध्यवसायः क्रोधः तं परित्यज, तस्य च कार्यं कम्पनं तत्प्रतिषेधं दर्शयति—अविकम्पमानः ॥ किं विगणय्यैतत्कुर्यादित्याह—

इमं निरुद्धाउयं संपेहाए, दुक्खं च जाण अदु आगमेस्सं, पुढो फासाइं च फासे, लोयं च पास विफंदमाणं, जे निव्वुडा पावेहिं कम्मेहिं अणियाणा ते वियाहिया, तम्हा अतिविज्जो नो पडिसंजलिज्जासि त्तिबेमि (सू० १३६) चतुर्थे तृतीयः ॥ ४–३ ॥

'इदं' मनुष्यत्वं 'निरुद्धायुष्कं' निरुद्धं–परिगलितमायुष्कं 'सम्प्रेक्ष्य' पर्यालोच्य क्रोधादिपरित्यागं विदध्यात्, किं च —'दुक्ख' मित्यादि, क्रोधादिना दन्दह्यमानस्य यन्मानसं दुःखमुत्पद्यते तज्जानीहि, तज्जनितकर्म्मविपाकापादितं चागामि दुःखं सम्प्रेक्ष्य क्रोधादिकं प्रत्याख्यानपरिज्ञया जानीहि, परित्यजेरित्यर्थः, आगामिदुःखस्वरूपमाह—'पुढो' इत्यादि, पृथक् सप्तमनरकपृथिवीसम्भवशीतोष्णवेदनाकुम्भीपाकादियातनास्थानेषु 'स्पर्शान्' दुःखानि, चः समुच्चये, न केवलं क्रोधाध्मातस्तस्मिन्नेव क्षणे दुःखमनुभवतीत्यागामीनि पृथग् दुःखानि च स्पृशेद्–अनुभवेत्, तेन चातिदुःखेनापरोऽपि लोको दुःखित इत्येतदाह—'लोयं च' इत्यादि, न केवलं क्रोधादिविपाकादात्मा दुःखान्यनुभवति, लोकं च शारीरमानसदुःखापन्नं विस्पन्दमानमस्वतन्त्रमितश्चेतश्च दुःखप्रतीकाराय धावन्तं 'पश्य' विवेकचक्षुषाऽवलोकय । ये त्वेवं न ते किम्भूता भवन्तीत्यत आह—'जे निव्वुडा' इत्यादि, ये तीर्थकरोपदेशवासितान्तःकरणा विषयकषायाद्युपशमाच्चिर्वृताः–शीतीभूताः पापेषु कर्म्मसु 'अनिदानाः' निदानरहितास्ते परमसुखास्पदतया व्याख्याताः, औपशमिकसुखभाक्त्वेन प्रसिद्धा इत्यर्थः, यत एवं ततः किमित्याह—'तम्हा' इत्यादि, यस्माद्रागद्वेषाभिभूतो दुःखभाग्भवति तस्मादतिविद्वान्–विदितागमसद्भावः सन्न प्रतिसञ्ज्वलेः–क्रोधाग्निनाऽऽत्मानं नोद्दीपयेः, कषायोपशमं कुर्वित्यर्थः । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत्, सम्यक्त्वाध्ययने तृतीयोद्देशकटीका समाप्तेति ।

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके निरवद्यं तपोऽभिहितं, तच्चाविकलं सत्संयमव्यवस्थितस्य भवतीत्यतः संयमप्रतिपादनाय चतुर्थोद्देशक इत्येनेन सम्बन्धेनायातस्यास्योद्देशस्यादि सूत्रम्—

आवीलए पवीलए निप्पीलए जहित्ता पुव्वसंजोगं हिच्चा उवसमं, तम्हा अविमणे वीरे, सारए समिए सहिए सया जए, दुरणुचरो मग्गो वीराणं अनियट्टगामीणं, विगिंच मंससोणियं, एस पुरिसे दविए वीरे, आयाणिज्जे वियाहिए, जे धुणाइ समुस्सयं वसित्ता बंभचेरंसि (सू० १३७)

आङीषदर्थे, ईषत्पीडयेद् अविकृष्टेन तपसा शरीरकमापीडयेद्, एतच्च प्रथमप्रव्रज्याऽवसरे, तत ऊर्ध्वमधीतागमः परिणतार्थसद्भावः सन् प्रकर्षेण विकृष्टतपसा पीडयेत्प्रपीडयेत्, पुनरध्यापितान्तेवासिवर्गः सङ्क्रामितार्थसारः शरीरं तित्यक्षुर्मासार्द्धमासक्षपणादिभिः शरीरं निश्चयेन पीडयेन्निष्पीडयेत्, स्यात्–कर्म्मक्षयार्थं तपोऽनुष्ठीयते, स च पूजालाभख्यात्यर्थेन तपसा न भवत्यतो निरर्थक एव शरीरपीडनोपदेश इत्यतोऽन्यथा व्याख्यायते–कर्म्मैव कार्मणशरीरं वा आपीडयेत्प्रपीडयेन्निष्पीडयेत्, अत्रापीषदर्थादिका प्रकर्षगतिरवसेया, यदिवा आपीडयेत्कर्म्म अपूर्वकरणादिकेषु सम्यग्दृष्ट्यादिषु गुणस्थानकेषु, ततोऽपूर्वकरणानिवृत्तिबादरयोः प्रपीडयेत्, सूक्ष्मसम्परायावस्थायां तु निष्पीडयेत्, अथवा आपीडनमुपशमश्रेण्यां प्रपीडनं क्षपकश्रेण्यां निष्पीडनं तु शैलेश्यवस्थायामिति । किं कृत्वैतत्कुर्यादित्याह—'जहित्ता' इत्यादि, पूर्वः संयोगः पूर्वसंयोगो–धनधान्यहिरण्यपुत्रकलत्रादिकृतस्तं त्यक्त्वा, यदिवा पूर्वः–असंयमोऽनादिभवाभ्यासात्तेन संयोगः पूर्वसंयोगस्तं त्यक्त्वा 'आवीलये'दित्यादिसम्बन्धः, किं च—'हिच्चा'इत्यादि, 'हि गता'वित्यस्मात् पूर्वकाले क्त्वा 'हित्वा' गत्वा, किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्?–उपशमं–इन्द्रियनोइन्द्रियजयरूपं संयमं वा 'गत्वा' प्रतिपद्यापीडयेदिति वर्त्तते, इदमुक्तं भवति–असंयमं त्यक्त्वा संयमं प्रतिपद्य तपश्चरणादिनाऽऽत्मानं कर्म वाऽऽपीडयेत् प्रपीडयेन्निष्पीडयेदिति, यतः कर्मापीडनार्थमुपशमप्रतिपत्तिस्तत्प्रतिपत्तौ चाविमनस्कतेत्याह—'तम्हा' इत्यादि, यस्मात्कर्मक्षयायासंयमपरित्यागस्तत्परित्यागे चावश्यंभावी संयमस्तत्र च न चित्तवैमनस्यमिति, तस्मादविमना विगतं भोगकषायादिष्वरतौ वा मनो यस्य स विमना यो न तथा सोऽविमनाः, कोऽसौ?, वीरः–कर्म्मविदारणसमर्थः,। अविमनस्कत्वाच्च यत्स्यात्तदाह—'सारए' इत्यादि, सुष्ठा–जीवनमर्यादया संयमानुष्ठाने रतः स्वारतः, पञ्चभिः समितिभिः समितः, सह हितेन सहितो ज्ञानादिसमन्वितो वा सहितः, 'सदा' सर्वकालं सकृदारोपितसंयमभारः संस्तत्र 'यतेत' यत्नवान् भवेदिति। किमर्थं पुनः पौनःपुन्येन संयमानुष्ठानं प्रत्युपदेशो दीयते? इत्याह—'दुरनुचरो' इत्यादि, दुःखेनानुचर्यत इति दुरनुचरः, कोऽसौ?–मार्गः–संयमानुष्ठानविधिः, केषां?–'वीराणाम्' अप्रमत्तयतीनां, किम्भूतानामित्याह—'अणियट्ट' इत्यादि, अनिवर्त्तो–मोक्षस्तत्र गन्तुं शीलं येषां ते तथा तेषामिति, यथा च तन्मार्गानुचरणं कृतं भवति तद्दर्शयति—'विगिंच' इत्यादि, 'मांसं' शोणितं दर्प्पकारि विकृष्टतपोऽनुष्ठानादिना 'विवेचय' पृथक्कुरु, तद्ध्रासं विधेहीतियावत्, एवं वीराणां मार्गानुचरणं कृतं भवतीति भावः। यश्चैवम्भूतः स कं गुणमवाप्नुयादित्याह—'एस' इत्यादि, 'एष' मांसशोणितयोरपनेता पुरि शयनात् पुरुषः द्रवः–संयमः स विद्यते यस्यासौ द्रविकः, मत्वर्थीयष्ठन्, द्रव्यभूतो वा मुक्तिगमनयोग्यत्वात्, कर्म्मरिपुविदारणसहिष्णुत्वाद्वीर इति, मांसशोणितापचयप्रतिपादनाच्च तदुत्तरेषामपि मेदआदीनामपचय उक्त एव द्रष्टव्यः, तद्भावभावित्वात्तेषामिति। किं च—'आयाणिज्जे' इत्यादि, स वी-

आ. सू. २२

श्रीआचाराङ्गवृत्तिः (शी०)

॥१९३॥

राणां मार्गं प्रतिपन्नः मांसशोणितयोरपनेता मुमुक्षूणामादानीयो–ग्राह्य आदेयवचनश्च व्याख्यात इति। कश्चैवम्भूत इत्याह—'जे धुणाइ' इत्यादि, 'ब्रह्मचर्ये' संयमे मदनपरित्यागे वोषित्वा यः 'समुच्छ्रयं' शरीरकं कर्म्मोपचयं वा तपश्चरणादिना 'धुनाति' कृशीकरोति स आदानीय इति विविधमाख्यातो व्याख्यात इति सम्बन्धः॥ उक्ता अप्रमत्ताः, तद्विपर्य्ययेण तु प्रमत्तानभिधित्सुराह—

सम्य० ४ उद्देशकः२

नित्तेहिं पलिच्छिन्नेहिं आयाणसोयगढिए बाले, अव्वोच्छिन्नबंधणे अणभिक्कंतसंजोए तमंसि अवियाणओ आणाए लंभो नत्थि त्तिबेमि (सू० १३८)

॥ १९३ ॥

नयत्यर्थदेशम्–अर्थक्रियासमर्थमर्थमाविर्भावयन्तीति नेत्राणि–चक्षुरादीनीन्द्रियाणि तैः परिच्छिन्नैः–यथास्वं विषयग्रहणं प्रति निरुद्धैः सद्भिरादानीयोऽपि भूत्वोषित्वा ब्रह्मचर्ये पुनर्मोहोदयादादानस्रोतोगृद्धः–आदीयते–सावद्यानुष्ठानेन स्वीक्रियत इत्यादानं–कर्म्म संसारबीजभूतं तस्य स्रोतांसि–इन्द्रियविषया मिथ्यात्वाविरतिप्रमादकसाययोगा वा तेषु गृद्धः–अध्युपपन्नः स्यात्, कोऽसौ?—'बालः' अज्ञः रागद्वेषमहामोहाभिभूतान्तःकरणः। यश्चादानस्रोतोगृद्धः स किम्भूतः स्यादित्याह—'अव्वोच्छिन्नबंधणे' इत्यादि, अव्यवच्छिन्नं जन्मशतानुवृत्ति बन्धनम्–अष्टप्रकारं कर्म्म यस्य स तथा, किं च—'अणभिक्कंत' इत्यादि, अनभिक्रान्तः–अनतिलङ्घितः संयोगो धनधान्यहिरण्यपुत्रकलत्रादिकृतोऽसंयमसंयोगो वा येनासावनभिक्रान्तसंयोगः तस्य चैवम्भूतस्येन्द्रियानुकूल्यरूपे मोहात्मके वा तमसि वर्त्तमानस्यात्महितं मोक्षोपायं वाऽविजानत आज्ञायाः–तीर्थकरोपदेशस्य लाभो नास्तीत्येतदहं ब्रवीमि तीर्थकरवचनोपलब्धसद्भाव इति, यदिवाऽऽज्ञा बोधिः सम्यक्त्वम्, अस्तिशब्दश्चायं निपातस्त्रिकालविषयो, तेनायमर्थः–तस्यानभिक्रान्तसंयोगस्य भावतमसि वर्त्तमानस्य बोधिलाभो नासीन्नास्ति न भावीति। एतेदवाह—

जस्स नत्थि पुरा पच्छा मज्झे तस्स कुओ सिया?, से हु पन्नाणमंते बुद्धे आरंभोवरए, संममेयंति पासह, जेण बंधं वहं घोरं परियावं च दारुणं पलिछिंदिय बाहिरगं च सोयं, निक्कंमदंसी इह मच्चिएहिं, कम्माणं सफलं दट्ठूण तओ निज्जाइ वेयवी (सू० १३९)

यस्य कस्यचिदविशेषितस्य कर्म्मादानस्रोतोगृद्धस्य बालस्याव्यवच्छिन्नबन्धनस्यानभिक्रान्तसंयोगस्याज्ञानतमसि वर्त्तमानस्य 'पुरा' पूर्वजन्मनि बोधिलाभो नास्ति–सम्यक्त्वं नासीत् 'पश्चादपि' एष्येऽपि जन्मनि न भावि 'मध्ये' मध्यजन्मनि तस्य कुतः स्यात् इति?, एतदुक्तं भवति–यस्यैव पूर्वं बोधिलाभः संवृत्तो भविष्यति वा तस्यैव वर्त्तमानकाले भवति, येन हि सम्यक्त्वमास्वादितं पुनर्मिथ्यात्वोदयात्तत्प्रच्यवते तस्यापार्द्धपुद्गलपरावर्त्तेनापि कालेनावश्यं तत्सद्भावात्, न ह्ययं सम्भवोऽस्ति प्रच्युतस्य सम्यक्त्वस्य पुनरसम्भव एवेति, अथवा निरुद्धेन्द्रियोऽपि आदानस्रोतोगृद्ध इत्युक्तः, तद्विपर्ययभूतस्य त्वतिक्रान्तसुखस्मरणमकुर्वतः आगामि च दिव्याङ्गनाभोगमनभिकाङ्क्षतो वर्त्तमानसुखाभिष्वङ्गोऽपि नैव स्यादित्येतदर्शयितुमाह—'जस्स नत्थि' इत्यादि, यस्य भोगविपाकवेदिनः पूर्वभुक्तानुस्मृतिर्नास्ति नापि पाश्चात्यकाल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगाभिलाषिता विद्यते तस्य व्याधिचिकित्सारूपान् भोगान् भावयतो 'मध्ये' वर्त्तमानकाले कुतो भोगेच्छा स्यात्?, मोहनीयोपशमान्नैव स्यादित्यर्थः। यस्य तु त्रिकालविषया भोगेच्छा निवृत्ता स किम्भूतः स्यादित्याह—'से हु' इत्यादि, 'हुः' यस्मादर्थे यस्मान्निवृत्तभोगाभिलाषस्तस्मात्स प्रज्ञानवान्—प्रकृष्टं ज्ञानं प्रज्ञानं—जीवाजीवादिपरिच्छेत्तृ तद्विद्यते यस्यासौ प्रज्ञानवान्, यत एव प्रज्ञानवानत एव बुद्धः—अवगततत्त्वो, यत एवम्भूतोऽत एवाह—'आरंभोवरए' सावद्यानुष्ठानमारम्भस्तस्मादुपरत आरम्भोपरतः। एतच्चारम्भोपरमणं शोभनमिति दर्शयन्नाह—'सम्म'मित्यादि, यदिदं सावद्यारम्भोपरमणं सम्यगेतत्—शोभनमेतत् सम्यक्त्वकार्यत्वाद्वा सम्यक्त्वमेतदित्येवं पश्यत—एवं गृह्णीत यूयमिति। किमित्यारम्भोपरमणं सम्यगिति चेदाह—'जेण' इत्यादि, येन कारणेन सावद्यारम्भप्रवृत्तो बन्धं निगडादिभिः वधं कशादिभिः 'घोरं' प्राणसंशयरूपं 'परितापं' शारीरमानसं 'दारुणं' असह्यमवाप्नोत्यत आरम्भोपरमणं सम्यग्भूतं कुर्यात्, किं कृत्वेत्याह—'पलिच्छिन्दि'इत्यादि, 'परिच्छिन्द्य' अपनीय, किं तत्?—'स्रोतः' पापोपादानं, तच्च बाह्यं धनधान्यहिरण्यपुत्रकलत्रादिरूपं हिंसाद्याश्रवद्वारात्मकं वा, चशब्दादान्तरं च रागद्वेषात्मकं विषयपिपासारूपं वेति, किं च—'णिक्कम्मदंसी'त्यादि, निष्क्रान्तः कर्म्मणो निष्कर्म्मा—मोक्षः संवरो वा तं द्रष्टुं शीलमस्येति निष्कर्म्मदर्शी, 'इहे'ति संसारे मर्त्येषु मध्ये य एव निष्कर्म्मदर्शी स एव बाह्याभ्यन्तरस्रोतसश्छेत्तेति स्यात्। किमभिसन्ध्य स बाह्याभ्यन्तरसंयोगस्य छेत्ता निष्कर्म्मदर्शी वा भवेत् इत्यत आह—'कम्माणं'इत्यादि, मिथ्यात्वाविरतिप्रमादकषाययोगैः क्रियन्ते—बध्यन्त इति कर्म्माणि—ज्ञानावरणीयादीनि तेषां सफलत्वं दृष्ट्वा स वा निष्कर्म्मदर्शी वेदवित्वा कर्म्मणां फलं दृष्ट्वा, तेषां च फलं—ज्ञानावरणीयस्य ज्ञानावृतिः दर्शनावरणस्य दर्शनाच्छादनं वेदनीयस्य विपाकोदयजनिता वेदनेत्यादि, ननु च न सर्वेषां कर्म्मणां विपाकोदयमिच्छन्ति, प्रदेशानुभवस्यापि सद्भावात् तपसा च क्षयोपपत्तेरित्यतः कथं कर्म्मणां सफलत्वं?, नैष दोषो, नात्र प्रकारकात्स्न्र्यमभिप्रेतम्, अपितु द्रव्यकात्स्न्र्यं, तच्चास्त्येव, तथाहि—यद्यपि प्रतिबन्धव्यक्ति न विपाकोदयस्तथाप्यष्टानामपि कर्म्मणां सामान्येन सोऽस्त्येवेत्यतः कर्म्मणां सफलत्वमुपलभ्यते, तस्मात्—कर्म्मणस्तदुपादानादास्रवाद्वा निश्चयेन याति निर्याति—निर्गच्छति, तन्न विधत्त इतियावत्, कोऽसौ?—'वेदवित्' वेद्यते सकलं चराचरमनेनेति वेदः—आगमस्तं वेत्तीति वेदवित्. सर्वज्ञोपदेशवर्त्तीत्यर्थः॥ न केवलस्य ममैवायमभिप्रायः, सर्वेषामेव तीर्थकराणामयमाशय इति दर्शयितुमाह—

जे खलु भो! वीरा ते समिया सहिया सयाजया संघडदंसिणो आओवरया अहातहं लोयं उवेहमाणा पाईणं पडिणं दाहिणं उईणं इय सच्चंसि परि (चिए) चिट्ठिंसु, साहिस्सामो नाणं वीराणं समियाणं सहियाणं सयाजयाणं संघडदंसीणं आओवरयाणं अहातहं लोयं समुवेहमाणाणं किमत्थि उवाही?, पासगस्स न विज्जइ नत्थित्तिबेमि (सू०१४०) ॥ चतुर्थे चतुर्थः ४–४। इति सम्यक्त्वाध्ययनम्॥ ४ ॥

यदिवा उक्तः सम्यग्वादो निरवद्यं तपश्चारित्रं च, अधुना तत्फलमुच्यते—'जे खलु' इत्यादि, खलुशब्दो वाक्यालङ्कारे, ये केचनातीतानागतवर्त्तमानाः 'भो' इत्यामन्त्रणे 'वीराः' कर्म्मविदारणसहिष्णवः समिताः समितिभिः सहिता ज्ञानादिभिः सदा यताः सत्संयमेन 'संघडदंसिणो'त्ति निरन्तरदर्शिनः शुभाशुभस्य आत्मोपरताः पापकर्म्मभ्यो यथा तथा अवस्थितं 'लोकं' चतुर्दशरज्ज्वात्मकं कर्म्मलोकं वोपेक्षमाणाः—पश्यन्तः सर्वासु प्राच्यादिषु दिक्षु व्यवस्थिता इत्येवंप्रकाराः 'सत्य'मिति कृतं तपः संयमो वा तत्र परिचिते—स्थिरे तस्थुः—स्थितवन्तः, उपलक्षणार्थत्वात् त्रिकालविषयता द्रष्टव्या, तत्रातीते काले अनन्ता अपि सत्ये तस्थुः वर्त्तमाने पञ्चदशसु कर्म्मभूमिषु सङ्ख्येयास्तिष्ठन्ति अनागते अनन्ता अपि स्थास्यन्ति, तेषां चातीतानागतवर्त्तमानानां सत्यवतां यज्ज्ञानं योऽभिप्रायस्तदहं कथयिष्यामि भवतां शृणुत यूयं, किम्भूतानां तेषां?—'वीराणा'मित्यादीनि विशेषणानि गतार्थानि, किम्भूतं ज्ञानमिति चेदाह—किं प्रश्ने 'अस्ति' विद्यते?, कोऽसौ?—'उपाधिः' कर्म्मजनितं विशेषणं, तद्यथा—नारकतिर्यग्योनः सुखी दुःखी सुभगो दुर्भगः पर्याप्तकोऽपर्याप्तक इत्यादि, आहोस्विन्न विद्यत इति परमतमाशङ्क्य त ऊचुः—'पश्यकस्य' सम्यग्वादादिकमर्थं पूर्वोपात्तं पश्यतीति पश्यः स एव पश्यकस्तस्य कर्म्मजनितोपाधिर्न विद्यते, इत्येतदनुसारेणाहमपि ब्रवीमि न स्वमनीषिकयेति। गतः सूत्रानुगमः, तद्गतौ च समासश्चतुर्थोद्देशको, नयविचारातिदेशात् समासं सम्यक्त्वाध्ययनं चतुर्थमिति॥ ग्रं० ६२० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ लोकसाराख्यं पञ्चममध्ययनम् ।

उक्तं चतुर्थमध्ययनं, साम्प्रतं पञ्चममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तराध्ययने सम्यक्त्वं प्रतिपादितं तदन्तर्गतं च ज्ञानं, तदुभयस्य च चारित्रफलत्वात् तस्यैव च प्रधानमोक्षाङ्गतया लोकसारत्वात् तत्प्रतिपादनार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमेऽर्थाधिकारो द्वेधा, तत्राप्यध्ययनार्थाधिकारोऽभिहितः, उद्देशार्थाधिकारं तु निर्युक्तिकारः प्रतिपिपादयिषुराह—

हिंसगविसयारंभग एगचरुत्ति न मुणी पढमगंमि । विरओ मुणित्ति बिइए अविरयवाई परिग्गहिओ ॥२३६॥
तइए एसो अपरिग्गहो य निव्विन्नकामभोगो य । अव्वत्तसमगचरस्स पवत्तया चउत्थंमि ॥ २३७ ॥
हरओवमो य तवसंयमगुत्ती निस्संगया य पंचमए । उम्मग्गवज्जणा छट्ठगंमि तह रागदोसे य ॥ २३८ ॥

हिनस्तीति हिंसकः आरम्भणमारम्भो विषयाणामारम्भोऽस्येति विषयारम्भकः, व्यधिकरणस्यापि गमकत्वात्समासः, ण्वुलन्तस्य वा याजकादिदर्शनात् समासो, विषयाणामारम्भको विषयारम्भक इति, हिंसकश्च विषयारम्भकश्चेति विगृह्य समाहारद्वन्द्वः, प्राकृतत्वात्पुंल्लिङ्गता, अयमर्थो—हिंसकः प्राणिनां विषयारम्भकश्च विषयार्थं सावद्यारम्भप्रवृत्तश्च न मुनिः, तथा विषयार्थमेव एक एव चरत्येकचरः स च न मुनिरिति, एतदधिकारत्रयं प्रथमोद्देशके १, द्वितीये तु हिंसादिपापस्थानकेभ्यो विरतो मुनिर्भवतीत्ययमर्थाधिकारः, वदनशीलो वादी अविरतस्य वादी अविरतवादी परिग्रहवान् भवतीत्येतच्चोद्देशके प्रतिपादयिष्यत इति २, तृतीये त्वेष एव विरतो मुनिरपरिग्रहो भवतीति निर्विण्णकामभोगश्चेत्ययमर्थाधिकारः ३, चतुर्थे त्वव्यक्तस्य—अगीतार्थस्य सूत्रार्थापरिनिष्ठितस्य प्रत्यपाया भवन्तीत्ययमर्थाधिकारः ४, पञ्चमके तु ह्रदोपमेन साधुना भाव्यं, यथा हि ह्रदो जलभृतोऽप्रतिस्रवः प्रशस्यो भवति, एवं साधुरपि ज्ञानदर्शनचारित्रभृतो विस्रोतसिकारहित इति, तथा तपःसंयमगुप्तयो निःसङ्गता चेत्ययमर्थाधिकारः ५, षष्ठे तून्मार्गवर्जना—कुदृष्टिपरित्यागः, तथा रागद्वेषौ च त्याज्यावित्ययमर्थाधिकारः ६, इति गाथात्रयार्थः ॥ नामनिष्पन्ने तु निक्षेपेऽत्र द्विधा नाम—आदानपदेन गौणं चेति, एतत् द्विविधमपि निर्युक्तिकारः प्रतिपादयितुमाह—

आयाणपएणावंति गोण्णनामेण लोगसारुत्ति । लोगस्स य सारस्स य चउक्कओ होइ निक्खेवो ॥ २३९ ॥

आदीयते—प्रथममेव गृह्यत इत्यादानं तच्च तत्पदं च आदानपदं तेन करणभूतेनावन्तीत्येतन्नाम, अध्ययनादावावन्तीशब्दस्योच्चारणाद्, गुणैर्निष्पन्नं गौणं तच्च तन्नाम च गौणनाम तेन हेतुना लोकसार इति, लोकस्य—चतुर्दशरज्ज्वात्मकस्य सारः—परमार्थो लोकसारः द्विपदं नामेत्यतः लोकस्य सारस्य च प्रत्येकं चतुष्कको निक्षेपो भवति, तद्यथा—नामलोको यस्य कस्यचिल्लोक इति नाम क्रियते, स्थापनालोकश्चतुर्दशरज्ज्वात्मकस्य लोकस्य स्थापना गाथात्रयादवसेया, तच्चैतत्—तिरिअं चउरो दोसुं छद्दोसुं अट्ठ दस य एक्केके । बारस दोसुं सोलस दोसुं वीसा य चउसुं तु ॥ १ ॥ पुणरवि सोलस दोसुं बारस दोसुं तु हुंति नायव्वा । तिसु दस तिसु अट्ठच्च य दोसु दोसुं तु चत्तारि ॥ २ ॥ ओयरिअ लोअमज्झा चउरो चउरो य सव्वहिं णेया । तिअ तिअ दुग दुग एक्केकगं च जा सत्तमीए उ ॥ ३ ॥ द्रव्यलोको जीवपुद्गलधर्माधर्माकाशकालात्मकः षड्विधः भावलोकस्त्वौदयिकादिषड्भावात्मकः सर्वद्रव्यपर्यायात्मको वा । सारोऽपि नामादि चतुर्विधः, तत्र नामस्थापने सुगमत्वादनादृत्य द्रव्यसारप्रतिपादनायाह—

सव्वस्स थूल गुरुए मज्झे देसप्पहाण सरिराई । धण एरंडे वहरे खइरं च जिणादुरालाई ॥ २४० ॥

अत्र पूर्वार्द्धपश्चार्द्धयोर्यथासङ्ख्यं लगनीयं, सर्वस्वे धनं सारभूतं, तद्यथा—कोटिसारोऽयं पञ्चकपर्दकसारो वा, स्थूले एरण्डः सारः, सारशब्दोऽत्र प्रकर्षवाची, स्थूलानां मध्ये एरण्डो भिण्डो वा प्रकर्षभूतः, गुरुत्वे वज्रं, मध्ये खदिरः, देशे आम्रवृक्षो वेणुर्वा, प्रधाने यो यत्र प्रधानभावमनुभवति सचित्तोऽचित्तो मिश्रश्चेति, सचित्तो द्विपदश्चतुष्पदोऽपदश्चेति, द्विपदेषु जिनः चतुष्पदेषु सिंहः अपदेषु कल्पवृक्षः, अचित्तेषु वैडूर्यो मणिः, मिश्रेषु तीर्थकर एव विभूषितः, शरीरेष्वौदारिकं मुक्तिगमनयोग्यत्वाद्विशिष्टरूपापत्तेश्च, आदिग्रहणात् स्वामित्वकरणाधिकरणेषु सारता योज्या, तद्यथा—स्वामित्वे गोरसस्य घृतं सारभूतं, करणत्वे मणिसारेण मुकुटेन शोभते राजा, अधिकरणे दधि घृतं जले पद्ममुत्थितमित्यादिगाथार्थः ॥ भावसारप्रतिपादनायाह—

भावे फलसाहणया फलओ सिद्धी सुहुत्तमवरिट्ठा । साहणय नाणदंसणसंजमतवसा तहिं पगयं ॥ २४१ ॥

'भावे' भावविषये सारे चिन्त्यमाने फलसाधनता सारः फलम्—अर्थक्रियावाप्तिस्तस्य साधनता फलसाधनता—फलार्थमारम्भे प्रवर्त्तनं ततः फलावाप्तिः प्राधान्यं, फलतोऽप्यनैकान्तिकानात्यन्तिकरूपात् सांसारिकात्सकाशात्सद्विपर्यस्तं फलं सारः, किं तत्?—सिद्धिः, किम्भूताऽसौ?—'उत्तमसुखवरिष्ठा' उत्तमं च तदात्यन्तिकैकान्तिकानाबाधत्वात् सुखं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तमसुखं तेन वरिष्ठा-वरतमा, तत्साधनानि च गाथाशकलेन दर्शयति—'साधनकानि' प्रकृष्टोपकारकाणि ज्ञानदर्शनसंयमतपांसि, तस्मिंश्च भावसारे सिद्धाख्यफलसाधने ज्ञानादिके प्रकृतं ज्ञानदर्शनचारित्रेण भावसाररूपेणाऽधिकार इति गाथार्थः ॥ तस्यैव ज्ञानादेः सिद्ध्युपायस्य भावसारतां प्रतिपादयन्नाह—

लोगंमि कुसमएसु य कामपरिग्गहकुमग्गलग्गेसुं । सारो हु नाणदंसणतवचरणगुणा हियट्ठाए ॥२४२॥

'लोके' गृहस्थलोके कुत्सिताः समयाः कुसमयाः तेषु च, किम्भूतेषु?—कामपरिग्रहेण ये कुत्सिता मार्गास्तेषु लग्नेषु, हुर्हेतौ, यस्माल्लोकः कामपरिग्रहाग्रही गृहस्थभावमेव प्रशंसति, उक्तं च—'गृहाश्रमसमो धर्म्मो, न भूतो न भविष्यति । पालयन्ति नराः शूराः, क्लीबाः पाषण्डमाश्रिताः ॥ १ ॥' गृहाश्रमाधाराश्च सर्वेऽपि पाषण्डिनः इत्येवं महामोहमोहितेच्छामदनकामेषु प्रवर्त्तते, तथा तीर्थिका अप्यनिरुद्धेन्द्रियप्रसरा द्विरूपकामाभिष्वङ्गिणः इत्यतस्तेषु सारो ज्ञानदर्शनतपश्चरणगुणाः, उत्तमसुखवरिष्ठसिद्धिहेतुत्वात्, हिता-सिद्धिस्तदर्थत्वादिति गाथार्थः ॥ यतो ज्ञानदर्शनतपश्चरणगुणा हितार्थतया सारस्तस्मात्किं कर्त्तव्यमित्याह—

चइऊणं संकपयं सारपयमिणं दढेण चित्तव्वं । अत्थि जिओ परमपयं जयणा जा रागदोसेहिं ॥ २४३ ॥

'त्यक्त्वा' प्रोज्झ्य, किं तत्?—'शङ्कापदं' किमेतन्मदारब्धमनुष्ठानं निष्फलं स्यादित्येवंभूतो विकल्पः शङ्का तस्याः पदं—निमित्तकारणं तच्चार्हन्मोक्तेष्वत्यन्तसूक्ष्मेष्वतीन्द्रियेषु केवलागमग्राह्येष्वर्थेषु या संशीतिः—सन्देह इत्येतद्रूपं तच्छङ्कापदं विहाय सारपदं—इदं ज्ञानादिकं प्रागुपन्यस्तं दृढेन—अनन्यमनस्केन तीर्थिकदम्भप्रतारणाक्षोभ्येन ग्राह्यं, तदेव शङ्कापदव्युदासकार्यं गाथाशकलेन दर्शयति—अस्ति जीवः, अस्य च पदार्थानामादावुपन्यासाज्जीवपदार्थस्य च प्राधान्यादुपलक्षणार्थत्वाद्वा शेषपदार्थग्रहणं, अस्ति—विद्यते जीवितवान् जीवति जीविष्यतीति वा जीवः शुभाशुभफलभोक्तेति, स च प्रत्यक्ष एवाहंप्रत्ययसाध्यः, इच्छाद्वेषप्रयत्नादिकार्यानुमानसाध्यो वा, तथा अजीवा अपि धर्म्माधर्म्माकाशपुद्गलागतिस्थित्यवगाहह्यणुकादिस्कन्धहेतवः सन्ति, एवमास्रवसंवरबन्धनिर्जरा अपि विद्यन्ते, प्रधानपुरुषार्थत्वाद् आद्यन्तग्रहणे मध्यग्रहणस्यावश्यंभावित्वादाद्यं जीवपदार्थं साक्षादुपन्यस्यान्त्यं मोक्षपदार्थमुपन्यस्यति—परमं च तत्पदं च परमपदं, तच्चास्तीति सम्बन्ध इति, अस्ति मोक्षः शुद्धपदवाच्यत्वाद् बन्धस्य सप्रतिपक्षत्वान्मोक्षाविनाभावित्वाद्वा बन्धस्येति, सत्यपि मोक्षे यदि तदवाप्तावुपायो न स्यात्ततो जनाः किं कुर्युरित्यतस्तत्कारणास्तित्वं दर्शयति—'यतना'यत्नो रागद्वेषेषु, रागद्वेषोपशमाद्यः संयमोऽसावप्यस्तीति । तदेवं सति जीवे परमपदे च शङ्कापदव्युदासेन ज्ञानादिकं सारपदं दृढेन ग्राह्यमिति गाथार्थः ॥ ततोऽप्यपरापरसारप्रकर्षगतिरस्तीति दर्शयन्नुपक्षेपगाह—

लोगस्स उ को सारो? तस्स य सारस्स को हवइ सारो?। तस्स य सारो सारं जइ जाणसि पुच्छिओ साह २४४

'लोकस्य' चतुर्दशरज्ज्वात्मकस्य कः सारः?, तस्यापि सारस्य कोऽपरः सारः?, तस्यापि सारसारस्य सारं यदि जानासि ततः पृष्टो मया कथयेति गाथार्थः ॥ प्रश्नप्रतिवचनार्थमाह—

लोगस्स सार धम्मो धम्मंपि य नाणसारियं बिंति । नाणं संजमसारं संजमसारं च निव्वाणं ॥ २४५ ॥

समस्तस्यापि लोकस्य तावद्धर्मः सारो, धर्म्ममपि ज्ञानसारं ब्रुवते, ज्ञानमपि संयमसारं, संयमस्यापि सारभूतं निर्व्वाणमिति गाथार्थः ॥ उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—

आवंती केयावंती लोयंसि विप्परामुसंति अट्ठाए अणट्ठाए, एएसु चेव विप्परामुसंति, गुरु से कामा, तओ से मारंते, जओ से मारंते तओ से दूरे, नेव से अंतो नेव दूरे (सू० १४१)

'आवन्ती'त्ति यावन्तो जीवा मनुष्या असंयता वा स्युः, 'केआवंति'त्ति केचन 'लोके' चतुर्दशरज्ज्वात्मके गृहस्थान्यतीर्थिकलोके वा षड्जीवनिकायान् आरम्भप्रवृत्ता विविधम्—अनेकप्रकारं विषयाभिलाषितया 'परामृशन्ति' उपतापयन्ति, दण्डकशताडनादिभिर्घातयन्तीत्यर्थः, किमर्थं विपरामृशन्तीति दर्शयति—'अर्थाय' अर्थार्थं अर्थाद्वा अर्थः—प्रयोजनं धर्म्मार्थकामरूपं, कर्म्मणि ल्यब्लोपे पञ्चमी, अर्थमुद्दिश्य—प्रयोजनमुद्दिश्य प्राणिनो घातयन्ति, तथाहि—धर्म्मनिमित्तं शौचार्थं पृथिवीकायं समारभन्ते, अर्थार्थं कृष्यादि करोति, कामार्थमाभरणादि, एवं शेषेष्वपि कायेषु यथायोगं वाच्यं, अनर्थाद्वा—प्रयोजनमनुद्दिश्यैव तच्छीलतयैव मृगयाद्याः प्राण्युपघातकारिणीः क्रियाः कुर्वन्ति, तदेवमर्थादनर्थाद्वा प्राणिनो हत्वा एतेष्वेव—षड्जीवनिकायस्थानेषु विविधम्—अनेकप्रकारं सूक्ष्मबादरपर्याप्तकापर्याप्तकादिभेदेन तानेकेन्द्रियादीन् प्राणिनस्तदुपघातकारिणः परामृशन्ति, तान् प्रपीड्य तेष्वेवानेकशः उत्पद्यन्त इतियावत्, यदिवा तत्षड्जीवनिकायबाधाऽवाप्तं कर्म्म तेष्वेव कायेषूत्पद्य ते तैस्तैः प्रकारैरुदीर्णं विपरामृशन्ति—अनुभवन्तीति, नागार्जुनीयास्तु पठन्ति—"जावंति केइ लोए छक्कायवहं समारभंति अट्ठाए अणट्ठाए वा" इत्यादि, गतार्थं, स्याद्—असौ किमर्थमेवंविधानि क-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्म्माणि कुरुते यान्यस्य कायगतस्य विपच्यन्ते?, तदुच्यते-'गुरू से कामा' 'से' तस्यापरमार्थविदः काम्यन्त इति कामाः-शब्दादयस्ते गुरवो दुस्त्यजत्वात्, कामा ह्यल्पसत्त्वैरनवाप्तपुण्योपचयैरुल्लङ्घयितुं दुष्करमित्यतस्तदर्थं कायेषु प्रवर्त्तते तत्प्रवृत्तौ च पापोपचयस्तदुपचयाच्च यत्स्यात्तदाह—'ततः' षड्जीवनिकायविपरामर्शात् परमकामगुरुत्वाच्चासौ मरणं मारः-आयुषः क्षयस्तस्यान्तर्वर्त्तते, मृतस्य च पुनर्जन्म जन्मनि चावश्यंभावी मृत्युरेवं जन्ममरणात् संसारोदन्वति मज्जनोन्मज्जनरूपान्न मुच्यते। ततः किमपरमित्याह—'जओ से'इत्यादि, यतोऽसौ मृत्योरन्तस्ततोऽसौ 'दूरे' परमपदोपायात् ज्ञानादित्रयात् तत्कार्याद्वा मोक्षाद्, यदिवा सुखार्थी कामान्न परित्यजति, तदपरित्यागे च मारान्तर्वर्त्ती, यतश्च मारान्तर्वर्त्ती ततो जातिजरामरणरोगशोकाभिभूतत्वादसौ सुखादूरे। यस्मादसौ कामगुरुस्तद्गुरुत्वान्मारान्तर्वर्त्ती तदन्तर्वर्त्तित्वात्किम्भूतो भवतीत्यत आह—'नेव से'इत्यादि, नैवासौ विषयसुखस्यान्तर्वर्त्तते, तदभिलाषापरित्यागाच्च नैवासौ दूरे, यदिवा यस्य गुरवः कामाः स किं कर्म्मणोऽन्तर्बहिर्वेति प्रश्नावसरे सत्याह—'णेव से'इत्यादि, नैवासौ कर्म्मणोऽन्तः-मध्ये भिन्नग्रन्थित्वात्सम्भावितावश्यंभाविकर्म्मक्षयोपपत्तेः, नाप्यसौ दूरे देशोनकोटीकोटिकर्म्मस्थितिकत्वात्, चारित्रावाप्तावपि नैवान्तर्नैव च दूरे इत्येतच्छक्यते वक्तुं, पूर्वोक्तादेव कारणादिति, अथवा येनेदं प्राणार्थि किमसावन्तर्भूतः संसारस्याहोश्विद्बहिर्वर्त्तते इत्याशङ्क्याह—'णेव से'इत्यादि, नैवासौ संसारान्तः घातिकर्म्मक्षयात् नापि दूरे अद्यापि भवोपग्राहिकर्म्मसद्भावादिति ॥ यो हि भिन्नग्रन्थिको दुरापावाप्तसम्यक्त्वः संसाराराती यतीरवर्ती स किमध्यवसायी स्यादित्याह—

से पासइ फुसियमिव कुसग्गे पणुन्नं निवइयं वाएरियं, एवं बालस्स जीवियं मंदस्स अवियाणओ, कूराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परिआसमुवेइ, मोहेण गब्भं मरणाइ एइ, एत्थ मोहे पुणो पुणो (सू० १४२)

'से पासई'त्यादि, 'सः' अपगतमिथ्यात्वपटलः सम्यक्त्वप्रभावावाप्तसंसारासारः 'पश्यति' इक्षिरुपलब्धिक्रिय इत्यत उपलभते-अवगच्छति, किं तत्?—'फुसियमिव'त्ति कुशाग्र उदकबिन्दुमिव बालस्य जीवितमिति सम्बन्धः, तत्किम्भूतमित्याह—'पणुन्न'मित्यादि, प्रणुन्नम्-अनवरतापरापरोदकपरमाणूपचयात् प्रणुन्नं-प्रेरितं वातेनेरितं सन्निपतितं भाविनि भूतवदुपचाराल्लिपतदेव निपतितं, दार्ष्टान्तिकं दर्शयति—'एव'मिति यथा कुशाग्रे बिन्दुः क्षणसम्भावितस्थितिकः एवं बालस्यापि जीवितम्, अवगततत्त्वो हि स्वयमेवावगच्छति नाप्यसौ तदभिकाङ्क्षति अतो बालग्रहणं, बालो ह्यज्ञः, स चाज्ञानत्वादेव जीवितं बहु मन्यते, यत एव बालोऽत एव मन्दः-सदसद्विवेकापटुः, यत एव बुद्धिमन्दोऽत एव परमार्थं न जानाति, अतः परमार्थमविजानत एवम्भूतं जीवितमित्येवं पश्यति। परमार्थमजानंश्च यत्कुर्यात्तदाह—'कूराणि'इत्यादि, 'क्रूराणि' निर्दयानि निरनुक्रोशानि 'कर्म्माणि' अनुष्ठानानि हिंसानृतस्तेयादीनि सकललोकचमत्कृतिकारीणि अष्टादश वा पापस्थानानि 'बालः' अज्ञः प्रकर्षेण कुर्वाणः, कर्त्रभिप्राये क्रियाफले आत्मनेपदविधानात्तस्यैव तत्क्रियाफलविपाकं दर्शयति—'तेन' क्रूरकर्म्मविपाकापादितेन दुःखेन 'मूढः' किंकर्त्तव्यताऽऽकुलः, केन कृतेन ममैतदुःखमुपशमं यादिति मोहमोहितो विपर्यासमुपैति-यदेव प्राण्युपघातादि दुःखोत्पादने कारणं तदुपशमाय तदेव विदधातीति। किं च—'मोहेण'इत्यादि, 'मोहः' अज्ञानं मोहनीयं वा मिथ्यात्वकषायविषयाभिलाषमयं तेन मोहेन मोहितः सन् कर्म बध्नाति, तेन च गर्भमवाप्नोति, ततोऽपि जन्म पुनर्बालकुमारयौवनादिवयोविशेषाः, पुनर्विषयकषायादिना कर्म्मोपादायायुषः क्षयात् मरणमवाप्नोति, आदिग्रहणात्पुनर्गर्भमित्यादि, नरकादियातनास्थानमेतीत्यतोऽभिधीयते—'एत्थ'इत्यादि, 'अत्र' अस्मिन्ननन्तरोक्ते 'मोहे' मोहकार्ये गर्भमरणादिके पौनःपुन्येनानादिकमपर्यन्तं चतुर्गतिकं संसारकान्तारं पर्यटति, नास्मादपैतीतियावत्, कथं पुनः संसारे न बम्भ्रम्यात्?, तदुच्यते-मिथ्यात्वकषायविषयाभिलाषाभावाद्, असावेव कुतो?, विशिष्टज्ञानोत्पत्तेः?, सैव कुतो?, मोहाभावात्, यद्येवमितरेतराश्रयत्वं, तथाहि-मोहोऽज्ञानं मोहनीयं वा, तदभावो विशिष्टज्ञानोत्पत्तेः, साऽपि तदभावादिति भणता स्पष्टमेव इतरेतराश्रयत्वमुक्तं, ततश्च न यावद्विशिष्टज्ञानोत्पत्तिः संवृत्ता न तावत्कर्म्मशमनाय प्रवृत्तिः स्यात्, नैष दोषः, अर्थसंशयेनापि प्रवृत्तिदर्शनादिति। आह च—

संसयं परिआणओ संसारे परिन्नाए भवइ, संसयं अपरियाणओ संसारे अपरिन्नाए भवइ (सू० १४३)

'संसय'मित्यादि, संशीतिः संशयः-उभयांशावलम्बा प्रतीतिः संशयः, स चार्थसंशयोऽनर्थसंशयश्च, इह चार्थो मोक्षो मोक्षोपायश्च, तत्र मोक्षे न संशयोऽस्ति, परमपदमितिप्रतिपादनात्, तदुपाये तु संशयेऽपि प्रवृत्तिर्भवत्येव, अर्थसंश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य प्रवृत्त्यङ्गत्वात् । अनर्थस्तु संसारः संसारकारणं च, तत्सन्देहेऽपि निवृत्तिः स्यादेव, अनर्थसंशयस्य निवृत्त्यङ्गत्वात्' अतः संशयमर्थानर्थगतं परिजानतो हेयोपादेयप्रवृत्तिः स्यादित्येतदेव परमार्थतः संसारपरिज्ञानमिति दर्शयति–तेन संशयं परिजानता संसारश्चतुर्गतिकः तदुपादानं वा मिथ्यात्वाविरत्यादि अनर्थरूपतया परिज्ञातं भवति ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया तु परिहृतमिति, यस्तु पुनः संशयं न जानीते स संसारमपि न जानातीति दर्शयितुमाह—'संसयं' इत्यादि, 'संशयं' सन्देहं द्विविधमप्यपरिजानतो हेयोपादेयप्रवृत्तिर्न स्यात्, तदप्रवृत्तौ च संसारोऽनित्याशुचिरूपो व्यसनोपनिपातबहुलो निःसारो न ज्ञातो भवति ॥ कुतः पुनरेतन्निश्चीयते ? यथा तेन संशयवेदिना संसारः परिज्ञात इति ?, किमत्र निश्चेतव्यं ?, संसारपरिज्ञानकार्यविरत्युपलब्धेः, तत्र सर्वविरतिप्रष्ठां विरतिं निर्दिदिक्षुराह—

जे छेए से सागारियं न सेवइ, कट्टु एवमवियाणओ बिइया मंदस्स बालया, लद्धा हुरत्था पडिलेहाए आगमित्ता आणविज्जा अणासेवणय त्ति बेमि (सू० १४४)

'जे छेए' इत्यादि यश्छेको–निपुण उपलब्धपुण्यपापः स 'सागारियं'ति मैथुनं न सेवते मनोवाक्कायकर्म्मभिः, स एव यथावस्थितसंसारवेदी, यस्तु पुनर्मोहनीयोदयात्पार्श्वस्थादिः तत्सेवते, सेवित्वा च सातगौरवभयात् किं कुर्यादित्याह—'कट्टु' इत्यादि, रहसि मैथुनप्रसङ्गं कृत्वा पुनर्गुर्वादिना पृष्टः सन्नपलपति, तस्य चैवमकार्यमपलपतोऽविज्ञापयतो वा किं स्यादित्याह—'बिइया' इत्यादि, 'मन्दस्य' अबुद्धिमत एकमकार्यासेवनमियं बालता–अज्ञानता, द्वितीया तदपह्नवनं मृषावादः तदकरणतया वा पुनरनुत्थानमिति, नागार्जुनीयास्तु पठन्ति—"जे खलु विसए सेवई सेवित्ता वा णालोएइ, परेण वा पुट्ठो निण्हवइ, अहवा तं परं सएण वा दोसेण पाविट्ठयरेण वा दोसेण उवलिंपिज्ज'त्ति" सुगमं । यद्येवं ततः किं कुर्यादित्याह—'लद्धा हु' इत्यादि, लब्धानपि कामान् 'हुरत्थे'त्ति बहिश्चित्रक्षुल्लकादिवत्तद्विपाकं प्रत्युपेक्ष्य चित्ताद्बहिः कुर्यात्, यदिवा हुशब्दोऽपिशब्दार्थे, रेफागमः सुब्व्यत्ययेन द्वितीयार्थे प्रथमा, ततोऽयमर्थो–लब्धानप्यर्थान्ते–अभिलष्यन्त इत्यर्थाः–शब्दादयस्तानुपनतानपि तद्विपाकद्वारेण 'प्रत्युपेक्ष्य' पर्यालोच्य ततः 'आगम्य' ज्ञात्वा दुरन्तं शब्दादिविषयानुषङ्गं, क्त्वाप्रत्ययस्योत्तरक्रियासव्यपेक्षत्वात्तां दर्शयति–तदनासेवनतया परानाज्ञापयेत्, स्वतोऽपि परिहरेदिति, एतदहं ब्रवीमि येन मया पूर्वार्धव्यावर्णनमकारि स एवाहमव्यवच्छिन्नसम्यग्ज्ञानप्रवाहः शब्दादिविषयस्वरूपोपलम्भात् समुपजनितजिनवचनसंमद इति । एतच्च वक्ष्यमाणं ब्रवीमीति, तदाह—

पासह एगे रूवेसु गिद्धे परिणिज्जमाणे, इत्थ फासे पुणो पुणो, आवंती केयावंती लोयंसि आरंभजीवी, एएसु चेव आरंभजीवी, इत्थवि बाले परिपच्चमाणे रमई पावेहिं कम्मेहिं असरणे सरणंति मन्नमाणे, इहमेगेसिं एगचरिया भवइ, से बहुकोहे बहुमाणे बहुमाए बहुलोभे बहुरए बहुनडे बहुसढे बहुसंकप्पे आसवसत्ती पलिउच्छन्ने उट्ठियवायं पवयमाणे, मा मे केइ अदक्खू अन्नायपमायदोसेणं, सययं मूढे धम्मं नाभिजाणइ, अट्टा पया माणव ! कंमकोविया जे अणुवरया अविज्जाए पलिमुक्खमाहु आवट्टमेव अणुपरियट्टंति त्तिबेमि (१४५)॥ लोकसारे प्रथमोद्देशकः ५–१ ॥

'पासह'इत्यादि, हे जनाः ! पश्यत यूयमेकान्तपुष्टधर्म्माणो, बहुवचननिर्देशादाद्यर्थो गम्यते, 'रूपेषु' रूपादिष्विन्द्रियविषयेषु निःसारकटुफलेषु 'गृद्धान्' अध्युपपन्नान् सतः इन्द्रियैर्विषयाभिमुखं संसाराभिमुखं वा नरकादियातनास्थानकेषु वा परिणीयमानान् प्राणिन इति । ते च विषयगृद्धव इन्द्रियवशगाः संसारार्णवे किमाप्नुयुरित्याह—'एत्थ फासे'इत्यादि, 'अत्र' अस्मिन् संसारे हृषीकवशगः सन् कर्म्मपरिणतिरूपान् स्पर्शान् पौनःपुन्येन–आवृत्त्या तानेव तेषु तेष्वेव स्थानेषु प्राप्नुयादिति । पाठान्तरं वा 'एत्थ मोहं पुणो पुणो' 'अत्र' अस्मिन् संसारे 'मोहे' अज्ञाने चारित्रमोहे वा पुनः पुनर्भवतीति । कोऽसावेवम्भूतः स्यादित्यत आह—'आवंती'त्यादि, यावन्तः केचन 'लोके' गृहस्थलोके 'आरम्भजीविनः' सावद्यानुष्ठानस्थितिकाः, ते पौनःपुन्येन दुःखान्यनुभवेयुरिति । येऽपि गृहस्थाश्रिताः सारम्भास्तीर्थिकादयस्तेऽपि तद्दुःखभाजिन इति दर्शयति—'एएसु'इत्यादि, 'एतेषु' सावद्यारम्भप्रवृत्तेषु गृहस्थेषु शरीरयापनार्थं वर्त्तमानस्तीर्थिकः पार्श्वस्थादिर्वा 'आरम्भजीवी' सावद्यानुष्ठानवृत्तिः पूर्वोक्तदुःखभाग् भवति । आस्तां तावद्गृहस्थस्तीर्थिको वा, योऽपि संसारार्णवतटदेशमवाप्य सम्यक्त्वरत्नं लब्ध्वाऽपि मोक्षैककारणं विरतिपरिणामं सफलतामनीत्वा कर्म्मोदयात् सोऽपि सावद्यानुष्ठायी स्यादित्याह—'एत्थवि बाले'इत्यादि, 'अत्र' अस्मिन्नप्यर्हत्प्रणीतसंयमाभ्युपगमे 'बालो' रागद्वेषाकुलितः परितप्यमानः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिपच्यमानो वा विषयपिपासया रमते, कैः?–पापैः कर्म्मभिः, विषयार्थं सावद्यानुष्ठाने धृतिं विधत्ते, किं कुर्वाण इत्याह —'असरण'मित्यादि, कामाग्निना पापैर्वा कर्म्मभिः परिपच्यमानः सावद्यानुष्ठानमशरणमेव शरणमिति मन्यमानो भोगेच्छाऽज्ञानतमिस्राच्छादितदृष्टिविपर्ययः सन् भूयो भूयो नानारूपावेदना अनुभवेदिति । आस्तां तावदन्ये, प्रव्रज्यामप्यभ्युपेत्य केचिद्विषयपिपासार्त्तास्तांस्तान् कल्काचारानाचरन्तीति दर्शयितुमाह—'इहमेगेसि'मित्यादि, 'इह' मनुष्यलोके एकेषां न सर्वेषां, चरणं चर्यते वा चर्या एकस्य चर्या एकचर्या, सा च प्रशस्तेतरभेदेन द्विधा–साऽपि द्रव्यभावभेदात् प्रत्येकं द्विधा, तत्र द्रव्यतो गृहस्थपाषण्डिकादेर्विषयकषायनिमित्तमेकाकिनो विहरणं, भावतस्तु अप्रशस्ता न विद्यते, सा हि रागद्वेषविरहाद्भवति, न च तद्रहितस्याप्रशस्तेति । प्रशस्ता तु द्रव्यतः प्रतिमाप्रतिपन्नस्य गच्छनिर्गतस्य स्थविरकल्पिकस्य चैकाकिनः सङ्घादिकार्यनिमित्तान्निर्गतस्य, भावतस्तु पुना रागद्वेषविरहाद्भवति, तत्र द्रव्यतो भावतश्चैकचर्या अनुत्पन्नज्ञानानां तीर्थकृतां प्रतिपन्नसंयमानाम्, अन्ये तु चतुर्भङ्गपतिताः, तत्राप्रशस्तद्रव्यैकचर्योदाहरणं, तद्यथा–पूर्वदेशे धान्यपूरकाभिधाने सन्निवेशे एकस्तापसः प्रथमवया देवकुमारसदृशविग्रहः षष्ठभक्तेन तद्ग्रामनिर्गमपथे तपस्तेपे, द्वितीयोऽप्युपग्रामं गिरिगह्वरेऽष्टमभक्तेन तपःकर्म्मणाऽऽतापनां विधत्ते, तस्मै च ग्रामनिर्गमपथवर्त्तिने शीतोष्णसहिष्णवे गुणैराकृष्टो लोक आहारादिभिः सपर्ययोपतिष्ठते, स च तथा लोकेन पूज्यमानो वाग्भिरभिष्टूयमानः आहारादिनोपचर्यमाणो जनमूचे–मत्तोऽपि गिरिपरिसरातापी दुष्करकारकः, ततोऽसौ लोकस्तेन भूयो भूयः प्रोच्यमानस्तमेकाकिनं तापसमद्रिकुहरवासिनं पर्यपूजयद्, दुष्करं च परगुणोत्कीर्त्तनमितिकृत्वा तस्यापि सपर्यादिकं व्यधात्, तदेवमाभ्यां पूजाख्यात्यर्थमेकचर्या विदधे, अतोऽप्रशस्ता,· एवमनया दिशाऽन्येऽप्यप्रशस्तैकचर्याश्रिता दृष्टान्ता यथासम्भवमायोज्या इति । तदेवं सूत्रार्थे व्याख्याते सूत्रस्पर्शिकनिर्युक्त्या निर्युक्तिकारो व्याचिख्यासुराह-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २०२ ॥

लाक० ५ उद्देशकः१

चारो चरिया चरणं गगडं वंजणं तहिं छक्कं । दव्वं तु दारुसंकम जलथलचाराइयं बहुहा ॥ २४६ ॥

'चार' इति 'चर गतिभक्षणयोः' भावे घञ्, चर्येति 'गदमदचरयमश्चानुपसर्गे' (पा० ३–१–१००) इत्यनेन कर्मणि भावे वा यत्, चरणमिति वा, भावे ल्युट्, एकः–अभिन्नोऽर्थोऽस्येत्येकार्थं, किं तत्?—'व्यञ्जनं' व्यज्यते–आविष्क्रियतेऽर्थोऽनेनेति व्यञ्जनं–शब्द इत्येतत्पूर्वोक्तं शब्दत्रयमेकार्थं, एकार्थत्वाच्च न पृथग् निक्षेपः, 'तत्र' चारनिक्षेपे षट्कं, चारस्य षट्प्रकारो निक्षेप इत्यर्थः, तद्यथा–नामस्थापनेत्यादि, तत्र सुगमत्वान्नामस्थापने अनादृत्य ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यचारं गाथाशकलेन दर्शयति—'दव्वं तु' त्ति तुशब्दः पुनःशब्दार्थे द्रव्यं पुनरेवम्भूतं भवति, दारुसङ्क्रमश्च जलस्थलचारश्च दारुसङ्क्रमजलस्थलचारौ तावादी यस्य तद्दारुसङ्क्रमजलस्थलचारादिकं 'बहुधा' अनेकधा, तत्र दारुसङ्क्रमो जले सेत्वादिः क्रियते, स्थले वा गर्त्तलङ्घनादिकः, जलचारो नावादिना, स्थलचारो रथादिना, आदिग्रहणात् प्रासादादौ सोपानपङ्क्त्यादिरिति, यद्यदेशादेशान्तरावाप्तये द्रव्यं स स द्रव्यचार इति गाथार्थः ॥ साम्प्रतं क्षेत्रादिकमाह—

खित्तं तु जंमि खित्ते कालो काले जहिं भवे चारो । भावंमि नाणदंसणचरणं तु पसत्थमपसत्थं ॥ २४७ ॥

क्षेत्रं पुनर्यस्मिन् क्षेत्रे चारः क्रियते यावद्वा क्षेत्रं चर्यते स क्षेत्रचारः, कालस्तु यस्मिन् काले चरति यावन्तं वा कालं स कालचारः, भावे तु द्विधा चरणं–प्रशस्तमप्रशस्तं च, तत्र प्रशस्तं ज्ञानदर्शनचरणानि, अतोऽन्यदप्रशस्तं गृहस्थान्यतीर्थिकाणामिति गाथार्थः ॥ तदेवं सामान्यतो द्रव्यादिकं चारं प्रदर्श्य प्रकृतोपयोगितया यतेर्भावचारं प्रशस्तं प्रश्नद्वारेण दर्शयितुमाह— ॥ २०२ ॥

लोगे चउव्विहंमी समणस्स चउव्विहो कहं चारो ?। होई विई अहिगारो विसेसओ खित्तकालेसुं ॥ २४८ ॥

'लोके' चतुर्विधे द्रव्यक्षेत्रकालभावरूपे 'श्रमणस्य' श्राम्यतीति श्रमणो–यतिस्तस्य कथम्भूतो द्रव्यादिश्चतुर्विधश्चारः स्याद्?, इति प्रश्ने निर्वचनमाह–भवति धृतिरित्येषोऽधिकारः, द्रव्ये तावदरसविरसप्रान्तरूक्षादिके धृतिर्भावयितव्या, क्षेत्रेऽपि कुतीर्थिकभाविते प्रकृत्यभद्रके वा नोद्वेगः कार्यः, कालेऽपि दुष्कालादौ यथालाभं सन्तोषिणा भाव्यं, भावेऽप्याक्रोशोपहसनादौ नोहीपितव्यं, विशेषतस्तु क्षेत्रकालयोरवमयोरपि धृतिर्भाव्या, द्रव्यभावयोरपि प्रायस्तन्निमित्तत्वात् ॥ पुनरपि द्रव्यादिकं विशेषतो यतेश्चारमाह—

पावोवरए अपरिग्गहे अ गुरुकुलनिसेवए जुत्ते । उम्मग्गवज्जए रागदोसविरए य से विहरे ॥ २४९ ॥

'पापोपरतः' पापात्–पापहेतोः सावद्यानुष्ठानाद्धिंसाऽनृतादत्तादानाब्रह्मरूपादुपरतः पापोपरतः, तथा न विद्यते परिग्रहोऽस्येत्यपरिग्रहः, पापोपरतोऽपरिग्रहश्चेति द्रव्यचारः, क्षेत्रचारमाह–गुरोः कुलं गुरुकुलं–गुरुसान्निध्यं तत्सेवको–युक्तः समन्वितो यावज्जीवं गुरूपदेशादिनेति, अनेन कालचारः प्रदर्शितः, सर्वकालं गुरूपदेशविधायित्वोपदेशाद्, भावचारमाह–उद्गतो मार्गादुन्मार्गः–अकार्याचरणं तद्वर्जकः, तथा रागद्वेषविरतः स साधुर्विहरेत्–संयमानुष्ठानं कुर्यादिति गता निर्युक्तिः । साम्प्रतं सूत्रमनुश्रियते–तत्र विषयकषायनिमित्तं यस्यैकचर्या स्यात् स किम्भूतः स्यादित्याह—'से बहु कोहे'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, 'स' विषयगृध्नुरिन्द्रियानुकूलवर्त्येकचर्याप्रतिपन्नस्तीर्थिको गृहस्थो वा परैः परिभूयमानो बहुः क्रोधोऽस्येति बहुक्रोधः, तथा वन्द्यमानो मानमुद्वहत इति बहुमानः, तथा कुरुकुचादिभिः कल्कतपसा च बहुमायी, सर्वमेतदाहारादिलोभात्करोतीत्यतो बहुलोभः, यत एवमतो बहुरजाः–बहुपापो बहुषु वाऽऽरम्भादिषु रतो बहुरतः, तथा नटवद्लोगार्थं बहून् वेषान् विधत्त इति बहुनटः, तथा बहुभिः प्रकारैः शठो बहुशठः, तथा बहवः सङ्कल्पाः–कर्त्तव्याध्यवसाया यस्य स बहुसङ्कल्पः, इत्येवमन्येषामपि चौरादीनामेकचर्या वाच्येति, स एवम्भूतः किमवस्थः स्यादित्याह—'आसव' इत्यादि, आस्रवाः–हिंसादयस्तेषु सक्तं–सङ्गं आश्रवसक्तं तद्विद्यते यस्यासावाश्रवसक्ती–हिंसाद्यनुषङ्गवान् पलितं–कर्म्म तेनावच्छन्नः, कर्मावष्टब्ध इतियावत्, स चैवम्भूतोऽपि किं ब्रूयादित्याह—'उट्ठिय'इत्यादि, धर्म्मचरणायोद्युक्तः उत्थितस्तद्वाद उत्थितवादस्तं प्रवदन्, तीर्थिकोऽप्येवमाह–यथा अहमपि प्रव्रजितो धर्म्मचरणायोद्यत इत्येवं प्रवदन् कर्म्मणाऽवच्छाद्यत इति । स चोत्थितवादी आस्रवेषु प्रवर्त्तमानः आजीविकाभयात् कथं प्रवर्त्तत इत्याह—'मा मे'इत्यादि, मा मां 'केचन' अन्येऽद्राक्षुरवद्यकारिणमित्यतः प्रच्छन्नमकार्यं विदधाति, एतच्चाज्ञानदोषेण प्रमाददोषेण वा विधत्त इति । किं च—'सयय'मित्यादि, 'सततम्' अनवरतं मूढो मोहनीयोदयादज्ञानाद्वा 'धर्म्मं' श्रुतचारित्राख्यं नाभिजानाति, न विवेचयतीत्यर्थः । यद्येवं ततः किमित्याह—'अट्टा' इत्यादि, आर्त्ता विषायकषायैः 'प्रजायन्त' इति प्रजाः–जन्तवः हे मानव!, मनुजस्यैवोपदेशार्हत्वान्मानवग्रहणं, 'कर्म्मणि' अष्टप्रकारे विभंत्तिते 'कोविदाः' कुशलाः, न धर्म्मानुष्ठान इति, के पुनः ते ये सततं धर्म्मं नाभिजानन्ति कर्म्मबन्धकोविदाश्चेति?, अत आह—'जे अणुवरया' इत्यादि, ये केचनानिर्दिष्टस्वरूपाः 'अनुपरताः' पापानुष्ठानेभ्योऽनिवृत्ता ज्ञानदर्शनचारित्राणि मोक्षमार्ग इत्येषा विद्या अतो विपर्ययेणाविद्या तया परि–समन्तात् मोक्षमाहुः ते धर्म्मं नाभिजानन्त इति सम्बन्धः, धर्म्ममजानानाश्च किमाप्नुयुरित्याह—'आवट्टं' इत्यादि, भावावर्त्तः–संसारस्तमरघट्टयटीयन्त्रन्यायेनानुपरिवर्त्तन्ते, तास्वेव नरकादिगतिषु भूयो भूयो भवन्तीतियावत् । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । लोकसाराध्ययने प्रथमोद्देशक इति ॥ १ ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः–इह प्रागुद्देशके एकचर्याप्रतिपन्नोऽपि सावद्यानुष्ठानाद्विरतेरभावाच्च न मुनिरित्युक्तम्, इह तु तद्विपर्ययेण यथा मुनिभावः स्यात्तथोच्यते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

आवन्ती कयावन्ती लोए अणारंभजीविणो तेसु, एत्थोवरए तं झोसमाणे, अयं संधीति अदक्खू, जे इमस्स विग्गहस्स अयं खणेत्ति अन्नेसी एस मग्गे आरिएहिं पवेइए, उट्ठिए नो पमायए, जाणित्तु दुक्खं पत्तेयं सायं, पुढोछंदा इह माणवा पुढो दुक्खं पवेइयं से अविहिंसमाणे अणवयमाणे, पुट्ठो फासे विपणुन्नए (सू० १४६)

'यावन्तः' केचन 'लोके' मनुष्यलोके 'अनारम्भजीविनः' आरम्भः–सावद्यानुष्ठानं प्रमत्तयोगो वा, उक्तं च–"[1]आदाणे निक्खेवे भासुस्सग्गे अ ठाणगमणाई । सव्वो पमत्तजोगो समणस्सवि होइ आरंभो ॥ १ ॥" तद्विपर्ययेण त्वनारम्भस्तेन जीवितुं शीलं येषां इत्यनारम्भजीविनो यतयः समस्तारम्भनिवृत्ताः तेष्वेव–गृहिषु पुत्रकलत्रस्वशरीराद्यर्थमारम्भप्रवृत्तेष्वनारम्भजीविनो भवन्ति, एतदुक्तं भवति–सावद्यानुष्ठानप्रवृत्तेषु गृहस्थेषु देहसाधनार्थमनवद्यारम्भजीविनः साधवः पङ्काधारपङ्कजवन्निर्लेपा एव भवन्ति । यद्येवं ततः किमित्याह—'अत्र' अस्मिन् सावद्यारम्भे कर्त्तव्ये 'उपरतः' सङ्कुचितगात्रः, अत्र वाऽऽर्हते धर्म्मे व्यवस्थित उपरतः पापारम्भात्, किं कुर्यात् स?–'तत्' सावद्यानुष्ठानायातं कर्म्म 'झोषयन्' क्षपयन् मुनिभावं भजत इति । किमभिसन्धायात्रोपरतः स्यादित्याह—'अयं संधी' इत्यादि, अविवक्षितकर्म्मका अप्यकर्मका धातवो, यथा पश्य मृगो धावति, एवमत्राप्यद्राक्षीदित्येतत्क्रियायोगेऽप्ययं सन्धिरिति प्रथमा कृतेति, 'अय'मिति प्रत्यक्षगोचरापन्न आर्यक्षेत्रसुकुलोत्पत्तीन्द्रियनिर्वृत्तिश्रद्धासंवेगलक्षणः 'सन्धिः' अवसरो मिथ्यात्वक्षयानुदयलक्षणो वा सम्यक्त्वावाप्तिहेतुभूतकर्म्मविवरलक्षणः सन्धिः शुभाध्यवसायसन्धानभूतो वा सन्धिरित्येनं स्वात्मनि व्यवस्थापितमद्राक्षीन्नवानित्यतः क्षणमप्येकं न प्रमादयेत् न विषयादिप्रमादवशगो भूयात् । कश्च न प्रमत्तः स्यादित्याह—'जे इमस्स' इत्यादि, 'य' इत्युपलब्धतत्त्वः 'अस्य' अध्यक्षस्य विशेषेण गृह्यते अनेनाष्टप्रकारं कर्म तद्वेतरशरीरविशिष्टं बाह्येन्द्रियेण गृह्यत इति विग्रहः–औदारिकं शरीरं तस्य 'अयं' वार्त्तमानिकक्षणः एवम्भूतः सुखदुःखान्यतररूपश्च गतः एवम्भूतश्च भावीत्येवं

[1] आदाने निक्षेपे भाषायामुत्सर्गे च स्थाने गमनादौ । सर्वः प्रमत्तयोगः श्रमणस्यापि भवत्यारम्भः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः क्षणाम्वेषणशीलः सोऽन्वेषी सदाऽप्रमत्तः स्यादिति । स्वमनीषिकापरिहारार्थमाह—'एस मग्गे' इत्यादि, 'एषः' अनन्तरोक्तो 'मार्गो' मोक्षपथः 'आर्यैः' सर्वहेयधर्म्मारातीय(तीर)वर्त्तिभिस्तीर्थकरगणधरैः प्रकर्षेणादौ वा वेदितः—कथितः प्रवेदित इति । न केवलमनन्तरोक्तो वक्ष्यमाणश्च तीर्थकरैः प्रवेदित इति तदाह—'उट्ठिए' इत्यादि, सन्धिमधिगम्योत्थितो धर्म्मचरणाय क्षणमप्येकं न प्रमादयेत् । किं चापरमधिगम्येत्याह—'जाणित्तु' इत्यादि, ज्ञात्वा प्राणिनां प्रत्येकं दुःखं तदुपादानं वा कर्म्म तथा प्रत्येकं सातं च—मनआह्लादि ज्ञात्वा समुत्थितो न प्रमादयेत् । न केवलं दुःखं कर्म्म वा प्रत्येकं, तदुपादानभूतोऽध्यवसायोऽपि प्राणिनां भिन्न एवेति दर्शयितुमाह—'पुढो' इत्यादि, पृथग्—भिन्नः छन्दः—अभिप्रायो येषां ते पृथग्छन्दाः, नानाभूतबन्धाध्यवसायस्थाना इत्यर्थः, 'इहे'ति संसारे संज्ञिलोके वा, के ते?—'माणवाः' मनुष्याः, उपलक्षणार्थत्वादन्येऽपि, संज्ञिनां पृथक्सङ्कल्पत्वाच्च तत्कार्यमपि कर्म्म पृथगेव, तत्कारणमपि दुःखं नानारूपमिति, कारणभेदे कार्यभेदस्य अवश्यंभावित्वादिति, अतः पूर्वोक्तं स्मारयन्नाह—'पुढो' इत्यादि, दुःखोपादानभेदाद् दुःखमपि प्राणिनां पृथक् प्रवेदितं, सर्वस्य स्वकृतकर्म्मफलेश्वरत्वात् नान्यकृतमन्य उपभुङ्क्ते इति । एतन्मत्वा किं कुर्यादित्याह—'से' इत्यादि, 'सः' अनारम्भजीवी प्रत्येकसुखदुःखाध्यवसायी प्राणिनो विविधैरुपायैरहिंसन् तथाऽनपवदन्—अन्यथैव व्यवस्थितं वस्त्वन्यथा वदन्नपवदन् नापवदन् अनपवदन्, मृषावादमब्रुवन्नित्यर्थः, पश्य च त्वं तस्यापि प्राकृतत्वादार्षत्वाद्वा लोपः, एवं परस्वमगृह्णन्नित्याद्यप्यायोज्यम् । एतद्विधायी च किमपरं कुर्यादित्याह—'पुट्ठो' इत्यादि, स पञ्चमहाव्रतव्यवस्थितः सन् यथागृहीतप्रतिज्ञानिर्वहणोद्यतः स्पृष्टः परीषहोपसर्गैस्तान् तत्कृतान् शीतोष्णादिस्पर्शान् दुःखस्पर्शान् वा तत्सहिष्णुतया अनाकुलो विविधैरुपायैः—प्रकारैः संसारासारभावनादिभिः प्रेरयेत्, तत्प्रेरणं च सम्यक्सहनं, न तत्कृतया दुःखासिकयाऽऽत्मानं भावयेदितियावत् ॥ यो हि सम्यक्करणतया परीषहान् सहेत स किंगुणः स्यादित्याह—

आ. सू. १५

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २०५ ॥

लोक० ५

उद्देशकः२

एस समिया परियाए वियाहिए, जे असत्ता पावेहिं कम्मेहिं उदाहु ते आयंका फुसंति, इति उदाहु धीरे ते फासे पुट्ठो अहियासइ, से पुव्विंपेयं पच्छापेयं भेउरधम्मं विद्धंसणधम्ममधुवं अणिइयं असासयं चयावचइयं विप्परिणामधम्मं, पासह एयं रूवसंधिं । (सू० १४७)

'एषः' अनन्तरोक्तो यः परीषहाणां प्रणोदकः 'समिया' सम्यक् शमिता वा शमोऽस्यास्तीति शमी तद्भावः शमिता 'पर्यायः' प्रव्रज्या सम्यक् शमितया वा पर्यायः—प्रव्रज्याऽस्येति विगृह्य बहुव्रीहिः स सम्यक्पर्यायः शमितापर्यायो वा व्याख्यातो नापर इति । तदेवं परीषहोपसर्गाक्षोभ्यतां प्रतिपाद्य व्याधिसहिष्णुतां प्रतिपादयन्नाह—'जे असत्ता' इत्यादि, येऽपाकृतमदनतया समतृणमणिलेष्टुकाञ्चनाः समतापन्नाः पापेषु कर्म्मस्वसक्ताः—पापोपादानानुष्ठानारताः 'उदाहु' कदाचित्तान् तथाभूतान् साधून् 'आतङ्का' आशुजीवितापहारिणः शूलादयो व्याधिविशेषाः 'स्पृशन्ति' अभिभवन्ति पीडयन्ति । यदि नामैवं ततः किमित्याह—'इति उदाहु' इत्यादि, 'इति' एतद्वक्ष्यमाणमुदाहृतवान्—व्याकृतवान्, कोऽसौ?—'धीरो' धीः—बुद्धिस्तया राजते, स च तीर्थकृद्गणधरो वा, किं तदुदाहृतवान्?—तैरातङ्कैः स्पृष्टः सन् तान् स्पर्शान्—दुःखानुभवान् व्याधिविशेषापादितानध्यासयेत्—सहेत । किमाकलय्येत्याह—'से पुव्व' मित्यादि, स स्पृष्टः पीडितः आशुकारिभिरातङ्कैरेतद्भावयेद् यथा पूर्वमप्येतद्—असातावेदनीयविपाकजनितं दुःखं मयैव सोढव्यं, पश्चादप्येतन्मयैव सहनीयं, यतः संसारोदरविवरवर्त्ती न विद्यत एवासौ यस्यासातावेदनीयविपाकापादिता रोगातङ्का न भवेयुः, तथाहि—केवलिनोऽपि मोहनीयादिघातिचतुष्टयक्षयादुत्पन्नज्ञानस्य वेदनीयसद्भावेन तदुदयात्तत्सम्भव इति, यतश्च तीर्थकरैरप्येतद्बद्धस्पृष्टनिधत्तनिकाचनावस्थायातं कर्म्मावश्यं वेद्यं नान्यथा तन्मोक्षः, अतोऽन्येनाप्यसातावेदनीयोदये सनत्कुमारदृष्टान्तेन मयैवैतत्सोढव्यमित्याकलय्य नोद्विजितव्यमिति, उक्तं च—"स्वकृतपरिणतानां दुर्नयानां विपाकः,

॥ २०५ ॥

१-२-३-४ कर्मबन्धश्चतुर्विधः, तद्यथा—प्रकृतिबन्धः १ स्थितिबन्धः २ अनुभागबन्धः ३ प्रदेशबन्धः ४, तत्र प्रकृतिबन्धोऽष्टविधः, ज्ञानावरणीयाद्यन्तरायान्तः, एतेऽष्टावपि मूलभेदाः, उत्तरभेदास्तु ज्ञानावरणीये पञ्च, दर्शनावरणीये नव, वेदनीये द्वौ, मोहनीयेऽष्टाविंशतिः, आयुषश्चत्वारः, नाम्नः द्विचत्वारिंशत् सप्तषष्टिर्वा त्रिनवतिर्वा शतं वा, गोत्रे द्वौ, अन्तराये पञ्च, इति मूलोत्तरप्रकृतिबन्धः । स्थितिबन्धे ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायेषु त्रिंशत्कोटीकोट्य उत्कृष्टा स्थितिः, मोहनीये सप्ततिकोटाकोट्यः, नामगोत्रयोर्विंशतिः, आयुषि ३३ सागरोपमाणि पूर्वकोटित्रिभागोनानि, नामगोत्रयोर्जघन्या स्थितिरष्टौ मुहूर्ताः, वेदनीयस्य बारसमुहुत्ता, अंतोमुहुत्ता सेसाणं इति स्थितिबन्धः, शुभाशुभकर्म्मपुद्गलेषु—"जो रसो अणुभागो वुच्चइ तत्थ सुभेसु महुरो असुभेसु अमहुरो रसो तस्स बन्धो अणुभागबंधो" अणुभागबन्धो समत्तो । प्रदेशाः—कर्म्मवर्गणास्कन्धाः तेषां बन्धः जीवप्रदेशैः सर्वं बद्धयः पिण्डवत्क्षीरनीरसम्बन्धवद्वा, उक्तं च—"जीवकर्मप्रदेशानां, यः सम्बन्धः परस्परम् । कृशानुलोहवद्ज्ञेतोः, तं बन्धं जगदुर्बुधाः ॥ १ ॥" स्पृष्टबद्धनिधत्तनिकाचितकारणभेदात् स पुनश्चतुर्विधः, तथाहि—समूहगतायःसूचिसम्बन्धवत् स्पृष्टकर्मबन्धः, दवरकवद्धसूचिसम्बन्धवद्बद्धकर्मबन्धः, वर्षान्तरितदवरकवद्धसूचिकासम्बन्धवन्निधत्तकर्मबन्धः, अग्निध्मातसूचिकासमवायमेलकवन्निकाचितकर्म्मबन्धः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २०६ ॥

पुनरपि सहनीयोऽन्यत्र ते निर्गुणस्य । स्वयमनुभवतोऽसौ दुःखमोक्षाय सद्यो, भवशतगतिहेतुर्जायतेऽनिच्छतस्ते ॥ १ ॥" अपि च-एतदौदारिकं शरीरं सुचिरमप्यौषधरसायनाद्युपबृंहितं मृन्मयामघटादपि निःसारतरं सर्वथा सदा विशराव्विति दर्शयन्नाह—'भिदुरधम्म'मित्यादि, यदिवा पूर्वं पश्चादप्येतदौदारिकं शरीरं वक्ष्यमाणधर्म्मस्वभावमित्याह—'भिदुरधम्म'मित्यादि, स्वयमेव भिद्यत इति भिदुरः स धर्म्मोऽस्य शरीरस्येति भिदुरधर्म्मं, इदमौदारिकं शरीरं सुपोषितमपि वेदनोदयाच्छिरोदरचक्षुरुरःप्रभृत्यवयवेषु स्वत एव भिद्यत इति भिदुरं, तथा विध्वंसनधर्म्मं पाणिपादाद्यवयवविध्वंसनात्, तथा अवश्यंभावसम्भावितं त्रियामान्ते सूर्योदयवत् ध्रुवं न तथा यत्तदध्रुवं, तथा अप्रच्युतानुत्पन्नस्थिरैकस्वभावतया कूटस्थनित्यत्वेन व्यवस्थितं सन्नित्यं नैवं यत्तदनित्यमिति, तथा तेन तेन रूपेणोदकधारावच्छश्वद्भवतीति शाश्वतं ततोऽन्यदशाश्वतं, तथेष्टाहारोपभोगतया धृत्युपष्टम्भादौदारिकशरीरवर्गणापरमाणूपचयाच्चयः तदभावेन तद्विघटनादपचयः, चयापचयौ विद्येते यस्य तच्चयापचयिकम्, अत एव विविधः परिणामः-अन्यथाभावात्मको धर्म्मः-स्वभावो यस्य तद्विपरिणामधर्म्मं । यतश्चैवम्भूतमिदं शरीरकमतोऽस्योपरि कोऽनुबन्धः का मूर्च्छा?, नास्य कुशलानुष्ठानमृतेऽन्यथा साफल्यमित्येतदेवाह—'पासह' इत्यादि, पश्यतैनं पूर्वोक्तं रूपसन्धिं, भिदुरधर्म्माद्याघातौदारिकं पञ्चेन्द्रियनिर्वृत्तिलाभावसरात्मकं, दृष्ट्वा च विविधातङ्कजनितान् स्पर्शानध्यासयेदिति ॥ एतत्पश्यतश्च यत्स्यात्तदाह—

लोक० १-
उद्देशकः२

समुप्पेहमाणस्स इक्काययणरयस्स इह विप्पमुक्कस्स नत्थि मग्गे विरयस्स त्तिबेमि । (सू० १४८)

॥ २०६ ॥

सम्यगुत्प्रेक्षमाणस्य-पश्यतोऽनित्यताघातमिदं शरीरमित्येवमवधारयतो नास्ति मार्ग इति सम्बन्धः, किं च-आङ्-अभिविधौ समस्तपापारम्भेभ्यः आत्मा आयत्यते-आनियम्यते यस्मिन् कुशलानुष्ठाने वा यत्नवान् क्रियत इत्यायतनं-ज्ञानादित्रयम् एकम्-अद्वितीयमायतनमेकायतनं तत्र रतस्तस्य, किं च—'इह' शरीरे जन्मनि वा विविधं परमार्थभावनया शरीरानुबन्धात् प्रमुक्तो विप्रमुक्तस्तस्य 'नास्ति' न विद्यते, कोऽसौ?—'मार्गो' नरकतिर्यङ्मनुष्यगमनपद्धतिः, वर्त्तमानसामीप्ये वर्त्तमानदर्शनान्न भविष्यतीति नास्तीत्युक्तं, यदिवा तस्मिन्नेव जन्मनि समस्तकर्म्मक्षयोपपत्तेर्नास्ति नरकादिमार्गः, कस्येति दर्शयति—'विरतस्य' हिंसाद्याश्रवद्वारेभ्यो निवृत्तस्य, इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् सुधर्म्मस्वाम्यात्मानमाह, यद्भगवता वीरवर्द्धमानस्वामिना दिव्यज्ञानेनार्थानुपलभ्य वाग्योगेनोक्तं तदहं भवतां ब्रवीमि, न स्वमतिविरचनेनेति । विरत एव मुनिर्भवत्येतत्प्रतिपाद्य साम्प्रतम् 'अविरतवादी परिग्रहवानि'ति यदुक्तं तत्प्रतिपादयन्नाह—

आवंती केयावंती लोगंसि परिग्गहावंती, से अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा एएसु चेव परिग्गहावंती, एतदेव एगेसिं महब्भयं भवइ, लोगवित्तं च णं उवेहाए, एए संगे अवियाणओ । (सू० १४९)

यावन्तः केचन लोके 'परिग्रहवन्तः' परिग्रहयुक्ताः स्युस्तत(त्र) एवम्भूतपरिग्रहसद्भावादित्याह—'से अप्पं वा' इत्यादि, तद्द्रव्यं यत्परिगृह्यते तदल्पं वा-स्तोकं वा स्यात् कपर्दकादि, बहु वा स्यात् धनधान्यहिरण्यग्रामजनपदादि, अणु वा स्यात् मूल्यतस्तृणकाष्ठादि प्रमाणतो वज्रादि, स्थूलं वा स्यात् मूल्यतः प्रमाणतश्च हस्त्यश्वादि, एतच्च चित्तवद्वा स्याद्-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २०७ ॥

चित्तवद्वेति । एतेन च परिग्रहेण परिग्रहवन्तः सन्त एतेष्वेव परिग्रहवत्सु गृहस्थेष्वन्तर्वर्त्तिनो व्रतिनोऽपि स्युः, यदिवैतेष्वेव षट्सु जीवनिकायेषु विषयभूतेष्वल्पादिषु वा द्रव्येषु मूर्च्छां कुर्वन्तः परिग्रहवन्तो भवन्ति, तथा चाविरतो विरतिवादं वदन्नल्पादपि परिग्रहात् परिग्रहवान् भवति, एवं शेषेष्वपि व्रतेष्वायोज्यम्, एकदेशापराधादपि सर्वापराधितासम्भवः, अनिवारितास्रवत्वात् । यद्येवमल्पेनापि परिग्रहेण परिग्रहवत्त्वमतः पाणिपुटभोजिनो दिगम्बराः सरजस्कबोटिकादयोऽपरिग्रहाः स्युः, तेषां तदभावात्, नैतदस्ति, तदभावादित्यसिद्धो हेतुः, तथाहि-सरजस्कानामस्थ्यादिपरिग्रहाद्बोटिकानामपि पिच्छिकादिपरिग्रहाद् अन्त(न्तत)श्च शरीराहारादिपरिग्रहसद्भावात्, धर्मोपष्टम्भकत्वाददोष इति चेद् तद् इतरत्रापि समानं, किं दिगम्बराग्रहग्रहेणेति । एतच्चाल्पादिपरिग्रहेण परिग्रहवत्त्वमपरिग्रहाभिमानिनां चाहारशरीरादिकं महतेऽनर्थायेति दर्शयन्नाह—'एतदेवे'त्यादि, एतदेव-अल्पबहुत्वादिपरिग्रहेण परिग्रहवत्त्वमेकेषां-परिग्रहवतां नरकादिगमनहेतुत्वात् सर्वस्याविश्वासकारणाद्वा महाभयं भवति, प्रकृतिरियं परिग्रहस्य, यदुत-तद्वान् सर्व्वस्माच्छकति, यदिवैतदेव शरीराहारादिकमपरस्याल्पस्यापि पात्रत्वक्त्राणादेर्द्धर्म्मोपकरणस्याभावाद् गृहिगृहे सम्यगुपायाभावादविधिनाऽशुद्धमाहारादिकं भुञ्जानस्य कर्म्मबन्धजनितमहाभयहेतुत्वान्महाभयं, तथैतद्धर्मशरीरं समस्ताच्छादनाभावाद्बीभत्सं परेषां महाभयं, तन्निरवद्यविधिपालनाभावाच्च महाभयमिति । यतः परिग्रहो महाभयमतोऽपदिश्यते—'लोगं' इत्यादि, 'लोकस्य' असंयतलोकस्य 'वित्तं' द्रव्यमल्पादिविशेषणविशिष्टं, चशब्दः पुनःशब्दार्थे, णमिति वाक्यालङ्कारे, लोकवित्तं लोकवृत्तं वा आहारभयमैथुनपरिग्रहोत्कटसंज्ञात्मकं महते भयाय पुनरुत्प्रेक्ष्य-ज्ञात्वा ज्ञपरिज्ञया प्रत्याख्यानपरि-

लोक० ५
उद्देशकः२

॥ २०७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञया परिहरेत् । तत्परिहर्तुश्च यत्स्यात्तदाह—'एए संगे' इत्यादि, 'एतान्' अल्पादिद्रव्यपरिग्रहसङ्गान् शरीराहारादिसङ्गान् वा 'अविजानतः' अकुर्वाणस्य वा तत्परिग्रहजनितं महाभयं न स्यात् ॥ किं च—

से सुपडिबद्धं सूयणीयंति नच्चा पुरिसा परमचक्खू विपरिक्कमा, एएसु चेव बंभचेरं तिबेमि, से सुयं च मे अज्झत्थयं च मे—बंधपमुक्खो अज्झत्थेव, इत्थ विरए अणगारे दीहरायं तितिक्खए, पमत्ते बहिया पास, अप्पमत्तो परिव्वए, एयं मोणं सम्मं अणुवासिज्जासि त्तिबेमि (सू० १५०) । लोकसाराध्ययने द्वितीयोद्देशकः ५—२ ॥

'से' तस्य परिग्रहपरिहर्तुः सुष्ठु प्रतिबद्धं सुप्रतिबद्धं सुष्ठूपनीतं सूपनीतं ज्ञानादि इत्येतत् ज्ञात्वा 'हे पुरुष !' मानव ! परमं ज्ञानं चक्षुर्यस्यासौ परमचक्षुः मोक्षैकदृष्टिर्वा सन् विविधं तपोऽनुष्ठानविधिना संयमे कर्म्मणि वा पराक्रमस्वेति । अथ किमर्थं पराक्रमणोपदेश इत्यत आह—'एएसु चेवे' त्यादि, य इमे परिग्रहविरताः परमचक्षुषश्चैतेष्वेव परमार्थतो ब्रह्मचर्यं नान्येषु, नवविधब्रह्मचर्यगुप्त्यभावाद्, यदिवा ब्रह्मचर्याख्योऽयं श्रुतस्कन्धः, एतद्ब्राह्म्यमपि ब्रह्मचर्यं तदेतेष्वेवापरिग्रहवत्सु, इतिरधिकारपरिसमाप्तौ, ब्रवीम्यहं यदुक्तं वक्ष्यमाणं च सर्वज्ञोपदेशादित्याह—'से सुअं च मे' इत्यादि, तद्यत् कथितं यच्च कथयिष्यामि तच्छ्रुतं मया तीर्थकरसकाशात् तथा आत्मन्यधि अध्यात्मं ममैतच्चेतसि व्यवस्थितं, किं तदध्यात्मनि स्थितमिति दर्शयति—बन्धात्सकाशान्मोक्षः बन्धप्रमोक्षस्तथा 'अध्यात्मन्येव' ब्रह्मचर्ये व्यवस्थितस्यैवेति । किं च—'इत्थ' इत्यादि, 'अत्र' अस्मिन् परिग्रहे जिघृक्षिते विरतः, कोऽसौ ?—नास्यागारं—गृहं विद्यत इत्यनगारः, स एवम्भूतो 'दीर्घरात्रं' यावज्जीवं परिग्रहाभावात् यत् क्षुत्पिपासादिकमागच्छति तत् 'तितिक्षेत' सहेत । पुनरप्युपदेशदानायाह—'पमत्ते' इत्यादि, प्रमत्तान्—विषयादिभिः प्रमादैर्बहिर्द्धर्म्माद्व्यवस्थितान् पश्य गृहस्थतीर्थिकादीन् । दृष्ट्वा च किं कुर्यादिति दर्शयति—अप्रमत्तः सन् संयमानुष्ठाने परिव्रजेदिति । किं च—'एय' मित्यादि, 'एतत्' पूर्वोक्तं संयमानुष्ठानं मुनेरिदं मौनं—सर्वज्ञोक्तं सम्यग् 'अनुवासयेः' प्रतिपालयेः 'इति' अधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । लोकसाराध्ययने द्वितीयोद्देशकः समाप्तः

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २०८ ॥

लोक० ५ उद्देशकः ३

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते—अस्य चायमभिसम्बन्धः—इहानन्तरोक्तोद्देशकेऽविरतवादी परिग्रहवानित्यभिहितम्, इह तु तद्विपर्यय उच्यते इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

आवंती केयावंती लोयंसि अपरिग्गहावंती एएसु चेव अपरिग्गहावंती, सुच्चा वई मेहावी पंडियाण निसामिया समियाए धम्मे आरिएहिं पवेइए जहित्थ मए संधी झोसिए एवमन्नत्थ संधी दुज्झोसए भवइ, तम्हा बेमि नो निहणिज्ज वीरियं । (सू० १५१)

॥ २०८ ॥

यावन्तः केचन लोकेऽपरिग्रहवन्तो विरता यतय इत्यर्थः, ते सर्वे एतेष्वेव—अल्पादिषु द्रव्येषु त्यक्तेषु सत्स्वपरिग्रहवन्तो भवन्ति, यदिवैतेष्वेव षट्सु जीवनिकायेषु ममत्वाभावादपरिग्रहा भवन्ति । स्यात्—कथमपारिग्रहभावः स्यादित्याह—'सोच्चा' इत्यादि 'वई'त्ति सुव्व्यत्ययेन द्वितीयार्थे प्रथमाऽतो वाचं—तीर्थकराज्ञामागमरूपां 'श्रुत्वा' आकर्ण्य 'मेधावी' मर्यादाव्यवस्थितः सश्रुतिको हेयोपादेयपरिहारप्रवृत्तिज्ञः, तथा 'पण्डितानां' गणधराचार्यादीनां विधिनियमात्मकं वचनं निशम्य सचित्ताचित्तपरिग्रहपरित्यागादपरिग्रहो भवति । स्यादेतत्—कदा पुनरुत्पन्ननिरावरणज्ञानानां तीर्थकृतां वाग्योगो भवति येनासावाकर्ण्यते ?, उच्यते, धर्म्मकथाऽवसरे, किम्भूतैस्तैः पुनर्धर्म्मः प्रवेदित इत्यारेकापनोदार्थमाह—'समिय'त्ति 'समता' समशत्रुमित्रता तयाऽऽर्यैर्द्धर्म्मः प्रवेदित इति, उक्तं च—"जो चंदणेण बाहुं आलिंपइ वासिणा व तच्छेति । संथुणइ जो अ णिंदति महेसिणो तत्थ समभावा ॥ १ ॥" यदिवाऽऽर्येषु—देशभाषाचरित्राऽऽर्येषु समतया भगवता धर्म्मः प्रवेदितः, तथा चोक्तम्—"जह्म पुण्णस्स कत्थइ तहा तुच्छस्स कत्थई"[1]त्यादि, अथवा शमिनो भावः शमिता तया सर्वहेयधर्म्मारातीयवर्त्तिभिः आर्यैः प्रकर्षेणादौ वा धर्म्मो वेदितः प्रवेदितः, इन्द्रियनोइन्द्रियोपशमेन तीर्थकृद्भिर्द्धर्म्मः प्रज्ञापित इतियावत्। स्याद्—अन्यैरपि स्वाभिप्रायेण धर्म्मः प्रवेदिता एवेत्यतस्तद्व्युदासार्थं भगवानेवाह—'जहेत्थे'त्यादि, सदेवमनुजायां पर्षदि भगवानेवमाह—यथाऽत्र मया ज्ञानादिको मोक्षसन्धिः 'झोसिओ'त्ति सेवित इति, यदिवा 'अत्र' अस्मिन् ज्ञानदर्शनचारित्रात्मके मोक्षमार्गे समभावात्मके इन्द्रियनोइन्द्रियोपशमरूपे मया मुमुक्षुणा स्वत एव सन्धानं सन्धिः—कर्म्मसन्ततिः सन्धीयत इति वा भवाद्भवान्तरमनेनेति सन्धिः—अष्टप्रकारकर्म्मसन्ततिरूपः स

१ यश्चन्दनेन बाहुं आलिम्पति वास्या वा तक्ष्णोति । संस्तौति यश्च निन्दति महर्षयस्तत्र समभावाः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

झोषितः–क्षपितः अतो य एव तीर्थकृद्भिर्द्धर्म्मोऽभिहितः स एव मोक्षमार्गो नापर इत्येतदेवाह–यथाऽत्र मया सन्धिर्झोषितः एवमन्यत्र–अन्यतीर्थिकप्रणीते मोक्षमार्गे सन्धिः–कर्म्मसन्ततिरूपः दुर्झोष्यो भवति–दुःक्षयो भवति, असमीचीनतया तदुपायाभावाद्, यदि नाम भगवताऽत्र कर्म्मसन्धिर्झोषितस्ततः किमित्याह–यस्मादस्मिन्नेव मार्गे व्यवस्थितेन मयाऽपि विकृष्टतरेण तपसा कर्म्म क्षपितं ततोऽन्योऽपि मुमुक्षुः संयमानुष्ठाने तपसि च वीर्यं 'नो निहन्यात्' नो निगूहयेद् अनिगूहितबलवीर्यो भूयाद्, एतदहं ब्रवीमि परमकारुण्याकृष्टहृदयः परहितैकोपदेशदायीत्येतद्वीरवर्द्धमानस्वाम्याह, सुधर्मस्वामी स्वशिष्याणां कथयति स्म ॥ कश्चैवम्भूतः स्यादित्याह—

जे पुव्वुट्ठाई नो पच्छानिवाई, जे पुव्वुट्ठाई पच्छानिवाई, जे नो पुव्वुट्ठायी नो पच्छानिवाई, सेऽवि तारिसिए सिया, जे परिन्नाय लोगमन्नेसयंति । (सू० १५२)

यः कश्चिद्विदितसंसारस्वभावतया धर्म्मचरणैकप्रवणमनाः पूर्वं–प्रव्रज्याऽवसरे संयमानुष्ठानेनोत्थातुं शीलमस्येति पूर्वोत्थायी पश्चाच्च श्रद्धासंवेगतया विशेषेण वर्द्धमानपरिणामो नो निपाती, निपतितुं शीलमस्येति विगृह्य णिनिः निपतनं वा निपातः सोऽस्यास्तीति निपाती, सिंहतया निष्क्रान्तः सिंहतया विहारी च गणधरादिवत् प्रथमो भङ्गः । द्वितीयभङ्गं सूत्रेणैव दर्शयन्नाह–पूर्वमुत्थातुं शीलमस्येति पूर्वोत्थायी, पुनर्विचित्रत्वात् कर्म्मपरिणतेस्तथाविधभवितव्यतानियोगात्पश्चान्निपाती स्यात्, नन्दिषेणवत्, कश्चिद्दर्शनतोऽपि गोष्ठामाहिलवदिति । तृतीयभङ्गस्य चाभावादनुपादानं, स चायम्—'जे नो पुव्वुट्ठायी पच्छानिवाती', तथाहि–उत्थाने सति निपातोऽनिपातो वा चिन्त्यते, सति धर्म्मिणि धर्म्मचिन्ता, तदुत्थानप्रतिषेधे च दूरोत्सादितैव निपातचिन्तेति। चतुर्थभङ्गदर्शनाय त्वाह–यो हि नो पूर्वोत्थायी न च पश्चान्निपाती सोऽविरत एव गृहस्थः सन्नोत्थायी भवति सम्यग्विरतेरभावात् नापि पश्चान्निपाती उत्थानाविनाभावित्वान्निपातस्य, शाक्यादयो वा चतुर्थभङ्गपतिता द्रष्टव्याः, तेषामप्युभयासद्भावादिति । ननु च गृहस्था एव चतुर्थभङ्गपतिता युक्ता वक्तुं, तथाहि–तेषां सावद्ययोगानुष्ठानेनानुत्थानतया प्रतिज्ञामन्दरारोपाभावान्निपाताभावः, शाक्यादिरपि चतुर्थभङ्गपतित इत्यत आह—'सोऽपि' शाक्यादिर्गणः पञ्चमहाव्रतभारारोपणाभावेन सावद्ययोगानुष्ठानतया नो पूर्वोत्थायी निपातस्य च तत्पूर्वकत्वान्नोपश्चान्निपातीत्यतस्तादृश एव–गृहस्थतुल्य एव स्याद्, आस्रवद्वाराणामुभयेषामप्यसंवृतत्वात्, उदायिनृपमारकवत् । अन्येऽपि ये सावद्यानुष्ठायिनस्तेऽपि तादृक्षा एवेति दर्शयन्नाह–येऽपि स्वयूथ्याः पार्श्वस्थादयो द्विविधयाऽपि परिज्ञया लोकं परिज्ञाय पुनः पचनपाचनाद्यर्थं तमेव लोकमन्वाश्रिता अन्वेषयन्ति वा तेऽपि गृहस्थतुल्या एव भवेयुः ॥ स्वमनीषिकापरिहारार्थमाह—

एयं नियाय मुणिणा पवेइयं, इह आणाकंखी पंडिए अणिहे, पुव्वावररायं जयमाणे, सया सीलं सुपेहाए सुणिया भवे अकामे अझंझे, इमेण चेव जुज्झाहि, किं ते जुज्झेण बज्झओ? (सू० १५३)

'एतद्' यदुत्थाननिपातादिकं प्रागुपन्यस्तं तत्केवलज्ञानावलोकनेन 'नियाय'त्ति ज्ञात्वा 'मुनिना' तीर्थकृता 'प्रवेदितं' कथितम् । इदं चान्यत्रवेदितमित्याह—'इह' अस्मिन् मौनीन्द्रे प्रवचने व्यवस्थितः सन् 'आज्ञां' तीर्थकरोपदेशमाकाङ्क्षितुं शीलमस्येत्याज्ञाकाङ्क्षी–आगमानुसारप्रवृत्तिकः, कश्चैवम्भूतः ?–'पण्डितः' सदसद्विवेकज्ञः 'अस्निहः' स्नेहरहितः । रागद्वेषविप्रमुक्तोऽहर्निशं गुरुनिर्देशवर्ती यत्नवान् स्यादित्येतदाह–पूर्वरात्रं–रात्रेः प्रथमो यामोऽपररात्रं–रात्रेः पाश्चात्यः एतद्यामद्वयमपि 'यतमानः' सदाचारमाचरेत्, मध्यवर्त्तियामद्वयमपि यथोक्तविधिना स्वपन् वैरात्रादिकं विदध्यात्, रात्रियतनाप्रतिपादनेन चाह्नोऽपि प्रतिपादितैव भवति, आद्यन्तग्रहणे मध्यग्रहणस्यावश्यंभावित्वात् । किं च—'सदा' सर्वकालं 'शीलम्' अष्टादशभेदसहस्रसङ्ख्यं संयमं वा यदिवा चतुर्द्धा शीलं–महाव्रतसमाधानं तिस्रो गुप्तयः पञ्चेन्द्रियदमः कषायनिग्रहश्चेत्येतच्छीलं सम्प्रेक्ष्य मोक्षाङ्गतयाऽनुपालयेत् नाक्षिनिमेषमात्रमपि कालं प्रमादवशगो भूयात् । कश्च शीलसम्प्रेक्षकः स्यादित्याह–यो हि श्रुत्वा शीलसम्प्रेक्षणफलं निःशीलनिर्व्रतानां च नरकादिपातविपाकमाकर्ण्यागमात्, 'भवेत्' स्यात् 'अकाम' इच्छामदनकामरहित इति, तथा नास्य 'झञ्झा' माया लोभेच्छा वा विद्यत इत्यझञ्झः, कामझञ्झाप्रतिषेधाच्च मोहनीयोदयः प्रतिषिद्धः, तत्प्रतिषेधाच्च शीलवान् स्यादिति, एतदुक्तं भवति–धर्मं श्रुत्वा स्यात् अकामोऽझञ्झश्चेत्यनेन चोत्तरगुणा गृहीताः, उपलक्षणार्थत्वाच्च मूलगुणा अपि गृहीताः, ततः स्यात् अहिंसकः सत्यवादीत्यादयोऽपि द्रष्टव्यं । ननु चान्यजीवाच्छरीरमित्येवंभावनायुक्तस्यानिगूहितबलवीर्यस्य पराक्रममाणस्याष्टादशशीलाङ्गसहस्रधारिणोऽपि मे यथोपदेशं प्रवर्त्तमानस्यापि नाशेषकर्म्ममलापगमोऽद्यापि भवतीत्यतस्तथाभूतमसाधारणकारणमाचक्ष्व

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येनाहमाश्वेवाशेषमलकलङ्करहितः स्याम्, अहं च भवदुपदेशाद् अपि सिंहेनापि सह युद्धये, न मे कर्म्मक्षयार्थं प्रवृत्तस्य किञ्चिदशक्यमस्तीत्यत्रोत्तरं सूत्रेणैवाह–अनेनैवौदारिकेण शरीरेणेन्द्रियनोइन्द्रियात्मकेन विषयसुखपिपासुना स्वैरिणा सार्द्धं युध्यस्व, इदमेव सन्मार्गावतारणतो वशीकुरु, किमपरेण बाह्यतस्ते युद्धेन?, अन्तरारिषड्वर्गकर्मरिपुजयाद्वा सर्वं सेत्स्यति भवतो, नातोऽपरं दुष्करमस्तीति ॥ किंत्वियमेव सामग्री अगाधसंसाराणवे पर्यटतो भवकोटिसहस्रेष्वपि दुष्प्रापेति दर्शयितुमाह—

जुद्धारिहं खलु दुल्लहं, जहित्थ कुसलेहिं परिन्नाविवेगे भासिए, चुए हु बाले गब्भाइसु रज्जइ, अस्सिं चेयं पवुच्चइ, रूवंसि वा छणंसि वा, से हु एगे संविद्धपहे मुणी, अन्नहा लोगमुवेहमाणे, इय कम्म परिण्णाय सव्वसो से न हिंसइ, संजमई नो पगब्भइ, उवेहमाणो पत्तेयं सायं, वण्णाएसी नारभे कंचणं सव्वलोए एगप्पमुहे विदिसप्पइन्ने निव्विण्णचारी अरए पयासु (सू० १५४)

एतदौदारिकं शरीरं भावयुद्धार्हं, खलुरवधारणे, स च भिन्नक्रमो, दुर्लभमेव–दुष्प्रापमेव, उक्तं च—"ननु पुनरिदमतिदुर्लभमगाधसंसारजलधिविभ्रष्टम् । मानुष्यं खद्योतकतडिल्लताविलसितप्रतिमम् ॥ १ ॥" इत्यादि, पाठान्तरं वा—"जुद्धारियं च दुल्लहं" तत्रानार्यं सङ्ग्रामयुद्धं परीषहादिरिपुयुद्धं त्वार्यं तद् दुर्लभमेव तेन युद्धस्व, ततो भवतोऽशेषकर्म्मक्षयलक्षणो मोक्षोऽचिरादेव भावीति भावार्थः । तच्च भावयुद्धार्हं शरीरं लब्ध्वा कश्चित्तेनैव भवेनाशेषकर्म्मक्षयं विधत्ते, मरुदेवीस्वामिनीव, कश्चित् सप्तभिरष्टभिर्वा भवैर्भरतवत्, कश्चिदपार्द्धपुद्गलपरावर्त्तेन, अपरो न सेत्स्यत्येव, किमित्येवं यत आह–यथा येन प्रकारेण 'अत्र' अस्मिन् संसारे 'कुशलैः' तीर्थकृद्भिः 'परिज्ञाविवेकः' परिज्ञानविशिष्टता, कस्यचित् कोऽप्यध्यवसायः संसारवैचित्र्यहेतुः 'भाषितः' प्रज्ञापितः, स च मतिमता तथैवाभ्युपगन्तव्य इति । तदेव परिज्ञाननानात्वं दर्शयन्नाह–लब्ध्वाऽपि दुर्लभं मनुजत्वं प्राप्य च मोक्षैकगमनहेतुं धर्म्मं पुनरपि कर्म्मोदयात्तस्मात् च्युतो 'बालः' अज्ञः 'गर्भादिषु रज्यते' गर्भ आदिर्येषां कुमारयौवनावस्थाविशेषाणां ते गर्भादयः तेष्वेव गार्द्ध्यमुपयाति, यथैभिः सार्द्धं मम वियोगो मा भूत् इत्यध्यवसायी भवति, यदिवा धर्म्माच्च्युतस्तत्करोति येन गर्भादिषु यातनास्थानेषु सङ्गमुपयाति, 'रिज्जइ'त्ति वा क्वचित्पाठः, रीयते–गच्छतीत्यर्थः । स्यात्–क्वोक्तमिदं? यत् प्राग् व्यावर्णितमित्याह—'अस्मिन्नि'ति आर्हते प्रवचने 'एतत्' पूर्वोक्तं प्रकर्षेणोच्यते प्रोच्यते । एतच्च वक्ष्यमाणमत्रैवोच्यते इति दर्शयन्नाह—'रूपे' चक्षुरिन्द्रियविषयेऽध्युपपन्नो, वाशब्दादन्यत्र वा स्पर्शरसादौ 'क्षणे' प्रवर्त्तते, 'क्षणु हिंसायां' क्षणनं क्षणो–हिंसा तस्यां प्रवर्त्तते, वाशब्दादन्यत्र चानृतस्तेयादाविति, रूपप्रधानत्वाद्विषयाणां रूपित्वाच्च रूपोपादानं, आस्रवद्वाराणां च हिंसाप्रधानत्वात्तदादित्वाच्च तदुपादानमिति । बालो रूपादिविषयनिमित्तं धर्माच्युतः सन् गर्भादिषु रज्यते, अत्रार्हते मार्गे इदमुच्यते, यस्तु पुनर्गर्भादिगमनहेतुं ज्ञात्वा विषयसङ्गं धर्म्मादच्युतो हिंसाद्याश्रवद्वारेभ्यो निवर्त्तते स किंभूतः स्यादित्याह—'स' जितेन्द्रियो, ह्रुवधारणे, स एवैकः–अद्वितीयो 'मुनिः' जगत्त्रयमन्ता 'संविद्धपथः' सम्यग्विद्धः–ताडितः क्षुण्णः पन्थाः–मोक्षमार्गो ज्ञानदर्शनचारित्राख्यो येन स तथा, 'संविद्धभये'त्ति वा पाठः, संविद्धभयो दृष्टभय इत्यर्थः, यो ह्यास्रवद्वारेभ्यो हिंसादिभ्यो निवृत्तः स एव मुनिः क्षुण्णमोक्षमार्ग इति भावार्थः । किं च–अन्येन प्रकारेणान्यथा–विषयकषायाभिभूतं हिंसादिकर्म्मसु प्रवृत्तं 'लोकं' गृहस्थलोकं पाखण्डिलोकं वा पचनपाचनौद्देशिकसचित्ताहारादिप्रवृत्तमुत्प्रेक्षमाणोऽन्यथा वा आत्मानं निवृत्ताशुभव्यापारमुत्प्रेक्षमाणः संविद्धपथो मुनिः स्यात् इति । लोकं चान्यथोत्प्रेक्ष्य किं कुर्यादित्याह–'इति' पूर्वोक्तैर्हेतुभिर्यद्बद्धं कर्म्म तदुपादानं च सर्वतः परिज्ञाय ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञयाऽपि सर्वतः परिहरेत् । कथं परिहरतीत्याह—'स' कर्म्मपरिहर्त्ता कायवाङ्मनोभिर्न हिनस्ति जन्तून् न घातयत्यपरैर्नाप्यनुमन्यते । किं च–पापोपादानप्रवृत्तमात्मानं संयमयति, सप्तदशप्रकारं वा संयमं करोति संयमयति, आचारक्रियन्तं वैतत् संयम इवाचरति संयमयति । किं च—'नो पगब्भइ' 'गल्भ धार्ष्ट्ये' असंयमकर्म्मसु प्रवृत्तः सन् न प्रगल्भत्वमायाति, रहस्यप्यकार्यप्रवृत्तो जिह्रेति न धृष्टतां अवलम्बत इति, उपलक्षणार्थत्वादस्य क्षुण्णमोक्षपथो मुनिर्न क्रुध्यति, न जात्यादिमानमुद्वहति, न वञ्चनां विधत्ते, न लुभ्यति । किमाकलय्यैतत्कुर्यादित्याह—'उत्प्रेक्षमाणः' अवगच्छन् प्रत्येकं प्राणिनां सातं मनोऽनुकूलं नान्यसुखेनान्यः सुखीति नापि परदुःखेन दुःखीत्यतः प्राणिनो न हिंस्यादिति । प्राणिनां प्रत्येकं सातमुत्प्रेक्षमाणश्च किं कुर्यादित्याह–वर्ण्यते–प्रशस्यते येन स वर्णः–साधुकारस्तदादेशी वर्णादेशी–वर्णाभिलाषी सन् नारभते कञ्चन पापारम्भं सर्वस्मिन्नपि लोके, यदिवा–तपःसंयमादिकमप्यारम्भं यशःकीर्त्यर्थं नारभते, प्रवचनो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्भावनार्थं त्वारभते, तदुद्भावकाश्चामी—"प्रावचनी धर्मकथी वादी नैमित्तिकस्तपस्वी च । विद्यासिद्धः ख्यातः कविरपि चोद्भावकास्त्वष्टौ ॥ १ ॥" यदिवा वर्णो–रूपं तदादेशी–तदभिलाषुकः नोद्वर्त्तनादिकाः क्रिया आरभेत, किम्भूतः सन्नेतत्कुर्यादित्याह—'एको' मोक्षोऽशेषमलकलङ्करहितत्वात् संयमो वा रागद्वेषरहितत्वात् तत्र प्रगतं मुखं यस्य स तथा –मोक्षे तदुपाये वा दत्तैकदृष्टिर्न कञ्चन पापारम्भमारभेत इति, किं च–मोक्षसंयमाभिमुखा दिक् ततोऽन्या विदिक् तां प्रकर्षेण तीर्णो विदिक्प्रतीर्णः, स चैवम्भूतः सन्नारम्भी स्यात्, कुमार्गपरित्यागेन न पापारम्भान्वेषी भवतीत्यर्थः, किं च–चरणं चारः–अनुष्ठानं निर्विण्णस्य चारो निर्विण्णचारः सोऽस्यास्तीति निर्विण्णचारी, कुत इति चेत्, यतः 'प्रजास्वरतः' प्रजायन्त इति प्रजाः–प्राणिनस्तत्रारतः–तदारम्भाप्रवृत्तो निर्ममत्वो वा, यश्च शरीरादिष्वपि ममत्वरहितः स निर्विण्णचार्येव भवति, यदिवा प्रजाः–स्त्रियस्तास्वरतः आरम्भेऽपि निर्वेदमागच्छति, कारणाभावे कार्यस्याप्यभावादिति ॥ यश्च प्रजास्वरक्तः आरम्भरहितः स किम्भूतः स्यादित्याह—

से वसुमं सव्वसमन्नागयपन्नाणेणं अप्पाणेणं अकरणिज्जं पावकम्मं तं नो अन्नेसी, जं संमंति पासहा तं मोणंति पासहा जं मोणंति पासहा तं संमंति पासहा, न इमं सक्कं सिढिलेहिं अदिज्जमाणेहिं गुणासाएहिं वंकसमायारेहिं पमत्तेहिं गारमावसंतेहिं, मुणी मोणं समायाए धुणे सरीरगं, पंतं लूहं सेवंति वीरा सम्मत्तदंसिणो, एस ओ-

हन्तरे मुणी, तिण्णे मुत्ते विरए वियाहिए त्तिबेमि (सू० १५५) ॥ लोकसारे तृतीयोद्देशकः ॥ ५–३ ॥

वसु–द्रव्यं, स चात्र संयमस्तद्विद्यते यस्य स निवृत्तारम्भो मुनिर्वसुमान् सर्वं सम्यगन्वागतं प्रज्ञानं पदार्थाविर्भावकं यस्यात्मनस्तेनात्मना सर्वसमन्वागतप्रज्ञानरूपापन्नेन यदकर्त्तव्यं पापकर्म तन्नो कदाचिदप्यन्वेषति, उपलब्धपरमार्थरूपेणात्मना न सावद्यानुष्ठानविधायी स्यादिति भावार्थः । यदेव सम्यक् प्रज्ञानं तदेव पापकर्मवर्जनं, यदेव च पापकर्मवर्जनं तदेव च सम्यक् प्रज्ञानमित्येतद्गतप्रत्यागतसूत्रेणैव दर्शयितुमाह–सम्यगिति–सम्यग्ज्ञानं सम्यक्त्वं वा तत्सहचरितं, अनयोः सहभावादेकग्रहणे द्वितीयग्रहणं न्याय्यं, यदिदं सम्यग्ज्ञानं सम्यक्त्वं वेत्येतत्पश्यत तन्मुनेर्भावो मौनं–संयमानुष्ठानमित्येतत्पश्यत, यच्च मौनमित्येतत् पश्यत तत्सम्यग्ज्ञानं नैश्चयिकसम्यक्त्वं वा पश्यत, ज्ञानस्य विरतिफलत्वात् सम्यक्त्वस्य चाभिव्यक्तिकारणत्वात् सम्यक्त्वज्ञानचरणानामेकताऽध्यवसेयेति भावार्थः । एतच्च न येन केनचिच्छक्यमनुष्ठातुमित्याह–नैतत्सम्यक्त्वादित्रयं सम्यगनुष्ठातुं शक्यं, कैः?—'शिथिलैः' अल्पपरिणामतया मन्दवीर्यैः संयमतपसोर्धृतिदृढिमरहितैरिति, किं च–आर्द्रैः–पुत्रकलत्राद्यनुषङ्गजनितस्नेहादार्द्रीक्रियमाणैरेतत्पूर्वोक्तमशक्यमिति सम्बन्धः, किं च–गुणाः–शब्दादयस्तेष्वास्वादो येषां ते गुणास्वादास्तैरिति, किं च–वक्रः समाचारो येषां ते तथा तैः, मायाविभिरित्यर्थः, तथा–विषयकषायादिप्रमादैः प्रमत्तैरिति, किं च–अगारं–गृहं तद् आद्यक्षरलोपाद्वारमित्युक्तं तदगारमावसद्भिः–सेवमानैः, पापकर्मवर्जनरूपं मौनमनुष्ठानमशक्यमिति सर्वत्र योजनीयं । कथं तर्हि शक्यमित्याह—'मुनिः' जगत्त्रयस्य मन्ता मौनं–मुनित्वमशेषसावद्यानुष्ठानवर्जनरूपं 'समादाय' गृहीत्वा धुनीयाच्छरीरकमौदारिकं कर्मशरीरं वेति । कथं च तद्धुननमित्याह–प्रान्तं–पर्युषितं वल्लचनकाद्यल्पं वा, तदपि रूक्षं विकृतेरभावात्, तत् 'सेवन्ते' तदभ्यवहरन्ति, के ते?–'वीराः' कर्मविदारणसहिष्णवः, किंभूताः?–सम्यक्त्वदर्शिनः समत्वदर्शिनो वा । यश्च प्रान्तरूक्षसेवी स किंगुणः स्यादित्याह—'एषः' अनन्तरोक्तविशेषणविशिष्टः ओघो–भावौघः संसारस्तं तरतीति, कोऽसौ?–मुनिः, वर्त्तमानसामीप्यं वा वर्त्तमानवद्वेति तीर्ण एवासौ, सबाह्याभ्यन्तरसङ्गाभावान्मुक्तवन्मुक्तः, कश्चैवम्भूतो?–यः सावद्यानुष्ठानाद्विरत इत्येवं व्याख्यातः । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । लोकसाराध्ययने तृतीयोद्देशकः परिसमाप्त इति ॥

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः–इहाद्योद्देशके हिंसकस्य विषयारम्भकस्यैकचरस्य मुनित्वाभावः प्रदर्शितो, द्वितीयतृतीययोस्तु हिंसाविषयारम्भपरिग्रहव्युदासेन तद्व्रतो दोषं प्रदर्श्य विरत एव मुनिर्भवतीत्येतत्प्रतिपादितम्, अस्मिंश्च एकचरस्यामुनिभावे दोषोद्भावनतः कारणमाह, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

गामाणुगामं दूइज्जमाणस्स दुज्जायं दुप्परक्कंतं भवइ अवियत्तस्स भिक्खुणो (सू० १५६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रसति बुद्ध्यादीन् गुणानिति ग्रामः, ग्रामादनु–पश्चादपरो ग्रामो ग्रामानुग्रामस्तं, 'दूयमानस्य' अनेकार्थत्वाद्धातूनां विहरतः एकाकिनः साधोर्यत्स्यात् तद्दर्शयति–दुष्टं यातं दुर्यातं, गमनक्रियाया गर्हा, गच्छत एवानुकूलप्रतिकूलोपसर्गसद्भावादर्हन्नकस्येव कृतगतिभेदस्य दुष्टव्यन्तरीजङ्घाच्छेदवत्, तथा दुष्टं पराक्रान्तम्–आक्रान्तं स्थानमेकाकिनो भवति, स्थूलभद्रेर्ष्याश्रितोपकोशागृहसाधोरिवेति, यदिवा–चतुर्म्रोषितभर्तृकागृहोषितसाधोरिव, तस्य महासत्त्वतया अक्षोभेऽपि दुष्पराक्रान्तमेवेति, एतच्च न सर्वस्यैव दुर्यातं दुष्पराक्रान्तं च भवतीत्यतो विशिनष्टि–अव्यक्तस्य भिक्षोरिति, भिक्षणशीलो भिक्षुस्तस्य, किम्भूतस्य?–अव्यक्तस्य, स चाव्यक्तः श्रुतवयोभ्यां स्यात्, तत्र श्रुताव्यक्तो येनाचारप्रकल्पोऽर्थतो नाधिगतो भवति गच्छगतानां तन्निर्गतानां तु नवमपूर्ववृतीयवस्त्विति, वयसा चाव्यक्त आषोडशवर्षाद्गच्छगतानां तन्निर्गतानां च त्रिंशत इति, अत्र चतुर्भङ्गिका, श्रुतवयोभ्यामव्यक्तस्यैकचर्या न कल्पते, संयमात्मविराधनातः इत्याद्यो भङ्गः, तथा श्रुतेनाव्यक्तो वयसा च व्यक्तः, अस्याप्येकचर्या न कल्पते, अगीतार्थत्वादुभयविराधनासद्भावादिति द्वितीयः, तथा श्रुतेन व्यक्तो वयसा चाव्यक्तः, तस्यापि न कल्पते, बालतया सर्वपरिभवास्पदत्वाद् विशेषतः स्तेनकुलिङ्गादीनामिति तृतीयः, यस्तूभयव्यक्तः स सति कारणे प्रतिमामेकाकिविहारित्वमभ्युद्यतविहारं वा प्रतिपद्यताम्, अस्यापि कारणाभावे एकचर्या नानुमता, यतस्तस्यां गुप्तीर्याभाषैषणादिविषया बहवो दोषाः प्रादुष्यन्ति, तथाहि–एकाकी पर्यटन् यदीर्यापथं शोधयति ततः स्वाद्युपयोगाद्भ्रश्यति तदुपयुक्तश्चेन्नेर्यापथं शोधयेदित्यादिकाः शेषा अपि समितयो वाच्याः, अन्यच्च–अजीर्णेन वातादिक्षोभेण वा व्याध्युद्भवे संयमात्मविराधना प्रवचनहीलना च, तत्र यदि करुणापन्ना गृहस्थाः प्रतिजागरणं कुर्युस्तर्ह्यज्ञानतया षट्कायोपमर्दनं कुर्वाणाः संयमबाधामापादयेयुः, अथ न कश्चित्तत्र तथाभूतः कर्त्तव्योद्यतः स्यात् तत आत्मविराधना, तथाऽतिसारादौ मूत्रपुरीषजम्बालान्तर्वर्त्तित्वात् प्रवचनहीलना, अपि च–ग्रामादिव्यवस्थितः सन् धिग्जात्यादिना केशलुञ्चिताद्यधिक्षेपेणाधिक्षिप्तः सन् परस्परोपमर्दकारि दण्डादण्डि भण्डनं विदध्यात्, तच्च गच्छगतस्य न सम्भवति, गुर्वाद्युपदेशसम्भवात्, तदुक्तं च—"[1]अक्कोसहणणमारणधम्मब्भंसाण बालसुलभाणं । लाभं मण्णइ धीरो जहुत्तराणं अभावंमि ॥ १ ॥" इत्येवमादिनोपदेशेन गच्छान्तर्गतो गुरुणाऽनुशास्यते, गच्छनिर्गतस्य पुनर्दोषा एव केवला इति, उक्तं च—"[2]सोहंमिएहिं संमुज्जएहिं एगागिओ अ जो विहरे । आयंकपउरयाए छक्कायवहंमि आवडइ ॥ १ ॥ एगागिअस्स दोसा इत्थी साणे तहेव पडिणीए । भिक्खऽविसोही महव्वय तम्हा सविइज्जए गमणं ॥ २ ॥" इत्यादि, गच्छान्तर्वर्त्तिनस्तु बहवो गुणाः, तन्निश्रया अपरस्यापि बालवृद्धादेरुद्यतविहाराभ्युपगमात्, यथाहि उदके समर्थस्तरन्नपरमपि काष्ठादि विलग्नं तारयति, एवं गच्छेऽप्युद्यतविहार्यपरं सीदन्तमुद्यमयति, तदेवमेकाकिनो दोषान् वीक्ष्य गच्छान्तर्विहारिणश्च गुणान् कारणाभावे व्यक्तेनापि नैकचर्या विधेया, कुतः पुनरव्यक्तेनेति स्थितं । ननु च सति सम्भवे प्रतिषेधो युक्तो, न चास्ति सम्भवः एकाकिविहारितायाः, को हि नाम बालिशः सहायान् विहाय समस्तापायास्पदमेकाकिविहारितामभ्युपेयादिति, अत्रोच्यते, न किञ्चिदपि कर्म्मपरिणतेरशक्यमस्ति, तथाहि

१ आक्रोशवधमारणधर्मभ्रंशानां बालसुलभानाम् । लाभं मन्यते धीरः यथोत्तराणामभावे ॥ १ ॥ २ साधर्मिकेषु सम्यगुद्यतेषु एकाकी च यो विहरेत् । आतङ्कप्रचुरतायां षट्कायवधे स पतति ॥ १ ॥ ३ एकाकिनो दोषाः स्त्री श्वा तथैव प्रत्यनीकः । भिक्षाऽविशोधिः महाव्रतेषु तस्मात्सद्वितीयेन गमनम् ॥ २ ॥

–स्वातन्त्र्यगदागदकल्पस्य समस्तव्यसनप्रवाहसेतुभूतस्याशेषकल्याणनिकेतनस्य शुभाचाराधारस्य गच्छस्यान्तर्वर्त्तिनः क्वचित्प्रमादस्खलिते चोदिताः अवगणय्य सदुपदेशमपर्यालोच्य सद्धर्ममविचार्य कषायविपाककटुकतामनवधार्य परमार्थं पृष्ठतः कृत्वा कुलपुत्रतां वाञ्छात्रादपि केचित्कोपनिघ्नाः सुखैषिणोऽगणितापदो गच्छान्निर्गच्छन्ति, तत्र चैहिकामुष्मिकापायानवाप्नुवन्तीति, उक्तं च—"जह सायरंमि मीणा संखोहं सायरस्स असहंता । णिंति तओ सुहकामी णिग्गयमित्ता विणस्संति ॥ १ ॥ एवं गच्छसमुद्दे सारणवीईहिं चोईया संता । णिंति तओ सुहकामी मीणा व जहा विणस्संति ॥ २ ॥ गच्छंमि केइ पुरिसा सउणी जह पंजरंतरणिरुद्धा । सारणवारणचोइय पासत्थगया परिहरंति ॥ ३ ॥ जहा दियापोयम-पक्खजायं, सवासया पविउमणं मणागं । तमचाइया तरुणमपत्तजायं, ढंकादि अव्वत्तगमं हरेज्जा ॥ ४ ॥" एवमजातसूत्रवयःपक्षस्तीर्थिकध्वाङ्क्षादिभिर्विलुप्यते गच्छालयान्निर्गतो वाञ्छात्रेणापि चोदितः सन् इति । एतदर्शयितुमाह—

वयसावि एगे बुइया कुप्पंति माणवा, उन्नयमाणे य नरे महया मोहेण मुज्झइ, संबाहा बहवे भुज्जो २ दुरइक्कम्मा अजाणओ अपासओ, एयं ते मा होउ, एयं कुसलस्स

१ यथा सागरे मीनाः संक्षोभं सागरस्यासहमानाः । निर्गच्छन्ति ततः सुखकामिनो निर्गतमात्रा विनश्यन्ति ॥ १ ॥ एवं गच्छसमुद्रे स्मारणवीचिभिर्नोदिताः सन्तः । निर्गच्छन्ति ततः सुखकामिनो मीना इव यथा विनश्यन्ति ॥ २ ॥ गच्छे केचित् पुरुषाः शकुनयो यथा पञ्जरान्तरनिरुद्धाः । स्मारणवारणचोदिताः पार्श्वस्थतां गताः परिव्रजन्ति ॥३॥ यथा द्विजपोतमजातपक्षं खकादावासकात् क्षपितुमनसं मनाग् । तत्राशक्तं तरुणमजातपत्रं, ढङ्कादयोऽव्यक्तगमं हरेयुः(रन्ति)॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दंसणं, तद्दिट्ठीए तम्मुत्तीए तप्पुरक्कारे तस्सन्नी तन्निवेसणे, जयं विहारी चित्तनिवाई पंथनिज्झाई पलिवाहिरे, पासिय पाणे गच्छिज्जा (सू० १५७)

काचत्तपःसंयमानुष्ठानादावसीदन्तः प्रमादस्खलिता वा गुर्वादिना धर्मेण वचसाऽपि 'एके' अपुष्टधर्माणः अनवगततपरमार्थाः 'उक्ताः' चोदिताः कुप्यन्ति, के ते ?–'मानवा' मनुजाः क्रोधवशगा भवन्ति, ब्रुवते च–कथमहमनेनेयतां साधूनां मध्ये तिरस्कृतः, किं मया कृतम् ?, अथवाऽन्येऽप्येतत्कारिणः सन्त्येव, ममाप्येवम्भूतोऽधिकारोऽभूत्, धिग्मे जीवितमित्यादि, महामोहोदयेन क्रोधतमिस्राच्छादितदृष्टयः उज्झितसमुचिताचारा उभयान्यतराव्यक्ता मीना इव गच्छसमुद्रादिर्लिंगत्य विनाशमाप्नुवन्ति, यदिवा वचसाऽपि यथा क इमे लुञ्चिताः मलोपहतगात्रयष्टयः प्रगेतनावसर एवास्माभिर्द्रष्टव्या इत्यादिनोक्ता एके क्रोधान्धाः कुप्यन्ति मानवाः, अपिशब्दात्कायेनापि स्पृष्टाः कुप्यन्ति, कुपिताश्चाधिकरणादि कुर्वन्तीत्येवमादयो दोषा अव्यक्तैकचर्यायां गुर्वादिनियामकाभावाद्भवेयुरिति, गुरुसान्निध्ये चैवम्भूत उपदेशः सम्भवेत्, तद्यथा—"आकुष्टेन मतिमता तत्त्वार्थान्वेषणे मतिः कार्या । यदि सत्यं कः कोपः ? स्यादनृतं किं नु कोपेन ? ॥ १ ॥" तथा—"अपकारिणि कोपश्चेत्कोपे कोपः कथं न ते ? । धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि ॥ २ ॥" इत्यादि, किं पुनः कारणं वचसाऽप्यभिहिता ऐहिकामुष्मिकापकारकारिणः स्वपरबाधकस्य क्रोधस्यावकाशं ददतीत्याह–उन्नतो मानोऽस्येत्युन्नतमानः, उन्नतं वाऽऽत्मानं मन्यत इति, स चैवम्भूतो 'नरो' मनुष्यो महता मोहेन–प्रबलमोहनीयोदयेन

अज्ञानोदयेन वा 'मुह्यति' कार्याकार्यविचारविवेकविकलो भवति, स च मोहमोहितः केनचिच्छिक्षणार्थमभिहितो मिथ्यादृष्टिना वा वाचा तिरस्कृतो जात्यादिमदस्थानान्यतरसद्भावेनोन्नतमानमन्दरारूढः कुप्यति, मामप्येवमयं तिरस्करोति, धिग्मे जातिं पौरुषं विज्ञानं चेत्येवमभिमानग्रहगृहीतो वाङ्मात्रादपि गच्छान्निर्गच्छति, तन्निर्गतो वाऽधिकरणादिविडम्बनयाऽऽत्मानं विडम्बयति, अथवोन्नम्यमानः केनचित् दुर्विदग्धेनाहोऽयं महाकुलप्रसूत आकृतिमान् पटुप्रज्ञो मृष्टवाक् समस्तशास्त्रवेत्ता सुभगः सुखसेव्यो वेत्यादिना वचसा तथ्येनातथ्येन वोत्प्रास्यमान उन्नतमानो गर्वाध्मातो महता चारित्रमोहेन मुह्यति संसारमोहेन वोह्यत इति । तस्य चोन्नतमानतया महामोहेन मुह्यतो मोहाच्च वाङ्मात्रेणापि कुप्यतः कोपाच्च गच्छनिर्गतस्यानभिव्यक्तस्य भिक्षोर्ग्रामानुग्राममेकाकिनः पर्यटतो यत्स्यात्तदाह–तस्याव्यक्तस्यैकचरस्य पर्यटतः सम्बाधयन्तीति सम्बाधाः–पीडाः उपसर्गजनिता नानाप्रकारातङ्कजनिता वा भूयो भूयो बह्व्यः स्युः, ताश्चैकाकिनाऽव्यक्तेन निरवद्यविधिना 'दुरतिक्रमा' दुरतिलङ्घनीयाः, किम्भूतस्य दुरतिक्रमा इत्याह–तासां नानाप्रकारनिमित्तोत्थापितानां बाधानामतिसहनोपायमजानानस्य सम्यक्करणसहनफलं चापश्यतो दुरतिक्रमणीयाः पीडा भवन्ति, ततश्चातङ्कपीडाकूलीभूतः सन्नेषणामपि लङ्घयेत्, प्राण्युपमर्दमप्यनुमन्येत, वाक्कण्टकनुदितः सन्नव्यक्ततया प्रज्वलेत, नैतद्भावयेद् यथा मत्कर्मविपाकापादिता एताः पीडाः परोऽत्र केवलं निमित्तभूतः, किं च—"आत्मद्रोहममर्यादं, मूढमुज्झितसत्पथम् । सुतरामनुकम्पेत, नरकार्चिष्मदिन्धनम् ॥ १ ॥" इत्यादिका भावना आगमापरिमलितमतेर्न भवेदिति । एतत्प्रदर्श्य भगवान् विनेयमाह—'एतद्' एकचर्याप्रतिपन्नस्य बाधादुरतिक्रमणीयत्वमजानानस्यापश्यतश्च 'ते' तव

मदुपदेशवर्त्तिनो मा भवतु, आगमानुसारितया सदा गच्छान्तर्वर्त्ती भवेत्यर्थः । सुधर्मस्वाम्याह—'एतत्' पूर्वोक्तं तत् 'कुशलस्य' श्रीवर्द्धमानस्वामिनो 'दर्शनम्' अभिप्रायो यथाऽव्यक्तस्यैकचरस्य दोषाः सततमाचार्यसमीपवर्त्तिनश्च गुणा इति । आचार्यसमीपवर्त्तिना च किं विधेयमित्याह–तस्य–आचार्यस्य दृष्टिस्तदृष्टिस्तया सततं वर्त्तितव्यं हेयोपादेयार्थेषु, यदिवा तस्मिन् संयमे दृष्टिस्तदृष्टिः, स एव वाऽऽगमो दृष्टिस्तदृष्टिस्तया सर्वकार्येषु व्यवहर्त्तव्यम्, तथा–तेनोक्ता सर्वसङ्गेभ्यो विरतिर्मुक्तिस्तया सदा यतितव्यम्, तथा पुरस्करणं पुरस्कारः–सर्वकार्येष्वग्रतः स्थापनं, तस्य–आचार्यस्य पुरस्कारस्तत्पुरस्कारस्तस्मिन्–तद्विषये यतितव्यम्, तथा तस्य संज्ञा तत्संज्ञा–तज्ज्ञानं तद्वांस्तत्संज्ञी सर्वकार्येषु स्यात्, न स्वमतिविरचनया कार्यं विदध्यात्, तथा तस्य–गुरोर्निवेशनं–स्थानं यस्यासौ तन्निवेशनः, सदागुरुकुलवासी स्यादिति भावः । तत्र गुरुकुले निवसन् किम्भूतः स्यादित्याह–यतमानो–यतनया विहरणशीलो विहारी स्यात्, यतमानः प्राण्युपमर्दनमकुर्वन् प्रत्युपेक्षणादिकाः क्रियाः कुर्यादिति, किं च–चित्तम्–आचार्याभिप्रायस्तेन निपतितुं–क्रियायां प्रवर्त्तितुं शीलमस्येति चित्तनिपाती सदा स्यादिति, तथा गुरोः क्वचिद्गतस्य पन्थानं निर्द्धातुं–प्रलोकितुं शीलमस्येति पथिनिर्द्धायी, उपलक्षणं चैतत् तेन सुषुप्सोः संस्तारकप्रलोकी बुभुक्षोराहारान्वेषीत्यादिना गुरोराराधकः सदा स्यात्, किं च–परिः–समन्तात् गुरोरवग्रहात् पुरतः पृष्ठतो वाऽवस्थानात्सदा कार्यमृते बाह्यः स्याद्, एतस्माच्च सूत्रात्रयः ईर्योद्देशका निर्गता इति । किं च–क्वचित्कार्यादौ गुर्वादिना प्रेषितः सन् दृष्ट्वा प्राणिनो युगमात्रदृष्टिस्तदुपघातं परिहरन् गच्छेत् । किं च—

से अभिक्कममाणे पडिक्कममाणे संकुचमाणे पसारेमाणे विणिवट्टमाणे संपलिज्जमाणे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगया गुणसमियस्स रीयओ कायसंफासं समणुचिन्ना एगतिया पाणा उद्दायंति, इहलोगवेयणविज्जावडियं, जं आउट्टिकयं कंमं तं परिन्नाय विवेगमेइ, एवं से अप्पमाएण विवेगं किट्टइ वेयवी (सू० १५८)

'स' भिक्षुः सदा गुर्वादेशविधायी एतद्व्यापारवान् भवति, तद्यथा–अभिक्रामन्–गच्छन् प्रतिक्रामन्–निवर्त्तमानः सङ्कुचन् हस्तपादादिसङ्कोचनतः प्रसारयन् हस्तादीनवयवान् विनिवर्त्तमानः समस्ताशुभव्यापारात्, सम्यक् परिः–समन्ताद्धस्तपादादीनवयवांस्तन्निक्षेपस्थानानि वा रजोहरणादिना मृजन्–परिमृजन् गुरुकुलवासे वसेदिति सर्वत्र सम्बन्धनीयं, तत्र निविष्टस्य विधिः–भूम्यामेकमूरुं व्यवस्थाप्य द्वितीयमुत्क्षिप्य तिष्ठेत्, निश्चलस्थानासहिष्णुतया भूमीं प्रत्युपेक्ष्य प्रमार्ज्य च कुक्कुटीविजृम्भितदृष्टान्तेन सङ्कोचयेत् प्रसारयेद्वा, स्वपन्नपि मयूरवत्स्वपिति, स किलान्यसत्त्वभयादेकपार्श्वशायी सचेतनश्च स्वपिति, निरीक्ष्य च परिवर्त्तनादिकाः क्रिया विधत्ते, इत्येवमादि संपरिमृजन् सर्वाः क्रियाः करोति । एवं चाप्रमत्ततया पूर्वोक्ताः क्रियाः कुर्वतोऽपि कदाचिदवश्यंभावितया यत्स्यात्तदाह—'एकदा' कदाचित्, 'गुणसमितस्य' गुणयुक्तस्याप्रमत्ततया यतेः 'रीयमाणस्य' सम्यगनुष्ठानवतोऽभिक्रामतः परिक्रामतः सङ्कुचतः प्रसारयतो विनिवर्त्तमानस्य संपरिमृजतः कस्याञ्चिदवस्थायां कायः–शरीरं तत्संस्पर्शमनुचीर्णाः–कायसङ्गमागताः सम्पातिमादयः प्राणिनः एके परितापमाप्नुवन्ति–एके ग्लानतामुपयान्ति एकेऽवयवविध्वंसमापद्यन्ते, अपश्चिमावस्थां तु सूत्रेणैव दर्श-

आ. सू. ३७

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २१७ ॥

यति–एके 'प्राणाः' प्राणिनः 'अपद्रान्ति' प्राणैर्विमुच्यन्ते, अत्र च कर्म्मबन्धं प्रति विचित्रता,' तथाहि–शैलेश्यवस्थाया मशकादीनां कायसंस्पर्शेन प्राणत्यागेऽपि बन्धोपादानकारणयोगाभावान्नास्ति बन्धः, उपशान्तक्षीणमोहसयोगिकेवलिना स्थितिनिमित्तकषायाभावात् सामयिकः, अप्रमत्तयतेर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टतश्चान्तःकोटीकोटीस्थितिरिति, प्रमत्तस्य त्वनाकुट्टिकयाऽनुपेत्यप्रवृत्तस्य क्वचित्प्राण्याद्यवयवसंस्पर्शात् प्राण्युपतापनादौ जघन्यतः कर्म्मबन्ध उत्कृष्टतश्च प्राक्तन एव विशेषिततरः । स च तेनैव भवेन क्षिप्यत इति सूत्रेणैव दर्शयितुमाह–इह–अस्मिन् लोके–जन्मनि वेदनम्–अनुभवनमिहलोकवेदनं तेन वेद्यम्–अनुभवनीयमिहलोकवेदनवेद्यं तत्रापतितमिहलोकवेदनवेद्यापतितं, इदमुक्तं भवति–प्रमत्तयतिनाऽपि यदकामतः कृतं कर्म्म कायसङ्घट्टनादिना तदैहिकभवानुबन्धि, तेनैव भवेन क्षप्यमाणत्वाद्, आकुट्टीकृतकर्मणि तु यद्विधेयं तदाह–यत्तु पुनः कर्म्माकुट्ट्या कृतम्–आगमोक्तकारणमन्तरेणोपेत्य प्राण्युपमर्देन विहितं तत्परिज्ञाय ज्ञपरिज्ञया 'विवेकमेति' विविच्यतेऽनेनेति विवेकः–प्रायश्चित्तं दशविधं तस्यान्यतरं भेदमुपैति, तद्विवेकं वा–अभावाख्यमुपैति–तत्करोति येन कर्म्मणोऽभावो भवति । यथा च कर्म्मणो विवेको भवति तथा दर्शयितुमाह—'एव'मिति वक्ष्यमाणेन प्रकारेण 'से' तस्य कर्म्मणः साम्परायिकस्य सदा वेदविद् 'अप्रमादेन' प्रमादाभावेन दशविधप्रायश्चित्तान्यतरभेदसम्यगनुष्ठानेन 'विवेकम्' अभावं कीर्त्तयति 'वेदवित्' तीर्थकरो वेदविद्वा–आगमविद्गणधरश्चतुर्दशपूर्वविद्वेति ॥ किम्भूतः पुनरप्रमादवान् भवतीत्याह—

लोकसार उद्देशक ५

॥ २१७ ॥

से पभूयदंसी पभूयपरिन्नाणे उवसंते समिए सहिए सयाजए, दट्ठुं विप्पडिवेएइ अप्पाणं किमेस जणो करिस्सइ?, एस से परमारामो जाओ लोगंमि इत्थीओ, मुणिणा हु एयं पवेइयं, उब्बाहिज्जमाणे गामधम्मेहिं अवि निब्बलासए अवि ओमोयरियं कुज्जा अवि उड्ढं ठाणं ठाइज्जा अवि गामाणुगामं दूइज्जिज्जा अवि आहारं वुच्छिदिज्जा अवि चए इत्थीसु मणं, पुव्वं दंडा पच्छा फासा पुव्वं फासा पच्छा दंडा, इच्चेए कलहासंगकरा भवंति, पडिलेहाए आगमित्ता आणविज्जा अणासेवणाए त्ति बेमि, से नो काहिए नो पासणिए नो संपसारणिए नो ममाए णो कयकिरिए वइगुत्ते अज्झप्पसंवुडे परिव्वजइ सया पावं एयं मोणं समणुवासिज्जासित्तिबेमि (सू० १५९) ॥ ५–४ ॥ लोकसारे चतुर्थः ॥

'स' साधुः प्रभूतं प्रमादविपाकादिकमतीतानागतवर्त्तमानं वा कर्म्मविपाकं द्रष्टुं शीलमस्येति प्रभूतदर्शी, साम्प्रतेक्षितया न यत्किञ्चनकारीत्यर्थः, तथा प्रभूतं सत्त्वरक्षणोपायपरिज्ञानं संसारमोक्षकारणपरिज्ञानं वा यस्य स प्रभूतपरिज्ञानः, यथावस्थितसंसारस्वरूपदर्शीत्यर्थः, किं च–उपशान्तः कषायानुदयादिन्द्रियनोइन्द्रियोपशमाद्वा, तथा पञ्चभिः समितिभिः समितः सम्यग्वा मोक्षमार्गमितः समितः, तथा ज्ञानादिभिः सहितः–समन्वितः सह हितेन वा सहितः, 'सदा'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वकाल यतः सदायतः, स एवम्भूतोऽप्रमत्तो गुरोरन्तिकमावसन् प्रमादजनितस्य कर्म्मणोऽन्तं विधत्ते । स च रूयाद्यनुकूलपरीषहोपपत्तौ किं विदध्यादित्याह—'दृष्ट्वा' अवलोक्य स्त्रीजनमुपसर्गकरणायोद्यतमात्मानं 'विप्रतिवेदयति' पर्यालोचयति, तद्यथा—सम्यग्दृष्टिरस्मि, तथोक्षिप्तमहाव्रतभारः शरच्छशाङ्कनिर्म्मलकुलवन्धजन्मा अकार्याकरणतयोत्थित इत्येवमात्मानं पर्यालोचयति, तं च स्त्रीजनं किमेष स्त्रीजनो मम त्यक्तजीविताशस्योज्झितैहिकसुखाभिलाषस्योपसर्गादिकं कुर्यात्?, अथवा वैषयिकसुखस्य दुःखप्रतीकाररूपत्वात् किमेष स्त्रीजनः सुखं विदध्याद्? अन्यो वा पुत्रकलत्रादिको जनो मम मृत्युना जिघृक्षितस्य व्याधिना वाऽऽदित्सितस्य किं तत्प्रतीकारादिकं कुर्यादिति?। यदिवैवं स्त्रीजनस्वभावं चिन्तयेदिति सूत्रेणैव दर्शयति—स एष स्त्रीजन आरमयतीत्यारामः परमश्चासावारामश्च परमारामः ज्ञाततत्त्वमपि जनं हासविलासोपाङ्गनिरीक्षणादिभिर्विब्बोकैर्मोहयतीत्यर्थः, याः काश्चनास्मिन् लोके स्त्रियः ता मोहरूपा विज्ञाय यावन्न परित्यजन्ति तावत्स्वत एव परित्यजेत् । एतच्च तीर्थकरेण प्रवेदितमिति दर्शयितुमाह—'मुनिना' श्रीवर्द्धमानस्वामिनोत्पन्नज्ञानेनैव 'एतत्' पूर्वोक्तं, यथा स्त्रियो भावबन्धनरूपाः, 'प्रवेदितं' प्रकर्षेणादौ वा व्याख्यातमिति । एतच्च वक्ष्यमाणं प्रवेदितमित्याह—उत्—प्राबल्येन मोहोदयाद् बाध्यमानः-पीड्यमानः उद्बाध्यमानः, कैः?—ग्रामधर्म्मैः ग्रामाः—इन्द्रियग्रामास्तेषां धर्म्माः—स्वभावा यथास्वं विषयेषु प्रवर्त्तनं तैरुद्बाध्यमानो गच्छान्तर्गतः सन् गुर्वादिनाऽनुशास्यते, कथमनुशास्यत इत्यत आह—अपिः सम्भावनायां, निर्बलं—निःसारमन्तप्रान्तादिकं यद्द्रव्यं तदाशकः—तद्भोजी स्यात्, यदिवा निर्गतं बलं—सामर्थ्यमस्येति निर्बलः एवम्भूतः सन्नाशीत, बलाभावे च ग्रामधर्म्मोपशमदर्शनाद्, बलाभावश्चाहारहान्या स्यादिति

दर्शयति—अप्यवमौदर्यं कुर्याद्, यदि ह्यन्तप्रान्ताशिनोऽपि न मोहोपशमः स्यात् ततस्तदपि वल्लचनकादिनां द्वात्रिंशत्कवलमात्रं गृह्णीयात्, तेनाप्यनुपशमे कायोत्सर्गादिना कायक्लेशं कुर्यादित्येतदर्शयति—अप्यूर्ध्वं स्थानं तिष्ठेत्, शीतोष्णादौ कायोत्सर्गेणातापनां कुर्यात्, तेनाप्यनुपशमे ग्रामानुग्राममपि विहरेत्, निष्कारणे विहारो निषिद्धो मोहोपशमनार्थं तु कुर्यात्, किं बहुना?, येन येनोपायेन विषयेच्छा निवर्त्तते तत्तत्कुर्यात्, पर्यन्ते आहारमपि व्यवच्छिन्द्याद्, अपि पातं विदध्यात् अप्युद्बन्धनं कुर्यात् न च स्त्रीषु मनः कुर्यादित्याह च—अपिः समुच्चये, स्त्रीषु यन्मनः प्रवृत्तं तत् परित्यजेत्, तत्परित्यागे हि कामा द्विरूपा अपि दूरत एव परित्यक्ता भवन्तीति, उक्तं च—"काम! जानामि ते रूपं, संकल्पात्किल जायसे । न त्वां संकल्पयिष्यामि, ततो मे न भविष्यसि ॥ १ ॥" किं पुनः कारणं स्त्रीषु मनो न विधेयमित्याह—स्त्रीसङ्गप्रवृत्तानामपरमार्थदृशां 'पूर्वं' प्रथममेव तत्सङ्गविच्छेदार्थमर्थोपार्जनप्रवृत्तस्य कृषिवाणिज्यादिक्रियाः कुर्वतोऽगणितक्षुत्पिपासाशीतोष्णादिपरीषहस्यैहिकदुःखरूपा दण्डाः, ते च स्त्रीसम्भोगात्प्रथममेव क्रियन्त इति पूर्वमित्युक्तं, पश्चाच्च विषयनिमित्तजनितकर्म्मविपाकापादितनरकादिदुःखविशेषाः स्पर्शा भवन्ति, यदिवा रूयाद्यकार्यप्रवृत्तस्य पूर्वं दण्डपाताः पश्चाद्धस्तपादच्छेदादिकाः स्पर्शा भवन्ति, यदिवा पूर्वं स्पर्शाः पश्चाद्दण्डपाता इति, अथवा पूर्वं दण्डाः—ताडनादिकाः पश्चात्स्पर्शाः—सम्बाधनालिङ्गनचुम्बनादिकाः, तद्यथा—बन्धानीतावरुद्धराजकुमारीगवाक्षक्षिप्तपतदावीलग्रहणाद्राजपुरुषावलोकनताडनेन मूर्च्छितराजकुमारीतद्दर्शनतो वणिगिन्द्रदत्तस्याग्रतो दण्डाः पश्चात्स्पर्शा इति, पूर्वं वा सुखादिस्पर्शाः पश्चाद्दण्डा ललिताङ्गकस्येवान्येषां चोपपतीनामिति । किं च—इत्येते स्त्रीसम्बन्धाः कलहः—सङ्गामस्तत्रासङ्गः—संबन्धस्तत्करा भवन्ति, यदिवा कलहः—क्रोधः आसङ्गो—राग इत्यतो रागद्वेषकारिणो भवन्ति, यद्येवं ततः किं कुर्यादित्याह—ऐहिकामुष्मिकापायतः स्त्रीसङ्गप्रत्युपेक्षया 'आगमेत्त'त्ति ज्ञात्वा आज्ञापयेदात्मानमनासेवनयेति, इतिरधिकारपरिसमाप्तौ, ब्रवीम्यहं तीर्थकरवचनानुसारेण—दुःखं च ताः पारहर्त्तुमिति । पुनरपि तत्परिहरणोपायमाह—'स' स्त्रीसङ्गपरित्यागी स्त्रीनेपथ्यकथां शृङ्गारकथां वा नो कुर्यात्, एवं च तास्त्यक्ता भवन्ति, तथा—तासां नरकवीथीनां स्वर्गापवर्गमार्गार्गलानामङ्गप्रत्यङ्गादिकं न पश्येत्, यतस्तन्निरीक्ष्यमाणं महतेऽनर्थाय भवतीति, उक्तं च—"सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां, लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव । भ्रूचापाकृष्टमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते, यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥१॥" तथा—ताभिर्नरकविघ्नम्भभूमिभिः सार्द्धं न सम्प्रसारणं—पर्यालोचनमेकान्ते निजस्वस्रादिभिरपि कुर्यादिति, उक्तं च—"मात्रा स्वस्रा दुहित्रा वा, न विविक्तासनो भवेत् । बलवानिन्द्रियग्रामः, पण्डितोऽप्यत्र मुह्यति ॥ १ ॥" इत्येवमादि, तथा—न तासु स्वार्थपरासु ममत्वं कुर्यात्, तथा—कृता—अनुष्ठिता तदुपकारिणी मण्डनादिका क्रिया येन स कृतक्रिय इत्येवम्भूतो न भूयात्, न स्त्रीणां वैयावृत्त्यं कुर्यात्, काययोगनिरोध इति भावः, तथा तथैताः शुभानुष्ठानपरिपन्थिनीर्न वाङ्मात्रेणाप्यालपेदिति वाग्योगनिरोधः, तथा—आत्मन्यधि अध्यात्मं—मनस्तेन संवृत्तोऽध्यात्मसंवृत्तः—स्त्रीभोगादत्तमनाः सूत्रार्थोपयुक्तनिरुद्धमनोयोगः, एवम्भूतश्च किमपरं कुर्यादित्याह—परिः—समन्तात् वर्जयेत्—परिहरेत् 'सदा' सर्वकालं 'पापं' किल्बिषं तदुपादानं वा कर्म्म, उपसं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हरणार्थमाह—'एतद्' यदुद्देशकादेरारभ्योक्तं, मुनेरिदं मौनं मुनिभावो वा तदात्मनि समनुवासयेः—आत्मनि विदध्याः ॥ इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । लोकसाराध्ययन चतुर्थोद्देशकः परिसमाप्तः ॥

उक्तश्चतुर्थोद्देशकः, साम्प्रतं पञ्चम आरभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशकेऽव्यक्तस्यैकचरस्य प्रत्यपायाः प्रदर्शिताः, अतस्तान् परिजिहीर्षुणा सदाऽऽचार्यसेविना भवितव्यम्, आचार्येण च ह्रदोपमेन भाव्यं, तदन्तेवासिना च तपःसंयमगुप्तेन निःसङ्गेन च विहर्त्तव्यमिति, एतत्प्रतिपादनसम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

से बेमि तंजहा—अवि हरए पडिपुण्णे समंसि भोमे चिट्ठइ उवसंतरए सारक्खमाणे, से चिट्ठइ सोयमज्झगए से पास सव्वओ गुत्ते, पास लोए महेसिणो जे य पन्नाणमंता पबुद्धा आरम्भोवरया सम्ममेयंति पासह, कालस्स कंखाए परिव्वयंति त्तिबेमि (सू० १६०)

सशब्दस्तच्छब्दार्थे, यद्भुण आचार्यो भवति तदहं तीर्थकरोपदेशानुसारेण ब्रवीमीति, तद्यथेति वाक्योपन्यासार्थे, अपिशब्दो भङ्गसमुच्चयार्थः, ते चामी भङ्गाः—एको ह्रदो—जलाशयः परिगलत्स्रोताः पर्यागलत्स्रोताश्च, सीतासीतो-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २२० ॥

दाप्रवाहह्रदवत्, अपरस्तु परिगलत्स्रोताः नो पर्यागलत्स्रोताः, पद्मह्रदवत्, तथा परो नो परिगलत्स्रोताः पर्यागलत्स्रोताश्च, लवणोदधिवत्, अपरस्तु नो परिगलत्स्रोता नो पर्यागलत्स्रोताश्च, मनुष्यलोकाद्बहिः समुद्रवत् । तत्राचार्यः श्रुतमङ्गीकृत्य प्रथमभङ्गपतितः, श्रुतस्य दानग्रहणसद्भावात्, साम्परायिककर्म्मापेक्षया तु द्वितीयभङ्गपतितः, कषायोदयाभावेन ग्रहणाभावात्तपःकायोत्सर्गादिना क्षपणोपपत्तेश्चेति, आलोचनामङ्गीकृत्य तृतीयभङ्गपतितः, आलोचनाया अप्रतिश्रावित्वात्, कुमार्गं प्रति चतुर्थभङ्गपतितः, कुमार्गस्य हि प्रवेशनिर्गमाभावात्, यदिवा धर्म्मिभेदेन भङ्गा योज्यन्ते—तत्र स्थविरकल्पिकाचार्याः प्रथमभङ्गपतिताः, द्वितीयभङ्गपतितस्तीर्थकृत्, तृतीयभङ्गस्थस्त्वहालन्दिकः, स च क्वचिदर्थापरिसमाप्तावाचार्यादेर्निर्णयसद्भावात्, प्रत्येकबुद्धास्तूभयाभावाच्चतुर्थभङ्गस्था इति, इह पुनः प्रथमभङ्गपतितेनोभयसद्भाविनाऽधिकारः, तथाभूतस्यैवायं ह्रददृष्टान्तः, स च ह्रदो निर्म्मलजलस्य 'प्रतिपूर्णो' जलजैः सर्वर्तुजैरुपशोभितः समे भूभागे विद्यमानोदकनिर्गमप्रवेशो नित्यमेव तिष्ठति, न कदाचिच्छोषमुपयाति, सुखोत्तारावतारसमन्वितः, उपशान्तम्—अपगतं रजः कालुष्यापादकं यस्य स तथा, नानाविधांश्च यादसां गणान् संरक्षन् सह वा यादोगणैरात्मानमारक्षन्—प्रतिपालयन् सारक्षन् तिष्ठतीत्येषा क्रिया प्रकृतैव । यथा चासौ ह्रदस्तथाऽऽचार्योऽपीति दर्शयति—'सः'

लोक० ५ उद्देशकः५

॥ २२० ॥

१ उदकार्दः करो यावत्कालेन शुष्यति तज्जघन्यं लन्दं तत आरभ्योत्कृष्टं पञ्चरात्रिंदिवलक्षणं लन्दं, तदत्र गृह्यते, उत्कृष्टलन्दस्यानतिक्रमेण चरन्तीति यथालन्दिकाः, पञ्चको गणोऽमुं कल्पं प्रतिपद्यते, मासकल्पक्षेत्रं च ग्रहपञ्चद्वाराभिः षड्विंशीभिर्जिनकल्पिकवत्परिकल्पयन्ति. २ पर्यागलत्स्रोतोवदर्थापेक्षया ग्राहकत्वात् तृतीयभङ्गपतित इति गम्यम्.

आचार्यः प्रथमभङ्गपतितः पञ्चविधाचारसमन्वितोऽष्टविधाचार्यसम्पदुपेतः, [तद्यथा—"आयार सुअ सरीरे वयणे वायण मई पओगमई । एए सुसंपया खलु अट्ठमिआ संग्गहपरिन्ना ॥ १॥"] षट्त्रिंशद्गुणगणाधारो ह्रदकल्पो निर्म्मलज्ञानप्रतिपूर्णः समे भूभाग इति संसक्तादिदोषरहिते सुखविहारे क्षेत्रे समो वा ज्ञानदर्शनचारित्राख्यो मोक्षमार्गः उपशमवतां तत्र तिष्ठति—समध्यास्ते, किंभूतः ?—'उपशान्तरजा' उपशान्तमोहनीय इति, किं कुर्वन् ?—जीवनिकायान् रक्षन् स्वतः परतश्च सदुपदेशदानतो नरकादिपाताद्वेति, 'स्रोतोमध्यगत' इत्यनेन प्रथमभङ्गपतितं स्थविराचार्यमाह, तस्य हि श्रुतार्थदानग्रहणसद्भावात् स्रोतोमध्यगतत्वम्, स च किम्भूतः स्यादित्याह—'सः' आचार्योऽक्षोभ्यह्रदकल्पः 'सर्वतः' सर्वप्रकारतयेन्द्रियनोइन्द्रियरूपया गुप्त्या गुप्त इत्येतत्पश्य आचार्यव्यतिरेकेणान्येऽप्येवम्भूता बहवः साधवः सम्भवन्तीत्येतन्निर्दिदिक्षुराह—इह मनुष्यलोके पूर्वव्यावर्णितस्वरूपाः 'महर्षयो' महामुनयः सन्ति, इत्येतत्पश्य, किम्भूतास्ते महर्षय इत्यत आह—न केवलमाचार्या ह्रदकल्पा ये चान्ये साधवस्तेऽपि ह्रदकल्पाः, किम्भूताः ?—प्रकर्षेण ज्ञायतेऽनेनेति प्रज्ञानं—स्वपरावभासकत्वादागमस्तद्वन्तः प्रज्ञानवन्तः, आगमस्य वेत्तार इत्यर्थः, तज्ज्ञा अपि मोहोदयात् क्वचिद्धेतूदाहरणासम्भवे ज्ञेयगहनतया संशयानाः न सम्यक् श्रद्धानं विदध्युरित्यतो विशिनष्टि—'प्रबुद्धाः' प्रकर्षेण यथैव तीर्थकृदाह तथैवावगततत्त्वाः प्रबुद्धाः, तथाभूता अपि कर्म्मगुरुत्वान्न सावद्यानुष्ठानविरतिं कुर्युरित्यतो विशेषयति—'आरम्भोपरताः' आरम्भः—सावद्यो योगस्तस्मादुपरता आरम्भोपरताः, एतच्च न मदुपरोधेन ग्राह्यम् अपि तु स्वत एव कु-

१ आचारः श्रुतं शरीरं वचनं वाचना मतिः प्रयोगमतिः । एताः सुसंपदः खलु अष्टमी संग्रहपरिज्ञा ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २२१ ॥

शास्त्रीयया बुद्ध्या विचार्यमित्याह—एतद्यन्मया प्रोक्तं तत्सम्यग् मध्यस्था भूत्वा समर्यादं यूयमपि पश्यत। अपि चैतत्पश्यत—'कालः' समाधिमरणकालस्तदभिकाङ्क्षया साधवो मोक्षाध्वनि संयमे परिः—समन्ताद्व्रजन्ति परिव्रजन्ति—उद्यच्छन्ति, इतिरधिकारपरिसमाप्तौ, ब्रवीमीत्येतत्प्रकरणोद्देशकाध्ययनश्रुतस्कन्धाङ्गपरिसमाप्तौ प्रयुज्यते, तदिहाधिकारपरिसमाप्तौ द्रष्टव्यमिति ॥ आचार्याधिकारं परिसमापय्य विनेयवक्तव्यतामाह—

लोक० ५ उद्देशकः५

॥ २२१ ॥

वितिगिच्छसमावन्नेणं अप्पाणेणं नो लहइ समाहिं, सिया वेगे अणुगच्छंति असिता वेगे अनुगच्छंति, अणुगच्छमाणेहिं अणणुगच्छमाणे कहं न निव्विज्जे? (सू० १६१)

विचिकित्सा या चित्तविप्लुतिः यथा इदमप्यस्तीत्येवमाकारा युक्त्या समुपपन्नेऽप्यर्थे मतिविभ्रमो मोहोदयाद्भवति, तथाहि—अस्य महतस्तपःक्लेशस्य सिकताकणकवलनिःस्वादस्य स्यात् सफलता न वेति? कृषीबलादिक्रियाया उभयथाऽप्युपलब्धेरिति, इयं च मतिर्मिथ्यात्वांशानुवेधाद्भवति ज्ञेयगहनत्वाच्च, तथाहि—अर्थस्त्रिविधः—सुखाधिगमो दुरधिगमोऽनधिगमश्च श्रोतारं प्रति भिद्यते, तत्र सुखाधिगमो यथा चक्षुष्मतश्चित्रकर्मनिपुणस्य रूपसिद्धिः दुरधिगमस्त्वनिपुणस्य अनधिगमस्त्वन्धस्य, तत्रानधिगमरूपोऽस्त्येव, सुखाधिगमस्तु विचिकित्साया विषय एव न भवति, देशकालस्वभावविप्रकृष्टस्तु विचिकित्सागोचरीभवति, तस्मिन् धर्माधर्माकाशादौ या विचिकित्सेति, यदिवा 'विइगिच्छ'त्ति विद्वज्जुगुप्सा, विद्वांसः—साधवो विदितसंसारस्वभावाः परित्यक्तसमस्तसङ्गास्तेषां जुगुप्सा—निन्दा अस्नानात् प्रस्वेदजलक्लिन्नमलत्वाद्दुर्गन्धिवपुषस्तान्निन्दति—को दोषः स्याद्यदि प्रासुकेन वारिणाऽङ्गक्षालनं कुर्वीरन्नित्यादि जुगुप्सा तां विचिकित्सां विद्वज्जुगुप्सां वा सम्यगापन्नः—प्राप्तः आत्मा यस्य स तथा तेन विचिकित्सासमापन्नेनात्मना नोपलभते 'समाधिं' चित्तस्वास्थ्यं ज्ञानदर्शनचारित्रात्मको वा समाधिस्तं न लभते, विचिकित्साकलुषिन्तान्तःकरणो हि कथयतोऽप्याचार्यस्य सम्यक्त्वारूयां बोधिं नावाप्नोति। यश्चावाप्नोति स गृहस्थो वा स्याद्यतिर्वेति दर्शयितुमाह—'सिताः' पुत्रकलत्रादिभिरवबद्धाः, वाशब्द उत्तरापेक्षया पक्षान्तरमाह, 'एके' लघुकर्म्माणः सम्यक्त्वं प्रतिपादयन्तमाचार्यमनुगच्छन्ति—आचार्योक्तं प्रतिपद्यन्ते, तथा 'असिता वा' गृहवासविमुक्ता वा 'एके' विचिकित्सादिरहिता आचार्यमार्गमनुगच्छन्ति। तेषां च मध्ये यदि कश्चित् कङ्कटुकदेश्यः स्यात् स तान् प्रभूताननपाचीनमार्गप्रतिपन्नानवलोक्यासावपि कर्म्मविवरतः प्रतिपद्येतापीति दर्शयितुमाह—आचार्योक्तं सम्यक्त्वमनुगच्छद्भिर्विरताविरतैः सह संवसंस्तैर्वा चोद्यमानोऽननुगच्छन्—अप्रतिपद्यमानः कथं न निर्वेदं गच्छेद्?, असदनुष्ठानस्य मिथ्यात्वादिरूपां विचिकित्सां परित्यज्याचार्योक्तं सम्यक्त्वमेव प्रतिपद्येतेत्यर्थः, यदिवा सितासितैराचार्योक्तमनुगच्छद्भिः—अवगच्छद्भिर्बुध्यमानैः सद्भिः कश्चिदज्ञानोदयान्मतिजाड्यतया क्षपकादिश्रिरप्रव्रजितोऽप्यननुगच्छन्—अनवधारयन् कथं न निर्विद्येत?, न निर्वेदं तपःसंयमयोर्गच्छेत्, निर्विण्णश्चेदमपि भावयेत्, यथा—नाहं भव्यः स्यां न च मे संयतभावोऽप्यस्तीति, यतः स्फुटविकटमपि कथितं नावगच्छामि, एवं च निर्विण्णस्याचार्याः समाधिमाहुः—यथा—भोः साधो! मा विषादमवलम्बिष्ठाः, भव्यो भवान्, यतो भवता सम्यक्त्वमभ्युपगतं, तच्च न ग्रन्थिभेदमृते, तच्चेदश्च न भव्यत्वमृते, अभव्यस्य हि भव्याभव्यशङ्कायाअभावादिति भावः ॥ किं चायं विरतिपरिणामो द्वादशकषायक्षयोपशमाधन्यतमसद्भावे सति भवति, स च भवताऽवाप्तः, तदेवं दर्शनचारित्रमोहनीये भवतः क्षयोपशमं समागते, दर्शनचारित्रान्यथानुपपत्तेः, यत्पुनः कथ्यमानेऽपि समस्तपदार्थावगतिर्न भवति तज्ज्ञानावरणीयविजृम्भितं, तत्र च श्रद्धानरूपं सम्यक्त्वमालम्बनमित्याह—

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २२२ ॥

लोक० ५ उद्देशकः५

तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं (सू० १६२)

यत्र क्वचित्स्वसमयपरसमयज्ञाचार्याभावात् सूक्ष्मव्यवहितातीन्द्रियपदार्थेषूभयसिद्धदृष्टान्तसम्यग्हेत्वभावाच्च ज्ञानावरणीयोदयेन सम्यग्ज्ञानाभावेऽपि शङ्काविचिकित्सादिरहित इदं भावयेत्, यथा—तदेवैकं सत्यम्—अवितथं, 'निःशङ्कं'मिति अर्हदुक्तेष्वत्यन्तसूक्ष्मेष्वतीन्द्रियेषु केवलागमग्राह्येष्वर्थेष्वेवं स्यात् एवं वा इत्येवमाकारा संशीतिः शङ्का निर्गता शङ्का यस्मिन् प्रवेदने तन्निःशङ्कं, यत्किमपि धर्म्माधर्म्माकाशपुद्गलादि प्रवेदितं, कैः?—'जिनैः'तीर्थकरैः रागद्वेषजयनशीलैः, तत्तथ्यमेवेत्येवम्भूतं श्रद्धानं विधेयं सम्यक्पदार्थानवगमेऽपि, न पुनर्विचिकित्सा कार्येति। किं यतेरपि विचिकित्सा स्याद्येनेदमभिधीयते?, संसारान्तर्वर्त्तिनो मोहोदयात्तत्किं? यन्न स्यादिति, तथा चागमः—"[1]अत्थि णं भंते! समणावि निग्गंथा कंखामोहणिज्जं कम्मं वेदेंति?, हंता अत्थि, कहन्नं समणावि निग्गंथा कंखामोहणिज्जं कम्मं वेयंति?, गोअमा!

१ अस्ति भदन्त! श्रमणा अपि निर्ग्रन्थाः काङ्क्षामोहनीयं कर्म वेदयन्ति?, हन्त अस्ति, कथं श्रमणा अपि निर्ग्रन्थाः काङ्क्षामोहनीयं कर्म वेदयन्ति?, गौतम! तेषु तेषु ज्ञानान्तरेषु चरित्रान्तरेषु शङ्किताः काङ्क्षिता विचिकित्सासमापन्ना भेदसमापन्नाः कालुष्यसमापन्नाः, एवं खलु गौतम! श्रमणा अपि निर्ग्रन्थाः काङ्क्षामोहनीयं कर्म वेदयन्ति, तदालम्बनं 'तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदितम्'। अथ नूनं भदन्त! एवं मनो धारयन् आज्ञाया आराधको भवति?, हन्त गौतम! एवं मनो धारयन् आज्ञाया आराधको भवति.

॥ २२२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसु तेसु नाणन्तरेसु चरित्तंतरेसु संकिया कंखिया विइगिच्छासमावन्ना भेयसमावन्ना कलुससमावन्ना, एवं खलु गोयमा! समणावि निग्गंथा कंखामोहणिज्जं कम्मं वेदंति, तत्थालंबणं 'तमेव सच्चं णीसंकं जं जिणेहिं पवेइयं,' से णूणं भंते! एवं मणं धारेमाणे आणाए आराहए भवति?, हंता गोअमा! एवं मणं धारेमाणे आणाए आराहए भवति" किं चान्यत्? —"वीतरागा हि सर्वज्ञा, मिथ्या न ब्रुवते क्वचित्। यस्मात्तस्माद्वचस्तेषां, तथ्यं भूतार्थदर्शनम् ॥ १ ॥" इत्यादि ॥ सा पुनर्विचिकित्सा प्रविव्रजिषोर्भवत्यागमापरिकर्म्मितमतेः, तत्राप्येतत्पूर्वोक्तं भावयितव्यमित्याह—

सद्धिस्स णं समणुन्नस्स संपव्वयमाणस्स समियंति मन्नमाणस्स एगया समिया होइ १, समियंति मन्नमाणस्स एगया असमिया होइ २, असमियंति मन्नमाणस्स एगया समिया होइ ३, असमियंति मन्नमाणस्स एगया असमिया होइ ४, समियंति मन्नमाणस्स समिया वा असमिया वा समिआ होइ उवेहाए ५, असमियंति मन्नमाणस्स समिया वा असमिया वा असमिया होइ उवेहाए ६, उवेहमाणो अणुवेहमाणं बूया-उवेहाहि समियाए, इच्चेवं तत्थ संधी झोसिओ भवइ, से उट्ठियस्स ठियस्स गइं समणुपासह, इत्थवि बालभावे अप्पाणं नो उवदंसिज्जा (सू० १६३)

श्रद्धा-धर्मेच्छा सा विद्यते यस्यासौ श्रद्धावांस्तस्य 'समनुज्ञस्य' संविग्नविहारिभिर्भावितस्य संविग्नादिभिर्वा गुणैः प्रव्रज्यार्हस्य 'संप्रव्रजतः' सम्यक्प्रव्रज्यामभ्युपगच्छतो विचिकित्सा-शङ्का भवेत्, तत्रैतस्य सम्यग्जीवादिपदार्थावधारणाशक्त्यैदमुपदेष्टव्यम्, यथा-तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदितमिति, तदेवं प्रव्रज्यावसरे तदेव निःशङ्कं यज्जिनैः प्रवेदितमित्येवं यथोपदेशं प्रवर्त्तमानस्य प्रवर्द्धमानकण्डकस्य सत उत्तरकालमपि तदधिकता तत्समता तदूनता तदभावो वा स्यादित्येवंरूपां विचित्रपरिणामतां दर्शयितुमाह-तस्य श्रद्धावतः समनुज्ञस्य संप्रव्रजतस्तदेव निःशङ्कं यज्जिनैः प्रवेदितमित्येतत्सम्यगित्येवं मन्यमानस्य 'एकदा' इत्युत्तरकालमपि शङ्काकाङ्क्षाविचिकित्सादिरहिततया सम्यगेव भवति-न तीर्थकरभाषिते शङ्काद्युत्पद्यत इति १। कस्यचित्तु प्रव्रज्यावसरे श्रद्धानुसारितया सम्यगिति मन्यमानस्य तदुत्तरकालमधीतान्वीक्षिकीकस्य दुर्गृहीतहेतुदृष्टान्तलेशस्य ज्ञेयगहनताव्याकुलितमतेः 'एकदे'ति मिथ्यात्वांशोदयेऽसम्यगिति भवति, तथाहि-असौ सर्वनयसमूहाभिप्रायतया अनन्तधर्म्माध्यासितवस्तुप्रसाधने सति मोहादेकनयाभिप्रायेणैकांशसाधनाय प्रक्रमते, यदि नित्यं कथमनित्यमनित्यं चेत्कथं नित्यमिति, परस्परपरिहारलक्षणतयाऽनयोरवस्थानात्, तथाहि-अप्रच्युतानुत्पन्नस्थिरैकस्वभावं हि नित्यम् अतोऽन्यत्प्रतिक्षणविशरारुरूपमनित्यमित्येवमादिकमसम्यग्भावमुपयाति, न पुनर्विवेचयति, यथा अनन्तधर्म्माध्यासितं वस्तु सर्वनयसमूहात्मकं च दर्शनमतिगहनं मन्दधियां श्रद्धागम्यमेव न हेतुक्षोभ्यमिति, उक्तं च—"सर्वैर्नयैर्निर्यतनैर्गमसङ्ग्रहाद्यैरेकैकशो विहिततीर्थिकशासनैर्यत्। निष्ठां गतं बहुविधैर्नमपर्ययैस्तो, श्रद्धेयमेव वचनं न तु हेतुगम्यम् ॥ १ ॥" इत्यादि, यतो हेतुः प्रवर्त्तमानः एकनयाभिप्रायेण प्रवर्त्तते, एकं च धर्मं साधयेत्, सर्वधर्म्मप्रसाधकस्य हेतोरसम्भवादिति २। पुनरपि विचित्रभावनामाह-कस्यचित् मिथ्यात्वलेशानुविद्धस्य कथं पौद्गलिकः शब्द इत्यादिकमसम्यगिति मन्यमानस्य 'एकदे'ति मिथ्यात्वपरमाणूपशमतया शङ्काविचिकित्साद्यभावे गुर्वाद्युपदेशतः सम्यगिति भवति, यदि हि पौद्गलिकः शब्दो न स्यात् ततस्तत्कृतावनुग्रहोपघातौ श्रवणेन्द्रियस्य न स्याताम्, अमूर्त्तत्वादाकाशवदित्यादिकं सम्यग् भवति ३। कस्यचित्त्यागमापरिमिलितमतेः कथमेकेनैव समयेन परमाणोर्लोकान्तगमनमित्यादिकमसम्यगिति मन्यमानस्यैकदेति-कुहेतुवितर्काविर्भावावसरे नितरामसम्यगेव भवति, तथाहि—चतुर्दशरज्ज्वात्मकस्य लोकस्याद्यन्ताकाशप्रदेशयोः समयाभेदतया यौगपद्यसंस्पर्शात् तावन्मात्रता परमाणोः स्यात्, प्रदेशयोर्लोकान्तद्वयगतयोर्वैक्यमित्यादिकमसम्यगिति भवति, न त्वसौ स्वाग्रहाविष्ट एतन्नावयति, यथा-विस्रसापरिणामेन शीघ्रगतित्वात् परमाणोरेकसमयेनासङ्ख्येयप्रदेशातिक्रमणं, यथा हि अङ्गुलिद्रव्यमेकसमयेनासङ्ख्येयानप्याकाशप्रदेशानतिलङ्घयति, एतदेव कुत इति चेत्, न हि दृष्टेऽनुपपन्नं नाम, न च सकलप्रमाणप्रष्ठप्रत्यक्षसिद्धेऽर्थेऽनुमानमन्वेष्टव्यं, तथाहि-यद्यनेकप्रदेशातिक्रमणं सामयिकं न भवेत् ततोऽङ्गुलमात्रमपि क्षेत्रमसङ्ख्येयसमयातिक्रमणीयं स्यात्, तथा च सति दृष्टेष्टबाधाऽऽपद्येतेति यत्किञ्चिदेतत् ४। साम्प्रतं भङ्गकोपसंहारद्वारेण परमार्थमाविर्भावयन्नाह-सम्यगित्येवं मन्यमानस्य शङ्काविचिकित्सादिरहितस्य सतस्तद्वस्तु यत्नेन तथारूपतयैव भावितं तत्सम्यग्वा स्यादसम्यग्वा, तथापि तस्य तत्र सम्यगुल्लेखया-पर्यालोचनया सम्यगेव भवति, ईर्यापथोपयुक्तस्य क्वचित्प्राण्युपमर्दवत् ५। साम्प्रतमेतद्विपर्ययमाह-असम्यगिति किञ्चिद्वस्तु मन्यमानस्य शङ्का स्यादवगृदर्शितया छद्मस्थस्य सतस्तद्वस्तु सम्यग्वा स्यादसम्यग्वा, तस्य तदसम्यगेवोल्ले-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षया, असम्यग्पर्यालोचनतयाऽशुद्धाध्यवसायतयेतियावत्, 'यद्यथा शङ्केयेत्तत्तथैव समापद्येते'ति वचनादिति ६ ॥ यदिवा —"समियंति मन्नमाणस्स" इत्याद्यन्यथा व्याख्यायते—शमिनो भावः शमिता 'इतिः' उपप्रदर्शने तामेतां शमिता मन्यमानस्य शुभाध्यवसायिनः 'एकदे'त्युत्तरकालमपि शमितैव भवति—उपशमवत्त्वेनोपजायते, अन्यस्य तु शमितामपि मन्यमानस्य कषायोदयादशमितोपजायत इति, अनया दिशोत्तरभङ्गेष्वपि सम्यगुपयुज्यायोज्यमिति । तदेवं सम्यगसम्यगित्येवं पर्यालोचयन्नपरस्याप्युपदेशदानायालमिति, आह च—आगमपरिकर्मितमतित्वाद्यथावस्थितपदार्थस्वभावदर्शितया सम्यगसम्यगिति चोल्लेक्षमाणः—पर्यालोचयन्नपरमनुल्लेक्षमाणं गड्डरिकायूथप्रवाहप्रवृत्तं गतानुगतिकन्यायानुसारिणं शङ्कया वाऽपश्यन्तं ब्रूयाद्, यथा—'उल्लेक्षस्व'पर्यालोचय सम्यग्भावेन माध्यस्थमवलम्ब्य किमेतदहंदुक्तं जीवादितत्त्वं घटामियर्त्यहोश्चित्नेत्यक्षिणी निमील्य चिन्तयेति भावः । यदिवा उल्लेक्षमाणः संयममुत्-प्राबल्येनेक्षमाणः—संयमे उद्यच्छन्ननुल्लेक्षमाणं ब्रूयात्, यथा—सम्यग्भावापन्नः सन् संयममुल्लेक्षस्व—संयमे उद्योगं कुरु । किमवलम्ब्येत्याह—'इत्येवं' पूर्वोक्तेन प्रकारेण 'तत्र' तस्मिन् संयमे 'सन्धिः' कर्मसन्ततिरूपो 'झोषितः' क्षपितो भवति, यदि संयमे सम्यग्भावे वोल्लेक्षणं स्यात्, नान्यथेति । सम्यगुल्लेक्षमाणस्य च यत्स्यात्तदाह—'से' तस्य सम्यगुत्थानेनोत्थितस्य निःशङ्कस्य श्रद्धावतः स्थितस्य गुरुकुले गुरोराज्ञायां वा या गतिर्भवति—या पदवी भवति तां सम्यगनुपश्यत यूयं, तद्यथा—सकललोकश्लाघ्यता ज्ञानदर्शनस्थैर्यं चारित्रे निष्प्रकम्पता श्रुतज्ञानाधारता च स्यादिति, यदिवा स्वर्गापवर्गादिका गतिः स्यात्, तां पश्यतेति सम्बन्धः, अथवा उत्थितस्य—संयमोद्योगवतः तद्भावेन च स्थितस्य पार्श्वस्थादेर्गतिं—सकलजनोपहास्यरूपामधमस्थानगतिं वा पश्यतेति । तदेवमुद्युक्तेतरयोर्गतिमुपलभ्य पञ्चविधाचारसारे प्रक्रमितव्यं, यदि नामानुपस्थितस्य विरूपा गतिर्भवति ततः किमित्याह—'अत्रापि'असंयमे बालभावरूपे इतरजनाचरिते आत्मानं सकलकल्याणास्पदं नोपदर्शयेत्, बालानुष्ठानविधायी मा भूदिति यावत्, तथाहि—बालाः शाक्यकापिलादयस्तद्भावितो बालभावमाचरति, वक्ति च—नित्यत्वादमूर्त्तत्वाच्चात्मनः प्राणातिपात एव नास्त्याकाशस्येव, न हि वृक्षादिच्छेदे दाहे वाऽऽकाशस्य भिदा क्लोपो वा स्यात्, एवमात्मनोऽपि शरीरविकारेऽविकारित्वम्, उक्तं च—"न जायते न म्रियते कदाचिन्नायं भूत्वा भवितेति ॥ नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः ॥ १ ॥ अच्छेद्योऽयमभेद्योऽयमविकारी स उच्यते । नित्यः सततगः स्थाणुरचलोऽयं सनातनः ॥ २ ॥" इत्यादि ॥ अध्यवसायात्तद्धननादौ प्रवृत्तस्य तत्प्रतिषेधार्थमाह—

तुमंसि नाम सच्चेव जं हंतव्वंति मन्नसि, तुमंसि नाम सच्चेव जं अज्जावेयव्वंति मन्नसि, तुमंसि नाम सच्चेव जं परियावेयव्वंति मन्नसि, एवं जं परिघित्तव्वंति मन्नसि, जं उद्दवेयंति मन्नसि, अंजू चेयपडिबुद्धजीवी, तम्हा न हंता नवि घायए, अणुसंवेयणमप्पाणेणं जं हंतव्वं नाभिपत्थए (सू० १६४)

योऽयं हन्तव्यत्वेन भवताऽध्यवसितः स त्वमेव, नामशब्दः सम्भावनायां यथा भवान शिरःपाणिपादपार्श्वपृष्ठोरुद-

रवान् एवमसावपि यं हन्तव्यमिति मन्यसे, यथा च भवतो हन्नोद्यतं दृष्ट्वा दुःखमुत्पद्यते एवमन्येषामपि, तदुःखोत्पादनाच्च किल्बिषानुषङ्गः, इदमुक्तं भवति—मात्रान्तरात्मनः आकाशदेशस्य व्यापादनेन हिंसा, अपि तु शरीरात्मनः, तस्य हि यत्र क्वचित्स्वाधारं शरीरं नितरां दवितं तद्वियोजीकरणमेव हिंसेति, उक्तं च—"पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः । प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा ॥ १ ॥" न च संसारस्थस्य सर्वथा अमूर्त्तत्वाद्वाप्तिः, येनाकाशस्येव विकारो न स्यात्, सर्वत्रैव च प्राण्युपमर्दचिकीर्षितायामात्मतुल्यता भावयितव्येत्येतदुत्तरसूत्रैर्दर्शयितुमाह—त्वमपि नाम स एव यं प्रेषणादिना आज्ञापयितव्यमिति मन्यसे, तथा त्वमपि नाम स एव यं परितापयितव्यमिति मन्यसे, एवं यं परिगृहीतव्यमिति मन्यसे, यमपद्रावयितव्यमिति मन्यसे असौ त्वमेव, यथा भवतोऽनिष्टापादनेन दुःखमुत्पद्यते एवमस्यापीत्यर्थः, यदिवा यं कायं हन्तव्यादितयाऽध्यवस्यसि तत्रानेकशो भवतोऽपि भावात्त्वमेवासौ, एवं मृषावादादावप्यायोज्यम् । यदि नाम हन्तव्यघातकयोरुक्तक्रमेणैक्यं ततः किमित्याह—'अञ्जु'रिति ऋजुः प्रगुणः साधुरितियावत्, चशब्दोऽवधारणे, एतच्च—हन्तव्यघातकैकत्वस्य प्रतिबोधः प्रतिबुद्धमेतत्प्रतिबुद्धं तेन जीवितुं शीलमस्येत्येतत्प्रतिबुद्धजीवी साधुरेव तत्परिज्ञानेन जीवति नापर इत्युक्तं भवति । यदि नामैवं ततः किमित्याह—'तस्माद्' हन्यमानस्यात्मन इव महद्दुःखमुत्पद्यते तस्मादात्मौपम्यादन्येषां जन्तूनां न हन्ता स्यात्, नाप्यपरैर्घातयेत् न च घ्नतोऽनुमन्येत, किं च—संवेदनम्—अनुभवनं अनु—पश्चात्संवेदनं केन?—आत्मना, यत्परेषां मोहोदयाद्धननादिना दुःखोत्पादनं विधीयते तत्पश्चादात्मना संवेद्यमित्याकलय्य यत्किमपि हन्तव्यमिति चिकीर्षितं तन्नाभिप्रार्थयेत्—नाभिल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षेत् । ननु चात्मनाऽनुसंवेदनमित्युक्तं, संवेदनं च सातासातरूपं, तच्च यथा नैयायिकवैशेषिकाणामात्मनो भिन्नेन गुणभूतेनैकार्थसमवायिना ज्ञानेन भवति तथा भवतामप्याहोस्विदभिन्नेनात्मन इत्यस्य प्रतिवचनमाह—

जे आया से विन्नाया जे विन्नाया से आया जेण वियाणइ से आया त पडुच्च पडिसंखाए, एस आयावाई समियाए परियाए वियाहिए त्तिबेमि (सू० १६५) ॥ ५–५ ॥

य आत्मा नित्य उपयोगलक्षणः विज्ञाताऽप्यसावेव, न तु पुनस्तस्मादात्मनो भिन्नं ज्ञानं पदार्थसंवेदकं, यश्च विज्ञाता—पदार्थानां परिच्छेदक उपयोगः आत्माऽप्यसावेव, उपयोगलक्षणत्वाज्जीवस्य उपयोगस्य च ज्ञानात्मकत्वादिति । ज्ञानात्मनोरभेदाभिधानाद्बौद्धाभिमतं ज्ञानमेवैकं स्यादिति चेत्, तन्न, भेदाभावोऽत्र केवलं चिकीर्षितो नैक्यं, एतदेवैक्यं यो भेदाभाव इति चेद्, वार्त्तमेतत्, तथाहि—पटशुक्लत्वयोर्भेदेनावस्थानाभावेऽपि नैकत्वापत्तिः, अत्रापि शुक्लत्वव्यतिरेकेण नापरः पटः कश्चिदप्यस्तीति चेद्, अशिक्षितस्योल्लापो, यतः शुक्लगुणविनाशे सर्वथा पटाभावापत्तिः स्यात्, तदात्मना विनष्ट एवेति चेत्, भवतु का नो हानिः?, अनन्तधर्म्मात्मकत्वाद्वस्तुनोऽपरमृद्वादिधर्म्मसद्भावे तद्धर्मविनाशेऽप्यविनष्ट एव, इत्येवमात्मनोऽपि प्रत्युत्पन्नज्ञानात्मकतया विनाशेऽप्यपरामूर्त्तत्वासङ्ख्येयप्रदेशताऽगुरुलघ्वादिधर्म्मसद्भावादविनाश एवेत्यलं प्रसङ्गेन । ननु च य आत्मा स विज्ञातेत्यत्र तृजन्तेन कर्तुरभिधानादात्मनश्च कर्तृत्वात्ततश्च य एवात्मा स एव विज्ञातेत्यत्र विप्रतिपत्त्यभावो, येन चासौ जानाति तन्निश्चमपि स्यात्, तथाहि—तत्करणं क्रिया वा भवेद्?, यदि

करणं तदात्मादिवन्निश्चं स्यात्, अथ क्रिया सा यथा कर्तृस्था सम्भवत्येवं कर्म्मस्थाऽपीत्येवं भदसम्भवे कुत ऐक्यमिति यश्चोदयेत्तं प्रति स्पष्टतरमाह—'येन' मत्यादिना ज्ञानेन करणभूतेन क्रियारूपेण वा विविधं—सामान्यविशेषाकारतया वस्तु जानाति विजानाति स आत्मा, न तस्मादात्मनो भिन्नं ज्ञानं, तथाहि—न करणतया भेदः, एकस्यापि कर्तृकर्म्मकरणभेदेनोपलब्धेः, तद्यथा—देवदत्त आत्मानमात्मना परिच्छिनत्ति, क्रियापक्षे चाक्षिको ह्यभेदो भवताऽप्यभ्युपगत एव, अपि च—'भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यत' इत्यादिनैकत्वमेवेति । ज्ञानात्मनोश्चैकत्वे यद्भवति तद्दर्शयितुमाह—'तं' ज्ञानपरिणामं 'प्रतीत्य' आश्रित्यात्मा तेनैव 'प्रतिसङ्ख्यायते' व्यपदिश्यते, तद्यथा—इन्द्रोपयुक्त इन्द्र इत्यादि, यदिवा मतिज्ञानी श्रुतज्ञानी यावत्केवलज्ञानीति, यश्च ज्ञानात्मनोरेकत्वमभ्युपगच्छति स किंगुणः स्यादित्याह—'एषः' अनन्तरोक्तया नीत्या यथावस्थितात्मवादी स्यात्, तस्य च सम्यग्भावेन शमितया वा 'पर्यायः' संयमानुष्ठानरूपो व्याख्यातः । इत्यधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ लोकसाराध्ययने पञ्चमोद्देशकः ॥

उक्तः पञ्चमोद्देशकः, साम्प्रतं षष्ठ आरभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके ह्रदोपमेनाचार्येण भाव्यमित्येतदुक्तं, तथाभूताचार्यसंपर्काच्च कुमार्गपरित्यागो रागद्वेषहानिश्चावश्यंभाविनीत्यतस्तत्प्रतिपादनसम्बन्धेनागतस्यास्योद्देशकस्यादिसूत्रम्—

अणाणाए एगे सोवट्ठाणा आणाए एगे निरुवट्ठाणा, एयं ते मा होउ, एयं कुसलस्स दंसणं, तद्दिट्ठीए तम्मुत्तीए तप्पुरक्कारे तस्सन्नी तन्निवेसणे (सू० १६६)

इह तीर्थकरगणधरादिनोपदेशगोचरीभूतो विनेयोऽभिधीयते, यदिवा सर्वभावसम्भवित्वाद्भावस्य सामान्यतोऽभिधानम्, अनाज्ञा—अनुपदेशः स्वमनीषिकाचरितोऽनाचारस्तयाऽनाज्ञया तस्यां वा 'एके' इन्द्रियवशगा दुर्गतिं जिगमिषवः स्वाभिमानग्रहग्रस्ताः सह उपस्थानेन—धर्म्मचरणाभासोद्यमेन वर्त्तन्त इति सोपस्थानाः, किल वयमपि प्रव्रजिताः सद्सद्धर्मविशेषविवेकविकलाः सावद्यारम्भतया प्रवर्त्तन्ते, एके तु न कुमार्गवासितान्तःकरणाः, किन्तु आलस्यावर्णस्तम्भाद्युपबृंहितबुद्धयः, 'आज्ञायां' तीर्थकरोपदेशप्रणीते, सदाचारे निर्गतमुपस्थानम्—उद्यमो येषां ते निरुपस्थानाः—सर्वज्ञप्रणीतसदाचारानुष्ठानविकलाः । एतत्कुमार्गानुष्ठानं सन्मार्गावसीदनं च द्वयमपि 'ते' तव गुरुविर्नेयोपगतस्य दुर्गतिहेतुत्वान्मा भूदिति । सुधर्म्मस्वामी स्वमनीषिकापरिहारार्थमाह—'एतद्' यत्पूर्वोक्तं यदिवा अनाज्ञायां निरुपमस्थानत्वमाज्ञायां च सोपमस्थानत्वमित्येत् 'कुशलस्य' तीर्थकृतो दर्शनमभिप्रायः, यदिवैतद्वक्ष्यमाणं कुशलस्य दर्शनमित्याह—कुमार्गं परित्यज्य सदाऽऽचार्यान्तेवासिना एवंभूतेन भाव्यं, तस्य—आचार्यस्य दृष्टिस्तदृष्टिस्तया वर्त्तितव्यं, सा वा तीर्थकरप्रणीतागमदृष्टिस्तदृष्टिस्तयेति, तथा तस्य—आचार्यस्य तीर्थकृतो वा मुक्तिस्तन्मुक्तिस्तया, तथा तमाचार्यं सर्वकार्येषु पुरः करोतीति तत्पुरस्कारः—आचार्यानुमत्या क्रियानुष्ठायीत्यर्थः, तथा तत्संज्ञी—तज्ज्ञानोपयुक्तः, तथा तन्निवेशनः—सदा गुरुकुलनिवासी ॥ स एवंभूतः किंगुणः स्यादित्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिभूय अदक्खू अणभिभूए पभू निरालंबणयाए जे महं अवहिमणे, पवाएण पवायं जाणिज्जा, सहसंमइयाए परवागरणेणं अन्नेसिं वा अंतिए सुच्चा (सू० १६७)

'अभिभूय' पराजित्य परीषहोपसर्गान् घातिचतुष्टयं वा तत्त्वमद्राक्षीत्, किं च–नाभिभूतोऽनभिभूतः अनुकूलप्रतिकूलोपसर्गैः परतीर्थिकैर्वा, स एवम्भूतः 'प्रभुः' समर्थो निरालम्बनतायाः–नात्र संसारे मातापितृकलत्रादिकमालम्बनमस्तीति तीर्थकृद्वचनमन्तरेण नरकादौ पततामित्येवम्भूतभावनायाः समर्थो भवति, कः पुनः परीषहोपसर्गाणां जेता केनचिदनभिभूतो निरालम्बनतायाः प्रभुर्भवति ? इत्येवं पृष्टे तीर्थकृत् सुधर्मस्वाम्यादिको वाऽऽचार्योऽन्तेवासिनमाह–यः पुरस्कृतमोक्षो 'महान्' महापुरुषो लघुकर्म्मा ममाभिप्रायान्न विद्यते बहिर्मनो यस्यासावबहिर्म्मनाः, सर्वज्ञोपदेशवर्त्तीति यावत्, कुतः पुनस्तदुपदेशनिश्चय इति चेदाह–प्रकृष्टो वादः प्रवादः–आचार्यपारम्पर्योपदेशः प्रवादस्तेन प्रवादेन प्रवादं–सर्वज्ञोपदेशं 'जानीयात्' परिच्छिन्द्यादिति । यदिवाऽणिमाद्यष्टविधैश्वर्यदर्शनादपि न तीर्थकृद्वचनाद्बहिर्मनो विधत्ते, तीर्थिकानिन्द्रजालिककल्पानिति मत्वा तदनुष्ठानं तद्वादांश्च पर्यालोचयति, कथमित्याह–'पवाएण पवायं जाणिज्जा' प्रकृष्टो वादः प्रवादः–सर्वज्ञवाक्यं तेन भौनीन्द्रेण प्रवादेन तीर्थिकप्रवादं 'जानीयात्' परीक्षयेत्, तद्यथा–वैशेषिकाः तनुभुवनकरणादिकमीश्वरकर्तृकमिति प्रतिपन्नाः, तदुक्तम्–"अन्यो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव च ॥ १ ॥" इत्यादिकं प्रवादमात्मीयप्रवादेन पर्यालोचयेत्, तद्यथा–अभ्रेन्द्रधनुरादीनां विस्रसापरिणामलब्धात्मलाभानां तदतिरिक्तेश्वरादिकारणपरिकल्पनायामतिप्रसङ्गः स्यात्, तथा घटपटादीनां दण्डचक्रचीवरसलिलकुलालतुरीवेमशलाकाकुविन्दादिव्यापारानन्तरावाप्तात्मलाभानां तदनुपलब्धव्यापारेश्वरस्य कारणपरिकल्पनायां रासभादेरपि किं न स्यात् ?, तनुकरणादीनामप्यवन्ध्यस्वकृतकर्म्मापादितं वैचित्र्यं, कर्म्मणोऽनुपलब्धेः कुत एतदिति चेत्, समानः पर्यनुयोगः, अपि च–तुल्ये मातापित्रादिके कारणेऽपत्यवैचित्र्यदर्शनात्तदधिकेन निमित्तेन भाव्यं, तच्चेश्वराभ्युपगमेऽप्यदृष्टमेवेष्टव्यं, नान्यथा सुखदुःखसुभगदुर्भगादि जगद्वैचित्र्यं स्यादिति। तथा साङ्ख्या एवमाहुः–यथा 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महांस्ततोऽहङ्कारः, तस्मादेकादशेन्द्रियाणि पञ्च तन्मात्राणि, तन्मात्रेभ्यः पञ्चभूतानि, बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते, स चाकर्त्ता निर्गुणश्चेति, तथा प्रकृतिः करोति पुरुष उपभुङ्क्ते ततः कैवल्यावस्थायां द्रष्टाऽस्मीति निवर्त्तते' इत्यादिकं युक्तिविकलत्वाच्छिरन्तराः सुहृदः प्रत्येष्यन्ति, तथाहि–प्रकृतेरचेतनत्वात् कुत आत्मोपकाराय क्रियाप्रवृत्तिः स्यात् ?, कुतो वा दृष्टेत्यात्मोपकाराय प्रवृत्तिर्न स्यात् ?, अचेतनायास्तद्विकल्पासम्भवात्, नित्यायाश्च प्रवृत्तिनिवृत्त्यभावात्, पुरुषस्याप्यकर्तृत्वे संसारोद्वेगमोक्षौत्सुक्यभोक्तृत्वाद्यभावः स्यादिति, उक्तं च–"न विरक्तो न निर्विण्णो, न भीतो भवबन्धनात्। न मोक्षसुखकाङ्क्षी वा, पुरुषो निष्क्रियात्मकः ॥ १ ॥ कः प्रव्रजति साङ्ख्यानां, निष्क्रिये क्षेत्रभोक्तरि । निष्क्रियत्वात्कथं वाऽस्य, क्षेत्रभोक्तृत्वमिष्यते ? ॥ २ ॥" इति । तथा शौद्धोदनिशिष्यका यत्सत्तत्सर्वं क्षणिकमित्येवं व्यवस्थिताः, तत्रोत्तरम्, यदि निरन्वयो विनाशः स्यात् ततः प्रतिनियतः कार्यकारणभाव एव न स्यात्, एकसन्तानान्तर्गतत्वात्स्यादिति चेत्, अशिक्षितस्योल्लापः, तथाहि–न सन्तानिव्यतिरेकेण कश्चित्सन्तानोऽस्ति,

तथा च सति पूर्वकालक्षणावस्थायित्वमेव कारणत्वम्, एवं च सर्वं सर्वस्य कारणं स्यात्, सर्वस्य पूर्वकालक्षणावस्थायित्वाविशेषादेतदिति, किं च–"यज्जातमात्रमेव प्रध्वस्तं तस्य का क्रिया कुम्भे ? । नोत्पन्नमात्रभग्ने क्षिप्तं सन्तिष्ठते वारि ॥ १ ॥ कर्त्तरि जातविनष्टे धर्माधर्म्मक्रिया न सम्भवति । तदभावे बन्धः को बन्धाभावे च को मोक्षः ? ॥ २ ॥" इत्यादि । बार्हस्पत्यानां तु भूतवादेनात्मपुण्यपापपरलोकाभाववादिनां निर्म्मर्यादतया जनतातिगानां न्यक्कारपदव्याधानमनुत्तरमेवोत्तरमिति । अपि च–"अब्रह्मचर्यरक्तैर्मूढैः परदारधर्षणाभिरतैः । मायेन्द्रजालविषवन्मार्त्तितमसत्किमप्येतत् ॥ १ ॥" तथा–"मिथ्या च दृष्टिर्भवदुःखधात्री, मिथ्यामतिश्चापि विवेकशून्या । धर्म्मार्थ येषां पुरुषाधमानां, तेषामधर्मो भुवि कीदृशोऽन्यः ? ॥ २ ॥" इत्यनया दिशा सर्वेऽपि तीर्थिकवादाः सर्वज्ञवादमनुश्रित्य निराकार्या इति स्थितं । तन्निराकरणं च सर्वज्ञप्रवादं निराकार्यं च तीर्थिकप्रवादमेभिस्त्रिभिः प्रकारैर्जानीयादित्याह–मननं मतिः–ज्ञानं ज्ञानावरणीयक्षयक्षयोपशमान्यतरसद्भावानन्तरमेव सहसा–तत्क्षणमेव मत्या प्रातिभबोधाबध्यादिज्ञानेन परिच्छिन्द्यात् सह वा ज्ञानेन ज्ञेयं सच्छोभनया मिथ्यात्वकलङ्काङ्करहितया मत्याऽवगच्छेत्, स्वपरावभासकत्वान्मतेरिति, कदाचित्तदव्याकरणेनाप्यवगच्छेत् परः–तीर्थकृत्तस्य तेन वा व्याकरणं–यथावस्थितार्थप्रज्ञापनम् आगमः परव्याकरणं तेन वा जानीयात्, तथाऽप्यनवगमेऽन्येषामाचार्यादीनां अन्तिके श्रुत्वा यथावस्थितवस्तुसद्भावमवधारयेद् ॥ अवधार्य च किं कुर्यादित्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निद्देसं नाइवट्टेज्जा मेहावी सुपडिलेहिया सव्वओ सव्वप्पणा सम्मं समभिण्णाय, इह आरामो परिव्वए निट्ठियट्ठी वीरे आगमेण सया परक्कमे (सू० १६८)

निर्दिश्यत इति निर्देशः–तीर्थकराद्युपदेशस्तं नातिवर्तेत 'मेधावी' मर्यादावानिति । किं कृत्वा निर्देशं नातिवर्तेतेत्यत आह–सुष्ठु प्रत्युपेक्ष्य हेयोपदेयतया तीर्थिकवादान् सर्वज्ञवादं च 'सर्वतः' सर्वैः प्रकारैर्द्रव्यक्षेत्रकालभावरूपैः सर्वात्मना-सामान्यविशेषात्मकतया पदार्थान् पर्यालोच्य सहसन्मत्यादित्रिकेण परिच्छिद्य सदाऽऽचार्यनिर्देशवर्ती तीर्थिकप्रवादनिराकरणं कुर्यात्, किं च कृत्वेत्यत आह–सम्यगेव स्वपरतीर्थिकवादान् 'समभिज्ञाय' बुद्ध्वा ततो निराकरणं कुर्यात् । किं च—'इह' अस्मिन् मनुष्यलोके आरमणमारामो रतिरित्यर्थः, स चारामः परमार्थचिन्तायामात्यन्तिकैकान्तिकरतिरूपः संयमः तमासेवनपरिज्ञया परिज्ञाय आलीनो गुप्तश्च 'परिव्रजेत्' संयमानुष्ठाने विहरेत्, किंभूत इत्याह–निष्ठितो-मोक्षस्तेनार्थी यदिवा निष्ठितः–परिसमाप्तः अर्थः–प्रयोजनं यस्य स निष्ठितार्थः 'वीरः' कर्मविदारणसहिष्णुः सन् 'आगमेन' सर्वज्ञप्रणीताचारादिना 'सदा' सर्वकालं 'पराक्रमेथाः' कर्मरिपून् प्रति मोक्षाध्वनि वा गच्छेः । इत्यधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । किमर्थं पुनः पौनःपुन्येनोपदेशदानमित्याह—

उड्ढं सोया अहे सोया, तिरियं सोया वियाहिया । एए सोया विअक्खाया, जेहिं संगंति पासह ॥ १ ॥

आ. सू. ३९

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २२९ ॥

श्रोतांसि–कर्म्मास्रवद्वाराणि तानि च प्रतिभवाभ्यासाद्विषयानुबन्धादीनि गृह्यन्ते, तत ऊर्द्धं श्रोतांसि–वैमानिकाङ्गनाऽभिलाषेच्छा वैमानिकसुखनिदानं वा, अधो भवनपतिसुखाभिलाषिता, तिर्यग् व्यन्तरमनुष्यतिर्यग्विषयेच्छा, यदिवा प्रज्ञापकापेक्षयोर्द्धं गिरिशिखरप्राग्भारनितम्बप्रपातोदकादीनि अधोऽपि स्वभ्रनदीकूलगुहालयनादीनि तिर्यगप्यारामसभाऽऽवसथादीनि प्राणिनां विषयोपभोगस्थानानि विविधमाहितानि–प्रयोगविस्रसाभ्यां स्वकर्म्मपरिणत्या वा जनितानि व्याहितानि, एतानि च कर्म्मास्रवद्वाराणीतिकृत्वा श्रोतांसीव श्रोतांसि, एभिश्च त्रिभिः प्रकारैरप्यन्यैश्च पापोपादानहेतुभूतैर्यैः 'सङ्गं' प्राणिनामासक्तिं कर्म्मानुषङ्गं वा पश्यत, इतिहेतौ, तस्मात्कर्मानुषङ्गात् कारणादेतानि श्रोतांसीत्यतोऽपदिश्यते, आगमेन सदा पराक्रमेथा इति ॥ किं च—

लोक० उद्देशकः६

आवट्टं तु पेहाए इत्थ विरमिज्ज वेयवी, विणइत्तु सोयं निक्खम्म एसमहं अकम्मा जाणइ पासइ पडिलेहाए नावकंखइ इह आगइं गइं परिन्नाय (सू० १६९)

रागद्वेषकषायविषयावर्त्तं कर्म्मबन्धावर्त्तं वा तुशब्दः पुनःशब्दार्थे भावावर्त्तं पुनरुल्लेक्ष्य 'अत्र' अस्मिन् भावावर्त्ते विषयरूपे 'वेदविद्' आगमविद् 'विरमेद्' आस्रवद्वारनिरोधं विदध्यात्, पाठान्तरं वा "विवेगं किट्टइ वेदवी" आस्रवद्वारनिरोधेन तज्जनितकर्म्मविवेकम्–अभावं 'कीर्त्तयति' प्रतिपादयति वेदविदिति । आस्रवद्वारनिरोधेन च यत्स्यात्तदाह–स्रोतः–आस्रवद्वारं तद्विनेतुम्–अपनेतुं 'निष्क्रम्य' प्रव्रज्य 'एष' इति प्रत्यक्षः प्रस्तुतार्थस्य चावश्यंभावित्वादेष इति

॥ २२९ ॥

प्रत्यक्षवाचिना सर्वनाम्नोक्तो यः कश्चिदित्यर्थः 'महान्' महापुरुषः अतिशयिककर्म्मविधायी, एवम्भूतश्च किंविशिष्टः स्यादिति दर्शयति—'अकर्म्मा'नास्य कर्म्म विद्यत इत्यकर्म्मा, कर्म्मशब्देन चात्र घातिकर्म्म विवक्षितं, तदभावाच्च जानाति विशेषतः पश्यति च सामान्यतः, सर्वाश्च लब्धयो विशेषोपयुक्तस्य भवन्तीत्यतः पूर्वं जानाति पश्चाच्च पश्यति, अनेन च क्रमोपयोग आविष्कृतः, स चोत्पन्नदिव्यज्ञानखैलोक्यललामचूडामणिः सुरासुरनरेन्द्रैकपूज्यः संसारार्णवपारवर्त्ती विदितवेद्यः सन् किं कुर्यादित्याह–स हि ज्ञातज्ञेयः सुरासुरनरोपहितां पूजामुपलभ्य कृत्रिममनित्यामसारां सोपाधिकां च 'प्रत्युपेक्ष्य' पर्यालोच्य हृषीकविजयजनितसुखनिःस्पृहतया तां नाकाङ्क्षति–नाभिलषतीति । किं च—'इह' अस्मिन् मनुष्यलोके व्यवस्थितः सन् उत्पन्नज्ञानः प्राणिनामागतिं गतिं च संसारभ्रमणं तत्कारणं च ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया निराकरोति ॥ तन्निराकरणे च यत्स्यात्तदाह—

अच्चेइ जाईमरणस्स वट्टमग्गं विक्खायरए, सव्वे सरा नियट्टंति, तक्का जत्थ न विज्जइ, मई तत्थ न गाहिया, ओए, अप्पइट्ठाणस्स खेयन्ने, से न दीहे न हस्से न वट्टे न तंसे न चउरंसे न परिमंडले न किण्हे न नीले न लोहिए न हालिद्दे न सुक्किले न सुरभिगंधे न दुरभिगंधे न तित्ते न कडुए न कसाए न अंबिले न महुरे न कक्खडे न मउए न गरुए न लहुए न उण्हे न निद्धे न लुक्खे न काऊ न रुहे न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संगे न इत्थी न पुरिसे न अन्नहा परिन्ने सन्ने उवमा न विज्जए, अरूवी सत्ता, अपयस्स पयं नत्थि, (सू० १७०)

'अत्येति' अतिक्रामति जातिश्च मरणं च जातिमरणं तस्य 'वट्टमग्गं'ति पन्थानं मार्गं उपादानं कर्मेतियावत्, तदत्येति–अशेषकर्ममक्षयं विधत्ते, तत्क्षयाच्च किंगुणः स्यादित्याह–विविधम्–अनेकप्रकारं प्रधानपुरुषार्थतयाऽऽरब्धशास्त्रार्थतया तपःसंयमानुष्ठानार्थत्वेन (आख्यातो) व्याख्यातो मोक्षः–अशेषकर्ममक्षयलक्षणो विशिष्टाकाशप्रदेशाख्यो वा तत्र रतो व्याख्यातरतः, आत्यन्तिकैकान्तिकानाबाधसुखक्षायिकज्ञानदर्शनसंपदुपेतोऽनन्तमपि कालं संतिष्ठते । किम्भूत इति चेत्, न तत्र शब्दानां प्रवृत्तिः, न च सा काचिदवस्थाऽस्ति या शब्दैरभिधीयेत इत्येतत्प्रतिपादयितुमाह—'सर्वे' निरवशेषाः 'स्वरा'ध्वनयस्तस्मान्निवर्त्तन्ते, तद्वाच्यवाचकसम्बन्धे न प्रवर्त्तन्ते, तथाहि–शब्दाः प्रवर्त्तमाना रूपरसगन्धस्पर्शानामन्यतमे विशेषे सङ्केतकालगृहीते तत्तुल्ये वा प्रवर्त्तेरन्, न चैतत्तत्र शब्दादीनां प्रवृत्तिनिमित्तमस्ति, अतः शब्दानभिधेया मोक्षावस्थेति । न केवलं शब्दानभिधेया, उत्प्रेक्षणीयाऽपि न सम्भवतीत्याह–सम्भवत्यर्थविशेषास्तित्वाध्यवसाय ऊहस्तर्कः–एवमेवं चैतत्स्यात्, स च यत्र न विद्यते ततः शब्दानां कुतः प्रवृत्तिः स्यात्?। किमिति तत्र तर्काभाव इति चेदाह–मननं मतिः–मनसो व्यापारः पदार्थचिन्ता सौलत्तिक्यादिका चतुर्विधाऽपि मतिस्तत्र न ग्राहिका, मोक्षावस्थायाः सकलविकल्पातीतत्वात्, तत्र च मोक्षे कर्म्मांशसमन्वितस्य गमनमाहोश्चिन्निष्कर्म्मणः?, न तत्र कर्म्मसमन्वितस्य गमनमस्तीत्येतदर्शयितुमाह—'ओजः' एकोऽशेषमलकलङ्काङ्करहितः, किं च– न विद्यते प्रतिष्ठानमौदारिकशरीरादेः कर्म्मणो वा यत्र सोऽप्रतिष्ठानो–मोक्षस्तस्य 'खेदज्ञो' निपुणो, यदिवा अप्रतिष्ठानो–नरकस्तत्र स्थित्यादिपरिज्ञानतया खेदज्ञो, लोकनाडिपर्यन्तपरिज्ञानावेदनेन च समस्तलोकखेदज्ञता आवेदिता भवति । सर्वस्वरनिवर्त्तनं च येनाभिप्रायेणोक्तवांस्तमभिप्रायमाविष्कुर्वन्नाह– 'स' परमपदाध्यासी लोकान्तक्रोशषड्भागक्षेत्रावस्थानोऽनन्तज्ञानदर्शनोपयुक्तः संस्थानमाश्रित्य न दीर्घो न ह्रस्वो न वृत्तो न त्र्यस्रो न चतुरस्रो न परिमण्डलो वर्णमाश्रित्य न कृष्णो न नीलो न लोहितो न हारिद्रो न शुक्लो गन्धमाश्रित्य न सुरभिगन्धो न दुरभिगन्धो रसमाश्रित्य न तिक्तो न कटुको न कषायो नाम्लो न मधुरः स्पर्शमाश्रित्य न कर्कशो न मृदुर्न लघुर्न गुरुर्न शीतो नोष्णो न स्निग्धो न रुक्षो 'न काऊ' इत्यनेन लेश्या गृहीता, यदिवा न कायवान् यथा वेदान्तवादिनाम्–'एक एव मुक्तात्मा तत्कायमपरे क्षीणक्लेशा अनुप्रविशन्ति आदित्यरश्मय इवांशुमन्तमिति, तथा न रुहः 'रुह बीजजन्मनि प्रादुर्भावे च' रोहतीति रुहः, न रुहोऽरुहः, कर्म्मबीजाभावादपुनर्भावीत्यर्थः, न पुनर्यथा शाक्यानां दर्शननिकारतो मुक्तात्मनोऽपि पुनर्भवोपादानमिति, उक्तं च—"दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठम् । मुक्तः स्वयंकृतभवश्च परार्थशूरस्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् ॥ १ ॥" तथा च न विद्यते सङ्गोऽमूर्त्तत्वाद्यस्य स तथा, तथा न स्त्री न पुरुषो नान्यथेति–न नपुंसकः, केवलं सर्वैरात्मप्रदेशैः परिः–समन्ताद्विशेषतो जानातीति परिज्ञः, तथा सामान्यतः सम्यग्जानाति–पश्यतीति संज्ञः, ज्ञानदर्शनयुक्त इत्यर्थः, यदि नाम स्वरूपतो न ज्ञायते मुक्तात्मा तथाऽप्युपमाद्वारेणादित्यगतिरिव ज्ञायत एवेति चेत्, तन्न, यत आह–उपमीयते सादृश्यात् परिच्छिद्यते यया सोपमा–तुल्यता सा मुक्तात्मनस्तज्ज्ञानसुखयोर्वा न विद्यते, लोकातिगत्वात्तेषा, कुत एतदिति चेदाह–तेषां मुक्तात्मनां या सत्ता सा अरूपिणी, अरूपित्वं च दीर्घादिप्रतिषेधेन प्रतिपादितमेव । किं च–न विद्यते पदम्–अवस्थाविशेषो यस्य सोऽपदः, तस्य पद्यते–गम्यते येनार्थस्तत्पदम्–अभिधानं तच्च 'नास्ति' न विद्यते, वाच्यविशेषाभावात्, तथाहि–योऽभिधीयते स शब्दरूपगन्धरसस्पर्शान्यतरविशेषेणाभिधीयते, तस्य च तदभाव इत्येतदर्शयितुमाह, यदिवा दीर्घ इत्यादिना रूपादिविशेषनिराकरणं कृतं, इह तु तत्सामान्यनिराकरणं कर्तुकाम आह—

से न सद्दे न रूवे न गंधे न रसे न फासे, इच्चेव त्तिबेमि (सू० १७१)॥ षष्ठ उद्देशकः।

लोकसाराध्ययनं समाप्तं ॥ ५–६ ॥

'स' मुक्तात्मा न शब्दरूपः न रूपात्मा न गन्धः न रसः न स्पर्श इत्येतावन्त एव वस्तुनो भेदाः स्युः, तत्प्रतिषेधाच्च नापरः कश्चिद्विशेषः सम्भाव्यते येनासौ व्यपदिश्येतेति भावार्थः । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । गतः सूत्रानुगमः, तद्गतौ चापवर्गमाप्त उद्देशकः, तदपवर्गाच्चासौ च नयवक्तव्यताऽतिदेशात्समाप्तं लोकसाराख्यं पञ्चममध्ययनमिति ॥ ग्रन्थाग्र० १११५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ धुताख्यं षष्ठमध्ययनम्

उक्तं पञ्चममध्ययनं, साम्प्रतं षष्ठमारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तराध्ययने लोकसारभूतः संयमो मोक्षश्च प्रतिपादितः, स च निःसङ्गताव्यतिरेकेण कर्म्मधुननमन्तरेण च न भवतीत्यतस्तत्प्रतिपादनार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमेऽर्थाधिकारो द्वेधा–अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारः प्रागभाणि, उद्देशार्थाधिकारं तु निर्युक्तिकारो बिभणिषुराह—

पठमे नियगविहुणणा कम्माणं बितियए तइयगंमि। उवगरणसरीराणं चउत्थए गारवतिगस्स ॥ २५० ॥

प्रथमोद्देशके निजकाः–स्वजनास्तेषां विधूननेत्ययमर्थाधिकारः, द्वितीये कर्म्मणां, तृतीये उपकरणशरीराणां, चतुर्थे गौरवत्रिकस्य, विधूननेति सर्वत्र सम्बन्धनीयम्, उपसर्गाः सन्माननानि च, यथा साधुभिर्विधूतानि तथा पञ्चमोद्देशके प्रतिपाद्यत इत्यर्थाधिकारं परिसमाप्य निक्षेपमाह–स च त्रिधा, तत्रौघनिष्पन्नेऽध्ययनं, नामनिष्पन्ने तु धूतं, तच्च चतुर्द्धा, तत्रापि नामस्थापने सुगमत्वादनादृत्य द्रव्यभावधूतप्रतिपादनाय गाथाशकलम्—

उवसग्गा सम्माणयविहूआणि पञ्चमंमि उद्देसे। दव्वधुयं वत्थाई भावधुयं कम्म अट्ठविहं ॥ २५१ ॥

द्रव्यधूतं द्विधा–आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चानुपयुक्तः, नोआगमतस्तु ज्ञशरीरभव्यशरीर-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २३२ ॥

व्यतिरिक्तं द्रव्यधूतं द्रव्यं च तद्वस्त्रादि धूतं च रजोऽपनयनार्थं द्रव्यधूतं, आदिग्रहणाद्भक्षादि फलार्थं, भावधूतं कर्म्माष्टविधं, तद्विमोक्षार्थं धूयत इति गाथाशकलार्थः ॥ पुनरप्येनमेवार्थं विशेषतः प्रतिपादयितुमाह—

धुता० ६ उद्देशकः १

अहियासित्तुवसग्गे दिव्वे माणुस्सए तिरिच्छे य। जो विहुणइ कम्माइं भावधुयं तं वियाणाहि ॥ २५२ ॥

अधिकमासह्यात्यर्थं सोढ्वा, कानतिसह्य?–उपसर्गान्, किंभूतान्?–दिव्यान्मानुषांस्तैरश्चांश्च यः कर्म्माणि संसारतरुबीजानि विधुनाति–अपनयति तद्भावधुतमित्येवं जानीहि, क्रियाकारकयोरभेदाद्वा कर्म्मधूननं भावधूतं जानीहीति भावार्थः ॥ गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

ओबुज्झमाणे इह माणवेसु आघाइ से नरे, जस्स इमाओ जाइओ सव्वओ सुपडिलेहियाओ भवंति, आघाइ से नाणमणेलिसं, से किट्टइ तेसिं समुट्ठियाणं निक्खित्तदण्डाणं समाहियाणं पन्नाणमंताणं इह मुत्तिमग्गं, एवं (अवि) एगे महावीरा विप्परिक्कमंति, पासह एगे अवसीयमाणे अणत्तपन्ने से बेमि, से जहावि (सेवि) कुंमे हरए विणिविट्ठचित्ते पच्छन्नपलासे उम्मग्गं से नो लहइ भंजगा इव संनिवेसं नो चयंति एवं (अवि) एगे अणेगरूवेहिं कुलेहिं जाया रूवेहिं सत्ता कलुणं थणंति नियाणओ ते न लभंति मुक्खं, अह पास तेहिं कुलेहिं आयत्ताए जाया,–गंडी अहवा कोढी, रायसी अवमारियं। काणियं झिमियं चेव, कुणियं खुज्जियं तहा ॥ १ ॥ उदरिं च पास मूयं च, सूणीयं च गिलासणिं। वेवइं पीढसप्पिं च, सिलिवयं महुमेहणिं ॥ २ ॥ सोलस एए रोगा अक्खाया अणुपुव्वसो। अह णं फुसंति आयंका, फासा य असमंजसा ॥ ३ ॥ मरणं तेसिं संपेहाए उववायं चवणं च नच्चा, परियागं च संपेहाए (सू० १७२)

॥ २३२ ॥

स्वर्गापवर्गौ तत्कारणानि च तथा संसारं तत्कारणानि चावबुध्यमानोऽनावारकज्ञानसद्भावाद् 'इहे'ति मर्त्यलोके मानवेषु विषयभूतेषु धर्म्ममाख्याति स नरो भवोपग्राहिकर्म्मसद्भावात् मनुष्यभावव्यवस्थितः सन् धर्म्ममाचष्टे, न पुनर्यथा शाक्यानां कुड्यादिभ्योऽपि धर्म्मदेशनाः प्रादुष्यन्ति, यथा वा वैशेषिकाणामुलूकभावेन पदार्थाविर्भावनम्, एवमस्माकं न, कथं?–घातिकर्म्मक्षये तूत्पन्ननिरावरणज्ञानो मनुष्यभावापन्न एव कृतार्थोऽपि सत्त्वहिताय सदेवमनुजायां पर्षदि कथयतीति। किं तीर्थकर एव धर्म्ममाचष्टे उतान्योऽपि?, अन्योऽपि यो विशिष्टज्ञानः सम्यक्पदार्थपरिच्छेदी स धर्म्माविर्भावनं करोतीति दर्शयितुमाह–यस्मातीन्द्रियज्ञानिनः श्रुतकेवलिनो वा 'इमाः' शस्त्रपरिज्ञायां साधितत्वात् प्रत्यक्षवाचिनेदमाऽभिहिताः 'जातयः' एकेन्द्रियादयः 'सर्वतः' सर्वैः प्रकारैः सूक्ष्मबादरपर्याप्तकापर्याप्तकरूपैः सुष्ठु–शङ्कादिदूष्यु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दासेन 'प्रत्युपेक्षिताः' प्रति उप-सामीप्येन ईक्षिताः-ज्ञाता भवन्ति स धर्ममाचष्टे नापर इति । इदमेवाह—'आख्याति' कथयति 'स' तीर्थकृत्सामान्यकेवली अपरो वाऽतिशयज्ञानी श्रुतकेवली वा, किमाख्याति?—'ज्ञानं' ज्ञायन्ते परिच्छिद्यन्ते जीवादयः पदार्थाः येन तज्ज्ञानं-मत्यादि पञ्चधा, किम्भूतं ज्ञानमाख्याति?—'अनीदृशं' नान्यत्रेदृशमस्तीत्यनीदृशं, यदिवा सकलसंशयापनयनेन धर्ममाचक्षाण एव स आत्मनो ज्ञानमनन्यसदृशमाख्याति । केषां पुनः स धर्ममाचष्ट इत्यत आह—'स' तीर्थकृद्गणधरादिः 'कीर्त्तयति' यथावस्थितान् भावान् प्रतिपादयति 'तेषां' धर्मचरणाय सम्यगुत्थितानां, यदिवा उत्थिता द्रव्यतो भावतश्च, तत्र द्रव्यतः शरीरेण भावतो ज्ञानादिभिः, तत्र स्त्रियः समवसरणस्था उभयथाऽप्युत्थिताः शृण्वन्ति, पुरुषास्तु द्रव्यतो भाज्याः, भावोत्थितानां तु धर्ममावेदयति उत्तिष्ठासूनां च देवानां तिरश्चां च, येऽपि कौतुकादिना शृण्वन्ति तेभ्योऽप्याचष्टे, भावसमुत्थितान् विशिशेषयिषुराह-निक्षिप्ताः-संयमिताः मनोवाक्कायरूपाः प्राण्युपमर्दकारित्वाद्दण्डा इव दण्डा यैस्ते तथा तेषां निक्षिप्तदण्डानां, तथा 'समाहिताणं' सम्यगाहिताः-तपःसंयम उद्युक्ताः समाहिता अनन्यमनस्कास्तेषां, तथा प्रकर्षेण ज्ञायतेऽनेनेति प्रज्ञानं तद्वतां सश्रुतिकानाम् 'इह' अस्मिन्मनुष्यलोके 'मुक्तिमार्गं' ज्ञानदर्शनचारित्रात्मकं कीर्त्तयतीति सम्बन्धः । तस्य च तीर्थकृतः साक्षाद्धर्मावेदयतः केचन लघुकर्म्माणस्तथैव प्रतिपद्य धर्मचरणायोद्यच्छन्त्यपरे त्वन्यथेत्येतत्प्रतिपादयितुमाह-अपिशब्दश्चार्थे, चशब्दश्च वाक्योपन्यासार्थे, एवं च तीर्थकृताऽऽवेदिते सत्येके-लब्धकर्म्मविवरा विविधं संयमसङ्ग्रामशिरसि पराक्रमन्ते, परान् वा इन्द्रियकर्म्मरिपून् आक्रमन्ते पराक्रमन्त इति । एतद्विपर्ययमाह-साक्षात्तीर्थकरे सकलसंशयच्छेत्तरि धर्ममावेदयति सत्येकान्

॥ २३३ ॥

प्रबलमोहोदयावृतान् संयमेऽवसीदतः पश्यत यूयं, किम्भूतानित्याह-नात्मने हिता प्रज्ञा येषां ते अनात्मप्रज्ञास्तानिति, कुतः पुनः संयमानुष्ठानेऽवसीदन्ति इत्यारेकायां सोऽहं ब्रवीमि । अत्र दृष्टान्तद्वारेण सोपपत्ति किं कारणमित्याह—सेशब्दस्तच्छब्दार्थे, अपिशब्दश्चार्थे, स च वाक्योपन्यासार्थः, तद्यथा च कूर्मो महाह्रदे विनिविष्टं चित्तं यस्यासौ विनिविष्टचित्तो-गाढ्यमुपगतः पलाशैः-पत्रैः प्रच्छन्नः पलाशप्रच्छन्नः, सूत्रे तु प्राकृतत्वाद्व्यत्ययः, 'उम्मग्गं'ति विवरं उन्मज्यतेऽनेनेति वोन्मज्यम्, ऊर्ध्वं वा मार्गमुन्मार्गं, सर्वथा अरन्ध्रमित्यर्थः, तदसौ न लभतः इत्यक्षरार्थः । भावार्थस्त्वयम्-कश्चिद् ह्रदो योजनशतसहस्रविस्तीर्णः प्रबलशेवालघनकठिनवितानाच्छादितो नानारूपकरिमकरमत्स्यकच्छपादिजलचराश्रयः, तन्मध्ये चैकं विस्रसापरिणामापादितं कच्छपग्रीवामात्रप्रमाणं विवरमभूत्, तत्र चैकेन कूर्मेण निजयूथात् प्रभ्रष्टेन वियोगाकुलतयेतस्ततश्च शिरोधरां प्रक्षिपता कुतश्चित्तथाविधभवितव्यतानियोगेन तद्रन्ध्रे ग्रीवानिर्गमनमासं, तत्र चासौ शरच्चन्द्रचन्द्रिकया क्षीरोदसलिलप्रवाहकल्पयोपशोभितं विकचकुमुदनिकरकृतोपचारमिव तारकाकीर्णं नभस्तलमीक्षाञ्चक्रे, दृष्ट्वा चातीव मुमुदे, आसीच्चास्य मनसि-यदि तानि महद्भाग्यान्येतत्स्वर्गदेश्यमदृष्टपूर्वं मनोरथानामप्यविषयभूतं पश्यन्ति ततः शोभनमापद्यत इत्येतदवधार्य तूर्णमन्वेषणाय बन्धूनामितश्चेतश्च बभ्राम, अवाप्य च निजान् पुनरपि तद्विवरान्वेषणार्थं सर्वतः पर्यटति, न च तद्विवरं विस्तीर्णतया ह्रदस्य प्रचुरतया यादसामीक्षते, तत्रैव च विनाशमुपयात इति । अस्यायमर्थोपनयः-संसारह्रदे जीवकूर्मः कर्मशेवालविवरतो मनुष्यार्यक्षेत्रसुकुलोत्पत्तिसम्यक्त्वावसाननभस्तलमासाद्य मोहोदयात् ज्ञात्यर्थं विषयोपभोगाय वा सदनुष्ठानविकलो न सफलतां नयति, तत्त्यागे कुतः पुनः

संसारह्रदान्तर्वर्त्तिनस्तद्वासिः?, तस्मादवाप्य भवशतदुरापं कर्म्मविवरभूतं सम्यक्त्वं क्षणमप्येकं तत्र न प्रमादवता भाव्यमिति तात्पर्यार्थः । पुनरपि संसारानुषङ्गिणां दृष्टान्तान्तरमाह—'भञ्जगा' वृक्षास्त इव शीतोष्णप्रकम्पनच्छेदनशाखाकर्षणक्षोभामोटनभञ्जनरूपानुपद्रवान् सहमाना अपि 'सन्निवेशं' स्थानं कर्म्मपरतया न त्यजन्ति, एवमित्यादिना दार्ष्टान्तिकमर्थं दर्शयति—'एव'मिति वृक्षोपमया 'अपिः' सम्भावने, 'एके' कर्म्मगुरवोऽनेकरूपेषु कुलेषूच्चावचेषु जाता धर्मचरणयोग्या अपि रूपेषु चक्षुरिन्द्रियानुकूलेषूपलक्षणार्थत्वाच्छब्दादिषु च विषयेषु 'सक्ताः' अध्युपपन्नाः शारीरमानसदुःखदुःखिता राजोपद्रवोपद्रुताः अग्निदाहदग्धसर्वस्वा नानानिमित्ताहिताधयोऽपि न सकलदुःखावासं गृहवासं कर्म्मनिघ्नास्त्यक्तुमलम्, अपि तु तत्स्था एव तेषु तेषु व्यसनोपनिपातेषु सत्सु 'करुणं स्तनन्ति' दीनमाक्रोशन्ति, तद्यथा-हा तात! हा मातः हा दैव! न युज्यते भवत एवंविधेऽवसरे एवम्भूतं व्यसनमापादयितुं, तदुक्तम्—"किमिदमचिन्तितमसदृशमनिष्टमतिकष्टमनुपमं दुःखम् । सहसैवोपनतं मे नैरयिकस्येव सत्त्वस्य? ॥ १ ॥" इत्यादि, यदिवा रूपादिविषयासक्ता उपचितकर्म्माणो नरकादिवेदनामनुभवन्तः करुणं स्तनन्तीति, न च करुणं स्तनन्तोऽप्येतस्मात् दुःखान्मुच्यन्ते इत्येतद्दर्शयितुमाह-दुःखस्य निदानम्-उपादानं कर्म्म ततस्ते विलपन्तोऽपि न लभन्ते 'मोक्षं' दुःखापगमं मोक्षकारणं वा संयमानुष्ठानमिति । दुःखविमोक्षाभावे च यथा नानाव्याध्युपसृष्टाः संसारोदरे प्राणिनो विवर्त्तन्ते तथा दर्शयितुमाह—'अथ' इति वाक्योपन्यासार्थे पश्य त्वं तेषूच्चावचेषु कुलेषु, आत्मत्वाय-आत्मीयकर्म्मानुभवाय जाताः, तदुदयाच्चेमां अवस्थामनुभवन्तीत्याह-षोडशरोगवक्तव्यानुगतं श्लोकत्रयं, वातपित्तश्लेष्मसन्निपातजं चतुर्द्धा गण्डं, तदस्यास्तीति गण्डी-गण्ड-

॥ २३४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मालावानित्यादि, अथवेत्येतत्प्रतिरोगमभिसम्बध्यते, अथवा राजांसी अपस्मारीत्यादि, अथवा तथा—'कुष्ठी' कुष्ठमष्टादशभेदं तदस्यास्तीति कुष्ठी, तत्र सप्त महाकुष्ठानि, तद्यथा—अरुणोदुम्बरनिश्यजिह्वकपालकाकनादपौण्डरीकदद्रुकुष्ठानीति, महत्त्वं चैषां सर्वधात्वनुप्रवेशादसाध्यत्वाच्चेति, एकादश क्षुद्रकुष्ठानि, तद्यथा—स्थूलारुष्क १ महाकुष्ठै २ ककुष्ठ ३—चर्मदल ४ परिसर्प्प ५ विसर्प्प ६ सिध्म ७ विचर्चिका ८ किटिभ ९ पामा १० शतारुक ११ संज्ञानीति, सर्वाण्यप्यष्टादश, सामान्यतः कुष्ठं सर्वं सन्निपातजमपि वातादिदोषोत्कटतया तु भेदभाग्भवतीति। तथा—राजांसो—राजयक्ष्मा सोऽस्यास्तीति राजांसी, क्षयीत्यर्थः, स च क्षयः सन्निपातजश्चतुर्भ्यः कारणेभ्यो भवति इति, उक्तं च—"त्रिदोषो जायते यक्ष्मा, गदो हेतुचतुष्टयात् । वेगरोधात् क्षयाच्चैव, साहसाद्विषमाशनात् ॥ १ ॥" तथा—अपस्मारो वातपित्तश्लेष्मसन्निपातजत्वाच्चतुर्धा, तद्वानपगतसदसद्विवेकः भ्रममूर्च्छादिकामवस्थामनुभवति प्राणीति, उक्तं च—"भ्रमावेशः ससंरम्भो, द्वेषोद्रेको हृतस्मृतिः । अपस्मार इति ज्ञेयो, गदो घोरश्चतुर्विधः ॥१॥" तथा 'काणियं'ति अक्षिरोगः, स च द्विधा—गर्भगतस्योत्पद्यते जातस्य च, तत्र गर्भस्थस्य दृष्टिभागमप्रतिपन्नं तेजो जात्यन्धं करोति, तदेवैकाक्षिगतं काणं विधत्ते, तदेव रक्तानुगतं रक्ताक्षं पित्तानुगतं पिङ्गाक्षं श्लेष्मानुगतं शुक्लाक्षं वातानुगतं विकृताक्षं, जातस्य च वातादिजनितोऽभिष्यन्दो भवति, तस्माच्च सर्वे रोगाः प्रादुष्यन्तीति, उक्तं च—"वातात्पित्तात्कफाद्रक्तादभिष्यन्दश्चतुर्विधः । प्रायेण जायते घोरः, सर्वनेत्रामयाकरः ॥ १ ॥" इति, तथा—'झिमियं'ति जाड्यता सर्वशरीरावयवानामवशित्वमिति, तथा 'कुणियं'ति गर्भाधानदोषाद्

१ अपगतः स्मारः स्मरणं यस्मात् सः अपस्मारः तस्मिन्सति तद्रोगिणः सर्वविषया स्मृतिः नश्यति.

ह्रस्वैकपादो न्यूनैकपाणिर्वा कुणिः, तथा 'खुज्जियं'ति कुब्जं पृष्ठादावस्यास्तीति कुब्जी, मातापितृशोणितशुक्रदोषेण गर्भस्थदोषोद्भवाः कुब्जवामनकादयो दोषा भवन्तीति, उक्तं च—"गर्भे वातप्रकोपेन, दौहृदे वाऽपमानिते । भवेत् कुब्जः कुणिः पङ्गुर्मूको मन्मन एव वा ॥ १ ॥" मूको मन्मन एवेत्येतदेकान्तरिते मुखदोषे लगनीयमिति । तथा—'उदरिं च'त्ति चः समुच्चये वातपित्तादिसमुत्थमष्टधोदरं तदस्यास्तीत्युदरी, तत्र जलोदर्यसाध्यः शेषास्त्वचिरोत्थिताः साध्या इति, ते चामी भेदाः—"पृथक् समस्तैरपि चानिलाद्यैः, प्लीहोदरं बद्धगुदं तथैव । आगन्तुकं सप्तममष्टमं तु, जलोदरं चेति भवन्ति तानि ॥ १ ॥" इति, तथा 'पास मूयं च'त्ति पश्य—अवधारय मूकं मन्मनभाषिणं वा, गर्भदोषादेव जातं तदुत्तरकालं च, पञ्चषष्टिर्मुखे रोगाः सप्तस्वायतनेषु जायन्ते, तत्रायतनानि ओष्ठौ दन्तमूलानि दन्ता जिह्वा तालु कण्ठः सर्वाणि चेति, तत्राष्टावोष्ठयोः पञ्चदश दन्तमूलेष्वष्टौ दन्तेषु पञ्च जिह्वायां नव तालुनि सप्तदश कण्ठे त्रयः सर्वेष्वायतनेष्विति, 'सूणियं च' त्ति शूनत्वं—श्वयथुर्वातपित्तश्लेष्मसन्निपातरक्ताभिघातजोऽयं षोढेति, उक्तं च—"शोफः स्यात् षड्विधो घोरो, दोषैरुत्सेधलक्षणः । व्यस्तैः समस्तैश्चापीह, तथा रक्ताभिघातजः ॥ १ ॥" इति, तथा 'गिलासणिं'ति भस्मको व्याधिः, स च वातपित्तोत्कटतया श्लेष्मन्यूनतयोपजायत इति, तथा 'वेवइं'ति वातसमुत्थः शरीरावयवानां कम्प इति, उक्तं च—"प्रकामं वेपते यस्तु, कम्पमानश्च गच्छति । कलापखञ्जं तं विद्यान्मुक्तसन्धिनिबन्धनम् ॥ १ ॥" इति, तथा 'पीढसप्पिं च'त्ति जन्तुर्गर्भदोषात् पीढसर्पित्वेनोत्पद्यते, जातो वा कर्मदोषाद्भवति, स किल पाणिगृहीतकाष्ठः प्रसर्प्पतीति, तथा 'सिलिवयं'ति श्लीपदं—पादादौ काठिन्यं, तद्यथा—प्रकुपितवातपित्तश्लेष्माणोऽधः प्रपन्ना वङ्क्षणो(वक्षो)रुजङ्घास्ववतिष्ठमानाः कालान्तरेण पादमाश्रित्य शनैः शनैः शोफमुपजनयन्ति तच्छ्लीपदमित्याचक्षते—"पुराणोदकभूमिष्ठाः, सर्वर्तुषु च शीतलाः । ये देशास्तेषु जायन्ते, श्लीपदानि विशेषतः ॥ १ ॥ पादयोर्हस्तयोश्चापि, श्लीपदं जायते नृणाम् । कर्णोष्ठनासास्वपि च, केचिदिच्छन्ति तद्विदः ॥ २ ॥" तथा 'महुमेहणिं'ति मधुमेहो—बस्तिरोगः स विद्यते यस्यासौ मधुमेही, मधुतुल्यप्रस्रावत्वान्नित्यर्थः, तत्र प्रमेहाणां विंशतिर्भेदाः, तत्रास्यासाध्यत्वेनोपन्यासः, तत्र सर्व एव प्रमेहाः प्रायशः सर्वदोषोत्थास्तथापि वाताद्युत्कटभेदाद्विंशतिर्भेदा भवन्ति, तत्र कफाद्दश षट् पित्तात् वातजाश्चत्वार इति, सर्वेऽपि चैतेऽसाध्यावस्थायां मधुमेहत्वमुपयान्तीति, उक्तं च—"सर्व एव प्रमेहास्तु, कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति, तदाऽसाध्या भवन्ति ते ॥ १ ॥" इति । तदेवं षोडशाप्येते—अनन्तरोक्ताः 'रोगा' व्याधयो व्याख्याताः 'अनुपूर्वशो' अनुक्रमेण 'अथ' अनन्तरं 'णं' इति वाक्यालङ्कारे 'स्पृशन्ति' अभिभवन्ति 'आतङ्का' आशुजीवितापहारिणः शूलादयो व्याधिविशेषाः 'स्पर्शाश्च' गाढप्रहारादिजनिता दुःखविशेषाः 'असमञ्जसाः' क्रमयोगपद्यनिमित्तानिमित्तोत्पन्नाः स्पृशन्तीति सम्बन्धः । न रोगातङ्कैरेव केवलैर्मुच्यते, अन्यदपि यत् संसारिणोऽधिकं स्यात्तदाह—तेषां कर्मगुरूणां गृहवासासक्तमनसामसमञ्जसरोगैः क्लेशितानां 'मरणं' प्राणत्यागलक्षणं 'संप्रेक्ष्य' पर्यालोच्य पुनरुपपातं च्यवनं च देवानां कर्मोदयात् सञ्चितं ज्ञात्वा तद्विधेयं येन गण्डादिरोगाणां मरणोपपातयोश्चात्यन्तिकोऽभावो भवति, किं च—कर्मणां मिथ्यात्वाविरतिप्रमादकषाययोगाहितानामबाधोत्तरकालमुदयावस्थायां परिपाकं च 'सम्प्रेक्ष्य' शारीरमानसदुःखोत्पादकं पर्यालोच्य तदुच्छित्तये यतितव्यं॥ स च करुणं स्तनन्तीत्यादिना ग्रन्थेनोपपात-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्यवनावसानेनावेदितोऽपि पुनरपि तद्वरीयस्त्वख्यापनाय प्राणिनां संसारे निर्वेदवैराग्योत्पत्त्यर्थमभिधित्सुकाम आह—

तं सुणेह जहा तहा संति पाणा अंधा तमसि वियाहिया, तामेव सइं असइं अइअ-
च्च उच्चावयफासे पडिसंवेएइ, बुद्धेहिं एयं पवेइयं—संति पाणा वासगा रसगा उदए
उदएचरा आगासगामिणो पाणा पाणे किलेसंति, पास लोए महब्भयं (सू० १७७)

'तं' कर्म्मविपाकं यथावस्थितं तथैव ममावेदयतः शृणुत यूयं, तद्यथा—नारकतिर्यङ्नरामरलक्षणाश्चतस्रो गतयः, तत्र नरकगतौ चत्वारो योनिलक्षाः पञ्चविंशतिकुलकोटिलक्षाः त्रयस्त्रिंशत्सागरोपमाण्युत्कृष्टा स्थितिः वेदनाश्च परमाधार्मिकपरस्परोदीरितस्वाभाविकदुःखानां नारकाणां या भवन्ति ता वाचामगोचराः, यद्यपि लेशतश्चिकथयिषोरभिधेयविषयं न वाग्वतरति तथाऽपि कर्म्मविपाकावेदनेन प्राणिनां वैराग्यं यथा स्यादित्येवमर्थं श्लोकैरेव किञ्चिदभिधीयते—"श्रवणलवनं नेत्रोद्धारं करक्रमपाटनं, हृदयदहनं नासाच्छेदं प्रतिक्षणदारुणम् । कटविदहनं तीक्ष्णापातत्रिशूलविभेदनं, दहनवदनैः कङ्कैर्घोरैः समन्तविभक्षणम् ॥१॥ तीक्ष्णैरसिभिर्दीप्तैः कुन्तैर्विषमैः परश्वधैश्चक्रैः । परशुत्रिशूलमुद्गरतोमरवासीमुषण्ढीभिः ॥ २ ॥ सम्भिन्नतालुशिरस श्छिन्नभुजाश्छिन्नकर्णनासौष्ठाः । भिन्नहृदयोदरान्त्रा भिन्नाक्षिपुटाः सुदुःखार्त्ताः ॥ ३ ॥ निपतन्त उत्पतन्तो विचेष्टमाना महीतले दीनाः । नेक्षन्ते त्रातारं नैरयिकाः कर्म्मपटलान्धाः ॥ ४ ॥ छिद्यन्ते कृपणाः कृतान्तपरशोस्तीक्ष्णेन धारासिना, क्रन्दन्तो विषवीचि(वच्छ)भिः परिकृताः संभक्षणव्यापृतैः । पाट्यन्ते क्रकचेन दारुवदसिना प्रच्छिन्नबाहुद्वयाः, कुम्भीषु त्रपुपानदग्धतनवो मूषासु चान्तर्गताः ॥ ५ ॥ भृज्यन्ते ज्वलदम्बरीषहुतभुगुज्वालाभिराराविणो, दीक्षाङ्गारनिभेषु वज्रभवनेष्वङ्गारकेषूत्थिताः । दह्यन्ते विकृतोर्ध्वबाहुवदनाः क्रन्दन्त आर्त्तस्वनाः, पश्यन्तः कृपणा दिशो विशरणास्त्राणाय को नो भवेत्? ॥ ६ ॥" इत्यादि । तथा तिर्यग्गतौ पृथिवीकायजन्तूनां सप्त योनिलक्षा द्वादश कुलकोटिलक्षाः स्वकायपरकायशस्त्राणि शीतोष्णादिका वेदनाः, तथाऽप्कायस्यापि सप्त योनिलक्षाः सप्त च कुलकोटिलक्षाः वेदना अपि नानारूपा एव, तथा तेजस्कायस्य सप्त योनिलक्षाः त्रयः कुलकोटीलक्षाः पूर्ववद्वेदनादिकं, वायोरपि सप्त योनिलक्षाः सप्त च कुलकोटीलक्षाः वेदना अपि शीतोष्णादिजनिता नानारूपा एव, प्रत्येकवनस्पतेर्दश योनिलक्षाः साधारणवनस्पतेश्चतुर्दश उभयरूपस्याप्यष्टाविंशतिः कुलकोटीलक्षाः, तत्र च गतोऽसुमाननन्तमपि कालं छेदनभेदनमोटनादिजनिता नानारूपा वेदना अनुभवन्नास्ते, विकलेन्द्रियाणामपि द्वौ द्वौ योनिलक्षौ कुलकोव्यस्तु द्वीन्द्रियाणां सप्त त्रीन्द्रियाणामष्टौ चतुरिन्द्रियाणां नव, दुःखं तु क्षुत्पिपासाशीतोष्णादिजनितमनेकधाऽध्यक्षमेव तेषामिति, पञ्चेन्द्रियतिरश्चामपि चत्वारो योनिलक्षाः कुलकोटीलक्षास्तु जलचराणामर्द्धत्रयोदश पक्षिणां द्वादश चतुष्पदानां दश उरःपरिसर्प्पाणां दश भुजपरिसर्प्पाणां नव वेदनाश्च नानारूपा यास्तिरश्चां सम्भवन्ति ताः प्रत्यक्षा एवेति, उक्तं च—"क्षुत्तृड्हिमात्युष्णभयार्दितानां, पराभियोगव्यसनातुराणाम् । अहो ! तिरश्चामतिदुःखितानां, सुखानुषङ्गः किल वार्त्तमेतत् ॥१॥" इत्यादि । मनुष्यगतावपि चतुर्दश योनिलक्षा द्वादश कुलकोटीलक्षाः, वेदनास्त्वेवम्भूता इति—"दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां, बालत्वे चापि दुःखं मललुलिततनुस्त्रीपयःपानमिश्रम् । तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः, संसारे रे मनुष्या! वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ १ ॥ बाल्यात्प्रभृति च रोगैर्दष्टोऽभिभवश्च यावदिह मृत्युः । शोकवियोगायोगैर्दुर्गतदोषैश्च नैकविधैः ॥ २ ॥ क्षुत्तृड्हिमोष्णानिलशीतदाहदारिद्र्यशोकप्रियविप्रयोगैः । दौर्भाग्यमौर्ख्यानभिजात्यदाग्र्यवैरूप्यरोगादिभिरस्वतन्त्राः ॥ ३ ॥" इत्यादि । देवगतावपि चत्वारो योनिलक्षाः षड्विंशतिः कुलकोटीलक्षाः तेषामपीर्ष्याविषादमत्सरच्यवनभयशल्यवितुद्यमानमनसां दुःखानुषङ्ग एव, सुखाभासाभिमानस्तु केवलमिति, उक्तं च—"देवेषु च्यवनवियोगदुःखितेषु, क्रोधेर्ष्यामदमदनातितापितेषु । आर्या! नस्तदिह विचार्य संगिरन्तु, यत्सौख्यं किमपि निवेदनीयमस्ति ॥१॥" इत्यादि । तदेवं चतुर्गतिपतिताः संसारिणो नानारूपं कर्म्मविपाकमनुभवन्तीत्येतदेव सूत्रेण दर्शयितुमाह—'सन्ति' विद्यन्ते 'प्राणाः' प्राणिनः 'अन्धाः' चक्षुरिन्द्रियविकला भावान्धा अपि सद्विवेकविकलाः 'तमसि' अन्धकारे नरकगत्यादौ भावान्धकारेऽपि च मिथ्यात्वाविरतिप्रमादकषायादिके कर्म्मविपाकापादिते व्यवस्थिता व्याख्याताः । किं च—तामेवावस्थां कुष्ठाद्यापादितामेकेन्द्रियापर्याप्तकादिकां वा सकृदनुभूय कर्म्मोदयात्तामेव असकृद्—अनेकशोऽतिगत्योच्चावचान्—तीव्रमन्दान् स्पर्शान्—दुःखविशेषान् 'प्रतिसंवेदयति' अनुभवति । एतच्च तीर्थकृद्भिरावेदितमित्याह—'बुद्धैः' तीर्थकृद्भिः 'एतद्' अनन्तरोक्तं प्रकर्षेणादौ वा वेदितं प्रवेदितम् । एतच्च वक्ष्यमाणं प्रवेदितमित्याह—'सन्ति' विद्यन्ते 'प्राणाः' प्राणिनो 'वासकाः' 'वासृ' शब्दकुत्सायां वासन्तीति वासकाः—भाषालब्धिसम्पन्ना द्वीन्द्रियादयः, तथा रसमनुगच्छन्तीति रसगाः—कटुतिक्तकषायादिरसवेदिनः संज्ञिन इत्यर्थः, इत्येवम्भूतः कर्म्मविपाकः संसारिणां सम्प्रेक्ष्य इति सम्बन्धः, तथा—'उदके' उदकरूपा एवैकेन्द्रिया

॥ २३६ ॥

॥ २३७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जन्तवः पर्याप्तकापर्याप्तकभेदेन व्यवस्थिताः, तथा उदके चरन्तीत्युदकचराः–पूतरकच्छेदनकलोडुणकत्रसा मत्स्यकच्छपादयः, तथा स्थलजा अपि केचन जलाश्रिता महोरगादयः पक्षिणश्च केचन तद्गतवृत्तयो द्रष्टव्याः, अपरे तु आकाशगामिनः पक्षिणः, इत्येवं सर्वेऽपि 'प्राणाः' प्राणिनोऽपरान् प्राणिनः आहाराद्यर्थं मत्सरादिना वा 'क्लेशयन्ति' उपतापयन्ति । यद्येवं ततः किमित्यत आह—'पश्य' अवधारय 'लोके' चतुर्दशरज्वात्मके, कर्म्मविपाकात्सकाशात् 'महद्भयं' नानागतिदुःखक्लेशविपाकात्मकमिति ॥ किमिति कर्म्मविपाकान्महद्भयमित्याह—

बहुदुक्खा हु जन्तवो, सत्ता कामेसु माणवा, अबलेण वहं गच्छन्ति सरीरेणं पभंगुरेण अट्टे से बहुदुक्खे इइ बाले पकुव्वइ एए रोगा बहू नच्चा आउरा परियावए नालं पास, अलं तवेएहिं, एयं पास मुणी! महब्भयं नाइवाइज्ज कंचणं (सू० १७८)

बहूनि दुःखानि कर्म्मविपाकापादितानि येषां जन्तूनां ते तथा, हुर्यस्मादेवं तस्मात्तत्राप्रमादवता भाव्यं । किमित्येवं भूयो भूयोऽपदिश्यत इत्यत आह–यस्मादनादिभवाभ्यासेनागणितोत्तरपरिणामाः 'सक्ताः' गृद्धाः 'कामेषु' इच्छामदनरूपेषु 'मानवाः' पुरुषा इत्यतो न पुनरुक्तदोषानुषङ्गः । कामासक्ताश्च यदवाप्नुवन्ति तदाह–बलरहितेन निःसारेण तुषमुष्टिकल्पेनौदारिकेण शरीरेण 'प्रभङ्गुरेण' स्वत एव भङ्गशीलेन तत्सुखाधानाय कर्म्मोपचित्याऽनेकशो वधं गच्छन्ति, कः पुनरसौ विपाककटुकेषु कामेषु यो रतिं विदध्यादित्याह–मोहोदयादार्त्तः अगणितकार्याकार्यविवेकः सोऽसुमान्बहु

दुःखं प्राप्तव्यमनेनेति बहुदुःख इत्येनं कामानुषङ्गं प्राणिनां क्लेशं वा 'बालो' रागद्वेषाकुलितः प्रकर्षेण करोति प्रकरोति, तज्जनितकर्म्मविपाकाच्च अनेकशो वधं गच्छति, यदिवा रोगेषु सत्सु इत्येतद्वक्ष्यमाणं बालोऽज्ञः प्रकरोति तदाह–एतान्–गण्डकुष्ठराजयक्ष्मादीन् रोगान् बहुनुत्पन्नानिति ज्ञात्वा तद्रोगवेदनया आतुराः सन्तः चिकित्सायै प्राणिनः परितापयेयुः, 'लावकादिपिशिताशिनः किल क्षयव्याध्युपशमः स्यादि'त्यादिवाक्याकर्णनाजीविताशया गरीयस्यपि प्राण्युपमर्दे प्रवर्त्तेरन्, नैतदवधारयेयुः यथा–स्वकृतावन्ध्यकर्म्मविपाकोदयादेतत्, तदुपशमाच्चोपशमः, प्राण्युपमर्दचिकित्सया च किल्बिषानुषङ्ग एवेति, एतदेवाह–पश्यैतद्विमलविवेकावलोकनेन यथा 'नालं' न समर्थाः चिकित्साविधयः कर्म्मोदयोपशमं विधातुं, यद्येवं ततः किं कर्त्तव्यमिति दर्शयति—'अलं' पर्याप्तं 'तव' सदसद्विवेकिनः 'एभिः' पापोपादानभूतैश्चिकित्साविधिभिरिति । किं च—'एतत्' प्राण्युपमर्दादिकं 'पश्य' अवधारय हे 'मुने'! जगन्नयस्वभाववेदिन्, महत्–बृहद्भयहेतुत्वाद्भयं, यद्येवं ततः किं कुर्यादिति दर्शयति—'नातिपातयेत्' न हन्यात् कञ्चन प्राणिनं, यत एकस्मिन्नपि प्राणिनि–हन्यमानेऽष्टप्रकारमपि कर्म बध्यते, तच्चानुत्तारसंसारगमनायेत्यतो महाभयमिति, यदिवा एए रोगे बहू णच्चेत्यादिको ग्रन्थः कामानधिकृत्य नेयः, एतान् रोगरूपान् कामान् बहून् ज्ञात्वा आसेवनाप्रज्ञयेति आतुराः–कामेच्छान्धा अपरान् प्राणिनः परितापयेयुः इत्यादिना प्रक्रमेणेति ॥ तदेवं रोगकामातुरतया सावद्यानुष्ठानप्रवृत्तानामुपदेशदानपुरस्सरं महाभयं प्रदर्श्य तद्विपर्यस्तानां सत्स्वरूपां गुणवत्तां दिदर्शयिषुः प्रस्तावमारचयन्नाह—

आयाण भो सुस्सूस! भो धूयवायं पवेयइस्सामि इह खलु अत्तत्ताए तेहिं तेहिं कुलेहिं आभेसेएण अभिसंभूया अभिसंजाया अभिनिव्वुडा अभिसंवुड्ढा अभिसंबुद्धा अभिनिक्कंता अणुपुव्वेण महामुणी (सू० १७९)

'भोः' इति शिष्यामन्त्रणं, यदहमुत्तरत्रावेदयिष्यामि भवतस्तत् 'आजानीहि'–अवधारय, 'शुश्रूषस्व' श्रवणेच्छां विधेहि 'भोः' इति पुनरप्यामन्त्रणमर्थगरीयस्त्वख्यापनाय, नात्र भवता प्रमादो विधेयो, धूतवादं कथयिष्याम्यहं, धूतम्–अष्टप्रकारकर्म्मधूननं ज्ञातिपरित्यागो वा तस्य वादो धूतवादः तं प्रवेदयिष्यामि, अवहितेन च भवता भाव्यमिति । नागार्जुनीयास्तु पठन्ति—"धुतोवायं पवेयंति"अष्टप्रकारकर्म्मधूननोपायं निजधूननोपायं वा प्रवेदयन्ति तीर्थकरादयः । कोऽसावुपाय इत्यत आह—'इह' अस्मिन् संसारे 'खलुः' वाक्यालङ्कारे आत्मनो भाव आत्मता–जीवास्तिता स्वकृतकर्म्मपरिणतिर्वा तयाऽभिसम्भूताः–सञ्जाताः, न पुनः पृथिव्यादिभूतानां कायाकारपरिणामतया ईश्वरप्रजापतिनियोगेन वेति, तेषु तेषूच्चावचेषु कुलेषु यथास्वं कर्म्मोदयापादितेषु 'अभिषेकेण' शुक्रशोणितनिषेकादिक्रमेणेति, तत्रायं क्रमः—"सप्ताहं कललं विन्द्यात्ततः सप्ताहमर्बुदम् । अर्बुदाज्जायते पेशी, पेशीतोऽपि घनं भवेत् ॥ १ ॥" इति, तत्र यावत्कललं तावदभिसम्भूताः, पेशीं यावदभिसञ्जाताः, ततः साङ्गोपाङ्गस्नायुशिरोरोमादिक्रमाभिनिर्वर्त्तनादभिनिर्वृत्ताः, ततः प्रसूताः सन्तोऽभिसंवृद्धाः, धर्म्मश्रवणयोग्यावस्थायां वर्त्तमाना धर्म्मकथादिकं निमित्तमासाद्योपलब्धपुण्यपापतयाऽभिसम्बुद्धाः, ततः सदसद्विवेकं जानानाः अभिनिष्क्रान्ताः. ततोऽधीताचारादिशास्त्रास्तदर्थभावनोपबृंहितचर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णपरिणामा अनुपूर्वेण शिक्षकगीतार्थक्षपकपरिहारविशुद्धिकैकाकिविहारिजिनकल्पिकावसाना मुनयोऽभूवन्निति ॥ अभिसम्बुद्धं च प्रविव्रजिषुमुपलभ्य यन्निजाः कुर्युस्तद्दर्शयितुमाह—

तं परिक्कमंतं परिदेवमाणा मा चयाहि इय ते वयंति—छंदोवणीया अज्झोववन्ना अक्कंदकारी जणगा रुयंति, अतारिसे मुणी (ण य) ओहं तरए जणगा जेण विप्पजढा, सरणं तत्थ नो समेइ, कहं नु नाम से तत्थ रमइ?, एयं नाणं सया समणुवासिज्जासि त्तिबेमि (सू० १८०) धूताध्ययनोद्देशकः ६—१ ॥

'तम्' अवगततत्त्वं गृहवासपराङ्मुखं महापुरुषसेवितं पन्थानं पराक्रममाणमुपलभ्य मातापितृपुत्रकलत्रादयः परिदेवमाना माऽस्मान् परित्यज 'इति' एतत् ते कृपामापादयन्तो वदन्ति, किं चापरं वदन्तीत्याह—छन्देनोपनीताः छन्दोपनीताः—तवाभिप्रायानुवर्त्तिनस्त्वयि चाभ्युपपन्नाः, तदेवम्भूतानस्मान्माऽवमंस्था इत्येवमाक्रन्दकारिणो 'जनका' मातापित्रादयो जना वा रुदन्ति । एवं च वदेयुरित्याह—न तादृशो मुनिर्भवति, न चौघं संसारं तरति, येन पाखण्डिप्रलब्धेन 'जनका' मातापित्रादयः 'अपोढाः' त्यक्ता इति । स चावगतसंसारस्वभावो यत्करोति तदाह—न ह्यसावनुरक्तमपि बन्धुवर्गं 'तत्र' तस्मिन्नवसरे शरणं समेति, न तदभ्युपगमं करोतीत्यर्थः । किमित्यसौ शरणं नैतीत्याह—कथं नु नामासौ 'तत्र' तस्मिन् गृहवासे सर्वनिकारास्पदे नरकप्रतिनिधौ शुभद्वारपरिघे रमते?. कथं गृहवासे द्वन्द्वैकहेतौ विघटितमोहकपाटः सन् रतिं कुर्यादिति ?। उपसंहारमाह—'एतत्' पूर्वोक्तं ज्ञानं सदा आत्मनि 'सम्यगनुवासयेः' व्यवस्थापयेः, इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । धूताध्ययनस्य प्रथमोद्देशकः समाप्तः ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीय आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके निजकविधूनना प्रतिपादिता, सा चैवं फलवति स्याद्यदि कर्म्मविधूननं स्याद्. अतः कर्म्मविधूननार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

आउरं लोगमायाए चइत्ता पुव्वसंजोगं हिच्चा उवसमं वसित्ता बंभचेरंसि वसु वा अणुवसु वा जाणित्तु धम्मं अहा तहा अहेगे तमचाइ कुसीला (सू० १८१)

'लोकं' मातापितृपुत्रकलत्रादिकं तमातुरं स्नेहानुषङ्गतया वियोगात् कार्यावसादेन वा यदिवा जन्तुलोकं कामरागातुरम् 'आदाय' ज्ञानेन 'गृहीत्वा' परिच्छिद्य तथा त्यक्त्वा च 'पूर्वसंयोगं' मातापित्रादिसम्बन्धं, तथा' हित्वा'गत्वोपशमं उषित्वापि ब्रह्मचर्ये, किम्भूतः सन्निति दर्शयति—वसु द्रव्यं तद्भूतः कषायकालिकादिमलापगमाद्वीतराग इत्यर्थः, तद्विपर्ययेणानुवसु सराग इत्यर्थः, यदिवा वसुः—साधुः अनुवसुः—श्रावकः, तदुक्तम्—"वीतरागो वसुर्ज्ञेयो, जिनो वा संयतोऽथवा । सरागो ह्यनुवसुः प्रोक्तः, स्थविरः श्रावकोऽपि वा ॥ १ ॥" तथा ज्ञात्वा 'धर्म्मं श्रुतचारित्राख्यं यथातथावस्थितं धर्म्मं प्रतिपद्याप्यथैके मोहोदयात्तथाविधभवितव्यतानियोगेन 'तं' धर्म्मं प्रति पालयितुं न शक्नुवन्ति, किंभूताः?—कुत्सितं शीलं येषां ते कुशीला इति. यत एव धर्मपालनाशक्ता अत एव कुशीलाः ॥ एवम्भूताश्च सन्तः किं कुर्युरित्याह—

वत्थं पडिग्गहं कंबलं पायपुंछणं विउसिज्जा, अणुपुव्वेण अणहियासेमाणा परीसहे दुरहियासए, कामे ममायमाणस्स इयाणिं वा मुहुत्तेण वा अपरिमाणाए भेए, एवं से अंतराएहिं कामेहिं आकेवलिएहिं अवइन्नचेए (सू० १८२)

केचिन्नरवशतकोटिदुरापमवाप्य मानुषं जन्म समासाद्यालब्धपूर्वां संसारार्णवोत्तरणप्रत्यलां बोधिद्रोणीमङ्गीकृत्य मोक्षतरुबीजं सर्वविरतिलक्षणं चरणं पुनर्दुर्निवारतया मन्मथस्य पारिप्लवतया मनसो लोलुपतयेन्द्रियग्रामस्यानेकभवाभ्यासापादितविषयमधुरतया प्रबलमोहनीयोदयादशुभवेदनीयोदयासन्नप्रादुर्भावादयशःकीर्त्युत्कटतया अवगणय्याऽऽयतिमविचार्य कार्याकार्यं उररीकृत्य महाव्यसनसागरं साम्प्रतेक्षितयाऽधःकृतकुलक्रमाचारास्तत्त्यजेयुः, तत्त्यागश्च धर्म्मोपकरणपरित्यागान्नवतीत्यतस्तद्दर्शयति—वस्त्रमित्यनेन क्षौमिकः कल्पो गृहीतः, तथा 'पतद्ग्रहः' पात्रं 'कम्बलं' और्णिकं कल्पं पात्रनिर्योगं वा 'पादपुञ्छनकं' रजोहरणं एतानि निरपेक्षतया व्युत्सृज्य कश्चिद्देशविरतिमभ्युपगच्छति, कश्चिद्दर्शनमेवालम्बते, कश्चित्ततोऽपि भ्रश्यति । कथं पुनर्दुर्लभं चारित्रमवाप्य पुनस्तत्त्यजेदित्याह—परीषहान् दुरधिसहनीयान् 'अनुक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेण' परिपाट्या यौगपद्येन वोदीर्णाननधिसहमानाः–परीषहैर्भग्ना मोहपरवशतया पुरस्कृतदुर्गतयो मोक्षमार्गं परित्यजन्ति । भोगार्थं त्यक्तवतामपि पापोदयाद्यत्स्यात्तदाह—'कामान्' विरूपानपि 'ममायमाणस्स'त्ति स्वीकुर्वतो भोगाध्यवसायिनोऽन्तरायोदयात् 'इदानीं' तत्क्षणमेव प्रव्रज्यापरित्यागानन्तरमेव भोगप्राप्तिसमनन्तरमेव वा अन्तर्मुहूर्त्तेन वा कण्डरीकस्येवाहोरात्रेण वा ततोऽप्यूर्ध्वं शरीरभेदो भवत्यपरिमाणाय, एवम्भूत आत्मना सार्द्धं विवक्षितशरीरभेदो भवति येनानन्तेनापि कालेन पुनः पञ्चेन्द्रियत्वं न प्राप्नोति । एतदेवोपसञ्जिहीर्षुराह—'एवं' पूर्वोक्तप्रकारेण 'स' भोगाभिलाषी आन्तरायिकैः कामैः–बहुप्रत्यपायैः न केवलमकेवलं तत्र भवा आकेवलिकाः–सद्वन्द्वाः सप्रतिपक्षा इतियावत् असम्पूर्णा वा, तैः सद्भिरवतीर्णाः संसारं तान् वा द्वितीयार्थे तृतीया, 'चः' समुच्चये, 'एत' इति भोगाभिलाषिणः, कामैरतृप्ता एव शरीरभेदमवाप्नुवन्तीति तात्पर्यार्थः ॥ अपरे त्वासन्नतया मोक्षस्य कथञ्चित्कुतश्चित् कदाचिदवाप्य चरणपरिणामं प्रतिक्षणं लघुकर्म्मतया प्रवर्द्धमानाध्यवसायिनो भवन्तीति दर्शयितुमाह—

अहेगे धम्ममायाय आयाणप्पभिइसु पणिहिए चरे, अप्पलीयमाणे दढे सव्वं गिद्धिं परिन्नाय, एस पणए महामुणी, अइअच्च सव्वओ संगं न महं अत्थित्ति इय एगो अहं, अस्सिं जयमाणे इत्थ विरए अणगारे सव्वओ मुंडे रीयंते, जे अचेले परिवुसिए संचिक्खइ ओमोयरियाए, से आकुट्ठे वा हए वा लुंचिए वा पलियं पकत्थ अ-

दुवा पकत्थ अतहेहिं सद्दफासेहिं इय संखाए एगयरे अन्नयरे अभिन्नाय तितिक्खमाणे परिव्वए जे य हिरी जे य अहिरीमाणा (सू० १८३)

'अथ' अनन्तरमेके विशुद्धपरिणामतया आसन्नापवर्गतया 'धर्म्मं' श्रुतचारित्राख्यं 'आदाय' गृहीत्वा वस्त्रपतद्ग्रहादिधर्म्मोपकरणसमन्विता धर्म्मकरणेषु प्रणिहिताः परीषहसहिष्णवः सर्वज्ञोपदिष्टं धर्म्मं चरेयुरिति । अत्र च पूर्वाणि प्रमादसूत्राण्यप्रमादाभिप्रायेण पठितव्यानीति, उक्तं च—"यत्र प्रमादेन तिरोऽप्रमादः, स्याद्वाऽपि यत्नेन पुनः प्रमादः । विपर्ययेणापि पठन्ति तत्र, सूत्राण्यधीकारवशाद्विधिज्ञाः ॥ १ ॥" । किम्भूताः पुनर्धर्म्मं चरेयुरित्याह—कामेषु मातापित्रादिके वा लोके न प्रलीयमाना अप्रलीयमानाः–अनभिषक्ता धर्म्मचरणे 'दृढाः' तपःसंयमादौ दृढिमानमालम्बमानाः धर्म्मं चरन्तीति, किं च–सर्वां 'गृद्धिं' भोगकाङ्क्षां दुःखरूपतया ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परित्यजेत् । तत्परित्यागे गुणमाह—'एष' इति कामपिपासापरित्यागी प्रकर्षेण नतः–प्रह्वः संयमे कर्म्मधुननायां वा महामुनिर्भवति नापर इति । किं च—'अतिगत्य' अत्येत्यातिक्रम्य 'सर्वतः' सर्वैः प्रकारैः 'सङ्गं' सम्बन्धं पुत्रकलत्रादिजनितं काम्मनुषङ्गं वा, किं भावयेदित्याह–न मम किमप्यस्तीति यत्संसारे पतत आलम्बनाय स्यादिति, तदभावाच्च 'इति' उक्तक्रमेणैकोऽहमस्मिन्–संसारोदरे, न चाहमन्यस्य कस्यचिदिति । एतद्भावनाभावितश्च यत्कुर्यात्तदाह—'अत्र' अस्मिन् मौनीन्द्रे प्रवचने विरतः सन् सावद्यानुष्ठानाद्दशविधचक्रवालसामाचार्यां यतमानः, कोऽसौ?—'अनगारः' प्रव्रजितः, एक-

त्वभावना भावयन्नवमौदर्ये संतिष्ठत इत्युत्तरसूत्रेण सम्बन्धः, इयमेव क्रिया अनन्तरसूत्रेष्वपि लगयितव्येति, किं च—'सर्वतः' द्रव्यतो भावतश्च मुण्डो 'रीयमाणः' संयमानुष्ठाने गच्छन्, किम्भूत इत्याह—यः 'अचेलः' अल्पचेलो जिनकल्पिको वा 'पर्युषितः' संयमे उद्युक्तविहारी अन्तप्रान्तभोजी, तदपि न प्रकामतयेत्याह—'संचिक्खइ' संतिष्ठते अवमौदर्ये । न्यूनोदरतायां वर्त्तमानः सन् कदाचिन्नित्यनीकतया ग्रामकण्टकैस्तुद्येतेत्येतद्दर्शयितुमाह—'स' मुनिर्वाग्भिराकुष्टो वा दण्डादिभिर्हतो वा लुञ्चितो वा केशोत्पाटनतः पूर्वकृतकर्म्मपरिणत्युदयादेतदवगच्छन् सम्यक्तितिक्षमाणः परिव्रजेदिति, एतच्च भावयेत्, तद्यथा—"पावाणं च खलु भो कडाणं कम्माणं पुव्विंदुच्चिन्नाणं दुप्पडिक्कंताणं वेदयित्ता मुक्खो, नत्थि अवेयइत्ता, तवसा वा झोसइत्ता" इत्यादि । कथं पुनर्वाग्भिराकुश्यत इत्याह—'पलिअं'ति कर्म्म जुगुप्सितमनुष्ठानं तेन पूर्वाचरितेन कुविन्दादिना प्रकथ्य जुगुप्स्यते, तद्यथा–भो कोलिक ! प्रव्रजित ! त्वमपि मया सार्द्धमेवं जल्पसीति, अथवा जकारचकारादिभिरपरैः प्रकारैः प्रकथ्य निन्दां विधत्ते, एभिर्वा वक्ष्यमाणैः प्रकारैरित्याह—'अतथ्यैः' वितथैरसद्भूतैः शब्दैश्चौरस्त्वं पारदारिक इत्येवमादिकैः स्पर्शैश्च असद्भूतैः साधोः कर्तुमयुक्तैः करचरणच्छेदादिभिः स्वकृताद्दष्टफलमित्येतत् 'सङ्ख्याय' ज्ञात्वा तितिक्षमाणः प्रव्रजेदिति, यदिवा एतत् सङ्ख्याय, तद्यथा—"पंचहिं ठाणेहिं छउ-

१ पापानां च खलु भोः कृतानां कर्मणां पूर्वं दुश्चीर्णानां दुष्पराक्रान्तानां वेदयित्वा मोक्षः, नास्त्यवेदयित्वा, तपसा वा क्षपयित्वा. २ पञ्चभिः स्थानैरछद्मस्थ उत्पन्नानुपसर्गान् सहते क्षमते तितिक्षते अध्यासयति, तद्यथा–यक्षाविष्टोऽयं पुरुषः, उन्मादप्राप्तोऽयं पुरुषः, दत्तचित्तोऽयं पुरुषः मम च तद्वेदवेदनीयानि कर्माण्युदीर्णानि भवन्ति यदेष पुरुष आक्रोशति वध्नाति तेपते पिट्टयति परितापयति, मम च सम्यक् सहमानस्य यावदध्यासीनस्यैकान्ततः कर्मनिर्जरा भवति । पञ्चभिः स्थानैः केवली उदीर्णान् परीषहानुपसर्गान् यावदध्यासयेत् यावत् समाध्यासयतः बहवश्छद्मस्थाः श्रमणा निर्ग्रन्था उदीर्णान् परीषहोपसर्गान् सम्यक् सहिष्यन्ते यावद् अध्यासिष्यन्ते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्थे उप्पन्ने उवसग्गे सहइ खमइ तितिक्खइ अहियासेइ, तंजहा–जक्खाइट्ठे अयं पुरिसे १, उम्मायपत्ते अयं पुरिसे २, दित्तचित्ते अयं पुरिसे ३, ममं च णं तब्भववेअणीयाणि कम्माणि उदिन्नाणि भवंति–जन्नं एस पुरिसे आउसइ बंधइ तिप्पइ पिट्टइ परितावेइ ४, ममं च णं सम्मं सहमाणस्स जाव अहियासेमाणस्स एगंतसो कम्मणिज्जरा हवइ ५। पंचहिं ठाणेहिं केवली उदिन्ने परीसहे उवसग्गे जाव अहियासेज्जा, जाव मम च णं अहियासेमाणस्स बहवे छउमत्था समणा निग्गंथा उदिन्ने परीसहोवसग्गे सम्मं सहिस्संति जाव अहियासिस्संति" इत्यादि, परीषहाश्चानुकूलप्रतिकूलतया भिन्ना इत्येतदर्शयितुमाह –एकतरान्–अनुकूलान् अन्यतरान्–प्रतिकूलान् परीषहानुदीर्णानभिज्ञाय सम्यक्तितिक्षमाणः परिव्रजेत् यदिवाऽन्यथा परीषहाणां द्वैविध्यमित्याह–ये च परीषहाः सत्कारपुरस्कारादयः साधोर्हारिणो–मनआह्लादकारिणो ये तु प्रतिकूलतया अहारिणो–मनसोऽनिष्टा, यदिवा ह्रीरूपाः–याचनाऽचेलादयः, अह्रीमनसश्च–अलज्जाकारिणः शीतोष्णादयः इत्येतान् द्विरूपानपि परीषहान् सम्यक् तितिक्षमाणः परिव्रजेदिति ॥ किं च—

चिच्चा सव्वं विसुत्तियं फासे समियदंसणे, एए भो णगिणा वुत्ता जे लोगंसि अणागमणधम्मिणो आणाए मामगं धम्मं एस उत्तरवाए इह माणवाणं वियाहिए, इत्थोवरए तं झोसमाणे आयाणिज्जं परिन्नाय परियाएण विगिंचइ, इह एगेसिं एगचरिया होइ तत्थियरा इयरेहिं कुलेहिं सुद्धेसणाए सव्वेसणाए से मेहावी परिव्वए सुब्भिं अदुवा दुब्भिं अदुवा तत्थ भेरवा पाणा पाणे किलेसंति, ते फासे पुट्ठो धीरे अहियासिज्जासि त्तिबेमि (सू० १८४) ॥ धूताध्ययने द्वितीयोद्देशकः ॥ ६–२ ॥

त्यक्त्वा सर्व्वां परीषहकृतां विस्रोतसिकां परीषहापादितान् स्पर्शान्–दुःखानुभवान् 'स्पृशेत्' अनुभवेत् सम्यगधिसहेत, स किम्भूतः?–सम्यग् इतं–गतं दर्शनं यस्य स समितदर्शनः, सम्यग्दृष्टिरित्यर्थः। तत्सहिष्णवश्च किम्भूताः स्युरित्याह—'भोः' इत्यामन्त्रणे 'एते' परीषहसहिष्णवो निष्किञ्चना निर्ग्रन्था भावनग्ना 'उक्ताः' अभिहिताः, यस्मिन्मनुष्यलोके अनागमनं धर्म्मो येषां तेऽनागमनधर्म्माणः, यथाऽऽरोपितप्रतिज्ञाभारवाहित्वान्न पुनर्गृहं प्रत्यागमनेप्सव इति, किं च–आज्ञाप्यतेऽनयेत्याज्ञा तया मामकं धर्म्मं सम्यगनुपालयेत् तीर्थकर एवमाहेति, यदिवा धर्म्मानुष्ठाय्येवमाह–धर्म्म एवैको मामकः अन्यत्तु सर्वं पारक्यमित्यतस्तमहमाज्ञया–तीर्थकरोपदेशेन सम्यक्करोमीति, किमित्याज्ञया धर्म्मोऽनुपाल्यत इत्यत आह—'एषः' अनन्तरोक्तः 'उत्तरवाद' उत्कृष्टवाद इह मानवानां व्याख्यात इति। किं च —'अत्र' अस्मिन् कर्म्मधुननोपाये संयमे उप–सामीप्येन रत उपरतः तद्–अष्टप्रकारं कर्म्म 'झोषयन्' क्षपयन् धर्म्मं चरेदिति, किं चापरं कुर्यादित्याह–आदीयत इत्यादानीयं–कर्म्म तत्परिज्ञाय मूलोत्तरप्रकृतिभेदतो ज्ञात्वा 'पर्यायेण' श्रामण्येन विवेचयति, क्षपयतीत्यर्थः। अत्र चाशेषकर्म्मधुननासमर्थं तपस्तद्वाह्यमधिकृत्योच्यते—'इह' अस्मिन् प्रवचने 'एकेषां' शिथिलकर्म्मणामेकचर्या भवति–एकाकिविहारप्रतिमाऽभ्युपगमो भवति, तत्र च नानारूपाभिग्रहविशेषात्तपश्चरणविशेषाश्च भवन्तीत्यतस्तावत्प्राभृतिकामधिकृत्याह—'तत्र' तस्मिन्नेकाकिविहारे 'इतरे' सामान्यसाधुभ्यो विशिष्टतरा 'इतरेषु' अन्तप्रान्तेषु कुलेषु शुद्धैषणया दशैषणादोषरहितेनाहारादिना 'सर्वैषणये'ति सर्व्वा चाऽऽहाराद्युद्गमोत्पादनग्रासैषणारूपा तया सुपरिशुद्धेन विधिना संयमे परिव्रजन्ति, बहुत्वेऽप्येकदेशतामाह—स मेधावी मर्यादाव्यवस्थितः संयमे परिव्रजेदिति, किं च–सु आहारस्तेष्वितरेषु कुलेषु सुरभिर्वा स्यात् अथवा दुर्गन्धः, न तत्र रागद्वेषौ विदध्यात्, किं च–अथवा तत्रैकाकिविहारित्वे पितृवनप्रतिमाप्रतिपन्नस्य सतो 'भैरवा' भयानका यातुधानादिकृताः शब्दाः प्रादुर्भवेयुः, यदिवा 'भैरवा' बीभत्साः 'प्राणाः' प्राणिनो दीप्तजिह्वादयोऽपरान् प्राणिनः 'क्लेशयन्ति' उपतापयन्ति, त्वं तु पुनस्तैः स्पृष्टस्तान् स्पर्शान् दुःखविशेषान् 'धीरः' अक्षोभ्यः सन्नतिसहस्व। इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत्। धूताध्ययने द्वितीयोद्देशकः परिसमाप्तः ॥

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके कर्म्मधुननाऽभिहिता, सा च नोपकरणशरीरविधूननामन्तरेण, इत्यतस्तद्विधूननार्थमिदमारभ्यते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्य सूत्रमुच्चारयितव्यम्, तच्चेदम्—

एयं खु मुणी आयाणं सया सुयक्खायधम्मे विहूयकप्पे निज्झोसइत्ता, जे अचेले परिवुसिए तस्स णं भिक्खुस्स नो एवं भवइ–परिजुण्णे मे वत्थे वत्थं जाइस्सामि सुत्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाइस्सामि सूइं जाइस्सामि संधिस्सामि सीविस्सामि उक्कसिस्सामि वुक्कसिस्सामि परिहिस्सामि पाउणिस्सामि, अदुवा तत्थ परिक्कमंतं भुज्जो अचेलं तणफासा फुसंति सीयफासा फुसंति तेउफासा फुसंति दंसमसगफासा फुसंति एगयरे अन्नयरे विरूवरूवे फासे अहियासेइ अचेले लाघवं आगममाणे, तवे से अभिसमन्नागए भवइ, जहेयं भगवया पवेइयं तमेव अभिसमिच्चा सव्वओ सव्वत्ताए संमत्तमेव समभिजाणिज्जा, एवं तेसिं महावीराणं चिररायं पुव्वाइं वासाणि रीयमाणाणं दवियाणं पास अहियासियं (सू० १८५)

'एतत्' यत्पूर्वोक्तं वक्ष्यमाणं वा 'खुः' वाक्यालङ्कारे, आदीयते इत्यादानं–कर्म्म आदीयते वाऽनेन कर्म्मेत्यादानं-कर्म्मोपादानं, तच्च धर्म्मोपकरणातिरिक्तं वक्ष्यमाणं वस्त्रादि तन्मुनिः निर्झोषयितेति सम्बन्धः, किम्भूतः ?—'सदा' सर्वकालं सुष्ठ्वाख्यातो धर्म्मोऽस्येति स्वाख्यातधर्म्मा–संसारभीरुत्वाद्यथारोपितभारवाहीत्यर्थः, तथा विधूतः–क्षुण्णः सम्यग्स्पृष्टः कल्पः–आचारो येन स तथा, स एवम्भूतो मुनिरादानं झोषयित्वा आदानमपनेष्यति, कथं पुनस्तदादानं वस्त्रादि स्याद्येन तत झोषयितव्यं भवेदित्याह–अल्पार्थे नञ्, यथाऽयं पुमानज्ञः, स्वल्पज्ञान इत्यर्थः, यः साधुर्नास्य

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २४४ ॥

चेलं–वस्त्रमस्तीत्यचेलः, अल्पचेल इत्यर्थः, संयमे 'पर्युषितो' व्यवस्थित इति, तस्य भिक्षोः 'नैतद्भवति' नैतत्कल्पते यथा परिजीर्णं मे वस्त्रमचेलकोऽहं भविष्यामि न मे त्वक्राणं भविष्यति, ततश्च शीताद्यर्दितस्य किं शरणं मे स्यादिति वस्त्रं विनेत्यतोऽहं कञ्चन श्रावकादिकं प्रत्यग्रं वस्त्रं याचिष्ये, तस्य वा जीर्णस्य वस्त्रस्य सन्धानाय सूत्रं याचिष्ये, सूचिं च याचिष्ये, अवाप्ताभ्यां च सूचिसूत्राभ्यां जीर्णवस्त्ररन्ध्रं सन्धास्यामि–पाटितं सेविष्यामि, लघु वा सदपरशकललगनत उत्कर्षयिष्यामि, दीर्घं वा सत् खण्डापनयनतो व्युत्कर्षयिष्यामि, एवं च कृतं सत्परिधास्यामि तथा प्रावरिष्यामीत्यार्त्तध्यानोपहता असत्यपि जीर्णादिवस्त्रसद्भावे यद्भविष्यत्ताऽध्यवसायिनो धर्म्मैकप्रवणस्य न भवत्यन्तःकरणवृत्तिरिति, यदिवा जिनकल्पिकाभिप्रायेणैवैतत्सूत्रं व्याख्येयं, तद्यथा—'जे अचेले' इत्यादि, नास्य चेलं–वस्त्रमस्तीत्यचेलः–अच्छिद्रपाणित्वात् पाणिपात्रः, पाणिपात्रत्वात् पात्रादिसप्तविधतन्नियोगरहितोऽभिग्रहविशेषात् त्यक्तकल्पत्रयः केवलं रजोहरणमुखवस्त्रिकासमन्वितस्तस्याचेलस्य भिक्षोर्नैतद्भवति, यथा–परिजीर्णं मे वस्त्रं छिद्रं पाटितं चेत्येवमादि वस्त्रगतमपध्यानं न भवति, धर्म्मिणोऽभावाद्धर्म्माभावः, सति तु धर्म्मिणि धर्म्मान्वेषणं न्याय्यमिति सत्यथः, तथेदमपि तस्य न भवत्येव यथा–अपरं वस्त्रमहं याचिष्ये इत्यादि पूर्ववन्नेयं, योऽपि छिद्रपाणित्वात् पात्रनियोगसमन्वितः कल्पत्रयान्यतरयुक्तोऽसावपि परिजीर्णादिसद्भावे तद्गतमपध्यानं न विधत्ते, यथाकृतस्याल्पपरिकर्म्मणो ग्रहणात्सूचिसूत्रान्वेषणं न करोति । तस्य चाचेलस्याल्पचेलस्य वा तृणादिस्पर्शसद्भावे यद्विधेयं तदाह–तस्य ह्यचेलतया परिवसतो जीर्णवस्त्रादिकृतमपध्यानं न भवति, अथवैतत्स्यात्–तत्राचेलत्वे पराक्रममाणं पुनस्तं साधुमचेलं क्वचिद्ग्रामादौ त्वक्राणाभावात् तृण-

धुता० ६ उद्देशकः ३

॥ २४४ ॥

शय्याशायिनं तृणानां स्पर्शाः परुषास्तृणैर्वा जनिताः स्पर्शाः–दुःखविशेषास्तृणस्पर्शास्ते कदाचित् स्पृशन्ति, तांश्च सम्यग् अदीनमनस्कोऽतिसहत इति सम्बन्धः, तथा शीतस्पर्शाः स्पृशन्ति–उपतापयन्ति, तेजः–उष्णास्तत्स्पर्शाः स्पृशन्ति, तथा दंशमशकस्पर्शाः स्पृशन्ति, एतेषां तु परीषहाणामेकतरेऽविरुद्धा दंशमशकतृणस्पर्शादयः प्रादुर्भवेयुः, शीतोष्णादिपरीषहाणां वा परस्परविरुद्धानामन्यतरे प्रादुष्ष्युः, प्रत्येकं बहुवचननिर्देशश्च तीव्रमन्दमध्यमावस्थासंसूचकः, इत्येतदेव दर्शयति–विरूपं–बीभत्सं मनोऽनाह्लादि विविधं वा मन्दादिभेदाद्रूपं–स्वरूपं येषां ते विरूपरूपाः, के ते ?—'स्पर्शाः' दुःखविशेषाः, तदापादकास्तृणादिस्पर्शा वा, तान् सम्यक्करणेनाप्यध्यानरहितोऽधिसहते, कोऽसौ ?—'अचेलः' अपगतचेलोऽल्पचेलो वा अचलनस्वरूपो वा सम्यक्तितिक्षते, किमभिसन्ध्य परीषहानधिसहत इत्यत आह–लघोर्भावो लाघवं, द्रव्यतो भावतश्च, द्रव्यतो ह्युपकरणलाघवं भावतः कर्म्मलाघवं 'आगमयन्' अवगमयन् बुध्यमान इतियावद् अधिसहते परीषहोपसर्गानिति, नागार्जुनीयास्तु पठन्ति—"एवं खलु से उवगरणलाघवियं तवं कम्मक्खयकारणं करेइ" 'एवम्' उक्तक्रमेण भावलाघवार्थमुपकरणलाघवं तपश्च करोति इति भावार्थः । किं च—'से' तस्योपकरणलाघवेन कर्म्मलाघवमागमयतः कर्म्मलाघवेन चोपकरणलाघवमागमयतस्तृणादिस्पर्शानधिसहमानस्य 'तपः' कायक्लेशरूपतया बाह्यमभिसमन्वागतं भवति–सम्यग् आभिमुख्येन सोढं भवति । एतच्च न मयोच्यते इत्येतद्दर्शयितुमाह—'यथा' येन प्रकारेण 'इद'मिति यदुक्तं वक्ष्यमाणं चैतद्भगवता–वीरवर्द्धमानस्वामिना प्रकर्षेणादौ वा वेदितं प्रवेदितमिति, यदि नाम भगवता प्रवेदितं ततः किमित्याह–तद्–उपकरणलाघवमाहारलाघवं वा 'अभिसमेत्य' ज्ञात्वा एवकारोऽवधारणे, तदेव लाघवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञात्वेत्यर्थः, कथमिति चेत् तदुच्यते-'सर्वत' इति द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतः आहारोपकरणादौ क्षेत्रतः सर्वत्र ग्रामादौ कालतोऽहनि रात्रौ वा दुर्भिक्षादौ वा सर्वात्मनेति भावतः कृत्रिमकल्काद्यभावेन, तथा 'सम्यक्त्व'-मिति प्रशस्तं शोभनं एकं सङ्गतं वा तत्त्वं सम्यक्त्वं, यदुक्तम्—"प्रशस्तः शोभनश्चैव, एकः सङ्गत एव च । इत्येतैरुपसृष्टस्तु, भावः सम्यक्त्वमुच्यते ॥ १॥" तदेवम्भूतं सम्यक्त्वमेव समत्वमेव वा 'समभिजानीयात्' सम्यगाभिमुख्येन जानीयात्-परिच्छिन्द्यात्, तथाहि-अचेलोऽप्येकचेलादिकं नावमन्यते, यत उक्तम्—"जोऽवि दुवत्थतिवत्थो एगेण अचेलगो व संथरइ । ण हु ते हीलंति परं सव्वेऽवि य ते जिणाणाए ॥ १ ॥" तथा—"जे खलु विसरिसकप्पा संघयणधियादिकारणं पप्प । णऽवमन्नइ ण य हीणं अप्पाणं मन्नई तेहिं ॥ २ ॥ सव्वेऽवि जिणाणाए जहाविहिं कम्मखवणअट्ठाए । विहरंति उज्जया खलु सम्मं अभिजाणई एवं ॥ ३ ॥" ति, यदिवा तदेव लाघवमभिसमेत्य सर्वतो द्रव्यादिना सर्वात्मना नामादिना सम्यक्त्वमेव सम्यगभिजानीयात्, तीर्थकरगणधरोपदेशात् सम्यक्कुर्यादिति तात्पर्यार्थः । एतच्च नाशक्यानुष्ठानं ज्वरहरतक्षकचूडालङ्काररत्नोपदेशवद्भवतः केवलमुपन्यस्यते, अपि त्वन्यैर्बहुभिश्चिरकालमासेवितमित्येतद्दर्शयितुमाह—'एवम्' इत्यचेलतया पर्युषितानां तृणादिस्पर्शानधिसहमानानां तेषां महावीराणां सकललोकचमत्कृतिकारिणां 'चिररात्रं' प्रभूतकालं यावज्जीवमित्यर्थः, तदेव विशेषतो दर्शयति-'पूर्वाणि' प्रभूतानि वर्षाणि 'रीयमाणानां'

१ योऽपि द्विवस्त्रस्त्रिवस्त्र एकेन अचेलको वा निर्वहति । नैव हीलयति परं सर्वेऽपि ज्ञ ते जिनाज्ञायाम् ॥ १ ॥ ये खलु विसदृशकल्पाः संहननधृत्यादिकारणं प्राप्य । नावमन्यते न च हीनमात्मानं मन्यते तेभ्यः ॥ २ ॥ सर्वेऽपि जिनाज्ञायां यथाविधि कर्मक्षपणार्थं । विहरन्त्युद्यताः खलु सम्यगभिजानात्येवम् ॥ ३ ॥

॥ २४५ ॥

संयमानुष्ठानेन गच्छतां, पूर्वस्य तु परिमाणं वर्षाणां सप्ततिः कोटिलक्षाः षट्पञ्चाशच्च कोटिसहस्राः, तथा प्रभूतानि वर्षाणि रीयमाणानां, तत्र नाभेयादारभ्य शीतलं दशमतीर्थकरं यावत्पूर्वसङ्ख्यासद्भावात् पूर्वाणीत्युक्तं, ततः आरतः श्रेयांसादारभ्य वर्षसङ्ख्याप्रवृत्तेर्वर्षाणीत्युक्तमिति, तथा 'द्रव्याणां' भव्यानां मुक्तिगमनयोग्यानां 'पश्य' अवधारय यत्तृणस्पर्शादिकं पूर्वमभिहितं तदधिसोढव्यमिति सम्यक्करणेन स्पर्शातिसहनं कृतमेतदयगच्छेति ॥ एतच्चाधिसहमानानां यत्स्यात्तदाह—

आगयपन्नाणाणं किसा बाहवो भवंति पयणुए य मंससोणिए विस्सेणिं कट्टु परिन्नाय,
एस तिण्णे मुत्ते विरए वियाहिए त्तिबेमि (सू० १८६)

आगतं प्रज्ञानं पदार्थाविर्भावकं येषां ते तथा तेषामागतप्रज्ञानानां तपसा परीषहातिसहनेन च कृशा 'बाहवः' भुजा भवन्ति, यदिवा सत्यपि महोपसर्गपरीषहादावागतप्रज्ञानत्वाद् 'बाधाः' पीडाः कृशा भवन्ति, कर्म्मक्षपणायोत्थितस्य शरीरमात्रपीडाकारिणः परीषहोपसर्गान् सहायानिति मन्यमानस्य न मनःपीडोत्पद्यत इति, तदुक्तम्—"णिम्मंसो(णे)इ परो ज्झिय अप्पाण उ ण वेयणं सरीराणं । अप्पाणो ज्झिअ हिअयस्स ण उण दुक्खं परो देइ ॥ १ ॥" इत्यादि, शरीरस्य तु पीडा भवत्येवेति दर्शयितुमाह-प्रतनुके च मांसं च शोणितं च मांससोणिते द्वे अपि, तस्य हि रूक्षाहार-

१ विदधात्यि परो नैवात्मनो वेदनां शरीराणाम् । आत्मन एव हृदयस्य न पुनर्दुःखं परो ददाति ॥ १ ॥

त्वादल्पाहारत्वाच्च प्रायशः खलत्वेनैवाहारः परिणमति, न रसत्वेन, कारणाभावाच्च प्रतन्वेव शोणितं तत्तनुत्वान्मांसमपीति ततो मेदादीन्यपि, यदिवा प्रायशो रूक्षं वातलं भवति, वातप्रधानस्य च प्रतनुतैव मांसशोणितयोः, अचेलतया च तृणस्पर्शादिप्रादुर्भावेन शरीरोपतापात् प्रतनुके मांसशोणिते भवत इति सम्बन्धः, 'संसारश्रेणी' संसारावतरणी रागद्वेषकषायसंततिस्तां क्षान्त्यादिना विश्रेणीं कृत्वा, तथा 'परिज्ञाय' ज्ञात्वा च समत्वभावनया, तद्यथा-जिनकल्पिकः कश्चिदेककल्पधारी द्वौ त्रीन् वा बिभर्त्ति, स्थविरकल्पिको वा मासार्द्धमासक्षपकः तथा विकृष्टाविकृष्टतपश्चारी प्रत्यहं भोजी क्रूरगडुको वा, एते सर्वेऽपि तीर्थकृद्वचनानुसारतः परस्परानिन्दया समत्वदर्शिन इति, उक्तं च—"जोवि दुवत्थतिवत्थो एगेण अचेलगो व संथरइ । न हु ते हीलेंति परं सव्वेवि हु ते जिणाणाए ॥ १ ॥" तथा जिनकल्पिकः प्रतिमाप्रतिपन्नो वा कश्चित्कदाचित् षडपि मासानात्मकल्पेन भिक्षां न लभेत तथाऽप्यसौ क्रूरगडुकमपि यथौदनमुण्डस्त्वमित्येवं न हीलयति । तदेवं समत्वदृष्टिप्रज्ञया विश्रेणीकृत्य 'एष' उक्तलक्षणो मुनिः तीर्णः संसारसागरं एष एव मुक्तः सर्वसङ्गेभ्यो विरतः सर्वसावद्यानुष्ठानेभ्यो व्याख्यातो नापर इति । ब्रवीमीतिशब्दौ पूर्ववत् ॥ तदेवं संसारश्रेणीं विश्लेषयित्वा यः संसारसागरतीर्णवत्तीर्णो मुक्तवन्मुक्तो विरतो व्याख्यातः, तं च तथाभूतं किमरतिरभिभवेदुत नेति, अचिन्त्यसामर्थ्यात् कर्म्मणोऽभिभवेदित्येतदेवाह—

॥ २४६ ॥

विरयं भिक्खुं रीयंतं चिरराओसियं अरई तत्थ किं विधारए?, संधेमाणे समुट्ठिए,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहा से दीवे असंदीणे एवं से धम्मे आरियपदेसिए, ते अणवकंखमाणा पाणे अण इवाएमाणा जइया मेहाविणो पंडिया, एवं तेसिं भगवओ अणुट्ठाणे जहा से दियापोए एवं ते सिस्सा दिया य राओ य अणुपुव्वेण वाइय त्तिबेमि (सू० १८७) धूताध्ययने तृतीयोद्देशकः ॥ ६-३ ॥

विरतमसंयमाद् भिक्षणशीलं भिक्षुं 'रीयमाणं' निस्सरन्तमप्रशस्तेभ्योऽसंयमस्थानेभ्यः प्रशस्तेष्वपि गुणोत्कर्षादुपर्युपरि वर्त्तमानं चिररात्रं-प्रभूतं कालं संयमे उषितश्चिररात्रोषितस्तमेवंगुणयुक्तम् 'अरतिः' संयमोद्विग्नता 'तत्र' तस्मिन् संयमे प्रवर्त्तमानं 'किं विधारयेत्' किं प्रतिस्खलयेत्?, किंशब्दः प्रश्ने, किं तथाभूतमपि मोक्षप्रस्थितं प्रणाय्य विषयमरतिर्विधारयेत्, ओमित्युच्यते, तथाहि-दुर्बलान्यविनयवन्ति चेन्द्रियाण्यचिन्त्या मोहशक्तिर्विचित्रा कर्म्मपरिणतिः किं न कुर्यादिति, उक्तं च—"कम्माणि णूणं घणचिक्कणाइं गरुयाइं वइरसाराइं। णाणट्ठिअंपि पुरिसं पंथाओ उप्पहं णिंति ॥१॥" यदिवा किं क्षेपे, किं तथाभूतं विधारयेदरतिः?, नैव विधारयेदित्यर्थः, तथाहि-असौ क्षणे क्षणे विशुद्धतरचरणपरिणामतया विष्कम्भितमोहनीयोदयत्वाल्लघुकर्म्मा भवतीति, कुतस्तमरतिर्वि(नै वि)धारयेदित्याह-क्षणे क्षणेऽव्यवच्छेदेनोत्तरोत्तरं संयमस्थानकण्डकं संदधानः सम्यगुत्थितः समुत्थितः उत्तरोत्तरं गुणस्थानकं वा संदधानो यथाख्यातचा-

° कर्माणि नूनं घनकठोराणि गुरुकानि वज्रसाराणि। ज्ञानस्थितमपि पुरुषं पथ उत्पथं नयन्ति ॥ १ ॥

रित्राभिमुखः समुत्थितोऽसावतस्तमरतिः कथं विधारयेदिति?। स चैवम्भूतो न केवलमात्मनस्त्राता परेषामप्यरतिविधारकत्वात् त्राणायेत्येतद्दर्शयितुमाह-द्विर्गता आपोऽस्मिन्निति द्वीपः, स च द्रव्यभावभेदात् द्वेधा-तत्र द्रव्यद्वीप आश्वासद्वीपः, आश्वास्यतेऽस्मिन्नित्याश्वासः आश्वासश्चासौ द्वीपश्चाश्वासद्वीपो, यदिवा आश्वसनमाश्वासः, आश्वासाय द्वीप आश्वासद्वीपः, तत्र नदीसमुद्रबहुमध्यप्रदेशे भिन्नबोहित्थादयस्तमवाप्याश्वसन्ति, असावपि द्वेधा-सन्दीनोऽसन्दीनश्चेति, यो हि पक्षमासादावुदकेन प्लाव्यते स सन्दीनो, विपरीतस्त्वसन्दीनः सिंहलद्वीपादिः, यथा हि सांयात्रिकास्तं द्वीपमसन्दीनमुदन्वदादेरुत्तितीर्षवः समवाप्याश्वसन्ति एवं तं भावसंधानायोत्थितं साधुमवाप्यापरे प्राणिनः समाश्वस्युः, यदिवा दीप इति प्रकाशदीपः, प्रकाशाय दीपः प्रकाशदीपः, स चादित्यचन्द्रमण्यादिरसन्दीनोऽपरस्तु विद्युदुल्कादिः सन्दीनो, यदिवा प्रचुरेन्धनतया विवक्षितकालावस्थाय्यसन्दीनो विपरीतस्तु सन्दीन इति, यथा ह्यसौ स्थपुटाद्यावेदनतो हेयोपादेयहानोपादानवतां निमित्तभावमुपयाति तथा क्वचित्समुद्राद्यन्तर्वर्त्तिनामाश्वासकारी च भवति एवं ज्ञानसंधानायोत्थितः परीषहोपसर्गाक्षोभ्यतयाऽसन्दीनः साधुर्विशिष्टोपदेशदानतोऽपरेषामुपकारायेति, अपरे भावद्वीपं भावदीपं वा अन्यथा व्याचक्षते-तद्यथा-भावद्वीपः सम्यक्त्वं, तच्च प्रतिपातित्वादौपशमिकं क्षायोपशमिकं च संदीनो भावद्वीपः, क्षायिकं त्वसन्दीन इति, तं द्विविधमवाप्य परीतसंसारत्वात् प्राणिन आश्वसन्ति, भावदीपस्तु सन्दीनः श्रुतज्ञानम् असंदीनस्तु केवलमिति, तच्चावाप्य प्राणिनोऽवश्यमाश्वसन्त्येवेति, अथवा धर्म्मं संदधानः समुत्थितः सन्नरतेर्दुष्प्रधृष्यो भवतीत्युक्ते कश्चिच्चोदयेत्-किम्भूतोऽसौ धर्म्मो? यत्सन्धानाय समत्थित इति,

॥ २४७ ॥

अत्रोच्यते, यथाऽसौ द्वीपोऽसन्दीनः-असलिलप्लुतोऽवरुग्णवाहनानामितरेषां च बहूनां जन्तूना शरण्यतयाऽऽश्वासहेतुर्भवत्येवमसावपि धर्म्मः 'आर्यप्रदेशितः' तीर्थकरप्रणीतः कषतापच्छेदनिर्घर्षितोऽसन्दीनः, यदिवा कुतर्कप्रधूष्यतयाऽसन्दीनः-अक्षोभ्यः प्राणिनां त्राणायाश्वासभूमिर्भवति। तस्य चार्यदेशितस्य धर्म्मस्य किं सम्यगनुष्ठायिनः केचन सन्ति?, ओमित्युच्यते, यदि सन्ति किम्भूतास्त इत्यत आह—'ते' साधवो भावसन्धानोद्यताः संयमारतेः प्रणोदका मोक्षनेदिष्ठा भोगाननवकाङ्क्षन्तो धर्म्मे सम्यगुत्थानवन्तः स्युरिति, एतदुत्तरत्रापि योज्यम्, तथा प्राणिनोऽनतिपातयन्तः, उपलक्षणार्थत्वात् शेषमहाव्रतग्रहणमायोज्यं, तथा कुशलानुष्ठानप्रवृत्तत्वाद्दयिताः सर्वलोकानां, तथा 'मेधाविनो' मर्यादाव्यवस्थिताः 'पण्डिताः' पापोपादानपरिहारितया सम्यक्पदार्थज्ञा धर्म्मचरणाय समुत्थिता भवन्तीति। ये पुनस्तथाभूतज्ञानाभावात् सम्यग्विवेकविकलतया नाद्यापि पूर्वोक्तसमुत्थानवन्तः स्युः ते तथाभूता आचार्यादिभिः सम्यगनुपाल्या यावद्विवेकिनोऽभूवन्नित्येतद्दर्शयितुमाह—'एवम्' उक्तविधिना 'तेषाम्' अपरिकर्मितमतीनां 'भगवतो' वीरवर्द्धमानस्वामिनो धर्म्मे सम्यगनुत्थाने सति तत्परिपालनतस्तथा सदुपदेशदानेन परिकर्मितमतित्वं विधयमिति, अत्रैव दृष्टान्तमाह-द्विजः-पक्षी तस्य पोतः-शिशुः द्विजपोतः स यथा तेन द्विजेन गर्भप्रसवात् प्रभृत्यण्डकोच्छूनोच्छूनतरभेदादिकास्ववस्थासु यावन्निष्पन्नपक्षस्तावत्पाल्यते एवमाचार्येणापि शिक्षकः प्रव्रज्यादानादारभ्य सामाचार्युपदेशदानेनाध्यापनेन च तावदनुपाल्यते यावद्गीतार्थोऽभूत्, यः पुनराचार्योपदेशमुल्लङ्घ्य स्वैरित्वाद्यथा कथञ्चित्क्रियासु प्रवर्त्तते स उज्जयिनीराजपुत्रवद्विनश्येदिति, तद्यथा-उज्जयिन्यां जितशत्रो राज्ञो द्वौ पुत्रौ, तत्र ज्येष्ठो धर्म्मघो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाचार्यसमीपे संसारासारतामवगम्य प्रव्रव्राज, क्रमेण चाधीताचारादिशास्त्रोऽवगततदर्थश्च जिनकल्पं प्रतिपित्सुः द्वितीयां सत्त्वभावनां भावयति, सा च पञ्चधा–तत्र प्रथमोपाश्रये द्वितीया तद्बहिः तृतीया चतुष्के चतुर्थी शून्यगृहे पञ्चमी श्मशाने, तत्र पञ्चमीं भावनां भावयतः स कनिष्ठो भ्राता तदनुरागादाचार्यान्तिकमागत्योवाच–मम ज्यायान् भ्राता क्वास्ते?, साधुभिरभाणि–किं तेन?, स आह–प्रव्रजाम्यहं, आचार्येणोक्तो–गृहाण तावत् प्रव्रज्यां पुनर्द्रक्ष्यसि, स तु तथैव चक्रे, पुनरपि पृच्छत आचार्या ऊचुः–किं तेन दृष्टेन?, नासौ कस्यचिदुलापमपि ददाति, जिनकल्पं प्रतिपत्तुकाम इति, असावाह–तथाऽपि पश्यामि तावदिति, निर्बन्धे दर्शितः, तूष्णीभावस्थित एव वन्दितः, तदनुरागाच्च निषिद्धोऽप्याचार्येण निवार्यमाणोऽप्युपाध्यायेन म्रियमाणोऽपि साधुभिरसाम्प्रतमेतद्भवतो दुष्करं दुरध्यवसेयमित्येवं कथ्यमानेऽप्यहमपि तेनैव पित्रा जात इत्यवष्टम्भेन मोहात्तथैव तस्थौ यथा ज्येष्ठो भ्रातेति, इतरो देवतयाऽऽगत्य वन्दितः, शिक्षकस्तु न वन्दितः, ततोऽसावपरिकर्मितमतित्वात्कुपितः, अविधिरितिकृत्वा देवताऽपि तस्योपरि कुपिता सती तलप्रहारेणाक्षिगोलकौ बहिर्निश्चिक्षेप, ततस्तज्ज्यायान् हृदयेनैव देवतामाह–किमित्ययमज्ञस्त्वया कदर्थितः, तदस्याक्षिणी पुनर्नवीकुरु, सा त्वबादीत्–जीवप्रदेशैर्मुक्ताविमौ गोलकौ न शक्यौ पुनर्नवीकर्तुं इत्युक्त्वा ऋषिवचनमलङ्घनीयमित्यवधार्य तत्क्षणश्वपाकव्यापादितैलाक्षिगोलकौ गृहीत्वा तदक्ष्णोश्चकार । इत्येवमनुपदेशप्रवर्त्तनं सापायमित्यवधार्य शिष्येण सदाऽऽचार्योपदेशवर्त्तिना भाव्यम्, आचार्येणापि सदा स्वपरोपकारवृत्तिना सम्यक् स्वशिष्या यथोक्तविधिना प्रतिपालनीया इति स्थितम् । इत्येतदेवोपसंहरन्नाह–यथा द्विजपोतो मातापितृभ्यामनुपाल्यते एवमाचार्येणापि शिष्या अहर्निशम् 'अनुपूर्वेण' क्रमेण 'वाचिताः' पाठिताः शिक्षां ग्राहिताः समस्तकार्यसहिष्णवः संसारोत्तरणसमर्थाश्च भवन्ति । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । धूताध्ययने तृतीयोद्देशकः परिसमाप्त इति ॥

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके शरीरोपकरणधूननाऽभिहिता, सा च परिपूर्णा न गौरवत्रिकसमन्वितस्येत्यतस्तद्धूननार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यास्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

एवं ते सिस्सा दिया य राओ य अणुपुव्वेण वाइया तेहिं महावीरेहिं पन्नाणमन्तेहिं तेसिमंतिए पन्नाणमुवलब्भ हिच्चा उवसमं फारुसियं समाइयंति, वसित्ता बंभचेरंसि आणं तं नोत्ति मन्नमाणा आघायं तु सुच्चा निसम्म, समणुन्ना जीविस्सामो एगे निक्खमंते असंभवंता विडज्झमाणा कामेहिं गिद्धा अज्झोववन्ना समाहिमाघायमजोसयंता सत्थारमेव फरुसं वयंति (सू० १८८)

एवम्' इति द्विजपोतसंवर्द्धनक्रमेणैव 'ते शिष्याः' स्वहस्तप्रव्राजिता उपसम्पदागताः प्रातीच्छकाश्च दिवा च रात्रौ च

'अनुपूर्वेण' क्रमेण 'वाचिताः' पाठिताः, तत्र कालिकमद्धः प्रथमचतुर्थपौरुष्यारभ्याप्यते उत्कालिकं तु कालवेलावर्जं सकलमप्यहोरात्रमिति, तच्चाध्यापनमाचारादिक्रमेण क्रियते, आचारश्च त्रिवर्षपर्यायोऽध्याप्यत इत्यादिक्रमेणाध्यापिताः शिष्याश्चारित्रं च ग्राहिताः, तद्यथा–युगमात्रदृष्टिना गन्तव्यम् कूर्म्मवत्सङ्कुचिताङ्गेन भाव्यमित्याद्येवं शिक्षां ग्राहिता वाचिताः–अध्यापिताः, कैरिति दर्शयति–तैर्महावीरैः–तीर्थकरैर्गणधराचार्यादिभिः, किम्भूतैः?–प्रज्ञानवद्भिः, ज्ञानिभिरेवोपदेशादि दत्तं लगतीत्यतो विशेषणं, ते तु शिष्याः द्विप्रकारा अपि प्रेक्षापूर्वकारिणस्तेषाम्–आचार्यादीनाम् 'अन्तिके' समीपे प्रकर्षेण ज्ञायते अनेनेति प्रज्ञानं–श्रुतज्ञानं, तस्यैवापरस्मादासन्नवादित्यतस्तद्, 'उपलभ्य' लब्ध्वा बहुश्रुतीभूताः प्रबलमोहोदयापनीतसदुपदेशोत्कटमदत्वात् त्यक्त्वोपशमं, स च द्वेधा–द्रव्यभावभेदात्, तत्र द्रव्योपशमः कतकफलाद्यादितः कलुषजलादेः भावोपशमस्तु ज्ञानादित्रयात्, तत्र यो येन ज्ञानेनोपशाम्यति स ज्ञानोपशमः, तद्यथा–आक्षेपण्याद्यन्यतरया धर्म्मकथया कश्चिद् उपशाम्यतीत्यादि, दर्शनोपशमस्तु यो हि शुद्धेन सम्यग्दर्शनेनापरमुपशमयति, यथा श्रेणिकेनाश्रद्दधानो देवः प्रतित्रोधित इति, दर्शनप्रभावकैर्वा सम्मत्यादिभिः कश्चिदुपशाम्यति, चारित्रोपशमस्तु क्रोधाद्युपशमो विनयनम्रतेति, तत्र केचन क्षुद्रका ज्ञानोदन्वतोऽद्याप्युपर्येव प्लवमानास्तमेवंभूतमुपशमं त्यक्त्वा ज्ञानलवोत्सम्भितगर्वाध्माताः 'पारुष्यं' परुषतां 'समाददति' गृह्णन्ति, तद्यथा–परस्परगुणनिकायां मीमांसायां वा एकोऽपरमाह–त्वं न जानीषे न चैषां शब्दानामयमर्थो यो भवताऽभाणि, अपि च–कश्चिदेव मादृशः शब्दार्थनिर्णयायालं, न सर्व इति, उक्तं च—"पृष्टा गुरवः स्वयमपि परीक्षितं निश्चितं पुनरिदम् नः । वादिनि च मन्दमुख्ये च मादृगेवान्तरं ग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छेत् ॥ १ ॥" द्वितीयस्त्वाह–नन्वस्मदाचार्या एवमाज्ञापयन्तीत्युक्ते पुनराह–सोऽपि वाचिकुण्ठो बुद्धिविकलः किं जानीते?, त्वमपि च शुकवत्पाठितो निरूहापोह इत्यादीन्यन्यान्यपि दुर्गृहीतकतिचिदक्षरो महोपशमकारणं ज्ञानं विपरीततामापादयन् स्वौद्धत्यमाविर्भावयन् भाषते, उक्तं च—"अन्यैः स्वेच्छारचितानर्थविशेषान् श्रमेण विज्ञाय । कृत्स्नं वाङ्मयमिति खादत्यङ्गानि दर्पेण ॥ १ ॥ क्रीडनकमीश्वराणां कुक्कुटलावकसमानवाग्भ्यः । शास्त्राण्यपि हास्यकथां लघुतां वा क्षुल्लको नयति ॥ २ ॥" इत्यादि, पाठान्तरं वा "हेच्चा उवसमं अहेगे पारुसियं समारुहंति" त्यक्त्वोपशमम् 'अथ' अनन्तरं बहुश्रुतीभूताः एके न सर्वे परुषतामालम्बन्ते, ततश्चालसाः शब्दिता वा तूष्णीभावं भजन्ते हुङ्कारशिरःकम्पनादिना वा प्रतिवचनं ददति । किं च–एके पुनर्ब्रह्मचर्य–संयमस्तत्रोषित्वा आचारो वा ब्रह्मचर्यं तदर्थोऽपि ब्रह्मचर्यमेव तत्रोषित्वा आचारार्थानुष्ठायिनोऽपि तद्भङ्गितास्तामाज्ञां–तीर्थकरोपदेशरूपां 'नो इति मन्यमानाः' नोशब्दो देशप्रतिषेधे देशतस्तीर्थकरोपदेशं न बहु मन्यमानाः सातागौरवबाहुल्याच्छरीरबाकुशिकतामालम्बन्ते, यदिवा अपवादमालम्ब्य वर्त्तमाना उत्सर्गचोदनाचोदिताः सन्तः नैषा तीर्थकराज्ञेत्येवं मन्यन्ते, दर्शयन्ति चापवादपदानि "कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहियं" इत्यादि, ततश्च यो येन ग्लायति तस्य तदपनयनार्थमाधाकर्म्माद्यपि कार्यं, स्यादेतत्–किं तेषां नाख्याताः कुशीलानां प्रत्यपायाः यथाऽऽशातनाबहुलानां दीर्घः संसार इति?, तदुच्यते—'तुः' अवधारणे, आख्यातनेवैतत्कुशीलविपाकादिकं श्रुत्वा 'निशम्य' अवबुध्य च शास्तारमेव परुषं वदन्तीति सम्बन्धः । किमर्थं तर्हि

१ तूर्याद्विक्षुर्ग्लानस्य अग्लान्या समाहितं.

शृण्वन्तीति चेत्तदाह—'समनोज्ञा' लोकसम्मता जीविष्याम इतिकृत्वा प्रश्नव्याकरणार्थमेव शब्दशास्त्रादीनि शास्त्राण्यधीयते, यदिवा अनेनोपायेन लोकसम्मता जीविष्याम इतिकृत्वैके निष्क्रम्य, अथवा समनोज्ञा उद्युक्तविहारिणः सन्तो जीविष्यामः संयमजीवितेनेत्येवं निष्क्रम्य पुनर्मोहोदयाद् असम्भवन्तः–ते गौरवत्रिकान्यतरदोषात् ज्ञानादिके मोक्षमार्गे न सम्यग्भवन्तो–नोपदेशे वर्त्तमाना विविधं दह्यमानाः कामैर्गृद्धा गौरवत्रिकेऽध्युपपन्ना विषयेषु 'समाधिं' इन्द्रियप्रणिधानमाख्यातं तीर्थकृदादिभिः यमा(आ)वेदितं(तः)तं 'अजोषयन्तः' असेवमाना दुर्विदग्धा आचार्यादिना शास्त्राभिप्रायेण चोद्यमाना अपि तच्छास्तारमेव परुषं वदन्ति–नास्मिन्विषये भवान् किञ्चिज्जानाति, यथाऽहं सूत्रार्थं शब्दं गणितं निमित्तं वा जाने तथा कोऽन्यो जानीते?, इत्येवमाचार्यादिकं शास्तारं हीलयन्तः परुषं वदन्ति, यदिवा शास्ता–तीर्थकृदादिस्तमपि परुषं वदन्ति, तथाहि–कचित्स्खलिते चोदिता जगदुः–किमन्यदधिकं तीर्थकृद्दृश्यत्यस्मद्गल्कर्त्तनादपीति, इत्यादिभिरपाचीनैरालापैरलीकविद्यामदावलेपाच्छास्त्रकृतामपि दूषणानि वदेयुः ॥ न केवलं शास्तारं परुषं वदन्त्यपरानपि साधूनपवदेयुरित्येतदाह—

सीलमंता उवसंता संखाए रीयमाणा असीला अणुवयमाणस्स बिइया मंदस्स बालया (सू० १८९)

शीलम्–अष्टादशशीलाङ्गसहस्रसङ्ख्यं, यदिवा महाव्रतसमाधानं पञ्चेन्द्रियजयः कषायनिग्रहस्त्रिगुप्तिगुप्तता चेत्येतच्छीलं विद्यते येषां ते शीलवन्तः, तथा उपशान्ताः कषायोपशमात्, अत्र शीलवद्ग्रहणेनैव गतार्थत्वादुपशान्ता इत्येतद्विशेषणं कषायनिग्रहप्राधान्यख्यापनार्थं, सम्यक् ख्यायते–प्रकाश्यतेऽनयेति संख्या–प्रज्ञा तया 'रीयमाणाः' संयमानुष्ठाने पराक्रममाणाः सन्तः कस्यचिद्विश्रान्तभागधेयतया अशीला एत इत्येवमनुवदतोऽनु–पश्चाद्वदतः पृष्ठतो वदतोऽन्येन वा मिथ्यादृष्ट्यादिना कुशीला इत्येवमुक्तेऽनुवदतः पार्श्वस्थादेः द्वितीयैषा 'मन्दस्य' अज्ञस्य 'बालता' मूर्खता, एकं तावत्स्वतश्चारित्रापगमः पुनरपरानुद्युक्तविहारिणोऽपवदत इत्येषा द्वितीया बालता, यदिवा शीलवन्त एते उपशान्ता वेत्येवमन्येनाभिहिते कैषां प्रचुरोपकरणानां शीलवत्तोपशान्तता वा इत्येवमनुवदतो हीनाचारस्य द्वितीया बालता भवतीति ॥ अपरे तु वीर्यान्तरायोदयात् स्वतोऽवसीदन्तोऽप्यपरसाधुप्रशंसान्विता यथावस्थितमाचारमावेदयेयुः, इत्येतद्दर्शयितुमाह—

नियट्टमाणा वेगे आयारगोयरमाइक्खंति, नाणब्भट्ठा दंसणलूसिणो (सू० १९०)

एके–कर्म्मोदयात् संयमान्निवर्त्तमाना लिङ्गाद्वा, वाशब्दादनिवर्त्तमाना वा, यथावस्थितमाचारगोचरमाचक्षते, वयं तु कर्त्तुमसहिष्णव आचारस्त्वेवम्भूत इत्येवं वदतां तेषां द्वितीया बालता न भवत्येव, न पुनर्वदन्ति–एवंभूत एवाचारो योऽस्माभिरनुष्ठीयते, साम्प्रतं दुष्षमानुभावेन बलाद्यपगमान्मध्यभूतैव वर्त्तनी श्रेयसी नोत्सर्गापवाद इति, उक्तं हि —"नात्यायतं न शिथिलं, यथा युञ्जीत सारथिः । तथा भद्रं वहन्त्यश्वा, योगः सर्वत्र पूजितः ॥ १ ॥" अपि च जो जत्थ होइ भग्गो, ओवासं सो परं अविंदंतो । गंतुं तत्थऽचयंतो, इमं पहाणंति घोसेति ॥ १ ॥" इत्यादि । किम्भूताः

१ यो यत्र भवति भग्नोऽवकाशं सोऽपरमविन्दन् । गन्तुं तत्रासमर्थ इदं प्रधानमिति घोषयति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरेतदेवं समर्थयेयुरित्याह–सदसद्विवेको ज्ञानं तस्माद्भ्रष्टा ज्ञानभ्रष्टाः, तथा 'दंसणलूसिणो'त्ति सम्यग्दर्शनविध्वंसिनोऽसदनुष्ठानेन स्वतो विनष्टा अपरानपि शङ्कोत्पादनेन सन्मार्गाच्चयावयन्ति ॥ अपरे पुनर्बाह्यक्रियोपपेता अप्यात्मानं नाशयन्तीत्याह—

नममाणा वेगे जीवियं विप्परिणामंति पुट्ठा वेगे नियट्टंति जीवियस्सेव कारणा, निक्खंतंपि तेसिं दुन्निक्खंतं भवइ, बालवयणिज्जा हु ते नरा, पुणो पुणो जाइं पकप्पिंति अहे संभवंता विद्दायमाणा अहमंसीति विउक्कसे उदासीणे फरुसं वयंति, पलियं पकथे अदुवा पकथे अतहेहिं, तं वा मेहावी जाणिज्जा धम्मं (सू० १९१)

नमन्तोऽप्याचार्यादेर्द्रव्यतः श्रुतज्ञानार्थं ज्ञानादिभावविनयाभावात् कर्म्मोदयाद् एके न सर्वे संयमजीवितं 'विपरिणामयन्ति' अपनयन्ति, सच्चरितादात्मानं ध्वंसयन्तीत्यर्थः । किं चापरमित्याह–एके–अपरिकर्म्मितमतयो गौरवत्रिकप्रतिबद्धाः स्पृष्टाः परीषहैर्निर्वर्त्तन्ते संयमात् लिङ्गाद्वेति, किमर्थं ?–जीवितस्यैव–असंयमाख्यस्य कारणात्–निमित्तात् सुखेन वयं जीविष्याम इतिकृत्वा सावद्यानुष्ठानतया संयमान्निवर्त्तन्ते । तथाभूतानां च यत्स्यात्तदाह–तेषां गृहवासान्निष्क्रान्तमपि ज्ञानदर्शनचारित्रमूलोत्तरगुणान्यतरोपघातादुर्निष्क्रान्तं भवति । तद्धर्म्मणां च यत्स्यात्तदाह–हुर्हेतौ यस्मादसम्यगनुष्ठानात् दुर्निष्क्रान्तास्तस्माद्बालानां–प्राकृतपुरुषाणामपि वचनीयाः–गर्ह्या बालवचनीयास्ते नरा इति । किं च–

॥ २५१ ॥

पौनःपुन्येनारहट्टघटीयन्त्रन्यायेन जातिः–उत्पत्तिस्तां कल्पयन्ति, किम्भूतास्ते इत्याह–अधःसंयमस्थानेषु सम्भवन्तो वर्त्तमाना अविद्यया वाऽधो वर्त्तमानाः सन्तो विद्वांसो वयमित्येवं मन्यमाना लघुतयाऽऽत्मानं व्युत्कर्षयेयुरिति–आत्मनः श्लाघां कुर्वते, यत्किञ्चिज्जानानोऽपि मानोन्नतत्वाद्रससातागौरवबहुलोऽहमेवात्र बहुश्रुतो यदाचार्यो जानाति तन्मयाऽल्पेनैव कालेनाधीतमित्येवमात्मानं व्युत्कर्षयेदिति । नात्मश्लाघतयैवासते, अपरानप्यपवदेयुरित्याह—'उदासीनाः' रागद्वेषरहिता मध्यस्था बहुश्रुतत्वे सत्युपशान्तास्तान् स्खलितचोदनोद्यतान् परुषं वदन्ति, तद्यथा–स्वयमेव तावत्कृत्यमकृत्यं वा जानीहि ततोऽन्येषामुपदेक्ष्यसीति । यथा च परुषं वदन्ति तथा सूत्रेणैव दर्शयितुमाह—'पलियं'ति अनुष्ठानं तेन पूर्वाचरितेनानुष्ठानेन तृणहारादिना प्रकथयेद्–एवम्भूतस्त्वमिति, अन्यथा वा कुण्टमण्टादिभिर्गुणैर्मुखविकारादिभिर्वा प्रकथयेदिति । किम्भूतैः ?–'अतथ्यैः' अविद्यमानैरिति । उपसंहरन्नाह—'तद्' वाच्यमवाच्यं वा 'तं' वा धर्म्मं श्रुतचारित्राख्यं 'मेधावी' मर्यादाव्यवस्थितो 'जानीयात्' सम्यक् परिच्छिन्द्यादिति ॥ सोऽसम्यग्वादप्रवृत्तो बालो गुर्वादिना यथाऽनुशास्यते तथा दर्शयितुमाह—

अहम्मट्ठी तुमंसि नाम बाले आरंभट्ठी अणुवयमाणे हण पाणे घायमाणे हणआ यावि समणुजाणमाणे, घोरे धम्मे, उदीरिए उवेहइ णं अणाणाए, एस विसन्ने वियदे वियाहिए त्तिबेमि (सू० १९२)

अर्थोऽस्यास्तीत्यर्थी, अधर्म्मेणार्थी अधर्म्मार्थी, यतो नाम त्वमेवम्भूतोऽतोऽनुशास्यसे, कुतोऽधर्म्मार्थी ? यतो 'बालः' अज्ञः, कुतो बालो ?, यत 'आरम्भार्थी' सावद्यारम्भप्रवृत्तः, कुतः आरम्भार्थी ?, यतः प्राण्युपमर्दवादाननुवदन्नैतद् ब्रूषे, तद्यथा–जहि प्राणिनोऽपरैरेवं घातयन् व्रतश्चापि समनुजानासि गौरवत्रिकानुबद्धः पचनपाचनादिक्रियाप्रवृत्तांस्तत्सिण्डतर्की तत्समक्षं तानननुवदसि–कोऽत्र दोषो ?, न ह्यशरीरैर्द्धर्म्मः कर्त्तुं पार्य्यते, अतो धर्म्माधारं शरीरं यत्नतः पालनीयमिति, उक्तं च—"शरीरं धर्म्मसंयुक्तं, रक्षणीयं प्रयत्नतः । शरीराज्जायते धर्म्मो, यथा बीजात्सदङ्कुरः ॥ १ ॥" इति, किं चैवं ब्रवीषि त्वं, तद्यथा–'घोरः' भयानको धर्म्मः सर्वाश्रवनिरोधात् दुरनुचरः उत्–प्राबल्येनेरितः–कथितः प्रतिपादितस्तीर्थकरगणधरादिभिरित्येवमध्यवसायी भवांस्तमनुष्ठानत 'उपेक्षते' उपेक्षां विधत्ते, 'णम्' इति वाक्यालङ्कारे, 'अनाज्ञया' तीर्थकरगणधरानुपदेशेन स्वेच्छया प्रवृत्त इति, क एवम्भूत इति दर्शयति—'एष' इत्यनन्तरोक्तोऽधर्म्मार्थी बाल आरम्भार्थी प्राणिनां हन्ता घातयिता व्रतोऽनुमन्ता धर्म्मोपेक्षक इति, विषण्णः कामभोगेषु, विविधं तर्दतीति वितर्दो–हिंसकः 'तर्द हिंसाया'मित्यस्मात् कर्त्तरि पचाद्यच्, संयमे वा प्रतिकूलो वितर्दः इत्येवंरूपस्त्वमेष व्याख्यात इत्यतोऽहं ब्रवीमि–त्वं मेधावी धर्म्मं जानीया इति ॥ एतच्च वक्ष्यमाणमहं ब्रवीमीत्यत आह—

किमणेण भो ! जणेण करिस्सामित्ति मन्नमाणे एवं एगे वइत्ता मायरं पियरं हिच्चा नायओ य परिग्गहं वीरायमाणा समुट्ठाए अविहिंसा सुव्वया दंता पस्स दीणे

॥ २५२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उप्पइए पडिवयमाणे वसट्टा कायरा जणा लूसगा भवंति, अहमेगेसिं सिलोए पावए भवइ, से समणो भवित्ता विब्भंते २ पासहेगे समन्नागएहिं सह असमन्नागए नममाणेहिं अनममाणे विरएहिं अविरए दविएहिं अदविए अभिसमिच्चा पंडिए मेहावी निट्ठियट्ठे वीरे आगमेणं सया परक्कमिज्जासि त्तिबेमि (सू० १९३) ॥ इति धूताध्ययने चतुर्थ उद्देशकः ६–४ ॥

केचन–विदितवेद्या वीरायमाणाः सम्यगुत्थानेनोत्थाय पुनः प्राण्युपमर्दका भवन्तीति, कथमुत्थाय?–किमहमनेन 'भोः' इत्यामन्त्रणे 'जनेन' मातापितृपुत्रकलत्रादिना स्वार्थपरेण परमार्थतोऽनर्थरूपेण करिष्यामीति, न ममायं कस्यचिदपि कार्यस्य रोगापनयनादेरलमित्यतोऽनेन किमहं करिष्ये?, यदिवा प्रविव्रजिषुः केनचिदभिहितः किमनया सिकताकवलसन्निभया प्रव्रज्यया करिष्यति भवान्?, अदृष्टवशायातं तावद्भोजनादिकं भुङ्क्ष्वेत्यभिहितो विरागतामापन्नो ब्रवीति–किमहमनेन भोजनादिना करिष्ये?, भुक्तं मयाऽनेकशः संसारे पर्यटता तथापि तृप्तिर्नाभूत्, तत्किमिदानीमनेन जन्मना भविष्यतीत्येवं मन्यमाना एके विदितसंसारस्वभावा उदित्वाऽप्येवं ततो 'मातरं' जननीं 'पितरं' जनयितारं 'हित्वा' त्यक्त्वा 'ज्ञातयः' पूर्वापरसम्बन्धिनः स्वजनास्तान् परिगृह्यत इति परिग्रहः–धनधान्यहिरण्यद्विपदचतुष्पदादिः तं, किम्भूताः?–वीरमिवात्मानमाचरन्तो वीरायमाणाः, सम्यक् संयमानुष्ठानेनोत्थाय समुत्थाय विविधैरुपायैर्हिंसा विहिंसा

आ. सू. ४३

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २५३ ॥

न विद्यते विहिंसा येषां तऽविहिंसाः, तथा शोभनं व्रतं येषां ते सुव्रताः, तथेन्द्रियदमाद्दान्ताः, इत्येवं समुत्थाय, नागार्जुनीयास्तु पठन्ति—"समणा भविस्सामो अणगारा अकिंचणा अपुत्ता अपसूया अविहिंसगा सुव्वया दंता परदत्तभोइणो पावं कम्मं न करेस्सामो समुट्ठाए" सुगमत्वान्न विव्रियते, इत्येवं समुत्थाय पूर्वं पश्चात् 'पश्य' निभालय 'दीनान्' शृगालत्वविहारिणो वान्तं जिघृक्षून् पूर्वमुत्पतितान् संयमारोहणात् पश्चात्तापोदधात् प्रतिपतत इति, किमिति दीना भवन्तीति दर्शयति–यतो 'वशार्त्ताः' वशा इन्द्रियविषयकषायाणां तत आर्त्ता वशार्त्ताः, तथाभूतानां च कर्म्मानुषङ्गः, तदुक्तम्—"सोइंदियवसट्टेणं भंते! कइ कम्मपगडीओ बंधइ?, गोयमा! आउअवज्जाओ सत्त कम्मपगडीओ जाव अणुपरिअट्टइ। कोहवसट्टेणं भंते! जीवे एवं तं चेव" एवं मानादिष्वपीति, तथा 'कातराः' परीषहोपसर्गोपनिपाते सति विषयलोलुपा वा कातराः, के ते?–जगाः, किं कुर्वन्ति?–ते प्रतिभग्नाः सन्तः 'लूषका भवन्ति' व्रतानां विध्वंसका भवन्ति, को ह्यष्टादशशीलाङ्गसहस्राणि धारयिष्यतीत्येवमभिसन्धाय द्रव्यलिङ्गं भावलिङ्गं वा परित्यज्य प्राणिनां विराधका भवन्ति। तेषां च पश्चात्कृतलिङ्गानां यत्स्यात्तदाह—'अथ' आनन्तर्ये 'एकेषां' भग्नप्रतिज्ञानामुत्प्रव्रजितानां तत्समनन्तरमेवान्तर्मुहूर्त्तेन वा पञ्चत्वापत्तिः स्याद्, एकेषां तु 'श्लोकः' श्लाघारूपः पापको भवेत्, स्वपक्षात्परपक्षाद्वा महत्ययशःकीर्त्तिर्भवति, तद्यथा–स एष पितृवनकाष्ठसमानो भोगाभिलाषी व्रजति तिष्ठति वा, नास्य विश्वसनीयं, यतो नास्याकर्त्तव्यमस्तीति, उक्तं च—"परलोकविरुद्धानि, कुर्वाणं दूरतस्त्यजेत्। आत्मानं यो न संधत्ते, सोऽन्यस्मै स्यात्कथं

धुता० ६ उद्देशकः४

॥ २५३ ॥

१ श्रोत्रेन्द्रियवशार्त्तो भदन्त! कति कर्मप्रकृतीर्बध्नाति?, गौतम! आयुर्वर्जाः सप्त कर्मप्रकृतीर्यावत् अनुपरिवर्तते। क्रोधवशार्त्तो भदन्त! जीवः, एवमेव तद.

हितः? ॥ १ ॥" इत्यादि. यदिवा सूत्रेणैवाश्लाघ्यतां दर्शयितुमाह–सोऽयं श्रमणो भूत्वा विविधं भ्रान्तो–भग्नः श्रमणविभ्रान्तो, वीप्सयाऽत्यन्तजुगुप्सामाह, किं च–पश्यत यूयं कर्म्मसामर्थ्यम् 'एके' विश्रान्तभागधेयाः समन्वागतैरुद्युक्तविहारिभिः सह वसन्तोऽप्यसमन्वागताः–शीतलविहारिणः, तथा 'नममानैः' संयमानुष्ठानेन विनयवद्भिः 'अनममानान्' निर्घृणतया सावद्यानुष्ठायिनो, विरतैरविरता द्रव्यभूतैरद्रव्यभूताः पापकलङ्काङ्कितत्वादेवम्भूतैरपि साधुभिः सह वसन्तोऽपि, एवम्भूतान् 'अभिसमेत्य' ज्ञात्वा किं कर्त्तव्यमिति दर्शयति—'पण्डितः' त्वं ज्ञातज्ञेयो 'मेधावी' मर्यादाव्यवस्थितो 'निष्ठितार्थः' विषयसुखनिष्पिपासो 'वीरः' कर्म्मविदारणसहिष्णुर्भूत्वा 'आगमेन' सर्वज्ञप्रणीतोपदेशानुसारेण 'सदा' सर्वकालं परिक्रामयेरिति। इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववद् ॥ धूताध्ययनस्य चतुर्थोद्देशकः परिसमाप्तः ॥

उक्तश्चतुर्थोद्देशकः, साम्प्रतं पञ्चम आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके कर्म्मविधूननार्थं गौरवत्रयविधूननाऽभिहिता, सा च कर्मविधूननोपसर्गविधूननामन्तरेण न सम्पूर्णभावमनुभवति, नापि सत्कारपुरस्कारात्मकसन्मानविधूननामन्तरेण गौरवत्रयविधूनना सम्पूर्णतामियादित्यत उपसर्गसन्मानविधूननार्थमिदमुपक्रम्यते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यास्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से गिहेसु वा गिहंतरेसु वा गामेसु वा गामंतरेसु वा नगरेसु वा नगरंतरेसु वा जण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वयेसु वा जणवयंतरेसु वा गामनयरंतरे वा गामजणवयंतरे वा नगरजणवयंतरे वा संतेगइया जणा लूसगा भवंति अदुवा फासा फुसंति ते फासे पुट्ठे वीरो अहियासए, ओए समियदंसणे, दयं लोगस्स जाणित्ता पाईणं पडीणं दाहिणं उदीणं आइक्खे, विभए किट्टे वेयवी, से उट्ठिएसु वा अणुट्ठिएसु वा सुस्सूसमाणेसु पवेयए संतिं विरइं उवसमं निव्वाणं सोयं अज्जवियं मद्दवियं लाघवियं अणइवत्तियं सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं सत्ताणं सव्वेसिं जीवाणं अणुवीइ भिक्खू धम्ममाइक्खिज्जा (सू० १९४)

'स' पण्डितो मेधावी निष्ठितार्थो वीरः सदा सर्वज्ञप्रणीतोपदेशानुविधायी गौरवत्रिकाप्रतिबद्धो निर्ममो निष्किञ्चनो निराश एकाकिविहारितया ग्रामानुग्रामं रीयमाणः क्षुद्रतिर्यङ्नरामरकृतोपसर्गपरीषहापादितान् दुःखस्पर्शान् निर्जरार्थी सम्यगधिसहेत, क्व पुनर्व्यवस्थितस्य ते परीषहोपसर्गा अभिपतेयुरिति दर्शयति—आहाराद्यर्थं प्रविष्टस्य गृहेषु वा, उच्चनीचमध्यमावस्थासंसूचकं बहुवचनं, तथा गृहान्तरेषु वा, ग्रसन्ति बुद्ध्यादीन् गुणानिति ग्रामाः तेषु वा तदन्तरालेषु वा, नैतेषु करोऽस्तीति नकराणि तेषु वा तदन्तरालेषु वा, जनानां—लोकानां पदानि—अवस्थानानि येषु ते जनपदाः—अवन्त्यादयः साधुविहरणयोग्याः अर्द्धषड्विंशतिर्देशास्तेषु तदन्तरालेषु वा, तथा ग्रामनगरान्तरे वा ग्रामजनपदान्तरे वा नगरजनपदान्तरे वा उद्याने वा तदन्तरे वा विहारभूमिगतस्य वा गच्छतो वा, तदेवं तस्य भिक्षोर्ग्रामादीनधिशयानस्य कायोत्सर्गादि वा कुर्वत एके कालुष्योपहतात्मानो ये जना लूषयन्तीति लूषका भवन्ति, 'लूष हिंसाया'मित्यस्मात् ल्युड्, ते 'सन्ति' विद्यन्ते, तत्र नारकास्तावदुपसर्गकरणं प्रत्यवस्तु, तिर्यगमरयोरपि कादाचित्कत्वान्मानुष्याणामेवानुकूलप्रतिकूलसद्भावाज्जनग्रहणं, यदिवा जायन्त इति जनाः, ते च तिर्यङ्नरामरा एव जनशब्दाभिहिताः, ते च जना अनुकूलप्रतिकूलान्यतरोभयोपसर्गापादानेनोपसर्गयेयुरिति, तत्र दिव्याश्चतुर्विधाः, तद्यथा हास्यात् १ प्रद्वेषाद् २ विमर्शात् ३ पृथग्विमात्रातो ४ वा, तत्र केलीकिलः कश्चिद्व्यन्तरो विविधानुपसर्गान् हास्यादेव कुर्यात्, यथा भिक्षार्थं प्रविष्टैः क्षुल्लकैर्भिक्षालाभार्थं पललविकटतर्पणादिनोपयाचितकं व्यन्तरस्य प्रपेदे, भिक्षावासौ च तद्याचमानस्य कुतश्चिदुपलभ्य विकटादिकं तैर्दुढौके, तेनापि केल्यैव ते क्षुल्लकाः क्षीबा इव व्यधायिषत १, प्रद्वेषेण यथा भगवतो माघमासरजन्यन्ते तापसीरूपधारिण्या व्यन्तर्योदकजटाभारवल्कलविप्रुड्सिसेचनमकारि २, विमर्शात्किमयं दृढधर्म्मा न वेत्यनुकूलप्रतिकूलोपसर्गैः परीक्षयेत्, यथा संविग्नसाधुभावितया कयाचिद्व्यन्तर्या स्त्रीवेषधारिण्या शून्यदेवकुलिकावासितः

'पुरच्छिमेणं कप्पइ निग्गंथाण वा निग्गंथीण वा जाव मगहाओ एत्तए, दक्खिणेणं कप्पइ निग्गंथाण वा निग्गंथीण वा जाव कोसंबीओ एत्तए, पच्छिमेणं जाव थूणाविसओ, उत्तरेणं जाव कुणालाविसओ, ताव आरिए खित्ते, नो कप्पइ इत्तो बाहिं'ति, अस्यां च आर्यभूमिकायां सार्द्धपञ्चविंशतिर्जनपदा धर्मक्षेत्राण्यर्हद्भिरुक्तानि ॥

साधुरनुकूलोपसर्गैरुपसर्गितो दृढधर्मेति च कृत्वा वन्दित इति ३, तथा पृथग् विविधा मात्रा येषूपसर्गेषु ते पृथग्विमात्राः—हास्यादित्रयान्यतरारब्धा अन्यतरावसायिनो भवन्ति, तद्यथा भगवति सङ्गमकेनेव विमर्शारब्धाः प्रद्वेषेण पर्यवसिता इति, मानुषा अपि हास्यप्रद्वेषविमर्शकुशीलप्रतिसेवनाभेदाच्चतुर्द्धा, तत्र हास्यादेवसेनागणिका क्षुल्लकमुपसर्गयन्ती दण्डेन ताडिता राजानमुपस्थिता, क्षुल्लकेन तदाहृतेन श्रीगृहोदाहरणेन राजा प्रतिबोधित इति १, प्रद्वेषाद्गजसुकुमारस्यैव श्वशुरसोमभूतिनेति २, विमर्शाच्चन्द्रगुप्तो राजा चाणाक्यचोदितो धर्म्मपरीक्षार्थमन्तःपुरिकाभिर्धर्म्ममावेदयन्तं साधुमुपसर्गयति, साधुना च प्रताड्य ताः श्रीगृहोदाहरणं राज्ञे निवेदितमिति ३, तत्र कुत्सितं शीलं कुशीलं तस्य प्रतिसेवनं कुशीलप्रतिसेवनं तदर्थं कश्चिदुपसर्गं कुर्यात्, तद्यथा—ईर्ष्यालुगृहपर्युषितः साधुश्चतसृभिः सीमन्तिनीभिः प्रोषितभर्तृकाभिः सकलां रजनीमेकैकया प्रतियाममुपसर्गितो न चासौ तासु लुलुभे मन्दरवन्निष्प्रकम्पोऽभूदिति ४। तैर्यग्योना अपि भयप्रद्वेषाहारापत्यसंरक्षणभेदाच्चतुर्द्धैव, तत्र भयात्सर्पादिभ्यः, प्रद्वेषाद्यथा भगवतश्चण्डकौशिकात्, आहारात् सिंहव्याघ्रादिभ्यः, अपत्यसंरक्षणात् काक्यादिभ्य इति । तदेवमुक्तविधिनोपसर्गापादकत्वाज्जना लूषका भवन्ति, अथवा तेषु ग्रामादिषु स्थानेषु तिष्ठतो गच्छतो वा स्पर्शाः—दुःखविशेषा आत्मसंवेदनीयाः स्पृशन्ति—अभिभवन्ति, ते चतुर्विधाः—तद्यथा—घट्टनताऽक्षिकणुकादेः पतनता भ्रमिमूर्च्छादिना स्तम्भनता वातादिना श्लेषणता तालुनः पातादङ्गुल्यादेर्वा स्यात्, यदिवा वातपित्तश्लेष्मादिक्षोभात् स्पर्शाः स्पृशन्ति, अथवा निष्किञ्चनतया तृणस्पर्शदंशमशकशीतोष्णाद्यापादिताः स्पर्शाः—दुःखविशेषाः कदाचित्स्पृशन्ति—अभिभवन्ति, तैश्च स्पृष्टः परीषहैस्तान् स्पर्शान्—दुःखविशेषान् 'धीरः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षाभ्योऽधिसहेत नरकादिदुःखभावनयाऽवन्ध्यकर्म्मोदयापादितं पुनरपि मयैवैतत्सोढव्यमित्याकलय्य सम्यक् तितिक्षेतेति । कीदृक्षोऽधिसहेतेत्यत आह, यदिवा स एवम्भूतो न केवलमात्मनस्त्राता सदुपदेशदानतः परेषामपीति दर्शयितुमाह—'ओजः' एको रागादिविरहात् सम्यग् इतं–गतं दर्शनमस्येति समितदर्शनः, सम्यग्दृष्टिरित्यर्थः, यदिवा 'शमितम्' उपशमं नीतं 'दर्शनं' दृष्टिर्ज्ञानमस्येति शमितदर्शनः, उपशान्ताध्यवसाय इत्यर्थः, अथवा समतामितं–गतं दर्शनं–दृष्टिरस्येति समितदर्शनः, समदृष्टिरित्यर्थः, एवम्भूतः स्पर्शानधिसहेत, यदिवा धर्म्ममाचक्षीतेत्युत्तरक्रियया सह सम्बन्धः, किमभिसन्धाय धर्म्ममाचक्षीतेति दर्शयति—'दयां' कृपां 'लोकस्य' जन्तुलोकस्योपरि द्रव्यतो ज्ञात्वा क्षेत्रतः प्राचीनं प्रतीचीनं दक्षीणमुदीचीनमपरानपि दिग्विभागानभिसमीक्ष्य सर्वत्र दयां कुर्वन् धर्म्ममाचक्षीत, कालतो यावज्जीवं, भावतोऽरक्तोऽद्विष्टः, कथमाचक्षीत?–तद्यथा–सर्वे जन्तवो दुःखद्विषः सुखलिप्सवः आत्मोपमया सदा द्रष्टव्या इति, उक्तं च—"न तत्परस्य संदध्यात्, प्रतिकूलं यदात्मनः । एष सङ्ग्राहिको धर्म्मः, कामादन्यः प्रवर्त्तते ॥ १ ॥" इत्यादि, तथा धर्म्ममाचक्षाणो 'विभजेत्' द्रव्यक्षेत्रकालभावभेदैराक्षेपण्यादिकथाविशेषैर्वा प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहरात्रीभोजनविरतिविशेषैर्वा धर्म्मं विभजेत्, यदिवा कोऽयं पुरुषः कं नतो देवताविशेषमभिगृह्णीतोऽनभिगृहीतो वा? एवं विभजेत्, तथा कीर्त्तयेद्व्रतानुष्ठानफलं, कोऽसौ कीर्त्तयेद्? –वेदविद्, आगमविदिति । नागार्ज्जुनीयास्तु पठन्ति—"जे खलु समणे बहुस्सुए वज्झागमे आहरणहेउकुसले धम्मकहालद्धिसम्पन्ने खेत्तं कालं पुरिसं समासज्ज केऽयं पुरिसे कं वा दरिसणमभिसम्पन्नो? एवंगुणजाइए पभू धम्मस्स आघवित्तए" इति,

कण्ड्यं । स पुनः केषु निमित्तभूतेषु कीर्त्तयेदित्याह—'स' आगमवित् स्वसमयपरसमयज्ञः 'उत्थितेषु वा' भावोत्थानेन यतिषु, वाशब्दः उत्तरापेक्षया पक्षान्तरद्योतकः, पार्श्वनाथशिष्येषु चतुर्यामोत्थितेष्वेव वर्द्धमानतीर्थाचार्यादिः पञ्चयामं धर्म्मं प्रवेदयेदिति, स्वशिष्येषु वा सदोत्थितेष्वज्ञातज्ञापनाय धर्मं प्रवेदयेदिति, 'अनुत्थितेषु वा' श्रावकादिषु 'शुश्रूषमाणेषु' धर्म्मं श्रोतुमिच्छत्सु गुर्वादेः पर्युपास्तिं कुर्वत्सु वा संसारोत्तारणाय धर्म्मं प्रवेदयेत् । किम्भूतं प्रवेदयेदित्याह–शमनं शान्तिः, अहिंसेत्यर्थः, तामाचक्षीत, तथा विरतिम्, अनेन च मृषावादादिशेषव्रतसङ्ग्रहः, तथा 'उपशमं' क्रोधजयादु, अनेन चोत्तरगुणसङ्ग्रहः, तथा निर्वृतिः निर्वाणं मूलगुणोत्तरगुणयोरैहिकामुष्मिकफलभूतमाचक्षीत, तथा 'शौचं' सर्वोपाधिशुचित्वं निर्वाच्यव्रतधारणं, तथा आर्जवं मायावक्रतापरित्यागात्, तथा मार्दवं मानस्तब्धतापरित्यागात्, तथा लाघवं सबाह्याभ्यन्तरग्रन्थपरित्यागात्, कथमाचक्षीतेति दर्शयति—'अनतिपत्य' यथावस्थितं वस्त्वागमाभिहितं तथाऽनतिक्रम्येत्यर्थः, केषां कथयति?—'सर्वेषां प्राणिनां' दशविधाः प्राणा विद्यन्ते येषां ते प्राणिनस्तेषां सामान्यतः संज्ञिपञ्चेन्द्रियाणां, तथा 'सर्वेषां भूतानां' मुक्तिगमनयोग्येन भव्यत्वेन भूतानां–व्यवस्थितानां, तथा 'सर्वेषां जीवानां' संयमजीवितेन जीवतां जिजीविषूणां च, तथा 'सर्वेषां सत्त्वानां' तिर्यङ्नरामराणां संसारे क्लिश्यमानतया करुणास्पदानामेकार्थिकानि वैतानि प्राणादीनि वचनानि इत्यतस्तेषां क्षान्त्यादिकं दशविधं धर्म्मं यथायोगं प्रागुपन्यस्तं शान्त्यादिपदाभिहितम् 'अनुविचिन्त्य' स्वपरोपकाराय भिक्षणशीलो भिक्षुर्धर्म्मकथालब्धिमान् 'आचक्षीत' प्रतिपादयेदिति । यथा च धर्म्मं कथयेत्तथाऽऽह—

अणुवीइ भिक्खू धम्ममाइक्खमाणे नो अत्ताणं आसाइज्जा नो परं आसाइज्जा नो अन्नाइं पाणाइं भूयाइं जीवाइं सत्ताइं आसाइज्जा से अणासायए अणासायमाणे वज्झमाणाणं पाणाणं भूयाणं जीवाणं सत्ताणं जहा से दीवे असंदीणे एवं से भवइ सरणं महामुणी, एवं से उट्ठिए ठियप्पा अणिहे अचले चले अबहिल्लेसे परिव्वए संक्खाय पेसलं धम्मं दिट्ठिमं परिनिव्वुडे, तम्हा संगंति पासह गंथेहिं गढिया नरा विसन्ना कामकंता तम्हा लूहाओ नो परिवित्तसिज्जा, जस्सिमे आरंभा सव्वओ सव्वप्पयाए सुपरिन्नाया भवंति जेसिमे लूसिणो नो परिवित्तसंति, से वंता कोहं च माणं य मायं च लोभं च एस तुट्ठे वियाहिए त्तिबेमि (सू० १९५)

स भिक्षुर्मुमुक्षुरनुविचिन्त्य–पूर्वापरेण धर्म्मं पुरुषं वाऽऽलोच्य यो यस्य कथनयोग्यस्तं धर्म्ममाचक्षाणः आङिति मर्यादया यथाऽनुष्ठानं सम्यग्दर्शनादेः शातना आशातना तया आत्मानं नो आशातयेत्, तथा धर्म्ममाचक्षीत यथाऽऽत्मन आशातना न भवेत्, यदिवाऽऽत्मन आशातना द्विधा–द्रव्यतो भावतश्च, द्रव्यतो यथाऽऽहारोपकरणादेर्द्रव्यस्य कालातिपातादिकृताऽऽशातना–बाधा न भवति तथा कथयेत्, आहारादिद्रव्यबाधया च शरीरस्यापि पीडा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावाशातनारूपा स्यात्, कथयतो वा यथा गात्रभङ्गरूपा भावाशातना न स्यात् तथा कथयेदिति, तथा नो परं शुश्रूषुं आशातयेद्–हीलयेद्, यतः परो हीलनया कुपितः सन्नाहारोपकरणशरीरान्यतरपीडायै प्रवर्त्तेतेति, अतस्तदाशातनां वर्जयन् धर्म्मं ब्रूयादिति, तथाऽन्यान् वा सामान्येन प्राणिनो भूतान् जीवान् सत्त्वान्नो आशातयेद्–बाधयेत्, तदेवं स मुनिः स्वतोऽनाशातकः परैरनाशातयन् तथाऽपरानाशातयतोऽननुमन्यमानो परेषां वध्यमानानां प्राणिनां भूतानां जीवानां सत्त्वानां यथा पीडा नोत्पद्यते तथा धर्म्मं कथयेदिति, तद्यथा–यदि लौकिककुप्रावचनिकपार्श्वस्थादिदानानि प्रशंसति अवटतटागादीनि वा ततः पृथिवीकायादयो व्यापादिता भवेयुः, अथ दूषयति ततोऽपरेषां अन्तरायापादनेन तत्कृतो बन्धविपाकानुभवः स्यात्, उक्तं च—"जे उ दाणं पसंसंति, वहमिच्छंति पाणिणं। जे उ णं पडिसेहिंति, वित्तिच्छेअं करिंति ते ॥ १ ॥" तस्मात्तद्दानावटतटागादिविधिप्रतिषेधव्युदासेन यथावस्थितं दानं शुद्धं प्ररूपयेत् सावद्यानुष्ठानं चेति, एवं च ब्रुवन्नुभयदोषपरिहारी जन्तूनामाश्वासभूमिर्भवतीति, एतदृष्टान्तद्वारेण दर्शयति–यथाऽसौ द्वीपोऽसन्दीनः शरणं भवत्येवमसावपि महामुनिः तद्रक्षणोपायोपदेशतः वध्यमानानां वधकानां च तदध्यवसायविनिवर्त्तनेन विशिष्टगुणस्थानापादनाच्छरण्यो भवति, तथाहि–यथोद्दिष्टेन कथाविधानेन धर्म्मकथां कथयन् कांश्चन प्रव्राजयति कांश्चन श्रावकान् विधत्ते कांश्चन सम्यग्दर्शनयुजः करोति, केषाञ्चित्प्रकृतिभद्रकतामापादयति। किंगुणश्चासौ द्वीप इव शरण्यो भवतीत्याह—'एव'मिति वक्ष्यमाणप्रकारेण 'स' शरण्यो महामुनिर्भावोत्थानेन ॥ २५७ ॥

१ ये तु दानं प्रशंसन्ति वधमिच्छन्ति प्राणिनाम्। ये चैतत् प्रतिषेधयन्ति वृत्तिच्छेदं कुर्वन्ति ते ॥ १ ॥

संयमानुष्ठानरूपेण उत्–प्राबल्येन स्थित उत्थितः, तथा स्थितो ज्ञानादिके मोक्षाध्वन्यात्मा यस्य स स्थितात्मा, तथा स्निह्यतीति स्निहो न स्निहोऽस्निहः–रागद्वेषरहितत्वात् अप्रतिबद्धः, तथा न चलतीत्यचलः परीषहोपसर्गवातेरितोऽपीति, तथा चलः अनियतविहारित्वात्, तथा संयमाद्बहिर्निर्गता लेश्या-अध्यवसायो यस्य स बहिर्लेश्यः यो न तथा सोऽबहिर्लेश्यः, स एवम्भूतः परि-समन्तात् संयमानुष्ठाने व्रजेत् परिव्रजेत्, न क्वचित्प्रतिबध्यमान इतियावत्, स च किमिति संयमानुष्ठाने परिव्रजेदित्याह—'संख्याय' अवधार्य 'पेशलं' शोभनं 'धर्म्मं' अविपरीतार्थं दर्शनं–दृष्टिः सदनुष्ठानं वा सा यस्यास्त्यसौ दृष्टिमान्, स च कषायोपशमात् क्षयाद्वा, परिः–समन्तान्निर्वृतः–शीतीभूतो। यस्त्वसद्ख्यातवान् पेशलं धर्म्मं मिथ्यादृष्टिरसौ न निर्वातीति दर्शयितुमाह–इतिर्हेतौ यस्माद्विपरीतदर्शनो मिथ्यादृष्टिः सङ्गवान्न निर्वाति तस्मात् 'सङ्गं' मातापितृपुत्रकलत्रादिजनितं धनधान्यहिरण्यादिजनितं वा सङ्गविपाकं वा पश्यत यूयं विवेकेनावधारयत, सूत्रेणैव सङ्गमाह–त एवं सङ्गिनो नराः सबाह्याभ्यन्तरैर्ग्रन्थैर्ग्रथिता अवबद्धा विषण्णा ग्रन्थसङ्गे निमग्नाः कामैः–इच्छामदनरूपैराक्रान्ता अवष्टब्धा न निर्वान्ति, यद्येवं ततः किं कर्त्तव्यमित्याह–यस्मात्कामाद्यासक्तचेतसः स्वजनधनधान्यादिमूर्च्छिताः कामजैः शारीरमानसादिभिर्दुःखैरुपतापितास्तस्माद् रूक्षात्–संयमाग्निःसङ्गात्मकात् 'नो परिवित्रसेत्' न संयमानुष्ठानाद्बिभीयात्, यतः प्रभूततरदुःखानुषङ्गिणो हि सङ्गिन इति। कस्य पुनः संयमान्न परिवित्रसनं सम्भाव्यत इत्याह–यस्य महामुनेरवगतसंसारमोक्षकारणस्येमे सङ्गाः–आरम्भा अनन्तरोक्ता अविज्ञानतः सर्वज्ञानाचरितत्वात् प्रत्यक्षासन्नवाचिनेदमाऽभिहिताः 'सर्वतः' सर्वात्मकतया सुपरिज्ञाता भवन्ति, किम्भूता आरम्भाः ?–ये-

ष्विमे ग्रन्थग्रथिता विषण्णाः कामभराक्रान्ता जना 'लूषिणो' लूषणशीलाः हिंसका अज्ञानमोहोदयात् 'न परिवित्रसन्ति' न बिभ्यति, यो ह्येवम्भूतांश्चारम्भान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया च परिहरति तस्यैते सुपरिज्ञाता भवन्ति। यश्चारम्भाणां परिज्ञाता स किमपरं कुर्यादित्याह–'स' महामुनिः पूर्वव्यावर्णितस्वरूपो 'वान्त्वा' त्यक्त्वा क्रोधं च मानं च मायां च लोभं चेति, स्वगतभेदसंसूचनार्थो व्यस्तनिर्देशः, सर्वानुयायित्वात् क्रोधस्य प्रथमोपादानं तत्सम्बद्धत्वान्मानस्य लोभार्थे मायोपादीयत इत्यतस्तत्कारणत्वान्मायाया लोभस्यादावुपन्यासः ततः सर्वदोषाश्रयत्वात् सर्वगुरुत्वाच्च सर्वोपरि लोभस्य, क्षपणाक्रमं वाऽऽश्रित्यायमुपन्यास इति, चकारो हीतरेतरापेक्षया समुच्चयार्थः। स एवं क्रोधादीन् वान्त्वा मोहनीयं त्रोटयति, स चैषोऽपगतमोहनीयः संसारसन्ततेस्त्रुट्टः-अपसृतो व्याख्यातस्तीर्थकृदादिभिरितिरधिकारपरिसमाप्तौ, ब्रवीमीत्येतत् पूर्वोक्तं ॥ यदि वैतद्वक्ष्यमाणमित्याह—

कायस्स वियाघाए एस संगामसीसे वियाहिए से हु पारंगमे मुणी, अविहम्ममाणे फलगावयट्ठी कालोवणीए कंखिज्ज कालं जाव सरीरभेउत्तिबेमि (सू० १९६) ६–५॥

धूताध्ययनम् ॥ ६ ॥

'कायः' औदारिकादित्रयं धातिचतुष्टयं वा तस्य 'व्याघातो' विनाशः, अथवा चीयत इति कायस्तस्य विशेषेणाङ्गमर्यादयाऽऽयुष्कक्षयावधिलक्षणया घातो व्याघातः–शरीरविनाश एष सङ्ग्रामशीर्षरूपतया व्याख्यातो, यथा हि सङ्ग्राम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिरसि परानीकनिशिताकृष्टकृपाणनिर्यत्प्रभासंवलितोद्यत्सूर्यविद्युद्भूतविद्युन्नयनचमत्कृतिकारिणि कृतकरणोऽपि सुभटश्चित्तविकारं विधत्ते, एवं मरणकालेऽपि समुपस्थिते परिकर्म्मितमतेरप्यन्यथाभावः कदाचित्स्याद् अतो यो मरणकाले न मुह्यति स पारगामी मुनिः संसारस्य कर्म्मणो वा उत्क्षिप्तभारस्य वा पर्यन्तयायीति । किं च–विविधं परीषहोपसर्गैर्हन्यमानो विहन्यमानः न विहन्यमानोऽविहन्यमानः न निर्विण्णः सन् वैहानसं गार्द्धपृष्ठमन्यद्वा बालमरणं प्रतिपद्यत इति, यदिवा हन्यमानोऽपि सबाह्याभ्यन्तरतया तपःपरीषहोपसर्गैः फलकवदवतिष्ठते न कातरीभवति, तथा कालेनोपनीतः कालोपनीतो–मृत्युकालेनान्यवशतां प्रापितः सन् द्वादशवर्षसंलेखनयाऽऽत्मानं संलिख्य गिरिगह्वरादिस्थण्डिलपादपोपगमनेङ्गितमरणभक्तपरिज्ञान्यतरावस्थोपगतः 'कालं' मरणकालमायुष्कक्षयं यावच्छरीरस्य जीवेन सार्द्धं भेदो भवति तावदाकाङ्क्षेद्, अयमेव च मृत्युकालो यदुत शरीरभेदो, न पुनर्जीवस्यात्यन्तिको विनाशोऽस्तीति । इतिरधिकारपरिसमाप्तौ, ब्रवीमीत्यादिकं पूर्ववदिति, पञ्चमोद्देशकः, तत्समाप्तौ समाप्तं धूताख्यं षष्ठमध्ययनमिति ॥ ग्रं० ८३५ ॥

आ. सू. ४४
श्रीआचाराङ्गवृत्तिः (शी०)
॥ २५९ ॥

अथाष्टमं विमोक्षाध्ययनम् (सप्तमं व्युच्छिन्नम्)

विमो० उद्देशक०

उक्तं षष्ठमध्ययनं, अथ सप्तमाष्टमाध्ययनमारभ्यते, अधुना सप्तमाध्ययनस्य महापरिज्ञाख्यस्यावसरः, तच्च व्यवच्छिन्नमितिकृत्वाऽतिलङ्घ्याष्टमस्य सम्बन्धो वाच्यः, स चायम्–इहानन्तराध्ययने निजकर्म्मशरीरोपकरणगौरवत्रिकोपसर्गसन्मानविधूननेन निःसङ्गताऽभिहिता, सा चैवं साफल्यमनुभवति यद्यन्तकालेऽपि सम्यग्निर्याणं स्यादित्यतः सम्यग्निर्याणप्रतिपादनायेदमारभ्यते, यदिवा निःसङ्गविहारिणा नानाविधाः परीषहोपसर्गाः सोढव्या इत्येतत्प्रतिपादितं, तत्र मारणान्तिकोपसर्गनिपाते सति अदीनमनस्केन सम्यग्निर्याणमेव विधेयमित्यस्यार्थस्य प्रतिपादनायेदमारभ्यते इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमद्वारायातोऽर्थाधिकारो द्वेधा, तत्राप्यध्ययनार्थाधिकारः प्रागभिहितः, उद्देशार्थाधिकारं तु निर्युक्तिकारो बिभणिषुराह—

असमणुन्नस्स विमुक्खो पढमे बिइए अकप्पियविमुक्खो । पडिसेहणा य रुट्ठस्स चेव सब्भावकहणा य ॥२५३॥
तइयंमि अंगचिट्ठाभासिय आसंकिए य कहणा य । सेसेसु अहीगारो उवगरणसरीरमुक्खेसु ॥ २५४ ॥
उद्देसंमि चउत्थे वेहाणसगिद्धपिट्ठमरणं च । पंचमए गेलन्नं भत्तपरिन्ना य बोद्धव्वा ॥ २५५ ॥
छट्ठंमि उ एगत्तं इंगिणिमरणं च होइ बोद्धव्वं । सत्तमए पडिमाओ पायवगमणं च नायव्वं ॥ २५६ ॥

॥ २५९

अणुपुव्विविहारीणं भत्तपरिन्ना य इंगिणीमरणं । पायवगमणं च तहा अहिगारो होइ अट्ठमए ॥ २५७ ॥

अत्राद्योद्देशकेऽयमर्थाधिकारः, तद्यथा–असमनुज्ञानाम समनोज्ञानां वा त्रयाणां त्रिषष्ट्यधिकानां प्रावादुकशतानां विमोक्षः–परित्यागः कार्यः, तथा तदाहारोपधिशय्यातद्दृष्टिपरित्यागश्च, पार्श्वस्थादयः पुनश्चारित्रतपोविनयेष्वसमनोज्ञाः, यथाच्छन्दास्तु पञ्चस्वपि ज्ञानाचारादिष्वसमनोज्ञास्तेषां यथायोगं त्यागो विधेय इति १ । द्वितीये तु अकल्पिकस्य–आधाकर्म्मादेर्विमोक्षः–परित्यागः कार्यो, यदिवाऽऽधाकर्म्मणा कश्चिन्निमन्त्रयेत्, ततः प्रतिषेधो विधेयः, तत्प्रतिषेधे च रुष्टस्य सतः सिद्धान्तसद्भावः कथनीयो यथैवम्भूतं दानं तव मम च न गुणायेति २ । तृतीये तूद्देशकेऽयमर्थाधिकारः, तद्यथा–गोचरगतस्य यतेः शीतादिना कम्पनादिकायामङ्गचेष्टायां सत्यां गृहस्थस्येयमारेका स्याद् यथा–ग्रामधर्म्मैरुद्ध्याध्यमानस्य भृङ्गारभावावेशादस्य यतेः कम्पनमित्येवं भाषिते आशङ्कितेवा तदाशङ्काव्युदासाय यथावस्थितार्थकथना क्रियत इति ३ । शेषेषु तूद्देशकेषु पञ्चस्वयमर्थाधिकारः, तद्यथा–उपकरणशरीराणां विमोक्षः–परित्यागस्तद्विषयः समासतो व्यासतस्तूच्यते–चतुर्थोद्देशके त्वयमर्थाधिकारः, तद्यथा–वैहानसम्–उद्बन्धनं गार्द्धपृष्ठम्–अपरमांसादिहृदयन्यासाद्वृद्धादिनाऽऽत्मव्यापादनम्, एतत् प्रकारद्वयं मरणं वाच्यं ४। पञ्चमके तु ग्लानता भक्तपरिज्ञा च बोद्धव्या ५। षष्ठे त्वेकत्वम्–एकत्वभावना तथेङ्गितमरणं च बोद्धव्यं ६। सप्तमकेषु प्रतिमाः–भिक्षुप्रतिमा मासादिका वाच्याः, तथा पादपोपगमनं च ज्ञातव्यमिति ७। अष्टमके त्वयमर्थाधिकारः, तद्यथा–अनुपूर्वविहारिणां–प्रतिपालितदीर्घसंयमानां शास्त्रार्थग्रहणप्रतिपादनोत्तरकालमवसीदत्–संयमाध्ययनाध्यापनक्रियाणां निष्पादितशिष्याणामुत्सर्गतः द्वादशसंवत्सरसंलेखनाक्रमसंलिखितदेहानां भक्तपरिज्ञेङ्गित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २६० ॥

मरणं पादपोपगमनं वा यथा भवति तथोच्यत इति गाथापञ्चकसमासार्थो, व्यासार्थस्तु प्रत्युद्देशकं वक्ष्यते । निक्षेपस्तु त्रिधा–ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्चेति, तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने तु विमोक्ष इति नाम, तत्र विमोक्षस्य निक्षेपं चिकीर्षुः निर्युक्तिकार आह—

विमो० ८ उद्देशकः१

नामंठवणविमुक्खो दव्वे खित्ते य काल भावे य । एसो उ विमुक्खस्सा निक्खेवो छव्विहो होइ ॥ २५८॥

नामविमोक्षः स्थापनाविमोक्षो द्रव्यविमोक्षः क्षेत्रविमोक्षः कालविमोक्षो भावविमोक्षश्चेत्येवं विमोक्षस्य निक्षेपः षोढा भवतीति गाथासमासार्थः ॥ व्यासार्थप्रतिपादनाय तु सुगमनामस्थापनाव्युदासेन द्रव्यादिविमोक्षप्रतिपादनद्वारेणाह—

दव्वविमुक्खो निगलाइएसु खित्तंमि चारयाईसुं । काले चेइयमहिमाइएसु अणघायमाईओ ॥ २५९ ॥

द्रव्यविमोक्षो द्विधा–आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चानुपयुक्तः, नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तो निगडादिकेषु विषयभूतेषु यो विमोक्षः स द्रव्यविमोक्षः, सुब्व्यत्ययेन वा पञ्चम्यर्थे सप्तमी, निगडादिभ्यो द्रव्येभ्यः सकाशाद्विमोक्षो द्रव्यविमोक्षः, अपरकारकवचनसम्भवस्तु स्वयमभ्यूह्यायोज्यः, तद्यथा–द्रव्येण द्रव्यात् सचित्ताचित्तमिश्राद्विमोक्ष इत्यादि, क्षेत्रविमोक्षस्तु यस्मिन् क्षेत्रे चारकादिके व्यवस्थितो विमुच्यते क्षेत्रदानाद्वा यस्मिन्वा क्षेत्रे व्यावर्ण्यते स क्षेत्रविमोक्षः, कालविमोक्षस्तु चैत्यमहिमादिकेषु कालेष्वनाघातादिघोषणापादितो यावन्तं कालं मुच्यते यस्मिन्वा काले व्याख्यायते सोऽभिधीयते इति गाथार्थः ॥ भावविमोक्षप्रतिपादनायाह—

॥ २६० ॥

दुविहो भावविमुक्खो देसविमुक्खो य सव्वमुक्खो य । देसविमुक्खा साहू सव्वविमुक्खा भवे सिद्धा ॥२६०॥

भावविमोक्षो द्विधा–आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चोपयुक्तो, नोआगमतस्तु द्विधा–देशतः सर्वतश्च, तत्र देशतोऽविरतसम्यग्दृष्टिनामाद्यकषायचतुष्कक्षयोपशमाद्देशविरतानामाद्याष्टकषायक्षयोपशमाद्भवति, साधूनां च द्वादशकषायक्षयोपशमात् क्षपकश्रेण्यां च यस्य यावन्मात्रं क्षीणं तस्य तत्क्षयादेशविमुक्ततेत्यतः साधवो देशविमुक्ता, भवस्थकेवलिनोऽपि भवोपग्राहिसद्भावादेशविमुक्ता एव, सर्वविमुक्ताश्च सिद्धा भवेयुः इति गाथार्थः ॥ ननु बन्धपूर्वकत्वान्मोक्षस्य निगडादिमोक्षवदित्याशङ्क्याव्यवच्छेदार्थं बन्धाभिधानपूर्वकं मोक्षमाह—

कम्मयदव्वेहि समं संजोगो होइ जो उ जीवस्स । सो बंधो नायव्वो तस्स विओगो भवे मुक्खो ॥ २६१ ॥

कर्मद्रव्यैः[1] 'समं' सार्द्धं यः संयोगो जीवस्य सबन्धः प्रकृतिस्थित्यनुभावप्रदेशरूपो बद्धस्पृष्टनिधत्तनिकाचनावस्थश्च ज्ञातव्यः, तथैकैको ह्यात्मप्रदेशोऽनन्तानन्तैः कर्मपुद्गलैर्बद्धः, बध्यमाना अप्यनन्तानन्ता एव, शेषाणामग्रहणयोग्यत्वात्, कथं पुनरष्टप्रकारं कर्म बध्नातीति चेद्, उच्यते, मिथ्यात्वोदयादिति, उक्तं च—"कहं णं भंते! जीवा अट्ठ कम्मपगडीओ बंधंति?[2], गोअमा! णाणावरणिज्जस्स कम्मस्स उदएणं दरिसणावरणिज्जं कम्मं निअच्छन्ति, दंसणमोहणिज्जस्स कम्मस्स उदएणं मिच्छत्तं णियच्छन्ति, मिच्छत्तेणं उइण्णेणं एवं खलु जीवे अट्ठकम्मपगडीओ बं-

१ अत्र कथमन्यथा? इत्येवंरूपा. २ कथं भदन्त! जीवा अष्टकर्मप्रकृतीर्बध्नन्ति?, गौतम! ज्ञानावरणीयस्य कर्मण उदयेन दर्शनावरणीयं कर्म बध्नन्ति (उदयते), दर्शनमोहनीयस्य कर्मण उदयेन मिथ्यात्वं बध्नन्ति (उदयते), मिथ्यात्वेन उदितेन एवं खलु जीवोऽष्टकर्मप्रकृतीर्बध्नाति.

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २६१ ॥

विभा० ४ उद्देशकः१

धइ" यदिवा—"जेहेतुप्पिअगत्तस्स रेणुओ लग्गई जहा अंगे । तह रागदोसणेहालियस्स कम्मंपि जीवस्स ॥ १ ॥[1]" इत्यादि, तस्यैवम्भूतस्याष्टप्रकारस्य कर्मणः आस्रवनिरोधात् तपसाऽपूर्वकरणक्षपकश्रेणिप्रक्रमेण शैलेश्यवस्थायां वा योऽसौ वियोगः–क्षयः स मोक्षो भवेदिति गाथार्थः ॥ अस्य च प्रधानपुरुषार्थत्वात् प्रारब्धासिधाराव्रतानुष्ठानफलत्वात् तीर्थिकैः सह विप्रतिपत्तिसद्भावाच्च यथावस्थितमव्यभिचारि मोक्षस्य स्वरूपं दर्शयितुमाह, यदिवा पूर्वं कर्मवियोगोद्देशेन मोक्षस्वरूपमभिहितं, साम्प्रतं जीववियोगोद्देशेन मोक्षस्वरूपं दर्शयितुमाह—

जीवस्स अट्ठजणिएहिं चेव कम्मेहिं पुव्वबद्धस्स । सव्वविवेगो जो तेण तस्स अह इत्तिओ मुक्खो ॥ २६२ ॥

जीवस्यासङ्ख्येयप्रदेशात्मकस्य स्वतोऽनन्तज्ञानस्वभावस्यात्मनैव–मिथ्यात्वाविरतिप्रमादकषाययोगपरिणतेन जनितानि–बद्धानि यानि कर्माणि तैः पूर्वबद्धस्यानादिबन्धबद्धस्य प्रवाहापेक्षया तेन कर्मणा 'सर्वविवेकः' सर्वाभावरूपतया यो विश्लेषस्तस्य–जन्तोः 'अथे'त्युपप्रदर्शने एतावन्मात्र एव मोक्षो नापरः परपरिकल्पितो निर्वाणप्रदीपकल्पादिक इति गाथार्थः ॥ उक्तो भावविमोक्षः, स च यस्य भवति तस्यावश्यं भक्तपरिज्ञादिमरणत्रयान्यतरेण मरणेन भाव्यं, तत्र कार्ये कारणोपचारात् तन्मरणमेव भावविमोक्षो भवतीत्येतत्प्रतिपादयितुमाह—

भत्तपरिण्णा इंगिणि पायवगमणं च होइ नायव्वं । जो मरइ चरिमभरणं भावविमुक्खं वियाणाहि ॥ २६३ ॥

भक्तस्य परिज्ञा भक्तपरिज्ञाऽनशनमित्यर्थः, तत्र त्रिविधचतुर्विधाहारनिवृत्तिमान् सप्रतिकर्मशरीरो धृतिसंहननवान्

॥ २६१ ॥

१ स्नेहम्रक्षितगात्रस्य रेणुर्लगति यथाऽङ्गे । तथा रागद्वेषस्नेहक्लिन्ने कर्मापि जीवस्य ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा समाधिर्भवेत्तथाऽनशनं प्रतिपद्यते, तथेङ्गिते प्रदेशे मरणमिङ्गितमरणमिदं चतुर्विधाहारनिवृत्तिस्वरूपं विशिष्टसंहननवतः स्वत एवोद्वर्त्तनादिक्रियायुक्तस्यावगन्तव्यं, तथा परित्यक्तचतुर्विधाहारस्यैवाधिकृतचेष्टाव्यतिरेकेण चेष्टान्तरमधिकृत्यैकान्तनिष्प्रतिकर्म्मशरीरस्य पादपस्येवोप–सामीप्येन गमनं–वर्त्तनं पादपोपगमनमेतच्च ज्ञातव्यं भवति, यो हि भवसिद्धिकश्चरमं–अन्तिमं मरणमाश्रित्य म्रियते स एतत्पूर्वोक्तत्रयान्यतरेण मरणेन म्रियते, नान्येन वैहानसादिना बालमरणेनेत्येतच्चानन्तरोक्तं मरणं चेष्टाभेदोपाधिविशेषात् त्रैविध्यमनुभवद्भावमोक्षं विजानीहीति गाथार्थः॥ साम्प्रतमेतदेव मरणं सपराक्रमेतरभेदाद् द्विविधमिति दर्शयितुमाह—

सपरिक्कमे य अपरिक्कमए य वाघाय आणुपुव्वीए । सुत्तत्थजाणएणं समाहिमरणं तु कायव्वं ॥ २६४ ॥

'पराक्रमः' सामर्थ्यं सह पराक्रमेण वर्त्तत इति सपराक्रमस्तस्मिंश्च मरणं स्यात्, तद्विपर्यये चापराक्रमे–जङ्घाबलपरिक्षीणे तङ्गक्तपरिज्ञेङ्गितमरणपादपोपगमनभेदात्त्रिविधमपि मरणं सपराक्रमेतरभेदात् प्रत्येकं द्वैविध्यमनुभवति, तदपि व्याघातिमेतरभेदात् द्विधा भवेत्, तत्र व्याघातः सिंहव्याघ्रादिकृतोऽव्याघातस्तु प्रव्रज्यासूत्रार्थग्रहणादिकयाऽऽनुपूर्व्या विपक्किमायुष्कक्षयमनुभवतो यो भवति सोऽव्याघात इहानुपूर्वीत्युक्तं, तत्र परमार्थोपक्षेपेणोपसंहरति–व्याघातेनानुपूर्व्या वा सपराक्रमस्यापराक्रमस्य वा मरणे समुपस्थिते सति सूत्रार्थज्ञेन कालज्ञतया समाधिमरणमेव कर्त्तव्यं, भक्तपरिज्ञेङ्गितमरणपादपोपगमनानामन्यतरद् यथासमाधि विधेयं, न वैहानसादिकं बालमरणं कर्त्तव्यमिति गाथार्थः ॥ तत्र सपराक्रममरणं दृष्टान्तद्वारेण दर्शयितुमाह—

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २६२ ॥

सपरक्कममाएसो जह मरणं होइ अज्जवइराणं । पायवगमणं च तहा एयं सपरक्कमं मरणं ॥ २६५ ॥

विभो० ८ उद्देशकः १

सह पराक्रमेण वर्त्तत इति सपराक्रमं, किं तत्?–मरणं आदिश्यते–इत्यादेशः आचार्यपारम्पर्यश्रुत्यायातो वृद्धवादो यमैतिह्यमाचक्षते, स आदेशो 'यथे'त्युदाहरणोपन्यासार्थः, यथैतत्तथाऽन्यदप्यनया दिशा द्रष्टव्यं, 'आर्यवैरा'वैरस्वामिनो यथा तेषां मरणमभूत् तथा पादपोपगमनं च, एतच्च सपराक्रमं मरणमन्यत्राप्यायोज्यमिति गाथार्थः ॥ भावार्थस्तु कथानकादवसेयः, तच्च प्रसिद्धमेव यथाऽऽर्यवैरैर्विस्मृतकर्णाहितभृङ्गवैरैः प्रमादादवगतासन्नमृत्युभिः सपराक्रमैरेव रथावर्त्तशिखरिणि पादपोपगमनमकारीति । साम्प्रतमपराक्रमं दर्शयितुमाह—

अपरक्कममाएसो जह मरणं होइ उद्दिनामाणं । पाओवगमेऽवि तहा एयं अपरक्कमं मरणं ॥ २६६ ॥

न विद्यते पराक्रमः–सामर्थ्यमस्मिन्नित्यपराक्रमं, किं तत्?–मरणं, तच्च यथा जङ्घाबलपरिक्षीणानामुदधिनाम्नाम्-आर्यसमुद्राणां मरणमभूद् अयमादेशो–दृष्टान्तो वृद्धवादायात इति, पादपोपगमनेऽपि तथैवादेशं जानीयाद् यथा पादपोपगमनेन तेषां मरणमभूदिति, एतद्–अपराक्रमं मरणं यदार्यसमुद्राणां सञ्जातमेवमन्यत्राप्यायोज्यमिति गाथाऽक्षरार्थः ॥ भावार्थस्तु कथानकादवसेयः, तच्चेदम्–आर्यसमुद्रा आचार्याः प्रकृतिकृशा एवासन्, पश्चाच्च तैर्जङ्घाबलपरिक्षीणैः शरीराद्यभमनपेक्ष्य तत्तित्थक्षुभिर्गच्छस्थैरेवानशनं विधाय प्रतिश्रयैकदेशे निर्हारिमं पादपोपगमनमकारि ॥ साम्प्रतं व्याघातिममाह—

वाघाइयमाएसो अवरद्धो हुज्ज अन्नतरएणं । तोसलि महिसीह हओ एयं वाघाइयं मरणं ॥ २६७ ॥

॥ २६२ ॥

विशेषेणाघातो व्याघातः–सिंहादिकृतः शरीरविनाशस्तेन निर्वृत्तं तत्र वा भवं व्याघातिमं, कश्चित्सिंहाद्यन्यतरेणापराद्धो भवेद्–आरब्धो भवेत् तेन यन्मरणं तद्व्याघातिमं, तत्र वृद्धवादायात आदेशो–दृष्टान्तः, यथा–तोसलिनामाचार्यो महिष्याऽऽरब्धश्चतुर्विधाहारपरित्यागेन मरणमभ्युपगतवान् एतद्व्याघातिमं मरणमिति गाथाऽक्षरार्थो, भावार्थस्तु कथानकादवसेयः, तच्चेदम्–तोसलिनामाचार्योऽरण्यमहिषीभिः प्रारब्धः, तोसलिदेशे वा बह्व्यो महिष्यः सम्भवन्ति, ताभिश्च कदाचिदेकः साधुरटव्यन्तर्वर्त्त्यारब्धः, स च ताभिः क्षुद्यमानोऽनिर्वाहमवगम्य चतुर्विधाहारं प्रत्याख्यातवानिति ॥ साम्प्रतमव्याघातिमप्रतिपादनेच्छयाऽऽह—

अणुपुव्विगमाएसो पव्वज्जासुत्तअत्थकरणं च । वीसज्जिओ(य)निन्नो मुक्को तिविहस्स नीयस्स ॥ २६८ ॥

आनुपूर्वी–क्रमस्तं गच्छतीत्यानुपूर्वीगः, कोऽसौ?–आदेशो–वृद्धवादः, स चायं, तद्यथा–पूर्वमुत्थितस्य प्रव्रज्यादानं, ततः सूत्रकरणं पुनरर्थग्रहणं, ततस्तदुभयनिर्म्मातः सुपात्रनिक्षिप्तसूत्रार्थः गुर्वादिनाऽनुज्ञातोऽभ्युद्यतो मरणत्रिकान्यतराय 'निर्यन्' निर्गच्छन् त्रिविधस्याहारोपधिशय्याख्यस्य नित्यपरिभोगान्नित्यस्य मुक्तो भवति, तत्र यद्याचार्यस्तदा शिष्यान्निष्पाद्याऽपरमाचार्यं विधायोत्सर्गेण द्वादशसांवत्सरिक्या संलेखनया संलिख्य ततो गच्छविसर्जितो गच्छानुज्ञया स्वस्थापिताचार्यविसर्जितो वा अभ्युद्यतमरणायापराचार्यान्तिकमियात्, एवमुपाध्यायः प्रवर्त्तिः स्थविरो गणावच्छेदकः सामान्यसाधुर्वाऽऽचार्यविसर्जितः कृतसंलेखनापरिकर्म्मा भक्तपरिज्ञादिकं मरणमभ्युपेयात्, तत्रापि भावसंलेखनां कुर्यात् ॥ द्रव्यसंलेखनायां तु केवलायां दोषसम्भवादित्याह—

पडिचोइओ य कुविओ रण्णो जह तिक्ख सीयला आणा। तंथोले य विवेगो घट्टणया जा पसाओ य ॥२६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिचोदितः सन्नाचार्येण पुनरपि संलिखेत्येवमभिहितः 'कुपितः' क्रुद्धो यथा च राज्ञः पूर्वं तीक्ष्णाज्ञा पश्चाच्छीतलीभवति एवमाचार्यस्यापि, 'तम्बोले' नागवल्लीपत्रे च कुथिते शेषरक्षणाय 'विवेकः' परित्यागः कार्यः, ततः 'घट्टना' कदर्थना कार्या, तत्सहिष्णोः पश्चाद्यावत् प्रसाद इति गाथाऽक्षरार्थः, भावार्थस्तु कथानकादवसेयः, तच्चेदम्–एकेन साधुना द्वादशवर्षसंलेखनयाऽऽत्मानं संलिख्य पुनरभ्युद्यतमरणायाचार्यो विज्ञप्तः, तेनाप्यभाणि–यथाऽद्यापि संलिख, ततोऽसौ कुपितः त्वगस्थिशेषामङ्गुलीं भङ्क्त्वा दर्शयति, किमत्राशुद्धमिति ?, आचार्योऽपि येनाभिप्रायेणोक्तवांस्तमाविष्करोति–अत एवाशुद्धो भवान्, यतो वचनसमनन्तरमेवाङ्गुलीभङ्गद्वारेण भावाशुद्धतामाविष्कृतवानित्युक्त्वाऽऽचार्यस्तत्प्रतिबोधनाय दृष्टान्तं दर्शयति, यथा–कस्यचिद्राज्ञो नित्यं निष्पन्दिनी लोचने, ते च स्ववैद्योपन्यस्तानुष्ठानवतोऽपि न स्वस्थतामियातां, पुनरागन्तुकेन वैद्येनाभिहितः–स्वस्थीकरोमि भवन्तं यदि मुहूर्त्तं वेदनां तितिक्षसे वेदनार्त्तश्च न मां घातयसीति, राज्ञा चाभ्युपगतं, अञ्जनप्रक्षेपानन्तरोद्भूततीव्रवेदनार्त्तेनापगते ममाक्षिणी इत्येवंवादिना व्यापादयितुमारेभे, ततो राज्ञस्तीक्ष्णाज्ञा, यतश्च पूर्वमव्यापादनमभ्युपगतमतः शीतलेति, मुहूर्त्ताच्चापगतवेदनः पटुनयनश्च पूजितवैद्यो मुमुदे राजेति, एवमाचार्यस्यापि तीक्ष्णा प्रतिचोदनादिकाऽऽज्ञा परमार्थतस्तु शीतलेति, यदि पुनरेवं कथितेऽपि नोपशाम्यति ततः शेषसंरक्षणार्थं विकृतनागवल्लीपत्रस्येव विवेकः क्रियते, अथाचार्योपदेशं प्रतिपद्यते ततो गच्छ एव तिष्ठतो घट्टना दुर्वचनादिभिः कदर्थना क्रियते, यदि च तथापि न ज्वलति ततः शुद्ध इतिकृत्वाऽनशनदानेन प्रतिजागरणेन च प्रसादः क्रियत इति ॥ किम्भूतः पुनः कियन्तं वा कालं कथं वाऽऽत्मानं संलिखेदित्येतत् हृदि व्यवस्थाप्याह—

निप्फाईया य सीसा सउणी जह अंडगं पयत्तेणं । बारससंवच्छरियं सो संलेहं अह करेइ ॥ २७० ॥
चत्तारि विचित्ताइं विगईनिज्जूहियाइं चत्तारि । संवच्छरे य दुन्नि उ एगंतरियं तु आयामं ॥ २७१ ॥
नाइविगिट्ठो उ तवो छम्मासे परिमियं तु आयामं । अन्नेऽवि य छम्मासे होइ विगिट्ठं तवोकम्मं ॥२७२॥
वासं कोडीसहियं आयामं काउ आणुपुव्वीए । गिरिकंदरंमि गंतुं पायवगमणं अह करेइ ॥ २७३ ॥

सूत्रार्थतदुभयैः स्वशिष्याः प्रातीच्छका वा 'निष्पादिता' योग्यतामापादिताः शकुनिनेवाण्डकं प्रयत्नेन, ततोऽसौ 'अथ' अनन्तरं द्वादशसांवत्सरिकीं संलेखनां करोति, तद्यथा–चत्वारि वर्षाणि 'विचित्राणि' विचित्रतपोऽनुष्ठानवन्ति भवन्ति, चतुर्थषष्ठाष्टमदशमद्वादशादिके कृते पारणकं सविकृतिकमन्यथा वेति, पञ्चमादारभ्य संवत्सरादपराणि चत्वारि वर्षाणि निर्विकृतिकमेव पारणकमिति, नवमदशमसंवत्सरद्वयं त्वेकान्तरितमाचाम्लमेकस्मिन्नहनि चतुर्थमपरेद्युराचाम्लेन पारणकमिति, तत एकादशसंवत्सरं द्विधा विधत्ते–तत्राद्यं षण्मासं नातिविकृष्टं तपः करोति, चतुर्थं षष्ठं वा विधाय परिमितेनाचाम्लेन पारणकं विधत्ते, न्यूनोदरतां करोतीत्यर्थः, अपरषण्मासं तु विकृष्टतपश्चरणवतः पूर्वोक्तमेव पारणकं, द्वादशं तु संवत्सरं कोटीसहितमाचाम्लं करोति, प्रतिदिनमाचाम्लेन भुङ्क्ते, आचाम्लस्य कोट्याः कोटिं मीलयत्यतः कोटीसहितमित्युक्तं, चतुर्मासावशेषे तु संवत्सरे तैलगण्डूषानस्खलितनमस्कारार्थध्ययनायापगतवातमुखयन्त्रप्रचारार्थं पौनःपुन्येन करोतीति, तदेवमनयाऽऽनुपूर्व्या सर्वं विधाय सति सामर्थ्ये गुरुणाऽनुज्ञातो गिरिकन्दरं गत्वा स्थण्डिलं प्रत्युपेक्ष्य 'अथ' अनन्तरं पादपोपगमनं करोति, इङ्गितमरणं वा भक्तप्रत्याख्यानं वा यथासमाधि

विधत्त इति गाथाचतुष्टयार्थः॥ अनया च द्वादशसंवत्सरसंलेखनाऽऽनुपूर्व्या क्रमेण आहारं परित्तनुं कुर्वत आहाराभिलाषोच्छेदो भवतीत्येतद्गाथाद्वयेन दर्शयितुमाह—

कह नाम सो तवोकम्मपंडिओ जो न निच्चुज्जुत्तप्पा । लहुविस्सीपरिक्खेवं वच्चइ जेमंतओ चेव ? ॥ २७४ ॥
आहारेण विरहिओ अप्पाहारो य संवरनिमित्तं । हासंतो हासंतो एवाहारं निरुंभिज्जा ॥ २७५ ॥

कथं नामासौ तपःकर्मणि पण्डितः स्यात् ?, यो न नित्यमुद्युक्तात्मा सन् वर्त्तनं वृत्तिः–द्वात्रिंशत्कवलपरिमाणलक्षणा तस्याः परिक्षेपः–संक्षेपो वृत्तिपरिक्षेपः लघुर्वृत्तिपरिक्षेपोऽस्येति लघुवृत्तिपरिक्षेपः तद्भावं यो भुञ्जान एव न व्रजति कथमसौ तपःकर्मणि पण्डितः स्यात् ?, तथाऽऽहारेण विरहितो द्वित्रान् पञ्चषान् वा वासरान् स्थित्वा पुनः पारयति तत्राप्यल्पाहारोऽसौ भवति, किमर्थं ?—'संवरनिमित्तम्' अनशननिमित्तं, एवमसावुपवासैः प्रतिपारणकमल्पाहारतया च ह्रासयन् ह्रासयन्नाहारमुक्तविधिना पश्चान्निरुन्ध्याद्–भक्तप्रत्याख्यानं कुर्यादिति गाथाद्वयार्थः॥ उक्तो नामनिष्पन्नो निक्षेपस्तन्निर्युक्तिश्च, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं तच्चेदम्—

से बेमि समणुन्नस्स वा असमणुन्नस्स वा असणं वा पाणं वा खाइमं वा साइमं वा वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा नो पादेज्जा नो निमंतिज्जा नो कुज्जा वेयावडियं परं आढायमाणे त्तिबेमि (सू० १९७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽहं ब्रवीमि योऽहं भगवतः सकाशात् ज्ञातज्ञेय इति, किं तद्ब्रवीमि ?-वक्ष्यमाणं, तद्यथा—'समनोज्ञस्य वा' वाशब्द उत्तरापेक्षया पक्षान्तरोद्योतकः, समनोज्ञो दृष्टितो लिङ्गतो न तु भोजनादिभिः तस्य, तद्विपरीतस्वसमनोज्ञः-शाक्यादिस्तस्य वा, अश्यत इत्यशनं-शाल्योदनादि, पीयत इति पानं-द्राक्षापानकादि, खाद्यत इति खादिमं-नालिकेरादि, स्वाद्यत इति स्वादिमं-कर्पूरलवङ्गादि, तथा वस्त्रं वा पात्रं वा पतद्ग्रहं वा कम्बलं वा पादपुञ्छनं वा, नो प्रदद्यात्-प्रासुकमप्रासुकं वा तदन्येषां कुशीलानामुपभोगाय नो वितरेत्, नापि दानार्थं निमन्त्रयेत्, न च तेषां वैयावृत्त्यं कुर्यात्, परम्-अत्यर्थमादृियमाण इति, अत्यर्थमादरवान्न तेभ्यः किमपि दद्यात् नापि तानामन्त्रयेत् न च तेषां वैयावृत्त्यमुच्चावचं कुर्यादिति, ब्रवीमीत्यधिकारपरिसमाप्तौ ॥ एतच्च वक्ष्यमाणमहं ब्रवीमीत्याह—

धुवं चेयं जाणिज्जा असणं वा जाव पायपुंछणं वा लभिया नो लभिया भुंजिया नो भुंजिया पंथं विउत्ता विउक्कम्म विभत्तं धम्मं जोसेमाणे समेमाणे चलेमाणे पाइज्जा वा निमंतिज्ज वा कुज्जा वेयावडियं परं अणाढायमाणे त्तिबेमि (सू० १९८)

ते हि शाक्यादयः कुशीला अशनादिकमुपदर्श्यैवं ब्रूयुः, यथा-ध्रुवं चैतज्जानीयात्-नित्यमस्मदावसथे भवति लभ्यते वाऽतो भवद्भिरेतदशनादिकमन्यत्र लब्ध्वावाऽलब्ध्वा वा भुक्त्वा वाऽभुक्त्वा वा अस्मद्धृतयेऽवश्यमागन्तव्यं, अलब्धे लाभाय लब्धेऽपि विशेषाय भुक्ते पुनः पुनर्भोजनायाभुक्तेऽपि प्रथमालिकार्थमस्मद्धृतये यथाकथञ्चिदागन्तव्यं, यद्यथा वा भवतां कल्पनीयं भवति तत्तथा दास्याम इति, अनुपथ एवास्मदावसथो भवतां वर्त्तते, अन्यथाऽप्यस्मत्कृते पन्थानं व्यावर्त्यापि वक्रपथेनाप्यागन्तव्यमपक्रम्य वाऽन्यगृहाणि समागन्तव्यं, नात्रागमने खेदो विधेयः, किम्भूतोऽसौ शाक्यादिरिति दर्शयति—'विभक्तं' पृथग्भूतं धर्म्मं 'जुषन्' आचरन्, एतच्च कदाचित्प्रतिश्रयमध्येन 'समेमाणे'त्ति समागच्छन् तथा 'चलेमाणे'त्ति गच्छन् ब्रूयाद् यदिवाऽशनादि प्रदद्यात् अशनादिदानेन वा निमन्त्रयेदन्यद्वा प्रश्रयवद्वैयावृत्त्यं कुर्यात्, तस्य कुशीलस्य नाभ्युपेयात् न तेन सह संस्तवमपि कुर्यात्, कथं परम्-अत्यर्थमनादृियमाणः-अनादरवान्, एवं हि दर्शनशुद्धिर्भवतीति ब्रवीमीत्येतत्पूर्वोक्तं ॥ यदि वैतद्वक्ष्यमाणमित्याह—

इहमेगेसिं आयारगोयरे नो सुनिसंते भवति ते इह आरंभट्ठी अणुवयमाणा हण पाणे घायमाणा हणओ यावि समणुजाणमाणा अदुवा अदिन्नमाययंति अदुवा वायाउ विउज्जंति, तंजहा-अत्थि लोए नत्थि लोए धुवे लोए अधुवे लोए साइए लोए अणाइए लोए सपज्जवसिए लोए अपज्जवसिए लोए सुकडेत्ति वा दुक्कडेत्ति वा कल्लाणेत्ति वा पावेत्ति वा साहुत्ति वा असाहुत्ति वा सिद्धित्ति वा असिद्धिसि वा निरएत्ति वा अनिरएत्ति वा, जमिणं विप्पडिवन्ना मामगं धम्मं पन्नवेमाणा इत्थवि जाणह अकस्मात् एवं तेसिं नो सुयक्खाए धम्मे नो सुपन्नत्ते धम्मे भवइ (सू० १९९)

'इह' अस्मिन्मनुष्यलोके 'एकेषां' पुरस्कृताशुभकर्म्मविपाकानामाचरणमाचारो-मोक्षार्थमनुष्ठानविशेषस्तस्य गोचरो-विषयः नो सुष्ठु निशान्तः-परिचितो भवति, ते चापरिणताचारगोचरा यथाभूताः स्युः तथा दर्शयितुमाह—'ते' अनधीताचारगोचरा भिक्षाचर्याऽस्नानस्वेदमलपरीषहतर्जिताः सुखविहारिभिः शाक्यादिभिरात्मसात्परिणामिताः 'इह' मनुष्यलोके आरम्भार्थिनो भवन्ति, ते वा शाक्यादयोऽन्ये वा कुशीलाः सावद्यारम्भार्थिनः, तथा विहारारामतडागकूपकरणौद्देशिकभोजनादिभिर्धर्म्मं वदन्तोऽनुवदन्तः, तथा जहि प्राणिन इत्येवमपरैर्घातयन्तो घ्नतश्चापि समनुजानन्तः, अथवा अदत्तं परकीयं द्रव्यमगणितविपाकास्तिरोहितशुभाध्यवसायाः 'आददति' गृह्णन्तीति, किं च-तत्र प्रथमतृतीयव्रते अल्पवक्तव्यत्वात् पूर्वं प्रतिपाद्य ततो बहुतरवक्तव्यत्वात् द्वितीयव्रतोपन्यास इति, 'अथवेति' पूर्वस्मात् पक्षान्तरोपक्षेपकः, तद्यथा अदत्तं गृह्णन्त्यथवा वाचो विविधं-नानाप्रकारा युञ्जन्ति, 'तद्यथे'त्युपक्षेपार्थः, अस्ति 'लोकः' स्थावरजङ्गमात्मकः, तत्र नवखण्डा पृथ्वी सप्तद्वीपा वसुन्धरेति वा, अपरेषां तु ब्रह्माण्डान्तर्वर्त्ती, अपरेषां तु प्रभूतान्येवम्भूतानि ब्रह्माण्डान्युदकमध्ये प्लवमानानि संतिष्ठन्ते, तथा सन्ति जीवाः स्वकृतफलभुजः, अस्ति परलोकः, स्तो बन्धमोक्षौ, सन्ति पञ्च महाभूतानि इत्यादि, तथाऽपरे चार्वाका आहुः—नास्ति लोको मायेन्द्रजालस्वप्नकल्पमेवैतत्सर्वं, तथा ह्यविचारितरमणी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतया भूताभ्युपगमोऽपि तेषामतो नास्ति परलोकानुयायी जीवो, न सुः शुभाशुभे, किण्वादिभ्यो मदशक्तिवद्भूतेभ्य एव चैतन्यमित्यादिना सर्वं मायाकारगन्धर्वनगरतुल्यम्, उपपत्त्यक्षमत्वादिति, उक्तं च—"यथा यथाऽर्थाश्चिन्त्यन्ते, विविच्यन्ते तथा तथा। यद्येतत्स्वयमर्थेभ्यो, रोचते तत्र के वयम्? ॥ १ ॥ भौतिकानि शरीराणि, विषयाः करणानि च। तथापि मन्दैरन्यस्य, तत्त्वं समुपदिश्यते ॥ २ ॥" इत्यादि, तथा साङ्ख्यादय आहुः—'ध्रुवो' नित्यो लोकः, आविर्भावतिरोभावमात्रत्वादुत्पादविनाशयोः, असतोऽनुत्पादात् सतश्चाविनाशात्, यदिवा 'ध्रुवः' निश्चलः, सरित्समुद्रभूधराभ्राणां निश्चलत्वात्, शाक्यादयस्त्वाहुः—अध्रुवो लोकोऽनित्यः, प्रतिक्षणं विशरारुस्वभावत्वात्, विनाशहेतोरभावात् नित्यस्य च क्रमयौगपद्याभ्यामर्थक्रियायामसामर्थ्यात्, यदिवा 'अध्रुवः' चलः, तथाहि—भूगोलः केषाञ्चिन्मतेन नित्य चलन्नेवास्ते, आदित्यस्तु व्यवस्थित एव, तत्रादित्यमण्डलं दूरत्वाद्ये पूर्वतः पश्यन्ति तेषामादित्योदयः आदित्यमण्डलाधो व्यवस्थितानां मध्याह्नः ये तु दूरातिक्रान्तत्वान्न पश्यन्ति तेषामस्तमित इति, अन्ये पुनः सादिको लोक इति प्रतिपन्नाः, तथा चाहुः—"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं, प्रसुप्तमिव सर्वतः ॥ १ ॥ तस्मिन्नेकार्णवीभूते, नष्टस्थावरजङ्गमे। नष्टामरनरे चैव, प्रनष्टोरगराक्षसे ॥ २ ॥ केवलं गह्वरीभूते, महाभूतविवर्जिते। अचिन्त्यात्मा विभुस्तत्र, शयानस्तप्यते तपः ॥ ३ ॥ तस्य तत्र शयानस्य, नाभेः पद्मं विनिर्गतम्। तरुणरविमण्डलनिभं, हृद्यं काञ्चनकर्णिकम् ॥ ४ ॥ तस्मिन् पद्मे तु भगवान् दण्डी यज्ञोपवीतसंयुक्तः। ब्रह्मा तत्रोत्पन्नस्तेन जगन्मातरः सृष्टाः ॥ ५ ॥ अदितिः सुरसङ्घानां दितिरसुराणां मनुर्मनुष्याणाम्। विनता विहङ्गमानां माता विश्वप्रकाराणाम् ॥ ६ ॥ कद्रूः सरीसृपाणां सुलसा माता तु नागजातीनाम्। सुरभिश्चतुष्पदानामिला पुनः सर्ववीजानाम् ॥ ७ ॥" इत्यादि, अपरे तु पुनरनादिको लोक इत्येवं प्रतिपन्नाः, यथा शाक्या एवमाहुः—अनवदग्रोऽयं भिक्षवः! संसारः, पूर्वा च कोटी न प्रज्ञायते, अविद्या निरावरणानां सत्त्वानां न विद्यते, न च सत्त्वोत्पाद इति, तथा सपर्यवसितो लोको, जगत्सत्त्वे सर्वस्य विनाशसद्भावात्, तथाऽपर्यवसितो लोकः, सतः आत्यन्तिकविनाशासम्भवात्, 'न कदाचिदनीदृशं जगदि'ति वचनात्, तत्र येषां सादिकस्तेषां सपर्यवसितो येषां त्वनादिकस्तेषामपर्यवसित इति, केषाञ्चित्तूभयमपीति, तथा चोक्तम्—"द्वावेव पुरुषौ लोके, क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि, कूटस्थोऽक्षर उच्यते ॥ १ ॥" इत्यादि, तदेवं परमार्थमजानाना अस्तीत्याद्यभ्युपगमेन लोकं विवदमानाः नानाभूता वाचो नियुञ्जन्ति, तथाऽऽत्मानमपि प्रति विवदन्ते, तद्यथा—सुष्ठु कृतं सुकृतमिति वा दुष्कृतमिति वेत्येवं क्रियावादिनः संप्रतिपद्यन्ते, तथा सुष्ठु कृतं यत् सर्वसङ्गपरित्यागतो महाव्रतमग्राहि, तथाऽपरे दुष्कृतं भवता यदसौ मुग्धमृगलोचना पुत्रमनुत्साद्योज्झितेति, तथा य एव कश्चित्प्रव्रज्योद्यतः कल्याण इत्येवमभिहितः स एवापरेण पाखण्डिकविप्रलब्धः क्लीबोऽयं गृहाश्रमपालनासमर्थोऽनपत्यः पाप इत्येवमभिधीयते, तथा साधुरिति वा असाधुरिति वा स्वमतिविकल्पितरुचिभिरभिधीयते, तथा सिद्धिरिति वा असिद्धिरिति वा नरक इति वा अनरक इति वा, एवमन्यदप्याश्रित्य स्वाग्रहग्रहिणो विवदन्त इति दर्शयति, 'यदिदं विप्रतिपन्ना' यत्पूर्वोक्तं लोकादिकं तदिदमाश्रित्य विविधं प्रतिपन्ना विप्रतिपन्नाः, तथा चोक्तम्—"इच्छंति कृत्रिमं सृष्टिवादिनः सर्वमेव सितिलिङ्गम्। कृत्स्नं लोकं माहेश्वरादयः सादिपर्यन्तम् ॥ १ ॥ नारीश्वरजं केचित् केचित्सोमाग्निसम्भवं लोकम्। द्रव्यादिपड्विकल्पं जगदेतत्केचिदिच्छन्ति ॥ २ ॥ ईश्वरप्रेरितं केचित्केचिद्ब्रह्मकृतं जगत्। अव्यक्तप्रभवं सर्वं, विश्वमिच्छन्ति कापिलाः ॥ ३ ॥ यादृच्छिकमिदं सर्वं, केचिद्भूतविकारजम्। केचिच्चानेकरूपं तु, बहुधा संप्रधाविताः ॥ ४ ॥" इत्यादि, तदेवमनवगाहितस्याद्वादोदन्वतामेकांशावलम्बिनां मतिभेदाः प्रादुष्यन्ति, तदुक्तम्—"लोकक्रियाऽऽत्मतत्त्वे विवदन्ते वादिनो विभिन्नार्थम्। अविदितपूर्वं येषां स्याद्वादविनिश्चितं तत्त्वम् ॥१॥" येषां तु पुनः स्याद्वादमतं निश्चितं तेषामस्तित्वनास्तित्वादेरर्थस्य नयाभिप्रायेण कथञ्चिदाश्रयणात् विवादाभाव एवेति, अत्र च बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थविस्तरभयाद्, अन्यत्र च सूत्रकृतादौ विस्तरेण सुविहितत्वादिति। ते च विवदन्तः परस्परतो विप्रतिपन्नाः 'मामकम्' इत्यात्मीयं धर्मं प्रज्ञापयन्तः स्वतो नष्टाः परानपि नाशयन्ति, तथाहि—केचित्सुखेन धर्ममिच्छन्ति अपरे दुःखेनान्ये स्नानादिनेति, तथा मामक एवैको धर्मो मोक्षायानिर्वाच्यश्च नापर इत्येवं वदन्तोऽपुष्टधर्माणोऽविदितपरमार्थान् प्रतारयन्ति, तेषामुत्तरं दर्शयति—'अत्रापि' अस्ति लोको नास्ति वेत्यादौ जानीत यूयम् 'अकस्मादि'ति मागधदेशे आगोपालाङ्गनादिना संस्कृतस्यैवोच्चारणादिहापि तथैवोच्चारित इति, कस्मादिति हेतुर्न कस्मादकस्माद् हेतोरभावादित्यर्थः, तत्रास्ति लोक इत्युक्तेऽत्राप्येवं जानीत यथा न भवत्येवमकस्माद्, हेतोरभावादिति, तथाहि—यद्येकान्तेनैव लोकोऽस्ति ततोऽस्तिना सह समानाधिकरण्याद्यदस्ति तल्लोकः स्याद् एवं च तत्प्रतिपक्षोऽप्यलोकोऽस्तीतिकृत्वा लोक एवालोकः स्याद्, व्याप्यसद्भावे व्यापकस्यापि सद्भावादलोकाभावः, तदभावे च तत्प्रतिपक्षभूतस्य लोकस्य प्रागेवाभावः सर्वगतत्वं वा लोकस्य स्यादिति, अथवा लोकोऽस्ति, न च लोको भवति, लोकोऽपि नामास्ति, न च लोकोऽलोकाभाव इत्येवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्याद्, अनिष्टं चैतत्, किं च-अस्तेर्व्यापकत्वे लोकस्य घटपटादेरपि लोकत्वप्राप्तिः, व्याप्यस्य व्यापकसद्भावनान्तरीयकत्वात्, किं च-अस्ति लोकः इत्येषापि प्रतिज्ञा लोक इतिकृत्वा हेतोरप्यस्तित्वात्, प्रतिज्ञाहेत्वोरेकत्वाद्वाप्तिः, तदेकत्वे हेत्वभावः, तदभावे किं केन सिद्ध्यतीति?, उतास्तित्वादन्यो लोक इत्येवं च प्रतिज्ञाहानिः स्यात्, तदेवमेकान्तेनैव लोकास्तित्वेऽभ्युपगम्यमाने हेत्वभावः प्रदर्शितः, एवं नास्तित्वप्रतिज्ञायामपि वाच्यं, तथाहि-नास्ति लोक इति ब्रुवन् वाच्यः-किं भवानस्युत नेति?, यद्यस्ति किं लोकान्तर्वर्त्ती न वेति, यदि लोकान्तर्गतः कथं नास्ति लोक इति ब्रवीषि?, अथ बहिर्भूतस्ततः खरविषाणवदसद्भूत एवेति कस्य मयोत्तरं दातव्यम्, इत्यनया दिशैकान्तवादिनः स्वयमभ्यूह्य प्रतिक्षेप्तव्या इति, 'एव' मिति यथाऽस्तित्वनास्तित्ववादस्तेषामाकस्मिको-निर्युक्तिकः, एवं ध्रुवाध्रुवादयोऽपि वादा निर्युक्तिका एवेति, अस्माकं तु स्याद्वादवादिनां कथञ्चिदभ्युपगमान्न यथोक्तदोषानुषङ्गो, यतः स्वपरसत्ताव्युदासोपादानाप्राप्यं हि वस्तुनो वस्तुत्वम्, अतः स्वद्रव्यक्षेत्रकालस्वभावतोऽस्ति परद्रव्यादिचतुष्टयान्नास्तीति, उक्तं च-"सदेव सर्वं को नेच्छेत्, स्वरूपादिचतुष्टयात्?। असदेव विपर्यासान्न चेन्न व्यवतिष्ठते ॥ १ ॥" इत्यादि, अलमतिप्रसङ्गेनाक्षरगमनिकार्थत्वात् प्रयासस्य, एवं ध्रुवाध्रुवादिष्वपि पञ्चावयवेन दशावयवेन वाऽन्यथा वैकान्तपक्षं विक्षिप्य स्याद्वादपक्षोऽभ्यूह्यायोज्य इति। साम्प्रतमुपसंहरति-'एवं' उक्तनीत्या तेषामेकान्तवादिनां न स्वाख्यातो धर्म्मो भवति, नापि शास्त्रप्रणयनेन सुप्रज्ञापितो भवति ॥ किं स्वमनीषिकया भवतेदमभिधीयते?, नेत्याह-यदिवा किम्भूतस्तर्हि सुप्रज्ञापितो धर्म्मो भवतीत्याह—

से जहेयं भगवया पवेइयं आसुपन्नेण जाणया पासया अदुवा गुत्ती वओगोयरस्स

त्तिबेमि सव्वत्थ संमयं पावं, तमेव उवाइक्कम्म एस महं विवेगे वियाहिए, गामे वा अदुवा रण्णे नेव गामे नेव रण्णे धम्ममायाणह पवेइयं माहणेण मइमया, जामा तिन्नि उदाहिया जेसु इमे आयरिया संबुज्झमाणा समुट्ठिया, जे णिव्वुया पावेहिं कम्मेहिं अणियाणा ते वियाहिया (सू० २००)

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २६८ ॥

विभो० ८ उद्देशकः १

तद्यथा 'इदं' स्याद्वादरूपं वस्तुनो लक्षणं समस्तव्यवहारानुयायि क्वचिदप्यप्रतिहतं 'भगवता' श्रीवर्द्धमानस्वामिना प्रवेदितम्, एतद्वाऽनन्तरोक्तं भगवता प्रवेदितमिति, किम्भूतेनेति दर्शयति-आशुप्रज्ञेन, निरावरणत्वात् सततोपयुक्तेनेत्यर्थः, किं यौगपद्येन?, नेति दर्शयति—'जानता' ज्ञानोपयुक्तेन, तथा 'पश्यता' दर्शनोपयुक्तेनैतत्प्रवेदितं, यथा नैषामेकान्तवादिनां धर्म्मः स्वाख्यातो भवति, अथवा गुप्तिर्वाग्गोचरस्य-भाषासमितिः कार्येत्येतत्प्रवेदितं भगवता, यदिवा अस्ति नास्ति ध्रुवाध्रुवादिवादिनां वादायोत्थितानां त्रयाणां त्रिषष्ट्यधिकानां प्रावादुकशतानां वादलब्धिमतां प्रतिज्ञाहेतुदृष्टान्तोपन्यासद्वारेण तदुपन्यस्तदूषणोपन्यासेन च तत्पराजयापादनतः सम्यगुत्तरं देयम्, अथवा गुप्तिर्वाग्गोचरस्य विधेयेत्येतदहं ब्रवीमि, वक्ष्यमाणं चेत्याह-तान् वादिनो वादायोत्थितानेवं ब्रूयाद्-यथा भवतां सर्वेषामपि पृथिव्यप्तेजोवायुवनस्पत्यारम्भ कृतकारितानुमतिभिरनुज्ञातोऽतः सर्वत्र 'सम्मतम्' अभिप्रेतमप्रतिषिद्धं 'पापं' पापानुष्ठानं, मम तु नैतत्सम्मतमित्येतद्दर्शयितुमाह—'तदेव' एतत्पापानुष्ठानमुप-सामीप्येनातिक्रम्य-अतिलङ्घ्य यतोऽहं व्यवस्थितोऽत एष मम विवेको व्याख्यातः, तत्कथमहं सर्वाप्रतिषिद्धास्रवद्वारैः संभाषणमपि करिष्ये?, आस्तां तावद्दाद इत्येवमसमनुज्ञविवेकं करोतीति, अत्राह चोदकः-कथं तीर्थिकाः सम्मतपापा अज्ञानिनो मिथ्यादृष्टयोऽचरित्रिणोऽतपस्विनो वेति?, तथाहि-तेऽप्यकृष्टभूमिवनवासिनो मूलकन्दाहारा वृक्षादिनिवासिनश्चेति, अत्राहाचार्यः-नारण्यवासादितो धर्मः, अपि तु जीवाजीवपरिज्ञानात् तत्पूर्वकानुष्ठानाच्च, तच्च तेषां नास्तीत्यतोऽसमनोज्ञास्ते इति। किं च-सदसद्विवेकिनो हि धर्म्मः, स च ग्रामे वा स्यात् अथवाऽरण्ये, नैवाधारो ग्रामो नैवारण्यं धर्म्मनिमित्तं, यतो भगवता न वसिममितरद्वाऽऽश्रित्य धर्म्मः प्रवेदितः, अपि तु जीवादितत्त्वपरिज्ञानात् सम्यगनुष्ठानाच्च, अतस्तं धर्ममाजानीत 'प्रवेदितं' कथितं 'माहणेण'त्ति भगवता, किम्भूतेन?-'मतिमता' मननं-सर्वपदार्थपरिज्ञानं मतिस्तद्वता मतिमता केवलिनेत्यर्थः। किंभूतो धर्म्मः प्रवेदित इत्याह—'यामा' व्रतविशेषाः त्रय उदाहृताः, तद्यथा-प्राणातिपातो मृषावादः परिग्रहश्चेति, अदत्तादानमैथुनयोः परिग्रह एवान्तर्भावात् त्रयग्रहणं, यदिवा यामा-वयोविशेषाः, तद्यथा-अष्टवर्षादारित्रिंशतः प्रथमस्तत ऊर्द्धमाषष्टेः द्वितीयस्तत ऊर्द्धं तृतीय इति अतिबालवृद्धयोर्व्युदासो, यदिवा यम्यते-उपरम्यते संसारभ्रमणादेभिरिति यामाः-ज्ञानदर्शनचारित्राणीति ते 'उदाहृता' व्याख्याताः, यदि नामैवं ततः किमित्याह—'येषु' अवस्थाविशेषेषु ज्ञानादिषु वा इमे देशार्या अपाकृतहेयधर्म्मा वा सम्बुध्यमानाः सन्तः समुत्थिताः, के?-ये 'निर्वृताः' क्रोधाद्यपगमेन शीतीभूताः पापेषु कर्म्मसु 'अनिदाना' निदानरहिताः ते 'व्याख्याताः' प्रतिपादिता इति ॥ क्व च पुनः पापकर्म्मस्वनिदाना इत्यत आह—

॥ २६८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उड्ढं अहं तिरियं दिसासु सव्वओ सव्वावंति च णं पाडियक्कं जीवेहिं कम्मसमारम्भेणं तं परिन्नाय मेहावी नेव सयं एएहिं काएहिं दंडं समारंभिज्जा नेवन्ने एएहिं काएहिं दंडं समारंभाविज्जा नेवन्ने एएहिं काएहिं दंडं समारंभंतेऽवि समणुजाणेज्जा जेवऽन्ने एएहिं काएहिं दंडं समारंभंति तेसिंपि वयं लज्जामो तं परिन्नाय मेहावी तं वा दंडं अन्नं वा नो दंडभी दंडं समारंभिज्जासि त्तिबेमि (सू० २०१)॥ विमोक्षाध्ययनोद्देशकः ८–१ ॥

ऊर्द्ध्वमधस्तिर्यग्दिक्षु 'सर्वतः' सर्वैः प्रकारैः सर्वा याः काश्चन दिशः चशब्दादनुदिशश्च 'णम्' इति वाक्यालङ्कारे 'प्रत्येकं जीवेषु' एकेन्द्रियसूक्ष्मेतरादिकेषु यः कर्म्मसमारम्भः–जीवानुद्दिश्य य उपमर्दरूपः क्रियासमारम्भः 'णम्' इति वाक्यालङ्कारे तं कर्म्मसमारम्भं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया प्रत्याचक्षीत, कोऽसौ ?—'मेधावी' मर्यादाव्यवस्थित इति, कथं प्रत्याचक्षीतेत्याह–नैव स्वयमात्मना 'एतेषु' चतुर्दशभूतग्रामावस्थितेषु 'कायेषु' पृथिवीकायादिषु 'दण्डम्' उपमर्दं समारभेत, न चापरेण समारम्भयेत्, नैवान्यान् समारभमाणान् समनुजानीयात्, ये चान्ये दण्डं समारभन्ते, सुव्व्यत्ययेन तृतीयार्थे षष्ठी, तैरपि वयं लज्जाम इत्येवं कृताध्यवसायः सन् तज्जीवेषु कर्म्मसमारम्भं महतेऽनर्थाय 'परिज्ञाय' ज्ञात्वा 'मेधावी' मर्यादावान्, तथा पूर्वोक्तं दण्डमन्यद्वा मृषावादादिकं दण्डाद्बिभेतीति दण्डभीः सन् नो 'दण्डं' प्राण्युपमर्दादिकं समारभेथाः, करणत्रिकयोगत्रिकेण परिहरेदिति, इतिरधिकारपरिसमाप्तौ ब्रवीमीति पूर्ववत्। विमोक्षाध्ययने प्रथमोद्देशक इति ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीय आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशकेऽनघसंयमप्रतिपालनाय कुशीलपरित्यागोऽभिहितः, स चैतावताऽकल्पनीयपरित्यागमृते न सम्पूर्णतामियाद् अतोऽकल्पनीयपरित्यागार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

से भिक्खू परिक्कमिज्ज वा चिट्ठिज्ज वा निसीइज्ज वा तुयट्टिज्ज वा सुसाणंसि वा सुन्नागारंसि वा गिरिगुहंसि वा रुक्खमूलंसि वा कुंभारायययणंसि वा हुरत्था वा कहिंचि विहरमाणं तं भिक्खुं उवसंक्कमित्तु गाहावई बूया–आउसंतो समणा! अहं खलु तव अट्ठाए असणं वा पाणं वा खाइमं वा साइमं वा वत्थं वा पडिग्गहं वा कंबलं वा पायपुच्छणं वा पाणाइं भूयाइं जीवाइं सत्ताइं समारब्भ समुद्दिस्स कीयं पामिच्चं अच्छिज्जं अणिसट्ठं अभिहडं आहट्टु चेएमि आवसहं वा समुस्सिणोमि से भुंजह वसह, आउसंतो समणा! भिक्खू तं गाहावइं समणसं सवयसं पडियाइक्खे–आउसंतो! गाहावई नो खलु ते वयणं आढामि नो खलु ते वयणं परिजाणामि, जो तुमं मम अट्ठाए असणं वा ४ वत्थं वा ४ पाणाइं वा ४ समारम्भ समुद्दिस्स कीयं पामिच्चं अच्छिज्जं अणिसट्ठं अभिहडं आहट्टु चेएसि आवसहं वा समुस्सिणासि, से विरओ आउसो गाहावई! एयस्स अकरणयाए (सू० २०२)

'स' कृतसामायिकः सर्वसावद्याकरणतया प्रतिज्ञामन्दरमारूढो भिक्षणशीलो भिक्षुः भिक्षार्थमन्यकार्याय वा 'पराक्रमेत' विहरेत् तिष्ठेद्वा ध्यानव्यग्रो निषीदेद्वा अध्ययनाध्यापनश्रवणश्रावणादृतः, तथा श्रान्तः क्वचिदध्यानादौ त्वग्वर्त्तनं वा विदध्यात्, कैतानि विदध्यादिति दर्शयति—'श्मशाने वा' शवानां शयनं श्मशानं–पितृवनं तस्मिन् वा, तत्र च त्वग्वर्त्तनं न सम्भवत्यतो यथासम्भवं पराक्रमणाद्ययोज्यं, तथाहि–गच्छवासिनस्तत्र स्थानादिकं न कल्पते, प्रमादस्खलितादौ व्यन्तराद्युपद्रवात्, तथा जिनकल्पार्थं सत्त्वभावनां भावयतोऽपि न पितृवनमध्ये निवासोऽनुज्ञातः, प्रतिमाप्रतिपन्नस्य तु यत्रैव सूर्योऽस्तमुपयाति तत्रैव स्थानं, जिनकल्पिकस्य वा, तदपेक्षया श्मशानसूत्रम्, एवमन्यदपि यथासम्भव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मायोज्यं, शून्यागारे वा गिरिगुहायां वा 'हुरत्था व'त्ति अन्यत्र वा ग्रामादेर्बहिस्तं भिक्षुं क्वचिद्विहरन्तं गृहपतिरुपसंक्रम्य विनेयदेशं गत्वा 'ब्रूयाद्' वदेदिति, यच्च ब्रूयात्तद्दर्शयितुमाह–साधुं श्मशानादिषु परिक्रमणादिकां क्रियां कुर्वाणमुपसङ्क्रम्य–उपेत्य पूर्वस्थितो वा गृहस्थः प्रकृतिभद्रकोऽभ्युपेतसम्यक्त्वो वा साध्वाचाराकोविदः साधुमुद्दिश्यैतद्ब्रूयात्–यथैते लब्धापलब्धभोजिनः त्यक्तारम्भाः सानुक्रोशाः सत्यशुचय एतेषु निक्षिप्तमक्षयमित्यतोऽहमेतेभ्यो दास्यामीत्यभिसन्धाय साधुमुपतिष्ठते, वक्ति च–आयुष्मन्! भोः श्रमण! अहं संसारार्णवं समुत्तितीर्षुः 'खलुः' वाक्यालङ्कारे 'तवार्थाय' युष्मन्निमित्तं अशनं वा पानं वा खादिमं वा स्वादिमं वा तथा वस्त्रं वा पतद्ग्रहं वा कम्बलं वा पादपुञ्छनं वा समुद्दिश्य–आश्रित्य किं कुर्यादिति दर्शयति–पञ्चेन्द्रियोच्छ्वासनिश्वासादिसमन्विताः प्राणिनस्तान्, अभूवन् भवन्ति भविष्यन्ति चेति भूतानि तानि, तथा जीवितवन्तो जीवन्ति जीविष्यन्तीति वा जीवाः तान्, सक्ताः सुखदुःखेष्विति सत्त्वास्तान् समारभ्य–उपमर्द्य, तथाहि–अशनाद्यारम्भे प्राण्युपमर्दोऽवश्यंभावी, एतच्च समस्तं व्यस्तं वा कश्चित्प्रतिपद्येत, इयं चाविशुद्धिकोटिर्गृहीता, सा चेमा—"आहाकम्मुद्देसिअ मीसज्जा बायरा य पाहुडिआ । पूइअ अज्झोयरगो उग्गमकोडी अ छब्भेआ ॥ १ ॥" विशुद्धिकोटिं दर्शयति—'क्रीतं' मूल्येन गृहीतं 'पामिच्चं'ति अपरस्मादुच्छिन्नमुद्यतकं गृहीतं, बलात्कारितया वाऽन्यस्मादाच्छिद्य राजोपसृष्टो वाऽन्येभ्यो गृहिभ्यः साधोर्दास्यामीत्याच्छिन्द्यात्, तथा 'अनिसृष्टं' परकीयं यत्तदन्तिके तिष्ठति न च परेण तस्य निसृष्टं–दत्तं तदनिसृष्टं, तदेवंभूतमपि साधोर्दानाय प्रतिपद्यते, तथा स्वगृहादाहृत्य

१ आधाकर्मौद्देशिके मिश्रजातं बादरा च प्राभृतिका । पूतिश्च अध्यवपूरक उद्गमकोटी च षड्भेदा ॥ १ ॥

आ.सू. ४६ श्रीआचाराङ्गवृत्तिः (शी०) ॥ २७१ ॥

'चेएमि'त्ति ददामि तुभ्यं वितरामि, एवमशनादिकमुद्दिश्य ब्रूयात्, तथा 'आवसथं वा' युष्मदाश्रयं समुच्छृणोमि–आदेरारभ्यापूर्वं करोमि संस्कारं वा करोमीत्येवं प्राञ्जलिरवनतोत्तमाङ्गः सन् अशनादिना निमन्त्रयेत्, यथा–भुङ्क्ष्वाशनादिकं मत्संस्कृतावसथे वसेत्यादि, द्विवचनबहुवचने अध्यायोज्ये । साधुना तु सूत्रार्थविशारदेनादीनमनस्केन प्रतिषेधितव्यमित्याह—आयुष्मन्! श्रमण! भिक्षो! तं गृहपतिं सभनसं सवयसमन्यथाभूतं वा प्रत्याचक्षीत, कथमिति चेद्दर्शयति–यथा आयुष्मन्! भो गृहपते! न खलु तवैवंभूतं वचनमहमाद्रिये, खलुशब्दोऽपिशब्दार्थे, स च समुच्चये, नापि तवैतद्वचनं 'परिजानामि' आसेवनपरिज्ञानेन परिविदधेऽहमित्यर्थः, यस्त्वं मम कृतेऽशनादि प्राण्युपमर्देन विदधासि यावदावसथसमुच्छ्रयं विदधासि, भो आयुष्मन् गृहपते! विरतोऽहमेवम्भूतादनुष्ठानात्, कथम्?–एतस्य–भवदुपन्यस्तस्याकरणतयेत्यतो भवदीयमभ्युपगमं न जानेऽहमिति ॥ तदेवं प्रसह्याशनादिसंस्कारप्रतिषेधः प्रतिपादितो, यदि पुनः कश्चिद्विदितसाध्वभिप्रायः प्रच्छन्नमेव विदध्यात्तदपि कुतश्चिदुपलभ्य प्रतिषेधयेदित्याह—

विभो० ८ उद्देशकः२

से भिक्खुं परिक्कमिज्ज वा जाव हुरत्था वा कहिंचि विहरमाणं तं भिक्खुं उवसंकमित्तु गाहावई आयगयाए पेहाए असणं वा ४ वत्थं वा ४ जाव आहट्टु चेएइ आवसहं वा समुस्सिणाइ भिक्खू परिघासेउं, तं च भिक्खू जाणिज्जा सहसम्मइयाए परवागरणेणं अन्नेसिं वा सुच्चा–अयं खलु गाहावई मम अट्ठाए असणं वा ४ वत्थं वा ४ जाव आवसहं वा समुस्सिणाइ, तं च भिक्खू पडिलेहाए आगमित्ता आणविज्जा अणासेवणाए त्तिबेमि (सू० २०३)

॥ २७१ ॥

तं भिक्षुं क्वचित् श्मशानादौ विहरन्तमुपसङ्क्रम्य प्राञ्जलिर्वन्दित्वा गृहपतिः प्रकृतिभद्रकादिकः कश्चिदात्मगतया प्रेक्षयाऽनाविष्कृताभिप्रायः केनचिदलक्ष्यमाणो यथाऽहमस्य दास्यामीत्यशनादिकं प्राण्युपमर्देनारभेत, किमर्थमिति चेद्दर्शयति–तदशनादिकं भिक्षुं 'परिघासयितुं' भोजयितुं, साधुभोजनार्थमित्यर्थः, आवसथं च साधुभिरधिवासयितुमिति, तदशनादिकं साध्वर्थं निष्पादितं भिक्षुः 'जानीयात्' परिच्छिन्द्यात्, कथमित्याह—स्वसन्मत्या परव्याकरणेन वा तीर्थकरोपदिष्टोपायेन वा अन्येभ्यो वा तत्परिजनादिभ्यः श्रुत्वा जानीयादिति वर्त्तते, यथाऽयं खलु गृहपतिर्मदर्थमशनादिकं प्राण्युपमर्देन विधाय मह्यं ददात्यावसथं च समुच्छ्रणोति, तद्भिक्षुः सम्यक् 'प्रत्युपेक्ष्य' पर्यालोच्यावगम्य च ज्ञात्वा 'ज्ञापयेत्' तं गृहपतिमनासेवनया यथाऽनेन विधानेनोपकल्पितमाहारादिकं नाहं भुञ्जे एवं तस्य ज्ञापनं कुर्याद्, यद्यसौ श्रावकस्ततो लेशतः पिण्डनिर्युक्तिं कथयेद्, अन्यस्य च प्रकृतिभद्रकस्योद्गमादिदोषानाविर्भावयेत् प्रासुकदानफलं च प्ररूपयेत्, यथाशक्तितो धर्मकथां च कुर्यात्, तद्यथा—"काले देशे कल्प्यं श्रद्धायुक्तेन शुद्धमनसा च । सत्कृत्य च दातव्यं दानं प्रयतात्मना सद्म्यः ॥ १ ॥" तथा—"दानं सत्पुरुषेषु स्वल्पमपि गुणाधिकेषु विनयेन । वटकणिकेव महान्तं न्यग्रोधं सत्फलं कुरुते ॥ २ ॥ दुःखसमुद्रं प्राज्ञास्तरन्ति पात्रार्पितेन दानेन । लघुनेव मकरनिलयं वणिजः सद्यानपात्रेण ॥ ३ ॥" इत्यादि, इतिरधिकारपरिसमाप्तौ, ब्रवीमीत्येतत्पूर्वोक्तं वक्ष्यमाणं चेत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्खुं च खलु पुट्ठा वा अपुट्ठा वा जे इमे आहच्च गंथा वा फुसंति, से हंता हणह खणह छिंदह दहह पयह आलुंपह विलुंपह सहसाकारेह विप्परामुसह, ते फासे धीरो पुट्ठो अहियासए अदुवा आयारगोयरमाइक्खे, तक्किया णमणेलिसं अदुवा वइगुत्तीए गोयरस्स अणुपुव्वेण संमं पडिलेहए आयतगुत्ते बुद्धेहिं एयं पवेइयं (सू० २०४)

'चः' समुच्चये 'खलुः' वाक्यालङ्कारे भिक्षणशीलो भिक्षुस्तं भिक्षुं पृष्ट्वा कश्चिद्यथा भो भिक्षो! भवदर्थमशनादिकमावयमर्थं वा संस्करिष्येऽननुज्ञातोऽपि तेनासौ तत्करोत्यवश्यमयं चादुभिर्वलात्कारेण वा ग्राहयिष्यते, अपरस्त्वीपत्साध्याचारविधिज्ञोऽतोऽपृष्ट्वैव छद्मना ग्राहयिष्यामीत्यभिसन्धायाशनादिकं विदध्यात्, स च तदपरिभोगे श्रद्धाभङ्गाच्चादुशताग्रहणाच्च रोषावेशान्निःसुखदुःखतयाऽलोकज्ञा इत्यनुशयाच्च राजानुसृष्टतया च न्यक्कारभावनातः प्रद्वेषमुपगतो हननादिकमपि कुर्यादिति दर्शयति—एकाधिकारे बहुतिदेशाद्य इमे प्रश्नपूर्वकमप्रश्नपूर्वकं वा आहारादिकं 'ग्रन्थात्' महतो द्रव्यव्ययाद् 'आहत्य' ढौकित्वा आहृतग्रन्था वा—व्ययीकृतद्रव्या वा तदपरिभोगे 'स्पृशन्ति' उपतापयन्ति, कथमिति चेदर्शयति—'स' ईश्वरादिः प्रद्विष्टः सन् हन्ता स्वतोऽपरांश्च हननादौ चोदयति, तद्यथा—हतैनं साधुं दण्डाभिक्षणुत'व्यापादयत छिन्नहस्तपादादिकं दहत अग्न्यादिना पचत उरुमांसादिकं आलुम्पत वस्त्रादिकं विलुम्पत सर्वस्वापहारेण सहसात् कारयत—आशु पञ्चत्वं नयत तथा विविधं परामृशत—नानापीडाकरणैर्बाधयत, तांश्चैवम्भूतान् 'स्पर्शान्' दुःखविशेषान् 'धीरः' अक्षोभ्यः तैः स्पर्शैः स्पृष्टः सन्नधिसहेत, तथा परैः क्षुत्पिपासापरीषहैः स्पृष्टः सन्नधिसहेत, न तु पुनरुपसर्गैः परीषहैर्वा तर्जितो विक्लवतामापन्नस्तदुद्देशिकादिकमभ्युपेयादनुकूलैर्वा सान्त्ववादादिभिरुपसर्गितो नाद्यात्, अपि तु सति सामर्थ्ये जिनकल्पिकादन्यः आचारगोचरमाचक्षीतेत्याह—नानाविधोपसर्गजनितान् स्पर्शानधिसहेत, अथवा साधूनामाचारगोचरम्—आचारानुष्ठानविषयं मूलोत्तरगुणभेदभिन्नमाचक्षीत, न पुनर्नैर्द्रव्यविचारं, तत्रापि मूलगुणस्थैर्यार्थमुत्तरगुणान् तत्रापि पिण्डैषणाविशुद्धिमाचक्षीत, अत्र च पिण्डैषणासूत्राणि पठितव्यानि, अपि च—"यत्स्वयमदुःखितं स्यान्न च परदुःखे निमित्तभूतमपि। केवलमुपग्रहकरं धर्म्मकृते तद्भवेद्देयम् ॥ १ ॥" किं सर्वस्य सर्वं कथयेत्?, नेति दर्शयति—'तर्कयित्वा' पर्यालोच्य पुरुषं, तद्यथा—कोऽयं पुरुषः कञ्च नतोऽभिगृहीतोऽनभिगृहीतो मध्यस्थः प्रकृतिभद्रको वेत्येवमुपयुज्य यथार्हं यथाशक्ति चावेदयेत्, सत्यां च शक्तौ पञ्चावयवेनान्यथा वा वाक्येनानीदृशम्—अनन्यसदृशं स्वपरपक्षस्थापनाव्युदासद्वारेणावेदयेदिति, अथ सामर्थ्यविकलः स्यात् कुप्यति वा कथ्यमानेऽसावनुकूलप्रत्यनीकस्ततो वाग्गुप्तिर्विधेयेत्याह—सति सामर्थ्ये शृण्वति वा दातरि आचारगोचरमाचक्षीत, 'अथवे'त्यन्यथाभावे तु वाग्गुप्त्या व्यवस्थितः सन्नात्महितमाचरन् 'गोचरस्य' पिण्डविशुद्ध्यादेराचारगोचरस्य 'आनुपूर्व्या' उद्गमप्रश्नादिरूपया सम्यगशुद्धिं प्रत्युपेक्षेत, किम्भूतः?—आत्मगुप्तः सन्, सततोपयुक्त इत्यर्थः, नैतन्मयोच्यत इत्याह—'बुद्धैः' कल्प्याकल्पविधिज्ञैः 'एतत्' पूर्वोक्तं प्रवेदितम् ॥ एतद्वा वक्ष्यमाणमित्याह—

से समणुन्ने असमणुन्नस्स असणं वा जाव नो पाइज्जा नो निमंतिज्जा नो कुज्जा वेयावडियं परं आढायमाणे त्तिबेमि (सू० २०५)

न केवलं गृहस्थेभ्यः कुशीलेभ्यो वा अकल्प्यमितिकृत्वाऽऽहारादिकं न गृह्णीयात्, स समनोज्ञोऽसमनोज्ञाय तत् पूर्वोक्तमशनादिकं न प्रदद्यात्, नापि परम्—अत्यर्थमाद्रियमाणोऽशनादिनिमन्त्रणतोऽन्यथा वा तेषां वैयावृत्त्यं कुर्यादिति, ब्रवीमीतिशब्दावधिकारपरिसमाप्त्यर्थौ। किम्भूतस्तर्हि किम्भूताय दद्यादित्याह—

धम्ममायाणह पवेइयं माहणेण मइमया समणुन्ने समणुन्नस्स असणं वा जाव कुज्जा वेयावडियं परं आढायमाणे (सू० २०६) त्तिबेमि ॥ ८–२ ॥

'धर्म्मं' दानधर्म्मं जानीत यूयं 'प्रवेदितं' कथितं, केन?—श्रीवर्द्धमानस्वामिना, किम्भूतेन?—'मतिमता' केवलिना, किम्भूतं धर्म्ममिति दर्शयति—यथा समनोज्ञः—साधुरुद्युक्तविहारी अपरस्मै—समनोज्ञाय चारित्रवते संविज्ञाय साम्भोगिकायैकसामाचारीप्रविष्टायाशनादिकं चतुर्विधं तथा वस्त्रादिकमपि चतुर्द्धा 'प्रदद्यात्' प्रयच्छेत्, तथा तदर्थं च निमन्त्रयेत्, पेशलमन्यद्वा वैयावृत्त्यम् अङ्गमर्दनादिकं कुर्यात्, नैतद्विपर्यस्तेभ्यो गृहस्थेभ्यः कुतीर्थिकेभ्यः पार्श्वस्थादिभ्योऽसंविग्नेभ्योऽसमनोज्ञेभ्यो वेत्येतत्पूर्वोक्तं कुर्यादिति, किन्तु समनोज्ञेभ्य एव परम्—अत्यर्थमाद्रियमाणस्तदर्थसीदने परमुत्तप्यमानः सम्यग्वैयावृत्त्यं कुर्यात्, तदेवं गृहस्थादयः कुशीलादयस्त्याज्या इति दर्शितम्, अयं तु विशेषो—गृहस्थेभ्यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावल्लभ्यते तावद्गृह्यते, केवलमकल्पनीयं प्रतिषिध्यते, असमनोज्ञेभ्यस्तु दानग्रहणं प्रति सर्वनिषेध इति । इतिब्रवीमिशब्दौ पूर्ववद् । विमोक्षाध्ययने द्वितीयोद्देशकः समाप्तः ॥ ८-२ ॥

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशकेऽकल्पनीयाहारादिप्रतिषेधोऽभिहितस्तत्प्रतिषेधकुपितस्य दातुर्यथावस्थितपिण्डदानप्ररूपणा च, तदिहाप्याहारादिनिमित्तं प्रविष्टेन शीताद्यङ्गोत्कम्पदर्शनान्यथाभाववतो गृहपतेर्यथावस्थितपदार्थावेदनतो गीतार्थेन साधुनाऽसदारेकाऽपनेयेत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—

मज्झिमेणं वयसावि एगे संबुज्झमाणा समुट्ठिया, सुच्चा मेहावी वयणं पंडियाणं निसामिया समियाए धम्मे आरिएहिं पवेइए ते अणवकंखमाणा अणइवाएमाणा अपरिग्गहेमाणा नो परिग्गहावंती सव्वावंति च णं लोगंसि निहाय दंडं पाणेहिं पावं कम्मं अकुव्वमाणे एस महं अगंथे वियाहिए, ओए जुइमस्स खेयन्ने उववायं चवणं च नच्चा (सू० २०७)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २७४ ॥

विमो० ८ उद्देशकः ३

इह त्रीणि वयांसि-युवा मध्यमवया वृद्धश्चेति, तत्र मध्यमवयाः परिपक्वबुद्धित्वाद्धर्म्मार्ह इत्यादौ दर्शयति-मध्यमेन वयसाऽप्येके सम्बुध्यमानाः धर्म्मचरणाय सम्यगुत्थिताः समुत्थिता इति, सत्यपि प्रथमचरमवयसोरुत्थाने यतो बाहुल्यादोग्यत्वाच्च प्रायो विनिवृत्तभोगकुतूहल इति निष्प्रत्यूहधर्म्माधिकारीति मध्यमवयोग्रहणं । कथं सम्बुध्यमानाः समुत्थिता इत्याह-इह त्रिविधाः सम्बुध्यमानका भवन्ति, तद्यथा-स्वयंबुद्धाः प्रत्येकबुद्धाः बुद्धबोधिताश्च, तत्र बुद्धबोधितेनेहाधिकार इति दर्शयति—'मेधावी' मर्यादाव्यवस्थितः 'पण्डितानां' तीर्थकृदादीनां 'वचनं' हिताहितप्राप्तिपरिहारप्रवर्त्तकं 'श्रुत्वा' आकर्ण्य पूर्वं पश्चात् 'निशम्य' अवधार्य समतामालम्बेत, किमिति ?-यतः समतया-माध्यस्थ्येनार्यैः-तीर्थकृद्भिर्धर्म्मः-श्रुतचारित्राख्यः 'प्रवेदितः' आदौ प्रकर्षेण वा कथित इति, ते च मध्यमे वयसि श्रुत्वा धर्म्मं सम्बुध्यमानाः समुत्थिताः सन्तः किं कुर्युरित्याह-ते निष्क्रान्ताः मोक्षमभि प्रस्थिताः कामभोगानभिकाङ्क्षन्तः तथा प्राणिनोऽनतिपातयन्तः परिग्रहमपरिगृह्णन्तः, आद्यन्तयोर्ग्रहणे मध्योपादानमपि द्रष्टव्यम्, तथा (तो) मृषावादमवदन्त इत्यादयपि वाच्यम्, एवम्भूताः स्वदेहेऽप्यममत्वाः 'सव्वावंति'त्ति सर्वस्मिन्नपि लोके, चः समुच्चये स च भिन्नक्रमः, 'णम्' इति वाक्यालङ्कारे, नो परिग्रहवन्तश्च भवन्तीतियावत्, किं च-प्राणिनो दण्डयतीति दण्डः-परितापकारी तं दण्डं प्राणिषु प्राणिभ्यो वा 'निधाय' क्षिप्त्वा त्यक्त्वा 'पापं' पापोपादानं 'कर्म्म' अष्टादशभेदभिन्नं तत् 'अकुर्वाणः' अनाचरन्नेषु महान् न विद्यते ग्रन्थः सबाह्याभ्यन्तरोऽस्येत्यग्रन्थः 'व्याख्यातः' तीर्थकरगणधरादिभिः प्रतिपादित इति । कश्चैवम्भूतः स्यादित्याह—'ओजः' अद्वितीयो रागद्वेषरहितः 'द्युतिमान्' संयमो मोक्षो वा तस्य 'खेदज्ञो' निपुणो देवलोकऽप्युपपातं च्यवनं च ज्ञात्वा सर्वस्थानानित्यताहितमतिः पापकर्म्मवर्जी स्यादिति । केचित्तु मध्यमवयसि समुत्थिता अपि परीषहेन्द्रियैर्ग्लानतां नीयन्त इति दर्शयितुमाह— ॥ २७४ ॥

आहारोवचया देहा परीसहपभंगुरा पासह एगे सव्विंदिएहिं परिगिलायमाणेहिं (सू० २०८)

आहारेणोपचयो येषां ते आहारोपचयाः, के ते ?-दिह्यन्त इति देहास्तदभावे तु म्लायन्ते म्रियन्ते वा, तथा 'परीषहप्रभङ्गिनः' परीषहैः सद्भिर्भङ्गुरा देहा भवन्ति, ततश्चाहारोपचितदेहा अपि प्राप्तपरीषहा वातादिक्षोभेण वा पश्यत यूयमेके क्लीबाः सर्वैरिन्द्रियैर्ग्लायमानैः क्लीवतामीयुः, तथाहि-क्षुत्पीडितो न पश्यति न शृणोति न जिघ्रतीत्यादि, तत्र केवलिनोऽप्याहारमन्तरेण शरीरं ग्लानभावं यायाद् आस्तां तावदपरः प्रकृतिभङ्गुरशरीर इति, स्यान्मतं-अकेवल्यकृतार्थत्वात् क्षुद्वेदनीयसद्भावाच्चाहारयति दयादीनि व्रतान्यनुपालयति, केवली तु नियमात् सेत्स्यतीत्यतः किमर्थं शरीरं धारयति ? तद्धरणार्थं चाहारयतीति ?, अत्रोच्यते, तस्यापि चतुःकर्म्मसद्भावान्नैकान्तेन कृतार्थता, तत्कृते शरीरं बिभृयात्, तद्धरणं च नाहारमन्तरेण, क्षुद्वेदनीयसद्भावाच्चेति, तथाहि-वेदनीयसद्भावात्तत्कृता एकादशापि परीषहाः केवलिनो व्यस्तसमस्ताः प्रादुष्यन्ति इत्यत आहारयत्येव केवलीति स्थितम्, अत आहारमृते ग्लानतेन्द्रियाणामिति प्रतिपादितं ॥ विदितवेद्यश्च परीषहपीडितोऽपि किं कुर्यादित्याह—

ओए दयं दयइ, जे संनिहाणसत्थस्स खेयन्ने से भिक्खू कालन्ने बलन्ने मायन्ने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खणन्ने विणयन्ने समयन्ने परिग्गहं अममायमाणे कालेणुट्ठाइ अपडिन्ने दुहओ छित्ता नियाइं (सू० २०९)

'ओजः' एको रागादिरहितः सन् सत्यपि क्षुत्पिपासादिपरीषहे 'दयामेव दयते' कृपां पालयति, न परीषहैः तर्जितो दयां खण्डयतीत्यर्थः । कः पुनर्दयां पालयतीत्याह–यो हि लघुकर्म्मा सम्यङ् निधीयते नारकादिगतिषु येन तत्सन्निधानं–कर्म्म तस्य स्वरूपनिरूपकं शास्त्रं तस्य खेदज्ञो–निपुणो, यदिवा सन्निधानस्य–कर्म्मणः शस्त्रं–संयमः सन्निधानशस्त्रं तस्य खेदज्ञः–सम्यक् संयमस्य वेत्ता, यश्च संयमविधिज्ञः स भिक्षुः कालज्ञः–उचितानुचितावसरज्ञः, एतानि च सूत्राणि लोकविजयपञ्चमोद्देशकव्याख्यानुसारेण नेतव्यानीति, तथा बलज्ञो मात्रज्ञः क्षणज्ञो विनयज्ञः समयज्ञः परिग्रहममत्वेन अचरन् कालेनोत्थायी अप्रतिज्ञः उभयतश्छेत्ता, स चैवम्भूतः संयमानुष्ठाने निश्चयेन याति निर्यातीति ॥ तस्य च संयमानुष्ठाने परिव्रजतो यत्स्यात्तदाह—

तं भिक्खुं सीयफासपरिवेवमाणगायं उवसंकमित्ता गाहावई ब्रूया–आउसंतो समणा ! नो खलु ते गामधम्मा उव्वाहंति ?, आउसंतो गाहावई ! नो खलु मम गामधम्मा उव्वाहंति, सीयफासं च नो खलु अहं संचाएमि अहियासित्तए, नो खलु मे कप्पइ अगणिकायं उज्जालित्तए वा (पज्जालित्तए वा) कायं आयावित्तए वा पयावित्तए वा अन्नेसिं वा वयणाओ, सिया स एवं वयंतस्स परो अगणिकायं उज्जालित्ता पज्जालित्ता कायं आयाविज्ज वा पयाविज्ज वा, तं च भिक्खू पडिलेहाए आगमित्ता आणविज्जा अणासेवणाए त्तिबेमि (सू० २१०) ॥ ८–३ ॥

॥ २७५ ॥

'तम्' अन्तप्रान्ताहारतया निस्तेजसं निष्किञ्चनं भिक्षणशीलं भिक्षुमतिक्रान्तसोष्मयौवनावस्थं सम्यक्त्वक्राणाभावतया शीतस्पर्शपरिवेपमानगात्रं उपसङ्क्रम्य–आसन्नतामेत्य गृहपतिः–ऐश्वर्योष्मानुगतो मृगनाभ्यनुविद्धकश्मीरजवहलरसानुलिप्तदेहो मीनमदागुरुघनसारधूपितरल्लिकाच्छादितवपुः प्रौढसीमन्तिनीसन्दोहपरिवृतो वार्तीभूतशीतस्पर्शानुभवः सन् किमयं मुनिरुपहसितसुरसुन्दरीरूपसम्पदो मत्सीमन्तिनीरवलोक्य सात्त्विकभावोपेतः कम्पते उत शीतेनेत्येवं संशयानो ब्रूयात्–भो आयुष्मन् ! श्रमण ! कुलीनतामात्मन आविर्भावयन् प्रतिषेधद्वारेण प्रश्नयति–नो भवन्तं ग्रामधर्म्माः–विषया उत–प्रावल्येन बाधन्ते ?, एवं गृहपतिनोक्ते विदिताभिप्रायः साधुराह–अस्य हि गृहपतेरात्मसंवित्त्याऽङ्गनावलोकनाऽऽविष्कृतभावस्यासत्याशङ्काऽभूद् अतोऽहमस्यापनयामीत्येवमभिसन्धाय साधुर्वभाषे–आयुष्मन् ! गृहपते ! 'नो खलु' नैव ग्रामधर्म्मा मामुद्बाधन्ते, यत्पुनर्वेपमानगात्रयष्टिं मामीक्षांचकृषे तच्छीतस्पर्शविजृम्भितं, न मनसिजविकारः, शीतस्पर्शमहं न खलु शक्नोम्यधिसोढुं, एवमुक्तः सन् भक्तिकरुणारसाक्षिप्तहृदयो ब्रूयात्–सुप्रज्वलितमाशुशुक्षणिं किमिति न सेवसे ?,

महामुनिराह–भो गृहपते ! न खलु मे कल्पतेऽग्निकायं मनाग् ज्वालयितुं (उज्ज्वालयितुं) प्रकर्षेण ज्वालयितुं प्रज्वालयितुं स्वतो ज्वलितादौ 'कायं' शरीरमीषत् तापयितुमातापयितुं वा प्रकर्षेण तापयितुं प्रतापयितुं वा, अन्येषां वा वचनात् ममैतत्कर्त्तुं न कल्पते, यदिवाऽग्निसमारम्भायान्यो वा वक्तुं न कल्पते ममेति । तं चैवं वदन्तं साधुमवगम्य गृहपतिः कदाचिदेतत्कुर्यादित्याह—स्यात्–कदाचित्स–परो गृहस्थ एवमुक्तनीत्या वदतः साधोरग्निकायमुज्ज्वालय्य प्रज्वालय्य वा कायमातापयेत् प्रतापयेद्वा, तच्चोज्ज्वालनातापनादिकं भिक्षुः 'प्रत्युपेक्ष्य' विचार्य स्वसन्मत्या परव्याकरणेनान्येषां वाऽन्तिके श्रुत्वा–अवगम्य ज्ञात्वा तं गृहपतिमाज्ञापयेत्–प्रतिबोधयेत्, कया ?–अनासेवनया, यथैतत् ममायुक्तमासेवितुं, भवता तु पुनः साधुभक्त्यनुकम्पाभ्यां पुण्यप्राग्भारोपार्जनमकारीति, ब्रवीमीतिशब्दावुक्तार्थौ । विमोक्षाध्ययनस्य तृतीयोद्देशकः परिसमाप्तः ।

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके गोचरादिगतेन शीताद्यङ्गविकारदर्शनान्यथाभावापन्नस्य गृहस्थस्यासदारेका व्युदस्ता, यदि पुनर्गृहस्थाभावे योषित एवान्यथाभावाभिप्रायेणोपसर्गयेयुः ततो वैहानसगार्द्धपृष्ठादिकं मरणमप्यवलम्बनीयं, कारणाभावे तु तन्न कार्यमित्येतत्प्रतिपादनार्थमिदमारभ्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

॥ २७६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जे भिक्खू तिहिं वत्थेहिं परिवुसिए पायचउत्थेहिं तस्स णं नो एवं भवइ–चउत्थं वत्थं जाइस्सामि, से अहेसणिज्जाइं वत्थाइं जाइज्जा अहापरिग्गहियाइं वत्थाइं धारिज्जा, नो धोइज्जा नो धोयरत्ताइं वत्थाइं धारिज्जा, अपलिओवमाणे गामंतरेसु ओमचेलिए, एयं खु वत्थधारिस्स सामग्गियं (सू० २११)

इह प्रतिमाप्रतिपन्नो जिनकल्पिको वा अच्छिद्रपाणिः, तस्य हि पात्रनिर्योगसमन्वितं पात्रं कल्पत्रयं चायमेवौघोपधिर्भवति नौपग्रहिकः, तत्र शिशिरादौ क्षौमिकं कल्पद्वयं सार्द्धहस्तद्वयायामविष्कम्भं तृतीयस्त्वौर्णिकः, स च सत्यपि शीते नापरमाकाङ्क्षतीत्येतदर्शयति–यो भिक्षुः त्रिभिर्वस्त्रैः 'पर्युषितो' व्यवस्थितः, तत्र शीते पतत्येकं क्षौमिकं प्रावृणोति, ततोऽपि शीतासहिष्णुतया द्वितीयं क्षौमिकं, पुनरपि अतिशीततया क्षौमिककल्पद्वयोपर्यौर्णिकमिति, सर्वथौर्णिकस्य बाह्याच्छादनता विधेया, किम्भूतैस्त्रिभिर्वस्त्रैरिति दर्शयति—'पात्रचतुर्थैः' पतन्तमाहारं पातीति पात्रं, तद्ग्रहणेन च पात्रनिर्योगः सप्तप्रकारोऽपि गृहीतः, तेन विना तद्ग्रहणाभावात्, स चायम्—"पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिआ। पडलाइ रयत्ताणं च गोच्छओ पायणिज्जोगो ॥ १ ॥" तदेवं सप्तप्रकारं पात्रं कल्पत्रयं रजोहरणं १ मुखवस्त्रिका २ चेत्येवं द्वादशधोपधिः, इत्तस्यैवम्भूतस्य भिक्षोः 'णम्' इति वाक्यालङ्कारे 'नैवं भवति' नायमध्यवसायो भवति, तद्यथा–न ममास्मिन्

१ पात्रं पात्रबन्धः पात्रस्थापनं च पात्रकेशरिका। पटलानि रजस्त्राणं च गोच्छकः पात्रनिर्योगः ॥ १ ॥

काले कल्पत्रयेण सम्यक् शीतापनोदो भवत्यतश्चतुर्थं वस्त्रमहं याचिष्ये, अध्यवसायनिषेधे च तद्याचनं दूरोत्सादितमेव, यदि पुनः कल्पत्रयं न विद्यते शीतकालश्चापतितस्ततोऽसौ जिनकल्पिकादिर्यथैषणीयानि वस्त्राणि याचेत–उत्कर्षणापकर्षणरहितान्यपरिकर्म्माणि प्रार्थयेदिति, तत्र "उद्दिट्ठ १ पहे २ अंतर ३ उज्झियधम्मा ४ य" चतस्रो वस्त्रैषणा भवन्ति, तत्र चाधस्तन्योर्द्वयोरग्रह इतरयोस्तु ग्रहः, तत्राप्यन्यतरस्यामभिग्रह इति, याच्चावासानि च वस्त्राणि यथापरिगृहीतानि धारयेत्, न तत्रोत्कर्षणधावनादिकं परिकर्म्म कुर्याद् ॥ एतदेव दर्शयितुमाह—नो धावेत्–प्रासुकोदकेनापि न प्रक्षालयेत्, गच्छवासिनो ह्यप्राप्तवर्षादौ ग्लानावस्थायां वा प्रासुकोदकेन यतनया धावनमनुज्ञातं, न तु जिनकल्पिकस्येति, तथा–न धौतरक्तानि वस्त्राणि धारयेत्, पूर्वं धौतानि पश्चाद्रक्तानीति, तथा ग्रामान्तरेषु गच्छन् वस्त्राण्यगोपयन् व्रजेद्, एतदुक्तं भवति–तथाभूतान्यसावन्तप्रान्तानि बिभर्ति यानि गोपनीयानि न भवन्ति, तदेवमसावल्पमचेलिकः, अल्पं च तच्चेलं चाल्पमचेलं प्रमाणतः परिमाणतो मूल्यतश्च, तद्यस्यास्त्यसावल्पमचेलिक इत्येतत्–पूर्वोक्तं 'खुः' अवधारणे, एतदेव वस्त्रधारिणः सामग्र्यं भवति–एषैव त्रिकल्पात्मिका द्वादशप्रकारौधिकोपध्यात्मिका वा सामग्री भवति, नापरेति ॥ शीतापगमे तान्यपि वस्त्राणि त्याज्यानीत्येतदर्शयितुमाह—

अह पुण एवं जाणिज्जा-उवाइक्कंते खलु हेमंते गिम्हे पडिवन्ने अहापरिजुन्नाइं वत्थाइं परिट्ठविज्जा, अदुवा संतरुत्तरे अदुवा ओमचेले अदुवा एगसाडे अदुवा अचेले (सू० २१२)

यदि तानि वस्त्राण्यपरहेमन्तस्थितिसहिष्णूनि तत उभयकालं प्रत्युपेक्षयन् बिभर्ति, यदि पुनर्जीर्णदेश्यानि जीर्णानीति जानीयात् ततः परित्यजतीत्यनेन सूत्रेण दर्शयति, अथ पुनरेवं जानीयाद्यथाऽपक्रान्तः खल्वयं हेमन्तो ग्रीष्मः प्रतिपन्नः अपगता शीतपीडा यथापरिजीर्णान्येतानि वस्त्राणि, एवमवगम्य ततः परिष्ठापयेत्–परित्यजेदिति, यदि पुनः सर्वाण्यपि न जीर्णानि ततो यद्यजीर्णं तत्तत्परिष्ठापयेत्, परिष्ठाप्य च निस्सङ्गो विहरेत्, यदि पुनरतिक्रान्तेऽपि शिशिरे क्षेत्रकालपुरुषगुणाद्भवेच्छीतं ततः किं कर्त्तव्यमित्याह–अपगते शीते वस्त्राणि त्याज्यानि, अथवा क्षेत्रादिगुणाद्धिमकणिनि वाते वाति सत्यात्मपरितुलनार्थं शीतपरीक्षार्थं च सान्तरोत्तरो भवेत्–सान्तरमुत्तरं–प्रावरणीयं यस्य स तथा, क्वचित्प्रावृणोति क्वचित्पार्श्ववर्त्ति बिभर्त्ति, शीताशङ्क्या नाद्यापि परित्यजति, अथवाऽवमचेल एककल्पपरित्यागात् द्विकल्पधारीत्यर्थः, अथवा शनैः शनैः शीतेऽपगच्छति सति द्वितीयमपि कल्पं परित्यजेत् तत एकशाटकः संवृतः, अथवाऽऽत्यन्तिके शीताभावे तदपि परित्यजेदतोऽचेलो भवति, असौ मुखवस्त्रिकारजोहरणमात्रोपधिः॥ किमर्थमसावेकैकं वस्त्रं परित्यजेदित्याह—

लाघवियं आगममाणे, तवे से अभिसमन्नागए भवइ (सू० २१३)

लघोर्भावो लाघवं लाघवं विद्यते यस्यासौ लाघविक(स्त)मात्मानमागमयन्–आपादयन् वस्त्रपरित्यागं कुर्यात्, शरीरोपकरणकर्म्मणि वा लाघवमागमयन् वस्त्रपरित्यागं कुर्यादिति। तस्य चैवम्भूतस्य किं स्यादित्याह—'से' तस्य वस्त्रप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रित्यागं कुर्वतः साधोस्तपोऽभिसमन्वागतं भवति, कायक्लेशस्य तपोभेदत्वात्, उक्तं च—"पंचहिं ठाणेहिं समणाणं निग्गंथाणं अचेलगत्ते पसत्थे भवति, तंजहा—अप्पा पडिलेहा १ वेसासिए रूवे २ तवे अणुमए ३ लाघवे पसत्थे ४ विउले इंदियनिग्गहे ५" ॥ एतच्च भगवता प्रवेदितमिति दर्शयितुमाह—

जमेयं भगवया पवेइयं तमेव अभिसमिच्चा सव्वओ सव्वत्ताए सम्मत्तमेव समभिजाणिज्जा (सू० २१४)

यदेतद्भगवता—वीरवर्द्धमानस्वामिना प्रवेदितं तदेवाभिसमेत्य—ज्ञात्वा 'सर्वतः' सर्वैः प्रकारैः सर्वात्मतया सम्यक्त्वमेव समत्वं वा—सचेलाचेलावस्थयोस्तुल्यतां 'समभिजानीयात्' आसेवनापरिज्ञया आसेवेतेति ॥ यः पुनरल्पसत्त्वतया भगवदुपदिष्टं नैव सम्यग् जानीयात्स एतदध्यवसायी स्यादित्याह—

जस्स णं भिक्खुस्स एवं भवइ—पुट्ठो खलु अहमंसि नालमहमंसि सीयफासं अहियासित्तए, से वसुमं सव्वसमन्नागयपन्नाणेणं अप्पाणेणं केइ अकरणयाए आउट्टे तवस्सिणो हु तं सेयं जमेगे विहमाइए तत्थावि तस्स कालपरियाए, सेऽवि तत्थ

१ पञ्चभिः कारणैः श्रमणानां निर्ग्रन्थानामचेलकत्वं प्रशस्तं भवति, तद्यथा—अल्पा प्रतिलेखना १ वैश्वासिकं रूपं २ तपोऽनुमतं ३ लाघवं प्रशस्तं ४ विपुल इन्द्रियनिग्रहः ५.

विअंतिकारए, इच्चेयं विमोहायतणं हियं सुहं खमं निस्सेसं आणुगामियं तिबेमि (सू० २१५) ॥ ८—४ ॥ विमोक्षाध्ययने चतुर्थ उद्देशकः ॥

'णम्' इति वाक्यालङ्कारे यस्य भिक्षोर्मन्दसंहननतया एवम्भूतोऽध्यवसायो भवति, तद्यथा—स्पृष्टः खल्वहमस्मि रोगातङ्कैः शीतस्पर्शादिभिर्वा रुग्व्याद्युपसर्गैर्वा, ततो ममास्मिन्नवसरे शरीरविमोक्षं कर्त्तुं श्रेयो 'नालं' न समर्थोऽहमस्मि, 'शीतस्पर्शं' शीतापादितं दुःखविशेषं भावशीतस्पर्शं वा रुग्व्याद्युपसर्गम् 'अध्यासयितुम्' अधिसोढुमित्यतो भक्तपरिज्ञेङ्गितमरणपादपोपगमनमुत्सर्गतः कर्त्तुं युक्तं, न च तस्य ममास्मिन्नवसरेऽवसरो यतो मे कालक्षेपासहिष्णुरुपसर्गः समुत्थितो रोगवेदनां वा चिराय सोढुं नालमतो वेहानसं गार्द्धपृष्ठं वा आपवादिकं मरणमत्र साम्प्रतं, न पुनरुपसर्गितस्तदेवाभ्युपेयादित्याह—'स' साधुः वसु—द्रव्यं स चात्र संयमः स विद्यते यस्यासौ वसुमान्, सर्वसमन्वागतप्रज्ञानेनात्मना कश्चिद्दर्द्धकटाक्षनिरीक्षणादुपसर्गसम्भवे सत्यपि तदकरणतया आ—समन्ताद्वृत्तो—व्यवस्थित आवृत्तो, यदिवा शीतस्पर्श—वातादिजनितं दुःखविशेषमसहिष्णुस्तच्चिकित्साया अकरणतया वसुमान् सर्वसमन्वागतप्रज्ञानेनात्मना आवृत्तो—व्यवस्थित इति, स चोपसर्गितो वातादिवेदनां चासहिष्णुः किं कुर्यादित्याह—हुर्हेतौ यस्माच्चिराय वातादिवेदनां सोढुमसहिष्णुः, यदिवा यस्मात् सीमन्तिनी उपसर्गयितुमुपस्थिता विषभक्षणोद्बन्धनाद्युपन्यासेनापि न मुञ्चति ततस्तपस्विनः प्रभूततरकालनानाविधोपायोपार्जिततपोधनस्य तदैव श्रेयो यदैकः कश्चिन्निजैः सपत्नीकोऽपवरके प्रवेशितः आरूढप्रण-

यप्रेयसीप्रार्थितस्तन्निर्गमोपायमलभमान आत्मोद्बन्धनाय विहायोगमनं तदाऽऽदद्याद्विषं वा भक्षयेत् पतनं वा कुर्याद् दीर्घकालं वा शीतस्पर्शादिकमसहिष्णुः सुदर्शनवत् प्राणान् जह्यात्। ननु च वेहानसादिकं बालमरणमुक्तं, तच्चानर्थाय, तत्कथं तस्याभ्युपगमः?, तथा चागमः—"इच्चेएणं बालमरणेणं मरमाणे जीवे अणंतेहिं नेरइयभवग्गहणेहिं अप्पाणं संजोएइ जाव अणाइयं च णं अणवयग्गं चाउरंतं संसारकंतारं भुज्जो भुज्जो परियट्टइ'त्ति, अत्रोच्यते, नैष दोषोऽत्रास्माकमार्हतानां, नैकान्ततः किञ्चित्प्रतिषिद्धमभ्युपगतं वा मैथुनमेकं विहाय, अपि तु द्रव्यक्षेत्रकालभावानाश्रित्य तदेव प्रतिषिध्यते तदेव चाभ्युपगम्यते, उत्सर्गोऽप्यगुणायापवादोऽपि गुणाय कालज्ञस्य साधोरिति, एतदर्शयितुमाह—दीर्घकालं संयममप्रतिपालनं विधाय संलेखनाविधिना कालपर्यायेण भक्तपरिज्ञादिमरणं गुणायेति, एवंविधे त्ववसरे तत्रापि वेहानसगार्द्धप्रष्ठादिमरणे अपि कालपर्याय एव, यद्वत्कालपर्यायमरणं गुणाय एवं वेहानसादिकमपीत्यर्थः, बहुनाऽपि कालपर्यायेण यावन्मात्रं कर्म्मासौ क्षपयति तदसावल्पेनापि कालेन कर्म्मक्षयमवाप्नोतीति दर्शयति—'सोऽपि' वेहानसादिर्विधाता, न केवलमानुपूर्व्या भक्तपरिज्ञादेः कर्त्तेत्यपिशब्दार्थः, 'तत्र' तस्मिन् वेहानसादिमरणे 'विअंतिकारए'त्ति विशेषेणान्तिर्व्यन्तिः—अन्तक्रिया तस्याः कारको व्यन्तिकारकः, तस्य हि तस्मिन्नवसरे तद्वेहानसादिकमौत्सर्गिकमेव मरणं, यतोऽनेनाप्यापवादिकेन मरणेनानन्ताः सिद्धाः सेत्स्यन्ति च, उपसञ्जिहीर्षुराह—'इत्येतत्' पूर्वोक्तं वेहानसादिमरणं विगतमोहानामायतनम्—आश्रयः कर्त्तव्यतया तथा हितम् अपायपरिहारतया तथा सुखं जन्मान्तरेऽपि सुखहेतुत्वात् तथा 'क्षमं' युक्तं

१ इत्येतेन बालमरणेन म्रियमाणो जीवोऽनन्तैर्नैरयिकभवग्रहणैरात्मानं संयोजयति यावदनादिकं चानवदग्रं चातुरन्तं संसारकान्तारं भूयो भूयः परिवर्तते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्तकालत्वात् तथा निःश्रेयसं कर्म्मक्षयहेतुत्वात् तथा 'आनुगामिकं' तदर्जितपुण्यानुगमनात्, इतिब्रवीमिशब्दौ पूर्ववद् । विमोक्षाध्ययनस्य चतुर्थोद्देशकः समाप्तः ॥

उक्तश्चतुर्थोद्देशकः, साम्प्रतं पञ्चम आरभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके बालमरणं गार्द्धपृष्ठादिकमुपन्यस्तम्, इह तु तद्विपर्यस्तं ग्लानभावोपगतेन भिक्षुणा भक्तपरिज्ञाख्यं मरणमभ्युपगन्तव्यमित्येतत्प्रतिपाद्यते, तदनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

जे भिक्खू दोहिं वत्थेहिं परिवुसिए पायतइएहिं तस्स णं नो एवं भवइ—तइयं वत्थं जाइस्सामि, से अहेसणिज्जाइं वत्थाइं जाइज्जा जाव एवं खु तस्स भिक्खुस्स सामग्गियं, अह पुण एवं जाणिज्जा—उवाइक्कंते खलु हेमन्ते गिम्हे पडिवण्णे, अहापरिजुन्नाइं वत्थाइं परिट्ठविज्जा, अहापरिजुन्नाइं परिट्ठवित्ता अदुवा संतरुत्तरे अदुवा ओमचेले अदुवा एगसाडे अदुवा अचेले लाघवियं आगममाणे तवे से अभिसमन्नागए भवइ जमेयं भगवया पवेइयं तमेव अभिसमिच्चा सव्वओ सव्वत्ताए सम्मत्तमेव समभिजाणिया, जस्स णं भिक्खुस्स एवं भवइ—पुट्ठो अवलो अहमंसि नालमहमंसि गिहंतरसंकमणं भिक्खायरियं गमणाए, से एवं वयंतस्स परो अभिहडं असणं वा ४ आहट्टु दलइज्जा, से पुव्वामेव आलोइज्जा—आउसंतो! नो खलु मे कप्पइ अभिहडं असणं ४ भुत्तए वा पायए वा अन्ने वा एयप्पगारे (सू० २१६)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २८० ॥

विमो० ८ उद्देशकः५

तत्र त्रिकल्पपर्युषितः स्थविरकल्पिको जिनकल्पिको वा स्यात्, कल्पद्वयपर्युषितस्तु नियमाज्जिनकल्पिकपरिहारविशुद्धिकयथालन्दिकप्रतिमाप्रतिपन्नानामन्यतमः, अस्मिन् सूत्रेऽपदिष्टो यो भिक्षुर्जिनकल्पिकादिर्द्वाभ्यां वस्त्राभ्यां पर्युषितो वस्त्रशब्दस्य सामान्यवाचित्वादेकः क्षौमिकोऽपर और्णिक इत्याभ्यां कल्पाभ्यां पर्युषितः-संयमे व्यवस्थितः, किम्भूताभ्यां कल्पाभ्यां?-पात्रतृतीयाभ्यां पर्युषित इत्याद्यनन्तरोद्देशकवन्नेयं यावत् 'नालमहमंसि'त्ति स्पृष्टोऽहं वातादिभी रोगैः 'अवलः असमर्थः 'नालं' न समर्थोऽस्मि गृहाद्गृहान्तरं सङ्क्रमितुं, तथा भिक्षार्थं चरणं चर्या भिक्षाचर्यां तद्गमनाय 'नालं' न समर्थ इति, तमेवम्भूतं भिक्षुमुपलभ्य स्याद्गृहस्थ एवम्भूतामात्मीयामवस्थां वदतः साधोरवदतोऽपि परो गृहस्थादिरनुकम्पाभक्तिरसार्द्रहृदयोऽभिहृतं-जीवोपमर्दनिर्वृत्तं, किं तद्?-अशनं पानं खादिमं स्वादिमं चेत्यारादाहृत्य तस्मै साधवे 'दलएज्ज'त्ति दद्यादिति । तेन च ग्लानेनापि साधुना सूत्रार्थमनुसरता जीवितनिष्पिपासुनाऽवश्यं मर्त्तव्यमित्यध्यवसायिना किं विधेयमित्याह-स जिनकल्पिकादीनां चतुर्णामप्यन्यतमः पूर्वमेव-आदावेव 'आलोचयेत्' विचारयेत्, कतरेणोद्गमादिना दोषेण दुष्टमेतत्?, तत्राभ्याहृतमिति ज्ञात्वाऽभ्याहृतं च प्रतिषेधयेत्, तद्यथा-आयुष्मन् गृहपते! न खल्वेतन्ममाभिहृतमभ्याहृतं च कल्पते अशनं भोक्तुं पानं पातुमन्यद्धैतत्प्रकारमाधाकर्म्मादिदोषदुष्टं न कल्पते, इत्येवं तं गृहपतिं दानायोद्यतमाज्ञापयेदिति, पाठान्तरं वा "तं भिक्खुं केइ गाहावई उवसंकमित्तु बूया-आउसंतो समणा! अहन्नं तव अट्ठाए असणं वा ४ अभिहडं दलामि, से पुव्वामेव जाणेज्जा-आउसंतो गाहावई! जन्नं तुमं मम अट्ठाए असणं वा ४ अभिहडं चेतेसि, णो य खलु मे कप्पइ एयप्पगारं असणं वा ४ भोत्तए वा पायए वा, अन्ने वा तहप्पगारे"त्ति, कण्ठ्यं, तदेवं प्रतिषिद्धोऽपि श्रावकसंज्ञिप्रकृतिभद्रकमिथ्यादृष्टीनामन्यतम एवं चिन्तयेत्, तद्यथा-एष तावत् ग्लानो न शक्नोति भिक्षामटितुं न चापरं कञ्चन ब्रवीति तदस्मै प्रतिषिद्धोऽप्यहं केनचिच्छन्नना दास्यामीत्येवमभिसन्धायाहारादिकं ढौकयति, तत्साधुरनेषणीयमितिकृत्वा प्रतिषेधयेत् ॥ किं च—

॥ २८० ॥

जस्स णं भिक्खुस्स अयं पगप्पे—अहं च खलु पडिन्नत्तो अपडिन्नत्तेहिं गिलाणो अगिलाणेहिं अभिकंख साहम्मिएहिं कीरमाणं वेयावडियं साइज्जिस्सामि, अहं वावि खलु अप्पडिन्नत्तो पडिन्नत्तस्स अगिलाणो गिलाणस्स अभिकंख साहम्मियस्स कुज्जा वेयावडियं करणाए आहट्टु परिन्नं अणुक्खिस्सामि आहडं च साइज्जिस्सामि १, आहट्टु परिन्नं आणक्खिस्सामि आहडं च नो साइज्जिस्सामि २, आहट्टु परिन्नं नो आण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खिखस्सामि आहडं च साइज्जिस्सामि ३, आहट्टु परिन्नं नो आणक्खिस्सामि आहडं च नो साइज्जिस्सामि ४ एवं से अहाकिट्टियमेव धम्मं समभिजाणमाणे संते विरए सुसमाहियलेसे तत्थावि तस्स कालपरियाए से तत्थ विअंतिकारए, इच्चेयं विमोहायय-णं हियं सुहं खमं निस्सेसं आणुगामियं तिबेमि (सू० २१७) ८–५। विमोक्षाध्ययने पञ्चम उद्देशकः ॥

'णम्' इति वाक्यालङ्कारे यस्य भिक्षोः परिहारविशुद्धिकस्य यथालन्दिकस्य वाऽयं–वक्ष्यमाणः 'प्रकल्पः' आचारो भवति, तद्यथा–अहं च खलु 'चः' समुच्चये 'खलुः' वाक्यालङ्कारे अहं क्रियमाणं वैयावृत्त्यमपरैः 'स्वादयिष्यामि' अभिलषिष्यामि, किम्भूतोऽहं?–प्रतिज्ञप्तो–वैयावृत्त्यकरणायापरैरुक्तः–अभिहितो यथा तव वयं वैयावृत्त्यं यथोचितं कुर्म्म इति, किम्भूतैः परैः?–अप्रतिज्ञप्तैः–अनुक्तैः, किम्भूतोऽहं–ग्लानो–विकृष्टतपसा कर्त्तव्यताऽशक्तो वातादिक्षोभेण वा ग्लान इति, किम्भूतैरपरैः?–अग्लानैः–उचितकर्त्तव्यसहिष्णुभिः, तत्र परिहारविशुद्धिकस्यानुपारिहारिकः करोति कल्पस्थितो वा परो, यदि पुनस्तेऽपि ग्लानास्ततोऽन्ये न कुर्वन्ति, एवं यथालन्दिकस्यापीति, केवलं तस्य स्थविरा अपि कुर्वन्तीति दर्शयति–निर्जराम् 'अभिकाङ्क्ष्य' उद्दिश्य 'साधर्म्मिकैः' सदृशकल्पिकैरेककल्पस्थैरपरसाधुभिर्वा क्रियमाणं वैयावृत्त्यमहं 'स्वादयिष्यामि' अभिकाङ्क्षयिष्यामि यस्यायं भिक्षोः प्रकल्पः–आचारः स्यात् स तमाचारमनुपालयन् भक्तपरिज्ञयाऽपि जीवितं जह्यात्, न पुनराचारखण्डनं कुर्यादिति भावार्थः। तदेवमन्येन साधर्म्मिकेण वैयावृत्त्यं क्रियमाणमनुज्ञातं, साम्प्रतं स एवापरस्य कुर्यादिति दर्शयितुमाह—'चः' समुच्चये अपिशब्दः पुनःशब्दार्थे, स च पूर्वस्माद्विशेषदर्शनार्थः, 'खलुः' वाक्यालङ्कारे, अहं च पुनरप्रतिज्ञप्तः–अनभिहितः प्रतिज्ञप्तस्य–वैयावृत्त्यकरणायाभिहितस्य अग्लानो ग्लानस्य निर्जरामभिकाङ्क्ष्य साधर्म्मिकस्य वैयावृत्त्यं कुर्या, किमर्थं?—'करणाय' तदुपकरणाय तदुपकारायेत्यर्थः, तदेवं प्रतिज्ञां परिगृह्यापि भक्तपरिज्ञया प्राणान् जह्यात्, न पुनः प्रतिज्ञामिति सूत्रभावार्थः। इदानीं प्रतिज्ञाविशेषद्वारेण चतुर्भङ्गिकामाह–एकः कश्चिदेवम्भूतां प्रतिज्ञां गृह्णाति, तद्यथा–ग्लानस्यापरस्य साधर्मिकस्याहारादिकमन्वेषयिष्यामि, अपरं च वैयावृत्त्यं यथोचितं करिष्यामि, तथाऽपरेण च साधर्मिकेणाहृतमानीतमाहारादिकं स्वादयिष्यामि–उपभोक्ष्ये, एवम्भूतां प्रतिज्ञामाहृत्य–गृहीत्वा वैयावृत्त्यं कुर्यादिति १, तथाऽपर आहृत्य–प्रतिज्ञां गृहीत्वा यथाऽपरनिमित्तमन्वीक्षिष्ये आहारादिकमाहृतं चापरेण न स्वादयिष्यामीति २, तथाऽपर आहृत्य प्रतिज्ञामेवम्भूतां, तद्यथा–नापरनिमित्तमन्वीक्षिष्याम्याहारादिकमाहृतं चान्येन स्वादयिष्यामीति ३, तथाऽपर आहृत्य प्रतिज्ञामेवम्भूतां, तद्यथा–नान्वीक्षिष्येऽपरनिमित्तमाहारादिकं नाप्याहृतमन्येन स्वादयिष्यामीति ४, एवम्भूतां च नानाप्रकारां प्रतिज्ञां गृहीत्वा कुतश्चिद् ग्लायमानोऽपि जीवितपरित्यागं कुर्यात्, न पुनः प्रतिज्ञालोपमिति। अमुमेवार्थमुपसंहारद्वारेण दर्शयितुमाह—'एवम्' उक्तविधिना 'स' भिक्षुरवगततत्त्वः शरीरादिनिष्पिपासुः यथाकीर्त्तितमेव धर्म्मम्–उक्तस्वरूपं सम्यगभिजानन्–आसेवनापरिज्ञया आसेवमानः, तथा लाघविकमागमयन्नित्यादि यच्चतुर्थोद्देशकेऽभिहितं तदत्र वाच्यमिति, तथा 'शान्तः' कषायोपशमाच्छान्तो वा अ-

नादिसंसारपर्यटनाद् विरतः सावद्यानुष्ठानात् शोभनाः समाहृता–गृहीता लेश्याः–अन्तःकरणवृत्तयस्तैजसीप्रभृतयो वा येन स सुसमाहृतलेश्यः, एवम्भूतः सन् पूर्वगृहीतप्रतिज्ञापालनासमर्थो ग्लानभावोपगतस्तपसा रोगातङ्केन वा प्रतिज्ञालोपमकुर्वन् शरीरपरित्यागाय भक्तप्रत्याख्यानं कुर्यात्, 'तत्रापि' भक्तपरिज्ञायामपि 'तस्य' कालपर्यायेणानागतायामपि कालपर्याय एव निष्पादितशिष्यस्य संलिखितदेहस्य यः कालपर्यायो–मृत्योरवसरोऽत्रापि ग्लानावसरेऽसावेव कालपर्याय इति, कर्म्मनिर्जराया उभयत्र समानत्वात्, स भिक्षुस्तत्र–ग्लानतयाऽनशनविधाने व्यन्तिकारकः–कर्म्मक्षयविधायीति। उद्देशकार्थमुपसञ्जिहीर्षुराह–सर्वं पूर्ववद्। विमोक्षाध्ययनस्य पञ्चमोद्देशकः परिसमाप्तः ॥

उक्तः पञ्चमोद्देशकः, साम्प्रतं षष्ठ आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके ग्लानतया भक्तप्रत्याख्यानमुक्तम्, इह धृतिसंहननादिबलोपेत एकत्वभावनां भावयन्निङ्गितमरणं कुर्यादित्येतत्प्रतिपाद्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादौ सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्—

जे भिक्खू एगेण वत्थेण परिवुसिए पायविईएण, तस्स णं नो एवं भवइ–विइयं वत्थं जाइस्सामि, से अहेसणिज्जं वत्थं जाइज्जा अहापरिग्गहियं वत्थं धारिज्जा जाव गिम्हे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिवन्ने अहापरिजुन्नं वत्थं परिट्ठविज्जा २ त्ता अदुवा एगसाडे अदुवा अचेले लाघवियं आगममाणे जाव सम्मत्तमेव समभिजाणीया (सू० २१८)

गतार्थं ॥ तस्य च भिक्षोरभिग्रहविशेषात् सपात्रमेकं वस्त्रं धारयतः परिकर्म्मितमतेर्लघुकर्म्मतया एकत्वभावनाऽध्यवसायः स्यादिति दर्शयितुमाह—

जस्स णं भिक्खुस्स एवं भवइ—एगे अहमंसि न मे अत्थि कोइ न याहमवि कस्सवि, एवं से एगागिणमेव अप्पाणं समभिजाणिज्जा, लाघवियं आगममाणे तवे से अभिसमन्नागए भवइ जाव समभिजाणिया (सू० २१९)

'णम्' इति वाक्यालङ्कारे, यस्य भिक्षोः 'एव'मिति वक्ष्यमाणं भवति, तद्यथा—एकोऽहमस्मि संसारे पर्यटतो न मे पारमार्थिक उपकारकर्त्तृत्वेन द्वितीयोऽस्ति, न चाहमन्यस्य दुःखापनयनतः कस्यचिद् द्वितीय इति, स्वकृतकर्म्मफलेश्वरत्वात्प्राणिनां, एवमसौ साधुरेकाकिनमेवात्मानम्—अन्तरात्मानं सम्यगभिजानीयात्, नास्यात्मनो नरकादिदुःखत्राणतया शरण्यो द्वितीयोऽस्तीत्येवं संदधानो यद्यद्रोगादिकमुपतापकारणमापद्यते तत्तदपरशरणनिरपेक्षो मयैवैतत्कृतं मयैव सोढव्यमित्येतदध्यवसायी सम्यगधिसहते । कुत एतदधिसहत इत्यत आह—लाघवियमित्यादि, चतुर्थोद्देशकवद्वृत्तार्थं, यावत् 'सम्मत्तमेव समभि जाणिय'त्ति ॥ इह द्वितीयोद्देशके उद्गमोत्पादनैषणा प्रतिपादिता, तद्यथा—'आउसंतो समणा! अहं खलु तव अट्ठाए असणं वा ४ वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पाणाई भूयाइं जीवाइं सत्ताइं समारंभ समुद्दिस्स कीयं पामिच्चं अच्छेज्जं अणिसिट्ठं आहट्टु चेएमि' इत्यादिना ग्रन्थेनेति, तथाऽनन्तरोद्देशके ग्रहणैषणा प्रतिपादिता, "सिया य से एवं वयंतस्सवि परो अभिहडं असणं वा ४ आहट्टु दलएज्जा" इत्यादिना ग्रन्थेन, ततो ग्रासैषणाऽवशिष्यते, अतस्तत्प्रतिपादनायाह—

आ. सू. ४८ श्रीआचाराङ्गवृत्तिः (शी०) ॥ २८३ ॥ विमो० ८ उद्देशकः६

से भिक्खू वा भिक्खुणी वा असणं वा ४ आहारेमाणे नो वामाओ हणुयाओ दाहिणं हणुयं संचारिज्जा आसाएमाणे, दाहिणाओ वामं हणुयं नो संचारिज्जा आसाएमाणे, से अणासायमाणे लाघवियं आगममाणे तवे से अभिसमन्नागए भवइ, जमेयं भगवया पवेइयं तमेवं अभिसमिच्चा सव्वओ सव्वत्ताए सम्मत्तमेव अ(सम)भिजाणिया (सू० २२०)

'स' पूर्वव्यावर्णितो 'भिक्षुः' साधुः साध्वी वा अशनादिकमाहारमुद्गमोत्पादनैषणाशुद्धं प्रत्युत्पन्नं ग्रहणैषणाशुद्धं च गृहीतं सदङ्गारिताभिधूमितवर्जमाहारयेत्, तयोश्चाङ्गारिताभिधूमितयो रागद्वेषौ निमित्तं, तयोरपि सरसनीरसोपलब्धिः, कारणाभावे च कार्याभाव इतिकृत्वा रसोपलब्धिनिमित्तपरिहारं दर्शयति—स भिक्षुराहारमाहारयन्नो वामतो हनुतो दक्षिणां हनुं रसोपलब्धये सञ्चारयेदास्वादयन्नशनादिकं, नापि दक्षिणतो वामां सञ्चारयेदास्वादयन्, तत्सञ्चारास्वादनेन हि रसोपलब्धौ रागद्वेषनिमित्ते अङ्गारितत्वाभिधूमितत्वे स्यातामतो यत्किञ्चिदप्यास्वादनीयं नास्वादयेत्, पाठान्तरं वा 'आढायमाणे' आदरवानाहारे मूर्च्छितो गृद्धो न सञ्चारयेदिति, हन्वन्तरसङ्क्रमवदन्यत्रापि नास्वादयेदिति दर्शयति—स ह्याहारं चतुर्विधमप्याहारयन् रागद्वेषौ परिहरन्नास्वादयेदिति, तथा कुतश्चिन्निमित्ताद्धन्वन्तरं सञ्चारयन्नप्यनास्वादयन् सञ्चारयेदिति। किमिति यत आह—आहारलाघवमागमयन्-आपादयन् नो आस्वादयेदित्यास्वादनिषेधेन चान्तप्रान्ताहाराभ्युपगमोऽभिहितो भवति, एवं च तपः 'से' तस्य भिक्षोरभिसमन्वागतं भवतीत्यादि गतार्थं यावत् 'सम्मत्तमेव समभिजाणिय'त्ति ॥ तस्य चान्तप्रान्ताशितयाऽपचितमांसशोणितस्य जरदस्थिसन्ततेः क्रियाऽवसीदत्कायचेष्टस्य शरीरपरित्यागबुद्धिः स्यादित्याह— ॥ २८३ ॥

जस्स णं भिक्खुस्स एवं भवइ—से गिलामि च खलु अहं इमंमि समए इमं सरीरगं अणुपुव्वेण परिवहित्तए, से अणुपुव्वेणं आहारं संवट्टिज्जा, अणुपुव्वेणं आहारं संवट्टित्ता कसाए पयणुए किच्चा समाहियच्चे फलगावयट्ठी उट्ठाय भिक्खू अभिनिवुडच्चे (सू० २२१)

'णम्' इति वाक्यालङ्कारे यस्यैकत्वभावनाभावितस्य भिक्षोराहारोपकरणलाघवं गतस्य 'एव'मिति वक्ष्यमाणोऽभिप्रायो भवति, 'से' इति तच्छब्दार्थे तच्छब्दोऽपि वाक्योपन्यासार्थे, 'चः' शब्दसमुच्चये 'खलुः' अवधारणे, अहं चास्मिन् 'समये'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवसरे संयमावसरे ग्लायामि ग्लानिमेव गतो रूक्षाहारतया तत्समुत्थेन वा रोगेण पीडितोऽतो न शक्नोमि रूक्षतपोभिरभिनिष्टप्तं शरीरकमानुपूर्व्या–यथेष्टकालावश्यककियारूपया परिवोढुं–नालमहं क्रियासु व्यापारयितुम्, अस्मिन्नवसरे इदं प्रतिक्षणं शीर्यमाणत्वाच्छरीरकमिति मत्वा स भिक्षुरानुपूर्व्या–चतुर्थषष्ठाचाम्लादिकया आहारं 'संवर्त्तयेत्' संक्षिपेत् न पुनर्द्वादशसंवत्सरसंलेखनाऽऽनुपूर्वीह गृह्यते, ग्लानस्य तावन्मात्रकालस्थितेरभावाद्, अतस्तत्कालयोग्ययाऽऽनुपूर्व्या द्रव्यसंलेखनार्थमाहारं निरुन्ध्यादिति। द्रव्यसंलेखनया संलिख्य च यदपरं कुर्यात्तदाह–षष्ठाष्टमदशमद्वादशादिकयाऽऽनुपूर्व्याऽऽहारं संवर्त्य कषायान् प्रतनून् कृत्वा सर्वकालं हि कषायतानवं विधेयं विशेषतस्तु संलेखनावसरे इत्यतस्तान् प्रतनून् कृत्वा सम्यगाहिता–व्यवस्थापिता अर्चा–शरीरं येन स समाहितार्चः, नियमितकायव्यापार इत्यर्थः, यदिवा अर्चा–लेश्या सम्यगाहिता–जनिता लेश्या येन स समाहितार्चः, अतिविशुद्धाध्यवसाय इत्यर्थः, यदिवाऽर्चा–क्रोधाद्यध्यवसायात्मिका ज्वाला समाहिता–उपशमिताऽर्चा येन स तथा, 'फलं' कर्म्मक्षयरूपं तदेव फलकं तेनापदि–संसारभ्रमणरूपायामर्थः–प्रयोजनं फलकापदर्थः स विद्यते यस्यासौ फलकापदर्थी, यदिवा फलकवद्वास्यादिभिरुभयतो बाह्यतोऽभ्यन्तरतश्चावकृष्टः फलकावकृष्ट इत्येवं विगृह्यार्षत्वात् 'फलगावयट्ठी' इत्युक्तं, यदिवा तक्ष्यमाणोऽपि दुर्वचनवास्यादिभिः कषायाभावतया फलकवदवतिष्ठते तच्छीलश्चेति फलकावस्थायी, वासीचन्दनकल्प इत्यर्थः, स एवम्भूतः प्रतिदिनं साकारभक्तप्रत्याख्यायी बलवति रोगातंके उत्थाय–अभ्युद्यतमरणोद्यमं विधायाभिनिर्वृत्तार्चः–शरीरसन्तापरहितो धृतिसंहननाद्युपेतो महापुरुषाचीर्णमार्गानुविधायीङ्गितमरणं कुर्यात्॥ कथं कुर्यादित्याह—

अणुपविसित्ता गामं वा नगरं वा खेडं वा कव्वडं वा मडंबं वा पट्टणं वा दोणमुहं वा आगरं वा आसमं वा सन्निवेसं वा नेगमं वा रायहाणिं वा तणाइं जाइज्जा तणाइं जाइत्ता से तमायाए एगंतमवक्कमिज्जा, एगंतमवक्कमित्ता अप्पंडे अप्पपाणे अप्पबीए अप्पहरिए अप्पोसे अप्पोदए अप्पुत्तिंगपणगदगमट्टियमक्कडासंताणए पडिलेहिय २ पमज्जिय २ तणाइं संथरिज्जा, तणाइं संथरित्ता इत्थवि समए इत्तरियं कुज्जा, तं सच्चं सच्चवाई ओए तिन्ने छिन्नकहंकहे आईयट्ठे अणाईए चिच्चाण भेउरं कायं संविहूय विरूवरूवे परीसहोवसग्गे अस्सिं विस्संभणयाए भेरवमणुचिन्ने तत्थावि तस्स कालपरियाए जाव अणुगामियं तिबेमि (सू० २२२) ८–६॥ विमोक्षाध्ययने षष्ठ उद्देशकः॥ ८॥

ग्रसति बुद्ध्यादीन् गुणानिति गम्यो वाऽष्टादशानां कराणामिति ग्रामः, सर्वत्र वाशब्दः पक्षान्तरदर्शनार्थः, नात्र करो विद्यत इति नकरं, पांशुप्राकारवद्धं खेटं, क्षुल्लकप्राकारवेष्टितं कर्वटं, अर्द्धतृतीयगव्यूतान्तर्ग्रामरहितं मडम्बं, पत्तनं तु द्विधा–जलपत्तनं स्थलपत्तनं च, जलपत्तनं यथा काननद्वीपः, स्थलपत्तनं यथा मथुरा, 'द्रोणमुखं' जलस्थलनिर्गमप्रवेशं यथा भरुकच्छं तामलिप्ती वा, 'आकरो' हिरण्याकरादिः, 'आश्रमः' तापसावसथोपलक्षित आश्रयः, 'सन्निवेशः' यात्रासमागतजनावासो जनसमागमो वा 'नैगमः' प्रभूततरवणिग्वर्गावासः 'राजधानी' राजाधिष्ठानं राज्ञः पीठिकास्थानमित्यर्थः, एतेष्वेतानि वा प्रविश्य तृणानि याचेत, ततः किमित्याह–संस्तारकाय प्रासुकानि दर्भवीरणादिकानि क्वचिद्ग्रामादौ तृणस्वामिनमशुषिराणि तृणानि याचित्वा स तान्यादायैकान्ते–गिरिगुहादावपक्रामेद्–गच्छेदेकान्तं–रहोऽपक्रम्य च प्रासुकं महास्थण्डिलं प्रत्युपेक्षते, किम्भूतं तद्दर्शयति–अल्पान्यण्डानि कीटिकादीनां यत्र तदल्पाण्डं तस्मिन्, अल्पशब्दोऽत्राभावे वर्त्तते, अण्डकरहित इत्यर्थः, तथाऽल्पाः प्राणिनो–द्वीन्द्रियादयो यस्मिन् तत्तथा, तथा अल्पानि बीजानि नीवारश्यामाकादीनां यत्र तत्तथा, तथा अल्पानि हरितानि–दूर्वाप्रवालादीनि यत्र तत्तथा, तथाऽल्पावश्याये–अधस्तनोपरितनावश्यायविप्रुड्वर्जिते, तथाऽल्पोदके–भौमान्तरिक्षोदकरहिते, तथोत्तिङ्गपनकोदकमृत्तिकामर्कटसन्तानरहिते, तत्रोत्तिङ्गः–पिपीलिकासन्तानकः पनको–भूम्यादावुल्लिविशेषः उदकमृत्तिका–अचिराप्कायाद्रीकृता मृत्तिका मर्कटसन्तानको–लूतातन्तुजालं, तदेवम्भूते महास्थण्डिले तृणानि संस्तरेत्, किं कृत्वा?–तत् स्थण्डिलं चक्षुषा प्रत्युपेक्ष्य २, वीप्सया भृशभावमाह, एवं रजोहरणादिना प्रमृज्य २, अत्रापि वीप्सया भृशार्थता सूचिता, संस्तीर्य च तृणान्युच्चारप्रस्रवणभूमिं च प्रत्युपेक्ष्य पूर्वाभिमुखसंस्तारकगतः करतललललाटस्पर्शिधृतरजोहरणः कृतसिद्धनमस्कारः आवर्त्तितपञ्चनमस्कारोऽत्रापि समये अपिशब्दादन्यत्र वा समये 'इत्वर'मिति पादपोपगमनापेक्षया नियतदेशप्रचाराभ्युपगमादिङ्गितमरणमुच्यते, न तु पुनरित्वरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साकारं प्रत्याख्यानं, साकारप्रत्याख्यानस्यान्यस्मिन्नपि काले जिनकल्पिकादेरसम्भवात्, किं पुनर्यावत्कथिकभक्तप्रत्याख्यानावसर इति, इत्वरं हि रोगातुरः श्रावको विधत्ते, तद्यथा–यद्यहमस्माद्रोगात् पञ्चभिरहोभिर्मुक्तः स्यां ततो भोक्ष्ये, नान्यथेत्यादि, तदेवमित्वरम्–इङ्गितमरणं धृतिसंहननादिबलोपेतः स्वकृतत्वग्वर्त्तनादिक्रियो यावज्जीवं चतुर्विधाहारनियमं कुर्यादिति, उक्तं च—"पच्चक्खइ आहारं चउव्विहं णियमओ गुरुसमीवे । इंगियदेसंमि तहा चिट्ठंपि हु नियमओ कुणइ ॥ १ ॥ उव्वत्तइ परिअत्तइ काइगमाईऽवि अप्पणा कुणइ । सव्वमिह अप्पणच्चिअ ण अन्नजोगेण धितिबलिओ ॥ २ ॥" तच्चेङ्गितमरणं किम्भूतं किम्भूतश्च प्रतिपद्यत इत्याह—'तद्' इङ्गितमरणं सद्भ्यो हितं सत्यं,–सुगतिगमनाविसंवादनात्सर्वज्ञोपदेशाच्च सत्यं–तथ्यं, तथा स्वतोऽपि सत्यं वदितुं शीलमस्येति सत्यवादी, यावज्जीवं यथोक्तानुष्ठानाद्यधाऽऽरोपितप्रतिज्ञाभारनिर्वहणादित्यर्थः, तथा 'ओजः' रागद्वेषरहितः, तथा 'तीर्णः' संसारसागरं, भाविनि भूतवदुपचारात्तीर्णवत्तीर्ण इत्यर्थः, तथा 'छिन्ना' अपनीता 'कथं' कथमपि या 'कथा' रागकथादिका विकथारूपा येन स छिन्नकथंकथः, यदिवा कथमहमिङ्गितमरणप्रतिज्ञां निर्वहिष्ये इत्येवंरूपा या कथा सा छिन्ना येन स छिन्नकथंकथः, दुष्करानुष्ठानविधायी हि कथंकथी भवति, स तु पुनर्महापुरुषतया न व्याकुलतामियादिति, तथा आ–समन्तादतीव इता–ज्ञाता परिच्छिन्ना जीवादयोऽर्था येन सोऽयमातीतार्थः आदत्तार्थो वा, यदिवाऽतीताः–सामस्त्येनातिक्रान्ताः अर्थाः–

१ प्रत्याख्याति आहारं चतुर्विधं नियमाद् गुरुसमीपे । इङ्गितदेशे तथा चेष्टामपि नियमतः करोति ॥ १ ॥ उद्वर्तते परिवर्तते कायिक्याद्यपि आत्मना करोति । सर्वमिहात्मनैव नान्ययोगेन धृतिबलिकः ॥ २ ॥

प्रयोजनानि यस्य स तथा, उपरतव्यापार इत्यर्थः, तथा आ–समन्तादतीव इतो–गतोऽनाद्यनन्ते संसारे आतीतः न आतीतः अनातीतः, अनादत्तो वा संसारो येन स तथा, संसारार्णवपारगामीत्यर्थः, स एवम्भूत इङ्गितमरणं प्रतिपद्यते, विधिना 'त्यक्त्वा' प्रोज्झ्य स्वयमेव भिद्यते इति भिदुरं–प्रतिक्षणविशरारुं 'कायं' कर्म्मवशाद्गृहीतमौदारिकं शरीरं त्यक्त्वा, तथा 'संविधूय' परीषहोपसर्गान् प्रमथ्य 'विरूपरूपान्' नानाप्रकारान् सोढ्वा 'अस्मिन्' सर्वज्ञप्रणीत आगमे 'विस्रम्भणतया' विश्वासास्पदे तदुक्तार्थाविसंवादाध्यवसायेन भैरवं–भयानकमनुष्ठानं क्लीवैर्दुरध्यवसमिङ्गितमरणाख्यमनुचीर्णवान्–अनुष्ठितवानिति, तच्च तेन यद्यपि रोगातुरतया व्यधायि तथापि तत्कालपर्यायागततुल्यफलमिति दर्शयितुमाह—'तत्रापि' रोगपीडाऽऽहितेङ्गितमरणाभ्युपगमेऽपि, न केवलं कालपर्यायेणेत्यपिशब्दार्थः, 'तस्य' कालज्ञस्य भिक्षोरसावेव कालपर्यायः, कर्म्मक्षयस्योभयत्र समानत्वादिति, आह च—'सेवि तत्थ वियंतिकारए' इत्यादि पूर्ववद्गतार्थम्, इतिब्रवीमिशब्दावपि क्षुण्णार्थाविति विमोक्षाध्ययनस्य षष्ठोद्देशकः समाप्तः ॥

उक्तः षष्ठोद्देशकः, साम्प्रतं सप्तमव्याख्या प्रतन्यते, अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके एकत्वभावनाभावितस्य धृतिसंहननाद्युपेतस्येङ्गितमरणमभिहितम्, इह तु सैवैकत्वभावना प्रतिभाभिर्निष्पाद्यत इतिकृत्वाऽतस्ताः प्रतिपाद्यन्ते, तथा विशिष्टतरसंहननोपेतश्च पादपोपगमनमपि विदध्यादित्येतच्चेत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

जे भिक्खू अचेले परिवुसिए तस्स णं भिक्खुस्स एवं भवइ–चाएमि अहं तणफासं अहियासित्तए सीयफासं अहियासित्तए तेउफासं अहियासित्तए दंसमसगफासं अहियासित्तए एगयरे अन्नतरे विरूवरूवे फासे अहियासित्तए, हिरिपडिच्छायणं चऽहं नो संचाएमि अहिआसित्तए , एवं से कप्पेइ कडिबंधणं धारित्तए ॥ (सू० २२३)

यो भिक्षुः प्रतिमाप्रतिपन्नोऽभिग्रहविशेषादचेलो–दिग्वासाः 'पर्युषितः' संयमे व्यवस्थितो 'णम्' इति वाक्यालङ्कारे 'तस्य' भिक्षोः 'एव'मिति वक्ष्यमाणोऽभिप्रायो भवति, तद्यथा–शक्नोम्यहं तृणस्पर्शमपि सोढुं धृतिसंहननाद्युपेतस्य वैराग्यभावनाभावितान्तःकरणस्यागमेन प्रत्यक्षीकृतनारकतिर्यग्वेदनाऽनुभवस्य न मे तृणस्पर्शो महति फलविशेषेऽभ्युद्यतस्य किञ्चित् प्रतिभासते, तथा शीतोष्णदंशमशकस्पर्शमधिसोढुमिति, तथा एकतरान् अन्यतरांश्चानुकूलप्रत्यनीकान् विरूपरूपान् 'स्पर्शान्' दुःखविशेषानध्यासयितुं–सोढुमिति, किं त्वहं ह्री–लज्जा तया गुह्यप्रदेशस्य प्रच्छादनं ह्रीप्रच्छादनं, तच्चाहं त्यक्तुं न शक्नोमि, एतच्च प्रकृतिलज्जालुकतया साधनविकृतरूपतया वा स्यात्, एवमेभिः कारणैः 'से' तस्य 'कल्पते' युज्यते 'कटिबन्धनं' चोलपट्टकं कर्तुं, स च विस्तरेण चतुरङ्गुलाधिको हस्तो दैर्घ्येण कटिप्रमाण इति गणनाप्रमाणेनैकः, पुनरेतानि कारणानि न स्युः ततोऽचेल एव पराक्रमेत, अचेलतया शीतादिस्पर्शं सम्यगधिसहेतेति ॥ एतत्प्रतिपादयितुमाह—

अदुवा तत्थ परक्कमंतं भुज्जो अचेलं तणफासा फुसन्ति सीयफासा फुसन्ति तेउफासा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फुसन्ति दंसमसगफासा फुसन्ति एगयरे अन्नयरे विरूवरूवे फासे अहियासेइ, अचेले लाघवियं आगममाणे जाव समभिजाणिया (सू० २२४)

स एवं कारणसद्भावे सति वस्त्रं बिभृयादथवा नैवासौ जिह्रेति, ततोऽचेल एव पराक्रमेत, तं च तत्र संयमेऽचेलं पराक्रममाणं भूयः–पुनस्तृणस्पर्शाः स्पृशन्ति–उपतापयन्ति, तथा शीतोष्णदंशमशकस्पर्शाः स्पृशन्तीति, तथैकतरान्यतरांश्च विरूपरूपान् स्पर्शानुदीर्णानधिसहते असावचेलोऽचेललाघवमागमयन्नित्यादि गतार्थं यावत् 'सम्मत्तमेव समभिजाणिय'त्ति ॥ किं च–प्रतिमाप्रतिपन्न एव विशिष्टमभिग्रहं गृह्णीयात्, तद्यथा–अहमन्येषां प्रतिमाप्रतिपन्नानामेव किञ्चिद्दास्यामि, तेभ्यो वा ग्रहीष्यामीत्येवमाकारं चतुर्भङ्गिकयाऽभिग्रहविशेषमाह—

जस्स णं भिक्खुस्स एवं भवइ–अहं च खलु अन्नेसिं भिक्खूणं असणं वा ४ आहट्टु दलइस्सामि आहडं च साइज्जिस्सामि १ जस्स णं भिक्खुस्स एवं भवइ–अहं च खलु अन्नेसिं भिक्खूणं असणं वा ४ आहट्टु दलइस्सामि आहडं च नो साइस्सामि २ जस्स णं भिक्खुस्स एवं भवइ–अहं च खलु असणं वा ४ आहट्टु नो दलइस्सामि आहडं च साइज्जिस्सामि ३ जस्स णं भिक्खुस्स एवं भवइ–अहं च खलु अन्नेसिं भिक्खूणं असणं वा ४ आहट्टु नो दलइस्सामि आहडं च नो साइज्जिस्सामि ४, अहं च खलु तेण अहाइरित्तेण अहेसणिज्जेण अहापरिग्गहिएणं असणेण वा ४ अभिकङ्ख साहम्मियस्स कुज्जा वेयावडियं करणाए, अहं वावि तेण अहाइरित्तेण अहेसणिज्जेण अहापरिग्गहिएणं असणेण वा पाणेण वा ४ अभिकङ्ख साहम्मिएहिं कीरमाणं वेयावडियं साइज्जिस्सामि लाघवियं आगममाणे जाव सम्मत्तमेव समभिजाणिया (सू० २२५)

॥ २८७ ॥

एतच्च पूर्वं व्याख्यातमेव, केवलमिह संस्कृतेनोच्यते–यस्य भिक्षोरेवं भवति–वक्ष्यमाणम्, तद्यथा–अहं च खल्वन्येभ्यो–भिक्षुभ्योऽशनादिकमाहृत्य दास्याम्यपराहृतं च स्वादयिष्यामीत्येको भङ्गकः १, तथा यस्य भिक्षोरेवं भवति, तद्यथा–अहं च खल्वन्येभ्योऽशनादिकमाहृत्य दास्याम्यपराहृतं च नो स्वादयिष्यामीति द्वितीयः २ यस्य भिक्षोरेवं भवति, तद्यथा–अहं च खल्वन्येभ्योऽशनादिकमाहृत्य नो दास्याम्यपराहृतं च स्वादयिष्यामीति तृतीयः ३ तथा यस्य भिक्षोरेवं भवति, तद्यथा–अहं च खल्वन्येभ्यो भिक्षुभ्योऽशनादिकमाहृत्य नो दास्याम्यपराहृतं च नो स्वादयिष्यामीति चतुर्थः ४ । इत्येवं चतुर्णामभिग्रहाणामन्यतरमभिग्रहं गृह्णीयात्, अथवा एतेषामेवाद्यानां त्रयाणां भङ्गानामेकपदेनैव कञ्चिदभिग्रहं गृह्णीयादिति दर्शयितुमाह–यस्य भिक्षोरेवंभूतोऽभिग्रहविशेषो भवति, तद्यथा–अहं च खलु तेन यथाऽतिरिक्तेन–आत्मपरिभोगाधिकेन यथैषणीयेन यत्तेषां प्रतिमाप्रतिपन्नानामेषणीयमुक्तम्, तद्यथा–पञ्चसु प्राभृतिकासु अग्रहः द्वयोरभिग्रहः तथा यथापरिगृहीतेनात्मार्थं स्वीकृतेनाशनादिना निर्जरामभिकाङ्क्ष्य साधर्म्मिकस्य वैयावृत्यं कुर्याद्, यद्यपि ते प्रतिमाप्रतिपन्नत्वादेकत्र न भुञ्जते तथाप्येकाभिग्रहापादितानुष्ठानत्वात्साम्भोगिका भण्यन्ते, अतस्तस्य समनोज्ञस्य करणाय–उपकरणार्थं वैयावृत्यं कुर्यामित्येवंभूतमभिग्रहं कञ्चिद्गृह्णाति । तथाऽपरं दर्शयितुमाह–वाशब्दः पूर्वस्मात्पक्षान्तरमाह–अपिशब्दः पुनःशब्दार्थे, अहं वा पुनस्तेन यथातिरिक्तेन यथैषणीयेन यथापरिगृहीतेनाशनेन ४ निर्जरामभिकाङ्क्ष्य साधर्म्मिकैः क्रियमाणं वैयावृत्यं स्वादयिष्यामि–अभिलषिष्यामि, यो वाऽन्यः साधर्म्मिकोऽन्यस्य करोति तं चानुमोदयिष्यामि–यथा सुष्ठु भवता कृतमेवंभूतया वाचा, तथा कायेन च प्रसन्नदृष्टिमुखेन तथा मनसा चेति, किमित्येवं करोति?–लाघविकमित्यादि, गतार्थं ॥ तदेवमन्यतराभिग्रहवान् भिक्षुरचेलः सचेलो वा शरीरपीडायां सत्यामसत्यां वा आयुःशेषतामवगम्योद्यतमरणं विदध्यादिति दर्शयितुमाह—

जस्स णं भिक्खुस्स एवं भवइ–से गिलामि खलु अहं इमम्मि समए इमं सरीरगं अणुपुव्वेणं परिवहित्तए, से अणुपुव्वेणं आहारं संवट्टिज्जा २ कसाए पयणुए किच्चा समाहियच्चे फलगावयट्ठी उट्ठाय भिक्खू अभिनिव्वुडच्चे अणुपविसित्ता गामं वा नगरं

॥ २८८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा जाव रायहाणिं वा तणाइं जाइज्जा जाव सन्थरिज्जा, इत्थवि समए कायं च जोगं च ईरियं च पच्चक्खाइज्जा, तं सच्चं सच्चावाई ओए तिन्ने छिन्नकहंकहे आइयट्ठे अणाईए चिच्चाणं भेउरं कायं संविहुणिय विरूवरूवे परीसहोवसग्गे अस्सिं विस्संभणाए भेरवमणुचिन्ने तत्थवि तस्स कालपरियाए, सेवि तत्थ विअन्तिकारए, इच्चेयं विमोहायतणं हियं सुहं खमं निस्सेसं आणुगामियं तिबेमि (सू० २२६)८–७ ॥

णमिति वाक्यालङ्कारे, यस्य भिक्षोरेवंभूतो–वक्ष्यमाणोऽभिप्रायो भवति, तद्यथा–ग्लायामि खल्वहमित्यादि यावत्तृणानि संस्तरेत्, संस्तीर्य च तृणानि यदपरं कुर्यात्तदाह–अत्रापि समये–अवसरे न केवलमन्यत्रानुज्ञाप्य संस्तारकमारुह्य सिद्धसमक्षं स्वत एव पञ्चमहाव्रतारोपणं करोति, ततश्चतुर्विधमप्याहारं प्रत्याचष्टे, ततः पादपोपगमनाय कायं च–शरीरं प्रत्याचक्षीत, तद्योगं च–आकुञ्चनप्रसारणोन्मेषनिमेषादिकम्, तथेरणमीर्यां तां च सूक्ष्मां कायवाग्गतां मनोगतां वाऽप्रशस्तां प्रत्याचक्षीत, तच्च सत्यं सत्यवादीत्याद्यनन्तरोद्देशकवन्नेयम् । इतिब्रवीमिशब्दावपि क्षुण्णार्थाविति विमोक्षाध्ययनस्य सप्तमोद्देशकः समाप्तः ८–७ ॥

उक्तः सप्तमोद्देशकः, साम्प्रतमष्टम आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशकेषु रोगादिसम्भवे कालपर्यायागतं परिज्ञेङ्गितमरणपादपोपगमनविधानमुक्तम्, इह तु तदेवानुपूर्वीविहारिणां कालपर्यायागतमुच्यते इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रमुच्यते—

अनुष्टुप् ॥ अणुपुव्वेण विमोहाइं, जाइं धीरा समासज्ज । वसुमन्तो मइमन्तो, सव्वं नच्चा अणेलिसं ॥ १ ॥ दुविहंपि विइत्ता णं, बुद्धा धम्मस्स पारगा । अणुपुव्वीइ सङ्खाए, आरम्भाओ(य)तिउट्टई ॥ २ ॥ कसाए पयणू किच्चा, अप्पाहारे तितिक्खए । अह भिक्खू गिलाइज्जा, आहारस्सेव अन्तियं ॥ ३ ॥ जीवियं नाभिकङ्खिज्जा, मरणं नोवि पत्थए । दुहओऽवि न सज्जिज्जा, जीविए मरणे तहा ॥ ४ ॥

आनुपूर्वी–क्रमः, तद्यथा–प्रव्रज्याशिक्षासूत्रार्थग्रहणपरिनिष्ठितस्यैककविहारित्वमित्यादि, यदिवा आनुपूर्वी–संलेखनाक्रमश्चत्वारि विकृष्टानीत्यादि तथा आनुपूर्व्या यान्यभिहितानि, कानि पुनस्तानि?—'विमोहानि' विगतो मोहो येषु येषां वा येभ्यो वा तानि तथा–भक्तपरिज्ञेङ्गितमरणपादपोपगमनानि यान्येवंभूतानि यथाक्रममायातानि धीराः–अक्षोभ्याः समासाद्य–प्राप्य वसु–द्रव्यं संयमस्तद्वन्तो वसुमन्तः, तथा मननं मतिः–हेयोपादेयहानोपादानाध्यवसायस्तद्वन्तो मतिमन्तः, तथा 'सर्वं' कृत्यमकृत्यं च ज्ञात्वा यद्यस्य वा भक्तपरिज्ञानादिकं मरणविधानमुचितं धृतिसंहननाद्यपेक्षयाऽनन्यसदृशम्–अद्वितीयम्, सर्वं ज्ञात्वा समाधिमनुपालयेदिति ॥ १ ॥ किं च–द्वे विधे प्रकारावस्येति द्विविधं तपो बाह्यमभ्यन्तरं च, तद्विदित्वा–आसेव्य यदिवा मोक्षाधिकारे विमोक्तव्यं द्विविधं, तदपि बाह्यं शरीरोपकरणादि आन्तरं रागादि, तद्भेदतया विदित्वा त्यक्तवेत्यर्थः, हेयपरित्यागफलत्वात् ज्ञानस्य, 'ण'मिति वाक्यालङ्कारे, के विदित्वा?—'बुद्धा' अवगततत्त्वा धर्म्मस्य–श्रुतचारित्राख्यस्य पारगाः–सम्यग्वेत्तारः, ते बुद्धा धर्म्मस्वरूपवेदिनः 'आनुपूर्व्या' प्रव्रज्यादिक्रमेण संयममनुपाल्य मम जीवतः कश्चिद्गुणो नास्तीत्यतः शरीरमोक्षावसरः प्राप्तः तथा कस्मै मरणायालमहमित्येवं 'संख्याय' ज्ञात्वा, आरम्भणमारम्भः–शरीरधारणायान्नपानाद्यन्वेषणात्मकस्तस्मात् त्रुट्यति–अपगच्छतीत्यर्थः, सुव्यत्ययेन पञ्चम्यर्थे चतुर्थी, पाठान्तरं वा 'कम्मुणाओ तिअट्टई' कर्माष्टभेदं तस्मात् त्रुटिष्यतीति त्रुट्यति 'वर्त्तमानसामीप्ये वर्त्तमानवद्वे'-(पा० ३-३-१३१)त्यनेन भविष्यत्कालस्य वर्त्तमानता ॥२॥ स चाभ्युद्यतमरणाय संलेखनां कुर्वन् प्रधानभूतां भावसंलेखनां कुर्यादित्येतद्दर्शयितुमाह–कषः–संसारस्तस्यायाः कषायाः–क्रोधादयश्चत्वारस्तान् प्रतनून् कृत्वा ततो यत्किञ्चनाश्नीयात्, तदपि न प्रकाममिति दर्शयति–'अल्पाहारः' स्तोकाशी षष्ठाष्टमादि संलेखनाक्रमायातं तपः कुर्वन् यत्रापि पारयेत्तत्राप्यल्पमित्यर्थः, अल्पाहारतया च क्रोधोद्गमः स्यादतस्तदुपशमो विधेय इति दर्शयति–तितिक्षते–असदृशजनादपि दुर्भाषितादि क्षमते, रोगातङ्कं वा सम्यक् सहत इति, तथा च संलेखनां कुर्वन्नाहारस्याल्पतया 'अथे'त्यानन्तर्ये 'भिक्षुः' मुमुक्षुः 'ग्लायेत्' आहारेण विना ग्लानतां व्रजेत्, क्षणे मूर्च्छन्नाहारस्यैवान्तिकं–पर्यवसानं व्रजेदिति, त्यक्त्वा विकृष्टानीत्यादि संलेखनाक्रमं विहायाशनं विध्यादित्यर्थः, यदिवा ग्लानतामुपगतः सन्नाहारस्यान्तिकं–समीपं न व्रजेत्, तथाहि–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहारयामि तावत्कतिचिद्दिनानि पुनः संलेखनाशेषं विधास्येऽहमित्येवं नाहारान्तिकमियादिति ॥३॥ किं च–तत्र संलेखनायां व्यवस्थितः सर्वदा वा साधुर्जीवितं–प्राणधारणलक्षणं नाभिकाङ्क्षेत्, नापि क्षुद्वेदनापरीषहमनधिसहमानो मरणं प्रार्थयेद् 'उभयतोऽपि' जीविते मरणे वा न सङ्गं विदध्यात् जीविते मरणे तथा ॥४॥ किं भूतस्तर्हि स्यादित्याह—

मज्झत्थो निज्जरापेही, समाहिमणुपालए । अन्तो बहिं विउस्सिज्ज, अज्झत्थं सुद्धमेसए ॥ ५ ॥ जं किंचुवक्कमं जाणे, आउखेमस्समप्पणो । तस्सेव अन्तरद्धाए, खिप्पं सिक्खिज्ज पण्डिए ॥ ६ ॥ गामे वा अदुवा रण्णे, थंडिलं पडिलेहिया । अप्पपाणं तु विन्नाय, तणाइं संथरे मुणी ॥ ७ ॥ अणाहारो तुयट्टिज्जा, पुट्ठो तत्थऽहियासए । नाइवेलं उवचरे, माणुस्सेहि विपुट्ठवं ॥ ८ ॥

रागद्वेषयोर्मध्ये तिष्ठतीति मध्यस्थः, यदिवा जीवितमरणयोर्निराकाङ्क्षतया मध्यस्थो निर्जरामपेक्षितुं शीलमस्येति निर्जरापेक्षी, स एवंभूतः समाधिं–मरणसमाधिमनुपालयेत्–जीवितमरणाशंसारहितः कालपर्यायेण यन्मरणमापद्यते तत् समाधिस्थोऽनुपालयेदिति भावः । अन्तः कषायान् बहिरपि शरीरोपकरणादिकं व्युसृज्यात्मन्यध्यात्मम्–अन्तःकरणं तच्छुद्धं सकलद्वन्द्वोपरमाद्विस्रोतसिकारहितमन्वेषयेत्–प्रार्थयेदिति ॥ ५ ॥ किं च— उपक्रमणमुपक्रमः–उपायस्तं यं कञ्चन जानीत, कस्योपक्रमः ?—'आयुःक्षेमस्य' आयुषः क्षेमं–सम्यक्पालनं तस्य, कस्य सम्बन्धि तदायुः ?–आत्मनः, एतदुक्तं भवति–आत्मायुषो यं क्षेमप्रतिपालनोपायं जानीत तं क्षिप्रमेव शिक्षेत्–व्यापारयेत् पण्डितो–बुद्धिमान्, 'तस्यैव' संलेखनाकालस्य 'अन्तरद्धाए'त्ति अन्तरकालेऽर्द्धसंलिखित एव देहे देही यदि कश्चित् वातादिक्षोभात् आतङ्क आशुजीवितापहारी स्यात् ततः समाधिमरणमभिकाङ्क्षन् तदुपशमोपायमेषणीयविधिनाऽभ्यङ्गादिकं विदध्यात्, पुनरपि संलिखेत्, यदिवाऽऽत्मनः आयुःक्षेमस्य–जीवितस्य यत्किमप्युपक्रमणम्–आयुःपुद्गलानां संवर्त्तनं समुपस्थितं तज्जानीत, ततस्तस्यैव संलेखनाकालस्य मध्येऽव्याकुलितमतिः क्षिप्रमेव भक्तपरिज्ञानादिकं शिक्षेत –आसेवेत पण्डितो–बुद्धिमानिति ॥ ६ ॥ संलेखनाशुद्धकायश्च मरणकालं समुपस्थितं ज्ञात्वा किं कुर्यादित्याह—ग्रामः–प्रतीतो, ग्रामशब्देन चात्र प्रतिश्रय उपलक्षितः, प्रतिश्रय एव स्थण्डिलं–संस्तारकभुवं प्रत्युपेक्ष्य, तथा अरण्ये वेत्यनेन चोपाश्रयाद्बहिरित्येतदुपलक्षितम्, उद्याने गिरिगुहायामरण्ये वा स्थण्डिलं प्रत्युपेक्ष्य विज्ञाय चाल्पप्राणं–प्राणिरहितम्, ग्रामादियाचितानि प्रासुकानि दर्भादिमयानि तृणानि संस्तरेत् 'मुनिः' यथोचितकालस्य वेत्तेति॥७॥ संस्तीर्य च तृणानि यत्कुर्यात्तदाह—न विद्यते आहारोऽस्येत्यनाहारः तत्र यथाशक्ति यथासमाधानं च त्रिविधं चतुर्विधं वाऽऽहारं प्रत्याख्यायारोपितपञ्चमहाव्रतः क्षान्तः–क्षामितसमस्तप्राणिगणः समसुखदुःखः आवर्जितपुण्यप्राग्भारतया मरणादबिभ्यत् संस्तारके त्वग्वर्त्तनं कुर्यात्, तत्र च स्पृष्टः परीषहोपसर्गैस्त्यक्तदेहतया सम्यक्तानध्यासयेद्–अधिसहेत, तत्र मानुष्यैरनुकूलप्रतिकूलैः परीषहोपसर्गैः स्पृष्टो–व्याप्तो नातिवेलमुपचरेत्–न मर्यादोल्लङ्घनं कुर्यात्, पुत्रकलत्रादिसम्बन्धान्नार्तध्यानवशगो भूयात्, प्रतिकूलैर्वा परीषहोपसर्गैर्न क्रोधनिघ्नः स्यादिति ॥ ८ ॥ एतदेव दर्शयितुमाह—

संसप्पगा य जे पाणा, जे य उड्ढमहाचरा । भुञ्जन्ति मंससोणियं, न छणे न पमज्जए ॥ ९ ॥ पाणा देहं विहिंसन्ति, ठाणाओ नवि उब्भमे । आसवेहिं विवित्तेहिं, तिप्पमाणोऽहियासए ॥ १० ॥ गन्थहिं विवित्तेहिं, आउकालस्स पारए । पग्गहियतरगं चेयं, दवियस्स वियाणओ ॥ ११ ॥ अयं से अवरे धम्मे, नायपुत्तेण साहिए । आयवज्जं पडीयारं, विजहिज्जा तिहा तिहा ॥ १२ ॥

संसर्पन्तीति संसर्पकाः–पिपीलिकाकोष्ठादयो ये प्राणाः–प्राणिनो ये चोर्द्ध्वचरा–गृध्रादयो ये चाधश्चराः बिलवासित्वात्सर्प्पादयस्त एवंभूता नानाप्रकाराः 'भुञ्जन्ते' अभ्यवहरन्ति मांसं सिंहव्याघ्रादयः तथा शोणितं मशकादयः, तांश्च प्राणिन आहारार्थिनः समाढतानवन्तिसुकुमारवद्धस्तादिभिर्न क्षणुयात्–न हन्यात् न च भक्ष्यमाणं शरीरावयवं रजोहरणादिना प्रमार्जयेदिति ॥ ९ ॥ किं च—प्राणाः–प्राणिनो देहं मम (वि)हिंसन्ति, न तु पुनर्ज्ञानदर्शनचारित्राणीत्यतस्त्यक्तदेहाशिनस्तानन्तरायभयान्न निषेधयेत्, तस्माच्च स्थानान्नाप्युद्भमेत्–नान्यत्र यायात्, किंभूतः सन् ?–आश्रवैः–प्राणातिपातादिभिर्विषयकषायादिभिर्वा 'विविक्तैः' पृथग्भूतैरविद्यमानैः शुभाध्यवसायी तैर्भक्ष्यमाणोऽप्यमृतादिना तृप्यमाण इव सम्यक्तकृतां वेदनां तैस्तप्यमानो वाऽध्यासयेद्–अधिसहेत ॥ १० ॥ किं च— ग्रन्थः सबाह्याभ्यन्तरैः शरीररागादिभिः 'विविक्तैः' त्यक्तैः सद्भिर्ग्रन्थैर्वा–अङ्गानङ्गप्रविष्टैरात्मानं भावयन् धर्म्मशुक्ल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानान्यतरोपेतः 'आयुःकालस्य' मृत्युकालस्य 'पारगः' पारगामी स्यात्–यावदन्त्या उच्छ्वासनिश्वासास्तावत्तद्विदध्या; एतन्मरणविधानकारी सिद्धिं त्रिविष्टपं वा प्राप्नुयादिति गतं भक्तपरिज्ञामरणं। साम्प्रतमिङ्गितमरणं श्लोकाद्धादिनोच्यते–तद्यथा–'प्रगृहीततरकं चेदं' प्रकर्षेण गृहीततरं प्रगृहीततरं तदेव प्रगृहीततरकम्, 'इद'मिति वक्ष्यमाणमिङ्गितमरणम्, एतद्धि भक्तप्रत्याख्यानात्मकाशान्नियमेन चतुर्विधाहारप्रत्याख्यानादिङ्गितप्रदेशसंस्तारकमात्रविहाराभ्युपगमाच्च विशिष्टतरधृतिसंहननाद्युपेतेन प्रकर्षेण गृह्यत इति, कस्यैतद्भवति?–द्रव्यं–संयमः स विद्यते यस्यासौ द्रविकस्तस्य 'विज्ञानतो' गीतार्थस्य जघन्यतोऽपि नवपूर्वविशारदस्य भवति, नान्यस्येति, अत्रापीङ्गितमरणे यत्संलेखनातृणसंस्तारादिकमभिहितं तत्सर्वं वाच्यम् ॥ ११ ॥ अयमपरो विधिरित्याह—'अयं स' इति सोऽयम् 'अपरः' अन्यो भक्तप्रत्याख्यानाद्भिन्न इङ्गितमरणस्य 'धर्म्मो' विशेषो 'ज्ञातपुत्रेण' वीरवर्द्धमानस्वामिना सुग्रहितः–उपलब्धः स्याहितः, अस्य चानन्तरं वक्ष्यमाणत्वात्प्रत्यक्षासन्नवाचिनेदमाऽभिधानं, अत्रापीङ्गितमरणे प्रव्रज्यादिको विधिः संलेखना च पूर्ववद्द्रष्टव्या, तथोपकरणादिकं हित्वा स्थण्डिलं प्रत्युपेक्ष्यालोचितप्रतिक्रान्तः पञ्चमहाव्रतारूढश्चतुर्विधमाहारं प्रत्याख्याय संस्तारके तिष्ठति, अयमत्र विशेषः–आत्मवर्जं प्रतिचारम्–अङ्गव्यापारं विशेषेण जह्यात्–त्यजेत् 'त्रिविधत्रिविधेने'ति मनोवाक्कायैः कृतकारितानुमतिभिः स्वव्यापारव्यतिरेकेण परित्यजेत्, स्वयमेव चोद्वर्त्तनपरिवर्त्तनं कायिकायोगादिकं विधत्ते ॥ १२ ॥ सर्वथा प्राणिसंरक्षणं पौनःपुन्येन विधेयमिति दर्शयितुमाह—

हरिएसु न निवज्जिज्जा, थण्डिलं मुणिया सए। विओसिज्ज अणाहारो, पुट्ठो तत्थऽहियासए ॥ १३ ॥ इन्दिएहिं गिलायन्तो, समियं आहरे मुणी। तहावि से अगरिहे, अचले जे समाहिए ॥ १४ ॥ अभिक्कमे पडिक्कमे, सङ्कुचए पसारए। कायसाहारणट्ठाए, इत्थं वावि अचेयणो ॥ १५ ॥ परिक्कमे परिकिलन्ते, अदुवा चिट्ठे अहायए। ठाणे ण परिकिलन्ते, निसीइज्जा य अंतसो ॥ १६ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २९२ ॥

विमो० ८ उद्देशकः८

हरितानि–दूर्वाङ्कुरादीनि तेषु न शयीत स्थण्डिलं मत्वा शयीत तथा सबाह्याभ्यन्तरमुपधिं व्युत्सृज्य–त्यक्त्वाऽनाहारः सन् स्पृष्टः परीषहोपसर्गैः 'तत्र' तस्मिन् संस्तारके व्यवस्थितः सन् सर्वमध्यासयेद्–अधिसहेत ॥ १३ ॥ किं च—स ह्यनाहारतया मुनिर्ग्लायमान इन्द्रियैः शमिनो भावः शमिता–समता तां साम्यं वा आत्मन्याहारयेद् व्यवस्थापयेत् नार्त्तध्यानोपगतो भूयादिति, यथासमाधानमास्ते, तद्यथा–सङ्कोचननिर्विण्णो हस्तादिकं प्रसारयेत् तेनापि निर्विण्ण उपविशेत् यथेङ्गितदेशे सञ्चरेद्वा, तथाप्यसौ स्वकृतचेष्टत्वादगर्ह्य एव, किंभूत इति दर्शयति–अचलो यः समाहितः, यद्यप्यसाविङ्गितप्रदेशे स्वतः शरीरमात्रेण चलति तथाप्यभ्युद्यतमरणान्न चलतीत्यचलः सम्यगाहितं–व्यवस्थापितं धर्म्मध्याने शुक्लध्याने वा मनो येन स समाहितः, भावाच्चलितश्चेङ्गितप्रदेशे चङ्क्रमणादिकमपि कुर्यादिति ॥१४॥ एतद्दर्शयितुमाह —प्रज्ञापकापेक्षयाऽभिमुखं क्रमणमभिक्रमणं, संस्तारकाद्गमनमित्यर्थः, तथा प्रतीपं–पश्चादभिमुखं क्रमणं प्रतिक्रमणमागमनमित्यर्थः, नियतदेशे गमनागमने कुर्यादितियावत्, तथा निष्पन्नो निष्पण्णो वा यथासमाधानं भुजादिकं सङ्कोचयेत्प्रसारयेद्वा, किमर्थमेतदिति चेद्दर्शयति–कायस्य–शरीरस्य प्रकृतिपेलवस्य साधारणार्थं, कायसाधारणाच्च तस्याऽकृतायुष्कोपक्रमपरिहारेण स्वायुःस्थितिक्षयान्मरणं यथा स्यात्, न पुनस्तेषां महासत्त्वतया शरीरपीडोत्थापितचित्तस्यान्यथाभावः स्यादिति भावः, ननु च निरुद्धसमस्तकायचेष्टस्य शुष्ककाष्ठवदचेतनतया पतितस्य प्रचुरतरपुण्यप्राग्भारोऽभिहित इति, नायं नियमः, संविशुद्धाध्यवसायतया यथाशक्त्यारोपितभारनिर्वाहिणः तत्तुल्य एव कर्म्मक्षयः अत्राप्यसौ वाशब्दात्तत्र वा पादपोपगमनेऽचेतनवत्सक्रियोऽपि निष्क्रिय एव, यदिवा 'अत्रापि' इङ्गितमरणेऽचेतनवच्छुष्ककाष्ठवत्सर्वक्रियारहितो यथा पादपोपगमने तथा सति सामर्थ्ये तिष्ठेद् ॥ १५ ॥ एतत्सामर्थ्याभावे चैतत्कुर्यादित्याह—यदि निषण्णस्यानिषण्णस्य वा गात्रभङ्गः स्यात्, ततः परिक्रामेत्–चङ्क्रम्याद् यथानियमिते देशेऽकुटिलया गत्या गतागतानि कुर्यात्, तेनापि श्रान्तः सन् अथवोपविष्टस्तिष्ठेत्, 'यथायतो' यथाप्रणिहितगात्र इति, यदा पुनः स्थानेनापि परिक्रमामियात् तद्यथा–निषण्णो वा पर्यङ्केण वा अर्द्धपर्यङ्केण वोत्कुटुकासनो वा परिताम्यति तदा निषण्णः स्यात्, तत्राप्युत्तानको वा पार्श्वशायी वा दण्डायतो वा लगण्डशायी वा यथा समाधानमवतिष्ठेत् ॥ १६ ॥ किं च—

आसीणेऽणेलिसं मरणं, इन्दियाणि समीरए। कोलावासं समासज्ज, वितहं पाउरे सए ॥ १७ ॥ जओ वज्जं समुप्पज्जे, न तत्थ अवलम्बए। तउ उक्कसे अप्पाणं, फासे तत्थऽहियासए ॥ १८ ॥ अयं चाययतरे सिया, जो एवमणुपालए। सव्वगायनिरो-

॥ २९२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेऽवि, ठाणाओ नत्रि उब्भमे ॥ १९ ॥ अयं से उत्तमे धम्मे, पुव्वट्ठाणस्स पग्गहे । अचिरं पडिलेहित्ता, विहरे चिट्ठ माहणे ॥ २० ॥

आसीनः' आश्रितः किं तत्?—मरणम्, किंभूतम्?—'अनीदृशम्' अनन्यसदृशमितरजनदुरध्यवसेयम्, तथाभूतश्च किं कुर्यादिति दर्शयति—इन्द्रियाणीष्टानिष्टस्वविषयेभ्यः सकाशाद्रागद्वेषाकरणतया सम्यगीरयेत्—प्रेरयेदिति, कोलाघुणकीटकास्तेषामावासः कोलावासस्तमन्तर्घुणक्षतमुद्देहिकानिचितं वा 'समासाद्य' लब्ध्वा तस्माद्यद्वितथम्—आगन्तुकतदुत्थजन्तुरहितमवष्टम्भनाय प्रादुरेषयेत्—प्रकटं प्रत्युपेक्षणयोग्यमशुषिरमन्वेषयेत् ॥१७॥ इङ्गितमरणे चोदनामभिधाय यन्निषेध्यं तद्दर्शयितुमाह—'यतो' यस्मादनुष्ठानादवष्टम्भनादेर्वैक्लव्यद्वक्त्रं—गुरुत्वात्कर्म्म अवद्यं वा—पापं वा तत्समुत्सृजेत्—प्रावुष्ष्यात्, न तत्र घुणक्षतकाष्ठादावलम्बेत—नावष्टम्भनादिकां क्रियां कुर्यात्, तथा 'ततः' तस्मादुत्क्षेपणापक्षेपणादेः कायोयोगाद्दुष्प्रणिहितवाग्योगादार्त्तध्यानादिमनोयोगाच्चावद्यसमुत्सृत्तिहेतोरात्मानमुत्कर्षेद्—उत्क्रामयेत्, पापोपादानादात्मानं निवर्त्तयेदितियावत्, तत्र च धृतिसंहननाद्युपेतोऽप्रतिकर्म्मशरीरः प्रवर्धमानशुभाध्यवसायकण्डकोऽपूर्वापूर्वपरिणामारोही सर्वज्ञप्रणीतागमानुसारेण पदार्थस्वरूपनिरूपणाहितमतिः अन्यदिदं शरीरं त्याज्यमित्येवंकृताध्यवसायः सर्वान् स्पर्शान्—दुःखविशेषाननुकूलप्रतिकूलोपसर्गपरीषहापादितान् तथा वातपित्तश्लेष्मद्वन्द्वेतरप्रोद्भूतान् कर्म्मक्षयायोद्यतो मर्षयेत्—सम्यक्कायक्लेशसहिष्णुर्भवेदित्यर्थः, एतदेव दर्शयति—एवं कृतं सोढव्यं चेत्येतदध्यवसायी अध्यासयेद्—अधिसहेत, यतो यन्मया त्यक्तं शरीरकमेतदेवोपद्रवन्ति न पुनर्जिघक्षितं धर्म्माचरणमित्याकलय्य सर्वपीडासहिष्णुर्भवेदिति ॥ १८ ॥ गत इङ्गितमरणाधिकारः, साम्प्रतं पादपोपगमनमाश्रित्याह—अनन्तरमभिधास्यमानत्वाद्योऽयं प्रत्यक्षो मरणविधिः, स चाऽऽयततरो, न केवलं भक्तपरिज्ञाया इङ्गितमरणविधिरायततरः, अयं च तस्मादायततर इति चशब्दार्थः, आयततर इत्याऽभिविधौ सामस्त्येन यत आयतः, अयमनयोरतिशयेनायत आयततरः, यदिवाऽयमनयोरतिशयेनात्तो—गृहीत आत्ततरः, यत्नेनाध्यवसित इत्यर्थः, तदेवमयं पादपोपगमनमरणविधिरात्ततरो—दृढतरः स्याद्भवेत्, अत्रापि यदिङ्गितमरणे प्रव्रज्यासंलेखनादिकमुक्तं तत्सर्वं द्रष्टव्यमिति, यद्यसावायततरः ततः किमिति दर्शयति—यो भिक्षुः 'एवम्' उक्तविधिनैव पादपोपगमनविधिमनुपालयेत् 'सर्वगात्रनिरोधेऽपि' उत्तप्यमानकायोऽपि मूर्च्छन्नपि मरणसमुद्घातगतो वा भक्ष्यमाणमांसशोणितोऽपि क्रोष्टुगृद्धपिपीलिकादिभिर्महासत्त्वतयाऽऽशंसितमहाफलविशेषः संस्तस्मात्स्थानात्—प्रदेशात् द्रव्यतो भावतोऽपि शुभाध्यवसायस्थानान्न व्युद्गमेत्—न स्थानान्तरं यायात् ॥ १९ ॥ किं च—'अयं' मित्यन्तःकरणनिष्पन्नत्वात्प्रत्यक्षः 'उत्तमः' प्रधानो मरणविधिः सर्वोत्तरत्वाद्धर्म्मो—विशेषः पादपोपगमनरूपो मरणविशेष इति, उत्तमत्वे कारणं दर्शयति—'पूर्वस्थानस्य प्रग्रह' इति पञ्चम्यर्थे षष्ठी पूर्वस्थानान्नरकपरिज्ञेङ्गितमरणरूपात्प्रकर्षेण ग्रहोऽत्र पादपोपगमने, प्रगृहीततरमेतदित्यर्थः, तथाहि—अत्र यदिङ्गितमरणानुमतं कायपरिस्पन्दनं तदपि निषेध्यते अच्छिन्नमूलपादपवन्निश्चेष्टो निष्क्रियो दह्यमानश्छिद्यमानो वा विषमपतितो वा तथैवास्ते न तस्मात्स्थानाच्चलति, चिलातपुत्रवत्, एतदेव दर्शयति—अचिरं स्थानं, तच्च स्थण्डिलं तत्पूर्वविधिना प्रत्युपेक्ष्य तस्मिन् प्रत्युपेक्षिते स्थण्डिले विहरेदिति, अत्र पादपोपगमनाधिकाराद्विहरणं तद्विधिपालनमुक्तं, तच्च स्थानात्स्थानान्तरसंक्रमणम्, एतदेव च दर्शयति—तिष्ठेत् सर्वगात्रनिरोधेऽपि, स्थानान्तरासङ्क्रमणं कुर्यादित्यर्थः, कोऽसौ ?—'माहणे'त्ति साधुः, स हि निष्पन्नो निष्पन्नऊर्ध्वस्थितो वा निष्प्रतिकर्म्मा यद्यथानिक्षिप्तमङ्गमचेतन इव न चालयेदितियावत् ॥ २० ॥ एतदेव प्रकारान्तरेण दर्शयितुमाह—

अचित्तं तु समासज्ज, ठावए तत्थ अप्पगं । वोसिरे सव्वसो कायं, न मे देहे परीसहा ॥ २१ ॥ जावज्जीवं परीसहा, उवसग्गा इति सङ्ख्या । संवुडे देहभेयाए, इय पन्नेऽहियासए ॥ २२ ॥ भेउरेसु न रज्जिज्जा, कामेसु बहुतरेसुवि । इच्छा लोभं न सेविज्जा, धुववन्नं सपेहिया ॥ २३ ॥ सासएहिं निमन्तिज्जा, दिव्वमायं न सद्दहे । तं पडिबुज्झ माहणे, सव्वं नूमं विहूणिया ॥ २४ ॥

न विद्यते चित्तमस्मिन्नित्यचित्तम्—अचेतनं जीवरहितमित्यर्थः, तच्च स्थण्डिलं फलकादि वा 'समासाद्य' लब्ध्वा फलकेऽपि समर्थः कश्चित्काष्ठे वाऽवष्टभ्य तत्रात्मानं स्थापयेत्, व्यवस्थाप्य च त्यक्तचतुर्विधाहारो मेरुरिव निष्प्रकम्पः कृतालोचनादिपरिकर्म्मा गुरुभिरनुज्ञातो व्युत्सृजेत्, 'सर्वशः' सर्वात्मना 'कायं'देहं, व्युत्सृष्टदेहस्य च यदि केचन परीषहोपसर्गाः स्युस्ततो भावयेत्—'न मे देहे परीषहाः' मत्सम्बन्धी देह एव न भवति, परित्यक्तत्वात्, तदभावे कुतः परीषहाः ?, यदिवा न मम देहे परीषहाः, सम्यक्करणेन सहमानस्य तत्कृतपीडयोद्वेगाभावात्, अतः परीषहान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म्मशत्रुजयसहायानितिकृत्वाऽपरीषहानेव मन्यते ॥ २१ ॥ ते पुनः कियन्तं कालं सोढव्या इत्याशङ्क्याह्युदासार्थमाह— 'यावज्जीवं' यावत्प्राणधारणं तावत्परीषहा उपसर्गाश्च सोढव्या इत्येतत् 'सङ्ख्याय' ज्ञात्वा तानध्यासयेदिति, यदिवा न मे यावज्जीवं परीषहोपसर्गा इत्येतत्सङ्ख्याय–ज्ञात्वाऽधिसहेत, यदिवा यावज्जीवमिति–यावदेव जीवितं तावत्परीषहोपसर्गजनिता पीडेति, तत्पुनः कतिपयनिमेषाऽवस्थायि एतदवस्थस्य ममात्यन्तमल्पमेवेत्यत एतत्सङ्ख्याय–ज्ञात्वा संवृतो यथानिक्षिप्तत्यक्तगात्रो 'देहभेदाय' शरीरत्यागायोत्थित इतिकृत्वा 'प्राज्ञः' उचितविधानवेदी, यद्यत्कायपीडाकार्युपतिष्ठते तत्तत्सम्यगधिसहेत ॥ २२ ॥ एवंभूतं च साधुमुपलभ्य कश्चिद्राजादिर्भोगैरुपनिमन्त्रयेत्, तन्नतिविधानार्थमाह— भेदनशीला भिदुराः–शब्दादयः कामगुणास्तेषु प्रभूततरेष्वपि 'न रज्येत्' न रागं यायात्, पाठान्तरं वा 'कामेसु बहुलेसुवि' इच्छामदनरूपेषु कामेषु बहुलेषु–अनल्पेष्वपीत्यर्थः, यद्यपि राजा राज्यकन्यादानादिनोपप्रलोभयेत् तथापि तत्र न गार्ध्यमियात्, तथा इच्छारूपो लोभ इच्छालोभः–चक्रवर्तीन्द्रत्वाद्यभिलाषादिको निदानविशेषस्तमसौ निर्जरापेक्षी न सेवेत, सुरर्द्धिदर्शनमोहितो वह्मदत्तवन्निदानं न कुर्यादित्यर्थः, तथा चागमः—'इहलोगासंसप्पओगे, १ परलोगासंसप्पओगे २ जीवियासंसप्पयोगे ३ मरणासंसप्पयोगे ४ कामभोगासंसप्पयोगे ५ इत्यादि, 'वर्णः' संयमो मोक्षो वा स च सूक्ष्मो दुर्ज्ञेयत्वात्, पाठान्तरं वा—'धुववन्नमि'त्यादि, ध्रुवः–अव्यभिचारी स चासौ वर्णश्च ध्रुववर्णस्तं संप्रेक्ष्य ध्रुवां वा शाश्वतीं यशःकीर्तिं पर्यालोच्य कामेच्छालोभविक्षेपं कुर्यादिति ॥ २३ ॥ किं च—शाश्वता–यावज्जीवमपरिभ्रंशा-

न्तेदिनदानाद्वाऽर्थास्तैस्तथाभूतैर्विभवैः कश्चिन्निमन्त्रयेत् तन्नतिबुध्यस्व यथा शरीरार्थं धनं मृग्यते तदेव शरीरमशाश्वतमिति, तथा दिव्यां मायां न श्रद्दधीत, तद्यथा–यदि कश्चिद्देवो मीमांसया प्रत्यनीकतया वा भक्त्या वाऽन्यथा वा कौतुकादिना नानर्द्धिदानतो निमन्त्रयेत्, तां च तत्कृतां मायां न श्रद्दधीत, तथा बुध्यस्व यथा देवमायैषा, अन्यथा कुतोऽयमाकस्मिकः पुरुषो दुर्लभमेतद्द्रव्यं प्रभूततरमेवंभूते क्षेत्रे काले भावे च दद्यात्?, एवं द्रव्यादिनिरूपणया देवमायां बुध्यस्व इति, तथा देवाङ्गना वा यदि दिव्यं रूपं विधाय प्रार्थयेत् तामपि बुध्यस्वेति, 'माहणे'त्ति साधुः 'सर्वम्' अशेषं 'नूमं'ति कर्म्म मायां वा तत् तां वा 'विधूय' अपनीय देवादिमायां बुध्यस्वेति क्रिया ॥ २४ ॥ किं च—

सव्वट्ठेहिं अमुच्छिए, आउकालस्स पारए । तितिक्खं परमं नच्चा, विमोहन्नयरं हियं ॥ २५ ॥ तिबेमि ॥ विमोक्षाध्ययनमष्टमं समाप्तम् । उद्देशः ॥ ८–८ ॥

सर्वे च तेऽर्थाश्च सर्वार्थाः–पञ्चप्रकाराः कामगुणास्तत्सम्पादका वा द्रव्यनिचयास्तेषु वा अमूर्च्छितः–अनध्युपपन्नः आयुःकालस्य यावन्मात्रं कालमायुः संतिष्ठते असौ आयुःकालस्तस्य पारम्–आयुष्कपुद्गलानां क्षयो मरणं तद्गच्छतीति पारगः, यथोक्तविधिना पादपोपगमनव्यवस्थितः प्रवर्द्धमानशुभाध्यवसायः त्वायुःकालान्तगः स्यादिति । तदेवं पादपोपगमनविधिं परिसमाप्य्योपसंहारद्वारेण त्रयाणामपि मरणानां कालक्षेत्रपुरुषावस्थाश्रयणात्तुल्यकक्षतां पश्चार्द्धेन दर्शयति– तितिक्षा–परीषहोपसर्गापादितदुःखविशेषसहनं तत्त्रयाणामपि परमं–प्रधानमस्तीति 'ज्ञात्वा' अवधार्य 'विमोहान्यतरं हित'मिति विगतो मोहो येषु तानि विमोहानि–भक्तपरिज्ञेङ्गितमरणपादपोपगमनानि तेषामन्यतरत्कालक्षेत्रादिकमाश्रित्य तुल्यफलत्वाद्धितं अभिप्रेतार्थसाधनादतो यथाशक्ति त्रयाणामन्यतरत्तुल्यबलत्वाद्यथावसरं विधेयं, इति अधिकारपरिसमाप्तौ ब्रवीमीति पूर्ववत्, नयविचारादिकमनुगतं वक्ष्यमाणं च द्रष्टव्यमिति विमोक्षाध्ययनस्याष्टमोद्देशकः समाप्तः । समाप्तं च विमोक्षाध्ययनमष्टममिति ॥ ग्रन्थाग्रम् ॥ १०२० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथोपधानश्रुताख्यं नवममध्ययनम्

उक्तमध्ययनमष्टमं, साम्प्रतं नवममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तराध्ययनेष्वष्टसु योऽर्थोऽभिहितः स तीर्थकृता वीरवर्द्धमानस्वामिना स्वत एवाचीर्ण इत्येतन्नवमेऽध्ययने प्रतिपाद्यते, अनन्तराध्ययनसम्बन्धस्त्वयम्—इहाभ्युद्यतमरणं त्रिप्रकारमभिहितं, तत्रान्यतरस्मिन्नपि व्यवस्थितोऽष्टाध्ययनार्थविधायिनमतिघोरपरीषहोपसर्गसहिष्णुमाविष्कृतसन्मार्गावतारं तथा घातितघातिचतुष्टयाविर्भूतानन्तातिशयाप्रमेयमहाविषयस्वपरावभासककेवलज्ञानं भगवन्तं श्रीवर्द्धमानस्वामिनं समवसरणस्थं सत्त्वहिताय धर्मदेशनां कुर्वाणं ध्यायेदित्येतत्प्रतिपादनार्थमिदमध्ययनमुच्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमेऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारो लेशतोऽभिहितस्तमेव निर्युक्तिकारः स्पष्टतरं बिभणिषुराह—

जो जइया तित्थयरो सो तइया अप्पणो य तित्थम्मि । वण्णेइ तवोकम्मं ओहाणसुयंमि अज्झयणे ॥२७६॥

यो यदा तीर्थकृदुत्पद्यते स तदाऽऽत्मीये तीर्थे आचारार्थप्रणयनावसानाध्ययने स्वतपःकर्म व्यावर्णयतीत्ययं सर्वतीर्थकृतां कल्पः, इह पुनरुपधानश्रुताख्यं चरममध्ययनमभूत् अत उपधानश्रुतमित्युक्तमिति ॥ किमेकाकारं केवलज्ञानवत्सर्वतीर्थकृतां तपःकर्मोतान्यथेत्यारेकाव्युदासार्थमाह— ॥ २९६ ॥

सव्वेसिं तवोकम्मं निरुवसग्गं तु वण्णियं जिणाणं । नवरं तु वद्धमाणस्स सोवसग्गं मुणेयव्वं ॥ २७७ ॥
तित्थयरो चउनाणी सुरमहिओ सिज्झियव्वयं धुवम्मि । अणिगूहियबलविरिओ तवोविहाणंमि उज्जमइ ॥
किं पुण अवसेसेहिं दुक्खक्खयकारणा सुविहिएहिं । होइ न उज्जमियव्वं सपच्चवायंमि माणुस्से ? ॥ २७९ ॥

गाथात्रयमप्युत्तानार्थम् ॥ अध्ययनार्थाधिकारं प्रतिपाद्योद्देशार्थाधिकारं प्रतिपादयन्नाह—

चरिया १ सिज्जा य २ परीसहा य ३ आयंकिया(ए)चिगिच्छा ४ य । तवचरणेणऽहिगारो चउसुद्देसेसु नायव्वो ॥२८०॥

चरणं चर्यत इति वा चर्या—श्रीवीरवर्द्धमानस्वामिनो विहारः, अयं प्रथमोद्देशकेऽर्थाधिकारः १, द्वितीयोद्देशके त्वयमर्थाधिकारः, तद्यथा—शय्या—वसतिः सा च यादृग्भगवत आसीत् तादृग्वक्ष्यते २, तृतीये त्वयमर्थाधिकारः—मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः, उपलक्षणार्थत्वादुपसर्गाश्चानुकूलप्रतिकूला वर्द्धमानस्वामिनो येऽभूवन् तेऽत्र प्रतिपाद्यन्ते ३, चतुर्थे त्वयमर्थाधिकारः, तद्यथा—'आतङ्किते' क्षुत्पीडायामातङ्कोत्पत्तौ विशिष्टाभिग्रहावाप्ताहारेण चिकित्सेदिति ४, तपश्चरणाधिकारस्तु चतुर्ष्वप्युद्देशकेष्वनुयायीति गाथार्थः ॥ निक्षेपस्त्रिधा—ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च, तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने तूपधानश्रुतमिति द्विपदं नाम, तत्रोपधानस्य श्रुतस्य च यथाक्रमं निक्षेपः कर्तव्य इति न्यायादुपधाननिक्षेपचिकीर्षयाऽऽह—

नामंठवणुवहाणं दव्वे भावे य होइ नायव्वं । एमेव य सुत्तस्सवि निक्खेवो चउव्विहो होइ ॥ २८१ ॥

नामोपधानं स्थापनोपधानं द्रव्योपधानं भावोपधानं च, श्रुतस्याप्येवमेव चतुर्द्धा निक्षेपः, तत्र द्रव्यश्रुतमनुपयुक्तस्य

यत् श्रुतं द्रव्यार्थं वा यत् श्रुतं कुतावचनिकश्रुतानि चाते द्रव्यश्रुतम्, भावश्रुतं त्वज्ञानक्षयविशिष्टश्रुतविषयोपयोगः ॥ तत्र सुगमनामस्थापनाव्युदासेन द्रव्याद्युपधानप्रतिपादनायाह—

दव्वुवहाणं सयणे भावुवहाणं तवो चरित्तस्स । तम्हा उ नाणदंसणतवचरणेहिं इहाहिगयं ॥ २८२ ॥

उप—सामीप्येन धीयते—व्यवस्थाप्यत इत्युपधानं द्रव्यभूतमुपधानं द्रव्योपधानं, तत्पुनः शय्यादौ सुखशयनार्थं शिरोऽवष्टम्भनवस्तु, 'भावोपधान'मिति भावस्योपधानं भावोपधानं, तत्पुनर्ज्ञानदर्शनचारित्राणि तपो वा सबाह्याभ्यन्तरं, तेन हि चारित्रपरिणतभावस्योपष्टम्भनं क्रियते, यत एवं तस्मात् ज्ञानदर्शनतपश्चरणैरिहाधिकृतमिति गाथार्थः ॥ किं पुनः कारणं चारित्रोपष्टम्भकतया तपो भावोपधानमुच्यते इत्याह—

जह खलु मइलं वत्थं सुज्झइ उदगाइएहिं दव्वेहिं । एवं भावुवहाणेण सुज्झए कम्ममट्ठविहं ॥ २८३ ॥

'यथे'त्युदाहरणोपन्यासार्थः यथैतत्तथाऽन्यदपि द्रष्टव्यमित्यर्थः, खलुशब्दो वाक्यालङ्कारे, यथा मलिनं वस्त्रमुदकादिभिर्द्रव्यैः शुद्धिमुपयाति एवं जीवस्यापि भावोपधानभूतेन सबाह्याभ्यन्तरेण तपसा अष्टप्रकारं कर्म शुद्धिमुपयातीति ॥ अस्य च कर्मक्षयहेतोस्तपस उपधानश्रुतत्वेनात्रोपात्तस्य 'तत्त्वभेदपर्यायैर्व्याख्ये'तिकृत्वा पर्यायदर्शनायाह—यदिवा तपोऽनुष्ठानेनापादिता अवधूननादयः कर्मापगमविशेषाः सम्भवन्तीत्यतस्तान् दर्शयितुमाह—

ओधूणण धुणण नासण विणासणं झवण खवण सोहिकरं । छेयण भेयण फेडण डहणं धुवणं च कम्माणं ॥२८४॥

तत्रावधूननम्—अपूर्वकरणेन कर्मग्रन्थेर्भेदापादनं, तच्च तपोऽन्यतरभेदसामर्थ्याद्भवतीत्येषा क्रिया शेषेष्वप्येकादश- ॥ २९७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सु पदेष्वायोज्या, तथा 'धूननं' भिन्नग्रन्थेरनिवर्त्तिकरणेन सम्यक्त्वावस्थानं, तथा 'नाशनं' कर्म्मप्रकृतेः स्तिबुकसङ्क्रमेण प्रकृत्यन्तरगमनं, तथा 'विनाशनं' शैलेश्यवस्थायां सामस्त्येन कर्म्माभावापादनं, तथा ध्यापनम्–उपशमश्रेण्यां कर्म्मानुदयलक्षणं विध्यापनं, तथा 'क्षपणम्' अप्रत्याख्यानादिप्रक्रमेण क्षपकश्रेण्यां मोहाद्यभावापादनं, तथा 'शुद्धिकर'मित्यनन्तानुबन्धिक्षयप्रक्रमेण क्षायिकसम्यक्त्वापादनं, तथा 'छेदनम्' उत्तरोत्तरशुभाध्यवसायारोहणात्स्थितिह्रासजननं, तथा 'भेदनं' बादरसम्परायावस्थायां सञ्ज्वलनलोभस्य खण्डशो विधानं, तथा 'फेडण'न्ति अपनयनं चतुःस्थानिकादीनामशुभप्रकृतीनां रसतस्त्र्यादिस्थानापादनं, तथा 'दहनं' केवलिसमुद्घातध्यानाग्निना वेदनीयस्य भस्मसात्करणं, शेषस्य च दग्धरज्जुतुल्यत्वापादनं, तथा 'भावनं' शुभाध्यवसायान्मिथ्यात्वप्रद्गलानां सम्यक्त्वभावसंजननमिति, एताश्च कर्म्मणोऽवस्थाः प्रायश उपशमश्रेणिक्षपकश्रेणिकेवलिसमुद्घातशैलेश्यवस्थाप्रकटनेन प्रभूता आविर्भाविता भवन्तीत्यतस्तत्प्रकटनाय प्रक्रम्यते, तत्रोपशमश्रेण्यामादावेवानन्तानुबन्धिनामुपशमना तावत्कथ्यते, इहासंयतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तानामन्यतरोऽन्यतरयोगे वर्त्तमान आरम्भको भवति, तत्रापि दर्शनसप्तकमेकेनोपशमयति, तद्यथा–अनन्तानुबन्धिनश्चतुरः, उपरितनलेश्यात्रिके च विशुद्धे साकारोपयोग्यन्तःकोटीकोटीस्थितिसत्कर्म्मा परिवर्त्तमानाः शुभप्रकृतीरेव बध्नन् प्रतिसमयमशुभप्रकृतीनामनुभागमनन्तगुणहान्या ह्रासयन् शुभानां चानन्तगुणवृद्ध्याऽनुभागं व्यवस्थापयन् पल्योपमासङ्ख्येयभागहीनमुत्तरोत्तरं स्थितिबन्धं कुर्वन् करणकालादपि पूर्वमन्तर्मुहूर्त्तं विशुध्यमानः करणत्रयं विधत्ते, तच्च प्रत्येकमान्तर्मौहूर्त्तिकं, तद्यथा–यथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं चेति, चतुर्थ्युपशान्ताद्धा, तत्र यथाप्रवृत्तकरणे प्रतिसमयमनन्तगुणवृद्ध्या विशुद्धिमनुभवति, न तत्र स्थितिघातरसघातगुणश्रेणीगुणसङ्क्रमाणामन्यतमोऽपि विद्यते, तथा द्वितीयमपूर्वकरणं, किमुक्तं भवति ?–अपूर्वामपूर्वां क्रियां गच्छतीत्यपूर्वकरणं, तत्र च प्रथमसमय एव स्थितिघातरसघातगुणश्रेणिगुणसङ्क्रमा अन्यश्च स्थितिबन्ध इत्येते पञ्चाप्यधिकारा यौगपद्येन पूर्वमप्रवृत्ताः प्रवर्त्तन्त इत्यपूर्वकरणं, तथाऽनिवृत्तिकरणमित्यन्योऽन्यं नातिवर्त्तन्ते परिणामा अस्मिन्नित्यनिवृत्तिकरणं, एतदुक्तं भवति–प्रथमसमयप्रतिपन्नानां तत्करणमसुमतां सर्वेषां तुल्यः परिणामः, एवं द्वितीयादिष्वप्यायोज्यं, अत्रापि पूर्वोक्ता एव स्थितिघातादयः पञ्चाप्यधिकारा युगपत्प्रवर्त्तन्त इति, तत एभिस्त्रिभिरपि करणैर्यथोक्तक्रमेणानन्तानुबन्धिनः कषायानुपशमयति, उपशमनं नाम यथा धूलिरुदकेन सिक्ता द्रुघणादिभिर्हता न वाय्वादिभिः प्रसर्प्पणादिविकारभाग्भवति, एवं कर्म्मधूल्यपि विशुद्ध्युदकार्द्रीकृता अनिवृत्तिकरणक्रियाहता सत्युदयोदीरणसङ्क्रमनिधत्तनिकाचनाकरणानामयोग्या भवति, तत्रापि प्रथमसमयोपशान्तं कर्म्मदलिकं स्तोकं द्वितीयादिषु समयेष्वसङ्ख्येयगुणवृद्ध्योपशाम्यमानमन्तर्मुहूर्त्तेन सर्वमप्युपशान्तं भवति, एवमेकीयमतेनानन्तानुबन्धिनामुपशमोऽभिहितः, अन्ये त्वनन्तानुबन्धिनां विसंयोजनामेवाभिदधति, तद्यथा क्षायोपशमिकसम्यग्दृष्टयश्चतुर्गतिका अप्यनन्तानुबन्धिनां विसंयोजकाः, तत्र नारका देवा अविरतसम्यग्दृष्टयस्तिर्यञ्चोऽविरतदेशविरता मनुष्या अविरतदेशविरतप्रमत्ताप्रमत्ताः, एते सर्वेऽपि यथासम्भवं विशोधिविवेकेन परिणता अनन्तानुबन्धिविसंयोजनार्थं प्रागुक्तं करणत्रयं कुर्वन्ति, तत्राप्यनन्तानुबन्धिनां स्थितिमपवर्त्तयन्नपवर्त्तयन् यावत्पल्योपमासङ्ख्येयभागमात्रा तावद्विधत्ते, तमपि पल्योपमासङ्ख्येयभागं बध्यमानासु मोहप्रकृतिषु प्रतिसमयं सङ्क्रामयति, तत्रापि प्रथमसमये स्तोकं द्वितीयादिष्वसङ्ख्येयगुणं एवं यावच्चरमसमये सर्वसङ्क्रमेणावलिकागतं मुक्त्वा सर्वं सङ्क्रामयति, आवलिकागतमपि स्तिबुकसङ्क्रमेण वेद्यमानास्वपरप्रकृतिषु सङ्क्रामयति, एवमनन्तानुबन्धिनो विसंयोजिता भवन्ति । इदानीं दर्शनत्रिकोपशमना भण्यते–तत्र मिथात्वस्योपशमको मिथ्यादृष्टिर्वेदकसम्यग्दृष्टिर्वा सम्यक्त्वसम्यग्मिथ्यात्वयोस्तु वेदक एवोपशमकः, तत्र मिथ्यात्वस्योपशमं कुर्वंस्तस्यान्तरं कृत्वा प्रथमस्थितिं विपाकेनानुभूयोपशान्तमिथ्यात्वः सन्नुपशमसम्यग्दृष्टिर्भवतीति । साम्प्तं वेदकसम्यग्दृष्टिरुपशमश्रेणिं प्रतिपद्यमानोऽनन्तानुबन्धिनो विसंयोज्य संयमे वर्त्तमानो दर्शनत्रिकमुपशमयत्यनेन विधिना, तत्र यथाप्रवृत्तादीनि प्राग्वत्रीणि करणानि कृत्वाऽन्तरकरणं कुर्वन् वेदकसम्यक्त्वस्य प्रथमस्थितिमान्तर्मौहूर्त्तिकीं करोति, इतरां त्वावलिकामात्रां, ततः किञ्चिन्यूनमुहूर्त्तमात्रां स्थितिं खण्डयित्वा बध्यमानानां प्रकृतीनां स्थितिबन्धमात्रेण कालेन तत्कर्म्मदलिकं सम्यक्त्वप्रथमस्थितौ प्रक्षिपन्नेत्येवमनया प्रक्रियया सम्यक्त्वबन्धाभावादन्तरं क्रियमाणं कृतं भवति, मिथ्यात्वसम्यग्मिथ्यात्वप्रथमस्थितिदलिकमावलिकामात्रपरिमाणं सम्यक्त्वप्रथमस्थितौ स्तिबुकसङ्क्रमेण सङ्क्रमयति, तस्यामपि सम्यक्त्वप्रथमस्थितौ क्षीणायां सत्यामुपशान्तदर्शनत्रिको भवतीति । तदनन्तरं चारित्रमोहनीयमुपशमयन् पूर्ववत् करणत्रयं करोति, नवरं यथाप्रवृत्तकरणमप्रमत्तगुणस्थान एव भवति, द्वितीयं त्वपूर्वकरणमष्टमस्थमेव गुणस्थानकं, तस्य च प्रथमसमय एव स्थितिघातरसघातगुणश्रेणिगुणसङ्क्रमापूर्वस्थितिबन्धा यौगपद्येन पञ्चाप्यधिकाराः प्रवर्त्तन्ते, तत्रापूर्वकरणसङ्ख्येयभागे गते निद्राप्रचलयोर्बन्धव्यवच्छेदो भवति, ततोऽपि बहुषु स्थितिकण्डकसहस्रेषु गतेषु सत्सु परभविकनाम्नां चरमसमये त्रिंशतो नाम-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २९८ ॥

॥ २९८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकृतीनां बन्धव्यवच्छेदं विधत्ते, ताश्चेमाः—देवगतिस्तदानुपूर्वी पञ्चेन्द्रियजातिर्वैक्रियाहारकशरीरतदङ्गोपाङ्गानि तैजसकार्मणशरीरे चतुरस्रसंस्थानं वर्णगन्धरसस्पर्शागुरुलघूपघातपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तकप्रत्येकस्थिरशुभसुभगसुस्वरादेयनिर्म्माणतीर्थकरनामानि चेति, ततोऽपूर्वकरणचरमसमये हास्यरतिभयजुगुप्सानां बन्धव्यवच्छेदः, हास्यादिषट्कस्य तूदयव्यवच्छेदश्च, सर्वकर्म्मणामप्रशस्तो (णां देशो) पशमनानिधत्तनिकाचनाकरणानि च व्यवच्छिद्यन्ते, तदेवमसंयतसम्यग्दृष्ट्यादिष्वपूर्वकरणान्तेषु सप्त कर्म्माण्युपशान्तानि लभ्यन्ते, तत ऊर्ध्वमनिवृत्तिकरणं, स च नवमो गुणः, तत्र व्यवस्थित एकविंशतीनां मोहप्रकृतीनामन्तरं कृत्वा नपुंसकवेदमुपशमयति, तदनन्तरं स्त्रीवेदं, ततो हास्यादिसप्तकं (षट्कं), पुनः पुंवेदस्य बन्धोदयव्यवच्छेदः, तत ऊर्ध्वं समयोनावलिकाद्वयेन पुंवेदोपशमः, ततः क्रोधद्वयस्य पुनः सञ्ज्वलनक्रोधस्यैवं मानत्रिकस्य मायात्रिकस्य च, ततः सञ्ज्वलनलोभं सूक्ष्मखण्डानि विधत्ते, तत्करणकालचरमसमये लोभद्वयमुपशमयति, एवं चानिवृत्तिकरणान्ते सप्तविंशतिरुपशान्ता भवति, ततः सूक्ष्मखण्डान्यनुभवन् सूक्ष्मसम्परायो भवति, तदन्ते ज्ञानान्तरायदशकदर्शनावरणचतुष्कयशःकीर्त्युच्चैर्गोत्राणां बन्धव्यवच्छेदः, तदेवमष्टाविंशतिमोहप्रकृत्युपशमे सत्युपशान्तवीतरागो भवति, स च जघन्यत एकं समयमुत्कृष्टतोऽन्तर्मुहूर्त्तं, तत्प्रतिपातश्च भवक्षयेणाद्धाक्षयेण वा स्यात्, स च यथाऽऽरूढो बन्धादिव्यवच्छेदं च यथा कृतवांस्तथैव प्रतिपतन्विधत्ते, कश्चिच्च मिथ्यात्वमपि गच्छेदिति, यस्तु भवक्षयेण प्रतिपतति तस्य प्रथमसमय एव सर्वकरणानि प्रवर्त्तन्ते, एकभव एव कश्चिद् वारद्वयमुपशमं विदध्यादिति । साम्प्रतं क्षपकश्रेणिर्व्यावर्ण्यते—अस्याश्च मनुष्य एवाष्टवर्षोपरि वर्त्तमान आरम्भको भवति, स च

प्रथममेव करणत्रयपूर्वकमनन्तानुबन्धिनो विसंयोजयति, ततः करणत्रयपूर्वकमेव मिथ्यात्वं तच्छेषं च सम्यग्मिथ्यात्वे प्रक्षिपन् क्षपयति, एवं सम्यग्मिथ्यात्वं, नवरं तच्छेषं सम्यक्त्वे प्रक्षिपति, एवं सम्यक्त्वमपि, तच्चरमसमये च वेदकसम्यग्दृष्टिर्भवति, तत ऊर्ध्वं क्षायिकसम्यग्दृष्टिरिति, एताश्च सप्तापि कर्म्मप्रकृतीरसंयतसम्यग्दृष्ट्याद्यप्रमत्तान्ताः क्षपयन्ति, बद्धायुष्कश्चात्रैवावतिष्ठते, श्रेणिकवद्, अपरस्तु कषायाष्टकं क्षपयितुं करणत्रयपूर्वकमारभते, तत्र यथाप्रवृत्तकरणमप्रमत्तस्यैव, अपूर्वकरणे तु स्थितिघातादिकं प्राग्वन्निद्राद्विकस्य देवगत्यादीनां च त्रिंशतां हास्यादिचतुष्कस्य (च) यथाक्रमं बन्धव्यवच्छेद उपशमश्रेणिक्रमेण वक्तव्यः, अनिवृत्तिकरणे तु स्त्यानार्द्धित्रिकस्य नरकतिर्यग्गतितदानुपूर्व्येकेन्द्रियादिजातिचतुष्टयातपोद्योतस्थावरसूक्ष्मसाधारणानां षोडशप्रकृतीनां क्षयः, ततः कषायाष्टकस्यापि, अन्येषां तु मते—पूर्वं कषायाष्टकं क्षप्यते, पश्चात् षोडशेति, ततो नपुंसकवेदं, तदनन्तरं हास्यादिषट्कं, पुनः पुंवेदं, ततः स्त्रीवेदं, ततः क्रमेण क्रोधादीन् सञ्ज्वलनान् क्षपयति, लोभं च खण्डशः कृत्वा क्षपयति, तत्र बादरखण्डानि क्षपयन्ननिवृत्तिबादरः सूक्ष्मानि तु सूक्ष्मसम्पराय इति, तदन्ते च ज्ञानावरणीयादीनां षोडशप्रकृतीनां बन्धव्यवच्छेदं विधत्ते, ततः क्षीणमोहोऽन्तर्मुहूर्त्तं स्थित्वा तदन्ते द्विचरमसमये निद्राद्वयं क्षपयति, अन्तसमये च ज्ञानान्तरायदशकं दर्शनावरणचतुष्कं च क्षपयित्वा निरावरणज्ञानदर्शनसमन्वितः केवली भवति, स च सातावेदनीयमेवैकं बध्नाति यावत्सयोग इति, स चान्तर्मुहूर्त्तं देशोनां पूर्वकोटिं वा यावद्भवति, ततोऽसावन्तर्मुहूर्त्तावशेषमायुर्ज्ञात्वा वेदनीयं च प्रभूततरमतस्तयोः स्थितिसाम्यापादनार्थं समुद्घातमेतेन क्रमेण करोति, तद्यथा—औदारिककाययोगी आलोकान्तादूर्ध्वाधःशरीरपरिणाहप्रमाणं प्रथमसमये

दण्डं करोति, पुनर्द्वितीयसमये तिरश्चीनमालोकान्तात्कायप्रमाणमेवौदारिककार्म्मणशरीरयोगी कपाटवत्कपाटं विधत्ते, तृतीयसमये त्वपरदिक्तिरश्चीनमेव कार्म्मणशरीरयोगी मन्थानवन्मन्थानं करोति, अनुश्रेणिगमनाच्च लोकस्य प्रायशो बहु पूरितं भवति, ततश्चतुर्थसमये कार्मणकाययोगेनैव मन्थान्तरालव्यापनात्सह निष्कुटैर्लोकः पूरितो भवति, पुनरनेनैव क्रमेण पश्चानुपूर्व्या समुद्घातावस्थां चतुर्भिरेव समयैरुपसंहरंस्तद्व्यापारवांस्तत्तद्योगो भवति, केवलं षष्ठसमये मन्थानमुपसंहरन्नौदारिकमिश्रयोगी स्यादिति, तदेवं केवली समुद्घातं संहृत्य प्रत्यूर्ध्वं च फलकादिकं ततो योगनिरोधं विधत्ते, तद्यथा—पूर्वं मनोयोगं बादरं निरुणद्धि, पुनर्वाग्योगं काययोगं च बादरमेवेति, पुनरनेनैव क्रमेण सूक्ष्ममनोयोगं निरुणद्धि, ततः सूक्ष्मवाग्योगं निरुणद्धि, ततः सूक्ष्मकाययोगं निरुन्धन् सूक्ष्मक्रियमप्रतिपाति तृतीयं शुक्लध्यानभेदमारोहति, तन्निरोधे च व्युपरतक्रियमनिवर्त्ति चतुर्थं शुक्लध्यानमारोहति, तदारूढश्चायोगिकेवलिभावमुपगतः सन्नन्तर्मुहूर्त्तं यावत्कालमजघन्योत्कृष्टमास्ते, तत्र चासौ येषां कर्म्मणामुदयो नास्ति तानि स्थितिक्षयेण क्षपयन् वेद्यमानासु चापरप्रकृतिषु सङ्क्रामयन् क्षपयंश्च तावद्गतो यावद्द्विचरमसमयं, तत्र च द्विचरमसमये देवगतिसहगताः कर्म्मप्रकृतीः क्षपयति, ताश्चेमाः—देवगतिस्तदानुपूर्वी वैक्रियाहारकशरीरतदङ्गोपाङ्गचतुष्टयमेतद्बन्धनसङ्घातावितिच, तथा तत्रैवापरा इमाः क्षपयति, तद्यथा—औदारिकतैजसकार्मणानि शरीराणि एतद्बन्धनानि त्रीणि सङ्घातांश्च षट् संस्थानानि षट् संहननानि औदारिकशरीराङ्गोपाङ्गं वर्णगन्धरसस्पर्शा मनुष्यानुपूर्व्यगुरुलघूपघातपराघातोच्छ्वासप्रशस्ताप्रशस्तविहायोगतयस्तथाऽपर्याप्तकप्रत्येकस्थिरास्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरानादेययशःकीर्त्तिर्निर्म्माणानि तथा नीचैर्गोत्रमन्यतरद्वेदनीयमिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमसमये तु मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तकसुभगादेययशःकीर्त्तितीर्थकरत्वान्यतरद्वेदनीयायुष्कोच्चैर्गोत्राण्येतां द्वादश तीर्थकृत् केषांचिन्मतेनानुपूर्वीसहितास्त्रयोदश अतीर्थकृच्च द्वादशैकादश वा क्षपयति, अशेषकर्म्मक्षयसमनन्तरमेव चास्पर्शवद्गत्या ऐकान्तिकात्यन्तिकानाबाधलक्षणं सुखमनुभवन् सिद्धा(द्धः)ख्यं लोकाग्रमुपैतीत्ययं गाथातात्पर्यार्थः ॥ साम्प्रतमुपसंहरंस्तीर्थकरासेवनतः प्ररोचनतां दर्शयितुमाह—

एवं तु समणुचिन्नं वीरवरेणं महाणुभावेणं । जं अणुचरित्तु धीरा सिवमचलं जन्ति निव्वाणं ॥ २८४ ॥

'एवम्' उक्तविधिना भावोपधानं—ज्ञानादि तपो वा वीरवर्द्धमानस्वामिना स्वतोऽनुष्ठितमतोऽन्येनापि मुमुक्षुणैतदनुष्ठेयमिति गाथार्थः ॥ समाप्ता ब्रह्मचर्याध्ययननिर्युक्तिः ॥ साम्प्रतं सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्—

अहासुयं वइस्सामि जहा से समणे भगवं उट्ठाए । संखाए तंसि हेमंते अहुणो पव्वइए रीइत्था ॥ १ ॥ णो चेविमेण वत्थेण पिहिस्सामि तंसि हेमंते । से पारए आवकहाए, एयं खु अणुधम्मियं तस्स ॥ २ ॥ चत्तारि साहिए मासे, बहवे पाणजाइया आगम्म । अभिरुज्झ कायं विहरिंसु, आरुसिया णं तत्थ हिंसिंसु ॥३॥ संवच्छरं साहियं मासं जं न रिक्कासि वत्थगं भगवं । अचेलए तओ चाइ तं वोसिज्ज वत्थमणगारे ॥ ४ ॥

आ. सू. ५१

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३०१ ॥

आर्यसुधर्म्मस्वामी जम्बूस्वामिने पृच्छते कथयति, यथाश्रुतं यथासूत्रं वा वदिष्यामि, तद्यथा—स श्रमणो भगवान् वीरवर्द्धमानस्वाम्युत्थाय—उद्यतविहारं प्रतिपद्य सर्वालङ्कारं परित्यज्य पञ्चमुष्टिकं लोचं विधायैकेन देवदूष्येणेन्द्रक्षिप्तेन युक्तः कृतसामायिकप्रतिज्ञ आविर्भूतमनःपर्यायज्ञानोऽष्टप्रकारकर्म्मक्षयार्थं तीर्थप्रवर्त्तनार्थं चोत्थाय 'संख्याय' ज्ञात्वा तस्मिन् हेमन्ते मार्गशीर्षदशम्यां प्राचीनगामिन्यां छायायां प्रव्रज्याग्रहणसमनन्तरमेव 'रीयते स्म' विजहार, तथा च किल कुण्डग्रामान्मुहूर्त्तशेषे दिवसे कर्मारग्राममाप, तत्र च भगवानित आरभ्य नानाविधाभिग्रहोपेतो घोरान् परीषहोपसर्गानधिसहमानो महासत्त्वतया म्लेच्छान्प्युपशमं नयन् द्वादश वर्षाणि साधिकानि छद्मस्थो मौनव्रती तपश्चचार, अत्र च सामायिकारोपणसमनन्तरमेव सुरपतिना भगवदुपरि देवदूष्यं क्षिप्तं, तत् भगवतोऽपि निःसङ्गाभिप्रायेणैव धर्मोपकरणमृते न धर्मोऽनुष्ठातुं मुमुक्षुभिरपरैः शक्यत इति कारणापेक्षया मध्यस्थवृत्तिना तथैवावधारितं, न पुनस्तस्य तदुपभोगेच्छाऽस्तीति ॥ एतद्दर्शयितुमाह—न चैवाहमनेन वस्त्रेणेन्द्रप्रक्षिप्तेनात्मानं पिधास्यामि—स्थगयिष्यामि तस्मिन् हेमन्ते तद्वा वस्त्रं त्वक्त्राणीकरिष्यामि, लज्जाप्रच्छादनं वा विधास्यामि, किंभूतोऽसाविति दर्शयति—'स' भगवान् प्रतिज्ञायाः परीषहाणां संसारस्य वा पारं गच्छतीति पारगः, कियन्तं कालमिति दर्शयति—यावत्कथं यावज्जीवमित्यर्थः, किमर्थं पुनरसौ बिभर्त्तीति चेद्दर्शयति—खुरवधारणे स च भिन्नक्रमः, एतद्वस्त्रावज्ञावधारणं तस्य भगवतोऽनु—पश्चाद्धार्म्मिकमनुधार्मिकमेवेति, अपरैरपि तीर्थकृद्भिः समाचीर्णमित्यर्थः, तथा चागमः—"से बेमि जे य अईया जे य पडुप्पन्ना जे य आगमेस्सा अरहंता भगवन्तो जे य पव्वयन्ति जे अ पव्वइस्सन्ति सव्वे ते सोवही धम्मो देसिअव्वोत्तिकट्टु तित्थधम्मयाए एसाऽणुधम्मिगत्ति एगं देवदूसमायाए पव्वइंसु वा पव्वयंति वा पव्वइस्सन्ति व"त्ति, अपि च—'गरीयस्त्वात्सचलस्य, धर्म्मस्यान्यैस्तथागतैः । शिष्यस्य प्रत्ययार्थं च, वस्त्रं दध्रे न लज्जया ॥ १ ॥"इत्यादि ॥ तथा भगवतः प्रव्रजतो ये दिव्याः सुगन्धिपटवासा आसंस्तद्गन्धाकृष्टाश्च भ्रमरादयः समागत्य शरीरमुपतापयन्तीति, एतद्दर्शयितुमाह—चतुरः समधिकान् मासान् बहवः प्राणिजातयो—भ्रमरादिकाः समागत्य आरुह्य च 'कायं' शरीरं 'विजहुः' काये प्रविचारं चक्रुः, तथा मांसशोणितार्थितयाऽऽरुह्य 'तत्र' काये 'ण'मिति वाक्यालङ्कारे, 'हिंसिंसु' इतश्चेतश्च विलुम्पन्ति स्मेत्यर्थः ॥ कियन्मात्रं कालं तद्देवदूष्यं भगवति स्थितमित्येतद्दर्शयितुमाह—तदिन्द्रोपाहितं वस्त्रं संवत्सरमेकं साधिकं मासं 'जं ण रिक्कासि'त्ति यन्न त्यक्तवान् भगवान् तस्थितकल्प इतिकृत्वा, तत ऊर्ध्वं तद्वस्त्रपरित्यागी, व्युत्सृज्य च तदनगारो भगवानचेलोऽभूदिति, तच्च सुवर्णवालुकानदीपूराहृतकण्टकावलग्नं धिग्जातिना गृहीतमिति ॥ किं च—

उपधा० ९ उद्देशकः १

॥ ३०१ ॥

अदु पोरिसिं तिरियं भित्तिं चक्खुमासज्ज अन्तसो झायइ । अह चक्खुभीया संहिया ते हन्ता हन्ता बहवे कंदिंसु ॥ ५ ॥ सयणेहिं वितिमिस्सेहिं इत्थिओ तत्थ से परिन्नाय । सागारियं न सेवेइ य, से सयं पवेसिया झाइ ॥ ६ ॥ जे के इमे अगारत्था मीसीभावं पहाय से झाई । पुट्ठोवि नाभिभासिंसु गच्छइ नाइवत्तइ अंजू

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ७ ॥ णो सुकरमेयमेगेसिं नाभिभासे य अभिवायमाणे । हयपुव्वे तत्थ दण्डेहिं लूसियपुव्वे अप्पपुण्णेहिं ॥ ८ ॥

'अथ' आनन्तर्ये पुरुषप्रमाणा पौरुषी-आत्मप्रमाणा वीथी तां गच्छन् ध्यायतीर्यासमितो गच्छति, तदेव चात्र ध्यानं यदीर्यासमितस्य गमनमिति भावः, किंभूतां तां?-तिर्यग्भित्तिं-शकटोद्धिवदादौ सङ्कटामग्रतो विस्तीर्णामित्यर्थः, कथं ध्यायति?,—'चक्षुरासाद्य' चक्षुर्दत्त्वाऽन्तः-मध्ये दत्तावधानो भूत्वेति, तं च तथा रीयमाणं दृष्ट्वा कदाचिदव्यक्तवयसः कुमारादय उपसर्गयेयुरिति दर्शयति—'अथ' आनन्तर्ये चक्षुःशब्दोऽत्र दर्शनपर्यायो, दर्शनादेव भीता दर्शनभीताः संहिता-मिलितास्ते बहवो डिम्भादयः पांसुमुष्ट्यादिभिर्हत्वा हत्वा चक्रन्दुः, अपरांश्च चुक्रुशुः-पश्यत यूयं नग्नो मुण्डितः, तथा कोऽयं कुतोऽयं किमीयो वा अयमित्येवं हलबोलं चक्रुरिति ॥ किं च-शय्यत एष्विति शयनानि-वसतयस्तेषु कुतश्चिन्निमित्ताद्यतिमिश्रेषु गृहस्थतीर्थिकैः, तत्र व्यवस्थितः सन् यदि स्त्रीभिः प्रार्थ्यते ततस्ताः शुभमार्गार्गला इति ज्ञात्वा ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया परिहरन् सागारिकं-मैथुनं न सेवेत, शून्येषु च भावमैथुनं न सेवेत,इत्येवं स भगवान् स्वयम्-आत्मना वैराग्यमार्गमात्मानं प्रवेश्य धर्म्मध्यानं शुक्लध्यानं वा ध्यायति ॥ तथा-ये केचन इमेऽगारं-गृहं तत्र तिष्ठन्तीति अगारस्थाः-गृहस्थास्तैर्मिश्रीभावमुपगतोऽपि द्रव्यतो भावतश्च तं मिश्रीभावं प्रहाय-त्यक्त्वा स भगवान् धर्मध्यानं ध्यायति, तथा कुतश्चिन्निमित्ताद्गृहस्थैः पृष्टोऽपृष्टो वा न वक्ति, स्वकार्याय गच्छत्येव, न तैरुक्तो मोक्षपथमतिवर्त्तते ध्यानं वा,

'अंजु'त्ति ऋजुः ऋजोः संयमस्यानुष्ठानात्, नागार्जुनीयास्तु पठन्ति-'पुट्ठो व सो अपुट्ठो व णो अणुन्नाइ पावगं भगवं' कण्ठ्यम् ॥ किं च-नैतद्वक्ष्यमाणमुक्तं वा एकेषाम्-अन्येषां सुकरमेव, नान्यैः प्राकृतपुरुषैः कर्त्तुमलं, किं तत्तेन कृतमिति दर्शयति-अभिवादयतो नाभिभाषते, नाप्यनभिवादयन्यः कुप्यति, नापि प्रतिकूलोपसर्गैरन्यथाभावं यातीति दर्शयति-दण्डैर्हतपूर्वः 'तत्र' अनार्यदेशादौ पर्यटन् तथा 'लूषितपूर्वो' हिंसितपूर्वः केशलुञ्चनादिभिरपुण्यैः-अनार्यैः पापाचारैरिति ॥ किं च—

फरुसाइं दुत्तितिक्खाइ अइअच्च मुणी परक्कममाणे । आघायनट्ठगीयाइं दण्डजुद्धाइं मुट्ठिजुद्धाइं ॥ ९ ॥ गढिए मिहुकहासु समयंमि नायसुए विसोगे अदक्खु । एयाइ से उरालाइं गच्छइ नायपुत्ते असरणयाए ॥ १० ॥ अवि साहिए दुवे वासे सीओदं अभुच्चा निक्खन्ते । एगत्तगए पिहियच्चे से अहिन्नायदंसणे सन्ते ॥ ११ ॥

'परुषाणि' कर्कशानि वाग्दुष्टानि तानि चापरैर्दुःखेन तितिक्ष्यन्त इति दुस्तितिक्षाणि तान्यतिगत्य-अविगणय्य 'मुनिः' भगवान् विदितजगत्स्वभावः पराक्रममाणः सम्यक्तितिक्षते, तथा आख्यातानि च तानि नृत्यगीतानि च आख्यातनृत्यगीतानि तानि उद्दिश्य न कौतुकं विदधाति, नापि दण्डयुद्धमुष्टियुद्धान्याकर्ण्य विस्मयोत्फुल्ललोचन उद्भूतरोमकूपो भवति, तथा 'ग्रथितः' अवबद्धो 'मिथः' अन्योऽन्यं 'कथासु' स्वैरकथासु समये वा कश्चिदवबद्धस्तं स्त्रीद्वयं वा परस्य कथायां गृद्धमपेक्ष्य तस्मिन्नवसरे 'ज्ञातपुत्रो' भगवान् विशोको विगतहर्षश्च तान्मिथःकथाऽवबद्धान् मध्यस्थोऽद्राक्षीत्, एतान्यन्यानि चानुकूलप्रतिकूलानि परीषहोपसर्गरूपाण्युरालानि दुष्प्रधृष्याणि दुःखान्यस्मरन् 'गच्छति' संयमानुष्ठाने पराक्रमते, ज्ञाताः-क्षत्रियास्तेषां पुत्रः-अपत्यं ज्ञातपुत्रः-वीरवर्द्धमानस्वामी स भगवान्नैतद्दुःखस्मरणाय गच्छति-पराक्रमत इति सम्बन्धः, यदिवा शरणं-गृहं नात्र शरणमस्तीत्यशरणः-संयमस्तस्मै अशरणाय पराक्रमत इति, तथाहि-किमत्र चित्रं यद्भगवानपरिमितबलपराक्रमः प्रतिज्ञामन्दरमारूढः पराक्रमते इति?, स भगवानप्रव्रजितोऽपि प्रासुकाहारानुवर्त्त्यासीत्, श्रूयते च किल पञ्चत्वमुपगते मातापितरि समाप्तप्रतिज्ञोऽभूत्, ततः प्रविव्रजिषुः ज्ञातिभिरभिहितो, यथा-भगवन्! मा कृथाः क्षते क्षारावसेचनमित्येवमभिहितेन भगवताऽवधिना व्यज्ञायि, यथा-मय्यस्मिन्नवसरे प्रव्रजति सति बहवो नष्टचित्ता विगतासवश्च स्युरित्यवधार्य तानुवाच-कियन्तं कालं पुनरत्र मया स्थातव्यमिति?, ते ऊचुः-संवत्सरद्वयेनास्माकं शोकापगमो भावीति, भट्टारकोऽप्योमित्युवाच, किं त्वाहारादिकं मया स्वेच्छया कार्यं, नेच्छाविघाताय भवद्भिरुपस्थातव्यं, तैरपि यथाकथञ्चिदयं तिष्ठत्विति मत्वा तैः सर्वैस्तथैव प्रतिपेदे ॥ ततो भगवांस्तद्वचनमनुवर्त्त्यात्मीयं च निष्क्रमणावसरमवगम्य संसारासारतां विज्ञाय तीर्थप्रवर्त्तनायोद्यत इति दर्शयितुमाह-अपि साधिके द्वे वर्षे शीतोदकमभुक्त्वा-अनभ्यवहृत्यापीत्येवार्थः, अपरा अपि पादधावनादिकाः क्रियाः प्रासुकेनैव प्रकृत्य ततो निष्क्रान्तो, यथा च प्राणातिपातं परिहृतवान् एवं शेषव्रतान्यपि पालितवानिति, तथा 'एकत्व'मिति तत एकत्वभावनाभावितान्तःकरणः पिहिता-स्थगिताऽर्चा-क्रोधज्वाला येन स तथा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदिवा पिहितार्च्चो–गुप्ततनुः स भगवान् छद्मस्थकालेऽभिज्ञातदर्शनः–सम्यक्त्वभावनया भावितः शान्तः इन्द्रियनो-इन्द्रियैः ॥ स एवंभूतो भगवान् गृहवासेऽपि सावद्यारम्भत्यागी, किं पुनः प्रव्रज्यायामिति दर्शयितुमाह—

पुढविं च आउकायं च तेउकायं च वाउकायं च । पणगाइं बीयहरियाइं तसकायं च सव्वसो नच्चा ॥ १२ ॥ एयाइं सन्ति पडिलेहे, चित्तमन्ताइ से अभिन्नाय । परिवज्जिय विहरित्था इय सङ्खाय से महावीरे ॥ १३ ॥ अदु थावरा य तसत्ताए, तसा य थावरत्ताए । अदुवा सव्वजोणिया सत्ता कम्मुणा कप्पिया पुढो बाला ॥ १४ ॥ भगवं च एवमन्नेसिं सोवहिए हु लुप्पई बाले । कम्मं च सव्वसो नच्चा तं पडियाइक्खे पावगं भगवं ॥ १५ ॥ दुविहं समिच्च मेहावी किरियमक्खायऽणेलिसं नाणी । आगमणसो-यमइवायसोयं जोगं च सव्वसो णच्चा ॥ १६ ॥

श्लोकद्वयस्याप्ययमर्थः–एतानि पृथिव्यादीनि चित्तमन्त्यभिज्ञाय तदारम्भं परिवर्ज्य विहरति स्म, क्रियाकारकसम्बन्धः, तत्र पृथिवी सूक्ष्मबादरभेदेन द्विधा, सूक्ष्मा सर्वगा, बादराऽपि श्लक्ष्णकठिनभेदेन द्विधैव, तत्र श्लक्ष्णा शुक्लादिपञ्चवर्णा,

श्रीआचाराङ्गवृत्तिः (शी०) ॥ २०४ ॥

कठिना तु पृथ्वीशर्करावालुकादि षट्त्रिंशद्भेदा शस्त्रपरिज्ञानुसारेण द्रष्टव्या, अप्कायोऽपि सूक्ष्मबादरभेदाद्विधा, तत्र सूक्ष्मः पूर्ववद्बादरस्तु शुद्धोदकादिभेदेन पञ्चधा, तेजःकायोऽपि पूर्ववत् नवरं बादरोऽङ्गारादि पञ्चधा, वायुरपि तथैव, नवरं बादर उत्कलिकादिभेदेन पञ्चधा, वनस्पतिरपि सूक्ष्मबादरभेदेन द्विधा, तत्र सूक्ष्मः सर्वगो बादरोऽप्यग्रमूलस्कन्ध-पर्ववीजसम्मूर्छनभेदात्सामान्यतः षोढा, पुनर्द्विधा–प्रत्येकः साधारणश्च, तत्र प्रत्येको वृक्षगुच्छादिभेदाद्बादशधा, साधारणस्त्वनेकविध इति, स एवं भेदभिन्नोऽपि वनस्पतिः सूक्ष्मस्य सर्वगतत्वादतीन्द्रियत्वाच्च तद्व्युदासेन बादरो भेदत्वेन संगृहीतः, तद्यथा–पनकग्रहणेन बीजाङ्कुरभावरहितस्य पनकादेरुल्यादिविशेषापन्नस्य ग्रहणं, बीजग्रहणेन त्वग्रबीजादेरुपादानं, हरितशब्देन शेषस्येत्येतानि पृथिव्यादीनि भूतानि 'सन्ति' विद्यन्त इत्येवं प्रत्युपेक्ष्य तथा 'चित्तवन्ति' सचेतनान्यभिधाय–ज्ञात्वा 'इति' एतत्सङ्ख्याय–अवगम्य स भगवान्महावीरस्तदारम्भं परिवर्ज्य विहृतवानिति ॥ पृथिवीकायादीनां जन्तूनां त्रसस्थावरत्वेन भेदमुपदर्श्य साम्प्रतमेषां परस्परतोऽनुगमनमप्यस्तीत्येतद्दर्शयितुमाह—'अथ' आनन्तर्ये 'स्थावराः' पृथिव्यप्तेजोवायुवनस्पतयः ते 'त्रसतया' द्वीन्द्रियादितया 'विपरिणमन्ते' कर्म्मवशादू गच्छन्ति, चशब्द उत्तरापेक्षया समुच्चयार्थः, तथा 'त्रसजीवाश्च' कृम्यादयः 'स्थावरतया' पृथिव्यादित्वेन कर्म्मनिष्ठाः समुत्पद्यन्ते, तथा चान्यत्राप्युक्तम्—"अवण्णं भन्ते! जीवे पुढविकाइयत्ताए जाव तसकाइयत्ताए उववण्णपुव्वे?, हन्ता गोअमा! असइं अदुवाऽणंतखुत्तो जाव उववण्णपुव्वे"त्ति, अथवा सर्वा योनयः–उत्पत्तिस्थानानि येषां सत्त्वानां ते सर्वयोनिकाः

उपधा० ९ उद्देशकः १

॥ २०४ ॥

१ अयं भदन्त! जीवः पृथ्वीकायिकतया यावत् त्रसकायिकतयोत्पन्नपूर्वः?, हन्त गौतम! असकृत् अनन्तकृत्वो यावदुत्पन्नपूर्वः.

सत्त्वाः सर्वगतिभाजः, ते च 'बाला' रागद्वेषाकलिताः स्वकृतेन कर्मणा पृथक्कया सर्वयोनिभाक्त्वेन च 'कल्पिताः' व्यवस्थिता इति, तथा चोक्तम्—"णत्थि किर सो पएसो लोए वालग्गकोडिमित्तोऽवि । जम्मणमरणाबाहा अणेगसो जत्थ णवि पत्ता ॥ १ ॥" अपि च–"रङ्गभूमिर्न सा काचिच्छुद्धा जगति विद्यते । विचित्रैः कर्म्मनेपथ्यैर्यत्र सत्त्वैर्न नाटितम् ॥ २ ॥" इत्यादि ॥ किं च–भगवांश्च–असौ वीरवर्द्धमानस्वाम्येवममन्यत–ज्ञातवान् सह उपधिना वर्त्तत इति सोपधिकः–द्रव्यभावोपधियुक्तः, क्षुरवधारणे, लुप्यत एव–कर्म्मणा क्लेशमनुभवत्येव 'अज्ञो' बाल इति, यदिवा हुर्हेतौ यस्मात्सोपधिकः कर्म्मणा लुप्यते बालस्तस्मात्कर्म्म च सर्वशो ज्ञात्वा तत्कर्म्म प्रत्याख्यातवांस्तदुपादानं च पापकमनुष्ठानं भगवान् वर्द्धमानस्वामीति ॥ किं च–द्वे विधे–प्रकारावस्येति द्विविधं, किं तत्?–कर्म, तच्चेर्यापथ्यं साम्परायिकं च, तद्विविधमपि 'समेत्य' ज्ञात्वा 'मेधावी' सर्वभावज्ञः, 'क्रियां' संयमानुष्ठानरूपां कर्म्मोच्छेत्रीमनीदृशीम्–अनन्यसदृशीमाख्यातवान्, किंभूतो?–ज्ञानी, केवलज्ञानवानित्यर्थः, किं चापरमाख्यातवानिति दर्शयति–आदीयते कर्म्मानेनेति आदानं–दुष्प्रणिहितमिन्द्रियमादानं च तत् स्रोतश्चादानस्रोतस्तत् ज्ञात्वा तथाऽतिपातस्रोतश्च उपलक्षणार्थत्वादस्य मृषावादादिकमपि ज्ञात्वा तथा 'योगं च' मनोवाक्कायलक्षणं दुष्प्रणिहितं 'सर्वशः' सर्वैः प्रकारैः कर्म्मबन्धायेति ज्ञात्वा क्रियां संयमलक्षणामाख्यातवानिति सम्बन्धः ॥ किं च—

अइवत्तियं अणाउट्टिं सयमन्नेसिं अकरणयाए । जस्सित्थिओ परिन्नाया सव्वकम्मावहा-

१ नास्ति किल स प्रदेशो लोके वालाग्रकोटीमात्रोऽपि । जन्ममरणाबाधा अनेकशो यत्र नैव प्राप्ताः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उ से अदक्खु ॥ १७ ॥ अहाकडं न से सेवे सव्वसो कम्म अदक्खू । ज किंचि पावगं भगवं तं अकुव्वं वियडं भुञ्जित्था ॥ १८ ॥ णो सेवइ य परवत्थं परपाएवी से न भुञ्जित्था । परिवज्जियाण उमाणं गच्छइ संखडिं असरणयाए ॥ १९ ॥ मायण्णे असणपाणस्स नाणुगिद्धे रसेसु अपडिन्ने । अच्चिंछपि नो पमज्जिज्जा नोवि य कंडूयए मुणी गायं ॥ २० ॥

आकुट्टिः–हिंसा नाकुट्टिरनाकुट्टिरहिंसेत्यर्थः, किंभूताम्?–अतिक्रान्ता पातकादतिपातिका–निर्दोषा तामाश्रित्य, स्वतोऽन्येषां चाकरणतया–अव्यापारतया प्रवृत्त इति, तथा यस्य स्त्रियः स्वरूपतस्तद्विपाकतश्च परिज्ञाता भवन्ति, सर्वे कर्मावहन्तीति सर्वकर्मावहाः–सर्वपापोपादानभूताः स एवाद्राक्षीत्–स एव यथावस्थितं संसारस्वभावं ज्ञातवानिति, एतदुक्तं भवति–स्त्रीस्वभावपरिज्ञानेन तत्परिहारेण च स भगवान् परमार्थदर्श्यभूदिति ॥ मूलगुणानाख्यायोत्तरगुण-(णान्)प्रचिकटयिषुराह–'यथा' येन प्रकारेण पृष्ट्वा वाऽपृष्ट्वा वा कृतं यथाकृतम्–आधाकर्मादि नासौ सेवते, किमिति?–यतः 'सर्वशः' सर्वैः प्रकारैस्तदासेवनेन कर्मणाऽष्टप्रकारेण बन्धमद्राक्षीत्–दृष्टवान्, अन्यदप्येवंजातीयकं न सेवत इति दर्शयति–यत्किञ्चित्सापकं–पापोपादानकारणं तद्गमनकुर्वन् 'विकटं' प्रासुकमभुङ्क्त–उपभुक्तवान् ॥ किं च–नो से-

वते च–नोपभुङ्क्ते च परवस्त्रं–प्रधानं वस्त्रं परस्य वा वस्त्रं परवस्त्रं नासेवते, तथा परपात्रेऽप्यसौ न भुङ्क्ते, तथा परिवर्ज्यापमानम्–अवगणय्य गच्छति असावाहाराय सङ्गृण्ह्यन्ते प्राणिनोऽस्मिन्निति सङ्गृण्डिस्तामाहारपाकस्थानभूतामशरणाय शरणमनालम्बमानोऽदीनमनस्कः कल्प इतिकृत्वा परीषहविजयार्थं गच्छतीति ॥ किं च–आहारस्य मात्रां जानातीति मात्राज्ञः, कस्य?–अश्यत इत्यशनं–शाल्योदनादि पीयत इति पानं–द्राक्षापानकादिः तस्य च, तथा नानुगृद्धो 'रसेषु' विकृतिषु, भगवतो हि गृहस्थभावेऽपि रसेषु गृद्धिर्नासीत्, किं पुनः प्रव्रजितस्येति?, तथा रसेष्वेव ग्रहणं प्रत्यप्रतिज्ञो, यथा–मयाऽद्य सिंहकेसरा मोदका एव ग्राह्या इत्येवंरूपप्रतिज्ञारहितोऽन्यत्र तु कुल्माषादौ सप्रतिज्ञ एष, तथाऽक्ष्यपि रजःकणुकाद्यपनयनाय नो प्रमार्जयेन्नापि च गात्रं मुनिरसौ कण्डूयते–काष्ठादिना गात्रस्य कण्डूव्यपनोदं न विधत्त इति ॥ किं च—

अप्पं तिरियं पेहाए अप्पिं पिट्ठओ पेहाए । अप्पं बुइएऽपडिभाणी पंथपेहि चरे जयमाणे ॥ २१ ॥ सिसिरंसि अद्धपडिवन्ने तं वोसिज्ज वत्थमणगारे । पसारित्तु बाहुं परक्कमे नो अवलम्बियाण कंधंमि ॥ २२ ॥ एस विही अणुक्कन्तो माहणेण मईमया । बहुसो अपडिन्नेण भगवया एवं रियंति ॥२३॥ त्तिबेमि ॥ उपधानश्रुताध्ययनोद्देशः१॥९–१॥

अल्पशब्दोऽभावे वर्त्तते, अल्पं तिर्यक्–तिरश्चीनं गच्छन् प्रेक्षते, तथाऽल्पं पृष्ठतः स्थित्वोत्प्रेक्षते, तथा मार्गादि केनचित्पृष्टः सन्नप्रतिभाषी सन्नल्पं ब्रूते, मौनेन गच्छत्येव केवलमिति दर्शयति–पथिप्रेक्षी 'चरेद्' गच्छेद्यतमानः–प्राणिविषये यत्नवानिति ॥ किं च–अध्वप्रतिपन्ने शिशिरे सति तद्देवदूष्यं वस्त्रं व्युत्सृज्यानगारो भगवान् प्रसार्य बाहू पराक्रमते, न तु पुनः शीतार्दितः सन् सङ्कोचयति, नापि स्कन्धेऽवलम्ब्य तिष्ठतीति ॥ साम्प्रतमुपसञ्जिहीर्षुराह–एष चर्याविधिरनन्तरोक्तोऽनुक्रान्तः–अनुचीर्णः 'माहणेण'त्ति श्रीवर्द्धमानस्वामिना 'मतिमता' विदितवेद्येन 'बहुशः' अनेकप्रकारमप्रतिज्ञेन–अनिदानेन 'भगवता' ऐश्वर्यादिगुणोपेतेन, 'एवम्' अनेन पथा भगवदनुचीर्णेनान्ये मुमुक्षवोऽशेषकर्मक्षयाय साधवो 'रीयन्ते' गच्छन्तीति । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववद्, उपधानश्रुताध्ययनस्य प्रथमोद्देशक इति ॥ उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीय आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके भगवतश्चर्याऽभिहिता, तत्र चावश्यं कयाचिच्छय्यया–वसत्या भाव्यमतस्तत्प्रतिपादनायायमुद्देशकः प्रक्रम्यते इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

चरियासणाइं सिज्जाओ एगइयाओ जाओ बुइयाओ । आइक्ख ताइं सयणासणाइं जाइं सेवित्था से महावीरे ॥ १ ॥ आवेसणसभापवासु पणियसालासु एगया वासो । अदुवा पलियठाणेसु पलालपुञ्जेसु एगया वासो ॥ २ ॥ आगन्तारे आरा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगारे तह य नगरे व एगया वासो। सुसाणे सुण्णगारे वा रुक्खमूले व एगया वासो ॥ ३ ॥ एएहिं मुणी सयणेहिं समणे आसि पतेरसवासे। राइं दिवंपि जयमाणे अपमत्ते समाहिए झाइ ॥ ४ ॥

चर्यायामवश्यंभावितया यानि शय्यासनान्यभिहितानि सामर्थ्यायातानि तानि शयनासनानि–शय्याफलकादीन्याचक्ष्व सुधर्म्मस्वामी जम्बूनाम्नाऽभिहितो यानि सेवितवान् महावीरो–वर्द्धमानस्वामीति, अयं च श्लोकश्चिरन्तनटीकाकारेण न व्याख्यातः, तत्र किं सुगमत्वादुताभावात्, सूत्रपुस्तकेषु तु दृश्यते, तदभिप्रायं च वयं न विद्म इति ॥ प्रश्नप्रतिवचनमाह–भगवतो ह्याहाराभिग्रहवत् प्रतिमाव्यतिरेकेण प्रायशो न शय्याऽभिग्रह आसीत्, नवरं यत्रैव चरमपौरुषी भवति तत्रैवानुज्ञाप्य स्थितवान्, तद्दर्शयति–आ–समन्ताद्विशन्ति यत्र तदावेशनं–शून्यगृहं सभा नाम ग्रामनगरादीनां तद्वासिलोकास्थायिकार्थमागन्तुकशयनार्थं च कुड्याद्याकृतिः क्रियते, 'प्रपा' उदकदानस्थानम् आवेशनं च सभा च प्रपा च आवेशनसभाप्रपास्वासु, तथा 'पण्यशालासु' आपणेषु 'एकदा' कदाचिद्वासो भगवतोऽथवा 'पलिय'न्ति कर्म्म तस्य स्थानं कर्म्मस्थानं–अयस्कारवर्द्धकिकुड्यादिकं, तथा पलालपुञ्जेषु मञ्चोपरि व्यवस्थितेष्वधो, न पुनस्तेष्वेव, शुषिरत्वादिति ॥ किं च–प्रसङ्गायाता आगत्य वा यत्र तिष्ठन्ति तदागन्तारं तत्पुनर्ग्रामान्नगराद्वा बहिः स्थानं तत्र, तथा आरामेऽगारं–गृहमारामागारं तत्र वा तथा नगरे वा एकदा वासः, तथा श्मशाने शून्यागारे वा, आवेशनशून्यागारयोर्भेदः सकुड्याकुड्यकृतो, वृक्षमूले वा एकदा वास इति ॥ किं च—'एतेषु' पूर्वोक्तेषु 'शयनेषु' वसतिषु स 'मुनिः' जगत्त्रयवेत्ता ऋतुबद्धेषु वर्षासु वा 'श्रमणः' तपस्युद्युक्तः समना वाऽऽसीत् निश्चलमना इत्यर्थः, कियन्तं कालं यावदिति दर्शयति—'पतेलसवासे'त्ति प्रकर्षेण त्रयोदश वर्ष यावत्समस्तां रात्रिं दिनमपि यतमानः संयमानुष्ठान उद्युक्तवान् तथाऽप्रमत्तो–निद्रादिप्रमादरहितः 'समाहितमनाः' विस्रोतसिकारहितो धर्म्मध्यानं शुक्लध्यानं वा ध्यायतीति ॥ किं च—

णिद्दंपि नो पगामाए, सेवइ भगवं उट्ठाए। जग्गावइ य अप्पाणं इसिं साई य अपडिन्ने ॥ ५ ॥ संबुज्झमाणे पुणरवि आसिंसु भगवं उट्ठाए। निक्खम्म एगया राओ बहि चंकमिया मुहुत्तागं ॥ ६ ॥ सयणेहिं तत्थुवसग्गा भीमा आसी अणेगरूवा य। संसप्पगा य जे पाणा अदुवा जे पक्खिणो उवचरन्ति ॥ ७ ॥ अदु कुचरा उवचरन्ति गामरक्खा य सत्तिहत्था य। अदु गामिया उवसग्गा इत्थी एगइया पुरिसा य ॥ ८ ॥

निद्रामप्यसावपरप्रमादरहितो न प्रकामतः सेवते, तथा च किल भगवतो द्वादशसु संवत्सरेषु मध्येऽस्थिकग्रामे व्यन्तरोपसर्गान्ते कायोत्सर्गव्यवस्थितस्यैवान्तर्मुहूर्त्तं यावत्स्वप्नदर्शनाध्यासिनः सकृन्निद्राप्रमाद आसीत्, ततोऽपि चोत्थायात्मानं 'जागरयति' कुशलानुष्ठाने प्रवर्त्तयति, यत्रापीषच्छय्याऽऽसीत् तत्राप्यप्रतिज्ञः–प्रतिज्ञारहितो, न तत्रापि स्वापाभ्युपगमपूर्वकं शयित इत्यर्थः ॥ किं च–स मुनिर्निद्राप्रमादाद् व्युत्थितचित्तः 'संबुध्यमानः' संसारपातायायं प्रमाद इत्येवमवगच्छन् पुनरप्रमत्तो भगवान् संयमोत्थानेनोत्थाय यदि तत्रान्तर्व्यवस्थितस्य कुतश्चिन्निद्राप्रमादः स्यात् ततस्तस्मान्निष्कम्यैकदा शीतकालरात्रादौ बहिश्चङ्क्रम्य मुहूर्त्तमात्रं निद्राप्रमादापनयनार्थं ध्याने स्थितवानिति ॥ किं च–शय्यते–स्थीयते उत्कुटुकासनादिभिर्येष्विति शयनानि–आश्रयस्थानानि तेषु तैर्वा तस्य भगवत उपसर्गा 'भीमा' भयानका आसन् अनेकरूपाश्च शीतोष्णादिरूपतयाऽनुकूलप्रतिकूलरूपतया वा, तथा संसर्प्पन्तीति संसर्प्पकाः–शून्यगृहादावहिनकुलादयो ये प्राणिनः 'उपचरन्ति'उप–सामीप्येन मांसादिकमश्नन्ति अथवा श्मशानादौ पक्षिणो गृध्रादय उपचरन्तीति वर्त्तते ॥ किं च—'अथ' अनन्तरं कुत्सितं चरन्तीति कुचराः–चौरपारदारिकादयस्ते च क्वचिच्छून्यगृहादौ 'उपचरन्ति' उपसर्गयन्ति, तथा ग्रामरक्षादयश्च त्रिकचत्वरादिव्यवस्थितं शक्तिकुन्तादिहस्ता उपचरन्तीति, अथ 'ग्रामिका' ग्रामधर्म्माश्रिता उपसर्गा एकाकिनः स्युः, तथाहि–काचित्स्त्री रूपदर्शनाध्युपपन्ना उपसर्गयेत् पुरुषो वेति ॥ किं च—

इहलोइयाइं परलोइयाइं भीमाइं अणेगरूवाइं। अवि सुब्भि दुब्भिगन्धाइं सद्दाइं अणेगरूवाइं ॥ ९ ॥ अहियासए सया समिए फासाइं विरूवरूवाइं। अरइं रइं अभिभूय रीयइ माहणे अबहुवाई ॥ १० ॥ स जणेहिं तत्थ पुच्छिंसु एगचरावि एगया राओ। अव्वाहिए कसाइत्था पेहमाणे समाहिं अपडिन्ने ॥ ११ ॥ अयमंतरंसि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

को इत्थ? अहमंसित्ति भिक्खु आहट्टु। अयमुत्तमे से धम्मे तुसिणीए कसाइए झाइ ॥१२॥

इहलोके भवा ऐहलौकिकाः–मनुष्यकृताः के ते?–'स्पर्शाः' दुःखविशेषा दिव्यास्तैरश्चाश्च पारलौकिकास्तानुपसर्गादितान् दुःखविशेषानध्यासयति–अधिसहते, यदिवा इहैव जन्मनि ये दुःखयन्ति दण्डप्रहारादयः प्रतिकूलोपसर्गास्त ऐहलौकिकाः, तद्विपर्यस्तास्तु पारलौकिकाः, 'भीमा' भयानका 'अनेकरूपाः' नानाप्रकाराः, तानेव दर्शयति–अपि सुरभिगन्धाः–स्रक्चन्दनादयो दुर्गन्धाः–कुथितकडेवरादयः, तथा शब्दाश्चानेकरूपा वीणावेणुमृदङ्गादिजनिताः, तथा क्रमेलकरसिताद्युत्थापितास्तांश्चाविकृतमना 'अध्यासयति' अधिसहते, 'सदा' सर्वकालं सम्यगितः समितः–पञ्चभिः समितिभिर्युक्तः, तथा स्पर्शान्–दुःखविशेषानरतिं संयमे रतिं चोपभोगाभिष्वङ्गेऽभिभूय–तिरस्कृत्य 'रीयते' संयमानुष्ठाने व्रजति, 'माहणे'त्ति पूर्ववद् 'अबहुवादी' अबहुभाषी, एकद्विव्याकरणं क्वचिन्निमित्ते कृतवानिति भावः ॥ 'स' भगवानर्द्धत्रयोदश पक्षाधिकाः समा एकाकी विचरन् तत्र शून्यगृहादौ व्यवस्थितः सन् 'जनैः' लोकैः पृष्टः, तद्यथा–को भवान्? किमत्र स्थितः? कुतस्त्यो वेत्येवं पृष्टोऽपि तूष्णींभावमभजत्, तथोपपत्त्याद्या अप्येकचरा–एकाकिन एकदा–कदाचिद्रात्रावह्नि वा पप्रच्छुः, अव्याहृते च भगवता कषायिताः ततो ज्ञानावृतदृष्टयो दण्डमुष्ट्यादिताडनतोऽनार्यत्वमाचरन्ति, भगवांस्तु तत्समाधिं प्रेक्षमाणो धर्म्मध्यानोपगतचित्तः सन् सम्यक्तितिक्षते, किंभूतः?—'अप्रतिज्ञो' नास्य वैरनिर्यातनप्रतिज्ञा विद्यत इत्यप्रतिज्ञः॥ कथं ते पप्रच्छुरिति दर्शयितुमाह–अयमन्तः–मध्ये कोऽत्र व्यवस्थितः?, एवं सङ्केतागता दुश्चारिणः पृच्छन्ति कर्म्मकरादयो वा, तत्र नित्यवासिनो दुष्प्रणिहितमानसाः पृच्छन्ति, तत्र चैवं पृच्छतामेषां भगवान्–तूष्णीभावमेव भजते, क्वचिद्बहुतरदोषापनयनाय जल्पत्यपि, कथमिति दर्शयति–अहं भिक्षुरस्मीति, एवमुक्ते यदि तेऽवधारयन्ति ततस्तिष्ठत्येव, अथाभिप्रेतार्थव्याघातात् कषायिता मोहान्धाः साम्प्रतेक्षितयैवं ब्रूयुः, यथा–तूष्णमस्मात्स्थानान्निर्गच्छ, ततो भगवानचियत्तावग्रह इतिकृत्वा निर्गच्छत्येव, यदिवा न निर्गच्छत्येव भगवान् किंतु सोऽयमुत्तमः प्रधानो धर्म्म आचार इतिकृत्वा स कषायितेऽपि तस्मिन् गृहस्थे तूष्णीभावव्यवस्थितो यद्भविष्यत्तया ध्यायत्येव–न ध्यानान्मनाग्व्यवचलते ॥ किं च—

जंसिप्पेगे पवेयन्ति सिसिरे मारुए पवायन्ते। तंसिप्पेगे अणगारा हिमवाए निवायमेसन्ति ॥ १३ ॥ संघाडीओ पवेसिस्सामो एहा य समादहमाणा। पिहिया व सक्खामो अइदुक्खे हिमगसंफासा ॥ १४ ॥ तंसि भगवं अपडिन्ने अहे विगडे अहीयासए। दविए निक्खम्म एगया राओ ठाइए भगवं समियाए ॥ १५ ॥ एस विही अणुक्कन्तो माहणेण मईमया। बहुसो अपडिण्णेण भगवया एवं रीयन्ति ॥ १६ ॥ त्तिबेमि ॥ नवमस्य द्वितीय उद्देशकः ९–२ ॥

यस्मिन् शिशिरादावप्येके त्वक्त्राणाभावतया 'प्रवेपन्ते' दन्तवीणादिसमन्विताः कम्पन्ते, यदिवा 'प्रवेदयन्ति' शीतजनितं दुःखस्पर्शमनुभवन्ति, आर्त्तध्यानवशगा भवन्तीत्यर्थः, तस्मिंश्च शिशिरे हिमकणिनि मारुते च प्रवाति सत्येके न सर्वे 'अनगाराः' तीर्थिकप्रव्रजिता हिमवाते सति शीतपीडितास्तदपनोदाय पावकं प्रज्वालयन्ति–अङ्गारशकटिकामन्वेषयन्ति, प्रावारादिकं याचन्ते, यदिवाऽनगारा इति–प्रार्श्वनाथतीर्थप्रव्रजिता गच्छवासिन एव शीतार्दिता निवातमेषन्ति–यद्गृहशालादिकावसतीर्वातायनादिरहिताः प्रार्थयन्ति ॥ किं च–इह सङ्घाटीशब्देन शीतापनोदक्षमं कल्पद्वयं त्रयं वा गृह्यते, ताः सङ्घाटीः शीतार्दिता वयं प्रवेक्ष्यामः, एवं शीतार्दिता अनगारा अपि विदधति, तीर्थिकप्रव्रजितास्त्वेधाः–समिधः काष्ठानीतियावद् एताश्च समादहन्तः शीतस्पर्शं सोढुं शक्ष्यामः, तथा संघाट्या वा पिहिताः–स्थगिताः कम्बलाद्यावृतशरीरा इति, किमर्थमेतत्कुर्वन्तीति दर्शयति–यतोऽतिदुःखमेतद्–अतिदुःसहमेतद्यदुत हिमसंस्पर्शाः–शीतस्पर्शवेदना दुःखेन सह्यन्त इतियावत् ॥ तदेवमेवंभूते शिशिरे यथोक्तानुष्ठानवत्सु च स्वयूथ्येतरेष्वनगारेषु यद्भगवान् व्यधात्तद्दर्शयितुमाह—'तस्मिन्' एवंभूते शिशिरे हिमवाते शीतस्पर्शे च सर्वकषे 'भगवान्' ऐश्वर्यादिगुणोपेतस्तं शीतस्पर्शमध्यासयति–अधिसहते, किंभूतोऽसौ?—'अप्रतिज्ञो' न विद्यते निवातवसतिप्रार्थनादिका प्रतिज्ञा यस्य स तथा, क्वाध्यासयति?—'अधो विकटे' अधः–कुड्यादिरहिते छन्नेऽप्युपरि तदभावेऽपि चेति, पुनरपि विशिनष्टि–रागद्वेषविरहाद्द्रव्यभूतः कर्म्मग्रन्थिद्रावणाद्वा द्रवः–संयमः स विद्यते यस्यासौ द्रविकः, स च तथाऽध्यासयन् यद्यत्यन्तं शीतेन बाध्यते ततस्तस्मात् छन्नान्निष्क्रम्य बहिरेकदा–रात्रौ मुहूर्त्तमात्रं स्थित्वा पुनः प्रविश्य स भगवान् शमितया सम्यग्वा समतया वा व्यवस्थितः सन् तं शीतस्पर्शं रासभदृष्टान्तेन सोढुं शक्नोति–अधिसहत इति ॥ एतदेवोद्देशकार्थमुपसंजिहीर्षु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राह–एस विही इत्याद्यनन्तरोद्देशकवन्नेयमिति । इतिब्रवीमीतिशब्दौ पूर्ववद् । उपध्यानश्रुतस्य द्वितीयोद्देशकः परिसमाप्त इति ॥

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके भगवतः शय्याः प्रतिपादिताः, तासु च व्यवस्थितेन ये यथोपसर्गाः परीषहाश्च सोढास्तत्प्रतिपादनार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

तणफासे सीयफासे य तेउफासे य दंसमसगे य । अहियासए सया समिए फासाइं विरूवरूवाइं ॥ १ ॥ अह दुच्चरलाढमचारी वज्जभूमिं च सुब्भभूमिं च । पंतं सिज्जं सेविंसु आसणगाणि चेव पंताणि ॥ २ ॥ लाढेहिं तस्सुवसग्गा बहवे जाणवया लूसिंसु । अह लूहदेसिए भत्ते कुक्कुरा तत्थ हिंसिंसु निवइंसु ॥ ३ ॥ अप्पे जणे निवारेइ लूसणए सुणए दसमाणे । छुच्छुकारिंति आहंसु समणं कुक्कुरा दसंतुत्ति ॥ ४ ॥

तृणानां–कुशादीनां स्पर्शास्तृणस्पर्शाः तथा शीतस्पर्शाः तथा तेजःस्पर्शा–उष्णस्पर्शाश्चातापनादिकाले आसन् यदिवा गच्छतः किल भगवतस्तेजःकाय एवासीत्, तथा दंशमशकादयश्च, एतान् तृणस्पर्शादीन् 'विरूपरूपान्' नानाभूतान्

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३१० ॥

भगवानध्यासयति, सम्यगितः–सम्यग्भावं गतः समितिभिः समितो वेति ॥ किं च—'अथ' आनन्तर्ये दुःखेन चर्यतेऽस्मिन्निति दुश्चरः स चासौ लाढश्च–जनपदविशेषो दुश्चरलाढस्तं चीर्णवान्–विहृतवान्, स च द्विरूपो–वज्रभूमिः शुभ्रभूमिश्च, तं द्विरूपमपि विहृतवान्, तत्र च प्रान्तां 'शय्यां' वसतिं शून्यगृहादिकामनेकोपद्रवोपद्रुता सेवितवान्, तथा प्रान्तानि चासनानि–पांशूत्करशर्करालोष्टाद्युपचितानि च काष्ठानि च दुर्घटितान्यासेवितवानिति ॥ किं च–लाढा नाम जनपदविशेषास्तेषु च द्विरूपेष्वपि लाढेषु 'तस्य' भगवतो बहव उपसर्गाः प्रायशः प्रतिकूला आक्रोशश्वभक्षणादय आसन्, तानेव दर्शयति–जनपदे भवा जानपदा–अनार्याऽऽचारिणो लोकाः ते भगवन्तं लूषितवन्तो–दन्तभक्षणोल्मुकदण्डप्रहारादिभिर्जिहिंसुः, अथशब्दोऽपिशब्दार्थे, स चैवं द्रष्टव्यः, भक्तमपि तत्र 'रूक्षदेश्यं' रूक्षकल्पमन्तप्रान्तमितियावत्, ते चानार्यतया प्रकृतिक्रोधनाः कर्पासाद्यभावत्वाच्च तृणप्रावरणाः सन्तो भगवति विरूपमाचरन्ति, तथा तत्र 'कुक्कुराः' श्वानस्ते च जिहिंसुः, उपरि च निपेतुरिति ॥ किं च—'अल्पः' स्तोकः स जनो यदि परं सहस्राणामेको यदिवा नास्त्येवासाविति यस्तान् शुनो लूषकान् दशतो 'निवारयति' निषेधयति, अपि तु दण्डप्रहारादिभिर्भगवन्तं हत्वा तत्प्रेरणाय सीत्कुर्वन्ति, कथं नामैनं श्रमणं कुक्कुराः श्वानो दशन्तु–भक्षयन्तु ?, तत्र चैवंविधे जनपदे भगवान् षण्मासावधिं कालं स्थितवानिति ॥ किं च—

एलिक्खए जणा भुज्जो बहवे वज्जभूमि फरुसासी । लट्ठिं गहाय नालियं समणा तत्थ य विहरिंसु ॥ ५ ॥ एवंपि तत्थ विहरन्ता पुट्ठपुव्वा अहेसि सुणिएहिं । संलुञ्चमाणा सुणएहिं दुच्चराणि तत्थ लाढेहिं ॥ ६ ॥ निहाय दण्डं पाणेहिं तं कायं वोसज्जमणगारे । अह गामकण्टए भगवन्ते अहिआसए अभिसमिच्चा ॥ ७ ॥ नागो संगामसीसे वा पारए तत्थ से महावीरे । एवंपि तत्थ लाढेहिं अलद्धपुव्वोवि एगया गामो ॥ ८ ॥

उपधा० ९ उद्देशकः ३

॥ ३१० ॥

'इदृक्षः' पूर्वोक्तस्वभावो यत्र जनस्तं तथाभूतं जनपदं भगवान् 'भूयः' पौनःपुन्येन विहृतवान्, तस्यां च वज्रभूमौ बहवो जनाः परुषाशिनो–रूक्षाशिनो रूक्षाशितया च प्रकृतिक्रोधनास्ततो यतिरूपमुपलभ्य कदर्थयन्ति, ततस्तत्रान्ये श्रमणाः शाक्यादयो यष्टिं–देहप्रमाणां चतुरङ्गुलाधिकप्रमाणां वा नालिकां गृहीत्वा स्वादिनिषेधनाय विजह्रुरिति ॥ किं च–एवमपि यष्ट्यादिकया सामग्र्या श्रमणा विहरन्तः 'स्पृष्टपूर्वा' आरब्धपूर्वाः स्वभिरासन्, तथा 'संलुच्यमाना' इतश्चेतश्च भक्ष्यमाणाः स्वभिरासन्, दुर्निवारत्वात्तेषां, 'तत्र' तेषु लाढेष्वार्यलोकानां दुःखेन चर्यन्त इति दुश्चराणि–ग्रामादीनीति ॥ तदेवंभूतेष्वपि लाढेषु कथं भगवान् विहृतवानिति दर्शयितुमाह–प्राणिषु यो दण्डनादण्डो–मनोवाक्कायादिकस्तं भगवान् 'निधाय' त्यक्त्वा, तथा तच्छरीरमप्यनगारो व्युत्सृज्याथ 'ग्रामकण्टकान्' नीचजनरूक्षालापानपि भगवांस्तांस्तान् सम्यक्करणतया निर्जरामभिसमेत्य–ज्ञात्वाऽध्यासयति–अधिसहते ॥ कथमधिसहत इति दृष्टान्तद्वारेण दर्शयितुमाह—'नागो'हस्ती य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थाऽसौ संग्राममूर्द्धनि परानीकं जित्वा तत्पारगो भवति, एवं भगवानपि महावीरस्तत्र लाढेषु परीषहानीकं विजित्य पारगोऽभूत्, किं च-'तत्र' लाढेषु विरलत्वाद्ग्रामाणां क्वचिदेकदा वासायालब्धपूर्वो ग्रामोऽपि भगवता ॥ किं च—

उवसंकमन्तमपडिन्नं गामंतियम्मि अप्पत्तं । पडिनिक्खमित्तु लूसिंसु एयाओ परं पलेहित्ति ॥ ९ ॥ हयपुव्वो तत्थ दण्डेण अदुवा मुट्ठिणा अदु कुन्तफलेण । अदु लेलुणा कवालेण हन्ता हन्ता बहवे कन्दिंसु ॥ १० ॥ मंसाणि छिन्नपुव्वाणि उट्ठुंभिया एगया कायं । परीसहाइं लुंचिंसु अदुवा पंसुणा उवकरिंसु ॥ ११ ॥ उच्चालइय निहणिंसु अदुवा आसणाउ खलइंसु । वोसट्ठकायपणयाऽऽसी दुक्खसहे भगवं अपडिन्ने ॥ १२ ॥

'उपसङ्क्रामन्तं' भिक्षायै वासाय वा गच्छन्तं, किंभूतम्?—'अप्रतिज्ञं' नियतनिवासादिप्रतिज्ञारहितं ग्रामाभ्यन्तरं प्राप्तमप्राप्तमपि तस्माद्ग्रामात्प्रतिनिर्गत्य ते जना भगवन्तमलूषिषुः, एतदुक्तं भवति-इतोऽपि स्थानात्परं दूरतरं स्थानं 'पर्येहि' गच्छेति ॥ किं च-तत्र ग्रामादेर्बहिर्व्यवस्थितः पूर्वं हतो हतपूर्वः, केन?-दण्डेनाथवा मुष्टिनाऽथवा कुन्तादिफलेनाथवा लेष्टुना कपालेन-घटखर्पराद्दिना हत्वा हत्वा बहवोऽनार्याश्चक्रन्दुः-पश्यत यूयं किंभूतोऽयमित्येवं कलकलं चक्रुः ॥ किं च-मांसानि च तत्र भगवतश्छिन्नपूर्वाणि एकदा कायमवष्टभ्य-आक्रम्य तथा नानाप्रकाराः प्रतिकूलपरीषहाश्च भगवन्तमलुञ्चिषुः, अथवा पांसुनाऽवकीर्णवन्त इति ॥ किं च-भगवन्तमूर्ध्वमुत्क्षिप्य भूमौ 'निहतवन्तः' क्षिप्तवन्तः, अथवा 'आसनात्' गोदोहिकोत्कुटुकासनवीरासनादिकात् 'स्खलितवन्तो' निपातितवन्तः, भगवांस्तु पुनर्व्युत्सृष्टकायः परीषहसहनं प्रति प्रणत आसीत्, परीषहोपसर्गकृतं दुःखं सहत इति दुःखसहो भगवान्, नास्य दुःखचिकित्साप्रतिज्ञा विद्यत इत्यप्रतिज्ञः ॥ कथं दुःखसहो भगवानित्येतद्दृष्टान्तद्वारेण दर्शयितुमाह—

सूरो सङ्गामसीसे वा संवुडे तत्थ से महावीरे । पडिसेवमाणे फरुसाइं अचले भगवं रीयित्था ॥ १३ ॥ एस विही अणुक्कन्तो० जाव रीयं ॥ १४ ॥ तिबेमि ९-३ ॥

यथा हि संग्रामशिरसि 'शूरः' अक्षोभ्यः परैः कुन्तादिभिर्भिद्यमानोऽपि वर्म्मणा संवृताङ्गो न भङ्गमुपयातीति, एवं स भगवान्महावीरः 'तत्र' लाढादिजनपदे परीषहानीकतुद्यमानोऽपि प्रतिसेवमानश्च 'परुषान्' दुःखविशेषान् मेरुरिवाचलो-निष्प्रकम्पो धृत्या संवृताङ्गो भगवान् 'रीयते स्म' ज्ञानदर्शनचारित्रात्मके मोक्षाध्वनि पराक्रमते स्मेति ॥ उद्देशकार्थमुपसंजिहीर्षुराह-'एस विही'त्यादि पूर्ववद् । उपधानश्रुताध्ययनस्य तृतीयोद्देशकः परिसमाप्तः ॥

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशके भगवतः परीषहोपसर्गाधिसहनं प्रतिपादितं, तदिहापि रोगातङ्कपीडाचिकित्साव्युदासेन सम्यगधिसहते तदुत्सन्नौ च नितरां तपश्चरणायोद्यच्छतीत्येतत्प्रतिपाद्यते, तदनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

ओमोयरियं चाएइ अपुट्ठेऽवि भगवं रोगेहिं । पुट्ठे वा अपुट्ठे वा नो से साइज्जई तइच्छं ॥ १ ॥ संसोहणं च वमणं च गायब्भंगण च सिणाणं च । संबाहणं च न से कप्पे दन्तपक्खालणं च परिन्नाए ॥ २ ॥ विरए गामधम्मेहिं रीयइ माहणे अबहुवाई । सिसिरंमि एगया भगवं छायाए झाइ आसीय ॥ ३ ॥ आयावइ य गिम्हाणं अच्छइ उक्कुडुए अभित्तावे । अदु जाव इत्थ लूहेणं ओयणमंथुकुम्मासेणं ॥ ४ ॥

अपि शीतोष्णदंशमशकाक्रोशताडनाद्याः शक्याः परीषहाः सोढुं न पुनरवमोदरतां, भगवांस्तु पुना रोगैरस्पृष्टोऽपि वातादिक्षोभाभावेऽप्यवमौदर्यं न्यूनोदरतां शक्नोति कर्तुं, लोको हि रोगैरभिद्रुतः संस्तदुपशमनायावमोदरतां विधत्ते भगवांस्तु तदभावेऽपि विधत्त इत्यपिशब्दार्थः, अथवाऽस्पृष्टोऽपि कासश्वासादिभिर्द्रव्यरोगैः अपिशब्दात्स्पृष्टोऽप्यसद्वेदनीयादिभिर्भावरोगैर्न्यूनोदरतां करोति, अथ किं द्रव्यरोगातङ्का भगवतो न प्रादुष्यन्ति येन भावरोगैः स्पृष्ट इत्युक्तं?, तदुच्यते, भगवतो हि न प्राकृतस्येव देहजाः कासश्वासादयो भवन्ति, आगन्तुकास्तु शस्त्रप्रहारजा भवेयुः, इत्येतदेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शयति–स च भगवान् स्पृष्टो वा स्वभक्षणादिभिरस्पृष्टो वा कासश्वासादिभिर्नासौ चिकित्सामभिलषति, न द्रव्यौषधाद्युपयोगतः पीडोपशमं प्रार्थयतीति॥ एतदेव दर्शयितुमाह–गात्रस्य सम्यक् शोधनं संशोधनं–विरेचनं निःसोत्रादिभिः तथा वमनं मदनफलादिभिः, चशब्द उत्तरपदसमुच्चयार्थो, गात्राभ्यङ्गनं च सहस्रपाकतैलादिभिः स्नानं चोद्वर्त्तनादिभिः संबाधनं च हस्तपादादिभिस्तस्य–भगवतो न कल्पते, तथा सर्वमेव शरीरमशुच्यात्मकमित्येवं 'परिज्ञाय' ज्ञात्वा दन्तकाष्ठादिभिर्दन्तप्रक्षालनं च न कल्पत इति॥ किं च–'विरतो' निवृत्तः केभ्यो?–'ग्रामधर्मेभ्यो' यथास्वमिन्द्रियाणां शब्दादिभ्यो विषयेभ्यो 'रीयते' संयमानुष्ठाने पराक्रमते, 'माहणे'त्ति, किंभूतो भगवान्? असावबहुवादी, सकृद्व्याकरणभावाद्बहुशब्दोपादानम्, अन्यथा हि अवादीत्येव ब्रूयात्, तथैकदा शिशिरसमये स भगवांश्छायायां धर्म्मशुक्लध्यानध्याय्यासीच्चेति॥ किं च–सुब्व्यत्ययेन सप्तम्यर्थे षष्ठी, ग्रीष्मेष्वातापयति, कथमिति दर्शयति–तिष्ठत्युत्कुटुकासनोऽभितापं–तापाभिमुखमिति, 'अथ' आनन्तर्ये धर्म्माधारं देहं यापयति स्म रूक्षेण–स्नेहरहितेन केन?–'ओदनमन्थुकुल्माषेण' ओदनं च–कोद्रवौदनादि मन्थु च–बदरचूर्णादिकं कुल्माषाश्च–माषविशेषा एवोत्तरापथे धान्यविशेषभूताः पर्युषितमाषा वा सिद्धमाषा वा ओदनमन्थुकुल्माषमिति समाहारद्वन्द्वः तेनात्मानं यापयतीति सम्बन्ध इति॥ एतदेव कालावधिविशेषणतो दर्शयितुमाह—

आ. सू. ५२

एयाणि तिन्नि पडिसेवे अट्ठ मासे अ जावयं भगवं। आपे इत्थ एगया भगव अद्धमासं अदुवा मासंपि ॥ ५ ॥ अवि साहिए दुवे मासे छप्पि मासे अदुवा विहरित्था। राओवरायं अपडिन्ने अन्नगिलायमेगया भुञ्जे ॥ ६ ॥ छट्ठेण एगया भुञ्जे अदुवा अट्ठमेण दसमेणं। दुवालसमेण एगया भुञ्जे पेहमाणे समाहिं अपडिन्ने ॥७॥ णच्चा णं से महावीरे नोऽवियं पावगं सयमकासी। अन्नेहिं वा ण कारित्था कीरंतंपि नाणुजाणित्था ॥ ८ ॥

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३१३ ॥

उपधा० ९

उद्देशकः४

'एतानि' ओदनादीन्यनन्तरोक्तानि प्रतिसेवते, तानि च समाहारद्वन्द्वेन तिरोहितावयवसमुदायप्रधानेन निर्देशात्कस्यचिन्मन्दबुद्धेः स्यादारेका यथा–त्रीण्यपि समुदितानि प्रतिसेवत इति, अतस्तद्व्युदासाय त्रीणीत्यनया सङ्ख्यया निर्देश इति, त्रीणि समस्तानि व्यस्तानि वा यथालाभं प्रतिसेवत इति, कियन्तं कालमिति दर्शयति–अष्टौ मासान् ऋतुबद्धसंज्ञकानात्मानं अयापयद्–वर्त्तितवान् भगवानिति, तथा पानमप्यर्द्धमासमथवा मासं भगवान् पीतवान्॥ अपि च–मासद्वयमपि साधिकम् अथवा षडपि मासान् साधिकान् भगवान्पानकमपीत्वाऽपि 'रात्रोपरात्र'मित्यहर्निशं विहृतवान्, किंभूतः?—'अप्रतिज्ञः' पानाभ्युपगमरहित इत्यर्थः, तथा 'अन्नगिलाय'न्ति पर्युषितं तदेकदा भुक्तवानिति॥ किं च–षष्ठेनैकदा भुङ्क्ते, षष्ठं हि नामैकस्मिन्नहन्येकभक्तं विधाय पुनर्दिनद्वयमभुक्त्वा चतुर्थेऽह्नयेकभक्तमेव विधत्ते, ततश्चाद्यन्तयोरेकभक्तदिनयोर्भक्तद्वयं मध्यदिवसयोश्च भक्तचतुष्टयमित्येवं षण्णां भक्तानां परित्यागात्षष्ठं भवति, एवं दिनादिवृद्ध्याऽष्टमाद्यायोज्यमिति, अथाष्टमेन दशमेनाथवा द्वादशमेनैकदा कदाचिद्भुक्तवान्, 'समाधिं' शरीरसमा-

॥ ३१३ ॥

धानं 'प्रेक्षमाणः' पर्यालोचयन् न पुनर्भगवतः कथंचिदौर्मनस्यं समुत्पद्यते, तथाऽप्रतिज्ञः–अनिदान इति॥ किं च–ज्ञात्वा हेयोपादेयं स महावीरः कर्मप्रेरणसहिष्णुर्नापि च पापकं कर्म्म स्वयमकार्षीत् न चाप्यन्यैरकारयत् न च क्रियमाणमपरैरनुज्ञातवानिति॥ किं च—

गामं पविसे नगरं वा घासमेसे कडं परट्ठाए। सुविसुद्धमेसिया भगवं आयतजोगयाए सेवित्था ॥ ९ ॥ अदु वायसा दिगिंछत्ता जे अन्ने रसेसिणो सत्ता। घासेसणाए चिट्ठन्ति सययं निवइए य पेहाए ॥ १० ॥ अदुवा माहणं च समणं वा गामपिण्डोलगं च अतिहिं वा। सोवागमूसियारिं वा कुक्कुरं वावि विट्ठियं पुरओ ॥ ११ ॥ वित्तिच्छेयं वज्जन्तो तेसिमप्पत्तियं परिहरन्तो। मन्दं परक्कमे भगवं अहिंसमाणो घासमेसित्था ॥ १२ ॥

ग्रामं नगरं वा प्रविश्य भगवान् ग्रासमन्वेषयेत्, परार्थाय कृतमित्युद्गमदोषरहितं, तथा सुविशुद्धमुत्पादनादोषरहितं, तथैषणादोषपरिहारेणैषित्वा–अन्वेष्य भगवानायतः–संयतो योगो–मनोवाक्कायलक्षणः आयतश्चासौ योगश्चायतयोगो–ज्ञानचतुष्टयेन सम्यग्योगप्रणिधानमायतयोगस्य भाव आयतयोगता तया सम्यगाहारं शुद्धं ग्रासैषणादोषपरिहारेण से-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वतवानिति ॥ किं च—अथ भिक्षां पर्यटतो भगवतः पथि वायसाः—काका 'दिगिंछ'त्ति बुभुक्षा तयाऽऽर्त्ता बुभुक्षार्त्ता ये चान्ये रसैषिणः—पानार्थिनः कपोतपारापतादयः सत्त्वाः तथा ग्रासस्यैषणार्थम्—अन्वेषणार्थं च ये तिष्ठन्ति तान् सततम्—अनवरतं निपतितान् भूमौ 'प्रेक्ष्य' दृष्ट्वा तेषां वृत्तिव्यवच्छेदं वर्जयन्मन्दमाहारार्थी पराक्रमते ॥ किं च—अथ ब्राह्मणं लाभार्थमुपस्थितं दृष्ट्वा तथा श्रमणं शाक्याजीवकपरिव्राट्तापसनिर्ग्रन्थानामन्यतमं 'ग्रामपिण्डोलक' इति भिक्षोदरभरणार्थं ग्राममाश्रितस्तुन्दपरिमृजो द्रमक इति, तथाऽतिथिं वा—आगन्तुकम् तथा श्वपाकं—चाण्डालं मार्जारीं वा कुकुरं वापि—श्वानं विविधं स्थितं 'पुरतः' अग्रतः समुपलभ्य तेषां वृत्तिच्छेदं वर्जयन् मनसो दुष्प्रणिधानं च वर्जयन् मन्दं—मनाक् तेषां त्रासमकुर्वन् भगवान् पराक्रमते, तथा परांश्च कुन्थुकादीन् जन्तून् अहिंसन् ग्रासमन्वेषितवानिति ॥ किं च—

अवि सूइयं वा सुक्कं वा सीयं पिंडं पुराणकुम्मासं । अदु बुक्कसं पुलागं वा लद्धे पिंडे अलद्धे दविए ॥ १३ ॥ अवि झाइ से महावीरे आसणत्थे अकुक्कुए झाणं । उड्ढं अहे तिरियं च पेहमाणे समाहिमपडिन्ने ॥ १४ ॥ अकसाई विगयगेही य सद्दरूवेसु अमुच्छिए झाई । छउमत्थोऽवि परक्कममाणो न पमायं सइंपि कुव्वित्था ॥ १५ ॥ सयमेव अभिसमागम्म आयतजोगमायसोहीए । अभिनिव्वुडे अमाइल्ले आवकहं भगवं समियासी ॥ १६ ॥ एस विही अणु० रीयइ ॥ १७ ॥ त्तिबेमि ९-४ ब्रह्मचर्यश्रुतस्कन्धे नवमाध्ययने चतुर्थ उद्देशकः ॥ ९ ॥

'सूइयं'त्ति दध्यादिना भक्तमार्द्रीकृतमपि तथाभूतं शुष्कं वा—वल्लचनकादि शीतपिण्डं वा—पर्युषितभक्तम् तथा 'पुराणकुल्माषं वा' बहुदिवससिद्धस्थितकुल्माषं, 'बुक्कस'ंति चिरन्तनधान्यौदनं, यदिवा पुरातनसक्तुपिण्डं, यदिवा बहुदिवससम्भृतगोरसं गोधूममण्डकं चेति, तथा 'पुलाकं' यवनिष्पावादि, तदेवम्भूतं पिण्डमवाप्य रागद्वेषविरहाद् द्रविको भगवान् तथाऽन्यस्मिन्नपि पिण्डे लब्धेऽलब्धे वा द्रविक एव भगवानिति, तथाहि—लब्धे पर्याप्ते शोभने वा नोत्कर्षं याति, नाप्यलब्धेऽपर्याप्तेऽशोभने वाऽऽत्मानमाहारदातारं वा जुगुप्सते ॥ किं च—तस्मिंस्तथाभूत आहारे लब्ध उपभुक्तेऽलब्धे चापि ध्यायति स महावीरो, दुष्प्रणिधानादिना नापध्यानं विधत्ते, किमवस्थो ध्यायतीति दर्शयति—आसनस्थः—उत्कुटुकगोदोहिकावीरासनाद्यवस्थोऽकौत्कुचः सन्—मुखविकारादिरहितो ध्यानं—धर्म्मशुक्लयोरन्यतरदारोहति, किं पुनस्तत्र ध्येयं ध्यायतीति दर्शयितुमाह—ऊर्ध्वमधस्तिर्यग्लोकस्य ये जीवपरमाण्वादिका भावा व्यवस्थितास्तान् द्रव्यपर्यायनित्यानित्यादिरूपतया ध्यायति, तथा समाधिम्—अन्तःकरणशुद्धिं च प्रेक्षमाणोऽप्रतिज्ञो ध्यायतीति ॥ किं च—न कषाय्यकषायी तदुदयापादितभ्रकुट्यादिकार्याभावात्, तथा विगता गृद्धिः—गार्ध्यं यस्यासौ विगतगृद्धिः, तथा शब्दरूपादिष्विन्द्रियार्थेष्वमूर्च्छितो ध्यायति, मनोऽनुकूलेषु न रागमुपयाति नापीतरेषु द्वेषवशगोऽभूदिति, तथा छद्मनि—ज्ञानदर्शनावरणीयमोहनीयान्तरायात्मके तिष्ठतीति छद्मस्थ इत्येवंभूतोऽपि विविधम्—अनेकप्रकारं सदनुष्ठाने पराक्रममाणो न प्रमादं—कषायादिकं सकृदपि कृतवानिति ॥ किं च—स्वयमेव—आत्मना तत्त्वमभिसमागम्य विदितसंसारस्वभावः स्वयंबुद्धः संस्तीर्थप्रवर्त्तनायोद्यतवान्, तथा चोक्तम्—"आदित्यादिर्विबुधविसरः सारमस्यां त्रिलोक्यामास्कन्दन्तं पदमनुपमं यच्छिवं त्वामुवाच। तीर्थं नाथो लघुभवभयच्छेदि तूर्णं विधत्स्वेत्येतद्वाक्यं त्वदधिगतये नो किमु स्यान्नियोगः? ॥ १ ॥" इत्यादि, कथं तीर्थप्रवर्त्तनायोद्यत इति दर्शयति—'आत्मशुद्ध्या' आत्मकर्म्मक्षयोपशमोपशमक्षयलक्षणयाऽऽयतयोगं—सुप्रणिहितं मनोवाक्कायात्मकं विधाय विषयकषायाद्युपशमादिभिर्निर्वृत्तः—शीतीभूतः, तथा अमायावी—मायारहित उपलक्षणार्थत्वादस्याक्रोधाद्यपि द्रष्टव्यं, 'यावत्कथ'मिति यावज्जीवं भगवान् पञ्चभिः समितिभिः समितः तथा तिसृभिर्गुप्तिभिर्गुप्तश्चासीदिति॥ श्रुतस्कन्धाध्ययनोद्देशकार्थमुपसंजिहीर्षुराह—एषः—अनन्तरोक्तः शस्त्रपरिज्ञादेरारभ्य योऽभिहितः सोऽनुक्रान्तः—अनुष्ठित आसेवनापरिज्ञया सेवितः, केन?—श्रीवर्द्धमानस्वामिना 'मतिमता' ज्ञानचतुष्टयान्वितेन बहुशः—अनेकशोऽप्रतिज्ञेन—अनिदानेन भगवता—ऐश्वर्यादिगुणोपेतेन, अतोऽपरोऽपि मुमुक्षुरनेनैव भगवदाचीर्णेन मोक्षप्रगुणेन पथाऽऽत्महितमाचरन् रीयते—पराक्रमते, इतिरधिकारपरिसमाप्तौ, ब्रवीमीति सुधर्म्मस्वामी जम्बूस्वामिने कथयति—सोऽहं ब्रवीमि येन मया भगवद्वदनारविन्दादर्थजातं निर्यातमवधारितमिति ॥ उक्तोऽनुगमः सूत्रालापकनिष्पन्ननिक्षेपश्च ससूत्रस्पर्शनिर्युक्तिकः, साम्प्रतं नयाः, ते च नैगमसङ्ग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूतभेदभिन्नाः सामान्यतः सप्त, ते चान्यत्र सम्मत्यादौ लक्षणतो विधानतश्च न्यक्षेणाभिहिता इति, इह पुनस्त एव ज्ञानक्रियानयान्तर्भावद्वारेण समासतः प्रो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्यन्ते, अधिकृताचाराङ्गस्य ज्ञानक्रियात्मकतयोभयरूपत्वात् ज्ञानक्रियाधीनत्वान्मोक्षस्य तदर्थं च शास्त्रप्रवृत्तेरिति भावः, अत्र च परस्परतः सव्यपेक्षावेव ज्ञानक्रियानयौ विवक्षितकार्यसिद्धयेऽलं नान्योऽन्यनिरपेक्षावित्येतत्प्रपञ्च्यते, तत्र ज्ञाननयाभिप्रायोऽयम्-यथा ज्ञानमेव प्रधानं न क्रियेति, समस्तहेयोपादेयहानोपादानप्रवृत्तेर्ज्ञानाधीनत्वात्, तथा हि-सुनिश्चितात् सम्यग्ज्ञानात्प्रवृत्तोऽर्थक्रियार्थी न विसंवाद्यते, तथा चोक्तम्-"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता। मिथ्याज्ञानात् प्रवृत्तस्य, फलासंवाददर्शनाद् ॥ १ ॥" इत्यादि, संविन्निष्ठत्वाच्च विषयव्यवस्थितीनां तत्पूर्वकसकलदुःखप्रहीणत्वाच्चान्वयव्यतिरेकदर्शनाच्च ज्ञानस्य प्राधान्यं, तथाहि-ज्ञानाभावेऽनर्थपरिहाराय प्रवर्त्तमानोऽपि तत्करोति येन नितरां पतङ्गवदनर्थेन संयुज्यते, ज्ञानसद्भावे च समस्तानप्यर्थानर्थसंशयांश्च यथाशक्तितः परिहरति, तथा चागमः -'पढमं नाणं तओ' इत्यादि, एवं तावत्क्षायोपशमिकं ज्ञानमाश्रित्योक्तं, क्षायिकमप्याश्रित्य तदेव प्रधानं, यस्माद्भगवतः प्रणतसुरासुरमुकुटकोटिवेदिकाङ्कितचरणयुगलपीठस्य भवाम्भोधितटस्थस्य प्रतिपन्नदीक्षस्य त्रिलोकवन्धोस्तपश्चरणवतोऽपि न तावदपवर्गप्राप्तिः सञ्जायते यावज्जीवाजीवाद्यखिलवस्तुपरिच्छेदरूपं घनघातिकर्म्मसंहतिक्षयात्केवलज्ञानं नोत्पन्नमित्यतो ज्ञानमेव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वादिति। अधुना क्रियानयाभिप्रायोऽभिधीयते, तद्यथा-क्रियैव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, यस्माद्दर्शितेऽपि ज्ञानेनार्थक्रियासमर्थेऽर्थे प्रमाता प्रेक्षापूर्वकारी यदि हानोपादानरूपां प्रवृत्तिक्रियां न कुर्यात् ततो ज्ञानं विफलतामियात्, तदर्थत्वात्तस्येति, यस्य हि यदर्थं प्रवृत्तिस्तत्तस्य प्रधानमितरदप्रधानमिति न्यायात्, संविदा विषयव्यवस्थानस्याप्यर्थक्रियार्थत्वात्क्रियायाः प्राधान्यम्, अन्वयव्यतिरेकावपि क्रियायां समुपलभ्येते, यतः-सम्यक्चिकित्साविधिज्ञोऽपि यथार्थौषधावाप्तावपि उपयोगक्रियारहितो नोल्लाघतामेति, तथा चोक्तम्-"शास्त्राण्यधीत्यापि भवन्ति मूर्खा, यस्तु क्रियावान् पुरुषः स विद्वान्। संचिन्त्यतामौषधमातुरं हि, किं ज्ञानमात्रेण करोत्यरोगम्? ॥ १ ॥" तथा "क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम्। यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥ १ ॥" इत्यादि, तत्क्रियायुक्तस्तु यथाऽभिलषितार्थभाग्भवत्यपि, कुत इति चेत् न हि दृष्टेऽनुपपन्नं नाम, न च सकललोकप्रत्यक्षसिद्धेऽर्थेऽन्यत्प्रमाणान्तरं मृग्यत इति, तथाऽऽमुष्मिकफलप्राप्त्यर्थिनाऽपि तपश्चरणादिका क्रियैव कर्तव्या, मौनीन्द्रं प्रवचनमप्येवमेव व्यवस्थितं, यत उक्तं-'चेइयकुलगणसङ्घे आयरियाणं च पवयण सुए य। सव्वेसुऽवि तेण कयं तवसञ्जममुज्जमन्तेणं ॥ १ ॥" इतश्चैतदेवमङ्गीकर्तव्यं, यतस्तीर्थकृदादिभिः क्रियारहितं ज्ञानमप्यफलमुक्तं, उक्तं च-'सुबहुं पि सुअमधीतं किं काहि चरणविप्पहूण(मुक्क)स्स?। अंधस्स जह पलित्ता दीवसतसहस्सकोडीवि ॥ १ ॥" इतिक्रियापूर्वकक्रियाविकलत्वात्तस्येति भावः, न केवलं क्षायोपशमिकाज्ज्ञानात्क्रिया प्रधाना, क्षायिकादपि, यतः सत्यपि जीवाजीवाद्यखिलवस्तुपरिच्छेदके ज्ञाने समुल्लसिते न व्युपरतक्रियानिवर्त्तिध्यानक्रियामन्तरेण भवधारणीयकर्म्मोच्छेदः, तदुच्छेदाच्च न मोक्षावाप्तिरित्यतो न ज्ञानं प्रधानं, चरणक्रियायां पुनरैहिकामुष्मिकफलावाप्तिरित्यतः सैव प्रधानभावमनुभवतीति, तदेवं ज्ञानमृते सम्यक्रियाया अभावः, तदभावाच्च तदर्थप्रवृत्तस्य ज्ञानस्य वैफल्यम्। एवमादीनां युक्तीनामुभयत्राप्युपलब्धेर्व्याकुलितमतिः

१ चैत्यकुलगणसङ्घे आचार्ये च प्रवचने श्रुते च। सर्वेष्वपि तेन कृतं तपःसंयमयोगयच्चता ॥ १ ॥ २ सुबहूपि श्रुतमधीतं किं करिष्यति विप्रहीणचरणस्य?। अन्धस्य यथा प्रदीप्ता दीपशतसहस्रकोट्यपि ॥ १ ॥

शिष्यः पृच्छति-किमिदानीं तत्त्वमस्तु?, आचार्य आह-नन्वभिहितमेव विस्मरणशीलो देवानांप्रियो यथा ज्ञानक्रियानयौ परस्परसव्यपेक्षौ सकलकर्म्मकन्दोच्छेदात्मकस्य मोक्षस्य कारणभूताविति, प्रदीप्तसमस्तनगरान्तर्वर्त्तिपरस्परोपकार्योपकारकभावावाप्तानाबाधस्थानौ पङ्गवन्धाविवेति, तथा चोक्तम्-"संजोयसिद्धीऐं फलं वदन्ती'त्यादि, स्वतन्त्रप्रवृत्तौ तु न विवक्षितकार्यं साधयत इत्येतच्च प्रसिद्धमेव, यथा 'हयं णाण'मित्यादि, आगमेऽपि सर्वनयोपसंहारद्वारेणायमेवार्थोऽभिहितो, यथा-'सव्वेसिंपि णयाणं बहुविहवत्तव्वयं णिसामेत्ता। तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ १ ॥ त्ति', तदेतदाचाराङ्गं ज्ञानक्रियात्मकं अधिगतसम्यक्पथानां कुश्रुतसरित्कषायश्वापकुलाकुलं प्रियविप्रयोगाप्रियसंप्रयोगाद्यनेकव्यसनोपनिपातमहावर्त्तं मिथ्यात्वपवनेरणोपस्थापितभयशोकहास्यरत्यरत्यादितरङ्गं विश्रसावेलाचितं व्याधिशतनक्रचक्रालयं महागम्भीरं भयजननं पश्यतां त्रासोत्पादकं महासंसारार्णवं साधूनामुत्तितीर्षतां तदुत्तरणसमर्थमव्याहतं यानपात्रमिति, अतो मुमुक्षुणाऽऽत्यन्तिकैकान्तिकानाबाधं शाश्वतमनन्तमजरममरमक्षयमव्याबाधमुपरतसमस्तद्वन्द्वं सम्यग्दर्शनज्ञानव्रतचरणक्रियाकलापोपेतेन परमार्थपरमकार्यमनुत्तमं मोक्षस्थानं लिप्सुना समालम्बनीयमिति तदात्मकस्य ब्रह्मचर्याख्यश्रुतस्कन्धस्य निर्वृतिकुलीनश्रीशीलाचार्येण तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति ॥ श्लोकतो ग्रन्थमानम् ॥ ९७६ ॥

१ संयोगसिद्धेः फलं वदन्ति (नैकेनचक्रेण रथः प्रयाति। अन्धश्च पङ्गुश्च वने समेत्य तौ संप्रयुक्तौ नगरं प्रविष्टौ ॥ १ ॥) २ हतं ज्ञानं क्रिया हीनं. ३ सर्वेषामपि नयानां बहुविधवक्तव्यतां निशम्य। तत्सर्वनयविशुद्धं यच्चरणगुणस्थितः साधुः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वासप्तत्यधिकेषु हि शतेषु सप्तसु गतेषु गुप्तानाम् । संवत्सरेषु मासि च भाद्रपदे शुक्लपञ्चम्याम् ॥ १ ॥
शीलाचार्येण कृता गम्भूतायां स्थितेन टीकैषा । सम्यगुपयुज्य शोध्यं मात्सर्यविनाकृतैरार्यैः ॥ २ ॥
कृत्वाऽऽचारस्य मया टीकां यत्किमपि संचितं पुण्यम् । तेनाभ्युद्यात्परगदिदं निर्वृतिमतुलां सदाचारम् ॥३॥
वर्णः पदमथ वाक्यं पद्यादि च यन्मया परित्यक्तम् । तच्छोधनीयमत्र च व्यामोहः कस्य नो भवति? ॥ ४ ॥

तत्त्वादित्यापराभिधानश्रीमच्छीलाचार्यविहिता वृत्तिर्ब्रह्मचर्यश्रुतस्कन्धस्य आचाराङ्गस्य समाप्ता ॥

इति श्रीमद्भद्रबाहुस्वामिसंदृब्धनिर्युक्तिसंकलिताचाराङ्गप्रथमश्रुतस्कन्धस्य वृत्तिः श्रीवाहरिगणिविहितसाहाय्यकेन श्रीशीलाङ्काचार्येण तत्त्वादित्यापराभिधानेन विहिताऽऽयाता संपूर्तिम् ।

॥ अर्हम् ॥

जयत्यनादिपर्यन्तमनेकगुणरत्नभृत् । न्यक्कृताशेषनीर्थेशं तीर्थं तीर्थाधिपैर्नुतम् ॥ १ ॥
नमः श्रीवैर्द्धमानाय, सदाचारविधायिने । प्रणताशेषगीर्वाणचूडारत्नार्चितांह्रये ॥ २ ॥
आचारमेरोर्गदितस्य लेशतः, प्रवक्ष्मि तच्छेषिकचूलिकागतम् ।
आरिप्सितेऽर्थे गुणवान् कृती सदा, जायेत निःशेषमशेषितक्रियः ॥ ३ ॥

उक्तो नवब्रह्मचर्याध्ययनात्मक आचारश्रुतस्कन्धः, साम्प्रतं द्वितीयोऽग्रश्रुतस्कन्धः समारभ्यते, अस्य चायमभिसम्बन्धः-उक्तं प्रागाचारपरिमाणं प्रतिपादयता, तद्यथा—"नवँबंभचेरमइओ अट्ठारसपयसहस्सिओ वेओ । हवइ य सपंचचूलो बहुबहुअयरो पयग्गेणं ॥ १ ॥" तत्राद्ये श्रुतस्कन्धे नवब्रह्मचर्याध्ययनानि प्रतिपादितानि, तेषु च न समस्तोऽपि विवक्षितोऽर्थोऽभिहितः अभिहितोऽपि सङ्क्षेपतोऽतोऽनभिहितार्थाभिधानाय सङ्क्षेपोक्तस्य च प्रपञ्चाय तदग्रभूताश्चतस्रश्चूडा उक्तानुक्तार्थसङ्ग्राहिकाः प्रतिपाद्यन्ते, तदात्मकश्च द्वितीयोऽग्रश्रुतस्कन्धः, इत्यनेन सम्बन्धेनायातस्यास्य व्याख्या प्रतन्यते, तत्र नामस्थापने अनादृत्य द्रव्याग्रनिक्षेपार्थं निर्युक्तिकृदाह—

१ °तविशेष. २ °र्नतम् ३ वीरनाथाय ४ °ङ्घये ५ नवब्रह्मचर्यमयोऽष्टादशपदसहस्रको वेदः । भवति च सपञ्चचूलो बहुबहुतरः पदाग्रेण ॥ १ ॥

दव्वोगाहण आएस काल कमगणणसंचए भावे । अग्गं भावे उ पहाणयम्मि उवगारओ तिविहं ॥ ४ ॥

तत्र द्रव्याग्रं द्विधा-आगमतो नोआगमत इत्यादि भणित्वा व्यतिरिक्तं त्रिधा-सचित्ताचित्तमिश्रद्रव्यस्य वृक्षकुन्तादेर्यदग्रमिति, अवगाहनाग्रं यद्यस्य द्रव्यस्याधस्तादवगाढं तदवगाहनाग्रं, तद्यथा-मनुष्यक्षेत्रे मन्दरवर्जानां पर्वतानामुच्चत्वचतुर्भागो भूमाववगाढ इति मन्दराणां तु योजनसहस्रमिति, आदेशाग्रम् आदिश्यत इत्यादेशः-व्यापारनियोजना, अग्रशब्दोऽत्र परिमाणवाची, ततश्च यत्र परिमितानामादेशो दीयते तदादेशाग्रं, तद्यथा-त्रिभिः पुरुषैः कर्म कारयति तान् वा भोजयतीति, कालाग्रम्-अधिकमासकः, यदिवाऽग्रशब्दः परिमाणवाचकस्तत्रातीतकालोऽनादिरनागतोऽनन्तः सर्वाद्धा वा, क्रमाग्रं तु क्रमेण-परिपाट्याऽग्रं क्रमाग्रं, एतद् द्रव्यादि चतुर्विधं, तत्र द्रव्याग्रमेकाणुकाद् द्व्यणुकं द्व्यणुकाद् त्र्यणुकमित्येवमादि । क्षेत्राग्रम्-एकप्रदेशावगाढाद् द्विप्रदेशावगाढं, द्विप्रदेशावगाढात्रिप्रदेशावगाढमित्यादि । कालाग्रमेकसमयस्थितिकाद् द्विसमयस्थितिकं द्विसमयस्थितिकात्रिसमयस्थितिकमित्यादि, भावाग्रमेकगुणकृष्णाद् द्विगुणकृष्णं द्विगुणकृष्णात्रिगुणकृष्णमित्यादि, गणनाग्रं तु सङ्ख्याधर्मस्थानात्स्थानं, दशगुणमित्यर्थः, तद्यथा-एको दश शतं सहस्रमित्यादि, सञ्चयाग्रं तु सञ्चितस्य द्रव्यस्य यदुपरि तत्सञ्चयाग्रं, यथा तान्द्योपस्करस्य सञ्चितस्योपरि शङ्खः, भावाग्रं तु त्रिविधं-प्रधानाग्रं १ प्रभूताग्रम् २ उपकाराग्रं ३ च, तत्र प्रधानाग्रं सचित्तादि त्रिधा, सचित्तमपि द्विपदादिभेदात्त्रिधैव, तत्र द्विपदेषु तीर्थकरश्चतुष्पदेषु सिंहः अपदेषु कल्पवृक्षः, अचित्तं वैडूर्यादि मिश्रं तीर्थकर एवालङ्कृत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, प्रभूताग्रं त्वापेक्षिकं, तद्यथा—"जीवा पोग्गल समया दव्व पएसा य पज्जवा चेव । थोवाऽणंताणंता विसेसमहिया दुवे णंता ॥ १ ॥" अत्र च यथोत्तरमग्रं, पर्यायाग्रं तु सर्वाग्रमिति, उपकाराग्रं तु यत्पूर्वोक्तस्य विस्तरतोऽनुक्तस्य च प्रतिपादनादुपकारे वर्त्तते तद् यथा दशवैकालिकस्य चूडे, अयमेव वा श्रुतस्कन्ध आचारस्येत्यतोऽत्रोपकाराग्रेणाधिकार इति ॥ आह च निर्युक्तिकारः—

उवगारेण उ पगयं आयारस्सेव उवरिमाइं तु । रुक्खस्स य पव्वयस्स य जह अग्गाइं तहेयाइं ॥ ५ ॥

उपकाराग्रेणात्र प्रकृतम्—अधिकारः, यस्मादेतान्याचारस्यैवोपरि वर्त्तन्ते, तदुक्तविशेषवादितया तत्संबद्धानि, यथा वृक्ष-पर्वतादेरग्राणीति । शेषाणि त्वग्राणि शिष्यमतिव्युत्पत्त्यर्थमस्य चोपकाराग्रस्य सुखप्रतिपत्त्यर्थमिति, तदुक्तम्—"उच्चारि-अस्स सरिसं जं केणइ तं परूवए विहिणा । जेणऽहिगारो तंमि उ परूविए होइ सुहगेज्झं ॥ १ ॥" तत्रेदमिदानीं वाच्यं—केनैतानि निर्यूढानि ? किमर्थं ? कुतो वेति ?, अत आह—

थेरेहिंऽणुग्गहट्ठा सीसहिअं होउ पागडत्थं च । आयाराओ अत्थो आयारग्गेसु पविभत्तो ॥ ६ ॥

'स्थविरैः' श्रुतवृद्धैश्चतुर्दशपूर्वविद्भिर्निर्यूढानीति, किमर्थं ?, शिष्यहितं भवत्वितिकृत्वाऽनुग्रहार्थं, तथाऽप्रकटोऽर्थः

---

१ जीवाः पुद्गलाः समयाः (त्रैकालिकाः) द्रव्याणि प्रदेशाश्च पर्यवाश्चैव । स्तोकाः अनन्तगुणा अनन्तगुणा विशेषाधिकाः द्वयेऽनन्ताः (अनन्तगुणाः अनन्तगुणाः) ॥ १ ॥ २ गाथायां पज्जवा इत्यनेनोपात्तं. ३ उच्चारितस्य सदृशं यत्केनचित् तत् प्ररूप्यते विधिना । येनाधिकारस्तस्मिंस्तु प्ररूपिते भवति सुखग्राह्यम् ॥ १ ॥

प्रकटो यथा स्यादित्येवमर्थं च, कुतो निर्यूढानि ?, आचारात्सकाशात्सप्तमस्तोऽप्यर्थ आचाराग्रेषु विस्तरेण प्रविभक्त इति ॥ साम्प्रतं यद्यस्मान्निर्यूढं तद्विभागेनाचष्ट इति—

विइअस्स य पंचमए अट्ठमगस्स बिइयंमि उद्देसे । भणिओ पिंडो सिज्जा वत्थं पाउग्गहो चेव ॥ ७ ॥
पंचमगस्स चउत्थे इरिया वण्णिज्जई समासेणं । छट्ठस्स य पंचमए भासज्जायं वियाणाहि ॥ ८ ॥
सत्तिक्कगाणि सत्तवि निज्जूढाइं महापरिन्नाओ । सत्थपरिन्ना भावण निज्जूढा उ धुय विमुत्ती ॥ ९ ॥
आयारपकप्पो पुण पच्चक्खाणस्स तइयवत्थूओ । आयारनामधिज्जा वीसइमा पाहुडच्छेया ॥ १० ॥

ब्रह्मचर्याध्ययनानां द्वितीयमध्ययनं लोकविजयाख्यं, तत्र पञ्चमोद्देशक इदं सूत्रम्—"सव्वामगंधं परिन्नाय निरा-मगंधो परिव्वए" तत्रामग्रहणेन हननाद्यास्तिस्रः कोट्यो गृहीता गन्धोपादानादपरास्तिस्रः, एताः षडप्यविशोधिकोट्यो गृहीताः, ताश्चेमाः—स्वतो हन्ति घातयति घ्नन्तमन्यमनुजानीते, तथा पचति पाचयति पचन्त (मन्य) मनुजानीत इति, तथा तत्रैव सूत्रम्—"अदिस्समाणो कयविक्कएहिं"ति, अनेनापि तिस्रो—विशोधिकोट्यो गृहीताः, ताश्चेमाः—क्रीणाति क्रापयति क्रीणन्तमन्यमनुजानीते, तथाऽष्टमस्य—विमोहाध्ययनस्य द्वितीयोद्देशक इदं सूत्रम्—"भिक्खू परक्कमेज्जा चिट्ठेज्ज वा निसीएज्ज वा तुयट्टिज्ज वा सुसाणंसि वे"त्यादि यावद् "बहिया विहरिज्जा तं भिक्खुं गाहावती उवसंकमित्तु वएज्जा-अहमाउसंतो समणा ! तुब्भट्ठाए असणं वा पाणं वा खाइमं वा साइमं वा पाणाइं भूयाइं जीवाइं सत्ताइं समारब्भ समुद्दिस्स कीयं पामिच्चं"मित्यादि, एतानि सर्वाण्यपि सूत्राण्याश्रित्यैकादश पिण्डैषणा निर्यूढाः, तथा तस्मिन्नेव द्वितीयाध्ययने पञ्चमोद्देशके सूत्रम्—"से वत्थं पडिग्गहं कंबलं पायपुंछणं उग्गहं च कडासणं"मिति, तत्र वस्त्रकम्बलपादपुञ्छनग्रहणाद् वस्त्रैषणा निर्यूढा, पतद्ग्रहपदात् पात्रैषणा निर्यूढा, अवग्रह इत्येतस्मादवग्रहप्रतिमा निर्यूढा, कटासनमित्येतस्माच्छय्येति, तथा पञ्चमाध्ययनावन्त्याख्यस्य चतुर्थोद्देशके सूत्रम्—"गामाणुगामं दूइज्जमाणस्स दुज्जायं दुप्परिक्कंतं" इत्यादिनेर्या सङ्क्षेपेण व्यावर्णितेत्यत एव ईर्याध्ययनं निर्यूढम्, तथा षष्ठाध्ययनस्य धूताख्यस्य पञ्चमोद्देशके सूत्रम्—"आइक्खइ विहयइ किट्टइ धम्मकामी"त्येतस्माद्भाषाजाताध्ययनमाकृष्टमित्येवं विजानीयास्त्वमिति । तथा महापरिज्ञाध्ययने सप्तोद्देशकास्तेभ्यः प्रत्येकं सप्तापि सप्तैकका निर्यूढाः, तथा शस्त्रपरिज्ञाध्ययनाद्भावना निर्यूढा, तथा धूताध्ययनस्य द्वितीयचतुर्थोद्देशकाभ्यां विमुक्त्यध्ययनं निर्यूढमिति, तथा 'आचारप्रकल्पः'निशीथः, स च प्रत्याख्यानपूर्वस्य यत्तृतीयं वस्तु तस्यापि यदाचाराख्यं विंशतितमं प्राभृतं ततो निर्यूढ इति ॥ ब्रह्मचर्याध्ययनेभ्य आचाराग्राणि निर्यूढान्यतो निर्यूहनाधिकारादेव तान्यपि शस्त्रपरिज्ञाध्ययनान्निर्यूढानीति दर्शयति—

अव्वोगडो उ भणिओ सत्थपरिन्नाय दंडनिक्खेवो । सो पुण विभज्जमाणो तहा तहा होइ नायव्वो ॥ ११ ॥

'अव्याकृतः' अव्यक्तोऽपरिस्फुट इतियावत् 'भणितः' प्रतिपादितः, कोऽसौ?—'दण्डनिक्षेपः' दण्डः—प्राणिपीडालक्षण-स्तस्य निक्षेपः—परित्यागः संयम इत्यर्थः, स च शस्त्रपरिज्ञायामव्यक्तोऽभिहितो यतस्तेन पुनः विभज्यमानः अष्टस्वप्य-ध्ययनेष्वसावेव तथा तथा—अनेकप्रकारो ज्ञातव्यो भवतीति ॥ कथं पुनरयं संयमः सङ्क्षेपाभिहितो विस्तार्यते ? इत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगविहो पुण सो संजमुत्ति अज्झत्थ बाहिरो य दुहा । मणवयणकाय तिविहो चउव्विहो चाउजामो उ॥१२॥
पंच य महव्वयाइं तु पंचहा राइभोअणे छट्ठा । सीलंगसहस्साणि य आयारस्सप्पवीभागा ॥ १३ ॥

अविरतिनिवृत्तिलक्षण एकविधः संयमः, स एवाध्यात्मिकबाह्यभेदाद् द्विधा भवति, पुनर्मनोवाक्काययोगभेदात्त्रिविधः, स एव चतुर्यामभेदाच्चतुर्धा, पुनः पञ्चमहाव्रतभेदात्पञ्चधा, रात्रीभोजनविरतिपरिग्रहाच्च षोढा, इत्यादिकया प्रक्रियया भिद्यमानो यावदष्टादशशीलाङ्गसहस्रपरिमाणो भवतीति ॥ किं पुनरसौ संयमस्तत्र तत्र प्रवचने पञ्चमहाव्रतरूपतया भिद्यते ? इत्याह—

आइक्खिउं विभइउं विन्नाउं चेव सुहतरं होइ । एएण कारणेणं महव्वया पंच पन्नत्ता ॥ १४ ॥

संयमः पञ्चमहाव्रतरूपतया व्यवस्थापितः सन्नाख्यातुं विभक्तुं विज्ञातुं च सुखेनैव भवतीत्यतः कारणात्पञ्चमहाव्रतानि प्रज्ञाप्यन्ते ॥ एतानि च पञ्च महाव्रतानि अस्खलितानि फलवन्ति भवन्त्यतो रक्षायत्नो विधेयस्तदर्थमाह—

तेसिं च रक्खणट्ठा य भावणा पंच पंच इक्किक्के । ता सत्थपरिन्नाए एसो अभिनरो होई ॥ १५ ॥

'तेषां च' महाव्रतानामेकैकस्य तद्रक्षणनिमित्तकल्पाः पञ्च पञ्च भावना भवन्ति, ताश्च द्वितीयाग्रश्रुतस्कन्धे प्रतिपाद्यन्तेऽतोऽयं शस्त्रपरिज्ञाध्ययनाभ्यन्तरो भवतीति ॥ साम्प्रतं चूडानां यथास्वं परिमाणमाह—

जावोग्गहपडिमाओ पढमा सत्तिक्कगा बिइअचूला । भावण विमुत्ति आयारपकप्पा तिन्नि इअ पंच ॥ १६ ॥

१ अहारसगस्स निप्फत्ती प्र. एसो उ अब्भन्तरो होइ प्र.

पिण्डैषणाध्ययनादारभ्यावग्रहप्रतिमाध्ययनं यावदेतानि सप्ताध्ययनानि प्रथमा चूडा, सप्तसप्तैकका द्वितीया, भावना तृतीया, विमुक्तिश्चतुर्थी, आचारप्रकल्पो निशीथः, सा च पञ्चमी चूडेति । तत्र चूडाया निक्षेपो नामादिः षड्विधः, नामस्थापने क्षुण्णे, द्रव्यचूडा व्यतिरिक्ता सचित्ता कुर्कुटस्य अचित्ता मुकुटस्य चूडामणिः मिश्रा मयूरस्य, क्षेत्रचूडा लोकनिष्कुटरूपा, कालचूडाऽधिकमासकस्वभावा, भावचूडा त्वियमेव, क्षायोपशमिकभाववर्त्तित्वात् । इयं च सप्ताध्ययनात्मिका, तत्राद्यमध्ययनं पिण्डैषणा, तस्य चत्वार्यनुयोगद्वाराणि भवन्ति, यावन्नामनिष्पन्ने निक्षेपे पिण्डैषणाऽध्ययनं, तस्य निक्षेपद्वारेण सर्वा पिण्डनिर्युक्तिरत्र भणनीयेति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से भिक्खू वा भिक्खुणी वा गाहावइकुलं पिंडवायपडियाए अणुपविट्ठे समाणे से जं पुण जाणिज्जा—असणं वा पाणं वा खाइमं वा साइमं वा पाणेहिं वा पणगेहिं वा बीएहिं वा हरिएहिं वा संसत्तं उम्मिस्सं सीओदएण वा ओसित्तं रयसा वा परिघासियं[1] वा तहप्पगारं असणं वा पाणं वा खाइमं वा साइमं वा परहत्थंसि वा परपायंसि वा अफासुयं अणेसणिज्जंति मन्नमाणे लाभेऽवि संते नो पडिग्गाहिज्जा ॥ से य आहच्च पडिग्गहे सिया से तं आयाय एगंतमवक्कमिज्जा, एगंतमवक्कमित्ता अहे आरामंसि वा अहे उवस्सयंसि वा अप्पंडे अप्पपाणे अप्पबीए अप्पहरिए अप्पोसे अप्पुदए अप्पुत्तिंगपणगदगमट्टियमक्कडासंताणए विगिंचिय २ उम्मीसं विसोहिय २ तओ संजयामेव भुंजिज्ज वा पीइज्ज वा, जं च नो संचाइज्जा भुत्तए वा पायए वा से तमायाय एगंतमवक्कमिज्जा, अहे झामथंडिलंसि वा अट्ठिरासिंसि वा किट्टरासिंसि वा तुसरासिंसि वा गोमयरासिंसि वा अन्नयरंसि वा तहप्पगारंसि थंडिलंसि पडिलेहिय पडिलेहिय पमज्जिय पमज्जिय तओ संजयामेव परिट्ठविज्जा ॥ (सू० १)

१ परिवासियं प्र. एवं वृत्तावपि प्र०

'से' इति मागधदेशीवचनतः प्रथमान्तो निर्देशे वर्त्तते, यः कश्चिद्भिक्षणशीलो भावभिक्षुर्मूलोत्तरगुणधारी विविधाभिग्रहरतः 'भिक्षुणी वा' साध्वी, स भावभिक्षुर्वेदनादिभिः कारणैराहारग्रहणं करोति, तानि चामूनि—"वेअण १ वेआवच्चे २ इरियट्ठाए य ३ संजमट्ठाए ४ । तह पाणवत्तियाए ५ छट्ठं पुण धम्मचिंताए ६ ॥ १ ॥" इत्यादि, अमीषां मध्येऽन्यतमेनापि कारणेनाहारार्थी सन् गृहपतिः—गृहस्थस्तस्य कुलं—गृहं तदनुप्रविष्टः, किमर्थं?—'पिंडवायपडियाए'त्ति पिण्डपातो—भिक्षालाभस्तत्प्रतिज्ञया—अहमत्र भिक्षां लप्स्य इति, स प्रविष्टः सन् यत्पुनरशनादि जानीयात्, कथमिति दर्शयति—'प्राणिभिः' रसजादिभिः 'पनकैः' उल्लीजीवैः संसक्तं 'बीजैः' गोधूमादिभिः 'हरितैः' दूर्वाऽङ्कुरादिभिः 'उन्मिश्रं' शबलीभूतं, तथा शीतोदकेन वा 'अवसिक्तम्' आर्द्रीकृतं 'रजसा वा' सचित्तेन 'परिघासियं'ति परिगुण्डितं, कियद्वा वक्ष्यति ? 'तथाप्रकारम्' एवंजातीयमशुद्धमशनादि चतुर्विधमप्याहारं 'परहस्ते' दातृहस्ते परपात्रे वा स्थितम् 'अप्रासुकं' सचित्तम् 'अनेषणीयम्' आधाकर्मादिदोषदुष्टम् 'इति' एवं मन्यमानः 'स' भावभिक्षुः सत्यपि लाभे न प्रतिगृह्णीयादित्युत्सर्गतः, अपवादतस्तु द्रव्यादि ज्ञात्वा प्रतिगृह्णीयादपि, तत्र द्रव्यं दुर्लभद्रव्यं क्षेत्रं साधारणद्रव्यलाभरहितं सरजस्कादिभावितं वा कालो दुर्भिक्षादिः भावो ग्लानतादिः, इत्यादिभिः कारणैरुपस्थितैरल्पबहुत्वं

१ वेदना वैयावृत्त्यं ईर्यार्थं च संयमार्थं च । तथा प्राणप्रत्ययाय षष्ठं पुनर्धर्मचिन्तायै ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यालोच्य गीतार्थो गृह्णीयादिति ॥ अथ कथञ्चिदनाभोगात्संसक्तमागामिसत्त्वान्मिश्रं वा गृहीतं तत्र विधिमाह—'से आहच्चे'त्यादि स च भावभिक्षुः 'आहच्चे'ति सहसा संसक्तादिकमाहारजातं कदाचिदनाभोगात्प्रतिगृह्णीयात्, स चानाभोगो दातृप्रतिगृहीतृपदद्वयाच्चतुर्धा योजनीय इति, 'तम्' एवंभूतमशुद्धमाहारमादायैकान्तम् 'अपक्रामेत्' गच्छेत्, तं 'अपक्रम्य, गत्वेति । यत्र सागारिकाणामनालोकमसम्पातं च भवति तदेकान्तमनेकधेति दर्शयति—अथारामे वा अथोपाश्रये वा अथशब्दोऽनापातविशिष्टप्रदेशोपसङ्ग्रहार्थः, वाशब्दो विकल्पार्थः शून्यगृहाद्युपसङ्ग्रहार्थो वा, तद्विशिनष्टि—'अल्पाण्डे' अल्पशब्दोऽभाववचनः, अपगताण्ड इत्यर्थः, एवमल्पबीजेऽल्पहरिते 'अल्पावश्याये' अवश्याय उदकसूक्ष्मतुषारः, अल्पोदके, तथा, 'अल्पोत्तिङ्गपनकदगमृत्तिकामर्कटसन्तानके' तत्रोत्तिङ्गस्तृणाग्रउदकविन्दुः, [भुञ्जीतेत्युत्तरक्रियया सम्बन्धः] पनकः—उल्लीविशेषः, उदकप्रधाना मृत्तिका उदकमृत्तिकेति, मर्कटः—सूक्ष्मजीवविशेषस्तेषां सन्तानः, यदिवा मर्कटकसन्तानः—कोलिकः, तदेवमण्डादिदोषरहिते आरामादिके स्थण्डिले गत्वा प्राग्गृहीताहारस्य यत्संसक्तं तद् 'विविच्य विविच्य' त्यक्त्वा त्यक्त्वा, क्रियाऽभ्यावृत्त्याऽशुद्धस्य परित्यागनिःशेषतामाह, 'उन्मिश्रं वा' आगामुकसत्त्वसंवलितं सक्तुकादि ततः प्राणिनः 'विशोध्य विशोध्य' अपनीयापनीय 'ततः' तदनन्तरं शेषं शुद्धं परिज्ञाय सम्यग्यत एव भुञ्जीत पिबेद्वा रागद्वेषविप्रमुक्तः सन्निति, उक्तञ्च—"बायालीसेसणसंकडंमि

१ द्वाचत्वारिंशदेषणासंकटे गहने जीव ! नैव छलितः । इदानीं यथा न छल्यसे भ्रमन् रागद्वेषाभ्यां (तथा प्रवर्तस्व) ॥ १ ॥ रागेण साङ्गारं द्वेषेण सधूमकं विजानाहि । रागद्वेषविमुक्तो भुञ्जीत वा निर्जरापेक्षी ॥ २ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३२२ ॥

गहणंमि जीव ! ण हु छालओ । इण्हिं जह न छलिज्जसि भुंजंतो रागदोसेहिं ॥ १ ॥ रागेण सइंगालं दोसेण सधूमगं वियाणाहि । रागद्दोसविमुक्को भुंजेज्जा निज्जरापेही ॥ २ ॥" यच्चाहारादिकं पातुं भोक्तुं वा न शक्नुयात्प्राचुर्यादशुद्धपृथक्करणासम्भवाद्वा स भिक्षुः 'तद्' आहारजातमादायैकान्तमपक्रामेत्, अपक्रम्य च तदाहारजातं 'परिष्ठापयेत्' त्यजेदिति सम्बन्धः, यत्र च परिष्ठापयेत्तद्दर्शयति—'अथ' आनन्तर्यार्थे वाशब्द उत्तरापेक्षया विकल्पार्थः 'झामे'ति दग्धं तस्मिन् वा स्थण्डिलेऽस्थिराशौ वा किट्टे—लोहादिमलस्तद्राशौ वा तुषराशौ वा गोमयराशौ वा, कियद्वा वक्ष्यते इत्युपसंहरति—अन्यतरराशौ वा 'तथाप्रकारे' पूर्वसदृशे प्रासुके स्थण्डिले गत्वा तत् प्रत्युपेक्ष्य प्रत्युपेक्ष्य अक्ष्णा प्रमृज्य २ रजोहरणादिना, अत्रापि द्विर्वचनमादरख्यापनार्थमिति, प्रत्युपेक्षणप्रमार्जनपदाभ्यां सप्त भङ्गका भवन्ति, तद्यथा—अप्रत्युपेक्षितमप्रमार्जितम् १, अप्रत्युपेक्षितं प्रमार्जितं २, प्रत्युपेक्षितमप्रमार्जितं ३, तत्राप्यप्रत्युपेक्ष्य प्रमृजन् स्थानात्स्थानसङ्क्रमणेन त्रसान् विराधयति, प्रत्युपेक्ष्याप्यप्रमृजन्नागन्तुकपृथ्वीकायादीन् विराधयतीति, चतुर्थभङ्गके तु चत्वारोऽमी, तद्यथा—दुष्प्रत्युपेक्षितं दुष्प्रमार्जितं ४, दुष्प्रत्युपेक्षितं सुप्रमार्जितं ५, सुप्रत्युपेक्षितं दुष्प्रमार्जितं ६, सुप्रत्युपेक्षितं सुप्रमार्जितमिति ७, स्थापना । तत्रैवंभूते सप्तमभङ्गायाते स्थण्डिले 'संयत एव' सम्यगुपयुक्त एव शुद्धाशुद्धपुञ्जभागपरिकल्पनया 'परिष्ठापयेत' न्यजेदिति ॥ साम्प्रतमौषधिविषयं विधिमाह—

श्रुतस्कं० चूलिका पिण्डैष० उद्देशः १

से भिक्खू वा भिक्खूणी वा गाहावइ० जाव पविट्ठे समाणे से जाओ पुण ओसहीओ जाणिज्जा—कसिणाओ सासियाओ अविदलकडाओ अतिरिच्छच्छिन्नाओ अवुच्छिण्णाओ तरुणियं वा छिवाडिं अणभिक्कंतभज्जियं पेहाए अफासुयं अणेसणिज्जंति मन्नमाणे लाभे संते नो पडिग्गाहिज्जा ॥ से भिक्खू वा० जाव पविट्ठे समाणे से जाओ पुण ओसहीओ जाणिज्जा—अकसिणाओ असासियाओ विदलकडाओ तिरिच्छच्छिन्नाओ वुच्छिन्नाओ तरुणियं वा छिवाडिं अभिक्कंतं भज्जियं पेहाए फासुयं एसणिज्जंति मन्नमाणे लाभे संते पडिग्गाहिज्जा ॥ (सू० २)

स भावभिक्षुर्गृहपतिकुलं प्रविष्टः सन् याः पुनः "ओषधीः" शालिव्रीह्यादिकाः एवंभूता जानीयात्, तद्यथा—'कसिणाओ'त्ति 'कृत्स्नाः' सम्पूर्णा अनुपहताः, अत्र च द्रव्यभावाभ्यां चतुर्भङ्गिका, तत्र द्रव्यकृत्स्ना अशस्त्रोपहताः, भावकृत्स्नाः सचित्ताः, तत्र कृत्स्ना इत्यनेन चतुर्भङ्गकेष्वाद्यं भङ्गत्रयमुपात्तं, 'सासियाओ'त्ति, जीवस्य स्वाम्—आत्मीयामुत्तिं प्रत्याश्रयो यासु ताः स्वाश्रयाः, अविनष्टयोनय इत्यर्थः, आगमे च कासाञ्चिदौषधीनामविनष्टो योनिकालः पठ्यते, तदुक्तम्—"एतेसि णं भंते ! सालीणं केवइअं कालं जोणी संचिट्ठइ ?" इत्याद्यालापकाः, 'अविदलकडाओ'त्ति न द्विदलकृताः अद्विदलकृताः, अनूर्ध्वपाटिता इत्यर्थः, 'अतिरिच्छच्छिन्नाओ'त्ति तिरश्चीनं छिन्नाः—कन्दलीकृतास्तत्प्रतिषेधादतिरश्चीनच्छिन्नाः, एताश्च द्रव्यतः कृत्स्ना भावतो भाज्याः, 'अव्वोच्छिन्नाओ'त्ति व्यवच्छिन्ना—जीवरहिता न व्यवच्छिन्नाः अव्यवच्छिन्नाः, भावतः कृत्स्ना इत्यर्थः, तथा 'तरुणियं वा छिवाडिं'ति, 'तरुणीम्' अपरिपक्वां 'छिवाडि'न्ति मुद्गादेः फलिं, तामेव विशिनष्टि—'अणभिक्कंतभज्जिय'न्ति, नाभिक्रान्ता जीविताद् अनभिक्रान्ता, सचेतनेत्यर्थः, 'अभज्जियं' अभग्नाम्—अमर्दितामविराधितामित्यर्थः, इति 'प्रेक्ष्य' दृष्ट्वा तदेवंभूतमाहारजातमप्रासुकमनेषणीयं वा मन्यमानो लाभे

१ एतेषां भदन्त ! शालीनां कियन्तं कालं योनिः संतिष्ठति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सति न प्रतिगृह्णीयात्। साम्प्रतमेतदेव सूत्रं विपर्ययेणाह–स एव भावभिक्षुर्यावत् पुनरौषधीरेवं जानीयात्, तद्यथा—'अकृत्स्नाः' असम्पूर्णा द्रव्यतो भावतश्च पूर्ववच्चर्चः, 'अस्वाश्रयाः' विनष्टयोनयः, 'द्विदलकृताः' ऊर्ध्वपाटिताः 'तिरश्चीनच्छिन्नाः' कन्दलीकृताः तथा तरुणिकां वा फलीं जीवितादपक्रान्तां भग्नां चेति, तदेवंभूतमाहारजातं प्रासुकमेषणीयं च मन्यमानो लाभे सति कारणे गृह्णीयादिति ॥ ग्राह्याग्राह्याधिकार एवाहारविशेषमधिकृत्याह—

से भिक्खू वा० जाव समाणे से जं पुण जाणिज्जा–पिहुयं वा बहुरयं वा भुंजियं वा मंथुं वा चाउलं वा चाउलपलंबं वा सइं संभज्जियं अफासुयं जाव नो पडिगाहिज्जा ॥ से भिक्खू वा० जाव समाणे से जं पुण जाणिज्जा–पिहुयं वा जाव चाउलपलंबं वा असइं भज्जियं दुक्खुत्तो वा तिक्खुत्तो वा भज्जियं फासुयं एसणिज्जं जाव पडिगाहिज्जा ॥ (सू० ३)

स भावभिक्षुर्गृहपतिकुलं प्रविष्टः सन् इत्यादि पूर्ववद्यावत् 'पिहुयं व'त्ति पृथुकं जातावेकवचनं नवस्य शालिव्रीह्यादेरग्निना ये लाजाः क्रियन्ते त इति, बहु रजः–तुषादिकं यस्मिंस्तद्बहुरजः, 'भुज्जिय'न्ति अभ्यर्द्धपक्वं गोधूमादेः शीर्षकमन्यद्वा तिलगोधूमादि, तथा गोधूमादेः 'मन्थुं' चूर्णं तथा 'चाउलाः' तन्दुलाः शालिव्रीह्यादेः त एव चूर्णीकृतास्तत्कणिका वा चाउलपलंबंति, तदेवंभूतं पृथुकाद्याहारजातं सकृद् एकवारं 'संभज्जिय'ति आमर्दितं किञ्चिदग्निना किञ्चिदपरशस्त्रेणाप्रासुकमनेषणीयं मन्यमानो लाभे सति न प्रतिगृह्णीयात् ॥ एतद्विपरीतं ग्राह्यमित्याह–पूर्ववत्, नवरं यदसकृद्–अनेकशोऽग्न्यादिना पक्वमामर्दितं वा दुष्पक्वादिदोषरहितं प्रासुकं मन्यमानो लाभे सति गृह्णीयादिति ॥ साम्प्रतं गृहपतिकुलप्रवेशविधिमाह— ॥ ३२३ ॥

से भिक्खू वा भिक्खुणी वा गाहावइकुलं जाव पविसिउकामे नो अन्नउत्थिएण वा गारत्थिएण वा परिहारिओ वा अपरिहारिएणं सद्धिं गाहावइकुलं पिंडवायपडियाए पविसिज्ज वा निक्खमिज्ज वा ॥ से भिक्खू वा० बहिया वियारभूमिं वा विहारभूमिं वा निक्खममाणे वा पविसमाणे वा नो अन्नउत्थिएण वा गारत्थिएण वा परिहारिओ वा अपरिहारिएण सद्धिं बहिया वियारभूमिं वा विहारभूमिं वा निक्खमिज्ज वा पविसिज्ज वा ॥ से भिक्खू वा० गामाणुगामं दूइज्जमाणे नो अन्नउत्थिएण वा जाव गामाणुगामं दूइज्जिज्जा ॥ (सू० ४)

स भिक्षुर्यावद्गृहपतिकुलं प्रवेष्टुकाम एभिर्वक्ष्यमाणैः सार्द्धं न प्रविशेत् प्राक् प्रविष्टो वा न निष्क्रामेदिति सम्बन्धः। यैः सह न प्रवेष्टव्यं तान् स्वनामग्राहमाह–तत्रान्यतीर्थिकाः–सरजस्कादयः 'गृहस्थाः' पिण्डोपजीविनो धिग्जातिप्रभृतयः, तैः सह प्रविशताममी दोषाः, तद्यथा–ते पृष्ठतो वा गच्छेयुरग्रतो वा, तत्राग्रतो गच्छन्तो यदि साध्वनुवृत्त्या गच्छेयुस्ततस्तत्कृत ईर्याप्रत्ययः कर्मबन्धः प्रवचनलाघवं च, तेषां वा स्वजात्याद्युत्कर्ष इति, अथ पृष्ठतस्ततस्तद्भद्रेपो दातुर्वाऽभद्रकस्य, लाभं च दाता संविभज्य दद्यात्तेनावमौदर्यादौ दुर्भिक्षादौ प्राणवृत्तिर्न स्यादित्येवमादयो दोषाः, तथा परिहरणं–परिहारस्तेन चरति पारिहारिकः–पिण्डदोषपरिहरणादुद्युक्तविहारी साधुरित्यर्थः, स एवंगुणकलितः साधुः 'अपरिहारिकेण' पार्श्वस्थावसन्नकुशीलसंसक्तयथाच्छन्दरूपेण न प्रविशेत्, तेन सह प्रविष्टानामनेषणीयभिक्षाग्रहणाग्रहणकृता दोषाः, तथाहि–अनेषणीयग्रहणे तत्प्रवृत्तिरनुज्ञाता भवति, अग्रहणे तैः सहासङ्खडादयो दोषाः, तत एतान् दोषान् ज्ञात्वा साधुर्गृहपतिकुलं पिण्डपातप्रतिज्ञया तैः सह न प्रविशेन्नापि निष्क्रामेदिति ॥ तैः सह प्रसङ्गतोऽन्य-

त्रापि गमन प्रतिषेधमाह–स भिक्षुर्बहिः 'विचारभूमिं' सञ्ज्ञाव्युत्सर्गभूमिं तथा 'विहारभूमिं' स्वाध्यायभूमिं तैरन्यतीर्थिकादिभिः सह दोषसम्भवान्न प्रविशेदिति सम्बन्धः, तथाहि–विचारभूमौ प्रासुकोदकस्वच्छास्वच्छबहुल्पनिर्लेपनकृतोपघातसद्भावाद्, विहारभूमौ वा सिद्धान्तालापकविकत्थनभयात्सेहाद्यसहिष्णुकलहसद्भावाच्च साधुस्तां तैः सह न प्रविशेन्नापि ततो निष्क्रामेदिति ॥ तथा–स भिक्षुर्ग्रामाद्ग्रामो ग्रामान्तरमुपलक्षणार्थत्वान्नगरादिकमपि 'दूइज्जमाणो'त्ति गच्छन्नेभिरन्यतीर्थिकादिभिः सह दोषसम्भवान्न गच्छेत्, तथाहि–कायिक्यादिनिरोधे सत्यात्मविराधना, व्युत्सर्गे च प्रासुकाप्रासुकग्रहणादावुपघातसंयमविराधने भवतः, एवं भोजनेऽपि दोषसम्भवो भावनीयः सेहादिविप्रतारणादिदोषश्चेति ॥ साम्प्रतं तदानप्रतिषेधार्थमाह— ॥ ३२४ ॥

से भिक्खू वा भिक्खूणी वा० जाव पविट्ठे समाणे नो अन्नउत्थियस्स वा गारत्थियस्स वा परिहारिओ वा अपरिहारियस्स असणं वा पाणं वा खाइमं वा साइमं वा दिज्जा वा अणुपइज्जा वा ॥ (सू० ५)

स भिक्षुर्यावद्गृहपतिकुलं प्रविष्टः सन्नुपलक्षणत्वादुपाश्रयस्थो वा तेभ्योऽन्यतीर्थिकादिभ्यो दोषसम्भवादशनादिकं ४ न दद्यात् स्वतो नाप्यनुप्रदापयेदपरेण गृहस्थादिनेति, तथाहि–तेभ्यो दीयमानं दृष्ट्वा लोकोऽभिमन्यते–एते ह्येवंविधानामपि दक्षिणार्हाः, अपि च–तदुपष्टम्भादसंयमप्रवर्त्तनादयो दोषा जायन्त इति ॥ पिण्डाधिकार एवानेषणीयविशेषप्रतिषेधमधिकृत्याह—

से भिक्खू वा० जाव समाणे असणं वा ४ अस्सिंपडियाए एगं साहम्मियं समुद्दिस्स पाणाइं भूयाइं जीवाइं सत्ताइं समा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रब्भ समुद्दिस्स कीयं पामिच्चं अच्छिज्जं अणिसट्ठं अभिहडं आहट्टु चेएइ, तं तहप्पगारं असणं वा ४ पुरिसंतरकडं वा अपुरिसंतरकडं वा बहिया नीहडं वा अनीहडं वा अत्तट्ठियं वा अणत्तट्ठियं वा परिभुत्तं वा अपरिभुत्तं वा आसेवियं वा अणासेवियं वा अफासुयं जाव नो पडिग्गाहिज्जा, एवं बहवे साहम्मिया एगं साहम्मिणिं बहवे साहम्मिणीओ समुद्दिस्स चत्तारि आलावगा भाणियव्वा ॥ (सू० ६)

स–भिक्षुर्यावद्गृहपतिकुलं प्रविष्टः सन्नेवंभूतमाहारजातं नो प्रतिगृह्णीयादिति सम्बन्धः, 'अस्संपडियाए'त्ति, न विद्यते स्वं–द्रव्यमस्य सोऽयमस्वो–निर्ग्रन्थ इत्यर्थः, तत्प्रतिज्ञया कञ्चिद्गृहस्थः प्रकृतिभद्रक एकं 'साधर्मिकं' साधुं 'समुद्दिश्य' अस्वोऽयमित्यभिसन्धाय 'प्राणिनो भूतानि जीवाः सत्त्वाश्च' एतेषां किञ्चिद्भेदाद्भेदः, तान् समारभ्येत्यनेन मध्यग्रहणात्संरम्भसमारम्भारम्भा गृहीताः, एतेषां च स्वरूपमिदम्—"संकप्पो संरंभो परियावकरो भवे समारंभो। आरंभो उद्दवओ सुद्धनयाणं तु सव्वेसिं ॥ १ ॥" इत्येवं समारम्भादि 'समुद्दिश्य' अधिकृत्याधाकर्म कुर्यादिति, अनेन सर्वाऽविशुद्धिकोटिर्गृहीता, तथा 'क्रीतं' मूल्यगृहीतं 'पामिच्चं' उच्छिन्नकम् 'आच्छेद्यं' परस्माद्बलादाच्छिन्नम् 'अणिसिट्ठं'ति 'अनिसृष्टं' तत्स्वामिनाऽनुत्सङ्कलितं चोलकादि 'अभ्याहृतं' गृहस्थेनानीतं, तदेवंभूतं क्रीताद्याहृत्य 'चेएइ'त्ति ददाति, अनेनापि समस्ता विशुद्धिकोटिर्गृहीता, 'तद्' आहारजातं चतुर्विधमपि 'तथाप्रकारम्' आधाकर्मादिदोषदुष्टं यो ददाति तस्मात्पुरुषादपरः पुरुषः पुरुषान्तरं तत्कृतं वा अपुरुषान्तरकृतं वा–तथा तेनैव दात्रा कृतं, तथा गृहान्नि-

आ. सू. ५५

१ संकल्पः संरम्भः परितापकरो भवेत् समारम्भः। आरम्भ उपद्रवतः शुद्धनयानां च सर्वेषाम् ॥ १ ॥

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३२५ ॥

गतमानगेतं वा, तथा तेनैव दात्रा स्वीकृतमस्वीकृतं वा, तथा तेनैव दात्रा तस्माद्बहुपरिभुक्तमपरिभुक्तं वा, तथा स्तोकमास्वादितमनास्वादितं वा, तदेवमप्रासुकमनेषणीयं च मन्यमानो लाभे सति न प्रतिगृह्णीयादिति। एतच्च प्रथमचरमतीर्थकृतोरकल्पनीयं, मध्यमतीर्थकराणां चान्यस्य कृतमन्यस्य कल्पत इति। एवं बहून् साधर्मिकान् समुद्दिश्य प्राग्वच्चः। तथा साध्वीसूत्रमप्येकत्वबहुत्वाभ्यां योजनीयमिति ॥ पुनरपि प्रकारान्तरेणाविशुद्धिकोटिमधिकृत्याह—

श्रुतस्कं० २
चूलिका १
पिण्डैष० १
उद्देशः १

से भिक्खू वा० जाव समाणे से जं पुण जाणिज्जा असणं वा ४ बहवे समणा माहणा अतिहि किवणवणीमए पगणिय २ समुद्दिस्स पाणाइं वा ४ समारब्भ जाव नो पडिग्गाहिज्जा ॥ (सू० ७)

स–भावभिक्षुर्यावद्गृहपतिकुलं प्रविष्टस्तद्यत्पुनरेवंभूतमशनादि जानीयात्, तद्यथा–बहून् श्रमणानुद्दिश्य, ते च पञ्चविधाः–निर्ग्रन्थशाक्यतापसगैरिकाजीविका इति, ब्राह्मणान् भोजनकालोपस्थाय्यपूर्वो वाऽतिथिस्तानिति कृपणा–दरिद्रास्तान् वणीमका–वन्दिप्रायास्तानपि श्रमणादीन् बहून् 'उद्दिश्य' प्रगणय्य प्रगणय्योद्दिशति, तद्यथा–द्वित्राः श्रमणाः पञ्चषाः ब्राह्मणा इत्यादिना प्रकारेण श्रमणादीन् परिसङ्ख्यातानुद्दिश्य, तथा प्राण्यादीन् समारभ्य यदशनादि संस्कृतं तदासेवितमनासेवितं वाऽप्रासुकमनेषणीयमाधाकर्म, एवं मन्यमानो लाभे सति न प्रतिगृह्णीयादिति ॥ विशोधिकोटिमधिकृत्याह—

॥ ३२५ ॥

से भिक्खू वा भिक्खुणी वा० जाव पविट्ठे समाणे से जं पुण जाणिज्जा—असणं वा ४ बहवे समणा माहणा अतिहिं किवणवणीमए समुद्दिस्स जाव चेएइ तं तहप्पगारं असणं वा ४ अपुरिसंतरकडं वा अबहियानीहडं अणत्तट्ठियं अपरिभुत्तं अणासेवियं अफासुयं अणेसणिज्जं जाव नो पडिग्गाहिज्जा। अह पुण एवं जाणिज्जा पुरिसंतरकडं बहियानीहडं अत्तट्ठियं परिभुत्तं आसेवियं फासुयं एसणिज्जं जाव पडिग्गाहिज्जा ॥ (सू० ८)

स भिक्षुर्यत्पुनरशनादि जानीयात्, किंभूतमिति दर्शयति–बहून् श्रमणब्राह्मणातिथिकृपणवणीमकान् समुद्दिश्य श्रमणाद्यर्थमिति यावत्, प्राणादींश्च समारभ्य यावदाहृत्य कश्चिद् गृहस्थो ददाति, तत्तथाप्रकारमशनाद्यपुरुषान्तरकृतमबहिर्निर्गतमनात्मीकृतमपरिभुक्तमनासेवितमप्रासुकमनेषणीयं मन्यमानो लाभे सति न प्रतिगृह्णीयात् ॥ इयं च "जावंतिया भिक्ख"त्ति, एतद्व्यत्ययेन ग्राह्यमाह–अथशब्दः पूर्वापेक्षी पुनःशब्दो विशेषणार्थः, अथ स भिक्षुः पुनरेवं जानीयात्, तद्यथा—'पुरुषान्तरकृतम्' अन्यार्थं कृतं बहिर्निर्गतमात्मीकृतं परिभुक्तमासेवितं प्रासुकमेषणीयं च ज्ञात्वा लाभे सति प्रतिगृह्णीयात्, इदमुक्तं भवति–अविशोधिकोटिर्यथा तथा न कल्पते, विशोधिकोटिस्तु पुरुषान्तरकृतात्मीयकृतादिविशिष्टा कल्पत इति ॥ विशुद्धिकोटिमधिकृत्याह—

से भिक्खू वा भिक्खुणी वा गाहावइकुलं पिंडवायपडियाए पविसिउकामे से जाइं पुण कुलाइं जाणिज्जा—इमेसु खलु कुलेसु निइए पिंडे दिज्जइ अग्गपिंडे दिज्जइ नियए भाए दिज्जइ नियए अवड्ढभाए दिज्जइ, तहप्पगाराइं कुलाइं निइयाइं निइउमाणाइं नो भत्ताए वा पाणाए वा पविसिज्ज वा निक्खमिज्ज वा ॥ एयं खलु तस्स भिक्खुस्स भिक्खुणीए वा सामग्गियं जं सव्वट्ठेहिं समिए सहिए सया जए (सू० ९) त्तिबेमि ॥ पिण्डैषणाध्ययन आद्योद्देशकः ॥ १–१–१ ॥

१ यावन्तो भिक्षाः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स भिक्षुर्यावद्गृहपतिकुलं प्रवेष्टुकामः से-तच्छब्दार्थे स च वाक्योपन्यासार्थः, यानि पुनरेवंभूतानि कुलानि जानीयात्, तद्यथा-इमेषु कुलेषु 'खलु' वाक्यालङ्कारे 'नित्यं' प्रतिदिनं 'पिण्डः' पोषो दीयते, तथा अग्रपिण्डः-शाल्योदनादेः प्रथममुद्धृत्य भिक्षार्थं व्यवस्थाप्यते सोऽग्रपिण्डो नित्यं भागः-अर्धपोषो दीयते, तथा नित्यमुपार्द्धभागः-पोषचतुर्थभागः, तथाप्रकाराणि कुलानि 'नित्यानि' नित्यदानयुक्तानि नित्यदानादेव 'निइउमाणाइ'न्ति नित्यम् 'उमाणं'ति प्रवेशः स्वपक्षपरपक्षयोर्येषु तानि तथा, इदमुक्तं भवति-नित्यलाभात्तेषु स्वपक्षः-संयतवर्गः परपक्षः-अपरभिक्षाचरवर्गः सर्वो भिक्षार्थं प्रविशेत्, तानि च बहुभ्यो दातव्यमिति तथाभूतमेव पाकं कुर्युः, तत्र च षट्कायवधः, अल्पे च पाके तदन्तरायः कृतः स्यादित्यतस्तानि नो भक्तार्थं पानार्थं वा प्रविशेन्निष्क्रामेद्वेति ॥ सर्वोपसंहारार्थमाह—

'एतदि'ति यदादेरारभ्योक्तं खलुशब्दो वाक्यालङ्कारार्थः, एतत्तस्य भिक्षोः 'सामग्र्यं' समग्रता यदुद्गमोत्पादनग्रहणैषणासंयोजनाप्रमाणेङ्गालधूमकारणैः सुपरिशुद्धस्य पिण्डस्योपादानं क्रियते तज्ज्ञानाचारसामग्र्यं दर्शनचारित्रतपोवीर्याचारसंपन्नता चेति, अथवैतत्सामग्र्यं सूत्रेणैव दर्शयति-यत् 'सर्वार्थैः' सरसविरसादिभिराहारगतैः यदिवा रूपरसगन्धस्पर्शगतैः सम्यगितः समितः, संयत इत्यर्थः, पञ्चभिर्वा समितिभिः समितः शुभेतरेषु रागद्वेषविरहित इतियावत्, एवंभूतश्च सह हितेन वर्त्तत इति सहितः, सहितो वा ज्ञानदर्शनचारित्रैः, एवंभूतश्च सदा 'यतेत' संयमयुक्तो भवेदित्युपदेशः, ब्रवीमीति जम्बूनामानं सुधर्मस्वामीदमाह-भगवतः सकाशाच्छ्रुत्वाऽहं ब्रवीमि, न तु स्वेच्छयेति। शेषं पूर्ववदिति ॥ पिण्डैषणाध्ययनस्य प्रथमोद्देशकः समाप्तः ॥

॥ ३२६ ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीय आरभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशके पिण्डः प्रतिपादितस्तदिहापि तद्गतामेव विशुद्धकोटिमधिकृत्याह—

से भिक्खू वा भिक्खुणी वा गाहावइकुलं पिंडवायपडियाए अणुपविट्ठे समाणे से जं पुण जाणिज्जा-असणं वा ४ अट्ठमिपोसहिएसु वा अद्धमासिएसु वा मासिएसु वा दोमासिएसु वा तेमासिएसु वा चाउम्मासिएसु वा पंचमासिएसु वा छम्मासिएसु वा उऊसु वा उडसंधीसु वा उडपरियट्टेसु वा बहवे समणमाहणअतिहिकिवणवणीमगे एगाओ उक्खाओ परिएसिज्जमाणे पेहाए दोहिं उक्खाहिं परिएसिज्जमाणे पेहाए तिहिं उक्खाहिं परिएसिज्जमाणे पेहाए कुंभीमुहाओ वा कलोवाइओ वा संनिहिसंनिचयाओ वा परिएसिज्जमाणे पेहाए तहप्पगारं असणं वा ४ अपुरिसंतरकडं जाव अणासेवियं अफासुयं जाव नो पडिग्गाहिज्जा ॥ अह पुण एवं जाणिज्जा पुरिसंतरकडं जाव आसेवियं फासुयं पडिग्गाहिज्जा ॥ (सू० १०)

स भावभिक्षुर्यत्पुनरशनादिकमाहारमेवंभूतं जानीयात्, तद्यथा-अष्टम्यां पौषधः-उपवासादिकोऽष्टमीपौषधः स विद्यते येषां तेऽष्टमीपौषधिका-उत्सवाः तथाऽर्द्धमासिकादयश्च ऋतुसन्धिः-ऋतोः पर्यवसानम् ऋतुपरिवर्त्तः-ऋत्वन्तरम्, इत्यादिषु प्रकरणेषु बहून् श्रमणब्राह्मणातिथिकृपणवणीमगानेकस्मात्पिठरकाद् गृहीत्वा कूरादिकं 'परिएसिज्जमाणे'त्ति तदीयमानाहारेण भोज्यमानान् 'प्रेक्ष्य' दृष्ट्वा, एवं द्विकादिकादपि पिठरकाद् गृहीत्वेत्यायोजनीयमिति, पिठरक एव सङ्कटमुखः कुम्भी, 'कलोवाइओ व'त्ति पिच्छी पिटकं वा तस्माद्वैकस्मादिति, सन्निधेः-गोरसादेः संनिचयस्तस्माद्वेति, ['तओ एवंविहं जावंतियं पिंडं समणादीणं परिएसिज्जमाणं पेहाए'त्ति,] एवंभूतं पिण्डं दीयमानं दृष्ट्वा अपुरुषा-

न्तरकृतादिविशेषणमप्रासुकमनेषणीयमिति मन्यमानो लाभे सति न प्रतिगृह्णीयादिति ॥ एतदेव सविशेषणं ग्राह्यमाह-अथ पुनः स भिक्षुरेवंभूतं जानीयात्ततो गृह्णीयादिति सम्बन्धः, तद्यथा-पुरुषान्तरकृतमित्यादि ॥ साम्प्रतं येषु कुलेषु भिक्षार्थं प्रवेष्टव्यं तान्यधिकृत्याह—

से भिक्खू वा २ जाव समाणे से जाइं पुण कुलाइं जाणिज्जा, तंजहा—उग्गकुलाणि वा भोगकुलाणि वा राइन्नकुलाणि वा खत्तियकुलाणि वा इक्खागकुलाणि वा हरिवंसकुलाणि वा एसियकुलाणि वा वेसियकुलाणि वा गंडागकुलाणि वा कोट्टागकुलाणि वा गामरक्खकुलाणि वा बुक्कासकुलाणि वा अन्नयरेसु वा तहप्पगारेसु कुलेसु अदुगुंछिएसु अगरहिएसु असणं वा ४ फासुयं जाव पडिग्गाहिज्जा ॥ (सू० ११)

स भिक्षुर्भिक्षार्थं प्रवेष्टुकामो यानि पुनरेवंभूतानि कुलानि जानीयात्तेषु प्रविशेदिति सम्बन्धः, तद्यथा-उग्रा-आरक्षिकाः, भोगा-राज्ञः पूज्यस्थानीयाः, राजन्याः-सखिस्थानीयाः, क्षत्रिया-राष्ट्रकूटादयः, इक्ष्वाकवः-ऋषभस्वामिवंशिकाः, हरिवंशाः-हरिवंशजाः अरिष्टनेमिवंशस्थानीयाः, 'एसिअ'त्ति गोष्ठाः, वैश्या-वणिजः, गण्डको-नापितः, यो हि ग्राम उद्घोषयति, कोट्टागाः-काष्ठतक्षका वर्द्धकिन इत्यर्थः, बोक्कशालियाः-तन्तुवायाः, कियन्तो वा वक्ष्यन्ते इत्युपसंहरति-अन्यतरेषु वा तथाप्रकारेष्वजुगुप्सितेषु कुलेषु, नानादेशविनेयसुखप्रतिपत्त्यर्थं पर्यायान्तरेण दर्शयति-अगर्हितेषु, यदिवा जुगुप्सितानि चर्मकारकुलादीनि गर्ह्याणि-दास्यादिकुलानि तद्विपर्ययभूतेषु कुलेषु लभ्यमानमाहारादिकं प्रासुकमेषणीयमिति मन्यमानो गृह्णीयादिति ॥ तथा—

॥ ३२७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से भिक्खू वा २ जाव समाणे से जं पुण जाणिज्जा—असणं वा ४ समवाएसु वा पिंडनियरेसु वा इंदमहेसु वा खंदमहेसु वा एवं रुद्दमहेसु वा मुगुंदमहेसु वा भूयमहेसु वा जक्खमहेसु वा नागमहेसु वा थूभमहेसु वा चेइयमहेसु वा रुक्खमहेसु वा गिरिमहेसु वा दरिमहेसु वा अगडमहेसु वा तलागमहेसु वा दहमहेसु वा नइमहेसु वा सरमहेसु वा सागरमहेसु वा आगरमहेसु वा अन्नयरेसु वा तहप्पगारेसु विरूवरूवेसु महामहेसु वट्टमाणेसु बहवे समणमाहणअतिहिकिवणवणीमगे एगाओ उक्खाओ परिएसिज्जमाणे पेहाए दोहिं जाव संनिहिसंनिचयाओ वा परिएसिज्जमाणे पेहाए तहप्पगारं असणं वा ४ अपुरिसंतरकडं जाव नो पडिग्गाहिज्जा ॥ अह पुण एवं जाणिज्जा दिन्नं जं तेसिं दायव्वं, अह तत्थ भुंजमाणे पेहाए गाहावइभारियं वा गाहावइभगिणिं वा गाहावइपुत्तं वा धूयं वा सुण्हं वा धाइं वा दासं वा दासिं वा कम्मकरं वा कम्मकरिं वा से पुव्वामेव आलोइज्जा—आउसित्ति वा भगिणित्ति वा दाहिसि मे इत्तो अन्नयरं भोयणजायं, से सेवं वयंतस्स परो असणं वा ४ आहट्टु दलइज्जा तहप्पगारं असणं वा ४ सयं वा पुण जाइज्जा परो वा से दिज्जा फासुयं जाव पडिग्गाहिज्जा ॥ (सू० १२)

स भिक्षुर्यत्पुनरेवंभूतमाहारादिकं जानीयात्तदपुरुषान्तरकृतादिविशेषणमप्रासुकमनेषणीयमिति मन्यमानो नो गृह्णीयादिति सम्बन्धः, तत्र समवायो—मेलकः शङ्खच्छेदश्रेण्यादेः पिण्डनिकरः—पितृपिण्डो मृतकभक्तमित्यर्थः, इन्द्रोत्सवः—प्रतीतः स्कन्दः—स्वामिकार्त्तिकेयस्तस्य महिमा—पूजा विशिष्टे काले क्रियते, रुद्रादयः—प्रतीताः नवरं मुकुन्दो—बलदेवः, तदेवंभूतेषु नानाप्रकारेषु प्रकरणेषु सत्सु तेषु च यदि यः कश्चिच्छ्रमणब्राह्मणातिथिकृपणवणीमगादिरापतति तस्मै स-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३२८ ॥

श्रुतस्कं० २ चूलिका १ पिण्डैष० १ उद्देशः २

र्वस्मै दीयत इति मन्यमानोऽपुरुषान्तरकृतादिविशेषणविशिष्टमाहारादिकं न गृह्णीयात्, अथापि सर्वस्मै न दीयते तथाऽपि जनाकीर्णमिति मन्यमान एवंभूते सङ्खडिविशेषे न प्रविशेदिति ॥ एतदेव सविशेषणं ग्राह्यमाह—

अथ पुनरेवंभूतमाहारादिकं जानीयात्, तद्यथा—दत्तं यत्तेभ्यः श्रमणादिभ्यो दातव्यम्, 'अथ' अनन्तर तत्र स्वत एव तान् गृहस्थान् भुञ्जानान् 'प्रेक्ष्य' दृष्ट्वाऽऽहारार्थी तत्र यायात्, तान् गृहस्थान् स्वनामग्राहमाह, तद्यथा—गृहपतिभार्यादिकं भुञ्जानं पूर्वमेव 'आलोकयेत्' पश्येत् प्रभुं प्रभुसंदिष्टं वा ब्रूयात्, तद्यथा—आयुष्मति! भगिनि! इत्यादि, दास्यसि मह्यमन्यतरद्भोजनजातमिति, एवं वदते साधवे परो—गृहस्थ आहृत्याशनादिकं दद्यात्, तत्र च जनसङ्कुलत्वात्सति वाऽन्यस्मिन् कारणे स्वत एव साधुर्याचेत्, अयाचितो वा गृहस्थो दद्यात्, तत्प्रासुकमेषणीयमिति मन्यमानो गृह्णीयादिति ॥ अन्यग्रामचिन्तामधिकृत्याह—

से भिक्खू वा २ परं अद्धजोयणमेराए संखडिं नच्चा संखडिपडियाए नो अभिसंधारिज्जा गमणाए ॥ से भिक्खू वा २ पाईणं संखडिं नच्चा पडीणं गच्छे अणाढायमाणे, पडीणं संखडिं नच्चा पाईणं गच्छे अणाढायमाणे, दाहिणं संखडिं नच्चा उदीणं गच्छे अणाढायमाणे, उईणं संखडिं नच्चा दाहिणं गच्छे अणाढायमाणे, जत्थेव सा संखडि सिया, तंजहा—गामंसि वा नगरंसि वा खेडंसि वा कव्वडंसि वा मडंबंसि वा पट्टणंसि वा आगरंसि वा दोणमुहंसि वा नेगमंसि वा आसमंसि वा संनिवेसंसि वा जाव रायहाणिंसि वा संखडिं संखडिपडियाए नो अभिसंधारिज्जा गमणाए, केवली बूया—आयाणमेयं संखडिं संखडिपडियाए अभिधारेमाणे आहाकम्मियं वा उद्देसियं वा मीसजायं वा कीयगडं वा पामिच्चं वा अच्छिज्जं वा अणिसिट्ठं वा अभिहडं वा आहट्टु दिज्जमाणं भुंजिज्जा ॥

॥ ३२८ ॥

स भिक्षुः 'परं' प्रकर्षेणार्द्धयोजनमात्रे क्षेत्रे संखड्यन्ते—विराध्यन्ते प्राणिनो यत्र सा सङ्खडिस्तां ज्ञात्वा तत्प्रतिज्ञया 'नाभिसंधारयेत्' न पर्यालोचयेत्तत्र गमनमिति, न तत्र गच्छेदितियावत् ॥ यदि पुनर्ग्रामेषु परिपाट्या पूर्वप्रवृत्तं गमनं तत्र च सङ्खडिं परिज्ञाय यद्विधेयं तद्दर्शयितुमाह—

स भिक्षुर्यदि 'प्राचीनां' पूर्वस्यां दिशि संखडिं जानीयात्ततः 'प्रतीचीनम्' अपरदिग्भागं गच्छेत्, अथ प्रतीचीनां जानीयात्ततः प्राचीनं गच्छेत्, एवमुत्तरत्रापि व्यत्ययो योजनीयः, कथं गच्छेत्?—'अनादियमाणः' सङ्खडिमनादरयन्नित्यर्थः, एतदुक्तं भवति—यत्रैवासौ सङ्खडिः स्यात्तत्र न गन्तव्यमिति, क्व चासौ स्यादिति दर्शयति, तद्यथा—ग्रामे वा प्राचुर्येण ग्रामधर्मोपेतत्वात्, करादिगम्यो वा ग्रामः, नास्मिन् करोऽस्तीति नकरं, धूलिप्राकारोपेतं खेटं, कर्वटं—कुनगरं, सर्वतोऽर्द्धयोजनात्परेण स्थितग्रामं मडम्बं पत्तनं—यस्य जलस्थलपथयोरन्यतरेण पर्याहारप्रवेशः, आकरः—ताम्रादेरुत्पत्तिस्थानं, द्रोणमुखं—यस्य जलस्थलपथावुभावपि, निगमा—वणिजस्तेषां स्थानं नैगमम्, आश्रमं—यत्तीर्थस्थानं, राजधानी—यत्र राजा स्वयं तिष्ठति, सन्निवेशो यत्र प्रभूतानां भाण्डानां प्रवेश इति, तत्रैतेषु स्थानेषु सङ्खडिं ज्ञात्वा सङ्खडिप्रतिज्ञया न गमनम् 'अभिसंधारयेत्' न पर्यालोचयेत्, किमिति?, यतः केवली ब्रूयात् 'आदानमेतत्' कर्मोपादानमेतदिति, पाठान्तरं वा 'आययणमेयं'ति आयतनं—स्थानमेतद्दोषाणां यत्सङ्खडीगमनमिति, कथं दोषाणामायतनमिति दर्शयति—'संखडिं संखडिपडियाए'त्ति, या या सङ्खडिस्तां ताम् 'अभिसन्धारयतः' तत्प्रतिज्ञया गच्छतः साधोरवश्यमे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां मध्येऽन्यतमो दोषः स्यात्, तद्यथा–आधाकर्म वा औद्देशिकं वा मिश्रजातं वा क्रीतकृतं वा उद्यतकं वा आच्छेद्यं वा अनिसृष्टम (ष्टं वाऽ)भ्याहृतमि(तं वेति,) एतेषां दोषाणामन्यतमदोषदुष्टं भुञ्जीत, स हि प्रकरणकर्त्तव्यमभिसंधारयेत्–यथाऽयं यतिर्मत्प्रकरणमुद्दिश्येहायातः, तदस्य मया येन केनचित्प्रकारेण देयमित्यभिसन्धायाधाकर्मादि विदध्यादिति, यदिवा यो हि लोलुपतया सङ्कडिप्रतिज्ञया गच्छेत् स तत एवाधाकर्माद्यपि भुञ्जीतेति ॥ किञ्च–सङ्कडिनिमित्तमागच्छतः साधूनुद्दिश्य गृहस्थ एवंभूता वसतीः कुर्यादित्याह—

असंजए भिक्खुपडियाए खुड्डियदुवारियाओ महल्लियदुवारियाओ कुज्जा, महल्लियदुवारियाओ खुड्डियदुवारियाओ कुज्जा, समाओ सिज्जाओ विसमाओ कुज्जा, विसमाओ सिज्जाओ समाओ कुज्जा, पवायाओ सिज्जाओ निवायाओ कुज्जा, निवायाओ सिज्जाओ पवायाओ कुज्जा, अंतो वा वहिं वा उवस्सयस्स हरियाणि छिंदिय छिंदिय दालिय दालिय संथारगं संथारिज्जा, एस विलुंगयामो सिज्जाए, तम्हा से संजए नियंठे तहप्पगारं पुरेसंखडिं वा पच्छासंखडिं वा संखडिं संखडिपडियाए नो अभिसंधारिज्जा गमणाए, एयं खलु तस्स भिक्खुस्स जाव सया जए (सू० १३) त्तिबेमि ॥ पिण्डैषणाध्ययने द्वितीयः १–१–२

'असंयतः' गृहस्थः स च श्रावकः प्रकृतिभद्रको वा स्यात्, तत्रासौ साधुप्रतिज्ञया क्षुद्रद्वाराः–सङ्कटद्वाराः सत्यस्ता महाद्वाराः कुर्यात्, व्यत्ययं वा कार्यापेक्षया कुर्यात्, तथा समाः शय्या–वसतयो विषमाः सागारिकापातभयात् कुर्यात्, साधुसमाधानार्थं वा व्यत्ययं कुर्यात्, तथा प्रवाताः शय्याः शीतभयान्निर्वाताः कुर्यात्, ग्रीष्मकालापेक्षया वा व्यत्ययं विदध्यादिति, तथाऽन्तः–मध्ये उपाश्रयस्य बहिर्वा हरितानि छित्त्वा छित्त्वा विदार्य विदार्य उपाश्रयं संस्कुर्यात्, संस्तारकं वा संस्तारयेत्, गृहस्थश्चानेनाभिसन्धानेन संस्कुर्याद्–यथैषः–साधुः शय्यायाः संस्कारे विधातव्ये 'विलुंगयामो'त्ति निर्ग्रन्थः अकिञ्चन इत्यतः स गृहस्थः कारणे संयतो वा स्वयमेव संस्कारयेदित्युपसंहरति–तस्मात् 'तथाप्रकाराम्' अनेकदोषदुष्टां सङ्कडिं विज्ञाय सा पुरःसङ्कडिः पश्चात्सङ्कडिर्वा भवेत्, जातनामकरणविवाहादिका पुरःसङ्कडिः तथा मृतकसङ्कडिः पश्चात्सङ्कडिरिति, यदिवा पुरः–अग्रतः सङ्कडिर्भविष्यति अतोऽनागतमेव यायात्, वसतिं वा गृहस्थः संस्कुर्यात्, कृत्ता वा सङ्कडिरतोऽत्र तच्छेषोपभोगाय साधवः समागच्छेयुरिति, सर्वथा सर्वां सङ्कडिं सङ्कडिप्रतिज्ञया 'नोऽभिसंधारयेत्' न पर्यालोचयेद्गमनक्रियामिति, एवं तस्य भिक्षोः सामग्र्यं–सम्पूर्णता भिक्षुभावस्य यत्सर्वथा सङ्कडिवर्जनमिति ॥ प्रथमस्य द्वितीयः समासः ॥

उक्तो द्वितीयः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके दोषसंभवात्सङ्कडिगमनं निषिद्धं, प्रकारान्तरेणापि तद्गतानेव दोषानाह—

से एगइओ अन्नयरं संखडिं आसित्ता पिबित्ता छड्डिज्ज वा वमिज्ज वा भुत्ते वा से नो सम्मं परिणमिज्जा अन्नयरे वा से दुक्खे रोगायंके समुप्पज्जिज्जा केवली बूया आयाणमेयं ॥ (सू० १४) इह खलु भिक्खू गाहावईहिं वा गाहावईणीहिं वा परिवायएहिं वा परिवाईयाहिं वा एगज्जं सद्धिं सुंडं पाउं भो वइमिस्सं हुरत्था वा उवस्सयं पडिलेहेमाणे नो लभिज्जा तमेव उवस्सयं संमिस्सीभावमावज्जिज्जा, अन्नमणे वा से मत्ते विप्परियासियभूए इत्थिविग्गहे वा किलीबे वा तं भिक्खुं

उवसंकमित्तु बूया—आउसंतो समणा! अहे आरामंसि वा अहे उवस्सयंसि वा राओ वा वियाले वा गामधम्मनियंतियं कट्टु रहस्सियं मेहुणधम्मपरियारणाए आउट्टामो, तं चेवेगइओ सातिज्जिज्जा—अकरणिज्जं चेयं संखाए एए आयाणा (आयतणाणि) संति संविज्जमाणा पच्चवाया भवंति, तम्हा से संजए नियंठे तहप्पगारं पुरेसंखडिं वा पच्छासंखडिं वा संखडिं संखडिपडियाए नो अभिसंधारिज्जा गमणाए ॥ (सू० १५)

स भिक्षुः 'एकदा' कदाचिद् एकचरो वा 'अन्यतरां' काञ्चित्पुरःसङ्कडिं पश्चात्सङ्कडिं वा 'सङ्कडि'मिति सङ्कडिभक्तम् 'आस्वाद्य' भुक्त्वा तथा पीत्वा शिखरिणीदुग्धादि, तच्चातिलोलुपतया रसगृद्ध्याऽऽहारितं सत् 'छड्डेज्ज वा' छर्दिं विदध्यात्, कदाचिच्चापरिणतं सद्विशूचिकां कुर्यात्, अन्यतरो वा रोगः–कुष्ठादिकः आतङ्कस्त्वाशुजीवितापहारी शूलादिकः समुत्पद्येत, केवली–सर्वज्ञो ब्रूयात्, यथा 'एतत्' सङ्कडीभक्तम् 'आदानं' कर्मोपादानं वर्त्तत इति । यथैतदादानं भवति तथा दर्शयति—'इहे'ति सङ्कडिस्थानेऽस्मिन् वा भवेऽमी अपायाः आमुष्मिकास्तु दुर्गतिगमनादयः, खलुशब्दो वाक्यालङ्कारे, भिक्षणशीलो भिक्षुः स गृहपतिभिस्तद्भार्याभिर्वा परिव्राजकैः परिव्राजिकाभिर्वा सार्द्धमेकद्यम्–एकवाक्यतया संप्रधार्य 'भो' इत्यामन्त्रणे एतानामन्त्र्य चैतद्दर्शयति–सङ्कडिगतस्य लोलुपतया सर्वं संभाव्यत इत्यतस्तैर्व्यतिमिश्रं 'सोंडं'ति सीधुमन्यद्वा प्रसन्नादिकं 'पातुं' पीत्वा ततः 'हुरत्था वा' बहिर्वा निर्गत्योपाश्रयं याचेत, यदा च प्रत्युपेक्षमाणो विवक्षितमुपाश्रयं न लभेत ततस्तमेवोपाश्रयं यत्रासौ सङ्कडिस्तत्रान्यत्र वा गृहस्थपरिव्राजिकादिभिर्मिश्रीभावमापद्येत, तत्र चासावन्यमना मत्तो गृहस्थादिको विपर्यासीभूत आत्मानं न स्मरति, स वा भिक्षुरात्मानं न स्मरेत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मरणाच्चैवं चिन्तयेद्–यथाऽहं गृहस्थ एव, यदिवा–स्त्रीविग्रहे शरीरे 'विपर्यासीभूतः' अध्युपपन्नः 'क्लीबे वा' नपुंसके वा, सा च स्त्री नपुंसको वा, तं भिक्षुम् 'उपसङ्क्रम्य' आसन्नीभूय ब्रूयात्, तद्यथा–आयुष्मन्! श्रमण! त्वया सहैकान्तमहं प्रार्थयामि, तद्यथा–आरामे वोपाश्रये वा कालतश्च रात्रौ वा विकाले वा, तं भिक्षुं ग्रामधर्मैः–विषयोपभोगगतैर्व्यापारैर्नियन्त्रितं कृत्वा, तद्यथा–मम त्वया विप्रियं न विधेयं, प्रत्यहमहमनुसर्पणीयेति, एवमादिभिर्नियम्य ग्रामासन्ने वा कुत्रचिद्रहसि मिथुनं–दाम्पत्यं तत्र भवं मैथुनम्–अब्रह्मेति तस्य धर्माः–तद्गता व्यापारास्तेषां परियारणा–आसेवना तया 'आउट्टामो'त्ति प्रवर्त्तामहे, इदमुक्तं भवति–साधुमुद्दिश्य रहसि मैथुनप्रार्थनां काचित्कुर्यात्, तां चैकः कश्चिदेकाकी वा 'साइज्जेज्ज'त्ति अभ्युपगच्छेत्, अकरणीयमेतद् एवं 'सङ्गथाय' ज्ञात्वा सङ्गडिगमनं न कुर्याद्, यस्मादेतानि 'आयतनानि' कर्मोपादानकारणानि 'सन्ति' भवन्ति 'संचीयमानानि' प्रतिक्षणमुपचीयमानानि, इदमुक्तं भवति–अन्यान्यपि कर्मोपादानकारणानि भवेयुः, यत एवमादिकाः प्रत्यपाया भवन्ति तस्मादसौ संयतो निर्ग्रन्थस्तथाप्रकारां सङ्गडिं पुरःसङ्गडिं पश्चात्सङ्गडिं वा सङ्गडिं ज्ञात्वा सङ्गडिप्रतिज्ञया 'नाभिसंधारयेद् गमनाय' गन्तुं न पर्यालोचयेदित्यर्थः ॥ तथा—

से भिक्खू वा २ अन्नयरिं संखडिं सुच्चा निसम्म संपहावइ उस्सुयभूएण अप्पाणेणं, धुवा संखडी, नो संचाएइ तत्थ इयरेयरेहिं कुलेहिं सामुदाणियं एसियं वेसियं पिंडवायं पडिग्गाहित्ता आहारं आहारित्तए, माइट्ठाणं संफासे, नो एवं करिज्जा ॥ से तत्थ कालेण अणुपविसित्ता तत्थियरेयरेहिं कुलेहिं सामुदाणियं एसियं वेसियं पिंडवायं पडिगाहित्ता आहारं आहारिज्जा ॥ (सू. १६)

आ. सू. ५६

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३३१ ॥

स भिक्षुरन्यतरां पुरःसङ्गडिं पश्चात्सङ्गडिं वा श्रुत्वाऽन्यतः स्वतो वा 'निशम्य' निश्चित्य कुतश्चिद्धेतोस्ततस्तदभिमुखं संप्रधावत्युत्सुकभूतेनात्मना–यथा ममात्र भविष्यत्यद्भुतभूतं भोज्यं, यतस्तत्र 'ध्रुवा' निश्चिता सङ्गडिरस्ति, 'नो संचाएइ'त्ति न शक्नोति 'तत्र' सङ्गडिग्रामे इतरेतरेभ्यः कुलेभ्यः सङ्गडिरहितेभ्यः 'सामुयाणियं'ति भैक्षं, किम्भूतम्?—'एषणीयम्' आधाकर्मादिदोषरहितं 'वेसियं'ति केवलरजोहरणादिवेषालब्धमुत्पादनादिदोषरहितम्, एवंभूतं पिण्डपातम्–आहारं परिगृह्याभ्यवहर्त्तुं न शक्नोतीति सम्बन्धः, तत्र चासौ मातृस्थानं संस्पृशेत्, तस्य मातृस्थानं संभाव्येत, कथं?–यद्यपीतरकुलाहारप्रतिज्ञया गतो, न चासौ तमभ्यवहर्तुमलं पूर्वोक्त्या नीत्या, ततोऽसौ सङ्गडिमेव गच्छेत्, एवं च मातृस्थानं तस्य संभाव्येत, तस्माच्चैवं कुर्याद्–ऐहिकामुष्मिकापायभयात् सङ्गडिग्रामगमनं न विदध्यादिति ॥ यथा च कुर्यात्तथाऽऽह—'सः' भिक्षुः 'तत्र' सङ्गडिनिवेशे कालेनानुप्रविश्य तत्रेतरेतरेभ्यो गृहेभ्यः उग्रकुलादिभ्यः 'सामुदानिकं' समुदानं–भिक्षा तत्र भवं सामुदानिकम् 'एषणीयं' प्रासुकं 'वैषिकं' केवलवेषावाप्तं धात्रीपिण्डादिरहितं पिण्डपातं प्रतिगृह्याहारमाहारयेदिति ॥ पुनरपि सङ्गडिविशेषमधिकृत्याह—

से भिक्खू वा २ से जं पुण जाणिज्जा गामं वा जाव रायहाणिं वा इमंसि खलु गामंसि वा जाव रायहाणिंसि वा संखडी सिया तंपि य गामं वा जाव रायहाणिं वा संखडिं संखडिपडियाए नो अभिसंधारिज्जा गमणाए ॥ केवली बूया आयाणमेयं आइन्नाऽवमा णं संखडिं अणुपविस्समाणस्स—पाएण वा पाए अक्कंतपुव्वे भवइ, हत्थेण वा हत्थे संचालियपुव्वे भवेइ, पाएण वा पाए आवडियपुव्वे भवइ, सीसेण वा सीसे संघट्टियपुव्वे भवइ, काएण वा काए संखोभियपुव्वे भवइ, दंडेण वा अट्ठीण वा मुट्ठीण वा लेलुणा वा कवालेण वा अभिहयपुव्वेण वा भवइ, सीओदएण वा उस्सित्तपुव्वे भवइ, रयसा वा परिघासियपुव्वे भवइ, अणेसणिज्जे वा परिभुत्तपुव्वे भवइ, अन्नेसिं वा दिज्जमाणे पडिग्गाहियपुव्वे भवइ, तम्हा से संजए नियंठे तहप्पगारं आइन्नावमा णं संखडिं संखडिपडियाए नो अभिसंधारिज्जा गमणाए ॥ (सू. १७)

॥ ३३१ ॥

स भिक्षुर्यदि पुनरेवंभूतं ग्रामादिकं जानीयात्, तद्यथा–ग्रामे वा नगरे वा यावद्राजधान्यां वा सङ्गडिर्भविष्यति, तत्र च चरकादयोऽपरे वा भिक्षाचराः स्युरतस्तदपि ग्रामादिकं सङ्गडिप्रतिज्ञया 'नाभिसन्धारयेद्गमनाय' न तत्र गमनं कुर्यादित्यर्थः ॥ तद्गतांश्च दोषान् सूत्रेणैवाह—केवली ब्रूयाद् यथैतदादानं–कर्मोपादानं वर्त्तत इति दर्शयति–सा च सङ्गडिः आकीर्णा वा भवेत्–चरकादिभिः सङ्कुला 'अवमा'हीना शतस्योपस्कृते पञ्चशतोपस्थानादिति, तां चाकीर्णामवमां चानुप्रविशतोऽमी दोषाः, तद्यथा–पादेनापरस्य पाद आक्रान्तो भवेत्, हस्तेन वा हस्तः संचालितो भवेत्, 'पात्रेण वा' भाजनेन वा 'पात्रं' भाजनमापतितपूर्वं भवेत्, शिरसा वा शिरः सङ्घट्टितं भवेत्, कायेनापरस्य–चरकादेः कायः सङ्क्षोभितपूर्वो भवेदिति, स च चरकादिरारुषितः कलहं कुर्यात्, कुपितेन च तेन दण्डेनास्थ्ना वा मुष्टिना वा लोष्टेन वा कपालेन वा साधुरभिहतपूर्वो भवेत्, तथा शीतोदकेन वा कश्चित्सिञ्चेत्, रजसा वा परिघर्षितो भवेत्। एते तावत्सङ्कीर्णदोषाः, अवमदोषाश्चामी–अनेषणीयपरिभोगो भवेत्, स्तोकस्य संस्कृतत्वात्प्रभूतत्वाच्चार्थिनां, प्रकरणकारस्यायमाशयः स्याद्–यथा मत्प्रकरणमुद्दिश्यैते समायातास्तत एतेभ्यो मया यथाकथञ्चिद्देयमित्यभिसन्धिनाऽऽधाकर्माद्यपि कुर्याद्, अतोऽनेषणीयपरिभोगः स्यादिति, कदाचिद्वा दात्राऽन्यस्मै दातुमभिवाञ्छितं, तच्चान्यस्मै दीयमानमन्तराले साधुर्गृह्णीयात्, तस्मादेतान् दोषानभिसंप्रधार्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयतो निर्ग्रन्थस्तथाप्रकारामाकीर्णामवमां वा सङ्खडिं विज्ञाय सङ्खडिप्रतिज्ञया नाभिसंधारयेद् गमनायेति ॥ साम्प्रतं सामान्येन पिण्डशङ्कामधिकृत्याह—

से भिक्खू वा २ जाव समाणे से जं पुण जाणिज्जा असणं वा ४ एसणिज्जे सिया अणेसणिज्जे सिया वितिगिंछसमावन्नेण अप्पाणेण असमाहडाए लेसाए तहप्पगारं असणं वा ४ लाभे संते नो पडिगाहिज्जा ॥ (सू. १८)

स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यत्पुनराहारजातमेषणीयमप्येवं शङ्केत, तद्यथा विचिकित्सा—जुगुप्सा वाऽनेषणीयाशङ्का तया समापन्नः—शङ्कागृहीत आत्मा यस्य स तथा तेन शङ्कासमापन्नेनात्मना 'असमाहडाए' अशुद्धया लेश्यया—उद्गमादिदोषदुष्टमिदमित्येवं चित्तविप्लुत्याऽशुद्धा लेश्या—अन्तःकरणरूपोपजायते तया सत्या 'तथाप्रकारम्' अनेषणीयं शङ्कादिदोषदुष्टमाहारादिकं सति लाभे "'जं संके तं समावज्जे" इति वचनान्न प्रतिगृह्णीयादिति ॥ साम्प्रतं गच्छनिर्गतानधिकृत्य सूत्रमाह—

से भिक्खू० गाहावइकुलं पविसिउकामे सव्वं भंडगमायाए गाहावइकुलं पिंडवायपडियाए पविसिज्ज वा निक्खमिज्ज वा ॥ से भिक्खू वा २ बहिया विहारभूमिं वा वियारभूमिं वा निक्खममाणे वा पविसमाणे वा सव्वं भंडगमायाए बहिया विहारभूमिं वा वियारभूमिं वा निक्खमिज्ज वा पविसिज्ज वा ॥ से भिक्खू वा २ गामाणुगामं दूइज्जमाणे सव्वं भंडगमायाए गामाणुगामं दूइज्जिज्जा ॥ (सू. १९)

१ यं शङ्केत तं सम्यगेत.

स भिक्षुर्गच्छनिर्गतो जिनकल्पिकादिर्गृहपतिकुलं प्रवेष्टुकामः 'सर्वं' निरवशेषं 'भण्डकं' धर्मोपकरणम् 'आदाय' गृहीत्वा गृहपतिकुलं पिण्डपातप्रतिज्ञया प्रविशेद्वा ततो निष्क्रामेद्वा । तस्य चोपकरणमनेकधेति, तद्यथा—"दुग तिग चउक्क पंचग नव दस एक्कारसेव बारसहे"त्यादि । तत्र जिनकल्पिको द्विविधः—छिद्रपाणिरच्छिद्रपाणिश्च, तत्राच्छिद्रपाणेः शक्त्यनुरूपाभिग्रहविशेषाद् द्विविधमुपकरणं, तद्यथा—रजोहरणं मुखवस्त्रिका च, कस्यचित्त्वकृत्राणार्थं क्षौमपटपरिग्रहात्त्रिविधम्, अपरस्योदकबिन्दुपरितापादिरक्षणार्थमौर्णिकपटपरिग्रहाच्चतुर्द्धा, तथाऽसहिष्णुतरस्य द्वितीयक्षौमपटपरिग्रहात्पञ्चधेति । छिद्रपाणेस्तु जिनकल्पिकस्य सप्तविधपात्रनियोगसमन्वितस्य रजोहरणमुखवस्त्रिकादिग्रहणक्रमेण यथायोगं नवविधो दशविध एकादशविधो द्वादशविधश्चोपधिर्भवति, पात्रनियोगश्च—"पत्तं १ पत्ताबंधो २ पायट्ठवणं ३ च पायकेसरिया ४ । पडलाइ ५ रयत्ताणं ६ च गोच्छओ ७ पायनिज्जोगो ॥ १ ॥" अन्यत्रापि गच्छता सर्वमुपकरणं गृहीत्वा गन्तव्यमित्याह—स भिक्षुर्ग्रामादेर्बहिर्विहारभूमिं स्वाध्यायभूमिं वा तथा 'विचारभूमिं' विष्ठोत्सर्गभूमिं सर्वमुपकरणमादाय प्रविशेन्निष्क्रामेद्वा, एतद्वितीयं, एवं ग्रामान्तरेऽपि तृतीयं सूत्रम् ॥ साम्प्रतं गमनाभावे निमित्तमाह—

से भिक्खू० अह पुण एवं जाणिज्जा—तिव्वदेसियं वासं वासेमाणं पेहाए तिव्वदेसियं महियं संनिचयमाणं पेहाए महावाएण वा रयं समुद्धुयं पेहाए तिरिच्छसंपाइमा वा तसा पाणा संथडा संनिचयमाणा पेहाए से एवं नच्चा नो सव्वं भंडग-

१ पात्रं पात्रबन्धः पात्रस्थापनं च पात्रकेशरिका । पटलानि रजस्त्राणं च गोच्छकः पात्रनियोगः ॥ १ ॥

मायाए गाहावइकुलं पिंडवायपडियाए पविसिज्ज वा निक्खमिज्ज वा बहिया विहारभूमिं वा वियारभूमिं वा निक्खमिज्ज वा पविसिज्ज वा गामाणुगामं दूइज्जिज्जा ॥ (सू० २०)

स भिक्षुरथ पुनरेवं विजानीयात्, तद्यथा—तीव्रं—बृहद्वारोपेतं देशिकं—बृहत्क्षेत्रव्यापि तीव्रं च तदेशिकं चेति समासः, बृहद्वारं महति क्षेत्रे वर्षन्तं प्रेक्ष्य, तथा तीव्रदेशिकां—महति देशेऽन्धकारोपेतां 'महिकां वा' धूमिकां संनिपतन्तीं 'प्रेक्ष्य' उपलभ्य, तथा महावातेन वा समुद्धूतं रजः प्रेक्ष्य तिरश्चीनं वा संनिपततो—गच्छतः 'प्राणिनः' पतङ्गादीन् 'संस्कृ(स्तृ)तान्' घनान् प्रेक्ष्य स भिक्षुरेवं ज्ञात्वा गृहपतिकुलादौ सूत्रत्रयोद्दिष्टं सर्वमादाय न गच्छेन्नापि निष्क्रामेद्वेति, इदमुक्तं भवति—सामाचार्येवैषा यथा गच्छता साधुना गच्छनिर्गतेन तदन्तर्गतेन वा उपयोगो दातव्यः, तत्र यदि वर्षमहिकादिकं जानीयात्ततो जिनकल्पिको न गच्छत्येव, यतस्तस्य शक्तिरेषा यया षण्मासं यावत्पुरीषोत्सर्गनिरोधं विदध्यात्, इतरस्तु सति कारणे यदि गच्छेत् न सर्वमुपकरणं गृहीत्वा गच्छेदिति तात्पर्यार्थः ॥ अधस्ताज्जुगुप्सितेषु दोषदर्शनात्प्रवेशप्रतिषेध उक्तः, साम्प्रतमजुगुप्सितेष्वपि केषुचिद्दोषदर्शनात्प्रवेशप्रतिषेधं दर्शयितुमाह—

से भिक्खू वा २ से जाइं पुण कुलाइं जाणिज्जा तंजहा—खत्तियाण वा राईण वा कुराईण वा रायपेसियाण वा रायवंसट्ठियाण वा अंतो वा बाहिं वा गच्छंताण वा संनिविट्ठाण वा निमंतेमाणाण वा अनिमंतेमाणाण वा असणं वा ४ लाभे संते नो पडिगाहिज्जा (सू० २१)॥ १—१—३ ॥ पिण्डैषणायां तृतीय उद्देशकः ॥

स भिक्षुर्यानि पुनरेवंभूतानि कुलानि जानीयात्, तद्यथा—क्षत्रियाः—चक्रवर्तिवासुदेवबलदेवप्रभृतयस्तेषां कुलानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजानः–क्षत्रियेभ्योऽन्य, कुराजानः–प्रत्यन्तराजानः, राजप्रेष्याः–दण्डपाशिकप्रभृतयः, राजवंशे स्थिता–राज्ञो मातुलभागिनेयादयः, एतेषां कुलेषु संपातभयान्न प्रवेष्टव्यं, तेषां च गृहान्तर्बहिर्वा स्थितानां 'गच्छतां' पथि वहतां 'संनिविष्टानाम्' आवासितानां निमन्त्र्यतामनिमन्त्र्यतां वाऽशनादि सति लाभे न गृह्णीयादिति ॥ प्रथमस्याध्ययनस्य तृतीय उद्देशकः समाप्तः ॥ १–१–३ ॥

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके सङ्खडिगतो विधिरभिहितस्तदिहापि तच्छेषविधेः प्रतिपादनार्थमाह—

से भिक्खू वा० जाव समाणे से जं पुण जाणेज्जा मंसाइयं वा मच्छाइयं वा मंसखलं वा मच्छखलं वा आहेणं वा पहेणं वा हिंगोलं वा संमेलं वा हीरमाणं पेहाए अंतरा से मग्गा बहुपाणा बहुबीया बहुहरिया बहुओसा बहुउदया बहुउत्तिंगपणगदगमट्टीयमक्कडासंताणया बहवे तत्थ समणमाहणअतिहिकिवणवणीमगा उवागया उवागमिस्संति (उवागच्छंति) तत्थाइण्णा वित्ती नो पन्नस्स निक्खमणपवेसाए नो पन्नस्स वायणपुच्छणपरियट्टणाणुप्पेहधम्माणुओगचिंताए, से एवं नच्चा तहप्पगारं पुरेसंखडिं वा पच्छासंखडिं वा संखडिं संखडिपडिआए नो अभिसंधारिज्जा गमणाए ॥ से भिक्खू वा० से जं पुण जाणिज्जा मंसाइयं वा मच्छाइयं वा जाव हीरमाणं वा पेहाए अंतरा से मग्गा अप्पा पाणा जाव संताणगा नो जत्थ बहवे समण० जाव उवागमिस्संति अप्पाइण्णा वित्ती पन्नस्स निक्खमणपवेसाए पन्नस्स वायणपुच्छणपरियट्टणाणुप्पेहधम्माणुओगचिंताए. सेवं नच्चा तहप्पगारं पुरेसंखडिं वा० अभिसंधारिज्ज गमणाए ॥ (सू० २२)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३३४ ॥

स भिक्षुः क्वचिद्ग्रामादौ भिक्षार्थं प्रविष्टः सन् यद्येवंभूता सङ्खडिं जानीयात् तत्प्रतिज्ञया नाभिसंधारयेद् गमनायेत्यन्ते क्रिया, यादृग्भूतां च सङ्खडिं न गन्तव्यं तां दर्शयति–मांसमादौ प्रधानं यस्यां सा मांसादिका तामिति, इदमुक्तं भवति–मांसनिवृत्तिं कर्तुकामाः पूर्णायां वा निवृत्तौ मांसप्रचुरां सङ्खडिं कुर्युः, तत्र कश्चित्स्वजनादिस्तदनुरूपमेव किञ्चिन्नयेत्, तच्च नीयमानं दृष्ट्वा न तत्र गन्तव्यं, तत्र दोषान् वक्ष्यतीति, तथा मत्स्या आदौ प्रधानं यस्यां सा तथा, एवं मांसखलमिति, यत्र सङ्खडिनिमित्तं मांसं छित्त्वा छित्त्वा शोष्यते शुष्कं वा पुञ्जीकृतमास्ते तत्तथा, क्रिया पूर्ववत्, एवं मत्स्यखलमपीति, तथा 'आहेणं'ति यद्विवाहोत्तरकालं वधूप्रवेशे वरगृहे भोजनं क्रियते, 'पहेणं'ति वध्वा नीयमानाया यत्पितृगृहभोजनमिति, 'हिंगोलं'ति मृतकभक्तं यक्षादियात्राभोजनं वा, 'संमेलं'ति परिजनसन्मानभक्तं गोष्ठीभक्तं वा, तदेवंभूतां सङ्खडिं ज्ञात्वा तत्र च केनचित्स्वजनादिना तन्निमित्तमेव किञ्चिद् 'ह्रियमाणं' नीयमानं प्रेक्ष्य तत्र भिक्षार्थं न गच्छेद्, यतस्तत्र गच्छतो गतस्य च दोषाः संभवन्ति, तांश्च दर्शयति–गच्छतस्तावदन्तरा–अन्तराले 'तस्य' भिक्षोः 'मार्गाः' पन्थानो बहवः प्राणाः–प्राणिनः–पतङ्गादयो येषु ते तथा, तथा बहुबीजा बहुहरिता बहूदश्याया बहूदका बहूत्तिङ्गपनकोदकमृत्तिकामर्कटसन्तानकाः, प्राप्तस्य च तत्र सङ्खडिस्थाने बहवः श्रमणब्राह्मणातिथिकृपणवणीमगा उपागता उपागमिष्यन्ति तथोपागच्छन्ति च, तत्राकीर्णा चरकादिभिः 'वृत्तिः' वर्त्तनम् अतो न तत्र प्राज्ञस्य निष्क्रमणप्रवेशाय वृत्तिः कल्पते, नापि प्राज्ञस्य वाचनाप्रच्छनापरिवर्त्तनाऽनुप्रेक्षाधर्मानुयोगचिन्तायै वृत्तिः कल्पते, न तत्र जनाकीर्णे गीतवादित्रसम्भवात् स्वाध्यायादिक्रियाः प्रवर्त्तन्त इति भावः, स भिक्षुरेवं गच्छगतापेक्षया बहुदोषां तथाप्रकारां मांसप्रधानादिकां पुरःसङ्खडिं पश्चात्सङ्खडिं वा ज्ञात्वा तत्प्रतिज्ञया नाभिसन्धारयेद्गमनायेति ॥ साम्प्रतमपवादमाह –स भिक्षुरध्वानक्षीणो ग्लानोत्थितस्तपश्चरणकर्शितो वाऽत्यमौदर्यं वा प्रेक्ष्य दुर्लभद्रव्यार्थी वा स यदि पुनरेवं जानीयात्–मांसादिकमित्यादि पूर्ववदालापका यावदन्तरा–अन्तराले 'से' तस्य भिक्षोर्गच्छतो मार्गा अल्पप्राणा अल्पबीजा अल्पहरिता इत्यादि व्यत्ययेन पूर्ववदालापकः, तदेवमल्पदोषां सङ्खडिं ज्ञात्वा मांसादिदोषपरिहरणसमर्थः सति कारणे तत्प्रतिज्ञयाऽभिसंधारयेद्गमनायेति ॥ पिण्डाधिकारेऽनुवर्त्तमाने भिक्षागोचरविशेषमधिकृत्याह—

से भिक्खू वा २ जाव पविसिउकामे से जं पुण जाणिज्जा खीरिणियाओ गावीओ खीरिज्जमाणीओ पेहाए असणं वा ४ उवसंखडिज्जमाणं पेहाए पुरा अप्पजूहिए सेवं नच्चा नो गाहावइकुलं पिंडवायपडियाए निक्खमिज्ज वा पविसिज्ज वा ॥ से तमादाय एगंतमवक्कमिज्जा अणावायमसंलोए चिट्ठिज्जा, अह पुण एवं जाणिज्जा–खीरिणियाओ गावीओ खीरियाओ पेहाए असणं वा ४ उवक्खडियं पेहाए पुराए जूहिए सेवं नच्चा तओ संजयामेव गाहा० निक्खमिज्ज वा ॥ (सू० २३)

स भिक्षुर्गृहपतिकुलं प्रवेष्टुकामः सन्नथ पुनरेवं विजानीयाद्, यथा क्षीरिण्यो गावोऽत्र दुह्यन्ते, ताश्च दुह्यमानाः प्रेक्ष्य तथाऽशनादिकं चतुर्विधमप्याहारमुपसंस्क्रियमाणं प्रेक्ष्य तथा 'अप्पजूहिए'त्ति सिद्धेऽप्योदनादिके 'पुरा' पूर्वमन्येषामदत्ते सति प्रवर्त्तमानाधिकरणापेक्षी पूर्वत्र च प्रकृतिभद्रकादिः कश्चिद्यतिं दृष्ट्वा श्रद्धावान् बहुतरं दुग्धं ददामीति वत्सकपीडां कुर्यात् त्रसेयुर्वा दुह्यमाना गावस्तत्र संयमात्मविराधना, अर्द्धपक्वौदने च पाकार्थं त्वरयाऽधिकं यत्नं कुर्यात्

श्रुतस्कं० २ चूलिका १ पिण्डैष० १ उद्देशः ४

॥ ३३४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः संयमविराधनेति, तदेवं ज्ञात्वा स भिक्षुर्गृहपतिकुलं पिण्डपातप्रतिज्ञया न प्रविशेन्नापि निष्कामेदिति ॥ यच्च कुर्यात्तद्दर्शयितुमाह—

'सः' भिक्षुः 'तम्' अर्थं गोदोहनादिकम् 'आदाय' गृहीत्वाऽवगम्येत्यर्थः, तत एकान्तमपक्रामेद्, अपक्रम्य च गृहस्थानामनापातेऽसंलोके च तिष्ठेत्, तत्र तिष्ठन्नथ पुनरेवं जानीयाद् यथा क्षीरिण्यो गावो दुग्धा इत्यादि पूर्वव्यत्ययेनालापका नेया यावन्निष्कामेत्प्रविशेद्वेति ॥ पिण्डाधिकार एवेदमाह—

भिक्खागा नामेगे एवमाहंसु—समाणा वा वसमाणा वा गामाणुगामं दूइज्जमाणे खुड्डाए खलु अयं गामे संनिरुद्धाए नो महालए से हंता भयंतारो बाहिरगाणि गामाणि भिक्खायरियाए वयह, संति तत्थेगइयस्स भिक्खुस्स पुरेसंथुया वा पच्छासंथुया वा परिवसंति, तंजहा—गाहावई वा गाहावइणीओ वा गाहावइपुत्ता वा गाहावइधूयाओ वा गाहावइसुण्हाओ वा धाइओ वा दासा वा दासीओ वा कम्मकरा वा कम्मकरीओ वा, तहप्पगाराइं कुलाइं पुरेसंथुयाणि वा पच्छासंथुयाणि वा पुव्वामेव भिक्खायरियाए अणुपविसिस्सामि, अविय इत्थ लभिस्सामि पिंडं वा लोयं वा खीरं वा दहिं वा नवणीयं वा घयं वा गुलं वा तिलं वा महुं वा मज्जं वा मंसं वा सक्कुलिं वा फाणियं वा पूयं वा सिहिरिणिं वा, तं पुव्वामेव भुच्चा पिच्चा पडिग्गहं च संलिहिय संमज्जिय तओ पच्छा भिक्खूहिं सद्धिं गाहा० पविसिस्सामि वा निक्खमिस्सामि वा, माइट्ठाणं संफासे, तं नो एवं करिज्जा ॥ से तत्थ भिक्खूहिं सद्धिं कालेण अणुपविसित्ता तत्थियरेयरेहिं कुलेहिं सामुदाणियं एसियं वेसियं पिंडवायं पडिगाहित्ता आहारं आहारिज्जा, एयं खलु तस्स भिक्खुस्स वा भिक्खुणीए वा सामग्गियं० (सू० २४) ॥ १—१—४ ॥ पिण्डैषणायां चतुर्थ उद्देशकः ॥

॥ २३५ ॥

भिक्षणशीला भिक्षुका नामैके साधवः केचनैवमुक्तवन्तः, किम्भूतास्ते इत्याह—'समानाः' इति अङ्गाबलपरिक्षीणतयैकस्मिन्नेव क्षेत्रे तिष्ठन्तः, तथा 'वसमानाः' मासकल्पविहारिणः, त एवंभूताः प्राघूर्णकान् समायातान् ग्रामानुग्रामं दूयमानान्—गच्छत एवमूचुः—यथा क्षुल्लकोऽयं ग्रामोऽल्पगृहभिक्षादो वा, तथा संनिरुद्धः—सूतकादिना, नो महानिति पुनर्वचनमादरख्यापनार्थम्, अतिशयेन क्षुल्लक इत्यर्थः, ततो हन्त! इत्यामन्त्रणं, यूयं भवन्तः—पूज्या बहिर्ग्रामेषु भिक्षाचर्यार्थं व्रजतेत्येवं कुर्यात्, यदिवा तत्रैकस्य वास्तव्यस्य भिक्षोः 'पुरःसंस्तुताः' भ्रातृव्यादयः 'पश्चात्संस्तुताः' श्वशुरकुलसंबद्धाः परिवसन्ति, तान् स्वनामग्राहमाह, तद्यथा—गृहपतिर्वेत्यादि सुगमं यावत्तथाप्रकाराणि कुलानि पुरःपश्चात्संस्तुतानि पूर्वमेव भिक्षाकालादहमेतेषु भिक्षार्थं प्रवेक्ष्यामि, अपि चैतेषु स्वजनादिकुलेष्वभिप्रेतं लाभं लप्स्ये, तदेव दर्शयति—'पिण्डं' शाल्योदनादिकं 'लोयम्' इतीन्द्रियानुकूलं रसाद्युपेतमुच्यते, तथा क्षीरं वेत्यादि सुगमं यावत्सिहरिणीं वेति नवरं मद्यमांसे छेदसूत्राभिप्रायेण व्याख्येये, अथवा कश्चिदतिप्रमादावष्टब्धोऽत्यन्तगृध्नुतया मधुमद्यमांसान्यप्याश्रयेदतस्तदुपादानं, 'फाणियं'ति उदकेन द्रवीकृतो गुडः क्वथितोऽक्वथितो वा शिखरिणी मार्जिता, तल्लब्धं पूर्वमेव भुक्त्वा पेयं च पीत्वा पतद्ग्रहं संलिह्य निरवयवं कृत्वा संमृज्य च वस्त्रादिनाऽऽर्द्रतामपनीय ततः पश्चाद्वपागते भिक्षाकालेऽविकृत-

वदनः प्राघूर्णकभिक्षुभिः सार्द्धं गृहपतिकुलं पिण्डपातप्रतिज्ञया प्रवेक्ष्यामि निष्क्रमिष्यामि चेत्यभिसन्धिना मातृस्थानं संस्पृशेदसावित्यतः प्रतिषिध्यते—नैवं कुर्यादिति ॥ कथं च कुर्यादित्याह—

'सः' भिक्षुः 'तत्र' ग्रामादौ प्राघूर्णकभिक्षुभिः सार्द्धं 'कालेन' भिक्षावसरेण प्राप्तेन गृहपतिकुलमनुप्रविश्य तत्र 'इतरेतरेभ्यः' उच्चावचेभ्यः कुलेभ्यः 'सामुदानिकं' भिक्षापिण्डम् 'एषणीयम्' उद्गमादिदोषरहितं 'वैषिकं' केवलवेषधारिणं धात्रीदूतनिमित्तादिपिण्डदोषरहितं 'पिण्डपातं' भैक्षं प्रतिगृह्य प्राघूर्णकादिभिः सह प्रासैषणादिदोषरहितमाहारमाहारयेद्, एतत्तस्य भिक्षोः 'सामग्र्यं' संपूर्णो भिक्षुभाव इति ॥ प्रथमस्य चतुर्थः समाप्तः १—१—४ ॥

उक्तश्चतुर्थोद्देशकः, अधुना पञ्चमः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके पिण्डग्रहणविधिरभिहितः, अत्रापि स एवाभिधीयत इत्याह—

से भिक्खू वा २ जाव पविट्ठे समाणे से जं पुण जाणिज्जा—अग्गपिंडं उक्खिप्पमाणं पेहाए अग्गपिंडं निक्खिप्पमाणं पेहाए अग्गपिंडं हीरमाणं पेहाए अग्गपिंडं परिभाइज्जमाणं पेहाए अग्गपिंडं परिभुंजमाणं पेहाए अग्गपिंडं परिट्ठविज्जमाणं पेहाए पुरा असिणाइ वा अवहाराइ वा पुरा जत्थऽण्णे समण० वणीमगा खद्धं २ उवसंकमंति से हंता अहमवि खद्धं २ उवसंकमामि, माइट्ठाणं संफासे, नो एवं करेज्जा ॥ (सू० २५)

॥ २३६ ॥

स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यत्पुनरेवं जानीयात्तद्यथा—अग्रपिण्डो—निष्पन्नस्य शाल्योदनादेराहारस्य देवताद्यर्थं

स्तोकस्तोकोद्धारस्तमुत्क्षिप्यमाणं दृष्ट्वा, तथाऽन्यत्र निक्षिप्यमाणं, तथा 'ह्रियमाणं' नीयमानं देवतायतनादौ, तथा 'परिभज्यमानं' विभज्यमानं स्तोकं स्तोकमन्येभ्यो दीयमानं, तथा परिभुज्यमानं, तथा परित्यज्यमानं-देवायतनाद्यनुदिक्षु क्षिप्यमाणं, तथा 'पुरा असिणाइ व'त्ति-'पुरा'पूर्वमन्ये श्रमणादयो येऽमुमग्रपिण्डमशितवन्तः, तथा पूर्वमपहृतवन्तो-व्यवस्थयाऽव्यवस्थया वा गृहीतवन्तः, तदभिप्रायेण पुनरपि पूर्वमिव वयमत्र लप्स्यामह इति यत्राग्रपिण्डादौ श्रमणादयः 'खद्धं खद्धं'ति त्वरितं त्वरितमुपसंक्रामन्ति, स भिक्षुरेतदपेक्ष्य कश्चिदेवं 'कुर्याद्' आलोचयेद्, यथा 'हन्त' इति वाक्योपन्यासार्थः अहमपि त्वरितमुपसंक्रमामि, एवं च कुर्वन् भिक्षुर्मातृस्थानं संस्पृशेदित्यतो नैवं कुर्यादिति ॥ साम्प्रतं भिक्षाटनविधिप्रदर्शनार्थमाह—

से भिक्खू वा० जाव समाणे अंतरा से वप्पाणि वा फलिहाणि वा पागाराणि वा तोरणाणि वा अग्गलाणि वा अग्गलपासगाणि वा सति परक्कमे संजयामेव परिक्कमिज्जा, नो उज्जुयं गच्छिज्जा, केवली बूया आयाणमेयं, से तत्थ परक्कममाणे पयलिज्ज वा पक्खलेज्ज वा पवडिज्ज वा, से तत्थ पयलमाणे वा पक्खलेज्जमाणे वा पवडमाणे वा, तत्थ से काए उच्चारेण वा पासवणेण वा खेलेण वा सिंघाणेण वा वंतेण वा पित्तेण वा पूएण वा सुक्केण वा सोणिएण वा उवलित्ते सिया, तहप्पगारं कायं नो अणंतरहियाए पुढवीए नो ससिणिद्धाए पुढवीए नो, ससरक्खाए पुढवीए नो चित्तमंताए सिलाए नो चित्तमंताए लेलूए कोलावासंसि वा दारुए जीवपइट्ठिए सअंडे सपाणे जाव ससंताणए नो आमज्जिज्ज वा पमज्जिज्ज वा संलिहिज्ज वा निलिहिज्ज वा उव्वलेज्ज वा उव्वट्टिज्ज वा आयाविज्ज वा पयाविज्ज वा, से पुव्वामेव अप्पससरक्खं तणं वा

पत्तं वा कट्ठं वा सक्करं वा जाइज्जा, जाइत्ता से तमायाय एगंतमवक्कमिज्जा २ अहे झामथंडिलंसि वा जाव अन्नयरंसि वा तहप्पगारंसि पडिलेहिय पडिलेहिय पमज्जिय पमज्जिय तओ संजयामेव आमज्जिज्ज वा जाव पयाविज्ज वा ॥ (सू० २६)

स भिक्षुर्भिक्षार्थं गृहपतिकुलं-पाटकं रथ्यां ग्रामादिकं वा प्रविष्टः सन् मार्गं प्रत्युपेक्षेत, तत्र यदि 'अन्तरा' अन्तराले 'से' तस्य भिक्षोर्गच्छत एतानि स्युः, तद्यथा—'वप्राः' समुन्नता भूभागा ग्रामान्तरे वा केदाराः, तथा परिखा वा प्राकारा वा गृहस्य पत्तनस्य वा, तथा तोरणानि वा, तथाऽर्गला वाऽर्गलपाशका वा-यत्रार्गलाऽग्राणि निक्षिप्यन्ते, एतानि चान्तराले ज्ञात्वा प्रक्रम्यतेऽनेनेति प्रक्रमो-मार्गस्तस्मिन्नन्यस्मिन् सति संयत एव तेन 'पराक्रमेत' गच्छेत्, नैवर्जुना गच्छेत्, किमिति?, यतः 'केवली' सर्वज्ञो ब्रूयाद् 'आदानं' कर्मादानमेतत्, संयमात्मविराधनातः, तामेव दर्शयति—'स' भिक्षुः 'तत्र' तस्मिन् वप्रादियुक्ते मार्गे 'पराक्रममाणः' गच्छन् विषमत्वान्मार्गस्य कदाचित् 'प्रचलेत्' कम्पेत् प्रस्खलेद्वा तथा प्रपतेद्वा, स तत्र प्रस्खलन् प्रपतन् वा षण्णां कायानामन्यतमं विराधयेत्, तथा तत्र 'से' तस्य काय उच्चारेण वा प्रस्रवणेन वा श्लेष्मणा वा सिङ्घानकेन वा वान्तेन वा पित्तेन वा पूतेन वा शुक्रेण वा शोणितेन वा उपलिप्तः स्यादित्यत एवंभूतेन पथा न गन्तव्यम्, अथ मार्गान्तराभावात्तेनैव गतः प्रस्खलितः सन् कर्दमाद्युपलिप्तकायो नैवं कुर्यादिति दर्शयति—स यतिस्तथाप्रकारम्—अशुचिकर्दमाद्युपलिप्तं कायमनन्तर्हितया—अव्यवहितया पृथिव्या तथा 'सस्निग्धया' आर्द्रया एवं सरजस्कया वा, तथा 'चित्तवत्या' सचित्तया शिलया, तथा चित्तवता 'लेलुना' पृथिवीशकलेन वा, एवं कोलाघुणास्तदावासभूते दारुणि जीवप्रतिष्ठिते साण्डे सप्राणिनि यावत्ससन्तानके 'नो' नैव सकृदामृज्यान्नापि पुनः पुनः

प्रमृज्यात्, कर्दमादि शोधयेदित्यर्थः, तथा तत्रस्थ एव 'न संलिहेज्जा' न संलिखेत्, नोद्वर्तनादिनोद्वलेत्, नापि तदेवेषच्छुष्कमुद्वर्तयेत्, नापि तत्रस्थ एव सकृदातापयेत्, पुनः पुनर्वा प्रतापयेत्, यत्कुर्यात्तदाह—स भिक्षुः 'पूर्वमेव' तदनन्तरमेवाल्परजस्कं तृणादि याचेत, तेन चैकान्तस्थण्डिले स्थितः सन् गात्रं 'प्रमृज्यात्' शोधयेत्, शेषं सुगममिति ॥ किञ्च—

से भिक्खू वा० से जं पुण जाणिज्जा गोणं वियालं पडिपहे पेहाए महिसं वियालं पडिपहे पेहाए, एवं मणुस्सं आसं हत्थिं सीहं वग्घं विगं दीवियं अच्छं तरच्छं परिसरं सियालं विरालं सुणयं कोलसुणयं कोकंतियं चित्ताचिल्लडयं वियालं पडिपहे पेहाए सइ परक्कमे संजयामेव परक्कमेज्जा, नो उज्जुयं गच्छिज्जा । से भिक्खू वा० समाणे अंतरा से उवाओ वा खाणुए वा कंटए वा घसी वा भिलुगा वा विसमे वा विज्जले वा परियावज्जिज्जा, सइ परक्कमे संजयामेव, नो उज्जुयं गच्छिज्जा ॥ (सू० २७)

स भिक्षुर्भिक्षार्थं प्रविष्टः सन् पथ्युपयोगं कुर्यात्, तत्र च यदि पुनरेवं जानीयाद् यथाऽत्र किञ्चिद्गवादिकमास्त इति तन्मार्गं रुन्धानं 'गां' बलीवर्दं 'व्यालं' दुष्टमित्यर्थः, पन्थानं प्रति प्रतिपथस्तस्मिन् स्थितं प्रत्युपेक्ष्य, शेषं सुगमं, यावत्सति पराक्रमे-मार्गान्तरे ऋजुना पथाऽऽत्मविराधनासम्भवान्न गच्छेत्, नवरं 'विगं'ति वृकं 'द्वीपिनं' चित्रकम् 'अच्छं'ति ऋक्षं 'परिसर'न्ति सरभं 'कोलसुणयं' महासूकरं 'कोकंतिय'न्ति शृगालाकृतिर्लोमटको रात्रौ को को इत्येवं रारटीति, 'चित्ताचिल्लडयं'ति आरण्यो जीवविशेषस्तमिति ॥ तथा—स भिक्षुर्भिक्षार्थं प्रविष्टः सन् मार्गोपयोगं दद्यात्, तत्रान्तराले यद्येतत्पर्यापद्येत-स्यात्, तद्यथा—'अवपातः' गर्तः स्थाणुर्वा कण्टको वा घसी नाम-सालादधस्तादवतरणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भिलुग'त्ति स्फुटितकृष्णभूराजिः विषमं-निम्नोन्नतं विज्जलं-कर्दमः तत्रात्मसंयमविराधनासम्भवात् 'पराक्रमे' मार्गान्तरे सति ऋजुना पथा न गच्छेदिति ॥ तथा—

से भिक्खू वा० गाहावइकुलस्स दुवारबाहं कंटगबुंदियाए परिपिहियं पेहाए तेसिं पुव्वामेव उग्गहं अणणुन्नविय अपडिलेहिय अप्पमज्जिय नो अवंगुणिज्ज वा पविसिज्ज वा निक्खमिज्ज वा, तेसिं पुव्वामेव उग्गहं अणुन्नविय पडिलेहिय पडिलेहिय पमज्जिय पमज्जिय तओ संजयामेव अवंगुणिज्ज वा पविसेज्ज वा निक्खमेज्ज वा ॥ (सू० २८)

स भिक्षुर्भिक्षार्थं प्रविष्टः सन् गृहपतिकुलस्य 'दुवारबाहं'ति द्वारभागस्तं कण्टकशाखया 'पिहितं' स्थगितं प्रेक्ष्य येषां तद्गृहं तेषामवग्रहं पूर्वमेव 'अननुज्ञाप्य' अयाचित्वा, तथा अप्रत्युपेक्ष्य चक्षुषाऽप्रमृज्य च रजोहरणादिना 'नोऽवंगुणेज्ज'त्ति नैवोद्घाटयेद्, उद्घाट्य च न प्रविशेन्नापि निष्क्रामेत्, दोषदर्शनात्, तथाहि-गृहपतिः प्रद्वेषं गच्छेत्, नष्टे च वस्तुनि साधुविषया शङ्कोत्पद्येत, उद्घाटद्वारे चान्यत् पश्वादि प्रविशेदित्येवं च संयमात्मविराधनेति । सति कारणेऽपवादमाह-स भिक्षुर्येषां तद्गृहं तेषां सम्बन्धिनमवग्रहम् 'अनुज्ञाप्य' याचित्वा प्रत्युपेक्ष्य प्रमृज्य च गृहोद्घाटनादि कुर्यादिति, एतदुक्तं भवति-स्वतो द्वारमुद्घाट्य न प्रवेष्टव्यमेव, यदि पुनर्ग्लानाचार्यादिप्रायोग्यं तत्र लभ्यते वैद्यो वा तत्रास्ते दुर्लभं वा द्रव्यं तत्र भविष्यति अवमौदर्ये वा सत्येभिः कारणैरुपस्थितैः स्थगितद्वारि व्यवस्थितः सन् शब्दं कुर्यात्, स्वयं वा यथाविध्युद्घाट्य प्रवेष्टव्यमिति ॥ तत्र प्रविष्टस्य विधिं दर्शयितुमाह— ॥ ३३८ ॥

से भिक्खू वा २ से जं पुण जाणिज्जा समणं वा माहणं वा गामपिंडोलगं वा अतिहिं वा पुव्वपविट्ठं पेहाए नो तेसिं संलोए सपडिदुवारे चिट्ठिज्जा, से तमायाय एगंतमवक्कमिज्जा २ अणावायमसंलोए चिट्ठिज्जा, से से परो अणावायमसंलोए चिट्ठमाणस्स असणं वा ४ आहट्टु दलइज्जा, से य एवं वइज्जा—आउसंतो समणा! इमे भे असणे वा ४ सव्वजणाए निसट्ठे तं भुंजह वा णं परिभाएह वा णं, तं चेगइओ पडिगाहित्ता तुसिणीओ उवेहिज्जा, अवियाइं एयं ममेव सिया, माइट्ठाणं संफासे, नो एवं करिज्जा, से तमायाए तत्थ गच्छिज्जा २ से पुव्वामेव आलोइज्जा—आउसंतो समणा! इमे भे असणे वा ४ सव्वजणाए निसिट्ठे तं भुंजह वा णं जाव परिभाएह वा णं, सेणमेवं वयंतं परो वइज्जा—आउसंतो समणा! तुमं चेव णं परिभाएहि, से तत्थ परिभाएमाणे नो अप्पणो खद्धं २ डायं २ ऊसढं २ रसियं २ मणुन्नं २ निद्धं २ लुक्खं २, से तत्थ अमुच्छिए अगिद्धे अग(णा)ढिए अणज्झोववन्ने बहुसममेव परिभाइज्जा, से णं परिभाएमाणं परो वइज्जा—आउसंतो समणा! मा णं तुमं परिभाएहि सव्वे वेगइआ ठिया उ भुक्खामो वा पाहामो वा, से तत्थ भुंजमाणे नो अप्पणा खद्धं खद्धं जाव लुक्खं, से तत्थ अमुच्छिए ४ बहुसममेव भुंजिज्जा वा पाइज्जा वा ॥ (सू० २९)

स भिक्षुर्ग्रामादौ भिक्षार्थं प्रविष्टो यदि पुनरेवं विजानीयाद् यथाऽत्र गृहे श्रमणादिः कश्चिन्नविष्टः, तं च पूर्वप्रविष्टं प्रेक्ष्य दातृप्रतिग्राहकासमाधानान्तरायभयान्न तदालोके तिष्ठेत्, नापि तन्निर्गमद्वारं प्रति दातृप्रतिग्राहकासमाधानान्तरायभयात्, किन्तु स भिक्षुस्तं श्रमणादिकं भिक्षार्थमुपस्थितम् 'आदाय' अवगम्यैकान्तमपक्रामेत्, अपक्रम्य चान्येषां चानापातेऽसंलोके च संतिष्ठेत्, तत्र च तिष्ठतः स गृहस्थः 'से' तस्य भिक्षोश्चतुर्विधमप्याहारमाहृत्य दद्यात्, प्रयच्छंश्चैतद्ब्रूयाद्-यथा यूयं बहवो भिक्षार्थमुपस्थिता अहं च व्याकुलत्वान्नाहारं विभाजयितुमलमतो हे

आयुष्मन्तः! श्रमणाः! अयमाहारश्चतुर्विधोऽपि 'भे' युष्मभ्यं सर्वजनार्थं मया निसृष्टो-दत्तस्तत्साम्प्रतं स्वरुच्या तमाहारमेकत्र वा भुङ्ग्ध्वं परिभजध्वं वा-विभज्य वा गृह्णीतेत्यर्थः, तदेवंविध आहार उत्सर्गतो न ग्राह्यः, दुर्भिक्षे वाऽध्वाननिर्गतादौ वा द्वितीयपदे कारणे सति गृह्णीयाद्, गृहीत्वा च नैवं कुर्याद् यथा तमाहारं गृहीत्वा तूष्णीको गच्छेन्नैवमुत्प्रेक्षेत-यथा ममैवायमेकस्य दत्तोऽपि चायमल्पत्वान्ममैवैकस्य स्याद्, एवं च मातृस्थानं संस्पृशेद्, अतो नैवं कुर्यादिति, यथा च कुर्यात्तथा च दर्शयति-स भिक्षुस्तमाहारं गृहीत्वा तत्र श्रमणाद्यन्तिके गच्छेद्, गत्वा च सः 'पूर्वमेव' आदावेव तेषामाहारम् 'आलोकयेत्' दर्शयेत्, इदं च ब्रूयाद्-यथा भो आयुष्मन्तः! श्रमणादयः! अयमशनादिक आहारो युष्माकं सर्वजनार्थमविभक्त एव गृहस्थेन निसृष्टो-दत्तस्तद्यूयमेकत्र भुङ्ग्ध्वं विभजध्वं वा, 'से' अथैनं साधुमेवं ब्रुवाणं कश्चिच्छ्रमणादिरेवं ब्रूयाद्-यथा भो आयुष्मन्! श्रमण! त्वमेवास्माकं परिभाजय, नैवं तावत्कुर्यात्, अथ सति कारणे कुर्यात् तदाऽनेन विधिनेति दर्शयति-स भिक्षुर्विभाजयन्नात्मनः 'खद्धं २' प्रचुरं २ 'डागं'ति शाकम् 'ऊसढं'ति उच्छ्रितं वर्णादिगुणोपेतं, शेषं सुगमं यावद्भक्षमिति न गृह्णीयादिति । अपि च—'सः' भिक्षुः 'तत्र' आहारेऽमूर्छितोऽगृद्धोऽनाद्दतोऽनध्युपपन्न इति, एतान्यादरख्यापनार्थमेकार्थिकान्युपात्तानि कथञ्चिद्भेदाद्व व्याख्यातव्यानीति, 'बहुसम'मिति सर्वमत्र समं किञ्चित्सिक्थादिना यद्यधिकं भवेदिति, तदेवं प्रभूतसमं परिभाजयेत्, तं च साधुं परिभाजयन्तं कश्चिदेवं ब्रूयाद्, यथा-आयुष्मन्! श्रमण! मा त्वं परिभाजय, किन्तु सर्व एव चैकत्र व्यवस्थिता वयं भोक्ष्यामहे पास्यामो वा, तत्र परतीर्थिकैः सार्द्धं न भोक्तव्यं, स्वयूथ्यैश्च पार्श्वस्थादिभिः सह सम्भोगिकैः सहौघा- ॥ ३३९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोचनां दत्त्या भुञ्जानानामयं विधिः, तद्यथा–नो आत्मन इत्यादि, सुगममिति ॥ इहानन्तरसूत्रे बहिरालोकस्थानं निषिद्धं, साम्प्रतं तत्प्रवेशप्रतिषेधार्थमाह—

से भिक्खू वा से जं पुण जाणिज्जा समणं वा माहणं वा गामपिंडोलगं वा अतिहिं वा पुव्वपविट्ठं पेहाए नो ते उवाइक्कम्म पविसिज्ज वा ओभासिज्ज वा, से तमायाय एगंतमवक्कमिज्जा २ अणावायमसंलोए चिट्ठिज्जा, अह पुणेवं जाणिज्जा–पडिसेहिए वा दिन्ने वा, तओ तंमि नियत्तिए संजयामेव पविसिज्ज वा ओभासिज्ज वा एवं० सामग्गियं० (सू० ३०) ॥ २–१–१–५ ॥ पिण्डैषणायां पञ्चम उद्देशकः ॥

स भिक्षुर्भिक्षार्थं ग्रामादौ प्रविष्टः सन् यदा पुनरेवं विजानीयात्, तद्यथा–अत्र गृहपतिकुले श्रमणादिकः प्रविष्टः, तं च पूर्वप्रविष्टं श्रमणादिकं प्रेक्ष्य ततो न तान् श्रमणादीन् पूर्वप्रविष्टानतिक्रम्य प्रविशेत्, नापि तत्स्थ एव 'अवभाषेत' दातारं याचेत्, अपि च–स तम् 'आदाय' अवगम्यैकान्तमपक्रामेद् अनापातासंलोके च तिष्ठेत् तावद्यावच्छ्रमणादिके प्रतिषिद्धे पिण्डे वा तस्मै दत्ते, ततस्तस्मिन् 'निवृत्ते' गृहाङ्गिर्गते सति ततः संयत एव प्रविशेदवभाषेत वेति, एवं च तस्य भिक्षोः 'सामग्र्यं' सम्पूर्णो भिक्षुभाव इति ॥ प्रथमस्य पञ्चमोद्देशकः समाप्तः ॥

पञ्चमोद्देशकानन्तरं षष्ठः समारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके श्रमणाद्यन्तरायभयाद्गृहप्रवेशो निषिद्धः, तदिहाप्यपरप्राण्यन्तरायप्रतिषेधार्थमाह—

से भिक्खू वा० से जं पुण जाणिज्जा–रसेसिणो बहवे पाणा घासेसणाए संथडे संनिवइए पेहाए, तंजहा–कुक्कुडजाइयं वा सूयरजाइयं वा अग्गपिंडंसि वा वायसा संथडा संनिवइया पेहाए सइ परक्कमे संजया नो उज्जुयं गच्छिज्जा ॥ (सू० ३१)

स भिक्षुर्भिक्षार्थं प्रविष्टः सन् यदि पुनरेवं विजानीयात्, तद्यथा–बहवः 'प्राणाः' प्राणिनः रस्यते–आस्वाद्यत इति रसस्तमेषितुं शीलमेषां ते रसैषिणः, रसान्वेषिण इत्यर्थः, ते तदर्थिनः सन्तः पश्चाद् ग्रासार्थं क्वचिद्गृध्यादौ संनिपतितास्तांश्चाहारार्थं संस्कृ(स्तृ)तान्–घनान् संनिपतितान् प्रेक्ष्य ततस्तदभिमुखं न गच्छेदिति सम्बन्धः, तांश्च प्राणिनः स्वनामग्राहमाह–कुक्कुटजातिकं वेत्यनेन च पक्षिजातिरुद्दिष्टा, सूकरजातिकमित्यनेन च चतुष्पदजातिरिति, 'अग्रपिण्डे वा' काकपिण्ड्यां वा बहिः क्षिप्तायां वायसाः संनिपतिता भवेयुः, तांश्च दृष्ट्वाऽग्रतः, ततः सति पराक्रमे–अन्यस्मिन् मार्गान्तरे 'संयतः' सम्यगुपयुक्तः संयतामन्त्रणं वा ऋजुस्तदभिमुखं न गच्छेद्, यतस्तत्र गच्छतोऽन्तरायं भवति, तेषां चान्यत्र संनिपतितानां वधोऽपि स्यादिति ॥ साम्प्रतं गृहपतिकुलं प्रविष्टस्य साधोर्विधिमाह—

से भिक्खू वा २ जाव नो गाहावइकुलस्स वा दुवारसाहं अवलंबिय २ चिट्ठिज्जा, नो गा० दगच्छडणमत्तए चिट्ठिज्जा, नो गा० चंदणिउयए चिट्ठिज्जा, नो गा० सिणाणस्स वा वच्चस्स वा संलोए सपडिदुवारे चिट्ठिज्जा, नो० आलोयं वा थिग्गलं वा संधिं वा दगभवणं वा बाहाओ पगिज्झिय २ अंगुलियाए वा उद्दिसिय २ उण्णमिय २ अवनमिय २ निज्झाइज्जा, नो गाहावइअंगुलियाए उद्दिसिय २ जाइज्जा, नो गा० अंगुलिए चालिय २ जाइज्जा, नो गा० अं० तज्जिय २ जाइज्जा, नो गा० अं० उक्खुलंपिय [उक्खलुंदिय] २ जाइज्जा, नो गाहावइं वंदिय २ जाइज्जा नो वयणं फरुसं वइज्जा ॥ (सू० ३२)

स भिक्षुर्भिक्षार्थं गृहपतिकुलं प्रविष्टः सन्नेतत्कुर्यात्, तद्यथा–नो गृहपतिकुलस्य द्वारशाखाम् 'अवलम्ब्यावलम्ब्य' पौनःपुन्येन भृशं वाऽवलम्ब्य तिष्ठेद्, यतः सा जीर्णत्वात्पतेद् दुष्प्रतिष्ठितत्वाद्वा चलेत् ततश्च संयमात्मविराधनेति, तथा 'उदकप्रतिष्ठापनमात्रके' उपकरणधावनोदकप्रक्षेपस्थाने प्रवचनजुगुप्साभयान्न तिष्ठेत्, तथा 'चंदणिउदय'त्ति आचमनोदकप्रवाहभूमौ न तिष्ठेद्, दोषः पूर्वोक्त एव, तथा स्नानवर्चःसंलोके तत्प्रतिद्वारं वा न तिष्ठेत्, एतदुक्तं भवति–यत्र स्थितैः स्नानवर्चःक्रिये कुर्वन् गृहस्थः समवलोक्यते तत्र न तिष्ठेदिति, दोषश्चात्र दर्शनाशङ्कया निःशङ्कतत्क्रियाया अभावेन निरोधप्रद्वेषसम्भव इति, तथा नैव गृहपतिकुलस्य 'आलोकम्' आलोकस्थानं–गवाक्षादिकं, 'थिग्गलं'ति प्रदेशपतितसंस्कृतं, तथा 'संधि'त्ति चौरखातं भित्तिसन्धिं वा, तथा 'उदकभवनम्' उदकगृहं, सर्वाण्यप्येतानि भुजां 'प्रगृह्य प्रगह्य' पौनःपुन्येन प्रसार्य तथाऽङ्गुल्योद्दिश्य तथा कायमवनम्योन्नम्य च न निध्यापयेत्–न प्रलोकयेन्नाप्यन्यस्मै प्रदर्शयेत्, सर्वत्र द्विर्वचनमादरख्यापनार्थं, तत्र हि हृतनष्टादौ शङ्कोत्पद्यत इति ॥ अपि च—स भिक्षुर्गृहपतिकुलं प्रविष्टः सन्नेव गृहपतिमङ्गुल्याऽत्यर्थमुद्दिश्य तथा चालयित्वा तथा 'तर्जयित्वा' भयमुपदर्श्य तथा कण्डूयनं कृत्वा तथा गृहपतिं 'वन्दित्वा' वाग्भिः स्तुत्वा प्रशस्य नो याचेत, अदत्ते च नैव तद्गृहपतिं परुषं वदेत्, तद्यथा–यक्कस्त्वं परगृहं रक्षसि, कुतस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानं ?, वार्त्तैव भद्रिका भवतो न पुनरनुष्ठानम्, अपि च—"अक्षरद्वयमेतद्धि, नास्ति नास्ति यदुच्यते । तदिदं देहि देहीति, विपरीतं भविष्यति ॥ १ ॥" अन्यच्च—

अह तत्थ कंचि भुंजमाणं पेहाए गाहावइं वा० जाव कम्मकरिं वा से पुव्वामेव आलोइज्जा—आउसोत्ति वा भइणित्ति वा दाहिसि मे इत्तो अन्नयरं भोयणजायं ?, से सेवं वयंतस्स परो हत्थं वा मत्तं वा दव्विं वा भायणं वा सीओदगवियडेण वा उसिणोदगवियडेण वा उच्छोलिज्ज वा पहोइज्ज वा, से पुव्वामेव आलोइज्जा—आउसोत्ति वा भइणित्ति वा ! मा एयं तुमं हत्थं वा० ४ सीओदगवियडेण वा २ उच्छोलेहि वा २, अभिकंखसि मे दाउं एवमेव दलयाहि, से सेवं वयंतस्स परो हत्थं वा ४ सीओ० उसि० उच्छोलित्ता पहोइत्ता आहट्टु दलइज्जा, तहप्पगारेणं पुरेकम्मकएणं हत्थेण वा ४ असणं वा ४ अफासुयं जाव नो पडिगाहिज्जा । अह पुण एवं जाणिज्जा नो पुरेकम्मकएणं उदउल्लेणं तहप्पगारेणं वा उदउल्लेण वा हत्थेण वा ४ असणं वा ४ अफासुयं जाव नो पडिगाहिज्जा । अह पुणेवं जाणिज्जा—नो उदउल्लेण ससिणिद्धेण सेसं तं चेव एवं—ससरक्खे उदउल्ले, ससिणिद्धे भट्टिया ऊसे । हरियाले हिंगुलुए, मणोसिला अंजणे लोणे ॥ १ ॥ गेरुय वन्निय सेडिय सोरट्ठिय पिट्ठ कुक्कुस उकुट्ठसंसट्ठेण । अह पुणेवं जाणिज्जा नो असंसट्ठे संसट्ठे तहप्पगारेण संसट्ठेण हत्थेण वा ४ असणं वा ४ फासुयं जाव पडिगाहिज्जा ॥ (सू० ३३)

अथ भिक्षुस्तत्र गृहपतिकुले प्रविष्टः सन् कञ्चन गृहपत्यादिकं भुञ्जानं प्रेक्ष्य स भिक्षुः पूर्वमेवालोचयेद्—यथाऽयं गृहपतिस्तज्जाया वा यावत्कर्मकरी वा भुङ्क्ते पर्यालोच्य च सनामग्राहं याचेत, तद्यथा—'आउसेत्ति वे'त्ति, अमुक इति

॥ ३४१ ॥

गृहपते ! भगिनि ! इति वा इत्याद्यामन्त्र्य दास्यसि मेऽस्मादाहारजातादन्यतरद्भोजनजातमित्येवं याचेत, तच्च न वर्त्तते कर्त्तुं, कारणे वा सत्येवं वदेत्—अथ 'से' तस्य भिक्षोरेवं वदतो याचमानस्य परो गृहस्थः कदाचिद्धस्तं मात्रं दर्वीं भाजनं वा 'शीतोदकविकटेन' अप्कायेन 'उष्णोदकविकटेन' उष्णोदकेनाप्रासुकेनात्रिदण्डोद्वृत्तेन पश्चाद्वा सचित्तीभूतेन 'उच्छोलेज्ज'त्ति सकृदुदकेन प्रक्षालनं कुर्यात्, 'पहोएज्ज'त्ति प्रकर्षेण वा हस्तादेर्द्धावनं कुर्यात्, स भिक्षुर्हस्तादिकं पूर्वमेव प्रक्षाल्यमानमालोचयेद्, दत्तावधानो भवेदित्यर्थः, तच्च प्रक्षाल्यमानमालोच्यामुक इत्येवं स्वनामग्राहं निवारयेद्, यथा—मैवं कृथास्त्वमिति, यदि पुनरसौ गृहस्थो हस्तादिकं सचित्तोदकेन प्रक्षाल्य दद्यात्तदप्रासुकमिति ज्ञात्वा न प्रतिगृह्णीयादिति ॥ किञ्च—अथासौ भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यदि पुनरेवं विजानीयात्, तद्यथा—'नो' नैव साधुभिक्षादानार्थं पुरः—अग्रतः कृतं प्रक्षालनादिकं कर्म—क्रिया यस्य हस्तादेः स तथा तेनोदकेनार्द्रेणेति—गलद्बिन्दुनेति, एतदुक्तं भवति—साधुभिक्षादानार्थं नैव हस्तादिकं प्रक्षालितं किन्तु तथाप्रकार एव स्वतः कुतोऽप्यनुष्ठानादुदकार्द्रो हस्तस्तेन, एवं मात्रादिनाऽपि गलद्बिन्दुना दीयमानं चतुर्विधमप्याहारमप्रासुकमनेषणीयमिति मत्वा नो गृह्णीयादिति ॥ अथ पुनरेवं विजानीयात्, तद्यथा—नैव 'उदकार्द्रेण' गलद्बिन्दुना हस्तादिना दद्यात्, किन्तु 'सस्निग्धेन' शीतोदकस्तिमितेनापि हस्तादिना दीयमानं न प्रतिगृह्णीयात्, 'एव'मिति प्राक्तनं न्यायमतिदिशति, यथोदकस्निग्धेन हस्तेन न ग्राह्यं तथाऽन्येन रजसाऽपि, एवं मृत्तिकाद्यप्यायोज्यमिति, तत्रौषः—क्षारमृत्तिका हरितालहिङ्गुलकमनःशिलाऽञ्जनलवणगेरुकाः प्रतीताः, सचित्ताश्च खनिविशेषोत्पत्तेः, वर्णिका—पीतमृत्तिका, सेटिका—खटिका, सौराष्ट्रिका—सुघरिका, पि-

ष्टम्—अच्छटिततन्दुलचूर्णः, कुक्कुसाः—प्रतीताः, 'उक्कुट्ठं'ति पीलुपर्णिकादेरुदूखलचूर्णितमार्द्रपर्णचूर्णमित्येवमादिना सस्निग्धेन हस्तादिना दीयमानं न गृह्णीयात्, इत्येवमादिना तु असंसृष्टेन तु गृह्णीयादिति । अथ पुनरेवं जानीयान्नोऽसंसृष्टः किं तर्हि ?—संसृष्टस्तज्जातीयेनाहारादिना तेन संसृष्टेन हस्तादिना प्रासुकमेषणीयमिति गृह्णीयात्, अत्र चाष्टौ भङ्गाः, तद्यथा—"असंसट्ठे हत्थे असंसट्ठे मत्ते निरवसेसे दव्वे" इत्येकैकपदव्यभिचारान्नेयाः, स्थापना चेयम्—अथ पुनरसौ भिक्षुरेवं जानीयात्, तद्यथा—उदकादिनाऽसंसृष्टो हस्तादिस्ततो गृह्णीयात्, यदिवा तथाप्रकारेण दातव्यद्रव्यजातीयेन संसृष्टो हस्तादिस्तेन तथा प्रकारेण हस्तादिना दीयमानमाहारादिकं प्रासुकमेषणीयमितिकृत्वा प्रतिगृह्णीयादिति ॥ किञ्च—

से भिक्खू वा २ से जं पुण जाणिज्जा पिहुयं वा बहुरयं वा जाव चाउलपलंबं वा असंजए भिक्खुपडियाए चित्तमंताए सिलाए जाव संताणाए कुट्टिंसु वा कुट्टिंति वा कुट्टिस्संति वा उप्फणिंसु वा ३ तहप्पगारं पिहुयं वा० अफासुयं नो पडिगाहिज्जा ॥ (सू० ३४)

स भिक्षुर्भिक्षार्थं गृहपतिकुलं प्रविष्टः सन् यदि पुनरेवं विजानीयात्, तद्यथा—'पृथुकं' शाल्यादिलाजान् 'बहुरयं'ति पृथुकं 'चाउलपलंबं'ति अर्द्धपक्वशाल्यादिकणादिकमित्येवमादिकम् 'असंयतः' गृहस्थः 'भिक्षुप्रतिज्ञया' भिक्षुमुद्दिश्य चित्तमत्यां शिलायां तथा सबीजायां सहरितायां साण्डायां यावन्मर्कटसन्तानोपेतायाम् 'अकुट्टिषुः' कुट्टितवन्तः तथा कुट्टन्ति कुटिप्यन्ति वा, एकवचनाधिकारेऽपि छान्दसत्वात्तिङ्व्यत्ययेन बहुवचनं द्रष्टव्यं, पूर्वत्र वा जातावेकवचनं,

॥ ३४२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्च पृथुकादिकं सचित्तमचित्तं वा चित्तमत्यां शिलायां कुट्टयित्वा 'उप्फणिंसु'त्ति साध्वर्थं वाताय दत्तवन्तो ददति दास्यन्ति वा, तदेवं तथाप्रकारं पृथुकादि ज्ञात्वा लाभे सति नो प्रतिगृह्णीयादिति ॥ किञ्च—

से भिक्खू वा २ जाव समाणे से जं० बिलं वा लोणं उब्भियं वा लोणं अस्संजए जाव संताणाए भिंदिसु ३ रुचिंसु वा ३ बिलं वा लोणं उब्भियं वा लोणं अफासुयं० नो पडिगाहिज्जा ॥ (सू० ३५)

स भिक्षुर्यदि पुनरेवं विजानीयात्, तद्यथा—बिलमिति खनिविशेषोत्पन्नं लवणम्, अस्य चोपलक्षणार्थत्वात्सैन्धवसौवर्चलादिकमपि द्रष्टव्यं, तथोब्भिज्जमिति समुद्रोपकण्ठे क्षारोदकसम्पर्कात् यदुद्भिद्यते लवणम्, अस्याप्युपलक्षणार्थत्वात्क्षारोदकसेकाद्यद्भवति रुमकादिकं तदपि ग्राह्यं, तदेवंभूतं लवणं पूर्वोक्तविशेषणविशिष्टायां शिलायामभैत्सुः—कणिकाकारं कुर्युः, तथा साध्वर्थमेव भिन्दन्ति भेत्स्यन्ति वा तथा श्लक्ष्णतरार्थं 'रुचिंसुव'त्ति पिष्टवन्तः पिंषन्ति पेक्ष्यन्ति वा, तदपि लवणमेवंप्रकारं ज्ञात्वा नो (प्रति) गृह्णीयात् ॥ अपि च—

से भिक्खू वा० से जं० असणं वा ४ अगणिनिक्खित्तं तहप्पगारं असणं वा ४ अफासुयं नो०, केवली बूया आयाणमेयं, अस्संजए भिक्खुपडियाए उस्सिंचमाणे वा निस्सिंचमाणे वा आमज्जमाणे वा पमज्जमाणे वा ओयारेमाणे वा उव्वत्तमाणे वा अगणिजीवे हिंसिज्जा, अह भिक्खूणं पुव्वोवइट्ठा एस पइन्ना एस हेऊ एस कारणे एसुवएसे जं तहप्पगारं असणं वा ४ अगणिनिक्खित्तं अफासुयं नो० पडि० एयं० सामग्गियं ॥ (सू० ३६) ॥ पिण्डैषणायां षष्ठ उद्देशकः २—१—१—६ ॥

आ. सू. ५८ श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३४३ ॥

स भिक्षुर्गृहपतिकुलं प्रविष्टश्चतुर्विधमप्याहारमग्नावुपरि निक्षिप्तं तथाप्रकारं ज्वालासंबद्धं लाभे सति न प्रतिगृह्णीयात् । अत्रैव दोषमाह—केवली ब्रूयात् 'आदानं' कर्मादानमेतदिति, तथाहि 'असंयतः' गृहस्थो भिक्षुप्रतिज्ञया तत्राग्न्युपरिव्यवस्थितमाहारम् 'उत्सिञ्चन्' आक्षिपन् 'निःसिञ्चन्' दत्तोद्धरितं प्रक्षिपन्, तथा 'आमर्जयन्' सकृद्धस्तादिना शोधयन्, तथा प्रकर्षेण मार्जयन्—शोधयन्, तथाऽवतारयन्, तथा 'अपवर्त्तयन्' तिरश्चीनं कुर्वन्नग्निजीवान् हिंस्यादिति । 'अथ' अनन्तरं 'भिक्षूणां' साधूनां पूर्वोपदिष्टा एषा प्रतिज्ञा एष हेतुरेतत्कारणमयमुपदेशः यत्तथाप्रकारमग्निसंबद्धमशनाद्यग्निनिक्षिप्तमप्रासुकमनेषणीयमिति ज्ञात्वा लाभे सति न प्रतिगृह्णीयात्, एतत्खलु भिक्षोः 'सामग्र्यं' समग्रो भिक्षुभाव इति ॥ प्रथमाध्ययनस्य षष्ठ उद्देशकः समाप्तः ॥ २—१—१—६ ॥

श्रुतस्कं० २ चूलिका १ पिण्डैष० १ उद्देशः

षष्ठोद्देशकानन्तरं सप्तमः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके संयमविराधनाऽभिहिता, इह तु संयमात्मदातृविराधना तया च विराधनया प्रवचनकुत्सेत्येतदत्र प्रतिपाद्यत इति—

से भिक्खू वा २ से जं० असणं वा ४ खंधंसि वा थंभंसि वा मंचंसि वा मालंसि वा पासायंसि वा हम्मियतलंसि वा अन्नयरंसि वा तहप्पगारंसि अंतलिक्खजायंसि उवनिक्खित्ते सिया तहप्पगारं मालोहडं असणं वा ४ अफासुयं नो०, केवली बूया आयाणमेयं, अस्संजए भिक्खुपडियाए पीढं वा फलगं वा निस्सेणिं वा उदूहलं वा आहट्टु उस्सविय दुरूहिज्जा, से तत्थ दुरूहमाणे पयलिज्ज वा पवडिज्ज वा, से तत्थ पयलमाणे वा २ हत्थं वा पायं वा बाहं वा ऊरुं वा उदरं वा सीसं वा अन्नयरं वा कायंसि इंदियजालं लूसिज्ज वा पाणाणि वा ४ अभिहणिज्ज वा वित्तासिज्ज वा लेसिज्ज वा संघसिज्ज वा संघट्टिज्ज वा परियाविज्ज वा किलामिज्ज वा ठाणाओ ठाणं संकामिज्ज वा, तं तहप्पगारं मालोहडं असणं वा ४ लाभे संते नो पडिगाहिज्जा, से भिक्खू वा २ जाव समाणे से जं० असणं वा ४ कुट्ठियाओ वा कोलेज्जाउ वा अस्संजए भिक्खुपडियाए उक्कुज्जिय अवउज्जिय ओहरिय आहट्टु दलइज्जा, तहप्पगारं असणं वा ४ लाभे संते नो पडिगाहिज्जा ॥ (सू० ३७) ॥

॥ ३४३ ॥

स भिक्षुर्भिक्षार्थं प्रविष्टः सन् यदि पुनरेवं चतुर्विधमप्याहारं जानीयात्, तद्यथा—'स्कन्धे' अर्द्धप्राकारे 'स्तम्भे वा' शैलदारुमयादौ, तथा मञ्चके वा माले वा प्रासादे वा हर्म्यतले वा अन्यतरस्मिन् वा तथाप्रकारेऽन्तरिक्षजाते स आहारः 'उपनिक्षिप्तः' व्यवस्थापितो भवेत्, तं च तथाप्रकारमाहारं मालाहृतमिति मत्वा लाभे सति न प्रतिगृह्णीयात्, केवली ब्रूयाद्यत आदानमेतदिति, तथाहि—असंयतो भिक्षुप्रतिज्ञया साधुदानार्थं पीठकं वा फलकं वा निश्रेणिं वा उदूखलं वाऽऽहृत्य—ऊर्ध्वं व्यवस्थाप्यारोहेत्, स तत्रारोहन् प्रचलेद्वा प्रपतेद्वा, स तत्र प्रचलन् प्रपतन् वा हस्तादिकमन्यतरद्वा काये इन्द्रियजातं 'लूसेज्ज'त्ति विराधयेत्, तथा प्राणिनो भूतानि जीवान् सत्त्वानभिहन्याद्वित्रासयेद्वा लेषयेद्वा—संश्लेषं वा कुर्यात् तथा संघर्षं वा कुर्यात् तथा सङ्घट्टं वा कुर्यात्, एतच्च कुर्वंस्तान् परितापयेद्वा क्लामयेद्वा स्थानात्स्थानं सङ्क्रामयेद्वा, तदेतज्ज्ञात्वा यदाहारजातं तथाप्रकारं मालाहृतं तल्लाभे सति नो प्रतिगृह्णीयादिति ॥ स भिक्षुर्यदि पुनरेवंभूतमाहारं जानीयात्, तद्यथा—'कोष्ठिकातः' मृन्मयकुशूलसंस्थानायाः तथा 'कोलेज्जाओ'त्ति अधोवृत्तखाताकाराद् असंयतः 'भिक्षुप्रतिज्ञया' साधुमुद्दिश्य कोष्ठिकातः 'उक्कुज्जिय'त्ति ऊर्द्धकायमुन्नम्य ततः कुब्जीभूय, तथा कोलेज्जाओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अवउज्जिअ'त्ति अधोऽवनम्य, तथा 'ओहरिय'त्ति तिरश्चीनो भूत्वाऽऽहारमाहृत्य दद्यात्, तच्च भिक्षुस्तथाप्रकारमधोमालाहृतमितिकृत्वा लाभे सति न प्रतिगृह्णीयादिति ॥ अधुना पृथिवीकायमधिकृत्याह—

से भिक्खू वा० से जं० असणं वा ४ मट्टियाउलित्तं तहप्पगारं असणं वा ४ लाभे सं०, केवली०, अस्संजए भि० मट्टिओलित्तं असणं वा० उब्भिंदमाणं पुढविकायं समारंभिज्जा तह तेउवाउवणस्सइतसकायं समारंभिज्जा, पुणरवि उल्लिंपमाणे पच्छाकम्मं करिज्जा, अह भिक्खूणं पुव्वो० जं तहप्पगारं मट्टिओलित्तं असणं वा लाभे० । से भिक्खू० से जं० असणं वा ४ पुढविकायपइट्ठियं तहप्पगारं असणं वा० अफासुयं० । से भिक्खू० जं० असणं वा ४ आउकायपइट्ठियं चेव, एवं अगणिकायपइट्ठियं लाभे० केवली०, अस्संज० भि० अगणिं उस्सक्किय निस्सक्किय ओहरिय आहट्टु दलइज्जा अह भिक्खूणं० जाव नो पडि० ॥ (सू० ३८) ॥

स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यदि पुनरेवं जानीयात्, तद्यथा—पिठरकादौ मृत्तिकयाऽवलिप्तमाहारं 'तथाप्रकार'मित्यवलिप्तं केनचित्परिज्ञाय पश्चात्कर्मभयाच्चतुर्विधमप्याहारं लाभे सति न प्रतिगृह्णीयात्, किमिति?, यतः केवली ब्रूयात्कर्मादानमेतदिति, तदेव दर्शयति—'असंयतः' गृहस्थो भिक्षुप्रतिज्ञया मृत्तिकोपलिप्तमशनादिकम्—अशनादिभाजनं तच्चोद्भिन्दन् पृथिवीकायं समारभेत, स एव केवल्याह, तथा तेजोवायुवनस्पतित्रसकायं समारभेत, दत्ते सत्युत्तरकालं पुनरपि शेषरक्षार्थं तद्भाजनमवलिम्पन् पश्चात्कर्म कुर्यात्, अथ भिक्षूणां पूर्वोपदिष्टा एषा प्रतिज्ञा एष हेतुरेतत्कारणमयमुपदेशः यत्तथाप्रकारं मृत्तिकोपलिप्तमशनादिजातं लाभे सति नो प्रतिगृह्णीयादिति ॥ स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यदि पुनरेवंभूतमशनादि जानीयात्, तद्यथा—'सचित्तपृथिवीकायप्रतिष्ठितं' पृथ्वीकायोपरिव्यवस्थितमाहारं विज्ञाय पृथिवीकायसङ्घट्टनादिभयाल्लाभे सत्यप्रासुकमनेषणीयं च ज्ञात्वा न प्रतिगृह्णीयादिति ॥ एवमप्कायप्रतिष्ठितमग्निकायप्रतिष्ठितं लाभे सति न प्रतिगृह्णीयाद्, यतः केवली ब्रूयादादानमेतदिति । तदेव दर्शयति—असंयतो भिक्षुप्रतिज्ञयाऽग्निकायमुल्मुकादिना 'ओसक्किय'त्ति प्रज्वाल्य (निषिच्य), तथा 'ओहरिय'त्ति अग्निकायोपरि व्यवस्थितं पिठरकादिकमाहारभाजनमपवृत्त्य तत आहृत्य—गृहीत्वाऽऽहारं दद्यात्, तत्र भिक्षूणां पूर्वोपदिष्टा एषा प्रतिज्ञा यदेतत्तथाभूतमाहारं नो प्रतिगृह्णीयादिति ॥

से भिक्खू वा २ से जं० असणं वा ४ अचुसिणं अस्संजए भि० सुप्पेण वा विहुयणेण वा तालियंटेण वा पत्तेण वा साहाए वा साहाभंगेण वा पिहुणेण वा पिहुणहत्थेण वा चेलेण वा चेलकण्णेण वा हत्थेण वा मुहेण वा फुमिज्ज वा वीइज्ज वा, से पुव्वामेव आलोइज्जा—आउसोत्ति वा भइणित्ति वा! मा एतं तुमं असणं वा अचुसिणं सुप्पेण वा जाव फुमाहि वा वीयाहि वा अभिकंखसि मे दाउं, एमेव दलयाहि, से सेवं वयंतस्स परो सुप्पेण वा जाव वीइत्ता आहट्टु दलइज्जा तहप्पगारं असणं वा ४ अफासुयं वा नो पडि० ॥ (सू० ३९) ॥

स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यदिपुनरेवं जानीयाद् यथाऽत्युष्णमोदनादिकमसंयतो भिक्षुप्रतिज्ञया शीतीकरणार्थं सूर्पेण वा बीजनेन वा तालवृन्तेन वा मयूरपिच्छकृतव्यजनेनेत्यर्थः, तथा शाखया शाखाभङ्गेन पल्लवेनेत्यर्थः, तथा बर्हेण वा बर्हकलापेन वा, तथा वस्त्रेण वस्त्रकर्णेन वा हस्तेन वा मुखेन वा तथाप्रकारेणान्येन वा केनचित् 'फुमेज्जा वे'ति मुखवायुना शीतीकुर्याद् वस्त्रादिभिर्वा वीजयेत्, स भिक्षुः पूर्वमेव 'आलोकयेद्' दत्तोपयोगो भवेत्, तथाकुर्वाणं च दृष्ट्वैतद्वदेत्, तद्यथा—अमुक! इति वा भगिनि! इति वा इत्यामन्त्र्य मैवं कृथा यद्यभिकाङ्क्षसि मे दातुं तत एवंस्थितमेव ददस्व, अथ पुनः स परो—गृहस्थः 'से' तस्य भिक्षोरेवं वदतोऽपि सूर्पेण वा यावन्मुखेन वा बीजयित्वाऽऽहृत्य तथाप्रकारमशनादिकं दद्यात्, स च साधुरनेषणीयमिति मत्वा न परिगृह्णीयादिति ॥ पिण्डाधिकार एवैषणादोषमधिकृत्याह—

से भिक्खू वा २ से जं० असणं वा ४ वणस्सइकायपइट्ठियं तहप्पगारं असणं वा ४ वण० लाभे संते नो पडि० । एवं तसकाएवि ॥ (सू० ४०) ॥

स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यत्पुनरेवं जानीयाद्—वनस्पतिकायप्रतिष्ठितं, तं चतुर्विधमप्याहारं न गृह्णीयादिति ॥ एवं त्रसकायसूत्रमपि नेयमिति । अत्र च वनस्पतिकायप्रतिष्ठितमित्यादिना निक्षिप्ताख्य एषणादोषोऽभिहितः, एवमन्येऽप्येषणादोषा यथासम्भवं सूत्रेष्वेवायोज्याः । ते चामी—"संकिय १ मक्खिय २ निक्खित्त ३ पिहिय ४ साहरिय ५ दायगु ६ म्मीसे ७ । अपरिणय ८ लित्त ९ छड्डिय १० एसणदोसा दस हवंति ॥ १ ॥" तत्र शङ्कितमाधाकर्मादिना १, म्रक्षितनुदकादिना २, निक्षिप्तं पृथिवीकायादौ ३, पिहितं बीजपूरकादिना ४, 'साहरियं'ति मात्रकादेस्तुषाद्यदेयमन्यत्र सचित्तपृथिव्यादौ संहृत्य तेन मात्रकादिना यद्ददाति तत्संहृतमित्युच्यते ५, 'दायग'त्ति दाता बालवृद्धाद्ययोग्यः ६, उन्मिश्रं—सचित्तमिश्रम् ७, अपरिणतमिति यद्देयं न सम्यगचित्तीभूतं दातृग्राहकयोर्वा न सम्यग्भावोपेतं ८, लिप्तं वसादिना ९, 'छड्डियं'ति परिशाटव १० दित्येषणादोषाः ॥ साम्प्रतं पानकाधिकारमुद्दिश्याह—

१ शङ्कित म्रक्षितं निक्षिप्तं पिहितं संहृतं दायकदोषदुष्टं उन्मिश्रम् । अपरिणतं लिप्तं छर्दितं एषणादोषा दश भवन्ति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से भिक्खू वा २ से जं पुण पाणगजायं जाणिज्जा, तंजहा–उस्सेइमं वा १ संसेइमं वा २ चाउलोदगं वा ३ अन्नयरं वा तहप्पगारं पाणगजायं अहुणाधोयं अणंबिलं अव्वुक्कंतं अपरिणयं अविद्धत्थं अफासुयं जाव नो पडिगाहिज्जा । अह पुण एवं जाणिज्जा चिराधोयं अंबिलं वुक्कंतं परिणयं विद्धत्थं फासुयं पडिगाहिज्जा । से भिक्खू वा० से जं पुण पाणगजायं जाणिज्जा, तंजहा–तिलोदगं वा ४ तुसोदगं वा ५ जवोदगं वा ६ आयामं वा ७ सोवीरं वा ८ सुद्धवियडं वा ९ अन्नयरं वा तहप्पगारं वा पाणगजायं पुव्वामेव आलोइज्जा–आउसोत्ति वा भइणित्ति वा ! दाहिसि मे इत्तो अन्नयरं पाणगजायं ?, से सेवं वयंतस्स परो वइज्जा–आउसंतो समणा ! तुमं चेवेयं पाणगजायं पडिग्गहेण वा उस्सिंचिया णं उयत्तिया णं गिण्हाहि, तहप्पगारं पाणगजायं सयं वा गिण्हिज्जा परो वा से दिज्जा, फासुयं लाभे संते पडिगाहिज्जा ॥ (सू० ४१)

स भिक्षुर्गृहपतिकुलं पानकार्थं प्रविष्टः सन् यत्पुनरेवं जानीयात् तद्यथा—'उस्सेइमं वे'ति पिष्टोत्स्वेदनार्थमुदकं १ 'संसेइमं वे'ति तिलधावनोदकं, यदिवाऽरणिकादिसंस्विन्नधावनोदकं २, तत्र प्रथमद्वितीयोदके प्रासुके एव, तृतीयचतुर्थे तु मिश्रे, कालान्तरेण परिणते भवतः, 'चाउलोदयं'ति तन्दुलधावनोदकम् ३, अत्र च त्रयोऽनादेशाः, तद्यथा–बुद्बुद विगमो वा १ भाजनलग्नबिन्दुशोषो वा २ तन्दुलपाको वा ३, आदेशस्त्वयम्–उदकस्वच्छीभावः, तदेवमाद्युदकम् 'अनाम्लं' स्वस्वादादचलितम् अव्युत्क्रान्तमपरिणतमविध्वस्तमप्रासुकं यावन्न प्रतिगृह्णीयादिति ॥ एतद्विपरीतं तु ग्राह्यमित्याह–अहेत्यादि सुगमम् । पुनः पानकाधिकार एव विशेषार्थमाह—स भिक्षुर्गृहपतिकुलं प्रविष्टो यत्पुनः पानकजातमेवं

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३४६ ॥

जानीयात्, तद्यथा—'तिलोदकं' तिलः केनचित्प्रकारेण प्रासुकीकृतमुदकम् ४, एवं तुषधावनं ५–६, तथा 'आचाम्लम्' अवश्यानं ७, 'सौवीरम्' आरनालं ८ 'शुद्धविकटं' प्रासुकमुदकम् ९, अन्यद्वा तथाप्रकारं द्राक्षापानकादि 'पानकजातं' पानीयसामान्यं पूर्वमेव 'अवलोकयेत्' पश्येत्, तच्च दृष्ट्वा तं गृहस्थम् अमुक! इति वा भगिनि! इति वेत्यामन्त्र्यैवं ब्रूयाद्–यथा दास्यसि मे किञ्चित्पानकजातं?, स परस्तं भिक्षुमेवं वदन्तमेवं ब्रूयाद्–यथा आयुष्मन्! श्रमण! त्वमेवेदं पानकजातं स्वकीयेन पतद्ग्रहेण टोप्परिकया कटाहकेन वोत्सिञ्चयापवृत्त्य वा पानकभाण्डकं गृहाण, स एवमभ्यनुज्ञातः स्वयं गृह्णीयात् परो वा तस्मै दद्यात्, तदेवं लाभे सति प्रतिगृह्णीयादिति ॥ किञ्च—

श्रुतस्क० २ चूलिका १ पिण्डैष० १ उद्देशः ७

से भिक्खू वा० से जं पुण पाणगं जाणिज्जा–अणंतरहियाए पुढवीए जाव संताणए उद्धट्टु २ निक्खित्ते सिया, असंजए भिक्खुपडियाए उदउल्लेण वा ससिणिद्धेण वा सकसाएण वा मत्तेण वा सीओदगेण वा संभोइत्ता आहट्टु दलइज्जा, तहप्पगारं पाणगजायं अफासुयं० एयं खलु सामग्गियं० ॥ (सू० ४२) ॥ पिण्डैषणायां सप्तमः २–१–१–७ ।

स भिक्षुर्यदि पुनरेवं जानीयात् तत्पानकं सचित्तेष्वव्यवहितेषु पृथिवीकायादिषु तथा मर्कटकादिसन्तानके वाऽन्यतो भाजनादुद्धृत्योद्धृत्य 'निक्षिप्तं' व्यवस्थापितं स्यात्, यदिवा स एव 'असंयतः' गृहस्थः 'भिक्षुप्रतिज्ञया' भिक्षुमुद्दिश्य 'उदकाद्रेण' गलद्बिन्दुना 'सस्निग्धेन' गलदुदकबिन्दुना 'सकषायेण' सचित्तपृथिव्याद्यवयवगुण्ठितेन 'मात्रेण' भाजनेन शीतोदकेन वा 'संभोएत्ता' मिश्रयित्वाऽऽहृत्य दद्यात्, तथाप्रकारं पानकजातमप्रासुकमनेषणीयमिति मत्वा न परिगृह्णीयात. एतत्तस्य भिक्षोर्भिक्षुण्या वा 'सामग्र्यं' समग्रो भिक्षुभाव इति ॥ प्रथमस्य सप्तमः समाप्तः ॥ २–१–१–७ ॥

॥ ३४६ ॥

उक्तः सप्तमोद्देशकः, साम्प्रतमष्टमः समारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके पानकविचारः कृतः, इहापि तद्गतमेव विशेषमधिकृत्याह—

से भिक्खू वा २ से जं पुण पाणगजायं जाणिज्जा, तंजहा–अंबपाणगं वा १० अंबाडगपाणगं वा ११ कविट्ठपाण० १२ माउलिंगपा० १३ मुद्दियापा० १४ दालिमपा० १५ खज्जूरपा० १६ नालियेरपा० १७ करीरपा० १८ कोलपा० १९ आमलपा० २० चिंचापा० २२ अन्नयरं वा तहप्पगारं पाणगजातं सअट्ठियं सकणुयं सबीयगं अस्संजए भिक्खुपडियाए छब्बेण वा दूसेण वा वालगेण वा आविलियाण परिवीलियाण परिसाविया आहट्टु दलइज्जा तहप्पगारं पाणगजायं अफा० लाभे संते नो पडिगाहिज्जा ॥ (सू० ४३) ॥

स भिक्षुर्गृहपतिकुलं प्रविष्टः सन् यत्पुनरेवंभूतं पानकजातं जानीयात्, तद्यथा—'अंबगपाणगं वे'त्यादि सुगमं, नवरं 'मुद्दिया' द्राक्षा कोलानि–बदराणि, एतेषु च पानकेषु द्राक्षाबदराम्बिलिकादिकतिचित्पानकानि तत्क्षणमेव संमर्द्य क्रियन्ते अपराणि त्वाम्राम्बाडकादिपानकानि द्वित्रादिदिनसन्धानेन विधीयन्त इत्येवंभूतं पानकजातं तथाप्रकारमन्यदपि 'सास्थिकं' सहास्थिना कुलकेन यद्वर्त्तते, तथा सह कणुकेन–त्वगाद्यवयवेन यद्वर्त्तते, तथा बीजेन सह यद्वर्त्तते, अस्थिबीजयोश्चामलकादौ प्रतीतो विशेषः, तदेवंभूतं पानकजातम् 'असंयतः' गृहस्थो भिक्षुमुद्दिश्य–साध्वर्थं द्राक्षादिकमामर्द्य पुनर्वेशत्वमुत्पादितच्छब्बकेन वा, तथा दूसं–वस्त्रं तेन वा, तथा 'वालगेणं'ति गवादिवालधिबालनिष्पन्नचालनकेन सुघरिकागृहकेन वा इत्यादिनोपकरणेनास्थ्याद्यपनयनार्थं सकृदापीड्य पुनः पुनः परिपीड्य, तथा परिस्राव्य निर्गाल्याहृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च साधुसमीपं दद्यादिति, एवंप्रकारं पानकजातमुद्गमदोषदुष्टं सत्यपि लाभे न प्रतिगृह्णीयात्, ते चामी उद्गमदोषाः—"आहाकम्मु १ देसिअ २ पूतीकम्मे ३ अ मीसजाए अ ४ । ठवणा ५ पाहुडियाए ६ पाओअर ७ कीय ८ पामिच्चे ९ ॥ १ ॥ परियट्टिए १० अभिहडे ११ उब्भिन्ने १२ मालोहडे १३ इअ । अच्छेज्जे १४ अणिसट्ठे १५ अज्झोअरए १६ अ सोलसमे ॥ २ ॥" साध्वर्थं यत्सचित्तमचित्तीक्रियते अचित्तं वा यत्पच्यते तदाधाकर्म १ । तथाऽऽत्मार्थं यत्पूर्वसिद्धमेव लड्डुकचूर्णकादि साधुमुद्दिश्य पुनरपि [संत] गुडादिना संस्क्रियते तदुद्देशिकं सामान्येन, विशेषतो विशेषसूत्रादवगन्तव्यमिति २ । यदाधाकर्माद्यवयवसम्मिश्रं तत्पूतीकर्म ३ । संयतासंयताद्यर्थमादेरारभ्याहारपरिपाको मिश्रम् ४ । साध्वर्थं क्षीरादिस्थापनं स्थापना भण्यते ५ । प्रकरणस्य साध्वर्थमुत्सर्पणमवसर्पणं वा प्राभृतिका ६ । साधूनुद्दिश्य गवाक्षादिप्रकाशकरणं बहिर्वा प्रकाशे आहारस्य व्यवस्थापनं प्रादुष्करणम् ७ । द्रव्यादिविनिमयेन स्वीकृतं क्रीतम् ८ । साध्वर्थं यदन्यस्मादुच्छिन्नकं गृह्यते तत्प्रामिच्चंति ९ । यच्छाल्योदनादि कोद्रवादिना प्रातिवेशिकगृहे परिवर्त्य ददाति तत्परिवर्त्तितम् १० । यद्गृहादेः साध्ववसतिमानीय ददाति तदाहृतम् ११ । गोमयाद्युपलिप्तं भाजनमुद्भिद्य ददाति तदुद्भिन्नम् १२ । मालाद्यवस्थितं निश्रेण्यादिनाऽवतार्य ददाति तन्मालाहृतम् १३ । भृत्यादेराच्छिद्य यद्दीयते तदाच्छेद्यम् १४ । सामान्यं श्रेणीभक्तकाद्येकस्य ददतोऽनिसृष्टम् १५ । स्वार्थमधिश्रयणादौ कृते पश्चात्तन्दुलादिप्रसृत्यादिप्रक्षेपादध्यवपूरकः १६ । तदेवमन्यतमेनापि दोषेण दुष्टं न प्रतिगृह्णीयादिति ॥ पुनरपि भक्तपानविशेषमधिकृत्याह—

॥ ३४७ ॥

से भिक्खू वा० २ आगंतारेसु वा आरामागारेसु वा गाहावईगिहेसु वा परियावसहेसु वा अन्नगंधाणि वा पाणगंधाणि वा सुरभिगंधाणि वा आघाय २ से तत्थ आसायपडियाए मुच्छिए गिद्धे गढिए अज्झोववन्ने अहो गंधो २ नो गंधमाघाइज्जा (सू० ४४)

'आगंतारेसु व'त्ति पत्तनाद्बहिर्गृहेषु, तेषु ह्यागत्यागत्य पथिकादयस्तिष्ठन्तीति, तथाऽऽरामगृहेषु वा गृहपतिगृहेषु वा 'पर्यावसथेषु' इति भिक्षुकादिमठेषु वा, इत्येवमादिष्वन्नपानगन्धान् सुरभीनाघ्यायाघ्राय स भिक्षुस्तेष्वास्वादनप्रतिज्ञया मूर्छितो गृद्धो ग्रथितोऽध्युपपन्नः सन्नहो! गन्धः अहो! गन्ध इत्येवमादरवान् न गन्धं जिघ्रेदिति ॥ पुनरप्याहारमधिकृत्याह—

से भिक्खू वा २ से जं० सालुयं वा बिरालियं वा सासवनालियं वा अन्नयरं वा तहप्पगारं आमगं असत्थपरिणयं अफासु० । से भिक्खू वा० से जं पुण० पिप्पलिं वा पिप्पलचुण्णं वा मिरियं वा मिरियचुण्णं वा सिंगबेरं वा सिंगबेरचुण्णं वा अन्नयरं वा तहप्पगारं वा आमगं वा असत्थ प० । से भिक्खू वा० से जं पुण पलंबजायं जाणिज्जा, तंजहा—अंबपलंबं वा अंबाडगपलंबं वा तालप० झिज्झिरिप० सुरहि० सल्लइप० अन्नयरं तहप्पगारं पलंबजायं आमगं असत्थप० । से भिक्खू ५ से जं पुण पवालजायं जाणिज्जा, तंजहा—आसोट्ठपवालं वा निग्गोहप० पिलुंखुप० निपूरप० सल्लइप० अन्नयरं वा तहप्पगारं पवालजायं आमगं असत्थपरिणयं० । से भि० से जं पुण० सरडुयजायं जाणिज्जा, तंजहा—सरडुयं वा कविट्ठसर० दाडिमसर० बिल्लस० अन्नयरं वा तहप्पगारं सरडुयजायं आमं असत्थ परिणयं० । से भिक्खू वा० से जं पु० तंजहा—उंबरमंथुं वा नग्गोहमं० पिलुंखुमं० आसोत्थमं० अन्नयरं वा तहप्पगारं वा मंथुजायं आमयं दुरुक्कं साणुबीयं अफासुयं० ॥ (सू० ४५) ॥

सुगमं, 'सालुकम्' इति कन्दको जलजः, 'बिरालियं' इति कन्द एव स्थलजः, 'सासवणालिअ'न्ति सर्षपकन्दस्य इति ॥ किञ्च—पिप्पलीमरिचे—प्रतीते 'शृङ्गबेरम्' आर्द्रकं तथाप्रकारमामलकादि आमम्—अशस्त्रोपहतं न प्रतिगृह्णीयादिति ॥

सुगमं, नवरं पलम्बजातमिति फलसामान्यं झिञ्झिरी—वल्ली पलाशः सुरभिः—शतपुरिति ॥

गतार्थं, नवरम् 'आसोट्ठे'त्ति अश्वत्थः 'पिलुंखु'त्ति पिप्परी णिपूरो—नन्दीवृक्षः ॥ पुनरपि फलविशेषमधिकृत्याह—

सुगमं, नवरं 'सरडुअं वे'ति अबद्धास्थिफलं, तदेव विशिष्यते कपित्थादिभिरिति ॥

स्पष्टं, नवरं 'मंथु'न्ति चूर्णः 'दुरुक्कं'ति ईषत्पिष्टं 'साणुबीय'न्ति अविध्वस्तयोनिबीजमिति ॥

से भिक्खू वा० से जं पुण० आमडागं वा पूइपिन्नागं वा महुं वा मज्जं वा सप्पिं वा खोलं वा पुराणगं वा इत्थ पाणा अणुप्पसूयाइं जायाइं संवुड्ढाइं अव्वुक्कंताइं अपरिणया इत्थ पाणा अविद्धत्थाः नो पडिगाहिज्जा । (सू० ४६)॥

स भिक्षुर्यत्पुनरेवं जानीयात्, तद्यथा—'आमडागं वे'ति 'आमपत्रम्' अरणिकतन्दुलीयकादि तच्चार्द्धपक्वमपक्वं वा, 'पूतिपिन्नाग'न्ति कुथितखलं मधुमद्ये—प्रतीते 'सर्पिः' घृतं 'खोलं' मद्याधःकर्दमः, एतानि पुराणानि न ग्राह्याणि, यत एतेषु प्राणिनोऽनुप्रसूता जाताः संवृद्धा अव्युत्क्रान्ता अपरिणताः—अविध्वस्ताः, नानादेशजविनेयानुग्रहार्थमेकार्थिकान्येवैतानि किञ्चिद्भेदाद्वा भेदः ॥

॥ ३४८ ॥

से भिक्खू वा० से जं० उच्छुमेरगं वा अंककरेलुगं वा कसेरुगं वा सिंघाडगं वा पूइआलुगं वा अन्नयरं वा० । से भिक्खू वा० से जं० उप्पलं वा उप्पलनालं वा भिसं वा भिसमुणालं वा पुक्खलं वा पुक्खलविभंगं वा अन्नयरं वा तहप्पगारं० । (सू० ४७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उच्छुमेरगं'ति अपनीतत्वगिक्षुगण्डिका 'अंककरेलुअं वा' इत्येवमादीन् वनस्पतिविशेषान् जलजान् अन्यद्वा तथाप्रकारमामम्–अशस्त्रोपहतं नो प्रतिगृह्णीयादिति ॥ स भिक्षुर्यत्पुनरेवं जानीयात्, तद्यथा—'उत्पलं' नीलोत्पलादि नालं–तस्यैवाधारः, 'भिसं' पद्मकन्दमूलं 'भिसमुणालं' पद्मकन्दोपरिवर्त्तिनी लता 'पोक्खलं' पद्मकेसरं 'पोक्खलविभंगं' पद्मकन्दः अन्यद्वा तथाप्रकारमामम्–अशस्त्रोपहतं न प्रतिगृह्णीयादिति ॥

से भिक्खू वा २ से जं पु० अग्गबीयाणि वा मूलबीयाणि वा खंधबीयाणि वा पोरबी० अग्गजायाणि वा मूलजा० खंधजा० पोरजा० नन्नत्थ तक्कलिमत्थएण वा तक्कलिसीसेण वा नालियेरमत्थएण वा खजूरिमत्थएण वा तालम० अन्नयरं वा तह०। से भिक्खू वा २ से जं० उच्छुं वा काणगं वा अंगारियं वा संमिस्सं विगदूमियं वित(त्त)गगं वा कंदलीऊसुगं अन्नयरं वा तहप्पगा०। से भिक्खू वा० से जं० लसुणं वा लसुणपत्तं वा ल० नालं वा लसुणकंदं वा ल० चोयगं वा अन्नयरं वा०। से भिक्खू वा० से जं० अच्छियं वा कुंभिपक्कं तिंदुगं वा वेलुगं वा कासवनालियं वा अन्नयरं वा तहप्पगारं आमं असत्थप०। से भिक्खू वा० से जं० कणं वा कणकुंडगं वा कणपूयलियं वा चाउलं वा चाउलपिट्टं वा तिलं वा तिलपिट्टं वा तिलपप्पडगं वा अन्नयरं वा तहप्पगारं आमं असत्थप० लाभे संते नो प०, एवं खलु तस्स भिक्खुस्स सामग्गियं ॥ (सू० ४८)

२–१–१–८ ॥ पिण्डैषणायामष्टम उद्देशकः ॥

स भिक्षुर्यत्पुनरेवं जानीयात्, तद्यथा—'अग्रबीजानि' जपाकुसुमादीनि 'मूलबीजानि' जात्यादीनि 'स्कन्धबीजानि' सल्लकयादीनि 'पर्वबीजानि' इक्ष्वादीनि, तथा अग्रजातानि मूलजातानि स्कन्धजातानि पर्वजातानीति, 'णन्नत्थ'त्ति नान्य-

आ. सू. ५५

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३४९ ॥

स्मादग्रादेरानीयान्यत्र प्ररोहितानि किन्तु तत्रैवाग्रादौ जातानि, तथा 'तक्कलिमत्थए ण वा' तक्कली–कन्दली 'ण' इति वाक्यालङ्कारे तन्मस्तकं–तन्मध्यवर्त्ती गर्भः, तथा 'कन्दलीशीर्षं' कन्दलीसत्कः, एवं नालिकेरादेरपि द्रष्टव्यमिति, अथवा कन्दल्यादिसत्केन सदृशमन्यद्यच्छिन्नानन्तरमेव ध्वंसमुपयाति तत्तथाप्रकारमन्यदामम्–अशस्त्रपरिणतं न प्रतिगृह्णीयादिति ॥ स भिक्षुर्यत्पुनरेवं जानीयात्, तद्यथा–इक्षुं वा 'काणगं'ति व्याधिविशेषात्सच्छिद्रं, तथा 'अंगारकितं' विवर्णीभूतं, तथा 'सम्मिश्रं' स्फुटितत्वक् 'विगदूमियं'ति वृकैः शृगालैर्वा ईषद्भक्षितं, न शेषतावता रत्नाद्युपद्रवेण तद्प्रासुकं भवतीति सूत्रोपन्यासः, तथा वेत्राग्रं 'कंदलीऊसुयं'ति कन्दलीमध्यं, तथाऽन्यदप्येवंप्रकारमामम्–अशस्त्रोपहतं न प्रतिगृह्णीयादिति ॥ एवं लशुनसूत्रमपि सुगमं, नवरं 'चोअगं'ति कोशिकाकारा लशुनस्य बाह्यत्वक्, सा च यावत्सार्द्रा तावत्सचित्तेति ॥ 'अच्छियं'ति वृक्षविशेषफलं 'तेंदुयं'ति टेम्बरुयं 'वेलुयं'ति बिल्वं 'कासवनालियं'ति श्रीपर्णीफलं, कुम्भीपक्वशब्दः प्रत्येकमभिसंबध्यते, एतदुक्तं भवति–यदच्छिकफलादिगर्त्तादावप्राप्तपाककालमेव बलात्पाकमानीयते तदामम्–अपरिणतं न प्रतिगृह्णीयादिति ॥ 'कणम्' इति शाल्यादेः कणिकास्तत्र कदाचिन्नाभिः संभवेत् 'कणिककुण्डं' कणिकाभिर्मिश्राः कुक्कुसाः 'कणपूयलिअं'ति कणिकाभिर्मिश्राः पूपलिकाः कणपूपलिकाः, अत्रापि मन्दपक्वादौ नाभिः संभाव्यते, शेषं सुगमं यावत्तस्य भिक्षोः 'सामग्र्यं' सम्पूर्णो भिक्षुभाव इति ॥ प्रथमस्याष्टमोद्देशकः समाप्तः ॥

श्रुतस्कं० २ चूलिका १ पिण्डैष० १ उद्देशः ८

॥ ३४९ ॥

उक्तोऽष्टमोद्देशकः, साम्प्रतं नवम आरभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरमनेषणीयपिण्डपरिहार उक्तः, इहापि प्रकारान्तरेण स एवाभिधीयते—

इह खलु पाईणं वा ४ संतेगइया सड्ढा भवंति, गाहावई वा जाव कम्मकरी वा, तेसिं च णं एवं वुत्तपुव्वं भवइ–जे इमे भवंति समणा भगवंता सीलवंतो वयवंतो गुणवंतो संजया संवुडा बंभयारी उवरया मेहुणाओ धम्माओ, नो खलु एएसिं कप्पइ आहाकम्मिए असणे वा ४ भुत्तए वा पायए वा, से जं पुण इमं अम्हं अप्पणो अट्ठाए निट्ठियं तं असणं ४ सव्वमेयं समणाणं निसिरामो, अवियाइं वयं पच्छा अप्पणो अट्ठाए असणं वा ४ चेइस्सामो, एयप्पगारं निग्घोसं सुच्चा निसम्म तहप्पगारं असणं वा ४ अफासुयं० ॥ (सू० ४९)

'इहे'ति वाक्योपन्यासे प्रज्ञापकक्षेत्रे वा, खलुशब्दो वाक्यालङ्कारे प्रज्ञापकाद्यपेक्षया प्राच्यादौ दिशि सन्ति–विद्यन्ते पुरुषाः तेषु च केचन श्रद्धालवो भवेयुः ते च श्रावकाः प्रकृतिभद्रका वा, ते चामी–गृहपतिर्यावत्कर्मकरी वेति, तेषां चेदमुक्तपूर्वं भवेत्—'णम्' इति वाक्यालङ्कारे, ये इमे 'श्रमणाः' साधवो भगवन्तः 'शीलवन्तः' अष्टादशशीलाङ्गसहस्रधारिणः 'व्रतवन्तः' रात्रिभोजनविरमणषष्ठपञ्चमहाव्रतधारिणः 'गुणवन्तः' पिण्डविशुद्ध्याद्युत्तरगुणोपेताः 'संयताः' इन्द्रियनोइन्द्रियसंयमवन्तः 'संवृताः' पिहितास्रवद्वाराः 'ब्रह्मचारिणः' नवविधब्रह्मगुप्तिगुप्ताः 'उपरता मैथुनाद्धर्मात्' अष्टादशविकल्पब्रह्मोपेताः(संयताः), एतेषां च न कल्पते आधाकर्मिकमशनादि भोक्तुं पातुं वा, अतो यदात्मार्थमस्माकं निष्ठितं सिद्धमशनादि ४ तत्सर्वमेतेभ्यः श्रमणेभ्यः 'णिसिरामो'त्ति प्रयच्छामः, अपि च–वयं पश्चादात्मार्थमशनाद्यन्यत् 'चेत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यिष्यामः' सङ्कल्पयिष्यामो निर्वर्त्तयिष्याम इतियावत्, तदेवं साधुरेवं 'निर्घोषं' ध्वनिं श्रुत एव श्रुत्वाऽन्यतो वा कुतश्चित् 'निशम्य' ज्ञात्वा तथाप्रकारमशनादि पश्चात्कर्मभयादप्रासुकमित्यनेषणीयं मत्वा लाभे सति न प्रतिगृह्णीयादिति ॥ किञ्च—

से भिक्खू वा० वसमाणे वा गामाणुगामं वा दूइज्जमाणे से जं० गामं वा जाव रायहाणिं वा इमंसि खलु गामंसि वा रायहाणिंसि वा संतेगइयस्स भिक्खुस्स पुरेसंथुया वा पच्छासंथुया वा परिवसंति, तंजहा—गाहावई वा जाव कम्म० तहप्पगाराइं कुलाइं नो पुव्वामेव भत्ताए वा निक्खमिज्ज वा पविसेज्ज वा २, केवली बूया—आयाणमेयं, पुरा पेहाए तस्स परो अट्ठाए असणं वा ४ उवकरिज्ज वा उवक्खडिज्ज वा, अह भिक्खूणं पुव्वोवइट्ठा ४ जं नो तहप्पगाराइं कुलाइं पुव्वामेव भत्ताए वा पाणाए वा पविसिज्ज वा निक्खमिज्ज वा २, से तमायाय एगंतमवक्कमिज्जा २ अणावायमसंलोए चिट्ठिज्जा, से तत्थ कालेणं अणुपविसिज्जा २ तत्थियरेयरेहिं कुलेहिं सामुदाणियं एसियं वेसियं पिंडवायं एसित्ता आहारं आहारिज्जा, सिया से परो कालेण अणुपविट्ठस्स आहाकम्मियं असणं वा उवकरिज्ज वा उवक्खडिज्ज वा तं चेगइओ तुसिणीओ उवेहेज्जा, आहडमेव पडाइक्खिस्सामि, माइट्ठाणं संफासे, नो एवं करिज्जा, से पुव्वामेव आलोइज्जा—आउसोत्ति वा भइणित्ति वा! नो खलु मे कप्पइ आहाकम्मियं असणं वा ४ भुत्तए वा पायए वा, मा उवकरेहि मा उवक्खडेहि, से सेवं वयंतस्स परो आहाकम्मियं असणं वा ४ उवक्खडावित्ता आहट्टु दलइज्जा तहप्पगारं असणं वा० अफासुयं० ॥ (सू० ५०)

स भिक्षुर्यत्पुनरेवं जानीयात्, तद्यथा—ग्रामं वा यावद्राजधानीं वा, अस्मिंश्च ग्रामादौ 'सन्ति' विद्यन्ते कस्यचिद्भिक्षोः 'पूर्वसंस्तुताः' पितृव्यादयः 'पश्चात्संस्तुता वा' श्वशुरादयः, ते च तत्र बद्धगृहाः प्रबन्धेन प्रतिवसन्ति, ते चामी—गृहपतिर्वा यावत्कर्मकरी वा, तथाप्रकाराणि च कुलानि भक्तपानाद्यर्थं न प्रविशेत् नापि निष्क्रामेत्, स्वमनीषिकापरिहारार्थमाह—केवली ब्रूयात्कर्मोपादानमेतत्, किमिति?, यतः पूर्वमेवैतत् 'प्रत्युपेक्षेत' पर्यालोचयेत्, तथा 'एतस्य' भिक्षोः कृते 'परः' गृहस्थोऽशनाद्यर्थम् 'उपकुर्यात्' ढौकयेदुपकरणजातम्, 'उवक्खडेज्ज'त्ति तदशनादि पचेद्वेति, 'अथ' अनन्तरं भिक्षूणां पूर्वोपदिष्टमेतत्प्रतिज्ञादि, यथा—नो तथाप्रकाराणि स्वजनसम्बन्धीनि कुलानि पूर्वमेव—भिक्षाकालादारत एव भक्ताद्यर्थं प्रविशेद्वा निष्क्रामेद्वेति। यद्विधेयं तद्दर्शयति—'से तमादाये'ति 'सः' साधुः 'एतत्' स्वजनकुलम् 'आदाय' ज्ञात्वा केनचित्स्वजनेनाज्ञात एवैकान्तमपक्रामेद्, अपक्रम्य च स्वजनाद्यनापातेऽनालोके च तिष्ठेत्, स च तत्र स्वजनसम्बद्धग्रामादौ 'कालेन' भिक्षाऽवसरेणानुप्रविशेत्, अनुप्रविश्य च 'इतरेतरेभ्यः कुलेभ्यः' स्वजनरहितेभ्यः 'एसियं'ति एषणीयम्—उद्गमादिदोषरहितं 'वेसियं'ति वेषमात्रादवाप्तमुत्पादनादिदोषरहितं 'पिण्डपातं' भिक्षाम् 'एषित्वा' अन्विष्य एवंभूतं ग्रासैषणादोषरहितमाहारमाहारयेदिति। ते चामी उत्पादनादोषाः, तद्यथा—"धाई १ दूइ २ निमित्ते ३ आजीव ४ वणीमगे ५ तिगिच्छा ६ य। कोहे ७ माणे ८ माया ९ लोभे १० य हवन्ति दस एए ॥ १ ॥ पुव्विंपच्छासंथव ११ विज्जा १२ मंते १३ अ चुण्ण १४ जोगे १५ य। उप्पायणाय दोसा सोलसमे मूलकम्मे य १६ ॥ २ ॥" तत्राशनाद्यर्थं दातुरपत्योपकारे वर्त्तत इति धात्रीपिण्डः १, तथा कार्यसङ्घट्टनाय दौत्यं विधत्ते इति दूतीपिण्डः २, निमित्तम्—अङ्गुष्ठप्रश्नादि तदवाप्तो निमित्तपिण्डः ३, तथा जात्याद्याजीवनादवाप्त आजीविकापिण्डः ४, दातुर्वनीमगपिण्डः ५, सूक्ष्मेतरचिकित्सयाऽवाप्तश्चिकित्सापिण्डः ६, एवं क्रोधमानमायालोभैरवाप्तः क्रोधादिपिण्डः १०, भिक्षादानात्पूर्वं पश्चाद्वा दातुः 'कर्णायते भवानि'त्येवं संस्तवादवाप्तः पूर्वपश्चात्संस्तवपिण्डः ११, विद्ययाऽवाप्तो विद्यापिण्डः १२, तथैव मन्त्रजापावाप्तो मन्त्रपिण्डः १३, वशीकरणाद्यर्थं द्रव्यचूर्णादवाप्तश्चूर्णपिण्डः १४, योगाद्—अञ्जनादेरवाप्तो योगपिण्डः १५, यदनुष्ठानाद्गर्भशातनादेर्मूलमवाप्यते तद्विधानादवाप्तो मूलपिण्डः १६, तदेवमेते साधुसमुत्थाः षोडशोत्पादनादोषाः। ग्रासैषणादोषाश्चामी—"संजोअणा १ पमाणे २ इंगाले ३ धूम ४ कारणे ५ चेव।" तत्राहारलोलुपतया दधिगुडादेः संयोजनां विदधतः संयोजनादोषः १, द्वात्रिंशत्कवलप्रमाणातिरिक्तमाहारमाहारयतः प्रमाणदोषः २, तथाऽऽहाररागाद्गार्ध्याद् भुञ्जानस्य चारित्राङ्गारत्वापादनादङ्गारदोषः ३, तथाऽन्तप्रान्तादावाहारद्वेषाच्चारित्रस्याभिधूमनाद्धूमदोषः ४, वेदनादिकारणमन्तरेण भुञ्जानस्य कारणदोषः ५, इत्येवं वेषमात्रावाप्तं ग्रासैषणादिदोषरहितः सन्नाहारमाहारयेदिति। अथ कदाचिदेवं स्यात्, सः 'परः' गृहस्थः कालेनानुप्रविष्टस्यापि भिक्षोराधाकर्मिकमशनादि विदध्यात्, तच्च कश्चित्साधुस्तूष्णीभावेनोल्लेक्षेत, किमर्थम्?, आहृतमेव प्रत्याख्यास्यामीति, एवं च मातृस्थानं संस्पृशेत्, न चैवं कुर्यात्, यथा च कुर्यात्तदर्शयति—स पूर्वमेव 'आलोकयेत्' दत्तोपयोगो भवेत्, दृष्ट्वा चाहारं संस्क्रियमाणमेवं वदेद्—यथा अमुक! इति वा भगिनि! इति वा न खलु मम कल्पत आधाकर्मिक आहारो भोक्तुं वा पातुं वाऽतस्तदर्थं यत्नो न विधेयः, अथैवं वदतोऽपि पर आधाकर्मादि कुर्यात्ततो लाभे सति न प्रतिगृह्णीयादिति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से भिक्खू वा से जं० मंसं वा मच्छं वा भज्जिजमाणं पेहाए तिल्लपूयं वा आएसाए उवक्खडिज्जमाणं पेहाए नो खद्धं २ उवसंकमित्तु ओभासिज्जा, नन्नत्थ गिलाणणीसाए ॥ (सू० ५१)

स पुनः साधुर्यदि पुनरेवं जानीयात्, तद्यथा—मांसं वा मत्स्यं वा 'भज्यमान'मिति पच्यमानं तैलप्रधानं वा पूपं, तच्च किमर्थं क्रियते इति दर्शयति—यस्मिन्नायाते कर्मण्यादिश्यते परिजनः स आदेशः—प्राघूर्णकस्तदर्थं संस्क्रियमाणमाहारं प्रेक्ष्य लोलुपतया 'नो' नैव 'खद्धं २'ति शीघ्रं २, द्विर्वचनमादरख्यापनार्थमुपसंक्रम्यावभाषेत—याचेत, अन्यत्र ग्लानादिकार्यादिति ॥

से भिक्खू वा० अन्नयरं भोयणजायं पडिगाहित्ता सुब्भिं सुब्भिं भुच्चा दुब्भिं २ परिट्ठवेइ, माइट्ठाणं संफासे, नो एवं करिज्जा । सुब्भिं वा दुब्भिं वा सव्वं भुंजिज्जा नो किंचिवि परिट्ठविज्जा ॥ (सू० ५२)

स भिक्षुरन्यतरद् भोजनजातं परिगृह्य सुरभि सुरभि भक्षयेत् दुर्गन्धं २ परित्यजेत्, वीप्सायां द्विर्वचनं, मातृस्थानं चैवं संस्पृशेत्, तच्च न कुर्यात्, यथा च कुर्यात् तद्दर्शयति—सुरभि वा दुर्गन्धं वा सर्वं भुञ्जीत न परित्यजेदिति ॥

से भिक्खू वा २ अन्नयरं पाणगजायं पडिगाहित्ता पुप्फं २ आविइत्ता कसायं २ परिट्ठवेइ, माइट्ठाणं संफासे, नो एवं करिज्जा । पुप्फं पुप्फेइ वा कसायं कसाइ वा सव्वमेयं भुंजिज्जा, नो किंचिवि परि० ॥ (सू० ५३)

एवं पानकसूत्रमपि, नवरं वर्णगन्धोपेतं पुष्पं तद्विपरीतं कषायं, वीप्सायां द्विर्वचनं, दोषश्चानन्तरसूत्रयोराहारगार्द्ध्यात् सूत्रार्थहानिः कर्मबन्धश्चेति ॥

से भिक्खू वा० बहुपरियावन्नं भोयणजायं पडिगाहित्ता बहवे साहम्मिया तत्थ वसंति संभोइया समणुन्ना अपरिहारिया अदूरगया, तेसिं अणालोइया अणाभंते परिट्ठवेइ, माइट्ठाणं संफासे, नो एवं करेज्जा, से तमायाए तत्थ गच्छिज्जा २ से पुव्वामेव आलोइज्जा—आउसंतो समणा ! इमे मे असणे वा पाणे वा ४ बहुपरियावन्ने तं भुंजह णं, से सेवं वयंतं परो वइज्जा—आउसंतो समणा ! आहारमेयं असणं वा ४ जावइयं २ सरइ तावइयं २ भुक्खामो वा पाहामो वा सव्वमेयं परिसडइ सव्वमेयं भुक्खामो वा पाहामो वा ॥ (सू० ५४)

स भिक्षुर्बहुशनादि पर्यापन्नं—लब्धं परिगृह्य बहुभिर्वा प्रकारैराचार्यग्लानप्राघूर्णकाद्यर्थं दुर्लभद्रव्यादिभिः पर्यापन्नमाहारजातं परिगृह्य तद्बृहत्त्वाद्भोक्तुमसमर्थः, तत्र च साधर्मिकाः सम्भोगिकाः समनोज्ञा अपरिहारिका एकार्थालापकाः, इत्येतेषु सत्स्वदूरगतेषु वा ताननापृच्छ्य प्रमादितया 'परिष्ठापयेत्' परित्यजेत्, एवं च मातृस्थानं संस्पृशेत्, नैवं कुर्यात्, यच्च कुर्यात्तद्दर्शयति—स भिक्षुस्तदधिकमाहारजातं परिगृह्य तत्समीपं गच्छेद्, गत्वा च पूर्वमेव 'आलोकयेत्' दर्शयेत्, एवं च ब्रूयाद्—आयुष्मन्! श्रमण! ममैतदशनादि बहु पर्यापन्नं नाहं भोक्तुमलमतो यूयं किञ्चिद् भुङ्क्ष्वं, तस्य चैवं वदतः स परो ब्रूयाद्—यावन्मात्रं भोक्तुं शक्नुमस्तावन्मात्रं भोक्ष्यामहे पास्यामो वा, सर्वं वा 'परिशटति' उपयुज्यते तत्सर्वं भोक्ष्यामहे पास्याम इति ॥

॥ ३५२ ॥

से भिक्खू वा २ से जं० असणं वा ४ परं समुद्दिस्स बहिया नीहडं जं परेहिं असमणुन्नायं अणिसिट्ठं अफा० जाव नो पडिगाहिज्जा जं परेहिं समणुण्णायं सम्मं णिसिट्ठं फासुयं जाव पडिगाहिज्जा, एवं खलु तस्स भिक्खुस्स भिक्खुणीए वा सामग्गियं (सू० ५५) ॥ २—१—१—९ ॥ पिण्डैषणायां नवम उद्देशकः ।

स पुनर्यदेवंभूतमाहारजातं जानीयात्, तद्यथा—'परं' चारभटादिकमुद्दिश्य गृहान्निष्क्रान्तं यच्च परैर्यदि भवान् कस्मैचिद्ददाति ददात्वित्येवं समनुज्ञातं नेतुर्दातुर्वा स्वामित्वेनानिसृष्टं वा तद् बहुदोषदुष्टत्वादप्रासुकमनेषणीयमिति मत्वा न प्रतिगृह्णीयात्, तद्विपरीतं तु प्रतिगृह्णीयादिति, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ प्रथमाध्ययनस्य नवमोद्देशकः परिसमाप्तः ॥

उक्तो नवमोऽधुना दशम आरभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरं पिण्डग्रहणविधिः प्रतिपादितः, इह तु साधारणादिपिण्डावाप्तौ वसतौ गतेन साधुना यद्विधेयं तद्दर्शयितुमाह—

से एगइओ साहारणं वा पिंडवायं पडिगाहित्ता ते साहम्मिए अणापुच्छित्ता जस्स जस्स इच्छइ तस्स तस्स खद्धं खद्धं दलइ, माइट्ठाणं संफासे, नो एवं करिज्जा । से तमायाय तत्थ गच्छिज्जा २ एवं वइज्जा—आउसंतो समणा ! संति मम पुरेसंथुया वा पच्छा० तंजहा—आयरिए वा १ उवज्झाए वा २ पवित्ती वा ३ थेरे वा ४ गणी वा ५ गणहरे वा ६ गणावच्छेइए वा ७ अवियाइं एएसिं खद्धं खद्धं दाहामि, सेणेवं वयंतं परो वइज्जा—कामं खलु आउसो ! अहापज्जत्तं निसिराहि, जावइयं २ परो वदइ तावइयं २ निसिरिज्जा, सव्वमेवं परो वयइ सव्वमेयं निसिरिज्जा ॥ (सू० ५६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सः भिक्षुः 'एकतरः' कश्चित् 'साधारणं' बहूनां सामान्येन दत्तं वाशब्दः पूर्वोत्तरापेक्षया पक्षान्तरद्योतकः पिण्डपातं परिगृह्य तान् साधर्मिकाननापृच्छ्य यस्मै यस्मै रोचते तस्मै तस्मै स्वमनीषिकया 'खद्धं खद्धं'ति प्रभूतं प्रभूतं प्रयच्छति, एवं च मातृस्थानं संस्पृशेत् तस्मान्नैवं कुर्यादिति ॥ असाधारणपिण्डावाप्तावपि यद्विधेयं तद्दर्शयति—

'सः' भिक्षुः 'तम्' एषणीयं केवलवेषावासं पिण्डमादाय 'तत्र' आचार्याद्यन्तिके गच्छेत्, गत्वा चैवं वदेद्, यथा—आयुष्मन्! श्रमण! 'सन्ति' विद्यन्ते मम 'पुरःसंस्तुताः' यदन्तिके प्रव्रजितस्तत्सम्बन्धिनः 'पश्चात्संस्तुता वा' यदन्तिकेऽधीतं श्रुतं वा तत्सम्बन्धिनो वाऽन्यत्रावासिताः, तांश्च स्वनामग्राहमाह, तद्यथा—'आचार्यः' अनुयोगधरः १ 'उपाध्यायः' अध्यापकः २ प्रवृत्तिर्यथायोगं वैयावृत्त्यादौ साधूनां प्रवर्त्तकः ३, संयमादौ सीदतां साधूनां स्थिरीकरणात्स्थविरः ४, गच्छाधिपो गणी ५, यस्त्वाचार्यदेशीयो गुर्वादेशात् साधुगणं गृहीत्वा पृथग्विहरति स गणधरः ६, गणावच्छेदकस्तु गच्छकार्यचिन्तकः ७, 'अवियाइं'ति इत्येवमादीनुद्दिश्यैतद्ब्रूयाद्—यथाऽहमेतेभ्यो युष्मदनुज्ञया 'खद्धं खद्धं'ति प्रभूतं प्रभूतं दास्यामि, तदेवं विज्ञप्तः सन् 'परः' आचार्यादिर्यावन्मात्रमनुजानीते तावन्मात्रमेव 'निसृजेत्' दद्यात् सर्वानुज्ञया सर्वं वा दद्यादिति ॥ किञ्च—

से एगइओ मणुन्नं भोयणजायं पडिगाहित्ता पंतेण भोयणेण पलिच्छाएइ मा मेयं दाइयं संतं दट्ठूणं सयमाइए आयरिए वा जाव गणावच्छेए वा, नो खलु मे कस्सइ किंचि दायव्वं सिया, माइट्ठाणं संफासे, नो एवं करिज्जा। से तमायाए तत्थ गच्छिज्जा २ पुव्वामेव उत्ताण५ इत्थे पडिग्गहं कट्टु इमं खलु इमं खलुत्ति आलोइज्जा, नो किंचिवि णिगूहिज्जा। से एगइओ अन्नयरं भोयणजायं पडिगाहित्ता भद्दयं २ भुच्चा विवन्नं विरसमाहरइ, माइ०, नो एवं० ॥ (सू० ५७)

॥ ३५३ ॥

सुगमं, यावन्नैवं कुर्यात्, यच्च कुर्यात्तद्दर्शयति—'सः' भिक्षुः 'तं' पिण्डमादाय 'तत्र' आचार्याद्यन्तिके गच्छेत्, गत्वा च सर्वं यथाऽवस्थितमेव दर्शयेत्, न किञ्चित् 'अवगूहयेत्' प्रच्छादयेदिति ॥ साम्प्रतमदतो मातृस्थानप्रतिषेधमाह—

'सः' भिक्षुः 'एकतरः' कश्चित् 'अन्यतरत्' वर्णाद्युपेतं भोजनजातं परिगृह्याटन्नेव रसगृद्धुतया भद्रकं २ भुक्त्वा यद् 'विवर्णम्' अन्तप्रान्तादिकं तत्प्रतिश्रये 'समाहरति' आनयति, एवं च मातृस्थानं संस्पृशेत्, न चैवं कुर्यादिति ॥ किञ्च—

से भिक्खू वा० से जं० अंतरुच्छियं वा उच्छुगंडियं वा उच्छुचोयगं वा उच्छुमेरगं वा उच्छुसालगं वा उच्छुडालगं वा सिंबलिं वा सिंबलथालगं वा अस्सिं खलु पडिग्गहियंसि अप्पे भोयणजाए बहुउज्झियधम्मिए तहप्पगारं अंतरुच्छुयं वा० अफा०॥ से भिक्खू वा २ से जं० बहुअट्ठियं वा मंसं वा मच्छं वा बहुकंटयं अस्सिं खलु० तहप्पगारं बहुअट्ठियं वा मंसं० लाभे संतो०। से भिक्खू वा० सिया णं परो बहुअट्ठिएणं मंसेण वा मच्छेण वा उवनिमंतिज्जा—आउसंतो समणा! अभिकंखसि बहुअट्ठियं मंसं पडिगाहित्तए? एयप्पगारं निग्घोसं सुच्चा निसम्म से पुव्वामेव आलोइज्जा—आउसोत्ति वा २ नो खलु मे कप्पइ बहु० पडिगा०, अभिकंखसि मे दाउं जावइयं तावइयं पुग्गलं दलयाहि, मा य अट्ठियाइं, से सेवं वयंतस्स परो अभिहट्टु अंतो पडिग्गहगंसि बहु० परिभाइत्ता निहट्टु दलइज्जा, तहप्पगारं पडिग्गहं परहत्थंसि वा परपायंसि वा अफा० नो०। से आहच्च पडिगाहिए सिया तं नोहित्ति वइज्जा नो अणिहित्ति वइज्जा, से तमायाय एगंतमवक्कमिज्जा २ अहे आरामंसि वा अहे उवस्सयंसि वा अप्पंडे जाव संताणए मंसगं मच्छगं भुच्चा अट्ठियाइं कंटए गहाय से तमायाय एगंतमवक्कमिज्जा २ अहे झामथंडिलंसि वा जाव पमज्जिय पमज्जिय परट्ठविज्जा ॥ (सू० ५८)

स भिक्षुर्यत्पुनरेवंभूतमाहारजातं जानीयात्, तद्यथा—'अंतरुच्छुअं व'त्ति इक्षुपर्वमध्यम् 'इक्षुगंडियं'ति सपर्वेक्षुशकलं 'चोयगो' पीलितेक्षुच्छोदिका 'मेरुकं' त्यग्रं 'सालगं'ति दीर्घशाखा 'डालगं'ति शाखैकदेशः 'सिंबलि'न्ति मुद्गादीनां विध्वस्ता फलिः 'सिंबलिथालगं'ति वल्यादिफलीनां स्थाली फलीनां वा पाकः, अत्र चैवंभूते परिगृहीतेऽप्यन्तरिक्षादिकेऽल्पमशनीयं बहुपरित्यजनधर्मकमिति मत्वा न प्रतिगृह्णीयादिति ॥ एवं मांससूत्रमपि नेयम्, अस्य चोपादानं क्वचिल्लूताद्युपशमनार्थं सद्वैद्योपदेशतो बाह्यपरिभोगेन स्वेदादिना ज्ञानाद्युपकारकत्वात्फलवद्दृष्टं, भुजिश्चात्र बहिःपरिभोगार्थे नाभ्यवहारार्थे पदातिभोगवदिति ॥ एवं गृहस्थामन्त्रणादिविधिपुद्गलसूत्रमपि सुगममिति, तदेवमादिना छेदसूत्राभिप्रायेण ग्रहणे सत्यपि कण्टकादिप्रतिष्ठापनविधिरपि सुगम इति ॥

से भिक्खू० सिया से परो अभिहट्टु अंतो पडिग्गहे बिलं वा लोणं उब्भियं वा लोणं परिभाइत्ता नीहट्टु दलइज्जा, तहप्पगारं पडिग्गहं परहत्थंसि वा २ अफासुयं नो पडि०, से आहच्च पडिगाहिए सिया तं च नाइदूरगए जाणिज्जा, से तमायाय तत्थ गच्छिज्जा २ पुव्वामेव आलोइज्जा—आउसोत्ति वा २ इमं किं ते जाणया दिन्नं उयाहु अजाणया?, से य भणिज्जा—नो खलु मे जाणया दिन्नं, अजाणया दिन्नं, कामं खलु आउसो! इयाणिं निसिरामि, तं भुंजह वा णं परिभाएह वा णं तं परेहिं समणुन्नायं समणुसट्ठं तओ संजयामेव भुंजिज्ज वा पीइज्ज वा, जं च नो संचाएइ भोत्तए वा पायए वा साहम्मिया

॥ ३५४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थ वसंति संभोइया समणुन्ना अपरिहारिया अदूरगया, तेसिं अणुप्पयायव्वं सिया, नो जत्थ साहम्मिया जहेव बहुपरियावन्नं कीरइ तहेव कायव्वं सिया, एवं खलु० ॥ (सू० ५९) ॥ २–१–१–१० ॥ पिण्डैषणायां दशम उद्देशकः ॥

स भिक्षुर्गृहादौ प्रविष्टः, तस्य च स्यात्–कदाचित् 'परः' गृहस्थः 'अभिहट्टु अंतो' इति अन्तः प्रविश्य पतद्ग्रहे–काष्ठच्छब्बकादौ ग्लानाद्यर्थं खण्डादियाचने सति 'बिडं वा लवणं' खनिविशेषोत्पन्नम् 'उब्भिज्जं वा' लवणाकराद्युत्पन्नं 'परिभाएत्त'त्ति दातव्यं विभज्य दातव्यद्रव्यात्किञ्चिदंशं गृहीत्वेत्यर्थः, ततो निःसृत्य दद्यात्, तथाप्रकारं परहस्तादिगतमेव प्रतिषेधयेत्, तच्च 'आहच्चे'ति सहसा प्रतिगृहीतं भवेत्, तं च दातारमदूरगतं ज्ञात्वा स भिक्षुस्तल्लवणादिकमादाय तत्समीपं गच्छेद्, गत्वा च पूर्वमेव तल्लवणादिकम् 'आलोकयेत्' दर्शयेद्, एतच्च ब्रूयाद्–अमुक! इति वा भगिनि! इति वा, एतच्च लवणादिकं किं त्वया जानता दत्तमुताजानता?, एवमुक्तः सन् पर एवं वदेद्–यथा पूर्वं मयाऽजानता दत्तं, साम्प्रतं तु यदि भवतोऽनेन प्रयोजनं ततो दत्तम्, एतत्परिभोगं कुरुध्वं, तदेवं परैः समनुज्ञातं समनुसृष्टं सत्प्रासुकं कारणवशादप्रासुकं वा भुञ्जीत पिबेद्वा, यच्च न शक्नोति भोक्तुं पातुं वा तत्साधर्मिकादिभ्यो दद्यात्, तदभावे बहुपर्यापन्नविधिं प्राक्तनं विदध्यात्, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ प्रथमस्य दशमः समाप्तः ॥ २–१–१–१० ॥

उक्तो दशमः, अधुनैकादशः समारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके लब्धस्य पिण्डस्य विधिरुक्तः, तदिहापि विशेषतः स एवोच्यते—

आ. सू. ६०

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३५५ ॥

भिक्खागा नामेगे एवमाहंसु समाणे वा वसमाणे वा गामाणुगामं वा दूइज्जमाणे मणुन्नं भोयणजायं लभित्ता से भिक्खू गिलाइ, से हंदह णं तस्साहरह, से य भिक्खू नो भुंजिज्जा तुमं चेव णं भुंजिज्जासि, से एगइओ भोक्खामित्तिकट्टु पलिउंचिय २ आलोइज्जा, तंजहा—इमे पिंडे इमे लोए इमे तित्ते इमे कडुयए इमे कसाए इमे अंबिले इमे महुरे, नो खलु इत्तो किंचि गिलाणस्स सयइत्ति माइट्ठाणं संफासे, नो एवं करिज्जा, तहाठियं आलोइज्जा जहाठियं गिलाणस्स सयइत्ति, तं तित्तयं तित्तएत्ति वा कडुयं कडुयं कसायं कसायं अंबिलं अंबिलं महुरं महुरं० ॥ (सू० ६०)

श्रुतस्कं० २ चूलिका १ पिण्डैष० १ उद्देशः ११

भिक्षामटन्ति भिक्षाटाः भिक्षणशीलाः साधव इत्यर्थः, नामशब्दः सम्भावनायां, वक्ष्यमाणमेषां संभाव्यते, 'एके' केचन एवमाहुः–साधुसमीपमागत्य वक्ष्यमाणमुक्तवन्तः, ते च साधवः 'समाना वा' साम्भोगिका भवेयुः, वाशब्दादसाम्भोगिका वा, तेऽपि च 'वसन्तः' वास्तव्या अन्यतो वा ग्रामादेः समागता भवेयुः, तेषु च कश्चित्साधुः 'ग्लायति' ग्लानिमनुभवति, तत्कृते तान् सम्भोगिकादींस्ते भिक्षाटा मनोज्ञभोजनलाभे सत्येवमाहुरिति सम्बन्धः, 'से' इति एतन्मनोज्ञमाहारजातं 'हन्दह' गृह्णीत यूयं 'णम्' इति वाक्यालङ्कारे 'तस्य' ग्लानस्य 'आहरत' नयत, तस्मै प्रयच्छत इत्यर्थः, ग्लानश्चेन्न भुङ्क्ते ग्राहक एवाभिधीयते–त्वमेव भुङ्क्ष्वेति, स च भिक्षुर्भिक्षोर्हस्तात् ग्लानार्थं गृहीत्वाऽऽहारं तत्राध्युपपन्नः सन्नेक एवाहं भोक्ष्य इतिकृत्वा तस्य ग्लानस्य 'पलिउंचिअ पलिउंचिय'त्ति मनोज्ञं गोपित्वा गोपित्वा वातादिरोगमुद्दिश्य तथा तस्य 'आलोकयेत्' दर्शयति यथाऽपथ्योऽयं पिण्ड इति बुद्धिरुत्पद्यते, तद्यथा–अग्रतो ढौकयित्वा वदति –अयं पिण्डो भवदर्थं साधुना दत्तः, किन्त्वयं 'लोए'ञ्जि रूक्षः, तथा तिक्तः कटः कषायोऽम्लो मधुरो वेत्यादि दोषदुष्टत्वान्नातः किञ्चिद् ग्लानस्य 'स्वदतीति' उपकारे न वर्त्तत इत्यर्थः, एवं च मातृस्थानं संस्पृशेत्, न चैतत्कुर्यादिति । यथा च कुर्यात्तद्दर्शयति–तथाऽवस्थितमेव ग्लानस्यालोकयेद्यथाऽवस्थितमिति, एतदुक्तं भवति–मातृस्थानपरित्यागेन यथाऽवस्थितमेव ब्रूयादिति, शेषं सुगमम् ॥ तथा—

॥ ३५५ ॥

भिक्खागा नामेगे एवमाहंसु—समाणे वा वसमाणे वा गामाणुगामं दूइज्जमाणे वा मणुन्नं भोयणजायं लभित्ता से य भिक्खू गिलाइ से हंदह णं तस्स आहरह, से य भिक्खू नो भुंजिज्जा आहारिज्जा, से णं नो खलु मे अंतराए आहरिस्सामि, इच्चेयाइं आयतणाइं उवाइक्कम्म ॥ (सू० ६१)

'भिक्षादाः' साधवो मनोज्ञमाहारं लब्ध्वा समनोज्ञांस्तांश्च वास्तव्यान् प्राघूर्णकान् वा ग्लानमुद्दिश्यैवमूचुः–एतन्मनोज्ञमाहारजातं गृह्णीत यूयं ग्लानाय नयत, स चेन्न भुङ्क्ते ततोऽस्मदन्तिकमेव ग्लानार्थम् 'आहरेत्' आनयेत्, स चैवमुक्तः सन्नेवं वदेद्–यथाऽन्तरायमन्तरेणाहरिष्यामीति प्रतिज्ञयाऽऽहारमादाय ग्लानान्तिकं गत्वा प्राक्तनान् भक्तादिरूक्षादिदोषानुद्घाट्य ग्लानायादत्त्वा स्वत एव लौल्याद्भुक्त्वा ततस्तस्य साधोर्निवेदयति, यथा मम शूलं वैयावृत्त्यकालापर्याप्त्यादिकमन्तरायिकमभूदतोऽहं तद् ग्लानभक्तं गृहीत्वा नायात इत्यादि मातृ[सं]स्थानं संस्पृशेत्, एतदेव दर्शयति–इत्येतानि–पूर्वोक्तान्यायतनानि–कर्मोपादानस्थानानि 'उपातिक्रम्य' सम्यक् परिहृत्य मातृस्थानपरिहारेण ग्लानाय वा दद्यादातृसाधुसमीपं वाऽऽहरेदिति ॥ पिण्डाधिकार एव सप्तपिण्डैषणा अधिकृत्य सूत्रमाह—

अह भिक्खू जाणिज्जा सत्त पिंडेसणाओ सत्त पाणेसणाओ, तत्थ खलु इमा पढमा पिंडेसणा—असंसट्ठे हत्थे असंसट्ठे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्ते, तहप्पगारेण असंसट्ठेण हत्थेण वा मत्तेण वा असणं वा ४ सयं वा णं जाइज्जा परो वा से दिज्जा फासुयं पडिगाहिज्जा, पढमा पिंडेसणा १ ॥ अहावरा दुच्चा पिंडेसणा—संसट्ठे हत्थे संसट्ठे मत्ते, तहेव दुच्चा पिंडेसणा २ ॥ अहावरा तच्चा पिंडेसणा—इह खलु पाईणं वा ४ संतेगइया सड्ढा भवंति—गाहावई वा जाव कम्मकरी वा, तेसिं च णं अन्नयरेसु विरूवरूवेसु भायणजाएसु उवनिक्खित्तपुव्वे सिया, तंजहा—थालंसि वा पिढरंसि वा सरगंसि वा परगंसि वा वरगंसि वा, अह पुणेवं जाणिज्जा—असंसट्ठे हत्थे संसट्ठे मत्ते, संसट्ठे वा हत्थे असंसट्ठे मत्ते, से य पडिग्गहधारी सिया पाणिपडिग्गहिए वा, से पुव्वामेव०—आउसोत्ति वा! २ एएण तुमं असंसट्ठेण हत्थेण संसट्ठेण मत्तेण संसट्ठेण वा हत्थेण असंसट्ठेण मत्तेण अस्सिं पडिग्गहगंसि वा पाणिंसि वा निहट्टु उचित्तु दलयाहि तहप्पगारं भोयणजायं सयं वा णं जाइज्जा २ फासुयं० पडिगाहिज्जा, तइया पिंडेसणा ३ ॥ अहावरा चउत्था पिंडेसणा—से भिक्खू वा० से जं० पिहुयं वा जाव चाउलपलंबं वा अस्सिं खलु पडिग्गहियंसि अप्पे पच्छाकम्मे अप्पे पज्जवजाए, तहप्पगारं पिहुयं वा जाव चाउलपलंबं वा सयं वा णं० जाव पडि०, चउत्था पिंडेसणा ४ ॥ अहावरा पंचमा पिंडेसणा—से भिक्खू वा २ उग्गहियमेव भोयणजायं जाणिज्जा, तंजहा—सरावंसि वा डिंडिमंसि वा कोसगंसि वा, अह पुणेवं जाणिज्जा बहुपरियावन्ने पाणीसु दगलेवे, तहप्पगारं असणं वा ४ सयं० जाव पडिगाहि०, पंचमा पिंडेसणा ५ ॥ अहावरा छट्ठा पिंडेसणा—से भिक्खू वा २ पग्गहियमेव भोयणजायं जाणिज्जा, जं च सयट्ठाए पग्गहियं, जं च परट्ठाए पग्गहियं, तं पायपरियावन्नं तं पाणिपरियावन्नं फासुयं पडि०, छट्ठा पिंडेसणा ६ ॥ अहावरा सत्तमा पिंडेसणा—से भिक्खू वा० बहुउज्झिय-

धम्मियं भोयणजायं जाणिज्जा, जं चऽन्ने बहवे दुपयचउप्पयसमणमाहणअतिहिकिवणवणीमगा नावकंखंति, तहप्पगारं उज्झियधम्मियं भोयणजायं सयं वा णं जाइज्जा परो वा से दिज्जा जाव पडि०, सत्तमा पिंडेसणा ७ ॥ इच्चेयाओ सत्त पिंडेसणाओ, अहावराओ सत्त पाणेसणाओ, तत्थ खलु इमा पढमा पाणेसणा—असंसट्ठे हत्थे असंसट्ठे मत्ते, तं चेव भाणियव्वं, नवरं चउत्थाए नाणत्तं। से भिक्खू वा० से जं० पुण पाणगजायं जाणिज्जा, तंजहा—तिलोदगं वा ६, अस्सिं खलु पडिग्गहियंसि अप्पे पच्छाकम्मे तहेव पडिगाहिज्जा ॥ (सू० ६२)

अथशब्दोऽधिकारान्तरे, किमधिकुरुते?, सप्त पिण्डैषणाः पानैषणाश्चेति, 'अथ' अनन्तरं भिक्षुर्जानीयात्, काः?—सप्तपिण्डैषणाः पानैषणाश्च, ताश्चेमाः, तद्यथा—"असंसट्ठा १ संसट्ठा २ उद्धडा ३ अप्पलेवा ४ उग्गहिआ ५ पग्गहिया ६ उज्झियधम्मे"ति, अत्र च द्वये साधवो—गच्छान्तर्गता गच्छविनिर्गताश्च, तत्र गच्छान्तर्गतानां सप्तानामपि ग्रहणमनुज्ञातं, गच्छनिर्गतानां पुनराद्ययोर्द्वयोरग्रहः पञ्चस्वभिग्रह इति, तत्राद्यां तावद्दर्शयति—'तत्र' तासु मध्ये 'खलु' इत्यलङ्कारे, इमा प्रथमा पिण्डैषणा, तद्यथा—असंसृष्टो हस्तोऽसंसृष्टं च मात्रं, द्रव्यं पुनः सावशेषं वा स्यान्निरवशेषं वा, तत्र निरवशेषे पश्चात्कर्मदोषस्तथाऽपि गच्छस्य बालाद्याकुलत्वात्तन्निषेधो नास्ति, अत एव सूत्रे तच्चिन्ता न कृता, शेषं सुगमम् ॥ तथाऽपरा द्वितीया पिण्डैषणा, तद्यथा—संसृष्टो हस्तः संसृष्टं मात्रकमित्यादि सुगमम् ॥ अथापरा तृतीया पिण्डैषणा, तद्यथा इह खलु प्रज्ञापकापेक्षया प्राच्यादिषु दिक्षु सन्ति केचित् श्रद्धालवः, ते चामी—गृहपत्यादयः कर्मकरीपर्यन्ताः, तेषां च गृहेष्वन्यतरेषु नानाप्रकारेषु भाजनेषु पूर्वमुक्षिप्तमशनादि स्यात्, भाजनानि च स्थालादीनि सुबोध्यानि नवरं 'सरगम्' इति

शरिकाभिः कृतं सूर्पादि 'परगं' वंशनिष्पन्नं छब्बकादि 'वरगं' मण्यादि महार्घमूल्यं, शेषं सुगमं यावत्परिगृह्णीयादिति, अत्र च संसृष्टासंसृष्टसावशेषद्रव्यैरष्टौ भङ्गाः, तेषु चाष्टमो भङ्गः संसृष्टो हस्तः संसृष्टं मात्रं सावशेषं द्रव्यमित्येष गच्छनिर्गतानामपि कल्पते, शेषास्तु भङ्गा गच्छान्तर्गतानां सूत्रार्थहान्यादिकं कारणमाश्रित्य कल्पन्त इति ॥ अपरा चतुर्थी पिण्डैषणाऽल्पलेपा नाम, सा यत्पुनरेवमल्पलेपं जानीयात्, तद्यथा—'पृथुकम्' इति भुग्नशाल्याद्यपगतसुषं यावत् 'तन्दुलपलम्बं' इति भुग्नशाल्यादितन्दुलानिति, अत्र च पृथुकादिके गृहीतेऽप्यल्पं पश्चात्कर्मादि, तथाऽल्पं पर्यायजातमल्पं तुषादि त्यजनीयमित्येवंप्रकारमल्पलेपम्, अन्यदपि वल्लचनकादि यावत्परिगृह्णीयादिति ॥ अथापरा पञ्चमी पिण्डैषणाऽवगृहीता नाम, तद्यथा—स भिक्षुर्यावदुपहृतमेव भोक्तुकामस्य भाजनस्थितमेव भोजनजातं ढौकितं जानीयात्, तत्पुनर्भाजनं दर्शयति, तद्यथा—'शरावं' प्रतीतं 'डिण्डिमं' कंश (कांस्य) भाजनं 'कोशकं' प्रतीतं, तेन च दात्रा कदाचित् पूर्वमेवोदकेन हस्तो मात्रकं वा धौतं स्यात्, तथा च निषिद्धं ग्रहणम्, अथ पुनरेवं जानीयाद्बहुपर्यापन्नः—परिगतः पाण्यादिषूदकलेपः, तत एवं ज्ञात्वा यावद् गृह्णीयादिति ॥ अथापरा षष्ठी पिण्डैषणा प्रगृहीता नाम—स्वार्थं परार्थं वा पिठरकादेरुद्धृत्य चट्टुकादिनोत्क्षिप्ता परेण च न गृहीता प्रव्रजिताय वा दापिता सा प्रकर्षेण गृहीता प्रगृहीता तां तथाभूतां प्राभृतिकां 'पात्रपर्यापन्नां वा' पात्रस्थितां 'पाणिपर्यापन्नां वा' हस्तस्थितां वा यावत्प्रतिगृह्णीयादिति ॥ अथापरा सप्तमी पिण्डैषणा उज्झितधर्मिका नाम, सा च सुगमा ॥ आसु च सप्तस्वपि पिण्डैषणासु संसृष्टाद्यष्टभङ्गका भणनीयाः, नवरं चतुर्थ्यां नानात्वमिति, तस्या अलेपत्वात्संसृष्टाद्यभाव इति ॥ एवं पानैषणा अपि नेया भङ्गकाश्चायोज्याः, नवरं चतुर्थी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानात्वं, स्वच्छत्वाच्च तस्या अल्पलेपत्वं, ततश्च संसृष्टाद्यभाव इति, आसां चैषणाना यथोत्तरं विशुद्धितारतम्यादेष एव क्रमो न्याय्य इति ॥ साम्प्रतमेताः प्रतिपद्यमानेन पूर्वप्रतिपन्नेन वा यद्विधेयं तद्दर्शयितुमाह—

इच्चेयासिं सत्तण्हं पिंडेसणाणं सत्तण्हं पाणेसणाणं अन्नयरं पडिमं पडिवज्जमाणे नो एवं वइज्जा—मिच्छापडिवन्ना खलु एए भयंतारो, अहमेगे सम्मं पडिवन्ने, जे एए भयंतारो एयाओ पडिमाओ पडिवज्जित्ता णं विहरंति जो य अहमंसि एयं पडिमं पडिवज्जित्ताणं विहरामि सव्वेऽवि ते उ जिणाणाए उवट्ठिया अन्नुन्नसमाहीए, एवं च णं विहरंति, एयं खलु तस्स भिक्खुस्स भिक्खुणीए वा सामग्गियं ॥ (सू० ६३) २–१–१–११ पिण्डैषणायामेकादश उद्देशकः ॥

इत्येतासां सप्तानां पिण्डैषणानां पानैषणानां वाऽन्यतरां प्रतिमां प्रतिपद्यमानो नैतद्वदेत्, तद्यथा—'मिथ्याप्रतिपन्नाः' न सम्यक् पिण्डैषणाद्यभिग्रहवन्तो भगवन्तः–साधवः, अहमेवैकः सम्यक्प्रतिपन्नो, यतो मया विशुद्धः पिण्डैषणाभिग्रहः कृत एभिश्च न, इत्येवं गच्छनिर्गतेन गच्छान्तर्गतेन वा समदृष्ट्या द्रष्टव्याः, नापि गच्छान्तर्गतेनोत्तरोत्तरपिण्डैषणाभिग्रहवता पूर्वपूर्वतरपिण्डैषणाभिग्रहवन्तो दूष्या इति, यच्च विधेयं तद्दर्शयति–य एते भगवन्तः–साधव एताः 'प्रतिमाः' पिण्डैषणाद्यभिग्रहविशेषान् 'प्रतिपद्य' गृहीत्वा ग्रामानुग्रामं 'विहरन्ति' यथायोगं पर्यटन्ति, यां चाहं प्रतिमां प्रतिपद्य विहरामि, सर्वेऽप्येते जिनाज्ञायां जिनाज्ञया वा 'समुत्थिताः' अभ्युद्यतविहारिणः संवृत्ताः, ते चान्योऽन्यसमाधिना यो यस्य गच्छान्तर्गतादेः समाधिरभिहितः, तद्यथा–सप्तापि गच्छवासिनां, तन्निर्गतानां तु द्वयोरग्रहः पञ्चस्वभिग्रहः

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३५८ ॥

इत्यनेन 'विहरन्ति' यदुक्तं इति, तथाविहारिणश्च सर्वेऽपि ते जिनाज्ञां नातिलङ्घन्ते, तथा चोक्तम्—"जोऽवि दुवत्थतिवत्थो बहुवत्थ अचेलओव्व संथरइ । न हु ते हीलंति परं सव्वेवि अ ते जिणाणाए ॥ १ ॥" एतत्तस्य भिक्षोर्भिक्षुण्या वा 'सामग्र्यं' सम्पूर्णो भिक्षुभावो यदात्मोत्कर्षवर्जनमिति २–१–१–११ ॥ द्वितीयश्रुतस्कन्धे प्रथमाध्ययनटीका परिसमाप्ता ॥

श्रुतस्कं०२ चूलिका० पिण्डैष०१ उद्देशः११

॥ ३५८ ॥

१ योऽपि द्विवस्त्रत्रिवस्त्रो बहुवस्त्रोऽचेलको वा संस्तरति । नैव ते हीलन्ति परान् सर्वेऽपि च ते जिनाज्ञायाम् ॥ १ ॥

अथ द्वितीयं शय्यैषणाख्यमध्ययनम्

उक्तं प्रथममध्ययनं, साम्प्रतं द्वितीयमारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तराध्ययने धर्माधारशरीरपरिपालनार्थमादावेव पिण्डग्रहणविधिरुक्तः, स च गृहीतः सन्नवश्यमल्पसागारिके प्रतिश्रये भोक्तव्य इत्यतस्तद्गतगुणदोषनिरूपणार्थं द्वितीयमध्ययनम्, अनेन च सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि व्यावर्णनीयानि, तत्र नामनिष्पन्ने निक्षेपे शय्यैषणेति, तस्या निक्षेपविधानाय पिण्डैषणानिर्युक्तिर्यत्र संभवति तां तत्रातिदिश्य प्रथमगाथया अपरासां च निर्युक्तीनां यथायोगं संभवं द्वितीयगाथया आविर्भाव्य निक्षेपं च तृतीयगाथया शय्याषट्कनिक्षेपे प्राप्ते नामस्थापने अनादृत्य निर्युक्तिकृदाह—

दव्वे खित्ते काले भावे सिज्जा य जा तहिं पगयं । केरिसिया सिज्जा खलु संजयजोगस्सि नायव्वा ?॥ २९८ ॥

द्रव्यशय्या क्षेत्रशय्या कालशय्या भावशय्या, अत्र च या द्रव्यशय्या तस्यां प्रकृतं, तामेव च दर्शयति–कीदृशी सा द्रव्यशय्या? संयतानां योग्येत्येवं ज्ञातव्या भविष्यति ॥ द्रव्यशय्याव्याचिख्यासयाऽऽह—

तिविहा य दव्वसिज्जा सचित्ताऽचित्त मीसगा चेव । खित्तंमि जंमि खित्ते काले जा जंमि कालंमि ॥२९९॥

त्रिविधा द्रव्यशय्या भवति, तद्यथा–सचित्ता अचित्ता मिश्रा चेति, तत्र सचित्ता पृथिवीकायादौ, अचित्ता तत्रैव प्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुके, मिश्राऽपि तत्रैवार्द्रपरिणते, अथवा सचित्तामुत्तरगाथया स्वत एव निर्युक्तिकृद् भावयिष्यति । 'क्षेत्र'मिति तु क्षेत्रशय्या, सा च यत्र ग्रामादिके क्षेत्रे क्रियते, कालशय्या तु या यस्मिन्नृतुबद्धादिके काले क्रियते ॥ तत्र सचित्तद्रव्यशय्योदाहरणार्थमाह—

उक्कलकलिंग गोअम वग्गुमई चेय होइ नायव्वा । एयं तु उदाहरणं नायव्वं दव्वसिज्जाए ॥ ३०० ॥

अस्या भावार्थः कथानकादवसेयः, तच्चेदम्—एकस्यामटव्यां द्वौ भ्रातरावुत्कलकलिङ्गाभिधानौ विषमप्रदेशे पल्लिं निवेश्य चौर्येण वर्त्तेते, तयोश्च भगिनी वल्गुमती नाम, तत्र कदाचिद् गौतमाभिधानो नैमित्तिकः समायातः, ताभ्यां च प्रतिपन्नः, तया च वल्गुमत्योक्तं—यथा नायं भद्रकः, अत्र वसन् यदा तदाऽयमस्माकं पल्लिविनाशाय भविष्यत्यतो निर्द्धाट्यते, ततस्ताभ्यां तद्वचनान्निर्द्धाटितः, स तस्यां प्रद्वेषमापन्नः प्रतिज्ञामग्रहीद्, यथा—नाहं गौतमो भवामि यदि वल्गुमत्युदरं विदार्य तत्र न स्वपिमीति, अन्ये तु भणन्ति—सैव वल्गुमत्यपत्यानां लघुत्वात्पल्लिस्वामिनी, उत्कलकलिङ्गौ नैमित्तिकौ, सा तयोर्भक्त्या गौतमं पूर्वनैमित्तिकं निर्द्धाटितवती, अतस्तत्प्रद्वेषात्प्रतिज्ञामादाय सर्षपान् वपन्निर्गतः, सर्षपाश्च वर्षाकालेन जाताः, ततस्तदनुसारेणान्यं राजानं प्रवेश्य सा पल्ली समस्ता लुण्टिता दग्धा च, गौतमेनापि वल्गुमत्या उदरं पाटयित्वा सावशेषजीवितदेहाया उपरि सुप्तमित्येषा वा सचित्ता द्रव्यशय्येति ॥ भावशय्याप्रतिपादनार्थमाह—

दुविहा य भावसिज्जा कायगए छव्विहे य भावंमि । भावे जो जत्थ जया सुहदुहगब्भाइसिज्जासु ॥ ३०१ ॥

॥ ३५९ ॥

द्वे विधे—प्रकारावस्थाः सा द्विविधा, तद्यथा—कायविषया षड्भावविषया च, तत्र यो जीवः 'यत्र' औदयिकादौ भावे 'यदा' यस्मिन् काले वर्त्तते सा तस्य षड्भावरूपा भावशय्या, शयनं शय्या स्थितिरितिकृत्वा, तथा रूयादिकायगतो गर्भत्वेन स्थितो यो जीवस्तस्य रूयादिकाय एव भावशय्या, यतः रूयादिकाये सुखिते दुःखिते सुप्ते उत्थिते वा तादृगवस्थ एव तदन्तर्वर्त्ती जीवो भवति, अतः कायविषया भावशय्या द्वितीयेति ॥ अध्ययनार्थाधिकारः सर्वोऽपि शय्याविषयः, उद्देशार्थाधिकारप्रतिपादनाय निर्युक्तिकृदाह—

सव्वेवि य सिज्जविसोहिकारगा तहवि अत्थि उ विसेसो । उद्देसे उद्देसे वुच्छामि समासओ किंचि ॥३०२॥

'सर्वेऽपि' त्रयोऽप्युद्देशका यद्यपि शय्याविशुद्धिकारकास्तथाऽपि प्रत्येकमस्ति विशेषस्तमहं लेशतो वक्ष्य इति ॥ एतदेवाह—

उग्गमदोसा पढमिल्लुयंमि संसत्तपच्चवाया य १ । बीयंमि सोअवाई बहुविहसिज्जाविवेगो २ य ॥ ३०३ ॥

तत्र प्रथमोद्देशके वसतेरुद्गमदोषाः—आधाकर्मादयस्तथा गृहस्थादिसंसक्तप्रत्यपायश्च चिन्त्यन्ते १, तथा द्वितीयोद्देशके शौचवादिदोषा बहुप्रकारः शय्याविवेकश्च—त्यागश्च प्रतिपाद्यत इत्ययमर्थाधिकारः २ ॥

तइए जयंनछलणा सज्झायस्सऽणुवरोहि जइयव्वं । समविसमाईएसु य समणेणं निज्जरट्ठाए ३ ॥ ३०४ ॥

तृतीयोद्देशके यतमानस्य—उद्गमादिदोषपरिहारिणः साधोर्या छलना स्यात्तत्परिहारे यतितव्यं, तथा स्वाध्यायानुपरोधिनि समविषमादौ प्रतिश्रये साधुना निर्जरार्थिना स्थातव्यमित्ययमर्थाधिकारः ३ ॥ गतो निर्युक्त्यनुगमः, अधुना सूत्रानुगमे सूत्रमुच्चारयितव्यं, तच्चेदम्—

से भिक्खू वा० अभिकंखिज्जा उवस्सयं एसित्तए अणुपविसित्ता गामं वा जाव रायहाणिं वा, से जं पुण उवस्सयं जाणिज्जा सअंडं जाव ससंताणयं तहप्पगारे उवस्सए नो ठाणं वा सिज्जं वा निसीहियं वा चेइज्जा ॥ से भिक्खू वा० से जं पुण उवस्सयं जाणिज्जा अप्पंडं जाव अप्पसंताणयं तहप्पगारे उवस्सए पडिलेहित्ता पमज्जित्ता तओ संजयामेव ठाणं वा ३ चेइज्जा ॥ से जं पुण उवस्सयं जाणिज्जा अस्सिं पडियाए एगं साहम्मियं समुद्दिस्स पाणाइं ४ समारब्भ समुद्दिस्स कीयं पामिच्चं अच्छिज्जं अणिसट्ठं अभिहडं आहट्टु चेएइ, तहप्पगारे उवस्सए पुरिसंतरकडे वा जाव अणासेविए वा नो ठाणं वा ३ चेइज्जा । एवं बहवे साहम्मिया एगं साहम्मिणिं बहवे साहम्मिणीओ ॥ से भिक्खू वा० से जं पुण उ० बहवे समणवणीमए पगणिय २ समुद्दिस्स तं चेव भाणियव्वं ॥ से भिक्खू वा० से जं० बहवे समण० समुद्दिस्स पाणाइं ४ जाव चेएति, तहप्पगारे उवस्सए अपुरिसंतरकडे जाव अणासेविए नो ठाणं वा ३ चेइज्जा ३, अह पुणेवं जाणिज्जा पुरिसंतरकडे जाव सेविए पडिलेहित्ता २ तओ संजयामेव चेइज्जा ॥ से भिक्खू वा० से जं पुण अस्संजए भिक्खुपडियाए कडिए वा उक्कंबिए वा छन्ने वा लित्ते वा घट्ठे वा मट्ठे वा संमट्ठे वा संपधूमिए वा तहप्पगारे उवस्सए अपुरिसंतरकडे जाव अणासेविए नो ठाणं वा सेज्जं वा निसीहिं वा चेइज्जा, अह पुण एवं जाणिज्जा पुरिसंतरकडे जाव आसेविए पडिलेहित्ता २ तओ चेइज्जा ॥ (सू० ६४)

॥ ३६० ॥

स भिक्षुः 'उपाश्रयं' वसतिमेषितुं यद्यभिकाङ्क्षेत्ततो ग्रामादिकमनुप्रविशेत्, तत्र च प्रविश्य साधुयोग्यं प्रतिश्रयमन्वेषयेत्, तत्र च यदि साण्डादिकमुपाश्रयं जानीयात्ततस्तत्र स्थानादिकं न विदध्यादिति दर्शयति—सुगमं, नवरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'स्थानं' कायोत्सर्गः 'शय्या' संस्तारकः 'निषीधिका' स्वाध्यायभूमिः 'णो चेइज्ज'त्ति नो चेतयेत्–नो कुर्यादित्यर्थः ॥ एतद्विपरीते तु प्रत्युपेक्ष्य स्थानादीनि कुर्यादिति ॥ साम्प्रतं प्रतिश्रयगतानुद्गमादिदोषान् विभणिषुराह–'सः' भावभिक्षुर्यत्पुनरेवंभूतं प्रतिश्रयं जानीयात्, तद्यथा—'अस्संपडियाए'त्ति एतत्प्रतिज्ञया एतान् साधून् प्रतिज्ञाय–उद्दिश्य प्राण्युपमर्देन साधुप्रतिश्रयं कश्चिच्छ्राद्धः कुर्यादिति । एतदेव दर्शयति–एकं साधर्मिकं 'साधुम्' अर्हत्प्रणीतधर्मानुष्ठायिनं सम्यगुद्दिश्य–प्रतिज्ञाय प्राणिनः 'समारभ्य' प्रतिश्रयार्थमुपमर्द्य प्रतिश्रयं कुर्यात्, तथा तमेव साधुं सम्यगुद्दिश्य 'क्रीतं' मूल्येनावाप्तं, तथा 'पामिच्चं'ति अन्यस्मादुच्छिन्नं गृहीतम् 'आच्छेद्यमि'ति भृत्यादेर्बलादाच्छिद्य गृहीतम् 'अनिसृष्टं' स्वामिनाऽनुत्सङ्कलितम् 'अभ्याहृतं' निष्पन्नमेवान्यतः समानीतम्, एवंभूतं प्रतिश्रयम् 'आहृत्य' उपेत्य 'चेएइ'त्ति साधवे ददाति, तथाप्रकारे चोपाश्रये पुरुषान्तरकृतादौ स्थानादि न विदध्यादिति ॥ एवं बहुवचनसूत्रमपि नेयम् ॥ तथा साध्वीसूत्रमप्येकवचनबहुवचनाभ्यां नेयमिति ॥ किञ्च–सूत्रद्वयं पिण्डैषणानुसारेण नेयं, सुगमं च ॥ तथा–

स भिक्षुर्यत्पुनरेवंभूतं प्रतिश्रयं जानीयात्, तद्यथा–भिक्षुप्रतिज्ञया 'असंयतः' गृहस्थः प्रतिश्रयं कुर्यात्, स चैवंभूतः स्यात्, तद्यथा—'कटकितः' काष्ठादिभिः कुड्यादौ संस्कृतः 'उक्कंबिओ'त्ति वंशादिकम्बाभिरवबद्धः 'छन्ने व'त्ति दर्भादिभिश्छादितः लिप्तः गोमयादिना घृष्टः सुधादिश्वेतरपिण्डेन मृष्टः स एव लेवनिकादिना समीकृतः 'संसृष्टः' भूमिकर्मादिना संस्कृतः 'संप्रधूपितः' दुर्गन्धापनयनार्थं धूपादिना धूपितः, तदेवंभूते प्रतिश्रयेऽपुरुषान्तरस्वीकृते यावदनासेविते स्थानादि न कुर्यात्, पुरुषान्तरकृतासेवितादौ प्रत्युपेक्ष्य स्थानादि कुर्यादिति ॥

से भिक्खू वा० से जं० पुण उवस्सयं जा० अस्संजए भिक्खुपडियाए खुडियाओ दुवारियाओ महल्लियाओ कुज्जा, जहा पिंडेसणाए जाव संथारगं संथारिज्जा बहिया वा निन्नक्खु तहप्पगारे उवस्सए अपु० नो ठाणं० ३ अह पुणेवं० पुरिसंतरकडे आसेविए पडिलेहित्ता २ तओ संजयामेव आव चेइज्जा ॥ से भिक्खू वा० से जं० अस्संजए भिक्खुपडियाए उदगप्पसूयाणि कंदाणि वा मूलाणि वा पत्ताणि वा पुप्फाणि वा फलाणि वा बीयाणि वा हरियाणि वा ठाणाओ ठाणं साहरइ बहिया वा निण्णक्खू त० अपु० नो ठाणं वा चेइज्जा, अह पुण० पुरिसंतरकडं चेइज्जा ॥ से भिक्खू वा से जं० अस्संज० भि० पीढं वा फलगं वा निस्सेणिं वा उदूखलं वा ठाणाओ ठाणं साहरइ बहिया वा निण्णक्खू तहप्पगारे उ० अपु० नो ठाणं वा चेइज्जा, अह पुण० पुरिसं० चेइज्जा ॥ (सू० ६५)

स भिक्षुर्यं पुनरेवंभूतं प्रतिश्रयं जानीयात्, तद्यथा—'असंयतः' गृहस्थः साधुप्रतिज्ञया लघुद्वारं प्रतिश्रयं महाद्वारं विदध्यात्, तत्रैवंभूते पुरुषान्तरास्वीकृतादौ स्थानादि न विदध्यात्, पुरुषान्तरस्वीकृतासेवितादौ तु विदध्यादिति, अत्र सूत्रद्वयेऽप्युत्तरगुणा अभिहिताः, एतद्दोषदुष्टाऽपि पुरुषान्तरस्वीकृतादिका कल्पते, मूलगुणदुष्टा तु पुरुषान्तरस्वीकृताऽपि न कल्पते, ते चामी मूलगुणदोषाः—"पट्ठी वंसो दो धारणाउ चत्तारि मूलवेलीओ" एतैः पृष्ठवंशादिभिः साधुप्रतिज्ञया या वसतिः क्रियते सा मूलगुणदुष्टा ॥ स भिक्षुर्यं पुनरेवम्भूतं प्रतिश्रयं जानीयात्, तद्यथा–गृहस्थः साधुप्रतिज्ञया उदकप्रसूतानि कन्दादीनि स्थानान्तरं सङ्क्रामयति बहिर्वा 'निण्णक्खु'त्ति निस्सारयति तथाभूते प्रतिश्रये पुरुषा-

१ पृष्ठिवंशो द्वे धारणे चतस्रो मूलवेल्यः.

न्तरास्वीकृते स्थानादि न कुर्यात्, पुरुषान्तरस्वीकृते तु कुर्यादिति ॥ एवमचित्तनिःसारणसूत्रमपि नेयम्, अत्र च त्रसादिविराधना स्यादिति भावः ॥ किञ्च—

से भिक्खू वा० से जं० तंजहा–खंधंसि वा मंचंसि वा मालंसि वा पासा० हम्मि० अन्नयरंसि वा तहप्पगारंसि अंतलिक्खजायंसि, नन्नत्थ आगाढागाढेहिं कारणेहिं ठाणं वा नो चेइज्जा ॥ से आहच्च चेइए सिया नो तत्थ सीओदगवियडेण वा २ हत्थाणि वा पायाणि वा अच्छीणि वा दंताणि वा मुहं वा उच्छोलिज्ज वा पहोइज्ज वा, नो तत्थ ऊसढं पकरेज्जा, तंजहा—उच्चारं वा पा० खे० सिं० वंतं वा पित्तं वा पूयं वा सोणियं वा अन्नयरं वा सरीरावयवं वा, केवली बूया आयाणमेयं, से तत्थ ऊसढं पगरेमाणे पयलिज्ज वा २, से तत्थ पयलमाणे वा पवडमाणे वा हत्थं वा जाव सीसं वा अन्नयरं वा कायंसि इंदियजालं लूसिज्ज वा पाणिं ४ अभिहणिज्ज वा जाव ववरोविज्ज वा, अथ भिक्खूणं पुव्वोवइट्ठा ४ जं तहप्पगारं उवस्सए अंतलिक्खजाए नो ठाणंसि वा ३ चेइज्जा ॥ (सू० ६६)

स भिक्षुर्यं पुनरेवंभूतमुपाश्रयं जानीयात्, तद्यथा–स्कन्धः–एकस्य स्तम्भस्योपर्याश्रयः, मञ्चमालौ–प्रतीतौ, प्रासादो–द्वितीयभूमिका, हर्म्यतलं–भूमिगृहम्, अन्यस्मिन् वा तथाप्रकारे प्रतिश्रये स्थानादि न विदध्यादन्यत्र तथाविधप्रयोजनादिति, स चैवंभूतः प्रतिश्रयस्तथाविधप्रयोजने सति यद्याहृत्य–उपेत्य गृहीतः स्यात्तदानीं यत्तत्र विधेयं तद्दर्शयति–न तत्र शीतोदकादिना हस्तादिधावनं विदध्यात्, तथा न च तत्र व्यवस्थितः 'उत्सृष्टम्' उत्सर्जनं–त्यागमुच्चारादेः कुर्यात्, केवली ब्रूयात्कर्मोपादानमेतदात्मसंयमविराधनातः, एतदेव दर्शयति–स तत्र त्यागं कुर्वन् पतेद्वा पतंश्चान्यतरं शरीराव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यवमिन्द्रियं वा विनाशयेत्, तथा प्राणिनश्चाभिहन्यात्तावज्जीविताद् 'व्यपरोपयेत्' प्रच्यावयेदिति, अथ भिक्षूणां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्तथाभूतेऽन्तरिक्षजाते प्रतिश्रये स्थानादि न विधेयमिति ॥ अपि च—

से भिक्खू वा० से जं० सइत्थियं सखुड्डं सपसुभत्तपाणं तहप्पगारे सागारिए उवस्सए नो ठाणं वा ३ चेइज्जा । आयाणमेयं भिक्खुस्स गाहावइकुलेण सद्धिं संवसमाणस्स अलसगे वा विसूइया वा छड्डी वा उव्वाहिज्जा अन्नयरे वा से दुक्खे रोगायंके समुप्पज्जिज्जा, अस्संजए कलुणपडियाए तं भिक्खुस्स गायं तिल्लेण वा घएण वा नवणीएण वा वसाए वा अब्भंगिज्ज वा मक्खिज्ज वा सिणाणेण वा कक्केण वा लुद्धेण वा वण्णेण वा चुण्णेण वा पउमेण वा आघंसिज्ज वा पघंसिज्ज वा उव्वलिज्ज वा उव्वट्टिज्ज वा सीओदगवियडेण वा उसिणोदगवियडेण वा उच्छोलिज्ज वा पक्खालिज्ज वा सिणाविज्ज वा सिंचिज्ज वा दारुणा वा दारुपरिणामं कट्टु अगणिकायं उज्जालिज्ज वा पज्जालिज्ज वा उज्जालित्ता कायं आयाविज्जा वा प० अह भिक्खूणं पुव्वोवइट्ठा० जं तहप्पगारे सागारिए उवस्सए नो ठाणं वा ३ चेइज्जा ॥ (सू० ६७)

स भिक्षुर्यं पुनरेवंभूतमुपाश्रयं जानीयात् तद्यथा—यत्र स्त्रियं तिष्ठन्तीं जानीयात्, तथा 'सखुड्ड'न्ति सबालं, यदिवा सह क्षुद्रैरवबद्धः—सिंहश्वमार्जारादिभिर्यो वर्त्तते, तथा पशवश्च भक्तपाने च, यदिवा पशूनां भक्तपाने तद्युक्तं, तथाप्रकारे सागारिके गृहस्थाकुलप्रतिश्रये स्थानादि न कुर्यात्, यतस्तत्रामी दोषाः, तद्यथा—आदानं कर्मोपादानमेतद्, भिक्षोर्गृहपतिकुटुम्बेन सह संवसतो यतस्तत्र भोजनादिक्रिया निःशङ्का न संभवति, व्याधिविशेषो वा कश्चित्संभवेदिति दर्शयति—'अलसगे'त्ति हस्तपादादिस्तम्भः श्वयथुर्वा, विशूचिकाछर्दी प्रतीते, एते व्याधयस्तं साधुमुद्बाधेरन्, अन्यतरद्वा

दुःखं 'रोगः' ज्वरादिः 'आतङ्कः' सद्यः प्राणहारी शूलादिस्तत्र समुत्पद्येत, तं च तथाभूतं रोगातङ्कपीडितं दृष्ट्वाऽसंयतः कारुण्येन भक्त्या वा तच्छिक्षुगात्रं तैलादिनाऽभ्यङ्ग्यात् तथेषन्नक्षयेद्वा पुनश्च स्नानं—सुगन्धिद्रव्यसमुदयः, कल्कः—कषायद्रव्यक्काथः, लोध्रं—प्रतीतं, वर्णकः—कम्पिलकादिः, चूर्णो यवादीनां पद्मकं—प्रतीतम्, इत्यादिना द्रव्येण ईषत्पुनः पुनर्वा घर्षयेत्, घृष्ट्वा चाभ्यङ्गापनयनार्थमुद्वर्त्तयेत्, ततश्च शीतोदकेन वा उष्णोदकेन वा 'उच्छोलेज्ज'त्ति ईषदुच्छोलनं विदध्यात् प्रक्षालयेत्, पुनः पुनः स्नानं वा—सोत्तमाङ्गं कुर्यात्सिञ्चेद्वेति, तथा दारुणा वा दारूणां परिणामं कृत्वा—संघर्षं कृत्वाऽग्निमुज्ज्वालयेत्प्रज्वालयेद्वा, तथा च कृत्वा साधुकायम् 'आतापयेत्' सकृत् प्रतापयेत्पुनः पुनः । अथ साधूनां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्तथाभूते ससागारिके प्रतिश्रये स्थानादिकं न कुर्यादिति ॥

आयाणमेयं भिक्खुस्स सागारिए उवस्सए संवसमाणस्स इह खलु गाहावई वा जाव कम्मकरी वा अन्नमन्नं अक्कोसंति वा पघंति वा रुंभंति वा उद्दविंति वा, अह भिक्खूणं उच्चावयं मणं नियंछिज्जा, एए खलु अन्नमन्नं अक्कोसंतु वा मा वा अक्कोसंतु जाव मा वा उद्दविंतु, अह भिक्खूणं पुव्व० जं तहप्पगारे सा० नो ठाणं वा ३ चेइज्जा ॥ (सू० ६८)

कर्मोपादानमेतद्भिक्षोः ससागारिके प्रतिश्रये वसतो, यतस्तत्र बहवः प्रत्यपायाः संभवन्ति, तानेव दर्शयति—'इह' इत्थंभूते प्रतिश्रये गृहपत्यादयः परस्परत आक्रोशादिकाः क्रियाः कुर्युः, तथा च कुर्वतो दृष्ट्वा स साधुः कदाचिदुच्चावचं मनः कुर्यात्, तत्रोच्चं नाम मैवं कुर्वन्तु, अवचं नाम कुर्वन्त्विति, शेषं सुगममिति ॥

आयाणमेयं भिक्खुस्स गाहावईहिं सद्धिं संवसमाणस्स, इह खलु गाहावई अप्पणो सयट्ठाए अगणिकायं उज्जालिज्जा वा पज्जालिज्ज वा विज्झविज्ज वा, अह भिक्खू उच्चावयं मणं नियंछिज्जा, एए खलु अगणिकायं उ० वा २ मा वा उ० पज्जा लिंतु वा मा वा प०, विज्झविंतु वा मा वा वि०, अह भिक्खूणं पु० जं तहप्पगारे उ० नो ठाणं वा ३ चेइज्जा ॥ (सू० ६९)

एतदपि गृहपत्यादिभिः स्वार्थमग्निसमारम्भे क्रियमाणे भिक्षोरुच्चावचमनःसम्भवप्रतिपादकं सूत्रं सुगमम् ॥ अपि च—

आयाणमेयं भिक्खुस्स गाहावईहिं सद्धिं संवसमाणस्स, इह खलु गाहावइस्स कुंडले वा गुणे वा मणी वा मुत्तिए वा हिरण्णेसु वा सुवण्णेसु वा कडगाणि वा तुडियाणि वा तिसराणि वा पालंबाणि वा हारे वा अद्धहारे वा एगावली वा कणगावली वा मुत्तावली वा रयणावली वा तरुणीयं वा कुमारिं अलंकियविभूसियं पेहाए, अह भिक्खू उच्चाव० एरिसिया वा सा नो वा एरिसिया इय वा णं बूया इय वा णं मणं साइज्जा, अह भिक्खूणं पु० ४ जं तहप्पगारे उवस्सए नो० ठा० ॥ (सू० ७०)

गृहस्थैः सह संवसतो भिक्षोरेते च वक्ष्यमाणा दोषाः, तद्यथा—अलङ्कारजातं दृष्ट्वा कन्यकां वाऽलङ्कृतां समुपलभ्य ईदृशी तादृशी वा शोभनाऽशोभना वा मद्भार्यासदृशी वा तथाऽलङ्कारो वा शोभनोऽशोभन इत्यादिकां वाचं ब्रूयात्, तथोच्चावचं शोभनाशोभनादौ मनः कुर्यादिति समुदायार्थः, तत्र गुणो—रसना हिरण्यं—दीनारादिद्रव्यजातं त्रुटितानि—मृणालिकाः प्रालम्बः—आप्रदीपन आभरणविशेषः, शेषं सुगमम् ॥ किञ्च—

आयाणमेयं भिक्खुस्स गाहावईहिं सद्धिं संवसमाणस्स, इह खलु गाहावइणीओ वा गाहावइधूयाओ वा गा० सुण्हाओ वा गा० धाईओ वा गा० दासीओ वा गा० कम्मकरीओ वा तासिं च णं एवं वुत्तपुव्वं भवइ—जे इमे भवंति समणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवंतो जाव उवरया मेहुणाओ धम्माओ, नो खलु एएसिं कप्पइ मेहुणधम्मं परियारणाए आउट्टित्तए, जा य खलु एएहिं सद्धिं मेहुणधम्मं परियारणाए आउट्टाविज्जा पुत्तं खलु सा लभिज्जा उयस्सिं तेयस्सिं वच्चस्सिं जसस्सिं संपराइयं आलोयणदरसणिज्जं, एयप्पगारं निग्घोसं सुच्चा निसम्म तासिं च णं अन्नयरी सड्ढी तं तवस्सिं भिक्खुं मेहुणधम्मपडियारणाए आउट्टाविज्जा, अह भिक्खूणं पु० जं तहप्पगारे सा० उ० नो ठा ३ चेइज्जा एयं खलु तस्स० ॥ (सू० ७१) पढमा सिज्जा सम्मत्ता २-१-२-१ ॥

पूर्वोक्ते गृहे वसतो भिक्षोरमी दोषाः, तद्यथा—गृहपतिभार्यादय एवमालोचयेयुः—यथैते श्रमणा मैथुनादुपरताः, तदेतेभ्यो यदि पुत्रो भवेत्ततोऽसौ 'ओजस्वी' बलवान् 'तेजस्वी' दीप्तिमान् 'वर्चस्वी' रूपवान् 'यशस्वी' कीर्त्तिमान्, इत्येवं संप्रधार्य तासां च मध्ये एवंभूतं शब्दं काचित्पुत्रश्रद्धालुः श्रुत्वा तं साधुं मैथुनधर्म(स्य) 'पडियारणाए'त्ति आसेवनार्थम् 'आउट्टावेज्ज'त्ति अभिमुखं कुर्यात्, अत एतद्दोषभयात्साधूनां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्तथाभूते प्रतिश्रये स्थानादि न कार्यमिति, एतत्तस्य भिक्षोर्भिक्षुण्या वा 'सामग्र्यं' सम्पूर्णो भिक्षुभाव इति ॥ द्वितीयाध्ययनस्य प्रथमोद्देशकः समाप्तः ॥ २-१-२-१ ॥

उक्तः प्रथमोद्देशकः, अधुना द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके सागारिकप्रतिबद्धवसतिदोषाः प्रतिपादिताः, इहापि तथाविधवसतिदोषविशेषप्रतिपादनायाह—

गाहावई नामेगे सुइसमायारा भवंति, से भिक्खू य असिणाणए मोयसमायारे से तग्गंधे दुग्गंधे पडिकूले पडिलोमे यावि भवइ, जं पुव्वं कम्मं तं पच्छा कम्मं जं पच्छा कम्मं तं पुरे कम्मं, तं भिक्खुपडियाए वट्टमाणा करिज्जा वा नो करिज्जा वा, अह भिक्खूणं पु० जं तहप्पगारे उ० नो ठाणं० ॥ (सू० ७२)

'एके' केचन गृहपतयः शुचिः समाचारो येषां ते तथा, ते च भागवतादिभक्ता भवन्ति भोगिनो वा—चन्दनागुरुकुङ्कुमकर्पूरादिसेविनः, भिक्षुश्चास्नानतया तथाकार्यवशात् 'मोया'त्ति कायिका तत्समाचरणात्स भिक्षुस्तद्गन्धो भवति, तथा च दुर्गन्धः, एवंभूतश्च तेषां गृहस्थानां 'प्रतिकूलः' नानुकूलोऽनभिमतः, तथा 'प्रतिलोमः' तद्गन्धाद्विपरीतगन्धो भवति, एकार्थिकौ वैतावतिशयानभिमतत्वख्यापनार्थावुपात्ताविति, तथा ते गृहस्थाः साधुप्रतिज्ञया यत्तत्र भोजनस्वाध्यायभूमौ स्नानादिकं पूर्वं कृतवन्तस्तत्तेषामुपरोधात्पश्चात्कुर्वन्ति यद्वा पश्चात्कृतवन्तस्तत्पूर्वं कुर्वन्ति, एवमवसर्पणोत्सर्पणक्रियया साधूनामधिकरणसम्भवः, यदिवा ते गृहस्थाः साधूपरोधान्नात्तकालमपि भोजनादिकं न कुर्युः, ततश्चान्तरायमनःपीडादिदोषसम्भवः, अथवा त एव साधवो गृहस्थोपरोधाद्यत्पूर्वं कर्म—प्रत्युपेक्षणादिकं तत्पश्चात्कुर्युर्विपरीतं वा कालातिक्रमेण कुर्युर्न कुर्युर्वा, अथ भिक्षूणां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्तथाविधे प्रतिश्रये स्थानादिकं न कार्यमिति ॥ किञ्च—

आयाणमेयं भिक्खुस्स गाहावईहिं सद्धिं सं०, इह खलु गाहावइस्स अप्पणो सयट्ठाए विरूवरूवे भोयणजाए उवक्खडिए सिया, अह पच्छा भिक्खुपडियाए असणं वा ४ उवक्खडिज्ज वा उवकरिज्ज वा, तं च भिक्खू अभिकंखिज्जा भुत्तए वा पायए वा वियट्टित्तए वा, अह भि० जं नो तह० ॥ (सू० ७३) आयाणमेयं भिक्खुस्स गाहावइणा सद्धिं संव०

इह खलु गाहावइस्स अप्पणो सयट्ठाए विरूवरूवाइं दारुयाइं भिन्नपुव्वाइं भवंति, अह पच्छा भिक्खुपडियाए विरूवरूवाइं दारुयाइं भिंदिज्ज वा किणिज्ज वा पामिच्चेज्ज वा दारुणा वा दारुपरिणामं कट्टु अगणिकायं उ० प०, तत्थ भिक्खू अभिकंखिज्जा आयावित्तए वा पयावित्तए वा वियट्टित्तए वा, अह भिक्खू० जं नो तहप्पगारे० ॥ (सू० ७४)

कर्मोपादानमेतद्भिक्षोर्यद्गृहस्थावबद्धे प्रतिश्रये स्थानमिति, तद्यथा—'गाहावइस्स अप्पणो'त्ति, तृतीयार्थे षष्ठी, गृहपतिना आत्मना स्वार्थं 'विरूपरूपः' नानाप्रकार आहारः संस्कृतः स्यात्, 'अथ' अनन्तरं पश्चात्साधूनुद्दिश्याशनादिपाकं वा कुर्यात्, तदुपकरणादि वा ढौकयेत्, तं च तथाभूतमाहारं साधुर्भोक्तुं पातुं वाऽभिकाङ्क्षेत्, 'विअट्टित्तए व'त्ति तत्रैवाहारगृद्ध्या विवर्त्तितुम्—आसितुमाकाङ्क्षेत्, शेषं पूर्ववदिति ॥ एवं काष्ठाग्निप्रज्वालनसूत्रमपि नेयमिति ॥ किञ्च—

से भिक्खू वा० उच्चारपासवणेण उव्वाहिज्जमाणे राओ वा वियाले वा गाहावइकुलस्स दुवारबाहं अवंगुणिज्जा, तेणे य तस्संधिचारी अणुपविसिज्जा, तस्स भिक्खुस्स नो कप्पइ एवं वइत्तए—अयं तेणो पविसइ वा नो वा पविसइ उवलियइ वा नो वा० आवयइ वा नो वा० वयइ वा नो वा० तेण हडं अन्नेण हडं तस्स हडं अन्नस्स हडं अयं तेणे अयं उवचरए अयं हंता अयं इत्थमकासी तं तवस्सिं भिक्खुं अतेणं तेणंति संकइ, अह भिक्खूणं पु० जाव नो ठा० ॥ (सू० ७५)

स भिक्षुस्तत्र गृहस्थसंसक्ते प्रतिश्रये वसन्नुच्चारादिना बाध्यमानो विकालादौ प्रतिश्रयद्वारभागमुद्घाटयेत्, तत्र च 'स्तेनः' चौरः 'तत्सन्धिचारी' छिद्रान्वेषी अनुप्रविशेत्, तं च दृष्ट्वा तस्य भिक्षोर्नैवं वक्तुं कल्पते—यथाऽयं चौरः प्रविशति न वेति, तथोपलीयते न वेति, तथाऽयमतिपतति न वेति, तथा वदति वा न वदति वा. तेनामुकेनापहृतम् अन्येन वा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यापहृतमन्यस्य वा, अयं स स्तेनस्तदुपचारको वा, अयं गृहीतायुधोऽयं हन्ता अयमत्राकार्षीदित्यादि न वदनीयं, यत एवं तस्य चौरस्य व्यापत्तिः स्यात्, स वा प्रद्विष्टस्तं साधुं व्यापादयेदित्यादिदोषाः, अभणने च तमेव तपस्विनं भिक्षुमस्तेनं स्तेनमित्याशङ्केतेति, शेषं पूर्ववदिति ॥ पुनरपि वसतिदोषाभिधित्सयाऽऽह—

से भिक्खू वा से जं० तणपुंजेसु वा पलालपुंजेसु वा सअंडे जाव ससंताणए तहप्पगारं उ० नो ठाणं वा० ॥ ३ ॥ से भिक्खू वा० से जं० तणपुं० पलाल० अप्पंडे जाव चेइज्जा ॥ (सू० ७६)

सुगमम्, एतद्विपरीतसूत्रमपि सुगमं, नवरमल्पशब्दोऽभाववाची ॥ साम्प्रतं वसतिपरित्यागमुद्देशकार्थाधिकारनिर्दिष्टमधिकृत्याह—

से आगंतारेसु आरामागारेसु वा गाहावइकुलेसु वा परियावसहेसु वा अभिक्खणं साहम्मिएहिं उवयमाणेहिं नो उवइज्जा ॥ (सू० ७७)

यत्र ग्रामादेर्बहिरागत्यागत्य पथिकादयस्तिष्ठन्ति तान्यागन्तागाराणि, तथाऽऽराममध्यगृहाण्यारामागाराणि, पर्यावसथा—मठाः, इत्यादिषु प्रतिश्रयेषु 'अभीक्ष्णम्' अनवरतं 'साधर्मिकैः' अपरसाधुभिः 'अवपतद्भिः' आगच्छद्भिर्मासादिविहारिभिश्छर्दितेषु 'नावपतेत्' नागच्छेत्—तेषु मासकल्पादि न कुर्यादिति ॥ साम्प्रतं कालातिक्रान्तवसतिदोषमाह—

से आगंतारेसु वा ४ जे भयंतारो उडुबद्धियं वा वासावासियं वा कप्पं उवाइणित्ता तत्थेव भुज्जो संवसंति, अयमाउसो ! कालाइक्कंतकिरियावि भवति १ ॥ (सू० ७८)

॥ ३६५ ॥

तेष्वागन्तागारादिषु ये भगवन्तः 'ऋतुबद्धम्' इति शीतोष्णकालयोर्मासकल्पम् 'उपनीय' अतिवाह्य वर्षासु वा चतुरो मासानतिवाह्य तत्रैव पुनः कारणमन्तरेणासते, अयमायुष्मन्! कालातिक्रमदोषः संभवति, तथा च रुग्यादिप्रतिबन्धः स्नेहादुद्गमादिदोषसम्भवो वेत्यतस्तथा स्थानं न कल्पत इति १ ॥ इदानीमुपस्थानदोषमभिधित्सुराह—

से आगंतारेसु वा ४ जे भयंतारो उडु० वासा० कप्पं उवाइणावित्ता तं दुगुणा दु(ति)गुणेण वा अपरिहरित्ता तत्थेव भुज्जो० अयमाउसो ! उवट्ठाणकि० २ ॥ (सू० ७९)

ये 'भगवन्तः' साधव आगन्तागारादिषु ऋतुबद्धं वर्षा वाऽतिवाह्यान्यत्र मासमेकं स्थित्वा 'द्विगुणत्रिगुणादिना' मास(सादि)कल्पेन अपरिहृत्य—द्वित्रैर्मासैर्व्यवधानमकृत्वा पुनस्तत्रैव वसन्ति, अयमेवंभूतः प्रतिश्रय उपस्थानक्रियादोषदुष्टो भवत्यतस्तत्रावस्थातुं न कल्पत इते २ ॥ इदानीमभिक्रान्तवसतिप्रतिपादनायाह—

इह खलु पाईणं वा ४ संतेगइया सड्ढा भवंति, तंजहा—गाहावई वा जाव कम्मकरीओ वा, तेसिं च णं आयारगोयरे नो सुनिसंते भवइ, तं सद्दहमाणेहिं पत्तियमाणेहिं रोयमाणेहिं बहवे समण माहण अतिहिकिवणवणीमए समुद्दिस्स तत्थ २ अगारीहिं अगाराइं चेइयाइं भवंति, तंजहा—आएसणाणि वा आयतणाणि वा देवकुलाणि वा सहाओ वा पवाणि वा पणियगिहाणि वा पणियसालाओ वा जाणगिहाणि वा जाणसालाओ वा सुहाकम्मंताणि वा दब्भकम्मंताणि वा वद्धकं० वक्कयकं० इंगालकम्मं० कट्ठक० सुसाणक० सुण्णागारगिरिकंदरसंतिसेलोवट्ठाणकम्मंताणि वा भवणगिहाणि वा, जे भयंतारो तहप्पगाराइं आएसणाणि वा जाव गिहाणि वा तेहिं उवयमाणेहिं उवयंति अयमाउसो ! अभिक्कंतकिरिया यावि भवइ ३ ॥ (सू० ८०)

इह प्रज्ञापकाद्यपेक्षया प्राच्यादिषु दिक्षु श्रावकाः प्रकृतिभद्रका वा गृहपत्यादयो भवेयुः, तेषां च साध्वाचारगोचरः 'णो

सुणिसंतो भवइ'त्ति न सुष्ठु निशान्तः—श्रुतोऽवगतो भवति, साधूनामेवंभूतः प्रतिश्रयः कल्पते नैवंभूत इत्येवं न ज्ञातं भवतीत्यर्थः, प्रतिश्रयदानफलं च स्वर्गादिकं तैः कुतश्चिदवगतं, तच्छ्रद्दधानैः प्रतीयमानै रोचयद्भिरित्येकार्था एते किञ्चिद्भेदाद्वा भेदः, तदेवंभूतैः 'अगारिभिः' गृहस्थैर्बहून् श्रमणादीन् उद्दिश्य तत्र तत्रारामादौ यानशालादीनि स्वार्थं कुर्वद्भिः श्रमणाद्यवकाशार्थं 'चेइयाइं' महान्ति कृतानि भवन्ति, तानि चागाराणि स्वनामग्राहं दर्शयति, तद्यथा—'आदेशनानि' लोहकारादिशालाः 'आयतनानि' देवकुलपार्श्वापवरकाः 'देवकुलानि' प्रतीतानि 'सभाः' चातुर्वैद्यादिशालाः 'प्रपाः' उदकदानस्थानानि 'पण्यगृहाणि वा' पण्यापणाः 'पण्यशालाः' धर्मशालाः 'यानगृहाणि' रथादीनि यत्र यानानि तिष्ठन्ति 'यानशालाः' यत्र यानानि निष्पाद्यन्ते 'सुधाकर्मान्तानि' यत्र सुधापरिकर्म क्रियते, एवं दर्भवर्धवल्कजाङ्गारकाष्ठकर्म[काष्ठ]गृहाणि द्रष्टव्यानि, 'श्मशानगृहं' प्रतीतं (शून्यागारं—विविक्तगृहं) शान्तिकर्मगृहं—यत्र शान्तिकर्म क्रियते गिरिगृहं—पर्वतोपरिगृहं कन्दरं—गिरिगुहा संस्कृता शैलोपस्थापनं—पाषाणमण्डपः, तदेवंभूतानि गृहाणि तैश्चरकब्राह्मणादिभिरभिक्रान्तानि पूर्वं पश्चाद् 'भगवन्तः' साधवः 'अवपतन्ति' अवतरन्ति, इयमायुष्मन्! विनेयामन्त्रणम्, अभिक्रान्तक्रिया वसतिर्भवति, अल्पदोषा चेयम् ३ ॥

इह खलु पाईणं वा जाव रोयमाणेहिं बहवे समणमाहणअतिहिकिवणवणिमए समुद्दिस्स तत्थ तत्थ अगारीहिं अगाराइं चेइयाइं भवंति, तं० —आएसणाणि वा जाव भवणगिहाणि वा, जे भयंतारो तहप्प० आएसणाणि जाव गिहाणि वा तेहिं अणोवयमाणेहिं उवयंति अयमाउसो ! अणभिक्कंतकिरिया यावि भवइ ॥ (सू० ८१)

॥ ३६६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुगमं, नवरं चरकादिभिरनवसेवितपूर्वा अनभिक्रान्तक्रिया वसतिर्भवति, इयं चानभिक्रान्तत्वादेवाकल्पनीयेति ४ ॥ साम्प्रतं वर्ज्याभिधानां वसतिमाह—

इह खलु पाईणं वा ४ जाव कम्मकरीओ वा, तेसिं च णं एवं वुत्तपुव्वं भवइ—जे इमे भवंति समणा भगवंतो जाव उवरया मेहुणाओ धम्माओ, नो खलु एएसिं भयंताराणं कप्पइ आहाकम्मिए उवस्सए वत्थए, से जाणिमाणि अम्हं अप्पणो सयट्ठाए चेइयाइं भवंति, तं०—आएसणाणि वा जाव गिहाणि वा, सव्वाणि ताणि समणाणं निसिरामो, अवियाइं वयं पच्छा अप्पणो सयट्ठाए चेइस्सामो, तं०—आएसणाणि वा जाव०, एयप्पगारं निग्घोसं सुच्चा निसम्म जे भयंतारो तहप्प० आएसणाणि वा जाव गिहाणि वा उवागच्छंति इयराइयरेहिं पाहुडेहिं वट्टंति, अयमाउसो! वज्जकिरियावि भवइ ५ ॥ (सू० ८२)

इह खल्वित्यादि प्रायः सुगमं, समुदायार्थस्त्वयम्—गृहस्थैः साध्वाचाराभिज्ञैर्यान्यात्मार्थं गृहाणि निर्वर्त्तितानि तानि साधुभ्यो दत्त्वाऽऽत्मार्थं त्वन्यानि कुर्वन्ति, ते च साधवस्तेष्वितरेतरेषूच्चावचेषु 'पाहुडेहिं'ति प्रदत्तेषु गृहेषु यदि वर्त्तन्ते ततो वर्ज्यक्रियाभिधाना वसतिर्भवति, सा च न कल्पत इति ५ ॥ इदानीं महावर्ज्याभिधानां वसतिमधिकृत्याह—

इह खलु पाईणं वा ४ संतेगइआ सड्ढा भवंति, तेसिं च णं आयारगोयरे जाव तं रोयमाणेहिं बहवे समणमाहण जाव वणीमगे पगणिय २ समुद्दिस्स तत्थ २ अगारीहिं अगाराइं चेइयाइं भवंति, तं०—आएसणाणि वा जाव गिहाणि वा, जे भयंतारो तहप्पगाराइं आएसणाणि वा जाव गिहाणि वा उवागच्छंति इयराइयरेहिं पाहुडेहिं०, अयमाउसो! महावज्जकिरियावि भवइ ६ ॥ (सू० ८३)

इहेत्यादि प्रायः सुगममेव, नवरं श्रमणाद्यर्थं निष्पादिताया यावन्तिकवसतौ स्थानादि कुर्वतो महावर्ज्याभिधाना वसतिर्भवति, अतः अकल्प्या चेयं विशुद्धकोटिश्चेति ६ ॥ इदानीं सावद्याभिधानामधिकृत्याह—

इह खलु पाईणं वा ४ संतेगइया जाव तं सद्दहमाणेहिं तं पत्तियमाणेहिं तं रोयमाणेहिं बहवे समणमाहणअतिहिकिवणवणीमगे पगणिय २ समुद्दिस्स तत्थ २ अगाराइं चेइयाइं भवंति तं०—आएसणाणि वा जाव भवणगिहाणि वा, जे भयंतारो तहप्पगाराणि आएसणाणि वा जाव भवणगिहाणि वा उवागच्छंति इयराइयरेहिं पाहुडेहिं, अयमाउसो! सावज्जकिरिया यावि भवइ ७ ॥ (सू० ८४)

इहेत्यादि प्रायः सुगमं, नवरं पञ्चविधश्रमणाद्यर्थमेवैषा कल्पिता, ते चामी श्रमणाः—"निग्गंथ[1] १ सक्क २ तावस ३ गेरुअ ४ आजीव ५ पंचहा समणा।" इति, अस्यां च स्थानादि कुर्वतः सावद्यक्रियाऽभिधाना वसतिर्भवति, अकल्पनीया, चेयं विशुद्धकोटिश्चेति ७ ॥ महासावद्याभिधानामधिकृत्याह—

इह खलु पाईणं वा ४ जाव तं रोयमाणेहिं एगं समणजायं समुद्दिस्स तत्थ २ अगारीहिं अगाराइं चेइयाइं भवन्ति, तं० आएसणाणि जाव गिहाणि वा महया पुढविकायसमारंभेणं जाव महया तसकायसमारंभेणं महया विरूवरूवेहिं पावकम्मकिच्चेहिं, तंजहा—छायणओ लेवणओ संथारदुवारपिहणओ सीओदए वा परट्ठवियपुव्वे भवइ अगणिकाए वा उज्जालियपुव्वे

॥ ३६७ ॥

१ निर्ग्रन्थाः शाक्याः तापसा गैरिका आजीविकाः पञ्चधाः श्रमणाः.

भवइ, जे भयंतारो तह० आएसणाणि वा० उवागच्छंति इयराइयरेहिं पाहुडेहिं दुपक्खं ते कम्मं सेवंति, अयमाउसो! महासावज्जकिरिया यावि भवइ ८ ॥ (सू० ८५)

इह कश्चिद्गृहपत्यादिरेकं साधर्मिकमुद्दिश्य पृथिवीकायादिसंरम्भसमारम्भारम्भैरन्यतरेण वा महता तथा 'विरूपरूपैः' नानारूपैः पापकर्मकृत्यैः—अनुष्ठानैः, तद्यथा—छादनतो लेपनतस्तथा संस्तारकार्थं द्वारढक्कनार्थं च, इत्यादीनि प्रयोजनान्युद्दिश्य शीतोदकं त्यक्तपूर्वं भवेत् अग्निर्वा प्रज्वालितपूर्वो भवेत्, तदस्यां वसतौ स्थानादि कुर्वन्तस्ते द्विपक्षं कर्मासेवन्ते, तद्यथा—प्रव्रज्याम् आधाकर्मिकवसत्यासेवनाद्गृहस्थत्वं च रागद्वेषं च ईर्यापथं साम्परायिकं च, इत्यादिदोषान्महासावद्यक्रियाऽभिधाना वसतिर्भवतीति ८ ॥ इदानीमल्पक्रियाऽभिधानामधिकृत्याह—

इह खलु पाईणं वा० रोयमाणेहिं अप्पणो सयट्ठाए तत्थ २ अगारीहिं जाव उज्जालियपुव्वे भवइ, जे भयंतारो तहप्प० आएसणाणि वा० उवागच्छंति इयराइयरेहिं पाहुडेहिं एगपक्खं ते कम्मं सेवंति, अयमाउसो! अप्पसावज्जकिरिया यावि भवइ ९ ॥ एवं खलु तस्स० (सू० ८६) ॥ २-१-२-२ ॥ शय्यैषणायां द्वितीयोद्देशकः ॥

सुगमं, नवरमल्पशब्दोऽभाववाचीति ९। एतत्तस्य भिक्षोः 'सामग्र्यं' संपूर्णो भिक्षुभाव इति ॥ "कालाइक्कंतु १ वट्ठाण २ अभिक्कंता ३ चेव अणभिक्कंता ४ य। वज्जा य ५ महावज्जा ६ सावज्ज ७ मह ८ ऽप्पकिरिआ ९ य ॥ १ ॥"

१ कालातिक्रान्ता उपस्थाना अभिक्रान्ता चैवानभिक्रान्ता च। वर्ज्या च महावर्ज्या सावद्या महासावद्या अल्पक्रिया च ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एताश्च नव वसतयो यथाक्रमं नवभिरनन्तरसूत्रैः प्रतिपादिताः, आसु चाभिक्रान्ताल्पक्रिये योग्ये शेषास्त्वयोग्या इति ॥ द्वितीयाध्ययनस्य द्वितीयः ॥ २-१-२-२ ॥

उक्तो द्वितीयोद्देशकोऽधुना तृतीयः समारभ्यते, अस्य चायमभिसंबन्धः, इहानन्तरसूत्रेऽल्पक्रिया शुद्धा वसतिरभिहिता, इहाप्यादिसूत्रेण तद्विपरीतां दर्शयितुमाह—

से य नो सुलभे फासुए उंछे अहेसणिज्जे नो य खलु सुद्धे इमेहिं पाहुडेहिं, तंजहा—छायणओ लेवणओ संथारदुवारपिहणओ पिंडवाएसणाओ, से य भिक्खू चरियारए ठाणरए निसीहियारए सिज्जासंथारपिंडवाएसणारए, संति भिक्खुणो एवमक्खाइणो उज्जुया नियागपडिवन्ना अमायं कुव्वमाणा वियाहिया, संतेगइया पाहुडिया उक्खित्तपुव्वा भवइ, एवं निक्खित्तपुव्वा भवइ, परिभाइयपुव्वा भवइ, परिभुत्तपुव्वा भवइ परिट्ठवियपुव्वा भवइ, एवं वियागरेमाणे समियाए वियागरेइ?, हंता भवइ ॥ (सू० ८७)

अत्र च कदाचित्कश्चित्साधुर्वसत्यन्वेषणार्थं भिक्षार्थं वा गृहपतिकुलं प्रविष्टः सन् केनचिच्छ्रद्धालुनैवमभिधीयते, तद्यथा—प्रचुरान्नपानोऽयं ग्रामोऽतोऽत्र भवतां वसतिमभिगृह्य स्थातुं युक्तमित्येवमभिहितः सन्नेवमाचक्षीत—न केवलं पिण्डपातः प्रासुको दुर्लभस्तदवाप्तावपि यत्रासौ भुज्यते स च प्रासुकः—आधाकर्मादिरहितः प्रतिश्रयो दुर्लभः, 'उंछ' इति छादनाद्युत्तरगुणदोषरहितः, एतदेव दर्शयति—'अहेसणिज्जे'त्ति यथाऽसौ मूलोत्तरगुणदोषरहितत्वेनैषणीयो भवति तथाभूतो दुर्लभ इति, ते चामी मूलोत्तरगुणाः—"पंढी वंसो दो धारणाओ चत्तारि मूलवेलीओ । मूलगुणोहं विसुद्धा एसा आहागडा वसही ॥ १ ॥ वंसगकडणोकंपण छायण लेवण दुवारभूमीओ । परिकम्मविप्पमुक्का एसा मूलुत्तरगुणेसु ॥ २ ॥ धूमिअधूमिअवासिअउज्जोवियबलिकडा अ वत्ता य । सित्ता सम्मट्ठावि अ विसोहिकोडीगया वसही ॥ ३ ॥" अत्र च प्रायशः सर्वत्र सम्भवित्वादुत्तरगुणानां तानेव दर्शयति, न चासौ शुद्धा भवत्यमीभिः कर्मोपादानकर्मभिः, तद्यथा—'छादनतः' दर्भादिना, 'लेपनतः' गोमयादिना संस्तारकम्—अपवर्त्तकमाश्रित्य, तथा द्वारमाश्रित्य बृहल्लघुत्वापादानतः, तथा द्वारस्थगनं—कपाटमाश्रित्य, तथा पिण्डपातैषणामाश्रित्य, तथाहि—कस्मिंश्चिन्नतिश्रये प्रतिवसतः साधून् शय्यातरः पिण्डेनोपनिमन्त्रयेत्, तद्ग्रहे निषिद्धाचरणमग्रहे तद्भक्तद्वेषादिसम्भव इत्यादिभिरुत्तरगुणैः शुद्धः प्रतिश्रयो दुरापः, शुद्धे च प्रतिश्रये साधुना स्थानादि विधेयं, यत उक्तम्—"मूलुत्तरगुणसुद्धं थीपसुपंडगविवज्जियं वसहिं । सेवेज्ज सव्वकालं विवज्जए हुंति दोसा उ ॥ १ ॥" मूलोत्तरगुणशुद्धावाप्तावपि स्वाध्यायादिभूमीसमन्वितो विविक्तो दुरापः इति दर्शयति—'से' इत्यादि, तत्र च भिक्षवः चर्यारताः—निरोधासहिष्णुत्वाद्भ्रमणशीलाः, तथा 'स्थानरताः' कायोत्सर्गकारिणः 'निषीधिकारताः' स्वाध्यायध्यायिनः शय्या—सर्वाङ्गिकी संस्तारकः—अर्द्धतृतीयहस्तप्रमाणः, यदिवा शयनं शय्या

१ धूपितैषो द्वे धारणे चतस्रो मूलवेल्यः । मूलगुणैर्वैशुद्धा एषा यथाकृता वसतिः ॥ १ वंशककटनोत्कम्पनच्छादनलेपनं द्वारभूमेः । परिकर्मविप्रमुक्ता एषा मूलोत्तरगुणैः ॥ २ ॥ धवलिता धूपिता वासिता उद्योतिता कृतबलिका च व्यक्ता च । सिक्ता संमृष्टाऽपि च विशोधिकोटीगता वसतिः ॥ ३ ॥ २ मूलोत्तरगुणशुद्धां स्त्रीपशुपण्डकविवर्जितां वसतिम् । सेवेत सदाकालं विपर्यये तु भवन्ति दोषाः ॥ १ ॥

तदर्थं संस्तारकः शय्यासंस्तारकस्तत्र केचिद्भवन्ताः ग्लानादिभावात्, तथा लब्धे पिण्डपाते ग्रासैषणारतास्तदेवं 'सन्ति' भवन्ति केचन भिक्षवः 'एवमाख्यायिनः' यथाऽवस्थितवसतिगुणदोषाख्यायिनः ऋजवो नियागः—संयमो मोक्षो वा तं प्रतिपन्नाः, तथा अमायाविनः, एवंविशिष्टाः साधवः 'व्याख्याताः' प्रतिपादिताः, तदेवं वसतिगुणदोषानाख्याय गतेषु तेषु तैश्च श्रावकैरेवंभूतैषणीयवसत्यभावे साध्वर्थमादेरारभ्य वसतिः कृता पूर्वकृता वा छादनादिना संस्कृता भवेत्, पुनश्च तेष्वन्येषु वा साधुषु समागतेषु 'सन्ति' विद्यन्ते तथाभूताः केचन गृहस्थाः य एवंभूतां छलनां विदध्युः, तद्यथा—प्राभृतिकेव प्राभृतिका—दानार्थं कल्पिता वसतिरिह गृह्यते, सा च तैर्गृहस्थैः 'उत्क्षिप्तपूर्वा' तेषामादौ दर्शिता यथाऽस्यां वसत यूयमिति, तथा 'निक्षिप्तपूर्वा' पूर्वमेव अस्माभिरात्मकृते निष्पादिता, तथा 'परिभाइयपुव्व'त्ति पूर्वमेवास्माभिरियं भ्रातृव्यादेः परिकल्पितेत्येवंभूता भवेत्, तथाऽन्यैरपीयं परिभुक्तपूर्वा, तथा पूर्वमेवास्माभिरियं परित्यक्तेति, यदि च भगवतां नोपयुज्यते ततो वयमेनामपनेष्यामः, इत्येवमादिका छलना पुनः सम्यग् विज्ञाय परिहर्त्तव्येति, ननु किमेवं छलनासम्भवेऽपि यथाऽवस्थितवसतिगुणदोषादिकं गृहस्थेन पृष्टः साधुर्व्याकुर्वन्—कथयन् सम्यगेव व्याकरोति?, यदिवैवं व्याकुर्वन् सम्यग् व्याकर्त्ता भवति?, आचार्य आह—हन्त इति शिष्याभ्रणे सम्यगेव व्याकर्त्ता भवतीति ॥ तथाविधकार्यवशाच्चरककार्पटिकादिभिः सह संवासे विधिमाह—

से भिक्खू वा० से जं पुण उवस्सयं जाणिज्जा खुड्डियाओ खुड्डदुवारियाओ निययाओ संनिरुद्धाओ भवन्ति, तहप्पगा० उवस्सए राओ वा वियाले वा निक्खममाणे वा प० पुरा हत्थेण वा पच्छा पाएण वा तओ संजयामेव निक्खमिज्ज वा २,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवली बूया आयाणमेयं, जे तत्थ समणाण वा माहणाण वा छत्तए वा मत्तए वा दंडए वा लट्ठिया वा भिसिया वा नालिया वा चेलं वा चिलिमिली वा चम्मए वा चम्मकोसए वा चम्मछेयणए वा दुब्बद्धे दुन्निक्खित्ते अणिकंपे चलाचले भिक्खू य राओ वा वियाले वा निक्खममाणे वा २ पयलिज्ज वा २, से तत्थ पयलमाणे वा० हत्थं वा० लूसिज्ज वा पाणाणि वा ४ जाव ववरोविज्ज वा, अह भिक्खूणं पुव्वोवइट्ठं जं तह० उवस्सए पुरा हत्थेण निक्ख० वा पच्छा पाएणं तओ संजयामेव नि० पविसिज्ज वा ॥ (सू० ८८)

स भिक्षुर्य पुनरेवंभूतं प्रतिश्रयं जानीयात्, तद्यथा—'क्षुद्रिकाः' लघ्व्यः तथा क्षुद्रद्वाराः 'नीचाः' उच्चैस्त्वरहिताः 'संनिरुद्धाः' गृहस्थाकुला वसतयो भवन्ति, ताश्चैवं भवन्ति-तस्यां साधुवसतौ शय्यातरेणान्येषामपि कतिपयदिवसस्थायिनां चरकादीनामवकाशो दत्तो भवेत्, तेषां वा पूर्वस्थितानां पश्चात्साधूनामुपाश्रयो दत्तो भवेत्, तत्र कार्यवशाद्गच्छता राज्यादौ निर्गच्छता प्रविशता वा यथा चरकाद्युपकरणोपघातो न भवति तदवयवोपघातो वा तथा पुरो हस्तकरणादिकया गमनागमनादिक्रियया यतितव्यं, शेषं कण्ठ्यं, नवरं 'चिलिमिली' यमनिका 'चर्मकोशः' पाणित्रं खल्लकादिः ॥ इदानीं वसतियाञ्चाविधिमधिकृत्याह—

से आगंतारेसु वा अणुवीय उवस्सयं जाइज्जा, जे तत्थ ईसरे जे तत्थ समाहिट्ठाए ते उवस्सयं अणुन्नविज्जा—कामं खलु आउसो! अहालंदं अहापरिन्नायं वसिस्सामो जाव आउसंतस्स उवस्सए जाव साहम्मियाइं ततो उवस्सयं गिण्हिस्सामो तेण परं विहरिस्सामो ॥ (सू० ८९)

स भिक्षुरागन्तागारादीनि गृहाणि पूर्वोक्तानि तेषु प्रविश्यानुविचिन्त्य च—किंभूतोऽयं प्रतिश्रयः? कञ्चात्रेश्वरः? इत्येवं पर्यालोच्य च प्रतिश्रयं याचेत, यस्तत्र 'ईश्वरः' गृहस्वामी यो वा तत्र 'समधिष्ठाता' प्रभुर्नियुक्तस्तानुपाश्रयमनुज्ञापयेत्, तद्यथा—'कामं' तवेच्छया आयुष्मन्! त्वया यथापरिज्ञातं प्रतिश्रयं कालतो भूभागतश्च तथैवाधिवत्स्यामः, एवमुक्तः स कदाचिद् गृहस्थ एवं ब्रूयाद्—यथा कियत्कालं भवतामत्रावस्थानमिति?, एवं गृहस्थेन पृष्टः साधुः—वसतिप्रत्युपेक्षक एतद् ब्रूयाद्—यथा कारणमन्तरेण ऋतुबद्धे मासमेकं वर्षासु चतुरो मासानवस्थानमिति, एवमुक्तः कदाचित्परो ब्रूयात्—नैतावन्तं कालं ममात्रावस्थानं वसतिर्वा, तत्र साधुस्थाभूतकारणसद्भावे एवं ब्रूयाद्—यावत्कालमिहायुष्मन्त आसते यावद्वा भवत उपाश्रयस्तावत्कालमेवोपाश्रयं गृहीष्यामः, ततः परेण विहरिष्याम इत्युत्तरेण सम्बन्धः, साधुप्रमाणप्रश्ने चोत्तरं दद्याद् यथा समुद्रसंस्थानीयाः सूरयो, नास्ति परिमाणं, यतस्तत्र कार्यार्थिनः केचनागच्छन्ति अपरे कृतकार्या गच्छन्त्यतो यावन्तः साधर्मिकाः समागमिष्यन्ति तावतामयमाश्रयः, साधुपरिमाणं न कथनीयमिति भावार्थः ॥ किञ्च—

से भिक्खू वा० जस्सुवस्सए संवसिज्जा तस्स पुव्वामेव नामगोत्तं जाणिज्जा, तओ पच्छा तस्स गिहे निमंतेमाणस्स वा अनिमंतेमाणस्स वा असणं वा ४ अफासुयं जाव नो पडिगाहेज्जा ॥ (सू० ९०)

सुगमं, नवरं साधूनां सामाचार्येषा, यदुत शय्यातरस्य नामगोत्रादि ज्ञातव्यं, तत्परिज्ञानाच्च सुखेनैव प्राघूर्णिकादयो भिक्षामटन्तः शय्यातरगृहप्रवेशं परिहरिष्यन्तीति ॥ किञ्च—

से भिक्खू वा० से जं० ससागारियं सागणियं सउदयं नो पन्नस्स निक्खमणपवेसाए जावऽणुचिंताए तहप्पगारे उवस्सए नो ठा० ॥ (सू० ९१)

स भिक्षुर्य पुनरेवंभूतं प्रतिश्रयं जानीयात्, तद्यथा—ससागारिकं साग्निकं सोदकं, तत्र स्वाध्यायादिकृते स्थानादि न विधेयमिति ॥ तथा—

से भिक्खू वा० से जं० गाहावइकुलस्स मज्झंमज्झेणं गंतुं पंथए पडिबद्धं वा नो पन्नस्स जाव चिंताए तह० उ० नो ठा० ॥ (सू० ९२)

यस्योपाश्रयस्य गृहस्थगृहमध्येन पन्थास्तत्र बहूपायसम्भवात्तत्र न स्थातव्यमिति ॥ तथा—

से भिक्खू वा० से जं०, इह खलु गाहावई वा० कम्मकरीओ वा अन्नमन्नं अक्कोसंति वा जाव उद्दवंति वा नो पन्नस्स०, सेवं नच्चा तहप्पगारे उ० नो ठा० ॥ (सू० ९३) से भिक्खू वा० से जं पुण० इह खलु गाहावई वा कम्मकरीओ वा अन्नमन्नस्स गायं तिल्लेण वा नव० घ० वसाए वा अब्भंगेंति वा मक्खेंति वा नो पन्नस्स जाव तहप्प० उव० नो ठा० (सू० ९४) से भिक्खू वा० से जं पुण०—इह खलु गाहावई वा जाव कम्मकरीओ अन्नमन्नस्स गायं सिणाणेण वा क० लु० चु० प० आघंसंति वा पघंसंति वा उव्वलंति वा उव्वट्टिंति वा नो पन्नस्स० (सू० ९५) से भिक्खू० से जं पुण उवस्सयं जाणिज्जा, इह खलु गाहावती वा जाव कम्मकरी वा अण्णमण्णस्स गायं सीओदग० उसिणो० उच्छो० पहोयंति सिंचंति सिणावंति वा नो पन्नस्स जाव नो ठाणं० ॥ (सू० ९६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुगमं, नवरं यत्र प्रातिवेशिकाः प्रत्यहं कलहायमानास्तिष्ठन्ति तत्र स्वाध्यायाद्युपरोधान्न स्थेयमिति ॥ एवं तैलाद्यभ्यङ्गकल्काद्युद्वर्त्तनोदकप्रक्षालनसूत्रमपि नेयमिति ॥ किञ्च—

से भिक्खू वा० से जं० इह खलु गाहावई वा जाव कम्मकरीओ वा निगिणा ठिया निगिणा उल्लीणा मेहुणधम्मं विन्नवंति रहस्सियं वा मंतं मंतंति नो पन्नस्स जाव नो ठाणं वा ३ चेइज्जा ॥ (सू० ९७)

यत्र प्रातिवेशिकस्त्रियः 'णिगिणाउ'त्ति मुक्तपरिधाना आसते, तथा 'उपलीनाः' प्रच्छन्ना मैथुनधर्मविषयं किञ्चिद्रहस्यं रात्रिसम्भोगं परस्परं कथयन्ति, अपरं वा रहस्यमकार्यसंबद्धं मन्त्रं मन्त्रयन्ते, तथाभूते प्रतिश्रये न स्थानादि विधेयं, यतस्तत्र स्वाध्यायक्षितिचित्तविप्लुत्यादयो दोषाः समुपजायन्त इति ॥ अपि च-

से भिक्खू वा से जं पुण उ० आइन्नसंलिक्खं नो पन्नस्स० ॥ (सू० ९८)

कण्ठ्यं, नवरं, तत्रायं दोषः-चित्रभित्तिदर्शनात्स्वाध्यायक्षितिः, तथाविधचित्रस्थस्त्र्यादिदर्शनात्पूर्वक्रीडिताक्रीडितस्मरणकौतुकादिसम्भव इति ॥ साम्प्रतं फलहकादिसंस्तारकमधिकृत्याह—

से भिक्खू वा० अभिकंखिज्जा संथारगं एसित्तए, से जं० संथारगं जाणिज्जा सअंडं जाव ससंताणयं, तहप्पगारं संथारं लाभे संते नो पडि० १ ॥ से भिक्खू वा से जं० अप्पंडं जाव संताणगरुयं तहप्पगारं नो प० २ ॥ से भिक्खू वा० अप्पंडं लहुयं अपाडिहारियं तह० नोप० ३ ॥ से भिक्खू वा० अप्पंडं जाव अप्पसंताणगं लहुअं पाडिहारियं नो अहाबद्धं तहप्पगारं लाभे संते नो पडिगाहिज्जा ४ ॥ से भिक्खू वा २ से जं पुण संथारगं जाणिज्जा अप्पंडं जाव संताणगं लहुअं पाडिहारिअं अहाबद्धं, तहप्पगारं संथारगं लाभे संते पडिगाहिज्जा ५ ॥ (सू० ९९)

स भिक्षुर्यदि फलहकादिसंस्तारकमेषितुमभिकाङ्क्षयेत्, तच्चैवंभूतं जानीयात्, तद्यथा-प्रथमसूत्रे साण्डादित्वात्संयमविराधनादोषः १, द्वितीयसूत्रे गुरुत्वादुत्क्षेपणादावात्मविराधनादिदोषः २, तृतीयसूत्रेऽप्रतिहारकत्वात्तत्परित्यागादिदोषः ३, चतुर्थसूत्रे त्वबद्धत्वात्तद्बन्धनादिपलिमन्थदोषः ४, पञ्चमसूत्रे त्वल्पाण्डं यावदल्पसन्तानकलघुप्रातिहारिकावबद्धत्वात्सर्वदोषविप्रमुक्तत्वात्संस्तारको ग्राह्य इति सूत्रपञ्चकसमुदायार्थः ५ ॥ साम्प्रतं संस्तारकमुद्दिश्याभिग्रहविशेषानाह—

इच्चेयाइं आयतणाइं उवाइक्कम—अह भिक्खू जाणिज्जा इमाइं चउहिं पडिमाहिं संथारगं एसित्तए, तत्थ खलु इमा पढमा पडिमा—से भिक्खू वा २ उद्दिसिय २ संथारगं जाइज्जा, तंजहा—इक्कडं वा कढिणं वा जंतुयं वा परगं वा मोरगं वा तणगं वा सोरगं वा कुसं वा कुच्चगं वा पिप्पलगं वा पलालगं वा, से पुव्वामेव आलोइज्जा—आउसोति वा भ० दाहिसि मे इत्तो अन्नयरं संथारगं ? तह० संथारगं सयं वा णं जाइज्जा परो वा देज्जा फासयं एसणिज्जं जाव पडि०, पढमा पडिमा ॥ (सू० १००)

'इत्येतानि' पूर्वोक्तानि 'आयतनादीनि' दोषरहितस्थानानि वसतिगतानि संस्तारकगतानि च 'उपातिक्रम्य' परिहृत्य वक्ष्यमाणांश्च दोषान् परिहृत्य संस्तारको ग्राह्य इति दर्शयति—'अथ' आनन्तर्ये स भावभिक्षुर्जानीयात् 'आभिः' करणभूताभिश्चतसृभिः 'प्रतिमाभिः' अभिग्रहविशेषभूताभिः संस्तारकमन्वेष्टुं, ताश्चेमाः-उद्दिष्ट १ प्रेक्ष्य २ तस्यैव ३

यथासंस्तृत ४ रूपाः, तत्रोद्दिष्टा फलहकादीनामन्यतमङ्गृहीष्यामि नेतरदिति प्रथमा १, यदेव प्रागुद्दिष्टं तदेव द्रक्ष्यामि ततो ग्रहीष्यामि नान्यदिति द्वितीया प्रतिमा २, तदपि यदि तस्यैव शय्यातरस्य गृहे भवति ततो ग्रहीष्यामि नान्यत आनीय तत्र शयिष्य इति तृतीया ३ तदपि फलहकादिकं यदि यथासंस्तृतमेवास्ते ततो गृहीष्यामि नान्यथेति चतुर्थी प्रतिमा ४ । आसु च प्रतिमास्वाद्ययोः प्रतिमयोर्गच्छनिर्गतानामग्रहः, उत्तरयोरन्यतरस्यामभिग्रहः, गच्छान्तर्गतानां तु चतसृणामपि कल्पन्त इति, एताश्च यथाक्रमं सूत्रैर्दर्शयति-तत्र खल्विमा प्रथमा प्रतिमा तद्यथा-उद्दिश्योद्दिश्येक्कडादीनामन्यतमङ्गृहीष्यामीत्येवं यस्याभिग्रहः सोऽपरलाभेऽपि न प्रतिगृह्णीयादिति, शेषं कण्ठ्यं नवरं 'कठिनं' वंशकटादि 'जन्तुकं' तृणविशेषोत्पन्नं 'परकं' येन तृणविशेषेण पुष्पाणि ग्रथ्यन्ते 'मोरगं'ति मयूरपिच्छनिष्पन्नं 'कुच्चगं'ति येन कूर्चकाः क्रियन्ते, एते चैवंभूताः संस्तारका अनूपदेशे सार्द्रादिभूम्यन्तरणार्थमनुज्ञाता इति ॥

अहावरा दुच्चा पडिमा—से भिक्खू वा० पेहाए संथारगं जाइज्जा, तंजहा—गाहावइं वा कम्मकरिं वा से पुव्वामेव आलोइज्जा—आउ० ! भइ० ! दाहिसि मे ? जाव पडिगाहिज्जा, दुच्चा पडिमा २ ॥ अहावरा तच्चा पडिमा—से भिक्खू वा० जस्सुवस्सए संवसिज्जा जे तत्थ अहासमन्नागए, तंजहा—इक्कडे इ वा जाव पलाले इ वा तस्स लाभे संवसिज्जा तस्सालाभे उक्कुडुए वा नेसज्जिए वा विहरिज्जा तच्चा पडिमा ३ ॥ (सू० १०१)

अत्रापि पूर्ववत्सर्वं भणनीयं, यदि परं तमिक्कडादिकं संस्तारकं दृष्ट्वा याचते नादृष्टमिति ॥ एवं तृतीयाऽपि नेया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इयांस्तु विशेषः—गच्छान्तर्गतो निर्गतो वा यदि वसतिदातैव संस्तारकं प्रयच्छति ततो गृह्णाति, तदभावे उत्कटुको वा निषण्णो वा पद्मासनादिना सर्वरात्रमास्त इति ॥

अहावरा चउत्था पडिमा—से भिक्खू वा अहासंथडमेव संथारगं जाइज्जा, तंजहा—पुढविसिलं वा कट्ठसिलं वा अहासंथडमेव, तस्स लाभे संते संवसिज्जा, तस्स अलाभे उक्कडुए वा २ विहरिज्जा, चउत्था पडिमा ४ ॥ (सू० १०२)

एतदपि सुगमं, केवलमस्यामयं विशेषः—यदि शिलादिसंस्तारकं यथासंस्तृतं शयनयोग्यं लभ्यते ततः शेते नान्यथेति ॥ किञ्च—

इच्चेयाणं चउण्हं पडिमाणं अन्नयरं पडिमं पडिवज्जमाणे तं चेव जाव अन्नोऽन्नसमाहीए एवं च णं विहरंति ॥ (सू० १०३)

आसां चतसृणां प्रतिमानामन्यतरां प्रतिपद्यमानोऽन्यमपरप्रतिमाप्रतिपन्नं साधुं न हीलयेद्, यस्मात्ते सर्वेऽपि जिनाज्ञामाश्रित्य समाधिना वर्त्तन्त इति ॥ साम्प्रतं प्रातिहारकसंस्तारकप्रत्यर्पणे विधिमाह—

से भिक्खू वा० अभिकंखिज्जा संथारगं पच्चप्पिणित्तए, से जं पुण संथारगं जाणिज्जा सअंडं जाव ससंताणयं तहप्प० संथारगं नो पच्चप्पिणिज्जा ॥ (सू० १०४)

स भिक्षुः प्रातिहारिकं संस्तारकं यदि प्रत्यर्पयितुमभिकाङ्क्षेदेवंभूतं जानीयात् तद्यथा—गृहकोकिलकाद्यण्डकसंबद्धमप्रत्युपेक्षणयोग्यं ततो न प्रत्यर्पयेदिति ॥ किञ्च—

आ. सू. ६३

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३७३ ॥

से भिक्खू० अभिकंखिज्जा सं० से जं० अप्पंडं० तहप्पगारं० संथारगं पडिलेहिय २ प० २ आयाविय २ विहूणिय २ तओ संजयामेव पच्चप्पिणिज्जा ॥ (सू० १०५)

श्रुतस्क० २ चूलिका १ शय्यैष० २ उद्देशः ३

युगमम् । साम्प्रतं वसतौ वसतां विधिमधिकृत्याह—

से भिक्खू वा० समाणे वा वसमाणे वा गामाणुगामं दूइज्जमाणे वा पुव्वामेव पन्नस्स उच्चारपासवणभूमिं पडिलेहिज्जा, केवली बूया आयाणमेयं—अपडिलेहियाए उच्चारपासवणभूमीए, से भिक्खू वा० राओ वा वियाले वा उच्चारपासवणं परिट्ठवेमाणे पयलिज्ज वा २, से तत्थ पयलमाणे वा २ हत्थं वा पायं वा जाव लूसेज्ज व पाणाणि वा ४ वयरोविज्जा, अह भिक्खू णं पु० जं पुव्वामेव पन्नस्स उ० भूमिं पडिलेहिज्जा ॥ (सू० १०६)

सुगमं, नवरं साधूनां सामाचार्येषा, यदुत—विकाले प्रश्रवणादिभूमयः प्रत्युपेक्षणीया इति ॥ साम्प्रतं संस्तारकभूमिमधिकृत्याह—

से भिक्खू वा २ अभिकंखिज्जा सिज्जासंथारगभूमिं पडिलेहित्तए नन्नत्थ आयरिएण वा उ० जाव गणावच्छेएण वा बालेण वा वुड्ढेण वा सेहेण वा गिलाणेण वा आएसेण वा अंतेण वा मज्झेण वा समेण वा विसमेण वा पवाएण वा निवाएण वा, तओ संजयामेव पडिलेहिय २ पमज्जिय २ तओ संजयामेव बहुफासुयं सिज्जासंथारगं संथरिज्जा ॥ (सू० १०७)

स भिक्षुराचार्योपाध्यायादिभिः स्वीकृतां भूमिं मुक्त्वाऽन्यां स्वसंस्तरणाय प्रत्युपेक्षेत, शेषं सुगमं, नवरमादेशः—प्राघूर्णक इति, तथाऽन्तेन वेत्यादीनां पदानां तृतीया सप्तम्यर्थे इति ॥ इदानीं शयनविधिमधिकृत्याह—

॥ ३७३ ॥

से भिक्खू वा० बहु० संथरित्ता अभिकंखिज्जा बहुफासुए सिज्जासंथारए दुरुहित्तए ॥ से भिक्खू० बहु० दुरुहमाणे पुव्वामेव ससीसोवरियं कायं पाए य पमज्जिय २ तओ संजयामेव बहु० दुरुहित्ता तओ संजयामेव बहु० सइज्जा ॥ (सू० १०८)

से इत्यादि स्पष्टम् । इदानीं सुप्तविधिमधिकृत्याह—

से भिक्खू वा० बहु० सयमाणे नो अन्नमन्नस्स हत्थेण हत्थं पाएण पायं कारण कायं आसाइज्जा, से अणासायमाणे तओ संजयामेव बहु० सइज्जा ॥ से भिक्खू वा उस्सासमाणे वा नीसासमाणे वा कासमाणे वा छीयमाणे वा जंभायमाणे वा उड्डोए वा वायनिसग्गं वा करेमाणे पुव्वामेव आसयं वा पोसयं वा पाणिणा परिपेहित्ता तओ संजयामेव ऊससिज्जा वा जाव वायनिसग्गं वा करेज्जा ॥ (सू० १०९)

निगदसिद्धम्, इयमत्र भावना—स्वपद्भिर्हस्तमात्रव्यवहितसंस्तारकैः स्वप्तव्यमिति ॥ एवं सुप्तस्य निःश्वसितादिविधिसूत्रमुत्तानार्थं, नवरम् 'आसयं व'त्ति आस्यं 'पोसयं वा' इत्यधिष्ठानमिति ॥ साम्प्रतं सामान्येन शय्यामङ्गीकृत्याह—

से भिक्खू वा० समा वेगया सिज्जा भविज्जा विसमा वेगया सि० पवाया वे० निवाया वे० ससरक्खा वे० अप्पससरक्खा वे० सदंसमसगा वेगया अप्पदंसमसगा० सपरिसाडा वे० अपरिसाडा० सउवसग्गा वे० निरुवसग्गा वे० तहप्पगाराहिं सिज्जाहिं संविज्जमाणाहिं पग्गहियतरागं विहारं विहरिज्जा नो किंचिवि गिलाइज्जा, एवं खलु० जं सव्वट्ठेहिं सहिए सया जएत्तिबेमि (सू० ११०) २-१-२-२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखोन्नेयं, यावत्तथाप्रकारासु वसतिषु विद्यमानासु 'प्रगृहीततर'मिति यैव काचिद्विषमसमादिका वसतिः संपन्ना तामेव समचित्तोऽधिवसेत्—न तत्र व्यलीकादिकं कुर्यात्, एतत्तस्य भिक्षोः सामग्र्यं यत्सर्वार्थैः सहितः सदा यतेतेति ॥ द्वितीयमध्ययनं शय्याख्यं समाप्तम् ॥ २-१-२-२ ॥

उक्तं द्वितीयमध्ययनं, साम्प्रतं तृतीयमारभ्यते, अस्य चायमभिसम्बन्धः—इहाद्येऽध्ययने धर्मशरीरपरिपालनार्थं पिण्डः प्रतिपादितः, स चावश्यमैहिकामुष्मिकापायरक्षणार्थं वसतौ भोक्तव्य इति द्वितीयेऽध्ययने वसतिः प्रतिपादिता, साम्प्रतं तयोरन्वेषणार्थं गमनं विधेयं, तच्च यदा यथा विधेयं यथा च न विधेयमित्येतत्प्रतिपाद्यम्, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्र निक्षेपनिर्युक्त्यनुगमे नामनिक्षेपणार्थं निर्युक्तिकृदाह—

नामं १ ठवणाइरिया २ दव्वे ३ खित्ते ४ य काल ५ भावे ६ य। एसो खलु इरियाए निक्खेवो छव्विहो होइ ॥३०५॥

कण्ठ्यं। नामस्थापने क्षुण्णत्वादनादृत्य द्रव्येर्याप्रतिपादनार्थमाह—

दव्वइरियाओ तिविहा सचित्ताचित्तमीसगा चेव। खित्तंमि जंमि खित्ते काले कालो जहिं होइ ॥ ३०६ ॥

तत्र द्रव्येर्या सचित्ताचित्तमिश्रभेदात्त्रिविधा, ईरणमीर्या गमनमित्यर्थः, तत्र सचित्तस्य—वायुपुरुषादेर्द्रव्यस्य यद्गमनं सा सचित्तद्रव्येर्या, एवं परमाण्वादिद्रव्यस्य गमनमचित्तद्रव्येर्या, तथा मिश्रद्रव्येर्या रथादिगमनमिति, क्षेत्रेर्या यस्मिन् क्षेत्रे गमनं क्रियते ईर्या वा वर्ण्यते, एवं कालेर्याऽपि द्रष्टव्येति ॥ भावेर्याप्रतिपादनायाह—

भावइरियाओ दुविहा चरणरिया चेव संजमरिया य। समणस्स कहं गमणं निद्दोसं होइ परिसुद्धं ? ॥ ३०७ ॥

भावविषयेर्या द्विधा—चरणेर्या संयमेर्या च, तत्र संयमेर्या सप्तदशविधसंयमानुष्ठानं, यदिवाऽसङ्ख्येयेषु संयमस्थानेष्वेकस्मात्संयमस्थानादपरं संयमस्थानं गच्छतः संयमेर्या भवति, चरणेर्या तु 'अभ्र वभ्र मभ्र चर गत्यर्थाः' चरतेर्भावे ल्युट् चरणं तद्रूपेर्या चरणेर्या, चरणं गतिर्गमनमित्यर्थः, तच्च श्रमणस्य 'कथं' केन प्रकारेण भावरूपं गमनं निर्दोषं भवति ? इति ॥ आह—

आलंबणे य काले मग्गे जयणाइ चेव परिसुद्धं। भंगेहिं सोलसविहं जं परिसुद्धं पसत्थं तु ॥ ३०८ ॥

'आलम्बनं' प्रवचनसङ्गच्छाचार्यादिप्रयोजनं 'कालः' साधूनां विहरणयोग्योऽवसरः 'मार्गः' जनैः पद्भ्यां क्षुण्णः पन्थाः 'यतना' उपयुक्तस्य युगमात्रदृष्टित्वं, तदेवमालम्बनकालमार्गयतनापदैरेकैकपदव्यभिचाराद् ये भङ्गास्तैः षोडशविधं गमनं भवति ॥ तस्य च यत्परिशुद्धं तदेव प्रशस्तं भवतीति दर्शयितुमाह—

चउकारणपरिसुद्धं अहवावि (हु) होज्ज कारणज्जाए। आलंबणजयणाए काले मग्गे य जइयव्वं ॥ ३०९ ॥

चतुर्भिः कारणैः साधोर्गमनं परिशुद्धं भवति, तद्यथा—आलम्बनेन दिवा मार्गेण यतनया गच्छत इति, अथवाऽकालेऽपि ग्लानाद्यालम्बनेन यतनया गच्छतः शुद्धमेव गमनं भवति, एवंभूते च मार्गे साधुना यतितव्यमिति ॥ उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतमुद्देशार्थाधिकारमधिकृत्याह—

सव्वेवि ईरियविसोहिकारगा तहवि अत्थि उ विसेसो। उद्देसे उद्देसे वुच्छामि जहक्कमं किंचि ॥ ३१० ॥

'सर्वेऽपि' त्रयोऽपि यद्यपीर्याविशुद्धिकारकास्तथाऽपि प्रत्युद्देशकमस्ति विशेषः, तं च यथाक्रमं किञ्चिद्वक्ष्याम इति ॥ यथाप्रतिज्ञातमाह—

पढमे उवागमण निग्गमो य अद्धाण नावजयणा य। बिइए आरूढ छलणं जंघासंतार पुच्छा य ॥ ३११ ॥

प्रथमोद्देशके वर्षाकालादावुपागमनं—स्थानं तथा निर्गमश्च शरत्कालादौ यथा भवति तदत्र प्रतिपाद्यमध्वनि यतना चेति, द्वितीयोद्देशके नावादारूढस्य छलनं—प्रक्षेपणं व्यावर्ण्यते, जङ्घासन्तारे च पानीये यतना, तथा नानाप्रकारे च प्रश्ने साधुना यद्विधेयमेतच्च प्रतिपाद्यमिति ॥

तइयंमि अदायणया अप्पडिबंधो य होइ उवहिंमि। वज्जेयव्वं च सया संसारियरायगिहगमणं ॥ ३१२ ॥

तृतीयोद्देशके यदि कश्चिदुदकादीनि पृच्छति, तस्य जानताऽप्यदर्शनता विधेयेत्ययमधिकारः, तथोपधावप्रतिबन्धो विधेयः, तदपहरणे च स्वजनराजगृहगमनं च वर्जनीयं, न च तेषामाख्येयमिति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

> अब्भुवगए खलु वासावासे अभिपवुट्ठे बहवे पाणा अभिसंभूया बहवे बीया अहुणाभिन्ना अंतरा से मग्गा बहुपाणा बहुबीया जाव ससंताणगा अणभिक्कंता पंथा नो विन्नाया मग्गा सेवं नच्चा नो गामाणुगामं दूइज्जिज्जा, तओ संजयामेव वासावासं उवल्लिइज्जा ॥ (सू० १११)

आभिमुख्येनोपगतासु वर्षासु अभिप्रवृष्टे च पयोमुचि, अत्र वर्षाकालवृष्टिभ्यां चत्वारो भङ्गाः, तत्र साधूनां सामा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चार्येवैषा, यदुत–निर्व्याघातेनाप्राप्त एवाषाढचतुर्मासके तृणफलकडगलकभस्ममात्रकादिपरिग्रहः, किमिति ?, यतो जातायां वृष्टौ बहवः 'प्राणिनः' इन्द्रगोपकवीयावकगर्दभकादयः 'अभिसंभूताः' प्रादुर्भूताः, तथा बहूनि 'बीजानि' अभिनवाङ्कुरितानि, अन्तराले च मार्गास्तस्य–साधोर्गच्छतो बहुप्राणिनो बहुबीजा यावत्ससन्तानका अनभिक्रान्ताश्च पन्थानः, अत एव तृणाकुलत्वान्न विज्ञाताः मार्गाः, स–साधुरेवं ज्ञात्वा न ग्रामाद्ग्रामान्तरं यायात्, ततः संयत एव वर्षासु यथाऽवसरप्राप्तायां वसतावुपलीयेत–वर्षाकालं कुर्यादिति ॥ एतदपवादार्थमाह—

से भिक्खू वा० सेज्जं गामं वा जाव रायहाणिं वा इमंसि खलु गामंसि वा जाव राय० नो महई विहारभूमी नो महई वियारभूमी नो सुलभे पीढफलगसिज्जासंथारगे नो सुलभे फासुए उंछे अहेसणिज्जे जत्थ बहवे समण० वणीमगा उवागया उवागमिस्संति य अप्पाइन्ना वित्ती नो पन्नस्स निक्खमणे जाव चिंताए, सेवं नच्चा तहप्पगारं गामं वा नगरं वा जाव रायहाणिं वा नो वासावासं उवल्लिइज्जा ॥ से भि० से जं० गामं वा जाव राय० इमंसि खलु गामंसि वा जाव महई विहारभूमी महई वियार० सुलभे जत्थ पीढ ४ सुलभे फा० नो जत्थ बहवे समण० उवागमिस्संति वा अप्पाइन्ना वित्ती जाव रायहाणिं वा तओ संजयामेव वासावासं उवल्लिइज्जा ॥ (सू० ११२)

स भिक्षुर्यत्पुनरेवं राजधान्यादिकं जानीयात्, तद्यथा–अस्मिन् ग्रामे यावद्वू राजधान्यां वा न विद्यते महती 'विहारभूमिः' स्वाध्यायभूमिः, तथा 'विचारभूमिः' बहिर्गमनभूमिः, तथा नैवात्र सुलभानि पीठफलहकशय्यासंस्तारकादीनि, तथा न सुलभः प्रासुकः पिण्डपातः, 'उंछे'त्ति एषणीयः, एतदेव दर्शयति—'अहेसणीज्जे'त्ति यथाऽसाधुग्रामादिदोषरहित एषणीयो भवति तथाभूतो दुर्लभ इति, यत्र च ग्रामनगरादौ बहवः श्रमणब्राह्मणकृपणवणीमगादय उपागता अपरे चोपागमिष्यन्ति, एवं च तत्रात्याकीर्णा वृत्तिः, वर्त्तनं–वृत्तिः, सा च भिक्षाटनस्वाध्यायध्यानबहिर्गमनकार्येषु जनसङ्कुलत्वादाकीर्णा भवति, ततश्च न प्राज्ञस्य तत्र निष्क्रमणप्रवेशौ यावच्चिन्तनादिकाः क्रिया निरुपद्रवाः संभवन्ति, स साधुरेवं ज्ञात्वा न तत्र वर्षाकालं विदध्यादिति ॥ एवं च व्यत्ययसूत्रमपि व्यत्ययेन नेयमिति ॥ साम्प्रतं गतेऽपि वर्षाकाले यदा यथा च गन्तव्यं तदधिकृत्याह—

अह पुणेवं जाणिज्जा–चत्तारि मासा वासावासाणं वीइक्कंता हेमंताण य पंचदसरायकप्पे परिवुसिए, अंतरा से मग्गे बहुपाणा जाव ससंताणगा नो जत्थ बहवे जाव उवागमिस्संति, सेवं नच्चा नो गामाणुगामं दूइज्जिज्जा ॥ अह पुणेवं जाणिज्जा चत्तारि मासा० कप्पे परिवुसिए, अंतरा से मग्गे अप्पंडा जाव ससंताणगा बहवे जत्थ समण० उवागमिस्संति, सेवं नच्चा तओ संजयामेव० दूइज्जिज्ज ॥ (सू० ११३)

अथैवं जानीयाद् यथा चत्वारोऽपि मासाः प्रावृट्कालसम्बन्धिनोऽतिक्रान्ताः, कार्त्तिकचातुर्मासिकमतिक्रान्तमित्यर्थः, तत्रोत्सर्गतो यदि न वृष्टिस्ततः प्रतिपद्येवान्यत्र गत्वा पारणकं विधेयम्, अथ वृष्टिस्ततो हेमन्तस्य पञ्चसु दशसु वा दिनेषु 'पर्युषितेषु' गतेषु गमनं विधेयं, तत्रापि यद्यन्तराले पन्थानः साण्डा यावत्ससन्तानका भवेयुर्न च तत्र बहवः श्रमणब्राह्मणादयः समागताः समागमिष्यन्ति वा ततः समस्तमेव मार्गशिरं यावत्तत्रैव स्थेयं, तत ऊर्द्धं यथा तथाऽस्तु न स्थेयमिति ॥ एवमेतद्विपर्ययसूत्रमप्युक्तार्थम् ॥ इदानीं मार्गयतनामधिकृत्याह—

से भिक्खू वा० गामाणुगामं दूइज्जमाणे पुरओ जुगमायाए पेहमाणे दट्ठूण तसे पाणे उद्धट्टु पायं रीइज्जा साहट्टु पायं रीइज्जा वितिरिच्छं वा कट्टु पायं रीइज्जा, सइ परक्कमे संजयामेव परिक्कमिज्जा नो उज्जुयं गच्छिज्जा, तओ संजयामेव गामाणुगामं दूइज्जिज्जा ॥ से भिक्खू वा० गामा० दूइज्जमाणे अंतरा से पाणाणि वा बी० हरि० उदए वा मट्टिआ वा अविद्धत्थे सइ परक्कमे जाव नो उज्जुयं गच्छिज्जा, तओ संजया० गामा० दूइज्जिज्जा ॥ (सू० ११४)

स भिक्षुर्यावद् ग्रामान्तरं गच्छन् 'पुरतः' अग्रतः 'युगमात्रं' चतुर्हस्तप्रमाणं शकटोर्द्धिसंस्थितं भूभागं पश्यन् गच्छेत्, तत्र च पथि दृष्ट्वा 'त्रसान् प्राणिनः' पतङ्गादीन् 'उद्धट्टु'त्ति पादमुद्धृत्याग्रतलेन पादपातप्रदेशं वाऽतिक्रम्य गच्छेत्, एवं संहृत्य–शरीराभिमुखमाक्षिप्य पादं विवक्षितपादपातप्रदेशादारत एव विन्यस्य उत्क्षिप्य वाऽग्रभागं पार्ष्णिकया गच्छेत्, तथा तिरश्चीनं वा पादं कृत्वा गच्छेत्, अयं चान्यमार्गाभावे विधिः, सति त्वन्यस्मिन् पराक्रमे—गमनमार्गे संयतः संस्तेनैव 'पराक्रमेत्' गच्छेत् न ऋजुनेत्येवं ग्रामान्तरं गच्छेत् सर्वोपसंहारोऽयमिति ॥ से इत्यादि, उत्तानार्थम् ॥ अपि च—

से भिक्खू वा० गामा० दूइज्जमाणे अंतरा से विरूवरूवाणि पच्चंतिगाणि दसुगायणाणि मिलक्खूणि अणायरियाणि दुसन्नप्पाणि दुप्पन्नवणिज्जाणि अकालपडिबोहीणि अकालपरिभोईणि सइ लाढे विहाराए संथरमाणेहिं जाणवएहिं नो विहारवडियाए पवज्जिज्जा गमणाए, केवली बूया आयाणमेयं, तेणं बाला अयं तेणे अयं उवचरए अयं ततो आगएत्तिकट्टु तं भिक्खुं अक्कोसिज्ज वा जाव उद्दविज्ज वा वत्थं प० कं० पाय० अच्छिंदिज्ज वा भिंदिज्ज वा अवहरिज्ज वा परिट्ठविज्ज

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा, अह भिक्खूणं पु० जं तहप्पगाराइं विरू० पव्वंतियाणि दस्सुगा० जाव विहारवत्तियाए नो पवज्जिज्ज वा गमणाए तओ संजया गा० दू० ॥ (सू० ११५)

स भिक्षुर्ग्रामान्तरं गच्छन् यत्पुनरेवं जानीयात्, तद्यथा—'अन्तरा' ग्रामान्तराले 'विरूपरूपाणि' नानाप्रकाराणि प्रात्यन्तिकानि दस्यूनां—चौराणामायतनानि—स्थानानि 'मिलक्खूणि'त्ति बर्बरशबरपुलिन्द्रादिम्लेच्छप्रधानानि 'अनार्याणि' अर्द्धषड्विंशजनपदबाह्यानि 'दुःसञ्ज्ञाप्यानि' दुःखेनार्यसञ्ज्ञां ज्ञाप्यन्ते, तथा 'दुष्प्रज्ञाप्यानि' दुःखेन धर्मसञ्ज्ञोपदेशेनानार्यसङ्कल्पान्निवर्त्त्यन्ते 'अकालप्रतिबोधीनि' न तेषां कश्चिदपर्यटनकालोऽस्ति, अर्द्धरात्रादावपि मृगयादौ गमनसम्भवात्, तथाऽकालभोजीन्यपीति, सत्यन्यस्मिन् ग्रामादिके विहारे विद्यमानेषु चान्येष्वार्यजनपदेषु न तेषु म्लेच्छस्थानेषु विहरिष्यामीति गमनं न प्रतिपद्येत, किमिति?, यतः केवली ब्रूयात्कर्मोपादानमेतत्, संयमात्मविराधनातः, तत्रात्मविराधने संयमविराधनाऽपि संभवतीत्यात्मविराधनां दर्शयति—'ते' म्लेच्छाः 'णम्' इति वाक्यालङ्कारे एवमूचुः, तद्यथा—अयं स्तेनः, अयमुपचरकः—चरोऽयं तस्मादस्मच्छत्रुग्रामादागत इतिकृत्वा वाचाऽऽक्रोशयेयुः, तथा दण्डेन ताडयेयुः यावज्जीविताद्व्यपरोपयेयुः, तथा वस्त्रादि 'आच्छिन्द्युः' अपहरेयुः, ततस्तं साधुं निर्द्धाटयेयुरिति। अथ साधूनां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्तथाभूतेषु म्लेच्छस्थानेषु गमनार्थं न प्रतिपद्यते, ततस्तानि परिहरन् संयत एव ग्रामान्तरं गच्छेदिति ॥ तथा—

से भिक्खू० दूइज्जमाणे अंतरा से अरायाणि वा गणरायाणि वा जुवरायाणि वा दोरज्जाणि वा वेरज्जाणि वा विरुद्धरज्जाणि वा सइ लाढे विहाराए संथ० जण० नो विहारवडियाए०, केवली बूया आयाणमेयं, तेणं बाला तं चेव जाव गमणाए तओ सं० गा० दू० ॥ (सू० ११६)

कण्ठ्यं, नवरम् 'अराजानि' यत्र राजा मृतः 'युवराजानि' यत्र नाद्यापि राज्याभिषेको भवतीति ॥ किञ्च—

से भिक्खू वा गा० दूइज्जमाणे अंतरा से विहं सिया, से जं पुण विहं जाणिज्जा एगाहेण वा दुआहेण वा तिआहेण वा चउआहेण वा पंचाहेण वा पाउणिज्ज वा नो पाउणिज्ज वा तहप्पगारं विहं अणेगाहगमणिज्जं सइ लाढे जाव गमणाए, केवली बूया आयाणमेयं, अंतरा से वासे सिया पाणेसु वा पणएसु वा बीएसु वा हरि० उद० मट्टियाए वा अविद्धत्थाए, अह भिक्खू जं तह० अणेगाह० जाव नो पव०, तओ सं० गा० दू० ॥ (सू० ११७)

स भिक्षुर्ग्रामान्तरं गच्छन् यत्पुनरेवं जानीयात् 'अन्तरा' ग्रामान्तराले मम गच्छतः 'विहं'ति अनेकाहगमनीयः पन्थाः 'स्यात्' भवेत्, तमेवंभूतमध्वानं ज्ञात्वा सत्यन्यस्मिन् विहारस्थाने न तत्र गमनाय मतिं विदध्यादिति, शेषं सुगम् ॥ साम्प्रतं नौगमनविधिमधिकृत्याह—

से भि० गामा० दूइज्जिज्जा० अंतरा से नावासंतारिमे उदए सिया, से जं पुण नावं जाणिज्जा असंजए अ भिक्खुपडियाए किणिज्ज वा पामिच्चेज्ज वा नावाए वा नावं परिणामं कट्टु थलाओ वा नावं जलंसि ओगाहिज्जा जलाओ वा नावं थलंसि उक्कसिज्जा पुण्णं वा नावं उस्सिंचिज्जा सन्नं वा नावं उप्पीलाविज्जा तहप्पगारं नावं उड्ढगामिणिं वा अहे-

गा० तिरियगामि० परं जोयणमेराए अद्धजोयणमेराए अप्पतरे वा भुज्जतरे वा नो दूरुहिज्जा गमणाए ॥ से भिक्खू वा० पुव्वामेव तिरिच्छसंपाइमं नावं जाणिज्जा, जाणित्ता से तमायाए एगंतमवक्कमिज्जा २ भण्डगं पडिलेहिज्जा २ एगओ भोयणभंडगं करिज्जा २ ससीसोवरियं कायं पाए पमज्जिज्जा सागारं भत्तं पच्चक्खाइज्जा, एगं पायं जले किच्चा एगं पायं थले किच्चा तओ सं० नावं दूरुहिज्जा ॥ (सू० ११८)

स भिक्षुर्ग्रामान्तराले यदि नौसंतार्यमुदकं जानीयात्, नावं चैवंभूतां विजानीयात्, तद्यथा—'असंयतः' गृहस्थो भिक्षुप्रतिज्ञया नावं क्रीणीयात्, अन्यस्माद्गुच्छिन्नां वा गृह्णीयात्, परिवर्त्तनां वा कुर्यात्, एवं स्थलाद्यानयनादिक्रियोपेतां नावं ज्ञात्वा नारुहेदिति, शेषं सुगमम् ॥ इदानीं कारणजाते नावारोहणविधिमाह—सुगमम् ॥ तथा—

से भिक्खू वा० नावं दुरूहमाणे नो नावाओ पुरओ दुरूहिज्जा नो नावाओ मग्गओ दुरूहिज्जा नो नावाओ मज्झओ दुरूहिज्जा नो बाहाओ पगिज्झिय २ अंगुलियाए उद्दिसिय २ ओणमिय २ उन्नमिय २ निज्झाइज्जा। से णं परो नावागओ नावागयं वइज्जा—आउसंतो! समणा एयं ता तुमं नावं उक्कसाहिज्जा वा वुक्कसाहि वा खिवाहि वा रज्जूयाए वा गहाय आकसाहि, नो से तं परिन्नं परिजाणिज्जा, तुसिणीओ उवेहिज्जा। से णं परो नावागओ नावाग० वइ०—आउसं० नो संचायसि तुमं नावं उक्कसित्तए वा ३ रज्जूयाए वा गहाय आकसित्तए वा आहर एयं नावाए रज्जूयं सयं चेव णं वयं नावं उक्कसिस्सामो वा जाव रज्जूए वा गहाय आकसिस्सामो, नो से तं प० तुसि०। से णं प० आउसं० एअं ता तुमं नावं आलित्तेण वा पीढएण वा वंसेण वा वलएण वा अवलुएण वा बाहेहि, नो से तं प० तुंसि०। से णं परो० एयं ता तुमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नावाए उदयं हत्थेण वा पाएण वा मत्तेण वा पडिग्गहेण वा नावाउस्सिंचणेण वा उस्सिंचाहि, नो से तं० से णं परो० समणा! एयं तुमं नावाए उत्तिंगं हत्थेण वा पाएण वा बाहुणा वा ऊरुणा वा उदरेण वा सीसेण वा कायेण वा उस्सिंचणेण वा चेलेण वा मट्टियाए वा कुसपत्तेण वा कुविंदएण वा पिहेहि, नो से तं० ॥ से भिक्खू वा २ नावाए उत्तिंगेण उदयं आसवमाणं पेहाए उवरुवरिं नावं कज्जलावेमाणिं पेहाए नो परं उवसंकमित्तु एवं बूया—आउसंतो! गाहावइ एयं ते नावाए उदयं उत्तिंगेण आसवइ उवरुवरिं नावा वा कज्जलावेइ, एयप्पगारं मणं वा वायं वा नो पुरओ कट्टु विहरिज्जा अप्पुस्सुए अबहिल्लेसे एगंतगएण अप्पाणं विउसेज्जा समाहीए, तओ सं० नावासंतारिमे उदए आहारियं रीइज्जा, एयं खलु सया जइज्जासि त्तिबेमि ॥ इरियाए पढमो उद्देसो (सू० ११९) २—१—३—१ ॥

स्पष्टं, नवरं नो नावोऽग्रभागमारुहेत् निर्यामकोपद्रवसम्भवात्, नावारोहिणां वा पुरतो नारोहेत्, प्रवर्त्तनाधिकरणसम्भवात्, तत्रस्थश्च नौव्यापारं नापरेण चोदितः कुर्यात्, नाप्यन्यं कारयेदिति। 'उत्तिंगं'ति रन्ध्रं 'कज्जलावेमाणं'ति प्लाव्यमानम् 'अप्पुस्सुए'त्ति अविमनस्कः शरीरोपकरणादौ मूर्छामकुर्वन् तस्मिंश्चोदके नावं गच्छन् 'अहारिय'मिति यथाऽऽर्यं भवति तथा गच्छेद्, विशिष्टाध्यवसायो यायादित्यर्थः, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ तृतीयस्याध्ययनस्य प्रथमोद्देशकः समाप्तः २—१—३—१ ॥

उक्तः प्रथमोद्देशकोऽधुना द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके नावि व्यवस्थितस्य विधिरभिहितस्तदिहापि स एवाभिधीयते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

से णं परो णावा० आउसंतो! समणा एयं ता तुमं छत्तगं वा जाव चम्मछेयणगं वा गिण्हाहि, एयाणि तुमं विरूवरूवाणि सत्थजायाणि धारेहि, एयं ता तुमं दारगं वा पज्जेहि, नो से तं० ॥ (सू० १२०)

सः 'परः' गृहस्थादिर्नावि व्यवस्थितस्तत्स्थमेव साधुमेवं ब्रूयात्, तद्यथा—आयुष्मन्! श्रमण! एतन्मदीयं तावच्छत्रकादि गृहाण, तथैतानि 'शस्त्रजातानि' आयुधविशेषान् धारय, तथा दारकाद्युदकं पायय, इत्येतां 'परिज्ञां' पार्श्वनां परस्य न शृणुयादिति ॥ तदकरणे च परः प्रद्विष्टः सन् यदि नावः प्रक्षिपेत्तत्र यत्कर्त्तव्यं तदाह—

से णं परो नावागए नावागयं वएज्जा—आउसंतो! एस णं समणे नावाए भंडभारिए भवइ, से णं बाहाए गहाय नावाओ उदगंसि पक्खिविज्जा, एयप्पगारं निग्घोसं सुच्चा निसम्म से य चीवरधारी सिया खिप्पामेव चीवराणि उव्वेढिज्ज वा निवेढिज्ज वा उप्फेसं वा करिज्जा, अह० अभिकंतकूरकम्मा खलु बाला बाहाहिं गहाय ना० पक्खिविज्जा से पुव्वामेव वइज्जा—आउसंतो! गाहावई मा मेत्तो बाहाए गहाय नावाओ उदगंसि पक्खिवह, सयं चेव णं अहं नावाओ उदगंसि ओगाहिस्सामि, से णेवं वयंतं परो सहसा बलसा बाहाहिं ग० पक्खिविज्जा तं नो सुमणे सिया नो दुम्मणे सिया नो उच्चावयं मणं नियंछिज्जा नो तेसिं बालाणं घायाए वहाए समुट्ठिज्जा, अप्पुस्सुए जाव समाहीए तओ सं० उदगंसि पविज्जा ॥ (सू० १२१)

स परः 'णम्' इति वाक्यालङ्कारे नौगतस्तत्स्थं साधुमुद्दिश्यापरमेवं ब्रूयात्, तद्यथा—आयुष्मन्! अयमत्र श्रमणो भाण्डवन्निश्चेष्टत्वाद् गुरुः भाण्डेन वोपकरणेन गुरुः, तदेनं च बाहुग्राहं नावं उदके प्रक्षिपत यूयमित्येवंप्रकारं शब्दं श्रुत्वा तथाऽन्यतो वा कुतश्चित् 'निशम्य' अवगम्य 'सः' साधुर्गच्छगतो निर्गतो वा तेन च चीवरधारिणैतद्विधेयं—क्षिप्रमेव चीवराण्यसाराणि गुरुत्वान्निर्वाहितुमशक्यानि च 'उद्वेष्टयेत्' पृथक् कुर्यात्, तद्विपरीतानि तु 'निर्वेष्टयेत्' सुबद्धानि कुर्यात्, तथा 'उप्फेसं वा कुज्ज'त्ति शिरोवेष्टनं वा कुर्याद् येन संवृतोपकरणो निर्व्याकुलत्वात्सुखेनैव जलं तरति, तांश्च धर्मदेशनयाऽनुकूलयेत्, अथ पुनरेवं जानीयादित्यादि कण्ठ्यमिति ॥ साम्प्रतमुदकं प्लवमानस्य विधिमाह—

से भिक्खू वा० उदगंसि पवमाणे नो हत्थेण हत्थं पाएण पायं कारण कायं आसाइज्जा, से अणासायणाए अणासायमाणे तओ सं० उदगंसि पविज्जा ॥ से भिक्खू वा० उदगंसि पवमाणे नो उम्मुग्गनिमुग्गियं करिज्जा, मामेयं उदगं कन्नेसु वा अच्छीसु वा नक्कंसि वा मुहंसि वा परियावज्जिज्जा, तओ० संजयामेव उदगंसि पविज्जा ॥ से भिक्खू वा उदगंसि पवमाणे दुब्बलियं पाउणिज्जा खिप्पामेव उवहिं विगिंचिज्ज वा विसोहिज्ज वा, नो चेव णं साइज्जिज्जा, अह पु० पारए सिया उदगाओ तीरं पाउणित्तए, तओ संजयामेव उदउल्लेण वा ससिणद्धेण वा काएण उदगतीरे चिट्ठिज्जा ॥ से भिक्खू वा० उदउल्लं वा २ कायं नो आमज्जिज्जा वा णो पमज्जिज्जा वा संलिहिज्जा वा निल्लिहिज्जा वा उव्वलिज्जा वा उव्वट्टिज्जा वा आयाविज्ज वा पया०, अह पु० विगओदओ मे काए छिन्नसिणेहे काए तहप्पगारं कायं आमज्जिज्ज वा पयाविज्ज वा तओ सं० गामा० दूइज्जिज्जा ॥ (सू० १२२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स भिक्षुरुदके प्लवमानो हस्तादिकं हस्तादिना 'नासादयेत्' न संस्पृशेत्, अप्कायादिसंरक्षणार्थमिति भावः, ततस्तथा कुर्वन् संयत एवोदकं प्लवेदिति ॥ तथा—स भिक्षुरुदके प्लवमानो मज्जनोन्मज्जने नो विदध्यादिति (शेषं) सुगममिति ॥ किञ्च स भिक्षुरुदके प्लवमानः 'दौर्बल्यं' श्रमं प्राप्नुयात् ततः क्षिप्रमेवोपधिं त्यजेत् तदेशं वा विशोधयेत्—त्यजेदिति, नैवोपधावासक्तो भवेत् । अथ पुनरेवं जानीयात् 'पारए सिअ'त्ति समर्थोऽहमस्मि सोपधिरेवोदकपारगमनाय ततस्तस्मादुदकादुत्तीर्णः सन् संयत एवोदकार्द्रेण गलद्बिन्दुना कायेन सस्निग्धेन वोदकतीरे तिष्ठेत्, तत्र चेर्यापथिकां च प्रतिक्रामेत् ॥ न चैतत्कुर्यादित्याह—स्पष्टं, नवरमत्रेयं सामाचारी—यदुदकार्द्रं वस्त्रं तत्स्वत एव यावच्छिष्यगलं भवति तावदुदकतीर एव स्थेयम्, अथ चौरादिभयाद्गमनं स्यात्ततः प्रलम्बमानं कायेनास्पृशता नेयमिति ॥ तथा—

से भिक्खू वा गामाणुगामं दूइज्जमाणे नो परेहिं सद्धिं परिजविय २ गामा० दूइ०, तओ० सं० गामा० दूइ०॥(सू०१२३)

कण्ठ्यं, नवरं 'परिजविय२'त्ति परैः सार्द्धं मृषामुल्लापं कुर्वन्न गच्छेदिति ॥ इदानीं जङ्घासंतरणविधिमाह—

से भिक्खू वा गामा० दू० अंतरा से जंघासंतारिमे उदगे सिया, से पुव्वामेव ससीसोवरियं कायं पाए य पमज्जिआ २ एगं पायं जले किच्चा एगं पायं थले किच्चा तओ सं० उदगंसि आहारियं रीएज्जा ॥ से भि० आहारियं रीयमाणे नो हत्थेण हत्थं जाव अणासायमाणे तओ संजयामेव जंघासंतारिमे उदए अहारियं रीएज्जा ॥ से भिक्खू वा० जंघासंतारिमे उदए अहारियं रीयमाणे नो सायावडियाए नो परिदाहपडियाए महइमहालयंसि उदयंसि कायं विउसिज्जा, तओ संजयामेव जंघासंतारिमे उदए अहारियं रीएज्जा, अह पुण एवं जाणिज्जा पारए सिया उदगाओ तीरं पाउणित्तए, तओ संजयामेव

उदउल्लेण वा २ काएण दगतीरए चिट्ठिज्जा ॥ से भि० उदउल्लं वा कायं ससि० कायं नो आमज्जिज्ज वा नो० अह पु० विगओदए मे काए छिन्नसिणेहे तहप्पगारं कायं आमज्जिज्ज वा० पयाविज्ज वा तओ सं० गामा० दूइ० ॥ (सू० १२४)

'तस्य' भिक्षोर्ग्रामान्तरं गच्छतो यदा अन्तराले जानुदघ्नादिकमुदकं स्यात्तत ऊर्ध्वकायं मुखवस्त्रिकया अधःकायं च रजोहरणेन प्रमृज्योदकं प्रविशेत्, प्रविष्टश्च पादमेकं जले कृत्वाऽपरमुत्क्षिपन् गच्छेत्, न जलमालोडयता गन्तव्यमित्यर्थः, 'अहारियं रीएज्ज'त्ति यथा ऋजु भवति तथा गच्छेन्नार्दवितर्दं विकारं वा कुर्वन् गच्छेदिति ॥ स भिक्षुर्यथाऽऽर्यमेव गच्छन् महत्युदके महाश्रये वक्षःस्थलादिप्रमाणे जङ्घातरणीये नदीह्रदादौ पूर्वविधिनैव कायं प्रवेशयेत्, प्रविष्टश्च यदुपकरणं निर्वाहयितुमसमर्थस्ततः सर्वमसारं वा परित्यजेत्, अथैवं जानीयाच्छक्तोऽहं पारगमनाय ततस्तथाभूत एव गच्छेत्, उत्तीर्णश्च कायोत्सर्गादि पूर्ववत्कुर्यादिति ॥ आमर्जनप्रमार्जनादिसूत्रं पूर्ववज्ज्ञेयमिति ॥ साम्प्रतमुदकोत्तीर्णस्य गमनविधिमाह—

से भिक्खू वा० गामा० दूइज्जमाणे नो मट्टियागएहिं पाएहिं हरियाणि छिंदिय २ विकुज्जिय २ विफालिय २ उम्मग्गेण हरियवहाए गच्छिज्जा, जमेयं पाएहिं मट्टियं खिप्पामेव हरियाणि अवहरंतु, माइट्ठाणं संफासे, नो एवं करिज्जा, से पुव्वामेव अप्पहरियं मग्गं पडिलेहिज्जा तओ० सं० गामा० ॥ से भिक्खू वा २ गामाणुगामं दूइज्जमाणे अंतरा से वप्पाणि वा फ० पा० तो० अ० अग्गलपासगाणि वा गड्डाओ वा दरीओ वा सइ परक्कमे संजयामेव परिक्कमिज्जा नो उज्जु०, केवली०, से तत्थ परक्कममाणे पयलिज्ज वा २, से तत्थ पयलमाणे वा २ रुक्खाणि वा गुच्छाणि वा गुम्माणि वा लयाओ वा वल्लीओ

वा तणाणि वा गहणाणि वा हरियाणि वा अवलंबिय २ उत्तरिज्जा, जे तत्थ पाडिपहिया उवागच्छंति ते पाणी जाइज्जा २, तओ सं० अवलंबिय २ उत्तरिज्जा तओ सं० गामा० दू० ॥ से भिक्खू वा० गा० दूइज्जमाणे अंतरा से जवसाणि वा सगडाणि वा रहाणि वा सचक्काणि वा परचक्काणि वा से णं वा विरूवरूवं संनिरुद्धं पेहाए सइ परक्कमे सं० नो उ०, से णं परो सेणागओ वइज्जा आउसंतो! एस णं समणे सेणाए अभिनिवारियं करेइ, से णं बाहाए गहाय आगसह, से णं परो बाहाहिं गहाय आगसिज्जा, तं नो सुमणे सिया जाव समाहीए तओ सं० गामा० दू० ॥ (सू० १२५)

स भिक्षुरुदकादुत्तीर्णः सन् कर्दमाविलपादः सन्(नो)हरितानि भृशं छित्त्वा तथा विकुब्जानि कृत्वा एवं भृशं पाटयित्वोन्मार्गेण हरितवधाय गच्छेत्—यथैनां पादमृत्तिकां हरिताम्यपनयेयुरित्येवं मातृस्थानं संस्पृशेत्, न चैतत्कुर्याच्छेषं सुगममिति ॥ स भिक्षुर्ग्रामान्तराले यदि वप्रादिकं पश्येत्ततः सत्यन्यस्मिन् सङ्क्रमे तेन ऋजुना पथा न गच्छेत्, यतस्तत्र गर्तादौ निपतन् सचित्तं वृक्षादिकमवलम्बेत, तच्चायुक्तम्, अथ कारणिकस्तेनैव गच्छेत्, कथञ्चित्पतितश्च गच्छगतो वृक्षादिकमप्यवलम्ब्य प्रातिपथिकं हस्तं वा याचित्वा संयत एव गच्छेदिति ॥ किञ्च—स भिक्षुर्यदि ग्रामान्तराले 'यवसं' गोधूमादिधान्यं शकटस्कन्धावारनिवेशादिकं वा भवेत् तत्र बहुपायसम्भवात्तन्मध्येन सत्यपरस्मिन् पराक्रमे न गच्छेत्, शेषं सुगममिति ॥ तथा—

से भिक्खू वा० गामा० दूइज्जमाणे अंतरा से पाडिवहिया उवागच्छिज्जा, ते णं पाडिवहिया एवं वइज्जा—आउ० समणा! केवइए एस गामे वा जाव रायहाणी वा केवइया इत्थ आसा इत्थी गामपिंडोलगा मणुस्सा परिवसंति! से बहुभत्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुउदए बहुजणे बहुजवसे से अप्पभत्ते अप्पुदए अप्पजणे अप्पजवसे ?, एयप्पगाराणि पसिणाणि पुच्छिज्जा, एयप्प० पुट्ठो वा अपुट्ठो वा नो वागरिज्जा, एवं खलु० जं सव्वट्ठेहिं० ॥ (सू० १२६) ॥ २-१-३-२

'से' तस्य भिक्षोरपान्तराले गच्छतः 'प्रातिपथिकाः' संमुखाः पथिका भवेयुः, ते चैवं वदेयुर्यथाऽऽयुष्मन् ! श्रमण ! किम्भूतोऽयं ग्रामः ? इत्यादि पृष्टो न तेषामाचक्षीत, नापि तान् पृच्छेदिति पिण्डार्थः, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ तृतीयस्याध्ययनस्य द्वितीयः ॥ २-१-३-२

उक्तो द्वितीयोद्देशकः साम्प्रतं तृतीयः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरं गमनविधिः प्रतिपादितः, इहापि स एव प्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

से भिक्खू वा गामा० दूइज्जमाणे अंतरा से वप्पाणि वा जाव दरीओ वा जाव कूडागाराणि वा पासायाणि वा भूमिघराणि वा रुक्खगिहाणि वा पव्वयगि० रुक्खं वा चेइयकडं थूभं वा चेइयकडं आएसणाणि वा जाव भवणगिहाणि वा नो बाहाओ पगिज्झिय २ अंगुलिआए उद्दिसिय २ ओणमिय २ उन्नमिय २ निज्झाइज्जा, तओ सं० गामा० ॥ से भिक्खू वा० गामा० दू० माणे अंतरा से कच्छाणि वा दवियाणि वा भूमाणि वा वलयाणि वा गहणाणि वा गहणविदुग्गाणि वणाणि वा वणवि० पव्वयाणि वा पव्वयवि० अगडाणि वा तलागाणि वा दहाणि वा नईओ वा वावीओ वा पुक्खरिणीओ वा दीहियाओ वा गुंजालियाओ वा सराणि वा सरपंतियाणि वा सरसरपंतियाणि वा नो बाहाओ पगिज्झिय २ जाव निज्झाइज्जा, केवली०, जे तत्थ मिगा वा पसू वा पंखी वा सरीसिवा वा सीहा वा जलचरा वा थलचरा वा खहचरा वा सत्ता ते उत्तसिज्ज वा वित्तसिज्ज वा वाडं वा सरणं वा कंखिज्जा, चारित्ति मे अयं समणे, अह भिक्खू णं पु० जं नो बाहाओ पगिज्झिय २ निज्झाइज्जा, तओ संजयामेव आयरिउवज्झाएहिं सद्धिं गामाणुगामं दूइज्जिज्जा ॥ (सू० १२७)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३८२ ॥

श्रुतस्क० २ चूलिका १ ईर्याध्य० ३ उद्देशः ३

स भिक्षुर्ग्रामाद्ग्रामान्तरं गच्छन् यद्यन्तराले एतत्पश्येत्, तद्यथा—परिखाः प्राकारान् 'कूटागारान्' पर्वतोपरि गृहाणि, 'भूमगृहाणि' भूमीगृहाणि, वृक्षप्रधानानि तदुपरि वा गृहाणि वृक्षगृहाणि, पर्वतगृहाणि—पर्वतगुहाः, 'रुक्खं वा चेइअकडं'ति वृक्षस्याधो व्यन्तरादिस्थलकं 'स्तूपं वा' व्यन्तरादिकृतं, तदेवमादिकं साधुना भृशं बाहुं 'प्रगृह्य' उत्क्षिप्य तथाऽङ्गुलीः प्रसार्य तथा कायमवनम्योन्नम्य वा न दर्शनीयं नाप्यवलोकनीयं, दोषाश्चात्र दग्धमुषितादौ साधुराशङ्क्येताजितेन्द्रियो वा संभाव्येत तत्स्थः पक्षिगणो वा संत्रासं गच्छेत्, एतद्दोषभयात्संयत एव 'दूयेत्' गच्छेदिति ॥ तथा—स भिक्षुर्ग्रामान्तरं गच्छेत्, तस्य च गच्छतो यद्येतानि भवेयुः, तद्यथा—'कच्छाः' नद्यासन्ननिम्नप्रदेशा मूलकवाटुक्यादिवाटिका वा 'दवियाणि'त्ति अटव्यां घासार्थं राजकुलावरुद्धभूमयः 'निम्नानि' गर्तादीनि 'वलयानि' नद्यादिवेष्टितभूमिभागाः 'गहनं' निर्जलप्रदेशोऽरण्यक्षेत्रं वा 'गुञ्जालिकाः'दीर्घा गम्भीराः कुटिलाः श्लक्ष्णाः जलाशयाः 'सरःपङ्क्तयः' प्रतीताः 'सरःसरःपङ्क्तयः' परस्परसंलग्नानि बहूनि सरांसीति, एवमादीनि बाह्वादिना न प्रदर्शयेद् अवलोकयेद्वा, यतः केवली ब्रूयात्कर्मोपादानमेतत्, किमिति ?, यतो ये तत्स्थाः पक्षिमृगसरीसृपादयस्ते त्रासं गच्छेयुः, तदावासितानां वा साधुविषयाऽऽशङ्का समुत्पद्येत, अथ साधूनां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्तथा न कुर्यात्, आचार्योपाध्यायादिभिश्च गीतार्थैः सह विहरेदिति ॥ साम्प्रतमाचार्यादिना सह गच्छतः साधोर्विधिमाह—

॥ ३८२ ॥

से भिक्खू वा २ आयरिउवज्झा० गामा० नो आयरियउवज्झायस्स हत्थेण वा हत्थं जाव अणासायमाणे तओ संजयामेव आयरिउ० सद्धिं जाव दूइज्जिज्जा ॥ से भिक्खू वा आय० सद्धिं दूइज्जमाणे अंतरा से पाडिवहिया उवागच्छिज्जा, ते णं पा० एवं वइज्जा—आउसंतो ! समणा ! के तुब्भे ? कओ वा एह ? कहिं वा गच्छिहिह ?, जे तत्थ आयरिए वा उवज्झाए वा से भासिज्ज वा वियागरिज्ज वा, आयरिउवज्झायस्स भासमाणस्स वा वियागरेमाणस्स वा नो अंतरा भासं करिज्जा, तओ० सं० अहाराइणिए वा० दूइज्जिज्जा ॥ से भिक्खू वा अहाराइणियं गामा० दू० नो राईणियस्स हत्थेण हत्थं जाव अणासायमाणे तओ सं० अहाराइणियं गामा० दू० ॥ से भिक्खू वा २ अहाराइणिअं गामाणुगामं दूइज्जमाणे अंतरा से पाडिवहिया उवागच्छिज्जा, ते णं पाडिपहिया एवं वइज्जा—आउसंतो ! समणा ! के तुब्भे ?, जे तत्थ सव्वराइणिए से भासिज्ज वा वागरिज्ज वा, राइणियस्स भासमाणस्स वा वियागरेमाणस्स वा नो अंतरा भासं भासिज्जा, तओ संजयामेव अहाराइणियाए गामाणुगामं दूइज्जिज्जा ॥ (सू० १२८)

स भिक्षुराचार्यादिभिः सह गच्छंस्तावन्मात्रायां भूमौ स्थितो गच्छेद् यथा हस्तादिसंस्पर्शो न भवतीति ॥ तथा—स भिक्षुराचार्यादिभिः सार्द्धं गच्छन् प्रातिपथिकेन पृष्टः सन् आचार्यादीनतिक्रम्य नोत्तरं दद्यात्, नाप्याचार्यादौ जल्पत्यन्तरभाषां कुर्यात्, गच्छंश्च संयत एव युगमात्रया दृष्ट्या यथारत्नाधिकं गच्छेदिति तात्पर्यार्थः ॥ एवमुत्तरसू-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रद्वयमप्याचार्योपाध्यायैरिवापरेणापि रत्नाधिकेन साधुना सह गच्छता हस्तादिसङ्कट्टोऽन्तरभाषा च वर्जनीयेति द्रष्टव्यमिति ॥ किञ्च—

से भिक्खू वा० दूइज्जमाणे अंतरा से पाडिवहिया उवागच्छिज्जा, ते णं पा० एवं वइज्जा—आउ० स०! अवियाइं इत्तो पडिवहे पासह, तं०—मणुस्सं वा गोणं वा महिसं वा पसुं वा पक्खिं वा सिरीसिवं वा जलयरं वा से आइक्खह दंसेह, तं नो आइक्खिज्जा नो दंसिज्जा, नो तस्स तं परिन्नं परिजाणिज्जा, तुसिणीए उवेहिज्जा, जाणं वा नो जाणंति वइज्जा, तओ सं० गामा० दू० ॥ से भिक्खू वा० गा० दू० अंतरा से पाडि० उवा०, ते णं पा० एवं वइज्जा—आउ० स०! अवियाइं इत्तो पडिवहे पासह उदगपसूयाणि कंदाणि वा मूलाणि वा तया पत्ता पुप्फा फला बीया हरिया उदगं वा संनिहियं अगणिं वा संनिक्खित्तं से आइक्खह जाव दूइज्जिज्जा ॥ से भिक्खू वा० गामा० दूइज्जमाणे अंतरा से पाडि० उवा०, ते णं पाडि० एवं आउ० स० अवियाइं इत्तो पडिवहे पासह जवसाणि वा जाव से णं वा विरूवरूवं संनिविट्ठं से आइक्खह जाव दूइज्जिज्जा ॥ से भिक्खु वा० गामा० दूइज्जमाणे अंतरा पा० जाव आउ० स० केवइए इत्तो गामे वा जाव रायहाणिं वा से आइक्खह जाव दूइज्जिज्जा ॥ से भिक्खू वा २ गामाणुगामं दूइज्जेज्जा, अंतरा से पाडिपहिया आउसंतो समणा! केवइए इत्तो गामस्स नगरस्स वा जाव रायहाणीए वा मग्गे से आइक्खह, तहेव जाव दूइज्जिज्जा ॥ (सू०१२९)

'से' तस्य भिक्षोर्गच्छतः प्रातिपथिकः कश्चित्संमुखीन एतद्ब्रूयात्, तद्यथा—आयुष्मन्! श्रमण! अपिच किं भवता पथ्यागच्छता कश्चिन्मनुष्यादिरुपलब्धः?, तं चैवं पृच्छन्तं तूष्णीभावेनोपेक्षेत, यदिवा जानन्नपि नाहं जानामीत्येवं वदेदिति ॥ अपि च—स भिक्षुर्ग्रामान्तरं गच्छन् केनचित्संमुखीनेन प्रातिपथिकेन पृष्टः सन् उदकप्रसूतं कन्दमूलादि नैवाचक्षीत, जानन्नपि नैव जानामीति वा ब्रूयादिति ॥ एवं यवसासनादिसूत्रमपि नेयमिति ॥ तथा कियद्दूरे ग्रामादिप्रश्नसूत्रमपि नेयमिति ॥ एवं कियान् पन्था? इत्येतदपीति ॥ किञ्च—

से भिक्खू० गा० दू० अंतरा से गोणं वियालं पडिवहे पेहाए जाव चित्तचिल्लडं वियालं प० पेहाए नो तेसिं भीओ उम्मग्गेणं गच्छिज्जा नो मग्गाओ उम्मग्गं संकमिज्जा नो गहणं वा वणं वा दुग्गं वा अणुपविसिज्जा नो रुक्खंसि दूरुहिज्जा नो महइमहालयंसि उदयंसि कायं विउसिज्जा नो वाडं वा सरणं वा सेणं वा सत्थं वा कंखिज्जा अप्पुस्सुए जाव समाहीए तओ संजयामेव गामाणुगामं दूइज्जिज्जा ॥ से भिक्खू० गामाणुगामं दूइज्जमाणे अंतरा से विहं सिया, से जं पुण विहं जाणिज्जा इमंसि खलु विहंसि बहवे आमोसगा उवगरणपडियाए संपिंडिया गच्छिज्जा, नो तेसिं भीओ उम्मग्गेण गच्छिज्जा जाव समाहीए तओ संजयामेव गामाणुगामं दूइज्जेज्जा ॥ (सू० १३०)

स भिक्षुर्ग्रामान्तरं गच्छन् यद्यन्तराले "गां" वृषभं 'व्यालं' दर्पितं प्रतिपथे पश्येत्, तथा सिंहं व्याघ्रं यावच्चित्रकं तदपत्यं वा व्यालं क्रूरं दृष्ट्वा च तत्रयात्नैवोन्मार्गेण गच्छेत्, न च गहनादिकमनुप्रविशेत्, नापि वृक्षादिकमारोहेत्, न चोदकं प्रविशेत्, नापि शरणमभिकाङ्क्षेत्, अपि त्वल्पोत्सुकोऽविमनस्कः संयत एव गच्छेत्, एतच्च गच्छनिर्गतैर्विधेयं, गच्छान्तर्गतास्तु व्यालादिकं परिहरत्यपीति ॥ किञ्च—'से' तस्य भिक्षोर्ग्रामान्तराले गच्छतः 'विहं'ति अटवीप्रायो दीर्घोऽध्वा भवेत्, तत्र च 'आमोषकाः' स्तेनाः 'उपकरणप्रतिज्ञया' उपकरणार्थिनः समागच्छेयुः, न तत्रयावुन्मार्गगमनादि कुर्यादिति ॥

से भिक्खू वा० गा० दू० अंतरा से आमोसगा संपिंडिया गच्छिज्जा, ते णं आ० एवं वइज्जा—आउ० स०! आहर एयं वत्थं वा ४ देहि निक्खिवाहि, तं नो दिज्जा निक्खिविज्जा, नो वंदिय २ जाइज्जा, नो अंजलिं कट्टु जाइज्जा, नो कलुणपडियाए जाइज्जा, धम्मियाए जायणाए जाइज्जा, तुसिणीयभावेण वा से णं आमोसगा सयं करणिज्जंतिकट्टु अक्कोसंति वा जाव उद्दविंति वा वत्थं वा ४ अच्छिंदिज्ज वा जाव परिट्ठविज्ज वा, तं नो गामसंसारियं कुज्जा, नो रायसंसारियं कुज्जा, नो परं उवसंकमित्तु बूया—आउसंतो! गाहावई एए खलु आमोसगा उवगरणपडियाए सयंकरणिज्जंतिकट्टु अक्कोसंति वा जाव परिट्ठवंति वा, एयप्पगारं मणं वा वायं वा नो पुरओ कट्टु विहरिज्जा, अप्पुस्सुए जाव समाहीए तओ संजयामेव गामा० दूइ० ॥ एयं खलु० सया जइ० (सू० १३१) त्तिबेमि ॥ समाप्तमीर्याख्यं तृतीयमध्ययनम् ॥२-१-३-३

स भिक्षुर्ग्रामान्तरे गच्छन् यदि स्तेनैरुपकरणं याच्येत तत्तेषां न समर्पयेत्, बलाद्गृह्यतां भूमौ निक्षिपेत्, न च चौरगृहीतमुपकरणं वन्दित्वा दीनं वा वदित्वा पुनर्याचेत, अपि तु धर्मकथनपूर्वकं गच्छान्तर्गतो याचेत तूष्णीभावेन वोपेक्षेत, ते पुनः स्तेनाः स्वकरणीयमितिकृत्वैतत्कुर्युः, तद्यथा—आक्रोशन्ति वाचा ताडयन्ति दण्डेन यावज्जीविताच्याजयन्ति, वस्त्रादिकं वाऽऽच्छिन्द्युर्यावत्तत्रैव 'प्रतिष्ठापयेयुः' त्यजेयुः, तच्च तेषामेवं चेष्टितं न ग्रामे 'संसारणीयं' कथनीयं, नापि राजकुलादौ, नापि परं—गृहस्थमुपसंक्रम्य चौरचेष्टितं कथयेत्, नाप्येवंप्रकारं मनो वाचं वा सङ्कल्प्यान्यत्र गच्छेदिति, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ तृतीयमध्ययनं समाप्तम् ॥

॥ ३८३ ॥

॥ ३८४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ चतुर्थं भाषाजातमध्ययनम् ।

उक्तं तृतीयमध्ययनं, साम्प्रतं चतुर्थमारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तराध्ययने पिण्डविशुद्ध्यर्थं गमनविधिरुक्तः, तत्र च गतेन पथि वा यादृग्भूतं वाच्यं न वाच्यं वा, अनेन च सम्बन्धेनायातस्य भाषाजाताध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्र निक्षेपनिर्युक्त्यनुगमे भाषाजातशब्दयोर्निक्षेपार्थं निर्युक्तिकृदाह—

जह वक्कं तह भासा जाए छक्कं च होइ नायव्वं । उप्पत्तीए १ तह पज्जवं २ तरे ३ जायगहणे ४ य ॥ ३१३ ॥

यथा वाक्यशुद्ध्यध्ययने वाक्यस्य निक्षेपः कृतस्तथा भाषाया अपि कर्त्तव्यः, जातशब्दस्य तु षट्निक्षेपोऽयं ज्ञातव्यो—नाम १ स्थापना २ द्रव्य ३ क्षेत्र ४ काल ५ भाव ६ रूपः, तत्र नामस्थापने क्षुण्णे, द्रव्यजातं तु आगमतो नोआगमतः, व्यतिरिक्तं निर्युक्तिकारो गाथापश्चार्द्धेन दर्शयति—तच्चतुर्विधम्, उत्पत्तिजातं १ पर्यवजातम् २ अन्तरजातं ३ ग्रहणजातं ४, तत्रोत्पत्तिजातं नाम यानि द्रव्याणि भाषावर्गणान्तःपातीनि काययोगगृहीतानि वाग्योगेन निसृष्टानि भाषात्वेनोत्पद्यन्ते तदुत्पत्तिजातं, यद्द्रव्यं भाषात्वेनोत्पन्नमित्यर्थः १, पर्यवजातं तैरेव वाग्निसृष्टभाषाद्रव्यैर्यानि विश्रेणिस्थानि भाषावर्गणान्तर्गतानि निसृष्टद्रव्यपराघातेन भाषापर्यायत्वेनोत्पद्यन्ते तानि द्रव्याणि पर्यवजातमित्युच्यन्ते २, यानि त्वन्तराले समश्रेण्यामेव निसृष्टद्रव्यमिश्रितानि भाषापरिणामं भजन्ते तान्यन्तरजातमित्युच्यन्ते ३, यानि पुनर्द्र-

आ. सू. ६५

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ३८५ ॥

व्याणि समश्रेणिविश्रेणिस्थानि भाषात्वेन परिणतानि कर्णशष्कुलीविवरप्रविष्टानि गृह्यन्ते तानि चानन्तप्रदेशिकानि द्रव्यतः क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढानि कालत एकद्वित्र्यादियावदसङ्ख्येयसमयस्थितिकानि भावतो वर्णगन्धरसस्पर्शवन्ति तानि चैवंभूतानि ग्रहणजातमित्युच्यन्ते ४ । उक्तं द्रव्यजातं, क्षेत्रादिजातं तु स्पष्टत्वान्निर्युक्तिकारेण नोक्तं, तच्चैवंभूतं—यस्मिन् क्षेत्रे भाषाजातं व्यावर्ण्यते यावन्मात्रं वा क्षेत्रं स्पृशति तत्क्षेत्रजातम्, एवं कालजातमपि, भावजातं तु तान्येवोत्पत्तिपर्यवान्तरग्रहणद्रव्याणि श्रोतरि यदा शब्दोऽयमिति बुद्धिमुत्पादयन्तीति । इह त्वधिकारो द्रव्यभाषाजातेन, द्रव्यस्य प्राधान्यविवक्षया, द्रव्यस्य तु विशिष्टावस्था भाव इतिकृत्वा भावभाषाजातेनाप्यधिकार इति ॥ उद्देशार्थाधिकारार्थमाह—

श्रुतस्कं० २
चूलिका १
भाषा० ४
उद्देशः १

सव्वेऽवि य वयणविसोहिकारगा तहवि अत्थि उ विसेसो । वयणविभत्ती पढमे उप्पत्ती वज्जणा बीए ॥ ३१४ ॥

यद्यपि द्वावप्युद्देशकौ वचनविशुद्धिकारकौ तथाऽप्यस्ति विशेषः, स चायं—प्रथमोद्देशके वचनस्य विभक्तिः वचनविभक्तिः—एकवचनादिषोडशविधवचनविभागः, तथैवंभूतं भाषणीयं नैवंभूतमिति व्यावर्ण्यते, द्वितीयोद्देशके तूत्पत्तिः—क्रोधाद्युत्पत्तिर्यथा न भवति तथा भाषितव्यम् ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से भिक्खू वा २ इमाइं वयायाराइं सुच्चा निसम्म इमाइं अणायाराइं अणारियपुव्वाइं जाणिज्जा—जे कोहा वा वायं विउंजंति जे माणा वा० जे मायाए वा० जे लोभा वा वायं विउंजंति जाणओ वा फरुसं वयंति अजाणओ वा फ० सव्वं चेयं सावज्जं वज्जिज्जा विवेगमायाए, धुवं चेयं जाणिज्जा अधुवं चेयं जाणिज्जा असणं वा ४ लभिय नो लभिय भुंजिय नो भुंजिय अदुवा आगओ अदुवा नो आगओ अदुवा एइ अदुवा नो एइ अदुवा एहिइ अदुवा नो एहिइ इत्थवि आगए इत्थवि नो आगए इत्थवि एइ इत्थवि नो एति इत्थवि एहिति इत्थवि नो एहिति ॥ अणुवीइ निट्ठाभासी समियाए संजए भासं भासिज्जा, तंजहा—एगवयणं १ दुवयणं २ बहुव० ३ इत्थि० ४ पुरि० ५ नपुंसगवयणं ६ अज्झत्थव० ७ उवणीयवयणं ८ अवणीयवयणं ९ उवणीयअवणीयव० १० अवणीयउवणीयव० ११ तीयव० १२ पडुप्पन्नव० १३ अणागयव० १४ पच्चक्खवयणं १५ परुक्खव० १६, से एगवयणं वइस्सामीति एगवयणं वइज्जा जाव परुक्खवयणं वइस्सामीति परुक्खवयणं वइज्जा, इत्थी वेस पुरिसो वेस नपुंसगं वेस एयं वा चेयं अन्नं वा चेयं अणुवीइ निट्ठाभासी समियाए संजए भासं भासिज्जा, इच्चेयाइं आयतणाइं उवातिकम्म ॥ अह भिक्खू जाणिज्जा चत्तारि भासज्जायाइं, तंजहा—सच्चमेगं पढमं भासज्जायं १ बीयं मोसं २ तईयं सच्चामोसं ३ जं नेव सच्चं नेव मोसं नेव सच्चामोसं असच्चामोसं नाम तं चउत्थं भासजायं ४ ॥ से बेमि जे अईया जे य पडुप्पन्ना जे अणागया अरहंता भगवंतो सव्वे ते एयाणि चेव चत्तारि भासज्जायाइं भासिंसु वा भासंति वा भासिस्संति वा पन्नविंसु वा ३, सव्वाइं च णं एयाइं अचित्ताणि वण्णमंताणि गंधमंताणि रसमंताणि फासमंताणि चओवचइयाइं विप्परिणामधम्माइं भवंतीति अक्खायाइं ॥ (सू० १३२)

॥ ३८५ ॥

स भावभिक्षुः 'इमान्' इत्यन्तःकरणनिष्पन्नान्, इदमः प्रत्यक्षासन्नवाचित्वात्समनन्तरं वक्ष्यमाणान् वाच्याचारान् वागाचाराः—वाग्व्यापारास्तान् श्रुत्वा, तथा 'निशम्य' ज्ञात्वा भाषासमित्या भाषां भाषेतोत्तरेण सम्बन्ध इति । तत्र यादृग्भूता भाषा न भाषितव्येति तत्तावद्दर्शयति—'इमान्' वक्ष्यमाणान् 'अनाचारान्' साधूनामभाषणयोग्यान् पूर्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधुभिरनाचीर्णपूर्वान् साधुर्जानीयात्, तद्यथा—ये केचन क्रोधाद्वा वाचं 'विउंजन्ति' विविधं व्यापारयन्ति—भाषन्ते यथा चौरस्त्वं दासस्त्वमित्यादि तथा मानेन भाषन्ते यथोत्तमजातिरहं हीनस्त्वमित्यादि तथा मायया यथा ग्लानोऽहमपरसन्देशकं वा सावद्यकं केनचिदुपायेन कथयित्वा मिथ्यादुष्कृतं करोति सहसा ममैतदायातमिति तथा लोभेनाहमनेनोक्तेनातः किञ्चिल्लप्स्य इति तथा कस्यचिद्दोषं जानानास्तद्दोषोद्घटनेन परुषं वदन्ति अजानाना वा, सर्वं चैतत्क्रोधादिवचनं सहावद्येन—पापेन गर्ह्येण वा वर्त्तत इति सावद्यं तद्वर्जयेत् विवेकमादाय, विवेकिना भूत्वा सावद्यं वचनं वर्जनीयमित्यर्थः, तथा केनचित्सार्द्धं साधुना जल्पता नैव सावधारणं वचो वक्तव्यं यथा 'ध्रुवमेतत्' निश्चितं वृष्ट्यादिकं भविष्यतीत्येवं जानीयाद् अध्रुवं वा जानीयादिति। तथा कथञ्चित्साधुं भिक्षार्थं प्रविष्टं ज्ञातिकुलं वा गतं चिरयन्तमुद्दिश्यापरे साधव एवं ब्रवीरन् यथा—भुङ्क्ष्महे वयं स तत्राशनादिकं लब्ध्वैव समागमिष्यति, यदिवा म्रियते तदर्थं किञ्चित् नैवासौ तस्माल्लब्धलाभः समागमिष्यति, एवं तत्रैव भुक्त्वाऽभुक्त्वा वा समागमिष्यतीति सावधारणं न वक्तव्यम्, अथ चैवंभूतां सावधारणां वाचं न ब्रूयाद् यथाऽऽगतः कश्चिद्राजादिर्नो वा समागतः तथाऽऽगच्छति न वा समागच्छति एवं समागमिष्यति न वेति, एवमत्र पत्तनमठादावपि भूतादिकालत्रयं योज्यं, यमर्थं सम्यग् न जानीयात्तदेवमेवैतदिति न ब्रूयादिति भावार्थः, सामान्येन सर्वत्रगः साधोरयमुपदेशो, यथा—'अनुविचिन्त्य' विचार्य सम्यग्निश्चित्यातिशयेन श्रुतोपदेशेन वा प्रयोजने सति 'निष्ठाभाषी' सावधारणभाषी सन् 'समित्या' भाषासमित्या 'समतया वा' रागद्वेषाकरणलक्षणया षोडशवचनविधिज्ञो भाषां भाषेत। याद्दग्भूता च भाषा भाषितव्या तां षोडशवचनविधिगतां दर्शयति—'तद्यथे'त्ययमुपप्रदर्शनार्थः, एकवचनं वृक्षः १, द्विवचनं वृक्षौ २, बहुवचनं वृक्षा इति ३, स्त्रीवचनं वीणा कन्या इत्यादि ४, पुंवचनं घटः पट इत्यादि ५, नपुंसकवचनं पीठं देवकुलमित्यादि ६, अध्यात्मवचनम्, आत्मन्यधि अध्यात्मं—हृदयगतं तत्परिहारेणान्यद्भणिष्यतस्तदेव सहसा पतितम् ७, 'उपनीतवचनं' प्रशंसावचनं यथा रूपवती स्त्री ८, तद्विपर्ययेणापनीतवचनं यथेयं रूपहीनेति ९, 'उपनीतापनीतवचनं' कश्चिद् गुणः प्रशस्यः कश्चिन्निन्द्यो, यथा—रूपवतीयं स्त्री किन्त्वसद्वृत्तेति १०, 'अपनीतोपनीतवचनम्' अरूपवती स्त्री किन्तु सद्वृत्तेति ११, 'अतीतवचनं' कृतवान् १२ 'वर्त्तमानवचनं' करोति १३ 'अनागतवचनं' करिष्यति १४ 'प्रत्यक्षवचनम्' एष देवदत्तः १५, 'परोक्षवचनं' स देवदत्तः १६, इत्येतानि षोडश वचनानि, अमीषां स भिक्षुरेकार्थविवक्षायामेकवचनमेव ब्रूयाद् यावत्परोक्षवचनविवक्षायां परोक्षवचनमेव ब्रूयादिति। तथा स्त्र्यादिके दृष्टे सति स्त्र्येवैषा पुरुषो वा नपुंसकं वा, एवमेवैतदन्यद्वैतत्, एवम् 'अनुविचिन्त्य' निश्चित्य निष्ठाभाषी सन् समित्या समतया संयत एव भाषां भाषेत, तथा 'इत्येतानि' पूर्वोक्तानि भाषागतानि वक्ष्यमाणानि वा 'आयतनानि' दोषस्थानानि 'उपातिक्रम्य' अतिलङ्घ्य भाषां भाषेत। अथ स भिक्षुर्जानीयात् 'चत्वारि भाषाजातानि' चतस्रो भाषाः, तद्यथा—सत्यमेकं प्रथमं भाषाजातं यथार्थम्—अवितथं, तद्यथा—गौर्गौरेवाश्वोऽश्व एवेति १, एतद्विपरीता तु मृषा द्वितीया, यथा गौरश्वोऽश्वो गौरिति २, तृतीया भाषा सत्यामृषेति, यत्र किञ्चित्सत्यं किञ्चिन्मृषेति, यथाऽश्वेन यान्तं देवदत्तमुष्ट्रेण यातीत्यभिदधाति ३, चतुर्थी तु भाषा योच्यमाना न सत्या नापि मृषा नापि सत्यामृषा आमन्त्रणाज्ञापनादिका साऽत्रासत्याऽमृषेति ४॥ स्वमनीषिकापरिहारार्थमाह—

सोऽहं यदेतद्ब्रवीमि तत्सर्वैरेव तीर्थकृद्भिरतीतानागतवर्त्तमानैर्भाषितं भाष्यते भाषिष्यते च, अपि चैतानि—सर्वाण्यप्येतानि भाषाद्रव्याण्यचित्तानि च वर्णगन्धरसस्पर्शवन्ति चयोपचयिकानि विविधपरिणामधर्माणि भवन्तीति, एवमाख्यातं तीर्थकृद्भिरिति, अत्र च वर्णादिमत्त्वाविष्करणेन शब्दस्य मूर्त्तत्वमावेदितं, न ह्यमूर्त्तस्याकाशादेर्वर्णादयः संभवन्ति तथा चयोपचयधर्माणीत्यनेन तु शब्दस्यानित्यत्वमाविष्कृतं, विचित्रपरिणामत्वाच्छब्दद्रव्याणामिति॥ साम्प्रतं शब्दस्य कृतकत्वाविष्करणायाह—

से भिक्खू वा० से जं पुण जाणिज्जा पुव्विं भासा अभासा भासिज्जमाणी भासा भासा भासासमयवीइक्कंता च णं भासिया भासा अभासा॥ से भिक्खू वा० से जं पुण जाणिज्जा जा य भासा सच्चा १ जा य भासा मोसा २ जा य भासा सच्चामोसा ३ जा य भासा असच्चाऽमोसा ४, तहप्पगारं भासं सावज्जं सकिरियं कक्कसं कडुयं निट्ठुरं फरुसं अण्हयकरिं छेयणकरिं भेयणकरिं परितावणकरिं उद्दवणकरिं भूओवघाइयं अभिकंख नो भासिज्जा॥ से भिक्खू वा भिक्खुणी वा से जं पुण जाणिज्जा, जा य भासा सच्चा सुहुमा जा य भासा असच्चामोसा तहप्पगारं भासं असावज्जं जाव अभूओवघाइयं अभिकंख भासं भासिज्जा॥ (सू० १३३)

स भिक्षुरेवंभूतं शब्दं जानीयात्, तद्यथा—भाषाद्रव्यवर्गणानां वाग्योगनिस्सरणात् 'पूर्वं' प्रागभाषा 'भाष्यमाणैव' वाग्योगेन निसृज्यमानैव भाषा, भाषाद्रव्याण्यपि भाषा भवति, तदनेन ताल्वोष्ठादिव्यापारेण प्रागसतः शब्दस्य निष्पादनात्स्फुटमेव कृतकत्वमावेदितं, मृत्पिण्डे दण्डचक्रादिनेव घटस्येति, स च बोद्धारितप्रध्वंसित्वाच्छब्दार्थो भाषणोत्तरकालमप्य-

॥ ३८६ ॥

॥ ३८७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावैव, यथा कपालावस्थायां घटोऽघट इति, तदनेन प्रागभावप्रध्वंसाभावौ शब्दस्यावेदितावितिः ॥ इदानीं चतसृणां भाषाणामभाषणीयामाह–स भिक्षुर्या पुनरेवं जानीयात्, तद्यथा–सत्यां १ मृषां २ सत्यामृषाम् ३ असत्यामृषां ४, तत्र मृषा सत्यामृषा च साधूनां तावन्न वाच्या, सत्याऽपि या कर्कशादिगुणोपेता सा न वाच्या, तां च दर्शयति–सहावद्येन वर्त्तत इति सावद्या तां सत्यामपि न भाषेत, तथा सह क्रियया–अनर्थदण्डप्रवृत्तिलक्षणया वर्त्तत इति सक्रिया तामिति तथा 'कर्कशां' चार्वेताक्षरां तथा 'कटुकां' चित्तोद्वेगकारिणीं तथा 'निष्ठुरां' हक्काप्रधानां 'परुषां' मर्मोद्घाटनपराम् 'अण्हयकरि'न्ति कर्माश्रवकरीम्, एवं छेदनभेदनकरीं यावदपद्रावणकरीमित्येवमादिकां 'भूतोपघातिनीं' प्राण्युपतापकारिणीम् 'अभिकाङ्क्ष्य' मनसा पर्यालोच्य सत्यामपि न भाषेतेति ॥ भाषणीयां त्वाह–स भिक्षुर्या पुनरेवं जानीयात्, तद्यथा–या च भाषा सत्या 'सूक्ष्मे'ति कुशाग्रीयया बुद्ध्या पर्यालोच्यमाना मृषाऽपि सत्या भवति यथा सत्यपि मृगदर्शने लुब्धकादेरपलाप इति, उक्तञ्च—"अलिअं न भासिअव्वं अत्थि हु सच्चंपि जं न वत्तव्वं । सच्चंपि होइ अलिअं जं परपीडाकरं वयणं ॥ १ ॥" या चासत्यामृषा–आमन्त्रण्याज्ञापनादिका तां तथाप्रकारां भाषामसावद्यामक्रियां यावदभूतोपघातिनीं मनसा पूर्वम् 'अभिकाङ्क्ष्य' पर्यालोच्य सर्वदा साधुर्भाषां भाषेतेति ॥ किञ्च—

से भिक्खू वा पुमं आमंतेमाणे आमंतिए वा अपडिसुणेमाणे नो एवं वइज्जा—होलित्ति वा गोलित्ति वा वसुलेत्ति वा कुपक्खेत्ति वा घडदासेत्ति वा साणेत्ति वा तेणित्ति वा चारिएत्ति वा माईत्ति वा मुसावाइत्ति वा, एयाइं तुमं ते जणगा वा,

१ अलीकं न भाषितव्यं अस्त्येव सत्यमपि यत्र वक्तव्यम् । सत्यमपि भवत्यलीकं यत् परपीडाकरं वचनम् ॥ १ ॥

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३८८ ॥

एअप्पगारं भासं सावज्जं सकिरियं जाव भूओवघाइयं अभिकंख नो भासिज्जा ॥ से भिक्खू वा० पुमं आमंतेमाणे आमंतिए वा अप्पडिसुणेमाणे एवं वइज्जा—अमुगे इ वा आउसोत्ति वा आउसंतारोत्ति वा सावगेत्ति वा उवासगेत्ति वा धम्मिएत्ति वा धम्मप्पियेत्ति वा, एयप्पगारं भासं असावज्जं जाव अभिकंख भासिज्जा ॥ से भिक्खू वा २ इत्थिं आमंतेमाणे आमंतिए य अप्पडिसुणेमाणे नो एवं वइज्जा—होली इ वा गोलीति वा इत्थीगमेणं नेयव्वं ॥ से भिक्खू वा २ इत्थिं आमंतेमाणे आमंतिए य अप्पडिसुणेमाणी एवं वइज्जा—आउसोत्ति वा भइणित्ति वा भोईति वा भगवईति वा साविगेति वा उवासिएत्ति वा धम्मिएत्ति वा धम्मप्पियेत्ति वा, एयप्पगारं भासं असावज्जं जाव अभिकंख भासिज्जा ॥ (सू० १३४)

श्रुतस्कं० २ चूलिका १ भाषा० ४ उद्देशः १

स भिक्षुः पुमांसमामन्त्रयन्नामन्त्रितं वाऽशृण्वन्तं नैवं भाषेत, तद्यथा–होल इति वा गोल इति वा, एतौ च देशान्तरेऽवज्ञासंसूचकौ, तथा 'वसुले'त्ति वृषलः 'कुपक्षः' कुत्सितान्वयः घटदास इति वा श्वेति वा स्तेन इति वा चारिक इति वा मायीति वा मृषावादीति वा, इत्येतानि–अनन्तरोक्तानि त्वमसि तव जनकौ वा-मातापितरावेतानीति, एवंप्रकारां भाषां यावन्न भाषेतेति ॥ एतद्विपर्ययेण च भाषितव्यमाह–स भिक्षुः पुमांसमामन्त्रयन्नामन्त्रितं वाऽशृण्वन्तमेवं ब्रूयाद् यथाऽमुक इति वा आयुष्मन्निति वा आयुष्मन्त इति वा तथा श्रावक धर्मप्रिय इति, एवमादिकां भाषां भाषेतेति ॥ एवं स्त्रियमधिकृत्य सूत्रद्वयमपि प्रतिषेधविधिभ्यां नेयमिति ॥ पुनरप्यभाषणीयामाह—

से भि० नो एवं वइज्जा—नभोदेवित्ति वा गज्जदेवित्ति वा विज्जुदेवित्ति वा पवुट्ठदे० निवुट्ठदेवित्तए वा पडउ वा वासं मा वा पडउ निप्फज्जउ वा सस्सं मा वा नि० विभाउ वा रयणी मा वा विभाउ उदेउ वा सूरिए मा वा उदेउ सो वा राया जयउ वा मा जयउ, नो एयप्पगारं भासं भासिज्जा ॥ पन्नवं से भिक्खू वा २ अंतलिक्खेत्ति वा गुज्झाणुचरिएत्ति वा संमुच्छिए वा निवइए वा पओ वइज्जा बुट्ठबलाहगेत्ति वा, एयं खलु तस्स भिक्खुस्स भिक्खुणीए वा सामग्गियं जं सव्वट्ठेहिं समिए सहिए सया जइज्जासि त्तिबेमि २–१–४–१ ॥ भाषाध्ययनस्य प्रथमः ॥ (सू० १३५)

॥ ३८८ ॥

स भिक्षुरेवंभूतामसंयतभाषां न वदेत्, तद्यथा–नभोदेव इति वा गर्जति देव इति वा तथा विद्युद्देवः प्रवृष्टो देवः निवृष्टो देवः, एवं पततु वर्षा मा वा, निष्पद्यतां शस्यं मेति वा, विभातु रजनी मेति वा, उदेतु सूर्यो मा वा, जयत्वसौ राजा मा वेति, एवंप्रकारां देवादिकां भाषां न भाषेत ॥ कारणजाते तु प्रज्ञावान् संयतभाषयाऽन्तरिक्षमित्यादिकया भाषेत, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ चतुर्थस्य प्रथमोद्देशकः समाप्तः २–१–४–१ ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरोद्देशके वाच्यावाच्यविशेषोऽभिहितः, तदिहापि स एव शेषभूतोऽभिधीयते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

से भिक्खू वा जहा वेगइयाइं रूवाइं पासिज्जा तहावि ताइं नो एवं वइज्जा, तंजहा—गंडी गंडीति वा कुट्ठी कुट्ठीति वा जाव मधुमेहुणीति वा हत्थच्छिन्नं हत्थच्छिन्नेत्ति वा एवं पायछिन्नेत्ति वा नक्कछिण्णेइ वा कण्णछिन्नेइ वा उट्ठछिन्नेति वा, जेयावन्ने तहप्पगारा एयप्पगाराहिं भासाहिं बुइया २ कुप्पंति माणवा ते यावि तहप्पगाराहिं भासाहिं अभिकंख नो भासिज्जा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से भिक्खू वा० जहा वेगइयाइं रूवाइं पासिज्जा तहावि ताइं एवं वइज्जा—तंजहा—ओयंसी ओयंसित्ति वा तेयंसी तेयंसीति वा जसंसी जसंसीइ वा वच्चंसी वच्चंसीइ वा अभिरूयंसी २ पडिरूवंसी २ पासाइयं २ दरिसणिज्जं दरिसणीयत्ति वा, जे यावन्ने तहप्पगारा तहप्पगाराहिं भासाहिं बुइया २ नो कुप्पंति माणवा तेयावि तहप्पगारा एयप्पगाराहिं भासाहिं अभिकंख भासिज्जा ॥ से भिक्खू वा० जहा वेगइयाइं रूवाइं पासिज्जा, तंजहा—वप्पाणि वा जाव गिहाणि वा, तहावि ताइं नो एवं वइज्जा, तंजहा—सुकडे इ वा सुट्ठुकडे इ वा साहुकडे इ वा कल्लाणे इ वा करणिज्जे इ वा, एयप्पगारं भासं सावज्जं जाव नो भासिज्जा ॥ से भिक्खू वा० जहा वेगइयाइं रूवाइं पासिज्जा, तंजहा—वप्पाणि वा जाव गिहाणि वा तहावि ताइं एवं वइज्जा, तंजहा—आरंभकडे इ वा सावज्जकडे इ वा पयत्तकडे इ वा पासाइयं पासाइए वा दरिसणीयं दरसणीयंति वा अभिरूवं अभिरूवंति वा पडिरूवं पडिरूवंति वा एयप्पगारं भासं असावज्जं जाव भासिज्जा ॥ (सू० १३६)

स भिक्षुर्यद्यपि 'एगइयाइ'न्ति कानिचिद्रूपाणि गण्डीपदकुष्ठ्यादीनि पश्येत् तथाप्येतानि स्वनामग्राहं तद्विशेषणविशिष्टानि नोच्चारयेदिति, तद्यथेत्युदाहरणोपप्रदर्शनार्थः, 'गण्डी' गण्डमस्यास्तीति गण्डी यदिवोच्छूनगुल्फपादः स गण्डीत्येवं न व्याहर्त्तव्यः, तथा कुष्ठ्यपि न कुष्ठीति व्याहर्त्तव्यः, एवमपरव्याधिविशिष्टो न व्याहर्त्तव्यो यावन्मधुमेहीति मधुवर्णमूत्रानवरतप्रश्रावीति, अत्र च घृताध्ययने व्याधिविशेषाः प्रतिपादितास्तदपेक्षया सूत्रे यावदित्युक्तम्, एवं छिन्नहस्तपादनासिकाकर्णोष्ठादयः, तथाऽन्ये च तथाप्रकाराः काणकुण्टादयः, तद्विशेषणविशिष्टाभिर्वाग्भिरुक्ता उक्ताः कुप्यन्ति मानवास्तांस्तथाप्रकारांस्तथाप्रकाराभिर्वाग्भिरभिकाङ्क्ष्य नो भाषेतेति ॥ यथा च भाषेत तथाऽऽह–स भिक्षुर्यद्यपि गण्डीपदादिव्याधिग्रस्तं पश्येत्तथाऽपि तस्य यः कश्चिद्विशिष्टो गुण ओजस्तेज इत्यादिकस्तमुद्दिश्य सति कारणे वदेदिति, केशववत्कृष्णश्वशुक्लदन्तगुणोद्घाटनवद्गुणग्राही भवेदित्यर्थः ॥ तथा स भिक्षुर्यद्यप्येतानि रूपाणि पश्येत्तद्यथा—'वप्राः' प्राकारा यावद्गृहाणि, तथाऽप्येतानि नैवं वदेत्, तद्यथा–सुकृतमेतत् सुष्ठु कृतमेतत् साधु–शोभनं कल्याणमेतत्, कर्त्तव्यमेवैतदेवंविधं भवद्विधानामिति, एवंप्रकारामन्यामपि भाषामधिकरणानुमोदनात् नो भाषेतेति ॥ पुनर्भाषणीयामाह–स भिक्षुर्वप्रादिकं दृष्ट्वाऽपि तदुद्देशेन न किञ्चिद् ब्रूयात्, प्रयोजने सत्येवं संयतभाषया ब्रूयात्, तद्यथा–महारम्भकृतमेतत् सावद्यकृतमेतत् तथा प्रयत्नकृतमेतत्, एवं प्रसादनीयदर्शनादिकां भाषामसावद्यां भाषेतेति ॥

से भिक्खू वा २ असणं वा० उवक्खडियं तहाविहं नो एवं वइज्जा, तं० सुकडेत्ति वा सुट्ठुकडे इ वा साहुकडे इ वा कल्लाणे इ वा करणिज्जे इ वा, एयप्पगारं भासं सावज्जं जाव नो भासिज्जा ॥ से भिक्खू वा २ असणं वा ४ उवक्खडियं पेहाय एवं वइज्जा, तं०—आरंभकडेत्ति वा सावज्जकडेत्ति वा पयत्तकडे इ वा [illegible] भद्देति वा ऊसढं ऊसढे इ वा रसियं २ मणुन्नं २ एयप्पगारं भासं असावज्जं जाव भासिज्जा ॥ (सू० १३७)

एवमशनादिगतप्रतिषेधसूत्रद्वयमपि नेयमिति, नवरम् 'ऊसढ'न्ति उच्छ्रितं वर्णगन्धाद्युपेतमिति ॥ पुनरभाषणीयामाह–किञ्च—

से भिक्खू वा भिक्खुणी वा मणुस्सं वा गोणं वा महिसं वा मिगं वा पसुं वा पक्खिं वा सरीसिवं वा जलचरं वा से त्तं परिवूढकायं पेहाए नो एवं वइज्जा—थूले इ वा पमेइले इ वा वट्टे इ वा वज्झे इ वा पाइमे इ वा, एयप्पगारं भासं सा-

वज्जं जाव नो भासिज्जा ॥ से भिक्खू वा भिक्खुणी वा मणुस्सं वा जाव जलयरं वा सेत्तं परिवूढकायं पेहाए एवं वइज्जा—परिवूढकाएत्ति वा उवचियकाएत्ति वा थिरसंघयणेत्ति वा चियमंससोणिएत्ति वा बहुपडिपुन्नइंदिएत्ति वा, एयप्पगारं भासं असावज्जं जाव भासिज्जा ॥ से भिक्खू वा २ विरूवरूवाओ गाओ पेहाए नो एवं वइज्जा, तंजहा—गाओ दुज्झाओत्ति वा दम्मेत्ति वा गोरहत्ति वा वाहिमत्ति वा रहजोग्गत्ति वा, एयप्पगारं भासं सावज्जं जाव नो भासिज्जा ॥ से भि० विरूवरूवाओ गाओ पेहाए एवं वइज्जा, तंजहा—जुवंगवित्ति वा धेणुत्ति वा रसवइत्ति वा हस्से इ वा महल्ले इ वा महव्वए इ वा संवहणित्ति वा, एअप्पगारं भासं असावज्जं जाव अभिकंख भासिज्जा ॥ से भिक्खू वा० तहेव गंतुमुज्जाणाइं पव्वयाइं वणाणि वा रुक्खा महल्ले पेहाए नो एवं वइज्जा, तं०—पासायजोग्गाति वा तोरणजोग्गाइ वा गिहजोग्गाइ वा फलिहजो० अग्गलजो० नावाजो० उदग० दोणजो० पीढचंगबेरनंगलकुलियजंतलट्ठीनाभिगंडीआसणजो० सयणजाणउवस्सयजोगाइं वा, एयप्पगारं० नो भासिज्जा ॥ से भिक्खू वा० तहेव गंतु० एवं वइज्जा, तंजहा—जाइमंता इ वा दीहवट्टा इ वा महालया इ वा पयायसाला इ वा विडिमसाला इ वा पासाइया इ वा जाव पडिरूवाति वा एयप्पगारं भासं असावज्जं जाव भासिज्जा ॥ से भि० बहुसंभूया वणफला पेहाए तहावि ते नो एवं वइज्जा, तंजहा—पक्का इ वा पायखज्जा इ वा वेलोइया इ वा टाला इ वा वेहिया इ वा, एयप्पगारं भासं सावज्जं जाव नो भासिज्जा ॥ से भिक्खू० बहुसंभूया वणफला अंबा पेहाए एवं वइज्जा, तं०—असंथडा इ वा बहुनिवट्टिमफला इ वा बहुसंभूया इ वा भूयरूवित्ति वा, एयप्पगारं भा० असा० ॥ से० बहुसंभूया ओसही पेहाए तहावि ताओ न एवं वइज्जा, तंजहा—पक्का इ वा नीलीया इ वा छवी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इया इ वा लाइमा इ वा भज्जिमा इ वा बहुखज्जा इ वा, एयप्पगा० ना भासेज्जा ॥ से० बहु० पेहाए तहावि एवं वइज्जा, तं०—रूढा इ वा बहुसंभूया इ वा थिरा इ वा ऊसढा इ वा गब्भिया इ वा पसूया इ वा ससारा इ वा, एयप्पगारं भासं असावज्जं जाव भासि० ॥ (सू० १३८)

स भिक्षुर्गवादिकं 'परिवृद्धकायं' पुष्टकायं प्रेक्ष्य नैतद्वदेत्, तद्यथा–स्थूलोऽयं प्रमेदुरोऽयं तथा वृत्तस्तथा 'वध्यो वहनयोग्यो वा, एवं पचनयोग्यो देवतादेः पातनयोग्यो वेति, एवमादिकामन्यामप्येवंप्रकारां सावद्यां भाषां नो भाषेतेति ॥ भाषणविधिमाह–स भिक्षुर्गवादिकं परिवृद्धकायं प्रेक्ष्यैवं वदेत्, तद्यथा–परिवृद्धकायोऽयमित्यादि सुगममिति ॥ तथा–स भिक्षुः 'विरूपरूपाः' नानाप्रकारा गाः समीक्ष्य नैतद्वदेत्, तद्यथा–दोहनयोग्या एता गावो दोहनकालो वा वर्त्तते तथा 'दम्यः' दमनयोग्योऽयं 'गोरहकः' कल्होटकः, एवं वाहनयोग्यो रथयोग्यो वेति, एवंप्रकारां सावद्यां भाषां नो भाषेतेति ॥ सति कारणे भाषणविधिमाह–स भिक्षुर्नानाप्रकारा गाः प्रेक्ष्य प्रयोजने सत्येवं ब्रूयात्, तद्यथा–'जुवंगवे'त्ति युवाऽयं गौः धेनुरिति वा रसवतीति वा, (ह्रस्वः महान् महाव्ययो वा) एवं संवहन इति, एवंप्रकारामसावद्यां भाषां भाषेतेति ॥ किञ्च–स भिक्षुरुद्यानादिकं गत्वा महतो वृक्षान् प्रेक्ष्य नैवं वदेत्, तद्यथा–प्रासादादियोग्या अमी वृक्षा इति, एवमादिकां सावद्यां भाषां नो भाषेतेति ॥ यत्तु वदेत्तदाह–स भिक्षुस्तथैवोद्यानादिकं गत्वैवं वदेत्, तद्यथा—'जातिमन्तः' सुजातय इति, एवमादिकां भाषामसावद्यां संयत एव भाषेतेति ॥ किञ्च–स भिक्षुर्बहुसंभूतानि वृक्षफलानि प्रेक्ष्य नैवं वदेत्, तद्यथा–एतानि फलानि 'पक्वानि' पाकप्राप्तानि, तथा 'पाकखाद्यानि' बद्धास्थीनि गर्त्तोत्प्रक्षेपकोद्रवपलालादिना विपच्य भक्षणयोग्यानीति, तथा

'वेलोचितानि' पाकातिशयतो ग्रहणकालोचितानि, अतः परं कालं न विषहन्तीत्यर्थः, 'टालानि' अनवबद्धास्थीनि कोमलास्थीनीति यदुक्तं भवति, तथा 'द्वैधिकानि' इति पेशीसम्पादनेन द्वैधीभावकरणयोग्यानि वेति, एवमादिकां भाषां फलगतां सावद्यां नो भाषेत ॥ यदभिधानीयं तदाह–स भिक्षुर्बहुसम्भूतफलानावान् प्रेक्ष्यैवं वदेत्, तद्यथा—'असमर्थाः' अतिभरेण न शक्नुवन्ति फलानि धारयितुमित्यर्थः, एतेन पक्वार्थ उक्तः, तथा 'बहुनिर्वर्त्तितफलाः' बहूनि निर्वर्त्तितानि फलानि येषु ते तथा, एतेन पाकखाद्यार्थ उक्तः, तथा 'बहुसम्भूताः' बहूनि संभूतानि पाकातिशयतो ग्रहणकालोचितानि फलानि येषु ते तथा, अनेन वेलोचितार्थ उक्तः, तथा 'भूतरूपाः' इति वा भूतानि रूपाण्यनवबद्धास्थीनि कोमलफलरूपाणि येषु ते तथा, अनेन टालाद्यर्थ उपलक्षितः, एवंभूता एते आम्राः, आम्रग्रहणं प्रधानोपलक्षणम्, एवंभूतामनवद्यां भाषां भाषेतेति ॥ किञ्च–स भिक्षुर्बहुसम्भूता ओषधीर्वीक्ष्य तथाऽप्येता नैतद्वदेत्, तद्यथा–पक्वा नीला आर्द्राः छविमत्यः 'लाइमाः' लाजायोग्या रोपणयोग्या वा, तथा 'भज्जिमाओ'त्ति पचनयोग्या भञ्जनयोग्या वा 'बहुखज्जा' बहुभक्ष्याः पृथुककरणयोग्या वेति, एवंप्रकारां सावद्यां भाषां नो भाषेत ॥ यथा च भाषेत तदाह–स भिक्षुर्बहुसंभूता ओषधीः प्रेक्ष्यैतद् ब्रूयात्, तद्यथा–रूढा इत्यादिकामसावद्यां भाषां भाषेत ॥ किञ्च—

से भिक्खू वा० तहप्पगाराइं सद्दाइं सुणिज्जा तहावि एयाइं नो एवं वइज्जा, तंजहा—सुसद्देत्ति वा दुसद्देत्ति वा, एयप्पगारं भासं सावज्जं नो भासिज्जा ॥ से भि० तहावि ताइं एवं वइज्जा, तंजहा—सुसद्दं सुसद्दित्ति वा दुसद्दं दुसद्दित्ति वा, एयप्पगारं असावज्जं जाव भासिज्जा, एवं रूवाइं किण्हेत्ति वा ५ गंधाइं सुरभिगंधित्ति वा २ रसाइं तित्ताणि वा ५ फासाइं कक्खडाणि वा ८ ॥ (सू० १३९)

स भिक्षुर्यद्यप्येतान् शब्दान् शृणुयात् तथाऽपि नैवं वदेत्, तद्यथा–शोभनः शब्दोऽशोभनो वा माङ्गलिकोऽमाङ्गलिको वा, इत्यर्थं न व्याहर्त्तव्यः ॥ विपरीतं त्वाह—यथाऽवस्थितशब्दप्रज्ञापनाविषये एतद्वदेत्, तद्यथा—'सुसद्दं'ति शोभनशब्दं शोभनमेव ब्रूयाद्, अशोभनं त्वशोभनमिति ॥ एवं रूपादिसूत्रमपि नेयम् ॥ किञ्च—

से भिक्खू वा० वंता कोहं च माणं च मायं च लोभं च अणुवीइ निट्ठाभासी निसम्मभासी अतुरियभासी विवेगभासी समियाए संजए भासं भासिज्जा ५ ॥ एवं खलु० सया जइ (सू० १४०) त्तिबेमि ॥ २–१–४–२ ॥ भाषाऽध्ययनं चतुर्थम् ॥ २–१–४ ॥

स भिक्षुः क्रोधादिकं वान्त्वैवंभूतो भवेत्, तद्यथा–अनुविचिन्त्य निष्ठाभाषी निशम्यभाषी अत्वरितभाषी विवेकभाषी भाषासमित्युपेतो भाषां भाषेत, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ चतुर्थमध्ययनं भाषाजाताख्यं २–१–४ समाप्तमिति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३९२ ॥

अथ वस्त्रैषणाऽध्ययनम् ।

श्रुतस्कं० २ चूलिका १ वस्त्रैष० ५ उद्देशः १

चतुर्थाध्ययनानन्तरं पञ्चममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तराध्ययने भाषासमितिः प्रतिपादिता, तदनन्तरमेषणासमितिर्भवतीति सा वस्त्रगता प्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि उपक्रमादीनि भवन्ति, तत्रोपक्रमान्तर्गतोऽध्ययनार्थाधिकारो वस्त्रैषणा प्रतिपाद्येति, उद्देशार्थाधिकारदर्शनार्थं तु निर्युक्तिकार आह—

पढमे गहणं बीए धरणं पगयं तु दव्ववत्थेणं । एमेव होइ पायं भावे पायं तु गुणधारी ॥ ३१५ ॥

प्रथमे उद्देशके वस्त्रग्रहणविधिः प्रतिपादितः, द्वितीये तु धरणविधिरिति ॥ नामनिष्पन्ने तु निक्षेपे वस्त्रैषणेति, तत्र वस्त्रस्य नामादिश्चतुर्विधो निक्षेपः, तत्रापि नामस्थापने क्षुण्णे, द्रव्यवस्त्रं त्रिधा, तद्यथा—एकेन्द्रियनिष्पन्नं कार्पासिकादि, विकलेन्द्रियनिष्पन्नं चीनांशुकादि, पञ्चेन्द्रियनिष्पन्नं कम्बलरत्नादि, भाववस्त्रं त्वष्टादशशीलाङ्गसहस्राणीति, इह तु द्रव्यवस्त्रैषणाधिकारः, तदाह निर्युक्तिकारः—'पगयं तु दव्ववत्थेणं'ति । वस्त्रस्येव पात्रस्यापि निक्षेप इति मन्यमानोऽत्रैव पात्रस्यापि निक्षेपातिनिर्देशं निर्युक्तिकारो गाथापश्चार्द्धेनाह—'एवमेव' इति वस्त्रवत्पात्रस्यापि चतुर्विधो निक्षेपः, तत्र द्रव्यपात्रमेकेन्द्रियादिनिष्पन्नं, भावपात्रं साधुरेव गुणधारीति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्— ॥ ३९२ ॥

से भि० अभिकंखिज्जा वत्थं एसित्तए, से जं पुण वत्थं जाणिज्जा, तंजहा—जंगियं वा भंगियं वा साणियं वा पोत्तगं वा खोमियं वा तूलकडं वा, तहप्पगारं वत्थं वा जे निग्गंथे तरुणे जुगवं बलवं अप्पायंके थिरसंघयणे से एगं वत्थं धारिज्जा नो बीयं, जा निग्गंथी सा चत्तारिसंघाडीओ धारिज्जा, एगं दुहत्थवित्थारं दो तिहत्थवित्थाराओ एगं चउहत्थवित्थारं, तहप्पगारेहिं वत्थेहिं असंधिज्जमाणेहिं, अह पच्छा एगमेगं संसिविज्जा ॥ (सू० १४१)

स भिक्षुरभिकाङ्क्षेद्वस्त्रमन्वेषितुं तत्र यत्पुनरेवंभूतं वस्त्रं जानीयात्, तद्यथा—'जंगियं'ति जङ्गमोष्ट्राद्यूर्णानिष्पन्नं, तथा 'भंगियं'ति नानाभङ्गिकविकलेन्द्रियलालानिष्पन्नं, तथा 'साणयं'ति सणवल्कलनिष्पन्नं 'पोत्तगं'ति ताड्यादिपत्रसङ्घातनिष्पन्नं 'खोमियं'ति कार्पासिकं 'तूलकडं'ति अर्कादितूलनिष्पन्नम्, एवं तथाप्रकारमन्यदपि वस्त्रं धारयेदित्युत्तरेण सम्बन्धः । येन साधुना यावन्ति धारणीयानि तद्दर्शयति—तत्र यस्तरुणो निर्ग्रन्थः—साधुर्यौवने वर्त्तते 'बलवान्' समर्थः 'अल्पातङ्कः' अरोगी 'स्थिरसंहननः' दृढकायो दृढधृतिश्च, स एवंभूतः साधुरेकं 'वस्त्रं' प्रावरणं त्वक्त्राणार्थं धारयेत् नो द्वितीयमिति, यदपरमाचार्यादिकृते बिभर्त्ति तस्य स्वयं परिभोगं न कुरुते, यः पुनर्बालो दुर्बलो वृद्धो वा यावदल्पसंहननः स यथासमाधि द्व्यादिकमपि धारयेदिति, जिनकल्पिकस्तु यथाप्रतिज्ञमेव धारयेत् न तत्रापवादोऽस्ति । या पुनर्निर्ग्रन्थी सा चतस्रः संघाटिका धारयेत्, तद्यथा—एकां द्विहस्तपरिमाणां यां प्रतिश्रये तिष्ठन्ती प्रावृणोति, द्वे त्रिहस्तपरिमाणे, तत्रैकामुज्वलां भिक्षाकाले प्रावृणोति, अपरां बहिर्भूमिगमनावसर इति, तथाऽपरां चतुर्हस्तविस्तरां समवसरणादौ सर्वशरीरप्रच्छादिकां प्रावृणोति, तस्याश्च यथाकृताया अलाभे अथ पश्चादेकमेकेन सार्द्धं सीव्येदिति ॥ किञ्च—

से भि० परं अद्धजोयणमेराए वत्थपडियाo नो अभिसंधारिज्ज गमणाए ॥ (सू० १४२)

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ३९३ ॥

स भिक्षुर्वस्त्रार्थमर्द्धयोजनात्परतो गमनाय मनो न विदध्यादिति ॥

से भि० से जं० अस्सिंपडियाए एगं साहम्मियं समुद्दिस्स पाणाइं जहा पिंडेसणाए भाणियव्वं ॥ एवं बहवे साहम्मिया एगं साहम्मिणिं बहवे साहम्मिणीओ बहवे समणमाहण० तहेव पुरिसंतरकडा जहा पिंडेसणाए ॥ (सू० १४३)

श्रुतस्कं० २ चूलिका १ वस्त्रैष० ५ उद्देशः १

सूत्रद्वयमाधाकर्मिकोद्देशेन पिण्डैषणावन्नेयमिति ॥ साम्प्रतमुत्तरगुणानधिकृत्याह—

से भि० से जं० असंजए भिक्खुपडियाए कीयं वा धोयं वा रत्तं वा घट्टं वा मट्ठं वा संपधूमियं वा तहप्पगारं वत्थं अपुरिसंतरकडं जाव नो०, अह पु० पुरिसं० जाव पडिगाहिज्जा ॥ (सू० १४४)

'साधुप्रतिज्ञया' साधुमुद्दिश्य गृहस्थेन क्रीतधौतादिकं वस्त्रमपुरुषान्तरकृतं न प्रतिगृह्णीयात्, पुरुषान्तरस्वीकृतं तु गृह्णीयादिति पिण्डार्थः ॥ अपि च—

से भिक्खू वा २ से जाइं पुण वत्थाइं जाणिज्जा विरूवरूवाइं महद्धणमुल्लाइं, तं०—आईणगाणि वा सहिणाणि वा सहिणकल्लाणाणि वा आयाणि वा कायाणि वा खोमियाणि वा दुगुल्लाणि वा पट्टाणि वा मलयाणि वा पन्नुन्नाणि वा अंसुयाणि वा चीणंसुयाणि वा देसरागाणि वा अमिलाणि वा गज्जफलाणि वा फालियाणि वा कोयवाणि वा कंबलगाणि वा पावराणि वा, अन्नयराणि वा तह० वत्थाइं महद्धणमुल्लाइं लाभे संते नो पडिगाहिज्जा ॥ से भि० आइण्णपावरणाणि वत्थाणि जाणिज्जा, तं०—उद्दाणि वा पेसाणि वा पेसलाणि वा किण्हमिगाईणगाणि वा नीलमिगाईणगाणि वा गोरमि० कणगाणि ॥ ३९३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा कणगकंताणि वा कणगपट्टाणि वा कणगखइयाणि वा कणगफुसियाणि वा वग्घाणि वा विवग्घाणि वा [विगाणि वा] आभरणाणि वा आभरणविचित्ताणि वा, अन्नयराणि तह० आईणपाउरणाणि वत्थाणि लाभे संते नो० ॥ (सू० १४५)

स भिक्षुर्यानि पुनर्महाधनमूल्यानि जानीयात्, तद्यथा—'आजिनानि' मूषकादिचर्मनिष्पन्नानि श्लक्ष्णानि—सूक्ष्माणि च तानि वर्णच्छव्यादिभिश्च कल्याणानि—शोभनानि वा सूक्ष्मकल्याणानि, 'आयाणि'त्ति क्वचिद्देशविशेषेऽजाः सूक्ष्मरोमत्वत्यो भवन्ति तत्पक्ष्मनिष्पन्नानि आजकानि भवन्ति, तथा क्वचिद्देशे इन्द्रनीलवर्णः कर्पासो भवति तेन निष्पन्नानि कायकानि, 'क्षौमिकं' सामान्यकार्पासिकं 'दुकूलं' गौडविषयविशिष्टकार्पासिकं पट्टसूत्रनिष्पन्नानि पट्टानि 'मलयानि' मलयजसूत्रोत्पन्नानि 'पत्तुण्णं'ति वल्कलतन्तुनिष्पन्नम् अंशुकचीनांशुकादीनि नानादेशेषु प्रसिद्धाभिधानानि, तानि च महार्घमूल्यानीतिकृत्वा ऐहिकामुष्मिकापायभयाद्लाभे सति न प्रतिगृह्णीयादिति ॥ स भिक्षुर्यानि पुनरेवंभूतानि अजिननिष्पन्नानि 'प्रावरणीयानि' वस्त्राणि जानीयात्, तद्यथा—'उद्दाणि व'त्ति उद्राः—सिन्धुविषये मत्स्यास्तत्सूक्ष्मचर्मनिष्पन्नानि उद्राणि 'पेसाणि'त्ति सिन्धुविषय एव सूक्ष्मचर्माणः पशवस्तच्चर्मनिष्पन्नानीति 'पेसलाणि'त्ति तच्चर्मसूक्ष्मपक्ष्मनिष्पन्नानि कृष्णनीलगौरमृगाजिनानि—प्रतीतानि 'कनकानि च' इति कनकरसच्छुरितानि, तथा कनकस्येव कान्तिर्येषां तानि कनककान्तीनि तथा कृतकनकरसपट्टानि कनकपट्टानि एवं 'कनकखचितानि' कनकरससंबकाङ्कितानि कनकस्पृष्टानि तथा व्याघ्रचर्माणि एवं 'वग्घाणि'त्ति व्याघ्रचर्मविचित्रितानि 'आभरणानि' आभरणप्रधानानि 'आभरणविचित्राणि' गिरिविडकादिविभूषितानि अन्यानि वा तथाप्रकाराण्यजिनप्रावरणानि लाभे सति न प्रतिगृह्णीयादिति ॥ साम्प्रतं वस्त्रग्रहणाभिग्रहविशेषमधिकृत्याह—

इच्चेइयाइं आयतणाइं उवाइकम्म अह भिक्खू जाणिज्जा चउहिं पडिमाहिं वत्थं एसित्तए, तत्थ खलु इमा पढमा पडिमा, से भि० २ उद्देसिय वत्थं जाइज्जा, तं०—जंगियं वा जाव तूलकडं वा, तह० वत्थं सयं वा ण जाइज्जा, परो० फासुयं० पडि०, पढमा पडिमा १ । अहावरा दुच्चा पडिमा—से भि० पेहाए वत्थं जाइज्जा गाहावई वा० कम्मकरी वा से पुव्वामेव आलोइज्जा—आउसोत्ति वा २ दाहिसि मे इत्तो अन्नयरं वत्थं?, तह्प्प० वत्थं सयं वा० परो० फासुयं एस० लाभे० पडि०, दुच्चा पडिमा २ । अहावरा तच्चा पडिमा—से भिक्खू वा० से जं पुण० तं अंतरिज्जं वा उत्तरिज्जं वा तह्प्पगारं वत्थं सयं० पडि०, तच्चा पडिमा ३ । अहावरा चउत्था पडिमा—से० उज्झियधम्मियं वत्थं जाइज्जा जं चऽन्ने बहवे समण० वणीमगा नावकंखंति तह्प्प० उज्झिय० वत्थं सयं० परो० फासुयं जाव प०, चउत्थापडिमा ४ ॥ इच्चेयाणं चउण्हं पडिमाणं जहा पिंडेसणाए ॥ सिया णं एताए एसणाए एसमाणं परो वइज्जा—आउसंतो समणा! इज्जाहि तुमं मासेण वा दसराएण वा पंचराएण वा सुते सुतरे वा तो ते वयं अन्नयरं वत्थं दाहामो, एयप्पगारं निग्घोसं सुच्चा नि० से पुव्वामेव आलोइज्जा—आउसोत्ति वा! २ नो खलु मे कप्पइ एयप्पगारं संगारं पडिसुणित्तए, अभिकंखसि मे दाउं इयाणिमेव दलयाहि, से णेवं वयंतं परो वइज्जा—आउ० स०! अणुगच्छाहि तो ते वयं अन्न० वत्थं दाहामो, से पुव्वामेव आलोइज्जा—आउसोत्ति! वा २ नो खलु मे कप्पइ संगारवयणे पडिसुणित्तए०, से सेवं वयंतं परो णेया वइज्जा—आउसोत्ति वा भइणित्ति वा! आहरेयं वत्थं समणस्स दाहामो, अवियाइं वयं पच्छावि अप्पणो सयट्ठाए पाणाइं ४ समारंभ समुद्दिस्स जाव चेइस्सामो, एयप्पगारं निग्घोसं सुच्चा निसम्म तह्प्पगारं वत्थं अफासुअं जाव नो पडिगाहिज्जा ॥ सिआ णं परो नेता वइज्जा—आउसोत्ति! वा २ आहर एयं वत्थं सिणाणे वा ४ आघंसित्ता वा प० समणस्स णं दाहामो, एयप्पगारं निग्घोसं सुच्चा नि० से पुव्वामेव आउ० भ०! मा एयं तुमं वत्थं सिणाणेण वा जाव पघंसाहि वा, अभि० एमेव दलयाहि, से सेवं वयंतस्स परो सिणाणेण वा पघंसित्ता दलइज्जा, तह्प्प० वत्थं अफा० नो प० ॥ से णं परो नेता वइज्जा०—भ०! आहर एयं वत्थं सीओदगवियडेण वा २ उच्छोलेत्ता वा पहोलेत्ता वा समणस्स णं दाहामो०, एय० निग्घोसं तहेव नवरं मा एयं तुमं वत्थं सीओदग० उसि० उच्छोलेहि वा पहोलेहि वा, अभिकंखसि, सेसं तहेव जाव नो पडिगाहिज्जा ॥ से णं परो ने० आ० भ०! आहरेयं वत्थं कंदाणि वा जाव हरियाणि वा विसोहित्ता समणस्स णं दाहामो, एय० निग्घोसं तहेव, नवरं मा एयाणि तुमं कंदाणि वा जाव विसोहेहि, नो खलु मे कप्पइ एयप्पगारे वत्थे पडिगाहित्तए, से सेवं वयंतस्स परो जाव विसोहित्ता दलइज्जा, तह्प्प० वत्थं अफासुअं नो प० ॥ सिया से परो नेता वत्थं निसिरिज्जा, से पुव्वा० आ० भ०! तुमं चेव णं संतियं वत्थं अंतोअंतेणं पडिलेहिस्सामि, केवली बूया आ०, वत्थंतेण वा सिया कुंडले वा गुणे वा हिरण्णे वा सुवण्णे वा मणी वा जाव रयणावली वा पाणे वा बीए वा हरिए वा, अह भिक्खू णं पु० जं पुव्वामेव वत्थं अंतोअंतेण पडिलेहिज्जा ॥ (सू० १४६)

इत्येतानि' पूर्वोक्तानि वक्ष्यमाणानि वाऽऽयतनान्यतिक्रम्याथ भिक्षुश्चतसृभिः 'प्रतिमाभिः' वक्ष्यमाणैरभिग्रहविशेषै-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्त्रमन्वेष्टुं जानीयात्, तद्यथा—'उद्दिष्टं' प्राक् सङ्कल्पितं वस्त्रं याचिष्ये, प्रथमा प्रतिमा १, तथा 'प्रेक्षितं' दृष्टं सद् वस्त्रं याचिष्ये नापरमिति द्वितीया २, तथा अन्तरपरिभोगेन उत्तरीयपरिभोगेन वा शय्यातरेण परिभुक्तप्रायं वस्त्रं ग्रहीष्यामीति तृतीया ३, तथा तदेवोत्सृष्टधार्मिकं वस्त्रं ग्रहीष्यामीति चतुर्थी प्रतिमेति ४ सूत्रचतुष्टयसमुदायार्थः। आसां चतसृणां प्रतिमानां शेषो विधिः पिण्डैषणावत्ज्ञेय इति ॥ किञ्च—'स्यात्' कदाचित् 'णम्' इति वाक्यालङ्कारे 'एतया' अनन्तरोक्तया वस्त्रैषणया वस्त्रमन्वेषयन्तं साधुं परो वदेद्, यथा—आयुष्मन्! श्रमण! त्वं मासादौ गते समागच्छ ततोऽहं वस्त्रादिकं दास्यामि, इत्येवं तस्य न शृणुयात्, शेषं सुगमं यावदिदानीमेव ददस्वेति, एवं वदन्तं साधुं परो ब्रूयाद्, यथा—अनुगच्छ तावत्पुनः स्तोकवेलायां समागताय दास्यामि, इत्येतदपि न प्रतिशृणुयाद्, वदेच्चेदानीमेव ददस्वेति, तदेवं पुनरपि वदन्तं साधुं 'परो' गृहस्थो नेताऽपरं भगिन्यादिकमाहूय वदेद् यथाऽऽनयैतद्, वस्त्रं येन श्रमणाय दीयते, वयं पुनरात्मार्थं भूतोपमर्देनापरं करिष्याम इति, एतत्प्रकारं वस्त्रं पश्चात्कर्मभयाल्लाभे सति न प्रतिगृह्णीयादिति ॥ तथा—स्यात्पर एवं वदेद्, यथा—स्नानादिना सुगन्धिद्रव्येणाघर्षणादिकां क्रियां कृत्वा दास्यामि, तदेतन्निशम्य प्रतिषेधं विदध्यात्, अथ प्रतिषिद्धोऽप्येवं कुर्यात्, ततो न प्रतिगृह्णीयादिति ॥ एवमुदकादिना धावनाऽऽदिसूत्रमपि ॥ स परो वदेद्याचितः सन् यथा कन्दादीनि वस्त्रादपनीय दास्यामीति, अत्रापि पूर्ववन्निषेधादिकश्चर्च इति ॥ किञ्च—स्यात्परो याचितः सन् कदाचिद्वस्त्रं 'निसृजेत्' दद्यात्, तं च ददमानमेवं ब्रूयाद्, यथा—त्वदीयमेवाहं वस्त्रमन्तोपान्तेन प्रत्युपेक्षिष्ये, नैवा-

प्रत्युपेक्षितं गृह्णीयाद्, यतः केवली ब्रूयात्कर्मोपादानमेतत्, किमिति?, यतस्तत्र किञ्चित्कुण्डलादिकमाभरणजातं बद्धं भवेत्, सचित्तं वा किंचिद् भवेद्, अतः साधूनां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यद्वस्त्रं प्रत्युपेक्ष्य गृह्णीयादिति ॥ किञ्च—

से भि० से जं० सअंडं० ससंताणं तहप्प० वत्थं अफा० नो प० ॥ से भि० से जं अप्पंडं जाव संताणगं अनलं अथिरं अधुवं अधारणिज्जं रोइज्जंतं न रुचइ तह अफा० नो प० ॥ से भि० से जं० अप्पंडं जाव संताणगं अलं थिरं धुवं धारणिज्जं रोइज्जंतं रुचइ, तह० वत्थं फासु० पडि० ॥ से भि० नो नवए मे वत्थेत्तिकट्टु नो बहुदेसिएण सिणाणेण वा जाव पघंसिज्जा ॥ से भि० नो नवए मे वत्थेत्तिकट्टु नो बहुदे० सीओदगवियडेण वा २ जाव पहोइज्जा ॥ से भिक्खू वा २ दुब्भिगंधे मे वत्थित्तिकट्टु नो बहु० सिणाणेण तहेव बहुसीओ० उसिण० आलावओ ॥ (सू० १४७)

स भिक्षुर्यत्पुनः साण्डादिकं वस्त्रं जानीयात् तन्न प्रतिगृह्णीयादिति ॥ स भिक्षुर्यत्पुनरेवंभूतं वस्त्रं जानीयात्, तद्यथा—अल्पाण्डं यावदल्पसन्तानकं किन्तु 'अनलम्' अभीष्टकार्यासमर्थं हीनादित्वात्, तथा 'अस्थिरं' जीर्णम् 'अध्रुवं' स्वल्पकालानुज्ञापनात्, तथा 'अधारणीयम्' अप्रशस्तप्रदेशसञ्ज्ञनादिकलङ्काङ्कितत्वात्, तथा चोक्तम्—"चत्तारि देविया भागा, दो य भागा य माणुसा। आसुरा य दुवे भागा, मज्झे वत्थस्स रक्खसो ॥ १ ॥ देविएसुत्तमो लाभो, माणुसेसु अ मज्झिमो। आसुरेसु अ गेलन्नं, मरणं जाण रक्खसे ॥ २ ॥" स्थापना चेयम् ॥ किञ्च—"लक्खणहीणो उवही उवहणई

१ चत्वारो दैविका भागा द्वौ च भागौ च मानुषौ। आसुरौ च द्वौ भागौ मध्ये वस्त्रस्य राक्षसौ ॥ १ ॥ दैविकेभूतमो लाभो मानुष्ययोश्च मध्यमः। आसुरोऽन्त्यः ग्लानत्वं मरणं जानीहि राक्षसे ॥ २ ॥ २ लक्षणहीन उपधिरुपहन्ति ज्ञानदर्शनचारित्राणि.

नाणदंसणचरित्तं" इत्यादि, तदेवंभूतमप्रायोग्यं 'रोच्यमानं' प्रशस्यमानं दीयमानमपि वा दात्रा न रोचते, साधवे न कल्पत इत्यर्थः ॥ एतेषां चानलादीनां चतुर्णां पदानां षोडश भङ्गा भवन्ति, तत्राद्याः पञ्चदशाशुद्धाः, शुद्धस्त्वेकः षोडशस्तमधिकृत्य सूत्रमाह—स भिक्षुर्यत्पुनरेवंभूतं वस्त्रं चतुष्पदविशुद्धं जानीयात्तच्च लाभे सति गृह्णीयादिति पिण्डार्थः ॥ किञ्च—स भिक्षुः 'नवम्' अभिनवं वस्त्रं मम नास्तीतिकृत्वा ततः 'बहुदेश्येन' ईषद्बहुना 'स्नानादिकेन' सुगन्धिद्रव्येणाघृष्य प्रघृष्य वा नो शोभनत्वमापादयेदिति ॥ तथा—स भिक्षुः 'नवम्' अभिनवं वस्त्रं मम नास्तीतिकृत्वा ततस्तस्यैव 'नो' नैव शीतोदकेन बहुशो न धावनादि कुर्यादिति ॥ अपि च- स भिक्षुर्यद्यपि मलोपचितत्वाद्दुर्गन्धि वस्त्रं स्यात् तथाऽपि तदपनयनार्थं सुगन्धिद्रव्योदकादिना नो धावनादि कुर्याद् गच्छनिर्गतः, तदन्तर्गतस्तु यतनया प्रासुकोदकादिना लोकोपघातसंसक्तिभयात् मलापनयनार्थं कुर्यादपीति ॥ धौतस्य प्रतापनविधिमधिकृत्याह—

से भिक्खू वा० अभिकंखिज्ज वत्थं आयावित्तए वा प०, तहप्पगारं वत्थं नो अणंतरहियाए जाव पुढवीए संताणए आयाविज्ज वा प० ॥ से भि० अभि० वत्थं आ० प० त० वत्थं थूणंसि वा गिहेलुगंसि वा उसुयालंसि वा कामजलंसि वा अन्नयरे तहप्पगारे अंतलिक्खजाए दुब्बद्धे दुन्निक्खित्ते अणिकंपे चलाचले नो आ० नो प०॥ से भिक्खू वा० अभि० आयावित्तए वा तह० वत्थं कुलियंसि वा भित्तंसि वा सिलंसि वा लेलुंसि वा अन्नयरे वा तह० अंतलि० जाव नो आयाविज्ज वा प० ॥ से भि० वत्थं आया० प० तह० वत्थं खंधंसि वा मं० मा० पासा० ह० अन्नयरे वा तह० अंतलि० नो आयाविज्ज वा० प० ॥ से० तमायाए एगंतमवक्कमिज्जा २ अहे झामथंडिल्लंसि वा जाव अन्नयरंसि वा तहप्पगारंसि थंडिल्लंसि पडिले-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिय २ पमज्जिय २ तओ सं० वत्थं आयाविज्ज वा पया०, एवं खलु० सया जइज्जासि (सू० १४८) त्तिबेमि ॥ २-१-५-१ ॥ वत्थेसणस्स पढमो उद्देसो समत्तो ॥

स भिक्षुरव्यवहितायां भूमौ वस्त्रं नातापयेदिति॥ किञ्च-स भिक्षुर्यद्यभिकाङ्क्षयेद्वस्त्रमातापयितुं ततः स्थूणादौ चलाचले स्थूणादिवस्त्रपतनभयान्नातापयेत्, तत्र गिहेलुकः-उम्बरः 'उसूयालं' उदूखलं 'कामजलं' स्नानपीठमिति ॥ स भिक्षुर्भित्तिशिलादौ पतनादिभयाद्वस्त्रं नातापयेदिति ॥ स भिक्षुः स्कन्धमञ्चकप्रासादादावन्तरिक्षजाते वस्त्रं पतनादिभयादेव नातापयेदिति ॥ यथा चातापयेत्तथा चाह-स भिक्षुस्तद्वस्त्रमादाय स्थण्डिलादि प्रत्युपेक्ष्य चक्षुषा प्रमृज्य च रजोहरणादिना तत आतापनादिकं कुर्यादिति, एतत्तस्य भिक्षोः सामग्र्यमिति ॥ पञ्चमस्य प्रथमोद्देशकः समाप्तः ॥ २-१-५-१ ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशके वस्त्रग्रहणविधिरभिहितस्तदनन्तरं धरणविधिरभिधीयते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

से भिक्खू वा० अहेसणिज्जाइं वत्थाइं जाइज्जा अहापरिग्गहियाइं वत्थाइं धारिज्जा नो धोइज्जा नो रएज्जा नो धोयरत्ताइं वत्थाइं धारिज्जा अपलिउंचमाणो गामंतरेसु० ओमचेलिए, एयं खलु वत्थधारिस्स सामग्गियं ॥ से भि० गाहावइकुलं पविसिउकामे सव्वं चीवरमायाए गाहावइकुलं निक्खमिज्ज वा पविसिज्ज वा, एवं बहिय विहारभूमिं वा वियारभूमिं वा गामाणुगामं वा

आ. सू. ६७

दूइज्जिज्जा, अह पु० तिव्वदेसियं वा वासं वासमाणं पेहाए जहा पिंडेसणाए नवरं सव्वं चीवरमायाए ॥ (सू० १४९)

श्रीआचाराङ्गवृत्तिः (शी०)

॥ २९७ ॥

श्रुतस्कं० २ चूलिका १ वस्त्रैष० ५ उद्देशः २

स भिक्षुः 'यथैषणीयानि' अपरिकर्माणि वस्त्राणि याचेत यथापरिगृहीतानि च धारयेत्, न तत्र किञ्चित्कुर्यादिति दर्शयति, तद्यथा-न तद्वस्त्रं गृहीतं सत् प्रक्षालयेत् नापि रञ्जयेत् तथा नापि वाकुशिकतया धौतरक्तानि धारयेत्, तथाभूतानि न गृह्णीयादित्यर्थः, तथाभूताधौतारक्तवस्त्रधारी च ग्रामान्तरे गच्छन् 'अपलिउंचमाणे'त्ति अगोपयन् सुखेनैव गच्छेद्, यतोऽसौ—'अवमचेलिकः' असारवस्त्रधारी, इत्येतत्तस्य भिक्षोर्वस्त्रधारिणः 'सामग्र्यं' सम्पूर्णो भिक्षुभावः यदेवंभूतवस्त्रधारणमिति, एतच्च सूत्रं जिनकल्पिकोद्देशेन द्रष्टव्यं, वस्त्रधारित्वविशेषणाद् गच्छान्तर्गतेऽपि चाविरुद्धमिति ॥ किञ्च-से इत्यादि पिण्डैषणावन्नेयं, नवरं तत्र सर्वमुपधिम्, अत्र तु स सर्वं चीवरमादायेति विशेषः ॥ इदानीं प्रातिहारिकोपहृतवस्त्रविधिमधिकृत्याह—

से एगइओ मुहुत्तगं २ पाडिहारियं वत्थं जाइज्जा जाव एगाहेण वा दु० ति० चउ० पंचाहेण वा विप्पवसिय २ उवागच्छिज्जा, नो तह वत्थं अप्पणो गिण्हिज्जा नो अन्नमन्नस्स दिज्जा, नो पामिच्चं कुज्जा, नो वत्थेण वत्थपरिणामं करिज्जा, नो परं उवसंकमित्ता एवं वइज्जा—आउ० समणा! अभिकंखसि वत्थं धारित्तए वा परिहरित्तए वा?, थिरं वा संतं नो पलिच्छिंदिय २ परट्ठविज्जा, तहप्पगारं वत्थं ससंधियं वत्थं तस्स चेव निसिरिज्जा नो णं साइज्जिज्जा ॥ से एगइओ एयप्पगारं निग्घोसं सुच्चा नि० जे भयंतारो तहप्पगाराणि वत्थाणि ससंधियाणि मुहुत्तगं २ जाव एगाहेण वा० ५ विप्पवसिय २ उवागच्छंति, तह० वत्थाणि नो अप्पणा गिण्हंति नो अन्नमन्नस्स दलयंति तं चेव जाव नो साइज्जंति, बहुवयणेण भाणियव्वं, से हंता अहमवि मुहुत्तगं पाडिहारियं वत्थं जाइत्ता जाव एगाहेण वा ५ विप्पवसिय २ उवागच्छस्सामि, अवियाइं एवं ममेव सिया, माइट्ठाणं संफासे नो एवं करिज्जा ॥ (सू० १५०)

॥ २९७ ॥

स कश्चित्साधुरपरं साधुं मुहूर्त्तादिकालोद्देशेन प्रातिहारिकं वस्त्रं याचेत, याचित्वा चैकाक्येव ग्रामान्तरादौ गतः, तत्र चासावेकाहं यावत्पञ्चाहं वोषित्वाऽऽगतः, तस्य चैकाकित्वात्स्वपतो वस्त्रमुपहतं, तच्च तथाविधं वस्त्रं तस्य समर्पयतोऽपि वस्त्रस्वामी न गृह्णीयात्, नापि गृहीत्वाऽन्यस्मै दद्यात्, नाप्युच्छिन्नं दद्याद्, यथा गृहाणेदं, त्वं पुनः कतिभिरहोभिर्मह्यमान्यद्दद्यात्, नापि तदैव वस्त्रेण परिवर्त्तयेत्, न चापरं साधुमुपसंक्रम्यैतद्ददेत्, तद्यथा-आयुष्मन्! श्रमण! 'अभिकाङ्क्षसि' इच्छस्येवंभूतं वस्त्रं धारयितुं परिभोक्तुं चेति?, यदि पुनरेकाकी कश्चिद्गच्छेत्तस्य तदुपहतं वस्त्रं समर्पयेत् न स्थिरं-दृढं सत् 'परिच्छिन्द्य परिच्छिन्द्य' खण्डशः २ कृत्वा 'परिष्ठापयेत्' त्यजेत्, तथाप्रकारं वस्त्रं 'ससंधिय'न्ति उपहतं स्वतो वस्त्रस्वामी 'नास्वादयेत्' न परिभुञ्जीत, अपि तु तस्यैवोपहन्तुः समर्पयेत्, अन्यस्मै वैकाकिनो गन्तुः समर्पयेदिति। एवं बहुवचनेनापि नेयमिति ॥ किञ्च—'सः' भिक्षुः 'एकः' कश्चिदेवं साध्वाचारमवगम्य ततोऽहमपि प्रातिहारिकं वस्त्रं मुहूर्त्तादिकालमुद्दिश्य याचित्वाऽन्यत्रैकाहादिना वासेनोपहनिष्यामि, ततस्तद्वस्त्रं ममैव भविष्यतीत्येवं मातृस्थानं संस्पृशेत्, न चैतत्कुर्यादिति ॥ तथा—

से भि० नो वण्णमंताइं वत्थाइं विवण्णाइं करिज्जा विवण्णाइं न वण्णमंताइं करिज्जा, अन्नं वा वत्थं लभिस्सामित्तिकट्टु नो अन्नमन्नस्स दिज्जा, नो पामिच्चं कुज्जा, नो वत्थेण वत्थपरिणामं कुज्जा, नो परं उवसंकमित्तु एवं वदेज्जा—आउसो०!

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सममिकंखसि मे वत्थं धारित्तए वा परिहरित्तए वा ?, थिरं वा संतं नो पलिच्छिंदिय २ परिट्ठविज्जा, जहा मेयं वत्थं पावगं परो मन्नइ, परं च णं अदत्तहारी पडिपहे पेहाए तस्स वत्थस्स नियाणाय नो तेसिं भीओ उम्मग्गेणं गच्छिज्जा, जाव अप्पुस्सुए, तओ संजयामेव गामाणुगामं दूइज्जिज्जा ॥ से भिक्खू वा० गामाणुगामं दूइज्जमाणे अंतरा से विहं सिया, से जं पुण विहं जाणिज्जा इमंसि खलु विहंसि बहवे आमोसगा वत्थपडियाए संपिंडिया गच्छेज्जा, णो तेसिं भीओ उम्मग्गेणं गच्छेज्जा जाव गामा० दूइज्जेज्जा ॥ से भि० दूइज्जमाणे अंतरा से आमोसगा पडियागच्छेज्जा, ते णं आमोसगा एवं वदेज्जा—आउसं० ! आहरेयं वत्थं देहि णिक्खिवाहि जहा रियाए णाणत्तं वत्थपडियाए, एयं खलु० सया जइज्जासि (सू० १५१) त्तिबेमि वत्थेसणा समत्ता ॥ २–१–५–२

स भिक्षुर्वर्णवन्ति वस्त्राणि चौरादिभयान्नो विगतवर्णानि कुर्यात्, उत्सर्गतस्तादृशानि न ग्राह्याण्येव, गृहीतानां वा परिकर्म न विधेयमिति तात्पर्यार्थः, तथा विवर्णानि न शोभनवर्णानि कुर्यादित्यादि सुगममिति ॥ नवरं 'विहं'ति अटवीप्रायः पन्थाः । तथा तस्य भिक्षोः पथि यदि 'आमोषकाः' चौरा वस्त्रग्रहणप्रतिज्ञया समागच्छेयुरित्यादि पूर्वोक्तं यावदेतत्तस्य भिक्षोः सामग्र्यमिति ॥ पञ्चममध्ययनं समाप्तम् ॥ २–१–५ ॥

अथ पात्रैषणाख्यं षष्ठमध्ययनम् ।

पञ्चमाध्ययनानन्तरं षष्ठमारभ्यते, अस्य चायमभिसम्बन्धः—इह प्रथमेऽध्ययने पिण्डविधिरुक्तः, स च वसतावागमोक्तेन विधिना भोक्तव्य इति द्वितीये वसतिविधिरभिहितः, तदन्वेषणार्थं च तृतीये ईर्यासमितिः प्रतिपादिता, पिण्डाद्यर्थं प्रवृत्तेन कथं भाषितव्यमिति चतुर्थे भाषासमितिरुक्ता, स च पटलकैर्विना न ग्राह्य इति तदर्थं पञ्चमे वस्त्रैषणा प्रतिपादिता, तदधुना पात्रेणापि विना पिण्डो न ग्राह्य इत्यनेन सम्बन्धेन पात्रैषणाऽध्ययनमायातम्, अस्य च चत्वार्यनुयोगद्वाराणि भवन्ति, तत्र नामनिष्पन्ने निक्षेपे पात्रैषणाऽध्ययनम्, अस्य च निक्षेपोऽर्थाधिकारश्चानन्तराध्ययन एव लाघवार्थं निर्युक्तिकृताऽभिहितः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

से भिक्खू वा अभिकंखिज्जा पायं एसित्तए, से जं पुण पादं जाणिज्जा, तंजहा—अलाउयपायं वा दारुपायं वा मट्टियापायं वा, तहप्पगारं पायं जे निग्गंथे तरुणे जाव थिरसंघयणे से एगं पायं धारिज्जा नो बिइयं ॥ से भि० परं अद्धजोयणमेराए पायपडियाए नो अभिसंधारिज्जा गमणाए ॥ से भि० से जं० अस्सिं पडियाए एगं साहम्मियं समुद्दिस्स पाणाइं ४ जहा पिंडेसणाए चत्तारि आलावगा, पंचमे बहवे समण० पगणिय २ तहेव ॥ से भिक्खू वा० अस्संजए भिक्खुपडियाए बहवे समणमाहणे० वत्थेसणाऽऽलावओ ॥ से भिक्खू वा० से जाइं पुण पायाइं जाणिज्जा विरूवरूवाइं महद्धणमुल्लाइं, तं०—अयपायाणि वा तउपाया० तंबपाया० सीसगपा० हिरण्णपा० सुवण्णपा० रीरिअपाया० हारपुडपा० मणिकायकंसपाया० संखसिंगपा० दंतपा० चेलपा० सेलपा० चम्मपा० अन्नयराइं वा तह० विरूवरूवाइं महद्धणमुल्लाइं पायाइं अफासुयाइं नो० ॥ से भि० से जाइं पुण पाया० विरूव० महद्धणबंधणाइं, तं०—अयबंधणाणि वा जाव चम्मबंधणाणि वा, अन्नयराइं तहप्प० महद्धणबंधणाइं अफा० नो प० ॥ इच्चेयाइं आयतणाइं उवाइक्कम्म अह भिक्खू जाणिज्जा चउहिं पडिमाहिं पायं एसित्तए, तत्थ खलु इमा पढमा पडिमा—से भिक्खू० उद्दिसिय २ पायं जाएज्जा, तंजहा—अलाउयपायं वा ३ तह० पायं सयं वा णं जाइज्जा जाव पडि० पढमा पडिमा १ । अहावरा० से० पेहाए पायं जाइज्जा, तं०—गाहावइं वा कम्मकरिं वा से पुव्वामेव आलोइज्जा, आउ० भ० ! दाहिसि मे इत्तो अन्नयरं पादं तं०—लाउयपायं वा ३, तह० पायं सयं वा जाव पडि०, दुच्चा पडिमा २ । अहा० से भि० से जं पुण पायं जाणिज्जा संगइयं वा वेजइयंतियं वा तहप्प० पायं सयं वा जाव पडि०, तच्चा पडिमा ३ । अहावरा चउत्था पडिमा—से भि० उज्झियधम्मियं जाएज्जा जावऽन्ने बहवे समणा जाव नावकंखंति तह० जाएज्जा जाव पडि०, चउत्था पडिमा ४ । इच्चेइयाणं चउण्हं पडिमाणं अन्नयरं पडिमं जहा पिंडेसणाए ॥ से णं एयाए एसणाए एसमाणं पासित्ता परो वइज्जा, आउ० स० ! एज्जासि तुमं मासेण वा जहा वत्थेसणाए, से णं परो नेता व०—आ० भ० ! आहारेयं पायं तिलेण वा घ० नव० वसाए वा अब्भंगित्ता वा तहेव सिणाणादि तहेव सीओदगाइं कंदाइं तहेव ॥ से णं परो ने०—आउ० स० ! मुहुत्तगं २ जाव अच्छाहि ताव अम्हे असणं वा उवकरेंसु वा उवक्खडेंसु वा, तो ते वयं आउसो० ! सपाणं सभोयणं पडिग्गहं दाहामो, तुच्छए पडिग्गहे दिन्ने समणस्स नो सुट्ठु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहु भवइ, से पुव्वामेव आलोइज्जा—आउ० भइ०! नो खलु मे कप्पइ आहाकम्मिए असणे वा ४ भुत्तए वा०, मा उवकरेहि मा उवक्खडेहि, अभिकंखसि मे दाउं एमेव दलयाहि, मे सेवं वयंतस्स परो असणं वा ४ उवकरित्ता उवक्खडित्ता सपाणं सभोयणं पडिग्गहगं दलइज्जा तह० पडिग्गाहगं अफासुयं जाव नो पडिगाहिज्जा ॥ सिया से परो उवणित्ता पडिग्गहगं निसिरिज्जा, से पुव्वामे० आउ० भ०! तुमं चेव णं संतियं पडिग्गाहगं अंतोअंतेणं पडिलेहिस्सामि, केवली० आयाण०, अंतो पडिग्गहगंसि पाणाणि वा बीया० हरि०, अह भिक्खूणं पु० जं पुव्वामेव पडिग्गाहगं अंतोअंतेणं पडि० सअंडाइं सव्वे आलावगा भाणियव्वा जहा वत्थेसणाए, नाणत्तं तिल्लेण वा घय० नव० वसाए वा सिणाणादि जाव अन्नयरंसि वा तहप्पगा० थंडिलंसि पडिलेहिय २ पम० २ तओ० संज० आमज्जिज्जा, एवं खलु० सया जएज्जा त्तिबेमि ॥ (सू० १५२) २–१–६–१

स भिक्षुरभिकाङ्क्षेत् पात्रमन्वेष्टुं, तत्पुनरेवं जानीयात्, तद्यथा–अलाबुकादिकं तत्र च यः स्थिरसंहननाद्युपेतः स एकमेव पात्रं बिभृयात् न च द्वितीयं, स च जिनकल्पिकादिः, इतरस्तु मात्रकसद्द्वितीयं पात्रं धारयेत्, तत्र सङ्घाटके सत्येकस्मिन् भक्तं द्वितीये पात्रे पानकं, मात्रकं त्वाचार्यादिप्रायोग्यकृतेऽशुद्धस्य वेति ॥ 'से भिक्खू' इत्यादीनि सूत्राणि सुगमानि यावन्महार्घमूल्यानि पात्राणि लाभे सत्यप्रासुकानि न प्रतिगृह्णीयादिति, नवरं 'हारपुडपाय'त्ति लोहपात्रमिति ॥ एवमयोबन्धनादिसूत्रमपि सुगमं। तथा प्रतिमाचतुष्टयसूत्राण्यपि वस्त्रैषणावत्रेयानीति, नवरं तृतीयप्रतिमायां 'संगइयं'ति दातुः स्वाङ्गिकं–परिभुक्तप्रायं 'वेजयंतियं'ति द्वित्रेषु पात्रेषु पर्यायेणोपभुज्यमानं पात्रं याचेत ॥ 'एतया' अनन्तरोक्तया

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ४०० ॥

पात्रैषणया पात्रमन्विषन्तं साधुं प्रेक्ष्य परो ब्रूयाद् भगिन्यादिकं यथा–तैलादिनाऽभ्यज्य साधवे ददस्वेत्यादि सुगममिति ॥ तथा–स नेता तं साधुमेवं ब्रूयाद्, यथा–रिक्तं पात्रं दातुं न वर्त्तत इति मुहूर्त्तकं तिष्ठ स्वं यावदशनादिकं कृत्वा पात्रकं भृत्वा ददामीत्येवं कुर्वन्तं निषेधयेत्, निषिद्धोऽपि यदि कुर्यात्ततः पात्रं न गृह्णीयादिति ॥ यथा दीयमानं गृह्णीयात्तथाऽऽह–तेन दात्रा दीयमानं पात्रमन्तोपान्तेन प्रत्युपेक्षेतेत्यादि वस्त्रवन्नेयमिति, पतत्तस्य भिक्षोः सामग्र्यमिति ॥ षष्ठस्याध्ययनस्य प्रथमोद्देशकः परिसमाप्तः ॥ २–१–६–१ ॥

श्रुतस्कं० २ चूलिका १ पात्रैष० ६ उद्देशः २

उद्देशकाभिसम्बन्धोऽयम्–इहानन्तरसूत्रे पात्रनिरीक्षणमभिहितमिहापि तच्चेष्टमभिधीयते इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्येदमादिसूत्रम्—

से भिक्खू वा २ गाहावइकुलं पिंड० पविट्ठे समाणे पुव्वामेव पेहाए पडिग्गहगं अवहट्टु पाणे पमज्जिय रयं तओ सं० गाहावइं० पिंड० निक्ख० प०, केवली०, आउ०! अंतो पडिग्गहगंसि पाणे वा बीए वा हरि० परियावज्जिज्जा, अह भिक्खूणं पु० जं पुव्वामेव पेहाए पडिग्गहं अवहट्टु पाणे पमज्जिय रयं तओ सं० गाहावइ० निक्खमिज्ज वा २ ॥ (सू० १५३)

स भिक्षुर्गृहपतिकुलं पिण्डपातप्रतिज्ञया प्रविशन् पूर्वमेव भृशं प्रत्युपेक्ष्य पतद्ग्रहं, तत्र च यदि प्राणिनः पश्येत्ततस्तान् 'आहृत्य' निष्कृष्य त्यक्त्वेत्यर्थः, तथा प्रमृज्य च रजस्ततः संयत एव गृहपतिकुलं प्रविशेद्वा निष्क्रामेद्वा इत्येषोऽपि पात्रविधिरेव, यतोऽत्रापि पूर्वं पात्रं सम्यक् प्रत्युपेक्ष्य प्रमृज्य च पिण्डो ग्राह्य इति पात्रगतैव चिन्तेति, किमिति पात्रं प्रत्युपेक्ष्य पिण्डो ग्राह्य इति?, अप्रत्युपेक्षिते तु कर्मबन्धो भवतीत्याह–केवली ब्रूयाद् यथा कर्मोपादानमेतत्, यथा च कर्मोपादानं तथा दर्शयति—'अन्तः' मध्ये पतद्ग्रहकस्य प्राणिनो–द्वीन्द्रियादयः, तथा बीजानि रजो वा 'पर्यापद्येरन्' भवेयुः, तथाभूते च पात्रे पिण्डं गृह्णतः कर्मोपादानं भवतीत्यर्थः, साधूनां पूर्वोपदिष्टमेतत्प्रतिज्ञादिकं यत्पूर्वमेव पात्रप्रत्युपेक्षणं कृत्वा तद्गतप्राणिनो रजश्चापनीय गृहपतिकुले प्रवेशो निष्क्रमणं वा कार्यमिति ॥ किञ्च—

॥ ४०० ॥

से भि० जाव समाणे सिया से परो आहट्टु अंतो पडिग्गहगंसि सीओदगं परिभाइत्ता नीहट्टु दलइज्जा, तहप्प० पडिग्गहगं परहत्थंसि वा परपायंसि वा अफासुयं जाव नो प०, से य आहच्च पडिग्गहिए सिया खिप्पामेव उदगंसि साहरिज्जा, से पडिग्गहमायाए पाणं परिट्ठविज्जा, ससिणिद्धाए वा भूमीए नियमिज्जा ॥ से० उदउल्लं वा ससिणिद्धं वा पडिग्गहं नो आमज्जिज्ज वा २ अह पु० विगओदए मे पडिग्गहए छिन्नसिणेहे तह० पडिग्गहं तओ० सं० आमज्जिज्ज वा जाव पयाविज्ज वा ॥ से भि० गाहा० पविसिउकामे पडिग्गहमायाए गाहा० पिंड० पविसिज्ज वा नि०, एवं बहिया वियारभूमीं विहारभूमीं वा गामा० दूइज्जिज्जा, तिव्वदेसीयाए जहा बिइयाए वत्थेसणाए नवरं इत्थ पडिग्गहे, एयं खलु तस्स० जं सव्वट्ठेहिं सहिए सया जएज्जासि (सू० १५४) त्तिबेमि ॥ पाएसणा सम्मत्ता ॥ २–१–६–२ ॥

स भिक्षुर्गृहपतिकुलं पिण्डपातप्रतिज्ञया प्रविष्टः सन् पानकं याचेत, तस्य च स्यात्–कदाचित्स परो गृहस्थोऽनाभोगेन प्रत्यनीकतया, तथाऽनुकम्पया विमर्षतया वा गृहान्तः–मध्य एवापरस्मिन् पतद्ग्रहे स्वकीये भाजने आहृत्य शीतोदकं 'परिभाज्य' विभागीकृत्य 'नीहट्टु'त्ति निःसार्य दद्यात्, स–साधुस्तथाप्रकारं शीतोदकं परहस्तगतं परपात्रगतं वाऽप्रासुक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिति मत्वा न प्रतिगृह्णीयात्, तद्यथाऽकामेन विमनस्केन वा प्रतिगृहीतं स्यात् ततः क्षिप्रमेव तस्यैव दातुरुदकभाजने प्रक्षिपेत्, अनिच्छतः कूपादौ समानजातीयोदके प्रतिष्ठापनविधिना प्रतिष्ठापनं कुर्यात्, तदभावेऽन्यत्र वा छायागर्त्तादौ प्रक्षिपेत्, सति चान्यस्मिन् भाजने तत् सभाजनमेव निरुपरोधिनि स्थाने मुञ्चेदिति ॥ तथा–स भिक्षुरुदकाद्रोंदेः पतद्ग्रहस्यामर्जनादि न कुर्यादीषच्छुष्कस्य तु कुर्यादिति पिण्डार्थः ॥ किञ्च–स भिक्षुः क्वचिद् गृहपतिकुलादौ गच्छन् सपतद्ग्रह एव गच्छेदित्यादि सुगमं यावदेतत्तस्य भिक्षोः सामग्र्यमिति ॥ षष्ठमध्ययनं समाप्तम् ॥ २–१–६ ॥

अथ सप्तममवग्रहप्रतिमाख्यमध्ययनम् ।

उक्तं षष्ठमध्ययनमधुना सप्तममारभ्यते, अस्य चायमभिसम्बन्धः–पिण्डशय्यावस्त्रपात्रादयोऽवग्रहमाश्रित्य भवन्तीत्यतोऽसावेव कतिविधो भवतीत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयं–यथा साधुना विशुद्धोऽवग्रहो ग्राह्य इति, नामनिष्पन्ने तु निक्षेपेऽवग्रहप्रतिमेति नाम, तत्रावग्रहस्य नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यादिचतुर्विधं निक्षेपं दर्शयितुकामो निर्युक्तिकार आह—

दव्वे खित्ते काले भावेऽवि य उग्गहो चउद्धा उ। देविंद १ रायउग्गह २ गिहवइ ३ सागरिय ४ साहम्मी ॥३१६॥

द्रव्यावग्रहः क्षेत्रावग्रहः कालावग्रहो भावावग्रहश्चेत्येवं चतुर्विधोऽवग्रहः, यदिवा सामान्येन पञ्चविधोऽवग्रहः, तद्यथा–देवेन्द्रस्य लोकमध्यवर्त्तिरुचकदक्षिणार्द्धमवग्रहः १, राज्ञश्चक्रवर्त्त्यर्दभरतादिक्षेत्रं २, गृहपतेर्ग्राममहत्तरादेर्ग्रामपाटकादिकमवग्रहः ३, तथा सागारिकस्य–शय्यातरस्य धर्मशालादिकं ४, साधर्मिकाः–साधवो ये मासकल्पेन तत्रावस्थितास्तेषां वसत्यादिरवग्रहः सपादं योजनमिति ५, तदेवं पञ्चविधोऽवग्रहः, वसत्यादिपरिग्रहं च कुर्वता सर्वेऽप्येते यथाऽवसरमनुज्ञाप्या इति ॥ साम्प्रतं द्रव्याद्यवग्रहप्रतिपादनायाह—

दव्वुग्गहो उ तिविहो सचित्ताचित्तमीसओ चेव। खित्तुग्गहोऽवि तिविहो दुविहो कालुग्गहो होइ ॥ ३१७॥

द्रव्याद्यवग्रहस्त्रिविधः, शिष्यादेः सचित्तो रजोहरणादेरचित्तः शिष्यरजोहरणादेर्मिश्रः, क्षेत्रावग्रहोऽपि सचित्तादि-

स्त्रिविध एव, यदिवा ग्रामनगरारण्यभेदादिति, कालावग्रहस्तु ऋतुबद्धवर्षाकालभेदाद्विधेति ॥ भावावग्रहप्रतिपादनार्थमाह—

मइउग्गहो य गहणुग्गहो य भावुग्गहो दुहा होइ। इंदिय नोइंदिय अत्थवंजणे उग्गहो दसहा ॥ ३१८ ॥

भावावग्रहो द्वेधा, तद्यथा–मत्यवग्रहो ग्रहणावग्रहश्च, तत्र मत्यवग्रहो द्विधा–अर्थावग्रहो व्यञ्जनावग्रहश्च, तत्रार्थावग्रह इन्द्रियनोइन्द्रियभेदात् षोढा, व्यञ्जनावग्रहस्तु चक्षुरिन्द्रियमनोवर्जश्चतुर्धा, स एष सर्वोऽपि मतिभावावग्रहो दशधेति ॥ ग्रहणावग्रहार्थमाह—

गहणुग्गहम्मि अपरिग्गहस्स समणस्स गहणपरिणामो। कह पाडिहारियाऽपाडिहारिए होइ? जइयव्वं ३१९ ॥

अपरिग्रहस्य साधोर्यदा पिण्डवसतिवस्त्रपात्रग्रहणपरिणामो भवति तदा स ग्रहणभावावग्रहो भवति, तस्मिंश्च सति 'कथं' केन प्रकारेण मम शुद्धं वसत्यादिकं प्रातिहारिकमप्रातिहारिकं वा भवेदित्येवं यतितव्यमिति, प्रागुक्तश्च देवेन्द्राद्यवग्रहः पञ्चविधोऽप्यस्मिन् ग्रहणावग्रहे द्रष्टव्य इति ॥ गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्—

समणे भविस्सामि अणगारे अकिंचणे अपुत्ते अपसू परदत्तभोई पावं कम्मं नो करिस्सामित्ति समुट्ठाए सव्वं भंते! अदिन्नादाणं पच्चक्खामि, से अणुपविसित्ता गामं वा जाव रायहाणिं वा नेव सयं अदिन्नं गिण्हिज्जा नेवऽन्नेहिं अदिन्नं गिण्हाविज्जा अदिन्नं गिण्हंतेवि अन्ने न समणुजाणिज्जा, जेहिवि सद्धिं संपव्वइए तेसिंपि जाइं छत्तगं वा जाव चम्मछेयणगं वा तेसिं पुव्वामेव उग्गहं अणणुन्नविय अपडिलेहिय २ अपमज्जिय २ नो उग्गिण्हिज्जा वा परिगिण्हिज्ज वा, तेसिं पुव्वामेव उग्गहं जाइज्जा अणुन्नविय पडिलेहिय पमज्जिय तओ सं० उग्गिण्हिज्ज वा प० ॥ (सू० १५५)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्राम्यतीति श्रमणः–तपस्वी यतोऽहमत एवंभूतो भविष्यामीति दर्शयति—'अनगारः' अगा–वृक्षास्तैर्निष्पन्नमगारं तन्न विद्यत इत्यनगारः, त्यक्तगृहपाश इत्यर्थः, तथा 'अकिञ्चनः' न विद्यते किमप्यस्येत्यकिञ्चनो, निष्परिग्रह इत्यर्थः, तथा 'अपुत्रः' स्वजनबन्धुरहितो, निर्मम इत्यर्थः, एवम् 'अपशुः' द्विपदचतुष्पदादिरहितः, यत एवमतः परदत्तभोजी सन् पापं कर्म न करिष्यामीत्येवं समुत्थायैतत्प्रतिज्ञो भवामीति दर्शयति–यथा सर्वं भदन्त! अदत्तादानं प्रत्याख्यामि, दन्तशोधनमात्रमपि परकीयमदत्तं न गृह्णामीत्यर्थः, तदनेन विशेषणकदम्बकेनापरेषां शाक्यसरजस्कादीनां सम्यक्श्रमणत्वं निराकृतं भवति, स चैवंभूतोऽकिञ्चनः श्रमणोऽनुप्रविश्य ग्रामं वा यावद्राजधानीं वा नैव स्वयमदत्तं गृह्णीयात् नैवापरेण ग्राहयेत् नाप्यपरं गृह्णन्तं समनुजानीयात्, यैर्वा साधुभिः सह सम्यक् प्रव्रजितस्तिष्ठति वा तेषामपि सम्बन्ध्युपकरणमननुज्ञाप्य न गृह्णीयादिति दर्शयति, तद्यथा–छत्रकमिति 'छद अपवारणे' छादयतीति छत्रं–वर्षाकल्पादि, यदि वा कारणिकः क्वचित्कुङ्कणदेशादावतिवृष्टिसम्भवाच्छत्रकमपि गृह्णीयाद् यावच्चर्मच्छेदनकमप्यननुज्ञाप्याप्रत्युपेक्ष्य च नावगृह्णीयात् सकृत् प्रगृह्णीयादनेकशः। तेषां च सम्बन्धि यथा गृह्णीयात्तथा दर्शयति–पूर्वमेव ताननुज्ञाप्य प्रत्युपेक्ष्य चक्षुषा प्रमृज्य रजोहरणादिना सकृदनेकशो वा गृह्णीयादिति ॥ किञ्च—

से मि० आगंतारेसु वा ४ अणुवीइ उग्गहं जाइज्जा, जे तत्थ ईसरे जे तत्थ समहिट्ठए ते उग्गहं अणुन्नविजा—कामं खलु आउसो०! अहालंदं अहापरिन्नायं वसामो जाव आउसो! जाव आउसंतस्स उग्गहे जाव साहम्मिया एइतावं उग्गहं उगिण्हिस्सामो, तेण परं विहरिस्सामो ॥ से किं पुण तत्थोग्गहंसि एवोग्गहियंसि जे तत्थ साहम्मिया संभोइया समणुन्ना उवाग-

आ. सू. ६८

श्रीआचाराङ्गवृत्तिः (शी०)

॥ ४०३ ॥

च्छिज्जा जे तेण सयमेसित्तए असणे वा ४ तेण ते साहम्मिया ३ उवनिमंतिज्जा, नो चेव णं परवडियाए ओगिज्झिय २ उवनि० ॥ (सू० १५६)

श्रुतस्कं० २
चूलिका १
अध्य० ७
उद्देशः १

स भिक्षुरागन्तागारादौ प्रविश्यानुविचिन्त्य च–पर्यालोच्य यतिविहारयोग्यं क्षेत्रं ततोऽवग्रहं वसत्यादिकं याचेत, यश्च याच्यस्तं दर्शयति–यस्तत्र 'ईश्वरः' गृहस्वामी तथा यस्तत्र 'समधिष्ठाता' गृहपतिना निक्षिप्तभरः कृतस्तानवग्रहं–क्षेत्रावग्रहम् 'अनुज्ञापयेत्' याचेत, कथमिति दर्शयति—'काम'मिति तवेच्छया 'खलु' इति वाक्यालङ्कारे आयुष्मन्! गृहपते! 'अहालंद'मिति यावन्मात्रं कालं भवाननुजानीते 'अहापरिन्नायं'ति यावन्मात्रं क्षेत्रमनुजानीषे तावन्मात्रं कालं तावन्मात्रं च क्षेत्रमाश्रित्य वयं वसाम इति यावत्, इहायुष्मन्! यावन्मात्रं कालमिहायुष्मतोऽवग्रहो यावन्तश्च साधर्मिकाः–साधवः समागमिष्यन्ति एतावन्मात्रमवग्रहिष्यामस्तत ऊर्ध्वं विहरिष्याम इति ॥ अवगृहीते चावग्रहे सत्युत्तरकालविधिमाह–तदेवमवगृहीतेऽवग्रहे स साधुः किं पुनः कुर्यादिति दर्शयति–ये तत्र केचन प्राघूर्णकाः 'साधर्मिकाः' साधवः 'साम्भोगिकाः' एकसामाचारीप्रविष्टाः 'समनोज्ञाः' उद्युक्तविहारिणः 'उपागच्छेयुः' अतिथयो भवेयुः, ते चैवंभूता ये तेनैव साधुना परलोकार्थिना स्वयमेषितव्याः, ते च स्वयमेवागता भवेयुः, तांश्चाशनादिना स्वयमाहृतेन स साधुरुपनिमन्त्रयेद्, यथा–गृहीत यूयमेतन्मयाऽऽनीतमशनादिकं क्रियतां ममानुग्रहमित्येवमुपनिमन्त्रयेत्, न चैव 'परवडियाए'त्ति परानीतं यदशनादि तन्मृशम् 'अवगृह्य' आश्रित्य नोपनिमन्त्रयेत्, किं तर्हि?, स्वयमेवानीतेन निमन्त्रयेदिति ॥ तथा—

॥ ४०३ ॥

से आगंतारेसु वा ४ जाव से किं पुण तत्थोग्गहंसि एवोग्गहियंसि जे तत्थ साहम्मिआ अन्नसंभोइआ समणुन्ना उवाग-

च्छिज्जा जे तेण सयमेसित्तए पीढे वा फलए वा सिज्जा वा संथारए वा तेण ते साहम्मिए अन्नसंभोइए समणुन्ने उवनिमंतिज्जा नो चेवणं परवडियाए ओगिज्झिय उवनिमंतिज्जा॥ से आगंतारेसु वा ४ जाव से किं पुण तत्थुग्गहंसि एवोग्गहियंसि जे तत्थ गाहावईण वा गाहा० पुत्ताण वा सूई वा पिप्पलए वा कण्णसोहणए वा नहच्छेयणए वा तं अप्पणो एगस्स अट्ठाए पाडिहारियं जाइत्ता नो अन्नमन्नस्स दिज्ज वा अणुपइज्ज वा, सयंकरणिज्जंतिकट्टु, से तमायाए तत्थ गच्छिज्जा २ पुव्वामेव उत्ताणए हत्थे कट्टु भूमीए वा ठवित्ता इमं खलु २ त्ति आलोइज्जा, नो चेव णं सयं पाणिणा परपाणिंसि पच्चप्पिणिज्जा ॥ (सू० १५७)

पूर्वसूत्रवत्सर्वं, नवरमसाम्भोगिकान् पीठफलकादिनोपनिमन्त्रयेद्, यतस्तेषां तदेव पीठिकादिसंभोग्यं नाशनादीनि ॥ किञ्च–तस्मिन्नवग्रहे गृहीते यस्तत्र गृहपत्यादिको भवेत् तस्य सम्बन्धि सूच्यादिकं यदि कार्यार्थमेकमात्मानमुद्दिश्य गृह्णीयात् तदपरेषां साधूनां न समर्पयेत्, कृतकार्यश्च प्रतीपं गृहस्यस्यैवानेन सूत्रोक्तेन विधिना समर्पयेदिति ॥ अपि च—

से मि० से जं० उग्गहं जाणिज्जा अणंतरहियाए पुढवीए जाव संताणए तह० उग्गहं नो गिण्हिज्जा वा २॥ से मि० से जं पुण उग्गहं थूणंसि वा ४ तह० अंतलिक्खजाए दुब्बद्धे जाव नो उगिण्हिज्जा वा २॥ से मि० से जं० कुलियंसि वा ४ जाव नो उगिण्हिज्ज वा २ ॥ से मि० खंधंसि वा ४ अन्नयरे वा तह० जाव नो उग्गहं उगिण्हिज्ज वा २ ॥ से मि० से जं० पुण० ससागारियं० ससुइपसुभत्तपाणं नो पन्नस्स निक्खमणपवेसे जाव धम्माणुओगचिंताए, सेवं नच्चा तह० उवस्सए ससागारिए० नो उवग्गहं उगिण्हिज्जा वा २ ॥ से मि० से जं० गाहावइकुलस्स मज्झंमज्झेणं गंतुं पंथे पडिबद्धं वा नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पलस्स जाव सेवं न० ॥ से भि० से जं० इह खलु गाहावई वा जाव कम्मकरीओ वा अन्नमन्नं अक्कोसंति वा तहेव तिल्लादि सिणाणादि सीओदगवियडादि निगिणाइ वा जहा सिज्जाए आलावगा, नवरं उग्गहवत्तव्वया ॥ से भि० से जं० आइन्नसंलिक्खे नो पलस्स० उगिण्हिज्ज वा २, एयं खलु० ॥ (सू० १५८) उग्गहपडिमाए पढमो उद्देसो ॥ २–१–७–१ ॥

यत्पुनः सचित्तपृथिवीसम्बन्धमवग्रहं जानीयात्तन्न गृह्णीयादिति ॥ तथा–अन्तरिक्षजातमप्यवग्रहं न गृह्णीयादित्यादि शय्यावगन्तव्यं यावदुद्देशकसमाप्तिः, नवरमवग्रहाभिलाप इति ॥ सप्तमस्य प्रथमोद्देशकः समाप्तः ॥ २–१–७–१ ॥

उक्तः प्रथमोद्देशकः, अधुना द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः–पूर्वोद्देशकेऽवग्रहः प्रतिपादितस्तदिहापि तच्छेषप्रतिपादनायोद्देशकः, तस्य चादिसूत्रम्—

से आगंतारेसु वा ४ अणुवीइ उग्गहं जाइज्जा, जे तत्थ ईसरे० ते उग्गहं अणुन्नविज्जा कामं खलु आउसो! अहालंदं अहापरिन्नायं वसामो जाव आउसो! जाव आउसंतस्स उग्गहे जाव साहम्मिआए ताव उग्गहं उगिण्हिस्सामो, तेण परं वि०, से किं पुण तत्थ उग्गहं से एवोग्गहियंसि जे तत्थ समणाण वा माह० छत्तए वा जाव चम्मछेदणए वा तं नो अंतोहिंतो बाहिं नीणिज्जा बहियाओ वा नो अंतो पविसिज्जा, सुत्तं वा नो पडिबोहिज्जा, नो तेसिं किंचिवि अप्पत्तियं पडिणीयं करिज्जा ॥ (सू० १५९)

स भिक्षुरागन्तागारादावपरब्राह्मणाद्युपभोगसामान्ये कारणिकः सन्नीश्वरादिकं पूर्वप्रक्रमेणावग्रहं याचेत, तस्मिंश्चावगृहीतेऽवग्रहे यत्तत्र श्रमणब्राह्मणादीनां छत्राद्युपकरणजातं भवेत्तन्नैवाभ्यन्तरतो बहिर्निष्क्रामयेत् नापि ततोऽभ्यन्तरं प्रवेशयेत् नापि ब्राह्मणादिकं सुप्तं प्रतिबोधयेत् न च तेषाम् 'अप्पत्तियं'ति मनसः पीडां कुर्यात् तथा 'प्रत्यनीकतां' प्रतिकूलतां न विदध्यादिति ॥

से भि० अभिकंखिज्जा अंबवणं उवागच्छित्तए जे तत्थ ईसरे २ ते उग्गहं अणुजाणाविज्जा—कामं खलु जाव विहरिस्सामो, से किं पुण० एवोग्गहियंसि अह भिक्खू इच्छिज्जा अंबं भुत्तए वा से जं पुण अंबं जाणिज्जा सअंडं ससंताणं तह० अंबं अफा० नो प० ॥ से भि० से जं० अप्पंडं अप्पसंताणगं अतिरिच्छछिन्नं अव्वोच्छिन्नं अफासुयं जाव नो पडिगाहिज्जा ॥ से भि० से जं० अप्पंडं वा जाव संताणगं तिरिच्छछिन्नं वुच्छिन्नं फा० पडि० ॥ से भि० अंबभित्तगं वा अंबपेसियं वा अंबचोयगं वा अंबसालगं वा अंबडालगं वा भुत्तए वा पायए वा, से जं० अंबभित्तगं वा ५ सअंडं अफा० नो पडि० ॥ से भिक्खू वा २ से जं० अंबं वा अंबभित्तगं वा अप्पंडं० अतिरिच्छछिन्नं २ अफा० नो प० ॥ से जं० अंबडालगं वा अप्पंडं ५ तिरिच्छछिन्नं वुच्छिन्नं फासुयं पडि० ॥ से भि० अभिकंखिज्जा उच्छुवणं उवागच्छित्तए, जे तत्थ ईसरे जाव उग्गहंसि० ॥ अह भिक्खू इच्छिज्जा उच्छुं भुत्तए वा पा०, से जं० उच्छुं जाणिज्जा सअंडं जाव नो प०, अतिरिच्छछिन्नं तहेव, तिरिच्छछिन्नेऽवि तहेव ॥ से भि० अभिकंखि० अंतरुच्छुयं वा उच्छुगंडियं वा उच्छुचोयगं वा उच्छुसा० उच्छुडा० भुत्तए वा पाय०, से जं पु० अंतरुच्छुयं वा जाव डालगं वा सअंडं० नो प० ॥ से भि० से जं० अंतरुच्छुयं वा० अप्पंडं वा० जाव पडि०, अतिरिच्छछिन्नं तहेव ॥ से भि० लहसणवणं उवागच्छित्तए, तहेव तिन्निवि आलावगा, नवरं

लहसुणं ॥ से भि० लहसुणं वा लहसुणकंदं वा लह० चोयगं वा लहसुणनालगं वा भुत्तए वा २ से जं० लहसुणं वा जाव लहसुणचोयगं वा सअंडं जाव नो प०, एवं अतिरिच्छछिन्नेऽवि तिरिच्छछिन्ने जाव प० ॥ (सू० १६०)

स भिक्षुः कदाचिदाम्रवनेऽवग्रहमीश्वरादिकं याचेत, तत्रस्थश्च सति कारणे आम्रं भोक्तुमिच्छेत्, तच्चाम्रं साण्डं ससन्तानकमप्रासुकमिति च मत्वा न प्रतिगृह्णीयादिति ॥ किञ्च–स भिक्षुर्यत्पुनराम्रमल्पाण्डमल्पसन्तानकं वा जानीयात् किन्तु 'अतिरश्चीनच्छिन्नं' तिरश्चीनमपाटितं तथा 'अव्यवच्छिन्नम्' अखण्डितं यावदप्रासुकं न प्रतिगृह्णीयादिति ॥ तथा–स भिक्षुरल्पाण्डमल्पसन्तानकं तिरश्चीनच्छिन्नं तथा व्यवच्छिन्नं यावत्प्रासुकं कारणे सति गृह्णीयादिति ॥ एवमाम्रातयवसम्बन्धि सूत्रत्रयमपि नेयमिति, नवरम्—'अंबभित्तयं'ति आम्रार्द्धम् 'अंबपेसी' आम्रफाली 'अंबचोयगं'ति आम्रछली सालगं–रसं 'डालगं'ति आम्रश्लक्ष्णखण्डानीति ॥ एवमिक्षुसूत्रत्रयमप्याम्रसूत्रवन्नेयमिति, नवरम् 'अंतरुच्छुयं'ति पर्वमध्यमिति ॥ एवं लशुनसूत्रत्रयमपि नेयमिति, आम्रादिसूत्राणामवकाशो निशीथषोडशोद्देशकादवगन्तव्य इति ॥ साम्प्रतमवग्रहाभिग्रहविशेषानधिकृत्याह—

से भि० आगंतारेसु वा ४ जावोग्गहियंसि जे तत्थ गाहावईण वा गाहा० पुत्ताण वा इच्चेयाइं आयतणाइं उवाइक्कम्म अह भिक्खू जाणिज्जा, इमाहिं सत्तहिं पडिमाहिं उग्गहं उगिण्हित्तए, तत्थ खलु इमा पढमा पडिमा—से आगंतारेसु वा ४ अणुवीइ उग्गहं जाइज्जा जाव विहरिस्सामो पढमा पडिमा १ । अहावरा० जस्स णं भिक्खुस्स एवं भवइ—अहं च खलु अन्नेसिं भिक्खूणं अट्ठाए उग्गहं उगिण्हिस्सामि, अन्नेसिं भिक्खूणं उग्गहे उग्गहिए उवलिसामि, दुचा पडिमा २ । अहा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वरा० जस्स णं मि० अहं च० उग्गिण्हिस्सामि अमेसिं च उग्गहे उग्गहिए नो उवलिस्सामि, तच्चा पडिमा ३ । अहावरा० जस्स णं मि० अहं च० नो उग्गहं उग्गिण्हिस्सामि, अमेसिं च उग्गहे उग्गहिए उवलिस्सामि, चउत्था पडिमा ४। अहावरा० जस्स णं अहं च खलु अप्पणो अट्ठाए उग्गहं चउ०, नो दुण्हं नो तिण्हं नो चउण्हं नो पंचण्हं पंचमा पडिमा ५। अहावरा० से मि० जस्स एवं उग्गहे उवलिइज्जा जे तत्थ अहासमन्नागए इक्कडे वा जाव पलाले तस्स लाभे संवसिज्जा, तस्स अलाभे उक्कुडुओ वा नेसज्जिओ वा विहरिज्जा, छट्ठा पडिमा ६ । अहावरा स० जे भि० अहासंथडमेव उग्गहं जाइज्जा, तंजहा—पुढविसिलं वा कट्ठसिलं वा अहासंथडमेव तस्स लाभे संते०, तस्स अलाभे उ० ने० विहरिज्जा, सत्तमा पडिमा ७ । इच्चेयासिं सत्तण्हं पडिमाणं अन्नयरं जहा पिंडेसणाए ॥ (सू० १६१)

स भिक्षुरागन्तागारादावग्रहे गृहीते ये तत्र गृहपत्यादयस्तेषां सम्बन्धीन्यायतनानि पूर्वप्रतिपादितान्यतिक्रम्यैतानि च वक्ष्यमाणानि कर्मोपादानानि परिहृत्यावग्रहमवग्रहीतुं जानीयात्, अथ भिक्षुः सप्तभिः प्रतिमाभिरभिग्रहविशेषैरवग्रहं गृह्णीयात्, तत्रेयं प्रथमा प्रतिमा, तद्यथा—स भिक्षुरागन्तागारादौ पूर्वमेव विचिन्त्यैवंभूतः प्रतिश्रयो मया ग्राह्यो नान्यथाभूत इति प्रथमा । तथाऽन्यस्य च भिक्षोरेवंभूतोऽभिग्रहो भवति, तद्यथा—अहं च खल्वन्येषां साधूनां कृतेऽवग्रहं 'गृहीष्यामि' याचिष्ये, अन्येषां वाऽवग्रहे गृहीते सति 'उपालयिष्ये' वत्स्यामीति द्वितीया । प्रथमा प्रतिमा सामान्येन, इयं तु गच्छान्तर्गतानां साधूनां साम्भोगिकानामसांभोगिकानां चोद्युक्तविहारिणां, यतस्तेऽन्योऽन्यार्थं याचन्त इति। तृतीया त्वियम्—अन्यार्थमवग्रहं याचिष्येऽन्यावगृहीते तु न स्थास्यामीति, एषा त्वाहालन्दिकानां, यतस्ते सूत्रार्थविशेष-

श्रीआचाराङ्गवृत्तिः (शी०) ॥ ४०६ ॥

मार्चार्यादभिकाङ्क्षन्त आचार्यार्थं याचन्ते । चतुर्थी पुनरहमन्येषां कृतेऽवग्रहं न याचिष्ये अन्यावगृहीते च वत्स्यामीति, इयं तु गच्छ एवाभ्युद्यतविहारिणां जिनकल्पाद्यर्थं परिकर्म कुर्वताम् । अथापरा पञ्चमी—अहमात्मकृतेऽवग्रहमवग्रहीष्यामि न चापरेषां द्वित्रिचतुष्पञ्चानामिति, इयं तु जिनकल्पिकस्य । अथापरा षष्ठी—यदीयमवग्रहं ग्रहीष्यामि तदीयमेवोत्कटादिसंस्तारकं ग्रहीष्यामि, इतरथोत्कुटुको वा निषण्णः उपविष्टो वा रजनीं गमिष्यामीत्येषा जिनकल्पिकादेरिति । अथापरा सप्तमी—एषैव पूर्वोक्ता, नवरं यथासंस्तृतमेव शिलादिकं ग्रहीष्यामि नेतरदिति, शेषमात्मोत्कर्षवर्जनादि पिण्डैषणावच्नेयमिति ॥ किञ्च—

सुयं मे आउसंतेणं भगवया एवमक्खायं—इह खलु थेरेहिं भगवंतेहिं पंचविहे उग्गहे पन्नत्ते, तं०—देविंदउग्गहे १ रायउग्गहे २ गाहावइउग्गहे ३ सागारियउग्गहे ४ साहम्मियउग्गह० ५, एवं खलु तस्स भिक्खुस्स भिक्खुणीए वा सामग्गियं (सू० १६२) उग्गहपडिमा सम्मत्ता ॥ अध्ययनं समाप्तं सप्तमम् ॥ २—१—७—२ ॥

श्रुतस्क०२ चूलिका १ अवग्र० ७ उद्देशः २

श्रुतं मयाऽऽयुष्मता भगवतैवमाख्यातम्—इह खलु स्थविरैर्भगवद्भिः पञ्चविधोऽवग्रहो व्याख्यातः, तद्यथा—देवेन्द्रावग्रह इत्यादि सुखोन्नेयं यावदुद्देशकसमाप्तिरिति ॥ अवग्रहप्रतिमाख्यं सप्तममध्ययनं समाप्तं, तत्समाप्तौ प्रथमाऽऽचाराङ्गचूला समाप्ता ॥ २—१—७ ॥

॥ ४०६ ॥

सप्तसप्तिकाख्या द्वितीया चूला ।

उक्तं सप्तममध्ययनं, तदुक्तौ च प्रथमचूलाऽभिहिता, इदानीं द्वितीया समारभ्यते, अस्याश्चायमभिसम्बन्धः—इहानन्तरचूडायां वसत्यवग्रहः प्रतिपादितः, तत्र च कीदृशे स्थाने कायोत्सर्गस्वाध्यायोच्चारप्रश्रवणादि विधेयमित्येतत्प्रतिपादनाय द्वितीयचूडा, सा च सप्ताध्ययनात्मिकेति निर्युक्तिकृदाशयितुमाह—

सत्तिक्कगाणि इक्कस्सरगाणि पुव्व भणियं तहिं ठाणं । उद्धट्ठाणे पगयं निसीहियाए तहिं छक्कं ॥ ३२० ॥

'सप्तैककान्येकसरागी'ति सप्ताध्ययनान्युद्देशकरहितानि भवन्तीत्यर्थः, तत्रापि 'पूर्वं' प्रथमं स्थानाख्यमध्ययनमभिहितमित्यतस्तद्व्याख्यायते इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयम्—किंभूतं साधुना स्थानमाश्रयितव्यमिति, नामनिष्पन्ने तु निक्षेपे स्थानमिति नाम, तस्य च नामादिश्चतुर्धा निक्षेपः, तत्रेह द्रव्यमाश्रित्योर्द्धस्थानेनाधिकारः, तदाह निर्युक्तिकारः—ऊर्द्धस्थाने 'प्रकृतं' प्रस्ताव इति, द्वितीयमध्ययनं निशीथिका, तस्याश्च षट्को निक्षेपः, तं च स्वस्थान एव करिष्यामीति । साम्प्रतं सूत्रमुच्चारणीयं, तच्चेदम्—

से भिक्खू वा० अभिकंखेज्जा ठाणं ठाइत्तए, से अणुपविसिज्जा गामं वा जाव रायहाणिं वा, से जं पुण ठाणं जाणिज्जा—सअंडं जाव मक्कडासंताणयं तं तह० ठाणं अफासुयं अणेस० लाभे संते नो प०, एवं सिज्जागमेण नेयव्वं जाव उदयपसू-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

याइंति ॥ इच्चेयाइं आयतणाइं उवाइक्कम्म २ अह भिक्खू इच्छिज्जा चउहिं पडिमाहिं ठाणं ठाइत्तए, तत्थिमा पढमा पडिमा —अचित्तं खलु उवसज्जिज्जा अवलंबिज्जा काएण विप्परिकम्माइ सवियारं ठाणं ठाइस्सामि पढमा पडिमा । अहावरा दुच्चा पडिमा—अचित्तं खलु उवसज्जेज्जा अवलंबिज्जा काएण विप्परिकम्माइ नो सवियारं ठाणं ठाइस्सामि दुच्चा पडिमा । अहावरा तच्चा पडिमा—अचित्तं खलु उवसज्जेज्जा अवलंबिज्जा नो काएण विपरिकम्माई नो सवियारं ठाणं ठाइस्सामित्ति तच्चा पडिमा । अहावरा चउत्था पडिमा—अचित्तं खलु उवसज्जेज्जा नो अवलंबिज्जा काएण नो परक्कम्माई नो सवियारं ठाणं ठाइस्सामित्ति वोसट्ठकाए वोसट्ठकेसमंसुलोमनहे संनिरुद्धं वा ठाणं ठाइस्सामित्ति चउत्था पडिमा, इच्चेयासिं चउण्हं पडिमाणं जाव पग्गहियतरायं विहरिज्जा, नो किंचिवि वइज्जा, एवं खलु तस्स० जाव जइज्जासि त्तिबेमि (सू० १६३) ॥ ठाणासत्तिक्कयं सम्मत्तं ॥ २–२–८ ॥

'स' पूर्वोक्तो भिक्षुर्यदा स्थानमभिकाङ्क्षेत् स्थातुं तदा सोऽनुप्रविशेद्ग्रामादिकम्, अनुप्रविश्य च स्थानमूर्ध्वस्थानाद्यर्थमन्वेषयेत्, तच्च साण्डं यावत्ससन्तानकमप्रासुकमिति लाभे सति न प्रतिगृह्णीयादिति, इत्येवमन्यान्यपि सूत्राणि शय्यावद्दृष्टव्यानि यावदुदकप्रसूतानि कन्दादीनि यदि भवेयुस्तत्तथाभूतं स्थानं न गृह्णीयादिति ॥ साम्प्रतं प्रतिमोद्देशेनाह-'इत्येतानि' पूर्वोक्तानि वक्ष्यमाणानि वा 'आयतनानि' कर्मोपादानानि 'उपातिक्रम्य २' अतिलङ्घ्याथ भिक्षुः स्थानं स्थातुमिच्छेत् 'चतसृभिः प्रतिमाभिः' अभिग्रहविशेषैः करणभूतैः, तांश्च यथाक्रममाह, तत्रेयं प्रथमा प्रतिमा–कस्यचिन्निश्चेरेवंभूतोऽभिग्रहो भवति, यथाऽहमचित्तं स्थानमुपाश्रयिष्यामि, तथा चित्तमपि कुड्यादिकमवलम्बयिष्ये कायेन, तथा 'विपरिक्रमिष्यामि' परिस्पन्दं करिष्यामि, हस्तपादाद्याकुञ्चनादि करिष्यामीत्यर्थः, तथा तत्रैव सविचारं स्तोकपादादिविहरणरूपं स्थानं 'स्थास्यामि' समाश्रयिष्यामि, प्रथमा प्रतिमा । द्वितीयायां त्वाकुञ्चनप्रसारणादिक्रियामवलम्बनं च करिष्ये न पादविहरणमिति । तृतीयायां त्वाकुञ्चनप्रसारणमेव नावलम्बनपादविहरणे इति । चतुर्थ्यां पुनस्त्रयमपि न विधत्ते, स चैवंभूतो भवति–व्युत्सृष्टः–त्यक्तः परिमितं कालं कायो येन स तथा, तथा व्युत्सृष्टं केशश्मश्रुलोमनखं येन स तथा, एवंभूतश्च सम्यग्निरुद्धं स्थानं स्थास्यामीत्येवं प्रतिज्ञाय कायोत्सर्गव्यवस्थितो मेरुवन्निष्प्रकम्पस्तिष्ठेत्, यद्यपि कश्चित्केशाद्युत्पाटयेत्तथाऽपि स्थानान्न चलेदिति, आसां चान्यतमां प्रतिमां प्रतिपद्य नापरमप्रतिपन्नप्रतिमं साधुमपवदेदात्मोत्कर्षं कुर्यान्न किञ्चिदेवंजातीयं वदेदिति ॥ प्रथमः सप्तैककः समाप्तः ॥ २–२–१ ॥

प्रथमानन्तरं द्वितीयः सप्तैककः, सम्बन्धश्चास्य–इहानन्तराध्ययने स्थानं प्रतिपादितं, तच्च किंभूतं स्वाध्याययोग्यं ?, तस्यां च स्वाध्यायभूमौ यद्विधेयं यच्च न विधेयमित्यनेन सम्बन्धेन निषीधिकाऽध्ययनमायातम्, अस्य च चत्वार्यनुयोगद्वाराणि भवन्ति, तत्र नामनिष्पन्ने निक्षेपे निषीथिकेति नाम, अस्य च नामस्थापनाद्रव्यक्षेत्रकालभावैः षड्विधो निक्षेपः, नामस्थापने पूर्ववत्, द्रव्यनिषीथं नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तं यद्द्रव्यं प्रच्छन्नं, क्षेत्रनिषीथं तु ब्रह्मलोकरिष्टविमानपार्श्ववर्तिन्यः कृष्णराजयो यस्मिन् वा क्षेत्रे तद्व्याख्यायते, कालनिषीथं कृष्णरजन्यो यत्र वा काले निषीथं व्या-

१ निशीथनिषीधयोः प्राकृते एकेन निसीहशब्देन वाच्यत्वात् एवं निक्षेपवर्णनं तथा च निषीधिका निशीथिकेत्युभयमपि संमतमभिधानयोः ।

ख्यायत इति, भावनिषीथं नोआगमत इदमेवाध्ययनम्, आगमैकदेशत्वात्, गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्—

से भिक्खू वा २ अभिकंखेज्जा निसीहियं फासुयं गमणाए, से पुण निसीहियं जाणिज्जा—सअंडं तह० अफा० नो चेइस्सामि ॥ से भिक्खू० अभिकंखेज्जा निसीहियं गमणाए, से पुण नि० अप्पपाणं अप्पबीयं जाव संताणयं तह० निसीहियं फासुयं चेइस्सामि, एवं सिज्जागमेणं नेयव्वं जाव उदयप्पसूयाइं ॥ जे तत्थ दुवग्गा तिवग्गा चउवग्गा पंचवग्गा वा अभिसंधारिंति निसीहियं गमणाए ते नो अन्नमन्नस्स कायं आलिंगिज्ज वा विलिंगिज्ज वा चुंबिज्ज वा दंतेहिं वा नहेहिं वा अच्छिंदिज्ज वा वुच्छिं०, एयं खलु० जं सव्वट्ठेहिं सहिए समिए सया जएज्जा, सेयमिणं मन्निज्जासि त्तिबेमि ॥ (सू० १६४) निसीहियासत्तिक्कयं ॥ २–२–९ ॥

स भवद्भिक्षुर्यदि वसतेरुपहताया अन्यत्र निषीधिकां–स्वाध्यायभूमिं गन्तुमभिकाङ्क्षेत्, तां च यदि साण्डा यावत्ससन्तानकां जानीयात्ततोऽप्रासुकत्वान्न परिगृह्णीयादिति ॥ किञ्च–स भिक्षुरल्पाण्डादिकां गृह्णीयादिति ॥ एवमन्यान्यपि सूत्राणि शय्यावन्नेयानि यावद् यत्रोदकप्रसूतानि कन्दादीनि स्युस्तां न गृह्णीयादिति ॥ तत्र गतानां विधिमधिकृत्याह-ये तत्र साधवो नैषेधिकाभूमौ द्वित्राद्या गच्छेयुस्ते नान्योऽन्यस्य 'कायं' शरीरमालिङ्गयेयुः–परस्परं गात्रसंस्पर्शं न कुर्युरित्यर्थः, नापि 'विविधम्' अनेकप्रकारं यथा मोहोदयो भवति तथा विलिङ्गेयुरिति, तथा कन्दर्पप्रधाना वक्रसंयोगादिकाः क्रिया न कुर्युरिति, एतत्तस्य भिक्षोः सामग्र्यं यदसौ 'सर्वार्थैः' अशेषप्रयोजनैरामुष्मिकैः 'सहितः' समन्वितः तथा 'स-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मितः' पञ्चभिः समितिभिः 'सदा' यावदायुस्तावत्संयमानुष्ठाने यतेत, एतदेव च श्रेय इत्येव मन्येतेति ब्रवीमीति पूर्ववत् ॥ निषीधिकाऽध्ययनं द्वितीयमादितो नवमं समाप्तमिति ॥ २-२-२ ॥

साम्प्रतं तृतीयः सप्तैककः समारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरे निषीधिका प्रतिपादिता, तत्र च कथम्भूतायां भूमावुच्चारादि विधेयमिति, अस्य च नामनिष्पन्ने निक्षेपे उच्चारप्रश्रवण इति नाम, तदस्य निरुक्त्यर्थं निर्युक्तिकृदाह—

उच्चइ सरीराओ उच्चारो पसवइत्ति पासवणं । तं कह आयरमाणस्स होइ सोही न अइयारो ? ॥३२१॥

शरीरादुत्-प्राबल्येन च्यवते-अपयाति चरतीति वा उच्चारः-विष्ठा, तथा प्रकर्षेण श्रवतीति प्रश्रवणम्-एकिका, तच्च कथमाचरतः साधोः शुद्धिर्भवति नातिचार इति? ॥ उत्तरगाथया दर्शयितुमाह—

मुणिणा छक्कायदयावरेण सुत्तभणियंमि ओगासे । उच्चारविउस्सग्गो कायव्वो अप्पमत्तेणं ॥ ३२२ ॥

'साधुना' षड्जीवकायरक्षणोद्युक्तेन वक्ष्यमाणसूत्रोक्ते स्थण्डिले उच्चारप्रश्रवणे विधेये अप्रमत्तेनेति ॥ निर्युक्त्यनुगमानन्तरं सूत्रानुगमे सूत्रं, तच्चेदम्—

६७९-६८२ ,,	प्रवादिगर्हा, सर्वेषां स्ववाद इति गो० । सर्वेषां परस्परं गर्हा, सदसतोरस्तित्वनास्तित्ववादान्न गर्हा, नाभिधारणं, सत्पुरुषोक्तमार्गकथनं, दोषस्य गर्हा नान्यस्येत्यार्द्रः ।	261
६८३-६८६ ,,	दक्षभीतो नारामादिवासी, सूत्रार्थप्रश्नभीतो न तत्रोपैतीति गो० । अकामकृत्यबालकृत्यराजाभियोगभयपरिहारे गत्वाऽगत्वा च व्याकरणम्, अदर्शनत्वादनार्येष्वगमनमित्यार्द्रः ।	262
६८७-६९३ ,,	लाभेच्छुर्वणिगिव वीर इति गो० । नवाकरणं, पुराणनिर्जरणं दुर्मतित्याजनं, उदयश्च कथाफलं, हिंसका ममीकुर्वन्तः ससङ्गा वित्तैषिणो मैथुनासक्ता भोजनार्थाः कामप्रेमगृद्धाः आत्मदण्डा वणिजः, तेषां लाभो भवाय अनैकान्तिकोऽनात्यन्तिकश्च, भगवतस्तु साद्यनन्तो लाभः, परप्रदानं, अहिंसकादिगुणो भगवान् कर्मविवेकाय धर्मकथा, तन्न सादृश्यमित्यार्द्रः ।	263
६९४-७१० सू०	गा० पिण्याकपिण्डचाः पुरुषबुद्ध्या अलाबुनः कुमारबुद्ध्या भेदादौ अस्माकं म्लेच्छस्य च न बन्धः, बुद्धभक्षणार्हता च, स्नातकसहस्रद्वयभोजनात्पुण्यस्कन्ध इति शाक्यः। अयोगरूपे प्रसह्य पापं, अबोधिता द्वयोः, प्राणी ज्ञानवान् न तथा वदेत् कुर्याद्वा, न च सम्भवस्तथाबुद्ध्याः, वागेषाऽसत्या, पापहेतुवाचोऽनुदाहरणम्, अस्थानमेतत्, अहो लब्धोऽर्थ इत्यादिशाक्यस्योपहासः (प्राण्यङ्गत्वेन न भक्ष्यता), जीवानुभागचिन्तादिना धर्मः, स्नातकभोजकोऽसंयतः, उद्दिष्टोरभ्रभोगेऽप्यलेपइत्यनार्यवाक्, (मांसदोषाः), भोगिनोऽज्ञानं, कुशलानां मनोऽपि न, एषा वागपि मिथ्या, उद्दिष्टवर्जिनः श्रमणाः, निर्दण्ड उद्दिष्टवर्जको धर्मः, अस्मिंश्च समाध्यादीत्यार्द्रः ।	264-266
७११-७१२ ,,	स्नातकब्राह्मणसहस्रद्वयभोजने पुण्यस्कन्धः, इति वेदवाक्, अब्रह्मचारिणां भोजने लौल्यं नरकश्च ।	267
७१३-७२३ ,,	दयाजुगुप्सकवधप्रशंसकभोजनेऽसुरत्वं, धर्मस्थित इहामुत्र ज्ञानी, न शुष्कज्ञानिनः संसारे विशेषः (जातिनिराकरणम्), अव्यक्तरूपः पुरुषः, सर्वभूतव्यापी संसरणादिरहितः, ब्राह्मणादिजातिशून्य इत्येकदण्डिनः, अज्ञानिन आत्मपरोभयनाशकत्वं, पूर्णज्ञानसमाधिमन्त आत्मपरतारकाः, असर्वज्ञस्य यथार्थाकथनमित्यार्द्रः, वर्षेण गजेन वृत्तिरिति हस्तितापसाः, जीववधका गृहिणः, सप्राणवधोऽनार्यः, सर्वज्ञाज्ञया धर्मस्थितो धर्ममुदाहरेत् ।	268-270
	॥ इति ६ आर्द्रीयाध्ययनम् ॥	
२०१-२०४ नि०	अलंनिक्षेपाः (४) पर्याप्तावलङ्कारे प्रतिषेधे चालंशब्दः, (अमानोनशब्दार्थभिन्नता), राजगृहनगरे नालन्दाबाहिरिका, मनोरथे गौतमेनोदकाय भाषितमेतत् ।	271
६८-७० सू०	राजगृहनालन्दयोर्वर्णनं, लेपगाथापतिश्रमणोपासकवर्णनं, हस्तियामवनखण्डवर्णनम् ।	271-272
२०५ नि०	श्रावकधर्मविषये उदकप्रश्नगौतमोत्तरौ ।	273
७१ सू०	जिज्ञासाप्रदर्शनं, उत्तरानुमतिश्च ।	273-274
७२-७६ ,,	त्रसस्थावरयोर्गमागमात्कुमारपुत्रकारितं दुष्प्रत्याख्यानम्, त्रसभूतप्रत्याख्यानं, त्रसानामेव त्रसता, त्रसभूतत्वं तु स्थावराणामपि (उपमातादर्थ्यार्थयोरपि प्रसङ्गः), श्रावकाणां गृहपतिचौरग्रहणविमोक्षणज्ञातेन त्रसवधविरतिः (पुत्रषट्कदृष्टान्तः)	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		P.
	स्थावरगतानां न त्रसता भिन्नभिन्नकर्मोदयत्वात् ।	275-276
७७ सू०	श्रावकस्यैकस्मादपि प्राणातिपातादविरमणं, त्रसस्थावराणां परस्परगमागमात्, इत्युदकः । त्रसस्थावरानुच्छेदान्नास्माकमेतत्, भवन्मते परस्परं सर्वेषां गमागमाद् दण्डनिक्षेपासम्भवः ।	277
७८ ,,	अगारिभूतस्यानगारस्य गृहस्थवधे नानगारनिवृत्तिभङ्गः १ अगारिभूतस्यानगारस्य न सर्वदण्डत्यागः २ अन्यतीर्थीभूतस्यानगारस्य पूर्वमन्यतीर्थिकस्यासमाचरणं ३ च यथोभयसंमतं तथाऽत्र भूतशब्देनार्थः ।	278-279
७९-८० ,,	स्थूलव्रतोच्चारे स्वार्थक्रियानिषेधे कालकरणे सम्यक्कालः, अनगारत्वस्य चतुर्दश्यादिपौषधस्य चाशक्तौ भक्तप्रत्याख्यानस्य त्रिविधत्रिविधेनाश्रयकाले सम्यक्कालः,	
	अविरतानां दुर्गतिः, अनारम्भाणां सुगतिः, अल्पेच्छादिगुणवतां देशविरतानां सुगतिः, आरण्यकादीनां स्वघातनिवारिणामासुरत्वं, च्युतस्य चैलमूकत्वं, दीर्घसमाल्पायुष्कश्रमणोपासकानां सुप्रत्याख्यानात्सद्गतिः, केवलसामायिकवतां सद्गतिः, गृहीतपरिमाणमुत्कलदेशयोस्त्रसस्थावरगमागमाच्च नैवाविषयं प्रत्याख्यानम् ।	P.
८१ ,,	बुद्ध्वा पापकरणाकरणयोः परलोकस्य विघ्नः शुद्धिश्च, एवमेवोदकस्य गमने आदरादिप्रेरणा, गौतमोक्तश्रद्धानादि, पञ्चयामप्रतिपत्तिप्रेरणा, उपवीरमागत्य तत्प्रतिपत्तिः । (नैगमादिनयव्याख्या, ज्ञानक्रियानययोर्विचारश्च) ।	279-284
	॥ इति द्वितीयः श्रुतस्कन्धः ॥	
	॥ इति सूत्रकृताङ्गविषयानुक्रमः ॥	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

श्रीमद्गणधरवरसुधर्मस्वामिनिर्मितम् ।

श्रीमच्छीलाङ्काचार्यविहितविवरणयुतम् ।

श्रीसूत्रकृताङ्गम् ।

स्वपरसमयार्थसूचकमनन्तगमपर्यायार्थगुणकलितम् । सूत्रकृतमङ्गमतुलं विवृणोमि जिनाममस्कृत्य ॥ १ ॥ व्याख्यातमङ्गमिह यद्यपि सूरिमुख्यैर्भक्त्या तथापि विवरीतुमहं यतिष्ये । किं पक्षिराजगतमित्येषगम्य सम्यक्, तेनैव वाञ्छति पथा शलभो न गंतुम् ? ॥ २[५] ॥ ये मध्यवक्षां व्यधुरिद्धबोधा, जानन्ति ते किञ्चन तानपास्य । मत्तोऽपि यो मन्दमतिस्तथार्थी, तस्योपकाराय ममैष

सूत्रकृ. १

१ सदृशपाठाः २ शब्दपर्यायाः ३ अभिधेयगुणाः ४ पक्षिराजगतमध्यवगम्येति प्र० ५ त्मौ जौ गौ वसन्ततिलका (छन्दोऽनुशासने अ० २ सू० २११)

सूत्रकृताङ्गं शीलाङ्काचार्यविहितनियुतं ॥ १ ॥

यत्नः ॥ ३[१] ॥ इहापसदसंसारान्तर्गतेनासुमताऽवाप्यातिदुर्लभं मनुजत्वं सुकुलोत्पत्तिसमग्रेन्द्रियसामग्र्यासुपेतेनार्हद्दर्शनम् अशेषकर्मोच्छित्तये यतितव्यम्, कर्मोच्छेदश्च सम्यग्विवेकसव्यपेक्षः, असावप्याप्तोपदेशमन्तरेण न भवति, आप्तश्चात्यन्तिकादोषक्षयात्, स चार्हन्नेव, अतस्तत्प्रणीतागमपरिज्ञाने यत्नो विधेयः, आगमश्च द्वादशाङ्गादिरूपः, सोऽप्यार्यरक्षितमिश्रैरेदंयुगीनपुरुषानुग्रहबुद्ध्या चरणकरणद्रव्यधर्मकथागणितानुयोगभेदाच्चतुर्धा व्यवस्थापितः, तत्राचाराङ्गं चरणकरणप्राधान्येन व्याख्यातम्, अधुनाऽवसरायातं द्रव्यप्राधान्येन सूत्रकृताख्यं द्वितीयमङ्गं व्याख्यातुमारभ्यत इति । ननु चार्थस्य शासनाच्छास्त्रमिदं, शास्त्रस्य चाशेषप्रत्यूहोपशान्त्यर्थमादिमङ्गलं तथा स्थिरपरिचयार्थं मध्यमङ्गलं शिष्यप्रशिष्याविच्छेदार्थं चान्त्यमङ्गलमुपादेयं तत्रेह नोपलभ्यते, सत्यमेतत्, मङ्गलं हीष्टदेवतानमस्कारादिरूपम्, अस्य च प्रणेता सर्वज्ञः, तस्य चापरनमस्कार्याभावान्मङ्गलकरणे प्रयोजनाभावाच्च न मङ्गलाभिधानं, गणधराणामपि तीर्थकृदुक्तानुवादित्वान्मङ्गलाकरणं, अस्मदाद्यपेक्षया तु सर्वमेव शास्त्रं मङ्गलम्। अथवा निर्युक्तिकार एवात्र भावमङ्गलमभिधातुकाम आह—

१ समयाध्ययने उपोद्घातः

णित्थयरे य जिणवरे सुत्तकरे गणहरे य णमिऊणं । सूयगडस्स भगवओ णिज्जुत्तिं किंचिइस्सामि ॥ १ ॥

गाथापूर्वार्द्धेनेह भावमङ्गलमभिहितं, पश्चार्द्धेन तु प्रेक्षापूर्वकारिप्रवृत्त्यर्थं प्रयोजनादित्रयमिति, तदुक्तम्—"उक्तार्थं ज्ञातसंबन्धं, श्रोतुं श्रोता प्रवर्त्तते । शास्त्रादौ तेन वक्तव्यः, सम्बन्धः सप्रयोजनः॥१॥" तत्र सूत्रकृतस्येत्यभिधेयपदं, निर्युक्तिं कीर्त्तयिष्ये इति

॥ १ ॥

१ तौ जौ गाविन्द्रवज्रा (छन्दो० २-१५४) २ इहापारसंसारेति प्र० ३ श्रोतारः । ४ उक्तप्रयोजनं ५ चान्द्रमतेन णिजन्तात्कर्तर्यात्मनेपदभावान्न परस्मैपदित्वादसाधुः प्रयोगोऽयमिति शङ्क्यम् । स्वपरसमयसूचनार्थत्वात्सूत्रकृतशब्दस्य नाभिधेयत्वेऽस्य क्षतिः, स्वकृत्यपेक्षया निर्युक्तिं कीर्त्तयिष्य इति प्रयोजनोक्तिः ।

प्रयोजनपदं, प्रयोजनप्रयोजनं तु मोक्षावाप्तिः, सम्बन्धस्तु प्रयोजनपदानुमेय इति पृथक् नोक्तः, तदुक्तम्—"शास्त्रं प्रयोजनं चेति, सम्बन्धस्याश्रयावुभौ । तदुक्तयन्तर्गतत्वात्तद्भिन्नो नोक्तः प्रयोजनात् ॥ १ ॥" इति समुदायार्थः ॥ अधुनाऽवयवार्थः कथ्यते—तत्र तीर्थं द्रव्यभावभेदाद्द्विधा, तत्रापि द्रव्यतीर्थं नद्यादेः समुत्तरणमार्गः[१], भावतीर्थं तु सम्यग्दर्शनज्ञानचारित्राणि, संसारार्णवादुत्तारकत्वात्, तदाधारो वा सङ्घः प्रथमगणधरो वा, तत्करणशीलास्तीर्थङ्करास्तान्नत्वेति क्रिया । तत्रान्येषामपि तीर्थकरत्वसंभवे तद्व्यवच्छेदार्थमाह—'जिनवरानि'ति रागद्वेषमोहजितो जिनाः, एवंभूताश्च सामान्यकेवलिनोऽपि भवन्ति, तद्व्यवच्छेदार्थमाह—वराः-प्रधानाः चतुस्त्रिंशदतिशयसमन्वितत्वेन, तान्नत्वेति, एतेषां च नमस्कारकरणमागमार्थोपदेष्टृत्वेनोपकारित्वात्, विशिष्टविशेषणोपादानं च शास्त्रस्य गौरवाधानार्थं, शास्तुः प्राधान्येन हि शास्त्रस्यापि प्राधान्यं भवतीति भावः । अर्थस्य सूचनात्सूत्रं, तत्करणशीलाः सूत्रकराः, ते च स्वयंबुद्धादयोऽपि भवन्तीत्यत आह—गणधरास्तांश्च नत्वेति, सामान्याचार्याणां गणधरत्वेऽपि तीर्थकरनमस्कारानन्तरोपादानाद्गौतमादय एवेह विवक्षिताः । प्रथमश्चकारः सिद्धाद्युपलक्षणार्थो द्वितीयः समुच्चितौ । क्त्वाप्रत्ययस्य क्रियाऽन्तरसव्यपेक्षत्वात्तामाह—स्वपरसमयसूचनं कृतमनेनेति सूत्रकृतस्तस्य,महार्थवत्त्वाद्वगवांस्तस्य,अनेन च सर्वज्ञप्रणीतत्वमावेदितं भवति । 'निर्युक्तिं कीर्तयिष्ये' इति योजनं युक्तिः—अर्थघटना, निश्चयेनाधिक्येन वा युक्तिर्निर्युक्तिः-सम्यगर्थप्रकटनमितियावत्,निर्युक्तानां वा—सूत्रेष्वेव परस्परसम्बद्धानामर्थानामाविर्भावनं,युक्तशब्दलोपान्निर्युक्तिरिति, तां 'कीर्तयिष्यामि' अभिधास्य इति ॥ इह सूत्रकृतस्य निर्युक्तिं कीर्तयिष्ये इत्यनेनोपक्रमद्वारमुपक्षिप्तं,तच्च 'इहापसदे'त्यादिनेषदभिहितमिति, तदनन्तरं

१ समः समुत्तरणमार्गः प्र० २ जिनेत्यनुक्त्वा जिनवरानिति वरत्वयुक्तजिनेत्युपादानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निक्षेपः, स च त्रिविधः, तद्यथा—ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्चेति । तत्रौघनिष्पन्ने निक्षेपेऽङ्गं, नामनिष्पन्ने तु निक्षेपे सूत्रकृतमिति ॥ १ ॥ तत्र 'तत्त्वभेदपर्यायैर्व्याख्ये'यत इति पर्यायप्रदर्शनार्थं निर्युक्तिकृदाह—

सूयगडं अंगाणं बितियं तस्स य इमाणि नामाणि । सूतगडं सुत्तकडं सूयगडं चेव गोण्णाइं ॥ २ ॥

सूत्रकृतमित्येतदङ्गानां द्वितीयं, तस्य चामून्येकार्थिकानि, तद्यथा—सूतम्—उत्पन्नमर्थरूपतया तीर्थकृद्भ्यः ततः कृतं ग्रन्थरचनया गणधरैरिति, तथा 'सूत्रकृत'मिति सूत्रानुसारेण तत्त्वावबोधः क्रियतेऽस्मिन्निति, तथा 'सूचाकृत'मिति स्वपरसमयार्थसूचनं सूचा साऽस्मिन्कृतेति, एतानि चास्य गुणनिष्पन्नानि नामानीति ॥ २ ॥ साम्प्रतं सूत्रकृतपदयोर्निक्षेपार्थमाह—

दव्वं तु पोण्डयादी भावे सुत्तमिह सूयगं नाणं । सण्णासंगहचित्ते जातिणिबद्धे य कत्थादी ॥ ३ ॥

नामस्थापने अनादृत्य द्रव्यसूत्रं दर्शयति—'पोण्डयाइ'त्ति पोण्डगं च वनीफलादुत्पन्नं कार्प्पासिकं, आदिग्रहणादण्डजवालजादेर्ग्रहणं, भावसूत्रं तु 'इह' अस्मिन्नधिकारे सूचकं ज्ञानं—श्रुतज्ञानमित्यर्थः, तस्यैव स्वपरार्थसूचकत्वादिति । तच्च श्रुतज्ञानसूत्रं चतुर्द्धा भवति, तद्यथा—संज्ञासूत्रं संग्रहसूत्रं वृत्तनिबद्धं जातिनिबद्धं च, तत्र संज्ञासूत्रं यत् स्वसंकेतपूर्वकं निबद्धं, तद्यथा—"[1]जे छेए सागारियं न सेवे, सव्वामगंधं परिण्णाय निरामगंधो परिव्वए" इत्यादि, तथा लोकेऽपि—पुद्गलाः संस्कारः क्षेत्रज्ञा इत्यादि । संग्रहसूत्रं तु यत्प्रभूतार्थसंग्राहकं, तद्यथा—द्रव्यमित्याकारिते समस्तधर्माधर्मादिद्रव्यसंग्रह इति, यदिवा 'उत्पादव्य-

१ सूयागडमिति वाच्ये दीर्घह्रस्वाविति बन्धानुलोम्येन ह्रस्वता, तथा च न पर्यायैक्यं । २ भावसूत्रेण सूत्रानुसारेण निर्वाणपथो गम्यते चू० । ३ यदुक्तं: स सागारिकं (मैथुनं) न सेवेत, सर्वेषामगन्धं परिज्ञाय निरामगन्धः परिव्रजेत् (आसं विशोधि गन्धमविशोधि) ४ उभए जे ससमए परसमए य चू० ।

यध्रौव्ययुक्तं सदि'ति, वृत्तनिबद्धसूत्रं पुनर्यदनेकप्रकारया वृत्तजात्या निबद्धं तद्यथा—बुद्धिज्ञेत्यादि, जातिनिबद्धं तु चतुर्द्धा, तद्यथा—कथनीयं कथ्यमुत्तराध्ययनज्ञातादिधर्मकथादि, पूर्वर्षिचरितकथानकप्रायत्वात्तस्य, तथा गद्यं ब्रह्मचर्याध्ययनादि, तथा पद्यं—छन्दोनिबद्धं, तथा गेयं यत् स्वरसंचारेण गीतिकाप्रायनिबद्धं, तद्यथा कापिलीयमध्ययनं 'अधुवे असासयंमि संसारंमि दुक्खपउराए' इत्यादि ॥ ३ ॥ इदानीं कृतपदनिक्षेपार्थं निर्युक्तिकृद्गाथामाह—

करणं च कारओ य कडं च तिण्हंपि छक्कनिक्खेवो । दव्वे खित्ते काले भावेण उ कारओ जीवो ॥ ४ ॥

इह कृतमित्यनेन कर्मोपात्तं, न चाकर्तृकं कर्म भवतीत्यर्थात्कर्तुराक्षेपो धात्वर्थस्य च करणस्य, अमीषां त्रयाणामपि प्रत्येकं नामादिः षोढा निक्षेपः, तत्र गाथापश्चार्द्धेनाल्पवक्तव्यत्वात्तावत्करणमतिक्रम्य कारकस्य निक्षेपमाह, तत्र नामस्थापने प्रसिद्धत्वादनादृत्य द्रव्यादिकं दर्शयति—'दव्वे' इति द्रव्यविषये कारकश्चिन्त्यः, स च द्रव्यस्य द्रव्येण द्रव्यभूतो वा कारको द्रव्यकारकः, तथा क्षेत्रे भरतादौ यः कारको यस्मिन् वा क्षेत्रे कारको व्याख्यायते स क्षेत्रकारकः, एवं कालेऽपि योज्यम्, 'भावेन तु' भावद्वारेण चिन्त्यमानो जीवोऽत्र कारकः, यस्मात्सूत्रस्य गणधरः कारकः, एतच्च निर्युक्तिकृदेवोत्तरत्र वक्ष्यति 'ठिइ अणुभावे'त्यादौ ॥ ४ ॥[1] साम्प्रतं करणव्याचिख्यासया नामस्थापने मुक्त्वा द्रव्यादिकरणनिक्षेपार्थं निर्युक्तिकृदाह—

दव्वं पओगवीससस पओगसा मूल उत्तरे चेव । उत्तरकरणं बंजण अत्थो उ उवक्खरो सव्वो ॥ ५ ॥

१ बुध्येतेति त्रोटयेत् । २ चित्तबद्धं सिलोगादिबद्धं वा चू० । ३ अध्रुवेऽशाश्वते संसारे दुःखप्रचुरतायाम् (दुःखप्रपुरे) । ४ सुण्णाकरणं भोरुण्णाकरणं च कडकरणं अक्षाकरणं पेलुकरणादि चू० ।

'द्रव्ये' द्रव्यविषये करणं चिन्त्यते, तद्यथा—द्रव्यस्य द्रव्येण द्रव्यनिमित्तं वा करणम्—अनुष्ठानं द्रव्यकरणं, तत्पुनर्द्विधा—प्रयोगकरणं विस्रसाकरणं च, तत्र प्रयोगकरणं पुरुषादिव्यापारनिष्पाद्यं, तदपि द्विविधं—मूलकरणमुत्तरकरणं च, तत्रोत्तरकरणं गाथापश्चार्द्धेन दर्शयति—उत्तरत्र करणमुत्तरकरणं—कर्णवेधादि, यदिवा तन्मूलकरणं घटादिकं येनोपस्करेण—दण्डचक्रादिना अभिव्यज्यते—स्वरूपतः प्रकाश्यते तदुत्तरकरणं, कर्तुरुपकारकः सर्वोऽप्युपस्कारार्थ इत्यर्थः ॥ ५ ॥ पुनरपि प्रपञ्चतो मूलोत्तरकरणे प्रतिपादयितुमाह—

मूलकरणं सरीराणि पंच तिसु कण्णखंधमादीयं । दव्विंदियाणि परिणामियाणि विसओसहादीहिं ॥ ६ ॥

मूलकरणमौदारिकादीनि शरीराणि पञ्च, तत्र चौदारिकवैक्रियाहारकेषु त्रिष्वुत्तरकरणं कर्णस्कन्धादिकं विद्यते, तथाहि—'सीसमुरोयर पिट्ठी दो बाहू ऊरुया य अट्ठंग'त्ति त्रयाणामप्येतन्निष्पत्तिर्मूलकरणं, कर्णस्कन्धाद्यङ्गोपाङ्गनिष्पत्तिस्तूत्तरकरणं, कार्मणतैजसयोस्तु स्वरूपनिष्पत्तिरेव मूलकरणम्, अङ्गोपाङ्गाभावान्नोत्तरकरणं, यदिवा औदारिकस्य कर्णवेधादिकमुत्तरकरणं, वैक्रियस्य तूत्तरकरणम्—उत्तरवैक्रियं, दन्तकेशादिनिष्पादनरूपं वा, आहारकस्य तु गमनाद्युत्तरकरणं, यदिवा औदारिकस्य मूलोत्तरकरणे गाथापश्चार्द्धेन प्रकारान्तरेण दर्शयति—'द्रव्येन्द्रियाणि' कलम्बुकापुष्पाद्याकृतीनि मूलकरणं, तेषामेव परिणामिनां विषौषधादिभिः क्षाट्याद्यापादनमुत्तरकरणमिति ॥ ६ ॥ साम्प्रतमजीवाश्रितं करणमभिधातुकाम आह—

१ उक्कारसमर्थं भवति संस्करणादित्यर्थः चू० । २ कण्णवेहमाईयमिति टीकाकृद्दहार्दम् । ३ कालेन संघातनादि चिन्ता विस्तरेण चूर्णौ उ० वृ० वत् ४ शीर्षमुरः उदरं पृष्ठिः द्वौ बाहू ऊरू चाङ्घ्री अङ्गानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संघायणे य परिसाडणा य मीसे तहेव पडिसेहो। पडसंखसगडथूणाउद्धतिरिच्छादिकरणं च ॥ ७ ॥

संघातकरणम्—आतानवितानीभूततन्तुसंघातेन पटस्य, परिसाटकरणं—करपत्रादिना शङ्खस्य निष्पादनं, संघातपरिसाटकरणं-शकटादेः, तदुभयनिषेधकरणं-स्थूणादेरूर्ध्वतिरश्चीनाद्यापादनमिति ॥ ७ ॥ प्रयोगकरणमभिधाय विस्रसाकरणाभिधित्सयाऽऽह—

खंधेसु दुप्पएसादिएसु अब्भेसु विज्जुमाईसु। णिप्फण्णगाणि दव्वाणि जाण तं वीससाकरणं ॥ ८ ॥

विस्रसाकरणं साद्यनादिभेदाद्द्विधा,तत्रानादिकं धर्माधर्माऽऽकाशानामन्योऽन्यानुवेधेनावस्थानम्, अन्योऽन्यसमाधानाश्रयणाच्च सत्यप्यनादित्वे करणत्वाविरोधः, रूपिद्रव्याणां च द्व्यणुकादिप्रक्रमेण भेदसंघाताभ्यां स्कन्धत्वापत्तिः सादिकं करणं, पुद्गलद्रव्याणां च दशविधः परिणामः, तद्यथा—बन्धनगतिसंस्थानभेदवर्णगन्धरसस्पर्शअगुरुलघुशब्दरूप इति, तत्र बन्धः स्निग्धरूक्षत्वात्, गतिपरिणामो—देशान्तरप्राप्तिलक्षणः, संस्थानपरिणामः-परिमण्डलादिकः पञ्चधा, भेदपरिणामः-खण्डप्रतरचूर्णकानुतटिकोत्करिकाभेदेन पञ्चधैव, खंडादिस्वरूपप्रतिपादकं चेदं गाथाद्वयम्, तद्यथा—'[1] खंडेहि खंडभेयं पयरब्भेयं जहब्भपडलस्स। चुण्णं चुण्णियभेयं अणुतडियं वंसवक्कलियं ॥ १ ॥ [2]दुंदुंमि समारोहे भेए उक्केरिया य उक्केरं। वीससपओगमीसगसंघायविओग

१ विधिविपर्ययेऽन्यथाभावः त्रिविधा गतिर्वा चू० । २ अचित्ता काचिद्विद्युदिति लक्ष्यतेऽनेन । ३ खण्डानां खण्डभेदः प्रतरभेदो यथाऽभ्रपटलस्य । चूर्णभूर्णितभेदोऽनुतटिका वंशवल्कलिका ॥ १ ॥ शुष्कतडागे समारोहे भेदे उत्करिका चोत्कीर्णः । विश्रसाप्रयोगमिश्रसंघातविभागतो विविधो गमः ॥ २ ॥ ४ दुंदंसीति काष्ठपटनो कुन्द इति वि०प० ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ४ ॥

विविहगमो ॥ २ ॥' वर्णपरिणामः पञ्चानां श्वेतादीनां वर्णानां परिणतिस्तद्व्यादिसंयोगपरिणतिश्च, एतत्स्वरूपं च गाथाभ्योऽवसेयं, ताश्चेमाः-'जई कालगमेगगुणं सुकिलयंपि य हविज्ज बहुयगुणं। परिणामिज्जइ कालं सुक्केण गुणाहियगुणेणं ॥ १ ॥ जइ सुकिलमेगगुणं कालगदव्वं तु बहुगुणं जइ य। परिणामिज्जइ सुक्कं कालेण गुणाहियगुणेणं ॥२॥ जइ सुक्कं एकगुणं कालगदव्वंपि एकगुणमेव। कावोयं परिणामं तुल्लगुणत्तेण संभवइ ॥३॥ एवं पंचवि वण्णा संजोएणं तु वण्णपरिणामो। एकत्तीसं भंगा सव्वेवि य ते मुणेयव्वा ॥४॥ एमेव य परिणामो गंधाण रसाण तहय फासाणं। संठाणाण य भणिओ संजोगेणं बहुविगप्पो ॥५॥' एकत्रिंशद्भङ्गा एवं पूर्यन्ते—दश द्विकसंयोगा दश त्रिकसंयोगाः पञ्च चतुष्कसंयोगा एकः पञ्चकसंयोगः प्रत्येकं वर्णाश्च पञ्चेति। अगुरुलघुपरिणामस्तु परमाणोरारभ्य यावदनन्तानन्तप्रदेशिकाः स्कन्धाः सूक्ष्माः, शब्दपरिणामस्ततविततघनशुषिरभेदाच्चतुर्द्धा, तथा ताल्वोष्ठपुटव्यापाराद्यभिनिवर्त्यश्च, अन्येऽपि च पुद्गलपरिणामाश्छायादयो भवन्ति, ते चामी—'[1]छाया य आयवो वा उज्जोओ तहय अंधकारो य। एसो उ पुग्गलाणं परिणामो फंदणा चेव ॥१॥ सीया णाइपगासा छाया णाइच्चिया बहुविगप्पा। उण्हो पुणप्पगासो णायव्वो आयवो नाम ॥२॥

१ समवाध्ययने करणनिक्षेपः

॥ ४ ॥

१ यदि कालकमेकगुणं शुक्लमपि च भवेत् बहुकगुणम्। परिणम्यते कालकं शुक्लेन गुणाधिकगुणेन ॥ १ ॥ यदि शुक्लमेकगुणं कालकद्रव्यं तु बहुगुणं यदि च। परिणम्यते शुक्लं कालकेन गुणाधिकगुणेन ॥ २ ॥ यदि शुक्लमेकगुणं कालकद्रव्यमप्येकगुणमेव। कापोतः परिणामः तुल्यगुणत्वेन संभवति ॥ ३ ॥ एवं पञ्चापि वर्णाः संयोगेन तु वर्णपरिणामः। एकत्रिंशद्भङ्गाः सर्वेऽपि च ते मुणितव्याः ॥ ४ ॥ एवमेव च परिणामो गन्धयो रसानां तथैव स्पर्शानाम्। संस्थानानां च भणितः संयोगेन बहुविकल्पः ॥ ५ ॥ २ छाया चातपो वोद्योतस्तथैवान्धकारश्च। एष एव पुद्गलानां परिणामः स्पन्दनं चैव ॥ १ ॥ शीता नातिप्रकाशा छाया अन्यादित्यिका बहुविकल्पा। उष्णः पुनः प्रकाशो ज्ञातव्य आतपो नाम ॥ २ ॥

[1]नवि सीओ नवि उण्हो समो पगासो य होइ उज्जोओ। कालं महलं तमंपि य वियाण तं अंधयारंति ॥ ३ ॥ दव्वस्स चलण पप्फंदणा उ सा पुण गई उ निद्दिट्ठा। वीससपओगमीसा अत्तपरेणं तु उभओवि ॥ ४ ॥' तथाऽभ्रेन्द्रधनुर्विद्युदादिषु कार्येषु यानि पुद्गलद्रव्याणि परिणतानि तद्विस्रसाकरणमिति ॥ ८ ॥ गतं द्रव्यकरणम्, इदानीं क्षेत्रकरणाभिधित्सयाऽऽह—

ण विणा आगासेणं कीरइ जं किंचि खेत्तमागासं। वंजणपरियावण्णं उच्छुकरणमादियं बहुहा ॥ ९ ॥

'क्षि निवासगत्योः' अस्मादधिकरणे ष्ट्रना क्षेत्रमिति, तच्चावगाहदानलक्षणमाकाशं, तेन चावगाहदानाभ्येन विना न किञ्चिदपि कर्तुं शक्यत इत्यतः क्षेत्रे करणं क्षेत्रकरणं, नित्यत्वेऽपि चोपचारतः क्षेत्रस्यैव करणं क्षेत्रकरणं, यथा गृहादावपनीते कृतमाकाशमुत्पादिते विनष्टमिति, यदिवा 'व्यञ्जनपर्यायापन्नं' शब्दद्वाराऽऽयातम् 'इक्षुकरणादिक'मिति इक्षुक्षेत्रस्य करणम्—लाङ्गलादिना संस्कारः क्षेत्रकरणं, तच्च बहुधा-शालिक्षेत्रादिभेदादिति ॥ ९ ॥ साम्प्रतं कालकरणाभिधित्सयाऽऽह—

कालो जो जावइओ जं कीरइ जंमि जंमि कालंमि। ओहेण णामओ पुण करणा एक्कारस हवंति ॥ १० ॥

कालस्यापि मुख्यं करणं न संभवतीत्यौपचारिकं दर्शयति-'कालो यो यावानिति' यः कश्चिद् घटिकादिको नलिकादिना व्यवच्छिद्य व्यवस्थाप्यते, तद्यथा—षष्टयुदकपलमाना घटिका द्विघटिको मुहूर्त्तस्त्रिंशन्मुहूर्तमहोरात्रमित्यादि, तत्कालकरणमिति,

॥ ४ ॥

१ नापि शीतो नाप्युष्णः समः प्रकाशो भवति चोद्योतः। कालं महान्तं तमोऽपि च विजानीहि तदन्धकार इति ॥३॥ द्रव्यस्य चलनं प्रस्पन्दना तु सा पुनर्गतिस्तु निर्दिष्टा। विश्रसाप्रयोगमिश्रादात्मपराभ्यां तूभयतोऽपि ॥ ४ ॥ २ साहूहिं अच्छमाणेहिं गामो खेत्तीकओ चू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा—यत् यस्मिन् काले क्रियते यत्र वा काले करणं व्याख्यायते तत्कालकरणम्, एतदोघतः, नामतस्त्वेकादश करणानि ॥१०॥ तानि चामूनि—

बंब च बालवं चेव, कोलवं तेत्तिलं तहा। गरादि वणियं चेव, विट्ठी हवइ सत्तमा ॥ ११ ॥ सउणि चउप्पयं नागं किंसुग्घं च करणं भवे एयं। एते चत्तारि धुवा अन्ने करणा चला सत्त ॥ १२ ॥ चाउद्दसि रत्तीए सउणी पडिवज्जए सदा करणं। तत्तो अहक्कमं खलु चउप्पयं णाग किंसुग्घं ॥ १३ ॥

ऐतद्गाथात्रयं सुखोन्नेयमिति ॥ ११ ॥ १२ ॥ १३ ॥ इदानीं भावकरणप्रतिपादनायाऽऽह—

भावे पओगवीससस पओगसा मूल उत्तरे चेव। उत्तर कमसुयजोवण वण्णादी भोअणादीसु ॥ १४ ॥

भावकरणमपि द्विधा—प्रयोगविस्रसाभेदात्, तत्र जीवाश्रितं प्रायोगिकं मूलकरणं पञ्चानां शरीराणां पर्याप्तिः, तानि हि पर्याप्तिनामकर्मोदयादौदयिके भावे वर्तमानो जीवः स्ववीर्यजनितेन प्रयोगेण निष्पादयति। उत्तरकरणं तु गाथापश्चार्द्धेनाह—उत्तरकरणं क्रमश्रुतयौवनवर्णादिचतूरूपं, तत्र क्रमकरणं शरीरनिष्पत्युत्तरकालं बालयुवस्थविरादिक्रमेणोत्तरोत्तरोऽवस्थाविशेषः, श्रुतकरणं तु व्याकरणादिपरिज्ञानरूपोऽवस्थाविशेषोऽपरकलापरिज्ञानरूपश्चेति, यौवनकरणं कालकृतो वयोऽवस्थाविशेषो रसायनाद्यापादितो वेति, तथा वर्णगन्धरसस्पर्शकरणं विशिष्टेषु भोजनादिषु सत्सु यद्विशिष्टवर्णाद्यापादनमिति, एतच्च पुद्गलविपाकित्वाद्वर्णादीनामजीवाश्रितमपि द्रष्टव्यमिति ॥ १४ ॥ इदानीं विस्रसाकरणाभिधित्सयाऽऽह—

वण्णादिया य वण्णादिएसु जे केइ वीससामेला। ते हुंति थिरा अथिरा छायातवदुद्धमादीसु ॥ १५ ॥

'वर्णादिका' इति रूपरसगन्धस्पर्शाः ते यदाऽपरेष्वपरेषां वा स्वरूपादीनां मिलन्ति ते वर्णादिमेलका विस्रसाकरणं, ते च मेलकाः स्थिरा—असंख्येयकालावस्थायिनः, अस्थिराश्च—क्षणावस्थायिनः, सन्ध्यारागाभ्रेन्द्रधनुरादयो भवन्ति, तथा छायातेनातपस्तेन च पुद्गलानां विस्रसापरिणामत एव परिणामो भावकरणं दुग्धादेश्च स्तनप्रच्यवनानन्तरं प्रतिक्षणं कठिनाम्लादिभावेन गमनमिति ॥ १५ ॥ साम्प्रतं श्रुतज्ञानमधिकृत्य मूलकरणाभिधित्सयाऽऽह—

मूलकरणं पुण सुते तिविहे जोगे सुभासुभे झाणे। ससमयसुएण पगयं अज्झवसाणेण य सुहेणं ॥ १६ ॥

'श्रुते' पुनः श्रुतग्रन्थे मूलकरणमिदं 'त्रिविधे योगे' मनोवाक्कायलक्षणे व्यापारे शुभाशुभे च ध्याने वर्तमानैर्ग्रन्थरचना क्रियते, तत्र लोकोत्तरे शुभध्यानावस्थितैर्ग्रन्थरचना विधीयते, लोके त्वशुभध्यानाश्रितैर्ग्रन्थग्रथनं क्रियत इति, लौकिकग्रन्थस्य कर्मबन्धहेतुत्वात् कर्तुरशुभध्यायित्वमवसेयम्, इह तु सूत्रकृतस्य तावत्स्वसमयेन शुभाध्यवसायेन चेति प्रकृतं, यस्माद्गणधरैः शुभध्यानावस्थितैरिदमङ्गीकृतमिति ॥ १६ ॥ तेषां च ग्रन्थरचनां प्रति शुभध्यायिनां कर्मद्वारेण योऽवस्थाविशेषस्तं दर्शयितुकामो निर्युक्तिकृदाह—

ठिइअणुभावे बंधणनिकायणनिहत्तदीहहस्सेसु। संकमउदीरणाए उदए वेदे उवसमे य ॥ १७ ॥

तत्र कर्मस्थितिं प्रति अजघन्योत्कृष्टकर्मस्थितिभिर्गणधरैः सूत्रमिदं कृतमिति, तथाऽनुभावो—विपाकस्तदपेक्षया मन्दानुभावैः, तथा बन्धमङ्गीकृत्य ज्ञानावरणीयादिप्रकृतीर्मन्दानुभावा बध्नद्भिः तथाऽनिकाचयद्भिरेवं निधत्तावस्थामकुर्वद्भिः तथा दीर्घस्थितिकाः कर्मप्रकृतीर्ह्रसीयसीर्जनयद्भिः, तथोत्तरप्रकृतीर्बध्यमानासु संक्रामयद्भिः, तथोदयवतां कर्मणामुदीरणां विदधानैरप्रमत्तगुणस्थैस्तु सातासाताऽऽयुष्यनुदीरयद्भिः, तथा मनुष्यगतिपञ्चेन्द्रियजात्यौदारिकशरीरतदङ्गोपाङ्गादिकर्मणामुदये वर्तमानैः, तथा वेदमङ्गीकृत्य पुंवेदे सति, तथा 'उवसमे'त्ति सूचनात्सूत्रमिति क्षायोपशमिके भावे वर्तमानैर्गणधारिभिरिदं सूत्रकृताङ्गं दृब्धमिति ॥ १७ ॥ साम्प्रतं स्वमनीषिकापरिहारद्वारेण करणप्रकारमभिधातुकाम आह—

सोऊण जिणवरमतं गणहारी काउ तक्खओवसमं। अज्झवसाणेण कयं सूत्तमिणं तेण सूयगडं ॥ १८ ॥

'श्रुत्वा' निशम्य जिनवराणां—तीर्थकराणां मतम्—अभिप्रायं मातृकापदं 'गणधरैः' गौतमादिभिः कृत्वा 'तत्र' ग्रन्थरचने क्षयोपशमं, तत्प्रतिबन्धककर्मक्षयोपशमाद्दत्तावधानैरितिभावः, शुभाध्यवसायेन च सता कृतमिदं सूत्रं तेन सूत्रकृतमिति ॥१८॥ इदानीं कस्मिन् योगे वर्तमानैस्तीर्थकृद्भिर्भाषितं ? कुत्र वा गणधरैर्दृब्धमित्येतदाह—

वइजोगेण पभासियमणेगजोगंधराण साहूणं। तो वयजोगेण कयं जीवस्स सभाविगुणेण ॥ १९ ॥

तत्र 'तीर्थकृद्भिः' क्षायिकज्ञानवर्तिभिर्वाग्योगेनार्थः प्रकर्षेण भाषितः प्रभाषितो गणधराणां, ते च न प्राकृतपुरुषकल्पाः

---

१ श्रीविलोयणं प्र० । २ पक्खतिहिओ दुगुणिआ दुरूवहीणा य सुक्कपक्खंमि । सत्तहिए देवसियं तं चेव रूवाहियं रत्तिं ॥ १ ॥ इति गाथानुसारेण करणयोजना ४×२=८-२=६+(विष्टि) १+७(वणिक्)=१०=२÷, २०=६+१=७ (व. वि०)।

१ समयेन प्र० । २ समयत्वेनेति पाठे योगसमुच्चयाय अन्यथा स्वसमयसमुच्चयः, शुभध्यानसमुच्चयोऽप्युभयत्र । ३ रिदमङ्गीकृत इति प्र० ।

१ मातृकापदादिकं प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं तनेकयोगधराः, तत्र योगः–क्षीराश्रवादिलब्धिकलापसंबन्धस्तं धारयन्तीत्यनेकयोगधरास्तेषां, प्रभाषितमिति सूत्रकृताङ्गापेक्षया नपुंसकता, साधवश्चात्र गणधरा एव गृह्यन्ते, तदुद्देशेनैव भगवतामर्थप्रभाषणादिति, ततोऽर्थं निशम्य गणधरैरपि वाग्योगेनैव कृतं, तच्च जीवस्य 'स्वाभाविकेन गुणेनेति' स्वस्मिन् भावे भवः स्वाभाविकः प्राकृत इत्यर्थः, प्राकृतभाषयेत्युक्तं भवति, न पुनः संस्कृतया लट्लिट्शप्रकृतिप्रत्ययादिविकारविकल्पनानिष्पन्नयेति ॥ १९ ॥ पुनरन्यथा सूत्रकृतनिरुक्तमाह—

अक्खरगुणमतिसंघायणाएँ कम्मपरिसाडणाए य । तदुभययोगेण कयं सुत्तमिणं तेण सूत्तगडं ॥ २० ॥

अक्षराणि–अकारादीनि तेषां गुणः–अनन्तगमपर्यायवक्तव्यमुच्चारणं वा, अन्यथाऽर्थस्य प्रतिपादयितुमशक्यत्वात्, मतेः–मतिज्ञानस्य संघटना मतिसंघटना, अक्षरगुणेन मतिसंघटना अक्षरगुणमतिसंघटना, भावश्रुतस्य द्रव्यश्रुतेन प्रकाशनमित्यर्थः, अक्षरगुणस्य वा मत्या–बुद्ध्या संघटना रचनेतियावत् तयाऽक्षरगुणमतिसंघटनया, तथा कर्मणां–ज्ञानावरणादीनां परिशाटना–जीवप्रदेशेभ्यः पृथक्करणरूपा तया च हेतुभूतया, सूत्रकृताङ्गं कृतमिति संबन्धः, तथाहि–यथा यथा गणधराः सूत्रकरणायोद्यमं कुर्वन्ति तथा तथा कर्मपरिशाटना भवति, यथा यथा च कर्मपरिशाटना तथा तथा ग्रन्थरचनायोद्यमः संपद्यत इति, एतदेव गाथापश्चार्धेन दर्शयति–'तदुभययोगेनेति' अक्षरगुणमतिसंघटनायोगेन कर्मपरिशाटनायोगेन च, यदिवा वाग्योगेन मनोयोगेन च कृतमिदं सूत्रं तेन सूत्रकृतमिति ॥ २० ॥ इहानन्तरं सूत्रकृतस्य निरुक्तमुक्तम्, अधुना सूत्रपदस्य निरुक्ताभिधित्सयाऽऽह—

सुत्तेण सुत्तिया चिय अत्था तह सूइया य जुत्ता य । तो बहुविहप्पउत्ता एय पसिद्धा अणादीया ॥२१॥

१ प्रोक्ताः २ युज्यमानाः ३ चउव्विहेण जाइबंधेण पंचावयवविसेसेण वा चू०

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ७ ॥

अर्थस्य सूचनात्सूत्रं तेन सूत्रेण केचिदर्थाः साक्षात्सूत्रिता–मुख्यतयोपात्ताः, तथाऽपरे सूचिता–अर्थापत्त्याक्षिप्ताः साक्षादनुपादानेऽपि ध्यानयनचोदनया तदाधारानयनचोदनावदिति, एवं च कृत्वा चतुर्दशपूर्ववेदिनः परस्परं षट्स्थानपतिता भवन्ति, तथा चोक्तम्–"अक्खरलंभेण समा ऊणहिया हुंति मतिविसेसेहिं । तेऽवियं मइविसेसा सुयणाणऽब्भंतरे जाण ॥ १ ॥" तत्र ये साक्षादुपात्तास्तान् प्रति सर्वेऽपि तुल्याः, ये पुनः सूचितास्तदपेक्षया कस्यचिदनन्तभागाधिकमर्थं वेत्त्यपरोऽसंख्येयभागाधिकमन्यः संख्येयभागाधिकं तथाऽन्यः संख्येयासंख्येयानन्तगुणमिति, ते च सर्वेऽपि 'युक्ता' युक्त्युपपन्नाः सूत्रोपात्ता एव वेदितव्याः, तथा चाभिहितम्–"तेऽवियं मइविसेसे" इत्यादि, ननु किं सूत्रोपात्तेभ्योऽन्येऽपि केचनार्थाः सन्ति ? येन तदपेक्षया चतुर्दशपूर्ववेदिनां षट्स्थानपतिततामुद्घुष्यते, बाढं विद्यन्ते, यतोऽभिहितम्–"पण्णवेणिज्जा भावा अणंतभागो उ अणभिलप्पाणं । पण्णवणिज्जाणं पुण अणंतभागो सुयनिबद्धो ॥ १ ॥" यतश्चैवं ततस्ते अर्था आगमे बहुविधं प्रयुक्ताः–सूत्रैरुपात्ताः केचन साक्षात्केचिदर्थापत्त्या समुपलभ्यन्ते, यदिवा क्वचिदेशग्रहणं क्वचित्सर्वार्थोपादानमित्यादि, यैश्च पदैस्ते अर्थाः प्रतिपाद्यन्ते तानि पदानि प्रकर्षेण सिद्धानि प्रसिद्धानि न साधनीयानि, तथाऽनादीनि च तानि नेदानीमुत्पाद्यानि, तथा चेयं द्वादशाङ्गी शब्दार्थरचनाद्वारेण विदेहेषु नित्या भरतैरावतेष्वपि शब्दरचनाद्वारेणैव प्रति तीर्थकरं क्रियते अन्यथा तु नित्यैव । एतेन च 'उच्चरितप्रध्वंसिनो वर्णा' इत्येतन्निराकृतं वेदितव्यमिति ॥ २१ ॥ साम्प्रतं सूत्रकृतस्य श्रुतस्कन्धाध्ययनादिनिरूपणार्थमाह—

१ समवाध्ययने सूत्रनिरुक्तम्

॥ ७ ॥

१ अक्षरलाभेन समा ऊनाधिका भवन्ति मतिविशेषैः । तानपि च मतिविशेषान् श्रुतज्ञानाभ्यन्तरे जानीहि ॥ १ ॥ २ प्रज्ञापनीया भावा अनन्तभाग एवानभिलाप्यानाम् । प्रज्ञापनीयानां पुनरनन्तभागः श्रुतनिबद्धः ॥ १ ॥

दो चेव सुयक्खंधा अज्झयणाइं च हुंति तेवीसं । तेत्तिसुद्देसणकाला आयाराओ दुगुणमंगं ॥ २२ ॥

द्वावत्र श्रुतस्कन्धौ, त्रयोविंशतिरध्ययनानि, त्रयस्त्रिंशदुद्देशनकालाः, ते चैवं भवन्ति–प्रथमाध्ययने चत्वारो द्वितीये त्रयस्तृतीये चत्वारः एवं चतुर्थपञ्चमयोर्द्वौ द्वौ तथैकादशस्त्रेकसप्तकेष्वेकादशैवेति प्रथमश्रुतस्कन्धे, तथा द्वितीयश्रुतस्कन्धे सप्ताध्ययनानि तेषां सप्तैवोद्देशनकालाः, एवमेते सर्वेऽपि त्रयस्त्रिंशदिति, एतच्चाचाराङ्गाद्द्विगुणमङ्गं, षट्त्रिंशत्पदसहस्रपरिमाणमित्यर्थः ॥ २२ ॥ साम्प्रतं सूत्रकृताङ्गनिक्षेपानन्तरं प्रथमश्रुतस्कन्धस्य नामनिष्पन्ननिक्षेपाभिधित्सयाऽऽह—

निक्खेवो गाहाए चउव्विहो छव्विहो य सोलससु । निक्खेवो य सुयंमि य खंधे य चउव्विहो होइ ॥२३॥

इहाद्यश्रुतस्कन्धस्य गाथाषोडशक इति नाम, गाथाख्यं षोडशमध्ययनं यस्मिन् श्रुतस्कन्धे स तथेति, तत्र गाथाया नामस्थापनाद्रव्यभावरूपश्चतुर्विधो निक्षेपः, नामस्थापने प्रसिद्धे, द्रव्यगाथा द्विधा–आगमतो नोआगमतश्च, तत्र आगमतो ज्ञाता तत्र चानुपयुक्तः 'अनुपयोगो द्रव्य'मितिकृत्वा, नोआगमतस्तु त्रिधा–ज्ञशरीरद्रव्यगाथा भव्यशरीरद्रव्यगाथा ताभ्यां विनिर्मुक्ता च–"सत्तट्ठतरू विसमे ण से हया ताण छट्ठ णह जलया । गाहाए पच्छद्धे भेओ छट्ठोत्ति इककलो ॥ १ ॥" इत्यादिलक्षणलक्षिता पत्रपुस्तकादिन्यस्तेति, भावगाथापि द्विविधा–आगमनोआगमभेदात्, तत्राऽऽगमतो गाथापदार्थज्ञस्तत्र चोपयुक्तः, नोआगमतस्त्विदमेव गाथाख्यमध्ययनम्, आगमैकदेशत्वादस्य । षोडशकस्यापि नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् षोढा निक्षेपः, तत्र नाम-

१ सप्त तरवः (चतुर्मात्रा गणाः) अष्टमः (गुरुः) विषमे न (जगणः,) तस्याघातकास्तासां षष्ठे नहौ (चतुर्लघवः) जो वा । गाथायाः पश्चार्धे भेदः षष्ठ एककल इति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापने क्षुण्णे, द्रव्यषोडशकं ज्ञशरीरभव्यशरीरविनिर्मुक्तं सचित्तादीनि षोडश द्रव्याणि, क्षेत्रषोडशकं षोडशाकाशप्रदेशाः, कालषोडशकं षोडश समयाः एतत्कालावस्थायि वा द्रव्यमिति, भावषोडशकमिदमेवाध्ययनषोडशकं, क्षायोपशमिकभाववृत्तित्वादिति। श्रुतस्कन्धयोः प्रत्येकं चतुर्विधो निक्षेपः, स चान्यत्र न्यक्षेण प्रतिपादित इति नेह प्रतन्यते ॥ २३ ॥ साम्प्रतमध्ययनानां प्रत्येकमर्थाधिकारं दिदर्शयिषयाऽऽह—

ससमयपरसमयपरूवणा य णाऊण बुज्झणा चेव। संबुद्धस्सुवसग्गा थीदोसविवज्जणा चेव ॥ २४ ॥
उवसग्गभीरुणो थीवसस्स णरएसु होज्ज उववाओ। एव महप्पा वीरो जयमाह तहा जएज्जाहं ॥ २५ ॥
परिचत्तनिसीलकुसीलसुसीलसविग्गसीलयं चेव। णाऊण वीरियदुगं पंडियवीरिए पयट्टेज्ज (पयट्टिज्जा)-
॥२६॥ धम्मो समाहि मग्गो समोसढा चेउसु सव्ववादीसु। सीसगुणदोसकहणा गंथंमि सदा गुरुनिवासो ॥ २७ ॥ आदाणिय संकलिया आदाणीयंमि आदयचरित्तं। अप्पग्गंथे पिंडियवयणेण होइ अहिगारो ॥ २८ ॥

तत्र प्रथमाध्ययने स्वसमयपरसमयप्ररूपणा, द्वितीये स्वसमयगुणान् परसमयदोषांश्च ज्ञात्वा स्वसमय एव बोधो विधेय इति, तृतीयाध्ययने तु संबुद्धः सन् यथोपसर्गसहिष्णुर्भवति तदभिधीयते, चतुर्थे स्त्रीदोषविवर्जना, पञ्चमे स्वयमर्थाधिकारः, तद्यथा—उपसर्गसहिष्णोः स्त्रीवशवर्तिनोऽवश्यं नरकेषूपपात इति, षष्ठे पुनः 'एवमिति' अनुकूलप्रतिकूलोपसर्गसहनेन स्त्रीदोषवर्जनेन च भगवान् महावीरो जेतव्यस्य कर्मणः संसारस्य वा पराभवेन जयमाह ततस्तथैव यूयमिति शिष्याणामुपदेशो दीयते

१ स्त्रीवशगस्य प्र०

सप्तमे त्विदमभिहितं, तद्यथा—निःशीला—गृहस्थाः कुशीलास्तु—अन्यतीर्थिकाः पार्श्वस्थादयो वा ते परित्यक्ता येन साधुना स परित्यक्तनिःशीलकुशील इति, तथा सुशीला—उद्युक्तविहारिणः संविग्नाः—संवेगमग्नास्तत्सेवाशीलः शीलवान् भवतीति, अष्टमे त्वेतत्प्रतिपाद्यते, तद्यथा—ज्ञात्वा वीर्यद्वयं पण्डितवीर्ये प्रयत्नो विधीयत इति, नवमे अर्थाधिकारस्त्वयं, तद्यथा—यथाऽवस्थितो धर्मः कथ्यते, दशमे तु समाधिः प्रतिपाद्यते, एकादशे तु सम्यग्दर्शनज्ञानचारित्रात्मको मोक्षमार्गः कथ्यते, द्वादशे स्वयमर्थाधिकारः, तद्यथा—'समवसृता' अवतीर्णा व्यवस्थिताश्चतुर्षु मतेषु क्रियाऽक्रियाऽज्ञानवैनयिकाख्येष्वभिप्रायेषु त्रिषष्ट्युत्तरशतत्रयसंख्याः पापण्डिनः स्वीयं स्वीयमर्थं प्रसाधयन्तः समुत्थितास्तदुपन्यस्तसाधनदोषोद्भावनतो निराक्रियन्ते, त्रयोदशे त्विदमभिहितं, तद्यथा—सर्ववादिषु कपिलकणादाक्षपादशौद्धोदनिजैमिनिप्रभृतिमतानुसारिषु कुमार्गप्रणेतृत्वं साध्यते, चतुर्दशे तु ग्रन्थाख्येऽध्ययनेऽयमर्थाधिकारः, तद्यथा—शिष्याणां गुणदोषकथना, तथा शिष्यगुणसम्पदुपेतेन च विनेयेन नित्यं गुरुकुलवासो विधेय इति, पञ्चदशे त्वादानीयाख्येऽध्ययनेऽर्थाधिकारोऽयं, तद्यथा—आदीयन्ते—गृह्यन्ते उपादीयन्त इत्यादानीयानि—पदान्यर्था वा ते च प्रागुपन्यस्तपदैरर्थैश्च प्रायशोऽत्र संकलिताः, तथा आयतं चरित्रं—सम्यक्चरित्रं मोक्षमार्गप्रसाधकं तच्चात्र व्यावर्ण्यत इति, षोडशे तु गाथाख्येऽल्पग्रन्थेऽध्ययनेऽयमर्थो व्यावर्ण्यते, तद्यथा—पञ्चदशभिरध्ययनैर्योऽर्थोऽभिहितः सोऽत्र 'पिण्डितवचनेन' संक्षिप्ताभिधानेन प्रतिपाद्यत इति ॥ २८ ॥ 'गाहासोलसगाणं पिंडत्थो वण्णिओ समासेणं। इत्तो इक्किक्कं पुण अज्झयणं कित्तयिस्सामि' ॥ १ ॥

१ गुणानुरूपयु० प्र० २ गाथाषोडशकानां पिण्डार्थो वर्णितः (समुदायार्थः) समासेन। इत एकैकं पुनरध्ययनं कीर्त्तयिष्यामि ॥ १ ॥ ३ चूर्णिगाथा

तत्राद्यमध्ययनं समयाख्यं, तस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमणमुपक्रम्यते वाऽनेन शास्त्रं न्यासदेशं—निक्षेपावसरमानीयत इत्युपक्रमः, स च लौकिको नामस्थापनाद्रव्यक्षेत्रकालभावभेदेन षड्रूप आवश्यकादिष्वेव प्रपञ्चितः, शास्त्रीयोऽप्यानुपूर्वीनामप्रमाणवक्तव्यताऽर्थाधिकारसमवतारूपः षोढैव, तत्रानुपूर्व्यादीन्ययनुयोगद्वारानुसारेण ज्ञेयानि तावद्यावत्समवतारः, तत्रैतदध्ययनमानुपूर्व्यादिषु यत्र यत्र समवतरति तत्र तत्र समवतारयितव्यं, तत्र दशविधायामानुपूर्व्यां गणनानुपूर्व्यां समवतरति, सापि त्रिधा—पूर्वानुपूर्वी पश्चानुपूर्वी अनानुपूर्वी चेति, तत्रेदमध्ययनं पूर्वानुपूर्व्यां प्रथमं पश्चानुपूर्व्यां षोडशम् अनानुपूर्व्यां तु चिन्त्यमानमस्यामेवैकादिकायामेकोत्तरिकायां षोडशगच्छगतायां श्रेण्यामन्योऽन्याभ्यासद्विरूपोनसंख्याभेदं भवति। अनानुपूर्व्यां तु भेदसंख्यापरिज्ञानोपायोऽयं, तद्यथा—'एकाद्या गच्छपर्यन्ताः, परस्परसमाहताः। राशयस्तद्वि विज्ञेयं, विकल्पगणिते फलम् ॥ १ ॥' प्रस्तारानयनोपायस्त्वयम्—"पुव्वाणुपुवि हेट्ठा समयाभेएण कुण जहाजेट्ठं। उवरिमतुल्लं पुरओ नसेज्ज पुव्वक्कमो सेसे ॥१॥" तत्र—'गणितेऽन्त्यविभक्ते तु, लब्धं शेषैर्विभाजयेत्। आदावन्ते च तत् स्थाप्यं, विकल्पगणिते क्रमात् ॥१॥' अयं श्लोकः शिष्यहितार्थं विवियते—तत्र सुखावगमार्थं षट् पदानि समाश्रित्य तावत् श्लोकार्थो योज्यते, तत्रैवं १२३४५६ षट् पदानि स्थाप्यानि, एतेषां परस्परताडनेन सप्त शतानि विंशत्युत्तराणि गणितमुच्यते, तस्मिन् गणितेऽन्त्योऽत्र षट्कः तेन भागे हृते विंशत्युत्तरं शतं लभ्यते, तच्च षण्णां पङ्क्तीनामन्त्यपङ्क्तौ षट्कानां न्यस्यते, तदधः पञ्चकानां विंशत्युत्तरमेव शतम्, एवमधोऽधश्चतुष्कत्रिकद्विकैककानां प्रत्येकं विंशत्युत्तरशतं न्यस्यम्, एवमन्त्यपङ्क्तौ सप्त शतानि विंशत्युत्तराणि भवन्ति, एषा च गणितप्रक्रियाया आदिरुच्यते, तथा यत्त्रिंशत्युत्तरं शतं लब्धं, तस्य च पुनः शेषैः पञ्चकेन भागेऽपहृते लब्धा चतुर्विंशतिः, तावन्तस्तावन्तश्च पञ्चकचतुष्कत्रिकद्विकैककाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकं पञ्चमपङ्क्तौ न्यस्ताः यावद्द्विशत्युत्तरं शतमिति, तदधोऽग्रतो न्यस्तमङ्कं मुक्त्वा येऽन्ये तेषां यो यो महत्संख्यः स सोऽधस्ताच्चतुर्विंशतिसंख्य एव तावत् न्यस्तो यावत्सप्त शतानि विंशत्युत्तराणि पञ्चमपङ्क्तावपि पूर्णानि भवन्ति, एषा च गणितप्रक्रिययैवान्त्योऽभिधीयते, एवमनया प्रक्रियया चतुर्विंशतेः शेषचतुष्ककेन भागे हृते षट् लभ्यन्ते, तावन्तश्चतुर्थपङ्क्तौ चतुष्काः स्थाप्याः, तदधः षट् त्रिकाः, पुनर्द्विका भूय एककाः, पुनः पूर्वन्यायेन पङ्क्तिः पूरणीया, पुनः षट्कस्य शेषत्रिकेण भागे हृते द्वौ लभ्येते, तावन्मात्रौ त्रिकौ तृतीयपङ्क्तौ, शेषं पूर्ववत्, शेषपङ्क्तिद्वये शेषमङ्कद्वयं क्रमोत्क्रमाभ्यां व्यवस्थाप्यमिति १२३४, २१३४, १३२४, ३१२४, २३१४, ३२१४, १२४३, २१४३, १४२३, ४१२३, २४१३, ४२१३, १३४२, ३१४२, १४३२, ४१३२, ३४१२, ४३१२, २३४१, ३२४१, २४३१, ४२३१, ३४२१, ४३२१। तथा नाम्नि पञ्चिधनाभ्यवतरति, यतस्तत्र षड् भावाः प्ररूप्यन्ते, श्रुतस्य च क्षायोपशमिकभाववर्तित्वात्। प्रमाणमधुना—प्रमीयतेऽनेनेति प्रमाणं, तत् द्रव्यक्षेत्रकालभावभेदाच्चतुर्धा, तत्रास्याध्ययनस्य क्षायोपशमिकभावव्यवस्थितत्वाद्भावप्रमाणेऽवतारः, भावप्रमाणं च गुणनयसंख्याभेदात्त्रिधा, तत्रापि गुणप्रमाणे समवतारः, तदपि जीवाजीवभेदाद् द्विधा, समयाध्ययनस्य च क्षायोपशमिकभावरूपत्वात् तस्य च जीवानन्यत्वाज्जीवगुणप्रमाणे समवतारः, जीवगुणप्रमाणमपि ज्ञानदर्शनचारित्रभेदात्त्रिविधं, तत्रास्य बोधरूपत्वात् ज्ञानगुणप्रमाणे समवतारः, तदपि प्रत्यक्षानुमानोपमानागमभेदाच्चतुर्धा, तत्रास्यागमप्रमाणे समवतारः, सोऽपि लौकिकलोकोत्तरभेदाद् द्विधा, तदस्य लोकोत्तरे समवतारः, तस्य च सूत्रार्थतदुभयरूपत्वात्त्रैविध्यं, (अस्य त्रिपरूपत्वात्) त्रिष्वपि समवतारः, यदिवा-आत्मानन्तरपरम्परभेदादागमस्त्रिविधः, तत्र तीर्थकृतामर्थापेक्षयाऽऽत्मागमो गणधराणामनन्तरागमस्तच्छिष्याणां परम्परागमः, सूत्रापेक्षया तु गणधराणामात्मागमस्तच्छिष्याणामनन्तरागमस्तदन्येषां परम्परागमः,

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ १० ॥

गुणप्रमाणानन्तरं नयप्रमाणावसरः, तस्य चेदानीं पृथक्त्वानुयोगे नास्ति समवतारो, भवेद्वा पुरुषापेक्षया, तथा चोक्तम् "मूढनइयं सुयं कालियं तु ण णया समोरयंति इहं। अपुहुत्ते समोयारो णत्थि पुहुत्ते समोयारो ॥१॥" तथा "आसज्ज उ सोयारं नए नयविसारउ बूया," संख्याप्रमाणं त्वष्टधा-नामस्थापनाद्रव्यक्षेत्रकालपरिमाणपर्यवभावभेदात्, तत्रापि परिमाणसंख्यायां समवतारः, सापि कालिकदृष्टिवादभेदात् द्विधा, तत्रास्य कालिकपरिमाणसंख्यायां समवतारः, तत्राप्यङ्गानङ्गयोरङ्गप्रविष्टे समवतारः, पर्यवसंख्यायां त्वनन्ताः पर्यवाः, तथा संख्येयान्यक्षराणि संख्येयाः संघाताः संख्येयानि पदानि संख्येयाः पादाः संख्येयाः श्लोकाः संख्येया गाथाः संख्येया वेढाः संख्येयान्यनुयोगद्वाराणि। साम्प्रतं वक्तव्यतायाः समवतारश्चिन्त्यते—सा च स्वपरसमयतदुभयभेदात्त्रिधा, तत्रेदमध्ययनं त्रिविधायामपि समवतरति। अर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारोऽभिहितः, उद्देशार्थाधिकारं तु गाथान्तरितं निर्युक्तिकृद्वक्ष्यति। साम्प्रतं निक्षेपावसरः, स च त्रिधा—ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च, तत्रौघनिष्पन्नेऽध्ययनं, तस्य च निक्षेप आवश्यकादौ प्रबन्धेनाभिहित एव. नामनिष्पन्ने तु समय इति नाम, तन्निक्षेपार्थं निर्युक्तिकार आह—

१ समयाध्ययने अनुयोगद्वाराणि

नामं ठवणा दविए खेत्ते काले कुतित्थसंगारे। कुलगणसंकरगंडी बोद्धव्वो भावसमए य ॥ २९ ॥

॥ १० ॥

नामस्थापनाद्रव्यक्षेत्रकालकुतीर्थसंगारकुलगणसंकरगण्डीभावभेदात् द्वादशधा समयनिक्षेपः, तत्र नामस्थापने क्षुण्णे, द्रव्यस-

१ वस्तुनः पर्यायाणां संभवतां निगमनं। २ मूढनयिकं (नयशून्यं) श्रुतं कालिकं तु न नयाः समवतरन्तीह। अपृथक्त्वे समवतारो नास्ति पृथक्त्वे समवतारः ॥ १ ॥ ३ आसाद्य तु श्रोतारं नयान् नयविशारदो ब्रूयात् ॥

मयो द्रव्यस्य सम्यगयनं—परिणतिविशेषः स्वभाव इत्यर्थः, तद्यथा—जीवद्रव्यस्योपयोगः पुद्गलद्रव्यस्य मूर्तत्वं धर्माधर्माकाशानां गतिस्थित्यवगाहदानलक्षणः, अथवा यो यस्य द्रव्यस्यावसरो—द्रव्यस्योपयोगकाल इति, तद्यथा-'वर्षासु लवणममृतं शरदि जलं गोपयश्च हेमन्ते। शिशिरे चामलकरसो घृतं वसन्ते गुडश्चान्ते ॥ १ ॥' क्षेत्रसमयः—क्षेत्रम्—आकाशं तस्य समयः—स्वभावः, यथा 'एगेणवि से पुण्णे दोहिवि पुण्णे सयंपि माएज्जा। लक्खसएणवि पुण्णे कोडिसहस्संपि माएज्जा ॥१॥' यदिवा देवकुरुप्रभृतीनां क्षेत्राणामीदृशोऽनुभावो यदुत तत्र प्राणिनः सुरूपा नित्यसुखिनो निर्वैराश्च भवन्तीति, क्षेत्रस्य वा परिकर्मणावसरः क्षेत्रसमय इति, कालसमयस्तु सुषमादेरनुभावविशेषः, उत्पलपत्रशतभेदाभिव्यङ्ग्यो वा कालविशेषः कालसमय इति, अत्र च द्रव्यक्षेत्रकालप्राधान्यविवक्षया द्रव्यक्षेत्रकालसमयता द्रष्टव्येति, कुतीर्थसमयः पाखण्डिकानामात्मीयात्मीय आगमविशेषः तदुक्तं वाऽनुष्ठानमिति, संगारः—संकेतस्तद्रूपः समयः संगारसमयः, यथा सिद्धार्थसारथिदेवेन पूर्वकृतसंगारानुसारेण गृहीतहरिध्वजो बलदेवः प्रतिबोधित इति, कुलसमयः—कुलाचारो यथा शकानां पितृशुद्धिः आभीरकाणां मन्थनिकाशुद्धिः, गणसमयो यथा मल्लानामयमाचारो—यथा यो ह्यनाथो मल्लो म्रियते स तैः संस्क्रियते, पतितश्चोद्धियत इति, संकरसमयस्तु संकरो—भिन्नजातीयानां मीलकस्तत्र च समयः—एकवाक्यता, यथा वाममार्गादावनाचारप्रवृत्तावपि गुप्तिकरणमिति, गण्डीसमयो—यथा शाक्यानां भोज-

१ कालओ भमरो सुगंधं चंदणादि तित्तो निंबो कक्कडओ पाहाणो चू०। २ एकेनापि स पूर्णो द्वाभ्यामपि पूर्णः शतमपि मायात्। लक्षशतेनापि पूर्णः कोटीसहस्रमपि मायात् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ११ ॥

नावसरे गण्डीताडनमिति, भावसमयस्तु नोआगमत इदमेवाध्ययनम्, अनेनैवाधिकारः, शेषाणां तु शिष्यमतिविकासार्थमुपन्यास इति ॥ २९ ॥ साम्प्रतं प्रागुपन्यस्तोद्देशार्थाधिकाराभिधित्सयाऽऽह—

१ समयाध्ययने उद्देशार्थाधिकाराः

महपंचभूय एकप्पए य तज्जीवतस्सरीरे य । तहय अगारगवाती अत्तच्छट्ठो अफलवादी ॥ ३० ॥ बीए निर्यइवाओ अण्णाणिय तहय नाणवाईओ । कम्मं चयं न गच्छइ चउव्विहं भिक्खुसमयंमि ॥ ३१ ॥ तइए आहाकम्मं कडवाई जह य ते य वाईओ । किज्जुवमा य चउत्थे परप्पवाई अविरएसु ॥ ३२ ॥

अस्याध्ययनस्य चत्वार उद्देशकाः, तत्राद्यस्य षडर्थाधिकारा आद्यगाथयाऽभिहिताः, तद्यथा पञ्च भूतानि—पृथिव्यप्तेजोवाय्वाकाशाख्यानि महान्ति च तानि सर्वलोकव्यापित्वात् भूतानि च महाभूतानि इत्ययमेकोऽर्थाधिकारः । तथा चेतनाचेतनं सर्वमेवात्मविवर्त इत्यात्माऽद्वैतवादः प्रतिपाद्यत इत्यर्थाधिकारो द्वितीयः । स चासौ जीवश्च तज्जीवः—कायाकारो भूतपरिणामः, तदेव च शरीरं जीवश्शरीरयोरैक्यमितियावदिति तृतीयोऽर्थाधिकारः । तथाऽकारको जीवः सर्वस्याः पुण्यपापक्रियाया इत्येवंवादीति चतुर्थोऽधिकारः । तथाऽस्मा षष्ठ इति पञ्चानां भूतानामात्मा षष्ठः प्रतिपाद्यत इत्ययं पञ्चमोऽर्थाधिकारः । तथाऽफलवादीति—न विद्यते कस्याश्चित् क्रियायाः फलमित्येवंवादी च प्रतिपाद्यत इति षष्ठोऽर्थाधिकार इति । द्वितीयोद्देशके चत्वारोऽर्थाधिकाराः, तद्यथा—नियतिवादस्तथाऽज्ञानिकमतं ज्ञानवादी च प्रतिपाद्यते, कर्म चयम्—उपचयं चतुर्विधमपि न गच्छति 'भिक्षुसमये' शाक्यागमे इति चतुर्थोऽर्थाधिकारः । चातुर्विध्यं तु कर्मणोऽविज्ञोपचितम्—अविज्ञानमविज्ञा तयोपचितम्, अनाभोगकृतमित्यर्थः, यथा मातुः स्नानाद्याक्रमणेन पुत्रव्यापत्तावप्यनाभोगान्न कर्मोपचीयते, तथा परिज्ञानं परिज्ञा—केवलेन मनसा पर्यालोचनं, तेनापि कस्यचित्प्राणिनो व्यापादनाभावात् कर्मोपचयाभाव इति, तथा ईरणमीर्या—गमनं तेन जनितमीर्याप्रत्ययं तदपि कर्मोपचयं न गच्छति, प्राणिव्यापादनाभिसन्धेरभावादिति, तथा स्वप्नान्तिकं—स्वप्नप्रत्ययं कर्म नोपचीयते, यथा स्वप्नभोजने तृप्त्यभाव इति । तृतीयोद्देशके त्वयमर्थाधिकारः, तद्यथा—आधाकर्मगतविचारस्तद्भोजिनां च दोषोपदर्शनमिति, तथा कृतवादी च मण्यते, तद्यथा—ईश्वरेण कृतोऽयं लोकः, प्रधानादिकृतो वा, यथा च ते प्रवादिन आत्मीयमात्मीयं कृतवादं गृहीत्वोत्थितास्तथा भण्यन्त इति द्वितीयोऽधिकारः, चतुर्थोद्देशकाधिकारस्त्वयं, तद्यथा—अविरतेषु—गृहस्थेषु यानि कृत्यानि—अनुष्ठानानि स्थितानि तैरसंयमप्रधानैः कर्तव्यैः 'परप्रवादी' परतीर्थिक उपमीयत इति । इदानीमनुगमः, स च द्वेधा—सूत्रानुगमो निर्युक्त्यनुगमश्च, तत्र निर्युक्त्यनुगमस्त्रिविधः, तद्यथा—निक्षेपनिर्युक्त्यनुगम उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्च । तत्र निक्षेपनिर्युक्त्यनुगमोऽनुगतः, ओघनामनिष्पन्ननिक्षेपयोरन्तर्गतत्वात्, तथा च वक्ष्यमाणस्य सूत्रस्य निक्षेप्स्यमानत्वात् । उपोद्घातनिर्युक्त्यनुगमस्तु षड्विंशतिद्वारप्रतिपादकाद्गाथाद्वयादवसेयः, तच्चेदम्—'उद्देसे निद्देसे य' इत्यादि । सूत्रस्पर्शिकनिर्युक्त्यनुगमस्तु सूत्रे सति संभवति, सूत्रं च सूत्रानुगमे, स चावसरप्राप्त एव, तत्रास्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

॥ ११ ॥

१—पस्थिताः प्र. २ उद्देसे निद्देसे य निग्गमे खित्त काल पुरिसे य । कारण पच्चय लक्खण नए समोयारणाणुमए ॥१॥ किं कइविहं कस्स कहिं केसु कहं किच्चिरं हवइ कालं । कइसंतरमविरहिअं भवागरिस फासण निरुत्ती ॥२॥ उद्देशो निर्देशश्च निर्गमः क्षेत्रं कालः पुरुषश्च । कारणं प्रत्ययो लक्षणं नयः समवतारोऽनुमतम् ॥१॥ किं कतिविधं कस्य क्व केषु कथं कियच्चिरं भवति कालम् । कति सान्तरमविरहितं भवा आकर्षाः स्पर्शना निरुक्तिः ॥२॥ ३ प्रसूतिर्निर्गमनमित्यर्थः,—मेघच्छन्ने यथा चन्द्रो, न राजति नभस्तले । उपोद्घातं विना शास्त्रं, तथा न भ्राजते विधौ ॥ १ ॥ ४ संहिता लक्षिता 'संहिया य पयं चेव पयत्थो पयविग्गहो । चालणा य पसिद्धी य

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ १२ ॥

१ समयाध्ययने बन्धप्रमोक्षौ

बुज्झिज्जत्ति तिउट्टिज्जा, बंधणं परिजाणिया । किमाह बंधणं वीरो, किंवा जाणं तिउट्टई ? ॥ १ ॥

अस्य संहितादिक्रमेण व्याख्या—बुध्येतेत्यादि, सूत्रमिदं सूत्रकृताङ्गादौ वर्तते, अस्य चाचाराङ्गेन सहायं संबन्धः, तद्यथा—आचाराङ्गेऽभिहितम्—'जीवो छक्कायरूवण्णा य तेसिं वहेण बंधोत्ति' इत्यादि तत्सर्वं बुध्येतेत्यादि, यदिवेह केषाञ्चिद्वादिनां ज्ञानादेव मुक्त्यवाप्तिरन्येषां क्रियामात्रात्, जैनानां तूभाभ्यां निःश्रेयसाधिगम इत्येतदनेन श्लोकेन प्रतिपाद्यते । तत्रापि ज्ञानपूर्विका क्रिया फलवती भवतीत्यादौ बुध्यतेत्यनेन ज्ञानमुक्तं त्रोटयेदित्येनेन च क्रियोक्ता, तत्रायमर्थो—'बुध्येत' अवगच्छेत् बोधं विदध्यादित्युपदेशः, किं पुनस्तद्बुध्येतात आह—'बन्धनं' बध्यते जीवप्रदेशैरन्योऽन्यानुवेधरूपतया व्यवस्थाप्यत इति बन्धनं—ज्ञानावरणाद्यष्टप्रकारं कर्म तद्धेतवो वा मिथ्यात्वाविरत्यादयः परिग्रहारम्भादयो वा, न च बोधमात्रादभिलषितार्थावाप्तिर्भवतीत्यतः क्रियां दर्शयति—तच्च बंधनं परिज्ञाय विशिष्टया क्रियया—संयमानुष्ठानरूपया 'त्रोटयेद्' अपनयेदात्मनः पृथक्कुर्यात्परित्यजेद्वा, एवं चाभिहिते जम्बूस्वाम्यादिको विनेयो बन्धादिस्वरूपं विशिष्टं जिज्ञासुः पप्रच्छ—'किमाह' किमुक्तवान् बन्धनं 'वीरः' तीर्थकृत् ?, किंवा 'जानन्' अवगच्छंस्तद्बन्धनं त्रोटयति ततो वा मुच्यते ?, इति श्लोकार्थः ॥ १ ॥ बन्धनप्रश्नस्वरूपप्रश्ननिर्वचनायाह—

॥ १२ ॥

चित्तमंतमचित्तं वा, परिगिज्झ किसामवि । अन्नं वा अणुजाणाइ, एवं दुक्खा ण मुच्चइ ॥ २ ॥

इह बन्धनं कर्म तद्धेतवो वाऽभिधीयन्ते, तत्र न निदानमन्तरेण निदानिनो जन्मेति निदानमेव दर्शयति, तत्रापि सर्वारम्भाः

छव्विहं विद्धि लक्खणं ॥ १ ॥" इति व्याख्यालक्षणे तस्या एवादौ प्रतिपादनात् ॥ १ एकान्तपरोक्षे चू० २ कर्मणो बन्धनत्वपक्षे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शयति, तत्रापि सर्वारम्भाः कर्मोपादानरूपाः प्रायश आत्मात्मीयग्रहोत्थाना इतिकृत्वाऽऽदौ परिग्रहमेव दर्शितवान्, चित्तम्—उपयोगो ज्ञानं तद्विद्यते यस्य तच्चित्तवत्—द्विपदचतुष्पदादि, ततोऽन्यदचित्तवत्—कनकरजतादि, तदुभयरूपमपि परिग्रहं परिगृह्य 'कृशमपि'स्तोकमपि तृणतुषादिकमपीत्यर्थः, यदिवा कसनं कसः—परिग्रहग्रहणबुद्ध्या जीवस्य गमनपरिणाम इतियावत्, तदेवं स्वतः परिग्रहं परिगृह्यान्यान्वा ग्राहयित्वा गृह्णतो वाऽन्याननुज्ञाय दुःखयतीति दुःखम्—अष्टप्रकारं कर्म तत्फलं वा असातोदयादिरूपं तस्मान्न मुच्यत इति, परिग्रहाग्रह एव परमार्थतोऽनर्थमूलं भवति, तथा चोक्तम्—"ममाहमिति चैष यावदभिमानदाहज्वरः, कृतान्तमुखमेव तावदिति न प्रशान्त्युन्मुखाः। यशःसुखपिपासितैरयमसावनर्थोत्करैः, परैरपसदः कुतोऽपि कथमप्यपाकृष्यते ॥ १ ॥" तथा च "द्वेषस्यायतनं धृतेरपचयः क्षान्तेः प्रतीपो विधिर्ध्यानस्य सुहृन्मदस्य भवनं ध्यानस्य कष्टो रिपुः। दुःखस्य प्रभवः सुखस्य निधनं पापस्य वासो निजः, प्राज्ञस्यापि परिग्रहो ग्रह इव क्लेशाय नाशाय च ॥ २ ॥" तथा च परिग्रहेऽप्राप्तनष्टेषु काङ्क्षाशोकौ प्राप्तेषु च रक्षणमुपभोगे चातृप्तिरित्येवं परिग्रहे सति दुःखात्मकाद्बन्धनान्न मुच्यत इति ॥ २ ॥ परिग्रहवतश्चावश्यंभाव्यारम्भस्तस्मिंश्च प्राणातिपात इति दर्शयितुमाह—

सयं तिवायए पाणे, अदुवाऽन्नेहिं घायए। हणंतं वाऽणुजाणाइ, वेरं वड्ढइ अप्पणो ॥ ३ ॥
जस्सिं कुले समुप्पन्ने, जेहिं वा संवसे नरे। ममाइ लुप्पई बाले, अण्णे अण्णेहि मुच्छिए ॥४॥

सूत्रकृ. १ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ १३ ॥

यदिवा—प्रकारान्तरेण बन्धनमेवाह—'सयं तीत्यादि'. स परिग्रहवानसंतुष्टो भयस्तदर्जनपरः समर्जितोपद्रवकारिणि च द्वेषमुपगतस्ततः 'स्वयम्' आत्मना 'त्रिभ्यो' मनोवाक्कायेभ्य आयुर्बलशरीरेभ्यो वा 'पातयेत्' च्यावयेत् 'प्राणान्' प्राणिनः, अकारलोपाद्वा अतिपातयेत् प्राणानिति, प्राणाश्चामी—'पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिश्वासमथान्यदायुः। प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा ॥१॥' तथा स परिग्रहाग्रही न केवलं स्वतो व्यापादयति अपरैरपि घातयति घ्नतश्चान्यान् समनुजानीते, तदेवं कृतकारितानुमतिभिः प्राण्युपमर्दनेन जन्मान्तरशतानुबन्ध्यात्मनो वैरं वर्धयति, ततश्च दुःखपरम्परारूपाद् बन्धनान्न मुच्यत इति। प्राणातिपातस्य चोपलक्षणार्थत्वात् मृषावादादयोऽपि बन्धहेतवो द्रष्टव्या इति॥३॥ पुनर्बन्धनमेवाश्रित्याह—'जस्सिं' मित्यादि, 'यस्मिन्' राष्ट्रकूटादौ कुले जातो 'यैर्वा' सह पांसुक्रीडितैर्वयस्यैर्भार्यादिभिर्वा सह संवसेन्नरः, तेषु मातृपितृभ्रातृभगिनीभार्यावयस्यादिषु ममायमिति ममत्ववान् स्निह्यन् 'लुप्यते' विलुप्यते, ममत्वजनितेन कर्मणा नारकतिर्यङ्मनुष्यामरलक्षणे संसारे भ्रम्यमाणो बाध्यते—पीड्यते। कोऽसौ ?—'बालः' अज्ञः, सदसद्विवेकरहितत्वाद्, अन्येष्वन्येषु च 'मूर्च्छितो' गृद्धोऽध्युपपन्नो, ममत्वबहुल इत्यर्थः, पूर्वं तावन्मातापित्रोस्तदनु भार्यायां पुनः पुत्रादौ स्नेहवानिति ॥४॥ साम्प्रतं यदुक्तं प्राक्—'किं वा जानन् बन्धनं त्रोटयतीति,' अस्य निर्वचनमाह—

वित्तं सोयरिया चेव, सव्वमेयं न ताणइ। संखाए जीविअं चेवं, कम्मुणा उ तिउट्टइ ॥ ५ ॥

१ समयाध्ययने स्वसमयः

॥ १३ ॥

'वित्तं' द्रव्यं, तच्च सचित्तमचित्तं वा, तथा 'सोदर्या' भ्रातृभगिन्यादयः, सर्वमपि च 'एतद्' वित्तादिकं संसारान्तर्गतस्यासुमतोऽतिकटुकाः शारीरमानसीर्वेदनास्समनुभवतो न 'त्राणाय' रक्षणाय भवतीत्येतत् 'संख्याय' ज्ञात्वा तथा 'जीविअं च' प्राणिनां स्वल्पमिति संख्याय—ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया तु सचित्ताचित्तपरिग्रहप्राण्युपघातस्वजनस्नेहादीनि बन्धनस्थानानि प्रत्याख्याय 'कर्मणः' सकाशात् 'त्रुट्यति' अपगच्छत्यसौ, तुरवधारणे, त्रुट्यत्येवेति, यदिवा—'कर्मणा' क्रियया संयमानुष्ठानरूपया बन्धनात्त्रुट्यति, कर्मणः पृथग्भवतीत्यर्थः ॥ ५ ॥ अध्ययनार्थाधिकाराभिहितत्वात्स्वसमयप्रतिपादनानन्तरं परसमयप्रतिपादनाभिधित्सयाऽऽह—

एए गंथे विउक्कम्म, एगे समणमाहणा। अयाणंता विउस्सित्ता, सत्ता कामेहि माणवा ॥ ६ ॥

'एतान्' अनन्तरोक्तान् ग्रन्थान् 'व्युत्क्रम्य' परित्यज्य स्वरुचिविरचितार्थेषु ग्रन्थेषु सक्ताः 'सिताः' बद्धाः, एके, न सर्वे इति संबन्धः। ग्रन्थातिक्रमश्चैतेषां तदुक्तार्थानभ्युपगमात्, अनन्तरग्रन्थेषु चायमर्थोऽभिहितः तद्यथा—जीवास्तित्वे सति ज्ञानावरणीयादिकर्मबन्धनं, तस्य हेतवो मिथ्यात्वाविरतिप्रमादादयः परिग्रहारम्भादयश्च, तन्मोटनं च सम्यग्दर्शनाद्युपायेन, मोक्षसद्भावश्चेत्येवमादिकः, तदेवमेके 'श्रमणाः' शाक्यादयो बार्हस्पत्यमतानुसारिणश्च ब्राह्मणाः 'एतान्' अर्हदुक्तान् ग्रन्थानतिक्रम्य परमार्थमजानाना विविधम्—अनेकप्रकारम् उत्—प्राबल्येन सिता—बद्धाः स्वसमयेष्वभिनिविष्टाः। तथा च शाक्या एवं प्रतिपादयन्ति, यथा—सुखदुःखेच्छाद्वेषज्ञानाधारभूतो नास्त्यात्मा कश्चित्, किंतु विज्ञानमेवैकं विवर्तत इति, क्षणिकाः सर्वसंस्कारा इत्यादि, तथा सांख्या एवं व्यवस्थिताः—सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽह-

१ परिव्राजकादयः अथवा समणलिंगत्था माहणा समणोवासगा समणा एव माहणा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारः, तस्माद्गगनश्च षोडशकः, तस्मात्षोडशकादपि पञ्च भूतानि, चैतन्यं पुरुषस्य स्वरूपमित्यादि, वैशेषिकाः पुनराहुः—द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्था इति, तथा नैयायिकाः—प्रमाणप्रमेयादीनां पदार्थानामन्वयव्यतिरेकपरिज्ञानान्निःश्रेयसाधिगम इति व्यवस्थिताः, तथा मीमांसकाः—चोदनालक्षणो धर्मो, न च सर्वज्ञः कश्चिद्विद्यते, मुख्यभावश्चेत्येवमाश्रिताः, चार्वाकास्त्वेवमभिहितवन्तो, यथा—नास्ति कश्चित्परलोकयायी भूतपञ्चकाव्यतिरिक्तो जीवाख्यः पदार्थो, नापि पुण्यपापे स्त इत्यादि । एवं चाङ्गीकृत्यैते लोकायतिकाः 'मानवाः' पुरुषाः 'सक्ता' गृद्धा अध्युपपन्नाः 'कामेषु' इच्छामदनरूपेषु, तथा चोचुः—'एतावानेव पुरुषो, यावानिन्द्रियगोचरः । भद्रे ! वृकपदं पश्य, यद्वदन्त्यबहुश्रुताः ॥ १ ॥ पिब खाद च साधु शोभने !, यदतीतं वरगात्रि ! तन्न ते । नहि भीरु ! गतं निवर्तते, समुदयमात्रमिदं कलेवरम् ॥ २ ॥" एवं ते तत्रान्तरीयाः स्वसमयार्थवासितान्तःकरणाः सन्तो भगवदर्हदुक्तं ग्रन्थार्थमजातपरमार्थाः समतिक्रम्य स्वकीयेषु ग्रन्थेषु सिताः—संबद्धाः कामेषु च सक्ता इति ॥ ६ ॥ साम्प्रतं विशेषेण सूत्रकार एव चार्वाकमतमाश्रित्याऽऽह—

संति पंच महब्भूया, इहमेगेसिमाहिया । पुढवी आउ तेऊ वा, वाउ आगासपंचमा ॥ ७ ॥
एए पंच महब्भूया, तेब्भो एगोत्ति आहिया । अह तेसिं विणासेणं, विणासो होइ देहिणो ॥८॥

'सन्ति' विद्यन्ते महान्ति च तानि भूतानि च महाभूतानि, सर्वलोकव्यापित्वान्महत्त्वविशेषणम्, अनेन च भूता-

१ लोकोऽयं ।

भाववादिनिराकरणं द्रष्टव्यम्, 'इह' अस्मिन् लोके 'एकेषां' भूतवादिनाम् 'आख्यातानि' प्रतिपादितानि तत्तीर्थकृता तैर्वा भूतवादिभिर्बार्हस्पत्यमतानुसारिभिराख्यातानि—स्वयमङ्गीकृतान्यन्येषां च प्रतिपादितानि । तानि चामूनि, तद्यथा—पृथिवी कठिनरूपा, आपो द्रवलक्षणाः, तेज उष्णरूपं, वायुश्चलनलक्षणः, आकाशं शुषिरलक्षणमिति, तच्च पञ्चमं येषां तानि तथा, एतानि साङ्गोपाङ्गानि प्रसिद्धत्वात् प्रत्यक्षप्रमाणावसेयत्वाच्च न कैश्चिदपह्नोतुं शक्यानि । ननु च साङ्ख्यादिभिरपि भूतान्यभ्युपगतान्येव, तथाहि सांख्यास्तावदेवमूचुः—सत्त्वरजस्तमोरूपात्प्रधानान्महान्, बुद्धिरित्यर्थः, महतोऽहङ्कारः—अहमितिप्रत्ययः, तस्मादप्यहङ्कारात्षोडशको गण उत्पद्यते, स चायम्—पञ्च स्पर्शनादीनि बुद्धीन्द्रियाणि, वाक्पाणिपादपायूपस्थरूपाणि पञ्च कर्मेन्द्रियाणि, एकादशं मनः, पञ्च तन्मात्राणि, तद्यथा—गन्धरसरूपस्पर्शशब्दतन्मात्राख्यानि, तत्र गन्धतन्मात्रात्पृथिवी गन्धरसरूपस्पर्शवती, रसतन्मात्रादापो रसरूपस्पर्शवत्यः, रूपतन्मात्राच्चेजो रूपस्पर्शवत्, स्पर्शतन्मात्राद्वायुः स्पर्शवान्, शब्दतन्मात्रादाकाशं गन्धरसरूपस्पर्शवर्जितमुत्पद्यत इति । तथा वैशेषिका अपि भूतान्यभिहितवन्तः, तद्यथा—पृथिवीत्वयोगात्पृथिवी, सा च परमाणुलक्षणा नित्या, द्व्यणुकादिप्रक्रमनिष्पन्नकार्यरूपतया त्वनित्या, चतुर्दशभिर्गुणैः रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्ववेगाख्यैरुपेता, तथाऽप्त्वयोगादापः, ताश्च रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वस्नेहवेगवत्यः, तासु च रूपं शुक्लमेव रसो मधुर एव स्पर्शः शीत एवेति, तेजस्त्वाभिसंबन्धात्तेजः, तच्च रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवत्ववे-

१ आगोपालाङ्गना प्र० ।

गाख्यैरेकादशभिर्गुणैर्गुणवत्, तत्र रूपं शुक्लं भास्वरं च, स्पर्श उष्ण एवेति, वायुत्वयोगाद्वायुः, स चानुष्णशीतस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगाख्यैर्नवभिर्गुणैर्गुणवान् हृत्कम्पशब्दानुष्णशीतस्पर्शलिङ्गः, आकाशमिति पारिभाषिकी संज्ञा एकत्वात्तस्य, तच्च संख्यापरिमाणपृथक्त्वसंयोगविभागशब्दाख्यैः षड्भिर्गुणैर्गुणवत् शब्दलिङ्गं चेति, एवमन्यैरपि वादिभिर्भूतसद्भावाश्रयणे किमिति लोकायतिकमतापेक्षया भूतपञ्चकोपन्यास इति ?, उच्यते, सांख्यादिभिर्हि प्रधानात्साहङ्कारिकं तथा कालदिगात्मादिकं चान्यदपि वस्तुजातमभ्युपेयते, लोकायतिकैस्तु भूतपञ्चकव्यतिरिक्तं नात्मादिकं किञ्चिदभ्युपगम्यते इत्यतस्तन्मताश्रयणेनैव सूत्रार्थो व्याख्यायत इति ॥ ७ ॥ यथा चैतत् तथा दर्शयितुमाह—'एए पंच महब्भूया' इत्यादि, 'एतानि' अनन्तरोक्तानि पृथिव्यादीनि पञ्च महाभूतानि यानि 'तेभ्यः' कायाकारपरिणतेभ्यः 'एकः' कश्चिच्चिद्रूपो भूताव्यतिरिक्त आत्मा भवति, न भूतेभ्यो व्यतिरिक्तोऽपरः कश्चित्परपरिकल्पितः परलोकानुयायी सुखदुःखभोक्ता जीवाख्यः पदार्थोऽस्तीत्येवमाख्यातवन्तस्ते, तथा(ते)हि एवं प्रमाणयन्ति—न पृथिव्यादिव्यतिरिक्त आत्माऽस्ति, तद्ग्राहकप्रमाणाभावात्, प्रमाणं चात्र प्रत्यक्षमेव,नानुमानादिकं,तत्रेन्द्रियेण साक्षादर्थस्य संबन्धाभावाद्व्यभिचारसंभवः, सति च व्यभिचारसंभवे सदृशे च बाधासंभवे तल्लक्षणमेव दूषितं स्यादिति सर्वत्रानाश्वासः, तथा चोक्तम्—"हस्तस्पर्शादिवान्धेन, विषमे पथि धावता । अनुमानप्रधानेन, विनिपातो न दुर्लभः ॥ १ ॥" अनुमानं चात्रोपलक्षणमागमादीनामपि, साक्षादर्थसंबन्धाभावाद्धस्तस्पर्शनेनेव प्रवृत्तिरिति । तस्मात्प्रत्यक्षमेवैकं प्रमाणं, तेन च भूतव्यतिरिक्तस्यात्मनो न ग्रहणं, यत्तु चैतन्यं तेषूपलभ्यते, तद्भूतेष्वेव कायाकारपरिणतेष्वभि-

१ इति० प्र० हरणमित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यज्यते, मद्याङ्गेषु समुदितेषु मदशक्तिवदिति, तथा—न भूतव्यतिरिक्तं चैतन्यं, तत्कार्यत्वात्, घटादिवदिति । तदेवं भूतव्यतिरिक्तस्याऽऽत्मनोऽभावाद्भूतानामेव चैतन्याभिव्यक्तिः, जलस्य बुद्बुदाभिव्यक्तिवदिति । केषाञ्चिल्लोकायतिकानामाकाशस्यापि भूतत्वेनाभ्युपगमाद्भूतपञ्चकोपन्यासो न दोषायेति । ननु च यदि भूतव्यतिरिक्तोऽपरः कश्चिदात्माख्यः पदार्थो न विद्यते, कथं तर्हि मृत इति व्यपदेश इत्याशङ्क्याह—अथैषां कायाकारपरिणतौ चैतन्याभिव्यक्तौ सत्यां तदूर्ध्वं तेषामन्यतमस्य 'विनाशे' अपगमे वायोस्तेजसश्चोभयोर्वा 'देहिनो' देवदत्ताख्यस्य 'विनाशः' अपगमो भवति, ततश्च मृत इति व्यपदेशः प्रवर्तते, न पुनर्जीवापगम इति भूताव्यतिरिक्तचैतन्यवादिपूर्वपक्ष इति ॥ अत्र प्रतिसमाधानार्थं निर्युक्तिकृदाह—

पंचण्हं संजोए अण्णगुणाणं च चेयणाइगुणो । पंचिंदियठाणाणं ण अण्णमुणियं मुणइ अण्णो ॥ ३३ ॥

'पञ्चानां' पृथिव्यादीनां भूतानां 'संयोगे' कायाकारपरिणामे चैतन्यादिकः आदिशब्दात् भाषाचङ्क्रमणादिकश्च गुणो न भवतीति प्रतिज्ञा, अन्यादयस्त्वत्र हेतुत्वेनोपात्ताः, दृष्टान्तस्त्वभ्यूह्यः, सुलभत्वात्तस्य नोपादानं । तत्रेदं चार्वाकः प्रष्टव्यः—यदेतद्भूतानां संयोगे चैतन्यमभिव्यज्यते तत्किं तेषां संयोगेऽपि स्वातन्त्र्य एवाऽऽहोस्वित्परस्परापेक्षया पारतन्त्र्ये इति ?, किंचातः ?, न तावत्स्वातन्त्र्ये, यत आह—'अण्णगुणाणं चे'ति चैतन्यादन्ये गुणा येषां तान्यन्यगुणानि, तथाहि—आधारकाठिन्यगुणा पृथिवी द्रवगुणा आपः पक्तृगुणं तेजः चलनगुणो वायुः अवगाहदानगुणमाकाशमिति, यदिवा प्रागभिहिता गन्धादयः पृथिव्यादीनामेकैकपरिहान्याऽन्ये गुणाश्चैतन्यादिति, तदेवं पृथिव्यादीन्यन्यगुणानि, चशब्दो द्वितीयविकल्पवक्तव्यतासूचनार्थः, चैतन्यगुणे साध्ये पृथिव्यादीनामन्यगुणानां सतां चैतन्यगुणस्य पृथिव्यादीनामेकैकस्याप्यभावान्न तत्समुदायाच्चैतन्याख्यो गुणः

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥ १६ ॥

सिद्ध्यतीति, प्रयोगस्त्वत्र—भूतसमुदायः स्वातन्त्र्ये सति धर्मित्वेनोपादीयते, न तस्य चैतन्याख्यो गुणोऽस्तीति साध्यो धर्मः, पृथिव्यादीनामन्यगुणत्वात्, यो योऽन्यगुणानां समुदायस्तत्र तत्रापूर्वगुणोत्पत्तिर्न भवतीति, यथा सिकतासमुदाये स्निग्धगुणस्य तैलस्य नोत्पत्तिरिति, घटपटसमुदाये वा न स्तम्भाद्याविर्भाव इति, दृश्यते च काये चैतन्यं, तदात्मगुणो भविष्यति न भूतानामिति । अस्मिन्नेव साध्ये हेत्वन्तरमाह—'पञ्चिन्दियठाणाणं'ति पञ्च च तानि स्पर्शनरसनघ्राणचक्षुःश्रोत्राख्यानीन्द्रियाणि तेषां स्थानानि—अवकाशास्तेषां चैतन्यगुणाभावान्न भूतसमुदाये चैतन्यम्, इदमत्र हृदयं—लोकायतिकानां हि अपरस्य द्रष्टुरनभ्युपगमादिन्द्रियाण्येव द्रष्टृणि, तेषां च यानि स्थानानि—उपादानकारणानि तेषामचिद्रूपत्वान्न भूतसमुदाये चैतन्यमिति, इन्द्रियाणां चामूनि स्थानानि, तद्यथा—श्रोत्रेन्द्रियस्याकाशं सुषिरात्मकत्वात्, घ्राणेन्द्रियस्य पृथिवी तदात्मकत्वात्, चक्षुरिन्द्रियस्य तेजस्तद्रूपत्वात्, एवं रसनेन्द्रियस्यापः स्पर्शनेन्द्रियस्य वायुरिति । प्रयोगश्चात्र—नेन्द्रियाण्युपलब्धिमन्ति, तेषामचेतनगुणारब्धत्वात्, यद्यदचेतनगुणारब्धं तत्तदचेतनं, यथा घटपटादीनि, एवमपि च भूतसमुदाये चैतन्याभाव एव साधितो भवति । पुनर्हेत्वन्तरमाह—'अ अण्णमुणियं मुणइ अण्णो'त्ति इहेन्द्रियाणि प्रत्येकभूतात्मकानि, तान्येवापरस्य द्रष्टुरभावाद् द्रष्टृणि, तेषां च प्रत्येकं स्वविषयग्रहणादन्यविषये चाप्रवृत्तेर्नान्यदिन्द्रियज्ञातमन्यदिन्द्रियं जानातीति, अतो मया पञ्चापि विषया ज्ञाता इत्येवमात्मकः संकलनाप्रत्ययो न प्राप्नोति, अनुभूयते चायं, तस्मादेकेनैव द्रष्ट्रा भवितव्यम्, तस्यैव च चैतन्यं न भूतसमुदायस्येति, प्रयोगः पुनरेवं—न भूतसमुदाये चैतन्यं, तदारब्धेन्द्रियाणां प्रत्येकविषयग्राहिते सति संकलनाप्रत्ययाभावात्, यदि पुनरन्यगृहीतमप्यन्यो गृह्णीयाद् देवदत्तगृहीतं यज्ञदत्तेनापि गृह्येत, न चैतद् दृष्टमिष्टं वेति । ननु च स्वातन्त्र्यपक्षेऽयं दोषः, यदा पुनः परस्परसापेक्षाणां संयोगपारतन्त्र्याभ्युपगमेन भूतानामेव समुदितानां चैतन्याख्यो धर्मः संयोगवशादाविर्भवति, यथा किण्वोदकादिषु मद्याङ्गेषु समुदितेषु प्रत्येकमविद्यमानाऽपि मदशक्तिरिति, तदा कुतोऽस्य दोषस्यावकाश इति ?, अत्रोत्तरं गाथोपात्तचशब्दाक्षिप्तमभिधीयते—यत्तावदुक्तं यथा 'भूतेभ्यः परस्परसव्यपेक्षसंयोगभाग्भ्यश्चैतन्यमुत्पद्यते,' तत्र विकल्पयामः—किमसौ संयोगः संयोगिभ्यो भिन्नोऽभिन्नो वा ?, भिन्नश्चेत्पञ्चभूतप्रसंगो, न चान्यत् पञ्चभूतव्यतिरिक्तसंयोगाख्यभूतग्राहकं भवतां प्रमाणमस्ति, प्रत्यक्षस्यैवैकस्याभ्युपगमात्, तेन च तस्याग्रहणात्, प्रमाणान्तराभ्युपगमे च तेनैव जीवस्यापि ग्रहणमस्तु, अथ अभिन्नो भूतेभ्यो संयोगः, तत्राप्येतच्चिन्तनीयं—किं भूतानि प्रत्येकं चेतनावन्त्यचेतनावन्ति वा ?, यदि चेतनावन्ति तदा एकेन्द्रियसिद्धिः, तथा (च) समुदायस्य पञ्चप्रकारचैतन्यापत्तिः, अथाचेतनानि, तत्र चोक्तो दोषो, न हि यद्यत्र प्रत्येकमविद्यमानं तत्तत्समुदाये भवदुपलभ्यते, सिकतासु तैलवदित्यादिना । यदप्यत्रोक्तं—यथा मद्याङ्गेष्वविद्यमानाऽपि प्रत्येकं मदशक्तिः समुदाये प्रादुर्भवतीति, तदप्ययुक्तं, यतस्तत्र किण्वादिषु या च यावती च शक्तिरुपलभ्यते, तथाहि—किण्वे बुभुक्षापनयनसामर्थ्यं भ्रमिजननसामर्थ्यं च उदकस्य तृडपनयनसामर्थ्यमित्यादिनेति, भूतानां च प्रत्येकं चैतन्यानभ्युपगमे दृष्टान्तदार्ष्टान्तिकयोरसाम्यं । किंच—भूतचैतन्याभ्युपगमे मरणाभावो, मृतकायेऽपि पृथ्व्यादीनां भूतानां सद्भावात्, नैतदस्ति, तत्र मृतकाये वायोस्तेजसो वाऽभावान्मरणसद्भावः इत्यशिक्षितस्योल्लापः, तथाहि—मृतकाये शोफोपलब्धेर्न वायोरभावः, कोथस्य च पक्तिस्वभावस्य दर्शनान्नाग्नेरिति, अथ सूक्ष्मः कश्चिद्वायुविशेषोऽग्निर्वा ततोऽपगत इति मतिरिति, एवं च जीव एव नामान्तरेणाभ्युपगतो भवति, यत्किञ्चिदेतत् । तथा न भूतसमुदायमात्रेण चैतन्याविर्भावः, पृथिव्यादिष्वेकत्र व्यवस्थापितेष्वपि चैतन्यानुपलब्धेः, अथ कायाकारपरिणतौ सत्यां तदभिव्यक्तिरि-

१ समयाध्ययने चार्वाकः

॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्यते, तदपि न, यतो लेप्यमयप्रतिमायां समस्तभूतसद्भावेऽपि जडत्वमेवोपलभ्यते । तदेवमन्वयव्यतिरेकाभ्यामालोच्यमानो नायं चैतन्याख्यो गुणो भूतानां भवितुमर्हति, समुपलभ्यते चायं शरीरेषु, तस्मात् पारिशेष्यात् जीवस्यैवायमिति स्वदर्शनपक्षपातं विहायाङ्गीक्रियतामिति । यच्चोक्तं प्राक्—'न पृथिव्यादिव्यतिरिक्त आत्माऽस्ति, तद्ग्राहकप्रमाणाभावात्, प्रमाणं चात्र प्रत्यक्षमेवैक'मित्यादि, तत्र प्रतिविधीयते—यत्तावदुक्तं 'प्रत्यक्षमेवैकं प्रमाणं नानुमानादिक'मित्येतदनुपासितगुरोर्वचः, तथाहि—अर्थाविसंवादकं प्रमाणमित्युच्यते, प्रत्यक्षस्य च प्रामाण्यमेवं व्यवस्थाप्यते—काश्चित्प्रत्यक्षव्यक्तीर्धर्मित्वेनोपादाय प्रमाणयति—प्रमाणमेताः, अर्थाविसंवादकत्वात्, अनुभूतप्रत्यक्षव्यक्तिवत्, न च ताभिरेव प्रत्यक्षव्यक्तिभिः स्वसंविदिताभिः परं व्यवहारयितुमयमीशः, तासां स्वसंविन्निष्ठत्वात् मूकत्वाच्च प्रत्यक्षस्य, तथा नानुमानं प्रमाणमित्यनुमानेनैवानुमाननिरासं कुर्वश्चार्वाकः कथं नोन्मत्तः स्याद् ?, एवं ह्यसौ तदप्रामाण्यं प्रतिपादयेत् यथा—नानुमानं प्रमाणं, विसंवादकत्वाद्, अनुभूतानुमानव्यक्तिवदिति, एतच्चानुमानम्, अथ परप्रसिद्ध्यैतदुच्यते, तदप्ययुक्तं, यतस्तत्परप्रसिद्धमनुमानं भवतः प्रमाणमप्रमाणं वा ?, प्रमाणं चेत्कथमनुमानमप्रमाणमित्युच्यते, अथाप्रमाणं कथमप्रमाणेन सता तेन परः प्रत्याय्यते ?, परेण तस्य प्रामाण्येनाभ्युपगतत्वादिति चेद्, तदप्यसाम्प्रतं, यदि नाम परो मौढ्यादप्रमाणमेव प्रमाणमित्यध्यवस्यति, किं भवताऽतिनिपुणेनापि तेनैवासौ प्रतिपाद्यते ?, यो ह्यज्ञो गुडमेव विषमिति मन्यते किं तस्य मारयितुकामेनापि बुद्धिमता गुड एव दीयते ?, तदेवं प्रत्यक्षानुमानयोः प्रामाण्याप्रामाण्ये व्यवस्थापयतो भवतोऽनिच्छतोऽपि बलादायातमनुमानस्य प्रामाण्यं । तथा स्वर्गापवर्गदेवतादेः प्रतिषेधं कुर्वन् भवान् केन प्रमा-

१ प्येत प्र० ।

णेन करोति ?, न तावत्प्रत्यक्षेण प्रतिषेधः कर्तुं पार्यते, यतस्तत्प्रत्यक्षं प्रवर्तमानं वा तन्निषेधं विदध्यान्निवर्तमानं वा ?, न तावत्प्रवर्तमानं, तस्याभावविषयत्वविरोधात्, नापि निवर्तमानं, यतस्तच्च नास्ति तेन च प्रतिपत्तिरित्यसंगतं, तथाहि—व्यापकविनिवृत्तौ व्याप्यस्यापि (वि)निवृत्तिरिष्यते, न चार्वाग्दर्शिप्रत्यक्षेण समस्तवस्तुव्याप्तिः संभाव्यते, तत्कथं प्रत्यक्षविनिवृत्तौ पदार्थव्यावृत्तिरिति ?, तदेवं स्वर्गादेः प्रतिषेधं कुर्वता चार्वाकेणावश्यं प्रमाणान्तरमभ्युपगतं । तथाऽन्याभिप्रायविज्ञानाभ्युपगमादत्र स्पष्टमेव प्रमाणान्तरमभ्युपगतम्, अन्यथा कथं परावबोधाय शास्त्रप्रणयनमकारि चार्वाकेणेत्यलमतिप्रसङ्गेन । तदेवं प्रत्यक्षादन्यदपि प्रमाणमस्ति, तेनात्मा सेत्स्यति, किं पुनस्तदिति चेद्, उच्यते, अस्त्यात्मा, असाधारणतद्गुणोपलब्धेः, चक्षुरिन्द्रियवत्, चक्षुरिन्द्रियं हि न साक्षादुपलभ्यते, स्पर्शनादीन्द्रियासाधारणरूपविज्ञानोत्पादनशक्त्या त्वनुमीयते, तथाऽऽत्माऽपि पृथिव्याद्यसाधारणचैतन्यगुणोपलब्धेरस्तीत्यनुमीयते, चैतन्यं च तस्यासाधारणगुण इत्येतत्पृथिव्यादिभूतसमुदाये चैतन्यस्य निराकृतत्वादवसेयं । तथा अस्त्यात्मा, समस्तेन्द्रियोपलब्धार्थसंकलनाप्रत्ययसद्भावात्, पञ्चगवाक्षान्यान्योपलब्धार्थसंकलनाविधाय्येकदेवदत्तवत्, तथाऽऽत्मा अर्थद्रष्टा नेन्द्रियाणि, तद्विगमेऽपि तदुपलब्धार्थस्मरणात्, गवाक्षोपरमेऽपि तद्वातायनोपलब्धार्थस्मर्तृदेवदत्तवत्, तथा अर्थापत्त्याऽप्यात्माऽस्तीत्यवसीयते, तथाहि—सत्यपि पृथिव्यादिभूतसमुदाये लेप्यकर्मादौ न सुखदुःखेच्छाद्वेषप्रयत्नादिक्रियाणां सद्भाव इति, अतः सामर्थ्यादवसीयते—अस्ति भूतातिरिक्तः कश्चित्सुखदुःखेच्छादीनां क्रियाणां समवायिकारणं पदार्थः, स चात्मेति, तदेवं प्रत्यक्षानुमानादिपूर्विकाऽन्याऽप्यर्थापत्तिरभ्यूह्या, तस्यास्त्विदं लक्षणम्—प्रमाणषट्कविज्ञातो, यत्रार्थो नान्यथाभवन् । अदृष्टं कल्प-

१ चार्वाकदर्शित० । २ संसाध्यते प्र० ।

येदन्यं, साऽर्थापत्तिरुदाहृता ॥ १ ॥" तथाऽऽगमादप्यस्तित्वमवसेयं, स चायमागमः—"अत्थि मे आया उववाइए" इत्यादि । यदिवा किमत्रापरप्रमाणचिन्तया ?, सकलप्रमाणज्येष्ठेन प्रत्यक्षेणैवात्माऽस्तीत्यवसीयते, तद्गुणस्य ज्ञानस्य प्रत्यक्षत्वात्, ज्ञानगुणस्य च गुणिनोऽनन्यत्वात् प्रत्यक्ष एवात्मा, रूपादिगुणप्रत्यक्षत्वेन पटादिप्रत्यक्षवत्, तथाहि—अहं सुखी अहं दुःखीत्येवमाद्यहंप्रत्ययग्राह्यश्चात्मा प्रत्यक्षः, अहंप्रत्ययस्य स्वसंविद्रूपत्वादिति, ममेदं शरीरं पुराणं कर्मेति च शरीराद्भेदेन निर्दिश्यमानत्वाद्, इत्यादीन्यन्यान्यपि प्रमाणानि जीवसिद्धावभ्यूह्यानीति । तथा यदुक्तं—'न भूतव्यतिरिक्तं चैतन्यं तत्कार्यत्वात् घटादिवदि'ति, एतदप्यसमीचीनं, हेतोरसिद्धत्वात्, तथाहि—न भूतानां कार्यं चैतन्यं, तेषामतद्गुणत्वात् भूतकार्यचैतन्ये संकलनाप्रत्ययासंभवाच्च, इत्यादिनोक्तप्रायम्, अतोऽस्त्यात्मा भूतव्यतिरिक्तो ज्ञानाधार इति स्थितम् ॥ ननु च किं ज्ञानाधारभूतेनात्मना ज्ञानाद्भिन्नेनाश्रितेन ?, यावता ज्ञानादेव सर्वसंकलनाप्रत्ययादिकं सेत्स्यति, किमात्मनाऽन्तर्गडुकल्पेनेति, तथाहि—ज्ञानस्यैव चिद्रूपत्वाद् भूतैरचेतनैः कायाकारपरिणतैः सह संबन्धे सति सुखदुःखेच्छाद्वेषप्रयत्नक्रियाः प्रादुर्भवन्ति तथा संकलनाप्रत्ययो भवान्तरगमनं चेति, तदेवं व्यवस्थिते किमात्मना कल्पितेनेति ?, अत्रोच्यते, न ह्यात्मानमेकमाधारभूतमन्तरेण संकलनाप्रत्ययो घटते, तथाहि—प्रत्येकमिन्द्रियैः स्वविषयग्रहणे सति परविषये चाप्रवृत्तेः एकस्य च परिच्छेतुरभावात् मया पञ्चापि विषयाः परिच्छिन्ना इत्यात्मकस्य संकलनाप्रत्ययस्याभाव इति, आलयविज्ञानमेकमस्तीति चेद्, एवं सत्यात्मन एव नामान्तरं भवता कृतं स्यात्, न च ज्ञानाख्यो गुणो गुणिनमन्तरेण भवतीत्यवश्यमात्मना गुणिना भाव्यमिति ॥ स च न सर्वव्यापी, तद्गुणस्य सर्वत्रानुपलभ्यमानत्वात्, घट-

१ अस्ति मे आत्मौपपातिकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत् । नापि श्यामाकतन्दुलमात्रोऽङ्गुष्ठपर्वमात्रो वा, तावन्मात्रस्योपात्तशरीराव्यापित्वात्, स्वपर्यन्तशरीरव्यापितेन चोपलभ्यमानगुणत्वात्, तस्मात्स्थितमिदम्—उपात्तशरीरस्वपर्यन्तव्याप्यात्मेति । तस्य चानादिकर्मसंबद्धस्य कदाचिदपि सांसारिकस्यात्मनः स्वरूपेऽनवस्थानात् सत्यप्यमूर्तत्वे मूर्तेन कर्मणा संबन्धो न विरुध्यते, कर्मसंबन्धाच्च सूक्ष्मबादरैकेन्द्रियद्वित्रिचतुष्पञ्चेन्द्रियपर्याप्तापर्याप्तावस्था बहुविधाः प्रादुर्भवन्ति । तस्य चैकान्तेन क्षणिकत्वे ध्यानाध्ययनश्रमप्रत्यभिज्ञानाद्यभावः एकान्तनित्यत्वे च नारकतिर्यङ्मनुष्यामरगतिपरिणामाभावः स्यात् तस्मात्स्यादनित्यः स्यान्नित्य आत्मेत्यलमतिप्रसङ्गेन ॥ ८ ॥ साम्प्रतमेकात्माद्वैतवादमुद्देशार्थाधिकारप्रदर्शितं पूर्वपक्षयितुमाह—

जहा य पुढवीथूभे, एगे नाणाहि दीसइ । एवं भो ! कसिणे लोए, विन्नू नाणाहि दीसइ ॥ ९ ॥

दृष्टान्तबलेनैवार्थस्वरूपावगतेः पूर्वं दृष्टान्तोपन्यासः, यथेत्युपदर्शने, चशब्दोऽपिशब्दार्थे, स च भिन्नक्रम एके इत्यस्यानन्तरं द्रष्टव्यः, पृथिव्येव स्तूपः पृथिव्या वा स्तूपः पृथिवीसंघाताख्योऽवयवी, स चैकोऽपि यथा नानारूपः—सरित्समुद्रपर्वतनगरसन्निवेशाधाधारतया विचित्रो दृश्यते निम्नोन्नतमृदुकठिनरक्तपीतादिभेदेन वा दृश्यते, न च तस्य पृथिवीतत्त्वस्यैतावता भेदेन भेदो भवति, 'एवम्' उक्तरीत्या 'भो'इति परामन्त्रणे, कृत्स्नोऽपि लोकः—चेतनाचेतनरूप एको विद्वान् वर्तते, इदमत्र हृदयं—एक एव ह्यात्मा विद्वान् ज्ञानपिण्डः पृथिव्यादिभूताद्याकारतया नाना दृश्यते, न च तस्यात्मन एतावताऽऽत्मतत्त्वभेदो भवति, तथा चोक्तम्—"एक एव हि भूतात्मा, भूते भूते व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥ १ ॥" तथा 'पुरुष एवेदं निं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति, यदेजति यन्नैजति यद्दूरे यद् अन्तिके यदन्तरस्य सर्वस्य यत्सर्वस्यास्य बाह्यतः' इत्यात्माद्वैतवादः ॥ ९ ॥ अस्योत्तरदानायाह—

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ १९ ॥

१ समयाध्ययने अद्वैतनिराकरणं

एवमेगेत्ति जप्पंति, मंदा आरंभणिस्सिआ । एगे किच्चा सयं पावं, तिव्वं दुक्खं नियच्छइ ॥१०॥

'एव'मिति अनन्तरोक्तात्माद्वैतवादोपप्रदर्शनम् 'एके' केचन पुरुषकारणवादिनो 'जल्पन्ति' प्रतिपादयन्ति, किंभूतास्ते इत्याह—'मन्दा' जडाः सम्यक्परिज्ञानविकलाः, मन्दत्वं च तेषां युक्तिविकलात्माऽद्वैतपक्षसमाश्रयणात्, तथाहि—यद्येक एवात्मा स्वात्मातबहुत्वं ततो ये सत्त्वाः—प्राणिनः कृषीवलादयः 'एके' केचन आरम्भे—प्राण्युपमर्दनकारिणि व्यापारे निःश्रिता—आसक्ताः संबद्धा अध्युपपन्नाः ते च संरम्भसमारम्भारम्भैः 'कृत्वा' उपादाय 'स्वयम्' आत्मना 'पापम्' अशुभप्रकृतिरूपमसातोदयफलं तीव्रदुःखं तदनुभवस्थानं वा नरकादिकं नियच्छतीति, आर्षत्वाद्बहुवचनार्थे एकवचनमकारि, ततश्चायमर्थो—निश्चयेन यच्छन्त्यवश्यंतया गच्छन्ति—प्राप्नुवन्ति त एवारम्भासक्ता नान्य इति, एतच्च स्याद्, अपि त्वेकेनापि अशुभे कर्मणि कृते सर्वेषां शुभानुष्ठायिनामपि तीव्रदुःखाभिसंबन्धः स्याद्, एकत्वादात्मन इति, न चैतदेवं दृश्यते, तथाहि—य एव कश्चिदसमञ्जसकारी स एव लोके तदनुरूपा विडम्बनाः समनुभवन्नुपलभ्यते नान्य इति, तथा सर्वगतत्वे आत्मनो बन्धमोक्षाद्यभावः तथा प्रतिपाद्यप्रतिपादकविवेकाभावाच्छास्त्रप्रणयनाभावश्च स्यादिति । एतदर्थसंवादित्वात्प्राक्तन्येव निर्युक्तिकृद्गाथाऽत्र व्याख्यायते, तद्यथा—पञ्चानां पृथिव्यादीनां भूतानामेकत्र कायाकारपरिणतानां चैतन्यमुपलभ्यते, यदि पुनरेक एवात्मा व्यापी स्यात्तदा घटादिष्वपि चैतन्योपलब्धिः स्यात्, न चैवं, तस्मान्नैक आत्मा, भूतानां चान्याऽन्यगुणत्वं न स्याद्, एकस्मादात्मनोऽभिन्नत्वात्, तथा पञ्चेन्द्रियस्थानानां—पञ्चेन्द्रियाश्रितानां ज्ञानानां प्रवृत्तौ सत्यामनेन ज्ञाता विदितमन्यो न जानातीत्येतदपि न स्याद्यद्येक एवात्मा स्यादिति ॥ १० ॥ साम्प्रतं तज्जीवतच्छरीरवादिमतं पूर्वपक्षयितुमाह—

॥ १९ ॥

पत्तेअं कसिणे आया, जे बाला जे अ पंडिआ । संति पिच्चा न ते संति, नत्थि सत्तोववाइया ॥११॥

तज्जीवतच्छरीरवादिनामयमभ्युपगमः—यथा पञ्चभ्यो भूतेभ्यः कायाकारपरिणतेभ्यश्चैतन्यमुत्पद्यते अभिव्यज्यते वा, तेनैकैकं शरीरं प्रति प्रत्येकमात्मानः 'कृत्स्नाः' सर्वेऽप्यात्मान एवमवस्थिताः, ये 'बाला' अज्ञा ये च 'पण्डिताः' सदसद्विवेकज्ञास्ते सर्वे पृथग् व्यवस्थिताः, नह्येक एवात्मा सर्वव्यापित्वेनाभ्युपगन्तव्यो, बालपण्डिताद्यविभागप्रसङ्गात्, ननु प्रत्येकशरीराश्रयत्वेनात्मबहुत्वमार्हतानामपीष्टमेवेत्याशङ्क्याह—'सन्ति' विद्यन्ते यावच्छरीरं विद्यन्ते तदभावे तु न विद्यन्ते, तथाहि—कायाकारपरिणतेषु भूतेषु चैतन्याविर्भावो भवति, भूतसमुदायविघटने च चैतन्यापगमो, न पुनरन्यत्र गच्छच्चैतन्यमुपलभ्यते, इत्येतदेव दर्शयति—'पिच्चा न ते संती'ति 'प्रेत्य' परलोके न 'ते' आत्मानः 'सन्ति' विद्यन्ते, परलोकानुयायी शरीराज्जिन्नः स्वकर्मफलभोक्ता न कश्चिदात्माख्यः पदार्थोऽस्तीति भावः । किमित्येवमत आह—'नत्थि सत्तोववाइया' अस्तिशब्दस्तिङन्तप्रतिरूपको निपातो बहुवचने द्रष्टव्यः, तदयमर्थः—'न सन्ति' न विद्यन्ते 'सत्त्वाः' प्राणिन उपपातेन निर्वृत्ता औपपातिका—भवाद्भवान्तरगामिनो न

१ विचटने प्र० । २० पलक्ष्यते प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्तीति तात्पर्यार्थः, तथाहि तदागमः–"विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्ती"ति, ननु प्रागुपन्यस्तभूतवादिनोऽस्य च तज्जीवतच्छरीरवादिनः को विशेष इति?, अत्रोच्यते, भूतवादिनो भूतान्येव कायाकारपरिणतानि धावनवल्गनादिकां क्रियां कुर्वन्ति, अस्य तु कायाकारपरिणतेभ्यो भूतेभ्यश्चैतन्याख्य आत्मोत्पद्यतेऽभिव्यज्यते वा, तेभ्यश्चाभिन्न इत्ययं विशेषः ॥ ११ ॥ एवं च धर्मिणोऽभावाद्धर्मस्याप्यभाव इति दर्शयितुमाह —

नत्थि पुण्णे व पावे वा, नत्थि लोए इतो वरे। सरीरस्स विणासेणं, विणासो होइ देहिणो ॥ १२ ॥

'पुण्यम्' अभ्युदयप्राप्तिलक्षणं तद्विपरीतं पापमेतदुभयमपि न विद्यते, आत्मनो धर्मिणोऽभावात्, तदभावाच्च नास्ति 'अतः' अस्माल्लोकात् 'परः' अन्यो लोको यत्र पुण्यपापानुभव इति, अत्र चार्थे सूत्रकारः कारणमाह—'**शरीरस्य**' कायस्य '**विनाशेन**' भूतविघटनेन '**विनाशः**' अभावो '**देहिन**' आत्मनोऽप्यभावो भवति यतः, न पुनः शरीरे विनष्टे तस्मादात्मा परलोकं गत्वा पुण्यं पापं वाऽनुभवतीति, अतो धर्मिण आत्मनोऽभावात्तद्धर्मयोः पुण्यपापयोरप्यभाव इति, अस्मिन्नर्थे बहवो दृष्टान्ताः सन्ति, तद्यथा—यथा जलबुद्बुदो जलातिरेकेण नापरः कश्चिद्विद्यते तथा भूतव्यतिरेकेण नापरः कश्चिदात्मेति, तथा यथा कदलीस्तम्भस्य बहिस्त्वगपनयने क्रियमाणे तद्व्यात्रमेव सर्वं नान्तः कश्चित्सारोऽस्ति एवं भूतसमुदाये विघटति सति तावन्मात्रं विहाय नान्तः सारभूतः कश्चिदात्माख्यः पदार्थ उपलभ्यते, यथा वाऽलातं भ्राम्यमाणमतद्रूपमपि चक्रबुद्धिमुत्पादयति एवं भूतसमुदायोऽपि

॥ २० ॥

१ श्व भिन्न प्र० ।

विशिष्टक्रियोपेतो जीवभ्रान्तिमुत्पादयतीति, यथा च स्वप्ने बहिर्मुखाकारतया विज्ञानमनुभूयते अन्तरेणैव बाह्यमर्थम्, एवमात्मानमन्तरेण तद्विज्ञानं भूतसमुदाये प्रादुर्भवतीति, तथा यथाऽऽदर्शे स्वच्छत्वात्प्रतिबिम्बितो बहिःस्थितोऽप्यर्थोऽन्तर्गतो लक्ष्यते, न चासौ तथा, यथा च ग्रीष्मे भौमेनोष्मणा परिस्पन्दमाना मरीचयो जलाकारं विज्ञानमुत्पादयन्ति, एवमन्येऽपि गन्धर्वनगरादयः स्वस्वरूपेणातथाभूता अपि तथा प्रतिभासन्ते, तथाऽऽत्मापि भूतसमुदायस्य कायाकारपरिणतौ सत्यां पृथगसन्नेव तथा भ्रान्तिं समुत्पादयतीति । अमीषां च दृष्टान्तानां प्रतिपादकानि केचित्सूत्राणि व्याचक्षते, अस्माभिस्तु सूत्राऽऽदर्शेषु चिरन्तनटीकायां चादृष्टत्वान्नोल्लिखितानीति । ननु च यदि भूतव्यतिरिक्तः कश्चिदात्मा न विद्यते, तत्कृते च पुण्यापुण्ये न स्तः, तत्कथमेतज्जगद्वैचित्र्यं घटते?, तद्यथा—कश्चिदीश्वरोऽपरो दरिद्रोऽन्यः सुभगोऽपरो दुर्भगः सुखी दुःखी सुरूपो मन्दरूपो व्याधितो नीरोगीति, एवंप्रकारा च विचित्रता किंनिबन्धनेति, ? अत्रोच्यते, स्वभावात्, तथाहि—कुत्रचिच्छिलाशकले प्रतिमारूपं निष्पाद्यते, तच्च कुङ्कुमागरुचन्दनादिविलेपनानुभोगमनुभवति धूपाद्यामोदं च, अन्यस्मिंस्तु पाषाणखण्डे पादक्षालनादि क्रियते, न च तयोः पाषाणखण्डयोः शुभाशुभे स्तः, यदुदयात्स तादृग्विधावस्थाविशेष इत्येवं स्वभावाज्जगद्वैचित्र्यं, तथा चोक्तम्—"कण्टकस्य च तीक्ष्णत्वं, मयूरस्य विचित्रता । वर्णाश्च ताम्रचूडानां, स्वभावेन भवन्ति हि ॥ १ ॥" इति तज्जीवतच्छरीरवादिमतं गतम् ॥ १२ ॥ इदानीमकारकवादिमताभिधित्सयाऽऽह—

कुव्वं च कारयं चेव, सव्वं कुव्वं न विज्जई । एवं अकारओ अप्पा, एवं ते उ पगब्भिआ ॥ १३ ॥

कुर्वन्निति स्वतन्त्रः कर्ताऽभिधीयते, आत्मनश्चामूर्तत्वान्नित्यत्वात् सर्वव्यापित्वाच्च कर्तृत्वानुपपत्तिः, अत एव हेतोः कारयितृत्वमप्यात्मनोऽनुपपन्नमिति, पूर्वश्चशब्दोऽतीतानागतकर्तृत्वनिषेधको द्वितीयः समुच्चयार्थः, ततश्चात्मा न स्वयं क्रियायां प्रवर्तते, नाप्यन्यं प्रवर्तयति, यद्यपि च स्थितिक्रियां मुद्राप्रतिबिम्बोदयन्यायेन [जपास्फटिकन्यायेनच] भुजिक्रियां करोति तथाऽपि समस्तक्रियाकर्तृत्वं तस्य नास्तीत्येतदर्शयति—'सव्वं कुव्वं ण विज्जइ'त्ति '**सर्वां**' परिस्पन्दादिकां देशादेशान्तरप्राप्तिलक्षणां क्रियां कुर्वन्नात्मा न विद्यते, सर्वव्यापित्वेनामूर्तत्वेन चाकाशस्येवात्मनो निष्क्रियत्वमिति, तथा चोक्तम्—"अकर्ता निर्गुणो भोक्ता, आत्मा साङ्ख्यनिदर्शने" इति । '**एवम्**' अनेन प्रकारेणात्माऽकारक इति, '**ते**' सांख्याः, तुशब्दः पूर्वेभ्यो व्यतिरेकमाह, ते पुनः साङ्ख्या एवं '**प्रगल्भिताः**' प्रगल्भवन्तो धार्ष्टयवन्तः सन्तो भूयो भूयस्त्रत्र तत्र प्रतिपादयन्ति, यथा—"प्रकृतिः करोति, पुरुष उपभुङ्क्ते, तथा बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते" इत्याद्यकारकवादिमतमिति ॥१३॥ साम्प्रतं तज्जीवतच्छरीराकारकवादिनोर्मतं निराचिकीर्षुराह—

जे ते उ वाइणो एवं, लोए तेसिं कओ सिया? । तमाओ ते तमं जंति, मंदा आरंभनिस्सिया॥१४॥

॥ २१ ॥

तत्र ये तावच्छरीराव्यतिरिक्तात्मवादिनः 'एव'मिति पूर्वोक्तया नीत्या भूताव्यतिरिक्तमात्मानमभ्युपगतवन्तस्ते निराक्रियन्ते—तत्र यच्चैस्तावदुक्तम्—'यथा न शरीराद्भिन्नोऽस्त्यात्मे'ति, तदसङ्गतं, यतस्तत्प्रसाधकं प्रमाणमस्ति, तच्चेदम्—विद्यमानकर्तृकमिदं शरीरम्, आदिमत्प्रतिनियताकारत्वात्, इह यदादिमत्प्रतिनियताकारं तत्तद्विद्यमानकर्तृकं दृष्टं, यथा घटः, यच्चाविद्यमानकर्तृकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदादिमत्प्रतिनियताकारमपि न भवति, यथाऽऽकाशम्, आदिमत्प्रतिनियताकारस्य च सकर्तृत्वेन व्याप्तेः, व्यापकनिवृत्तौ व्याप्यस्य विनिवृत्तिरिति सर्वत्र योजनीयम् । तथा विद्यमानाधिष्ठातृकानीन्द्रियाणि, करणत्वात्, यद्यदिह करणं तत्तद्विद्यमानाधिष्ठातृकं दृष्टं, यथा दण्डादिकमिति, अधिष्ठातारमन्तरेण करणत्वानुपपत्तिः यथाऽऽकाशस्य, हृषीकाणां चाधिष्ठाताऽऽत्मा, स च तेभ्योऽन्य इति, तथा विद्यमानाऽऽदातृकमिदमिन्द्रियविषयकदम्बकम्, आदानादेयसद्भावात्, इह यत्र यत्राऽऽदानादेयसद्भावस्तत्र तत्र विद्यमान आदाता—ग्राहको दृष्टः, यथा संदंशकायस्पिण्डयोस्तद्ग्राह्योऽयस्कार इति, यश्चात्रेन्द्रियैः करणैर्विषयाणामादाता—ग्राहकः स तद्भिन्न आत्मेति, तथा विद्यमानभोक्तृकमिदं शरीरं, भोग्यत्वादोदनादिवत्, अत्र च कुलालादीनां मूर्तत्वानित्यत्वसंहतत्वदर्शनादात्मापि तथैव स्यादिति धर्मिविशेषविपरीतसाधनत्वेन विरुद्धाशङ्का न विधेया, संसारिण आत्मनः कर्मणा सहान्योऽन्यानुबन्धतः कथञ्चिन्मूर्तत्वाद्यभ्युपगमादिति, तथा यदुक्तम् 'नास्ति सत्त्वा औपपातिका' इति, तदप्ययुक्तं, यतस्तदहर्जातबालकस्य यः स्तनाभिलाषः सोऽन्याभिलाषपूर्वकः, अभिलाषत्वात्, कुमाराभिलाषवत्, तथा बालविज्ञानमन्यविज्ञानपूर्वकं, विज्ञानत्वात्, कुमारविज्ञानवत्, तथाहि—तदहर्जातबालकोऽपि यावत्स एवायं स्तन इत्येवं नावधारयति तावन्नोपरतरुदितो मुखमर्पयति स्तने इति, अतोऽस्ति बालके विज्ञानलेशः, स चान्यविज्ञानपूर्वकः, तच्चान्यद्विज्ञानं भवान्तरविज्ञानं, तस्मादस्ति सत्त्व औपपातिक इति । तथा यदभिहितं, 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यती'ति, तत्राप्ययमर्थो—'विज्ञानघनो'विज्ञानपिण्ड आत्मा 'भूतेभ्य उत्थाये'ति प्राक्तनकर्मवशात्तथाविधकायाकारपरिणते भूतसमुदाये तद्वारेण स्वकर्मफलमनुभूय पुनस्तद्विनाशे आत्मापि तदनु तेनाकारेण

१ नाम्नां प्रतिनियत आकारः, जम्बूद्वीपादिलोकस्थितिनिषेधार्थमादिमत्त्वम् ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ २२ ॥

१ समयाध्ययने तज्जीवतच्छरीर०

विनश्यापरपर्यायान्तरेणोत्पद्यते, न पुनस्तेरेव सह विनश्यतीति । तथा यदुक्तं—'धर्मिणोऽभावाच्चद्धर्मयोः पुण्यपापयोरभाव'इति, तदप्यसमीचीनं, यतो धर्मी तावदनन्तरोक्तिकदम्बकेन साधितः, तत्सिद्धौ च तद्धर्मयोः पुण्यपापयोरपि सिद्धिरवश्येया जगद्वैचित्र्यदर्शनाच्च । यत्तु स्वभावमाश्रित्योपन्यस्तं दृष्टान्तत्वेनोपन्यस्तं तदपि तद्भोक्तृकर्मवशादेव तथा तथा संवृत्तमिति दुर्निवारः पुण्यापुण्यसद्भाव इति । येऽपि बहवः कदलीस्तम्भादयो दृष्टान्ता आत्मनोऽभावसाधनायोपन्यस्ताः तेऽप्यभिहितनीत्याऽऽत्मनो भूतव्यतिरिक्तस्य परलोकयायिनः सारभूतस्य साधितत्वात्केवलं भवतो वाचालतां ग्रख्यापयन्ति इत्यलमतिप्रसङ्गेन । शेषं सूत्रं विवियतेऽधुनेति । तदेवं 'तेषां' भूतव्यतिरिक्तात्मनिह्नववादिनां योऽयं 'लोकः' चतुर्गतिकसंसारो भवाद्भवान्तरगतिलक्षणः प्राक् प्रसाधितः सुभगदुर्भगसुरूपमन्दरूपैश्वरदारिद्र्यादिगत्या जगद्वैचित्र्यलक्षणश्च स एवंभूतो लोकस्तेषां 'कुतो भवेत्?' कयोपपत्त्या घटेत ? आत्मनोऽनभ्युपगमात्, न कथञ्चिदित्यर्थः, 'ते च' नास्तिकाः परलोकयायिजीवाऽनभ्युपगमेन पुण्यपापयोश्चाभावमाश्रित्य यत्किञ्चनकारिणोऽज्ञानरूपात्तमसः सकाशादन्यत्तमो यान्ति, भूयोऽपि ज्ञानावरणादिरूपं महत्तरं तमः संचिन्वन्तीत्युक्तं भवति, यदिवा—तम इव तमो—दुःखसमुद्घातेन सदसद्विवेकप्रध्वंसित्वाद्यातनास्थानं तस्माद्—एवंभूतात्तमसः परतरं तमो यान्ति, सप्तमनरकपृथिव्यां रौरवमहारौरवकालमहाकालाप्रतिष्ठानाख्यं नरकावासं यान्तीत्यर्थः । किमिति ?, यतस्ते 'मन्दा' जडा मूर्खाः, सत्यपि युक्त्युपपन्ने आत्मन्यसदभिनिवेशात्तदभावमाश्रित्य प्राण्युपमर्दकारिणि विवेकिजननिन्दिते आरम्भे—व्यापारे निश्चयेन नितरां वा श्रिताः—संबद्धाः, पुण्यपापयोरभाव इत्याश्रित्य परलोकनिरपेक्षतयाऽऽरम्भनिश्रिता इति । तथा तज्जीवतच्छरीरवादिमतं निर्युक्तिकारोऽपि निराचिकीर्षुराह—'पंचण्ह'मित्यादिगाथा प्राग्वदत्रापि ३३ ॥ साम्प्रतमकारकवादिमतमाश्रित्यायमनन्तर(रोक्त)श्लोको भूयोऽपि

॥ २२ ॥

व्याख्यायते—ये एते अकारकवादिन आत्मनोऽमूर्तत्वनित्यत्वसर्वव्यापित्वेभ्यो हेतुभ्यो निष्क्रियत्वमेवाभ्युपगताः तेषां य एष 'लोको' जरामरणशोकाक्रन्दनहर्षादिलक्षणो नरकतिर्यङ्मनुष्यामरगतिरूपः सोऽप्यमेवंभूतो निष्क्रिये सत्यात्मन्यप्रच्युतानुत्पन्नस्थिरैकस्वभावे 'कुतः' कस्माद्धेतोः स्यात् ?, न कथञ्चित्कुतश्चित्स्यादित्यर्थः, ततश्च दृष्टेष्टबाधारूपात्तमसोऽज्ञानरूपात्ते तमोऽन्तरं—निकृष्टं यातनास्थानं यान्ति, किमिति ?, यतो 'मन्दा' जडाः प्राण्युपकारकाऽऽरम्भनिश्रिताश्च ते इति ॥ अधुना निर्युक्तिकारोऽकारकवादिमतनिराकरणार्थमाह—

को वेएई अकयं ? कयनासो पंचहा गई नत्थि । देवमणुस्सगयागइ जाईसरणाइयाणं च ॥ ३४ ॥

आत्मनोऽकर्तृत्वात्कृतं नास्ति, ततश्चाकृतं को वेदयते ?, तथा निष्क्रियत्वे वेदनक्रियाऽपि न घटां प्राञ्चति, अथाकृतमप्यनुभूयेत तथा सत्यकृतागमकृतनाशापत्तिः स्यात्, ततश्च एककृतपातकेन सर्वः प्राणिगणो दुःखितः स्यात् पुण्येन च सुखी स्यादिति, न चैतद् दृष्टमिष्टं वा, तथा व्यापित्वान्नित्यत्वाच्चात्मनः 'पञ्चधा' पञ्चप्रकारा नारकतिर्यङ्मनुष्यामरमोक्षलक्षणा गतिर्न भवेद्, ततश्च भवतां सांख्यानां कषायचीवरधारणशिरस्तुण्डमुण्डनदण्डधारणभिक्षाभोजित्वपञ्चरात्रोपदेशानुसारयमनियमाद्यनुष्ठानं, तथा "पञ्चविंशतितत्त्वज्ञो, यत्र तत्राश्रमे रतः । जटी मुण्डी शिखी वापि, मुच्यते नात्र संशयः॥१॥" इत्यादि सर्वमपार्थकमापद्येत तथा देवमनुष्यादिषु गत्यागती न स्यातां, सर्वव्यापित्वादात्मनः, तथा नित्यत्वाच्च विस्मरणाभावाज्जातिस्मरणादिका च क्रिया नोपपद्यते, तथा आदिग्रहणात् 'प्रकृतिः करोति पुरुष उपभुङ्क्ते' इति भुजिक्रिया या समाश्रिता साऽपि न प्राप्नोति, तस्या अपि क्रियात्वादिति, अथ 'मुद्राप्रतिबिम्बोदयन्यायेन भोग'इति चेद्, एतत्तु निरन्तराः सुहृदः प्रत्येष्यन्ति, वाङ्मात्रत्वात्, प्रतिबिम्बोदयस्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पि च क्रियाविशेषत्वादेव, तथा नित्ये चाविकारिण्यात्मनि प्रतिविम्बोदयस्याभावाद्यत्किञ्चिदेतदिति ॥ ३४ ॥ ननु च भुजिक्रियामात्रेण प्रतिविम्बोदयमात्रेण च यद्यप्यात्मा सक्रियः तथापि न तावन्मात्रेणास्माभिः सक्रियत्वमिष्यते, किं तर्हि ?, समस्तक्रियावत्त्वे सतीत्येतदाशङ्क्य निर्युक्तिकृदाह—

ण हु अफलधोवणिच्छितकालफलत्तणमिहं अदुमहेऊ । णादुद्धथोवदुद्धत्तणे णगावित्तणे हेऊ ॥ ३५ ॥

'न हु' नैवाफलत्वं द्रुमाभावे साध्ये हेतुर्भवति, नहि यदैव फलवांस्तदैव द्रुमः अन्यदा त्वद्रुम इति भावः, एवमात्मनोऽपि सुप्तावस्थायां यद्यपि कथञ्चिन्निष्क्रियत्वं तथापि नैतावता त्वसौ निष्क्रिय इति व्यपदेशमर्हति, तथा स्तोकफलत्वमपि न वृक्षाभावसाधनायालं, स्वल्पफलोऽपि हि पनसादिर्वृक्षव्यपदेशभाग्भवति, एवमात्माऽपि स्वल्पक्रियोऽपि क्रियावानेव, कदाचिदेषा मतिर्भवेत्. भवेत्—स्तोकक्रियो निष्क्रिय एव, यथैककार्षापणधनो न धनित्व(व्यपदेश)मास्कन्दति, एवमात्माऽपि स्वल्पक्रियत्वादक्रिय इति, एतदप्यचारु, यतोऽयं दृष्टान्तः प्रतिनियतपुरुषापेक्षया चो(ऽत्रो)पगम्यते समस्तपुरुषापेक्षया वा ?, तत्र यद्याद्यः पक्षः तदा सिद्धसाध्यता, यतः—सहस्रादिधनवदपेक्षया निर्धन एवासौ, अथ समस्तपुरुषापेक्षया तदसाधु, यतोऽन्यान् जरच्चीवरधारिणोऽपेक्ष्य कार्षापणधनोऽपि धनवानेव, तथाऽऽत्मापि यदि विशिष्टसामर्थ्योपेतपुरुषक्रियापेक्षया निष्क्रियोऽभ्युपगम्यते न काचित्क्षतिः सामान्यापेक्षया तु क्रियावानेव, इत्यलमतिप्रसङ्गेन, एवमनिश्चिताकालफलत्वाख्यहेतुद्वयमपि न वृक्षाभावसाधकम् इत्यादि योज्यं,

१ चोच्यते प्र० ।

एवमदुग्धत्वस्तोकदुग्धत्वरूपावपि हेतू न गोत्वाभावं साधयतः, उक्तन्यायेनैव दार्ष्टान्तिकयोजना कार्येति ३५ ॥ १४ ॥ साम्प्रतमात्मषष्ठवादिमतं पूर्वपक्षयितुमाह—

संति पंच महब्भूया, इहमेगेसि आहिया । आयछट्ठो पुणो आहु, आया लोगे य सासए ॥ १५ ॥

'सन्ति' विद्यन्ते 'पञ्च महाभूतानि' पृथिव्यादीनि 'इह' अस्मिन्संसारे 'एकेषां' वेदवादिनां सांख्यानां शैवादिकारिणां च, एतद् आख्यातम् आख्यातानि वा भूतानि, ते च वादिन एवमाहुः—एवमाख्यातवन्तः, यथा 'आत्मषष्ठानि' आत्मा षष्ठो येषां तानि आत्मषष्ठानि भूतानि विद्यन्त इति, एतानि चात्मषष्ठानि भूतानि यथाऽन्येषां वादिनामनित्यानि तथा नामीषामिति दर्शयति—आत्मा 'लोकश्च' पृथिव्यादिरूपः 'शाश्वतः' अविनाशी, तत्रात्मनः सर्वव्यापित्वादमूर्तत्वाच्चाकाशस्येव शाश्वतत्वं, पृथिव्यादीनां च तद्रूपाप्रच्युतेरविनश्वरत्वमिति ॥ १५ ॥ शाश्वतत्वमेव भूयः प्रतिपादयितुमाह—

दुहओ ण विणस्संति, नो य उप्पज्जए असं । सव्वेऽवि सव्वहा भावा, नियत्तीभावमागया ॥ १६ ॥

'ते' आत्मषष्ठाः पृथिव्यादयः पदार्था 'उभयत'इति निर्हेतुकसहेतुकविनाशद्वयेन न विनश्यन्ति, यथा बौद्धानां स्वत एव निर्हेतुको विनाशः, तथा च ते ऊचुः—'जातिरेव हि भावानां, विनाशे हेतुरिष्यते । यो जातश्च न च ध्वस्तो, नश्येत्पश्चात्स केन च ? ॥ १ ॥" यथा च वैशेषिकाणां लकुटादिकारणसान्निध्ये विनाशः सहेतुकः, तेनोभयरूपेणापि विनाशेन लोकात्मनोर्न

१ वैशेषिकाणां प्र० ।

विनाश इति तात्पर्यार्थः, यदिवा—'दुहओ'त्ति द्विरूपादात्मनः स्वभावाच्चेतनाचेतनरूपान्न विनश्यन्तीति, तथाहि—पृथिव्यप्तेजोवाय्वाकाशानि स्वरूपापरित्यागतया नित्यानि, 'न कदाचिदनीदृशं जगदि'तिकृत्वा, आत्माऽपि नित्य एव, अकृतकत्वादिभ्यो हेतुभ्यः, तथा चोक्तम्—"नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः ॥ १ ॥ अच्छेद्योऽयमभेद्योऽयमविकार्योऽयमुच्यते । नित्यः सततगः[1] स्थाणुरचलोऽयं सनातनः ॥ २ ॥" एवं च कृत्वा नासदुत्पद्यते, सर्वस्य सर्वत्र सद्भावाद् असति च कारकव्यापाराभावात् सत्कार्यवादः, यदि च असदुत्पद्येत खरविषाणादेरप्युत्पत्तिः स्यादिति, तथा चोक्तम्—"असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥ १ ॥" एवं च कृत्वा मृत्पिण्डेऽपि घटोऽस्ति, तदर्थिनां मृत्पिण्डोपादानात्, यदि चासदुत्पद्येत ततो यतः कुतश्चिदेव स्यात्, नावश्यमेतदर्थिना मृत्पिण्डोपादानमेव क्रियेत इति, अतः सदेव कारणे कार्यमुत्पद्यत इति । एवं च कृत्वा सर्वेऽपि भावाः—पृथिव्यादय आत्मषष्ठाः 'नियतिभावं' नित्यत्वमागता नाभावरूपतामभूत्वा च भावरूपतां प्रतिपद्यन्ते, आविर्भावतिरोभावमात्रत्वादुत्पत्तिविनाशयोरिति, तथा चाभिहितम्—"नासतो जायते भावो, नाभावो जायते सतः" इत्यादि, अस्योत्तरं निर्युक्तिकृदाह—'को वेएई'त्यादिप्राक्तनेव गाथा, सर्वपदार्थनित्यत्वाभ्युपगमे कर्तृत्वपरिणामो न स्यात्, ततश्चात्मनोऽकर्तृत्वे कर्मबन्धाभावस्तदभावाच्च को वेदयति ?, न कश्चित्सुखदुःखादिकमनुभवतीत्यर्थः, एवं च सति कृतनाशः स्यात्, तथा असतश्चोत्पादाभावे येयमात्मनः पूर्वभवपरित्यागेनापरभवोत्पत्तिलक्षणा पञ्चधा गतिरुच्यते सा न स्यात्, ततश्च मोक्षगतेरभावादीक्षादिक्रियाऽनुष्ठानमनर्थकमापद्येत, तथाऽप्रच्युतानु-

१० महात्मोऽय० प्र० । २ सर्वगतः प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्पन्नस्थिरैकस्वभावत्वे चात्मनो देवमनुष्यगत्यागती तथा विस्मृतेरभावात् जातिस्मरणादिकं च न प्राप्नोति, यच्चोक्तं 'सदेवोत्पद्यते' तदप्यसत्, यतो यदि सर्वथा सदेव कथमुत्पादः ?, उत्पादश्चेत् न तर्हि सर्वदा सदिति, तथा चोक्तम्—"कर्मगुणव्यपदेशाः प्रागुत्पत्तेर्न सन्ति यत्तस्मात् । कार्यमसद्विज्ञेयं क्रियाप्रवृत्तेश्च कर्तृणाम् ॥१॥" तस्मात्सर्वपदार्थानां कथञ्चित्नित्यत्वं कथञ्चिदनित्यत्वं सदसत्कार्यवादश्चेत्यवधार्यं, तथा चाभिहितम्—"सर्वव्यक्तिषु नियतं क्षणे क्षणेऽन्यत्वमथ च न विशेषः । सत्योश्चित्यपचित्योर्गकृतिजातिव्यवस्थानात् ॥ १ ॥" इति, तथा "नान्वयः स हि भेदत्वान्न भेदोऽन्वयवृत्तितः । मृद्भेदद्वयसंसर्गवृत्तिर्जात्यन्तरं घटः ॥ १ ॥" ॥ १६ ॥ साम्प्रतं बौद्धमतं पूर्वपक्षयन्निर्युक्तिकारोपन्यस्तमकलवादाधिकारमाविर्भावयन्नाह—

पंच खंधे वयंतेगे, बाला उ खणजोइणो । अण्णो अणण्णो णेवाहु, हेउयं च अहेउयं ॥ १७ ॥

'एके' केचन वादिनो बौद्धाः 'पञ्च स्कन्धान् वदन्ति' रूपवेदनाविज्ञानसंज्ञासंस्काराख्याः पञ्चैव स्कन्धा विद्यन्ते नापरः कश्चिदात्माख्यः स्कंधोऽस्तीत्येवं प्रतिपादयन्ति, तत्र रूपस्कन्धः पृथिवीधात्वादयो रूपादयश्च १ सुखा दुःखा अदुःखसुखा चेति वेदना वेदनास्कन्धः २ रूपविज्ञानं रसविज्ञानमित्यादि विज्ञानं विज्ञानस्कन्धः ३ संज्ञास्कन्धः संज्ञानिमित्तोद्ग्रहणात्मकः प्रत्ययः ४ संस्कारस्कन्धः पुण्यापुण्यादिधर्मसमुदाय इति ५ । न चैतेभ्यो व्यतिरिक्तः कश्चिदात्माख्यः पदार्थोऽध्यक्षेणाध्यवसीयते, तदव्यभिचारिलिङ्गग्रहणाभावात्, नाप्यनुमानेन, न च प्रत्यक्षानुमानव्यतिरिक्तमर्थाविसंवादि प्रमाणान्तरमस्तीत्येवं बाला इव बाला—यथाऽवस्थितार्थापरिज्ञानात् बौद्धाः प्रतिपादयन्ति, तथा ते स्कन्धाः 'क्षणयोगिनः' परमनिरुद्धः कालः क्षणः क्षणेन योगः—संबन्धः क्षणयोगः स विद्यते येषां ते क्षणयोगिनः, क्षणमात्रावस्थायिन इत्यर्थः, तथा च तेऽभिदधति—स्वकारणेभ्यः पदार्थ उत्पद्यमानः किं विनश्वरस्वभाव उत्पद्यतेऽविनश्वरस्वभावो वा ?, यद्यविनश्वरस्ततस्तद्व्यापिन्याः क्रमयौगपद्याभ्यामर्थक्रियाया अभावात् पदार्थस्यापि व्याप्यस्याभावः प्रसजतीति, तथाहि—यदेवार्थक्रियाकारि तदेव परमार्थतः सदिति, स च नित्योऽर्थक्रियायां प्रवर्तमानः क्रमेण वा प्रवर्तेत यौगपद्येन वा ?, न तावत्क्रमेण, यतो ह्येकस्या अर्थक्रियायाः काले तस्यापरार्थक्रियाकरणस्वभावो विद्यते वा न वा ?, यदि विद्यते किमिति क्रमकरणं ?, सहकार्यपेक्षयेति चेत् तेन सहकारिणा तस्य कश्चिदतिशयः क्रियते न वा ?, यदि क्रियते किं पूर्वस्वभावपरित्यागेनापरित्यागेन वा ?, यदि परित्यागेन ततोऽतादवस्थ्यापत्तेरनित्यत्वम्, अथ पूर्वस्वभावापरित्यागेन ततोऽतिशयाभावात्किं सहकार्यपेक्षया ?, अथ अकिञ्चित्करोऽपि विशिष्टकार्यार्थमपेक्षते, तदयुक्तं, यतः—'अपेक्षेत परं कश्चिद्यदि कुर्वीत किञ्चन । यदकिञ्चित्करं वस्तु, किं केनचिदपेक्ष्यते ? ॥१॥" अथ तस्यैकार्थक्रियाकरणकालेऽपरार्थक्रियाकरणस्वभावो न विद्यते, तथा च सति स्पष्टैव नित्यताहानिः, अथासौ नित्यो यौगपद्येनार्थक्रियां कुर्यात् तथा सति प्रथमक्षण एवाशेषार्थक्रियाणां करणात् द्वितीयक्षणेऽकर्तृत्वमायातं, तथा च सैवानित्यता, अथ तस्य तत्स्वभावत्वात्ता एवार्थक्रिया भूयो भूयो द्वितीयादिक्षणेष्वपि कुर्यात्, तदसाम्प्रतं, कृतस्य करणाभावादिति, किंच—द्वितीयादिक्षणसाध्या अप्यर्थाः प्रथमक्षण एव प्राप्नुवन्ति, तस्य तत्स्वभावत्वात्, अतत्स्वभावत्वे च तस्यानित्यत्वापत्तिरिति । तदेवं नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरहान्न स्वकारणेभ्यो नित्यस्योत्पाद इति । अथानित्यस्वभावः समुत्पद्यते, तथा च सति विघ्नाभावादायातमस्मदुक्तमशेषपदार्थजातस्य क्षणिकत्वं, तथा चोक्तम्—"जातिरेव हि भावानां, विनाशे हेतुरिष्यते । यो जातश्च न च ध्वस्तो, नश्येत्पश्चात्स केन च ?, ॥ १॥" ननु च सत्यप्यनित्यत्वे यस्य यदा विनाशहेतुसद्भावस्तस्य तदा विनाशः, तथा च स्वविनाशकारणापेक्षाणामनित्यानामपि पदार्थानां न क्षणिकत्वमिति, एतच्चानुपासितगुरोर्वचः, तथाहि—तेन मुद्गरादिकेन विनाशहेतुना घटादेः किं क्रियते ?, किमत्र प्रष्टव्यम् ? अभावः क्रियते, अत्र च प्रष्टव्यो देवानांप्रियः, अभाव इति किं पर्युदासप्रतिषेधोऽयमुत प्रसज्यप्रतिषेध इति ?, तत्र यदि पर्युदासस्ततोऽयमर्थो—भावादन्योऽभावो भावान्तरं—घटात्पटादिः सोऽभाव इति, तत्र भावान्तरे यदि मुद्गरादिव्यापारो न तर्हि तेन किञ्चिद् घटस्य कृतमिति, अथ प्रसज्यप्रतिषेधस्तदाऽयमर्थो—विनाशहेतुरभावं करोति, किमुक्तं भवति ?—भावं न करोतीति, ततश्च क्रियाप्रतिषेध एव कृतः स्यात्, न च घटादेः पदार्थस्य मुद्गरादिना करणं, तस्य स्वकारणैरेव कृतत्वात्, अथ भावाभावोऽभावत्वं करोतीति, तस्य तुच्छस्य नीरूपत्वात् कृतत्वत्र कारकाणां व्यापारः ?, अथ तत्रापि कारकव्यापारो भवेत् खरशृङ्गादावपि व्यापारियेरन् कारकाणीति । तदेवं विनाशहेतोरकिञ्चित्करत्वात् स्वहेतुत एवानित्यताक्रोडीकृतानां पदार्थानामुत्पत्तेर्विघ्नहेतोश्चाभावात् क्षणिकत्वमवस्थितमिति । तुशब्दः पूर्ववादिभ्योऽस्य व्यतिरेकप्रदर्शकः, तमेव श्लोकपश्चार्धेन दर्शयति—'अण्णो अणण्णो' इति ते हि बौद्धा यथाऽऽत्मषष्ठवादिनः सांख्यादयो भूतव्यतिरिक्तमात्मानमभ्युपगतवन्तो यथा च चार्वाका भूताव्यतिरिक्तं चैतन्याख्यमात्मानमिष्टवन्तस्था 'नैवाहुः' नैवोक्तवन्तः, तथा हेतुभ्यो जातो हेतुकः कायाकारपरिणतभूतनिष्पादित इतियावत् तथाऽहेतुकोऽनाद्यपर्यवसितत्वान्नित्य इत्येवं तमात्मानं ते बौद्धा नाभ्युपगतवन्त इति ॥१७॥ तथाऽपरे बौद्धाश्चातुर्धातुकमिदं जगदाहुरित्येतदर्शयितुमाह—

पुढवी आउ तेऊ य, तहा वाऊ य एगओ । चत्तारि धाउणो रूवं, एवमाहंसु आवरे ॥ १८ ॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ २५ ॥

१ समयाध्ययने अफवालदिबौद्धाः

॥ २५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथिवी धातुरापश्च धातुस्तथा तेजो वायुश्चेति, धारकत्वात्पोषकत्वाच्च धातुत्वमेषाम्, 'एगओत्ति' यदैते चत्वारोऽप्येकाकारपरिणतिं बिभ्रति कायाकारतया तदा जीवव्यपदेशमश्नुवते, तथा चोचुः—"चतुर्धातुकमिदं शरीरं, न तद्व्यतिरिक्त आत्माऽस्ती"ति, 'एवमाहंसु यावरेत्ति' अपरे बौद्धविशेषा एवम् 'आहुः' अभिहितवन्त इति, क्वचिद् 'जाणगा' इति पाठः, तत्राप्ययमर्थो-'ज्ञानका' ज्ञानिनो वयं किलेत्यभिमानाभिदग्धाः सन्त एवमाहुरिति संबन्धनीयम् । अफलवादित्वं चैतेषां क्रियाक्षण एव कर्तुः सर्वात्मना नष्टत्वात् क्रियाफलेन सबन्धाभावादवसेयं, सर्व एव वा पूर्ववादिनोऽफलवादिनो द्रष्टव्याः, कैश्चिदात्मनो नित्यस्याविकारिणोऽभ्युपगतत्वात् कैश्चिच्चात्मन एवानभ्युपगमादिति । अत्रोत्तरदानार्थं प्राक्तन्येव निर्युक्तिगाथा 'को वेए' इत्यादि व्याख्यायते, यदि पञ्चस्कन्धव्यतिरिक्तः कश्चिदात्माख्यः पदार्थो न विद्यते ततस्तदभावात्सुखदुःखादिकं कोऽनुभवतीत्यादिगाथा प्राग्वद्व्याख्येयेति, तदेवमात्मनोऽभावाद्योऽयं स्वसंविदितः सुखदुःखानुभवः स कस्य भवतिति चिन्त्यतां, ज्ञानस्कन्धस्यायमनुभव इति चेत्, न, तस्यापि क्षणिकत्वात्, ज्ञानक्षणस्य चातिसूक्ष्मत्वात् सुखदुःखानुभवाभावः, क्रियाफलवतोश्च क्षणयोरत्यन्तासंगतेः कृतनाशाकृताभ्यागमापत्तिरिति, ज्ञानसंतान एकोऽस्तीति चेत् तस्यापि संतानिव्यतिरिक्तस्याभावाद्यत्किञ्चिदेतत्, पूर्वक्षण एव उत्तरक्षणे वासनामाधाय विनङ्क्ष्यतीति चेत्, तथा चोक्तम्—"यस्मिन्नेव हि संताने, आहिता कर्मवासना । फलं तत्रैव संधत्ते, कार्पासे रक्तता यथा ॥१॥" अत्रापीदं विकल्प्यते—सा वासना किं क्षणेभ्यो व्यतिरिक्ताऽव्यतिरिक्ता वा ?, यदि व्यतिरिक्ता वासकत्वानुपपत्तिः, अथाव्यतिरिक्ता क्षणवत् क्षणक्षयित्वं तस्याः, तदेवमात्माभावे सुखदुःखानुभवाभावः स्याद्, अस्ति च सुखदुःखानुभवो, अतोऽस्त्यात्मेति, अन्यथा पञ्चविषयानुभवोत्तरकालमिन्द्रियज्ञानानां स्वविषयादन्यत्राप्रवृत्तेः संकलनाप्रत्ययो न स्यात्, आलयविज्ञानाद्भविष्यतीति चेदात्मैव तर्हि संज्ञान्तरेणाभ्युपगत इति । तथा बौद्धागमोऽप्यात्मप्रतिपादकोऽस्ति, स चायम्—" इत एकनवते कल्पे, शक्त्या मे पुरुषो हतः । तेन कर्मविपाकेन, पादे विद्धोऽस्मि भिक्षवः ! ॥ १ ॥" तथा "कृतानि कर्माण्यतिदारुणानि, तनूभवन्त्यात्मनि गर्हणेन । प्रकाशनात्संवरणाच्च तेषामत्यन्तमूलोद्धरणं वदामि ॥ १ ॥" इत्येवमादि, तथा यदुक्तं क्षणिकत्वं साधयता यथा 'पदार्थाः कारणेभ्य उत्पद्यमानो नित्यः समुत्पद्यतेऽनित्यो वे'त्यादि, तत्र नित्येऽप्रच्युतानुत्पन्नस्थिरैकस्वभावे कारकाणां व्यापाराभावादतिरिक्ता वाचोयुक्तिरिति नित्यत्वपक्षानुपन्यासेन, यच्च नित्यपक्षे भवताऽभिहितं 'नित्यस्य न क्रमेणार्थक्रियाकारित्वं नापि यौगपद्येनेति' तत्क्षणिकत्वेऽपि समानं, यतः क्षणिकोऽप्यर्थक्रियायां प्रवर्तमानः क्रमेण यौगपद्येन वाऽवश्यं सहकारिकारणसव्यपेक्ष एव प्रवर्तते, यतः 'सामग्री जनिका, न ह्येकं किञ्चिदि'ति तेन च सहकारिणा न तस्य कश्चिदतिशयः कर्तुं पार्यते, क्षणस्याविवेकत्वेनानाधेयातिशयत्वात्, क्षणानां च परस्परोपकारकोपकार्यत्वानुपपत्तेः सहकारित्वाभावः, सहकार्यनपेक्षायां च प्रतिविशिष्टकार्यानुपपत्तिरिति । तदेवमनित्य एव कारणेभ्यः पदार्थः समुत्पद्यत इति द्वितीयपक्षसमाश्रयणमेव, तत्रापि चैतदालोचनीयं—किं क्षणक्षयित्वेनानित्यत्वमाहोस्वित्परिणामानित्यतयेति ?, तत्र क्षणक्षयित्वे कारणकार्यभावात् कारकाणां व्यापार एवानुपपन्नः कुतः क्षणिकानित्यस्य कारणेभ्य उत्पाद इति ?, अथ पूर्वक्षणादुत्तरक्षणोत्पादे सति कार्यकारणभावो भवतीत्युच्यते, तदयुक्तं, यतोऽसौ पूर्वक्षणो विनष्टो वोत्तरक्षणं जनयेदविनष्टो वा ?, न तावद्विनष्टः, तस्यासत्त्वाज्जनकत्वानुपपत्तेः, नाप्यविनष्टः, उत्तरक्षणकाले पूर्वक्षणव्यापारसमावेशात्क्षणभङ्गभङ्गापत्तेः, पूर्वक्षणो विनश्यंस्तूत्तरक्षणमुत्पादयिष्यति तुलान्तयोर्नामोन्नामवदिति चेत्, एवं तर्हि क्षणयोः स्पष्टैवैककालताऽऽश्रिता, तथाहि—याऽसौ विनश्यदवस्था साऽवस्थातुरभिक्षा उत्पादावस्थाऽप्युत्पित्सोः, ततश्च तयोर्विनाशोत्पादयोर्यौगपद्याभ्युपगमे तद्धर्मिणोरपि पूर्वोत्तरक्षणयोरेककालावस्थायित्वमिति, तद्धर्मताऽनभ्युपगमे च विनाशोत्पादयोरवस्तुत्वापत्तिरिति । यच्चोक्तम्—'जातिरेव हि भावानामि'त्यादि, तत्रेदमभिधीयते—यदि जातिरेव—उत्पत्तिरेव भावानां—पदार्थानामभावे हेतुः, ततोऽभावकारणस्य सन्निहितत्वेन विरोधेनाप्रातत्वादुत्पत्त्यभावः, अथोत्पन्नुत्तरकालं विनाशो भविष्यतीत्यभ्युपगम्यते, तथा सति उत्पत्तिक्रियाकाले तस्याभूतत्वात्पश्चाच्च भवन्ननन्तर एव भवति न भूयसा कालेनेति किमत्र नियामकं ?, विनाशहेतवभाव इति चेत्, यत उक्तं—'निर्हेतुत्वाद्विनाशस्य स्वभावादनुबन्धिते'ति, एतदप्ययुक्तं, यतो घटादीनां मुद्गरादिव्यापारानन्तरमेव विनाशो भवन् लक्ष्यते, ननु चोक्तमेवात्र तेन मुद्गरादिना घटादेः किं क्रियते ? इत्यादि, सत्यमुक्तं इदमयुक्तं तूक्तं, तथाहि—अभाव इति प्रसज्यपर्युदास विकल्पद्वयेन योऽयं विकल्पितः पक्षद्वयेऽपि च दोषः प्रदर्शितः सोऽदोष एव, यतः पर्युदासपक्षे कपालाख्यभावान्तरकरणे घटस्य च परिणामानित्यतया तद्रूपतापत्तेः कथं मुद्गरादेर्घटादीन् प्रत्यकिञ्चित्करत्वं ?, प्रसज्यप्रतिषेधस्तु भावं न करोतीति क्रियाप्रतिषेधात्मकोऽत्र नाश्रीयते, किं तर्हि ?, प्रागभावप्रध्वंसाभावेतरेतरात्यन्ताभावानां चतुर्णां मध्ये प्रध्वंसाभाव एवेहाश्रीयते, तत्र च कारकाणां व्यापारो भवत्येव, यतोऽसौ वस्तुतः पर्यायोऽवस्थाविशेषो नाभावमात्रं, तस्य चावस्थाविशेषस्य भावरूपत्वात्पूर्वोपमर्देन च प्रवृत्तत्वाद्य एव कपालादेरुत्पादः स एव घटादेर्विनाश इति विनाशस्य सहेतुकत्वमवस्थितम्, अपिच—कादाचित्कत्वेन विनाशस्य सहेतुकत्वमवसेयमिति, पदार्थव्यवस्थार्थं चावश्यमभावचातुर्विध्यमाश्रयणीयं, तदुक्तम्—"कार्यद्रव्यमनादिः स्यात्प्रागभावस्य निह्नवे । प्रध्वंसस्य चाभावस्य, प्रच्यवेऽनन्ततां व्रजेत् ॥ १ ॥ सर्वात्मकं तदेकं स्यादन्यापोहव्यतिक्रमे" इत्यादि । तदेवं

१ च भावस्य प्र० ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ २७ ॥

१ समयाध्ययने अफलवादिबौद्धाः

॥ २६ ॥

॥ २७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षणिकस्य विचाराक्षमत्वात्परिणामानित्यपक्ष एव ज्यायानिति । एवञ्च सत्यात्मा परिणामी ज्ञानाधारो भवान्तरयायी भूतेभ्यः कथञ्चिदन्य एव शरीरेण सहान्योऽन्यानुवेधादनन्योऽपि, तथा सहेतुकोऽपि नारकतिर्यङ्मनुष्यामरभवोपादानकर्मणा तथा तथा विक्रियमाणत्वात् पर्यायरूपतयेति, तथाऽऽत्मस्वरूपाप्रच्युतेर्नित्यत्वादहेतुकोऽपीति । आत्मनश्च शरीरव्यतिरिक्तस्य साधितत्वात् 'चतुर्द्धातुकमात्रं शरीरमेवेदमि'त्येतदुन्मत्तप्रलपितमपकर्णयितव्यमित्यलं प्रसङ्गेनेति ॥ १८ ॥ साम्प्रतं पञ्चभूतात्माऽद्वैततज्जीवतच्छरीराकारकात्मषष्ठक्षणिकपञ्चस्कन्धवादिनाम[1]फलवादित्वं वक्तुकामः सूत्रकारस्तेषां स्वदर्शनफलाभ्युपगमं दर्शयितुमाह—

अगारमावसंतावि, अरण्णा वावि पव्वया । इमं दरिसणमावण्णा, सव्वदुक्खा विमुच्चई ॥ १९ ॥

'अगारं' गृहं तद् 'आवसन्तः' तस्मिंस्तिष्ठन्तो गृहस्था इत्यर्थः, 'आरण्या वा' तापसादयः, 'प्रव्रजिताश्च' शाक्यादयः, अपिः संभावने, इदं ते संभावयन्ति यथा—'इदम्' अस्मदीयं दर्शनम् 'आपन्ना' आश्रिताः सर्वदुःखेभ्यो विमुच्यन्ते, आर्षत्वादेकवचनं सूत्रे कृतं, तथाहि—पञ्चभूततज्जीवतच्छरीरवादिनामयमाशयः—यथेदमस्मदीयं दर्शनं ये समाश्रितास्ते गृहस्थाः सन्तः सर्वेभ्यः शिरस्तुण्डमुण्डनदण्डाजिनजटाकाषायचीवरधारणकेशोल्लुञ्चननाग्न्यतपश्चरणकायक्लेशरूपेभ्यो दुःखेभ्यो मुच्यन्ते, तथा चोचुः—"तपांसि यातनाश्चित्राः, संयमो भोगवञ्चनम् । अग्निहोत्रादिकं कर्म, बालक्रीडेव लक्ष्यत ॥ १ ॥" इति, सांख्यादयस्तु मोक्षवादिन एवं संभावयन्ति—यथा येऽस्मदीयं दर्शनमकर्तृकात्माऽद्वैतपञ्चस्कन्धादिप्रतिपादकमापन्नाः प्रव्रजितास्ते सर्वेभ्यो

१ दगसोयरिआदओ चू० तच्चणिआणं उवासगाविवज्जंति आरोप्पगावि अणागमणधम्मिणोय देवा तओ चेव णिवंति ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ २८ ॥

जन्मजरामरणगर्भपरम्पराऽनेकशारीरमानसातितीव्रतरासातोदयरूपेभ्यो दुःखेभ्यो विमुच्यन्ते, सकलद्वन्द्वविनिर्मोक्षं मोक्षमास्कन्दन्तीत्युक्तं भवति ॥ १९ ॥ इदानीं तेषामेवाफलवादित्वाविष्करणायाह—

ते णावि संधिं णच्चा णं, न ते धम्मविओ जणा । जे ते उ वाइणो एवं, न ते ओहंतराऽऽहिया ॥२०॥
ते णावि संधिं णच्चा णं, न ते धम्मविओ जणा । जे ते उ वाइणो एवं, न ते संसारपारगा ॥२१॥
ते णावि संधिं णच्चा णं, न ते धम्मविओ जणा । जे ते उ वाइणो एवं, न ते गब्भस्स पारगा ॥२२॥
ते णावि संधिं णच्चा णं, न ते धम्मविओ जणा । जे ते उ वाइणो एवं, न ते जम्मस्स पारगा ॥२३॥
ते णावि संधिं णच्चा णं, न ते धम्मविओ जणा । जे ते उ वाइणो एवं, न ते दुक्खस्स पारगा ॥२४॥
ते णावि संधिं णच्चा णं, न ते धम्मविओ जणा । जे ते उ वाइणो एवं, न ते मारस्स पारगा ॥२५॥

ते—पञ्चभूतवाद्याद्याः 'नापि' नैव 'सन्धिं' छिद्रं विवरं, स च द्रव्यभावभेदाद्द्विधा, तत्र द्रव्यसन्धिः कुड्यदेः भावसन्धिश्च ज्ञानावरणादिकर्मविवररूपः तमज्ञात्वा ते प्रवृत्ताः णमिति वाक्यालङ्कारे, यथा आत्मकर्मणोः सन्धिर्द्विधाभावलक्षणो भवति तथा अबुद्धैव ते वराका दुःखमोक्षार्थमभ्युद्यता इत्यर्थः, यथा त एवंभूतास्तथा प्रतिपादितं लेशतः प्रतिपादयिष्यते च, यदिवा—सन्धानं सन्धिः—उत्तरोत्तरपदार्थपरिज्ञानं तदज्ञाता प्रवृत्ता इति, यतश्चैवमतस्ते न सम्यग्धर्मपरिच्छेदे कर्तव्ये विद्वांसो—निपुणा 'जनाः' पञ्चभूतात्मित्वादिवादिनो लोका इति, तथाहि—क्षान्त्यादिको दशविधो धर्मस्तमज्ञात्वैवान्यथाऽन्यथा च धर्मं प्रतिपादयन्ति, यत्फलाभावाच्च तेषामफलवादित्वं तदुत्तरग्रन्थेनोद्देशकपरिसमाप्त्यवसानेन दर्शयति—'ये ते त्वित' तुशब्दश्चशब्दार्थे य इत्यस्यानन्तरं प्रयुज्यते, ये च ते एवमनन्तरोक्तप्रकारवादिनो नास्तिकादयः, 'ओघो' भवौघः संसारस्तस्तरणशीलास्ते न भवन्तीति श्लोकार्थः ॥ ॥ २० ॥ तथा च न ते वादिनः संसारगर्भजन्मदुःखमारादिपारगा भवन्तीति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ यत्पुनस्ते प्राप्नुवन्ति तद्दर्शयितुमाह—

नाणाविहाइं दुक्खाइं, अणुहोंति पुणो पुणो । संसारचक्कवालंमि, मच्चुवाहिजराकुले ॥ २६ ॥
उच्चावयाणि गच्छंता, गब्भमेस्संति णंतसो । नायपुत्ते महावीरे, एवमाह जिणोत्तमे ॥ २७ ॥
इति बेमि पढममज्झयणे पढमो उद्देसो समत्तो ॥

'नानाविधानि' बहुप्रकाराणि 'दुःखानि' असातोदयलक्षणान्यनुभवन्ति पुनः पुनः, तथाहि—नरकेषु करपत्रदारणकुम्भीपाकतप्तायःशाल्मलीसमालिङ्गनादीनि तिर्यक्षु च शीतोष्णदमनाङ्कनताडनाऽतिभारारोपणक्षुत्तृडादीनि मनुष्येषु इष्टवियोगानिष्टसंप्रयोगशोकाक्रन्दनादीनि देवेषु चाभियोग्येर्ष्याकिल्बिषिकत्वच्यवनादीन्यनेकप्रकाराणि दुःखानि ये एवंभूता वादिनस्ते पौन.

१ समयाध्ययने मिथ्यात्वफलं

॥ २८ ॥

१ अष्टप्रकारं कर्म चू०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुण्येन समनुभवन्ति, एतच्च श्लोकार्द्धं सर्वेष्वुत्तरश्लोकार्धेष्वायोज्यम्, शेषं सुगमं यावदुद्देशकसमाप्तिरिति ॥ २६ ॥ नवरम् 'उच्चावचानी'ति अधमोत्तमानि नानाप्रकाराणि वासस्थानानि गच्छन्तीति, गच्छन्तो भ्रमन्तो गर्भाद्गर्भमेष्यन्ति यास्यन्त्यनन्तशो निर्विच्छेदमिति ब्रवीमीति सुधर्मस्वामी जम्बूस्वामिनं प्रत्याह—ब्रवीम्यहं तीर्थङ्कराज्ञया, न स्वमनीषिकया, स चाहं ब्रवीमि येन मया तीर्थङ्करसकाशाच्छ्रुतम्, एतेन च क्षणिकवादिनिरासो द्रष्टव्यः ॥२७॥ इति समयाख्यप्रथमाध्ययने प्रथमोद्देशकः समाप्तः ॥

अथ प्रथमाध्ययने द्वितीय उद्देशकः प्रारभ्यते ॥

उक्तः प्रथमोद्देशकस्तदनु द्वितीयोऽभिधीयते,—

तस्य चायमभिसंबन्धः—इहानन्तरोद्देशके स्वसमयपरसमयप्ररूपणा कृता, इहाप्यध्ययनार्थाधिकारत्वात्सैवाभिधीयते, यदिवाऽनन्तरोद्देशके भूतवादादिमतं प्रदर्श्य तन्निराकरणं कृतं, तदिहापि तदवशिष्टनियतिवाद्यादिमिथ्यादृष्टिमतान्युपदर्श्य निराक्रियन्ते, अथवा प्रागुद्देशकेऽभ्यधायि यथा 'बंधनं बुध्येत तच्च त्रोटयेदिति' तदेव च बन्धनं नियतिवाद्यभिप्रायेण न विद्यत इति प्रदर्श्यते—तदेवमनेकसंबन्धेनायातस्यास्योद्देशकस्य चत्वार्यनुयोगद्वाराणि व्यावर्ण्य सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

॥ २९ ॥

आघायं पुण एगेसिं, उववण्णा पुढो जिया । वेदयंति सुहं दुक्खं, अदुवा लुप्पंति ठाणउ ॥ १ ॥

अस्य चानन्तरपरम्परसूत्रैः संबन्धो वक्तव्यः, तत्रानन्तरसूत्रसंबन्धोऽयम्—इहानन्तरसूत्रे इदमभिहितं, यथा 'पञ्चभूतस्कन्धादिवादिनो मिथ्यात्वोपहतान्तरात्मानोऽसदग्रहाभिनिविष्टाः परमार्थावबोधविकलाः सन्तः संसारचक्रवाले व्याधिमृत्युजराकुले उच्चावचानि स्थानानि गच्छन्तो गर्भमेष्यन्त्यनन्तश' इति, तदिहापि नियत्यज्ञानिज्ञानचतुर्विधकर्मापचयवादिनां तदेव संसारचक्रवालभ्रमणगर्भान्वेषणं प्रतिपाद्यते । परम्परसूत्रं तु 'बुज्झेज्जे' त्यादि, तेन च सहायं संबन्धः—तत्र बुध्येतेत्येतत् प्रतिपादितम्, इहापि यदाख्यातं नियतिवादिभिस्तद्बुध्येत, इत्येवं मध्यसूत्रैरपि यथासंभवं संबन्धो लगनीय इति तदेवं पूर्वोत्तरसंबन्धसंबद्धस्यास्य सूत्रस्याधुनाऽर्थः प्रतन्यते—पुनःशब्दः पूर्ववादिभ्यो विशेषं दर्शयति, नियतिवादिनां पुनरेकेषामेतदाख्यातं, अत्र च 'अविवक्षितकर्मका अपि अकर्मका भवन्ती'ति ख्यातेर्धातोर्भावे निष्ठाप्रत्ययः तद्योगे कर्तरि षष्ठी ततश्चायमर्थः—तैर्नियतिवादिभिः पुनरिदमाख्यातं, तेषामयमाशय इत्यर्थः, तद्यथा—'उपपन्ना' युक्त्या घटमानका इति, अनेन च पञ्चभूततज्जीवतच्छरीरवादिमतमपाकृतं भवति, युक्तिस्तु लेशतः प्राग्दर्शितैव प्रदर्शयिष्यते च, पृथक् पृथक् नारकादिभवेषु शरीरेषु वेति, अनेनाप्यात्माद्वैतवादिनिरासोऽवसेयः, के पुनस्ते पृथगुपपन्नाः ?, तदाह—'जीवाः' प्राणिनः सुखदुःखभोगिनः, अनेन च पञ्चस्कन्धातिरिक्तजीवाभावप्रतिपादकबौद्धमतापक्षेपः कृतो द्रष्टव्यः, तथा ते जीवाः 'पृथक्' पृथक् प्रत्येकदेहे व्यवस्थिताः सुखं दुःखं च 'वेदयन्ति' अनुभवन्ति, न वयं प्रतिप्राणि प्रतीतं सुखदुःखानुभवं निह्नुमहे, अनेन चाकर्तृवादिनो निरस्ता भवन्ति, अकर्तर्यविकारिण्यात्मनि सुखदुःखानुभवानुपपत्तेरिति भावः । तथैतदस्माभिर्नापलप्यते 'अदुवे' ति अथवा ते प्राणिनः सुखं दुःखं चानुभवन्ति, 'विलुप्यन्ते' उच्छिद्यन्ते स्वायुषः प्रच्याव्यन्ते स्थानात्स्थानान्तरं संक्राम्यन्त इत्यर्थः,ततश्चौपपातिकत्वमप्यस्याभिप्रेतं

१ न कर्मापचय प्र०

न निषिध्यते इतिश्लोकार्थः ॥१॥तदेवं पञ्चभूतास्तित्वादिवादिनिरासं कृत्वा यच्चैर्नियतिवादिभिराश्रीयते तच्छ्लोकद्वयेन दर्शयितुमाह

न तं सयं कडं दुक्खं, कओ अन्नकडं च णं ? । सुहं वा जइ वा दुक्खं, सेहियं वा असेहियं ॥ २ ॥
सयं कडं न अण्णेहिं, वेदयंति पुढो जिया । संगइअं तं तहा तेसिं, इहमेगेसि आहिअं ॥ ३ ॥

यत् तैः प्राणिभिरनुभूयते सुखं दुःखं स्थानविलोपनं वा न तत् 'स्वयम्' आत्मना पुरुषकारेण 'कृतं' निष्पादितं दुःखमिति कारणे कार्योपचारात् दुःखकारणमेवोक्तम्, अस्य चोपलक्षणत्वात् सुखाद्यपि ग्राह्यं, ततश्चेदमुक्तं भवति—योऽयं सुखदुःखानुभवः स पुरुषकारकृतकारणजन्यो न भवतीति, तथा कुतः 'अन्येन' कालेश्वरस्वभावकर्मादिना च कृतं भवेत् 'ण'मित्यलङ्कारे तथाहि—यदि पुरुषकारकृतं सुखाद्यनुभूयेत ततः सेवकवणिकर्षकादीनां समाने पुरुषाकारे सति फलप्राप्तिवैसदृश्यं फलाप्राप्तिश्च न भवेत्, कस्यचित्तु सेवादिव्यापाराभावेऽपि विशिष्टफलावाप्तिर्दृश्यत इति, अतो न पुरुषकारात्किञ्चिदासाद्यते, किं तर्हि ?, नियतेरेवेति, एतच्च द्वितीयश्लोकान्तेऽभिधास्यते नापि कालः कर्ता, तस्यैकरूपत्वाज्जगति फलवैचित्र्यानुपपत्तेः, कारणभेदे हि कार्यभेदो भवति नाभेदे, तथाहि—अयमेव हि भेदो भेदहेतुर्वा घटते यदुत विरुद्धधर्माध्यासः कारणभेदश्च, तथेश्वरकर्तृकेऽपि सुखदुःखे न भवतः, यतोऽसावीश्वरो मूर्तोऽमूर्तो वा ?, यदि मूर्तस्ततः प्राकृतपुरुषस्येव सर्वकर्तृत्वाभावः, अथामूर्तस्तथा सत्याकाशस्येव सुतरां निष्क्रियत्वम्, अपिच—यद्यसौ रागादिमांस्ततोऽस्मदाद्यव्यतिरेकाद्विश्वस्याकर्तैव, अथासौ विगतरागस्ततस्तत्कृतं सुभगदुर्भगेश्वरदरिद्रादि जगद्वैचित्र्यं न घटां प्राञ्चति, ततो नेश्वरः कर्तेति, तथा स्वभावस्यापि सुखदुःखादिकर्तृत्वानुपपत्तिः, यतोऽसौ स्वभावः

॥ ३० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषाद्भिन्नोऽभिन्नो वा ?, यदि भिन्नो न पुरुषाश्रिते सुखदुःखे कर्तुमलं, तस्माद्भिन्नत्वादिति, नाप्यभिन्नः अभेदे पुरुष एव स्यात्, तस्य चाकर्तृत्वमुक्तमेव । नापि कर्मणः सुखदुःखं प्रति कर्तृत्वं घटते, यतस्तत्कर्म पुरुषाद्भिन्नमभिन्नं वा भवेत् ?, अभिन्नं चेत्पुरुषमात्रतापत्तिः कर्मणः, तत्र चोक्तो दोषः, अथ भिन्नं तर्हि सचेतनमचेतनं वा ?, यदि सचेतनमेकस्मिन् काये चैतन्यद्वयापत्तिः, अथाचेतनं तथा सति कुतस्तस्य पाषाणखण्डस्येवास्वतन्त्रस्य सुखदुःखोत्पादनं प्रति कर्तृत्वमिति, एतच्चोत्तरत्र व्यासेन प्रतिपादयिष्यत इत्यलं प्रसङ्गेन । तदेवं सुखं 'सैद्धिकं' सिद्धौ—अपवर्गलक्षणायां भवं यदिवा दुःखम्—असातोदयलक्षणमसैद्धिकं सांसारिकं, यदिवा उभयमप्येतत्सुखं दुःखं वा, सत्कृचन्दनाङ्गनाद्युपभोगक्रियासिद्धौ भवं तथा कशाताडनाङ्कनादिसिद्धौ भवं सैद्धिकं, तथा 'असैद्धिकं' सुखमान्तरमानन्दरूपमाकस्मिकमनवधारितबाह्यनिमित्तम् एवं दुःखमपि ज्वरशिरोऽर्तिशूलादिरूपमुत्थमसैद्धिकं, तदेतदुभयमपि न स्वयं पुरुषकारेण कृतं नाप्यन्येन केनचित् कालादिना कृतं 'वेदयन्ति' अनुभवन्ति 'पृथक्जीवाः' प्राणिन इति । कथं तर्हि तत्तेषामभूत् ? इति नियतिवादी स्वाभिप्रायमाविष्करोति—"संगइयंति" सम्यक्स्वपरिणामेन गतिः—यस्य यदा यत्र यत्सुखदुःखानुभवनं सा संगतिः—नियतिस्तस्यां भवं सांगतिकं, यतश्चैवं न पुरुषकारादिकृतं सुखदुःखादि अतस्तत्तेषां प्राणिनां नियतिकृतं सांगतिकमित्युच्यते, 'इह' अस्मिन् सुखदुःखानुभववादे एकेषां वादिनाम् 'आख्यातं' तेषामयमभ्युपगमः, तथा चोक्तम्—"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥" ॥ ३ ॥ एवं श्लोकद्वयेन नियतिवादिमतमुपन्यस्याक्षोत्तरदानायाह—

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥ ३१ ॥

एवमेयाणि जंपंता, बाला पंडिअमाणिणो । निययानिययं संतं, अयाणंता अबुद्धिया ॥ ४ ॥

एवमेगे उ पासत्था, ते भुज्जो विप्पगब्भिआ । एवं उवट्ठिआ संता, ण ते दुक्खविमोक्खया ॥५॥

१ समया० उद्देशः २ नियतिवादिमतं

'एवम्' इति अनन्तरोक्तस्योपप्रदर्शने 'एतानि' पूर्वोक्तानि नियतिवादाश्रितानि वचनानि 'जल्पन्तः' अभिदधतो बाला इव 'बाला' अज्ञाः सदसद्विवेकविकला अपि सन्तः 'पण्डितमानिनः' आत्मानं पण्डितं मन्तुं शीलं येषां ते तथा, किमिति त एवमुच्यत ? इति तदाह—यतो 'निययानिययं संतमिति' सुखादिकं किञ्चिन्नियतिकृतम्—अवश्यंभाव्युदयप्राप्तं तथा अनियतम्—आत्मपुरुषकारेश्वरादिप्रापितं सत् नियतिकृतमेवैकान्तेनाश्रयन्ति, अतोऽजानानाः सुखदुःखादिकारणं अबुद्धिका—बुद्धिरहिता भवन्तीति, तथाहि—आर्हतानां किञ्चित्सुखदुःखादि नियतित एव भवति—तत्कारणस्य कर्मणः कस्मिंश्चिदवसरेऽवश्यंभाव्युदयसद्भावान्नियतिकृतमित्युच्यते, तथा किञ्चिदनियतिकृतं च—पुरुषकारकालेश्वरस्वभावकर्मादिकृतं, तत्र कथञ्चित्सुखदुःखादेः पुरुषकारसाध्यत्वमप्याश्रीयते, यतः क्रियातः फलं भवति, क्रिया च पुरुषकाराऽऽयत्ता प्रवर्तते, तथा चोक्तम्,—"न दैवमिति संचिन्त्य, त्यजेदुद्यममात्मनः । अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति ? ॥ १ ॥" यत्तु समाने पुरुषव्यापारे फलवैचित्र्यं दूषणत्वेनोपन्यस्तं तददूषणमेव, यतस्तत्रापि पुरुषकारवैचित्र्यमपि फलवैचित्र्ये कारणं भवति, समाने वा पुरुषकारे यः फलाभावः कस्यचिद्भवति सोऽदृष्टकृतः, तदपि चास्माभिः कारणत्वेनाश्रितमेव । तथा कालोऽपि कर्ता, यतो वकुलचम्पकाशोकपुन्नागनागसहकारादीनां विशिष्ट एव काले पुष्पफलाद्युद्भवो न सर्वदेति, यच्चोक्तं 'कालस्यैकरूपत्वाज्जगद्वैचित्र्यं न घटत' इति, तदस्मान् प्रति न दूषणं, यतोऽस्माभिर्न काल एवैकः कर्तृत्वेनाभ्युपगम्यते अपि तु कर्मापि, ततो जगद्वैचित्र्यमित्यदोषः । तथेश्वरोऽपि कर्ता, आत्मैव हि तत्र तत्रोत्पत्तिद्वारेण सकलजगद्व्यापनादीश्वरः, तस्य सुखदुःखोत्पत्तिकर्तृत्वं सर्ववादिनामविगानेन सिद्धमेव, यच्चात्र मूर्तामूर्तादिकं दूषणमुपन्यस्तं तदेवंभूतेश्वरसमाश्रयणे दूरोत्सादितमेवेति । स्वभावस्यापि कथञ्चित्कर्तृत्वमेव, तथाहि—आत्मन उपयोगलक्षणत्वमसंख्येयप्रदेशत्वं पुद्गलानां च मूर्तत्वं धर्माधर्मास्तिकाययोर्गतिस्थित्युपष्टम्भकारित्वममूर्तत्वं चेत्येवमादि स्वभावापादितं, यदपि चात्रात्मव्यतिरेकाव्यतिरेकरूपं दूषणमुपन्यस्तं तददूषणमेव, यतः स्वभाव आत्मनोऽव्यतिरिक्तः, आत्मनोऽपि च कर्तृत्वमभ्युपगतमेतदपि स्वभावापादितमेवेति । तथा कर्मापि कर्तृ भवत्येव, तद्धि जीवप्रदेशैः सहान्योऽन्यानुवेधरूपतया व्यवस्थितं कथञ्चिदात्मनोऽभिन्नं, तद्वशाच्चात्मा नारकतिर्यङ्मनुष्यामरभवेषु पर्यटन् सुखदुःखादिकमनुभवतीति । तदेवं नियत्यनियत्योः कर्तृत्वे युक्त्युपपन्ने सति नियतेरेव कर्तृत्वमभ्युपगच्छन्तो निर्बुद्धिका भवन्तीत्यवसेयम् ॥ ४ ॥ तदेवं युक्त्या नियतिवादं दूषयित्वा तद्वादिनामपायदर्शनायाह—'एव'मिति पूर्वाभ्युपगमसंसूचकः, सर्वस्मिन्नपि वस्तुनि नियतानियते सत्येके नियतिमेवावश्यंभाव्येव कालेश्वरादेर्निराकरणेन निर्हेतुकतया नियतिवादमाश्रिताः, दुरवधारणे, त एव नान्ये, किंविशिष्टाः पुनस्ते इति दर्शयति—युक्तिकदम्बकाद्बहिस्तिष्ठन्तीति पार्श्वस्थाः परलोकक्रियापार्श्वस्था वा, नियतिपक्षसमाश्रयणात्परलोकक्रियावैयर्थ्यं, यदिवा-पाश इव पाशः-कर्मबन्धनं, तच्चेह युक्तिविकलनियतिवादप्ररूपणं तत्र स्थिताः पाशस्थाः, अन्येऽप्येकान्तवादिनः कालेश्वरादिकारणिकाः पार्श्वस्थाः पाशस्था वा द्रष्टव्याः

॥ ३१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, 'ते' पुनर्नियतिवादमाश्रित्यापि, भूयो विविधं विशेषेण वा 'प्रगल्भिताः' धाष्टर्योपगताः परलोकसाधकासु क्रियासु प्रवर्तन्ते, धाष्टर्याश्रयणं तु तेषां नियतिवादाश्रयणे सत्येव पुनरपि तत्प्रतिपन्थिनीषु क्रियासु प्रवर्तनादिति, ते पुनः 'एवमप्युपस्थिताः' परलोकसाधकासु क्रियासु प्रवृत्ता अपि सन्तो 'नात्मदुःखविमोक्षकाः' असम्यक्प्रवृत्तत्वान्नात्मानं दुःखाद्विमोचयन्ति । गता नियतिवादिनः ॥ ५ ॥ साम्प्रतमज्ञानिमतं दूषयितुं दृष्टान्तमाह—

जविणो मिगा जहा संता, परित्ताणेण वज्जिआ । असंकियाइं संकंति, संकिआइं असंकिणो ॥ ६ ॥

यथा—'जविनो' वेगवन्तः सन्तो 'मृगा' आरण्याः पशवः परि—समन्तात् त्रायते—रक्षतीति परित्राणं तेन वर्जिता—रहिताः, परित्राणविकला इत्यर्थः । यदिवा—परित्रानं—वागुरादिबन्धनं तेन तर्जिता—भयं ग्राहिताः सन्तो भयोद्भ्रान्तलोचनाः समाकुलीभूतान्तःकरणाः सम्यग्विवेकविकला 'अशङ्कनीयानि' कूटपाशादिरहितानि स्थानान्यशङ्काहाणि तान्येव 'शङ्कन्ते' अनर्थोत्पादकत्वेन गृह्णन्ति । यानि पुनः 'शङ्काहाणि' शंका संजाता येषु योग्यत्वात्तानि शङ्कितानि—शङ्कायोग्यानि—वागुरादीनि तान्यशङ्किनः तेषु शङ्कामकुर्वाणाः, 'तत्र तत्र' पाशादिके संपर्यायन्त इत्युत्तरेण संबन्धः॥६॥पुनरप्येतदेवातिमोहाविष्करणायाह—

परियाणिआणि संकंता, पासिताणि असंकिणो । अण्णाणभयसंविग्गा, संपलिंति तहिं तहिं ॥ ७ ॥

परित्रायते इति परित्राणं तज्जातं येषु तानि तथा, परित्राणयुक्तान्येव शङ्कमाना अतिमूढत्वाद्विपर्यस्तबुद्धयः, त्रातर्यपि भयमुत्प्रेक्षमाणाः, तथा 'पाशितानि' पाशोपेतानि—अनर्थोपादकानि 'अशङ्किनः' तेषु शङ्कामकुर्वाणाः सन्तः अज्ञानेन भयेन च 'संविग्ग'त्ति सम्यग्व्याप्ता—वशीकृताः, शङ्कनीयमशङ्कनीयं वा तथा परित्राणोपेतं पाशाद्यनर्थोपेतं वा सम्यग्विवेकेनाजानानाः 'तत्र तत्र' अनर्थबहुले पाशवागुरादिके बन्धने 'संपर्यायन्ते' सम्—एकीभावेन परि—समन्तादयन्ते यान्ति वा, गच्छन्तीत्युक्तं भवति, तदेवं दृष्टान्तं प्रसाध्य नियतिवादाद्येकान्ताज्ञानवादिनो दार्ष्टान्तिकत्वेनाऽऽयोज्याः, यतस्तेऽप्येकान्तवादिनोऽज्ञानिकाः त्राणभूतानेकान्तवादवर्जिताः सर्वदोषविनिर्मुक्तं कालेश्वरादिकारणवादाभ्युपगमेनानाशङ्कनीयमनेकान्तवादमाशङ्कन्ते शङ्कनीयं च नियत्यज्ञानवादमेकान्तं न शङ्कन्ते, 'ते' एवंभूताः परित्राणार्हेऽप्यनेकान्तवादे शङ्कां कुर्वाणा युक्त्याऽघटमानकमनर्थबहुलमेकान्तवादमशङ्कनीयत्वेन गृह्णन्तोऽज्ञानावृतास्तेषु तेषु कर्मबन्धस्थानेषु संपर्यायन्त इति ॥ ७ ॥ पूर्वदोषैरतुष्यन्नाचार्यो दोषान्तरदित्सया पुनरपि प्राक्तनदृष्टान्तमधिकृत्याऽऽह—

अह तं पवेज्ज बज्झं, अहे बज्झस्स वा वए । मुच्चेज्ज पयपासाओ, तं तु मंदे ण देहए ॥ ८ ॥

'अथ' अनन्तरमसौ मृगस्तत् 'बज्झमिति' बद्धं—बन्धनाकारेण व्यवस्थितं वागुरादिकं वा बन्धनं बन्धकत्वाद्बन्धमित्युच्यते, तदेवंभूतं कूटपाशादिकं बन्धनं यद्यसावुपरि प्लवेत् तदधस्तादतिक्रम्योपरि गच्छेत्, तस्य वध्यादेर्बन्धनस्याधो (वा) गच्छेत्, तत एवं क्रियमाणेऽसौ मृगः पदे पाशः पदपाशो—वागुरादिबन्धनं तस्मान्मुच्येत, यदिवा पदं—कूटं पाशः—प्रतीतस्ताभ्यां मुच्येत, क्वचित्पदपाशादीति पठ्यते, आदिग्रहणाद्वधताडनमारणादिकाः क्रिया गृह्यन्ते, एवं सन्तमपि तमनर्थपरिहरणोपायं 'मन्दो' जडोऽज्ञानावृतो न 'देहए'ति न पश्यतीति ॥ ८ ॥ कूटपाशादिकं चापश्यन् यामवस्थामवाप्नोति तां दर्शयितुमाह—

अहिअप्पाऽहियपण्णाणे, विसमंतेणुवागते । स बद्धे पयपासेणं, तत्थ घायं नियच्छइ ॥ ९ ॥

स मृगोऽहितात्मा तथाऽहितं प्रज्ञानं—बोधो यस्य सोऽहितप्रज्ञानः, स चाहितप्रज्ञानः सन् 'विषमान्तेन' कूटपाशादियुक्तेन प्रदेशेनोपागतः, यदिवा—विषमान्ते—कूटपाशादिके आत्मानमनुपातयेत्, तत्र चासौ पतितो बद्धश्च तेन कूटा[1]दिना पदपाशादीननर्थबहुलानवस्थाविशेषान् प्राप्तः 'तत्र' बन्धने 'घातं' विनाशं 'नियच्छति' प्राप्नोतीति ॥ ९ ॥ एवं दृष्टान्तं प्रदर्श्य सूत्रकार एव दार्ष्टान्तिकमज्ञानविपाकं दर्शयितुमाह—

एवं तु समणा एगे, मिच्छदिट्ठी अणारिआ । असंकिआइं संकंति, संकिआइं असंकिणो ॥१०॥

एवमिति यथा मृगा अज्ञानावृता अनर्थमनेकशः प्राप्नुवन्ति, तुरवधारणे, एवमेव 'श्रमणाः' केचित् पाखण्डविशेषाश्रिताः एके न सर्वे, किंभूतास्ते इति दर्शयति—मिथ्या—विपरीता दृष्टिर्येषामज्ञानवादिनां नियतिवादिनां वा ते मिथ्यादृष्टयः, तथा 'अनार्याः' आराद्याताः सर्वहेयधर्मेभ्य इति आर्याः न आर्या अनार्या अज्ञानावृतत्वादसदनुष्ठायिन इतियावत् । अज्ञानावृतत्वं च दर्शयति—'अशङ्कितानि' अशङ्कनीयानि सुधर्मानुष्ठानादीनि शङ्कमानाः, तथा 'शङ्कनीयानि' अपायबहुलानि एकान्तपक्षसमाश्रयणानि, अशङ्किनो मृगा इव मूढचेतसस्तत्तदाऽऽरभन्ते यत्तदनर्थाय संपद्यन्त इति ॥ १० ॥ शङ्कनीयाशङ्कनीयविपर्यासमाह—

१० तेऽणुवायए इति पाठमाश्रित्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धम्मपण्णवणा जा सा, तं तु संकंति मूढगा । आरंभाइं न संकंति, अविअत्ता अकोविआ ॥११॥

धर्मस्य—क्षान्त्यादिदशलक्षणोपेतस्य या प्रज्ञापना—प्ररूपणा, 'तां तु' इति तामेव 'शङ्कन्ते' असद्धर्मप्ररूपणेयमित्येवमध्यवस्यन्ति, ये पुनः पापोपादानभूताः समारम्भास्तान्नाशङ्कन्ते, किमिति ?, यतः 'अव्यक्ता' मुग्धाः—सहजसद्विवेकविकलाः, तथा 'अकोविदा' अपण्डिताः-सच्छास्त्रावबोधरहिता इति ॥ ११ ॥ ते च अज्ञानाभूता यन्नाप्नुवन्ति तदर्शनायाह—

सव्वप्पगं विउक्कस्सं, सव्वं णूमं विहूणिआ । अप्पत्तिअं अकम्मंसे, एयमट्ठं मिगे चुए ॥ १२ ॥

सर्वत्राप्यात्मा यस्यासौ सर्वात्मको—लोभस्तं विधूयेति संबन्धः, तथा विविध उत्कर्षो गर्वो व्युत्कर्षो—मान इत्यर्थः, तथा 'णूमं'ति माया तां विधूय, तथा 'अप्पत्तियं'ति क्रोधं विधूय, कषायविधूननेन च मोहनीयविधूननमावेदितं भवति, तदपगमाच्चाशेषकर्माभावः प्रतिपादितो भवतीत्याह—'अकर्मांश' इति न विद्यते कर्मांशोऽस्येत्यकर्मांशः, स चाकर्मांशो विशिष्टज्ञानाद्भवति नाज्ञानादित्येव दर्शयति—'एनमर्थं' कर्माभावलक्षणं मृग इव मृगः—अज्ञानी 'चुए'त्ति त्यजेत्, विभक्तिपरिणामेन वा अस्मादेवंभूतादर्थात् च्यवेत्—भ्रश्येदिति ॥ १२ ॥ भूयोऽप्यज्ञानवादिनां दोषाभिधित्सयाऽऽह—

जे एयं नाभिजाणंति, मिच्छदिट्ठी अणारिया । मिगा वा पासबद्धा ते, घायमेसंति णंतसो ॥ १३ ॥

'ये' अज्ञानपक्षं समाश्रिता 'एनं' कर्मक्षपणोपायं 'न जानन्ति' आत्मीयासद्ग्रहग्रहग्रस्ता मिथ्यादृष्टयोऽनार्यास्ते मृगा इव पाशबद्धा 'घातं' विनाशम् 'एष्यन्ति' यास्यन्त्यन्वेषयन्ति वा, तद्योग्यक्रियानुष्ठानात्, 'अनंतशः' अविच्छेदेनेत्यज्ञानवादिनो गताः ॥ १३ ॥ इदानीमज्ञानवादिनां दूषणोद्भिावयिषया स्ववाग्यन्त्रिता वादिनो न चलिष्यन्तीति तन्मतावि्करणायाह—

माहणा समणा एगे, सव्वे नाणं सयं वए । सव्वलोगेऽवि जे पाणा, न ते जाणंति किंचण ॥ १४ ॥

एके केचन ब्राह्मणविशेषाः तथा 'श्रमणाः' परिव्राजकविशेषाः सर्वेऽप्येते ज्ञायतेऽनेनेति ज्ञानं—हेयोपादेयार्थाऽविर्भावकं परस्परविरोधेन व्यवस्थितं 'स्वकम्' आत्मीयं वदन्ति, न च तानि ज्ञानानि परस्परविरोधेन प्रमृष्टसात्सत्यानि, तस्मादज्ञानमेव श्रेयः, किं ज्ञानपरिकल्पनयेति, एतदेव दर्शयति—सर्वस्मिन्नपि लोके ये 'प्राणाः' प्राणिनो न ते किञ्चनापि सम्यगपेतवाचं(च्यं) 'जानन्ती'ति विदन्तीति ॥ १४ ॥ यदपि तेषां गुरुपारम्पर्येण ज्ञानमायातं तदपि छिन्नमूलत्वादवितथं न भवतीति दृष्टान्तद्वारेण दर्शयितुमाह—

मिलक्खू अमिलक्खुस्स, जहा वुत्ताणुभासए । ण हेउं से विजाणाइ, भासिअं तऽणुभासए ॥१५॥

यथा 'म्लेच्छ' आर्यभाषानभिज्ञः 'अम्लेच्छस्य' आर्यस्य म्लेच्छभाषानभिज्ञस्य यद्भाषितं तद् 'अनुभाषते' अनुवदति केवलं, न सम्यक् तदभिप्रायं वेत्ति, यथाऽनया विवक्षयाऽनेन भाषितमिति, न च 'हेतुं' निमित्तं निश्चयेनासौ म्लेच्छस्तद्भाषितस्य जानाति, केवलं परमार्थशून्यं तद्भाषितमेवानुभाषत इति ॥ १५ ॥ एवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकं योजयितुमाह—

एवमन्नाणिया नाणं, वयंतावि सयं सयं । निच्छयत्थं न याणंति, मिलक्खुव्व अबोहिया ॥ १६ ॥

यथा म्लेच्छः अम्लेच्छस्य परमार्थमजानानः केवलं तद्भाषितमनुभाषते, तथा 'अज्ञानिकाः' सम्यग्ज्ञानरहिताः श्रमणा ब्राह्मणा वदन्तोऽपि स्वीयं स्वीयं ज्ञानं प्रमाणत्वेन परस्परविरुद्धार्थभाषणात् निश्चयार्थं न जानन्ति, तथाहि—ते स्वकीयं तीर्थकरं सर्वज्ञत्वेन निर्द्धार्य तदुपदेशेन क्रियासु प्रवर्तेरन्, न च सर्वज्ञविवक्षा अर्वाग्दर्शिना ग्रहीतुं शक्यते, 'नासर्वज्ञः सर्वज्ञं जानाती'ति न्यायात्, तथा चोक्तम्—"सर्वज्ञोऽसाविति ह्येतत्तत्कालेऽपि बुभुत्सुभिः । तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ? ॥ १ ॥" एवं परचेतोवृत्तीनां दुरन्वयत्वादुपदेष्टुरपि यथावस्थितविवक्षया ग्रहणासंभवान्निश्चयार्थमजानानाः म्लेच्छवदपरोक्तमनुभाषन्त एव, 'अबोधिका' बोधरहिताः केवलमिति, अतोऽज्ञानमेव श्रेय इति । एवं यावद्यावज्ज्ञानाभ्युपगमस्तावत्तावद्बृहत्तरदोषसंभवः, तथाहि—योऽवगच्छन् पादेन कस्यचित् शिरः स्पृशति तस्य महानपराधो भवति, यस्त्वनाभोगेन स्पृशति तस्मै न कश्चिदपराध्यतीति, एवं चाज्ञानमेव प्रधानभावमनुभवति, न तु ज्ञानमिति ॥ १६ ॥ एवमज्ञानवादिमतमनूद्येदानीं तद्दूषणायाह—

अन्नाणियाणं वीमंसा, अण्णाणे ण विनियच्छइ । अप्पणो य परं नालं, कुतो अन्नाणुसासिउं ? ॥१७॥

न ज्ञानमज्ञानं तद्विद्यते येषां तेऽज्ञानिनः, अज्ञानशब्दस्य संज्ञाशब्दत्वाद्वा मत्वर्थीयः,गौरखरवदरण्यमिति यथा, तेषामज्ञानिनाम् —अज्ञानमेव श्रेय इत्येवंवादिनां, योऽयं 'विमर्शः' पर्यालोचनात्मको मीमांसा वा—मातुं परिच्छेत्तुमिच्छा सा 'अज्ञाने' अज्ञानविषये 'न णियच्छति' न निश्चयेन यच्छति-नावतरति, न युज्यत इतियावत्, तथाहि—यैवंभूता मीमांसा विमर्शो वा किमेतज्ज्ञानं सत्यमुतासत्यमिति ?, यथा अज्ञानमेव श्रेयो यथा यथा च ज्ञानातिशयस्तथा तथा च दोषातिरेक इति सोऽयमेवंभूतो विमर्श-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ ३५ ॥

१ समया० उद्देशः २ नियतिवादिमतं

स्तेषां न बुध्यते, एवंभूतस्य पर्यालोचनस्य ज्ञानरूपत्वादिति । अपिच—तेऽज्ञानवादिन आत्मनोऽपि 'परं' प्रधानमज्ञानवादमिति 'शासितुम्' उपदेष्टुं 'चालं' न समर्थाः, तेषामज्ञानपक्षसमाश्रयणेनाज्ञत्वादिति, कुतः पुनस्ते स्वयमज्ञाः सन्तोऽन्येषां शिष्यलेनोपगतानामज्ञानवादमुपदेष्टुमलं—समर्था भवेयुरिति ? । यदप्युक्तं—'छिन्नमूलत्वात् म्लेच्छानुभाषणवत्सर्वमुपदेशादिकं,' तदप्ययुक्तं, यतोऽनुभाषणमपि न ज्ञानमृते कर्तुं शक्यते, तथा यदप्युक्तं 'परचेतोवृत्तीनां दुरन्वयत्वादज्ञानमेव श्रेय इति,' तदप्यसत्, यतो भवतैवाज्ञानमेव श्रेय इत्येवं परोपदेशदानाभ्युद्यतेन परचेतोवृत्तिज्ञानस्याभ्युपगमः कृत इति, तथाऽन्यैरप्यभ्यधायि—"आकारैरिङ्गितैर्गत्या, चेष्टया भाषितेन च । नेत्रवक्त्रविकारैश्च, गृह्यतेऽन्तर्गतं मनः ॥ १ ॥" ॥ १७ ॥ तदेवं ते तपस्विनोऽज्ञानिन आत्मनः परेषां च शासने कर्तव्ये यथा न समर्थास्तथा दृष्टान्तद्वारेण दर्शयितुमाह—

वणे मूढे जहा जंतू, मूढे णेयाणुगामिए । दोवि एए अकोविया, तिव्वं सोयं नियच्छइ ॥ १८ ॥

'वने' अटव्यां यथा कश्चिन्मूढो 'जन्तुः' प्राणी दिक्परिच्छेदं कर्तुमसमर्थः स एवंभूतो यदा परं मूढमेव नेतारमनुगच्छति तदा द्वावपि 'अकोविदौ' सम्यग्ज्ञानानिपुणौ सन्तौ 'तीव्रम्' असह्यं 'स्रोतो' गहनं शोकं वा 'नियच्छतो' निश्चयेन गच्छतः—प्राप्नुतः, अज्ञानावृतत्वात् । एवं तेऽप्यज्ञानवादिन आत्मीयं मार्गं शोभनतया निर्धारयन्तः परकीयं चाशोभनतया जानानाः स्वयं मूढाः सन्तः परानपि मोहयन्तीति ॥ १८ ॥ अस्मिन्नेवार्थे दृष्टान्तान्तरमाह—

॥ ३५ ॥

---

१ तेषां मते सम्यक्तया न ज्ञायते न युज्यते इति भावः ।

अंधो अंधं पहं णितो, दूरमद्धाणु गच्छइ । आवज्जे उप्पहं जंतू, अदुवा पंथाणुगामिए ॥ १९ ॥

यथा अन्धः स्वयमपरमन्धं पन्थानं नयन् 'दूरमध्वानं' विवक्षितादध्वनः परतरं गच्छति, नथोत्पथमापद्यते जन्तुरन्धः, अथवा परं पन्थानमनुगच्छेत्, न विवक्षितमेवाध्वानमनुयायादिति ॥ १९ ॥ एवं दृष्टान्तं प्रसाध्य दार्ष्टान्तिकमर्थं दर्शयितुमाह—

एवमेगे णियायट्ठा, धम्ममाराहगा वयं । अदुवा अहम्ममावज्जे, ण ते सव्वजुय वए ॥ २० ॥

'एव'मिति पूर्वोक्तार्थोपप्रदर्शने, एवं भावमूढा भावान्धार्थके आजीविकादयः 'नियायट्ठी'त्ति नियागो–मोक्षः सद्धर्मो वा तदर्थिनः, ते किल वयं सद्धर्माराधका इत्येवं संधाय प्रव्रज्यायामुद्यताः सन्तः पृथिव्यम्बुवनस्पत्यादिकायोपमर्देन पचनपाचनादिक्रियासु प्रवृत्ताः सन्तस्तत्स्वयमनुतिष्ठन्ति अन्येषां चोपदिशन्ति येनाभिप्रेताया मोक्षावाप्तेर्भ्रश्यन्ति, अथवाऽस्तां तावन्मोक्षाभावः, त एवं प्रवर्तमाना 'अधर्मं' पापमापद्येरन्, संभावनायामुत्पन्नेन लिङ्प्रत्ययेनैतदर्शयति—एतदपरं तेषामनर्थान्तरं संभाव्यते यदुत विवक्षितार्थाभावतया विपरीतार्थावाप्तेः पापोपादानमिति । अपिच—त एवमसदनुष्ठायिन आजीविकादयो गोशालकमतानुसारिणोऽज्ञानवादप्रवृत्ताः सर्वैः प्रकारैर्ऋजुः—प्रगुणो विवक्षितमोक्षगमनं प्रत्यकुटिलः सर्वर्जुः—संयमः सद्धर्मो वा तं सर्वर्जुकं ते 'न व्रजेयुः' न प्राप्नुयुरित्युक्तं भवति, यदिवा–सर्वर्जुकं–सत्यं तत्तेऽज्ञानान्धा ज्ञानापलापिनो न वदेयुरिति । एते चाज्ञानिकाः सप्तषष्टिभेदा भवन्ति, ते च भेदा अमुनोपायेन प्रदर्शनीयाः, तद्यथा—जीवादयो नव पदार्थाः, सत् असत् सदसत् अवक्तव्यः सदवक्तव्यः असदवक्तव्यः सदसदवक्तव्य इत्येतैः सप्तभिः प्रकारैर्विज्ञातुं न शक्यन्ते, न च विज्ञातैः प्रयोजनमस्ति, भावना

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ ३६ ॥

चेयम्—सन् जीव इति को वेत्ति ? किंवा तेन ज्ञातेन ?, असन् जीव इति को वेत्ति ? किंवा तेन ज्ञातेनेत्यादि, एवमजीवादिष्वपि प्रत्येकं सप्त विकल्पाः, नव सप्तकास्त्रिषष्टिः, अमी चान्ये चत्वारस्त्रिषष्टिमध्ये प्रक्षिप्यन्ते, तद्यथा—सती भावोत्पत्तिरिति को जानाति ? किंवाऽनया ज्ञातया ?, एवमसती सदसत्यवक्तव्या भावोत्पत्तिरिति को जानाति ? किंवाऽनया ज्ञातयेति, शेषविकल्पत्रयं तूत्पन्नोत्तरकालं पदार्थावयवापेक्षमतोऽत्र न संभवतीति नोक्तम्, एतच्चतुष्टयप्रक्षेपात्सप्तषष्टिर्भवति, तत्र सन् जीव इति को वेत्तीत्यस्यायमर्थो–न कस्यचिद्विशिष्टं ज्ञानमस्ति योऽतीन्द्रियान् जीवादीनवभोत्स्यते, न च तैर्ज्ञातैः किञ्चित्फलमस्ति, तथाहि—यदि नित्यः सर्वगतोऽमूर्तो ज्ञानादिगुणोपेत एतद्गुणव्यतिरिक्तो वा ततः कतमस्य पुरुषार्थस्य सिद्धिरिति ?, तस्माज्ज्ञानमेव श्रेय इति ॥ २० ॥ पुनरपि तद्दूषणाभिधित्सयाऽऽह—

१ समया० उद्देशः २ अज्ञानवादः

एवमेगे वियक्काहिं, नो अन्नं पज्जुवासिया । अप्पणो य वियक्काहिं, अयमंजूहिं दुम्मई ॥ २१ ॥

'एवम्' अनन्तरोक्तया नीत्या एके—केचनाज्ञानिका 'वितर्काभिः' मीमांसाभिः स्वोत्प्रेक्षिताभिरसत्कल्पनाभिः 'परम्' अन्यमार्हतादिकं ज्ञानवादिनं 'न पर्युपासते' न सेवन्ते स्वावलेपग्रहग्रस्ता वयमेव तत्त्वज्ञानाभिज्ञा नापरः कश्चिदित्येवं नान्यं पर्युपासत इति । तथा आत्मीयैर्वितर्कैरेवमभ्युपगतवन्तो—यथा 'अयमेव' असदीयोऽज्ञानमेव श्रेय इत्येवमात्मको मार्गः 'अंजू'रिति निर्देशाव्यक्तः–स्पष्टः, परैस्तिरस्कर्तुमशक्यः, ऋजुर्वा—प्रगुणोऽकुटिलः, यथावस्थितार्थाभिधायित्वात्, किमिति (ते) एवमभिदधति ?—'हि'यस्मादर्थे यस्माते 'दुर्मतयो' विपर्यस्तबुद्धय इत्यर्थः ॥२१॥ साम्प्रतमज्ञानवादिनां ज्ञानवादी स्पष्टमेवानर्थाभिधित्सयाऽऽह—

॥ ३६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तक्काइ साहिंता, धम्माधम्मे अकोविया । दुक्खं ते नाइतुट्टंति, सउणी पंजरं जहा ॥ २२ ॥

'एवं' पूर्वोक्तन्यायेन 'तर्कया' स्वकीयविकल्पनया 'साधयन्तः' प्रतिपादयन्तो धर्मे-क्षान्त्यादिके अधर्मे च—जीवोपमर्दापादिते पापे 'अकोविदा' अनिपुणा 'दुःखम्' असातोदयलक्षणं तद्धेतुं वा मिथ्यात्वाद्युपचितकर्मबन्धनं 'नातित्रोटयन्ति' अतिशयेनैतत्स्थितं तथा ते न त्रोटयन्ति—अपनयन्तीति, अत्र दृष्टान्तमाह—यथा पञ्जरस्थः शकुनिः पञ्जरं त्रोटयितुं—पञ्जरबन्धनादात्मानं मोचयितुं नालम्, एवमसावपि संसारपञ्जरादात्मानं मोचयितुं नालमिति ॥ २२ ॥ अधुना सामान्येनैकान्तवादिमतदूषणार्थमाह—

सयं सयं पसंसंता, गरहंता परं वयं । जे उ तत्थ विउस्संति, संसारं ते विउस्सिया ॥ २३ ॥

'स्वकं स्वकम्' आत्मीयमात्मीयं दर्शनमभ्युपगतं 'प्रशंसन्तो' वर्णयन्तः समर्थयन्तो वा, तथा 'गर्हमाणा' निन्दन्तः परकीयां वाचं, तथाहि—साङ्ख्याः सर्वस्याविर्भावतिरोभाववादिनः सर्वं वस्तु क्षणिकं निरन्वयविनश्वरं चेत्येवंवादिनो बौद्धान् दूषयन्ति, तेऽपि नित्यस्य क्रमयोगपद्याभ्यामर्थक्रियाविरहात् साङ्ख्यान्, एवमन्येऽपि द्रष्टव्या इति । तदेवं 'ये' एकान्तवादिनः, तुरवधारणे भिन्नक्रमश्च, 'तत्रैव' तेष्वेवाऽऽत्मीयात्मीयेषु दर्शनेषु प्रशंसां कुर्वाणाः परवाचं च विगर्हमाणा 'विद्वस्यंते' विद्वांस इवाऽऽचरन्ति, तेषु वा विशेषेणोशन्ति—स्वशास्त्रविषये विशिष्टं युक्तिव्रातं वदन्ति, ते चैवंवादिनः 'संसारं' चतुर्गतिभेदेन संसृतिरूपं विविधम्—अनेकप्रकारम् उत्—प्राबल्येन श्रिताः—संबद्धाः, तत्र वा संसारे उषिताः संसारान्तर्वर्तिनः सर्वदा भवन्तीत्यर्थः ॥२३॥ साम्प्रतं यदुक्तं निर्युक्तिकारेणोद्देशकार्थाधिकारे 'कर्म चयं न गच्छति चतुर्विधं भिक्षुसमय' इति, तदधिकृत्याह—

अहावरं पुरक्खायं, किरियावाइदरिसणं । कम्मचिंतापणट्ठाणं, संसारस्स पवड्ढणं ॥ २४ ॥

'अथे'त्यानन्तर्ये, अज्ञानवादिमतानन्तरमिदमन्यत् 'पुरा' पूर्वम् 'आख्यातं' कथितं, किं पुनस्तदित्याह—'क्रियावादिदर्शनं' क्रियैव—चैत्यकर्मादिका प्रधानं मोक्षाङ्गमित्येवं वदितुं शीलं येषां ते क्रियावादिनस्तेषां दर्शनम्—आगमः क्रियावादिदर्शनं, किंभूतास्ते क्रियावादिन इत्याह—कर्मणि—ज्ञानावरणादिके चिन्ता—पर्यालोचनं कर्मचिन्ता तस्याः प्रणष्टा—अपगताः कर्मचिन्ताप्रणष्टाः, यतस्ते अविज्ञानाद्युपचितं चतुर्विधं कर्मबन्धं नेच्छन्ति अतः कर्मचिन्ताप्रणष्टाः, तेषां चेदं दर्शनं 'दुःखस्कन्धस्य' असातोदयपरम्पराया विवर्धनं भवति, क्वचित्संसारवर्धनमिति पाठः, ते ह्येवं प्रतिपद्यमानाः संसारस्य वृद्धिमेव कुर्वन्ति नोच्छेदमिति ॥ २४ ॥ यथा च ते कर्मचिन्ततो नष्टास्तथा दर्शयितुमाह—

जाणं काएणऽणाउट्टी, अबुहो जं च हिंसति । पुट्ठो संवेदइ परं, अवियत्तं खु सावज्जं ॥ २५ ॥

यो हि 'जानन्' अवगच्छन् प्राणिनो हिनस्ति, कायेन चानाकुट्टी, 'कुट्ट छेदने' आकुट्टनमाकुट्टः स विद्यते यस्यासावाकुट्टी नाकुट्टनाकुट्टी, इदमुक्तं भवति—यो हि कोपादेर्निमित्तात् केवलं मनोव्यापारेण प्राणिनो व्यापादयति, न च कायेन प्राण्यवयवानां छेदनभेदनादिके व्यापारे वर्तते न तस्यावद्यं, तस्य कर्मोपचयो न भवतीत्यर्थः, तथा 'अबुधः' अजानानः कायव्यापारमात्रेण यं च हिनस्ति प्राणिनं तत्रापि मनोव्यापाराभावान्न कर्मोपचय इति, अनेन च श्लोकार्धेन यदुक्तं निर्युक्तिकृता यथा—'चतुर्विधं कर्म नोपचीयते भिक्षुसमय' इति, तत्र परिज्ञोपचितमविज्ञोपचिताख्यं भेदद्वयं साक्षादुपात्तं, शेषं तीर्यापथस्वप्नान्तिकभेदद्वयं चशब्देनोपात्तं, तत्रेरणमीर्या-गमनं तत्संबद्धः पन्था ईर्यापथस्तत्रत्ययं कर्मेर्यापथम्, एतदुक्तं भवति—पथि गच्छतो यथाकथञ्चिदनभिसंधेर्यत्प्राण्युपादनं भवति तेन कर्मणश्चयो न भवति, तथा स्वप्नान्तिकमिति—स्वप्न एव लोकोक्त्या स्वप्नान्तः स विद्यते यस्य तत्स्वप्नान्तिकं, तदपि न कर्मबन्धाय, यथा स्वप्ने भुजिक्रियायां तृप्यभावस्तथा कर्मणोऽपीति, कथं तर्हि तेषां कर्मोपचयो भवतीति ?, उच्यते, यद्यसौ हन्यमानः प्राणी भवति हन्तुश्च यदि प्राणीत्येवं ज्ञानमुत्पद्यते तथैनं हन्मीत्येवं च यदि बुद्धिः प्रादुष्याद् एतेषु च सत्सु यदि कायचेष्टा प्रवर्तते तस्यामपि यद्यसौ प्राणी व्यापाद्यते ततो हिंसा ततश्च कर्मोपचयो भवतीति, एषामन्यतराभावेऽपि न हिंसा, न च कर्मचयः । अत्र च पञ्चानां पदानां द्वात्रिंशद्भङ्गा भवन्ति, तत्र प्रथमभङ्गे हिंसकोऽपरेष्वेकत्रिंशत्स्वहिंसकः, तथा चोक्तम्—"प्राणी प्राणिज्ञानं घातकचित्तं च तद्गता चेष्टा । प्राणैश्च विप्रयोगः पञ्चभिरापद्यते हिंसा ॥ १ ॥" किमेकान्तेनैव परिज्ञोपचितादिना कर्मोपचयो न भवत्येव ?, भवति काचिद्व्यक्तमात्रेति दर्शयितुं श्लोकपश्चार्धमाह—'पुट्ठो'त्ति तेन केवलमनोव्यापाररूपपरिज्ञोपचितेन केवलकायक्रियोत्थेन वाऽविज्ञोपचितेनेर्यापथेन स्वप्नान्तिकेन च चतुर्विधेनापि कर्मणा 'स्पृष्टः' ईषच्छुष्कभित्तिकल्पः संस्तत्कर्माऽसौ स्पर्शमात्रेणैव परमनुभवति, न तस्याधिको विपाकोऽस्ति, कुड्यापतितसिकतामुष्टिवत्स्पर्शानन्तरमेव परिशटतीत्यर्थः, अत एव तस्य चयाभावोऽभिधीयते, न पुनरत्यन्ताभाव इति । एवं च कृत्वा तद् 'अव्यक्तम्' अपरिस्फुटं,

सूत्रकृ. ७ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ ३७ ॥

१ समया० उद्देशः २ चतुर्विधकर्मचयाभावः

॥ ३७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरवधारणे, अव्यक्तमेव, स्पष्टविपाकानुभवाभावात्, तदेवमव्यक्तं सहावद्येन—गर्हेण वर्तते तत्परिज्ञोपचितादिकर्मेति ॥ २५ ॥ ननु च यद्यनन्तरोक्तं चतुर्विधं कर्म नोपचयं याति कथं तर्हि कर्मोपचयो भवतीत्येतदाशङ्क्याह—

संतिमे तउ आयाणा, जेहिं कीरइ पावगं । अभिकम्मा य पेसा य, मणसा अणुजाणिया ॥२६॥

'सन्ति' विद्यन्ते अमूनि त्रीणि आदीयते—स्वीक्रियते असीभिः कर्मेत्यादानानि, एतदेव दर्शयति—यैरादानैः 'क्रियते' विधीयते निष्पाद्यते 'पापकं' कल्मषं, तानि चामूनि, तद्यथा—'अभिक्रम्ये'ति आभिमुख्येन वध्यं प्राणिनं क्रान्त्वा—तद्घाताभिमुखं चित्तं विधाय यत्र स्वत एव प्राणिनं व्यापादयति तदेकं कर्मादानं, तथाऽपरं च प्राणिघाताय प्रेष्यं समादिश्य यत्प्राणिव्यापादनं तद्द्वितीयं कर्मादानमिति, तथाऽपरं व्यापादयन्तं मनसाऽनुजानीत इत्येतत्तृतीयं कर्मादानं, परिज्ञोपचितादस्यायं भेदः—तत्र केवलं मनसा चिन्तनमिह स्वपरेण व्यापाद्यमाने प्राणिन्यनुमोदनमिति ॥ २६ ॥ तदेवं यत्र स्वयं कृतकारितानुमतयः प्राणिघाते क्रियमाणे विद्यन्ते क्लिष्टाध्यवसायस्य प्राणातिपातश्च तत्रैव कर्मोपचयो नान्यत्रेति दर्शयितुमाह—

एते उ तउ आयाणा, जेहिं कीरइ पावगं । एवं भावविसोहीए, निव्वाणमभिगच्छइ ॥ २७ ॥

तुरवधारणे, 'एतान्येव' पूर्वोक्तानि त्रीणि व्यस्तानि समस्तानि वा आदानानि यैर्दुष्टाध्यवसायसव्यपेक्षैः पापकं कर्मोपचीयत इति, एवं च स्थिते यत्र कृतकारितानुमतयः प्राणिव्यपरोपणं प्रति न विद्यन्ते तथा 'भावविशुद्ध्या' अरक्तद्विष्टबुध्या प्रवर्तमानस्य सत्यपि प्राणातिपाते केवलेन मनसा कायेन वा मनोऽभिसंधिरहितेनोभयेन वा विशुद्धबुद्धेर्न कर्मोपचयः, तदभावाच्च 'निर्वाणं' सर्वद्वन्द्वोपरतिस्वभावम् 'अभिगच्छति' आभिमुख्येन प्राप्नोतीति ॥२७॥ भावशुद्धया प्रवर्तमानस्य कर्मबन्धो न भवतीत्यत्रार्थे दृष्टान्तमाह—

पुत्तं पिया समारब्भ, आहारेज्ज असंजए । भुंजमाणो य मेहावी, कम्मणा नोवलिप्पइ ॥ २८ ॥

'पुत्रम्' अपत्यं 'पिता' जनकः 'समारभ्य' व्यापाद्य आहारार्थं कस्याञ्चित्तथाविधायामापदि तद्रुधिरणार्थमरक्तद्विष्टः 'असंयतो' गृहस्थस्तत्पिशितं भुञ्जानोऽपि चशब्दस्यापिशब्दार्थत्वादिति, तथा 'मेधाव्यपि' संयतोऽपीत्यर्थः, तदेवं गृहस्थो भिक्षुर्वा शुद्धाशयः पिशिताश्यपि 'कर्मणा' पापेन 'नोपलिप्यते' नाश्लिष्यत इति यथा चात्र पितुः पुत्रं व्यापादयतस्तत्रारक्तद्विष्टमनसः कर्मबन्धो न भवति तथाऽन्यस्याप्यरक्तद्विष्टान्तःकरणस्य प्राणिवधे सत्यपि न कर्मबन्धो भवतीति ॥ २८ ॥ साम्प्रमेतद्रूपणायाह—

मणसा जे पउस्संति, चित्तं तेसिं ण विज्जइ । अणवज्जमतहं तेसिं, ण ते संवुडचारिणो ॥ २९ ॥
इच्चेयाहि य दिट्ठीहिं, सातागारवणिस्सिया । सरणंति मन्नमाणा, सेवंती पावगं जणा ॥ ३० ॥
जहा अस्साविणिं णावं, जाइअंधो दुरूहिया । इच्छई पारमागंतुं, अंतरा य विसीयई ॥ ३१ ॥
एवं तु समणा एगे, मिच्छदिट्ठी अणारिया । संसारपारकंखी ते, संसारं अणुपरियट्टंति ॥ ३२ ॥
(गाथाग्रं॥५९॥) त्तिबेमि । इति प्रथमाध्ययने द्वितीयोद्देशकः ॥

ये हि कुतश्चिन्निमित्तात् 'मनसा' अन्तःकरणेन 'प्रादुष्यन्ति' प्रद्वेषमुपयान्ति 'तेषां' वधपरिणतानां शुद्धं चित्तं न विद्यते, तदेवं यत्तैरभिहितं—यथा केवलमनःप्रद्वेषेऽपि 'अनवद्यं' कर्मोपचयाभाव इति, तत् तेषाम् 'अतथ्यम्' असदर्थाभिधायित्वं, यतो न ते संवृतचारिणो, मनसोऽशुद्धत्वात्, तथाहि—कर्मोपचये कर्तव्ये मन एव प्रधानं कारणं, यतस्तैरपि मनोरहितकेवलकायव्यापारे कर्मोपचयाभावोऽभिहितः, ततश्च यत् यस्मिन् सति भवत्यसति तु न भवति तत्तस्य प्रधानं कारणमिति, ननु तस्यापि कायचेष्टारहितस्याकारणत्वमुक्तं, सत्यमुक्तम्, अयुक्तं तूक्तं, यतो भवतैव 'एवं भावशुद्धया निर्वाणमभिगच्छती'ति भणता मनस एवैकस्य प्राधान्यमभ्यधायि, तथाऽन्यैरप्यभिहितं—"चित्तमेव हि संसारो, रागादिक्लेशवासितम्। तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥१॥" तथाऽन्यैरप्यभिहितं—"मतिर्विभव ! नमस्ते यत्समलेऽपि पुंसां, परिणमसि शुभांशैः कल्मषांशैस्त्वमेव। नरकनगरवर्त्म प्रस्थिताः कष्टमेके, उपचितशुभशक्त्या सूर्यसंभेदिनोऽन्ये ॥१॥" तदेवं भवदभ्युपगमेनैव क्लिष्टमनोव्यापारः कर्मबन्धायेत्युक्तं भवति, तथेर्यापथेऽपि यद्यनुपयुक्तो याति ततोऽनुपयुक्ततैव क्लिष्टचित्ततेति कर्मबन्धो भवत्येव, अथोपयुक्तो याति ततोऽप्रमत्तत्वादबन्धक एव, तथा चोक्तम्—"उच्चालियंमि पाए इरियासमियस्स संकमट्ठाए। वावज्जेज्ज कुलिंगी मरेज्ज तं जोगमासज्ज ॥१॥

१ उच्चालिते पादे ईर्यासमितेन संक्रमार्थाय। व्यापद्येत कुलिङ्गी म्रियेत तं योगमासाद्य ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णे य तस्स तन्निमित्तो बन्धो सुहुमोऽवि देसिओ समए । अणवज्जो उ पयोगेण सव्वभावेण सो जम्हा ॥२॥" स्वप्नान्तिकेऽप्यशुद्धचित्तसद्भावादीषद्बन्धो भवत्येव, स च भवताऽप्यभ्युपगत एव 'अव्यक्तं तत्सावद्य'मित्यनेनेति । तदेवं मनसोऽपि क्लिष्टस्यैकस्यैव व्यापारे बन्धसद्भावात् यदुक्तं भवता 'प्राणी प्राणिज्ञान'मित्यादि तत्सर्वं प्लवत इति, यदप्युक्तं—'पुत्रं पिता समारभ्ये'त्यादि तदप्यनालोचिताभिधानं, यतो मारयामीत्येवं यावन्न चित्तपरिणामोऽभूत्तावच्च कश्चिद्व्यापादयति, एवंभूतचित्तपरिणतेश्च कथमसंक्लिष्टता ?, चित्तसंक्लेशे चावश्यंभावी कर्मबन्ध इत्युभयोरस्संवादोऽत्रेति । यदपि च तैः क्वचिदुच्यते—यथा 'परव्यापादितपिशितभक्षणे परहस्ताऽऽकृष्टाङ्गारदाहाभाववच्च दोषः' इति, तदपि उन्मत्तप्रलपितवदनाकर्णनीयं, यतः परव्यापादिते पिशितभक्षणेऽनुमतिरप्रतिहता, तस्माच्च कर्मबन्ध इति, तथा चान्यैरप्यभिहितम्—"अनुमन्ता विशसिता, संहर्ता क्रयविक्रयी । संस्कर्ता चोपभोक्ता च, घातकश्चाष्ट घातकाः ॥ १ ॥" यच्च कृतकारितानुमतिरूपमादानत्रयं तैरभिहितं तच्चैनेन्द्रमतलवास्वादनमेव तैरकारीति । तदेवं कर्मचतुष्टयं नोपचयं यातीत्येवं तदभिदधानाः कर्मचिन्तातो नष्टा इति सुप्रतिष्ठितमिदमिति ॥ २९ ॥ अधुनैतेषां क्रियावादिनामनर्थपरम्परां दर्शयितुमाह—'इत्येताभिः' पूर्वोक्ताभिश्चतुर्विधं कर्म नोपचयं यातीति 'दृष्टिभिः' अभ्युपगमैस्ते वादिनः 'सातगौरवनिःश्रिताः' सुखशीलतायामासक्ता यत्किञ्चनकारिणो यथालब्धभोजिनश्च संसारोद्धरणसमर्थं 'शरणम्' इदमस्मदीयं दर्शनम् 'इति' एवं मन्यमाना विपरीतानुष्ठानतया 'सेवन्ते' कुर्वते 'पापम्' अवद्यम्, एवं व्रतिनोऽपि सन्तो जना इव जनाः प्राकृतपुरुषसदृशा इत्यर्थः ॥३०॥ अस्यैवार्थस्योपदर्शकं दृष्टान्तमाह—आ—समन्तात्स्रवति तच्छीला वा

१ न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि दिष्टः समये । अनवद्यस्तु प्रयोगेण सर्वभावेन स यस्मात् ॥ २ ॥

आस्राविणी सच्छिद्रेत्यर्थः, तां तथाभूतं नावं यथा जात्यन्धः समारुह्य 'पारं' तटम् 'आगन्तुं' प्राप्तुमिच्छत्यसौ, तस्याश्चास्राविणीत्वेनोदकप्लुतत्वात् 'अन्तराले' जलमध्य एव 'विषीदति' वारिणि निमज्जति तत्रैव च पञ्चत्वमुपयातीति ॥३१॥ साम्प्रतं दार्ष्टान्तिकयोजनार्थमाह—'एव'मिति यथाऽन्धः सच्छिद्रां नावं समारूढः पारगमनाय नालं तथा श्रमणा एके शाक्यादयो मिथ्या—विपरीता दृष्टिर्येषां ते मिथ्यादृष्टयः तथा पिशिताशनानुमतेरनार्याः स्वदर्शनानुरागेण 'संसारपारकाङ्क्षिणो' मोक्षाभिलाषुका अपि सन्तस्ते चतुर्विधकर्मचयानभ्युपगमेनानिपुणत्वाच्छासनस्य 'संसारमेव' चतुर्गतिसंसरणरूपम् 'अनुपर्यटन्ति' भूयोभूयस्तत्रैव जन्मजरामरणदौर्गत्यादिक्लेशमनुभवन्तोऽनन्तमपि कालमासते, न विवक्षितमोक्षसुखमाप्नुवन्ति, इति ब्रवीमीति पूर्ववदिति ॥ ३२ ॥ इति सूत्रकृताङ्गे समयाख्याध्ययनस्य द्वितीयोद्देशकः समाप्तः ॥

॥ अथ प्रथमाध्ययने तृतीयोद्देशकः प्रारभ्यते ॥

द्वितीयोद्देशकानन्तरं तृतीयः समारभ्यते, अस्य चायमभिसंबन्धः—अध्ययनार्थाधिकारः स्वसमयपरसमयप्ररूपणेति, तत्रोद्देशकद्वयेन स्वपरसमयप्ररूपणा कृता अत्रापि सैव क्रियते, अथवाऽऽद्ययोरुद्देशकयोः कुदृष्टयः प्रतिपादितास्तद्दोषाश्च तदिहापि तेषामाचारदोषः प्रदर्श्यत इत्यनेन संबन्धेनायातस्यास्योद्देशकस्य चत्वार्यनुयोगद्वाराणि व्याख्यान्यस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

जं किंचि उ पूइकडं, सड्ढीमागंतुमीहियं । सहस्संतरियं भुंजे, दुपक्खं चेव सेवइ ॥ १ ॥
तमेव अवियाणंता, विसमंसि अकोविया । मच्छा वेसालिया चेव, उदगस्सऽभियागमे ॥ २ ॥
उदगस्स पभावेणं, सुक्कं सिग्घं तमिंति उ । ढंकेहि य कंकेहि य, आमिसत्थेहिं ते दुही ॥ ३ ॥
एवं तु समणा एगे, वट्टमाणसुहेसिणो । मच्छा वेसालिया चेव, घातमेस्संति णंतसो ॥ ४ ॥

अस्य चानन्तरसूत्रेण सहायं संबन्ध—इहानन्तरोद्देशकपर्यन्तसूत्रेऽभिहितम्, 'एवं तु श्रमणा एके' इत्यादि, तदिहापि संबध्यते, एके श्रमणा यत्किञ्चित्पूतिकृतं भुञ्जानाः संसारं पर्यटन्तीति, परम्परसूत्रे त्वभिहितं 'बुज्झिज्ज' इत्यादि, यत्किञ्चित्पूतिकृतं तद्बुध्येतेति, एवमन्यैरपि सूत्रैरुत्प्रेक्ष्य संबन्धो योज्यः । अधुना सूत्रार्थः प्रतीयते—'यत्किञ्चि'दिति आहारजातं स्तोकमपि, आस्तां तावत्प्रभूतं, तदपि 'पूतिकृतम्' आधाकर्मादिसिक्थेनाप्युपसृष्टम्, आस्तां तावदाधाकर्म, तदपि न स्वयंकृतम्, अपि तु 'श्रद्धावता' अन्येन भक्तिमताऽपरान् आगन्तुकानुद्दिश्य 'ईहितं' चेष्टितं निष्पादितं, तच्च सहस्रान्तरितमपि यो 'भुञ्जीत' अभ्यवहरेदसौ 'द्विपक्षं' गृहस्थपक्षं प्रव्रजितपक्षं चाऽऽसेवते, एतदुक्तं भवति—एवंभूतमपि परकृतमपरागन्तुकयत्स्वर्थं निष्पादितं यदाधाकर्मादि तस्य सहस्रान्तरितस्यापि योऽवयवलेनाप्युपसृष्टमाहारजातं भुञ्जानस्य द्विपक्षसेवनमापद्यते, किं पुनः य एते शाक्यादयः स्वयमेव सकलमाहारजातं निष्पाद्य स्वयमेव चोपभुञ्जते ?, ते च सुतरां द्विपक्षसेविनो भवन्तीत्यर्थः, यदिवा—'द्विपक्ष'मिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईर्यापथः सांपरायिकं च, अथवा—पूर्वबद्धा निकाचिताद्यवस्थाः कर्मप्रकृतीर्नयत्यपूर्वाश्चादत्ते, तथा चागमः—"आहाकम्मं णं भुञ्जमाणे समणे कइ कम्मपयडीओ बंधइ ?, गोयमा ! अट्ठकम्मपयडीओ बंधइ, सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ करेइ, चियाओ करेइ, उवचियाओ करेइ, हस्सठिइयाओ दीहठिइयाओ करेइ' इत्यादि । ततश्चैवं शाक्यादयः परतीर्थिकाः स्वयूथ्या वा आधाकर्म भुञ्जाना द्विपक्षमेवाऽऽसेवन्त इति सूत्रार्थः ॥ १ ॥ इदानीमेतेषां सुखैषिणामाधाकर्मभोजिनां कटुकविपाकाविर्भावनाय श्लोकद्वयेन दृष्टान्तमाह—'तमेव' आधाकर्मोपभोगदोषम् 'अजानाना' विषमः—अष्टप्रकारकर्मबन्धो भवकोटिभिरपि दुर्मोक्षः चतुर्गतिसंसारो वा तस्मिन्नकोविदाः, कथमेष कर्मबन्धो भवति ? कथं वा न भवति ? केन वोपायेनायं संसारार्णवस्तीर्यत इत्यत्राकुशलाः, तस्मिन्नेव संसारोदरे कर्मपाशावपाशिता दुःखिनो भवन्तीति । अत्र दृष्टान्तमाह—यथा 'मत्स्याः' पृथुरोमाणो विशालः—समुद्रस्तत्र भवा वैशालिकाः विशालाख्यविशिष्टजात्युद्भवा वा वैशालिकाः विशाला एव (वा) वैशालिकाः—बृहच्छरीरास्ते एवंभूता महामत्स्या 'उदकस्याभ्यागमे' समुद्रवेला(यामागता)यां सत्यां प्रबलमरुद्वेगोद्भूतोत्तुङ्गकल्लोलमालाऽपनुन्नाः सन्त उदकस्य प्रभावेन नदीमुखमागताः पुनर्वेलाऽपगमे तस्मिंश्चोदके शुष्के वेगेनैवापगते सति बृहच्चाच्छरीरस्य तस्मिन्नेव धुनीमुखे विलग्ना अवसीदन्त आमिषग्रध्नुभिर्ढङ्कैः कङ्कैश्च पक्षिविशेषैरन्यैश्च मांसवसार्थिभिर्मत्स्यबन्धादिभिर्जीवन्त एव विलुप्यमाना महान्तं दुःखसमुद्घातमनुभवन्तः अशरणा 'घातं' विनाशं 'यान्ति' प्राप्नुवन्ति, तुरवधारणे, त्राणाभावाद्विनाशमेव यान्तीति श्लोकद्व-

१ आधाकर्म भुञ्जानः श्रमणः कति कर्मप्रकृतीर्बध्नाति ? गौतम ! अष्टकर्मप्रकृतीर्बध्नाति, शिथिलबन्धनबद्धाः गाढबन्धनबद्धाः करोति चिताः करोति उपचिताः करोति ह्रस्वकालस्थितिका दीर्घकालस्थितिकाः करोति ।

यार्थः ॥२—३॥ एवं दृष्टान्तमुपदर्श्य दार्ष्टान्तिके योजयितुमाह—यथैतेऽनन्तरोक्ता मत्स्यास्तथा 'श्रमणाः' श्राम्यन्तीति श्रमणा 'एके' शाक्यपाशुपतादयः स्वयूथ्या वा, किंभूतास्ते इति दर्शयति—वर्त्तमानमेव सुखम् आधाकर्मोपभोगजनितमेषितुं शीलं येषां ते वर्तमानसुखैषिणः, समुद्रवायसवत् तत्कालावाप्तसुखलवासक्तचेतसोऽनालोचिताधाकर्मोपभोगजनितातिकटुकदुःखौघानुभवा वैशालिकमत्स्या इव 'घातं' विनाशम् 'एष्यन्ति' अनुभविष्यन्ति 'अनन्तशः' अरहट्टघटीन्यायेन भूयो भूयः संसारोदन्वति निमज्जनोन्मज्जनं कुर्वाणा न ते संसाराम्भोधेः पारगामिनो भविष्यन्तीत्यर्थः ॥ ४ ॥ साम्प्रतमपराज्ञाभिमतोपप्रदर्शनायाह—

इणमन्नं तु अन्नाणं, इहमेगेसि आहियं । देवउत्ते अयं लोए, बंभउत्तेति आवरे ॥ ५ ॥
ईसरेण कडे लोए, पहाणाइ तहावरे । जीवाजीवसमाउत्ते, सुहदुक्खसमन्निए ॥ ६ ॥
सयंभुणा कडे लोए, इति वुत्तं महेसिणा । मारेण संथुया माया, तेण लोए असासए ॥ ७ ॥

'इद'मिति वक्ष्यमाणं, तुशब्दः पूर्वेभ्यो विशेषणार्थः, 'अज्ञान'मिति मोहविजृम्भणम्—'इह' अस्मिन् लोके एकेषां न सर्वेषाम् 'आख्यातम्' अभिप्रायः, किं पुनस्तदाख्यातमिति ? तदाह—देवेनोप्तो देवोप्तः, कर्षकेणेव बीजवपनं कृत्वा निष्पादितोऽयं लोक इत्यर्थः, देवैर्वा गुप्तो—रक्षितो देवगुप्तो देवपुत्रो वेत्येवमादिकमज्ञानमिति, तथा ब्रह्मणा उप्तो ब्रह्मोप्तोऽयं लोक इत्यपरे एवं व्यवस्थिताः, तथाहि तेषामयमभ्युपगमः—ब्रह्मा जगत्पितामहः, स चैक एव जगदादावात्मीयेन च प्रजापतयः सृष्टाः तैश्च क्रमेणैतत्सकलं जगदिति ॥ ५ ॥ तथेश्वरेण कृतोऽयं लोकः, एवमेके ईश्वरकारणिका अभिदधति, प्रमाणयन्ति च ते—सर्वमिदं विमत्यधिकरणभावापन्नं तनुभुवनकरणादिकं धर्मिसेनोपादीयते, बुद्धिमत्कारणपूर्वकमिति साध्यो धर्मः, संस्थानविशेषवत्त्वादिति हेतुः, यथा घटादिरिति दृष्टान्तोऽयं, यद्यत्संस्थानविशेषवत्तत्तद्बुद्धिमत्कारणपूर्वकं दृष्टं, यथा देवकुलकूपादीनि, संस्थानविशेषवच्च मकराकरनदीधराधरधराशरीरकरणादिकं विवादगोचरापन्नमिति, तस्माद्बुद्धिमत्कारणपूर्वकं, यश्च समस्तस्यास्य जगतः कर्ता स सामान्यपुरुषो न भवतीत्यसावीश्वर इति, तथा सर्वमिदं तनुभुवनकरणादिकं धर्मिसेनोपादीयते, बुद्धिमत्कारणपूर्वकमिति साध्यो धर्मः, कार्यत्वाद् घटादिवत्, तथा स्थित्वा प्रवृत्तेर्वा, वास्यादिवदिति । तथाऽपरे प्रतिपन्ना यथा—प्रधानादिकृतो लोकः, सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सा च पुरुषार्थं प्रति प्रवर्तते, आदिग्रहणाच्च 'प्रकृतेर्महान् ततोऽहङ्कारः तस्माच्च गणः षोडशकः तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानी'त्यादिकया प्रक्रियया सृष्टिर्भवतीति, यदिवा—आदिग्रहणात्स्वभावादिकं गृह्यते, ततश्चायमर्थः—स्वभावेन कृतो लोकः, कण्टकादितैक्ष्ण्यवत्, तथाऽन्ये नियतिकृतो लोको मयूराङ्गरुहवदित्यादिभिः कारणैः कृतोऽयं लोको 'जीवाजीवसमायुक्तो' जीवैः—उपयोगलक्षणैः तथा अजीवैः—धर्माधर्माकाशपुद्गलादिकैः समन्वितः समुद्रधराधरादिक इति, पुनरपि लोकं विशेषयितुमाह—'सुखम्' आनन्दरूपं 'दुःखम्' असातोदयरूपमिति, ताभ्यां समन्वितो—युक्त इति ॥ ६ ॥ किंच—'सयंभुणा'इत्यादि, स्वयं भवतीति स्वयम्भूः-विष्णुरन्यो वा, स चैक एवादावभूत्, तत्रैकाकी रमते, द्वितीयमिच्छन्, तच्चिन्तानन्तरमेव द्वितीया शक्तिः समुत्पन्ना, तदनन्तरमेव जगत्सृष्टिरभूद् 'इति' एवं महर्षिणा 'उक्तम्' अभिहितम्, एवंवादिनो लोकस्य कर्तारमभ्युपगतवन्तः । अपि च 'तेन' स्वयंभुवा लोकं निष्पाद्यातिभारभयाद्यमाख्यो मारयतीति मारो व्यधायि, तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मारेण 'संस्तुता' कृता प्रसाधिता माया, तया च मायया लोका म्रियन्ते, न च परमार्थतो जीवस्योपयोगलक्षणस्य व्यापत्तिरस्ति, अतो मायैषा यथाऽयं मृतः, तथा चायं लोकः 'अशाश्वतः' अनित्यो विनाशीति गम्यते ॥ ७ ॥ अपि च—

माहणा समणा एगे, आह अंडकडे जगे। असो तत्तमकासी य, अयाणंता मुसं वदे ॥ ८ ॥

'ब्राह्मणा' विगूजातयः 'श्रमणाः' त्रिदण्डिप्रभृतयः 'एके' केचन पौराणिका न सर्वे, एवम् 'आहुः' उक्तवन्तो, वदन्ति च यथा—जगदेतच्चराचरमण्डेन कृतमण्डकृतं अण्डाजातमित्यर्थः, तथाहि ते वदन्ति—यदा न किञ्चिदपि वस्त्वासीत्—पदार्थशून्योऽयं संसारः तदा ब्रह्माऽण्डमसृजत्, तस्माच्च क्रमेण वृद्धात्पश्चाद्विधाभावमुपगतादूर्ध्वाधोविभागोऽभूत्, तन्मध्ये च सर्वाः प्रकृतयोऽभूवन्, एवं पृथिव्यप्तेजोवाय्वाकाशसमुद्रसरित्पर्वतमकराकरनिवेशादिसंस्थितिरभूदिति, तथा चोक्तम्—"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं, प्रसुप्तमिव सर्वतः ॥ १ ॥" एवंभूते चास्मिन् जगति 'असौ' ब्रह्मा, तस्य भावस्तत्त्वं—पदार्थजातं तदण्डादिप्रक्रमेण 'अकार्षीत्' कृतवानिति। ते च ब्राह्मणादयः परमार्थमजानानाः सन्तो मृषा वदन्त एवं वदन्ति—अन्यथा च स्थितं तत्त्वमन्यथा प्रतिपादयन्तीत्यर्थः ॥ ८ ॥ अधुनैतेषां देवोप्तादिजगद्वादिनामुत्तरदानायाह—

सएहिं परियाएहिं, लोयं बूया कडेति य। तत्तं ते ण विजाणंति, ण विणासी कयाइवि ॥ ९ ॥

सूत्रकृ. ८

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं

॥ ४३ ॥

'स्वकैः' स्वकीयैः 'पर्यायैः' अभिप्रायैर्युक्तिविशेषैः अयं लोकः कृत इत्येवम् 'अब्रुवन्' अभिहितवन्तः, तद्यथा—देवोप्तो ब्रह्मोप्तः ईश्वरकृतः प्रधानादिनिष्पादितः स्वयम्भुवा व्यधायि तन्निष्पादितमायया म्रियते तथाऽण्डजश्चायं लोक इत्यादि, स्वकीयाभिरुपपत्तिभिः प्रतिपादयन्ति—यथाऽस्मदुक्तमेव सत्यं नान्यदिति, ते चैवंवादिनो वादिनः सर्वेऽपि 'तत्त्वं' परमार्थं यथावस्थितलोकस्वभावं 'नाभि (न वि)जानन्ति' न सम्यक् विवेचयन्ति, यथाऽयं लोको द्रव्यार्थतया न विनाशीति—निर्मूलतः कदाचन, न चायमादित आरभ्य केनचित् क्रियते, अपि स्वयं लोकोऽभूद्भवति भविष्यति च, तथाहि—यत्तावदुक्तं यथा 'देवोप्तोऽयं लोक' इति, तदसंगतम्, यतो देवोप्तत्वे लोकस्य न किञ्चित्तथाविधं प्रमाणमस्ति, न चाप्रमाणकमुच्यमानं विद्वज्जनमनांसि प्रीणयति, अपि च—किमसौ देव उत्पन्नोऽनुत्पन्नो वा लोकं सृजेत्?, न तावदनुत्पन्नस्तस्य खरविषाणस्येवासत्त्वात्करणाभावः, अथोत्पन्नः सृजेत्तत्किं स्वतोऽन्यतो वा?, यदि स्वत एवोत्पन्नस्तथा सति तल्लोकस्यापि स्वत एवोत्पत्तिः किं नेष्यते?, अथान्यत उत्पन्नः सन् लोककरणाय, सोऽप्यन्योऽन्यतः सोऽप्यन्योऽन्यत इत्येवमनवस्थालता नभोमण्डलव्यापिन्यनिवारितप्रसरा प्रसर्पतीति, अथासौ देवोऽनादित्वान्नोत्पन्न इत्युच्यते, इत्येवं सति लोकोऽप्यनादिरेवास्तु, को दोषः?, किंच—असावनादिः सन्नित्योऽनित्यो वा स्यात्?, यदि नित्यस्तदा तस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधान्न कर्तृत्वम्, अथानित्यस्तथा सति स्वत एवोत्पत्त्यनन्तरं विनाशित्वादात्मनोऽपि न त्राणाय, कुतोऽन्यत्करणं प्रति तस्य व्यापारचिन्तेति?, तथा किममूर्तो मूर्तिमान् वा?, यद्यमूर्तस्तदाऽऽकाशवदकर्तैव, अथ मूर्तिमान् तथा सति प्राकृतपुरुषस्येवोपकरणसव्यपेक्षस्य स्पष्टमेव सर्वजगदकर्तृत्वमिति। देवगुप्तदेवपुत्रपक्षौ तु तिफल्गुत्वादपकर्णयितव्याविति, एतदेव दूषणं ब्रह्मोप्तपक्षेऽपि द्रष्टव्यं, तुल्ययोगक्षेमत्वादिति। तथा यदुक्तम्—'तनुभुवनकरणादिकं विमत्यधिकरणभावापन्नं विशिष्टबुद्धिमत्कारणपूर्वकं, कार्यत्वाद्, घटादिवदिति' तदयुक्तं, तथाविधविशिष्टकारणपूर्वकत्वेन व्याप्यसिद्धेः, कारणपूर्वकत्वमात्रेण तु कार्यं व्याप्तं, कार्यविशेषोपलब्धौ कारणविशेषप्रतिपत्तिर्गृहीतप्रतिबन्धस्यैव भवति, न चात्यन्तादृष्टे तथा प्रतीतिर्भवति, घटे तत्पूर्वकत्वं प्रतिपन्नमिति चेत् युक्तं तत्र घटस्य कार्यविशेषत्वप्रतिपत्तेः, न त्वेवं सरित्समुद्रपर्वतादौ बुद्धिमत्कारणपूर्वकत्वेन संबन्धो गृहीत इति, नन्वत एव घटादिसंस्थानविशेषदर्शनवत्पर्वतादावपि विशिष्टसंस्थानदर्शनाद्बुद्धिमत्कारणपूर्वकत्वस्य साधनं क्रियते, नैतदेवं युक्तं, यतो न हि संस्थानशब्दप्रवृत्तिमात्रेण सर्वस्य बुद्धिमत्कारणपूर्वकत्वावगतिर्भवति, यदि तु स्यात् मृद्विकारत्वाद्वल्मीकस्यापि घटवत्कुम्भकारकृतिः स्यात्, तथा चोक्तम्—"अन्यथा कुम्भकारेण, मृद्विकारस्य कस्यचित्। घटादेः करणात्सिद्धेर्वल्मीकस्यापि तत्कृतिः ॥ १ ॥" इति, तदेवं यस्यैव संस्थानविशेषस्य बुद्धिमत्कारणपूर्वकत्वेन संबन्धो गृहीतस्तद्दर्शनमेव तथाविधकारणानुमापकं भवति न संस्थानमात्रमिति, अपिच—घटादिसंस्थानानां कुम्भकार एव विशिष्टः कर्तोपलक्ष्यते नेश्वरः, यदि पुनरीश्वरः स्यात् किं कुम्भकारेणेति?, नैतदस्ति, तत्रापीश्वर एव सर्वव्यापितया निमित्तकारणत्वेन व्याप्रियते, नन्वेवं दृष्टहानिरदृष्टकल्पना स्यात्, तथा चोक्तम्—"शस्त्रौषधादिसंबन्धाच्चैत्रस्य व्रणरोहणे। असंबद्धस्य किं स्थाणोः, कारणत्वं न कल्प्यते?॥ १ ॥" तदेवं दृष्टकारणपरित्यागेनादृष्टपरिकल्पना न न्याय्येति, अपिच—देवकुलावटादीनां यः कर्ता स सावयवोऽध्याप्यनित्यो दृष्टः, तद्दृष्टान्तसाधितश्चेश्वर एवंभूत एव प्राप्नोति, अन्यथाभूतस्य च दृष्टान्ताभावाद्व्याप्यसिद्धेर्नानुमानमिति, अनयैव दिशा स्थित्याप्रवृत्त्यादिकमपि साधनमसाधनमायोज्यं, तुल्ययोगक्षेमत्वादिति। यदपि चोक्तं 'प्रधानादिकृतोऽयं लोक' इति, तदप्यसंगतं, यतस्तत्प्रधानं किं मूर्तममूर्तं वा?, यद्यमूर्तं न ततो मकराकरादेर्मूर्तस्योद्भवो घटते, न ह्याकाशात्किञ्चिदुत्पद्यमानमालक्ष्यते, मूर्तामूर्तयोः कार्यकारणविरोधादिति, अथ मूर्तं तत्कृतः समुत्पन्नं?, न तावत्स्वतो लोकस्यापि तथोत्पत्ति-

१ समया० उद्देशः ३ जगत्कर्तृत्ववादः

॥ ४३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसङ्गात्, नाप्यन्यतोऽनवस्थाप्तेरिति, यथाऽनुत्पन्नमेव प्रधानाद्यनादिभावेनाऽऽस्ते तद्वल्लोकोऽपि किं नेष्यते ?, अपिच—सत्त्वरजस्तमसां साम्यावस्था प्रधानमित्युच्यते, न चाविकृतात्प्रधानान्महदादेरुत्पत्तिरिष्यते भवद्भिः, न च विकृतं प्रधानव्यपदेशमास्कन्दतीत्यतो न प्रधानान्महदादेरुत्पत्तिरिति, अपिच—अचेतनायाः प्रकृतेः कथं पुरुषार्थं प्रति प्रवृत्तिः ? येनाऽऽत्मनो भोगोपपत्त्या सृष्टिः स्यादिति, प्रकृतेरयं स्वभाव इति चेदेवं तर्हि स्वभाव एव बलीयान् यस्तामपि प्रकृतिं नियमयति, तत एव च लोकोऽप्यस्तु, किमदृष्टप्रधानादिकल्पनयेति ?, अथादिग्रहणात्स्वभावस्यापि कारणत्वं कैश्चिदिष्यत इति चेदस्तु, न हि स्वभावोऽभ्युपगम्यमानो नः क्षतिमातनोति, तथाहि—स्वो भावः स्वभावः—स्वकीयोत्पत्तिः, सा च पदार्थानामिष्यत एवेति। तथा यदुक्तं 'नियतिकृतोऽयं लोक' इति, तत्रापि नियमनं नियतिर्यद्यथाभवनं नियतिरित्युच्यते, सा चाऽऽलोच्यमाना न स्वभावाद्व्यतिरिच्यते, यथाभ्यधायि—'स्वयम्भुवोत्पादितो लोक' इति, तदप्यसुन्दरमेव, यतः स्वयम्भूरिति किमुक्तं भवति ?, किं यदाऽसौ भवति तदा स्वतोऽन्यनिरपेक्ष एव भवति अथानादिभवनात्स्वयम्भूरिति व्यपदिश्यते ?, तद्यदि स्वतश्चभवनाभ्युपगमस्तद्वल्लोकस्यापि भवनं किं नाभ्युपेयते ?, किं स्वयम्भुवा ?, अथानादित्वात्तत्स्वभावानादित्वे नित्यत्वं, नित्यस्य चैकरूपत्वात्कर्तृत्वानुपपत्तिः, तथा वीतरागत्वात्तस्य संसारवैचित्र्यानुपपत्तिः, अथ सरागोऽसौ ततोऽस्मदाद्यव्यतिरेकात्सुतरां विश्वस्याकर्ता, मूर्तामूर्तादिविकल्पाश्च प्राग्वदायोज्या इति। यदपि चात्रामिहितं—'तेन भारः समुत्पादितः, स च लोकं व्यापादयति', तदप्यकर्तृत्वस्याभिहितत्वात्प्रलापमात्रमिति। तथा यदुक्तम् 'अण्डादिक्रमजोऽयं लोक' इति, तदप्यसमीचीनं, यतो यावत्सप्त तदण्डं निसृष्टं ता वधाऽण्डमन्तरेणाभूवन् तथा लोकोऽपि भूत इत्यभ्युपगमे न काचिद्बाधा दृश्यते, तथाऽसौ ब्रह्मा यावदण्डं सृजति तावल्लोकमेव कस्मान्नोत्पादयति ?, किमनया कष्टया युक्त्यसंगतया चाण्डपरिकल्पनया ?, एवमस्त्विति चेत् तथा केचिदभिहितवन्तो यथा ब्राह्मणो मुखाद्ब्राह्मणाः समजायन्त बाहुभ्यां क्षत्रिया ऊरुभ्यां वैश्याः पद्भ्यां शूद्रा इति, एतदप्ययुक्तिसंगतमेव, यतो न मुखादेः कस्यचिदुत्पत्तिर्भवन्त्युपलक्ष्यते, अथापि स्यात्तथा सति वर्णानामभेदः स्याद्, एकस्मादुत्पत्तेः, तथा ब्राह्मणानां कठतैत्तिरीयककलापादिकश्च भेदो न स्याद्, एकस्मान्मुखादुत्पत्तेः, एवं चोपनयनादिसद्भावो न भवेद्, भावे वा स्वस्रादिग्रहणापत्तिः स्याद्, एवमाद्यनेकदोषदुष्टत्वादेवं लोकोत्पत्तिर्नाभ्युपगन्तव्या। ततश्च स्थितमेतत्—त एवंवादिनो लोकस्यानाद्यपर्यवसितस्योर्ध्वाधश्चतुर्दशरज्जुप्रमाणस्य वैशाखस्थानस्थकटिन्यस्तकरयुग्मपुरुषाकृतेरधोमुखमल्लकाकारसप्तपृथिव्यात्मकाधोलोकस्य स्थालाकारासंख्येयद्वीपसमुद्राधारमध्यलोकस्य मल्लकसमुद्गकाकारोर्ध्वलोकस्य धर्माधर्माकाशपुद्गलजीवात्मकस्य द्रव्यार्थतया नित्यस्य पर्यायापेक्षया क्षणक्षयिण उत्पादव्ययध्रौव्यादितद्रव्यसतत्त्वस्यानादिजीवकर्मसंबन्धादितानेकभवप्रपञ्चस्याष्टविधकर्मविप्रमुक्ताऽऽत्मलोकान्तोपलक्षितस्य तत्त्वमजानानाः सन्तो मृषा वदन्तीति ॥ ९ ॥ इदानीमेतेषामेव देवोप्तादिवादिनामज्ञानित्वं प्रसाध्य तत्फलदिदर्शयिषयाऽऽह—

अमणुन्नसमुप्पायं, दुक्खमेव विजाणिया। समुप्पायमजाणंता, कहं नायंति संवरं ? ॥ १० ॥

मनोऽनुकूलं मनोज्ञं—शोभनमनुष्ठानं न मनोज्ञममनोज्ञम्—असदनुष्ठानं तस्मादुत्पादः—प्रादुर्भावो यस्य दुःखस्य तदमनोज्ञसमुत्पादम्, एवकारोऽवधारणे, स चैवं संबन्धनीयः—अमनोज्ञसमुत्पादमेव दुःखमित्येवं 'विजानीयात्' अवगच्छेत्प्राज्ञः, एतदुक्तं भवति—स्वकृतासदनुष्ठानादेव दुःखस्योद्भवो भवति नान्यस्मादिति, एवं व्यवस्थितेऽपि सति अनन्तरोक्तवादिनोऽसदनुष्ठानो-

द्भवस्य दुःखस्य समुत्पादमजानानाः सन्तोऽन्यत ईश्वरादेर्दुःखस्योत्पादमिच्छन्ति, ते चैवमिच्छन्तः 'कथं' केन प्रकारेण दुःखस्य संवरं—दुःखप्रतिघातहेतुं ज्ञास्यन्ति, निदानोच्छेदेन हि निदानिन उच्छेदो भवति, ते च निदानमेव न जानन्ति, तज्ञाजानानाः कथं दुःखोच्छेदाय यतिष्यन्ते ?, यत्नवन्तोऽपि च नैव दुःखोच्छेदनमवाप्स्यन्ति, अपि तु संसार एव जन्मजरामरणेष्टवियोगाद्यनेकदुःखव्राताघाता भूयो भूयोऽरहट्टघटीन्यायेनानन्तमपि कालं संस्थास्यन्ति ॥१०॥ साम्प्रतं प्रकारान्तरेण कृतवादिमतमेवोपन्यस्यन्नाह—

सुद्धे अपावए आया, इहमेगेसिमाहियं। पुणो किडापदोसेणं, सो तत्थ अवरज्झई ॥ ११ ॥
इह संवुडे मुणी जाए, पच्छा होइ अपावए। वियडंबु जहा भुज्जो, नीरयं सरयं तहा ॥ १२ ॥

'इह' अस्मिन् कृतवादिप्रस्तावे त्रैराशिका गोशालकमतानुसारिणो येषामेकविंशतिसूत्राणि पूर्वगतत्रैराशिकसूत्रपरिपाट्या व्यवस्थितानि ते एवं वदन्ति—यथाऽयमात्मा 'शुद्धो' मनुष्यभव एव शुद्धाचारो भूत्वा अपगताशेषमलकलङ्को मोक्षे अपापको भवति—अपगताशेषकर्मा भवतीत्यर्थः, इदम् 'एकेषां' गोशालकमतानुसारिणामाख्यातं, पुनरसावात्मा शुद्धत्वाकर्मकलराशिद्वयावस्थो भूत्वा क्रीडया प्रद्वेषेण वा स तत्र मोक्षस्थ एव 'अपराध्यति' रजसा श्लिष्यते, इदमुक्तं भवति—तस्य हि स्वशासनपूजामुपलभ्यान्यशासनपराभवं चोपलभ्य क्रीडोत्पद्यते—प्रमोदः संजायते, स्वशासनन्यक्कारदर्शनाच्च द्वेषः, ततोऽसौ क्रीडाद्वेषाभ्यामनुगतान्तरात्मा शनैः शनैर्निर्मलपटवदुपभुज्यमानो रजसा मलिनीक्रियते, मलीमसश्च कर्मगौरवाद्भूयः संसारेऽवतरति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यां चावस्थायां सकर्मकत्वात्तृतीयगाथयावस्थो भवति ॥ ११ ॥ किं च—'इह' अस्मिन् मनुष्यभवे प्राप्तः सन् प्रव्रज्यामभ्युपेत्य संवृतात्मा—यमनियमरतो जातः सन् पश्चादपापो भवति—अपगताशेषकर्मकलङ्को भवतीति भावः, ततः स्वशासनं प्रज्वाल्य मुक्त्यवस्थो भवति, पुनरपि स्वशासनपूजादर्शनान्निकारोपलब्धेश्च रागद्वेषोदयात्कलुषितान्तरात्मा विकटाम्बुवद्—उदकवन्नीरजस्कं सद्वातोद्धतरेणुनिवहसंपृक्तं सरजस्कं—मलिनं भूयो यथा भवति तथाऽयमप्यात्माऽनन्तेन कालेन संसारोद्वेगाच्छुद्धाचारावस्थो भूत्वा ततो मोक्षावाप्तौ सत्यामकर्मावस्थो भवति, पुनः शासनपूजानिकारदर्शनाद्रागद्वेषोदयात्सकर्मा भवतीति, एवं त्रैराशिकानां राशित्रयावस्थो भवत्यात्मेत्याख्यातम्, उक्तं च—"दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठम् । मुक्तः स्वयं कृतभवश्च परार्थशूरस्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् ॥ १ ॥" इति ॥ १२ ॥ अधुनैतद्दूषयितुमाह—

एताणुवीति मेधावी, बंभचेरेण ते वसे । पुढो पावाउया सव्वे, अक्खायारो सयं सयं ॥ १३ ॥
सए सए उवट्ठाणे, सिद्धिमेव न अन्नहा । अहो इहेव वसवत्ती, सव्वकामसमप्पिए ॥ १४ ॥

'एतान्' पूर्वोक्तान् वादिनोऽनुचिन्त्य 'मेधावी' प्रज्ञावान् मर्यादाव्यवस्थितो वा एतदवधारयेत् यथा—नैते राशित्रयवादिनो देवोप्तादिलोकवादिनश्च 'ब्रह्मचर्ये' तदुपलक्षिते वा संयमानुष्ठाने 'वसेयुः' अवतिष्ठेरन्निति, तथाहि—तेषामयमभ्युपगमो यथा स्वदर्शनपूजानिकारदर्शनात्कर्मबन्धो भवति, एवं चावश्यं तद्दर्शनस्य पूजया तिरस्कारेण वोभयेन वा भाव्यं, तत्संभवाच्च कर्मोप-

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ ४६ ॥

चयस्तदुपचयाच्च शुद्ध्यभावः शुद्ध्यभावाच्च मोक्षाभावः, न च मुक्तानामपगताशेषकर्मकलङ्कानां कृतकृत्यानामपगताशेषयथावस्थितवस्तुतत्त्वानां समस्तुतिनिन्दानामपगतात्मात्मीयपरिग्रहाणां रागद्वेषानुषङ्गः, तदभावाच्च कुतः पुनः कर्मबन्धः ?, तद्भावाच्च संसारावतरणमित्यर्थः, अतस्ते यद्यपि कथञ्चिद् द्रव्यब्रह्मचर्ये व्यवस्थितास्तथापि सम्यग्ज्ञानाभावान्न ते सम्यगनुष्ठानभाज इति स्थितम् । अपिच—सर्वेऽप्येते प्रावादुकाः 'स्वकं स्वकम्' आत्मीयमात्मीयं दर्शनं स्वदर्शनानुरागादाख्यातारः—शोभनत्वेन प्ररूपयितार इति, न च तत्र विदितवेद्येनास्था विधेयेति ॥१३॥ पुनरन्यथा कृतवादिमतमुपदर्शयितुमाह—ते कृतवादिनः शैवैकदण्डिप्रभृतयः स्वकीये स्वकीये उपतिष्ठन्त्यस्मिन्नित्युपस्थानं—स्वीयमनुष्ठानं दीक्षागुरुचरणशुश्रूषादिकं तस्मिन्नेव 'सिद्धिम्' अशेषसांसारिकप्रपञ्चरहितस्वभावामभिहितवन्तो 'नान्यथा' नान्येन प्रकारेण सिद्धिरवाप्यत इति, तथाहि—शैवा दीक्षात एव मोक्ष इत्येवं व्यवस्थिताः, एकदण्डिकास्तु पञ्चविंशतितत्त्वपरिज्ञानान्मुक्तिरित्यभिहितवन्तः, तथाऽन्येऽपि वेदान्तिका ध्यानाध्ययनसमाधिमार्गानुष्ठानात्सिद्धिमुक्तवन्त इत्येवमन्येऽपि यथास्वं दर्शनान्मोक्षमार्गं प्रतिपादयन्तीति, अशेषद्वन्द्वोपरमलक्षणायाः सिद्धिप्राप्तेरधस्तात्—प्रागपि यावदद्यापि सिद्धिप्राप्तिर्न भवति तावदिहैव जन्मन्यस्मदीयदर्शनोक्तानुष्ठानानुभावादष्टगुणैश्वर्यसद्भावो भवतीति दर्शयति—आत्मवशे वर्तितुं शीलमस्येति वशवर्ती—वशेन्द्रिय इत्युक्तं भवति, न ह्यसौ सांसारिकैः स्वभावैरभिभूयते, सर्वे कामा—अभिलाषा अर्पिताः—संपन्ना यस्य स सर्वकामसमर्पितो, यान् यान् कामान् कामयते ते तेऽस्य सर्वे सिध्यन्तीतियावत्, तथाहि—सिद्धेरारादष्टगुणैश्वर्यलक्षणा 'सिद्धिर्भवति' तद्यथा—अणिमा लघिमा महिमा प्राकाम्यमीशित्वं वशित्वं प्रतिघातित्वं यत्र कामावसायित्वमिति ॥ १४ ॥ तदेवमिहैवास्मदुक्तानुष्ठायिनोऽष्टगुणैश्वर्यलक्षणा सिद्धिर्भवत्यमुत्र चाशेषद्वन्द्वोपरमलक्षणा सिद्धिर्भवतीति दर्शयितुमाह—

सिद्धा य ते अरोगा य, इहमेगेसिमाहियं । सिद्धिमेव पुरो काउं, सासए गढिआ नरा ॥ १५ ॥
असंवुडा अणादीयं, भमिहिंति पुणो पुणो । कप्पकालमुवज्जंति, ठाणा आसुरकिब्बिसिया ॥१६॥

इति बेमि इति प्रथमाध्ययने तृतीयोद्देशकः ॥ गाथा अं. ७५ ॥

ये ह्यस्मदुक्तमनुष्ठानं सम्यगनुतिष्ठन्ति तेऽस्मिन् जन्मन्यष्टगुणैश्वर्यरूपां सिद्धिमासाद्य पुनर्विशिष्टसमाधियोगेन शरीरत्यागं कृत्वा 'सिद्धाश्च' अशेषद्वन्द्वरहिता अरोगा भवन्ति, अरोगग्रहणं चोपलक्षणम्, अनेकशारीरमानसद्वन्द्वैर्न स्पृश्यन्ते, शरीरमनसोरभावादिति, एवम् 'इह' अस्मिन् लोके सिद्धिविचारे वा 'एकेषां' शैवादीनामिदम् 'आख्यातं' भाषितं, ते च शैवादयः 'सिद्धिमेव पुरस्कृत्य' मुक्तिमेवाङ्गीकृत्य 'स्वकीये आश्रये' स्वदर्शनाभ्युपगमे 'ग्रथिताः' संबद्धा अध्युपपन्नास्तदनुकूला युक्तीः प्रतिपादयन्ति, नरा इव नराः—प्राकृतपुरुषाः शास्त्रावबोधविकलाः स्वाभिप्रेतार्थसाधनाय युक्तीः प्रतिपादयन्ति, एवं तेऽपि पण्डितंमन्याः परमार्थमजानानाः स्वाग्रहग्रसाधिका युक्तीरुद्घोषयन्तीति, तथा चोक्तम्—'आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा । पक्षपातरहितस्य तु युक्तिर्यत्र तत्र मतिरेति निवेशम् ॥ १ ॥" ॥ १५ ॥ साम्प्रतमेतेषामनर्थप्रदर्शनपुरःसरं दूषणाभिधित्सयाऽऽह—ते हि पाखण्डिका मोक्षाभिसन्धिना समुत्थिता अपि 'असंवृता' इन्द्रियनोइन्द्रियैरसंयताः, इहाप्यस्माकं लाभ इन्द्रियानुरोधेन सर्वविषयोपभोगाद्, अमुत्र मुक्त्यवाप्तेः, तदेवं मुग्धजनं प्रतारयन्तोऽनादिसंसारकान्तारं 'भ्रमिष्यन्ति' पर्यटिष्यन्ति स्वदुश्चरितो-

१ समया० उद्देशः ३ त्रिराशिकवादनिरासः

॥ ४६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाशकर्मपाशावशापि(पाशि)ताः पौनःपुन्येन नरकादियातनास्थानेषूत्पद्यन्ते, तथाहि—नेन्द्रियैरनियमितैरशेषद्वन्द्वप्रच्युतिलक्षणा सिद्धिरवाप्यते, याऽप्यणिमाद्यष्टगुणलक्षणैहिकी सिद्धिरभिधीयते साऽपि मुग्धजनप्रतारणाय दम्भकल्पैवेति, याऽपि च तेषां बालतपोऽनुष्ठानादिना स्वर्गावाप्तिः साऽप्येवंप्राया भवतीति दर्शयति—'कल्पकालं' प्रभूतकालम् 'उत्पद्यन्ते' संभवन्ति आसुराः—असुरस्थानोत्पन्ना नागकुमारादयः, तत्रापि न प्रधानाः, किं तर्हि ?—'किल्बिषिकाः' अधमाः प्रेष्यभूता अल्पर्धयोऽल्पभोगाः स्वल्पायुःसामर्थ्यद्युपेताश्च भवन्तीति । इति उद्देशकपरिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ १६ ॥ ७५ ॥ इति समयाख्याध्ययनस्य तृतीयोद्देशकः समाप्तः ॥

अथ प्रथमाध्ययने चतुर्थ उद्देशकः प्रारभ्यते ॥

उक्तस्तृतीयोद्देशकः, अधुना चतुर्थः समारभ्यते, अस्य चायमभिसंबन्धः—अनन्तरोद्देशकेऽध्ययनार्थत्वात्स्वपरसमयवक्तव्यतोक्तेहापि सैवाभिधीयते, अथवाऽनन्तरोद्देशके तीर्थिकानां कुत्सिताचारत्वमुक्तमिहापि तदेवाभिधीयते, तदनेन संबन्धेनाऽऽयातस्यास्योद्देशकस्योपक्रमादीनि चत्वार्यनुयोगद्वाराण्यभिधाय सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्—

एते जिया भो ! न सरणं, बाला पंडियमाणिणो । हिच्चा णं पुव्वसंजोगं, सिया किच्चोवएसगा ॥१॥

१ सायात प्र० २ जत्थ बालेऽवसीय प्र० ।

तं च भिक्खू परिन्नाय, वियं तेसु ण मुच्छए । अणुक्कस्से अप्पलीणे, मज्झेण मुणि जावए ॥२॥

अस्य चानन्तरसूत्रेण सहायं संबन्धस्तद्यथा, अनन्तरसूत्रेऽभिहितं—'तीर्थिका असुरस्थानेषु किल्बिषा जायन्त' इति, किमिति ? यत एते जिताः परीषहोपसर्गैः, परम्परसूत्रसंबन्धस्त्वयम्—आदाविदमभिहितं 'बुध्येत त्रोटयेच्च' ततश्चैतदपि बुध्येत—यथैते पञ्चभूतादिवादिनो गोशालकमतानुसारिणश्च जिताः परीषहोपसर्गैः कामक्रोधलोभमानमोहमदाख्यैनारिषड्वर्गेण चेति, एवमन्यैरपि सूत्रैः संबन्ध उत्प्रेक्ष्यः । तदेवं कृतसंबन्धस्यास्य सूत्रस्येदानीं व्याख्या प्रतन्यते—'एते' इति पञ्चभूतैकात्मतज्जीवतच्छरीरादिवादिनः कृतवादिनश्च गोशालकमतानुसारिणस्त्रैराशिकाश्च 'जिता' अभिभूता रागद्वेषादिभिः शब्दादिविषयैश्च तथा प्रबलमहामोहोत्थाज्ञानेन च 'भो' इति विनेयामन्त्रणम् एवं लं गृहाण यथैते तीर्थिका असम्यगुपदेशप्रवृत्तत्वान्न कस्यचिच्छरणं भवितुमर्हन्ति न कञ्चित्रातुं समर्था इत्यर्थः, किमित्येवं ?, यतस्ते बाला इव बालाः, यथा शिशवः सदसद्विवेकवैकल्याद्यत्किञ्चनकारिणो भाषिणश्च, तथैतेऽपि स्वयमज्ञाः सन्तः परानपि मोहयन्ति, एवम्भूता अपि च सन्तः पण्डितमानिन इति, क्वचित्पाठो 'जत्थ बालेऽवसीयइ'त्ति 'यत्र' अज्ञाने 'बालः' अज्ञो लग्नः सन्नवसीदति, तत्र ते व्यवस्थिताः यतस्ते न कस्यचित्त्राणायेति ! यच्च तैर्विरूपमाचरितं तदुत्तरार्द्धेन दर्शयति—'हित्वा'त्यक्त्वा, णमिति वाक्यालङ्कारे, पूर्वसंयोगो—धनधान्यस्वजनादिभिः संयोगस्तं त्यक्त्वा किल वयं निःसङ्गाः प्रव्रजिता इत्युत्थाय पुनः सिता—बद्धाः परिग्रहारम्भेष्वासक्तास्ते गृहस्थाः तेषां कृत्यं-करणीयं पचनपाचनकण्डनपेषणादिको भूतोपमर्दकारी व्यापारस्तस्योपदेशस्तं गच्छन्तीति कृत्योपदेशगाः कृत्योपदेशका वा, यदिवा—'सिया' इति आर्षत्वाद्भूवचनेन व्याख्यायते 'स्युः' भवेयुः कृत्यं-कर्तव्यं सावद्यानुष्ठानं तत्प्रधानाः कृत्या—गृहस्थास्तेषामुपदेशः—

संरम्भसमारम्भारम्भरूपः स विद्यते येषां ते कृत्योपदेशिकाः, प्रव्रजिता अपि सन्तः कर्तव्यैर्गृहस्थेभ्यो न भिद्यन्ते, गृहस्था इव तेऽपि सर्वावस्थाः पञ्चसूनाव्यापारोपेता इत्यर्थः ॥ १ ॥ एवम्भूतेषु च तीर्थिकेषु सत्सु भिक्षुणा यत्कर्तव्यं तदर्शयितुमाह—'तं' पाखण्डिकलोकमसदुपदेशदानाभिरतं 'परिज्ञाय' सम्यगवगम्य यथैते मिथ्यात्वोपहतान्तरात्मानः सद्विवेकशून्या नात्मने हितावालं नान्यस्मै इत्येवं पर्यालोच्य भावभिक्षुः संयतो 'विद्वान्' विदितवेद्यः तेषु 'न मूर्च्छयेत्' न गार्ध्यं विदध्यात्, न तैः सह संपर्कमपि कुर्यादित्यर्थः । किं पुनः कर्तव्यमिति पश्चार्द्धेन दर्शयति—'अनुत्कर्षवानिति' अष्टमदस्थानानामन्यतमेनाप्युत्सेकमकुर्वन् तथा 'अप्रलीनः' असंबद्धस्तीर्थिकेषु गृहस्थेषु पार्श्वस्थादिषु वा संश्लेषमकुर्वन् 'मध्येन' रागद्वेषयोरन्तरालेन संचरन् 'मुनिः' जगत्त्रयवेदी 'यापयेत्' आत्मानं वर्तयेत्, इदमुक्तं भवति—तीर्थिकादिभिः सह सत्यपि कथञ्चित्संबन्धे त्यक्ताहङ्कारेण तथा भावतस्तेष्वप्रलीयमानेनारक्तद्विष्टेन तेषु निन्दामात्मनश्च प्रशंसां परिहरता मुनिनाऽऽत्मा यापयितव्य इति ॥२॥ किमिति ते तीर्थिकास्त्राणाय न भवन्तीति दर्शयितुमाह—

सपरिग्गहा य सारंभा, इहमेगेसिमाहियं । अपरिग्गहा अणारंभा, भिक्खू ताणं परिव्वए ॥ ३ ॥
कडेसु घासमेसेज्जा, विऊ दत्तेसणं चरे । अगिद्धो विप्पमुक्को अ, ओमाणं परिवज्जए ॥ ४ ॥

सह परिग्रहेण धनधान्यद्विपदचतुष्पदादिना वर्तन्ते तद्भावेऽपि शरीरोपकरणादौ मूर्च्छावन्तः सपरिग्रहाः, तथा सहारम्भेण—जीवोपमर्दादिकारिणा व्यापारेण वर्तन्त इति तदभावेऽप्यौद्देशिकादिभोजित्वात्सारम्भाः—तीर्थिकादयः, सपरिग्रहारम्भकत्वेनैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च मोक्षमार्गं प्रसाधयन्तीति दर्शयति—'इह' परलोकचिन्तायाम् एकेषां केषाञ्चिद् 'आख्यातं' भाषितं, यथा किमनया शिरस्तुण्डमुण्डनादिकया क्रियया ?, परं गुरोरनुग्रहात्परमाक्षरावाप्तिस्तद्दीक्षावाप्तिर्वा यदि भवति ततो मोक्षो भवतीत्येवं भाषमाणास्ते न त्राणाय भवन्तीति । ये तु त्रातुं समर्थास्तान्पश्चार्द्धेन दर्शयति—'अपरिग्रहाः' न विद्यते धर्मोपकरणादृते शरीरोपभोगाय स्वल्पोऽपि परिग्रहो येषां ते अपरिग्रहाः, तथा न विद्यते सावद्य आरम्भो येषां तेऽनारम्भाः, ते चैवंभूताः कर्मलघवः स्वयं यानपात्रकल्पाः संसारमहोदधेर्जन्तूत्तारणसमर्थास्तान् 'भिक्षुः'भिक्षणशील उद्देशिकाद्यपरिभोजी 'त्राणं' शरणं परिः—समन्ताद्व्रजेद्—गच्छेदिति ॥ ३ ॥ कथं पुनस्तेनापरिग्रहेणानारम्भेण च वर्तनीयमित्येतदर्शयितुमाह—गृहस्थैः परिग्रहारम्भद्वारेणाऽऽत्मार्थं ये निष्पादिता ओदनादयस्ते कृता उच्यन्ते तेषु कृतेषु—परकृतेषु परनिष्ठितेष्वित्यर्थः, अनेन च षोडशोद्गमदोषपरिहारः सूचितः, तदेवमुद्गमदोषरहितं ग्रस्यत इति ग्रासः—आहारस्तमेवंभूतम् 'अन्वेषयेत्' मृगयेत् याचेयेदित्यर्थः, तथा 'विद्वान्' संयमकरणैकनिपुणः परैराशंसादोषरहितैर्यन्निःश्रेयसबुद्ध्या दत्तमिति, अनेन षोडशोत्पादनदोषाः परिगृहीता द्रष्टव्याः, तदेवम्भूते धात्रीनिमित्तादिदोषरहिते आहारे स भिक्षुः 'एषणां' ग्रहणैषणां 'चरेद्' अनुतिष्ठेदिति, अनेनापि दशैषणादोषाः परिगृहीता इति मन्तव्यं, तथा 'अगृद्धः' अनध्युपपन्नोऽमूर्च्छितस्तस्मिन्नाहारे रागद्वेषविप्रमुक्तः, अनेनापि च ग्रासैषणादोषाः पञ्च निरस्ता अवसेयाः, स एवम्भूतो भिक्षुः परेषामपमानं—परावमदर्शित्वं 'परिवर्जयेत्' परित्यजेत्, न तपोमदं ज्ञानमदं च कुर्यादिति भावः ॥४॥ एवं निर्युक्तिकारेणोद्देशकार्थाधिकाराभिहितं 'किंचुवमा य चउत्थे' इत्येतत्प्रदर्श्येदानीं परवादिमतमेवोद्देशार्थाधिकाराभिहितं दर्शयितुमाह—

सूत्रकृ. १

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं

॥ ४९ ॥

१ समया० उद्देशः ४ लोकवादाः

लोगवायं णिसामिज्जा, इहमेगेसिमाहियं । विपरीयपन्नसंभूयं, अन्नउत्तं तयाणुयं ॥ ५ ॥
अणंते णिइए लोए, सासए ण विणस्सती । अंतवं णिइए लोए, इति धीरोऽतिपासइ ॥ ६ ॥

लोकानां—पाखण्डिनां पौराणिकानां वा वादो लोकवादः—यथास्वमभिप्रायेणान्यथा वाऽभ्युपगमस्तं 'निशामयेत्' शृणुयात् जानीयादित्यर्थः, तदेव दर्शयति—'इह' अस्मिन्संसारे 'एकेषां' केषाञ्चिदिदम् 'आख्यातम्' अभ्युपगमः । तदेव विशिनष्टि विपरीता—परमार्थादन्यथाभूता या प्रज्ञा तया संभूतं—समुत्पन्नं, तत्त्वविपर्यस्तबुद्धिग्रथितमितियावत्, पुनरपि विशेषयति—अन्यैः-अविवेकिभिर्यदुक्तं तदनुगं, यथावस्थितार्थविपरीतानुसारिभिर्यदुक्तं विपरीतार्थाभिधायितया तदनुगच्छतीत्यर्थः ॥ ५ ॥ तमेव विपर्यस्तबुद्धिरचितं लोकवादं दर्शयितुमाह—नास्यान्तोऽस्तीत्यनन्तः, न निरन्वयनाशेन नश्यतीत्युक्तं भवतीति, तथाहि—यो यादृगिह भवे स तादृगेव परभवेऽप्युत्पद्यते, पुरुषः पुरुष एवाङ्गना अङ्गनैवेत्यादि, यदिवा 'अनन्तः' अपरिमितो निरवधिक इतियावत्, तथा 'नित्य' इति अप्रच्युतानुत्पन्नस्थिरैकस्वभावो लोक इति, तथा शश्वद्भवतीति शाश्वतो द्व्यणुकादिकार्यद्रव्यापेक्षयाऽशश्वद्भवन्नपि न कारणद्रव्यं परमाणुत्वं परित्यजतीति तथा न विनश्यतीति दिगात्माकाशाद्यपेक्षया । तथाऽन्तोऽस्यास्तीत्यन्तवान् लोकः, 'सप्तद्वीपा वसुन्धरे'ति परिमाणोक्तेः, स च तादृक्परिमाणो नित्य इत्येवं 'धीरः' कश्चित्साहसिकोऽन्यथाभूतार्थप्रतिपादनात् व्यासादिरिवाति पश्यतीत्यतिपश्यति । तदेवंभूतमनेकभेदभिन्नं लोकवादं निशामयेदिति प्रकृतेन सम्बन्धः । तथा 'अपुत्रस्य न सन्ति लोका, ब्राह्मणा देवाः, श्वानो यक्षा, गोभिर्हतस्य गोघ्नस्य वा न सन्ति लोका'इत्येवमादिकं निर्युक्तिकं लोकवादं निशामयेदिति ॥ ६ ॥ किंच—

॥ ४९ ॥

अपरिमाणं वियाणाई, इहमेगेसिमाहियं । सव्वत्थ सपरिमाणं, इति धीरोऽतिपासई ॥ ७ ॥
जे केइ तसा पाणा, चिट्ठंति अदु थावरा । परियाए अत्थि से अंजू, जेण ते तसथावरा ॥ ८ ॥

न विद्यते 'परिमाणम्' इयत्ता क्षेत्रतः कालतो वा यस्य तदपरिमाणं, तदेवंभूतं विजानाति कश्चित्तीर्थिकतीर्थकृत्, एतदुक्तं भवति—अपरिमितज्ञोऽसावतीन्द्रियद्रष्टा, न पुनः सर्वज्ञ इति, यदिवा—अपरिमितज्ञ इत्यभिप्रेतार्थातीन्द्रियदर्शीति, तथा चोक्तम्—"सर्वं पश्यतु वा मा वा, इष्टमर्थं तु पश्यतु । कीटसंख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते ? ॥१॥" इति, 'इह' अस्मिंल्लोके 'एकेषां' सर्वज्ञापह्नववादिनाम् 'इदमाख्यातम्' अयमभ्युपगमः, तथा सर्वक्षेत्रमाश्रित्य कालं वा परिच्छेद्यं कर्मतापन्नमाश्रित्य सह परिमाणेन सपरिमाणं—सपरिच्छेदं धीः—बुद्धिस्तया राजत इति धीर इत्येवमसौ अतीव पश्यतीत्यतिपश्यति, तथाहि ते ब्रुवते—दिव्यं वर्षसहस्रमसौ ब्रह्मा स्वपिति, तस्मामवस्थायां न पश्यत्यसौ, तावन्मात्रं च कालं जागर्ति, तत्र च पश्यत्यसाविति, तदेवम्भूतो बहुधा लोकवादः प्रवृत्तः ॥ ७ ॥ अस्य चोत्तरदानायाह—ये केचन त्रसन्तीति त्रसा—द्वीन्द्रियादयः 'प्राणाः' प्राणिनः सत्त्वाः 'तिष्ठन्ति' त्रसत्वमनुभवन्ति, अथवा 'स्थावराः' स्थावरनामकर्मोदयात् (थाः) पृथिव्यादयस्ते, यद्ययं लोकवादः सत्यो भवेत् यथा यो यादृगस्मिन् जन्मनि मनुष्यादिः सोऽन्यस्मिन्नपि जन्मनि तादृगेव भवतीति, ततः स्थावराणां त्रसानां च तादृशत्वे सति दानाध्ययनजपनियमतपोऽनुष्ठानादिकाः क्रियाः सर्वा अप्यनर्थिका आपद्येरन् । लोकेनापि चान्यथात्वमुक्तं, तद्यथा—"स वै एष

१ कथित्तु पक्षे प्रकृतिभावमपीच्छतीति श्रीहेमचन्द्रसूरयोऽत्र प्रकृतिभावसद्भावान्नापश्रोगता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृगालो जायते यः सपुरीषो दह्यते" तस्मात् स्थावरजङ्गमानां स्वकृतकर्मवशात् परस्परसंक्रमणाद्यनिवारितमिति । तथा 'अनन्तो नित्यश्च लोकः' इति यदभिहितं, तत्रेदमभिधीयते—यदि स्वजात्यनुच्छेदेनास्य नित्यताऽभिधीयते ततः परिणामानित्यत्वमस्मदभीष्टमेवाभ्युपगतं न काचित्क्षतिः, अथाप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वेन नित्यत्वमभ्युपगम्यते तन्न घटते, तस्याध्यक्षबाधितत्वात्, न हि क्षणभाविपर्यायानालिङ्गितं किञ्चिद्वस्तु प्रत्यक्षेणावसीयते, निष्पर्यायस्य च खपुष्पस्येवासद्रूपतैव स्यादिति । तथा शश्वद्भवनं कार्यद्रव्यस्याऽऽकाशात्मादेश्चाविनाशित्वं यदुच्यते द्रव्यविशेषापेक्षया तदप्यसदेव, यतः सर्वमेव वस्तूत्पादव्ययध्रौव्ययुक्तत्वेन निर्विभागमेव प्रवर्तते, अन्यथा वियदरविन्दस्येव वस्तुत्वमेव हीयेतेति । तथा यदुक्तम्—'अन्तवाँल्लोकः समद्वीपावच्छिन्नत्वा'दित्येतच्चिरन्तनाः सुहृदः प्रत्येष्यन्ति, न प्रेक्षापूर्वकारिणः, तद्ग्राहकप्रमाणाभावादिति । तथा यदप्युक्तम्—'अपुत्रस्य न सन्ति लोका'इत्यादीत्येतदपि बालभाषितं, तथाहि—किं पुत्रसत्तामात्रेणैव विशिष्टलोकावाप्तिरुत तत्कृतविशिष्टानुष्ठानात् ?, तद्यदि सत्तामात्रेण तत इन्द्रमहैकाष्टुकगर्दभराहादिभिर्व्याप्ता लोका भवेयुः, तेषां पुत्रबहुलसंभवात्, अथानुष्ठानमाश्रीयते, तत्र पुत्रद्वये सत्येकेन शोभनमनुष्ठितमपरेणाशोभनमिति तत्र का वार्त्ता ?, स्वकृतानुष्ठानं च निष्फलमापद्येतेत्येवं यत्किञ्चिदेतदिति । तथा 'श्वानो यक्षा' इत्यादि युक्तिविरोधित्वादनाकर्णनीयमिति । यदपि चोक्तम्—'अपरिमाणं विजानाती'ति, तदपि न घटामियर्ति, यतः सत्यप्यपरिमितज्ञत्वे यद्यसौ सर्वज्ञो न भवेत् ततो हेयोपादेयोपदेशदानविकलत्वान्नैवासौ प्रेक्षापूर्वकारिभिरादृियेत, तथाहि तस्य कीटसंख्यापरिज्ञानमप्युपयोग्येव, यतो यथैतद्विषयेऽस्यापरिज्ञानमेवमन्यत्रापि(पीत्या)शङ्कया हेयोपादेये प्रेक्षापूर्वकारिणः प्रवृत्तिर्न

१ अन्तरं-हृदयं, विचारशून्या इति तात्पर्यम् । २ क्रक्कर इति त्रिकाण्डशेषः ।

स्यात्, तस्मात्सर्वज्ञत्वमेष्टव्यं । तथा यदुक्तं—'स्वापबोधविभागेन परिमितं जानाती'त्येतदपि सर्वजनसमानत्वे यत्किञ्चिदिति । यदपि च कैश्चिदुच्यते—यथा 'ब्रह्मणः स्वप्नावबोधयोर्लोकस्य प्रलयोदयौ भवत' इति, तदप्ययुक्तिसंगतमेव, प्रतिपादितं चैतत् प्रागेवेति न प्रतन्यते । न चात्यन्तं सर्वजगत उत्पादविनाशौ विद्येते 'न कदाचिदनीदृशं जगदि'ति वचनात् । तदेवमनन्तादिकं लोकवादं परिहृत्य यथावस्थितवस्तुस्वभावाविर्भावनं पश्चार्द्धेन दर्शयति—ये केचन त्रसाः स्थावरा वा तिष्ठन्त्यस्मिन् संसारे तेषां स्वकर्मपरिणत्याऽस्त्यसौ पर्यायः 'अंजू' इति प्रगुणोऽभिधायी तेन पर्यायेण स्वकर्मपरिणतिजनितेन ते त्रसाः सन्तः स्थावराः संपद्यन्ते स्थावरा अपि च त्रसत्वमश्नुवते तथा त्रसास्त्रसत्वमेव स्थावराः स्थावरत्वमेवाऽऽप्नुवन्ति, न पुनर्यो यादृगिह स तादृगेवामुत्रापि भवतीत्ययं नियम इति ॥ ८ ॥ अस्मिन्नेवार्थे दृष्टान्ताभिधित्सयाऽऽह—

उरालं जगतो जोगं, विवज्जासं पलिंति य । सव्वे अक्कंतदुक्खा य, अओ सव्वे अहिंसिता ॥ ९ ॥
एयं खु नाणिणो सारं, जन्न हिंसइ किंचण । अहिंसासमयं चेव, एतावन्तं वियाणिया ॥ १० ॥

'उराल'मिति स्थूलमुदारं 'जगत' औदारिकजन्तुग्रामस्य 'योगं' व्यापारं चेष्टामवस्थाविशेषमित्यर्थः, औदारिकशरीरिणो हि जन्तवः प्राक्तनादवस्थाविशेषाद्गर्भकललार्बुदरूपाद् 'विपर्यासभूतं' बालकौमारयौवनादिकमुदारं योगं परि—समन्तादयन्ते-गच्छन्ति पर्ययन्ते, एतदुक्तं भवति—औदारिकशरीरिणो हि मनुष्यादेर्बालकौमारादिकः कालादिकृतोऽवस्थाविशेषोऽन्यथा चान्यथा च भवन् प्रत्यक्षेणैव लक्ष्यते, न पुनर्यादृक् प्राक् तादृगेव सर्वदेति, एवं सर्वेषां स्थावरजङ्गमानामन्यथाऽन्यथा च भवनं द्रष्टव्यमिति ।

अपि च—'सर्वे' जन्तव आक्रान्ता-अभिभूता दुःखेन-शारीरमानसेनासातोदयेन दुःखाक्रान्ताः सन्तोऽन्यथाऽवस्थाभाजो लभ्यन्ते, अतः सर्वेऽपि ते यथाऽहिंसिता भवन्ति तथा विधेयं । यदिवा—सर्वेऽपि जन्तवः 'अकान्तम्' अनभिमतं दुःखं येषां तेऽकान्तदुःखाः चशब्दात् प्रियसुखाश्च, अतस्तान् सर्वान् न हिंस्यादित्यनेन चान्यथालब्धदृष्टान्तो दर्शितो भवत्युपदेशश्च दत्त इति ॥ ९ ॥ किमर्थं सत्त्वान् न हिंस्यादित्याह—सुरवधारणे, एतदेव 'ज्ञानिनो' विशिष्टविवेकवतः 'सारं' न्याय्यं यत् कञ्चन प्राणिजातं स्थावरं जङ्गमं वा 'न हिनस्ति' न परितापयति, उपलक्षणं चैतत्, तेन न मृषा ब्रूयान्नादत्तं गृह्णीयान्नाब्रह्माऽऽसेवेत न परिग्रहं परिगृह्णीयान्न नक्तं भुञ्जीतेत्येतज्ज्ञानिनः सारं यन्न कर्माश्रवेषु वर्तत इति । अपि च—अहिंसया समता अहिंसासमता तां चैतावद्विजानीयात्, यथा मम मरणं दुःखं चाप्रियमेवमन्यस्यापि प्राणिलोकस्येति, एवकारोऽवधारणे, इत्येवं साधुना ज्ञानवता प्राणिनां परितापनाऽपद्रावणादि न विधेयमेवेति ॥ १० ॥ एवं मूलगुणानभिधायेदानीमुत्तरगुणानभिधातुकाम आह—

वुसिए य विगयगेही, आयाणं सं(सम्म)रक्खए[1] । चरिआसणसेज्जासु, भत्तपाणे अ अंतसो ॥ ११ ॥
एतेहिं तिहिं ठाणेहिं, संजए सततं मुणी । उक्कसं जलणं णूमं, मज्झत्थं च विगिंचए ॥ १२ ॥
समिए उ सया साहु, पंचसंवरसंवुडे । सिएहि असिए भिक्खू, आमोक्खाय परिव्वएज्जासि॥१३॥त्तिबेमि॥

१ विगयगिद्धी य प्र० २ आयाणियं सरक्खए । चू०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विविधम्—अनेकप्रकारमुषितः—स्थितो दशविधचक्रवालसामाचार्यां व्युषितः, तथा विगता—अपगता आहारादौ गृद्धिर्यस्यासौ विगतगृद्धिः साधुः, एवंभूतश्चादीयते स्वीक्रियते प्राप्यते वा मोक्षो येन तदादानीयं—ज्ञानदर्शनचारित्रत्रयं तत्सम्यग् रक्षयेद्—अनुपालयेत्, यथा यथा तस्य वृद्धिर्भवति तथा तथा कुर्यादित्यर्थः। कथं पुनश्चारित्रादि पालितं भवतीति दर्शयति—'चर्यासन-शय्यासु' चरणं चर्या—गमनं, साधुना हि सति प्रयोजने युगमात्रदृष्टिना गन्तव्यं, तथा सुप्रत्युपेक्षिते सुप्रमार्जिते चासने उपवेष्टव्यं, तथा शय्यायां—वसतौ संस्तारके वा सुप्रत्युपेक्षितप्रमार्जिते स्थानादि विधेयं, तथा भक्ते पाने चान्तशः सम्यगुपयोगवता भाव्यम्, इदमुक्तं भवति—ईर्याभाषैषणाऽऽदाननिक्षेपप्रतिष्ठापनासमितिषूपयुक्तेनान्तशो भक्तपानं यावदुद्गमादिदोषरहितमन्वेषणीयमिति ॥ ११ ॥ पुनरपि चारित्रशुद्ध्यर्थं गुणानधिकृत्याह—एतानि—अनन्तरोक्तानि त्रीणि स्थानानि, तद्यथा—ईर्यासमितिरित्येकं स्थानम्, आसनं शय्येत्यनेनादानभाण्डमात्रनिक्षेपणासमितिरित्येतच्च द्वितीयं स्थानं, भक्तपानमित्यनेनैषणासमितिरुपात्ता, भक्तपानार्थं च प्रविष्टस्य भाषणसंभवाद्भाषासमितिराक्षिप्ता, सति चाहारे उच्चारप्रश्रवणादीनां सद्भावात्प्रतिष्ठापनासमितिरप्यायातेत्येतच्च तृतीयं स्थानमिति, अत एतेषु त्रिषु स्थानेषु सम्यग्यतः संयत आमोक्षाय परिव्रजेदित्युत्तरश्लोकान्ते क्रियेति। तथा 'सततम्' अनवरतम् 'मुनिः' सम्यक् यथावस्थितजगत्त्रयवेत्ता उत्कृष्यते आत्मा दर्पाध्मातो विधीयतेऽनेनेत्युत्कर्षो—मानः, तथाऽऽत्मानं चारित्रं वा ज्वलयति—दहतीति ज्वलनः—क्रोधः, तथा 'णूम'मिति गहनं मायेत्यर्थः, तस्या अलब्धमध्यत्वादेवमभिधीयते, तथा आसंसारमसुमतां मध्ये—अन्तर्भवतीति मध्यस्थो—लोभः, चशब्दः समुच्चये, एतान् मानादींश्चतुरोऽपि कषायाँस्तद्विपाकाभिज्ञो मुनिः सदा 'विगिंचए'त्ति विवेचयेद्—आत्मनः पृथक्कुर्यादित्यर्थः। ननु चान्यत्रागमे क्रोध आदावुपन्यस्यते, तथा क्षपकश्रेण्यामारूढो भगवान् क्रोधादीनेव संज्वलनान् क्षपयति तत् किमर्थमागमप्रसिद्धं क्रममुल्लङ्घ्यादौ मानस्योपन्यास इति?, अत्रोच्यते, माने सत्यवश्यंभावी क्रोधः, क्रोधे तु मानः स्याद्वा न वेत्यस्यार्थस्य प्रदर्शनायान्यथाक्रमकरणमिति ॥१२॥ तदेवं मूलगुणानुत्तरगुणाँश्चोपदर्श्याधुना सर्वोपसंहारार्थमाह—तुरवधारणे, पञ्चभिः समितिभिः समित एव साधुः, तथा प्राणातिपातादिपञ्चमहाव्रतोपेतत्वात्पञ्चप्रकारसंवरसंवृतः, तथा मनोवाक्कायगुप्तिगुप्तः, तथा गृहपाशादिषु सिता—बद्धाः अवसक्ता गृहस्थात्तेष्वसितः—अनवबद्धस्तेषु मूर्च्छामकुर्वाणः पङ्क्तावारपङ्क्तिजवत्तत्कर्मणाऽदिह्यमानो भिक्षुः—भिक्षणशीलो भावभिक्षुः 'आमोक्षाय' अशेषकर्मापगमलक्षणमोक्षार्थं परि—समन्तात् व्रजेः संयमानुष्ठानरतो भवेरस्मिति विनेयस्योपदेशः। इति अध्ययनसमाप्तौ, ब्रवीमीति गणधर एवमाह, यथा तीर्थकृतोक्तं तथैवाहं ब्रवीमि, न स्वमनीषिकयेति। गतोऽनुगमः, साम्प्रतं नयास्तेषामयमुपसंहारः "सव्वेसिंपि नयाणं बहुविधवत्तव्वयं निसामित्ता। तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ १ ॥" ॥ १३ ॥ ८८ ॥ इति सूत्रकृताङ्गे समयाख्यं प्रथमाध्ययनं समाप्तम् ॥

१ प्रकर्षप्राप्तः २ सर्वेषामपि नयानां बहुविधवक्तव्यतां निशम्य। तत्सर्वनयविशुद्धं यच्चरणगुण (क्रियाज्ञान) स्थितः साधुः ॥ १ ॥

॥ अथ द्वितीयाध्ययनस्य प्रथमोद्देशकः प्रारभ्यते ॥

उक्तं समयाख्यं प्रथममध्ययनं, साम्प्रतं वैतालीयाख्यं द्वितीयमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने स्वसमयगुणाः परसमयदोषाश्च प्रतिपादिताः, तांश्च ज्ञात्वा यथा कर्म विदार्यते तथा बोधो विधेय इत्यनेन संबन्धेनाऽऽयातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भणनीयानि, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारः प्रागेव निर्युक्तिकारेणाभाणि—'णाऊण बुज्झणा चेवे'त्यनेन गाथाद्वितीयपादेनेति, उद्देशार्थाधिकारं तु स्वत एव निर्युक्तिकार उत्तरत्र वक्ष्यति, नामनिष्पन्नं तु निक्षेपमधिकृत्य निर्युक्तिकृदाह—

वेयालियंमि वेयालगो य वेयालणं वियालणियं। निक्खिवि चउक्कगाइं वियालओ एत्थ पुण जीवो ॥ ३६ ॥

तत्र प्राकृतशैल्या वेयालियमिति 'ट विदारणे'इत्यस्य धातोर्विपूर्वस्य छान्दसत्वात् भावे ण्वुल्प्रत्ययान्तस्य विदारकमिति क्रियावाचकमिदमध्ययनाभिधानमिति, सर्वत्र च क्रियायामेतत्त्रयं सन्निहितं, तद्यथा—कर्ता करणं कर्म चेति, अतस्तद्दर्शयति—विदारको विदारणं विदारणीयं च, तेषां त्रयाणामपि नामस्थापनाद्रव्यभावभेदाच्चतुर्द्धा निक्षेपेण त्रीणि चतुष्कानि द्रष्टव्यानि, अत्र च नामस्थापने क्षुण्णे, द्रव्यविदारको यो हि द्रव्यं काष्ठादि विदारयति, भावविदारकस्तु कर्मणो विदार्यत्वात् नोआगमतो जीवविशेषः, साधुरिति ॥ ३६ ॥ करणमधिकृत्याऽऽह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वं च परसुमादी दंसणणाणतवसंजमा भावे । दव्वं च दारुगादी भावे कम्मं वियालणियं ॥ ३७ ॥

नामस्थापने क्षुण्णे द्रव्यविदारणं परश्वादि, भावविदारणं तु दर्शनज्ञानतपःसंयमाः, तेषामेव कर्मविदारणे सामर्थ्यमित्युक्तं भवति, विदारणीयं तु नामस्थापने अनादृत्य द्रव्यं दार्वादि, भावे पुनरष्टप्रकारं कर्मेति ॥ ३७ ॥ साम्प्रतं 'वेतालिय'मित्येतस्य निरुक्तं दर्शयितुमाह—

वेयालियं इह देसियंति वेयालियं तओ होइ । वेयालियं तहा वित्तमत्थि तेणेव य णिबद्धं ॥ ३८ ॥

इहाध्ययनेऽनेकधा कर्मणां विदारणमभिहितमितिकृत्वैतदध्ययनं निरुक्तिवशाद्विदारकं ततो भवति, यदिवा—वैतालीयमित्यध्ययननाम, अत्रापि प्रवृत्तौ निमित्तं—वैतालीयं छन्दोविशेषरूपं वृत्तमस्ति, तेनैव च वृत्तेन निबद्धमित्यध्ययनमपि वैतालीयं, तस्य चेदं लक्षणम्—वैतालीयं लगनैधनाः षडयुक्पादेऽष्टौ समे च लः । न समोऽत्र परेण युज्यते नेतः षट् च निरन्तरा युजोः ॥ १ ॥" ॥ ३८ ॥ साम्प्रतमध्ययनस्योपोद्घातं दर्शयितुमाह—

कामं तु सामयमिणं कहियं अट्ठावयंमि उसभेणं । अट्ठाणउतिसुयाणं सोऊणं तेवि पव्वइया ॥ ३९ ॥

कामशब्दोऽयमभ्युपगमे, तत्र यद्यपि सर्वोऽप्यागमः सामायिकः तदन्तर्गतमध्ययनमपि तथापि भगवताऽऽदितीर्थाधिपेनोत्पन्न-

१ ओजे षण्मात्राः लगन्ता युज्यष्टौ न युजि षट् चत्तलं ला न समः परेण गो वैतालीयम् (छन्दोऽनुशासने अ० ३–५३) तद्वैतालीयं छन्दः यत्र रगणलघुगुरुप्रान्ताः प्रथमतृतीययोः षट् द्वितीयचतुर्थयोरष्टौ मात्राः, अत्र समसंख्यको लघुर्न परेण गुरुः कार्यः, इतश्च विषमपादयोः षट् ला निरन्तरा नेति वैतालीयार्थः ।

दिव्यज्ञानेनाष्टापदोपरिव्यवस्थितेन भरताधिपभरतेन चक्रवर्त्तिनोपहूतैरष्टनवतिभिः पुत्रैः पृष्टेन यथा भरतोऽस्मानाज्ञां कारयत्यतः किमस्माभिर्विधेयमित्यतस्तेषामङ्गारदाहकदृष्टान्तं प्रदर्श्य न कथञ्चिदन्तोभोगेच्छा निवर्तत इत्यर्थगर्भमिदमध्ययनं 'कथितं' प्रतिपादितं, तेऽप्येतच्छ्रुत्वा संसारासारतामवगम्य विषयाणां च कटुविपाकतां निःसारतां च ज्ञात्वा मत्तकरिकर्णवच्चपलमायुर्गिरिनदीवेगसमं यौवनमित्यतो भगवदाज्ञैव श्रेयस्करीति तदन्तिके सर्वे प्रव्रज्यां गृहीतवन्त इति । अत्र 'उद्देसे निद्देसे य' इत्यादिः सर्वोऽप्युपोद्घातो भणनीयः ॥ ३९ ॥ साम्प्रतं उद्देशार्थाधिकारं प्रागुल्लिखितं दर्शयितुमाह—

पढमे संबोहो अनिच्चया य बीयंमि माणवज्जणया । अहिगारो पुण भणिओ तहा तहा बहुविहो तत्थ ॥ ४० ॥
उद्देसंमि य तइए अन्नाणचियस्स अवचओ भणिओ । वज्जेयव्वो य सया सुहप्पमाओ जइजणेणं ॥ ४१ ॥

तत्र प्रथमोद्देशके हिताहितप्राप्तिपरिहारलक्षणो बोधो विधेयोऽनित्यता चेत्ययमर्थाधिकारः, द्वितीयोद्देशके मानो वर्जनीय इत्ययमर्थाधिकारः, पुनश्च तथा तथाऽनेकप्रकारो बहुविधं शब्दादावर्थेऽनित्यतादिप्रतिपादकोऽर्थाधिकारो भणित इति, तृतीयोद्देशके अज्ञानोपचितस्य कर्मणोऽपचयरूपोऽर्थाधिकारो भणित इति यतिजनेन च सुखप्रमादो वर्जनीयः सदेति ॥४१॥ साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

संबुज्झह किं न बुज्झह?, संबोही खलु पेच्च दुल्लहा । णो हूवणमंति राइओ,नो सुलभं पुणरावि जीवियं ॥१॥

१ यद्यपि विंशत्याद्येति वचनात्स्यादत्र स्त्रीत्वमेकवचनान्वितं तथापि प्रतिपुत्रं प्रश्नोत्तरपार्थक्यविवक्षयाऽत्र बहुत्वं । चैत्रमैत्राभ्यामेकविंशती दत्तमितिवत् ।

डहरा बुड्ढा य पासह गब्भत्था वि चयंति माणवा । सेणे जह वट्टयं हरे एवं आउखयंमि तुट्टई ॥२॥

तत्र भगवानादितीर्थकरो भरततिरस्कारागतसंवेगान् स्वपुत्रानुद्दिश्येदमाह, यदिवा—सुरासुरनरोरगतिरश्चः समुद्दिश्य प्रोवाच यथा—'संबुध्यध्वं' यूयं ज्ञानदर्शनचारित्रलक्षणे धर्मे बोधं कुरुत, यतः पुनरेवंभूतोऽवसरो दुरापः, तथाहि—मानुषं जन्म तत्रापि कर्मभूमिः पुनरार्यदेशः सुकुलोत्पत्तिः सर्वेन्द्रियपटुत्वं श्रवणश्रद्धादिप्राप्तौ सत्यां स्वसंवित्त्यवष्टम्भेनाह—'किं न बुध्यध्व' मिति, अवश्यमेवंविधसामग्र्यवाप्तौ सत्यां सकर्णेन तुच्छान् भोगान् परित्यज्य सद्धर्मे बोधो विधेय इति भावः, तथाहि—"निर्वाणादिसुखप्रदे नरभवे जैनेन्द्रधर्मान्विते, लब्धे खल्वमचारु कामजसुखं नो सेवितुं युज्यते । वैडूर्यादिमहोपलौघनिचिते प्राप्तेऽपि रत्नाकरे, लातुं खल्वमदीप्तिकाचशकलं किं साम्प्रतं साम्प्रतम् ?॥१॥" अकृतधर्मचरणानां तु प्राणिनां 'संबोधिः' सम्यग्दर्शनज्ञानचारित्रावाप्तिलक्षणा 'प्रेत्य' परलोकगतानां खलुशब्दस्यावधारणार्थत्वात् सुदुर्लभैव, तथाहि—विषयप्रमादवशात् सकृत् धर्माचरणाद् अष्टस्वानन्तमपि कालं संसारे पर्यटनमभिहितमिति । किंच—हुरित्यवधारणे, नैवातिक्रान्ता रात्रयः 'उपनमन्ति' पुनर्ढौकन्ते, न ह्यतिक्रान्तो यौवनादिकालः पुनरावर्त्तत इतिभावः, तथाहि—"भवकोटीभिरसुलभं मानुष्यं प्राप्य कः प्रमादो मे? । न च गतमायुर्भूयः प्रत्येत्यपि देवराजस्य ॥ १ ॥" 'नो' नैव संसारे 'सुलभं' सुप्रापं संयमप्रधानं जीवितं, यदिवा—जीवितम्—आयुस्त्रुटितं सत् तदेव संधातुं न शक्यत इति वृत्तार्थः । संबोधश्च प्रसुप्तस्य मतो भवति, स्वापश्च निद्रोदये, निद्रासंबोधयोश्च नामादिश्चतुर्द्धा निक्षेपः, तत्र नामस्थापने अनादृत्य द्रव्यभावनिक्षेपं प्रतिपादयितुं निर्युक्तिकृदाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वं निद्दाभेओ दंसणनाणतवसंजमा भावे। अहिगारो पुण भणिओ नाणे तवदंसणचरित्ते ॥ ४२ ॥

इह च गाथायां द्रव्यनिद्राभावसंबोधश्च दर्शितः, तत्राधन्तग्रहणेन भावनिद्राद्रव्यबोधयोस्तदन्तर्वर्तिनोर्ग्रहणं द्रष्टव्यं, तत्र द्रव्यनिद्रा निद्राभेदो, वेदनमनुभवः दर्शनावरणीयविशेषोदय इतियावत्, भावनिद्रा तु ज्ञानदर्शनचारित्रशून्यता। तत्र द्रव्यबोधो द्रव्यनिद्रया सुप्तस्य बोधनं, भावे—भावविषये पुनर्बोधो दर्शनज्ञानचारित्रतपःसंयमा द्रष्टव्याः। इह च भावप्रबोधनाधिकारः, स च गाथापश्चार्द्धेन सुगमेन प्रदर्शित इति। अत्र च निद्राबोधयोर्द्रव्यभावभेदाच्चत्वारो भङ्गा योजनीया इति ॥ ४२ ॥ १ ॥

भगवानेव सर्वसंसारिणां सोपक्रमत्वादनियतमायुरुपदर्शयन्नाह—'डहराः' बाला एव केचन जीवितं त्यजन्ति, तथा वृद्धाश्च गर्भस्था अपि, एतत्पश्यत यूयं, के ते ?—'माणवा' मनुष्याः, तेषामेवोपदेशदानार्हत्वात् मानवग्रहणं, बहुपायत्वादायुषः सर्वास्वप्यवस्थासु प्राणी प्राणांस्त्यजतीत्युक्तं भवति, तथाहि—त्रिपल्योपमायुष्कस्यापि पर्याप्तनन्तरमन्तर्मुहूर्तेनैव कस्यचिन्मृत्युरुपतिष्ठतीति, अपि च—"गर्भस्थं जायमान" मित्यादि। अत्रैव दृष्टान्तमाह—यथा 'इयेनः' पक्षिविशेषो 'वर्त्तकं' तित्तिरजातीयं 'हरेत्' व्यापादयेद्, एवं प्राणिनः प्राणान् मृत्युरपहरेत्, उपक्रमकारणमायुष्कमुपक्रामेत्, तदभावे वा आयुष्यक्षये 'त्रुट्यति' व्यवच्छिद्यते जीवानां जीवितमिति शेषः ॥ २ ॥ तथा—

मायाहिं पियाहिं लुप्पइ, नो सुलहा सुगई य पेच्चओ। एयाइं भयाइं पेहिया, आरम्भा विरमेज्ज सुव्वए ॥३॥
जमिणं जगती पुढो जगा, कम्मेहिं लुप्पंति पाणिणो। सयमेव कडेहिं गाहइ, णो तस्स मुच्चेज्ज पुट्ठयं ॥ ४ ॥

सूत्र. १०

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं

॥ ५५ ॥

कश्चिन्मातापितृभ्यां मोहेन स्वजनस्नेहेन च न धर्मं प्रत्युद्यमं विधत्ते स च तैरेव मातापित्रादिभिः 'लुप्यते' संसारे भ्राम्यते, तथाहि—"विहितमलोहमहो महन्मातापितृपुत्रदारबन्धुसङ्गम्। स्नेहमयमसुमतामदः किं बन्धनं मुद्गलं खलेन धात्रा? ॥ १ ॥" तस्य च स्नेहाकुलितमानसस्य सदसद्विवेकविकलस्य स्वजनपोषणार्थं यत्किञ्चनकारिण इहैव सद्भिर्निन्दितस्य सुगतिरपि 'प्रेत्य' जन्मान्तरे नो सुलभा, अपि तु मातापितृव्यामोहितमनसस्तदर्थं क्लिश्यतो विषयसुखेप्सोश्च दुर्गतिरेव भवतीत्युक्तं भवति, तदेवमेतानि 'भयानि' भयकारणानि दुर्गतिगमनादीनि 'पेहिय'त्ति प्रेक्ष्य 'आरम्भात्' सावद्यानुष्ठानरूपाद्विरमेत् 'सुव्रतः' शोभनव्रतः सन्, सुस्थितो वेति पाठान्तरम् ॥३॥ अनिवृत्तस्य दोषमाह—'यद्' यस्मादनिवृत्तानामिदं भवति, किं तत् ?—'जगति' पृथिव्यां 'पुढो'त्ति पृथग्भूता—व्यवस्थिताः सावद्यानुष्ठानोपचितैः 'कर्मभिः' 'विलुप्यन्ते' नरकादिषु यातनास्थानेषु आम्यन्ते, स्वयमेव च कृतैः कर्मभिः, न ईश्वराद्यापादितैः, गाहते नरकादिस्थानानि यानि तानि वा कर्माणि दुःखहेतूनि गाहते—उपचिनोति, अनेन च हेतुहेतुमद्भावः कर्मणामुपदर्शितो भवति, न च 'तस्य' अशुभाचरितस्य कर्मणो विपाकेन 'अस्पृष्टः' अच्छुप्तो 'मुच्यते' जन्तुः, कर्मणामुदयमननुभूय तपोविशेषमन्तरेण दीक्षाप्रवेशादिना न तदपगमं विधत्त इति भावः ॥ ४ ॥ अधुना सर्वस्थानानित्यतां दर्शयितुमाह—

देवा गंधव्वरक्खसा, असुरा भूमिचरा सरिसिवा। राया नरसेट्ठिमाहणा, ठाणा तेऽवि चयंति दुक्खिया ॥५॥
कामेहि ण संथवेहि गिद्धा, कम्मसहा कालेण जंतवो। ताले जह बंधणच्चुए, एवं आउखयंमि तुट्टती ॥६॥

२ वैतालीयाध्य० उद्देशः १

॥ ५५ ॥

१ कामे हि य संथवे हि य इति पु०, छन्दोऽनुलोमता चात्र, नवरं टीकाकृद्भिः गृद्धा इत्येतद् व्याख्यातं, परं 'वर्त्मा औपच्छन्दसकम्' इति लक्षणं संगच्छते इति

देवा—ज्योतिष्कसौधर्माद्याः, गन्धर्वराक्षसयोरुपलक्षणत्वाद्दक्षकारा व्यन्तरा गृह्यन्ते, तथा 'असुरा' दशप्रकारा भवनपतयः, ये चान्ये भूमिचराः सरीसृपाद्याः तिर्यञ्चः, तथा 'राजानः' चक्रवर्तिनो बलदेववासुदेवप्रभृतयः, तथा 'नराः' सामान्यमनुष्याः 'श्रेष्ठिनः' पुरमहत्तराः ब्राह्मणाश्चैते सर्वेऽपि स्वकीयानि स्थानानि दुःखिताः सन्तस्त्यजन्ति, यतः—सर्वेषामपि प्राणिनां प्राणपरित्यागे महदुःखं समुत्पद्यत इति ॥ ५ ॥ किञ्च—'कामेहिं' इत्यादि, 'कामैः' इच्छामदनरूपैस्तथा 'संस्तवैः' पूर्वापरभूतैः 'गृद्धा' अध्युपपन्नाः सन्तः 'कर्मसहत्ति कर्मविपाकसहिष्णवः 'कालेन' कर्मविपाककालेन 'जन्तवः' प्राणिनो भवन्ति, इदमुक्तं भवति—भोगेप्सोर्विषयाऽऽसेवनेन तदुपशममिच्छत इहामुत्र च क्लेश एव केवलं, न पुनरुपशमावाप्तिः, तथाहि—"उपभोगोपायपरो वाञ्छति यः शमयितुं विषयतृष्णाम्। धावत्याक्रमितुमसौ पुरोऽपराह्णे निजच्छायाम् ॥१॥" नच तस्य मुमूर्षोः कामैः संस्तवैश्च त्राणमस्तीति दर्शयति—यथा तालफलं 'बन्धनात्' वृन्तात् च्युतम् अत्राणमवश्यं पतति, एवमसावपि स्वायुषः क्षये 'त्रुट्यति' जीवितात् च्यवत इति ॥ ६ ॥ अपिच—

जे यावि बहुस्सुए सिया, धम्मिय माहणभिक्खुए सिया। अभिणूमकडेहिं मुच्छिए, तिव्वं ते कम्मेहिं किच्चती
अह पास विवेगमुट्ठिए, अवितिण्णे इह भासई धुवं। णाहिसि आरं कओ परं, वेहासे कम्मेहिं किच्चती ॥८॥

न क्षतिः, तस्यापि वैतालीयप्रकरणगतत्वान्न प्राक्प्रतिज्ञाविरोधः, एवमन्यत्रापि विकल्पसमाहृतेः सर्वजातिवस्तोकर्षाभ्युपगमे च नाक्षपादमात्रस्य तथात्वे क्षतिः

ये चापि 'बहुश्रुताः' शास्त्रार्थपारगाः तथा 'धार्मिका'धर्माचरणशीलाः, तथा ब्राह्मणा' तथा 'भिक्षुका'भिक्षाटनशीलाः 'स्युः' भवेयुः, तेऽप्याभिमुख्येन 'णूम'न्ति कर्म माया वा तत्कृतैः असदनुष्ठानैः 'मूर्च्छिताः' गृद्धाः 'तीव्रम्' अत्यर्थं, अत्र च छान्दसत्वाद्बहुवचनं द्रष्टव्यं, 'ते' एवंभूताः 'कर्मभिः' सद्वेद्यादिभिः 'कूल्यन्ते' छिद्यन्ते पीड्यन्त इतियावत् ॥ ७ ॥ साम्प्रतं ज्ञानदर्शनचारित्रमन्तरेण नापरो मोक्षमार्गोऽस्तीतित्रिकालविषयत्वात् सूत्रस्याऽऽगामितीर्थिकधर्मप्रतिषेधार्थमाह—'अथे'त्यधिकारान्तरे वाक्यादेशे एकादेश इति, 'अथे'त्यनन्तरं एतच्च 'पश्य' कश्चित्तीर्थिको 'विवेकं' परित्यागं परिग्रहस्य परिज्ञानं वा संसारस्याऽऽश्रित्य उत्थितः प्रव्रज्योत्थानेन, स च सम्यक्परिज्ञानाभावादवितीर्णः संसारसमुद्रं तितीर्षुः, केवलम् 'इह' संसारे प्रस्तावे वा शाश्वतत्वात् 'ध्रुवो' मोक्षस्तं तदुपायं वा संयमं भाषत एव न पुनर्विधत्ते तत्परिज्ञानाभावादिति भावः, तन्मार्गे प्रपन्नस्त्वमपि कथं ज्ञास्यसि 'आरम्' इहभवं कुतो वा 'परं' परलोकं यदिवा—आरमिति गृहस्थत्वं, परमिति प्रव्रज्यापर्यायं, अथवा—आरमिति संसारं परमिति मोक्षं, एवम्भूतश्चान्योऽप्युभयभ्रष्टः, 'वेहासे'त्ति अन्तराले उभयाभावतः स्वकृतैः कर्मभिः 'कूल्यते' पीड्यत इति ॥ ८ ॥ ननु च तीर्थिका अपि केचन निष्परिग्रहास्तथा तपसा निष्टप्तदेहाश्च, तत्कथं तेषां नो मोक्षावाप्तिरित्येतदाशङ्क्याह—

जइ वि य णिगणे किसे चरे, जइविय भुंजिय मासमंतसो। जे इह मायाइ मिज्जई, आगंता गब्भाय णंतसो
पुरिसोरम पावकम्मुणा, पलियंतं मणुयाण जीवियं। सन्ना इह काममुच्छिया, मोहं जंति नरा असंवुडा १०

यद्यपि तीर्थिकः कश्चित्तापसादिस्त्यक्तबाह्यगृहवासादिपरिग्रहत्वात् निष्किञ्चनतया नग्नः त्यक्त्राणाभावाच्च कृशः 'चरेत्' स्वकीयप्रव्रज्यानुष्ठानं कुर्यात्, यद्यपि च षष्ठाष्टमदशमद्वादशादितपो विशेषं विधत्ते यावद् अन्तशो मासं स्थित्वा 'भुञ्जे' तथापि आन्तरकषायापरित्यागान्न मुच्यते इति दर्शयति—'यः' तीर्थिक इह मायादिना मीयते, उपलक्षणार्थत्वात् कषायैर्युक्त इत्येवं परिच्छिद्यते, असौ 'गर्भाय' गर्मार्थमा—समन्तात् 'गन्ता' यास्यति 'अनन्तशो'निरवधिकं कालमिति, एतदुक्तं भवति—अकिञ्चनोऽपि तपोनिष्टप्तदेहोऽपि कषायापरित्यागान्नरकादिस्थानात् तिर्यगादिस्थानं गर्भाद्गर्भमनन्तमपि कालमग्निशर्मवत् संसारे पर्यटतीति ॥ ९ ॥ यतो मिथ्यादृष्टयुपदिष्टतपसाऽपि न दुर्गतिमार्गनिरोधो अतो मदुक्त एव मार्गे स्थेयमेतद्गर्भमुपदेशं दातुमाह—'पुरिसो' इत्यादि, हे पुरुष ! येन 'पापेन कर्मणा' असदनुष्ठानरूपेण त्वमुपलक्षितस्तत्रासकृद् प्रवृत्तत्वात् तस्मात् 'उपरम' निवर्तस्व, यतः पुरुषाणां जीवितं सुबहुपि त्रिपल्योपमान्तं संयमजीवितं वा पल्योपमस्यान्तः—मध्ये वर्त्तते तदप्यूनां पूर्वकोटिमितियावत्, अथवा परि—समन्तात् अन्तोऽस्येति पर्यन्तं—सान्तमित्यर्थः, यच्चैवं तद्गतमेवावगन्तव्यं, तदेवं मनुष्याणां स्तोकं जीवितमवगम्य यावत्तच्च पर्येति तावद्धर्मानुष्ठानेन सफलं कर्त्तव्यं, ये पुनर्भोगस्नेहपङ्के अवसन्ना—मग्ना 'इह' मनुष्यभवे संसारे वा कामेषु—इच्छामदनरूपेषु 'मूर्च्छिता' अध्युपपन्नाः ते नरा मोहं यान्ति—हिताहितप्राप्तिपरिहारे मुह्यन्ति, मोहनीयं वा कर्म चिन्वन्तीति संभाव्यते, एतदसंवृतानां—हिंसादिस्थानेभ्योऽनिवृत्तानामसंयतेन्द्रियाणां चेति ॥ १० ॥ एवं च स्थिते यद्विधेयं तदर्शयितुमाह—

जयय विहराहि जोगवं, अणुपाणा पंथा दुरुत्तरा। अणुसासणमेव पक्कमे, वीरेहिं समं पवेइयं ॥ ११ ॥
विरया वीरा समुट्ठिया, कोहकायरियाइपीसणा। पाणे ण हणंति सव्वसो, पावाओ विरयाऽभिनिव्वुडा १२

स्वल्पं जीवितमवगम्य विषयांश्च क्लेशप्रायानवबुध्य छित्त्वा गृहपाशबन्धनं 'यतमानः' यत्नं कुर्वन् प्राणिनामनुपरोधेन 'विहर' उद्युक्तविहारी भव, एतदेव दर्शयति—'योगवानि'ति संयमयोगवान् गुप्तिसमितिगुप्त इत्यर्थः, किमित्येवं ?, यतः 'अणवः'—सूक्ष्माः प्राणाः—प्राणिनो येषु पथिषु ते तथा ते चैवम्भूताः पन्थानोऽनुपयुक्तैर्जीवानुपमर्दन 'दुस्तरा' दुर्गमा इति, अनेन ईर्यासमितिरुपलक्षिता, अस्याश्चोपलक्षणार्थत्वात् अन्यास्वपि समितिषु सततोपयुक्तेन भवितव्यम्, अपिच 'अनुशासनमेव' यथागममेव सूत्रानुसारेण संयमं प्रति क्रामेत्, एतच्च सर्वैरेव 'वीरैः' अर्हद्भिः सम्यक् 'प्रवेदितं' प्रकर्षेणाख्यातमिति ॥ ११ ॥ अथ क एते वीरा इत्याह—'विरया' इत्यादि, हिंसाऽनृतादिपापेभ्यो ये विरताः, विशेषेण कर्म प्रेरयन्तीति वीराः, सम्यगारम्भपरित्यागेनोत्थिताः समुत्थिताः, ते एवम्भूताश्च 'क्रोधकातरिकादिपीषणाः' तत्र क्रोधग्रहणान्मानो गृहीतः, कातरिका—माया तद्ग्रहणाल्लोभो गृहीतः, आदिग्रहणात् शेषमोहनीयपरिग्रहः, तत्पीषणाः—तदपनेतारः, तथा 'प्राणिनो' जीवान् सूक्ष्मेतरभेदभिन्नान् 'सर्वशो' मनोवाक्कायकर्मभिः 'न घ्नन्ति' न व्यापादयन्ति, 'पापाच्च' सर्वतः सावद्यानुष्ठानरूपाद्विरताः—निवृत्तास्ततश्च 'अभिनिर्वृत्ताः' क्रोधाद्युपशमेन शान्तीभूताः, यदिवाऽभिनिर्वृत्ता इव अग्निनिर्वृत्ताः—मुक्ता इव द्रष्टव्या इति ॥ १२ ॥ पुनरप्युपदेशान्तरमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णवि ता अहमेव लुप्पए, लुप्पंती लोअंसि पाणिणो। एवं सहिएहिं पासए, अणिहे से पुट्ठे अहियासए १३
धुणिया कुलियं व लेववं, किसए देहमणासणा इह। अविहिंसामेव पव्वए, अणुधम्मो मुणिणा पवेदितो १४

परीषहोपसर्गा एतद्भावनापरेण सोढव्याः, नाहमेवैकस्तावदिह शीतोष्णादिदुःखविशेषैः 'लुप्ये' पीड्ये अपि त्वन्येऽपि 'प्राणिनः' तथाविधास्तिर्यङ्मनुष्याः अस्मिल्लोके 'लुप्यन्ते' अतिदुःसहैर्दुःखैः परिताप्यन्ते, तेषां च सम्यग्विवेकाभावान्न निर्जराख्यफलमस्ति, यतः—'क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः, सोढा दुःसहतापशीतपवनक्लेशा न तप्तं तपः। ध्यातं वित्तमहर्निशं नियमितं द्वन्द्वैर्न तत्त्वं परं, तत्तत्कर्म कृतं सुखार्थिभिरहो तैस्तैः फलैर्वञ्चिताः ॥ १ ॥' तदेवं क्लेशादिसहनं सद्विवेकिनां संयमाभ्युपगमे सति गुणायैवेति, तथाहि—'काश्यं क्षुत्प्रभवं कदन्नमशनं शीतोष्णयोः पात्रता, पारुष्यं च शिरोरुहेषु शयनं मद्यास्तले केवले। एतान्येव गृहे वहन्त्यवनतिं ता-युक्तिं संयमे, दोषाश्चापि गुणा भवन्ति हि नृणां योग्ये पदे योजिताः ॥१॥' एवं सहितो ज्ञानादिभिः स्वहितो वा आत्महितः सन् 'पश्येत्' कुशाग्रीयया बुद्ध्या पर्यालोचयेदनन्तरोदितं, तथा निहन्यत इति निहः न निहोऽनिहः—क्रोधादिभिरपीडितः सन् स महासत्त्वः परीषहैः स्पृष्टोऽपि तान् 'अधिसहेत' मनःपीडां न विदध्यादिति, यदिवा 'अनिह' इति तपःसंयमे परीषहसहने वाऽनिगूहितबलवीर्यः, शेषं पूर्ववदिति ॥ १३ ॥ अपिच 'धुणिया'

१ अधिकं पृथग्जनान् पश्यतीति चू.

इत्यादि, 'धूत्वा' विधूय 'कुलियं' कडणकृतं कुड्यं 'लेपवत्' सलेपं, अयमत्रार्थः—यथा कुड्यं गोमयादिलेपेन सलेपं जाघट्यमानं लेपापगमात् कृशं भवति, एवम् अनशनादिभिर्देहं 'कर्शयेत्' अपचितमांसशोणितं विदध्यात्, तदपचयाच्च कर्मणोऽपचयो भवतीति भावः, तथा विविधा हिंसा विहिंसा न विहिंसा अविहिंसा तामेव प्रकर्षेण व्रजेत्, अहिंसाप्रधानो भवेदित्यर्थः, अनुगतो—मोक्षं प्रत्यनुकूलो धर्मोऽनुधर्मः असावहिंसालक्षणः, परीषहोपसर्गसहनलक्षणश्च धर्मो 'मुनिना' सर्वज्ञेन 'प्रवेदितः' कथित इति ॥ १४ ॥ किञ्च—

सउणी जह पंसुगुंडिया, विहुणिय धंसयई सियं रयं। एवं दविओवहाणवं, कम्मं खवइ तवस्सिमाहणे॥१५॥
उट्ठियमणगारमेसणं, समणं ठाणठिअं तवस्सिणं। डहरा वुड्ढा य पत्थए, अवि सुस्से ण य तं लभेज्ज णो१६

'शकुनिका' पक्षिणी यथा 'पांसुना' रजसा 'अवगुण्ठिता' खचिता सती अङ्गं 'विधूय' कम्पयित्वा तद्रजः 'सितम्' अवबद्धं सत् 'ध्वंसयति' अपनयति, एवं 'द्रव्यो' भव्यो मुक्तिगमनयोग्यो मोक्षं प्रत्युप—सामीप्येन दधातीति उपधानम्—अनशनादिकं तपः तदस्यास्तीत्युपधानवान्, स चैवम्भूतः 'कर्म' ज्ञानावरणादिकं 'क्षपयति' अपनयति, 'तपस्वी' साधुः 'माहण'त्ति मा वधीरिति प्रवृत्तिर्यस्य स प्राकृतशैल्या माहणेत्युच्यत इति ॥ १५ ॥ अनुकूलोपसर्गमाह—'उट्ठिये'त्यादि, अगारं—गृहं तदस्य नास्तीत्यनगारः तमेवम्भूतं संयमोत्थानेनैषणां प्रत्युत्थितं—प्रवृत्तं, श्राम्यतीति श्रमणस्तं, तथा 'स्थानस्थितम्' उत्तरोत्तरविशिष्टसंयमस्थानाध्यासिनं 'तपस्विनं' विशिष्टतपोनिष्टप्तदेहं तमेवम्भूतमपि कदाचित् 'डहरा' पुत्रनप्त्रादयः 'वृद्धाः' पितृमातुलादयः उच्चिष्कामयितुं 'प्रार्थयेयुः' याचेरन्, त एवमूचुः—भवता वयं प्रतिपाल्या न त्वामन्तरेणास्माकं कश्चिदस्ति त्वं वाऽस्माकम् एक एव प्रतिपाल्यः, (इति) भणन्तस्ते जना अपि 'शुष्येयुः' श्रमं गच्छेयुः, न च तं साधुं विदितपरमार्थं 'लभेरन्' नैवाऽऽत्मसात्कुर्युः—नैवाऽऽत्मवशगं विदध्युरिति ॥ १६ ॥ किञ्च—

जइ कालुणियाणि कासिया, जइ रोयंति य पुत्तकारणा। दवियं भिक्खूं समुट्ठियं, णो लब्भंति ण संठवित्तए
जइविय कामेहि लाविया, जइ णेज्जाहि ण बंधिउं घरं। जइ जीविय नावकंखए, णो लब्भंति ण संठवित्तए१८

यद्यपि ते मातापितृपुत्रकलत्रादयस्तदन्तिके समेत्य करुणाप्रधानानि—विलापप्रायाणि वचांस्यनुष्ठानानि वा कुर्युः, तथाहि—"णाहपियकंतसामिय अइवल्लह दुल्लहोऽसि भुवणंमि। तुह विरहम्मि य निक्किव! सुण्णं सव्वंपि पडिहाइ ॥१॥ मेणी गामो गोट्ठी गणो व तं जत्थ होसि संणिहितो। दिप्पइ सिरिए सुपुरिस! किं पुण नियगं घरदारं? ॥२॥" तथा यदि 'रोयंति य' त्ति रुदन्ति 'पुत्रकारणं' सुतनिमित्तं, कुलवर्धनमेकं सुतमुत्पाद्य पुनरेवं कर्तुमर्हसीति। एवं रुदन्तो यदि भणन्ति तं भिक्षुं रागद्वेषपरहितत्वान्मुक्तियोग्यत्वाद्वा द्रव्यभूतं सम्यक्संयमोत्थानेनोत्थितं तथाऽपि साधुं 'न लप्स्यन्ते' न शक्नुवन्ति प्रव्रज्यातो भ्रंशयितुं भावाच्चावयितुं नापि संस्थापयितुं—गृहस्थभावेन द्रव्यलिङ्गाच्चावयितुमिति ॥ १७ ॥ अपिच—'जइवि' इत्यादि, यद्यपि ते

१ नाथ कान्त प्रिय स्वामिन् अतिवल्लभ दुर्लभोऽसि भुवने तव विरहे च निष्कृप!, शून्यं सर्वमपि प्रतिभाति ॥ १ ॥ श्रेणिर्ग्रामो गोष्ठी गणो वा त्वं यत्र भवसि सन्निहितः। दीप्यते श्रिया सुपुरुष! किं पुनर्निजं गृहद्वारम् ? ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निजास्तं साधुं संयमोत्थानेनोत्थितं 'कामैः' इच्छामदनरूपैः 'लावयन्ति' उपनिमन्त्रयेयुरुपलोभयेयुरित्यर्थः, अनेनानुकूलोपसर्गग्रहणं, तथा यदि नयेयुर्बध्वा गृहं, णमिति वाक्यालङ्कारे । एवमनुकूलप्रतिकूलोपसर्गैरभिद्रुतोऽपि साधुः—'यदि जीवितं नाभिकाङ्क्षेत्' यदि जीविताभिलाषी न भवेत् असंयमजीवितं वा नाभिनन्देत् ततस्ते निजास्तं साधुं 'णो लब्भंति'त्ति न मन्ते—न प्राप्नुवन्ति आत्मसात्कर्तुं 'ण संठवित्तए'त्ति नापि गृहस्थभावेन संस्थापयितुमलमिति ॥ १८ ॥ किञ्च—

सेहंति य णं ममाइणो, माय पिया य सुया य भारिया।
पोसाहि ण पासओ तुमं, लोग परंपि जहासि पोसणो ॥
अन्ने अन्नेहिं मुच्छिया, मोहं जंति णरा असंवुडा।
विसमं विसमेहिं गाहिया, ते पावेहिं पुणो पगब्भिया ॥ २० ॥

ते कदाचिन्मातापित्रादयस्तमभिनवप्रव्रजितं 'सेहंति'त्ति शिक्षयन्ति 'णम्' इति वाक्यालङ्कारे—'ममाइणो'त्ति ममायमित्येवं स्नेहालवः, कथं शिक्षयन्तीत्यत आह—पश्य 'नः' अस्मानस्मदुःखितांस्वदर्थं पोषकाभावाद्वा, त्वं च यथावस्थितार्थपश्यकः—सूक्ष्मदर्शी, सश्रुतिक इत्यर्थः, अतः 'नः' अस्मान् 'पोषय' प्रतिजागरणं कुरु अन्यथा प्रव्रज्याऽभ्युपगमेनेहलोकस्त्यक्तो भवता अस्मत्प्रतिपालनपरित्यागेन च परलोकमपि त्वं त्यजसि इति दुःखितनिजप्रतिपालनेन च पुण्यावाप्तिरेवेति, तथाहि—'या गतिः क्लेशदग्धानां, गृहेषु गृहमेधिनाम् । विभ्रतां पुत्रदारांस्तु, तां गतिं व्रज पुत्रक ! ॥ १ ॥" ॥ १९ ॥ एवं तैरुपसर्गिताः केचन

१ लाविया उवनिमंतणा चू०

कातराः कदाचिदेतत्कुर्युरित्याह—'अन्ने' इत्यादि, 'अन्ने' केचनाल्पसत्त्वाः 'अन्नैः' मातापित्रादिभिः 'मूर्च्छिता' अध्युपपन्नाः सम्यग्दर्शनादिव्यतिरेकेण सकलमपि शरीरादिकमन्यदित्यन्यग्रहणं, ते एवम्भूताः असंवृता नराः 'मोहं यान्ति' सदनुष्ठाने मुह्यन्ति, तथा संसारगमनैकहेतुभूतत्वात् 'विषमः' असंयमस्तं 'विषमैः' असंयतैरुन्मार्गप्रवृत्तत्वेनापायाभीरुभिः रागद्वेषैर्वा अनादिभवाभ्यस्ततया दुश्छेद्यत्वेन विषमैः ग्राहिता—असंयमं प्रतिवर्तिताः, ते चैवम्भूताः 'पापैः' कर्मभिः पुनरपि प्रवृत्ताः 'प्रगल्भिताः' धृष्टतां गताः पापकं कर्म कुर्वन्तोऽपि न लज्जन्त इति ॥ २० ॥ यत एवं ततः किं कर्तव्यमित्याह—

तम्हा दवि इक्ख पंडिए, पावाओ विरतेऽभिणिव्वुडे।
पणए वीरं महाविहिं, सिद्धिपहं णेआउयं धुवं ॥ २१ ॥
वेयालियमग्गमागओ, मणवयसाकायेण संवुडो।
चिच्चा वित्तं च णायओ, आरंभं च सुसंवुडे चरे ॥ २२ ॥

त्तिबेमि इति वैतालीयाध्ययनस्य प्रथमोद्देशकः (गाथाग्रम् १२०)

यतो मातापित्रादिमूर्च्छिताः पापेषु कर्मसु प्रगल्भा भवन्ति तस्माद् द्रव्यभूतो भव्यः—मुक्तिगमनयोग्यः रागद्वेषरहितो वा सन् 'ईक्षस्व' तद्विपाकं पर्यालोचय 'पण्डितः' सद्विवेकयुक्तः 'पापात्' कर्मणोऽसदनुष्ठानरूपात् 'विरतः' निवृत्तः क्रोधादिपरित्यागाच्छान्तीभूत इत्यर्थः तथा 'प्रणताः' प्रहीभूताः 'वीराः' कर्मविदारणसमर्थाः 'महावीथिं' महामार्गं, तमेव विशिनष्टि—'सिद्धिपथं' ज्ञानादियोक्षमार्गं तथा मोक्षं प्रति 'नेतारं' प्रापकं 'ध्रुवम्' अव्यभिचारिणमित्येतदवगम्य स एव मार्गोऽनुष्ठेयः, नासदनुष्ठानप्रगल्भैर्भाव्यमिति ॥ २१ ॥ पुनरप्युपदेशदानपूर्वकमुपसंहरन्नाह—'वेयालियमग्ग' इत्यादि, कर्मणां विदारणमार्गमागतो भूत्वा तं तथाभूतं मनोवाक्कायसंवृतः पुनः 'त्यक्त्वा' परित्यज्य 'वित्तं' द्रव्यं तथा 'ज्ञातींश्च' स्वजनांश्च तथा सावद्यारम्भं च सुष्ठु संवृत इन्द्रियैः संयमानुष्ठानं चरेदिति ब्रवीमीति पूर्ववत् ॥ २२ ॥ इति वैतालीयद्वितीयाध्ययनस्य प्रथमोद्देशकः समाप्तः ॥

अथ द्वितीयाध्ययने द्वितीय उद्देशकः प्रारभ्यते ॥

प्रथमानन्तरं द्वितीयः समारभ्यते—अस्य चायमभिसंबन्धः, इहानन्तरोद्देशके भगवता स्वपुत्राणां धर्मदेशनाऽभिहिता, तदिहापि सैवाध्ययनार्थाधिकारत्वात् अभिधीयते, सूत्रस्य सूत्रेण सह संबन्धोऽयम्—अनन्तरोक्तसूत्रे बाह्यद्रव्यस्वजनारम्भपरित्यागोऽभिहितः, तदिहाप्यान्तरमानपरित्याग उद्देशार्थाधिकारसूचितोऽभिधीयते, तदनेन संबन्धेनायातस्यास्योद्देशकस्यादिसूत्रं—

तयसं व जहाइ से रयं, इति संखाय मुणी ण मज्जई।
गोयन्नतरेण माहणे, अहसेयकरी अन्नेसी इंखिणी १
जो परिभवइ परं जणं, संसारे परिवत्तई महं।
अदु इंखिणिया उ पाविया, इति संखाय मुणी ण मज्जई ॥ २ ॥

१ नेसि. २ चिरं पा०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा उरगः त्वां त्वचं अवश्यं परित्यागार्हत्वात् 'जहाति' परित्यजति, एवमसावपि साधुः रज इव रजः—अष्टप्रकारं कर्म तदकषायित्वेन परित्यजतीति, एवं कषायाभावो हि कर्माभावस्य कारणमिति 'संख्याय' ज्ञात्वा 'मुनिः' कालत्रयवेदी 'न माद्यति' मदं न याति, मदकारणं दर्शयति-'गोत्रेण' काश्यपादिना, अन्यतरग्रहणात् शेषाणि मदस्थानानि गृह्यन्त इति, 'माहण'त्ति साधुः, पाठान्तरं वा 'जे विउ'त्ति यो विद्वान्-विवेकी स जातिकुललाभादिभिः न माद्यतीति, न केवलं स्वतो मदो न विधेयः, जुगुप्साऽप्यन्येषां न विधेयेति दर्शयति—'अथ' अनन्तरं असौ 'अश्रेयस्करी' पापकारिणी 'इंखिणि'त्ति निन्दा अन्येषामतो न कार्येति, 'मुणी न मज्जइ' इत्यादिकस्य सूत्रावयवस्य सूत्रस्पर्शं गाथाद्वयेन निर्युक्तिकृदाह—

तवसंजमणाणेसुवि जइ माणो वज्जिओ महेसीहिं । अत्तसमुक्करिसत्थं किं पुण हीला उ अन्नेसिं ? ॥४३॥
जइ ताव निज्जरमओ, पडिसिद्धो अट्ठमाणमहणेहिं । अवसेसमयट्ठाणा परिहरियव्वा पयत्तेणं ॥ ४४ ॥

'वेयालियस्स णिज्जुत्ती सम्मत्ता' तपःसंयमज्ञानेष्वपि आत्मसमुत्कर्षणार्थम्-उत्सेकार्थं यः प्रवृत्तो मानः यद्यसावपि तावद् 'वर्जितः' त्यक्तो 'महर्षिभिः' महामुनिभिः, किंपुनर्निन्दाऽन्येषां न त्याज्येति । यदि तावन्निर्जरामदोऽपि मोक्षैकगमनहेतुः प्रतिषिद्धः 'अष्टमामथनैः' अर्हद्भिरवशेषाणि तु 'मदस्थानानि' जात्यादीनि 'प्रयत्नेन' सुतरां परिहर्त्तव्यानीति गाथाद्वयार्थः ॥ ४३-४४ ॥ १ ॥ साम्प्रतं परनिन्दादोषमधिकृत्याह-'जो परिभवइ' इत्यादि, यः कश्चिदविवेकी 'परिभवति' अवज्ञयति, 'परं जनं' अन्यं लोकम् आत्मव्यतिरिक्तं स तत्कृतेन कर्मणा 'संसारे' चतुर्गतिलक्षणे भवोदधावरघट्टघटीन्यायेन 'परिवर्त्तते'

१ निर्जराविशेषणम् ।

भ्रमति 'महद्' अत्यर्थं महान्तं वा कालं, क्वचित् 'चिरम्' इति पाठः, 'अदु'त्ति अथशब्दो निपातः निपातानामनेकार्थत्वात् अत इत्यस्यार्थे वर्त्तते, यतः परपरिभवादात्यन्तिकः संसारः अतः 'इंखिणिया' परनिन्दा तुशब्दस्यैवकारार्थत्वात् 'पापिकैव' दोषवत्येव, अथवा स्वस्थानादधमस्थाने पातिका, तत्रेह जन्मनि सुघरो दृष्टान्तः, परलोकेऽपि पुरोहितस्यापि श्वादिषूत्पत्तिरिति, इत्येवं 'संख्याय' परनिन्दां दोषवतीं ज्ञात्वा मुनिर्जात्यादिभिः यथाऽहं विशिष्टकुलोद्भवः श्रुतवान् तपस्वी भवांस्तु मत्तो हीन इति न माद्यति ॥ २ ॥ मदाभावे च यद्विधेयं तदर्शयितुमाह—

जे यावि अणायगे सिया, जेवियं पेसगपेसए सिया । जे मोणपयं उवट्ठिए, णो लज्जे समयं सया यरे ॥३॥
सम अन्नयरम्मि संजमे, संसुद्धे समणे परिव्वए । जे आवकहा समाहिए, दविए कालमकासि पंडिए ॥४॥

यश्चापि कश्चिदास्तां तावत् अन्यो न विद्यते नायकोऽस्येत्यनायकः-स्वयंप्रभुश्चक्रवर्त्यादिः 'स्यात्' भवेत्, यश्चापि प्रेष्यस्यापि प्रेष्यः-तस्यैव राज्ञः कर्मकरस्यापि कर्मकरः, य एवम्भूतो मौनीन्द्रं पदं यते-गम्यते मोक्षो येन तत्पदं—संयमस्तम् उप-सामीप्येन स्थितः उपस्थितः—समाश्रितः सोऽप्यलज्जमान उत्कर्षमकुर्वन् वा सर्वाः क्रियाः-परस्परतो वन्दनप्रतिवन्दनादिका विधत्ते, इदमुक्तं भवति-चक्रवर्तिनाऽपि मौनीन्द्रपदमुपस्थितेन पूर्वमात्मप्रेष्यप्रेष्यमपि वन्दमानेन लज्जा न विधेया इतरेण चोत्कर्ष इत्येवं 'समतां' समभावं सदा भिक्षुश्चरेत्-संयमोद्युक्तो भवेदिति ॥ ३ ॥ क पुनर्व्यवस्थितेन लज्जामदौ न विधेयावेति दर्शयितुमाह—

१ मिश्र वृत्तौ ।

'समे'ति समभावोपेतः सामायिकादौ संयमे संयमस्थाने वा षट्स्थानपतितत्वात् संयमस्थानानामन्यतरस्मिन् संयमस्थाने छेदोपस्थापनीयादौ वा, तदेव विशिनष्टि—सम्यक्शुद्धे सम्यक्शुद्धो वा 'श्रमणः' तपस्वी लज्जामदपरित्यागेन समानमना वा 'परिव्रजेत्' संयमोद्युक्तो भवेत्, स्यात्-कियन्तं कालम् ?, यावत् कथा-देवदत्तो यज्ञदत्त इति कथां यावत्, सम्यगाहित आत्मा ज्ञानादौ येन स समाहितः समाधिना वा—शोभनाध्यवसायेन युक्तः, द्रव्यभूतो-रागद्वेषादिरहितः मुक्तिगमनयोग्यतया वा भव्यः, स एवम्भूतः कालमकार्षीत् 'पण्डितः' सदसद्विवेककलितः, एतदुक्तं भवति—देवदत्त इति कथा मृतस्यापि भवति अतो यावन्मृत्युकालं तावल्लज्जामदपरित्यागोपेतेन संयमानुष्ठाने प्रवर्तितव्यमिति स्यात् ॥ ४ ॥ किमालम्ब्यैतद्विधेयमिति, उच्यते—

दूरं अणुपस्सिया मुणी, तीतं धम्ममणागयं तहा । पुट्ठे परुसेहिं माहणे, अवि हण्णू समयंमि रीयइ ॥५॥
पण्णसमत्ते सया जए, समताधम्ममुदाहरे मुणी । सुहुमे उ सया अलूसए, णो कुज्झे णो माणि माहणे ॥६॥

दूरवर्त्तित्वात् दूरो-मोक्षस्तमनु-पश्चात् तं दृष्ट्वा यदिवा-दूरमिति-दीर्घकालम् 'अनुदृश्य' पर्यालोच्य 'मुनिः' कालत्रयवेत्ता दूरमेव दर्शयति—अतीतं 'धर्मं' स्वभावं-जीवानामुच्चावचस्थानगतिलक्षणं तथा अनागतं च धर्मं-स्वभावं पर्यालोच्य लज्जामदौ न विधेयौ, तथा 'स्पृष्टः' लुप्तः 'परुषैः' दण्डकशादिभिर्वाग्भिर्वा 'माहणे'त्ति मुनिः 'अवि हण्णू'त्ति अपि मार्यमाणः

१ समयाहियासए पा० । २ पण्हसमत्थे पा०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्कन्दकशिष्यगणवत् 'समये' संयमे 'रीयते' तदुक्तमार्गेण गच्छतीत्यर्थः, पाठान्तरं वा 'समयाऽहियासए'त्ति समतया सहत इति ॥ ५ ॥ पुनरप्युपदेशान्तरमाह—प्रज्ञायां समाप्तः प्रज्ञासमाप्तः—पटुप्रज्ञः, पाठान्तरं वा 'पण्हसमत्थे' प्रश्नविषये प्रत्युत्तरदानसमर्थः 'सदा' सर्वकालं जयेत्, जेयं कषायादिकमिति शेषः । तथा समया—समता तया धर्मम्—अहिंसादिलक्षणम् 'उदाहरेत्' कथयेत् 'मुनिः' यतिः सूक्ष्मे तु-संयमे यत्कर्तव्यं तस्य 'अत्तुषकः' अविराधकः, तथा न हन्यमानो वा पूज्यमानो वा कुध्येन्नापि 'माती' गर्वितः स्यात् 'माहणो' यतिरिति ॥ ६ ॥ अपिच—

बहुजणणमणंमि संवुडो, सव्वट्ठेहिं णरे अणिस्सिए । हरए व सया अणाविले, धम्मं पादुरकासि कासवं ७
बहवे पाणा पुढो सिया, पत्तेयं समयं समीहिया । जो मोणपदं उवट्ठिते, विरतिं तत्थ अकासि पंडिए ॥८॥

बहून् जनान् आत्मानं प्रति नामयति—प्रह्वीकरोति तैर्वा नम्यते—स्तूयते बहुजननमनो—धर्मः, स एव बहुभिर्जनैरात्मीयात्मीयाशयेन यथाऽभ्युपगमप्रशंसया स्तूयते—प्रशस्यते, कथम् ?, अत्र कथानकं राजगृहे नगरे श्रेणिको महाराजः, कदाचिदसौ चतुर्विधबुध्युपेतेन पुत्रेण अभयकुमारेण सार्धमास्थानस्थितस्ताभिस्ताभिः कथाभिरासाञ्चक्रे, तत्र कदाचिदेवम्भूता कथाऽभूत्, तद्यथा—इह लोके धार्मिकाः बहवः उताधार्मिका इति ?, तत्र समस्तपर्षदाऽभिहितम्—यथाऽत्राधार्मिका बहवो लोका धर्मं तु शतानामपि मध्ये कश्चिदेवैको विधत्ते, तदाकर्ण्याभयकुमारेणोक्तं—यथा प्रायशो लोकाः सर्व एव धार्मिकाः, यदि न निश्चयो भवतां परीक्षा

१ उवेतिया प्र० ।

क्रियतां, पर्षदाऽप्यभिहितम्—एवमस्तु, ततोऽभयकुमारेण धवलेतरप्रासाद्द्वयं कारितं, घोषितं च डिण्डिमेन नगरे, यथा—यः कश्चिदिह धार्मिकः स सर्वोऽपि धवलप्रासादं गृहीतबलिः प्रविशतु, इतरस्त्वितरमिति, ततोऽसौ लोकः सर्वोऽपि धवलप्रासादमेव प्रविष्टो निर्गच्छंश्च कथं त्वं धार्मिकः ? इत्येवं पृष्टः कश्चिदाचष्टे—यथाऽहं कर्षकः अनेकशकुनिगणः मद्धान्यकणैरात्मानं प्रीणयति खलकसमागतधान्यकणभिक्षादानेन च मम धर्म इति, अपरस्त्वाह—यथाऽहं ब्राह्मणः षट्कर्माभिरतः तथा बहुशौचस्नानादिभिर्वेदविहितानुष्ठानेन पितृदेवांस्तर्पयामि, अन्यः कथयति—यथाऽहं वणिक्कुलोपजीवी भिक्षादानादिप्रवृत्तः, अपरस्त्विदमाह—यथाऽहं कुलपुत्रकः न्यायागतं निर्गतिकं कुटुम्बकं पालयाम्येव, तावत् श्वपाकोऽपीदमाह—यथाऽहं कुलक्रमागतं धर्ममनुपालयामीति मन्त्रिश्रया च बहवः पिशितभुजः प्राणान् संधारयन्ति, इत्येवं सर्वोऽप्यात्मीयमात्मीयं व्यापारमुद्दिश्य धर्मे नियोजयति, तत्रापरमसितप्रासादं श्रावकद्वयं प्रविष्टं, तच्च किमधर्माचरणं भवद्भ्यामकारीत्येवं पृष्टं सत् सकृन्मद्यनिवृत्तिभङ्ग्यलीकमकथयत्, तथा साधव एवात्र परमार्थतो धार्मिका यथागृहीतप्रतिज्ञानिर्वाहणसमर्थाः, अस्माभिस्तु—'अवाप्य मानुषं जन्म, लब्ध्वा जैनं च शासनम् । कृत्वा निवृत्तिं मद्यस्य, सम्यक् सा[1]पि न पालिता ॥ १ ॥ अनेन व्रतभङ्गेन, मन्यमाना अधार्मिकम् । अधमाधममात्मानं, कृष्णप्रासादमाश्रिताः ॥ २ ॥' तथाहि—'लज्जां गुणौघजननीं जननीमिवार्यामत्यन्तशुद्धहृदयामनुवर्तमानाः । तेजस्विनः सुखमसूनपि संत्यजन्ति, सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ३ ॥ वरं प्रवेष्टुं ज्वलितं हुताशनं, नचापि भग्नं चिरसंचितव्रतम् । वरं हि मृत्युः सुविशुद्धचेतसो, नचापि शीलस्खलितस्य जीवितम् ॥ ४ ॥" इति, तदेवं प्रायशः सर्वोऽप्यात्मानं धार्मिकं मन्यत इतिकृत्वा

१ आधारस्यापि कर्मत्वविवक्षया, गत्यर्थत्वेन त्रिशः कर्तरि क्त इति न प्रथमाशङ्का । २ जातिपक्षीया मविपुलेयम् । ३ कर्मणो । प्र० ।

बहुजननमनो धर्म इति स्थितं, तस्मिंश्च 'संवृतः' समाहितः सन् 'नरः' पुमान् 'सर्वार्थैः' बाह्याभ्यन्तरैर्धनधान्यकलत्रममत्वादिभिः 'अनिश्रितः' अप्रतिबद्धः सन् धर्मं प्रकाशितवानित्युत्तरेण सह सम्बन्धः, निदर्शनमाह—ह्रद इव स्वच्छाम्भसा भृतः सदा 'अनाविलः' अनेकमत्स्यादिजलचरसंक्रमेणाप्यनाकुलोऽकलुषो वा क्षान्त्यादिलक्षणं धर्मं 'प्रादुरकार्षीत्' प्रकटं कृतवान्, यदिवा एवंविशिष्ट एव काश्यपं-तीर्थङ्करसंबन्धिनं धर्मं प्रकाशयेत्, छान्दसत्वात् वर्त्तमाने भूतनिर्देश इति ॥ ७ ॥ स बहुजननमने धर्मे व्यवस्थितो यादृक् धर्मं प्रकाशयति तद्दर्शयितुमाह—यदिवोपदेशान्तरमेवाश्रित्याह—'बहवे'इत्यादि, 'बहवः' अनन्ताः 'प्राणाः दशविधप्राणभाक्त्वात्तदभेदोपचारात् प्राणिनः 'पृथग्' इति पृथिव्यादिभेदेन सूक्ष्मबादरपर्याप्तकापर्याप्तनरकगत्यादिभेदेन वा संसारमाश्रिताः तेषां च पृथगाश्रितानामपि प्रत्येकं समतां—दुःखद्वेषित्वं सुखप्रियत्वं च 'समीक्ष्य' दृष्ट्वा, यदिवा—'समतां' माध्यस्थ्यमुपेक्ष्य(त्य) यो 'मौनीन्द्रपदमुपस्थितः' संयममाश्रितः स साधुः 'तत्र' अनेकभेदभिन्नप्राणिगणे दुःखद्विषि सुखाभिलाषिणि सति तदुपघाते कर्तव्ये विरतिम् अकार्षीत् कुर्याद्वेति, पापाङ्गीनः—पापानुष्ठानात् दवीयान् पण्डित इति ॥ ८ ॥ अपिच—

धम्मस्स य पारए मुणी, आरंभस्स य अंतए ठिए । सोयंति य णं ममाइणो, णो लब्भंति णियं परिग्गहं ९
इहलोगदुहावहं विऊ, परलोगे य दुहं दुहावहं । विद्धंसणधम्ममेव तं, इति विज्जं कोऽगारमावसे ? ॥ १० ॥

धर्मस्य—श्रुतचारित्रभेदभिन्नस्य पारं गच्छतीति पारगः—सिद्धान्तपारगामी सम्यक्चारित्रानुष्ठायी वेति, चारित्रमधिकृत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आरम्भस्य' सावद्यानुष्ठानरूपस्य 'अन्ते' पर्यन्ते तदभावरूपे स्थितो मुनिर्भवति, ये पुनर्नैवं भवन्ति ते अकृतधर्माः मरणे दुःखे वा समुत्थिते आत्मानं शोचन्ति, णमिति वाक्यालङ्कारे, यदिवेष्टमरणादौ अर्थनाशे वा 'ममाइणो'त्ति ममेदमहमस्य स्वामीत्येवमध्यवसायिनः शोचन्ति, शोचमाना अप्येते 'निजम्' आत्मीयं परि—समन्तात् गृह्यते-आत्मसात्क्रियत इति परिग्रहः—हिरण्यादिरिष्टस्वजनादिर्वा तं नष्टं मृतं वा 'न लभन्ते' न प्राप्नुवन्तीति, यदिवा धर्मस्य पारगं मुनिमारम्भस्थान्ते व्यवस्थितमेनमागत्य 'स्वजनाः' मातापित्रादयः शोचन्ति 'ममत्वयुक्ताः' स्नेहालवः, न च ते लभन्ते निजमप्यात्मीयपरिग्रहबुद्ध्या गृहीतमिति, ॥ ९ ॥ अत्रान्तरे 'नागार्जुनीयास्तु' पठन्ति "सोऊण तयं उवट्ठियं, केइ गिही विग्घेण उट्ठिया। धम्ममि अणुत्तरे मुणी, तंपि जिणिज्ज इमेण पंडिए ॥ १ ॥" एतदेवाह—'इह' अस्मिन्नेव लोके हिरण्यस्वजनादिकं दुःखमावहति 'विउ'त्ति विद्वांः—जानीहि, तथाहि—'अर्थानामर्जने दुःखमर्जितानां च रक्षणे । आये दुःखं व्यये दुःखं, धिगर्थं दुःखभाजनम् ॥१॥' तथाहि—'रेवापयः किसलयानि च सल्लकीनां, विन्ध्योपकण्ठविपिनं स्वकुलं च हित्वा । किं ताम्यसि द्विप! गतोऽसि वशं करिष्यैः, स्नेहो निबन्धनमनर्थपरम्परायाः ॥ १ ॥' परलोके च हिरण्यस्वजनादिममत्वापादितकर्मजं दुःखं भवति, तदप्यपरं दुःखमावहति, तदुपादानकर्मोपादानादिति भावः, तथैतदुपार्जितमपि 'विध्वंसनधर्मं' विशरारुस्वभावं, गलरमित्यर्थः, इत्येवं 'विद्वान्' जानन् कः सकर्णः 'अगारवासं' गृहवासमावसेत्?, गृहपाशं वाऽनुबध्नीयादिति, उक्तं च—"दाराः परिभवकारा बन्धुजनो बन्धनं विषं विषयाः। कोऽयं जनस्य मोहो? ये रिपवस्तेषु सुहृदाशा ॥ १ ॥" १० ॥ पुनरप्युपदेशमधिकृत्याह—

१ त्रिपदबहुव्रीहिरत्र, अनृसमासान्तश्च द्विपदादेव । २ श्रुत्वा तमुपस्थितं केचिद्गृहिणो विज्ञायोत्सिद्धेयुः । धर्मेऽनुत्तरे मुनिस्तानपि जयेदनेन पण्डितः ॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ६४ ॥

महयं पलिगोव जाणिया, जावि य वंदणपूयणा इहं। सुहुमे सल्ले दुरुद्धरे, विउमंता पयहिज्ज संथवं ॥ ११ ॥
एगे चरे(र) ठाणमासणे, सयणे एगे(ग)समाहिए सिया। भिक्खू उवहाणवीरिए, वइगुत्ते अज्झत्तसंवुडो १२

२ वैतालीयाध्य० उद्देशः २

'महान्तं' संसारिणां दुस्त्यजत्वान्महता वा संरम्भेण परिगोपणं परिगोपः द्रव्यतः पङ्कादिः भावतोऽभिष्वङ्गः तं 'ज्ञात्वा' स्वरूपतः तद्विपाकतो वा परिच्छिद्य याऽपि च प्रव्रजितस्य सतो राजादिभिः कायादिभिर्वन्दना वस्त्रपात्रादिभिश्च पूजना तां च 'इह' अस्मिन् लोके मौनीन्द्रे वा शासने व्यवस्थितेन कर्मोपशमजं फलमित्येवं परिज्ञायोत्सेको न विधेयः, किमिति?, यतो गर्वात्मकमेतत्सूक्ष्मं शल्यं वर्त्तते, सूक्ष्मत्वाच्च 'दुरुद्धरं' दुःखेनोद्धर्तुं शक्यते, अतः 'विद्वान्' सदसद्विवेकज्ञस्तत्त्यावत् 'संस्तवं' परिचयमभिष्वङ्गं 'परिजह्यात्' परित्यजेदिति। नागार्जुनीयास्तु पठन्ति—"पलिमंथ महं वियाणिया, जाऽवि य वंदणपूयणा इहं। सुहुमं सल्लं दुरुद्धरं, तंपि जिणे एएण पंडिए ॥ १ ॥" अस्य चायमर्थः—साधोः स्वाध्यायध्यानपरस्यैकान्तनिःस्पृहस्य योऽपि चायं परैः वन्दनापूजनादिकः सत्कारः क्रियते असावपि सदनुष्ठानस्य सद्भावेन महान् पलिमन्थो—विघ्नः, आस्तां तावच्छब्दादिष्वभिष्वङ्गः, तमित्येवं परिज्ञाय तथा सूक्ष्मशल्यं दुरुद्धरं च अतस्तमपि 'जयेद्' अपनयेद् पण्डितः 'एतेन' वक्ष्यमाणेनेति ॥ ११ ॥ 'एकः' असहायो द्रव्यत एकाकिविहारी भावतो रागद्वेषरहितश्चरेत्, तथा 'स्थानं' कायोत्सर्गादिकम् एक एव

॥ ६४ ॥

१ आस्तां तावत् प्र० तं तावत् प्र० । २ पलिमन्थं (विघ्नं) महान्तं विज्ञाय याऽपिच वन्दनापूजनेह। सूक्ष्मं शल्यं दुरुद्धरं, तदपि जयेदेतेन पंडितः ॥ १ ॥ ३ प्राकृते स्वार्थे लप्रत्ययागमे एकल इति जाते प्रसिद्धत्वादनुकरणमेतत् ।

कुर्यात्, तथा आसनेऽपि व्यवस्थितोऽपि रागद्वेषरहित एव तिष्ठेत्, एवं शयनेऽप्येकाकिनैव 'समाहितः' धर्मादिध्यानयुक्तः 'स्यात्' भवेत्, एतदुक्तं भवति—सर्वास्वप्यवस्थासु चरणस्थानासनशयनरूपासु रागद्वेषविरहात् समाहित एव स्यादिति, तथा भिक्षणशीलो भिक्षुः उपधानं—तपस्तत्र वीर्यं यस्य स उपधानवीर्यः—तपस्यनिगूहितबलवीर्य इत्यर्थः, तथा 'वाग्गुप्तः' सुपर्यालोचिताभिधायी 'अध्यात्मं' मनः तेन संवृतो भिक्षुर्भवेदिति ॥ १२ ॥ किञ्च—

णो पीहे ण यावपंगुणे, दारं सुन्नघरस्स संजए। पुट्ठो ण उदाहरे वयं, ण समुच्छे णो संथरे तणं ॥ १३ ॥
जत्थऽत्थमिए अणाउले, समविसमाइं मुणीऽहियासए।
चरगा अदुवावि भेरवा, अदुवा तत्थ सरीसिवा सिया ॥ १४ ॥

केनचिच्छयनादिनिमित्तेन शून्यगृहमाश्रितो भिक्षुः तस्य गृहस्य द्वारं कपाटादिना न स्वगयेन्नापि तच्चालयेत्, यावत् 'न यावपंगुणे'त्ति नोद्घाटयेत्, तत्रस्थोऽन्यत्र वा केनचिद्धर्मादिकं मार्गं वा पृष्टः सन् सावद्यां वाचं 'नोदाहरेत्' न ब्रूयात्, आभिग्रहिको जिनकल्पिकादिर्निरवद्यामपि न ब्रूयात्, तथा 'न समुच्छिन्द्यात्' तृणानि कचवरं च प्रमार्जनेन नापनयेत, नापि शयनार्थी कश्चिदाभिग्राहिकः 'तृणादिकं संस्तरेत्' तृणैरपि संस्तारकं न कुर्यात्, किं पुनः कम्बलादिना?, अन्यो वा शुषिरतृणं न संस्तरेदिति ॥ १३ ॥ तथा भिक्षुर्यत्रैवास्तमुपैति सविता तत्रैव कायोत्सर्गादिना तिष्ठतीति यत्रास्तमितः, तथाऽनाकुलः समुद्रव-

१ प्राक्तनोऽपिः शयनादिसमुच्चयाय अयं तूर्ध्वस्थानादिसमुच्चयाय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मकादिभिः परीषहोपसर्गैरक्षुभ्यन् 'समविषमाणि' शयनासनादीन्यनुकूलप्रतिकूलानि 'मुनिः' यथावस्थितसंसारस्वभाववेत्ता सम्यग्—अरक्तद्विष्टतयाऽधिसहेत, तत्र च शून्यगृहादौ व्यवस्थितस्य तस्य चरन्तीति चरका—दंशमशकादयः अथवापि 'भैरवा' भयानका—रक्षःशिवादयः अथवा तत्र सरीसृपाः 'स्युः' भवेयुः, तत्कृतांश्च परीषहान् सम्यक् अधिपहेतेति ॥ १४ ॥ साम्प्रतं त्रिविधोपसर्गाधिसहनमधिकृत्याह—

तिरिया मणुया य दिवगा, उवसग्गा तिविहाऽहियासिया। लोमादीयं ण हारिसे, सुन्नागारगओ महामुणी
णो अभिकंखेज्ज जीवियं, नोऽविय पूयणपत्थए सिया। अब्भत्थमुविंति भेरवा, सुन्नागारगयस्स भिक्खुणो

'तैरश्चाः' सिंहव्याघ्रादिकृताः तथा 'मानुषा' अनुकूलप्रतिकूलाः सत्कारपुरस्कारदण्डकशाताडनादिजनिताः, तथा 'दिव्वगा'इति व्यन्तरादिना हास्यप्रद्वेषादिजनिताः, एवं त्रिविधानप्युपसर्गान् 'अधिसहेत' नोपसर्गैर्विकारं गच्छेत्, तदेव दर्शयति—'लोमादिकमपि न हर्षेत्' भयेन रोमोद्गममपि न कुर्यात्, यदिवा—एवम्प्रकारोपसर्गाः त्रिविधा अपि 'अहियासिय'त्ति अधिसोढा भवन्ति यदि रोमोद्गमादिकमपि न कुर्यात्, आदिग्रहणात् दृष्टिमुखविकारादिपरिग्रहः, शून्यागारगतः, शून्यगृहव्यवस्थितस्य चोपलक्षणार्थत्वात् पितृवनादिस्थितो वा 'महामुनिः' जिनकल्पिकादिरिति ॥ १५ ॥ किञ्च—स तैर्भैरवैरुपसर्गैरुदीर्णैस्तोत्तुद्यमानोऽपि जीवितं न अभिकाङ्क्षेत्, जीवितनिरपेक्षेणोपसर्गः सोढव्य इति भावः, न चोपसर्गसहनद्वारेण 'पूजाप्रार्थकः' प्रकर्षाभिलाषी 'स्यात्' भवेत्, एवं च जीवितपूजानिरपेक्षेणासकृत् सम्यक् सह्यमाना भैरवा—भयानकाः शिवापिशाचादयोऽभ्यस्तभावं स्वात्मतां उप—सामीप्येन यान्ति—गच्छन्ति, तत्सहनाच्च भिक्षोः शून्यागारगतस्य नीराजितवारणस्येव शीतोष्णादिजनिता उपसर्गाः सुसहा एव भवन्तीति भावः ॥ १६ ॥ पुनरप्युपदेशान्तरमाह—

उवणीयतरस्स ताइणो, भयमाणस्स विविक्कमासणं। सामाइयमाहु तस्स जं, जो अप्पाण भए ण दंसए॥
उसिणोदगतत्तभोइणो, धम्मट्ठियस्स मुणिस्स हीमतो। संसग्गि असाहु राइहिं, असमाही उ तहागयस्सवि

उप—सामीप्येन नीतः—प्रापितो ज्ञानादावात्मा येन स तथा अतिशयेनोपनीत उपनीततरस्तस्य, तथा 'तायिनः' परात्मोपकारिणः त्रायिणो वा—सम्यक्पालकस्य, तथा 'भजमानस्य' सेवमानस्य 'विविक्तं' स्त्रीपशुपण्डकविवर्जितम् आस्यते—स्थीयते यस्मिन्निति तदासनं—वसत्यादि, तस्यैवम्भूतस्य मुनेः 'सामायिकं' समभावरूपं सामायिकादिचारित्रमाहुः सर्वज्ञाः, 'यद्' यस्मात् ततश्चारित्रिणा प्राग्व्यवस्थितस्वभावेन भाव्यं, यश्चात्मानं 'भये' परिषहोपसर्गजनिते 'न दर्शयेत्' तद्भीरुर्न भवेत् तस्य सामायिकमाहुरिति सम्बन्धनीयं ॥ १७ ॥ किञ्च—मुनेः 'उष्णोदकतप्तभोजिनः' त्रिदण्डोद्धृतोष्णोदकभोजिनः, यदिवा—उष्णं सन्न शीतीकुर्यादिति तप्तग्रहणं,तथा श्रुतचारित्राख्ये धर्मे स्थितस्य 'हीमतो'त्ति हीः—असंयमं प्रति लज्जा तद्वतोऽसंयमजुगुप्सावत इत्यर्थः, तस्यैवम्भूतस्य मुने राजादिभिः सार्द्धं यः 'संसर्गः' सम्बन्धो सावसाधुः अनर्थोदयहेतुत्वात् 'तथागतस्यापि' यथोक्तानुष्ठायिनोऽपि राजादिसंसर्गवशाद् 'असमाधिरेव' अपध्यानमेव स्यात्, न कदाचित् स्वाध्यायादिकं भवेदिति ॥१८॥ परिहार्यदोषप्रदर्शनेन अधुनोपदेशमभिधित्सयाऽऽह—

अहिगरणकडस्स भिक्खुणो, वयमाणस्स पसज्झ दारुणं। अट्ठे परिहायती बहु, अहिगरणं न करेज्ज पंडिए
सीओदगं पडि दुगुंछिणो, अपडिण्णस्स लवावसप्पिणो।
सामाइयमाहु तस्स जं, जो गिहिमत्तेऽसणं न भुंजती ॥ २० ॥

अधिकरणं—कलहस्तत्करोति तच्छीलश्चेत्यधिकरणकरः तस्यैवम्भूतस्य भिक्षोः तथाऽधिकरणकरीं दारुणां वा भयानकां वा 'प्रसह्य'प्रकटमेव वाचं ब्रुवतः सतः 'अर्थो'मोक्षः तत्कारणभूतो वा संयमः स बहु 'परिहीयते' ध्वंसमुपयाति, इदमुक्तं भवति—बहुना कालेन यदर्जितं विप्रकृष्टेन तपसा महत्पुण्यं तत्कलहं कुर्वतः परापभूतिनीं च वाचं ब्रुवतः तत्क्षणमेव ध्वंसमुपयाति, तथाहि—'[3]जं अज्जियं समीखल्लएहिं तवनियमबंभमइएहिं। मा हु तयं कलहंतो छड्डेह सागपत्तेहिं ॥ १ ॥' इत्येवं मत्वा मनागप्यधिकरणं न कुर्यात् 'पण्डितः' सदसद्विवेकीति ॥१९॥ तथा शीतोदकम्—अप्रासुकोदकं तत्प्रति जुगुप्सकस्याप्रासुकोदकपरिहारिणः साधोः न विद्यते प्रतिज्ञा—निदानरूपा यस्य सोऽप्रतिज्ञोऽनिदान इत्यर्थः,लवं—कर्म तस्मात् अवसर्पिणोऽसि—अवसर्पिणः यदनुष्ठानं कर्मबन्धोपादानभूतं तत्परिहारिण इत्यर्थः, तस्यैवम्भूतस्य साधोर्यस्मात् यत् 'सामायिकं' समभावलक्षणमाहुः सर्वज्ञाः, यश्च साधुः 'गृहमात्रे' गृहस्थभाजने कांस्यपात्रादौ न भुङ्क्ते तस्य च सामायिकमाहुरिति संबन्धनीयमिति ॥२०॥ किञ्च—

---

१ नीओदपडि० । २ सुद्धि० । ३ मदर्जितं कष्टैः (शमीपत्रैः) तपोनियमब्रह्मचर्यमयैः । मा तत् कलहयन्तः क्षिप्त शाकपत्रैः ॥ १ ॥

ण य संखयमाहु जीवियं,तहविय बालजणो पगब्भइ।बाले पावेहिं मिज्जती, इति संखाय मुणी ण मज्जती ॥
छंदेण पले इमा पया, बहुमाया मोहेण पाउडा। विएडेण पलिंति माहणे, सीउण्हं बयसाऽहियासए ॥ २२ ॥

'न च' नैव 'जीवितम्' आयुष्कं कालपर्यायेण त्रुटितं सत् पुनः 'संखय'मिति संस्कर्तुं—तन्तुवत्संधातुं शक्यते इत्येवमाहुस्तद्विदः, तथाऽपि एवमपि व्यवस्थिते 'बालः' अज्ञो जनः 'प्रगल्भते' पापं कुर्वन् धृष्टो भवति, असदनुष्ठानरतोऽपि न लज्जत इति, स चैवम्भूतो बालस्तैरसदनुष्ठानापादितैः 'पापैः' कर्मभिः 'मीयते' तद्युक्त इत्येवं परिच्छिद्यते, म्रियते वा मेषेन धान्यादिना प्रस्थकवदिति, एवं 'संख्याय' ज्ञात्वा 'मुनिः' यथावस्थितपदार्थानां वेत्ता 'न माद्यतीति' तेष्वसदनुष्ठानेष्वहं शोभनः कर्त्तेत्येवं प्रगल्भमानो मदं न करोति ॥२१॥ उपदेशान्तरमाह—'छन्दः' अभिप्रायस्तेन तेन स्वकीयाभिप्रायेण कुगतिगमनैकहेतुना 'इमाः प्रजाः' अयं लोकस्तासु गतिषु प्रलीयते, तथाहि—छागादिवधमपि स्वाभिप्रायग्रहग्रस्ता धर्मसाधनमित्येवं प्रगल्भमाना विदधति, अन्ये तु संघादिकमुद्दिश्य दासीदासधनधान्यादिपरिग्रहं कुर्वन्ति, तथाऽन्ये मायाप्रधानैः कुकुटैरसकृदुत्प्रोक्षणश्रोत्रस्पर्शनादिभिर्मुग्धजनं प्रतारयन्ति, तथाहि—'कुक्कुटसाध्यो लोको नाकुक्कुटः प्रवर्तते किञ्चित्। तस्माल्लोकस्यार्थे पितरमपि सकुक्कुटं कुर्यात् ॥१॥' तथेयं प्रजा 'बहुमाया' कपटप्रधाना, किमिति ?—यतो मोहः—अज्ञानं तेन 'प्रावृता' आच्छादिता सदसद्विवेकविकलेत्यर्थः, तदेतदवगम्य 'माहणे'त्ति साधुः 'विकटेन' प्रकटेनामायेन कर्मणा मोक्षे संयमे वा प्रकर्षेण

१ बस्त्वादीति प्र० । २ कुरुकुचैः इति प्र० ।

सूत्रकृ. १२

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं

॥ ६७ ॥

लीयते—प्रलीयते, शोभनभावयुक्तो भवतीति भावः, तथा शीतं च उष्णं च शीतोष्णं शीतोष्णा वा—अनुकूलप्रतिकूलपरीषहास्तान् वाचा कायेन मनसा च करणत्रयेणापि सम्यगधिसहेत इति ॥ २२ ॥ अपिच—

२ वैतालीयाध्य० उद्देशः २

कुजए अपराजिए जहा, अक्खेहिं कुसलेहिं दीवयं। कडमेव गहाय णो कलिं,नो तीयं नो चेव दावरं ॥२३॥
एवं लोगंमि ताइणा, बुइए जे धम्मे अणुत्तरे। तं गिण्ह हियंति उत्तमं, कडमिव सेसऽवहाय पंडिए ॥ २४ ॥

कुत्सितो जयोऽस्येति कुजयो—द्यूतकारः, महतोऽपि द्यूतजयस्य सद्भिर्निन्दितत्वादनर्थहेतुत्वाच्च कुत्सितत्वमिति, तमेव विशिनष्टि—अपराजितो दीव्यन् कुशलत्वादन्येन न जीयते अक्षैः वा—पाशकैः दीव्यन्—क्रीडंस्तत्पातज्ञः कुशलो—निपुणः, यथा असौ द्यूतकारोऽक्षैः—पाशकैः कपर्दकैर्वा रममाणः 'कडमेव'त्ति चतुष्कमेव गृहीत्वा तल्लब्धजयत्वात् तेनैव दीव्यति, ततोऽसौ तल्लब्धजयः सन्न 'कलिं' एककं नापि 'त्रेतं' त्रिकं च नापि 'द्वापरं' द्विकं गृह्णातीति ॥ २३ ॥ दार्ष्टान्तिकमाह—यथा द्यूतकारः प्राप्तजयत्वात् सर्वोत्तमं दीव्यंश्चतुष्कमेव गृह्णाति एवमस्मिन् 'लोके' मनुष्यलोके तायिना त्रायिणा वा—सर्वज्ञेनोक्तो योऽयं 'धर्मः' क्षान्त्यादिलक्षणः श्रुतचारित्राख्यो वा नास्योत्तरः—अधिकोऽस्तीत्यनुत्तरः तमेकान्तहितमितिकृत्वा सर्वोत्तमं च 'गृहाण' विस्रोतसिकारहितः स्वीकुरु, पुनरपि निगमनार्थं तमेव दृष्टान्तं दर्शयति—यथा कश्चित् द्यूतकारः 'कृतं' कृतयुगं चतुष्कमित्यर्थः, 'शेषम्' एककादि 'अपहाय'त्यक्त्वा दीव्यन् गृह्णाति, एवं पण्डितोऽपि—साधुरपि शेषं—गृहस्थकुप्रावचनिकपार्श्वस्थादिभावमपहाय सम्पूर्णं महान्तं सर्वोत्तमं धर्मं गृह्णीयादिति भावः ॥ २४ ॥ पुनरप्युपदेशान्तरमाह—

॥ ६७ ॥

उत्तर मणुयाण आहिया, गामधम्मा(म्म)इइ मे अणुस्सुयं ।
जंसी विरता समुट्ठिया, कासवस्स अणुधम्मचारिणो ॥ २५ ॥
जे एय चरंति आहियं, नाएणं महया महेसिणा। ते उट्ठिय ते समुट्ठिया, अन्नोन्नं सारंति धम्मओ ॥ २६ ॥

उत्तराः—प्रधानाः दुर्जयत्वात्, केषाम् ?—उपदेशार्हत्वान्मनुष्याणाम् अन्यथा सर्वेषामेवेति, के ते ?—'ग्रामधर्माः' शब्दादिविषया मैथुनरूपा वेति, एवं ग्रामधर्मा उत्तरत्वेन सर्वज्ञैराख्याताः, मयैतदनु—पश्चाच्छ्रुतं, एतच्च सर्वमेव प्रागुक्तं यच्च वक्ष्यमाणं तन्ममेवेनाऽऽदितीर्थकृता पुत्रानुद्दिश्याभिहितं सत् पश्चात्यगणधराः सुधर्मस्वामिप्रभृतयः स्वशिष्येभ्यः प्रतिपादयन्ति अतो मयैतदनुश्रुतमित्यनवद्यं, यस्मिन्निति—कर्मणि ल्यब्लोपे पञ्चमी सप्तमी वेति यान् ग्रामधर्मानाश्रित्य ये विरताः, पंचम्यर्थे वा सप्तमी, येभ्यो वा विरताः सम्यक्संयमरूपेणोत्थिताः समुत्थितास्ते 'काश्यपस्य' ऋषभस्वामिनो वर्धमानस्वामिनो वा सम्बन्धी यो धर्मस्तदनुचारिणः, तीर्थकरप्रणीतधर्मानुष्ठायिनो भवन्तीत्यर्थः ॥ २५ ॥ किञ्च—ये मनुष्या 'एनं' प्रागुक्तं धर्मं—ग्रामधर्मविरतिलक्षणं 'चरन्ति' कुर्वन्ति आख्यातं 'ज्ञातेन' ज्ञातपुत्रेण 'महया'ति महाविषयस्य ज्ञानस्यानन्यभूतत्वात् महान् तेन, तथाऽनुकूलप्रतिकूलोपसर्गसहिष्णुत्वात् 'महर्षिणा' श्रीमद्वर्धमानस्वामिना आख्यातं धर्मं ये चरन्ति ते एव संयमोत्थानेन—कुतीर्थिकपरिहारेणोत्थिताः तथा निह्नवादिपरिहारेण त एव सम्यक्—कुमार्गदेशनापरित्यागेन उत्थिताः समुत्थिता इति, नान्ये कुप्राव-

१ सम्यक्त्वमार्गदेशनाऽपरि० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चनिका जमालिप्रभृतयश्चेति भावः, त एव च यथोक्तधर्मानुष्ठायिनः 'अन्योऽन्यं' परस्परं 'धर्मतो' धर्ममाश्रित्य धर्मतो वा प्रशंसन्तं 'सारयन्ति' चोदयन्ति—पुनरपि सद्धर्मे प्रवर्तयन्तीति ॥ २६ ॥ किञ्च—

मा पेह पुरा पणामए, अभिकंखे उवहिं धुणित्तए। जे दूमण तेहिं णो णया, ते जाणंति समाहिमाहियं॥२७॥
णो काहिए होज्ज संजए, पासणिए ण य संपसारए। नच्चा धम्मं अणुत्तरं, कयकिरिए णयावि मामए ॥२८॥

दुर्गतिं संसारं वा प्रणामयन्ति—प्रह्वीकुर्वन्ति प्राणिनां प्रणामकाः—शब्दादयो विषयास्तान् 'पुरा' पूर्वं श्रुतान् 'मा प्रेक्षस्व' मा स्मर, तेषां स्मरणमपि यस्मान्महतेऽनर्थाय, अनागतांश्च नोदीक्षेत—नाऽऽकाङ्क्षेदिति, तथा 'अभिकाङ्क्षेत्' अभिलषेद् अनारतं चिन्तयेदनुरूपमनुष्ठानं कुर्यात्, किमर्थमिति दर्शयति—उपधीयते—ढौक्यते दुर्गतिं प्रत्यात्मा येनासावुपधिः—मायाऽष्टप्रकारं वा कर्म तद् 'धुनन'ाय अपनयनायाभिकाङ्क्षेदिति सम्बन्धः, दुष्टधर्मं प्रत्युपनताः कुमार्गानुष्ठायिनस्तीर्थिकाः, यदिवा—'दूमण'त्ति दुष्टमनःकारिण उपतापकारिणो वा शब्दादयो विषयास्तेषु ये महासत्त्वाः 'न नताः' न ग्रहीभूताः तदाचारानुष्ठायिनो न भवन्ति 'ते' सन्मार्गानुष्ठायिनो 'जानन्ति' विदन्ति 'समाधिं' रागद्वेषपरित्यागरूपं धर्मध्यानं च 'आहितम्' आत्मनि व्यवस्थितम्, आ—समन्ताद्धितं वा त एव जानन्ति नान्य इति भावः ॥ २७ ॥ तथा 'संयतः' प्रव्रजितः कथया चरति काथिकः गोचरादौ न भवेत्, यदिवा—विरुद्धां पैशून्यापादनीं रुषादिकथां वा न कुर्यात्, तथा 'प्रश्नेन' राजादिकृतवृत्तरूपेण दर्पणादिप्रश्ननिमित्तरूपेण वा चरतीति प्राश्निको न भवेत्, नापिच 'संप्रसारकः' देवकृष्यर्थकाण्डादिसूचककथाविस्तारको भवेदिति, किं कृत्वेति दर्शयति—'ज्ञात्वा' अवबुद्ध्य नास्योत्तरो विद्यत इत्यनुत्तरस्तं श्रुतचारित्राख्यं धर्मं सम्यग् अवगम्य, तस्य हि धर्मस्यैतदेव फलं यदुत—विकथानिमित्तपरिहारेण सम्यक्क्रियावान् स्यादिति, तदर्शयति—कृता—सभ्यस्ता क्रिया—संयमानुष्ठानरूपा येन स कृतक्रियस्तथाभूतश्च नचापि 'मामको' ममेदमहमस्य स्वामीत्येवं परिग्रहाग्रही भवेदिति ॥ २८ ॥ किञ्च—

छन्नं च पसंस णो करे, न य उक्कोस पगास माहणे। तेसिं सुविवेगमाहिए, पणया जेहिं सुजोसिअं धुयं॥२९॥
अणिहे सहिए सुसंवुडे, धम्मट्ठी उवहाणवीरिए। विहरेज्ज समाहिइंदिए, अत्तहिअं खु दुहेण लब्भइ॥३०॥

'छन्नं'ति माया तस्याः स्वाभिप्रायप्रच्छादनरूपत्वात् तां न कुर्यात्, चशब्द उत्तरापेक्षया समुच्चयार्थः, तथा प्रशस्यते—सर्वैरप्यविगानेनाद्रियत इति प्रशस्यो—लोभस्तं च न कुर्यात्, तथा—जात्यादिभिर्मदस्थानैर्लघुप्रकृतिं पुरुषमुत्कर्षयतीत्युत्कर्षको—मानस्तमपि न कुर्यादिति सम्बन्धः, तथाऽन्तर्व्यवस्थितोऽपि मुखदृष्टिभ्रूभङ्गविकारैः प्रकाशीभवतीति प्रकाशः—क्रोधस्तं च 'माहणे'त्ति साधुर्न कुर्यात्, 'तेषां' कषायाणां यैर्महात्मभिः 'विवेकः' परित्यागः 'आहितो' जनितस्त एव धर्मं प्रति प्रणता इति, यदिवा—तेषामेव सत्पुरुषाणां सुष्ठु विवेकः परिज्ञानरूप आहितः—प्रथितः प्रसिद्धिं गतः त एव च धर्मं प्रति प्रणताः 'यैः' महासत्त्वैः सुष्ठु 'जुष्टं' सेवितं धूयतेऽष्टप्रकारं कर्म तद्भूतं—संयमानुष्ठानं, यदिवा—यैः सदनुष्ठायिभिः 'सुजोसिअं'त्ति सुष्ठु क्षिप्तं

धूननार्हत्वात् 'धूतं' कर्मेति ॥ २९ ॥ अपि च—स्निह्यत इति स्निहः न स्निहः अस्निहः—सर्वत्र ममत्वरहित इत्यर्थः, यदिवा—परीषहोपसर्गैर्निहन्यते इति निहः न निहोऽनिहः—उपसर्गैरपराजित इत्यर्थः, पाठान्तरं वा 'अणहे'ति निष्पापमस्तीत्यनघो, निरवद्यानुष्ठायीत्यर्थः, सह हितेन वर्तत इति सहितः सहितो—युक्तो वा ज्ञानादिभिः, स्वहितः—आत्महितो वा सदनुष्ठानप्रवृत्तेः, तामेव दर्शयति—सुष्ठु 'संवृतः' इन्द्रियनोइन्द्रियैर्विस्रोतसिकारहित इत्यर्थः, तथा धर्मः—श्रुतचारित्राख्यः तेनार्थः—प्रयोजनं स एव वाऽर्थः तस्यैव सद्भिरर्थ्यमानत्वात् धर्मार्थः स यस्यास्तीति स धर्मार्थी तथा उपधानं—तपस्तत्र वीर्यवान् स एवम्भूतो 'विहरेत्' संयमानुष्ठानं कुर्यात् 'समाहितेन्द्रियः' संयतेन्द्रियः, कृत एवं ?—यत आत्महितं दुःखेनासुमता संसारे पर्यटता अकृतधर्मानुष्ठानेन 'लभ्यते' अवाप्यत इति, तथाहि "न पुनरिदमतिदुर्लभमगाधसंसारजलधिविभ्रष्टम्। मानुष्यं खद्योतकतडिल्लताविलसितप्रतिमम् ॥ १ ॥" तथाहि—युगसमिलादिदृष्टान्तनीत्या मनुष्यभव एव तावत् दुर्लभः, तत्राप्यार्यक्षेत्रादिकं दुरापमिति, अत आत्महितं दुःखेनावाप्यत इति मन्तव्यम्, अपिच—भूतेषु जङ्गमत्वं तस्मिन् पञ्चेन्द्रियत्वमुत्कृष्टम्। तस्मादपि मानुष्यं मानुष्येऽप्यार्यदेशश्च ॥ १ ॥ देशे कुलं प्रधानं कुले प्रधाने च जातिरुत्कृष्टा। जातौ रूपसमृद्धी रूपे च बलं विशिष्टतमम् ॥ २ ॥ भवति बले चायुष्कं प्रकृष्टमायुष्कतोऽपि विज्ञानम्। विज्ञाने सम्यक्त्वं सम्यक्त्वे शीलसंप्राप्तिः, ॥ ३ ॥ एतत्पूर्वश्चायं समासतो मोक्षसाधनोपायः। तत्र च बहु सम्प्राप्तं भवद्भिरलं च संप्राप्यम् ॥ ४ ॥ तत्कुरुतोद्यममधुना मदुक्तमार्गे समाधिमाधाय। त्यक्त्वा सङ्गमनार्यं कार्यं सद्भिः सदा श्रेयः ॥ ५ ॥ इति ॥ ३० ॥ एतच्च प्राणिभिर्न कदाचिदवाप्तपूर्वमित्येतदर्शयितुमाह—

१ स तदर्थः प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ण हि णूण पुरा अणुस्सुतं, अदुवा तं तह णो समुट्ठियं ।
मुणिणा सामाइआहितं, नाएणं जगसव्वदंसिणा ॥ ३१ ॥

एवं मत्ता महंतरं, धम्ममिणं सहिया बहू जणा ।
गुरुणो छंदाणुवत्तगा, विरया तिन्न महोघमाहितं ॥३२॥ तिबेमि ॥ (गाथाग्रम् १५२)

यदेतत् 'मुनिना' जगतः सर्वभावदर्शिना ज्ञातपुत्रीयेण सामायिकादि 'आहितम्' आख्यातं, तत् 'नूनं' निश्चितं 'न हि' नैव 'पुरा' पूर्वं जन्तुभिः 'अनुश्रुतं' श्रवणपथमायातं अथवा श्रुतमपि तत्सामायिकादि यथा अवस्थितं तथा नानुष्ठितं, पाठान्तरं वा 'अवितहं'न्ति अवितथं यथावन्नानुष्ठितमतः कारणादसुमतामात्महितं सुदुर्लभमिति ॥३१॥ पुनरप्युपदेशान्तरमधिकृत्याह—'एवम्' उक्तरीत्याऽऽत्महितं सुदुर्लभं 'मत्वा' ज्ञात्वा धर्माणां च महदन्तरं धर्मविशेषं कर्मणो वा विवरं ज्ञात्वा, यदिवा 'महंतरं'ति मनुष्यार्यक्षेत्रादिकमवसरं सदनुष्ठानस्य ज्ञात्वा 'एनं' जैनं 'धर्मं' श्रुतचारित्रात्मकं, सह हितेन वर्तन्त इति सहिता—ज्ञानादियुक्ता बहवो जना लघुकर्माणः समाश्रिताः सन्तो 'गुरोः' आचार्यादेस्तीर्थङ्करस्य वा 'छन्दानुवर्त्तकाः' तदुक्तमार्गानु-

१ पा० अदुवाऽवितहं णो अणुट्ठियं ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ ७० ॥

२ वैतालीयाध्य० उद्देशः ३

ष्ठायिनो 'विरताः' पापेभ्यः कर्मभ्यः सन्तस्तीर्णा 'महौघम्' अपारं संसारसागरमेवमाख्यातं मया भवतामपरैश्च तीर्थकृद्भिरन्यैर्नाम्, इतिशब्दः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ ३२ ॥ वैतालीयस्य द्वितीयोद्देशकः समाप्तः ॥ २ ॥

॥ अथ वैतालीयाध्ययनस्य तृतीयोद्देशकस्य प्रारम्भः ॥

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीयः समारभ्यते अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशकान्ते विरता इत्युक्तं, तेषां च कदाचित्परीषहाः समुदीर्येरन्ततस्तत्सहनं विधेयमिति, उद्देशार्थाधिकारोऽपि निर्युक्तिकारेणाभिहितः यथाऽज्ञानोपचितस्य कर्मणोऽपचयो भवतीति, स च परीषहसहनादेवेत्यतः परीषहाः सोढव्या इत्यनेन संबन्धेनाऽऽयातस्यास्योद्देशकस्याऽऽदि सूत्रं—

संवुडकम्मस्स भिक्खुणो, जं दुक्खं पुट्ठं अबोहिए । तं संजमओऽवचिज्जई, मरणं हेच्च वयंति पंडिया ॥१॥
जे विन्नवणाहिऽजोसिया, संतिन्नेहिं समं वियाहिया । तम्हा उड्ढंति पासहा, अदक्खु कामाइ रोगवं ॥२॥

॥ ७० ॥

१ उड्ढं तिरियं अहे तहा इति पा० ।

संवृतानि—निरुद्धानि कर्माणि—अनुष्ठानानि सम्यगुपयोगरूपाणि वा मिथ्यादर्शनाविरतिप्रमादकषाययोगरूपाणि वा यस्य 'भिक्षोः' साधोः स तथा तस्य यत् 'दुःखम्' असद्वेद्यं तदुपादानभूतं वाऽष्टप्रकारं कर्म 'स्पृष्ट'मिति बद्धस्पृष्टनिकाचितमित्यर्थः, तच्चात्र 'अबोधिना' अज्ञानेनोपचितं सत् 'संयमतो' मौनीन्द्रोक्तात् सप्तदशरूपादनुष्ठानाद् 'अपचीयते' प्रतिक्षणं क्षयमुपयाति, एतदुक्तं भवति—यथा तटाकोदरसंस्थितमुदकं निरुद्धापरप्रवेशद्वारं सदादित्यकरसम्पर्कात् प्रत्यहमपचीयते, एवं संवृताश्रवद्वारस्य भिक्षोरिन्द्रिययोगकषायं प्रति संलीनतया संवृतात्मनः सतः संयमानुष्ठानेन चानेकभवाज्ञानोपचितं कर्म क्षीयते, ये च संवृतात्मानः सदनुष्ठायिनश्च ते 'हित्वा' त्यक्त्वा 'मरणं' मरणस्वभावमुपलक्षणत्वात् जातिजरामरणशोकादिकं त्यक्त्वा मोक्षं व्रजन्ति 'पण्डिताः' सदसद्विवेकिनः, यदिवा—'पण्डिताः' सर्वज्ञा एवं वदन्ति यत् प्रागुक्तमिति ॥ १ ॥ येऽपिच तेनैव भवेन न मोक्षमाप्नुवन्ति तानधिकृत्याह—'ये' महासत्त्वाः कामार्थिभिर्विज्ञाप्यन्ते यास्तदर्थिन्यो वा कामिनं विज्ञापयन्ति ता विज्ञापनाः—स्त्रियस्ताभिः 'अजुष्टा' असेविताः क्षयं वा—अवसायलक्षणमतीतास्ते 'सन्तीर्णैः' मुक्तैः समं व्याख्याताः, अतीर्णा अपि सन्तो यतस्ते निष्किञ्चनतया शब्दादिषु विषयेष्वप्रतिबद्धाः संसारोदन्वतस्तटोपान्तवर्तिनो भवन्ति, तस्माद् 'ऊर्ध्वमिति' मोक्षं योषित्परित्यागाद्वोर्ध्वं यद्भवति तत्पश्यत यूयं । ये च कामान् 'रोगवद्' व्याधिकल्पान् 'अद्राक्षुः' दृष्टवन्तस्ते संतीर्णसमा व्याख्याताः, तथा चोक्तम्—"पुष्फफलाणं च रसं सुराइ मंसस्स महिलियाणं च । जाणंता जे विरया ते दुक्करकारए

१ क्षोणोऽवसानम् । २ स्तटान्तर्व० प्र० । ३ पुष्पफलानां च रसं सुरायां मांसस्य महेलानां च । जानन्तो ये विरतास्तान् दुष्करकारकान् वन्दे ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वंदे ॥ १ ॥" तृतीयपादस्य पाठान्तरं वा 'उड्ढं तिरियं अहे तहा' ऊर्ध्वमिति—सौधर्मादिषु, तिरियमिति—तिर्यक्लोके, अध इति—भवनपत्यादौ, ये कामास्तान् रोगवदद्राक्षुर्ये ते तीर्णकल्पा व्याख्याता इति ॥ २ ॥ पुनरप्युपदेशान्तरमधिकृत्याह—

अग्गं वणिएहिं आहियं, धारंती राईणिया इहं । एवं परमा महव्वया, अक्खाया उ सराइभोयणा ॥३॥

जे इह सायाणुगा नरा, अज्झोववन्नाकामेहिं मुच्छिया ।
किवणेण समं पगब्भिया, न वि जाणंति समाहिमाहितं ॥ ४ ॥

'अग्रं' वर्यं प्रधानं रत्नवस्त्राभरणादिकं तद्यथा वणिग्भिर्देशान्तराद् 'आहितं' द्रौकितं राजानस्तत्कल्पा ईश्वरादयः 'इह' अस्मिन्मनुष्यलोके 'धारयन्ति' बिभ्रति, एवमेतान्यपि महाव्रतानि रत्नकल्पानि आचार्यैः 'आख्यातानि' प्रतिपादितानि नियोजितानि 'सरात्रिभोजनानि' रात्रिभोजनविरमणषष्ठानि साधवो बिभ्रति, तुशब्दः पूर्वरत्नेभ्यो महाव्रतरत्नानां विशेषापादक इति, इदमुक्तं भवति—यथा प्रधानरत्नानां राजान एव भाजनमेवं महाव्रततरत्नानामपि महासत्त्वा एव साधवो भाजनं नान्ये इति ॥ ३ ॥ किञ्च—ये नरा लघुप्रकृतयः 'इह' अस्मिन् मनुष्यलोके सातं—सुखमनुगच्छन्तीति सातानुगाः—सुखशीला ऐहिकामुष्मिकापायभीरवः समृद्धिरससातागौरवेषु 'अध्युपपन्ना' गृद्धाः तथा 'कामेषु' इच्छामदनरूपेषु 'मूर्च्छिता' कामोत्कटतृष्णाः कृपणो—दीनो वराकक इन्द्रियैः पराजितस्तेन समाः तद्वत्कामासेवने 'प्रगल्भिता' धृष्टतां गताः, यदिवा—किमनेन

श्लोकेन दोषेणासम्यक्प्रत्युपेक्षणादिरूपेणासत्संयमस्य विराधनं भविष्यत्येवं प्रमादवन्तः कर्तव्येष्ववसीदन्तः समस्तमपि संयमं पटवन्मणिकुट्टिमवद्वा मलिनीकुर्वन्ति, एवम्भूताश्च ते 'समाधिं' धर्मध्यानादिकम् 'आख्यातं' कथितमपि न जानन्तीति ॥४॥ पुनरप्युपदेशान्तरमधिकृत्याह—

वाहेण जहा व विच्छए, अबले होइ गवं पचोइए । से अंतसो अप्पथामए, नाइवहइ अबले विसीयति ५
एवं कामेसणं विऊ, अज्ज सुए पयहेज्ज संथवं । कामी कामे ण कामए, लद्धे वावि अलद्ध कण्हुई ॥ ६ ॥

'व्याधेन' लुब्धकेन 'जहा व'त्ति यथा 'गव'न्ति मृगादिपशुर्विविधम्—अनेकप्रकारेण कूटपाशादिना क्षतः—परवशीकृतः श्रमं वा ग्राहितः प्रणोदितोऽप्यबलो भवति, जातश्रमत्वात् गन्तुमसमर्थः, यदिवा—वाहयतीति वाहः—शाकटिकस्तेन यथावदवहन् गौर्विविधं प्रतोदादिना क्षतः—प्रचोदितोऽप्यबलो—विषमपथादौ गन्तुमसमर्थो भवति, 'स चान्तशः' मरणान्तमपि यावदल्पसामर्थ्यो नातीव वोढुं शक्नोति, एवम्भूतश्च 'अबलो' भारं वोढुमसमर्थः तत्रैव पङ्कादौ विषीदतीति ॥५॥ दार्ष्टान्तिकमाह—'एवम्' अनन्तरोक्तया नीत्या कामानां—शब्दादीनां विषयाणां या गवेषणा—प्रार्थना तस्यां कर्त्तव्यायां 'विद्वान्' निपुणः कामप्रार्थनासक्तः शब्दादिपङ्के मग्नः स चैवम्भूतोऽद्य श्वो वा 'संस्तवं' परिचयं कामसम्बन्धं प्रजह्यात् किलेति, एवमध्यवसाय्येव सर्वदाऽवतिष्ठते, नच तान् कामान् अबलो बलीवर्दवत् विषमं मार्गं त्यक्तुमलं, किञ्च—न चैहिकामुष्मिकापायदर्शितया कामी

१ प्यचालो प्र० । २ वाऽन्वेषणा प्र० । ३ बालो । ४ जबल० प्र० । ५ नैवै० प्र० ।

भूत्वोपनतानपि 'कामान्' शब्दादिविषयान् वैरस्वामिजम्बूनामादिवद्वा 'कामयेत' अभिलषेदिति, तथा क्षुल्लककुमारवत् कुतश्चिन्निमित्तात् 'सुट्ठुगाइय'मित्यादिना प्रतिबुद्धो 'लब्धानपि' प्राप्तानपि कामान् अलब्धसमान् मन्यमानो महासत्त्वतया तच्चिस्पृहो भवेदिति ॥ ६ ॥ किमिति कामपरित्यागो विधेय इत्याशङ्क्याह—

मा पच्छ असाधुता भवे, अच्चेही अणुसास अप्पगं । अहियं च असाहु सोयती, से थणती परिदेवती बहुं ७
इह जीवियमेव पासहा, तरुण एवा(णे वा) ससयस्स तुट्टतीइत्तरवासे य बुज्झह, गिद्धनरा कामेसु मुच्छिया

मा पश्चात्—मरणकाले भवान्तरे वा कामानुषङ्गाद् 'असाधुता' कुगतिगमनादिकरूपा 'भवेत्' प्रादुर्यादिति, अतो विषयासङ्गादात्मानम् 'अत्येहि' त्याजय, तथा आत्मानं च 'अनुशाधि' आत्मनोऽनुशास्तिं कुरु, यथा हे जीव! यो हि 'असाधुः' असाधुकर्मकारी हिंसानृतस्तेयादौ प्रवृत्तः सन् दुर्गतौ पतितः अधिकम्—अत्यर्थमेवं शोचति, स च परमाधार्मिकैः कदर्थ्यमानस्तिर्यक्षु वा क्षुधादिवेदनाग्रस्तोऽत्यर्थं 'स्तनति' सशब्दं निःश्वसिति, तथा 'परिदेवते' विलपत्याक्रन्दति सुबहिति—हा मातर्म्रियत इति त्राता नैवास्ति साम्प्रतं कश्चित् । किं शरणं मे स्यादिह दुष्कृतचरितस्य पापस्य ? ॥१॥ इत्येवमादीनि दुःखान्यसाधुकारिणः प्राप्नुवन्तीत्यतो विषयानुषङ्गो न विधेय इत्येवमात्मनोऽनुशासनं कुर्विति सम्बन्धनीयं ॥ ७ ॥ किञ्च—'इह' अस्मिन् संसारे आस्तां तावदन्यज्जीवितमेव सकलसुखास्पदमनित्यताऽऽघातं आधीचिमरणेन प्रतिक्षणं विशरारुस्वभावं, तथा—सर्वायुःक्षय एव वा

१ दुब्बल वा० चू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तरुण एव' युवैव वर्षशतायुरप्युपक्रमतोऽध्यवसाननिमित्तादिरूपादायुषः 'त्रुट्यति' प्रच्यवते, यदिवा—साम्प्रतं सुबहप्यायुर्वर्षशतं तच्च तस्य तदन्ते त्रुट्यति, तच्च सागरोपमापेक्षया कतिपयनिमेषप्रायत्वात् इत्वरवासकल्पं वर्तते—स्तोकनिवासकल्पमित्येवं बुध्यध्वं यूयं, तथैवम्भूतेऽप्यायुषि 'नराः' पुरुषा लघुप्रकृतयः 'कामेषु' शब्दादिषु विषयेषु 'गृद्धा' अध्युपपन्ना मूर्च्छिताः तत्रैवाऽऽसक्तचेतसो नरकादियातनास्थानमाप्नुवन्तीति शेषः ॥ ८ ॥ अपिच

जे इह आरंभनिस्सिया, आतदंडा(ड)एगंतलूसगा। गंता ते पावलोगयं, चिररायं आसुरियं दिसं ॥ ९ ॥
ण य संखयमाहु जीवितं, तहवि य बालजणो पगब्भई। पच्चुप्पन्नेण कारियं,को दट्ठुं परलोयमागते ?॥१०॥

ये केचन महामोहाकुलितचेतसः 'इह' अस्मिन्मनुष्यलोके 'आरम्भे' हिंसादिके सावद्यानुष्ठानरूपे निश्रयेन श्रिताः—संबद्धा अध्युपपन्नास्ते आत्मानं दण्डयन्तीत्यात्मदण्डकाः, तथैकान्तेनैव जन्तूनां लूषका—हिंसकाः सदनुष्ठानस्य वा ध्वंसकाः, ते एवम्भूता 'गन्तारो' यास्यन्ति 'पापं लोकं' पापकर्मकारिणां यो लोको नरकादिः 'चिररात्रम्' इति प्रभूतं कालं तन्निवासिनो भवन्ति, तथा बालतपश्चरणादिना यद्यपि तथाविधदेवत्वापत्तिस्तथाऽप्यसुराणामियमासुरी तां दिशं यान्ति, अपरप्रेष्याः किल्बिषिका देवाधमा भवन्तीत्यर्थः ॥ ९ ॥ किञ्च—'न च' नैव त्रुटितं जीवितमायुः 'संस्कर्तुं' संधातुं शक्यते, एवमाहुः सर्वज्ञाः, तथाहि—दंडकलियं करिन्ता वच्चंति हु राइओ य दिवसा य। आउं संवेल्लंता गया य ण पुणो नियत्तंति ॥१॥[1]" 'तथाऽपि' एवमपि

[1] दण्डकलितं कुर्वन्त्यो व्रजन्ति रात्रयश्च दिवसाश्च । आयुः संवेलयन्त्यः गताश्च पुनर्न निवर्तन्ते ॥ १ ॥

सूत्रकृ. १२

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तिपुतं

॥ ७२ ॥

व्यवस्थिते जीवानामायुषि 'बालजनः' अज्ञो लोको निर्विवेकतया असदनुष्ठाने प्रवृत्तिं कुर्वन् 'प्रगल्भते' धृष्टतां याति, असदनुष्ठानेनापि न लज्जत इत्यर्थः, स चाज्ञो जनः पापानि कर्माणि कुर्वन् परेण चोदितो धृष्टतया अलीकपाण्डित्याभिमानेनेदमुत्तरमाह—'प्रत्युत्पन्नेन' वर्तमानकालभाविना परमार्थसता अतीतानागतयोर्विनष्टानुत्पन्नत्वेनाविद्यमानत्वात् 'कार्यं' प्रयोजनं, प्रेक्षापूर्वकारिभिस्तदेव प्रयोजनसाधकत्वादादीयते, एवं च सतीहलोक एव विद्यते न परलोक इति दर्शयति—कः परलोकं द्रष्टुमायातः, तथा चोचुः—"पिब खाद च साधु शोभने!, यदतीतं वरगात्रि! तन्न ते। नहि भीरु! गतं निवर्तते, समुदयमात्रमिदं कलेवरम् ॥ १ ॥" तथा—"एतावानेव पुरुषो, यावानिन्द्रियगोचरः। भद्रे! वृकपदं पश्य, यद्वदन्त्यबहुश्रुताः ॥ २ ॥" इति ॥ ॥ १० ॥ एवमैहिकसुखाभिलाषिणा परलोकं निह्नवानेन नास्तिकेन अभिहिते सत्युत्तरप्रदानायाह—

२ वैतालीयाध्य० उद्देशः ३

अदक्खुव दक्खुवाहियं,(तं)सद्दहसु अदक्खुदंसणा!। हंदि हु सुनिरुद्धदंसणे,मोहणिज्जेण कडेण कम्मुणा
दुक्खी मोहे पुणो पुणो, निव्विंदेज्ज सिलोगपूयणं। एवं सहितेऽहिपासए, आयतुलं पाणेहिं संजए ॥१२॥

पश्यतीति पश्यो न पश्योऽपश्यः—अन्धस्तेन तुल्यः कार्याकार्यविवेचित्वादन्धवत्तस्याऽऽमन्त्रणं हेऽपश्यवद्—अन्धसदृश! प्रत्यक्षस्यैवैकस्याभ्युपगमेन कार्याकार्यानभिज्ञ पश्येन—सर्वज्ञेन व्याहृतम्—उक्तं सर्वज्ञागमं 'श्रद्धस्व' प्रमाणीकुरु, प्रत्यक्षस्यैवैकस्याभ्युपगमेन समस्तव्यवहारविलोपेन हन्त हतोऽसि, पितृनिबन्धनस्यापि व्यवहारस्यासिद्धेरिति, तथा अपश्यकस्य—असर्वज्ञ-

॥ ७२ ॥

[1] कः परलोकं दर्शयति, कः पर० प्र० २ वदन्ति पा०

स्याभ्युपगतं दर्शनं येनासावपश्यकदर्शनस्तस्याऽऽमन्त्रणं हेऽपश्यकदर्शन! स्वतोऽर्वाग्दर्शी भवांस्तथाविधदर्शनप्रमाणश्च सन् कार्याकार्यविवेचितयाऽन्धवदभविष्यत् यदि सर्वज्ञाभ्युपगमं नाकरिष्यत्, यदिवा अदक्षो वा अनिपुणो वा दक्षो वा—निपुणो वा यादृशस्तादृशो वाऽचक्षुर्दर्शनमस्यासावचक्षुर्दर्शनः—केवलदर्शनः—सर्वज्ञस्तस्याद्यदव्याप्यते हितं तत् श्रद्धस्व, इदमुक्तं भवति—अनिपुणेन निपुणेन वा सर्वज्ञदर्शनोक्तं हितं श्रद्धातव्यं, यदिवा—हे 'अदृष्ट' हे अर्वाग्दर्शन! द्रष्टा—अतीतानागतव्यवहितसूक्ष्मपदार्थदर्शिना यद्व्याहृतम्—अभिहितमागमे तत् श्रद्धस्व, हे अदृष्टदर्शन अदक्षदर्शन! इति वा—असर्वज्ञोक्तशासनानुयायिन्! तमात्मीयमाग्रहं परित्यज्य सर्वज्ञोक्ते मार्गे श्रद्धानं कुर्वीति तात्पर्यार्थः, किमिति सर्वज्ञोक्ते मार्गे श्रद्धानमसुमान्न करोति? येनैवमुपदिश्यते, तन्निमित्तमाह—'हंदी'त्येवं गृहाण, हुशब्दो वाक्यालङ्कारे सुष्ठु—अतिशयेन निरुद्धम्—आवृतं दर्शनं—सम्यग् अवबोधरूपं यस्य स तथा, केनेत्याह—मोहयतीति मोहनीयं—मिथ्यादर्शनादि ज्ञानावरणीयादिकं वा तेन स्वकृतेन कर्मणा निरुद्धदर्शनः प्राणी सर्वज्ञोक्तं मार्गं न श्रद्धत्ते अतस्तन्मार्गश्रद्धानं प्रति चोद्यते इति ॥ ११ ॥ पुनरप्युपदेशान्तरमाह—दुःखम्—असातवेदनीयमुदयप्राप्तं तत्कारणं वा दुःखयतीति दुःखं तदस्यास्तीति दुःखी सन् प्राणी पौनःपुन्येन मोहं याति—सदसद्विवेकविकलो भवति, इदमुक्तं भवति—असातोदयात् दुःखमनुभवन्नार्तो मूढस्तत्तत्करोति येन पुनः पुनः दुःखी संसारसागरमनन्तमभ्येति, तदेवम्भूतं मोहं परित्यज्य सम्यगुत्थानेनोत्थाय 'निर्विंद्येत' जुगुप्सयेत् परिहरेदात्मश्लाघां स्तुतिरूपां तथा 'पूजनं' वस्त्रादिलाभरूपं परिहरेत्, 'एवम्' अनन्तरोक्तया नीत्या प्रवर्त्तमानः सह हितेन वर्तत इति सहितो ज्ञानादियुक्तो वा संयतः प्रव्रजितोऽपरप्राणिभिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखार्थिभिः 'आत्मतुलां' आत्मतुल्यतां दुःखाप्रियत्वसुखप्रियत्वरूपामधिकं पश्येत्, आत्मतुल्यान् सर्वानपि प्राणिनः पालयेदिति ॥ १२ ॥ किञ्च—

गारंपिअ आवसे नरे,अणुपुव्वं पाणेहिं संजए । समता सव्वत्थ सुव्वते, देवाणं गच्छे सलोगयं ॥ १३ ॥
सोच्चा भगवाणुसासणं,सच्चे तत्थ करेज्जुवक्कमं । सव्वत्थ विणीयमच्छरे, उञ्छं भिक्खु विसुद्धमाहरे ॥१४॥

'अगारमपि' गृहमध्यावसन्—गृहवासमपि कुर्वन् 'नरो' मनुष्यः 'आनुपूर्व्या'मिति आनुपूर्व्या—श्रवणधर्मप्रतिपत्त्यादिलक्षणया प्राणिषु यथाशक्त्या सम्यक् यतः संयतः तदुपमर्दान्निवृत्तः, किमिति ? यतः 'समता' समभावः आत्मपरतुल्यता 'सर्वत्र' यतौ गृहस्थे च यदिवैकेन्द्रियादौ 'भूयते' अभिधीयते आर्हते प्रवचने, तां च कुर्वन् स गृहस्थोऽपि सुव्रतः सन् 'देवानां' पुरन्दरादीनां 'लोकं' स्थानं गच्छेत्, किं पुनर्यो महासत्त्वतया पञ्चमहाव्रतधारी यतिरिति ॥ १३ ॥ अपिच—ज्ञानैश्वर्यादिगुणसमन्वितस्य भगवतः—सर्वज्ञस्य शासनम्—आज्ञामागमं वा 'श्रुत्वा' अधिगम्य 'तत्र' तस्मिन्नागमे तदुक्ते वा संयमे सद्यो हिते सत्ये लघुकर्मा तदुपक्रमं—तत्प्राप्त्युपायं कुर्यात्, किम्भूतः ?—सर्वत्रापनीतो मत्सरो येन स तथा सोऽस्कद्विष्टः क्षेत्रेव(वा)स्तूपधिशरीरनिष्पिपासः, तथा 'उंछं'ति मैक्ष्यं विशुद्धं—द्विचत्वारिंशद्दोषरहितमाहारं गृह्णीयादभ्यवहरेद्वेति ॥ १४ ॥ किञ्च—

१ श्रमण० प्र० २ ० वल्लोप० प्र०

सव्वं नच्चा अहिट्ठए, धम्मट्ठी उवहाणवीरिए । गुत्ते जुत्ते सदाजए, आयपरे परमायतट्ठिते ॥ १५ ॥
वित्तं पसवो य नाइओ, तं बाले सरणं ति मन्नइ । एते मम तेसुवी अहं, नो ताणं सरणं न विज्जई ॥ १६ ॥

'सर्वम्' एतद्धेयमुपादेयं च ज्ञात्वा सर्वज्ञोक्तं मार्गं सर्वसंवररूपम् 'अधितिष्ठेत्' आश्रयेत्, धर्मेणार्थो धर्म एव वार्थः परमार्थेनान्यस्यानर्थरूपत्वात् धर्मार्थः स विद्यते यस्यासौ धर्मार्थी—धर्मप्रयोजनवान्, उपधानं—तपस्तत्र वीर्यं यस्य स तथा अनिगूहितबलवीर्य इत्यर्थः, तथा मनोवाक्कायगुप्तः, सुप्रणिहितयोग इत्यर्थः, तथा युक्तो ज्ञानादिभिः 'सदा' सर्वकालं यतेताऽऽत्मनि परस्मिंश्च । किंविशिष्टः सन् ? अत आह—परम—उत्कृष्ट आयतो—दीर्घः सर्वकालभवनात् मोक्षस्तेनार्थिकः—तदभिलाषी पूर्वोक्तविशेषणविशिष्टो भवेदिति ॥ १५ ॥ पुनरप्युपदेशान्तरमाह—'वित्तं' धनधान्यहिरण्यादि 'पशवः' करितुरगगोमहिष्यादयो 'ज्ञातयः' स्वजना मातापित्रपुत्रकलत्रादयः तदेतद्वित्तादिकं 'बालः' अज्ञः शरणं मन्यते, तदेव दर्शयति—ममैते वित्तपशुज्ञातयः परिभोगे उपयोक्ष्यन्ते, तेषु चार्जनपालनसंरक्षणादिना शरीरोपद्रवनिराकरणद्वारेणाहं भवामीत्येवं बालो मन्यते, न पुनर्जानीते यदर्थं धनमिच्छन्ति तच्छरीरमशाश्वतमिति, अपिच—"रिद्धी सहावतरला रोगजराभंगुरं हयसरीरं। दोण्हंपि गमणसीलाण किचिरं होज्ज संबंधो ? ॥ १ ॥" तथा "मातापितृसहस्राणि, पुत्रदारशतानि च। प्रतिजन्मनि वर्तन्ते, कस्य माता पि-

१ ऋद्धिः स्वभावतरला रोगजराभङ्गुरं हतकं शरीरम् । द्वयोरपि गमनशीलयोः कियच्चिरं भवेत्संबन्धः ? ॥ १ ॥

ताऽपि वा ? ॥ १ ॥" एतदेवाह—'नो' नैव वित्तादिकं संसारे कथमपि त्राणं भवति नरकादौ पततो, नापि रोगादिनोपद्रुतस्य क्वचिच्छरणं विद्यत इति ॥ १६ ॥ एतदेवाह—

अदुभागमितंमि वा दुहे,अहवा उक्कमिते भवंतिए । एगस्स गती य आगती,विदुमंता सरणं ण मन्नई॥१७॥
सव्वे सयकम्मकप्पिया,अवियत्तेण दुहेण पाणिणो । हिंडंति भयाउला सढा, जाइजरामरणेहिऽभिद्दुता १८

पूर्वोपात्तासातवेदनीयोदयेनाभ्यागते दुःखे सत्येकाक्येव दुःखमनुभवति, न ज्ञातिवर्गेण वित्तेन वा किञ्चित्क्रियते, तथाच—"सयणस्सवि मज्झगओ रोगाभिहतो किलिस्सइ इहेगो । सयणोचिय से रोगं, न विरंचइ नेव नासेइ ॥ १ ॥" अथवा उपक्रमकारणैरुपक्रान्ते स्वायुषि स्थितिक्षयेण वा भवान्तरे भवान्तिके वा—मरणे समुपस्थिते सति एकस्यैवासुमतो गतिरागतिश्च भवति, 'विद्वान्' विवेकी यथावस्थितसंसारस्वभावस्य वेत्ता ईषदपि तावत् शरणं न मन्यते, कुतः ? सर्वात्मना त्राणमिति, तथाहि—"एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते । तस्मादाकालिकहितमेकेनैवात्मनः कार्यम् ॥ १ ॥ एक्को करेइ कम्मं फलमवि तस्सिक्कओ समणुहवइ । एक्को जायइ मरइ य परलोयं एक्कओ जाइ ॥ २ ॥" ॥ १७ ॥ अन्यच्च—सर्वेऽपि संसारोदरविवरवर्तिनः प्राणिनः संसारे पर्यटन्तः स्वकृतेन ज्ञानावरणीयादिना कर्मणा कल्पिताः—सूक्ष्मबादरपर्याप्तकापर्याप्तकैकेन्द्रियादिभेदेन

१ स्वजनस्यापि मध्यगतो रोगाभिहतः क्लिश्यति इहैकः । स्वजनोऽपि च तस्य रोगं न विरेचयति (हसयति) नैव नाशयति ॥ १ ॥ २ एकः करोति कर्म फलमपि तस्यैकः समनुभवति । एको जायते म्रियते च परलोकमेको याति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवस्थिताः, तथा तेनैव कर्मणैकेन्द्रियाद्यवस्थायाम् 'अव्यक्तेन' अपरिस्फुटेन शिरःशूलाद्यलक्षितस्वभावेनोपलक्षणार्थत्वात् प्रव्यक्तेन च 'दुःखेन' असातावेदनीयस्वभावेन समन्विताः प्राणिनः पर्यटन्ति–अरघट्टघटीयन्त्रन्यायेन तास्वेव योनिषु भयाकुलाः शटकर्मकारित्वात् शटा भ्रमन्ति जातिजरामरणैरभिद्रुता—गर्भाधानादिभिर्दुःखैः पीडिता इति ॥ १८ ॥ किञ्च—

इणमेव खणं वियाणिया,णो सुलभं बोहिं च आहितं। एवं सहिएऽहिपासए,आह जिणे इणमेव सेसगा१९
अभविंसु पुरावि भिक्खुवो,आएसावि भवंति सुव्वता। एयाइं गुणाइं आहु ते,कासवस्स अणुधम्मचारिणो॥

इदमः प्रत्यक्षासन्नत्वाच्चित्वात् इमं—द्रव्यक्षेत्रकालभावलक्षणं 'क्षणम्' अवसरं ज्ञात्वा तदुचितं विधेयं, तथाहि—द्रव्यं जङ्गमत्वपञ्चेन्द्रियत्वसुकुलोत्पत्तिमानुष्यलक्षणं क्षेत्रमप्यार्यदेशार्धषड्विंशतिजनपदलक्षणं कालोऽप्यवसर्पिणीचतुर्थारकादिः धर्मप्रतिपत्तियोग्यलक्षणः भावश्च धर्मश्रवणतच्छ्रद्धानचारित्रावरणकर्मक्षयोपशमाहितविरतिप्रतिपत्त्युत्साहलक्षणः, तदेवंविधं क्षणम्–अवसरं परिज्ञाय तथा 'बोधिं च' सम्यग्दर्शनावाप्तिलक्षणां नो सुलभामिति, एवमाख्यातिमवगम्य तदवाप्तौ तदनुरूपमेव कुर्यादिति शेषः, अकृतधर्माणां च पुनर्दुर्लभा बोधिः, तथाहि—"लद्धेहिंयं च बोहिं अकरेंतो अणागयं च पत्थेंतो। अन्नं दाइं बोहिं लब्भिसि कयरेण मोल्लेणं ? ॥ १ ॥" तदेवमुत्कृष्टतोऽपार्द्धपुद्गलपरावर्तप्रमाणकालेन पुनः सुदुर्लभा बोधिरित्येवं सहितो ज्ञानादिभिरधिपश्येत्—बोधिसुदुर्लभत्वं पर्यालोचयेत्, पाठान्तरं वा 'अहियासए'त्ति परीषहानुदीर्णान् सम्यगधिसहेत। एतचाऽऽह

१ °एयाता० प्र० २ लब्धां च बोधिमकुर्वन् अनागतं च प्रार्थयमानः। अन्यां (तदा) बोधिं लप्स्यसे कतरेण मूल्येन? ॥ १ ॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ७६ ॥

'जिनो'रागद्वेषजेता नाभेयोऽष्टापदे स्वान् सुतानुद्दिश्य, तथाऽन्येऽपि इदमेव शेषका जिना अभिहितवन्त इति॥१९॥ एतदाह—
हे भिक्षवः–साधवः!, सर्वज्ञः स्वशिष्यानेवमामन्त्रयति, येऽभूवन्–अतिक्रान्ता 'जिनाः' सर्वज्ञाः 'आएसावि'त्ति आगमिष्याश्च ये भविष्यन्ति, तान् विजिनष्टि—'सुव्रताः' शोभनव्रताः, अनेनेदमुक्तं भवति–तेषामपि जिनत्वं सुव्रतत्वादेवायातमिति, ते सर्वेऽप्येतान् अनन्तरोदितान् गुणान् 'आहुः' अभिहितवन्तः, नात्र सर्वज्ञानां कश्चिन्मतभेद इत्युक्तं भवति, ते च 'काश्यपस्य' ऋषभस्वामिनो वर्द्धमानस्वामिनो वा सर्वेऽप्यनुचीर्णधर्मचारिण इति, अनेन च सम्यग्दर्शनज्ञानचारित्रात्मक एक एव मोक्षमार्ग इत्यावेदितं भवतीति ॥ २० ॥ अभिहितांश्च गुणानुद्देशत आह—

२ वैतालीयाध्य० उद्देशः ३

तिविहेणवि पाण मा हणे,आयहिते अणियाण संवुडे। एवं सिद्धा अणंतसो,संपइ जे अ अणागयावरे॥२१॥
एवं से उदाहु अणुत्तरनाणी अणुत्तरदंसी अणुत्तरनाणदंसणधरे। अरहा नायपुत्ते भगवं वेसालिए वियाहिए॥२२॥ त्तिबेमि॥ इति श्रीवेयालियं बितीयमज्झयणं समत्तं ॥ (गाथाग्रं. १७४)।

॥ ७६ ॥

'त्रिविधेन' मनसा वाचा कायेन यदित्वा–कृतकारितानुमतिभिर्वा 'प्राणिनो' दशविधप्राणभाजो मा हन्यादिति, प्रथममिदं महाव्रतम्, अस्य चोपलक्षणार्थत्वात् एवं शेषाण्यपि द्रष्टव्यानि, तथाऽऽत्मने हित आत्महितः, तथा नास्य स्वर्गावाप्यादिलक्षणं निदानमस्तीत्यनिदानः, तथेन्द्रियनोइन्द्रियैर्मनोवाक्कायैर्वा संवृतस्त्रिगुप्तिगुप्त इत्यर्थः, एवम्भूतश्चावश्यं सिद्धिमवाप्नोतीत्येतदर्शयति—
'एवम्' अनन्तरोक्तमार्गानुष्ठानेनानन्ताः 'सिद्धा' अशेषकर्मक्षयभाजः संवृत्ता विशिष्टस्थानभाजो वा, तथा 'सम्प्रति' वर्तमाने काले सिद्धिगमनयोग्ये सिध्यन्ति, अपरे वा अनागते काले एतन्मार्गानुष्ठायिन एव सेत्स्यन्ति, नापरः सिद्धिमार्गोऽस्तीति भावार्थः ॥२१॥ एतच्च सुधर्मस्वामी जम्बूस्वामिप्रभृतिभ्यः स्वशिष्येभ्यः प्रतिपादयतीत्याह—'एवं से'इत्यादि 'एवम्' उद्देशकत्रयाभिहितनीत्या 'स' ऋषभस्वामी स्वपुत्रानुद्दिश्य 'उदाहृतवान्' प्रतिपादितवान्, नास्योत्तरं–प्रधानमस्तीत्यनुत्तरं तच्च तज्ज्ञानं च अनुत्तरज्ञानं तदस्यास्तीत्यनुत्तरज्ञानी तथाऽनुत्तरदर्शी, सामान्यविशेषपरिच्छेदकावबोधस्वभाव इति, बौद्धमतनिरासद्वारेण ज्ञानाधारं जीवं दर्शयितुमाह—'अनुत्तरज्ञानदर्शनधर' इति कथञ्चिद्भिन्नज्ञानदर्शनाऽऽधार इत्यर्थः, 'अर्हन्' सुरेन्द्रादिपूजार्हो ज्ञातपुत्रो वर्द्धमानस्वामी ऋषभस्वामी वा 'भगवान्' ऐश्वर्यादिगुणयुक्तो विशाल्यां नगर्यां वर्द्धमानोऽस्माकमाख्यातवान्, ऋषभस्वामी वा विशालकुलोद्भवत्वाद्वैशालिकः, तथा चोक्तम्–"विशाला जननी यस्य, विशालं कुलमेव वा। विशालं प्रवचनं चास्य, तेन वैशालिको जिनः ॥ १ ॥" एवमसौ जिन आख्यातेति। इतिशब्दः परिसमाप्त्यर्थो, ब्रवीमीति उक्तार्थो, नयाः पूर्ववदिति ॥ २२ ॥ तृतीय उद्देशकः समाप्तः, तत्समाप्तौ च समाप्तं द्वितीयं वैतालीयमध्ययनं ॥

१ (वचनं) यस्य प्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तृतीयस्योपसर्गाध्ययनस्य प्रथमोद्देशकः प्रारभ्यते ॥

उक्तं द्वितीयमध्ययनम्, अधुना तृतीयमारभ्यते—अस्य चायमभिसम्बन्धः—इहानन्तरं स्वसमयपरसमयप्ररूपणाऽभिहिता, तथा परसमयदोषान् स्वसमयगुणांश्च परिज्ञाय स्वसमये बोधो विधेय इत्येतच्चाभिहितं, तस्य च प्रतिबुद्धस्य सम्यगुत्थानेनोत्थितस्य सतः कदाचिदनुकूलप्रतिकूलोपसर्गाः प्रादुर्भवेयुः, ते चोदीर्णाः सम्यक् सोढव्या इत्येतदनेनाध्ययनेन प्रतिपाद्यते, ततोऽनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारः 'संबुद्धस्सुवसग्गा' इत्यादिना प्रथमाध्ययने प्रतिपादितः, उद्देशार्थाधिकारं तूत्तरत्र स्वयमेव निर्युक्तिकारः प्रतिपादयिष्यतीति, नामनिष्पन्नं तु निक्षेपमधिकृत्य निर्युक्तिकृदाह—

उवसग्गंमि य छक्कं दव्वे खेयणमखेयणं दुविहं । आगंतुगो य पीलाकरो य जो सो उवस्सग्गो ॥ ४५ ॥

नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् उपसर्गाः षोढा, तत्र नामस्थापने क्षुण्णत्वादनादृत्य द्रव्योपसर्गं दर्शयति—'द्रव्ये' द्रव्यविषये उपसर्गो द्वेधा, यतस्तद्द्रव्यमुपसर्गकर्तृ चेतनाचेतनभेदात् द्विविधं, तत्र तिर्यञ्चमनुष्यादयः स्वावयवाभिघातेन यदुपसर्गयन्ति स सचित्तद्रव्योपसर्गः, स एव काष्ठादिनेतरः । 'तत्त्वभेदपर्यायैर्व्याख्ये'ति, तत्रोपसर्गे उपतापः शरीरपीडोत्पादनमित्यादिपर्यायाः, भेदाश्च तिर्यङ्मनुष्योपसर्गादयः नामादयश्च, तत्त्वव्याख्यां तु निर्युक्तिकृदेव गाथापश्चार्द्धेन दर्शयति—अपरस्माद्द्रव्यादेः आगच्छतीत्यागन्तुको योऽसावुपसर्गो भवति, स च देहस्य संयमस्य वा पीडाकारीति ॥ क्षेत्रोपसर्गानाह—

खेत्तं बहुओघपयं कालो एगंतदूसमादीओ । भावे कम्मब्भुदओ, सो दुविहो ओघुवक्कमिओ ॥ ४६ ॥

यस्मिन् क्षेत्रे बहून्योघतः—सामान्येन पदानि—क्रूरचौराद्युपसर्गस्थानानि भवन्ति तत्क्षेत्रं बह्वोघपदं, पाठान्तरं वा 'बह्वोघभयं' बहून्योघतो भयस्थानानि यत्र तत्तथा, तच्च लाढादिविषयादिकं क्षेत्रमिति, कालस्त्वेकान्तदुष्षमादिः, आदिग्रहणात् यो यस्मिन् क्षेत्रे दुःखोत्पादको ग्रीष्मादिः स गृह्यत इति, कर्मणां—ज्ञानावरणीयादीनामभ्युदयो भावोपसर्ग इति, स च उपसर्गः सर्वोऽपि सामान्येन औधिकौपक्रमिकभेदात् द्वेधा, तत्रौधिकोऽशुभकर्मप्रकृतिजनितो भावोपसर्गो भवति, औपक्रमिकस्तु दण्डकशास्त्रादिनाऽसातवेदनीयोदयापादक इति ॥ तत्रौधिकौपक्रमिकयोरुपसर्गयोरौपक्रमिकमधिकृत्याह—

उवक्कमिओ संयमविग्घकरे तत्थुवक्कमे पगयं । दव्वे चउव्विहो देवमणुयतिरियायसंवेत्तो ॥ ४७ ॥

उपक्रमणमुपक्रमः, कर्मणामनुदयप्राप्तानामुदयप्रापणमित्यर्थः, एतच्च यद्द्रव्योपयोगात् येन वा द्रव्येणासातावेदनीयाद्यशुभं कर्मोदीर्यते यदुदयाच्चाल्पसत्त्वस्य संयमविघातो भवति अत औपक्रमिक उपसर्गः संयमविघातकारीति, इह च यतीनां मोक्षं प्रति प्रवृत्तानां संयमो मोक्षाङ्गं वर्तते तस्य यो विघ्नहेतुः स एवात्राधिक्रियत इति दर्शयति—तत्र—औधिकौपक्रमिकयोरौपक्रमिकेन 'प्रकृतं' प्रस्तावः तेनात्राधिकार इतिवत्, स च 'द्रव्ये' द्रव्यविषयश्चिन्त्यमानश्चतुर्विधो भवति, तद्यथा—दैविको मानुषस्तैरश्च आत्मसंवेदनश्चेति ॥ साम्प्रतमेतेषामेव भेदमाह—

एक्केको य चउव्विहो अट्ठविहो वावि सोलसविहो वा । घट्टण जयणा व तेसिं एत्तो वोच्छं अहि(ही)यारं(रा) ४८

एकैको दिव्यादिः 'चतुर्विधः' चतुर्भेदः, तत्र दिव्यस्तावत् हास्यात् प्रद्वेषात् विमर्शात् पृथग्विमात्रातश्चेति, मानुषा अपि हास्यतः प्रद्वेषाद्विमर्शात् कुशीलप्रतिसेवनातश्च, तैरश्चा अपि चतुर्विधाः, तद्यथा—भयात् प्रद्वेषाद् आहारादपत्यसंरक्षणात्, आत्मसंवेदनाः चतुर्विधाः, तद्यथा—घट्टनातो लेशनातः—अङ्गुल्याद्यवयवसंश्लेषरूपायाः स्तम्भनातः प्रपाताच्चेति, यदिवा—वातपित्तश्लेष्मसंनिपातजनितश्चतुर्धेति, स एव दिव्यादिश्चतुर्विधोऽनुकूलप्रतिकूलभेदात् अष्टधा भवति, स एव दिव्यादिः प्रत्येकं यश्चतुर्धा प्राग्दर्शितः स चतुर्णां चतुष्ककानां मेलापकात् षोडशभेदो भवति, तेषां चोपसर्गाणां यथा घटना—सम्बन्धः प्राप्तिः प्राप्तानां चाधिसहनं प्रति यतना भवति तथाऽत ऊर्द्धमध्ययनेन वक्ष्यते इत्ययमत्रार्थाधिकार इति भावः ॥ ४ ॥ उद्देशार्थाधिकारमधिकृत्याह—

पढमंमि य पडिलोमा हुंती अणुलोमगा य बितियंमि (बिइएणाईकया य अणुलोमा) । तइए अज्झत्तविसोहणं च परवादिवयणं च ॥ ४९ ॥

हेउसरिसेहिं अहेउएहिं समयपडिएहिं णिउणेहिं । सीलक्खलितपण्णवणा कया चउत्थंमि उद्देसे ॥ ५० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमे उद्देशके 'प्रतिलोमाः' प्रतिकूला उपसर्गाः प्रतिपाद्यन्त इति, तथा द्वितीये 'ज्ञातिकृताः' स्वजनापादिता अनुलोमा–अनुकूला इति, तथा तृतीये अध्यात्मविपीदनं परवादिवचनं चेत्यवमर्थाधिकार इति, चतुर्थोद्देशके अयमर्थाधिकारः, तद्यथा—'हेतुसदृशैः' हेत्वाभासैर्यऽन्यतीर्थिकैर्व्युद्ग्राहिताः—प्रतारितास्तेषां शीलस्खलितानां–व्यामोहितानां प्रज्ञापना–यथावस्थितार्थप्ररूपणा स्वसमयप्रतीतैर्निपुणभणितैर्हेतुभिः कृतेति ॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

सूरं मण्णइ अप्पाणं, जाव जेयं न पस्सती । जुज्झंतं दढधम्माणं, सिसुपालो व महारहं ॥ १ ॥
पयाता सूरा रणसीसे, संगामंमि उवट्ठिते । माया पुत्तं न याणाइ, जेएण परिविच्छए ॥ २ ॥

कश्चिल्लघुप्रकृतिः सङ्ग्रामे समुपस्थिते शूरमात्मानं मन्यते–निस्तोयाम्बुद इवात्मश्लाघाप्रवणो वाग्भिर्विस्फूर्जन् गर्जति, तद्यथा–न मत्कल्पः परानीके कश्चित् सुभटोऽस्तीति, एवं तावद्गर्जति यावत् पुरोऽवस्थितं प्रोद्यतासिं जेतारं न पश्यति, तथा चोक्तम्—"तावद्गर्जः प्रस्रुतदानगण्डः, करोत्यकाले जलदो गर्जितानि । यावन्न सिंहस्य गुहास्थलीषु, लाङ्गूलविस्फोटरवं शृणोति ॥ १ ॥" न दृष्टान्तमन्तरेण प्रायो लोकस्यार्थावगमो भवतीत्यतस्तदवगतये दृष्टान्तमाह—यथा माद्रीसुतः शिशुपालो वासुदेवदर्शनात्प्राक् आत्मश्लाघाप्रधानं गर्जितवान्, पश्चाच्च युध्यमानं–शस्त्राणि व्यापारयन्तं दृढः–समर्थो धर्मः—स्वभावः सङ्ग्रामाभङ्गरूपो यस्य स तथा तं, महान् रथोऽस्येति महारथः, स च प्रक्रमादत्र नारायणस्तं युध्यमानं दृष्ट्वा प्राग्गर्जनाप्रधानोऽपि क्षोभं गतः, एवमुत्तरत्र

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ७९ ॥

३ उपसर्गाध्य० उद्देशः १

दार्ष्टान्तिकेऽपि योजनीयमिति । भावार्थस्तु कथानकादवसेयः, तच्चेदम्—वसुदेवसुसाएँ सुओ दमघोसणराहिवेण महीए । जाओ चउब्भुओऽब्भुयबलकलिओ कलहपत्तट्ठो ॥ १ ॥ दट्ठूण तओ जणणी चउब्भुयं पुत्तमब्भुयमणग्घं । भयहरिसविम्हयमुही पुच्छइ णेमित्तियं सहसा ॥ २ ॥ णेमित्तिएण मुणिऊण साहियं तीइ हट्ठहिययाए । जह एस तुम्ह पुत्तो महाबलो दुज्जओ समरे ॥३॥ एयस्स य जं दट्ठूण होइ साभाविगं भुयाजुयलं । होही तओ चिय भयं सुतस्स ते णत्थि संदेहो ॥ ४ ॥ साविं भयवेविरंगी पुत्तं दंसेइ जाव कण्हस्स । तावच्चिय तस्स ठियं पयइत्थं वरभुयाजुयलं ॥ ५ ॥ तो कण्हस्स पिउच्छा पुत्तं पाडेइ पायपीढंमि । अवराहखामणत्थं सोवि सयं से खमिस्सामि ॥ ६ ॥ सिसुवालो वि हु लुब्भणमएण नारायणं असब्भेहिं । वयणेहिं भणइ सोविहु खमइ खमाए समत्थोवि ॥ ७ ॥ अवराहसए पुण्णे वारिज्जंतो ण चिट्ठई जाहे । कण्हेण तओ छिन्नं चक्केणं उत्तमंगं से ॥ ८ ॥ साम्प्रतं सर्वजनप्रतीतं वार्तमानिकं दृष्टान्तमाह—'पयाया' इत्यादि, यथा वाग्भिर्विस्फूर्जन्तः प्रकर्षेण विकटपादपातं 'रणशि-

---

१ वसुदेवस्वसुः सुतो दमघोषनराधिपेन माद्र्याः । जातश्चतुर्भुजोऽद्भुतबलकलितः प्राप्तकलहार्थः ॥ १ ॥ दृष्ट्वा ततो जननी चतुर्भुजं पुत्रमद्भुतमनर्घम् । भयहर्षविस्मयमुखी पृच्छति नैमित्तिकं सहसा ॥ २ ॥ नैमित्तिकेन मुणित्वा साधितं तस्यै हृष्टहृदयायै । यथैष तव पुत्रो महाबलो दुर्जयः समरे ॥३॥ एतस्य च यं दृष्ट्वा भवेत् स्वाभाविकं भुजयुगलम् । भविष्यति तत एव भयं सुतस्य ते नास्ति संदेहः ॥ ४ ॥ साऽपि भयवेपिताङ्गी पुत्रं दर्शयति यावत्कृष्णाय । तावदेव तस्य स्थितं प्रकृतिस्थं वरभुजयुगलम् ॥ ५ ॥ ततः कृष्णस्य पितृष्वसा पुत्रं पातयति पादपीठे । अपराधक्षामणार्थं सोऽपि शतं तस्य क्षमिष्ये ॥ ६ ॥ शिशुपालोऽपि यौवनमदेन नारायणमसभ्यैः । वचनैर्भणति सोऽपि च क्षमते क्षमया समर्थोऽपि ॥ ७ ॥ अपराधशते पूर्णे वार्यमाणोऽपि न तिष्ठति यदा । कृष्णेन ततश्छिन्नं चक्रेणोत्तमाङ्गं तस्य ॥८॥

॥ ७९ ॥

रांसे' संग्राममूर्धन्यग्रानीके याता–गताः, के ते ?—'शूराः' शूरंमन्याः—सुभटाः, ततः सङ्ग्रामे समुपस्थिते पतत्परानीकसुभटशस्त्रहेतिसङ्घाते सति तत्र च सर्वस्याकुलीभूतत्वात् 'माता पुत्रं न जानाति' कटीतो भ्रश्यन्तं स्तनन्धयमपि न सम्यक् प्रतिजागर्त्तीत्येवं मातापुत्रीये सङ्ग्रामे परानीकसुभटेन जेत्रा चक्रकुन्तनाराचशक्त्यादिभिः परिः—समन्तात् विविधम्—अनेकप्रकारं क्षतो—हतश्छिन्नो वा यथा कश्चिदल्पसत्त्वो भङ्गमुपयाति दीनो भवतीतियावदिति ॥ २ ॥ दार्ष्टान्तिकमाह-

एवं सेहेवि अप्पुट्ठे, भिक्खायरियाअकोविए । सूरं मण्णति अप्पाणं, जाव लूहं न सेवए ॥ ३ ॥
जया हेमंतमासंमि, सीतं फुसइ सव्वगं । तत्थ मंदा विसीयंति, रज्जहीणा व खत्तिया ॥ ४ ॥

'एव'मिति प्रक्रान्तपरामर्शार्थः, यथाऽसौ शूरंमन्य उत्कृष्टिसिंहनादपूर्वकं सङ्ग्रामशिरस्युपस्थितः पश्चाज्जेतारं वासुदेवमन्यं वा युध्यमानं दृष्ट्वा दैन्यमुपयाति, एवं 'शैक्षकः' अभिनवप्रव्रजितः परीषहैः 'अस्पृष्टः' अच्छुप्तः किं प्रव्रज्यायां दुष्करमित्येवं गर्जन् 'भिक्षाचर्यायां' भिक्षाटने 'अकोविदः' अनिपुणः, उपलक्षणार्थत्वादन्यत्रापि साध्वाचारेऽभिनवप्रव्रजितत्वात्प्रवीणः, स एवम्भूत आत्मानं तावच्छिशुपालवत् शूरं मन्यते यावज्जेतारमिव 'रूक्षं' संयमं कर्मसंश्लेषकारणाभावात् 'न सेवते' न भजत इति, तत्प्राप्तौ तु बहवो गुरुकर्माणोऽल्पसत्त्वा भङ्गमुपयान्ति ॥ ३ ॥ संयमस्य रूक्षत्वप्रतिपादनायाह—'जया हेमंते' इत्यादि, 'यदा' कदाचित् 'हेमन्तमासे' पौषादौ 'शीतं' सहिमकणवातं 'स्पृशति' लगति 'तत्र' तस्मिन्नसह्ये शीतस्पर्शे लगति सति एके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मन्दा' जडा गुरुकर्माणो 'विषीदन्ति' दैन्यभावमुपयान्ति 'राज्यहीना' राज्यच्युताः यथा-क्षत्रिया राजान इवेति ॥४॥ उष्णपरीषहमधिकृत्याह—

पुट्ठे गिम्हाहितावेणं, विमणे सुपिवासिए। तत्थ मंदा विसीयंति, मच्छा अप्पोदए जहा ॥ ५ ॥
सदा दत्तेसणा दुक्खा, जायणा दुप्पणोल्लिया। कम्मत्ता दुब्भगा चेव, इच्चाहंसु पुढोजणा ॥ ६ ॥

'ग्रीष्मे' ज्येष्ठाषाढाख्ये अभितापस्तेन 'स्पृष्टः' लुप्तो व्याप्तः सन् 'विमनाः' विमनस्कः, सुष्ठु पातुमिच्छा पिपासा तां प्राप्तोऽतिशयेन तृडभिभूतो बाहुल्येन दैन्यमुपयातीति दर्शयति-'तत्र' तस्मिन्नुष्णपरीषहोदये 'मन्दा' जडा अशक्ता 'विषीदन्ति' यथा पराभङ्गमुपयान्ति, दृष्टान्तमाह—मत्स्या अल्पोदके विषीदन्ति, गमनाभावान्मरणमुपयान्ति, एवं सत्त्वाभावात्संयमात् भ्रश्यन्त इति, इदमुक्तं भवति—यथा मत्स्या अल्पत्वादुदकस्य ग्रीष्माभितापेन तप्ता अवसीदन्ति, एवमल्पसत्त्वाश्चारित्रप्रतिपत्तावपि जल्लमलक्लेदक्लिन्नगात्रा बहिरुष्णाभितप्ताः शीतलान् जलाश्रयान् जलधारागृहचन्दनादीनुष्णप्रतिकारहेतूननुस्मरन्ते—व्याकुलितचेतसः संयमानुष्ठानं प्रति विषीदन्ति ॥ ५ ॥ साम्प्रतं याच्ञापरीषहमधिकृत्याह—'सदा दत्ते' इत्यादि, यतीनां 'सदा' सर्वदा दन्तशोधनाद्यपि परेण दत्तम् एषणीयम्—उत्पादाद्येषणादोषरहितमुपभोक्तव्यमित्यतः क्षुधादिवेदनार्त्तानां यावज्जीवं परदत्तैषणा दुःखं भवति, अपिचेयं 'याच्ञा' याच्ञापरीषहोऽल्पसत्त्वैर्दुःखेन 'प्रणोद्यते' त्यज्यते, तथा चोक्तम्—"खिज्जइ मुहलावण्णं

१ क्षीयते मुखलावण्यं वाचा गिलति (घूर्णति) कण्टमध्ये। कहकहकहित हृदयं देहीति परं भणतः ॥ १ ॥

वाया घोलेइ कंठमज्झंमि। कहकहकहेइ हिययं देहित्ति परं भणंतस्स ॥१॥ गतिभ्रंशो मुखे दैन्यं, गात्रस्वेदो विवर्णता। मरणे यानि चिह्नानि, तानि चिह्नानि याचके॥ १ ॥" इत्यादि, एवं दुस्त्यजं याच्ञापरीषहं परित्यज्य गताभिमाना महासत्त्वा ज्ञानाद्यभिवृद्धये महापुरुषसेवितं पन्थानमनुव्रजन्तीति। श्लोकपश्चार्द्धेनाऽऽक्रोशपरीषहं दर्शयति'-पृथग्जनाः' प्राकृतपुरुषा अनार्यकल्पा 'इत्येवमाहुः' इत्येवमुक्तवन्तः, तद्यथा—ये एते यतयः जल्लाविलदेहा लुञ्चितशिरसः क्षुधादिवेदनाग्रस्तास्ते एते पूर्वाचरितैः कर्मभिरार्त्ताः पूर्वस्वकृतकर्मणः फलमनुभवन्ति, यदिवा—कर्मभिः—कृष्यादिभिरार्त्ताः—तत्कर्तुमसमर्था उद्विग्नाः सन्तो यतयः संवृत्ता इति, तथैते 'दुर्भगाः' सर्वेणैव पुत्रदारादिना परित्यक्ता निर्गतिकाः सन्तः प्रव्रज्यामभ्युपगता इति ॥ ६ ॥

एते सद्दे अचायंता, गामेसु णगरेसु वा। तत्थ मंदा विसीयंति, संगामंमिव भीरुया ॥ ७ ॥
अप्पेगे खुधियं भिक्खुं, सुणी डंसति लूसए। तत्थ मंदा विसीयंति, तेउपुट्ठा व पाणिणो ॥ ८ ॥

'एतान्' पूर्वोक्तानाक्रोशरूपान् तथा चौरचारिकादिरूपान् शब्दान् सोढुमशक्नुवन्तो ग्रामनगरादौ तदन्तराले वा व्यवस्थिताः 'तत्र' तस्मिन् आक्रोशे सति 'मन्दा' अज्ञा लघुप्रकृतयो 'विषीदन्ति' विमनस्का भवन्ति संयमाद्वा भ्रश्यन्ति, यथा भीरवः 'संग्रामे' रणशिरसि चक्रकुन्तासिशक्तिनाराचाकुले रटत्पटहशङ्खझल्लरीनादगम्भीरे समाकुलाः सन्तः पौरुषं परित्यज्यायशःपटहमङ्गीकृत्य भज्यन्ते, एवमाक्रोशादिशब्दाकर्णनादल्पसत्त्वाः संयमे विषीदन्ति ॥ ७ ॥ वधपरीषहमधिकृत्याह-'अप्पेगे' इत्यादि, अपिः संभावने, एकः कश्चिच्छ्वादिः लूपयतीति लूषकः प्रकृत्यैव क्रूरो भक्षकः, 'खुधियं'ति क्षुधितं-बुभुक्षितं भिक्षामटन्तं भिक्षुं 'दशति' भक्षयति दशनैरङ्गावयवं विलुम्पति, 'तत्र' तस्मिन् श्वादिभक्षणे सति 'मन्दा' अज्ञा अल्पसत्त्वतया 'विषीदन्ति' दैन्यं भजन्ते, यथा 'तेजसा' अग्निना 'स्पृष्टा' दह्यमानाः 'प्राणिनो' जन्तवो वेदनार्त्ताः सन्तो विषीदन्ति-गात्रं संकोचयन्त्यार्तध्यानोपहता भवन्ति, एवं साधुरपि क्रूरसत्त्वैरभिद्रुतः संयमाद् भ्रश्यत इति, दुःसहत्वाद्ग्रामकण्टकानाम् ॥ ८ ॥ पुनरपि तानधिकृत्याह—

अप्पेगे पडिभासंति, पडिपंथियमागता। पडियारगता एते, जे एते एव जीविणो ॥ ९ ॥
अप्पेगे वइ जुंजंति, नगिणा पिंडोलगाहमा। मुंडा कंडूविणट्ठंगा, उज्जल्ला असमाहिता ॥ १० ॥

अपिः संभावने, 'एके' केचनापुण्यधर्माणः—अपुण्यकर्माणः 'प्रतिभाषन्ते' ब्रुवते, प्रतिपथः-प्रतिकूलत्वं तेन चरन्ति प्रातिपन्थिकाः—साधुविद्वेषिणस्तद्भावमागताः कथञ्चित्प्रतिपथे वा दृष्टा अनार्या एतद् ब्रुवते, सम्भाव्यत एतदेवंविधानां, तद्यथा प्रतीकारः-पूर्वाचरितस्य कर्मणोऽनुभवस्तमेके गताः-प्राप्ताः स्वकृतकर्मफलभोगिनो 'य एते' यतयः 'एवंजीविन' इति परगृहान्यटन्ति अतोऽन्तप्रान्तभोजिनोऽदत्तादाना लुञ्चितशिरसः सर्वभोगवञ्चिता दुःखितं जीवन्तीति ॥ ९ ॥ किञ्च—अप्येके केचन कुयुक्तिग्रस्ता अनार्या वाचं युञ्जन्ति—भाषन्ते, तद्यथा—एते जिनकल्पिकादयो नग्नास्तथा 'पिंडोलग'त्ति परपिण्डप्रा-

१ जुञ्जंतं प्र० अप्पेगे खु० २ तदारंभेणमिच्छे ते खु० ३ पिंडेसु दीयमानेसु उक्तेति अधमा अधमजातयः खु० ४ उच्चाताः नग्नाः चू०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्थका अधमाः—मलाविलत्वात् जुगुप्सिता 'मुण्डा' लुञ्चितशिरसः, तथा—क्वचित्कण्डूकृतक्षतैः रेखाभिर्वा विनष्टाङ्गा—विकृतशरीराः, अप्रतिकर्मशरीरतया वा क्वचिद्रोगसम्भवे सनत्कुमारवद्विनष्टाङ्गाः, तथोद्गतो जल्लः—शुष्कप्रस्वेदो येषां ते उज्जल्लाः, तथा 'असमाहिता' अशोभना बीभत्सा दुष्टा वा प्राणिनामसमाधिमुत्पादयन्तीति ॥ १० ॥ साम्प्रतमेतद्भापकाणां विपाकदर्शनायाह—

एवं विप्पडिवन्नेगे, अप्पणा उ अजाणया । तमाओ ते तमं जंति, मंदा मोहेण पाउडा ॥ ११ ॥
पुट्ठो य दंसमसएहिं, तणफासमचाइया । न मे दिट्ठे परे लोए, जइ परं मरणं सिया ॥ १२ ॥

'एवम्' अनन्तरोक्तनीत्या 'एके' अपुण्यकर्माणो 'विप्रतिपन्नाः' साधुसन्मार्गद्वेषिणः 'आत्मना' स्वयमज्ञाः, तुशब्दादन्येषां च विवेकिनां वचनमकुर्वाणाः सन्तस्ते 'तमसः' अज्ञानरूपादुत्कृष्टं तमो 'यान्ति' गच्छन्ति, यदिवा—अधस्तादप्यधस्तनीं गतिं गच्छन्ति, यतो 'मन्दा' ज्ञानावरणीयेनावष्टब्धाः तथा 'मोहेन' मिथ्यादर्शनरूपेण 'प्रावृता' आच्छादिताः सन्तः खिन्नप्रायाः साधुविद्वेषितया कुमार्गगा भवन्ति, तथा चोक्तम्—"एकं हि चक्षुरमलं सहजो विवेकस्तद्वद्विरेव सह संवसतिर्द्वितीयम् । एतद् द्वयं भुवि न यस्य स तत्त्वतोऽधस्तस्यापमार्गचलने खलु कोऽपराधः ? ॥ १ ॥" ॥ ११ ॥ दंशमशकपरीषहमधिकृत्याह—क्वचित्सिन्धुनाम्बलिङ्गकोङ्कणादिके देशे अधिका दंशमशका भवन्ति तत्र च कदाचित्साधुः पर्यटंस्तैः 'स्पृष्टश्च' भक्षितः तथा निष्किञ्चनत्वात् तृणेषु शयानस्तत्स्पर्शं सोढुमशक्नुवन् आर्तः सन् एवं कदाचिच्चिन्तयेत्, तद्यथा—परलोकार्थमेतदुष्करमनुष्ठानं

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥ ८२ ॥

क्रियमाणं घटते, न चासौ मया परलोकः प्रत्यक्षेणोपलब्धः, अप्रत्यक्षत्वात्, नाप्यनुमानादिनोपलभ्यत इति, अतो यदि परं ममानेन क्लेशाभितापेन मरणं स्यात्, नान्यत्फलं किञ्चनेति ॥ १५ ॥ अपिच—

३ उपसर्गाध्ययनं उद्देशः १

संतत्ता केसलोएणं, बंभचेरपराइया । तत्थ मंदा विसीयंति, मच्छा विट्ठा व केयणे ॥ १३ ॥
आयदंडसमायारे, मिच्छासंठियभावणा । हरिसप्पओसमावन्ना, केई लूसंतिऽनारिया ॥ १४ ॥

समन्तात् तप्ताः सन्तप्ताः केशानां 'लोच' उत्पाटनं तेन, तथाहि—सरुधिरकेशोत्पाटने हि महती पीडोपपद्यते, तया चाल्पसत्त्वाः विस्रोतसिकां भजन्ते, तथा 'ब्रह्मचर्ये' वस्तिनिरोधस्तेन च 'पराजिताः' पराभग्नाः सन्तः 'तत्र' तस्मिन् केशोत्पाटनेऽतिदुर्जयकामोद्रेके वा सति 'मन्दा' जडा—लघुप्रकृतयो विषीदन्ति संयमानुष्ठानं प्रति शीतलीभवन्ति, सर्वथा संयमाद् वा भ्रश्यन्ति, यथा मत्स्याः 'केतने' मत्स्यबन्धने प्रविष्टा निर्गतिकाः सन्तो जीविताद् भ्रश्यन्ति, एवं तेऽपि वराकाः सर्वकषकामपराजिताः संयमजीविताद् भ्रश्यन्ति ॥ १३ ॥ किञ्च—आत्मा दण्ड्यते—खण्ड्यते हिताद् भ्रश्यते येन स आत्मदण्डः 'समाचारः' अनुष्ठानं येषामनार्याणां ते तथा, तथा मिथ्या—विपरीता संस्थिता—ग्राहरूढा भावना—अन्तःकरणवृत्तिर्येषां ते मिथ्यासंस्थितभावना—मिथ्यालोपहतदृष्टय इत्यर्थः, हर्षश्च प्रद्वेषश्च हर्षप्रद्वेषं तदापन्ना रागद्वेषसमाकुला इतियावत्, त एवम्भूता अ-

॥ ८२ ॥

१ कडवल्लसंठिआ मच्छा पाणीए पडिनियत्ते ओयारिज्जंति खुणी एमादी

नार्याः सदाचारं साधुं क्रीडया प्रद्वेषेण वा क्रूरकर्मकारित्वात् 'लूषयन्ति' कदर्थयन्ति दण्डादिभिर्वाग्भिर्वेति ॥ १४ ॥ एतदेव दर्शयितुमाह—

अप्पेगे पलियंते सिं, चारो चोरोत्ति सुव्वयं । बंधंति भिक्खुयं बाला, कसायवयणेहि य ॥ १५ ॥
तत्थ दंडेण संवीते, मुट्ठिणा अदु फलेण वा । नातीणं सरती बाले, इत्थी वा कुद्धगामिणी ॥१६॥
एते भो ! कसिणा फासा, फरुसा दुरहियासया । हत्थी वा सरसंवित्ता, कीवा वस गया गिहं ॥ १७ ॥
तिबेमि ॥ इति तृतीयाध्ययनस्य प्रथमोद्देशकः समाप्तः ॥ (गाथाग्रं० १९१)

अपिः संभावने, एके अनार्या आत्मदण्डसमाचारा मिथ्यालोपहतबुद्धयो रागद्वेषपरिगताः साधुं 'पलियंते सिं'ति अनार्यदेशपर्यन्ते वर्तमानं 'चारो'त्ति चरोऽयं 'चौरः' अयं स्तेन इत्येवं मत्वा सुव्रतं कदर्थयन्ति, तथाहि—'बध्नन्ति' रज्ज्वादिना संयमयन्ति 'भिक्षुकं' भिक्षणशीलं 'बाला' अज्ञाः सदसद्विवेकविकलाः तथा 'कषायवचनैश्च' क्रोधप्रधानकटुकवचनैर्निर्भर्त्सयन्तीति ॥ १५ ॥ अपिच—'तत्र' तस्मिन्ननार्यदेशपर्यन्ते वर्त्तमानः साधुरनार्यैः 'दण्डेन' यष्टिना मुष्टिना वा 'संवीतः' प्रहतोऽथवा 'फलेन वा' मातुलिङ्गादिना खड्गादिना वा स साधुरेवं तैः कदर्थ्यमानः कश्चिदपरिणतः 'बालः' अज्ञो 'ज्ञातीनां'

१ येषां परस्परविरोधः चू० २ खीलो दंडपहारो वा ३ चवेडा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वजनानां स्मरति, तद्यथा—यद्यत्र मम कश्चित् सम्बन्धी स्यात् नाहमेवम्भूतां कदर्थनामवाप्नुयामिति, दृष्टान्तमाह—यथा स्त्री कुद्धा सती स्वगृहात् गमनशीला निराश्रया मांसपेशीव सर्वैस्पृहणीया तस्करादिभिरभिद्रुता सती जातपश्चात्तापा ज्ञातीनां स्मरति एवमसावपीति ॥ १६ ॥ उपसंहारार्थमाह—भो इति शिष्यामन्त्रणं, य एते आदितः प्रभृति दंशमशकादयः पीडोत्पादकत्वेन परीषहा एवोपसर्गा अभिहिताः 'कृत्स्नाः' संपूर्णा बाहुल्येन स्पृश्यन्ते—स्पर्शेन्द्रियेणानुभूयन्त इति स्पर्शाः, कथम्भूताः ?—'परुषाः' परुषैरनार्यैः कृतत्वात् पीडाकारिणः, ते चाल्पसत्त्वैर्दुःखेनाधिसह्यन्ते तांश्चासहमाना लघुप्रकृतयः केचनाश्लाघामङ्गीकृत्य हस्तिन इव रणशिरसि 'शरजालसंवीताः' शरशताकुलां भङ्गमुपयान्ति एवं 'क्लीबा' असमर्था 'अवशाः' परवशाः कर्मायत्ता गुरुकर्माणः पुनरपि गृहमेव गताः, पाठान्तरं वा 'तिव्वसद्दे'त्ति तीव्रैरुपसर्गैरभिद्रुताः 'शठाः' शठानुष्ठानाः संयमं परित्यज्य गृहं गताः, इति ब्रवीमीति पूर्ववत् ॥ १७ ॥ उपसर्गपरिज्ञायाः प्रथमोद्देशक इति—

॥ अथ तृतीयाध्ययनस्य द्वितीयोद्देशकः प्रारभ्यते ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः समारभ्यते—अस्य चायमभिसम्बन्धः, इहोपसर्गपरिज्ञाध्ययने उपसर्गाः प्रतिपिपाद-

१ °कुलाङ्गाः प्र०

यिषिताः, ते चानुकूलाः प्रतिकूलाश्च, तत्र प्रथमोद्देशके प्रतिकूलाः प्रतिपादिताः, इह त्वनुकूलाः प्रतिपाद्यन्त इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्याऽऽदिसूत्रम्—

अहिमे सुहुमा संगा, भिक्खुणं जे दुरुत्तरा। जत्थ एगे विसीयंति, ण चयंति जवित्तए ॥ १ ॥
अप्पेगे नायओ दिस्स, रोयंति परिवारिया। पोस णे ताय! पुट्ठोऽसि, कस्स ताय! जहासि णे ?॥२॥

'अथ' इति आनन्तर्ये, प्रतिकूलोपसर्गानन्तरमनुकूलाः प्रतिपाद्यन्त इत्यानन्तर्यार्थः, ते 'इमे' अनन्तरमेवाभिधीयमानाः प्रत्यक्षासन्नवाचित्वादिदमाऽभिधीयन्ते, ते च 'सूक्ष्माः' प्रायश्चेतोविकारकारित्वेनान्तराः, न प्रतिकूलोपसर्गा इव बाहुल्येन शरीरविकारकारित्वेन प्रकटतया बादरा इति, 'सङ्गा' मातापित्रादिसम्बन्धाः ये एते 'भिक्षूणां' साधूनामपि 'दुरुत्तरा' दुर्लङ्घ्या—दुरतिक्रमणीया इति, प्रायो जीवितविघ्नकरैरपि प्रतिकूलोपसर्गैरुदीर्णैर्माध्यस्थ्यमवलम्बयितुं महापुरुषैः शक्यम्, एते त्वनुकूलोपसर्गास्तानप्युपायेन धर्माच्यावयन्ति, ततोऽमी दुरुत्तरा इति, 'यत्र' येषूपसर्गेषु सत्सु 'एके' अल्पसत्त्वाः सदनुष्ठानं प्रति 'विषीदन्ति' शीतलविहारित्वं भजन्ते सर्वथा वा-संयमं त्यजन्ति, नैवात्मानं संयमानुष्ठानेन 'यापयितुं'—वर्तयितुं तस्मिन् वा व्यवस्थापयितुं 'शक्नुवन्ति' समर्था भवन्तीति ॥ १ ॥ तानेव सूक्ष्मसङ्गान् दर्शयितुमाह—'अपिः' संभावने 'एके' तथाविधा 'ज्ञातयः' स्वजना मातापित्रादयः प्रव्रजन्तं प्रव्रजितं वा 'दृष्ट्वा' उपलभ्य 'परिवार्य' वेष्टयित्वा रुदन्ति रुदन्तो वदन्ति च

१ यतः प्र०

दीनं यथा—बाल्यात् प्रभृति त्वमस्माभिः पोषितो वृद्धानां पालको भविष्यतीतिकृत्वा, ततोऽधुना 'नः' अस्मानपि त्वं 'तात!' पुत्र 'पोषय' पालय, कस्य कृते-केन कारणेन कस्य वा बलेन तातास्मान् त्यजसि ?, नास्माकं भवन्तमन्तरेण कश्चिन्नाता विद्यत इति ॥ २ ॥ किञ्च—

पिया ते थेरओ तात!, ससा ते खुड्डिया इमा। भायरो ते सगा तात!, सोयरा किं जहासि णे ?॥३॥
मायरं पियरं पोस, एवं लोगो भविस्सति। एवं खु लोइयं ताय!, जे पालंति य मायरं ॥ ४ ॥

हे 'तात!' पुत्र! पिता 'ते' तव 'स्थविरो' वृद्धः शैतातीकः 'स्वसा' च भगिनी तव 'क्षुल्लिका' लघ्वी अप्राप्तयौवना 'इमा' पुरोवर्त्तिनी प्रत्यक्षेति, तथा भ्रातरः 'ते' तव 'स्वका' निजास्तात! 'सोदराः' एकोदराः किमित्यस्मान् परित्यजसीति ॥ ३ ॥ तथा 'मायरमि'त्यादि, 'मातरं' जननीं तथा 'पितरं' जनयितारं 'पुषाण' बिभृहि, एवं च कृते तवेहलोकः परलोकश्च भविष्यति, तातेदमेव 'लौकिकं' लोकाचीर्णम्, अयमेव लौकिकः पन्था यदुत—वृद्धयोर्मातापित्रोः प्रतिपालनमिति, तथा चोक्तम्—"गुरवो यत्र पूज्यन्ते, यत्र धान्यं सुसंस्कृतम्। अदन्तकलहो यत्र, तत्र शक्र! वसाम्यहम् ॥ १ ॥" इति ॥ ४ ॥" अपिच—

१ सवा—वयणनिद्दसे चिट्ठंति चू० २ वर्षशतमानः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तरा मधुरुल्लावा, पुत्ता ते तात ! खुड्डया । भारिया ते णवा तात !, मा सा अन्नं जणं गमे ॥ ५ ॥
एहि ताय ! घरं जामो, मा य कम्मे सहा वयं । बितियंपि ताय ! पासामो, जामु ताव सयं गिहं ॥ ६ ॥

'उत्तराः' प्रधानाः उत्तरोत्तरजाता वा मधुरो-मनोज्ञ उल्लापः-आलापो येषां ते तथाविधाः पुत्राः 'ते' तव 'तात' पुत्र ! 'क्षुल्लकाः' लघवः तथा 'भार्या' पत्नी ते 'नवा' प्रत्यग्रयौवना अभिनवोढा वा मा असौ त्वया परित्यक्ता सती अन्यं जनं गच्छेत्-उन्मार्गयायिनी स्याद्, अयं च महान् जनापवाद इति ॥ ५ ॥ अपिच—जानीमो वयं यथा त्वं कर्मभीरुस्तथापि 'एहि' आगच्छ गृहं 'यामो' गच्छामः । मा त्वं किमपि साम्प्रतं कर्म कृथाः, अपितु तव कर्मण्युपस्थिते वयं सहायका भविष्यामः—साहाय्यं करिष्यामः । एकवारं तावद्गृहकर्मभिर्भग्नस्त्वं तात ! पुनरपि द्वितीयं वारं 'पश्यामो' द्रक्ष्यामो यदस्माभिः सहायैर्भवतो भविष्यतीत्यतो 'यामो' गच्छामः तावत् स्वकं गृहं कुर्वेतदसद्वचनमिति ॥ ६ ॥ किञ्च—

गंतुं ताय ! पुणो गच्छे, ण तेणासमणो सिया । अकामगं परिक्कम्मं, को ते वारेउमरिहति ? ॥ ७ ॥
जं किंचि अणगं तात !, तंपि सव्वं समीकतं । हिरण्णं ववहाराइ, तंपि दाहामु ते वयं ॥ ८ ॥

'तात' पुत्र ! गत्वा गृहं स्वजनवर्गं दृष्ट्वा पुनरागन्ताऽसि, नच 'तेन' एतावता गृहगमनमात्रेण त्वमश्रमणो भविष्यसि, 'अ-

१ उत्तमा चू० २ उत्तारितं चू०

कामगं'ति अनिच्छन्तं गृहव्यापारेच्छारहितं 'पराक्रमन्तं' स्वाभिप्रेतानुष्ठानं कुर्वाणं कः 'त्वां' भवन्तं 'वारयितुं' निषेधयितुम् 'अर्हति' योग्यो भवति, यदिवा—'अकामगं'ति वार्द्धकावस्थायां मदनेच्छाकामरहितं पराक्रमन्तं संयमानुष्ठानं प्रति कस्त्वामवसरप्राप्ते कर्मणि प्रवृत्तं धारयितुमर्हतीति ॥ ७ ॥ अन्यच्च—'तात' पुत्र ! यत्किमपि भवदीयमृणजातमासीत्तत्सर्वमस्माभिः सम्यग्विभज्य 'समीकृतं' समभागेन व्यवस्थापितं, यदिवोत्कटं सत् समीकृतं-सुदेयत्वेन व्यवस्थापितं, यच्च 'हिरण्यं' द्रव्यजातं व्यवहारादावुपयुज्यते, आदिशब्दात् अन्येन वा प्रकारेण तवोपयोगं यास्यति तदपि वयं दास्यामः, निर्धनोऽयमिति मा कृथा भयमिति ॥ ८ ॥ उपसंहारार्थमाह—

इच्चेव णं सुसेहंति, कालुणीयसमुट्ठिया । विबद्धो नाइसंगेहिं, ततोऽगारं पहावइ ॥ ९ ॥
जहा रुक्खं वणे जायं, मालुया पडिबंधई । एव णं पडिबंधंति, णातओ असमाहिणा ॥ १० ॥

णमिति वाक्यालङ्कारे 'इत्येव' पूर्वोक्तया नीत्या मातापित्रादयः कारुणिकैर्वचोभिः करुणामुत्पादयन्तः स्वयं वा दैन्यमुपस्थिताः 'तं' प्रव्रजितं प्रव्रजन्तं वा 'सुसेहंति'त्ति सुष्ठु शिक्षयन्ति व्युद्ग्राहयन्ति, स चापरिणतधर्मोऽल्पसत्त्वो गुरुकर्मा ज्ञातिसङ्गैर्विवद्धो-मातापितृपुत्रकलत्रादिमोहितः ततः 'अगारं' गृहं प्रति धावति-प्रव्रज्यां परित्यज्य गृहपाशमनुबध्नातीति ॥ ९ ॥ किञ्चान्यत्-यथा वृक्षं 'वने' अटव्यां 'जातम्' उत्पन्नं 'मालुया' वल्ली 'प्रतिबध्नाति' वेष्टयत्येवं 'णं' इति वाक्यालङ्कारे 'ज्ञातयः' स्वजनाः 'तं' यतिं असमाधिना प्रतिबध्नन्ति, ते तत्कुर्वन्ते येनास्यासमाधिरुत्पद्यत इति, तथा चोक्तम्-"अमित्तो मित्तवेसेणं, कंठे घेत्तूण रोयइ । मा मित्ता ! सोग्गइं जाहि, दोवि गच्छामु दुग्गइं ॥ १ ॥" ॥ १० ॥ अपिच—

विबद्धो नातिसंगेहिं, हत्थीवावी नवग्गहे । पिट्ठतो परिसप्पंति, सुयगोव्व अदूरए ॥ ११ ॥
एते संगा मणूसाणं, पाताला व अतारिमा । कीवा जत्थ य किस्संति, नाइसंगेहिं मुच्छिया ॥ १२ ॥

विविधं बद्धः-परवशीकृतः विबद्धो ज्ञातिसङ्गैः-मातापित्रादिसम्बन्धैः, ते च तस्य तस्मिन्नवसरे सर्वमनुकूलमनुतिष्ठन्तो धृतिमुत्पादयन्ति, हस्तीवापि 'नवग्रहे' अभिनवग्रहणे, (यथा स) धृत्युत्पादनार्थमिक्षुशकलादिभिरुपचर्यते, एवमसावपि सर्वानुकूलैरुपायैरुपचर्यते, दृष्टान्तान्तरमाह-यथाऽभिनवप्रसूता गौर्निजस्तनन्धयस्य 'अदूरगा' समीपवर्तिनी सती पृष्ठतः परिसर्पति, एवं तेऽपि निजा उत्प्रव्रजितं पुनर्जातमिव मन्यमानाः पृष्ठतोऽनुसर्पन्ति-तन्मार्गानुयायिनो भवन्तीत्यर्थः ॥ ११ ॥ सङ्गदोषदर्शनायाह—'एते' पूर्वोक्ताः सज्यन्त इति सङ्गाः—मातृपित्रादिसम्बन्धाः कर्मोपादानहेतवः, मनुष्याणां 'पाताला इव' समुद्रा इवाप्रतिष्ठितभूमितलत्वात् ते 'अतारिम'त्ति दुस्तराः, एवमेतेऽपि सङ्गा अल्पसत्त्वैर्दुःखेनातिलङ्घ्यन्ते, 'यत्र च' येषु सङ्गेषु 'क्लीबा' असमर्थाः 'क्लिश्यन्ति' क्लेशमनुभवन्ति, संसारान्तर्वर्तिनो भवन्तीत्यर्थः, किंभूताः ?-'ज्ञातिसङ्गैः' पुत्रादिसम्बन्धैः 'मूर्च्छिताः' गृद्धा अध्युपपन्नाः सन्तो, न पर्यालोचयन्त्यात्मानं संसारान्तर्वर्तिनमेवं क्लिश्यन्तमिति ॥ १२ ॥ अपिच—

१ अमित्रमित्रवेषेण कण्ठे गृहीत्वा रोदिति । मा मित्र ! सुगतीर्याः द्वावपि गच्छावो दुर्गतिम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं च भिक्खू परिन्नाय, सवे संगा महासवा । जीवियं नावकंखिज्जा, सोच्चा धम्ममणुत्तरं ॥ १३ ॥
अहिमे संति आवट्टा, कासवेणं पवेइया । बुद्धा जत्थावसप्पंति, सीयंति अबुहा जहिं ॥ १४ ॥

'तं च' ज्ञातिसङ्गं संसारैकहेतुं भिक्षुर्ज्ञपरिज्ञया (ज्ञात्वा) प्रत्याख्यानपरिज्ञया परिहरेत् । किमिति ?, यतः 'सर्वेऽपि' ये केचन सङ्गास्ते 'महाश्रवा' महान्ति कर्मण आश्रवद्वाराणि वर्तन्ते । ततोऽनुकूलैरुपसर्गैरुपस्थितैरसंयमजीवितं–गृहावासपाशं 'नाभिकाङ्क्षेत्' नाभिलषेत्, प्रतिकूलैश्चोपसर्गैः सञ्जिजीविताभिलाषी न भवेद्, असमञ्जसकारिसेन भवजीवितं नाभिकाङ्क्षेत् । किं कृत्वा ?–'श्रुत्वा' निशम्यावगम्य, कम् ?–'धर्मं' श्रुतचारित्राख्यं, नास्योत्तरोऽस्तीत्यनुत्तरं—प्रधानं मौनीन्द्रमित्यर्थः ॥१३॥ अन्यच्च—'अथे' त्यधिकारान्तरदर्शनार्थः, पाठान्तरं वा 'अहो' इति, तच्च विस्मये, 'इमे' इति एते प्रत्यक्षासन्नाः सर्वजनविदितत्वात् 'सन्ति' विद्यन्ते वक्ष्यमाणा आवर्तयन्ति–प्राणिनं भ्रामयन्तीत्यावर्ताः, तत्र द्रव्यावर्ता नद्यादेः भावावर्तास्तूत्कटमोहोदयापादितविषयाभिलाषसंपादकसंपत्प्रार्थनाविशेषाः, एते चावर्ताः 'काश्यपेन' श्रीमन्महावीरवर्द्धमानस्वामिना उत्पन्नदिव्यज्ञानेन 'आ(प्र)वेदिताः' कथिताः प्रतिपादिताः 'यत्र' येषु सत्सु 'बुद्धा' अवगततत्त्वा आवर्तविपाकवेदिनस्तेभ्यः 'अपसर्पन्ति' अप्रमत्ततया तद्दूरगामिनो भवन्ति, अबुद्धास्तु निर्विवेकतया येष्ववसीदन्ति–आसक्तिं कुर्वन्तीति ॥ १४ ॥ तानेवावर्तान् दर्शयितुमाह—

रायाणो रायऽमच्चा य, माहणा अदुव खत्तिया । निमंतयंति भोगेहिं, भिक्खूयं साहुजीविणं ॥१५॥
हत्थऽस्सरहजाणेहिं, विहारगमणेहि य । भुंज भोगे इमे सग्घे, महरिसी ! पूजयामु तं ॥ १६ ॥

'राजानः' चक्रवर्त्यादयो 'राजामात्याश्च' मन्त्रीपुरोहितप्रभृतयः तथा ब्राह्मणा अथवा 'क्षत्रिया' इक्ष्वाकुवंशजप्रभृतयः, एते सर्वेऽपि 'भोगैः' शब्दादिभिर्विषयैः 'निमन्त्रयन्ति' भोगोपभोगं प्रत्यभ्युपगमं कारयन्ति, कम् ?–भिक्षुकं 'साधुजीविणमि'ति साध्वाचारेण जीवितुं शीलमस्येति (साधुजीवी तं) साधुजीविनमिति, यथा ब्रह्मदत्तचक्रवर्तिना नानाविधैर्भोगैश्चित्रसाधुरुपनिमन्त्रित इति। एवमन्येऽपि केनचित्सम्बन्धेन व्यवस्थिता यौवनरूपादिगुणोपेतं साधुं विषयोद्देशेनोपनिमन्त्रयेयुरिति ॥१५॥ एतदेव दर्शयितुमाह—हस्त्यश्वरथयानैः तथा 'विहारगमनैः' विहरणं क्रीडनं विहारस्तेन गमनानि विहारगमनानि–उद्यानादौ क्रीडया गमनानीत्यर्थः, चशब्दादन्यैश्चेन्द्रियानुकूलैर्विषयैरुपनिमन्त्रयेयुः, तद्यथा—भुङ्क्ष्व 'भोगान्' शब्दादिविषयान् 'इमान्' अस्माभिर्दीक्षितान् प्रत्यक्षासन्नान् 'श्लाघ्यान्' प्रशस्तान् अनिन्द्यान् 'महर्षे' साधो! वयं विषयोपकरणदौर्कनेन 'त्वां' भवन्तं 'पूजयामः' सत्कारयाम इति ॥ १६ ॥ किञ्चान्यत्—

वत्थगंधमलंकारं, इत्थीओ सयणाणि य । भुंजाहिमाइं भोगाइं, आउसो ! पूजयामु तं ॥ १७ ॥
जो तुमे नियमो चिण्णो, भिक्खुभावंमि सुव्वया ! । अगारमावसंतस्स, सव्वो संविज्जए तहा ॥१८॥

'वस्त्रं' चीनांशुकादि 'गन्धाः' कोष्ठपुटपाकादयः, वस्त्राणि च गन्धाश्च वस्त्रगन्धमिति समाहारद्वन्द्वः तथा 'अलङ्कारम्' कटककेयूरादिकं तथा 'स्त्रियः' प्रत्यग्रयौवनाः 'शयनानि च' पर्यङ्कतूलीप्रच्छदपटोपधानयुक्तानि, इमान् भोगानिन्द्रियमनोऽनुकूलानस्माभिर्दीक्षितान् 'भुङ्क्ष्व' तदुपभोगेन सफलीकुरु, हे आयुष्मन्! भवन्तं 'पूजयामः' सत्कारयाम इति ॥ १७ ॥ अपिच—यस्त्वया पूर्वं 'भिक्षुभावे' प्रव्रज्यावसरे 'नियमो' महाव्रतादिरूपः 'चीर्णः' अनुष्ठितः इन्द्रियनोइन्द्रियोपशमगतेन हे सुव्रत ! स साम्प्रतमपि 'अगारं' गृहम् 'आवसतः' गृहस्थभावं सम्यगनुपालयतो भवतस्तथैव विद्यत इति, न हि सुकृतदुष्कृतस्यानुचीर्णस्य नाशोऽस्तीति भावः ॥ १८ ॥ किञ्च—

चिरं दूइज्जमाणस्स, दोसो दाणिं कुतो तव ? । इच्चेव णं निमंतेंति, नीवारेण व सूयरं ॥ १९ ॥
चोइया भिक्खचरियाए, अचयंता जवित्तए । तत्थ मंदा विसीयंति, उज्जाणंसि व दुब्बला ॥२०॥

'चिरं' प्रभूतं कालं संयमानुष्ठानेन 'दूइज्जमाणस्स'त्ति विहरतः सतः 'इदानीं' साम्प्रतं दोषः कुतस्तव ?, नैवास्तीति भावः, इत्येवं हस्त्यश्वरथादिभिर्वस्त्रगन्धालङ्कारादिभिश्च नानाविधैरुपभोगोपकरणैः करणभूतैः 'ण' मिति वाक्यालङ्कारे 'तं' भिक्षुं साधुजीविनं 'निमन्त्रयन्ति' भोगबुद्धिं कारयन्ति, दृष्टान्तं दर्शयति–यथा 'नीवारेण' व्रीहिविशेषकणदानेन 'सूकरं' वराहं कूटके प्रवेशयन्ति एवं तमपि साधुमिति ॥ १९ ॥ अनन्तरोपन्यस्तवार्तोपसंहारार्थमाह—भिक्षूणां—साधूनामुद्युक्तविहारिणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चर्या—दशविधचक्रवालसामाचारी इच्छामिच्छेत्यादिका तया चोदिताः—प्रेरिता यदिवा भिक्षुचर्यया करणभूतया सीदन्तश्चोदिताः—तत्करणं प्रत्याचार्यादिकैः पौनःपुन्येन प्रेरितास्तच्चोदनामशक्नुवन्तः संयमानुष्ठानेनात्मानं 'यापयितुं' वर्तयितुमसमर्थाः सन्तः 'तत्र' तस्मिन् संयमे मोक्षैकगमनहेतौ भवकोटिशतावाप्ते 'मन्दा' जडा 'विषीदन्ति' शीतलविहारिणो भवन्ति, तमेवाचिन्त्यचिन्तामणिकल्पं महापुरुषानुचीर्णं संयमं परित्यजन्ति, दृष्टान्तमाह—ऊर्ध्वं यानमुद्यानं-मार्गस्योन्नतो भाग उट्टङ्कमित्यर्थः तस्मिन् उद्यानशिरसि उत्क्षिप्तमहाभरा उक्षाणोऽतिदुर्बला यथाऽवसीदन्ति-ग्रीवां पातयित्वा तिष्ठन्ति नोत्क्षिप्तभरनिर्वाहका भवन्तीत्येवं तेऽपि भावमन्दा उत्क्षिप्तपञ्चमहाव्रतभारं वोढुमसमर्थाः पूर्वोक्तभावावर्तैः पराभग्ना विषीदन्ति ॥२०॥ किञ्च—

अचयंता व लूहेणं, उवहाणेण तज्जिया। तत्थ मंदा विसीयंति, उज्जाणंसि जरग्गवा ॥ २१ ॥
एवं निमंतणं लद्धुं, मुच्छिया गिद्ध इत्थीसु। अज्झोववन्ना कामेहिं, चोइज्जंता गया गिहं ॥ २२ ॥
तिबेमि ॥ इति उवसग्गपरिण्णाए बितिओ उद्देसो सम्मत्तो ॥ ३–२ ॥ (गाथाग्रं० २१३)

'रूक्षेण' संयमेनात्मानं यापयितुमशक्नुवन्तः तथा 'उपधानेन' अनशनादिना सबाह्याभ्यन्तरेण तपसा 'तर्जिताः' बाधिताः सन्तः तत्र संयमे मन्दा विषीदन्ति 'उद्यानशिरसि' उट्टङ्कमस्तके 'जीर्णो' दुर्बलो गौरिव, यूनोऽपि हि तत्रावसीदनं सम्भाव्यते

१ बाधिता इति प्र० २ तप्त प्र०

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तिपुर्त

॥ ८८ ॥

किं पुनर्जरद्गवस्येति जीर्णग्रहणम्, एवमावर्तमन्तरेणापि धृतिसंहननोपेतस्य विवेकिनोऽप्यवसीदनं सम्भाव्यते, किं पुनरावर्तैरुपसर्गितानां मन्दानामिति ॥ २१ ॥ सर्वोपसंहारमाह—'एवं' पूर्वोक्तया नीत्या विषयोपभोगोपकरणदानपूर्वकं 'निमन्त्रणं' विषयोपभोगं प्रति प्रार्थनं 'लब्ध्वा' प्राप्य 'तेषु' विषयोपकरणेषु हस्त्यश्वरथादिषु 'मूर्च्छिताः' अत्यन्तासक्ताः तथा स्त्रीषु 'गृद्धाः' दत्तावधाना रमणीरागमोहिताः तथा 'कामेषु' इच्छामदनरूपेषु 'अध्युपपन्नाः' कामगतचित्ताः संयमेऽवसीदन्तोऽपरेणोद्युक्तविहारिणा नोद्यमानाः-संयमं प्रति प्रोत्साह्यमाना नोदनां सोढुमशक्नुवन्तः सन्तो गुरुकर्माणः प्रव्रज्यां परित्यज्याल्पसत्त्वा गृहं गता—गृहस्थीभूताः। इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ २२ ॥ इति उपसर्गपरिज्ञाऽध्ययनस्य द्वितीय उद्देशः ॥

३ उपसर्गाध्य० उद्देशः ३

॥ ८८ ॥

अथ तृतीयस्योपसर्गाध्ययनस्य तृतीयोद्देशकः प्रारभ्यते ॥

उपसर्गपरिज्ञायां उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीयः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशकाभ्यामुपसर्गा अनुकूलप्रतिकूलभेदेनाभिहिताः, तैश्चाध्यात्मविषीदनं भवतीति तदनेन प्रतिपाद्यत इत्यनेन संबन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

जहा संगामकालंमि, पिट्ठतो भीरु वेहइ। वलयं गहणं णूमं, को जाणइ पराजयं ? ॥ १ ॥
मुहुत्ताणं मुहुत्तस्स, मुहुत्तो होइ तारिसो। पराजियाऽवसप्पामो, इति भीरू उवेहई ॥ २ ॥

दृष्टान्तेन हि मन्दमतीनां सुखेनैवार्थावगतिर्भवतीत्यत आदावेव दृष्टान्तमाह—यथा कश्चिद् 'भीरुः' अकृतकरणः 'संग्रामकाले' परानीकयुद्धावसरे समुपस्थिते 'पृष्ठतः प्रेक्षते' आदावेवापत्प्रतीकारहेतुभूतं दुर्गादिकं स्थानमवलोकयति। तदेव दर्शयति–'वलय'मिति यत्रोदकं वलयाकारेण व्यवस्थितम् उदकरहिता वा गर्ता दुःखनिर्गमप्रवेशा, तथा 'गहनं' धवादिवृक्षैः कण्टिसंस्थानीयं 'णूमं'ति प्रच्छन्नं गिरिगुहादिकं, किमित्यसावेवमवलोकयति ?, यत एवं मन्यते–तत्रैवम्भूते तुमुले सङ्ग्रामे सुभटसङ्कुले को जानाति कस्यात्र पराजयो भविष्यतीति ?, यतो दैवायत्ताः कार्यसिद्धयः, स्तोकैरपि बहवो जीयन्त इति ॥१॥ किञ्च-मुहूर्त्तानामेकस्य वा मुहूर्तस्यापरो 'मुहूर्तः' कालविशेषलक्षणोऽवसरस्तादृग् भवति यत्र जयः पराजयो वा सम्भाव्यते, तत्रैवं व्यवस्थिते पराजिता वयम् 'अवसर्पामो' नश्याम इत्येतदपि सम्भाव्यते अस्मद्विधानामिति भीरुः पृष्ठत आपत्प्रतीकारार्थं शरणमुपेक्षते ॥ २ ॥ इति श्लोकद्वयेन दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमाह—

१ कण्टिसं० प्र० २ युद्धविषयत्वात् मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रय इति श्रीहेमचन्द्रवचनादत्र क्षुद्रोपायपर उपेक्षिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तु समणा एगे, अबलं नच्चाण अप्पगं । अणागयं भयं दिस्स, अविकप्पंतिमं सुयं ॥ ३ ॥
को जाणइ विऊवातं, इत्थीओ उदगाउ वा । चोइज्जंता पवक्खामो, ण णो अत्थि पकप्पियं ॥४॥

'एवम्' इति यथा सङ्ग्रामं प्रवेष्टुमिच्छुः पृष्ठतोऽवलोकयति–किमत्र मम पराभग्नस्य वलयादिकं शरणं त्राणाय स्यादिति?, एवमेव 'श्रमणाः' प्रव्रजिता 'एके' केचनाद्दमतयोऽल्पसत्त्वा आत्मानम् 'अबलं' यावज्जीवं संयमभारवहनाक्षमं ज्ञात्वा अनागतमेव भयं 'दृष्ट्वा' उत्प्रेक्ष्य तद्यथा–निष्किञ्चनोऽहं किं मम वृद्धावस्थायां ग्लानाद्यवस्थायां दुर्भिक्षे वा त्राणाय स्यादित्येवमाजीविकाभयमुत्प्रेक्ष्य 'अवकल्पयन्ति' परिकल्पयन्ति मन्यन्ते–इदं व्याकरणं गणितं ज्योतिष्कं वैद्यकं होराशास्त्रं मन्त्रादिकं वा श्रुतमधीतं ममावमादौ त्राणाय स्यादिति ॥ ३ ॥ एतच्चैतेऽवकल्पयन्तीत्याह–अल्पसत्त्वाः प्राणिनो विचित्रा च कर्मणां गतिः बहूनि प्रमादस्थानानि विद्यन्ते अतः 'को जानाति?' कः परिच्छिनत्ति 'व्यापातं' संयमजीवितात् भ्रंशं, केन पराजितस्य मम संयमाद् भ्रंशः स्यादिति, किम् 'स्त्रीतः' स्त्रीपरिषहात् उत 'उदकात्' स्नानाद्यर्थमुदकासेवनाभिलाषाद्?, इत्येवं ते वराकाः प्रकल्पयन्ति, न 'नः' अस्माकं किञ्चन 'प्रकल्पितं' पूर्वोपार्जितद्रव्यजातमस्ति यत्तस्मावस्थायामुपयोगं यास्यति, अतः 'चोद्यमानाः' परेण पृच्छ्यमाना हस्तिशिक्षाधनुर्वेदादिकं कुटिलैर्विण्टलादिकं वा 'प्रवक्ष्यामः' कथयिष्यामः प्रयोक्ष्याम इत्येवं ते हीनसत्त्वाः सम्प्रधार्य व्याकरणादौ श्रुते प्रयतन्त इति, न च तथापि मन्दभाग्यानामभिप्रेतार्थावाप्तिर्भवतीति, तथा चोक्तम्— ॥ ८९ ॥

१ अवकल्पंतीति टीका । २ विद्यावातं इति टीकाकृदभिप्रायः । ३ कुण्टलमण्डलादि० । कुण्टलविण्टलादि० ।

"उपशमफलाद्विद्याबीजात्फलं धनमिच्छतां, भवति विफलो यद्यायासस्तदत्र किमद्भुतम्? । न नियतफलाः कर्तुर्भावाः फलान्तरमीशते, जनयति खलु व्रीहेर्बीजं न जातु यवाङ्कुरम् ॥ १ ॥ इति" ॥ ४ ॥ उपसंहारार्थमाह—

इच्चेव पडिलेहंति, वलया पडिलेहिणो । वितिगिच्छसमावन्ना, पंथाणं च अकोविया ॥ ५ ॥
जे उ संगामकालंमि, नाया सूरपुरंगमा । णो ते पिट्ठमुवेहिंति, किं परं मरणं सिया ? ॥ ६ ॥

'इत्येवमि'ति पूर्वप्रक्रान्तपरामर्शार्थः, यथा भीरवः सङ्ग्रामे प्रविविक्षवो वलयादिकं प्रति उपेक्षिणो भवन्तीति, एवं प्रव्रजिता मन्दभाग्यतया अल्पसत्त्वा आजीविकाभयाद्व्याकरणादिकं जीवनोपायत्वेन 'प्रत्युपेक्षन्ते' परिकल्पयन्ति, किम्भूताः?–विचिकित्सा–चित्तविप्लुतिः–किमेनं संयमभारमुत्क्षिप्तमन्तं नेतुं वयं समर्थाः उत नेतीत्येवम्भूता, तथा चोक्तम्—"लुक्खमणुण्हमणियमं कालाइक्कंतभोयणं विरसं । भूमीसयणं लोओ असिणाणं बंभचेरं च ॥ १ ॥" तां समापन्नाः–समागताः, यथा पन्थानं प्रति 'अकोविदा' अनिपुणाः, किमयं पन्था विवक्षितं भूभागं यास्यत्युत नेतीत्येवं कृतचित्तविप्लुतयो भवन्ति, तथा तेऽपि संयमभारवहनं प्रति विचिकित्सां समापन्ना निमित्तगणितादिकं जीविकार्थं प्रत्युपेक्षन्त इति ॥ ५ ॥ साम्प्रतं महापुरुषचेष्टिते दृष्टान्तमाह—ये पुनर्महासत्त्वाः, तुशब्दो विशेषणार्थः 'सङ्ग्रामकाले' परानीकयुद्धावसरे 'ज्ञाताः' लोकविदिताः, कथम्?–'शूरपुरङ्गमाः' शूराणामग्रगामिनो युद्धावसरे सैन्याग्रस्कन्धवर्तिन इति, त एवम्भूताः सङ्ग्रामं प्रविशन्तो 'न पृष्ठमुत्प्रेक्षन्ते' न दुर्गा-

१ कर्तुं भा० प्र० । २ रूक्षमनुष्णमनियतं कालातिक्रान्तं भोजनं विरसम् । भूमिशयनं लोचोऽस्नानं ब्रह्मचर्यं च ॥ १ ॥

दिकमापत्त्राणाय पर्यालोचयन्ति, ते चाभङ्गकृतबुद्धयः, अपि ज्ञेयं मन्यन्ते—किमपरमत्रास्माकं भविष्यति?, यदि परं मरणं स्यात्, तच्च शाश्वतं यशःप्रवाहमिच्छतामस्माकं स्तोकं वर्तत इति, तथा चोक्तम्–"विशरारुभिरविनश्वरमपि चपलैः स्थास्नु वाञ्छतां विशदम् । प्राणैर्यदि शूराणां भवति यशः किं न पर्याप्तम्? ॥ १ ॥" ॥ ६ ॥ तदेवं सुभटदृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमाह—

एवं समुट्ठिए भिक्खू, वोसिज्जागारबंधणं । आरंभं तिरियं कट्टु, अत्तत्ताए परिव्वए ॥ ७ ॥
तमेगे परिभासंति, भिक्खूयं साहुजीविणं । जे एवं परिभासंति, अंतए ते समाहिए ॥ ८ ॥

यथा सुभटा ज्ञाता नामतः कुलतः शौर्यतः शिक्षातश्च तथा सन्नद्धबद्धपरिकराः करगृहीतहेतयः प्रतिभटसमितिभेदिनो न पृष्ठतोऽवलोकयन्ति, एवं 'भिक्षुरपि' साधुरपि महासत्त्वः परलोकप्रतिस्पर्द्धिनमिन्द्रियकषायादिकमरिवर्गं जेतुं सम्यक्—संयमोत्थानेनोत्थितः समुत्थितः, तथा चोक्तम्—"कोहं माणं च मायं च, लोहं पंचिंदियाणि य । दुज्जयं चेवमप्पाणं, सव्वमप्पे जिए जियं ॥ १ ॥" किं कृत्वा समुत्थित इति दर्शयति—'व्युत्सृज्य' त्यक्त्वा 'अगारबन्धनं' गृहपाशं तथा 'आरम्भं' सावद्यानुष्ठानरूपं 'तिर्यक्कृत्वा' अपहस्त्य आत्मनो भाव आत्मत्वम्–अशेषकर्मकलङ्करहितत्वं तस्मै आत्मत्वाय, यदिवा—आत्मा–मोक्षः संयमो वा तद्भावस्तस्मै—तदर्थं परि—समन्ताद्व्रजेत्–संयमानुष्ठानक्रियायां दत्तावधानो भवेदित्यर्थः ॥ ७ ॥ निर्युक्तौ यदभिहितमध्यात्मविषीदनं तदुक्तम्, इदानीं परवादिवचनं द्वितीयमर्थाधिकारमधिकृत्याह–'त' मिति साधुम् 'एके' ये ॥ ९० ॥

१ क्रोधः मानश्च माया च लोभः पंचेन्द्रियाणि च । दुर्जयं चैवात्मनां सर्वमात्मनि जिते जितम् ॥ १ ॥ २ हस्तायित्वा प्र० । ३ परिवादि० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परोपकाररहितं दर्शनमापन्ना अयःशलाकाकल्पाः, ते च गोशालकमतानुसारिण आजीविका दिगम्बरा वा, त एवं वक्ष्यमाणं परि—समन्ताद्भाषन्ते । तं भिक्षुकं साध्वाचारं साधु—शोभनं परोपकारपूर्वकं जीवितुं शीलमस्य स साधुजीवीनमिति, 'ये' ते अपुष्टधर्माण 'एवं' वक्ष्यमाणं 'परिभाषन्ते' साध्वाचारनिन्दां विदधति त एवंभूता 'अन्तके' पर्यन्ते दूरे 'समाधेः' मोक्षाख्यात्सम्यग्ध्यानात्सदनुष्ठानात् वा वर्तन्त इति ॥ ८ ॥ यत्ते प्रभाषन्ते तदर्शयितुमाह—

संबद्धसमकप्पा उ, अन्नमन्नेसु मुच्छिया । पिंडवायं गिलाणस्स, जं सारेह दलाह य ॥ ९ ॥
एवं तुब्भे सरागत्था, अन्नमन्नमणुव्वसा । नट्ठसप्पहसब्भावा, संसारस्स अपारगा ॥ १० ॥

सम्—एकीभावेन परस्परोपकार्योपकारितया च 'बद्धाः' पुत्रकलत्रादिस्नेहपाशैः सम्बद्धा—गृहस्थास्तैः **समः**—तुल्यः कल्पो—व्यवहारोऽनुष्ठानं येषान्ते सम्बद्धसमकल्पा—गृहस्थानुष्ठानतुल्यानुष्ठाना इत्यर्थः, तथाहि—यथा गृहस्था परस्परोपकारेण माता पुत्रे पुत्रोऽपि मात्रादावित्येवं 'मूर्च्छिता' अध्युपपन्नाः, एवं भवन्तोऽपि 'अन्योऽन्यं' परस्परतः शिष्याचार्याद्युपकारक्रियाकल्पनया मूर्च्छिताः, तथाहि—गृहस्थानामयं न्यायो यदुत—परस्मै दानादिनोपकार इति, न तु यतीनां, कथमन्योऽन्यं मूर्च्छिता इति दर्शयति—'पिण्डपातं' भैक्ष्यं 'ग्लानस्य' अपरस्य रोगिणः साधोः यद्—यस्मात् 'सारेह'त्ति अन्वेषयत, तथा 'दलाह य'त्ति ग्लानयोग्यमाहारमन्विष्य तदुपकारार्थं ददध्वं, चशब्दादाचार्यादेः वैयावृत्यकरणाद्युपकारेण वर्तध्वं, ततो गृहस्थसमकल्पा

१ अन्वेषयन्ते प्र०

सूत्रकृ. १२

श्रुतस्कन्धे शीलाङ्काचार्यविरचितवृत्तियुतं

॥ ९१ ॥

इति ॥ ९ ॥ साम्प्रतमुपसंहारव्याजेन दोषदर्शनायाह—'एवं' परस्परोपकारादिना यूयं गृहस्था इव सरागस्थाः—सह रागेण वर्तत इति सरागः—स्वभावस्तस्मिन् तिष्ठन्तीति ते तथा, 'अन्योऽन्यं' परस्परतो वशमुपागताः—परस्परायत्ताः, यतयो हि निःसङ्गतया न कस्यचिदायत्ता भवन्ति, यतो गृहस्थानामयं न्याय इति, तथा नष्टः—अपगतः सत्पथः—सद्भावः—सन्मार्गः परमार्थो येभ्यस्ते तथा । एवम्भूताश्च यूयं 'संसारस्य' चतुर्गतिभ्रमणलक्षणस्य 'अपारगा' अतीरगामिन इति ॥ १० ॥ अयं तावत्पूर्वपक्षः, अस्य च दूषणायाह—

अह ते परिभासेज्जा, भिक्खु मोक्खविसारए । एवं तुब्भे पभासंता, दुपक्खं चेव सेवह ॥ ११ ॥
तुब्भे भुंजह पाएसु, गिलाणो अभिहडंमि या । तं च बीओदगं भोच्चा, तमुद्दिस्सादि जं कडं ॥१२॥

'अथ' अनन्तरं 'तान्' एवं प्रतिकूलत्वेनोपस्थितान् भिक्षुः 'परिभाषेत' ब्रूयात्, किम्भूतः ?—'मोक्षविशारदो' मोक्षमार्गस्य—सम्यग्ज्ञानदर्शनचारित्ररूपस्य प्ररूपकः, 'एवम्' अनन्तरोक्तं यूयं प्रभाषमाणाः सन्तः दुष्टः पक्षो दुष्पक्षः—असत्प्रतिज्ञाभ्युपगमस्तमेव सेवध्वं यूयं, यदिवा—रागद्वेषात्मकं पक्षद्वयं सेवध्वं यूयं, तथाहि—सदोषस्याप्यात्मीयपक्षस्य समर्थनाद्रागो, निष्कलङ्कस्याप्यसदभ्युपगमस्य दूषणाद्द्वेषः, अथै(थवै)वं पक्षद्वयं सेवध्वं यूयं, तद्यथा—वक्ष्यमाणनीत्या बीजोदकोद्दिष्टकृतभोजिताद्गृहस्थाः यतिलिङ्गाभ्युपगमात्किल प्रव्रजिताश्चेत्येवं पक्षद्वयासेवनं भवतामिति, यदिवा—स्वतोऽसदनुष्ठानमपरञ्च सदनुष्ठायिनां निन्दनमितिभावः ॥ ११ ॥ आजीविकादीनां परतीर्थिकानां दिगम्बराणां चासदाचारनिरूपणायाह—किल वयमपरिग्रहतया निष्किञ्चना एवमभ्युपगमं कृत्वा यूयं भुञ्जध्वं 'पात्रेषु' कांस्यपात्र्यादिषु गृहस्थभाजनेषु, तैत्परिभोगाच्च तत्परिग्रहोऽवश्यंभावी, तथाऽऽहारादिषु मूर्च्छां कुरुध्वमित्यतः कथं निष्परिग्रहाभ्युपगमो भवतामकलङ्क इति, अन्यच्च 'ग्लानस्य' भिक्षाटनं कर्तुमसमर्थस्य यदपरैर्गृहस्थैरभ्याहृतं कार्यते भवद्भिः, यतेरानयनाधिकारामावाद् गृहस्थानयने च यो दोषसद्भावः स भवतामवश्यंभावीति, तमेव दर्शयति—यच्च गृहस्थैर्बीजोदकाद्युपमर्देनोपादितमाहारं भुक्त्वा तं ग्लानमुद्दिश्योद्देशकादि 'यत्कृतं' यच्चिष्पादितं तदवश्यं युष्मत्परिभोगायावतिष्ठते । तदेवं गृहस्थगृहे तद्भाजनादिषु भुञ्जानास्तथा ग्लानस्य च गृहस्थैरेव वैयावृत्त्यं कारयन्तो यूयमवश्यं बीजोदकादिभोजिन उद्देशिकादिकृतभोजिनश्चेति ॥ १२ ॥ किञ्चान्यत्—

लित्ता तिव्वाभितावेणं, उज्झिआ असमाहिया । नातिकंडूइयं सेयं, अरुयस्सावरज्झती ॥ १३ ॥
तत्तेण अणुसिट्ठा ते, अपडिन्नेण जाणया । ण एस णियए मग्गे, असमिक्खा वती किती ॥१४॥

योऽयं षड्जीवनिकायविराधनयोद्दिष्टभोजित्वेनाभिगृहीतमिथ्यादृष्टितया च साधुपरिभाषणेन च तीव्रोऽभितापः—कर्मबन्धरूपस्तेनोपलिप्ताः—संवेष्टितास्तथा 'उज्झिय'त्ति सद्विवेकशून्या भिक्षापात्रादित्यागात्परगृहभोजितयोद्देशकादिभोजित्वात् तथा 'असमाहिता' शुभाध्यवसायरहिताः सत्साधुप्रद्वेषित्वात्, साम्प्रतं दृष्टान्तद्वारेण पुनरपि तद्दोषाभिधित्सयाऽऽह—यथा 'अरुषः' व्रणस्यातिकण्डूयितं—नखैर्विलेखनं न श्रेयो—न शोभनं भवति, अपि त्वपराध्यति—तत्कण्डूयनं व्रणस्य दोषमावहति, एवं

१ प्रसङ्गापादनं, तैःसंबन्धमात्रस्य परिग्रहत्वाभ्युपगमात्, अन्यथा निर्मूर्च्छं धर्मोपकरणधरणापत्तेः

१ उपस. गौण्य० उद्देशः ३

॥ ९१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्तोऽपि सद्विवेकरहिताः वयं किल निष्किञ्चना इत्येवं निष्परिग्रहतया षड्जीवनिकायरक्षणभूतं भिक्षापात्रादिकमपि संयमोपकरणं परिहृतवन्तः, तदभावाच्चावश्यंभावी अशुद्धाहारपरिभोग इत्येवं द्रव्यक्षेत्रकालभावानपेक्षणेन नातिकण्डूयितं श्रेयो भवतीति भावः ॥ १३ ॥ अपि च—'तत्त्वेन' परमार्थेन मौनीन्द्राभिप्रायेण यथावस्थितार्थप्ररूपणया ते गोशालकमतानुसारिण आजीविकादयः बोटिका वा 'अनुशासिताः' तदभ्युपगमदोषदर्शनद्वारेण शिक्षां ग्राहिताः, केन ?—'अप्रतिज्ञेन' नास्य मयेदमसदपि समर्थनीयमित्येवं प्रतिज्ञा विद्यते इत्यप्रतिज्ञो—रागद्वेषरहितः साधुस्तेन 'जानता' हेयोपादेयपदार्थपरिच्छेदकेनेत्यर्थः, कथमनुशासिता इत्याह—योऽयं भवद्भिरभ्युपगतो मार्गो यथा यतीनां निष्किञ्चनतयोपकरणाभावात् परस्परत उपकार्योपकारकभाव इत्येष 'न नियतो' न निश्चितो न युक्तिसङ्गतः, अतो येयं वाग् यथा—ये पिण्डपातं ग्लानस्याऽऽनीय ददति ते गृहस्थकल्पा इत्येषा 'असमीक्ष्याभिहिता' अपर्यालोच्योक्ता, तथा 'कृतिः' करणमपि भवदीयमसमीक्षितमेव, यथा चापर्यालोचितकरणता भवति भवदनुष्ठानस्य तथा नातिकण्डूयितं श्रेय इत्यनेन प्राग्लेशतः प्रतिपादितं, पुनरपि सदृष्टान्तं तदेव प्रतिपादयति ॥ १४ ॥ यथाप्रतिज्ञातमाह—

एरिसा जा वई एसा, अग्गवेणु व्व करिसिता। गिहिणो अभिहडं सेयं, भुंजिउं ण उ भिक्खुणं ॥१५॥
धम्मपन्नवणा जा सा, सारंभा ण विसोहिआ। ण उ एयाहिं दिट्ठीहिं, पुव्वमासिं पगप्पिअं ॥ १६ ॥

येयमीदृक्षा वाक् यथा यतिना ग्लानस्यानीय न देयमित्येषा अग्रे वेणुवद्-वंशवत् कर्षिता तन्वी युक्त्यक्षमत्वात् दुर्बलेत्यर्थः, तामेव वाचम् दर्शयति—'गृहिणां' गृहस्थानां यदभ्याहृतं तद्यतेर्भोक्तुं 'श्रेयः' श्रेयस्करं, न तु भिक्षूणां सम्बन्धीति, अग्रे तनुत्वं चास्या वाच एवं द्रष्टव्यं—यथा गृहस्याभ्याहृतं जीवोपमर्देन भवति, यतीनां तूद्गमादिदोषरहितमिति ॥ १५ ॥ किञ्च—धर्मस्य प्रज्ञापना—देशना यथा—यतीनां दानादिनोपकर्तव्यमित्येवम्भूता या सा 'सारम्भाणां' गृहस्थानां विशोधिका, यतयस्तु स्वानुष्ठानेनैव विशुध्यन्ति, न तु तेषां दानाधिकारोऽस्तीत्येतत् दूषयितुं प्रक्रमते—'न तु' नैवंताभिर्यथा गृहस्थेनैव पिण्डदानादिना यतेर्ग्लानाद्यवस्थायामुपकर्तव्यं ननु यतिभिरेव परस्परमित्येवम्भूताभिः युष्मदीयाभिः 'दृष्टिभिः' धर्मप्रज्ञापनाभिः 'पूर्वम्' आदौ सर्वज्ञैः 'प्रकल्पितं' प्ररूपितं प्रख्यापितमासीदिति, यतो न हि सर्वज्ञा एवम्भूतं परिफल्गुप्रायमर्थं प्ररूपयन्ति यथा—असंयतैरेषणाद्यनुपयुक्तैर्ग्लानादेर्वैयावृत्त्यं विधेयं न तूपयुक्तेन संयतेनेति, अपिच—भवद्भिरपि ग्लानोपकारोऽभ्युपगत एव, गृहस्थप्रेरणादनुमोदनाच्च, ततो भवन्तस्तत्कारिणस्तत्प्रद्वेषिणश्चेत्यापन्नमिति ॥ १६ ॥ अपिच—

सव्वाहिं अणुजुत्तीहिं, अचयंता जविंत्तए। ततो वायं णिराकिच्चा, ते भुज्जोवि पगब्भिया ॥ १७ ॥
रागदोसाभिभूयप्पा, मिच्छत्तेण अभिदुता। आउस्से सरणं जंति, टंकणा इव पव्वयं ॥ १८ ॥

ते गोशालकमतानुसारिणो दिगम्बरा वा सर्वाभिरर्थानुगताभिर्युक्तिभिः सर्वैरेव हेतुदृष्टान्तैः प्रमाणभूतैरशक्नुवन्तः स्वपक्ष आत्मानं 'यापयितुम्' संस्थापयितुम् 'ततः' तस्माद्युक्तिभिः प्रतिपादयितुम् सामर्थ्याभावाद् 'वादं निराकृत्य' सम्यग्हेतुदृष्टान्तैर्यो वादो—जल्पस्तं परित्यज्य ते तीर्थिका 'भूयः' पुनरपि वादपरित्यागे सत्यपि 'प्रगल्भिता' धृष्टतां गता इदमूचुः, तद्यथा—

"पुराणं मानवो धर्मः, साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥ १ ॥" अन्यच्च किमनया बहिरङ्गया युक्त्याऽनुमानादिकयाऽत्र धर्मपरीक्षणे विधेये कर्तव्यमस्ति, यतः प्रत्यक्ष एव बहुजनसंमतत्वेन राजाद्याश्रयणाच्चायमेवास्मदभिप्रेतो धर्मः श्रेयान्नापर इत्येवं विवदन्ते, तेषामिदमुत्तरम्—न ह्यत्र ज्ञानादिसाररहितेन बहुनाऽपि प्रयोजनमस्तीति, उक्तं च—"एरंडकट्ठरासी जहा य गोसीसचंदनपलस्स। मोल्लेण न होज्ज सरिसो कित्तियमेत्तो गणिज्जंतो ॥ १ ॥" तहवि गणणातिरेगो जह रासी सो न चंदनसरिच्छो। तह निव्विण्णाणमहाजणोवि सोज्झे विसंवयति ॥ २ ॥ एक्को सचक्खुगो जह अंधलयाणं सएहिं बहुएहिं। होइ वरं दट्ठव्वो णहु ते बहुगा अपेच्छंता ॥ ३ ॥ एवं बहुगावि मूढा ण पमाणं जे गई ण याणंति। संसारगमणगुविलं णिउणस्स य बंधमोक्खस्स ॥ ४ ॥" इत्यादि ॥ १७ ॥ अपिच—रागश्च—प्रीतिलक्षणो द्वेषश्च—तद्विपरीतलक्षणस्ताभ्यामभिभूत आत्मा येषां परतीर्थिकानां ते तथा, 'मिथ्यात्वेन' विपर्यस्तावबोधेनातत्त्वाध्यवसायरूपेण 'अभिद्रुता' व्याप्ताः सद्युक्तिभिर्वादं कर्तुमसमर्थाः क्रोधानुगा 'आक्रोशान्' असभ्यवचनरूपांस्तथा दण्डमुष्ट्यादिभिश्च हननव्यापारं 'यान्ति' आश्रयन्ते। अस्मिन्नेवार्थे प्रतिपाद्ये दृष्टान्तमाह—यथा 'टङ्कणा' म्लेच्छविशेषा दुर्जया यदा परेण बलिना स्वानीकादिनाऽभिद्रूयन्ते तदा ते नानाविधैरप्यायुधैर्योद्धुमसमर्थाः सन्तः पर्वतं शरणमाश्रयन्ति, एवं तेऽपि कुतीर्थिका वादपराजिताः क्रोधाद्युपहत-

१ एरण्डकाष्ठराशिर्यथा च गोशीर्षचन्दनपलस्य। मूल्येन न भवेत् सदृशः कियन्मात्रो गण्यमानः ॥ १ ॥ २ तथापि गणनातिरेको यथा राशिः स न चन्दनसदृशः। तथा निर्विज्ञानमहाजनोऽपि मूल्ये विसंवदते ॥ २ ॥ ३ एकः सचक्षुष्को यथा अन्धानां शतैर्बहुभिर्भवति वरं द्रष्टव्यो नैव बहुका अप्रेक्षमाणाः ॥ ३ ॥ ४ एवं बहुका अपि मूढा न प्रमाणं ये गतिं न जानन्ति। संसारगमनबकां निपुणयोर्बन्धमोक्षयोश्च ॥ ४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्ट्वा आक्रोशादिकं शरणमाश्रयन्ते, न च ते इदमाकलय्य प्रत्याक्रोष्टव्याः, तद्यथा—"अक्कोसहणणमारणधम्मब्भंसाण बालसुलभाणं । लाभं मन्नइ धीरो जहुत्तराणं अभावंमि ॥ १ ॥ " ॥ १८ ॥ किञ्चान्यत्—

बहुगुणप्पगप्पाइं, कुज्जा अत्तसमाहिए । जेणऽन्ने णो विरुज्झेज्जा, तेण तं तं समायरे ॥ १९ ॥
इमं च धम्ममादाय, कासवेण पवेइयं । कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहिए ॥ २० ॥
संखाय पेसलं धम्मं,, दिट्ठिमं परिनिव्वुडे । उवसग्गे नियामित्ता, आमोक्खाए परिव्वएज्जाऽसि ॥२१॥
त्तिबेमि । इति ततीयअज्झयणस्स तईओ उद्देसो समत्तो ॥ (गाथाग्रं० २३४)

'बहवो गुणाः' स्वपक्षसिद्धिपरदोषोद्भावनादयो माध्यस्थ्यादयो वा प्रकल्पन्ते—प्रादुर्भवन्त्यात्मनि येष्वनुष्ठानेषु तानि बहुगुणप्रकल्पानि—प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनादीनि माध्यस्थ्यवचनप्रकाराणि वा अनुष्ठानानि साधुवादकाले अन्यदा वा 'कुर्यात्' विदध्यात्, स एव विशिष्यते—आत्मनः 'समाधिः' चित्तस्वास्थ्यं यस्य स भवत्यात्मसमाधिकः, एतदुक्तं भवति—येन येनोपन्यस्तेन हेतुदृष्टान्तादिना आत्मसमाधिः—स्वपक्षसिद्धिलक्षणो माध्यस्थ्यवचनादिना वा परानुपघातलक्षणः समुत्पद्यते तत् तत् कुर्यादिति, तथा येनानुष्ठितेन वा भाषितेन वा अन्यतीर्थिको धर्मश्रवणादौ वाऽन्यः प्रवृत्तो 'न विरुध्येत' न विरोधं

१ आक्रोशहननमारणधर्मभ्रंशानां बालसुलभानां (मध्ये) । लाभं मन्यते धीरो यथोत्तराणामभावे ॥ १ ॥

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥ ९४ ॥

गच्छेत्, तेन पराविरोधकारणेन तत्तदविरुद्धमनुष्ठानं वचनं वा 'समाचरेत्' कुर्यादिति ॥ १९ ॥ तदेवं परमतं निराकृत्योपसंहारद्वारेण स्वमतस्थापनायाह—'इम' मिति वक्ष्यमाणं दुर्गतिधारणाद्धर्मम् 'आदाय' उपादाय गृहीत्वा 'काश्यपेन' श्रीमन्महावीरवर्द्धमानस्वामिनोत्पन्नदिव्यज्ञानेन सदेवमनुजायां पर्षदि प्रकर्षेण—यथावस्थितार्थनिरूपणद्वारेण वेदितं प्रवेदितं, चशब्दात्परमतं च निराकृत्य, भिक्षणशीलो भिक्षुः 'ग्लानस्य' अपटोरपरस्य भिक्षोर्वैयावृत्त्यादिकं कुर्यात्, कथं कुर्याद् ?, एतदेव विशिनष्टि—स्वतोऽप्यग्लानतया यथाशक्ति 'समाहितः' समाधिं प्राप्त इति, इदमुक्तं भवति—यथा यथाऽऽत्मनः समाधिरुत्पद्यते न तत्करणेन अपाटवसंभवात् योगा विषीदन्तीति, तथा तथा तस्य च ग्लानस्य समाधिरुत्पद्यते तथा पिण्डपातादिकं विधेयमिति ॥ २० ॥ किं कृत्वैतद्विधेयमिति दर्शयितुमाह—'संखाये' त्यादि, संख्याय—ज्ञात्वा कं ?—'धर्मं' सर्वज्ञप्रणीतं श्रुतचारित्राख्यभेदभिन्नं 'पेशलम्' इति सुश्लिष्टं प्राणिनामहिंसादिप्रवृत्त्या प्रीतिकारणं, किम्भूतमिति दर्शयति—दर्शनं दृष्टिः सद्भूतपदार्थगता सम्यग्दर्शनमित्यर्थः सा विद्यते यस्यासौ दृष्टिमान् यथावस्थितपदार्थपरिच्छेदवानित्यर्थः, तथा 'परिनिर्वृतो' रागद्वेषविरहाच्छान्तीभूतस्तदेवं धर्मं पेशलं परिसंख्याय दृष्टिमान् परिनिर्वृत उपसर्गाननुकूलप्रतिकूलान्नियम्य—संयम्य सोढा, नोपसर्गैरुपसर्गितोऽसमञ्जसं विदध्यादित्येवम् 'आमोक्षाय' अशेषकर्मक्षयप्राप्तिं यावत् परि—समन्तात् व्रजेत्—संयमानुष्ठानोद्युक्तो भवेत् परिव्रजेद्, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ २१ ॥ उपसर्गपरिज्ञायास्तृतीयोद्देशकः समाप्तः ॥ ३ ॥

३ उपसर्गाध्य० उद्देशः ३

॥ ९४ ॥

अथ तृतीयोपसर्गाध्ययने चतुर्थोद्देशकस्य प्रारम्भः ॥

उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थः समारभ्यते—अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके अनुकूलप्रतिकूलोपसर्गाः प्रतिपादिताः, तैश्च कदाचित्साधुः शीलात् प्रच्याव्येत—तस्य च स्खलितशीलस्य प्रज्ञापनाऽनेन प्रतिपाद्यते इति, अनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिमं सूत्रम्—

आहंसु महापुरिसा, पुव्विं तत्ततवोधणा । उदएण सिद्धिमावन्ना, तत्थ मंदो विसीयति ॥ १ ॥
अभुंजिया नमी विदेही, रामगुत्ते य भुंजिआ । बाहुए उदगं भोच्चा, तहा नारायणे रिसी ॥ २ ॥

केचन अविदितपरमार्था 'आहुः' उक्तवंतः, किं तदित्याह—यथा 'महापुरुषाः' प्रधानपुरुषा वल्कलचीरितारागणर्षिप्रभृतयः 'पूर्वं' पूर्वस्मिन् काले तप्तम्—अनुष्ठितं तप एव धनं येषां ते तप्ततपोधनाः—पञ्चाग्न्यादितपोविशेषेण निष्टप्तदेहाः, त एवम्भूताः शीतोदकपरिभोगेन, उपलक्षणार्थत्वात् कन्दमूलफलाद्युपभोगेन च 'सिद्धिमापन्नाः' सिद्धिं गताः, 'तत्र' एवम्भूतार्थसमाकर्णने तदर्थसद्भावावेशात् 'मन्दः' अज्ञोऽस्नानादित्याजितः प्रासुकोदकपरिभोगभ्रंशः संयमानुष्ठाने विषीदति, यदिवा तत्रैव शीतोदकपरिभोगे विषीदति लगति निमज्जतीतियावत्, न त्वसौ वराक एवमवधारयति, यथा—तेषां तापसादिव्रतानुष्ठायिनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुतश्चिज्जातिस्मरणादिप्रत्ययादाविर्भूतसम्यग्दर्शनानां मौनीन्द्रभावसंयमप्रतिपत्त्या अपगतज्ञानावरणीयादिकर्मणां भरतादीनामिव मोक्षावाप्तिः न तु शीतोदकपरिभोगादिति ॥ १ ॥ किञ्चान्यत्—केचन कुतीर्थिकाः साधुप्रतारणार्थमेवमूचुः, यदिवा स्वयूथ्याः शीतलविहारिण एतद् वक्ष्यमाणमुक्तवन्तः, तद्यथा—**नमीराजा** विदेहो नाम जनपदस्तत्र भवा वैदेहाः—तन्निवासिनो लोकास्तेऽस्य सन्तीति वैदेही, स एवम्भूतो नमी राजा अशनादिकमभुक्त्वा सिद्धिमुपगतः तथा **रामगुप्तश्च** राजर्षिराहारादिकं 'भुक्त्वैव' भुञ्जान एव सिद्धिं प्राप्त इति, तथा **बाहुकः** शीतोदकादिपरिभोगं कृत्वा तथा **नारायणो** नाम महर्षिः परिणतोदकादिपरिभोगात्सिद्ध इति ॥ २ ॥ अपिच—

आसिले देविले चेव, दीवायण महारिसी । पारासरे दगं भोच्चा, बीयाणि हरियाणि य ॥ ३ ॥
एते पुव्वं महापुरिसा, आहिता इह संमता । भोच्चा बीओदगं सिद्धा, इति मेयमणुस्सुअं ॥ ४ ॥

आसिलो नाम महर्षिस्तथा **देविलो** द्वैपायनश्च तथा **पराशरा**ख्य इत्येवमादयः शीतोदकबीजहरितादिपरिभोगादेव सिद्धा इति श्रूयते ॥ ३ ॥ एतदेव दर्शयितुमाह—**एते** पूर्वोक्ता नम्यादयो महर्षयः 'पूर्वमि'ति पूर्वस्मिन्काले त्रेताद्वापरादौ **'महापुरुषा'** इति प्रधानपुरुषा आ—समन्तात् ख्याताः आख्याताः—प्रख्याता राजर्षित्वेन प्रसिद्धिमुपगता इहापि आर्हते प्रवचने ऋषिभाषितादौ केचन **'सम्मता'** अभिप्रेता इत्येवं कुतीर्थिकाः स्वयूथ्या वा प्रोचुः, तद्यथा—एते सर्वेऽपि बीजोदकादिकं भुक्त्वा सिद्धा इत्येतन्मया **भारतादौ** पुराणे श्रुतम् ॥ ४ ॥ एतदुपसंहारद्वारेण परिहरन्नाह—

तत्थ मंदा विसीअंति, वाहच्छिन्ना व गद्दभा । पिट्ठतो परिसप्पंति, पिट्ठसप्पी य संभमे ॥ ५ ॥
इहमेगे उ भासंति, सातं सातेण विज्जती । जे तत्थ आरियं मग्गं, परमं च समाहिए(यं) ॥ ६ ॥

'तत्र' तस्मिन् कुश्रुत्युपसर्गोदये **'मन्दा'** अज्ञा नानाविधोपायसाध्यं सिद्धिगमनमवधार्य **विषीदन्ति** संयमानुष्ठाने, न पुनरेतद्विदन्त्यज्ञाः, तद्यथा—येषां सिद्धिगमनमभूत् तेषां कुतश्चिन्निमित्तात् जातजातिस्मरणादिप्रत्ययानामवाप्तसम्यग्ज्ञानचारित्राणामेव वल्कलचीरिप्रभृतीनामिव सिद्धिगमनमभूत्, न पुनः कदाचिदपि सर्वविरतिपरिणामाभावलिङ्गमन्तरेण शीतोदकबीजाद्युपभोगेन जीवोपमर्दप्रायेण कर्मक्षयोऽवाप्यते, विषीदने दृष्टान्तमाह—**वहनं** वाहो—भारोद्वहनं तेन **छिन्नाः**—कर्पितास्त्रुटिता रासभा इव विषीदन्ति, यथा—रासभा गमनपथ एव प्रोज्झितभारा निपतन्ति, एवं तेऽपि प्रोह्य संयमभारं शीतलविहारिणो भवन्ति, दृष्टान्तान्तरमाह—यथा **'पृष्ठसर्पिणो'** भग्नगतयोऽश्वादिसम्भ्रमे सत्युद्भ्रान्तनयनाः समाकुलाः प्रनष्टजनस्य **'पृष्ठतः'** पश्चात्परिसर्पन्ति नाग्रगामिनो भवन्ति, अपि तु तत्रैवाश्वादिसम्भ्रमे विनश्यन्ति, एवं तेऽपि शीतलविहारिणो मोक्षं प्रति प्रवृत्ता अपि तु न मोक्षगतयो भवन्ति अपि तु तस्मिन्नेव संसारे अनन्तमपि कालं यावदासत इति ॥ ५ ॥ मतान्तरं निराकर्तुं पूर्वपक्षयितुमाह—**'इहे'**ति मोक्षगमनविचारप्रस्तावे **'एके'** शाक्यादयः स्वयूथ्या वा लोचादिनोपतप्ताः, तुशब्दः पूर्वस्मात् शीतोदकादिपरिभोगाद्विशेषमाह, **'भाषन्ते'** ब्रुवते मन्यन्ते वा क्वचित्पाठः, किं तदित्याह—**'सातं'** सुखं **'सातेन'** सुखेनैव **'विद्यते'** भवतीति, तथा च वक्तारो भवन्ति—"सर्वाणि सत्त्वानि सुखे रतानि, सर्वाणि दुःखाच्च समुद्विजन्ते । तस्मात्सुखार्थी सुखमेव दद्यात्, सुखप्रदाता लभते सुखानि ॥ १ ॥" युक्तिरप्येवमेव स्थिता, यतः कारणानुरूपं कार्यमुत्पद्यते, तद्यथा—शालिबीजाच्छाल्यङ्कुरो जायते न यवाङ्कुर इत्येवमिहत्यात् सुखान्मुक्तिसुखमुपजायते, न तु लोचादिरूपात् दुःखादिति, तथा **आगमोऽप्येवमेव व्यवस्थितः**—"मणुण्णं भोयणं भोच्चा, मणुण्णं सयणासणं । मणुण्णंसि अगारंसि, मणुण्णं झायए मुणी ॥ १ ॥"[1] तथा "मृद्वी शय्या प्रातरुत्थाय पेया, भक्तं मध्ये पानकं चापराह्णे । द्राक्षाखण्डं शर्करा चार्द्धरात्रे, मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ॥ १ ॥" इत्यतो मनोज्ञाहारविहारादेश्चित्तस्वास्थ्यं ततः समाधिरुत्पद्यते समाधेश्च मुक्त्यवाप्तिः, अतः स्थितमेतत्—सुखेनैव सुखावाप्तिः न पुनः कदाचनापि लोचादिना कायक्लेशेन सुखावाप्तिरिति स्थितं, इत्येवं व्यामूढमतयो ये केचन शाक्यादयः **'तत्र'** तस्मिन्मोक्षविचारप्रस्तावे समुपस्थिते आराद्यातः सर्वहेयधर्मेभ्य इत्यार्यो मार्गो जैनेन्द्रशासनप्रतिपादितो मोक्षमार्गस्तं ये परिहरन्ति, तथा च—**'परमं च समाधिं'** ज्ञानदर्शनचारित्रात्मकं ये त्यजन्ति तेऽज्ञाः संसारान्तर्वर्तिनः सदा भवन्ति, तथाहि—यत्तैरभिहितं—कारणानुरूपं कार्यमिति, तन्नायमेकान्तो, यतः शृङ्गाच्छरो जायते गोमयाद्वृश्चिको गोलोमाविलोमादिभ्यो दूर्वेति, यदपि मनोज्ञाहारादिकमुपन्यस्तं सुखकारणत्वेन तदपि विशूचिकादिसंभवाद्व्यभिचारीति, अपिच—इदं वैषयिकं सुखं दुःखप्रतीकारहेतुत्वात् सुखाभासतया सुखमेव न भवति, तदुक्तम्—"दुःखात्मकेषु विषयेषु सुखाभिमानः, सौख्यात्मकेषु नियमादिषु दुःखबुद्धिः । उत्कीर्णवर्णपदपङ्क्तिरिवान्यरूपा, सारूप्यमेति विपरीतगतिप्रयोगात् ॥ १ ॥" इति, कुतस्तत्परमानन्दरूपस्यात्यन्तिकैकान्तिकस्य मोक्षसुखस्य कारणं भवति, यदपि च लोचभूशयनभिक्षाटनपरपरिभवक्षुत्पिपासादंशमशकादिकं दुःखकारणत्वेन भवतो-

[1] मनोज्ञं भोजनं भुक्त्वा मनोज्ञे शयनासने । मनोज्ञेऽगारे मनोज्ञं ध्यायेन्मुनिः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्यस्तं तदत्यन्ताल्पमन्यानामपरमार्थदर्शां, महापुरुषाणां तु स्वार्थाभ्युपगमप्रवृत्तानां परमार्थचिन्तैकतानानां महासत्त्वतया सर्वमेवैतत्सुखायेवेति, तथा चोक्तम्—"तृणसंथारनिविण्णोवि मुनिवरो भट्ठरागमयमोहो । जं पावइ मुत्तिसुहं कत्तो तं चक्कवट्टीवि ? ॥ १ ॥" तथा । "दुःखं दुष्कृतसंक्षयाय महतां क्षान्तेः पदं वैरिणः, कायस्याशुचिता विरागपदवी संवेगहेतुर्जरा । सर्वत्यागमहोत्सवाय मरणं जातिः सुहृत्प्रीतये, संपद्भिः परिपूरितं जगदिदं स्थानं विपत्तेः कुतः ? ॥ १ ॥" इति, अपिच—एकान्तेन सुखेनैव सुखेऽभ्युपगम्यमाने विचित्रसंसाराभावः स्यात्, तथा स्वर्गस्थानां नित्यसुखिनां पुनरपि सुखानुभूतेस्तत्रैवोत्पत्तिः स्यात्, तथा नारकाणां च पुनर्दुःखानुभवात्तत्रैवोत्पत्तेः, न नानागत्या विचित्रता संसारस्य स्यात्, नचैतत् दृष्टमिष्टं चेति ॥ ६ ॥ अतो व्यपदिश्यते—

मा एयं अवमन्नंता, अप्पेणं लुंपहा बहुं । एतस्स (उ)अमोक्खाए, अओहारिव्व जूरह ॥ ७ ॥
पाणाइवाते वट्टंता, मुसावादे असंजता । अदिन्नादाणे वट्टंता, मेहुणे य परिग्गहे ॥ ८ ॥

'एनम्' आर्हं मार्गं जैनेन्द्रप्रवचनं सम्यग्दर्शनज्ञानचारित्रमोक्षमार्गप्रतिपादकं 'सुखं सुखेनैव विद्यते' इत्यादिमोहेन मोहिता 'अवमन्यमानाः' परिहरन्तः 'अल्पेन' वैषयिकेण सुखेन मा 'बहु' परमार्थसुखं मोक्षाख्यं 'लुम्पथ' विध्वंसथ, तथाहि—मनोज्ञाऽऽहारादिना कामोद्रेकः, तदुद्रेकाच्च चित्तास्वास्थ्यं न पुनः समाधिरिति, अपि च 'एतस्य' असत्पक्षाभ्युपगमस्य 'अ-

सूत्रकृ. १७ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुते ॥ ९७ ॥

१ तृणसंस्तारनिषण्णोऽपि मुनिवरो भ्रष्टरागमदमोहः । यत्प्राप्नोति मुक्तिसुखं कुतस्तत् चक्रवर्त्यपि ? ॥ १ ॥

मोक्षे' अपरित्यागे सति 'अयोहारिव्व जूरह'त्ति आत्मानं यूयं कदर्थयथ, केवलं, यथाऽसौ अयसो—लोहस्याऽऽहर्त्ता अपान्तराले रूप्यादिलाभे सत्यपि दूरमानीतमितिकृत्वा नोज्झितवान्, पश्चात् स्वावस्थानावाप्तावल्पलाभे सति जूरितवान्—पश्चात्तापं कृतवान् एवं भवन्तोऽपि जूरयिष्यन्तीति ॥ ७ ॥ पुनरपि 'सातेन सात'मित्येवंवादिनां शाक्यानां दोषोद्भिावयिषयाह—प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहेषु वर्तमाना असंयता यूयं वर्तमानसुखैषिणोऽल्पेन वैषयिकसुखाभासेन पारमार्थिकमैकान्तात्यन्तिकं बहु मोक्षसुखं विलुम्पथेति, किमिति ?, यतः पचनपाचनादिषु क्रियासु वर्तमानाः सावद्यानुष्ठानारम्भतया प्राणातिपातमाचरथ तथा येषां जीवानां शरीरोपभोगो भवद्भिः क्रियते तानि शरीराणि तत्स्वामिभिरदत्तानीत्यदत्तादानाचरणं तथा गोमहिष्यजोष्ट्रादिपरिग्रहात्तन्मैथुनानुमोदनादब्रह्मेति तथा प्रव्रजिता वयमित्येवमुत्थाय गृहस्थाचरणानुष्ठानान्मृषावादः तथा धनधान्यद्विपदचतुष्पदादिपरिग्रहात्परिग्रह इति ॥ ८ ॥ साम्प्रतं मतान्तरदूषणाय पूर्वपक्षयितुमाह—

२ उपसर्गाध्य० उद्देशः ४

एवमेगे उ पासत्था, पन्नवंति अणारिया । इत्थीवसं गया बाला, जिणसासणपरम्मुहा ॥ ९ ॥
जहा गंडं पिलागं वा, परिपीलेज्ज मुहुत्तगं । एवं विन्नवणित्थीसु, दोसो तत्थ कओ सिआ ? ॥१०॥
जहा मंधादए नाम, थिमिअं भुंजती दगं । एवं विन्नवणित्थीसु, दोसो तत्थ कओ सिआ ? ॥ ११ ॥
जहा विहंगमा पिंगा, थिमिअं भुंजती दगं । एवं विन्नवणित्थीसु, दोसो तत्थ कओ सिआ ! ॥१२॥
एवमेगे उ पासत्था, मिच्छदिट्ठी अणारिया । अज्झोववन्ना कामेहिं, पूयणा इव तरुणए ॥ १३ ॥

॥ ९७ ॥

तुशब्दः पूर्वस्माद्विशेषणार्थः, 'एवमि'ति वक्ष्यमाणया नीत्या, यदिवा प्राक्तन एव श्लोकोऽत्रापि सम्बन्धनीयः, एवमिति प्राणातिपातादिषु वर्तमाना 'एके' इति बौद्धविशेषा नीलपटादयो नाथवादिकमण्डलप्रविष्टा वा शैवविशेषाः, सदनुष्ठानात् पार्श्वे तिष्ठन्तीति पार्श्वस्थाः, स्वयूथ्या वा पार्श्वस्थावसन्नकुशीलादयः स्त्रीपरीषहपराजिताः, त एवं 'प्रज्ञापयन्ति' प्ररूपयन्ति अनार्याः, अनार्यकर्मकारित्वात्, तथाहि ते वदन्ति—"प्रियादर्शनमेवास्तु, किमन्यैर्दर्शनान्तरैः ? । प्राप्यते येन निर्वाणं, सरागेणापि चेतसा ॥१॥" किमित्येवं तेऽभिदधतीत्याह—'स्त्रीवशं गताः' यतो युवतीनामाज्ञायां वर्तन्ते 'बाला' अज्ञा रागद्वेषोपहतचेतस इति, रागद्वेषजितो जिनास्तेषां शासनम्—आज्ञा कषायमोहोपशमहेतुभूता तत्पराङ्मुखाः संसाराभिष्वङ्गिणो जैनमार्गविद्वेषिणः 'एतत्' वक्ष्यमाणमूचुरिति ॥९॥ यदुचुस्तदाह—यथेत्युदाहरणोपन्यासार्थः, 'यथा' येन प्रकारेण कश्चित् गण्डी पुरुषो गण्डं समुत्थितं पिटकं वा तज्जातीयकमेव तदाकृतोपशमनार्थं 'परिपीड्य' पूयरुधिरादिकं निर्गाल्य मुहूर्तमात्रं सुखितो भवति, न च दोषेणानुषज्यते, एवमत्रापि 'स्त्रीविज्ञापनायां' युवतिप्रार्थनायां रमणीसम्बन्धे गण्डपरिपीडनकल्पे दोषस्तत्र कुतः स्यात् ?, न ह्येतावता क्लेदापगममात्रेण दोषो भवेदिति ॥१०॥ स्यात्तत्र दोषो यदि काचित्पीडा भवेत्, न चासाविहास्तीति दृष्टान्तेन दर्शयति—

१ चक्षुषेति प्र० । २ आकोपः वि० प्र० तदाकृतो० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'यथे' त्यनुदाहरणोपन्यासार्थः, 'मन्धादन' इति मेषः नाम्नशब्दः सम्भावनायां यथा मेषः तिमितम् अनालोडयन्नुदकं पिबत्यात्मानं प्रीणयति, न च तथाऽन्येषां किञ्चनोपघातं विधत्ते, एवमत्रापि स्त्रीसम्बन्धे न काचिदन्यस्य पीडा आत्मनश्च प्रीणनम्, अतः कुतस्तत्र दोषः स्यादिति ॥११॥ अस्मिन्नेवानुपघातार्थे दृष्टान्तबहुत्वख्यापनार्थं दृष्टान्तान्तरमाह—'यथा' येन प्रकारेण विहायसा गच्छतीति विहंगमा-पक्षिणी 'पिंगे'ति कपिञ्जला साऽऽकाश एव वर्तमानाः 'तिमितं' निभृतमुदकमापिबति, एवमत्रापि दर्भप्रदानपूर्विकया क्रियया अरक्तद्विष्टस्य पुत्रार्थं स्त्रीसम्बन्धं कुर्वतोऽपि कपिञ्जलाया इव न तस्य दोष इति, साम्प्रतमेतेषां गण्डपीडनतुल्यं स्त्रीपरिभोगं मन्यमानानां तथैडकोदकपानसदृशं परपीडाऽनुत्पादकत्वेन परात्मनोश्च सुखोत्पादकत्वेन किल मैथुनं जायत इत्यध्यवसायिनां तथा कपिञ्जलोदकपानं यथा तडागोदकासंस्पर्शेन किल भवत्येवमरक्तद्विष्टतया दर्भाद्युच्चारणात् स्त्रीगात्रासंस्पर्शेन पुत्रार्थं न कामार्थं ऋतुकालाभिगामितया शास्त्रोक्तविधानेन मैथुनेऽपि न दोषानुषङ्गः, तथा चोक्तम्—"धर्मार्थं पुत्रकामस्य, स्वदारेष्वधिकारिणः । ऋतुकाले विधानेन, दोषस्तत्र न विद्यते ॥१॥" इति, एवमुदासीनत्वेन व्यवस्थितानां दृष्टान्तेनैव निर्युक्तिकारो गाथात्रयेणोत्तरदानायाह—

जह णाम मंडलग्गेण सिरं छेत्तूण कस्सइ मणुस्सो । अच्छेज्ज पराहुत्तो किं नाम ततो ण घिप्पेज्जा ? ॥५३॥
जह वा विसगंडूसं कोई घेत्तूण नाम तुण्हिक्को । अण्णेण अदीसंतो किं नाम ततो न य मरेज्जा ! ॥ ५४ ॥
जह नाम सिरिघराओ कोइ रयणाणि णाम घेत्तूणं । अच्छेज्ज पराहुत्तो किं णाम ततो न घेप्पेज्जा ? ॥ ५५ ॥

यथा [ग्रन्थाग्रम् ३०००] नाम कश्चिन्मण्डलाग्रेण कस्यचिच्छिरश्छित्त्वा पराङ्मुखस्तिष्ठेत्, किमेतावतोदासीनभावावलम्बनेन 'न गृह्येत' नापराधी भवेत्? । तथा-यथा कश्चिद्विषगण्डूषं 'गृहीत्वा' पीत्वा नाम तूष्णींभाव भजेदन्येन चादृश्यमानोऽसौ किं नाम 'ततः' असावन्यादर्शनात् न म्रियेत? । तथा-यथा कश्चित् श्रीगृहाद्-भाण्डागाराद्रत्नानि महार्घाणि गृहीत्वा पराङ्मुखस्तिष्ठेत्, किमेतावताऽसौ न गृह्येतेति? । अत्र च यथा-कश्चित् शठतया अज्ञतया वा शिरश्छेदविषगण्डूषरत्नापहाराख्ये सत्यपि दोषत्रये माध्यस्थ्यमवलम्बेत, न च तस्य तदवलम्बनेऽपि निर्दोषतेति, एवमत्राप्यवश्यंभाविरागकार्ये मैथुने सर्वदोषास्पदे संसारवर्द्धके कुतो निर्दोषतेति, तथा चोक्तम्—"प्राणिनां बाधकं चैतच्छास्त्रे गीतं महर्षिभिः । नलिकातप्तकणकप्रवेशज्ञाततस्तथा ॥ १ ॥ मूलं चैतदधर्मस्य, भवभावप्रवर्धनम् । तस्माद्विषान्नवत्त्याज्यमिदं पापमनिच्छता ॥२॥" इति निर्युक्तिगाथात्रयतात्पर्यार्थः ॥ ॥ साम्प्रतं सूत्रकार उपसंहारव्याजेन गण्डपीडनादिदृष्टान्तवादिनां दोषोद्भिावयिषयाह—'एव' मिति गण्डपीडनादिदृष्टान्तबलेन निर्दोषं मैथुनमिति मन्यमाना 'एके' स्त्रीपरीषहपराजिताः सदनुष्ठानात्पार्श्वे तिष्ठन्तीति पार्श्वस्था नाथवादिकमण्डलचारिणः, तुशब्दात् स्वयूथ्या वा, तथा मिथ्या-विपरीता तत्त्वाग्राहिणी दृष्टिः—दर्शनं येषां ते तथा, आरात्—दूरे याता—गताः सर्वहेयधर्मेभ्य इत्यार्याः न आर्या अनार्याः धर्मविरुद्धानुष्ठानात्, त एवंविधा 'अध्युपपन्ना' गृध्नव इच्छामदनरूपेषु कामेषु कामैर्वा करणभूतैः सावद्यानुष्ठानेष्विति, अत्र लौकिकं दृष्टान्तमाह—यथा वा 'पूतना' डाकिनी 'तरुणके' स्तनन्धयेऽध्युपपन्ना, एवं तेऽप्यनार्याः कामेष्विति, यदिवा 'पूयण'त्ति गडुरिका आत्मीयेऽपत्येऽध्युपपन्ना, एवं तेऽपीति, कथानकं चात्र—यथा किल सर्वपशूनामपत्यानि निरुदके कूपेऽपत्यस्नेहपरीक्षार्थं क्षिप्तानि, तत्र चापरा मातरः स्वकीयस्तनन्धयशब्दाकर्णनेऽपि कूपतटस्था रुदन्त्यस्तिष्ठन्ति, उरभ्री त्वपत्यातिस्नेहेनान्धा अपायमनपेक्ष्य तत्रैवात्मानं क्षिप्तवतीत्यतोऽपरपशुभ्यः स्वापत्येऽध्युपपन्नेति, एवं तेऽपि ॥ १३ ॥ कामाभिष्वङ्गिणां दोषमाविष्कुर्वन्नाह—

अणागयमपस्संता, पच्चुप्पन्नगवेसगा । ते पच्छा परितप्पंति, खीणे आउंमि जोव्वणे ॥ १४ ॥
जेहिं काले परिक्कंतं, न पच्छा परितप्पए । ते धीरा बंधणुम्मुक्का, नावकंखंति जीविअं ॥ १५ ॥

'अनागतम्' एष्यत्कालमनिवृत्तानां नरकादियातनास्थानेषु महत् दुःखम् 'अपश्यन्तः' अपर्यालोचयन्तः, तथा 'प्रत्युत्पन्नं' वर्तमानमेव वैषयिकं सुखाभासम् 'अन्वेषयन्तो' मृगयमाणा नानाविधैरुपायैर्भोगान्प्रार्थयन्तः ते पश्चात् क्षीणे स्वायुषि जातसंवेगा यौवने वाऽपगते 'परितप्यन्ते' शोचन्ते पश्चात्तापं विदधति, उक्तं च-"हतं मुष्टिभिराकाशं, तुषाणां कण्डनं कृतम् । यन्मया प्राप्य मानुष्यं, सदर्थे नादरः कृतः ॥ १ ॥" तथा—"विहवावलेवनडिएहिं जाइं कीरंति जोव्वणमएणं । वयपरिणामे सरियाइं ताइं हिअए खुडुक्कंति ॥ १ ॥" ॥ १४ ॥ ये तूत्तमसत्त्वतया अनागतमेव तपश्चरणादावुद्यमं विदधति न ते पश्चाच्छोचन्तीति दर्शयितुमाह—'यैः' आत्महितकर्तृभिः 'काले' धर्मार्जनावसरे 'पराक्रान्तम्' इन्द्रियकषायपराजययोद्यमो विहितो न ते 'पश्चात्' मरणकाले वृद्धावस्थायां वा 'परितप्यन्ते' न शोकाकुला भवन्ति, एकवचननिर्देशस्तु सौत्रश्छान्दसत्वादिति,

१ विभवावलेपनडितैर्यानि न क्रियन्ते यौवनमदेन । वयःपरिणामे स्मृतानि तानि हृदयं व्यथयन्ते ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मार्जनकालस्तु विवेकिनां प्रायशः सर्व एव, यस्मात्स एव प्रधानपुरुषार्थः, प्रधान एव च प्रायशः क्रियमाणो घटां प्राञ्चति, ततश्च ये बाल्यात्प्रभृत्यकृतविषयासङ्गतया कृततपश्चरणाः ते 'धीराः' कर्मविदारणसहिष्णवो बन्धनेन-स्नेहात्मकेन कर्मणा चोत् —प्राबल्येन मुक्ता नावकाङ्क्षन्ति असंयमजीवितं, यदिवा-जीविते मरणे वा निःस्पृहाः संयमोद्यममतयो भवन्तीति ॥ १५ ॥ अन्यच्च—

जहा नई वेयरणी, दुत्तरा इह संमता । एवं लोगंसि नारीओ, दुरुत्तरा अमईमया ॥ १६ ॥
जेहिं नारीण संजोगा, पूयणा पिट्ठतो कता । सव्वमेयं निराकिच्चा, ते ठिया सुसमाहिए ॥ १७ ॥

यथेत्युदाहरणोपन्यासार्थः, यथा वैतरणी नदीनां मध्येऽत्यन्तवेगवाहित्वात् विषमतटत्वाच्च 'दुस्तरा' दुर्लङ्घ्या 'एवम्' अस्मिन्नपि लोके नार्यः 'अमतिमता' निर्विवेकेन हीनसत्त्वेन दुःखेनोत्तीर्यन्ते, तथाहि—ता हावभावैः कृतविघ्नानपि स्वीकुर्वन्ति, तथा चोक्तम्—"सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां, लज्जां तावद्बिभर्त्ति विनयमपि समालम्बते तावदेव । भ्रूचापाक्षेपमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते, यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥ १ ॥" तदेवं वैतरणीनदीवत् दुस्तरा नार्यो भवन्तीति ॥ १६ ॥ अपिच—'यैः' उत्तमसत्त्वैः स्त्रीसङ्गविपाकवेदिभिः पर्यन्तकटवो नारीसंयोगाः परित्यक्ताः, तथा तत्सङ्गार्थमेव वस्त्रालङ्कारनाट्यादिभिरात्मनः 'पूजना' कामविभूषा 'पृष्ठतः कृता' परित्यक्तेत्यर्थः, 'सर्वमेतत्' स्त्रीप्रसङ्गादिकं क्षुत्पिपासादि प्रतिकूलोपसर्गकदम्बकं च निराकृत्य ये महापुरुषसेवितपन्थानं प्रति प्रवृत्तास्ते सुसमाधिना—स्वस्थचित्तवृत्तिरूपेण व्यवस्थिताः, नोपसर्गैरनुकूलप्रतिकूलरूपैः प्रक्षोभ्यन्ते, अन्ये तु विषयाभिष्वङ्गिणः क्षुदादिपरीषहपराजिता अङ्गारोपरिपतितमीनवद्रागाग्निना दह्यमाना असमाधिना तिष्ठन्तीति ॥ १७ ॥ क्षुदादिपरीषहपराजयस्य फलं दर्शयितुमाह—

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१००॥

३ उपसर्गाध्य० उद्देशः ४

एते ओघं तरिस्संति, समुद्दं ववहारिणो । जत्थ पाणा विसन्नासि, किच्चंती सयकम्मुणा ॥ १८ ॥
तं च भिक्खू परिण्णाय, सुव्वते समिते चरे । मुसावायं च वज्जिज्जा, अदिन्नादाणं च वोसिरे ॥१९॥
उड्ढमहे तिरियं वा, जे केई तसथावरा । सव्वत्थ विरतिं कुज्जा,

य एते अनन्तरोक्ता अनुकूलप्रतिकूलोपसर्गजेतार एते सर्वेऽपि 'ओघं' संसारं दुस्तरमपि तरिष्यन्ति, द्रव्यौघदृष्टान्तमाह—'समुद्रं' लवणसागरमिव यथा 'व्यवहारिणः' सांयात्रिका यानपात्रेण तरन्ति, एवं भावौघमपि संसारं संयमयानपात्रेण यतयस्तरिष्यन्ति, तथा तीर्णास्तरन्ति चेति, भावौघमेव विशिनष्टि-'यत्र' यस्मिन् भावौघे संसारसागरे 'प्राणाः' प्राणिनः स्त्रीविषयसंगाद्विपण्णाः सन्तः 'कृत्यन्ते' पीड्यन्ते 'स्वकृतेन' आत्मनाऽनुष्ठितेन पापेन 'कर्मणा' असद्वेदनीयोदयरूपेणेति ॥ १८ ॥ साम्प्रतमुपसंहारव्याजेनोपदेशान्तरदित्सयाह—तदेतद्यत्प्रागुक्तं यथा-वैतरणीनदीवत् दुस्तरा नार्यो यैः परित्यक्तास्ते समाधिस्थाः संसारं तरन्ति, स्त्रीसङ्गिनश्च संसारान्तर्गताः स्वकृतकर्मणा कृत्यन्त इति, तदेतत्सर्वं भिक्षणशीलो भिक्षुः 'परिज्ञाय' हेयोपादेयतया बुध्वा शोभनानि व्रतान्यस्य सुव्रतः पञ्चभिः समितिभिः समित इत्यनेनोत्तरगुणावेदनं कृतमित्येवंभूतः 'चरेत्' संयमानुष्ठानं विदध्यात्, तथा 'मृषावादम्' असद्भूतार्थभाषणं विशेषेण वर्जयेत्, तथा 'अदत्तादानं च व्युत्सृजेद्' दन्तशोधनमात्रमप्यदत्तं न गृह्णीयात्, आदिग्रहणान्मैथुनादेः परिग्रह इति, तच्च मैथुनादिकं यावज्जीवमात्महितं मन्यमानः परिहरेत् ॥१९॥ अपरव्रतानामहिंसाया वृत्तिकल्पत्वात् तत्प्राधान्यख्यापनार्थमाह-ऊर्ध्वमधस्तिर्यक्ष्वित्यनेन क्षेत्रप्राणातिपातो गृहीतः, तत्र ये केचन त्रसन्तीति त्रसा द्वित्रिचतुःपञ्चेन्द्रियाः पर्याप्तापर्याप्तकभेदभिन्नाः, तथा तिष्ठन्तीति स्थावराः-पृथिव्यप्तेजोवायुवनस्पतयः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्ना इति, अनेन च द्रव्यप्राणातिपातो गृहीतः, सर्वत्र काले सर्वास्ववस्थास्वित्यनेनापि कालभावभेदभिन्नः प्राणातिपात उपात्तो द्रष्टव्यः, तदेवं चतुर्दशस्वपि जीवस्थानेषु कृतकारितानुमतिभिर्मनोवाक्कायैः प्राणातिपातविरतिं कुर्यादित्यनेन पादोनेनापि श्लोकद्वयेन प्राणातिपातविरत्यादयो मूलगुणाः ख्यापिताः, साम्प्रतमेतेषां सर्वेषामेव मूलोत्तरगुणानां फलमुद्देशेनाह—

संति निव्वाणमाहियं ॥ २० ॥
इमं च धम्ममादाय, कासवेण पवेदितं । कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहिए ॥ २१ ॥
संखाय पेसलं धम्मं, दिट्ठिमं परिनिव्वुडे । उवसग्गे नियामित्ता, आमोक्खाए परिव्वएज्जासि ॥२२॥
त्तिबेमि । इति उवसग्गपरिन्नाणामं तइयं अज्झयणं सम्मत्तं ॥ [गाथाग्रं २५६]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'शान्तिः' इति कर्मदाहोपशमस्तदेव च 'निर्वाणं' मोक्षपदं यद् 'आख्यातं' प्रतिपादितं सर्वद्वन्द्वापगमरूपं तदस्यावश्यं चरणकरणानुष्ठायिनः साधोर्भवतीति ॥ २० ॥ समस्ताध्ययनार्थोपसंहारार्थमाह—'इमं च धम्ममि'त्यादि, 'इम' मिति पूर्वोक्तं मूलोत्तरगुणरूपं श्रुतचारित्राख्यं वा दुर्गतिधारणात् धर्मम् 'आदाय' आचार्योपदेशेन गृहीत्वा किम्भूतमिति तदेव विशिनष्टि—'काश्यपेन' श्रीमन्महावीरवर्धमानस्वामिना समुत्पन्नदिव्यज्ञानेन भव्यसत्त्वाभ्युद्धरणाभिलाषिणा 'प्रवेदितम्' आख्यातं समधिगम्य 'भिक्षुः' साधुः परीषहोपसर्गैरनभिजितो ग्लानस्यापरस्य साधोर्वैयावृत्त्यं कुर्यात्, कथमिति ?, स्वतोऽग्लानतया यथाशक्ति 'समाहित' इति समाधिं प्राप्तः, इदमुक्तं भवति—कृतकृत्योऽहमिति मन्यमानो वैयावृत्त्यादिकं कुर्यादिति ॥ २१ ॥ अन्यच्च—'संख्याये'ति सम्यक् ज्ञात्वा स्वसम्मत्या अन्यतो वा—श्रुत्वा 'पेशलं'ति मोक्षगमनं प्रत्यनुकूलं, किं तद् ?—'धर्मं' श्रुतचारित्राख्यं 'दृष्टिमान्' सम्यग्दर्शनी 'परिनिर्वृत' इति कषायोपशमाच्छीतीभूतः परिनिर्वृतकल्पो वा 'उपसर्गान्' अनुकूलप्रतिकूलान् सम्यग् 'नियम्य' अतिसह्य 'आमोक्षाय' मोक्षं यावत् परि—समन्तात् 'व्रजेत्' संयमानुष्ठानेन गच्छेदिति, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत्, नयचर्चोऽपि तथैवेति ॥ २२ ॥ उपसर्गपरिज्ञायाः समाप्तश्चतुर्थोद्देशकः, तत्परिसमाप्तौ च तृतीयमध्ययनमिति । ग्रंथाग्रं ७७५ ॥

---

१ सदसन्मल्लेति तात्पर्यं प्राकृतानुकरणं चेदम् ।

॥ अथ चतुर्थं स्त्रीपरिज्ञाध्ययनं प्रारभ्यते ॥

उक्तं तृतीयमध्ययनं, साम्प्रतं चतुर्थमारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने उपसर्गाः प्रतिपादिताः, तेषां च प्रायोऽनुकूला दुःसहाः, ततोऽपि स्त्रीकृताः, अतस्तज्जयार्थमिदमध्ययनमुपदिश्यत इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारः प्रागुवत् निर्युक्तिकृता 'थीदोषपिवज्जणा चेवे'त्यनेन स्वयमेव प्रतिपादितः, उद्देशार्थाधिकारं तूत्तरत्र निर्युक्तिकृदेव भणिष्यति, साम्प्रतं निक्षेपः, स चौघनामसूत्रालापकभेदात्त्रिधा, तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने 'स्त्रीपरिज्ञे'ति नाम, तत्र नामस्थापने क्षुण्णत्वादनादृत्य स्त्रीशब्दस्य द्रव्यादिनिक्षेपार्थमाह—

दव्वाभिलावचिंधे वेदे भावे य इत्थिणिक्खेवो । अहिलावे जह सिद्धी भावे वेयंमि उवउत्तो ॥ ५६ ॥

तत्र द्रव्यस्त्री द्वेधा—आगमतो नोआगमतश्च, आगमतः स्त्रीपदार्थज्ञस्तत्र चानुपयुक्तः, अनुपयोगो द्रव्यमितिकृत्वा, नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्ता त्रिधा, एकभविका बद्धायुष्काऽभिमुखनामगोत्रा चेति, चिह्नयते—ज्ञायतेऽनेनेति चिह्नं—स्त-

---

१ व्यतिरिक्तभेदाः ।

ननेपथ्यादिकं, चिह्नमात्रेण स्त्री चिह्नस्त्री अपगतस्त्रीवेदश्छद्मस्थः केवली वा अन्यो वा स्त्रीवेषधारी यः कश्चिदिति, वेदस्त्री तु पुरुषाभिलाषरूपः स्त्रीवेदोदयः, अभिलापभावो तु निर्युक्तिकृदेव गाथापश्चार्द्धेनाह—अभिलप्यते इत्यभिलापः स्त्रीलिङ्गाभिधानः शब्दः, तद्यथा—शाला माला सिद्धिरिति, भावस्त्री तु द्वेधा—आगमतो नोआगमतश्च, आगमतः स्त्रीपदार्थज्ञस्तत्र चोपयुक्तः, 'उपयोगो भाव' इतिकृत्वा, नोआगमतस्तु भावविषये निक्षेपे 'वेदे' स्त्रीवेदरूपे वस्तुन्युपयुक्ता तदुपयोगानन्यत्वाद्भावस्त्री भवति, यथाऽग्नावुपयुक्तो माणवकोऽग्निरेव भवति, एवमत्रापि, यदिवा—स्त्रीवेदनिर्वर्तकान्युदयप्राप्तानि यानि कर्माणि तेषु 'उपयुक्ते'ति तान्यनुभवन्ती भावस्त्रीति, एतावानेव स्त्रियो निक्षेप इति, परिज्ञानिक्षेपस्तु शस्त्रपरिज्ञावद् द्रष्टव्यः ॥ साम्प्रतं स्त्रीविपक्षभूतं पुरुषनिक्षेपार्थमाह—

णामं ठवणादविए खेत्ते काले य पज्जणणकंमे । भोगे गुणे य भावे दस एए पुरिसणिक्खेवा ॥ ५७ ॥

'नाम' इति संज्ञा तन्मात्रेण पुरुषो नामपुरुषः—यथा घटः पट इति, यस्य वा पुरुष इति नामेति, 'स्थापनापुरुषः' काष्ठादिनिर्वर्तितो जिनप्रतिमादिकः, द्रव्यपुरुषो ज्ञशरीरभव्यशरीरव्यतिरिक्तो नोआगमत एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्चेति, इह प्रधानो वा सम्मणवणिगादिरिति, यो यस्मिन् मुराष्ट्रादौ क्षेत्रे भवः स क्षेत्रपुरुषो यथा सौराष्ट्रिक इति, यस्य वा यत् क्षेत्रमाश्रित्य पुंस्त्वं भवतीति, यो यावन्तं कालं पुरुषवेदवेद्यानि कर्माणि वेदयते स कालपुरुष इति, यथा—'पुरिसे णं भंते ! पुरिसोत्ति कालओ केवचिरं होइ ? गो०, जहन्नेणं एगं समयं उक्कोसेणं जो जम्मि काले पुरिसो भवइ, जहा कोइ एगंमि पक्खे पुरिसो एगंमि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नपुंसगो'त्ति । प्रजन्यतेऽपत्यं येन तत्प्रजननं शिश्नम्--लिङ्गम् तत्प्रधानः पुरुषः अपरपुरुषकार्यरहितत्वात् प्रजननपुरुषः, कर्म—अनुष्ठानं तत्प्रधानः पुरुषः कर्मपुरुषः—कर्मकरादिकः, तथा भोगप्रधानः पुरुषो भोगपुरुषः—चक्रवर्त्यादिः—तथा गुणाः—व्यायामविक्रमधैर्यसत्त्वादिकास्तत्प्रधानः पुरुषो गुणपुरुषः, भावपुरुषस्तु पुंवेदोदये वर्तमानस्तद्वेद्यानि कर्माण्यनुभवन्निति, एते दश पुरुषनिक्षेपा भवन्ति । साम्प्रतं प्रागुद्दिष्टमुद्देशार्थाधिकारमधिकृत्याह—

पढमे संथवसंलवमाइहि खलणा उ होति सीलस्स । बितिए इहेव खलियस्स अवरया कम्मबंधो य ॥५८॥

प्रथमे उद्देशके अयमर्थाधिकारः, तद्यथा—स्त्रीभिः सार्धं 'संस्तवेन' परिचयेन तथा 'संलापेन' भिन्नकथाद्यालापेन, आदिग्रहणादङ्गप्रत्यङ्गनिरीक्षणादिना कामोत्कोचकारिणा भवेदल्पसत्त्वस्य 'शीलस्य' चारित्रस्य स्खलना तुशब्दात्तत्परित्यागो वेति, द्वितीये त्वयमर्थाधिकारः, तद्यथा—शीलस्खलितस्य साधोः 'इहैव' अस्मिन्नेव जन्मनि स्वपक्षपरपक्षकृता तिरस्कारादिका विडम्बना तत्प्रत्ययश्च कर्मबन्धः, ततश्च संसारसागरपर्यटनमिति, किं स्त्रीभिः कश्चित् शीलात् प्रच्याव्यात्मवशः कृतो येनैवमुच्यते ?, कृत इति दर्शयितुमाह—

सूरा मो मन्नंता कइतवियाहिं उवहिप्पहाणाहिं । गहिया हु अभयपज्जोयकूलवालादिणो बहवे ॥ ५९ ॥

बहवः पुरुषा अभयप्रद्योतकूलवालादयः शूरा वयमित्येवं मन्यमानाः, मो इति निपातो वाक्यालङ्कारार्थः, 'कृत्रिमाभिः' सद्भावरहिताभिः स्त्रीभिस्तथा उपधिः-माया तत्प्रधानाभिः कृतकपटशताभिः 'गृहीता' आत्मवशतां नीताः केचन राज्यादपरे

शीलात् प्रच्याव्येहैव विडम्बनां प्रापिताः, अभयकुमारादिकथानकानि च मूलादावश्यकादवगन्तव्यानि, कथानकत्रयोपन्यासस्तु यथाक्रमं अत्यन्तबुद्धिविक्रमतपस्वित्वख्यापनार्थ इति ॥ यत एवं ततो यत्कर्तव्यं तदाह—

तम्हा ण उ वीसंभो गंतव्वो णिच्चमेव इत्थीसुं । पढमुद्देसे भणिया जे दोसा ते गणंतेणं ॥ ६० ॥

यस्मात् स्त्रियः सुगतिमार्गार्गला मायाप्रधाना वञ्चनानिपुणास्तस्मादेतदवगम्य नैव 'विश्रम्भो' विश्वासस्तासां विवेकिना 'नित्यं' सदा 'गन्तव्यो' यातव्यः, कर्तव्य इत्यर्थः, ये दोषाः प्रथमोद्देशके अस्योपलक्षणार्थत्वात् द्वितीये च तान् 'गणयता' पर्यालोचयता, तासां मूर्तिमत्कपटराशिभूतानामात्महितमिच्छता न विश्वसनीयमिति ॥ अपिच—

सुसमत्थाऽवऽसमत्था कीरंती अप्पसत्तिया पुरिसा । दीसंती सूरवादी णारीवसगा ण ते सूरा ॥ ६१ ॥

परानीकविजयादौ सुष्ठु समर्था अपि सन्तः पुरुषाः स्त्रीभिरात्मवशीकृता 'असमर्थाः' भ्रूक्षेपमात्रभीरवः क्रियन्ते—अल्पसात्त्विकाः स्त्रीणामपि पादपतनादिचाटुकरणेन निःसाराः क्रियन्ते, तथा 'दृश्यन्ते' प्रत्यक्षेणोपलभ्यन्ते शूरमात्मानं वदितुं शीलं येषां ते शूरवादिनोऽपि नारीवशगाः सन्तो दीनतां गताः, एवम्भूताश्च न ते शूरा इति, तस्मात् स्थितमेतद्—अविश्वास्याः स्त्रिय इति, उक्तं च—"को धीससेज्ज तासिं कतिवयभरियाण दुव्वियड्ढाणं ! । खणरत्तविरत्ताणं धिरत्थु इत्थीण हिययाणं ॥ १ ॥ अण्णं भणंति पुरओ अण्णं पासे णिवज्जमाणीओ । अन्नं च तासिं हियए जं च खमं तं करिंति पुणो ॥ २ ॥ को एयाणं णा-

१ को विश्रम्भात्तासु कैतवभृत्सु दुर्विदग्धासु । क्षणरक्तविरक्तासु धिगस्तु स्त्रीहृदयानां ॥ १ ॥ २ अन्यद् भणंति पुरतोऽन्यत्पार्श्वे निषीदयन्त्यः । अन्यत्तासां हृदये यच्च क्षमं तत्कुर्वन्ति पुनः ॥ १ ॥ ३ क एतासां श्रास्यति वेत्रलतागुल्मगुपिलहृदयानां । भावं भग्नाशानां तत्रोत्पन्नं भणंतीनां ॥ १ ॥

हिइ वेत्तलयागुम्मगुविलहिययाणं । भावं भग्गासाणं तत्थुप्पन्नं भणंतीणं ॥ ३ ॥ महिला य रत्तमेत्ता उच्छुखंडं च सक्करा चेव । सा पुण विरत्तमित्ता णिंबकूरे विसेसेइ ॥ ४ ॥ महिला दिज्ज करेज्ज व मारिज्ज व संठविज्ज व मणुस्सं । तुट्ठा जीवाविज्जा अहव णरं वंचयावेज्जा ॥ ५ ॥ णवि रक्खंते सुकयं णवि णेहं णवि य दाणसम्माणं । ण कुलं ण पुव्वयं आयतिं च सीलं महिलियाओ ॥ ६ ॥ मा वीसंभह ताणं महिलाहिययाण कवडभरियाणं ॥ णिण्णेहनिद्दयाणं अलियवयणजंपणरयाणं ॥ ७ ॥ मारेइ जियंतंपिहु मयंपि अणुमरइ काइ भत्तारं । विसहरगइव्व चरियं वंकविवंकं महेलाणं ॥ ८ ॥ गंगाए वालुया सागरे जलं हिमवओ य परिमाणं । जाणंति बुद्धिमंता महिलाहिययं ण जाणंति ॥ ९ ॥ रोवावंति रुवंति य अलियं जंपंति पत्तियावंति । कवडेण य खंति विसं मरंति णय जंति सब्भावं ॥ १० ॥ चिंतिंति कज्जमण्णं अण्णं संठवइ भासई अण्णं । आढवइ कुणइ अण्णं माइवग्गो णियडिसारो ॥ ११ ॥ असयारंभाण तहा सव्वेसिं लोगगरहणिज्जाणं । परलोगवेरियाणं कारणयं चेव इत्थीओ ॥ १२ ॥

१ महिला च रक्तमात्रेक्षुखंडेव शर्करेव च । सा पुनर्विरक्तमात्रा निंबाकूरं विशेषयति ॥ १ ॥ २ महिला दद्यात्कुर्याद्वा मारयेद्वा संस्थापयेद्वा मानुष्यं । तुष्टा जीवापयेत् अथ च नरं वंचयेत् ॥ १ ॥ ३ संथविज्ज प्र० संवहेज्ज प्र० । ४ नापि रक्षति सुकृतं नापि स्नेहं नापि दानसन्माने च । न कुलं न पूर्वजं नायतिं च शीलं महिलाः ॥ १ ॥ ५ मा विश्वस तेषां महिलाहृदयानां कपटभृतां । निःस्नेहनिर्दयानां अलीकवचनजल्पनरतानाम् ॥ १ ॥ ६ मारयति जीवन्तमप्येव मृतमप्यनुम्रियते कांचिद्भर्त्तारं । विषधरगतिरिव चरितं वक्रविवक्रं महेलानां ॥ १ ॥ ७ गंग वालुकाः सागरे जलं हिमवतश्च परिमाणं जानंति बुद्धिमन्तो महिलाहृदयं न जानन्ति ॥ १ ॥ ८ रोदयन्ति रुदन्ति च अलीकं जल्पन्ति प्रत्याययन्ति । कपटेन खादति विषं म्रियते न च यान्ति सद्भावं ॥ १ ॥ ९ चिन्तयति कार्यमन्यदन्यत् संस्थापयति भाषतेऽन्यत् । आरभते करोत्यन्यन्मायिवर्गो निकृतिसारः ॥ १ ॥ १० असदारंभाणां तथा सर्वेषां लोकगर्हणीयानां । परलोकवैरिकाणां कारणं चैव स्त्रियः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा को जुवईणं जाणइ चरियं सहावकुडिलाणं । दोसाण आगरो चिय जाण सरीरे वसइ कामो ॥ १३ ॥ मूलं दुच्चरियाणं हवइ उ णरयस्स वत्तणी विउला । मोक्खस्स महाविग्घं वज्जेयव्वा सया नारी ॥ १४ ॥ धण्णा ते वरपुरिसा जे चिय मोत्तूण णियय(ज)युवईओ । पव्वइया कयनियमा सिवमयलमणुत्तरं पत्ता ॥ १५ ॥" अधुना यादृक्षः शूरो भवति तादृक्षं दर्शयितुमाह—

धम्मंमि जो दढा मई सो सूरो सत्तिओ य वीरो य । णहु धम्मणिरुस्साहो पुरिसो सूरो सुबलिओऽवि ॥ ६२ ॥

'धर्मे' श्रुतचारित्राख्ये दृढा—निश्चला मतिर्यस्य स तथा एवम्भूतः स इन्द्रियनोइन्द्रियारिजयात्शूरः तथा 'सात्त्विको' महासत्त्वोपेतोऽसावेव 'वीरः' स्वकर्मदारणसमर्थोऽसावेवेति, किमिति ?, यतो नैव 'धर्मनिरुत्साहः' सदनुष्ठाननिरुद्यमः सत्पुरुषाचीर्णमार्गपरिभ्रष्टः पुरुषः सुष्ठु बलवानपि शूरो भवतीति ॥ एतानेव दोषान् पुरुषसम्बन्धेन स्त्रीणामपि दर्शयितुमाह—

एते चेव य दोसा पुरिससमाएवि इत्थीयाणंपि । तम्हा उ अप्पमाओ विरागमग्गंमि तासिं तु ॥ ६३ ॥

ये प्राक् शीलप्रध्वंसादयः स्त्रीपरिचयादिभ्यः पुरुषाणां दोषा अभिहिता एत एवान्यूनाधिकाः पुरुषेण सह यः समायः—सम्बन्धस्तस्मिन् स्त्रीणामपि, यस्माद्दोषा भवन्ति तस्मात् तासामपि विरागमार्गे प्रवृत्तानां पुरुषपरिचयादिपरिहारलक्षणोऽप्रमाद

१ अथवा को युवतीनां जानाति चरितं स्वभावकुटिलानां । दोषाणामाकरश्चैव यासां शरीरे वसति कामः ॥ १ ॥ २ मूलं दुश्चरितानां भवति तु नरकस्य वर्तनी विपुला । मोक्षस्य महाविघ्नं वर्जयितव्या सदा नारी ॥ १ ॥ ३ धन्यास्ते वरपुरुषा ये चैव मुक्त्वा निजकयुवतीः । प्रव्रजिताः कृतनियमाः शिवमचलमनुत्तरं प्राप्ताः ॥ १ ॥

एव श्रेयानिति । एवं यदुक्तं 'स्त्रीपरिज्ञे'ति तत्पुरुषोत्तमधर्मप्रतिपादनार्थम्, अन्यथा 'पुरुषपरिज्ञे'त्यपि वक्तव्येति, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

जे मायरं च पियरं च, विप्पजहाय पुव्वसंजोगं । एगे सहिते चरिस्सामि, आरतमेहुणो विवित्तेसु ॥१॥
सुहुमेणं तं परिक्कम्म, छन्नपएण इत्थिओ मंदा । उव्वायंपि ताउ जाणंसु जहा लिस्संति भिक्खुणो एगे ॥२॥

अस्य चायमनन्तरसूत्रेण सह सम्बन्धः, तद्यथा—अनन्तरसूत्रेऽभिहितम्, आमोक्षाय परिव्रजेदिति, एतच्चाशेषाभिष्वङ्गवर्जितस्य भवतीत्यतोऽनेन तदभिष्वङ्गवर्जनमभिधीयते, 'यः' कश्चिदुत्तमसत्त्वो 'मातरं पितरं' जननीं जनयितारम्, एतद्ग्रहणादन्यदपि भ्रातृपुत्रादिकं पूर्वसंयोगं तथा श्वश्रूश्वशुरादिकं पश्चात्संयोगं च 'विप्रहाय' त्यक्त्वा, चकारौ समुच्चयार्थौ, 'एको' मातापित्राद्यभिष्वङ्गवर्जितः कषायरहितो वा तथा सहितो ज्ञानदर्शनचारित्रैः स्वस्मै वा हितः स्वहितः—परमार्थानुष्ठानविधायी 'चरिष्यामि' संयमं करिष्यामीत्येवं कृतप्रतिज्ञः, तामेव प्रतिज्ञां सर्वप्रधानभूतां लेशतो दर्शयति—'आरतम्' उपरतं मैथुनं—कामाभिलाषो यस्यासावारतमैथुनः, तदेवम्भूतो 'विविक्तेषु' स्त्रीपशुपण्डकवर्जितेषु स्थानेषु चरिष्यामीत्येवं सम्यगुत्थानेनोत्थाय विहरतीति, क्वचित्पाठो 'विविच्चेसित्ति' 'विविक्तं'—स्त्रीपण्डकादिरहितं स्थानं संयमानुपरोध्येषितुं शीलमस्य तथेति ॥ १ ॥ तस्यैवं कृतप्रतिज्ञस्य साधोर्यद्भवत्यविवेकिस्त्रीजनात्तद्दर्शयितुमाह—'सुहुमेणं' इत्यादि, 'तं' महापुरुषं साधुं 'सूक्ष्मेण' अपरकार्यव्यपदेशभूतेन 'छन्नपदेने'ति छद्मना—कपटजालेन 'पराक्रम्य' तत्समीपमागत्य, यदिवा—'पराक्रम्ये'ति शीलस्खलनयोग्यतापत्त्या

अभिभूय, काः ?—'स्त्रियः' कुलबालुकादीनामिव मागधगणिकाद्या नानाविधकपटशतकरणदक्षा विविधविब्बोकवत्यो भावमन्दाः—कामोद्रेकविधायितया सदसद्विवेकविकलाः समीपमागत्य शीलात् ध्वंसयन्ति, एतदुक्तम् भवति—भ्रातृपुत्रव्यपदेशेन साधुसमीपमागत्य संयमाद् भ्रंशयन्ति, तथा चोक्तम्—"पियपुत्त भाइकिडगा णत्तूकिडगा य सयणकिडगा य । एते जोव्वणकिडगा पच्छन्नपई महिलियाणं ॥ १ ॥" यदिवा—छद्मपदेनेति—गुप्तामिधानेन, तद्यथा—"काले पसुत्तस्स जनार्दनस्स, मेघान्धकारासु च शर्वरीषु । मिथ्या न भाषामि विशालनेत्रे !, ते प्रत्ययाः ये प्रथमाक्षरेषु ॥ १ ॥" इत्यादि, ताः स्त्रियो मायाप्रधानाः प्रतारणोपायमपि जानन्ति—उत्पन्नप्रतिभतया विदन्ति, पाठान्तरं वा ज्ञातवत्यः, यथा 'श्लिष्यन्ते' विवेकिनोऽपि साधव एके तथाविधकर्मोदयात् तासु सङ्गमुपयान्ति ॥ २ ॥ तानेव सूक्ष्मप्रतारणोपायान् दर्शयितुमाह—

पासे भिसं णिसीयंति अभिक्खणं पोसवत्थं परिहिंति । कायं अहेवि दंसंति, बाहू उद्धट्टु कक्खमणुव्वजे ॥३॥
सयणासणेहिं जोगेहिं इत्थिओ एगता णिमंतंति । एयाणि चेव से जाणे, पासाणि विरूवरूवाणि ॥ ४ ॥

'पार्श्वे' समीपे 'भृशम्' अत्यर्थमरूपपीडमतिस्नेहमाविष्कुर्वन्त्यो 'निषीदन्ति' विश्रम्भमापादयितुमुपविशन्तीति, तथा कामं पुष्णातीति पोषं—कामोत्कोचकारि शोभनमित्यर्थः तच्च तद्वस्त्रं पोषवस्त्रं तद् 'अभीक्ष्णम्' अनवरतं तेन शिथिलादिव्यपदेशेन परिदधति, स्वाभिलाषमावेदयन्त्यः साधुप्रतारणार्थं परिधानं शिथिलीकृत्य पुनर्निबध्नन्तीति, तथा 'अधःकायम्' ऊर्वादिकमन-

१ प्रियपुत्रभ्रातृक्रीडका नप्तृक्रीडकाश्च स्वजनक्रीडकाश्च एते यौवनक्रीडकाः प्राप्ताः प्रच्छन्नपतयो महिलानां ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्योदीपनाय 'दर्शयन्ति' प्रकटयन्ति, तथा 'बाहुमुद्धृत्य' कक्षामादर्श्य 'अनुकूलं' साध्वभिमुखं 'व्रजेत्' गच्छेत्। सम्भावनायां लिङ्, सम्भाव्यते एतदङ्गप्रत्यङ्गसन्दर्शकत्वं स्त्रीणामिति ॥३॥ अपिच–'सयणासणे' इत्यादि, शय्यतेऽस्मिन्निति शयनं–पर्यङ्कादि तथाऽऽस्यतेऽस्मिन्नित्यासनम्–आसंदकादीत्येवमादिना 'योग्येन' उपभोगार्हेण कालोचितेन 'स्त्रियो' योषित 'एकदा' इति विविक्तदेशकालादौ 'निमन्त्रयन्ति' अभ्युपगमं ग्राहयन्ति, इदमुक्तं भवति–शयनासनाद्युपभोगं प्रति साधुं प्रार्थयन्ति, 'एतानेव' शयनासननिमन्त्रणरूपान् स साधुर्विदितवेद्यः परमार्थदर्शी 'जानीयाद्' अवबुध्येत स्त्रीसम्बन्धकारिणः पाशयन्ति–बध्नन्तीति पाशास्तान् 'विरूपरूपान्' नानाप्रकारानिति। इदमुक्तं भवति–स्त्रियो ह्यासङ्गगामिन्यो भवन्ति, तथा चोक्तम्–"अंबं वा निंबं वा अब्भासगुणेण आरुहइ वल्ली। एवं इत्थीतोवि य जं आसन्नं तमिच्छन्ति ॥ १ ॥" तदेवम्भूताः स्त्रियो ज्ञात्वा न ताभिः सार्धं साधुः सङ्गं कुर्यात्, यतस्तदुपचारादिकः सङ्गो दुष्परिहार्यो भवति, तदुक्तम्–"जं इच्छसि घेत्तुं जे पुव्विं तं आमिसेण गिण्हाहि। आमिसपासनिबद्धो काहिइ कज्जं अकज्जं वा ॥ १ ॥" ॥ ४ ॥ किञ्च—

नो तासु चक्खु संधेज्जा, नोवियं साहसं समभिजाणे। णो सहियंपि विहरेज्जा, एवमप्पा सुरक्खिओ होइ ५
आमंतिय उस्सविया भिक्खुं आयसा निमंतंति। एताणि चेव से जाणे, सद्दाणि विरूवरूवाणि ॥६॥

१ ०सनादिनि० प्र०। २ आम्रं वा निम्बं वाभ्यासगुणेनारोहति वल्ली। एवं स्त्रियोऽपि य एवासन्नस्तमिच्छंति ॥ १ ॥ ३ यान् गृहीतुमिच्छसि तानामिषेण पूर्वं गृहाण। यदामिषपाशनिबद्धः करिष्यति कार्यमकार्यं वा ॥ १ ॥

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥१०६॥

४ स्त्रीपरिज्ञाध्ययनं उद्देशः १

'नो' नैव 'तासु' शयनासनोपनिमन्त्रणपाशावपाशिकासु स्त्रीषु 'चक्षुः' नेत्रं सन्दध्यात् सन्धयेद्वा, न तदृष्टौ स्वदृष्टिं निवेशयेत्, सति च प्रयोजने ईषदवज्ञया निरीक्षेत, तथा चोक्तम्–"कार्येऽपीषन्मतिमाभिरीक्षते योषिदङ्गमस्थिरया। अस्निग्धया दृशाऽवज्ञया ह्यकुपितोऽपि कुपित इव ॥ १ ॥" तथा नापि च साहसम्–अकार्यकरणं तत्प्रार्थनया 'समनुजानीयात्' प्रतिपद्येत, तथा ह्यतिसाहसमेतत्सङ्गामावतरणवधबन्धरकपातादिविपाकवेदिनोऽपि साधोर्योषिदासङ्गनमिति, तथा नैव स्त्रीभिः सार्धं ग्रामादौ 'विहरेत्' गच्छेत्, अपिशब्दात् न ताभिः सार्धं विविक्तासनो भवेत्, ततो महापापस्थानमेतत् यतीनां यत् स्त्रीभिः सह साङ्गत्यमिति, तथा चोक्तम्–"मात्रा स्वस्रा दुहित्रा वा, न विविक्तासनो भवेत्। बलवानिन्द्रियग्रामः, पण्डितोऽप्यत्र मुह्यति ॥ १ ॥" एवमनेन स्त्रीसङ्गवर्जनेनात्मा समस्तापायस्थानेभ्यो रक्षितो भवति, यतः–सर्वापायानां स्त्रीसम्बन्धः कारणम्, अतः स्वहितार्थी तत्सङ्गं दूरतः परिहरेदिति ॥ ५ ॥ कथं चैताः पाशा इव पाशिका इत्याह—'आमंतिय' इत्यादि, स्त्रियो हि स्वभावेनैवाकर्तव्यप्रवणाः साधुमासाद्य यथाऽहमभ्युत्कर्षा वेलायां भवदन्तिकमागमिष्यामीत्येवं सङ्केतं ग्राहयित्वा तथा 'उस्सविय'त्ति संस्थाप्योच्चावचैर्विश्रम्भजनकैरालापैर्विश्रम्भे पातयित्वा पुनरकार्यकरणायात्मना निमन्त्रयन्ति, आत्मनोपभोगेन साधुमभ्युपगमं कारयन्ति। यदिवा–साधोर्भयापहरणार्थं ता एव योषितः प्रोचुः, तद्यथा–भर्तारमामन्त्र्यापृच्छ्याहमिहाऽऽयाता, तथा संस्थाप्य–भोजनपदधावनशयनादिकया क्रिययोपचर्य ततस्त्वान्तिकमागतेत्यतो भवता सर्वा मद्भर्तृजनितामाशङ्कां परित्यज्य निर्भयेन भाव्यमित्येवमादिकैर्वचोभिर्विश्रम्भमुत्पाद्य भिक्षुमात्मना निमन्त्रयन्ते, युष्मदीयमिदं शरीरकं यादृक्षस्य क्षोदीयसो गरीयसो वा कार्यस्य क्षमं तत्रैव नियोज्यतामित्येवमुपप्रलोभयन्ति, स च भिक्षुरवगतपरमार्थः एतानेव 'विरूपरूपान्' नानाप्रकारान् 'शब्दादीन्' विषयान् तत्स्वरूपनिरूपणतो ज्ञपरिज्ञया जानीयात्, यथैते स्त्रीसंसर्गोपादिताः शब्दादयो विषया दुर्गतिगमनैकहेतवः सन्मार्गार्गलारूपा इत्येवमवबुध्येत, तथा प्रत्याख्यानपरिज्ञया च तद्विपाकावगमेन परिहरेदिति ॥ ६ ॥ अन्यच्च—

मणबंधणेहिं णेगेहिं, कलुण विणीयमुवगसित्ताणं। अदु मंजुलाइं भासंति, आणवयंति भिन्नकहाहिं ॥७॥
सीहं जहा व कुणिमेणं, निब्भयमेगचरंति पासेणं। एवित्थियाउ बंधंति, संवुडं एगतियमणगारं ॥८॥

मनो बध्यते यैस्तानि मनोबन्धनानि–मञ्जुलालापस्निग्धावलोकनाङ्गप्रत्यङ्गप्रकटनादीनि, तथा चोक्तम्–"णाह पिय कंत सामिय दइय जिंयाओ तुमं मह पिओत्ति। जीए जीयामि अहं पहवसि तं मे सरीरस्स ॥ १ ॥" इत्यादिभिरनेकैः प्रपञ्चैः करुणालापविनयपूर्वकं 'उवगसित्ताणं'ति उपसंश्लिष्य समीपमागत्य 'अथ' तदनंतरं 'मञ्जुलानि' पेशलानि विश्रम्भजनकानि कामोत्कोचकानि वा भाषन्ते, तदुक्तम्–"मितमंहुररिभियजंपुल्लयहि ईसीकडक्खहसिएहिं। सविगारेहि वरागं हिययं पिहियं मयच्छीए ॥ १ ॥" तथा 'भिन्नकथाभी' रहस्यालापैर्मैथुनसम्बद्धैर्वचोभिः साधोश्चित्तमादाय तमकार्यकरणं प्रति 'आज्ञापयन्ति' प्रवर्तयन्ति, स्ववशं वा ज्ञात्वा कर्मकरवदाज्ञां कारयन्तीति ॥ ७ ॥ अपिच–'सीहं जहे' त्यादि, यथेति दृष्टान्तोपदर्शनार्थे यथा बन्धनविधिज्ञाः सिंहं पिशितादिनाऽऽमिषेणोपप्रलोभ्य 'निर्भयं' गतभीकं निर्भयत्वादेव एकचरं 'पाशेन' गलयन्त्रादिना बध्नन्ति

१ नाथ कान्त प्रिय स्वामिन्दयित ! जीवितादपि त्वं मम प्रिय इति जीवति जीवामि अहं प्रभृति त्वं मे शरीरस्य ॥१॥ २ इयय आङ तं प्र०। ३ तुमं प्र०। ४ मितमधुररिभितजल्पार्द्रैरीषत्कटाक्षहसितैः। सविकारैर्वैराकं हृदयं पिहितं मृगाक्ष्याः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बद्धा च बहुप्रकारं कदर्थयन्ति, एवं स्त्रियो नानाविधैरुपायैः पेशलभाषणादिभिः 'एगतियन्ति' कञ्चन तथाविधम् 'अनगारं' साधुं 'संवृतमपि' मनोवाक्कायगुप्तमपि 'वशान्ति' स्ववशं कुर्वन्तीति, संवृतग्रहणं च स्त्रीणां सामर्थ्योपदर्शनार्थं, तथाहि—संवृतोऽपि ताभिर्वेध्यते, किं पुनरपरोऽसंवृत इति ॥ ८ ॥ किञ्च—

अह तत्थ पुणो णमयंती, रहकारो व णेमिं आणुपुव्वीए। बद्धे मिए व पासेणं, फंदंते वि ण मुच्चए ताहे ॥९॥
अह सेऽणुतप्पई पच्छा, भोच्चा पायसं व विसमिस्सं। एवं विवेगमादाय, संवासो नवि कप्पए दविए ॥१०॥

'अथ' इति स्ववशीकरणानन्तरं पुनस्तत्र—स्वाभिप्रेते वस्तुनि 'नमयन्ति' प्रह्वं कुर्वन्ति, यथा—'रथकारो' वर्धकिः 'नेमिकाष्ठं' चक्रवाद्यभ्रमिरूपमानुपूर्व्या नमयति, एवं ता अपि साधुं स्वकार्यानुकूल्ये प्रवर्तयन्ति, स च साधुर्मृगवत् पाशेन बद्धो मोक्षार्थं स्पन्दमानोऽपि ततः पाशान्न मुच्यत इति ॥ ९ ॥ किञ्च—'अह से' इत्यादि, अथासौ साधुः स्त्रीपाशावबद्धो मृगवत् कूटके पतितः सन् कुटुम्बकृते अहर्निशं क्लिश्यमानः पश्चादनुतप्यते, तथाहि—गृहान्तर्गतानामेतदवश्यं सम्भाव्यते, तद्यथा—"कोद्वायओ को समचित्तु काहोवणाहिं काहो दिज्जउ चित्त को उग्घाडउ परिहियउ परिणीयउ को व कुमारउ पडियतो जीव खडप्फडेहि पर बंधइ पावइ भारओ ॥ १ ॥" तथा यत्—"मया परिजनस्यार्थे, कृतं कर्म सुदारुणम्। एकाकी तेन दह्येऽहं, गतास्ते फलभोगिनः ॥ १ ॥" इत्येवं बहुप्रकारं महामोहात्मके कुटुम्बकूटके पतिता अनुतप्यन्ते, अमुमेवार्थं दृष्टान्तेन स्पष्टयति—यथा

१ कौथिकः कः समचित्तः कथं उपनय कथं ददात चित्तं कः उद्घाटकः परिहृतः परिणीतः को वा कुमारकः पतितो जीवः खण्डस्फेटैः प्रबध्नाति पापभारं ॥१॥

कश्चिद्विषमिश्रं भोजनं भुक्त्वा पश्चात्तत्र कृतावेगाकुलितोऽनुतप्यते, तद्यथा—किमतन्मया पापेन साम्प्रतेक्षिणा सुखरसिकतया विपाककटुकमेवम्भूतं भोजनमास्वादितमिति, एवमसावपि पुत्रपौत्रदुहितृजामातृस्वसृभ्रातृव्यभागिनेयादीनां भोजनपरिधानपरिणयनालङ्कारजातमृतकर्मतद्व्याधिचिकित्साचिन्ताकुलोऽपगतस्वशरीरकर्तव्यः प्रनष्टैहिकामुष्मिकानुष्ठानोऽहर्निशं तद्व्यापारव्याकुलितमतिः परितप्यते, तदेवं अनन्तरोक्तया नीत्या विपाकं स्वानुष्ठानस्य 'आदाय' प्राप्य, विवेकमिति वा क्वचित्पाठः, तद्विपाकं विवेकं वा 'आदाय'—गृहीत्वा स्त्रीभिश्चारित्रपरिपन्थिनीभिः सार्धं 'संवासो' वसतिरेकत्र 'न कल्पते' न युज्यते, कस्मिन्—'द्रव्यभूते' मुक्तिगमनयोग्ये रागद्वेषरहिते वा साधौ, यतस्तासां सार्धं संवासोऽवश्यं विवेकिनामपि सदनुष्ठानविघातकारीति ॥ १० ॥ स्त्रीसम्बन्धदोषानुपदर्श्योपसंहरन्नाह—

तम्हा उ वज्जए इत्थी, विसलित्तं व कंटगं नच्चा। ओए कुलाणि वसवत्ती, आघाते ण सेवि णिग्गंथे ॥११॥
जे एयं उंछं अणुगिद्धा, अन्नयरा हुंति कुसीलाणं। सुतवस्सिएवि से भिक्खू, नो विहरे सह णमित्थीसु ॥१२॥

यस्मात् विपाककटुः स्त्रीभिः सह सम्पर्कस्तस्मात्कारणात् स्त्रियो वर्जयेत् तुशब्दात्तदालापमपि न कुर्यात्, किंवदित्याह—विषोपलिप्तं कण्टकमिव 'ज्ञात्वा' अवगम्य स्त्रियं वर्जयेदिति, अपिच—विषदिग्धकण्टकः शरीरावयवे भग्नः सन्नानर्थमापादयेत् स्त्रियस्तु स्मरणादपि, तदुक्तम्—"विषस्य विषयाणां च, दूरमत्यन्तमन्तरम्। उपभुक्तं विषं हन्ति, विषया: स्मरणादपि ॥ १ ॥"

तथा—"वरि विस खइयं न विसयसुहु इक्कसि विसिण मरंति। विसयामिस पुण घारिया णर णरएहि पडंति ॥ १ ॥" तथा—'ओजः' एकः असहायः सन् 'कुलानि' गृहस्थानां गृहाणि गत्वा स्त्रीणां वशवर्ती तन्निर्दिष्टवेलागमनेन तदानुकूल्यं भजमानो धर्ममाख्याति योऽसावपि 'न निर्ग्रन्थो' न सम्यक् प्रव्रजितो, निषिद्धाचरणसेवनादवश्यं तत्रापायसम्भवादिति, यदा पुनः कांचित्कृतश्चिन्निमित्तादागन्तुमसमर्थां ज्ञात्वा भवेत्तदाऽपरसहायसाध्वभावे एकाकिन्यपि गत्वा अपरस्त्रीवृन्दमध्यगतायाः पुरुषसमन्वितायाः वा स्त्रीनिन्दाविषयजुगुप्साप्रधानं वैराग्यजननं विधिना धर्मं कथयेदपीति ॥ ११ ॥ अन्वयव्यतिरेकाभ्यामुक्तोऽर्थः सुगमो भवतीत्यभिप्रायवानाह—'जे एयं उंछं' मित्यादि, 'ये' मन्दमतयः पश्चात्कृतसदनुष्ठानाः साम्प्रतेक्षिण एतद्—अनन्तरोक्तम् उंछन्ति जुगुप्सनीयं गर्ह्यं तदत्र स्त्रीसम्बन्धादिकं एकाकिस्त्रीधर्मकथनादिकं वा द्रष्टव्यं, तदनु—तत्प्रति ये 'गृद्धा' अध्युपपन्ना मूर्च्छिताः, ते हि 'कुशीलानां' पार्श्वस्थावसन्नकुशीलसंसक्तयथाच्छन्दरूपाणामन्यतरा भवन्ति, यदिवा—काथिकपाश्यकसम्प्रसारकमामकरूपाणां वा कुशीलानामन्यतरा भवन्ति, तन्मध्यवर्तिनस्तेऽपि कुशीला भवन्तीत्यर्थः, यत एवमतः 'सुतपस्व्यपि' विकृष्टतपोनिष्टप्तदेहोऽपि 'भिक्षुः' साधुः आत्महितमिच्छन् 'स्त्रीभिः' समाधिपरिपन्थिनीभिः सह 'न विहरेत्' क्वचिद्गच्छेन्नापि सन्तिष्ठेत्, तृतीयार्थे सप्तमी, णमिति वाक्यालङ्कारे, ज्वलिताङ्गारपुञ्जवद्दूरतः स्त्रियो वर्जयेदितिभावः ॥ १२ ॥ कतमाभिः पुनः स्त्रीभिः सार्धं न विहर्तव्यमित्येतदाशङ्क्याह—

१ वरं विषं जग्धं न विषयसुखं एकशो विषेण म्रियते। विषयामिषघातिताः पुनर्नरा नरकेषु पतन्ति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवि धूयराहि सुण्हाहिं, धातीहिं अदुव दासीहिं। महतीहि वा कुमारीहिं, संथवं से न कुज्जा अणगारे ॥१३॥
अदु णाइणं च सुहीणं वा, अप्पियं दट्ठु एगता होति। गिद्धा सत्ता कामेहिं, रक्खणपोसणे मणुस्सोऽसि १४

अपिशब्दः प्रत्येकमभिसम्बध्यते, 'धूयराहि'त्ति दुहितृभिरपि सार्धं न विहरेत् तथा 'स्नुषाः' सुतभार्यास्ताभिरपि सार्धं न विविक्तासनादौ स्थातव्यं, तथा 'धात्र्यः' पञ्चप्रकाराः स्तन्यदादयो जननीकल्पास्ताभिश्च सार्धं न स्थेयं, अथवाऽऽसतां तावदपरा योषितो या अप्येता 'दास्यो' घटयोषितः सर्वोपसदास्ताभिरपि सह सम्पर्कं परिहरेत्, तथा महतीभिः कुमारीभिर्वाशब्दाल्लघ्वीभिश्च सार्धं 'संस्तवं' परिचयं प्रत्यासत्तिरूपं सोऽनगारो न कुर्यादिति, यद्यपि तस्यानगारस्य तस्यां दुहितरि स्नुषादौ वा न चित्तान्यथात्वमुत्पद्यते तथापि च तत्र विविक्तासनादावपरस्य शङ्कोत्पद्यते अतस्तच्छङ्कानिरासार्थं स्त्रीसम्पर्कः परिहर्तव्य इति ॥ १३ ॥ अपरस्य शङ्का यथोत्पद्यते तथा दर्शयितुमाह—'अदु णाइणम्' इत्यादि, विविक्तयोषिता सार्धमनगारमर्थैकदा दृष्ट्वा योषिज्ज्ञातीनां सुहृदां वा 'अप्रियं' चित्तदुःखासिका भवति, एवं च ते समाशङ्केरन्, यथा—सत्त्वाः—प्राणिन इच्छामदनकामैः 'गृद्धा' अध्युपपन्नाः, तथाहि—एवम्भूतोऽप्ययं श्रमणः स्त्रीवदनावलोकनासक्तचेताः परित्यक्तनिजव्यापारोऽनया सार्धं निर्हीकस्तिष्ठति, तदुक्तम्—"मुण्डं शिरो वदनमेतदनिष्टगन्धं, भिक्षाशनेन भरणं च हतोदरस्य। गात्रं मलेन मलिनं गतसर्वशोभं, चित्रं तथापि मनसो मदनेऽस्ति वाञ्छा ॥ १ ॥" तथातिक्रोधाध्मातमानसाश्चैवमूचुर्यथा—रक्षणं पोषणं चेति विगृह्य समाहारद्वन्द्वस्तस्मिन्

१ भिक्षाटनेन प्र० । २ विहितो० विहतो० ।

सूत्रकृ. १९ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१०९॥

रक्षणपोषणे सदाऽऽदरं कुरु यतस्त्वमस्याः 'मनुष्योऽसि' मनुष्यो वर्तसे, यदिवा यदि परं वयमस्या रक्षणपोषणव्यापृतास्त्वमेव मनुष्यो वर्तसे, यतस्त्वयैव सार्धमियमेकाकिन्यहर्निशं परित्यक्तनिजव्यापारा तिष्ठतीति ॥ १४ ॥ किञ्चान्यत्—

४ स्त्रीपरिज्ञाध्य. उद्देशः १

समणंपि दट्ठुदासीणं, तत्थवि ताव एगे कुप्पंति। अदुवा भोयणेहिं णत्थेहिं, इत्थीदोसं संकिणो होंति १५॥
कुव्वंति संथवं ताहिं, पब्भट्ठा समाहिजोगेहिं। तम्हा समणा ण समेंति, आयहियाए सण्णिसेज्जाओ ॥१६॥

श्राम्यतीति श्रमणः—साधुः अपिशब्दो भिन्नक्रमः तम् 'उदासीनमपि' रागद्वेषविरहान्मध्यस्थमपि दृष्ट्वा, श्रमणग्रहणं तपः—खिन्नदेहोपलक्षणार्थं, तत्रैवम्भूतेऽपि विषयद्वेषिण्यपि साधौ तावदेके केचन रहस्यस्त्रीजल्पनकृतदोषत्वात्कुप्यन्ति, यदिवा पाठान्तरं "समणं दट्ठूणुदासीणं" 'श्रमणं' प्रव्रजितं 'उदासीनम्' परित्यक्तनिजव्यापारं स्त्रिया सह जल्पन्तं 'दृष्ट्वा' उपलभ्य तत्राप्येके केचन तावत् कुप्यन्ति, किं पुनः कृतविकारमितिभावः, अथवा स्त्रीदोषाशङ्किनश्च ते भवन्ति, ते चामी स्त्रीदोषाः 'भोजनैः' नानाविधैराहारैः 'न्यस्तैः' साध्वर्थमुपकल्पितैरेतदर्थमेव संस्कृतैरियमेनमुपचरति तेनायमहर्निशमिहागच्छतीति, यदिवा—भोजनैः श्वशुरादीनां न्यस्तैः अर्धदत्तैः सद्भिः सा वधूः साध्वागमनेन समाकुलीभूता सत्यन्यस्मिन् दातव्येऽन्यद्दद्यात्, ततस्ते स्त्रीदोषाशङ्किनो भवेयुर्यथेयं दुःशीलाऽनेनैव सहास्त इति, निदर्शनमत्र यथा—कयाचिद्वध्वा ग्राममध्यप्रारब्धनटप्रेक्षणैकगतचित्तया पतिश्वशुरयोर्भोजनार्थमुपविष्टयोस्तण्डुला इतिकृत्वा राइकाः संस्कृत्य दत्ताः, ततोऽसौ श्वशुरेणोपलक्षिता, निजपतिना क्रुद्धेन ताडिता, अन्यपुरुषगतचित्तेत्याशङ्क्य स्वगृहान्निर्धाटितेति ॥ १५ ॥ किञ्चान्यत्—'कुव्वंती'त्यादि, 'ताभिः' स्त्रीभिः—सन्मार्गार्गलाभिः

॥१०९॥

सह 'संस्तवं' तद्गृहगमनालापदानसम्प्रेक्षणादिरूपं परिचयं तथाविधमोहोदयात् 'कुर्वन्ति' विदधति, किम्भूताः?—प्रकर्षेण भ्रष्टाः—स्खलिताः 'समाधियोगेभ्यः' समाधिः—धर्मध्यानं तदर्थं तत्प्रधाना वा योगा—मनोवाक्कायव्यापारास्तेभ्यः प्रच्युताः शीतलविहारिण इति, यस्मात् स्त्रीसंस्तवात्समाधियोगपरिभ्रंशो भवति तस्मात्कारणात् 'श्रमणाः' सत्साधवो 'न समेन्ति' न गच्छन्ति, सत् शोभना सुखोत्पादकतयाऽनुकूलत्वान्निषद्या इव निषद्या स्त्रीभिः कृता माया, यदिवा स्त्रीवसतीरिति, 'आत्महिताय' स्वहितं मन्यमानाः, एतच्च स्त्रीसम्बन्धपरिहरणं तासामप्यैहिकामुष्मिकापायपरिहाराद्धितमिति, क्वचित्पश्चार्द्धमेवं पठ्यते—"तम्हा समणा उ जहाहि अहिताओ सन्निसेज्जाओ" अयमस्यार्थः—यस्मात्स्त्रीसम्बन्धोऽनर्थाय भवति, तस्मात् हे श्रमण!—साधो!, तुशब्दो विशेषणार्थः, विशेषेण संनिषद्या—स्त्रीवसतीस्तत्कृतोपचाररूपा वा माया आत्महिताद्धेतोः 'जहाहि' परित्यजेति ॥ १६ ॥ किं केचनाभ्युपगम्यापि प्रव्रज्यां स्त्रीसम्बन्धं कुर्युः?, येनैवमुच्यते, ओमित्याह—

बहवे गिहाइं अवहट्टु, मिस्सीभावं पत्थुया य एगे। धुवमग्गमेव पवयंति, वायावीरियं कुसीलाणं ॥ १७ ॥
सुद्धं रवति परिसाए, अह रहस्संमि दुक्कडं करेंति। जाणंति, य णं तहाविहा, माइल्ले महासढेऽयंति ॥१८॥

१ सदिति शोभनः पा० । २ पण्णता पा० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'बहवः' केचन गृहाणि 'अपहृत्य' परित्यज्य पुनस्तथाविधमोहोदयात् मिश्रीभावं इति द्रव्यलिङ्गमात्रसद्भावाद्भावतस्तु गृहस्थसमकल्पा इत्येवम्भूता मिश्रीभावं 'प्रस्तुताः' समनुप्राप्ता न गृहस्था एकान्ततो नापि प्रव्रजिताः, तदेवम्भूता अपि सन्तो ध्रुवो-मोक्षः संयमो वा तन्मार्गमेव प्रवदन्ति, तथाहि-ते वक्तारो भवन्ति यथाऽयमेवाऽऽदारब्धो मध्यमः पन्थाः श्रेयान्, तथा हि—अनेन प्रवृत्तानां प्रव्रज्यानिर्वहणं भवतीति, तदेतत्कुशीलानां वाचा कृतं वीर्यं नानुष्ठानकृतं, तथाहि—ते द्रव्यलिङ्गधारिणो वाङ्मात्रेणैव वयं प्रव्रजिता इति ब्रुवते नतु तेषां सातगौरवविषयसुखप्रतिबद्धानां शीतलविहारिणां सदनुष्ठानकृतं वीर्यमस्तीति ॥ १७ ॥ अपिच—स कुशीलो वाङ्मात्रेणाविष्कृतवीर्यः 'पर्षदि' व्यवस्थितो धर्मदेशनावसरे सत्यात्मानं 'शुद्धम्' अपगतदोषमात्मानमात्मीयानुष्ठानं वा 'रौति' भाषते अथानन्तरं 'रहस्ये' एकान्ते 'दुष्कृतं' पापं तत्कारणं वाऽसदनुष्ठानं 'करोति' विदधाति, तच्च तस्यासदनुष्ठानं गोपायतोऽपि 'जानन्ति' विदन्ति, के?-तथारूपमनुष्ठानं विदन्तीति तथाविदः—इङ्गिताकारकुशला निपुणास्तद्विद इत्यर्थः यदिवा सर्वज्ञाः, एतदुक्तं भवति—यद्यप्यपरः कश्चिदकर्तव्यं तेषां न वेत्ति तथापि सर्वज्ञा विदन्ति, तत्परिज्ञानेनैव किं न पर्याप्तं?, यदिवा—मायावी महाशठश्चायमित्येवं तथाविदस्तद्विदो जानन्ति, तथाहि—प्रच्छन्नाकार्यकारी न मां कश्चिज्जानात्येवं रागान्धो मन्यते, अथ च तं तद्विदो विदन्ति, तथा चोक्तम्—"न यं लोणं लोणिज्जइ ण य तुप्पिज्जइ घयं व तेल्लं वा। किह सक्को वंचेउं अत्ता अणुहूयकल्लाणो ॥ १ ॥" ॥ १८ ॥ किञ्चान्यत्—

१ °वेदा प्र० । २ न च लवणं लवणीयते न म्रक्ष्यते घृतं च तैलं च । किं शक्यो वंचयितुं आत्माऽनुभूताकल्याणः ॥ ० ३ सक्का प्र० ।

सयं दुक्कडं च न वदति, आइट्ठोवि पकत्थति बाले। वेयाणुवीइ मा कासी, चोइज्जंतो गिलाइ से भुज्जो १९॥
ओसियावि इत्थिपोसेसु, पुरिसा इत्थिवेयखेदन्ना। पण्णासमन्निता वेगे, नारीणं वसं उवकसंति ॥२०॥

'स्वयम्' आत्मना प्रच्छन्नं यदुष्कृतं कृतं तदपरेणाचार्यादिना पृष्टो 'न वदति' न कथयति, यथा अहमस्याकार्यस्य कारीति, स च प्रच्छन्नपापो मायावी स्वयमवदन् यदा परेण 'आदिष्टः' चोदितोऽपि सन् 'बालः' अज्ञो रागद्वेषकलितो वा 'प्रकत्थते' आत्मानं श्लाघमानोऽकार्यमपलपति, वदति च—यथाऽहमेवम्भूतमकार्यं कथं करिष्ये इत्येवं धार्ष्ट्यात्प्रकथते, तथा-वेदः—पुंवेदोदयस्तस्य 'अनुवीचि' आनुकूल्यं मैथुनाभिलाषं तन्त्रा कार्षीरित्येवं 'भूयः' पुनः चोद्यमानोऽसौ 'ग्लायति' ग्लानिमुपयाति—अकर्णश्रुतं विधत्ते, मर्मविद्धो वा सखेदमिव भाषते, तथा चोक्तम्—"सम्भाव्यमानपापोऽहमपापेनापि किं मया?। निर्विपन्नापि सर्पेण, भृशमुद्विजते जनः ॥ १ ॥" इति ॥ १९ ॥ अपिच—स्त्रियं पोषयन्तीति स्त्रीपोषका—अनुष्ठानविशेषास्तेषु 'उषिता अपि' व्यवस्थिता अपि 'पुरुषा' मनुष्या भुक्तभोगिनोऽपीत्यर्थः, तथा—'स्त्रीवेदखेदज्ञाः' स्त्रीवेदो मायाप्रधान इत्येवं निपुणा अपि तथा प्रज्ञया औत्पत्तिक्यादिबुध्या समन्विता-युक्ता अपि 'एके' महामोहान्धचेतसो 'नारीणां' स्त्रीणां संसारावतरणवीथीनां 'वशं' तदायत्ततामुप-सामीप्येन 'कषन्ति' व्रजन्ति, यद्यवशाः स्वमायमाना अपि कार्यमकार्यं वा ब्रुवते तत्तत्कुर्वते, न पुनरेतज्जानन्ति यथैता एवम्भूता भवन्तीति, तद्यथा—"एता हसन्ति च रुदन्ति च कार्यहेतोर्विश्वासयन्ति च

१ स्त्रियः प्र० ।

नरं न च विश्वसन्ति। तस्मान्नरेण कुलशीलसमन्वितेन, नार्यः श्मशानघटिका इव वर्जनीयाः ॥ १ ॥" तथा—"समुद्रवीचीव चलस्वभावाः, सन्ध्याभ्रलेखेव मुहूर्तरागाः। स्त्रियः कृतार्थाः पुरुषं निरर्थकं, निष्पीडितालक्तकवत्त्यजन्ति ॥ २ ॥" अत्र च स्त्रीस्वभावपरिज्ञाने कथानकमिदम्—तद्यथा-एको युवा स्वगृहान्निर्गत्य वैशिकं कामशास्त्रमध्येतुं पाटलिपुत्रं प्रस्थितः, तदन्तराले अन्यतरग्रामवर्तिन्यैकया योषिताऽभिहितः, तद्यथा—सुकुमारपाणिपादः शोभनाकृतिस्त्वं क्व प्रस्थितोऽसि?, तेनापि यथास्थितमेव तस्याः कथितं, तया चोक्तम्-वैशिकं पठित्वा मम मध्येनागन्तव्यं, तेनापि तथैवाभ्युपगतम्, अधीत्य चासौ मध्येनायातः, तया च स्नानभोजनादिना सम्यगुपचरितो विविधहावभावैश्चापहृतहृदयः संस्तां हस्तेन गृह्णाति, ततस्तया महताशब्देन पूत्कृत्य जनागमनावसरे मस्तके वारिवर्धनिका प्रक्षिप्ता, ततो लोकस्य समाकुले एवमाचष्टे-यथाऽयं गले लग्नेनोदकेन मनाक् न मृतः, ततो मयोदकेन सिक्त इति। गते च लोके सा पृष्टवती—किं त्वया वैशिकशास्त्रोपदेशेन स्त्रीस्वभावानां परिज्ञातमिति?, एवं स्त्रीचरित्रं दुर्विज्ञेयमिति नात्मात्मा कर्तव्येति, तथा चोक्तम्—"हृद्यन्यद्वाच्यन्यत्कर्मण्यन्यत्पुरोऽथ पृष्ठेऽन्यत्। अन्यत्तव मम चान्यत् स्त्रीणां सर्वं किमप्यन्यत् ॥ १ ॥" ॥ २० ॥ साम्प्रतमिहलोक एव स्त्रीसम्बन्धविपाकं दर्शयितुमाह—

अवि हत्थपादछेदाए, अदुवा वद्धमंसउक्कंते। अवि तेयसाभितावणाणि, तच्छियखारसिंचणाइं च ॥२१॥
अदु कण्णणासच्छेदं, कंठच्छेदणं तितिक्खंती। इति इत्थ पावसंतत्ता, नय विंति पुणो न काहिंति ॥ २२ ॥

स्त्रीसम्पर्को हि रागिणां हस्तपादच्छेदाय भवति, 'अपिः' सम्भावने सम्भाव्यत एतन्मोहातुराणां स्त्रीसम्बन्धाद्धस्तपादच्छे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दादिकम्, अथवा वर्धमांसोत्कर्तनमपि 'तेजसा' अग्निना 'अभितापनानि' स्त्रीसम्बन्धिभिरुत्तेजितै राजपुरुषैर्भटित्रकाण्यपि क्रियन्ते पारदारिकाः, तथा वास्यादिना तक्षयित्वा क्षारोदकसेचनानि च प्रापयन्तीति ॥२१॥ अपिच—अथ कर्णनासिकाच्छेदं तथा कण्ठच्छेदनं च 'तितिक्षन्ते' स्वकृतदोषात्सहन्ते इति, एवं बहुविधां विडम्बनाम् 'अस्मिन्नेव' मानुषे च जन्मनि पापेन—पापकर्मणा संतप्ता नरकातिरिक्तां वेदनामनुभवन्तीति न च पुनरेतदेवम्भूतमनुष्ठानं न करिष्याम इति भुवत इत्यवधारयन्तीतियावत्, तदेवमैहिकामुष्मिकां दुःखविडम्बना अप्यङ्गीकुर्वन्ति न पुनस्तदकरणतया निवृत्तिं प्रतिपद्यन्त इति भावः ॥ २२ ॥ किञ्चान्यत्—

सुतमेतमेवमेगेसिं, इत्थीवेदेति हु सुयक्खायं । एवंपि ता वदित्ताणं, अदुवा कम्मुणा अवकरेंति ॥२३॥
अन्नं मणेण चिंतेति, वाया अन्नं च कम्मुणा अन्नं । तम्हा ण सद्दह भिक्खू, बहुमायाओ इत्थिओ णच्चा२४

'श्रुतम्' उपलब्धं गुर्वादेः सकाशाल्लोकतो वा 'एतद्' इति यत्पूर्वमाख्यातं, तद्यथा—दुर्विज्ञेयं स्त्रीणां चित्तं दारुणः स्त्रीसम्बन्धविपाकः तथा चलस्वभावाः स्त्रियो दुष्परिचारा अदीर्घप्रेक्षिण्यः प्रकृत्या लघ्व्यो भवन्त्यात्मगर्विताश्च 'इति' एवमेकेषां स्वाख्यातं भवति लोकश्रुतिपरम्परया चिरन्तनाख्यायिकासु वा परिज्ञातं भवति, तथा स्त्रियं यथावस्थितस्वभावतस्तत्सम्बन्धविपाकतश्च वेदयति—ज्ञापयतीति स्त्रीवेदो—वैशिकादिकं स्त्रीस्वभावाविर्भावकं शास्त्रमिति, तदुक्तम्—"दुर्ग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतं, भावः पर्वतमार्गदुर्गविषमः स्त्रीणां न विज्ञायते । चित्तं पुष्करपत्रतोयतरलं नैकत्र सन्तिष्ठते, नार्यो नाम विषाङ्कुरैरिव लता दोषैः समं वर्धिताः ॥ १ ॥" अपिच—"सुट्ठुवि जियासु सुट्ठुवि पियासु सुट्ठुविय लद्धपसरासु । अडईसु महिलियासु य वीसंभो नेव कायव्वो ॥ १ ॥ उब्भेउं अंगुली सो पुरिसो सयलंमि जीवलोयम्मि । कामंतएण नारी जेण न पत्ताइं दुक्खाइं ॥ २ ॥ अहं एयाणं पगई सव्वस्स करेंति वेमणस्साइं । तस्स ण करेंति णवरं जस्स अलं चेव कामेहिं ॥ ३ ॥" किञ्च—अकार्यमहं न करिष्यामीत्येवमुक्त्वापि वाचा 'अदुव'त्ति तथापि कर्मणा—क्रियया 'अपकुर्वन्ति' इति विरूपमाचरन्ति, यदिवा अग्रतः प्रतिपद्यापि शास्तुरेवापकुर्वन्तीति ॥ २३ ॥ सूत्रकार एव तत्स्वभावाविष्करणायाह—पातालोदरगम्भीरेण मनसाऽन्यच्चिन्तयन्ति तथा श्रुतिमात्रपेशलया विपाकदारुणया वाचा अन्यद्भाषन्ते तथा 'कर्मणा' अनुष्ठानेनान्यन्निष्पादयन्ति, यत एवं बहुमायाः स्त्रिय इति, एवं ज्ञात्वा 'तस्मात्' तासां 'भिक्षुः' साधुः 'न श्रद्दधीत' तत्कृतया मायायात्मानं न प्रतारयेत्, दत्तावैशिकवत्, अत्र चैतत्कथानकम्—दत्तावैशिक एकया गणिकया तैस्तैः प्रकारैः प्रतार्यमाणोऽपि तां नेष्टवान्, ततस्तयोक्तम्—किं मया दौर्भाग्यकलङ्काङ्कितया जीवन्त्या प्रयोजनम् ?, अहं त्वत्परित्यक्ताऽग्निं प्रविशामि, ततोऽसाववोचत्—मायया इदमप्यस्ति वैशिके, तदाऽसौ पूर्वसुरङ्गामुखे काष्ठसमुदयं कृत्वा तं प्रज्वाल्य तत्रानुप्रविश्य सुरङ्गया गृहमागता, दत्तकोऽपि च इदमपि अस्ति वैशिके,

१ °सूक्ष्ममार्गं वि० । २ सुष्ठु विजितासु सुष्ठुपि प्रीतासु सुष्ठुपि च लब्धप्रसरासु अटवीषु महिलासु च विश्रम्भो नैव कार्यः ॥१॥ ३ ऊर्ध्वयतु अंगुलिं स पुरुषः सकले जीवलोके कामयता नारीयेन न प्राप्तानि दुःखानि ॥ १ ॥ ४ असावेतासां प्रकृतिस्सर्वेषामपि कुर्वन्ति वैमनस्यानि तस्य न कुर्वन्ति नवरं यस्यालं चैव कामैः ॥ १ ॥

इत्येवमसौ विलपन्नपि वैतिकैश्चितायां प्रक्षिप्तः, तथापि नासौ तासु श्रद्धानं कृतवान्, एवमन्येनापि न श्रद्धातव्यमिति ॥ २४ ॥ किञ्चान्यत्—

जुवती समणं बूया,विचित्तलंकारवत्थगाणे परिहित्ता । विरता चरिस्सहं रुक्खं,धम्ममाइक्ख णे भयंतारो
अदु साविया पवाएणं, अहमंसि साहम्मिणी य समणाणं । जतुकुंभे जहा उवज्जोई,संवासे विदू विसीएज्जा

'युवतिः' अभिनवयौवना स्त्री विचित्रवस्त्रालङ्कारविभूषितशरीरा मायया श्रमणं ब्रूयात्, तद्यथा—विरता अहं गृहपाशात् न ममानुकूलो भर्ता मह्यं वाऽसौ न रोचते परित्यक्ता वाऽहं तेनेत्येतत् 'चरिष्यामि' करिष्याम्यहं 'रूक्ष' मिति संयमं, मौनमिति वा क्वचित्पाठः तत्र मुनेरयं मौनः—संयमस्तमाचरिष्यामि, धर्ममाचक्ष्व 'णे'त्ति अस्माकं हे भयत्रातः !, यथाऽहमेवं दुःखानां भाजनं न भवामि तथा धर्ममावेदयेति ॥ २५ ॥ किञ्चान्यत्—अथवाऽनेन 'प्रवादेन' व्याजेन साध्वन्तिकं योषिदुपसर्पेत्—यथाऽहं श्राविकेतिकृत्वा युष्माकं श्रमणानां साधर्मिणीत्येवं प्रपञ्चेन नेदीयसीभूत्वा कूलवालुकमिव साधुं धर्माद्भ्रंशयति, एतदुक्तं भवति—योषित्सान्निध्यं ब्रह्मचारिणां महतेऽनर्थाय, तथा चोक्तम्—"तज्ज्ञानं तच्च विज्ञानं, तत्तपः स च संयमः । सर्वमेकपदे भ्रष्टं, सर्वथा किमपि स्त्रियः ॥ १ ॥" अस्मिन्नेवार्थे दृष्टान्तमाह—यथा जातुषः कुम्भो 'ज्योतिषः' अग्नेः समीपे व्यवस्थित

१ धूर्तैः वि० प० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपज्योतिर्वर्ती 'विलीयते' द्रवति, एवं योषितां 'संवासे' सान्निध्ये विद्वानपि आस्तां तावदितरो योऽपि विदितवेद्योऽसावपि धर्मानुष्ठानं प्रति 'विषीदेत्' शीतलविहारी भवेदिति ॥२६॥ एवं तावत्स्त्रीसान्निध्ये दोषान् प्रदर्श्य तत्संस्पर्शजं दोषं दर्शयितुमाह—

जतुकुंभे जोइउवगूढे, आसुऽभितत्ते णासमुवयाइ। एवित्थियाहिं अणगारा, संवासेण णासमुवयंति॥२७॥
कुव्वंति पावगं कम्मं, पुट्ठा वेगेवमाहिंसु। नोऽहं करेमि पावंति, अंकेसाइणी ममेसत्ति ॥ २८ ॥

यथा जातुपः कुम्भो 'ज्योतिषा' अग्निनोपगूढः—समालिङ्गितोऽभितसोऽग्निनाभिमुख्येन सन्तापितः क्षिप्रं 'नाशमुपयाति' द्रवीभूय विनश्यति, एवं स्त्रीभिः सार्धं 'संवसनेन' परिभोगेनानगारा नाशमुपयान्ति, सर्वथा जातुपकुम्भवत् व्रतकाठिन्यं परित्यज्य संयमशरीराद् भ्रश्यन्ति ॥ २७ ॥ अपिच—तासु संसाराभिष्वङ्गिणीष्वभिपक्ता अवधीरितैहिकामुष्मिकापायाः 'पापं कर्म' मैथुनासेवनादिकं 'कुर्वन्ति' विदधति, परिभ्रष्टाः सदनुष्ठानाद् 'एके' केचनोत्कटमोहा आचार्यादिना चोद्यमाना 'एवमाहुः' वक्ष्यमाणमुक्तवन्तः, तद्यथा—नाहमेवम्भूतकुलप्रसूतः एतदकार्यं पापोपादानभूतं करिष्यामि, ममैषा दुहितृकल्पा पूर्वम् अङ्कशयिनी आसीत्, तदेषा पूर्वाभ्यासेनैव मय्येवमाचरति, न पुनरहं विदितसंसारस्वभावः प्राणात्ययेऽपि व्रतभङ्गं विधास्य इति ॥ २८ ॥ किञ्च—

१ ममैषिका प्र० ।

बालस्स मंदयं बीयं, जं च कडं अवजाणई भुज्जो। दुगुणं करेइ से पावं, पूयणकामो विसन्नेसी ॥२९॥
संलोकणिज्जमणगारं, आयगयं निमंतणेणाहंसु। वत्थं च ताइ! पायं वा, अन्नं पाणगं पडिग्गाहे ॥३०॥
णीवारमेवं बुज्झेज्जा, णो इच्छे अगारमागंतुं। बद्धे विसयपासेहिं, मोहमावज्जइ पुणो मंदे ॥ ३१ ॥
त्तिबेमि। इति इत्थीपरिन्नाए पढमो उद्देसो समत्तो ॥ ४–१ ॥ (गाथाग्र. २८७)

'बालस्य' अज्ञस्य रागद्वेषाकुलितस्यापरमार्थदृश एतद्वितीयं 'मान्द्यं' अज्ञत्वम्, एकं तावदकार्यकरणेन चतुर्थव्रतभङ्गो द्वितीयं तदपलपनेन मृषावादः, तदेव दर्शयति—यत्कृतमसदाचरणं 'भूयः' पुनरपरेण चोद्यमानः 'अपजानीते' अपलपति—नैतन्मया कृतमिति, स एवम्भूतः असदनुष्ठानेन तदपलपनेन च द्विगुणं पापं करोति, किमर्थमपलपतीत्याह—पूजनं—सत्कारपुरस्कारस्तत्कामः—तदभिलाषी मा मे लोके अवर्णवादः स्यादित्यकार्यं प्रच्छादयति विषण्णः—असंयमस्तमेषितुं शीलमस्येति विषण्णैषी ॥२९॥ किञ्चान्यत्—संलोकनीयं—संदर्शनीयमाकृतिमन्तं कञ्चन 'अनगारं' साधुमात्मनि गतमात्मगतम् आत्मज्ञमित्यर्थः, तदेवम्भूतं काश्चन स्त्रैरिण्यो 'निमन्त्रणेन' निमन्त्रणपुरःसरम् 'आहुः' उक्तवत्यः, तद्यथा—हे त्रायिन्! साधो वस्त्रं पात्रमन्यद्वा पानादिकं येन केनचिद्भवतः प्रयोजनं तदहं भवते सर्वं ददामीति मद्गृहमागत्य प्रतिगृहाण त्वमिति ॥ ३० ॥ उपसंहारार्थमाह—एतद्योषितां

१ °मावदंति पाठान्तरसंभवः ।

वस्त्रादिकमामन्त्रणं नीवारकल्पं 'बुध्येत' जानीयात्, यथाहि नीवारेण केनचिद्भक्ष्यविशेषेण शूकरादिर्वशमानीयते, एवमसावपि तेनामन्त्रणेन वशमानीयते, अतस्तन्नेच्छेद् 'अगारं' गृहं गन्तुं, यदिवा—गृहमेवावर्तो गृहावर्तो गृहभ्रमस्तं 'नेच्छेत्' नाभिलषेत्, किमिति ?, यतो 'बद्धो' वशीकृतो विषया एव शब्दादयः 'पाशा' रज्जुबन्धनानि तैर्बद्धः—परवशीकृतः स्नेहपाशानपत्रोटयितुमसमर्थः सन् 'मोहं' चित्तव्याकुलतमागच्छति—किंकर्तव्यतामूढो भवति पौनःपुन्येन 'मन्दः' अज्ञो जड इति। इतिः परिसमाप्तौ। ब्रवीमीति पूर्ववत् ॥ ३१ ॥ इति स्त्रीपरिज्ञायां प्रथमोद्देशकः समाप्तः ॥ ४–१ ॥

अथ चतुर्थोपसर्गाध्ययने द्वितीयोद्देशकस्य प्रारम्भः ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके स्त्रीसंस्तवाचारित्रस्खलनमुक्तं, स्खलितशीलस्य या अवस्था इहैव प्रादुर्भवति तत्कृतकर्मबन्धश्च तदिह प्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओए सया ण रज्जेज्जा, भोगकामी पुणो विरज्जेज्जा। भोगे समणाण सुणेह, जह भुंजंति भिक्खुणो एगे॥१॥
अह तं तु भेदमावन्नं,मुच्छितं भिक्खुं काममतिवट्टं। पलिभिंदिया णं तो पच्छा,पादुद्धट्टु मुद्धि पहणंति॥२॥

अस्य चानन्तरपरम्परसूत्रसम्बन्धो वक्तव्यः, स चायं सम्बन्धो–विषयपाशैर्मोहमागच्छति यतोऽत 'ओज' एको रागद्वेषवियुतः स्त्रीषु रागं न कुर्यात्, परम्परसूत्रसम्बन्धस्तु संलोकनीयमनगारं दृष्ट्वा च यदि काचिद्योषित् साधुमशनादिना नीवारकल्पेन प्रतारयेत् तत्रौजः सन्न रज्येतेति, तत्रौजो द्रव्यतः परमाणुः भावतस्तु रागद्वेषवियुतः, स्त्रीषु रागादिहैव वक्ष्यमाणनीत्या नानाविधा विडम्बना भवन्ति तत्कृतश्च कर्मबन्धः तद्विपाकाच्चामुत्र नरकादौ तीव्रा वेदना भवन्ति यतोऽत एतन्मत्वा भावौजः सन् 'सदा' सर्वकालं तास्वनर्थखनिषु स्त्रीषु न रज्येत, तथा यद्यपि मोहोदयात् भोगाभिलाषी भवेत् तथाप्यैहिकामुष्मिकापायान् परिगणय्य पुनस्ताभ्यो विरज्येत, एतदुक्तं भवति–कर्मोदयात्प्रवृत्तमपि चित्तं हेयोपादेयपर्यालोचनया ज्ञानाङ्कुशेन निवर्तयेदिति, तथा श्राम्यन्ति–तपसा खिद्यन्तीति श्रमणास्तेषामपि भोगा इत्येतच्छ्रुणुत यूयं, एतदुक्तं भवति–गृहस्थानामपि भोगा विडम्बनाप्राया यतीनां तु भोगा इत्येतदेव विडम्बनाप्रायं, किं पुनस्तत्कृतावस्थाः, तथा चोक्तम्–"मुण्डं शिर" इत्यादि पूर्ववत्, तथा यथा च भोगान् 'एके' अपुष्टधर्माणो 'भिक्षवो' यतयो विडम्बनाप्रायान् भुञ्जते तथोद्देशकसूत्रेणैव वक्ष्यमाणेनोत्तरत्र महता प्रबन्धेन दर्शयिष्यति, अन्यैरप्युक्तम्–"कुशः काणः खञ्जः श्रवणरहितः पुच्छविकलः, क्षुधाक्षामो जीर्णः पिठरकैकपालार्दित-

सूत्रकृ. २०

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं

॥११५॥

१ °लार्पितगलः प्र० वि० प० ।

गलः । व्रणैः पूयक्लिन्नैः कृमिकुलशतैराविलतनुः, शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः ॥१॥" इत्यादि, ॥ १ ॥ भोगिनां विडम्बनां दर्शयितुमाह–'अथे' त्यानन्तर्यार्थः तुशब्दो विशेषणार्थः, स्त्रीसंस्तवादनन्तरं 'भिक्षुं' साधुं 'भेदं' शीलभेदं चारित्रस्खलनम् 'आपन्नं' प्राप्तं सन्तं स्त्रीषु 'मूर्च्छितं' गृद्धमध्युपपन्नं, तमेव विशिनष्टि–कामेषु–इच्छामदनरूपेषु मतेः–बुद्धेर्मनसो वा वर्त्तो–वर्तनं प्रवृत्तिर्यस्यासौ काममतिवर्तः–कामाभिलाषुक इत्यर्थः, तमेवम्भूतं 'परिभिद्य' मदभ्युपगतः श्वेतकृष्णप्रतिपत्त्या मद्वशकं इत्येवं परिज्ञाय यदिवा–परिभिद्य—परिसामोत्मकृतं तत्कृतं चोच्चार्येति, तद्यथा–मया तव लुञ्चितशिरसो जल्लमलाविलतया दुर्गन्धस्य जुगुप्सनीयकक्षावक्षोवस्तिस्थानस्य कुलशीलमर्यादालज्जाधर्मादीन् परित्यज्यात्मा दत्तः त्वं पुनरकिञ्चित्कर इत्यादि भणित्वा, प्रकुपितायाः तस्या असौ विषयमूर्च्छितस्तत्प्रत्यायनार्थं पादयोर्निपतति, तदुक्तम्–"व्याभिन्नकेसरबृहच्छिरसश्च सिंहा, नागाश्च दानमदराजिकृशैः कपोलैः । मेधाविनश्च पुरुषाः समरे च शूराः, स्त्रीसन्निधौ परमकापुरुषा भवन्ति ॥ १ ॥" ततो विषयेष्वेकान्तेन मूर्च्छित इति परिज्ञानात् पश्चात् 'पादं' निजवामचरणम् 'उद्धृत्य' उत्क्षिप्य 'मूर्ध्नि' शिरसि 'प्रघ्नन्ति' ताडयन्ति, एवं विडम्बनां प्रापयन्तीति ॥ २ ॥ अन्यच्च—

४ स्त्रीपरिज्ञाध्य. उद्देशः २

जइ केसिआ णं मए भिक्खू, णो विहरे सह णमित्थीए। केसाणविह लुंचिस्सं, नन्नत्थ मए चरिज्जासि॥३॥
अह णं से होई उवलद्धो, तो पेसंति तहाभूएहिं। अलाउच्छेदं पेहेहि, वग्गुफलाइं आहराहित्ति ॥ ४ ॥

॥११५॥

१ °अत प्र० । २ निपतितः प्र० ।

केशा विद्यन्ते यस्याः सा केशिका णमिति वाक्यालङ्कारे, हे भिक्षो! यदि मया 'स्त्रिया' भार्यया केशवत्या सह नो विहरेस्त्वं, सकेशया स्त्रिया भोगान् भुञ्जानो व्रीडां यदि वहसि ततः केशानप्यहं त्वत्सङ्गमाकाङ्क्षिणी 'लुञ्चिष्यामि' अपनेष्यामि, आस्तां तावदलङ्कारादिकमित्यपिशब्दार्थः, अस्य चोपलक्षणार्थत्वादन्यदपि यद् दुष्करं विदेशगमनादिकं तत्सर्वमहं करिष्ये, त्वं पुनर्मया रहितो नान्यत्र चरेः, इदमुक्तं भवति—मया रहितेन भवता क्षणमपि न स्थातव्यम्, एतावदेवाहं भवन्तं प्रार्थयामि, अहमपि यद्भवानादिशति तत्सर्वं विधास्य इति ॥ ३ ॥ इत्येवमतिपेशलैर्विश्रम्भजननैरापातभद्रकैरालापैर्विश्रम्भयित्वा यत्कुर्वन्ति तद्दर्शयितुमाह—'अथे' त्यानन्तर्यार्थः, णमिति वाक्यालङ्कारे, विश्रम्भालापानन्तरं यदाऽसौ साधुर्मदनुरक्त इत्येवम् 'उपलब्धो' भवति–आकारैरिङ्गितैश्चेष्टया वा मद्वशग इत्येवं परिज्ञातो भवति तामिः कपटनाटकनायिकाभिः स्त्रीभिः, ततः तदभिप्रायपरिज्ञानादुत्तरकालं 'तथाभूतैः' कर्मकरव्यापारैरेपशदैः 'प्रेषयन्ति' नियोजयन्ति यदिवा–तथाभूतैरिति लिङ्गस्थयोग्यैर्व्यापारैः प्रेषयन्ति, तानेव दर्शयितुमाह—'अलाउ'त्ति अलाबु—तुम्बं छिद्यते येन तदलाबुच्छेदं—पिप्पलकादि शस्त्रं 'पेहाहि'त्ति प्रेक्षस्व निरूपय लभस्वेति, येन पिप्पलकादिना लब्धेन पात्रादेर्मुखादि क्रियत इति, तथा 'वल्गूनि' शोभनानि 'फलानि' नालिकेरादीनि अलाबुकानि वा त्वम् 'आहर' आनयेति, यदिवा–वाक्फलानि च धर्मकथारूपाया व्याकरणादिव्याख्यानरूपाया वा वाचो यानि फलानि—वस्त्रादिलाभरूपाणि तान्याहरेति ॥ ४ ॥ अपिच—

१ °शब्दैः प्र० खेटं पापमपशब्दमिति हैमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दारूणि सागपागाए, पज्जोओ वा भविस्सती राओ। पाताणि य मे रयावेहि, एहि ता मे पिट्ठओमद्दे ॥५॥
वत्थाणि य मे पडिलेहेहि, अन्नं पाणं च आहराहित्ति। गंधं च रओहरणं च, कासवगं च मे समणुजाणाहि ६

तथा 'दारूणि' काष्ठानि शाकं टक्कवस्तुलादिकं पत्रशाकं तत्पाकार्थं, क्वचिद् अन्नपाकायेति पाठः, तत्राऽन्नम्—ओदनादिकमिति, 'रात्रौ' रजन्यां प्रद्योतो वा भविष्यतीतिकृत्वा, अतो अटवीतस्तमाहरेति, तथा— [ग्रन्थाग्रम् ३५००] 'पात्राणि' पतद्ग्रहादीनि 'रञ्जय' लेपय, येन सुखेनैव भिक्षाटनमहं करोमि, यदिवा—पादावलक्तकादिना रञ्जयेति, तथा—परित्यज्यापरं कर्म तावद् 'एहि' आगच्छ 'मे' मम पृष्ठिम् उत्—प्राबल्येन मर्दय बाधते ममाङ्गमुपविष्टाया अतः संबाधय, पुनरपरं कार्यशेषं करिष्यसीति ॥ ५ ॥ किञ्च—'वस्त्राणि च' अम्बराणि 'मे' मम जीर्णानि वर्तन्तेऽतः 'प्रत्युपेक्षस्व' अन्यानि निरूपय, यदिवा—मलिनानि रजकस्य समर्पय, मदुपधिं वा मूषिकादिभयात्प्रत्युपेक्षस्वेति, तथा अन्नपानादिकम् 'आहर' आनयेति, तथा 'गन्धं' कोष्ठपुटादिकं ग्रन्थं वा हिरण्यं तथा शोभनं रजोहरणं तथा लोचं कारयितुमहमशक्तेत्यतः 'काश्यपं' नापितं मच्छिरोमुण्डनाय श्रमणानुजानीहि येनाहं वृहत्केशानपनयामीति ॥ ६ ॥ किञ्चान्यत्—

अदु अंजणिं अलंकारं, कुक्कयेयं मे पयच्छाहि। लोद्धं च लोद्धकुसुमं च, वेणुपलासियं च गुलियं च ॥ ७ ॥
कुट्ठं तगरं च अगरुं, संपिट्ठं सम्मं उसिरेणं। तेल्लं मुहभिंजाए, वेणुफलाइं सन्निधानाए ॥ ८ ॥

१ गंधं इति स्यात्पाठान्तरम्। २ धर्मरमिति वि० प०। ३ भिण्डलिजाए प्र०।

अथशब्दोऽधिकारान्तरप्रदर्शनार्थः पूर्वं लिङ्गस्योपकरणान्यधिकृत्याभिहितम्, अधुना गृहस्थोपकरणान्यधिकृत्याभिधीयते, तद्यथा—'अंजणिमि'ति अञ्जनिकां कज्जलाधारभूतां नलिकां मम प्रयच्छस्वेत्युत्तरत्र क्रिया, तथा कटककेयूरादिकमलङ्कारं वा, तथा 'कुक्कयेयं'ति खुंखुणकं 'मे' मम प्रयच्छ, येनाहं सर्वालङ्कारविभूषिता वीणाविनोदेन भवन्तं विनोदयामि, तथा लोध्रं च लोध्रकुसुमं च, तथा 'वेणुपलासियं'ति वंशात्मिका श्लक्ष्णत्वक् काष्ठिका, सा दन्तैर्वामहस्तेन प्रगृह्य दक्षिणहस्तेन वीणावद्वाद्यते, तथौषधगुटिकां तथाभूतामानय येनाहमविनष्टयौवना भवामीति ॥ ७ ॥ तथा कुष्ठम्—उत्पलकुष्ठं तथाऽगरं तगरं च, एते द्वे अपि गन्धिकद्रव्ये, एतत्कुष्ठादिकम् 'उशीरेण' वीरणीमूलेन सम्पिष्टं सुगन्धि भवति यतस्तत्तथा कुरु, तथा 'तैलं' लोध्रकुङ्कुमादिना संस्कृतं मुखमाश्रित्य 'भिलिंजए'त्ति अभ्यङ्गाय ढौकयस्व, एतदुक्तं भवति—मुखाभ्यङ्गार्थं तथाविधं संस्कृतं तैलमुपाहरेति, येन कान्त्युपेतं मे मुखं जायते, 'वेणुफलाइं'ति वेणुकार्याणि करण्डकपेटुकादीनि सन्निधिः सन्निधानं—वस्त्रादेर्व्यवस्थापनं तदर्थमानयेति ॥ ८ ॥ किञ्च—

नंदीचुण्णगाइं पाहराहि, छत्तोवाणहं च जाणाहि। सत्थं च सूवच्छेज्जाए, आणीलं च वत्थयं रयावेहि ॥९॥
सुफणिं च सागपागाए, आमलगाइं दगाहरणं च। तिलगकरणिमंजणसलागं, धिंसु मे विहूणयं विजाणेहि॥

'नन्दीचुण्णगाइं'ति द्रव्यसंयोगनिष्पादितोष्ठश्लक्ष्णचूर्णोऽभिधीयते, तमेवम्भूतं चूर्णं प्रकर्षेण—येन केनचित्प्रकारेण 'आहर'

१ कुक्कुयं प्र०। २ भिंजाए। भिंडलिजाए० प्र०।

आनयेति, तथाऽऽतपस्य वृष्टेर्वा संरक्षणाय छत्रं तथा उपानहौ च ममानुजानीहि, न मे शरीरमेभिर्विना वर्तते ततो ददस्वेति, तथा 'शस्त्रं' दात्रादिकं 'सूपच्छेदनाय' पत्रशाकच्छेदनार्थं ढौकयस्व, तथा 'वस्त्रम्' अम्बरं परिधानार्थं गुलिकादिना रञ्जय यथा आनीलम्—ईषन्नीलं सामस्त्येन वा नीलं भवति, उपलक्षणार्थत्वाद्रक्तं वा यथा भवतीति ॥ ९ ॥ तथा—सुष्ठु सुखेन वा फण्यते—क्वाथ्यते तक्रादिकं यत्र तत्सुफणि—स्थालीपिठरादिकं भाजनमभिधीयते तच्छाकपाकार्थमानय, तथा 'आमलकानि' धात्रीफलानि स्नानार्थं पित्तोपशमनायाभ्यवहारार्थं वा तथोदकमाहियते येन तदुदकाहरणं—कुटवर्धनिकादि, अस्य चोपलक्षणार्थत्वाद् घृततैलाद्याहरणं सर्वं वा गृहोपस्करं ढौकयस्वेति, तिलकः क्रियते यया सा तिलककरणी—दन्तमयी सुवर्णात्मिका वा शलाका यया गोरोचनादियुक्तया तिलकः क्रियत इति, यदिवा गोरोचनया तिलकः क्रियते (इति) सैव तिलककरणीत्युच्यते, तिलका वा क्रियन्ते—पिष्यन्ते वा यत्र सा तिलककरणीत्युच्यते, तथा अञ्जनं—सौवीरकादि शलाका—अक्ष्णोरञ्जनार्थं शलाका अञ्जनशलाका तामाहरेति। तथा 'ग्रीष्मे' उष्णाभितापे सति 'मे' मम विधूनकं व्यजनकं विजानीहि ॥ १० ॥ एवं—

संडासगं च फणिहं च, सीहलिपासगं च आणाहि। आदंसगं च पयच्छाहि, दंतपक्खालणं पवेसाहि ॥११॥
पूयफलं तंबोलयं, सूईसुत्तगं च जाणाहि। कोसं च मोयमेहाए, सुप्पुक्खलगं च खारगालणं च ॥१२॥

'संडासकं' नासिकाकेशोत्पाटनं 'फणिहं' केशसंयमनार्थं कङ्कतकं, तथा 'सीहलिपासगं'ति वीणासंयमनार्थंमूर्णामयं कङ्कणं च 'आनय' ढौकयेति, एवम् आ—समन्ताद्दृश्यते आत्मा यस्मिन् स आदर्शः स एव आदर्शकस्तं 'प्रयच्छ' ददस्वेति, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दन्ताः प्रक्षाल्यन्ते—अपगतमलाः क्रियन्ते येन तद्दन्तप्रक्षालनं-दन्तकाष्ठं तन्मदन्तिके प्रवेशयेति ॥ ११ ॥ पूगफलं प्रतीतं 'ताम्बूलं' नागवल्लीदलं तथा सूचीं च सूत्रं च सूच्यर्थं वा सूत्रं 'जानीहि' ददस्वेति, तथा 'कोशम्' इति वारकादिभाजनं तत् मोचमेहाय समाहर, तत्र मोचः—प्रस्रवणं कायिकेत्यर्थः तेन मेहः—सेचनं तदर्थं भाजनं ढौकय, एतदुक्तं भवति—बहिर्गमनं कर्तुमहमसमर्था रात्रौ भयाद्, अतो मम यथा रात्रौ बहिर्गमनं न भवति तथा कुरु, एतच्चान्यस्याप्यधमतमकर्तव्यस्योपलक्षणं द्रष्टव्यं, तथा 'शूर्पं' तन्दुलादिशोधनं तथोदूखलं तथा किञ्चन क्षारस्य—सर्जिकादेर्गालनकमित्येवमादिकमुपकरणं सर्वमप्यानयेति ॥ १२ ॥ किञ्चान्यत्—

चंदालगं च करगं च, वच्चघरं च आउसो ! खणाहि । सरपाययं च जायाए, गोरहगं च सामणेराए ॥१३॥
घडिगं च सडिंडिमयं च, चेलगोलं कुमारभूयाए। वासं समभिआवण्णं, आवसहं च जाण भत्तं च ॥१४॥

'चन्दालकम्' इति देवतार्चनिकाद्यर्थं ताम्रमयं भाजनं, एतच्च मथुरायां चन्दालकत्वेन प्रतीतमिति, तथा 'करको' जलाधारो मदिराभाजनं वा तदानयेति क्रिया, तथा 'वर्चोगृहं' पुरीषोत्सर्गस्थानं तदायुष्मन्! मदर्थं 'खन' संस्कुरु, तथा शरा—इषवः पात्यन्ते—क्षिप्यन्ते येन तच्छरपातं—धनुः तत् 'जानाय' मत्पुत्राय कृते ढौकय, तथा 'गोरहगं'ति त्रिहायणं बलीवर्दं च ढौकयेति, 'सामणेराए'त्ति श्रमणस्यापत्यं श्रामणिस्तस्मै श्रमणपुत्राय स्वपुत्रीय गव्यादिकृते भविष्यतीति ॥ १३ ॥ तथा घटिकां

१ श्रामणिपुत्राय प्र० । २ स्वपुत्राय प्र० ।

मृन्मयकुल्लडिकां 'डिण्डिमेन' पटहकादिवाद्यविशेषेण सह, तथा 'चेलगोलं'ति वस्त्रात्मकं कन्दुकं 'कुमारभूताय' क्षुल्लकरूपाय राजकुमारभूताय वा मत्पुत्राय क्रीडनार्थमुपानयेति, तथा वर्षमिति प्रावृट्कालोऽयम् अभ्यापन्नः—अभिमुखं समापन्नोऽत 'आवसथं' गृहं प्रावृट्कालनिवासयोग्यं तथा 'भक्तं च' तन्दुलादिकं तत्कालयोग्यं 'जानीहि' निरूपय निष्पादय, येन सुखेनैवानागतपरिकल्पितावसथादिना प्रावृट्कालोऽतिवाह्यते इति, तदुक्तम्—"मासैरष्टभिरह्ना च, पूर्वेण वयसाऽऽयुषा। तत्कर्तव्यं मनुष्येण, यस्यान्ते सुखमेधते ॥ १ ॥" इति ॥ १ ॥

आसंदियं च नवसुत्तं, पाउल्लाइं संकमट्ठाए । अदु पुत्तदोहलट्ठाए, आणप्पा हवंति दासा वा ॥ १५ ॥
जाए फले समुप्पन्ने, गेण्हसु वा णं अहवा जहाहि। अहं पुत्तपोसिणो एगे, भारवहा हवंति उट्टा वा ॥१६॥

तथा 'आसंदिय' मित्यादि, आसन्दिकामुपवेशनयोग्यां मञ्चिकां, तामेव विशिनष्टि नवं—प्रत्यग्रं सूत्रं वल्कवलितं यस्यां सा नवसूत्रा ताम् उपलक्षणार्थत्वाद्वध्रचर्मावनद्धां वा निरूपयेति वा एवं च—मौञ्जे काष्ठपादुके वा 'संक्रमणार्थं' पर्यटनार्थं निरूपय, यतो नाहं निरावरणपादा भूमौ पदमपि दातुं समर्थेति, अथवा—पुत्रे गर्भस्थे दौहृदः पुत्रदौहृदः—अन्तर्वर्ती फलादावभिलाषविशेषस्तस्मै—तत्सम्पादनार्थं स्त्रीणां पुरुषाः स्ववशीकृता 'दासा इव' क्रयक्रीता इव 'आज्ञाप्या' आज्ञापनीया भवन्ति, यथा दासा अलज्जितैर्योग्यत्वादाज्ञाप्यन्ते एवं तेऽपि वराकाः स्नेहपाशावपाशिता विषयार्थिनः स्त्रीभिः संसारावतरणवीथीभिरादिश्यन्त इति

१ अनागते परिकल्पितं यदावसथादि तेन । २ अन्तर्वत्नी प्रावृडिति, फलस्य पुत्रवाञ्छिता उपरिष्टात्स्पष्टा ।

॥ १५ ॥ अन्यच्च—जातः—पुत्रः स एव फलं गृहस्थानां, तथाहि—पुरुषाणां कामभोगाः फलं तेषामपि फलं—प्रधानकार्यं पुत्रजन्मेति, तदुक्तम्—"इदं तत्स्नेहसर्वस्वं, सममाढ्यदरिद्रयोः। अचन्दनमनौशीरं, हृदयस्यानुलेपनम् ॥ १ ॥ यत्तच्छपनिकेत्युक्तं, बालेनाव्यक्तभाषिणा। हित्वा सांख्यं च योगं च, तन्मे मनसि वर्तते ॥' २ ॥" यथा 'लोके पुत्रसु(सू)खं नाम, द्वितीयं सु(सू)खमात्मनः' इत्यादि, तदेवं पुत्रः पुरुषाणां परमाभ्युदयकारणं तस्मिन् 'समुत्पन्ने' जाते तदुद्देशेन या विडम्बनाः पुरुषाणां भवन्ति ता दर्शयति—अमुं दारकं गृहाण त्वम्, अहं तु कर्माक्षणिका न मे ग्रहणावसरोऽस्ति, अथवैनं 'जहाहि' परित्यज नाहमस्य वार्तामपि पृच्छामि एवं कुपिता सती ब्रूते, मयाऽयं नव मासानुदरेणोढः त्वं पुनरुत्सङ्गेनाप्युद्वहन् स्तोकमपि कालमुद्विजस इति, दासदृष्टान्तस्त्वादेशदानेनैव साम्यं भजते, नादेशनिष्पादनेन, तथाहि—दासो भयादुद्विजन्नादेशं विधत्ते, स तु स्त्रीवशगोऽनुग्रहं मन्यमानो मुदितश्च तदादेशं विधत्ते, तथा चोक्तम्—"यदेव रोचते मह्यं, तदेव कुरुते प्रिया। इति वेत्ति न जानाति, तत्प्रियं यत्करोत्यसौ ॥ १ ॥ ददाति प्रार्थितः प्राणान्, मातरं हन्ति तत्कृते। किं न दद्यात् न किं कुर्यात्स्त्रीभिरभ्यर्थितो नरः ॥ २ ॥ ददाति शौचपानीयं, पादौ प्रक्षालयत्यपि। श्लेष्माणमपि गृह्णाति, स्त्रीणां वशगतो नरः ॥३॥" तदेवं पुत्रनिमित्तमन्यद्वा यत्किञ्चिन्निमित्तमुद्दिश्य दासमिवादिशन्ति, अथ तेऽपि पुत्रान् पोषितुं शीलं येषां ते पुत्रपोषिण उपलक्षणार्थत्वाच्चास्य सर्वादेशकारिणः 'एके' केचन मोहोदये वर्तमानाः स्त्रीणां निर्देशवर्तिनोऽपहस्तितैहिकामुष्मिकापाया उष्ट्रा इव परवशा भारवाहा भवन्तीति ॥ १६ ॥ किञ्चान्यत्—

१ एतच्छ्लोकद्वयमपि व्रतभ्रष्टेन धर्मकीर्तिना भाषितमिति वि० प० ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥११८॥

४ स्त्रीपरिज्ञाध्य. उद्देशः २

॥११८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राओवि उट्ठिया संता, दारगं च संठवंति धाई वा। सुहिरामणा वि ते संता, वत्थधोवा हवंति हंसा वा १७
एवं बहुहिं कयपुव्वं, भोगत्थाए जेऽभियावन्ना । दासे मिइव पेसे वा, पसुभूतेव से ण वा केई ॥ १८ ॥

रात्रावप्युत्थिताः सन्तो रुदन्तं दारकं धात्रीवत् संस्थापयन्त्यनेकप्रकारैरुल्लापनैः, तद्यथा—"सामिओसि णगरस्स य णकउरस्स य हत्थकप्पगिरिपट्टणसीहपुरस्स य उण्णयस्स निन्नस्स य कुच्छिपुरस्स य कण्णकुज्ज आयामुहमोरियपुरस्स य" इत्येवमादिभिरसम्बद्धैः क्रीडनकालापैः स्त्रीचित्तानुवर्तिनः पुरुषास्तत् कुर्वन्ति येनोपहास्यतां सर्वस्य व्रजन्ति, सुष्ठु ह्रीः-लज्जा तस्यां मनः-अन्तःकरणं येषां ते सुह्रीमनसो—लज्जालवोऽपि ते सन्तो विहाय लज्जां स्त्रीवचनात्सर्वजघन्यान्यपि कर्माणि कुर्वते, तान्येव सूत्रावयवेन दर्शयति—'वस्त्रधावका' वस्त्रप्रक्षालका हंसा इव-रजका इव भवन्ति, अस्य चोपलक्षणार्थत्वादन्यदप्युदकवहनादिकं कुर्वन्ति ॥ १७ ॥ किमेतत्केचन कुर्वन्ति येनैवमभिधीयते ?, बाढं कुर्वन्तीत्याह—'एव' मिति पूर्वोक्तं स्त्रीणामादेशकरणं पुत्रपोषणवस्त्रधावनादिकं तद्बहुभिः संसाराभिष्वङ्गिभिः पूर्वं कृतं कृतपूर्वं तथा परे कुर्वन्ति करिष्यन्ति च ये 'भोगकृते' कामभोगार्थमैहिकामुष्मिकापायभयमपर्यालोच्य आभिमुख्येन—भोगानुकूल्येन आपन्ना—व्यवस्थिताः सावद्यानुष्ठानेषु प्रतिपन्ना इतियावत्, तथा यो रागान्धः स्त्रीभिर्वशीकृतः स दासवदशङ्कितास्ताभिः प्रत्यपरेऽपि कर्मणि नियोज्यते, तथा वागुरापतितः परवशो मृग इव धार्यते, नात्मवशो भोजनादिक्रिया अपि कर्तुं लभते, तथा 'प्रेष्य इव' कर्मकर इव क्रयक्रीत इव वर्चःशोधना-

१ स्लाम्यसि नगरस्य च नकपुरस्य च हस्तिकल्पगिरिपत्तनसिंहपुरस्य उन्नतस्य निम्नस्य कुक्षिपुरस्य च कान्यकुब्जपितामहमुखशौर्यपुरस्य च ॥

दावपि नियोज्यते, तथा-कर्तव्याकर्तव्यविवेकरहिततया हिताहितप्राप्तिपरिहारशून्यत्वात् पशुभूत इव, यथा हि पशुराहारभयमैथुनपरिग्रहाभिज्ञ एव केवलम्, एवमसावपि सदनुष्ठानरहितत्वात्पशुकल्पः, यदिवा- स स्त्रीवशगो दासमृगप्रेष्यपशुभ्योऽप्यधमत्वान्न कश्चित्, एतदुक्तं भवति-सर्वाधमत्वात्तस्य तत्तुल्यं नास्त्येव येनासावुपमीयते, अथवा-न स कश्चिदिति, उभयभ्रष्टत्वात्, तथाहि-न तावत्प्रव्रजितोऽसौ सदनुष्ठानरहितत्वात्, नापि गृहस्थः ताम्बूलादिपरिभोगरहितत्वाल्लोचिकामात्रधारित्वाच्च, यदिवा ऐहिकामुष्मिकानुष्ठायिनां मध्ये न कश्चिदिति ॥ १८ ॥ साम्प्रतमुपसंहारद्वारेण स्त्रीसङ्गपरिहारमाह—

एवं खु तासु विन्नप्पं, संथवं संवासं च वज्जेज्जा। तज्जातिआ इमे कामा, वज्जकरा य एवमक्खाए ॥१९॥
एयं भयं ण सेयाय, इइ से अप्पगं निरुंभित्ता। णो इत्थिं णो पसुं भिक्खू, णो सयं पाणिणा णिलिज्जेज्जा२०

'एतत्' पूर्वोक्तं खुशब्दो वाक्यालङ्कारे तासु यत् स्थितं तासां वा स्त्रीणां सम्बन्धि यद् विज्ञप्तम्—उक्तं, तद्यथा—यदि सकेशया मया सह न रमसे ततोऽहं केशानप्यपनयामीत्येवमादिकं, तथा स्त्रीभिः सार्धं 'संस्तवं' परिचयं तत्संवासं च स्त्रीभिः सहैकत्र निवासं चात्महितमनुवर्तमानः सर्वापायभीरुः 'त्यजेत्' जह्यात्, यतस्ताभ्यो-रमणीभ्यो जातिः—उत्पत्तिर्येषां तेऽमी कामास्तज्जातिका-रमणीसम्पर्कोत्थास्तथा 'अवद्यं' पापं वज्रं वा गुरुत्वादधःपातकत्वेन पापमेव तत्करणशीला अवद्यकरा वज्रकरा वेत्येवम् 'आख्याताः' तीर्थकरगणधरादिभिः प्रतिपादिता इति ॥ १९ ॥ सर्वोपसंहारार्थमाह—'एवम्' अनन्तरनीत्या भयहेतुत्वात् स्त्रीभिर्विज्ञप्तं तथा संस्तवस्तत्संवासश्च भयमित्यतः स्त्रीभिः सार्धं सम्पर्को न श्रेयसे असदनुष्ठानहेतुत्वात्तस्येत्येवं परिज्ञाय

स भिक्षुरवगतकामभोगविपाक आत्मानं स्त्रीसम्पर्कान्निरुध्य सन्मार्गे व्यवस्थाप्य यत्कुर्यात्तद्दर्शयति—न स्त्रियं नरकवीथीप्रायां नापि पशुं 'लीयेत' आश्रयेत स्त्रीपशुभ्यां सह संवासं परिवर्जयेत्, 'स्त्रीपशुपण्डकविवर्जिता शय्ये'तिवचनात्, तथा स्वकीयेन 'पाणिना' हस्तेनात्मन्यस्य 'न णिलिज्जेज्ज'त्ति न सम्बाधनं कुर्यात्, यतस्तदपि हस्तसम्बाधनं चारित्रं शबलीकरोति, यदिवा-स्त्रीपश्वादिकं स्वेन पाणिना न स्पृशेदिति ॥ २० ॥ अपि च—

सुविसुद्धलेसे मेहावी, परकिरिअं च वज्जए नाणी। मणसा वयसा कायेणं, सव्वफाससहे अणगारे ॥२१॥
इच्चेवमाहु से वीरे, धुअरए धुअमोहे से भिक्खू। तम्हा अज्झत्थविसुद्धे, सुविमुक्के आमोक्खाए परिव्वएज्जासि ॥ २२ ॥ त्तिबेमि ॥ इति श्रीइत्थीपरिन्ना चतुर्थाध्ययनं समत्तं ॥ (गाथाग्र० ३०९)

सुष्ठु-विशेषेण शुद्धा—स्त्रीसम्पर्कपरिहाररूपतया निष्कलङ्का लेश्या—अन्तःकरणवृत्तिर्यस्य स तथा स एवम्भूतो 'मेधावी' मर्यादावर्ती परस्मै स्त्र्यादिपदार्थाय क्रिया परक्रिया- विषयोपभोगद्वारेण परोपकारकरणं परेण वाऽऽत्मनः संबाधनादिका क्रिया परक्रिया तां च 'ज्ञानी' विदितवेद्यो 'वर्जयेत्' परिहरेत्, एतदुक्तं भवति-विषयोपभोगोपाधिना नान्यस्य किमपि कुर्यान्नाप्यात्मनः स्त्रिया पादधावनादिकमपि कारयेत्, एतच्च परक्रियावर्जनं मनसा वचसा कायेन वर्जयेत्, तथाहि-औदारिककामभोगार्थं मनसा न गच्छति नान्यं गमयति गच्छन्तमपरं नानुजानीते एवं वाचा कायेन च, सर्वेऽप्यौदारिके नव भेदाः, एवं दिव्येऽपि

१ पा० विहरे आमुक्खाए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नव भेदाः, ततश्चाष्टादशभेदमिन्नमपि ब्रह्म बिभृयात्, यथा च स्त्रीस्पर्शपरीषहः सोढव्य एवं सर्वानपि शीतोष्णदंशमशकतृणादिस्पर्शानधिसहेत, एवं च सर्वस्पर्शसहोऽनगारः साधुर्भवतीति ॥ २१ ॥ क एवमाहेति दर्शयति–'इति' एवं यत्पूर्वमुक्तं तत्सर्वं स वीरो भगवानुत्पन्नदिव्यज्ञानः परहितैकरतः 'आह' उक्तवान्, यत एवमतो धूतम्–अपनीतं रजः—स्त्रीसम्पर्कादिकृतं कर्म येन स धूतरजाः तथा धूतो मोहो रागद्वेषरूपो येन स तथा । पाठान्तरं वा धूतः–अपनीतो रागमार्गो–रागपन्था यस्मिन् स्त्रीसंस्तवादिपरिहारे तत्तथा तत्सर्वं भगवान् वीर एवाह, यत एवं तस्मात् स भिक्षुः 'अध्यात्मविशुद्धः' सुविशुद्धान्तःकरणः सुष्ठु रागद्वेषात्मकेन स्त्रीसम्पर्केण मुक्तः सन् 'आमोक्षाय' अशेषकर्मक्षयं यावत्परि–समन्तात्संयमानुष्ठानेन 'व्रजेत्' गच्छेत्संयमोद्योगवान् भवेदिति, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ २२ ॥ इति चतुर्थं स्त्रीपरिज्ञाध्ययनं परिसमाप्तम् ॥

॥ अथ पञ्चमं नरकविभक्त्यध्ययनं प्रारभ्यते ॥

५ नरकविभक्त्यध्य. उद्देशः १

उक्तं चतुर्थमध्ययनं, साम्प्रतं पञ्चममारभ्यते, अस्य चायमभिसम्बन्धः, इहाद्ये अध्ययने स्वसमयपरसमयप्ररूपणाऽभिहिता, तदनन्तरं स्वसमये बोधो विधेय इत्येतद्द्वितीयेऽध्ययनेऽभिहितं, सम्बुद्धेन चानुकूलप्रतिकूला उपसर्गाः सम्यक् सोढव्या इत्येतत्तृतीयेऽध्ययने प्रतिपादितं, तथा सम्बुद्धेनैव स्त्रीपरीषहश्च सम्यगेव सोढव्य इत्येतच्चतुर्थेऽध्ययने प्रतिपादितं, साम्प्रतमुपसर्गभीरोः स्त्रीवशगस्यावश्यं नरकपातो भवति तत्र च यादृक्षा वेदनाः प्रादुर्भवन्ति ता अनेनाध्ययनेन प्रतिपाद्यन्ते, तदनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि उपक्रमादीनि वक्तव्यानि, तत्रोपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राध्ययनार्थाधिकारो निर्युक्तिकारेण प्रागेवाभिहितः, तद्यथा—'उवसग्गभीरुणो थीवसस्स नरएसु होज्ज उववाओ' इत्यनेन, उद्देशार्थाधिकारस्तु निर्युक्तिकृता नाभिहितः, अध्ययनार्थाधिकारान्तर्गतत्वादिति । साम्प्रतं निक्षेपः, स च त्रिविधः, ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्चेति, तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने तु नरकविभक्तिरिति द्विपदं नाम, तत्र नरकपदनिक्षेपार्थं निर्युक्तिकृदाह— ॥१२१॥

णिरए छक्कं दव्वं णिरया उ इहेव जे भवे असुभा । खेत्तं णिरओगासो कालो णिरएसु चेव ठिती ॥ ६४ ॥
भावे उ णिरयजीवा कम्मुदओ चेव णिरयपाओग्गो । सोऊण णिरयदुक्खं तवचरणे होइ जइयव्वं ॥ ६५ ॥

तत्र नरकशब्दस्य नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् षोढा निक्षेपः, तत्र नामस्थापने क्षुण्णे, द्रव्यनरक आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चानुपयुक्तः, नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तः 'इहैव' मनुष्यभवे तिर्यग्भवे वा ये केचनाशुभकर्मकारित्वादशुभाः सत्त्वाः कालकसौकरिकादय इति, यदिवा यानि कानिचिदशुभानि स्थानानि चारकादीनि याश्च नरकप्रतिरूपा वेदनास्ताः सर्वा द्रव्यनरका इत्यभिधीयन्ते, यदिवा कर्मद्रव्यनोकर्मद्रव्यभेदाद् द्रव्यनरको द्वेधा, तत्र नरकवेद्यानि यानि बद्धानि कर्माणि तानि चैकभविकस्य बद्धायुष्कस्याभिमुखनामगोत्रस्य चाश्रित्य द्रव्यनरको भवति, नोकर्मद्रव्यनरकस्त्विहैव येऽशुभा रूपरसगन्धवर्णशब्दस्पर्शा इति, क्षेत्रनरकस्तु 'नरकावकाशः' कालमहाकालरौरवमहारौरवाप्रतिष्ठानाभिधानादिनरकाणां चतुरशीतिलक्षसंख्यानां विशिष्टो भूभागः, कालनरकस्तु यत्र यावती स्थितिरिति, भावनरकस्तु ये जीवा नरकायुष्कमनुभवन्ति तथा नरकप्रायोग्यः कर्मोदय इति, एतदुक्तं भवति—नरकान्तर्वर्तिनो जीवास्तथा नारकायुष्कोदयापादितासातावेदनीयादिकर्मोदयाश्चैतद् द्वितयमपि भावनरक इत्यभिधीयते इति, तदेवं 'श्रुत्वा' अवगम्य तीव्रमसह्यं 'नरकदुःखं' क्रकचपाटनकुम्भीपाकादिकं परमाधार्मिकापादितं परस्परोदीरणाकृतं स्वाभाविकं च 'तपश्चरणे' संयमानुष्ठाने नरकपातपरिपन्थिनि स्वर्गापवर्गगमनैकहेतावात्महितमिच्छता 'प्रयतितव्यं' परित्यक्तान्यकर्तव्येन यत्नो विधेय इति ॥ साम्प्रतं विभक्तिपदनिक्षेपार्थमाह—

णामंठवणादविए खेत्ते काले तहेव भावे य । एसो उ विभत्तीए णिक्खेवो छव्विहो होइ ॥ ६६ ॥

विभक्तेर्नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् षोढा निक्षेपः, तत्र नायविभक्तिर्यस्य कस्यचित्सचित्तादेर्द्रव्यस्य विभक्तिरिति

१ नरकाख्यु प्र० । २ रूपं मूर्तिः (आकारः) । लावण्यं वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाम क्रियते, तद्यथा—स्वादयोऽष्टौ विभक्तयस्तिबादयश्च, स्थापनाविभक्तिस्तु यत्र ता एव प्रातिपदिकाद्धातोर्वा परेण स्थाप्यन्ते पुस्तकपत्रकादिन्यस्ता वा, द्रव्यविभक्तिर्जीवाजीवभेदाद् द्विधा, तत्रापि—जीवविभक्तिः सांसारिकेतरभेदाद्विधा, तत्राप्यसांसारिकजीवविभक्तिर्द्रव्यकालभेदात् द्वेधा, तत्र द्रव्यतस्तीर्थातीर्थसिद्धादिभेदात्पञ्चदशधा, कालतस्तु प्रथमसमयसिद्धादिभेदादनेकधा, सांसारिकजीवविभक्तिरिन्द्रियजातिभवभेदात्त्रिधा, तत्रेन्द्रियविभक्तिः—एकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियभेदात्पञ्चधा, जातिविभक्तिः पृथिव्यप्तेजोवायुवनस्पतित्रसभेदात् षोढा, भवविभक्तिर्नारकतिर्यङ्मनुष्यामरभेदाच्चतुर्धा, अजीवद्रव्यविभक्तिस्तु रूप्यरूपिद्रव्यभेदाद् द्विधा, तत्र रूपिद्रव्यविभक्तिश्चतुर्धा, तद्यथा—स्कन्धाः स्कन्धदेशाः स्कन्धप्रदेशाः परमाणुपुद्गलाश्च, अरूपिद्रव्यविभक्तिर्दशधा, तद्यथा—धर्मास्तिकायो धर्मास्तिकायस्य देशो धर्मास्तिकायस्य प्रदेशः, एवमधर्माकाशयोरपि प्रत्येकं त्रिभेदता द्रष्टव्या, अद्धासमयश्च दशम इति, क्षेत्रविभक्तिश्चतुर्धा, तद्यथा—स्थानं दिशं द्रव्यं स्वामित्वं चाश्रित्य, तत्र स्थानाश्रयणादूर्ध्वाधस्तिर्यग्विभागव्यवस्थितो लोको वैशाखस्थानस्थपुरुष इव कटिस्थकरयुग्म इव द्रष्टव्यः, तत्राप्यधोलोकविभक्तौ रत्नप्रभाद्याः सप्त नरकपृथिव्यः, तत्रापि सीमन्तकादिनरकेन्द्रकावलिकप्रविष्टपुष्पावकीर्णकवृत्तत्र्यस्रचतुरस्रादिनरकस्वरूपनिरूपणं, तिर्यग्लोकविभक्तिस्तु जम्बूद्वीपलवणसमुद्रधातकीखण्डकालोदसमुद्रेत्यादिद्विगुणद्विगुणवृद्ध्या द्वीपसागरस्वयम्भूरमणपर्यन्तस्वरूपनिरूपणं, ऊर्ध्वलोकविभक्तिः सौधर्माद्या उपर्युपरिव्यवस्थिता द्वादश देवलोकाः नव ग्रैवेयकानि पञ्च महाविमानानि, तत्रापि विमानेन्द्रकावलिकाप्रविष्टपुष्पावकीर्णकवृत्तत्र्यस्रचतुरस्रादिविमानस्वरूपनिरूपणमिति, दिगाश्रयणेन तु पूर्वस्यां दिशि व्यवस्थितं क्षेत्रमेवमपरा- ॥१२२॥

१ इति प्र० ।

स्वपीति, द्रव्याश्रयणाच्छालिक्षेत्रादिकं गृह्यते, स्वाम्याश्रयणाच्च देवदत्तस्य क्षेत्रं यज्ञदत्तस्य वेति, यदिवा—क्षेत्रविभक्तिरार्यानार्यक्षेत्रभेदाद् द्विधा, तत्राप्यार्यक्षेत्रमर्धषड्विंशतिजनपदोपलक्षितं राजगृहमगधादिकं गृह्यते, "रायगिह मगह चंपा अंगा तह तामलित्ति वंगा य । कंचणपुरं कलिंगा वाणारसी चेव कासी य ॥ १ ॥ साकेय कोसला गयपुरं च कुरु सोरियं कुसट्टा य । कंपिल्लं पंचाला अहिछत्ता जंगला चेव ॥ २ ॥ बारवई य सुरट्ठा मिहिल विदेहा य वच्छ कोसंबी । नंदिपुरं संदिब्भा भद्दिलपुरमेव मलया य ॥ ३ ॥ वइराड मच्छ वरणा अच्छा तह मित्तियावइ दसण्णा । सुत्तीमई य चेदी वीयभयं सिंधुसोवीरा ॥ ४ ॥ महुरा य सूरसेणा पावा भंगी य मासपुरिवट्टा । सावत्थी य कुणाला, कोडीवरिसं च लाढा य ॥ ५ ॥ सेयवियावि य णयरि केययअद्धं च आरियं भणियं । जत्थुप्पत्ति जिणाणं चक्कीणं रामकिण्हाणं ॥ ॥ ६ ॥" अनार्यक्षेत्रं धर्मसंज्ञारहितमनेकधा, तदुक्तम्—"सगं जवण सबर बब्बर कायमुरुंडो दुगोणपकणया । अक्खागहूणरोमस पारसखसखासिया चेव ॥ १ ॥ डुंबिलयलवोस बोकस भिल्लंद पुलिंद कोंच भमर रूया । कोंबोय चीण चंचुय मालय दमिला कुलक्खा य ॥ २ ॥ केकय किराय हय-

१ राजगृहं मगधे चंपायां तामलिप्तिवंङ्गे काञ्चनपुरं कलिंगे वाणारसी काश्यां ॥ १ ॥ साकेतं कौशले गजपुरं च कुरुषु सौरिकं च कुशार्त्ते कापिल्यं पंचालायां अहिच्छत्रं जंगलायां चैव ॥ २ ॥ द्वारवती सुराष्ट्रायां मिथिला विदेहेषु वत्से कौशाम्बी नंदीपुरं साण्डिल्ये भद्दिलपुरं मलये ॥ ३ ॥ वैराटं वच्छे वरणे अच्छा मृत्तिकावती दशार्णे शुक्तिमती चेदिके वीतभयं सिन्धौ सौवीरे ॥ ४ ॥ मथुरा च शूरसेने पापायां भंगं मासा पुर्यां श्रावस्तिश्च कुणालायां कोटीवर्षं च लाटे च ॥ ५ ॥ श्वेताम्बिकापि च नगरी कैकेयार्द्धं चार्यं भणितं यत्रोत्पत्तिर्जिनानां चक्रिणां रामकृष्णानां ॥ ६ ॥ २ वाराणसी प्र० । ३ शकयवनशबरबर्बरकायमुरुण्डोद्रगौडपक्कणिकाः आख्याकदुणरोमाः पारसखसखासिकाश्चैव ॥ १ ॥ ४ द्विबलश्चलीसबुक्कसाः भिल्लांध्रपुलिंद्रकौंचभ्रमरुकाः कौंबाश्च चीनचंचुकमालवद्रमिलकुलाक्ष्याश्च ॥ १ ॥ ५ मिलिंध प्र० । ६ कोचा य प्र० । ७ कैकेयकिरातहयमुखखरमुखाः गजतुरगमेंढमुखाश्च हयकर्णा गजकर्णाः अन्ये च अनार्या बहवः ॥ १ ॥

मुह खरमुह गयतुरगमेढगमुहा य । हयकण्णा गयकण्णा अण्णे य अणारिया बहवे ॥ ३ ॥ पावा य चंडदंडा अणारिया णिग्घिणा णिरणुकंपा । धम्मोत्ति अक्खराइं जेसु ण णज्जंति सुविणेऽवि ॥ ४ ॥" कालविभक्तिस्तु अतीतानागतवर्तमानकालभेदात्त्रिधा, यदिवैकान्तसुषमादिक्रमेणावसर्पिण्युत्सर्पिण्युपलक्षितं द्वादशारं कालचक्रं, अथवा—"समयावलियमुहुत्ता दिवसमहोरत्त पक्ख मासा य । संवच्छरयुगपलिया सागर उस्सप्पि परियट्टे ॥ १ ॥" त्येवमादिका कालविभक्तिरिति, भावविभक्तिस्तु जीवाजीवभावभेदाद्द्विधा, तत्र जीवभावविभक्तिः औदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकभेदात् षट्प्रकारा, तत्रौदयिको गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्चतुश्चतुरुत्तरैकैकैकैकषड्भेदक्रमेणैकविंशतिभेदभिन्नः, तथौपशमिकः सम्यक्त्वचारित्रभेदाद् द्विविधः, क्षायिकः सम्यक्त्वचारित्रज्ञानदर्शनदानलाभभोगोपभोगवीर्यभेदान्नवधा, क्षायोपशमिकस्तु ज्ञानाज्ञानदर्शनदानादिलब्धयश्चतुस्त्रित्रिपञ्चभेदाः तथा सम्यक्त्वचारित्रसंयमासंयमभेदक्रमेणाष्टादशधेति, पारिणामिको जीवभव्याभव्यत्वादिरूपः, सान्निपातिकस्तु द्विकादिभेदात् षड्विंशतिभेदः, संभवी तु षड्विधोऽयमेव गतिभेदात्पञ्चदशधेति । अजीवभावविभक्तिस्तु मूर्तानां वर्णगन्धरसस्पर्शसंस्थानपरिणामः अमूर्तानां गतिस्थित्यवगाहवर्तनादिक इति, साम्प्रतं समस्तपदापेक्षया नरकविभक्तिरिति नरकाणां विभागो विभक्तिस्तामाह—

पुढवीफासं अण्णाणुवक्कम णिरयवालवहणं च । निसु वेदेंति अताणा अणुभागं चेव सेसासु ॥ ६७ ॥ ॥१२३॥

१ तह प्र० । २ पापाश्चंडदंडाः अनार्या निर्घृणा निरनुकंपाः धर्म इति अक्षराणि यैर्न ज्ञायते स्वप्नेऽपि ॥ १ ॥ ३. रुद्दा प्र० । ४ निरणुतावी प्र० । ५ समय आवलिका मुहूर्त्तैः दिवसोऽहोरात्रं पक्षो मासश्च संवत्सरं युगं पल्यं सागर उत्सर्पिण्यवसर्पिण्यौ पुद्गलपरावर्तः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथिव्याः—शीतोष्णरूपायास्तीव्रवेदनोत्पादको यः स्पर्शः—सम्पर्कः पृथिवीसंस्पर्शस्तमनुभवन्ति, तमेव विशिनष्टि—अन्येन-देवादिना उपक्रमितुम्—उपशमयितुं यो न शक्यते सोऽन्यानुपक्रमस्तम्, अपराचिकित्स्यमित्यर्थः, तमेवम्भूतमपरासाध्यं पृथिवी-स्पर्शं नारकाः समनुभवन्ति, उपलक्षणार्थत्वाच्चास्य रूपरसगन्धस्पर्शशब्दानप्येकान्तेनाशुभानिरुपमाननुभवन्ति, तथा नरकपालैः-पञ्चदशप्रकारैः परमाधार्मिकैः कृतं मुद्गरासिकुन्तककचकुम्भीपाकादिकं वधमनुभवन्त्याद्यासु 'तिसृषु' रत्नशर्करावालुकाख्यासु पृथिवीषु स्वकृतकर्मफलभुजो नारका 'अत्राणा' अशरणाः प्रभूतकालं यावदनुभवन्ति, 'शेषासु' चतसृषु पृथिवीषु पङ्कधूमतमोमहातमःप्रभाख्यासु अनुभावमेव परमाधार्मिकनरकपालाभावेऽपि स्वत एव तत्कृतवेदनाधाः सकाशाद्यस्तीव्रतरोऽनुभावो विपाको वेदनासमुद्घातस्तमनुभवन्ति परस्परोदीरितदुःखाश्च भवन्तीति । साम्प्रतं परमाधार्मिकानामाद्यासु तिसृषु पृथिवीषु वेदनोत्पादकान् स्वनामग्राहं दर्शयितुमाह—

अंबे अंबरिसी चेव, सामे य सबलेवि य । रोद्दोवरुद्द काले य, महाकालेत्तिआवरे ॥ ६८ ॥
असिपत्ते धणुं कुंभे, वालु वेयरणीवि य । खरस्सरे महाघोसे, एवं पण्णरसाहिया ॥ ६९ ॥

गाथाद्वयं प्रकटार्थम्, एवं ते चाम्बाद्यादयः परमाधार्मिका यादृक्षां वेदनामुत्पादयन्ति प्रायोऽन्वर्थसंज्ञत्वाच्चादृशाभिधाना एव द्रष्टव्या इति, साम्प्रतं स्वाभिधानापेक्षया यो यां वेदनां परस्परोदीरणदुःखं चोत्पादयति तां दर्शयितुमाह—

धाडेंति य हाडेंति य हणंति विंधंति तह णिसुंभंति । सुंचंति अंबरतले अंबा खलु तत्थ णेरइया ॥ ७० ॥

१ गंध रस इति प्र० ।

ओहयहये य तहियं णिस्सन्ने कप्पणीहि कप्पंति । विदुलगच्चडुलगछिन्ने अंबरिसी तत्थ णेरइए ॥ ७१ ॥
साडणपाडणतोडण बंधणरज्जुल्लयप्पहारेहिं । सामा णेरइयाणं पवत्तयंती अपुण्णाणं ॥ ७२ ॥
अंतगयफिप्फिसाणि य हिययं कालेज्ज फुप्फुसे वक्के । सबला णेरतियाणं कड्ढेंति तहिं अपुन्नाणं ॥ ७३ ॥
असिसत्तिकोंततोमरसूलतिसूलेसु सूइचियगासु । पोयंति रुद्दकम्मा उ णरगपाला तहिं रोद्दा ॥ ७४ ॥
भंजंति अंगमंगाणि ऊरूबाहूसिराणि करचरणे । कप्पेंति कप्पणीहिं उवरुद्दा पावकम्मरया ॥ ७५ ॥
मीरासु सुंठएसु य कंडूसु य पयंडएसु य पयंति । कुंभीसु य लोहिएसु य पयंति काला उ णेरतिए ॥ ७६ ॥
कप्पंति कागिणीमंसगाणि छिंदंति सीहपुच्छाणि । खावंति य णेरइए महकाला पावकम्मरए ॥ ७७ ॥
हत्थे पाए ऊरू बाहुसिरापायअंगमंगाणि । छिंदंति पगामं तू असि णेरइए निरयपाला ॥ ७८ ॥
कण्णोट्ठणासकरचरणदसणट्ठणफुग्गऊरुबाहूणं । छेयणभेयणसाडण असिपत्तधणूहि पाडंति ॥ ७९ ॥
कुम्भीसु य पयणेसु य लोहियसु य कंदुलोहिकुंभीसु । कुंभी य णरयपाला हणंति पाडं(यं)ति णरएसु ॥८०॥
तडतडतडस्स भज्जंति भज्जणे कलंबुवालुगापट्ठे । वालुगा णेरइया लोलंती अंबरतलंमि ॥ ८१ ॥
पूयरुहिरकेसट्ठिवाहिणी कलकलेंतजलसोया । वेयरणिणिरयपाला णेरइए ऊ पवाहंति ॥ ८२ ॥
कप्पेंति करकएहिं तच्छिंति परोप्परं परसुएहिं । सिंबलितरुमारुहंती खरस्सरा तत्थ णेरइए ॥ ८३ ॥

१ वोहण० टीका । २ कंडुड० प्र० । ३ पूओरु० प्र० ।

भीए य पलायंते समंततो तत्थ ते णिरुंभंति । पसुणो जहा पसुवहे महघोसा तत्थ णेरइए ॥ ८४ ॥

तत्राम्बाभिधानाः परमाधार्मिकाः स्वभवनान्नरकावासं गत्वा क्रीडया नारकान् अत्राणान् सारमेयानिव शूलादिप्रहारैस्तुदन्तो 'धाडेंति'त्ति प्रेरयन्ति—स्थानात् स्थानान्तरं प्रापयन्तीत्यर्थः, तथा 'पहाडेंति'त्ति खेच्छयेतश्चेतश्चानाथं भ्रमयन्ति, तथा अम्बरतले प्रक्षिप्य पुनर्निपतन्तं मुद्गरादिना घ्नन्ति, तथा शूलादिना विध्यन्ति, तथा 'निसुंभंति'त्ति कुकाटिकायां गृहीत्वा भूमौ पातयन्ति अधोमुखान्, तथोत्क्षिप्य अम्बरतले मुञ्चन्तीत्येवमादिकया विडम्बनया 'तत्र' नरकपृथिवीषु नारकान् कदर्थयन्ति । किञ्चान्यत्—उप—सामीप्येन मुद्गरादिना हता उपहताः पुनरप्युपहता एव खड्गादिना हता उपहतहतास्तान्नारकान् 'तस्यां' नरकपृथिव्यां 'निःसंज्ञकान्' नष्टसंज्ञान् मूर्च्छितान्सतः कर्पणीभिः 'कल्पयन्ति' छिन्दन्तीतश्चेतश्च पाटयन्ति, तथा 'द्विदलचतुलकच्छिन्नानि'ति मध्यपाटितान् खण्डशश्छिन्नांश्च नारकांस्तत्र-नरकपृथिव्यामम्बर्षिनामानोऽसुराः कुर्वन्तीति, तथा-'अपुण्यवतां' तीव्रासातोदये वर्तमानानां नारकाणां श्यामाख्याः परमाधार्मिका एतच्चैतच्च प्रवर्तयन्ति, तद्यथा—'शातनम्' अङ्गोपाङ्गानां छेदनं, तथा 'पातनं' निष्कुटादधो वज्रभूमौ प्रक्षेपः तथा 'प्रतोदनं' शूलादिना तोदनं व्यधनं, (ग्रन्थाग्रम् ३७५०) सूच्यादिना नासिकादौ वेधस्तथा रज्ज्वादिना क्रूरकर्मकारिणं बध्नन्ति, तथा तादृग्विधबलताप्रहारैस्ताडयन्त्येवं दुःखोत्पादनं दारुणं शातनपातनवेधबन्धनादिकं बहुविधं 'प्रवर्तयन्ति' व्यापारयन्तीति, अपिच-तथा—सबलाख्या नरकपालास्तथाविधकर्मोदयसमुत्पन्नक्रीडापरिणामा अपुण्यभाजां नारकाणां यत्कुर्वन्ति तद्दर्शयति, तद्यथा-अभ्रगतानि यानि फिप्फिसानि—अभ्रान्तर्वर्तीनि मांसविशेषरूपाणि तथा

१ कूष्माण्डवदायतं छित्त्वा यत्तिर्यक् छिद्यते वि० प्र० । २ व्यधनं तथा । व्यधनं तथा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृदयं पाटयन्ति तथा तदृतं 'कालेज्जं'ति हृदयान्तर्वर्ति मांसखण्डं तथा 'फुप्फुसे'त्ति उदरान्तर्वर्तीन्यन्यविशेषरूपाणि तथा 'वंकलान्' वर्धान् आकर्षयन्ति, नानाविधैरुपायैरशरणानां नारकाणां तीव्रां वेदनामुत्पादयन्तीति । अपिच–तथा अन्वर्थाभिधाना रौद्राख्या नरकपाला रौद्रकर्माणो नानाविधेष्वसिशक्त्यादिषु प्रहरणेषु नारकानशुभकर्मोदयवर्तिनः प्रोतयन्तीति । तथा–उपरुद्राख्याः परमाधार्मिका नारकाणामङ्गप्रत्यङ्गानि शिरोबाहूरुकादीनि तथा करचरणांश्च 'भञ्जन्ति' मोटयन्ति पापकर्माणः कल्पनीभिः 'कल्पयन्ति' पाटयन्ति, तन्नास्त्येव दुःखोत्पादनं यत्ते न कुर्वन्तीति । अपिच—तथा कालाख्या नरकपालासुरा 'भीरासु' दीर्घचुल्लीषु तथा शुण्ठकेषु तथा कन्दुकेषु प्रचण्डकेषु तीव्रतापेषु नारकान् पचन्ति, तथा 'कुम्भीषु' उष्ट्रिकाकृतिषु तथा 'लोहिषु' आयसकवल्लिषु नारकान् व्यवस्थाप्य जीवन्मत्स्यानिव पचन्ति । अपिच—महाकालाख्या नरकपालाः पापकर्मनिरता नारकान्नानाविधैरुपायैः कदर्थयन्ति, तद्यथा–'काकिणीमांसकानि' श्लक्ष्णमांसखण्डानि 'कल्पयन्ति' नारकान् कुर्वन्ति, तथा 'सीहपुच्छाणि'त्ति पृष्ठीवंशास्तांश्छिन्दन्ति, तथा ये प्राक् मांसाशिनो नारका आसन् तान् स्वमांसानि खादयन्तीति । अपिच—असिनामानो नरकपाला अशुभकर्मोदयवर्तिनो नारकानेवं कदर्थयन्ति, तद्यथा–हस्तपादोरुबाहुशिरःपार्श्वादीन्यङ्गप्रत्यङ्गानि छिन्दन्ति 'प्रकामम्' अत्यर्थं खण्डयन्ति, तुशब्दोऽपरदुःखोत्पादनविशेषणार्थ इति । तथा—असिप्रधानाः पत्रधनुर्नामानो नरकपाला असिपत्रवनं वीभत्सं कृत्वा तत्र छायार्थिनः समागतान् नारकान् वराकान् अस्यादिभिः पाटयन्ति, तथा कर्णौष्ठनासिकाकरचरणदशनस्तनस्फिगूरुबाहूनां छेदनभेदनशातनादीनि विकुर्वितवाताहतचलिततरुपातितासिपत्रादिना कुर्वन्तीति, तदुक्तम्–"छिन्नपादभुजस्कन्धाश्छिन्नकर्णौष्ठनासिकाः । भिन्नतालुशिरोमेण्ढ्रा, भिन्नाक्षिहृदयोदराः ॥ १ ॥" किञ्चान्यत्—कुम्भिनामानो नरकपाला नारकान्नरकेषु व्यवस्थितान् निभन्ति, तथा पाचयन्ति, केति दर्शयति–'कुम्भीषु' उष्ट्रिकाकृतिषु तथा 'पचनेषु' कडिल्लकाकृतिषु तथा 'लोहीषु' आयसभाजनविशेषेषु कन्दुलोहिकुम्भीषु कन्दुकानामिव अयोमयीषु कुम्भीषु–कोष्ठिकाकृतिषु एवमादिभाजनविशेषेषु पाचयन्ति । तथा—वालुकाख्याः परमाधार्मिका नारकानत्राणांस्तप्तवालुकाभृतभाजने चणकानिव तडतडित्ति स्फुटतः 'भर्जंति' भृज्जन्ति–पचन्ति, क? इत्याह–कदम्बपुष्पाकृतिवालुका कदम्बवालुका तस्याः पृष्ठम्–उपरितलं तस्मिन् पातयित्वा अम्बरतले च लोलयन्तीति । किञ्चान्यत्—वैतरणीनामानो नरकपाला वैतरणीं नदीं विकुर्वन्ति, सा च पूयरुधिरकेशास्थिवाहिनी महाभयानका कलकलायमानजलश्रोता तस्यां च क्षारोष्णजलायामतीव बीभत्सदर्शनायां नारकान् प्रवाहयन्तीति ॥ तथा—खरस्वराख्यास्तु परमाधार्मिका नारकानेवं कदर्थयन्ति, तद्यथा–ककचपार्तैर्मध्यं मध्येन स्तम्भमिव सूत्रपातानुसारेण कल्पयन्ति–पाटयन्ति, तथा परशुभिश्च तानेव नारकान् 'परस्परम्' अन्योऽन्यं तक्षयन्ति सर्वशो देहावयवापनयनेन तनून् कारयन्ति, तथा 'शाल्मलीं' वज्रमयभीषणकण्टकाकुलां खरस्वरैः आरटतो नारकानारोहयन्ति पुनरारूढानाकर्षयन्तीति । अपिच–महाघोषाभिधाना भवनपत्यसुराधमविशेषाः परमाधार्मिका व्याधा इव परपीडोत्पादनेनैवातुलं हर्षमुद्वहन्तः क्रीडया नानाविधैरुपायैर्नारकान् कदर्थयन्ति, तांश्च भीतान् प्रपलायमानान् मृगानिव 'समन्ततः' सामस्त्येन 'तत्रैव' पीडोत्पादनस्थाने 'निरुम्भन्ति' प्रतिबध्नन्ति 'पशून्' बस्तादिकान् यथा पशुवधे समुपस्थिते नश्यतस्तद्वधकाः प्रतिबध्नन्त्येवं तत्र नरकावासे नारकानिति ॥ गतो नामनिष्पन्ननिक्षेपः, अधुना सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

पुच्छिस्सऽहं केवलियं महेसिं, कहं भितावा णरगा पुरत्था ?।
अजाणओ मे मुणि बूहि जाणं, कहिं नु बाला नरयं उविंति ? ॥ १ ॥
एवं मए पुट्ठे महाणुभावे, इणमोऽब्बवी कासवे आसुपन्ने ।
पवेदइस्सं दुहमट्ठदुग्गं, आदीणियं दुक्कडियं पुरत्था ॥ २ ॥

जम्बूस्वामिना सुधर्मस्वामी पृष्टः, तद्यथा–भगवन्! किंभूता नरकाः? कैर्वा कर्मभिरसुमतां तेषूत्पादः? कीदृश्यो वा तत्रत्या वेदना? इत्येवं पृष्टः सुधर्मस्वाम्याह—यदेतद्भवताऽहं पृष्टस्तदेतद् 'केवलिनम्' अतीतानागतवर्तमानसूक्ष्मव्यवहितपदार्थवेदिनं 'महर्षिम्' उग्रतपश्चरणकारिणमनुकूलप्रतिकूलोपसर्गसहिष्णुं श्रीमन्महावीरवर्धमानस्वामिनं पुरस्तात्पूर्वं पृष्टवानहमस्मि, यथा 'कथं' किम्भूता अभितापान्विता 'नरका' नरकावासा भवन्तीत्येतदजानतो 'मे' मम हे मुने 'जानन्' सर्वमेव केवलज्ञानेनावगच्छन् 'ब्रूहि' कथय, 'कथं नु' केन प्रकारेण किमनुष्ठायिनो नुरिति वितर्के 'बाला' अज्ञा हिताहितप्राप्तिपरिहारविवेकरहितास्तेषु नरकेषूप–सामीप्येन तद्योग्यकर्मोपादानतया 'यान्ति' गच्छन्ति किम्भूताश्च तत्र गतानां वेदनाः प्रादुष्यन्तीत्येतच्चाहं 'पृष्टवानि'ति ॥ १ ॥ तथा 'एवम्' अनन्तरोक्तं मया विनेयेनोपगम्य पृष्टो महांश्चतुस्त्रिंशदतिशयरूपोऽनुभावो–माहात्म्यं यस्य स तथा, प्रश्नोत्तरकालं च 'इदं' वक्ष्यमाणं, मो इति वाक्यालङ्कारे, केवलालोकेन परिज्ञाय मत्प्रश्ननिर्वचनम् 'अब्रवीत्' उक्त-

१ किंच प्र० । २ कण्ठोष्ठ० प्र० । ३ धतौ स्फिजौ कटि प्रोथौ डैमः ।

१ ०नुभागो० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वान् कोऽसौ?—'काश्यपो' वीरो वर्धमानस्वामी आशुप्रज्ञः सर्वत्र सदोपयोगात्, स चैवं मया पृष्टो भगवानिदमाह—यथा यदेतद्भवता पृष्टस्तदहं 'प्रवेदयिष्यामि' कथयिष्याम्यग्रतो दत्तावधानः शृण्विति, तदेवाह—'दुःखम्' इति नरकं दुःखहेतुत्वात् असदनुष्ठानं यदिवा—नरकावास एव दुःखयतीति दुःखं अथवा—असातावेदनीयोदयात् तीव्रपीडात्मकं दुःखमिति, एतच्चार्थतः—परमार्थतो विचार्यमाणं 'दुर्गं' गहनं विषमं दुर्विज्ञेयं असर्वज्ञेन, तत्प्रतिपादकप्रमाणाभावादित्यभिप्रायः, यदिवा—'दुरुहमट्ठदुग्गं'ति दुःखमेवार्थो यस्मिन् दुःखनिमित्तो वा दुःखप्रयोजनो वा स दुःखार्थो—नरकः, स च दुर्गो—विषमो दुरुत्तरत्वात् तं प्रतिपादयिष्ये, पुनरपि तमेव विशिनष्टि—आ—समन्तादीनमादीनं तद्विद्यते यस्मिन्स आदीनिकः—अत्यन्तदीनसत्त्वाश्रयस्तथा दुष्टं कृतं दुष्कृतम् असदनुष्ठानं पापं वा तत्फलं वा असातावेदनीयोदयरूपं तद्विद्यते यस्मिन्स दुष्कृतिकस्तं, 'पुरस्तात्' अग्रतः प्रतिपादयिष्ये, पाठान्तरं वा 'दुक्कडिणं'ति दुष्कृतं विद्यते येषां ते दुष्कृतिनो—नारकास्तेषां सम्बन्धि चरितं 'पुरस्तात्' पूर्वस्मिन् जन्मनि नरकगतिगमनयोग्यं यत्कृतं तत्प्रतिपादयिष्य इति ॥ २ ॥ यथाप्रतिज्ञातमाह—

जे केइ बाला इह जीवियट्ठी, पावाइं कम्माइं करंति रुद्दा ।
ते घोररूवे तमिसंधयारे, तिव्वाभितावे नरए पडंति ॥ ३ ॥
तिव्वं तसे पाणिणो थोवरे य, जे हिंसती आयसुहं पडुच्चा ।

१ असर्वज्ञस्य नरकज्ञानकारकतादृक्ज्ञानाभावात् ।

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥१२७॥

जे लूसए होइ अदत्तहारी, ण सिक्खती सेयवियस्स किंचि ॥ ४ ॥

५ नरकविभक्त्यध्ययनं उद्देशः १

ये केचन महारम्भपरिग्रहपञ्चेन्द्रियवधपिशितभक्षणादिके सावद्यानुष्ठाने प्रवृत्ताः 'बाला' अज्ञा रागद्वेषोत्कटास्तिर्यग्मनुष्या 'इह' अस्मिन्संसारे असंयमजीवितार्थिनः पापोपादानभूतानि 'कर्माणि' अनुष्ठानानि 'रौद्राः' प्राणिनां भयोत्पादकत्वेन भयानकाः हिंसानृतादीनि कर्माणि कुर्वन्ति, त एवम्भूतास्तीव्रपापोदयवर्तिनो 'घोररूपे' अत्यन्तभयानके 'तमिसंधयारे'त्ति बहलतमोऽन्धकारे यत्रात्मापि नोपलभ्यते चक्षुषा केवलमवधिनापि मन्दंमन्दमुलूका इवाहि पश्यन्ति, तथा चागमः—"किण्हलेसे णं भंते! णेरइए किण्हलेस्सं णेरइअं पणिहाए ओहिणा सव्वओ समंता समभिलोएमाणे केवइयं खेत्तं जाणई? केवइयं खेत्तं पासइ?, गोयमा! णो बहुययरं खेत्तं जाणइ णो बहुययरं खेत्तं पासइ, इत्तरियमेव खेत्तं जाणइ इत्तरियमेव खेत्तं पासइ" इत्यादि तथा तीव्रो—दुःसहः खदिराङ्गारमहाराशितापादनन्तगुणोऽभितापः—सन्तापो यस्मिन् स तीव्राभितापः तस्मिन् एवम्भूते नरके बहुवेदने अपरित्यक्तविषयाभिष्वङ्गाः स्वकृतकर्मगुरवः पतन्ति, तत्र च नानारूपा वेदनाः समनुभवन्ति, तथा चोक्तम्—"अच्छड्डियविसयसुहो पडइ अविज्झायसिहिसिहाणिवहे । संसारोदहिवलयामुहंमि दुक्खागरे निरए ॥ १ ॥ पायकंतोरत्थलमुहकुहरुच्छलियरुहिरगं-

१ कृष्णलेश्यो भदन्त ! नैरयिकः कृष्णलेश्यं नैरयिकं प्रणिधायावधिना सर्वतः समन्तात् समभिलोकयन् कियत्क्षेत्रं जानाति कियत्क्षेत्रं पश्यति?, गौतम! नो बहुतरं क्षेत्रं जानाति नो बहुतरं क्षेत्रं पश्यति इत्वरमेव क्षेत्रं जानाति इत्वरमेव क्षेत्रं पश्यति । २ अत्यन्तविषयसुखः पतति अविध्यातशिखिशिखानिवहे । संसारोदधिवलयामुखे दुःखाकरे निरये ॥ १ ॥ ३ महे प्र० । ४ पादाक्रान्तोरस्थलमुखकुहरोच्छलितरुधिरमेदुरे करपत्रोत्कृत्तद्विधीभागविदार्णदेहार्धे ॥ १ ॥

॥१२७॥

हूसे । करवत्तुक्कत्तदुहाविरिक्कविविहिण्णदेहद्धे ॥ २ ॥ जंतंतरभिज्जंतुच्छलंतसंसद्दभरियदिसिविवरे । डज्झंतुप्फिडियसमुच्छलंतसीसट्ठिसंघाए ॥ ३ ॥ मुक्कक्कंदकडाहुक्कढंतदुक्कयकयंतकम्मंते । सूलविभिन्नुक्खित्तुद्धदेहणिट्ठंतपब्भारे ॥ ४ ॥ सैंदंधयारदुग्गंधबंधणायारदुद्धरकिलेसे । भिन्नकरचरणसंकररुहिरवसादुग्गमप्पवहे ॥ ५ ॥ गिद्धमुहणिद्दउक्खित्तवंधणोमुद्धकंविरकंधे । दढगहियतत्ततंडासयग्गविसमुक्खुडियजीहे ॥ ६ ॥ तिक्खेक्कुसग्गकड्ढियकंटयरुक्खग्गजज्जरसरीरे । निमिसंतरंपि दुल्लहसोक्खेऽवक्खेवदुक्खंमि ॥ ७ ॥ इत्थं भीसणंमि णिरए पडंति जे विविहसत्तवहनिरया । सच्चब्भट्ठा य नरा जयंमि कयपावसंघाया ॥ ८ ॥" इत्यादि ॥ ३ ॥ किञ्चान्यत्—तथा 'तीव्रम्' अतिनिरनुकम्पं रौद्रपरिणामतया हिंसायां प्रवृत्तः, त्रसन्तीति त्रसाः—द्वीन्द्रियादयस्तान्, तथा 'स्थावरांश्च' पृथिवीकायादीन् 'यः' कश्चिन्महामोहोदयवर्ती 'हिनस्ति' व्यापादयति 'आत्मसुखं प्रतीत्य' स्वशरीरसुखकृते, नानाविधैरुपायैर्यः प्राणिनां 'लूषक' उपमर्दकारी भवति, तथा—अदत्तमपहर्तुं शीलमस्यासावदत्तहारी—परद्रव्यापहारकः तथा 'न शिक्षते' नाभ्यस्यति नादत्ते 'सेयवियस्स'त्ति सेवनीयस्यात्महितैषिणा सदनुष्ठेयस्य संयमस्य किञ्चिदिति, एतदुक्तम् भवति—पापोदयाद्विरतिपरिणामं काकमांसादेरपि मनागपि न विधत्ते इति ॥ ४ ॥ तथा—

१ मु० प्र० । २ यंत्रान्तर्भिद्यदुच्छलत्संशब्दभृतदिग्विवरे दह्यमानोत्स्फटितोच्छलच्छीर्षास्थिसंघाते ॥ १ ॥ ३ मुक्ताक्रंदकटाहोत्कथ्यमानदुष्कृतकृतान्तकर्मान्ते शूलविभिन्नोत्क्षिप्तोर्ध्वदेहनिष्ठप्राग्भारे ॥ १ ॥ ४ शब्दान्धकारदुर्गन्धबन्धनागारदुर्धरक्लेशे । भिन्नकरचरणसंकररुधिरवसादुर्गमप्रवाहे ॥ १ ॥ ५ गृध्रमुखनिर्दयोत्क्षिप्तबन्धनोन्मूर्धकन्दत्कबन्धे । दृढगृहीततप्तसंदंशकाग्रविषमोत्पाटितजिह्वे ॥ १ ॥ ६ °बंधणे प्र० । ७ °कंदिर० प्र० । ८ अधोमुखकन्दन् कबन्धो यत्र वि० प्र० । ९ तीक्ष्णाङ्कुशाग्रकर्षितकंटकवृक्षाग्रजर्जरशरीरे निमेषान्तरमपि दुर्लभसौख्येऽव्याक्षेपदुःखे ॥ १० इति भीषणे निरये पतन्ति विविधसत्त्ववधनिरताः, सत्यभ्रष्टाश्च नरा जगति कृतपापसंघाताः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पागब्भि पाणे बहुणं तिवाति, अतिवाते घातमुवेति बाले ।
णिहो णिसं गच्छति अंतकाले, अहोसिरं कट्टु उवेइ दुग्गं ॥ ५ ॥
हण छिंदह भिंदह णं दहेति, सद्दे सुणिता परहम्मियाणं ।
ते नारगाओ भयभिन्नसन्ना, कंखंति कन्नाम दिसं वयामो ! ॥ ६ ॥

'प्रागल्भ्यं' धाष्टर्यं तद्विद्यते यस्य स प्रागल्भी, बहूनां प्राणिनां प्राणानतीव पातयितुं शीलमस्य स भवत्यतिपाती, एतदुक्तं भवति—अतिपात्यपि प्राणिनः प्राणानतिधाष्टर्याद्वदति यथा-वेदाभिहिता हिंसा हिंसैव न भवति, तथा राज्ञामयं धर्मो यदुत आखेटकेन विनोदक्रिया, यदिवा—"न मांसभक्षणे दोषो, न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला ॥ १ ॥" इत्यादि, तदेवं क्रूरसिंहकृष्णसर्पवत् प्रकृत्यैव प्राणातिपातानुष्ठायी 'अनिर्वृतः' कदाचिदप्यनुपशान्तः क्रोधाग्निना दह्यमानो यदिवा-लुब्धकमत्स्यादिवधकजीविकाप्रसक्तः सर्वदा वधपरिणामपरिणतोऽनुपशान्तो हन्यन्ते प्राणिनः स्वकृतकर्मविपाकेन यस्मिन् स घातो-नरकस्तमुप-सामीप्येनेति—याति, कः ?-'बालः' अज्ञो रागद्वेषोदयवर्ती सः 'अन्तकाले' मरणकाले 'निहो'त्ति न्यग्वधस्तात् 'णिसं'ति अन्धकारम्, अधोऽन्धकारं गच्छतीत्यर्थः, तथा-स्वेन दुश्चरितेनाधःशिरः कृत्वा 'दुर्गं' विषमं

१ परिणामतो प्र० ।

यातनास्थानमुपैति, अवाक्छिरा नरके पततीत्यर्थः ॥ ५ ॥ साम्प्रतं पुनरपि नरकान्तर्वर्तिनो नारका यदनुभवन्ति तद्दर्शयितुमाह—तिर्यङ्मनुष्यभवात्सत्त्वा नरकेषूत्पन्ना अन्तर्मुहूर्तेन निर्लूनाण्डजसन्निभानि शरीराण्युत्पादयन्ति, पर्याप्तिभावमागताश्चातिभयानकान् शब्दान् परमाधार्मिकजनितान् शृण्वन्ति, तद्यथा—'हत' मुद्गरादिना 'छिन्त' खड्गादिना 'भिन्त' शूलादिना 'दह्त' मुर्मुरादिना, णमितिवाक्यालङ्कारे, तदेवम्भूतान् कर्णासुखान् शब्दान् भैरवान् श्रुत्वा ते तु नारका भयोद्भ्रान्तलोचना भयेन-भीत्या भिन्ना-नष्टा संज्ञा-अन्तःकरणवृत्तिर्येषां ते तथा नष्टसंज्ञाश्च 'कां दिशं व्रजामः' कुत्र गतानामस्माकमेवम्भूतस्यास्य महाघोरारवदारुणस्य दुःखस्य त्राणं स्यादित्येतत्काङ्क्षन्तीति ॥ ६ ॥ ते च भयोद्भ्रान्ता दिक्षु नष्टा यदनुभवन्ति तद्दर्शयितुमाह—

इंगालरासिं जलियं सजोतिं, तत्तोवमं भूमिमणुक्कमंता ।
ते डज्झमाणा कलुणं थणंति, अरहस्सरा तत्थ चिरट्ठितीया ॥ ७ ॥
जइ ते सुया वेयरणी भिदुग्गा, णिसिओ जहा खुर इव तिक्खसोया ।
तरंति ते वेयरणीं भिदुग्गां, उसुचोइया सत्तिसु हम्ममाणा ॥ ८ ॥'

'अङ्गाररासिं' खदिराङ्गारपुञ्जं 'ज्वलितं' ज्वालाकुलं तथा सह ज्योतिषा-उद्योतेन वर्तत इति सज्योतिर्भूमिः, तेनोपमा यस्याः सा तदुपमा तामङ्गारसन्निभां भूमिमाक्रमन्तस्ते नारका दह्यमानाः 'करुणं' दीनं 'स्तनन्ति' आक्रन्दन्ति, तत्र बाद-

१ अवाङ् प्र० । २ निर्लूनरोमाणोऽण्डजा इव ।

राग्नेरभावात्तदुपमां भूमिमित्युक्तम्, एतदपि दिग्दर्शनार्थमुक्तम्, अन्यथा नारकतापस्येहत्याग्निना नोपमा घटते, ते च नारका महानगरदाहाधिकेन तापेन दह्यमाना 'अरहस्वरा' प्रकटस्वरा महाशब्दाः सन्तः 'तत्र' तस्मिन्नरकावासे चिरं-प्रभूतं कालं स्थितिः-अवस्थानं येषां ते तथा, तथाहि-उत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमाणि जघन्यतो दशवर्षसहस्राणि तिष्ठन्तीति ॥ ७ ॥ अपिच-सुधर्मस्वामी जम्बूस्वामिनं प्रतीदमाह—यथा भगवतेदमाख्यातं यदि 'ते' त्वया श्रुता-श्रवणपथमुपागता 'वैतरणी' नाम क्षारोष्णरुधिराकारजलवाहिनी नदी अभिमुख्येन दुर्गा अभिदुर्गा-दुःखोत्पादिका, तथा-निशितो यथा क्षुरस्तीक्ष्णो भवत्येवं तीक्ष्णानि-शरीरावयवानां कर्तकानि स्रोतांसि यस्याः सा तथा, ते च नारकास्तप्ताङ्गारसन्निभां भूमिं विहायोदकपिपासवोऽभितप्ताः सन्तस्तापापनोदायाभिपिपिक्षवो वा तां वैतरणीमभिदुर्गां तरन्ति, कथम्भूताः ?-इषुणा-शरेण प्रतोदेनेव चोदिताः—प्रेरिताः शक्तिभिश्च हन्यमानास्तामेव भीमां वैतरणीं तरन्ति, तृतीयार्थे सप्तमी ॥ ८ ॥ किञ्च—

कीलेहिं विज्झंति असाहुकम्मा, नावं उविंते सइविप्पहूणा ।
अन्ने तु सूलाहिं तिसूलियाहिं, दीहाहिं विद्धूण अहेकरंति ॥ ९ ॥
केसिं च बंधित्तु गले सिलाओ, उदगंसि बोलंति महालयंसि ।
कलंबुयावालुय मुम्मुरे य, लोलंति पच्चंति अ तत्थ अन्ने ॥ १० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तांश्च नारकानत्यन्तक्षारोष्णेन दुर्गन्धेन वैतरणीजलेनाभितप्तानायसकीलाकुलां नावमुपगच्छतः पूर्वारूढा 'असाधुकर्माणः' परमाधार्मिकाः 'कीलेषु' कण्ठेषु विध्यन्ति, ते च विध्यमानाः कलकलायमानेन सर्वस्रोतोऽनुयायिना वैतरणीजलेन नष्टसंज्ञा अपि सुतरां 'स्मृत्या विप्रहीणा' अपगतैकर्तव्यविवेका भवन्ति, अन्ये पुनर्नरकपाला नारकैः क्रीडतस्तान्नष्टांस्त्रिशूलिकाभिः शूलाभिः 'दीर्घिकाभिः' आयताभिर्विध्वा अधोभूमौ कुर्वन्तीति ॥ ९ ॥ अपिच—केषांचिन्नारकाणां परमाधार्मिका महतीं शिलां गले बद्ध्वा महत्युदके 'बोलंति'त्ति निमज्जयन्ति, पुनस्ततः समाकृष्य वैतरणीनद्याः कलम्बुकावालुकायां गुर्म्मुरायां च 'लोलयन्ति' अतितप्तवालुकायां चणकानिव समन्ततो घोलयन्ति, तथा अन्ये 'तत्र' नरकावासे स्वकर्मपाशावपाशितान्नारकान् सुण्ठके प्रोतकमांसपेशीवत् 'पचन्ति' भर्जयन्तीति ॥ १० ॥ तथा—

आसूरियं नाम महाभितावं, अंधंतमं दुप्पतरं महंतं ।
उड्ढं अहेअं तिरियं दिसासु, समाहिओ जत्थऽगणी झियाई ॥ ११ ॥
जंसी गुहाए जलणेऽतिउट्टे, अविजाणओ डज्झइ लुत्तपण्णो ।
सया य कलुणं पुण घम्मठाणं, गाढोवणीयं अतिदुक्खधम्मं ॥ १२ ॥

न विद्यते सूर्यो यस्मिन् सः असूर्यो—नरको बहलान्धकारः कुम्भिकाकृतिः सर्व एव वा नरकावासोऽसूर्य इति व्यपदिश्यते,

१ कर्तव्याकर्तव्य० प्र० । २ ड्यत्त० प्र० । ३ प्रोतमां० प्र० । ४ असूरियं प्र० ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१३०॥

तमेवम्भूतं महाभितापम् अन्धतमसं 'दुष्प्रतरं' दुरुत्तरं 'महान्तं' विशालं नरकं महापापोदयाद्व्रजन्ति, तत्र च नरके ऊर्ध्वमधस्तिर्यक् सर्वतः 'समाहितः' सम्यगाहितो व्यवस्थापितोऽग्निर्ज्वलतीति, पठ्यते च 'समूसिओ जत्थऽगणी झियाई' यत्र नरके सम्यगूर्ध्वं श्रितः—समुच्छ्रितोऽग्निः प्रज्वलति तं तथाभूतं नरकं वराका व्रजन्ति इति ॥ ११ ॥ किञ्चान्यत्—'यस्मिन्' नरकेऽतिगतोऽसुमान् 'गुहायां' मित्युष्ट्रिकाकृतौ नरके प्रवेशितो 'ज्वलने' अग्नौ 'अतिवृत्तः' अतिगतो वेदनाभिभूतत्वात्स्वकृतं दुश्चरितमजानन् 'लुप्तप्रज्ञः' अपगतावधिविवेको दन्दह्यते, तथा 'सदा' सर्वकालं पुनः करुणप्रायं कृत्स्नं वा 'घर्मस्थानम्' उष्णस्थानं तापस्थानमित्यर्थः, 'गाढं'ति अत्यर्थम् 'उपनीतं' ढौकितं दुष्कृतकर्मकारिणां यत् स्थानं तत्ते व्रजन्ति, पुनरपि तदेव विशिनष्टि—अतिदुःखरूपो धर्मः—स्वभावो यस्मिन्निति, इदमुक्तं भवति—अक्षिनिमेषमात्रमपि कालं न तत्र दुःखस्य विश्राम इति, तदुक्तम्—"[3]अच्छिणिमीलणमेत्तं णत्थि सुहं दुक्खमेव पडिबद्धं । णिरए णेरइयाणं अहोणिसं पच्चमाणाणं ॥ १ ॥" ॥१२॥ अपिच—

चत्तारि अगणीओ समारभित्ता, जहिं कूरकम्माऽभितविंति बालं ।
ते तत्थ चिट्ठंतऽभितप्पमाणा, मच्छा व जीवंतुवजोतिपत्ता ॥ १३ ॥
संतच्छणं नाम महाहितावं, ते नारया जत्थ असाहुकम्मा ।
हत्थेहि पाएहि य बंधिऊणं, फलगं व तच्छंति कुहाडहत्था ॥ १४ ॥

१ जाज्वल० प्र० । २ पच्यते प्र० । ३ अक्षिनिमीलनमात्रं नास्ति सुखं दुःखमेव प्रतिबद्धं निरये नैरयिकाणां अहर्निशं पच्यमानानाम् ॥ १ ॥

५ नरकविभक्त्यध्ययनं उद्देशः १

॥१३०॥

चतसृष्वपि दिक्षु चतुरोऽग्नीन् 'समारभ्य' प्रज्वाल्य 'यत्र' यस्मिन्नरकावासे 'क्रूरकर्माणो' नरकपाला आभिमुख्येनात्यर्थं तापयन्ति—भर्त्रिवत्पचन्ति 'बालम्' अज्ञं नारकं पूर्वकृतदुश्चरितं ते तु नारकजीवा एवम् 'अभितप्यमानाः' कदर्थ्यमानाः स्वकर्मनिगडितास्तत्रैव प्रभूतं कालं महादुःखाकुले नरके तिष्ठन्ति, दृष्टान्तमाह—यथा जीवन्तो 'मत्स्या' मीना 'उपज्योतिः' अग्नेः समीपे प्राप्ताः परवशत्वादन्यत्र गन्तुमसमर्थास्तत्रैव तिष्ठन्ति, एवं नारका अपि, मत्स्यानां तापासहिष्णुत्वादग्नावत्यन्तं दुःखमुत्पद्यत इत्यतस्तद्ग्रहणमिति ॥ १३ ॥ किञ्चान्यत्—सम्—एकीभावेन तक्षणं सन्तक्षणं, नामशब्दः सम्भावनायां, यदेतत्संतक्षणं तत्सर्वेषां प्राणिनां 'महाभितापं' महादुःखोत्पादकमित्येवं सम्भाव्यते, यद्येवं ततः किमित्याह—ते 'नारका' नरकपाला 'यत्र' नरकावासे स्वभवनादागताः 'असाधुकर्माणः' क्रूरकर्माणो निरनुकम्पाः 'कुठारहस्ताः' परशुपाणयस्तान्नारकानत्राणान् हस्तैः पादैश्च 'बद्ध्वा' संयम्य 'फलकमिव' काष्ठशकलमिव 'तक्षणुवन्ति' तनूकुर्वन्ति छिन्दन्तीत्यर्थः ॥ १४ ॥ अपिच—

रुहिरे पुणो वच्चसमुस्सिअंगे, भिन्नुत्तमंगे वरिवत्तयंता ।
पयंति णं णेरइए फुरंते, सजीवमच्छे व अयोकवल्ले ॥ १५ ॥
नो चेव ते तत्थ मसीभवंति, ण मिज्जती तिव्वभिवेयणाए ।
तमाणुभागुं अणुवेदयंता, दुक्खंति दुक्खी इह दुक्कडेणं ॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते परमाधार्मिकास्ताञ्शारकान्स्वकीये रुधिरे तप्तकवल्यां प्रक्षिप्ते पुनः पचन्ति, वर्चःप्रधानानि समुच्छ्रितान्यङ्गान्यङ्गानि वा येषां ते तथा तान् भिन्न-चूर्णितम् उत्तमाङ्ग-शिरो येषां ते तथा तानिति, कथं पचन्तीत्याह-'परिवर्तयन्तः' उत्तानानवाङ्मुखान् वा कुर्वन्तः णमिति वाक्यालङ्कारे तान्-'स्फुरत' इतश्चेतश्च विह्वलमात्मानं निक्षिपतः सजीवमत्स्यानिवायसकवल्यामिति ॥ १५ ॥ तथा—ते च नारका एवं बहुशः पच्यमाना अपि 'नो' नैव 'तत्र' नरके पाके वा नरकानुभावे वा सति 'मर्षीभवन्ति' नैव मरणसाङ्गवन्ति, तथा तत्तीव्राभिवेदनया नापरमग्निप्रक्षिप्तमत्स्यादिकमप्यस्ति यन्मीयते-उपमीयते, अनन्यसदृशीं तीव्रां वेदनां वाचामगोचरामनुभवन्तीत्यर्थः, यदिवा—तीव्राभिवेदनयाऽप्यननुभूतस्वकृतकर्मत्वान्न म्रियन्त इति, प्रभूतमपि कालं यावत्तत्तादृशं शीतोष्णवेदनाजनितं तथा दहनच्छेदनभेदनतक्षणत्रिशूलारोपणकुम्भीपाकशाल्मल्यारोहणादिकं परमाधार्मिकजनितं परस्परोदीरणनिष्पादितं च 'अनुभागं' कर्मणां विपाकम् 'अनुवेदयन्तः' समनुवेदयन्तः समनुभवन्तस्तिष्ठन्ति, तथा स्वकृतेन 'दुष्कृतेन' हिंसादिनाऽष्टादशपापस्थानरूपेण सततोदीर्णदुःखेन दुःखिनो 'दुःखयन्ति' पीडयन्ते, नाक्षिनिमेषमपि कालं दुःखेन मुच्यन्त इति ॥ १६ ॥ किञ्चान्यत्—

तहिं च ते लोलणसंपगाढे, गाढं सुतत्तं अगणिं वयंति ।
न तत्थ सायं लहती भिदुग्गे, अरहियाभितावा तहवी तविंति ॥ १७ ॥

---

१ अरब्भिया० प्र० ।

से सुच्चई नगरवहे व सद्दे, दुहोवणीयाणि पयाणि तत्थ ।
उदिण्णकम्माण उदिण्णकम्मा, पुणो पुणो ते सरहं दुहेंति ॥ १८ ॥

'तस्मिंश्च' महायातनास्थाने नरके तमेव विशिनष्टि—नारकाणां लोलनेन सम्यक् प्रगाढो-व्याप्तो भूतः स तथा तस्मिन्नरके अतिशीतार्ताः सन्तो 'गाढम्' अत्यर्थं सुष्ठु तप्तम् अग्निं व्रजन्ति, 'तत्रापि' अग्निस्थानेऽभिदुर्गे दह्यमानाः 'सातं' सुखं मनागपि न लभन्ते, 'अरहितो' निरन्तरोऽभितापो-महादाहो येषां ते अरहिताभितापाः तथापि तान्नारकांस्ते नरकपालास्तापयन्त्यत्यर्थं तप्ततैलाग्निना दहन्तीति ॥ १७ ॥ अपिच-सेशब्दोऽथशब्दार्थे, 'अथ' अनन्तरं तेषां नारकाणां नरकपालै रौद्रैः कदर्थ्यमानानां भयानको हाहारवप्रचुर आक्रन्दनशब्दो नगरवध इव 'श्रूयते' समाकर्ण्यते, दुःखेन पीडयोपनीतानि-उच्चारितानि करुणाप्रधानानि यानि पदानि हा मातस्तात ! कष्टमनाथोऽहं शरणागतस्तव त्रायस्व मामित्येवमादीनां पदानां 'तत्र' नरके शब्दः श्रूयते, उदीर्णम्-उदयप्राप्तं कटुविपाकं कर्म येषां ते तथा तेषां तथा 'उदीर्णकर्माणो' नरकपाला मिथ्यात्वहास्यरत्यादीनामुदये वर्तमानाः 'पुनः पुनः' बहुशस्ते 'सरहं (दुहं)ति' सरभसं—सोत्साहं नारकान् 'दुःखयन्ति' अत्यन्तमसह्यं नानाविधैरुपायैर्दुःखमसातवेदनीयमुत्पादयन्तीति ॥ १८ ॥ तथा—

पाणेहि णं पाव विओजयंति, तं भे पवक्खामि जहातहेणं ।
दंडेहिं तत्था सरयंति बाला, सव्वेहिं दंडेहि पुराकएहिं ॥ १९ ॥
ते हम्ममाणा णरगे पडंति, पुन्ने दुरूवस्स महाभितावे ।
ते तत्थ चिट्ठंति दुरूवभक्खी, तुट्टंति कम्मोवगया किमीहिं ॥ २० ॥

'णमिति' वाक्यालङ्कारे, 'प्राणैः' शरीरेन्द्रियादिभिस्ते 'पापाः'पापकर्मणो नरकपाला 'वियोजयन्ति' शरीरावयवानां पाटनादिभिः प्रकारैर्विकर्तनादवयवान् विश्लेषयन्ति, किमर्थमेवं ते कुर्वन्तीत्याह-'तद्' दुःखकारणं 'भे' युष्माकं 'प्रवक्ष्यामि यथातथ्येन' अवितथं प्रतिपादयामीति, दण्डयन्ति-पीडामुत्पादयन्तीति दण्डा-दुःखविशेषास्तैर्नारकाणामापादितैः 'बाला' निर्विवेका नरकपालाः पूर्वकृतं स्मारयन्ति, तद्यथा—तदा हृष्टस्त्वं खादसि समुत्कृत्योत्कृत्य प्राणिनां मांसं तथा पिबसि तद्रसं मद्यं च गच्छसि परदारान्, साम्प्रतं तद्विपाकापादितेन कर्मणाऽभितप्यमानः किमेवं रारटीषीत्येवं सर्वैः पुराकृतैः 'दण्डैः' दुःखविशेषैः स्मारयन्तस्तादृशभूतमेव दुःखविशेषमुत्पादयन्तो नरकपालाः पीडयन्तीति ॥ १९ ॥ किञ्च—'ते' वराका नारका 'हन्यमानाः' ताड्यमाना नरकपालेभ्यो नष्टा अन्यस्मिन् घोरतरे 'नरके' नरकैकदेशे 'पतन्ति' गच्छन्ति, किम्भूते नरके ?-'पूर्णे' भृते दुष्टं रूपं यस्य तद्दूरूपं—विष्ठासृग्मांसादिकलमलं तस्य भृते तथा 'महाभितापे' अतिसन्तापोपेते 'ते' नारकाः स्वकर्मावबद्धाः 'तत्र' एवम्भूते नरके 'दूरूपभक्षिणः' अशुच्यादिभक्षकाः प्रभूतं कालं यावत्तिष्ठन्ति, तथा 'कृमिभिः' नरकपालापादितैः परस्परकृतैश्च 'स्वकर्मोपगताः' स्वकर्मढौकिताः 'तुद्यन्ते' व्यथ्यन्ते इति । तथा चागमः—"छट्ठीसत्तमासु णं पुढवीसु

---

१ षष्ठसप्तम्योः पृथ्व्योर्नैरयिका अतिमहान्ति रक्तकुन्थुरूपाणि विकुर्व्य अन्योन्यस्य कायं अनुदह्यमानास्तिष्ठन्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेरइया णं महंताइं लोहिकुंभपुरूवाइं विउव्वित्ता अन्नमन्नस्स कायं समतुरंगेमाणा समतुरंगेमाणा अणुघायमाणा अणुघायमाणा चिट्ठंति " ॥ २० ॥ किञ्चान्यत्—

सया कसिणं पुण धम्मठाणं, गाढोवणीयं अतिदुक्खधम्मं ।
अंदूसु पक्खिप्प विहत्तु देहं, वेहेण सीसं सेऽभितावयंति ॥ २१ ॥
छिंदंति बालस्स खुरेण नक्कं, उट्ठेवि छिंदंति दुवेवि कण्णे ।
जिब्भं विणिक्कस्स विहत्थिमित्तं, तिक्खाहिं सूलाहिऽभितावयंति ॥ २२ ॥

'सदा' सर्वकालं 'कृत्स्नं' संपूर्णं पुनः तत्र नरके 'धर्मप्रधानं' उष्णप्रधानं स्थितिः—स्थानं नारकाणां भवति, तत्र हि प्रलयातिरिक्ताग्निना वातादीनामत्यन्तोष्णरूपत्वात्, तच्च दृढैः—निधत्तनिकाचितावस्थैः कर्मभिर्नारकाणाम् 'उपनीतं' ढौकितं, पुनरपि विशिनष्टि—अतीव दुःखम्—असातावेदनीयं धर्मः—स्वभावो यस्य तत्तथा तस्मिंश्चैवंविधे स्थाने स्थितोऽसुमान् 'अन्दुषु' निगडेषु देहं विहत्य प्रक्षिप्य च तथा शिरश्च 'से' तस्य नारकस्य 'वेधेन' रन्ध्रोत्पादनेनाभितापयन्ति कीलकैश्च सर्वाण्यप्यङ्गानि वितत्य चर्मवत् कीलयन्ति इति ॥ २१ ॥ अपिच—ते परमाधार्मिकाः पूर्वदुश्चरितानि स्मारयित्वा 'बालस्य' अज्ञस्य—विवेकस्य प्रा-

सूत्रकृतः २१

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं

॥१३३॥

१ बहू प्र० । २ समवत्तरंगे० प्र० ।

यशः सर्वदा वेदनासमुद्घातोपगतस्य क्षुरप्रेण नासिकां छिन्दन्ति तथौष्ठावपि द्वावपि कर्णौ छिन्दन्ति, तथा मद्यमांसरसाभिलिप्सोर्मृषाभाषिणो जिह्वां वितस्तिमात्रामाक्षिप्य तीक्ष्णाभिः शूलाभिः 'अभितापयन्ति' अपनयन्ति इति ॥ २२ ॥ तथा—

ते तिप्पमाणा तलसंपुडंव, राइंदियं तत्थ थणंति बाला ।
गलंति ते सोणिअपूयमंसं, पज्जोइया खारपइद्धियंगा ॥ २३ ॥
जइ ते सुता लोहितपूअपाई, बालागणी तेअगुणा परेणं ।
कुंभी महंताहियपोरसीया, समूसिता लोहियपूयपुण्णा ॥ २४ ॥

'ते' छिन्ननासिकोष्ठजिह्वाः सन्तः शोणितं 'तिप्यमानाः' क्षरन्तो यत्र—यस्मिन् प्रदेशे रात्रिंदिनं गमयन्ति, तत्र 'बाला' अज्ञाः 'तालसम्पुटा इव' पवनेरितशुष्कतालपत्रसंचया इव सदा 'स्तनन्ति' दीर्घविस्वरमाक्रन्दन्तस्तिष्ठन्ति तथा 'प्रद्योतिना' वह्निना ज्वलिताः तथा क्षारेण प्रदिग्धाङ्गाः शोणितं पूयं मांसं चाहर्निशं गलन्तीति ॥ २३ ॥ किञ्च—पुनरपि सुधर्मस्वामी जम्बूस्वामिनमुद्दिश्य भगवद्वचनमाविष्करोति—यदि 'ते' त्वया 'श्रुता' आकर्णिता—लोहितं—रुधिरं पूयं—रुधिरमेव पक्वं ते द्वे अपि पक्वं शीलं यस्यां सा लोहितपूयपाचिनी—कुम्भी, तामेव विशिनष्टि—'बालः' अभिनवः प्रत्यग्रोऽग्निस्तेन तेजः—अभितापः स एव

५ नरकविभक्त्यध्य. उद्देशः १

॥१३३॥

१ स्तनन्तो प्र० ।

गुणो यस्याः सा बालाग्नितेजोगुणा 'परेण' प्रकर्षेण तप्तेत्यर्थः, पुनरपि तथा एव विशेषणं 'महती' बृहत्तरा 'अहियपोरुसीये'त्ति पुरुषप्रमाणाधिका 'समुच्छ्रिता' ऊर्ध्विकाकृतिरूर्ध्वं व्यवस्थिता लोहितेन पूयेन च पूर्णा, सैवम्भूता कुम्भी समन्ततोऽग्निना प्रज्वलिताऽतीव बीभत्सदर्शनेति ॥ २४ ॥ तासु च यत्क्रियते तद्दर्शयितुमाह—

पक्खिप्प तासुं पयंयंति बाले, अट्टस्सरे ते कलुणं रसंते ।
तण्हाइया ते तउतंबतत्तं, पज्जिज्जमाणाऽट्टतरं रसंति ॥ २५ ॥
अप्पेण अप्पं इह वंचइत्ता, भवाहमे पुव्वसते सहस्से ।
चिट्ठंति तत्था बहुकूरकम्मा, जहा कडं कम्म तहासि भारे ॥ २६ ॥
समज्जिणित्ता कलुसं अणज्जा, इट्ठेहि कंतेहि य विप्पहूणा ।
ते दुब्भिगंधे कसिणे य फासे, कम्मोवगा कुणिमे आवसंति ॥ २७ ॥
त्तिबेमि ॥ इति निरयविभत्तिए पढमो उद्देसो समत्तो ॥ (गाथाग्रं० ३३६)

'तासु' प्रत्यग्राग्निप्रदीप्तासु लोहितपूयशरीरावयवकिल्बिषपूर्णासु दुर्गन्धासु च 'बालान्' नारकांस्त्राणरहितान् आर्तस्वरान् करुणं—दीनं रसतः प्रक्षिप्य प्रपचन्ति, 'ते च' नारकास्तथा कदर्थ्यमाना विरसमाक्रन्दन्तस्तुदार्ताः सलिलं प्रार्थयन्तो मद्यं ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतीव प्रियमासीदित्येवं स्मरयित्वा तप्तं पाय्यन्ते, ते च तप्तं त्रपु पाय्यमाना आर्ततरं 'रसन्ति' रारटन्तीति ॥ २५ ॥ उद्देशकार्थोपसंहारार्थमाह–'अप्पेण' इत्यादि, 'इह' अस्मिन्मनुष्यभवे 'आत्मना' परवञ्चनप्रवृत्तेन स्वत एव परमार्थत आत्मानं वञ्चयित्वा 'अल्पेन' स्तोकेन परोपघातसुखेनात्मानं वञ्चयित्वा बहुशो भवानां मध्ये अधमा भवाधमाः–मत्स्यबन्धलुब्धकादीनां भवास्तान् पूर्वजन्मसु शतसहस्रशः समनुभूय तेषु भवेषु विषयोन्मुखतया सुकृतपराङ्मुखत्वेन चावाप्य महाघोरातिदारुणं नरकावासं 'तत्र' तस्मिन्मनुष्याः 'क्रूरकर्माणः' परस्परतो दुःखमुदीरयन्तः प्रभूतं कालं यावत्तिष्ठन्ति, अत्र कारणमाह—'यथा' पूर्वजन्मसु यादृग्भूतेनाध्यवसायेन जघन्यजघन्यतरादिना कृतानि कर्माणि 'तथा' तेनैव प्रकारेण 'से' तस्य नारकजन्तोः 'भारा' वेदनाः प्रादुर्भवन्ति स्वतः परत उभयतो वेति, तथाहि—मांसादाः स्वमांसान्येवाग्निना प्रताप्य भक्ष्यन्ते, तथा मांसरसपायिनो निजपूयरुधिराणि तप्तत्रपूणि च पाय्यन्ते, तथा मत्स्यघातकलुब्धकादयस्तथैव छिद्यन्ते भिद्यन्ते यावन्मार्यन्त इति, तथाऽनृतभाषिणां तत्स्मारयित्वा जिह्वाश्चेच्छिद्यन्ते, (ग्रन्थाग्रम् ४०००) तथा पूर्वजन्मनि परकीयद्रव्यापहारिणामङ्गोपाङ्गान्यपहियन्ते तथा पारदारिकाणां वृषणच्छेदः शाल्मल्युपगूहनादि च ते कार्यन्ते एवं महापरिग्रहारम्भवतां क्रोधमानमायालोभिनां च जन्मांतरस्वकृतक्रोधादिदुष्कृतस्मारणेन तादृग्विधमेव दुःखमुत्पाद्यते, इतिकृत्वा सुष्ठूच्यते यथा वृत्तं कर्म तादृग्भूत एव तेषां तत्कर्मविपाकापादितो भार इति ॥ २६ ॥ किञ्चान्यत्—अनार्या अनार्यकर्मकारित्वाद्धिंसानृतस्तेयादिभिराश्रवद्वारैः 'कलुषं' पापं 'समर्ज्य' अशुभकर्मोपचयं कृत्वा 'ते' क्रूरकर्माणो 'दुरभिगन्धे' नरके आवसन्तीति संटङ्कः, किम्भूताः?–'इष्टैः' शब्दादिभिर्विषयैः 'कममीयैः' कान्तैर्विविधं प्रकर्षेण हीना विप्रमुक्ता नरके वसन्ति, यदिवा—यदर्थं कलुषं समर्जयन्ति तैर्मनोज्ञशब्दरूपादिभिः कान्तैश्च विषयैर्विप्रमुक्ता एकाकिनस्ते 'दुरभिगन्धे' कुथितकलेवरातिशायिनि नरके 'कृत्स्ने' संपूर्णेऽत्यन्ताशुभस्पर्शे एकान्तोद्वेजनीयेऽशुभकर्मोपगताः 'कुणिमे'त्ति मांसपेशीरुधिरपूयाभ्रफिप्फिसकल्मलाकुले सर्वामेध्याधमे बीभत्सदर्शने हाहारवाक्रन्देन कष्टं मा तावदित्यादिशब्दबधिरितदिगन्तराले परमाधमे नरकावासे आ—समन्तादुत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमाणि यावद्यां वा नरकपृथिव्यां यावदायुस्तावद् 'वसन्ति' तिष्ठन्ति, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ २७ ॥ इति नरकविभक्तेः प्रथमोद्देशकः समाप्तः ॥

अथ पञ्चमाध्ययनस्य द्वितीयोद्देशकः प्रारभ्यते ॥

उक्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः समारभ्यते—अस्य चायमभिसम्बन्धः, इहानन्तरोद्देशके यैः कर्मभिर्जन्तवो नरकेषूत्पद्यन्ते यादृगवस्थाश्च भवन्त्येतत्प्रतिपादितम्, इहापि विशिष्टतरं तदेव प्रतिपाद्यते, इत्यनेन संबन्धेनायातस्यास्योद्देशकस्य सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

अहावरं सासयदुक्खधम्मं, तं भे पवक्खामि जहातहेणं ।
बाला जहा दुक्कडकम्मकारी, वेदंति कम्माइं पुरेकडाइं ॥ १ ॥
हत्थेहि पाएहि य बंधिऊणं, उदरं विकत्तंति खुरासिएहिं ।
गिण्हित्तु बालस्स विहत्तु देहं, वद्धं थिरं पिट्ठतो उद्धरंति ॥ २ ॥

'अथ' इत्यानन्तर्ये 'अपरम्' इत्युक्तादन्यद्वक्ष्यामीत्युत्तरेण सम्बन्धः, शश्वद्भवतीति शाश्वतं–यावदायुस्तच्च तद्दुःखं च शाश्वतदुःखं तद्धर्मः—स्वभावो यस्मिन् यस्य वा नरकस्य स तथा तम्, एवम्भूतं नित्यदुःखस्वभावमक्षिनिमेषमपि कालमविद्यमानसुखलेशं 'याथातथ्येन' यथा व्यवस्थितं तथैव कथयामि, नात्रोपचारोऽर्थवादो वा विद्यत इत्यर्थः, 'बालाः' परमार्थमजानाना विषयसुखलिप्सवः साम्प्रतेक्षिणः कर्मविपाकमनपेक्षमाणा 'यथा' येन प्रकारेण दुष्टं कृतं दुष्कृतं तदेव कर्म–अनुष्ठानं तेन वा दुष्कृतेन कर्म–ज्ञानावरणादिकं तद्दुष्कृतकर्म तत्कर्तुं शीलं येषां ते दुष्कृतकर्मकारिणः त एवम्भूताः 'पुराकृतानि' जन्मान्तरार्जितानि कर्माणि यथा वेदयन्ति तथा कथयिष्यामीति ॥ १ ॥ यथाप्रतिज्ञातमाह–परमाधार्मिकास्तथाविधकर्मोदयात् क्रीडायमानाः तान्नारकान् हस्तेषु पादेषु बद्ध्वोदरं 'क्षुरप्रासिभिः' नानाविधैरायुधविशेषैः 'विकर्तयन्ति' विदारयन्ति, तथा परस्य बालस्येवाकिञ्चित्करत्वाद्बालस्य लकुटादिभिर्विविधं 'हतं' पीडितं देहं गृहीत्वा 'चर्म्म' चर्मशकलं 'स्थिरं' बलवत् 'पृष्ठतः' पृष्ठिदेशे 'उद्धरन्ति' विकर्तयन्त्येवमग्रतः पार्श्वतश्चेति ॥ २ ॥ अपि च—

बाहू पकत्तंति य मूलतो से, थूलं वियासं मुहे आडहंति ।

१ पकप्पंति समू० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रहंसि जुत्तं सरयंति बालं, आरुस्स विज्झंति तुदेण पिट्ठे ॥ ३ ॥
अयंव तत्तं जलियं सजोइ, तऊवमं भूमिमणुक्कमंता ।
ते डज्झमाणा कलुणं थणंति, उसुचोइया तत्तजुगेसु जुत्ता ॥ ४ ॥

'से' तस्य नारकस्य तिसृषु नरकपृथिवीषु परमाधार्मिका अपरनारकाश्च अधस्तनचतसृषु चापरनारका एव मूलत आरभ्य बाहून् 'प्रकर्तयन्ति' छिन्दन्ति तथा 'मुखे' विकाशं कृत्वा 'स्थूलं' बृहत्तप्तायोगोलादिकं प्रक्षिपन्त आ—समन्ताद्हन्ति । तथा 'रहसि' एकाकिनं 'युक्तम्' उपपन्नं युक्तियुक्तं स्वकृतवेदनानुरूपं तत्कृतजन्मान्तरानुष्ठानं तं 'बालम्' अज्ञं नारकं स्मारयन्ति, तद्यथा—तप्ततैलपानावसरे मद्यपस्त्वमासीस्तथा स्वमांसभक्षणावसरे पिशिताशी त्वमासीरित्येवं दुःखानुरूपमनुष्ठानं स्मारयन्तः कदर्थयन्ति, तथा—निष्कारणमेव 'आरुष्य' कोपं कृत्वा प्रतोदादिना पृष्ठदेशे तं नारकं परवशं विध्यन्तीति ॥ ३ ॥ तथा—तप्तायोगोलकसन्निभां ज्वलितज्योतिर्भूतां तदेवंरूपां तदुपमां वा भूमिम् 'अनुक्रामन्तः' तां ज्वलितां भूमिं गच्छन्तस्ते दह्यमानाः 'करुणं' दीनं—विस्वरं 'स्तनंति' रारटन्ति तथा तप्तेषु युगेषु युक्ता गलिबलीवर्दा इव इषुणा प्रतोदादिरूपेण विध्यमानाः स्तनन्तीति ॥ ४ ॥ अन्यच्च—

बाला बला भूमिमणुक्कमंता, पविज्जलं लोहपहं च तत्तं ।
जंसीऽभिदुग्गंसि पवज्जमाणा, पेसेव दंडेहिं पुराकरंति ॥ ५ ॥
ते संपगाढंसि पवज्जमाणा, सिलाहि हम्मंति निपातिणीहिं ।
संतावणी नाम चिरट्ठितीया, संतप्पती जत्थ असाहुकम्मा ॥ ६ ॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तिर्युतं ॥१३६॥

५ नरकविभक्त्यध्य. उद्देशः २

'बाला' निर्विवेकिनः प्रज्वलितलोहपथमिव तप्तां भुवं 'पविज्जलं'ति रुधिरपूयादिना पिच्छिलां बलादनिच्छन्तः 'अनुक्रम्यमाणाः' प्रेर्यमाणा विरसमारसन्ति, तथा 'यस्मिन्' अभिदुर्गे कुम्भीशाल्मल्यादौ प्रपद्यमाना नरकपालचोदिता न सम्यगच्छन्ति, ततस्ते कुपिताः परमाधार्मिकाः 'प्रेष्यानिव' कर्मकरानिव बलीवर्दवद्वा दण्डैर्हेला प्रतोदनेन प्रतुद्य 'पुरतः' अग्रतः कुर्वन्ति, न ते स्वेच्छया गन्तुं स्थातुं वा लभन्त इति ॥ ५ ॥ किञ्च—'ते' नारकाः 'सम्प्रगाढं' मिति बहुवेदनमसह्यं नरकं मार्गं वा प्रपद्यमाना गन्तुं स्थातुं वा तत्राशक्नुवन्तोऽभिमुखपातिनीभिः शिलाभिरसुरैर्हन्यन्ते, तथा सन्तापयतीति सन्तापनी—कुम्भी सा च चिरस्थितिका तद्गतोऽसुमान् प्रभूतं कालं यावदतिवेदनाग्रस्त आस्ते यत्र च 'सन्तप्यते' पीड्यतेऽत्यर्थम् 'असाधुकर्मा' जन्मान्तरकृताशुभानुष्ठान इति ॥ ६ ॥ तथा—

॥१३६॥

कंदूसु पक्खिप्प पयंति बालं, ततोवि दड्ढा पुण उप्पयंति ।
ते उड्ढकाएहिं पखज्जमाणा, अवरेहिं खज्जंति सणप्फएहिं ॥ ७ ॥
समूसियं नाम विधूमठाणं, जं सोयतत्ता कलुणं थणंति ।
अहोसिरं कट्टु विगत्तिऊणं, अयंव सत्थेहिं समोसवेंति ॥ ८ ॥

तं 'बालं' वराकं नारकं कन्दुषु प्रक्षिप्य नरकपालाः पचन्ति, ततः पाकस्थानात् ते दह्यमानाश्चणका इव भृज्यमाना ऊर्ध्वं पतन्त्युत्पतन्ति, ते च ऊर्ध्वमुत्पतिताः 'उड्ढकाएहिं'ति द्रोणैः काकैर्वैक्रियैः 'प्रखाद्यमाना' भक्ष्यमाणा अन्यतो नष्टाः सन्तोऽपरैः 'सणप्फएहिं'ति सिंहव्याघ्रादिभिः 'खाद्यन्ते' भक्ष्यन्ते इति ॥ ७ ॥ किञ्च—सम्यगुच्छ्रितं—चितिकाकृति, नामशब्दः सम्भावनायां, सम्भाव्यन्ते एवंविधानि नरकेषु यातनास्थानानि, विधूमस्य—अग्नेः स्थानं विधूमस्थानं यत्प्राप्य शोकवितप्ताः 'करुणं' दीनं 'स्तनन्ति' आक्रन्दन्तीति, तथा अधःशिरः कृत्वा देहं च विकर्त्तयोवत् 'शस्त्रैः' तच्छेदनादिभिः 'समोसवेंति'त्ति खण्डशः खण्डयन्ति ॥ ८ ॥ अपि च—

समूसिया तत्थ विसूणियंगा, पक्खीहिं खज्जंति अओमुहेहिं ।
संजीवणी नाम चिरट्ठितीया, जंसी पया हम्मइ पावचेया ॥ ९ ॥
तिक्खाहिं सूलाहि निवाययंति, वसोगयं सावययं व लद्धं ।

१ भिताक्षयंति प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते सूलविद्धा कलुणं थणंति, एगंतदुक्खं दुहओ गिलाणा ॥ १० ॥

'तत्र' नरके स्तम्भादौ ऊर्ध्वबाहवोऽधःशिरसो वा श्वपाकैर्बस्तवल्लम्बिताः सन्तः 'विसूणियंग'त्ति उत्कृत्ताङ्गा अपगतत्वचः पक्षिभिः 'अयोमुखैः' वज्रचञ्चुभिः काकगृध्रादिभिर्भक्ष्यन्ते, तदेवं ते नारका नरकपालापादितैः परस्परकृतैः स्वाभाविकैर्वा छिन्ना भिन्नाः कथिता मूर्च्छिन्नाः सन्तो वेदनासमुद्घातगता अपि सन्तो न म्रियन्ते अतो व्यपदिश्यते सञ्जीवनीवत् सञ्जीवनी-जीवितदात्री नरकभूमिः, न तत्र गतः खण्डशश्छिन्नोऽपि म्रियते स्वायुषि सतीति, सा च चिरस्थितिकोत्कृष्टतस्त्रयस्त्रिंशत् याव-त्सागरोपमाणि, यस्यां च प्राप्ताः प्रजायन्त इति प्रजाः—प्राणिनः पापचेतसो हन्यन्ते मुद्गरादिभिः, नरकानुभावाच्च मुमूर्षवोऽ-प्यत्यन्तपिष्टा अपि न म्रियन्ते, अपितु पारदवन्मिलन्तीति ॥ ९ ॥ अपिच—पूर्वदुष्कृतकारिणं तीक्ष्णाभिरयोमयीभिः शूलाभिः नरकपाला [1]नारकमतिपातयन्ति, किमिव ?—वशमुपगतं श्वापदमिव कालपृष्ठसूकरादिकं [2]स्वातन्त्र्येण लब्ध्वा कदर्थयन्ति, ते नार-काः शूलादिभिर्विद्धा अपि न म्रियन्ते, केवलं 'करुणं' दीनं स्तनन्ति, न च तेषां कश्चित्राणायालं तथैकान्तेन 'उभयतः' अन्त-र्बहिश्च 'ग्लाना' अपगतप्रमोदाः सदा दुःखमनुभवन्तीति ॥ १० ॥ तथा—

सया जलं नाम निहं महंतं, जंसी जलंतो अगणी अकट्ठो ।
चिट्ठंति बद्धा बहुकूरकम्मा, अरहस्सरा केइ चिरट्ठितीया ॥ ११ ॥

१ ०मभितापयन्ति प्र० । २ कालपृष्ठो मृगभेदे (हैमः) ।

चिया महंतीउ समारभित्ता, छुब्भंति ते तं कलुणं रसंतं ।
आवट्टती तत्थ असाहुकम्मा, सप्पी जहा पडियं जोइमज्झे ॥ १२ ॥

'सदा' सर्वकालं 'ज्वलत्' देदीप्यमानमुष्णरूपत्वात् स्थानमस्ति, निहन्यन्ते प्राणिनः कर्मवशगा यस्मिन् तन्निहम्—आघात-स्थानं तच्च 'महद्' विस्तीर्णं यत्राकाष्ठोऽग्निर्ज्वलन्नास्ते, तत्रैवम्भूते स्थाने भवान्तरे बहुक्रूरकृतकर्माणस्तद्विपाकापादितेन पापेन बद्धास्तिष्ठन्तीति, किम्भूताः ?—'अरहस्वरा' बृहदाक्रन्दशब्दाः 'चिरस्थितिकाः' प्रभूतकालस्थितय इति ॥ ११ ॥ तथा—महं-तीश्चिताः समारभ्य नरकपालाः 'तं' नारकं विरसं 'करुणं' दीनमारसन्तं तत्र क्षिपन्ति, स चासाधुकर्मा 'तत्र' तस्यां चितायां गतः सन् 'आवर्तते' विलीयते, यथा-'सर्पिः' घृतं ज्योतिर्मध्ये पतितं द्रवीभवत्येवमसावपि विलीयते, न च तथापि भवानु-भावात्प्राणैर्वियुज्यते ॥ १२ ॥ अयमपरो नरकयातनाप्रकार इत्याह—

सदा कसिणं पुण घम्मठाणं, गाढोवणीयं अइदुक्खधम्मं ।
हत्थेहिं पाएहि य बंधिऊणं, सत्तुव्व डंडेहिं समारभंति ॥ १३ ॥
भंजंति बालस्स वहेण पुट्ठी, सीसंपि भिंदंति अओघणेहिं ।
ते भिन्नदेहा फलगंव तच्छा, तत्ताहिं आराहिं णियोजयंति ॥ १४ ॥

'सदा' सर्वकालं 'कृत्स्नं' सम्पूर्णं पुनरपरं 'घर्मस्थानं' उष्णस्थानं दृढैर्निबद्धनिकाचितावस्थैः कर्मभिः 'उपनीतं' ढौकि-तमतीव दुःखरूपो धर्मः-स्वभावो यस्मिंस्तदतिदुःखधर्मं तदेवम्भूते यातनास्थाने तमत्राणं नारकं हस्तेषु पादेषु च बद्धा तत्र प्रक्षि-पन्ति, तथा तदवस्थमेव शत्रुमिव दण्डैः 'समारभन्ते' ताडयन्ति इति ॥ १३ ॥ किञ्च—'बालस्य' वराकस्य नारकस्य व्यथ-यतीति व्यथो-लकुटादिप्रहारस्तेन पृष्ठं 'भञ्जयन्ति' मोटयन्ति, तथा शिरोऽप्ययोमयेन घनेन 'भिन्दन्ति' चूर्णयन्ति, अपिश-ब्दादन्यान्यप्यङ्गोपाङ्गानि हुषणपातैश्चूर्णयन्ति 'ते' नारका 'भिन्नदेहाः' चूर्णिताङ्गोपाङ्गाः फलकमिवोभाभ्यां पार्श्वाभ्यां क्रक-चादिना 'अवतष्टाः' तनूकृताः सन्तस्तप्ताभिरारामिः प्रतुद्यमानास्तत्रपुपानादिके कर्मणि 'विनियोज्यन्ते' व्यापार्यन्त इति ॥ १४ ॥ किञ्च—

अभिजुंजिया रुद्द असाहुकम्मा, उसुचोइया हत्थिवहं वहंति ।
एगं दुरूहित्तु दुवे ततो वा, आरुस्स विज्झंति ककाणओ सें ॥ १५ ॥
बाला बला भूमिमणुक्कमंता, पविज्जलं कंटइलं महंतं ।
विवज्जतप्पेहिं विवण्णचित्ते, समीरिया कोट्टबलिं करिंति ॥ १६ ॥

१ ०पातै० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रौद्रकर्मण्यपरनारकहननादिके 'अभियुज्य' व्यापार्य यदिवा—जन्मान्तरकृतं 'रौद्रं' सत्त्वोपघातकार्यम् 'अभियुज्य' स्मारयित्वा असाधूनि- अशोभनानि जन्मान्तरकृतानि कर्माणि-अनुष्ठानानि येषां ते तथा तान् 'इषुचोदितान्' शराभिघातप्रेरितान् हस्तिवाहं वाहयन्ति नरकपालाः, यथा हस्ती वाह्यते समारुह्य एवं तमपि वाहयन्ति, यदिवा—यथा हस्ती महान्तं भारं वहत्येवं तमपि नारकं वाहयन्ति, उपलक्षणार्थत्वादस्योष्ट्रवाहं वाहयन्तीत्याद्यप्यायोज्यं, कथं वाहयन्तीति दर्शयति—तस्य नारकस्योपर्येकं द्वौ त्रीन् वा 'समारुह्य' समारोप्य ततस्तं वाहयन्ति, अतिभारारोपणेनावहन्तम् 'आरुष्य' क्रोधं कृत्वा प्रतोदादिना 'विध्यन्ति' तुदन्ति, 'से' तस्य नारकस्य 'ककाणओ'त्ति मर्माणि[1] विध्यन्तीत्यर्थः ॥ १५ ॥ अपिच—बाला इव बालाः परतन्त्राः, पिच्छिलां रुधिरादिना तथा कण्टकाकुलां भूमिमनुक्रामन्तो मन्दगतयो बलात्प्रेर्यन्ते, तथा अन्यान् 'विषण्णचित्तान्' मूर्च्छितांस्तर्षकाकारान् 'विविधम्' अनेकधा बद्ध्वा ते नरकपालाः 'समीरिताः' पापेन कर्मणा चोदितास्तान्नारकान् 'कुट्टयित्वा' खण्डशः कृत्वा 'बलिं करिंति'त्ति नगरबलिवदितश्चेतश्च क्षिपन्तीत्यर्थः, यदिवा कोट्टबलिं कुर्वन्तीति[2] ॥ १६ ॥ किञ्च—

वेतालिए नाम महाभितावे, एगायते पव्वयमंतलिक्खे ।
हम्मंति तत्था बहुकूरकम्मा, परं सहस्साण मुहुत्तगाणं ॥ १७ ॥
संवाहिया दुक्कडिणो थणंति, अहो य राओ परितप्पमाणा ।

१ मर्मणि प्र० । २ बलिं कुर्वंति इतश्चेतश्च क्षिपंतीत्यर्थः, यदिवा कोट्टबलिं कुर्वंतीति, कुर्वंति नगरबलिं-प्र० ।

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥१३९॥

एगंतकूडे नरए महंते, कूडेण तत्था विसमे हता उ ॥ १८ ॥

५ नरकविभक्त्यध्य. उद्देशः २

नामशब्दः सम्भावनायां, सम्भाव्यते एतन्नरकेषु यथाऽन्तरिक्षे 'महाभितापे' महादुःखैककार्ये एकशिलाघटितो दीर्घः 'वेयालिए'त्ति वैक्रियः परमाधार्मिकनिष्पादितः पर्वतः तत्र तमोरूपत्वान्नरकाणामतो हस्तस्पर्शिकया समारुहन्तो नारका 'हन्यन्ते' पीड्यन्ते, बहूनि क्रूराणि जन्मान्तरोपात्तानि कर्माणि येषां ते तथा, सहस्रसंख्यानां मुहूर्तानां परं-प्रकृष्टं कालं, सहस्रशब्दस्योपलक्षणार्थत्वात्प्रभूतं कालं हन्यन्त इतियावत् ॥१७॥ तथा सम्-एकीभावेन बाधिताः पीडिता दुष्कृतं-पापं विद्यते येषां ते दुष्कृतिनो महापापाः 'अहो' अहनि तथा रात्रौ च 'परितप्यमाना' अतिदुःखेन पीड्यमानाः सन्तः करुणं-दीनं 'स्तनन्ति' आक्रन्दन्ति, तथैकान्तेन 'कूटानि' दुःखोत्पत्तिस्थानानि यस्मिन् स तथा तस्मिन् एवम्भूते नरके 'महति' विस्तीर्णे पतिताः प्राणिनः तेन च कूटेन गलयन्त्रपाशादिना पाषाणसमूहलक्षणेन वा 'तत्र' तस्मिन्विषमे हताः तुशब्दस्यावधारणार्थत्वात् स्तनन्त्येव केवलमिति ॥१८॥ अपिच—

भंजंति णं पुव्वमरी सरोसं, समुग्गरे ते मुसले गहेतुं ।
ते भिन्नदेहा रुहिरं वमंता, ओमुद्धगा धरणितले पडंति ॥ १९ ॥
अणासिया नाम महासियाला, पागब्भिणो तत्थ सयायकोवा ।
खज्जंति तत्था बहुकूरकम्मा, अदूरगा संकलियाहि बद्धा ॥ २० ॥

॥१३९॥

'णम्' इति वाक्यालङ्कारे पूर्वमस्य इवारयो जन्मान्तरवैरिण इव परमाधार्मिका यदिवा—जन्मान्तरापकारिणो नारका अपरेषामङ्गानि 'सरोषं' सकोपं समुद्गराणि मुसलानि गृहीत्वा 'भञ्जन्ति' गाढप्रहारैरामर्दयन्ति, ते च नारकास्त्राणरहिताः शस्त्रप्रहारैर्भिन्नदेहा रुधिरमुद्वमन्तोऽधोमुखा धरणितले पतन्तीति ॥ १९ ॥ किञ्च—महादेहप्रमाणा महान्तः शृगाला नरकपालविकुर्विता 'अनशिता' बुभुक्षिताः, नामशब्दः सम्भावनायां, सम्भाव्यत एतन्नरकेषु, 'अतिप्रगल्भिता' अतिधृष्टा रौद्ररूपा निर्भयाः 'तत्र' तेषु नरकेषु सम्भवन्ति 'सदाचकोपा' नित्यकुपिताः तैरेवम्भूतैः शृगालादिभिस्तत्र व्यवस्थिता जन्मान्तरकृतबहुक्रूरकर्माणः शृङ्खलादिभिर्बद्धा अयोमयनिगडनिगडिता 'अदूरगाः' परस्परसमीपवर्तिनो 'भक्ष्यन्ते' खण्डशः खाद्यन्त इति ॥ ॥ २० ॥ अपिच—

सयाजला नाम नदी भिदुग्गा, पविज्जलं लोहविलीणतत्ता ।
जंसी भिदुग्गंसि पवज्जमाणा, एगायऽताणुक्कमणं करेंति ॥ २१ ॥
एयाइं फासाइं फुसंति बालं, निरंतरं तत्थ चिरट्ठितीयं ।
ण हम्ममाणस्स उ होइ ताणं, एगो सयं पच्चणुहोइ दुक्खं ॥ २२ ॥

१ त्रोटयन्ते प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सदा-सर्वकालं जलम्-उदकं यस्यां सा तथा सदाजलाभिधाना वा 'नदी' सरित् 'अभिदुर्गा' अतिविषमा प्रकर्षेण विविधमत्युष्णं क्षारपूयरुधिराविलं जलं यस्यां सा प्रविजला यदिवा 'पविज्जले'ति रुधिराविलत्वात् पिच्छिला, विस्तीर्णगम्भीरजला वा अथवा प्रदीप्तजला वा, एतदेव दर्शयति—अग्निना तप्तं सत् 'विलीनं' द्रवतां गतं यल्लोहम्-अयस्तद्वत्तप्ता, अतितापविलीनलोहसदृशजलेत्यर्थः, यस्यां च सदाजलायां अभिदुर्गायां नद्यां प्रपद्यमाना नारकाः 'एगाय'त्ति एकाकिनोऽत्राणा 'अनुक्रमणं' तस्यां गमनं प्लवनं कुर्वन्तीति ॥ २१ ॥ साम्प्रतमुद्देशकार्थमुपसंहरन् पुनरपि नारकाणां दुःखविशेषं दर्शयितुमाह—'एते' अनन्तरोद्देशकद्वयाभिहिताः 'स्पर्शाः' दुःखविशेषाः परमाधार्मिकजनिताः परस्परापादिताः स्वाभाविका वेति अतिकटवो रूपरसगंधस्पर्शशब्दाः अत्यंतदुःसहा बालमिव 'बालम्' अशरणं 'स्पृशन्ति' दुःखयन्ति 'निरन्तरम्' अविश्रामं 'अच्छिनिमीलय'मित्यादिपूर्ववत् 'तत्र' तेषु नरकेषु चिरं-प्रभूतं कालं स्थितिर्यस्य बालस्यासौ चिरस्थितिकस्तं, तथाहि—रत्नप्रभायामुत्कृष्टा स्थितिः साग पं, तथा द्वितीयायां शर्करप्रभायां त्रीणि, तथा वालुकायां सप्त, पङ्कायां दश, धूमप्रभायां सप्तदश तमःप्रभायां द्वाविंशतिर्महातमःप्रभायां सप्तमपृथिव्यां त्रयस्त्रिंशत्सागरोपमाणि उत्कृष्टा स्थितिरिति, तत्र च गतस्य कर्मवशापादितोत्कृष्टस्थितिकस्य परैरन्यमानस्य स्वकृतकर्मफलभुजो न किञ्चित्राणं भवति, तथाहि-किल सीतेन्द्रेण लक्ष्मणस्य नरकदुःखमनुभवतस्तत्राणो घतेनापि न त्राणं कृतमिति श्रुतिः, तदेवमेकः-असहायो यदर्थं तत्पापं समर्जितं तै रहितस्तत्कर्मविपाकजं दुःखमनुभवति, न कश्चिद्दुःखसंविभागं गृह्णातीत्यर्थः, तथा चोक्तम्—"मया परिजनस्यार्थे, कृतं कर्म सुदारुणम्। एकाकी तेन दग्धोऽहं, गतास्ते फलभोगिनः॥ १ ॥" इत्यादि ॥ २२ ॥ किञ्चान्यत्—

जं जारिसं पुव्वमकासि कम्मं, तमेव आगच्छति संपराए।
एगंतदुक्खं भवमज्जणित्ता, वेदंति दुक्खी तमणंतदुक्खं ॥ २३ ॥
एताणि सोच्चा णरगाणि धीरे, न हिंसए किंचण सव्वलोए।
एगंतदिट्ठी अपरिग्गहे उ, बुज्झिज्ज लोयस्स वसं न गच्छे ॥ २४ ॥
एवं तिरिक्खे मणुयासु (म)रेसुं, चतुरन्तऽणंतं तयणुविवागं।
स सव्वमेयं इति वेदइत्ता, कंखेज्ज कालं धुयमायरेज्ज ॥ २५ ॥
त्तिबेमि। इति श्रीनरयविभत्तीनाम पंचमाध्ययनं समत्तं ॥ (गाथाग्रं० ३६१)

'यत्' कर्म 'यादृशं' यदनुभावं यादृक्स्थितिकं वा कर्म 'पूर्वं' जन्मान्तरे 'अकार्षीत्' कृतवांस्तत्तादृगेव जघन्यमध्यमोत्कृष्टस्थित्यनुभावभेदं 'सम्पराये' संसारे तथा-तेनैव प्रकारेणानुगच्छति, एतदुक्तं भवति—तीव्रमन्दमध्यमैर्बन्धाध्यवसायस्थानैर्यादृशैर्यद्धद्धं तत्तादृगेव तीव्रमन्दमध्यमेव विपाकम्-उदयमागच्छतीति, एकान्तेन-अवश्यं सुखलेशरहितं दुःखमेव यस्मिन्नरकादिके भवे स तथा तमेकान्तदुःखं 'भवमर्जयित्वा' नरकभवोपादानभूतानि कर्माण्युपादायैकान्तदुःखिनस्तत्-पूर्वनिर्दिष्टं दुःखम्-असातवेदनीयरूपमनन्तम्-अनन्योपशमनीयमप्रतिकारं 'वेदयन्ति' अनुभवन्तीति ॥ २३ ॥ पुनरप्युपसंहारव्याजेनोपदेशमाह—'एतान्'

पूर्वोक्तान्नरकान् तास्थ्यात्तद्व्यपदेश इतिकृत्वा नरकदुःखविशेषान् 'श्रुत्वा' निशम्य धीः-बुद्धिस्तया राजत इति धीरो-बुद्धिमान् प्राज्ञः, एतत्कुर्यादिति दर्शयति—सर्वस्मिन्नपि-त्रसस्थावरभेदभिन्ने 'लोके' प्राणिगणे न कमपि प्राणिनं 'हिंस्यात्' न व्यापादयेत्, तथैकान्तेन निश्चला जीवादितत्त्वेषु दृष्टिः-सम्यग्दर्शनं यस्य स एकान्तदृष्टिः निष्प्रकम्पसम्यक्त्व इत्यर्थः, तथा न विद्यते परि-समन्तात्सुखार्थं गृह्यत इति परिग्रहो यस्यासौ अपरिग्रहः, तुशब्दादाद्यन्तोपादानाद्वा मृषावादादत्तादानमैथुनवर्जनमपि द्रष्टव्यं, तथा 'लोकम्' अशुभकर्मकारिणं तद्विपाकफलभुजं वा यदिवा-कषायलोकं तत्स्वरूपतो 'बुध्येत' जानीयात्, न तु तस्य लोकस्य वशं गच्छेदिति ॥२४॥ एतदनन्तरोक्तं दुःखविशेषमन्यत्राप्यतिदिशन्नाह—'एवम्' इत्यादि, एवमशुभकर्मकारिणामसुमतां तिर्यङ्मनुष्यामरेष्वपि 'चतुरन्तं' चतुर्गतिकम् 'अनन्तम्' अपर्यवसानं तदनुरूपं विपाकं 'स' बुद्धिमान् सर्वमेतदिति पूर्वोक्तया नीत्या 'विदित्वा' ज्ञात्वा 'ध्रुवं' संयममाचरन् 'कालं' मृत्युकालमाकांक्षेत्, एतदुक्तं भवति—चतुर्गतिकसंसारान्तर्गतानामसुमतां दुःखमेव केवलं यतोऽतो ध्रुवो-मोक्षः संयमो वा तदनुष्ठानरतो यावज्जीवं मृत्युकालं प्रतीक्षेतेति, इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ २५ ॥ नरकविभक्त्यध्ययनं पञ्चमं परिसमाप्तमिति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ श्रीवीरस्तुत्याख्यं षष्ठमध्ययनं प्रारभ्यते ॥

उक्तं पञ्चममध्ययनं, साम्प्रतं षष्ठमारभ्यते, अस्य चायमभिसम्बन्धः—अत्रानन्तराध्ययने नरकविभक्तिः प्रतिपादिता, सा च श्रीमन्महावीरवर्धमानस्वामिनाऽभिहितेत्यतस्तस्यैवानेन गुणकीर्तनद्वारेण चरितं प्रतिपाद्यते शास्तुर्गुरुत्वेन शास्त्रस्य गरीयस्त्वमितिकृत्वा, इत्यनेन सम्बन्धेनाऽऽयातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारो महावीरगुणगणोत्कीर्तनरूपः । निक्षेपस्तु द्विधा—ओघनिष्पन्नो नामनिष्पन्नश्च, तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने तु महावीरस्तवः, तत्र महच्छब्दस्य वीर इत्येतस्य च स्तवस्य च प्रत्येकं निक्षेपो विधेयः, तत्रापि 'यथोद्देशस्तथा निर्देश' इतिकृत्वा पूर्वं महच्छब्दो निरूप्यते, तत्रास्त्ययं महच्छब्दो बहुत्वे, यथा—महाजन इति, अस्ति बृहत्त्वे, यथा—महाघोषः, अस्त्यत्यर्थे, यथा—महाभयमिति, अस्ति प्राधान्ये, यथा महापुरुष इति, तत्रेह प्राधान्ये वर्तमानो गृहीत इत्येतन्निर्युक्तिकारो दर्शयितुमाह—

पाहन्ने महसद्दो दव्वे खेत्ते य कालभावे य । वीरस्स उ णिक्खेवो चउक्कओ होइ णायव्वो ॥ ८३ ॥

तत्र महावीरस्तव इत्यत्र यो महच्छब्दः स प्राधान्ये वर्तमानो गृहीतः, तच्च नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् षोढा प्राधान्यं, नामस्थापने क्षुण्णे, द्रव्यप्राधान्यं ज्ञशरीरभव्यशरीरव्यतिरिक्तं सचित्ताचित्तमिश्रभेदात् त्रिधा, सचित्तमपि द्विपदचतुष्पदा-

१ पर्यायलक्षणत्वेतत्स्वसमयवाभिधानं यथा भाषाभिधानं वाक्यशुद्धौ वाक्यनिक्षेपे ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तिपुतं ॥१४२॥

६ श्रीमहावीरस्तुत्य.

पदभेदात् त्रिधैव, तत्र द्विपदेषु तीर्थंकरचक्रवर्त्यादिकं चतुष्पदेषु हस्त्यश्वादिकमपदेषु प्रधानं कल्पवृक्षादिकं, यदिवा—इहैव ये प्रत्यक्षा रूपरसगन्धस्पर्शैरुत्कृष्टाः पौण्डरीकादयः पदार्थाः अचित्तेषु वैडूर्यादयो नानाप्रभावा मणयो मिश्रेषु तीर्थंकरो विभूषित इति, क्षेत्रतः प्रधाना सिद्धिर्धर्मचरणाश्रयणान्महाविदेहं चोपभोगाङ्गीकरणेन तु देवकुर्वादिकं क्षेत्रं, कालतः प्रधानं त्रैकान्तसुषमादि, यो वा कालविशेषो धर्मचरणप्रतिपत्तियोग्य इति, भावप्रधानं तु क्षायिको भावः तीर्थंकरशरीरापेक्षयौदयिको वा, तत्रेह द्वयेनाप्यधिकार इति । वीरस्य द्रव्यक्षेत्रकालभावभेदाच्चतुर्धा निक्षेपः, तत्र ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यवीरो द्रव्यार्थे सङ्ग्रामादावद्भुतकर्मकारितया शूरो यदिवा—यत्किञ्चित् वीर्यवद् द्रव्यं तत् द्रव्यवीरे अन्तर्भवति, तद्यथा—तीर्थकृदनन्तबलवीर्यो लोकमलोके कन्दुकवत् प्रक्षेप्तुमलं तथा मन्दरं दण्डं कृत्वा रत्नप्रभां पृथिवीं छत्रवद्बिभृयात्, तथा चक्रवर्तिनोऽपि बलं 'दोसोला बत्तीसा', इत्यादि, तथा विष्णादीनां मोहनादिसामर्थ्यमिति, क्षेत्रवीरस्तु यो यस्मिन् क्षेत्रेऽद्भुतकर्मकारी वीरो वा यत्र व्यावर्ण्यते, एवं कालेऽप्यायोज्यं, भाववीरो यस्य क्रोधमानमायालोभैः परीषहादिभिश्चात्मा न जितः, तथा चोक्तम्—"कोहं माणं च मायं च, लोभं पंचेंदियाणि य । दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जियं ॥ १ ॥ जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे । एकं जिणेज्ज अप्पाणं, एस से परमो जओ ॥ २ ॥ तथा—एको परिभमउ जए वियडं जिणकेसरी सलीलाए । कंदप्पदुद्धदाढो मयणो विद्दारिओ जेणं ॥ ३ ॥" तदेवं वर्धमानस्वाम्येव परीषहोपसर्गैरनुकूलप्रतिकूलैरपराजितोऽद्भुतकर्मकारित्वेन गुणनिष्पन्नत्वात् भा- ॥१४२॥

१ क्रोधो मानश्च माया च लोभश्च पञ्चेन्द्रियाणि च दुर्जयं चैवात्मनः सर्वमात्मनि जिते जितं ॥१॥ यः सहस्रं सहस्राणां सङ्ग्रामे दुर्जये जयेत् । एकं जयेदात्मानं एष तस्य परमो जयः ॥ २ ॥ एकः परिभ्राम्यतु जगति विकटं जिनकेसरी । स्वलीलया कन्दर्पदुष्टदंष्ट्रः मदनो विदारितो येन ॥ ३ ॥

वतो महावीर इति भण्यते, यदिवा—द्रव्यवीरो व्यतिरिक्त एकभविकादिः, क्षेत्रवीरो यत्र तिष्ठत्यसौ व्यावर्ण्यते वा, कालतोऽप्येवमेव, भाववीरो नोआगमतो वीरनामगोत्राणि कर्माण्यनुभवन्, स च वीरवर्धमानस्वाम्येवेति ॥ स्तवनिक्षेपार्थमाह—

थुइणिक्खेवो चउहा आगंतुअभूसणेहिं दव्वथुती । भावे संताण गुणाण कित्तणा जे जहिं भणिया ॥ ८४ ॥

'स्तुतेः' स्तवस्य नामादिश्चतुर्धा निक्षेपः, तत्र नामस्थापने पूर्ववत्, द्रव्यस्तवस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तो यः कटककेयूरसक्चन्दनादिभिः सचित्ताचित्तद्रव्यैः क्रियत इति, भावस्तवस्तु 'सद्भूतानां' विद्यमानानां गुणानां ये यत्र भवन्ति तत्कीर्तनमिति ॥ साम्प्रतं आद्यसूत्रसंस्पर्शद्वारेण सकलाध्ययनसम्बन्धप्रतिपादिकां गाथां निर्युक्तिकृदाह—

पुच्छिस्सु जंबुणामो अज्ज सुहम्मा तओ कहेसी य । एव महप्पा वीरो जयमाह तहा जएज्जाहि ॥ ८५ ॥

जम्बूस्वामी आर्यसुधर्मस्वामिनं श्रीमन्महावीरवर्धमानस्वामिगुणान् पृष्टवान्, अतोऽसावपि भगवान् सुधर्मस्वाम्येवंगुणविशिष्टो महावीर इति कथितवान्, एवं चासौ भगवान् संसारस्य 'जयम्' अभिभवमाह, ततो यूयमपि यथा भगवान् संसारं जितवान् तथैव यत्नं विधत्तेति ॥ साम्प्रत निक्षेपानन्तरं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

पुच्छिस्सु णं समणा माहणा य, अगारिणो या परतित्थिआ य ।
से केइ णेगंतहियं धम्ममाहु, अणेलिसं साहु समिक्खयाए ॥ १ ॥
कहं च णाणं कह दंसणं से, सीलं कहं नायसुतस्स आसी ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाणासि णं भिक्खु जहातहेणं, अहासुतं बूहि जहा णिसंतं ॥ २ ॥

अस्य चानन्तरसूत्रेण सहायं सम्बन्धः, तद्यथा—तीर्थकरोपदिष्टेन मार्गेण ध्रुवमाचरन् मृत्युकालमुपेक्षेतेत्युक्तं, तत्र किम्भूतोऽसौ तीर्थकृत् येनोपदिष्टो मार्ग इत्येतत् पृष्टवन्तः 'श्रमणा' यतय इत्यादि, परम्परसूत्रसम्बन्धस्तु बुद्ध्येत यदुक्तं प्रागिति, एतच्च यदुत्तरत्र प्रश्नप्रतिवचनं वक्ष्यते तच्च बुद्ध्येतेति, अनेन सम्बन्धेनाऽऽयातस्यास्य सूत्रस्य संहितादिक्रमेण व्याख्या प्रतन्यते, सा चेयम्—अनन्तरोक्तां बहुविधां नरकविभक्तिं श्रुत्वा संसारादुद्विग्नमनसः केनेयं प्रतिपादितेत्येतत् सुधर्मस्वामिनम् 'अप्राक्षुः' पृष्टवन्तः 'णम्' इति वाक्यालङ्कारे यदिवा जम्बूस्वामी सुधर्मस्वामिनमेवाह—यथा केनैवंभूतो धर्मः संसारोत्तारणसमर्थः प्रतिपादित इत्येतद्बहवो मां पृष्टवन्तः, तद्यथा—'श्रमणा' निर्ग्रन्थादयः[1] तथा 'ब्राह्मणा' ब्रह्मचर्याद्यनुष्ठाननिरताः, तथा 'अगारिणः' क्षत्रियादयो ये च शाक्यादयः परतीर्थिकास्ते सर्वेऽपि पृष्टवन्तः, किं तदिति दर्शयति—स को योऽसावेनं धर्मं दुर्गतिप्रसृतजन्तुधारकमेकान्तहितम् 'आह' उक्तवान् 'अनीदृशम्' अनन्यसदृशम् अतुलमित्यर्थः, तथा—साध्वी चासौ समीक्षा च साधुसमीक्षा—यथावस्थिततत्त्वपरिच्छित्तिरूपया, यदिवा—साधुसमीक्षया—समतयोक्तवानिति ॥ १ ॥ तथा तस्यैव ज्ञानादिगुणावगतये प्रश्नमाह—'कथं' केन प्रकारेण भगवान् ज्ञानमवाप्तवान् ?, किम्भूतं वा तस्य भगवतो ज्ञानं—विशेषावबोधकं ?, किम्भूतं च 'से' तस्य 'दर्शनं' सामान्यार्थपरिच्छेदकं ? 'शीलं च' यमनियमरूपं कीदृक् ? ज्ञाताः—क्षत्रियास्तेषां 'पुत्रो' भगवान् वीरवर्धमान-

१ ०मेवमाह प्र० । २ निर्ग्रन्थाः प्र० ।

स्वामी तस्य 'आसीद्' अभूदिति, यदेतन्मया पृष्टं तत् 'भिक्षो !' सुधर्मस्वामिन् याथातथ्येन त्वं 'जानीषे' सम्यगवगच्छसि 'णम्' इति वाक्यालङ्कारे तदेतत्सर्वं यथाश्रुतं तया श्रुत्वा च यथा 'निशान्त' मित्यवधारितं यथा दृष्टं तथा सर्वं 'बूहि' आचक्ष्वेति ॥ २ ॥ स एवं पृष्टः सुधर्मस्वामी श्रीमन्महावीरवर्धमानस्वामिगुणान् कथयितुमाह—

खेयन्नए से कुसलासुपन्ने (०ले महेसी), अणंतनाणी य अणंतदंसी ।
जसंसिणो चक्खुपहे ठियस्स, जाणाहि धम्मं च धिइं च पेहि ॥ ३ ॥
उड्ढं अहेयं तिरियं दिसासु, तसा य जे थावर जे य पाणा ।
से णिच्चणिच्चेहि समिक्ख पन्ने, दीवे व धम्मं समियं उदाहु ॥ ४ ॥

सः—भगवान् चतुस्त्रिंशदतिशयसमेतः खेदं—संसारान्तर्वर्तिनां प्राणिनां कर्मविपाकजं दुःखं जानातीति खेदज्ञो दुःखापनोदनसमर्थोपदेशदानात्, यदिवा 'क्षेत्रज्ञो' यथावस्थितात्मस्वरूपपरिज्ञानादात्मज्ञ इति, अथवा—क्षेत्रम्—आकाशं तज्जानातीति क्षेत्रज्ञो लोकालोकस्वरूपपरिज्ञातेत्यर्थः, तथा भावकुशान्—अष्टविधकर्मरूपान् लुनाति—छिनत्तीति कुशलः प्राणिनां कर्मोच्छित्तये निपुण इत्यर्थः, आशु—शीघ्रं प्रज्ञा यस्यासावाशुप्रज्ञः, सर्वत्र सदोपयोगाद्, न छद्मस्थ इव विचिन्त्य जानातीति भावः, महर्षिरिति क्वचित्पाठः, महांश्चासावृषिश्च महर्षिः अत्यन्तोग्रतपश्चरणानुष्ठायित्वादतुलपरीषहोपसर्गसहनाच्चेति, तथा अनन्तम्—अविनाश्येनन्तपदार्थपरिच्छेदकं वा ज्ञानं—विशेषग्राहकं यस्यासावनन्तज्ञानी, एवं सामान्यार्थपरिच्छेदकत्वेनानन्तदर्शी, तदेवम्भूतस्य

भगवतो यशो नृसुरासुरातिशायितुलं विद्यते यस्य स यशस्वी तस्य, लोकस्य 'चक्षुःपथे' लोचनमार्गे भवस्थकेवल्यवस्थायां स्थितस्य, लोकानां सूक्ष्मव्यवहितपदार्थाविर्भावनेन चक्षुर्भूतस्य वा 'जानीहि' अवगच्छ 'धर्मं' संसारोद्तरणस्वभावं, तत्प्रणीतं वा श्रुतचारित्राख्यं, तथा तस्यैव भगवतस्तथोपसर्गितस्यापि निष्प्रकम्पां चारित्राचलनस्वभावां 'धृतिं' संयमे रतिं तत्प्रणीतां वा 'प्रेक्षस्व' सम्यक्कुशाग्रीयया बुद्ध्या पर्यालोचयेति, यदिवा—तैरेव श्रमणादिभिः सुधर्मस्वाम्यभिहितो यथा त्वं तस्य भगवतो यशस्विनश्चक्षुष्पथे व्यवस्थितस्य धर्मं धृतिं च जानीषे ततोऽस्माकं 'पेहि'त्ति कथयेति ॥ ३ ॥ साम्प्रतं सुधर्मस्वामी तद्गुणान् कथयितुमाह—ऊर्ध्वमधस्तिर्यक्षु सर्वत्रैव चतुर्दशरज्ज्वात्मके लोके ये केचन त्रसन्तीति त्रसास्तेजोवायुरूपविकलेन्द्रियपञ्चेन्द्रियभेदात् त्रिधा, तथा ये च 'स्थावराः' पृथिव्यम्बुवनस्पतिभेदात् त्रिविधाः, एत उच्छ्वासादयः प्राणा विद्यन्ते येषां ते प्राणिन इति, अनेन च शाक्यादिमतनिरासेन पृथिव्याद्येकेन्द्रियाणामपि जीवत्वमावेदितं भवति, स भगवांस्तान् प्राणिनः प्रकर्षेण केवलज्ञानित्वात् जानातीति प्रज्ञः [ग्रन्थाग्रम् ४२५०] स एव प्राज्ञो, नित्यानित्याभ्यां द्रव्यार्थपर्यायार्थाश्रयणात् 'समीक्ष्य' केवलज्ञानेनार्थान् परिज्ञाय प्रज्ञापनायोग्यानाहेत्युत्तरेण सम्बन्धः, तथा स प्राणिनां पदार्थाविर्भावनेन दीपवत् दीपः यदिवा—संसारार्णवपतितानां सदुपदेशप्रदानत आश्वासहेतुत्वात् द्वीप इव द्वीपः, स एवम्भूतः संसारोत्तारणसमर्थं 'धर्मं' श्रुतचारित्राख्यं सम्यक् इतं—गतं सदनुष्ठानतया रागद्वेषरहितत्वेन समतया वा, तथा चोक्तम्—"[1]जहा पुण्णस्स कत्थइ तहा तुच्छस्स कत्थइ" इत्यादि, समं वा—धर्मम् उत्—प्राबल्येन आह—उक्तवान् प्राणिनामनुग्रहार्थं न पूजासत्कारार्थमिति ॥ ४ किञ्चान्यत्—

१ यथा पूर्णस्य कथ्यते तथा तुच्छस्य कथ्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से सवदंसी अभिभूयनाणी, णिरामगंधे धिइमं ठितप्पा ।
अणुत्तरे सवजगंसि विज्जं, गंथा अतीते अभए अणाऊ ॥ ५ ॥
से भूइपण्णे अणिएअचारी, ओहंतरे धीरे अणंतचक्खू ।
अणुत्तरं तप्पति सूरिए वा, वइरोयणिंदे व तमं पगासे ॥ ६ ॥

'स' भगवान् सर्वं—जगत् चराचरं सामान्येन द्रष्टुं शीलमस्य स सर्वदर्शी, तथा 'अभिभूय' पराजित्य मत्यादीनि चत्वार्यपि ज्ञानानि यद्वर्तते ज्ञानं केवलाख्यं तेन ज्ञानेन ज्ञानी, अनेन चापरतीर्थाधिपाधिकत्वमावेदितं भवति, 'ज्ञानक्रियाभ्यां मोक्ष' इति कृत्वा तस्य भगवतो ज्ञानं प्रदर्श्य क्रियां दर्शयितुमाह—निर्गतः—अपगत आमः—अविशोधिकोट्याख्यः तथा गन्धो—विशोधिकोटिरूपो यस्मात् स भवति निरामगन्धः, मूलोत्तरगुणभेदभिन्नां चारित्रक्रियां कृतवानित्यर्थः, तथाऽसह्यपरीषहोपसर्गाभिद्रुतोऽपि निष्प्रकम्पतया चारित्रे धृतिमान् तथा—स्थितो व्यवस्थितोऽशेषकर्मविगमादात्मस्वरूपे आत्मा यस्य स भवति स्थितात्मा, एतच्च ज्ञानक्रिययोः फलद्वारेण विशेषणं, तथा—नास्योत्तरं—प्रधानं सर्वस्मिन्नपि जगति विद्यते (यः) स तथा, त्रिद्यानिति सकलपदार्थानां करतलामलकन्यायेन वेत्ता, तथा बाह्यग्रन्थात् सचित्तादिभेदादान्तराच्च कर्मरूपाद् 'अतीतो' अतिक्रान्तो ग्रन्थातीतो—निर्ग्रन्थ

१ तस्य परमाभ्रेडितमित्यादिवदवयवत्वाच्चित्वेन षष्ठी ।

सूत्रकृ. २५
सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं
॥१४५॥

६ श्रीमहावीरस्तुत्य.

इत्यर्थः, तथा न विद्यते सप्तप्रकारमपि भयं यस्यासावभयः समस्तभयरहित इत्यर्थः, तथा न विद्यते चतुर्विधमप्यायुर्यस्य स भवत्यनायुः, दग्धकर्मबीजत्वेन पुनरुत्पत्तेरसंभवादिति ॥ ५ ॥ अपिच—भूतिशब्दो वृद्धौ मङ्गले रक्षायां च वर्तते, तत्र 'भूतिप्रज्ञः' प्रवृद्धप्रज्ञः अनन्तज्ञानवानित्यर्थः, तथा—भूतिप्रज्ञो जगद्रक्षाभूतप्रज्ञः एवं सर्वमङ्गलभूतप्रज्ञ इति, तथा 'अनियतम्' अप्रतिबद्धं परिग्रहायोगाच्चरितुं शीलमस्यासावनियतचारी तथौघं—संसारसमुद्रं तरितुं शीलमस्य स तथा, तथा धीः—बुद्धिस्तया राजत इति धीरः परीषहोपसर्गाक्षोभ्यो वा धीरः, तथा अनन्तं—ज्ञेयानन्ततया नित्यतया वा चक्षुरिव चक्षुः—केवलज्ञानं यस्यानन्तस्य वा लोकस्य पदार्थप्रकाशकतया चक्षुभूतो यः स भवत्यनन्तचक्षुः, तथा यथा—सूर्यः 'अनुत्तरं' सर्वाधिकं तपति न तस्मादधिकस्तापेन कश्चिदस्ति, एवमसावपि भगवान् ज्ञानेन सर्वोत्तम इति, तथा 'वैरोचनः' अग्निः स एव प्रज्वलितत्वात् इन्द्रो यथाऽसौ तमोऽपनीय प्रकाशयति, एवमसावपि भगवानज्ञानतमोऽपनीय यथावस्थितपदार्थप्रकाशनं करोति ॥ ६ ॥ किञ्च—

अणुत्तरं धम्ममिणं जिणाणं, णेया मुणी कासव आसुपन्ने ।
इंदेव देवाण महाणुभावे, सहस्सणेता दिवि णं विसिट्ठे ॥ ७ ॥
से पन्नया अक्खयसागरे वा, महोदही वावि अणंतपारे ।
अणाइले वा अकसाइ मुक्के, सक्केव देवाहिवई जुईमं ॥ ८ ॥

॥१४५॥

१ ०भूति० प्र० । २ या प्र० । ३ मिक्षुः ।

नास्योत्तरोऽस्तीत्यनुत्तरस्तमिममनुत्तरं धर्मं 'जिनानाम्' ऋषभादितीर्थकृतां सम्बन्धिनमयं 'मुनिः' श्रीमान् वर्धमानाख्यः 'काश्यपः' गोत्रेण 'आशुप्रज्ञः' केवलज्ञानी उत्पन्नदिव्यज्ञानो 'नेता' प्रणेतेति, ताच्छीलिकस्तृन्, तद्योगे 'न लोकाव्ययनिष्ठे' (पा० २-३-६९) त्यादिना षष्ठीप्रतिषेधाद्धर्ममित्यत्र कर्मणि द्वितीयैव, यथा चेन्द्रो 'दिवि' स्वर्गे देवसहस्राणां 'महानुभावो' महाप्रभावत्वान् 'णम्' इति वाक्यालङ्कारे तथा 'नेता' प्रणायको 'विशिष्टो' रूपबलवर्णादिभिः प्रधानः एवं भगवानपि सर्वेभ्यो विशिष्टः प्रणायको महानुभावश्चेति ॥ ७ ॥ अपिच—असौ भगवान् प्रज्ञायतेऽनयेति प्रज्ञा तया 'अक्षयः' न तस्य ज्ञातव्येऽर्थे बुद्धिः प्रतिक्षीयते प्रतिहन्यते वा, तस्य हि बुद्धिः केवलज्ञानाख्या, सा च साद्यपर्यवसाना कालतो द्रव्यक्षेत्रभावैरप्यनन्ता, सर्वसाम्येन दृष्टान्ताभावाद्, एकदेशेन त्वाह—यथा 'सागर' इति, अस्य चाविशिष्टत्वात् विशेषणमाह—'महोदधिरिव' स्वयम्भूरमण इवानन्तपारः यथाऽसौ विस्तीर्णो गम्भीरजलोऽक्षोभ्यश्च, एवं तस्यापि भगवतो विस्तीर्णा प्रज्ञा स्वयम्भूरमणानन्तगुणा गम्भीराऽक्षोभ्या च, यथा च असौ सागरः 'अनाविलः' अकलुषजलः, एवं भगवानपि तथाविधकर्मलेशाभावादकलुषज्ञान इति, तथा—कषाया विद्यन्ते यस्यासौ कषायी न कषायी अकषायी, तथा ज्ञानावरणीयादिकर्मबन्धनाद्वियुक्तो मुक्तः, भिक्षुरिति क्वचित्पाठः, तस्यायमर्थः—सत्यपि निःशेषान्तरायक्षये सर्वलोकपूज्यत्वे च तथापि भिक्षामात्रजीवित्वात् भिक्षुरेवासौ, नाक्षीणमहानसादिलब्धिमुपजीवतीति, तथा शक्र इव देवाधिपतिः 'द्युतिमान्' दीप्तिमानिति ॥ ८ ॥ किञ्च—

१ स्थित्यपेक्षया ज्ञेयापेक्षया तु द्रव्यादिवदनाद्यनन्तकालगोचरैव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से वीरिएणं पडिपुन्नवीरिए, सुदंसणे वा णगसव्वसेट्ठे ।
सुरालए वासिमुदागरे से, विरायए णेगगुणोववेए ॥ ९ ॥
सयं सहस्साण उ जोयणाणं, तिकंडगे पंडगवेजयंते ।
से जोयणे णवणवते सहस्से, उड्ढुस्सितो हेट्ठ सहस्समेगं ॥ १० ॥

'स' भगवान् 'वीर्येण' औरसेन बलेन धृतिसंहननादिभिश्च वीर्यान्तरायस्य निःशेषतः क्षयात् प्रतिपूर्णवीर्यः, तथा 'सुदर्शनो' मेरुर्जम्बूद्वीपनाभिभूतः स यथा नगानां–पर्वतानां सर्वेषां श्रेष्ठः—प्रधानः तथा भगवानपि वीर्येणान्यैश्च गुणैः सर्वश्रेष्ठ इति, तथा यथा 'सुरालयः' स्वर्गस्तन्निवासिनां 'मुदाकरो' हर्षजनकः प्रशस्तवर्णरसगन्धस्पर्शप्रभावादिभिर्गुणैरुपेतो 'विराजते' शोभते, एवं भगवानप्यनेकैर्गुणैरुपेतो विराजत इति, यदिवा—यथा त्रिदशालयो मुदाकरोऽनेकैर्गुणैरुपेतो विराजत इति एवमसावपि मेरुरिति ॥ ९ ॥ पुनरपि दृष्टान्तभूतमेरुवर्णनायाह—स मेरुर्योजनसहस्राणां शतमुच्चैस्त्वेन, तथा त्रीणि कण्डान्यस्येति त्रिकण्डः, तद्यथा—भौमं जाम्बूनदं वैडूर्यमिति, पुनरप्यसावेव विशेष्यते—'पण्डकवैजयन्त' इति, पण्डकवनं शिरसि व्यवस्थितं वैजयन्तीकल्पं—पताकाभूतं यस्य स तथा, तथाऽसावूर्ध्वमुच्छ्रितो नवनवतियोजनसहस्राण्यधोऽपि सहस्रमेकमवगाढ इति ॥ १० ॥ तथा—

१ वादि० प्र० ।

पुट्ठे णभे चिट्ठइ भूमिवट्ठिए, जं सूरिया अणुपरिवट्टयंति ।
से हेमवन्ने बहुनंदणे य, जंसी रतिं वेदयती महिंदा ॥ ११ ॥
से पव्वए सद्दमहप्पगासे, विरायती कंचणमट्ठवन्ने ।
अणुत्तरे गिरिसु य पव्वदुग्गे, गिरीवरे से जलिएव भोमे ॥ १२ ॥

'नभसि' 'स्पृष्टो' लग्नो नभो व्याप्य तिष्ठति तथा भूमिं चावगाह्य स्थित इति ऊर्ध्वाधस्तिर्यक्लोकसंस्पर्शी, यथा 'यं' मेरुं 'सूर्याः' आदित्या ज्योतिष्का 'अनुपरिवर्त्तयन्ति' यस्य पार्श्वतो भ्रमन्तीत्यर्थः, तथाऽसौ 'हेमवर्णो' निष्टप्तजाम्बूनदाभः, तथा बहूनि चत्वारि नन्दनवनानि यस्य स बहुनन्दनवनः, तथाहि—भूमौ भद्रशालवनं ततः पञ्च योजनशतान्यारुह्य मेखलायां नन्दनं ततो द्विषष्टियोजनसहस्राणि पंचशताधिकान्यतिक्रम्य सौमनसं ततः षट्त्रिंशत्सहस्राण्यारुह्य शिखरे पण्डकवनमिति, तदेवमसौ चतुर्नन्दनवनाद्युपेतो विचित्रक्रीडास्थानसमन्वितः, यस्मिन् महेन्द्रा अप्यागत्य त्रिदशालयाद्रमणीयतरगुणेन 'रतिं' रमणक्रीडां 'वेदयन्ति' अनुभवन्तीति ॥ ११ ॥ अपिच–सः–मेर्वाख्योऽयं पर्वतो मन्दरो मेरुः सुदर्शनः सुरगिरिरित्येवमादिभिः शब्दैर्महान् प्रकाशः—प्रसिद्धिर्यस्य स शब्दमहाप्रकाशो 'विराजते' शोभते, काञ्चनस्येव 'मृष्टः' श्लक्ष्णः शुद्धो वा वर्णो यस्य स तथा, एवं न विद्यते उत्तरः–प्रधानो यस्मात्सावनुत्तरः, तथा गिरिषु च मध्ये पर्वतेभ्यः–मेखलादिभिर्दंष्ट्रापर्वतैर्वा 'दुर्गो' विषमः सामान्यजन्तूनां दुरारोहो 'गिरिवरः' पर्वतप्रधानः, तथाऽसौ मणिभिरौषधीभिश्च देदीप्यमानतया 'भौम इव' भूदेश इव ज्वलित इति ॥ १२ ॥ किञ्च—

महीइ मज्झंमि ठिते णगिंदे, पन्नायते सूरियसुद्धलेसे ।
एवं सिरीए उ स भूरिवन्ने, मणोरमे जोयइ अच्चिमाली ॥ १३ ॥
सुदंसणस्सेव जसो गिरिस्स, पवुच्चई महतो पवयस्स ।
एतोवमे समणे नायपुत्ते, जातीजसोदंसणनाणसीले ॥ १४ ॥

'मध्ये' रत्नप्रभापृथिव्या मध्यदेशे जम्बूद्वीपस्तस्यापि बहुमध्यदेशे सौमनसविद्युत्प्रभगन्धमादनमाल्यवन्तदंष्ट्रापर्वतचतुष्टयोपशोभितः समभूभागे दशसहस्रविस्तीर्णः शिरसि सहस्रमेकमधस्तादपि दश सहस्राणि नवतियोजनानि योजनैकादशभागैर्दशभिरधिकानि विस्तीर्णः चत्वारिंशद्योजनोच्छ्रितचूडोपशोभितो 'नगेन्द्रः' पर्वतप्रधानो मेरुः प्रकर्षेण लोके ज्ञायते सूर्यवत्शुद्धलेश्यः–आदित्यसमानतेजाः, 'एवम्' अनन्तरोक्तप्रकारया श्रिया तुशब्दाद्विशिष्टतरया सः–मेरुः 'भूरिवर्णः' अनेकवर्णो अनेकवर्णरत्नोपशोभितत्वात् मनः–अन्तःकरणं रमयतीति मनोरमा 'अर्चिमालीव' आदित्य इव स्वतेजसा द्योतयति दशापि दिशः प्रकाशयतीति ॥ १३ ॥ साम्प्रतं मेरुदृष्टान्तोपक्षेपेण दार्ष्टान्तिकं दर्शयति—एतदनन्तरोक्तं 'यशः' कीर्तनं सुदर्शनस्य मेरुगिरेः महापर्वतस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोच्यते, साम्प्रतमेतदेव भगवति दार्ष्टान्तिके योज्यते—एषा—अनन्तरोक्तोपमा यस्य स एतदुपमः, कोऽसौ ?—श्राम्यतीति श्रमणस्तपोनिष्टप्तदेहो ज्ञाताः—क्षत्रियास्तेषां पुत्रः श्रीमन्महावीरवर्द्धमानस्वामीत्यर्थः, स च जात्या सर्वजातिमद्भ्यो यशसा अशेषयशस्विभ्यो दर्शनज्ञानाभ्यां सकलदर्शनज्ञानिभ्यः शीलेन समस्तशीलवद्भ्यः श्रेष्ठः—प्रधानः, अक्षरघटना तु जात्यादीनां कृतद्वन्द्वानामतिशायने अर्शआदित्वादच्प्रत्ययविधानेन विधेयेति ॥ १४ ॥ पुनरपि दृष्टान्तद्वारेणैव भगवतो व्यावर्णनमाह—

गिरीवरे वा निसहाऽऽयताणं, रुयए व सेट्ठे वलयायताणं ।
तओवमे से जगभूइपन्ने, मुणीण मज्झे तमुदाहु पन्ने ॥ १५ ॥
अणुत्तरं धम्ममुईरइत्ता, अणुत्तरं झाणवरं झियाई ।
सुसुक्कसुक्कं अपगंडसुक्कं, संखिंदुएगंतवदातसुक्कं ॥ १६ ॥

यथा 'निषधो' गिरिवरो गिरीणामायतानां मध्ये जम्बूद्वीपे अन्येषु वा द्वीपेषु दैर्घ्येण 'श्रेष्ठः' प्रधानः तथा—वलयायतानां मध्ये रुचकः पर्वतोऽन्येभ्यो वलयायतत्वेन यथा प्रधानः, स हि रुचकद्वीपान्तर्वर्ती मानुषोत्तरपर्वत इव वृत्तायतैः

१ मत्वर्थीयात् अच्प्र० प्र० । २ वृत्तायतोऽसं० प्र० नचैतद्युक्तं ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१४८॥

सङ्ख्येययोजनानि परिक्षेपेणेति, तथा स भगवानपि तदुपमः यथा तावायतवृत्तताभ्यां श्रेष्ठौ एवं भगवानपि जगति—संसारे भूतिप्रज्ञः—प्रभूतज्ञानः प्रज्ञया श्रेष्ठ इत्यर्थः, तथा अपरमुनीनां मध्ये प्रकर्षेण जानातीति प्रज्ञः एवं तत्स्वरूपविदः 'उदाहुः' उदाहृतवन्त उक्तवन्त इत्यर्थः ॥१५॥ किञ्चान्यत्—नास्योत्तरः—प्रधानोऽन्यो धर्मो विद्यते इत्यनुत्तरः तमेवम्भूतं धर्मं 'उत्' प्राबल्येन 'ईरयित्वा' कथयित्वा प्रकाश्य 'अनुत्तरं' प्रधानं 'ध्यानवरं' ध्यानश्रेष्ठं ध्यायति, तथाहि—उत्पन्नज्ञानो भगवान् योगनिरोधकाले सूक्ष्मं काययोगं निरुन्धन् शुक्लध्यानस्य तृतीयं भेदं सूक्ष्मक्रियमप्रतिपातारव्यं तथा निरुद्धयोगश्चतुर्थं शुक्लध्यानभेदं व्युपरतक्रियमनिवृत्ताख्यं ध्यायति, एतदेव दर्शयति—सुष्ठु शुक्लवत्शुक्लं ध्यानं तथा अपगतं गण्डम्—अपद्रव्यं यस्य तदपगण्डं निर्दोषार्जुनसुवर्णवत् शुक्लं यदिवा—अपगण्डम्—उदकफेनं तत्तुल्यमिति भावः । तथा शङ्खेन्दुवदेकान्तावदातं—शुभ्रं शुक्लं—शुक्लध्यानोत्तरं भेदद्वयं ध्यायतीति ॥ १६ ॥ अपिच—

अणुत्तरग्गं परमं महेसी, असेसकम्मं स विसोहइत्ता ।
सिद्धिं गते साइमणंतपत्ते, नाणेण सीलेण य दंसणेण ॥ १७ ॥
रुक्खेसु णाते जह सामली वा, जस्सिं रतिं वेययती सुवन्ना ।
वणेस वा णंदणमाहु सेट्ठं, नाणेण सीलेण य भूतिपन्ने ॥ १८ ॥

तथाऽसौ भगवान् शैलेश्यवस्थापादितशुक्लध्यानचतुर्थभेदानन्तरं साद्यपर्यवसानां सिद्धिगतिं पञ्चमीं प्राप्तः, सिद्धिगतिमेव विशिनष्टि—अनुत्तरा चासौ सर्वोत्तमत्वादन्या च लोकाग्रव्यवस्थितत्वादनुत्तराख्या तां 'परमां' प्रधानां 'महर्षिः' असावत्यन्तोग्रतपोविशेषनिष्टप्तदेहत्वाद् अशेषं कर्म—ज्ञानावरणादिकं 'विशोध्य' अपनीय च विशिष्टेन ज्ञानेन दर्शनेन शीलेन च क्षायिकेण सिद्धिगतिं प्राप्त इति मीलनीयम् ॥ १७ ॥ पुनरपि दृष्टान्तद्वारेण भगवतः स्तुतिमाह—वृक्षेषु मध्ये यथा 'ज्ञातः' प्रसिद्धो देवकुरुव्यवस्थितः शाल्मलीवृक्षः, स च भवनपतिक्रीडास्थानं, 'यत्र' व्यवस्थिता अन्यतश्चागत्य 'सुपर्णा' भवनपतिविशेषा 'रतिं' रमणक्रीडां 'वेदयन्ति' अनुभवन्ति, वनेषु च मध्ये यथा नन्दनं वनं देवानां क्रीडास्थानं प्रधानं एवं भगवानपि 'ज्ञानेन' केवलाख्येन समस्तपदार्थाविर्भावकेन 'शीलेन' च चारित्रेण—यथाख्यातेन 'श्रेष्ठः' प्रधानः 'भूतिप्रज्ञः' प्रवृद्धज्ञानो भगवानिति ॥ ॥ १८ ॥ अपिच—

थणियं व सद्दाण अणुत्तरे उ, चंदो व ताराण महाणुभावे ।
गंधेसु वा चंदणमाहु सेट्ठं, एवं मुणीणं अपडिन्नमाहु ॥ १९ ॥
जहा सयंभू उदहीण सेट्ठे, नागेसु वा धरणिंदमाहु सेट्ठे ।
खोओदए वा रस वेजयंते, तवोवहाणे मुणिवेजयंते ॥ २० ॥

६ श्रीमहावीरस्तुत्य.

॥१४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा शब्दानां मध्ये 'स्तनितं' मेघगर्जितं तद् 'अनुत्तरं' प्रधानं, तुशब्दो विशेषणार्थः समुच्चयार्थो वा, 'तारकाणां च' नक्षत्राणां मध्ये यथा चन्द्रो महानुभावः सकलजननिर्वृत्तिकारिण्या कान्त्या मनोरमः श्रेष्ठः, 'गन्धेषु' इति गुणगुणिनोरभेदान्मत्वर्लोपाद्वा गन्धवत्सु मध्ये यथा 'चन्दनं' गोशीर्षकाख्यं मलयजं वा तज्ज्ञाः श्रेष्ठमाहुः, एवं 'मुनीनां' महर्षीणां मध्ये भगवन्तं नास्य प्रतिज्ञा इहलोकपरलोकाशंसिनी विद्यते इत्यप्रतिज्ञस्तमेवम्भूतं श्रेष्ठमाहुरिति ॥ १९ ॥ अपिच—स्वयं भवन्तीति स्वयम्भुवो—देवाः ते तत्रागत्य रमन्तीति स्वयम्भूरमणः तदेवम् 'उदधीनां' समुद्राणां मध्ये यथा स्वयम्भूरमणः समुद्रः समस्तद्वीपसागरपर्यन्तवर्ती 'श्रेष्ठः' प्रधानः 'नागेषु च' भवनपतिविशेषेषु मध्ये 'धरणेन्द्रं' धरणं यथा श्रेष्ठमाहुः, तथा 'खोओदए' इति इक्षुरस इवोदकं यस्य स इक्षुरसोदकः स यथा रसमाश्रित्य 'वैजयन्तः' प्रधानः स्वगुणैरपरसमुद्राणां पताकेवोपरि व्यवस्थितः एवं 'तपउपधानेन' विशिष्टतपोविशेषेण मनुते जगत्त्रिकालावस्थामिति 'मुनिः' भगवान् 'वैजयन्तः' प्रधानः, समस्तलोकस्य महातपसा वैजयन्तीवोपरि व्यवस्थित इति ॥ २० ॥

हत्थीसु एरावणमाहु णाए, सीहो मिगाणं सलिलाण गंगा ।
पक्खीसु वा गरुले वेणुदेवो, निव्वाणवादीणिह णायपुत्ते ॥ २१ ॥
जोहेसु णाए जह वीससेणे, पुप्फेसु वा जह अरविंदमाहु ।
खत्तीण सेट्ठे जह दंतवक्के, इसीण सेट्ठे तह वद्धमाणे ॥ २२ ॥

'हस्तिषु' करिवरेषु मध्ये यथा 'ऐरावणं' शक्रवाहनं 'ज्ञातं' प्रसिद्धं दृष्टान्तभूतं वा प्रधानमाहुस्तज्ज्ञाः, 'मृगाणां' च श्वापदानां मध्ये यथा 'सिंहः' केसरी प्रधानः तथा भरतक्षेत्रापेक्षया 'सलिलानां' मध्ये यथा गङ्गासलिलं प्रधानभावमनुभवति, 'पक्षिषु' मध्ये यथा गरुत्मान् वेणुदेवापरनामा प्राधान्येन व्यवस्थितः, एवं निर्वाणं—सिद्धिक्षेत्राख्यं कर्मच्युतिलक्षणं वा स्वरूपतत्कारणप्राप्तिहेतुतो वा वदितुं शीलं येषां ते तथा तेषां मध्ये ज्ञाताः—क्षत्रियास्तेषां पुत्रः—अपत्यं ज्ञातपुत्रः—श्रीमन्महावीरवर्धमानस्वामी स प्रधान इति, यथावस्थितनिर्वाणार्थवादित्वादित्यर्थः॥ २१ ॥ अपिच—योधेषु मध्ये 'ज्ञातो' विदितो दृष्टान्तभूतो वा विश्वा—हस्त्यश्वरथपदातिचतुरङ्गबलसमेता सेना यस्य स विश्वसेनः—चक्रवर्ती यथाऽसौ प्रधानः, पुष्पेषु च मध्ये यथा अरविन्दं प्रधानमाहुः, तथा क्षतात् त्रायन्त इति क्षत्रियाः तेषां मध्ये दान्ता—उपशान्ता यस्य वाक्येनैव शत्रवः स दान्तवाक्यः—चक्रवर्ती यथाऽसौ श्रेष्ठः । तदेवं बहून् दृष्टान्तान् प्रशस्तान् प्रदर्श्याधुना भगवन्तं दार्ष्टान्तिकं स्वनामग्राहमाह—तथा ऋषीणां मध्ये श्रीमान् वर्धमानस्वामी श्रेष्ठ इति ॥ २२ ॥ तथा—

दाणाण सेट्ठं अभयप्पयाणं, सच्चेसु वा अणवज्जं वयंति ।
तवेसु वा उत्तम बंभचेरं, लोगुत्तमे समणे नायपुत्ते ॥ २३ ॥

---

१ °स्याभिप्रायः प्र० ।

ठिईण सेट्ठा लवसत्तमा वा, सभा सुहम्मा व सभाण सेट्ठा ।
निव्वाणसेट्ठा जह सव्वधम्मा, ण णायपुत्ता परमत्थि नाणी ॥ २४ ॥

तथा स्वपरानुग्रहार्थमर्थिने दीयत इति दानमनेकधा, तेषां मध्ये जीवानां जीवितार्थिनां त्राणकारित्वादभयप्रदानं श्रेष्ठं, तदुक्तम्—"दीयते म्रियमाणस्य, कोटिं जीवितमेव वा । धनकोटिं न गृह्णीयात्, सर्वो जीवितुमिच्छति ॥ १ ॥" इति, गोपालाङ्गनादीनां दृष्टान्तद्वारेणार्थो बुद्धौ सुखेनारोहतीत्यतः अभयप्रदानप्राधान्यख्यापनार्थं कथानकमिदं—वसन्तपुरे नगरे अरिदमनो नाम राजा, स च कदाचिच्चतुर्वधूसमेतो वातायनस्थः क्रीडायमानस्तिष्ठति, तेन कदाचिच्चौरो रक्तकणवीरकृतमुण्डमालो रक्तपरिधानो रक्तचन्दनोपलिप्तश्च प्रहतवध्यडिण्डिमो राजमार्गेण नीयमानः सपत्नीकेन दृष्टः, दृष्ट्वा च ताभिः पृष्टं—किमनेनाकारीति ?, तासामेकेन राजपुरुषेणाऽऽवेदितं यथा—परद्रव्यापहारेण राजविरुद्धमिति, तत एकया राजा विज्ञप्तो यथा—यो भवता मम प्राग् वरः प्रतिपन्नः सोऽधुना दीयतां येनाहमस्योपकरोमि किञ्चित्, राज्ञाऽपि प्रतिपन्नं, ततस्तया स्नानादिपुरःसरमलङ्कारेणालङ्कृतो दीनारसहस्रव्ययेन पञ्चविधान् शब्दादीन् विषयानेकमहः प्रापितः, पुनर्द्वितीययाऽपि तथैव द्वितीयमहो दीनारशतसहस्रव्ययेन लालितः, ततस्तृतीयया तृतीयमहो दीनारकोटिव्ययेन सत्कारितः, चतुर्थ्या तु राजानुमत्या मरणाद्रक्षितः अभयप्रदानेन, ततोऽसावन्याभिर्हसिता नास्य त्वया किञ्चिद्दत्तमिति, तदेवं तासां परस्परबहूपकारविषये विवादे राज्ञाऽसावेव चौरः समाहूय पृष्टो यथा केन तव बहूपकृतमिति, तेनाप्यभाणि यथा—न मया मरणमहाभयभीतेन किञ्चित् स्नानादिकं सुखं व्यज्ञायीति, अभयप्रदानाकर्ण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेन पुनर्जन्मानमिवात्मानमवैमीति, अतः सर्वदानानाममयप्रदानं श्रेष्ठमिति स्थितम् । तथा सत्येषु च वाक्येषु यद् 'अनवद्यम्' अपापं परपीडानुत्पादकं तद् श्रेष्ठं वदन्ति, न पुनः परपीडोत्पादकं सत्यं, सद्यो हितं सत्यमितिकृत्वा, तथा चोक्तम्–"लोकेऽपि श्रूयते वादो, यथा सत्येन कौशिकः । पतितो वधयुक्तेन, नरके तीव्रवेदने ॥ १ ॥" अन्यच्च—"तहेव काणं काणत्ति, पंडगं पंडगत्ति वा । वाहियं वावि रोगित्ति, तेणं चोरोत्ति नो वदे ॥ १ ॥" तपस्सु मध्ये यथैवोत्तमं नवविधब्रह्मगुप्त्युपेतं ब्रह्मचर्यं प्रधानं भवति तथा सर्वलोकोत्तमरूपसम्पदा–सर्वातिशायिन्या शक्त्या क्षायिकज्ञानदर्शनाभ्यां शीलेन च 'ज्ञातपुत्रो' भगवान् श्रमणः प्रधान इति ॥ २३ ॥ किञ्च—स्थितिमतां मध्ये यथा 'लवसत्तमाः' पञ्चानुत्तरविमानवासिनो देवाः सर्वोत्कृष्टस्थितिवर्तिनः प्रधानाः, यदि किल तेषां सप्त लवा आयुष्कमभविष्यत्ततः सिद्धिगमनमभविष्यदित्यतो लवसत्तमास्तेऽभिधीयन्ते, 'सभानां च' पर्षदां च मध्ये यथा सौधर्माधिपपर्षच्छ्रेष्ठा बहुभिः क्रीडास्थानैरुपेतत्वात्तथा यथा सर्वेऽपि धर्मा 'निर्वाणश्रेष्ठाः' मोक्षप्रधाना भवन्ति, कुप्रावचनिका अपि निर्वाणफलमेव स्वदर्शनं ब्रुवते यतः, एवं 'ज्ञातपुत्रात्' वीरवर्धमानस्वामिनः सर्वज्ञात् सकाशात् 'परं' प्रधानं अन्यद्विज्ञानं नास्ति, सर्वथैव भगवानपरज्ञानिभ्योऽधिकज्ञानो भवतीति भावः ॥ २४ ॥ किञ्चान्यत्—

पुढोवमे धुणइ विगयगेही, न सण्णिहिं कुव्वति आसुपन्ने ।
तरित्तु समुद्दं व महाभवोघं, अभयंकरे वीर अणंतचक्खू ॥ २५ ॥

सूत्रकृ. २६

कोहं च माणं च तहेव मायं, लोभं चउत्थं अज्झत्थदोसा ।
एआणि वंता अरहा महेसी, ण कुव्वई पाव ण कारवेइ ॥ २६ ॥

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१५१॥

स हि भगवान् यथा पृथिवी सकलाधारा वर्तते तथा सर्वसत्त्वानाममयप्रदानतः सदुपदेशदानाद्वा सत्त्वाधार इति, यदिवा–यथा पृथ्वी सर्वंसहा एवं भगवान् परीषहोपसर्गान् सम्यक् सहत इति, तथा 'धुनाति' अपनयत्यष्टप्रकारं कर्मेति शेषः, तथा–'विगता' प्रलीना सबाह्याभ्यन्तरेषु वस्तुषु 'गृद्धिः' गार्द्ध्यमभिलाषो यस्य स विगतगृद्धिः, तथा सन्निधानं सन्निधिः, स च द्रव्यसन्निधिः धनधान्यहिरण्यद्विपदचतुष्पदरूपः भावसन्निधिस्तु माया क्रोधादयो वा सामान्येन कषायास्तदुभयरूपमपि संनिधिं न करोति भगवान्, तथा 'आशुप्रज्ञः' सर्वत्र सदोपयोगात् न छद्मस्थवन्मनसा पर्यालोच्य पदार्थपरिच्छित्तिं विधत्ते, स एवम्भूतः तरित्वा समुद्रमिवापारं 'महाभवौघं' चतुर्गतिकं संसारसागरं बहुव्यसनाकुलं सर्वोत्तमं निर्वाणमासादितवान्, पुनरपि तमेव विशिनष्टि—'अभयं' प्राणिनां प्राणरक्षारूपं स्वतः परतश्च सदुपदेशदानात् करोतीत्यभयंकरः, तथाऽष्टप्रकारं कर्म विशेषेणेरयति–प्रेरयतीति वीरः, तथा 'अनन्तम्' अपर्यवसानं नित्यं ज्ञेयानन्तत्वाद्वाऽनन्तं चक्षुरिव चक्षुः–केवलज्ञानं यस्य स तथेति ॥ २५ ॥ किञ्चान्यत्—'निदानोच्छेदेन हि निदानिन उच्छेदो भवती'ति न्यायात् संसारस्थितेश्च क्रोधादयः कषायाः कारणमत एतान् अध्यात्मदोषांश्चतुरोऽपि क्रोधादीन् कषायान् 'वान्त्वा' परित्यज्य असौ भगवान् 'अर्हन्' तीर्थकृत् जातः, तथा महर्षिः, एवं परमार्थतो महर्षित्वं भवति यद्यध्यात्मदोषा न भवन्ति, नान्यथेति, तथा न स्वतः 'पापं' सावद्यमनुष्ठानं करोति नाप्यन्यैः कारयतीति ॥ २६ ॥ किञ्चान्यत्—

६ श्रीमहावीरस्तुत्य.

॥१५१॥

किरियाकिरियं वेणइयाणुवायं, अण्णाणियाणं पडियच्च ठाणं ।
से सव्ववायं इति वेयइत्ता, उवट्ठिए संजमदीहरायं ॥ २७ ॥
से वारिया इत्थी सराइभत्तं, उवहाणवं दुक्खखयट्ठयाए ।
लोगं विदित्ता आरं परं च, सव्वं पभू वारिय सव्ववारं ॥ २८ ॥
सोच्चा य धम्मं अरहंतभासियं, समाहितं अट्ठपदोवसुद्धं ।
तं सद्दहाणा य जणा अणाऊ, इंदा व देवाहिव आगमिस्संति ॥ २९ ॥
त्तिबेमि (गाथाग्रं० ३९०) इति श्री वीरत्थुतीनाम छट्ठमज्झयणं समत्तं ॥

तथा स भगवान् क्रियावादिनामक्रियावादिनां वैनयिकानामज्ञानिकानां च 'स्थानं' पक्षमभ्युपगतमित्यर्थः, यदिवा—स्थीयतेऽस्मिन्निति स्थानं–दुर्गतिगमनादिकं 'प्रतीत्य' परिच्छिद्य सम्यगवबुध्येत्यर्थः, एतेषां च स्वरूपमुत्तरत्र न्यक्षेण व्याख्यास्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रकृताङ्गे शीलाङ्काचार्यविरचिते ॥१५२॥

६ श्रीमहावीरस्तुत्य.

मः, लेशतस्त्विदं–क्रियैव परलोकसाधनायालमित्येवं वदितुं शीलं येषां ते क्रियावादिनः, तेषां हि दीक्षात एव क्रियारूपाया मोक्ष इत्येवमभ्युपगमः, अक्रियावादिनस्तु ज्ञानवादिनः, तेषां हि यथावस्थितवस्तुपरिज्ञानादेव मोक्षः, तथा चोक्तम्—"पञ्चविंशतितत्त्वज्ञो, यत्र तत्राश्रमे रतः । शिखी मुण्डी जटी वापि, सिद्धयते नात्र संशयः ॥ १ ॥" तथा विनयादेव मोक्ष इत्येवं गोशालकमतानुसारिणो विनयेन चरन्तीति वैनयिका व्यवस्थिताः, तथाऽज्ञानमेवैहिकामुष्मिकायालमित्येवमज्ञानिका व्यवस्थिताः, इत्येवंरूपं तेषामभ्युपगमं परिच्छिद्य–स्वतः सम्यगवगम्य सम्यगवबोधेन, तथा स एव वीरवर्धमानस्वामी सर्वमन्यमपि बौद्धादिकं यं कञ्चन वादमपरान् सत्त्वान् यथावस्थिततत्त्वोपदेशेन 'बोधयित्वा' परिज्ञाप्योपस्थितः सम्यगुत्थानेन संयमे व्यवस्थितो न तु यथा अन्ये, तदुक्तम्—"यथा परेषां कथका विदग्धाः, शास्त्राणि कृत्वा लघुतामुपेताः । शिष्यैरनुज्ञामलिनोपचारैर्वैकृतदोषास्त्वयि ते न सन्ति ॥ १ ॥" इति 'दीर्घरात्रम्' इति यावज्जीवं संयमोत्थानेनोत्थित इति ॥ २७ ॥ अपिच—स भगवान् वारयित्वा–प्रतिषिध्य किं तदित्याह–'स्त्रियम्' इति स्त्रीपरिभोगं मैथुनमित्यर्थः, सह रात्रिभक्तेन वर्तत इति सरात्रिभक्तं, उपलक्षणार्थत्वादस्यान्यदपि प्राणातिपातनिषेधादिकं द्रष्टव्यं, तथा उपधानं–तपस्तद्विद्यते यस्यासौ उपधानवान्–तपोनिष्टप्तदेहः, किमर्थमिति दर्शयति—दुःखयतीति दुःखम्–अष्टप्रकारं कर्म तस्य क्षयः—अपगमस्तदर्थं, किञ्च—लोकं विदित्वा 'आरम्' इहलोकाख्यं 'परं' परलोकाख्यं यदिवा—आरं—मनुष्यलोकं पारमिति–नारकादिकं स्वरूपतस्तत्प्राप्तिहेतुतश्च विदित्वा सर्वमेतत् 'प्रभुः' भगवान् 'सर्ववारं' बहुशो निवारितवान्, एतदुक्तं भवति–प्राणातिपातनिषेधादिकं स्वतोऽनुष्ठाय परांश्च स्थापितवान्, न हि स्वतोऽस्थितः परांश्च स्थापयितुमलमित्यर्थः, तदुक्तम्–"ब्रुवाणोऽपि न्याय्यं स्ववचनविरुद्धं व्यवहरन्, परान्नालं कश्चिदमयितु- ॥१५२॥

मदान्तः स्वयमिति । भवानित्थंचित्त्वैवं मनसि जगदाधाव सकलं, स्वमात्मानं तावदमयितुमदान्तं व्यवसितः ॥१॥" इति, तथा–"तित्थयरो चउनाणी सुरमहिओ सिज्झियव्वयधुवंमि । अणिगूहियबलविरओ सव्वत्थामेसु उज्जमइ ॥ १ ॥ इत्यादि" ॥ २८ ॥ साम्प्रतं सुधर्मस्वामी तीर्थकरगुणानारूपाय स्वशिष्यानाह—'सोच्चा य' इत्यादि, श्रुत्वा च दुर्गतिधारणाद्धर्म–श्रुतचारित्राख्यमहद्भिर्भाषितं—सम्यगाख्यातमर्थपदानि—युक्तयो हेतवो वा तैरुपशुद्धम्–अवदातं सद्युक्तिकं सद्धेतुकं वा यदिवा अर्थैः–अभिधेयैः पदैश्च–वाचकैः शब्दैः उप–सामीप्येन शुद्धं—निर्दोषं, तमेवम्भूतमर्हद्भिर्भाषितं धर्मं श्रद्दधानाः, तथाऽनुतिष्ठन्तो 'जना' लोका 'अनायुषः' अपगतायुःकर्माणः सन्तः सिद्धाः, सायुषश्चेन्द्राद्या देवाधिपा आगमिष्यन्तीति । इतिशब्दः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ २९ ॥ इति वीरस्तवाख्यं षष्ठमध्ययनं परिसमाप्तमिति ॥

१ तीर्थङ्करश्चतुर्ज्ञानी सुरमहितः सेधयितव्ये ध्रुवे, अनिगूहितबलवीर्यः सर्वस्मात्प्रोद्यच्छति ॥ १ ॥

सूत्रकृताङ्गे शीलाङ्काचार्यविरचिते ॥१५३॥

अथ सप्तमं अध्ययनं प्रारभ्यते ॥

७ कुशील परिभाषा

उक्तं षष्ठमध्ययनं, साम्प्रतं सप्तममारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने महावीरस्य गुणोत्कीर्तनतः सुशीलपरिभाषा कृता, तदनन्तरं तद्विपर्यस्ताः कुशीलाः परिभाष्यन्ते, तदनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि व्याख्यानीयानि, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—कुशीलाः–परतीर्थिकाः पार्श्वस्थादयो वा स्वयूथ्या अशीलाश्च गृहस्थाः परि–समन्तात् भाष्यन्ते–प्रतिपाद्यन्ते तदनुष्ठानतत्प्रियाकदुर्गतिगमनतश्च निरूप्यन्त इति तथा तद्विपर्ययेण क्वचित्सुशीलाश्चेति, निक्षेपस्त्रिधा–ओघनाममूत्रालापकभेदात्, तत्रौघनिष्पन्ननिक्षेपेऽध्ययनं,नामनिष्पन्ने कुशीलपरिभाषेति, एतदधिकृत्य निर्युक्तिकृदाह–

सीले चउक्क दव्वे पाउरणाभरणभोयणादीसु । भावे उ ओहसीलं अभिक्खमासेवणा चेव ॥ ८६ ॥

'शीले' शीलविषये निक्षेपे क्रियमाणे 'चतुष्क'मिति नामादिश्चतुर्धा निक्षेपः, तत्रापि नामस्थापने क्षुण्णत्वादनादृत्य 'द्रव्यम्' इति द्रव्यशीलं प्रावरणाभरणभोजनादिषु द्रष्टव्यं, अस्यायमर्थः–यो हि फलनिरपेक्षस्तत्स्वभावादेव क्रियासु प्रवर्तते स तच्छीलः, तत्रेह प्रावरणशील इति प्रावरणप्रयोजनाभावेऽपि ताच्छील्यान्नित्यं प्रावरणस्वभावः प्रावरणे वा दत्तावधानः, एवमाभरणभोजनादिष्वपि द्रष्टव्यमिति, यो वा यस्य द्रव्यस्य चेतनाचेतनादेः स्वभावस्तद् द्रव्यशीलमित्युच्यते, भावशीलं तु द्विधा—ओघशीलमाभीक्ष्ण्यसेवनाशीलं चेति ॥ तत्रौघशीलं व्याचिख्यासुराह— ॥१५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओहे सीलं विरती विरयाविरई य अविरती असीलं । धम्मे णाणतवादी अपसत्थ अहम्मकोवादी ॥ ८७ ॥

तत्रौघः—सामान्यं सामान्येन सावद्ययोगविरतो विरताविरतो वा शीलवान् भण्यते, तद्विपर्यस्तोऽशीलवानिति, आमीक्ष्ण्यसेवायां तु—अनवरतसेवनायां तु शीलमिदं, तद्यथा—'धर्मे' धर्मविषये प्रशस्तं शीलं यदुतानवरतापूर्वज्ञानार्जनं विशिष्टतपःकरणं वा, आदिग्रहणादनवरताभिग्रहग्रहणादिकं परिगृह्यते, अप्रशस्तभावशीलं त्वधर्मप्रवृत्तिर्वाह्या आन्तरा तु क्रोधादिषु प्रवृत्तिः, आदिग्रहणात् शेषकषायाश्चौर्याभ्याख्यानकलहादयः परिगृह्यन्त इति ॥ साम्प्रतं कुशीलपरिभाषाख्यस्याध्ययनस्यान्वर्थतां दर्शयितुमाह—

परिभासिया कुसीला य एत्थ जावंति अविरता केई । सुत्ति पसंसा सुद्धो कुत्ति दुगुंछा अपरिसुद्धो ॥ ८८ ॥

परि-समन्तात् भाषिताः—प्रतिपादिताः 'कुशीलाः' कुत्सितशीलाः परतीर्थिकाः पार्श्वस्थादयश्च चशब्दात् यावन्तः केचनाविरता अस्मिन्नित्यत इदमध्ययनं कुशीलपरिभाषेत्युच्यते, किमिति कुशीला अशुद्धा गृह्यन्ते इत्याह—सुरित्ययं निपातः प्रशंसायां शुद्धविषये वर्तते, तद्यथा—सौराज्यमित्यादि, तथा कुरित्ययमपि निपातो जुगुप्सायामशुद्धविषये वर्तते, कुतीर्थं कुग्राम इत्यादि ॥ यदि कुत्सितशीलाः कुशीलाः, कथं तर्हि ? परतीर्थिकाः पार्श्वस्थादयश्च तथाविधा भवन्तीत्याह—

अफासुयपडिसेविय णामं भुज्जो य सीलवादी य । फासुं वयंति सीलं अफासुया मो असुंजंता ॥ ८९ ॥

अस्त्ययं शीलशब्दस्तत्स्वाभाव्ये, तथाहि—यः फलनिरपेक्षः क्रियास्वाभरणादिकासु प्रवर्तते स चेह द्रव्यशीलत्वेन प्रदर्शितः, अस्त्युपशमप्रधाने चारित्रे, तथाहि—तत्प्रधानः शीलवानयं तपस्वीति, तद्विपर्ययेण दुःशील इति, स चेह भावशीलग्रहणेनोपात्त इति. इह च यतीनां ध्यानाध्ययनादिकं मुक्त्वा धर्माधारशरीरतत्पालनाहारव्यापारं च मुक्त्वा नापरः कश्चिद्व्यापारोऽस्तीत्यतस्तदाश्रयणेनैव सुशीलत्वं दुःशीलत्वं च चिन्त्यते, तत्र कुतीर्थिकः पार्श्वस्थादिर्वा अप्रासुकं-सचित्तं प्रतिसेवितुं शीलमस्य स भवत्यप्रासुकप्रतिसेवी नामशब्दः सम्भावनायां 'भूयः' पुनर्धार्ष्ट्याच्छीलवन्तमात्मानं वदितुं शीलं यस्य स शीलवादी, किमित्येवं ?—यतः 'प्रासुकम्' अचेतनं शीलं वदन्ति, इदमुक्तं भवति—यः प्रासुकमुद्गमादिदोषरहितमाहारं भुङ्क्ते तं शीलवन्तं वदन्ति तज्ज्ञाः, तथाहि—यतयो प्रासुकमुद्गमादिदोषदुष्टमेवाहारमभुञ्जानाः शीलवन्तो भण्यन्ते, नेतर इति स्थितं, मोशब्दस्य निपातत्वेनावधारणार्थत्वादिति ॥ अप्रासुकभोजित्वेन कुशीलत्वं प्रतिपादयितुं दृष्टान्तमाह—

जह णाम गोयमा चंडीदेवगा वारिभद्दगा चेव । जे अग्गिहोत्तवादी जलसोयं जे य इच्छंति ॥ ९० ॥

यथेति दृष्टान्तोपक्षेपार्थं, नामशब्दो वाक्यालङ्कारे, 'गौतमा' इति गोव्रतिका गृहीतशिक्षं लघुकायं वृषभमुपादाय धान्यार्थं प्रतिगृहमटन्ति, तथा 'चंडीदेवगा' इति चक्रधरप्रायाः एवं 'वारिभद्रका' अम्भक्षाः शैवलाशिनो नित्यं स्नानपादादिधावनाभिरता वा तथा ये चान्ये 'अग्निहोत्रवादिनः' अग्निहोत्रादेव स्वर्गगमनमिच्छन्ति ये चान्ये जलशौचमिच्छन्ति भागवतादयस्ते सर्वेऽप्यप्रासुकाहारभोजित्वात् कुशीला इति, चशब्दात् ये च स्वयूथ्याः पार्श्वस्थादय उद्गमाद्यशुद्धमाहारं भुञ्जते तेऽपि कुशीला इति । गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्ने निक्षेपे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदं—

पुढवी य आऊ अगणी य वाऊ, तण रुक्ख बीया य तसा य पाणा ।
जे अंडया जे य जराउ पाणा, संसेयया जे रसयाभिहाणा ॥ १ ॥

एयाइं कायाइं पवेदिताइं, एतेसु जाणे पडिलेह सायं ।
एतेण काएण य आयदंडे, एतेसु या विप्परियासुविंति ॥ २ ॥

'पृथिवी' पृथिवीकायिकाः सत्त्वाः चकारः स्वगतभेदसंसूचनार्थः, स चायं भेदः—पृथिवीकायिकाः सूक्ष्मा बादराश्च, ते च प्रत्येकं पर्याप्तकापर्याप्तकभेदेन द्विधा, एवमप्कायिका अपि तथाऽग्निकायिका वायुकायिकाश्च द्रष्टव्याः, वनस्पतिकायिकान् भेदेन दर्शयति—'तृणानि' कुशादीनि 'वृक्षाश्च' अश्वत्थादयो 'बीजानि' शाल्यादीनि एवं वल्लीगुल्मादयोऽपि वनस्पतिभेदा द्रष्टव्याः, त्रसन्तीति 'त्रसा' द्वीन्द्रियादयः 'प्राणाः' प्राणिनः ये चाण्डाजाता अण्डजाः—शकुनिसरीसृपादयः 'ये च जरायुजा' जम्बालवेष्टिताः समुत्पद्यन्ते, ते च गोमहिष्यजाविकमनुष्यादयः, तथा संस्वेदाज्जाताः संस्वेदजा यूकामत्कुणकुम्यादयः 'ये च रसजाभिधाना' दधिसौवीरकादिषु रूतपक्ष्मसन्निभा इति ॥ १ ॥ नानाभेदभिन्नं जीवसंघातं प्रदर्श्याधुना तदुपघाते दोषं प्रदर्शयितुमाह—'एते' पृथिव्यादयः 'काया' जीवनिकाया भगवद्भिः 'प्रवेदिताः' कथिताः, छान्दसत्वात्पुंसकलिङ्गता, 'एतेषु' च पूर्वं प्रतिपादितेषु पृथिवीकायादिषु प्राणिषु 'सातं' सुखं जानीहि, एतदुक्तं भवति—सर्वेऽपि सत्त्वाः सातैषिणो दुःखद्विषश्चेति ज्ञात्वा 'प्रत्युपेक्षस्व' कुशाग्रीयया बुद्ध्या पर्यालोचयेति, यथैभिः कायैः समारभ्यमाणैः पीड्यमानैरात्मा दण्ड्यते, एतत्समारम्भादात्मदण्डो भवतीत्यर्थः, अथवैभिरेव कायैर्ये 'आयतदण्डा' दीर्घदण्डाः, एतदुक्तं भवति—एतान् कायान् ये दीर्घकालं दण्डयन्ति-पीडयन्तीति, तेषां यद्भवति तदर्शयति—ते एतेष्वेव-पृथिव्यादिकायेषु विविधम्-अनेकप्रकारं परि-समन्ताद् आशु—क्षिप्रमुप-

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१५४॥

७ कुशीलपरिभाषा.

॥१५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रकृताङ्गशीलाङ्काचार्यावृत्तियुतं ॥१५५॥

सासीप्येन यान्ति-व्रजन्ति, तेष्वेव पृथिव्यादिकायेषु विविधमनेकप्रकारं भूयो भूयः समुत्पद्यन्त इत्यर्थः, यदिवा—विपर्यासो-व्यत्ययः, सुखार्थिभिः कायसमारम्भः क्रियते तत्समारम्भेण च दुःखमेवावाप्यते न सुखमिति, यदिवा कुतीर्थिका मोक्षार्थमेतैः कार्यैर्या क्रियां कुर्वन्ति तया संसार एव भवतीति ॥ २ ॥ यथा चायमावायतदण्डो मोक्षार्थी तान् कायान् समारभ्य तद्विपर्ययात् संसारमाप्नोति तथा दर्शयति—

जाईपहं अणुपरिवट्टमाणे, तसथावरेहिं विणिघायमेति ।
से जाति जातिं बहुकूरकम्मे, जं कुव्वती मिज्जति तेण बाले ॥ ३ ॥
अस्सिं च लोए अदुवा परत्था, सयग्गसो वा तह अन्नहा वा ।
संसारमावन्न परं परं ते, बंधंति वेदंति य दुन्नियाणि ॥ ४ ॥

७ कुशील-परिभाषा.

जातीनाम्—एकेन्द्रियादीनां पन्था जातिपथः, यदिवा-जातिः-उत्पत्तिर्वधो-मरणं जातिश्च वधश्च जातिवधं तद् 'अनुपरिवर्तमानः' एकेन्द्रियादिषु पर्यटन् जन्मजरामरणानि वा बहुशोऽनुभवन् 'त्रसेषु' तेजोवायुद्वीन्द्रियादिषु 'स्थावरेषु' च पृथिव्यम्बुवनस्पतिषु समुत्पन्नः सन् कायदण्डविपाकजेन कर्मणा बहुशो 'विनिघातं' विनाशमेति-अवाप्नोति 'स' आयतदण्डोऽसुमान् 'जातिं जातिम्' उत्पत्तिमुत्पत्तिमवाप्य बहूनि क्रूराणि—दारुणान्यनुष्ठानानि यस्य स भवति बहुक्रूरकर्मा, स एवम्भूतो निर्विवेकः सदसद्विवेकशून्यत्वात् बाल इव बालो यस्यामेकेन्द्रियादिकायां जातौ यत्प्राण्युपमर्दकारि कर्म कुरुते स तेनैव कर्मणा 'मीयते' म्रियते पूर्यते यदिवा 'मीङ् हिंसायां' मीयते हिंस्यते अथवा-बहुक्रूरकर्मेति चौरोऽयं पारदारिक इति वा इत्येवं तेनैव कर्मणा मीयते—परिच्छिद्यत इति ॥ ३ ॥ ॥ क पुनरसौ तैः कर्मभिर्मीयते इति दर्शयति-यान्याशुकारीणि कर्माणि तान्यस्मिन्नेव जन्मनि विपाकं ददति, अथवा परस्मिन् जन्मनि नरकादौ तस्य कर्म विपाकं ददति, एकस्मिन्नेव जन्मनि विपाकं तीव्रं ददति 'शताग्रशो वे'ति बहुषु जन्मसु, येनैव प्रकारेण तदशुभमाचरन्ति तथैवोदीर्यते तथा—'अन्यथा वेति, इदमुक्तं भवति—किञ्चित्कर्म तद्भव एव विपाकं ददाति किञ्चिच्च जन्मान्तरे, यथा—मृगापुत्रस्य दुःखविपाकाख्ये विपाकश्रुताङ्गश्रुतस्कन्धे कथितमिति, दीर्घकालस्थितिकं लपरजन्मान्तरितं वेद्यते, येन प्रकारेण सकृत्तथैवानेकशो वा, यदिवाऽन्येन प्रकारेण सकृत्सहस्रशो वा शिरश्छेदादिकं हस्तपादच्छेदादिकं चानुभूयत इति, तदेवं ते कुशीला आयतदण्डाश्चतुर्गतिकसंसारमापन्ना अरहट्टघटीयन्त्रन्यायेन संसारं पर्यटन्तः 'परं परं' प्रकृष्टं प्रकृष्टं दुःखमनुभवन्ति, जन्मान्तरकृतं कर्मानुभवन्तश्चैकमार्तध्यानोपहता अपरं बध्नन्ति वेदयन्ति च, दुष्टं नीतानि दुर्नीतानि-दुष्कृतानि, न हि स्वकृतस्य कर्मणो विनाशोऽस्तीतिभावः, तदुक्तम्—"मा होहि रे विसण्णो जीव ! तुमं विमणदुम्मणो दीणो । णहु चिंतिएण फिट्टइ तं दुक्खं जं पुरा रइयं ॥ १ ॥ अह पविससि पायालं अडविं व दरिं गुहं समुद्दं वा । पुव्वकयाउ न चुक्कसि अप्पाणं घायसे जइवि ॥ २ ॥" ॥ ४ ॥ एवं तावदोघतः कुशीलाः प्रतिपादिताः, तदधुना पाषण्डिकानधिकृत्याह—

१ मा भव रे विषण्णो जीव ! त्वं विमना दुर्मना दीनः । नैव चिन्तितेन स्फेटते तदुःखं यत्पुरा रचितं ॥ १ ॥ २ यदि प्रविशसि पातालं अटवीं वा दरीं गुहां समुद्रं वा । पूर्वकृताच्चैव भ्रश्यसि आत्मानं घातयसि यद्यपि ॥ १ ॥

सूत्रकृताङ्गशीलाङ्काचार्यावृत्तियुतं ॥१५६॥

७ कुशील-परिभाषा.

जे मायरं वा पियरं च हिच्चा, समणव्वए अगणिं समारभिज्जा ।
अहाहु से लोए कुसीलधम्मे, भूताइं जे हिंसति आयसाते ॥ ५ ॥
उज्जालओ पाण निवातएज्जा, निव्वावओ अगणि निवायवेज्जा ।
तम्हा उ मेहावि समिक्ख धम्मं, ण पंडिए अगणिं समारभिज्जा ॥ ६ ॥

'ये' केचनाविदितपरमार्था धर्मार्थमुत्थिता मातरं पितरं च त्यक्त्वा, मातापित्रोर्दुस्त्यजत्वात् तदुपादानमन्यथा भ्रातृपुत्रादिकमपि त्यक्त्वेति द्रष्टव्यं, श्रमणव्रते किल वयं समुपस्थिता इत्येवमभ्युपगम्याग्निकायं समारभन्ते, पचनपाचनादिप्रकारेण कृतकारितानुमत्यौद्देशिकादिपरिभोगाच्चाग्निकायसमारम्भं कुर्युरित्यर्थः, अथेति वाक्योपन्यासार्थः, 'आहु' रिति तीर्थकृद्गणधरादय एवमुक्तवन्तः यथा सोऽयं पाषण्डिको लोको गृहस्थलोको वाऽग्निकायसमारम्भात् कुशीलः-कुत्सितशीलो धर्मो यस्य स कुशीलधर्मा, अयं किम्भूत इति दर्शयति—अभूवन् भवन्ति भविष्यन्तीति भूतानि-प्राणिनस्तान्यात्मसुखार्थं 'हिनस्ति' व्यापादयति, तथाहि-पञ्चाग्नितपसा निष्टप्तदेहास्तथाऽग्निहोत्रादिकया च क्रियया पाषण्डिकाः स्वर्गावाप्तिमिच्छन्तीति, तथा लौकिकाः पचनपाचनादिप्रकारेणाग्निकायं समारभमाणाः सुखमभिलषन्तीति ॥ ५ ॥ अग्निकायसमारम्भे च यथा प्राणातिपातो भवति तथा दर्शयितुमाह-तपनतापनप्रकाशादिहेतुं काष्ठादिसमारम्भेण योऽग्निकायं समारभते सोऽग्निकायमपरांश्च पृथिव्याद्याश्रितान् स्थावरांस्त्रसांश्च प्राणिनो निपातयेत्, त्रिभ्यो वा मनोवाक्कायेभ्य आयुर्बलेन्द्रियेभ्यो वा पातयेच्चिपातयेत् (त्रिपातयेत्), तथाऽग्निकायमुदकादिना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'निर्वापयन्' विध्यापयंस्तदाश्रितानन्यांश्च प्राणिनो निपातयेन्निपातयेद्वा तत्रोज्ज्वालकनिर्वापकयोर्योऽग्निकायमुज्ज्वलयति स बहूनामन्यकायानां समारम्भकः, तथा चागमः—"दो भंते! पुरिसा अन्नमन्नेण सद्धिं अगणिकायं समारभंति, तत्थ णं एगे पुरिसे अगणिकायं उज्जालेइ एगे णं पुरिसे अगणिकायं निव्वावेइ, तेसिं भंते! पुरिसाणं कयरे पुरिसे महाकम्मतराए कयरे वा पुरिसे अप्पकम्मतराए?, गोयमा! तत्थ णं जे से पुरिसे अगणिकायं उज्जालेइ से णं पुरिसे बहुतरागं पुढविकायं समारभति, एवं आउकायं वाउकायं वणस्सइकायं तसकायं अप्पतरागं अगणिकायं समारभइ, तत्थ णं जे से पुरिसे अगणिकायं निव्वावेइ से णं पुरिसे अप्पतरागं पुढविकायं समारभइ जाव अप्पतरागं तसकायं समारभइ बहुतरागं अगणिकायं समारभइ, से एतेणं अट्ठेणं गोयमा! एवं वुच्चइ" ॥ अपि चोक्तम्—"[1]भूयाणं एसमाघाओ, हव्ववाहो ण संसओ" इत्यादि। यस्मादेवं तस्मात् 'मेधावी' सदसद्विवेकः सश्रुतिकः समीक्ष्य धर्मं पापाद्दीनः पण्डितो नाग्निकायं समारभते, स एव च परमार्थतः पण्डितो योऽग्निकायसमारम्भकृतात् पापान्निवर्तत इति ॥ ६ ॥ कथमग्निकायसमारम्भेणापरप्राणिवधो भवतीत्याशङ्क्याह—

पुढवीवि जीवा आऊवि जीवा, पाणा य संपाइम संपयंति। संसेयया कट्ठसमस्सिया य, एते दहे अगणि समारभंते ॥ ७ ॥ हरियाणि भूताणि विलंबगाणि, आहार देहा य पुढो सियाई।

सूत्रकृ. १०

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं

॥१५७॥

---

१ भूतानामेष आघातो हव्यवाहो न संशयः ॥

जे छिंदती आयसुहं पडुच्च, पागब्भि पाणे बहुणं तिवाती ॥ ८ ॥ जातिं च वुद्धिं च विणासयंते, बीयाइ अस्संजय आयदंडे। अहाहु से लोए अणज्जधम्मे, बीयाइ जे हिंसति आयसाते ॥ ९ ॥ गब्भाइ मिज्जंति बुयाबुयाणा, णरा परे पंचसिहा कुमारा। जुवाणगा मज्झिम थेरगा य, (पाठांतरे पोरुसा य) चयंति ते आउखए पलीणा ॥ १० ॥

७ कुशीलपरिभाषा.

॥१५७॥

न केवलं पृथिव्याश्रिता द्वीन्द्रियादयो जीवा यापि च पृथ्वी—मृल्लक्षणा असावपि जीवाः, तथा आपश्च—द्रवलक्षणा जीवास्तदाश्रिताश्च प्राणाः 'सम्पातिमाः' शलभादयस्तत्र सम्पतन्ति, तथा 'संस्वेदजाः' करीषादिष्विन्धनेषु घुणपिपीलिकाकृम्यादयः काष्ठाद्याश्रिताश्च ये केचन 'एतान्' स्थावरजङ्गमान् प्राणिनः स दहेद् योऽग्निकायं समारभेत, ततोऽग्निकायसमारम्भो महादोषायेति ॥ ७ ॥ एवं तावदग्निकायसमारम्भकास्तापसाः तथा पाकादिनिवृत्ताः शाक्यादयश्चापदिष्टाः, साम्प्रतं ते चान्ये वनस्पतिसमारम्भादनिवृत्ताः परामृश्यन्ते इत्याह—'हरितानि' दूर्वाङ्कुरादीन्येतान्यप्याहारादेर्वृद्धिदर्शनात् 'भूतानि' जीवाः तथा 'विलम्बकानीति' जीवाकारं यान्ति विलम्बन्ति—धारयन्ति, तथाहि—कललार्बुदमांसपेश्यङ्गशैशवबालकुमारयुवमध्यमस्थविरावस्थातो मनुष्यो भवति, एवं हरितान्यपि शाल्यादीनि जातान्यभिनवानि संजातरसानि यौवनवन्ति परिपक्वानि जीर्णानि परिशुष्काणि मृतानि तथा वृक्षा अप्यङ्कुरावस्थायां जाता इत्युपदिश्यन्ते मूलस्कन्धशाखाप्रशाखादिभिर्विशेषैः परिवर्धमाना युवानः पोता इत्युपदिश्यन्त इत्यादि शेषास्वप्यवस्थास्वायोज्यं, तदेवं हरितादीन्यपि जीवाकारं विलम्बयन्ति, तत एतानि मूलस्कन्धशाखापत्रपुष्पादिषु स्थानेषु 'पृथक्' प्रत्येकं 'श्रितानि' व्यवस्थितानि, न तु मूलादिषु सर्वेष्वपि समुदितेषु एक एव जीवः, एतानि च भूतानि सङ्ख्येयासङ्ख्येयानन्तभेदभिन्नानि वनस्पतिकायाश्रितान्याहारार्थं देहोपचयार्थं देहक्षतसंरोहणार्थं वाऽऽत्मसुखं 'प्रतीत्य' आश्रित्य यच्छिनत्ति स 'प्रागल्भ्यात्' धार्ष्ट्यावष्टम्भाद्बहूनां प्राणिनामतिपाती भवति, तदतिपाताच्च निरनुक्रोशतया न धर्मो नाप्यात्मसुखमित्युक्तं भवति ॥ ८ ॥ किञ्च—'जातिम्' उत्पत्तिं तथा अङ्कुरपत्रमूलस्कन्धशाखाप्रशाखाभेदेन वृद्धिं च विनाशयन् बीजानि च तत्फलानि विनाशयन् हरितानि छिनत्तीति, 'असंयतः' गृहस्थः प्रव्रजितो वा तत्कर्मकारी गृहस्थ एव, स च हरितच्छेदविधाय्यात्मानं दण्डयतीत्यात्मदण्डः, स हि परमार्थतः परोपघातेनात्मानमेवोपहन्ति, अथशब्दो वाक्यालङ्कारे 'आहुः' एवमुक्तवन्तः, किमुक्तवन्त इति दर्शयति—यो हरितादिच्छेदको निरनुक्रोशः 'सः' अस्मिन् लोके 'अनार्यधर्मा' क्रूरकर्मकारी भवतीत्यर्थः, स च क एवम्भूतो यो धर्मापदेशेनात्मसुखार्थं वा बीजानि अस्य चोपलक्षणार्थत्वात् वनस्पतिकायं हिनस्ति स पाषण्डिकलोकोऽन्यो वाऽनार्यधर्मा भवतीति सम्बन्धः ॥९॥ साम्प्रतं हरितच्छेदकर्मविपाकमाह—इह वनस्पतिकायोपमर्दकाः बहुषु जन्मसु गर्भादिकास्ववस्थासु कललार्बुदमांसपेश्यङ्गरूपासु म्रियन्ते, तथा 'ब्रुवन्तोऽब्रुवन्तश्च' व्यक्तवाचोऽव्यक्तवाचश्च तथा परे नराः पञ्चशिखाः कुमाराः सन्तो म्रियन्ते, तथा युवानो मध्यमवयसः स्थविराश्च कचित्पाठो 'मज्झिमपोरुसा' य'त्ति तत्र 'मध्यमा' मध्यमवयसः 'पोरुसा य'त्ति पुरुषाणां चरमावस्थां प्राप्ता अत्यन्तवृद्धा एवेतियावत्, तदेवं सर्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वप्यवस्थासु बीजादीनामुपमर्दकाः सायुषः क्षये प्रलीनाः सन्तो देहं त्यजन्तीति, एवमपरस्थावरजङ्गमोपमर्दकारिणामप्यनियतायुष्कतमायोजनीयम् ॥ १० ॥ किञ्चान्यत्—

संबुज्झहा जंतवो! माणुसत्तं, दट्ठुं भयं बालिसेणं अलंभो । एगंतदुक्खे जरिए व लोए, सकम्मुणा विप्परियासुवेइ ॥ ११ ॥ इहेग मूढा पवयंति मोक्खं, आहारसंपज्जणवज्जणेणं । एगे य सीओदगसेवणेणं, हुएण एगे पवयंति मोक्खं ॥१२॥ पाओसिणाणादिसु णत्थि मोक्खो, खारस्स लोणस्स अणासएणं । ते मज्जमंसं लसणं च भोच्चा, अन्नत्थ वासं परिकप्पयंति ॥१३॥ उदगेण जे सिद्धिमुदाहरंति, सायं च पायं उदगं फुसंता । उदगस्स फासेण सिया य सिद्धी, सिज्झिंसु पाणा बहवे दगंसि ॥ १४ ॥

हे ! 'जन्तवः' प्राणिनः ! सम्बुध्यध्वं यूयं, न हि कुशीलपाषण्डिकलोकत्राणाय भवति, धर्मं च सुदुर्लभत्वेन सम्बुध्यध्वं, तथा चोक्तम्—"माणुस्सखेत्तजाई कुलरूवारोग्गमाउयं बुद्धी । सवणोग्गहसद्धा संजमो य लोगंमि दुलहाई ॥ १ ॥" तदेवमकृतधर्माणां मनुष्यत्वमतिदुर्लभमित्यवगम्य तथा जातिजरामरणरोगशोकादीनि नरकतिर्यक्षु च तीव्रदुःखतया भयं दृष्ट्वा तथा—

१ मानुष्यं क्षेत्रं जातिः कुलं रूपं आरोग्यं आयुः बुद्धिः श्रवणमवग्रहः श्रद्धा संयमश्च लोके दुर्लभानि ॥ १ ॥

'बालिशेन' अज्ञेन सदसद्विवेकस्यालम्भ इत्येतच्चावगम्य तथा निश्चयनयमवगम्य एकान्तदुःखोऽयं ज्वरित इव 'लोकः' संसारिप्राणिगणः, तथा चोक्तम्—"जम्मं दुक्खं जरा दुक्खं, रोगा य मरणाणि य । अहो दुक्खो हु संसारो, जत्थ कीसंति पाणिणो ॥ ॥ १ ॥" तथा—"तण्हाइयस्स पाणं कूरो छुहियस्स भुज्जए तित्ती । दुक्खसयसंपउत्तं जरियमिव जगं कलयलेइ ॥१॥" इति, अत्र चैवम्भूते लोके अनार्यकर्मकारी स्वकर्मणा 'विपर्यासमुपैति' सुखार्थी प्राण्युपमर्दं कुर्वन् दुःखं प्राप्नोति, यदिवा मोक्षार्थी संसारं पर्यटतीति ॥ ११ ॥ उक्तः कुशीलविपाकोऽधुना तद्दर्शनान्यभिधीयन्ते—'इहे'ति मनुष्यलोके मोक्षगमनाधिकारे वा, एके केचन 'मूढा' अज्ञानाऽऽच्छादितमतयः परैश्च मोहिताः प्रकर्षेण वदन्ति प्रवदन्ति—प्रतिपादयन्ति, किं तत् ?—'मोक्षं' मोक्षावाप्तिं, केनेति दर्शयति—आहियत इत्याहार—ओदनादिस्तस्य सम्पद्—रसपुष्टिस्तां जनयतीत्याहारसम्पज्जननं—लवणं, तेन आहारस्य रसपुष्टिः क्रियते, तस्य वर्जनं तेनाऽऽहारसम्पज्जननवर्जनेन—लवणवर्जनेन मोक्षं वदन्ति, पाठान्तरं वा 'आहारसपंचयवज्जणेण' आहारेण सह लवणपञ्चकमाहारसपञ्चकं, लवणपञ्चकं चेदं, तद्यथा—सैंधवं सौवर्चलं विडं रौमं सामुद्रं चेति, लवणेन हि सर्वरसानामभिव्यक्तिर्भवति, तथा चोक्तम्—"लवणविहूणा य रसा चक्खुविहूणा य इंदियग्गामा । धम्मो दयाय रहिओ सोक्खं संतोसरहियं नो ॥ १ ॥" तथा 'लवणं रसानां तैलं स्नेहानां घृतं मेध्यानां'मिति, तदेवम्भूतलवणपरिवर्जनेन रसपरि-

१ कर्मोदयसंपादितसुखादिपरिणामानां तन्मते दुःखरूपत्वात् । २ जन्म दुःखं जरा दुःखं रोगाश्च मरणं च अहो दुःखः एव संसारः यत्र क्लिश्यन्ति जन्तवः ॥ ३ तृष्णार्दितस्य पानं क्रूरः क्षुधितस्य भुक्तौ तृप्तिः दुःखशतसम्प्रयुक्तं ज्वरितमिव जगत्कलकलति ॥ १ ॥ ४ लवणविहीनाश्च रसाश्चक्षुर्विहीनाश्चेन्द्रियग्रामाः । धर्मो दयया रहितः सौख्यं सन्तोषरहितं न ॥ १ ॥

त्याग एव कृतो भवति, तस्यागाच्च मोक्षावाप्तिरित्येवं केचन मूढाः प्रतिपादयन्ति, पाठान्तरं वा 'आहारओ पंचकवज्जणेणं' आहारत इति ल्यब्लोपे कर्मणि पञ्चमी आहारमाश्रित्य पञ्चकं वर्जयन्ति, तद्यथा—लसुणं पलाण्डुः करभीक्षीरं गोमांसं मद्यं चेत्येतत्पञ्चकवर्जनेन मोक्षं प्रवदन्ति, तथैके 'वारिभद्रकादयो' भागवतविशेषाः 'शीतोदकसेवनेन' सचित्ताप्कायपरिभोगेन मोक्षं प्रवदन्ति, उत्पत्तिं च ते अभिदधति—यथोदकं बाह्यमलमपनयति एवमान्तरमपि, वस्त्रादेश्च यथोदकाच्छुद्धिरुपजायते एवं बाह्यशुद्धिसामर्थ्यदर्शनादान्तरापि शुद्धिरुदकादेवेति मन्यन्ते, तथैके तापसब्राह्मणादयो हुतेन मोक्षं प्रतिपादयन्ति, ये किल स्वर्गादिफलमनाशंस्य समिधाघृतादिभिर्हव्यविशेषैर्हुताशनं तर्पयन्ति ते मोक्षायाग्निहोत्रं जुहति शेषास्त्वभ्युदयायेति, युक्तिं चात्र ते आहुः—यथाऽग्निः सुवर्णादीनां मलं दहत्येवं दहनसामर्थ्यदर्शनादात्मनोऽप्यान्तरं पापमिति ॥ १२ ॥ तेषामसम्बद्धप्रलापिनामुत्तरदानायाह—'प्रातः स्नानादिषु नास्ति मोक्ष' इति प्रत्यूषजलावगाहनेन निःशीलानां मोक्षो न भवति, आदिग्रहणात् हस्तपादादिप्रक्षालनं गृह्यते, तथाहि—उदकपरिभोगेन तदाश्रितजीवानामुपमर्दः समुपजायते, न च जीवोपमर्दान्मोक्षावाप्तिरिति, न चैकान्तेनोदकं बाह्यमलस्याप्यपनयने समर्थम्, अथापि स्यात्तथाप्यान्तरं मलं न शोधयति, भावशुद्ध्या तच्छुद्धेः, अथ भावरहितस्यापि तच्छुद्धिः स्यात् ततो मत्स्यबन्धादीनामपि जलाभिषेकेण मुक्त्यवाप्तिः स्यात्, तथा—'क्षारस्य' पञ्चप्रकारस्यापि लवणस्य 'अनशनेन' अपरिभोगेन मोक्षो नास्ति, तथाहि—लवणपरिभोगरहितानां मोक्षो भवतीत्ययुक्तिकमेतत् न चायमेकान्तो लवणमेव रसपुष्टिजनकमिति, क्षीरशर्करादिभिर्व्यभिचारात्, अपिचासौ प्रष्टव्यः—किं द्रव्यतो लवणवर्जनेन मोक्षावाप्तिः उत भावतः ?, यदि

१ ०कादेरेवेति प्र० । २ पारिभाषिकलवणमात्रप्रतिपत्तिनिरासाय क्षारेति, अत एव पञ्चप्रकारस्यापीति वृत्तिः । ३ चणकादेरपि क्षारादिमत्त्वाल्लवणेति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यतस्ततो लवणरहितदेशे सर्वेषां मोक्षः स्यात्, न चैवं दृष्टमिष्टं वा, अथ भावतस्ततो भाव एव प्रधानं किं लवणवर्जनेनेति, तथा 'ते' मूढा मद्यमांसं लशुनादिकं च भुक्त्वा 'अन्यत्र' मोक्षादन्यत्र संसारे वासम्—अवस्थानं तथाविधानुष्ठानसद्भावात् सम्यग्दर्शनज्ञानचारित्ररूपमोक्षमार्गस्याननुष्ठानाच्च 'परिकल्पयन्ति' समन्तान्निष्पादयन्तीति ॥ १३ ॥ साम्प्रतं विशेषेण परिजिहीर्षुराह—तथा ये केचन मूढा 'उदकेन' शीतवारिणा 'सिद्धिं' परलोकम् 'उदाहरन्ति' प्रतिपादयन्ति—'सायम्' अपराह्णे विकाले वा 'प्रातश्च' प्रत्युषसि च आद्यन्तग्रहणात् मध्याह्ने च तदेवं सन्ध्यात्रयेऽप्युदकं स्पृशन्तः स्नानादिकां क्रियां जलेन कुर्वन्तः प्राणिनो विशिष्टां गतिमाप्नुवन्तीति केचनोदाहरन्ति, एतच्चासम्यक्, यतो यद्युदकस्पर्शमात्रेण सिद्धिः स्यात् तत उदकसमाश्रिता मत्स्यबन्धादयः क्रूरकर्माणो निरनुक्रोशा बहवः प्राणिनः सिद्ध्येयुरिति, यदपि तैरुच्यते—बाह्यमलापनयनसामर्थ्यमुदकस्य दृष्टमिति तदपि विचार्यमाणं न घटते, यतो यथोदकमनिष्टमलमपनयत्येवमभिमतमप्यङ्गरागं कुङ्कुमादिकमपनयति, ततश्च पुण्यस्यापनयनादिष्टविघातकृद्विरुद्धः स्यात्, किञ्च—यतीनां ब्रह्मचारिणामुदकस्नानं दोषायैव, तथा चोक्तम्—"स्नानं मददर्पकरं, कामाङ्गं प्रथमं स्मृतम् । तस्मात्कामं परित्यज्य, न ते स्नान्ति दमे रताः ॥ १ ॥" अपिच—"नोदकक्लिन्नगात्रो हि, स्नात इत्यभिधीयते । स स्नातो यो व्रतस्नातः, स बाह्याभ्यन्तरः शुचिः ॥ १ ॥" ॥ १४ ॥ किञ्च—

मच्छा य कुम्मा य सिरीसिवा य, मग्गू य उट्टा (ट्टा) दगरक्खसा य। अट्टाणमेयं कुसला वयंति,

---

१ अन्येषामपि भावाशुद्धयापादकानां वर्जनीयत्वात्, मद्यमांसादिभोजित्वं वक्ष्यत्यग्रे ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१६०॥

उदगेण जे सिद्धिमुदाहरंति ॥ १५ ॥ उदयं जइ कम्ममलं हरेज्जा, एवं सुहं इच्छामित्तमेव । अंधं व णेयारमणुस्सरित्ता, पाणाणि चेवं विणिहंति मंदा ॥ १६ ॥ पावाइं कम्माइं पकुव्वतो हि, सिओदगं तू जइ तं हरिज्जा । सिज्झिंसु एगे दगसत्तघाती, मुसं वयंते जलसिद्धिमाहु ॥ १७ ॥ हुतेण जे सिद्धिमुदाहरंति, सायं च पायं अगणिं फुसंता । एवं सिया सिद्धि हवेज्ज तम्हा, अगणिं फुसंताण कुकम्मिणंपि ॥ १८ ॥

७ कुशीलपरिभाषा.

यदि जलसम्पर्कात्सिद्धिः स्यात् ततो ये सततमुदकावगाहिनो मत्स्याश्च कूर्माश्च सरीसृपाश्च तथा मद्गवः तथोट्टा—जलचरविशेषाः तथोदकराक्षसा—जलमानुषाकृतयो जलचरविशेषा एते प्रथमं सिद्ध्येयुः, न चैतदृष्टमिष्टं वा, ततश्च ये उदकेन सिद्धिमुदाहरन्त्येतद् 'अस्थानम्' अयुक्तम्—असाम्प्रतं 'कुशला' निपुणा मोक्षमार्गाभिज्ञा वदन्ति ॥ १५ ॥ किञ्चान्यत्—यद्युदकं कर्ममलमपहरेदेवं शुभमपि पुण्यमपहरेत्, अथ पुण्यं नापहरेदेवं कर्ममलमपि नापहरेत्, अत इच्छामात्रमेवैतद्यदुच्यते—जलं कर्मापहारीति, एवमपि व्यवस्थिते ये स्नानादिकाः क्रियाः स्रातमार्गमनुसरन्तः कुर्वन्ति ते यथा जात्यन्धा अपरं जात्यन्धमेव नेतारमनुसृत्य गच्छन्तः कुपथश्रितयो भवन्ति नाभिप्रेतं स्थानमवाप्नुवन्ति एवं स्रातमार्गानुसारिणो जलशौचपरायणा 'मन्दा' अज्ञाः कर्तव्याकर्तव्यविवेकविकलाः प्राणिन एव तन्मयान् तदाश्रितांश्च पूतरकादीन् 'विनिघ्नन्ति' व्यापादयन्ति, अवश्यं जलक्रियया प्राणव्यपरोपणस्य सम्भवादिति ॥ १६ ॥ अपिच—'पापानि' पापोपादानभूतानि 'कर्माणि' प्राण्युपमर्दकारीणि कुर्वतोऽसुमतो यत्कर्मोपचीयते तत्कर्म यद्युदकमपहरेत् यद्येवं स्यात् तर्हि हिः यस्मादर्थे यस्मात्प्राण्युपमर्देन कर्मोपादीयते जलावगाहनाच्चापगच्छति तस्मादुदकसत्त्वघातिनः पापभूयिष्ठा अप्येवं सिद्ध्येयुः, न चैतदृष्टमिष्टं वा, तस्माद्ये जलावगाहनात्सिद्धिमाहुः ते मृषा वदन्ति ॥ १७ ॥ किञ्चान्यत्—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यस्माद्वाक्यात् 'ये' केचन मूढा 'हुतेन' अग्नौ हव्यप्रक्षेपेण 'सिद्धिं' सुगतिगमनादिकां स्वर्गावाप्तिलक्षणाम् 'उदाहरन्ति' प्रतिपादयन्ति, कथम्भूताः?—'सायम्' अपराह्णे विकाले वा 'प्रातश्च' प्रत्युषसि अग्निं 'स्पृशन्तः' यथेष्टैर्हव्यैरग्निं तर्पयन्तस्तत एव यथेष्टगतिमभिलषन्ति, आहुश्चैवं ते यथा—अग्निकार्यात्स्वादेव सिद्धिरिति, तत्र च यद्येवमग्निस्पर्शेन सिद्धिर्भवेत् ततस्तस्मादग्निं संस्पृशतां 'कुकर्मिणाम्' अङ्गारदाहककुम्भकारायस्कारादीनां सिद्धिः स्यात्, यदपि च मन्त्रपूतादिकं तैरुदाहियते तदपि च निरन्तराः सुहृदः प्रत्येष्यन्ति, यतः कुकर्मिणामप्यग्निकार्ये भस्मापादनमग्निहोत्रिकादीनामपि भस्मसात्करणमिति नातिरिच्यते कुकर्मिभ्योऽग्निहोत्रादिकं कर्मेति, यदप्युच्यते—अग्निमुखा वै देवाः, एतदपि युक्तिविकलत्वात् वाङ्मात्रमेव, विष्ठादिभक्षणेन चाग्नेस्तेषां बहुतरदोषोत्पत्तेरिति ॥ १८ ॥ उक्तानि पृथक् कुशीलदर्शनानि, अयमपरस्तेषां सामान्योपालम्भ इत्याह—

अपरिक्ख दिट्ठं ण हु एव सिद्धी, एहिंति ते घायमबुज्झमाणा । भूएहिं जाणं पडिलेह सातं, विज्जं गहायं तसथावरेहिं ॥ १९ ॥ थणंति लुप्पंति तसंति कम्मी, पुढो जगा परिसंखाय भि-

॥१६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्खू । तम्हा विऊ विरतो आयगुत्ते, दट्ठुं तसे या पडिसंहरेज्जा ॥ २० ॥ जे धम्मलद्धं विणिहाय भुंजे, वियडेण साहट्टु य जे सिणाइं । जे धोवती लूसयतीव वत्थं, अहाहु से णागणियस्स दूरे ॥ २१ ॥ कम्मं परिन्नाय दगंसि धीरे, वियडेण जीविज्ज य आदिमोक्खं । से वीयकंदाइ अभुंजमाणे, विरते सिणाणाइसु इत्थियासु ॥ २२ ॥

यैर्मुग्धबुधिभिरुदकसम्पर्केणाग्निहोत्रेण वा सिद्धिरभिहिता तैः 'अपरीक्ष्य दृष्टमेतत्' युक्तिविकलमभिहितमेतत्, किमिति ? यतो 'नहु' नैव 'एवम्' अनेन प्रकारेण जलावगाहनेन अग्निहोत्रेण वा प्राण्युपमर्दकारिणा सिद्धिरिति, ते च परमार्थमबुद्ध्यमानाः प्राण्युपघातेन पापमेव धर्मबुद्ध्या कुर्वन्तो घात्यन्ते—व्यापाद्यन्ते नानाविधैः प्रकारैर्यस्मिन् प्राणिनः स घातः—संसारस्तमेष्यन्ति, अप्कायतेजःकायसमारम्भेण हि त्रसस्थावराणां प्राणिनामवश्यं भावी विनाशस्तद्विनाशे च संसार एव न सिद्धिरित्यभिप्रायः, यत एवं ततो 'विद्वान्' सदसद्विवेकी यथावस्थिततत्त्वं गृहीत्वा त्रसस्थावरैर्भूतैः—जन्तुभिः कथं साम्प्रतं—सुखमवाप्यत इत्येतत् प्रत्युपेक्ष्य जानीहि—अवबुद्ध्यस्व, एतदुक्तं भवति—सर्वेऽप्यसुमन्तः सुखैषिणो दुःखद्विषो, न च तेषां सुखैषिणां दुःखोत्पादकत्वेन सुखावाप्तिर्भवतीति, यदिवा—'विज्जं गहाय'त्ति विद्यां ज्ञानं गृहीत्वा विवेकमुपादाय त्रसस्थावरैर्भूतैर्जन्तुभिः करणभूतैः 'सातं' सुखं 'प्रत्युपेक्ष्य' पर्यालोच्य 'जानीहि' अवगच्छेति, यत उक्तम्—"पढमं नाणं तओ दया, एव चिट्ठइ सव्व संजए । अन्नाणी किं काही, किंवा णाही छेयपावगं ॥ १ ॥ इत्यादि" ॥१९॥ ये पुनः प्राण्युपमर्देन सातमभिलषन्तीत्यशीलाः कुशीलाश्च ते संसारे एवंविधा अवस्था अनुभवन्तीत्याह—तेजःकायसमारम्भिणो भूतसमारम्भेण सुखमभिलषन्तो नरकादिगतिं गतास्तीव्रदुःखैः पीड्यमाना असह्यवेदनाघातमानसा अशरणाः 'स्तनन्ति' रुदन्ति केवलं करुणमाक्रन्दन्तीतियावत् तथा 'लुप्पंती'ति छिद्यन्ते खड्गादिभिरेवं च कदर्थ्यमानाः 'अस्यन्ति' प्रपलायन्ते, कर्माण्येषां सन्तीति कर्मिणः—सपापा इत्यर्थः, तथा पृथक् 'जगा' इति जन्तव इति, एवं 'परिसङ्ख्याय' ज्ञात्वा भिक्षणशीलो 'भिक्षुः' साधुरित्यर्थः, यस्मात्प्राण्युपमर्दकारिणः संसारान्तर्गता विलुप्यन्ते तस्मात् 'विद्वान्' पण्डितो विरतः पापानुष्ठानादात्मा गुप्तो यस्य सोऽयमात्मगुप्तो मनोवाक्कायगुप्त इत्यर्थः, दृष्ट्वा च त्रसान् चशब्दात्स्थावरांश्च 'दृष्ट्वा' परिज्ञाय तदुपघातकारिणीं क्रियां 'प्रतिसंहरेत्' निवर्तयेदिति ॥ २० ॥ साम्प्रतं स्वयूथ्याः कुशीला अभिधीयन्त इत्याह—'ये' केचन शीतलविहारिणो धर्मेण—बुधिकया लब्धं धर्मलब्धं उद्देशकक्रीतकृतादिदोषरहितमित्यर्थः, तदेवम्भूतमप्याहारजातं 'विनिधाय' व्यवस्थाप्य सन्निधिं कृत्वा भुञ्जन्ते तथा ये 'विकटेन' प्रासुकोदकेनापि सङ्क्षोच्याङ्गानि प्रासुकएव प्रदेशे देशसर्वस्नानं कुर्वन्ति तथा यो वस्त्रं 'धावति' प्रक्षालयति तथा 'लूषयति' शोभार्थं दीर्घमुत्पाटयित्वा ह्रस्वं करोति ह्रस्वं वा सन्धाय दीर्घं करोति एवं लूषयति, तदेवं स्वार्थं परार्थं वा यो वस्त्रं लूषयति, अथासौ 'णागणियस्स'त्ति निर्ग्रन्थभावस्य संयमानुष्ठानस्य दूरे वर्तते, न तस्य संयमो भवतीत्येवं तीर्थंकरगणधरादय आहुरिति ॥ २१ ॥ उक्ताः कुशीलाः, तत्प्रतिपक्षभूताः शीलवन्तः प्रतिपाद्यन्त इत्येतदाह—धिया राजते इति धीरो—बुद्धिमान् 'उदगंसि'त्ति उदकसमारम्भे सति कर्मबन्धो भवति, एवं परिज्ञाय किं कुर्यादित्याह—'विकटेन' प्रासुकोदकेन सौवीरादिना 'जीव्यात्' प्राणसंधारणं कुर्यात्, चशब्दात् अन्येनाप्याहारेण प्रासुकेनैव प्राणवृत्तिं कुर्यात्, आदिः—संसारस्तस्मान्मोक्ष आदिमोक्षः (तं) संसारविमुक्तिं यावदिति, धर्मकारणानां चाऽऽदिभूतं शरीरं तद्विमुक्तिं यावत् यावज्जीवमित्यर्थः, किं चासौ साधुर्बीजकन्दादीन् अभुञ्जानः, आदिग्रहणात् मूलपत्रफलानि गृह्यन्ते, एतान्यप्यप्रक्षिप्तानि परिहरन् विरतो भवति, कुत इति दर्शयति—स्नानाभ्यङ्गोद्वर्तनादिषु क्रियासु निष्प्रतिकर्मशरीरतयाऽन्यासु च चिकित्सादिक्रियासु न वर्तते, तथा स्त्रीषु च विरतः, वस्तिनिरोधग्रहणात् अन्येऽप्याश्रवा गृह्यन्ते, यश्चैवम्भूतः सर्वेभ्योऽप्याश्रवद्वारेभ्यो विरतो नासौ कुशीलदोषैर्युज्यते तद्योगाच्च न संसारे बम्भ्रमीति, ततश्च न दुःखितः स्तनति नापि नानाविधैरुपायैर्विलुप्यत इति ॥ २२ ॥ पुनरपि कुशीलानेवाधिकृत्याह—

जे मायरं च पियरं च हिच्चा, गारं तहा पुत्तपसुं धणं च । कुलाइं जे धावइ साउगाइं, अहाहु से सामणियस्स दूरे ॥ २३ ॥ कुलाइं जे धावइ साउगाइं, आघाति धम्मं उदराणुगिद्धे । अहाहु से आयरियाण सयंसे, जे लावएज्जा असणस्स हेऊ ॥ २४ ॥ णिक्खम्म दीणे परभोयणंमि, मुहमंगलीए उदराणुगिद्धे । नीवारगिद्धेव महावराहे, अदूरए एहिइ घातमेव ॥ २५ ॥

१ प्रथमं ज्ञानं ततो दया एवं तिष्ठति सर्वसंयतेषु अज्ञानी किं करिष्यति किं वाज्ञास्यति छेकपापकं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नस्स पाणस्सिहलोइयस्स, अणुप्पियं भासति सेवमाणे । पासत्थयं चेव कुसीलयं च, निस्सारए होइ जहा पुलाए ॥ २६ ॥

ये केचनापरिणतसम्यग्धर्माणस्त्यक्त्वा मातरं च पितरं च, मातापित्रोर्दुस्त्यजत्वादुपादानं, अतो भ्रातृदुहित्रादिकमपि त्यक्त्वेत्येतदपि द्रष्टव्यं, तथा 'अगारं' गृहं 'पुत्रम्' अपत्यं 'पशुं' हस्त्यश्वरथगोमहिष्यादिकं धनं च त्यक्त्वा सम्यक् प्रव्रज्योत्थानेनोत्थाय-पञ्चमहाव्रतभारस्य स्कन्धं दत्त्वा पुनर्हीनसत्त्वतया रससातादिगौरवगृद्धो यः 'कुलानि' गृहाणि 'स्वादुकानि' स्वादुभोजनवन्ति 'धावति' गच्छति, अयमसौ 'श्रामण्यस्य' श्रमणभावस्य दूरे वर्त्तते एवमाहुस्तीर्थकरगणधरादय इति ॥ २३ ॥ एतदेव विशेषेण दर्शयितुमाह-[ग्रन्थाग्रम् ४७५०] यः कुलानि स्वादुभोजनवन्ति 'धावति' इयर्ति तथा गत्वा धर्ममाख्याति भिक्षार्थं वा प्रविष्टो यद्यस्मै रोचते कथानकसम्बन्धं तत्तस्याख्याति, किम्भूत इति दर्शयति—उदरेऽनुगृद्ध उदरानुगृद्धः-उदरभरणव्यग्रस्तुन्दपरिमृज इत्यर्थः, इदमुक्तं भवति-यो ह्युदरगृद्ध आहारादिनिमित्तं दानश्रद्धकाख्यानि कुलानि गत्वाऽऽख्यायिकाः कथयति स कुशील इति, अथासावाचार्यगुणानामार्यगुणानां वा शतांशे वर्तते शतग्रहणमुपलक्षणं सहस्रांशादेरप्यधो वर्त्तते इति यो ह्यन्नस्य हेतुं-भोजननिमित्तमपरवस्त्रादिनिमित्तं वा आत्मगुणानपरेण 'आलापयेत्' भाषयेत्, असावप्यार्यगुणानां सहस्रांशे वर्तते किमङ्ग पुनर्यः स्वत एवाऽऽत्मप्रशंसां विदधातीति ॥ २४ ॥ किञ्च—यो ह्यात्मीयं धनधान्यहिरण्यादिकं त्यक्त्वा निष्क्रान्तो निष्क्रम्य च 'परभोजने' पराहारविषये 'दीनो' दैन्यमुपगतो जिह्वेन्द्रियवशार्त्तो वन्दिवत् 'मुखमाङ्गलिको' भवति

सूत्रकृ. २८

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं

॥१६३॥

मुखेन मङ्गलानि-प्रशंसावाक्यानि ईदृशस्त्वादृशस्त्वमित्येवं दैन्यभावमुपगतो वक्ति, उक्तं च—"सो एसो जस्स गुणा विचरंतनिवारिया दसदिसासु । इहरा कहासु सुच्चसि पच्चक्खं अज्ज दिट्ठोऽसि ॥ १ ॥" इत्येवमौदर्यं प्रति गृद्धः अध्युपपन्नः, किमिव ?-'नीवारः' सूकरादिमृगभक्ष्यविशेषस्तस्मिन् गृद्ध-आसक्तमना गृहीत्वा च स्वयूथं 'महावराहो' महाकायः सूकरः स चाहारमात्रगृद्धोऽतिसंकटे प्रविष्टः सन् 'अदूर एव' शीघ्रमेव 'घातं' विनाशम् 'एष्यति' प्राप्स्यति, एवकारोऽवधारणे, अवश्यं तस्य विनाश एव नापरा गतिरस्तीति, एवमसावपि कुशील आहारमात्रगृद्धः संसारोदरे पौनःपुन्येन विनाशमेवैति ॥२५॥ किंचान्यत्, स कुशीलोऽन्नस्य पानस्य वा कृतेऽन्यस्य वैहिकार्थस्य वस्त्रादेः कृते 'अनुप्रियं भाषते' यद्यस्य प्रियं तत्तस्य वदतोऽनु-पश्चाद्भाषते अनुभाषते, प्रतिशब्दकवत् सेवकवद्वा राजाद्युक्तमनुवदतीत्यर्थः, तमेव दातारमनुसेवमान आहारमात्रगृद्धः सर्वमेतत्करोतीत्यर्थः, स चैवम्भूतः सदाचारभ्रष्टः पार्श्वस्थभावमेव व्रजति कुशीलतां च गच्छति, तथा निर्गतः-अपगतः सारः-चारित्राख्यो यस्य स निःसारः, यदिवा-निर्गतः सारो निःसारः स विद्यते यस्यासौ निःसारवान्, पुलाक इव निष्कणो भवति यथा-एवमसौ संयमानुष्ठानं निःसारीकरोति, एवंभूतश्चासौ लिङ्गमात्रावशेषो बहूनां स्वयूथ्यानां तिरस्कारपदवीमवाप्नोति, परलोके च निकृष्टानि यातनास्थानान्यवाप्नोति ॥ २६ ॥ उक्ताः कुशीलाः, तत्प्रतिपक्षभूतान् सुशीलान् प्रतिपादयितुमाह—

७ कुशीलपरिभाषा.

अण्णातपिंडेणऽहियासएज्जा, णो पूयणं तवसा आवहेज्जा । सद्देहिं रूवेहिं असज्जमाणं, सव्वेहि

---

१ स एष यस्य गुणाः विचरन्त्यनिवारिता दशदिशासु इतरथा कथासु श्रूयते प्रत्यक्षं अद्य दृष्टोऽसि ॥ १ ॥

कामेहि विणीय गेहिं ॥ २७ ॥ सव्वाइं संगाइं अइच्च धीरे, सव्वाइं दुक्खाइं तितिक्खमाणे । अखिले अगिद्धे अणिएयचारी, अभयंकरे भिक्खु अणाविलप्पा ॥ २८ ॥ भारस्स जाता मुणि भुंजएज्जा, कंखेज्ज पावस्स विवेग भिक्खू । दुक्खेण पुट्ठे धुयमाइएज्जा, संगामसीसे व परं दमेज्जा ॥ २९ ॥ अवि हम्ममाणे फलगावतट्ठी, समागमं कंखति अंतकस्स । णिधूय कम्मं ण पवंचुवेइ, अक्खक्खए वा सगडं तिवेमि ॥ ३० ॥ इति श्रीकुसीलपरिभासियं सत्तममज्झयणं समत्तं ॥ (गाथाग्र० ४०२)

॥१६३॥

अज्ञातश्चासौ पिण्डश्चाज्ञातपिण्डः अन्तप्रान्त इत्यर्थः, अज्ञातेभ्यो वा-पूर्वापरासंस्तुतेभ्यो वा पिण्डोऽज्ञातपिण्डोऽज्ञातोञ्छवृत्त्या लब्धस्तेनात्मानम् 'अधिसहेत्' वर्तयेत्--पालयेत्, एतदुक्तं भवति—अन्तप्रान्तेन लब्धेनालब्धेन वा न दैन्यं कुर्यात्, नाप्युत्कृष्टेन लब्धेन मदं विदध्यात्, नापि तपसा पूजनसत्कारमावहेत्, न पूजनसत्कारनिमित्तं तपः कुर्यादित्यर्थः, यदिवा पूजासत्कारनिमित्तत्वेन तथाविधार्थित्वेन वा महतापि केनचित्तपो मुक्तिहेतुकं न निःसारं कुर्यात्, तदुक्तम्—"परं लोकाधिकं धाम, तपःश्रुतमिति द्वयम् । तदेवार्थित्वनिर्लुप्तसारं तृणलवायते ॥ १ ॥" ॥ यथा च रसेषु गृद्धिं न कुर्यात्, एवं शब्दादिष्वपीति दर्शयति—'शब्दैः' वेणुवीणादिभिराक्षिप्तः संस्तेषु 'असज्जन्' आसक्तिमकुर्वन् कर्कशेषु च द्वेषमगच्छन् तथा रूपैरपि मनोज्ञेतरै

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागद्वेषमकुर्वन् एवं सर्वैरपि 'कामैः' इच्छामदनरूपैः सर्वेभ्यो वा कामेभ्यो गृद्धिं 'विनीय' अपनीय संयममनुपालयेदिति, सर्वथा मनोज्ञेतरेषु विषयेषु रागद्वेषं न कुर्यात्, तथा चोक्तम्—"[1]सद्देसु य भद्दयपावएसु, सोयविसयमुवगएसु । तुट्ठेण व रुट्ठेण व, समणेण सया ण होयव्वं ॥ १ ॥ रूवेसु य भद्दयपावएसु, चक्खुविसयमुवगएसु । तुट्ठेण व रुट्ठेण व समणेण सया ण होयव्वं ॥ २ ॥ गंधेसु य भद्दयपावएसु, घाणविसयमुवगएसु । तुट्ठेण० ॥ ३ ॥ [2]भक्खेसु य भद्दयपावएसु, रसणविसयमुवगएसु । तुट्ठेण व रुट्ठेण व, समणेण सया ण होयव्वं ॥ ४ ॥ [3]फासेसु य भद्दयपावएसु, फासविसयमुवगएसु । तुट्ठेण व रुट्ठेण व, समणेण सयाण होयव्वं ॥ ५ ॥ " ॥ २७ ॥ यथा चेन्द्रियनिरोधो विधेय एवमपरसङ्गनिरोधोऽपि कार्य इति दर्शयति—सर्वान् 'सङ्गान्' संबन्धान् आन्तरान् स्नेहलक्षणान् बाह्यांश्च द्रव्यपरिग्रहलक्षणान् 'अतीत्य' त्यक्त्वा 'धीरो' विवेकी सर्वाणि 'दुःखानि' शारीरमानसानि त्यक्त्वा परीषहोपसर्गजनितानि 'तितिक्षमाणः' अधिसहन् 'अखिलो' ज्ञानदर्शनचारित्रैः सम्पूर्णः तथा कामेष्वगृद्धस्तथा 'अनियतचारी' अप्रतिबद्धविहारी तथा जीवानामभयंकरो भिक्षणशीलो भिक्षुः—साधुः एवम् 'अनाविलो' विषयकषायैरनाकुल आत्मा यस्यासावनाविलात्मा संयममनुपर्वत्तेत इति ॥ २८ ॥ किञ्चान्यत्—संयमभारस्य यात्रार्थं—पञ्चमहाव्रतभारनिर्वाहणार्थं 'मुनिः' कालत्रयवेत्ता 'भुञ्जीत' आहारग्रहणं कुर्वीत, तथा 'पापस्य' कर्मणः पूर्वाचरितस्य 'विवेकं' पृथग्भावं विनाशमाकाङ्क्षन् 'भिक्षुः' साधुरिति, तथा—दुःखयतीति दुःखं—परीषहोपसर्गजनिता पीडा तेन 'स्पृष्टो' व्याप्तः सन् 'धूतं' संयमं मोक्षं वा

१ शब्देषु च भद्रकपापकेषु श्रोत्रविषयमुपगतेषु तुष्टेन वा रुष्टेन वा श्रमणेन सदा न भवितव्यं । २ रूपेषु० चक्षुः । ३ गंधेषु० घ्राण० । ४ भक्ष्येषु रसना० । ५ स्पर्शेषु स्पर्शन० ।

'आददीत' गृह्णीयात्, यथा सुभटः कश्चित् सङ्ग्रामशिरसि शत्रुभिरभिद्रुतः 'परं' शत्रुं दमयति एवं परं—कर्मशत्रुं परीषहोपसर्गाभिद्रुतोऽपि दमयेदिति ॥ अपि च—परीषहोपसर्गैर्हन्यमानोऽपि—पीड्यमानोऽपि सम्यक् सहते, किमिव?—फलकवदपकृष्टः यथा फलकमुभाभ्यामपि पार्श्वाभ्यां तष्टं—घट्टितं सत्तनु भवति अरक्तद्विष्टं वा संभवत्येवमसावपि साधुः सबाह्याभ्यन्तरेण तपसा निष्टप्तदेहस्तनुः—दुर्बलशरीरोऽरक्तद्विष्टश्च, अन्तकस्य—मृत्योः 'समागमं' प्राप्तिम् 'आकाङ्क्षति' अभिलषति, एवं चाष्टप्रकारं कर्म 'निर्धूय' अपनीय न पुनः 'प्रपञ्चं' जातिजरामरणरोगशोकादिकं प्रपञ्चयते बहुधा नटवद्यस्मिन् स प्रपञ्चः—संसारस्तं 'नोपैति' न याति, दृष्टान्तमाह—यथा अक्षस्य 'क्षये' विनाशे सति 'शकटं' गव्यादिकं समविषमपथरूपं प्रपञ्चमुपदृष्टप्रकारणाभावान्नोपयाति, एवमसावपि साधुरष्टप्रकारस्य कर्मणः क्षये संसारप्रपञ्चं नोपयातीति, गतोऽनुगमो, नयाः पूर्ववद्, इतिशब्दः परिसमाप्त्यर्थे ब्रवीमीति पूर्ववत् ॥ ३० ॥ समाप्तं च कुशीलपरिभाषाख्यं सप्तममध्ययनं ॥

अथ अष्टमं श्रीवीर्याध्ययनं प्रारभ्यते ॥

उक्तं सप्तममध्ययनं, साम्प्रतमष्टममारभ्यते—अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने कुशीलास्तत्प्रतिपक्षभूताश्च सुशीलाः प्रतिपादिताः, तेषां च कुशीलत्वं सुशीलत्वं च संयमवीर्यान्तरायोदयात्तत्क्षयोपशमाच्च भवतीत्यतो वीर्यप्रतिपादनायेदमध्ययनमुपदिश्यते, तदनेन संबंधेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि उपक्रमादीनि वक्तव्यानि, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—बालबालपण्डितपण्डितवीर्यभेदात्त्रिविधमपि वीर्यं परिज्ञाय पण्डितवीर्ये यतितव्यमिति, नामनिष्पन्ने तु निक्षेपे वीर्याध्ययनं, वीर्यनिक्षेपाय निर्युक्तिकृदाह—

विरिए छक्कं दव्वे सचित्ताचित्तमीसगं चेव । दुपयचउप्पयअपयं एयं तिविहं तु सचित्तं ॥ ९१ ॥

वीर्ये नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् षोढा निक्षेपः, तत्रापि नामस्थापने क्षुण्णे, द्रव्यवीर्यं द्विधा—आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चानुपयुक्तः, नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तं सचित्ताचित्तमिश्रभेदात्त्रिधा वीर्यं, सचित्तमपि द्विपदचतुष्पदापदभेदात् त्रिविधमेव, तत्र द्विपदानां अर्हच्चक्रवर्त्तिबलदेवादीनां यद्वीर्यं स्त्रीरत्नस्य वा यस्य वा यद्वीर्यं तदिह द्रव्यवीर्यतेन ग्राह्यं, तथा चतुष्पदानामश्वहस्तिरत्नादीनां सिंहव्याघ्रशरभादीनां वा परस्य वा यद्वोढव्ये धावने वा वीर्यं तदिति, तथाऽपदानां गोशीर्षचन्दनप्रभृतीनां शीतोष्णकालयोरुष्णशीतवीर्यपरिणाम इति ॥ अचित्तवीर्यप्रतिपादनायाह—

अचित्तं पुण विरियं आहारावरणपहरणादीसु । जह ओसहीण भणियं विरियं रसवीरियविवागो ॥ ९२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवरणे कवयादी चक्कादीयं च पहरणे होंति । खित्तंमि जंमि खेत्ते काले जं जंमि कालंमि ॥ ९३ ॥

अचित्तद्रव्यवीर्यं त्वाहारावरणप्रहरणेषु यद्वीर्यं तदुच्यते, तत्राऽऽहारवीर्यं 'सद्यः प्राणकरा हृद्या, घृतपूर्णाः कफापहाः' इत्यादि, ओषधीनां च शल्योद्धरणसंरोहणविषापहारमेधाकरणादिकं रसवीर्यं, विपाकवीर्यं च यदुक्तं चिकित्साशास्त्रादौ तदिह ग्राह्यमिति, तथा योनिप्राभृतकान्नानाविधं द्रव्यवीर्यं द्रष्टव्यमिति, तथा-आवरणे कवचादीनां प्रहरणे चक्रादीनां यद्भवति वीर्यं तदुच्यत इति । अधुना क्षेत्रकालवीर्यं गाथापश्चार्धेन दर्शयति-क्षेत्रवीर्यं तु देवकुर्वादिकं क्षेत्रमाश्रित्य सर्वाण्यपि द्रव्याणि तदन्तर्गतान्युत्कृष्टवीर्यवन्ति भवन्ति, यद्वा दुर्गादिकं क्षेत्रमाश्रित्य कस्यचिद्वीर्योल्लासो भवति, यस्मिन्वा क्षेत्रे वीर्यं व्याख्यायते तत्क्षेत्रवीर्यमिति, एवं कालवीर्यमप्येकान्तसुषमादावायोज्यमिति, तथा चोक्तम्-"वर्षासु लवणममृतं शरदि जलं गोपयश्च हेमन्ते । शिशिरे चामलकरसो, घृतं वसन्ते गुडश्चान्ते ॥ १ ॥" तथा-"ग्रीष्मे तुल्यगुडां सुसैन्धवयुतां मेघावनद्धेऽम्बरे, तुल्यां शर्करया शरद्यमलया शुण्ठ्या तुषारागमे । पिप्पल्या शिशिरे वसन्तसमये क्षौद्रेण संयोजितां, पुंसां प्राप्य हरीतकीमिव गदा नश्यन्तु ते शत्रवः ॥१॥" भाववीर्यप्रतिपादनायाह—

भावो जीवस्स सवीरियस्स विरियंमि लद्धिऽणेगविहा । ओरस्सिंदियअज्झप्पिएसु बहुसो बहुविहीयं ॥ ९४ ॥
मणवइकाया आणापाणू संभव तहा य संभव्वे । सोत्तादीणं सद्दादिएसु विसएसु गहणं च ॥ ९५ ॥

'सवीर्यस्य' वीर्यशक्त्युपेतस्य जीवस्य 'वीर्ये' वीर्यविषये अनेकविधा लब्धिः, तामेव गाथापश्चार्द्धेन दर्शयति, तद्यथा-उरसि भवमौरस्सं शारीरबलमित्यर्थः, तथेन्द्रियबलमाध्यात्मिकं बलं बहुशो बहुविधं द्रष्टव्यमिति । एतदेव दर्शयितुमाह—आन्तरेण व्यापारेण गृहीत्वा पुद्गलान् मनोयोग्यान् मनस्त्वेन परिणमयति भाषायोग्यान् भाषात्वेन परिणमयति काययोग्यान् कायत्वेन आनापानयोग्यान् तद्भावेनेति, तथा मनोवाक्कायादीनां तद्भावपरिणतानां यद्वीर्यं-सामर्थ्यं तद्विविधं—सम्भवे सम्भाव्ये च, सम्भवे तावत्तीर्थकृतामनुत्तरोपपातिकानां च सुराणामतीव पटूनि मनोद्रव्याणि भवन्ति, तथाहि—तीर्थकृतामनुत्तरोपपातिकसुरमनःपर्यायज्ञानिप्रश्नव्याकरणस्य द्रव्यमनसैव करणात् अनुत्तरोपपातिकसुराणां च सर्वव्यापारस्यैव मनसा निष्पादनादिति, सम्भाव्ये तु यो हि यमर्थं पटुमतिना श्रोत्रयमानं न शक्नोति साम्प्रतं परिणमयितुं सम्भाव्यते तेष परिकर्म्यमाणः शक्ष्यत्यसुमर्थं परिणमयितुमिति, वाग्वीर्यमपि द्विविधं-सम्भवे सम्भाव्ये च, तत्र सम्भवे तीर्थकृतां योजननिर्हारिणी वाक् सर्वस्वभाषानुगता च तथाऽन्येषामपि क्षीरमध्वास्रवादिलब्धिमतां वाचः सौभाग्यमिति, तथा हंसकोकिलादीनां सम्भवति स्वरमाधुर्यं, सम्भाव्ये तु सम्भाव्यते श्यामायाः स्त्रिया गानमाधुर्यं, तथा चोक्तम्—"सामा गायति महुरं काली गायति खरं च रुक्खं चे"त्यादि, तथा-सम्भावयामः—एनं श्रावकदारकम् अकृतमुखसंस्कारमप्यक्षरेषु यथावदभिलप्स्यन्तेष्विति, तथा सम्भावयामः शुकसारिकादीनां वाचो मानुषभाषापरिणामः, कायवीर्यमप्यौरस्यं यद्यस्य बलं, तदपि द्विविधं—सम्भवे सम्भाव्ये च, संभवे यथा चक्रवर्तिबलदेववासुदेवादीनां यद्बाहुबलादि कायबलं, तद्यथा-कोटिशिला त्रिपृष्ठेन वामकरतलेनोद्धृता, यदिवा—'सोलस रायसहस्सा' इत्यादि यावदपरिमितबला जिनवरेन्द्रा इति, सम्भाव्ये तु सम्भाव्यते तीर्थकरो लोकमलोके कण्डुकवत् प्रक्षेप्तुं तथा मेरुं दण्डवद्बाहूत्सा वसुधां छत्रकवद्धर्त्तुमिति, तथा सम्भाव्यते अन्यतरसुराधिपो जम्बूद्वीपं वामहस्तेन छत्रकवद्धर्त्तुमयत्नेनैव च मन्दरमिति, तथा सम्भाव्यते अय दारकः परिवर्धमानः शिलामेनामुद्धर्त्तुं हस्तिनं दमयितुमश्वं वाहयितुमित्यादि, इन्द्रियबलमपि श्रोत्रेन्द्रियादि स्वविषयग्रहणसमर्थं पञ्चधा एकैकं, द्विविधं-सम्भवे सम्भाव्ये च, सम्भवे यथा श्रोत्रस्य द्वादश योजनानि विषयः, एवं शेषाणामपि यो यस्य विषय इति, सम्भाव्ये तु यस्य कस्यचिदनुपहतेन्द्रियस्य श्रान्तस्य क्षुद्धस्य पिपासितस्य परिग्लानस्य वा अर्थग्रहणासमर्थमपि इन्द्रियं सद्यथोक्तदोषोपशमे तु सति सम्भाव्यते विषयग्रहणायेति । साम्प्रतमाध्यात्मिकं वीर्यं दर्शयितुमाह—

उज्जमधिइधीरत्तं सोंडीरत्तं खमा य गंभीरं । उवओगजोगतवसंजमादियं होइ अज्झप्पो ॥ ९६ ॥

आत्मन्यधीत्यध्यात्मं तत्र भवमाध्यात्मिकम्-आन्तरशक्तिजनितं सात्त्विकमित्यर्थः, तच्चानेकधा-तत्रोद्यमो ज्ञानतपोऽनुष्ठानादिपूत्साहः, एतदपि यथायोगं सम्भवे सम्भाव्ये च योजनीयमिति, धृतिः संयमे स्थैर्यं चित्तसमाधानमिति(यावत्), धीरत्वं परीषहोपसर्गाक्षोभ्यता, शौण्डीर्यं त्यागसम्पन्नता, षट्खण्डमपि भरतं त्यजतश्चक्रवर्तिनो न मनः कम्पते,यदिवाऽऽपद्यविषण्णता, यदिवाविषमेऽपि कर्तव्ये समुपस्थिते पराभियोगमकुर्वन् मयैवैतत्कर्तव्यमित्येवं हर्षायमाणोऽविषण्णो विधत्त इति, क्षमावीर्यं तु परैराक्रुश्यमानोऽपि मनागपि मनसा न क्षोभमुपयाति, भावयति (च तत्त्वं,) तच्चेदम्-"आकुट्टेन मतिमता तत्त्वार्थगवेषणे मतिः कार्या । यदि सत्यं कः कोपः ? स्यादनृतं किं नु कोपेन ? ॥१॥" तथा "अक्कोसहणणमारणधम्मब्भंसाण बालसुलभाणं । लाभं मन्नइ धीरो जहुत्तराणं अभावं (लाभं) मि ॥ १ ॥" गाम्भीर्यवीर्यं नाम परीषहोपसर्गैरधृष्यत्वं, यदिवा यत् मनश्चमत्कारकारिण्यपि स्वानुष्ठाने

१ आक्रोशहननमारणधर्मभ्रंशानां बालसुलभानां लाभं मन्यते धीरो यथोत्तराणामभावे ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनोद्धत्यं, उक्तम् च–"चुलुच्चलेहिं जं होइ ऊणयं रित्तयं कणकणेइ । भरियाइं ण खुब्भंती सुपुरिसविन्नाणभंडाइं ॥१॥" उपयोगवीर्यं साकारानाकारभेदात् द्विविधं, तत्र साकारोपयोगोऽष्टधाऽनाकारश्चतुर्धा तेन चोपयुक्तः स्वविषयस्य द्रव्यक्षेत्रकालभावरूपस्य परिच्छेदं विधत्त इति, तथा योगवीर्यं त्रिविधं मनोवाक्कायभेदात्, तत्र मनोवीर्यमकुशलमनोनिरोधः कुशलमनसश्च प्रवर्तनं, मनसो वा एकतीभावकरणं, मनोवीर्येण हि निर्ग्रन्थसंयताः प्रवृद्धपरिणामा अवस्थितपरिणामाश्च भवन्तीति, वाग्वीर्येण तु भाषमाणोऽपुनरुक्तं निरवद्यं च भाषते, कायवीर्यं तु यस्तु समाहितपाणिपादः कूर्मवदवतिष्ठत इति, तपोवीर्यं द्वादशप्रकारं तपो यद्बलादग्लायन् विधत्त इति, एवं सप्तदशविधे संयमे एकतायाध्यवसितस्य यद्बलात्प्रवृत्तिस्तत्संयमवीर्यं, कथमहमतिचारं संयमे न प्राप्नुयामित्यध्यवसायिनः प्रवृत्तिरित्येवमाद्यध्यात्मवीर्यमित्यादि च भाववीर्यमिति, वीर्यप्रवादपूर्वे चानन्तं वीर्यं प्रतिपादितं, किमिति ?, यतोऽनन्तार्थं पूर्वं भवति, तत्र च वीर्यमेव प्रतिपाद्यते, अनन्तार्थता चातोऽवगन्तव्या, तद्यथा–"सव्वणईणं जा होज्ज वालुया गणणमागया सन्ती । तत्तो बहुयतरागो अत्थो एगस्स पुव्वस्स ॥१॥ सव्वसमुद्दाणं जलं जइ पत्थमियं हविज्ज संकलियं । एत्तो बहुयतरागो अत्थो एगस्स पुव्वस्स ॥२॥" तदेवं पूर्वार्थस्यानन्त्याद्वीर्यस्य च तदर्थत्वादनन्तता वीर्यस्येति। सर्वमप्येतद्वीर्यं त्रिधेति प्रतिपादयितुमाह—

सव्वंपियं तं तिविहं पंडिय बालविरियं च मीसं च । अहखाविं होति दुविहं अगारअणगारियं चेव ॥ ९७ ॥

॥१६७॥

सर्वमप्येतद्भाववीर्यं पण्डितबालमिश्रभेदात् त्रिविधं, तत्रानगाराणां पण्डितवीर्यं बालपण्डितवीर्यं त्वगाराणां गृहस्थानामिति, तत्र

---

१ चुलुच्चुलेइ प्र० । २ उद्धरति यद्भवत्यूनकं रिक्तकं कणकणति भृतानि न क्षुभ्यन्ते सुपुरुषविज्ञानभाण्डानि ॥ १ ॥ ३ सर्वासां नदीनां यावन्तो भवेयुर्बालुका गणनमागताः सत्यः ततो बहुतरोऽर्थ एकस्य पूर्वस्य ॥ १ ॥ ४ सर्वसमुद्राणां जलं यतिप्रमितं तत् भवेत्संकलितं ततो० ॥

यतीनां पण्डितवीर्यं सादिसपर्यवसितं, सर्वविरतिप्रतिपत्तिकाले सादिता सिद्धावस्थायां तदभावात्सान्तं, बालपण्डितवीर्यं तु देशविरतिसद्भावकाले सादि सर्वविरतिसद्भावे तद्भंशे वा सपर्यवसानं, बालवीर्यं त्वविरतिलक्षणमेवाभव्यानामनाद्यपर्यवसितं भव्यानां त्वनादिसपर्यवसितं, सादिसपर्यवसितं तु विरतिभ्रंशात् सादिता पुनर्जघन्यतोऽन्तर्मुहूर्तादुत्कृष्टतोऽपार्द्धपुद्गलपरावर्तात् विरतिसद्भावात् सान्ततेति, साद्यपर्यवसितस्य तृतीयभङ्गकस्य तत्सम्भव एव, यदिवा—पण्डितवीर्यं सर्वविरतिलक्षणं, विरतिरपि चारित्रमोहनीयक्षयक्षयोपशमोपशमलक्षणात्त्रिविधैव, अतो वीर्यमपि त्रिधैव भवति । गतो नामनिष्पन्नो निक्षेपः, तदनु सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदं—

दुहा वेयं सुयक्खायं, वीरियंति पवुच्चई । किं नु वीरस्स वीरत्तं, कहं चेयं पवुच्चई ? ॥ १ ॥
कम्ममेगे पवेदेंति, अकम्मं वावि सुव्वया । एतेहिं दोहि ठाणेहिं, जेहिं दीसंति मच्चिया ॥ २ ॥

द्वे विधे–प्रकारावस्येति द्विविधं–द्विप्रकारं, प्रत्यक्षासन्नवाचित्वात् इदमो यदनन्तरं प्रकर्षेणोच्यते प्रोच्यते वीर्यं तद्भिदं सुष्ठ्वाख्यातं स्वाख्यातं तीर्थकरादिभिः, वा वाक्यालङ्कारे, तत्र 'ईर गतिप्रेरणयोः' विशेषेण ईरयति–प्रेरयति अहितं येन तद्वीर्यं जीवस्य शक्तिविशेष इत्यर्थः, तत्र, किं नु 'वीरस्य' सुभटस्य वीरत्वं ?, केन वा कारणेनासौ वीर इत्यभिधीयते, नुशब्दो वितर्कवाची, एतद्वितर्कयति—किं तद्वीर्यं ?, वीरस्य वा किं तद्वीरत्वमिति ॥१॥ तत्र भेदद्वारेण वीर्यस्वरूपमाचिख्यासुराह—**कम्मं**—क्रियानुष्ठानमित्येतदेके वीर्यमिति प्रवेदयन्ति, यदिवा–कर्माष्टप्रकारं कारणे कार्योपचारात् तदेव वीर्यमिति प्रवेदयन्ति, तथाहि–औदयिकभावनिष्पन्नं

कर्मेत्युपदिश्यते, औदयिकोऽपि च भावः कर्मोदयनिष्पन्न एव बालवीर्यं, द्वितीयभेदस्त्वयं–न विद्यते कर्मोक्षेत्यकर्मा–वीर्यान्तरायक्षयजनितं जीवस्य सहजं वीर्यमित्यर्थः, चशब्दात् चारित्रमोहनीयोपशमक्षयोपशमजनितं च, हे सुव्रता ! एवम्भूतं पण्डितवीर्यं जानीत यूयं । आभ्यामेव द्वाभ्यां स्थानाभ्यां सकर्मकाकर्मकापादितबालपण्डितवीर्याभ्यां व्यवस्थितं वीर्यमित्युच्यते, यकाभ्यां च ययोर्वा व्यवस्थिता मर्त्येषु भवा मर्त्याः 'दिस्संत' इति दृश्यन्तेऽपदिश्यन्ते वा, तथाहि—नानाविधासु क्रियासु प्रवर्तमानमुत्साहबलसंपन्नं मर्त्यं दृष्ट्वा वीर्यवानयं मर्त्य इत्येवमपदिश्यते, तथा तदावारककर्मणः क्षयादनन्तबलयुक्तोऽयं मर्त्य इत्येवमपदिश्यते दृश्यते चेति ॥ २ ॥ इह बालवीर्यं कारणे कार्योपचारात्कर्मैव वीर्यत्वेनाभिहितं, साम्प्रतं कारणे कार्योपचारादेव प्रमादं कर्मत्वेनापदिशन्नाह—

पमायं कम्ममाहंसु, अप्पमायं तहाऽवरं । तब्भावादेसओ वावि, बालं पंडियमेव वा ॥ ३ ॥
सत्थमेगे तु सिक्खंता, अतिवायाय पाणिणं । एगे मंते अहिज्जंति, पाणभूयविहेडिणो ॥ ४ ॥

॥१६८॥

प्रमाद्यन्ति–सदनुष्ठानरहिता भवन्ति प्राणिनो येन स प्रमादो—मद्यादिः, तथा चोक्तम्–"मज्जं विसयकसाया णिद्दा विगहा य पंचमी भणिया । एस पमायपमाओ णिद्दिट्ठो वीयरागेहिं ॥ १ ॥" तमेवम्भूतं प्रमादं कर्मोपादानभूतं कर्म 'आहुः'

---

१ वीर्यप्रवेऽस्मिन्नुदयनिष्पन्नत्वात्, शेषं तत्र्यथैवोत्तरभेदे । २ मद्यं विषयाः कषाया निद्रा विकथा च पंचमी भणिता (एते पंच प्रमादा निर्दिष्टा) एष प्रमादः प्रमादो निर्दिष्टो वीतरागैः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तवन्तस्तीर्थकरादयः, अप्रमादं च तथाऽपरमकर्मकमाहुरिति, एतदुक्तं भवति–प्रमादोपहतस्य कर्म बध्यते, सकर्मणश्च यत्क्रियानुष्ठानं तद्बालवीर्यं, तथाऽप्रमत्तस्य कर्माभावो भवति, एवंविधस्य च पण्डितवीर्यं भवति, एतच्च बालवीर्यं पण्डितवीर्यमिति वा प्रमादवतः सकर्मणो बालवीर्यमप्रमत्तस्याकर्मणः पण्डितवीर्यमित्येवमायोज्यं, 'तब्भावादेसओ वावी'ति तस्य–बालवीर्यस्य कर्मणश्च पण्डितवीर्यस्य वा भावः–सत्ता स तद्भावस्तेनाऽऽदेशो–व्यपदेशः ततः, तद्यथा–बालवीर्यमभव्यानामनादिअपर्यवसितं भव्यानामनादिसपर्यवसितं वा सादिसपर्यवसितं वेति, पण्डितवीर्यं तु सादिसपर्यवसितमेवेति ॥ ३ ॥ तत्र प्रमादोपहतस्य सकर्मणो यद्बालवीर्यं तद्दर्शयितुमाह—शस्त्रं–खड्गादिप्रहरणं शास्त्रं वा धनुर्वेदायुर्वेदादिकं प्राण्युपमर्दकारि तत् सुष्ठु सातगौरवगृद्धा 'एके' केचन 'शिक्षन्ते' उद्यमेन गृह्णन्ति, तच्च शिक्षितं सत् 'प्राणिनां' जन्तूनां विनाशाय भवति, तथाहि–तत्रोपदिश्यते एवंविधमालीढप्रत्यालीढादिभिर्जीवे व्यापादयितव्ये स्थानं विधेयं, तदुक्तम्–"मुष्टिनाऽऽच्छादयेल्लक्ष्यं, मुष्टौ दृष्टिं निवेशयेत् । हतं लक्ष्यं विजानीयाद्यदि मूर्धा न कम्पते ॥१॥" तथा एवं लावकरमः क्षपिणे देयोऽभयारिष्टाख्यो मद्यविशेषश्चेति, तथा एवं चौरादेः शूलारोपणादिको दण्डो विधेयः तथा चाणक्याभिप्रायेण परो वञ्चयितव्योऽर्थोपादानार्थं तथा कामशास्त्रादिकं चोद्यमेनाशुभाध्यवसायिनोऽधीयते, तदेवं शस्त्रस्य धनुर्वेदादेः शास्त्रस्य वा यदभ्यसनं तत्सर्वं बालवीर्यं, किञ्च एके केचन पापोदयात् मन्त्रानभिचारकाना(ते)थर्वणानश्वमेधपुरुषमेधसर्वमेधादियागार्थमधीयन्ते, किम्भूतानिति दर्शयति–'प्राणा' द्वीन्द्रियादयः 'भूतानि' पृथिव्यादीनि तेषां 'विविधम्' अनेकप्रकारं 'हेठकान्' बाधकान् ऋक्संस्थानीयान् मन्त्रान् पठन्तीति, तथा चोक्तम्–"षट् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनान्यूनानि पशुभिस्त्रिभिः ॥ १ ॥" इत्यादि ॥ ४ ॥ अधुना 'सत्य'मित्येतत्सूत्रपदं सूत्रस्पर्शिकया निर्युक्तिकारः स्पष्टयितुमाह—

सूत्रकृ. २९ सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१६९॥

८ वीर्याध्ययनं.

सत्थं असिमादीयं विज्जामंते य देवकम्मकयं । पत्थिववारुणअग्गेय वाऊ तह मीसगं चेव ॥ ९८ ॥

शस्त्रं–प्रहरणं तच्च असिः–खड्गस्तदादिकं, तथा विद्याधिष्ठितं, मन्त्राधिष्ठितं देवकर्मकृतं–दिव्यक्रियानिष्पादितं, तच्च पञ्चविधं, तद्यथा–पार्थिवं वारुणमाग्नेयं वायव्यं तथैव त्र्यादिमिश्रं चेति । किञ्चान्यत्—

माइणो कट्टु माया य, कामभोगे समारभे । हंता छेत्ता पगब्भित्ता, आयसायाणुगामिणो ॥ ५ ॥
मणसा वयसा चेव, कायसा चेव अंतसो । आरओ परओ वावि, दुहावि य असंजया ॥ ६ ॥

'माया' परवञ्चनादि(स्मि)का बुद्धिः सा विद्यते येषां ते मायाविनस्त एवम्भूता मायाः–परवञ्चनानि कृत्वा एकग्रहणे तज्जातीयग्रहणादेव क्रोधिनो मानिनो लोभिनः सन्तः 'कामान्' इच्छारूपान् तथा 'भोगांश्च शब्दादिविषयरूपान् 'समारभन्ते' सेवन्ते पाठान्तरं वा 'आरंभाय तिवट्टइ' त्रिभिः मनोवाक्कायैरारम्भार्थं वर्त्तते, बहून् जीवान् व्यापादयन् घ्नन् अपध्वंसयन् आज्ञापयन् भोगार्थी वित्तोपार्जनार्थं प्रवर्त्तत इत्यर्थः, तदेवम् 'आत्मसातानुगामिनः' स्वसुखलिप्सवो दुःखद्विषो विषयेषु गृद्धाः कषायकलुषितान्तरात्मानः सन्त एवम्भूता भवन्ति, तद्यथा–'हन्तारः' प्राणिव्यापादयितारस्तथा छेत्तारः कर्णनासिकादेस्तथा प्रकर्तयितारः पृष्ठोदरादेरिति ॥ ५ ॥ तदेतत्कथमित्याह–तदेतत्प्राण्युपमर्दनं मनसा वाचा कायेन कृतकारितानुमतिभिश्च 'अन्ताशः' कायेनाशक्तोऽपि तन्दुलमत्स्यवन्मनसैव पापानुष्ठानानुमत्या कर्म बध्नातीति, तथा आरतः परतश्चेति लौकिकी वाचोयुक्तिरित्येवं पर्यालोच्यमाना ऐहिकामुष्मिकयोः 'द्विधापि' स्वयंकरणेन परकरणेन चासंयता–जीवोपघातकारिण इत्यर्थः ॥ ६ ॥ साम्प्रतं जीवोपघातविपाकदर्शनार्थमाह—

॥१६९॥

वेराइं कुव्वई वेरी, तओ वेरेहिं रज्जती । पावोवगा य आरंभा, दुक्खफासा य अंतसो ॥ ७ ॥
संपरायं णियच्छंति, अत्तदुक्कडकारिणो । रागदोससिया बाला, पावं कुव्वंति ते बहुं ॥ ८ ॥

वैरमस्यास्तीति वैरी, स जीवोपमर्दकारी जन्मशतानुबन्धीनि वैराणि करोति, ततोऽपि च वैरादपरैर्वैरैरनुरज्यते—संबध्यते, वैरपरम्परानुषङ्गी भवतीत्यर्थः, किमिति ?, यतः पापं उप—सामीप्येन गच्छन्तीति पापोपगाः, क एते ?–'आरम्भाः' सावद्यानुष्ठानरूपाः 'अन्तशो' विपाककाले दुःखं स्पृशन्तीति दुःखस्पर्शा–असातोदयविपाकिनो भवन्तीति ॥ ७ ॥ किञ्चान्यत्–'सम्परायं णियच्छंती'त्यादि, द्विविधं कर्म–ईर्यापथं साम्परायिकं च, तत्र सम्पराया–बादरकषायास्तेभ्य आगतं साम्परायिकं तत् जीवोपमर्दकत्वेन वैरानुषङ्गितया 'आत्मदुष्कृतकारिणः' स्वपापविधायिनः सन्तो 'नियच्छन्ति' बध्नन्ति, तानेव विशिनष्टि–'रागद्वेषाश्रिताः' कषायकलुषितान्तरात्मानः सदसद्विवेकविकलत्वात् बाला इव बालाः, ते चैवम्भूताः 'पापम्' असद्वेद्यं 'बहु' अनन्तं 'कुर्वन्ति' विदधति ॥ ८ ॥ एवं बालवीर्यं प्रदर्श्योपसंजिघृक्षुराह—

एयं सकम्मवीरियं, बालाणं तु पवेदितं । इत्तो अकम्मविरियं, पंडियाणं सुणेह मे ॥ ९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दविए बंधणुम्मुक्के, सव्वओ छिन्नबंधणे । पणोल्ल पावकं कम्मं, सल्लं कंतति अंतसो ॥ १० ॥

'एतत्' यत् प्राक् प्रदर्शितं, तद्यथा—प्राणिनामतिपातार्थं शस्त्रं शास्त्रं वा केचन शिक्षन्ते तथा परे विद्यामन्त्रान् प्राणिबाधकानधीयन्ते तथाऽन्ये मायाविनो नानाप्रकारां मायां कृत्वा कामभोगार्थमारम्भान् कुर्वते केचन पुनरपरे वैरिणस्तत्कुर्वन्ति येन वैरैरनुबध्यन्ते (ते) तथाहि—जमदग्निना स्वभार्याऽकार्यव्यतिकरे कृतवीर्यो विनाशितः, तत्पुत्रेण तु कार्तवीर्येण पुनर्जमदग्निः, जमदग्निसुतेन परशुरामेण सप्त वारान् निःक्षत्रा पृथिवी कृता, पुनः कार्तवीर्यसुतेन तु सुभूमेन त्रिःसप्तकृत्वो ब्राह्मणा व्यापादिताः, तथा चोक्तम्—"अपकारसमेन कर्मणा न नरस्तुष्टिमुपैति शक्तिमान् । अधिकां कुरु वै(तेऽरियातनां द्विषतां जातमन्येपमुद्धरेत् ॥१॥" तदेवं कषायवशगाः प्राणिनस्तत्कुर्वन्ति येन पुत्रपौत्रादिष्वपि वैरानुबन्धो भवति, तदेतत्सकर्मणां बालानां वीर्यं तुशब्दात्प्रमादवतां च प्रकर्षेण वेदितं प्रवेदितं प्रतिपादितमितियावत्, अत ऊर्ध्वमकर्मणां—पण्डितानां यद्वीर्यं तन्मे-मम कथयतः शृणुत यूयमिति ॥ ९ ॥ यथाप्रतिज्ञातमेवाह—'द्रव्यो' भव्यो मुक्तिगमनयोग्यः 'द्रव्यं च भव्य' इति वचनात् रागद्वेषविरहाद्वा द्रव्यभूतोऽकषायीत्यर्थः, यदिवा वीतराग इव वीतरागोऽल्पकषाय इत्यर्थः, तथा चोक्तम्—"किं सक्का वोत्तुं जे सरागधम्मंमि कोइ अकसायी । संतेवि जो कसाए निगिण्हइ सोऽवि तत्तुल्लो ॥१॥" स च किम्भूतो भवतीति दर्शयति—बन्धनात्—कषायात्मकान्मुक्तो बन्ध-

१ किं शक्यं वक्तुं यत्सरागधर्मे कोऽप्यकषायः । सतोऽपि यः कषायान्निगृण्हाति सोऽपि तत्तुल्यः ॥ १ ॥

नोन्मुक्तः, बन्धनत्वं तु कषायाणां कर्मस्थितिहेतुत्वात्, तथा चोक्तम्—"बंधट्ठिई कसायवसा" कषायवशात् इति, यदिवा—बन्धनोन्मुक्त इव बन्धनोन्मुक्तः, तथाऽपरः 'सर्वतः' सर्वप्रकारेण सूक्ष्मबादररूपं 'छिन्नम्' अपनीतं 'बन्धनं' कषायात्मकं येन स छिन्नबन्धनः, तथा 'प्रणुद्य' प्रेर्य 'पापं' कर्म कारणभूतान्बाह्याऽभ्यन्तरानपनीय शल्यवच्छल्यं—शेषकं कर्म तत् कृन्तति—अपनयति अन्तशो-निरवशेषतो विघटयति, पाठान्तरं वा 'सल्लं कंतइ अप्पणो'त्ति शल्यभूतं यदष्टप्रकारं कर्म तदात्मनः सम्बन्धि कृन्तति-छिनत्तीत्यर्थः ॥ १० ॥ यदुपादाय शल्यमपनयति तद्दर्शयितुमाह—

नेयाउयं सुयक्खायं, उवादाय समीहए । भुज्जो भुज्जो दुहावासं, असुहत्तं तहा तहा ॥ ११ ॥
ठाणी विविहठाणाणि, चइस्संति ण संसओ । अणियते अयं वासे, णायएहि सुहीहि य ॥ १२ ॥

नयनशीलो नेता, नयतेस्ताच्छीलिकस्तृन्, स चात्र सम्यग्दर्शनज्ञानचारित्रात्मको मोक्षमार्गः श्रुतचारित्ररूपो वा धर्मो मोक्षनयनशीलत्वात् गृह्यते, तं मार्गं धर्मं वा मोक्षं प्रति नेतारं सुष्ठु तीर्थकरादिभिराख्यातं स्वाख्यातं तम् 'उपादाय' गृहीत्वा 'समक्' मोक्षाय ईहते-चेष्टते ध्यानाध्ययनादावुद्यमं विधत्ते, धर्मध्यानारोहणालम्बनायाह—'भूयो भूयः' पौनःपुन्येन यद्बालवीर्यं तदतीतानागतानन्तभवग्रहणे-(ग्र० ५०००) षु दुःखमावासयतीति दुःखावासं वर्तते, यथा यथा च बालवीर्यवान् नरकादिषु दुःखावासेषु पर्यटति तथा तथा चास्याशुभाध्यवसायित्वादशुभमेव प्रवर्धते इत्येवं संसारस्वरूपमनुप्रेक्षमाणस्य धर्मध्यानं प्रवर्तत इति

१ बन्धस्थिती कषायवशात् ॥ २ अनिइए य संवासे इति पाठे व्याख्याकृन्मतः, एवं च चकाराविलादेर्नासंगतिर्व्याख्यापाठस्य ।

॥ ११ ॥ साम्प्रतमनित्यभावनामधिकृत्याह—स्थानानि विद्यन्ते येषां ते स्थानिनः, तद्यथा—देवलोके इन्द्रस्तत्सामानिकत्रायस्त्रिंशत्पार्षद्यादीनि मनुष्येष्वपि चक्रवर्तिबलदेववासुदेवमहामण्डलिकादीनि तिर्यक्ष्वपि यानि कानिचिदिष्टानि भोगभूम्यादौ स्थानानि तानि सर्वाण्यपि विविधानि—नानाप्रकाराण्युत्तमाधममध्यमानि ते स्थानिनस्त्यक्ष्यन्ति, नात्र संशयो विधेय इति, तथा चोक्तम्—"अशाश्वतानि स्थानानि, सर्वाणि दिवि चेह च । देवासुरमनुष्याणामृद्धयश्च सुखानि च ॥ १ ॥" तथाऽयं 'ज्ञातिभिः' बन्धुभिः सार्धं सहायैश्च मित्रैः सुहृद्भिर्यः संवासः सोऽनित्योऽशाश्वत इति, तथा चोक्तम्—"सुचिरतरमुषित्वा बान्धवैर्विप्रयोगः, सुचिरमपि हि रन्त्वा नास्ति भोगेषु तृप्तिः । सुचिरमपि सुपुष्टं याति नाशं शरीरं, सुचिरमपि विचिन्त्यो धर्म एकः सहायः ॥ १ ॥" इति, चकारौ धनधान्यद्विपदचतुष्पदशरीराद्यनित्यत्वभावनार्थौ (र्थं) अशरणाद्यशेषभावनार्थं चानुक्तसमुच्चयार्थमुपात्ताविति ॥ १२ ॥ अपिच—

एवमादाय मेहावी, अप्पणो गिद्धिमुद्धरे । आरियं उवसंपज्जे, सव्वधम्ममकोवि (५००)यं ॥१३॥
सह संमइए णच्चा, धम्मसारं सुणेत्तु वा । समुवट्ठिए उ अणगारे, पच्चक्खायपावए ॥ १४ ॥

अनित्यानि सर्वाण्यपि स्थानानीत्येवम् 'आदाय' अवधार्य 'मेधावी' मर्यादाव्यवस्थितः सदसद्विवेकी वा आत्मनः सम्बन्धिनीं 'गृद्धिं' गार्द्धं ममत्वम् 'उद्धरेद्' अपनयेत्, ममेदमहमस्य स्वामीत्येवं ममत्वं क्वचिदपि न कुर्यात्, तथा आराद्यातः सर्व-

१ सुगुप्तं । २ नेदं ग्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेयधर्मेभ्य इत्यार्यो-मोक्षमार्गः सम्यग्दर्शनज्ञानचारित्रात्मकः, आर्याणां वा—तीर्थकृदादीनामयमार्यो-मार्गस्तम् 'उपसम्पद्येत' अधितिष्ठेत् समाश्रयेदिति, किम्भूतं मार्गमित्याह—सर्वैः कुतीर्थिकधर्मैः 'अकोपितो' अदूषितः स्वमहिम्नैव दूषयितुमशक्यत्वात् प्रतिष्ठां गतः (तं), यद्वा—सर्वधर्मैः—स्वभावैरनुष्ठानरूपैरगोपितं—कुत्सितकर्त्तव्याभावात् प्रकटमित्यर्थः ॥ १३ ॥ सुधर्मपरिज्ञानं च यथा भवति तदर्शयितुमाह—धर्मस्य सारः—परमार्थो धर्मसारस्तं 'ज्ञात्वा' अवबुद्ध्य, कथमिति दर्शयति—सह सन्मत्या स्वमत्या वा—विशिष्टाभिनिबोधिकज्ञानेन श्रुतज्ञानेनावधिज्ञानेन वा, स्वपरावबोधकत्वात् ज्ञानस्य, तेन सह, धर्मस्य सारं ज्ञात्वेत्यर्थः, अन्येभ्यो वा—तीर्थकरगणधराचार्यादिभ्यः इलापुत्रवत् श्रुत्वा चिलातपुत्रवद्वा धर्मसारमुपगच्छति, धर्मस्य वा सारं—चारित्रं तत्प्रतिपद्यते, तत्प्रतिपत्तौ च पूर्वोपात्तकर्मक्षयार्थं पण्डितवीर्यसम्पन्नो रागादिबन्धनविमुक्तो बालवीर्यरहित उत्तरोत्तरगुणसम्पन्नये समुपस्थितोऽनगारः प्रवर्धमानपरिणामः प्रत्याख्यातं—निराकृतं पापकं—सावद्यानुष्ठानरूपं येनासौ प्रत्याख्यातपापको भवतीति ॥ १४ ॥ किञ्चान्यत्—

जं किंचुवक्कमं जाणे, आउक्खेमस्स अप्पणो । तस्सेव अंतरा खिप्पं, सिक्खं सिक्खेज्ज पंडिए ॥१५॥
जहा कुम्मे सअंगाइं, सए देहे समाहरे । एवं पावाइं मेधावी, अज्झप्पेण समाहरे ॥ १६ ॥

उपक्रम्यते—संवर्त्यते क्षयमुपनीयते आयुर्येन स उपक्रमस्तं यं कञ्चन जानीयात्, कस्य?—'आयुःक्षेमस्य' स्वायुष इति, इद-

१ सद्धर्म० प्र० । २ स्वमत्यपेक्षया ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१७२॥

युक्तं भवति—स्वायुष्कस्य येन केनचित्प्रकारेणोपक्रमो भावी यस्मिन् वा काले तत्परिज्ञाय तस्योपक्रमस्य कालस्य वा अन्तराले क्षिप्रमेवानाकुलो जीवितानाशंसी 'पण्डितो' विवेकी संलेखनारूपां शिक्षां भक्तपरिज्ञेङ्गितमरणादिकां वा शिक्षेत्, तत्र ग्रहणशिक्षया यथावन्मरणविधिं विज्ञायाऽऽसेवनाशिक्षया त्वासेवेतेति ॥ १५ ॥ किञ्चान्यत्—'यथे' त्युदाहरणप्रदर्शनार्थः यथा 'कूर्मः' कच्छपः स्वान्यङ्गानि—शिरोधरादीनि स्वके देहे 'समाहरेद्' गोपयेद्—अव्यापाराणि कुर्याद् 'एवम्' अनयैव प्रक्रियया 'मेधावी' मर्यादावान् सदसद्विवेकी वा 'पापानि' पापरूपाण्यनुष्ठानानि 'अध्यात्मना' सम्यग्धर्मध्यानादिभावनया 'समाहरेत्' उपसंहरेत्, मरणकाले चोपस्थिते सम्यक् संलेखनया संलिखितकायः पण्डितमरणेनात्मानं समाहरेदिति ॥१६॥ संहरणप्रकारमाह—

८ वीर्याध्ययनं ॥१७२॥

साहरे हत्थपाए य, मणं पंचेंदियाणि य । पावकं च परीणामं, भासादोसं च तारिसं ॥ १७ ॥
अणु माणं च मायं च, तं पडिन्नाय पंडिए । सातागारवणिहुए, उवसंते णिहे चरे ॥ १८ ॥

पादोपगमने इङ्गिनीमरणे भक्तपरिज्ञायां शेषकाले वा कूर्मवद्यौ पादौ च 'संहरेद्' व्यापाराच्निवर्त्तयेत्, तथा 'मनः' अन्तःकरणं तच्चाकुशलव्यापारेभ्यो निवर्तयेत्, तथा—शब्दादिविषयेभ्योऽनुकूलप्रतिकूलेभ्योऽरक्तद्विष्टतया श्रोत्रेन्द्रियादीनि पञ्चापीन्द्रियाणि चशब्दः समुच्चये तथा पापकं परिणाममैहिकामुष्मिकाशंसारूपं संहरेदित्येवं भाषादोषं च 'तादृशं' पापरूपं संहरेत्, मनोवाक्कायगुप्तः सन् दुर्लभं सत्संयममवाप्य पण्डितमरणं वाऽशेषकर्मक्षयार्थं सम्यगनुपालयेदिति ॥ १७ ॥ तं च संयमं परा-

१ उपसंहरेत् प्र० ।

क्रममाणं कश्चित् पूजासत्कारादिना निमन्त्रयेत्, तत्रात्मोत्कर्षो न कार्य इति दर्शयितुमाह—चक्रवर्त्यादिना सत्कारादिना पूज्यमानेन 'अणुरपि' स्तोकोऽपि 'मानः' अहङ्कारो न विधेयः, किमुत महान्?, यदिवोत्तममरणोपस्थितेनोग्रतपोनिष्पन्नदेहेन वा अहोऽहमित्येवंरूपः स्तोकोऽपि गर्वो न विधेयः, तथा पण्डुरार्यस्येव स्तोकाऽपि माया न विधेया, किमुत महती ?, इत्येवं क्रोधलोभावपि न विधेयाविति, एवं द्विविधयापि परिज्ञया कषायांस्तद्विपाकांश्च परिज्ञाय तेभ्यो निवृत्तिं कुर्यादिति, पाठान्तरं वा 'अणुमाणं च मायं च, तं परिण्णाय पंडिए' अतीव मानोऽतिमानः सुभूमादीनामिव तं दुःखावहमित्येवं ज्ञात्वा परिहरेत्, इदमुक्तं भवति—यद्यपि सरागस्य कदाचिन्मानोदयः स्यात्तथाप्युदयप्राप्तस्य विफलीकरणं कुर्यादित्येवं मायायामप्यायोज्यं, पाठान्तरं वा 'सुयं मे इहमेगेसिं, एयं वीरस्स वीरियं' येन बलेन सङ्ग्रामशिरसि महति सुभटसंकटे परानीकं विजयते तत्परमार्थतो वीर्यं न भवति, अपि तु येन कामक्रोधादीन् विजयते तद्वीरस्य—महापुरुषस्य वीर्यम् 'इहैव' अस्मिन्नेव संसारे मनुष्यजन्मनि वैकेषां तीर्थकरादीनां सम्बन्धि वाक्यं मया श्रुतं, पाठान्तरं वा 'आयतट्ठं सुआदाय, एवं वीरस्स वीरियं' आयतो—मोक्षोऽपर्यवसितावस्थानत्वात् स चासावर्थश्च तदर्थो वा—तत्प्रयोजनो वा सम्यग्दर्शनज्ञानचारित्रमार्गः स आयतार्थस्तं सुष्ठ्वादाय—गृहीत्वा यो धृतिबलेन कामक्रोधादिजयाय च पराक्रमते एतद्वीरस्य वीर्यमिति, यदुक्तमासीत् 'किं तु वीरस्य वीरत्व'मिति तद्यथा भवति तथा व्याख्यातं, किञ्चान्यत्—सातागौरवं नाम सुखशीलता तत्र निभृतः—तदर्थमनुद्युक्त इत्यर्थः, तथा क्रोधाग्निजयादुपशान्तः—शीतीभूतः शब्दादिविषयेभ्योऽप्यनुकूलप्रतिकूलेभ्योऽरक्तद्विष्टतयोपशान्तो जितेन्द्रियत्वात्तेभ्यो निवृत्त इति, तथा निह्न्यन्ते प्राणिनः संसारे यया सा निहा—माया न विद्यते सा यस्यासावनिहो मायाप्रपञ्चरहित इत्यर्थः, तथा मानरहितो लोभ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्जित इत्यपि द्रष्टव्यं, स चैवम्भूतः संयमानुष्ठानं 'चरेत्' कुर्यादिति, तदेवं मरणकालेऽन्यदा वा पण्डितवीर्यवान् महाव्रतेषूद्यतः स्यात् । तत्रापि प्राणातिपातविरतिरेव गरीयसीतिकृत्वा तत्प्रतिपादनार्थमाह—"उड्ढमहे तिरियं वा जे पाणा तसथावरा । सव्वत्थ विरतिं कुज्जा, संति निव्वाणमाहियं ॥ १[1] ॥" अयं च श्लोको न सूत्रादर्शेषु दृष्टः, टीकायां तु दृष्ट इतिकृत्वा लिखितः, उत्तानार्थश्चेति ॥ १८ ॥ किञ्च—

पाणे य णाइवाएज्जा, अदिन्नंपिय णादए । सादियं ण मुसं ब्रूया, एस धम्मे वुसीमओ ॥ १९ ॥
अतिक्कम्मंति वायाए, मणसा वि न पत्थए । सव्वओ संवुडे दंते, आयाणं सुसमाहरे ॥ २० ॥

प्राणप्रियाणां प्राणिनां प्राणान्नातिपातयेत्, तथा परेणादत्तं दन्तशोधनमात्रमपि 'नाददीत' न गृह्णीयात्, तथा—सहादिना—मायया वर्त्तत इति सादिकं—समार्थं मृषावादं न ब्रूयात्, तथाहि—परवञ्चनार्थं मृषावादोऽधिक्रियते, स च न मायामन्तरेण भवतीत्यतो मृषावादस्य माया आदिभूता वर्त्तते, इदमुक्तं भवति—यो हि परवञ्चनार्थं समायो मृषावादः स परिहियते, यस्तु संयमगुप्त्यर्थं न मया मृगा उपलब्धा इत्यादिकः स न दोषायेति, एष यः प्राक् निर्दिष्टो धर्मः—श्रुतचारित्राख्यः स्वभावो वा 'वुसीमउ'त्ति छान्दसत्वात्, निर्देशार्थस्त्वयं—वस्तूनि ज्ञानादीनि तद्वतो ज्ञानादिमत इत्यर्थः, यदिवा—वुसीमउत्ति वश्यस्य—आत्मवशगस्य—वश्येन्द्रियस्येत्यर्थः ॥ १९ ॥ अपिच—प्राणिनामतिक्रमं—पीडात्मकं महाव्रतातिक्रमं वा मनोऽवष्टब्धतया परतिरस्कारं वा इत्येवम्भूतमतिक्रमं वाचा मनसाऽपि च न प्रार्थयेत्, एतद्द्वयनिषेधे च कायातिक्रमो दूरत एव निषिद्धो भवति, तदेवं

१ अ० ३ उ० ४ गाथा० २० नवरं जे केइति ।

मनोवाकायैः कृतकारितानुमतिभिश्च नवकेन भेदेनातिक्रमं न कुर्यात्, तथा सर्वतः—सबाह्याभ्यन्तरतः संवृतो—गुप्तः तथा इन्द्रियदमेन तपसा वा दान्तः सन् मोक्षस्य 'आदानम्' उपादानं सम्यग्दर्शनादिकं सुष्ठूद्युक्तः सम्यग्विस्रोतसिकारहितः 'आहरेत्' आददीत—गृह्णीयादित्यर्थः ॥ २० ॥ किञ्चान्यत्—

कडं च कज्जमाणं च, आगमिस्सं च पावगं । सव्वं तं णाणुजाणंति, आयगुत्ता जिइंदिया ॥ २१ ॥
जे यावुद्धा महाभागा, वीरा असमत्तदंसिणो । असुद्धं तेसि परक्कंतं, सफलं होइ सव्वसो ॥ २२ ॥

साधूद्देशेन यदपरैरनार्यकल्पैः कृतमनुष्ठितं पापकं कर्म तथा वर्त्तमाने च काले क्रियमाणं तथाऽऽगामिनि च काले यत्करिष्यते तत्सर्वं मनोवाकायकर्मभिः 'नानुजानन्ति' नानुमोदन्ते, तदुपभोगपरिहारेणेति भावः, यदप्यात्मार्थं पापकं कर्म परैः कृतं क्रियते करिष्यते वा, तद्यथा—शत्रोः शिरश्छिन्नं छिद्यते छेत्स्यते वा तथा चौरो हतो हन्यते हनिष्यते वा इत्यादिकं परानुष्ठानं 'नानुजानन्ति' न च बहु मन्यन्ते, तथा यदि परः कश्चिदशुद्धेनाहारेणोपनिमन्त्रयेत्तमपि नानुमन्यन्त इति, क एवम्भूता भवन्तीति दर्शयति—आत्माऽकुशलमनोवाकायनिरोधेन गुप्तो येषां ते तथा, जितानि—वशीकृतानि इन्द्रियाणि—श्रोत्रादीनि यैस्ते तथा, एवम्भूताः पापकर्म नानुजानन्तीति स्थितम् ॥ २१ ॥ अन्यच्च—ये केचन 'अबुद्धा' धर्मं प्रत्यविज्ञातपरमार्था व्याकरणशुष्कतर्कादिपरिज्ञानेन जातावलेपाः पण्डितमानिनोऽपि परमार्थवस्तुतत्त्वानवबोधादबुद्धा इत्युक्तं, न च व्याकरणपरिज्ञानमात्रेण सम्यग्वस्तुव्यतिरेकेण तत्त्वावबोधो भवतीति, तथा चोक्तम्—"शास्त्रावगाहपरिघट्टनतत्परोऽपि, नैवाबुधः समभिगच्छति वस्तुतत्त्वम् ।

नानाप्रकाररसभावगताऽपि दर्वी, स्वादं रसस्य सुचिरादपि नैव वेत्ति ॥ १ ॥" यदिवाऽबुद्धा इव बालवीर्यवन्तः, तथा महान्तश्च ते भागाश्च महाभागाः, भागशब्दः पूजावचनः, ततश्च महापूज्या इत्यर्थः, लोकविश्रुता इति, तथा 'वीराः' परानीकमेदिनः सुभटा इति, इदमुक्तं भवति—पण्डिता अपि त्यागादिभिर्गुणैर्लोकपूज्या अपि तथा सुभटवादं वहन्तोऽपि सम्यक्तत्त्वपरिज्ञानविकलाः केचन भवन्तीति दर्शयति—न सम्यगसम्यक् तद्भावोऽसम्यक्त्वं तद्द्रष्टुं शीलं येषां ते तथा, मिथ्यादृष्टय इत्यर्थः, तेषां च बालानां यत्किमपि तपोदानाध्ययनयमनियमादिषु पराक्रान्तमनुष्ठितं तदशुद्धं अविशुद्धिकारि प्रत्युत कर्मबन्धाय, भावोपहतत्वात् सनिदानत्वाद्वेति कुवैद्यचिकित्सावद्विपरीतानुबन्धीति, तच्च तेषां पराक्रान्तं सह फलेन—कर्मबन्धेन वर्तत इति सफलं 'सर्वशः' इति सर्वाऽपि तत्क्रिया तपोऽनुष्ठानादिका कर्मबन्धायैवेति ॥ २२ ॥ साम्प्रतं पण्डितवीर्यिणोऽधिकृत्याह—

जे य बुद्धा महाभागा, वीरा सम्मत्तदंसिणो । सुद्धं तेसिं परक्कंतं, अफलं होइ सव्वसो ॥ २३ ॥
तेसिंपि तवो ण सुद्धो, निक्खंता जे महाकुला । जन्ने वन्ने वियाणंति, न सिलोगं पवेज्जए ॥ २४ ॥
अप्पपिंडासि पाणासि, अप्पं भासेज्ज सुव्वए । खंतेऽभिनिव्वुडे दंते, वीतगिद्धी सदा जए ॥ २५ ॥
झाणजोगं समाहट्टु, कायं विउसेज्ज सव्वसो । तितिक्खं परमं णच्चा, आमोक्खाए परिव्वएज्जासि ॥२६॥

(गाथाग्रं० ४४६) त्तिबेमि इति श्रीवीरियनाममट्ठममज्झयणं समत्तं ॥

१ महान्तश्चेति नागार्थ । महान्तश्च ते नागार्थ प्र० । २ सुयमः कृतस्त्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये केचन स्वयम्बुद्धास्तीर्थकराद्यास्तच्छिष्या वा बुद्धबोधिता गणधरादयो 'महाभागा' महापूजाभाजो 'वीराः' कर्मविदारणसहिष्णवो ज्ञानादिभिर्वा गुणैर्विराजन्त इति वीराः, तथा 'सम्यक्त्वदर्शिनः' परमार्थतत्त्ववेदिनस्तेषां भगवतां यत्पराक्रान्तं—तपोऽध्ययनयमनियमादावनुष्ठितं तच्छुद्धम्—अवदातं निरुपरोधं सातगौरवशल्यकषायादिदोषाकलङ्कितं कर्मबन्धं प्रति अफलं भवति—तन्निरनुबन्धनिर्जरार्थमेव भवतीत्यर्थः, तथाहि—सम्यग्दृष्टीनां सर्वमपि संयमतपःप्रधानमनुष्ठानं भवति, संयमस्य चानाश्रवरूपत्वात् तपसश्च निर्जराफलत्वादिति, तथा च पठ्यते—"संयमे अणण्हयफले तवे वोदाणफले" इति ॥ २३ ॥ किञ्चान्यत्—महत्कुलम्—इक्ष्वाकादिकं येषां ते महाकुला लोकविश्रुताः शौर्यादिभिर्गुणैर्विस्तीर्णयशसस्तेषामपि पूजासत्काराद्यर्थमुत्कीर्त्तनेन वा यत्तपस्तदशुद्धं भवति, यच्च क्रियमाणमपि तपो नैवान्ये दानश्राद्धादयो जानन्ति तत्तथाभूतमात्मार्थिना विधेयम्, अतो नैवात्मश्लाघां 'प्रवेदयेत्' प्रकाशयेत्, तद्यथा—अहमुत्तमकुलीन इत्यो वाऽऽसं साम्प्रतं पुनस्तपोनिष्टप्तदेह इति, एवं स्वयमाविष्करणेन न स्वकीयमनुष्ठानं फल्गुतामापादयेदिति ॥ २४ ॥ अपिच—अल्पं—स्तोकं पिण्डमशितुं शीलमस्यासावल्पपिण्डाशी यत्किञ्चनाश्नीति भावः, एवं पानेऽप्यायोज्यं, तथा चागमः—"हे[3] जं व तं व आसीय जत्थ व तत्थ व सुहोवगयनिद्दो । जेण व तेण (व) संतुट्ठ वीर! मुणिओऽसि ते अप्पा ॥ १ ॥ तथा "अट्ठकुक्कुडिअंड-

१ महानागाः प्र० । २ संयमोऽनाश्रवफलः तपो व्यवदानफलमिति । ३ यद्वा तद्वा अशित्वा यत्र तत्र वा सुखोपगतनिद्रः येन तेन वा सन्तुष्टः (असि) हे वीर! त्वयात्मा ज्ञातोऽसि ॥ १ ॥ ४ अष्टकुक्कुट्यण्डकप्रमाणान्कवलानाहारयन्नल्पाहारो द्वादशकवलैरपार्धावमोदरिका षोडशभिर्द्विभागा प्राप्ता चतुर्विंशत्या अवमोदरिका त्रिंशता कवलैः प्रमाणप्राप्तः द्वात्रिंशत्कवलाः सम्पूर्णाहार इति ॥

सूत्रकृ. २० सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१७५॥

गमेनप्पमाणे कवले आहारेमाणे अप्पाहारे दुवालसकवलेहिं अवड्ढोमोयरिया सोलसहिं दुभागे पत्ते चउवीसं ओमोदरिया तीसं पमाणपत्ते बत्तीसं कवला संपुण्णाहारे" इति, अत एकैककवलहान्यादिनोनोदरता विधेया, एवं पाने उपकरणे चोनोदरतां विदध्यादिति, तथा चोक्तम्—"थोवाहारो थोवभणिओ अ जो होइ थोवनिद्दो अ । थोवोवहिउवकरणो तस्स हु देवावि पणमंति ॥ १ ॥" तथा 'सुव्रतः' साधुः 'अल्पं' परिमितं हितं च भाषेत, सर्वदा विकथारहितो भवेदित्यर्थः, भावावमौदर्यमधिकृत्याह—भावतः क्रोधाद्युपशमात् 'क्षान्तः' क्षान्तिप्रधानः तथा 'अभिनिर्वृतो' लोभादिजयान्निरातुरः, तथा इन्द्रियनोइन्द्रियदमनात् 'दान्तो' जितेन्द्रियः, तथा चोक्तम्—"कषाया यस्य नोच्छिन्ना, यस्य नात्मवशं मनः । इन्द्रियाणि न गुप्तानि, प्रव्रज्या तस्य जीवनम् ॥ १ ॥" एवं विगता गृद्धिर्विषयेषु यस्य स विगतगृद्धिः—आशंसादोषरहितः 'सदा' सर्वकालं संयमानुष्ठाने 'यतेत' यत्नं कुर्यादिति ॥ २५ ॥ अपिच—'झाणजोगम्' इत्यादि, ध्यानं—चित्तनिरोधलक्षणं धर्मध्यानादिकं तत्र योगो विशिष्टमनोवाक्कायव्यापारस्तं ध्यानयोगं 'समाहृत्य' सम्यगुपादाय 'कायं' देहमकुशलयोगप्रवृत्तं 'व्युत्सृजेत्' परित्यजेत् 'सर्वतः' सर्वेणापि प्रकारेण, हस्तपादादिकमपि परपीडाकारि न व्यापारयेत्, तथा 'तितिक्षां' क्षान्तिं परीषहोपसर्गसहनरूपां 'परमां' प्रधानां ज्ञात्वा 'आमोक्षाय' अशेषकर्मक्षयं यावत् 'परिव्रजेरि'ति संयमानुष्ठानं कुर्यास्त्वमिति । इतिः परिसमाप्त्यर्थे । ब्रवीमीति पूर्ववत् ॥ २६ ॥ समाप्तं चाष्टमं वीर्याख्यमध्ययनमिति ॥

८ वीर्याध्ययनं.

॥१७५॥

१ स्तोकाहारः स्तोकभणितः स्तोकनिद्रश्च यो भवति । स्तोकोपधिकोपकरणस्तस्मै च देवा अपि प्रणमन्ति ॥ १ ॥

अथ नवमं अध्ययनं प्रारभ्यते ॥

अष्टमानन्तरं नवमं समारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तराध्ययने बालपण्डितभेदेन द्विरूपं वीर्यं प्रतिपादितं, अत्रापि तदेव पण्डितवीर्यं धर्मं प्रति यदुद्यमं विधत्ते अतो धर्मः प्रतिपाद्यत इत्यनेन सम्बन्धेन धर्माध्ययनमायातं, अस्य चत्वार्यनुयोगद्वाराणि उपक्रमादीनि प्राग्वत् व्यावर्णनीयानि, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—धर्मोऽत्र प्रतिपाद्यत इति तमधिकृत्य निर्युक्तिकृदाह—

धम्मो पुव्वुद्दिट्ठो भावधम्मेण एत्थ अहिगारो । एसेव होइ धम्मे एसेव समाहिमग्गोत्ति ॥ ९९ ॥

दुर्गतिगमनधरणलक्षणो धर्मः प्राक् दशवैकालिकश्रुतस्कन्धषष्ठाध्ययने धर्मार्थकामाख्ये उद्दिष्टः—प्रतिपादितः, इह तु भावधर्मेणाधिकारः, एष एव च भावधर्मः परमार्थतो धर्मो भवति, अमुमेवार्थमुत्तरयोरप्यध्ययनयोरतिदिशन्नाह—एष एव च भावसमाधिर्भावमार्गश्च भवतीत्यवगन्तव्यमिति, यदिवैष एव च भावधर्मः एष एव च भावसमाधिरेष एव च तथा भावमार्गो भवति, न तेषां परमार्थतः कश्चिद्भेदः, तथाहि—धर्मः श्रुतचारित्राख्यः क्षान्त्यादिलक्षणो वा दशप्रकारो भवेत्, भावसमाधिरप्येवंभूत एव, तथाहि—सम्यगाधानम्—आरोपणं गुणानां क्षान्त्यादीनामिति समाधिः, तदेवं मुक्तिमार्गोऽपि ज्ञानदर्शनचारित्राख्यो भावधर्मतया व्याख्यानयितव्य इति ॥ साम्प्रतमतिदिष्टस्यापि स्थानाशून्यार्थं धर्मस्य नामादिनिक्षेपं दर्शयितुमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णामंठवणाधम्मो दव्वधम्मो य भावधम्मो य । सचित्ताचित्तमीसगगिहत्थदाणे दवियधम्मे ॥ १०० ॥

नामस्थापनाद्रव्यभावभेदाच्चतुर्धा धर्मस्य निक्षेपः, तत्रापि नामस्थापने अनादृत्य ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यधर्मः सचित्ताचित्तमिश्रभेदात् त्रिधा, तत्रापि सचित्तस्य जीवच्छरीरस्योपयोगलक्षणो 'धर्मः' स्वभावः, एवमचित्तानामपि धर्मास्तिकायादीनां यो यस्य स्वभावः स तस्य धर्म इति, तथाहि—"गइलक्खणओ धम्मो, अहम्मो ठाणलक्खणो । भायणं सव्वदव्वाणं, नहं अवगाहलक्खणं ॥ १ ॥" पुद्गलास्तिकायोऽपि ग्रहणलक्षण इति, मिश्रद्रव्याणां च क्षीरोदकादीनां यो यस्य स्वभावः स तद्धर्मतयाऽवगन्तव्य इति, गृहस्थानां च यः कुलनगरग्रामादिधर्मो गृहस्थेभ्यो गृहस्थानां वा यो दानधर्मः स द्रव्यधर्मोऽवगन्तव्य इति, तथा चोक्तम्—"अन्नं पानं च वस्त्रं च, आलयः शयनासनम् । शुश्रूषा वन्दनं तुष्टिः, पुण्यं नवविधं स्मृतम् ॥ १ ॥" भावधर्मस्वरूपनिरूपणायाह—

लोइयलोउत्तरिओ दुविहो पुण होति भावधम्मो उ । दुविहोवि दुविहनिविहो पंचविहो होति णायव्वो ॥१०१॥

भावधर्मो नोआगमतो द्विविधः, तद्यथा—लौकिको लोकोत्तरश्च, तत्र लौकिको द्विविधः गृहस्थानां पाखण्डिकानां च, लोकोत्तरस्त्रिविधः—ज्ञानदर्शनचारित्रभेदात्, तत्राप्याभिनिबोधादिकं ज्ञानं पञ्चधा, दर्शनमप्यौपशमिकसास्वादनक्षायोपशमिकवेदकक्षायिकभेदात् पञ्चविधं, चारित्रमपि सामायिकादिभेदात् पञ्चधैव । गाथाऽक्षराणि त्वेवं नेयानि, तद्यथा—भावधर्मो लौकिकलोकोत्तरभेदाद्विधा, द्विविधोऽपि चायं यथासङ्ख्येन द्विविधस्त्रिविधः, तत्रैव लौकिको गृहस्थपाखण्डिकभेदात् द्विविधः, लोकोत्तरोऽपि ज्ञानदर्शनचारित्रभेदात् त्रिविधः, ज्ञानादीनि प्रत्येकं त्रीण्यपि पंचधैवेति ॥ तत्र ज्ञानदर्शनचारित्रवतां साधूनां यो धर्मस्तं दर्शयितुमाह—

पासत्थोसण्णकुसील संथवो ण किर वट्टती काउं । सूयगडे अज्झयणे धम्मंमि निकाइतं एयं ॥ १०२ ॥

साधुगुणानां पार्श्वे तिष्ठन्तीति पार्श्वस्थाः तथा संयमानुष्ठानेऽवसीदन्तीत्यवसन्नाः तथा कुत्सितं शीलं येषां ते कुशीलाः एतैः पार्श्वस्थादिभिः सह संस्तवः—परिचयः सहसंवासरूपो न किल यतीनां वर्त्तते कर्त्तुम्, अतः सूत्रकृताङ्गे धर्माख्येऽध्ययने एतत् 'निकाचितं' नियमितमिति ॥ गतो नामनिष्पन्नो निक्षेपः, अधुना सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

कयरे धम्मे अक्खाए, माहणेण मतीमता ? । अंजु धम्मं जहातच्चं, जिणाणं तं सुणेह मे ॥ १ ॥
माहणा खत्तिया वेस्सा, चंडाला अदु बोक्कसा । एसिया वेसिया सुद्दा, जे य आरंभणिस्सिया ॥ २ ॥
परिग्गहनिविट्ठाणं, वेरं तेसिं पवड्ढई । आरंभसंभिया कामा, न ते दुक्खविमोयगा ॥ ३ ॥
आघायकिच्चमाहेउं, णाइओ विसएसिणो । अन्ने हरंति तं वित्तं, कम्मी कम्मेहिं किच्चती ॥ ४ ॥

जम्बूस्वामी सुधर्मस्वामिनमुद्दिश्येदमाह—तद्यथा—'कतरः' किम्भूतो दुर्गतिगमनधरणलक्षणो धर्मः 'आख्यातः' प्रतिपादितो 'माहणेणं'ति मा जन्तून् व्यापादयेत्येवं चिन्तयेषु वाक्प्रवृत्तिर्यस्यासौ 'माहनो' भगवान् वीरवर्धमानस्वामी तेन ?, तमेव विशिनष्टि—मनुते—अवगच्छति जगत्त्रयं कालत्रयोपेतं यया सा केवलज्ञानाख्या मतिः सा अस्यास्तीति मतिमान् तेन उत्पन्नकेवलज्ञानेन भगवता, इति पृष्टे सुधर्मस्वाम्याह—रागद्वेषजितो जिनास्तेषां सम्बन्धिनं धर्मं 'अंजुम्' इति 'ऋजुं' मायाप्रपञ्चरहितत्वादवक्रं तथा—'जहातच्चं मे' इति यथावस्थितं मम कथयतः शृणुत यूयं, न तु यथाऽन्यैस्तीर्थिकैर्दम्भप्रधानो धर्मोऽभिहितस्तथा भगवताऽपीति, पाठान्तरं वा 'जणगा तं सुणेह मे' जायन्त इति जना—लोकास्त एव जनकास्तेषामामन्त्रणं हे जनकाः ! तं धर्मं शृणुत यूयमिति ॥१॥ अन्वयव्यतिरेकाभ्यामुक्तोऽर्थः सूक्तो भवतीत्यतो यथोद्दिष्टधर्मप्रतिपक्षभूतोऽधर्मस्तदाश्रितांस्तावद्दर्शयितुमाह—ब्राह्मणाः क्षत्रिया वैश्यास्तथा चाण्डालाः अथ बोक्कसा—अवान्तरजातीयाः, तद्यथा—ब्राह्मणेन शूद्र्यां जातो निषादो ब्राह्मणेनैव वैश्यायां जातोऽम्बष्ठः तथा निषादेनाम्बष्ठ्यां जातो बोक्कसः, तथा एषितुं शीलमेषामिति एषिका—मृगलुब्धका हस्तितापसाश्च मांसहेतोर्मृगान् हस्तिनश्च एषन्ति, तथा कन्दमूलफलादिकं च, तथा ये चान्ये पाखण्डिका नानाविधैरुपायैर्भैक्ष्यमेषन्त्यन्यानि वा विषयसाधनानि ते सर्वेऽप्येषिका इत्युच्यन्ते, तथा 'वैशिका' वणिजो मायाप्रधानाः कलोपजीविनः, तथा 'शूद्राः' कृषीवलादयः आभीरजातीयाः, कियन्तो वा वक्ष्यन्त इति दर्शयति—ये चान्ये वर्णापसदा नानारूपसावद्य 'आरम्भ(म्भे)निश्रिता' यत्रपीडननिर्लाञ्छनकर्माङ्गारदाहादिभिः क्रियाविशेषैर्जीवोपमर्दकारिणः तेषां सर्वेषामेव जीवापकारिणां वैरमेव प्रवर्धत इत्युत्तरश्लोके क्रियेति ॥ २ ॥ किञ्च—परि—समन्तात् गृह्यत इति परिग्रहो—द्विपदचतुष्पदधनधान्यहिरण्यसुवर्णादिषु ममीकारस्तत्र 'निविष्टानाम्' अध्युपपन्नानां गार्द्धं गतानां 'पापम्' असातवेदनीयादिकं 'तेषां' प्राग्उक्तानामारम्भनिश्रितानां परिग्रहे निविष्टानां प्रकर्षेण 'वर्द्धते' वृद्धिमुपयाति जन्मान्तरशतेष्वपि दुर्मोचं भवति, क्वचित्पाठः 'वेरं तेसिं पवड्ढइ'त्ति तत्र येन यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा प्राणिन उपमर्दः क्रियते स तथैव संसारान्तर्वर्ती शतशो दुःखभाक् भवतीति, जमदग्निकृतवीर्यादीनामिव पुत्रपौत्रानुगं वैरं प्रवर्द्धत इति भावः, किमित्येवं ?, यतस्ते कामेषु प्रवृत्ताः, कामाश्चारम्भैः सम्यग् भृताः संभृता–आरम्भपुष्टा आरम्भाश्च जीवोपमर्दकारिणः अतो न ते कामसम्भृता आरम्भनिश्रिताः परिग्रहे निविष्टाः दुःखयतीति दुःखम्—अष्टप्रकारं कर्म तद्विमोचका भवन्ति–तस्यापनेतारो न भवन्तीत्यर्थः ॥ ३ ॥ किञ्चान्यत्–आहन्यन्ते–अपनीयन्ते विनाश्यन्ते प्राणिनां दश प्रकारा अपि प्राणा यस्मिन् स आघातो—मरणं तस्मै तत्र वा कृतम्–अग्निसंस्कारजलाञ्जलिप्रदानपितृपिण्डादिकमाघातकृत्यं तदाधातुम्–आधाय कृत्वा पश्चात् 'ज्ञातयः' स्वजनाः पुत्रकलत्रभ्रातृव्यादयः, किम्भूताः ?–विषयानन्वेष्टुं शीलं येषां तेऽन्येऽपि विषयैषिणः सन्तस्तस्य दुःखार्जितं 'वित्तं' द्रव्यजातम् 'अपहरन्ति' स्वीकुर्वन्ति, तथा चोक्तम्—"ततस्तेनार्जितैर्द्रव्यैर्दारैश्च परिरक्षितैः । क्रीडन्त्यन्ये नरा राजन् !, हृष्टास्तुष्टा अलङ्कृताः ॥ १ ॥" स तु द्रव्यार्जनपरायणः सावद्यानुष्ठानवान् कर्मवान् पापी स्वकृतैः कर्मभिः संसारे 'कृत्यते' छिद्यते पीड्यत इतियावत् ॥ ४ ॥ स्वजनाश्च तद्द्रव्योपजीविनस्तत्राणाय न भवन्तीति दर्शयितुमाह—

माया पिया एहुसा भाया, भज्जा पुत्ता य ओरसा । नालं ते तव ताणाय, लुप्पंतस्स सकम्मुणा ॥५॥
एयमट्ठं सपेहाए, परमट्ठाणुगामियं । निम्ममो निरहंकारो, चरे भिक्खू जिणाहियं ॥ ६ ॥
चिच्चा वित्तं च पुत्ते य, णाइओ य परिग्गहं । चिच्चा ण अंतगं सोयं, निरवेक्खो परिव्वए ॥ ७ ॥
पुढवी उ अगणी वाऊ, तणरुक्ख सबीयगा । अंडया पोयजराऊ, रससंसेयउब्भिया ॥ ८ ॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१७८॥

९ धर्माध्ययनं.

'माता' जननी 'पिता' जनकः 'स्नुषा' पुत्रवधूः 'भ्राता' सहोदरः तथा 'भार्या' कलत्रं पुत्राश्चौरसाः–स्वनिष्पादिता एते सर्वेऽपि मात्रादयो ये चान्ये श्वशुरादयस्ते तव संसारचक्रवाले स्वकर्मभिर्विलुप्यमानस्य त्राणाय 'नालं' न समर्था भवन्तीति, इहापि तावन्नैते त्राणाय किमुतामुत्रेति, दृष्टान्तश्चात्र कालसौकरिकसुतः सुलसनामा अभयकुमारस्य सखा, तेन महासत्त्वेन स्वजनाभ्यर्थितेनापि न प्राणिष्वपकृतम्, अपि त्वात्मन्येवेति ॥५॥ किञ्चान्यत्–धर्मरहितानां स्वकृतकर्मविलुप्यमानानामैहिकामुष्मिकयोर्न कश्चित्राणायेति एनं पूर्वोक्तमर्थं स प्रेक्षापूर्वकारी 'प्रत्युपेक्ष्य' विचार्यावगम्य च परमः–प्रधानभूतो (ऽर्थो) मोक्षः संयमो वा तमनुगच्छतीति तच्छीलश्च परमार्थानुगामुकः–सम्यग्दर्शनादिस्तं च प्रत्युपेक्ष्य, क्त्वाप्रत्ययान्तस्य पूर्वकालवाचितया क्रियान्तरसव्यपेक्षत्वात् तदाह–निर्गतं ममत्वं बाह्याभ्यन्तरेषु वस्तुषु यस्मादसौ निर्ममः तथा निर्गतोऽहङ्कारः–अभिमानः पूर्वैश्वर्यजात्यादिमदजनितस्तथा तपःस्वाध्यायलाभादिजनितो वा यस्मादसौ निरहङ्कारो–रागद्वेषरहित इत्यर्थः, स एवम्भूतो भिक्षुर्जिनैराहितः–प्रतिपादितोऽनुष्ठितो वा यो मार्गो जिनानां वा सम्बन्धी योऽभिहितो मार्गस्तं 'चरेद्' अनुतिष्ठेदिति ॥ ६ ॥ अपिच–संसारस्वभावपरिज्ञानपरिकर्मितमतिर्विदितवेद्यः सम्यक् 'त्यक्त्वा' परित्यज्य किं तद् ?–'वित्तं' द्रव्यजातं पुत्रांश्च त्यक्त्वा, पुत्रेष्वधिकः स्नेहो भवतीति पुत्रग्रहणं, तथा 'ज्ञातीन्' स्वजनांश्च त्यक्त्वा तथा 'परिग्रहं' चान्तरममत्वरूपं णकारो वाक्यालङ्कारे अन्तं गच्छतीत्यन्तगो दुष्परित्यज इत्यर्थः अन्तको वा विनाशकारीत्यर्थः आत्मनि वा गच्छतीत्यात्मग आन्तर इत्यर्थः तं तथाभूतं 'शोकं' संतापं 'त्यक्त्वा' परित्यज्य श्रोतो वा–मिथ्यात्वाविरतिप्रमादकषायात्मकं कर्माश्रवद्वारभूतं परित्यज्य, पाठान्तरं वा–'चिच्चा णऽणंतगं सोयं' अन्तं गच्छतीत्यन्तगं न अन्तगमनन्तगं श्रोतः शोकं वा परित्यज्य 'निरपेक्षः' पुत्रदारधनधान्यहिरण्यादिकमनपेक्षमाणः सन् आमोक्षाय परि–समन्तात् संयमानुष्ठाने 'व्रजेत्' परिव्रजेदिति, तथा चोक्तम्–"[1]छलिया अवयक्खंता निरावयक्खा गया अविग्घेणं । तम्हा पवयणसारे निरावयक्खेण होयव्वं ॥ १ ॥ भोगे अवयक्खंता पडंति संसारसागरे घोरे । भोगेहि निरवयक्खा तरंति संसारकंतारं ॥ २ ॥" इति ॥ ७ ॥ स एवं प्रव्रजितः सुव्रतावस्थितात्माऽहिंसादिषु व्रतेषु प्रयतेत, तत्राहिंसाप्रसिद्ध्यर्थमाह–'पुढवी उ' इत्यादि श्लोकद्वयं, तत्र पृथिवीकायिकाः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्नाः तथाऽप्कायिका अग्निकायिका वायुकायिकाश्चैवम्भूता एव, वनस्पतिकायिकान् लेशतः सभेदानाह—'तृणानि' कुशवैचकादीनि 'वृक्षाः' चूताशोकादिकाः सह बीजैर्वर्तन्त इति सबीजाः, बीजानि तु शालिगोधूमयवादीनि, एते एकेन्द्रियाः पञ्चापि काथाः षष्ठत्रसकायनिरूपणायाह–अण्डाज्जाता अण्डजाः–शकुनिगृहकोकिलकसरीसृपादयः तथा पोता एव जाताः पोतजा–हस्तिशरभादयः तथा जरायुजा ये जम्बालवेष्टिताः समुत्पद्यन्ते गोमनुष्यादयः तथा रसात्—दधिसौवीरकादेर्जाता रसजास्तथा संस्वेदाज्जाताः संस्वेदजा–यूकामत्कुणादयः 'उद्भिज्जाः' खञ्जरीटकदर्दुरादय इति, अज्ञातभेदा हि दुःखेन रक्ष्यन्त इत्यतो भेदेनोपन्यास इति ॥ ८ ॥

१ छलिता अपेक्षमाणा निरपेक्षमाणा गता अविघ्नेन तस्मात्प्रवचनसारे (ज्ञाते) निरपेक्षेण भवितव्यम् ॥ १ ॥ २ भोगानपेक्षमाणाः पतन्ति संसारसागरे घोरे । भोगेषु निरपेक्षास्तरन्ति संसारकान्तारं ॥ १ ॥ ३ बन्धका० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेहिं छहिं काएहिं, तं विज्जं परिजाणिया । मणसा कायवक्केणं, णारंभी ण परिग्गही ॥ ९ ॥
मुसावायं बहिद्धं च, उग्गहं च अजाइया । सत्थादाणाइं लोगंसि, तं विज्जं परिजाणिया ॥ १० ॥
पलिउंचणं च भयणं च, थंडिल्लुस्सयणाणि या । धूणादाणाइं लोगंसि, तं विज्जं परिजाणिया ॥११॥
धोयणं रयणं चेव, वत्थीकम्मं विरेयणं । वमणंजण पलीमंथं, तं विज्जं परिजाणिया ॥ १२ ॥

'एभिः' पूर्वोक्तैः षड्भिरपि 'कायैः' त्रसस्थावररूपैः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्नैर्नारम्भी नापि परिग्रही स्यादिति सम्बन्धः, तदेतद् 'विद्वान्' सश्रुतिको ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया मनोवाक्कायकर्मभिर्जीवोपमर्दकारिणमारम्भं परिग्रहं च परिहरेदिति ॥ ९ ॥ शेषव्रतान्यधिकृत्याह—मृषा—असद्भूतो वादो मृषावादस्तं विद्वान् प्रत्याख्यानपरिज्ञया परिहरेत् तथा 'बहिद्धं'ति मैथुनं 'अवग्रहं' परिग्रहमयाचितम्—अदत्तादानं, [ग्रं० ५२५०] यदिवा बहिद्धमिति—मैथुनपरिग्रहौ अवग्रहमयाचितमित्यनेनादत्तादानं गृहीतं, एतानि च मृषावादादीनि प्राण्युपतापकारित्वात् शस्त्राणीव शस्त्राणि वर्तन्ते । तथाऽऽदीयते—गृह्यतेऽष्टप्रकारं कर्मभिरिति (आदानानि) कर्मोपादानकारणान्यस्मिन् लोके, तदेतत्सर्वं विद्वान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ १० ॥ किञ्चान्यत्—पञ्चमहाव्रतधारणमपि कषायिणो निष्फलं स्यादतस्तत्साफल्यापादनार्थं कषायनिरोधो विधेय इति दर्शयति—परि—समन्तात् कुञ्च्यन्ते—वक्रतामापाद्यन्ते क्रिया येन मायानुष्ठानेन तत्परिकुञ्चनं मायेति भण्यते, तथा भज्यते सर्वत्रात्मा प्रहीक्रियते येन स भजनो—लोभस्तं, तथा यदुदयेन ह्यात्मा सदसद्विवेकविकलत्वात् स्खण्डिलवद्भवति स स्थण्डिलः—क्रोधः, यस्मिंश्च सत्यूर्ध्वं श्वयति जात्यादिना दर्पाध्मातः पुरुष उत्तानीभवति स उच्छ्रायो—मानः, छान्दसत्वान्नपुंसकलिङ्गता, जात्यादिमदस्थानानां बहुत्वात् तत्कार्यस्यापि मानस्य बहुत्वमतो बहुवचनं, चकाराः स्वगतभेदसंसूचनार्थाः समुच्चयार्था वा, धूनयेति प्रत्येकं क्रिया योजनीया, तद्यथा—परिकुञ्चनं—मायां धूनय धूनीहि वा, तथा भजनं—लोभं, तथा स्थण्डिलं—क्रोधं, तथा उच्छ्रायं—मानं, विचित्रत्वात् सूत्रस्य क्रमोल्लङ्घनेन निर्देशो न दोषायेति, यदिवा—रागस्य दुस्त्यजत्वात् लोभस्य च मायापूर्वकत्वादित्यादावेव मायालोभयोरुपन्यास इति, कषायपरित्यागे विधेये पुनरपरं कारणमाह—एतानि परिकुञ्चनादीनि अस्मिन् लोके आदानानि वर्तन्ते, तदेतद्विद्वान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया प्रत्याचक्षीत ॥ ११ ॥ पुनरप्युत्तरगुणानधिकृत्याह—धावनं—प्रक्षालनं हस्तपादवस्त्रादेः रञ्जनमपि तस्यैव, चकारः समुच्चयार्थः, एवकारोऽवधारणे, तथा वस्तिकर्म—अनुवासनारूपं तथा 'विरेचनं' निरूहात्मकमधोविरेको वा वमनम्—ऊर्ध्वविरेकस्तथाऽञ्जनं नयनयोः, इत्येवमादिकमन्यदपि शरीरसंस्कारादिकं यत् 'संयमपलिमन्थकारि' संयमोपघातरूपं तदेतद्विद्वान् स्वरूपतस्तद्विपाकतश्च परिज्ञाय प्रत्याचक्षीत ॥ १२ ॥ अपिच—

गंधमल्लसिणाणं च, दंतपक्खालणं तहा । परिग्गहित्थिकम्मं च, तं विज्जं परिजाणिया ॥ १३ ॥

---

१ निरूहो निश्चिते तर्के वस्तिभेदे इति हैमः ।

उद्देसियं कीयगडं, पामिच्चं चेव आहडं । पूयं अणेसणिज्जं च, तं विज्जं परिजाणिया ॥ १४ ॥
आसूणिमक्खिरागं च, गिद्धुवघायकम्मगं । उच्छोलणं च कक्कं च, तं विज्जं परिजाणिया ॥ १५ ॥
संपसारी कयकिरिए, पसिणायतणाणि य । सागारियं च पिंडं च, तं विज्जं परिजाणिया ॥ १६ ॥

'गन्धाः' कोष्ठपुटादयः 'माल्यं' जात्यादिकं 'स्नानं च' शरीरप्रक्षालनं देशतः सर्वतश्च, तथा 'दन्तप्रक्षालनं' कदम्बकादिना तथा 'परिग्रहः' सचित्तादेः स्वीकरणं तथा स्त्रियो—दिव्यमानुषतैरश्च्यः तथा 'कर्म' हस्तकर्म सावद्यानुष्ठानं वा तदेतत्सर्वं कर्मोपादानतया संसारकारणत्वेन परिज्ञाय विद्वान् परित्यजेदिति ॥ १३ ॥ किञ्चान्यत्—साध्वाद्युद्देशेन यदन्नाद्यं व्यवस्थाप्यते तदुद्देशिकं, तथा 'क्रीतं' क्रयस्तेन क्रीतं—गृहीतं क्रीतकृतं 'पामिच्चं'ति साध्वर्थमन्यत उद्यतकं यद्गृह्यते तत्तदुच्यते चकारः समुच्चयार्थः एवकारोऽवधारणार्थः, साध्वर्थं यद्गृहस्थेनानीयते तदाहृतं, तथा 'पूय'मिति आधाकर्मावयवसम्पृक्तं शुद्धमप्याहारजातं पूति भवति, किं बहुनोक्तेन ?, यत् केनचिद्दोषेणानेषणीयम्—अशुद्धं तत्सर्वं विद्वान् परिज्ञाय संसारकारणतया निस्पृहः सन् प्रत्याचक्षीतेति ॥ १४ ॥ किञ्च—येन घृतपानादिना आहारविशेषेण रसायनक्रियया वा अशूनः सन् आ—समन्तात् शूनीभवति—बलवानुपजायते तदाशूनीत्युच्यते, यदिवा आसूणित्ति—श्लाघा यतः श्लाघया क्रियमाणया आ—समन्तात् शूनवच्छूनो लघुप्रकृतिः कश्चिद्दर्पाध्मातत्वात् स्तब्धो भवति, तथा अक्ष्णां 'रागो' रञ्जनं सौवीरादिकमञ्जनमितियावत्, एवं रसेषु शब्दादिषु विषयेषु वा 'गृद्धिं' गार्द्ध्यं तात्पर्यमासेवा, तथोपघातकर्म—अपरापकारक्रिया येन केनचित्कर्मणा परेषां जन्तूनामुपघातो भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदुपघातकमेत्युच्यते, तदेव लेशतो दर्शयति—'उच्छोलनं'ति अयतनया शीतोदकादिना हस्तपादादिप्रक्षालनं तथा 'कल्कं'लोध्रादिद्रव्यसमुदायेन शरीरोद्वर्तनकं तदेतत्सर्वं कर्मबन्धनायेत्येवं 'विद्वान्' पण्डितो ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ १५ ॥ अपिच—असंयतैः सार्धं सम्प्रसारणं–पर्यालोचनं परिहरेदिति वाक्यशेषः, एवमसंयमानुष्ठानं प्रत्युपदेशदानं, तथा 'कयकिरिओ' नाम कृता शोभना गृहकरणादिका क्रिया येन स कृतक्रिय इत्येवमसंयमानुष्ठानप्रशंसनं, तथा प्रश्नस्य–आदर्शप्रश्नादेः 'आयतनम्' आविष्करणं कथनं यथावद्विवक्षितप्रश्ननिर्णयनानि, यदिवा–प्रश्नायतनानि लौकिकानां परस्परव्यवहारे मिथ्याशास्त्रगतसंशये वा प्रश्ने सति यथावस्थितार्थकथनद्वारेणायतनानि–निर्णयनानीति, तथा 'सागारिकः' शय्यातरस्तस्य पिण्डम्–आहारं, यदिवा-सागारिकपिण्डमिति सूतकगृहपिण्डं जुगुप्सितं वर्णापसदपिण्डं वा, चशब्दः समुच्चये, तदेतत्सर्वं विद्वान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ १६॥ किञ्चान्यत्—

अट्ठावयं न सिक्खिज्जा, वेहाईयं च णो वए। हत्थकम्मं विवायं च, तं विज्जं परिजाणिया ॥१७॥
पाणहाओ य छत्तं च, णालीयं वालवीयणं। परकिरियं अन्नमन्नं च, तं विज्जं परिजाणिया ॥१८॥
उच्चारं पासवणं, हरिएसु ण करे मुणी। विवेडेण वावि साहट्टु, णावमज्जे(यमेज्जा) कयाइवि ॥१९॥
परमत्ते अन्नपाणं, ण भुंजेज्ज कयाइवि। परवत्थं अचेलोऽवि, तं विज्जं परिजाणिया ॥ २० ॥

सूत्रकृ. ११

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं

॥१८१॥

९ धर्माध्ययनं.

अयते इत्यर्थो–धनधान्यहिरण्यादिकः पद्यते–गम्यते येनार्थस्तत्पदं–शास्त्रं अर्थार्थं पदमर्थपदं चाणाक्यादिकमर्थशास्त्रं तत्र 'शिक्षेत्' नाभ्यस्येत् नाप्यपरं प्राण्युपमर्दकारि शास्त्रं शिक्षयेत्, यदिवा–'अष्टापदं'द्यूतक्रीडाविशेषस्तं न शिक्षेत, नापि पूर्वशिक्षितमनुशीलयेदिति, तथा 'वेधो' धर्मानुवेधस्तस्मादतीतं सद्धर्मानुवेधातीतम्–अधर्मग्रधानं वचो नो वदेत् यदिवा–वेध इति वस्तुवेधो द्यूतविशेषस्तद्गतं वचनमपि नो वदेद् आस्तां तावत्क्रीडनमिति, हस्तकर्म प्रतीतं, यदिवा 'हस्तकर्म' हस्तक्रिया परस्परं हस्तव्यापारप्रधानः कलहस्तं, तथा विरुद्धवादं विवादं शुष्कवादमित्यर्थः, चः समुच्चये, तदेतत्सर्वं संसारभ्रमणकारणं ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया प्रत्याचक्षीत ॥१७॥ किञ्च उपानद्दौ—काष्ठपादुके च तथा आतपादिनिवारणाय छत्रं तथा 'नालिका' द्यूतक्रीडाविशेषस्तथा वालैः मयूरपिच्छैर्वा व्यजनकं, तथा परेषां सम्बन्धिनीं क्रियामन्योऽन्यं–परस्परतोऽन्यनिष्पाद्यामन्यः करोत्यपरनिष्पाद्यां चापर इति, चः समुच्चये, तदेतत्सर्वं 'विद्वान्' पण्डितः कर्मोपादानकारणत्वेन ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ १८ ॥ तथा—उच्चारप्रस्रवणादिकां क्रियां हरितेषूपरि बीजेषु वा अस्थण्डिले वा 'मुनिः' साधुर्न कुर्यात्, तथा 'विकटेन' विगतजीवेनाप्युदकेन 'संहृत्य' अपनीय बीजानि हरितानि वा 'नाचमेत्' न निर्लेपनं कुर्यात्, किमुताविकटेनेतिभावः ॥ १९ ॥ किञ्च परस्य—गृहस्थस्यामत्रं–भाजनं परामत्रं तत्र पुरःकर्मपश्चात्कर्मभयात् हतनष्टादिदोषसम्भवाच्च अन्नं पानं च मुनिर्न कदाचिदपि भुञ्जीत, यदिवा—पतद्ग्रहधारिणश्छिद्रपाणेः पाणिपात्रं परपात्रं, यदिवा–पाणिपात्रस्याच्छिद्रपाणेर्जिनकल्पिकादेः पतद्ग्रहः परपात्रं तत्र संयमविराधनाभयान्न भुञ्जीत तथा परस्य–गृहस्थस्य वस्त्रं परवस्त्रं तत्साधुरचेलोऽपि सन् पश्चात्कर्मादिदोषभयात् हतनष्टादिदोषसम्भवाच्च न बिभृयात्, यदिवा–जिनकल्पिकादिकोऽचेलो भूता सर्वमपि वस्त्रं परवस्त्रमितिकृत्वा न बिभृयाद्, तदेतत्सर्वं परपात्रभोजनादिकं संयमविराधकत्वेन ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ तथा—

आसंदी पलियंके य, णिसिज्जं च गिहंतरे। संपुच्छणं सरणं वा, तं विज्जं परिजाणिया ॥ २१ ॥
जसं कित्तिं सलोयं च, जा य वंदणपूयणा। सव्वलोयंसि जे कामा, तं विज्जं परिजाणिया ॥ २२ ॥
जेणेहं णिव्वहे भिक्खू, अन्नपाणं तहाविहं। अणुप्पयाणमन्नेसिं, तं विज्जं परिजाणिया ॥ २३ ॥
एवं उदाहु निग्गंथे, महावीरे महामुणी। अणंतनाणदंसी से, धम्मं देसितवं सुतं ॥ २४ ॥

'आसन्दी'त्यासनविशेषः, अस्य चोपलक्षणार्थत्वात्सर्वोऽप्यासनविधिर्गृहीतः, तथा 'पर्यंकः' शयनविशेषः, तथा गृहस्यान्तर्मध्ये गृहयोर्वा मध्ये निषद्यां वाऽऽसनं वा संयमविराधनाभयात्परिहरेत्, तथा चोक्तम्—"गंभीरविजया[1] एते, पाणा दुप्पडिलेहगा। अगुत्ती बंभचेरस्स, इत्थीओ वावि संकणा ॥ १ ॥[2]" इत्यादि, तथा तत्र गृहस्थगृहे कुशलादिप्रच्छनं आत्मीयशरीरावयवप्रच्छ(पुच्छ)नं वा तथा पूर्वक्रीडितस्मरणं चेत्येतत्सर्वं 'विद्वान्' विदितवेद्यः सन्नवनर्थायेति ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेत् ॥२१॥ अपिच बहुसमरसङ्कटनिर्वहणशौर्यलक्षणं यशः दानसाध्या कीर्तिः जातितपोबाहुश्रुत्यादिजनिता श्लाघा, तथा या

॥१८१॥

१ गंभीरविजया इति द० अ० ६ गा० ५६ अप्रकाशाश्रया इति वृत्तिः। २ एतानि गम्भीरच्छिद्राणि प्राणा दुष्प्रतिलेख्याः। अगुप्तिर्ब्रह्मचर्यस्य स्त्रियो वापि शंकनं ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सुरासुराधिपतिचक्रवर्तिबलदेववासुदेवादिभिर्वन्दना तथा तैरेव सत्कारपूर्विका वस्त्रादिना पूजना, तथा सर्वस्मिन्नपि लोके इच्छामदनरूपा ये केचन कामास्तदेतत्सर्वं यशःकीर्ति(श्लोकादिक)मपकारितया परिज्ञाय परिहरेदिति ॥२२॥ किञ्चान्यत्—'येन' अन्नेन पानेन वा तथाविधेनेति सुपरिशुद्धेन कारणापेक्षया लशुद्धेन वा 'इह' अस्मिन् लोके इदं संयमपात्रादिकं दुर्भिक्षरोगातङ्कादिकं वा भिक्षुः निर्वहेत् निर्वाहयेद्वा तदन्नं पानं वा 'तथाविधं' द्रव्यक्षेत्रकालभावापेक्षया 'शुद्धं' कल्पं गृह्णीयात्तथैतेषाम्—अन्नादीनामनुप्रदानमन्यस्मै साधवे संयमयात्रानिर्वहणसमर्थमनुतिष्ठेत्, यदिवा—येन केनचिदनुष्ठितेन 'इमं' संयमं 'निर्वहेत्' निर्वाहयेद् असारतामापादयेत्तथाविधमशनं पानं वाऽन्यद्वा तथाविधमनुष्ठानं न कुर्यात्, तथैतेषामशनादीनाम् 'अनुप्रदानं' गृहस्थानां परतीर्थिकानां स्वयूथ्यानां वा संयमोपघातकं नानुशीलयेदिति, तदेतत्सर्वं ज्ञपरिज्ञया ज्ञात्वा सम्यक् परिहरेदिति॥२३॥ यदुपदेशेनैतत्सर्वं कुर्यात्तं दर्शयितुमाह—'एवम्' अनन्तरोक्तया नीत्या उद्देशकादेरारभ्य 'उदाहु'रिति उदाहृतवानुक्तवान् निर्गतः सर्वाह्याभ्यन्तरो ग्रन्थो यस्मात्स निर्ग्रन्थो 'महावीर' इति श्रीमद्वर्धमानस्वामी महांश्चासौ मुनिश्च महामुनिः अनन्तं ज्ञानं दर्शनं च यस्यासावनन्तज्ञानदर्शनी स भगवान् 'धर्मं' चारित्रलक्षणं संसारोत्तारणसमर्थं तथा 'श्रुतं च' जीवादिपदार्थसंसूचकं 'देशितवान्' प्रकाशितवान् ॥ २४ ॥ किञ्चान्यत्—

भासमाणो न भासेज्जा, णेव वंफेज्ज मम्मयं । मातिट्ठाणं विवज्जेज्जा, अणुचिंतिय वियागरे ॥ २५ ॥
तत्थिमा तइया भासा, जं वदित्ताऽणुतप्पती । जं छन्नं तं न वत्तव्वं, एसा आणा णियंठिया ॥२६॥
होलावायं सहीवायं, गोयावायं च नो वदे । तुमं तुमंति अमणुन्नं, सव्वसो तं ण वत्तए ॥ २७ ॥
अकुसीले सया भिक्खू, णेव संसग्गियं भए । सुहरूवा तत्थुवस्सग्गा, पडिबुज्झेज्ज ते विऊ ॥२८॥

यो हि भाषासमितः स भाषमाणोऽपि धर्मकथासम्बन्धमभाषक एव स्यात्, उक्तं च—"वयणविहत्तीकुसलो वओगयं बहुविहं वियाणंतो । दिवसंपि भासमाणो सोहू वयगुत्तयं पत्तो ॥ १ ॥" यदिवा—यत्रान्यः कश्चिद्वक्ताधिको भाषमाणस्तत्रान्तर एव सश्रुतिकोऽहमित्येवमभिमानवान्न भाषेत, तथा मर्म गच्छतीति मर्मगं वचो न 'वंफेज्ज'त्ति नाभिलपेत्, यद्वचनमुच्यमानं तथ्यमतथ्यं वा सद्यस्य कस्यचिन्मनःपीडामाधत्ते तद्विवेकी न भाषेतेति भावः, यदिवा 'मामकं' ममीकारः पक्षपातस्तं भाषमाणोऽन्यदा वा 'न वंफेज्ज'त्ति नाभिलपेत्, तथा 'मातृस्थानं' मायाप्रधानं वचो विवर्जयेत्, इदमुक्तं भवति—परवञ्चनबुद्ध्या गूढाचारप्रधानो भाषमाणोऽभाषमाणो वाऽन्यदा वा मातृस्थानं न कुर्यादिति, यदा तु वक्तुकामो भवति तदा नैतद्वचः परात्मनोरुभयोर्वा बाधकमित्येवं प्राग्विचिन्त्य वचनमुदाहरेत्, तदुक्तम्—"पुव्विं बुद्धीएँ पेहित्ता, पच्छा वक्कमुदाहरे" इत्यादि ॥२५॥ अपिच—सत्या असत्या सत्यामृषा असत्यामृषेत्येवंरूपासु चतसृषु भाषासु मध्ये तत्रेयं सत्यामृषेत्येतदभिधाना तृतीया भाषा, सा च किञ्चिन्मृषा किञ्चित्सत्या इत्येवंरूपा, तद्यथा—दश दारका अस्मिन्नगरे जाता मृता वा, तदत्र न्यूनाधिकसम्भवे सति सङ्ख्याया व्यभि-

१ वचनविभक्तिकुशलो वचोगतं बहुविधं विजानन् । दिवसमपि भाषमाणः साधुर्वचनगुप्तिसम्प्राप्तः ॥ १ ॥ २ तहावि द०अ० नि० । ३० न्यदा वा प्र० । ४ पूर्वं बुद्ध्या प्रेक्षयित्वा पश्चाद् वाक्यमुदाहरेत् ।

चारात्सत्यामृषात्वमिति, यां चैवंरूपां भाषामुदित्वा अनु—पश्चाज्जाषणाज्जन्मान्तरे वा तज्जनितेन दोषेण 'तप्यते' पीड्यते क्लेशभाग्भवति, यदिवा—अनुतप्यते किं ममैवम्भूतेन भाषितेनेत्येवं पश्चात्तापं विधत्ते, ततश्चेदमुक्तं भवति—मिश्रापि भाषा दोषाय किं पुनरसत्या द्वितीया भाषा समस्तार्थविसंवादिनी ?, तथा प्रथमापि भाषा सत्या या प्राण्युपतापेन दोषानुषङ्गिणी सा न वाच्या, चतुर्थ्यप्यसत्यामृषा भाषा या बुधैरनाचीर्णा सा न वक्तव्येति, सत्याया अपि दोषानुषङ्गित्वमधिकृत्याह—यद्वचः 'छन्नं'ति 'क्षणु हिंसायां' हिंसाप्रधानं, तद्यथा—वध्यतां चौरोऽयं लूयन्तां केदाराः दम्यन्तां गोरथका इत्यादि, यदिवा—'छन्न'न्ति प्रच्छन्नं यल्लोकैरपि यत्नतः प्रच्छाद्यते तत्सत्यमपि न वक्तव्यमिति, 'एषाऽऽज्ञा' अयमुपदेशो निर्ग्रन्थो—भगवांस्तस्येति ॥२६॥ किञ्च—होलेत्येवं वादो होलावादः, तथा सख्येत्येवं वादः सखिवादः, तथा गोत्रोद्घाटनेन वादो गोत्रवादो यथा काश्यपसगोत्रे वशिष्ठसगोत्रे वेति, इत्येवंरूपं वादं साधुर्नो वदेत्, तथा 'तुमं तुमं'ति तिरस्कारप्रधानमेकवचनान्तं बहुवचनोच्चारणयोग्ये 'अमनोज्ञं' मनःप्रतिकूलरूपमन्यदप्येवम्भूतमपमानापादकं 'सर्वशः' सर्वथा तत्साधूनां वक्तुं न वर्तत इति ॥ २७ ॥ यदाश्रित्योक्तं निर्युक्तिकारेण तद्यथा—"पासत्थोसण्णकुसील संथवो ण किल वट्टए काउं" तदिदमित्याह—कुत्सितं शीलमस्येति कुशीलः स च पार्श्वस्थादीनामन्यतमः न कुशीलोऽकुशीलः 'सदा' सर्वकालं भिक्षणशीलो भिक्षुः कुशीलो न भवेत्, न चापि कुशीलैः सार्धं 'संसर्गं' साङ्गत्यं 'भजेत' सेवेत, तत्संसर्गदोषोद्भावविषयाऽऽह—'सुखरूपाः' सातगौरवसुखभावाः 'तत्र' तस्मिन् कुशीलसंसर्गे संयमोपघातकारिण उपसर्गाः प्रादुष्यन्ति, तथाहि—ते कुशीला वक्तारो भवन्ति—कः किल प्रासुकोदकेन हस्तपाददन्तादिके प्रक्षाल्यमाने दोषः स्यात् ?, तथा नाशरीरो धर्मो भवति इत्यतो येन केनचित्प्रकारेणाधाकर्मसन्निध्यादिना तथा उपानच्छत्रादिना च शरीरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्माधारं वर्तयेत्, उक्तं च-"अप्पेण बहुमेसेज्जा, एयं पंडियलक्खणं" इति, तथा-"शरीरं धर्मसंयुक्तं, रक्षणीयं प्रयत्नतः । शरीरात् स्रवते धर्मः, पर्वतात्सलिलं यथा ॥१॥" तथा साम्प्रतमल्पानि संहननानि अल्पधृतयश्च संयमे जन्तव इत्येवमादि कुशीलोक्तं श्रुत्वा अल्पसत्त्वास्तत्रानुपजन्तीति 'विद्वान्' विवेकी 'प्रतिबुध्येत' जानीयात् बुद्ध्वा चापायरूपं कुशीलसंसर्गं परिहरेदिति ॥२८॥ किञ्चान्यत्—

नन्नत्थ अंतराएणं, परगेहे ण णिसीयए। गामकुमारियं किडुं, नातिवेलं हसे मुणी ॥ २९ ॥
अणुस्सुओ उरालेसु, जयमाणो परिव्वए । चरियाए अप्पमत्तो, पुट्ठो तत्थऽहियासए ॥ ३० ॥
हम्ममाणो ण कुप्पेज्ज, वुच्चमाणो न संजले । सुमणे अहियासिज्जा, ण य कोलाहलं करे ॥ ३१ ॥
लद्धे कामे ण पत्थेज्जा, विवेगे एवमाहिए । आयरियाइं सिक्खेज्जा, बुद्धाणं अंतिए सया ॥ ३२ ॥

तत्र साधुभिक्षादिनिमित्तं ग्रामादौ प्रविष्टः सन् परो-गृहस्थस्तस्य गृहं परगृहं तत्र 'न निषीदेत्' नोपविशेत् उत्सर्गतः, अस्यापवादं दर्शयति-नान्यत्र 'अन्तरायेणे'ति अन्तरायः शक्त्यभावः, स च जरसा रोगातङ्काभ्यां स्यात्, तस्मिंश्चान्तराये सत्युपविशेत् यदिवा-उपशमलब्धिमान् कश्चित्सुसहायो गुर्वनुज्ञातः कस्यचित्तथाविधस्य धर्मदेशनानिमित्तमुपविशेदपि, तथा ग्रामे कुमारका ग्रामकुमारकास्तेषामियं ग्रामकुमारिका काऽसौ ?-'क्रीडा' हास्यकन्दर्पहस्तसंस्पर्शनालिङ्गनादिका यदिवा वट्टकन्दुकादिका तां मुनिर्न

१ अन्तरेण बहु एषयेत् एतत् पण्डितलक्षणं । २ पापं प्र० । ३ एसमाहिए प्र० ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥१८४॥

९ धर्माध्ययनं.

कुर्यात्, तथा वेला-मर्यादा तामतिक्रान्तमतिवेलं न हसेत्, मर्यादामतिक्रम्य 'मुनिः' साधुः ज्ञानावरणीयाद्यष्टविधकर्मबन्धनभयान्न हसेत्, तथा चागमः-"जीवे णं भंते! हसमाणे(चा) उस्सूयमाणे वा कइ कम्मपगडीओ बंधइ?, गोयमा!, सत्तविहबंधए वा अट्ठविहबंधए वा" इत्यादि ॥२९॥ किञ्च-'उराला' उदाराः शोभना मनोज्ञा ये चक्रवर्त्यादीनां शब्दादिषु विषयेषु कामभोगा वस्त्राभरणगीतगन्धर्वयानवाहनादयस्तथा आज्ञैश्वर्यादयश्च एतेष्वुदारेषु दृष्टेषु श्रुतेषु वा नोत्सुकः स्यात्, पाठान्तरं वा न निश्रितोऽनिश्रितः-अप्रतिबद्धः स्यात्, यतमानश्च-संयमानुष्ठाने परि-समन्तान्मूलोत्तरगुणेषु उद्यमं कुर्वन् 'व्रजेत्' संयमं गच्छेत् तथा 'चर्यायां' भिक्षादिकायाम् 'अप्रत्तमः स्यात्' नाहारादिषु रसगार्ध्यं विदध्यादिति, तथा 'स्पृष्टश्च' अभिद्रुतश्च परीषहोपसर्गैस्तत्रादीनमनस्कः कर्मनिर्जरां मन्यमानो 'विषहेत्' सम्यक् सह्यादिति ॥३०॥ परीषहोपसर्गाधिसहनमेवाधिकृत्याह-'हन्यमानो' यष्टिमुष्टिलकुटादिभिरपि हतश्च 'न कुप्येत्' न कोपवशगो भवेत्, तथा दुर्वचनानि 'उच्यमानः' आक्रुश्यमानो निर्भर्त्स्यमानो 'न संज्वलेत्' न प्रतीपं वदेत्, न मनागपि मनोऽन्यथात्वं विदध्यात्, किंतु सुमनाः सर्वं कोलाहलमकुर्वन्नधिसहेतेति ॥३१॥ किञ्चान्यत्-'लब्धान्' प्राप्तानपि 'कामान्' इच्छामदनरूपान् गन्धालङ्कारवस्त्रादिरूपान्वा वैरस्वामिवत् 'न प्रार्थयेत्' नानुमन्येत न गृह्णीयादित्यर्थः, यदिवा-यत्रकामावसायितया गमनादिलब्धिरूपान् कामांस्तपोविशेषलब्धानपि नोपजीव्यात्, नाप्यनागतान् ब्रह्मदत्तवत्प्रार्थयेद्, एवं च कुर्वतो भावविवेकः 'आख्यात' आविर्भावितो भवति, तथा 'आर्याणि' आर्याणां कर्तव्यानि अनार्यकर्तव्यपरिहारेण यदिवा- ॥१८४॥
आचर्याणि मुमुक्षुणा यान्याचरणीयानि ज्ञानदर्शनचारित्राणि तानि 'बुद्धानाम्' आचार्याणाम् 'अन्तिके' समीपे 'सदा' सर्व-

१ जीवो भदन्त ! हसन् उत्सुकायमानो वा कतीः कर्मप्रकृतीर्बध्नाति, गौतम ! सप्तविधबन्धको वाऽष्टविधबंधको वा ।

कालं 'शिक्षेत' अभ्यसेदिति, अनेन हि शीलवता नित्यं गुरुकुलवास आसेवनीय इत्यावेदितं भवतीति ॥ ३२ ॥ यदुक्तं बुद्धानामन्तिके शिक्षेत्तत्स्वरूपनिरूपणायाह—

सुस्सूसमाणो उवासेज्जा, सुप्पन्नं सुतवस्सियं। वीरा जे अत्तपन्नेसी, धितिमन्ता जिइंदिया ॥३३॥
गिहे दीवमपासंता, पुरिसादाणिया नरा। ते वीरा बंधणुम्मुक्का, नावकंखंति जीवियं ॥ ३४ ॥
अगिद्धे सद्दफासेसु, आरंभेसु अणिस्सिए । सव्वं तं समयातीतं, जमेतं लविय बहु ॥ ३५ ॥
अइमाणं च मायं च, तं परिण्णाय पंडिए । गारवाणि य सव्वाणि, णिव्वाणं संधए मुणि ॥ ३६ ॥
(गाथाग्रं ४८२) त्तिबेमि ॥ इति श्रीधम्मनामं नवममज्झयणं समत्तं ॥

गुरोरादेशं प्रति श्रोतुमिच्छा शुश्रूषा गुर्वादेर्वैयावृत्त्यमित्यर्थः तां कुर्वाणो गुरुम् 'उपासीत' सेवेत, तस्यैव प्रधानगुणद्वयद्वारेण विशेषणमाह-सुष्ठु शोभना वा प्रज्ञाऽस्येति सुप्रज्ञः-स्वसमयपरसमयवेदी गीतार्थ इत्यर्थः, तथा सुष्ठु शोभनं वा सबाह्याभ्यन्तरं तपोऽस्यास्तीति सुतपस्वी, तमेवम्भूतं ज्ञानिनं सम्यक्चारित्रवन्तं गुरुं परलोकार्थी सेवेत, तथा चोक्तम्-"नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥ १ ॥" य एवं कुर्वन्ति तान् दर्शयति-यदिवा

१ ज्ञानस्य भवती भागी स्थिरतरो दर्शने चारित्रे च । धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

के ज्ञानिनस्तपस्विनो वेत्याह–'धीराः' कर्मविदारणसहिष्णवो धीरा वा परीषहोपसर्गाक्षोभ्याः, धिया–बुद्ध्या राजन्तीति वा धीरा ये केचनासन्नसिद्धिगमनाः, आसो–रागादिविप्रमुक्तस्य प्रज्ञा–केवलज्ञानाख्या तामन्वेष्टुं शीलं येषां ते आप्तप्रज्ञान्वेषिणः सर्वज्ञोक्तान्वेषिण इतियावत्, यदिवा–आत्मप्रज्ञान्वेषिण आत्मनः प्रज्ञा–ज्ञानमात्मप्रज्ञा तदन्वेषिणः आत्मज्ञत्वा(प्रज्ञा)न्वेषिण आत्महितान्वेषिण इत्यर्थः, तथा धृतिः–संयमे रतिः सा विद्यते येषां ते धृतिमन्तः, संयमधृत्या हि पञ्चमहाव्रतभारोद्वहनं सुसाध्यं भवतीति, तपःसाध्या च सुगतिर्हस्तप्राप्तेति, तदुक्तम्–"जस्स धिई तस्स तवो जस्स तवो तस्स सुग्गई सुलहा । जे अधिइमंत पुरिसा तवोऽवि खलु दुल्लहो तेसिं ॥ १ ॥" तथा जितानि–वशीकृतानि स्वविषयरागद्वेषविजयेनेन्द्रियाणि—स्पर्शनादीनि यैस्ते जितेन्द्रियाः, शुश्रूषमाणाः शिष्या गुरवो वा शुश्रूषमाणा यथोक्तविशेषणविशिष्टा भवन्तीत्यर्थः ॥ ३३ ॥ यदभिसंधायिनः पूर्वोक्तविशेषणविशिष्टा भवन्ति तदभिधित्सुराह—'गृहे' गृहवासे गृहपाशे वा गृहस्थभाव इतियावत् 'दीवं'ति 'दीपी दीप्तौ' दीपयति—प्रकाशयतीति दीपः स च भावदीपः श्रुतज्ञानलाभः यदिवा—द्वीपः समुद्रादौ प्राणिनामाश्वासभूतः स च भावद्वीपः संसारसमुद्रे सर्वज्ञोक्तचारित्रलाभस्तदेवम्भूतं दीपं द्वीपं वा गृहस्थभावे 'अपदस्यन्तः' अप्राप्नुवन्तः सन्तः सम्यक् प्रव्रज्योत्थानेनोत्थिता उत्तरोत्तरगुणलाभेनैवम्भूता भवन्तीति दर्शयति–'नराः' पुरुषाः पुरुषोत्तमत्वाद्धर्मस्य नरोपादानम्, अन्यथा स्त्रीणामप्येतद्गुणभाक्त्वं भवति, अथवा देवादिव्युदासार्थमिति, मुमुक्षूणां पुरुषाणामादानीया—आश्रयणीयाः पुरुषादानीया महतोऽपि महीयांसो भवन्ति, यदिवा—

१ यस्य धृतिस्तस्य तपो यस्य तपस्तस्य सुगतिस्सुलभा । येऽधृतिमन्तः पुरुषास्तपोऽपि खलु दुर्लभं तेषां ॥ १ ॥

॥१८५॥

आदानीयो–हितैषिणां मोक्षस्तन्मार्गो वा सम्यग्दर्शनादिकः पुरुषाणां–मनुष्याणामादानीयः पुरुषादानीयः स विद्यते येषामिति विगृह्य मत्वर्थीयोऽर्शआदिभ्योऽजिति, तथा य एवंभूतास्ते विशेषेणेरयन्ति अष्टप्रकारं कर्मेति वीराः, तथा बन्धनेन सबाह्याभ्यन्तरेण पुत्रकलत्रादिस्नेहरूपेणोत्–प्राबल्येन मुक्ता बन्धनोन्मुक्ताः सन्तो 'जीवितम्' असंयमजीवितं प्राणधारणं वा 'नाभिकाङ्क्षन्ति' नाभिलषन्तीति ॥ ३४ ॥ किञ्चान्यत्—'अगृद्धः' अनध्युपपन्नोऽमूर्च्छितः क ?—शब्दस्पर्शेषु मनोज्ञेषु आद्यन्तग्रहणान्मध्यग्रहणमतो मनोज्ञेषु रूपेषु गन्धेषु रसेषु वा अगृद्ध इति द्रष्टव्यं, तथेतरेषु वाऽद्विष्ट इत्यपि वाच्यं, तथा 'आरम्भेषु' सावद्यानुष्ठानरूपेषु 'अनिश्रितः' असम्बद्धोऽप्रवृत्त इत्यर्थः, उपसंहर्तुकाम आह—'सर्वमेतद्' अध्ययनादेरारभ्य प्रतिषेध्यत्वेन यत् लपितम्–उक्तं मया बहु तत् 'समयाद्' आर्हतादागमादतीतमतिक्रान्तमितिकृत्वा प्रतिषिद्धं, यदपि च विधिद्वारेणोक्तं तदेतत्सर्वं कुत्सितसमयातीतं लोकोत्तरं प्रधानं वर्तते, यदपि च तैः कुतीर्थिकैर्बहु लपितं तदेतत्सर्वं समयातीतमितिकृत्वा नानुष्ठेयमिति ॥ ३५ ॥ प्रतिषेध्यप्रधाननिषेधद्वारेण मोक्षाभिसन्धानेनाह—अतिमानो महामानस्तं, चशब्दात्तत्सहचरितं क्रोधं च, तथा मायां चशब्दात्तत्कार्यभूतं लोभं च, तदेतत्सर्वं 'पण्डितो' विवेकी ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेत्, तथा सर्वाणि 'गारवाणि' ऋद्धिरससातरूपाणि सम्यग् ज्ञात्वा संसारकारणत्वेन परिहरेत्, परिहृत्य च 'भुनिः' साधुः 'निर्वाणम्' अशेषकर्मक्षयरूपं विशिष्टाकाशदेशं वा 'सन्धयेत्' अभिसन्दध्यात् प्रार्थयेदितियावत्। इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ ३६ ॥ समाप्तं धर्माख्यं नवममध्ययनमिति ॥

अथ दशमं श्रीसमाध्यध्ययनं प्रारभ्यते ॥

नवमानन्तरं दशममारभ्यते—अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने धर्मोऽभिहितः, स चाविकलः समाधौ सति भवतीत्यतोऽधुना समाधिः प्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्युपक्रमादीन्यनुयोगद्वाराणि वाच्यानि, तत्रोपक्रमद्वारान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा–धर्मे समाधिः कर्तव्यः, सम्यगाधीयते–व्यवस्थाप्यते मोक्षं तन्मार्गं वा प्रति येनात्मा धर्मध्यानादिना स समाधिः–धर्मध्यानादिकः, स च सम्यग् ज्ञात्वा स्पर्शनीयः, नामनिष्पन्नं तु निक्षेपमधिकृत्य निर्युक्तिकृदाह–

आयाणपदेणाऽऽधं गोणं णामं पुणो समाहित्ति । णिक्खिविऊण समाहिं भावसमाहीइ पगयं तु ॥ १०३ ॥
णामंठवणादविए खेत्ते काले तहेव भावे य । एसो उ समाहीए णिक्खेवो छव्विहो होइ ॥ १०४ ॥
पञ्चसु विसएसु सुभेसु दव्वंमि वा भवे समाहित्ति । खेत्तं तु जम्मि खेत्ते काले कालो जहिं जो ऊ ॥ १०५ ॥
भावसमाहि चउव्विह दंसणणाणे तवे चरित्ते य । चउसुवि समाहियप्पा संमं चरणट्ठिओ साहू ॥ १०६ ॥

आदीयते–गृह्यते प्रथममादौ यत्तदादानम् आदानं च तत्पदं च–सुबन्तं तिङन्तं वा तदादानपदं तेन 'आघं'ति नामास्याध्ययनस्य, यस्मादध्ययनादाविदं सूत्रम्–'आघं मईमं मणुवीइ धम्म'मित्यादि, यथोत्तराध्ययनेषु चतुर्थमध्ययनं प्रमादाप्रमादाभिधायकमप्यादानपदेन 'असंखय'मित्युच्यते, गुणनिष्पन्नं पुनरस्याध्ययनस्य नाम समाधिरिति, यस्मात्स एवात्र प्रतिपाद्यते, तं च समाधिं

॥१८६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामादिना निक्षिप्य भावसमाधिनेह 'प्रकृतम्' अधिकार इति । समाधिनिक्षेपार्थमाह—नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् एष तु समाधिनिक्षेपः षड्विधो भवति, तुशब्दो गुणनिष्पन्नस्यैव नाम्नो निक्षेपो भवतीत्यस्यार्थस्याविर्भावनार्थ इति, नामस्थापने सुगमत्वादनादृत्य द्रव्यादिकमधिकृत्याह—पञ्चस्वपि शब्दादिषु मनोज्ञेषु विषयेषु श्रोत्रादीन्द्रियाणां यथास्वं प्राप्तौ सत्यां यस्तुष्टिविशेषः स द्रव्यसमाधिः, तदन्यथा त्वसमाधिरिति, यदिवा द्रव्ययोर्द्रव्याणां वा सम्मिश्राणामविरोधिनां सतां न रसोपघातो भवति अपितु रसपुष्टिः स द्रव्यसमाधिः, तद्यथा—क्षीरशर्करयोर्दधिगुडचातुर्जातकादीनां चेति, येन वा द्रव्येणोपभुक्तेन समाधिपानकादिना समाधिर्भवति तद्द्रव्यं द्रव्यसमाधिः, तुलादावारोपितं वा यत् द्रव्यं समतामुपैतीत्यादिको द्रव्यसमाधिरिति, क्षेत्रसमाधिस्तु यस्य यस्मिन् क्षेत्रे व्यवस्थितस्य समाधिरुत्पद्यते स क्षेत्रप्राधान्यात् क्षेत्रसमाधिः यस्मिन्वा क्षेत्रे समाधिर्व्यावर्ण्यते इति, कालसमाधिरपि यस्य यं कालमवाप्य समाधिरुत्पद्यते, तद्यथा—शरदि गवां नक्तमुल्लूकानामहनि बलिभुजां, यस्य वा यावन्तं कालं समाधिर्भवति यस्मिन्वा काले समाधिर्व्याख्यायते स कालप्राधान्यात् कालसमाधिरिति । भावसमाधिं त्वधिकृत्याह—भावसमाधिस्तु दर्शनज्ञानतपश्चारित्रभेदाच्चतुर्धा, तत्र चतुर्विधमपि भावसमाधिं समासतो गाथापश्चार्धेनाह—मुमुक्षुणा चर्यत इति चरणं तत्र सम्यक्चरणे—चारित्रे व्यवस्थितः—समुद्युक्तः 'साधुः' मुनिश्चतुर्ष्वपि भावसमाधिभेदेषु दर्शनज्ञानतपश्चारित्ररूपेषु सम्यगाहितो—व्यवस्थापित आत्मा येन स समाहितात्मा भवति, इदमुक्तं भवति—यः सम्यक्चरणे व्यवस्थितः स चतुर्विधभावसमाधिसमाहितात्मा भवति, यो वा भावसमाधिसमाहितात्मा भवति, स सम्यक्चरणे व्यवस्थितो द्रष्टव्य इति, तथाहि—दर्शनसमाधौ व्यवस्थितो जिनवचनभावितान्तःकरणो निवातशरणप्रदीपवन्न कुमतिवायुभिर्भ्राम्यते, ज्ञानसमाधिना तु यथा यथाऽपूर्वं श्रुतमधीते तथा तथाऽतीव भावसमाधावुद्युक्तो भवति, तथा चोक्तम्—"जह जह सुयमवगाहइ अइसयरसपसरसंजुयमउव्वं । तह तह पल्हाइ मुणी णवणवसंवेगसद्धाए ॥ १ ॥" चारित्रसमाधावपि विषयसुखनिःस्पृहतया निष्किञ्चनोऽपि परं समाधिमाप्नोति, तथा चोक्तम्—"तृणसंस्तारनिषण्णोऽपि मुनिवरो भ्रष्टरागमदमोहः । यत्प्राप्नोति मुक्तिसुखं कुतस्तत् चक्रवर्त्यपि ? ॥ १ ॥ नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य । यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥ २ ॥" इत्यादि, तपःसमाधिनापि विकृष्टतपसोऽपि न ग्लानिर्भवति तथा क्षुत्तृष्णादिपरीषहेभ्यो नोद्विजते, तथा अभ्यस्ताभ्यन्तरतपोध्यानाश्रितमनाः स निर्वाणस्थ इव न सुखदुःखाभ्यां बाध्यत इत्येवं चतुर्विधभावसमाधिस्थः सम्यक्चरणव्यवस्थितो भवति साधुरिति ॥ गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदं—

सूत्रक. १२ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१८७॥

१० समाध्यध्ययनं.

आघं मईमं मणुवीय धम्मं, अंजू समाहिं तमिणं सुणेह । अपडिन्न भिक्खू उ समाहिपत्ते, अणियाण भूतेसु परिव्वएज्जा ॥ १ ॥ उड्ढं अहे यं तिरियं दिसासु, तसा य जे थावर जे य पाणा । हत्थेहिं पाएहिं य संजमित्ता, अदिन्नमन्नेसु य णो गहेज्जा ॥ २ ॥ सुयक्खायधम्मे वितिगिच्छतिण्णे, लाढे चरे आयतुले पयासु । आयं न कुज्जा इह जीवियट्ठी, चयं न कुज्जा सुतवस्सि भिक्खू ॥ ३ ॥ सविंदियाभिनिव्वुडे पयासु, चरे मुणी सव्वतो विप्पमुक्के । पासाहि पाणे य पुढोवि सत्ते, दुक्खेण अट्टे परितप्पमाणे ॥ ४ ॥

॥१८७॥

---

१ यथा यथा श्रुतमवगाहतेऽतिशयरसप्रसरसंयुतमपूर्वं । तथा २ प्रह्लादते मुनिर्नवनवसंवेगश्रद्धया ॥ १ ॥ २ तृणसंस्तारनिविष्टोऽपि मुनिवरो भ्रष्टरागमदमोहः यत्प्राप्नोति मुक्तिसुखं कुतस्तत् चक्रवर्त्यपि ॥ १ ॥

अस्य चायमनन्तरसूत्रेण सह सम्बन्धः, तद्यथा—अशेषगारवपरिहारेण मु (मं० ५५००) निर्निर्वाणमनुसन्धयेदित्येतद्भगवानुत्पन्नदिव्यज्ञानः समाख्यातवान् एतच्च वक्ष्यमाणमाख्यातवानिति, 'आघं'ति आख्यातवान् कोऽसौ ?—'मतिमान्' मननं मतिः—समस्तपदार्थपरिज्ञानं तद्विद्यते यस्यासौ मतिमान् केवलज्ञानीत्यर्थः, तत्रासाधारणविशेषणोपादानात्तीर्थकृद् गृह्यते, असावपि प्रत्यासत्तेर्वीरवर्धमानस्वामी गृह्यते, किमाख्यातवान् ?—'धर्मं' श्रुतचारित्राख्यं, कथम् ?—'अनुविचिन्त्य' केवलज्ञानेन ज्ञात्वा प्रज्ञापनायोग्यान् पदार्थानाश्रित्य धर्मं भाषते, यादेवा—ग्राहकमनुविचिन्त्य कस्यार्थस्यायं ग्रहणसमर्थः ? तथा कोऽयं पुरुषः ? कश्च नतः ? किंवा दर्शनमापन्न ? इत्येवं पर्यालोच्य, धर्मशुश्रूषवो वा मन्यन्ते—यथा प्रत्येकमसदभिप्रायमनुविचिन्त्य भगवान् धर्मं भाषते, युगपत्सर्वेषां स्वभाषापरिणत्या संशयापगमादिति, किंभूतं धर्मं भाषते ?—'ऋजुम्' अवक्रं यथावस्थितवस्तुस्वरूपनिरूपणतो, न यथा शाक्याः सर्वं क्षणिकमभ्युपगम्य कृतनाशाकृताभ्यागमदोषभयात्सन्तानमभ्युपगमं कृतवन्तः तथा वनस्पतिमचेतनत्वेनाभ्युपगम्य स्वयं न छिन्दन्ति तच्छेदनादावुपदेशं तु ददति तथा कार्षापणादिकं हिरण्यं स्वतो न स्पृशन्ति अपरेण तु तत्परिग्रहतः क्रयविक्रयं कारयन्ति, तथा सांख्याः सर्वमप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यमभ्युपगम्य कर्मबन्धमोक्षाभावप्रसङ्गदोषभयादाविर्भावतिरोभावावाश्रितवन्त इत्यादिकौटिल्यभावपरिहारेणावक्रं तथ्यं धर्ममाख्यातवान् , तथा सम्यगाधीयते—मोक्षं तन्मार्गं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा प्रत्यात्मा योग्यः क्रियते व्यवस्थाप्यते येन धर्मेणासौ धर्मः समाधिस्तं समाख्यातवान्, यदिवा-धर्ममाख्यातवांस्तत्समाधिं च धर्मध्यानादिकमिति । सुधर्मस्वाम्याह—तमिमं-धर्मं समाधिं वा भगवदुपदिष्टं शृणुत यूयं, तद्यथा-न विद्यते ऐहिकामुष्मिकरूपा प्रतिज्ञा-आकाङ्क्षा तपोऽनुष्ठानं कुर्वतो यस्यासावप्रतिज्ञो, भिक्षणशीलो भिक्षुः तुर्विशेषणे भावभिक्षुः, असावेव परमार्थतः साधुः, धर्मं धर्मसमाधिं च प्राप्तोऽसावेवेति, तथा न विद्यते निदानमारम्भरूपं 'भूतेषु' जन्तुषु यस्यासावनिदानः स एवम्भूतः सावद्यानुष्ठानरहितः परि-समन्तात्संयमानुष्ठाने 'व्रजेत्' गच्छेदिति, यदिवा-अनिदानभूतः-अनाश्रवभूतः कर्मोपादानरहितः सुष्ठु परिव्रजेत् सुपरिव्रजेत्, यदिवा-अनिदानभूतानि-अनिदानकल्पानि ज्ञानादीनि तेषु परिव्रजेत्, अथवा निदानं हेतुः कारणं दुःखस्यातोऽनिदानभूतः कस्यचिद्दुःखमनुपपादयन् संयमे पराक्रमेतेति ॥१॥ प्राणातिपातादीनि तु कर्मणो निदानानि वर्तन्ते, प्राणातिपातोऽपि द्रव्यक्षेत्रकालभावभेदाच्चतुर्धा, तत्र क्षेत्रप्राणातिपातमधिकृत्याह—सर्वोऽपि प्राणातिपातः क्रियमाणः प्रज्ञापकापेक्षयोर्ध्वमधस्तिर्यक् क्रियते, तद्यथा—ऊर्ध्वाधस्तिर्यक्रूपेषु त्रिषु लोकेषु तथा प्राच्यादिषु दिक्षु विदिक्षु चेति, द्रव्यप्राणातिपातस्त्वयं-त्रस्यन्तीति त्रसा-द्वीन्द्रियादयो ये च 'स्थावराः' पृथिव्यादयः, चकारः स्वगतभेदसंसूचनार्थः, कालप्राणातिपातसंसूचनार्थो वा दिवा रात्रौ वा, 'प्राणाः' प्राणिनः, भावप्राणातिपातं त्वाह—एतान् प्राग्उक्तान् प्राणिनो हस्तपादाभ्यां 'संयम्य' बद्ध्वा उपलक्षणार्थत्वादस्यान्यथा वा कदर्थयित्वा यत्तेषां दुःखोत्पादनं तन्न कुर्यात्, यदिवैतान् प्राणिनो हस्तौ पादौ च संयम्य संयतकायः सन्न हिंस्यात्, चशब्दादुच्छ्वासनिश्वासकासितक्षुतवातनिसर्गादिषु सर्वत्र मनोवाक्कायकर्मसु संयतो भवन् भावसमाधिमनुपालयेत्, तथा परैरदत्तं न गृह्णीयादिति तृतीयव्रतोपन्यासः, अदत्तादाननिषेधाच्चार्थतः परिग्रहो निषिद्धो भवति, नापरिगृहीतमासेव्यत इति मैथुननिषेधोऽप्युक्तः, समस्तव्रतसम्यक्पालनोपदेशाच्च मृषावादोऽप्यर्थतो निरस्त इति ॥ २ ॥ ज्ञानदर्शनसमाधिमधिकृत्याह—सुष्ठ्वाख्यातः श्रुतचारित्राख्यो धर्मो येन साधुनाऽसौ स्वाख्यातधर्मा, अनेन ज्ञानसमाधिरुक्तो भवति, न हि विशिष्टपरिज्ञानमन्तरेण स्वाख्यातधर्मत्वमुपपद्यत इति भावः, तथा विचिकित्सा-चित्तविप्लुतिर्विद्वज्जुगुप्सा वा तां '[वि]तीर्णः'-अतिक्रान्तः 'तदेव च निःशङ्कं यज्जिनैः प्रवेदित'मित्येवं निःशङ्कतया न क्वचिच्चित्तविप्लुतिं विधत्त इत्यनेन दर्शनसमाधिः प्रतिपादितो भवति, येन केनचित्प्रासुकाहारोपकरणादिगतेन विधिनाऽऽत्मानं यापयति-पालयतीति लाढः, स एवम्भूतः संयमानुष्ठानं 'चरेत्' अनुतिष्ठेत्, तथा प्रजायन्त इति प्रजाः—पृथिव्यादयो जन्तवस्तास्वात्मतुल्यः, आत्मवत्सर्वप्राणिनः पश्यतीत्यर्थः, एवम्भूत एव भावसाधुर्भवतीति, तथा चोक्तम्—"जह मम ण पियं दुक्खं, जाणिय एमेव सव्वजीवाणं । ण हणइ ण हणावेइ य, सममणई तेण सो समणो ॥ १ ॥"[1] यथा च ममाऽऽक्रुश्यमानस्याभ्याख्यायमानस्य वा दुःखमुत्पद्यते एवमन्येषामपीत्येवं मत्वा प्रजास्वात्मसमो भवति, तथा ह्रासंयमजीवितार्थी प्रभूतं कालं सुखेन जीविष्यामीत्येतदध्यवसायी वा 'आयं' कर्माश्रवलक्षणं न कुर्यात्, तथा 'चयम्' उपचयमाहारोपकरणादेर्धनधान्यद्विपदचतुष्पदादेर्वा परिग्रहलक्षणं संचयमायत्यर्थं सुष्ठु तपस्वी सुतपस्वी-विकृष्टतपोनिष्टप्तदेहो भिक्षुर्न कुर्यादिति ॥३॥ किञ्चान्यत्—सर्वाणि च तानि इन्द्रियाणि च स्पर्शनादीनि तैरभिनिर्वृतः संवृतेन्द्रियो जितेन्द्रिय इत्यर्थः, क ?-'प्रजासु' स्त्रीषु, तासु हि पञ्चप्रकारा अपि शब्दादयो विषया विद्यन्ते, तथा चोक्तम्—"कलानि वाक्यानि विलासिनीनां, गतानि रम्याण्यवलोकितानि । रतानि चित्राणि च सुन्दरीणां, रसोऽपि गन्धोऽपि च चुम्बनानि ॥१॥" तदेवं स्त्रीषु पञ्चेन्द्रियविषयसम्भवात्तद्विषये

[1] यथा मम न प्रियं दुःखं ज्ञात्वा एवमेव सर्वसत्त्वानां । न हन्ति न घातयति च सममणति तेन स श्रमणः ॥ १ ॥

संवृतसर्वेन्द्रियेण भाव्यम्, एतदेव दर्शयति-'चरेत्' संयमानुष्ठानमनुतिष्ठेत् 'मुनिः' साधुः 'सर्वतः' सबाह्याभ्यन्तरात् सङ्गाद्विशेषेण प्रमुक्तो विप्रमुक्तो निःसङ्गो मुनिः निष्किञ्चनश्चेत्यर्थः, स एवम्भूतः सर्वबन्धनविप्रमुक्तः सन् 'पश्य' अवलोकय पृथक् पृथक् पृथिव्यादिषु कायेषु सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्नान् 'सत्त्वान्' प्राणिनः अपिशब्दाद्वनस्पतिकाये साधारणशरीरिणोऽनन्तानप्येकत्वमापन्नान् पश्य, किंभूतान् ?-दुःखेन-असातवेदनीयोदयरूपेण दुःखयतीति वा दुःखम्-अष्टप्रकारं कर्म तेनार्त्तान्-पीडितान् परि-समन्तात्संसारकटाहोदरे स्वकृतेनेन्धनेन 'परिपच्यमानान्' काथ्यमानान् यदिवा—दुष्प्रणिहितेन्द्रियानार्तध्यानोपगतान्मनोवाक्कायैः परितप्यमानान् पश्येति सम्बन्धो लगनीय इति ॥ ४ ॥ अपिच—

एतेसु बाले य पकुव्वमाणे, आवट्टती कम्मसु पावएसु । अतिवायतो कीरति पावकम्मं, निउंजमाणे उ करेइ कम्मं ॥ ५ ॥ आदीणवित्ती व करेति पावं, मंता उ एगंतसमाहिमाहु । बुद्धे समाहीय रते विवेगे, पाणातिवाता विरते ठियप्पा ॥६॥ सव्वं जगं तू समयाणुपेही, पियमप्पियं कस्सइ णो करेज्जा । उट्ठाय दीणो य पुणो विसन्नो, संपूयणं चेव सिलोयकामी ॥७॥ आहाकडं चेव निकाममीणे, नियामचारी य विसण्णमेसी । इत्थीसु सत्ते य पुढो य बाले, परिग्गहं चेव पकुव्वमाणे ॥ ८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एतेषु' प्राङ्निर्दिष्टेषु प्रत्येकसाधारणप्रकारेषूपतापक्रियया बालवत् 'बालः' अज्ञश्चशब्दादितरोऽपि सङ्घट्टनपरितापनापद्रावणादिकेनानुष्ठानेन 'पापानि' कर्माणि प्रकर्षेण कुर्वाणस्तेषु च पापेषु कर्मसु सत्सु एतेषु वा पृथिव्यादिजन्तुषु गतः संस्तेनैव संघट्टनादिना प्रकारेणानन्तशः 'आवर्त्यते' पीड्यते दुःखभाग्भवतीति, पाठान्तरं वा 'एवं तु बाले' एवमित्युपप्रदर्शने यथा चौरः पारदारिको वा असदनुष्ठानेन हस्तपादच्छेदान् बन्धवधादींश्चेहावाप्नोत्येवं सामान्यदृष्टेनानुमानेनान्योऽपि पापकर्मकारी इहामुत्र च दुःखभाग्भवति, 'आउट्टति' त्ति क्वचित्पाठः, तत्राशुभान् कर्मविपाकान् दृष्ट्वा श्रुत्वा ज्ञात्वा वा तेभ्योऽसदनुष्ठानेभ्य 'आउट्टति' त्ति निवर्तते, कानि पुनः पापस्थानानि येभ्यः पुनः प्रवर्तते निवर्तते वा इत्याशङ्क्याह तानि दर्शयति—'अतिपातयतः' प्राणातिपातयतः प्राणव्यपरोपणाद्धेतोस्तथाशुभं ज्ञानावरणादिकं कर्म 'क्रियते' समादीयते, तथा परांश्च भृत्यादीन् प्राणातिपातादौ 'नियोजयन्' व्यापारयन् पापं कर्म करोति, तुशब्दान्मृषावादादिकं च कुर्वन् कारयंश्च पापकं कर्म समुचिनोतीति ॥ ५ ॥ किञ्चान्यत्—आ—समन्ताद्दीना—करुणास्पदा वृत्तिः—अनुष्ठानं यस्य कृपणवनीपकादेः स भवत्यादीनवृत्तिः, एवम्भूतोऽपि पापं कर्म करोति, पाठान्तरं वा आदीनभोज्यपि पापं करोतीति, उक्तं च—"पिंडोलगेव दुस्सीले, णरगाओ ण मुच्चइ" स कदाचिच्छोभनमाहारमलभमानोऽज्ञत्वादार्तरौद्रध्यानोपगतोऽधः सप्तम्यामप्युत्पद्येत, तद्यथा—असावेव राजगृहनगरोत्सवनिर्गतजनसमूहवैभारगिरिशिलापातनोद्यतः स दैवात्स्वयं पतितः पिण्डोपजीवीति, तदेवमादीनभोज्यपि पिण्डोलकादिवज्जनः पापं कर्म करोतीत्येवं 'मत्वा' अवधार्य एकान्तेनात्यन्तेन च यो भावरूपो ज्ञानादिसमाधिस्तमाहुः संसारोत्तरणाय तीर्थकरगणधरादयः, द्रव्य-

१ पिण्डावलगकोऽपि दुःशीलो नरकान्न मुच्यते ॥

समाधयो हि स्पर्शादिसुखोत्पादका अनैकान्तिका अनात्यन्तिकाश्च भवन्ति अन्ते चावश्यमसमाधिमुत्पादयन्ति, तथा चोक्तम्—"यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः । किम्पाकफलादनवद्भवन्ति पश्चादतिदुरन्ताः ॥ १ ॥" इत्यादि, तदेवं 'बुद्धः' अवगततत्त्वः स चतुर्विधेऽपि ज्ञानादिके रतो—व्यवस्थितो 'विवेके वा' आहारोपकरणकषायपरित्यागरूपे द्रव्यभावात्मके रतः सन्नेवंभूतश्च स्यादित्याह—प्राणानां दशप्रकाराणामप्यतिपातो—विनाशस्तस्माद्विरतः स्थितः सम्यग्मार्गेषु आत्मा यस्य सः पाठान्तरं वा 'ठियच्चि'त्ति स्थिता शुद्धस्वभावात्मना अर्चिः—लेश्या यस्य स भवति स्थितार्चिः,—सुविशुद्धस्थिरलेश्य इत्यर्थः ॥६॥ किञ्च—'सर्वं' चराचरं 'जगत्' प्राणिसमूहं समतया प्रेक्षितुं शीलमस्य स समतानुप्रेक्षी समतापश्यको वा, न कश्चित्प्रियो नापि द्वेष्य इत्यर्थः, तथा चोक्तम्—"नत्थि य सि कोइ विस्सो पिओ व सव्वेसु चेव जीवेसु" तथा—'जह मम ण पियं दुक्खमि'त्यादि, समतोपेतश्च न कस्यचित्प्रियमप्रियं वा कुर्यान्निःसङ्गतया विहरेद्, एवं हि सम्पूर्णभावसमाधियुक्तो भवति, कश्चित्तु भावसमाधिना सम्यगुत्थानेनोत्थाय परीषहोपसर्गैस्तर्जितो दीनभावमुपगम्य पुनर्विषण्णो भवति विषयार्थी वा कश्चिद्ग्लानोऽहमस्यमप्यवलम्बते रससातागौरवगृद्धो वा पूजासत्काराभिलाषी स्यात् तदभावे दीनः सन् पार्श्वस्थादिभावेन वा विषण्णो भवति, कश्चित्तथा सम्पूजनं वस्त्रपात्रादिना प्रार्थयेत् 'श्लोककामी च' श्लाघाभिलाषी च व्याकरणगणितज्योतिषनिमित्तशास्त्राण्यधीते क्वचिदिति ॥ ७ ॥ किञ्चान्यत्—साधूनाधाय—उद्दिश्य कृतं निष्पादितमाधाकर्मेत्यर्थः, तदेवम्भूतमाहारोपकरणादिकं निकामम्—अत्यर्थं यः प्रार्थयते स निकाममीणेत्युच्यते । तथा 'निकामम्' अत्यर्थं आधाकर्मादीनि तन्निमित्तं निमन्त्रणादीनि वा सरति—चरति

१ नास्ति तस्य कोऽपि द्वेष्यः प्रियश्च सर्वेषु चैव जीवेषु ॥

तच्छीलश्च स तथा, एवम्भूतः पार्श्वस्थावसन्नकुशीलानां संयमोद्योगे विषण्णानां विषण्णभावमेषते, सदनुष्ठानविषण्णतया संसारपङ्कावसन्नो भवतीतियावत्, अपिच 'स्त्रीषु' रमणीषु 'आसक्तः' अध्युपपन्नः पृथक् पृथक् तद्भाषितहसितविलोकशरीरावयवेष्विति, बालवद् 'बालः' अज्ञः सदसद्विवेकविकलः, तदवसक्ततया च नान्यथा—द्रव्यमन्तरेण तत्सम्प्राप्तिर्भवतीत्यतो येन केनचिदुपायेन तदुपायभूतं परिग्रहमेव प्रकर्षेण कुर्वाणः पापं कर्म समुचिनोतीति ॥ ८ ॥ तथा—

वेराणुगिद्धे णिचयं करेति, इओ चुते स इहमट्ठदुग्गं । तम्हा उ मेधावि समिक्ख धम्मं, चरे मुणी सव्वउ विप्पमुक्के ॥ ९ ॥ आयं ण कुज्जा इह जीवियट्ठी, असज्जमाणो य परिव्वएज्जा । णिसम्मभासी य विणीय गिद्धिं, हिंसन्नियं वा ण कहं करेज्जा ॥ १० ॥ आहाकडं वा ण णिकामएज्जा, णिकामयंते य ण संथवेज्जा । धुणे उरालं अणुवेहमाणे, चिच्चा ण सोयं अणवेक्खमाणो ॥ ११ ॥ एगत्तमेयं अभिपत्थएज्जा, एव पमोक्खो न मुसंति पासं । एसप्पमोक्खो अमुसे वरेवि, अकोहणे सच्चरते तवस्सी ॥ १२ ॥

येन केन कर्मणा—परोपतापरूपेण वैरमनुबध्यते जन्मान्तरशतानुयायि भवति तत्र गृद्धो वैरानुगृद्धः, पाठान्तरं वा 'आरंभसत्तो'त्ति आरम्भे सावद्यानुष्ठानरूपे सक्तो—लग्नो निरनुकम्पो 'निचयं' द्रव्योपचयं तन्निमित्तापादितकर्मनिचयं वा 'करोति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपादत्ते, 'स' एवम्भूत उपात्तवैरः कृतकर्मोपचय 'इतः' अस्मात्स्थानात् 'च्युतो' जन्मान्तरं गतः सन् दुःखयतीति दुःखं-नरकादिघातनास्थानमर्थतः-परमार्थतो दुर्गं-विषमं दुरुत्तरमुपैति, यत एवं तत्तस्मात् 'मेधावी' विवेकी मर्यादावान् वा सम्पूर्णसमाधिगुणं जानानो 'धर्मं' श्रुतचारित्राख्यं 'समीक्ष्य' आलोच्याङ्गीकृत्य 'मुनिः' साधुः 'सर्वतः' सबाह्याभ्यन्तरात्सङ्गात् 'विप्रमुक्तः' अपगतः संयमानुष्ठानं मुक्तिगमनैकहेतुभूतं 'चरेद्' अनुतिष्ठेत्, तथारम्भादितत्सङ्गाद्विप्रमुक्तोऽनिश्रितभावेन विहरेदितियावत् ॥९॥ किञ्चान्यत्-आगच्छतीत्यायो-द्रव्यादेर्लाभस्तन्निमित्तापादितोऽष्टप्रकारकर्मलाभो वा तम् 'इह' अस्मिन् संसारे 'असंयमजीवितार्थी' भोगप्रधानजीवितार्थीत्यर्थः, यदिवा-आजीविकाभयात् द्रव्यसञ्चयं न कुर्यात्, पाठान्तरं वा छन्दणं कुज्जा इत्यादि, छन्दः-प्रार्थनाऽभिलाष इन्द्रियाणां स्वविषयाभिलाषो वा तत् न कुर्यात्, तथा 'असजमानः' सङ्गमकुर्वन् गृहपुत्रकलत्रादिषु 'परिव्रजेत्' उक्तविहारी भवेत् तथा 'गृद्धिं' गार्ध्यं विषयेषु शब्दादिषु 'विनीय' अपनीय 'निशम्य' अवगम्य पूर्वोत्तरेण पर्यालोच्य भाषको भवेत्, तदेव दर्शयति-हिंसया-प्राण्युपमर्दरूपया अन्विता-युक्तां कथां न कुर्यात्, न तत् ब्रूयात् यत्परात्मनो उभयोर्वा बाधकं वच इति भावः, तद्यथा-अभीत पिबत खादत मोदत हत छिन्त प्रहरत पचतेत्यादिकथां पापोपादानभूतां न कुर्यादिति ॥१०॥ अपिच-साधूनाधाय कृतमाधाकृतमौद्देशिकमाधाकर्मेत्यर्थः, तदेवम्भूतमाहारजातं निश्चयेनैव 'न कामयेत्' नाभिलषेत् तथाविधाहारादिकं च 'निकामयतः' निश्चयेनाभिलषतः पार्श्वस्थादींस्तत्सम्पर्कदानप्रतिग्रहसंवाससम्भाषणादिभिः न संस्थापयेत्-नोपबृंहयेत् तैर्वा सार्धं संस्तवं न कुर्यादिति, किञ्च-'उरालं'ति औदारिकं शरीरं विकृष्टतपसा कर्मनिर्जरामनुप्रेक्षमाणो 'धुनीयात्' कृशं कुर्यात्, यदिवा 'उरालं'ति बहुजन्मान्तरसञ्चितं कर्म तदुदारं-मोक्षमनुप्रेक्षमाणो 'धुनीयाद्' अपनयेत्, तस्मिंश्च तपसा धूयमाने कृशीभवति शरीरके कदाचित् शोकः स्यात् तं त्यक्त्वा याचितोपकरणवदनुप्रेक्षमाणः शरीरकं धुनीयादिति सम्बन्धः ॥ ११ ॥ किञ्चापेक्षेतेत्याह-एकत्वम्-असहायत्वमभिप्रार्थयेद्-एकत्वाध्यवसायी स्यात्, तथाहि-जन्मजरामरणरोगशोकाकुले संसारे स्वकृतकर्मणा विलुप्यमानानामसुमतां न कश्चित्राणसमर्थः सहायः स्यात्, तथा चोक्तम्-"एगो मे सासओ अप्पा, णाणदंसणसंजुओ । सेसा मे बाहिरा भावा, सबे संयोगलक्खणा ॥ १ ॥" इत्यादिकामेकत्वभावनां भावयेद्, एवमनयैकत्वभावनया प्रकर्षेण मोक्षः प्रमोक्षो-विप्रमुक्तसङ्गता, न 'मृषा' अलीकमेतद्भवतीत्येवं पश्य, एष एवैकत्वभावनाभिप्रायः प्रमोक्षो वर्तते, अमृषारूपः-सत्यश्चायमेव । तथा 'वरोऽपि' प्रधानोऽप्ययमेव भावसमाधिर्वा, यदिवा यः 'तपस्वी' तपोनिष्टप्तदेहोऽक्रोधनः, उपलक्षणार्थत्वादस्यामानो निर्मायो निर्लोभः सत्यरतश्च एष एव प्रमोक्ष 'अमृषा' सत्यो 'वरः' प्रधानश्च वर्तत इति ॥ १२ ॥ किञ्चान्यत्—

इत्थीसु या आरय मेहुणाओ, परिग्गहं चेव अकुव्वमाणे । उच्चावएसु विसएसु ताई, निस्संसयं भिक्खु समाहिपत्ते ॥ १३ ॥ अरइं रइं च अभिभूय भिक्खू, तणाइफासं तह सीयफासं । उण्हं च दंसं चऽहियासएज्जा, सुब्भिं व दुब्भिं व तितिक्खएज्जा ॥ १४ ॥ गुत्तो वईए य समाहिपत्तो, लेसं समाहट्टु परिव्वएज्जा । गिहं न छाए णवि छायएज्जा, संमिस्सभावं पयहे

---

१ एको मे शाश्वत आत्मा ज्ञानदर्शनसंयुतः शेषा मे बाह्या भावाः सर्वे संयोगलक्षणाः ॥ १ ॥

पयासु ॥ १५ ॥ जे केइ लोगंमि उ अकिरियआया, अन्नेण पुट्ठा धुयमादिसंति । आरंभसत्ता गढिता य लोए, धम्मं ण जाणंति विमुक्खहेउं ॥ १६ ॥

दिव्यमानुषतिर्यग्रूपासु त्रिविधास्वपि स्त्रीषु विषयभूतासु यत् 'मैथुनम्' अब्रह्म तस्माद् आ-समन्ताद्य रतः-अतो निवृत्त इत्यर्थः, तुशब्दात्प्राणातिपातादिनिवृत्तश्च, तथा परि-समन्ताद्गृह्यते इति परिग्रहो धनधान्यद्विपदचतुष्पदादिसंग्रहः तथा आत्माऽऽत्मीयग्रहस्तं चैवाकुर्वाणः सचुद्भावचेषु-नानारूपेषु विषयेषु यदिनोच्चा-उत्कृष्टा अवचा-जघन्यास्तेष्वरक्तद्विष्टः 'आर्यी' अपरेषां च त्राणभूतो विशिष्टोपदेशदानतो 'निःसंशयं' निश्चयेन परमार्थतो 'भिक्षुः' साधुरेवम्भूतो मूलोत्तरगुणसमन्वितो भावसमाधिं प्राप्तो भवति, नापरः कश्चिदिति, उच्चावचेषु वा विषयेषु भावसमाधिं प्राप्तो भिक्षुर्न संश्रयं याति नानारूपान् विषयान् न संश्रयतीत्यर्थः ॥१३॥ विषयाननाश्रयन् कथं भावसमाधिमाप्नुयादित्याह-स भावभिक्षुः परमार्थदर्शी शरीरादौ निःस्पृहो मोक्षगमनैकप्रवणश्च या संयमेऽरतिरसंयमे च रतिर्वा तामभिभूय एतदधिसहेत, तद्यथा-निष्किञ्चनतया तृणादिकान् स्पर्शानादिग्रहणान्निर्मोमतभूप्रदेशस्पर्शांश्च सम्यगधिसहेत, तथा शीतोष्णदंशमशकक्षुत्पिपासादिकान् परीषहानशेषान्यतया निर्जरार्थम् 'अध्यासयेद्' अधिसहेत तथा गन्धं सुरभिमितरं च सम्यक् 'तितिक्षयेत्' सहात्, चशब्दादाक्रोशवधादिकांश्च परिषहान्मुमुक्षुस्तितिक्षयेदिति ॥१४॥ किञ्चान्यत्-वाचि वाचा वा गुप्तो वाग्गुप्तो-मौनव्रती सुपर्यालोचितधर्मसम्बन्धभाषी वेत्येवं भावसमाधिं प्राप्तो भवति, तथा शुद्धां 'लेश्यां' तैजसादिकां 'समाहृत्य' उपादाय अशुद्धां च कृष्णादिकामपहृत्य परि-समन्तात्संयमानुष्ठाने 'व्रजेत्' गच्छेदिति, किञ्चान्यत्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहम्-आवसथं स्वतोऽन्येन वा न छादयेदुपलक्षणार्थत्वादस्यापरमपि गृहादेरुरगवत्परकृतविलनिवासित्वात्संस्कारं न कुर्यात्, अन्यदपि गृहस्थकर्तव्यं परिजिहीर्षुराह—प्रजायन्त इति प्रजास्तासु तद्विषय येन कृतेन सम्मिश्रभावो भवति तत्प्रजञ्झात्, एतदुक्तं भवति-प्रव्रजितोऽपि सन् पचनपाचनादिकां क्रियां कुर्वन् कारयंश्च गृहस्थैः सम्मिश्रभावं भजते, यदिवा-प्रजाः—स्त्रियस्तासु ताभिर्वा यः सम्मिश्रीभावस्तमविकलसंयमार्थी 'प्रजञ्झात्' परित्यजेदिति ॥ १५ ॥ अपिच—ये केचन अस्मिन् लोके अक्रिय आत्मा येषामभ्युपगमे तेऽक्रियात्मानः-साङ्ख्याः, तेषां हि सर्वव्यापित्वादात्मा निष्क्रियः पठ्यते, तथा चोक्तम्—"अकर्ता निर्गुणो भोक्ता, आत्मा कपिलदर्शने" इति, तुशब्दो विशेषणे, स चैतद्विशिनष्टि—अमूर्तत्वव्यापित्वाभ्यामात्मनोऽक्रियत्वमेव बुध्यते, ते चाक्रियात्मवादिनोऽन्येनाक्रियत्वे सति बन्धमोक्षौ न घटेते इत्यभिप्रायवता मोक्षसद्भावं पृष्टाः सन्तोऽक्रियावाददर्शनेऽपि 'धूतं' मोक्षं तदभावम् (च) 'आदिशन्ति' प्रतिपादयन्ति, ते तु पचनपाचनादिके स्नानार्थं जलावगाहनरूपे वा 'आरम्भे' सावद्ये 'सक्ताः' अध्युपपन्ना गृद्धास्तु लोके मोक्षैकहेतुभूतं 'धर्मं' श्रुतचारित्राख्यं 'न जानन्ति' कुमार्गग्राहिणो न सम्यगवगच्छन्तीति ॥ १६ ॥ किञ्चान्यत्—

पुढो य छंदा इह माणवा उ, किरियाकिरीयं च पुढो य वायं । जायस्स बालस्स पकुव्व देहं, पवड्ढती वेरमसंजतस्स ॥ १७ ॥ आउक्खयं चेव अबुज्झमाणे, ममाति से साहसकारि मंदे । अहो य राओ परितप्पमाणे, अट्ठेसु मूढे अजरामरेव्व ॥ १८ ॥ जहाहि वित्तं पसवो य सव्वं, जे बंधवा जे य पिया य मित्ता । लालप्पती सेऽवि य एइ मोहं, अन्ने जणा तंसि हरंति वित्तं ॥ १९ ॥ सीहं जहा खुड्डमिगा चरंता, दूरे चरंती परिसंकमाणा । एवं तु मेहावि समिक्ख धम्मं, दूरेण पावं परिवज्जएज्जा ॥ २० ॥

सूत्रकृ. २३ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१९३॥

१० समाध्यध्ययनं,

पृथक् नाना छन्दः-अभिप्रायो येषां ते पृथक्छन्दा 'इह' अस्मिन्मनुष्यलोके 'मानवा' मनुष्याः, तुरवधारणे, तमेव नानाभिप्रायमाह-क्रियाऽक्रिययोः पृथक्त्वेन क्रियावादमक्रियावादं च समाश्रिताः, तद्यथा-"क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥ १ ॥" इत्येवं क्रियैव फलदायित्वेनाभ्युपगता, क्रियावादमाश्रिताः, एवमेतद्विपर्ययेणाक्रियावादमाश्रिताः, एतयोश्चोत्तरत्र स्वरूपं न्यक्षेण वक्ष्यते, ते च नानाभिप्राया मानवाः क्रियाक्रियादिकं पृथग्वादमाश्रिता मोक्षहेतुं धर्ममजानाना आरम्भेषु सक्ता इन्द्रियवशगा रससातागौरवाभिलाषिण एतत्कुर्वन्ति, तद्यथा-'जातस्य' उत्पन्नस्य 'बालस्य' अज्ञस्य सदसद्विवेकविकलस्य सुखैषिणो 'देहं' शरीरं 'पकुव्व'न्ति खण्डशः कृत्वाऽऽत्मनः सुखमुत्पादयन्ति, तदेवं परोपघातक्रियां कुर्वतोऽसंयतस्य कुतोऽप्यनिवृत्तस्य जन्मान्तरशतानुबन्धि वैरं परस्परोपमर्दकारि प्रकर्षेण वर्धते, पाठान्तरं वा-जायाएँ बालस्स पगब्भणाए-'बालस्य' अज्ञस्य हिंसादिषु कर्मसु प्रवृत्तस्य निरनुकम्पस्य या जाता 'प्रगल्भता' धार्ष्टयं तया वैरमेव प्रवर्धत इति सम्बन्धः ॥ १७ ॥ अपिच—आयुषो-जीवनलक्षणस्य क्षय आयुष्कक्षयस्तमारम्भप्रवृत्तः छिन्नह्रदमत्स्यवदुदकक्षये सति अबुध्यमानोऽतीव 'ममाइ'त्ति ममत्ववान् हृदं मे अहमस्य स्वामीत्येवं स 'मन्दः' अज्ञः साहसं कर्तुं शीलमस्येति साहसकारीति, तद्यथा-कश्चिद्वणिग् महता क्लेशेन महार्घाणि रत्नानि समासाद्योज्जयिन्या बहिरावासितः, स च राजचौरदायादभयाद्रात्रौ रत्नान्येवमेवं च प्रवेशयिष्यामीत्येवं पर्यालोचनाकुलो रजनीक्षयं न ज्ञातवान्, अङ्गेषेव रत्नानि प्रवेशयन् राजपुरुषै रत्नेभ्यश्चावित इति, एवमन्योऽपि किंकर्तव्यताकुलः स्वायुषः क्षयमबुध्यमानः परिग्रहेष्वारम्भेषु च प्रवर्तमानः साहसकारी स्यादिति, तथा कामभोगतृषितोऽहि रात्रौ च परि-समन्तात् द्रव्यार्थी परितप्यमानो मम्मणवणिग्वदार्तध्यायी कायेनापि क्लिश्यते, तथा चोक्तम्-"अजरामरवद्बालः, क्लिश्यते धनकाम्यया । शाश्वतं जीवितं चैव, मन्यमानो धनानि च ॥ १ ॥" तदेवमार्तध्यानोपहतः 'कइया वच्चइ सत्थो ? किं भंडं कत्थ कित्तिया भूमी'त्यादि, तथा 'उक्खणइ खणइ णिहणइ रत्तिं न सुयइ दियावि य ससंको'इत्यादिचित्तसंक्लेशात्सुष्ठु मूढोऽजरामरवणिग्वदजरामरवदात्मानं मन्यमानोऽपगतशुभाध्यवसायोऽहर्निशमारम्भे प्रवर्तत इति ॥ १८ ॥ किञ्चान्यत्—'वित्तं' द्रव्यजातं तथा 'पशवो' गोमहिष्यादयस्तान् सर्वान् 'जहाहि' परित्यज-तेषु ममत्वं मा कृथाः, ये 'बान्धवा' मातापित्रादयः श्वशुरादयश्च पूर्वापरसंस्तुता ये च प्रिया 'मित्राणि' सहपांसुक्रीडितादयस्ते एते मातापित्रादयो न किञ्चित्तस्य परमार्थतः कुर्वन्ति, सोऽपि च वित्तपशुबान्धवमित्रार्थी अत्यर्थं पुनः पुनर्वा लपति लाल्प्यते, तद्यथा-हे मातः ! हे पितरित्येवं तदर्थं शोकाकुलः प्रलपति, तदर्जनपरश्च मोहमुपैति, रूपवानपि कण्डरीकवत् धनवानपि मम्मणवणिग्वत् धान्यवानपि तिलकश्रेष्ठिवद् इत्येवमसारेष्वसमाधिमान् मुह्यते(ति), यच्च तेन महता क्लेशेनापरप्राण्युपमर्देनोपार्जितं वित्तं तदन्ये जनाः 'से' तस्यापहरन्ति जीवत एव

१ कदा व्रजति सार्थः किं भाण्डं क्व च कियती भूमिः । २ उत्खनति खनति निहन्ति रात्रौ न स्वपिति दिवापि च सशंकः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृतस्य वा, तस्य च क्लेश एव केवलं पापबन्धश्चेत्येवं मत्वा पापानि कर्माणि परित्यजेत्तपश्चरेदिति ॥ १९ ॥ तपश्चरणोपायमधिकृत्याह—यथा 'क्षुद्रमृगा' क्षुद्राटव्यपशवो हरिणजात्याद्याः 'चरन्तः' अटव्यामटन्तः सर्वतो बिभ्यतः परिशङ्कमानाः सिंहं व्याघ्रं वा आत्मोपद्रवकारिणं दूरेण परिहृत्य 'चरन्ति' विहरन्ति, एवं 'मेधावी' मर्यादावान्, तुर्विशेषणे, सुतरां धर्मं 'समीक्ष्य' पर्यालोच्य 'पापं' कर्म असदनुष्ठानं दूरेण मनोवाक्कायकर्मभिः परिहृत्य परि—समन्ताद्व्रजेत् संयमानुष्ठायी तपश्चारी च भवेदिति, दूरेण वा पापं—पापहेतुत्वात्सावद्यानुष्ठानं सिंहमिव मृगः स्वहितमिच्छन् परिवर्जयेत्—परित्यजेदिति ॥ २० ॥ अपिच—

संबुज्झमाणे उ णरे मतीमं, पावाउ अप्पाण निवट्टएज्जा । हिंसप्पसूयाइं दुहाइं मत्ता, वेराणुबंधीणि महब्भयाणि ॥ २१ ॥ मुसं न बूया मुणि अत्तगामी, णिव्वाणमेयं कसिणं समाहिं । सयं न कुज्जा न य कारवेज्जा, करंतमन्नंपि य णाणुजाणे ॥ २२ ॥ सुद्धे सिया जाए न दूसएज्जा, अमुच्छिए ण य अज्झोववन्ने । धितिमं विमुक्के ण य पूयणट्ठी, न सिलोयगामी य परिव्वएज्जा ॥ २३ ॥ निक्खम्म गेहाउ निरावकंखी, कायं विउसेज्ज नियाणछिन्ने । णो जीवियं णो मरणाभिकंखी, चरेज्ज भिक्खू वलया विमुक्के ॥२६॥ त्तिबेमि ॥ (गाथाग्रं० ५८०) । इति समाहिनाम दसममज्झयणं समत्तं ॥

मननं मतिः सा शोभना यस्यास्त्यसौ मतिमान्, प्रशंसायां मतुप्, तदेवं शोभनमतियुक्तो मुमुक्षुर्नरः सम्यक्श्रुतचारित्राख्यं धर्मं भावसमाधिं वा 'बुध्यमानस्तु' विहितानुष्ठाने प्रवृत्तिं कुर्वाणस्तु पूर्वं तावन्निषिद्धाचरणान्निवर्तेत अतस्तत् दर्शयति—'पापात्' हिंसानृतादिरूपात्कर्मण आत्मानं निवर्तयेत्, निदानोच्छेदेन हि निदानिन उच्छेदो भवतीत्यतोऽशेषकर्मक्षयमिच्छन्नादावेव आश्रवद्वाराणि निरुन्ध्यादित्यभिप्रायः, किं चान्यत्—हिंसा—प्राणिव्यपरोपणं तया ततो वा प्रसूतानि—जातानि यान्यशुभानि कर्माणि तान्यत्यन्तं नरकादिषु यातनास्थानेषु दुःखानि—दुःखोत्पादकानि वर्तन्ते, तथा वैरमनुबध्नन्ति तच्छीलानि च वैरानुबन्धीनि—जन्मशतसहस्रदुर्मोचानि, अत एव महद्भयं येभ्यः सकाशात्तानि महाभयानीति, एवं च मत्वा मतिमानात्मानं पापान्निवर्तयेदिति, पाठान्तरं वा 'निव्वाणभूए व परिव्वएज्जा' अस्यायमर्थः—यथा हि निर्वृतो निर्व्यापारत्वात्कस्यचिदुपघाते न वर्तते एवं साधुरपि सावद्यानुष्ठानरहितः परि—समन्ताद् व्रजेदिति ॥२१॥ तथा आप्तो—मोक्षमार्गस्तद्गामी—तद्गमनशील आत्महितगामी वा आप्तो वा प्रक्षीणदोषः सर्वज्ञस्तदुपदिष्टमार्गगामी 'मुनिः' साधुः 'मृषावादम्' अनृतमयथार्थं न ब्रूयात् सत्यमपि प्राण्युपघातकमिति, 'एतदेव' मृषावादवर्जनं 'कृत्स्नं' संपूर्णं भावसमाधिं निर्वाणं चाहुः, सांसारिका हि समाधयः स्त्रानभोजनादिजनिताः शब्दादिविषयसंपादिता वा अनैकान्तिकानात्यन्तिकत्वेन दुःखप्रतीकाररूपत्वेन वा असंपूर्णा वर्तन्ते । तदेवं मृषावादमन्येषां वा व्रतानामतिचारं स्वयमात्मना न कुर्यान्नाप्यपरेण कारयेत्तथा कुर्वन्तमप्यपरं मनोवाक्कायकर्मभिर्नानुमन्येत इति ॥ २२ ॥ उत्तरगुणानधिकृत्याह—उद्गमोत्पादनैषणाभिः 'शुद्धे' निर्दोषे 'स्यात्' कदाचित् 'जाते' प्राप्ते पिण्डे सति साधू रागद्वेषाभ्यां न दूषयेत्, उक्तं च—

"बायालीसेसणसंकडंमि गहणंमि जीव ! नहु छलिओ । इण्हिं जह न छलिज्जसि भुंजंतो रागदोसेहिं ॥ १ ॥" [1] तत्रापि रागस्य प्राधान्यख्यापनायाह—न मूर्छितोऽमूर्छितः—सकृदपि शोभनाहारलाभे सति गृद्धिमकुर्वन्नाहारयति, तथा अनध्युपपन्नस्तमेवाहारं पौनःपुन्येनानभिलषमाणः केवलं संयमयात्रापालनार्थमाहारमाहारयेत्, प्रायो विदितवेद्यस्यापि विशिष्टाहारसन्निधावभिलाषातिरेको जायत इत्यतोऽमूर्छितोऽनध्युपपन्न इति च प्रतिषेधद्वयमुक्तम्, उक्तं च—"भुत्तभोगो पुरा जोऽवि, गीयत्थोऽवि य भाविओ । संतेसाहारमाईसु, सोऽवि खिप्पं तु खुब्भइ ॥ १ ॥" [2] तथा संयमे धृतिर्यस्यासौ धृतिमान्, तथा सबाह्याभ्यन्तरेण ग्रन्थेन विमुक्तः, तथा पूजनं वस्त्रपात्रादिना तेनार्थः पूजनार्थः स विद्यते यस्यासौ पूजनार्थी तदेवंभूतो न भवेत्, तथा श्लोकः—श्लाघा कीर्तिस्तद्गामी न तदभिलाषुकः परिव्रजेदिति, कीर्त्यर्थी न काञ्चन क्रियां कुर्यादित्यर्थः ॥ २३ ॥ अध्ययनार्थमुपसंजिघृक्षुराह—गेहान्निःसृत्य 'निष्क्रम्य च' प्रव्रजितोऽपि भूत्वा जीवितेऽपि निराकाङ्क्षी 'कायं' शरीरं व्युत्सृज्य निष्प्रतिकर्मतया चिकित्सादिकमकुर्वन् छिन्ननिदानो भवेत्, तथा न जीवितं नापि मरणमभिकाङ्क्षेत् 'भिक्षुः' साधुः 'वलयात्' संसारवलयात्कर्मबन्धनाद्वा विप्रमुक्तः संयमानुष्ठानं चरेत्, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ २४ ॥ इति समाध्याख्यं दशममध्ययनं समाप्तं ॥

---

१ द्विचत्वारिंशद्दोषैषणादोषसंकटे गहने जीव ! नैव छलितः । इदानीं यदि न छल्यसे भुञ्जन् रागद्वेषाभ्यां (तदा सफलं तत्) ॥ १ ॥ २ भुक्तभोगः पुरा योऽपि गीतार्थोऽपि च भावितः । सत्स्वाहारादिषु सोऽपि क्षिप्रमेव क्षुभ्यति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ एकादशं श्रीमार्गाध्ययनं प्रारभ्यते ।

उक्तं दशममध्ययनं, तदनन्तरमेकादशमारभ्यते, अस्य चायमभिसंबन्धः, इहानन्तराध्ययने समाधिः प्रतिपादितः, स च ज्ञानदर्शनतपश्चारित्ररूपो वर्तते, भावमार्गोऽप्येवमात्मक एवेत्यतो मार्गोऽनेनाध्ययनेन प्रतिपाद्यते इत्यनेन संबन्धेनायातस्यास्याध्ययनस्य चत्वार्युपक्रमादीन्यनुयोगद्वाराणि वाच्यानि, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा–प्रशस्तो ज्ञानादिको भावमार्गस्तदाचरणं चात्राभिधेयमिति, नामनिष्पन्ने तु निक्षेपे मार्ग इत्यस्याध्ययनस्य नाम, तन्निक्षेपार्थं निर्युक्तिकृदाह—

णामं ठवणा दविए खेत्ते काले तहेव भावे य । एसो खलु मग्गस्स य णिक्खेवो छव्विहो होइ ॥ १०७ ॥
फलगलयंदोलणवित्तरज्जुदवणबिलपासमग्गे य । खीलगअयपक्खिवहे छत्तजलाकासदव्वंमि ॥ १०८ ॥
खेत्तंमि जंमि खेत्ते काले कालो जहिं हवइ जो उ । भावंमि होंति दुविहो पसत्थ तह अप्पसत्थो य ॥ १०९ ॥
दुविहंमिवि तिगभेदो णेओ तस्स(उ) विणिच्छओ दुविहो । सुगतिफलदुग्गतिफलो पगयं सुगतीफलेणित्थं॥११०॥
दुग्गइफलवादीणं तिन्नि तिसट्ठा सताइ वादीणं । खेमे य खेमरूवे चउक्कगं मग्गमादीसु ॥ १११ ॥

नामस्थापनाद्रव्यक्षेत्रकालभावभेदान्मार्गस्य षोढा निक्षेपः, तत्र नामस्थापने सुगमत्वादनादृत्य ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यमार्गमधिकृत्याह—फलकैर्मार्गः फलकमार्गः यत्र कर्दमादिभयात् फलकैर्गम्यते, लतामार्गस्तु यत्र लतावलम्बेन गम्यते, अन्दोलनमार्गोऽपे यत्रान्दोलनेन दुर्गमतिलङ्घ्यते, वेत्रमार्गो यत्र वेत्रलतोपष्टम्भेन जलादौ गम्यते इति, तद्यथा—चारुदत्तो वेत्रलतोपष्टम्भेन वेत्रवतीं नदीमुत्तीर्य परकूलं गतः, रज्जुमार्गस्तु यत्र रज्जुं कञ्चिदतिदुर्गमतिलङ्घ्यते, 'दवनं'ति यानं तन्मार्गो दवनमार्गः, बिलमार्गो यत्र तु गुहाद्याकारेण बिलेन गम्यते, पाशप्रधानो मार्गः पाशमार्गः पाशकूटवागुरान्वितो मार्ग इत्यर्थः, कीलकमार्गो यत्र वालुकोत्कटे मरुकादिविषये कीलकाभिज्ञानेन गम्यते, अजमार्गो यत्र अजेन–वस्त्येन गम्यते, तद्यथा सुवर्णभूम्यां चारुदत्तो गत इति, पक्षिमार्गो यत्र भारुण्डादिपक्षिभिर्देशान्तरमवाप्यते, छत्रमार्गो यत्र छत्रमन्तरेण गन्तुं न शक्यते, जलमार्गो यत्र नावादिना गम्यते, आकाशमार्गो विद्याधरादीनाम्, अयं सर्वोऽपि फलकादिको 'द्रव्ये' द्रव्यविषयेऽवगन्तव्य इति॥ क्षेत्रादिमार्गप्रतिपादनायाह–क्षेत्रमार्गे पर्यालोच्यमाने यस्मिन् 'क्षेत्रे' ग्रामनगरादौ प्रदेशे वा शालिक्षेत्रादिके वा क्षेत्रे यो याति मार्गो यस्मिन्वा क्षेत्रे व्याख्यायते स क्षेत्रमार्गः, एवं कालेऽप्ययोज्यं। भावे त्वालोच्यमाने द्विविधो भवति मार्गः, तद्यथा–प्रशस्तोऽप्रशस्तश्चेति। प्रशस्ताप्रशस्तभेदप्रतिपादनायाह–'द्विविधेऽपि' प्रशस्ताप्रशस्तरूपे भावमार्गे प्रत्येकं त्रिविधो भेदो भवति, तत्राप्रशस्तो मिथ्यात्वमविरतिरज्ञानं चेति, प्रशस्तस्तु सम्यग्दर्शनज्ञानचारित्ररूप इति, 'तस्य' प्रशस्ताप्रशस्तरूपस्य भावमार्गस्य 'विनिश्चयो' निर्णयः फलं कार्यं निष्ठा द्वेधा, तद्यथा–प्रशस्तः सुगतिफलोऽप्रशस्तश्च दुर्गतिफल इति। इह तु पुनः 'प्रस्तावः' अधिकारः 'सुगतिफलेन' प्रशस्तमार्गेणेति ॥ तत्राप्रशस्तं दुर्गतिफलं मार्गं प्रतिपिपादयिषुस्तत्कर्दनिर्दिदिक्षुराह—दुर्गतिः फलं यस्य स दुर्गतिफलस्तद्वदनशीला दुर्गतिफलवादिनस्तेषां प्रावादुकानां त्रीणि त्रिषष्ट्यधिकानि शतानि भवन्ति, दुर्गतिफलमार्गोपदेष्टृत्वं च तेषां मिथ्यात्वोपहतदृष्टितया विपरीतजीवादितत्त्वाभ्युपगमात्, तत्संख्या चैवमवगन्तव्या, तद्यथा–असियसयं किरियाणं अकिरियवाईण होइ चुलसीई । अण्णाणिय सत्तट्ठी वेणइयाणं च बत्तीसं ॥१॥ तेषां च स्वरूपं समवसरणाध्ययने वक्ष्यत इति ॥ साम्प्रतं मार्गं भङ्गद्वारेण निरूपयितुमाह, तद्यथा-एकः क्षेमो मार्गस्तस्करसिंहव्याघ्राद्युपद्रवरहितत्वात् तथा क्षेमरूपश्च समत्वात्तथा छायापुष्पफलवद्वृक्षोपेतजलाश्रयाकुलत्वाच्च १, तथा परः क्षेमो निश्चौरः किंतुक्षेमरूप उपलशकलाकुलगिरिनदीकण्टकगर्ताशताकुलत्वेन विषमत्वात्, तथाऽपरोऽक्षेमस्तस्करादिभयोपेतत्वात्क्षेमरूपश्चोपलशकलाद्यभावतया समत्वात्, तथाऽन्यो न क्षेमो नापि क्षेमरूपः सिंहव्याघ्रतस्करादिदोषदुष्टत्वात्तथा गर्तापाषाणनिम्नोन्नतादिदोषदुष्टत्वाच्चेति, एवं भावमार्गोऽप्यायोज्यः, तद्यथा—ज्ञानादिसमन्वितो द्रव्यलिङ्गोपेतश्च साधुः क्षेमः क्षेमरूपश्च, तथा क्षेमोऽक्षेमरूपस्तु स एव भावसाधुः कारणिकद्रव्यलिङ्गरहितः, तृतीयभङ्गकगता निह्नवाः, परतीर्थिका गृहस्थाश्रमभङ्गकवर्तिनो द्रष्टव्याः । एवमनन्तरोक्तया प्रक्रियया 'चतुष्कं' भङ्गकचतुष्टयं मार्गादिष्वायोज्यं, आदिग्रहणादन्यत्रापि समाध्यादावायोज्यमिति ॥ सम्यग्मिथ्यात्वमार्गयोः स्वरूपनिरूपणायाह—

सम्मप्पणिओ मग्गो णाणे तह दंसणे चरित्ते य । चरगपरिव्वायादीचिण्णो मिच्छत्तमग्गो उ ॥ ११२ ॥
इड्ढिरससायगुरुया छज्जीवनिकायसंयनिरया (य) । जे उवदिसंति मग्गं कुमग्गमग्गस्सिता ते उ ॥ ११३ ॥
तवसंजमप्पहाणा गुणधारी जे वयंति सब्भावं । रत्तव्वजगज्जीवहियं तमाहु सम्मप्पणीयमिणं ॥ ११४ ॥
पंथो मग्गो णाओ विहीं थिती सुगती हियं (तह) सुहं च । पत्थं सेयं णिव्वुइ णिव्वाणं सिवकरं चेव ॥ ११५ ॥

१ अशीतिशतं क्रियावादिनामक्रियावादिनां भवति चतुरशीतिः अज्ञानिकानां सप्तषष्टिर्वैनयिकानां च द्वात्रिंशत् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यग्ज्ञानं दर्शनं चारित्रं चेत्ययं त्रिविधोऽपि भावमार्गः 'सम्यग्दृष्टिभिः' तीर्थकरगणधरादिभिः सम्यग्वा—यथावस्थितवस्तुतत्त्वनिरूपणया प्रणीतस्तैरेव(च) सम्यगाचीर्ण इति, चरकपरिव्राजकादिभिस्तु 'आचीर्णः' आसेवितो मार्गो मिथ्यात्वमार्गोऽप्रशस्तमार्गो भवतीति । तुशब्दोऽस्य दुर्गतिफलनिबन्धनत्वेन विशेषणार्थ इति ॥ स्वयूथ्यानामपि पार्श्वस्थादीनां षड्जीवनिकायोपमर्दकारिणां कुमार्गाश्रितत्वं दर्शयितुमाह—ये केचन अपुष्टधर्माणः शीतलविहारिणः ऋद्धिरससातगौरवेण 'गुरुकाः' गुरुकर्माण आधाकर्मोपभोगाभ्युपगमेन षड्जीवनिकायव्यापादनरताश्च अपरेभ्यो 'मार्गं' मोक्षमार्गमात्मानुचीर्णमुपदिशन्ति, तथाहि—शरीरमिदमाद्यं धर्मसाधनमिति मत्वा कालसंहननादिहानेश्चाधाकर्मोपभोगोऽपि न दोषायेत्येवं प्रतिपादयन्ति, ते चैवं प्रतिपादयन्तः कुत्सितमार्गास्तीर्थिकास्तन्मार्गाश्रिता भवन्ति । तुशब्ददेतेऽपि स्वयूथ्या एतदुपदिशन्तः कुमार्गाश्रिता भवन्तीति किंपुनस्तीर्थिका इति ॥ प्रशस्तशास्त्रप्रणयनेन सन्मार्गाविष्करणायाह—तपः—सबाह्याभ्यन्तरं द्वादशप्रकारं तथा संयमः—सप्तदशभेदः पञ्चाश्रवविरमणादिलक्षणस्ताभ्यां प्रधानास्तपःसंयमप्रधानाः, तथाऽष्टादशशीलाङ्गसहस्राणि गुणास्तद्धारिणो गुणधारिणो ये सत्साधवस्त एवंभूता यं 'सद्भावं' परमार्थं जीवाजीवादिलक्षणं 'वदन्ति' प्रतिपादयन्ति, किंभूतं !—सर्वस्मिन् जगति ये जीवास्तेभ्यो हितं—पथ्यं तद्रक्षणतस्तेषां सदुपदेशदानतो वा तं सन्मार्गं सम्यङ्मार्गज्ञाः 'सम्यग्' अविपरीतत्वेन प्रणीतम् 'आहुः' उक्तवन्त इति ॥ साम्प्रतं सन्मार्गस्यैकार्थिकान् दर्शयितुमाह—देशाद्विवक्षितदेशान्तरप्राप्तिलक्षणः पन्थाः, स चेह भावमार्गाधिकारे सम्यक्त्वावाप्तिरूपोऽवगन्तव्यः १, तथा 'मार्ग' इति पूर्वस्माद्विशुद्धा विशिष्टतरो मार्गः, स चेह सम्यग्ज्ञानावाप्तिरूपोऽवगन्तव्यः २, तथा 'न्याय' इति

॥१९७॥

१ चारित्रा० प्र० ।

निश्चयेनायनं—विशिष्टस्थानप्राप्तिलक्षणं यस्मिन् सति स न्यायः, स चेह सम्यक्चारित्रावाप्तिरूपोऽवगन्तव्यः, सत्पुरुषाणामयं न्याय एव यदुत अवाप्तयोः सम्यग्दर्शनज्ञानयोस्तत्फलभूतेन सम्यक्चारित्रेण योगो भवतीत्यतो न्यायशब्देनात्र चारित्रयोगोऽभिधीयत इति ३, तथा 'विधि'रिति विधानं विधिः सम्यग्ज्ञानदर्शनयोर्योगपद्येनावाप्तिः ४, तथा 'धृति'रिति धरणं धृतिः सम्यग्दर्शने सति चारित्रावस्थानं मापतुषादाविव विशिष्टज्ञानाभावाद्विक्षवैवमुच्यते ५, तथा 'सुगति'रिति शोभना गतिरस्मात् ज्ञानाचारित्राप्तेति सुगतिः, 'ज्ञानक्रियाभ्यां मोक्षः' इति न्यायात्सुगतिशब्देन ज्ञानक्रिये अभिधीयेते, दर्शनस्य तु ज्ञानविशेषत्वादत्रैवान्तर्भावोऽवगन्तव्यः ६, तथा 'हित'मिति परमार्थतो मुक्त्यवाप्तिस्तत्कारणं वा हितं, तच्च सम्यग्दर्शनज्ञानचारित्राख्यमवगन्तव्यमिति ७, अत्र च संपूर्णानां सम्यग्दर्शनादीनां मोक्षमार्गत्वे सति यद्व्यस्तसमस्तानां मोक्षमार्गत्वेनोपन्यासः स प्रधानोपसर्जनविवक्षया न दोषायेति, तथा 'सुख'मिति सुखहेतुत्वात्सुखम्—उपशमश्रेण्युपशामकं प्रत्यपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायरूपा गुणत्रयावस्था ८, तथा 'पथ्य'मिति पथि—मोक्षमार्गे हितं पथ्यं, तच्च क्षपकश्रेण्यां पूर्वोक्तं गुणत्रयं ९, तथा 'श्रेय' इत्युपशमश्रेणिमस्तकावस्था, उपशान्तसर्वमोहावस्थेत्यर्थः १०, तथा निर्वृतिहेतुत्वान्निर्वृतिः क्षीणमोहावस्थेत्यर्थः, मोहनीयविनाशेऽवश्यं निर्वृतिसद्भावादितिभावः ११, तथा 'निर्वाण'मिति घनघातिकर्मचतुष्टयक्षयेण केवलज्ञानावाप्तिः १२, तथा 'शिवं' मोक्षपदं तत्करणशीलं शैलेश्यवस्थागमनमिति १३, एवमेतानि मोक्षमार्गत्वेन किञ्चिद्भेदाद् भेदेन व्याख्यातान्यभिधानानि, यदिवैते पर्यायशब्दा एकार्थिका मोक्षमार्गस्येति । गतो नामनिष्पन्नो निक्षेपः, तदनन्तरं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

कयरे मग्गे अक्खाए, माहणेणं मईमता ? । जं मग्गं उज्जु पावित्ता, ओहं तरति दुत्तरं ॥ १ ॥

तं मग्गं णुत्तरं सुद्धं, सव्वदुक्खविमोक्खणं । जाणासि णं जहा भिक्खू !, तं णो बूहि महामुणी ॥
जइ णो केइ पुच्छिज्जा, देवा अदुव माणुसा । तेसिं तु कयरं मग्गं, आइक्खेज्ज ? कहाहि णो ॥३॥
जइ वो केइ पुच्छिज्जा, देवा अदुव माणुसा । तेसिमं पडिसाहिज्जा, मग्गसारं सुणेह मे ॥ ४ ॥

विचित्रत्वान्निकाचनाविषयत्वाच्च सूत्रस्यागामुकं प्रच्छकमाश्रित्य सूत्रमिदं प्रवृत्तम्, अतो जम्बूस्वामी सुधर्मस्वामिनमिदमाह, तद्यथा—'कतरः' किंभूतो 'मार्गः' अपवर्गावाप्तिसमर्थोऽस्यां त्रिलोक्यां 'आख्यातः' प्रतिपादितो भगवता त्रैलोक्योद्धरणसमर्थेनैकान्तहितैषिणा मा हनेत्येवमुपदेशप्रवृत्तिर्यस्यासौ माहनः—तीर्थकृत्तेन, तमेव विशिनष्टि—मतिः—लोकालोकान्तर्गतसूक्ष्मभव्यहितविप्रकृष्टातीतानागतवर्तमानपदार्थाविर्भाविका केवलज्ञानाख्या यस्यास्त्यसौ मतिमांस्तेन, यं प्रशस्तं भावमार्गं मोक्षगमनं प्रति 'ऋजुं' प्रगुणं यथावस्थितपदार्थस्वरूपनिरूपणद्वारेणावक्रं सामान्यविशेषनित्यानित्यादिस्याद्वादसमाश्रयणात्, तदेवंभूतं मार्गं ज्ञानदर्शनतपश्चारित्रात्मकं 'प्राप्य' लब्ध्वा संसारोदरविवरवर्ती प्राणी समग्रसामग्रीकः 'ओघ'मिति भवौघं संसारसमुद्रं तरत्यत्यन्तदुस्तरं, तदुत्तरणसामग्र्या एव दुष्प्रापत्वात्, तदुक्तम्—"माणुस्सखेत्तजाईकुलरूवारोगमाउयं बुद्धी । सवणोग्गहसद्धासंजमो य लोयंमि दुल्लहाइं ॥१॥" इत्यादि॥ स एव प्रच्छकः पुनरप्याह—योऽसौ मार्गः सत्त्वहिताय सर्वज्ञेनोपदिष्टोऽशेषैकान्तकौटिल्यवक्र(ता)रहितस्तं मार्गं, नास्योत्तरः—प्रधानोऽस्तीत्युत्तरस्तं शुद्धः—अवदातो निर्दोषः पूर्वापरव्याहतिदोषापगमात्सावद्यानुष्ठानोपदेशाभावाद्वा तमिति, तथा सर्वाणि—अशेषाणि बहुभिर्भवैरुपचितानि दुःखकारणत्वाद्दुःखानि—कर्माणि तेभ्यो 'विमोक्षणं'—विमोचकं तमेवंभूतं मार्गमनुत्तरं

॥१९८॥

१ माणुस्सं खेत्तं जातिः कुलं रूपमारोग्यमायुः बुद्धिः श्रवणग्रहणं श्रद्धा संयमश्च लोके दुर्लभानि ॥ १ ॥

निर्दोषं सर्वदुःखक्षयकारणं हे भिक्षो ! यथा त्वं जानीषे 'ण'मिति वाक्यालङ्कारे तथा तं मार्गं सर्वज्ञप्रणीतं 'नः' अस्माकं हे महा मुने ! 'ब्रूहि' कथयेति ॥ २ ॥ यद्यप्यस्माकमसाधारणगुणोपलब्धेर्युष्मत्प्रत्ययेनैव प्रवृत्तिः स्यात् तथाप्यन्येषां मार्गः किंभूतो मयाऽऽख्येय इत्यभिप्रायवानाह—यदा कदाचित् 'नः' अस्मान् 'केचन' सुलभबोधयः संसारोद्विग्नाः सम्यग्मार्गं पृच्छेयुः, के ते ?—'देवाः' चतुर्निकायाः तथा मनुष्याः—प्रतीताः, बाहुल्येन तयोरेव प्रश्नसद्भावात्तदुपादानं, तेषां पृच्छतां कतरं मार्गमहम् 'आख्यास्ये' कथयिष्ये, तदेतदस्माकं त्वं जानानः कथयेति ॥ ३ ॥ एवं पृष्टः सुधर्मस्वाम्याह—यदि कदाचित् 'वः' युष्मान् केचन देवा मनुष्या वा संसारभ्रान्तिपराभग्नाः सम्यग्मार्गं पृच्छेयुस्तेषां पृच्छताम् 'इम'मिति वक्ष्यमाणलक्षणं षड्जीवनिकाय-प्रतिपादनगर्भं तद्रक्षाप्रवणं मार्गं 'पडिसाहिज्जे'ति प्रतिकथयेत्, 'मार्गसारम्' मार्गपरमार्थं यं भवन्तोऽन्येषां प्रतिपादयिष्यन्ति तत् 'मे' मम कथयतः शृणुत यूयमिति, पाठान्तरं वा "तेसिं तु इमं मग्गं आइक्खेज्ज सुणेह मे"त्ति उत्तानार्थम् ॥ ४ ॥ पुनरपि मार्गाभिष्टवं कुर्वन्सुधर्मस्वाम्याह—

अणुपुव्वेण महाघोरं, कासवेण पवेइयं । जमादाय इओ पुव्वं, समुद्दं ववहारिणो ॥ ५ ॥
अतरिंसु तरंतेगे, तरिस्संति अणागया । तं सोच्चा पडिवक्खामि, जंतवो तं सुणेह मे ॥ ६ ॥
पुढवीजीवा पुढो सत्ता, आउजीवा तहाऽगणी । वाउजीवा पुढो सत्ता, तणरुक्खा सबीयगा ॥ ७ ॥
अहावरा तसा पाणा, एवं छक्काय आहिया । एतावंए जीवकाए, णावरे कोइ विज्जई ॥ ८ ॥

सूत्रक. १४ सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥१९९॥

११ मार्गाध्ययनं.

यथाऽहम् 'अनुपूर्वेण' अनुपरिपाट्या कथयामि तथा शृणुत, यदिवा यथा चानुपूर्व्या सामग्र्या वा मार्गोऽवाप्यते तच्छृणुत, तद्यथा—'पढमिल्लुगाण उदए' इत्यादि तावद्यावत् 'बारसविहे कसाए खविए उवसामिए व जोगेहिं । लब्भइ चरित्तलंभो" इत्यादि, तथा 'चत्तारि परमंगाणी'त्यादि । किंभूतं मार्गं ?, तमेव विशिनष्टि—कापुरुषैः संग्रामप्रवेशवत् दुरध्यवसेयत्वात् 'महाघोरं' महाभयानकं 'काश्यपो' महावीरवर्धमानस्वामी तेन 'प्रवेदितं' प्रणीतं मार्गं कथयिष्यामीति, अनेन स्वमनीषिकापरिहारमाह, यं शुद्धं मार्गम् 'उपादाय' गृहीत्वा 'इत' इति सन्मार्गोपादानात् 'पूर्वम्' आदावेवानुष्ठितत्वादुत्तरं संसारं महापुरुषास्तरन्ति, अस्मिन्नेवार्थे दृष्टान्तमाह—व्यवहारः—पण्यक्रयविक्रयलक्षणो विद्यते येषां ते व्यवहारिणः—सांयात्रिकाः, यथा ते विशिष्टलाभार्थिनः किञ्चिन्नगरं यियासवो यानपात्रेण दुस्तरमपि समुद्रं तरन्ति एवं साधवोऽप्यात्यन्तिकैकान्तिकाबाधसुखैषिणः सम्यग्दर्शनादिना मार्गेण मोक्षं जिगमिषवो दुस्तरं भवौघं तरन्तीति ॥ ५ ॥ मार्गविशेषणायाह—यं मार्गं पूर्वं महापुरुषाचीर्णमन्यभिचारिणमाश्रित्य पूर्वस्मिन्ननादिके काले बहवोऽनन्ताः सत्त्वा अशेषकर्मकचवरविप्रमुक्ता भवौघं-संसारम् 'अतारिषुः' तीर्णवन्तः, साम्प्रतमप्येके समग्रसामग्रीकाः संख्येयाः सत्त्वास्तरन्ति, महाविदेहादौ सर्वदा सिद्धिसद्भावाद्वर्तमानत्वं न विरुध्यते, तथाऽ- ॥१९९॥

१ इत्याव एव प्र० । २ दृश्यमानेषु बहुष्वादर्शेषु नावरे विज्जती काए इत्येव पाठ उपलभ्यते, प्राङ् मुद्रिते त्वेष ईदृशः, क्वचित् नावरे विज्जती कएत्ति पाठः छन्दोऽनुलोम्येन कायस्य स्यादध्यस्तता चेत्यासुन्दरः सः । ३ प्राथमिकानामुदये । ४ द्वादशविधेषु कषायेषु क्षपितेषूपशमितेषु वा योगैः । लभते चारित्रलाभं ॥ ५ चत्वारि परमाङ्गानि । ६ भवत इति गम्यं । ७ समासान्तागमेत्यादिनेटोऽनित्यत्वं ।

नागते च काले अपर्यवसानात्मकेऽनन्ता एव जीवास्तारयन्ति । तदेवं कालत्रयेऽपि संसारसमुद्रोत्तारकं मोक्षगमनैककारणं प्रशस्तं भावमार्गमुत्पन्नदिव्यज्ञानैस्तीर्थकृद्भिरुपदिष्टं, तं चाहं सम्यक् श्रुत्वाऽवधार्य च युष्माकं शुश्रूषूणां 'प्रतिवक्ष्यामि' प्रतिपादयिष्यामि, सुधर्मस्वामी जम्बूस्वामिनं निःश्रीकृत्यान्येषामपि जन्तूनां कथयतीत्येतद्दर्शयितुमाह—हे जन्तवोऽभिमुखीभूय तं चारित्रमार्गं मम कथयतः शृणुत यूयं, परमार्थकथनेऽत्यन्तमादरोत्पादनार्थमेवमुपन्यास इति ॥६॥ चारित्रमार्गस्य प्राणातिपातविरमणमूलत्वात्तस्य च तत्परिज्ञानपूर्वकत्वादतो जीवस्वरूपनिरूपणार्थमाह—पृथिव्येव पृथिव्याश्रिता वा जीवाः पृथ्वीजीवाः, ते च प्रत्येकशरीरत्वात् 'पृथक्' प्रत्येकं 'सत्त्वा' जन्तवोऽवगन्तव्याः, तथा आपश्च जीवाः, एवमग्निकायाश्च, तथाऽपरे वायुजीवाः, तदेवं चतुर्महाभूतसमाश्रिताः पृथक् सत्त्वाः प्रत्येकशरीरिणोऽवगन्तव्याः, एत एव पृथिव्यप्तेजोवायुसमाश्रिताः सत्त्वाः प्रत्येकशरीरिणः, वक्ष्यमाणवनस्पतेस्तु साधारणशरीरत्वेनापृथक्त्वमप्यस्तीत्यस्यार्थस्य दर्शनाय पुनः पृथक्सत्त्वग्रहणमिति । वनस्पतिकायस्तु यः सूक्ष्मः स सर्वोऽपि निगोदरूपः साधारणो बादरस्तु साधारणोऽसाधारणश्चेति, तत्र प्रत्येकशरीरिणोऽसाधारणस्य कतिचिद्भेदानिर्दिदिक्षुराह—तत्र तृणानि—दर्भवीरणादीनि वृक्षाः—चूताशोकादयः सह बीजैः—शालिगोधूमादिभिर्वर्तन्त इति सबीजकाः, एते सर्वेऽपि वनस्पतिकायाः सत्त्वा अवगन्तव्याः, अनेन च बौद्धादिमतनिरासः कृतोऽवगन्तव्य इति । एतेषां च पृथिव्यादीनां जीवानां जीवत्वेन प्रसिद्धिस्वरूपनिरूपणमाचारे प्रथमाध्ययने शस्त्रपरिज्ञाख्ये न्यक्षेण प्रतिपादितमिति नेह प्रतन्यते ॥ ७ ॥ षष्ठजीवनिकायप्रतिपादनायाह—तत्र पृथिव्यप्तेजोवायुवनस्पतय एकेन्द्रियाः सूक्ष्मबादरपर्याप्तापर्याप्तकभेदेन प्रत्येकं चतुर्विधाः, 'अथ' अनन्तरम् 'अपरे' अन्ये त्रसन्तीति त्रसाः—द्वित्रिचतुष्पञ्चेन्द्रियाः कृमिपिपीलिकाभ्रमरमनुष्यादयः, तत्र द्वित्रिचतुरि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्द्रियाः प्रत्येकं पर्याप्तकापर्याप्तकभेदात्षड्विधाः, पञ्चेन्द्रियास्तु संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकभेदाच्चतुर्विधाः । तदेवमनन्तरोक्तया नीत्या चतुर्दशभूतग्रामात्मकतया षड् जीवनिकाया व्याख्यातास्तीर्थकरगणधरादिभिः, 'एतावान्' एतद्भेदात्मक एव संक्षेपतो 'जीवनिकायो' जीवराशिर्भवति, अण्डजोद्भिज्जसंस्वेदजादेस्त्रैवान्तर्भावान्नापरो जीवराशिर्विद्यते कश्चिदिति ॥ ८ ॥ तदेवं षड्जीवनिकायं प्रदर्श्य यत्तत्र विधेयं तद्दर्शयितुमाह—

सव्वाहिं अणुजुत्तीहिं, मतिमं पडिलेहिया । सव्वे अकंतदुक्खा य, अतो सव्वे न हिंसया ॥ ९ ॥
एयं खु णाणिणो सारं, जं न हिंसति कंचण । अहिंसा समयं चेव, एतावंतं विजाणिया ॥ १० ॥
उड्ढं अहे य तिरियं, जे केइ तसथावरा । सव्वत्थ विरतिं विज्जा, संति निव्वाणमाहियं ॥ ११ ॥
पभू दोसे निराकिच्चा, ण विरुज्झेज्ज केणई । मणसा वयसा चेव, कायसा चेव अंतसो ॥ १२ ॥

सर्वा याः काश्चनानुरूपाः—पृथिव्यादिजीवनिकायसाधनत्वेनानुकूला युक्तयः—साधनानि, यदिवा असिद्धविरुद्धानैकान्तिकपरिहारेण पक्षधर्मत्वसपक्षसत्त्वविपक्षव्यावृत्तिरूपतया युक्तिसंगता युक्तयः अनुयुक्तयस्ताभिरनुयुक्तिभिः 'मतिमान्' सद्विवेकी पृथिव्यादिजीवनिकायान् 'प्रत्युपेक्ष्य' पर्यालोच्य जीवत्वेन प्रसाध्य तथा सर्वेऽपि प्राणिनः 'अकान्तदुःखा' दुःखद्विषः सुखलिप्सवश्च मन्वानो मतिमान् सर्वानपि प्राणिनो न हिंस्यादिति । युक्तयश्च तत्प्रसाधिकाः संक्षेपेणेमा इति- सात्मिका पृथिवी, तदात्मनां विद्रुमलवणोपलादीनां समानजातीयाङ्कुरसद्भावाद्, अर्शोविकाराङ्कुरवत् । तथा सचेतनमम्भः, भूमिखननादविकृतखभावसंभवाद्, दर्दुरवत् । तथा सात्मकं तेजः, तद्योग्याहारवृद्ध्या वृद्ध्युपलब्धेः, बालकवत् । तथा सात्मको वायुः, अपराप्रेरितनियततिरश्चीनगतिमत्त्वात्, गोवत् । तथा सचेतना वनस्पतयः, जन्मजरामरणरोगादीनां समुदितानां सद्भावात्, स्त्रीवत्, तथा क्षतसंरोहणाहारोपादानदौहृदसद्भावस्पर्शसंकोचसायाहस्वापप्रबोधाश्रयोपसर्पणादिभ्यो हेतुभ्यो वनस्पतेश्चैतन्यसिद्धिः । द्वीन्द्रियादीनां तु पुनः कृम्यादीनां स्पष्टमेव चैतन्यं, तद्वेदनाश्चौपक्रमिकाः स्वाभाविकाश्च समुपलभ्य मनोवाक्कायैः कृतकारितानुमतिभिश्च नवकेन भेदेन तत्पीडाकारिण उपमर्दान्निवर्तितव्यमिति ॥ ९ ॥ एतदेव समर्थयन्नाह—सुशब्दो वाक्यालङ्कारेऽवधारणे वा, 'एतदेव' अनन्तरोक्तं प्राणातिपातनिवर्तनं 'ज्ञानिनो' जीवस्वरूपतद्बन्धकर्मबन्धवेदिनः 'सारं' परमार्थतः प्रधानं, पुनरप्यादरख्यापनार्थमेतदेवाह—यत्कश्चन प्राणिनमनिष्टदुःखं सुखैषिणं न हिनस्ति, प्रभूतवेदिनोऽपि ज्ञानिन एतदेव सारतरं ज्ञानं यत्प्राणातिपातनिवर्तनमिति, ज्ञानमपि तदेव परमार्थतो यत्परपीडातो निवर्तनं, तथा चोक्तम् —"किं तीए पढियाए? पयकोडीए पलालभूयाए। जत्थित्तियं ण णायं परस्स पीडा न कायव्वा ॥ १ ॥" तदेवमहिंसाप्रधानः समय—आगमः संकेतो वोपदेशरूपस्तमेवंभूतमहिंसासमयमेतावन्तमेव विज्ञाय किमन्येन बहुना परिज्ञानेन?, एतावतैव परिज्ञानेन मुमुक्षोर्विवक्षितकार्यपरिसमाप्तेरतो न हिंस्यात्कञ्चनेति ॥ १० ॥ साम्प्रतं क्षेत्रप्राणातिपातमधिकृत्याह—ऊर्ध्वमधस्तिर्यक् च ये केचन त्रसाः—तेजोवायुद्वीन्द्रियादयः तथा स्थावराः—पृथिव्यादयः, किं बहुनोक्तेन?, 'सर्वत्र' प्राणिनि त्रसस्थावरसूक्ष्मबादरभेदभिन्ने 'विरतिं' प्राणातिपातनिवृत्तिं 'विजानीयात्' कुर्यात्, पर-

१ ननाधिकृत० । ननाविष्कृत० प्र० । १ किन्तया पठितया पदकोट्यापि पलालभूतया यत्रैतावत्र ज्ञातं परस्य पीडा न कर्तव्या ॥ १ ॥

मार्थत एवमेवासौ ज्ञाता भवति यदि सम्यक् क्रियत इति, एषैव च प्राणातिपातनिवृत्तिः परेषामात्मनश्च शान्तिहेतुत्वाच्छान्तिर्वर्तते, यतो विरतिमतो नान्ये केचन बिभ्यति, नाप्यसौ भवान्तरेऽपि कुतश्चिद्बिभेति, अपिच—निर्वाणप्रधानैककारणत्वान्निर्वाणमपि प्राणातिपातनिवृत्तिरेव, यदिवा शान्तिः—उपशान्तता निर्वृतिः—निर्वाणं विरतिमाश्रितौरौद्रध्यानाभावादुपशान्तिरूपो निर्वृतिभूतश्च भवति ॥ ११ ॥ किञ्चान्यत्—इन्द्रियाणां प्रभवतीति प्रभुर्वश्येन्द्रिय इत्यर्थः, यदिवा संयमावारकाणि कर्माण्यभिभूय मोक्षमार्गे पालयितव्ये प्रभुः—समर्थः, स एवंभूतः प्रभुः दूषयन्तीति दोषा—मिथ्यात्वाविरतिप्रमादकषाययोगास्तान् 'निराकृत्य' अपनीय केनापि प्राणिना सार्धं 'न विरुध्येत' न केनचित्सह विरोधं कुर्यात्, त्रिविधेनापि योगेनेति मनसा वाचा कायेन चैवान्तशो—यावज्जीवं, परापकारक्रियया न विरोधं कुर्यादिति ॥ १२ ॥ उत्तरगुणानधिकृत्याह—

संवुडे से महापन्ने, धीरे दत्तेसणं चरे । एसणासमिए णिच्चं, वज्जयंते अणेसणं ॥ १३ ॥
भूयाइं च समारंभ, तमुद्दिस्सा य जं कडं । तारिसं तु ण गिण्हेज्जा, अन्नपाणं सुसंजए ॥ १४ ॥
पूईकम्मं न सेविज्जा, एस धम्मे वुसीमओ । जं किंचि अभिकंखेज्जा, सव्वसो तं न कप्पए ॥ १५ ॥
हणंतं णाणुजाणेज्जा, आयगुत्ते जिइंदिए । ठाणाइं संति सड्ढीणं, गामेसु नगरेसु वा ॥ १६ ॥

१ भूयाइं समारंभ समुद्दिस्सा य जं कडं समप्रेक्ष्यादर्शेषु दृश्यमानेषु पाठः, टीकायां तु न तथा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आश्रवद्वाराणां रोधनेनेन्द्रियनिरोधेन च संवृतः स भिक्षुर्महती प्रज्ञा यस्यासौ महाप्रज्ञो—विपुलबुद्धिरित्यर्थः, तदनेन जीवाजीवादिपदार्थाभिज्ञतावेदिता भवति, 'धीरः' अक्षोभ्यः क्षुत्पिपासादिपरीषहैर्न क्षोभ्यते, तदेव दर्शयति—आहारोपधिशय्यादिके स्वस्वामिना तत्संदिष्टेन वा दत्ते सत्येषणां चरति एषणीयं गृह्णातीत्यर्थः, एषणाया एषणायां वा गवेषणग्रहणग्रासरूपायां त्रिविधायामपि सम्यगितः समितः, स साधुर्नित्यमेषणासमितः सन्नेषणां 'वर्जयन्' परित्यजन्संयममनुपालयेत्, उपलक्षणार्थत्वादस्य शेषाभिरपीर्यासमित्यादिभिः समितो द्रष्टव्य इति ॥१३॥ अनेषणीयपरिहारमधिकृत्याह—अभूवन् भवन्ति भविष्यन्ति च प्राणिनस्तानि भूतानि प्राणिनः 'समारभ्य' संरम्भसमारम्भारम्भैरुपतापयित्वा तं साधुम् 'उद्दिश्य' साध्वर्थं यत्कृतं तदुपकल्पितमाहारोपकरणादिकं 'तादृशम्' आधाकर्मदोषदुष्टं 'सुसंयतः' सुतपस्वी तदन्नं पानकं वा न भुञ्जीत, तुशब्दस्यैवकारार्थत्वान्नैवाभ्यवहरेत्, एवं तेन मार्गोऽनुपालितो भवति ॥ १४ ॥ किञ्च—आधाकर्माद्यविशुद्धकोट्यवयवेनापि संपृक्तं पूतिकर्म, तदेवंभूतमाहारादिकं 'न सेवेत' नोपभुञ्जीत, एषः—अनन्तरोक्तो धर्मः कल्पः[1] स्वभावः 'वुसीमओ' त्ति सम्यक्संयमवतोऽयमेवानुष्ठानकल्पो यदुताशुद्धमाहारादिकं परिहरतीति, किञ्च—यदप्यशुद्धत्वेनाभिकाङ्क्षेत् शुद्धमप्यशुद्धत्वेनाभिशङ्कते किञ्चिदप्याहारादिकं तत् 'सर्वशः' सर्वप्रकारमप्याहारोपकरणपूतिकर्म भोक्तुं न कल्पत इति ॥ १५ ॥ किञ्चान्यत्—धर्मश्रद्धावतां ग्रामेषु नगरेषु वा खेटकर्वटादिषु वा 'स्थानानि' आश्रयाः 'सन्ति' विद्यन्ते, तत्र तत्स्थानाश्रितः कश्चिद्धर्मोपदेशेन किल धर्मश्रद्धालुतया प्राण्युपमर्दकारिणीं धर्मबुद्ध्या कूपतडागखननप्रपासत्रादिकां क्रियां कुर्यात् तेन च तथाभूतक्रियायाः कर्त्रा किमत्र धर्मोऽस्ति नास्तीत्येवं पृष्टोऽपृष्टो वा तदुप-

[1] कल्पस्वभावः प्र० ब्रूमः ।

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तिपुते ॥२०२॥

रोधाद्वयाद्वा तं प्राणिनो घ्नन्तं नानुजानीयात्, किंभूतः सन् ?—'आत्मना' मनोवाक्कायरूपेण गुप्त आत्मगुप्तः तथा 'जितेन्द्रियो' वश्येन्द्रियः सावद्यानुष्ठानं नानुमन्येत ॥ १६ ॥ सावद्यानुष्ठानानुमतिं परिहर्तुकाम आह—

तहा गिरं समारब्भ, अत्थि पुण्णंति णो वए । अहवा णत्थि पुण्णंति, एवमेयं महब्भयं ॥ १७ ॥
दाणट्ठया य जे पाणा, हम्मंति तसथावरा । तेसिं सारक्खणट्ठाए, तम्हा अत्थित्ति णो वए ॥ १८ ॥
जेसिं तं उवकप्पंति, अन्नपाणं तहाविहं । तेसिं लाभंतरायंति, तम्हा णत्थित्ति णो वए ॥ १९ ॥
जे य दाणं पसंसंति, वहमिच्छंति पाणिणं । जे य णं पडिसेहंति, वित्तिच्छेयं करंति ते ॥ २० ॥

केनचिद्राजादिना कूपखननसत्रदानादिप्रवृत्तेन पृष्टः साधुः—किमस्मदनुष्ठाने अस्ति पुण्यमाहोस्विन्नास्तीति ?, एवंभूतां गिरं 'समारभ्य' निशम्याश्रित्य अस्ति पुण्यं नास्ति वेत्येवमुभयथापि महाभयमिति मत्वा दोषहेतुत्वेन नानुमन्येत ॥ १७ ॥ किमर्थं नानुमन्येत इत्याह—अन्नपानदानार्थमाहारमुदकं च पचनपाचनादिकया क्रियया कूपखननादिकया चोपकल्पयेत्, तत्र यस्माद् 'हन्यन्ते' व्यापाद्यन्ते त्रसाः स्थावराश्च जन्तवः तस्मात्तेषां 'रक्षणार्थं' रक्षानिमित्तं साधुरात्मगुप्तो जितेन्द्रियोऽत्र भवदीयानुष्ठाने पुण्यमित्येवं नो वदेदिति ॥ १८ ॥ यद्येवं नास्ति पुण्यमिति ब्रूयात्, तदेतदपि न ब्रूयादित्याह—'येषां' जन्तूनां कृते 'तद्' अन्नपानादिकं किल धर्मबुद्ध्या 'उपकल्पयन्ति' तथाविधं प्राण्युपमर्ददोषदुष्टं निष्पादयन्ति, तन्निषेधे च यस्मात् 'तेषाम्' आहारपानार्थिनां तत् 'लाभान्तरायो' विघ्नो भवेत्, तदभावेन तु ते पीड्येरन्, तस्मात्कूपखननसत्रादिके कर्मणि नास्ति पुण्यमित्येतदपि नो वदेदिति ॥ १९ ॥ एनमेवार्थं पुनरपि समासतः स्पष्टतरं विभणिषुराह—ये केचन प्रपासत्रादिकं दानं बहूनां जन्तूनामुपकारीतिकृत्वा 'प्रशंसन्ति' श्लाघन्ते 'ते' परमार्थानभिज्ञाः प्रभूततरप्राणिनां तत्प्रशंसाद्वारेण 'वधं' प्राणातिपातमिच्छन्ति, तद्दानस्य प्राणातिपातमन्तरेणानुपपत्तेः, येऽपि च किल सूक्ष्मधियो वयमित्येवं मन्यमाना आगमसद्भावानभिज्ञाः 'प्रतिषेधन्ति' निषेधयन्ति तेऽप्यगीतार्थाः प्राणिनां 'वृत्तिच्छेदं' वर्तनोपायविघ्नं कुर्वन्तीति ॥ २० ॥ तदेवं राज्ञा अन्येन वेश्वरेण कूपतडागयागसत्रदानाद्युद्यतेन पुण्यसद्भावं पृष्टैर्मुमुक्षुभिर्यद्विधेयं तद्दर्शयितुमाह—

दुहओवि ते ण भासंति, अत्थि वा नत्थि वा पुणो । आयं रयस्स हेच्चा णं, निव्वाणं पाउणंति ते ॥ २१ ॥
निव्वाणं परमं बुद्धा, णक्खत्ताण व चंदिमा । तम्हा सदा जए दंते, निव्वाणं संधए मुणी ॥ २२ ॥
वुज्झमाणाण पाणाणं, किच्चंताण सकम्मुणा । आघाति साहु तं दीवं, पतिट्ठेसा पवुच्चई ॥ २३ ॥
आयगुत्ते सया दंते, छिन्नसोए अणासवे । जे धम्मं सुद्धमक्खाति, पडिपुन्नमणेलिसं ॥ २४ ॥

यद्यस्ति पुण्यमित्येवमूचुस्ततोऽनन्तानां सत्त्वानां सूक्ष्मबादराणां सर्वदा प्राणत्याग एव स्यात् प्रीणनमात्रं तु पुनः स्वल्पानां स्वल्पकालीयमतोऽस्तीति न वक्तव्यं नास्ति पुण्यमित्येवं प्रतिषेधेऽपि तदर्थिनामन्तरायः स्यादित्यतो 'द्विधापि' अस्ति नास्ति वा पुण्यमित्येवं 'ते' मुमुक्षवः साधवः पुनर्न भाषन्ते, किंतु पृष्टैः सद्भिर्मौनं समाश्रयणीयं, निर्बन्धे त्वसाकं द्विचत्वारिंशद्दोषवर्जित

[1] वप्रप्राकारशेषस्तोः ।

११ मार्गाध्यवने कूपतटागादिप्रश्ने मौनादि.

॥२०२॥

With Best Compliments,
from

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहारः कल्पते, एवंविधविषये बुभुक्षूणामधिकार एव नास्तीति, उक्तं च—"सत्यं वप्रेषु शीतं शशिकरधवलं वारि पीत्वा प्रकामं, व्युच्छिन्नाशेषतृष्णाः प्रमुदितमनसः प्राणिसार्था भवन्ति । शोषं नीते जलौघे दिनकरकिरणैर्यान्त्यनन्ता विनाशं, तेनोदासीनभावं व्रजति मुनिगणः कूपवप्रादिकार्ये ॥ १ ॥" तदेवमुभयथापि भाषिते 'रजसः' कर्मण 'आयो' लाभो भवतीत्यतस्तमायं रजसो मौनेनानवद्यभाषणेन वा 'हित्वा' त्यक्त्वा 'ते' अनवद्यभाषिणो 'निर्वाणं' मोक्षं प्राप्नुवन्तीति ॥ २१ ॥ अपिच—निर्वृतिर्निर्वाणं तत्परमं—प्रधानं येषां परलोकार्थिनां बुद्धानां ते तथा तानेव बुद्धान् निर्वाणवादित्वेन प्रधानानित्येतदृष्टान्तेन दर्शयति—यथा 'नक्षत्राणाम्' अश्विन्यादीनां सौम्यत्वप्रमाणप्रकाशकत्वैरधिकश्चन्द्रमाः, एवं परलोकार्थिनां बुद्धानां मध्ये ये स्वर्गचक्रवर्तिसंपन्निदानपरित्यागेनाशेषकर्मक्षयरूपं निर्वाणमेवाभिसंधाय प्रवृत्तास्त एव प्रधाना नापर इति, यदिवा यथा नक्षत्राणां चन्द्रमाः प्रधानभावमनुभवति एवं लोकस्य निर्वाणं परमं प्रधानमित्येवं 'बुद्धा' अवगततत्त्वाः प्रतिपादयन्तीति, यस्माच्च निर्वाणं प्रधानं तस्मात्कारणात् 'सदा' सर्वकालं 'यतः' प्रयतः प्रयत्नवा(ग्रं० ६०००)न् इन्द्रियनोइन्द्रियदमनेन दान्तो 'मुनिः' साधुः 'निर्वाणमभिसंधयेत्' निर्वाणार्थं सर्वाः क्रियाः कुर्यादित्यर्थः ॥ २२ ॥ किञ्चान्यत्—संसारसागरस्रोतोभिर्मिथ्यात्वकषायप्रमादादिकैः 'उह्यमानानां' तदभिमुखं नीयमानानां तथा स्वकर्मोदयेन निकृत्यमानानामशरणानामसुमतां परहितैकरतोऽकारणवत्सलस्तीर्थकृदन्यो वा गणधराचार्यादिकस्तेषामाश्वासभूतं 'साधुं' शोभनं द्वीपमाख्याति, यथा समुद्रान्तःपतितस्य जन्तोर्जलकल्लोलाकुलितस्य श्रमूर्पोरतिश्रान्तस्य विश्रामहेतुं द्वीपं कश्चित्साधुर्वत्सलतया समाख्याति, एवं तं तथाभूतं 'द्वीपं' सम्यग्दर्शनादिकं संसारश्रमणविश्रामहेतुं परतीर्थिकैरनाख्यातपूर्वमाख्याति, एवं च कृत्वा प्रतिष्ठानं प्रतिष्ठा—संसारभ्रमणविरतिलक्षणैषा सम्यग्दर्शनाद्यवाप्तिसाध्या मोक्षप्राप्तिः प्रकर्षेण तत्त्वज्ञैः 'उच्यते' प्रोच्यत इति ॥ २३ ॥ किंभूतोऽसावाश्वासद्वीपो भवति? कीदृग्विधेन वाऽसावाख्यायत इत्येतदाह—मनोवाक्कायैरात्मा गुप्तो यस्य स आत्मगुप्तः, तथा 'सदा' सर्वकालमिन्द्रियनोइन्द्रियदमनेन दान्तो—वश्येन्द्रियो धर्मध्यानध्यायी वेत्यर्थः, तथा छिन्नानि—त्रोटितानि संसारस्रोतांसि येन स तथा, एतदेव स्पष्टतरमाह—निर्गत आश्रवः—प्राणातिपातादिकः कर्मप्रवेशद्वाररूपो यस्मात्स निराश्रवो य एवंभूतः स 'शुद्धं' समस्तदोषापेतं धर्ममाख्याति, किंभूतं धर्मं?—'प्रतिपूर्णं' निरवयवतया सर्वविरत्याख्यं मोक्षगमनैकहेतुम् 'अनीदृशम्' अनन्यसदृशमद्वितीयमितियावत् ॥ २४ ॥ एवंभूतधर्मव्यतिरेकिणां दोषाभिधित्सयाऽऽह—

तमेव अविजाणंता, अबुद्धा बुद्धमाणिणो । बुद्धा मोत्ति य मन्नंता, अंत एते समाहिए ॥ २५ ॥
ते य बीओदगं चेव, तमुद्दिस्सा य जं कडं । भोच्चा झाणं झियायंति, अखेयन्ना[अ]समाहिया ॥२६॥
जहा ढंका य कंका य, कुलला मग्गुका सिही । मच्छेसणं झियायंति, झाणं ते कलुसाधमं ॥ २७ ॥
एवं तु समणा एगे, मिच्छदिट्ठी अणारिया । विसएसणं झियायंति, कंका वा कलुसाहमा ॥ २८ ॥

तमेवंभूतं शुद्धं परिपूर्णमनीदृशं धर्ममजानाना 'अप्रबुद्धा' अविवेकिनः 'पण्डितमानिनो' वयमेव प्रतिबुद्धा धर्मतत्त्वमित्येवं मन्यमाना भावसमाधेः—सम्यग्दर्शनाख्यादन्ते—पर्यन्तेऽतिदूरे वर्तन्त इति, ते च सर्वेऽपि परतीर्थिका द्रष्टव्या इति ॥२५॥ किमिति ते तीर्थिका भावमार्गरूपात्समाधेर्दूरे वर्तन्त इत्याशङ्क्याह—'ते च' शाक्यादयो जीवाजीवानभिज्ञतया 'बीजानि' शालिगोधूमादीनि, तथा 'शीतोदकम्' अप्रासुकोदकं, तांश्चोद्दिश्य तज्जकैर्यदाहारादिकं 'कृतं' निष्पादितं तत्सर्वमविवेकितया ते शाक्यादयो 'भुक्त्वा' अभ्यवहृत्य पुनः सातर्द्धिरसगौरवासक्तमनसः संघमक्तादिक्रियया तदवाप्तिकृते आर्तं ध्यानं ध्यायन्ति, न ह्यैहिकसुखैषिणां दासीदासधनधान्यादिपरिग्रहवतां धर्मध्यानं भवतीति, तथा चोक्तम्—"ग्रामक्षेत्रगृहादीनां, गवां प्रेष्यजनस्य च । यस्मिन्परिग्रहो दृष्टो, ध्यानं तत्र कुतः शुभम्? ॥ १ ॥" इति, तथा—"मोहस्यायतनं धृतेरपचयः शान्तेः प्रतीपो विधिर्व्याक्षेपस्य सुहृन्मदस्य भवनं पापस्य वासो निजः । दुःखस्य प्रभवः सुखस्य निधनं ध्यानस्य कष्टो रिपुः, प्राज्ञस्यापि परिग्रहो ग्रह इव क्लेशाय नाशाय च ॥१॥" तदेवं पचनपाचनादिक्रियाप्रवृत्तानां तदेव चानुप्रेक्षमाणानां कुतः शुभध्यानस्य संभवः? इति । अपिच—ते तीर्थिका धर्माधर्मविवेके कर्तव्ये 'अखेदज्ञा' अनिपुणाः, तथाहि—शाक्या मनोज्ञाहारवसतिशय्यासनादिकं रागकारणमपि शुभध्याननिमित्तत्वेनाध्यवस्यन्ति, तथा चोक्तम्—'मणुण्णं भोयणं भुंजे'त्यादि, तथा मांसं कल्किकमित्युपदिश्य संज्ञान्तरसमाश्रयणाभिदोषं मन्यन्ते, बुद्धसङ्घादिनिमित्तं चारम्भं निर्दोषमिति, तदुक्तम्—"मंसंनिवत्तिं काउं सेवइ दंतिकगंति धणिमेया । इय चइऊणारंभं परवावएसा कुणइ बालो ॥ १ ॥" न चैतावता तन्निर्दोषता, न हि लूतादिकं शीतलिकाद्यभिधानान्तरमात्रेणान्यथात्वं भजते, विषं वा मेधुरकाभिधानेनेति, एवमन्येषामपि कापिलादीनामाविर्भावतिरोभावाभिधानाभ्यां विनाशोत्पादावभिदधतामनैपुण्यमाविष्करणीयं । तदेवं ते वराकाः शाक्यादयो मनोज्ञोद्दिष्टभोजिनः सपरिग्रहतयाऽऽर्तध्यायिनोऽसमाहिता मोक्षमार्गाख्याद्भावसमाधेरसंवृततया दूरेण वर्तन्त इत्यर्थः ॥ २६ ॥ यथा चैते रससातागौरवतयाऽऽर्तध्यायिनो भवन्ति तथा

१ मांसनिवृत्तिं कृत्वा सेवते इदं कल्किकमिति ध्वनिभेदादेवं त्यक्तारम्भं परव्यपदेशात्करोति बालः ॥ १ ॥ २ मधुरं विषे इत्युक्तेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तद्वारेण दर्शयितुमाह—यथेत्युदाहरणोपन्यासार्थः 'यथा' येन प्रकारेण 'ढङ्कादयः' पक्षिविशेषा जलाशयाश्रया आमिषजीविनो मत्स्यप्राप्तिं ध्यायन्ति, एवंभूतं च ध्यानमार्तरौद्रध्यानरूपतयाऽत्यन्तकलुषमधर्मं च भवतीति ॥ २७ ॥ दार्ष्टान्तिकं दर्शयितुमाह—'एव'मिति यथा ढङ्कादयो मत्स्यान्वेषणपरं ध्यानं ध्यायन्ति तद्ध्यायिनश्च कलुषाधमा भवन्ति एवमेव मिथ्यादृष्टयः श्रमणा 'एके' शाक्यादयोऽनार्यकर्मकारित्वात्सारम्भपरिग्रहतया अनार्याः सन्तो विषयाणां—शब्दादीनां प्राप्तिं ध्यायन्ति तद्ध्यायिनश्च ढङ्का इव कलुषाधमा भवन्तीति ॥ २८ ॥ किञ्च—

सुद्धं मग्गं विराहित्ता, इहमेगे उ दुम्मती । उम्मग्गगता दुक्खं, घायमेसंति तं तहा ॥ २९ ॥
जहा आसाविणिं नावं, जाइअंधो दुरूहिया । इच्छई पारमागंतुं, अंतरा य विसीयति ॥ ३० ॥
एवं तु समणा एगे, मिच्छदिट्ठी अणारिया । सोयं कसिणमावन्ना, आगंतारो महब्भयं ॥ ३१ ॥
इमं च धम्ममादाय, कासवेण पवेदितं । तरे सोयं महाघोरं, अत्तत्ताए परिव्वए ॥ ३२ ॥

'शुद्धम्' अवदातं निर्दोषं 'मार्गं' सम्यग्दर्शनादिकं मोक्षमार्गं कुमार्गप्ररूपणया 'विराध्य' दूषयित्वा 'इह' अस्मिन्संसारे मोक्षमार्गप्ररूपणप्रस्तावे वा 'एके' शाक्यादयः स्वदर्शनानुरागेण महामोहाकुलितान्तरात्मानो दुष्टा पापोपादानतया मतिर्येषां ते दुष्टमतयः सन्त उन्मार्गेण—संसारावतरणरूपेण गताः—प्रवृत्ता उन्मार्गगता दुःखयतीति दुःखम्—अष्टप्रकारं कर्मासातोदयरूपं वा तद्दुःखं घातं चान्तशस्ते तथा—सन्मार्गविराधनया उन्मार्गगमनं च 'एषन्ते' अन्वेषयन्ति, दुःखमरणे शतशः प्रार्थयन्तीत्यर्थः ॥ २९ ॥ शाक्यादीनां पापायं दिदर्शयिषुस्तावद्दृष्टान्तमाह—यथा जात्यन्ध 'आस्राविणीं' शतच्छिद्रां नावमारुह्य पारमागन्तुमिच्छति, न चासौ सच्छिद्रतया पारगामी भवति, किं तर्हि ?, अन्तराल एव—जलमध्य एव विषीदति—निमज्जतीत्यर्थः ॥३०॥ दार्ष्टान्तिकमाह—एवमेव श्रमणा 'एके' शाक्यादयो मिथ्यादृष्टयोऽनार्या भावस्रोतः—कर्माश्रवरूपं 'कृत्स्नं' संपूर्णमापन्नाः सन्तस्ते 'महाभयं' पौनःपुन्येन संसारपर्यटनया नारकादिस्वभावं दुःखम् 'आगन्तारः' आगमनशीला भवन्ति, न तेषां संसारोदधेरास्राविणीं नावं व्यवस्थितानामिवोत्तरणं भवतीति भावः ॥ ३१ ॥ यतः शाक्यादयः श्रमणाः मिथ्यादृष्टयोऽनार्याः कृत्स्नं स्रोतः समापन्नाः महाभयमागन्तारो भवन्ति तत इदमुपदिश्यते—'इम'मिति प्रत्यक्षासन्नवाचित्वादिदमोऽनन्तरं वक्ष्यमाणलक्षणं सर्वलोकप्रकटं च दुर्गतिनिषेधेन शोभनगतिधारणात् 'धर्मं' श्रुतचारित्राख्यं, चशब्दः पुनःशब्दार्थे, स च पूर्वसाद्व्यतिरेकं दर्शयति, यस्माच्छ्राद्धोदनिप्रणीतधर्मस्यादातारो महाभयं गन्तारो भवन्ति, इमं पुनर्धर्मम् 'आदाय' गृहीत्वा 'काश्यपेन' श्रीवर्धमानस्वामिना 'प्रवेदितं' प्रणीतं 'तरेत्' लङ्घयेद्भावस्रोतः संसारपर्यटनस्वभावं, तदेव विशिनष्टि—'महाघोरं' दुरुत्तरत्वान्महाभयानकं, तथाहि—तदन्तर्वर्तिनो जन्तवो गर्भाद्गर्भं जन्मतो जन्म मरणान्मरणं दुःखाद्दुःखमित्येवमरघट्टघटीन्यायेनानुभवन्तोऽनन्तमपि कालमासते । तदेवं काश्यपप्रणीतधर्मादानेन सता आत्मनस्त्राणं—नरकादिरक्षा तस्मै आत्मत्राणाय परिः—समन्ता(द्व्रजे) त्परिव्रजेत्संयमानुष्ठायी भवेदित्यर्थः, कचित्पश्चार्धस्यान्यथा पाठः—'कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहिए' 'भिक्षुः' साधुः ग्लानस्य वैयावृत्यम् 'अग्लानः' अपरिश्रान्तः कुर्यात्सम्यक्समाधिना ग्लानस्य वा समाधिमुत्पादयन्निति ॥३२॥ कथं संयमानुष्ठाने परिव्रजेदित्याह—

विरए गामधम्मेहिं, जे केई जगई जगा । तेसिं अत्तुवमायाए, थामं कुव्वं परिव्वए ॥ ३३ ॥
अहमाणं च मायं च, तं परिन्नाय पंडिए । सव्वमेयं णिराकिच्चा, णिव्वाणं संधए मुणी ॥ ३४ ॥
संधए साहुधम्मं च, पावधम्मं णिराकरे । उवहाणवीरिए भिक्खू, कोहं माणं ण पत्थए ॥३५॥
जे य बुद्धा अतिक्कंता, जे य बुद्धा अणागया । संति तेसिं पइट्ठाणं, भूयाणं जगती जहा ॥३६॥

ग्रामधर्माः—शब्दादयो विषयास्तेभ्यो विरता मनोज्ञेतरेष्वरक्तद्विष्टाः सन्त्येके केचन 'जगति' पृथिव्यां संसारोदरे 'जगा' इति जन्तवो जीवितार्थिनस्तेषां दुःखद्विषामात्मोपमया दुःखमनुत्पादयन् तद्रक्षणे सामर्थ्यं कुर्यात् तत् कुर्वंश्च संयमानुष्ठाने परिव्रजेदिति ॥ ३३ ॥ संयमविघ्नकारिणामपनयनार्थमाह—अतीव मानोऽतिमानश्चारित्रमतिक्रम्य यो वर्तते चकारादेतद्देश्यः क्रोधोऽपि परिगृह्यते, एवमतिमायां, चशब्दादतिलोभं च, तमेवंभूतं कषायव्रातं संयमपरिपन्थिनं 'पण्डितो' विवेकी परिज्ञाय सर्वमेनं संसारकारणभूतं कषायसमूहं निराकृत्य निर्वाणमनुसंधयेत्, सति च कषायकदम्बके न सम्यक् संयमः सफलतां प्रतिपद्यते, तदुक्तम्—"सामण्णमणुचरंतस्स, कसाया जस्स उक्कडा होंति । मण्णामि उच्छुपुप्फं व, निप्फलं तस्स सामण्णं ॥ १ ॥"[1] तन्निष्फलत्वे च न मोक्षसंभवः, तथा चोक्तम्—"संसारादपलायनप्रतिभुवो रागादयो मे स्थितास्तृष्णाबन्धनबध्यमानमखिलं किं वेत्सि नेदं जगत् ? । मृत्यो ! मुञ्च जराकरेण परुषं केशेषु मा मा ग्रहीरेहीत्यादरमन्तरेण भवतः किं नागमिष्याम्यहम् ? ॥१॥" इत्यादि । तदेवमेवंभूतकषायपरित्यागादच्छिन्नप्रशस्तभावानुसंधनया निर्वाणानुसंधानमेव श्रेय इति ॥ ३४ ॥ किञ्च—साधूनां धर्मः क्षान्त्यादिको द-

1 श्रामण्यमनुचरतः कषाया यस्योत्कटा भवन्ति । मन्ये इक्षुपुष्पमिव निष्फलं तस्य श्रामण्यं ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शविधः सम्यग्दर्शनज्ञानचारित्राख्यो वा तम् 'अनुसंधयेत्' वृद्धिमापादयेत्, तद्यथा—प्रतिक्षणमपूर्वज्ञानग्रहणेन ज्ञानं तथा शङ्कादिदोषपरिहारेण सम्यग्जीवादिपदार्थाधिगमेन च सम्यग्दर्शनम् अस्खलितमूलोत्तरगुणसंपूर्णपालनेन प्रत्यहमपूर्वाभिग्रहग्रहणेन (च)चारित्रं(च) वृद्धिमापादयेदिति, पाठान्तरं वा 'सद्दहे साधुधम्मं च' पूर्वोक्तविशेषणविशिष्टं साधुधर्मं मोक्षमार्गत्वेन श्रद्धीत—निःशङ्कतया गृह्णीयात्, चशब्दात्सम्यगनुपालयेच्च, तथा पापं—पापोपादानकारणं धर्मं प्राण्युपमर्देन प्रवृत्तं निराकुर्यात्, तथोपधानं—तपस्तत्र यथाशक्त्या वीर्यं यस्य स भवत्युपधानवीर्यः, तदेवंभूतो भिक्षुः क्रोधं मानं च न प्रार्थयेत् न वर्धयेद्वेति ॥३५॥ अथैवंभूतं भावमार्गं किं वर्धमानस्वाम्येवोपदिष्टवान् उतान्येऽपीत्येतदाशङ्क्याह—ये बुद्धाः—तीर्थकृतोऽतीतेऽनादिके कालेऽनन्ताः समतिक्रान्ताः ते सर्वेऽप्येवंभूतं भावमार्गमुपन्यस्तवन्तः, तथा ये चानागता भविष्यदनन्तकालभाविनोऽनन्ता एव तेऽप्येवमेवोपन्यसिष्यन्ति, चशब्दाद्वर्तमानकालभाविनश्च संख्येया इति। न केवलमुपन्यस्तवन्तोऽनुष्ठितवंतश्चेत्येतद्दर्शयति—शमनं शान्तिः—भावमार्गस्तेषामतीतानागतवर्तमानकालभाविनां बुद्धानां प्रतिष्ठानम्—आधारो बुद्धत्वस्यान्यथानुपपत्तेः, यदिवा शान्तिः—मोक्षः स तेषां प्रतिष्ठानम्—आधारः, ततस्तदवाप्तिश्च भावमार्गमन्तरेण न भवतीत्यतस्ते सर्वेऽप्येनं भावमार्गमुक्तवन्तोऽनुष्ठितवन्तश्च (इति) गम्यते। शान्तिप्रतिष्ठानत्वे दृष्टान्तमाह—'भूतानां' स्थावरजङ्गमानां यथा 'जगती' त्रिलोकी प्रतिष्ठानं एवं ते सर्वेऽपि बुद्धाः शान्तिप्रतिष्ठाना इति ॥ ३६ ॥ प्रतिपन्नभावमार्गेण च यद्विधेयं तद्दर्शयितुमाह—

अह णं वयमावन्नं, फासा उच्चावया फुसे। ण तेसु विणिहण्णेज्जा, वाएण व महागिरी ॥ ३७॥

संवुडे से महापन्ने, धीरे दत्तेसणं चरे। निव्वुडे कालमाकंखी, एवं (यं) केवलिणो मयं ॥ ३८ ॥
तिबेमि। इति मोक्षमार्गनामकं एकादशमध्ययनं समाप्तम् ॥ (गाथाग्रं ५४६)

'अथ' भावमार्गप्रतिपत्त्यनन्तरं साधुं प्रतिपन्नव्रतं सन्तं स्पर्शाः—परीषहोपसर्गरूपाः 'उच्चावचा' गुरुलघवो नानारूपा वा 'स्पृशेयुः' अभिद्रवेयुः, स च साधुस्तैरभिद्रुतः संसारस्वभावमपेक्षमाणः कर्मनिर्जरां च न तैरनुकूलप्रतिकूलैर्विहन्यात्, नैव संयमानुष्ठानान्मनागपि विचलेत्, किमिव ?, महावातेनेव महागिरिः—मेरुरिति। परीषहोपसर्गजयश्चाभ्यासक्रमेण विधेयः, अभ्यासवशेन हि दुष्करमपि सुकरं भवति, अत्र च दृष्टान्तः, तद्यथा—कश्चिद्रोपस्तदहर्जातं तर्णकमुत्क्षिप्य गवान्तिकं नयत्यानयति च, ततोऽसावनेनैव च क्रमेण प्रत्यहं प्रवर्द्धमानमपि वत्समुत्क्षिप्तमभ्यासवशाद्विहायनं त्रिहायणमप्युत्क्षिपति, एवं साधुरप्यभ्यासात् शनैः शनैः परिषहोपसर्गजयं विधत्त इति ॥ ३७॥ साम्प्रतमध्ययनार्थमुपसंजिहीर्षुरुक्तशेषमधिकृत्याह—स साधुः एवं संवृताश्रवद्वारतया संवरसंवृतो महती प्रज्ञा यस्यासौ महाप्रज्ञः—सम्यग्दर्शनज्ञानवान्, तथा धीः—बुद्धिस्तया राजत इति धीरः परीषहोपसर्गाक्षोभ्यो वा स एवंभूतः सन् परेण दत्ते सत्याहारादिके एषणां चरेत्त्रिविधयाप्येषणया युक्तः सन् संयममनुपालयेत्, तथा निर्वृत इव निर्वृतः कषायोपशमाच्छीतीभूतः 'कालं' मृत्युकालं यावदभिकाङ्क्षेत् 'एतत्' यत् मया प्राक् प्रतिपादितं तत् 'केवलिनः' सर्वज्ञस्य तीर्थकृतो मतं। एतच्च जम्बूस्वामिनमुद्दिश्य सुधर्मस्वाम्याह। तदेतद्यत्त्वया मार्गस्वरूपं प्रश्नितं तन्मया न स्वमनीषिकया कथितं, किं तर्हि ?, केवलिनो मतमेतदित्येवं भवता ग्राह्यं। इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ ३८ ॥ इति मार्गाख्यमेकादशमध्ययनं समाप्तम् ॥

अथ द्वादशं श्रीसमवसरणाध्ययनं प्रारभ्यते ॥

उक्तमेकादशमध्ययनं, साम्प्रतं द्वादशमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने मार्गोऽभिहितः, स च कुमार्गव्युदासेन सम्यग्मार्गतां प्रतिपद्यते, अतः कुमार्गव्युदासं चिकीर्षुणा तत्स्वरूपमवगन्तव्यमित्यतस्तत्स्वरूपनिरूपणार्थमिदमध्ययनमायातम्, अस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि, तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—कुमार्गाभिधायिनां क्रियाऽक्रियाऽज्ञानिकवैनयिकानां चत्वारि समवसरणानीह प्रतिपाद्यन्ते, नामनिष्पन्ने तु निक्षेपे **समवसरण**मित्येतन्नाम तन्निक्षेपार्थं निर्युक्तिकृदाह—

समवसरणेऽवि छक्कं सचित्ताचित्तमीसगं दव्वे। खेत्तंमि जंमि खेत्ते काले जं जंमि कालंमि ॥ ११६ ॥
भावसमोसरणं पुण णायव्वं छव्विहंमि भावंमि। अहवा किरिय अकिरिया अन्नाणी चेव वेणइया ॥ ११७ ॥
अत्थित्ति किरियवादी वयंति णत्थि अकिरियवादी य। अण्णाणी अण्णाणं विणइत्ता वेणइयवादी ॥ ११८ ॥

समवसरणमिति 'सृ गता' वित्येतस्य धातोः समवोपसर्गपूर्वस्य ल्युडन्तस्य रूपं, सम्यग्—एकीभावेनावसरणम्—एकत्र गमनं मेलापकः समवसरणं तस्मिन्नपि, न केवलं समाधौ, षड्विधो नामादिको निक्षेपः, तत्रापि नामस्थापने क्षुण्णे, द्रव्यविषयं पुनः स-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवसरणं नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तं सचित्ताचित्तमिश्रभेदात्त्रिविधं, सचित्तमपि द्विपदचतुष्पदापदभेदात्त्रिविधमेव, तत्र द्विपदानां साधुप्रभृतीनां तीर्थकृज्जन्मनिष्क्रमणप्रदेशादौ मेलापकः, चतुष्पदानां गवादीनां निपानप्रदेशादौ, अपदानां तु वृक्षादीनां स्वतो नास्ति समवसरणं, विवक्षया तु काननादौ भवत्यपि, अचित्तानां तु द्व्यणुकाद्यभ्रादीनां तथा मिश्राणां सेनादीनां समवसरणसद्भावोऽवगन्तव्य इति । क्षेत्रसमवसरणं तु परमार्थतो नास्ति, विवक्षया तु यत्र द्विपदादयः समवसरन्ति व्याख्यायते वा समवसरणं यत्र तत्क्षेत्रप्राधान्यादेवमुच्यते । एवं कालसमवसरणमपि द्रष्टव्यमिति । इदानीं भावसमवसरणमधिकृत्याह—भावानाम्—औदयिकादीनां समवसरणम्—एकत्र मेलापको भावसमवसरणं, तत्रौदयिको भाव एकविंशतिभेदः, तद्यथा—गतिश्चतुर्धा कषायाश्चतुर्विधाः एवं लिङ्गं त्रिविधं, मिथ्यात्वाज्ञानासंयतत्वासिद्धत्वानि प्रत्येकमेकैकविधानि, लेश्याः कृष्णादिभेदेन षड्विधा भवन्ति । औपशमिको द्विविधः सम्यक्त्वचारित्रोपशमभेदात् । क्षायोपशमिकोऽष्टादशभेदभिन्नः, तद्यथा—ज्ञानं मतिश्रुतावधिमनःपर्यायभेदाच्चतुर्धा अज्ञानं मत्यज्ञानश्रुताज्ञानविभङ्गभेदात्त्रिविधं, दर्शनं चक्षुरचक्षुरवधिदर्शनभेदात्त्रिविधमेव, लब्धिर्दानलाभभोगोपभोगवीर्यभेदात्पञ्चधा, सम्यक्त्वचारित्रसंयमासंयमाः प्रत्येकमेकप्रकारा इति । क्षायिको नवप्रकारः, तद्यथा—केवलज्ञानं केवलदर्शनं दानादिलब्धयः पञ्च सम्यक्त्वं चारित्रं चेति । जीवत्वभव्यत्वाभव्यत्वादिभेदात्पारिणामिकस्त्रिविधः । सान्निपातिकस्तु द्वित्रिचतुष्पञ्चकसंयोगो भवति, तत्र द्विकसंयोगः सिद्धस्य क्षायिकपारिणामिकभावद्वयसद्भावादवगन्तव्यः, त्रिकसंयोगस्तु मिथ्यादृष्टिसम्यग्दृष्ट्यविरतविरतानामौदयिकक्षायोपशमिकपारिणामिकभावसद्भावादवगन्तव्यः, तथा भवस्थकेवलिनोऽप्यौदयिकक्षायिकपारिणामिकभावसद्भावाद्विज्ञेय इति, चतुष्कसंयोगोऽपि क्षायिकसम्यग्दृष्टीनामौदयिकक्षायिकक्षायोपशमिकपारिणामिकभावसद्भावात्,

[त्रिकृताङ्गं शीलाङ्गाचार्यीयवृत्तियुतं ॥२०८॥]

तथौपशमिकसम्यग्दृष्टीनामौदयिकौपशमिकक्षायोपशमिकपारिणामिकभावसद्भावाच्चेति, पञ्चकसंयोगस्तु क्षायिकसम्यग्दृष्टीनामुपशमश्रेण्यां समस्तोपशान्तचारित्रमोहानां भावपञ्चकसद्भावाद्विज्ञेय इति, तदेवं भावानां द्विकत्रिकचतुष्कपञ्चकसंयोगात्संभविनः सान्निपातिकभेदाः षड् भवन्ति, एत एव त्रिकसंयोगचतुष्कसंयोगगतिभेदात्पञ्चदशधा प्रदेशान्तरेऽभिहिता इति । तदेवं षड्विधे भावे भावसमवसरणं—भावमीलनमभिहितम्, अथवा अन्यथा भावसमवसरणं निर्युक्तिकृदेव दर्शयति—क्रियां—जीवादिपदार्थोऽस्तीत्यादिकां वदितुं शीलं येषां ते क्रियावादिनः, एतद्विपर्ययात् अक्रियावादिनः, तथा अज्ञानिनो—ज्ञाननिह्नववादिनः तथा 'वैनयिका' विनयेन चरन्ति तत्प्रयोजना वा वैनयिकाः, एषां चतुर्णामपि सप्रभेदानामाक्षेपं कृत्वा यत्र विक्षेपः क्रियते तद्भावसमवसरणमिति, एतच्च स्वयमेव निर्युक्तिकारोऽन्त्यगाथया कथयिष्यति । साम्प्रतमेतेषामेवाभिधानान्वर्थतादर्शनद्वारेण स्वरूपमाविष्कुर्वन्नाह—जीवादिपदार्थसद्भावोऽस्त्येवेत्येवं सावधारणक्रियाभ्युपगमो येषां ते अस्तीति क्रियावादिनः, ते चैवंवादित्वान्मिथ्यादृष्टयः, तथाहि—यदि जीवोऽस्त्येवे[वेऽस्तित्वमेवे]त्येवमभ्युपगम्यते, ततः सावधारणत्वान्न कथञ्चिन्नास्तीत्यतः स्वरूपसत्तावत्पररूपापत्तिरपि स्याद्, एवं च नानेकं जगत् स्यात्, नचैतदृष्टमिष्टं वा । तथा नास्त्येव जीवादिकः पदार्थ इत्येवंवादिनोऽक्रियावादिनः, तेऽप्यसद्भूतार्थप्रतिपादनान्मिथ्यादृष्टय एव, तथाहि—एकान्तेन जीवास्तित्वप्रतिषेधे कर्तुरभावान्नास्तीत्येतस्यापि प्रतिषेधस्याभावः, तदभावाच्च सर्वास्तित्वमनिवारितमिति । तथा न ज्ञानमज्ञानं तद्विद्यते येषां तेऽज्ञानिनः, ते ह्यज्ञानमेव श्रेय इत्येवं वदन्ति, एतेऽपि मिथ्यादृष्टय एव, तथाहि—अज्ञानमेव श्रेय इत्येतदपि न ज्ञानमृते भणितुं पार्यते, तदभिधानाच्चावश्यं ज्ञानमभ्युपगतं तैरिति । तथा वैनयिका विनयादेव केवलात्स्वर्गमोक्षावाप्तिमभिलषन्तो मिथ्यादृष्टयो, यतो न ज्ञानक्रियाभ्यामन्तरेण मोक्षावाप्तिरिति । एषां च क्रियावाद्यादीनां

[१२ समवसरणाध्य० भावानां क्रियादिवादिनां वा समवसरणं]

स्वरूपं तन्निराकरणं चाचारटीकायां विस्तरेण प्रतिपादितमिति नेह प्रतन्यते । साम्प्रतमेतेषां भेदसंख्यानिरूपणार्थमाह—

असियसयं किरियाणं अकिरियाणं च होइ चुलसीती । अन्नाणिय सत्तट्ठी वेणइयाणं च बत्तीसा ॥ ११९ ॥
तेसि मताणुमएणं पन्नवणा वण्णिया इहऽज्झयणे । सब्भावणिच्छयत्थं समोसरणमाहु तेणं तु ॥ १२० ॥
सम्मद्दिट्ठी किरियावादी मिच्छा य सेसगा वाई । जहिऊण मिच्छवायं सेवह वायं इमं सच्चं ॥ १२१ ॥

क्रियावादिनामशीत्यधिकं शतं भवति, तच्चानया प्रक्रियया, तद्यथा—जीवादयो नव पदार्थाः परिपाट्या स्थाप्यन्ते, तदधः स्वतः परत इति भेदद्वयं, ततोऽप्यधो नित्यानित्यभेदद्वयं, ततोऽप्यधस्तात्परिपाट्या कालस्वभावनियतीश्वरात्मपदानि पञ्च व्यवस्थाप्यन्ते, ततश्चैवं चारणिकाप्रक्रमः, तद्यथा—अस्ति जीवः स्वतो नित्यः कालतः, तथाऽस्ति जीवः स्वतोऽनित्यः कालत एव, एवं परतोऽपि भङ्गकद्वयं, सर्वेऽपि च चत्वारः कालेन लब्धाः, एवं स्वभावनियतीश्वरात्मपदान्यपि प्रत्येकं चतुर एव लभन्ते, ततश्च पञ्चापि चतुष्कका विंशतिर्भवन्ति, साऽपि जीवपदार्थेन लब्धा, एवमजीवादयोऽप्यष्टौ प्रत्येकं विंशतिं लभन्ते, ततश्च नव विंशतयो मीलिताः क्रियावादिनामशीत्युत्तरं शतं भवतीति । इदानीमक्रियावादिनां न सन्त्येव जीवादयः पदार्था इत्येवमभ्युपगमवतामनेनोपायेन चतुरशीतिरवगन्तव्या, तद्यथा—जीवादीन् पदार्थान् सप्तभिर्लिख्य तदधः स्वपरभेदद्वयं व्यवस्थाप्यं, ततोऽप्यधः कालयदृच्छानियतिस्वभावे श्वरात्मपदानि षड् व्यवस्थाप्यानि, भङ्गकानयनोपायस्त्वयं—नास्ति जीवः स्वतः कालतः. तथा नास्ति जीवः परतः कालतः,

जीवः	स्वतः	परतः
नित्यः	अनित्यः	
कालः	स्वभावः	नियतिः
ईश्वर	आत्मा	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं यदृच्छानियतिस्वभावेश्वरात्ममिः प्रत्येकं द्वौ द्वौ भङ्गकौ लभ्येते, सर्वेऽपि द्वादश, तेऽपि च जीवादिपदार्थसप्तकेन गुणिताश्चतुरशीतिरिति, तथाचोक्तम्—"कालयदृच्छानियतिस्वभावेश्वरात्मतश्चतुरशीतिः । नास्तिकवादिगणमते न सन्ति भावाः स्वपरसंस्थाः ॥ १ ॥" साम्प्रतमज्ञानिकानामज्ञानादेव विवक्षितकार्यसिद्धिमिच्छतां ज्ञानं तु सदपि निष्फलं बहुदोषदुष्टत्वेत्येवमभ्युपगमवतां सप्तषष्टिरनेनोपायेनावगन्तव्या—जीवाजीवादीन् नव पदार्थान् परिपाट्या व्यवस्थाप्य तदधोऽमी सप्त भङ्गकाः संस्थाप्याः—सत् असत् सदसत् अवक्तव्यं सदवक्तव्यं असदवक्तव्यं सदसदवक्तव्यमिति, अभिलापस्त्वयं—सन् जीवः को वेत्ति ? किं वा तेन ज्ञातेन ! १, असन् जीवः को वेत्ति ? किं वा तेन ज्ञातेन ? २, सदसन् जीवः को वेत्ति ? किं वा तेन ज्ञातेन ! ३, अवक्तव्यो जीवः को वेत्ति ? किं वा तेन ज्ञातेन ? ४, सदवक्तव्यो जीवः को वेत्ति ? किं वा तेन ज्ञातेन ? ५, असदवक्तव्यो जीवः को वेत्ति ? किं वा तेन ज्ञातेन ? ६, सदसदवक्तव्यो जीवः को वेत्ति ? किं वा तेन ज्ञातेन ? ७, एवमजीवादिष्वपि सप्त भङ्गकाः, सर्वेऽपि मिलितास्त्रिषष्टिः, तथाऽपरेऽमी चत्वारो भङ्गकाः, तद्यथा—सती भावोत्पत्तिः को वेत्ति ? किं वाऽनया ज्ञातया ? १, असती भावोत्पत्तिः को वेत्ति किं वाऽनया ज्ञातया ? २, सदसती भावोत्पत्तिः को वेत्ति किं वाऽनया ज्ञातया ? ३, अवक्तव्या भावोत्पत्तिः को वेत्ति किं वाऽनया ज्ञातया ? ४, सर्वेऽपि सप्तषष्टिरिति, उत्तरं भङ्गकत्रयमुत्पन्नभावावयवापेक्षमिह भावोत्पत्तौ न संभवतीति नोपन्यस्तम्, उक्तं च—"अज्ञानिकवादिमतं नव जीवादीन् सदादिसप्तविधान् । भावोत्पत्तिः सदसद्वैधाऽवाच्या च को वेत्ति ? ॥ १ ॥" इदानीं वैनयिकानां विनयादेव केवलात्परलोकमपीच्छतां द्वात्रिंशदनेन प्रक्रमेण योज्याः, तद्यथा—सुरनृपतियतिज्ञातिस्थविराधममातृपितृषु मनसा वाचा कायेन दानेन (च) चतुर्विधो विनयो विधेयः, सर्वेऽप्यष्टौ चतुष्का

मिलिता द्वात्रिंशदिति, उक्तं च—"वैनयिकमतं विनयश्चेतोवाक्कायदानतः कार्यः । सुरनृपतियतिज्ञातिस्थविराधममातृपितृषु सदा ॥ १ ॥" सर्वेऽप्येते क्रियाऽक्रियाऽज्ञानिवैनयिकवादिभेदा एकीकृतास्त्रीणि त्रिषष्ट्यधिकानि प्रावादुकमतशतानि भवन्ति । तदेवं वादिनां मतभेदसंख्यां प्रदर्श्याधुना तेषामध्ययनोपयोगित्वं दर्शयितुमाह—'तेषां' पूर्वोक्तवादिनां मतम्—अभिप्रायस्तेन यदनुमतं—पक्षीकृतं तेन पक्षीकृतेन पक्षीकृताश्रयणेन 'प्रज्ञापना' प्ररूपणा 'वर्णिता' प्रतिपादिता 'इह' अस्मिन्नध्ययने गणधरैः, किमर्थमिति दर्शयति—तेषां यः सद्भावः—परमार्थस्तस्य निश्चयो—निर्णयस्तदर्थं, तेनैव कारणेनेदमध्ययनं समवसरणाख्यमाहुर्गणधराः, तथाहि—वादिनां सम्यगवसरणं—मेलापकस्तन्मतनिश्चयार्थमस्मिन्नध्ययने क्रियत इत्यतः समवसरणाख्यमिदमध्ययनं कृतमिति ॥ इदानीमेतेषां सम्यग्मिथ्यात्ववादितां विभागेन यथा भवति तथा दर्शयितुमाह—सम्यग्—अविपरीता दृष्टिः—दर्शनं पदार्थपरिच्छित्तिर्यस्यासौ सम्यग्दृष्टिः, कोऽसावित्याह—क्रियाम्—अस्तीत्येवंभूतां वदितुं शीलमस्येति क्रियावादी, अत्र च क्रियावादीत्येतद् 'अस्तित्ति किरियवादी' त्यनेन प्राक् प्रसाधितं सदनूद्य[निरवधारणतया] सम्यग्दृष्टित्वं विधीयते, तस्यासिद्धत्वादिति, तथाहि—अस्ति लोकालोकविभागः अस्त्यात्मा अस्ति पुण्यपापविभागः अस्ति तत्फलं स्वर्गनरकावाप्तिलक्षणं अस्ति कालः कारणत्वेनाशेषस्य जगतः प्रभवस्थितिविनाशेषु साध्येषु तथा शीतोष्णवर्षवनस्पतिपुष्पफलादिषु चेति, तथा चोक्तम्—"कालः पचति भूतानी"—त्यादि, तथाऽस्ति स्वभावोऽपि कारणत्वेनाशेषस्य जगतः, स्वो भावः स्वभाव इतिकृत्वा, तेन हि जीवाजीवभव्यत्वाभव्यत्वमूर्तत्वामूर्तत्वानां स्वस्वरूपानुविधानात् तथा धर्माधर्माकाशकालादीनां च गतिस्थित्यवगाहपरत्वापरत्वादिस्वरूपापादनादिति, तथा चोक्तम्—"कः कण्टकाना" मित्यादि । तथा नियतिरपि कारणत्वेनाश्रीयते, तथा तथा पदार्थानां नियतेरेव नियतत्वात्, तथा

चोक्तम्—"प्राप्तव्यो नियतिबलाश्रयेण" त्यादि । तथा पुराकृतं, तच्च शुभाशुभमिष्टानिष्टफलं कारणं, तथा चोक्तम्—"यथा यथा पूर्वकृतस्य कर्मणः, फलं निधानस्थमिहोपतिष्ठते । तथा तथा पूर्वकृतानुसारिणी, प्रदीपहस्तेव मतिः प्रवर्तते ॥१॥" तथा "स्वकर्मणा युक्त एव, सर्वो ह्युत्पद्यते जनः । स तथाऽऽकृष्यते तेन, न यथा स्वयमिच्छति ॥ १ ॥" इत्यादि । तथा पुरुषकारोऽपि कारणं, यस्मान्न पुरुषकारमन्तरेण किञ्चित्सिध्यति, तथा चोक्तम्—"न दैवमिति संचिन्त्य, त्यजेदुद्यममात्मनः । अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति ! ॥ १ ॥" तथा—"उद्यमाच्चारु चित्राङ्गि!, नरो भद्राणि पश्यति । उद्यमात्कुमिकीटोऽपि, भिनत्ति महतो द्रुमान् ॥ २ ॥" तदेवं सर्वानपि कालादीन् कारणत्वेनाभ्युपगच्छन् तथाऽऽत्मपुण्यपापपरलोकादिकं चेच्छन् क्रियावादी सम्यग्दृष्टित्वेनाभ्युपगन्तव्यः । शेषकास्तु वादा अक्रियावादाज्ञानवादवैनयिकवादा मिथ्यावादा इत्येवं द्रष्टव्याः, तथाहि—अक्रियावाद्यत्यन्तनास्तिकोऽध्यक्षसिद्धं जीवाजीवादिपदार्थजातमपह्नुवन् मिथ्यादृष्टिरेव भवति, अज्ञानवादी तु सति मत्यादिके हेयोपादेयप्रदर्शके ज्ञानपञ्चकेऽज्ञानमेव श्रेय इत्येवं वदन् कथं नोन्मत्तः स्यात् ?, तथा विनयवाद्यपि विनयादेव केवलात् ज्ञानक्रियासाध्यां सिद्धिमिच्छन्नपकर्णयितव्यः, तदेवं विपरीतार्थाभिधायितयैते मिथ्यादृष्टयोऽवगन्तव्याः । ननु च क्रियावाद्यप्यशीत्युत्तरशतभेदोऽपि तत्र तत्र प्रदेशे कालादीनभ्युपगच्छन्नेव मिथ्यावादित्वेनोपन्यस्तः तत्कथमिह सम्यग्दृष्टित्वेनोच्यत इति, उच्यते, स तत्रास्त्येव जीव इत्येवं सावधारणतयाऽभ्युपगमं कुर्वन् काल एवैकः सर्वस्यास्य जगतः कारणं तथा स्वभाव एव नियतिरेव पूर्वकृतमेव पुरुषकार एवेत्येवमपरनिरपेक्षतयैकान्तेन कालादीनां कारणत्वेनाश्रयणान्मिथ्यात्वं, तथाहि—अस्त्येव जीव इत्येवमस्तिना सह जीवस्य सामानाधिकरण्यात् यद्यदस्ति तत्तज्जीव इति प्राप्तम्, अतो निरवधारणपक्षसमाश्रयणादिह सम्यक्त्वमभिहितं, तथा कालादीनामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुदितानां परस्परसव्यपेक्षाणां कारणत्वेनेहाश्रयणात्सम्यक्त्वमिति । ननु च कथं कालादीनां प्रत्येकं निरपेक्षाणां मिथ्यात्वस्वभावत्वे सति समुदितानां सम्यक्त्वसद्भावः ?, न हि यत्प्रत्येकं नास्ति तत्समुदायेऽपि भवितुमर्हति, सिकतातैलवत्, नैतदस्ति, प्रत्येकं पद्मरागादिमणिष्वविद्यमानापि रत्नावली समुदाये भवन्ती दृष्टा, न च दृष्टेऽनुपपन्नं नामेति यत्किञ्चिदेतत्, तथा चोक्तम्—"कालो सहाव णियई पुव्वकयं पुरिस कारणेगंता । मिच्छत्तं ते चेव उ समासओ होंति संमत्तं ॥ १ ॥ सव्वेवि य कालाई इह समुदायेण साहगा भणिया । जुज्जंति य एमेव य सम्मं सव्वस्स कज्जस्स ॥ २ ॥ न हि कालादीहिंतो केवलएहिं तु जायए किंचि । इह मुग्गरंधणादिवि ता सव्वे समुदिता हेऊ ॥ ३ ॥ जह णेगलक्खणगुणा वेरुलियादी मणी विसंजुत्ता । रयणावलिववएसं ण लहंति महग्घमुल्लावि ॥ ४ ॥ तह णिययवादसुविणिच्छियावि अण्णोऽण्णपक्खनिरवेक्खा । सम्मद्दंसणसद्दं सव्वेऽवि णया ण पावेंति ॥ ॥ ५ ॥ जह पुण ते चेव मणी जहा गुणविसेसभागपडिबद्धा । रयणावलित्ति भण्णइ चयंति पाडिक्कसण्णाओ ॥ ६ ॥ तह सव्वे णयवाया जहाणुरूववत्तव्वया । सम्मद्दंसणसद्दं लभंति ण विसेससण्णाओ ॥ ७ ॥ तम्हा मिच्छदिट्ठी सव्वेवि णया

१ कालः स्वभावो नियतिः पूर्वकृतं पुरुषकारः कारणं एकान्तात् मिथ्यात्वं समासतो भवंति सम्यक्त्वं ॥ १ ॥ २ सर्वेऽपि च कालादय इह समुदायेन साधका भणिताः । युज्यते च एवमेव सम्यक् सर्वस्य कार्यस्य ॥ १ ॥ नैव कालादिभिः केवलैस्तु जायते किंचित् । इह मुद्गरंधनाद्यपि तत्सर्वेऽपि समुदिता हेतवः ॥ २ ॥ यथानेकलक्षणगुणा वैडूर्यादयो मणयो विसंयुताः । रत्नावलीव्यपदेशं न लभन्ते महार्घमूल्या अपि ॥ ३ ॥ तथा निजकवादसुविनिश्चिता अपि अन्योऽन्यपक्षनिरपेक्षाः सम्यग्दर्शनशब्दं सर्वेऽपि नया न प्राप्नुवन्ति ॥ ४ ॥ यथा पुनस्ते चैव मणयो यथा गुणविशेषभागप्रतिबद्धाः । रत्नावलीति भण्यते त्यजन्ति प्रत्येकसंज्ञाः ॥ ५ ॥ तथा सर्वेऽपि नयवादा यथानुरूपविनियुक्तवक्तव्याः । सम्यग्दर्शनशब्दं लभन्ते न विशेषसंज्ञाः ॥ ६ ॥ तस्मान्मिथ्यादृष्टयः सर्वेऽपि नयाः स्वपक्षप्रतिबद्धाः । अन्योऽन्यनिश्रिताः पुनर्भवन्ति सम्यक्त्वं सद्भावात् ॥ ७ ॥

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥२११॥

सपक्खपडिबद्धा । अण्णोण्णनिस्सिया पुण हवंति सम्मत्त सब्भावा ॥ ८ ॥" यत एवं तस्मात्त्यक्त्वा मिथ्यात्ववादं—कालादिप्रत्येकैकान्तकारणरूपं 'सेवध्वम्' अङ्गीकुरुध्वं 'सम्यग्वादं' परस्परसव्यपेक्षकालादिकारणरूपम् 'इम' मिति मयोक्तं प्रत्यक्षासन्नं 'सत्यम्' अवितथमिति ॥ गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं. तच्चेदम्—

१२ समवसरणाध्य०

चत्तारि समोसरणाणिमाणि, पावादुया जाइं पुढो वयंति । किरियं अकिरियं विणियंति तइयं, अन्नाणमाहंसु चउत्थमेव ॥ १ ॥ अण्णाणिया ता कुसलावि संता, असंथुया णो वितिगिच्छतिन्ना । अकोविया आहु अकोवियेहिं, अणाणुवीइत्तु मुसं वयंति ॥ २ ॥ सच्चं असच्चं इति चिंतयंता, असाहु साहुत्ति उदाहरंता । जेमे जणा वेणइया अणेगे, पुट्ठावि भावं विणइंसु णाम ॥ ३ ॥ अणोवसंखा इति ते उदाहू, अट्ठे स ओभासइ अम्ह एवं। लवावसंकी य अणागएहिं, णो किरियमाहंसु अकिरियवादी ॥ ४ ॥

॥२११॥

अस्य च प्राक्तनाध्ययनेन सहायं संबन्धः, तद्यथा—साधुना प्रतिपक्षभावमार्गेण कुमार्गाश्रिताः परवादिनः सम्यक् परिज्ञाय परिहर्तव्याः, तत्स्वरूपाविष्करणं चानेनाध्ययनेनोपदिश्यते इति, अनन्तरसूत्रस्यानेन सूत्रेण सह संबन्धोऽयं, तद्यथा—संवृतो महाप्रज्ञो धीरो दत्तैषणां चरन्नभिनिर्वृतः सन् मृत्युकालमभिकाङ्क्षेद् एतत्केवलिनो भाषितं, तथा परतीर्थिकपरिहारं च कुर्यात् एतच्च केवलिनो मतम्, अतस्तत्परिहारार्थं तत्स्वरूपनिरूपणमनेन क्रियते । 'चत्वारी'ति संख्यापदमपरसंख्यानिवृत्त्यर्थं 'समवसरणानि' परतीर्थिकाभ्युपगमसमूहरूपाणि यानि प्रावादुकाः पृथक् पृथग्वदन्ति, तानि चामूनि अन्वर्थाभिधायिभिः संज्ञापदैर्निर्दिश्यन्ते, तद्यथा—क्रियाम्—अस्तीत्यादिकां वदितुं शीलं येषां ते क्रियावादिनः, तथाऽक्रियां—नास्तीत्यादिकां वदितुं शीलं येषां तेऽक्रियावादिनः, तथा तृतीया वैनयिकाश्चतुर्थास्त्वज्ञानिका इति ॥ १ ॥ तदेवं क्रियाऽक्रियावैनयिकाज्ञानवादिनः सामान्येन प्रदर्श्याधुना तद्दूषणार्थं तन्मतोपन्यासं पश्चानुपूर्व्यप्यस्तीत्यतः पश्चानुपूर्व्या कर्तुमाह, यदिवैतेषामज्ञानिका एव सर्वापलापितयाऽत्यन्तमसंबद्धा अतस्तानेवादावाह—अज्ञानं 'विद्यते येषामज्ञानेन वा चरन्तीत्यज्ञानिकाः आज्ञानिका वा तावत्प्रदर्श्यन्ते, ते चाज्ञानिकाः किल वयं कुशला इत्येवंवादिनोऽपि सन्तः 'असंस्तुता' अज्ञानमेव श्रेय इत्येवंवादितया असंबद्धाः, असंस्तुतत्वादेव विचिकित्सा—चित्तविप्लुतिश्चित्तभ्रान्तिः संजीतिर्ता न तीर्णा—नातिक्रान्ताः, तथाहि ते ऊचुः—य एते ज्ञानिनस्ते परस्परविरुद्धवादितया न यथार्थवादिनो भवन्ति, तथाहि—एके सर्वगतमात्मानं वदन्ति तथाऽन्ये असर्वगतं अपरे अंगुष्ठपर्वमात्रं केचन श्यामाकतन्दुलमात्रमन्ये मूर्तममूर्तं हृदयमध्यवर्तिनं ललाटव्यवस्थितमित्याद्यात्मपदार्थ एव सर्वपदार्थपुरःसरे तेषां नैकवाक्यता, न चातिशयज्ञानी कश्चिदस्ति यद्वाक्यं प्रमाणीक्रियेत, न चासौ विद्यमानोऽप्युपलक्ष्यतेऽर्वाग्दर्शिना, 'नासर्वज्ञः सर्वं जानाती'ति वचनात्, तथा चोक्तम्—"सर्वज्ञोऽसाविति ह्येतत्तत्कालेऽपि बुभुत्सुभिः ।

१ धीरो प्र० । २ दूषणार्थं प्र० । ३ व्याख्यास्यामिति शेषः । ४ असंबद्धभाषिणः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तज्ज्ञातृज्ञेयविज्ञानशून्यैर्विज्ञायते कथम् ? ॥१॥" न च तस्य सम्यक् तदुपायपरिज्ञानाभावात्संभवः, संभवाभावश्चेतरेतराश्रयत्वात्, तथाहि—न विशिष्टपरिज्ञानमृते तदवाप्त्युपायपरिज्ञानमुपायमन्तरेण च नोपेयस्य विशिष्टपरिज्ञानस्यावाप्तिरिति, न च ज्ञानं ज्ञेयस्य स्वरूपं परिच्छेत्तुमलं, तथाहि—यत्किमप्युपलभ्यते तत्सर्वाग्रमध्यपरभागैर्भाव्यं, तत्रार्वाग्भागस्यैवोपलब्धिर्नेतरयोः, तेनैव व्यवहितत्वात्, अर्वाग्भागस्यापि भागत्रयकल्पनात्तत्सर्वारातीयभागपरिकल्पनया परमाणुपर्यवसानता, परमाणोश्च स्वभावविप्रकृष्टत्वादर्वाग्दर्शिनां नोपलब्धिरिति, तदेवं सर्वज्ञस्याभावादसर्वज्ञस्य च यथावस्थितवस्तुस्वरूपापरिच्छेदात्सर्ववादिनां च परस्परविरोधेन पदार्थस्वरूपाभ्युपगमात् यथोत्तरपरिज्ञानिनां प्रमादवतां बहुतरदोषसंभवाद्ज्ञानमेव श्रेयः, तथाहि—यद्यज्ञानवान् कथञ्चित्पादेन शिरसि हन्यात् तथापि चित्तशुद्धेर्न तथाविधदोषानुषङ्गी स्यादित्येवमज्ञानिन एवंवादिनः सन्तोऽसंबद्धाः, न चैवंविधा चित्तविप्लुतिं विदधीरन् इति । तत्रैवंवादिनस्ते अज्ञानिका 'अकोविदा' अनिपुणाः सम्यक्परिज्ञानविकला इत्यवगन्तव्याः, तथाहि—यत्तैरभिहितं 'ज्ञानवादिनः परस्परविरुद्धार्थवादितया न यथार्थवादिन' इति, तद्बलसर्वज्ञप्रणीतागमाभ्युपगमवादिनामयथार्थवादित्वं, न चाभ्युपगमवादा एव बाधायै प्रकल्प्यन्ते, सर्वज्ञप्रणीतागमाभ्युपगमवादिनां तु न क्वचित्परस्परतो विरोधः, सर्वज्ञस्यान्यथानुपपत्तेरिति, तथाहि—प्रक्षीणाशेषावरणतया रागद्वेषमोहानामनृतकारणानामभावाच्च तद्वाक्यमयथार्थमित्येवं तत्प्रणीतागमवतां न विरोधवादित्वमिति । ननु च स्यादेतद् यदि सर्वज्ञः कश्चित्स्यात्, न चासौ संभवतीत्युक्तं प्राक्, सत्यप्युक्तमयुक्तं तूक्तं, तथाहि—यत्तावदुक्तं 'न चासौ विद्यमानोऽप्युपलक्ष्यतेऽर्वाग्दर्शिनेति' तदयुक्तं, यतो यद्यपि परचेतोवृत्तीनां दुरन्वयत्वात्सरागा वीतरागा इव चेष्टन्ते वीतरागाः सरागा इवेत्यतः प्रत्यक्षेणानुपलब्धिः, तथापि संभवानुमानस्य सद्भावात्तद्बाधकप्रमाणाभावाच्च तदस्तित्वम-

निवार्यं, संभवानुमानं त्विदं—व्याकरणादिनां शास्त्राभ्यासेन संस्क्रियमाणायाः प्रज्ञाया ज्ञानातिशयो ज्ञेयावगमं प्रत्युपलब्धः, तदत्र कश्चित्तथाभूताभ्यासवशात्सर्वज्ञोऽपि स्यादिति, न च तदभावसाधकं प्रमाणमस्ति, तथाहि—न तावदर्वाग्दर्शिप्रत्यक्षेण सर्वज्ञाभावः साधयितुं शक्यः, तस्य हि तज्ज्ञानज्ञेयविज्ञानशून्यत्वाद्, अशून्यत्वाभ्युपगमे च सर्वज्ञत्वापत्तिरिति । नाप्यनुमानेन, तदव्यभिचारिलिङ्गाभावादिति । नाप्युपमानेन सर्वज्ञाभावः साध्यते, तस्य सादृश्यबलेन प्रवृत्तेः, न च सर्वज्ञाभावे साध्ये तादृग्विधं सादृश्यमस्ति येनासौ सिध्यतीति । नाप्यर्थापत्त्या, तस्याः प्रत्यक्षादिप्रमाणपूर्वकत्वेन प्रवृत्तेः, प्रत्यक्षादीनां च तत्साधकत्वेनाप्रवर्तनात् तस्या अप्यप्रवृत्तिः । नाप्यागमेन, तस्य सर्वज्ञसाधकत्वेनापि दर्शनात्, नापि प्रमाणपञ्चकाभावरूपेणाभावेन सर्वज्ञाभावः सिध्यति, तथाहि—सर्वत्र सर्वदा न संभवति तद्ग्राहकं प्रमाणमित्येतदर्वाग्दर्शिनो वक्तुं न युज्यते, तेन हि देशकालविप्रकृष्टानां पुरुषाणां यद्विज्ञानं तस्य ग्रहीतुमशक्यत्वात्, तद्ग्रहणे वा तस्यैव सर्वज्ञत्वापत्तेः, न चार्वाग्दर्शिनां ज्ञानं निवर्तमानं सर्वज्ञाभावं साधयति, तस्याव्यापकत्वात्, न चाव्यापकव्यावृत्त्या पदार्थव्यावृत्तिर्युक्तेति, न च वस्त्वन्तरविज्ञानरूपोऽभावः सर्वज्ञाभावसाधनायालं, वस्त्वन्तरसर्वज्ञयोरेकज्ञानसंसर्गप्रतिबन्धाभावात् । तदेवं बाधकप्रमाणाभावात्संभवानुमानस्य च प्रतिपादितत्वादस्ति सर्वज्ञः, तत्प्रणीतागमाभ्युपगमाच्च मतभेददोषो दूरापास्त इति, तथाहि—तत्प्रणीतागमाभ्युपगमवादिनामेकवाक्यतया शरीरमात्रव्यापी संसार्यात्माऽस्ति, तत्रैव तद्गुणोपलब्धेरिति, इतरेतराश्रयदोषश्चात्र नावतरत्येव, यतोऽभ्यस्यमानायाः प्रज्ञाया ज्ञानातिशयः

१ शास्त्राभ्यासे करणत्वात्तृतीया यद्वाऽभ्यासाभ्यस्ययोरैक्यं । २ बुद्धितारतम्योपलब्धेर्विश्रान्तिसिद्धिः । ३ भावयति प्र० । ४ घटज्ञाने हि पटाभावप्रतीतिर्यथा । ५ विप्रकृतानियमाभावात् ।

स्यात्मन्यपि दृष्टा, न च दृष्टेऽनुपपन्नं नामेति । यदप्यभिहितं तद्यथा 'न च ज्ञानं ज्ञेयस्य स्वरूपं परिच्छेत्तुमलं, सर्वत्रार्वाग्भागेन व्यवधानात्, सर्वारातीयभागस्य च परमाणुरूपतयाऽतीन्द्रियत्वा'दिति, एतदपि वाङ्मात्रमेव, यतः सर्वज्ञज्ञानस्य देशकालस्वभावव्यवहितानामपि ग्रहणान्नास्ति व्यवधानसंभवः, अर्वाग्दर्शिज्ञानंस्याप्यवयवद्वारेणावयविनि प्रवृत्तेर्नास्ति व्यवधानं, न ह्यवयवी स्वावयवैर्व्यवधीयत इति युक्तिसंगतम्, अपिच—अज्ञानमेव श्रेय इत्यत्राज्ञानमिति किमयं पर्युदास आहोस्वित्प्रसज्यप्रतिषेधः ?, तत्र यदि ज्ञानादन्यदज्ञानमिति ततः पर्युदासवृत्त्या ज्ञानान्तरमेव समाश्रितं स्यात् नाज्ञानवाद इति, अथ ज्ञानं न भवतीत्यज्ञानं तुच्छो नीरूपो ज्ञानाभावः स च सर्वसामर्थ्यरहित इति कथं श्रेयानिति ? । अपिच—अज्ञानं श्रेय इति प्रसज्यप्रतिषेधेन ज्ञानं श्रेयो न भवतीति क्रियाप्रतिषेध एव कृतः स्याद्, एतच्चाध्यक्षबाधितं, यतः सम्यग्ज्ञानादर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियार्थी न विसंवाद्यत इति । किंच—अज्ञानप्रमादवज्ज्रिःपादेन शिरःस्पर्शनेऽपि स्वल्पदोषतां परिज्ञायैवाज्ञानं श्रेय इत्यभ्युपगम्यते, एवं च सति प्रत्यक्ष एव स्यादभ्युपगमविरोधो, नानुमानं प्रमाणमिति । तथा तदेवं सर्वथा ते अज्ञानवादिनः 'अकोविदा' धर्मोपदेशं प्रत्यनिपुणाः सन्तोऽकोविदेभ्य एव स्वशिष्येभ्य 'आहुः' कथितवन्तः, छान्दसत्वाच्चैकवचनं सूत्रे कृतमिति । शाक्या अपि प्रायशोऽज्ञानिकाः, अविज्ञोपचितं कर्म बन्धं न यातीत्येवं यतस्तेऽभ्युपगमयन्ति, तथा ये च बालमत्तसुप्तादयोऽस्पष्टविज्ञाना अबन्धका इत्येवमभ्युपगमं कुर्वन्ति, ते सर्वेऽप्यकोविदा द्रष्टव्या इति । तथाऽज्ञानपक्षसमाश्रयणाच्चानुविचिन्त्य भाषणान्मृषा ते सदा वद-

• विवक्षितं निषेध्यं ज्ञानमत्र, तथा चान्यस्यापि ज्ञानत्वे न क्षतिः । २ किरियं अकिरियमित्यायगाथायामेकवचनस्य समाधानमिदमाभाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्ति । अनुविचिन्त्य भाषणं यतो ज्ञाने सति भवति, तत्पूर्वकत्वाच्च सत्यवादस्य, अतो ज्ञानानभ्युपगमादनुविचिन्त्य भाषणाभावः, तदभावाच्च तेषां मृषावादित्वमिति ॥ २ ॥ साम्प्रतं वैनयिकवादं निराचिकीर्षुः प्रक्रमते—सद्भो हितं 'सत्यं' परमार्थो यथावस्थितपदार्थनिरूपणं वा मोक्षो वा तदुपायभूतो वा संयमः सत्यं तदसत्यम् 'इति' एवं 'विचिन्तयन्तो' मन्यमानाः, एवमसत्यमपि सत्यमिति मन्यमानाः, तथाहि—सम्यग्दर्शनज्ञानचारित्राख्यो मोक्षमार्गः सत्यस्तमसत्यत्वेन चिन्तयन्तो विनयादेव मोक्ष इत्येतदसत्यमपि सत्यत्वेन मन्यमानाः, तथा असाधुमप्यविशिष्टकर्मकारिणं वन्दनादिकया विनयप्रतिपत्त्या साधुम् 'इति' एवम् 'उदाहरन्तः' प्रतिपादयन्तो न सम्यग्यथावस्थितधर्मस्य परीक्षकाः, युक्तिविकलं विनयादेव धर्म इत्येवमभ्युपगमात्, क एते इत्येतदाह—ये 'इमे' बुद्ध्या प्रत्यक्षासन्नीकृता 'जना इव' प्राकृतपुरुषा इव जना विनयेन चरन्ति वैनयिका—विनयादेव केवलात्स्वर्गमोक्षावाप्तिरित्येवंवादिनः 'अनेके' बहवो द्वात्रिंशद्भेदभिन्नत्वात्तेषां, ते च विनयैचारिणः केनचिद्धर्मार्थिना पृष्टाः सन्तोऽपिशब्दादपृष्टा वा 'भावं' परमार्थं यथार्थोपलब्धं स्वाभिप्रायं वा विनयादेव स्वर्गमोक्षावाप्तिरित्येवं 'व्यनैषुः' विनीतवन्तः—सर्वदा सर्वस्य सर्वसिद्धये विनयं ग्राहितवन्तः, नामशब्दः संभावनायां, संभाव्यत एव विनयात्सत्कार्यसिद्धिरिति, तदुक्तम्—"तस्मात्कल्याणानां सर्वेषां भाजनं विनय" इति ॥ ३ ॥ किंचान्यत्—संख्यानं संख्या—परिच्छेदः उप—सामीप्येन संख्या उपसंख्या—सम्यग्यथावस्थितार्थपरिज्ञानं नोपसंख्याऽनुपसंख्या तयाऽनुपसंख्यया—अपरिज्ञानेन व्यामूढमतयस्ते वैनयिकाः स्वाग्रह ग्रस्ता इति एतद्—यथा विनयादेव केवलात्स्वर्गमोक्षावाप्तिरित्युदाहृतवन्तः, एतच्च ते महामोहाच्छा-

१ समुच्चयार्थेलात्तच्छब्देनानुविचिन्त्य भाषणपरामर्शः । २ ०कारिणः । ३ ०लम्भं प्र० ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२१४॥

दिता 'उदाहृतः' उदाहृतवन्तः—यथैवं सर्वस्य विनयप्रतिपत्त्या स्वोऽर्थः—स्वर्गमोक्षादिकः अस्माकम् 'अवभासते' आविर्भवति प्राप्यते इतियावत्, अनुपसंख्योदाहृतिश्च तेषामेवमवगन्तव्या, तद्यथा—ज्ञानक्रियाभ्यां मोक्षसद्भावे सति तदपास्य विनयादेवैकस्मात्तदवाप्यभ्युपगमादिति, यदप्युक्तं 'सर्वकल्याणभाजनं' तदपि सम्यग्दर्शनादिसंभवे सति विनयस्य कल्याणभाक्त्वं भवति नैककस्येति, तद्रहितो हि विनयोपेतः सर्वस्य प्रहतया न्यत्कारमेवापादयति, ततश्च विवक्षितार्थावभासनाभावात्तेषामेवंवादिनामज्ञानावृतत्वमेवावशिष्यते, नाभिप्रेतार्थावाप्तिरित्युक्ता वैनयिकाः ॥ साम्प्रतमक्रियावादिदर्शनं निराचिकीर्षुः पञ्चार्धमाह—लवं—कर्म तस्मादपशङ्कितुम्—अपसर्तुं शीलं येषां ते लवापशङ्किनो—लोकायतिकाः शाक्यादयश्च, तेषामात्मैव नास्ति कुतस्तत्क्रिया तज्जनितो वा कर्मबन्ध इति, उपचारमात्रेण त्वस्ति बन्धः, तद्यथा—'बद्धा मुक्ताश्च कथ्यन्ते, मुष्टिग्रन्थिकपोतकाः । न चान्ये द्रव्यतः सन्ति, मुष्टिग्रन्थिकपोतकाः ॥ १ ॥' तथाहि—बौद्धानामयमभ्युपगमो, यथा—'क्षणिकाः सर्वसंस्कारा' इति 'अस्तितानां [च] कृतः क्रिये' त्यक्रियावादित्वं, योऽपि स्कन्धपञ्चकाभ्युपगमस्तेषां सोऽपि संवृतिमात्रेण न परमार्थेन, यतस्तेषामयमभ्युपगमः, तद्यथा—विचार्यमाणाः पदार्था न कथञ्चिदप्यात्मानं विज्ञानेन समर्पयितुमलं, तथाहि—अवयवी तेभ्यो ऽन्यो ऽभ्यो वा विचार्यमाणो न घटां प्राञ्चति, नाप्यवयवाः परमाणुपर्यवसानतयाऽतिसूक्ष्मत्वाज्ज्ञानगोचरतां प्रतिपद्यन्ते, विज्ञानमपि ज्ञेयाभावेनामूर्तत्वेन निराकारतया न स्वरूपं बिभर्त्ति, तथा चोक्तम्—"यथा यथाऽर्थाश्चिन्त्यन्ते, विविच्यन्ते तथा तथा । यद्येतत्स्वयमर्थेभ्यो, रोचते तत्र के वयम् ? ॥१॥" इति, प्रच्छन्नलोकायतिका हि बौद्धाः, तत्रानागतैः क्षणैः चशब्दादतीतैश्च वर्तमानक्षणस्यासंगतेर्न क्रिया, नापि च

१२ समवसरणाध्य० ॥२१४॥

१ लवावशङ्किनः । अग्रेऽपि अत्र गाथायां । २ तत्त्वाऽतत्त्वाभ्यां प्र० । ३ अवयवेभ्योऽभिन्नश्चेतराभ्यां ।

तज्जनितः कर्मबन्ध इति । तदेवमक्रियावादिनो नास्तिकवादिनः सर्वापलापितया लवापशङ्किनः सन्तो न क्रियामाहुः, तथा अक्रिय आत्मा येषां सर्वव्यापितया तेऽप्यक्रियावादिनः सांख्याः, तदेवं ते लोकायतिकबौद्धसांख्या अनुपसंख्यया—अपरिज्ञानेनेति—एतत् पूर्वोक्तमुदाहृतवन्तः, तथैतत्त्वज्ञानेनैवोदाहृतवन्तः, तद्यथा—अस्माकमेवमभ्युपगमेऽर्थोऽवभासते—युज्यमानको भवतीति, तदेवं श्लोकपूर्वार्द्धं काकाक्षिगोलकन्यायेनाक्रियावादिमतेऽप्यायोज्यमिति ॥ ४ ॥ साम्प्रतमक्रियावादिनामज्ञानविजृम्भितं दर्शयितुमाह—

सम्मिस्सभावं च गिरा गहीए, से मुम्मुई होइ अणाणुवाई । इमं दुपक्खं इममेगपक्खं, आहंसु छलायतणं च कम्मं ॥ ५ ॥ ते एवमक्खंति अबुज्झमाणा, विरूवरूवाणि अकिरियवाई । जे मायइत्ता बहवे मणूसा, भमंति संसारमणोवदग्गं ॥ ६ ॥ णाइच्चो उएइ ण अत्थमेति, ण चंदिमा वड्ढति हायती वा । सलिला ण संदंति ण वंति वाया, वंझो णियतो कसिणे हु लोए ॥ ७ ॥ जहाहि अंधे सह जोतिणावि, रूवाइ णो पस्सति हीणणेत्ते । संतंपि ते एवमकिरियवाई, किरियं ण पस्संति निरुद्धपन्ना ॥ ८ ॥

स्वकीयया गिरा—वाचा स्वाभ्युपगमेनैव 'गृहीते' तस्मिन्नर्थे नान्तरीयकतया वा समागते सति तस्याऽऽयातस्यार्थस्य गिरा प्र-

१ लोकायतिका बौद्धाः सांख्याः प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२१५॥

तिषेधं कुर्वाणाः 'सम्मिश्रीभावम्' अस्तित्वनास्तित्वाभ्युपगमं ते लोकायतिकादयः कुर्वन्ति, वाशब्दात्प्रतिषेधे प्रतिपाद्येऽस्तित्वमेव प्रतिपादयन्ति, तथाहि—लोकायतिकास्तावत्स्वशिष्येभ्यो जीवाद्यभावप्रतिपादकं शास्त्रं प्रतिपादयन्तो नान्तरीयकतयाऽऽत्मानं कर्तारं करणं च शास्त्रं कर्मतापन्नांश्च शिष्यानवश्यमभ्युपगच्छेयुः, सर्वशून्यत्वे त्वस्य त्रितयस्याभावान्मिश्रीभावो व्यत्ययो वा। बौद्धा अपि मिश्रीभावमेवाभ्युपगताः, तद्यथा—"गन्ता च नास्ति कश्चिद्गतयः षड् बौद्धशासने प्रोक्ताः। गम्यत इति च गतिः स्याच्छ्रुतिः कथं शोभना बौद्धी ? ॥ १ ॥" तथा—'कर्म [च] नास्ति फलं चास्ती' त्यसति चात्मनि कारके कथं पञ्चगतयः ?, ज्ञानसन्तानस्यापि संतानिव्यतिरेकेण संवृतिमत्त्वात् क्षणस्य चास्थितत्वेन क्रियाऽभावान्न नानागतिसंभवः, सर्वाण्यपि कर्माण्यबन्धनानि प्ररूपयन्ति स्वागमे, तथा पञ्च जातकशतानि च बुद्धस्योपदिशन्ति, तथा—'मातापितरौ हत्वा बुद्धशरीरे च रुधिरमुत्पाद्य। अर्हद्वधं च कृत्वा स्तूपं भित्त्वा च पञ्चैते ॥ १ ॥ आवीचिनरकं यान्ति।' एवमादिकस्यागमस्य सर्वशून्यत्वे प्रणयनमयुक्तिसंगतं स्यात्, तथा जातिजरामरणरोगशोकोत्तममध्यमाधमत्वानि च न स्युः, एष एव च नानाविधकर्मविपाको जीवास्तित्वं कर्तृत्वं कर्मवत्त्वं चावेदयति, तथा 'गान्धर्वनगरतुल्या मायास्वप्नोपपातघनसदृशाः। मृगतृष्णानीहाराम्बुचन्द्रिकालातचक्रसमाः ॥ १ ॥' इति भाषणाच्च स्पष्टमेव मिश्रीभावोपगमनं बौद्धानामिति। यदिवा—नानाविधकर्मविपाकाभ्युपगमात्तेषां व्यत्यय एवेति, तथा चोक्तम्—"यदि शून्यस्तव पक्षो मत्पक्षनिवारकः कथं भवति ?। अथ मन्यसे न शून्यस्तथापि मत्पक्ष एवासौ ॥ १ ॥" इत्यादि, तदेवं बौद्धाः पूर्वोक्तया नीत्या मिश्रीभावमुपगता नास्तित्वं प्रतिपादयन्तोऽस्तित्वमेव प्रतिपादयन्ति ॥ तथा सांख्या अपि सर्वव्यापितया अक्रियमात्मानमभ्युपगम्य प्रकृतिवियोगान्मोक्षसद्भावं प्रतिपादयन्तस्तेऽप्यात्मनो बन्धं मोक्षं च स्ववाचा प्रतिपादयन्ति, ततश्च बन्धमोक्षसद्भावे सति स्वकीयया गिरा सक्रियत्वे गृहीते सत्यात्मनः सम्मिश्रीभावं व्रजन्ति, यतो न क्रियामन्तरेण बन्धमोक्षौ घटेते, वाशब्दादक्रियत्वे प्रतिपाद्ये व्यत्यय एव—सक्रियत्वं तेषां स्ववाचा प्रतिपद्यते। तदेवं लोकायतिकाः सर्वाभावाभ्युपगमेन क्रियाऽभावं प्रतिपादयन्ति बौद्धाश्च क्षणिकत्वात्सर्वशून्यत्वाच्चाक्रियामेवाभ्युपगमयन्तः स्वकीयागमप्रणयनेन चोदिताः सन्तः सम्मिश्रीभावं स्ववाचैव प्रतिपद्यन्ते, तथा सांख्याश्चाक्रियमात्मानमभ्युपगच्छन्तो बन्धमोक्षसद्भावं च स्वाभ्युपगमेनैव सम्मिश्रीभावं व्रजन्ति व्यत्ययं च एतत्प्रतिपादितं। यदिवा बौद्धादिः कश्चित्स्याद्वादिना सम्यग्हेतुदृष्टान्तैर्व्याकुलीक्रियमाणः सन् सम्यगुत्तरं दातुमसमर्थो यत्किञ्चनभाषितया 'सुम्मुई होइ'त्ति शब्दबभाषित्वेनाव्यक्तभाषी भवति, यदिवा प्राकृतशैल्या छान्दसत्वाच्चायमर्थो द्रष्टव्यः, तद्यथा—मूकादपि मूको मूकमूको भवति, एतदेव दर्शयति—स्याद्वादिनोक्तं साधनमनुवदितुं शीलमस्येत्यनुवादी तत्प्रतिषेधादननुवादी, सद्धेतुभिर्व्याकुलितमना मौनमेव प्रतिपद्यत इति भावः, अननुभाष्य च प्रतिपक्षसाधनं तथाऽदूषयित्वा च स्वपक्षं प्रतिपादयन्ति, तद्यथा—'इदम्' अस्मदभ्युपगतं दर्शनमेकः पक्षोऽस्येति एकपक्षमप्रतिपक्षतयैकान्तिकमविरुद्धार्थाभिधायितया निष्प्रतिबाधं पूर्वापराविरुद्धमित्यर्थः, इदं चैवंभूतमपि सदि(त्कमि)त्याह—द्वौ पक्षावस्येति द्विपक्षं—सप्रतिपक्षमनैकान्तिकं पूर्वापरविरुद्धार्थाभिधायितया विरोधिवचनमित्यर्थः, यथा च विरोधिवचनत्वं तेषां तथा प्राग्दर्शितमेव, यदिवेदमस्मदीयं दर्शनं द्वौ पक्षावस्येति द्विपक्षं—कर्मबन्धनिर्जरणं प्रति पक्षद्वयसमाश्रयणात्, तत्समाश्रयणं चेहामुत्र च वेदनां चौरपारदारिकादीनामिव, ते हि करचरणनासिकादिच्छेदादिकामिहैव पुष्पकल्पां स्वकर्मणो विडम्बनामनुभवन्ति अमुत्र च नरकादौ तत्फलभूतां वेदनां समनुभवन्तीति, एवमन्यदपि कर्मोभयवेद्यमभ्युपगम्यते, तच्चेदं 'प्राणी प्राणिज्ञान' मित्यादि पूर्ववत्, तथेदमेकः पक्षोऽस्येत्येक-

१२ समवसरणाध्य०

॥२१५॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२१६॥

पक्षं इहैव जन्मनि तस्य वेद्यत्वात्, तच्चेदम्—अविज्ञोपचितं परिज्ञोपचितमीर्यापथं स्वप्नान्तिकं चेति। तदेवं स्याद्वादिनाऽभियुक्ताः स्वदर्शनमेवमनन्तरोक्तया नीत्या प्रतिपादयन्ति, तथा स्याद्वादिसाधनोक्तौ छलायतनं—छलं नवकम्बलो देवदत्त इत्यादिकं 'आहुः' उक्तवन्तः, चशब्दादन्यच्च दूषणाभासादिकं, तथा कर्म च एकपक्षद्विपक्षादिकं प्रतिपादितवन्त इति, यदिवा षडायतनानि—उपादानकारणानि आश्रवद्वाराणि श्रोत्रेन्द्रियादीनि यस्य कर्मणस्तत्षडायतनं कर्मेत्येवमाहुरिति ॥ ५ ॥ साम्प्रतमेतद्दूषणायाह—'ते' चार्वाकबौद्धादयोऽक्रियावादिन एवमाचक्षते, सद्भावमबुध्यमाना मिथ्यामलपटलावृतात्मानः परमात्मानं च व्युद्ग्राहयन्तो 'विरूपरूपाणि' नानाप्रकाराणि शास्त्राणि प्ररूपयन्ति, तद्यथा—'दानेन महाभोगाश्च देहिनां सुरगतिश्च शीलेन। भावनया च विमुक्तिस्तपसा सर्वाणि सिध्यन्ति ॥ १ ॥' तथा पृथिव्यापस्तेजो वायुरित्येतान्येव चत्वारि भूतानि विद्यन्ते, नापरः कश्चित्सुखदुःखभागात्मा विद्यते, यदिवैतान्यप्यविचारितरमणीयानि न परमार्थतः सन्तीति, स्वप्नेन्द्रजालमरुमरीचिकानिचयद्विचन्द्रादिप्रतिभासरूपत्वात्सर्वमेति। तथा 'सर्वं क्षणिकं निरात्मकं' 'मुक्तिस्तु शून्यतादृष्टेस्तदर्थाः शेषभावना' इत्यादीनि नानाविधानि शास्त्राणि व्युद्ग्राहयन्त्यक्रियात्मानोऽक्रियावादिन इति। ते च परमार्थमबुध्यमाना यद्दर्शनम् 'आदाय' गृहीत्वा बहवो मनुष्याः संसारम् 'अनवदग्रम्' अपर्यवसानमरहट्टघटीन्यायेन 'भ्रमन्ति' पर्यटन्ति, तथाहि—लोकायतिकानां सर्वशून्यत्वे प्रतिपाद्यं न प्रमाणमस्ति, तथा चोक्तम्—"तत्त्वान्युपप्लुतानीति, युक्त्यभावे न सिध्यति। सोऽस्ति चेत्सैव नस्तत्त्वं, तत्सिद्धौ सर्वमस्तु सत् ॥ १ ॥" न च प्रत्यक्षमेवैकं प्रमाणम्, अतीतानागतभावतया पितृनिबन्धनस्यापि व्यवहारस्यासिद्धेः, ततः सर्वसंव्यवहारो-

१२ समवसरणाध्य०

॥२१६॥

१ नास्ति प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छेदः स्यादिति । बौद्धानामप्यत्यन्तक्षणिकत्वेन वस्तुत्वाभावः प्रसजति, तथाहि—यदेवार्थक्रियाकारि तदेव परमार्थतः सत्, न च क्षणः क्रमेणार्थक्रियां करोति, क्षणिकत्वहानेः, नापि यौगपद्येन, [तत्कार्याणां] एकस्मिन्नेव क्षणे सर्वकार्योपत्तेः, न चैतदृष्टमिष्टं वा, नच ज्ञानाधारमात्मानं गुणिनमन्तरेण गुणभूतस्य संकलनाप्रत्ययस्य सद्भाव इत्येतच्च प्रागुक्तप्रायं, यच्चोक्तं—'दानेन महाभोगा' इत्यादि तदार्हतैरपि कथञ्चिदिष्यत एवेति, न चाभ्युपगमा एव बाधायै प्रकल्प्यन्त इति ॥ ६ ॥ पुनरपि शून्यमताविर्भावनायाह—सर्वशून्यवादिनो ह्यक्रियावादिनः सर्वाध्यक्षादित्योद्गमनादिकामेव क्रियां तावन्निरुन्धन्तीति दर्शयति—आदित्यो हि सर्वजनप्रतीतो जगत्प्रदीपकल्पो दिवसादिकालविभागकारी स एव तावन्न विद्यते, कुतस्तस्योद्गमनमस्तमयनं वा ?, यच्च जाज्वल्यमानं तेजोमण्डलं दृश्यते तद् भ्रान्तमतीनां द्विचन्द्रादिप्रतिभासमृगतृष्णिकाकल्पं वर्तते । तथा न चन्द्रमा वर्धते शुक्लपक्षे, नाप्यपरपक्षे प्रतिदिनमपहीयते, तथा 'न सलिलानि' उदकानि 'स्यन्दन्ते' पर्वतनिर्झरेभ्यो न स्रवन्ति । तथा वाताः सततगतयो न वान्ति । किं बहुनोक्तेन ?, कृत्स्नोऽप्ययं लोको 'वन्ध्यः' अर्थशून्यो 'नियतो' निश्चितः अभावरूप इतियावत्, सर्वमिदं यदुपलभ्यते तन्मायास्वप्नेन्द्रजालकल्पमिति ॥ ७ ॥ एतत्परिहर्तुकाम आह—यथा ह्यन्धो—जात्यन्धः पश्चाद्वा 'हीननेत्रः' अपगतचक्षुः 'रूपाणि' घटपटादीनि 'ज्योतिषापि' प्रदीपादिनापि सह वर्तमानो 'न पश्यति' नोपलभते, एवं तेऽप्यक्रियावादिनः सदपि घटपटादिकं वस्तु तत्क्रियां चास्तित्वादिकां परिस्पन्दादिकां वा [क्रियां] न पश्यन्ति । किमिति ?, यतो निरुद्धा—आच्छादिता ज्ञानावरणादिना कर्मणा प्रज्ञा—ज्ञानं येषां ते तथा, तथाहि—आगोपालाङ्गनादिप्रतीतः समस्तान्धकारक्षयकारी कमलाकरोद्घाटनपटीयानादित्योद्गमः प्रत्यहं भवद्भुपलक्ष्यते, तत्क्रिया च देशादेशान्तरावाप्त्याऽन्यत्र देवदत्तादौ प्रतीताऽनुमीयते । चन्द्रमाश्च प्रत्यहं क्षीयमाणः समस्तक्षयं यावत्पुनः कलाभिर्वृद्ध्या प्रवर्धमानः संपूर्णावस्था(स्थां)यां यावदध्यक्षेणैवोपलक्ष्यते । तथा सरितश्च प्रावृषि जलकल्लोलाविलाः स्यन्दमाना दृश्यन्ते । वायवश्च वान्तो वृक्षभङ्गकम्पादिभिरनुमीयन्ते । यच्चोक्तं भवता—सर्वमिदं मायास्वप्नेन्द्रजालकल्पमिति, तदसत्, यतः सर्वाभावे कस्यचिदमायारूपस्य सत्यस्याभावान्मायाया एवाभावः स्यात्, यश्च मायां प्रतिपादयेत् यस्य च प्रतिपाद्यते सर्वशून्यत्वे तयोरेवाभावात्कुतस्तद्व्यवस्थितिरिति ?, तथा स्वप्नोऽपि जाग्रदवस्थायां सत्यां व्यवस्थाप्यते तस्या अभावे तस्याप्यभावः स्यात्ततः स्वप्नमभ्युपगच्छता भवता तन्नान्तरीयकतया जाग्रदवस्थाऽवश्यमभ्युपगता भवति, तदभ्युपगमे च सर्वशून्यत्वहानिः, न च स्वप्नोऽप्यभावरूप एव, स्वप्नेऽप्यनुभूतादेः सद्भावात्, तथा चोक्तम्—"[1]अणुहूयदिट्ठचिंतिय सुयपयइवियारदेवयाऽणूया । सुमिणस्स निमित्ताइं पुण्णं पावं च णाभावो ॥ १ ॥" इन्द्रजालव्यवस्थाऽप्यपरसत्यत्वे सति भवति, तदभावे तु केन कस्य चेन्द्रजालं व्यवस्थाप्येत ?, द्विचन्द्रप्रतिभासोऽपि रात्रौ सत्यामेकस्मिंश्च चन्द्रमस्युपलंभकसद्भावे च घटते न सर्वशून्यत्वे, न चाभावः कस्यचिदप्यत्यन्ततुच्छरूपोऽस्ति, शशविषाणकूर्मरोमगगनारविन्दादीनामत्यन्ताभावप्रसिद्धानां समासप्रतिपाद्यस्यैवार्थस्याभावो न प्रत्येकपदवाच्यार्थस्येति, तथाहि—शशोऽप्यस्ति विषाणमप्यस्ति किं त्वत्र शशमस्तकसमवायि विषाणं नास्तीत्येतत्प्रतिपाद्यते, तदेवं संबन्धमात्रमत्र निषिध्यते नात्यन्तिको वस्त्वभाव इति, एवमन्यत्रापि द्रष्टव्यमिति । तदेवं विद्यमानायामप्यस्तीत्यादिकायां क्रियायां निरुद्धप्रज्ञास्तीर्थिका अक्रियावादमाश्रिता इति ॥ ८ ॥ अनिरुद्धप्रज्ञास्तु यथावस्थितार्थवेदिनो भवन्ति, तथाहि—अवधिमनःपर्यायकेवलज्ञानिनस्त्रैलोक्योदरविवरवर्तिनः पदार्थान् करतलामलकन्यायेन पश्यन्ति, समस्त-

[1] अनुभूतदृष्टचिन्तितश्रुतप्रकृतिविकारदेवतानूपाः । स्वप्नस्य निमित्तानि पुण्यं पापं च नाभावः ॥ १ ॥ २ वेन्द्रजालं प्र० ।

श्रुतज्ञानिनोऽपि आगमबलेनातीतानागतानर्थान् विदन्ति, येऽप्यन्येऽष्टाङ्गनिमित्तपारगास्तेऽपि निमित्तबलेन जीवादिपदार्थपरिच्छेदं विदधति, तदाह—

संवच्छरं सुविणं लक्खणं च, निमित्तदेहं च उप्पाइयं च । अट्ठंगमेयं बहवे अहित्ता, लोगंसि जाणंति अणागताइं ॥ ९ ॥ केई निमित्ता तहिया भवंति, केसिंचि तं विप्पडिएति णाणं । ते विज्जभावं अणहिज्जमाणा, आहंसु विज्जापरिमोक्खमेव ॥ १० ॥ ते एवमक्खंति समिच्च लोगं, तहा तहा (गया)समणा माहणा य । सयं कडं णन्नकडं च दुक्खं, आहंसु विज्जाचरणं पमोक्खं ॥ ११ ॥ ते चक्खु लोगंसिह णायगा उ, मग्गाणुसासंति हितं पयाणं । तहा तहा सासयमाहु लोए, जंसी पया माणव ! संपगाढा ॥ १२ ॥

'सांवत्सर' मिति ज्योतिषं स्वप्नप्रतिपादको ग्रन्थः स्वप्नस्तमधीत्य 'लक्षणं' श्रीवत्सादिकं, चशब्दादान्तरबाह्यभेदभिन्नं, 'निमित्तं' वाक्प्रशस्तशकुनादिकं देहे भवं दैहं—मषकतिलकादि, उत्पाते भवमौत्पातिकम्—उल्कापातदिग्दाहनिर्घातभूमिकम्पादिकं, तथा अष्टाङ्गं च निमित्तमधीत्य, तद्यथा—भौममुत्पातं स्वप्नमान्तरिक्षमाङ्गं स्वरं लक्षणं व्यञ्जनमित्येवंरूपं नवमपूर्ववृतीयाचारवस्तुविनिर्गतं सुखदुःखजीवितमरणलाभालाभादिसंसूचकं निमित्तमधीत्य लोकेऽस्मिन्नतीतानि वस्तूनि अनागतानि च

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥२१७॥

१२ समवसरणाध्य०

॥२१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जानन्ति' परिच्छिन्दन्ति, न च शून्यादिवादेष्वेतद् घटते, तस्मादप्रमाणकमेव तैरभिधीयत इति ॥ ९ ॥ एवं व्याख्याते सति आह परः–ननु व्यभिचार्यपि श्रुतमुपलभ्यते, तथाहि–चतुर्दशपूर्वविदामपि षट्स्थानपतितत्वमागम उद्घुष्यते किं पुनरष्टाङ्गनिमित्तशास्त्रविदाम् ?, अत्र चाङ्गचूर्जितानां निमित्तशास्त्राणामानुष्टुभेन छन्दसाऽर्धत्रयोदश शतानि सूत्रं तावन्त्येव सहस्राणि वृत्तिस्तावत्प्रमाणलक्षा परिभाषेति, अङ्गस्य त्वर्धत्रयोदशसहस्राणि सूत्रं, तत्परिमाणलक्षा वृत्तिरपरिमितं वार्तिकमिति, तदेवमष्टाङ्गनिमित्तवेदिनामपि परस्परतः षट्स्थानपतितत्वेन व्यभिचारित्वमत इदमाह–'केई'त्यादि, छान्दसत्वात्प्राकृतशैल्या वा लिङ्गव्यत्ययः, कानिचिन्निमित्तानि 'तथ्यानि' सत्यानि भवन्ति, केषाञ्चित्तु निमित्तानां निमित्तवेदिनां वा बुद्धिवैकल्यात्तथाविधक्षयोपशमाभावेन तत् निमित्तज्ञानं 'विपर्यासं' व्यत्ययमेति, आर्हतानामपि निमित्तव्यभिचारः समुपलभ्यते, किं पुनस्तीर्थिकानां ?, तदेवं निमित्तशास्त्रस्य व्यभिचारमुपलभ्य 'ते' अक्रियावादिनो 'विद्यासद्भावं' विद्यामनधीयानाः सन्तो निमित्तं तथा चान्यथा च भवतीति मत्वा ते 'आहंसु विज्जापलिमोक्खमेव' विद्यायाः—श्रुतस्य व्यभिचारेण तस्य परिमोक्षं–परित्यागमाहुः–उक्तवन्तः, यदिवा–क्रियाया अभावाद्विद्यया–ज्ञानेनैव मोक्षं–सर्वकर्मच्युतिलक्षणमाहुरिति । क्वचिच्चरमपादस्यैवं पाठः, 'जाणासु लोगंसि वयंति मंद'त्ति, विद्यामनधीत्यैव स्वयमेव लोकमस्मिन् वा लोके भावान् स्वयं जानीमः, एवं 'मंदाः' जडा वदन्ति, न च निमित्तस्य तथ्यता, तथाहि–कस्यचित्कचित्श्रुतेऽपि गच्छतः कार्यसिद्धिदर्शनात्, सच्छकुनसद्भावेऽपि कार्यविघातदर्शनाद्, अतो निमित्तबलेनादेशविधायिनां मृषावाद एव केवलमिति, नैतदस्ति, न हि सम्यगधीतस्य श्रुतस्यार्थे विसंवादोऽस्ति, यदपि षट्स्थानपतितत्वमुद्घोष्यते

१ बोधवैकल्यात् यद्वा निमित्तशब्देन निमित्तशास्त्राणि तेन तद्विषयकबुद्धिवैकल्यात् ।

तदपि पुरुषाश्रितक्षयोपशमवशेन, न च प्रमाणाभासव्यभिचारे सम्यक्प्रमाणव्यभिचाराशङ्का कर्तुं युज्यते, तथाहि–मरुमरीचिकानिचये जलग्राहि प्रत्यक्षं व्यभिचरतीतिकृत्वा किं सत्यजलग्राहिणोऽपि प्रत्यक्षस्य व्यभिचारो युक्तिसंगतो भवति ?, न हि मशकवर्तिरग्निसिद्धावुपदिश्यमाना व्यभिचारिणीति सत्यधूमस्यापि व्यभिचारो, न हि सुविवेचितं कार्यं कारणं व्यभिचरतीति, ततश्च प्रमातुरयमपराधो न प्रमाणस्य, एवं सुविवेचितं निमित्तश्रुतमपि न व्यभिचरतीति, यच्च श्रुतेऽपि कार्यसिद्धिदर्शनेन व्यभिचारः शङ्क्यते सोऽनुपपन्नः, तथाहि—कार्यात्कृतात् श्रुतेऽपि गच्छतो या कार्यसिद्धिः साऽपान्तराले इतरशोभननिमित्तबलात्संजातेत्येवमवगन्तव्यं, शोभननिमित्तप्रस्थितस्यापीतरनिमित्तबलात्कार्यव्याघात इति, तथा च श्रुतिः–किल बुद्धः स्वशिष्यानाहूयोक्तवान्, यथा–'द्वादशवार्षिकमत्र दुर्भिक्षं भविष्यतीत्यतो देशान्तराणि गच्छत यूयं' ते तद्वचनाद्गच्छन्तस्तेनैव प्रतिषिद्धाः, यथा 'मा गच्छत यूयम्, इहाद्यैव पुण्यवान् महासत्त्वः संजातस्तत्प्रभावात्सुभिक्षं भविष्यति' तदेवमन्तराऽपरनिमित्तसद्भावात्तव्यभिचारशङ्केति स्थितम् ॥ १० ॥ साम्प्रतं क्रियावादिमतं दुदूषयिषुस्तन्मतमाविष्कुर्वन्नाह–ये क्रियात एव ज्ञाननिरपेक्षायाः दीक्षादिलक्षणाया मोक्षमिच्छन्ति ते एवमाख्यान्ति, तद्यथा–'अस्ति माता पिता अस्ति सुचीर्णस्य कर्मणः फल'मिति, किं कृत्वा त एवं कथयन्ति ?–क्रियात एव सर्वं सिध्यतीति स्वाभिप्रायेण 'लोकं' स्थावरजङ्गमात्मकं 'समेत्य' ज्ञात्वा, किल वयं यथावस्थितवस्तुनो ज्ञातार इत्येवमभ्युपगम्य सर्वमस्त्येवेत्येवं सावधारणं प्रतिपादयन्ति, न कथञ्चिन्नास्तीति, कथमाख्यान्ति ?–'तथा तथा' तेन (तेन) प्रकारेण, यथा यथा क्रिया तथा तथा स्वर्गनरकादिकं फलमिति, ते च श्रमणास्तीर्थिका ब्राह्मणा वा क्रियात एव सिद्धिमिच्छन्ति, किञ्च–यत् किमपि संसारे दुःखं तथा सुखं च तत्सर्वं स्वयमेवात्मना कृतं, नान्येन कालेश्वरादिना, न चैतदक्रियावादे घटते, तत्र ह्यक्रियत्वादात्मनोऽकृतयो-

रेव सुखदुःखयोः संभवः स्यात्, एवं च कृतनाशाकृताभ्यागमौ स्याताम्, अत्रोच्यते, सत्यमस्त्यात्मसुखदुःखादिकं, न त्वस्त्येव, तथाहि–यद्यस्त्येव इत्येवं सावधारणमुच्यते ततश्च न कथञ्चिन्नास्तीत्यापन्नम्, एवं च सति सर्वं सर्वात्मकमापद्येत, तथा च सर्वलोकस्य व्यवहारोच्छेदः स्यात्, न च ज्ञानरहितायाः क्रियायाः सिद्धिः, तदुपायपरिज्ञानाभावात्, न चोपायमन्तरेणोपेयमवाप्यत इति प्रतीतं, सर्वा हि क्रिया ज्ञानवत्येव फलवत्युपलक्ष्यते, उक्तञ्च—"पढमं नाणं तओ दया, एवं चिट्ठति सव्वसंजए । अन्नाणी किं काही, किं वा नाही छेयपावयं ॥ १ ॥" इत्यतो ज्ञानस्यापि प्राधान्यं, नापि ज्ञानादेव सिद्धिः, क्रियारहितस्य ज्ञानस्य पङ्गोरिव कार्यसिद्धेरनुपपत्तेरित्यालोच्याह—'आहंसु विज्जाचरणं पमोक्खं'ति, न ज्ञाननिरपेक्षायाः क्रियायाः सिद्धिः, अन्धस्येव, नापि क्रियाविकलस्य ज्ञानस्य पङ्गोरिव, इत्येवमवगम्य 'आहुः' उक्तवन्तः, तीर्थकरगणधरादयः, कमाहुः ?, मोक्षं, कथं ?, विद्या च–ज्ञानं चरणं च–क्रिया ते द्वे अपि विद्येते कारणत्वेन यस्येति विगृह्यार्शआदित्वान्मत्वर्थीयोऽच्, असौ विद्याचरणो–मोक्षः–ज्ञानक्रियासाध्य इत्यर्थः, तमेवंसाध्यं–मोक्षं प्रतिपादयन्ति । यदिवाऽन्यथा पातनिका, केनैतानि समवसरणानि प्रतिपादितानि ? यच्चोक्तं यच्च वक्ष्यते इत्येतदाशङ्क्याह–'ते एवमक्खंती' त्यादि, अनिरुद्धा–क्वचिदप्यस्खलिता प्रज्ञायतेऽनयेति प्रज्ञा–ज्ञानं येषां तीर्थकृतां तेऽनिरुद्धप्रज्ञाः, त 'एवम्' अनन्तरोक्तया प्रक्रियया सम्यगाख्यान्ति–प्रतिपादयन्ति 'लोकं' चतुर्दशरज्ज्वात्मकं स्थावरजङ्गमाख्यं वा 'समेत्य' केवलज्ञानेन करतलामलकन्यायेन ज्ञात्वा तथागताः—तीर्थकरत्वं केवलज्ञानं च गताः,

१ प्रथमं ज्ञानं ततो दया एवं तिष्ठति सर्वसंयतः । अज्ञानी किं करिष्यति किंवा ज्ञास्यति छेकपापकं ॥ १ ॥ ज्ञानस्य ज्ञानिनां चैव, निन्दाप्रद्वेषमत्सरैः । उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते ॥ २ ॥ केषुचिदादर्शेषु दृश्यते श्लोकोऽयमशुभक्रियाया ज्ञानपूर्विकायाः फलवत्ताज्ञापनाय न तदा विरोधः. २ 'प्रणीतानि' इत्यपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'श्रमणाः' साधवो 'ब्राह्मणाः' संयतासंयताः, लौकिकी वा वाचोयुक्तिः, किम्भूतास्त एवमाख्यान्तीति सम्बन्धः, तथा तथेति वा क्वचित्पाठः, यथा यथा समाधिमार्गो व्यवस्थितस्तथा तथा कथयन्ति, एतच्च कथयन्ति—यथा यत्किञ्चित्संसारान्तर्गतानामसुमतां दुःखम्–असातोदयस्वभावं, तत्प्रतिपक्षभूतं च सातोदयापादितं सुखं, तत्स्वयम्–आत्मना कृतं, नान्येन कालेश्वरादिना कृतमिति, तथा चोक्तम्–"सेवो पुव्वकयाणं कम्माणं पावए फलविवागं। अवराहेसु गुणेसु य णिमित्तमित्तं परो होइ ॥१॥" एतच्चाहुस्तीर्थकरगणधरादयः, तद्यथा–विद्या—ज्ञानं चरणं–चारित्रं क्रिया तत्प्रधानो मोक्षस्तमुक्तवन्तो, न ज्ञानक्रियाभ्यां परस्परनिरपेक्षाभ्यामिति, तथा चोक्तम्—"क्रियां च सज्ज्ञानवियोगनिष्फलां, क्रियाविहीनां च विबोधसम्पदम् । निरस्यता क्लेशसमूहशान्तये, त्वया शिवायालिखितेव पद्धतिः ॥ १ ॥" ॥ ११ ॥ किञ्च–'ते' तीर्थकरगणधरादयोऽतिशयज्ञानिनोऽस्मिन् लोके चक्षुरिव चक्षुर्वर्तन्ते, यथा हि चक्षुर्योग्यदेशावस्थितान् पदार्थान् परिच्छिनत्ति एवं तेऽपि लोकस्य यथावस्थितपदार्थाविष्करणं कारयन्ति, तथाऽस्मिन् लोके ते नायकाः–प्रधानाः, तुशब्दो विशेषणे, सदुपदेशदानतो नायका इति, एतदेवाह–'मार्गं' ज्ञानादिकं मोक्षमार्गं 'अनुशासति' कथयन्ति प्रजना–प्रजायन्त इति प्रजाः—प्राणिनस्तेषां, किम्भूतं ?, हितं, सद्गतिप्रापकमनर्थनिवारकं च, किञ्च–चतुर्दशरज्ज्वात्मके लोके पञ्चास्तिकायात्मके वा येन येन प्रकारेण द्रव्यास्तिकनयाभिप्रायेण यद्वस्तु शाश्वतं तत्तथा 'त आहुः' उक्तवन्तः, यदिवा लोकोऽयं प्राणिगणः संसारान्तर्वर्ती यथा यथा शाश्वतो भवति तथा तथैवाहुः, तद्यथा—यथा यथा मिथ्यादर्शनाभिवृद्धिस्तथा तथा शाश्वतो लोकः, तथाहि–तत्र तीर्थकराहारकवर्ज्याः सर्वे एव कर्मबन्धाः सम्भाव्यन्त इति,

१ नेदं प्रत्यन्तरे । २ सर्वैः पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकं । अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥ १ ॥

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥२२०॥

तथा च महारम्भादिभिश्चतुर्भिः स्थानैर्जीवा नरकायुष्कं यावन्निर्वर्तयन्ति तावत्संसारानुच्छेद इति, अथवा यथा यथा रागद्वेषादिवृद्धिस्तथा तथा संसारोऽपि शाश्वत इत्याहुः, यथा यथा च कर्मोपचयमात्रा तथा तथैव संसाराभिवृद्धिरिति। दुष्टमनोवाक्कायाभिवृद्धौ वा संसाराभिवृद्धिरवगन्तव्या, तदेवं संसारस्याभिवृद्धिर्भवति । 'यस्मिंश्च' संसारे, प्रजायन्त इति 'प्रजाः' जन्तवः, हे मानव !, मनुष्याणामेव प्रायश उपदेशार्हत्वान्मानवग्रहणं, सम्यग्नारकतिर्यङ्नरामरभेदेन 'प्रगाढाः' प्रकर्षेण व्यवस्थिता इति ॥ १२ ॥ लेशतो जन्तुभेदप्रदर्शनद्वारेण तत्पर्यटनमाह—

१२ समवसरणाध्य०

जे रक्खसा वा जमलोइया वा, जे वा सुरा गंधव्वा य काया । आगासगामी य पुढोसिया जे, पुणो पुणो विप्परियासुवेंति ॥ १३ ॥ जमाहु ओहं सलिलं अपारगं, जाणाहि णं भवगहणं दुमोक्खं । जंसी विसन्ना विसयंगणाहिं, दुहओऽवि लोयं अणुसंचरंति ॥ १४ ॥ न कम्मुणा कम्म खवेंति बाला, अकम्मुणा कम्म खवेंति धीरा । मेधाविणो लोभमयावतीता, संतोसिणो नो पकरेंति पावं ॥ १५ ॥ ते तीयउप्पन्नमणागयाइं, लोगस्स जाणंति तहागयाइं । णेतारो अन्नेसि अणन्नणेया, बुद्धा हु ते अंतकडा भवंति ॥ १६ ॥

॥२२०॥

'ये' केचन व्यन्तरभेदा राक्षसात्मानः, तद्ग्रहणाच्च सर्वेऽपि व्यन्तरा गृह्यन्ते तथा यमलौकिकात्मानः, अ(म्बाम्ब)म्बर्ष्यादयस्तदुपलक्षणात्सर्वे भवनपतयः तथा ये च 'सुराः' सौधर्मादिवैमानिकाः, चशब्दाज्ज्योतिष्काः सूर्यादयः, तथा ये 'गान्धर्वा' विद्याधरा व्यन्तरविशेषा वा, तद्ग्रहणं च प्राधान्यख्यापनार्थं, तथा 'कायाः' पृथिवीकायादयः षडपि गृह्यन्त इति । पुनरन्येन प्रकारेण सत्त्वान्संजिघृक्षुराह—ये केचन 'आकाशगामिनः' संप्राप्ताकाशगमनलब्धयश्चतुर्विधदेवनिकायविद्याधरपक्षिवायवः, तथा ये च 'पृथिव्याश्रिताः' पृथिव्याश्रयोजीवनस्पतित्रिचतुष्पञ्चेन्द्रियास्ते सर्वेऽपि स्वकृतकर्मभिः पुनः पुनर्विविधम्–अनेकप्रकारं पर्यासपरिक्षेपमरहट्टघटीन्यायेन परिभ्रमणमुप—सामीप्येन यान्ति–गच्छन्तीति ॥ १३ ॥ किञ्चान्यत्—'यं' संसारसागरम् आहुः–उक्तवन्तस्तीर्थकरगणधरादयस्तद्विदः, कथमाहुः ?–स्वयम्भूरमणसलिलौघवदपारं, यथा स्वयम्भूरमणसलिलौघो न केनचिज्जलचरेण स्थलचरेण वा लङ्घयितुं शक्यते एवमयमपि संसारसागरः सम्यग्दर्शनमन्तरेण लङ्घयितुं न शक्यत इति दर्शयति—'जानीहि' अवगच्छ णमिति वाक्यालङ्कारे, भवगहनमिदं—चतुरशीतियोनिलक्षप्रमाणं यथासम्भवं सङ्ख्येयासङ्ख्येयानन्तस्थितिकं दुःखेन ह्युच्यत इति दुर्मोक्षं—दुरुत्तरमस्तिवादिनामपि, किं पुनर्नास्तिकानाम् ?, पुनरपि भवगहनोपलक्षितं संसारमेव विशिनष्टि—'यत्र' यस्मिन् संसारे सावद्यकर्मानुष्ठायिनः कुमार्गपतिता असत्समवसरणग्राहिणो 'विषण्णा' अवसक्ता विषयप्रधाना अङ्गना विषयाङ्गनास्ताभिः, यदिवा विषयाश्चाङ्गनाश्च विषयाङ्गनास्ताभिर्वशीकृताः सर्वत्र सदनुष्ठानेष्वसीदन्ति, त एवं विषयाङ्गनादिके पङ्के विषण्णा 'द्विधाऽपि' आकाशाश्रितं पृथिव्याश्रितं च लोकं, यदिवा स्थावरजङ्गमलोकं 'अनुसंचरन्ति' गच्छन्ति, यदिवा–'द्विधा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽपि' इति लिङ्गमात्रप्रव्रज्ययाऽविरत्या (च) रागद्वेषाभ्यां वा लोकं—चतुर्दशरज्ज्वात्मकं स्वकृतकर्मप्रेरिता 'अनुसञ्चरन्ति' पर्यटन्ति इति ॥ १४ ॥ किञ्चान्यत्—ते एवममत्समवसरणाश्रिता मिथ्यात्वादिभिर्दोषैरभिभूताः सावद्येतरविशेषानभिज्ञाः सन्तः कर्मक्षपणार्थमभ्युद्यता निर्विवेकतया सावद्यमेव कर्म कुर्वते, न च 'कर्मणा' सावद्यारम्भेण 'कर्म' पापं 'क्षपयन्ति' व्यपनयन्ति, अज्ञानलाढाला इव बालास्त इति, यथा च कर्म क्षिप्यते तथा दर्शयति—'अकर्मणा तु' आश्रवनिरोधेन तु अन्तशः शैलेश्यवस्थायां कर्म क्षपयन्ति 'धीराः' महासत्त्वाः सद्वैद्या इव चिकित्सयाऽऽमयानिति । मेधा—प्रज्ञा सा विद्यते येषां ते मेधाविनः—हिताहितप्राप्तिपरिहाराभिज्ञा लोभभयं—परिग्रहमेवातीताः परिग्रहातिक्रमाल्लोभातीताः—वीतरागा इत्यर्थः, 'सन्तोषिणः' येन केनचित्सन्तुष्टा अवीतरागा अपीति, यदिवा यत एवातीतलोभा अत एव सन्तोषिण इति, त एवंभूता भगवन्तः 'पापम्' असदनुष्ठानापादितं कर्म 'न कुर्वन्ति' नाददति, क्वचित्पाठः, 'लोभभयादतीता' लोभश्च भयं च समाहारद्वन्द्वः, लोभाद्वा भयं तस्मादतीताः सन्तोषिण इति, न पुनरुक्ताशङ्का विधेयेति, अतो (विधेयाऽत्र यतो)लोभातीतत्वेन प्रतिषेधांशो दर्शितः, सन्तोषिण इत्यनेन च विध्यंश इति, यदिवा लोभातीतग्रहणेन समस्तलोभाभावः संतोषिण इत्यनेन तु सत्यप्यवीतरागत्वे नोत्कटलोभा इति लोभाभावं दर्शयत्यपरकषायेभ्यो लोभस्य प्राधान्यमाह, ये च लोभातीतास्तेऽवश्यं पापं न कुर्वन्ति इति स्थितम् ॥ १५ ॥ ये च लोभातीतास्ते किम्भूता भवन्ति इत्याह—'ते' वीतरागा अल्पकषाया वा 'लोकस्य' पञ्चास्तिकायात्मकस्य प्राणिलोकस्य वाऽतीतानि—अन्यजन्माचरितानि उत्पन्नानि—वर्तमानावस्थायीनि अनागतानि—च भवान्तरभावीनि सुखदुःखादीनि 'तथागतानि' यथैव स्थितानि तथैव अवितथं जानन्ति, न विभङ्गज्ञानिन इव विपरीतं पश्यन्ति, तथाह्यागमः—"अणगारे णं भंते ! माई मिच्छादिट्ठी रायगिहे णयरे समोहए वाणारसीए नयरीए रूवाइं जाणइ पासइ ?, जाव से से दंसणे विवज्जासे भवती" त्यादि, ते चातीतानागतवर्तमानज्ञानिनः प्रत्यक्षज्ञानिनश्चतुर्दशपूर्ववित्को वा परोक्षज्ञानिनः 'अन्येषां' संसारोत्तितीर्षूणां भव्यानां मोक्षं प्रति नेतारः सदुपदेशं वा प्रत्युपदेष्टारो भवन्ति, न च ते स्वयम्बुद्धत्वादन्येन नीयन्ते—तत्त्वावबोधं कार्यं(धवन्तः क्रिय)न्त इत्यनन्यनेयाः, हिताहितप्राप्तिपरिहारं प्रति नान्यस्तेषां नेता विद्यत इति भावः । ते च 'बुद्धाः' स्वयंबुद्धास्तीर्थकरगणधरादयः, हुशब्दश्चशब्दार्थे विशेषणे वा, तथा च प्रदर्शित एव, ते च भवान्तकराः संसारोपादानभूतस्य वा कर्मणोऽन्तकरा भवन्तीति ॥ १६ ॥ यावदद्यापि भवान्तं न कुर्वन्ति तावत्प्रतिषेध्यमंशं दर्शयितुमाह—

ते णेव कुव्वंति ण कारवंति, भूताहिसंकाइ दुगुंछमाणा । सया जता विप्पणमंति धीरा, विण्णत्ति (ण्णाय) धीरा य हवंति एगे ॥ १७ ॥ डहरे य पाणे वुड्ढे य पाणे, ते आत्तओ पासइ सव्वलोए । उवेहती लोगमिणं महंतं, बुद्धेऽपमत्तेसु परिव्वएज्जा ॥ १८ ॥ जे आयओ पर-

१ अनगारो भदन्त ! मायी मिथ्यादृष्टिः राजगृहे नगरे समवहतः वाराणस्यां नगर्यां रूपाणि जानाति पश्यति ?, यावत्स तस्य दर्शनविपर्यासो भवति । २ तदा स्वयं पदार्थानां ज्ञातारस्ते इति स्वयमित्यादि । ३ तत्त्वावबोधकार्यं त इत्य० प्र० । ४ च प्र० ।

ओ वावि णच्चा, अलमप्पणो होंति अलं परेसिं । तं जोइभूतं च सयावसेज्जा, जे पाउकुज्जा अणुवीति धम्मं ॥ १९ ॥ अत्ताण जो जाणति जो य लोगं, गइं च जो जाणइ णागइं च । जो सासयं जाण असासयं च, जातिं(च) मरणं च जणोववायं ॥ २० ॥

'ते' प्रत्यक्षज्ञानिनः परोक्षज्ञानिनो वा विदितवेद्याः सावद्यमनुष्ठानं भूतोपमर्दाभिशङ्कया पापं कर्म जुगुप्समानाः सन्तो न स्वतः कुर्वन्ति, नाप्यन्येन कारयन्ति, कुर्वन्तमप्यपरं नानुमन्यन्ते । तथा स्वतो न मृषावादं जल्पन्ति नान्येन जल्पयन्ति नाप्यपरं जल्पन्तमनुजानन्ति, एवमन्यान्यपि महाव्रतान्यायोज्यानीति । तदेवं 'सदा' सर्वकालं 'यताः' संयताः पापानुष्ठानान्निवृत्ता विविधं—संयमानुष्ठानं प्रति 'प्रणमन्ति' प्रह्वीभवन्ति । के ते ?—'धीराः' महापुरुषा इति । तथैके केचन हेयोपादेयं विज्ञायापिशब्दात्सम्यक्परिज्ञायं तदेव निःशङ्कं यज्जिनैः प्रवेदितमित्येवंकृतनिश्चयाः कर्मणि विदारयितव्ये वीरा भवन्ति, यदिवा परीषहोपसर्गानीकविजयाद्वीरा इति पाठान्तरं वा 'विण्णत्तिधीरा य भवंति एगे' 'एके' केचन गुरुकर्माणोऽल्पसत्त्वाः विज्ञप्तिःज्ञानं, तन्मात्रेणैव धीरा नानुष्ठानेन, न च ज्ञानादेवाभिलषितार्थावाप्तिरुपजायते, तथाहि—"अधीत्य शास्त्राणि भवन्ति मूर्खा, यस्तु क्रियावान् पुरुषः स विद्वान् । संचिन्त्यतामौषधमातुरं हि, न ज्ञानमात्रेण करोत्यरोगम् ॥१॥" ॥ १७ ॥ कानि पुनस्तानि

१ जुगुप्सन्तः प्र० जुगुप्सां कुर्वन्त इति नामधातोः सैव सतरि । २ चकारोऽपिशब्दार्थे वहा धीराश्च इति भविष्यति । ३ ०य वा त० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतानि ? यच्छङ्कयाऽऽरम्भं जुगुप्सन्ति सन्त इत्येतदाशङ्क्याह—ये केचन 'डहरे'त्ति लघवः कुन्थ्वादयः सूक्ष्मा वा, ते सर्वेऽपि प्राणाः—प्राणिनः ये च वृद्धाः—बादरशरीरिणस्तान्सर्वानप्यात्मतुल्यान्—आत्मवत्पश्यति—सर्वेष्वपि लोके यावत्प्रमाणं मम तावदेव कुन्थोरपि, यथा वा मम दुःखमनभिमतमेवं सर्वलोकस्यापि, सर्वेषामपि प्राणिनां दुःखमुत्पद्यते, दुःखाद्बिभ्यति, तथा चागमः—"पुढविकाए णं भंते ! अक्कंते समाणे केरिसयं वेयणं वेएइ ?" इत्याद्याः सूत्रालापकाः, इति मत्वा तेऽपि नाक्रमितव्या—न संघट्टनीयाः, इत्येवं यः पश्यति स पश्यति । तथा लोकमिमं महान्तमुत्प्रेक्षते, बहुजीवसूक्ष्मबादरभेदैराकुलत्वान्महान्तं, यदिवाऽनाद्यनिधनत्वान्महान् लोकः, तथाहि—भव्या अपि केचन सर्वेणापि कालेन न सेत्स्यन्तीति, यद्यपि द्रव्यतः बहुद्रव्यात्मकत्वात् क्षेत्रतश्चतुर्दशरज्जुप्रमाणतया सावधिको लोकस्तथापि कालतो भावतश्चानाद्यनिधनत्वात्पर्यायाणां चानन्तत्वान्महान् लोकस्तमुत्प्रेक्षत इति । एवं च लोकमुत्प्रेक्षमाणो बुद्धः—अवगततत्त्वः सर्वाणि प्राणिस्थानान्यशाश्वतानि, तथा नात्रापसदे संसारे सुखलेशोऽप्यस्तीत्येवं मन्यमानः 'अप्रमत्तेषु' संयमानुष्ठायिषु यतिषु मध्ये तथाभूत एव परिः—समन्ताद्व्रजेत् परिव्रजेत्, यदिवा बुद्धः सन् 'प्रमत्तेषु' गृहस्थेषु अप्रमत्तः सन् संयमानुष्ठाने परिव्रजेदिति ॥ १८ ॥ किञ्च—'यः' स्वयं सर्वज्ञ आत्मनस्त्रैलोक्योदरविवरवर्तिपदार्थदर्शी यथाऽवस्थितं लोकं ज्ञात्वा तथा यश्च गणधरादिकः 'परतः' तीर्थकरादेर्जीवादीन् पदार्थान् विदित्वा परेभ्य उपदिशति स एवंभूतो हेयोपादेयवेदी 'आत्मनस्त्रातुमलं' आत्मानं संसारावटात्पालयितुं समर्थो भवति, तथा परेषां च

१ संबन्धे षष्ठी अपिना देशादिव्यवच्छेदः । २ उपचरितसर्वज्ञव्यवच्छेदाय, भिन्नं वा वाक्यमेवत् । ३ बुध्यीकाधिको भवन्त । आक्रान्तः सन् कीदृशीं वेदनां वेदयति ? । ४. चौणि स्थाना० प्र० ।

सूत्रकृताङ्गशीलाङ्काचार्यविरचितं

॥२२२॥

सदुपदेशदानतस्त्राता जायते, 'तं' सर्वज्ञं स्वत एव सर्ववेदिनं तीर्थकरादिकं परतोवेदिनं च गणधरादिकं 'ज्योतिर्भूतं' पदार्थप्रकाशकतया चन्द्रादित्यप्रदीपकल्पमात्महितमिच्छन् संसारदुःखोद्विग्नः कृतार्थमात्मानं भावयन् 'सततम्' अनवरतम् 'आमोक्षाय' मोक्षपर्यन्तं 'सेवेत' गुर्वन्तिक एव यावज्जीवं वसेत्, तथा चोक्तम्—"नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥ १ ॥" क एवं कुर्युः ? इति दर्शयति—ये कर्मपरिणतिमनुविचिन्त्य "माणुस्सखेत्तजाइ" इत्यादिना दुर्लभां च सद्धर्मावाप्तिं सद्धर्मं वा श्रुतचारित्राख्यं क्षान्त्यादिदशविधसाधुधर्मं श्रावकधर्मं वा 'अनुविचिन्त्य' पर्यालोच्य ज्ञात्वा वा तमेव धर्मं यथोक्तानुष्ठानतः 'प्रादुष्कुर्युः' प्रकटयेयुः ते गुरुकुलवासं यावज्जीवमासेवन्त इति, यदिवा ये ज्योतिर्भूतमाचार्यं सततमासेवन्ति त एवागमज्ञा धर्ममनुविचिन्त्य 'लोकं' पञ्चास्तिकायात्मकं चतुर्दशरज्ज्वात्मकं वा प्रादुष्कुर्युरिति क्रिया ॥ १९ ॥ किंचान्यत्—यो ह्यात्मानं परलोकयायिनं शरीराद्व्यतिरिक्तं सुखदुःखाधारं जानाति यश्चात्महितेषु प्रवर्तते स आत्मज्ञो भवति । येन चात्मा यथावस्थितस्वरूपोऽहंप्रत्ययग्राह्यो निर्ज्ञातो भवति तेनैवायं सर्वोऽपि लोकः प्रवृत्तिनिवृत्तिरूपो विदितो भवति, स एव चात्मज्ञोऽस्तीत्यादिक्रियावादं भाषितुमर्हतीति द्वितीयवृत्तस्यान्ते क्रिया । यश्च 'लोकं' चराचरं वैशाखस्थानस्थकटिस्थकरयुग्मपुरुषाकारं चशब्दाल्लोकं चानन्ताकाशास्तिकायमात्रं जानाति, यश्च जीवानाम् 'आगतिम्' आगमनं कुतः समागता नारकास्तिर्यञ्चो मनुष्या देवाः ? कैर्वा कर्मभिर्नारकादित्वेनोत्पद्यन्ते ? एवं यो जानाति, तथा 'अनागतिं च' अनागमनं च, कुत्र गतानां नागमनं भवति ? चकाराच्चलनोपायं च सम्यग्दर्शनज्ञानचारित्रात्मकं यो जानाति, तत्रानागतिः—सिद्धिरशेषकर्मच्यु-

१ ज्ञानस्य भवति भागी स्थिरतरो दर्शने चारित्रे च । धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति ॥ १ ॥ २ •मिज्ञातो प्र० ।

तिरूपा लोकाग्राकाशदेशस्थानरूपा वा ज्ञात्वा, सा च सादेरपर्यवसाना । यश्च 'शाश्वतं' नित्यं सर्ववस्तुजातं द्रव्यास्तिकनयाश्रयाद् 'अशाश्वतं' वाऽनित्यं प्रतिक्षणविनाशरूपं पर्यायनयाश्रयणात्, चकाराच्चित्यानित्यं चोभयाकारं सर्वमपि वस्तुजातं यो जानाति, तथा ह्यागमः—"णेरइया दव्वट्ठयाए सासया भावट्ठयाए असासया" एवमन्येऽपि तिर्यगादयो द्रष्टव्याः । अथवा निर्वाणं—शाश्वतं संसारः—अशाश्वतस्तद्गतानां संसारिणां स्वकृतकर्मवशगानामितश्चेतश्च गमनादिति । तथा 'जातिम्' उत्पत्तिं नारकतिर्यङ्मनुष्यामरजन्मलक्षणां 'मरणं च' आयुष्कक्षयलक्षणं, तथा जायन्त इति जनाः—सत्त्वास्तेषामुपपातं यो जानाति, स च नारकदेवयोर्भवतीति, अत्र च जन्मचिन्तायामसुमतामुत्पत्तिस्थानं योनिर्भणनीया, सा च सचित्ताऽचित्ता मिश्रा च तथा शीता उष्णा मिश्रा च तथा संवृता विवृता मिश्रा चेत्येवं सप्तविंशतिविधेति । मरणं—पुनस्तिर्यङ्मनुष्ययोः, च्यवनं—ज्योतिष्कवैमानिकानाम् उद्वर्तना—भवनपतिव्यन्तरनारकाणामिति ॥ २० ॥ किञ्च—

अहोऽवि सत्ताण विउट्टणं च, जो आसवं जाणति संवरं च । दुक्खं च जो जाणति निज्जरं च, सो भासिउमरिहइ किरियवादं ॥ २१ ॥ सद्देसु रूवेसु असज्जमाणो, गंधेसु रसेसु अदुस्समाणे । णो जीवितं णो मरणाहिकंखी, आयाणगुत्ते वलया विमुक्के ॥२२॥ त्तिबेमि । इति श्रीसमवसरणाध्ययनं द्वादशमं समत्तं ॥ (गाथाग्र० ५६८)

१ नैरयिका द्रव्यार्थतया शाश्वता भावार्थतया अशाश्वताः ।

सूत्रकृ. १८

१२ समवसरणाध्य०

॥२२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सत्त्वानां' स्वकृतकर्मफलभुजामधस्तान्नारकादौ दुष्कृतकर्मकारिणां विविधां विरूपां वा कृष्टनां—जातिजरामरणरोगशोककृतां शरीरपीडां, चशब्दात्तद्भावोपायं यो जानाति, इदमुक्तं भवति—सर्वार्थसिद्धादारतोऽधःसप्तमीं नरकभुवं यावदसुमन्तः सकर्माणो विवर्तन्ते, तत्रापि ये गुरुतरकर्माणस्तेऽप्रतिष्ठाननरकयायिनो भवन्तीत्येवं यो जानीते । तथा आश्रवत्यष्टप्रकारं कर्म येन स आश्रवः स च प्राणातिपातरूपो रागद्वेषरूपो वा मिथ्यादर्शनादिको वेति तं तथा 'संवरम्' आश्रवनिरोधरूपं यावदशेषयोगनिरोधस्वभावं, चकारात्पुण्यपापे च यो जानीते तथा 'दुःखम्' असातोदयरूपं तत्कारणं च यो जानाति 'सुखं' च तद्विपर्ययभूतं यो जानाति, तपसा यो निर्जरां च, इदमुक्तं भवति—यः कर्मबन्धहेतून् तद्विपर्यासहेतूंश्च तुल्यतया जानाति, तथाहि—"यथाप्रकारा यावन्तः, संसारावेशहेतवः । तावन्तस्तद्विपर्यासा, निर्वाणावेशहेतवः ॥१॥" स एव परमार्थतो 'भाषितुं' वक्तुमर्हति, किं तद् ? इत्याह—क्रियावादम्, अस्ति जीवोऽस्ति पुण्यमस्ति पापमस्ति च पूर्वाचरितस्य कर्मणः फलमित्येवंरूपं वादमिति । तथाहि—जीवाजीवाश्रवसंवरबन्धपुण्यपापनिर्जरामोक्षरूपा नवापि पदार्थाः श्लोकद्वयेनोपात्ताः, तत्र य आत्मानं जानातीत्यनेन जीवपदार्थः, लोकमित्यनेनाजीवपदार्थः, तथा गत्यनागतिः शाश्वतेत्यादिनाऽनयोरेव स्वभावोपदर्शनं कृतं, तथाऽऽश्रवसंवरौ स्वरूपेणैवोपात्तौ, दुःखमित्यनेन तु बन्धपुण्यपापानि गृहीतानि, तदविनाभावित्वाद्दुःखस्य, निर्जरायास्तु स्वाभिधानेनैवोपादानं, तत्फलभूतस्य च मोक्षस्योपादानं द्रष्टव्यमिति, तदेवमेतावन्त एव पदार्थास्तदभ्युपगमेन चास्तीत्यादिकः क्रियावादोऽभ्युपगतो भवतीति, यश्चैतान् पदार्थान् 'जानाति' अभ्युपगच्छति स परमार्थतः क्रियावादं जानाति । ननु चापरदर्शनोक्तपदार्थपरिज्ञानेनं सम्य-

१ आदिनाऽशाश्वतं । २ अजीवपक्षेऽनागतिः स्थितिः यद्वा जीवानां ते अजीवकृते इति । ३ वैषयिकसुखस्य दुःखरूपत्वात्र दुःखस्य पुण्याविनाभावत्वानुपपत्तिः । ४ ज्ञानाच्छ्रद्धा ततः प्ररूपणेति सम्यग्वादिलक्षणम् ।

ग्वादित्वं कस्मान्नाभ्युपगम्यते ?, तदुक्तपदार्थानामेवाघटमानत्वात्, तथाहि—नैयायिकदर्शनेन तावत्प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानीत्येते षोडश पदार्था अभिहिताः, तत्र हेयोपादेय-(निवृत्ति) प्रवृत्तिरूपतया येन पदार्थपरिच्छित्तिः क्रियते तत्प्रमीयतेऽनेनेति प्रमाणं, तच्च प्रत्यक्षानुमानोपमानशब्दभेदाच्चतुर्धा, तत्रेन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षं, तदत्रेन्द्रियार्थयोर्यः संबन्धस्तस्माद्युत्पन्नं, नाभिव्यक्तं, ज्ञानं, न सुखादिकम्, अव्यपदेश्यमिति व्यपदेश्यले शाब्दप्राप्तेः, अव्यभिचारि तद्धि द्विचन्द्रज्ञानवद्व्यभिचरतीति, व्यवसायात्मकमिति निश्चयात्मकं प्रत्यक्षं, तस्यास्य प्रत्यक्षता न बुध्य(युज्य)ते, तथाहि—यत्रात्मार्थग्रहणं प्रति साक्षाद्व्याप्रियते तदेव प्रत्यक्षं, तच्चावधिमनःपर्यायकेवलात्मकम्, एतच्चापरोगाधिद्वारेण प्रवृत्तेरनुमानवत्परोक्षमिति, उपचारप्रत्यक्षं तु स्यात्, न चोपचारस्तत्त्वचिन्तायां व्याप्रियत इति । अनुमानमपि पूर्ववच्छेषवत्सामान्यतोदृष्टमिति त्रिधा, तत्र कारणात्कार्यानुमानं पूर्ववत् कार्यात्कारणानुमानं शेषवत् सामान्यतोदृष्टं तु चूतमेकं विकसितं दृष्ट्वा पुष्पिताश्चूता जगतीति यदिवा देवदत्तादौ गतिपूर्विकां स्थानात् स्थानान्तरावाप्तिं दृष्ट्वाऽऽदित्येऽपि गत्यनुमानमिति, तत्राप्यन्यथानुपपत्तिरेव गमिका, न कारणादिकं, तया विना कारणस्य कार्यं प्रति व्यभिचारात्, यत्र तु सा विद्यते तत्र कार्यकारणादिव्यतिरेकेणापि गम्यगमकभावो दृष्टः, तद्यथा—भविष्यति शकटोदयः, कृत्तिकादर्शनादिति, तदुक्तम्—"अन्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम् ? । नान्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम् ? ॥ १ ॥" अपिच—प्रत्यक्षस्याप्रामाण्ये तत्पूर्वकस्यानुमानस्याप्रामाण्यमिति । प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानं, यथा गौर्गवयस्तथा, अत्र च सञ्ज्ञास-

१ जैनानां ह्यात्मा ज्ञानस्वरूप इतीन्द्रियादिनाऽभिव्यज्यते ज्ञानं तेषां तूत्पद्यते । २ सुखस्यापीन्द्रियार्थोत्पन्नत्वात् । ३ इन्द्रियार्थोत्थं ।

ज्ञिसंबन्धप्रतिपत्तिरुपमानार्थः, अत्रापि सिद्धायामन्यथाऽनुपपत्तावनुमानलक्षणेन तत्रैवान्तर्भावात्पृथक्प्रमाणत्वमनुपपन्नमेव, अथ नास्त्यनुपपत्तिस्ततो व्यभिचारादप्रमाणतोपमानस्य । शाब्दमपि न सर्वं प्रमाणं, किं तर्हि ?, आप्तप्रणीतस्यैवागमस्य प्रामाण्यं, न चार्हद्व्यतिरेकेणापरस्याप्तता युक्तियुक्तेति, एतच्चान्यत्र निर्लोठितमिति । किञ्च—सर्वमप्येतत्प्रमाणमात्मनो ज्ञानं ज्ञानं चात्मनो गुणः (गुणश्च) पृथक्पदार्थतयाऽभ्युपगन्तुं न युक्तो, रूपरसादीनामपि पृथक्पदार्थताऽऽपत्तेः, अथ प्रमेयग्रहणेनेन्द्रियार्थतया तेऽप्याश्रिताः, सत्यमाश्रिताः, न तु युक्तियुक्ताः, तथाहि—द्रव्यव्यतिरेकेण तेषामभावात् तद्ग्रहणे च तेषामपि ग्रहणं सिद्धमेवेति न युक्तं पृथगुपादानम् । प्रमेयं त्वात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः, तत्रात्मा सर्वस्य द्रष्टोपभोक्ता चे(स चे)च्छाद्वेषप्रयत्नसुखदुःखज्ञानानुमेयः, स च जीवपदार्थतया गृहीत एवास्माभिरिति, शरीरं तु तस्य भोगायतनं, भोगायतनानीन्द्रियाणि, भोक्तव्या इन्द्रियार्थाः, एतदपि शरीरादिकं जीवाजीवग्रहणेनोक्तमस्माभिरिति । उपयोगो बुद्धिरित्येतच्च ज्ञानविशेषः, स च जीवगुणतया जीवोपादानतयो(नेनो)पात्त एव । सर्वविषयमन्तःकरणं युगपज्ज्ञानानुत्पत्तिलिङ्गं मनः, तदपि द्रव्यमनः पौद्गलिकमजीवग्रहणेन गृहीतं, भावमनस्त्वात्मगुणत्वाज्जीवग्रहणेनेति । आत्मनः सुखदुःखसंवेदनानां निर्वर्तनकारणं प्रवृत्तिः, सापि पृथक्पदार्थतया नाभ्युपगन्तुं युक्ता, तथाहि—प्रवृत्तिरित्यत्रेच्छा, सा चात्मगुण एव, आत्माऽभिप्रायतया ज्ञानविशेषत्वाद्, आत्मानं दूषयतीति दोषः, तद्यथा—अस्यात्मनो नेदं शरीरमपूर्वम्, अनादित्वादस्य, नाप्यनुत्तरम्, अनन्तत्वात्सन्ततेरिति, (शरीरेऽपूर्वतया सान्ततया वा)योऽयमात्मनोऽध्यवसायः स दोषो, रागद्वेषमोहादिको वा दोषः, अयमपि दोषो जीवाभिप्रायतया तदन्तर्भावीति न पृथग्वाच्यः । प्रेत्यभावः—परलोकसद्भावोऽयमपि ससाधनो जीवाजीवग्रहणेनोपात्तः, फलमपि—सुखदुःखोपभोगात्मकं, तदपि जीवगुण एवान्तर्भवतीति न पृथग्गुपदेष्ट-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यमिति, दुःखमित्येतदपि विविधबाधनयोगरूपमिति न फलादतिरिच्यते, जन्ममरणप्रबन्धोच्छेदरूपतया सर्वदुःखप्रहाणलक्षणो मोक्षः, स चात्माभिरुपात्त एवेति । किमित्यनवधारणात्मकः प्रत्ययः संशयः, असावपि निर्णयज्ञानवदात्मगुण एवेति, येन प्रयुक्तः प्रवर्तते तत्प्रयोजनं, तदपीच्छाविशेषत्वादात्मगुण एव, अविप्रतिपत्तिविषयापन्नोऽर्थो दृष्टान्तः, असावपि जीवाजीवयोरन्यतरः, न चैतावताऽस्य पृथक्पदार्थता युक्ता, अतिप्रसङ्गाद्, अवयवग्रहणेन च तस्योत्तरत्र ग्रहणादिति । सिद्धान्तश्चतुर्विधः, तद्यथा—सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः १, यथा स्पर्शनादीनीन्द्रियाणि स्पर्शादय इन्द्रियार्थाः प्रमाणैः प्रमेयस्य ग्रहणमिति १, समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तो यथा साङ्ख्यानां नासत आत्मलाभो न च सतः सर्वथा विनाश इति, तथा चोक्तम्—"नासतो जायते भावो, नाभावो जायते सतः" इति २, यत्सिद्धावन्यस्यार्थस्यानुषङ्गेण सिद्धिः सोऽधिकरणसिद्धान्तः ३, यथेन्द्रियव्यतिरिक्तो ज्ञाताऽऽत्माऽस्ति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति, तत्रानुषङ्गिणोऽर्थाः १ इन्द्रियनानात्वं २ नियतविषयाणीन्द्रियाणि ३ स्वविषयग्रहणलिङ्गानि च ४ ज्ञातुर्ज्ञानसाधनानि ५ स्पर्शादिगुणव्यतिरिक्तं द्रव्यं ६ गुणाधिकरण ७ मनियतविषयाश्चेतनाः ८ इति, पूर्वार्थसिद्धावेतेऽर्थाः सिध्यन्ति, नैतैर्विना पूर्वार्थः संभवतीति ३, अपरीक्षितार्थाभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ४, तद्यथा, किं शब्द इति विचारे कश्चिदाह—अस्तु द्रव्यं शब्दः, स तु किं नित्योऽथानित्यः ?, इत्येवं विचारः, स चायं चतुर्विधोऽपि सिद्धान्तो न ज्ञानविशेषादतिरिच्यते, ज्ञानविशेषस्यात्मगुणत्वाद्गुणस्य च गुणिग्रहणेन ग्रहणाद् न पृथगुपादानमिति४ । अथावयवाः—प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि, तत्र साध्यनिर्देशः प्रतिज्ञा, यथा नित्यः शब्दोऽनित्यो वेति, हिनोति–गमयति प्रतिज्ञातमर्थमिति हेतुः, तद्यथा–उत्पत्तिधर्मकत्वात्, साध्यसाधर्म्यवैधर्म्यभावे दृष्टान्तः उदाहरणं, यथा

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२२६॥

घट इति, वैधर्म्योदाहरणं यदनित्यं न भवति तदुत्पत्तिमदपि न भवति यथाऽऽकाशमिति, तथा न तथेति वा पक्षधर्मोपसंहार उपनयः, तद्यथा—अनित्यः शब्दः कृतकत्वाद् घटवत्तथा चायं, अनित्यत्वाभावे कृतकत्वमपि न भवत्याकाशवत् न तथाऽयमिति, प्रतिज्ञाहेत्वोः पुनर्वचनं निगमनं, तस्मादनित्य इति, ते चामी पञ्चाप्यवयवा यदि शब्दमात्रं ततः शब्दस्य पौद्गिलकत्वात्पुद्गलानां चाजीवग्रहणेन ग्रहणान्न पृथगुपादानं न्याय्यम्, अथ तज्ज्ञं ज्ञानं ततो जीवगुणत्वात् जीवग्रहणेनैवोपादानमिति, ज्ञानविशेषपदार्थताऽभ्युपगमे च पदार्थबहुत्वं स्याद्, अनेकप्रकारत्वाज्ज्ञानविशेषाणामिति । संशयादूर्ध्वं भवितव्यताप्रत्ययः सदर्थपर्यालोचनात्मकस्तर्कः, यथा भवितव्यमत्र स्थाणुना पुरुषेण वेति, अयमपि ज्ञानविशेष एव, न च ज्ञानविशेषाणां ज्ञातुरभिन्नानां पृथक् पदार्थपरिकल्पनं समनुजानते विद्वांसः । संशयतर्काभ्यामुत्तरकालभावी निश्चयात्मकः प्रत्ययो निर्णयः, अयमपि प्राग्वन्न ज्ञानादतिरिच्यते, किञ्च—अस्य निश्चयात्मकतया प्रत्यक्षादिप्रमाणान्तर्भावान्न पृथग् निर्देशो न्याय्य इति । तिस्रः कथाः–वादो जल्पो वितण्डा चेति, तत्र प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः, स च तत्त्वज्ञानार्थं शिष्याचार्ययोर्भवति, स एव विजिगीषुणा सार्धं छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः, स एव प्रतिपक्षस्थापनाहीनो वितण्डेति, तत्रासां तिसृणामपि कथानां भेद एव नोपपद्यते, यतस्तत्त्वचिन्तायां तत्त्वनिर्णयार्थं वादो विधेयो, न छलजल्पादिना तत्त्वावगमः कर्तुं पार्यते, छलादिकं हि परवञ्चनार्थमुपन्यस्यते, न च तेन तत्त्वावगतिः इति सत्यपि भेदे नैवासां पदार्थता, यतो यदेव परमार्थतो वस्तुवृत्त्या वस्त्वस्ति तदेव परमार्थतयाऽभ्युपगन्तुं युक्तम्, वादास्तु पुरुषेच्छावशेन भवन्तोऽनियता वर्तन्ते(तत्) न तेषां पदार्थतेति, किञ्च—पुरुषेच्छानुविधायिनो वादाः कुक्कुटलावकादिष्वपि पक्षप्रतिपक्षपरिग्रहेण भवन्त्यतस्तेषामपि तत्त्वप्राप्तिः स्यान्न चैतदिष्यत इति । असिद्धानैकान्तिकविरुद्धा हेत्वाभासाः, हेतुवदाभासन्त इति हेत्वाभासाः, तत्र सम्यग्धेतूनामपि न तत्त्वव्यवस्थितिः किं पुनस्तदाभासानां ?, तथाहि—इह यन्नियतं वस्त्वस्ति तदेव तत्त्वं भवितुमर्हति, हेतवस्तु क्वचिद्वस्तुनि साध्ये हेतवः क्वचिदहेतव इत्यनियतास्त इति । अथ 'छलम्' अर्थविघातोऽर्थविकल्पोपपत्त्येति, तत्रार्थविशेषे विवक्षितेऽभिहिते वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलं, यथा नवकम्बलोऽयं देवदत्तः, अत्र च नवः कम्बलोऽस्येति वक्तुरभिप्रायो विग्रहे च विशेषो न समासे, तत्रायं छलवादी नव कम्बला अस्येत्येतद्भवताऽभिहितमिति कल्पयति, न चायं तथेत्येवं प्रतिषेधयति, तत्र छलमित्यसदर्थाभिधानं, तद्यदि छलं न तर्हि तत्त्वं, तत्त्वं चेन्न तर्हि छलं, परमार्थरूपत्वात्तत्त्वस्येति, तदेवं छलं तत्त्वमित्यतिरिक्ता वाचोयुक्तिः । दूषणाभासास्तु जातयः, तत्र सम्यग्दूषणस्यापि न तत्त्वव्यवस्थितिः, अनियतत्वात्, अनियतत्वं च यदेवैकस्मिन् सम्यग्दूषणं तदेवान्यत्र दूषणाभासं, पुरुषशक्त्यपेक्षत्वाच्च दूषणदूषणाभासव्यवस्थितेरनियतत्वमिति कुतः पुनर्दूषणाभासरूपाणां जातीनाम् ?, अवास्तवत्वात्तासामिति । वादकाले वादी प्रतिवादी वा येन निगृह्यते तन्निग्रहस्थानं, तच्च वादिनोऽसाधनाङ्गवचनं प्रतिवादिनस्तदोषोद्भावनं विहाय यदन्यदभिधीयते नैयायिकैस्तत्प्रलापमात्रमिति, तच्च प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोध इत्यादिकम्, एतच्च विचार्यमाणं न निग्रहस्थानं भवितुमर्हति, भवदपि च पुरुषस्यैवापराधं कर्तुमलं, न त्वेतत्तत्त्वं भवितुमर्हति, वक्तृगुणदोषौ हि परार्थेऽनुमानेऽधिक्रियेते न तु तत्त्वमिति, तदेवं न नैयायिकोक्तं तत्त्वं तत्त्वेनाश्रयितुं युज्यते, तस्मोक्तनीत्या सदोषत्वादिति ॥ नापि वैशेषिकोक्तं तत्त्वमिति, तथाहि–द्रव्यगुणकर्मसामान्यविशेषसमवायास्तत्त्वमिति, तत्र पृथिव्यप्तेजोवायुराकाशं कालो दिगात्मा मन इति नव द्रव्याणि, तदत्र पृथिव्यप्तेजोवायूनां पृथग्द्रव्यत्वमनुपपन्नं, तथाहि—त एव परमाणवः प्रयोगविस्रसा-

१२ समवसरणाध्ययनं नैयायिकतत्त्वनिरासः

॥२२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्यां पृथिव्यादित्वेन परिणमन्तोऽपि न स्वकीयं द्रव्यत्वं त्यजन्ति, न चावस्थाभेदेन द्रव्यभेदो युक्तः, अतिप्रसङ्ग इति । आकाशकालयोश्चास्माभिरपि द्रव्यत्वमभ्युपगतमेव, दिशस्त्वाकाशावयवभूताया अनुपपन्नं पृथग्द्रव्यत्वमतिप्रसङ्गदोषादेव, आत्मनश्च स्वशरीरमात्रव्यापिन उपयोगलक्षणस्याभ्युपगतमेव द्रव्यत्वमिति, मनसश्च पुद्गलविशेषतया पुद्गलद्रव्येऽन्तर्भाव इति [परमाणुवत्], भावमनसश्च जीवगुणत्वादात्मन्यन्तर्भाव इति । यदपि तैरभिधीयते, यथा पृथिवीत्वयोगात्पृथिवीति, तदपि स्वप्रक्रियामात्रमेव, यतो न हि पृथिव्याः पृथग्भूतं पृथिवीत्वमपि येन तद्योगात्पृथिवी भवेद्, अपितु सर्वमपि यदस्ति तत्सामान्यविशेषात्मकं नरसिंहाकारमुभयस्वभावमिति, तथा चोक्तम्—"नान्वयः स हि भेदत्वान्न भेदोऽन्वयवृत्तितः । मृद्भेदद्वयसंसर्गवृत्तिजा (र्जा) त्यन्तरं घटः ॥ १ ॥" तथा—"न नरः सिंहरूपत्वान्न सिंहो नररूपतः । शब्दविज्ञानकार्याणां, भेदाज्ज्ञात्यन्तरं हि सः ॥ १ ॥" इत्यादि । अथ रूपरसगन्धस्पर्शा रूपिद्रव्यवृत्तेर्विशेषगुणाः, तथा सङ्ख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे इत्येते सामान्यगुणाः सर्वद्रव्यवृत्तित्वात्, तथा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा आत्मगुणाः, गुरुत्वं पृथिव्युदकयोर्द्रवत्वं पृथिव्युदकाग्निषु स्नेहोऽम्भस्येव वेगाख्यः संस्कारो मूर्तद्रव्येष्वेव आकाशगुणः शब्द इति । तत्र सङ्ख्यादयः सामान्यगुणा रूपादिवद्द्रव्यस्वभा(वाभा)वत्वेन परोपाधिकत्वाद्गुणा एव न भवन्ति, अथापि स्युस्तथापि न गुणानां पृथक्त्वव्यवस्था, तत्पृथक्त्वभावे द्रव्यस्वरूपहानेः 'गुणपर्यायवद् द्रव्य'(तत्त्वा०अ०५ सू०)मितिकृत्वा अतो नान्तरीयकतया द्रव्यग्रहणेनैव ग्रहणं न्याय्यमिति न पृथग्भावः । किञ्च—तस्य भावस्तत्त्वमित्युच्यते, भावप्रत्ययश्च यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने 'त्वतलौ' वित्यनेन भवति, तत्र घटो रक्त उदकस्याहारको जलवान् सँवैरेव घट उच्यते, अत्र च घटस्य भावो घटत्वं रक्तस्य भावो रक्तत्वं आहारकस्य भाव आहारकत्वं जलवतो भावो जलवत्त्वमित्यत्र घटसामान्यरक्तगुणक्रियाद्रव्यसंबन्धरूपाणां गुणानां सद्भावाद् द्रव्ये पृथुबुध्नाकार उदकाद्याहरणक्षम कुटकाख्ये शब्दस्य घटादेरभिनिवेशस्तत्र त्वतलौ, इह च रक्ताख्यः को गुणो? यत् सद्भावात्, कतरच्च तद् द्रव्यं यत्र शब्दनिवेशो येन भावप्रत्ययः स्यादिति? । किमिदानीं रक्तस्य भावो रक्तत्वमिति न भवितव्यं?, भवितव्यमुपचारेण, तथाहि—रक्त इत्येतद्रव्यत्वेनोपचर्य तस्य सामान्यं भाव इति रक्तत्वमिति, न चोपचारस्तत्त्वचिन्तायामुपयुज्यते, शब्दसिद्धावेव तस्य कृतार्थत्वादिति । शब्दश्चाकाशस्य गुण एव न भवति, तस्य पौद्गलिकत्वाद्, आकाशस्य चामूर्तत्वादिति । शेषं तु प्रक्रियामात्रं न साधनदूषणयोरङ्गम् । क्रियाऽपि द्रव्यसमवायिनी गुणवत्पृथगाश्रयितुं न युक्तेति । अथ सामान्यं, तद्विधा—परमपरं च, तत्र परं महासत्ताख्यं द्रव्यादिपदार्थव्यापि, तथाचोक्तम्—"सदिति यतो द्रव्यगुणकर्मसु सा सत्ता" अपरं च द्रव्यत्वगुणत्वकर्मत्वात्मकं, तत्र न तावन्महासत्तायाः पृथक्पदार्थता युज्यते, यतस्तस्यां यः सदिति प्रत्ययः स किमपरसत्तानिबन्धन उत स्वत एव?, तत् यद्यपरसत्तानिबन्धनस्तत्राप्यपरमेव विकल्पोऽतोऽनवस्था, अथ स्वत एव ततस्तद्वद् द्रव्यादिष्वपि स्वत एव सत्प्रत्ययो भविष्यतीति किमपरसत्तयाऽऽगलस्तनकल्पया विकल्पितया?, किञ्च—द्रव्यादीनां किं सतां सत्तया सत्प्रत्यय उतासतां?, तत् यदि सतां स्वत एव सत्प्रत्ययो भविष्यति किं तया?, असत्पक्षे तु शशविषाणादिष्वपि सत्तायोगात्सत्प्रत्ययः स्यादिति, तथा चोक्तम्—"स्वतोऽर्थाः सन्तु सत्तावत्सत्तया किं सदात्मनाम्? । असदात्मसु नैषा स्यात्सर्वथाऽतिप्रसङ्गतः ॥ १ ॥" इत्यादि । एतदेव दूषणमपरसामान्येऽप्यायोज्यं, तुल्ययोगक्षेमत्वात् । किञ्च—अस्माभिरपि सामान्यविशेषरूपत्वाद्वस्तुनः कथञ्चित्तदिष्यत एवेति, तस्य च

१ समानस्वभावो भावः । २ गुणस्य पदार्थस्वरूपत्वान्न पृथक्पदार्थता । ३ द्रव्यादिभिन्नया ।

कथञ्चित्तदव्यतिरेकाद् द्रव्यग्रहणेनैव ग्रहणमिति । अथ विशेषाः, ते चात्यन्तव्यावृत्तिबुद्धिहेतुत्वेन परैराश्रीयन्ते, तत्रेदं चिन्त्यते—या तेषु विशेषबुद्धिः सा नापरविशेषहेतुकाऽऽश्रयितव्या, अनवस्थाभयात्, स्वतः समाश्रयणे च तद्वद् द्रव्यादिष्वपि विशेषबुद्धिः स्यात्किं द्रव्यादिव्यतिरिक्तैर्विशेषैरिति?, द्रव्याव्यतिरिक्तास्तु विशेषा अस्माभिरप्याश्रीयन्ते, सर्वेषु सामान्यविशेषात्मकत्वादिति । एतत्तु प्रक्रियामात्रं, तद्यथा—नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः, नित्यद्रव्याणि च चतुर्विधाः परमाणवो मुक्तात्मानो मुक्तमनांसि च, इति निर्युक्तिकत्वादपकर्णयितव्यमिति । समवायस्तु—अयुतसिद्धानामाधाराधेयभूतानां य इह प्रत्ययहेतुः स समवाय इत्युच्यते, असावपि नित्यश्चैकश्चाश्रीयते, तस्य च नित्यत्वात्समवायिनोऽपि नित्या आपद्येरन्, तदनित्यत्वे च तस्याप्यनित्यत्वापत्तिः, तदाधाररूपत्वाच्चस्य, तदेकत्वाच्च सर्वेषां समवायिनामेकत्वापत्तिः, तस्य चानेकत्वमिति । किञ्च—अयं समवायः संबन्धः, तस्य च द्विष्ठत्वाद् युतसिद्धत्वमेव दण्डदण्डिनोरिव, वीरणानां च कटोत्पत्तौ तद्रूपतया विनाशः कटरूपतयोत्पत्तिरन्वयरूपतया व्यवस्थानमिति दुग्धदध्नोरिवेत्येवं वैशेषिकमतेऽपि न सम्यक् पदार्थावस्थितिरिति ॥ साम्प्रतं साङ्ख्यदर्शने तत्त्वनिरूपणं प्रक्रम्यते—तत्र प्रकृत्यात्मसंयोगात्सृष्टिरुपजायते, प्रकृतिश्च सत्त्वरजस्तमसां साम्यावस्था ततो महान् महतोऽहङ्कारः अहङ्कारादेकादशेन्द्रियाणि पञ्चतन्मात्राणि तन्मात्रेभ्यः पञ्च भूतानीति, चैतन्यं पुरुषस्य स्वरूपं, स चाकर्ता निर्गुणो भोक्तेति । तत्र परस्परविरुद्धानां सत्त्वादीनां गुणानां प्रकृत्यात्मनां नियामकं गुणिनमन्तरेणैकत्रावस्थानं न युज्यते, कृष्णसितादिगुणैनाभिव, न च महदादिवि-

१ वक्ष्यमाणं । २ एतद्विरूपणं । ३ अपरविशेषभावयोर्दोषात् । ४ युगपद्योर्मिश्रत्वेन । ५ पृथग्भूता वर्णा आत्माः, वर्णमयानि द्रव्याणि, तेषां गुणानां वा स्वयं द्रव्यान्तरेण यथा नावस्थानं विरुद्धानां ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारे जन्ये प्रकृतिवैषम्योत्पादने कश्चिद्धेतुः, तव्यतिरिक्तवस्त्वन्तरानभ्युपगमाद्, आत्मनश्चाकर्तृत्वेनाकिञ्चित्करत्वात्, स्वभाववैषम्याभ्युपगमे तु निर्हेतुकतापत्तेर्नित्यं सत्त्वमसत्त्वं वा स्यादिति, उक्तं च—"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां, कादाचित्कत्वसंभवः ॥ १ ॥" अपिच—महदहङ्कारौ संवेदनादभिन्नौ पश्यामः, तथाहि—बुद्धिरध्यवसायोऽहङ्कारश्चाहं सुख्यहं दुःखीत्येवमात्मकः प्रत्ययः, तयोश्चिद्रूपतयाऽऽत्मगुणत्वं, न जडरूपायाः प्रकृतेर्विकारावेतावितिः । अपिच—येयं तन्मात्रेभ्यो भूतोत्पत्तिरिष्यते, तद्यथा—गन्धतन्मात्रात्पृथिवी रसतन्मात्रादापः रूपतन्मात्रात्तेजः स्पर्शतन्मात्राद्वायुः शब्दतन्मात्रादाकाशमिति, साऽपि न युक्तिक्षमा, यतो यदि बाह्यभूताश्रयेणैतदभिधीयते, तदयुक्तं, तेषां सर्वदा भावात्, न कदाचिदनीदृशं जगदितिकृत्वा, अथ प्रतिशरीराश्रयणादेतदुच्यते, तत्र किल त्वगस्थि कठिनलक्षणा पृथ्वी श्लेष्मासृग् द्रवलक्षणा आपः पक्तिलक्षणं तेजः प्राणापानलक्षणो वायुः शुषिरलक्षणमाकाशमिति, तदपि न युज्यते, यतोऽत्रापि केषाञ्चिच्छरीराणां शुक्रासृक्प्रभवोत्पत्तिः, न तत्र तन्मात्राणां गन्धोऽपि समुपलक्ष्यते, अदृष्टेरपि कारणत्वकल्पनेऽतिप्रसङ्गः स्यात्, अण्डजोद्भिज्जाङ्कुरादीनामप्यन्यत एवोत्पत्तिर्भवन्ती समुपलक्ष्यते, तदेवं व्यवस्थिते प्रधानमहदहङ्कारादिकोत्पत्तिर्या सांख्यैः स्वप्रक्रिययाऽऽभ्युपगम्यते तत्तैर्निर्युक्तिकमेव स्वदर्शनानुरागेणाभ्युपगम्यत इति । आत्मनश्चाकर्तृत्वाभ्युपगमे कृतनाशोऽकृतागमश्च स्यात् बन्धमोक्षाभावश्च, निर्गुणत्वे च ज्ञानशून्यतापत्तिरित्यतो बालप्रलापमात्रं, प्रकृतेश्चाचेतनाया आत्मार्थं प्रवृत्तिर्युक्तिविकलेति । अथ बौद्धमतं निरूप्यते—तत्र हि पदार्था द्वादशायतनानि, तद्यथा—चक्षुरादीनि पञ्च रूपादयश्च विषयाः पञ्च शब्दार्यतनं धर्मायतनं च, धर्माः—सुखादयो

१ वैधर्म्या० प्र० । २ गन्धः संबन्धलेशयोः । ३ तन्मात्रापञ्चकस्य । ४ मानसमिति शब्दान्तरं, तस्य शब्दमयविचारात्मकत्वात् ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२२९॥

द्वादशायतनपरिच्छेदके प्रत्यक्षानुमाने द्वे एव प्रमाणे, तत्र चक्षुरादी(दि)न्द्रियाण्यजीवग्रहणेनैवोपात्तानि, भावेन्द्रियाणि तु जीवग्रहणेनेति, रूपादयश्च विषया अजीवोपादानेनोपात्ता न पृथगुपादातव्याः, शब्दायतनं तु पौद्गलिकत्वाच्छब्दस्याजीवग्रहणेन गृहीतं, न च प्रतिव्यक्ति पृथक्पदार्थता युक्तिसंगतेति, धर्मात्मकं सुखं दुःखं च यद्यसा(तासा)तोदयरूपं ततो जीवगुणत्वाज्जीवेऽन्तर्भावः, अथ तत्कारणं कर्म ततः पौद्गलिकत्वादजीव इति । प्रत्यक्षं च तैर्निर्विकल्पकमिष्यते, तच्चानिश्चयात्मकतया प्रवृत्तिनिवृत्त्योरनङ्गमित्यप्रमाणमेव, तदप्रामाण्ये तत्पूर्वकत्वादनुमानमपीति, क्षेपस्त्वाक्षेपपरिहारोऽन्यत्र सुविचारित इति नेह प्रतन्यत इत्यनया दिशा मीमांसकलोकायतमताभिहिततत्त्वनिराकरणं स्वधुक्त्या विधेयं, तयोरत्यन्तलोकविरुद्धपदार्थानां श्रयणान्न साक्षादुपन्यासः कृत इति । तस्मात्पारिशेष्यसिद्धा अर्हदुक्ता नव सप्त वा पदार्थाः सत्याः तत्परिज्ञानं च क्रियावादे हेतुः नापरपदार्थपरिज्ञानमिति ॥ २१ ॥ साम्प्रतमध्ययनार्थमुपसंजिहीर्षुः सम्यग्वादपरिज्ञानफलमादर्शयन्नाह—'शब्देषु' वेणुवीणादिषु श्रुतिसुखदेषु 'रूपेषु च' नयनानन्दकारिषु 'आसङ्गमकुर्वन्' गार्ध्यमकुर्वाणः, अनेन रागो गृहीतः, तथा 'गन्धेषु' कुथितकलेवरादिषु 'रसेषु च' अन्तप्रान्ताशनादिषु अदुष्यमाणोऽमनोज्ञेषु द्वेषमकुर्वन्, इदमुक्तं भवति—शब्दादिष्विन्द्रियविषयेषु मनोज्ञेतरेषु रागद्वेषाभ्यामनपदिश्यमानो 'जीवितम्' असंयमजीवितं नाभिकाङ्क्षेत्, नापि परीषहोपसर्गैरभिद्रुतो मरणमभिकाङ्क्षेत्, यदिवा जीवितमरणयोरनभिलाषी संयममनुपालयेदिति । तथा मोक्षार्थिनाऽऽदीयते गृह्यत इत्यादानं—संयमस्तेन तस्मिन्वा सति गुप्तो, यदिवा—मिथ्यात्वादिनाऽऽदीयते इत्यादानम्—अष्टप्रकारं कर्म तस्मिन्नादातव्ये मनोवाक्कायैर्गुप्तः समितश्च, तथा भाववलयं—माया तया विमुक्तो मायामुक्तः । इतिः परिसमाप्त्यर्थे । ब्रवीमीति पूर्ववत् । नयाः पूर्ववदेव ॥२२॥ समाप्तं समवसरणाख्यं द्वादशमध्ययनमिति ॥

१२ समवसरणाध्व०

॥२२९॥

अथ त्रयोदशं श्रीयाथातथ्याध्ययनं प्रारभ्यते ॥

समाप्तं समवसरणाख्यं द्वादशमध्ययनं, तदनन्तरं त्रयोदशमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने परवादिमतानि निरूपितानि तन्निराकरणं चाकारि, तच्च याथातथ्येन भवति, तदिह प्रतिपाद्यते इत्यनेन संबन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तत्राप्युपक्रमद्वारान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—शिष्यगुणदीपना, अन्यच्च—अनन्तराध्ययनेषु धर्मसमाधिमार्गसमवसरणाख्येषु यदवितथं याथातथ्येन व्यवस्थितं यच्च विपरीतं वितथं तदपि लेशतोऽत्र प्रतिपादयिष्यत इति । नामनिष्पन्ने तु निक्षेपे याथातथ्यमिति नाम, तदधिकृत्य निर्युक्तिकृदाह—

णामतहं ठवणतहं दव्वतहं चेव होइ भावतहं । दव्वतहं पुण जो जस्स सभावो होति दव्वस्स ॥ १२२ ॥
भावतहं पुण नियमा णायव्वं छव्विहंमि भावंमि । अहवाऽवि नाणदंसणचरित्तविणएण अज्झप्पे ॥ १२३ ॥
जह सुत्तं तह अत्थो चरणं चारो तहत्ति णायव्वं । संतंमि [य] पसंसाए असती पगयं दुगुंछाए ॥ १२४ ॥
आयरियपरंपरएण आगयं जो उ छेयबुद्धीए । कोवेइ छेयवाई जमालिनासं स णासिहिति ॥ १२५ ॥
ण करेति दुक्खमोक्खं उज्जममाणोऽवि संजमतवेसुं । तम्हा अणुकरिसो वज्जेअव्वो जतिजणेणं ॥ १२६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्याध्ययनस्य याथातथ्यमिति नाम, तच्च यथातथाशब्दस्य भावप्रत्ययान्तस्य भवति, तत्र यथाशब्दोल्लङ्घनेन तथाशब्दस्य निक्षेपं कर्तुर्निर्युक्तिकारस्यायमभिप्रायः—इह यथाशब्दोऽयमनुवादे वर्तते, तथाशब्दश्च विधेयार्थे, तद्यथा—यथैवेदं व्यवस्थितं तथैवेदं भवता विधेयमिति, अनुवादविधेययोश्च विधेयांश एव प्रधानभावमनुभवतीति, यदिवा—याथातथ्यमिति तथ्यमतस्तदेव निरूप्यत इति। तत्र तथाभावस्तथ्यं—यथावस्थितवस्तुता, तन्नामादि चतुर्धा, तत्र नामस्थापने सुगमे, द्रव्यतथ्यं गाथापश्चार्धेन प्रतिपादयति, तत्र द्रव्यतथ्यं पुनर्यो 'यस्य' सचित्तादेः स्वभावो द्रव्यप्राधान्याद्यद्यस्य स्वरूपं, तद्यथा—उपयोगलक्षणो जीवः कठिनलक्षणा पृथिवी द्रवलक्षणा आप इत्यादि, मनुष्यादेर्वा यो यस्य मार्दवादिः स्वभावोऽचित्तद्रव्याणां च गोशीर्षचन्दनकम्बलरत्नादीनां द्रव्याणां स्वभावः, तद्यथा—उण्हे करेइ सीयं सीए उण्हत्तणं पुण करेइ। कंबलरयणादीणं एस सहावो मुणेयव्वो ॥ १ ॥ भावतथ्यमधिकृत्याह—भावतथ्यं पुनः 'नियमतः' अवश्यंभावतया षड्विधे औदयिकादिके भावे ज्ञातव्यं, तत्र कर्मणामुदयेन निर्वृत्त औदयिकः—कर्मोदयापादितो गत्याद्यनुभवलक्षणः, तथा कर्मोपशमेन निर्वृत्त औपशमिकः—कर्मानुदयलक्षण इत्यर्थः, तथा क्षयाज्जातः क्षायिकः—अप्रतिपातिज्ञानदर्शनचारित्रलक्षणः, तथा क्षयादुपशमाच्च जातः क्षायोपशमिको—देशोदयोपशमलक्षणः, परिणामेन निर्वृत्तः पारिणामिको—जीवाजीवभव्यत्वादिलक्षणः, पञ्चानामपि भावानां द्विकादिसंयोगान्निष्पन्नः सान्निपातिक इति। यदिवा—'अध्यात्मनि' आन्तरं चतुर्धा भावतथ्यं द्रष्टव्यं, तद्यथा—ज्ञानदर्शनचारित्रविनयतथ्यमिति, तत्र ज्ञानतथ्यं मत्यादिकेन ज्ञानपञ्चकेन यथास्थमवितथो विषयोपलम्भः दर्शनतथ्यं शङ्कायतिचाररहितं जीवा-

१ उष्णे कुर्वन्ति शीतं शीते उष्णत्वं पुनः कुर्वन्ति। कम्बलरत्नादीनां एष स्वभावो ज्ञातव्यः ॥ २ ज्ञानाद्यनुगतत्वान्न वीर्यादेः पृथगुपादानं।

दितत्त्वश्रद्धानं चारित्रतथ्यं तु तपसि द्वादशविधे संयमे सप्तदशविधे सम्यगनुष्ठानं, विनयतथ्यं द्विचत्वारिंशद्भेदभिन्ने विनये ज्ञानदर्शनचारित्रतपऔपचारिकरूपे यथायोगमनुष्ठानं, ज्ञानादीनां तु वितथाऽऽसेवनेनानातथ्यमिति। अत्र च भावतथ्येनाधिकारः, यदिवा भावतथ्यं प्रशस्ताप्रशस्तभेदाद्विधा, तदिह प्रशस्तेनाधिकारं दर्शयितुमाह—'यथा' येन प्रकारेण यथा पद्धत्या सूत्रं व्यवस्थितं 'तथा' तेनैव प्रकारेण 'अर्थो' व्याख्येयोऽनुष्ठेयश्च, एतद्दर्शयति—'चरणम्' आचरणमनुष्ठातव्यं, यदिवा सिद्धान्तसूत्रस्य चारित्रमेवाचरणम् अतो यथा सूत्रं तथा चारित्रमेतदेव चानुष्ठेयमेतच्च याथातथ्यमिति ज्ञातव्यं। पूर्वार्धस्यैव भावार्थं गाथापश्चार्धेन दर्शयितुमाह—यद्वस्तुजातं 'प्रकृतं' प्रस्तुतं यमर्थमधिकृत्य सूत्रमकारि तस्मिन्नर्थे 'सति' विद्यमाने यथावद्व्याख्यायमाने संसारोत्तारणकारणत्वेन प्रशस्यमाने वा याथातथ्यमिति भवति, विवक्षिते त्वर्थे 'असति' अविद्यमाने संसारकारणत्वेन वा जुगुप्सायां सत्यां सम्यगननुष्ठीयमाने वा याथातथ्यं न भवति, इदमुक्तं भवति—यदि [यथा] सूत्रं येन प्रकारेण व्यवस्थितं तथैवार्थो यदि भवति व्याख्यायतेऽनुष्ठीयते च संसारनिस्तरणसमर्थश्च भवति ततो याथातथ्यमिति भवति, असति त्वर्थेऽक्रियमाणे च संसारकारणत्वेन जुगुप्सिते वा न भवति याथातथ्यमिति गाथातात्पर्यार्थः ॥ एतदेव दृष्टान्तगर्भं दर्शयितुमाह—आचार्याः—सुधर्मस्वामिजम्बूनामप्रभवार्यरक्षिताद्यास्तेषां प्रणालिका—पारम्पर्यं तेनागतं यद्व्याख्यानं—सूत्राभिप्रायः, तद्यथा—व्यवहारनयाभिप्रायेण क्रियमाणमपि कृतं भवति, यस्तु कुतर्कदर्पाध्मातमानसो मिथ्यात्वोपहतदृष्टितया 'छेकबुद्ध्या' निपुणबुद्ध्या कुशाग्रीयशेमुषीकोऽहमि-

१ ज्ञानेऽर्थो दर्शने चारित्रे च तपसि विनयस्य विधेयत्वादेकादश औपचारिके सप्तभेदरूपे यद्वा क्रमेण पञ्चकसप्तदशद्वादशसप्तभेदरूपे।

तिकुला 'कोपयति' दूषयति—अन्यथा तमर्थं सर्वज्ञप्रणीतमपि व्याचष्टे—कृतं कृतमित्येवं ब्रूयात्, वक्ति च—न हि मृत्पिण्डक्रियाकाल एव घटो निष्पद्यते, कर्मगुणव्यपदेशानामनुपलब्धेः, स एवं 'छेकवादी' निपुणोऽहमित्येवंवादी पण्डिताभिमानी 'जमालिनाशं' जमालिनिह्नववत् सर्वज्ञमतविकोपको 'विनङ्क्ष्यति' अरहट्टघटीयन्त्रन्यायेन संसारचक्रवाले चंक्रमिष्यतीति, न चासौ जानाति बराको यथा अयं लोको घटार्थाः क्रिया मृत्खननाद्या घट एवोपचरति, (तत्त्वतः) तासां च क्रियाणां क्रियाकालनिष्ठाकालयोरेककाललात् क्रियमाणमेव कृतं भवति, दृश्यते चायं व्यवहारो लोके, तद्यथा—अद्यैव देवदत्ते निर्गते कान्यकुब्जं देवदत्तो गत इति व्यपदेशः, (लोकोक्त्या) तथा दारूणि छिद्यमाने प्रस्थकोऽयं (इति) व्यपदेश इत्यादि। साम्प्रतमन्यथावादिनोऽपायदर्शनद्वारेणोपदेशं दातुकाम आह—यो हि दुर्गृहीतविद्यालवदर्पाध्मातः सर्वज्ञवचनैकदेशमप्यन्यथा व्याचष्टे स एवंभूतः सन् संयमतपस्सूद्यमं कुर्वाणोऽपि शारीरमानसानां दुःखानामसातोदयजनितानां मोक्षं—विनाशं न करोति आत्मगर्वाध्मातमानसो, यत एवं तस्मादात्मोत्कर्षः—अहमेव सिद्धान्तार्थवेदी नापरः कश्चित् मत्तुल्योऽस्तीत्येवंरूपोऽभिमानो वर्जनीयः—त्याज्यो 'यतिजनेन' साधुलोकेन, अपरोऽपि ज्ञानिना जात्यादिको मदो न विधेयः किं पुनर्ज्ञानमदः ?, तथा चोक्तम्—"ज्ञानं मददर्पहरं मादयति यस्तेन तस्य को वैद्यः ?। अगदो यस्य विषायति तस्य चिकित्सा कथं क्रियते ? ॥ १ ॥" गतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्य निक्षेपस्यावसरः, स च सूत्रे सति भवति, सूत्रं च सूत्रानुगमे, स चावसरप्राप्तः अतः सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहत्तहीयं तु पवेयइस्सं, नाणप्पकारं पुरिसस्स जातं। सओ अ धम्मं असओ असीलं, संतिं असंतिं करिस्सामि पाउं ॥ १ ॥ अहो य राओ अ समुट्ठिएहिं, तहागएहिं पडिलब्भ धम्मं। समाहिमाघातमजोसयंता, सत्थारमेवं फरुसं वयंति ॥ २ ॥ विसोहियं ते अणुकाहयंते, जे आतभावेण वियागरेज्जा। अट्ठाणिए होइ बहूगुणाणं, जे णाणसंकाइ मुसं वदेज्जा ॥ ३ ॥ जे यावि पुट्ठा पलिउंचयंति, आयाणमट्ठं खलु वंचयित्ता (यन्ति)। असाहुणो ते इह साहुमाणी, मायण्णि एसंति अणंतघातं ॥ ४ ॥

अस्य चानन्तरसूत्रेण सहायं संबन्धः, तद्यथा—बलयाविमुक्तेत्यभिहितं, भाववलयं रागद्वेषौ, ताभ्यां विनिर्मुक्तस्यैव याथातथ्यं भवतीत्यनेन संबन्धेनायातस्यास्य सूत्रस्य व्याख्या प्रतन्यते—यथातथाभावो याथातथ्यं—तत्त्वं परमार्थः, तच्च परमार्थचिन्तायां सम्यग्ज्ञानादिकं, तदेव दर्शयति—'ज्ञानप्रकार'मिति प्रकारशब्द आद्यर्थे, आदिग्रहणाच्च सम्यग्दर्शनचारित्रे गृह्येते, तत्र सम्यग्दर्शनम्—औपशमिकक्षायिकक्षायोपशमिकं गृह्यते, चारित्रं तु व्रतसमितिकषायाणां धारणरक्षणनिग्रहादिकं गृह्यते, एतत्सम्यग्ज्ञानादिकं 'पुरुषस्य' जन्तोर्यज्जातम्—उत्पन्नं तदहं 'प्रवेदयिष्यामि' कथयिष्यामि, सुशब्दो विशेषणे, वितथाचारिणस्तदोषांश्चाविर्भावयिष्यामि, 'नानाप्रकारं' वा विचित्रं पुरुषस्य स्वभावम्—उच्चावचं प्रशस्ताप्रशस्तरूपं प्रवेदयिष्यामि। नाना-

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुते ॥२३२॥

प्रकारं स्वभावं फलं च पश्चार्धेन दर्शयति—'सतः' सत्पुरुषस्य शोभनस्य सदनुष्ठायिनः सम्यग्दर्शनज्ञानचारित्रवतो 'धर्मं' श्रुतचारित्राख्यं दुर्गतिगमनधरणलक्षणं वा तथा 'शीलम्' उद्युक्तविहारित्वं तथा 'शान्तिं' निर्वृतिमशेषकर्मक्षयलक्षणां 'करिस्सामि पाउ'त्ति प्रादुष्करिष्ये प्रकटयिष्यामि यथावद् उद्भावयिष्यामि, [ग्रन्थाग्रं. ७०००] तथा 'असतः' अशोभनस्य परतीर्थिकस्य गृहस्थस्य वा पार्श्वस्थादेर्वा, चशब्दसमुच्चितमधर्मं—पापं तथा 'अशीलं' कुत्सितशीलमशान्तिं च—अनिर्वाणरूपां संसृतिं प्रादुर्भावयिष्यामीति। अत्र च सतो धर्मं शीलं शान्तिं च प्रादुष्करिष्यामि, असतश्चाधर्ममशीलमशान्तिं चेत्येवं पदघटना योजनीया, अनुपात्तस्य [च] चशब्देनाक्षेपो द्रष्टव्य इति ॥ १ ॥ जन्तोर्गुणदोषरूपं नानाप्रकारं स्वभावं प्रवेदयिष्यामीत्युक्तं तद्दर्शयितुकाम आह—'अहोरात्रम्' अहर्निशं सम्यगुत्थिताः समुत्थिता सदनुष्ठानवन्तस्तेभ्यः श्रुतधरेभ्यः, तथा 'तथागतेभ्यो' वा तीर्थकृद्भ्यो 'धर्मं' श्रुतचारित्राख्यं प्रतिलभ्य—संसारनिःसरणोपायं धर्ममवाप्यापि कर्मोदयान्मन्दभाग्यतया जमालिप्रभृतय इहात्मोत्कर्षात्तीर्थकृदाद्याख्यातं 'समाधिं' सम्यग्दर्शनादिकं मोक्षपद्धतिम् 'अजोषयन्तः' असेवमानाः सम्यगकुर्वाणा निह्नवा बोटिकाश्च स्वरुचिविरचितव्याख्याप्रकारेण निर्दोषं सर्वज्ञप्रणीतं मार्गं विध्वंसयन्ति—कुमार्गं प्ररूपयन्ति, ब्रुवते च—असौ सर्वज्ञ एव न भवति यः क्रियमाणं कृतमित्यध्यक्षविरुद्धं प्ररूपयति, तथा यः पात्रादिपरिग्रहान्मोक्षमार्गमाविर्भावयति, एवं सर्वज्ञोक्तमश्रद्दधानाः श्रद्धानं कुर्वन्तोऽप्यपरे धृतिसंहननदुर्बलतया यथाऽऽरोपितं संयमभारं वोढुमसमर्थाः कथञ्चिदिदन्तोऽपरेणाचार्यादिना वत्सलतया चोदिताः सन्तस्तं 'शास्तारम्' अनुशासितारं चोदकं पुरुषं वदन्ति 'कर्कशं' निष्ठुरं प्रतीपं चोदयन्तीति ॥ २ ॥ किञ्च—विविधम्—अनेकप्र-

१ इवा० प्र० । २ आत्मनेपदमनित्यं तेन परस्मायपि सिवेः, श्वनितं चेदं धातुपारायणे जुग् दीप्तौ इत्यादौ ।

१३ याथा० तथ्याध्य०

॥२३२॥

कारं शोधितः—कुमार्गप्ररूपणापनयनद्वारेण निर्दोषतां नीतो विशोधितः सम्यग्दर्शनज्ञानचारित्राख्यो मोक्षमार्गस्तमेवंभूतं मोक्षमार्गं 'ते' स्वाग्रहग्रहग्रस्ता गोष्ठामाहिलवदनु—पश्चादाचार्यप्ररूपणातः कथयन्ति—अनुकथयन्ति। ये चैवंभूता आत्मोत्कर्षात्स्वरुचिविरचितव्याख्याप्रकारव्यामोहिता 'आत्मभावेन' स्वाभिप्रायेणाचार्यपारम्पर्येणायातमप्यर्थं व्युदस्यान्यथा 'व्याकुर्वीयुः' व्याख्यानयेयुः, ते हि गम्भीराभिप्रायं सूत्रार्थं कर्मोदयात्पूर्वापरेण यथावत्परिणामयितुमसमर्थाः पण्डितमानिन उत्सूत्रं प्रतिपादयन्ति। आत्मभावव्याकरणं च महतेऽनर्थायेति दर्शयति—'स' एवंभूतः स्वकीयाभिनिवेशाद् 'अस्थानिकः' अनाधारो बहूनां ज्ञानादिगुणानामभाजनं भवतीति, ते चामी गुणाः—"सुस्सूसइ पडिपुच्छइ सुणेइ गेण्हइ य ईहए आवि। तत्तो अपोहए वा धारेइ करेइ वा सम्मं ॥१॥" यदिवा गुरुशुश्रूषादिना सम्यग्ज्ञानावगमस्ततः सम्यगनुष्ठानमतः सकलकर्मक्षयलक्षणो मोक्ष इत्येवंभूतानां गुणानामनायतनमसौ भवति, क्वचित्पाठः—'अट्ठाणिए होंति बहूणियेस'त्ति अस्थायमर्थः—अस्थानम्—अभाजनमपात्रमसौ भवति सम्यग्ज्ञानादीनां गुणानां, किंभूतो?—बहुः—अनर्थसंपादकत्वेनासदभिनिवेशो यस्य स बहुनिवेशः, यदिवा—गुणानामस्थानिकः—अनाधारो बहूनां दोषाणां च निवेशः—स्थानम् आश्रय इति, किंभूताः पुनरेवं भवन्तीति दर्शयति—ये केचन दुर्गृहीतज्ञानलवावलेपिनो ज्ञाने—श्रुतज्ञाने शङ्का ज्ञानशङ्का तया मृषावादं वदेयुः, एतदुक्तं भवति—सर्वज्ञप्रणीते आगमे शङ्कां कुर्वन्ति, अयं तत्प्रणीत एव न भवेद् अन्यथा वाऽस्यार्थः स्यात्, यदिवा ज्ञानशङ्कया पाण्डित्याभिमानेन मृषावादं वदेयुर्यथाऽहं

१ शुश्रूषते प्रतिपृच्छति शृणोति गृह्णाति ईहते चापि। ततोऽपोहते वा धारयति करोति वा सम्यक् ॥ १ ॥ २ ज्ञानहीनत्वाविर्भावशङ्कया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्रवीमि तथैव युज्यते नान्ययेति ॥ ३ ॥ किञ्चान्यत्—ये केचनाविदितपरमार्थाः स्वल्पतया सद्भुत्सेकिनोऽपरेण पृष्टाः—कस्मादाचार्यात्सकाशादधीतं श्रुतं भवद्भिरिति, ते तु स्वकीयमाचार्यं ज्ञानावलेपेन निह्नुवाना अपरं प्रसिद्धं प्रतिपादयन्ति, यदिवा मयैवैतत्स्वत उत्प्रेक्षितमित्येवं ज्ञानावलेपात् 'पलिउंचयंति'त्ति निह्नुवते, यदिवा—सदपि प्रमादस्खलितमाचार्यादिनाऽऽलोचनादिके अवसरे पृष्टाः सन्तो मातृस्थानेनावर्णवादभयान्निह्नुवते । त एवं पलिकुञ्चिका-निह्नवं कुर्वाणा आदीयत इत्यादानं—ज्ञानादिकं मोक्षो वा तमर्थं वञ्चयन्ति- भ्रंशयन्त्यात्मनः, क्षुल्लरवधारणे वञ्चयन्त्येव । एवमनुष्ठायिनश्चासाधवस्ते परमार्थतस्तत्त्वचिन्तायाम् 'इह' अस्मिन् जगति साधुविचारे वा 'साधुमानिन' आत्मोत्कर्षात् सदनुष्ठानमानिनो मायान्वितास्ते 'एष्यन्ति' यास्यन्ति 'अनन्तशो' बहुशो 'घातं' विनाशं संसारं वा अनवदग्रं संसारकान्तारमनुपरिवर्तयिष्यन्तीति, दोषद्वयदुष्टत्वाच्चेषाम्, एक तावत्स्वयमसाधवो द्वितीयं साधुमानिनः, उक्तंच—"पावं काऊण सयं अप्पाणं सुद्धमेव वाहरइ । दुगुणं करेइ पावं बीयं बालस्स मंदयं ॥ १ ॥" तदेवमात्मोत्कर्षदोषाद्बोधिलाभमप्युपहत्यानन्तसंसारभाजो भवन्त्यसुमन्त इति स्थितम् ॥ ४ ॥ मानविपाकमुपदर्श्याधुना क्रोधादिकषायदोषप्रदुष्टावयितुमाह—

जे कोहणे होइ जगट्ठभासी, विओसियं जे उ उदीरएज्जा । अंधे व से दंडपहं गहाय, अविओसिए धासति पावकम्मी ॥ ५ ॥ जे विग्गहीए अन्नायभासी, न से समे होइ अझंझपत्ते ।

---

१ तुच्छतया । २ ज्ञातं । ३ पापं कृत्वा स्वयं आत्मानं शुद्धमेव व्याहरति द्विगुणं करोति पापं द्वितीयं बालस्य मंदत्वम् ॥ १ ॥

उ(ओ)वायकारी य हरीमणे य, एगंतदिट्ठी य अमाइरूवे ॥६॥ से पेसले सुहुमे पुरिसजाए, जच्चन्निए चेव सुउज्जुयारे । बहुंपि अणुसासिए जे तहच्चा, समे हु से होइ अझंझपत्ते ॥ ७ ॥ जे आवि अप्पं वसुमंति मत्ता, संखाय वायं अपरिक्ख कुज्जा । तवेण वाहं सहिउत्ति मत्ता, अण्णं जणं पस्सति बिंबभूयं ॥ ८ ॥

यो ह्यविदितकषायविपाकः प्रकृत्यैव क्रोधनो भवति तथा 'जगदर्थभाषी' यश्च भवति, जगत्यर्था जगदर्था ये यथा व्यवस्थिताः पदार्थास्तानाभाषितुं शीलमस्य जगदर्थभाषी, तद्यथा-ब्राह्मणं डोडमिति ब्रूयात्तथा वणिजं किराटमिति शूद्रमाभीरमिति श्वपाकं चाण्डालमित्यादि तथा काणं काणमिति तथा खञ्जं कुब्जं वडभमित्यादि तथा कुष्ठिनं क्षयिणमित्यादि यो यस्य दोषस्तं तेन खरपरुषं ब्रूयात् यः स जगदर्थभाषी, यदिवा जयार्थभाषी यथैवाऽऽत्मनो जयो भवति तथैवाविद्यमानमप्यर्थं भाषते तच्छीलश्च—येन केनचित्प्रकारेणासदर्थभाषणेनाप्यात्मनो जयमिच्छतीत्यर्थः । 'विओसियं'ति विविधमवसितं-पर्यवसितमुपशान्तं द्वन्द्वं-कलहं यः पुनरप्युदीरयेत्, एतदुक्तं भवति—कलहकारिभिर्मिथ्यादुष्कृतादिना परस्परं क्षामितेऽपि तत्तद् ब्रूयादेन पुनरपि तेषां क्रोधोदयो भवति । साम्प्रतमेतद्विपाकं दर्शयति-यथा ह्यन्धः-चक्षुर्विकलो 'दण्डपथं' गोदण्डमार्गं [लघुमार्गं] प्रमुक्तोज्ज्वलं 'गृहीत्वा' आश्रित्य व्रजन् सम्यगकोविदतया 'बाध्यते' कण्टकशर्कराद्यादिभिः पीड्यते, एवमसावपि केवलं लिङ्गधार्यनुपशान्तक्रोधः कर्कशभाष्यधिकरणोदीपकः, तथा 'अविओसिए'त्ति अनुपशान्तद्वन्द्वः पापम्-

अनार्यं कर्म-अनुष्ठानं यस्यासौ पापकर्मा धृष्यते चतुर्गतिके संसारे यातनास्थानगतः पौनःपुन्येन पीड्यत इति ॥ ५ ॥ किञ्चान्यत्-यः कश्चिदविदितपरमार्थो विग्रहो-युद्धं स विद्यते यस्यासौ विग्रहिको यद्यपि प्रत्युपेक्षणादिकाः क्रिया विधत्ते तथापि युद्धप्रियः कञ्चिद्भवति तथाऽन्याय्यं भाषितुं शीलमस्य सोऽन्याय्यभाषी यत्किञ्चनभाष्यस्थानभाषी गुर्वाद्यधिक्षेपकरो वा यश्चैवंभूतो नासौ 'समो' रक्तद्विष्टतया मध्यस्थो भवति, तथा नाप्यझञ्झां प्राप्तः-अकलहप्राप्तो वा न भवत्यमायाप्राप्तो वा, यदिवा अझञ्झाप्राप्तैः-अकलहप्राप्तैः सम्यग्दृष्टिभिरसौ समो न भवति यतः अतो नैवंविधेन भाव्यम्, अपि त्वक्रोधनेनाकर्कशभाषिणा चोपशान्तयुद्धानुदीरकेण न्याय्यभाषिणाऽझञ्झाप्राप्तेन मध्यस्थेन च भाव्यमिति । एवमनन्तरोद्दिष्टदोषवर्जी सद्युपपातकारी-आचार्यनिर्देशकारी-यथोपदेशं क्रियासु प्रवृत्तः यदिवा 'उपायकारि'त्ति सूत्रोपदेशप्रवर्तकः, तथा ह्रीः-लज्जा संयमो मूलोत्तरगुणभेदभिन्नस्तत्र मनो यस्यासौ ह्रीमनाः, यदिवा—अनाचारं कुर्वन्नाचार्यादिभ्यो लज्जते स एवमुच्यते, तथैकान्तेन तत्त्वेषु-जीवादिषु पदार्थेषु दृष्टिर्यस्यासावेकान्तदृष्टिः, पाठान्तरं वा 'एगंतसद्दि'त्ति एकान्तेन श्रद्धावान् मौनीन्द्रोक्तमार्गे एकान्तेन श्रद्धालुरित्यर्थः, चकारः पूर्वोक्तदोषविपर्यस्तगुणसमुच्चयार्थः, तद्यथा-ज्ञानापलिकुञ्चकोऽक्रोधीत्यादि तावदझञ्झाप्राप्त इति, स्वत एवाह-'अमाइरूवे'त्ति अमायिनो रूपं यस्यासावमायिरूपोऽशेषच्छद्मरहित इत्यर्थः, न गुर्वादीन् छद्मनोपचरति नाप्यन्येन केनचित्सार्धं छद्मव्यवहारं विधत्त इति ॥ ६ ॥ पुनरपि सद्गुणोत्कीर्तनायाह—यो हि कदुसंसारोद्विग्नः कथञ्चित्प्रमादस्खलिते सत्याचार्यादिना बहुपि 'अनुशास्यमानः' चोद्यमानस्तथैव—सन्मार्गानुसारिण्यचा-लेश्या चित्तवृत्तिर्यस्य स भवति तथार्चः, यश्च शिक्षां ग्राह्यमाणोऽपि तथार्चो भवति स 'पेशलो' मिष्टवाक्यो विनयादिगुणसमन्वितः 'सूक्ष्मः' सूक्ष्मदर्शित्वात्सूक्ष्मभाषि(वि)त्वाद्वा सूक्ष्मः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'स एव पुरुषजातः' स एव परमार्थतः पुरुषार्थकारी नापरो योऽन्यायुधतपस्विजनपराजितेनापि क्रोधेन जीयते, तथाऽसावेव 'जात्यन्वितः' सुकुलोत्पन्नः, सच्छीलान्वितो हि कुलीन इत्युच्यते, न सुकुलोत्पत्तिमात्रेण, तथा स एव सुष्ठु–अतिशयेन ऋजुः–संयमस्तत्करणशीलः—ऋजुकरः, यदिवा 'उजुचारे'त्ति यथोपदेशं यः प्रवर्तते न तु पुनर्वक्रतयाऽऽचार्यादिवचनं विलोमयति—प्रतिकूलयति, यश्च तथार्चः पेशलः सूक्ष्मभावी जात्यादिगुणान्वितः क्वचिदवक्रः 'समो' मध्यस्थो निन्दायां पूजायां च न रुष्यति नापि तुष्यति तथा अझंझा–अक्रोधोऽमाया वा तां प्राप्तोऽझंझाप्राप्तः, यदिवाऽझंझाप्राप्तैः–वीतरागैः 'समः' तुल्यो भवतीति ॥ ७ ॥ प्रायस्तपस्विनां ज्ञानतपोऽवलेपो भवतीत्यतस्तमधिकृत्याह—यद्यपि कश्चिल्लघुप्रकृतिरल्पतयाऽऽत्मानं वसु–द्रव्यं तच्च परमार्थचिन्तायां संयमस्तद्वन्तमात्मानं मत्वाऽहमेवात्र संयमवान् मूलोत्तरगुणानां सम्यग्विधायी नापरः कश्चिन्मत्तुल्योऽस्तीति, तथा संख्यायन्ते–परिच्छिद्यन्ते जीवादयः पदार्था येन तज्ज्ञानं संख्येत्युच्यते तद्वन्तमात्मानं मत्वा तथा सम्यक्–परमार्थमपरीक्ष्यात्मोत्कर्षवादं कुर्यात् तथा तपसा—द्वादशभेदभिन्नेनाहमेवात्र सहितो–युक्तो न मत्तुल्यो विकृष्टतपोनिष्टप्तदेहोऽस्तीत्येवं मत्ताऽऽत्मोत्कर्षाभिमानीति 'अन्यं जनं' साधुलोकं गृहस्थलोकं वा 'बिम्बभूतं' जलचन्द्रवत्तदर्थशून्यं कूटकार्षापणवद्वा लिङ्गमात्रधारिणं पुरुषाकृतिमात्रं वा 'पश्यति' अवमन्यते । तदेवं यद्यन्मदस्थानं जात्यादिकं तत्तदात्मन्येवारोप्यापरमवधूतं पश्यतीति ॥ ८ ॥ किञ्चान्यत्—

एगंतकूडेण उ से पलेइ, ण विज्जती मोणपयंसि गोत्ते । जे माणणट्ठेण विउक्कसेज्जा, वसुमन्नतरेण अबुज्झमाणे ॥ ९ ॥ जे माहणो खत्तियजायए वा, तहुग्गपुत्ते तह लेच्छई वा । जे पव्वईए परदत्तभोई, गोत्ते ण जे थब्भति (थंभभि) माणबद्धे ॥१०॥ न तस्स जाई व कुलं व ताणं, णण्णत्थ विज्जाचरणं सुचिण्णं । णिक्खम्म से सेवइऽगारिकम्मं, ण से पारए होइ विमोयणाए ॥ ११ ॥ णिक्किंचणे भिक्खु सुलूहजीवी. जे गारवं होइ सलोगगामी । आजीवमेयं तु अबुज्झमाणो, पुणो पुणो विप्परियासुवेंति ॥ १२ ॥

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥२३५॥

१३ याथातथ्याध्य०

कूटवत्कूटं यथा कूटेन मृगादिर्बद्धः परवशः सन्नेकान्तदुःखभाग्भवति एवं भावकूटेन स्नेहमयेनैकान्ततोऽसौ संसारचक्रवालं पर्येति तत्र वा प्रकर्षेण लीयते प्रलीयते–अनेकप्रकारं संसारं बंभ्रमीति, तुशब्दात्कामादिना वा मोहेन मोहितो बहुवेदने संसारे प्रलीयते, यश्चैवंभूतोऽसौ 'न विद्यते' न कदाचन संभवति मुनीनामिदं मौनं तच्च तत्पदं च मौनपदं–संयमस्तत्र मौनीन्द्रे वा पदे–सर्वज्ञप्रणीतमार्गे नासौ विद्यते, सर्वज्ञमतमेव विशिनष्टि—गां–वाचं त्रायते—अर्थाविसंवादनतः पालयतीति गोत्रं तस्मिन् समस्तागमाधारभूत इत्यर्थः, उच्चैर्गोत्रे वा वर्तमानस्तदभिमानग्रहग्रस्तो मौनीन्द्रपदे न वर्तते, यश्च माननं–पूजनं सत्कारस्तेनार्थः—प्रयोजनं तेन माननार्थेन विविधमुत्कर्षयेदात्मानं, यो हि माननार्थेन–लाभपूजासत्कारादिना मदं कुर्यान्नासौ सर्वज्ञपदे विद्यत इति पूर्वेण संबन्धः, तथा वसु—द्रव्यं तच्चेह संयमस्तमादाय तथाऽन्यतरेण ज्ञानादिना मदस्थानेन परमार्थमबुध्यमानो माद्यति ॥२३५॥ पठन्नपि सर्वशास्त्राणि तदर्थं चावगच्छन्नपि नासौ सर्वज्ञमतं परमार्थतो जानातीति ॥ ९ ॥ सर्वेषां मदस्थानानामुत्पत्तेरारभ्य जातिमदो बाह्यनिमित्तनिरपेक्षो यतो भवत्यतस्तमधिकृत्याह–यो हि जात्या ब्राह्मणो भवति क्षत्रियो वा–इक्ष्वाकुवंशादिकः, तद्भेदमेव दर्शयति—'उग्रपुत्रः' क्षत्रियविशेषजातीयः तथा 'लेच्छइ'त्ति क्षत्रियविशेष एव, तदेवमादिविशिष्टकुलोद्भूतो यथावस्थितसंसारस्वभाववेदितया यः 'प्रव्रजितः' त्यक्तराज्यादिगृहपाशबन्धनः परैर्दत्तं भोक्तुं शीलमस्य परदत्तभोजी–सम्यक्संयमानुष्ठायी 'गोत्रे' उच्चैर्गोत्रे हरिवंशस्थानीये समुत्पन्नोऽपि नैव 'स्तम्भं' गर्वमुपयायादिति, किंभूते गोत्रे ?–'अभिमानबद्धे' अभिमानास्पदे इति, एतदुक्तं भवति–विशिष्टजातीयतया सर्वलोकाभिमान्योऽपि प्रव्रजितः सन् कृतशिरस्तुण्डमुण्डनो भिक्षार्थं परगृहाण्यटन् कथं हास्यास्पदं गर्वं कुर्यादिति ?, नैवासौ मानं कुर्यादिति तात्पर्यार्थः ॥ १० ॥ न चासौ मानः क्रियमाणो गुणायेति दर्शयितुमाह—न हि 'तस्य' लघुप्रकृतेरभिमानोद्धुरस्य जातिमदः कुलमदो वा क्रियमाणः संसारे पर्यटतस्त्राणं भवति, न चाभिमानो जात्यादिक ऐहिकामुष्मिकगुणयोरुपकारीति, इह च मातृसमुत्था जातिः पितृसमुत्थं कुलम्, एतच्चोपलक्षणम्, अन्यदपि मदस्थानं न संसारत्राणायेति, यत्पुनः संसारोत्तारकलेन त्राणसमर्थं तद्दर्शयति–ज्ञानं च चरणं च ज्ञानचरणं तस्मादन्यत्र संसारोत्तारणत्राणाशा न विद्यते, एतच्च सम्यक्लोपबृंहितं सत् सुष्ठु चीर्णं सुचीर्णं संसारादुत्तारयति, 'ज्ञानक्रियाभ्यां मोक्षः' इति वचनात्, एवंभूते सत्यपि मोक्षमार्गे 'निष्क्रम्यापि' प्रव्रज्यां गृहीत्वापि कश्चिदपुष्टधर्मा संसारोन्मुखः 'सेवते' अनुतिष्ठत्यभ्यस्यति पौनःपुन्येन विधत्ते अगारिणां–गृहस्थानामङ्गं–कारणं जात्यादिकं मदस्थानं, पाठान्तरं वा 'अगारिकम्मं'ति अगारिणां कर्म–अनुष्ठानं सावद्यमारम्भं जातिमदादिकं वा सेवते, न चासावगारिकर्मणां सेवकोऽशेषकर्ममोचनाय पारगो भवति, निःशेषकर्मक्ष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यकारी न भवतीति भावः । देशमोचना तु प्रायशः सर्वेषामेवासुमता प्रतिक्षणमुपजायत इति ॥११॥ पुनरप्यभिमानदोषाविर्भावनायाह–बाह्येनार्थेन निष्किञ्चनोऽपि भिक्षणशीलो भिक्षुः–परदत्तभोजी तथा सुष्ठु रूक्षम्–अन्तप्रान्तं वल्लचणकादि तेन जीवितुं–प्राणधारणं कर्तुं शीलमस्य स सुरूक्षजीवी, एवंभूतोऽपि यः कश्चिद्दौरवप्रियो भवति तथा 'श्लोककामी' आत्मश्लाघाभिलाषी भवति, स चैवंभूतः परमार्थमबुध्यमान एतदेवाकिञ्चनत्वं सुरूक्षजीवित्वं वाऽऽत्मश्लाघातत्परतया आजीवम्—आजीविकामात्मवर्तनोपायं कुर्वाणः पुनः पुनः संसारकान्तारे विपर्यासं–जातिजरामरणरोगशोकोपद्रवमुपैति–गच्छति, तदुत्तरणायाभ्युद्यतो वा तत्रैव निमज्जतीत्ययं विपर्यास इति ॥ १२ ॥ यस्मादमी दोषाः समाधिमाख्यातमसेवमानानामाचार्यपरिभाषिणां वा तस्मादमीभिः शिष्यगुणैर्भाव्यमित्याह—

जे भासवं भिक्खु सुसाहुवादी, पडिहाणवं होइ विसारए य । आगाढपण्णे सुविभावियप्पा,
अन्नं जणं पन्नया परिहवेज्जा ॥ १३ ॥ एवं ण से होइ समाहिपत्ते, जे पन्नवं भिक्खु विउक्कसेज्जा ।
अहवाऽवि जे लाभमयावलित्ते, अन्नं जणं खिंसति बालपन्ने ॥ १४ ॥ पन्नामयं चेव तवोमयं
च, णिन्नामए गोयमयं च भिक्खू । आजीवगं चेव चउत्थमाहु, से पंडिए उत्तमपोग्गले से ॥
॥ १५ ॥ एयाइं मयाइं विगिंच धीरा, ण ताणि सेवंति सुधीरधम्मा । ते सव्वगोत्तावगया महेसी, उच्चं अगोत्तं च गतिं वयंति ॥ १६ ॥

भाषागुणदोषज्ञतया शोभनभाषायुक्तो भाषावान् 'भिक्षुः' साधुः, तथा सुष्ठु साधु–शोभनं हितं मितं प्रियं वदितुं शीलमस्येत्यसौ सुसाधुवादी, क्षीरमध्वाश्रववादीत्यर्थः तथा प्रतिभा प्रतिभानम्–औत्पत्तिक्यादिबुद्धिगुणसमन्वितत्वेनोत्पन्नप्रतिभत्वं तत्प्रतिभानं विद्यते यस्यासौ प्रतिभानवान्–अपरेणाक्षिप्तस्तदनन्तरमेवोत्तरदानसमर्थः यदिवा धर्मकथावसरे कोऽयं पुरुषः कं च देवताविशेषं प्रणतः कतरद्वा दर्शनमाश्रित इत्येवमासन्नप्रतिभतया (ज्ञेत्य) यथायोगमाचष्टे, तथा 'विशारदः' अर्थग्रहणसमर्थो बहुप्रकारार्थकथनसमर्थो वा, चशब्दाच्च श्रोत्राभिप्रायज्ञः, तथा आगाढा—अवगाढा परमार्थपर्यवसिता तत्त्वनिष्ठा प्रज्ञा–बुद्धिर्यस्यासावागाढप्रज्ञः, तथा सुष्ठु विविधं भावितो—धर्मवासनया वासित आत्मा यस्यासौ सुविभावितात्मा, तदेवमेभिः सत्यभाषादिभिर्गुणैः शोभनः साधुर्भवति, यश्चैभिरेव निर्जराहेतुभूतैरपि मदं कुर्यात्, तद्यथा—अहमेव भाषाविधिज्ञस्तथा साधुवाद्यहमेव च न मत्तुल्यः प्रतिभानवानस्ति नापि च मत्समानोऽलौकिकः लोकोत्तरशास्त्रार्थविशारदोऽवगाढप्रज्ञः सुभावितात्मेति च, एवमात्मोत्कर्षवानन्यं जनं स्वकीयया प्रज्ञया 'परिभवेत्' अवमन्येत, तथाहि–किमनेन वाक्कुण्ठेन दुर्दुरूढेन कुण्डिकाकार्पासकल्पेन खमूचिना कार्यमस्ति ? क्वचित्सभायां धर्मकथावसरे वेति, एवमात्मोत्कर्षवान् भवति, तथा चोक्तम्—"अन्यैः स्वेच्छारचितानर्थविशेषान् श्रमेण विज्ञाय । कृत्स्नं वाङ्मयमित इति खादत्यङ्गानि दर्पेण ॥ १ ॥" इत्यादि ॥ १३ ॥ साम्प्रतमेतद्दोषाभिधित्सयाऽऽह–'एवम्' अनन्तरोक्तया प्रक्रियया परपरिभवपुरःसरमात्मोत्कर्षं कुर्वन्नशेषशास्त्रार्थविशारदोऽपि तत्त्वार्थावगाढप्रज्ञोऽप्यसौ 'समाधिं' मोक्षमार्गं ज्ञानदर्शनचारित्ररूपं धर्मध्यानाख्यं वा न प्राप्तो भवति, उपर्यवासौ परमार्थोदन्वतः प्लवते, क एवंभूतो भवतीति दर्शयति–यो ह्यविदितपरमार्थतयाऽऽत्मानं सच्छ्रुतीर्कं मन्यमानः स्वप्रज्ञया भिक्षुः 'उत्कर्षेद्' गर्वं कुर्यात्, नासौ समाधिं

प्राप्तो भवतीति प्राक्तनेन संबन्धः, अन्यदपि मदस्थानमुद्घट्टयति–'अथवे'ति पक्षान्तरे, यो ह्यल्पान्तरायो लब्धिमानात्मकृते परस्मै चोपकरणादिकमुत्पादयितुमलं स लघुप्रकृतितया लाभमदावलिप्तो भवति, तदवलिप्तश्च समाधिमप्राप्तो भवति, स चैवंभूतोऽन्यं जनं कर्मोदयादलब्धिमन्तं 'खिंसइ'त्ति निन्दति परिभवति, वक्ति च–न मत्तुल्यः सर्वसाधारणशय्यासंस्तारकाद्युपकरणोत्पादको विद्यते, किमन्यैः स्वोदरभरणव्यग्रतया काकप्रायैः कृत्यमस्तीत्येवं 'बालप्रज्ञो' मूर्खप्रायोऽपरजनापवादं विदध्यादिति, ॥१४॥ तदेवं प्रज्ञामदावलेपादन्यस्मिन् जने निन्द्यमाने बालसदृशैर्भूयते यतोऽतः प्रज्ञामदो न विधेयो, न केवलमयमेव न विधेयः अन्यदपि मदस्थानं संसारजिहीर्षुणा न विधेयमिति तद्दर्शयितुमाह–प्रज्ञया–तीक्ष्णबुद्ध्या मदः प्रज्ञामदस्तं च, तपोमदं च निश्चयेन नामयेन्निर्नामयेद्–अपनयेद्, अहमेव यथाविधशास्त्रार्थस्य वेत्ता तथाऽहमेव विकृष्टतपोविधायी नापि च तपसो ग्लानिमुपगच्छामीत्येवंरूपं मदं न कुर्यात्, तथा उच्चैर्गोत्रे इक्ष्वाकुवंशहरिवंशादिके संभूतोऽहमित्येवमात्मकं गोत्रमदं च नामयेदिति । आ–समन्ताज्जीवन्त्यनेनेत्याजीवः–अर्थनिचयस्तं गच्छति–आश्रयत्यसावाजीवगः–अर्थमदस्तं च चतुर्थं नामयेत्, चशब्दाच्छेषानपि मदान्नामयेत्, तन्नामनाच्चासौ 'पण्डितः' तत्त्ववेत्ता भवति, तथाऽसावेव समस्तमदापनोदक उत्तमः पुद्गल—आत्मा भवति, प्रधानवाची वा पुद्गलशब्दः, ततश्चायमर्थः—उत्तमोत्तमो–महतोऽपि महीयान् भवतीत्यर्थः ॥ १५ ॥ साम्प्रतं मदस्थानानामकरणीयत्वमुपदर्श्योपसंजिहीर्षुराह–'एतानि' प्रज्ञादीनि मदस्थानानि संसारकारणत्वेन सम्यक् परिज्ञाय 'विगिंच'त्ति पृथक्कुर्यादात्मनोऽपनयेदितियावत्, धीः–बुद्धिस्तया राजन्त इति धीराः–विदितवेद्या नैतानि जात्यादीनि मदस्थानानि सेवन्ति–अनुतिष्ठन्ति, के एते ?–ये सद्धीरः–सुप्रतिष्ठितो धर्मः–श्रुतचारित्राख्यो येषां ते सुधीरधर्माणः, ते चैवंभूताः परित्यक्तसर्वमदस्थाना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महर्षयस्तपोविशेषशोषितकल्मषाः सर्वस्मादुच्चैर्गोत्रादेरपगता गोत्रापगताः सन्त उच्चा-मोक्षाख्यां सर्वोत्तमां वा गतिं व्रजन्ति—गच्छन्ति, चशब्दात्पञ्चमहाविमानेषु कल्पातीतेषु वा व्रजन्ति, अगोत्रोपलक्षणाच्चान्यदपि नामकर्मायुष्कादिकं तत्र न विद्यत इति द्रष्टव्यम् ॥ १६ ॥ किञ्च-

भिक्खू मुयच्चे तह दिट्ठधम्मे, गामं च णगरं च अणुप्पविस्सा । से एसणं जाणमणेसणं च, अन्नस्स पाणस्स अणाणुगिद्धे ॥ १७ ॥ अरतिं रतिं च अभिभूय भिक्खू, बहूजणे वा तह एगचारी । एगंतमोणेण वियागरेज्जा, एगस्स जंतो गतिरागती य ॥ १८ ॥ सयं समेच्चा अदुवाऽवि सोच्चा, भासेज धम्मं हिययं पयाणं । जे गरहिया सणियाणप्पओगा, ण ताणि सेवंति सुधीरधम्मा ॥१९॥ केसिंचि तक्काइ अबुज्झ भावं, खुद्दंपि गच्छेज्ज असद्दहाणे । आउस्स कालाइयारं वघाए, लद्धाणुमाणे य परेसु अट्ठे ॥ २० ॥

स एवं मदस्थानरहितो भिक्षणशीलो भिक्षुः, तं विशिनष्टि-मृतेव स्नानविलेपनादिसंस्काराभावादर्चा-तनुः शरीरं यस्य स मृतार्चः यदिवा मोदनं मुत् तद्भूता शोभनाऽर्चा—पद्मादिका लेश्या यस्य स भवति मुदर्चः-प्रशस्तलेश्यः, तथा दृष्टः—अवगतो यथावस्थितो धर्मः-श्रुतचारित्राख्यो येन स तथा, स चैवंभूतः क्वचिदवसरे ग्रामं नगरमन्यद्वा मडम्बादिकमनुप्रविश्य भिक्षार्थमसावुत्तमधृतिसंहननोपपन्नः सन्नेषणां-गवेषणग्रहणैषणादिकां 'जानन्' सम्यगवगच्छन्ननेषणां च-उद्गमदोषादिकां तत्परिहारं विपाकं च सम्यगवगच्छन् अन्नस्य पानस्य वा 'अनध्युपपन्नः' अनध्युपपन्नः सम्यग्विहरेत्, तथाहि-स्थविरकल्पिका द्विचत्वारिंशद्दोषरहितां भिक्षां गृह्णीयुः, जिनकल्पिकानां तु पञ्चस्वभिग्रहो द्वयोर्ग्रहः, ताश्चेमाः—'संसट्ठमसंसट्ठा उद्धड तह होति अप्पलेवा य । उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया ॥१॥' अथवा यो यस्याभिग्रहः सा तस्यैषणा अपरा त्वनेषणेत्येवमेषणानेषणाभिज्ञः क्वचित्प्रविष्टः सन्नाहारादावमूर्छितः सम्यक् शुद्धां भिक्षां गृह्णीयादिति ॥१७॥ तदेवं भिक्षोरनुकूलविषयोपलब्धिमतोऽप्यरक्तद्विष्टतया तथा दृष्टमप्यदृष्टं श्रुतमप्यश्रुतमित्येवंभावयुक्ततया च मृतकल्पदेहस्य सुदृष्टधर्मण एषणानेषणाभिज्ञस्यान्नपानादावमूर्छितस्य सतः क्वचिद् ग्रामनगरादौ प्रविष्टस्यासंयमे रतिररतिश्च संयमे कदाचित्प्रादुष्यात् सा चापनेतव्येत्येतदाह—महामुनेरप्यत्यन्तया मलाविलस्यान्तप्रान्तवल्लचणकादिभोजिनः कदाचित्कर्मोदयादरतिः संयमे समुत्पद्येत तां चोत्पन्नामसौ भिक्षुः संसारस्वभावं परिगणय्य तिर्यङ्नारकादिदुःखं चोत्प्रेक्षमाणः स्वल्पं च संसारिणमायुरित्येवं विचिन्त्याभिभवेद्, अभिभूय चासावेकान्तमौनेन व्यागृणीयादित्युत्तरेण संबन्धः, तथा रतिं च 'असंयमे' सावद्यानुष्ठाने अनादिभवाभ्यासादुत्पन्नामभिभवेदभिभूय च संयमोद्युक्तो भवेदिति । पुनः साधुमेव विशिनष्टि-बहवो जनाः—साधवो गच्छवासितया संयमसहाया यस्य स बहुजनः, तथैक एव चरति तच्छीलश्चैकचारी, स च प्रतिमाप्रतिपन्न एकल्लविहारी जिनकल्पादिर्वा स्यात्, स च बहुजन एकाकी वा केनचित्पृष्टोऽपृष्टो वैकान्तमौनेन—संयमेन करणभूतेन व्यागृणीयात् धर्मकथावसरे, अन्यदा संयमाबाधया किञ्चित्धर्मसंबद्धं ब्रूयात्, किं परिगणय्यैतत्कुर्यादित्याह, यदिवा किमसौ ब्रूयादिति दर्शयति-'एकस्य' असहायस्य जन्तोः शुभाशुभसहायस्य 'गतिः' गमनं परलोके भवति, तथा आगतिः-आगमनं भवान्तरादुपजायते कर्मसहायस्यैवेति, उक्तं च-"एकः प्रकुरुते कर्म, भुनक्त्येकश्च तत्फलम् । जायते म्रियते चैक, एको याति भवान्तरम् ॥ १ ॥" इत्यादि । तदेवं संसारे परमार्थतो न कश्चित्सहायो धर्ममेकं विहाय, एतद्विगणय्य मुनीनामयं मौनः—संयमस्तेन तत्प्रधानं वा ब्रूयादिति ॥ १८ ॥ किञ्चान्यत्—'स्वयम्' आत्मना परोपदेशमन्तरेण 'समेत्य' ज्ञात्वा चतुर्गतिकं संसारं तत्कारणानि च मिथ्यात्वाविरतिप्रमादकषाययोगरूपाणि तथाऽशेषकर्मक्षयलक्षणं मोक्षं तत्कारणानि च सम्यग्दर्शनज्ञानचारित्राण्येतत्सर्वं स्वत एवावबुध्यान्यस्माद्वाऽऽचार्यादेः सकाशाच्छ्रुत्वाऽन्यस्मै मुमुक्षवे 'धर्मं' श्रुतचारित्राख्यं भाषेत, किंभूतं ?-प्रजायन्त इति प्रजाः-स्थावरजङ्गमा जन्तवस्तेभ्यो हितं सदुपदेशदानतः सदोपकारिणं धर्मं ब्रूयादिति । उपादेयं प्रदर्श्य हेयं प्रदर्शयति-ये 'गर्हिता' जुगुप्सिता मिथ्यात्वाविरतिप्रमादकषाययोगाः कर्मबन्धहेतवः सह निदानेन वर्तन्त इति सनिदानाः प्रयुज्यन्त इति प्रयोगा-व्यापारा धर्मकथाप्रबन्धा वा ममास्मात्सकाशादिहिकञ्चित् पूजालाभसंस्कारादिकं भविष्यतीत्येवंभूतनिदानाऽऽशंसारूपास्तांश्चारित्रविघ्नभूतान् महर्षयः सुधीरधर्माणो 'न सेवन्ते' नानुतिष्ठन्ति । यदिवा ये गर्हिताः सनिदाना वाक्प्रयोगाः, तद्यथा-कुतीर्थिकाः सावद्यानुष्ठानरता निःशीला निर्व्रताः कुण्टलवेण्टलकारिण इत्येवंभूतान् परदोषोद्घट्टनया मर्मवेधिनः सुधीरधर्माणो वाक्कण्टकान् 'न सेवन्ते' न ब्रुवत इति ॥१९॥ किञ्चान्यत्-केषाञ्चिन्मिथ्यादृष्टीनां कुतीर्थिकभावितानां स्वदर्शनाऽऽग्रहिणां 'तर्कया' वितर्केण स्वमतिपर्यालोचनेन 'भावम्' अभिप्रायं दुष्टान्तःकरणवृत्तिमबुद्ध्वा कश्चित्साधुः श्रावको वा

१ संसृष्टाऽसंसृष्टा उद्धृता तथा भवेल्लेपेया च । उद्गृहीता प्रगृहीता उज्झितधर्मा च सप्तमिका ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वधर्मस्थापनेच्छया तीर्थिकतिरस्कारप्रायं वचो ब्रूयात्, स च तीर्थिकस्तद्वचः 'अश्रद्दधानः' अरोचयन्नप्रतिपद्यमानोऽतिकटुकं भावयन् 'क्षुद्रत्वमपि गच्छेद्' तद्विरूपमपि कुर्यात्, पालकपुरोहितवत् स्कन्दकाचार्यस्येति। क्षुद्रत्वगमनमेव दर्शयति—स निन्दावचनकुपितो वक्तुर्यदायुस्तस्यायुषो 'व्याघातरूपं' परिक्षेपस्वभावं कालातिचारं—दीर्घस्थितिकमप्यायुः संवर्तयेत्, एतदुक्तं भवति—धर्मदेशना हि पुरुषविशेषं ज्ञात्वा विधेया, तद्यथा—कोऽयं पुरुषो राजादिः? कं च देवताविशेषं नतः? कतरद्वा दर्शनमाश्रितोऽभिगृहीतोऽनभिगृहीतो वाऽयमित्येवं सम्यक् परिज्ञाय यथार्हं धर्मदेशना विधेया, यश्चैतदबुद्ध्वा किञ्चिद्धर्मदेशनाद्वारेण परविरोधकृद्वचो ब्रूयात् स परस्मादैहिकाद्यामुष्मिकयोर्मरणादिकमपकारं प्राप्नुयादिति, यत एवं ततो लब्धमनुमानं येन पराभिप्रायपरिज्ञाने स लब्धानुमानः 'परेषु' प्रतिपाद्येषु यथायोगं यथार्हप्रतिपत्त्या 'अर्थान्' सद्धर्मप्ररूपणादिकान् जीवादीन् वा स्वपरोपकाराय ब्रूयादिति ॥ २० ॥ अपि च—

कम्मं च छंदं च विगिंच धीरे, विणइज्ज उ सव्वओ(हा) आयभावं। रूवेहिं लुप्पंति भयावहेहिं, विज्जं गहाया तसथावरेहिं ॥२१॥ न पूयणं चेव सिलोयकामी, पियमप्पियं कस्सइ णो करेज्जा। सव्वे अणट्ठे परिवज्जयंते, अणाउले या अकसाइ भिक्खू ॥ २२॥ आहत्तहीयं समुपेहमाणेसव्वेहिं पाणेहिं णिहाय दंडं। णो जीवियं णो मरणाहिकंखी, परिव्वएज्जा वलयाविमुक्के [मेहावी वलयविप्पमुक्के] ॥२३॥ त्तिबेमि॥ इति श्रीआहत्तहियंनाम त्रयोदशमध्ययनं समत्तं ॥ (गाथा० ५९१)

'धीरः' अक्षोभ्यः सद्बुद्ध्यलङ्कृतो वा देशनावसरे धर्मकथाश्रोतुः 'कर्म' अनुष्ठानं गुरुलघुकर्मभावं वा तथा 'छन्दम्' अभिप्रायं सम्यक् 'विवेचयेत्' जानीयात्, ज्ञात्वा च पर्षदनुरूपामेव धर्मकथिको धर्मदेशनां कुर्यात् सर्वथा यथा तस्य श्रोतुर्जीवादिपदार्थावगमो भवति यथा च मनो न दूष्यते, अपि तु प्रसन्नतां व्रजति, एतदभिसंधिमानाह—विशेषेण नयेद्—अपनयेत् पर्षदः 'पापभावम्' अशुद्धमन्तःकरणं, तुशब्दाद्विशिष्टगुणारोपणं च कुर्यात्, 'आयभावं' ति क्वचित्पाठः, तस्यायमर्थः—'आत्मभावः' अनादिभवाभ्यस्तो मिथ्यात्वादिकस्तमपनयेत्, यदिवाऽऽत्मभावो—विषयगृध्नुताऽऽत्मकस्तमपनयेदिति। एतद्दर्शयति—'रूपैः' नयनमनोहारिभिः स्त्रीणामङ्गप्रत्यङ्गाद्येकटाक्षनिरीक्षणादिभिरल्पसत्त्वा 'विलुप्यन्ते' सद्धर्माद्ध्याध्यन्ते, किंभूते रूपैः?—'भयावहैः' भयमावहन्ति भयावहानि, इहैव तावद्रूपादिविषयासक्तस्य साधुजनजुगुप्सा नानाविधाश्च कर्णनासिकाविकर्तनादिका विडम्बनाः प्रादुर्भवन्ति जन्मान्तरे च तिर्यङ्नरकादिके यातनास्थाने प्राणिनो विषयासक्ता वेदनामनुभवन्तीत्येवं 'विद्वान्' पण्डितो धर्मदेशनाभिज्ञो गृहीत्वा पराभिप्रायं—सम्यगवगम्य पर्षदं त्रसस्थावरेभ्यो हितं धर्ममाविर्भावयेत् ॥ २१ ॥ पूजासत्कारादिनिरपेक्षेण च सर्वमेव तपश्चरणादिकं विधेयं विशेषतो धर्मदेशनेत्येतदभिप्रायवानाह—साधुर्देशनां विदधानो न पूजनं—वस्त्रपात्रादिलाभरूपमभिकाङ्क्षेन्नापि श्लोकं—श्लाघां कीर्तिम् आत्मप्रशंसां 'कामयेत्' अभिलषेत्, तथा श्रोतुर्यत्प्रियं राजकथाविकथादिकं छलितकथादिकं च तथाऽप्रियं च तत्समाश्रितदेवताविशेषनिन्दादिकं न कथयेत्, अरक्तद्विष्टतया श्रोतुरभिप्रायमभिसमीक्ष्य यथावस्थितं धर्मं सम्यग्दर्शनादिकं कथयेत्, उपसंहारमाह—'सर्वाननर्थान्' पूजासत्कारलाभाभिप्रायेण स्वकृतान् परदूषणतया च परकृतान् 'वर्जयन्' परिहरन् कथयेत् 'अनाकुलः' सूत्रार्थादनुत्तरन् अकषायी भिक्षुर्भवेदिति ॥ २२ ॥ सर्वाध्ययनोपसंहारार्थमाह—

'आहत्तहीय' मित्यादि, यथातथाभावो याथातथ्यं—धर्ममार्गसमवसरणाख्याध्ययनत्रयोक्तार्थतथ्यं सूत्रानुगतं सम्यक्त्वं चारित्रं वा तत् 'प्रेक्षमाणः' पर्यालोचयन् सूत्रार्थं सदनुष्ठानतोऽभ्यस्यन् 'सर्वेषु' स्थावरजङ्गमेषु सूक्ष्मबादरभेदभिन्नेषु पृथिवीकायादिषु दण्ड्यन्ते प्राणिनो येन स दण्डः—प्राणव्यपरोपणविधिस्तं 'निधाय' परित्यज्य, प्राणात्ययेऽपि यथातथ्यं धर्मं नोल्लङ्घयेदिति। एतदेव दर्शयति—'जीवितम्' असंयमजीवितं दीर्घायुष्कं वा स्थावरजङ्गमजन्तुदण्डेन नाभिकाङ्क्षी स्या(क्षे)त् परीषहपराजितो वेदनासमुद्घात(समव)हतो वा तद्वेदनाम(भि)सहमानो ज्वलानलसंपातापादितजन्तूपमर्देन नापि मरणाभिकाङ्क्षी स्यात्। तदेवं याथातथ्यमुत्प्रेक्षमाणः सर्वेषु प्राणिष्वपरतदण्डो जीवितमरणानपेक्षी संयमानुष्ठानं चरेद्—उद्युक्तविहारी भवेत् 'मेधावी' मर्यादाव्यवस्थितो विदितवेद्यो वा वलयेन—मायारूपेण मोहनीयकर्मणा वा विविधं प्रकर्षेण मुक्तो विप्रमुक्त इति। इतिः परिसमाप्त्यर्थे। ब्रवीमीति पूर्ववत् ॥ २३ ॥ समाप्तं च याथातथ्यं त्रयोदशमध्ययनमिति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ ग्रन्थनामकं चतुर्दशमध्ययनं प्रारभ्यते ।

उक्तं त्रयोदशमध्ययनं, साम्प्रतं चतुर्दशमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने याथातथ्यमिति सम्यक्चारित्रमभिहितं, तच्च बाह्याभ्यन्तरग्रन्थपरित्यागादवदातं भवति, तत्त्यागश्चानेनाध्ययनेन प्रतिपाद्यत इत्यनेन संबन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराण्युपक्रमादीनि भवन्ति, तत्रोपक्रमद्वारान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—सबाह्याभ्यन्तरग्रन्थपरित्यागो विधेय इति । नामनिष्पन्ने तु निक्षेपे आदानपदाद्गुणनिष्पन्नत्वाच्च ग्रन्थ इति नाम, तं ग्रन्थमधिकृत्य निर्युक्तिकृदाह—

गंथो पुव्वुद्दिट्ठो दुविहो सिस्सो य होति णायव्वो । पव्वावण सिक्खावण पगयं सिक्खावणाए उ ॥ १२७ ॥
सो सिक्खगो य दुविहो गहणे आसेवणाय णायव्वो । गहणंमि होति तिविहो सुत्ते अत्थे तदुभए य ॥ १२८ ॥
आसेवणाय दुविहो मूलगुणे चेव उत्तरगुणे य । मूलगुणे पंचविहो उत्तरगुण बारसविहो उ ॥ १२९ ॥
आयरिओऽविय दुविहो पव्वावंतो य सिक्खवंतो य । सिक्खावंतो दुविहो गहणे आसेवणे चेव ॥ १३० ॥
गाहाविंतो तिविहो सुत्ते अत्थे य तदुभए चेव । मूलगुण उत्तरगुणे दुविहो आसेवणाए उ ॥ १३१ ॥

ग्रन्थो द्रव्यभावभेदभिन्नः क्षुल्लकनैर्ग्रन्थ्यं नाम उत्तराध्ययनेष्वध्ययनं तत्र पूर्वमेव सप्रपञ्चोऽभिहितः, इह तु ग्रन्थं द्रव्यभावभेदभिन्नं यः परित्यजति शिष्य आचारादिकं वा ग्रन्थं योऽधीतेऽसौ अभिधीयते, स शिष्यो 'द्विविधो' द्विप्रकारो ज्ञातव्यो भवति, तद्यथा—प्रव्रज्यया शिक्षया च, यस्य प्रव्रज्या दीयते शिक्षां वा यो ग्राह्यते स द्विप्रकारोऽपि शिष्यः, इह [तु] पुनः शिक्षाशिष्येण 'प्रकृतम्' अधिकारो यः शिक्षां गृह्णाति शैक्षकः तच्छिक्षयेह प्रस्ताव इत्यर्थः ॥ यथाप्रतिज्ञातमधिकृत्याह—यः शिक्षां गृह्णाति शैक्षकः स द्विविधो- द्विप्रकारो भवति, तद्यथा—ग्रहणे प्रथममेवाचार्यादेः सकाशाच्छिक्षां—इच्छामिच्छातहक्कारादिरूपां गृह्णाति शिक्षति, तथा शिक्षितां चाभ्यस्यति—अहर्निशमनुतिष्ठति स एवंविधो ग्रहणासेवनाभेदभिन्नः शिष्यो ज्ञातव्यो भवति, तत्रापि ग्रहणपूर्वकमासेवनमितिकृत्वाऽऽदावेव ग्रहणशिक्षामाह—शिक्षाया 'ग्रहणे' उपादानेऽधिकृते त्रिविधो भवति शैक्षकः, तद्यथा—सूत्रेऽर्थे तदुभये च, सूत्रादीन्यादावेव गृह्णन् सूत्रादिशिक्षको भवतीति भावः ॥ साम्प्रतं ग्रहणोत्तरकालभाविनीमासेवनामधिकृत्याह- यथावस्थितसूत्रानुष्ठानमासेवना तया करणभूतया द्विविधो भवति शिक्षकः, तद्यथा—'मूलगुणे' मूलगुणविषये आसेवमानः—सम्यग्मूलगुणानामनुष्ठानं कुर्वन् तथा 'उत्तरगुणे च' उत्तरगुणविषयं सम्यगनुष्ठानं कुर्वाणो द्विरूपोऽप्यासेवनाशिक्षको भवति, तत्रापि मूलगुणे पञ्चप्रकारः—प्राणातिपातादिविरतिमासेवमानः पञ्चमहाव्रतधारणात्पञ्चविधो भवति मूलगुणेष्वासेवनाशिक्षकः, तथोत्तरगुणविषये सम्यक्पिण्डविशुद्ध्यादिकान् गुणानासेवमान उत्तरगुणासेवनाशिक्षको भवति, ते चामी उत्तरगुणाः—'पिंडस्स जा विसोही समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहावि य उत्तरगुणमो वियाणाहि ॥ १ ॥'[1] यदिवा सत्स्वप्यन्येषूत्तरगुणेषु प्रधाननिर्जराहेतुतया तप एव द्वादशविधमुत्तरगुणत्वेनाधिकृत्याह—'उत्तरगुणे' उत्तरगुणविषये तपो द्वादशभेदभिन्नं यः सम्यग् विधत्ते स आसेवनाशिक्षको भवतीति ॥ शिष्यो ह्याचार्यमन्तरेण न भवत्यत आचार्यनिरूपणमा(णाया)ह—शिष्यापेक्षया हि आचार्यो 'द्विविधो' द्विभेदः, एको यः प्रव्रज्यां ग्राहयत्यपरस्तु यः शिक्षामिति, शिक्षयन्नपि द्विविधः—एको यः शिक्षाशास्त्रं ग्राहयति—पाठयत्यपरस्तु तदर्थं दशविधचक्रवालसामाचार्यनुष्ठानतः सेवयति—सम्यगनुष्ठानं कारयति । तत्र सूत्रार्थतदुभयभेदाद् ग्राहयन्नप्याचार्यस्त्रिधा भवति । आसेवनाचार्योऽपि मूलोत्तरगुणभेदाद्द्विविधो भवति । गतो नामनिष्पन्नो निक्षेपः, तदनन्तरं कर्तव्यं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

गंथं विहाय इह सिक्खमाणो, उट्ठाय सुबंभचेरं वसेज्जा । ओवायकारी विणयं सुसिक्खे, जे छेय विप्पमायं न कुज्जा ॥ १ ॥ जहा दियापोतमपत्तजातं, सावासगा पविउं मन्नमाणं । तमचाइयं तरुणमपत्तजातं, ढंकाइ अवत्तगमं हरेज्जा ॥ २ ॥ एवं तु सेहंपि अपुट्ठधम्मं, निस्सारियं वुसिमं मन्नमाणा । दियस्स छायं व अपत्तजायं, हरिंसु णं पावधम्मा अणेगे ॥ ३ ॥ ओसाणमिच्छे मणुए समाहिं, अणोसिए णंतकरिंति णच्चा । ओभासमाणे दवियस्स वित्तं, ण णिक्कसे बहिया आसुपन्नो ॥ ४ ॥

'इह' प्रवचने ज्ञातसंसारस्वभावः सन् सम्यगुत्थानेनोत्थितो ग्रथ्यते आत्मा येन स ग्रन्थो—धनधान्यहिरण्यद्विपदचतुष्पदादि- 'विहाय' त्यक्त्वा प्रव्रजितः सन् सदुत्थानेनोत्थाय च ग्रहणरूपामासेवनारूपां च शिक्षां [च] कुर्वाणः—सम्यगासेवमानः सुष्ठु-

[1] पिण्डस्य या विशोधिः समितयो भावनास्तपो द्विविधम् । प्रतिमा अभिग्रहा अपि चोत्तरगुणा (इति) विजानीहि ॥ १ ॥ २ सत्स्वप्येते प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोभनं नवभिर्ब्रह्मचर्यगुप्तिभिर्गुप्तमाश्रित्य ब्रह्मचर्यं 'वसेत्' तिष्ठेत्, यदिवा 'सुब्रह्मचर्य'मिति संयमस्तद् आवसेत्–तं सम्यक् कुर्यात्, आचार्यान्तिके यावज्जीवं वसमानो यावद्भ्युद्यतविहारं न प्रतिपद्यते तावदाचार्यवचनस्यावपातो–निर्देशस्तत्कार्यवपातकारी–वचननिर्देशकारी सदाऽऽज्ञाविधायी, विनीयते–अपनीयते कर्म येन स विनयस्तं सुष्ठु शिक्षेद्–विदध्यात् ग्रहणासेवनाभ्यां विनयं सम्यक् परिपालयेदिति । तथा यः 'छेको' निपुणः स संयमानुष्ठाने सदाचार्योपदेशे वा विविधं प्रमादं न कुर्यात्, यथा हि आतुरः सम्यग्वैद्योपदेशं कुर्वन् श्लाघां लभते रोगोपशमं च एवं साधुरपि सावद्यग्रन्थपरिहारी पापकर्मभेषजस्थानभूतान्याचार्यवचनानि विदधदपरसाधुभ्यः साधुकारमशेषकर्मक्षयं चावाप्नोतीति ॥ १ ॥ यः पुनराचार्योपदेशमन्तरेण स्वच्छन्दतया गच्छान्निर्गत्य एकाकिविहारितां प्रतिपद्यते स च बहुदोषभाग् भवतीत्यस्यार्थस्य दृष्टान्तमाविर्भावयन्नाह–'यथे'ति दृष्टान्तोपप्रदर्शनार्थः 'यथा' येन प्रकारेण 'द्विजपोतः' पक्षिशिशुरव्यक्तः, तमेव विशिनष्टि–पतन्ति—गच्छन्ति तेनेति पत्रं–पक्षपुटं न विद्यते पत्रजातं–पक्षोद्भवो यस्यासावपत्रजातस्तं तथा स्वकीयादावासकात्–स्वनीडात् भ्रंशयितुम्–उत्पतितुं मन्यमानं तत्र तत्र पतन्तमुपलभ्य तं द्विजपोतं 'अचाइयं'ति पक्षाभावाद्गन्तुमसमर्थमपत्रजातमितिकृत्वा मांसपेशीकल्पं 'ढङ्कादयः' क्षुद्रसत्त्वाः पिशिताशिनः 'अव्यक्तगमं' गमनाभावे नंतुमसमर्थं 'हरेयुः' चञ्चादिनोत्क्षिप्य नयेयुर्व्यापादयेयुरिति ॥ २ ॥ एवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकं प्रदर्शयितुमाह—'एव' मित्युक्तप्रकारेण, तुशब्दः पूर्वस्माद्विशेषं दर्शयति, पूर्वं ह्यसंजातपक्षत्वादव्यक्तता प्रतिपादिता इह त्वपुष्टधर्मतयेत्ययं विशेषो, यथा द्विजपोतमसंजातपक्षं स्वनीडान्निर्गतं क्षुद्रसत्त्वा विनाशयन्ति एवं शिक्षकमभिनवप्रव्रजितं सूत्रार्थानिष्पन्नमगीतार्थम् 'अपुष्टधर्माणं' सम्यगपरिणतधर्मपरमार्थं सन्तमनेके पाषण्डिकाः पापधर्माणः प्रतारयन्ति, प्रतार्य च गच्छसमुद्राभिः-

॥२४२॥

सारयन्ति, निःसारितं च सन्तं विषयोन्मुखतामापादितमपगतपरलोकभयमस्माकं वश्यमित्येवं मन्यमानाः यदिवा 'बुस्सिम'न्ति चारित्रं तद् असदनुष्ठानतो निःसारं मन्यमाना अजातपक्षं 'द्विजशावमिव' पक्षिपोतमिव ढङ्कादयः पापधर्माणो मिथ्यात्वाविरतिप्रमादकषायकलुषितान्तरात्मानः कुतीर्थिकाः स्वजना राजादयो वाऽन्येके बहवो हृतवन्तो हरन्ति हरिष्यन्ति चेति, कालत्रयोपलक्षणार्थं भूतनिर्देश इति, तथाहि–पाषण्डिका एवमगीतार्थं प्रतारयन्ति, तद्यथा–युष्मदर्शने नाग्निप्रज्वालनविषापहारशिखाच्छेदादिकाः प्रत्यया दृश्यन्ते, तथाऽणिमाद्यष्टगुणमैश्वर्यं च नास्ति, तथा न राजादिभिर्बहुभिराश्रितं, याऽप्यर्हिंसोच्यते भवदागमे साऽपि जीवाकुलत्वाल्लोकस्य दुःसाध्या, नापि भवतां स्नानादिकं शौचमस्तीत्यादिकाभिः शठोक्तिभिरिन्द्रजालकल्पाभिर्मुग्धजनं प्रतारयन्ति, स्वजनादयश्चैवं विप्रलम्भयन्ति, तद्यथा–आयुष्मन् ! न भवन्तमन्तरेणास्माकं कश्चिदस्ति पोषकः पोष्यो वा, त्वमेवास्माकं सर्वस्वं, त्वया विना सर्वं शून्यमाभाति, तथा शब्दादिविषयोपभोगामन्त्रणेन सद्धर्मोच्चावयन्ति, एवं राजादयोऽपि द्रष्टव्याः, तदेवमपुष्टधर्माणमेकाकिनं बहुभिः प्रकारैः प्रतार्यापहरेयुरिति ॥ ३ ॥ तदेवमेकाकिनः साधोर्यतो बहवो दोषाः प्रादुर्भवन्ति अतः सदा गुरुपादमूले स्थातव्यमित्येतदर्शयितुमाह—'अवसानं' गुरोरन्तिके स्थानं तद्यावज्जीवं 'समाधिं' सन्मार्गानुष्ठानरूपम् 'इच्छेद्' अभिलषेत् 'मनुजो' मनुष्यः साधुरित्यर्थः, स एव च परमार्थतो मनुष्यो यो यथाप्रतिज्ञातं निर्वाहयति, तच्च सदा गुरोरन्तिके व्यवस्थितेन सदनुष्ठानरूपं समाधिमनुपालयता निर्वाह्यते नान्यथेत्येतदर्शयति—गुरोरन्तिके 'अनुषितः' अव्यवस्थितः स्वच्छन्दविधायी समाधेः सदनुष्ठानरूपस्य कर्मणो यथाप्रतिज्ञातस्य वा नान्तकरो भवतीत्येवं ज्ञात्वा सदा गुरुकुलवासोऽनुसर्तव्यः, तद्र-

१ समासाविति स्त्रीत्वेन न प्रथमा ।

हितस्य विज्ञानमुपहास्यप्रायं भवतीति, उक्तं च—"न हि भवति निर्विगोपकमनुपासितगुरुकुलस्य विज्ञानम् । प्रकटितपश्चाद्भागं पश्यत नृत्यं मयूरस्य ॥ १ ॥" तथाऽज्ञां गलविलम्बालुकां पार्ष्णिप्रहारेण प्रगुणां दृष्ट्वाऽपरोऽनुपासितगुरुरज्ञो राज्ञीं संजातगलगण्डां पार्ष्णिप्रहारेण व्यापादितवान्, इत्यादयः अनुपासितगुरोर्बहवो दोषाः संसारवर्धनाद्या भवन्तीत्यवगम्यानया मर्यादया गुरोरन्तिके स्थातव्यमिति दर्शयति—'अवभासयन्' उद्भासयन् सम्यगनुतिष्ठन् 'द्रव्यस्य' मुक्तिगमनयोग्यस्य सत्साधो रागद्वेषरहितस्य सर्वज्ञस्य वा वृत्तम्–अनुष्ठानं तत्सदनुष्ठानतोऽवभासयेद्, धर्मकथिकः कथनतो वोद्भासयेदिति । तदेवं यतो गुरुकुलवासो बहूनां गुणानामाधारो भवत्यतो 'न निष्कसेत्' न निर्गच्छेत् गच्छाद्बहिर्वर्तिकाद्वा बहिः, स्वेच्छाचारी न भवेद्, 'आशुप्रज्ञ' इति क्षिप्रप्रज्ञः, तदन्तिके निवसन् विषयकषायाभ्यामात्मानं ह्रियमाणं ज्ञात्वा क्षिप्रमेवाचार्योपदेशात्स्वत एव वा 'निवर्तयति' सत्समाधौ व्यवस्थापयतीति ॥ ४ ॥ तदेवं प्रव्रज्याममि उद्यतो नित्यं गुरुकुलवासमावसन् सर्वत्र स्थानशयनासनादावुपयुक्तो भवति तदुपयुक्तस्य च गुणमुद्भावयन्नाह—

॥२४३॥

जे ठाणओ य सयणासणे य, परक्कमे यावि सुसाहुजुत्ते । समितीसु गुत्तीसु य आयपन्ने, वियागरिंते य पुढो वएज्जा ॥ ५ ॥ सहाणि सोच्चा अदु भेरवाणि, अणासवे तेसु परिव्वएज्जा । निहं च भिक्खू न पमाय कुज्जा, कहंकहं वा वितिगिच्छतिन्ने ॥ ६ ॥ डहरेण वुड्ढेणऽणुसासि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ए उ, रातिणिएणावि समवएणं । सम्मं तयं थिरतो णाभिगच्छे, णिज्जंतए वावि अपारए से ॥ ७ ॥ विउट्टितेणं समयाणुसिट्ठे, डहरेण वुड्ढेण उ चोइए य । अच्चुट्रियाए घडदासिए वा, अगारिणं वा समयाणुसिट्ठे ॥ ८ ॥

यो हि निर्विण्णसंसारतया प्रव्रज्यामभि उद्यतो नित्यं गुरुकुलवासतः 'स्थानतश्च' स्थानमाश्रित्य तथा शयनत आसनतः, एकश्चकारः समुच्चये द्वितीयोऽनुक्तसमुच्चयार्थः चकाराद्गमनमाश्रित्यागमनं च तथा तपश्चरणादौ पराक्रमतश्च, (सु) साधोः-उद्युक्तविहारिणो ये समाचारास्तैः समायुक्तः सुसाधुयुक्तः, सुसाधुर्हि यत्र स्थाने—कायोत्सर्गादिकं विधत्ते तत्र सम्यक् प्रत्युपेक्षणादिकां क्रियां करोति, कायोत्सर्गं च मेरुरिव निष्प्रकम्पः शरीरनिःस्पृहो विधत्ते, तथा शयनं च कुर्वन् प्रत्युपेक्ष्य संस्तारकं तद्गुर्वं कार्यं चोदितकाले गुरुभिरनुज्ञातः स्वपेत्, तत्रापि जाग्रदिव नात्यन्तं निःसह इति । एवमासनादिष्वपि तिष्ठता पूर्ववत्संकुचितगात्रेण स्वाध्यायध्यानपरायणेन सुसाधुना भवितव्यमिति, तदेवमादिसुसाधुक्रियायुक्तो गुरुकुलनिवासी सुसाधुर्भवतीति स्थितम्। अपिच—गुरुकुलवासे निवसन् पञ्चसु समितिष्वीर्यासमित्यादिषु प्रविचाररूपासु तथा तिसृषु च गुप्तिषु प्रविचाराप्रविचाररूपासु आगता-उत्पन्ना प्रज्ञा यस्यासावागतप्रज्ञः-संजातकर्तव्याकर्तव्यविवेकः स्वतो भवति, परस्यापि च 'व्याकुर्वन्' कथयन् पृथक् पृथग्गुरोः प्रसादात्परिज्ञातस्वरूपः समितिगुप्तीनां यथावस्थितस्वरूपप्रतिपालनं तत्फलं च 'वदेत्' प्रतिपादयेदिति ॥ ५ ॥ ईर्या-

सूत्रकृताङ्गशीलाङ्काचार्यीयवृत्तियुतं ॥२४४॥

समित्याद्युपेतेन यद्विधेयं तद्दर्शयितुमाह—'शब्दान्' वेणुवीणादिकान् मधुरान् श्रुतिपेशलान् 'श्रुत्वा' समाकर्ण्यथवा 'भैरवान्' भयावहान् कर्णकटूनाकर्ण्य शब्दान् आश्रवति तान् शोभनत्वेनाशोभनत्वेन वा गृह्णातीत्याश्रवो नाश्रवोऽनाश्रवः, तेष्वनुकूलेषु प्रतिकूलेषु श्रवणपथमुपगतेषु शब्देष्वनाश्रवो-मध्यस्थो रागद्वेषरहितो भूत्वा परि-समन्ताद् व्रजेत् परिव्रजेत्-संयमानुष्ठायी भवेत्, तथा 'निद्रां च' निद्राप्रमादं च 'भिक्षुः' सत्साधुः प्रमादाङ्गत्वान्न कुर्यात्, एतदुक्तं भवति—शब्दाश्रवनिरोधेन विषयप्रमादो निषिद्धो निद्रानिरोधेन च निद्राप्रमादः, चशब्दादन्यमपि प्रमादं विकथाकषायादिकं न विदध्यात् । तदेवं गुरुकुलवासात् स्थानशयनासनसमितिगुप्तिष्वागतप्रज्ञः प्रतिषिद्धसर्वप्रमादः सन् गुरोरुपदेशादेव कथंकथमपि विचिकित्सां—चित्तविप्लुतिरूपां [वि]तीर्णः-अतिक्रान्तो भवति, यदिवा मद्गृहीतोऽयं पञ्चमहाव्रतभारोऽतिदुर्वहः कथं कथमप्यन्तं गच्छेद् ?, इत्येवंभूतां विचिकित्सां गुरुप्रसादाद्वितीर्णो भवति, अथवा यां काश्चिच्चित्तविप्लुतिं देशसर्वगतां तां कृत्स्नां गुर्वन्तिके वसन् वितीर्णो भवति अन्येषामपि तदपनयनसमर्थः स्यादिति ॥ ६ ॥ किञ्चान्यत्—स गुर्वन्तिके निवसन् क्वचित् प्रमादस्खलितः सन् वयःपर्यायाभ्यां क्षुल्लकेन—लघुना 'चोदितः' प्रमादाचरणं प्रति निषिद्धः, तथा 'वृद्धेन वा' वयोऽधिकेन श्रुताधिकेन वा 'अनुशासितः' अभिहितः, तद्यथा—भवद्विधानामिदमीदृक् प्रमादाचरणमासेवितुमयुक्तं, तथा 'रत्नाधिकेन वा' प्रव्रज्यापर्यायाधिकेन श्रुताधिकेन वा समवयसा वा 'अनुशासितः' प्रमादस्खलिताचरणं प्रति चोदितः कुप्यति यथा अहमप्यनेन द्रमकप्रायेणोत्तमकुलप्रसूतः सर्वजनसंमत इत्येवं चोदित इत्येवमनुशास्यमानो न मिथ्यादुष्कृतं ददाति न सम्यगुत्थानेनोत्तिष्ठति नापि तदनुशासनं सम्यक् स्थिरतः-अपुनःकरणतयाऽभिगच्छेत्-प्रतिपद्येत, चोदितश्च प्रतिचोदयेद्, असम्यक् प्रतिपद्यमानश्चासौ संसारस्रोतसा

१४ग्रन्थाध्ययनं.

॥२४४॥

'नीयमान' उह्यमानोऽनुशास्यमानः कुपितोऽसौ न संसारार्णवस्य पारगो भवति । यदिवाऽऽचार्यादिना सदुपदेशदानतः प्रमादस्खलितनिवर्तनतो मोक्षं प्रति नीयमानोऽप्यसौ संसारसमुद्रस्य तदकरणतोऽपारग एव भवतीति ॥७॥ साम्प्रतं स्वपक्षचोदनानन्तरतः(रं)स्वपरचोदनामधिकृत्याह-विरुद्धोत्थानेनोत्थितो व्युत्थितः-परतीर्थिको गृहस्थो वा मिथ्यादृष्टित्वेन प्रमादस्खलिते चोदितः स्वसमयेन, तद्यथा-नैतद्विधमनुष्ठानं भवतामागमे व्यवस्थितं येनाभिप्रवृत्तोऽसि, यदिवा व्युत्थितः-संयमाद्भ्रष्टत्वेनापरः साधुः स्खलितः सन् स्वसमयेन-अर्हत्प्रणीतागमानुसारेणानुशासितो मूलोत्तरगुणाचरणे स्खलितः सन् 'चोदित' आगमं प्रदर्श्याभिहितः, तद्यथा-नैतच्चरितगमनादिकं भवतामनुज्ञातमिति, तथा अन्येन वा मिथ्यादृष्ट्यादिना 'क्षुल्लकेन' लघुतरेण वयसा वृद्धेन वा कुत्सिताचारप्रवृत्तश्चोदितः, तुशब्दात्समानवयसा वा तथा अतीवाकार्यकरणं प्रति उत्थिता अत्युत्थिताः, यदिवा-दासीत्वेन अत्यन्तभुत्थिता दास्या अपि दासीति, तामेव विशिनष्टि-'घटदास्या' जलवाहिन्यापि चोदितो न क्रोधं कुर्यात्, एतदुक्तं भवति-अत्युत्थितयाऽतिकुपितयाऽपि चोदितः स्वहितं मन्यमानः सुसाधुर्न कुप्येत्, किं पुनरन्येनेति ?, तथा 'अगारिणां' गृहस्थानां यः 'समयः अनुष्ठानं तत्समयेनानुशासितो, गृहस्थानामपि एतन्न युज्यते कर्तुं यदारब्धं भवतेत्येवमात्मावमेनापि चोदितो ममैवैतच्छ्रेय इत्येवं मन्यमानो मनागपि न मनो दूषयेदिति ॥ ८ ॥ एतदेवाह—

ण तेसु कुज्झे ण य पव्वहेज्जा, ण यावि किंची फरुसं वदेज्जा । तहा करिस्संति पडिस्सुणेज्जा, सेयं खु मेयं ण पमाय कुज्जा ॥ ९ ॥ वणंसि मूढस्स जहा अमूढा, मग्गाणुसासंति हितं पयाणं । तेणेव (तेणावि) मज्झं इणमेव सेयं, जं मे बुहा समणुसासयंति ॥१०॥ अह तेण मूढेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमूढगस्स, कायव्व पूया सविसेसजुत्ता। एओवमं तत्थ उदाहु वीरे, अणुगम्म अत्थं उवणेति सम्मं ॥ ११ ॥ णेता जहा अंधकारंसि राओ, मग्गं ण जाणाति अपस्समाणे। से सूरिअस्स अब्भुग्गमेणं, मग्गं वियाणाइ पगासियंसि ॥ १२ ॥

'तेषु' स्वपरपक्षेषु स्खलितचोदकेष्वात्महितं मन्यमानो न क्रुध्येद् अन्यस्मिन् वा दुर्वचनेऽभिहिते न क्रुप्येद् एवं च चिन्तयेत्—'आकुष्टेन मतिमता तत्त्वार्थविचारणे मतिः कार्या। यदि सत्यं कः कोपः? स्यादनृतं किं नु कोपेन? ॥ १ ॥' तथा नाप्यपरेण स्वतोऽधमेनापि चोदितोऽईन्मार्गानुसारेण लोकाचारगत्या वाऽभिहितः परमार्थं पर्यालोच्य तं चोदकं प्रकर्षेण 'व्यथेत्' दण्डादिप्रहारेण पीडयेत् न चापि किञ्चित्परुषं तत्पीडादिकारि 'वदेत्' ब्रूयात्, ममैवायमसदनुष्ठायिनो दोषो येनायमपि मामेवं चोदयति, चोदितश्चैवंविधं भवता असदाचरणं न विधेयमेवंविधं च पूर्वर्षिभिरनुष्ठितमनुष्ठेयमित्येवंविधं वाक्यं तथा करिष्यामीत्येवं मध्यस्थवृत्त्या प्रतिशृणुयाद् अनुतिष्ठेच्च-मिथ्यादुष्कृतादिना निवर्तेत, यदेतच्चोदनं नामैतन्ममैव श्रेयो, यत एतद्भयात्कथित्पुनः प्रमादं न कुर्यान्नैवासदाचरणमनुतिष्ठेदिति ॥ ९ ॥ अस्यार्थस्य दृष्टान्तं दर्शयितुमाह—'वने' गहने महाटव्यां दिग्भ्रमेण कस्यचिद्व्याकुलितमतेर्नष्टसत्पथस्य यथा केचिदपरे कृपाकृष्टमानसा 'अमूढाः' सदसन्मार्गज्ञाः कुमार्गपरिहारेण प्रजानां 'हितम्' अशेषापायरहितमीप्सितस्थानप्रापकं 'मार्गं' पन्थानम् 'अनुशासन्ति' प्रतिपादयन्ति, स च तैः सदसद्विवेकिभिः सन्मार्गावतरणमनुशासित आत्मनः श्रेयो मन्यते, एवं तेनाप्यसदनुष्ठायिना चोदितेन न कुपितव्यम्, अपितु ममायमनुग्रह इत्येवं मन्तव्यं, यदेतद् बुद्धाः सम्यगनुशासयन्ति—सन्मार्गेऽवतारयन्ति पुत्रमिव पितरः तन्ममैव श्रेय इति मन्तव्यम् ॥ १० ॥ पुनरप्यस्यार्थस्य पुष्टयर्थमाह—'अथे' त्यानन्तर्यार्थे वाक्योपन्यासार्थे वा, यथा 'तेन' मूढेन सन्मार्गावतारितेन तदनन्तरं तस्य 'अमूढस्य' सत्पथोपदेष्टुः पुलिन्दादेरपि परमुपकारं मन्यमानेन पूजा विशेषयुक्ता कर्तव्या, एवमेतामुपमाम् 'उदाहृतवान्' अभिहितवान् 'वीरः' तीर्थकरोऽन्यो वा गणधरादिकः 'अनुगम्य' बुद्ध्वा 'अर्थं' परमार्थं चोदनाकृतं परमोपकारं सम्यगात्मन्युपनयति, तद्यथा—अहमनेन मिथ्यात्ववनाज्जन्मजरामरणाधनेकोपद्रवबहुलात्सदुपदेशदानेनोत्तारितः, ततो मयाऽस्य परमोपकारिणोऽभ्युत्थानविनयादिभिः पूजा विधेयेति। अस्मिन्नर्थे बहवो दृष्टान्ताः सन्ति, तद्यथा—'गेहंमि अग्गिजालाउलंमि जह णाम डज्झमाणंमि। जो बोहेइ सुयंतं सो तस्स जणो परमबंधू ॥ १ ॥ जह वा विससंजुत्तं भत्तं निद्धमिह भोत्तुकामस्स। जोवि सदोसं साहइ सो तस्स जणो परमबंधू ॥ २ ॥" ॥ ११ ॥ अयमपरः सूत्रेणैव दृष्टान्तोऽभिधीयते—यथा हि सजलजलधराच्छादितबहलान्धकारायां रात्रौ 'नेता' नायकोऽटव्यादौ स्वभ्यस्तप्रदेशोऽपि 'मार्गं' पन्थानमन्धकारावृतत्वात्स्वहस्तादिकमपश्यन्न जानाति—न सम्यक् परिच्छिनत्ति। स एव प्रणेता 'सूर्यस्य' आदित्यस्याभ्युद्गमेनापनीते तमसि प्रकाशिते दिक्चक्रे सम्यगाविर्भूते पाषाणदरिनिम्नोन्नतादिके मार्गं जानाति—विवक्षितप्रदेशप्रापकं पन्थानमभिव्यक्तचक्षुः परिच्छिनत्ति—दोषगुणविचारणतः सम्यगवगच्छतीति ॥ १२ ॥ एवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमधिकृत्याह—

१ गेहेऽग्निज्वालाकुले यथा नाम दह्यमाने। यो बोधयति सुप्तं स तस्य जनः परमबान्धवः ॥ १ ॥ यथा वा विषसंयुक्तं भक्तं स्निग्धं इह भोक्तुकामस्य योऽपि सदोषं साधयति स तस्य परमबन्धुर्जनः ॥ २ ॥

एवं तु सेहेवि अपुट्ठधम्मे, धम्मं न जाणाइ अबुज्झमाणे। से कोविए जिणवयणेण पच्छा, सूरोदए पासति चक्खुणेव ॥ १३ ॥ उड्ढं अहेयं तिरियं दिसासु, तसा य जे थावरा जे य पाणा। सया जए तेसु परिव्वएज्जा, मणप्पओसं अविकंपमाणे ॥ १४ ॥ कालेण पुच्छे समियं पयासु, आइक्खमाणो दवियस्स वित्तं। तं सोयकारी पुढो पवेसे, संखा इमं केवलियं समाहिं ॥१५॥ अस्सिं सुठिच्चा तिविहेण तायी, एएसु या संति निरोहमाहु। ते एवमक्खंति तिलोगदंसी, ण भुज्जमेयंति पमायसंगं ॥ १६ ॥

यथा ह्यसावन्धकारावृतायां रजन्यामतिगहनायामटव्यां मार्गं न जानाति सूर्योद्गमेनापनीते तमसि पश्यान्न जानाति एवं तु 'शिष्यकः' अभिनवप्रव्रजितोऽपि सूत्रार्थानिष्पन्नः अपुष्टः—अपुष्कलः सम्यगपरिज्ञातो धर्मः—श्रुतचारित्राख्यो दुर्गतिप्रसृतजन्तुधरणस्वभावो येनासावपुष्टधर्मा, स चागीतार्थः—सूत्रार्थानभिज्ञतादबुध्यमानो धर्मं न जानातीति—न सम्यक् परिच्छिनत्ति, स एव तु पश्चाद्गुरुकुलवासाज्जिनवचनेन 'कोविदः' अभ्यस्तसर्वज्ञप्रणीतागमत्वात्प्रगुणः सूर्योदयेऽपगतावरणश्चक्षुषेव यथावस्थितान् जीवादीन् पदार्थान् पश्यति, इदमुक्तं भवति—यथा हि इन्द्रियार्थसंपर्कात्साक्षात्कारितया परिस्फुटा घटपटादयः पदार्थाः प्रतीयन्ते एवं सर्वज्ञप्रणीतागमेनापि सूक्ष्मव्यवहितविप्रकृष्टस्वर्गापवर्गदेवतादयः परिस्फुटा निःशङ्कं प्रतीयन्त इति। अपिच कदाचिच्च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षुण्णाऽन्यथाभूतोऽप्यर्थोऽन्यथा परिच्छिद्यते, तद्यथा—मरुमरीचिकानिचयो जलभ्रान्त्या किंशुकनिचयोऽग्याकारेणापीति । नच सर्वज्ञप्रणीतस्यागमस्य क्वचिदपि व्यभिचारः, तद्व्यभिचारे हि सर्वज्ञत्वहानिप्रसङ्गात्, तत्संभवस्य चासर्वज्ञेन प्रतिषेद्धुमशक्यत्वादिति ॥ ॥ १३ ॥ शिक्षको हि गुरुकुलवासितया जिनवचनाभिज्ञो भवति, तत्कोविदश्च सम्यक् मूलोत्तरगुणान् जानाति, तत्र मूलगुणानधिकृत्याह—ऊर्ध्वमधस्तिर्यग् दिक्षु विदिक्षु चेत्यनेन क्षेत्रमङ्गीकृत्य प्राणातिपातविरतिरभिहिता, द्रव्यतस्तु दर्शयति—त्रसन्तीति त्रसाः—तेजोवायू द्वीन्द्रियादयश्च, तथा ये च स्थावराः—स्थावरनामकर्मोदयवर्तिनः पृथिव्यप्तेजोवनस्पतयः, तथा ये चैतद्भेदाः सूक्ष्मबादरपर्याप्तकापर्याप्तकरूपा दशविधप्राणधारणात्प्राणिनस्तेषु, 'सदा' सर्वकालम्, अनेन तु कालमधिकृत्य विरतिरभिहिता, यतः परिव्रजेत्—परिसमन्ताद्व्रजेत् संयमानुष्ठायी भवेत्, भावप्राणातिपातविरतिं दर्शयति—स्थावरजङ्गमेषु प्राणिषु तदपकारे उपकारे वा मनागपि मनसा प्रद्वेषं न गच्छेद् आस्तां तावदुर्वचनदण्डप्रहारादिकं, तेष्वपकारिष्वपि मनसाऽपि न मङ्गलं चिन्तयेद्, 'अविकम्पमानः' संयमाच्चलन् सदाचारमनुपालयेदिति, तदेवं योगत्रिककरणत्रिकेण द्रव्यक्षेत्रकालभावरूपां प्राणातिपातविरतिं सम्यगरक्तद्विष्टतयाऽनुपालयेद्, एवं शेषाण्यपि महाव्रतान्युत्तरगुणांश्च ग्रहणासेवनाशिक्षासमन्वितः सम्यगनुपालयेदिति ॥१४॥ गुरोरन्तिके वसतो विनयमाह—सूत्रमर्थं तदुभयं वा विशिष्टेन—प्रष्टव्यकालेनाचार्यादेरवसरं ज्ञात्वा प्रजायन्त इति प्रजा—जन्तवस्तासु प्रजासु—जन्तुविषये चतुर्दशभूतग्रामसंबद्धं कञ्चिदाचार्यादिकं सम्यगितं—सदाचारानुष्ठायिनं सम्यक् वा समन्ताद्वा जन्तुगतं पृच्छेदिति । स च तेन पृष्ट आचार्यादिराचक्षाणः शुश्रूषयितव्यो भवति, यदाचक्षाणस्तदर्शयति—मुक्तिगमनयोग्यो भव्यो द्रव्यं राग-

सूत्रकृ. ४९ सूत्रकृताङ्गशीलाङ्काचार्यविरचितं ॥२४७॥

१४ ग्रन्थाध्ययनं.

१सर्वज्ञप्रणीतागमोक्तपदार्थसंभवस्य, सर्वज्ञसंभवस्येति वा । २ शत्रोरुपकारे बाल्ये वा दुरायतिके स्वस्य, अन्यथोपकारे द्वेषासंभवात् ।

द्वेषविरहाद्वा द्रव्यं तस्य द्रव्यस्य—वीतरागस्य तीर्थकरस्य वा सूत्रम्—अनुष्ठानं संयमं ज्ञानं वा तत्प्रणीतमागमं वा सम्यगाचक्षाणः सपर्यायार्ह्यं माननीयो भवति । कथमित्याह—'तद्' आचार्यादिना कथितं श्रोत्रे—कर्णे कर्तुं शीलमस्य श्रोत्रकारी—यथोपदेशकारी आज्ञाविधायी सन् पृथक् पृथगुपन्यस्तमादरेण हृदये प्रवेशयेत्—चेतसि व्यवस्थापयेत्, व्यवस्थापनीयं दर्शयति—'संख्याय' सम्यक् ज्ञात्वा 'इमं' मिति वक्ष्यमाणं केवलिन इदं कैवलिकं—केवलिना कथितं समाधिं—सन्मार्गं सम्यग्ज्ञानादिकं मोक्षमार्गमाचार्यादिना कथितं यथोपदेशं प्रवर्तकः पृथग्—विविक्तं हृदये पृथग्व्यवस्थापयेदिति ॥१५॥ किंचान्यत्—'अस्मिन्' गुरुकुलवासे निवसता यच्छ्रुतं श्रुत्वा च सम्यक् हृदयव्यवस्थापनद्वारेणावधारितं तस्मिन् समाधिभूते मोक्षमार्गे सुष्ठु स्थित्वा 'त्रिविधेने'ति मनोवाक्कायकर्मभिः कृतकारितानुमतिभिर्वाऽऽत्मानं त्रातुं शीलमस्येति त्रायी जन्तूनां सदुपदेशदानत्राणकरणशीलो वा तस्य स्वपरत्रायिणः, एतेषु च समितिगुप्त्यादिषु समाधिमार्गेषु स्थितस्य शान्तिर्भवति—अशेषद्वन्द्वोपरमो भवति तथा निरोधम्—अशेषकर्मक्षयरूपम् 'आहुः' तद्विदः प्रतिपादितवन्तः, क एवमाहुरित्याह—त्रिलोकम्—ऊर्ध्वाधस्तिर्यग्लक्षणं द्रष्टुं शीलं येषां ते त्रिलोकदर्शिनः—तीर्थकृतः सर्वज्ञास्ते 'एवम्' अनन्तरोक्तया नीत्या सर्वभावान् केवलालोकेन दृष्ट्वा 'आचक्षते' प्रतिपादयन्तीति । एतदेव समितिगुप्त्यादिकं संसारोत्तारणसमर्थं ते त्रिलोकदर्शिनः कथितवन्तो न पुनर्भूय एतं (नं) 'प्रमादस्कन्धं' मद्यविषयादिकं संबन्धं विधेयत्वेन प्रतिपादितवन्तः ॥ १६ ॥ किञ्चान्यत्—

॥२४७॥

निसम्म से भिक्खु समीहियट्ठं, पडिभाणवं होइ विसारए य । आयाणअट्ठी वोदाणमोणं, उवेच्च सुद्धेण उवेति मोक्खं ॥ १७ ॥ संखाइ धम्मं च वियागरंति, बुद्धा हु ते अंतकरा भवंति । ते पारगा दोण्हवि मोयणाए, संसोधितं पण्हमुदाहरंति ॥१८॥ णो छायए णोऽविय लूसएज्जा, माणं ण सेवेज्ज पगासणं च । ण यावि पन्ने परिहास कुज्जा, ण याऽऽसियावाय वियागरेज्जा ॥ १९ ॥ भूताभिसंकाइ दुगुंछमाणे, ण णिव्वहे मंतपदेण गोयं । ण किंचि मिच्छे मणुए पयासुं, असाहुधम्माणि ण संवएज्जा ॥ २० ॥

स गुरुकुलवासी भिक्षुः द्रव्यस्य वृत्तं 'निशम्य' अवगम्य स्वतः समीहितं चार्थं—मोक्षार्थं बुद्ध्या हेयोपादेयं सम्यक् परिज्ञाय नित्यं गुरुकुलवासतः 'प्रतिभानवान्' उत्पन्नप्रतिभो भवति । तथा सम्यक् स्वसिद्धान्तपरिज्ञानाच्छ्रोतॄणां यथावस्थितार्थानां 'विशारदो भवति' प्रतिपादको भवति । मोक्षार्थिनाऽऽदीयत इत्यादानं—सम्यग्ज्ञानादिकं तेनार्थः स एव वाऽर्थः आदानार्थः स विद्यते यस्यासावादानार्थी, स एवंभूतो ज्ञानादिप्रयोजनवान् व्यवदानं—द्वादशप्रकारं तपो मौनं—संयम आश्रवनिरोधरूपस्तदेवमेतौ तपःसंयमावुपेत्य—प्राप्य ग्रहणासेवनरूपया द्विविधयापि शिक्षया समन्वितः सर्वत्रप्रमादरहितः प्रतिभानवान् विशारदश्च 'शुद्धेन' निरुपाधिना उद्गमादिदोषशुद्धेन चाहारेणात्मानं यापयन्नशेषकर्मक्षयलक्षणं मोक्षमुपैति 'न उवेइ मारं'ति क्वचित्पाठः, बहुशो म्रियन्ते स्वकर्मपरवशाः प्राणिनो यस्मिन् स मारः—संसारस्तं जातिजरामरणरोगशोकाकुलं शुद्धेन मार्गेणात्मानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्तयन् न उपैति, यदिवा मरणं-प्राणत्यागलक्षणं मारस्तं बहुशो नोपैति, तथाहि—अप्रतिपतितसम्यक्त्व उत्कृष्टतः सप्ताष्टौ वा भवान् म्रियते नोर्ध्वमिति ॥१७॥ तदेवं गुरुकुलनिवासितया धर्मे सुस्थिता बहुश्रुताः प्रतिभानवन्तोऽर्थविशारदाश्च सन्तो यत्कुर्वन्ति तद्दर्शयितुमाह-सम्यक् ख्यायते-परिज्ञायते यया सा संख्या—सद्बुद्धिस्तया स्वतो धर्मं परिज्ञायापरेषां यथावस्थितं 'धर्मं' श्रुतचारित्राख्यं 'व्याकुर्वन्ति' प्रतिपादयन्ति, यदिवा स्वपरशक्तिं परिज्ञाय पर्षदं वा प्रतिपाद्यं चार्थं सम्यगवबुध्य धर्मं प्रतिपादयन्ति । ते चैवंविधा बुद्धाः-कालत्रयवेदिनो जन्मान्तरसंचितानां कर्मणामन्तकरा भवन्ति अन्येषां च कर्मापनयनसमर्था भवन्तीति दर्शयति-ते यथावस्थितधर्मप्ररूपका 'द्वयोरपि' परात्मनोः कर्मपाशविमोचनया स्नेहादिनिगडविमोचनया वा करणभूतया संसारसमुद्रस्य पारगा भवन्ति । ते चैवंभूताः ? 'सम्यक् शोधितं' पूर्वोत्तराविरुद्धं 'प्रश्नं' शब्दमुदाहरन्ति, तथाहि-पूर्वं बुद्ध्या पर्यालोच्य कोऽयं पुरुषः कस्य चार्थस्य ग्रहणसमर्थोऽहं वा किंभूतार्थप्रतिपादनशक्त इत्येवं सम्यक् परीक्ष्य व्याकुर्यादिति, अथवा परेण कश्चिदर्थं पृष्टस्तं प्रश्नं सम्यग् परीक्ष्योदाहरेत्-सम्यगुत्तरं दद्यादिति, तथा चोक्तम्-"आयरियसयासा व धारिएण अत्थेण झरियमुणिएणं । तो संघमज्झयारे ववहरिउं जे सुहं होंति ॥ १ ॥" तदेवं ते गीतार्था यथावस्थितं धर्मं कथयन्तः स्वपरतारका भवन्तीति ॥ १८ ॥ स च प्रश्नमुदाहरन् कदाचिदन्यथापि ब्रूयादतस्तत्प्रतिषेधार्थमाह—'स' प्रश्नस्योदाहर्ता सर्वार्थाश्रयत्वाद्व्रह्म-

१ अहमवा उ चरित्ते इति वचनाच्चारित्रयुतं सम्यक्त्वं परं प्रतिपाति तदिति अप्रतिपतितसम्यक्त्व इति, जघन्याराधनया वा जन्मत्रिरष्टव्येकैः इति वचनात्, सप्ताष्टाविति मनुष्यकायस्थितिमपेक्ष्य, सम्यक्त्वभवास्तु पल्योपमासंख्यभागमिताः । २ आचार्यसकाशाद् अवधारितेनार्थेन स्मारकेण स्मारयित्वा च ततः संघमध्ये व्यवहर्तुं सुखं भवति ॥ १ ॥

करण्डकल्प. कुत्रिकापणकल्पो वा चतुर्दशपूर्विणामन्यतरो वा कश्चिदाचार्यादिभिः प्रतिभानवान्-अर्थविशारदस्तदेवंभूतः कुतश्चिन्निमित्तात् श्रोतुः कुपितोऽपि सूत्रार्थं 'न छादयेत्' नान्यथा व्याख्यानयेत् स्वाचार्यं वा नापलपेत् धर्मकथां वा कुर्वन्नार्थं छादयेद् आत्मगुणोत्कर्षाभिप्रायेण वा परगुणान्न छादयेत् तथा परगुणान्न लूषयेत्-न विडम्बयेत् शास्त्रार्थं वा नापसिद्धान्तेन व्याख्यानयेत् तथा समस्तशास्त्रवेत्ताऽहं सर्वलोकविदितः समस्तसंशयापनेता न मत्तुल्यो हेतुयुक्तिभिरर्थप्रतिपादयितेत्येवमात्मकं मानम्-अभिमानं गर्वं न सेवेत, नाप्यात्मनो बहुश्रुतत्वेन तपस्वित्वेन वा प्रकाशनं कुर्यात्, चशब्दादन्यदपि पूजासत्कारादिकं परिहरेत्, तथा न चापि 'प्रज्ञावान्' सश्रुतिकः 'परिहासं' केलिप्रायं ब्रूयाद्, यदिवा कथञ्चिदबुध्यमाने श्रोतरि तदुपहासप्रायं परिहासं न विदध्यात् तथा नापि चाशीर्वादं बहुपुत्रो बहुधनो [बहुधर्मो] दीर्घायुस्त्वं भूया इत्यादि व्याकुर्वीत, भाषासमितियुक्तेन भाव्यमिति ॥ १९ ॥ किंनिमित्तमाशीर्वादो न विधेय इत्याह—भूतेषु-जन्तुषूपमर्दशङ्का भूताभिशङ्का तयाऽऽशीर्वादं 'सावद्यं' सपापं जुगुप्समानो न ब्रूयात् तथा गात्रायत इति गोत्रं-मौनं वाक्संयमस्तं 'मन्त्रपदेन' विद्यापमार्जनविधिना 'न निर्वाहयेत्' न निःसारं कुर्यात् । यदिवा गोत्रं—जन्तूनां जीवितं 'मन्त्रपदेन' राजादिगुप्तभाषणपदेन राजादीनामुपदेशदानतो 'न निर्वाहयेत्' नापनयेत्, एतदुक्तं भवति-न राजादिना सार्धं जन्तुजीवितोपमर्दकं मन्त्रं कुर्यात्, तथा प्रजायन्त इति प्रजाः-जन्तवस्तासु प्रजासु 'मनुजो' मनुष्यो व्याख्यानं कुर्वन् धर्मकथां वा न 'किमपि' लाभपूजासत्कारादिकम् 'इच्छेद्' अभिलषेत्, तथा कुत्सितानाम्-असाधूनां धर्मान्-वस्तुदानतर्पणादिकान् 'न संवदेत्' न ब्रूयाद् यदिवा नासाधुधर्मान् ब्रुवन् संवादयेद् अथवा धर्मकथां व्याख्यानं वा कुर्वन् प्रजास्वात्मश्लाघारूपां कीर्तिं नेच्छेदिति ॥ २० ॥ किञ्चान्यत्—

हासं पि णो संधति पावधम्मे, ओए तहीयं फरुसं वियाणे । णो तुच्छए णो य विकंथइज्जा, अणाइले या अकसाइ भिक्खू ॥ २१ ॥ संकेज्ज याऽसंकितभाव भिक्खू, विभज्जवायं च वियागरेज्जा । भासादुयं धम्मसमुट्ठितेहिं, वियागरेज्जा समया सुपन्ने ॥ २२ ॥ अणुगच्छमाणे वितहं विजाणे, तहा तहा साहु अकक्कसेणं । ण कत्थई भास विहिंसइज्जा, निरुद्धगं वावि न दीहइज्जा ॥ २३ ॥ समालवेज्जा पडिपुन्नभासी, निसामिया समियाअट्ठदंसी । आणाइ सुद्धं वयणं भिउंजे, अभिसंधए पावविवेग भिक्खू ॥ २४ ॥

यथा परात्मनोर्हास्यमुत्पद्यते तथा शब्दादिकं शरीरावयवमन्यान् वा पापधर्मान् सावद्यान्मनोवाक्कायव्यापारान् 'न संधयेत्' न विदध्यात्, तद्यथा—इदं छिन्द्धि भिन्द्धि, तथा कुप्रावचनिकान् हास्यप्रायं नोत्त्रासयेत्, तद्यथा—शोभनं भवदीयं व्रतं, तद्यथा—'मृद्वी शय्या प्रातरुत्थाय पेया, मध्ये भक्तं पानकं चापराह्णे । द्राक्षाखण्डं शर्करा चार्धरात्रे, मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ॥ १ ॥' इत्यादिकं परदोषोद्भावनप्रायं पापबन्धकमितिकृत्वा हास्येनापि न वक्तव्यं । तथा 'ओजो' रागद्वेषरहितः सबाह्याभ्यन्तरग्रन्थत्यागाद्वा निष्किञ्चनः सन् 'तथ्यं' मिति परमार्थतः सत्यमपि परुषं वचोऽपरचेतोविकारि ज्ञपरिज्ञया विजानीयात्प्रत्याख्यानपरिज्ञया च परिहरेत्, यदिवा रागद्वेषविरहादोजाः 'तथ्यं' परमार्थभूतमकृत्रिमप्रतारकं 'परुषं' कर्मसंश्लेषाभावा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्ममत्वादल्पसत्त्वैर्दुरनुष्ठेयत्वाद्वा कर्कशमन्तप्रान्ताहारोपभोगाद्वा परुषं—संयमं 'विजानीयात्' तदनुष्ठानतः सम्यगवगच्छेत्, तथा स्वतः कश्चिदर्थविशेषं परिज्ञाय पूजासत्कारादिकं वाऽवाप्य 'न तुच्छो भवेत्' नोन्मादं गच्छेत्, तथा 'न विकत्थयेत्' नात्मानं श्लाघयेत् परं वा सम्यगनवबुध्यमानः 'नो विकत्थयेत्' नात्यन्तं चमढयेत्, तथा 'अनाकुलो' व्याख्यानावसरे धर्मकथावसरे वाऽनाविलो लाभादिनिरपेक्षो भवेत्, तथा सर्वदा 'अकषायः' कषायरहितो भवेद् 'भिक्षुः' साधुरिति ॥ २१ ॥ साम्प्रतं व्याख्यानविधिमधिकृत्याह—'भिक्षुः' साधुर्व्याख्यानं कुर्वन्नर्वाग्दर्शितादर्थनिर्णयं प्रति अशङ्कितभावोऽपि 'शङ्केत' औद्धत्यं परिहरन्नहमेवार्थस्य वेत्ता नापरः कश्चिदित्येवं गर्वं न कुर्वीत किंतु विषममर्थं प्ररूपयन् साशङ्कमेव कथयेद्, यदिवा परिस्फुटमप्यशङ्कितभावमप्यर्थं न तथा कथयेत् यथा परः शङ्केत, तथा विभज्यवादं—पृथगर्थनिर्णयवादं व्यागृणीयात् यदिवा विभज्यवादः—स्याद्वादस्तं सर्वत्रास्खलितं लोकव्यवहाराविसंवादितया सर्वव्यापिनं स्वानुभवसिद्धं वदेद्, अथवा सम्यगर्थान् विभज्य—पृथक्कृत्वा तद्वादं वदेत्, तद्यथा—नित्यवादं द्रव्यार्थतया पर्यायार्थतया चानित्यवादं वदेत्, तथा स्वद्रव्यक्षेत्रकालभावैः सर्वेऽपि पदार्थाः सन्ति, परद्रव्यादिभिस्तु न सन्ति, तथा चोक्तम्—"सदेव सर्वं को नेच्छेत्स्वरूपादिचतुष्टयात् ? । असदेव विपर्यासान्न चेन्न व्यवतिष्ठते ॥१॥" इत्यादिकं विभज्यवादं वदेदिति । विभज्यवादमपि भाषाद्वितयेनैव ब्रूयादित्याह—भाषयोः—आद्यचरमयोः सत्यासत्यामृषयोर्द्विकं भाषाद्विकं तद्भाषाद्वयं क्वचित्पृष्टोऽपृष्टो वा धर्मकथावसरेऽन्यदा वा सदा वा 'व्यागृणीयात्' भाषेत, किंभूतः सन् ?—सम्यक्—सत्संयमानुष्ठानेनोत्थिताः समुत्थिताः—सत्साधव उद्युक्तविहारिणो न पुनरुद्यायिशूपमारकवत्कुत्रिमास्तैः सम्यगुत्थितैः सह विहरन् चक्रवर्तिद्रमकयोः समतया रागद्वेषरहितो वा शोभनप्रज्ञो भाषाद्वयोपेतः सम्यग्धर्मं व्यागृणीयादिति ॥ २२ ॥ किञ्चान्यत्—तस्यैवं भाषाद्वयेन कथयतः कश्चिन्मेधाविततया तथैव तमर्थमाचार्यादिना कथितमनुगच्छन् सम्यगवबुध्यते, अपरस्तु मन्दमेधाविततया वितथम्—अन्यथैवाभिजानीयात्, तं च सम्यगनवबुध्यमानं तथा तथा—तेन तेन हेतूदाहरणसद्युक्तिप्रकटनप्रकारेण मूर्खस्त्वमसि तथा दुर्दुरूढः खलूचिरित्यादिना कर्कशवचनेनानिर्भर्त्सयन् यथा यथाऽसौ बुध्यते तथा तथा 'साधुः' सुष्ठु बोधयेत् न कुत्रचित्क्रुद्धमुखहस्ताष्ठनेत्रविकारैरनादरेण कथयन् मनःपीडामुत्पादयेत्, तथा प्रश्नयतस्तद्भावाभपशब्दादिदोषदुष्टामपि धिग् मूर्खासंस्कृतमते! किं तवानेन संस्कृतेन पूर्वोत्तरव्याहतेन वोद्धारितेनेत्येवं 'न विहिंस्यात्' न तिरस्कुर्याद् असंबद्धोद्घट्टनतस्तं प्रश्नयितारं न विडम्बयेदिति । तथा निरुद्धम्—अर्थस्तोकं दीर्घवाक्यैर्महता शब्ददर्दुरेणार्कविटपिकाष्टिकान्यायेन न कथयेत् निरुद्धं वा—स्तोककालीनं व्याख्यानं व्याकरणतर्कादिप्रवेशनद्वारेण प्रसक्त्यानुप्रसक्त्या 'न दीर्घयेत्' न दीर्घकालिकं कुर्यात्, तथा चोक्तम्—"सो[1] अत्थो वत्तव्वो जो भण्णइ अक्खरेहिं थोवेहिं । जो पुण थोवो बहुअक्खरेहिं सो होइ निस्सारो ॥ १॥" तथा किंचित्सूत्रमल्पाक्षरमल्पार्थं वा इत्यादि चतुर्भङ्गिका, तत्र यदल्पाक्षरं महार्थं तदिह प्रशस्यत इति ॥२३॥ अपिच—यत्पुनरतिविषमत्वादल्पाक्षरैर्न सम्यगवबुध्यते तत्सम्यग्—शोभनेन प्रकारेण समन्तात्पर्यायशब्दोदारणतो भावार्थकथनतश्चालपेद्—भाषेत समालपेत्, नाल्पैरेवाक्षरैरुक्त्वा कृतार्थो भवेद्, अपितु ज्ञेयगहनार्थभाषणे सद्धेतुयुक्त्यादिभिः श्रोतारमपेक्ष्य प्रतिपूर्णभाषी स्यादु—अस्खलितामिलितादीनाक्षरार्थवादी भवेदिति । तथाऽऽचार्यादेः सकाशाद्यथावदर्थं श्रुत्वा निशम्य अवगम्य च सम्यग्—यथावस्थितमर्थं यथा गुरुसकाशादवधारितमर्थं—प्रतिपाद्यं ब्रुवं शीलमस्य स भवति सम्यगर्थदर्शी, स एवंभूतः संस्तीर्थकराज्ञया—सर्वज्ञप्रणीतागमानुसारेण 'शुद्धम्' अवदातं पूर्वापराविरुद्धं निरवद्यं वचनमभियुञ्जीतोत्सर्गविषये सति उत्सर्गमपवादविषये चापवादं तथा स्वपरसमययोर्यथास्थं वचनमभिवदेत् । एवं चाभियुञ्जन् भिक्षुः पापविवेकं लाभसत्कारादिनिरपेक्षतया काङ्क्षमाणो निर्दोषं वचनमभिसन्धयेदिति ॥ २४ ॥ पुनरपि भाषाविधिमधिकृत्याह—

अहाबुइयाइं सुसिक्खएज्जा, जइज्जया णातिवेलं वदेज्जा । से दिट्ठिमं दिट्ठि ण लूसएज्जा, से जाणई भासिउं तं समाहिं ॥ २५ ॥ अलूसए णो पच्छन्नभासी, णो सुत्तमत्थं च करेज्ज ताई । सत्थारभत्ती अणुवीइ वायं, सुयं च सम्मं पडिवायएंति ॥ २६ ॥ से सुद्धसुत्ते उवहाणवं च, धम्मं च जे विंदति तत्थ तत्थ । आदेज्जवक्के कुसले वियत्ते, स अरिहइ भासिउं तं समाहिं ॥ ॥ २७ ॥ तिबेमि ॥ इति ग्रन्थनामयं चउद्दसमज्झयणं समत्तं ॥ (गाथाग्रं ५१८)

यथोक्तानि तीर्थकरगणधरादिभिस्तान्यहर्निशं 'सुष्ठु शिक्षेत' ग्रहणशिक्षया सर्वज्ञोक्तमागमं सम्यग् गृह्णीयाद् आसेवनाशिक्षया त्वनवरतमुद्युक्तविहारितयाऽऽसेवेत, अन्येषां च तथैव प्रतिपादयेद्, अतिप्रसक्तलक्षणनिवृत्तये त्वपदिश्यते, सदा ग्रहणासेवनाशिक्षयोर्देशनायां यतेत, सदा यतमानोऽपि यो यस्य कर्तव्यस्य कालोऽध्ययनकालो वा तां वेलामतिलङ्घ्य नातिवेलं वदेद्—अध्ययनकर्तव्यमर्यादां नातिलङ्घयेत्स(दस)दनुष्ठानं प्रति व्रजेद्वा, यथावसरं परस्परावाधया सर्वाः क्रियाः कुर्यादित्यर्थः । स एवंगुण-

[1] सोऽर्थो वक्तव्यो यो मण्यतेऽक्षरैः स्तोकैः । यः पुनः स्तोको बहुभिरक्षरैः स भवति निस्सारः ॥१॥

सूत्रकृताङ्गे शीलाङ्काचार्यीयवृत्तियुतं ॥२५०॥

१४ग्रन्थाध्ययनं.

॥२५०॥

जातीयो यथाकालवादी यथाकालचारी च 'सम्यग्दृष्टिमान्' यथावस्थितान् पदार्थान् श्रद्दधानो देशनां व्याख्यानं वा कुर्वन् 'दृष्टिं' सम्यग्दर्शनं 'न लूषयेत्' न दूषयेत्, इदमुक्तं भवति—पुरुषविशेषं ज्ञात्वा तथा तथा कथनीयमपसिद्धान्तदेशनापरिहारेण यथा यथा श्रोतुः सम्यक्त्वं स्थिरीभवति, न पुनः शङ्कोत्पादनतो दूष्यते, यश्चैवंविधः स 'जानाति'अवबुध्यते 'भाषितुं' प्ररूपयितुं 'समाधिं' सम्यग्दर्शनज्ञानचारित्राख्यं सम्यङ्निक्षेप्तव्यवस्थानाख्यं वा तं सर्वज्ञोक्तं समाधिं सम्यगवगच्छतीति ॥ ॥ २५ ॥ किंचान्यत्—'अलूसए' इत्यादि, सर्वज्ञोक्तमागमं कथयन् 'नो लूषयेत्' नान्यथाऽपसिद्धान्तव्याख्यानेन दूषयेत्, तथा 'न प्रच्छन्नभाषी भवेत्' सिद्धान्तार्थमविरुद्धमवदातं सार्वजनीनं तत्प्रच्छन्नभाषणेन न गोपयेत्, यदिवा प्रच्छन्नं वाऽर्थमपरिणताय न भाषेत, तद्धि सिद्धान्तरहस्यमपरिणतशिष्यविध्वंसनेन दोषायैव संपद्यते, तथा चोक्तम्—"अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम्। दोषायाभिनवोदीर्णे, शमनीयमिव ज्वरे ॥ १ ॥" इत्यादि, न च सूत्रमन्यत् स्वमतिविकल्पनतः स्वपरत्रायी कुर्वीतान्यथा वा सूत्रं तदर्थं वा संसाराऽत्रायी—त्राणशीलो जन्तूनां न विदधीत, किमित्यन्यथा सूत्रं न कर्तव्यमित्याह—परहितैकरतः शास्ता तस्मिन् शास्तरि या व्यवस्थिता भक्तिः—बहुमानस्तया तद्भक्त्या अनुविचिन्त्य—ममानेनोक्तेन न कदाचिदागमबाधा स्यादित्येवं पर्यालोच्य वादं वदेत्, तथा यच्छ्रुतमाचार्यादिभ्यः सकाशात्तत्तथैव सम्यक्त्वाराधनामनुवर्तमानोऽन्येभ्य ऋणमोक्षं प्रतिपद्यमानः 'प्रतिपादयेत्' प्ररूपयेच्च सुखशीलतां मन्यमानो यथाकथंचित्तिष्ठेदिति ॥ २६ ॥ अध्ययनोपसंहारार्थमाह—'रए' सम्यग्दर्शनस्यालूषको यथावस्थितागमस्य ग्रहेताऽनुविचिन्त्यभाषकः शुद्धम्—अवदातं यथावस्थितवस्तुप्ररूपणतोऽध्ययनतश्च सूत्रं—प्रवचनं यस्यासौ शुद्धसूत्रः, तथोपधानं—तपश्चरणं यस्य सूत्रस्याभिहितमार्गमे तद्विधते यस्यासावुपधानवान्, तथा 'धर्मं' श्रुतचारित्राख्यं यः सम्यक् वेत्ति विन्दते वा—सम्यग् लभते 'तत्र तत्रे'ति य आज्ञाग्राह्योऽर्थः स आज्ञयैव प्रतिपत्तव्यो हेतुकस्तु सम्यग्हेतुना यदिवा स्वसमयसिद्धोऽर्थः स्वसमये व्यवस्थापनीयः पर(समय)सिद्धश्च परस्मिन् अथवोत्सर्गापवादयोर्व्यवस्थितोऽर्थस्ताभ्यामेव यथास्वं प्रतिपादयितव्यः, एतद्गुणसंपन्नश्च 'आदेयवाक्यो' ग्राह्यवाक्यो भवति, तथा 'कुशलो' निपुणः आगमप्रतिपादने सदनुष्ठाने च 'व्यक्तः' परिस्फुटो नासमीक्ष्यकारी, यश्चैतद्गुणसमन्वितः सोऽर्हति—योग्यो भवति 'तं' सर्वज्ञोक्तं ज्ञानादिकं वा भावसमाधिं 'भाषितुं' प्रतिपादयितुं, नापरः कश्चिदिति । इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत्, गतोऽनुगमो, नयाः प्राग्वदाख्येयाः ॥ २७ ॥ समाप्तं चतुर्दशं ग्रन्थाख्यमध्ययनमिति ॥

इति श्रीसूत्रकृताङ्गे ग्रन्थनामकमध्ययनं समाप्तम् ॥

अथ आदाननामकं पञ्चदशमध्ययनं प्रारभ्यते ॥

अथ चतुर्दशाध्ययनानन्तरं पञ्चदशमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने सबाह्याभ्यन्तरस्य ग्रन्थस्य परित्यागो विधेय इत्यभिहितं, ग्रन्थपरित्यागाच्चायतचारित्रो भवति साधुः ततो यादृगसौ यथा च संपूर्णामायतचारित्रतां प्रतिपद्यते तदनेनाध्ययनेन प्रतिपाद्यते, तदनेन संबन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराण्युपक्रमादीनि भवन्ति, तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—आयतचारित्रेण साधुना भाव्यं। नामनिष्पन्ने तु निक्षेपे आदानीयमिति नाम, मोक्षार्थिनाऽशेषकर्मक्षयार्थं यज्ज्ञानादिकमादीयते तदत्र प्रतिपाद्यत इतिकृत्वा आदानीयमिति नाम संवृत्तं। पर्यायद्वारेण च प्रतिपादितं सुग्रहं भवतीत्यत आदानशब्दस्य तत्पर्यायस्य च ग्रहणशब्दस्य निक्षेपं कर्तुकामो निर्युक्तिकृदाह—

आदाणे गहणंमि य णिक्खेवो होति दोण्हवि चउक्को। एगट्ठं नाणट्ठं च होज्ज पगयं तु आदाणे ॥ १३२ ॥
जं पढमस्संतिमए वितियस्स उ तं हवेज्ज आदिंमि। एतेणादाणिज्जं एसो अन्नोऽवि पज्जाओ ॥ १३३ ॥
णामादी ठवणादी दव्वादी चेव होंति भावादी। दव्वादी पुण दव्वस्स जो सभावो सए ठाणे ॥ १३४ ॥
आगमणोआगमओ भावादी तं वुहा उवदिसंती। णोआगमओ भावो पंचविहो होइ णायव्वो ॥ १३५ ॥
आगमओ पुण आदी गणिपिडगं होइ बारसंगं तु। गंथसिलोगो पदपादअक्खराइं च तत्थादी ॥ १३६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा 'जमतीयं'ति अस्याध्ययनस्य नाम, तच्चादानपदेन, आदावादीयते इत्यादानं, तच्च ग्रहणमित्युच्यते, तत आदानग्रहणयोर्निक्षेपार्थं निर्युक्तिकृदाह–'आदाणं' इत्यादि, आदीयते कार्यार्थिना तदित्यादानं, कर्मणि ल्युट् प्रत्ययः, करणे वा, आदीयते–गृह्यते स्वीक्रियते विवक्षितमनेनेतिकृत्वा, आदानं च पर्यायतो ग्रहणमित्युच्यते, तत आदानग्रहणयोर्निक्षेपो(पे) भवति द्वौ चतुष्कौ, तद्यथा—नामादानं स्थापनादानं द्रव्यादानं भावादानं च, तत्र नामस्थापने क्षुण्णे, द्रव्यादानं वित्तं, यस्माल्लौकिकैः परित्यक्तान्यकर्तव्यमहता क्लेशेन तदादीयते, तेन वाऽपरं द्विपदचतुष्पदादिकमादीयत इतिकृत्वा, भावादानं तु द्विधा—प्रशस्तमप्रशस्तं च, तत्राप्रशस्तं क्रोधाद्युदयो मिथ्यात्वाविरत्यादिकं वा, प्रशस्तं तूत्तरोत्तरगुणश्रेण्या विशुद्ध्याध्यवसायकण्डकोपादानं सम्यग्ज्ञानादिकं वेत्येतदर्थप्रतिपादनपरमेतदेव वाऽध्ययनं द्रष्टव्यमिति, एवं ग्रहणेऽपि नामादिकश्चतुर्धा निक्षेपो द्रष्टव्यः, भावार्थोऽप्यादानपदस्येव द्रष्टव्यः, तत्पर्यायत्वादस्येति । एतच्च ग्रहणं नैगमसंग्रहव्यवहारर्जुसूत्रार्थनयाभिप्रायेणादानपदेन सहालोच्यमानं शक्रेन्द्रादिवदेकार्थम्—अभिन्नार्थं भवेत्, शब्दसमभिरूढैवंभूतशब्दनयाभिप्रायेण च नानार्थं भवेत् । इह तु 'प्रकृतं' प्रस्ताव 'आदाने' आदानविषये यत आदानपदमाश्रित्यास्याभिधानमकारि, आदानीयं वा ज्ञानादिकमाश्रित्य नाम कृतमिति ॥ आदानीयाभिधानस्यान्यथा वा प्रवृत्तिनिमित्तमाह–यद् पदं प्रथमश्लोकस्य तदर्धस्य च अन्ते–पर्यन्ते तदेव पदं शब्दतोऽर्थतः उभयतश्च द्वितीयश्लोकस्यादौ तदर्धस्य वाऽऽदौ भवति एतेन प्रकारेण–आद्यन्तपदसदृशत्वेनादानीयं भवति, एष आदानीयाभिधानप्रवृत्तेः 'पर्यायः' अभिप्रायः अन्यो वा विशिष्टज्ञानादि आदानीयोपादानादिति । केचित्तु पुनरस्याध्ययनस्यान्तादिपदयोः संकलनात्संकलिकेति नाम

१ कर्मकरणयोर्भेदात्, यद्वा धातुभेदेनार्थभेदात्, सामान्यं ग्रहणं आदानादादानमिति वा भेदः ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२५३॥

कुर्वते, तस्या अपि नामादिकश्चतुर्धा निक्षेपो विधेयः, तत्रापि द्रव्यसंकलिका निगडादौ भावसंकलना तूत्तरोत्तरविशिष्टाध्यवसायसंकलनम्, इदमेव वाऽध्ययनम्, आद्यन्तपदयोः संकलनादिति । येषामादानपदेनाभिधानं तन्मतेनादौ यत्पदं तदादानपदम्, अत आदेर्निक्षेपं कर्तुकाम आह—आदेर्नामादिकश्चतुर्धा निक्षेपः, नामस्थापने सुगमत्वादनादृत्य द्रव्यादिं दर्शयति—द्रव्यादिः पुनः 'द्रव्यस्य' परमाण्वादेर्यः 'स्वभावः' परिणतिविशेषः 'स्वके स्थाने' स्वकीये पर्याये प्रथमम्–आदौ भवति स द्रव्यादिः, द्रव्यस्य दध्यादेर्य आद्यः परिणतिविशेषः क्षीरस्य विनाशकालसमकालीनः, एवमन्यस्यापि परमाण्वादेर्द्रव्यस्य यो यः परिणतिविशेषः प्रथममुत्पद्यते स सर्वोऽपि द्रव्यादिर्भवति । ननु च कथं क्षीरविनाशसमय एव दध्युत्पादः ?, तथाहि—उत्पादविनाशौ भावाभावरूपौ वस्तुधर्मौ वर्तेते, न च धर्मो धर्मिणमन्तरेण भवितुमर्हति, अत एकस्मिन्नेव क्षणे तद्धर्मिणोर्दधिक्षीरयोः सत्ताऽवाप्नोति, एतच्च दृष्टेष्टबाधितमिति, नैष दोषः, यस्य हि वादिनः क्षणमात्रं वस्तु तस्यायं दोषो, यस्य तु पूर्वोत्तरक्षणानुगतमन्वयि द्रव्यमस्ति तस्यायं दोष एव न भवति, तथाहि–तत्परिणामिद्रव्यमेकस्मिन्नेव क्षणे एकेन स्वभावेनोत्पद्यते परेण विनश्यति, अनन्तधर्मात्मकत्वाद्वस्तुन इति यत्किञ्चिदेतत् । तदेवं द्रव्यस्य विवक्षितपरिणामेन परिणमतो य आद्यः समयः स द्रव्यादिरिति स्थितं, द्रव्यस्य प्राधान्येन विवक्षितत्वादिति ॥ साम्प्रतं भावादिमधिकृत्याह—भावः–अन्तःकरणस्य परिणतिविशेषस्तं 'बुद्धाः' तीर्थकरगणधरादयो 'व्यपदिशन्ति' प्रतिपादयन्ति, तद्यथा–आगमतो नोआगमतश्च, तत्र नोआगमतः प्रधानपुरुषार्थतया चिन्त्यमानत्वात् 'पञ्चविधः' पञ्चप्रकारो भवति, तद्यथा–प्राणातिपातविरमणादीनां पञ्चानामपि महाव्रतानामाद्यः प्रतिपत्तिसमय इति, तथा 'आगमओ' इत्यादि, आगममाश्रित्य पुनरादिरेवं द्रष्टव्यः, तद्यथा–यदेतद्गणिनः–आचार्यस्य पिटकं–सर्वस्वमाधारो वा तद्द्वादशाङ्गं भवति, तुशब्दादन्यदप्युपाङ्गादिकं द्रष्टव्यं, तस्य च प्रवचनस्यादिभूतो यो ग्रन्थस्तस्याप्याद्यः श्लोकस्तस्याप्यार्धं पदं तस्यापि प्रथममक्षरम्, एवंविधो बहुप्रकारो भावादिर्द्रष्टव्य इति । तत्र सर्वस्यापि प्रवचनस्य सामायिकमादिस्तस्यापि करोमीति पदं तस्यापि ककारो, द्वादशानां तल्लक्षणानामाचाराङ्गमादिस्तस्यापि शस्त्रपरिज्ञाध्ययनमस्यापि च जीवोद्देशकस्तस्यापि 'सुयं'ति पदं तस्यापि सुकार इति, अस्य च प्रकृताङ्गस्य समयाध्ययनमादिस्तस्यापि आद्युद्देशकश्लोकपादपदवर्णादिर्द्रष्टव्य इति । गतो नामनिष्पन्नो निक्षेपः, तदनन्तरमस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

जमतीतं पडुप्पन्नं, आगमिस्सं च णायओ । सव्वं मन्नति तं ताई, दंसणावरणंतए ॥ १ ॥
अंतए वितिगिच्छाए, से जाणति अणेलिसं । अणेलिसस्स अक्खाया, ण से होइ तहिं तहिं ॥२॥
तहिं तहिं सुयक्खायं, से य सच्चे सुआहिए । सया सच्चेण संपन्ने, मित्तिं भूएहिं कप्पए ॥ ३ ॥
भूएहिं न विरुज्झेज्जा, एस धम्मे बुसीमओ । बुसिमं जगं परिन्नाय, अस्सिं जीवितभावणा ॥ ४ ॥

अस्य चानन्तरसूत्रेण संबन्धो वक्तव्यः, स चायं, तद्यथा–आदेयवाक्यः कुशलो व्यक्तोऽर्हति तथोक्तं समाधिं भावितुं, यश्च यदतीतं प्रत्युत्पन्नमागामि च सर्वमवगच्छति स एव भावितुमर्हति नान्य इति । परम्परसूत्रसंबन्धस्तु य एवातीतानागतवर्तमानकालत्रयवेदी स एवाशेषबन्धनानां परिज्ञाता त्रोटयिता वेत्येतद्बुध्येतेत्यादिकः संबन्धोऽपरसूत्रैरपि स्वबुद्ध्या लगनीय इति । तदेवं प्रतिपादितसंबन्धस्यास्य सूत्रस्य व्याख्या प्रस्तूयते—यत्किमपि द्रव्यजातमतीतं यच्च प्रत्युत्पन्नं यच्चानागतम्–एष्यत्कालभावि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मात्सौ सर्वस्यापि यथावस्थितस्वरूपनिरूपणतो 'नायकः' प्रणेता, यथावस्थितवस्तुस्वरूपप्रणेतृत्वं च परिज्ञाने सति भवत्यतस्तदुपदिश्यते—'सर्वम्' अतीतानागतवर्तमानकालत्रयभावतो द्रव्यादिचतुष्कस्वरूपतो द्रव्यपर्यायनिरूपणतश्च मनुते—असौ जानाति सम्यक् परिच्छिनत्ति तत्सर्वमवबुध्यते, जानानश्च विशिष्टोपदेशदानेन संसारोत्तारणतः सर्वप्राणिनां त्रायत्यसौ—त्राणकरणशीलः, यदिवा—'अयवयपयमयचयतयणय गता' इत्यस्य धातोर्घञ्प्रत्ययः, तयनं तायः स विद्यते यस्यासौ तायी, 'सर्वे गत्यर्था ज्ञानार्थाः' इतिकृत्वा सामान्यस्य परिच्छेदको, मनुते इत्यनेन विशेषस्य, तदनेन सर्वज्ञः सर्वदर्शी चेत्युक्तं भवति, न च कारणमन्तरेण कार्यं भवतीत्यत इदमपदिश्यते—दर्शनावरणीयस्य कर्मणोऽन्तकः, मध्यग्रहणे (न)तु घातिचतुष्टयस्यान्तकृद् द्रष्टव्य इति ॥१॥ यश्च घातिचतुष्टयान्तकृत्स ईदृग्भवतीत्याह—विचिकित्सा—चित्तविप्लुतिः संशयज्ञानं तस्यासौ तदावरणक्षयादन्तकृत् संशयविपर्ययमिथ्याज्ञानानामविपरीतार्थपरिच्छेदादन्ते वर्तते, इदमुक्तं भवति—तत्र दर्शनावरणक्षयप्रतिपादनात् ज्ञानाद् भिन्नं दर्शनमित्युक्तं भवति, ततश्च येषामेकमेव सर्वज्ञस्य ज्ञानं वस्तुगतयोः सामान्यविशेषयोरचिन्त्यशक्त्युपेतत्वात्परिच्छेदकमित्येषोऽभ्युपगमः सोऽनेन पृथगावरणक्षयप्रतिपादनेन निरस्तो भवतीति, यश्च घातिकर्मान्तकृदतएवान्तसंशयादिज्ञानः सः 'अनीदृशम्' अनन्यसदृशं जानीते न तत्तुल्यो वस्तुगतसामान्यविशेषांशपरिच्छेदक उभयरूपेणैव विज्ञानेन विद्यत इति, इदमुक्तं भवति—न तज्ज्ञानमितरज्ञानतुल्यम्, अतो यदुक्तं मीमांसकैः—सर्वज्ञस्य सर्वपदार्थपरिच्छेदकत्वेऽभ्युपगम्यमाने सर्वदा स्पर्शरूपरसगन्धवर्णशब्दपरिच्छेदादनभिमतद्रव्यरसास्वादनमपि प्राप्नोति, तदनेन व्युदस्तं द्रष्टव्यं, यदप्युच्यते—सामान्येन सर्वज्ञसद्भावेऽपि शेषहेतोरभावादहेत्वेव संप्रत्ययो नोपपद्यते, तथा चोक्तम्—"अर्ह(रह)न् यदि सर्वज्ञो, बुद्धो नेत्यत्र का प्रमा? । अथोभावपि सर्वज्ञौ, मतभेदस्तयोः कथम्? ॥ १ ॥" इत्यादि, एतत्परिहारार्थमाह—'अनीदृशस्य' अनन्यसदृशस्य यः परिच्छेदक आख्याता च नासौ 'तत्र तत्र' दर्शने बौद्धादिके भवति, तेषां द्रव्यपर्याययोरनभ्युपगमादिति, तथाहि—शाक्यमुनिः सर्वं क्षणिकमिच्छन् पर्यायानेवेच्छति न द्रव्यं, द्रव्यमन्तरेण च निर्बीजत्वात् पर्यायाणामप्यभावः प्राप्नोत्यतः पर्यायानिच्छताऽवश्यमकामेनापि तदाधारभूतं परिणामि द्रव्यमेष्टव्यं, तदनभ्युपगमाच्च नासौ सर्वज्ञ इति, तथा अप्रच्युतानुत्पन्नस्थिरैकस्वभावस्य द्रव्यस्यैवैकस्याभ्युपगमादध्यक्षाध्यवसीयमानानामर्थक्रियासमर्थानां पर्यायाणामनभ्युपगमान्निष्पर्यायस्य द्रव्यस्याप्यभावात्कपिलोऽपि न सर्वज्ञ इति, तथा क्षीरोदकवदभिन्नयोर्द्रव्यपर्याययोर्भेदेनाभ्युपगमादुलूकस्यापि न सर्वज्ञत्वम् । असर्वज्ञत्वाच्च तीर्थान्तरीयाणां मध्ये न कश्चिदप्यनीदृशस्य—अनन्यसदृशस्यार्थस्य द्रव्यपर्यायोभयरूपस्याख्याता भवतीत्यर्हन्नेवातीतानागतवर्तमानत्रिकालवर्तिनोऽर्थस्य स्याख्यातेति न तत्र तत्रेति स्थितम् ॥ २ ॥ साम्प्रतमेतदेव कुतीर्थिकानामसर्वज्ञत्वमर्हतश्च सर्वज्ञत्वं यथा भवति तथा सोपपत्तिकं दर्शयितुमाह—तत्र तत्रेति वीप्सापदं यच्चैनार्हता जीवाजीवादिकं पदार्थजातं तथा मिथ्यात्वाविरतिप्रमादकषाययोगा बन्धहेतव इतिकृत्वा संसारकारणत्वेन तथा सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति मोक्षाङ्गतयेत्येतत्सर्वं पूर्वोत्तराविरोधितया युक्तिभिरुपपन्नतया च सुष्ठ्वाख्यातं—स्वाख्यातं, तीर्थिकवचनं तु 'न हिंस्याद्भूतानी'ति भणित्वा तदुपमर्दकारम्भाभ्यनुज्ञानात्पूर्वोत्तरविरोधितया तत्र तत्र चिन्त्यमानं निर्युक्तिकलाप्रं स्वाख्यातं भवति, स चाविरुद्धार्थस्याख्याता रागद्वेषमोहानामनृतकारणानामसंभवात् सद्यो हितत्वाच्च सत्यः 'स्वाख्यातः' तत्स्वरूपविद्भिः प्रतिपादितः । रागादयो ह्यनृतकारणं ते च तस्य न सन्ति अतः कारणाभावात्कार्याभाव इतिकृत्वा तद्वचो भूतार्थप्रतिपादकं, तथा चोक्तम्—"वीतरागा हि सर्वज्ञा, मिथ्या न ब्रुवते वचः । यस्मात्तस्माद्वचस्तेषां, तथ्यं भूतार्थदर्शनम् ॥ १ ॥" ननु च सर्वज्ञत्वमन्तरेणापि हेयोपादेयमात्रपरिज्ञानादपि सत्यता भवत्येव, तथा चोक्तम्—"सर्वं पश्यतु वा मा वा, तत्त्वमिष्टं तु पश्यतु । कीटसंख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते? ॥ १ ॥ इत्याशङ्क्याह—'सदा' सर्वकालं 'सत्येन' अवितथभाषणत्वेन संपन्नोऽसौ अवितथभाषणत्वं च सर्वज्ञत्वे सति भवति, नान्यथा, तथाहि—कीटसंख्यापरिज्ञानासंभवे सर्वत्रापरिज्ञानमाशङ्क्यते, तथा चोक्तम्—"सदृशे बाधासंभवे तल्लक्षणमेव दूषितं स्याद्" इति सर्वत्रानाश्वासः, तस्मात्सर्वज्ञत्वं तस्य भगवत एष्टव्यम्, अन्यथा तद्वचसः सदा सत्यता न स्यात्, सत्यो वा संयमः सन्तः—प्राणिनस्तेभ्यो हितत्वाद् अतस्तेन तपःप्रधानेन संयमेन भूतार्थहितकारिणा 'सदा' सर्वकालं 'संपन्नो' युक्तः, एतद्गुणसंपन्नश्चासौ 'भूतेषु' जन्तुषु 'मैत्रीं' तद्रक्षणपरतया भूतदयां 'कल्पयेत्' कुर्यात्, इदमुक्तं भवति—परमार्थतः स सर्वज्ञस्तत्त्वदर्शितया यो भूतेषु मैत्रीं कल्पयेत्, तथा चोक्तम्—["मातृवत्परदाराणि, परद्रव्याणि लोष्टवत् ।] आत्मवत्सर्वभूतानि, यः पश्यति स पश्यति ॥ १ ॥" ॥ ३ ॥ यथा भूतेषु मैत्री संपूर्णभावमनुभवति तथा दर्शयितुमाह—'भूतैः' स्थावरजङ्गमैः सह 'विरोधं न कुर्यात्' तदुपघातकारिणमारम्भं तद्विरोधकारणं दूरतः परिवर्जयेदित्यर्थः स 'एषः' अनन्तरोक्तो भूताविरोधकारी 'धर्मः' स्वभावः पुण्याख्यो वा 'बुसीमओ'त्ति तीर्थकृतोऽयं सत्संयमवतो वेति । तथा सत्संयमवान् साधुस्तीर्थकृद्वा 'जगत्' चराचरभूतग्रामाख्यं केवलालोकेन सर्वज्ञप्रणीतागमपरिज्ञानेन वा 'परिज्ञाय' सम्यगवबुध्य 'अस्मिन्' जगति मौनीन्द्रे वा धर्मे भावनाः पञ्चविंशतिरूपा द्वादशप्रकारा वा या

१ तथा भूतार्थ० प्र० । २ नास्ति क्वचिदपि आदर्शे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिमतास्ता 'जीवितभावना' जीवसमाधानकारिणीः सत्संयमाङ्गतया मोक्षकारिणीर्भावयेदिति ॥ ४ ॥ सद्भावनाभावितस्य यद्भवति तद्दर्शयितुमाह—

भावणाजोगसुद्धप्पा, जले णावा व आहिया । नावा व तीरसंपन्ना, सव्वदुक्खा तिउट्टइ ॥ ५ ॥
तिउट्टई उ मेधावी, जाणं लोगंसि पावगं । तुट्टंति पावकम्माणि, नवं कम्ममकुव्वओ ॥ ६ ॥
अकुव्वओ णवं णत्थि, कम्मं नाम विजाणइ । विन्नाय से महावीरे, जेण जाई ण मिज्जई ॥ ७ ॥
ण मिज्जई महावीरे, जस्स नत्थि पुरेकडं । वाउव्व जालमच्चेति, पिया लोगंसि इत्थिओ ॥ ८ ॥

भावनाभियोगः—सम्यक्प्रणिधानलक्षणो भावनायोगस्तेन शुद्ध आत्मा—अन्तरात्मा यस्य स तथा, स च भावनायोगशुद्धात्मा सन् परित्यक्तसंसारस्वभावो नौरिव जलोपर्यवतिष्ठते संसारोदन्वत इति, नौरिव—यथा जलेऽनिमज्जनतेन प्रख्याता एवमसावपि संसारोदन्वति न निमज्जतीति । यथा चासौ निर्यामकाधिष्ठिताऽनुकूलवातेरिता समस्तद्वन्द्वापगमात्तीरमास्कन्दत्येवमायतचारित्रवान् जीवपोतः सदागमकर्णधाराधिष्ठितस्तपोमारुतवशात्सर्वदुःखात्मकात्संसारात् 'त्रुट्यति' अपगच्छति मोक्षाख्यं तीरं सर्वद्वन्द्वोपरमरूपमवाप्नोतीति ॥ ५ ॥ अपिच—स हि भावनायोगशुद्धात्मा नौरिव जले संसारे परिवर्तमानस्त्रिभ्यो—मनोवाक्कायेभ्यश्चुभेभ्यस्त्रुट्यति, यदिवा अतीव सर्वबन्धनेभ्यस्त्रुट्यति—मुच्यते अतित्रुट्यति—संसारादतिवर्तते 'मेधावी' मर्यादाव्यवस्थितः सदसद्विवेकी वाऽस्मिन् 'लोके' चतुर्दशरज्ज्वात्मके भूतग्रामलोके वा यत्किमपि 'पापकं' कर्म सावद्यानुष्ठानरूपं तत्कार्यं वा अष्टप्रकारं कर्म तत् ज्ञपरिज्ञया जानन् प्रत्याख्यानपरिज्ञया च तदुपादानं परिहरन् ततस्त्रुट्यति, तस्यैवं लोकं कर्म वा जानतो नवानि कर्माण्यकुर्वतो निरुद्धाश्रवद्वारस्य विकृष्टतपश्चरणवतः पूर्वसंचितानि कर्माणि त्रुट्यन्ति निवर्तन्ते वा नवं च कर्माकुर्वतोऽशेषकर्मक्षयो भवतीति ॥ ६ ॥ केषाञ्चित्सत्यामपि कर्मक्षयानन्तरं मोक्षावाप्तौ [तथापि] स्वतीर्थनिकारदर्शनतः पुनरपि संसाराभिगमनं भवती(ती)दमाशङ्क्याह—तस्याशेषक्रियारहितस्य योगप्रत्ययाभावात्किमप्यकुर्वतोऽपि 'नवं' प्रत्यग्रं कर्म ज्ञानावरणीयादिकं 'नास्ति' न भवति, कारणाभावात्कार्याभाव इतिकृत्वा, कर्माभावे च कुतः संसाराभिगमनं ?, कर्मकार्यत्वात्संसारस्य, तस्य चोपरताशेषद्वन्द्वस्य स्वपरकल्पनाऽभावाद्रागद्वेषरहिततया स्वदर्शननिकाराभिनिवेशोऽपि न भवत्येव, स चैतद्गुणोपेतः कर्माष्टप्रकारमपि कारणतस्तद्विपाकतश्च जानाति, नमनं नाम—कर्मनिर्जरणं तच्च सम्यक् जानाति, यदिवा कर्म जानाति तन्नाम च, अस्य चोपलक्षणार्थत्वात्तद्भेदांश्च प्रकृतिस्थित्यनुभावप्रदेशरूपान् सम्यगवबुध्यते, संभावनायां वा नामशब्दः, संभाव्यते चास्य भगवतः कर्मपरिज्ञानं विज्ञाय च कर्मबन्धं तत्संवरणनिर्जरणोपायं चासौ 'महावीरः' कर्मदारणसहिष्णुस्तत्करोति येन कृतेनास्मिन् संसारोदरे न पुनर्जायते तदभावाच्च नापि म्रियते, यदिवा—जात्या नारकोऽयं तिर्यग्योनिकोऽयमित्येवं न मीयते—न परिच्छिद्यते, अनेन च कारणाभावात्संसाराभावाविर्भावनेन यत्कैश्चिदुच्यते—'ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम् ॥ १ ॥" इत्येतदपि व्युदस्तं भवति, संसारस्वरूपं विज्ञाय तदभावः क्रियते, न पुनः सांसिद्धिकः कश्चिदनादिसिद्धोऽस्ति, तत्प्रतिपादिकाया युक्तेरसंभवादिति ॥ ७ ॥ किं पुनः कारणमसौ न जात्यादिना मीयते इत्याशङ्क्याह—असौ महावीरः परित्यक्ताशेषकर्मा न जात्यादिना 'मीयते' परिच्छिद्यते, न म्रियते वा, जातिजरामरणरोगशोकैर्वा संसारचक्रवाले पर्यटन् न म्रियते—न पूर्यते, किमिति ?, यतस्तस्यैव जात्यादिकं भवति यस्य 'पुरस्कृ(राकृ)तं' जन्मशतोपात्तं कर्म विद्यते, यस्य तु भगवतो महावीरस्य निरुद्धाश्रवद्वारस्य 'नास्ति' न विद्यते पुरस्कृ(राकृ)तं, पुरस्कृ(राकृ)तकर्मोपादानाभावाच्च न तस्य जातिजरामरणैर्मरणं संभाव्यते, तदाश्रवद्वारनिरोधाद्, आश्रवाणां च प्रधानः स्त्रीप्रसङ्गस्तमधिकृत्याह—वायुर्यथा सततगतिरप्रतिस्खलिततयाः 'अग्निज्वालां' दहनात्मिकामप्यत्येति—अतिक्रामति पराभवति, न तया पराभूयते, एवं 'लोके' मनुष्यलोके हावभावप्रधानत्वात् 'प्रिया' दयितास्त्रियस्ताश्च दुरतिक्रमणीयात्मा अत्येति—अतिक्रामति न ताभिर्जीयते, तत्स्वरूपावगमात् तज्जयविपाकदर्शनाच्चेति, तथा चोक्तम्—"स्त्रितेन भावेन मदेन लज्जया, पराङ्मुखैरर्धकटाक्षवीक्षितैः । वचोभिरीर्ष्याकलहेन लीलया, समस्तभावैः खलु बन्धनं स्त्रियः ॥ १ ॥ तथा—स्त्रीणां कृते भ्रातृयुगस्य भेदः, संबन्धिभेदे स्त्रिय एव मूलम् । अप्राप्तकामा बहवो नरेन्द्रा, नारीभिरुत्सादितराजवंशाः ॥२॥" इत्येवं तत्स्वरूपं परिज्ञाय तज्जयं विधत्ते, नैताभिर्जीयत इति स्थितम् । अथ किं पुनः कारणं स्त्रीप्रसङ्गाश्रवद्वारेण शेषाश्रवद्वारोपलक्षणं क्रियते न प्राणातिपातादिनेति ?, अत्रोच्यते, केषाञ्चिद्दर्शनिनामङ्गोपभोग आश्रवद्वारमेव न भवति, तथा चोचुः—"न मांसभक्षणे दोषो, न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला ॥ १ ॥" इत्यादि, तन्मतव्युदासार्थमेवमुपन्यस्तमिति, यदिवा मध्यमतीर्थकृतां चतुर्याम एव धर्मः, इह तु पञ्चयामो धर्म इत्यस्यार्थस्याविर्भावनायानेनोपलक्षणमकारि, अथवा पराणि व्रतानि सापवादानि इदं तु निरपवादमित्यस्यार्थस्य प्रकटनायैवमकारि, अथवा सर्वाण्यपि व्रतानि तुल्यानि, एकखण्डने सर्वविराधनमितिकृत्वा येन केनचिन्निर्देशो न दोषायेति ॥ ८ ॥ अधुना स्त्रीप्रसङ्गाश्रवनिरोधफलमाविर्भावयन्नाह—

१ स्त्रीवशताफलस्य नरकादेः दर्शनात् यद्वा स्त्रीणां वशवर्ती न भवतीति प्रायुक्तं, असंभवि चेत्र, तत्स्वरूपादि, अनर्थकारित्वावगमाद् विरतिः, तत्र प्रमाणं कामजयलभ्यफलदर्शनम् जयोपायस्य भोगजन्यदारुणविपाकस्य च ज्ञानाद्वा । २ समन्तपार्श्व प्र० ।

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२५६॥

१५आदानीयाध्य०

॥२५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थिओ जे ण सेवंति, आइमोक्खा हु ते जणा। ते जणा बंधणुम्मुक्का, नावकंखंति जीवियं॥ ९ ॥
जीवितं पिट्ठओ किच्चा, अंतं पावंति कम्मुणं। कम्मुणा संमुहीभूता, जे मग्गमणुसासई ॥ १० ॥
अणुसासणं पुढो पाणी, वसुमं पूयणासु(स)ते। अणासए जते दंते, दढे आरयमेहुणे ॥ ११ ॥
णीवारे व ण लीएज्जा, छिन्नसोए अणाविले। अणाइले सया दंते, संधिं पत्ते अणेलिसं ॥ १२ ॥

ये महासत्त्वाः कटुविपाकोऽयं स्त्रीप्रसङ्ग इत्येवमवधारण[त]या स्त्रियः सुगतिमार्गार्गलाः संसारवीथीभूताः सर्वाविनयराजधान्यः कपटजालशताकुला महामोहनशक्तयो 'न सेवन्ते' न तत्प्रसङ्गमभिलषन्ति त एवंभूता जना इतरजनातीताः साधव आदौ-प्रथमं मोक्षः-अशेषद्वन्द्वोपरमरूपो येषां ते आदिमोक्षाः, दुरवधारणे, आदिमोक्षा एव तेऽवगन्तव्याः, इदमुक्तं भवति—सर्वाविनयास्पदभूतः स्त्रीप्रसङ्गो यैः परित्यक्तस्त एवादिमोक्षाः-प्रधानभूतमोक्षाख्यपुरुषार्थोद्यताः, आदिशब्दस्य प्रधानवाचित्वात्, न केवलमुद्यतास्ते जनाः स्त्रीपाशबन्धनोन्मुक्तयाऽशेषकर्मबन्धनोन्मुक्ताः सन्तो 'नावकाङ्क्षन्ति' नाभिलषन्ति असंयमजीवितम् अपरमपि परिग्रहादिकं नाभिलषन्ते, यदिवा परित्यक्तविषयेच्छाः सदनुष्ठानपरायणा मोक्षैकतानाः 'जीवितं' दीर्घकालजीवितं नाभिकाङ्क्षन्तीति ॥ ९ ॥ किंचान्यत्-'जीवितम्' असंयमजीवितं 'पृष्ठतः कृत्वा' अनादृत्य प्राणधारणलक्षणं वा जीवितमनादृत्य सदनुष्ठानपरायणाः 'कर्मणां' ज्ञानावरणादीनाम् 'अन्तं' पर्यवसानं प्राप्नुवन्ति, अथवा 'कर्मणा' सदनुष्ठानेन जीवितनिरपेक्षाः संसारोदन्वतोऽन्तं-सर्वद्वन्द्वोपरमरूपं मोक्षाख्यमाप्नुवन्ति, सर्वदुःखविमोक्षलक्षणं मोक्षमप्राप्ता अपि कर्मणा-विशिष्टानुष्ठानेन मोक्षस्य संमुखीभूता-घातिचतुष्टयक्षयकियया उत्पन्नदिव्यज्ञानाः शाश्वतपदस्याभिमुखीभूताः, क एवंभूता इत्याह—ये विपच्यमानतीर्थकृन्नामकर्माणः समासादितदिव्यज्ञाना 'मार्गं' मोक्षमार्गं ज्ञानदर्शनचारित्ररूपम् 'अनुशासन्ति' सत्त्वहिताय प्राणिनां प्रतिपादयन्ति स्वतश्चानुतिष्ठन्तीति ॥ १० ॥ अनुशासनप्रकारमधिकृत्याह-अनुशास्यन्ते-सन्मार्गेऽवतार्यन्ते सदसद्विवेकतः प्राणिनो येन तदनुशासनं-धर्मदेशनया सन्मार्गावतारणं तत्पृथक् पृथक् भव्याभव्यादिषु प्राणिषु क्षित्युदकवत् स्वाशयवशादनेकधा भवति, यद्यपि च अभव्येषु तदनुशासनं न सम्यक् परिणमति तथापि सर्वोपायज्ञस्यापि न सर्वज्ञस्य दोषः, तेषामेव स्वभावपरिणतिरियं यया तद्वाक्यममृतभूतमेकान्तपथ्यं समस्तद्वन्द्वोपघातकारि न यथावत् परिणमति, तथा चोक्तम्-"सद्धर्मबीजवपनानघकौशलस्य, यल्लोकबान्धव ! तवापि खिलान्यभूवन्। तन्नाद्भुतं खगकुलेष्विह तामसेषु, सूर्यांशवो मधुकरीचरणावदाताः ॥ १ ॥" किंभूतोऽसावनुशासक इत्याह—वसु-द्रव्यं स च मोक्षं प्रति प्रवृत्तस्य संयमः तद्विद्यते यस्यासौ वसुमान्, पूजनं-देवादिकृतमशोकादिकमास्वादयति-उपभुङ्क्त इति पूजनास्वादकः, ननु चाधाकर्मणो देवादिकृतस्य समवसरणादेरुपभोगात्कथमसौ सत्संयमवानित्याशङ्क्याह-न विद्यते आशयः-पूजाभिप्रायो यस्यासावनाशयः, यदिवा द्रव्यतो विद्यमानेऽपि समवसरणादिके भावतोऽनास्वादकोऽसौ, तद्गतगार्ध्याभावात्, सत्यप्युपभोगे 'यतः' प्रयतः सत्संयमवानेवासावेकान्तेन संयमपरायणत्वात्, कुतो? यत इन्द्रियनोइन्द्रियाभ्यां दान्तः, एतद्गुणोऽपि कथमित्याह-दृढः संयमे, आरतम्-उपरतमपगतं मैथुनं यस्य स आरतमैथुनः-अपगतेच्छामदनकामः, इच्छामदनकामाभावाच्च संयमे दृढोऽसौ भवति, आयतचारित्रत्वाच्च दान्तोऽसौ भवति, इन्द्रियनोइन्द्रियदमाच्च प्रयतः, प्रयत्नवत्त्वाच्च देवादिपूजनानास्वादकः, तदनास्वादनाच्च सत्यपि द्रव्यतः परिभोगे सत्संयमवानेवासाविति ॥ ११ ॥ अथ किमित्यसावुपरतमैथुन इत्याशङ्क्याह-नीवारः-सूकरादीनां पशूनां वध्यस्थानप्रवेशनभूतो भक्ष्यविशेषस्तत्कल्पमेतन्मैथुनं, यथा हि असौ पशुर्नीवारेण प्रलोभ्य वध्यस्थानमभिनीय नानाप्रकारा वेदनाः प्राप्यते एवमसावप्यसुमान् नीवारकल्पेनानेन स्त्रीप्रसङ्गेन वशीकृतो बहुप्रकारा यातनाः प्राप्नोति, अतो नीवारप्रायमेतन्मैथुनमवगम्य स तस्मिन् ज्ञाततत्त्वो 'न लीयेत' न स्त्रीप्रसङ्गं कुर्यात्, किंभूतः सन्नित्याह—छिन्नानि-अपनीतानि स्रोतांसि-संसारावतरणद्वाराणि यथाविषयमिन्द्रियप्रवर्तनानि प्राणातिपातादीनि वा आश्रवद्वाराणि येन स छिन्नस्रोताः, तथा 'अनाविलः' अकलुषो रागद्वेषासंपृक्ततया मलरहितोऽनाकुलो वा-विषयाप्रवृत्तेः स्वस्थचेता एवंभूतश्चानाविलोऽनाकुलो वा 'सदा' सर्वकालमिन्द्रियनोइन्द्रियाभ्यां दान्तो भवति, ईदृग्विधश्च कर्मविवरलक्षणं भावसंधिम् 'अनीदृशम्' अनन्यतुल्यं प्राप्तो भवतीति ॥ १२ ॥ किञ्च—

अणेलिसस्स खेयन्ने, ण विरुज्झिज्ज केणइ। मणसा वयसा चेव, कायसा चेव चक्खुमं ॥ १३ ॥
से हु चक्खू मणुस्साणं, जे कंखाए य अंतए। अंतेण खुरो वहती, चक्कं अंतेण लोट्टती ॥ १४ ॥
अंताणि धीरा सेवंति, तेण अंतकरा इह। इह माणुस्सए ठाणे, धम्ममाराहिउं णरा ॥ १५ ॥
णिट्ठियट्ठा व देवा वा, उत्तरीए इयं सुयं। सुयं च मेयमेगेसिं, अमणुस्सेसु णो तहा ॥ १६ ॥

'अनीदृशः' अनन्यसदृशः संयमो मौनीन्द्रधर्मो वा तस्य तस्मिन् वा 'खेदज्ञो' निपुणः, अनीदृशखेदज्ञश्च केनचित्सार्धं न विरोधं कुर्वीत, सर्वेषु प्राणिषु मैत्रीं भावयेदित्यर्थः, योगत्रिककरणत्रिकेणेति दर्शयति—'मनसा' अन्तःकरणेन प्रशान्तमनाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'वाचा' हितमितभाषी तथा कायेन निरुद्धदुष्प्रणिहितसर्वकायचेष्टो दृष्टिपूतपादचारी सन् परमार्थतश्चक्षुष्मान् भवतीति ॥ १३ ॥ अपिच—दुरवधारणे, स एव प्राप्तकर्मविवरोऽनीदृशस्य खेदज्ञो भव्यमनुष्याणां चक्षुः—सदसत्पदार्थाविर्भावनाक्षेत्रभूतो वर्तते, किंभूतोऽसौ ?, यः 'काङ्क्षायाः' भोगेच्छाया अन्तको विषयतृष्णायाः पर्यन्तवर्ती । किमन्तवर्तीति विवक्षितमर्थं साधयति ?, साधयत्येवेत्यमुमर्थं दृष्टान्तेन साधयन्नाह—'अन्तेन' पर्यन्तेन 'क्षुरो' नापितोपकरणं तदन्तेन वहति, तथा चक्रमपि रथाङ्गमन्तेनैव मार्गे प्रवर्तते, इदमुक्तं भवति—यथा क्षुरादीनां पर्यन्त एवार्थक्रियाकारी एवं विषयकषायात्मकमोहनीयान्त एवापसदसंसारक्षयकारीति ॥ १४ ॥ अमुमेवार्थमाविर्भावयन्नाह—'अन्तान्' पर्यन्तान् विषयकषायतृष्णायास्तत्परिकर्मणार्थमुद्यानादीनामाहारस्य वाऽन्तप्रान्तादीनि 'धीराः' महासत्त्वा विषयसुखनिःस्पृहाः 'सेवन्ते' अभ्यस्यन्ति, तेन चान्तप्रान्ताभ्यसनेन 'अन्तकराः' संसारस्य तत्कारणस्य वा कर्मणः क्षयकारिणो भवन्ति, 'इहे'ति मनुष्यलोके आर्यक्षेत्रे वा, न केवलं त एव तीर्थङ्करादयः अन्येऽप्याह मानुष्यलोके स्थाने प्राप्ताः सम्यग्दर्शनज्ञानचारित्रात्मकं धर्ममाराध्य 'नराः' मनुष्याः कर्मभूमिगर्भव्युत्क्रान्तिजसंख्येयवर्षायुषः सन्तः सदनुष्ठानसामग्रीमवाप्य 'निष्ठितार्थाः' उपरतसर्वद्वन्द्वा भवन्ति ॥१५॥ इदमेवाह—'निष्ठितार्थाः' कृतकृत्या भवन्ति, केचन प्रचुरकर्मतया सत्यामपि सम्यक्त्वादिकायां सामग्र्यां न तद्भव एव मोक्षमास्कन्दन्ति अपितु सौधर्माद्याः पञ्चो(अनु)त्तरविमानावसाना देवा भवन्तीति, एतल्लोकोत्तरीये प्रवचने श्रुतम्—आगमः एवंभूतः सुधर्मस्वामी वा जम्बूस्वामिनमुद्दिश्यैवमाह—यथा मयैतल्लोकोत्तरीये भगवत्यर्हत्युपलब्धं, तद्यथा—अवाप्तसम्यक्त्वादिसामग्रीकः सिध्यति वैमानिको वा भवतीति । मनुष्यगतावेवैतन्नान्यत्रेति दर्शयितुमाह—'सुयं मे' इत्यादि पश्चार्द्धं, तच्च मया तीर्थकरान्तिके 'श्रुतम्' अवगतं, गणधरः स्वशिष्याणामेकेषामिदमाह—यथा मनुष्य एवाशेषकर्मक्षयात्सिद्धिगतिभाग्भवति नामनुष्य इति, एतेन यच्छाक्यैरभिहितं, तद्यथा—देव एवाशेषकर्मप्रहाणं कृत्वा मोक्षभाग्भवति, तदपास्तं भवति, न ह्यमनुष्येषु गतित्रयवर्तिषु सच्चारित्रपरिणामाभावाद्यथा मनुष्याणां तथा मोक्षावाप्तिरिति ॥ १६ ॥ इदमेव स्वनामग्राहमाह—

सूत्र. ४४ सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२५९॥

१५आदानीयाध्य०

अंतं करंति दुक्खाणं, इहमेगेसि आहियं । आघायं पुण एगेसिं, दुल्लभेऽयं समुस्सए ॥ १७ ॥
इओ विद्धंसमाणस्स, पुणो संबोहि दुल्लभा । दुल्लहाओ तहच्चाओ, जे धम्मट्ठं वियागरे ॥ १८ ॥
जे धम्मं सुद्धमक्खंति, पडिपुन्नमणेलिसं । अणेलिसस्स जं ठाणं, तस्स जम्मकहा कओ ? ॥ १९ ॥
कओ कयाइ मेधावी, उप्पज्जंति तहागया । तहागया अप्पडिन्ना, चक्खू लोगस्सणुत्तरा ॥ २० ॥

न ह्यमनुष्या अशेषदुःखानामन्तं कुर्वन्ति, तथाविधसामग्र्यभावात्, यथैकेषां वादिनामाख्यातं, तद्यथा—देवा एवोत्तरोत्तरं स्थानमास्कन्दन्तोऽशेषक्लेशप्रहाणं कुर्वन्ति, न तथेह—आर्हते प्रवचने इति । इदमन्यत् पुनरेकेषां गणधरादीनां स्वशिष्याणां वा गणधरादिभिराख्यातं, तद्यथा—युगसमिलादिन्यायावाप्तकथञ्चित्कर्मविवरात् योऽयं शरीरसमुच्छ्रयः सोऽकृतधर्मोपायैरसुमद्भिर्महासमुद्रप्रभ्रष्टरत्नवत्पुनर्दुर्लभो भवति, तथा चोक्तम्—"ननु पुनरिदमतिदुर्लभमगाधसंसारजलधिविभ्रष्टम् । मानुष्यं खद्योतकतडिल्लता- ॥२५९॥

१ इष्टितोऽवधारणविधेर्भवतीत्यस्याग्रतो योजनैवकारस्य, तथा चासंभवव्यवच्छेदार्थैवकारोऽत्र, अन्यथा बुद्धस्यापि मनुष्यत्वादनिर्मोक्षप्रसङ्गः । २ शरीरमेव पुद्गलसंघातत्वात्समुच्छ्रयः 'उस्सय समुस्सए वा' इति वचनात् समुच्छ्रय एव वा देहवाचकः शरीरशब्दस्तु विशेषणं ।

विलसितप्रतिमम् ॥ १ ॥" इत्यादि ॥ १७ ॥ अपिच—'इतः' अमुष्मात् मनुष्यभवात्सद्धर्मतो वा विध्वंसमानस्याकृतपुण्यस्य पुनरस्मिन् संसारे पर्यटतो 'बोधिः' सम्यग्दर्शनावाप्तिः सुदुर्लभा उत्कृष्टतः अपार्धपुद्गलपरावर्तकालेन यतो भवति, तथा 'दुर्लभा' दुरापा तथाभूता—सम्यग्दर्शनप्राप्तियोग्या 'अर्चा' लेश्याऽन्तःकरणपरिणतिरकृतधर्मणामिति, यदिवाऽर्चा—मनुष्यशरीरं तदप्यकृतधर्मबीजानामार्यक्षेत्रसुकुलोत्पत्तिसकलेन्द्रियसामग्र्यादिरूपं दुर्लभं भवति, जन्तूनां ये धर्मरूपमर्थं व्याकुर्वन्ति, ये धर्मप्रतिपत्तियोग्या इत्यर्थः, तेषां तथाभूतार्चा सुदुर्लभा भवतीति ॥ १८ ॥ किञ्चान्यत्—ये महापुरुषा वीतरागाः करतलामलकवत्सकलजगद्द्रष्टारः त एवंभूताः परहितैकरताः 'शुद्धम्' अवदातं सर्वोपाधिविशुद्धं धर्मम् 'आख्यान्ति' प्रतिपादयन्ति स्वतः समाचरन्ति च 'प्रतिपूर्णम्' आयतचारित्रसद्भावात्संपूर्णं यथाख्यातचारित्ररूपं वा 'अनीदृशम्' अनन्यसदृशं धर्मम् आख्यान्ति अनुतिष्ठन्ति(च)। तदेवम् 'अनीदृशस्य' अनन्यसदृशस्य ज्ञानचारित्रोपेतस्य यत् स्थानं—सर्वद्वन्द्वोपरमरूपं तदवाप्तस्य तस्य कुतो जन्मकथा?, जातो मृतो वेत्येवंरूपा कथा स्वप्नान्तरेऽपि तस्य कर्मबीजाभावात् कुतो विद्यत? इति, तथोक्तम्—"दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः । कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥ १ ॥" इत्यादि ॥ १९ ॥ किंचान्यत्—कर्मबीजाभावात् 'कुतः' कस्मात्कदाचिदपि 'मेधाविनो' ज्ञानात्मकाः तथा—अपुनरावृत्त्या गतास्तां गताः पुनरस्मिन् संसारेऽशुचिनिगर्भाधाने समुत्पद्यन्ते?, न कथञ्चित्कदाचित्कर्मोपादानाभावादुत्पद्यन्त इत्यर्थः, तथा 'तथागताः' तीर्थकृद्गणधरादयो न विद्यते प्रतिज्ञा—निदानबन्धनरूपा येषां तेऽप्रतिज्ञा—अनिदाना निराशंसाः सत्त्वहितकरणोद्यता अनुत्तरज्ञानत्वादनुत्तरा 'लोकस्य' जन्तुगणस्य सदसदर्थ-

१ वान्तसम्यक्त्वधर्मस्यैतावताऽवधेर्य सम्यक्त्वस्य पुनः प्राप्तेः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरूपणकारणतश्चक्षुर्भूता हिताहितप्राप्तिपरिहारं कुर्वन्तः सकललोकलोचनभूतास्तथागताः सर्वज्ञा भवन्तीति ॥२०॥ किञ्चान्यत्—

अणुत्तरे य ठाणे से, कासवेण पवेदिते । जं किच्चा णिव्वुडा एगे, निट्ठं पावंति पंडिया ॥ २१ ॥
पंडिए वीरियं लद्धुं, निग्घायाय पवत्तगं । धुणे पुव्वकडं कम्मं, णवं वाऽवि ण कुव्वती ॥ २२ ॥
ण कुव्वती महावीरे, अणुपुव्वकडं रयं । रयसा संमुहीभूता, कम्मं हेच्चाण जं मयं ॥ २३ ॥
जं मयं सव्वसाहूणं, तं मयं सल्लगत्तणं । साहइत्ताण तं तिन्ना, देवा वा अभविंसु ते ॥ २४ ॥
अभविंसु पुरा धी(वी)रा, आगमिस्सावि सुव्वता । दुन्निबोहस्स मग्गस्स, अंतं पाउकरा तिन्ने ॥२५॥
त्तिबेमि । इति पनरसमं जमइयं नामज्झयणं समत्तं ॥ (गाथाग्रं ६४३)

न विद्यते उत्तरं-प्रधानं यस्मादनुत्तरं स्थानं तच्च तत्संयमाख्यं 'काश्यपेन' काश्यपगोत्रेण श्रीमन्महावीरवर्धमानस्वामिना 'प्रवेदितम्' आख्यातं, तस्य चानुत्तरत्वमाविर्भावयन्नाह—'यद्' अनुत्तरं संयमस्थानं 'एके' महासत्त्वाः सदनुष्ठायिनः 'कृत्वा' अनुपाल्य 'निर्वृताः' निर्वाणमनुप्राप्ताः, निर्वृताश्च सन्तः संसारचक्रवालस्य 'निट्ठां' पर्यवसानं 'पण्डिताः' पापाङ्गीनाः प्राप्नुवन्ति, तदेवंभूतं संयमस्थानं काश्यपेन प्रवेदितं यदनुष्ठायिनः सन्तः सिद्धिं प्राप्नुवन्तीति तात्पर्यार्थः ॥ २१ ॥ अपिच—'पण्डिताः' सदसद्विवेकज्ञो 'वीर्यं' कर्मोदलनसमर्थं सत्संयमवीर्यं तपोवीर्यं वा 'लब्ध्वा' अवाप्य, तदेव वीर्यं विशिनष्टि—निःशेषकर्मणो

'निर्घाताय' निर्जरणाय प्रवर्तकं पण्डितवीर्यं, तच्च बहुभवशतदुर्लभं कथञ्चित्कर्मविवरादवाप्य 'धुनीयाद्' अपनयेत् पूर्वभवेष्वनेकेषु यत्कृतम्—उपात्तं कर्माष्टप्रकारं तत्पण्डितवीर्येण धुनीयात् 'नवं च' अभिनवं चाश्रवनिरोधान्न करोत्यसाविति ॥ २२ ॥ किञ्च—'महावीरः' कर्मविदारणसहिष्णुः सम्यानुपूर्व्येण मिथ्यात्वाविरतिप्रमादकषाययोगैर्यत्कृतं रजोऽपरजन्तुभिस्तदसौ 'न करोति' न विधत्ते, यतस्तत्प्राक्तनोपात्तरजसैवोपादीयते, स च तत्प्राक्तनं कर्मावष्टभ्य सत्संयमात्संमुखीभूतः, तदभिमुखीभूतश्च यन्मतमष्टप्रकारं कर्म तत्सर्वं 'हित्वा' त्यक्त्वा मोक्षस्य सत्संयमस्य वा सम्मुखीभूतोऽसाविति ॥ २३ ॥ अन्यच्च—'जम्मय'-मित्यादि, सर्वसाधूनां यत् 'मतम्' अभिप्रेतं तदेतत्सत्संयमस्थानं, तद्विशिनष्टि—शल्यं—पापानुष्ठानं तज्जनितं वा कर्म तत्कर्तयति—छिनत्ति यत्तच्छल्यकर्तनं तच्च सदनुष्ठानं उद्युक्तविहारिणः 'साधयित्वा' सम्यगाराध्य बहवः संसारकान्तारं तीर्णाः, अपरे तु सर्वकर्मक्षयाभावात् देवा अभूवन्, ते चाप्तसम्यक्त्वाः सच्चारित्रिणो वैमानिकत्वमवापुः प्राप्नुवन्ति प्राप्स्यन्ति चेति ॥ २४ ॥ सर्वोपसंहारार्थमाह—'पुरा' पूर्वस्मिन्नादिके काले बहवो 'महावीराः' कर्मविदारणसहिष्णवः 'अभूवन्' भूताः, तथा वर्तमाने च काले कर्मभूमौ तथाभूता भवन्ति तथाऽऽगामिनि चानन्ते काले तथाभूताः सत्संयमानुष्ठायिनो भविष्यन्ति, ये किं कृतवन्तः कुर्वन्ति करिष्यन्ति चेत्याह—यस्य दुर्निबोधस्य—अतीव दुष्प्रापस्य(मार्गस्य)ज्ञानदर्शनचारित्राख्यस्य 'अन्तं' परमकाष्ठामवाप्य तस्यैव मार्गस्य 'प्रादुः' प्राकाश्यं तत्करणशीलाः प्रादुष्कराः स्वतः सन्मार्गानुष्ठायिनोऽन्येषां च प्रादुर्भावकाः सन्तः संसारार्णवं तीर्णास्तरन्ति तरिष्यन्ति चेति । गतोऽनुगमः, साम्प्रतं नयाः, ते च प्राग्वत् द्रष्टव्याः । इतिरध्ययनपरिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ २५ ॥ इति आदानीयाख्यं पञ्चदशाध्ययनं समाप्तम् ॥

अथ षोडशं श्रीगाथाध्ययनं प्रारभ्यते ॥

उक्तं पञ्चदशमध्ययनं, साम्प्रतं षोडशमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तरोक्तेषु पञ्चदशस्वध्ययनेषु येऽर्था अभिहिता विधिप्रतिषेधद्वारेण तान् तथैवाचरन् साधुर्भवतीत्येतदनेनाध्ययनेनोपदिश्यते, ते चामी अर्थाः, तद्यथा—प्रथमाध्ययने स्वसमयपरसमयपरिज्ञानेन सम्यक्त्वगुणावस्थितो भवति द्वितीयाध्ययने ज्ञानादिभिः कर्मविदारणहेतुभिरष्टप्रकारं कर्म विदारयन् साधुर्भवति तथा तृतीयाध्ययने यथाऽनुकूलप्रतिकूलोपसर्गान् सम्यक् सहमानः साधुर्भवति चतुर्थे तु स्त्रीपरीषहस्य दुर्जयत्वात्तज्जयकारीति पञ्चमे तु नरकवेदनाभ्यः सम्मुद्विजमानस्तत्प्रायोग्यकर्मणो विरतः सन्साधुत्वमवाप्नुयात् षष्ठे तु यथा श्रीवीरवर्धमानस्वामिना कर्मक्षयोद्यतेन चतुर्ज्ञानिनाऽपि संयमं प्रति प्रयत्नः कृतस्तथाऽन्येनापि छद्मस्थेन विधेय इति सप्तमे तु कुशीलदोषान् ज्ञात्वा तत्परिहारोद्यतेन सुशीलावस्थितेन भाव्यम् अष्टमे तु बालवीर्यपरिहारेण पण्डितवीर्योद्यतेन सदा मोक्षाभिलाषिणा भाव्यं नवमे तु यथोक्तं क्षान्त्यादिकं धर्ममनुचरन् संसारान्मुच्यत इति दशमे तु संपूर्णसमाधियुक्तः सुगतिभाग्भवति एकादशे तु सम्यग्दर्शनज्ञानचारित्राख्यं सन्मार्गं प्रतिपन्नोऽशेषक्लेशग्रहणं विधत्ते द्वादशे तु तीर्थिकदर्शनानि सम्यग्गुणदोषविचारणतो विजानन्न तेषु श्रद्धानं विधत्ते त्रयोदशे तु शिष्यगुणदोषविज्ञः सद्गुणेषु वर्तमानः कल्याणभाग्भवति चतुर्दशे तु प्रशस्तभावग्रन्थभावितात्मा विस्रोतसिकारहितो भवति पञ्चदशे तु यथावदायतचारित्रो भवति भिक्षुस्तदुपदिश्यत इति । तदेवमनन्तरोक्तेषु पञ्चदशस्वध्ययनेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येऽर्थाः प्रतिपादितास्तेऽत्र संक्षेपतः प्रतिपाद्यन्त इत्यनेन संबन्धेनायातस्यास्याध्ययनस्य चत्वार्युपक्रमादीन्यनुयोगद्वाराणि भवन्ति । तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽनन्तरमेव संबन्धप्रतिपादनेनैवाभिहितः । नामनिष्पन्ने तु निक्षेपे गाथाषोडशकमिति नाम । तत्र गाथानिक्षेपार्थं निर्युक्तिकृदाह—

णामंठवणागाहा दव्वगाहा य भावगाहा य । पोत्थगपत्तगलिहिया सा होई दव्वगाहा उ ॥ १३७ ॥
होति पुण भावगाहा सागारुवओगभावणिप्फन्ना । मधुराभिहाणजुत्ता तेणं गाहत्ति णं बिंति ॥ १३८ ॥
गाहीकया व अत्था अहव ण सामुद्दएण छंदेणं । एएण होंति गाहा एसो अन्नोऽवि पज्जाओ ॥ १३९ ॥
पण्णरससु अज्झयणेसु पिंडितत्थेसु जो अवितहत्ति । पिंडियवयणेणऽत्थं गहेति तम्हा तओ गाहा ॥१४०॥
सोलसमे अज्झयणे अणगारगुणाण वण्णणा भणिया । गाहासोलसणामं अज्झयणमिणं ववदिसंति ॥१४१॥

तत्र गाथाया नामादिकश्चतुर्धा निक्षेपः, तत्रापि नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यगाथामाह—तत्र ज्ञशरीरभव्यशरीरव्यतिरिक्ता द्रव्यगाथा पत्रकपुस्तकादिन्यस्ता, तद्यथा—जयति णवणलिणकुवलयवियसियसयवत्तपत्तलदलच्छो । वीरो गइंदमयगलसुललियगयविक्कमो भगवं ॥ १ ॥ अथवेयमेव गाथाषोडशाध्ययनरूपा पत्रकपुस्तकन्यस्ता द्रव्यगाथेति । भावगाथामधिकृत्याह—भावगाथा पुनरियं भवति, तद्यथा—योऽसौ साकारोपयोगः क्षायोपशमिकभावनिष्पन्नो गाथां प्रति व्यवस्थितः सा भावगाथेत्यु-

१ गाथैव षोडशं गाथाषोडशं तदेव गाथाषोडशकं गाथाख्यं षोडशमध्ययनं यत्र तत्तथा वा । २ जयति नवनलिनीकुवलयविकसितशतपत्रपत्रलदलाक्षः । वीरो गज-मदगजेन्द्रसुललितगतिविक्रमो भगवान् ॥ १ ॥

सूत्रकृताङ्गे क्षीलाङ्काचार्यीयवृत्तिपुतं ॥२६२॥

१६ गाथाध्ययनं.

चयते, समस्तस्यापि च श्रुतस्य क्षायोपशमिकभावे व्यवस्थितत्वात्, तत्र चानाकारोपयोगस्यासंभवादेवमभिधीयते इति । पुनरपि तामेव विशिनष्टि—मधुरं—श्रुतिपेशलमभिधानम्—उच्चारणं यस्याः सा मधुराभिधानयुक्ता, गाथाछन्दसोपनिबद्धस्य प्राकृतस्य मधुरत्वादित्यभिप्रायः, गीयते—पठ्यते मधुराक्षरप्रवृत्त्या गायन्ति वा तामिति गाथा, यत एवमतस्तेन कारणेन गाथामितिं तां ब्रुवते । णमिति वाक्यालङ्कारे एनां वा गाथामिति । अन्यथा वा निरुक्तिमधिकृत्याह—'गाथीकृताः' पिण्डीकृता विक्षिप्ताः सन्त एकत्र मीलिता अर्था यस्यां सा गाथेति, अथवा सामुद्रेण छन्दसा वा निबद्धा सा गाथेत्युच्यते, तच्चेदं छन्दः—'अनिबद्धं च यल्लोके, गाथेति तत्पण्डितैः प्रोक्तम्" । 'एषः' अनन्तरोक्तो गाथाशब्दस्य 'पर्यायो' निरुक्तं तात्पर्यार्थो द्रष्टव्यः, तद्यथा—गीयतेऽसौ गायन्ति वा तामिति गाथीकृता वाऽर्थाः सामुद्रेण वा छन्दसेति गाथेत्युच्यते, अन्यो वा स्वयमभ्यूह्य निरुक्तविधिना विधेय इति । पिण्डितार्थग्राहित्वमधिकृत्याह—पञ्चदशस्वप्यध्ययनेषु अनन्तरोक्तेषु 'पिण्डितः' एकीकृतोऽर्थो येषां तानि पिण्डितार्थानि तेषु सर्वेष्वपि य एव व्यवस्थितोऽर्थस्तम् 'अवितथं' यथावस्थितं पिण्डितार्थवचनेन यस्माद् ग्रन्थात्येतदध्ययनं षोडशं 'ततः' पिण्डितार्थप्रथनाद्गाथेत्युच्यत इति । 'तत्त्वभेदपर्यायैर्व्याख्ये'तिकृत्वा तत्त्वार्थमधिकृत्याह—षोडशाध्ययने अनगाराः—साधवस्तेषां गुणाः—क्षान्त्यादयस्तेषामनगारगुणानां पञ्चदशस्वप्यध्ययनेष्वभिहितानामिहाध्ययने पिण्डितार्थवचनेन यतो वर्णनाऽभिहिता उक्ताऽतो गाथाषोडशाभिधानमध्ययनमिदं 'व्यपदिश्यन्ति' प्रतिपादयन्ति । उक्तो नामनिष्पन्ननिक्षेपनिर्युक्त्यनुगमः, तदनन्तरं सूत्रस्पर्शिकनिर्युक्त्यनुगमस्यावसरः, स च सूत्रे सति भवति, सूत्रं च सूत्रानुगमे, असावप्यवसरप्राप्त एवातोऽस्खलितादिगुणोपेतं सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्—

॥२६२॥

अहाह भगवं—एवं से दंते दविए वोसट्ठकाएत्ति वच्चे माहणेत्ति वा १ समणेत्ति वा २ भिक्खूत्ति वा ३ णिग्गंथेत्ति वा ४ पडिआह—भंते! कहं नु दंते दविए वोसट्ठकाएत्ति वच्चे माहणेत्ति वा समणेत्ति वा भिक्खूत्ति वा णिग्गंथेत्ति वा? तं नो बूहि महामुणी!॥ इतिविरए सव्वपावकम्मेहिं पिज्जदोसकलह० अब्भक्खाण० पेसुन्न० परपरिवाय० अरतिरति० मायामोस० मिच्छादंसणसल्लविरए समिए सहिए सया जए णो कुज्झे णो माणी माहणेत्ति वच्चे १ ॥

'अथे' त्ययं शब्दोऽवसानमङ्गलार्थः, आदिमङ्गलं तु बुध्येतेत्यनेनाभिहितं, अत आद्यन्तयोर्मङ्गलत्वात्सर्वोऽपि श्रुतस्कन्धो मङ्गलमित्येतदनेनावेदितं भवति । आनन्तर्ये वाऽथशब्दः, पञ्चदशाध्ययनानन्तरं तदर्थसंग्राहीदं षोडशमध्ययनं प्रारभ्यते । अथानन्तरमाह—'भगवान्' उत्पन्नदिव्यज्ञानः सदेवमनुजायां पर्षदीदं वक्ष्यमाणमाह, तद्यथा—एवमसौ पञ्चदशाध्ययनोक्तार्थयुक्तः स साधुर्दान्त इन्द्रियनोइन्द्रियदमनेन द्रव्यभूतो मुक्तिगमनयोग्यत्वात् 'द्रव्यं च भव्ये' इति वचनात् रागद्वेषकालिकापद्रव्यरहितत्वाद्वाजात्यसुवर्णवद् शुद्धद्रव्यभूतस्तथा व्युत्सृष्टो निष्प्रतिकर्मशरीरतया कायः—शरीरं येन स भवति व्युत्सृष्टकायः, तदेवंभूतः सन् पूर्वोक्ताध्ययनार्थेषु वर्तमानः प्राणिनः स्थावरजङ्गमसूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्नान् मा हणत्ति प्रवृत्तिर्यस्यासौ माहनो नवब्रह्मचर्यगुप्तिगुप्तो ब्रह्मचर्यधारणाद्वा ब्राह्मण इत्यनन्तरोक्तगुणकदम्बकयुक्तः साधुर्माहनो ब्राह्मण [ग्रन्थाग्रम् ८०००] इति वा वाच्यः, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्राम्यति-तपसा खिद्यत इतिकृत्वा श्रमणो वाच्योऽथवा समं-तुल्यं मित्रादिषु मनः-अन्तःकरणं यस्य स समनाः सर्वत्र वासीचन्दनकल्प इत्यर्थः, तथा चोक्तम्-"णत्थि य सि कोइ वेसो" इत्यादि । तदेवं पूर्वोक्तगुणकलितः श्रमणः सन् सममना वा इत्येवं वाच्यः साधुरिति । तथा भिक्षणशीलो भिक्षुर्भिनत्ति वाऽष्टप्रकारं कर्मेति भिक्षुः स साधुर्दान्तादिगुणोपेतो भिक्षुरिति वाच्यः । तथा सबाह्याभ्यन्तरग्रन्थाभावान्निर्ग्रन्थः । तदेवमनन्तरोक्तपञ्चदशाध्ययनोक्तार्थानुष्ठायी दान्तो द्रव्यभूतो व्युत्सृष्टकायश्च [स] निर्ग्रन्थ इति वाच्य इति । एवं भगवतोक्ते सति प्रत्याह तच्छिष्यः—भगवन् !—भदन्त ! भयान्त ! भवान्त ! इति वा योऽसौ दान्तो द्रव्यभूतो व्युत्सृष्टकायः सन् ब्राह्मणः श्रमणो भिक्षुर्निर्ग्रन्थ इति वाच्यः तदेतत्कथं ? यद्भगवतोक्तं ब्राह्मणादिशब्दवाच्यत्वं साधोरिति, एतदुक्तं भवति-अस्माकं 'ब्रूहि' आवेदय 'महामुने !' यथावस्थितत्रिकालवेदिन् ॥ १ ॥ इत्येवं पृष्टो भगवान् ब्राह्मणादीनां चतुर्णामप्यभिधानानां कथञ्चिद्भेदाद्भिन्नानां यथाक्रमं प्रवृत्तिनिमित्तमाह—'इति' एवं पूर्वोक्ताध्ययनार्थवृत्तिः सन् 'विरतो' निवृत्तः सर्वेभ्यः पापकर्मभ्यः-सावद्यानुष्ठानरूपेभ्यः स तथा, तथा प्रेम-रागाभिष्वङ्गलक्षणं द्वेषः-अप्रीतिलक्षणः कलहो-द्वन्द्वाधिकरणमभ्याख्यानम्-असदभियोगः पैशुन्यं (कर्णेजपत्वं) परगुणासहनतया तद्दोषोद्घट्टनमितियावत् परस्य परिवादः काका परदोषापादनं अरतिः-चित्तोद्वेगलक्षणा संयमे तथा रतिः-विषयाभिष्वङ्गो माया-परवञ्चना तथा कुटिलमतर्मृषावादः-असदर्थाभिधानं गामश्वं ब्रुवतो भवति, मिथ्यादर्शनम्—अतत्त्वे तत्त्वाभिनिवेशस्तत्त्वे वाऽतत्त्वमिति, यथा-णत्थि ण णिच्चो ण कुणइ कयं ण वेएइ णत्थि णिव्वाणं । णत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥ १ ॥ इत्यादि, एतदेव शल्यं ॥२६३॥

१ नास्ति तस्य कोऽपि द्वेष्यः । २ नास्ति न नित्यो न करोति न कृतं वेदयति नास्ति निर्वाणं । नास्ति च मोक्षोपायः षण्मिथ्यात्वस्य स्थानानि ॥ १ ॥

तस्मिंस्ततो वा विरत इति, तथा सम्यगितः समितः-ईर्यासमित्यादिभिः पञ्चभिः समितिभिः समित इत्यर्थः, तथा सह हितेन-परमार्थभूतेन वर्तत इति सहितः, यदिवा सहितो—युक्तो ज्ञानादिभिः तथा 'सदा' सर्वकालं 'यतः' प्रयतः सत्संयमानुष्ठाने, तदनुष्ठानमपि न कषायैर्निःसारीकुर्यादित्याह-कस्यचिदप्यपकारिणोऽपि न क्रुध्येत—आक्रुष्टः सन्न क्रोधवशगो भूयात्, नापि मानी भवेदुत्कृष्टतपोयुक्तोऽपि न गर्वं विदध्यात्, तथा चोक्तम्-"जेइ सोऽवि निज्जरमओ पडिसिद्धो अट्ठमाणमहणेहिं । अवसेस मयट्ठाणा परिहरियव्वा पयत्तेणं ॥ १ ॥" अस्य चोपलक्षणार्थत्वाद्रागोऽपि मायालोभात्मको न विधेय इत्यादिगुणकलितः साधुर्माहन इति निःशङ्कं वाच्य इति ॥ २ ॥ साम्प्रतं श्रमणशब्दस्य प्रवृत्तिनिमित्तमुद्भावयन्नाह—

एत्थवि समणे अणिस्सिए अणियाणे आदाणं च अतिवायं च मुसावायं च बहिद्धं च कोहं च माणं च मायं च लोहं च पिज्जं च दोसं च इच्चेव जओ जओ आदाणं अप्पणो पदोसहेऊ तओ तओ आदाणातो पुव्वं पडिविरते पाणाइवाया सिआदंते दविए वोसट्ठकाए समणेत्ति वच्चे २ ॥ एत्थवि भिक्खू अणुन्नए विणीए नामए दंते दविए वोसट्ठकाए संविधुणीय विरू

१ यदि सोऽपि निर्जरामदः प्रतिषिद्धोऽष्टमानमथनैः । अवशेषाणि मदस्थानानि परिहर्तव्यानि प्रयत्नेन ॥ १ ॥

वरूवे परीसहोवसग्गे अज्झप्पजोगसुद्धादाणे उवट्ठिए ठिअप्पा संखाए परदत्तभोई भिक्खूत्ति वच्चे ३ ॥

अत्राप्यनन्तरोक्ते विरत्यादिके गुणसमूहे वर्तमानः श्रमणोऽपि वाच्यः, एतद्गुणयुक्तेनापि भाव्यमित्याह—निश्चयेनाधिक्येन वा 'श्रितो' निश्रितः न निश्रितोऽनिश्रितः-क्वचिच्छरीरादावप्यप्रतिबद्धः, तथा न विद्यते निदानमसंयमाभिलाषरूपं यस्यासौ अनिदानो-निराकाङ्क्षोऽशेषकर्मक्षयार्थी संयमानुष्ठाने प्रवर्तेत, तथाऽऽदीयते-स्वीक्रियतेऽष्टप्रकारं कर्म येन तदादानं-कषायाः परिग्रहः सावद्यानुष्ठानं वा, तथाऽतिपातनमतिपातः, प्राणातिपात इत्यर्थः, तं च प्राणातिपातं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरेत्, एवमन्यत्रापि क्रिया योजनीया । तथा मृषा-अलीको वादो मृषावादस्तं च, तथा 'बहिद्धं'ति मैथुनपरिग्रहौ तौ च सम्यक् परिज्ञाय परिहरेत् । उक्ता मूलगुणाः, उत्तरगुणानधिकृत्याह-क्रोधम्-अप्रीतिलक्षणं मानं-स्तम्भात्मकं मायां च-परवञ्चनात्मिकां लोभं-मूर्च्छास्वभावं तथा प्रेम-अभिष्वङ्गलक्षणं तथा द्वेषं-स्वपरात्मनोर्बाधारूपमित्यादिकं संसारावतरणमार्गं मोक्षाध्वनोऽपध्वंसकं सम्यक् परिज्ञाय परिहरेदिति । एवमन्यस्मादपि यतो यतः कर्मोपादानाद्—इहामुत्र चानर्थहेतोरात्मनोऽपायं पश्यति प्रद्वेषहेतूंश्च ततस्ततः प्राणातिपातादिकादनर्थदण्डादादानात् पूर्वमेव-अनागतमेवात्महितमिच्छन् प्रतिविरतो भवेत्-सर्वस्मादनर्थहेतुभूतादुभयलोकविरुद्धाद्वा सावद्यानुष्ठानान्मुमुक्षुर्विरतिं कुर्यात् । यश्चैवंभूतो दान्तः शुद्धो द्रव्यभूतो निष्प्रतिकर्मतया व्युत्सृष्टकायः स श्रमणो वाच्यः ॥३॥ साम्प्रतं भिक्षुशब्दस्य प्रवृत्तिनिमित्तमधिकृत्याह-'अत्रापी'ति, ये ते पूर्वमुक्ताः पापकर्मविरत्यादयो माहनशब्दप्रवृत्तिहेतवोऽत्रापि ॥२६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्षुशब्दस्य प्रवृत्तिनिमित्ते त एवावगन्तव्याः, अमी चान्ये, तद्यथा—न उन्नतोऽनुन्नतः, तत्र द्रव्योन्नतः शरीरेणोच्छ्रितः भावोन्नतस्त्वभिमानग्रहग्रस्तः, तत्प्रतिषेधात्तपोनिर्जरामदमपि न विधत्ते । विनीतात्मतया प्रश्रयवान् यतः, एतदेवाह—विनयालङ्कृतो गुर्वादावादेशदानोद्यतेऽन्यदा वाऽऽत्मानं नामयतीति नामकः—सदा गुर्वादौ ग्रहो भवति, विनयेन वाऽष्टप्रकारं कर्म नामयति, वैयावृत्योद्यतोऽशेषं पापमपनयतीत्यर्थः । तथा 'दान्तः' इन्द्रियनोइन्द्रियाभ्यां, तथा 'शुद्धात्मा' शुद्धद्रव्यभूतो निष्प्रतिकर्मतया 'व्युत्सृष्टकायश्च' परित्यक्तदेहश्च यत्करोति तद्दर्शयति—सम्यक् 'विधूय' अपनीय 'विरूपरूपान्' नानारूपाननुकूलप्रतिकूलान्—उच्चावचान् द्वाविंशतिपरीषहान् तथा दिव्यादिकानुपसर्गांश्चेति, तद्विधूननं तु यत्तेषां सम्यक् सहनं—तैरपराजितता, परीषहोपसर्गांश्च विधूयाध्यात्मयोगेन—सुप्रणिहितान्तःकरणतया धर्मध्यानेन शुद्धम्—अवदातमादानं—चारित्रं यस्य स शुद्धादानो भवति । तथा सम्यगुत्थानेन—सच्चारित्रोद्यमेनोत्थितः तथा स्थितो—मोक्षाध्वनि व्यवस्थितः परीषहोपसर्गैरप्यधृष्य आत्मा यस्य स स्थितात्मा, तथा 'संख्याय' परिज्ञायासारतां संसारस्य दुष्प्रापतां कर्मभूमेर्बोधेः सुदुर्लभतां चावाप्य च सकलां संसारोत्तरणसामग्रीं सत्संयमकरणोद्यतः परैः—गृहस्थैरात्मार्थं निर्वर्तितमाहारजातं तैर्दत्तं भोक्तुं शीलमस्य परदत्तभोजी, स एवंगुणकलितो भिक्षुरिति वाच्यः ॥ ३ ॥ तथाऽत्रापि गुणगणे वर्तमानो निर्ग्रन्थ इति वाच्यः, अमी चान्ये अपदिश्यन्ते, तद्यथा—

एत्थवि णिग्गंथे एगे एगविऊ बुद्धे संछिन्नसोए सुसंजते सुसमिते सुसामाइए आयवायपत्ते विऊ दुहओवि सोयपलिच्छिन्ने णो पूयासक्कारलाभट्ठी धम्मट्ठी धम्मविऊ णियागपडिवन्ने समि(म)यं चरे दंते दविए वोसट्ठकाए निग्गंथेत्ति वच्चे ४ ॥ से एवमेव जाणह जमहं भयंतारो ॥ त्तिबेमि । इति सोलसमं गाहानामज्झयणं समत्तं ॥ पढमो सुअक्खंधो समत्तो ॥ १ ॥

सूत्रकृताङ्गं शीलाङ्काचार्यीयवृत्तियुतं ॥२६५॥

१६ गाथाषोडशकाध्ययनं.

॥२६५॥

'एको' रागद्वेषरहिततया ओजाः, यदिवाऽस्मिन् संसारचक्रवाले पर्यटन्नसुमान् स्वकृतसुखदुःखफलभाक्तयैनैकस्यैव परलोकगमनतया सदैकक एव भवति । तत्रोद्यतविहारी द्रव्यतोऽप्येककः भावतोऽपि, गच्छान्तर्गतस्तु कारणिको द्रव्यतो भाज्यो भावतस्त्वेकक एव भवति । तथैकमेवात्मानं परलोकगामिनं वेत्तीत्येकवित्, न मे कश्चिद्दुःखपरित्राणकारी सहायोऽस्तीत्येवमेकवित्, यदिवैकान्तविद्—एकान्तेन विदितसंसारस्वभावतया मौनीन्द्रमेव शासनं तथ्यं नान्यदित्येवं वेत्तीत्येकान्तवित्, अथवैको—मोक्षः संयमो वा तं वेत्तीति, तथा बुद्धः—अवगततत्त्वः सम्यक् छिन्नानि—अपनीतानि भावस्रोतांसि—संवृतत्वात्कर्माश्रवद्वाराणि येन स तथा, सुष्ठु संयतः—कूर्मवत्संयतगात्रो निरर्थककायक्रियारहितः सुसंयतः, तथा सुष्ठु पञ्चभिः समितिभिः सम्यगितः—प्राप्तो ज्ञानादिकं मोक्षमार्गमसौ सुसमितः, तथा सुष्ठु समभावतया सामायिकं—समशत्रुमित्रभावो यस्य स सुसामायिकः । तथाऽऽत्मनः—उपयोगलक्षणस्य जीवस्यासंख्येयप्रदेशात्मकस्य संकोचविकाशभाजः स्वकृतफलभुजः प्रत्येकसाधारणशरीरतया व्यवस्थितस्य द्रव्यपर्यायतया नित्यानित्यादिनानन्तधर्मात्मकस्य वा वाद आत्मवादस्तं प्राप्त आत्मवादप्राप्तः, सम्यग्यथावस्थितात्मस्वतत्त्ववेदीत्यर्थः । तथा 'विद्वान्' अवगतसर्वपदार्थस्वभावो न व्यत्ययेन पदार्थानवगच्छति । ततो यत् कैश्चिदभिधीयते, तद्यथा—एक एवात्मा सर्वपदार्थस्वभावतया विश्वव्यापी श्यामाकतण्डुलमात्रोऽङ्गुष्ठपर्वपरिमाणो वेत्यादिकोऽसद्भूताभ्युपगमः परिहृतो भवति, तथाविधात्मसद्भावप्रतिपादकस्य प्रमाणस्याभावादित्यभिप्रायः । तथा 'द्विधाऽपी'ति द्रव्यतो भावतश्च, तत्र द्रव्यस्रोतांसि यथास्वं विषयेष्विन्द्रियप्रवृत्तयः भावस्रोतांसि तु शब्दादिष्वेवानुकूलप्रतिकूलेषु रागद्वेषोद्भवास्तान्युभयरूपाण्यपि स्रोतांसि संवृतेन्द्रियतया रागद्वेषाभावाच्च परिच्छिन्नानि येन स परिच्छिन्नस्रोताः, तथा नो पूजासत्कारलाभार्थी किंतु निर्जरापेक्षी सर्वोत्तपश्चरणादिकाः क्रियाः विदधाति, एतदेव दर्शयति—धर्मः—श्रुतचारित्राख्यस्तेनार्थः स एव वाऽर्थो धर्मार्थः स विद्यते यस्यासौ धर्मार्थीति, इदमुक्तं भवति—न पूजार्थं क्रियासु प्रवर्तते अपितु धर्मार्थीति । किमिति ?, यतो धर्मं यथावत्तत्फलानि च स्वर्गावाप्तिलक्षणानि सम्यक् वेत्ति, धर्मं च सम्यग् जानानो यत्करोति तद्दर्शयति—नियागो—मोक्षमार्गः सत्संयमो वा तं सर्वात्मना भावतः प्रतिपन्नः नियागपडिवन्नोत्ति, तथाविधश्च यत्कुर्यात् तदाह—'समि(म)यं'ति समतां समभावरूपां वासीचन्दनकल्पां 'चरेत्' सततमनुतिष्ठेत् । किंभूतः सन् ?, आह—दान्तो द्रव्यभूतो व्युत्सृष्टकायश्च, एतद्गुणसमन्वितः सन् पूर्वोक्तमाहनश्रमणभिक्षुशब्दानां यत् प्रवृत्तिनिमित्तं तत्समन्वितश्च निर्ग्रन्थ इति वाच्यः । तेऽपि माहनादयः शब्दा निर्ग्रन्थशब्दप्रवृत्तिनिमित्ताविनाभाविनो भवन्ति, सर्वेऽप्येते भिन्नव्यञ्जना अपि कथञ्चिदेकार्था इति ॥ ५ ॥ साम्प्रतमुपसंहारार्थमाह—सुधर्मस्वामी जम्बूस्वामिप्रभृतीनुद्दिश्येदमाह—'से' इति तत्यन्मया कथितमेवमेव जानीत यूयं, नान्यो मद्वचसि विकल्पो विधेयः, यस्मादहं सर्वज्ञाज्ञया ब्रवीमि । न च सर्वज्ञा भगवन्तः परहितैकरता भयात्रातारो रागद्वेषमोहान्यतरकारणाभावादन्यथा ब्रुवते, अतो यन्मयाऽऽदितः प्रभृति कथितं तदेवमेवावगच्छतेति । इतिः परिसमाप्त्यर्थे । ब्रवीमीति पूर्ववत् । उक्तोऽनुगमः, साम्प्रतं नयाः, ते च नैगमादयः सप्त, नैगमस्य सामान्यविशेषात्मकतया संग्रहव्यवहारप्रवेशात्संग्रहादयः षट्, समभिरूढेत्थंभूतयोः शब्दनयप्रवेशान्नैगमसंग्रहव्यवहारर्जुसूत्रशब्दाः पञ्च, नैगमस्याप्यन्तर्भावाच्चत्वारो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहारस्यापि सामान्यविशेषरूपतया सामान्यविशेषात्मनोः संग्रहर्जुसूत्रयोरन्तर्भावात्संग्रहर्जुसूत्रशब्दाख्यः, [1]ते च द्रव्यास्तिकपर्यायास्तिकान्तर्भावाद्द्रव्यास्तिकपर्यायास्तिकाभिधानौ द्वौ नयौ, यदिवा सर्वेषामेव ज्ञानक्रिययोरन्तर्भावात् ज्ञानक्रियाभिधानौ द्वौ, तत्रापि ज्ञाननयो ज्ञानमेव प्रधानमाह, क्रियानयश्च क्रियामिति । नयानां च प्रत्येकं मिथ्यादृष्टिताज्ज्ञानक्रिययोश्च परस्परापेक्षितया मोक्षाङ्गत्वादुभयमत्र प्रधानं, तच्चोभयं सत्क्रियोपेते साधौ भवतीति, तथा चोक्तम्—णायंम्मि गिण्हियव्वे अगिण्हियव्वंमि चेव अत्थंमि । जइयव्वमेव इति जो उवएसो सो नओ नाम ॥ १ ॥ सव्वेसिंपि णयाणं बहुविहवत्तव्वयं णिसामेत्ता । तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ २ ॥"त्ति, समाप्तं च गाथाख्यं षोडशमध्ययनं, तत्समाप्तौ च समाप्तः प्रथमः श्रुतस्कन्ध इति ॥ [ग्रन्थाग्रम् ८१०६]

॥ इति श्रीमच्छीलाङ्काचार्यविरचितविवरणयुतः सूत्रकृताङ्गीयः प्रथमः श्रुतस्कन्धः ॥

१ तेऽपि च । २ फलसाधकं, अन्यथा प्रमाणवाक्यतापातात् । ३ ज्ञाते गृहीतव्येऽग्रहीतव्ये चैवार्थे यतितव्यमेवेति य उपदेशः स नयो नाम ॥ १ ॥ ४ सर्वेषामपि नयानां बहुविधां वक्तव्यतां निशम्य तत्सर्वनयविशुद्धं यच्चरणगुणस्थितः साधुः ॥ १ ॥

ॐ नमः श्रीवीतरागाय ॥

अथ श्रीद्वितीये सूत्रकृतांगे द्वितीयः श्रुतस्कन्धः ।

प्रथमश्रुतस्कन्धानन्तरं द्वितीयः समारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरश्रुतस्कन्धे योऽर्थः समासतोऽभिहितः असावेवानेन श्रुतस्कन्धेन सोपपत्तिको व्यासेनाभिधीयते, त एव विषयः सुसंगृहीता भवन्ति येषां समासव्यासाभ्यामभिधानमिति, यदिवा पूर्वश्रुतस्कन्धोक्त एवार्थोऽनेन दृष्टान्तद्वारेण सुखावगमार्थं प्रतिपाद्यत इत्यनेन सम्बन्धेनायातस्यास्य श्रुतस्कन्धस्य सम्बन्धीनि सप्त महाध्ययनानि प्रतिपाद्यन्ते, महान्ति च तान्यध्ययनानि, पूर्वश्रुतस्कन्धाध्ययनेभ्यो महत्त्वादेतेषामिति, तत्र महच्छब्दाध्ययनशब्दयोर्निक्षेपार्थं निर्युक्तिकृदाह—

णामंठवणादविए खेत्ते काले तहेव भावे य । एसो खलु महतंमि निक्खेवो छव्विहो होति ॥ १४२ ॥
णामंठवणादविए खेत्ते काले तहेव भावे य । एसो खलु अज्झयणे निक्खेवो छव्विहो होति ॥ १४३ ॥
णामंठवणादविए खेत्ते काले य गणण संठाणे । भावे य अट्ठमे खलु णिक्खेवो पुंडरीयस्स ॥ १४४ ॥
जो जीवो भविओ खलुचवज्जिकामो य पुंडरीयंमि । सो दव्वपुंडरीओ भावंमि विजाणओ भणिओ ॥ १४५ ॥

एगभविए य बद्धाउए य अभिमुहियनामगोए य । एते तिन्निवि देसा दव्वंमि य पोंडरीयस्स ॥ १४६ ॥
तेरिच्छिया मणुस्सा देवगणा चेव होंति जे पवरा । ते होंति पुंडरीया सेसा पुण कंडरीया उ ॥ १४७ ॥
जलयर थलयर खयरा जे पवरा चेव होंति कंता य । जे अ सभावेऽणुमया ते होंति पुंडरीया उ ॥ १४८ ॥
अरिहंत चक्कवट्टी चारण विज्जाहरा दसारा य । जे अन्ने इड्ढिमंता ते होंति पोंडरीया उ ॥ ॥ १४९ ॥
भवणवइवाणमंतरजोतिसवेमाणियाण देवाणं । जे तेसिं पवरा खलु ते होंति पुंडरीया उ ॥ १५० ॥
कंसाणं दूसाणं मणिमोत्तियसिलपवालमादीणं । जे अ अचित्ता पवरा ते होंति पोंडरीया उ ॥ १५१ ॥
जाइं खेत्ताइं खलु सुहाणुभावाइं होंति लोगंमि । देवकुरुमादियाइं ताइं खेत्ताइं पवराइं ॥ १५२ ॥
जीवा भवट्ठितीए कायठितीए य होंति जे पवरा । ते होंति पोडरीया अवसेसा कंडरीया उ ॥ १५३ ॥
गणणाए रज्जू खलु संठाणं चेव होंति चउरंसं । एयाइं पोंडरीगाइं होंति सेसाइं इयराइं ॥ १५४ ॥
ओदइए उवसमिए खइए य तहा खओवसमिए अ । परिणामसन्निवाए जे पवरा तेवि ते चेव ॥ १५५ ॥
अहवावि नाणदंसणचरित्तविणए तहेव अज्झप्पे । जे पवरा होंति मुणी ते पवरा पुंडरीया उ ॥ १५६ ॥
एत्थं पुण अहिगारो वणस्सतिकायपुंडरीएणं । भावंमि अ समणेणं अज्झयणे पुंडरीअंमि ॥ १५७ ॥

नामस्थापनाद्रव्यक्षेत्रकालभावात्मको महति षड्विधो निक्षेपो भवति, तत्र नामस्थापने सुज्ञाने, द्रव्यमहदागमतो नोआगम-

अधिक मीसगेसुं दव्वेसुं जे य होंति पवरा उ । ते होंति पोंडरीया, सेसा पुण कंडरीया उ ॥ १ ॥ इति प्रक्षन्तरेऽधिका गाथा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तश्च, आगमतो ज्ञाता तश्च चानुपयुक्तः, नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तं सचित्ताचित्तमिश्रभेदात्त्रिधा, तत्रापि सचित्तद्रव्यमहत् औदारिकादिकं शरीरं, तत्रौदारिकं योजनसहस्रपरिमाणं मत्स्यशरीरं, वैक्रियं तु योजनशतसहस्रपरिमाणं, तैजसकार्मणे तु लोकाकाशप्रमाणे, तदेतदौदारिकवैक्रियतैजसकार्मणरूपं चतुर्विधं द्रव्यसचित्तमहद्, अचित्तद्रव्यमहत् समस्तलोकव्याप्यचित्तमहास्कन्धः, मिश्रं तु तदेव मत्स्यादिशरीरं, क्षेत्रमहत् लोकालोकाकाशं, कालमहत्सर्वाद्धा, भावमहदौदयिकादिभावरूपतया षोढा, तत्रौदयिको भावः सर्वसंसारिषु विद्यत इतिकृत्वा बहाश्रयत्वान्महान् भवति, कालतोऽप्यसौ त्रिविधः, तद्यथा—अनाद्यपर्यवसितोऽभव्यानामनादिसपर्यवसितो भव्यानां सादिसपर्यवसितो नारकादीनामिति, क्षायिकस्तु केवलज्ञानदर्शनात्मकः साद्यपर्यवसितत्वात्कालतो महान्, क्षायोपशमिकोऽप्याश्रयबहुत्वादनाद्यपर्यवसितत्वाच्च महानिति, औपशमिकोऽपि दर्शनचारित्रमोहनीयानुदयतया शुभभावत्वेन च महान् भवति, पारिणामिकस्तु समस्तजीवाजीवाश्रयत्वादाश्रयमहत्त्वान्महानिति, सान्निपातिकोऽप्याश्रयबहुत्वादेव महानिति । उक्तं महद्, अध्ययनस्यापि नामादिकं षोढा निक्षेपं दर्शयितुं निर्युक्तिकृदाह—अध्ययनस्य नामादिकः षोढा निक्षेपः, स चान्यत्र न्यक्षेण प्रतिपादित इति नेह प्रतन्यते, अत्र च श्रुतस्कन्धे सप्त महाध्ययनानि, तेषामाद्यमध्ययनं पौण्डरीकाख्यं, तस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि प्ररूपणीयानि, तत्रोपक्रम आनुपूर्वीनामप्रमाणवक्तव्यतार्थाधिकारसमवतारभेदात्षोढा, तत्र पूर्वानुपूर्व्या प्रथममिदं पश्चानुपूर्व्या तु सप्तममनानुपूर्व्या तु सप्तगच्छगतायाः श्रेण्या अन्योऽन्याभ्यासेन द्विरूपोने सति पञ्चाशच्छतान्यष्टत्रिंशदधिकानि भवन्ति, नाम्नि तु षण्णाम्नि, तत्रापि क्षायोपशमिके भावे, सर्वस्यापि च श्रुतस्य क्षायोपशमिकत्वात्, प्रमाणचिन्तायां जीवगुणप्रमाणे, वक्तव्यतायां सामान्येन सर्वेष्वध्ययनेषु स्वसमयवक्तव्यता, अर्थाधिकारः पौण्डरीकोपमया स्वसमयगुणव्यवस्थापनं, समवतारे तु यत्र यत्र समवतरति तत्र तत्र लेशतः समवतारितमेवेति। उपक्रमानन्तरं निक्षेपः, स च नामनिष्पन्ने निक्षेपे पौण्डरीकमित्यस्याध्ययनस्य नाम, तन्निक्षेपार्थं निर्युक्तिकृदाह—'नाम'मित्यादि, पौण्डरीकस्य नामस्थापनाद्रव्यक्षेत्रकालगणनासंस्थानभावात्मकोऽष्टधा निक्षेपः, तत्र नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यपौण्डरीकमभिधित्सुराह—'जो'इत्यादि, यः कश्चित्प्राणधारणलक्षणो जीवो भविष्यतीति भव्यः, तदेव दर्शयति—'उत्पत्तिकामः' समुत्पित्सुस्तथाविधकर्मोदयात् 'पौण्डरीकेषु' श्वेतपद्मेषु वनस्पतिकायविशेषेष्वनन्तरभवे भावी स द्रव्यपौण्डरीकः, खलुशब्दो वाक्यालङ्कारे, भावपौण्डरीकं त्वागमतः पौण्डरीकपदार्थज्ञस्तत्र चोपयुक्त इति।एतदेव द्रव्यपौण्डरीकं विशेषतरं दर्शयितुमाह—'एगे'त्यादि,एकेन भवेन गतेनानन्तरभव एव पौण्डरीकेषूत्पत्स्यते स एकभविकः, तथा तदासन्नतरः पौण्डरीकेषु बद्धायुष्कस्ततोऽप्यासन्नतमोऽभिमुखनामगोत्रोऽनन्तरसमयेषु यः पौण्डरीकेषूत्पद्यते, एते अनन्तरोक्ता त्रयोऽप्यादेशविशेषा द्रव्यपौण्डरीकेऽवगन्तव्या इति, "भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके । तद्द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम् ? ॥१॥" इति वचनात्, इह च पुण्डरीककण्डरीकयोर्भ्रात्रोर्महाराजपुत्रयोः सदसदनुष्ठानपरायणतया शोभनाशोभनत्वमवगम्य तदुपमयाऽन्यदपि यच्छोभनं तत्पौण्डरीकमितरत्तु कण्डरीकमिति । तत्र च नरकवर्जासु तिसृष्वपि गतिषु ये शोभनाः पदार्थास्ते पौण्डरीकाः शेषास्तु कण्डरीका इत्येतत्प्रतिपादयन्नाह—'तिरिच्छिये'त्यादि कण्ठ्या, तत्र तिर्यक्षु प्रधानस्य पौण्डरीकत्वप्रतिपादनार्थमाह—जलचरेत्यादि, जलचरेषु मत्स्यकरिमकरादयः स्थलचरेषु सिंहादयो बलवर्णरूपादिगुणयुक्ता उरःपरिसर्पेषु मणिफणिनो भुजपरिसर्पेषु नकुलादयः खचरेषु हंसमयूरादयः इत्येवमन्येऽपि 'स्वभावेन' प्रकृत्या लोकानुमतास्ते च पौण्डरीका इव प्रधाना भवन्ति । मनुष्यगतौ प्रधानाविष्करणायाह—'अरिहंते'त्यादि, सर्वातिशायिनीं पूजामर्हन्तीत्यर्हन्तः, ते निरुपमरूपादिगुणोपेताः, तथा चक्रवर्तिनः षट्खण्डभरतेश्वराः तथा चारणश्रमणा बहुविधाश्चर्यभूतलब्धिकलापोपेता महातपस्विनः तथा विद्याधरा वैताढ्यपुराधिपतयः तथा दशारा हरिवंशकुलोद्भवाः, अस्य चोपलक्षणार्थत्वादन्येऽपीक्ष्वाकादयः परिगृह्यन्ते, एतदेव दर्शयति—ये चान्ये महर्धिमन्तो महेभ्याः कोटीश्वरास्ते सर्वेऽपि पौण्डरीका भवन्ति, तुशब्दस्यानुक्तसमुच्चयार्थत्वात्, ये चान्ये विद्याकलाकलापोपेतास्ते पौण्डरीका इति । साम्प्रतं देवगतौ प्रधानस्य पौण्डरीकत्वं प्रतिपादयन्नाह—'भवणे'त्यादि, भवनपतिव्यन्तरज्योतिष्कवैमानिकानां चतुर्णां देवनिकायानां मध्ये ये प्रवराः—प्रधाना इन्द्रेन्द्रसामानिकादयस्ते प्रधाना इतिकृत्वा पौण्डरीकाभिधाना भवन्ति । साम्प्रतमचित्तद्रव्याणां यत्प्रधानं तस्य पौण्डरीकत्वप्रतिपादनायाह—'कंसणा'मित्यादि, कांस्यानां मध्ये जयघण्टादीनि दूष्याणां चीनांशुकादीनि मणीनामिन्द्रनीलवैडूर्यपद्मरागादीनि रत्नानि मौक्तिकानां यानि वर्णसंस्थानप्रमाणाधिकानि, तथा शिलानां मध्ये पाण्डुकम्बलादयः शिलास्तीर्थकृज्जन्माभिषेकसिंहासनाधाराः, तथा प्रवालानां यानि वर्णादिगुणोपेतानि, आदिग्रहणाज्जात्यचामीकरं तद्विकाराश्चाभरणविशेषाः परिगृह्यन्ते, तदेवमनन्तरोक्तानि कांस्यादीनि यानि प्रवराणि तान्यचित्तपौण्डरीकाण्यभिधीयन्त इति । मिश्रद्रव्यपौण्डरीकं तु तीर्थकृच्चक्रवर्त्यादय एव प्रधानकटककेयूराद्यलङ्कारालङ्कृता इति, द्रव्यपौण्डरीकानन्तरं क्षेत्रपौण्डरीकाभिधित्सयाऽऽह—'खित्ताणी'त्यादि, यानि कानिचिदिह देवकुर्वादीनि शुभानुभावानि क्षेत्राणि तानि प्रवराणि पौण्डरीकाभिधानानि भवन्ति ॥ साम्प्रतं कालपौण्डरीकप्रतिपादनायाह—'जीवाः' प्राणिनो भवस्थित्या कायस्थित्या च ये 'प्रवराः' प्रधानास्ते पौण्डरीका भवन्ति, शेषास्त्वप्रधानाः कण्डरीका इति, तत्र भवस्थित्या देवा अनुत्तरोपपातिकाः प्रधाना भवन्ति, तेषां यावद्भवं शुभानुभावत्वात्, कायस्थित्या तु मनुष्याः शुभकर्मसमाचाराः सप्ताष्टभवग्रहणानि मनुष्येषु पूर्वकोट्यायुष्केष्वनुपरिवर्त्यानन्तरभवे

मूलकृताङ्गे २श्रुतस्कन्धे शीलाङ्कीयायां वृत्तौ

॥२६८॥

१ पौण्डरीकाध्य. पुण्डरीकनिक्षेपाः

॥२६८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिपल्योपमायुष्केषूत्पादमनुभूय ततो देवेषूत्पद्यन्त इतिकृत्वा ततस्ते कामरूपित्वा पौण्डरीका भवन्ति, अवशिष्टास्तु कण्डरीका इति । कालपौण्डरीकानन्तरं गणनासंस्थानपौण्डरीकद्वयप्रतिपादनायाह—गणनया—सङ्ख्यया पौण्डरीकं चिन्त्यमानं दशप्रकारस्य गणितस्य मध्ये 'रज्जु' रज्जुगणितं प्रधानत्वात्पौण्डरीकं, दशप्रकारं तु गणितमिदं—"परिकम्म १ रज्जु २ रासी ३ ववहारे ४ तह कलासवण्णे ५ य । पुग्गल ६ जावं तावं ७ घणे य ८ घणवग्ग ९ वग्गे य १० ॥ १ ॥" एषां संस्थानानां मध्ये समचतुरस्रं संस्थानं प्रवरत्वात्पौण्डरीकमित्येवमेते द्वे अपि पौण्डरीके, शेषाणि तु परिकर्मादीनि गणितानि न्यग्रोधपरिमण्डलादीनि च संस्थानानि 'इतराणि' कण्डरीकान्यप्रवराणि भवन्तीतियावत् ॥ साम्प्रतं भावपौण्डरीकप्रतिपादनाभिधित्सयाऽऽह—'ओदई'त्यादि, औदयिके भावे तथौपशमिके क्षायिके क्षायोपशमिके पारिणामिके सान्निपातिके च भावे चिन्त्यमाने तेषु तेषां वा मध्ये ये 'प्रवराः' प्रधानाः 'तेऽपि' औदयिकादयो भावाः 'त एव' पौण्डरीका एवावगन्तव्याः, तथौदयिके भावे तीर्थकरा अनुत्तरोपपातिकसुरास्तथाऽन्येऽपि सितशतपत्रादयः पौण्डरीकाः, औपशमिके समस्तोपशान्तमोहाः, क्षायिके केवलज्ञानिनः, क्षायोपशमिके विपुलमतिश्चतुर्दशपूर्ववित्परमावधयो व्यस्ताः समस्ता वा, पारिणामिके भावे भव्याः, सान्निपातिके भावे द्विकादिसंयोगाः सिद्धादिषु स्वबुद्ध्या पौण्डरीकत्वेन योजनीयाः, शेषास्तु कण्डरीका इति । साम्प्रतमन्यथा भावपौण्डरिकप्रतिपादनायाह—'अहवावी'त्यादि, अथवापि भावपौण्डरीकमिदं, तद्यथा—सम्यग्ज्ञाने तथा सम्यग्दर्शने सम्यक्चारित्रे ज्ञानादिके विनये तथा 'अध्यात्मनि' च धर्मध्यानादिके ये 'प्रवराः' श्रेष्ठा मुनयो भवन्ति ते पौण्डरीकत्वेनावगन्तव्यास्ततोऽन्ये कण्डरीका इति । तदेवं सम्भविनमष्टधा

१ परिकर्म रज्जुः राशिः व्यवहारस्तथा कलासवर्णश्च । पुद्गलः यावत्तावत् भवति घनं घनमूलं वर्गः वर्गमूलं ॥ १ ॥

पौण्डरीकस्य निक्षेपं प्रदर्श्याधुनेह येनाधिकारस्तमाविर्भावयन्नाह—'अत्र' पुनर्दृष्टान्तप्रस्तावे 'अधिकारो' व्यापारः सचित्ततिर्यग्योनिकैकेन्द्रियवनस्पतिकायद्रव्यपौण्डरीकेण जलरुहेण, यदिवा औदयिकभाववर्तिना वनस्पतिकायपौण्डरीकेण सितशतपत्रेण, तथा भावे 'श्रमणेन च' सम्यग्दर्शनचारित्रविनयाध्यात्मवर्तिना सत्साधुनाऽस्मिन्नध्ययने पौण्डरीकाख्येऽधिकार इति । गता निक्षेपनिर्युक्तिः, अधुना सूत्रस्पर्शिकनिर्युक्तेरवसरः, सा च सूत्रे सति भवति, सूत्रं च सूत्रानुगमे, स चावसरप्राप्तोऽतोऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदं—

सुयं मे आउसंतेणं भगवया एवमक्खायं—इह खलु पोंडरीए णामज्झयणे, तस्स णं अयमट्ठे पण्णत्ते—से जहाणामए पुक्खरिणी सिया बहुउदगा बहुसेया बहुपुक्खला लद्धट्ठा पुंडरिकिणी पासादिया दरिसणिया अभिरूवा पडिरूवा, तीसे णं पुक्खरिणीए तत्थ तत्थ देसे देसे तहिं तहिं बहवे पउमवरपोंडरीया बुइया, अणुपुव्वुट्ठिया ऊसिया रुइला वण्णमंता गंधमंता रसमंता फासमंता पासादिया दरिसणिया अभिरूवा पडिरूवा, तीसे णं पुक्खरिणीए बहुमज्झदेसभाए एगे महं पउमवरपोंडरीए बुइए, अणुपुव्वुट्ठिए उस्सिते रुइले वन्नमंते गंधमंते रसमंते फासमंते पासादीए जाव पडिरूवे । सव्वावंति च णं तीसे पुक्खरिणीए तत्थ तत्थ देसे देसे तहिं तहिं बहवे पउमवरपोंडरीया बुइया अणुपुव्वुट्ठिया ऊसिया रुइला जाव पडिरूवा, सव्वावंति च णं तीसे णं पुक्खरिणीए बहुमज्झदेसभाए एगं महं पउमवरपोंडरीए बुइए अणुपुव्वुट्ठिए जाव पडिरूवे ॥ १ ॥ अह पुरिसे पुरित्थिमाओ दिसाओ आगम्म तं पुक्खरिणीं तीसे

पुक्खरिणीए तीरे ठिच्चा पासति तं महं एगं पउमवरपोंडरीयं अणुपुव्वुट्ठियं ऊसियं जाव पडिरूवं । तए णं से पुरिसे एवं वयासी—अहमंसि पुरिसे खेयन्ने कुसले पंडिते वियत्ते मेहावी अबाले मग्गत्थे मग्गविऊ मग्गस्स गतिपरक्कमण्णू अहमेयं पउमवरपोंडरीयं उन्निक्खिस्सामित्तिकट्टु इति वुच्चा से पुरिसे अभिक्कमेति तं पुक्खरिणीं, जावं जावं च णं अभिक्कमेइ तावं तावं च णं महंते उदए महंते सेए पहीणे तीरं अपत्ते पउमवरपोंडरीयं णो हव्वाए णो पाराए, अंतरा पोक्खरिणीए सेयंसि निसण्णे पढमे पुरिसजाए ! ॥ २ ॥ अहावरे दोच्चे पुरिसजाए, अह पुरिसे दक्खिणाओ दिसाओ आगम्म तं पुक्खरिणिं तीसे पुक्खरिणीए तीरे ठिच्चा पासति तं महं एगं पउमवरपोंडरीयं अणुपुव्वुट्ठियं पासादीयं जाव पडिरूवं तं च एत्थ एगं पुरिसजातं पासति पहीणतीरं अपत्तपउमवरपोंडरीयं णो हव्वाए णो पाराए अंतरा पोक्खरिणीए सेयंसि णिसन्नं, तए णं से पुरिसे तं पुरिसं एवं वयासी—अहो णं इमे पुरिसे अखेयन्ने अकुसले अपंडिए अवियत्ते अमेहावी बाले णो मग्गत्थे णो मग्गविऊ णो मग्गस्स गतिपरक्कमण्णू जन्नं एस पुरिसे, अहं खेयन्ने कुसले जाव पउमवरपोंडरीयं उन्निक्खिस्सामि, णो य खलु एयं पउमवरपोंडरीयं एवं उन्निक्खेयव्वं जहा णं एस पुरिसे मन्ने, अहमंसि पुरिसे खेयन्ने कुसले पंडिए वियत्ते मेहावी अबाले मग्गत्थे मग्गविऊ मग्गस्स गतिपरक्कमण्णू अहमेयं पउमवरपोंडरीयं उन्निक्खिस्सामित्तिकट्टु इति वच्चा से पुरिसे अभिक्कमे तं पुक्खरिणिं, जावं जावं च णं अभिक्कमेइ तावं तावं च णं महंते उदए महंते सेए पहीणे तीरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपत्ते पउमवरपोंडरीयं णो हव्वाए णो पाराए अंतरा पोक्खरिणीए सेयंसि णिसण्णे दोच्चे पुरिसजाते ॥ ३ ॥ अहावरे तच्चे पुरिसजाते, अह पुरिसे पच्चत्थिमाओ दिसाओ आगम्म तं पुक्खरिणिं तीसे पुक्खरिणीए तीरे ठिच्चा पासति तं एगं महं पउमवरपोंडरीयं अणुपुव्वुट्ठियं जाव पडिरूवं, ते तत्थ दोन्नि पुरिसजाते पासति पहीणे तीरं अपत्ते पउमवरपोंडरीयं णो हव्वाए णो पाराए जाव सेयंसि णिसण्णे, तए णं से पुरिसे एवं वयासी–अहो णं इमे पुरिसा अखेयन्ना अकुसला अपंडिया अवियत्ता अमेहावी बाला णो मग्गत्था णो मग्गविऊ णो मग्गस्स गतिपरक्कमण्णू, जं णं एते पुरिसा एवं मन्ने–अम्हे ए तं पउमवरपोंडरीयं उण्णिक्खिस्सामो, णो य खलु एयं पउमवरपोंडरीयं एवं उन्निक्खेतव्वं जहा णं एए पुरिसा मन्ने, अहमंसि पुरिसे खेयन्ने कुसले पंडिए वियत्ते मेहावी अबाले मग्गत्थे मग्गविऊ मग्गस्स गतिपरक्कमण्णू अहमेयं पउमवरपोंडरीयं उन्निक्खिस्सामित्तिकट्टु इति वुच्चा से पुरिसे अभिक्कमे तं पुक्खरिणिं जावं जावं च णं अभिक्कमे तावं तावं च णं महंते उदए महंते सेए जाव अंतरा पोक्खरिणीए सेयंसि णिसण्णे, तच्चे पुरिसजाए ॥ (सूत्रं ४) ॥ अहावरे चउत्थे पुरिसजाए, अह पुरिसे उत्तराओ दिसाओ आगम्म तं पुक्खरिणिं, तीसे पुक्खरिणीए तीरे ठिच्चा पासति तं महं एगं पउमवरपोंडरीयं अणुपुव्वुट्ठियं जाव पडिरूवं, ते तत्थ तिन्नि पुरिसजाते पासति पहीणे तीरं अपत्ते जाव सेयंसि णिसण्णे, तए णं से पुरिसे एवं वयासी–अहो णं इमे पुरिसा अखेयन्ना जाव णो मग्गस्स गतिपरक्कमण्णू जण्णं एते पुरिसा एवं मन्ने–अम्हे एतं पउम-

सूत्रं ४६

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥२७१॥

वरपोंडरीयं उन्निक्खिस्सामो णो य खलु एयं पउमवरपोंडरीयं एवं उन्निक्खेयव्वं जहा णं एते पुरिसा मन्ने, अहमंसि पुरिसे खेयन्ने जाव मग्गस्स गतिपरक्कमण्णू, अहमेयं पउमवरपोंडरीयं उन्निक्खिस्सामित्तिकट्टु इति वुच्चा से पुरिसे तं पुक्खरिणिं जावं जावं च णं अभिक्कमे तावं तावं च णं महंते उदए महंते सेए जाव णिसण्णे, चउत्थे पुरिसजाए ॥ (सूत्रं ५) ॥ अह भिक्खू चूहे तीरट्ठी खेयन्ने जाव गतिपरक्कमण्णू अन्नतराओ दिसाओ वा अणुदिसाओ वा आगम्म तं पुक्खरिणिं तीसे पुक्खरिणीए तीरे ठिच्चा पासति तं महं एगं पउमवरपोंडरीयं जाव पडिरूवं, ते तत्थ चत्तारि पुरिसजाए पासति पहीणे तीरं अपत्ते जाव पउमवरपोंडरीयं णो हव्वाए णो पाराए अंतरा पुक्खरिणीए सेयंसि णिसण्णे, तए णं से भिक्खू एवं वयासी–अहो णं इमे पुरिसा अखेयन्ना जाव णो मग्गस्स गतिपरक्कमण्णू, जं एते पुरिसा एवं मन्ने अम्हे एयं पउमवरपोंडरीयं उन्निक्खिस्सामो, णो य खलु एयं पउमवरपोंडरीयं एवं उन्निक्खेतव्वं जहा णं एते पुरिसा मन्ने, अहमंसि भिक्खू चूहे तीरट्ठी खेयन्ने जाव मग्गस्स गतिपरक्कमण्णू, अहमेयं पउमवरपोंडरीयं उण्णिक्खिस्सामित्तिकट्टु इति वुच्चा से भिक्खू णो अभिक्कमे तं पुक्खरिणिं तीसे पुक्खरिणीए तीरे ठिच्चा सद्दं कुज्जा—उप्पयाहि खलु भो पउमवरपोंडरीया ! उप्पयाहि, अह से उप्पतिते पउमवरपोंडरीए ॥ (सूत्रं ६) ॥

१ पुण्डरीकाध्ययं० दृष्टान्तः

॥२७१॥

अस्य चानन्तरसूत्रेण सह सम्बन्धो वाच्यः, स चायं–'से एवमेव जाणह जमहं भयंतारो'त्ति तदेतदेव जानीत भयत्त्रातारः !, तद्यथा—श्रुतं मयाऽऽयुष्मता भगवतैवमाख्यातम्, आदिसूत्रेण च सह सम्बन्धोऽयं, तद्यथा–यद्भगवताऽऽख्यातं मया च श्रुतं तद्बुध्येतेत्यादिकं, किं तद्भगवताऽऽख्यातमित्याह–'इह' प्रवचने सूत्रकृद्द्वितीयश्रुतस्कन्धे वा खलुशब्दो वाक्यालङ्कारे पौण्डरीकाभिधानमध्ययनं पौण्डरीकेण–सितशतपत्रेणात्रोपमा भविष्यतीतिकृत्वा, अतोऽस्याध्ययनस्य पौण्डरीकमिति नाम कृतं, तस्य चायमर्थः, णमिति वाक्यालङ्कारे, 'पन्नवइ' प्ररूपितः, 'सेजह'त्ति तद्यथार्थः, स च वाक्योपन्यासार्थः, नामशब्दः सम्भावनार्थो, सम्भाव्यते पुष्करिणीदृष्टान्तः, पुष्कराणि–पद्मानि तानि विद्यन्ते यस्यामसौ पुष्करिणी 'स्यादू' भवेदेवम्भूता, तद्यथा–'बहु' प्रचुरमगाधमुदकं यस्यां सा बहूदका, तथा बहुः–प्रचुरः सीयन्ते–अवबध्यन्ते यस्मिन्नसौ सेयः–कर्दमः स यस्यां सा बहुसेया-प्रचुरकर्दमा बहुश्वेतपद्मसद्भावात् स्वच्छोदकसंभवाच्च बहुश्वेता वा, तथा 'बहुपुष्कला' बहुसंपूर्णा–प्रचुरोदकभृतेत्यर्थः । तथा लब्धः–प्राप्तः पुष्करिणीशब्दान्वर्थतयाऽर्थो यया सा लब्धार्था, अथवाऽऽस्थानमास्था–प्रतिष्ठा सा लब्धा यया सा लब्धास्था, तथा पौण्डरीकाणि–श्वेतशतपत्राणि विद्यन्ते यस्यां सा पौण्डरीकिणी, प्रचुरार्थे मत्वर्थीयोत्पत्तेर्बहुपद्मेत्यर्थः । तथा प्रसादः–प्रसन्नता निर्मलजलता सा विद्यते यस्याः सा प्रसादिका प्रासादा वा–देवकुलसन्निवेशास्ते विद्यन्ते यस्यां समन्ततः सा प्रासादिका, दर्शनीया शोभना सत्संनिवेशतो वा द्रष्टव्या दर्शनयोग्या, तथाऽभिरूपेण सदाऽवस्थितानि रूपाणि–राजहंसचक्रवाकसारसादीनि गजमहिषमृगयूथादीनि वा जलान्तर्गतानि करिमकरादीनि वा यस्यां साऽभिरूपेति, तथा प्रतिरूपाणि–प्रतिबिम्बानि विद्यन्ते यस्यां सा प्रतिरूपा, एतदुक्तं भवति–स्वच्छत्वात्तस्याः सर्वत्र प्रतिबिम्बानि समुपलभ्यन्ते, तदतिशयरूपतया वा लोकेन तत्प्रतिबिम्बानि क्रियन्ते(इति) सा प्रतिरूपेति, यदिवा–'पासादीया दरिसणीया अभिरूवा पडिरूव'त्ति पर्याया इत्येते चत्वारोऽप्य-

१ पुष्कलस्तु पूर्णे श्रेष्ठे इत्यनेकार्थोक्तेः, बहुर्वाऽत्र प्रत्ययः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिशयरमणीयतख्यापनार्थमुपात्ताः। तस्याश्च पुष्करिण्याः णमिति वाक्यालङ्कारे 'तत्र तत्रे'त्यनेन दीप्सापदेन पौण्डरीकैर्व्याप्कत्वमाह, 'देशे देशे' इत्यनेन त्वेकैकप्रदेशे प्राचुर्यमाह, 'तस्मिंस्तस्मिन्नि'त्यनेन तु नास्त्येवासौ पुष्करिण्याः प्रदेशो यत्र तानि न सन्तीति, यदिवा—'देशे देशे' इत्येतत्प्रत्येकमभिसम्बध्यते 'तत्र तत्रे'ति, कोऽर्थः ?—देशे देशे तस्मिंस्तस्मिन्निति च, कोऽर्थः ?, देशैकदेश इति, यदिवा—अत्यादरख्यापनायैकार्थान्येवैतानि त्रीण्यपि पदानि, तेषु च पुष्करिण्याः सर्वप्रदेशेषु बहूनि—प्रचुराणि पद्मान्येव 'वराणि' श्रेष्ठानि पौण्डरीकाणि पद्मवरपौण्डरीकाणि, पद्मग्रहणं छत्रव्याघ्र्यवच्छेदार्थं, पौण्डरीकग्रहणं श्वेतशतपत्रप्रतिपत्त्यर्थं, वरग्रहणमप्रधाननिवृत्त्यर्थं, तदेवम्भूतानि बहूनि पद्मवरपौण्डरीकाणि 'तुइत्थ'त्ति उक्तानि—प्रतिपादितानि विद्यन्ते इत्यर्थः, 'आनुपूर्व्येण' विशिष्टरचनया स्थितानि, तथोच्छ्रितानि पङ्कजले अतिलङ्घ्योपरि व्यवस्थितानि, तथा 'रुचिः' दीप्तिस्तां लान्ति—आददति रुचिलानि—सदीप्तिमन्ति, तथा शोभनवर्णगन्धरसस्पर्शवन्ति, तथा प्रासादीयानि—दर्शनीयानि अभिरूपाणि प्रतिरूपाणि। तस्याश्च पुष्करिण्याः सर्वतः पद्मावृतायाः णमिति वाक्यालङ्कारे 'बहुदेशभाग्यभागे' निरुपचरितमध्यदेशे एकं महत्पद्मवरपौण्डरीकमुक्तमानुपूर्व्येण व्यवस्थितमुच्छ्रितं रुचिलं वर्णगन्धरसस्पर्शवत् तथा प्रासादीयं दर्शनीयं अभिरूपतरं प्रतिरूप[तर]मिति। साम्प्रतमेतदेवानन्तरोक्तं सूत्रद्वयं 'सव्वावंति च णं तीं'त्यनेन विशिष्टमपरं सूत्रद्वयं द्रष्टव्यम्, अस्यायमर्थः—'सव्वावंति'त्ति सर्वस्या अपि तस्याः पुष्करिण्याः सर्वप्रदेशेषु यथोक्तविशेषणविशिष्टानि बहूनि पद्मानि, तथा सर्वस्याश्च तस्या बहुमध्यदेशभागे यथोक्तविशेषणविशिष्टं महदेकं पौण्डरीकं विद्यत इति, उभयत्रापि चः समुच्चये, णमिति वाक्यालङ्कारे इति ॥ १ ॥ 'अथ' अनन्तरमेवम्भूतपुष्करिण्याः पूर्वस्या दिशः कश्चिदेकः पुरुषः समागत्य तां पुष्करिणीं तस्याश्च 'तीरे' तटे

१ पुण्डरीकाध्य० दृष्टान्तः

॥२७२॥

स्थित्वा तदेतत्पद्मं प्रासादीयादिप्रतिरूपान्तविशेषणकलापोपेतं स पुरुषः पूर्वदिग्भागव्यवस्थितः 'एव'मिति वक्ष्यमाणनीत्या 'वदेत्' ब्रूयात्—'अहमंसि'त्ति अहमस्मि पुरुषः, किम्भूतः ?—'कुशलो' हिताहितप्रवृत्तिनिवृत्तिनिपुणः, तथा पापाद्भीमः पण्डितो धर्मज्ञो देशकालज्ञः क्षेत्रज्ञो 'व्यक्तो' बालभावान्निष्क्रान्तः परिणतबुद्धिः 'मेधावी' प्रज्ञनोत्प्रज्ञनयोरुपायज्ञः, तथा 'अबालो' मध्यमवयाः षोडशवर्षोपरिवर्ती 'मार्गस्थः' सद्भिराचीर्णमार्गव्यवस्थितः तथा सन्मार्गज्ञः, तथा मार्गस्य या गतिर्यमनं वर्तते तथा यत्पराक्रमणं—विवक्षितदेशगमनं तज्जानातीति पराक्रमज्ञः, यदिवा—पराक्रमः—सामर्थ्यं तज्ज्ञोऽहमात्मज्ञ इत्यर्थः, तदेवम्भूतविशेषणकलापोपेतोऽहम् 'एतत्' पूर्वोक्तविशेषणकलापोपेतं पद्मवरपौण्डरीकं पुष्करिणीमध्यदेशावस्थितमहमुत्क्षेप्स्यामीतिकृत्वेहागतः 'इति' एतत्पूर्वोक्तं तत् प्रतीत्योक्तवाऽसौ पुरुषस्तां पुष्करिणीमभिमुखं क्रामेत्—अभिक्रामेत् तदभिमुखं गच्छेत्, यावद्यावच्चासौ तदवतरणाभिप्रायेणाभिमुखं क्रामेत्तावत्तावच्च णमिति वाक्यालङ्कारे तस्याः पुष्करिण्या महदगाधमुदकं तथा महच्च 'सेयः' कर्दमः, ततोऽसौ महाकर्दमोदकाभ्यामाकुलीभूतः प्रहीणः—सद्विवेकेन रहितस्त्वरया वा तीरं सुबुध्यत्ययाद्वा तीरात्प्रहीणः—प्रभ्रष्टः अप्राप्तश्च विवक्षितं पद्मवरपौण्डरीकं तस्याः पुष्करिण्यास्तस्यां वा यः सेयः—कर्दमस्तस्मिन्निषण्णो—निमग्न आत्मानमुद्धर्तुमसमर्थः, ततश्च तीरादपि प्रभ्रष्टः, ततस्तीरपद्मयोरन्तराल एवावतिष्ठते, यत एवमतः 'नो हव्वाए'त्ति नार्वाक्तटवर्त्यसौ भवति 'नो पाराए'त्ति नापि विवक्षितप्रदेशप्राप्त्या पारगमनाय वा समर्थो भवति। एवमसावुभयभ्रष्टो ह्युक्तह्युक्तोक्तीवदनर्थायैव प्रभवतीत्ययं प्रथमः पुरुषः, पुरुष एव पुरुषजातः—पुरुषजातीय इति ॥ २ ॥ 'अथ' प्रथमपुरुषादनन्तरम् 'अपरो' द्वितीयः पुरुषजातः—पुरुष इति। अथवेति वाक्योपन्यासार्थे, अथ—कश्चित्पुरुषो दक्षिणादिग्भागादागत्य तां पुष्करिणीं तस्याश्च पुष्करिण्यास्तीरे स्थित्वा तत्रस्थश्च पश्यति

महदेकं पद्मवरपौण्डरीकमानुपूर्व्येण व्यवस्थितं प्रासादीयं यावत्प्रतिरूपम् 'अत्र च' अस्मिंश्च तीरे व्यवस्थितः, तं च पूर्वव्यवस्थितमेकं पुरुषं पश्यति, किम्भूतं ?—तीरात्परिभ्रष्टमनवाप्तपद्मवरपौण्डरीकमुभयभ्रष्टमन्तराल एवावसीदन्तं, दृष्ट्वा च तमेवमवस्थं पुरुषं ततोऽसौ द्वितीयः पुरुषः तं प्राक्तनं पुरुषमेवं वदेत्—'अहो' इति खेदे, सर्वत्र णमिति वाक्यालङ्कारे द्रष्टव्यो, योऽयं कर्दमे निमग्नः पुरुषः सोऽखेदज्ञोऽकुशलोऽपण्डितोऽव्यक्तोऽमेधावी बालो न मार्गस्थो नो मार्गज्ञो नो मार्गस्य गतिपराक्रमज्ञः, अकुशलत्वादिके कारणमाह—'यद्' यस्मादेष पुरुष एतत्कृतवान्, तद्यथा—अहं खेदज्ञः कुशल इत्यादि भणित्वा पद्मवरपौण्डरीकमुत्क्षेप्स्यामीत्येवं प्रतिज्ञातवान्, न चैतत्पद्मवरपौण्डरीकम् 'एवम्' अनेन प्रकारेण यथाऽनेनोत्क्षेप्तुमारब्धमेवमुत्क्षेप्तव्यं यथाऽयं पुरुषो मन्यत इति ॥ ततोऽहमेवास्योत्क्षेपणे कुशल इति दर्शयितुमाह—'अहमंसीत्यादि जाव दोच्चे पुरिसजाए'त्ति, सुगमं ॥ ३ ॥ तृतीयं पुरुषजातमधिकृत्याह—'अहावरे तच्चे' इत्यादि सुगमं, यावच्चतुर्थः पुरुषजात इति ॥ ४-५ ॥ साम्प्रतमपरं पञ्चमं तद्विलक्षणं पुरुषजातमधिकृत्याह—'अहे' त्यानन्तर्ये, चतुर्थपुरुषादयमनन्तरः पुरुषः तस्यामूनि विशेषणानि—भिक्षणशीलो भिक्षुः—पचनपाचनादिसावद्यानुष्ठानरहिततया निर्दोषाहारभोजी, तथा 'रूक्षो' रागद्वेषरहितः, तौ हि कर्मबन्धहेतुतया स्निग्धौ, यथा हि स्नेहाभावाद्रजो न लगति तथा रागद्वेषाभावात्कर्मरेणुर्न लगति, अतस्तद्रहितो रूक्ष इत्युच्यते, तथा—संसारसागरस्य तीरार्थी, तथा क्षेत्रज्ञः खेदज्ञो वा, पूर्वं व्याख्यातान्येव विशेषणानि, यावन्मार्गस्य गतिपराक्रमज्ञः, स चान्यतरस्या दिशोऽनुदिशो वाऽऽगत्य तां पुष्करिणीं तस्याश्च तीरे स्थित्वा समन्तादवलोकयन् बहुमध्यदेशभागे तन्महदेकं पद्मवरपौण्डरीकं पश्यति, तांश्च चतुरः पुरुषान्

१ पुण्डरीकाध्य० दृष्टान्तः

॥२७३॥

१ वदेद्विकर्मकत्वादस्य प्रत्युच्चारेऽपि वाक्यस्य कर्मणि द्वितीयाऽऽप्राप, अयमित्यादिना नाम्ना निर्देशोऽप्यस्यैवं न दोषाय।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्यति, यत्र च व्यवस्थितानिति, किम्भूतान् ?–त्यक्ततीरान् अप्राप्तपद्मवरपुण्डरीकान् पङ्कजलावमग्नान् पुनस्तीरमप्यागन्तुमसमर्थान्, दृष्ट्वा च तांस्तदवस्थान् ततोऽसौ भिक्षुः 'एव' मिति वक्ष्यमाणनीत्या वदेत्, तद्यथा–अहो इति खेदे णमिति वाक्यालङ्कारे, इमे पुरुषाश्चत्वारोऽपि अखेदज्ञा यावन्तो मार्गस्य गतिपराक्रमज्ञाः, यस्माच्ते पुरुषा एवं ज्ञातवन्तो यथा वयं पद्मवरपौण्डरीकमुन्निक्षेप्स्यामः–उत्खनिष्यामो, न च खलु तत् पौण्डरीकमेवम्–अनेन प्रकारेण यथैते मन्यन्ते तथोत्क्षेप्तव्यं । अपि त्वहमस्मि भिक्षू रूक्षो यावद्गतिपराक्रमज्ञः, एतद्गुणविशिष्टोऽहमेतत्पौण्डरीकमुत्क्षेप्स्यामि–उत्खनिष्यामि–समुद्धरिष्यामीत्येवमुक्त्वाऽसौ 'नाभिक्रामेत्' तां पुष्करिणीं न प्रविशेत्, तत्रस्थ एव यत्कुर्यात्तद्दर्शयति–तस्यास्तीरे स्थित्वा तथाविधं शब्दं कुर्यात्, तद्यथा–ऊर्ध्वमुत्पतोत्पत, खलुशब्दो वाक्यालङ्कारे हे पद्मवरपौण्डरीक ! तस्याः पुष्करिण्या मध्यदेशात् एवमुत्पतोत्पत, 'अथ' तच्छब्दश्रवणादनन्तरं तदुत्पतितमिति ॥ ६ ॥ तदेवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकं दर्शयितुकामः श्रीमन्महावीरवर्धमानस्वामी स्वशिष्यानाह—

किट्टिए नाए समणाउसो !, अट्ठे पुण से जाणितव्वे भवति, भंतेत्ति समणं भगवं महावीरं निग्गंथा य निग्गंथीओ य वंदंति नमंसंति वंदेत्ता नमंसित्ता एवं वयासि—किट्टिए नाए समणाउसो !, अट्ठं पुण से ण जाणामो समणाउसोत्ति, समणे भगवं महावीरे ते य बहवे निग्गंथे य निग्गंथीओ य आमंतेत्ता एवं वयासी–हंत समणाउसो ! आइक्खामि विभावेमि किट्टेमि पवेदेमि सअट्ठं सहेउं सनिमित्तं भुज्जो भुज्जो उवदंसेमि से बेमि ॥ (सूत्रं ७) ॥

'कीर्तिते' कथिते प्रतिपादिते मयाऽस्मिन् 'ज्ञाते' उदाहरणे हे श्रमणा आयुष्मन्तोऽर्थः पुनरस्य ज्ञातव्यो भवति भवद्भिः, एतदुक्तं भवति–नास्योदाहरणस्य परमार्थं यूयं जानीथ, एवमुक्ते(क्त) भगवता ते बहवो निर्ग्रन्था निर्ग्रन्थ्यश्च तं श्रमणं भगवन्तं महावीरं ते निर्ग्रन्थादयो वदन्ते कायेन नमस्यन्ति–तत्प्रहैः शब्दैः स्तुवन्ति वन्दित्वा नमस्यित्वा चैवं–वक्ष्यमाणं वदेयुः, तद्यथा–'कीर्तितं' प्रतिपादितं 'ज्ञातम्' उदाहरणं भगवता, अर्थं पुनरस्य न सम्यक् जानीम इत्येवं पृष्टो भगवान् श्रमणो महावीरस्तान्निर्ग्रन्थादीनेवं वदेत्–'हन्ते'ति संप्रेषणे, हे श्रमणा आयुष्मन्तो ! यद्भवद्भिरहं पृष्टस्तत्सोपपत्तिकमाख्यामि भवतां, तथा 'विभावयामि' आविर्भावयामि प्रकटार्थं करोमि, तथा 'कीर्तयामि' पर्यायकथनद्वारेणेति तथा 'प्रवेदयामि' प्रकर्षेण हेतुदृष्टान्तैश्चित्तसंततावारोपयामि, अथवैकार्थिकानि चैतानि । कथं प्रतिपादयामीति दर्शयति–सहार्थेन—दार्ष्टान्तिकार्थेन वर्तत इति सार्थः पुष्करिणीदृष्टान्तस्तं, तथा सह हेतुना—अन्वयव्यतिरेकरूपेण वर्तत इति सहेतुस्तं तथाभूतमर्थं प्रतिपादयिष्यामि यथा ते पुरुषा अप्राप्तप्रार्थितार्थाः पुष्करिणीकर्दमे दुरुत्तारे निमग्ना एवं वक्ष्यमाणास्तीर्थिका अपारगाः संसारसागरस्य तत्रैव निमज्जन्तीत्येवंरूपोऽर्थः सोपपत्तिकः प्रदर्शयिष्यते, तथा सह निमित्तेन–उपादानकारणेन सहकारिकारणेन वा वर्तत इति सनिमित्तं–सकारणं दृष्टान्तार्थं भूयो भूयोऽपरैरपरैर्हेतुदृष्टान्तैरुपदर्शयामि सोऽहं साम्प्रतमेव ब्रवीमि शृणुत यूयमिति ॥ ७ ॥ तदधुना भगवान् पूर्वोक्तस्य दृष्टान्तस्य यथाक्षं दार्ष्टान्तिकं दर्शयितुमाह—

लोयं च खलु मए अप्पाहट्टु समणाउसो ! पुक्खरिणी बुइया, कम्मं च खलु मए अप्पाहट्टु समणाउसो ! से उदए बुइए, कामभोगे य खलु मए अप्पाहट्टु समणाउसो ! से सेए बुइए, जणजाणवयं च खलु मए अप्पाहट्टु समणाउसो ! ते बहवे पउमवरपोंडरीए बुइए, रायाणं च खलु मए अप्पाहट्टु समणाउसो ! से एगे महं पउमवरपोंडरीए बुइए, अन्नउत्थिया य खलु मए अप्पाहट्टु समणाउसो ! ते चत्तारि पुरिसजाया बुइया, धम्मं च खलु मए अप्पाहट्टु समणाउसो ! से भिक्खू बुइए, धम्मतित्थं च खलु मए अप्पाहट्टु समणाउसो ! से तीरे बुइए, धम्मकहं च खलु मए अप्पाहट्टु समणाउसो ! से सद्दे बुइए, निव्वाणं च खलु मए अप्पाहट्टु समणाउसो ! से उप्पाए बुइए, एवमेयं च खलु मए अप्पाहट्टु समणाउसो ! से एवमेयं बुइयं ॥ (सूत्रं ८) ॥

लोकमिति मनुष्यक्षेत्रं, चशब्द उत्तरापेक्षया समुच्चयार्थः, खलुरिति वाक्यालङ्कारे, मयेत्यात्मनिर्देशः, योऽयं लोको मनुष्याधारस्तमात्मनि 'आहृत्य' व्यवस्थाप्य अपाहृत्य वा हे आयुष्मन् ! श्रमण आत्मना वा–मयाऽऽहृत्य न परोपदेशतः, सा पुष्करिणी पद्माधारभूतोक्ता, तथा कर्म चाष्टप्रकारं, यद्बलेन पुरुषपौण्डरीकाणि भवन्ति तदेवंभूतं कर्म मयाऽऽत्मन्याहृत्य आत्मना वा आहृत्य अपाहृत्य वा, एतदुक्तं भवति—हे श्रमण ! आयुष्मन् सर्वावस्थानां निमित्तभूतं कर्माश्रित्य तदुदकं दृष्टान्तत्वेनोपन्यस्तं, कर्म चात्र दार्ष्टान्तिकं भविष्यति, तत्रेच्छामदनकामाः शब्दादयो विषयास्त एव भुज्यन्त इति भोगाः, यदिवा कामा—इच्छारूपा मदनकामास्तु भोगास्तान् मयाऽऽत्मन्याहृत्य 'सेयः' कर्दमोऽभिहितः, यथा महति पङ्के निमग्नो दुःखेनात्मानमुद्धरत्येवं विषयेष्वभ्यासक्तो नात्मानमुद्धर्तुमलमित्येतत्कर्दमविषययोः साम्यमिति, तथा 'जनं' सामान्येन लोकं, तथा जनपदे भवा जानपदा विशिष्टार्थदेशोत्पन्ना गृह्यन्ते, ते चार्द्धषड्विंशतिजनपदोद्भवा इति, तांश्च समाश्रित्य मया दार्ष्टान्तिकत्वेनाङ्गीकृत्य तानि बहूनि पद्मवरपौण्डरीकाणि दृष्टान्तत्वेनाभिहितानि, तथा राजानमात्मन्याहृत्य तदेकं पद्मवरपौण्डरीकं दृष्टान्तत्वेनाभिहितं, तथाऽन्यती-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थिकान् समाश्रित्य ते चत्वारः पुरुषजाता अभिहिताः, तेषां राजपौण्डरीकोद्धरणे सामर्थ्यवैकल्यात्, तथा धर्मं च खल्वात्मन्याहृत्य श्रमणायुष्मन् ! स भिक्षुः रूक्षवृत्तिरभिहितः, तस्यैव चक्रवर्त्यादिराजपद्मवरपौण्डरीकोद्धरणे सामर्थ्यसद्भावात्, धर्मतीर्थं च खल्वाश्रित्य मया तत्तीरमुक्तं, तथा सद्धर्मदेशनां चाश्रित्य मया स भिक्षुसंबन्धी शब्दोऽभिहितः, तथा 'निर्वाणं' मोक्षपदमशेषकर्मक्षयरूपमीषत्प्राग्भाराख्यं भूभागोपर्यवस्थितक्षेत्रखण्डं वाऽऽत्मन्याहृत्य स पद्मवरपौण्डरीकस्योत्पातोऽभिहित इति । साम्प्रतं समस्तोपसंहारार्थमाह—'एवं' पूर्वोक्तप्रकारेण एतल्लोकादिकं च खल्वात्मन्याहृत्य—आश्रित्य मया श्रमणायुष्मन् ! 'से' एतत्पुष्करिण्यादिकं दृष्टान्तत्वेन किञ्चित्साधर्म्यादेवमेतदुक्तमिति ॥ ८ ॥ तदेवं सामान्येन दृष्टान्तदार्ष्टान्तिकयोर्योजनां कृत्वाऽधुना विशेषेण प्रधानभूतराजदार्ष्टान्तिकं [तदुद्धरणार्थत्वात्सर्वप्रयासस्येति] दर्शयितुमाह—

इह खलु पाईणं वा पडीणं वा उदीणं वा दाहिणं वा संतेगतिया मणुस्सा भवंति अणुपुव्वेणं लोगं उववन्ना, तंजहा—आरिया वेगे अणारिया वेगे उच्चागोत्ता वेगे णीयागोया वेगे कायमंता वेगे रहस्समंता वेगे सुवन्ना वेगे दुव्वन्ना वेगे सुरूवा वेगे दुरूवा वेगे, तेसिं च णं मणुयाणं एगे राया भवइ, महयाहिमवंतमलयमंदरमहिंदसारे अच्चंतविसुद्धरायकुलवंसप्पसूते निरंतरायलक्खणविराइयंगमंगे बहुजणबहुमाणपूइए सव्वगुणसमिद्धे खत्तिए मुदिए मुद्धाभिसित्ते माउपिउसुजाए दयप्पिए सीमंकरे सीमंधरे खेमंकरे खेमंधरे मणुस्सिंदे जणवयपिया जणवयपुरोहिए सेउकरे केउकरे नरपवरे पुरिसपवरे पुरिससीहे पुरिसआसी- ॥२७५॥

१ द्वादशाङ्गं शासनं वा । २ राजदार्ष्टान्तिकयोजने हेतुदर्शनाय टीप्पणमिदमित्याभाति ।

विसे पुरिसवरपोंडरीए पुरिसवरगंधहत्थी अहे दित्ते वित्ते विच्छिन्नविउलभवणसयणासणजाणवाहणाइण्णे बहुधणबहुजातरूवरयए आओगपओगसंपउत्ते विच्छड्डियपउरभत्तपाणे बहुदासीदासगोमहिसगवेलगप्पभूते पडिपुण्णकोसकोट्ठागाराउहागारे बलवं दुब्बलपच्चामित्ते ओहयकंटयं निहयकंटयं मलियकंटयं उद्धियकंटयं अकंटयं ओहयसत्तू निहयसत्तू मलियसत्तू उद्धियसत्तू निज्जियसत्तू पराइयसत्तू ववगयदुब्भिक्खमारिभयविप्पमुक्कं रायवन्नओ जहा उववाइए जाव पसंतडिंबडमरं रज्जं पसाहेमाणे विहरति । तस्स णं रन्नो परिसा भवइ—उग्गा उग्गपुत्ता भोगा भोगपुत्ता इक्खागाइ इक्खागाइपुत्ता नाया नायपुत्ता कोरव्वा कोरव्वपुत्ता भट्टा भट्टपुत्ता माहणा माहणपुत्ता लेच्छइ लेच्छइपुत्ता पसत्थारो पसत्थपुत्ता सेणावई सेणावइपुत्ता । तेसिं च णं एगतीए सद्धी भवइ कामं तं समणा वा माहणा वा संपहारिंसु गमणाए, तत्थ अन्नतरेणं धम्मेणं पन्नत्तारो वयं इमेणं धम्मेणं पन्नवइस्सामो से एवमायाणह भयंतारो जहा मए एस धम्मे सुयक्खाए सुपन्नत्ते भवइ, तंजहा—उड्ढं पादतला अहे केसग्गमत्थया तिरियं तयपरियंते जीवे एस आयापज्जवे कसिणे एस जीवे जीवति एस मए णो जीवइ, सरीरे धरमाणे धरइ विणट्ठंमि य णो धरइ, एयंतं जीवियं भवति, आदहणाए परेहिं निज्जइ, अगणिझामिए सरीरे कवोतवन्नाणि अट्ठीणि भवंति, आसंदीपंचमा पुरिसा गामं पच्चागच्छंति, एवं असंते असंविज्जमाणे जेसिं तं असंते असंविज्जमाणे तेसिं तं सुयक्खायं भवति—अन्नो भवति जीवो अन्नं सरीरं, तम्हा, ते एवं नो विपडिवेदेंति—अयमाउसो !

आया दीहेति वा हस्सेति वा परिमंडलेति वा वट्टेति वा तंसेति वा चउरंसेति वा आयतेति वा छलंसिएति वा अट्ठंसेति वा किण्हेति वा णीलेति वा लोहियहालिद्दे सुक्किलेति वा सुब्भिगंधेति वा दुब्भिगंधेति वा तित्तेति वा कडुएति वा कसाएति वा अंबिलेति वा महुरेति वा कक्खडेति वा मउएति वा गुरुएति वा लहुएति वा सिएति वा उसिणेति वा निद्धेति वा लुक्खेति वा, एवं असंते असंविज्जमाणे जेसिं तं सुयक्खायं भवति—अन्नो जीवो अन्नं सरीरं, तम्हा ते णो एवं उवलब्भंति से जहाणामए केइ पुरिसे कोसीओ असिं अभिनिव्वट्टित्ताणं उवदंसेज्जा अयमाउसो ! असी अयं कोसी, एवमेव णत्थि केइ पुरिसे अभिनिव्वट्टित्ता णं उवदंसेत्तारो अयमाउसो ! आया इयं सरीरं । से जहाणामए केइ पुरिसे मुंजाओ इसियं अभिनिव्वट्टित्ता णं उवदंसेज्जा अयमाउसो ! मुंजे इयं इसियं, एवमेव नत्थि केइ पुरिसे उवदंसेत्तारो अयमाउसो ! आया इयं सरीरं । से जहाणामए केइ पुरिसे मंसाओ अट्ठिं अभिनिव्वट्टित्ता णं उवदंसेज्जा अयमाउसो ! मंसे अयं अट्ठी, एवमेव नत्थि केइ पुरिसे उवदंसेत्तारो अयमाउसो ! आया इयं सरीरं । से जहाणामए केइ पुरिसे करयलाओ आमलकं अभिनिव्वट्टित्ता णं उवदंसेज्जा अयमाउसो ! करतले अयं आमलए, एवमेव णत्थि केइ पुरिसे उवदंसेत्तारो अयमाउसो ! आया इयं सरीरं । से जहाणामए केइ पुरिसे दहिओ नवनीयं अभिनिव्वट्टित्ताणं उवदंसेज्जा अयमाउसो ! नवनीयं अयं तु दही, एवमेव णत्थि केइ पुरिसे जाव सरीरं । से जहाणामए केइ पुरिसे तिलेहिंतो तिल्लं अभिनिव्वट्टित्ता णं ॥२७६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवदंसेज्जा अयमाउसो! तेज्जं अयं पिन्नाए, एवमेव जाव सरीरं । से जहाणामए केइ पुरिसे इक्खूतो खोतरसं अभिनिवट्टित्ता णं उवदंसेज्जा अयमाउसो! खोतरसे अयं छोए, एवमेव जाव सरीरं । से जहाणामए केइ पुरिसे अरणीतो अग्गिं अभिनिवट्टित्ताणं उवदंसेज्जा अयमाउसो! अरणी अयं अग्गी, एवमेव जाव सरीरं । एवं असंते असंविज्जमाणे जेसिं तं सुयक्खायं भवति, तं० अन्नो जीवो अन्नं सरीरं । तम्हा ते मिच्छा ॥ से हंता तं हणह खणह छणह डहह पयह आलुंपह विलुंपह सहसाक्कारेह विपरामुसह, एतावता जीवे णत्थि परलोए, ते णो एवं विप्पडिवेदेंति, तं०—किरियाइ वा अकिरियाइ वा सुकडेइ वा दुक्कडेइ वा कल्लाणेइ वा पावएइ वा साहुइ वा असाहुइ वा सिद्धीइ वा असिद्धीइ वा निरएइ वा अनिरएइ वा, एवं ते विरूवरूवेहिं कम्मसमारंभेहिं विरूवरूवाइं कामभोगाइं समारभंति भोयणाए ॥ एवं एगे पागब्भिया णिक्खम्म मामगं धम्मं पन्नवेंति, तं सद्दहमाणा तं पत्तियमाणा तं रोएमाणा साहु सुयक्खाए समणेति वा माहणेति वा कामं खलु आउसो! तुमं पूययामि, तंजहा—असणेण वा पाणेण वा खाइमेण वा साइमेण वा वत्थेण वा पडिग्गहेण वा कंबलेण वा पायपुंछणेण वा तत्थेगे पूयणाए समाउट्टिंसु तत्थेगे पूयणाए निकाइंसु ॥ पुव्वमेव तेसिं णायं भवति—समणा भविस्सामो अणगारा अकिंचणा अपुत्ता अपसू परदत्तभोइणो भिक्खुणो पावं कम्मं णो करिस्सामो समुट्ठाए ते अप्पणा अप्पडिविरया भवंति, सयमाइयंति अन्नेवि आदियावेंति अन्नंपि आयतंतं समणुजाणंति, एवमेव ते इत्थिकामभोगेहिं मुच्छिया गिद्धा

सूत्रकृ. ४७

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥२७७॥

गढिया अज्झोववन्ना लुद्धा रागदोसवसट्टा, ते णो अप्पाणं समुच्छेदेंति ते णो परं समुच्छेदेंति ते णो अण्णाइं पाणाइं भूताइं जीवाइं सत्ताइं समुच्छेदेंति, पहीणा पुव्वसंजोगं आयरियं मग्गं असंपत्ता इति ते णो हट्ठाए णो पाराए अंतरा कामभोगेसु विसन्ना इति पढमे पुरिसजाए तज्जीवतच्छरीरएत्ति आहिए ॥ सूत्रं ९ ॥

१ पुण्डरीकाध्य० तज्जीवतच्छरीरवादी

'इह' अस्मिन्मनुष्यलोके, खलुवाक्यालङ्कारे, इहास्मिन् लोके प्राच्यां प्रतीच्यां दक्षिणायामुदीच्यामन्यतरस्यां वा दिशि 'सन्ति' विद्यन्ते एके केचन तथाविधा मनुष्याः आनुपूर्व्येणेमं लोकमाश्रित्योत्पन्ना भवन्ति । तानेवानुपूर्व्येण दर्शयति—'तद्यथे' त्युपन्यासार्थः, आराद्याताः सर्वहेयधर्मेभ्य इत्यार्याः, तत्र क्षेत्रार्या अर्धषड्विंशतिजनपदोत्पन्नाः, तद्व्यतिरिक्तास्त्वनार्या एके केचन भवन्ति, ते चानार्यक्षेत्रोत्पन्ना अमी द्रष्टव्याः, तद्यथा—सगजवणसबरबब्बर कायमुरुंडोड्डगोडपक्कणिया । अरबागहोणरोमय पारसउसखासिया चेव ॥ १ ॥ डोंबिलयलउसबोक्कस भिल्लंधपुलिंदकोंचभमररुया । कोंचा य चीणचंचुयमालव दमिला कुलग्घा य ॥ २ ॥ केकयकिरायहयमुहखरमुह तह तुरगगोंदयमुहा य । हयकण्णा गयकण्णा अण्णे य अणारिया बहवे ॥ ॥ ३ ॥ पावा य चंडदंडा अणारिया णिग्घिणा णिरणुकंपा । धम्मोत्ति अक्खराइं जेण ण णज्जंति सुमिणेवि ॥ ४ ॥ इत्यादि । तथोच्चैर्गोत्रम्—इक्ष्वाकुवंशादिकं येषां ते तथाविधा एके केचन तथाविधकर्मोदयवर्तिनः, वाशब्द उत्तरापेक्षया विकल्पार्थः तथा 'नीचैर्गोत्रं' सर्वजनावगीतं येषां ते तथा एके केचन नीचैर्गोत्रोदयवर्तिनो, न सर्वे, वाशब्दः पूर्ववदेव, ते चोच्चैर्गोत्रा नीचैर्गोत्रावा । कायो—महाकायः प्रांशुत्वं तद्विद्यते येषां ते कायवंतः, तथा 'ह्रस्ववन्तो' वामनककुब्जवडभादय एके केचन तथाविधनामकर्मोदयवर्तिनः, तथा शोभनवर्णाः सुवर्णाः—प्रतप्तचामीकरचारुदेहाः, तथा दुर्वर्णाः—कृष्णरूक्षादिवर्णा एके केचन, तथा सुरूपाः—

॥२७७॥

सुविभक्तावयवचारुदेहाः, तथा दुष्टरूपा—दुरूपा बीभत्सदेहाः, तेषां चोच्चैर्गोत्रादिविशेषणविशिष्टानां महान् कश्चिदेवैकस्तथाविधकर्मोदयाद्राजा भवति, स विशेष्यते—महाहिमवन्मलयमन्दरमहेन्द्राणामिव सारः—सामर्थ्ये विभवो वा यस्य स तथा इत्येवं राजवर्णको यावदुपशान्तडिम्बडमरं राज्यं प्रशासयंस्तिष्ठतीति, तत्र डिम्बः—परानीकभृगालिको डमरं—स्वराष्ट्रक्षोभः, पर्यायौ वैतावत्यादरख्यापनार्थमुपात्तौ इति । तस्य चैवंविधगुणसंपदुपेतस्य राज्ञ एवंविधा पर्षद्भव[ती]ति, तद्यथा—उग्रास्तत्कुमाराश्चोग्रपुत्राः, एवं भोगभोगपुत्रादयोऽपि द्रष्टव्याः, शेषं सुगमं, यावत्सेनापतिपुत्रा इति, णवरं 'लेच्छइ'त्ति लिप्सुकः स च वणिगादिः, तथा प्रशास्तारो—बुद्ध्युपजीविनो मन्त्रिप्रभृतयः, तेषां च मध्ये कश्चिदेवैकः श्रद्धावान्—धर्मलिप्सुर्भवति, 'काम' मित्यवधृतार्थेऽवधृतमेतद्यथाऽयं धर्मश्रद्धालुः, अवधार्य च तं धर्मलिप्सुतया श्रमणा ब्राह्मणा वा 'संप्रधारितवन्तः' समालोचितवन्तो धर्मप्रतिबोधनिमित्तं तदन्तिकगमनाय, तत्र चान्यतरेण धर्मेण—स्वसमयप्रसिद्धेन प्रज्ञापयितारो वयमित्येवं नाम संप्रधार्य—तं राजानं स्वकीयेन धर्मेण प्रज्ञापयिष्याम एवं संप्रधार्य राज्ञोऽन्तिकं गत्वैवमूचुः, तद्यथा—एतद्यथाऽहं कथयिष्यामि 'एव'मिति च वक्ष्यमाणनीत्या भवन्तो—यूयं जानीत भयात्रातारो वा 'यथा' येन प्रकारेण मयैष धर्मः स्वाख्यातः सुप्रज्ञप्तो भवतीति । एवं तीर्थिकः स्वदर्शनानुरञ्जितोऽन्यस्यापि राजादेः स्वाभिप्रायेणोपदेशं ददाति ॥ तत्राद्यः पुरुषजातस्तज्जीवतच्छरीरवादी राजानमुद्दिश्यैवं धर्मदेशनां चक्रे, तद्यथा—'ऊर्ध्वम्' उपरि पादतलादधश्च केशाग्रमस्तकात्तिर्यक् च त्वक्पर्यन्तो जीवः, एतदुक्तं भवति—यदेवैतच्छरीरं स एव जीवो, नैतस्माच्छरीराद्व्यतिरिक्तोऽस्त्यात्मेत्यतस्तत्प्रमाण एव भवत्यसौ, इत्येवं च कृत्स्नैष आत्मा योऽयं कायोऽयमेव च तस्मात्मनः

१ राजान्तिकं प्र० । २ एतचाहं प्र० । ३ कथयामि प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यवः 'कृत्स्नः' संपूर्णः 'पर्यायः' अवस्थाविशेषः, तस्मिंश्च कायात्मन्यवस्थे तदव्यतिरेकाज्जीवोऽप्यवस्थ एव भवति, एष च कायो यावन्तं कालं जीवेद्–अविकृत आस्ते तावन्तमेव कालं जीवोऽपि जीवतीत्युच्यते, तदव्यतिरेकात्, तथैव कायो यदा 'मृतो' विकारभाग्भवति तदा जीवोऽपि न जीवति, जीवशरीरयोरेकात्मकत्वात्, यावदिदं शरीरं पञ्चभूतात्मकमव्यङ्गं चरति तावदेव जीवोऽपीति, तस्मिंश्च विनष्टे सति–एकस्मिन्नपि भूतस्यान्यथाभावे विकारे सति जीवस्यापि तदात्मनो विनाशः, तदेवं यावदेतच्छरीरं वातपित्तश्लेष्माधारं पूर्वस्वभावादप्रच्युतं तावदेव तज्जीवस्य जीवितं भवति, तस्मिंश्च विनष्टे तदात्मा—जीवोऽपि विनष्ट इतिकृत्वा 'आदहनाय' आसमन्ताद्दहनार्थं श्मशानादौ नीयते यतोऽसौ, तस्मिंश्च शरीरेऽग्निना ध्मापिते कपोतवर्णान्यस्थीनि केवलमुपलभ्यन्ते न तदतिरिक्तोऽपरः कश्चिद्विकारः समुपलभ्यते यत आत्मास्तित्वशङ्का स्यात्, ते च तद्भान्धवा जघन्यतोऽपि चत्वारः आसन्दी–मञ्चकः स पञ्चमो येषां ते आसन्दीपञ्चमाः पुरुषास्तं कायमग्निना ध्मापयित्वा पुनः स्वग्रामं प्रत्यागच्छन्ति, यदि पुनस्तत्रात्मा निजशरीराद्भिन्नः स्यात्ततः शरीराग्निर्गच्छन् दृश्येत, न चोपलभ्यते, तस्मात्तज्जीवस्तदेव शरीरमिति स्थितं । तदेवमुक्तनीत्याऽसौ जीवोऽसन्–अविद्यमानस्तत्र तिष्ठन् गच्छंश्च 'असंवेद्यमानः' अननुभूयमानः येषामयं पक्षस्तेषां तत्स्वाख्यातं भवति, येषां पुनरन्यो जीवोऽन्यच्छरीरमेवंभूतोऽप्रमाणक एवाभ्युपगमः, तस्मात्ते स्वमूढ्या प्रवर्तमाना 'एव' मिति वक्ष्यमाणं तेनैव 'विप्रतिवेदयन्ति' जानन्ति, तद्यथा–अयमात्माऽऽयुष्मन्! शरीराद्बहिरभ्युपगम्यमानः किंप्रमाणकः स्यादिति वाच्यं, तत्र किं दीर्घः–स्वशरीरात्प्रांशुतरः उत ह्रस्वः–अङ्गुष्ठश्यामाकतण्डुलादिपरिमाणो वा?, तथा संस्थानानां–परिमण्डलादीनां मध्ये किंसंस्थानः?, तथा

१ °रात्मानिज० प्र० ।

कृष्णादीनां वर्णानां मध्ये कतमवर्णवर्ती?, तथा द्वयोर्गन्धयोर्मध्ये किंगन्धः?, षण्णां रसानां मध्ये कतमरसवर्ती?, तथाऽष्टानां स्पर्शानां मध्ये कतमे स्पर्शे वर्तते?। तदेवं संस्थानवर्णगन्धरसस्पर्शान्यरूपतया कथमप्यसावगृह्यमाणोऽसन्नसौ, तथापि केनापि प्रकारेण संवेद्यमानोऽपि येषां तत्स्वाख्यातं भवति यथाऽन्यो जीवोऽन्यच्छरीरकमित्ययं पक्षः, तस्मात्पृथगविद्यमानत्वात्ते शरीरात्पृथगात्मवादिनो नैव वक्ष्यमाणनीत्याऽऽत्मानमुपलभन्ते ॥ तद्यथा नाम कश्चित्पुरुषः 'कोशतः' परिवाराद् 'असिं' खड्गम् 'अभिनिर्वर्त्य' समाकृष्यान्येषामुपदर्शयेत्, तद्यथा–अयमायुष्मन्! 'असिः' खड्गोऽयं च 'कोशः' परिवारः, एवमेव जीवशरीरयोरपि नास्त्युपदर्शयिता, तद्यथा—अयं जीव इदं च शरीरमिति, न चास्त्येवमुपदर्शयिता कश्चिद् अतः कायान्न भिन्नो जीव इति । अस्मिन्नर्थे बहवो दृष्टान्ताः सन्तीत्यतो दर्शयितुमाह—तद्यथा वा कश्चित्पुरुषो 'मुञ्जात्' तृणविशेषात् 'इसियं'ति तद्गर्भभूतां शलाकां पृथक्कृत्य दर्शयेत्, तथा मांसादस्थि तथा करतलादामलकं तथा दध्नो नवनीतं तिलेभ्यस्तैलं इति तथेक्षो रसं तथाऽरणितोऽग्निमभिनिर्वर्त्य—पृथक्कृत्य दर्शयेद्, एवमेव शरीरादपि जीवमिति, न चास्त्येवमुपदर्शयिताऽतोऽसन्नात्मा शरीरात्पृथगसंवेद्यमानश्चेति । प्रयोगश्चात्र—सुखदुःखभाक् परलोकानुयायी नास्त्यात्मा, तिलशश्छिद्यमानेऽपि शरीरके पृथगनुपलब्धेः, घटात्मवत्, व्यतिरेकेण च कोशखड्गवत्, तदेवं युक्तिभिः प्रतिपादितेऽप्यात्माभावे येषां पृथगात्मवादिनां स्वदर्शनानुरागादेतत्स्वाख्यातं भवति, तद्यथा—अन्यो जीवः परलोकानुयायी अमूर्तः, अन्यच्च तद्भववृत्ति मूर्तिमच्छरीरम्, एतच्च पृथङ् नोपलभ्यते तस्मात्तन्मिथ्या यत्कैश्चिदुच्यते यथाऽस्त्यात्मा परलोकानुयायीति ॥ एतदध्यवसायी च 'स' लोकायतिकः स्वतः प्राणिनामेकेन्द्रियादीनां

'हन्ता' व्यापादको भवति, प्राणातिपाते दोषाभावमभ्युपगम्यान्येषामपि प्राण्युपघातकारिणामुपदेशं ददाति, तद्यथा—प्राणिनः खड्गादिना घातयत, पृथिव्यादिकं खनतेत्यादि सुगमं यावद् 'एतावानेव' शरीरमात्र एव जीवः, ततः परलोकिनोऽभावान्नास्ति परलोकः, तदभावाच्च यथेष्टमासत(ध्वं), तथा चोक्तम्—"पिब खाद च साधु शोभने!, यदतीतं वरगात्रि! तन्न ते । न हि भीरु! गतं निवर्तते, समुदयमात्रमिदं कलेवरम् ॥१॥" तदेवं परलोकयायिनो जीवस्याभावान्न पुण्यपापे स्तः नापि परलोक इत्ययं येषां पक्षस्ते लोकायतिकास्तज्जीवतच्छरीरवादिनो नैवैतद्वक्ष्यमाणं विप्रतिवेदयन्ति–अभ्युपगच्छन्ति, तद्यथा–क्रियां वा सदनुष्ठानात्मिकाम् अक्रियां वा–असदनुष्ठानरूपाम्, एवं नैव ते विप्रतिवेदयन्ति, यदि हि आत्मा तत्क्रियावान्सकर्मणो भोक्ता स्यात्ततोऽपायभयात्सदनुष्ठानचिन्ता स्यात्, तदभावाच्च सत्क्रियादिचिन्ताऽपि दूरोत्सादितैव । तथा सुकृतं वा दुष्कृतं वा कल्याणमिति वा पापमिति वा–साधु कृतमसाधु कृतमित्यादिका चिन्तैव नास्ति, तथाहि–सुकृतानां–कल्याणविपाकिनां साधुतयाऽवस्थानं दुष्कृतानां च–पापविपाकिनामसाधुत्वेनावस्थानम्, एतदुभयमपि सत्यात्मनि तत्फलभुजि संभवति, तदभावाच्च कुतोऽनर्थकौ हिताहितप्राप्तिपरिहारौ स्यातां?, तथा सुकृतेन–कल्याणेन साध्वनुष्ठानेनाशेषकर्मक्षयरूपा सिद्धिस्तद्विपर्ययेणासिद्धिः, तथा दुष्कृतेन–पापानुबन्धिना असाध्वनुष्ठानेन नरकोऽनरको वा–तिर्यङ्नरामरगतिलक्षणः स्यादित्येवमात्मिका चिन्तैव न भवेत्, तदाधारस्यात्मसद्भावस्थानभ्युपगमादिति भावः । पुनरपि लोकायतिकानुष्ठानदर्शनायाह—'एवं ते' इत्यादि 'एवम्' अनन्तरोक्तेन प्रकारेण ते–नास्तिका आत्माभावं प्रतिपद्य विरूपं–नानाप्रकारं रूपं—स्वरूपं येषां ते तथा कर्मसमारम्भाः–सावद्यानुष्ठानरूपाः पशुघातमांसभक्षणसुरापाननिर्लाञ्छनादिकास्तैरेवंभूतैर्नानाविधैः कर्मसमारम्भैः कृषीबलानुष्ठानादिभिर्विरूपरूपान् कामभोगान् 'समारभ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्ते' सम्यादददति तदुपभोगार्थमिति ॥ साम्प्रतं तज्जीवतच्छरीरवादिमतमुपदर्शयितुकामः प्रस्तावमारचयन्नाह—'एवं चेग' इत्यादि, मूर्तिमतः शरीरादन्यदमूर्तं ज्ञानमात्मन्यनुभूयते, तस्य चामूर्तेनैव गुणिना भाव्यम्, अतः शरीरात्पृथग्भूत आत्माऽमूर्तो ज्ञानवत् तदाधारभूतोऽस्तीति, न चात्माभ्युपगममन्तरेण तज्जीवतच्छरीरवादिनः कथञ्चिद्विचार्यमाणं मरणमुपपद्यते, दृश्यन्ते च तथाभूत एव शरीरे म्रियमाणा मृताश्च, तथा कुतः समागतोऽहं कुत्र चेदं शरीरं परित्यज्य यास्यामि ?, तथा 'इदं मे शरीरं पुराणं कर्मे'त्येवमादिकाः शरीरात्पृथग्भावेनात्मनि संप्रत्यया अनुभूयन्ते, तदेवमपि स्वानुभवसिद्धेऽप्यात्मनि एके केचन नास्तिकाः पृथग्जीवास्तित्वमश्रद्दधानाः 'प्रागल्भिकाः' प्रागल्भ्येन चरन्ति धृष्टतामापन्ना अभिदधति—यद्ययमात्मा शरीरात्पृथग्भूतः स्यात् ततः संस्थानवर्णगंधरसस्पर्शान्यतमगुणोपेतः स्यात्, न च ते वराकाः स्वदर्शनानुरागाच्च तमसावृतदृश्य एतद्विदन्ति यथा—मूर्तस्यायं धर्मो नामूर्तस्य, न हि ज्ञानस्य संस्थानादयो गुणाः संभाव्यन्ते, न च तत्तदभावेऽपि नास्ति, इत्येवमात्मानं संस्थानादिगुणरहितोऽपि विद्यत इति, एवं युक्तियुक्तमप्यात्मानं धार्ष्ट्यान्नाभ्युपगच्छन्ति । तथा 'निष्क्रम्य' च स्वदर्शनविहितां प्रव्रज्यां गृहीत्वा नास्तो जीवः शरीराद्विद्यत इत्येवं यो धर्मो मदीयोऽभिस्तेवमभ्युपगम्य स्वतोऽपरेषां च तं तथाभूतं धर्मं प्रतिपादयन्ति । यद्यपि लोकायतिकानां नास्ति दीक्षादिकं तथाऽप्यपरेण शाक्यादिना प्रव्रज्याविधानेन प्रव्रज्य पश्चाल्लोकायतिकमधीयानस्य(नानां) तथाविधपरिणतेस्तदेवाभिरुचितम्, अतो मामकोऽयं धर्मः (इति) स्वयमभ्युपगच्छन्त्यन्येषां च प्रज्ञापयन्ति, यदिवा—नीलपटाद्यभ्युपगन्तुः कश्चिदस्त्येव प्रव्रज्याविशेष इत्यदोष इति । साम्प्रतं तत्प्रज्ञापितशिष्यव्यापारमधिकृत्याह—'तं सद्दहमाणे'त्यादि, 'तं' नास्तिकवाद्युप-

१ ये मण्डलवादिकाः प्र० ।

न्यस्तं धर्मं विषयिणमनुकूलं 'श्रद्दधानाः' स्वमतावतिशयेन रोचयन्तः तथा 'प्रतिपादयन्तः' अवितथभावेन गृह्णन्तः तथा तत्र रुचिं कुर्वन्तः तथा साधु-शोभनमेतद्यत् यथा स्वाख्यातो-यथावस्थितो भवता धर्मोऽन्यथाऽसति हिंसादिष्ववर्त्तमानाः परलोकभयात्सुखसाधनेषु मांसमद्यादिष्वप्रवृत्तिं कुर्वन्तो मनुष्यजन्मफलवञ्चिता भवेयुः, ततः शोभनमकारि भवता हे श्रमण ! ब्राह्मण ! इति वा यदयं तज्जीवतच्छरीरधर्मोऽस्माकमावेदितः, काममिष्टमेतदस्माकं धर्मकथनं, खलुशब्दो वाक्यालङ्कारे, हे आयुष्मंस्तया वयमभ्युद्यताः अन्यथा कापटिकैस्तीर्थिकैर्वञ्चिताः स्युरि(स्मे) ति, तस्मादुपकारिणं 'त्वां' भवन्तं पूजयामः, अहमपि कञ्चिदायुष्मतो भवतः प्रत्युपकारं करोमि । तदेव दर्शयति—तद्यथा 'असणेणे'त्यादि सुगमं यावत्पादपुञ्छनकमि(केने)ति । तत्रैके केचन पूर्वोक्तया पूजया पूजायां वा 'समाउट्टिंसु'त्ति समावृत्ताः—प्रहीभूतास्ते राजानः पूजां प्रति प्रवृत्ताः, तदुपदेष्टारो वा पूजामभ्युपपन्नाः सन्तस्तं राजादिकं स्वदर्शनप्रतिपन्नमेके केचन स्वदर्शनस्थित्या हिताहितप्राप्तिपरिहारेषु 'निकाचितवन्तो' नियमितवन्तः, तथाहि—भवतेदं तज्जीवतच्छरीरमित्यभ्युपगन्तव्यम्, अन्यो जीवोऽन्यच्च शरीरमित्येतच्च परित्याज्यम्, अनुष्ठानमपि एतदनुरूपमेव विधेयमित्येवं निकाचितवन्त इति ॥ तत्र ये भागवतादिकं लिङ्गमभ्युपगताः पश्चाल्लोकायतग्रन्थश्रवणेन लोकायताः संवृत्तास्तेषां 'पूर्वम्' आदौ प्रव्रज्याग्रहणकाल एवैतत्परिज्ञातं भवति, तद्यथा—परित्यक्तपुत्रकलत्राः 'श्रमणा' यतयो भविष्यामः 'अनगारा' गृहरहिताः तथा 'निष्किञ्चनाः' किञ्चन—द्रव्यं तद्रहिताः तथा 'अपशवो' गोमहिष्यादिरहिताः, परदत्तभोजिनः स्वतः पचनपाचनादिक्रियारहितत्वात्, भिक्षणशीला भिक्षवः, किंबहूक्त्यते अन्यदपि यत्किञ्चित्पापं—सावद्यं कर्मानुष्ठानं तत्सर्वं न करिष्यामी(मइ)-

१ ०द्यधा प्र० ।

त्येवं सम्यगुत्थानेनोत्थाय पूर्वं पश्चात्ते लोकायतिकभावमुपगता आत्मनः—स्वतः पापकर्मभ्योऽतिविरता भवान्त, विरत्यभावे च यत्कुर्वन्ति तदर्शयति—पूर्वं सावद्यारम्भाश्रितवृत्तिं विधाय नीलपटादिकं च लिङ्गमाश्राय स्वयमात्मना सावद्यमनुष्ठानमाददते—स्वीकुर्वन्ति अन्यानप्यादापयन्ति—ग्राहयन्त्यन्यमप्याददानं—परिग्रहं स्वीकुर्वन्तं समनुजानन्ति । एवमेव—पूर्वोक्तप्रकारेण स्त्रीप्रधानाः स्त्रियोपलक्षिता वा काम्यन्त इति कामा शब्द्यन्त इति भोगास्तेषु सातबहुलतयाऽजितेन्द्रियाः सन्तस्तेषु कामभोगेषु मूर्च्छिता—एकीभावतामापन्ना गृद्धाः—काङ्क्षावन्तो ग्रथिता—अवबद्धा अध्युपपन्ना—आधिक्येन भोगेषु लुब्धा रागद्वेषा(वश)स्त्री—रागद्वेषवशगाः कामभोगान्धा वा, त एवं कामभोगेषु अवबद्धाः सन्तो नात्मानं संसारात्कर्मपाशाद्वा समुच्छेदयन्ति—मोचयन्ति, नापि परं सदुपदेशदानतः कर्मपाशावपाशितं समुच्छेदयन्ति—कर्मबन्धान्नोटयन्ति, नाप्यन्यान् दशविधप्राणवर्तिनः प्राणान्—प्राणिनः, तथा अभूवन् भवन्ति भविष्यन्ति च भूतानि तथा आयुष्कधारणाज्जीवास्तान् तथा सत्त्वास्तथाविधवीर्यान्तरायक्षयोपशमापादितवीर्यगुणोपेतास्तान् न समुच्छेदयन्ति, असदभिप्रायप्रवृत्तत्वात्, ते चैवंविधास्तज्जीवतच्छरीरवादिनो लोकायतिका अजितेन्द्रियतया कामभोगावसक्ताः पूर्वसंयोगात्—पुत्रदारादिकात्प्रहीणाः—प्रभ्रष्टा आराद्यातः सर्वहेयधर्मेभ्य इत्यार्यो मार्गः—सदनुष्ठानरूपस्तमसंप्राप्ता इति, एवं पूर्वोक्तया नीत्या ऐहिकामुष्मिकलोकद्वयसदनुष्ठानभ्रष्टा अन्तराल एव भोगेषु विषण्णास्तिष्ठन्ति, न विवक्षितं पौण्डरीकोत्क्षेपणादिकं कार्यं प्रसाधयन्तीति । अयं च प्रथमः पुरुषस्तज्जीवतच्छरीरवादी परिसमाप्त इति ॥ प्रथमपुरुषानन्तरं द्वितीयं पुरुषजातमधिकृत्याह-

अहावरे दोच्चे पुरिसजाए पंचमहब्भूतिएत्ति आहिज्जइ, इह खलु पाइणं वा ६ संतेगतिया मणुस्सा, भवंति

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥२८०॥

१ पुण्डरीकाध्य० तज्जीवतच्छरीरवादी

॥२८०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणुपुव्वेणं लोयं उववन्ना, तंजहा–आरिया वेगे अणारिया वेगे एवं जाव दुरूवा वेगे, तेसिं च णं महं एगे राया भवइ महया० एवं चेव णिरवसेसं जाव सेणावइपुत्ता, तेसिं च णं एगतिए सड्ढा भवंति कामं तं समणा य माहणा य पहारिंसु गमणाए, तत्थ अन्नयरेणं धम्मेणं पन्नत्तारो वयं इमेणं धम्मेणं पन्नवइस्सामो से एवमायाणह भयंतारो! जहा मए एस धम्मे सुअक्खाए सुपन्नत्ते भवति॥ इह खलु पंच महब्भूता, जेहिं नो विज्जइ किरियाति वा अकिरियाति वा सुकडेति वा दुक्कडेति वा कल्लाणेति वा पावएति वा साहुति वा असाहुति वा सिद्धीति वा असिद्धीति वा णिरएति वा अणिरएति वा अवि अंतसो तणमायमवि॥ तं च पिडुदेसेणं पुढोभूतसमवातं जाणेज्जा, तंजहा–पुढवी एगे महब्भूते आऊ दुच्चे महब्भूते तेऊ तच्चे महब्भूते वाऊ चउत्थे महब्भूते आगासे पंचमे महब्भूते, इच्चेते पंच महब्भूया अणिम्मिया अणिम्माविता अकडा णो कित्तिमा णो कडगा अणाइया अणिहणा अवंझा अपुरोहिता सतंता सासता आयच्छट्ठा, पुण एगे एवमाहु–सतो णत्थि विणासो असतो णत्थि संभवो॥ एतावताव जीवकाए, एतावताव अत्थिकाए, एतावताव सव्वलोए, एतं मुहं लोगस्स करणयाए, अविज्जंतसो तणमायमवि॥ से किणं किणावेमाणे हणं घायमाणे पयं पयावेमाणे अवि अंतसो पुरिसमवि कीणित्ता घायइत्ता एत्थंपि जाणाहि णत्थित्थदोसो, ते णो एवं विप्पडिवेदेंति, तंजहा–किरियाइ वा जावऽणिरएइ वा, एवं ते विरूवरूवेहिं

१ एवं प्र०।

कम्मसमारंभेहिं विरूवरूवाइं कामभोगाइं समारभंति भोयणाए, एवमेव ते अणारिया विप्पडिवन्ना तं सद्दहमाणा तं पत्तियमाणा जाव इति, ते णो हव्वाए णो पाराए, अंतरा कामभोगेसु विसण्णा, दोच्चे पुरिसजाए पंचमहब्भूतिएत्ति आहिए॥ सूत्रं १०॥

अथशब्द आनन्तर्यार्थे, प्रथमपुरुषानन्तरमपरो द्वितीयः पुरुष एव पुरुषजातः पञ्चभिः (भूतैः) पृथिव्यप्तेजोवाय्वाकाशाख्यैरिति पञ्चभूतिकः पञ्च वा भूतानि अभ्युपगमद्वारेण विद्यन्ते यस्य स पञ्चभूतिको, मलयीयष्टक, स च सांख्यमतावलम्बी आत्मनस्तृणकुञ्जीकरणेऽप्यसामर्थ्याभ्युपगमात् भूतात्मिकायाश्च प्रकृतेः सर्वत्र कर्तृत्वाभ्युपगमात् द्रष्टव्यो, लोकायतमतावलम्बी वा नास्तिको भूतव्यतिरिक्तनास्तित्वाभ्युपगमादाख्यायते, प्रथमपुरुषादनन्तरमयं पञ्चभूतात्मवादाधिधीयते चेति। अत्र च प्रथमपुरुषगमेन 'इह खलु पाइणं वेत्यादिको ग्रन्थः सुपण्णत्ते भवती'त्येतत्पर्यवसानोऽवगन्तव्य इति॥ सांप्रतं सांख्यस्य लोकायतिकस्य चाभ्युपगमं दर्शयितुमाह–'इह' अस्मिन् संसारे द्वितीयपुरुषवक्तव्यताधिकारे वा, खलुशब्दो वाक्यालङ्कारे, पृथिव्यादीनि पञ्च महाभूतानि विद्यन्ते, महान्ति च तानि भूतानि च महाभूतानि, तेषां च सर्वव्यापितयाऽभ्युपगमात् महत्त्वं, तानि च पञ्चैव, अपरस्य षष्ठस्य क्रियाकर्तृत्वेनानभ्युपगमात्, यैर्हि पञ्चभिर्भूतैरभ्युपगम्यमानैः 'नः' अस्माकं क्रिया–परिस्पन्दात्मिका चेष्टारूपा क्रियते अक्रिया वा–निर्व्यापाररूपतया स्थितिरूपा क्रियते, तथाहि तेषां दर्शनं—सत्त्वरजस्तमोरूपा प्रकृतिर्भूतात्मभूताः सर्वा अर्थक्रियाः करोति, पुरुषः केवलमुपभुङ्क्ते, 'बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते' इति वचनात्, बुद्धिश्च प्रकृतिरेव तद्विकारत्वात्, तस्माच्च प्रकृतेर्भूतात्मिकायाः सत्त्वरजस्तमसां चयापचयाभ्यां क्रियाक्रिये स्याताम्इतिकृत्वा भूतेभ्य एव क्रियादीनि प्रवर्तन्ते, तद्व्यतिरेकेणापरस्याभावादिति भावः। तथा सुष्ठु कृतं सुकृतम् एतच्च सत्त्वगुणाधिक्येन भवति, तथा दुष्ठं कृतं दुष्कृतम्, एतदपि रजस्तमसोरुत्कटतया प्रवर्तते, एवं कल्याणमिति वा पापकमिति वा साधिवति वा असाधिवति वा इत्येतत्सत्त्वादीनां गुणानामुत्कर्षानुत्कर्षतया यथासंभवमायोजनीयं। तथेप्सितार्थनिष्ठानं सिद्धिर्विपर्ययस्त्वसिद्धिः निर्वाणं वा–सिद्धिः असिद्धिः—संसारः संसारिणां तथा नरकः–पापकर्मणां यातनास्थानम् अनरकस्तिर्यङ्मनुष्यामराणाम्, एतत्सर्वं सत्त्वादिगुणाधिष्ठिता भूतात्मिका प्रकृतिर्विधत्ते। लोकायताभिप्रायेणापीहैव तथाविधसुखदुःखस्थाने स्वर्गनरकावितीत्येवमन्तशस्तृणमात्रमपि यत्कार्यं तद्भूतैरेव प्रधानरूपापन्नैः क्रियते, तथा चोक्तम्—'सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥ १॥" इत्यादि। तदेवं सांख्याभिप्रायेणात्मनस्तृणकुञ्जीकरणेऽप्यसामर्थ्याल्लोकायतिकाभिप्रायेण चात्मन एवाभावाद्भूतान्येव सर्वकार्यकर्तृणीत्येवमभ्युपगमः, तानि च समुदायरूपापन्नानि नानास्वभावं कार्यं कुर्वन्ति॥ तं च तेषां समवायं पृथग्भूतपदोद्देशेन जानीयात्, तद्यथा—पृथिव्येका काठिन्यलक्षणा महाभूतं, तथाऽऽपो द्रवलक्षणा महाभूतं, तथा तेज उष्णोद्योतलक्षणं, तथा वायुर्हेतिकम्पलक्षणः, तथाऽवगाहदानलक्षणं सर्वद्रव्याधारभूतमाकाशमित्येवं पृथग्भूतो यः पदोद्देशस्तेन कायाकारतया यस्तेषां समवायः स एकत्वेऽपि लक्ष्यते इत्येतानि पूर्वोक्तानि पृथिव्यादीनि, 'संख्या ह्यादीयमाना संख्यान्तरं निवर्तयती'तिकृत्वा न न्यूनानि नाप्यधिकानि, विश्वव्यापितया महान्ति, त्रिकालभवनाद्भूतानि, तदेवमेतान्येव पञ्च महाभूतानि 'प्रकृतेर्महान् महतोऽहङ्कारस्तस्मात् गणश्च षोडशकः। तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि॥ १॥' इत्येवं क्रमेण व्यवस्थितानि, अपरेण कालेश्वरादिना केनचिदनिर्मितानि–अनिष्पादितानि, तथा परेणानिर्मापयितव्यानि, तथाऽकृतानि न केनचित्तानि क्रियन्ते, अभ्रेन्द्रधनुरादि-

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥२८२॥

१ पुण्डरीकाध्य० भौतिकसाङ्ख्यौ

॥२८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वद्विस्रसापरिणामेन निष्पन्नत्वात्, तथा न घटवत्कृत्रिमाणि, कर्तृकरणव्यापारसाध्यानि न भवन्तीत्यर्थः, तथा परव्यापाराभावतया 'नो' नैव कृतकानि, अपेक्षितपरव्यापारः स्वभावनिष्पत्तौ भावः कृतक इति व्यपदिश्यते, तानि च विस्रसापरिणामेन निष्पन्नत्वात्कृतकव्यपदेशभाञ्जि न भवन्ति, तथा अनाद्यनिधनानि, अवन्ध्यानि-अवश्यकार्यकर्तृणि, तथा न विद्यते 'पुरोहितः' कार्यं प्रति प्रवर्तयिता येषां तान्यपुरोहितानि, स्वतन्त्राणि स्वकार्यकर्तृत्वं प्रत्यपरनिरपेक्षाणि, शाश्वतानि नित्यानि वा 'न कदाचिदनीदृशं जगदि'ति वचनात्, तदेवंभूतानि पञ्च महाभूतान्यात्मषष्ठानि पुनरेके एवमाहुः, आत्मा चाकिञ्चित्करः सांख्यानां लोकायतिकानां पुनः कायाकारपरिणतान्येव भूतान्यभिव्यक्तचेतनानि आत्मव्यपदेशं भजन्त इति। तदेवं सांख्याभिप्रायेण 'सतो' विद्यमानस्य प्रधानादेर्नास्ति 'विनाशः' अत्यन्ताभावरूपो नाप्यसतः शशविषाणादेः संभवः—समुत्पत्तिरस्ति, कारणे कार्यस्य विद्यमानस्यैवोत्पत्तिरिष्टा, नासतः, सर्वस्मात्सर्वस्योत्पत्तिप्रसङ्गात्, तथा चोक्तम्—"नासतो जायते भावो, नाभावो जायते सतः" इत्यादि, तथा असतः खरविषाणादेरकरणादुपादानकारणस्य च मृत्पिण्डादेर्घटार्थिनोपादानादित्यादिभ्यश्च हेतुभ्यः कारणे सत्कार्यवादः॥ तदेवमेतावानेव तावदिति सांख्यो लोकायतिको वा माध्यस्थ्यमवलम्बमान एवमाह, तद्यथा अस्मदयुक्तिभिर्विचार्यमाणस्तावदेतावानेव जीवकायो यदुत पञ्च महाभूतानि, यतस्तान्येव सांख्याभिप्रायेण प्रधानरूपतामापन्नानि सत्त्वादिगुणोपचयापचयाभ्यां सर्वकार्यकर्तृणि, आत्मा चाकिञ्चित्करत्वादसत्कल्प एव, लोकायतस्य तु स नास्त्येवेत्यत 'एतावानेव' भूतमात्र एव जीवकायः, तथा एतावानेव-भूतास्तित्वमात्र एवास्तिकायो नापरः कश्चित्तीर्थिकाभिप्रेतः पदार्थोऽस्तीति। तथा एतावानेव सर्वलोको यदुत पञ्च महाभूतानि प्रधानरूपापन्नानि, आत्मा चाकर्ता निर्गुणः सांख्यस्य, लोकायतिकस्य तु पञ्चभूतात्मक एव लोकः, तदतिरिक्तस्यापरस्य

सूत्रकृ. ४८

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥२८३॥

पदार्थस्याभावादिति। तथा एतदेव पञ्चभूतास्तित्वं 'मुख्यं' कारणं लोकस्य, एतदेव च कारणतया सर्वकार्येषु व्याप्रियते, तथाहि—सांख्यस्य प्रधानात्मभ्यां सृष्टिरुपजायते, लोकायतिकस्य तु भूतान्येव अन्तशस्तृणमात्रमपि कार्यं कुर्वन्ति, तदतिरिक्तस्यापरस्याभावादिति भावः॥ स चैवंवाद्येकत्रात्मनोऽकिञ्चित्करत्वादन्यत्र चात्मनोऽसत्त्वादसदनुष्ठानैरप्यात्मा पापैः कर्मभिर्न बध्यत इति (मन्यतेतद्) दर्शयितुमाह—'से कीण'मित्यादि 'से'त्ति स इति यः कश्चित्पुरुषः क्रयार्थी 'क्रीणन्' किञ्चित् क्रयेण गृह्णंस्तथाऽपरं क्रापयंस्तथा प्राणिनो घ्नन्-हिंसन् तथा परैर्घातयन्-व्यापादयन् तथा पचनपाचनादिकां क्रियां कुर्वंस्तथाऽपरैश्च पाचयन्, अस्य चोपलक्षणार्थत्वात् (अनुमोदयन्) क्रीणतः क्रापयतो घ्नतो घातयतः पचतः पाचयतश्चापरांस्तथा अप्यन्तशः पुरुषमपि पञ्चेन्द्रियं विक्रीय घातयित्वा, अपि पञ्चेन्द्रियघाते नास्ति दोषोऽत्र एवं 'जानीहि' अवगच्छ, किं पुनरेकेन्द्रियवनस्पतिघात इत्यपिशब्दार्थः। ततश्चैवंवादिनः सांख्या बार्हस्पत्या वा 'नो' नैव 'एतद्' वक्ष्यमाणं 'विप्रतिवेदयन्ति' जानन्ति, तद्यथा-क्रिया-परिस्पन्दात्मिका सावद्यानुष्ठानरूपा एवमक्रिया वा-स्थानादिलक्षणा यावदेवमेव 'विरूपरूपैः' उच्चावचैर्नानाप्रकारैर्जलस्नानावगाहनादिकैस्तथा प्राण्युपमर्दकारिभिः कर्मसमारम्भैः 'विरूपरूपान्' नानाप्रकारान् सुरापानमांसभक्षणागम्यगमनादिकान् कामभोगान् समारभन्ते स्वतः, परांश्च चोदयन्ति—नास्त्यत्र दोष इत्येवं प्रतार्यासत्कार्यकरणाय प्रेरयन्ति, एवं च तेऽनार्या अनार्यकर्मकारित्वादार्यान्मार्गाद्विरुद्धं मार्गं प्रतिपन्नाः विप्रतिपन्नाः, तथाहि-सांख्यानामचेतनत्वात्प्रकृतेः कार्यकर्तृत्वं नोपपद्यते, अचेतनत्वं तु तस्याः 'चैतन्यं पुरुषस्य स्वरूप'मिति वचनात्, आत्मैव प्रतिबिम्बोदयन्यायेन करिष्यतीति चेत्तदपि न युक्तिसंगतं, यतोऽकर्तृत्वादात्मनो नित्यत्वाच्च प्रतिबिम्बोदयो न युज्यते, किंच-नित्यत्वात्प्रकृतेर्महदादिविकारतया नोत्पत्तिः स्यात्, अपिच-'नासतो जायते भावो, नाभावो जायते सत' इत्याद्यभ्युप-

१ पुण्डरीकाध्ययनं पाञ्चभौतिकः

॥२८३॥

गमात्प्रधानात्मनोरेव विद्यमानत्वान्महदहङ्कारादेरनुत्पत्तिरेव, एकत्वाच्च प्रकृतेरेकात्मवियोगे सति सर्वात्मनां वियोगः स्याद् एकसंबन्धे वा सर्वात्मनां प्रकृतिसंयोगो न पुनः कस्यचित्तत्त्वपरिज्ञानात् प्रकृतिवियोगे मोक्षोऽपरस्य तु विपर्ययात्संसार इति, एवं जगद्वैचित्र्यं न स्याद्, आत्मनश्चाकर्तृत्वे तत्कृतौ बन्धमोक्षौ न स्याताम्, एतच्च दृष्टेष्टबाधितं। नापि कारणे सत्कार्यवादो, युक्तिभिरनुपपद्यमानत्वात्, तथाहि—मृत्पिण्डावस्थायां घटोत्पत्तेः प्राग्घटसंबन्धिनां कर्मगुणव्यपदेशानामभावात्, घटार्थिनां च क्रियासु प्रवृत्तेर्न कारणे कार्यमिति॥ लोकायतिकस्यापि भूतानामचेतनत्वात्कर्तृत्वानुपपत्तिः, कायाकारपरिणतानां चैतन्याभिव्यक्त्यभ्युपगमे च मरणाभावप्रसङ्गः स्यात्, तस्मान्न पञ्चभूतात्मकं जगदिति स्थितम्। अपिच—इदं ज्ञानं स्वसंवित्तिसिद्धमात्मानं धर्मिणमुपस्थापयति, नच भूतान्येव धर्मित्वेन परिकल्पयितुं युज्यन्ते, तेषामचेतनत्वाद्, अथ कायाकारपरिणतानां चैतन्यं धर्मो भविष्यतीत्येतदप्ययुक्तं, यतः कायाकारपरिणाम एव तेषामात्मानमधिष्ठातारमन्तरेण न भवितुमर्हति, निर्हेतुकत्वप्रसङ्गात्, निर्हेतुकत्वे च नित्यं सत्त्वमसत्त्वं वा स्यादिति। तदेवं भूतव्यतिरिक्त आत्मा, तस्मिंश्च सति सदसदनुष्ठानतः पुण्यपापे, ततश्च जगद्वैचित्र्यसिद्धिरिति। एवं च व्यवस्थिते तेऽनार्याः सांख्या लोकायतिका वा पञ्चमहाभूतप्रधानाभ्युपगमेन विप्रतिपन्ना यत्कुर्युस्तद्दर्शयितुमाह—'तं सद्दहमाणा' इत्यादि, 'तम्' आत्मीयमभ्युपगमं पूर्वोक्तया नीत्या निर्युक्तिकमपि श्रद्दधानाः पञ्चमहाभूतात्मकप्रधानस्य सर्वकार्याणि उपगच्छन्ति, तदेव च सत्यमित्येवं 'प्रतियन्तः' प्रतिपद्यमानास्तदेव चात्मीयमभ्युपगमं रोचयन्तस्तद्धर्मस्याख्यातारं प्रशंसयन्तः, तद्यथा—स्वाख्यातो भवता धर्मोऽस्माकमयमत्यन्तमभिप्रेत इत्येवं ते तदध्यवसायाः—सावद्यानुष्ठानेनाप्यधर्मो न भवतीत्यध्यवसायिनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीकामेषु मूर्च्छिता इत्येवं पूर्ववज्ज्ञेयं यावत्तदन्तरे कामभोगेषु विषण्णा ऐहिकामुष्मिकोभयकार्यभ्रष्टा नात्मत्रा(नस्त्रा)णाय नापि परेषामिति । भवत्येवं द्वितीयः पुरुषजातः पञ्चमहाभूताभ्युपगमिको व्याख्यात इति ॥ साम्प्रतमीश्वरकारणिकमधिकृत्याह—

अहावरे तच्चे पुरिसजाए ईसरकारणिए इति आहिज्जइ, इह खलु पाईणं वा ६ संतेगतिया मणुस्सा भवंति अणुपुव्वेणं लोयं उववन्ना, तं०—आरिया वेगे जाव तेसिं च णं महंते एगे राया भवइ जाव सेणावइपुत्ता, तेसिं च णं एगतीए सड्ढी भवइ, कामं तं समणा य माहणा य पहारिंसु गमणाए जाव जहा मए एस धम्मे सुअक्खाए सुपन्नत्ते भवइ ॥ इह खलु धम्मा पुरिसादिया पुरिसोत्तरिया पुरिसप्पणीया पुरिससंभूया पुरिसपज्जोतिता पुरिसअभिसमण्णागया पुरिसमेव अभिभूय चिट्ठंति, से जहाणामए गंडे सिया सरीरे जाए सरीरे संवुड्ढे सरीरे अभिसमण्णागए सरीरमेव अभिभूय चिट्ठति, एवमेव धम्मा पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति । से जहाणामए अरई सिया सरीरे जाया सरीरे संवुड्ढा सरीरे अभिसमण्णागया सरीरमेव अभिभूय चिट्ठति, एवमेव धम्मावि पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति । से जहाणामए वम्मिए सिया पुढविजाए पुढविसंवुड्ढे पुढविअभिसमण्णागए पुढविमेव अभिभूय चिट्ठइ एवमेव धम्मावि पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति । से जहाणामए रुक्खे सिया पुढविजाए पुढविसंवुड्ढे पुढविअभिसमण्णागए पुढविमेव अभिभूय चिट्ठति, एवमेव धम्मावि पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति । से जहाणामए पुक्खरिणी सिया पुढविजाया जाव पुढविमेव अभिभूय चिट्ठति, एवमेव धम्मावि पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति । से जहाणामए उदगपुक्खले सिया उदगजाए जाव उदगमेव अभिभूय चिट्ठति, एवमेव धम्मावि पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति । से जहाणामए उदगबुब्बुए सिया उदगजाए जाव उदगमेव अभिभूय चिट्ठति, एवमेव धम्मावि पुरिसादिया जाव पुरिसमेव अभिभूय चिट्ठंति ॥ जंपिय इमं समणाणं णिग्गंथाणं उद्दिट्ठं पणीयं वियंजियं दुवालसंगं गणिपिडगं, तंजहा—आयारो सूयगडो जाव दिट्ठिवातो, सव्वमेवं मिच्छा, ण एयं तहियं, ण एयं आहातहियं, इमं सच्चं इमं तहियं इमं आहातहियं, ते एवं सन्नं कुव्वंति, ते एवं सन्नं संठवेंति, ते एवं सन्नं सोवट्ठवयंति, तमेवं ते तज्जाइयं दुक्खं णातिउट्टंति सउणी पंजरं जहा ॥ ते णो एवं विप्पडिवेदेंति, तंजहा—किरिया इ वा जाव अणिरए इ वा, एवामेव ते विरूवरूवेहिं कम्मसमारंभेहिं विरूवरूवाइं कामभोगाइं समारंभंति भोयणाए, एवामेव ते अणारिया विप्पडिवन्ना एवं सद्दहमाणा जाव इति ते णो हव्वाए णो पाराए, अंतरा कामभोगेसु विसण्णेत्ति, तच्चे पुरिसजाए ईसरकारणिएत्ति आहिए (सूत्रं ११) ॥

अथ द्वितीयपुरुषादनन्तरं तृतीय ईश्वरकारणिक आख्यायते, समस्तस्यापि चेतनाचेतनरूपस्य जगत ईश्वरः कारणं, प्रमाणं चात्र—तनुभुवनकरणादिकं धर्मिसेनोपादीयते, ईश्वरकर्तृकमिति साध्यो धर्मः, संस्थानविशेषत्वात् कूपदेवकुलादिवत् तथा स्थिता २ प्रवृत्तेर्वास्यादिवत्, उक्तं च—"अज्ञो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥१॥" इत्यादि । तथा 'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्य' मित्यादि, तथा चोक्तम्—"एक एव हि भूतात्मा, भूते भूते प्रतिष्ठितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवद् ॥१॥" इत्यादि, तदेवमीश्वरकारणिक आत्माद्वैतवादी वा तृतीयः पुरुषजात आख्यायते । 'इह खलु' इत्यादि, इहैव—पुरुषजातप्रस्तावे, खलुशब्दो वाक्यालङ्कारे, प्राच्यादिषु दिक्ष्वन्यतमस्यां दिशि व्यवस्थितः कश्चिदेवं ब्रूयात्, तद्यथा—राजानमुद्दिश्य तावद्यावत्स्वाख्यातः सुप्रज्ञप्तो धर्मो भवति ॥ स चायम्—इह खलु धर्माः—स्वभावाश्चेतनाचेतनरूपाः पुरुष—ईश्वर आत्मा वा कारणमादिर्येषां ते पुरुषादिका ईश्वरकारणिका आत्मकारणिका वा, तथा पुरुष एवोत्तरं—कार्यं येषां ते पुरुषोत्तराः, तथा पुरुषेण प्रणीताः सर्वस्य तदधिष्ठितत्वात् तदात्मकत्वाद्वा, तथा पुरुषेण द्योतिताः—प्रकाशीकृताः प्रदीपमणिसूर्यादिनेव घटपटादय इति । ते च धर्मा जीवानां जन्मजरामरणव्याधिरोगशोकसुखदुःखजीवनादिकाः, अजीवधर्मास्तु मूर्तिमतां द्रव्याणां वर्णगन्धरसस्पर्शा अमूर्तिमतां च धर्माधर्माकाशानां गत्यादिका धर्माः, सर्वेऽप्यीश्वरकृता आत्माद्वैतवादे वाऽऽत्मविवर्ताः, सर्वेऽप्येते पुरुषमेवाभिभूय—अभिव्याप्य तिष्ठन्ति । अस्मिन्नर्थे दृष्टान्तानाविर्भावयन्नाह—'से जहाणामए' इत्यादि, सेशब्दस्तच्छब्दार्थे, नामशब्दः संभावनायां, तद्यथा नाम गण्डं 'स्याद्' भवेत्, संभाव्यते च शरीरिणां संसारान्तर्गतानां कर्मवशगानां गण्डादिसमुद्भवः, तच्च शरीरे जातं—शरीरजातं शरीरावयवभूतं, तथा शरीरे वृद्धिमुपगतं— शरीराभिवृद्धौ च तस्याभिवृद्धिः, तथा शरीरेऽभिसमन्वागतं—शरीरमाभिमुख्येन व्याप्य व्यवस्थितं, न तदवयवोऽपि शरीरात्पृथग्भूत इति भावः, तथा शरीरमेवाभिभूय—आभिमुख्येन पीडयित्वा तिष्ठति, यदिवा तदुपशमे शरीरमेवाश्रित्य तद्गण्डं तिष्ठति न शरीराद्बहिर्भवति, एतदुक्तं भवति—यथा तत्पिटकं शरीरैकदेशभूतं न युक्तिशतेनापि शरीरात्पृथग्दर्शयितुं शक्यते, एवमेवामी धर्माश्चेतनाचेतनरूपास्ते सर्वेऽप्यीश्वरकर्तृका न ते ईश्वरात्पृथक्कर्तुं पार्यन्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदिवा सर्वव्यापिन आत्मनस्त्रैलोक्योदरविवरवर्तिपदार्थात्मनो ये केचन धर्माः प्रादुष्यन्ति ते पृथक्कर्तुं न शक्यन्ते, यथा तद्भण्डं शरीरविकारभूतं तदपृथग्भूतं तद्विनाशे च शरीरमेवावतिष्ठते, एवमेव सर्वेऽपि धर्माः पुरुषादिकाः पुरुषकारणिकाः पुरुषविकारूपा वा न पुरुषात्पृथग्भवितुमर्हन्ति तद्विकारापगमे चात्मानमेवाश्रित्यावतिष्ठन्ते–न तस्माद्बहिर्भवन्तीति, शास्त्रे च दृष्टान्तप्राचुर्यमविरुद्धं, यदिवाऽस्मिन्नर्थे बहवो दृष्टान्ताः संभवन्तीश्वरकर्तृत्ववादस्यात्माद्वैतवादस्य च सुप्रसिद्धत्वाद्दृष्टान्तबहुत्वमित्याह–'से जहा'–इत्यादि, तद् यथा नामारतिः–चित्तोद्वेगलक्षणा 'स्याद्' भवेत्, सा च शरीरजाता इत्यादि गण्डवन्नेया, दार्ष्टान्तिकेऽप्येवमेव, सर्वे धर्माः पुरुषादिकाः पुरुषप्रभवा इत्यादि पूर्ववन्नेयं। तथा तद् यथा नाम वल्मीकं–पृथ्वीविकाररूपं स्यात्, तच्च पृथिव्यां जातं पृथिवीसंबद्धं पृथिव्यभिसमन्वागतं पृथिवीमेवाभि[सं]भूय तिष्ठति, एवमेव यदेतच्चेतनाचेतनरूपं तत्सर्वमीश्वरकारणिकमात्मविवर्तरूपं वा नात्मनः पृथग्भवितुमर्हति, पृथिव्या वल्मीकवत्। तथा तद् यथा नाम वृक्षोऽशोकादिकः स्यात् स च पृथिवीजात इत्यादि दृष्टान्तदार्ष्टान्तिके पूर्ववदायोज्ये, तद् यथा नाम पुष्करिणी स्यात्–तडागरूपा भवेत्, साऽपि पृथिव्यामेव जातेत्यादि प्राग्वच्चर्च्यः, तथा तद् यथा नाम पुष्कलं–प्रचुरमुदकपुष्कलम्–उदकप्राचुर्यं तच्च तद्धर्मत्वादुदकमेव यावदुदकमेवाभिभूय तिष्ठत्येवं दार्ष्टान्तिकेऽप्यायोज्यं, तथा तद् यथा नामोदकबुद्बुदः स्याद्, अत्रापि दृष्टान्तदार्ष्टान्तिके, न तस्मादवयविनः पृथग्भूत इति सुगमम्॥ तदेवं यदीश्वरकृतत्वेनाभ्युपगम्यते तत्सर्वं तथ्यमपरं तु मिथ्या इत्येतदाविर्भावयन्नाह–यदपि चेदं संव्यवहारतः प्रत्यक्षासन्नभूतं 'श्रमणानां' यतीनां 'निर्ग्रन्थानां' निष्किञ्चनानामुद्दिष्टं तदर्थं प्रणीतं व्यञ्जितं–तेषामभिव्यक्तीकृतं द्वादशाङ्गं गणिपिटकं तद्यथा–आचार इत्यादि यावद्दृष्टिवादः, सर्वमेतन्मिथ्या अनीश्वरप्रणीतत्वात् स्वरुचिविरचितरथ्यापु-

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥२८६॥

१ पुण्डरीकाध्य० ईश्वरकारणिकः

रुषवाक्यवत्, तथा नैतत्तथ्यं, मिथ्येत्यनेनाभूतोद्भावनत्वमाविष्कृतमचौरचौरत्ववत्, नैतत्तथ्यमित्यनेन तु सद्भूतार्थनिह्नवो यथा नास्त्यात्मेति, तथा नैतद्याथातथ्यम्–यथाऽवस्थितोऽर्थो न तथाऽवस्थितमिति भावः, अनेन सद्भूतार्थनिह्नवेनासद्भूतार्थारोपणमाविष्कृतं, तद् यथा गामश्वं ब्रुवतोऽश्वं वा गामिति, एकार्थिकानि वैतानि शक्रेन्द्रादिवद्द्रष्टव्यानि। तदेवं यदेतद्द्वादशाङ्गं गणिपिटकं तदनीश्वरप्रणीतत्वान्मिथ्येति स्थितम्, इदं तु पुनरीश्वरकर्तृकत्वं नामात्माद्वैतं वा सत्यं यथाऽवस्थितार्थप्रतिपादनात्। तथेदमेव तथ्यं सद्भूतार्थोद्भासनात्, तदेवं ते ईश्वरकारणिका आत्माद्वैतवादिनो वा 'एवम्' अनन्तरोक्तया नीत्या सर्वं तनुभुवनकरणादिकमीश्वरकारणिकं तथा सर्वं चेतनमचेतनं वाऽऽत्मविवर्तस्वभावम्, आत्मन एव सर्वावस्थायोत्पत्तेरित्येवं संज्ञानं संज्ञा तामेवं कुर्वन्त्यन्येषां च ते स्वदर्शनानुरक्तमनसां संज्ञां संस्थापयन्ति, तथा त एव एवंभूतां संज्ञां वक्ष्यमाणेन न्यायेन निर्युक्तिकामपि सुष्ठु उप–सामीप्येन तदाग्रहितया तदभिमुखा युक्तीर्निनीषवः 'स्थापयन्ति' प्रतिष्ठापयन्ति। ते चैवंवादिनस्तमीश्वरकर्तृत्ववादमात्माद्वैतवादं वा नातिवर्तन्ते, तदभ्युपगमजातीयं च दुःखं–दुःखहेतुत्वाद्दुःखं नातिवर्तन्ते न त्रोटयन्ति वा, अस्मिन्नर्थे दृष्टान्तमाह–यथा शाकुनिः–पक्षिविशेषो लावकादिकः पञ्जरं नातिवर्तते पौनःपुन्येन भ्रान्त्वा तत्रैव वर्तते, एवं तेऽप्येवंभूताभ्युपगमवादिनस्तदापादितकर्मबन्धनं नातिवर्तन्ते न वा त्रोटयन्ति। ते च स्वाग्रहाभिमानग्रहग्रस्ता नैतद्वक्ष्यमाणं विप्रतिवेदयन्ति–न सम्यक् जानन्ति, तद्यथा–इयं क्रिया–सदनुष्ठानरूपेयं चाक्रिया–तद्विपरीतेत्येवं स्वाग्रहिणो नान्यत् शोभनमशोभनं वा यावदयमनरक इत्येवं सदसद्विवेकरहितत्वान्नावधारयन्ति, एवमेव यथाकथञ्चित्ते विरूपरूपैः कर्मसमारम्भैः–नानाप्रकारैः सावद्यानुष्ठानैर्द्रव्योपार्जनोपायभूतैर्द्रव्यमुपादाय विरूपरूपान्कामभोगानुद्भावयन्तः समाचरन्ति भोजनाय–उपभोगार्थमित्येवमनार्यास्ते विरुद्धं

॥२८६॥

मार्गं प्रतिपन्ना विप्रतिपन्ना न सम्यग्वादिनो भवन्ति, तथाहि–सर्वमीश्वरकर्तृकमित्यत्राभ्युपगमे किमसावीश्वरः स्वत एवापरान् क्रियासु प्रवर्तते(य)ते उतापरेण प्रेरितः?, तत्र यद्याद्यः पक्षस्तदा तद्वदन्येषामपि स्वत एव क्रियासु प्रवृत्तिर्भविष्यति किमन्तर्गडुनेश्वरपरिकल्पनेन?, अथासावप्यपरप्रेरितः, सोऽप्यपरेण सोऽप्यपरेणेत्येवमनवस्थालता नभोमण्डलमालिनी प्रसर्पति। किञ्च असावीश्वरो महापुरुषतया वीतरागतोपेतः सन्नेकान्नरकयोग्यासु क्रियासु प्रवर्तयत्यपरांस्तु स्वर्गापवर्गयोग्यास्विति?, अथ ते पूर्वशुभाशुभकर्मोदयादेव तथाविधासु क्रियासु प्रवर्तन्ते, स तु निमित्तमात्रम्, तदपि न युक्तिसंगतं, यतः प्राक्तनाशुभप्रवर्तनमपि तदायत्तमेव, तथा चोक्तम्–"अज्ञो जन्तु"रित्यादि, अथ तदपि प्राक्तनमन्येन प्राक्तनतरेण कारितमिति, एवमनादिहेतुपरम्परेति, एवं च सति तत एव शुभाशुभे स्याने भविष्यतः किमीश्वरपरिकल्पनेन?, तथा चोक्तम्–"शस्त्रौषधादिसंबन्धाच्चैत्रस्य व्रणरोहणे। असंबद्धस्य किं स्थाणोः, कारणत्वं न कल्प्यते?॥ १॥" इत्यादि। यच्चोक्तं–सर्वं तनुभुवनकरणादिकं बुद्धिमत्कारणपूर्वकं संस्थानविशेषत्वात् देवकुलादिवदिति, एतदपि न युक्तिसंगतं, यत एतदपि साधनं न भवदभिप्रेतमीश्वरं साधयति, तेन सार्धं व्याप्यसिद्धेः, देवकुलादिके दृष्टान्तेऽनीश्वरस्यैव कर्तृत्वेनाभ्युपगमात्, न च संस्थानशब्दप्रवृत्तिमात्रेण सर्वस्य बुद्धिमत्कारणपूर्वकत्वं सिध्यति, अन्यथाऽनुपपत्तिलक्षणस्य साध्यसाधनयोः प्रतिबन्धस्याभावात्, अथाविनाभावमन्तरेणैव संस्थानमात्रदर्शनात्साध्यसिद्धिः स्याद्, एवं च सत्यतिप्रसङ्गः स्यात्, उक्तं च–"अन्यथा कुम्भकारेण, मृद्विकारस्य कस्यचित्। घटादेः करणात्सिद्धेद्वलमीकस्यापि तत्कृतिः॥ १॥" इत्यादि। न चेश्वरकर्तृत्वे जगद्वैचित्र्यं सिध्यति, तस्यैकरूपत्वादित्युक्तप्रायमिति। आत्माद्वैतपक्षस्तत्यन्तमयुक्तिसंगतत्वा-

१ परासु क्रियासु प्रवर्तते उता० प्रवर्तयते उता० प्र०। २ ०स्ततः प्र०। ३ किं चा०। ४ पूर्वाशुभ०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आश्रयणीयः, तथाहि–तत्र न प्रमाणं न प्रमेयं न प्रतिपाद्यं न प्रतिपादको न हेतुर्न दृष्टान्तो न तदाभासो भेदेनावगम्यते, सर्वस्यैव जगत एकत्वं स्याद् आत्मनोऽभिन्नत्वात्, तदभावे च कः केन प्रतिपाद्यते ? इत्यप्रणयनमेव शास्त्रस्य, आत्मनश्चैकत्वात्तत्कार्यमप्येकाकारमेव स्यादित्यतो निर्हेतुकं जगद्वैचित्र्यं, तथा च सति–"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां, कादाचित्कत्वसंभवः ॥ १ ॥" इत्यादि । तदेवमीश्वरकर्तृत्वमात्माद्वैतपक्षश्च युक्तिभिर्विचार्यमाणो न कथञ्चिद् घटां प्राञ्चति, तथापि-एते स्वदर्शनमोहमोहितास्तज्जातीयाद्युःखात् शकुनिः पञ्जरादिव नातिप्रयुच्यन्ते, विप्रतिपन्नाश्च तत्प्रतिपादिकाभिर्युक्तिभिस्तदेव स्वपक्षं प्रतियन्ति श्रद्दधतीति पूर्ववन्नेयं यावद् 'णो हव्वाए णो पाराए अंतरा कामभोगेसु विसण्ण'त्ति इत्ययं तृतीयः पुरुषजात ईश्वरकारणिक इति । स ह्येवमाह–'यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत् । आकाशमिव पङ्केन, नासौ पापेन लिप्यते ॥ १ ॥' इत्याद्यसमञ्जसभाषितया त्यक्त्वा पूर्वसंयोगमप्राप्तो विवक्षितं स्थानमन्तराल एव कामभोगेषु मूर्च्छितो विषण्ण इत्यवगन्तव्यमिति ॥ साम्प्रतं चतुर्थपुरुषजातमधिकृत्याह—

अहावरे चउत्थे पुरिसजाए णियतिवाइएत्ति आहिज्जइ, इह खलु पाईणं वा ६ तहेव जाव सेणावइपुत्ता वा, तेसिं च णं एगतीए सड्ढी भवइ, कामं तं समणा य माहणा य संपहारिंसु गमणाए जाव मए एस धम्मे सुअक्खाए सुपन्नत्ते भवइ ॥ इह खलु दुवे पुरिसा भवंति–एगे पुरिसे किरियमाइक्खइ एगे पुरिसे णोकिरियमाइक्खइ, जे य पुरिसे किरियमाइक्खइ जे य पुरिसे णोकिरियमाइक्खइ दोवि ते पुरिसा तुल्ला एगट्ठा, कारणमावन्ना ॥ बाले पुण एवं विप्पडिवेदेंति कारणमावन्ने अहमंसि दुक्खामि वा सोयामि वा जूरामि वा तिप्पामि वा पीडामि वा परितप्पामि वा अहमेयमकासि परो वा जं दुक्खइ वा सोयइ वा जूरइ वा तिप्पइ वा पीडइ वा परितप्पइ वा परो एवमकासि, एवं से बाले सकारणं वा परकारणं वा एवं विप्पडिवेदेंति कारणमावन्ने ॥ मेहावी पुण एवं विप्पडिवेदेंति कारणमावन्ने–अहमंसि दुक्खामि वा सोयामि वा जूरामि वा तिप्पामि वा पीडामि वा परितप्पामि वा, णो अहं एवमकासि, परो वा जं दुक्खइ वा जाव परितप्पइ वा णो परो एवमकासि, एवं से मेहावी सकारणं वा परकारणं वा एवं विप्पडिवेदेंति कारणमावन्ने, से बेमि पाईणं वा ६ जे तसथावरा पाणा ते एवं संघायमागच्छंति ते एवं विपरियासमावज्जंति ते एवं विवेगमागच्छंति ते एवं विहाणमागच्छंति ते एवं संगतियंति उवेहाए, णो एवं विप्पडिवेदेंति, तं जहा–किरियाति वा जाव णिरएति वा अणिरएति वा, एवं ते विरूवरूवेहिं कम्मसमारंभेहिं विरूवरूवाइं कामभोगाइं समारभंति भोयणाए ॥ एवमेव ते अणारिया विप्पडिवन्ना तं सद्दहमाणा जाव इति ते णो हव्वाए णो पाराए अंतरा कामभोगेसु विसण्णा । चउत्थे पुरिसजाए णियइवाइएत्ति आहिए ॥ इच्चेते चत्तारि पुरिसजाया णाणापन्ना णाणाछंदा णाणासीला णाणादिट्ठी णाणारुई णाणारंभा णाणाअज्झवसाणसंजुत्ता पहीणपुव्वसंजोगा आरियं मग्गं असंपत्ता इति ते णो हव्वाए णो पाराए अंतरा कामभोगेसु विसण्णा ॥ (सूत्रं १२) ॥

अथ तृतीयपुरुषादनन्तरमपरश्चतुर्थः पुरुष एव पुरुषजातो नियतिवादिक आख्यायते–प्रतिपाद्यते, स चैवमाह—नात्र कश्चित्कालेश्वरादिकः कारणं नापि पुरुषकारः, समानक्रियाणामपि कस्यचिदेव नियतिबलादर्थसिद्धेः, अतो नियतिरेव कारणम्, उक्तं च–"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥" इत्यादि ॥ 'इह खलु पाईणं' इत्यादिको ग्रन्थः प्राग्वन्नेतव्यो यावदेष धर्मो—नियतिवादरूपः स्वाख्यातः सुप्रज्ञप्तो भवतीति ॥ स च नियतिवादी स्वाभ्युपगमं दर्शयितुमाह–'इह खलु दुवे पुरिसा भवंती'त्यादि, 'इह' अस्मिन् जगति खलुशब्दो वाक्यालङ्कारे, द्वौ पुरुषौ भवतः, तत्रैकः क्रियामाख्याति, क्रिया हि देशादेशान्तरावाप्तिलक्षणा पुरुषस्य भवति, न कालेश्वरादिनाः चोदितस्य भवति, अपितु नियतिप्रेरितस्य, एवमक्रियाऽपि । यदि तावत्तत्रौ क्रियावादमक्रियावादं च समाश्रितौ तौ द्वावपि नियत्यधीनत्वात्तुल्यौ, यदि पुनस्तौ स्वतन्त्रौ भवतस्ततः क्रियाऽक्रियाभेदान्न तुल्यौ स्यातामिति, अत एकार्थविवक्षाकारणापन्नत्वादिति, नियतिवशेनैव तौ नियतिवादमनियतिवादं चाश्रिताविति भावः । उपलक्षणार्थत्वाच्चास्यान्योऽपि यः कश्चित्कालेश्वरादिपक्षान्तरमाश्रयति सोऽपि नियतिचोदित एव द्रष्टव्य इति ॥ साम्प्रतं नियतिवादी परमतोद्भिावयिषयाऽऽह–'बालः' अज्ञः पुरुषकारकालेश्वरवादीत्यादिकः, पुनरिति विशेषणार्थः, तदेव दर्शयति–'एव' मिति वक्ष्यमाणनीत्या 'विप्रतिवेदयति' जानीते कारणमापन्नः सुखदुःखयोः सुकृतदुष्कृतयोर्वा स्वकृत एव पुरुषकारः कालेश्वरादिर्वा कारणमित्येवम-

१ °यत्त० प्र० । २ पुनरपि नियतिवादेव स्वपक्षमन्यथा समर्थयितुमाह प्र० । ३ युक्त्यन्तरोपन्यासार्थः प्र० । ४ °प्रः, कारणमुद्दिश्य वक्ष्यमाणांश्च कारणात् नियतिरेव कर्त्री न पुरुषकारादिकमिति भावः, तदेव नियतिवादसमर्थनकारणं दर्शयति, तद्यथा–योऽहं० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्युपपन्नो नान्यत्तियत्यादिकं कारणमस्तीति, तदेवाह–तद्यथा–योऽहमस्मि 'दुक्खामि'त्ति शारीरं मानसं दुःखमनुभवामि तथा शोचामि—इष्टानिष्टवियोगसंप्रयोगकृतं शोकमनुभवामि, तथा 'तिप्पामि'त्ति शारीरबलं क्षरामि, तथा 'पीडामि'त्ति सद्बाह्याभ्यन्तरया पीडया पीडामनुभवामि, तथा 'परितप्पामि'त्ति परितापमनुभवामि, तथा 'जूरामि'त्ति अनार्यकर्मणि प्रवृत्तमात्मानं गर्हामि, अनर्थवाप्तौ विसूरयामीत्यर्थः, तदेवं यदहं दुःखमनुभवामि तदहमेवाकार्षं, परपीडया कृतवानस्मीत्यर्थः, तथा परोऽपि यदुःखशोकादिकमनुभवति मयि वाऽऽपादयति तत्स्वयमेव कृतमिति, तदेव दर्शयति–'परो वे'त्यादि, तथा परोऽपि यन्मां दुःखयति शोचयतीत्यादि प्राग्वत्तेयं तत्सर्वमहमकार्षमित्येवं द्वाभ्यामाकलितोऽज्ञो वा बाल एवं 'विप्रतिवेदयति' जानीते स्वकारणं वा परकारणं वा सर्वं दुःखादि पुरुषकारकृतमिति जानीते एवं पुरुषकारकारणमापन्न इति ॥ तदेवं नियतिवादी पुरुषकारकारणवादिनो बालत्वमापाद्य स्वमतमाह–मेधा–मर्यादा प्रज्ञा वा तद्वान् मेधावी–नियतिवादपक्षाश्रयी एवं विप्रतिवेदयति–जानीते, कारणमापन्न इति नियतिरेव कारणं सु(दुः)खाद्यनुभवस्य, तद्यथा–योऽहमस्मि दुःखयामि शोचयामि तथा 'तिप्पामि'त्ति क्षरामि 'पीडामि'त्ति पीडामनुभवामि 'परितप्पामि'त्ति परितापमनुभवामि, नाहमेवमकार्षं दुःखम्, अपि तु नियतित एवैतन्मय्यागतं, न पुरुषकारादिकृतं, यतो न हि कस्यचिदात्माऽनिष्टो येनानिष्टा दुःखोत्पादादिकाः क्रियाः समारभते, नियत्यैवासावनिच्छन्नपि तत्कार्यते येन दुःखपरम्परामाप्नोति, कारणमापन्न इति परेऽप्येवमेव योजनीयम् । एवं सति नियतिवादी मेधावीति सोल्लुण्ठमेतद्, स किल नियतिवादी दृष्टं पुरुषकारं परित्यज्यादृष्टनियतिवादाश्रयेण महाविवेकीत्येवमुल्लुण्ठ्यते, स्वकारणं परकारणं च दुःखादिकमनुभवन्नियतिकृतमेतदेवं विप्रतिवेदयति–जानाति नात्मकृतं नियतिकारणमापन्नं, कारणं चाश्रैकक्षासदनुष्ठानरतस्यापि

सूत्रकृ. ४९

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥२८९॥

न दुःखमुत्पद्यते परस्य तु सदनुष्ठायिनोऽपि तद्भवतीत्यतो नियतिरेव कर्त्रीति । तदेवं नियतिवादे स्थिते परमपि यत्किञ्चित्तत्सर्वं नियत्यधीनमिति दर्शयितुमाह–'से बेमी'त्यादि, सोऽहं नियतिवादी युक्तितो निश्चित्य 'ब्रवीमी'ति प्रतिपादयामि ये केचन प्राच्यादिषु दिक्षु त्रसन्तीति त्रसा–द्वीन्द्रियादयः स्थावराश्च–पृथिव्यादयः प्राणाः–प्राणिनस्ते सर्वेऽप्येवं नियतित एवौदारिकादिशरीरसंबन्धमागच्छन्ति, नान्येन केनचित्कर्मादिना शरीरं ग्राह्यन्ते, तथा बालकुमारयौवनस्थविरवृद्धावस्थादिकं विविधपर्यायं नियतित एवानुभवन्ति, तथा नियतित एव 'विवेकं' शरीरात्पृथग्भावमनुभवन्ति, तथा नियतित एव विविधं विधानम्—अवस्थाविशेषं कुलकाणखञ्जवामनकजरामरणरोगशोकादिकं बीभत्समागच्छन्ति, तदेवं ते प्राणिनस्त्रसाः स्थावरा 'एवं' पूर्वोक्तया नीत्या संगतिं यान्ति–नियतिमापन्ना नानाविधविधानभाजो भवन्ति, त एव वा नियतिवादिनः 'संगइयं'ति नियतिमाश्रित्य 'तदुत्प्रेक्षया' नियतिवादोत्प्रेक्षया यत्किञ्चनकारितया परलोकाभीरवो 'नो' नैव एतद्वक्ष्यमाणं विप्रतिवेदयन्ति–जानन्ति, तथा–क्रिया—सदनुष्ठानरूपा अक्रिया तु–असदनुष्ठानरूपा इत्यादि यावदेवं ते नियतिवादिनस्तदुपरि सर्वं दोषजातं प्रक्षिप्य विरूपरूपैः कर्मसमारम्भैर्विरूपरूपान् कामभोगान् भोजनाय–उपभोगार्थं समारभन्त इति ॥ तदेवमेव–पूर्वोक्तया नीत्या तेऽनार्या विरूपं नियतिमार्गं प्रतिपन्ना विप्रतिपन्नाः, अनार्यत्वं पुनस्तेषां निर्युक्तिकस्यैव नियतिवादस्य समाश्रयणात्, तथाहि–असौ नियतिः किं स्वत एव नियतिस्वभावा उतान्यया नियत्या नियम्यते ? किंचातः ?, तत्र यद्यसौ स्वयमेव तथास्वभावा सर्वपदार्थानामेव तथास्वभावत्वं किं न कल्प्यते ?, किं बहुदोषया नियत्या समाश्रितया ?। अथान्यया नियत्या तथा नियम्यते, साऽप्यन्यया साऽप्यन्ययेत्येवमनवस्था । तथा नियतेः स्वभावत्वाभिमतस्वभावयाऽन्यया भवितव्यं न नानास्वभावयेति, एकत्वाच्च नियतेस्तत्कार्याणाप्येकाकारेणैव भवितव्यं, तथा च सति जगद्वैचित्र्याभावः, न चैतदृष्टमिष्टं वा । तदेवं युक्तिभिर्विचार्यमाणा नियतिर्न कथञ्चिद् घटते, यदप्युक्तं–द्वावपि तौ पुरुषौ क्रियाक्रियावादिनौ तुल्यौ, एतदपि प्रतीतिबाधितं, यतस्तयोरेकः क्रियावाद्यपरस्त्वक्रियावादीति कथमनयोस्तुल्यत्वम्, अथैकया नियत्या तथानियतत्वात्तुल्यता अनयोः, एतच्च निरन्तराः सुहृदः प्रत्येष्यन्ति, नियतेरप्रमाणत्वात्, अप्रमाणत्वं च प्राग्लेशतः प्रदर्शितमेव, यदप्युक्तं–यदुःखादिकमहमनुभवामि तत्राहमकार्षमित्यादि, तदपि बालवचनप्रायं, यतो(यत्) जन्मान्तरकृतं शुभमशुभं वा तदिहोपभुज्यते, स्वकृतकर्मफलेश्वरत्वादसुमतां, तथा चोक्तं—'यदिह क्रियते कर्म, तत्परत्रोपभुज्यते । मूलसिक्तेषु वृक्षेषु, फलं शाखासु जायते ॥ १ ॥" तथा–'यदुपात्तमन्यजन्मनि शुभमशुभं वा स्वकर्म परिणत्या । तच्छक्यमन्यथा नो कर्तुं देवासुरैरपि हि ॥२॥" तदेवं ते नियतिवादिनोऽनार्या विप्रतिपन्नास्तमेव निर्युक्तिकं नियतिवादं श्रद्धानास्तमेव च प्रतीयन्ते इत्यादि तावज्ज्ञेयं यावदन्तरा कामभोगेषु विषण्णा इति चतुर्थः पुरुषजातः समाप्तः ॥ साम्प्रतमुपसंजिघृक्षुराह–'इत्येते' पूर्वोक्तास्तज्जीवतच्छरीरपञ्चमहाभूतेश्वरकर्तृनियतिवादपक्षाश्रयिणश्चत्वारः पुरुषा नानाप्रकारा प्रज्ञा–मतिर्येषां ते तथा नाना–भिन्नइच्छन्दः–अभिप्रायो येषां ते तथा, नानाप्रकारं शीलम्–अनुष्ठानं येषां ते तथा, नानारूपा दृष्टिः–दर्शनं येषां ते तथा, नानारूपा रुचिः–चेतोऽभिप्रायो येषां ते तथा, नानाप्रकार आरम्भो–धर्मानुष्ठानं येषां ते तथा, नानाप्रकारेण–परस्परभिन्नेनाध्यवसायेन संयुक्ता धर्मार्थमुद्यताः, प्रहीणः–परित्यक्तः पूर्वसंयोगो–मातृपितृकलत्रपुत्रसंबन्धो यैस्ते तथा, तथा आराद्यातः सर्वहेयधर्मेभ्य इत्यार्यो

१ पुण्डरीकाध्य०नियतिवादी

॥२८९॥

१ परकारणनिरपेक्षत्वेन स्वाभाविकत्वात् । २ एकरूपया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मार्गो निर्दोषः पापलेशासंपृक्तस्तमार्यं मार्गमसंप्राप्ता इति पूर्वोक्तया नीत्या ते चत्वारोऽपि नास्तिकादयो 'णो हव्वाए' इति परित्यक्तवान्मातापित्रादिसंबन्धस्य धनधान्यहिरण्यादिसंचयस्य च नैहिकसुखभाजो भवन्ति, तथा 'णो पाराए'त्ति असंप्राप्तत्वादार्यस्य मार्गस्य सर्वोपाधिविशुद्धस्य प्रगुणमोक्षपद्धतिरूपस्य न संसारपारगामिनो भवन्ति, न परलोकसुखभाजो भवन्तीति, किन्त्वन्तराल एव गृहवासार्यमार्गयोर्मध्यवर्तिन एव कामभोगेषु 'विषण्णा' अध्युपपन्ना दुष्पारपङ्कमग्ना इव करिणो विषीदन्तीति स्थितम् ॥ उक्ताः परतीर्थिकाः, साम्प्रतं लोकोत्तरं भिक्षावृत्तिं भिक्षुं पञ्चमं पुरुषजातमधिकृत्याह–

से बेमि पाईणं वा ६ संतेगतिया मणुस्सा भवंति, तंजहा–आरिया वेगे अणारिया वेगे उच्चागोया वेगे णीयागोया वेगे कायमंता वेगे हस्समंता वेगे सुवण्णा वेगे दुवण्णा वेगे सुरूवा वेगे दुरूवा वेगे, तेसिं च णं जणजाणवयाइं परिग्गहियाइं भवंति, तं० अप्पयरा वा भुज्जयरा वा, तहप्पगारेहिं कुलेहिं आगम्म अभिभूय एगे भिक्खायरियाए समुट्ठिता सतो वावि एगे णायओ (अणायओ) य उवगरणं च विप्पजहाय भिक्खायरियाए समुट्ठिता असतो वावि एगे णायओ (अणायओ) य उवगरणं च विप्पजहाय भिक्खायरियाए समुट्ठिता, [जे ते सतो वा असतो वा णायओ य अणायओ य उवगरणं च विप्पजहाय भिक्खायरियाए समुट्ठिता] पुव्वमेव तेहिं णायं भवइ, तंजहा–इह खलु पुरिसे अन्नमन्नं ममट्ठाए एवं विप्पडिवेदेंति, तंजहा–खेत्तं मे वत्थू मे हिरण्णं मे सुवण्णं मे धणं मे धण्णं मे कंसं मे दूसं मे विपुलधणकणगरयणमणिमोत्तियसंख-

॥२९०॥

सिलप्पवालरत्तरयणसंतसारसावतेयं मे सद्दा मे रूवा मे गंधा मे रसा मे फासा मे, एते खलु मे कामभोगा अहमवि एतेसिं ॥ से मेहावी पुव्वामेव अप्पणो एवं समभिजाणेज्जा, तंजहा–इह खलु मम अन्नयरे दुक्खे रोयातंके समुप्पज्जेज्जा अणिट्ठे अकंते अप्पिए असुभे अमणुन्ने अमणामे दुक्खे णो सुहे से हंता भयंतारो ! कामभोगाइं मम अन्नयरं दुक्खं रोयातंकं परियाइयह अणिट्ठं अकंतं अप्पियं असुभं अमणुन्नं अमणामं दुक्खं णो सुहं, ताऽहं दुक्खामि वा सोयामि वा जूरामि वा तिप्पामि वा पीडामि वा परितप्पामि वा इमाओ मे अण्णयराओ दुक्खाओ रोगातंकाओ पडिमोयह अणिट्ठाओ अकंताओ अप्पियाओ असुभाओ अमणुन्नाओ अमणामाओ दुक्खाओ णो सुहाओ, एवामेव णो लद्धपुव्वं भवइ, इह खलु कामभोगा णो ताणाए वा णो सरणाए वा, पुरिसे वा एगता पुव्विं कामभोगे विप्पजहति, कामभोगा वा एगता पुव्विं पुरिसं विप्पजहंति, अन्ने खलु कामभोगा अन्नो अहमंसि, से किमंग पुण वयं अन्नमन्नेहिं कामभोगेहिं मुच्छामो? इति संखाए णं वयं च कामभोगेहिं विप्पजहिस्सामो, से मेहावी जाणेज्जा बहिरंगमेतं, इणमेव उवणीयतरागं, तंजहा–माया मे पिता मे भाया मे भगिणी मे भज्जा मे पुत्ता मे धूता मे पेसा मे नत्ता मे सुण्हा मे सुहा मे पिया मे सहा मे सयणसंगंथसंथुया मे, एते खलु मम णायओ अहमवि एतेसिं, एवं से मेहावी पुव्वामेव अप्पणा एवं समभिजाणेज्जा, इह खलु मम अन्नयरे दुक्खे रोयातंके समुप्पज्जेज्जा अणिट्ठे जाव दुक्खे णो सुहे, से हंता भयंतारो ! णायओ इमं मम अन्नयरं दुक्खं रोयातंकं परि-

याइयह आणेट्ठं जाव णो सुहं, ताऽहं दुक्खामि वा सोयामि वा जाव परितप्पामि वा, इमाओ मे अन्नयरातो दुक्खातो रोयातंकाओ परिमोएह अणिट्ठाओ जाव णो सुहाओ, एवमेव णो लद्धपुव्वं भवइ, तेसिं वावि भयंताराणं मम णायगाणं अन्नयरे दुक्खे रोयातंके समुपज्जेज्जा अणिट्ठे जाव णो सुहे, से हंता अहमेतेसिं भयंताराणं णायगाणं इमं अन्नयरं दुक्खं रोयातंकं परियाइयामि अणिट्ठं जाव णो सुहं, मा मे दुक्खंतु वा जाव मा मे परितप्पंतु वा, इमाओ णं अण्णयराओ दुक्खातो रोयातंकाओ परिमोएमि अणिट्ठाओ जाव णो सुहाओ, एवमेव णो लद्धपुव्वं भवइ, अन्नस्स दुक्खं अन्नो न परियाइयति अन्नेण कडं अन्नो नो पडिसंवेदेति पत्तेयं जायति पत्तेयं मरइ पत्तेयं चयइ पत्तेयं उववज्जइ पत्तेयं झंझा पत्तेयं सन्ना पत्तेयं मन्ना एवं विन्नू वेयणा, इह (इ) खलु णातिसंजोगा णो ताणाए वा णो सरणाए वा, पुरिसे वा एगता पुव्विं णातिसंजोगे विप्पजहति, णातिसंजोगा वा एगता पुव्विं पुरिसं विप्पजहंति, अन्ने खलु णातिसंजोगा अन्नो अहमंसि, से किमंग पुण वयं अन्नमन्नेहिं णातिसंजोगेहिं मुच्छामो ?, इति संखाए णं वयं णातिसंजोगं विप्पजहिस्सामो । से मेहावी जाणेज्जा बहिरंगमेयं, इणमेव उवणीयतरागं, तंजहा–हत्था मे पाया मे बाहा मे ऊरू मे उदरं मे सीसं मे सीलं मे आऊ मे बलं मे वण्णो मे तया मे छाया मे सोयं मे चक्खू मे घाणं मे जिब्भा मे फासा मे ममाइज्जइ, वयाउ पडिजूरइ, तंजहा–आउओ बलाओ वण्णाओ तयाओ छायाओ सोयाओ जाव फासाओ सुसंधिनो संधी विसंधीभवइ, बलियतरंगे गाए

॥२९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवइ, किण्हा केसा पलिया भवंति, तंजहा–जंपि य इमं सरीरगं उरालं आहारोवइयं एयंपि य अणुपुव्वेणं विप्पजहियव्वं भविस्सति, एयं संखाए से भिक्खू भिक्खायरियाए समुट्ठिए दुहओ लोगं जाणेज्जा, तं०–जीवा चेव अजीवा चेव, तसा चेव थावरा चेव ॥ (सूत्रम् १३)

यादृक्कामभोगेष्वसक्तः सन्नन्तरा नोऽवसीदति पद्मवरपौण्डरीकोद्धरणाय च समर्थो भवति तदेतदहं ब्रवीमीति । अस्य चार्थस्योपदर्शनाय प्रस्तावमारचयन्नाह–प्राचीनादिकामन्यतरां दिशमुद्दिश्यैके केचन मनुष्याः'सन्ति' भवन्ति, तद्यथा–आर्या–आर्यदेशोत्पन्ना मगधादिजनपदोद्भवाः, तथा 'अनार्याः' शकयवनादिदेशोद्भवाः, तथा च 'उच्चैर्गोत्रोद्भवा' इक्ष्वाकुहरिवंशादिकुलोद्भवाः, तथा 'नीचैर्गोत्रोद्भवा' वर्णापसदसंभूताः, तथा 'कायदन्ताः' प्रांशवः, तथा 'ह्रस्वा' वामनकादयः, तथा 'सुवर्णा दुर्वर्णाः' सुरूपा दूरूपा वा एके केचन कर्मपरवशा भवन्ति, तेषां चार्यादीनां 'ण' मिति वाक्यालङ्कारे 'क्षेत्राणि' शालिक्षेत्रादीनि 'वास्तूनि' खातोच्छ्रितादीनि तानि 'परिगृहीतानि' स्वीकृतानि भवन्ति, तान्येव विशिनष्टि–'अल्पतराणि' स्तोकतराणि वा प्रभूततराणि वा भवन्ति। तथा ते(ये)षामेव च जनजानपदाः परिगृहीता भवन्ति, तेऽप्यल्पतराः प्रभूततरा वा भवेयुः, तेषु चार्यादिविशेषणविशिष्टेषु तथाप्रकारेषु कुलेष्वागम्यैवंभूतानि गृहाणि गत्वा तथाप्रकारेषु वा कुलेषु 'आगम्य' जन्म लब्ध्वाऽभिभूय च विषयकषायादीन् परीषहोपसर्गान् वा **सम्यगुत्थानेनोत्थाय प्रव्रज्यां गृहीतवैके केचन** तथाविधसत्त्ववन्तो भिक्षाचर्यायां सम्यगुत्थिताः समुत्थिताः तथा 'सतो' विद्यमानानपि वा एके केचन महासत्त्वोपेता 'ज्ञातीन्' स्वजनान् (अज्ञातीन–परिजनान्) तथा 'उपकरणं च' कामभोगाङ्गं धनधान्यहिरण्यादिकं विविधं प्रकर्षेण 'हित्वा' त्यक्त्वा भिक्षाचर्यायां सम्यगुत्थिताः, असतो वा ज्ञातीनुपकरणं च विप्रहाय भिक्षाचर्यायामेके केचनापगतस्वजनविभवाः समुत्थिताः ॥ ये ते पूर्वोक्तविशेषणविशिष्टा भिक्षाचर्यायामभ्युद्यताः पूर्वमेव—प्रव्रज्याग्रहणकाल एव तैरेतज्ज्ञातं भवति, तद्यथा—'इह' जगति खलुवाक्यालङ्कारे अन्यदन्यद्वस्तूद्दिश्य ममैतद्भोगाय भविष्यतीति, एवमसौ प्रव्रज्यां प्रतिपन्नः प्रविव्रजिषुर्वा 'प्रवेदयति' जानात्येवं परिच्छिनत्ति, तद्यथा—'क्षेत्रं' शालिक्षेत्रादिकं 'वास्तु' खातोच्छ्रितादिकं 'हिरण्यं' धर्मैलाभादिकं 'सुवर्णं' कनकं 'धनं' गोमहिष्यादिकं 'धान्यं' शालिगोधूमादिकं 'कांस्यं' कांस्यपात्रादिकं तथा 'विपुलानि' प्रभूततराणि धनकनकरत्नमणिमौक्तिकानि 'शंखशिल'त्ति मुक्तशैलादिकाः शिलाः 'प्रवालं' विद्रुमं, यदिवा–'सिलप्पवालं'ति श्रिया युक्तं प्रवालं श्रीप्रवालं वर्णादिगुणोपेतं तथा 'रत्तरयणं'ति रक्तरत्नं–पद्मरागादिकं तथा 'सत्सारं' शोभनसारमित्यर्थः शुलमण्यादिकं, तथा 'स्वापतेयं' रिक्थं द्रव्यजातं, सर्वमेतत्पूर्वोक्तं 'मे' ममोपभोगाय भविष्यति, तथा 'शब्दा' वेण्वादयो 'रूपाणि' अङ्गनादीनि 'गन्धाः' कोष्ठपुटादयः 'रसा' मधुरादयः मांसरसादयो वा 'स्पर्शा' मृद्वादयः, एते सर्वेऽपि खलु मे कामभोगाः, अहमप्येषां योगक्षेमार्थं प्रभविष्यामीत्येवं संप्रधार्य ॥ स मेधावी पूर्वमेवात्मानं **विजानीयाद्**–एवं पर्यालोचयेत् , तद्यथा–'इह' संसारे खलुशब्दोऽवधारणे, इहैव–अस्मिन्नेव जन्मनि मनुष्यभवे वा ममान्यतरदुःखं–शिरोवेदनादिकं **आतङ्को** वाऽऽशु जीवितापहारी शूलादिकः समुत्पद्यते, तमेव विशिनष्टि–अनिष्टः अकान्तः अप्रियः अशुभोऽमनोज्ञोऽवनामयतीत्यवनामः—पीडाविशेषकारी दुःखरूपो यदिवा न मनागमनाक् 'मे' मम नितरामित्यर्थः दुःखयतीति दुःखं, पुनरपि

१ ०द्वोगाय प्र० । २ विषयासक्तः पुरुषो मन्यते इति शेषः । ३ धर्मलाभादिकं प्र० । ४ अघटितरूप्यसुवर्णमितिपर्यायः प्राचीनपुस्तके । ५ शुद्धं प्र० ।

दुःखोपादानमत्यन्तदुःखप्रतिपादनार्थं सुखलेशस्यापि परिहारार्थं च, 'नो' नैव शुभः, अशुभकर्मविपाकापादितत्वादिति । अत्र च यदुक्तमपि पुनरुच्यते तदत्यादरख्यापनार्थं तद्विशेषप्रतिपादनार्थं चेति, तदेवंभूतं दुःखं रोगातङ्कं वा 'हन्त' इति खेदे भयात्रातारो यूयं क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यादिकाः परिग्रहविशेषाः शब्दादयो वा विषयाः तथा हे भगवन्तः ! कामभोगा यूयं मया पालिताः परिगृहीताश्च ततो यूयमपीदं दुःखं रोगातङ्कं वा 'परियाइयह'त्ति विभागशः परिगृह्णीत यूयम्, अत्यन्तपीडयोद्विग्नः पुनस्तदेव दुःखं रोगातङ्कं वा विशेषणद्वारेणोच्चारयति–अनिष्टमप्रियमकान्तमशुभममनोज्ञममनाग्भूतमवनामकं वा दुःखमेवैतत् ततोऽशुभमित्येवंभूतं ममोत्पन्नं यूयं विभजत अहमनेनातीव दुःखामीति दुःखित इत्यादि पूर्ववन्नेयमिति, अतोऽशुष्मान्मामन्यतरस्माद्दुःखाद्रोगातङ्काद्वा प्रतिमोचयत यूयम्, अनिष्टादिविशेषणानि तु पूर्ववद्व्याख्येयानि । प्रथमं प्रथमान्तानि पुनर्द्वितीयान्तानि साम्प्रतं पञ्चम्यन्तानीति । न चायमर्थलेन दुःखितेन 'एवमेवे'ति यथा प्रार्थितस्तथैव लब्धपूर्वो भवति, इदमुक्तं भवति–न हि ते क्षेत्रादयः परिग्रहविशेषा नापि शब्दादयः कामभोगास्तं दुःखितं दुःखाद्विमोचयन्तीति ॥ एतदेव लेशतो दर्शयति–'इह' अस्मिन् खलु वाक्यालङ्कारे ते कामभोगा अत्यन्तमभ्यस्ता न 'तस्य' दुःखितस्य त्राणाय शरणाय वा भवन्ति, सुलालितानामपि कामभोगानां पर्यवसानं दर्शयितुमाह–'पुरिसो वा' इत्यादि, पुरि शयनात्पुरुषः–प्राणी 'एकदा' व्याध्युत्पत्तिकाले जराजीर्णकाले वाऽन्यस्मिन्वा राजाद्युपद्रवे 'तान्' कामभोगान् परित्यजति, स वा पुरुषो द्रव्याद्यभावे तैः कामभोगैर्विषयोन्मुखोऽपि त्यज्यते, स चैवमवधारयति–'अन्ये' मत्तो भिन्नाः खल्वमी कामभोगाः, तेभ्यश्चान्योऽहमस्मि । तदेवं व्यवस्थिते "किमिति वयं पुनरेतेष्वनित्येषु परभूतेष्वन्येषु कामभोगेषु मूर्च्छां कुर्मः" इत्येवं केचन महापुरुषाः 'परिसंख्याय' सम्यग् ज्ञात्वा कामभोगान् वयं 'विप्र-

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥२९२॥

१ पुण्डरीकाध्य० भिक्षुःपञ्चमः वैराग्यस्वरूपं

॥२९२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहिष्यामः' त्यक्ष्याम इत्येवमध्यवसायिनो भवन्ति । पुनरपरं वैराग्योत्पत्तिकारणमाह—'से मेहावी' स 'मेधावी' सश्रुतिकः एतज्जानीयात्, तद्यथा—यदेतत्क्षेत्रवास्तुहिरण्यसुवर्णशब्दादिविषयादिकं दुःखपरित्राणाय न भवतीत्युपन्यस्तं तदेतद्बाह्यतरं वर्तते, इदमेव चान्यद्वक्ष्यमाणम् 'उपनीततरम्' आसन्नतरं वर्तते, तद्यथा—माता पिता भ्राता भगिनीत्यादयो ज्ञातयः पूर्वापरसंस्तुता एते खलु ममोपकाराय ज्ञातयो भविष्यन्ति, अहमप्येतेषां स्नानभोजनादिनोपकरिष्यामीत्येवं स मेधावी पूर्वमेवात्मनैवं समभिजानीयादित्यादि, एवं पर्यालोचयत्कल्पितवानिति वा, एतदध्यवसायी चासौ स्यादिति दर्शयितुमाह—'इह खलु' इत्यादि 'इह' अस्मिन् भवे मम वर्तमानस्यानिष्टादिविशेषणविशिष्टो दुःखातङ्कः समुत्पद्येत ततोऽसौ तदुःखदुःखितो ज्ञातीनेवमभ्यर्थयेत्, तद्यथा—इमं ममान्यतरं दुःखातङ्कमुत्पन्नं परिगृह्णीत यूयमहमनेनोत्पन्नेन दुःखातङ्केन पीडयिष्यामी(ष्य इ)त्यतोऽस्मान्मां परिमोचयत यूयमिति, न चैतत्तेन दुःखितेन लब्धपूर्वं भवति, न हि ते ज्ञातयस्तं दुःखान्मोचयितुमलमिति भावः, नाप्यसौ तेषां दुःखमोचनायालमिति दर्शयितुमाह—'तेसिं वावी'त्यादि, सर्वं प्राग्वद्योजनीयं, यावदेवमेव नो लब्धपूर्वं भवतीति, किमित्येवं नोपलब्धपूर्वं भवतीत्याह—'अण्णस्स दुक्ख'मित्यादि सर्वस्यैव संसारोदरविवरवर्तिनोऽसुमतः स्वकृतकर्मोदयाद्यद्दुःखमुत्पद्यते तदन्यस्य संबन्धि दुःखमन्यो—मातापित्रादिकः कोऽपि न प्रत्यापिपति, न तस्मात्पुत्रादेर्दुःखेनासह्येनात्यन्तपीडिताः स्वजना नापि तद्दुःखमात्मनि कर्तुमलं, किमित्येवमाशङ्क्याह—'अण्णेण कड'मित्यादि, 'अन्येन' जन्तुना कषायवशगेन इन्द्रियानुकूलतया भोगाऽभिलाषिणाऽज्ञानावृतेन मोहोदयवर्तिना यत्कृतं कर्म तदुदयमन्यः प्राणी नो प्रतिसंवेदयति—नानुभवति, तदनुभवने वा कृतागमकृतनाशौ स्यातां, न चैतौ युक्तिसंगतौ, अतो यद्येन कृतं तत्सर्वं स एवानुभवति, तथा चोक्तम्—"परकृतकर्मणि यस्मान्न क्रामति संक्रमो विभागो वा । तस्मात्सच्चानां कर्म यस्य यत्तेन तद्वेद्यम् ॥ १ ॥" यस्मात्स्वकृतकर्मफलेश्वरा जन्तवस्तस्मादेतद्भवतीत्याह—'पत्तेय'मित्यादि, एकमेकं प्रति प्रत्येकं सर्वोऽप्यसुमान् जायते, तथा क्षीणे चायुषि प्रत्येकमेव म्रियते, उक्तं च—"एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते । तस्मादाकालिकहितमेकेनैवात्मनः कार्यम् ॥१॥" इति, तथा प्रत्येकं क्षेत्रवास्तुहिरण्यसुवर्णादिकं परिग्रहं शब्दादींश्च विषयान् मातापितृकलत्रादिकं च त्यजति, तथा प्रत्येकमुपपद्यते—युज्यते परिग्रहस्वीकरणतया, तथा प्रत्येकं ज्ञंज्ञा—कलहस्तद्ग्रहणात्कषायाः परिगृह्यन्ते, ततः प्रत्येकमेवासुमतां मन्दतीव्रतया कषायोद्भवो भवति, तथा संज्ञानं संज्ञा—पदार्थपरिच्छित्तिः, साऽपि मन्दमन्दतरपटुपटुतरभेदात्प्रत्येकमेवोपजायते, सर्वज्ञादारतस्तरतमयोगेन मतेर्व्यवस्थितत्वात्, तथा प्रत्येकमेव 'मन्न'त्ति मननं चिन्तनं पर्यालोचनमितियावत्, तथा प्रत्येकमेव 'विण्णु'त्ति विद्वान्, तथा प्रत्येकमेव सातासातरूपवेदना—सुखदुःखानुभवः, उपसंजिघृक्षुराह—'इति खलु' इत्यादि, 'इति' एवं पूर्वोक्तेन प्रकारेण यतो नान्येन कृतमन्यः प्रतिसंवेदयते प्रत्येकं च जातिजरामरणादिकं ततः खल्वमी ज्ञातिसंयोगाः—स्वजनसंबन्धाः संसारचक्रवाले पर्यटतोऽत्यन्तपीडितस्य तदुद्धरणे न त्राणाय—न त्राणं कुर्वन्ति, नाप्यनागतसंरक्षणतः शरणाय भवन्ति, किमिति ?, यतः पुरुष 'एकदा' क्रोधोदयादिकाले ज्ञातिसंयोगान् 'विप्रजहाति' परित्यजति, 'स्वजनाश्च न बान्धवा' इति व्यवहारदर्शनात्, ज्ञातिसंयोगा वैकदा तदसदाचारदर्शनतः पूर्वमेव तं पुरुषं परित्यजन्ति—स्वसंबन्धादुत्तारयन्ति । तदेवं व्यवस्थिते एतद्भावयेत्, तद्यथा—अन्ये खल्वमी ज्ञातिसंयोगा मत्तो भिन्ना इतरा एभ्यश्चान्योऽहमस्मि । तदेवं व्यवस्थिते किमङ्ग पुनर्वयमन्यैरन्यैर्ज्ञातिसंयोगैर्मूर्च्छां कुर्मः ?, न तेषु मूर्च्छा क्रियमाणा न्याय्या इत्येवं 'संख्याय' ज्ञात्वा प्रत्याकलय्य वयश्रुतसत्त्ववैराग्या ज्ञातिसंयोगांस्त्यक्ष्याम इत्येवं कृताध्यवसायिनो विदितवेद्या भवन्तीति ॥ साम्प्रतमन्येन प्रकारेण वैराग्योत्पत्तिकारणमाह—स 'मेधावी' सश्रुतिक 'एतद्' वक्ष्यमाणं जानीयात्, तद्यथा—बाह्यतरमेतत् बज्ज्ञातिसंबन्धनम्, इदमेवान्यदुपनीततरम्—आसन्नतरं, शरीरावयवानां भिन्नज्ञातिभ्य आसन्नतरत्वात्, तद्यथा—हस्तौ ममाशोकपल्लवसदृशौ तथा भ्रुजौ करिकराकारौ परपुरंजयौ प्रणयिजनमनोरथपूरकौ शत्रुशतजीवितान्तकरौ यथा मम न तथाऽन्यस्य कस्यापीत्येवं पादावपि पद्मगर्भसुकुमारावित्यादि सुगमं, यावत्स्पर्शः स्पर्शनेन्द्रियं 'ममात्ति' ममीकरोति, यादृशे न तादृगन्यस्येति भावः, एतच्च हस्तपादादिकं स्पर्शनेन्द्रियपर्यवसानं शरीरावयवसंबन्धित्वेन विवक्षितं यत्किमपि वयसः परिणामात्—कालकृतावस्थाविशेषात् 'परिजूरइ'त्ति परिजीर्यते जीर्णतां याति प्रतिक्षणं विशरारुतां याति, तस्मिंश्च प्रतिसमयं विशीर्यति शरीरे प्रतिसमयमसौ प्राणी एतस्माद्भ्रश्यति, तद्यथा—आयुषः पूर्वनिषद्घात्समयादिहान्याऽपचीयते, आधीचीमरणेन प्रतिसमयं मरणाभ्युपगमात्, तथा बलादपचीयते, तथाहि—यौवनावस्थायाश्चयवमाने शरीरके प्रतिक्षणं शिथिलीभवत्सु संधिबन्धनेषु बलादवश्यं भ्रश्यते, तथा वर्णोत्त्वचश्छायातोऽपचीयते, अत्र च सनत्कुमारदृष्टान्तो वाच्यः, तथा जीर्यति शरीरे श्रोत्रादीनीन्द्रियाणि न सम्यक् स्वविषयं परिच्छेत्तुमलं, तथा चोक्तम्—"बाल्यं बुद्धिर्वयो मेधा लक्ष्मीश्चक्षुःश्रुतविक्रमाः । दशकेषु निवर्तन्ते, मनः सर्वेन्द्रियाणि च ॥१॥" तथा च विशिष्टवयोहान्या 'सुसंधितः' सुबद्धः संधिः—जानुकूपरादिको 'विसंधिर्भवति' विगलितबन्धनो भवतीत्यर्थः, तथा वलितरङ्गाकुलं सर्वतः शिराजालवेष्टितमात्मनोऽपि शरीरमिदमुद्वेगकृद्भवति किंपुनरन्येषां ?, तथा चोक्तम्—"वलिसंततमस्थिशेषितं, शिथिलस्नायुवृतं कडेवरम् । स्वयमेव पुमान् जुगुप्सते, किमु कान्ताः कमनीयविग्रहाः ? ॥१॥" तथा कृष्णाः केशा वयःपरिणामजलप्रक्षालिता धवलतां प्रतिपद्यन्ते, तदेवं वयःपरिणामापादितसन्मतिरेतद्भावयेत्, तद्यथा—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदपीदं शरीरमुदारं—शोभनावयवरूपोपेतं विशिष्टाहारोपचितम्, एतदपि मयाऽवश्यं प्रतिक्षणं विशीर्यमाणमायुषः क्षये विप्रहातव्यं भविष्यतीत्येतदवगम्य शरीरानित्यतया संसारासारतां 'संख्याय' अवगम्य परित्यक्तसमस्तगृहप्रपञ्चो निष्किञ्चनतामुपगम्य स भिक्षुर्देहदीर्घसंयमयात्रार्थं भिक्षाचर्यायां समुत्थितः सन् द्विधा लोकं जानीयादिति । तदेव लोकद्वैविध्यं दर्शयितुमाह—तद्यथा—जीवाश्च—प्राणधारणलक्षणास्तद्विपरीताश्चाजीवा—धर्माधर्माकाशादयः, तत्र तस्य भिक्षोरहिंसाप्रसिद्धये जीवान् विभागेन दर्शयितुमाह—जीवा अप्युपयोगलक्षणा द्विधा, तद्यथा—त्रसन्तीति त्रसा—द्वीन्द्रियादयः तथा तिष्ठन्तीति स्थावराः—पृथिवीकायादयः । तेऽपि सूक्ष्मबादरपर्याप्तकापर्याप्तकादिभेदेन बहुधा द्रष्टव्याः, एतेषु चोपरि बहुधा व्यापारः प्रवर्तते ॥ साम्प्रतं तदुपमर्दकव्यापारकर्तॄन् दर्शयन्नाह—

इह खलु गारत्था सारंभा सपरिग्गहा, संतेगतिया समणा माहणावि सारंभा सपरिग्गहा, जे इमे तसा थावरा पाणा ते सयं समारभंति अन्नेणवि समारभावेंति अण्णंपि समारभंतं समणुजाणंति ॥ इह खलु गारत्था सारंभा सपरिग्गहा, संतेगतिया समणा माहणावि सारंभा सपरिग्गहा, जे इमे कामभोगा सचित्ता वा अचित्ता वा ते सयं परिगिण्हंति अन्नेणवि परिगिण्हावेंति अण्णंपि परिगिण्हंतं समणुजाणंति ॥ इह खलु गारत्था सारंभा सपरिग्गहा, संतेगतिया समणा माहणावि सारंभा सपरिग्गहा, अहं खलु अणारंभे अपरिग्गहे, जे खलु गारत्था सारंभा सपरिग्गहा, संतेगतिया समणा माहणावि सारंभा सपरिग्गहा, एतेसिं चेव निस्साए बंभचेरवासं वसिस्सामो, कस्स णं तं हेउं ?, जहा पुव्वं तहा अवरं जहा अवरं

सूत्रकृ. २० सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥२९५॥

तहा पुव्वं, अंजू एते अणुवरया अणुवट्ठिया पुणरवि तारिसगा चेव ॥ जे खलु गारत्था सारंभा सपरिग्गहा, संतेगतिया समणा माहणावि सारंभा सपरिग्गहा, दुहतो पावाइं कुव्वंति इति संखाए दोहिवि अंतेहिं अदिस्समाणो इति भिक्खू रीएज्जा ॥ से बेमि पाईणं वा ६ जाव एवं से परिण्णायकम्मे, एवं से ववेयकम्मे, एवं से विअंतकारए भवतीति मक्खायं ॥ (सूत्रं १४)

१पौण्डरीकाध्ये० पञ्चमस्य साधोर्लोकनिश्रा

॥२९५॥

'इह' अस्मिन् संसारे खलुर्वाक्यालङ्कारे गृहम्—अगारं तत्र तिष्ठन्तीति गृहस्थाः, ते च सहारम्भेण—जीवोपमर्दकारिणा वर्तन्त इति सारम्भाः, तथा सह परिग्रहेण—द्विपदचतुष्पदधनधान्यादिना वर्तन्त इति सपरिग्रहाः, न केवलं त एव अन्येऽपि 'सन्ति' विद्यन्ते एके केचन 'श्रमणाः' शाक्यादयः, ते च पचनपाचनाद्यनुमतेः सारम्भा दास्यादिपरिग्रहाच्च सपरिग्रहाः, तथा ब्राह्मणाश्चैवंविधा एव, एतेषां च सारम्भकत्वं स्पष्टतरं सूत्रेणैव दर्शयति—य इमे प्राग्व्यावर्णितास्त्रसाः स्थावराश्च प्राणिनस्तान् स्वयमेव—अपरप्रेरिता एव समारभन्ते, तदुपमर्दकं व्यापारं स्वत एव कुर्वन्तीत्यर्थः, तथा अन्यांश्च समारम्भयन्ति समारम्भं कुर्वतश्चान्यान् समनुजानन्ति ॥ तदेवं प्राणातिपातं प्रदर्श्य भोगाङ्गभूतं परिग्रहं दर्शयितुमाह—'इह खलु' इत्यादि, इह खलु गृहस्थाः सारम्भाः सपरिग्रहाः सन्ति श्रमणा ब्राह्मणाश्च, ते च सारम्भपरिग्रहत्वात् किं कुर्वन्तीति दर्शयति—य इमे प्रत्यक्षाः कामप्रधाना भोगाः कामभोगाः काम्यन्त इति कामाः—स्त्रीगात्रपरिष्वङ्गादयो भुज्यन्त इति भोगाः—स्रक्चन्दनवादित्रादयः, त एते सचित्ताः—सचेतना अचेतना वा भवेयुः, तदुपादानभूता वाऽर्थाः, तांश्च सचित्ताचित्तान्वाऽर्थान् 'ते' काममोगार्थिनो गृहस्थादयः स्वत एव परिगृह्णन्ति अन्येन च परिग्राहयन्ति अपरं च परिगृह्णन्तं समनुजानत इति ॥ साम्प्रतमुपसंजिघृक्षुराह—'इह खलु'

॥२९५॥

इत्यादि, इह—अस्मिन् जगति 'सन्ति' विद्यन्ते गृहस्थास्तथाविधाः श्रमणा ब्राह्मणाश्च सारम्भाः सपरिग्रहा इत्येवं ज्ञात्वा स भिक्षुरेवमवधारयेद्—अहमेवात्र स्वल्पनारम्भोऽपरिग्रहश्च, ये चामी गृहस्थादयः सारम्भादिगुणयुक्तास्तदेतन्निश्रया—तदाश्रयेण ब्रह्मचर्यं—श्रामण्यमाचरिष्यामोऽनारम्भा अपरिग्रहाः सन्तः, धर्माधारदेहप्रतिपालनार्थमाहारादिकृते सारम्भपरिग्रहगृहस्थनिश्रया प्रव्रज्यां करिष्याम इत्यर्थः । ननु च यदि तन्निश्रया पुनरपि विहर्तव्यं किमर्थं ते त्यज्यन्त इति जाताशङ्कः पृच्छति—'कस्य हेतोः' केन कारणेन ? तदेतद्गृहस्थश्रमणब्राह्मणत्यजनमभिहितमिति, आचार्योऽपि विदिताभिप्राय उत्तरं ददाति, यथा—'पूर्वम्' आदौ सारम्भपरिग्रहत्वं तेषां तथा 'पश्चादपि' सर्वकालमपि गृहस्थाः सारम्भादिदोषदुष्टाः श्रमणाश्च केचन यथा 'पूर्वं' गृहस्थभावे सारम्भाः सपरिग्रहास्तथा 'अपरस्मिन्नपि' प्रव्रज्यारम्भकाले तथाविधा एव त इति, अधुनोभयपदाभ्यभिचारितव्रतिपादनार्थमाह—यथा 'अपरम्' अपरस्मिन् प्रव्रज्याप्रतिपत्तिकाले तथा 'पूर्वमपि' गृहस्थभावादावपीति, यदिवा—कस्य हेतोस्तद्गृहस्थाद्याश्रयणं क्रियते यतिनेत्याह—यथा 'पूर्वं' प्रव्रज्यारम्भकाले सर्वमेव भिक्षादिकं गृहस्थायत्तं तथा पश्चादपि, अतः कथं नु नामानवद्या वृत्तिर्भविष्यतीत्यतः साधुभिरनारम्भैः सारम्भाश्रयणं विधेयं । यथा चैते गृहस्थादयः सारम्भाः सपरिग्रहाश्च तथा प्रत्यक्षेणैवोपलभ्यन्त इति दर्शयितुमाह—'अंजू' इति व्यक्तमेतदेते गृहस्थादयो यदिवा—'अञ्जू' इति प्रगुणेन न्यायेन स्वरसप्रवृत्त्या सावद्यानुष्ठानेभ्योऽनुपरताः परिग्रहारम्भाच्च सत्संयमानुष्ठानेन चानुपस्थिताः—सम्यगुत्थानमकृतवन्तो येऽपि कथञ्चिद्धर्मकरणायोत्थितास्तेऽप्युद्दिष्टभोजित्वात्सावद्यानुष्ठानपरत्वाच्च गृहस्थभावानुष्ठानमनतिवर्तमानाः पुनरपि तादृशा एव—गृहस्थकल्पा एवेति ॥ साम्प्रतमुपसंहरति—य इमे—गृहस्थादयस्ते 'द्विधाऽपि' सारम्भसपरिग्रहत्वाभ्यामुभाभ्यामपि पापान्युपाददते यदिवा रागद्वेषाभ्यामुभा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्यामपि यदिवा गृहस्थप्रव्रज्यापर्यायाभ्यामुभाभ्यां पापानि कुर्वत इत्येवं 'संख्याय' परिज्ञाय 'द्वयोरप्यन्तयोः' आरम्भपरिग्रहयो रागद्वेषयोर्वा 'अदृश्यमानः' अनुपलभ्यमानो यदिवा रागद्वेषयोर्यावन्तौ–अभावौ तयोरादिदृश्यमानो–रागद्वेषाभाववृत्तिलेनापदिश्यमानः सन्नित्येवंभूतो 'भिक्षुः' भिक्षणशीलोऽनवद्याहारभोजी सत्संयमानुष्ठाने 'रीयेत' प्रवर्तेत, एतदुक्तं भवति–य इमे ज्ञातिसंयोगा यश्चायं धनधान्यादिकः परिग्रहो यच्चेदं हस्तपादाद्यवयवयुक्तं शरीरकं यच्च तदायुर्बलवर्णादिकं तत्सर्वमशाश्वतमनित्यं स्वप्नेन्द्रजालसदृशमसारं, गृहस्थश्रमणब्राह्मणाश्च सारम्भाः सपरिग्रहाश्च, एतत्सर्वं परिज्ञाय सत्संयमानुष्ठाने भिक्षू रीयेतेति स्थितम् ॥ स पुनरप्यहमधिकृतमेवार्थं विशेषिततरं सोपपत्तिकं ब्रवीमीति-तत्र प्रज्ञापकापेक्षया प्राच्यादिकाया दिशोऽन्यतरस्याः समायातः स भिक्षुर्द्वयोरप्यन्तयोरदृश्यमानतया सत्संयमे रीयमाणः सन् 'एवम्' अनन्तरोक्तेन प्रकारेण ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया प्रत्याख्याय च परिज्ञातकर्मा भवति । पुनरपि 'एव'मिति परिज्ञातकर्मत्वाद्यपेतकर्मा भवति–अपूर्वस्यावन्धको भवतीत्यर्थः, पुनरेवमित्यबन्धकतया योगनिरोधोपायतः पूर्वोपचितस्य कर्मणो विशेषेणान्तकारको भवतीति, एतच्च तीर्थकरगणधरादिभिर्ज्ञातज्ञेयैराख्यातमिति ॥ कथं पुनः प्राणातिपातविरतिव्रतादिव्यवस्थितस्य कर्मापगमो भवतीत्युक्तं ?, यतस्तत्प्रवृत्तस्यात्मौपम्येन प्राणिनां पीडोत्पद्यते, तया च कर्मबन्ध इत्येवं सर्वं मनस्याधायाह—

तत्थ खलु भगवता छज्जीवनिकाय हेऊ पण्णत्ता, तंजहा–पुढवीकाए[1] जाव तसकाए, से जहाणामए मम अस्सायं दंडेण वा अट्ठीण वा मुट्ठीण वा लेलूण वा कवालेण वा आउट्टिज्जमाणस्स वा हम्ममाणस्स वा

॥२९६॥

१ °येज्ज तिट्ठेज्ज प्र० । २ °काइया जाव तसकाइया प्र० ।

तज्जिज्जमाणस्स वा ताडिज्जमाणस्स वा परियाविज्जमाणस्स वा किलामिज्जमाणस्स वा उद्दविज्जमाणस्स वा जाव लोमुक्खणणमायमवि हिंसाकारगं दुक्खं भयं पडिसंवेदेमि, इच्चेवं जाण सव्वे जीवा सव्वे भूता सव्वे पाणा सव्वे सत्ता दंडेण वा जाव कवालेण वा आउट्टिज्जमाणा वा हम्ममाणा वा तज्जिज्जमाणा वा ताडिज्जमाणा वा परियाविज्जमाणा वा किलामिज्जमाणा वा उद्दविज्जमाणा वा जाव लोमुक्खणणमायमवि हिंसाकारगं दुक्खं भयं पडिसंवेदेंति, एवं नच्चा सव्वे पाणा जाव सत्ता ण हंतव्वा ण अज्जावेयव्वा ण परिघेतव्वा ण परितावेयव्वा ण उद्दवेयव्वा ॥ से बेमि जे य अतीता जे य पडुप्पन्ना जे य आगमिस्सा अरिहंता भगवंता सव्वे ते एवमाइक्खंति एवं भासंति एवं पण्णवेंति एवं परूवेंति–सव्वे पाणा जाव सत्ता ण हंतव्वा ण अज्जावेयव्वा ण परिघेतव्वा ण परितावेयव्वा ण उद्दवेयव्वा एस धम्मे धुवे णीतिए सासए समिच्च लोगं खेयन्नेहिं पवेदिए, एवं से भिक्खू विरते पाणातिवायातो जाव विरते परिग्गहातो णो दंतपक्खालणेणं दंते पक्खालेज्जा णो अंजणं णो वमणं णो धूवणे णो तं परिआविएज्जा ॥ से भिक्खू अकिरिए अलूसए अकोहे अमाणे अमाए अलोहे उवसंते परिनिव्वुडे णो आसंसं पुरतो करेज्जा इमेण मे दिट्ठेण वा सुएण वा मएण वा विन्नाएण वा इमेण वा सुचरियतवनियमबंभचेरवासेण इमेण वा जायामायावुत्तिएणं धम्मेणं इओ चुए पेच्चा देवे सिया कामभोगाण वसवत्ती सिद्धे वा अदुक्खमसुभे एत्थवि सिया एत्थवि णो सिया ॥ से भिक्खू सद्देहिं अमुच्छिए रूवेहिं अमुच्छिए गंधेहिं अमुच्छिए रसेहिं अमुच्छिए फासेहिं अमुच्छिए विरए

कोहाओ माणाओ मायाओ लोभाओ पेज्जाओ दोसाओ कलहाओ अब्भक्खाणाओ पेसुन्नाओ परपरिवायाओ अरइरईओ मायामोसाओ मिच्छादंसणसल्लाओ इति से महतो आयाणाओ उवसंते उवट्ठिए पडिविरते से भिक्खू ॥ जे इमे तसथावरा पाणा भवंति ते णो सयं समारंभइ णो वऽण्णेहिं समारंभावेंति अन्ने समारभंतेवि न समणुजाणंति इति से महतो आयाणाओ उवसंते उवट्ठिए पडिविरते से भिक्खू ॥ जे इमे कामभोगा सचित्ता वा अचित्ता वा ते णो सयं परिगिण्हंति णो अन्नेणं परिगिण्हावेंति अन्नं परिगिण्हंतंपि ण समणुजाणंति इति से महतो आयाणाओ उवसंते उवट्ठिए पडिविरते से भिक्खू ॥ जंपि य इमं संपराइयं कम्मं कज्जइ, णो तं सयं करेति णो अण्णाणं कारवेति अन्नंपि करेंतं ण समणुजाणइ इति, से महतो आयाणाओ उवसंते उवट्ठिए पडिविरते॥ से भिक्खू जाणेज्जा असणं वा४ अस्सिं पडियाए एगं साहम्मियं समुद्दिस्स पाणाइं भूताइं जीवाइं सत्ताइं समारंभ समुद्दिस्स कीतं पामिच्चं अच्छिज्जं अणिसट्ठं अभिहडं आहट्टदेसियं तं चेतियं सिया तं (अप्पणो पुत्ताईणट्ठाए जाव आएसाए पुढो पहेणाए सामासाए पायरासाए संणिहिसंणिचओ किज्जइ इहलोइयं पारलोइयं भोयणाए) णो सयं भुंजइ णो अण्णेणं भुंजावेंति अन्नंपि भुंजंतं ण समणुजाणइ इति, से महतो आयाणाओ उवसंते उवट्ठिए पडिविरते ॥ तत्थ भिक्खू पक्कडं परिणिट्ठितमुग्गमुप्पायणेसणासुद्धं सत्थाईयं सत्थपरिणामियं अविहिंसियं एसियं वेसियं सामुदाणियं पत्तसमणं कारणट्ठा पमाणजुत्तं अक्खोवंजणवणलेवणभूयं संजमजायामायावत्तियं विलमिव

॥२९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नगभूतेणं अप्पाणेणं आहारं आहारेज्जा अन्नं अन्नकाले पाणं पाणकाले वत्थं वत्थकाले लेणं लेणकाले सयणं सयणकाले ॥ से भिक्खू मायन्ने अन्नयरं दिसं अणुदिसं वा पडिवन्ने धम्मं आइक्खे विभए किट्टे उवट्ठिएसु वा अणुवट्ठिएसु वा सुस्सूसमाणेसु पवेदए, संतिविरतिं उवसमं निव्वाणं सोयवियं अज्जवियं मद्दवियं लाघवियं अणतिवातियं सव्वेसिं पाणाणं सव्वेसिं भूताणं जाव सत्ताणं अणुवाइं किट्टए धम्मं ॥ से भिक्खू धम्मं किट्टमाणे णो अन्नस्स हेउं धम्ममाइक्खेज्जा, णो पाणस्स हेउं धम्ममाइक्खेज्जा, णो वत्थस्स हेउं धम्ममाइक्खेज्जा, णो लेणस्स हेउं धम्ममाइक्खेज्जा, णो सयणस्स हेउं धम्ममाइक्खेज्जा, णो अन्नेसिं विरूवरूवाणं कामभोगाणं हेउं धम्ममाइक्खेज्जा, अगिलाए धम्ममाइक्खेज्जा, नन्नत्थ कम्मनिज्जरट्ठाए धम्ममाइक्खेज्जा ॥ इह खलु तस्स भिक्खुस्स अंतिए धम्मं सोच्चा णिसम्म उट्ठाणेणं उट्ठाय वीरा अस्सिं धम्मे समुट्ठिया जे तस्स भिक्खुस्स अंतिए धम्मं सोच्चा णिसम्म सम्मं उट्ठाणेणं उट्ठाय वीरा अस्सिं धम्मे समुट्ठिया ते एवं सव्वोवगता ते एवं सव्वोवरता ते एवं सव्वोवसंता ते एवं सव्वत्ताए परिनिव्वुडत्तिबेमि ॥ एवं से भिक्खू धम्मट्ठी धम्मविऊ णियागपडिवण्णे से जहेयं वुतियं अदुवा पत्ते पउमवरपोंडरीयं अदुवा अपत्ते पउमवरपोंडरीयं, एवं से भिक्खू परिण्णायकम्मे परिण्णायसंगे परिण्णायगेहवासे उवसंते समिए सहिए सया जए, सेवं वयणिज्जे, तंजहा–समणेति वा माहणेति वा खंतेति वा दंतेति वा गुत्तेति वा मुत्तेति वा इसीति वा मुणीति वा कतीति वा विऊति वा भिक्खूति वा लूहेति वा तीरट्ठीति वा चरणकरणपारविउत्तिबेमि ॥ (सूत्रं १५) इति बितियसुयक्खंधस्स पोंडरीयं नाम पढमज्झयणं समत्तं ॥

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥२९८॥

१पौण्डरीकाध्य० अहिंसापरिभावना साधोः

'तत्रे'ति कर्मबन्धप्रस्तावे खलु वाक्यालङ्कारे 'भगवता' उत्पन्नज्ञानेन तीर्थकृता षड्जीवनिकाया हेतुत्वेनोपन्यस्ताः, तद्यथा–पृथिवीकायो यावत्त्रसकायोऽपीति, तेषां च पीड्यमानानां यथा दुःखमुत्पद्यते तथा स्वसंवित्तिसिद्धेन दृष्टान्तेन दर्शयितुमाह—तद्यथा नाम मम 'असातं' दुःखं वक्ष्यमाणैः प्रकारैरुत्पद्यते तथाऽन्येषामपीति, तद्यथा—दण्डेनास्थ्ना मुष्टिना 'लेलुना' लोष्ठेन 'कपालेन' कर्परेण 'आकोट्यमानस्य' संकोच्यमानस्य हन्यमानस्य कशादिभिः तर्ज्यमानस्याङ्गुल्यादिभिः ताड्यमानस्य कुड्यादावभिघातादिना परिताप्यमानस्याग्न्यादौ अन्येन वा प्रकारेण परिक्लाम्यमानस्य तथा 'अपद्राव्यमानस्य' मार्यमाणस्य यावल्लोमोत्खननमात्रमपि हिंसाकरं दुःखं भयं च यन्मयि क्रियते तत्सर्वमहं संवेदयामीत्येवं जानीहि, तथा सर्वे प्राणा जीवा भूतानि सत्त्वा इत्येते एकार्थिकाः कथञ्चिद्भेदं वाऽऽश्रित्य व्याख्येयाः, तत्रैतेषां दण्डादिनाऽऽक्रुश्यमानानां यावल्लोमोत्खननमात्रमपि दुःखं प्रतिसंवेदयतामेतच्च हिंसाकरं दुःखं भयं चोत्पन्नं ते सर्वेऽपि प्राणिनः प्रतिसंवेदयन्ति–साक्षादनुभवन्तीति, एवमात्मोपमया पीड्यमानानां जन्तूनां यतो दुःखमुत्पद्यतेऽतः सर्वेऽपि प्राणिनो न हन्तव्या न व्यापादयितव्या 'नाज्ञापयितव्या' बलात्कारेण व्यापारे न प्रयोक्तव्याः तथा न परिग्राह्या न परितापयितव्या नापद्रावयितव्याः ॥ सोऽहं ब्रवीमि, एतत् न स्वमनीषिकया किंतु सर्वतीर्थकराज्ञेयेति दर्शयति–'जे अतीए' इत्यादि, ये केचन तीर्थकृत ऋषभादयोऽतीता ये च विदेहेषु वर्तमानाः सीमन्धरादयो ये चागामिन्यामुत्सर्पिण्यां भविष्यन्ति पद्मनाभादयः 'अर्हन्तः' अमरासुरनरेश्वराणां पूजार्हा भगवन्त–ऐश्वर्यादिगुणकलापोपेताः सर्वेऽप्येवं ते व्यक्तवाचा 'आख्यान्ति' प्रतिपादयन्ति एवं सदेवमनुजायां पर्षदि भाषन्ते, स्वत एव, न यथा बौद्धानां बोधिसत्त्वप्रभावात् कुड्यादिदेशनत इति, एवं प्रकर्षेण ज्ञापयन्ति हेतूदाहरणादिभिः, एवं प्ररूपयन्ति नामादिभिर्यथा सर्वे प्राणा न हन्तव्या इत्यादि, 'एष धर्मः' प्राणिरक्षणलक्षणः प्राग्व्यावर्णितस्वरूपो 'ध्रुवः' अवश्यंभावी 'नित्यः' क्षान्त्यादिरूपेण शाश्वत इत्येवं च 'अभिसमेत्य' केवलज्ञानेनावलोक्य 'लोकं' चतुर्दशरज्ज्वात्मकं 'खेदज्ञैः' तीर्थकृद्भिः 'प्रवेदितः' कथित इत्येवं सर्वं ज्ञात्वा स भिक्षुर्विदितवेद्यो विरतः प्राणातिपाताद्यावत्परिग्रहादिति, एतदेव दर्शयितुमाह—'णो दंत' इत्यादि, इह पूर्वोक्तमहाव्रतपालनार्थमनेनोत्तरगुणाः प्रतिपाद्यन्ते, तत्र अपरिग्रहो–निष्किञ्चनः सन् साधुर्नो 'दन्तप्रक्षालनेन' कदम्बादिकाष्ठेन दन्तान् प्रक्षालयेत् तथा नो 'अञ्जनं' सौवीरादिकं विभूषार्थमक्ष्णोर्दद्यात् तथा नो वमनविरेचनादिकाः क्रियाः कुर्यात् तथा नो शरीरस्य स्वीयवस्त्राणां वा धूपनं कुर्यात् नापि कासाद्यपनयनार्थं तं धूमं योगवर्तिनिष्पादितमापिबेदिति ॥ साम्प्रतं मूलगुणोत्तरगुणप्रस्तावमुपसंजिघृक्षुराह–(ग्रन्थाग्रं ९०००) स मूलोत्तरगुणव्यवस्थितो भिक्षुर्नास्य क्रिया–सावद्या विद्यते इत्यक्रियः, संवृतात्मकतया सांपरायिककर्मबन्धक इत्यर्थः, कुत एवंभूतः यतः प्राणिनामल्पकः–अहिंसकोऽनुपमर्दक इत्यर्थः, तथा न विद्यते क्रोधो अस्येत्यक्रोधः, एवममानोऽमायोऽलोभः कषायोपशमाद्योपशान्तः–शीतीभूतस्तदुपशमाच्च परिनिर्वृत इव परिनिर्वृतः एवं तावदैहिकेभ्यः कामभोगेभ्यो विरतः पारलौकिकेभ्योऽपि विरत इति दर्शयति–'नो आसंसं' इत्यादि, 'नो' नैवाशंसां पुरस्कृत्य ममानेन विशिष्टतपसा जन्मान्तरे कामभोगावाप्तिर्भविष्यतीत्येवंभूतामाशंसां न पुरस्कुर्यादिति, एतदेव दर्शयितुमाह—'इमेण मे' इत्यादि, अस्मिन्नेव जन्मन्यमुना विशिष्टतपश्चरणफलेन दृष्टेनामर्षौषध्यादिना तथा पारलौकिकेन च श्रुतेनार्द्रकधर्मिल्लब्रह्मदत्तादीनां विशिष्टतपश्चरणफलेन, तथा 'मएण व'त्ति 'मन ज्ञाने' जातिस्मरणादिना ज्ञानेन, तथाऽऽचार्यादेः सकाशाद्विज्ञातेन–अवगतेन

॥२९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ममापि विशिष्टं भविष्यतीत्येवं नाशंसां विदध्यात्, तथाऽमुना सुचरिततपोनियमब्रह्मचर्यवासेन तथाऽमुना वा यात्रामात्रावृत्तिना धर्मेणानुष्ठितेन 'इतः' अस्माद्भवाच्च्युतस्य 'प्रेत्य' जन्मान्तरे स्यामहं देवः, तत्रस्थस्य च मे वशवर्तिनः कामभोगा भवेयुः अशेषकर्मवियुतो वा सिद्धोऽदुःखः (अशुभः) शुभाशुभकर्मप्रकृत्यपेक्षयेत्येवंभूतोऽहं स्यामागामिनि काल इत्येवमाशंसां न विदध्यादिति, यदिवा विशिष्टतपश्चरणादिनाऽऽगामिनि काले ममाणिमालघिमेत्यादिकाऽष्टप्रकारा सिद्धिर्भविष्यतीत्यनया च सिद्ध्या सिद्धोऽहमदुःखोऽशुभो मध्यस्थ इत्येवंरूपामाशंसां न कुर्यात्। तदकरणे च कारणमाह–'एत्थवि' इत्यादि, 'अत्रापि' विशिष्टतपश्चरणे सत्यपि कुतश्चिन्निमित्ताद्दुष्प्रणिधानसद्भावे सति कदाचित्सिद्धिः स्यात्कदाचिच्च नैवाशेषकर्मक्षयलक्षणा सिद्धिः स्यात्, तथा चोक्तम्—"जे जत्तिया उ हेऊ भवस्स ते चेव तत्तिया मोक्खे" इत्यादि। यदिवाऽत्राप्यणिमाद्यष्टगुणकारणे तपश्चरणादौ सिद्धिः स्यात्कदाचिच्च न स्यात्–तद्विपर्ययोऽपि वा स्यादिति, एवं व्यवस्थिते प्रेक्षापूर्वकारिणां कथमाशंसा कर्तुं युज्यते इति, सिद्धिश्चाष्टप्रकारेयं–अणिमा १ लघिमा २ महिमा ३ प्राप्तिः ४ प्राकाम्यं ५ ईशित्वं ६ वशित्वं ७ यत्रकामावसायित्वमिति ८, तदेवमैहिकार्थमामुष्मिकार्थं कीर्तिवर्णश्लोकार्थं च तपो न विधेयमिति स्थितम्॥ साम्प्रतमनुकूलप्रतिकूलेषु शब्दादिषु विषयेषु रागद्वेषाभावं दर्शयितुमाह–स भिक्षुः सर्वाशंसारहितो वेणुवीणादिषु शब्देषु 'अमूर्च्छितः' अगृद्धोऽनध्युपपन्नः, तथा रसभादिशब्देषु कर्कशेषु अद्विष्टः, एवं रूपरसगन्धस्पर्शेष्वपि वाच्यमिति। पुनरपि सामान्येन क्रोधाद्युपशमं दर्शयितुमाह–'विरए कोहाओ' इत्यादि, क्रोधमानमायालोभेभ्यो विरत इत्यादि सुगमं यावदिति 'से महया आयाणाओ उवसंते उवट्ठिए पडिविरए

१ पौण्डरीकाध्य० अहिंसापरिभावना साधोः

॥२९९॥

१ इच्छाऽनभिघातः। २ स्थावरेष्वप्याहाकारित्वं। ३ भूमावप्युन्मज्जननिमज्जने। ४ सत्यसंकल्पता।

से भिक्खु'त्ति, स भिक्षुर्भवति यो महतः कर्मोपादानादुपशान्तः सत्संयमे वोपस्थितः सर्वपापेभ्यश्च विरतः प्रतिविरत इति॥ एतदेव च महतः कर्मोपादानाद्विरमणं साक्षाद्दर्शयितुमाह–'जे इमे' इत्यादि, ये केचन त्रसाः स्थावराश्च प्राणिनो भवन्ति, तान् सर्वानपि 'नो' नैव स्वयं सत्साधवः समारभन्ते प्राण्युपमर्दकमारम्भं नारम्भन्त इतियावत्, तथा नान्यैः समारम्भयन्ते न चान्यान् समारभमाणान् समनुजानत इत्येवं महतः कर्मोपादानादुपशान्तः प्रतिविरतो भिक्षुर्भवतीति॥ साम्प्रतं कामभोगनिवृत्तिमधिकृत्याह–'जे इमे' इत्यादि, ये केचनामी काम्यन्त इति कामा भुज्यन्त इति भोगाः, ते च सचित्ता अचित्ता वा भवेयुः, तांश्च न स्वतो गृण्हीयान्नाप्यन्येन ग्राहयेत् नाप्यपरं गृह्णन्तं समनुजानीयादित्येवं कर्मोपादानाद्विरतो भिक्षुर्भवतीति॥ साम्प्रतं सामान्यतः साम्परायिककर्मोपादाननिषेधमधिकृत्याह–यदपीदं संपर्येति तासु तासु गतिष्वनेन कर्मणेति सांपरायिकं, तच्च तत्प्रद्वेषनिह्नवमात्सर्यान्तरायाशातनोपघातैर्बध्यते, तत्कर्म तत्कारणं वा न कृतकारितानुमतिभिः करोति स भिक्षुरभिधीयत इति॥ साम्प्रतं भिक्षाविशुद्धिमधिकृत्याह–'से भिक्खू' इत्यादि स भिक्षुर्यत्पुनरेवंभूतमाहारजातं जानीयात् 'अस्सिं पडियाए'त्ति 'एतत्प्रतिज्ञया' आहारदानप्रतिज्ञया यादेवा 'अस्मिन्पर्याये' साधुपर्याये व्यवस्थितमेकं साधुं साधर्मिकं समुद्दिश्य कश्चिच्छ्रावकः प्रकृतिभद्रको वा साध्वाहारदानार्थं 'प्राणिनः' व्यक्तेन्द्रियान् 'भूतानि' त्रिकालभावीनि 'जीवान्' आयुष्कधरणलक्षणान् 'सत्त्वान्' सदा सत्त्वोपेतान् 'समारभ्य' तदुपमर्दकमारम्भं विधाय 'समुद्दिश्य' तत्पीडां सम्यगुद्दिश्य, क्रीतं क्रयेण द्रव्यविनिमयेन 'पामिच्चं'ति उद्यतकम् 'आच्छेद्य' मित्यन्यस्मादाच्छिद्य 'अनिसृष्ट'मिति परेणानुत्संकलितम् 'अभ्याहृत'मिति साध्वभिमुखं ग्रामादेरानीतम् 'आहृत्य' दत्त्वेत्य साध्वर्थं कृतमुद्देशिकमित्येवंभूतमाहारजातं साधवे दत्तं स्यात्, तच्चाकामेन तेन परि-

गृहीतं स्यात्, तदेवं दोषदुष्टं च ज्ञात्वा स्वयं न भुञ्जीत नाप्यपरेण भोजयेत् न च भुञ्जानमपरं समनुजानीयादित्येवं दुष्टाहारदोषान्निवृत्तो भिक्षुर्भवतीति॥ अथ पुनरेवं जानीयादित्यादि, तद्यथा–विद्यते तेषां गृहस्थानामेवंभूतो वक्ष्यमाणः 'पराक्रमः' सामर्थ्यमाहारनिर्वर्तनं प्रत्यारम्भस्तेन च यदाहारजातं निर्वर्तितं 'यस्य चार्थाय' यत्कृते तत् 'चेतित'मिति दत्तं निष्पादितं 'स्याद्' भवेत्, यत्कृते च तन्निष्पादितं तत्स्वनामग्राहमाह, तद्यथा—आत्मनः स्वनिमित्तमेवाहारादिपाकनिर्वर्तनं कृतमिति, तथा पुत्राद्यर्थं यावदादेशाय–आदिश्यते यस्मिन्नागते संभ्रमेण परिजनस्तदासनदानादिव्यापारे स आदेशः–प्राघूर्णकस्तदर्थं वा पृथक्प्रहेणार्थं विशिष्टाहारनिर्वर्तनं क्रियते, तथा श्यामा–रात्रिस्तस्यामशनमाशः श्यामाशस्तदर्थं, प्रातरशनं प्रातराशः–प्रत्यूषसेव भोजनं तदर्थं 'सन्निधिसंनिचयो' विशिष्टाहारसंग्रहस्य संचयः क्रियते। अनेन चैतत्प्रतिपादितं भवति–बालवृद्धग्लानादिनिमित्तं प्रत्यूषादिसमयेष्वपि भिक्षाटनं क्रियते, तस्य चायमभिहितः संभवः, स च 'संनिधिसंचय' इहैकेषां मानवानां भोजनार्थं भवति, तत्र भिक्षुरुद्यतविहारी परकृतपरनिष्ठितमुद्गमोत्पादनैषणाशुद्धमाहारमाहरेत्, अत्र च परकृतपरनिष्ठिते चत्वारो भङ्गाः, तद्यथा–तस्य कृतं तस्यैव च निष्ठितं, तस्य कृतमन्यस्य निष्ठितम्, अन्यस्य कृतं तस्यैव निष्ठितम्, अन्यस्य कृतमन्यस्य निष्ठितमित्ययं चतुर्थो भङ्गः सूत्रेणोपात्तः, अयं च शुद्धो द्वितीयश्च अन्यस्य निष्ठितत्वात्, तत्राधाकर्मौद्देशिकादय उद्गमदोषाः षोडश तथोत्पादनादोषा धात्रीदूत्यादिकाः षोडशैव तथैषणादोषाः शङ्कितादयो दश, एवमेभिर्द्विचत्वारिंशद्दोषै रहितत्वाच्छुद्धं, तथा शस्त्रम्–अग्न्यादिकं तेनातीतं–प्रासुकीकृतं 'शस्त्रपरिणामित'मिति शस्त्रेण स्वकायपरकायादिना निर्जीवीकृतं वर्णगन्धरसादिभिश्च परिणमितं, हिंसां प्राप्तं हिं-

१ पौण्डरीकाध्य० अहिंसापरिभावना साधोः

॥३००॥

१ आदिशब्दस्य प्रकारार्थत्वाद् दुहितृस्नुषाः, यावच्छब्दस्य धाष्ट्यार्थम्। २ ०शनासनदा० प्र०। ३ समुदायस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सितं विरूपं हिंसितं विहिंसितं—न सम्यक् निर्जीवीकृतमित्यर्थः, तत्प्रतिषेधाद्विहिंसितं, निर्जीवमित्यर्थः, तदप्येषितम्—अन्वेषितं भिक्षाचर्याविधिना प्राप्तं, 'वैधिक'मिति केवलसाधुवेषधारात्रं न पुनर्जात्याजीवनतो निमित्तादिना वोत्पादितं, तदपि 'सामुदानिकं' समुदानं—भिक्षासमूहस्तत्र भवं सामुदानिकम्, एतदुक्तं भवति—मधुकरवृत्त्याऽऽप्तं सर्वत्र स्तोकं स्तोकं गृहीतमित्यर्थः । तथा प्रज्ञप्तेदं प्राप्तं—गीतार्थेनोपात्तमशनम्—आहारजातं, तदपि वेदनावैय्यावृत्त्यादिके कारणे सति, तत्रापि प्रमाणयुक्तं नातिमात्रं, प्रमाणं चेदम्—"अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भाए । वाउपवियारणट्ठा छब्भागं ऊणयं कुज्जा ॥ १ ॥" इति । एतदपि न वर्णबलार्थं किंतु यावन्मात्रेणाहारेण देहः क्रियासु प्रवर्तते, तत्र दृष्टान्तद्वयमाह—तद्यथा—अक्षस्योपाञ्जनम्—अभ्यङ्गो व्रणस्य च लेपनं—प्रलेपस्तदुपमया आहारमाहरेत्, तथा चोक्तम्—"अब्भंगेण व सगडं ण तरइ विगइं विणा उ जो साहू । सो रागदोसरहिओ मत्ताएँ विहीइ तं सेवे ॥ १ ॥" एतदेव दर्शयति—संयमयात्रायां मात्रा संयमयात्रामात्रा यावत्याऽऽहारमात्रया संयमयात्रा प्रवर्तते सा तथा तया—संयमयात्रामात्रया वृत्तिर्यस्य तत्तथा, तदपि बिलप्रवेशपन्नगभूतेनात्मनाऽऽहारमाहरेत्, एतदुक्तं भवति—यथाऽहिर्बिलं प्रविशन् तूर्णं प्रविशति एवं साधुनाऽप्याहारस्तत्स्वादमनास्वादयता शीघ्रं प्रवेशयितव्य इति, यदिवा सर्वेणैवाहारो लब्ध्वाऽस्वादमभ्यवहार्यत इति । तदेव चाहारजातं दर्शयितुमाह—'अन्नं' भक्तम् 'अन्नकाले' सूत्रार्थपौरुष्युत्तरकालं भिक्षाकाले प्राप्ते, पुरःपश्चात्कर्मपरिहृतं भवति यथोक्तभिक्षाटनेन, ग्रहणकालावाप्तं भैक्षं परिभोगकाले भुञ्जीत, तथा पानकं पानकाले, नातितृषितो भुञ्जीत ना-

सूत्रकृ. ५१

१ अर्द्धमशनस्य सव्यंजनस्य कुर्याद्द्रवस्य द्वौ भागौ धातप्रविचारणार्थं चतुर्थं भागमूनं कुर्यात् ॥ १ ॥ २ अभ्यङ्गेनैव शकटं न शक्नोति गन्तुं विनैव यः साधुः । स रागद्वेषरहितो मात्रया विधिना तां सेवेत ॥ १ ॥

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३०१॥

प्यतिषुभुक्षितः पानकं पिबेदिति, तथा वस्त्रं वस्त्रकाले गृह्णीयाद्, उपभोगं वा कुर्यात्, तथा 'लयनं' गृहादिकमाश्रयस्तस्य वर्षास्ववश्यमुपादानम् अन्यदा तनियमः, तथा शय्यतेऽस्मिन्निति शयनं—संस्तारकः स च शयनकाले, तत्राप्यगीतार्थानां प्रहरद्वयं निद्राविमोक्षो गीतार्थानां प्रहरमेकमिति ॥ स भिक्षुराहारोपधिशयनस्वाध्यायध्यानादीनां मात्रां जानातीति तद्विधिज्ञः सन् अन्यतरां दिशमनुदिशं वा 'प्रतिपन्नः' समाश्रितो धर्ममाख्यापयेत्—प्रतिपादयेत् यद्येन विधेयं तद्यथायोगं विभजेद् धर्मफलानि च कीर्तयेद्—आविर्भावयेत्, तच्च धर्मकथनं परहितार्थप्रवृत्तेन साधुना सम्यगुपस्थितेषु शिष्येषु अनुपस्थितेषु वा—कौतुकादिप्रवृत्तेषु 'शुश्रूषमाणेषु' श्रोतुं प्रवृत्तेषु स्वपरहिताय 'प्रवेदयेत्' आवेदयेत्प्रकथयेदितियावत् । श्रोतुमुपस्थितेषु यत्कथयेत्तदर्शयितुमाह—'संतिविरइं' इत्यादि शान्तिः—उपशमः क्रोधजयस्तत्प्रधाना प्राणातिपातादिभ्यो विरतिः शान्तिविरतिः, यदिवा शान्तिः—अशेषक्लेशोपशमरूपा तस्यै—तदर्थं विरतिः शान्तिविरतिस्तां कथयेत्, तथा 'उपशमम्' इन्द्रियनोइन्द्रियोपशमरूपं रागद्वेषाभावजनितं तथा 'निर्वृत्तिं' निर्वाणमशेषद्वन्द्वोपरमरूपं तथा 'सोयवियं'ति शौचं तदपि भावशौचं सर्वोपाधिविशुद्धता व्रतामालिन्यं 'अज्जवियं'ति आर्जवम्—अमायित्वं तथा मार्दवं—मृदुभावः सर्वत्र प्रश्रयवत्त्वं विनयनम्रतेतियावत्, तथा 'लाघवियं'ति कर्मणां लाघवापादनं कर्मगुरोर्वाऽऽत्मनः कर्मापनयनतो लघ्ववस्थासंजननं, साम्प्रतमुपसंहारद्वारेण सर्वशुभानुष्ठानानां मूलकारणमाह—अतिपतनम्—अतिपातः प्राण्युपमर्दनं तद्विद्यते यस्यासावतिपातिकस्तत्प्रतिषेधादनतिपातिकस्तं सर्वेषां प्राणिनां भूतानां यावत्सत्त्वानां धर्ममनुविचिन्त्यानुविचिन्त्य वा 'कीर्तयेत्' कथयेत्, इदमुक्तं भवति—सर्वप्राणिनां रक्षाभूतं धर्मं कथयेदिति ॥ साम्प्रतं धर्मकीर्त्तनं यथा निरुपधि भवति तथा दर्शयितुमाह—स भिक्षुः परकृतपरनिष्ठिताहारभोजी यथाक्रियाकालानुष्ठायी शुश्रूषत्सु धर्मं कीर्तयेत् नाऽस्य हेतोर्मायामीश्वरो धर्मकथाप्रवणो विशिष्टमाहारजातं दास्यतीत्येतन्निमित्तं न धर्ममाचक्षीत, तथा पानवस्त्रलयनशयननिमित्तं न धर्ममाचक्षीत, अन्येषां वा विरूपरूपाणाम्—उच्चावचानां कार्याणां कामभोगानां वा निमित्तं न धर्ममाचक्षीत तथा ग्लानिमनुपगच्छन् धर्ममाचक्षीत, कर्मनिर्जरायाश्चान्यत्र न धर्मं कथयेद्, अपरप्रयोजननिरपेक्ष एव धर्मं कथयेदिति ॥ धर्मकथाश्रवणफलदर्शनद्वारेणोपसंजिघृक्षुराह—'इह खलु तस्से'त्यादि, 'इह' अस्मिन् जगति खलु वाक्यालङ्कारे 'तस्य' भिक्षोर्गुणवतः 'अन्तिके' समीपे पूर्वोक्तविशेषणविशिष्टं धर्मं श्रुत्वा 'निशम्य' अवगम्य सम्यगुत्थानेनोत्थाय 'वीराः' कर्मविदारणसहिष्णवो ये चैवंभूतास्ते 'एवं' पूर्वोक्तविशेषणविशिष्टानुष्ठानतया सर्वस्मिन्नपि मोक्षकारणे सम्यग्दर्शनादिके उप—सामीप्येन गताः सर्वोपगताः, तथैव सर्वेभ्यः पापस्थानेभ्य उपरताः सर्वोपरताः तथा त एव सर्वोपशान्ता जितकषायतया शीतलीभूताः तथा त एव सर्वात्मतया—सर्वसामर्थ्येन सदनुष्ठाने उद्यमं कृतवन्तो ये चैवंभूतास्तेऽशेषकर्मक्षयं कृत्वा परि—समन्तान्निर्वृताः परिनिर्वृताः अशेषकर्मक्षयं कृतवन्तः, इति ब्रवीमीति पूर्ववत् ॥ साम्प्रतमध्ययनोपसंहारार्थमाह—'एव'मिति पूर्वोक्तविशेषणकलापविशिष्टः स भिक्षुः पुनरपि सामान्यतो विशिष्यते—धर्मः—श्रुतचारित्राख्यस्तेनार्थी धर्मार्थी, यथावस्थितं परमार्थतो धर्मं सर्वोपाधिविशुद्धं जानातीति धर्मवित्, तथा नियागः—संयमो विमोक्षो वा कारणे कार्योपचारं कृत्वा तं प्रतिपन्नो नियागप्रतिपन्नः, स चैवंभूतः पञ्चमपुरुषजातः, तं चाश्रित्य तत्—यथेदं प्राक् प्रदर्शितं तत्सर्वमुक्तं, स च प्राप्तो वा स्यात्प्रधानपौण्डरीकम्—अनुत्तराग्रं पुरुषविशेषं चक्रवर्त्यादिकं, तत्प्राप्तिश्च परमार्थतः केवलज्ञानावाप्तौ सत्यां भवति, साक्षाद्यथाऽवस्थितवस्तुस्वरूपपरिच्छित्तेः, अप्राप्तो वा स्यात् मतिश्रुतावधिमनःपर्यायज्ञानैर्यथैस्तैः समस्तैर्वा समन्वितः, स चैवंभूतः प्राग्व्यावर्णितगुणकलापोपेतो भिक्षुः परि—समन्तात् ज्ञातं

१पौण्डरीकाध्ययः भिक्षोर्गुणाः

॥३०१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म स्वरूपतो विपाकतस्तदुपादानतश्च येन स परिज्ञातकर्मा, तथा परिज्ञातः सङ्गः–संबन्धः सबाह्याभ्यन्तरो येन स तथा, परिज्ञातो निःसारतया गृहवासो येन स तथा, उपशान्त इन्द्रियनोइन्द्रियोपशमात्, तथा समितः पञ्चभिः समितिभिः, तथा सह हितेन वर्तत इति सहितो ज्ञानादिभिर्वा सहितः—समन्वितः, 'सदा' सर्वकालं 'यतः' संयतः प्राग्व्यावर्णितनियमकलापोपेतः, स एवंगुणकलापान्वित एतद्वचनीयः, तद्यथा–श्राम्यतीति श्रमणः समनसा वा, तथा मा प्राणिनो जहि–व्यापादयेत्येवं प्रवृत्तिः–उपदेशो यस्य स माहनः स ब्रह्मचारी वा ब्राह्मणः, क्षान्तः स क्षमोपेतो, दान्त इन्द्रियनोइन्द्रियदमनेन, तथा तिसृभिर्गुप्तिभिर्गुप्तः, तथा मुक्त इव मुक्तः, तथा विशिष्टतपश्चरणोपेतो महर्षिः, तथा मनुते जगतस्त्रिकालावस्थामिति मुनिः, तथा कृतमस्यास्तीति कृती पुण्यवान् परमार्थपण्डितो वा, तथा विद्वान् सद्विद्योपेतः, तथा भिक्षुर्निरवद्याहारतया भिक्षणशीलः, तथाऽन्तप्रान्ताहारत्वेन रूक्षः, तथा संसारतीरभूतो मोक्षस्तदर्थी, तथा चर्यत इति चरणं–मूलगुणाः क्रियत इति करणम्—उत्तरगुणास्तेषां पारं—तीरं पर्यन्तगमनं तद्वेत्तीति चरणकरणपारविदिति । इतिशब्दः परिसमाप्तौ । ब्रवीमीति तीर्थकरवचनादायः सुधर्मस्वामी जम्बूस्वामिनमुद्दिश्य एवं भणति–यथाऽहं न स्वमनीषिकया ब्रवीमीति ॥ साम्प्रतं समस्ताध्ययनोपात्तदृष्टान्तदार्ष्टान्तिकयोस्तात्पर्यार्थं गाथाभिर्निर्युक्तिकृद्दर्शयितुमाह—

उवमा य पुंडरीए तस्सेव य उवचएण निज्जुत्ती । अधिगारो पुण भणिओ जिणोवदेसेण सिद्धित्ति ॥ १५८ ॥
सुरमणुयतिरियनिरओवगे मणुया पडुच्च चरित्तम्मि । अविध महाजणनेयत्ति चक्कवट्टिमि अधिगारो ॥ १५९ ॥
अविय हु भारियकम्मा नियमा उक्कस्सनिरयठितिगामी । तेऽवि हु जिणोवदेसेण तेणेव भवेण सिज्झंति ॥१६०॥

जलमालकद्दमालं बहुविहवल्लिगहणं च पुक्खरिणिं । जंघाहि व बाहाहि व नावाहि व तं दुरवगाहं ॥ १६१ ॥
पउमं उल्लंघेसुं ओयरमाणस्स होइ बावत्ती । किं नत्थि से उवाओ जेणुल्लंघेज्ज अविवन्नो ॥ १६२ ॥
विज्जा व देवकम्मं अहवा आगासिया विउव्वणया । पउमं उल्लंघेसुं न एस इणमो जिणक्खाओ ॥ १६३ ॥
सुद्धप्पओगविज्जा सिद्धा उ जिणस्स जाणणा विज्जा । भवियजणपोंडरीया उ जाए सिद्धिगतिमुवेंति ॥ १६४ ॥

इह 'उपमा' दृष्टान्तः 'पौण्डरीकेण' श्वेतशतपत्रेण कृतः, तस्येहाभ्यर्हितत्वात्, तस्यैव चोपचयेन सर्वावयवनिष्पत्तिर्यावद्विशिष्टोपायेनोद्धरणं, दार्ष्टान्तिकाधिकारस्तु पुनरत्र भणितः–अभिहितश्चक्रवर्त्यादेर्भव्यस्य जिनोपदेशेन सिद्धिरिति, तस्यैव पूज्यमानत्वादिति । पूज्यत्वमेव दर्शयितुमाह–'सुरमणुय' इत्यादि, सुरादिषु चतुर्गतिकेषु जन्तुषु मध्ये मनुजाश्चरित्रस्य–सर्वसंवररूपस्य प्रभवः–शक्ता वर्तन्ते, न शेषाः सुरादयः, तेष्वपि मनुजेषु महाजननेतारश्चक्रवर्त्यादयो वर्तन्ते, तेषु प्रबोधितेषु प्रधानानुगामित्वात् इतरजनः सुप्रतिबोध एव भवतीत्यतोऽत्र चक्रवर्त्यादिना पौण्डरीककल्पेनाधिकार इति । पुनरप्यन्यथा मनुजप्राधान्यं दर्शयितुमाह–'अविय हु' इत्यादि, गुरुकर्माणोऽपि मनुजा आसंकलितनरकायुषोऽपि–नरकगमनयोग्या अपि तेऽप्येवंभूताज्जिनोपदेशात्तेनैव भवेन समस्तकर्मक्षयात् सिद्धिगामिनो भवन्तीति । तदेवं दृष्टान्तदार्ष्टान्तिकयोस्तात्पर्यार्थं प्रदर्श्य दृष्टान्तभूतपौण्डरीकाऽऽधारायाः पुष्करिण्या दुरवगाहित्वं सूत्रालापकोपात्तं निर्युक्तिकृद्दर्शयितुमाह—'जलमाले' त्यादि, जलमालाम्–अत्यर्थप्रचुरजलां तथा कर्दममालाम्–अप्रतिष्ठिततलतया प्रभूततरपङ्कां तथा बहुविधवल्लिगहनां च पुष्करिणीं जङ्घाभ्यां वा बाहुभ्यां वा नावा वा दुस्तरां पुष्करिणीं, दृष्टेति क्रियाध्याहारः, किंचान्यत्–'पउमं' इत्यादि, तन्मध्ये पद्मवरपौण्डरीकं गृहीत्वा समुत्तरतोऽवश्यं व्यापत्तिः प्राणानां भवेत्,

किं तत्र कश्चिदुपायः स वास्ति ? येनोपायेन गृहीतकमलः सन् तां पुष्करिणीमुल्लङ्घ्येदविपन्न इति । तदुल्लङ्घनोपायं दर्शयितुमाह–'विद्या वे' त्यादि, विद्या वा काचित्प्रज्ञप्त्यादिका देवताकर्म वाऽथवाऽऽकाशगमनलब्धिर्वा कस्यचिद्भवेत् तेनासावविपन्नो गृहीतपौण्डरीकः सन्नुल्लङ्घयेत्तां पुष्करिणीम्, एष च जिनैरुपायः समाख्यात इति । सर्वोपसंहारार्थमाह–'सुद्धप्पे' त्यादि, शुद्धप्रयोगविद्या सिद्धा जिनस्यैव विज्ञानरूपा विद्या नान्यस्य कस्यचिद्यया विद्यया तीर्थकरदर्शितया भव्यजनपौण्डरीकाः सिद्धिमुपगच्छन्तीति । गतोऽनुगमः, साम्प्रतं नयाः, ते च पूर्ववद्द्रष्टव्या इति ॥ समाप्तं पौण्डरीकाख्यं द्वितीयश्रुतस्कन्धे प्रथमाध्ययनमिति ॥ [ग्रन्थाग्रम् १०३०]

इति श्रीसूत्रकृताङ्गे पौण्डरीकाख्यमाद्यमध्ययनं समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ द्वितीयक्रियास्थानाख्याध्ययनस्य प्रारम्भः ॥

व्याख्यातं प्रथमाध्ययनं, साम्प्रतं द्वितीयमारभ्यते, अस्य चायमभिसंबन्धः, इहानन्तराध्ययने पुष्करिणीपौण्डरीकदृष्टान्तेन तीर्थिकाः सम्यङ्मोक्षोपायाभावात्कर्मणां बन्धकाः प्रतिपादिताः, सत्साधवश्च सम्यग्दर्शनादिमोक्षमार्गप्रवृत्तत्वान्मोचकाः सदुपदेशदानतोऽपरेषामपीति । तदिहापि यथा कर्म द्वादशभिः क्रियास्थानैर्बध्यते यथा च त्रयोदशेन मुच्यते तदेतत्पूर्वोक्तमेव बन्धमोक्षयोः प्रतिपादनं क्रियते, अनन्तरसूत्रेण चायं संबन्धः, तद्यथा—भिक्षुणा चरणकरणविदा कर्मक्षपणायोद्यतेन द्वादश क्रियास्थानानि—कर्मबन्धकारणानि सम्यक् परिहर्तव्यानि, तद्विपरीतानि च मोक्षसाधनानि आसेवितव्यानि, इत्यनेन संबन्धेनाऽऽयातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्राप्युपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—कर्मणां बन्धोऽनेन प्रतिपाद्यते तद्विमोक्षश्चेति । नामनिष्पन्ने तु निक्षेपे क्रियास्थानमिति द्विपदं नाम, तत्रापि क्रियापदनिक्षेपार्थं प्रस्तावमारचयन्निर्युक्तिकृदाह—

किरियाओ भणियाओ किरियाठाणंति तेण अज्झयणं । अहिगारो पुण भणिओ बंधे तह मोक्खमग्गे य ॥१६५॥
दव्वे किरिएजणया य पयोगुवायकरणिज्जसमुदाणे । हरियावहसंमत्ते सम्मामिच्छा य मिच्छत्ते ॥ १६६ ॥
नामं ठवणा दविए खेत्तेऽद्धा उह उवरती वसही । संजमपग्गहजोहे अचलगणण संधणा भावे ॥ १६७ ॥

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३०४॥

संमुदाणियाणिहं तओ संमत्तउत्ते य भावठाणंमि । किरियाहिं पुरिस पावाइए उ सव्वे परिक्खेज्जा ॥ १६८ ॥

२ क्रियास्थानाध्ययनक्रियास्थानयोर्निक्षेपाः

तत्र क्रियन्त इति क्रियास्ताश्च कर्मबन्धकारणत्वेनाऽऽद्यन्तवर्तिनि प्रतिक्रमणाध्ययने 'पडिक्कमामि तेरसहिं किरियाठाणेहिं' ति अस्मिन्सूत्रेऽभिहिताः । यदिवा इहैव क्रियाः 'भणिता' अभिहितास्तेनेदमध्ययनं क्रियास्थानमित्युच्यते । तच्च क्रियास्थानं क्रियावत्स्वेव भवति नाक्रियावत्सु, क्रियावन्तश्च केचिद्बध्यन्ते केचिन्मुच्यन्तेऽतोऽध्ययनार्थाधिकारः पुनरभिहितो बन्धे तथा मोक्षमार्गे चेति । तत्र नामस्थापने सुगमत्वादनादृत्य द्रव्यादिकां क्रियां प्रतिपादयितुमाह—तत्र द्रव्ये—द्रव्यविषये या क्रिया एजनता 'एजृ कम्पने' जीवस्याजीवस्य वा कम्पनरूपा चलनस्वभावा सा द्रव्यक्रिया, सापि प्रयोगादिस्वसया वा भवेत्, तत्राप्युपयोगपूर्विका वाऽनुपयोगपूर्विका वा अक्षिनिमेषमात्रादिका सा सर्वा द्रव्यक्रियेति । भावक्रिया त्रिधा, तद्यथा—प्रयोगक्रिया उपायक्रिया करणीयक्रिया समुदानक्रिया ईर्यापथक्रिया सम्यक्त्वक्रिया सम्यग्मिथ्यात्वक्रिया मिथ्यात्वक्रिया चेति । तत्र प्रयोगक्रिया मनोवाक्कायलक्षणा त्रिधा, तत्र स्कुरद्भिर्मनोद्रव्यैरात्मन उपयोगो भवति, एवं वाकाययोरपि वक्तव्यं, तत्र शब्दे निष्पाद्ये वाकाययोर्द्वयोरप्युपयोगः, तथा चोक्तम्—"गिण्हइ य काइएणं णिसिरइ तह वाइएण जोगेण" गमनादिका तु कायक्रियैव १, उपायक्रिया तु घटादिकं द्रव्यं येनोपायेन क्रियते, तद्यथा—मृत्खननमर्दनचक्रारोपणदण्डचक्रसलिलकुम्भकारव्यापारैर्यावद्विरूपापैः क्रियते सा सर्वोपायक्रिया २, करणीयक्रिया तु यद्येन प्रकारेण करणीयं तत्तेनैव क्रियते नान्यथा, तथाहि—घटो मृत्पिण्डादिकयैव सामग्र्या क्रियते न पाषाणसिकतादिकयेति ३, समुदानक्रिया तु यत्कर्म प्रयोगगृहीतं समुदायावस्थं सत्प्रकृतिस्थित्यनुभावप्रदेशरूपतया

॥३०४॥

१ आचाराङ्गवृत्तिः "पत्रे । २ ०र्यं द्रष्टव्या प्र० । ३ कायवाग्योगयुक्तस्य । ४ प्रयोजनं व्यापारः । ५ गृह्णाति च कायिकेन निस्सारयति वाचिकेन योगेन ॥

यया व्यवस्थाप्यते सा समुदानक्रिया, सा च मिथ्यादृष्टेरारभ्य सूक्ष्मसंपरायं यावत् भवति ४, ईर्यापथक्रिया तूपशान्तमोहादारभ्य सयोगिकेवलिनं यावदिति ५, सम्यक्त्वक्रिया तु सम्यग्दर्शनयोग्याः कर्मप्रकृतीः सप्तसप्ततिसंख्या यद्या बध्नाति साऽभिधीयते ६, सम्यग्मिथ्यात्वक्रिया तु तद्योग्याः प्रकृतीश्चतुःसप्ततिसंख्या यया क्रियया बध्नाति साऽभिधीयते ७, मिथ्यात्वक्रिया तु सर्वाः प्रकृतीर्विंशत्युत्तरशतसंख्यास्तीर्थकराहारकशरीरतदङ्गोपाङ्गत्रिकरहिता यया बध्नाति सा मिथ्यात्वक्रियेत्यभिधीयते ८ । साम्प्रतं स्थाननिक्षेपार्थमाह—इयं च गाथाऽऽचारप्रथमश्रुतस्कन्धे द्वितीयाध्ययने लोकविजयाख्ये 'जे गुणे से मूलट्ठाणे' इत्यत्र स्थानशब्दस्य सूत्रस्पर्शिकनिर्युक्त्यां प्रबन्धेन व्याख्यातेति नेह प्रतन्यते । इह पुनर्यया क्रियया येन च स्थानेनाधिकारस्तद्दर्शयितुमाह—क्रियाणां मध्ये समुदानिका क्रिया या व्याख्याता, तस्याश्च कषायानुगतत्वात् बहवो भेदा यतस्ततस्तासां सामुदानिकानां क्रियाणामिह प्रकरणे 'तउ'त्ति अधिकारो व्यापारः, सम्यक्प्रयुक्ते च भावस्थाने, तच्चेह विरतिरूपं संयमस्थानं प्रशस्तभावसंघनारूपं च गृह्यते, सम्यक्प्रयुक्तभावस्थानग्रहणसामर्थ्यादैर्यापथिकी क्रियापि गृह्यते, सामुदानिकाक्रियाग्रहणाच्चाप्रशस्तभावस्थानान्यपि गृहीतानि, आभिश्च पूर्वोक्ताभिः क्रियाभिः पूर्वोक्तान् पुरुषान् तद्वारायातान्प्रावादुकांश्च परीक्षेत सर्वानपीति । यथा चैवं तथा स्वत एव सूत्रकारः 'तंजहा—से एगइया मणुस्सा भवंती' त्यादिना तथा प्रावादुकपरीक्षायामपि 'णायओ उवगरणं च विप्पजहाय भिक्खायरियाए समुट्ठिया' इत्यादिना वक्ष्यतीति । गतो निर्युक्त्यनुगमः, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुयं मे आउसंतेणं भगवया एवमक्खायं–इह खलु किरियाठाणे णामज्झयणे पण्णत्ते, तस्स णं अयमट्ठे–इह खलु संजूहेणं दुवे ठाणे एवमाहिज्जंति, तंजहा–धम्मे चेव अधम्मे चेव उवसंते चेव अणुवसंते चेव ॥ तत्थ णं जे से पढमस्स ठाणस्स अहम्मपक्खस्स विभंगे तस्स णं अयमट्ठे पण्णत्ते, इह खलु पाईणं वा ६ संतेगतिया मणुस्सा भवंति, तंजहा–आरिया वेगे अणारिया वेगे उच्चागोया वेगे णीयागोया वेगे कायमंता वेगे हस्समंता वेगे सुवण्णा वेगे दुवण्णा वेगे सुरूवा वेगे दुरूवा वेगे ॥ तेसिं च णं इमं एतारूवं दंडसमादाणं संपेहाए तंजहा–णेरइएसु वा तिरिक्खजोणिएसु वा मणुस्सेसु वा देवेसु वा जे यावण्णे तहप्पगारा पाणा विन्नू वेयणं वेयंति ॥ तेसिं पि य णं इमाइं तेरस किरियाठाणाइं भवंतीतिमक्खायं, तंजहा–अट्ठादंडे १ अणट्ठादंडे २ हिंसादंडे ३ अकम्हादंडे ४ दिट्ठीविपरियासियादंडे ५ मोसवत्तिए ६ अदिन्नादाणवत्तिए ७ अज्झत्थवत्तिए ८ माणवत्तिए ९ मित्तदोसवत्तिए १० मायावत्तिए ११ लोभवत्तिए १२ इरियावहिए १३ ॥ (सूत्रं १६)

सुधर्मस्वामी जम्बूस्वामिनमुद्दिश्येदमाह, तद्यथा—श्रुतं मयाऽऽयुष्मता भगवतैवमाख्यातम्—इह खलु क्रियास्थानं नामाध्ययनं भवति, तस्य चायमर्थः–इह खलु 'संजूहेणं'ति 'सामान्येन' संक्षेपेण समासतो द्वे स्थाने भवतः, य एते क्रियावन्तस्ते सर्वेऽप्यनयोः स्थानयोरेवमाख्यायन्ते, तद्यथा–धर्मे चैवाधर्मे चैव, इदमुक्तं भवति–धर्मस्थानमधर्मस्थानं च, यदिवा—धर्मादनपेतं धर्म्यं विपरीतमधर्म्यं, कारणशुद्धा च कार्यशुद्धिर्भवतीत्याह—उपशान्तं यत्तद्धर्मस्थानम्, अनुपशान्तं चाधर्मस्थानं, तत्रोपशान्ते–उपशमप्रधाने धर्मस्थाने धर्म्यस्थाने वा केचन महासत्त्वाः समासक्तोत्तरोत्तरशुभोदया वर्तन्ते, परे च तद्विपर्यस्ते विपर्यस्तमतयः संसाराभिष्वङ्गिणोऽधोऽधोगतयो वर्तन्ते । इह च यद्यप्यनादिभवाभ्यासादिन्द्रियानुकूलतया प्रायशः पूर्वमधर्मप्रवृत्तो भवति लोकः पश्चात्तदुपदेशयोग्याचार्यसंसर्गाद्धर्मस्थाने प्रवर्तते तथाऽप्यभ्यर्हितत्वात्पूर्वं धर्मस्थानमुपशमस्थानं च प्रदर्शितं, पश्चात्तद्विपर्यस्तमिति ॥ साम्प्रतं तु यत्र प्राणिनामनुपदेशतः स्वरसप्रवृत्त्याऽऽदावेव स्थानं भवति तदधिकृत्याह–'तत्थ णं' इत्यादि, तत्रेति वाक्योपन्यासार्थे णमिति वाक्यालङ्कारे योऽसौ प्रथमानुष्ठेयतया प्रथमस्याधर्मपक्षस्य स्थानस्य विविधो भङ्गो विभङ्गो–विभागो विचारस्तस्यायमर्थ इति । 'इह' अस्मिन् जगति प्राच्यादिषु दिक्षु मध्येऽन्यतरस्यां दिशि 'सन्ति' विद्यन्ते एके केचन 'मनुष्याः' पुरुषाः, ते चैवंभूता भवन्तीत्याह, तद्यथा—आराधाताः सर्वहेयधर्मेभ्य इत्यार्याः तद्विपरीताश्चानार्या एके केचन भवन्ति यावद्रूपाः सुरूपाश्चेति । 'तेषां च' आर्यादीनाम् 'इदं' वक्ष्यमाणमेतद्रूपं दण्डयतीति दण्डः–पापोपादानसंकल्पस्तस्य समादानं–ग्रहणं 'संपेहाए'त्ति संप्रेक्ष्य, तच्च चतुर्गतिकानामन्यतमस्य भवतीति दर्शयति—'तंजहे' त्यादि, तद्यथा–नारकादिषु, ये चान्ये तथाप्रकारास्तद्भेदवर्तिनः सुवर्णदुर्वर्णादयः 'प्राणाः' प्राणिनो विद्वांसो वेदना–ज्ञानं तद् 'वेदयन्ति' अनुभवन्ति, यदिवा सातासातरूपां वेदनामनुभवन्तीति, अत्र चत्वारो भङ्गाः, तद्यथा–संज्ञिनो वेदनामनुभवन्ति विदन्ति च १ सिद्धास्तु विदन्ति नानुभवन्ति २ असंज्ञिनोऽनुभवन्ति न पुनर्विदन्ति ३ अजीवास्तु न विदन्ति नाप्यनुभवन्तीति ४, इह पुनः प्रथमतृतीयाभ्यामधिकारो द्वितीयचतुर्थावस्तुभूताविति, 'तेषां च' नारकतिर्यङ्मनुष्यदेवानां तथाविधज्ञानवताम् 'इमानि' वक्ष्यमाणलक्षणानि त्रयोदश क्रियास्थानानि भवन्तीत्येवमाख्यातं तीर्थकरगणधरादिभिरिति । कानि पुनस्तानीति दर्शयितुमाह–'तंजहे' त्यादि, तद्यथेत्यस्योदाहरणवाक्योपन्यासार्थः, 'आत्मार्थाय' स्वप्रयोजनकृते दण्डोऽर्थदण्डः पापोपादानं १, तथाऽनर्थदण्ड इति निष्प्रयोजनमेव सावद्यक्रियानुष्ठानमनर्थदण्डः २, तथा हिंसनं हिंसा–प्राण्युपमर्दरूपा तया सैव वा दण्डो हिंसादण्डः ३, तथाऽकस्माद् अनुपयुक्तस्य दण्डोऽकस्माद्दण्डः, अन्यस्य क्रिययाऽन्यस्य व्यापादनमिति ४, तथा दृष्टेर्विपर्यासो–रज्ज्वामिव सर्पबुद्धित्तया दण्डो दृष्टिविपर्यासदण्डः, तद्यथा–लेष्वादिबुद्ध्या शरादभिघातेन चटकादिव्यापादनं ५, तथा मृषावादप्रत्ययिकः, स च सद्भूतनिह्नवासद्भूतारोपणरूपः ६, तथा अदत्तस्य परकीयस्याऽऽदानं—स्वीकरणमदत्तादानं–स्तेयं तत्प्रत्ययिको दण्ड इति ७, तथाऽऽत्मन्यध्यध्यात्मं तत्र भव आध्यात्मिको दण्डः, तद्यथा–निर्निमित्तमेव दुर्मना उपहतमनःसंकल्पो हृदयेन दूयमानश्चिन्तासागरावगाढः संतिष्ठते ८, तथा जात्याद्यष्टमदस्थानोपहतमनाः परावमदर्शी तस्य मानप्रत्ययिको दण्डो भवति ९, तथा मित्राणामुपतापेन दोषो मित्रदोषस्तत्प्रत्ययिको दण्डो भवति १०, तथा माया–परवञ्चनबुद्धित्तया दण्डो मायाप्रत्ययिकः ११, तथा लोभप्रत्ययिको–लोभनिमित्तोदण्ड इति १२, तथा एवं पञ्चभिः समितिभिः समितस्य तिसृभिर्गुप्तिभिर्गुप्तस्य सर्वत्रोपयुक्तस्येर्याप्रत्ययिकः सामान्येन कर्मबन्धो भवति १३, एतच्च त्रयोदशं क्रियास्थानमिति ॥ 'यथोद्देशस्तथा निर्देश' इतिकृत्वा प्रथमात्क्रियास्थानादारभ्य व्याचिख्यासुराह—

पढमे दंडसमादाणे अट्ठादंडवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे आयहेउं वा णाइहेउं वा अगारहेउं वा परिवारहेउं वा मित्तहेउं वा णागहेउं वा भूतहेउं वा जक्खहेउं वा तं दंडं तसथावरेहिं पाणेहिं सयमेव णिसिरिति अण्णेणवि णिसिरावेति अण्णंपि णिसिरंतं समणुजाणइ, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, पढमे दंडसमादाणे अट्ठादंडवत्तिएत्ति आहिए ॥ (सूत्रं १७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्प्रथममुपात्तं दण्डसमादानमर्थाय दण्ड इत्येवमाख्यायते तस्यायमर्थः, तद्यथा नाम कश्चित्पुरुषः, पुरुषग्रहणमुपलक्षणं सर्वोऽपि चातुर्गतिकः प्राणी 'आत्मनिमित्तम्' आत्मार्थं तथा 'ज्ञातिनिमित्तं' स्वजनाद्यर्थं तथा अगारं–गृहं तन्निमित्तं तथा 'परिवारो' दासीकर्मकरादिकः परिकरो वा—गृहादेर्वृत्त्यादिकस्तन्निमित्तं तथा मित्रनागभूतयक्षाद्यर्थं 'तं' तथाभूतं स्वपरोपघातरूपं दण्डं त्रसस्थावरेषु प्राणिषु स्वयमेव 'निसृजति' निक्षिपति, दण्डमिव दण्डमुपरि पातयति, प्राण्युपमर्दकारिणीं क्रियां करोतीत्यर्थः, तथाऽन्येनापि कारयति, अपरं दण्डं निसृजन्तं समनुजानीते, एवं कृतकारितानुमतिभिरेव तस्यानात्मज्ञस्य तत्प्रत्ययिकं सावद्यक्रियोपात्तं कर्म 'आधीयते' संबध्यते इति। एतत्प्रथमं दण्डसमादानमर्थदण्डप्रत्ययिकमित्याख्यातमिति ॥

अहावरे दोच्चे दंडसमादाणे अणट्ठादंडवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे जे इमे तसा पाणा भवंति ते णो अच्चाए णो अजिणाए णो मंसाए णो सोणियाए एवं हिययाए पित्ताए वसाए पिच्छाए पुच्छाए बालाए सिंगाए विसाणाए दंताए दाढाए णहाए ण्हारुणिए अट्ठीए अट्ठिमंजाए णो हिंसिंसु मेत्ति णो हिंसंति मेत्ति णो हिंसिस्संति मेत्ति णो पुत्तपोसणाए णो पसुपोसणयाए णो अगारपरिवूहणताए णो समणमाहणवत्तणाहेउं णो तस्स सरीरगस्स किंचि विप्परियादित्ता भवंति, से हंता छेत्ता भेत्ता लुंपइत्ता विलुंपइत्ता उद्दवइत्ता उज्झिउं बाले वेरस्स आभागी भवति, अणट्ठादंडे ॥ से जहाणामए केइ पुरिसे जे इमे थावरा पाणा भवंति, तंजहा–इक्कडा इ वा कडिणा इ वा जंतुगा इ वा परगा इ वा मोक्खा इ वा तणा इ वा कुसा इ वा कुच्छगा इ वा पव्वगा इ वा पलाला इ वा, ते णो पुत्तपोसणाए णो पसुपोसणाए णो अगारपडिवूहणयाए णो समणमाहणपोसणयाए णो तस्स सरीरगस्स किंचि विपरियाइत्ता भवंति, से हंता छेत्ता भेत्ता लुंपइत्ता विलुंपइत्ता उद्दवइत्ता उज्झिउं बाले वेरस्स आभागी भवति, अणट्ठादंडे ॥ से जहाणामए केइ पुरिसे कच्छंसि वा दहंसि वा उदगंसि वा दवियंसि वा वलयंसि वा णूमंसि वा गहणंसि वा गहणविदुग्गंसि वा वणंसि वा वणविदुग्गंसि वा पव्वयंसि वा पव्वयविदुग्गंसि वा तणाइं ऊसविय ऊसविय सयमेव अगणिकायं णिसिरति अण्णेणवि अगणिकायं णिसिरावेति अण्णंपि अगणिकायं णिसिरंतं समणुजाणइ अणट्ठादंडे, एवं खलु तस्स तप्पत्तियं सावज्जन्ति आहिज्जइ, दोच्चे दंडसमादाणे अणट्ठादंडवत्तिएत्ति आहिए ॥ सूत्रम् १८ ॥

तथापरं द्वितीयं दण्डसमादानमनर्थदण्डप्रत्ययिकमित्यभिधीयते, तदधुना व्याख्यायते, तद्यथा नाम कश्चित्पुरुषो निर्निमित्तमेव निर्विवेकतया प्राणिनो हिनस्ति, तदेव दर्शयितुमाह–'जे इमे' इत्यादि, ये केचन 'अमी' संसारान्तर्वर्तिनः प्रत्यक्षा बस्तादयः प्राणिनस्तांश्चासौ हिंसन्नर्थाय–शरीरं 'नो' नैवार्थाय हिनस्ति, तथाऽजिनं–चर्म नापि तदर्थम्, एवं मांसशोणितहृदयपित्तवसापिच्छपुच्छबालशृङ्गविषाणनखस्नाय्वस्थ्यस्थिमज्जा इत्येवमादिकं कारणमुद्दिश्य, नैवाहिंसिषुर्नापि हिंसन्ति नापि हिंसयिष्यन्ति मां मदीयं चेति, तथा नो 'पुत्रपोषणाये'ति पुत्रादिकं पोषयिष्यामीत्येतदपि कारणमुद्दिश्य न व्यापादयति, तथा नापि पशूनां पोषणाय, तथाऽगारं–गृहं तस्य परिबृंहणम्–उपचयस्तदर्थं वा न हिनस्ति, तथा न श्रमणब्राह्मणवर्तनाहेतुं, तथा यत्नेन पालयितुमारब्धं नो तस्य शरीरस्य किमपि परित्राणाय 'तत्' प्राणव्यपरोपणं भवति, इत्येवमादिकं कारणमनपेक्ष्यैवासौ क्रीडया तच्छीलतया व्यसनेन वा प्राणिनां हन्ता भवति दण्डादिभिः तथा छेत्ता भवति कर्णनासिकाधिकर्तनतः तथा भेत्ता शूलादिना तथा लुम्पयिता अन्यतराङ्गावयवविकर्तनतः तथा विलुम्पयिता अक्ष्युत्पाटनचर्मविकर्त्तनकरपादादिच्छेदनतः परमाधार्मिकवत्प्राणिनां निर्निमित्तमेव नानाविधोपायैः पीडोत्पादको भवति तथा जीवितादप्यपद्रावयिता भवति, स च सद्विवेकमुज्झितोऽस्मानं वा परित्यज्य बालवद्बालः–अज्ञोऽसमीक्षितकारितया जन्मान्तरानुबन्धिनो वैरस्यभागी भवति, तदेवं निर्निमित्तमेव पञ्चेन्द्रियप्राणिपीडनतो यथाऽनर्थदण्डो भवति तथा प्रतिपादितम्, अधुना स्थावरानधिकृत्योच्यते–'से जहे' त्यादि, यथा कश्चित्पुरुषो निर्विवेकः पथि गच्छन् वृक्षादेः पल्लवादिकं दण्डादिना प्रध्वंसयन् फलनिरपेक्षस्तच्छीलतया व्रजति, एतदेव दर्शयति—'जे इमे' इत्यादि, ये केचन 'अमी' प्रत्यक्षाः स्थावरा वनस्पतिकायाः प्राणिनो भवन्ति, तद्यथा–इक्कडादयो वनस्पतिविशेषा उत्तानार्थास्तदिहेयमिक्कडा ममानया प्रयोजनमित्येवमभिसंधाय न छिनत्ति, केवलं तत्पत्रपुष्पफलादिनिरपेक्षस्तच्छीलतया छिनत्तीत्येतत्सर्वत्रानुयोजनीयमिति, तथा न पुत्रपोषणाय नो पशुपोषणाय नागारप्रतिबृंहणाय न श्रमणब्राह्मणवृत्तये नापि शरीरस्य किञ्चित्परित्राणं भविष्यतीति, केवलमेवमेवासौ वनस्पतिं हन्ता छेत्तेत्यादि यावज्जन्मान्तरानुबन्धिनो वैरस्यभागी भवति, अयं वनस्पत्याश्रयोऽनर्थदण्डोऽभिहितः ॥ साम्प्रतमग्न्याश्रितमाह–'से जहे'त्यादि, तद्यथा नाम कश्चित्पुरुषः सदसद्विवेकविकलतया कच्छादिकेषु दशसु स्थानेषु वनदुर्गपर्यन्तेषु तृणानि–कुशपुष्पकादीनि पौनःपुन्येनोर्ध्वाधःस्थानि कृत्वा 'अग्निकायं' हुतभुजं 'निसृजति' प्रक्षिपत्यन्येन वाऽग्निकायं बहुसत्त्वापकारिणं दवार्थं 'निसर्जयति' प्रक्षेपयत्यन्यं च निसृजन्तं समनुजानीते। तदेवं योगत्रिकेण कृतकारितानुमतिभिस्तस्य

॥३०७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्किञ्चनकारिणः 'तत्प्रत्ययिकं' दवदाननिमित्तं 'सावद्यं कर्म' महापातकमाख्यातम्, एतच्च द्वितीयमनर्थदण्डसमादानमाख्यातमिति ॥ तृतीयमधुना व्याचिख्यासुराह

अहावरे तच्चे दंडसमादाणे हिंसादंडवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे ममं वा ममिं वा अन्नं वा अन्निं वा हिंसिंसु वा हिंसइ वा हिंसिस्सइ वा तं दंडं तसथावरेहिं पाणेहिं सयमेव णिसिरति अण्णेणवि णिसिरावेति अन्नंपि णिसिरंतं समणुजाणइ हिंसादंडे, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, तच्चे दंडसमादाणे हिंसादंडवत्तिएत्ति आहिए ॥ सूत्रम् १९ ॥

अथापरं तृतीयं दण्डसमादानं हिंसादण्डप्रत्ययिकमाख्यायते, तद्यथानाम कश्चित् 'पुरुषः' पुरुषकारं वहन् स्वतो मरणभीरुतया वा मामसौ घातयिष्यतीत्येवं मत्वा कंसवद्देवकीसुतान् भावतो जघान मदीयं वा पितरमन्यं वा मामकं–ममीकारोपेतं परशुरामवत्कार्तवीर्यं जघानान्यं वा कञ्चनायं सर्पसिंहादिर्व्यापादयिष्यतीति मत्वा सर्पादिकं व्यापादयति अन्यदीयस्य वा कस्यचिद्विद्विष्यप्यादेरयमुपद्रवकारीतिकृत्वा तत्र दण्डं निसृजति, तदेवमयं मां मदीयमन्यदीयं वा हिंसितवान् हिनस्ति हिंसिष्यतीत्येवं संभावितेत्रसे स्थावरे वा 'तं दण्डं' प्राणव्यपरोपणलक्षणं स्वयमेव निसृजति अन्येन निसर्जयति निसृजन्तं वाऽन्यं समनुजानीते । इत्येतत्तृतीयं दण्डसमादानं हिंसादण्डप्रत्ययिकमाख्यातमिति ॥

अहावरे चउत्थे दंडसमादाणे अकस्मात् दण्डवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे कच्छंसि वा जाव वणविदुग्गंसि वा मियवत्तिए मियसंकप्पे मियपणिहाणे मियवहाए गंता एए मियत्तिकाउं अन्नयरस्स मियस्स वहाए उसुं आयामेत्ता णं णिसिरेज्जा, स मियं वहिस्सामित्तिकट्टु तित्तिरं वा वट्टगं वा चडगं वा लावगं वा कवोयगं वा कविं वा कविंजलं वा विंधित्ता भवइ, इह खलु से अन्नस्स अट्ठाए अण्णं फुसति अकम्हादंडे ॥ से जहाणामए केइ पुरिसे सालीणि वा वीहीणि वा कोद्दवाणि वा कंगूणि वा परगाणि वा रालाणि वा णिलिज्जमाणे अन्नयरस्स तणस्स वहाए सत्थं णिसिरेज्जा, से सामगं तणगं कुमुदुगं वीहीऊसियं कलेसुयं तणं छिंदिस्सामित्तिकट्टु सालिं वा वीहिं वा कोद्दवं वा कंगुं वा परगं वा रालयं वा छिंदित्ता भवइ, इति खलु से अन्नस्स अट्ठाए अन्नं फुसति अकम्हादंडे, एवं खलु तस्स तप्पत्तियं सावज्जं आहिज्जइ, चउत्थे दंडसमादाणे अकम्हादंडवत्तिए आहिए ॥ सूत्रम् २० ॥

अथापरं चतुर्थं दण्डसमादानमकस्माद्दण्डप्रत्ययिकमाख्यायते, इह चाकस्मादित्ययं शब्दो मगधदेशे सर्वेणाप्यागोपालाङ्गनादिना संस्कृत एवोच्चार्यत इति तदिहापि तथाभूत एवोच्चरित इति । तद्यथा नाम कश्चित्पुरुषो लुब्धकादिकः कच्छे वा यावद्वनदुर्गे वा गत्वा मृगैः–हरिणैराटव्यपशुभिर्वृत्तिः—वर्त्तनं यस्य स मृगवृत्तिकः, स चैवंभूतो मृगेषु संकल्पो यस्यासौ मृगसंकल्पः, एतदेव दर्शयति—मृगेषु प्रणिधानम्–अन्तःकरणवृत्तिर्यस्य स मृगप्रणिधानः—क मृगान्द्रक्ष्यामीत्येतदध्यवसायी सन् मृगवधार्थं कच्छादिषु गन्ता भवति, तत्र च गतः सन् दृष्ट्वा मृगानेते मृगा इत्येवं कृत्वा तेषां मध्येऽन्यतरस्य मृगस्य वधार्थम् 'इषुं' शरं 'आयामेत्त'त्ति आयामेन समाकृष्य मृगमुद्दिश्य निसृजति, स चैवं संकल्पो भवति–यथाऽहं मृगं हनिष्यामीति इषुं क्षिप्तवान्, स च तेनेषुणा तित्तिरादिकं पक्षिविशेषं व्यापादयिता भवति, तदेवं खल्वसावन्यस्यार्थाय निक्षिप्तो दण्डो यदाऽन्यं 'स्पृशति' घातयति

सोऽकस्माद्दण्ड इत्युच्यते ॥ अधुना वनस्पतिमुद्दिश्याकस्माद्दण्डमाह–'से जहे' त्यादि, तद्यथा नाम कश्चित्पुरुषः कृषीवलादिः शाल्यादेः–धान्यजातस्य 'श्यामादिकं' तृणजातमपनयन् धान्यशुद्धिं कुर्वाणः सन्नन्यतरस्य तृणजातस्यापनयनार्थं 'शस्त्रं' दात्रादिकं निसृजेत्, स च श्यामादिकं तृणं छेत्स्यामीतिकृताऽकस्माच्छालिं वा यावत् रालकं वा छिन्द्याद्रक्षणीयस्यैवासावकस्माच्छेत्ता भवति, इत्येवमन्यस्यार्थाय–अन्यकृतेऽन्यं वा 'स्पृशति' छिनत्ति, यदिवा 'स्पृशती' त्यनेनापि परितापं करोतीति दर्शयति, तदेवं खलु 'तस्य' तत्कर्तुः 'तत्प्रत्ययिकम्' अकस्माद्दण्डनिमित्तं 'सावद्य' मिति पापम् 'आधीयते' संबध्यते, तदेतच्चतुर्थं दण्डसमादानमकस्माद्दण्डप्रत्ययिकमाख्यातमिति ॥

अहावरे पंचमे दंडसमादाणे दिट्ठिविपरियासियादंडवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिस माईहिं वा पिईहिं वा भाईहिं वा भगिणीहिं वा भज्जाहिं वा पुत्तेहिं वा धूयाहिं वा सुण्हाहिं वा सद्धिं संवसमाणे मित्तं अमित्तमेव मन्नमाणे मित्ते हयपुव्वे भवइ दिट्ठिविपरियासियादंडे ॥ से जहाणामए केइ पुरिसे गामघायंसि वा णगरघायंसि वा खेड० कव्वड० मडंबघायंसि वा दोणमुहघायंसि वा पट्टणघायंसि वा आसमघायंसि वा सन्निवेसघायंसि वा निग्गमघायंसि वा रायहाणिघायंसि वा अतेणं तेणमिति मन्नमाणे अतेणे हयपुव्वे भवइ दिट्ठिविपरियासियादंडे, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, पंचमे दंडसमादाणे दिट्ठिविपरियासियादंडवत्तिएत्ति आहिए ॥ सूत्रम् २१ ॥

अथापरं पञ्चमं दण्डसमादानं दृष्टिविपर्यासदण्डप्रत्ययिकमित्याख्यायते, तद्यथा नाम कश्चित्पुरुषः–चारभटादिको मातृपितृभ्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगिनीभार्यापुत्रदुहितृस्नुषादिभिः सार्धं '(सं)वसन्' तिष्ठन् ज्ञातिपालनकृते मित्रमेव दृष्टिविपर्यासादमित्रोऽयमित्येवं मन्यमानो 'हन्यात्' व्यापादयेत् तेन च दृष्टिविपर्यासवता मित्रमेव हतपूर्वं भवतीति अतो दृष्टिविपर्यासदण्डोऽयम् ॥ पुनरप्यन्यथा तमेवाह—'से जहे' त्यादि, तद्यथा नाम कश्चित्पुरुषः पुरुषकारमुद्वहन् ग्रामघातादिके विभ्रमे भ्रान्तचेता दृष्टिविपर्यासादचौरमेव चौरोऽयमित्येवं मन्यमानो व्यापादयेत्, तदेवं 'तेन' भ्रान्तमनसा विभ्रमाकुलेनाचौर एव हतपूर्वो भवति, सोऽयं दृष्टिविपर्यासदण्डः, तदेवं खलु 'तस्य' दृष्टिविपर्यासवत् तत्प्रत्ययिकं सावद्यं कर्माधीयते । तदेवं पञ्चमं दण्डसमादानं दृष्टिविपर्यासप्रत्ययिकमाख्यातमिति ॥

अहावरे छट्ठे किरियट्ठाणे मोसावत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे आयहेउं वा णाइहेउं वा अगारहेउं वा परिवारहेउं वा सयमेव मुसं वयति अण्णेणवि मुसं वाएइ मुसं वयंतंपि अण्णं समणुजाणइ, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, छट्ठे किरियट्ठाणे मोसावत्तिएत्ति आहिए ॥ सूत्रम् २२ ॥

अथापरं षष्ठं क्रियास्थानं मृषावादप्रत्ययिकमाख्यायते, तत्र च पूर्वोक्तानां पञ्चानां क्रियास्थानानां सत्यपि क्रियास्थानत्वे प्रायशः परोपघातो यावतीतिकृत्वा दण्डसमादानसंज्ञा कृता, षष्ठादिषु च बाहुल्येन न परव्यापादनं भवतीत्यतः क्रियास्थानमित्येषा संज्ञोच्यते, तद्यथा नाम कश्चित्पुरुषः स्वपक्षावेशादाग्रहादात्मनिमित्तं यावत्परिवारनिमित्तं वा सद्भूतार्थनिह्नवरूपमसद्भूतोद्भावनस्वभावं वा स्वयमेव मृषावादं वदति, तद्यथा—नाहं मदीयो वा कश्चिच्चौरः, स च चौरमपि सद्भूतमप्यर्थमपलपति, तथा परमचौरं चौरमिति वदति, तथाऽन्येन मृषावादं भाषयति, तथाऽन्यांश्च मृषावादं वदतः समनुजानीते । तदेवं खलु तस्य

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३१०॥

योगत्रिककरणत्रिकेण मृषावादं वदतस्तत्प्रत्ययिकं सावद्यं कर्म 'आधीयते' संबध्यते, तदेतत्षष्ठं क्रियास्थानं मृषावादप्रत्ययिकमाख्यातमिति ॥

२ क्रियास्थानाध्य० मृषावादाध्यात्मिकदण्डाः

अहावरे सत्तमे किरियट्ठाणे अदिन्नादाणवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे आयहेउं वा जाव परिवारहेउं वा सयमेव अदिन्नं आदियइ अन्नेणवि अदिन्नं आदियावेति अदिन्नं आदियंतं अन्नं समणुजाणइ, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, सत्तमे किरियट्ठाणे अदिन्नादाणवत्तिएत्ति आहिए ॥ सूत्रम् २३ ॥

अथापरं सप्तमं क्रियास्थानमदत्तादानप्रत्ययिकमाख्यायते, एतदपि प्राग्वन्नेयं, तद्यथा नाम कश्चित्पुरुष आत्मनिमित्तं यावत्परिवारनिमित्तं परद्रव्यमदत्तमेव गृह्णीयादपरं च ग्राहयेद्गृह्णन्तमप्यपरं समनुजानीयादित्येवं तस्यादत्तादानप्रत्ययिकं कर्म संबध्यते । इति सप्तमं क्रियास्थानमाख्यातमिति ॥

अहावरे अट्ठमे किरियट्ठाणे अज्झत्थवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे णत्थि णं केइ किंचि विसंवादेति सयमेव हीणे दीणे दुट्ठे दुम्मणे ओहयमणसंकप्पे चिंतासोगसागरसंपविट्ठे करतलपल्हत्थमुहे अट्टज्झाणोवगए भूमिगयदिट्ठिए झियाइ, तस्स णं अज्झत्थया आसंसइया चत्तारि ठाणा एवमाहिज्जइ (ज्झंति), तं०—कोहे माणे माया लोहे, अज्झत्थमेव कोहमाणमायालोहे, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, अट्ठमे किरियट्ठाणे अज्झत्थवत्तिएत्ति आहिए ॥ सूत्रम् २४ ॥

॥३१०॥

अथापरमष्टमं क्रियास्थानमाध्यात्मिकमिति—अन्तःकरणोद्भवमाख्यायते, तद्यथा नाम कश्चित्पुरुषश्चिन्तोत्प्रेक्षाप्रधानः, तस्य च नास्ति कश्चिद्विसंवादयिता—न तस्य कश्चिद्विसंवादेन परिभावेन वाऽसद्भूतोद्भावनेन वा चित्तदुःखमुत्पादयति, तथाप्यसौ स्वयमेव वर्णापसदवद्दीनो दुर्गतवद्दीनो दुश्चित्ततया दुष्टो दुर्मनास्तथोपहतोऽस्वस्थतया मनःसंकल्पो यस्य स तथा, तथा चिन्तैव शोक इति वा (स एव) सागरः चिन्ताशोकसागरश्चिन्ताप्रधानो वा शोकश्चिन्ताशोकः स एव सागरः तत्र प्रविष्टः चिन्ताशोकसागरप्रविष्टः । तथाभूतश्च यदवस्थो भवति तदर्शयति—करतले पर्यस्तं मुखं यस्य स तथाऽहर्निशं भवति, तथाऽऽर्तध्यानोपगतोऽपगतसद्विवेकतया धर्मध्यानादूरवर्ती निर्निमित्तमेव द्वन्द्वोपहतवद्ध्यायति । तस्यैवं चिन्ताशोकसागरावगाढस्य सत आध्यात्मिकानि—अन्तःकरणोद्भवानि मनःसंश्रितान्यसंशयितानि वा—निःसंशयानि चत्वारि वक्ष्यमाणानि स्थानानि भवन्ति, तानि चैवमाख्यायन्ते, तद्यथा क्रोधस्थानं मानस्थानं मायास्थानं लोभस्थानमिति । ते चावश्यं क्रोधमानमायालोभा आत्मनोऽधि भवन्त्या(न्तीत्या)ध्यात्मिकाः, एभिरेव सद्भिर्दुष्टं मनो भवति । तदेवं तस्य दुर्मनसः क्रोधमानमायालोभवत एवमेवोपहतमनःसंकल्पस्य 'तत्प्रत्ययिकम्' अध्यात्मनिमित्तं सावद्यं कर्म 'आधीयते' संबध्यते । तदेवमष्टममेतक्रियास्थानमाध्यात्मिकाख्यमाख्यातमिति ॥

अहावरे णवमे किरियट्ठाणे माणवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे जातिमएण वा कुलमएण वा बलमएण वा रूवमएण वा तवमएण वा सुयमएण वा लाभमएण वा इस्सरियमएण वा पन्नामएण वा अन्नतरेण वा मयट्ठाणेणं मत्ते समाणे परं हीलेति निंदेति खिंसति गरहति परिभवइ अवमण्णेति, इत्तरिए अयं, अहमंसि पुण विसिट्ठजाइकुलबलाइगुणोववेए, एवं अप्पाणं समुक्कसे, देहच्चुए कम्मवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिए अवसे पयाइ, तंजहा–गब्भाओ गब्भं ४ जम्माओ जम्मं माराओ मारं णरगाओ णरगं चंडे थद्धे चवले माणियावि भवइ, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, णवमे किरियाठाणे माणवत्तिएत्ति आहिए ॥ सूत्रम् २५ ॥

अथापरं नवमं क्रियास्थानं मानप्रत्ययिकमाख्यायते, तद्यथा नाम कश्चित्पुरुषो जात्यादिगुणोपेतः सन् जातिकुलबलरूपतपःश्रुतलाभैश्वर्यप्रज्ञामदाख्यैरष्टभिर्मदस्थानैरन्यतरेण वा मत्तः परमवमत्य हीलयति तथा निन्दति जुगुप्सते गर्हति परिभवति, एतानि चैकार्थिकानि कथञ्चिद्भेदं वोत्पेक्ष्य व्याख्येयानीति । यथा परिभवति तथा दर्शयति—इतरोऽयं जघन्यो हीनजातिकः तथा मत्तैः कुलबलरूपादिभिर्दूरमपकृष्टः सर्वजनावगीतोऽयमिति । अहं पुनर्विशिष्टजातिकुलबलादिगुणोपेतः, एवमात्मानं समुत्कर्षयेदिति । साम्प्रतं मानोत्कर्षविपाकमाह–'देहाओ' इत्यादि, तदेवं जात्यादिमदोन्मत्तः सन्निहैव लोके गर्हितो भवति, अत्र च जात्यादिपदद्वयादिसंयोगा द्रष्टव्याः, ते चैवं भवन्ति–जातिमदः कस्यचिन्न कुलमदः, अपरस्य कुलमदो न जातिमदः, परस्योभयम्, अपरस्यानुभयमित्येवं पदत्रयेणाष्टौ चतुर्भिः षोडशेत्यादि यावदष्टभिः पदैः षट्पञ्चाशदधिकं शतद्वयमिति, सर्वत्र मदाभावरूपश्चरमभङ्गः शुद्ध इति । परलोकेऽपि च मानी दुःखमाग्भवतीत्यनेन प्रदर्श्यते–स्वायुषः क्षये देहाच्युतो भवान्तरं गच्छन् शुभाशुभकर्मेतीयः कर्म-

१ लाभैश्वर्यैश्चवात् योगशास्त्रे 'जातिलाभे'सूत्र न प्रज्ञामदः पृथक् प्रज्ञामदस्तु च जातिकुलेश्वर्यादौ नैश्वर्यमद इति प्रसिद्धपुरोधेनान्यतरानिर्वचनाद्वाष्टभिरिति । २ -चित्तुमाह प्र० । ३ पञ्चम्यन्तस्यासरो रूपम् । ४ अजम्मं, ५ वक्ष्यमाणः तदेवमित्याहितः शुद्ध इति पर्यन्तः पाठोऽत्रस्य आभाति । परलोकेऽपीति वाक्यं च नवतीत्यस्याग्रे ·

परायत्तत्वादवशः–परतन्त्रः प्रयाति, तद्यथा–गर्भाद्गर्भं पञ्चेन्द्रियापेक्षं तथा गर्भाद्गर्भं विकलेन्द्रियेषूत्पद्यमानः पुनरगर्भाद्गर्भमेवमगर्भाद्गर्भम् एतच्च नरककल्पगर्भदुःखापेक्षायाममिहितम्, उत्पद्यमानदुःखापेक्षया त्विदमभिधीयते–जन्मन एकस्मादपरं जन्मान्तरं व्रजति, तथा मरणं मारस्तस्मान्मारान्तरं व्रजति, तथा नरकदेश्यात्—श्वपाकादिवासाद्वज्रप्रमादिकं नरकान्तरं व्रजति, यदिवा नरकात्सीमन्तकादिकादुद्वृत्य सिंहमत्स्यादाद्युत्पद्य पुनरपि तीव्रतरं नरकान्तरं व्रजति । तदेवं नटवद्रङ्गभूमौ संसारचक्रवाले स्त्रीपुंनपुंसकादीनि बहून्यवस्थान्तराण्यनुभवति । तदेवं मानी परपरिभवे सति चण्डो रौद्रो भवति परस्यापकरोति, तदभावे ह्यात्मानं व्यापादयति । तथा स्तब्धश्चपलो यत्किञ्चनकारी मानी सन् सर्वोऽप्येतदवस्थो भवतीति । तदेवं 'तत्प्रत्ययिकं' माननिमित्तं सावद्यं कर्म 'आधीयते' संबध्यते । नवममेतत्क्रियास्थानमाख्यातमिति ॥

अहावरे दसमे किरियट्ठाणे मित्तदोसवत्तिएत्ति आहिज्जइ, से जहाणामए केइ पुरिसे माईहिं वा पितीहिं वा भाईहिं वा भइणीहिं वा भज्जाहिं वा धूयाहिं वा पुत्तेहिं वा सुण्हाहिं वा सद्धिं संवसमाणे तेसिं अन्नयरंसि अहालहुगंसि अवराहंसि सयमेव गरुयं दंडं निवत्तेति, तंजहा–सीओदगवियडंसि वा कायं उच्छोलित्ता भवति, उसिणोदगवियडेण वा कायं ओसिंचित्ता भवति, अगणिकाएणं कायं उवडहित्ता भवति, ओल्लेण वा वेत्तेण वा णेत्तेण वा तयाए वा [कण्णेण वा छियाए वा] लयाए वा (अन्नयरेण वा दवरएण) पासाइं उद्दालित्ता भवति, दंडेण वा अट्ठीण वा मुट्ठीण वा लेट्ठुण वा कवालेण वा कायं आउट्टित्ता भवति, तहप्पगारे पुरिसजाए संवसमाणे दुम्मणा भवति, पवसमाणे सुमणा भवति, तहप्पगारे पुरिसजाए दंडपासी दंडगुरुए

दंडपुरक्कडे अहिए इहंसि लोगंसि अहिए परंसि लोगंसि संजलणे कोहणे पिट्ठिमंसि यावि भवति, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जति, दसमे किरियट्ठाणे मित्तदोसवत्तिएत्ति आहिए ॥ सूत्रम् २६ ॥

अथापरं दशमं क्रियास्थानं मित्रद्वेषप्रत्ययिकमाख्यायते, तद्यथा नाम कश्चित्पुरुषः प्रभुकल्पो मातापितृसुहृत्स्वजनादिभिः सार्धं परिवसंस्तेषां च मातापित्रादीनामन्यतमेनानाभोगतया यथाकथंचिल्लघुतमेऽप्यपराधे वाचिके दुर्वचनादिके तथा कायिके हस्तपादादिके संघट्टनरूपे कृते सति स्वयमेव—आत्मना क्रोधाध्मातो गुरुतरं 'दण्डं' दुःखोत्पादकं 'निर्वर्तयति' करोति, तद्यथा–शीतोदके 'विकटे' प्रभूते शीते वा शिशिरादौ 'तस्य' अपराधकर्तुः कायमधो बोलयिता भवति, तथोष्णोदकविकटेन 'कायं' शरीरमपसिञ्चयिता भवति, तत्र विकटग्रहणादुष्णतैलेन काञ्जिकादिना वा कायमुपतापयिता भवति, तथा अग्निकायेन उल्मुकेन तप्तायसा वा कायमुपदाहयिता भवति, तथा योत्रेण वा वेत्रेण वा नेत्रेण वा 'त्वचा वा' सनादिकया लतया वाऽन्यतमेन वा दवरकेण ताडनतः 'तस्य' अपराधकर्तुः 'शरीरपार्श्वाणि उद्दालयितुं' ति चर्माणि लुम्पयितुं भवति, तथा दण्डादिना कायमुपताडयिता भवतीति । तदेवमल्पापराधिन्यपि महाक्रोधदण्डवति तथाप्रकारे पुरुषजाते एकत्र वसति सति तत्सहवासिनो मातापित्रादयो दुर्मनसस्तदनिष्टाशङ्कया भवन्ति, तस्मिंश्च 'प्रवसति' देशान्तरे गच्छति गते वा तत्सहवासिनः सुमनसो भवन्ति । तथाप्रकारश्च पुरुषजातोऽल्पेऽप्यपराधे महान्तं दण्डं कल्पयतीति, एतदेव दर्शयितुमाह—दण्डस्य पार्श्वे दण्डपार्श्वं तद्विद्यते यस्यासौ दण्डपार्श्वी स्वल्पतया स्तोकापराधेऽपि कुप्यति दण्डं च पातयति । तमप्यतिगुरुमिति दर्शयितुमाह–दण्डेन गुरुको दण्डगुरुको यस्य च दण्डो महान् भवति असौ दण्डेन गुरुर्भवति, तथा दण्डः पुरस्कृतः सदा पुरस्कृतदण्ड इत्यर्थः, स चैवंभूतः स्वस्य परेषां च 'अस्मिन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोके' अस्मिन्नेव जन्मनि अहितः प्राणिनामहितदण्डापादनात्, तथा परस्मिन्नपि जन्मन्यसावहितः, तच्छीलतया चासौ यस्य कस्यचिदेव येन केनचिदेव निमित्तेन क्षणे क्षणे संज्वलयतीति संज्वलनः, स चात्यन्तक्रोधनो वधबन्धच्छविच्छेदादिषु शीघ्रमेव क्रियासु प्रवर्तते, तदभावेऽप्युत्कटद्वेषतया मर्मोद्घट्टनतः पृष्ठिमांसमपि खादेत् तत्तदसौ ब्रूयात् येनासावपि परः संज्वलेत् ज्वलितश्चान्येषामपकुर्यात्, तदेवं खलु तस्य महादण्डप्रवर्तयितुस्तद्दण्डप्रत्ययिकं सावद्यं कर्माऽऽधीयते। तदेतद्दशमं क्रियास्थानं मित्रद्वेषप्रत्ययिकमाख्यातमिति। अपरे पुनरष्टमं क्रियास्थानमात्मदोषप्रत्ययिकमाचक्षते, नवमं तु परदोषप्रत्ययिकं, दशमं पुनः प्राणवृत्तिकं क्रियास्थानमिति ॥

अहावरे एक्कारसमे किरियट्ठाणे मायावत्तिएत्ति आहिज्जइ, जे इमे भवंति–गूढायारा तमोकसिया उलूगपत्तलहुया पव्वयगुरुया ते आयरियावि संता अणारियाओ भासाओवि पउञ्जंति, अन्नहासंतं अप्पाणं अन्नहा मन्नंति, अन्नं पुट्ठा अन्नं वागरंति, अन्नं आइक्खियव्वं अन्नं आइक्खंति ॥ से जहाणामए केइ पुरिसे अंतोसल्ले तं सल्लं णो सयं णिहरति णो अन्नेण णिहरावेति णो पडिविद्धंसेइ, एवमेव निण्हवेइ, अविउट्टमाणे अंतोअंतो रियइ, एवमेव माई मायं कट्टु णो आलोएइ णो पडिक्कमेइ णो णिंदइ णो गरहइ णो विउट्टइ णो विसोहेइ णो अकरणाए अब्भुट्टेइ णो अहारिहं तवोकम्मं पायच्छित्तं पडिवज्जइ, माई अस्सिं लोए पच्चायाइ माइ परंसि लोए (पुणो पुणो) पच्चायाइ निंदइ गरहइ पसंसइ णिच्चरइ ण नियट्टइ णिस्सि-

सूत्रकृ. ५१

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३१३॥

रियं दंडं छाएति, माई असमाहडसुहलेस्से यावि भवइ, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, एक्कारसमे किरियट्ठाणे मायावत्तिएत्ति आहिए ॥ सूत्रं २७

२ क्रियास्थानाध्य० मायाप्रत्ययिकं ११

अथापरमेकादशं क्रियास्थानमाख्यायते, तद्यथा–ये केचनामी भवन्ति पुरुषाः, किंविशिष्टाः ?–गूढ आचारो येषां ते गूढाचाराः–गलकर्तकग्रन्थिच्छेदादयः, ते च नानाविधैरुपायैर्विश्रम्भमुत्पाद्य पश्चादपकुर्वन्ति, प्रद्योतादेरभयकुमारादिवत्। ते च मायाशीलत्वेनाप्रकाशचारिणः, तमसि कर्तुं शीलं येषां ते तमस्किकाश्चिणस्त एव च कापिकाः, पराविज्ञाताः क्रियाः कुर्वन्तीत्यर्थः। ते च स्वचेष्टयैवोल्लूकपत्रवल्गुवयः, कौशिकपिच्छवल्गुधीयांसोऽपि पर्वतवद्गुरुमात्मानं मन्यन्ते, यदिवाऽकार्यप्रवृत्तेः पर्वतवन्नो स्तम्भयितुं शक्यन्ते, ते चाऽऽर्यदेशोत्पन्ना अपि सन्तः शाठ्यादात्मप्रच्छादनार्थमपरभयोत्पादनार्थं चानार्यभाषाः प्रयुञ्जते, परव्यामोहार्थं स्वमतिपरिकल्पितभाषाभिरपराविदिताभिर्भाषन्ते, तथाऽन्यथाव्यवस्थितमात्मानम् अन्यथा–साध्वाकारेण मन्यन्ते व्यवस्थापयन्ति च, तथाऽन्यत्पृष्टा मातृस्थानतोऽन्यदाचक्षते, यथाऽऽम्रान् पृष्टाः केदारकानाचक्षते, वादकाले वा कश्चिन्नाथ (क्याय) वादितया व्याकरणे प्रवीणस्त(णं त)कैमार्गमवतारयति, यथा वा 'शरदि वाजपेयेन यजेत'त्यस्य वाक्यस्यार्थं पृष्टस्तदर्थानभिज्ञः कालातिपातार्थं शरत्कालं व्यावर्णयति, तथाऽन्यस्मिन्नर्थे कथयितव्येऽन्यमेवार्थमाचक्षते॥ तेषां च सर्वार्थविसंवादिनां कपटप्रपञ्चचतुराणां विपाकोद्भवनाय[1] दृष्टान्तं दर्शयितुमाह–'से जहे' त्यादि, तत् यथा नाम कश्चित्पुरुषः संग्रामादपक्रान्तोऽन्तः—मध्ये शल्यं—तोमरादिकं यस्य सोऽन्तःशल्यः, स च शल्यघट्टनवेदनाभीरुतया तच्छल्यं न स्वतो 'निहरति' अपनयति–उद्धरति नाप्यन्येनोद्धारयति, नापि तच्छल्यं वैद्योपदेशेनौषधोपयोगादिभिरुपायैः 'प्रतिध्वंसयति' विनाशयति, अन्येन केनचित्पृष्टो वाऽपृष्टो वा तच्छल्यं निह्नवयोजनमेव 'निह्नुते' अपलपति, तेन च शल्येनासावन्तर्वर्तिना 'अविउट्टमाणे'त्ति पीड्यमानः 'अंतो अंतो'त्ति मध्ये मध्ये पीड्यमानोऽपि 'रीयते' व्रजति, तत्कृतां वेदनामधिसहमानः क्रियासु प्रवर्तत इत्यर्थः। साम्प्रतं दार्ष्टान्तिकमाह 'एवमेव'त्यादि, यथाऽसौ सशल्यो दुःखभाग्भवति एवमेवासौ 'मायी' मायाशल्यवान् यत्कृतमकार्यं तन्मायया निगूहनन् मायां कृत्वा न तां मायामन्यस्मै 'आलोचयति' कथयति, नापि तस्मात् स्थानात्प्रतिक्रामति—न ततो निवर्तते, नाप्यात्मसाक्षिकं तन्मायाशल्यं निन्दति, तद्यथा–धिङ् मां यदहमेवंभूतमकार्यं कर्मोदयात्तत् कृतवान्, तथा नापि परसाक्षिकं गर्हते आलोचनार्हसमीपे गतो नापि च जुगुप्सते, तथा 'नो विउट्टति' नापि तन्मायाख्यं शल्यमकार्यकरणात्मकं विविधम् अनेकप्रकारं त्रोटयति–अपनयति, यद्यस्यापराधस्य प्रायश्चित्तं तत्तेन पुनस्तदकरणतया (न) निर्वर्तयतीत्यर्थः, नापि तन्मद्यादिकमकार्यं सेवित्वाऽऽलोचनार्हीयात्मानं निवेद्य तदकार्याकरणतयाऽभ्युत्तिष्ठते, प्रायश्चित्तं प्रतिपद्यापि नोद्युक्तविहारी भवतीत्यर्थः, तथा नापि गुर्वादिभिरभिधीयमानोऽपि 'यथाऽर्हम्' अकार्यनिर्वहणयोग्यं प्रायः चित्तं शोधयतीति प्रायश्चित्तं–तपःकर्म विशिष्टं चान्द्रायणाद्यात्मकं 'प्रतिपद्यते' अभ्युपगच्छति। तदेवं मायया सत्कार्यप्रच्छादकोऽस्मिन्नेव लोके मायावीत्येवं सर्वकार्येष्वेवाविश्रम्भणत्वेन 'प्रत्यायाति' प्रत्ययार्तिं याति, तथाभूतश्च सर्वस्यापि अविश्वासो भवति, तथा चोक्तम्–"मायाशीलः पुरुषः" (यद्यपि न करोति किञ्चिदपराधं। सर्वस्याविश्वासो भवति तथाप्यात्मदोषहतः ।१।) इत्यादि, तथाऽतिमायाविलादसौ परस्मिन् लोके जन्मान्तरावासी सर्वाधमेषु यातनास्थानेषु नरकतिर्यगादिषु 'पौनःपुन्येन प्रत्यायाति' भूयोभूयस्तेष्वेवावघट्टयटीयन्यायेन प्रत्यागच्छतीति। तथा नानाविधैरुपन्यासैर्वञ्चयित्वा परं निन्दति जुगुप्सते, तद्यथा—अयमज्ञः पशुकल्पो नानेन किमपि प्रयोजनमिति, एवं परं निन्दयित्वाऽऽत्मानं प्रशं-

॥३१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयति, तद्यथा–असावपि मया वञ्चित इत्येवमात्मप्रशंसया तुष्यति, तथा चोक्तम्–"येनापत्रपते साधुरसाधुस्तेन तुष्यती"ति। एवं चासौ लब्धप्रसरोऽधिकं निश्चयेन वा चरति–तथाविधानुष्ठायी भवतीति निश्चरति। तत्र च गृद्धः संस्तस्मान्मातुस्थानान्न निवर्तते, तथाऽसौ मायावलेपेन 'दण्डं' प्राण्युपमर्दकारिणं 'निसृज्य' पातयित्वा पश्चात् 'छादयति' अपलपति अन्यस्य वोपरि प्रक्षिपति, स च मायावी सर्वदा वञ्चनपरायणः संस्तन्मनाः सर्वानुष्ठानेष्वप्येवंभूतो भवति–असमाहृता–अनङ्गीकृता शोभना लेश्या येन स तथा आर्त्तध्यानोपहततयाऽसावशोभनलेश्य इत्यर्थः। तदेवमपगतधर्मध्यानोऽसमाहितोऽशुद्धलेश्यश्चापि भवति। तदेवं खलु तस्य 'तत्प्रत्ययिकं' मायाशल्यप्रत्ययिकं सावद्यं कर्माऽऽधीयते। तदेतदेकादशं क्रियास्थानं मायाप्रत्ययिकं व्याख्यातं ॥ एतानि चार्थदण्डादीनि एकादश क्रियास्थानानि सामान्येनासंयतानां भवन्ति, इदं तु द्वादशं क्रियास्थानं पाखण्डिकानुद्दिश्याभिधीयते—

अहावरे बारसमे किरियट्ठाणे लोभवत्तिएत्ति आहिज्जइ, जे इमे भवंति, तंजहा–आरन्निया आवसहिया गामंतिया कण्हुईरहस्सिया णो बहुसंजया णो बहुपडिविरया सव्वपाणभूतजीवसत्तेहिं ते अप्पणो सच्चामोसाइं एवं विउंजंति, अहं ण हंतव्वो अन्ने हंतव्वा अहं ण अज्जावेयव्वो अन्ने अज्जावेयव्वा अहं ण परिघेतव्वो अन्ने परिघेतव्वा अहं ण परितावेयव्वो अन्ने परितावेयव्वा अहं ण उद्दवेयव्वो अन्ने उद्दवेयव्वा, एवमेव ते इत्थिकामेहिं मुच्छिया गिद्धा गढिया गरहिया अज्झोववन्ना जाव वासाइं चउपंचमाइं छद्दसमाइं अप्पयरो वा भुज्जयरो वा भुंजित्तु भोगभोगाइं कालमासे कालं किच्चा अन्नयरेसु आसुरिएसु किब्बिसिएसु ठाणेसु उववत्तारो भवंति, ततो विप्पमुच्चमाणे भुज्जो भुज्जो एलमूयत्ताए तमूयत्ताए जाइमूयत्ताए पच्चायंति, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, दुवालसमे किरियट्ठाणे लोभवत्तिएत्ति आहिए ॥ इच्चेयाइं दुवालस किरियट्ठाणाइं दुविएणं समणेण वा माहणेण वा सम्मं सुपरिजाणिअव्वाइं भवंति ॥ सूत्रं २८ ॥

॥३१४॥

एकादशात् क्रियास्थानादनन्तरमथापरं द्वादशं क्रियास्थानं लोभप्रत्ययिकमाख्यायते, तद्यथा—य इमे वक्ष्यमाणा अरण्ये वसन्तीत्यारण्यकाः, ते च कन्दमूलफलाहाराः सन्तः केचन वृक्षमूले वसन्ति, केचनावसथेषु–उटजाकारेषु गृहेषु, तथा अपरे ग्रामादिकमुपजीवन्तो ग्रामस्यान्ते–समीपे वसन्तीति ग्रामान्तिकाः, तथा 'कचित्' कार्ये मण्डलप्रवेशादिके रहस्यं येषां ते कचिद्रहसिकाः, ते च 'न बहुसंयता' न सर्वसावद्यानुष्ठानेभ्यो निवृत्ताः, एतदुक्तं भवति–न बाहुल्येन त्रसेषु दण्डसमारम्भं विदधति, एकेन्द्रियोपजीविनस्तद्विगमेन तापसादयो भवन्तीति, तथा 'न बहुविरता' न सर्वेष्वपि प्राणातिपातविरमणादिषु व्रतेषु वर्तन्ते, किंतु ? द्रव्यतः कतिपयव्रतवर्तिनो न भावतो, मनागपि तत्कारणस्य सम्यग्दर्शनस्याभावादित्यभिप्रायः, इत्येतदाविर्भावयितुमाह–'सव्वपाणे'त्यादि, ते ह्यारण्यकादयः सर्वप्राणिभूतजीवसत्त्वेभ्य आत्मना–स्वतः अविरताः–तदुपमर्दकारम्भादविरता इत्यर्थः। तथा ते पाषण्डिका आत्मना–स्वतो बहूनि सत्या(त्य)मृषाभूतानि वाक्यानि 'एवं' वक्ष्यमाणनीत्या विशेषेण 'युञ्जन्ति' प्रयुञ्जन्ति ब्रुवत इत्यर्थः, यदिवा सत्यान्यपि तानि प्राण्युपमर्दकत्वेन मृषाभूतानि सत्या(त्य)मृषाणि, एवं ते प्रयुञ्जन्तीति दर्शयति–तद्यथा–अहं ब्राह्मणत्वाद्दण्डादिभिर्न हन्तव्योऽन्ये तु शूद्रत्वाद्धन्तव्याः, तथाहि तद्वाक्यं–'शूद्रं व्यापाद्य प्राणायामं जपेत्, किंचिद्वा दद्यात्, तथा क्षुद्रसत्त्वानामनस्थिकानां शकटभरमपि व्यापाद्य ब्राह्मणं भोजये(दि)'त्यादि, अपरं चाहं वर्णोत्तमत्वात् नाज्ञापयितव्यो ऽन्ये तु मत्तोऽधमाः समाज्ञापयितव्याः, तथा नाहं परितापयितव्योऽन्ये तु परितापयितव्याः, तथाऽहं वेतनादिना कर्मकरणाय न

ग्राह्योऽन्ये तु शूद्रा ग्राह्या इति, किं बहुनोक्तेन ?, नाहमुपद्रावयितव्यो–जीवितादपरोपयितव्योऽन्ये तु अपरोपयितव्या इति। तदेवं तेषां परपीडोपदेशनतोऽतिमूढतयाऽसंबद्धप्रलापिनामज्ञानावृतानामात्ममरीणां विषमदृष्टीनां न प्राणातिपातविरतिरूपं व्रतमस्ति, अस्य चोपलक्षणार्थत्वात् मृषावादादत्तादानविरमणाभावोऽप्यायोज्यः। अधुना त्वनादिभवाभ्यासादुत्सृजत्वेन प्राधान्यात् सूत्रेणैवाऽऽह–'एवमेवे'त्यादि, 'एवमेव' पूर्वोक्तेनैव कारणेनातिमूढत्वादिना परमार्थमजानानास्ते तीर्थिकाः स्त्रीप्रधानाः कामाः स्त्रीकामाः यदिवा स्त्रीषु कामेषु च–शब्दादिषु मूर्छिता गृद्धा ग्रथिता अध्युपपन्नाः, । अत्र चात्यादरख्यापनार्थं प्रभूतपर्यायग्रहणम्, एतच्च स्त्रीषु शब्दादिषु च प्रवर्तनं प्रायः प्राणिनां प्रधानं संसारकारणं, तथा चोक्तम्–"मूलमेयमहर्म्मस्स, महादोससमुस्सय[2]' मित्यादि, इह च स्त्रीसङ्गासक्तस्यावश्यंभाविनी शब्दादिविषयासक्तिरित्यतः स्त्रीकामग्रहणं, तत्र चाऽऽसक्ता यावन्तं कालमासते तत्सूत्रेणैव दर्शयति–यावद्वर्षाणि चतुष्पञ्चषड्दशकानि, अयं च मध्यमकालो गृहीतः, एतावत्कालोपादानं च साभिप्रायकं, प्रायस्तीर्थिका अतिक्रान्तवयस एव प्रव्रजन्ति, तेषां चैतावानेव कालः संभाव्यते, यदिवा मध्यग्रहणात्तत ऊर्ध्वमधश्च गृह्यते इति दर्शयति–तस्माद्योपात्तादल्पतरः प्रभूततरो वापि कालो भवति। तत्र च ते त्यक्त्वापि गृहवासं 'भुक्त्वा भोगभोगान्' इति स्त्रीभोगे सति अवश्यं शब्दादयो भोगाः भोगभोगास्तान् भुक्त्वा, ते च किल वयं प्रव्रजिता इति, न च भोगेभ्यो विनिवृत्ताः, यतो मिथ्यादृष्टितयाऽज्ञानान्धत्वात्सम्यग्विरतिपरिणाम [ग्रन्थाग्रं ९५००] रहिताः, ते चैवंभूतपरिणामाः स्वायुषः क्षये कालमासे कालं कृत्वा विकृष्टतपसोऽपि सन्तोऽन्यतरेष्वासुरिकेषु किल्बिषिकेषु स्थानेषूत्पादयितारो भवन्ति, ते ह्यज्ञानतपसा मृता

॥३१५॥

१ मूले व्यत्ययेन । २ मूलमेतदधर्मस्य महादोषसमुच्छ्रयं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि किल्बिषिकेषु स्थानेषूत्पत्स्यन्ते, तस्मादपि स्थानादायुषः क्षयाद्विप्रमुच्यमानाः—च्युताः किल्बिषबहुलास्तत्कर्मशेषेणैलवन्मूका एलमूकात्प्रद्वावेनोत्पद्यन्ते, किल्बिषिकस्थानाच्युतः सन्ननन्तरभवे वा मानुषत्वमवाप्य यद्यैलको मूकोऽव्यक्तवाक् भवति एवमसावप्यव्यक्तवाक् समुत्पद्यत इति । तथा 'तमूयत्ताए'त्ति तमस्त्वेन—अत्यन्तान्धतमस्त्वेन जात्यन्धतया अत्यन्ताज्ञानाभूततया वा तथा जातिमूकत्वेनापगतत्वाच्च इह प्रत्यागच्छन्तीति । तदेवंभूतं खलु तेषां तीर्थिकानां परमार्थतः सावद्यानुष्ठानादनिवृत्तानामाधाकर्मादिप्रवृत्तेस्तत्प्रायोग्यभोगभाजां 'तत्प्रत्ययिकं' लोभप्रत्ययिकं सावद्यं कर्माधीयते । तदेतल्लोभप्रत्ययिकं द्वादशं क्रियास्थानमाख्यातमिति ॥ साम्प्रतमेतेषां द्वादशानामप्युपसंहारार्थमाह—'इतिः' उपप्रदर्शने 'एतानि' अर्थदण्डादीनि लोभप्रत्ययिकक्रियास्थानपर्यवसानानि द्वादशापि क्रियास्थानानि कर्मग्रन्थिद्रावणाद्द्रवः—संयमः स विद्यते यस्यासौ द्रविको मुक्तिगमनयोग्यतया वा द्रव्यभूतः श्रमणः—साधुः, तमेव विशिनष्टि—मा वधीरित्येवं प्रवृत्तिर्यस्यासौ माहनस्तेनैव एतद्गुणविशिष्टेनैतानि सम्यग्यथावस्थितवस्तुस्वरूपनिरूपणतो मिथ्यादर्शनाश्रितानि संसारकारणानीतिकृत्वा ज्ञपरिज्ञया ज्ञातव्यानि प्रत्याख्यानपरिज्ञया परिहर्तव्यानि भवन्तीति ॥

अहावरे तेरसमे किरियट्ठाणे इरियावहिएत्ति आहिज्जइ, इह खलु अत्तत्ताए संवुडस्स अणगारस्स ईरियासमियस्स भासासमियस्स एसणासमियस्स आयाणभंडमत्तणिक्खेवणासमियस्स उच्चारपासवणखेलसिंघाणजल्लपारिट्ठावणियासमियस्स मणसमियस्स वयसमियस्स कायसमियस्स मणगुत्तस्स वयगुत्तस्स कायगुत्तस्स गुत्तिंदियस्स गुत्तबंभयारिस्स आउत्तं गच्छमाणस्स आउत्तं चिट्ठमाणस्स आउत्तं णिसीयमाणस्स आउत्तं तुयट्टमाणस्स आउत्तं भुंजमाणस्स आउत्तं भासमाणस्स आउत्तं वत्थं पडिग्गहं कंबलं पा-

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३१६॥

२ क्रियास्थानाध्ये० १२ ईर्यापथिकक्रिया

यपुंछणं गिण्हमाणस्स वा णिक्खिवमाणस्स वा जाव चक्खुपम्हणिवायमवि अत्थि विमाया सुहुमा किरिया ईरियावहिया नाम कज्जइ, सा पढमसमए बद्धा पुट्ठा बितीयसमए वेइया तइयसमए णिज्जिण्णा सा बद्धा पुट्ठा उदीरिया वेइया णिज्जिण्णा सेयकाले अकम्मे यावि भवति, एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ, तेरसमे किरियट्ठाणे ईरियावहिएत्ति आहिज्जइ ॥ से बेमि जे य अतीता जे य पडुप्पन्ना जे य आगमिस्सा अरिहंता भगवंता सव्वे ते एयाइं चेव तेरस किरियट्ठाणाइं भासिंसु वा भासंति वा भासिस्संति वा पन्नविंसु वा पन्नविंति वा पन्नविस्संति वा, एवं चेव तेरसमं किरियट्ठाणं सेविंसु वा सेवंति वा सेविस्संति वा ॥ सूत्रं २९ ॥

अथापरं त्रयोदशं क्रियास्थानमीर्यापथिकं नामाख्यायते, ईरणमीर्या तस्यास्तया वा पन्था ईर्यापथस्तत्र भवमीर्यापथिकम्, एतच्च शब्दव्युत्पत्तिनिमित्तं, प्रवृत्तिनिमित्तं त्विदं—सर्वत्रोपयुक्तस्याकषायस्य समीक्षितमनोवाक्कायक्रियस्य या क्रिया तया यत्कर्म तदीर्यापथिकं, सैव वा क्रिया ईर्यापथिकेत्युच्यते । सा कस्य भवति ? किंभूता वा ? कीदृक्कर्मफला वा ? इत्येतद्दर्शयितुमाह—'इह खलु' इत्यादि, 'इह' जगति प्रवचने संयमे वा वर्तमानस्य खलुशब्दोऽवधारणेऽलङ्कारे वा आत्मनो भाव आत्मत्वं तदर्थमात्मत्वार्थं संवृतस्य मनोवाक्कायैः, परमार्थतः एवंभूतस्यैवात्मभावोऽपरस्य त्वसंवृतस्यात्मत्वमेव नास्ति, सद्भूतात्मकार्याकरणात्, तदेव- ॥३१६॥

---

१ °पथः स विद्यते यस्य साधोरप्रमत्तस्य तदीर्या० (स ईर्यापथिकः तस्येदमीर्या०) प्र० प्रकृत्यपेक्षया साध्येतत ।

मात्मार्थं संवृतस्यानगारस्येर्यापथिकादिभिः पञ्चभिः समितिभिर्मनोवाक्कायैः समितस्य तथा तिसृभिर्गुप्तिभिर्गुप्तस्य, पुनर्गुप्तिग्रहणमेताभिरेव गुप्तिभिर्गुप्तो भवतीत्यस्यार्थस्याविर्भावनायात्यादरख्यापनार्थं वेति । तथा गुप्तेन्द्रियस्य नवब्रह्मचर्यगुप्युपेतब्रह्मचारिणश्च सतः, तथोपयुक्तं गच्छतस्तिष्ठतो निषीदतस्त्वक्वर्तनां कुर्वाणस्य तथोपयुक्तमेव वस्त्रं पतद्ग्रहं कम्बलं पादपुञ्छनकं वा गृह्णतो निक्षिपतो वा यावच्चक्षुःपक्ष्मनिपातमप्युपयुक्तं कुर्वतः सतोऽत्यन्तमुपयुक्तस्यापि अस्ति—विद्यते विविधा मात्रा विमात्रा तदेवंविधा सूक्ष्माक्षिपक्ष्मसंचलनरूपादिर्यापथिका नाम क्रिया केवलिनोऽपि क्रियते, तथाहि—सयोगी जीवो न शक्नोति क्षणमप्येकं निश्चलः स्थातुम्, अग्निना तप्यमानोदकवत्कार्मणशरीरानुगतः सदा परिवर्तयन्नेवास्ते, तथा चोक्तम्—"केवली णं भंते ! अस्सिं समयंसि जेसु आगासपएसेसु" इत्यादि । तदेवं केवलिनोऽपि सूक्ष्मगात्रसंचारा भवन्ति, इह च कारणे कार्योपचारात्तया क्रियया यद्बध्यते कर्म तस्य च कर्मणो या अवस्थास्ताः क्रियाः, ता एव दर्शयितुमाह—'सा पढमसमये' इत्यादि, याऽसावकषायिणः क्रिया तया यद्बध्यते कर्म तत्प्रथमसमय एव बद्धं स्पृष्टं चेतिकृत्वा तत्क्रियैव बद्धस्पृष्टेत्युक्ता, तथा द्वितीयसमये वेदितेत्यनुभूता तृतीयसमये निर्जीर्णा, एतदुक्तं भवति—कर्म योगनिमित्तं बध्यते, तत्स्थितिश्च कषायायत्ता, तदभावाच्च न तस्य सांपरायिकस्येव स्थितिः, किंतु योगसद्भावाद्बध्यमानमेव स्पृष्टतां—संश्लेषं याति, द्वितीयसमये त्वनुभूयते, तच्च प्रकृतितः सातावेदनीयं स्थितितो द्विसमयस्थितिकमनुभावतः शुभानुभावं अनुत्तरोपपातिकदेवसुखातिशायि प्रदेशतो बहुप्रदेशमस्थिरबन्धं बहुव्ययं च, तदेवं सेर्यापथिका क्रिया

---

१ केवली भदन्त ! अस्मिन् समये येष्वाकाशप्रदेशेषु । २ बध्यमानस्य बद्धत्वादायस्य गणना तृतीयस्य तु निर्जीर्यमाणस्य निर्जीर्णत्वान्न स्थितौ गणनेति उक्तमित्थं, भाष्ये तत्त्वार्थस्य तु एकसमयस्थितिकमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमसमये बद्धस्पृष्टा द्वितीयसमये उदिता वेदिता निर्जीर्णा भवति, 'सेयकाले'त्ति आगामिनि तृतीयसमये तत्कर्मापेक्षयाऽकर्मतापि च भवति, एवं तावद्वीतरागस्यैर्यापथिकं कर्म 'आधीयते' संबध्यते । तदेतत्रयोदशं क्रियास्थानं व्याख्यातं । ये पुनस्तेभ्योऽन्ये प्राणिनस्तेषां सांपरायिको बन्धः, ते तु यानि प्रागुक्तानीर्यापथवर्ज्यानि द्वादश क्रियास्थानानि तेषु वर्तन्ते तेषां च तद्वर्तिनामसुमतां मिथ्यात्वाविरतिप्रमादकषाययोगनिमित्तः सांपरायिको बन्धो भवति, यत्र च प्रमादस्तत्र कषाया [योगाश्च] नियमाद्भवन्ति, कषायिणश्च योगाः, योगिनस्तेते भाज्याः, तत्र प्रमादकषायप्रत्ययिको बन्धोऽनेकप्रकारस्थितिः, तद्रहितस्तु केवलयोगप्रत्ययिको द्विसमयस्थितिरेवेर्यापथप्रत्ययिक इति स्थितम् ॥ एतानि त्रयोदश क्रियास्थानानि न भगवद्वर्धमानस्वामिनैवोक्तानि अपि तु सर्वैरपीत्येतदर्शयितुमाह—'से बेमी'त्यादि, सोऽहं ब्रवीमीति, यत्प्रागुक्तं तद्वा ब्रवीमीति, तद्यथा—ये तेऽतिक्रान्ता ऋषभादयस्तीर्थकृतो ये च वर्तमानाः क्षेत्रान्तरे सीमन्धरस्वामिप्रभृतयो ये चागामिनः पद्मनाभादयोऽर्हन्तो भगवन्तः सर्वेऽपि ते पूर्वोक्तान्येतानि त्रयोदश क्रियास्थानान्यभाषिषुः भाषन्ते भाषिष्यन्ते च । तथा तत्स्वरूपतत्तद्विपाकतश्च प्ररूपितवन्तः प्ररूपयन्ति प्ररूपयिष्यन्ति च । तथैतदेव त्रयोदशं क्रियास्थानं सेवितवन्तः सेवन्ते सेविष्यन्ते च, यथा हि जम्बूद्वीपे सूर्यद्वयं तुल्यप्रकाशं भवति यथा वा सदृशोपकरणाः प्रदीपास्तुल्यप्रकाशा भवन्ति एवं तीर्थकृतोऽपि निरावरणत्वात् कालत्रयवर्तिनोऽपि तुल्योपदेशा भवन्ति ॥ साम्प्रतं त्रयोदशसु क्रियास्थानेषु यन्नामभिहितं पापस्थानं तद्विभणिषुराह—

॥३१७॥

अदुत्तरं च णं पुरिसविजयं विभंगमाइक्खिस्सामि, इह खलु णाणापण्णाणं णाणाछंदाणं णाणासीलाणं

१ •रः स्थितिति प्र० । २ 'मिथ्या न भाषामि विशालनेत्रे !' इति वत्परस्मै ।

णाणादिट्ठीणं णाणारुईणं णाणारंभाणं णाणाज्झवसाणसंजुत्ताणं णाणाविहपावसुयज्झयणं एवं भवइ, तंजहा—भोमं उप्पायं सुविणं अंतलिक्खं अंगं सरं लक्खणं वंजणं इत्थिलक्खणं पुरिसलक्खणं हयलक्खणं गयलक्खणं गोणलक्खणं मिंढलक्खणं कुक्कुडलक्खणं तित्तिरलक्खणं वट्टगलक्खणं लावयलक्खणं चक्कलक्खणं छत्तलक्खणं चम्मलक्खणं दंडलक्खणं असिलक्खणं मणिलक्खणं कागिणिलक्खणं सुभगाकरं दुब्भगाकरं गब्भाकरं मोहणकरं आहवणिं पागसासणिं दवहोमं खत्तियविज्जं चंदचरियं सूरचरियं सुक्कचरियं बहस्सइचरियं उक्कापायं दिसादाहं णियघायं वायसपरिमंडलं पंसुवुट्ठिं केसवुट्ठिं मंसवुट्ठिं रुहिरवुट्ठिं वेतालिं अद्धवेतालिं ओसोवणिं तालुग्घाडणिं सोवागिं सोवरिं दामिलिं कालिंगिं गोरिं गंधारिं ओवतणिं उप्पयणिं जंभणिं थंभणिं लेसणिं आमयकरणिं विसल्लकरणिं पक्कमणिं अंतद्धाणिं आयमणिं, एवमाइआओ विज्जाओ अन्नस्स हेउं पउंजंति पाणस्स हेउं पउंजंति वत्थस्स हेउं पउंजंति लेणस्स हेउं पउंजंति सयणस्स हेउं पउंजंति, अन्नेसिं वा विरूवरूवाणं कामभोगाण हेउं पउंजंति, तिरिच्छं ते विज्जं सेवेंति, ते अणारिया विप्पडिवन्ना कालमासे कालं किच्चा अन्नयराइं आसुरियाइं किब्बिसियाइं ठाणाइं उववत्तारो भवंति, ततोऽवि विप्पमुच्चमाणा भुज्जो एलमूयत्ताए तमअंधयाए पच्चायंति ॥ सूत्रं ३० ॥

अस्मात्रयोदशक्रियास्थानप्रतिपादनादुत्तरं यदत्र न प्रतिपादितं तदधुनोत्तरभूतेनानेन सूत्रसंदर्भेण प्रतिपाद्यते, यथाऽऽचारे प्रथमश्रुतस्कन्धे यन्नामभिहितं तदुत्तरभूताभिश्चूलिकाभिः प्रतिपाद्यते, तथा चिकित्साशास्त्रे मूलसंहितायां श्लोकस्थाननिदानशारीरचि-

कित्सितकल्पसंज्ञकायां यन्नामभिहितं तदुत्तरेऽभिधीयते, एवमन्यत्रापि छंदश्चिन्त्यादावुत्तरसद्भावोऽवगन्तव्यः, तदिहापि पूर्वेण यन्नामभिहितं तदनेनोत्तरग्रन्थेन प्रतिपाद्यत इति, चः समुच्चये, णमिति वाक्यालङ्कारे, पुरुषा विचीयन्ते—मृग्यन्ते विज्ञानद्वारेणान्वेष्यन्ते येन स पुरुषविचयः पुरुषविजयो वा—केषाञ्चिदल्पसत्त्वानां तेन ज्ञानलवेनाविधिप्रयुक्तेनानर्थानुबन्धिना विजयादिति, स च विभङ्गवद्—अवधिविषर्ययवद्विभङ्गो—ज्ञानविशेषः पुरुषविचयश्चासौ विभङ्गश्च पुरुषविचयविभङ्गस्तमेवंभूतं ज्ञानविशेषमाख्यास्यामि—प्रतिपादयिष्यामि, यादृशानां चासौ भवति तांल्लेशतः प्रतिपादयितुमाह—'इह खलु' इत्यादि, 'इह' जगति मनुष्यक्षेत्रे प्रवचने वा नानाप्रकारा—विचित्रक्षयोपशमात् प्रज्ञायतेऽनयेति प्रज्ञा सा चित्रा येषां ते नानाप्रज्ञाः, तया चाल्पाल्पतरात्यतमया चिन्त्यमानाः पुरुषाः षट्स्थानपतिता भवन्ति, तथा छन्दः—अभिप्रायः स नाना येषां ते तथा तेषां, नानाशीलानां तथा नानारूपा दृष्टिः—अन्तःकरणप्रवृत्तिर्येषां ते तथा तेषामिति, तेषां च त्रीणि शतानि त्रिषष्ट्यधिकानि प्रमाणमवगन्तव्यं, तथा नाना रुचिर्येषां ते नानारुचयः, तथाहि—आहारविहारशयनासनाच्छादनाभरणयानवाहनगीतवादित्रादिषु मध्येऽन्यस्यान्यस्मिन्नन्या रुचिर्भवति तेषां नानारुचीनामिति, तथा नानारम्भाणां—कृषिपाशुपाल्यवणिज्यशिल्पकर्मसेवादिष्वन्यतमारम्भेणेति, तथा नानाध्यवसायसंयुतानां शुभाऽशुभाध्यवसायभाजामिहलोकमात्रप्रतिबद्धानां परलोकनिष्पिपासानां विषयतृषितानामिदं नानाविधं पापश्रुताध्ययनं भवति, तद्यथा—भूमौ भवं भौमं—निर्घातभूकम्पादिकं, तथोत्पातं—कपिहसितादिकं, तथा स्वप्नं—गजवृषभसिंहादिकं, तथाऽन्तरिक्षम्—अभ्रोघादिकं, तथा अङ्गं भवमाङ्गम्—अक्षिबाहुस्फुरणादिकं, तथा स्वरलक्षणं—काकस्वरगम्भीरस्वरादिकं, तथा लक्षणं—यवमत्स्यपद्मशङ्खचक्रश्रीवत्सादिकं व्यञ्जनं—तिलकमषादिकं, तथा स्त्रीलक्षणं रक्तकरचरणादिकं, एवं पुरुषादीनां

॥३१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काकिणीरत्नपर्यन्तानां लक्षणप्रतिपादकशास्त्रपरिज्ञानमवगन्तव्यम् ॥ तथा मन्त्रविशेषरूपा विद्याः, तद्यथा–दुर्भगमपि सुभगमाकरोति सुभगाकरां, तथा सुभगमपि दुर्भगमाकरोति दुर्भगाकरां, तथा गर्भकरां–गर्भाधानविधायिनीं, तथा मोहो–व्यामोहो वेदोदयो वा तत्करणशीलामाथर्वणीमाथर्वणाभिधानां सद्योऽनर्थकारिणीं विद्यामधीयते, तथा पाकशासनीम् [आथर्वणीम्] इन्द्रजालसंज्ञिकां तथा नानाविधैर्द्रव्यैः–कणवीरपुष्पादिभिर्मधुघृतादिभिर्वोच्चाटनादिकैः कार्यैर्होमो–हवनं यस्यां सा द्रव्यहवना तां, तथा क्षत्रियाणां विद्या धनुर्वेदादिकाऽपरा वा या स्वगोत्रक्रमेणायाता तामधीत्य प्रयुञ्जते, तथा नानाप्रकारं ज्योतिषमधीत्य व्यापारयतीति दर्शयति–'चंदचरिय' मित्यादि, चन्द्रस्य–ग्रहपतेश्चरितं चन्द्रचरितमिति, तत्र वर्णसंस्थानप्रमाणप्रभानक्षत्रयोगराहुग्रहादिकं, सूर्यचरितं त्विदं—सूर्यस्य मण्डलपरिमाणराशिपरिभोगोद्योतावकाशराहुपरागादिकं, तथा शुक्रचारो–वीथीत्रयचारादिकः, तथा बृहस्पतिचारः शुभाशुभफलप्रदः संवत्सरराशिपरिभोगादिकश्च, तथोल्कापाता दिग्दाहाश्च वायव्यादिषु मण्डलेषु भवन्तः शस्त्राग्निक्षुत्पीडाविधायिनो भवन्ति, तथा मृगा—हरिणशृगालादय आरण्यास्तेषां दर्शनस्पर्शं ग्रामनगरप्रवेशादौ सति शुभाशुभं यत्र चिन्त्यते तन्मृगचक्रं, तथा वायसादीनां पक्षिणां यत्र स्थानदिक्स्वराश्रयणात् शुभाशुभफलं चिन्त्यते तद्वायसपरिमण्डलं, तथा पांसुकेशमांसरुधिरादिवृष्टयोऽनिष्टफलदा यत्र शास्त्रे चिन्त्यन्ते तत्तदभिधानमेव भवति, तथा विद्या नानाप्रकाराः क्षुद्रकर्मकारिण्यः, ताश्चेमाः–वैताली नाम विद्या नियताक्षरप्रतिबद्धा, सा च किल कतिभिर्जपैर्दण्डमुत्थापयति, तथाऽर्धवैताली तमेवोपशमयति, तथाऽप(व)स्वापिनी तालोद्घाटनी श्वपाकी शाम्बरी तथाऽपरा द्राविडी कालिङ्गी गौरी गान्धारीवपतन्युत्पतनी जृम्भणी स्तम्भनी श्लेषणी आमयकरणी विशल्यकरणी प्रक्रामण्यन्तर्धानकरणीत्येवमादिका विद्या अधीयते, आसां चार्थः संज्ञातोऽवसेय इति,

सूत्रकृ. ५४

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३१९॥

नवरं शाम्बरीद्राविडीकालिङ्गयस्तद्देशोद्भवास्तद्भाषानिबद्धा वा चित्रफलाः, अवपतनी तु जघन् स्वत एव पतत्यन्यं वा पातयत्येवमुत्पतन्यपि द्रष्टव्या । तदेवमेवमादिका विद्या आदिग्रहणात्प्रज्ञप्त्यादयो गृह्यन्ते । एताश्च विद्याः पाषण्डिका अविदितपरमार्था गृहस्था वा स्वयूथ्या वा द्रव्यलिङ्गधारिणोऽन्नपानाद्यर्थं प्रयुञ्जन्ति, अन्येषां वा विरूपरूपाणाम्–उच्चावचानां शब्दादीनां कामभोगानां कृते प्रयुञ्जन्ति । सामान्येन विद्याऽऽसेवनमनिष्टकारीति दर्शयितुमाह–'तिरिच्छ'मित्यादि, तिरश्चीनाम्–अननुकूलां सदनुष्ठानप्रतिघातिकां ते अनार्या विप्रतिपन्ना विद्यां सेवन्ते, ते च बह्वपि क्षेत्रार्यो भाषार्यालयापि मिथ्यात्वोपहतबुद्धयोऽनार्यकर्मकारित्वादनार्या एव द्रष्टव्याः, ते च स्वायुषः क्षये कालमासे कालं कृत्वा यदि कथञ्चिद्देवलोकगामिनो भवन्ति ततोऽन्यतरेषु आसुरीयकेषु किल्बिषिकादिषु स्थानेषूत्पत्स्यन्ते, ततोऽपि विप्रमुक्ताः–च्युता यदि मनुष्येषूत्पद्यन्ते, तत्र च तत्कर्मशेषतयैडमूकत्वेनाव्यक्तभाषिणस्तमस्त्वेनान्धतया मूकतया वा प्रत्यागच्छन्ति, ततोऽपि नानाप्रकारेषु दासनास्थानेषु नरकतिर्यगादिषूत्पद्यन्ते ॥

साम्प्रतं गृहस्थानुद्दिश्याधर्मपक्षसेवनमुच्यते—

से एगइओ आयहेउं वा णायहेउं वा सयणहेउं वा अगारहेउं वा परिवारहेउं वा नायगं वा सहवासियं वा णिस्साए अदुवा अणुगामिए १ अदुवा उवचरए २ अदुवा पडिपहिए ३ अदुवा संधिछेदए ४ अदुवा गंठिछेदए ५ अदुवा उरब्भिए ६ अदुवा सोवरिए ७ अदुवा वागुरिए ८ अदुवा साउणिए ९ अदुवा मच्छिए १० अदुवा गोघायए ११ अदुवा गोवालए १२ अदुवा सोवणिए १३ अदुवा सोवणियंतिए १४ ॥ एगइओ आणुगामियभावं पडिसंधाय तमेव अणुगामियाणुगामियं हंता छेत्ता भेत्ता लुंपइत्ता विलुंपइत्ता उद्दवइत्ता आहारं आहारेति, इति से महया पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ से एगइओ उवचरयभावं पडिसंधाय तमेव उवचरियं हंता छेत्ता भेत्ता लुंपइत्ता विलुंपइत्ता उद्दवइत्ता आहारं आहारेति, इति से महया पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ से एगइओ पाडिपहियभावं पडिसंधाय तमेव पाडिपहे ठिच्चा हंता छेत्ता भेत्ता लुंपइत्ता विलुंपइत्ता उद्दवइत्ता आहारं आहारेति, इति से महया पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ से एगइओ संधिछेदगभावं पडिसंधाय तमेव संधिं छेत्ता भेत्ता जाव इति से महया पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ से एगइओ गंठिछेदगभावं पडिसंधाय तमेव गंठिं छेत्ता भेत्ता जाव इति से महया पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ से एगइओ उरब्भियभावं पडिसंधाय उरब्भं वा अण्णतरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ । एसो अभिलावो सव्वत्थ ॥ से एगइओ सोयरियभावं पडिसंधाय महिसं वा अण्णतरं वा तसं पाणं जाव उवक्खाइत्ता भवइ ॥ से एगइओ वागुरियभावं पडिसंधाय मियं वा अण्णतरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ साउणियभावं पडिसंधाय साउणिं वा अण्णतरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ मच्छियभावं पडिसंधाय मच्छं वा अण्णतरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ गोघायभावं पडिसंधाय तमेव गोणं वा अण्णयरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ गोवालभावं पडिसंधाय तमेव गोवालं वा परिजविय

२ क्रियास्थानाध्ये० अधर्मपक्षेऽनुगामुकत्वाद्याः

॥३१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिजविय हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ सोवणियभावं पडिसंधाय तमेव सुणगं वा अन्नयरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ सोवणियंतियभावं पडिसंधाय तमेव मणुस्सं वा अन्नयरं वा तसं पाणं हंता जाव आहारं आहारेति, इति मे महया पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ सूत्रं ३१ ॥

स एकः कदाचिन्निशितः साम्प्रतापेक्षी अपगतपरलोकाध्यवसायः कर्मपरतया भोगलिप्सुः संसारस्वभावानुवर्ती आत्मनिमित्तं वेत्येतान्यनुगामुकादीन्यन्यकर्तव्यहेतुभूतानि चतुर्दशासदनुष्ठानानि विधत्ते, तथा–ज्ञातयः–स्वजनास्तन्निमित्तं तथाऽगारनिमित्तं–गृहसंस्करणार्थं सामान्येन वा कुटुम्बार्थं परिवारनिमित्तं वा–दासीदासकर्मकरादिपरिकरकृते तथा ज्ञात एव ज्ञातकः–परिचितस्तमुद्दिश्य तथा स्वहवास्तिकं वा–प्रातिवेशिकं निश्रीकृत्यैतानि वक्ष्यमाणानि कुर्यादिति संबन्धः । तानि च दर्शयितुमाह–'अदुवे'–त्यादि, अथवेत्येवं वक्ष्यमाणापेक्षया पश्चान्तरोपलक्षणार्थः, गच्छन्तमनुगच्छतीत्यनुगामुकः, स चाकार्याध्यवसायेन विवक्षितस्थानकालाद्यपेक्षया विरूपकर्तव्यचिकीर्षुस्तं गच्छन्तमनुगच्छति, अथवा तस्यापकर्तव्यस्यापकारावसरापेक्ष्युपचरको भवति, अथवा तस्य प्रातिपथिको भवति–प्रतिपथं–संमुखीनमागच्छति, अथवाऽऽत्मस्वजनार्थं संधिच्छेदको भवति–चौर्यं प्रतिपद्यते, अथवोरभ्रैः–मेषैश्चरत्यौरभ्रिकः अथवा सौकरिको भवति, अथवा शकुनिभिः–पक्षिभिश्चरतीति शाकुनिकः अथवा वागुरया–मृगादिबन्धनरज्ज्वा चरति वागुरिकः, अथवा मत्स्यैश्चरति मात्स्यिकः, अथवा गोपालभावं प्रतिपद्यते, अथवा गोघातकः स्याद्, अथवा श्वभिश्चरति शौवनिकः श्वनां परिपालको भवतीत्यर्थः, अथवा 'सोवणियं'ति श्वभिः पापार्द्धिं कुर्वन्मृगादीनामन्तं करोतीत्यर्थः ॥

तदेवमेतानि चतुर्दशाप्युद्दिश्य प्रत्येकमादितः प्रभृति विवृणोति—तत्रैकः कश्चिदात्माद्यर्थं अपरस्य गन्तुर्ग्रामान्तरं किञ्चिद्व्यजातमवगम्य तदादित्सुस्तस्यैवानुगामुकभावं 'प्रतिसंधाय' सहगन्तृभावेनानुकूल्यं प्रतिपद्य विवक्षितवञ्चनावसरकालाद्यपेक्षी तमेव गच्छन्तमनुव्रजति, तमेव चाभ्युत्थानविनयादिभिरत्यन्तोपचारैरुपचर्यानुव्रज्य च विवक्षितमवसरं लब्ध्वा तस्यार्थं हन्ता दण्डादिभिः तथा छेत्ता खड्गादिना हस्तपादादेः तथा भेत्ता वज्रमुष्ट्यादिना तथा लुम्पयिता केशाकर्षणादिकदर्थनैः तथा विलुम्पयिता कशाप्रहारादिभिरत्यन्तदुःखोत्पादनेन तथा अपद्रावयिता जीविताद्व्यपरोपणतो भवतीत्येवमादिकं कृत्वाऽऽहारमाहारयत्यसौ, एतदुक्तं भवति–गलकर्तकः कश्चिदन्यस्य धनवतोऽनुगामुकभावं प्रतिपद्य तं बहुविधैरुपायैर्विश्रम्भे पातयित्वा भोगार्थी मोहान्धः साम्प्रतेक्षितया तस्य रिक्थवतोऽपकृत्याहारादिकां भोगक्रियां विधत्ते । इत्येवमसौ महद्भिः क्रूरैः कर्मभिः–अनुष्ठानैर्महापातकभूतैर्वा तीव्रानुभावैर्दीर्घस्थितिकैरात्मानमुपख्यापयिता भवति, तथाहि—अयमसौ महापापकारीत्येवमात्मानं लोके ख्यापयति, अष्टप्रकारैर्वा कर्मभिरात्मानं तथा बन्धयति यथा लोके तद्विपाकापादितेनावस्थाविशेषेण सता नारकतिर्यङ्नरामररूपतयाऽऽख्यात इति ॥ तदेवमेकः कश्चिदकर्तव्याभिसंधिना परस्य स्वापतेयवतस्तद्वञ्चनार्थमुपचरकभावं 'प्रतिसंधाय' प्रतिज्ञाय पश्चात्तं नानाविधैर्विनयोपायैरुपचरति, उपचर्य च विश्रम्भे पातयित्वा तद्द्रव्यार्थी तस्य हन्ता छेत्ता भेत्ता यावदपद्रावयिता भवतीत्येवमसावात्मानं 'महद्भिः' बृहद्भिः पापैः कर्मभिः उपाख्यापयिता भवतीति ॥ अथैकः कश्चित्प्रतिपथेन–अभिमुखेन चरतीति प्रातिपथिकस्तद्भावं प्रतिपद्यापरस्यार्थवतस्तदेव प्रातिपथिकत्वं कुर्वन् प्रतिपथे स्थित्वा तस्यार्थवतो विश्रम्भतो हन्ता छेत्ता यावदपद्रावयिता भवतीत्येवमसावात्मानं पापैः कर्मभिः ख्यापयतीति ॥ अथैकः कश्चिद्विरूपकर्मणा जीवितार्थी 'संधिच्छेदकभावं'

खत्रखननत्वं प्रतिपद्यानेनोपायेनात्मानमहं कर्तयिष्यामीत्येवं प्रतिज्ञां कृत्वा तमेव प्रतिपद्यते, ततोऽसौ संधिं छिन्दन्–खत्रं खनन् प्राणिनां (हन्ता) छेत्ता भेत्ता विलुम्पयिता भवतीति, एतच्च कृत्वाऽऽहारमाहारयतीति, एतच्चोपलक्षणमन्यांश्च कामभोगान् स्वतो भुञ्जेऽन्यदपि ज्ञातिगृहादिकं पालयतीत्येवमसौ महद्भिः पापैः कर्मभिरात्मानमुपख्यापयति ॥ अथैकः कश्चिदसदनुष्ठायी घुर्घुरादिना ग्रन्थिच्छेदकभावं प्रतिपद्य तमेवानुयाति, शेषं पूर्ववत् ॥ अथैकः कश्चिदधर्मकर्मवृत्तिः उरभ्रा–उरणकास्तैश्चरति यः स औरभ्रिकः, स च तदूर्णया तन्मांसादिना वाऽऽत्मानं वर्तयति, तदेवमसौ तद्भावं प्रतिपद्योरभ्रं वाऽन्यं वा त्रसं प्राणिनं स्वमांसपुष्ट्यर्थं व्यापादयति, तस्य वा हन्ता छेत्ता भेत्ता भवतीति शेषं पूर्ववत् ॥ अत्रान्तरे सौकरिकपदं, तच्च स्वबुद्ध्या व्याख्येयं, सौकरिकाः–श्वपचाश्चाण्डालाः खट्टिका इत्यर्थः ॥ अथैकः कश्चित् क्षुद्रसत्त्वो 'वागुरिकभावं' लुब्धकत्वं 'प्रतिसंधाय' प्रतिपद्य वागुरया 'मृगं' हरिणमन्यं वा त्रसं प्राणिनं शशादिकमात्मवृत्त्यर्थं स्वजनाद्यर्थं वा व्यापादयति, तस्य च हन्ता छेत्ता भेत्ता भवति, शेषं पूर्ववत् ॥ अथैकः कश्चिदधमोपायजीवी शकुना–लावकादयस्तैश्चरति शाकुनिकस्तद्भावं प्रतिसंधाय तन्मांसाद्यर्थी शकुनमन्यं वा त्रसं व्यापादयति, तस्य च हननादिकां क्रियां करोतीति, शेषं पूर्ववत् ॥ अथैकः कश्चिदधमाधमो मात्स्यिकभावं प्रतिपद्य मत्स्यं वाऽन्यं(वा)जलचरं प्राणिनं व्यापादयेत्, हननादिकाः वा क्रियाः कुर्यात्, शेषं सुगमम् ॥ अथैकः कश्चिद्गोपालकभावं प्रतिपद्य कस्याश्चिद्गोः कुपितः सन् तां गां 'परिविच्य' पृथक् कृत्वा तस्या हन्ता छेत्ता भेत्ता भूयो भूयो भवति, शेषं पूर्ववत् ॥ अथैकः कश्चित्क्रूरकर्मकारी गोघातकभावं प्रतिपद्य गामन्यतरं वा त्रसं प्राणिनं व्यापादयेत्, तस्य च हननादिकाः क्रियाः कुर्यादिति ॥ अथैकः कश्चिज्जघन्यकर्मकारी 'शौवनिकभावं प्रति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्य' सारमेयपादर्द्धिभावं प्रतिज्ञाय तमेव श्वानं तेन वा 'परं' मृगशूकरादिकं त्रसं प्राणिनं व्यापादयेत् तस्य च हननादिकाः क्रियाः कुर्यादिति ॥ अथैकः कश्चिदनार्यो निर्विवेकः 'सोवणियंतियभावं'ति श्वभिश्चरति शौवनिकः अन्तोऽस्यास्तीत्यन्तिको-ऽन्ते वा चरत्यान्तिकः पर्यन्तवासीत्यर्थः, शौवनिकश्चासावान्तिकश्च शौवनिकान्तिकः—क्रूरसारमेयपरिग्रहः प्रत्यन्तनिवासी च प्रत्यन्तनिवासिभिर्वा श्वभिश्चरतीति, तदसौ तद्भावं प्रतिसंधाय—दुष्टसारमेयपरिग्रहं प्रतिपद्य, मनुष्यं वा कञ्चन पथिकमभ्यागत-मन्यं वा मृगशूकरादिकं त्रसं प्राणिनं हन्ता भवति, अत्र च ताच्छीलिकस्तृन् लुट्प्रत्ययो वा द्रष्टव्यः. तृचि तु साध्याहारं प्रा-ग्वद्व्याख्येयं, तद्यथा—पुरुषं व्यापादयेत् तस्य च हन्ता छेत्ता इत्यादि, तृन्लुट्प्रत्ययौ प्रागपि योजनीयाविति । तदेवमसौ महा-क्रूरकर्मकारी महद्भिः कर्मभिरात्मानमुपख्यापयिता भवतीति ॥ उक्ताऽसदाजीवनोपायभूता वृत्तिः, इदानीं कचित्कुतश्चिन्नि-मित्तादभ्युपगमं दर्शयति—

से एगइओ परिसामज्झाओ उट्ठित्ता अहमेयं हणामित्तिकट्टु तित्तिरं वा वट्टगं वा लावगं वा कवोयगं वा कविंजलं वा अन्नयरं वा तसं पाणं हंता जाव उवक्खाइत्ता भवइ ॥ से एगइओ केणइ आयाणेणं विरुद्धे समाणे अदुवा खलदाणेणं अदुवा सुराथालएणं गाहावतीण वा गाहावइपुत्ताण वा सयमेव अग-णिकाएणं सस्साइं झामेइ अन्नेणवि अगणिकाएणं सस्साइं झामावेइ अगणिकाएणं सस्साइं झामंतंपि अन्नं समणुजाणइ इति से महया पावकम्मेहिं अत्ताणं उवक्खाइत्ता भवइ ॥ से एगइओ केणइ आयाणेणं विरुद्धे समाणे अदुवा खलदाणेणं अदुवा सुराथालएणं गाहावतीण वा गाहावइपुत्ताण वा

सूत्रकृताङ्गे २ श्रुतस्क-न्धे शीला-ङ्कीयावृत्तिः ॥३२२॥

उट्टाण वा गोणाण वा घोडगाण वा गद्दभाण वा सयमेव धूराओ कप्पेति अन्नेणवि कप्पावेति कप्पंतंपि अन्नं समणुजाणइ इति से महया जाव भवइ ॥ से एगइओ केणइ आयाणेणं विरुद्धे समाणे अदु-वा खलदाणेणं अदुवा सुराथालएणं गाहावतीण वा गाहावइपुत्ताण वा उट्टसालाओ वा गोणसालाओ वा घोडगसालाओ वा गद्दभसालाओ वा कंटकबोंदियाए पडिपेहित्ता सयमेव अगणिकाएणं झामेइ अन्ने-णवि झामावेइ झामंतंपि अन्नं समणुजाणइ इति से महया जाव भवइ ॥ से एगइओ केणइ आयाणेणं विरुद्धे समाणे अदुवा खलदाणेणं अदुवा सुराथालएणं गाहावतीण वा गाहावइपुत्ताण वा कुंडलं वा मणिं वा मोत्तियं वा सयमेव अवहरइ अन्नेणवि अवहरावइ अवहरंतंपि अन्नं समणुजाणइ इति से महया जाव भवइ ॥ से एगइओ केणइवि आदाणेणं विरुद्धे समाणे अदुवा खलदाणेणं अदुवा सुराथालएणं समणाण वा माहणाण वा छत्तगं वा दंडगं वा भंडगं वा मत्तगं वा लट्ठिं वा भिसिगं वा चेलगं वा चिलिमिलिगं वा चम्मयं वा छेयणगं वा चम्मकोसियं वा सयमेव अवहरति जाव समणुजा-णइ इति से महया जाव उवक्खाइत्ता भवइ ॥ से एगइओ णो वितिगिंछइ तं०—गाहावतीण वा गाहावइपुत्ताण वा सयमेव अगणिकाएणं ओसहीओ झामेइ जाव अन्नंपि झामंतं समणुजाणइ इति से महया जाव उवक्खाइत्ता भवति ॥ से एगइओ णो वितिगिंछइ, तं०—गाहावतीण वा गाहाव-इपुत्ताण वा उट्टाण वा गोणाण वा घोडगाण वा गद्दभाण वा सयमेव धूराओ कप्पेइ अन्नेणवि कप्पावे-

२ क्रिया-स्थानाध्य० नैमित्तिका-धमवृत्तिः ॥३२२॥

ति अन्नंपि कप्पंतं समणुजाणइ ॥ से एगइओ णो वितिगिंछइ तं०—गाहावतीण वा गाहावइपुत्ताण वा उट्टसालाओ वा जाव गद्दभसालाओ वा कंटकबोंदियाहिं पडिपेहित्ता सयमेव अगणिकाएणं झामेइ जाव समणुजाणइ ॥ से एगइओ णो वितिगिंछइ, तं०—गाहावतीण वा गाहावइपुत्ताण वा जाव मोत्तियं वा सयमेव अवहरइ जाव समणुजाणइ ॥ से एगइओ णो वितिगिंछइ तं०—समणाण वा माहणाण वा छत्तगं वा दंडगं वा जाव चम्मच्छेदणगं वा सयमेव अवहरइ जाव समणुजाणइ इति से महया जाव उवक्खाइत्ता भवइ ॥ से एगइओ समणं वा माहणं वा दिस्सा णाणाविहेहिं पावकम्मेहिं अत्ताणं उवक्खाइत्ता भवइ, अदुवा णं अच्छराए आफालित्ता भवइ, अदुवा णं फरुसं वदित्ता भवइ, कालेणवि से अणुपविट्ठस्स असणं वा पाणं वा जाव णो दवावेत्ता भवइ, जे इमे भ-वन्ति वोनमंता भारक्कंता अलसगा वसलगा किवणगा समणगा पवयंति ते इणमेव जीवितं धिक्कीवितं संपडिबूहेंति, नाइ ते परलोगस्स अट्ठाए किंचिवि सिलीसंति, ते दुक्खंति ते सोयंति ते जूरंति ते तिप्पं-ति ते पिट्टंति ते परितप्पंति ते दुक्खणजूरणसोयणतिप्पणपिट्टणपरितिप्पणवहबंधणपरिकिलेसाओ अप्प-डिविरया भवंति, ते महया आरंभेणं ते महया समारंभेणं ते महया आरंभसमारंभेणं विरूवरूवेहिं पावकम्मकिच्चेहिं उरालाइं माणुस्सगाइं भोगभोगाइं भुंजित्तारो भवंति, तंजहा—अन्नं अन्नकाले पाणं पाणकाले वत्थं वत्थकाले लेणं लेणकाले सयणं सयणकाले सपुव्वावरं च णं ण्हाए कयबलिकम्मे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कयकाउयमंगलपायच्छित्ते सिरसा ण्हाए कंठेमालाकडे आविद्धमणिसुवन्ने कप्पियमालामउली पडिबद्धसरीरे वग्घारियसोणिसुत्तगमल्लदामकलावे अहतवत्थपरिहिए चंदणोक्खित्तगायसरीरे महतिमहालियाए कूडागारसालाए महतिमहालयंसि सीहासणंसि इत्थीगुम्मसंपरिवुडे सद्दफरिसरसरूवगंधे जोइणा झियायमाणेणं महयाहयनट्टगीयवाइयतंतीतलतालतुडियघणमुइंगपडुप्पवाइयरवेणं उरालाइं माणुस्सगाइं भोगभोगाइं भुंजमाणे विहरइ, तस्स णं एगमवि आणवेमाणस्स जाव चत्तारि पंच जणा अवुत्ता चेव अब्भुट्ठंति, भणह देवाणुप्पिया ! किं करेमो ? किं आहरेमो ? किं उवणेमो ? किं आचिट्ठामो ! किं मे हियं इच्छियं ? किं मे आसगस्स सयइ ?, तमेव पासित्ता अणारिया एवं वयंति–देवे खलु अयं पुरिसे, देवसिणाए खलु अयं पुरिसे, देवजीवणिज्जे खलु अयं पुरिसे, अन्नेवि य णं उवजीवंति, तमेव पासित्ता आरिया वयंति–अभिक्कंतकूरकम्मे खलु अयं पुरिसे अतिधुन्ने अइयायरक्खे दाहिणगामिए नेरइए कण्हपक्खिए आगमिस्साणं दुल्लहबोहियाए यावि भविस्सइ ॥ इच्चेयस्स ठाणस्स उट्ठिया वेगे अभिगिज्झंति अणुट्ठिया वेगे अभिगिज्झंति अभिझंझाउरा अभिगिज्झंति, एस ठाणे अणारिए अकेवले अप्पडिपुन्ने अणेयाउए असंसुद्धे असल्लगत्तणे असिद्धिमग्गे अमुत्तिमग्गे अनिव्वाणमग्गे अणिज्जाणमग्गे असव्वदुक्खपहीणमग्गे एगंतमिच्छे असाहु एस खलु पढमस्स ठाणस्स अधम्मपक्खस्स विभंगे एवमाहिए ॥ सूत्रं ३२ ॥

अयं चात्र पूर्वस्माद्विशेषः–पूर्वत्र वृत्तिः प्रतिपादिता प्रच्छन्नं वा प्राणव्यपरोपणं कुर्यात्, इह तु कुतश्चिन्निमित्तात्साक्षाज्जनमध्ये प्राणिव्यापादनप्रतिज्ञां विधायोद्यच्छत इति दर्शयति । अथैकः कश्चिन्मांसादनेच्छया व्यसनेन क्रीडया कुपितो वा षर्षदो मध्यादभ्युत्थायैवंभूतां प्रतिज्ञां विदध्यात्–यथाऽहम् 'एनं' वक्ष्यमाणं प्राणिनं हनिष्यामीति प्रतिज्ञां कृत्वा पश्चात्तित्तिरादिकं हन्ता भेत्ता छेत्तेति तान्छीलिकस्तृन् तृदप्रत्ययो वा, तस्य वा हन्तेत्यादि, यावदात्मानं पापेन कर्मणा ख्यापयिता भवतीति ॥ इह चाधर्मपाक्षिकेष्वभिधीयमानेषु सर्वेऽपि प्राणिद्रोहकारिणः कथञ्चिदभिधातव्याः, तत्र पूर्वमनपराधकुद्धा अभिहिताः, साम्प्रतमपराधकुद्धान् दर्शयितुमाह—'से एगइओ' इत्यादि, अथैकः कश्चित्प्रकृत्या क्रोधनोऽसहिष्णुतया केनचिदादीयत इत्यादानं–शब्दादिकं कारणं तेन विरुद्धः समानः परस्मापकुर्यात्, शब्दादानेन तावत्केनचिदाकुष्टो निन्दितो वा वाचा विरुध्येत, रूपादानेन तु बीभत्सं कञ्चन दृष्ट्वाऽपशकुनाध्यवसायेन कुप्येत, गन्धरसादिकं त्वादानं सूत्रेणैव दर्शयितुमाह—अथवा खलस्य—कुथितादिविशिष्टस्य दानं खलस्य वाऽल्पधान्यादेर्दानं खलदानं तेन कुपितः, अथवा सुरायाः स्थालकं—कोशकादि तेन विवक्षितलाभाभावान् कुपितः गृहपत्यादेरेतत् कुर्यादित्याह—स्वयमेवाग्निकायेन–अग्निना तत्सस्थानि–खलकवर्तीनि शालिव्रीह्यादीनि 'ध्मापयेद्' दहेदन्येन वा दाहयेद्दहतो वाऽन्यान्समनुजानीयादित्येवमसौ महापापकर्मभिरात्मानमुपख्यापयिता भवतीति ॥ साम्प्रतमन्येन प्रकारेण पापोपादानमाह–अथैकः कश्चित्केनचित्तु खलदानादिनाऽऽदानेन गृहपत्यादेः कुपितस्तत्संबन्धिन उष्ट्रादेः स्वयमेव–आत्मना परश्वादिना 'घुरीया(रा)ओ'त्ति जङ्घाः खलका वा 'कल्पयति' छिनत्ति अन्येन वा छेदयति अन्यं वा छिन्दन्तं समनुजानीते, इत्येवमसावात्मानं पापेन कर्मणोपाख्यापयिता भवति ॥ किञ्च–अथैकः कश्चित्केनचिन्निमित्तेन गृहपत्यादेः कुपितस्तत्संबन्धिनामुष्ट्रादीनां शाला—गृहाणि 'कंटकबोंदियाए'त्ति कण्टकशाखाभिः 'प्रतिविधाय' पिहित्वा स्थगित्वा स्वयमेवाग्निना दहेत् । शेषं पूर्ववत् ॥ अपिच–अथैकः कश्चित्केनचिदादानेन कुपितो गृहपत्यादेः संबन्धि कुण्डलादिकं द्रव्यजातं स्वयमेवापहरेदवशिष्टं पूर्ववत् ॥ साम्प्रतं पाखण्डिकोपरि कोपेन यत्कुर्यात्तद्दर्शयितुमाह–अथैकः कश्चित्स्वदर्शनानुरागेण वा वादपराजितो वाऽन्येन वा केनचिन्निमित्तेन कुपितः सन्नेतत्कुर्यादित्याह–तद्यथा–श्रम्यन्तीति श्रमणास्तेषामन्येषामपि तथाभूतानां केनचिदादानेन कुपितः मन् दण्डकादिकमुपकरणजातमपहरेत् अन्येन वा हारयेदन्यं वा हरन्तं समनुजानीयात् इत्यादि पूर्ववत् ॥ एवं तावद्विरोधिनोऽभिहिताः, साम्प्रतमितरेऽभिधीयन्ते—अथैकः कश्चित् दृढमूढतया 'नो वितिगिंछइ'त्ति 'न विमर्शति' न मीमांसते, यथाऽनेन कृतेन ममामुष्यानिष्टफलं स्यात्, तथा मदीयमिदमनुष्ठानं पापानुबन्धीत्येवं न पर्यालोचयति, तद्भावापन्नश्च यत्किञ्चनकारितया इहपरलोकविरोधिनीः क्रियाः कुर्यात्, एतदेवोद्देशतो दर्शयति–तद्यथा–गृहपत्यादेर्निमित्तमेव–तत्कोपमन्तरेणैव स्वयमेवात्मनाऽग्निकायेन—अग्निनौषधीः–शालिव्रीह्यादिकाः ध्मापयेत्—दहेत् तथाऽन्येन दाहयेद्दहन्तं च समनुजानीयादित्यादि ॥ तथेहामुत्र च दोषापर्यालोचको निश्शिलतया गृहपत्यादिसंबन्धिनां कमलकादीनां जङ्घादीनवयवांश्छिन्द्यात् ॥ तथा शालां दहेत् ॥ तथा गृहपत्यादेः संबन्धि कुण्डलमणिमौक्तिकादिकमपहरेत् ॥ तथा श्रमणब्राह्मणादीनां दण्डादिकमुपकरणजातमपहरेदित्येवं प्राक्तना एवालापका आदानकुपितस्य येऽभिहितास्त एव तदभावेनाभिधातव्या इति ॥ साम्प्रतं विपर्यस्तदृष्टयः आगाढमिथ्यादृष्टयोऽभिधीयन्ते–अथैकः कश्चिदभिगृहीतमिथ्यादृष्टिरभद्रकः साधुप्रत्यनीकतया श्रमणादीनां निर्गच्छतां प्रविशतां वा स्वतश्च निर्गच्छन् प्रविशन् वा नानाविधैः पापोपादानभूतैः कर्मभिरात्मानमुपख्यापयिता भवतीति, एतदेव दर्शयति–'अथवे'त्यनन्तरापेक्षया पक्षान्तरोपन्यासार्थः, कचिन्मिथ्यादर्शने सति मिथ्यात्वोपहतद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्टितयाऽपशकुनोऽयमित्येवं मन्यमानः सन् दृष्टिपथादपसारयन् साधुमुद्दिश्यावज्ञया 'अप्सरायाः' चप्पुटिकायाः आस्फालयिता भवत्यथवा तच्चिरस्कारमापादयन् परुषं वचो ब्रूयात्, तद्यथा—ओदनमुण्ड ! निरर्थककायक्लेशपरायण दुर्बुद्धेऽपसराग्रतः, तदसौ भ्रुकुटिं विदध्यादसत्यं वा ब्रूयात्, तथा भिक्षाकालेनापि 'से' तस्य भिक्षोरन्येभ्यो भिक्षाचरेभ्योऽनु—पश्चात्प्रविष्टस्य सतोऽत्यन्तदुष्टतयाऽऽदेनों दापयिता भवति, अपरं च दानोद्यतं निषेधयति तत्प्रत्यनीकतया, एतच्च ब्रूते—ये इमे पाषण्डिका भवन्ति त एवंभूता भवन्तीत्याह—'वोण्ण'न्ति तृणकाष्ठहारादिकमधमकर्म तद् विद्यते येषां ते तद्वन्तः, तथा भारेण—कुटुम्बभारेण पोट्टलिकादिभारेण वाऽऽक्रान्ताः—पराभग्नाः सुखलिप्सवोऽलसाः—क्रमागतं कुटुम्बं पालयितुमसमर्थाः ते पाषण्डव्रतमाश्रयन्ति, तथा चोक्तम्—'गृहाश्रमपरो धर्मो, न भूतो न भविष्यति। पालयन्ति नरा धन्याः, क्लीबाः पाषण्डमाश्रिताः॥१॥' इत्यादि, तथा 'वसलग'त्ति वृषला—अधमाः शूद्रजातयस्त्रिवर्गप्रतिचारकाः, तथा 'कृपणाः' क्लीबा अकिञ्चित्कराः श्रमणा भवन्ति—प्रव्रज्यां गृह्णन्तीति॥ साम्प्रतमेषामगारिकाणामत्यन्तविपर्यस्तमतीनामसद्वृत्तमाविर्भावयन्नाह—ते हि साधुवर्गापवादिनः सद्धर्मप्रत्यनीका इदमेव 'जीवितं' परापवादोद्भूतनजीवितं 'धिगजीवितं' कुत्सितं जीवितं साधुजुगुप्सापरायणं संप्रतिबृंहन्ति, एतदेवासद्वृत्तजीवितं प्रशंसन्तीति भावः। ते चेहलोकप्रतिबद्धाः साधुजुगुप्साजीविनो मोहान्धाः साधूनपवदन्ति, नापि च ते पारलौकिकस्यार्थस्य साधनम्—अनुष्ठानं 'किञ्चिदपि' खल्वपि 'श्रिष्यन्ति' समाश्रयन्ति, केवलं ते परान् साधून् वागादिभिरनुष्ठानैर्दुःखयन्ति—पीडामुत्पादयन्ति आत्मनः परेषां च, तदा तेऽज्ञानान्धास्तथा तत्कुर्वन्ति येनाधिकं शोचन्ते, परानपि शोचयन्ति—दुर्भाषितादिभिः शोकं चोत्पादयन्ति, तथा ते परान् 'जूरयन्ति' गर्हन्ति, तथा तिष्यन्ति—सुखाय्यावयन्त्यात्मानं परांश्च, तथा ते वराका अपुष्टधर्माणोऽसदनुष्ठानाः स्वतः पीड्यन्ते परांश्च पीडयन्ति. तथा ते पापे-

न कर्मणा परितप्यन्ते अन्तर्दहन्तेपरांश्च परितापयन्ति। तदेवं तेऽसद्वृत्तयः सन्तो दुःखनशोचनादिक्लेशादप्रतिविरताः सदा भवन्ति। एवंभूताश्च सन्तस्ते महताऽऽरम्भेण—प्राणिव्यापादनरूपेण तथा महता समारम्भेण—प्राणिपरितापनरूपेण तथोभाभ्यामप्यारम्भसमारम्भाभ्यां 'विरूपरूपैश्च' नानाप्रकारैः सावद्यानुष्ठानैः पापकर्मकृत्यैः 'उदारान्' अत्यन्तोत्कटान् समग्रतामग्रीकान् मधुमद्यमांसासुपेतान् 'मानुष्यकान्' मनुष्यभवयोग्यान् भोगेभ्योऽप्युत्कटान् भोगभोगान् ते सावद्यानुष्ठायिनो भोक्तारो भवन्ति। एतदेव दर्शयितुमाह—'तंजहे'त्यादि, तद्यथेत्युपप्रदर्शने, अन्नमन्नकाले यथेप्सितं तस्य पापानुष्ठानात्संपद्यते, एवं पानवस्त्रशयनासनादिकमपि। सर्वमेतद्यथाकालं सपूर्वापरं संपद्यते, सह पूर्वेण—पूर्वाह्णकर्तव्येनापरेण च—अपराह्णकर्तव्येन यदिवा पूर्वं यत् क्रियते स्नानादिकं तथा परं च यत् क्रियते विलेपनभोजनादिकं तेन सह वर्तत इति सपूर्वापरम्, इदमुक्तं भवति—यद्यदा प्रार्थ्यते तत्तदा संपद्यत इति, अभिलषितार्थप्राप्तिमेव लेशतो दर्शयितुमाह—तद्यथा—विभूष्य स्नातस्तथा कृतं देवतादिनिमित्तं बलिकर्म येन स तथा, तथा कृतानि कौतुकानि—अवतारणकादीनि मङ्गलानि च—सुवर्णचन्दनदध्यक्षतदूर्वातिद्वार्थकादर्शकस्पर्शनादीनि तथा दुःस्वप्नादिप्रतिघातकानि प्रायश्चित्तानि येन स कृतकौतुकमङ्गलप्रायश्चित्तः, तथा कल्पितश्चासौ मालाप्रधानो मुकुटश्च २ स तथा विद्यते यस्य स भवति कल्पितमालामुकुटी, तथा प्रतिबद्धशरीरो—दृढावयवकायो युवेत्यर्थः, तथा 'वग्घारिय'न्ति प्रलम्बितं श्रोणीसूत्रं—कटिसूत्रं मल्लदामकलापश्च येन स तथा, तदेवमसौ शिरस्निग्धातः नानाविधविलेपनावलिप्तश्च कण्ठेकृतमालस्तथाऽवरयथोक्तभूषणभूषितः सन्महत्याम्—उच्चायां 'महालियाए'त्ति विस्तीर्णायां कूटागारशालायां तथा 'महतिमहालये' विस्तीर्णे 'सिंहासने' भद्रासने समुपविष्टः 'स्त्रीगुल्मेन' युवतिजनेन सार्द्धमपरपरिवारेण 'संपरिवृतो' वेष्टितः, तथा महता बृहत्तरेण प्रहतनाट्यगीतवादित्र-

तन्त्र्यादिरवेणोदारान्मानुष्यकान् भोगभोगान्भुञ्जानो 'विहरति' संविचरति विजृम्भतीत्यर्थः॥ तस्य च कचित्प्रयोजने समुत्पन्ने सति एकमपि पुरुषमाज्ञापयतो यावच्चत्वारः पञ्च वा पुरुषा अनुक्ता एव समुपतिष्ठन्ते, ते च किं कुर्वाणाः ?, एतद्दृश्यमानमूचुः, तद्यथा—भण—आज्ञापय स्वामिन् ! धन्या वयं येन भवताऽप्येवमादिश्यन्ते, किं कुर्म इत्यादि सुगमं, यावद्धृदयेप्सितमिति, तथा किं च 'ते' युष्माकम् 'आस्यकस्य' मुखस्य 'स्वदते' स्वादु प्रतिभाति ?, यदिवा यदेवास्य—भवदीयास्यस्य स्रवति—निर्गच्छति तदेव वयं कुर्म इति। तथा 'तमेव'त्यादि, तमेव राजानं तथा क्रीडमानं दृष्ट्वा अन्येऽनार्या एवं वदन्ति, तद्यथा—देवः खल्वयं पुरुषः, तथा 'देवस्नातको' देवश्रेष्ठो बहूनामुपजीव्यः, तथा तमेवं साम्प्रतेक्षितयाऽसदनुष्ठायिनं दृष्ट्वा 'आर्याः' विवेकिनः सदाचारवन्त एवं ब्रुवते, तद्यथा—अभिक्रान्तक्रूरकर्मा खल्वयं पुरुषो, हिंसादिक्रियाप्रवृत्त इत्यर्थः, तथा धूयते—रेणुवद्वायुना संसारचक्रवाले भ्राम्यते येन तद्धूतं—कर्म, औणादिको नक्प्रत्ययः, अतीव—प्रभूतं धूतम्—अष्टप्रकारं कर्म यस्य सोऽतिधूतः, तथाऽतीवात्मनः पापैः कर्मभिः रक्षा यस्य सोऽत्यात्मरक्षः, तथा दक्षिणस्यां दिशि गमनशीलो दक्षिणगामुकः, इदमुक्तं भवति—यो हि क्रूरकर्मकारी साधुनिन्दापरायणस्तदाननिषेधकः स दक्षिणगामुको भवति—दाक्षिणात्येषु नरकतिर्यग्मनुष्यामरेषु उत्पद्यते, तादृग्भूतश्चायमतो दक्षिणगामुक इत्युक्तं, इदमेवाह—'नेरइए' इत्यादि, नरकेषु भवो नारकः, कृष्णः पक्षोऽस्यास्तीति कृष्णपाक्षिकः, तथा आगामिनि काले नरकादुद्वृत्तो दुर्लभबोधिकश्चायं बाहुल्येन भविष्यति, इदमुक्तं भवति—दिक्षु मध्ये दक्षिणा दिग् अशस्ता, गतिषु नरकगतिः, पक्षयोः कृष्णपक्षः, तदस्य विषयान्धस्येन्द्रियानुकूलवर्तिनः परलोकनिस्पृहमतेः साधुप्रद्वेषिणो दानान्तरायविधायिनो दिगादिकमशस्तं दर्शितम्, अन्यदपि यदशस्तं तिर्यग्मत्स्यादिकमबोधिलाभादिकं च तद्योजनीयम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मस्येति । एतद्विपरीतस्य तु विषयनिःस्पृहस्य इन्द्रियानुकूलस्य परलोकभीरोः साधुप्रशंसावतः सदनुष्ठानरतस्यादक्षिणगामुकत्वं सुदेवत्वं शुक्लपाक्षिकत्वं तथा सुमानुषत्वायातस्य सुलभबोधिलभिलेखमादिकं सद्धर्मानुष्ठायिनः सर्वं भवतीति ॥ साम्प्रतमुपसंजिघृक्षुराह–इत्येतस्य पूर्वोक्तस्य स्थानस्य ऐश्वर्यलक्षणस्य शृङ्गारमूलस्य सांसारिकस्य परित्यागबुद्ध्या एके केचन विपर्यस्तमतयः पाषण्डिकोत्थानेनोत्थिताः परमार्थमजानाना 'अभिगिज्झंति'त्ति आभिमुख्येन 'लुभ्यन्ते' लोभवशगा भवन्तीत्यर्थः । तथा एके केचन साम्प्रतेक्षिणस्तस्मात्स्थानादनुपस्थिता गृहस्था एव सन्तः 'अभिझंझ'त्ति झञ्झा—तृष्णा तदातुराः सन्तोऽर्थेष्वत्यर्थं लुभ्यन्ते, यत एवमतोऽदः स्थानमनार्यानुष्ठानपरत्वादनार्यं महापुरुषानुचीर्णं न भवति, तथा न विद्यते केवलमस्मिन्नित्यकेवलम्–अशुद्धमित्यर्थः, तथेतरपुरुषाचीर्णत्वादपरिपूर्णं सद्गुणविरहात्तुच्छमित्यर्थः, तथा न्यायेन चरति नैयायिकं न नैयायिकमनैयायिकम्–असन्न्यायवृत्तिकमित्यर्थः, तथा 'रगे लगे संवरणे' शोभनं लगनं–संवरणं इन्द्रियसंयमरूपं सल्लगस्तद्भावः सल्लगत्वं न विद्यते सल्लगत्वमस्मिन्नित्यसल्लगत्वम् इन्द्रियासंवरणरूपमित्यर्थः, यदिवा शल्यवच्छल्यं–मायानुष्ठानमकार्यं तद्भायति–कथयतीति, तच्छल्यगं यत्परिज्ञानं तन्नात्रेत्यशल्यगत्वमिति, तथा न विद्यते सिद्धेः—मोक्षस्य विशिष्टस्थानोपलक्षितस्य मार्गो यस्मिंस्तदसिद्धिमार्गं, तथा न विद्यते मुक्तेः–अशेषकर्मप्रच्युतिलक्षणाया मार्गः–सम्यग्दर्शनज्ञानचारित्रात्मको यस्मिंस्तदमुक्तिमार्गं, तथा न विद्यते परिनिर्वृतेः–परिनिर्वाणस्वात्मस्वास्थ्यापत्तिरूपस्य मार्गः–पन्था यस्मिन् स्थाने तदपरिनिर्वाणमार्गं, तथा न विद्यते सर्वदुःखानां–शारीरमानसानां प्रक्षयमार्गः सदुपदेशात्मको यस्मिंस्तदसर्वदुःखप्रक्षीणमार्गं, कुत एवंभूतं तत्स्थानमित्याशङ्क्याह—'एगंते'त्यादि, एकान्तेनैव तत्स्थानं यतो मिथ्याभूतं—मिथ्यात्वोपहतबुद्धीनां यतस्तद्भवत्यत एवासाधु असद्वृत्तत्वात्, न ह्ययं स-

त्पुरुषसेवितः पन्था येन विषयान्धाः प्रवर्तन्त इति । तदयं प्रथमस्य स्थानस्याधर्मपाक्षिकस्य पापोपादानभूतस्य विभङ्गो—विभागो विशेषः स्वरूपमितियावत् ॥ ५७ ॥ साम्प्रतं द्वितीयं धर्मोपादानभूतं पक्षमाश्रित्याह—

अहावरे दोच्चस्स ठाणस्स धम्मपक्खस्स विभंगे एवमाहिज्जइ, इह खलु पाईणं वा पडीणं वा उदीणं वा दाहिणं वा संतेगइया मणुस्सा भवंति, तंजहा–आयरिया वेगे अणारिया वेगे उच्चागोया वेगे णीयागोया वेगे कायमंता वेगे हस्समंता वेगे सुवण्णा वेगे दुवण्णा वेगे सुरूवा वेगे कुरूवा वेगे, तेसिं च णं खेत्तवत्थूणि परिग्गहियाइं भवंति, एसो आलावगो जहा पोंडरीए तहा णेतव्वो, तेणेव अभिलावेण जाव सव्वोवसंता सव्वत्ताए परिनिव्वुडेत्तिबेमि ॥ एस ठाणे आरिए केवले जाव सव्वदुक्खप्पहीणमग्गे एगंतसम्मे साहु, दोच्चस्स ठाणस्स धम्मपक्खस्स विभंगे एवमाहिए ॥ सूत्रं ३३ ॥

'अधे'त्यधर्मपाक्षिकस्थानादनन्तरमयमपरो द्वितीयस्य स्थानस्य 'धर्मपाक्षिकस्य' पुण्योपादानभूतस्य 'विभङ्गो' विभागः स्वरूपं समाधीयते—सम्यगाख्यायते, तद्यथा–प्राचीनं प्रतीचीनमुदीचीनं दक्षिणं वा दिग्विभागमाश्रित्य 'सन्ति' विद्यन्ते एके केचन कल्याणपरम्पराभाजः 'पुरुषा' मनुष्याः, ते च वक्ष्यमाणस्वभावा भवन्ति, 'तद्यथे'त्ययमुपप्रदर्शनार्थः, आर्या एके केचनार्यदेशोत्पन्नाः, तथाऽनार्याः शकयवनशबरबर्बरादय इत्याद्येवं यथा पौण्डरीकाध्ययने तथेहापि सर्वं निरवयवं भणितव्यम् यावत्ते 'एवं' पूर्वोक्तेन प्रकारेण सर्वेभ्यः पापस्थानेभ्य उपशान्ताः, तथा अत एव सर्वात्मतया परिनिर्वृता इत्यहमेवं ब्रवीमि ॥

तदेवमेतत्स्थानं 'कैवलिकं' प्रतिपूर्णं नैयायिकमित्यादि प्राग्वद्विपर्ययेण नेयं यावद्द्वितीयस्य स्थानस्य धार्मिकस्यैषः 'विभङ्गो' विभागः स्वरूपमाख्यातमिति ॥ साम्प्रतं धर्माधर्मयुक्तं तृतीयं स्थानमाश्रित्याह—

अहावरे तच्चस्स ठाणस्स मिस्सगस्स विभंगे एवमाहिज्जइ, जे इमे भवंति आरण्णिया आवसहिया गामणियंतिया कण्हुइरहस्सिता जाव ते तओ विप्पमुच्चमाणा भुज्जो एलमूयत्ताए तमूत्ताए पच्चायंति, एसठाणे अणारिए अकेवले जाव असव्वदुक्खप्पहीणमग्गे एगंतमिच्छे असाहू, एस खलु तच्चस्स ठाणस्स मिस्सगस्स विभंगे एवमाहिए ॥ सूत्रं ३४ ॥

अथापरस्तृतीयस्य स्थानस्य मिश्रकाख्यस्य 'विभङ्गो विभागः स्वरूपमाख्यायते । अत्र चाधर्मपक्षेण युक्तो धर्मपक्षो मिश्र इत्युच्यते, तत्राधर्मस्येह भूयिष्ठत्वादधर्मपक्ष एवायं द्रष्टव्यः, एतदुक्तं भवति–यद्यपि मिथ्यादृष्टयः काश्चित्तथाप्रकारां प्राणातिपातादिनिवृत्तिं विदधति तथाप्याशयाशुद्धत्वादभिनवे पित्तोदये सति शर्करामिश्रक्षीरपानवदूषरप्रदेशवृष्टिवद्विवक्षितार्थासाधकत्वान्निरर्थकतामापद्यते, ततो मिथ्यात्वानुभावात् मिश्रपक्षोऽप्यधर्म एवावगन्तव्य इति । एतदेव दर्शयितुमाह–'जे इमे भवंती'त्यादि, ये इमेऽनन्तरमुच्यमाना अरण्ये चरन्तीत्यारण्यिकाः–कन्दमूलफलाशिनस्तापसादयो ये चावसथिकाः—आवसथो–गृहं तेन चरन्तीत्यावसथिकाः–गृहिणः, ते च कुतश्चित् पापस्थानान्निवृत्ता अपि प्रबलमिथ्यात्वोपहतबुद्धयः, ते यद्यप्युपवासादिना महता कायक्लेशेन देवगतयः केचन भवन्ति तथापि ते आसुरीयेषु स्थानेषु किल्बिषिकेषूत्पद्यन्त इत्यादि सर्वं पूर्वोक्तं भणनीयं यावत्ततश्च्युता मनुष्यभवं प्रत्यायाता एलमूकत्वेन तमोऽन्धतया जायन्ते । तदेवमेतत्स्थानमनार्यमकेवलम्–असंपूर्णमनैयायिकमित्यादि याव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देकान्तमिथ्याभूतं सर्वमेवैतदसाधिति, तृतीयस्थानस्य मिश्रकस्थायं 'विभङ्गो' विभागः स्वरूपमाख्यातमिति ॥ उक्तान्यधर्मधर्ममिश्रस्थानानि, साम्प्रतं तदाश्रिताः स्थानिनोऽभिधीयन्ते—यदिवा प्राक्तनमेवान्येन प्रकारेण विशेषिततरमुच्यते—तत्राद्यमधार्मिकस्थानकमाश्रित्याह—

अहावरे पढमस्स ठाणस्स अधम्मपक्खस्स विभंगे एवमाहिज्जइ—इह खलु पाईणं वा ४ संतेगतिया मणुस्सा भवंति—गिहत्था महिच्छा महारंभा महापरिग्गहा अधम्मिया अधम्माणुया(एणा) अधम्मिट्ठा अधम्मक्खाई अधम्मपायजीविणो अधम्मप(वि)लोई अधम्मपलज्जणा अधम्मसीलसमुदायारा अधम्मेणं चेव वित्तिं कप्पेमाणा विहरंति ॥ हण छिंद भिंद विगत्तगा लोहियपाणी चंडा रुद्दा खुद्दा साहस्सिया उक्कंचणवंचणमायाणियडिकूडकवडमाइसंपओगबहुला दुस्सीला दुव्वया दुप्पडियाणंदा असाहू सव्वाओ पाणाइवायाओ अप्पडिविरया जावज्जीवाए जाव सव्वाओ परिग्गहाओ अप्पडिविरया जावज्जीवाए सव्वाओ कोहाओ जाव मिच्छादंसणसल्लाओ अप्पडिविरया, सव्वाओ ण्हाणुम्मद्दणवण्णगगंधविलेवणसद्दफरिसरसरूवगंधमल्लालंकाराओ अप्पडिविरया जावज्जीवाए सव्वाओ सगडरहजाणजुग्गसिल्लिथिल्लिसियासंदमाणियासयणासणजाणवाहणभोगभोयणपवित्थरविहीओ अप्पडिविरया जावज्जीवाए सव्वाओ कयविक्कयमासद्धमासरूवगसंववहाराओ अप्पडिविरया जावज्जीवाए सव्वाओ हिरण्णसुवण्णधणधण्णमणिमोत्तियसंखसिलप्पवालाओ अप्पडिविरया जावज्जीवाए सव्वाओ कूडतुलकूडमाणाओ अप्पडिविरया जावज्जीवाए सव्वाओ

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३२८॥

आरंभसमारंभाओ अप्पडिविरया जावज्जीवाए सव्वाओ करणकारावणाओ अप्पडिविरया जावज्जीवाए सव्वाओ पयणपयावणाओ अप्पडिविरया जावज्जीवाए सव्वाओ कुट्टणपिट्टणतज्जणताडणवहबंधपरिकिलेसाओ अप्पडिविरया जावज्जीवाए, जे आवण्णे तहप्पगारा सावज्जा अबोहिया कम्मंता परपाणपरियावणकरा जे अणारिएहिं कज्जंति ततो अप्पडिविरया जावज्जीवाए, से जहाणामए केइ पुरिसे कलममसूरतिलमुग्गमासनिप्फावकुलत्थआलिसंदगपलिमंथगमादिएहिं अयंते कूरे मिच्छादंडं पउंजंति, एवमेव तहप्पगारे पुरिसजाए तित्तिरवट्टगलावगकवोतकविंजलमियमहिसवराहगाहगोहकुम्मसिरिसिवमादिएहिं अयंते कूरे मिच्छादंडं पउंजंति, जावि य से बाहिरिया परिसा भवइ, तंजहा—दासे इ वा पेसे इ वा भयए इ वा भाइल्ले इ वा कम्मकरए इ वा भोगपुरिसे इ वा तेसिंपि य णं अन्नयरंसि वा अहालहुगंसि अवराहंसि सयमेव गरुयं दंडं निवत्तेइ, तंजहा—इमं दंडेह इमं मुंडेह इमं तज्जेह इमं तालेह इमं अदुयबंधणं करेह इमं नियलबंधणं करेह इमं हडिबंधणं करेह इमं चारगबंधणं करेह इमं नियलजुयलसंकोडियमोडियं करेह इमं हत्थछिन्नयं करेह इमं पायछिन्नयं करेह इमं कन्नछिण्णयं करेह इमं नक्कओट्ठसीसमुहछिन्नयं करेह वेयगछिन्नयं अंगछिन्नयं पक्खाफोडियं करेह इमं णयणुप्पाडियं करेह इमं दंसणुप्पाडियं वसणुप्पाडियं जिब्भुप्पाडियं ओलंबियं करेह घसियं करेह घोलियं करेह सूलाइयं करेह सूलाभिन्नयं करेह खारवत्तियं करेह वज्झवत्तियं करेह सीहपुच्छियगं करेह वसभपुच्छियगं करेह दवग्गिदड्ढयंगं कागणिमंसखावियंगं भत्तपाणनिरुद्धगं इमं जावज्जीवं वहबंधणं करेह इमं अन्नयरेणं असुभेणं कुमारेणं मारेह ॥ जावि य से अब्भिंतरिया परिसा भवइ, तंजहा—माया इ वा पिया इ वा भाया इ वा भगिणी इ वा भज्जा इ वा पुत्ता इ वा धूता इ वा सुण्हा इ वा, तेसिंपि य णं अन्नयरंसि अहालहुगंसि अवराहंसि सयमेव गरुयं दंडं णिवत्तेइ, सीओदगवियडंसि उच्छोलित्ता भवइ जहा मित्तदोसवत्तिए जाव अहिए परंसि लोगंसि, ते दुक्खंति सोयंति जूरंति तिप्पंति पिट्टंति परितप्पंति ते दुक्खणसोयणजूरणतिप्पणपिट्टणपरितप्पणवहबंधणपरिकिलेसाओ अपडिविरया भवंति ॥ एवमेव ते इत्थिकामेहिं मुच्छिया गिद्धा गढिया अज्झोववन्ना जाव वासाइं चउपंचमाइं छद्दसमाइं वा अप्पतरो वा भुज्जतरो वा कालं भुंजित्तु भोगभोगाइं पविसुइत्ता वेरायतणाइं संचिणित्ता बहूइं पावाइं कम्माइं उस्सन्नाइं संभारकडेण कम्मणा से जहाणामए अयगोले इ वा सेलगोले इ वा उदगंसि पक्खित्ते समाणे उदगतलमइवइत्ता अहे धरणितलपइट्ठाणे भवइ, एवमेव तहप्पगारे पुरिसजाते वज्जबहुले धूतबहुले पंकबहुले वेरबहुले अप्पत्तियबहुले दंभबहुले णियडिबहुले साइबहुले अयसबहुले उस्सन्नतसपाणघाती कालमासे कालं किच्चा धरणितलमइवइत्ता अहे णरगतलपइट्ठाणे भवइ ॥ सूत्रं ३५ ॥

२ क्रियास्थानाध्ये० अधर्मपक्षवन्तः

॥३२८॥

अथापरोऽन्यः प्रथमस्य स्थानस्याधर्मपाक्षिकस्य 'विभङ्गो' विभागः स्वरूपं व्याख्यायते—'इह खलु' इत्यादि, सुगमं यावन्मनुष्या एवंस्वभावा भवन्तीति । एते च प्रायो गृहस्था एव भवन्तीत्याह—'महेच्छा' इत्यादि, महती—राज्यविभवपरिवारादिका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वातिशायिनी इच्छा-अन्तःकरणप्रवृत्तिर्येषां ते महेच्छाः, तथा महानारम्भो-वाहनोष्ट्रमण्डलिकागन्त्रीप्रवाहकुपिपण्डपोषणादिको येषां ते महारम्भाः, ये चैवंभूतास्ते महापरिग्रहाः—धनधान्यद्विपदचतुष्पदवास्तुक्षेत्रादिपरिग्रहवन्तः क्वचिदप्यनिवृत्ताः, अत एवाधर्मेण चरन्तीत्याधर्मिकाः, तथा अधर्मिष्ठा निस्त्रिंशकर्मकारित्वादधर्मबहुलाः, ततश्चाधर्मे कर्तव्ये अनुज्ञा—अनुमोदनं येषां ते भवन्त्यधर्मानुज्ञाः, एवमधर्मम् आख्यातुं शीलं येषां ते तथा, एवमधर्मप्रायजीविनः, तथा अधर्ममेव प्रविलोकयितुं शीलं येषां ते भवन्त्यधर्मप्रविलोकिनः, तथा अधर्मप्रायेषु कर्मसु प्रकर्षेण रज्यन्त इति अधर्मप्ररक्ताः, रलयोरैक्यमिति रक्त स्थाने लकारोऽत्र कृत इति, तथाऽधर्मशीला अधर्मस्वभावाः तथाऽधर्मात्मकः समुदाचारो—यत्किञ्चनानुष्ठानं येषां ते भवन्त्यधर्मशीलसमुदाचाराः, तथाऽधर्मेण-पापेन सावद्यानुष्ठानेनैव दहनाङ्कनलिलाञ्छनादिकेन कर्मणा वृत्तिः-वर्तनं 'कल्पयन्तः' कुर्वाणा 'विहरन्ती'ति कालमतिवाहयन्ति ॥ पापानुष्ठानमेव लेशतो दर्शयितुमाह-'हण छिन्द भिन्दे'त्यादि स्वत एव हननादिकाः क्रियाः कुर्वाणा अपरेषामप्येवमात्मकमुपदेशं ददति, तत्र हननं दण्डादिभिस्तत्कारयन्ति तथा छिन्द्धि कर्णादिकं भिन्द्धि शूलादिना, विकर्तकाः—प्राणिनामजिनापनेतारः अत एव लोहितपाणयः, तथा चण्डा रौद्रा-निस्त्रिंशाः क्षुद्राः क्षुद्रकर्मकारित्वात् तथा 'साहस्सिका' असमीक्षितकारिणः, तथा उत्कुञ्चनवञ्चनमायानिकृतिकूटकपटादिभिः सहातिसंप्रयोगो—गार्ध्यं तेन बहुलाः-तत्प्रचुरास्ते तथा, तत्रोर्ध्वं कुञ्चनं—शूलाद्यारोपणार्थमुत्कुञ्चनं वञ्चनं-प्रतारणं तत् यथा अभयकुमारः प्रद्योतगणिकाभिधार्मिकवञ्चनया वञ्चितः माया-वञ्चनबुद्धिः प्रायो वणिजामिव निकृतिस्तु बकवृत्त्या कुक्कुटादिकरणेन दम्भप्रधानवणिक्श्रोत्रियसाध्वाकारेण परवञ्चनार्थं गलकर्तकानामिवावस्थानं, देशभाषानेपथ्यादिविपर्ययकरणं कपटं यथा आषाढभूतिना नटेनेवापरापरवेषपरावृत्त्याऽऽचार्योपाध्यायसंघाटकात्मार्थं चत्वारो मोदका अवाप्ताः, कूटं तु-कार्षापणतुलाप्रस्थादेः परवञ्चनार्थं न्यूनाधिककरणम्, एतैरुत्कुञ्चनादिभिः सहातिशयेन संप्रयोगो यदिवा-सातिशयेन द्रव्येण-कस्तूरिकादिनाऽपरस्य द्रव्यस्य संप्रयोगः सातिसंप्रयोगस्तद्बहुलाः-तत्प्रधाना इत्यर्थः, उक्तं च-"सो होई सातिजोगो दव्वं जं छादियण्णदव्वेसु । दोसगुणा वयणेसु य अत्थविसंवायणं कुणइ ॥ १ ॥" एते चोत्कुञ्चनादयो मायाभेदा इन्द्रशक्रादिवत् कथञ्चित्क्रियाभेदेऽपि द्रष्टव्याः । तथा दुष्टं शीलं येषां ते दुःशीलाः-चिरमुपचरिता अपि क्षिप्रं विसंवदन्ति, दुःखानुनेया दारुणस्वभावा इत्यर्थः, तथा दुष्टानि व्रतानि येषां ते तथा यथा मांसभक्षणव्रतकालसमासौ प्रभूततरसत्त्वोपघातेन मांसप्रदानम्, अन्यदपि नक्तभोजनादिकं तेषां दुष्टव्रतमिति, तथाऽन्यस्मिन् जन्मान्तरे मधुमद्यमांसादिकमभ्यवहरिष्यामीत्येवमज्ञानान्धा जन्मान्तरविधिद्वारेण सनिदानमेव व्रतं गृह्णन्ति, तथा दुःखेन प्रत्यानन्द्यन्ते दुष्प्रत्यानन्द्याः, इदमुक्तं भवति-तैरानन्दितेनापरेण केनचित्प्रत्युपकारेप्सुना सर्वोद्यमाता दुःखेन प्रत्यानन्द्यन्ते, यदिवा सत्यप्युपकारे प्रत्युपकारभीरवो नैवानन्द्यन्ते प्रत्युत शठतयोपकारे दोषमेवोत्पादयन्ति, तथा चोक्तम्—"प्रतिकर्तुमशक्तिष्ठा, नराः पूर्वोपकारिणाम् । दोषमुत्पाद्य गच्छन्ति, मद्गूनामिव वायसाः ॥ १ ॥" यत एवमतोऽसाध्वस्ते पापकर्मकारित्वात्, तथा 'यावज्जीवं' यावत्प्राणधारणेन सर्वस्मात्प्राणातिपातादप्रतिविरता लोकनिन्दनीयादपि ब्राह्मणघातादेरविरता इति सर्वग्रहणं, एवं सर्वस्मादपि कूटसाक्ष्यादेरप्रतिविरता इति, तथा सर्वस्मात्स्त्रीबालादेः परद्रव्यापहरणादविरताः, तथा सर्वस्मात्परस्त्रीगमनादेर्मैथुनादविरताः, एवं सर्वस्मात्परिग्रहाद्योनिपोषकाद्प्यविरताः, एवं सर्वेभ्यः क्रोधमानमायालोभेभ्योऽविरताः, तथा प्रेमद्वेषकलहाभ्याख्यानपैशुन्य-

१ स भवति सातियोगो द्रव्यं यच्छादयित्वाऽन्यद्रव्यैः दोषगुणांश्च वचनैरर्थविसंवादनं करोति ॥ १ ॥

परपरिवादारतिरतिमायामृषावादमिथ्यादर्शनशल्यादिभ्योऽप्रतिविरता भवन्तीति । तथा सर्वस्मात्स्नानोन्मर्दनवर्णकविलेपनशब्दस्पर्शरूपरसगन्धमाल्यालङ्कारात्कामाङ्गान्मोहजनितादप्रतिविरता यावज्जीवयेति, इह च वर्णकग्रहणेन वर्णविशेषापादकं लोध्रादिकं गृह्यते, तथा सर्वतः शकटरथादेर्यानविशेषादिकात्प्रतिविस्तरविधेः परिकररूपात्परिग्रहादप्रतिविरताः, इह च शकटरथादिकमेव यानं शकटरथयानं, युग्यं-पुरुषोत्क्षिप्तमाकाशयानं 'गिल्लि'त्ति पुरुषद्वयोत्क्षिप्ता श्रोल्लिका 'थिल्लि'त्ति वेगसराद्वयविनिर्मितो यानविशेषः तथा 'संदमाणिय'त्ति शिबिकाविशेष एव, तदेवमन्यस्मादपि वस्त्रादेः परिग्रहादुपकरणभूतादविरताः, तथा सर्वतः—सर्वस्मात्क्रयविक्रयाभ्यां करणभूताभ्यां यो माषकार्धमाषकरूपकार्षापणादिभिः पण्यविनिमयात्मकः संव्यवहारस्तस्मादविरता यावज्जीवयेति, तथा सर्वस्माद्धिरण्यसुवर्णादेः प्रधानपरिग्रहादविरताः, तथा कूटतुलकूटमानादेरविरताः, तथा सर्वतः कृषिपाशुपाल्यादेर्यत्स्वतः करणमन्येन च यत्किञ्चित्कारयति तस्मादविरताः, तथा पचनपाचनतः तथा कण्डनकुट्टनपिट्टनतर्जनताडनवधबन्धादिना यः परिक्लेशः प्राणिनां तस्मादविरताः, साम्प्रतमुपसंहरति-ये चान्ये तथाप्रकाराः परपीडाकारिणः सावद्याः कर्मसमारम्भा अबोधिकाः-बोध्यभावकारिणः तथा परप्राणपरितापनकरा-गोग्राहवन्दिग्रहग्रामघातात्मका येऽनार्यैः क्रूरकर्मभिः क्रियन्ते ततोऽप्रतिविरता यावज्जीवयेति ॥ पुनरन्यथा बहुप्रकारमधार्मिकपदं प्रतिपिपादयिषुराह-'तद्यथे'-त्युपप्रदर्शनार्थो नामशब्दः संभावनायां, संभाव्यते अस्मिन्विचित्रे संसारे केचनैवंभूताः पुरुषाः ये कलममसूरतिलमुद्गादिषु पचनपाचनादिकया क्रियया स्वपरार्थमयता—अप्रयत्नवन्तो निष्कृपाः क्रूरा मिथ्यादण्डं प्रयुञ्जन्ति, मिथ्यैव-अनपराधिष्वेव दोषमारोप्य दण्डो मिथ्यादण्डस्तं विदधति, तथैवमेव-प्रयोजनं विनैव तथाप्रकाराः पुरुषा निष्करुणा जीवोपघातनिरतास्तिरश्चवर्तकला-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वकादिषु जीवनप्रियेषु प्राणिष्ववधताः क्रूरकर्माणो मिथ्यादण्डं प्रयुञ्जन्ति । तेषां च क्रूरधियां "यथा राजा तथा प्रजा" इति प्रवादात् परिवारोऽपि तथाभूत एव भवतीति तथा दर्शयितुमाह–'जावि य से' इत्यादि, याऽपि च तेषां बाह्या पर्षद्भवति, तद्यथा–'दासः' खदासीसुतः 'प्रेष्यः' प्रेषणयोग्यो भृत्यदेश्यो 'भृतको' वेतनेनोदकाद्यानयनविधायी तथा 'भागिको' यः षष्ठांशादिलाभेन कृष्यादौ व्याप्रियते 'कर्मकरः' प्रतीतः तथा नायकाश्रितः कश्चिद्भोगपरः, तदेवं ते दासादयोऽन्यस्य लघावप्यपराधे गुरुतरं दण्डं प्रयुञ्जन्ति प्रयोजयन्ति च । स च नायकस्तेषां दासादीनां बाह्यपर्षद्भूतानामन्यतरस्मिंस्तथा लघावप्यपराधे–शब्दाश्रवणादिके गुरुतरं दण्डं वक्ष्यमाणं प्रयुङ्क्ते, तद्यथा–इमं दासं प्रेष्यादिकं वा सर्वस्वापहारेण दण्डयत यूयमित्यादि सूत्रसिद्धं यावदिममन्यतरेणाशुभेन कुत्सितमारेण व्यापादयत यूयम् ॥ याऽपिच क्रूरकर्मवतामभ्यन्तरा पर्षद्भवति, तद्यथा–मातापित्रादिका, मिश्रदोषप्रत्ययिकक्रियास्थानवद् नेयं यावदहितोऽयमस्मिन् लोके इति, तथा हि आत्मनोऽपथ्यकारी परस्मिन्नपि लोके, तदेवं ते मातापित्रादीनां स्वल्पापराधिनामपि गुरुतरदण्डापादनतो दुःखमुत्पादयन्ति, तथा नानाविधैरुपायैस्तेषां शोकमुत्पादयन्ति–शोकयन्तीत्येवं ते प्राणिनां बहुप्रकारपीडोत्पादकाः यावद्वधबन्धपरिक्लेशादप्रतिविरता भवन्ति ॥ ते च विषयासक्ततया एतत्कुर्वन्तीत्येतद्दर्शयितुमाह–एवमेव पूर्वोक्तस्वभावा एवं ते निष्कृपा निरनुक्रोशा बाह्याभ्यन्तरपर्षदोरपि कर्णनासाविकर्तनादिना दण्डपातनस्वभावाः स्त्रीप्रधानाः कामाः स्त्रीकामाः यदिवा स्त्रीषु–मदनकामविषयभूतासु कामेषु च–शब्दादिषु इच्छाकामेषु मूर्च्छिता गृद्धा ग्रथिता अध्युपपन्नाः, एते च शक्रपुरन्दरादिवत्पर्यायाः कथञ्चिद्भेदं वाऽऽश्रित्य व्याख्येयाः, ते च भोगासक्ता व्यपगतपरलोकाध्यवसाया यावद्दशानि चतुःपञ्च षट् सप्त वा दश वाऽल्पतरं वा कालं प्रभूततरं वा कालं भुक्त्वा भोगभोगान् इन्द्रियानुकूलान् मधुमद्यमांसपरदारासेवनरूपान् भोगासक्ततया च परपीडोत्पादनतो 'वैरायतनानि' वैरानुबन्धान् अनुस्मृत्य—उत्पाद्य विधाय तथा 'संचयित्वा' संचिन्त्योपचित्य 'बहूनि' प्रभूततरकालस्थितिकानि 'क्रूराणि' क्रूरविपाकानि नरकादिषु यातनास्थानेषु क्रकचपाटनशाल्मल्यवरोहणतप्तप्रतुषानात्मकानि कर्माण्यष्टप्रकाराणि बद्धस्पृष्टनिधत्तनिकाचनावस्थानि विधाय तेन च संभारकृतेन कर्मणा प्रेर्यमाणास्तत्कर्मगुरवो वा नरकतलप्रतिष्ठाना भवन्तीत्युत्तरक्रियया ऽऽपादितबहुवचनरूपयेति संबन्धः । अस्मिन्नेवार्थे सर्वलोकप्रतीतं दृष्टान्तमाह–'से जहाणामए' इत्यादि, तद्यथा नामायोगोलकः–अयस्पिण्डः 'शिलागोलको' वृत्ताश्मशकलं वोदके प्रक्षिप्तः समानः सलिलतलमतिवर्त्य–अतिलङ्घ्याधो धरणीतलप्रतिष्ठानो भवति । अधुना दार्ष्टान्तिकमाह–'एवमेवे'त्यादि. यथाऽसावयोगोलको वृत्तत्वाच्छीघ्रमेवाधो यात्येवमेव तथाप्रकारः पुरुषजातः, तमेव लेशतो दर्शयति—वज्रबहुत्वं गुरुत्वात्कर्म तद्बहुलः–तत्प्रचुरो वध्यमानककर्मगुरुरित्यर्थः तथा धूयत इति धूतं–प्राग्बद्धं कर्म तत्प्रचुरः, पुनः सामान्येनाह—पङ्कबहुलोति पङ्कं–पापं तद्बहुलः, तथा तदेव कारणतो दर्शयितुमाह–'वैरबहुलो' वैरानुबन्धप्रचुरः, तथा 'अपत्तियं'ति मनसो दुष्प्रणिधानं तत्प्रधानः, तथा दम्भो–मायया परवञ्चनं तदुत्कटः, तथा निकृतिः–माया वेषभाषापरावृत्तिरिच्छतो परद्रोहबुद्धिस्तन्मयः, तथा 'सातिबहुल' इति सातिशयेन द्रव्येणापरस्य हीनगुणस्य द्रव्यस्य संयोगः सातिस्तद्बहुलः–तत्कर्मप्रचुरः, तथा अयशः–अश्लाघा असद्भूतया निन्दा, यानि यानि परापकारभूतानि कर्मानुष्ठानानि विधत्ते तेषु तेषु कर्मसु करचरणच्छेदनादिषु अवश्योमाग्भवतीति, स एवंभूतः पुरुषः 'कालमासे' स्वायुषः क्षये कालं कृत्वा पृथिव्याः–रत्नप्रभादिकायास्तलम् 'अतिवर्त्य' योजनसहस्रपरिमाणमतिलङ्घ्य नरकतलप्रतिष्ठानोऽसौ भवति ॥ नरकस्वरूपनिरूपणायाह—

ते णं णरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया णिच्चंधकारतमसा ववगयगहचंदसूरनक्खत्तजोइसप्पहा मेदवसामंसरुहिरपूयपडलचिक्खिल्ललित्ताणुलेवणतला असुई वीसा परमदुब्भिगंधा कण्हा अगणिवण्णाभा कक्खडफासा दुरहियासा असुभा णरगा असुभा णरएसु वेयणाओ ॥ णो चेव णरएसु नेरइया णिद्दायंति वा पयलायंति वा सुइं वा रतिं वा धितिं वा मतिं वा उवलभंते, ते णं तत्थ उज्जलं विउलं पगाढं कडुयं कक्कसं चंडं दुक्खं दुग्गं तिव्वं दुरहियासं णेरइया वेयणं पच्चणुभवमाणा विहरंति ॥ सूत्रं ३६ ॥

णमिति वाक्यालङ्कारे ते नरकाः सीमन्तकादिका बाहुल्यमङ्गीकृत्यान्तः–मध्ये वृत्ता बहिरपि चतुरस्रा अधश्च क्षुरप्रसंस्थानसंस्थिताः, एतच्च संस्थानं पुष्पावकीर्णानाश्रित्योक्तं, तेषामेव प्रचुरत्वात्, आवलिकाप्रविष्टास्तु वृत्तत्र्यस्रचतुरस्रसंस्थाना एव भवन्ति, तथा नित्यमेवान्धतमसं येषु ते नित्यान्धतमसाः, क्वचित्पाठो नित्यान्धकारतमसा इति, मेघावच्छन्नाम्बरतलकृष्णपक्षरजनीवत् तमोबहुलाः, तथा व्यपगतो ग्रहचन्द्रसूर्यनक्षत्रज्योतिःपथो येषां ते तथा । पुनरप्यनिष्टापादनार्थं तेषामेव विशेषणान्याह–'मेदवसे'त्यादि, दुष्कृतकर्मकारिणां ते नरकास्तदुःखोत्पादनायैवंभूता भवन्ति, तद्यथा–मेदवसामांसरुधिरपूयादीनां पटलानि–सङ्घातास्तैर्लिप्तानि–पिच्छिलीकृतान्यनुलेपनतलानि–अनुलेपनप्रधानानि तलानि येषां ते तथा, अशुचयो विष्टाऽसृक्क्लेदप्रधानत्वाद् अत एव विश्राः कुथितमांसादिकल्पकर्दमावलिप्तत्वात्, एवं परमदुर्गन्धाः कुथितगोमायुकलेवरादपि असह्यगन्धाः, तथा कृष्णाग्निवर्णाभा रूपतः स्पर्शतस्तु कर्कशः–कठिनो वज्रकण्टकादप्यधिकतरः स्पर्शो येषां ते तथा, किं बहुना?, अतीव दुःखेनाधिसह्यन्ते, किमि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ति ?, यतस्ते नरकाः पञ्चानामपीन्द्रियार्थानामशोभनत्वादशुभाः, तत्र च सत्त्वानामशुभकर्मकारिणामुग्रदण्डपातिनां च वज्रप्रचुराणां तीव्रा अतिदुःसहवेदनाः शारीराः प्रादुर्भवन्ति, तया च वेदनयाऽभिभूतास्तेषु नरकेषु ते नारका नैवाक्षिनिमेषमपि कालं निद्रायन्ते, नाप्युपविष्टाद्यवस्था अक्षिसंकोचनरूपामीषन्निद्रामवाप्नुवन्ति, न ह्येवंभूतवेदनाभिभूतस्य निद्रालाभो भवतीति दर्शयति, तामुज्ज्वलां तीव्रानुभावेनोत्कटामित्यादिविशेषणविशिष्टां यावद्वेदयन्ति-अनुभवन्तीति ॥ अयं तावदयोगोलकपाषाणदृष्टान्तः शीघ्रमधोनिमज्जनार्थप्रतिपादकः प्रदर्शितः, अधुना शीघ्रपातार्थप्रतिपादकमेवापरं दृष्टान्तमधिकृत्याह—

से जहाणामए रुक्खे सिया पव्वयग्गे जाए मूले छिन्ने अग्गे गरुए जओ णिण्णं जओ विसमं जओ दुग्गं तओ पवडति, एवामेव तहप्पगारे पुरिसजाए गब्भातो गब्भं जम्मातो जम्मं माराओ मारं णरगाओ णरगं दुक्खाओ दुक्खं दाहिणगामिए णेरइए कण्हपक्खिए आगमिस्साणं दुल्लभबोहिए यावि भवइ, एस ठाणे अणारिए अकेवले जाव असव्वदुक्खपहीणमग्गे एगंतमिच्छे असाहू पढमस्स ठाणस्स अधम्मपक्खस्स विभंगे एवमाहिए ॥ सूत्रं ३७ ॥

तद्यथा नाम कश्चिद्वृक्षः पर्वताग्रे जातो मूले छिन्नः शीघ्रं यथा निम्ने पतति, एवमसावप्यसाधुकर्मकारी तत्कर्मप्रेरितः शीघ्रमेव नरके पतति, ततोऽप्युद्वृत्तो गर्भाद्गर्भमवश्यं याति न तस्य किंचित्राणं भवति, यावदागामिन्यपि काले ऽसौ दुर्लभधर्मप्रतिपत्तिर्भवतीति । साम्प्रतमुपसंहरति—'एस ठाणे' इत्यादि, तदेतत्स्थानमनार्यं पापानुष्ठानपरत्वाद्यावदेकान्तमिथ्यारूपमसाधु । तदेवं प्रथमस्याधर्मपाक्षिकस्य स्थानस्य 'विभङ्गो' विभागः स्वरूपमेष व्याख्यातः ॥

अहावरे दोच्चस्स ठाणस्स धम्मपक्खस्स विभंगे एवमाहिज्जइ-इह खलु पाइणं वा ४ संतेगतिया मणुस्सा भवंति, तंजहा—अणारंभा अपरिग्गहा धम्मिया धम्माणुया धम्मिट्ठा जाव धम्मेणं चेव वित्तिं कप्पेमाणा विहरंति, सुसीला सुव्वया सुप्पडियाणंदा सुसाहू सव्वतो पाणातिवायाओ पडिविरया जावजीवाए जाव जे यावन्ने तहप्पगारा सावज्जा अबोहिया कम्मंता परपाणपरियावणकरा कज्जंति ततो विपडिविरता जावजीवाए ॥ से जहाणामए अणगारा भगवंतो ईरियासमिया भासासमिया एसणासमिया आयाणभंडमत्तणिक्खेवणासमिया उच्चारपासवणखेलसिंघाणजल्लपारिट्ठावणियासमिया [मणसमिया वयसमिया कायसमिया मणगुत्ता वयगुत्ता कायगुत्ता गुत्ता गुत्तिंदिया गुत्तबंभयारी अकोहा अमाणा अमाया अलोभा संता पसंता उवसंता परिणिव्वुडा अणासवा अग्गंथा छिन्नसोया निरुवलेवा कंसपाइ व मुक्कतोया संखो इव णिरंजणा जीव इव अपडिहयगती गगणतलंपिव निरालंबणा वाउरिव अपडिबद्धा सारदसलिलं व सुद्धहियया पुक्खरपत्तं व निरुवलेवा कुम्मो इव गुत्तिंदिया विहग इव विप्पमुक्का खग्गिविसाणं व एगजाया भारंडपक्खीव अप्पमत्ता कुंजरो इव सोंडीरा वसभो इव जातत्थामा सीहो इव दुद्धरिसा मंदरो इव अप्पकंपा सागरो इव गंभीरा चंदो इव सोमलेसा सूरो इव दित्ततेया जच्चकंचणगं व जातरूवा वसुंधरा इव सव्वफासविसहा सुहुयहुयासणो विव तेयसा जलंता ॥ णत्थि णं तेसिं भगवंताणं कत्थवि पडिबंधे भवइ, से पडिबंधे चउव्विहे पण्णत्ते, तंजहा-अंडए इ वा पोयए इ वा उग्गहे इ वा पग्गहे

इ वा जन्नं जन्नं दिसं इच्छंति तन्नं तन्नं दिसं अपडिबद्धा सुहरूवा लहुभूया अप्पग्गंथा संजमेणं तवसा अप्पाणं भावेमाणा विहरंति ॥ तेसिं णं भगवंताणं इमा एतारूवा जायामायावित्ती होत्था, तंजहा—चउत्थे भत्ते छट्ठे भत्ते अट्ठमे भत्ते दसमे भत्ते दुवालसमे भत्ते चउद्दसमे भत्ते अद्धमासिए भत्ते मासिए भत्ते दोमासिए तिमासिए चाउम्मासिए पंचमासिए छम्मासिए अदुत्तरं च णं उक्खित्तचरया णिक्खित्तचरया उक्खित्तणिक्खित्तचरगा अंतचरगा पंतचरगा लूहचरगा समुदाणचरगा संसट्ठचरगा असंसट्ठचरगा तज्जातसंसट्ठचरगा दिट्ठलाभिया अदिट्ठलाभिया पुट्ठलाभिया अपुट्ठलाभिया भिक्खलाभिया अभिक्खलाभिया अन्नायचरगा उवनिहिया संखादत्तिया परिमितपिंडवाइया सुद्धेसणिया अंताहारा पंताहारा अरसाहारा विरसाहारा लूहाहारा तुच्छाहारा अंतजीवी पंतजीवी आयंबिलिया पुरिमड्ढिया निव्विगइया अमज्जमंसासिणो णो णियामरसभोई ठाणाइया पडिमाठाणाइया उक्कडुआसणिया णेसज्जिया वीरासणिया दंडायतिया लगंडसाइणो अप्पाउडा अगत्तया अकंडुया अणिट्ठुहा] (एवं जहोववाइए) धुतकेसमंसुरोमनहा सव्वगायपडिकम्मविप्पमुक्का चिट्ठंति ॥ ते णं एतेणं विहारेणं विहरमाणा बहूइं वासाइं सामन्नपरियागं पाउणंति २ बहुयबहु आबाहंसि उप्पन्नंसि वा अणुप्पन्नंसि वा बहूइं भत्ताइं पच्चक्खाइत्ता बहूइं भत्ताइं अणसणाए छेदिंति अणसणाए छेदित्ता जस्सट्ठाए कीरति नग्गभावे मुंडभावे अण्हाणभावे अदंतवणगे अछत्तए अणोवाहणए भूमिसेज्जा फलगसेज्जा कट्ठसेज्जा केसलोए बंभचेरवासे परघरपवेसे लद्धा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वलद्धे माणावमाणणाओ हीलणाओ निंदणाओ खिंसणाओ गरहणाओ तज्जणाओ तालणाओ उच्चावया गामकंटगा बावीसं परीसहोवसग्गा अहियासिज्जंति तमट्ठं आराहंति, तमट्ठं आराहित्ता चरमेहिं उस्सासनिस्सासेहिं अणंतं अणुत्तरं निव्वाघातं निरावरणं कसिणं पडिपुण्णं केवलवरणाणदंसणं समुप्पाडेंति, समुप्पाडित्ता ततो पच्छा सिज्झंति बुज्झंति मुच्चंति परिणिव्वायंति सव्वदुक्खाणं अंतं करेंति ॥ एगच्चाए पुण एगे भयंतारो भवंति, अवरे पुण पुव्वकम्मावसेसेणं कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवंति, तंजहा—महड्ढिएसु महज्जुतिएसु महापरक्कमेसु महाजसेसु महाबलेसु महाणुभावेसु महासुक्खेसु ते णं तत्थ देवा भवंति महड्ढिया महज्जुतिया जाव महासुक्खा हारविराइयवच्छा कडगतुडियथंभियभुया अंगयकुंडलमट्ठगंडयलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउलिमउडा कल्लाणगंधपवरवत्थपरिहिया कल्लाणगपवरमल्लाणुलेवणधरा भासुरबोंदी पलंबवणमालधरा दिव्वेणं रूवेणं दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघाएणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुत्तीए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चाए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा गइकल्लाणा ठिइकल्लाणा आगमेसिभद्दया यावि भवंति, एस ठाणे आयरिए जाव सव्वदुक्खपहीणमग्गे एगंतसम्मे सुसाहू । दोच्चस्स ठाणस्स धम्मपक्खस्स विभंगे एवमाहिए ॥ सूत्रं ३८ ॥

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३३४॥

अथापरस्य द्वितीयस्य स्थानस्य 'विभङ्गो' विभागः स्वरूपम् 'एवं' वक्ष्यमाणनीत्या व्याख्यायते, तद्यथा—'इह खलु' इत्यादि, प्राच्यादिषु दिक्षु मध्येऽन्यतरस्यां दिशि 'सन्ति' विद्यन्ते, ते चैवंभूता भवन्तीति, तद्यथा—न विद्यते सावद्य आरम्भो येषां ते तथा, तथा 'अपरिग्रहा' निष्किञ्चनाः, धर्मेण चरन्तीति धार्मिका यावद्धर्मेणैवात्मनो वृत्तिं परिकल्पयन्ति, तथा सुशीलाः सुव्रताः सुप्रत्यानन्दाः सुसाधवः सर्वस्मात्प्राणातिपाताद्विरता एवं यावत्परिग्रहाद्विरता इति । तथा ये चान्ये तथाप्रकाराः सावद्या आरम्भा यावदबोधिकारिणस्तेभ्यः सर्वेभ्योऽपि विरता इति ॥ पुनरन्येन प्रकारेण साधुगुणान् दर्शयितुमाह—तद्यथा नाम केचनोत्तमसंहननधृतिबलोपेता अनगारा भगवन्तो भवन्तीति, ते पञ्चभिः समितिभिः समिताः 'एव'मित्युपप्रदर्शने औपपातिकमाचाराङ्गसंबन्धि प्रथममुपाङ्गं तत्र साधुगुणाः प्रबन्धेन व्यावर्ण्यन्ते तदिहापि तेनैव क्रमेण द्रष्टव्यमित्यतिदेशः यावद्धूतम्—अपनीतं केशश्मश्रुलोमनखादिकं यैस्ते तथा, सर्वगात्रपरिकर्मविप्रमुक्ता निष्प्रतिकर्मशरीरास्तिष्ठन्तीति ॥ ते चोग्रविहारिणः प्रव्रज्यापर्यायमनुपाल्य, अबाधारूपे रोगातङ्के समुत्पन्नेऽनुत्पन्ने वा भक्तप्रत्याख्यानं विदधति, किं बहुनोक्तेन! यत्कृतेऽयमयोगोलकवच्चिरास्वादः करवालधारामार्गवदुरध्यवसायः श्रमणभावोऽनुपाल्यते तमर्थं—सम्यग्दर्शनज्ञानचारित्राख्यमाराध्य अव्याहतमेकमनन्तं मोक्षकारणं केवलज्ञानमाप्नुवन्ति, केवलज्ञानावाप्तेरूर्ध्वं सर्वदुःखविमोक्षलक्षणं मोक्षमवाप्नुवन्तीति ॥ एके पुनरेकयाऽचेया—एकेन शरीरेणैकसाद्वा भवात्सिद्धिगतिं गन्तारो भवन्ति, अपरे पुनस्तथाविधपूर्वकर्मावशेषे सति तत्कर्मवशगाः कालं कृत्वा अन्यतमेषु वैमानिकेषु देवेषूत्पद्यन्ते तत्रेन्द्रसामानिकत्रायस्त्रिंशलोकपालपार्षदात्मरक्षप्रकीर्णेषु नानाविधसमृद्धिषु भवन्तीति, न[ग्रन्थाग्र१०००]त्राभियोगिककिल्बिषिकादिष्विति । एतदेवाह—'तंजहे'त्यादि, तद्यथा महर्द्धिकादिषु देवलोकेषूत्पद्यन्ते । देवास्तेवंभूता भवन्तीति दर्शयति—'ते णं तत्थ देवा' इत्यादि, ते देवा नानाविधतपश्चरणोपात्तशुभकर्माणो महर्द्धिकादिगुणोपेता भवन्तीत्यादिकः सामान्यगुणवर्णकः, ततो हारविराजितवक्षस इत्यादिक आभरणवस्त्रपुष्पवर्णकः, पुनरतिशयापादनार्थं दिव्यरूपादिप्रतिपादनं चिकीर्षुराह—'दिव्वेणं रूवेण' मित्यादि, दिवि भवं दिव्यं तेन रूपेणोपपेता यावद्दिव्यया द्रव्यलेश्ययोपपेता दशापि दिशः समुद्योतयन्तः, तथा 'प्रभासयन्तः' अलंकुर्वन्तो 'गत्या' देवलोकरूपया कल्याणाः—शोभना गत्या वा—शीघ्ररूपया प्रशस्तविहायोगतिरूपया वा कल्याणाः, तथा स्थित्या उत्कृष्टमध्यमया कल्याणास्ते भवन्ति, तथाऽऽगामिनि काले भद्रकाः शोभनमनुष्यभवरूपसंपदुपपेताः, तथा सद्धर्मप्रतिपत्तारश्च भवन्तीति । तदेतत्स्थानमार्यमेकान्तेनैव सम्यग्भूतं सुसाधितीत्येतद्वितीयस्य स्थानस्य धर्मपाक्षिकस्य विभङ्ग एवमाख्यातः ॥

२ क्रियास्थानाध्य० धर्मपक्षवक्तव्यः

॥३३४॥

अहावरे तच्चस्स ठाणस्स मीसगस्स विभंगे एवमाहिज्जइ—इह खलु पाईणं वा ४ संतेगतिया मणुस्सा भवंति, तंजहा—अप्पिच्छा अप्पारंभा अप्पपरिग्गहा धम्मिया धम्माणुया जाव धम्मेणं चेव वित्तिं कप्पेमाणा विहरंति सुसीला सुव्वया सुपडियाणंदा साहू एगच्चाओ पाणाइवायाओ पडिविरता जावज्जीवाए एगच्चाओ अप्पडिविरया जाव जे यावण्णे तहप्पगारा सावज्जा अबोहिया कम्मंता परपाणपरितावणकरा कज्जंति ततोवि एगच्चाओ अप्पडिविरया ॥ से जहाणामए समणोवासगा भवंति अभिगयजीवाजीवा उवलद्धपुण्णपावा आसवसंवरवेयणाणिज्जराकिरियाहिगरणबंधमोक्खकुसला असहेज्जदेवासुरनागसुवण्णजक्खरक्खसकिंनरकिंपुरिसगरुलगंधव्वमहोरगाइएहिं देवगणेहिं निग्गंथाओ पावयणाओ अणइक्कमणिज्जा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इणमेव निग्गंथे पावयणे णिस्संकिया णिक्कंखिया निव्वितिगिच्छा लद्धट्ठा गहियट्ठा पुच्छियट्ठा विणिच्छियट्ठा अभिगयट्ठा अट्ठिमिंजपेम्माणुरागरत्ता अयमाउसो ! निग्गंथे पावयणे अट्ठे अयं परमट्ठे सेसे अणट्ठे उस्सियफलिहा अवंगुयदुवारा अचियत्तंतेउरपरघरपवेसा चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु पडिपुण्णं पोसहं सम्मं अणुपालेमाणा समणे निग्गंथे फासुएसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं ओसहभेसज्जेणं पीढफलगसेज्जासंथारएणं पडिलाभेमाणा बहूहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं अहापरिग्गहिएहिं तवोकम्मेहिं अप्पाणं भावेमाणा विहरंति ॥ ते णं एयारूवेणं विहारेणं विहरमाणा बहूइं वासाइं समणोवासगपरियागं पाउणंति पाउणित्ता आबाहंसि उप्पन्नंसि वा अणुप्पन्नंसि वा बहूइं भत्ताइं पच्चक्खायंति बहूइं भत्ताइं पच्चक्खाएत्ता बहूइं भत्ताइं अणसणाए छेदेन्ति बहूइं भत्ताइं अणसणाए छेइत्ता आलोइयपडिक्कंता समाहिपत्ता कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवंति, तंजहा—महड्ढिएसु महज्जुइएसु जाव महासुक्खेसु सेसं तहेव जाव एस ठाणे आयरिए जाव एगंतसम्मे साहू । तच्चस्स ठाणस्स मिस्सगस्स विभंगे एवं आहिए ॥ अविरइं पडुच्च बाले आहिज्जइ, विरइं पडुच्च पंडिए आहिज्जइ, विरयाविरइं पडुच्च बालपंडिए आहिज्जइ, तत्थ णं जा सा सव्वतो अविरई एस ठाणे आरंभट्ठाणे अणारिए जाव असव्वदुक्खप्पहीणमग्गे एगंतमिच्छे असाहू, तत्थ णं जा सा सव्वतो विरई एस ठाणे अणारंभट्ठाणे आरिए जाव सव्वदुक्खप्पहीणमग्गे एगंतसम्मे साहू, तत्थ णं जा सा सव्वओ विरयाविरई एस ठाणे आरंभणोआरंभट्ठाणे एस ठाणे आरिए जाव सव्वदुक्खप्पहीणमग्गे एगंतसम्मे साहू ॥ सूत्रं ३९ ॥

॥३३५॥

अथावरस्य तृतीयस्य स्थानस्य मिश्रकाख्यस्य विभङ्गः समाख्यायते—एतच्च यद्यपि मिश्रत्वाद्धर्माधर्माभ्यामुपपेतं तथापि धर्मभूयिष्ठत्वाद्धार्मिकपक्ष एवावतरति, तद्यथा—बहुषु गुणेषु मध्यपतितो दोषो नात्मानं लभते, कलङ्क इव चन्द्रिकायाः, तथा बहूदकमध्यपतितो मृच्छकलावयवो नोदकं कलुषयितुमलम्, एवमधर्मोऽपि धर्ममिति स्थितं धार्मिकपक्ष एवायं । 'इह' अस्मिन् जगति प्राच्यादिषु दिक्षु एके केचन शुभकर्माणो मनुष्या भवन्तीति, तद्यथा—अल्पा—स्तोका परिग्रहारम्भेच्छा—अन्तःकरणप्रवृत्तिर्येषां ते तथा एवंभूता धार्मिकवृत्तयः प्रायः सुशीलाः सुव्रताः सुप्रत्यानन्दाः साधवो भवन्तीति । तथैकस्मात्—स्थूलात्संकल्पकृतात् प्रतिनिवृत्ता एकस्माच्च सूक्ष्मादारम्भजात्प्रतिनिवृत्ता एवं शेषाण्यपि व्रतानि संयोज्यानीति । एतस्मादपि सामान्येन निवृत्ता इत्यतिदिदिक्षयाह—'जे यावण्णे' इत्यादि, ये चान्ये सावद्या नरकादिगमनहेतवः कर्मसमारम्भास्तेभ्य एकस्माद्यत्रपीडननिर्लाञ्छनकरीवलादेर्निवृत्ता एकस्माच्च क्रयविक्रयादेरनिवृत्ता इति ॥ तांश्च विशेषतो दर्शयितुमाह—विशिष्टोपदेशार्थं श्रमणानुपासते—सेवन्त इति श्रमणोपासकाः, ते च श्रमणोपासनतोऽभिगतजीवाजीवस्वभावाः तथोपलब्धपुण्यपापाः । इह च प्रायः सूत्रादर्शेषु नानाविधानि सूत्राणि दृश्यन्ते न च टीकासंवाद्येकोऽप्यस्माभिरादर्शः समुपलब्धोऽत एकमादर्शमङ्गीकृत्यास्माभिर्विवरणं क्रियते इत्येतदवगम्य सूत्रविसंवाददर्शनान्न चित्तव्यामोहो न विधेय इति । ते श्रावकाः परिज्ञातबन्धमोक्षस्वरूपाः सन्तो न धर्माच्याव्यन्ते मेरुरिव निष्प्रकम्पा दृढमार्हते दर्शनेऽनुरक्ताः । अत्र चार्थे सुखप्रतिप-

स्यर्थं दृष्टान्तभूतं कथानकं, तच्चेदं—तद्यथा—राजगृहे नगरे कश्चिदेकः परिव्राट् विद्यामन्त्रौषधिलब्धसामर्थ्यः परिवसति, स च विद्यादिबलेन पत्तने पर्यटन् यां यामभिरूपतरामङ्गनां पश्यति तां तामपहरति, ततः सर्वनागरैः राज्ञे निवेदितं—यथा देव ! प्रत्यहं पत्तनं मुष्यते केनापि, नीयते सर्वसारमङ्गनाजनोऽपि, यत्तत्स्थानमिमतः सोऽत्र केवलमास्ते, तदेवं (देव !) क्रियतां प्रसादस्तदन्वेषणेनेति । राज्ञाऽभिहितं—गच्छत यूयं विश्रब्धा भवत अवश्यमहं तं दुरात्मानं लप्स्ये, किंच—यदि पञ्चभिरहोभिर्न लभे चौरं विमर्शयुक्तोऽपि च त्यक्ष्याम्यात्मानमहं ज्वालामालाकुले वह्नौ, तदेवं कृतप्रतिज्ञं राजानं प्रणम्य निर्गता नागरिकाः, राज्ञा च सविशेषं नियुक्ता आरक्षकाः । आत्मनाऽप्येकाकी खड्गखेटकसमेतोऽन्वेष्टुमारब्धः, न चोपलभ्यते चौरः, ततो राज्ञा निपुणतरमन्वेष्यता पञ्चमेऽहनि भोजनताम्बूलगन्धमाल्यादिकं गृह्णन् रात्रौ स्वतो निर्गतेनोपलब्धः स परिव्राट्, तत्पृष्ठगामिना नगरोद्यानवृक्षकोटरप्रवेशेन गुहाभ्यन्तरं प्रविश्य व्यापादितः, तदनन्तरं समर्पितं यद्यस्य सत्कमङ्गनाजनोऽपीति । तत्र चैका सीमन्तिनी अत्यन्तमौषधिभिर्भाविता नेच्छत्यात्मीयमपि भर्तारं, ततस्तद्विद्विरभिहितं—यथाऽस्याः परिव्राट्समत्कान्यस्थीनि दुग्धेन सह संघृष्य यदि दीयन्ते तदेयं तदाग्रहं मुञ्चति, ततस्तत्स्वजनैरेवमेव कृतं, यथा यथा चासौ तदस्थ्यभ्यवहारं विधत्ते तथा तथा तल्लेहानुबन्धोऽपैति, सर्वास्थिपाने चापगतः प्रेमानुबन्धः, तदनु रक्ता निजे भर्तरि । तदेवं यथाऽसावत्यन्तं भाविता तेन परिव्राजा नेच्छत्यपरम् एवं श्रावकजनोऽपि नितरां भावितात्मा मौनीन्द्रशासने न शक्यते अन्यथाकर्तुम्, अत्यन्तं सम्यक्त्वौषधेन वासिततादिति । पुनरपि श्रावकान् विशिनष्टि—'जाव उस्सियफलिहा' इत्यादि, उच्छ्रितानि स्फटिकानीव स्फटिकानि—अन्तःकरणानि येषां ते तथा, एतदुक्तं भवति—मौनीन्द्रदर्शनावाप्तौ सत्यां परितुष्टमानसा इति, तथा अप्रावृतानि द्वाराणि यैस्ते तथा, उद्घाटितगृहद्वारास्तिष्ठन्ति

॥३३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अचियत्तः—अनभिमतोऽन्तःपुरप्रवेशश्चरत्परगृहद्वारप्रवेशोऽन्यतीर्थिकप्रवेशो येषां ते तथा, अनवरतं श्रमणानुद्युक्तविहारिणो निर्ग्रन्थान् प्रासुकेनैषणीयेनाशनादिना तथा पीठफलकशय्यासंस्तारकादिना च प्रतिलाभयंतः तथा बहूनि वर्षाणि शीलव्रतगुणव्रतप्रत्याख्यानपौषधोपवासैरात्मानं भावयन्तस्तिष्ठन्ति ॥ तदेवं ते परमश्रावकाः प्रभूतकालमणुव्रतगुणव्रतशिक्षाव्रतानुष्ठायिनः साधूनामौषधवस्त्रपात्रादिनोपकारिणः सन्तो यथोक्तं यथाशक्ति सदनुष्ठानं विधायोत्पन्ने वा कारणेऽनुत्पन्ने वा भक्तं प्रत्याख्यायालोचितप्रतिक्रान्ताः समाधिप्राप्ताः सन्तः कालमासे कालं कृत्वाऽन्यतरेषु देवेषूत्पद्यन्त इति । एतानि चाभिगतजीवाजीवादिकानि पदानि हेतुहेतुमद्भावेन नेतव्यानि, तद्यथा—यस्मादभिगतजीवाजीवास्तस्मादुपलब्धपुण्यपापाः, यस्मादुपलब्धपुण्यपापास्तस्मादुच्छ्रितमनसः, एवमुत्तरत्रापि एकैकं पदं त्यजद्भिरेकैकं चोत्तरं गृह्णद्भिर्वाच्यं, ते च परेण पृष्टा अपृष्टा वा एतदूचुः, तद्यथा—अयमेव मौनीन्द्रोक्तो मार्गः सदर्थः शेषस्त्वनर्थो, यस्मादेवं प्रतिपद्यन्ते तस्मात्ते समुच्छ्रितमनसः सन्तः साधुधर्मं श्रावकधर्मं च प्रकाशयन्तो विशेषेणैकादशोपासकप्रतिमाः स्पृशन्तो विहरन्तोऽष्टमीचतुर्दश्यादिषु पौषधोपवासादौ साधून् प्रासुकेन प्रतिलाभयन्ति, पाश्चात्ये च काले संलिखितकायाः संस्तारकश्रमणभावं प्रतिपद्य भक्तं प्रत्याख्यायायुषः क्षये देवेषूत्पद्यन्ते । ततोऽपि च्युताः सुमानुषभावं प्रतिपद्य तेनैव भवेनोत्कृष्टतः सप्तस्वष्टसु वा भवेषु सिध्यन्तीति । तदेतत्स्थानं कल्याणपरम्परया सुखविपाकमितिकृत्वाऽऽर्यमिति । अयं विभङ्गस्तृतीयस्य स्थानस्य मिश्रकाख्यस्याख्यात इति ॥ उक्ता धार्मिकाः, अधार्मिकास्तदुभयरूपाश्चाभिहिताः, साम्प्रतमेतदेव स्थानत्रिकमुपसंहारद्वारेण संक्षेपतो विभणिषुराह—येयमविरतिः—असंयमरूपा सम्यक्त्वाभावान्मिथ्यादृष्टेर्द्रव्यतो विरतिरप्यविरतिरेव तां प्रतीत्य—आश्रित्य बालबालाः—अज्ञाः सदसद्विवेकविकलत्वात् इत्येवम् 'आधीयते' व्यवस्थाप्यते आख्यायते वा, तथा विरतिं च 'प्रतीत्य' आश्रित्य पापाङ्गीनः पण्डिताः परमार्थज्ञो वेत्येवमाधीयते आख्यायते वा, तथा विरताविरतिं चाश्रित्य बालपण्डित इत्येतत्प्राग्वदायोज्यमिति । किमित्यविरतिं (विरताविरतिं) विरत्याश्रयेण (बाल) बालपाण्डित्यपाण्डित्यापत्तिरित्याशङ्क्याह—'तत्थ ण' मित्यादि, 'तत्र' पूर्वोक्तेषु स्थानेषु येयं 'सर्वात्मना' सर्वस्मात् 'अविरतिः' विरतिपरिणामाभावः एतत्स्थानं सावद्यारम्भस्थानमाश्रय एतदाश्रित्य सर्वाण्यकार्याणि क्रियन्ते, यत एवमत एतदनार्यं स्थानं निःशूकतया यत्किञ्चनकारित्वाद्यावदसर्वदुःखप्रक्षीणमार्गोऽयं तथैकान्तमिथ्यारूपोऽसाधुरिति । तत्र च येयं 'विरतिः' सम्यक्त्वपूर्विका सावद्यारम्भान्निवृत्तिः सा स्वागितद्वारत्वात् पापानुपादानरूपेति, एतदेवाह—तदेतत्स्थानम् अनारम्भस्थानं—सावद्यानुष्ठानरहितत्वात्संयमस्थानं, तथा चैतत्स्थानमार्यस्थानम्—आराद्यातं सर्वहेयधर्मेभ्य इत्यार्यं तथा सर्वदुःखप्रक्षीणमार्गः—अशेषकर्मक्षयपथ इति, तथैकान्तसम्यग्भूतः, एतदेवाह—'साधु'रिति, साधुभूतानुष्ठानात्साधुरिति । तत्र च येयं (विरता) विरतिरभिधीयते सैषा मिश्रस्थानभूता, तदेतदारम्भानारम्भरूपस्थानम्, एतदपि कथञ्चिदार्यमेव, पारम्पर्येण सर्वदुःखप्रक्षीणमार्गः, तथैकान्तसम्यग्भूतः साधुश्चेति । तदेवमनेकविधोऽयमधर्मपक्षो धर्मपक्षस्तथा मिश्रपक्षश्चेति संक्षेपेणाभिहितः पक्षत्रयसमाश्रयणेन ॥ साम्प्रतमसावपि मिश्रपक्षो धर्माधर्मसमाश्रयणेनानयोरन्तर्वर्ती भवतीति दर्शयति—

एवमेव समणुगम्ममाणा इमेहिं चेव दोहिं ठाणेहिं समोअरंति, तंजहा—धम्मे चेव अधम्मे चेव उवसंते चेव अणुवसंते चेव, तत्थ णं जे से पढमस्स ठाणस्स अधम्मपक्खस्स विभंगे एवमाहिए, तत्थ णं इमाइं तिन्नि तेवट्ठाइं पावादुयसयाइं भवंतीति मक्खायाइं (यं), तंजहा—किरियावाईणं अकिरियावाईणं अन्नाणियवाईणं वेणइयवाईणं, तेऽवि परिनिव्वाणमाहंसु, तेऽवि मोक्खमाहंसु तेऽवि लवंति, सावगा ! तेऽवि लवंति सावइत्तारो ॥ सूत्रम् ४० ॥ ॥३३७॥

'एवमेव' संक्षेपेण 'सम्यगनुगम्यमाना' व्याख्यायमानाः सम्यगनुगृह्यमाणाः 'अनयोरेव' धर्माधर्मस्थानयोरनुपतन्ति । किमिति ?, यतो यदुपशान्तस्थानं तद्धर्मपक्षस्थानमनुपशान्तस्थानमधर्मपक्षस्थानमिति । तत्र च यदधर्मपाक्षिकं प्रथमं स्थानं तत्रामूनि त्रीणि त्रिषष्ट्यधिकानि प्रावादुकशतान्यन्तर्भवन्तीत्येवमाख्यातं पूर्वाचार्यैरिति । एतानि च सामान्येन दर्शयितुमाह—'तंजहे'त्यादि, तद्यथेत्युपदर्शनार्थः क्रियां—ज्ञानादिरहितामेकामेव स्वर्गापवर्गसाधनत्वेन वदितुं शीलं येषां ते क्रियावादिनः, ते च दीक्षात एव मोक्षं वदन्तीत्येवमादयो द्रष्टव्या इति, तेषां च बहवो भेदाः, तथा अक्रियां परलोकसाधनत्वेन वदितुं शीलं येषां ते तथा तेषामिति, अज्ञानमेव श्रेयः इत्येवं वदितुं शीलं येषां ते भवन्त्यज्ञानवादिनस्तेषां, तथा विनय एव परलोकसाधने प्रधानं कारणं येषां ते तथा तेषामिति । अत्र च सर्वत्र षष्ठीबहुवचनेनेदमाह, तद्यथा—क्रियावादिनामशीत्युत्तरं शतं अक्रियावादिनां चतुरशीतिरज्ञानिकानां सप्तषष्ट्यैवनयिकानां द्वात्रिंशदिति । तत्र च सर्वेऽप्येते मौलास्तच्छिष्याश्च प्रवदनशीलत्वात्प्रावादुकाः, तेषां च भेदसंख्यापरिज्ञानोपाय आचार एवाभिहित इति नेह प्रतन्यते । ते सर्वेऽप्यार्हता इव परिनिर्वाणम्—अशेषद्वन्द्वोपरमरूपमवर्णगन्धरसस्पर्शस्वभावमनुपचरितपरमार्थस्थानं ब्रह्मपदाख्यमबाधात्मकं परमानन्दसुखस्वरूपमाहुः—उक्तवन्तः, तथा तेऽपि प्रावादुकाः संसारबन्धनान्मोचनात्मकं मोक्षमाहुः, पूर्वेण निरुपाधिकं कार्यमेव निर्वाणाख्यमुक्तम्, अनेन तु तदेव कारणोपाधिकमित्ययं विशेषः । तत्र येषामप्यात्मा नास्ति ज्ञानसन्ततिवादिनां तेषामपि कर्मसंततेः संसारनिबन्धनभूताया विच्छे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दान्मोक्षभावाविरोधः, तेषां चोपादानक्षयादनागतानुत्पत्तेः संततिच्छेद एव मोक्षः, प्रदीपस्येव तैलवर्त्यभावे निर्वाणमिति, तथा चाहुः–"न तस्य किञ्चिद्भवति, न भवत्येव केवल'मिति । एतच्च तेषां महामोहविजृम्भितं, यतः–"कर्म चास्ति फलं चास्ति, कर्ता नैवास्ति कर्मणाम् । संसारमोक्षवादित्वमहो ध्वान्त्यविजृम्भितम् ॥ १ ॥" इति । येषां चात्माऽस्ति सांख्यादीनां तेषां प्रकृतिविकारवियोगो मोक्षः, क्षेत्रज्ञस्य पञ्चविंशतितत्त्वपरिज्ञानादेव विद्यमानैः प्रधानविकारैर्वियोजनं मोक्ष इति, तेषामप्येकान्तनित्यवादितया मोक्षाभावः । एवमन्येऽपि नैयायिकवैशेषिकादयः संसाराभावमिच्छन्तोऽपि न मुच्यन्ते, सम्यग्दर्शनादिकस्योपायस्याभावाद्, इत्यभ्युपगमाह—यदि न तेषां मोक्षः कथं ते लोकस्योपास्या भवन्तीत्याशङ्क्याह—'तेऽपि' तीर्थिका'लपन्ति' ब्रुवते, मोक्षं प्रति धर्मदेशनां विदधति, शृण्वन्तीति श्रावकाः हे श्रावका ! एवं गृह्णीत यूयं यथाऽहं देशयामि, तथा तेऽपि धर्मश्रावयितारः सन्त एवं 'लपन्ति' भाषन्ते यथाऽनेनोपायेन स्वर्गमोक्षावाप्तिरिति तद्वचनं मिथ्यात्वोपहतबुद्धयोऽवितथमेव गृह्णन्ति, कूटपण्यदायिनां विपर्यस्तमतय इवेति । तदेवमादितीर्थिकास्तच्छिष्याश्च पारम्पर्येण मिथ्यादर्शनानुभावात्परान्प्रतारयन्ति, तेऽपि च तेषां प्रतीयन्ति, आह–कथमेते श्रावादुका मिथ्यावादिनो भवन्तीति?, अत्रोच्यते, यतस्तेऽप्यहिंसां प्रतिपादयन्ति न च तां प्रधानमोक्षाङ्गभूतां सम्यगनुतिष्ठन्ति, कथम् ?, सांख्यानां तावज्ज्ञानादेव धर्मो न तेषामहिंसा प्राधान्येन व्यवस्थिता, किं तु पञ्च यमा इत्यादिको विशेष इति । तथा शाक्यानामपि दश कुशला धर्मपथा अहिंसापि तत्रोक्ता, न तु सैव गरीयसी धर्मसाधनत्वेन तैराश्रिता । वैशेषिकाणामपि 'अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासप्रस्रादोनयज्ञादिनक्षत्रमन्त्रकालनियमा दृष्टाः' तेषु चाभिषेचनादिषु

१ ज्ञानसंतानस्य क्षणपरम्परकस्य वा २ ज्ञानं सन्तानान्त्यभागरूपं ३ हेतुत्वापेक्षया तृतीया, हेतुत्वं च मोक्षस्य तदविनाभावित्वात् ४ प्रस्थान० प्रस्थादन०

पर्यालोच्यमानेषु हिंसैव संपद्यते । वैदिकानां च हिंसैव गरीयसी धर्मसाधनं, यज्ञोपदेशात्, तस्य च तयाऽविनाभावादित्यभिप्रायः, उक्तं च–"ध्रुवः प्राणिवधो यज्ञे०" ॥ तदेवं सर्वप्रावादुका मोक्षाङ्गभूतामहिंसां न प्राधान्येन प्रतिपद्यन्त इति दर्शयितुमाह—

ते सव्वे पावाउया आदिकरा धम्माणं णाणापण्णा णाणाछंदा णाणासीला णाणादिट्ठी णाणारुई णाणारंभा णाणाज्झवसाणसंजुत्ता एगं महं मंडलिबंधं किच्चा सव्वे एगओ चिट्ठंति ॥ पुरिसे य सागणियाणं इंगालाणं पाइं बहुपडिपुन्नं अओमएणं संडासएणं गहाय ते सव्वे पावाउए आइगरे धम्माणं णाणापण्णे जाव णाणाज्झवसाणसंजुत्ते एवं वयासी–हंभो पावाउया ! आइगरा धम्माणं णाणापण्णा जाव णाणाअज्झवसाणसंजुत्ता! इमं ताव तुब्भे सागणियाणं इंगालाणं पाइं बहुपडिपुन्नं गहाय मुहुत्तगं मुहुत्तगं पाणिणा धरेह, णो बहुसंडासगं संसारियं कुज्जा णो बहुअग्गिथंभणियं कुज्जा णो बहु साहम्मियवेयावडियं कुज्जा णो बहुपरधम्मियवेयावडियं कुज्जा उज्जुया णियागपडिवन्ना अमायं कुव्वमाणा पाणिं पसारेह, इति वुच्चा से पुरिसे तेसिं पावादुयाणं तं सागणियाणं इंगालाणं पाइं बहुपडिपुन्नं अओमएणं संडासएणं गहाय पाणिंसु णिसिरति, तए णं ते पावादुया आइगरा धम्माणं णाणापण्णा जाव णाणाज्झवसाणसंजुत्ता पाणिं पडिसाहरंति, तए णं से पुरिसे ते सव्वे पावाउए आदिगरे धम्माणं जाव णाणाज्झवसाणसंजुत्ते एवं वयासी–हंभो पावादुया ! आइगरा धम्माणं णाणापण्णा जाव णाणाज्झवसाणसंजुत्ता ! कम्हा णं तुब्भे पाणिं पडिसाहरह ?, पाणिं नो डहिज्जा, दड्ढे किं भविस्सइ ?, दुक्खं दुक्खंति मन्नमाणा पडिसाहरह, एस तुला एस पमाणे एस समोसरणे, पत्तेयं तुला पत्तेयं पमाणे पत्तेयं समोसरणे, तत्थ णं जे ते समणा माहणा एवमाइक्खंति जाव परूवेंति–सव्वे पाणा जाव सव्वे सत्ता हंतव्वा अज्जावेयव्वा परिघेतव्वा परितावेयव्वा किलामेतव्वा उद्दवेतव्वा, ते आगंतुछेयाए ते आगंतुभेयाए जाव ते आगंतुजाइजरामरणजोणिजम्मणसंसारपुणब्भवगब्भवासभवपवंचकलंकलीभागिणो भविस्संति, ते बहूणं दंडणाणं बहूणं मुंडणाणं तज्जणाणं तालणाणं अंदुबंधणाणं जाव घोलणाणं माइमरणाणं पिइमरणाणं भाइमरणाणं भगिणीमरणाणं भज्जापुत्तधूतसुण्हामरणाणं दारिद्दाणं दोहग्गाणं अप्पियसंवासाणं पियविप्पओगाणं बहूणं दुक्खदोम्मणस्साणं आभागिणो भविस्संति, अणादियं च णं अणवयग्गं दीहमद्धं चाउरंतसंसारकंतारं भुज्जो भुज्जो अणुपरियट्टिस्संति, ते णो सिज्झिस्संति णो वुज्झिस्संति जाव णो सव्वदुक्खाणं अंतं करिस्संति, एस तुला एस पमाणे एस समोसरणे पत्तेयं तुला पत्तेयं पमाणे पत्तेयं समोसरणे ॥ तत्थ णं जे ते समणा माहणा एवमाइक्खंति जाव परूवेंति–सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता ण हंतव्वा ण अज्जावेयव्वा ण परिघेतव्वा ण उद्दवेयव्वा ते णो आगंतुछेयाए ते णो आगंतुभेयाए जाव जाइजरामरणजोणिजम्मणसंसारपुणब्भवगब्भवासभवपवंचकलंकलीभागिणो भविस्संति, ते णो बहूणं दंडणाणं जाव णो बहूणं मुंडणाणं जाव बहूणं दुक्खदोम्मणस्साणं णो भागिणो भविस्संति, अणादियं च णं अणवयग्गं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीहमद्धं चाउरंतसंसारकंतारं भुज्जो भुज्जो णो अणुपरियट्टिस्संति, ते सिज्झिस्संति जाव सव्वदुक्खाणं अंतं करिस्संति ॥ (सूत्रं ४१) ॥

प्रवदनशीलाः प्रावादुकाः 'सर्वेऽपि ते' त्रिषष्ट्युत्तरत्रिशतपरिमाणा अपि आदिकरा यथास्वं धर्माणां, येऽपि च तच्छिष्यास्तेऽपि सर्वे नाना–भिन्ना प्रज्ञा–ज्ञानं येषां ते नानाप्रज्ञाः, आदिकरा इत्यनेनेदमाह–स्वरुचिविरचितास्ते न त्वनादिप्रवाहायाताः, ननु चार्हतानामपि आदित्वविशेषणमस्त्येव, सत्यमस्ति, किंतु अनादिर्हेतुपरम्परेत्यनादित्वमेव, तेषां च सर्वज्ञप्रणीतागमानाश्रयणान्निबन्धनाभावः तदभावाच्च भिन्नं परिज्ञानम्, अत एव नानाछन्दाः, छन्दः–अभिप्रायः, भिन्नाभिप्राया इत्यर्थः, तथाहि–उत्पादव्ययध्रौव्यात्मके वस्तुनि सांख्यैरेकान्तेनाविर्भावतिरोभावाश्रयणादन्वयिनमेव पदार्थं सत्यत्वेनाश्रित्य नित्यपक्षं (ते) समाश्रिताः, तथा शाक्या अत्यन्तक्षणिकेषु पूर्वोत्तरभिन्नेषु पदार्थेषु सत्सु स एवायमिति प्रत्यभिज्ञाप्रत्ययः सदृशापरापरोत्पत्तिविप्रलब्धानां भवतीत्येतत्पक्षसमाश्रयणादनित्यपक्षं समाश्रिता इति । तथा नैयायिकवैशेषिकाः केषाञ्चिदाकाशपरमाण्वात्मादीनामेकान्तेन नित्यत्वमेव कार्यद्रव्याणां च घटपटादीनामेकान्तेनानित्यत्वमेवाश्रिताः । एवमनया दिशाऽन्येऽपि मीमांसकतापसादयोऽभ्यूह्या इति । तथा ते तीर्थैका नाना शीलं येषां ते तथा, शीलं–व्रतविशेषः, स च भिन्नस्तेषामनुभवसिद्ध एव । तथा नाना दृष्टिः–दर्शनं येषां ते तथा, तथा नाना रुचिर्येषां ते नानारुचयः, तथा नानारूपमध्यवसानम्–अन्तःकरणप्रवृत्तिर्येषां ते तथा, इदमुक्तं भवति—अहिंसाऽत्र प्रधानं धर्माङ्गं, सा च तेषां नानाभिप्रायत्वादविकलतेन न व्यवस्थिता । तस्या एव सूत्रकारः प्राधान्यं दर्शयितुमाह—ते सर्वेऽपि प्रावादुका यथास्वपक्षमाश्रिता एकत्र प्रदेशे संयुता मंडलिबन्धमाधाय तिष्ठन्ति, तेषां

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३४०॥

चैवं व्यवस्थितानामेकः कश्चित्पुरुषस्तेषां संविच्यर्थं ज्वलतामङ्गाराणां प्रतिपूर्णां पात्रीम्—अयोमयं भाजनमयोमयेनैव संदंशकेन गृहीत्वा तेषां दौकितवान्, उवाच च तान् यथा—भोः प्रावादुकाः ! पूर्वोक्तविशेषणविशिष्टा इदमङ्गारभृतं भाजनमेकैकं मुहूर्तं प्रत्येकं बिभृत यूयं, न चेदं (ह) संदंशकं सांसारिकं नापि चाग्निस्तम्भनं विदध्युः नापि च साधर्मिकाऽन्यधार्मिकाणामग्निदाहोपशमादिनोपकारं कुर्युरिति, 'ऋजवो' मायामकुर्वाणाः पाणिं प्रसारयत, तेऽपि च तथैव कुर्युः, ततोऽसौ पुरुषः तद्भाजनं पाणौ समर्पयति, तेऽपि च दाहशङ्किता हस्तं सङ्कोचयेयुरिति, ततोऽसौ तानुवाच–किमिति पाणिं प्रतिसंहरत यूयं ?, एवमभिहितास्ते ऊचुः—दाहभयादिति, एतदुक्तं भवति—अवश्यमग्निदाहभयाच्च कश्चिदन्यमिमुखं पाणिं ददातीत्येतत्परोऽयं दृष्टान्तः । पाणिना दग्धेनापि किं भवतां भविष्यतीति ?, दुःखमिति चेद्यद्येवं भवन्तो दाहापादितदुःखभीरवः सुखलिप्सवः, तदेवं सति सर्वेऽपि जन्तवः संसारोदरविवरवर्तिन एवंभूता एवेत्येवम् 'आत्मतुलया' आत्मौपम्येन यथा मम नाभिमतं दुःखमित्येवं सर्वजन्तूनामित्यवगम्याहिंसैव प्राधान्येनाश्रयणीया, 'तदेतत्प्रमाणं' सैषा युक्तिः 'आत्मवत्सर्वभूतानि, यः पश्यति स पश्यति' । तदेतत् समवसरणं–स एव धर्मविचारो यत्राहिंसा संपूर्णा तत्रैव परमार्थतो धर्मः, इत्येवं व्यवस्थिते तत्र ये केचनाविदितपरमार्थाः श्रमणब्राह्मणादयः 'एवं' वक्ष्यमाणमाचक्षते परेषामात्मदाढ्यर्थोत्पादनायैवं भाषन्ते तथैवमेव धर्मं 'प्रज्ञापयन्ति' व्यवस्थापयन्ति, तथा अनेन प्राण्युपतापकारिणा प्रकारेण परेषां धर्मं 'प्ररूपयन्ति' व्याचक्षते, तद्यथा–'सर्वे प्राणा' इत्यादि, यावद्धन्तव्या दण्डादिभिः परितापयितव्या धर्मार्थमरघट्टादिवहनादिभिः परिग्राह्या विशिष्टकाले श्राद्धादौ रोहितमत्स्यादय इव तथाऽपद्रावयितव्या देवतायागादिनिमित्तं बस्तादय इवेत्येवं ये श्रमणादयः प्राणिनामुपतापकारिणीं भाषां भाषन्ते (ते) आगामिनि कालेऽनेकशो बहुशः स्वशरीरच्छेदाय भेदाय च भाषन्ते, तथा ते सावद्यभाषिणो भविष्यति काले जातिजरामरणानि बहूनि प्राप्नुवन्ति । योन्यां जन्म योनिजन्म तदनेकशो गर्भेष्युत्क्रान्तजावस्थायां प्राप्नुवन्ति, तथा संसारप्रपञ्चान्तर्गतास्तेजोवायुषूच्चैर्गोत्रोद्वलनेन कलङ्कलीभावभाजो भवन्ति बहुशो भविष्यन्ति च, तथा ते बहूनां दण्डादीनां शारीराणां दुःखानामात्मानं भाजनं कुर्वन्ति, तथा ते निर्विवेका मातृवधादीनां मानसानां दुःखानां तथाऽन्येषामप्रियसंप्रयोगार्थनाशादिभिर्दुःखदौर्मनस्यानामाभागिनो भविष्यन्तीति । किं बहुनोक्तेन ?, उपसंहारव्याजेन गुरुतरमनर्थसंबन्धं दर्शयितुमाह—'अणादियं' इत्यादि, नास्यादिरस्तीत्यनादिः—संसारः, तदनेनेदमुक्तं भवति–यत्कैश्चिदभिहितं यथाऽमण्डकादिक्रमेणोत्पादित इत्येतदपास्तं, न विद्यतेऽवद्राग्–पर्यन्तो यस्य सोऽयमनवदाग्रोऽपर्यन्त इत्यर्थः, तदनेनेदमुक्तं भवति–यदुक्तं कैश्चिद्यथा प्रलयकालेऽशेषसागरजलप्लावनं द्वादशादित्योद्गमेन चात्यन्तदाह इत्यादिकं सर्वं मिथ्येति, 'दीर्घं' मित्यनन्तपुद्गलपरावर्तरूपकालावस्थानं, तथा चत्वारोऽन्ता–गतयो यस्य स तथा, चातुर्गतिक इत्यर्थः, तत्संसार एव कान्तारः संसारकान्तारो, निर्जलः सभयस्त्राणरहितोऽरण्यप्रदेशः कान्तार इति । तदेवंभूतं 'भूयो भूयः' पौनःपुन्येनानुपरिवर्तिष्यन्ते–अरहट्टघटीन्यायेन तत्रैव भ्रमन्तः स्थास्यन्तीति, अत एवाह—यतस्ते प्राणिनां हन्तारः, कुत एतदिति चेत्सावद्योपदेशाद्, एतदपि कथमिति चेदन्ततः औद्देशिकादिपरिभोगानुज्ञयेत्येवमवगन्तव्यमित्यतस्ते कुप्रावचनिका नैव सेत्स्यन्ति—नैव ते लोकाग्रस्थानमात्रमिष्यन्ति, तथा न ते सर्वपदार्थान् केवलज्ञानावाप्त्या भोत्स्यन्ते, अनेन ज्ञानातिशयाभावमाह, तथा न तेऽष्टप्रकारेण कर्मणा मोक्ष्यन्ते, अनेनाप्यसिद्धेरकैवल्यावाप्तेश्च कारणमाह, तथा परिनिर्वृतिः परिनिर्वाणं–आनन्दसुखावाप्तिस्तां ते नैव प्राप्स्यन्ते, अनेनापि सुखातिशयाभावः प्रदर्शितो भवतीति, तथा नैते शारीरमानसानां

२ क्रियास्थानाध्य०

॥३४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखानामात्यन्तिकमन्तं करिष्यन्तीत्यनेनाप्यपायातिशयाभावः प्रदर्शितो भवति । 'एषा तुला' तदेतदुपमानं यथा सावद्यानुष्ठानपरायणाः सावद्यभाषिणश्च कुप्रावचनिका न सिध्यन्त्येवं स्वयूथ्या अप्यौद्देशिकादिपरिभोगिनो न सिध्यन्तीति । तदेतत्प्रमाणं—प्रत्यक्षानुमानादिकं, तथाहि—प्रत्यक्षेणैव जीवपीडाकारी चौरादिर्बन्धनान्न मुच्यते, एवमन्येऽपीति, अनुमानादिकमप्यायोज्यं । तथा तदेतत्समवसरणम्—आगमविचाररूपमिति, प्रत्येकं च प्रतिप्राणि प्रतिप्रावादुकमेतत्तुलादिकं द्रष्टव्यमिति ॥ ये पुनर्विदिततत्त्वा आत्मौपम्येन—आत्मतुलया सर्वजीवेष्वहिंसां कुर्वाणा एवमाचक्षते, तद्यथा—सर्वेऽपि जीवा दुःखद्विषः सुखलिप्सवस्ते न हन्तव्या इत्यादि । तदेवं पूर्वोक्तं दण्डनादिकं सप्रतिषेधं भणनीयं यावत्संसारकान्तारमचिरेणैव ते व्यतिक्रमिष्यन्तीति ॥ भणितानि क्रियास्थानानि, साम्प्रतमुपसंजिघृक्षुरेतदेव पूर्वोक्तं समासेन विभणिषुराह—

इच्चेतेहिं बारसहिं किरियाठाणेहिं वट्टमाणा जीवा णो सिज्झिंसु णो बुज्झिंसु णो मुच्चिंसु णो परिणिव्वाइंसु जाव णो सव्वदुक्खाणं अंतं करेंसु वा णो करेंति वा णो करिस्संति वा ॥ एयंसि चेव तेरसमे किरियाठाणे वट्टमाणा जीवा सिज्झिंसु बुज्झिंसु मुच्चिंसु परिणिव्वाइंसु जाव सव्वदुक्खाणं अंतं करेंसु वा करंति वा करिस्संति वा । एवं से भिक्खु आयट्ठी आयहिते आयगुत्ते आयजोगे आयपरक्कमे आयरक्खिए आयाणुकंपए आयनिप्फेडए आयाणमेव पडिसाहरेज्जासि त्तिबेमि ॥ (सूत्रं ४२) ॥ इति वीयसुयक्खंधस्स किरियाठाणं नाम बीयमज्झयणं समत्तं ॥

१ पगमा० क्वचित् क्वचि० नाप्यायाति० २ आत्यन्तिकदुःखनाशाभाव इति ।

इत्येतेषु द्वादशसु क्रियास्थानेष्वधर्मपक्षोऽनुपशमरूपः समवतार्यते, अत एतेषु वर्तमाना जीवा नातीते काले सिद्धा न वर्तमाने सिध्यन्ति न भविष्यति सेत्स्यन्ति, तथा न बुबुधिरे न बुध्यन्ते न च भोत्स्यन्ते, तथा न मुमुचुर्न मुञ्चन्ति न च मोक्ष्यन्ते, तथा न निर्वृता न निर्वान्ति न च निर्वास्यन्ति, तथा न दुःखानामन्तं ययुर्न पुनर्यान्ति न च यास्यन्तीति ॥ साम्प्रतं त्रयोदशं क्रियास्थानं धर्मपक्षाश्रितं दर्शयितुमाह—एतस्मिंस्त्रयोदशे क्रियास्थाने वर्तमाना जीवाः सिद्धाः सिध्यन्ति सेत्स्यन्तीति यावत्सर्वदुःखानामन्तं करिष्यन्तीति स्थितं । तदेवं स भिक्षुर्यः पौण्डरीकाध्ययनेऽभिहितो द्वादशक्रियास्थानवर्जकः अधर्मपक्षानुपशमपरित्यागी धर्मपक्षे स्थित उपशान्त आत्मना आत्मनो वाऽर्थः आत्मार्थः स विद्यते यस्य स तथा, यो ह्यन्यमपायेभ्यो रक्षति स आत्मार्थ्यात्मवानित्युच्यते, अहिताचाराश्च चौरादयो नात्मवन्तोऽयं त्वात्महित ऐहिकामुष्मिकापायभीरुत्वात्, तथाऽऽत्मा गुप्तो यस्य स तथा, एतदुक्तं भवति—स्वयमेवासौ संयमानुष्ठाने पराक्रमते, तथाऽऽत्मयोगी आत्मनो योगः—कुशलमनःप्रवृत्तिरूप आत्मयोगः स यस्यास्ति स तथा, सदा धर्मध्यानावस्थित इत्यर्थः, तथाऽऽत्मा पापेभ्यो दुर्गतिगमनादिभ्यो रक्षितो येन स तथा, दुर्गतिगमनहेतुनिबन्धनस्य सावद्यानुष्ठानस्य निवृत्तत्वादितिभावः, तथाऽऽत्मानमेवानर्थपरिहारद्वारेणानुकम्पते शुभानुष्ठानेन सद्गतिगामिनं विधत्त इति, तथाऽऽत्मानं सम्यग्दर्शनादिकेनानुष्ठानेन संसारचारकान्निःसारयतीति, तथाऽऽत्मानमनर्थभूतेभ्यो द्वादशभ्यः क्रियास्थानेभ्यः प्रतिसंहरेत्, यदिवोपदेशः—आत्मानं सर्वापायेभ्यः प्रतिसंहियात्—सर्वानर्थेभ्यो निवर्तयेदित्येतस्मिन्महापुरुषे संभाव्यत इति । इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् । नयाः पूर्ववद्याख्येयाः । समाप्तं क्रियास्थानाख्यं द्वितीयमध्ययनमिति ॥

१ कर्तरिप्रयोगे आयद्वये कर्मण इत्यध्याहारः ।

अथ द्वितीयश्रुतस्कन्धे तृतीयाध्ययनप्रारम्भः ॥

द्वितीयाध्ययनानन्तरं तृतीयमारभ्यते, अस्य चायमभिसंबन्धः—कर्मक्षपणार्थमुद्यतेन भिक्षुणा द्वादशक्रियास्थानरहितेनान्त्यक्रियास्थानसेविना सदाऽऽहारगुप्तेन भवितव्यं, धर्माधारभूतस्य शरीरस्याधारो भवत्याहारः, स च मुमुक्षुणोद्देशकादिदोषरहितो ग्राह्यः, तेन च प्रायः प्रतिदिनं कार्यमित्यनेन संबन्धेनाहारपरिज्ञाध्ययनमायातम्, अस्य चत्वार्यनुयोगद्वाराण्युपक्रमादीनि भवन्ति, तत्रेदमध्ययनं पूर्वानुपूर्व्या तृतीयं पश्चानुपूर्व्या पञ्चममनानुपूर्व्या त्वनियतमिति, अर्थाधिकारः पुनरत्राहारः शुद्धाशुद्धभेदेन निरूप्यते । निक्षेपस्त्रिविधः—ओघादिः, तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने तु आहारपरिज्ञेति द्विपदं नाम, तत्राहारपदनिक्षेपार्थमाह निर्युक्तिकारः—

नामंठवणादविए खेत्ते भावे य होति बोद्धव्वो । एसो खलु आहारे निक्खेवो होइ पंचविहो ॥ १६९ ॥
दव्वे सचित्तादी खेत्ते नगरस्स जणवओ होइ । भावाहारो तिविहो ओए लोमे य पक्खेवे ॥ १७० ॥
सरीरेणोयाहारो तयाय फासेण लोमआहारो । पक्खेवाहारो पुण कावलिओ होइ नायव्वो ॥ १७१ ॥
ओयाहारा जीवा सव्वे अप्पज्जत्तगा मुणेयव्वा । पज्जत्तगा य लोमे पक्खेवे होइ (होंति) नायव्वा ॥ १७२ ॥
एगिंदियदेवाणं नेरइयाणं च नत्थि पक्खेवो । सेसाणं पक्खेवो संसारत्थाण जीवाणं ॥ १७३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एक्कं च दो व समए तिन्नि व समए मुहुत्तमद्धं वा । सादीयमनिहणं पुण कालमणाहारगा जीवा ॥ १७४ ॥
एक्कं च दो व समए केवलिपरिवज्जिया अणाहारा । मंथंमि दोण्णि लोए य पूरिए तिन्नि समया उ ॥ १७५ ॥
अंतोमुहुत्तमद्धं सेलेसीए भवे अणाहारा । सादीयमनिहणं पुण सिद्धा यऽणहारगा होंति ॥ १७६ ॥
जोएण कम्मएणं आहारेई अणंतरं जीवो । तेण परं मीसेणं जाव सरीरस्स निप्फत्ती ॥ १७७ ॥
णामं ठवणपरिन्ना दव्वे भावे य होइ नायव्वा । दव्वपरिन्ना तिविहा भावपरिन्ना भवे दुविहा ॥ १७८ ॥

नामस्थापनाद्रव्यक्षेत्रभावरूपः पञ्चप्रकारो भवति निक्षेप आहारपदाश्रय इति, तत्र नामस्थापने अनादृत्य द्रव्याहारं प्रतिपादयितुमाह–द्रव्याहारे चिन्त्यमाने सचित्तादिराहारस्त्रिविधो भवति, तद्यथा–सचित्तोऽचित्तो मिश्रश्च, तत्रापि सचित्तः पञ्चविधः पृथिवीकायादिकः, तत्र सचित्तस्य पृथिवीकायस्य लवणादिरूपापन्नस्याहारो द्रष्टव्यः, तथाऽप्कायादेरपीति, एवं मिश्रोऽचित्तश्च योज्यः, नवरमग्निकायमचित्तं प्रायशो मनुष्या आहारयन्ति, ओदनादेस्तद्रूपत्वादिति । क्षेत्राहारस्तु यस्मिन्क्षेत्रे आहारः क्रियते उत्पद्यते व्याख्यायते वा, यदिवा नगरस्य यो देशो धान्येन्धनादिनोपभोग्यः स क्षेत्राहारः, तद्यथा–मथुरायाः समासन्नो देशः परिभोग्यो मथुराहारो मोढेरकाहारः खेडाहार इत्यादि । भावाहारस्त्वयं–क्षुधोदयाद्भक्ष्यपर्यायापन्नं वस्तु यदाहारयति स भावाहार इति । तत्रापि प्रायश आहारस्य जिह्वेन्द्रियविषयत्वात्तिक्तकटुकषायाम्ललवणमधुररसा गृह्यन्ते, तथा चोक्तम्–"राईभत्ते

सूत्रक. ५८

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३४३॥

१ पोलिकादौ सचित्ताग्निकणिकास्तादनं यद्वा चक्रोरादयोऽग्नेर्भक्षका इति किंवदन्ती २ ओदनादीनामग्निनिष्पन्नत्वेनाचित्ताग्निरूपाणां भस्मादीनां च तद्रूपतया परिणामादधुनाऽचित्ताग्निकायता, भगवतीवृत्तौ त्वग्निपरिणामव्याख्यानमप्योदनादीनामौष्ण्ययोगादेव ३ रात्रिभक्तं भावतस्त्रिक्तं वा यावन्मधुरं वा ।

भावओ तित्ते वा जाव मधुरे"त्यादि, अन्यदपि प्रसङ्गेन गृह्यते, तद्यथा–खरविशदमभ्यवहार्यं भक्ष्यं, तत्रापि बाष्पाद्य ओदनः प्रशस्यते न शीतः, उदकं तु शीतमेव, तथा चोक्तं–"शैत्यमयां प्रधानो गुणः" एवं तावद्भ्यवहार्यं द्रव्यमाश्रित्य भावाहारः प्रतिपादितः, साम्प्रतमाहारकमाश्रित्य भावाहारं निर्युक्तिकृदाह–भावाहारस्त्रिविधः–त्रिप्रकारो भवति, आहारकस्य जन्तोस्त्रिभिः प्रकारैराहारोपादानादिति, प्रकारानाह–'ओए'त्ति तैजसेन शरीरेण तत्सहचरितेन च कार्मणेनाभ्यां द्वाभ्यामप्याहारयति यावदपरमौदारिकादिकं शरीरं न निष्पद्यते, तथा चोक्तम्–"तेएणं कम्मएणं आहारेइ अणंतरं जीवो । तेण परं मिस्सेणं जाव सरीरस्स निप्फत्ती ॥ १ ॥" तथा–ओआहारा जीवा सव्वे आहारगा अपज्जत्ता ।" लोमाहारस्तु शरीरपर्याप्त्युत्तरकालं बाह्यया त्वचा, लोमभिराहारो लोमाहारः, तथा प्रक्षेपेण कवलादेराहारः प्रक्षेपाहारः, स च वेदनीयोदयेन चतुर्भिः स्थानैराहारसंज्ञासद्भावाद्भवति, तथा चोक्तम्–"चउहिं ठाणेहिं आहारसण्णा समुप्पज्जइ, तंजहा–ओमकोट्ठयाए १ छुहावेयणिज्जस्स कम्मस्स उदएणं २ मईए ३ तयट्ठोवओगेणं"ति । साम्प्रतमेतेषां त्रयाणामप्येकयैव गाथया व्याख्यानं कर्तुमाह–तैजसेन कार्मणेन च शरीरेणौदारिकादिशरीरानिष्पत्तेर्मिश्रेण च य आहारः स सर्वोऽप्योजाहार इति, केचिद्व्याचक्षते–औदारिकादिशरीरपर्याप्त्या पर्याप्तकोऽपीन्द्रियानापानभाषामनःपर्याप्तिभिरपर्याप्तकः शरीरेणाहारयन् ओजाहार इति गृह्यते, तदुत्तरकालं तु त्वचा–स्पर्शेन्द्रियेण य आहारः स लोमाहार इति, प्रक्षेपाहारस्तु 'कावलिकः' कवलप्रक्षेपनिष्पादित इति ज्ञातव्यो भवति । पुनरप्येषामेव स्वामिविशेषेण विशेषमा-

३ आहार-परिज्ञा

॥३४३॥

१ तैजसेन कार्मणेन चाहारयत्यनन्तरं जीवः ततः परं मिश्रेण यावच्छरीरस्य निष्पत्तिः ॥ १ ॥ २ ओजआहारा जीवाः सर्वे आहारका अपर्याप्ताः ॥ १ ॥ ३ चतुर्भिः स्थानैराहारसंज्ञा समुत्पद्यते तद्यथा–वामकोष्ठतया क्षुधावेदनीयस्य कर्मण उदयेन मत्या तदर्थोपयोगेन ॥ १ ॥

विर्भावयन्नाह–यः प्रागुक्तः शरीरेणौजसाऽऽहारस्तेनाहारेणाहारका जीवाः सर्वेऽप्यपर्याप्तका ज्ञातव्याः, सर्वाभिः पर्याप्तिभिरपर्याप्तास्ते वेदितव्याः, तत्र प्रथमोत्पत्तौ जीवः पूर्वशरीरपरित्यागे विग्रहेणाविग्रहेण वोत्पत्तिदेशे तैजसेन कार्मणेन च शरीरेण तप्तलोहपतितसंपानकवत्तत्प्रदेशस्थानात् (स्थान) पुद्गलानादत्ते, तदुत्तरकालमपि यावदपर्याप्तकावस्था तावदोजआहार इति, पर्याप्तकास्त्विन्द्रियादिभिः पर्याप्तिभिः पर्याप्ताः केषांचिन्मतेन शरीरपर्याप्तका वा गृह्यन्ते, तदेवं ते लोमाहारा भवन्ति, तत्र स्पर्शेन्द्रियेणोष्मादिना तप्तश्छायया शीतवायुनोदकेन वा ग्रीयते प्राणी गर्भस्थोऽपि, पर्याप्त्युत्तरकालं लोमाहार एवेति, प्रक्षेपाहारे तु भजनीयाः, यदैव प्रक्षेपं कुर्वन्ति तदैव प्रक्षेपाहारा नान्यदा, लोमाहारता तु बाह्यादिस्पर्शोत्सर्वदैवेति, स च लोमाहारश्चक्षुष्मताम्–अवाग्दृष्टिमतां न दृष्टिपथमवतरति, अतोऽसौ प्रतिसमयवर्ती प्रायशः, प्रक्षेपाहारस्तूपलभ्यते प्रायः, स च नियतकालीयः, तद्यथा–देवकुरूत्तरकुरु (वादि) प्रभवा अष्टमभक्ता(द्या)हाराः, संख्येयवर्षायुषामनियतकालीयः प्रक्षेपाहार इति ॥ साम्प्रतं प्रक्षेपाहारं स्वामिविभागेन दर्शयितुमाह–एकमेव स्पर्शेन्द्रियं येषां ते भवन्त्येकेन्द्रियाः–पृथिवीकायादयस्तेषां देवनारकाणां च नास्ति प्रक्षेपः, ते हि पर्याप्त्युत्तरकालं स्पर्शेन्द्रियेणैवाहारयन्तीतिकृत्वा लोमाहाराः, तत्र देवानां मनसा परिकल्पिताः शुभाः पुद्गलाः सर्वेणैव कायेन परिणमन्ति नारकाणां त्वशुभा इति, शेषास्त्वौदारिकशरीरा द्वीन्द्रियादयस्तिर्यङ्मनुष्याश्च तेषां प्रक्षेपाहार इति, तेषां संसारस्थितानां कायस्थितेरेवाभावात्प्रक्षेपमन्तरेण, कावलिक आहारो जिह्वेन्द्रियस्य सद्भावादिति, अन्ये त्वाचार्या अन्यथा व्याचक्षते–तत्र यो जिह्वेन्द्रियेण स्थूलः शरीरे प्रक्षिप्यते स प्रक्षेपाहारः, यस्तु घ्राणदर्शनश्रवणैरुपलभ्यते धातुभावेन परिणमति स ओजाहारः, यः पुनः स्पर्शेन्द्रियेणै-

१ वायुपर्याप्तेलोमाहारस्य सार्वदिकत्वात्, विग्रहादौ व्यभिचारवारणाय प्रायश इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वोपलभ्यते धातुभावेन(च) प्रयाति स लोमाहार इति ॥ साम्प्रतं कालविशेषमधिकृत्याऽनाहारकानभिधित्सुराह–तत्र 'विग्गहगइमावन्ना केवलिणो समुहया अयोगी या । सिद्धा य अणाहारा सेसा आहारगा जीवा ॥ १ ॥' अस्या लेशतोऽयमर्थः–उत्पत्तिकाले विग्रहगतौ–वक्रगतावापन्नाः केवलिनो लोकपूरणंकाले समुद्घातावस्थिता अयोगिनः–शैलेश्यवस्थाः सिद्धाश्चानाहारकाः, शेषास्तु जीवा आहारका इत्यवगन्तव्यं, तत्र भवाद्भवान्तरं यदा समश्रेण्या याति तदाऽनाहारको न लभ्यते, यदापि विश्रेण्यामेकेन वक्रेणोत्पद्यते तदापि प्रथमसमये पूर्वशरीरस्थेनाहारितं द्वितीये त्ववक्रसमये समाश्रितशरीरस्थेनेति, वक्रद्वये तु त्रिसमयोत्पत्तौ मध्यमसमयेऽनाहारक इति इतरयोस्त्वाहारक इति, वक्रत्रये तु चतुःसमयोत्पत्तिके मध्यवर्तिनोः समययोरनाहारकः, चतुःसमयोत्पत्तिश्चैवं भवति–त्रसनाड्या बहिरुपरिष्टादधोऽधस्ताद्वोपर्युत्पद्यमानो दिशो विदिशि विदिशो वा दिशि यदोत्पद्यते तदा लभ्यते, तत्रैकेन समयेन त्रसनाडीप्रवेशो द्वितीयेनोपर्यधो वा गमनं, तृतीयेन च बहिर्निःसरणं, चतुर्थेन तु विदिक्षूत्पत्तिदेशे प्राप्तिरिति । पञ्चसमया तु त्रसनाड्या बहिरेव विदिशो विदिक्षूत्पत्तौ लभ्यते तत्र च मध्यवर्तिषु (त्रिषु) अनाहारक इत्यवगन्तव्यम्, आद्यन्तसमयोस्त्वाहारक इति । केवलिसमुद्घातेऽपि कार्मणशरीरवर्तित्वात् तृतीयचतुःपञ्चमसमयेष्वनाहारको द्रष्टव्यः । शेषेषु तु औदारिकतन्मिश्रशरीरवर्तित्वादाहारक इति । 'मुहुत्तमद्धं च'त्ति अन्तर्मुहूर्तं गृह्यते, तच्च केवली स्वायुषःक्षये सर्वयोगनिरोधे सति ह्रस्वपञ्चाक्षरोद्गिरणमात्रकालं यावदनाहारक इत्येवमवगन्तव्यं । सिद्धजीवास्तु शैलेश्यवस्थाया आदिसमयादारभ्यानन्तमपि कालमनाहारका इति ॥ साम्प्रतमेतदेव स्वामिविशेषविशेषिततरमाह–केवलिपरिवर्जिताः संसारस्था जीवा एकं द्वौ वा अनाहारका भवन्ति ।

१ उपलक्षणात्पूर्णतासंहरणयोः २ ततोऽर्वाक्, सामीप्ये च सप्तमी ।

ते च द्विविग्रहत्रिविग्रहोत्पत्तौ त्रिचतुःसामयिकायां द्रष्टव्याः, चतुर्विग्रहपञ्चसमयोत्पत्तिस्तु स्वल्पसत्त्वाश्रितेति न साक्षादुपात्ता, तथा चान्यत्राप्यभिहितम्–"एकं द्वौ वाऽनाहारकः" (तत्त्वा० अ०२ सू० ३१), वाशब्दात् त्रीन् वा, आनुपूर्व्या अप्युदय उत्कृष्टतो विग्रहगतौ चतुरः समयानागमेऽभिहितः, ते च पञ्चसमयोत्पत्तौ लभ्यन्ते नान्यत्रेति । भवस्थकेवलिनस्तु समुद्घाते मन्थे तत्करणोपसंहारावसरे तृतीयपञ्चमसमयौ द्वौ लोकपूरणाच्चतुर्थसमयेन सहितावयः समया भवन्तीति ॥ पुनरपि नियुक्तिकारः सादिकमपर्यवसानं कालमनाहारकत्वं दर्शयितुमाह–शैलेश्यवस्थाया आरभ्य सर्वदाऽनाहारकः सिद्धावस्थाप्राप्तावनन्तमपि कालं यावदिति, पूर्वं तु कावलिकव्यतिरेकेण प्रतिसमयमाहारकः कावलिकेन तु कादाचित्क इति । ननु केवलिनो घातिकर्मक्षयेऽनन्तवीर्यत्वान्न भवत्येव कावलिक आहारः, तथाहि–आहारादाने यानि वेदनादीनि षट् कारणान्यभिहितानि तेषां मध्ये एकमपि न विद्यते केवलिनि तत्कथमसावाहारं बहुदोषदुष्टं गृह्णीयात् ?, तत्र न तावत्तस्य वेदनोत्पद्यते, तद्वेदनीयस्य दग्धरज्ज्वस्थानिकत्वात्, सत्यामपि न तस्य तत्कृता पीडा, अनन्तवीर्यत्वात्, वैयावृत्यकारणं तु भगवति सुरासुरनराधिपतिपूज्ये न संभाव्यत एवेति, ईर्यापथः पुनः केवलज्ञानावरणपरिक्षयात्सम्यगवलोकयत्येवासौ, संयमस्तु तस्य यथाख्यातचारित्रिणो निष्ठितार्थत्वान्नाहारग्रहणाय कारणीभवति, प्राणवृत्तिस्तु तस्यानपवर्तित्वात् आयुषोऽनन्तवीर्यत्वाच्चान्यथा सिद्धैव, धर्मचिन्तावसरस्त्वपगतो निष्ठितार्थत्वात्, तदेवं केवलिनः कावलिकाहारो बहुपायत्वान्न कथञ्चिद् घटत इति स्थितम्, अत्रोच्यते, तत्र यत्तावदुक्तं 'घातिकर्मक्षये केवलज्ञानोत्पत्तावनन्तवीर्यत्वान्न केवलिनो भुक्ति'रिति, तदागमानभिज्ञस्य तत्त्वविचाररहितस्य युक्तिहृदयमजानतो वचनं, तथा-

१ अन्तराणि संहृत्य मन्थीभवनसमयः २ सति कारणतान्नापनाय ।

हि–यदाहारनिमित्तं वेदनीयं कर्म तत्तस्य तथैवाऽऽस्ते, किमिति सा·शारीरी स्थितिः प्राक्तनी न भवति ?, प्रमाणं च–अस्ति केवलिनो भुक्तिः, समग्रसामग्रीकत्वात्पूर्वभुक्तिवत्, सामग्री चेयं प्रक्षेपाहारस्य, तद्यथा—पर्याप्तत्वं १ वेदनीयोदयः २ आहारपक्तिनिमित्तं तैजसशरीरं ३ दीर्घायुष्कत्वं ४ चेति, तानि च समस्तान्यपि केवलिनि सन्ति, यदपि दग्धरज्ज्वसंस्थानिकत्वमुच्यते वेदनीयस्य तदप्यनागमिकमयुक्तिसंगतं च, आगमे ह्यल्पस्थित्युदयः सातस्य केवलिन्यभिधीयते, युक्तिरपि–यदि घातिकर्मक्षयाज्ज्ञानादयस्तस्याभूवन् वेदनीयोद्भवायाः क्षुधः किमायातं ? येनासौ न भवति, न तयोश्छायातपयोरिव सहानवस्थानलक्षणो नापि भावाभावयोरिव परस्परपरिहारलक्षणः कथिद्विरोधोऽस्तीति, सातासातयोश्चान्तर्मुहूर्तपरिवर्तमानतया यथा सातोदय एवमसातोदयोऽपीत्यनन्तवीर्यत्वे सत्यपि शरीरबलापचयः क्षुद्वेदनीयोद्भवा पीडा च भवत्येव, न चाहारग्रहणे तस्य किंचित्क्षीयते, केवलमाहोपुरुषिकामात्रमेवेति । यदप्युच्यते–वेदनीयस्योदीरणाया अभावात्प्रभूततरपुद्गलोदयाभावस्तदभावाच्चात्यन्तं वेदनीयपीडाऽभाव इति वाङ्मात्रं, तथाहि–अविरतसम्यग्दृष्ट्यादिष्वेकादशसु स्थानकेषु वेदनीयस्य गुणश्रेणीसद्भावात्प्रभूतपुद्गलोदयसद्भावः ततः किं तेषु प्राक्तनेभ्योऽधिकपीडासद्भाव इति, अपिच–यो जिने सातोदयस्तीव्रः किमसौ प्रचुरपुद्गलोदये नेति ?, अतो यत्किञ्चिदेतदिति । तदेवं सातोदयवदसातोदयोऽपि केवलिन्यनिवारित इति, तयोरन्तर्मुहूर्तकालेन परिवर्तमानत्वात् । यदपि क्वचित्कैश्चिदभिधीयते–विपद्यमानतीर्थकरनाम्नो देवस्य च्यवनकाले षण्मासकालं यावदत्यन्तं सातोदय एवेत्यसावपि यदि स्यान्न नो बाधायै, केवलिनां भुक्तेरनिवारितत्वात् । यदप्युच्यते–आहारविषयाकाङ्क्षारूपा क्षुद्भवति, अभिकाङ्क्षा चाहारपरिग्रहबुद्धिः, सा च मोहनीय-

१ आत्मशक्त्याविष्करणमात्रं २ पूर्वोक्तवादिभिः, षण्मासाधिकायुषामपि केवलाद्वेति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकारः, तस्य चापगतत्वात्केवलिनो न भुक्तिरिति, एतदप्यसमीचीनं, यतो मोहनीयविपाका क्षुद्य भवति, तद्विपाकस्य प्रतिपक्षभावनया प्रतिसंख्यानेन निवर्त्यमानत्वात्, तथाहि–कषायाः प्रतिकूलभावनया निवर्त्यन्ते, तथा चोक्तम्–"उवसमेण हणे कोहं, माणं मद्दवया जिणे । मायं चऽज्जवभावेण, लोभं संतुट्ठिए जिणे ॥ १ ॥" मिथ्यात्वसम्यक्त्वयोश्च परस्परनिवृत्तिर्भावनाकृता प्रतीतैव, वेदोदयोऽपि विपरीतभावनया निवर्तते, तदुक्तम्–"काम ! जानामि ते मूलं, संकल्पात्किल जायसे । ततस्तं न करिष्यामि, ततो मे न भविष्यसि ॥ १ ॥" हास्यादिषट्कमपि चेतोविकाररूपतया प्रतिसंख्यानेन निवर्तते, क्षुद्वेदनीयं तु रोगशीतोष्णादिवज्जीवपुद्गलविपाकितया न प्रतीपवासनामात्रेण निवर्त्ततेऽतो न मोहविपाकस्वभावा क्षुदिति । तदेवं व्यवस्थिते यत्कैश्चिदाग्रहगृहीतैरभिधीयते, यथा–'अपवर्त्यतेऽकृतार्थं नायुर्ज्ञानादयो न हीयन्ते । जगदुपकृतावनन्तं वीर्यं किं गततृषो भुक्तिः? ॥ १ ॥' तदेतत् प्लवते, यतश्छद्मस्थावस्थायामप्येतदस्तीति तत्रापि किमिति भुङ्क्ते ?, तत्र समस्तवीर्यान्तरायक्षयाभावान्भुक्तिसद्भाव इति चेत्, तदयुक्तं, यतः किं तत्रायुषोऽपवर्तनं स्यात् किं वा चतुर्णां ज्ञानानां काचिद्धानिः स्याद्येन भुक्तिरिति, तस्माद्यथा दीर्घकालस्थितेरायुष्कं कारणमेवमाहारोऽपि । यथा सिद्धिगतेर्व्युपरतक्रियस्य ध्यानस्य चरमक्षणः कारणमेवं सम्यक्त्वादिकमपीति । अनन्तवीर्यतापि तस्याहारग्रहणे सति न विरुध्यते, यथा तस्य देवच्छन्दादीनि विश्रामकारणानि गमननिषीदनानि च भवन्त्येवमाहारक्रियापि, विरोधाभावात्, नह्यत्र बलवत्तरवीर्यबलोऽल्पीयसी क्षुदिति, एवं च स्थिते यत्किञ्चिदेतत् । अपि च–एकादश परीषहा वेदनीयकृता जिने प्रादुष्यन्ति, अपरे तु एकादश ज्ञानावरणीयादिकृतास्तत्क्षयेऽपगता इतीयमप्युपपत्तिः केवलिनि भुक्तिं साध-

१ उपशमेन हन्यात् क्रोधं मानं मार्दवतया जयेत् मायां चार्जवभावेन लोभं सन्तोषतो जयेत् ॥ १ ॥ २ मोहरहितस्य, आकाङ्क्षाया मोहरूपत्वात् ।

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३४६॥

यति, तथाहि–क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याऽऽक्रोशवधयाञ्चालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानदर्शनानीत्येते द्वाविंशतिर्मुमुक्षुणा परिसोढव्याः परिषहाः, तेषां च मध्ये ज्ञानावरणीयात्त्रयो प्रज्ञाज्ञानाख्यौ, दर्शनमोहनीयसंभवो दर्शनपरिषहः, अन्तरायोत्थोऽलाभपरिषहः, चारित्रमोहनीयसंभूतास्त्वमी–नाग्न्यारतिस्त्रीनिषद्याऽऽक्रोशयाञ्चासत्कारपुरस्काराः, एते चैकादशापि जिने केवलिनि न संभवन्ति, तत्कारणानां कर्मणामपगतत्वात्, न हि कारणाभावे क्वचित्कार्योपपत्तिः, शेषास्त्वेकादश जिने संभवन्ति, तत्कारणस्य वेदनीयस्य विद्यमानत्वात्, ते चामी–क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलाख्याः, एते च वेदनीयप्रभवाः, तच्च केवलिनि विद्यन्ते, न च निदानानुच्छेदे निदानिन उच्छेदः संभाव्यते, अतः केवलिनि क्षुद्वेदनीयादिपीडा संभाव्यते, केवलमसावनन्तवीर्यत्वान्न विह्वलीभवति, न चासौ निष्ठितार्थो निष्प्रयोजनमेव पीडामधिसहते, न च शक्यते वक्तुम्–एवंभूतमेव तस्य भगवतः शरीरं यदुत क्षुत्पीडा न बाधते आहारमन्तरेण(च) वर्तते, यथा स्वभावेनैव प्रस्वेदादिरहितमेवं प्रक्षेपाहाररहितमित्येतच्चाप्रमाणकत्वादपकर्णनीयम् । अपि च–केवलोत्पत्तेः प्राग् भुक्तेरभ्युपगमात्केवलोत्पत्तावपि तदेवौदारिकं शरीरमाहाराद्युपसंस्कार्यम्, अथान्यथाभावः कैश्चिदुच्यते असावपि युक्तिरहितत्वादभ्युपगममात्र एवेति । तदेवं देशोनपूर्वकोटिकालस्य केवलिस्थितेः संभवादौदारिकशरीरस्थितेश्च यथाऽऽयुष्कं कारणमेवं प्रक्षेपाहारोऽपि, तथाहि–तैजसशरीरेण मृदूकृतस्याभ्यवहृतस्य द्रव्यस्य स्वपर्याप्त्या परिणामितस्योत्तरोत्तरपरिणामक्रमेणौदारिकशरीरिणामनेन प्रकारेण क्षुदुद्भवो भवति । वेदनीयोदये सति, इयं च सामग्री सर्वापि भगवति केवलिनि संभवति, तत्किमर्थमसौ न भुङ्क्ते ?, न च घाति-

३ आहारपरिज्ञायां केवलिनो भुक्तिः

॥३४६॥

१ दीर्घकालस्थितिदर्शनाय । २ विशेषणार्थः । ३ शरीरादिरूपः ।

चतुष्टयस्य सहकारिकारणभावोऽस्ति येन तदभावात्तदभाव इत्युच्यते । तदेवं संसारस्था जीवा विग्रहगतौ जघन्येनैकं समयं उत्कृष्टतः समयत्रयं भवस्थकेवली च समुद्घातावस्थः समयत्रयमनाहारकः शैलेश्यवस्थायां त्वन्तर्मुहूर्तं, सिद्धास्तु सादिकमपर्यन्तं कालमनाहारका इति स्थितं ॥ साम्प्रतं प्रथमाहारग्रहणं येन शरीरेण करोति तद्दर्शयति–ज्योतिः–तेजस्तदेव तत्र वा भवं तैजसं तेन कार्मणेन चाहारयति, तैजसकार्मणे हि शरीरे आसंसारभाविनी, ताभ्यामेव चोत्पत्तिदेशं गता जीवाः प्रथममाहारं कुर्वन्ति, ततः परमौदारिकमिश्रेण वैक्रियमिश्रेण वा यावच्छरीरं निष्पद्यते तावदाहारयन्ति, शरीरनिष्पत्तौ त्वौदारिकेण वैक्रियेण वाऽऽहारयन्तीति स्थितम् ॥ साम्प्रतं परिज्ञानिक्षेपार्थमाह–तत्र नामस्थापनाद्रव्यभावभेदात्परिज्ञा चतुर्धा, तत्रापि नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यपरिज्ञां प्रतिपादयन् गाथापश्चार्द्धमाह–'द्रव्यपरिज्ञे'ति द्रव्यस्य द्रव्येण वा परिज्ञा द्रव्यपरिज्ञा, सा च परिच्छेद्यद्रव्यप्राधान्यात्तस्य च सचित्ताचित्तमिश्रभेदेन त्रैविध्यात्त्रिविधेति । भावपरिज्ञाऽपि ज्ञपरिज्ञाप्रत्याख्यानपरिज्ञाभेदेन द्विविधेति, शेषस्त्वागमनोआगमज्ञशरीरभव्यशरीरव्यतिरिक्तादिको विचारः शस्त्रपरिज्ञावद्द्रष्टव्यः । गता निक्षेपनिर्युक्तिः, अधुना सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्–

सुयं मे आउसंतेणं भगवया एवमक्खायं–इह खलु आहारपरिण्णाणामज्झयणे, तस्स णं अयमट्ठे–इह खलु पाईणं वा ४ सव्वतो सव्वावंति च णं लोगंसि चत्तारि बीयकाया एवमाहिज्जंति, तंजहा–अग्गबीया मूलबीया पोरबीया खंधबीया, तेसिं च णं अहाबीएणं अहावगासेणं इहेगतिया सत्ता पुढवीजोणिया पुढवीसंभवा पुढवीवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोवगा कम्मणियाणेणं तत्थवुक्कमा णाणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहजोणियासु पुढवीसु रुक्खत्ताए विउट्टंति ॥ ते जीवा तेसिं णाणाविहजोणियाणं पुढवीणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं आउसरीरं तेउसरीरं वाउसरीरं वणस्सइसरीरं ॥ णाणाविहाण तसथावराणं पाणाणं सरीरं अचित्तं कुव्वंति परिविद्धत्थं तं सरीरं पुव्वाहारियं तयाहारियं विपरिणयं सारूवियकडं संतं ॥ अवरेऽवि य णं तेसिं पुढविजोणियाणं रुक्खाणं सरीरा णाणावण्णा णाणागंधा णाणारसा णाणाफासा णाणासंठाणसंठिया णाणाविहसरीरपुग्गलविउविता ते जीवा कम्मोववन्नगा भवंतित्तिमक्खायं ॥ (सूत्रं ४३) ॥ अहावरं पुरक्खायं इहेगतिया सत्ता रुक्खजोणिया रुक्खसंभवा रुक्खवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोवगा कम्मनियाणेणं तत्थवुक्कमा पुढवीजोणिएहिं रुक्खेहिं रुक्खत्ताए विउट्टंति, ते जीवा तेसिं पुढवीजोणियाणं रुक्खाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं आउतेउवाउवणस्सइसरीरं णाणाविहाणं तसथावराणं पाणाणं सरीरं अचित्तं कुव्वंति परिविद्धत्थं तं सरीरं पुव्वाहारियं तयाहारियं विप्परिणामियं सारूविकडं संतं अवरेवि य णं तेसिं रुक्खजोणियाणं रुक्खाणं सरीरा णाणावण्णा णाणागंधा णाणारसा णाणाफासा णाणासंठाणसंठिया णाणाविहसरीरपुग्गलविउविया ते जीवा कम्मोववन्नगा भवंतीतिमक्खायं ॥ (सूत्रं ४४) ॥ अहावरं पुरक्खायं इहेगतिया सत्ता रुक्खजोणिया रुक्खसंभवा रुक्खवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोवगा कम्मणियाणेणं तत्थवुक्कमा रुक्खजोणिएसु रुक्खत्ताए विउट्टंति, ते जीवा तेसिं रुक्खजोणियाणं रुक्खाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं आउतेउवाउवणस्सइसरीरं तसथावराणं पाणाणं सरीरं अचित्तं कुव्वंति, परिविद्धत्थं तं सरीरं पुव्वाहारियं तयाहारियं विपरिणामियं सारूविकडं संतं अवरेऽवि य णं तेसिं रुक्खजोणियाणं रुक्खाणं सरीरा णाणावन्ना जाव ते जीवा कम्मोववन्नगा भवंतीतिमक्खायं ॥ (सूत्रं४५) ॥ अहावरं पुरक्खायं इहेगइया सत्ता रुक्खजोणिया रुक्खसंभवा रुक्खवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोवगा कम्मनियाणेणं तत्थवुक्कमा रुक्खजोणिएसु रुक्खेसु मूलत्ताए कंदत्ताए खंधत्ताए तयत्ताए सालत्ताए पवालत्ताए पत्तत्ताए पुप्फत्ताए फलत्ताए बीयत्ताए विउट्टंति, ते जीवा तेसिं रुक्खजोणियाणं रुक्खाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं आउतेउवाउवणस्सइ० णाणाविहाणं तसथावराणं पाणाणं सरीरं अचित्तं कुव्वंति परिविद्धत्थं तं सरीरगं जाव सारूविकडं संतं, अवरेऽवि य णं तेसिं रुक्खजोणियाणं मूलाणं कंदाणं खंधाणं तयाणं सालाणं पवालाणं जाव बीयाणं सरीरा णाणावण्णा णाणागंधा जाव णाणाविहसरीरपुग्गलविउविया ते जीवा कम्मोववन्नगा भवंतीतिमक्खायं ॥ (सूत्रं ४६) ॥ अहावरं पुरक्खायं इहेगतिया सत्ता रुक्खजोणिया रुक्खसंभवा रुक्खवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोववन्नगा कम्मनियाणेणं तत्थवुक्कमा रुक्खजोणिएहिं अज्झारोहत्ताए विउट्टंति, ते जीवा तेसिं रुक्खजोणियाणं रुक्खाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं जाव सारूविकडं संतं, अवरेवि य णं तेसिं रुक्खजोणियाणं अज्झारुहाणं सरीरा

णाणावन्ना जावमक्खायं ॥ (सूत्रं४७) ॥ अहावरं पुरक्खायं इहेगतिया सत्ता अज्झारोहजोणिया अज्झारोहसंभवा जाव कम्मनियाणेणं तत्थवुक्कमा रुक्खजोणिएसु अज्झारोहेसु अज्झारोहत्ताए विउट्टंति, ते जीवा तेसिं रुक्खजोणियाणं अज्झारोहाणं सिणेहमाहारेंति, ते जीवा पुढवीसरीरं जाव सारूविकडं संतं, अवरेवि य णं तेसिं अज्झारोहजोणियाणं अज्झारोहाणं सरीरा णाणावन्ना जावमक्खायं ॥ (सूत्रं ४८) ॥ अहावरं पुरक्खायं इहेगतिया सत्ता अज्झारोहजोणिया अज्झारोहसंभवा जाव कम्मनियाणेणं तत्थवुक्कमा अज्झारोहजोणिएसु अज्झारोहत्ताए विउट्टंति, ते जीवा तेसिं अज्झारोहजोणियाणं अज्झारोहाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं आउसरीरं जाव सारूविकडं संतं, अवरेऽवि य णं तेसिं अज्झारोहजोणियाणं अज्झारोहाणं सरीरा णाणावन्ना जावमक्खायं ॥ (सूत्रं ४९) ॥ अहावरं पुरक्खायं इहेगतिया सत्ता अज्झारोहजोणिया अज्झारोहसंभवा जाव कम्मनियाणेणं तत्थवुक्कमा अज्झारोहजोणिएसु अज्झारोहेसु मूलत्ताए जाव बीयत्ताए विउट्टंति ते जीवा तेसिं अज्झारोहजोणियाणं अज्झारोहाणं सिणेहमाहारेंति जाव अवरेऽवि य णं तेसिं अज्झारोहजोणियाणं मूलाणं जाव बीयाणं सरीरा णाणावन्ना जावमक्खायं ॥(सूत्रं५०)॥ अहावरं पुरक्खायं इहेगतिया सत्ता पुढविजोणिया पुढविसंभवा जाव णाणाविहजोणियासु पुढवीसु तणत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहजोणियाणं पुढवीणं सिणेहमाहारेंति जाव ते जीवा कम्मोववन्ना भवंतीतिमक्खायं ॥ (सूत्रं५१) ॥ एवं पुढविजोणिएसु तणेसु तणत्ताए विउट्टंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जावमक्खायं ॥ सूत्रं ५२ ॥ एवं तणजोणिएसु तणेसु तणत्ताए विउट्टंति, तणजोणियं तणसरीरं च आहारेंति जावमक्खायं ॥ एवं तणजोणिएसु तणेसु मूलत्ताए जाव बीयत्ताए विउट्टंति ते जीवा जाव एवमक्खायं ॥ एवं ओसहीणवि चत्तारि आलावगा ॥ एवं हरियाणवि चत्तारि आलावगा ॥ सूत्रं ५३ ॥ अहावरं पुरक्खायं इहेगतिया सत्ता पुढविजोणिया पुढविसंभवा जाव कम्मनियाणेणं तत्थवुक्कमा णाणाविहजोणियासु पुढवीसु आयत्ताए वायत्ताए कायत्ताए कूहणत्ताए कंदुकत्ताए उवेहणियत्ताए निवेहणियत्ताए सछत्ताए छत्तगत्ताए वासाणियत्ताए कूरत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहजोणियाणं पुढवीणं सिणेहमाहारेंति, तेवि जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं पुढविजोणियाणं आयत्ताणं जाव कूराणं सरीरा णाणावण्णा जावमक्खायं, एगो चेव आलावगो सेसा तिण्णि णत्थि ॥ अहावरं पुरक्खायं इहेगतिया सत्ता उदगजोणिया उदगसंभवा जाव कम्मनियाणेणं तत्थवुक्कमा णाणाविहजोणिएसु उदएसु रुक्खत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं उदगजोणियाणं रुक्खाणं सरीरा णाणावण्णा जावमक्खायं । जहा पुढविजोणियाणं रुक्खाणं चत्तारि गमा अज्झारुहाणवि तहेव, तणाणं ओसहीणं हरियाणं चत्तारि आलावगा भाणियव्वा एक्केक्के ॥ अहावरं पुरक्खायं इहेगतिया सत्ता उदगजोणिया उदगसंभवा जाव कम्मणियाणेणं तत्थवुक्कमा णाणाविहजोणिएसु उदएसु

सूत्रकृ. ५९

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३४९॥

उदगत्ताए अवगत्ताए पणगत्ताए सेवालत्ताए कलंबुगत्ताए हडत्ताए कसेरुगत्ताए कच्छभाणियत्ताए उप्पलत्ताए पउमत्ताए कुमुयत्ताए नलिणत्ताए सुभगत्ताए सोगंधियत्ताए पोंडरियमहापोंडरियत्ताए सयपत्तत्ताए सहस्सपत्तत्ताए एवं कल्हारकोकणयत्ताए अरविंदत्ताए तामरसत्ताए भिसभिसमुणालपुक्खलत्ताए पुक्खलच्छिभगत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं जाव संतं, अवरेऽवि य णं तेसिं उदगजोणियाणं उदगाणं जाव पुक्खलच्छिभगाणं सरीरा णाणावण्णा जावमक्खायं, एगो चेव आलावगो ॥ सूत्रं ५४ ॥ अहावरं पुरक्खायं इहेगतिया सत्ता तेसिं चेव पुढवीजोणिएहिं रुक्खेहिं रुक्खजोणिएहिं रुक्खेहिं रुक्खजोणिएहिं मूलेहिं जाव बीएहिं रुक्खजोणिएहिं अज्झारोहेहिं अज्झारोहजोणिएहिं अज्झारुहेहिं अज्झारोहजोणिएहिं मूलेहिं जाव बीएहिं पुढविजोणिएहिं तणेहिं तणजोणिएहिं तणेहिं तणजोणिएहिं मूलेहिं जाव बीएहिं एवं ओसहीहिवि तिन्नि आलावगा, एवं हरिएहिवि तिन्नि आलावगा, पुढविजोणिएहिवि आएहिं काएहिं जाव कूरेहिं उदगजोणिएहिं रुक्खेहिं रुक्खजोणिएहिं रुक्खेहिं रुक्खजोणिएहिं मूलेहिं जाव बीएहिं एवं अज्झारुहेहिवि तिण्णि तणेहिंपि तिण्णि आलावगा, ओसहीहिंपि तिण्णि, हरिएहिंपि तिण्णि, उदगजोणिएहिं उदएहिं अवएहिं जाव पुक्खलच्छिभएहिं तसपाणत्ताए विउट्टंति ॥ ते जीवा तेसिं पुढवीजोणियाणं उदगजोणियाणं रुक्खजोणियाणं अज्झारोहजोणियाणं तणजोणियाणं ओसहीजोणियाणं हरियजोणियाणं रुक्खाणं अज्झारुहाणं तणाणं ओसहीणं हरियाणं मूलाणं जाव बीयाणं आयाणं कायाणं जाव कूरथा(कूरा) णं उदगाणं अवगाणं जाव पुक्खलच्छिभगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं जाव संतं, अवरेऽवि य णं तेसिं रुक्खजोणियाणं अज्झारोहजोणियाणं तणजोणियाणं ओसहिजोणियाणं हरियजोणियाणं मूलजोणियाणं कंदजोणियाणं जाव बीयजोणियाणं आयजोणियाणं कायजोणियाणं जाव कूरजोणियाणं उदगजोणियाणं अवगजोणियाणं जाव पुक्खलच्छिभगजोणियाणं तसपाणाणं सरीरा णाणावण्णा जावमक्खायं ॥ सूत्रं ५५ ॥

३ आहार परिज्ञाध्य

॥३४९॥

सुधर्मस्वामी जम्बूस्वामिनमुद्दिश्येदमाह–तद्यथा–श्रुतं मयाऽऽयुष्मता तु भगवतेदमाख्यातं, तद्यथा–आहारपरिज्ञेदमध्ययनं, तस्य चायमर्थः–प्राच्यादिषु दिक्षु 'सर्वत' इत्यूर्ध्वाधो विदिक्षु च 'सव्वावंति'त्ति सर्वस्मिन्नपि लोके क्षेत्रे प्रज्ञापकभावदिगाधारभूतेऽस्मिन् लोके चत्वारो 'बीजकाया' बीजमेव कायो येषां ते तथा, बीजं वक्ष्यमाणं, चत्वारो 'बीजप्रकाराः' समुत्पत्तिभेदा भवन्ति, तद्यथा—अग्रे बीजं येषामुत्पद्यते ते तलतालीसहकारादयः शाल्यादयो वा, यदिवाऽग्राण्येवोत्पत्तौ कारणतां प्रतिपद्यन्ते येषां कोरण्टादीनां ते अग्रबीजाः, तथा मूलबीजा आर्द्रकादयः, पर्वबीजास्त्विक्षवादयः, स्कन्धबीजाः सल्लक्यादयः, नागार्जुनीयास्तु पठन्ति–"वणस्सइकाइयाण पंचविहा बीजवक्कंती एवमाहिज्जइ–तंजहा–अग्गमूलपोरुक्खंधबीयरुहा छट्ठावि एगेंदिया संमुच्छिमा बीया जायंते" यथा दग्धवनस्थलीषु नानाविधानि हरितान्युद्भवन्ति पक्षिन्यो वाऽभिनवतडागादाविति । तेषां च चतुर्विधानामपि वनस्पतिकायानां यद्यस्य बीजम्—उत्पत्तिकारणं तद्यथाबीजं तेन यथाबीजेनेति, इदमुक्तं भवति–शाल्यङ्कुरस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शालिबीजमुत्पत्तिकारणम्, एवमन्यदपि द्रष्टव्यं, 'यथावकाशेने'ति यो यस्यावकाशः–यद्यस्योत्पत्तिस्थानमथवा भूम्यम्बुकालाकाशबीजसंयोगा यथावकाशे गृह्यन्ते तेनेति, तदेवं यथाबीजं यथावकाशेन च 'इह' अस्मिन् जगत्येके केचन सत्त्वा ये तथाविधकर्मोदयाद्वनस्पतिषूत्पित्सवः, ते हि वनस्पतावुत्पद्यमाना अपि पृथिवीयोनिका भवन्ति, यथा तेषां वनस्पतिबीजं कारणमेवमाधारमन्तरेणोत्पत्तेरभावात्पृथिव्यपि शैवालजम्बालादेरुदकवदिति, तथा पृथिव्यां संभवः–सदा भवनं येषां वनस्पतीनां ते तथा, इदमुक्तं भवति–न केवलं ते तद्योनिकाः तत्स्थितिकाश्चेति, तथा पृथिव्यामेव विविधमुत्–प्राबल्येन क्रमः–क्रमणं येषां ते पृथिव्युत्क्रमाः, इदमुक्तं भवति–पृथिव्यामेव तेषामूर्ध्वक्रमणलक्षणा वृद्धिर्भवति, एवं च ते तद्योनिकास्तत्संभवास्तदुत्क्रमा इत्येतदनूद्यापरं विधातुकाम आह–'कम्मोवगा'इत्यादि, ते हि तथाविधेन वनस्पतिकायसंभवेन कर्मणा प्रेर्यमाणास्तेष्वेव वनस्पतिषूप–सामीप्येन तस्यामेव च पृथिव्यां गच्छन्तीति कर्मोपगा भण्यन्ते, ते हि कर्मवशगा वनस्पतिकायादागत्य तेष्वेव पुनरपि वनस्पतिषूत्पद्यन्ते, न चान्यत्रोक्ता अन्यत्र भविष्यन्तीति, उक्तं च–"कुसुमपुरीते बीजे मथुरायां नाङ्कुरः समुद्भवति । यत्रैव तस्य बीजं तत्रैवोत्पद्यते प्रसवः ॥ १ ॥" तथा ते जीवाः कर्मनिदानेन–कारणेन समाकृष्यमाणास्तत्र–पृथिव्यां वनस्पतिकाये वा व्युत्क्रमाः समागताः सन्तो नानाविधयोनिकासु पृथिवीष्वित्यन्येषामपि षण्णां कायानामुत्पत्तिस्थानभूतासु सचित्ताचित्तमिश्रासु वा श्वेतकृष्णादिवर्णतिक्तादिरससुरभ्यादिगन्धमृदुकर्कशादिस्पर्शादिकैर्विकल्पैर्बहुप्रकारासु भूमिषु दृश्यतया विविधं वर्तन्ते विवर्तन्ते, ते च तत्रोत्पन्नास्तासां पृथिवीनां 'स्नेहं' स्निग्धभावमाददते, स एव च तेषामाहार इति, न च ते पृथिवीशरीरमाहारयन्तः पृथिव्याः पीडामुत्पादयन्ति ॥ एवमप्कायतेजोवायुवनस्पतीनामप्यायोज्यम्, अत्र च पीडानुत्पादनेऽयं दृष्टान्तः, तद्यथा–

अण्डोद्भवाद्या जीवा मातुरुष्मणा विवर्धमाना गर्भस्था एवोदरगतमाहारयन्तो नातीव पीडामुत्पादयन्ति, एवमसावपि वनस्पतिकायिकः पृथिवीस्नेहमाहारयन्नातीव तस्याः पीडामुत्पादयति उत्पद्यमानः, समुत्पन्नश्च वृद्धिमुपगतोऽसदृशवर्णरसाद्युपेतत्वात् बाधां विदध्यादपीति । एवमप्कायस्य भौमस्यान्तरिक्षस्य वा शरीरमाहारयन्ति, तथा तेजसो भस्मादिकं शरीरमाददति, एवं वाय्वादेरपीति द्रष्टव्यं, किं बहुनोक्तेन ?, नानाविधानां त्रसस्थावराणां प्राणिनां यच्छरीरं तच्चे समुत्पद्यमानाः 'अचित्त'मिति स्वकायेनाद्यवष्टभ्य प्रासुकीकुर्वन्ति, यदिवा परिविध्वस्तं पृथिवीकायादिशरीरं किञ्चित्प्रासुकं किञ्चित्परितापितं कुर्वन्ति, ते वनस्पतिजीवा एतेषां पृथिवीकायादीनां तच्छरीरं 'पूर्वमाहारित'मिति तैरेव पृथिवीकायादिभिरुत्पत्तिसमये आहारितमासीत्–स्वकायतेन परिणामितमासीत् तदधुनाऽपि वनस्पतिजीवस्तत्रोत्पद्यमान उत्पन्नो वा सचा–स्पर्शेनाहारयति, आहार्यं च स्वकायतेन विपरिणामयति, विपरिणामितं च तच्छरीरं स्वकायेन सह स्वरूपतां नीतं सत्तन्मयतां प्रतिपद्यते, अपराण्यपि शरीराणि मूलस्कन्धशाखाप्रतिशाखापत्रपुष्पफलादीनि तेषां पृथिवीयोनिकानां वृक्षाणां नानावर्णानि, तथाहि–स्कन्धस्यान्यथाभूतो वर्णो मूलस्य चान्यादृश इति, एवं यावन्नानाविधशरीरपुद्गलविकुर्वितास्ते भवन्तीति, तथाहि–नानारसवीर्यविपाका नानाविधपुद्गलोपचयात्सुरूपकुरूपसंस्थानाः तथा दृढाल्पसंहननाः कृशस्थूलस्कन्धाश्च भवन्तीत्येवमादिकानि नानाविधसरूपाणि शरीराणि विकुर्वन्तीति स्थितं । केषांचिच्छाक्यादीनां वनस्पत्याद्याः स्थावरा जीवा एव न भवन्तीत्यतस्तत्प्रतिषेधार्थमाह–'ते जीवा' इत्यादि, 'ते' वनस्पतिषूत्पन्ना जीवा नाजीवाः, उपयोगलक्षणत्वाज्जीवानां, तथाहि–तेषामप्याश्रयोत्सर्पणादिकया क्रिययोपयोगो लक्ष्यते, तथा विशिष्टाहारोपचयापचयाभ्यां शरीरोपचयापचयसद्भावादर्भकवत् जीवाः स्थावराः तथा छिन्नप्ररोहणात्सापात्सर्वत्रलभपहरणे मरणादित्येवमादयो हेतवो-

ऽत्र द्रष्टव्याः, यदत्र कैश्चित्स्पष्टेऽपि वनस्पतीनां चैतन्येऽसिद्धानैकान्तिकत्वादिकमुक्तं स्वदर्शनानुरागात् तदपकर्णनीयं, नहि सम्यगार्हतमताभिज्ञोऽसिद्धविरुद्धानैकान्तिकोपन्यासेन व्यामोह्यते, सर्वस्य कथञ्चिदभ्युपगतत्वात्प्रतिषिद्धत्वाच्चेति । ते च जीवास्तत्र वनस्पतिषु तथाविधेन कर्मणा उपपन्नगाः, तच्चेदम्–एकेन्द्रियजातिस्थावरनामवनस्पतिधोग्यायुष्कादिकमिति, तत्कर्मोदयेन तत्रोत्पन्ना इत्युच्यन्ते न पुनः कालेश्वरादिना तत्रोत्पाद्यन्ते इत्येवमाख्यातं तीर्थकरादिभिरिति । एवं तावत्पृथिवीयोनिका वृक्षा अभिहिताः ॥ साम्प्रतं तद्योनिकेष्वेव वनस्पतिषु अपरे समुत्पद्यन्त इत्येतदर्शयितुमाह–सुधर्मस्वामी शिष्योद्देशेनेदमाह–अथापरमेतदाख्यातं पुरा तीर्थकरेण यदिवा तस्यैव वनस्पतेः पुनरपरं वक्ष्यमाणमाख्यातं, तद्यथा–'इह' अस्मिन् जगत्येके केचन तथाविधकर्मोदयवर्तिनः 'सत्त्वाः' प्राणिनो वृक्षा एव योनिः–उत्पत्तिस्थानमाश्रयो येषां ते वृक्षयोनिकाः, इह च यत्पृथिवीयोनिकेषु वृक्षेष्वभिहितं तदेतेष्वपि वृक्षयोनिकेषु वनस्पतिषु तदुपचयकर्तृ सर्वमायोज्यं यावदाख्यातमिति ॥ साम्प्रतं वनस्पत्यवयवानधिकृत्याऽऽह–अथापरमेतदाख्यातं (यदाख्यातं) तद्दर्शयति–'इह' अस्मिन् जगत्येके न सर्वे तथाविधकर्मोदयवर्तिनो वृक्षयोनिकाः सत्त्वा भवन्ति तदवयवाश्रिताश्च परे वनस्पतिरूपा एव प्राणिनो भवन्ति, तथा यो ह्येको वनस्पतिजीवः सर्ववृक्षावयवव्यापी भवति, तस्य चापरे तदवयवेषु मूलकन्दस्कन्धत्वक्शाखाप्रवालपत्रपुष्पफलबीजभूतेषु दशसु स्थानेषु जीवाः समुत्पद्यन्ते, ते च तत्रोत्पद्यमाना वृक्षयोनिका वृक्षोद्भवा वृक्षजुत्क्रमाश्चोच्यन्त इति, शेषं पूर्ववत्, इह च प्राक्चतुर्विधार्थप्रतिपादकानि सूत्राण्यभिहितानि, तद्यथा–वनस्पतयः पृथिव्याश्रिता भवन्तीत्येकं १, तच्छरीरं अप्कायादिशरीरं वाऽऽहारयन्तीति द्वितीयं २, तथा विवृद्धात्तदाहारितं शरीरमचित्तं विध्वस्तं च कृत्वाऽऽत्मसात्कुर्वन्तीति तृतीयं ३, अन्यान्यपि तेषां पृथिवीयोनिकानां वनस्पतीनां शरीराणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलकन्दस्कन्धादीनि नानावर्णानि भवन्तीति चतुर्थं ४, एवमत्रापि वनस्पतियोनिकानां वनस्पतीनामेवंविधार्थप्रतिपादकानि चतुःप्रकाराणि सूत्राणि द्रष्टव्यानीति यावत्ते जीवा वनस्पत्यवयवमूलकन्दस्कन्धादिरूपाः कर्मोपपन्नगा भवन्त्येवमाख्यातम् ॥ साम्प्रतं वृक्षोपर्युत्पन्नान् वृक्षानाश्रित्याह—अथापरमेतत्पुराऽऽख्यातं यद्वक्ष्यमाणमिहैके सत्त्वा वृक्षयोनिका भवन्ति, तत्र ये ते पृथिवीयोनिका वृक्षास्तेष्वेव प्रतिप्रदेशतया येऽपरे समुत्पद्यन्ते तस्यैकस्य वनस्पतेर्मूलारम्भकस्योपचयकारिणस्ते वृक्षयोनिका इत्यभिधीयन्ते, यदिवा ये ते मूलकन्दस्कन्धशाखाप्रशाखादिकाः पूर्वोक्तदशस्थानवर्तिनस्त एवमभिधीयन्ते, तेषु च वृक्षयोनिकेषु वृक्षेषु कर्मोपादाननिष्पादितेषु उपर्युपरि अध्यारोहन्तीत्यध्यारुहाः—वृक्षोपरिजाता वृक्षा इत्यभिधीयन्ते, ते च वल्लीवृक्षाभिधानाः कामवृक्षाभिधाना वा द्रष्टव्याः, तद्भावे चापरे वनस्पतिकायाः समुत्पद्यन्ते वृक्षयोनिकेषु वनस्पतिष्विति, इहापि प्राग्वच्चत्वारि सूत्राणि द्रष्टव्यानि, तद्यथा—वृक्षयोनिकेषु वृक्षेष्वपरेऽध्यारुहाः समुत्पद्यन्ते, ते च तत्रोत्पन्नाः स्वयोनिभूतं वनस्पतिशरीरमाहारयन्ति, तथा पृथिव्यप्तेजोवाय्वादीनां च शरीरकमाहारयन्ति, तथा तच्छरीरमाहारितं सदचित्तं विध्वस्तं विपरिणामितमात्मसात्कृतं स्वकायावयवतया व्यवस्थापयन्ति, अपराणि च तेषामध्यारुहाणां नानाविधरूपरसगन्धस्पर्शोपेतानि नानासंस्थानानि शरीराणि भवन्ति, ते जीवास्तत्र स्वकृतकर्मोपपन्ना भवन्तीत्येतदाख्यातमिति प्रथमं सूत्रम्, द्वितीयं त्विदम्—अथापरं पुराऽऽख्यातं ये ते प्राग्वृक्षयोनिकेषु वृक्षेषु अध्यारुहाः प्रतिपादितास्तेष्वेवोपरि प्रतिप्रदेशोपचयकर्तारोऽध्यारुहवनस्पतित्वेनोपपद्यन्ते, ते च जीवा अध्यारुहप्रदेशेषूत्पन्ना अध्यारुहजीवास्तेषां स्वयोनिभूतानि शरीराण्याहारयन्ति, तत्रापराण्यपि पृथिव्यादीनि शरीराणि आहारयन्ति अपराणि चाध्यारुहसंभवानामध्यारुहजीवानां नानाविधवर्णकादिकानि शरीराणि भवन्तीत्येवमाख्यातम्, तृतीयं त्विदम्—

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३५२॥

अथापरं पुराख्यातं, तद्यथा—इहैके सत्त्वा अध्यारुहसंभवेष्वध्यारुहेष्वध्यारुहत्वेनोत्पद्यन्ते, ये चैवमुत्पद्यन्ते तेऽध्यारुहयोनिकानामध्यारुहाणां यानि शरीराणि तानि आहारयन्ति, द्वितीयसूत्रे वृक्षयोनिकानामध्यारुहाणां यानि शरीराणि तान्यपरे अध्यारुहजीवा आहारयन्ति, तृतीये तध्यारुहयोनिकानामध्यारुहजीवानां शरीराणि द्रष्टव्यानीति विशेषः, इदं तु चतुर्थकं, तद्यथा—अथापरमिदमाख्यातं, तद्यथा—इहैके सत्त्वा अध्यारुहयोनिकेष्वध्यारुहेषु मूलकन्दस्कन्धत्वक्शाखाप्रवालपत्रपुष्पफलबीजभावेनोत्पद्यन्ते, ते च तथाविधकर्मोपगा भवन्तीत्येतदाख्यातमिति, शेषं तदेवेति ॥ साम्प्रतं वृक्षव्यतिरिक्तं शेषं वनस्प(ग्रन्थाग्रं १०५००)तिकायमाश्रित्याह—अथापरमिदमाख्यातं यदुत्तरत्र वक्ष्यते, तद्यथा—इहैके सत्त्वाः पृथिवीयोनिकाः पृथिवीसंभवाः पृथिवीव्युत्क्रमा इत्यादयो यथा वृक्षेषु चत्वार आलापका एवं तृणान्यप्याश्रित्य द्रष्टव्याः, ते चामी—नानाविधासु पृथिवीयोनिषु तृणत्वेनोत्पद्यन्ते पृथिवीशरीरं चाहारयन्ति द्वितीयं तु पृथवीयोनिकेषु तृणेषूत्पद्यन्ते तृणशरीरं चाहारयन्तीति तृतीयं तु तृणयोनिकेषु तृणेषूत्पद्यन्ते तृणयोनिकतृणशरीरं चाहारयन्तीति चतुर्थं तृणयोनिकेषु तृणावयवेषु मूलादिषु दशप्रकारेषूत्पद्यन्ते तृणशरीरं चाहारयन्ति, इत्येवं यावदाख्यातमिति । एवमौषध्याश्रयाश्चत्वार आलापका भणनीयाः, नवरमोषधिग्रहणं कर्तव्यम् । एवं हरिताश्रयाश्चत्वार आलापका भणनीयाः । कुहणेषु त्वेक एवालापको द्रष्टव्यः, तद्योनिकानामपरेषामभावादिति भावः । इह चामी वनस्पतिविशेषा लोकव्यवहारतोऽनुगन्तव्याः प्रज्ञापनातो वाऽवसेया इति । अत्र च सर्वेषामेव पृथिवीयोनिकत्वात्पृथिवीसमाश्रयत्वेनाभिहिताः । इह च स्थावराणां वनस्पतेरेव प्रस्पष्टचैतन्यलक्षणत्वात्तस्यैव प्राक् प्रदर्शितं चैतन्यम्, साम्प्रतमप्कायसयोनिकस्य वनस्पतेः स्वरूपं दर्शयितुमाह—अथानन्तरमेतद्वक्ष्यमाणमाख्यातं, तद्यथा—इहैके सत्त्वास्तथाविधकर्मोदयादु-

३ आहारपरिज्ञाध्य.

॥३५२॥

दकं योनिः—उत्पत्तिस्थानं येषां ते तथा, तथोदके संभवो येषां ते तथा, यावत्कर्मनिदानेन संदानितास्तदुपक्रमा भवन्तीति । ते च तत्कर्मवशगा नानाविधयोनिषूदकेषु वृक्षत्वेन व्युत्क्रामन्ति—उत्पद्यन्ते । ये च जीवा उदकयोनिका वृक्षत्वेनोत्पन्नास्ते तच्छरीरम्—उदकशरीरमाहारयन्ति, न केवलं तदेवान्यदपि पृथिवीकायादिशरीरमाहारयन्तीति । शेषं पूर्ववत् नेयं । यथा पृथिवीयोनिकानां वृक्षाणां चत्वार आलापका एवमुदकयोनिकानामपि वृक्षाणां भवन्तीत्येवं द्रष्टव्यं, तदुत्पन्नानां त्वपरविकल्पाभावादेक एवालापको भवति, एतेषां हि उदकाकृतीनां वनस्पतिकायानां तथा अवकपनकशैवलादीनामपरस्य प्रागुक्तस्य विकल्पस्याभावादिति । एते च उदकाश्रया वनस्पतिविशेषाः कलम्बुकाहड्डादयो लोकव्यवहारतोऽवसेया इति ॥ साम्प्रतमन्येन प्रकारेण वनस्पत्याश्रयमालापकत्रयं दर्शयितुमाह—तद्यथा—पृथिवीयोनिकैर्वृक्षैर्वृक्षयोनिकैर्वृक्षैस्तथा वृक्षयोनिकैर्मूलादिभिरिति, एवं वृक्षयोनिकैरध्यारुहैस्तथाऽध्यारुहयोनिकैरध्यारुहैस्तथाध्यारुहयोनिकैर्मूलादिभिरिति । एवमन्येऽपि तृणादयो द्रष्टव्याः । एवमुदकयोनिकेष्वपि वृक्षेषु योजनीयं ॥ तदेवं पृथिवीयोनिकवनस्पतेरुदकयोनिकवनस्पतेश्च भेदानुपदर्श्याधुना तदनुवादेनोपसंजिघृक्षुराह—'ते जीवा' इत्यादि, ते वनस्पतिभूतपन्ना जीवाः पृथिवीयोनिकानां तथोदकवृक्षाध्यारुहतृणौषधिहरितयोनिकानां वृक्षाणां यावत्स्नेहमाहारयन्तीत्येतदाख्यातमिति, तथा त्रसानां प्राणिनां शरीरमाहारयन्त्येतदवसाने द्रष्टव्यमिति । तदेवं वनस्पतिकायिकानां सुप्रतिपाद्यचैतन्यानां स्वरूपमभिहितं, शेषाः पृथ्वीकायादयश्चत्वार एकेन्द्रिया उत्तरत्र प्रतिपादयिष्यन्ते, साम्प्रतं त्रसकायस्यावसरः, स च नारकतिर्यङ्मनुष्यदेवभेदभिन्नः, तत्र नारका अप्रत्यक्षत्वेनानुमानग्राह्याः—(तथाहि) दुष्कृतकर्मफलभुजः

१ एवमन्येष्वपि तृणादियोनिकेष्वपि वृक्षेषु योजनीयं, तदेवं प्र० २ तथोदकानां वृक्षा० प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचन संतीत्येवं ते ग्राह्याः । तदाहारोऽप्येकान्तेनाशुभपुद्गलनिर्वर्तित ओजसा न प्रक्षेपेणेति । देवा अप्यधुना बाहुल्येनानुमानगम्या एव, तेषामप्याहारः शुभ एकान्तेनौजोनिर्वर्तितो न प्रक्षेपकृत इति, स चाभोगनिर्वर्तितोऽनाभोगकृतश्च, तत्रानाभोगकृतः प्रतिसमयभावी आभोगकृतश्च जघन्येन चतुर्थभक्तकृत उत्कृष्टतस्तु त्रयस्त्रिंशद्वर्षसहस्रनिष्पादित इति । शेषास्तु तिर्यङ्मनुष्याः, तेषां च मध्ये मनुष्याणामभ्यर्हितत्वात्तानेव प्राग्दर्शयितुमाह—

३ आहारपरिज्ञाध्य.

अहावरं पुरक्खायं णाणाविहाणं मणुस्साणं तंजहा—कम्मभूमगाणं अकम्मभूमगाणं अंतरदीवगाणं आरियाणं मिलक्खुयाणं, तेसिं च णं अहाबीएणं अहावगासेणं इत्थीए पुरिसस्स य कम्मकडाए जोणिए एत्थ णं मेहुणवत्तियाए [व] णामं संजोगे समुप्पज्जइ, ते दुहओवि सिणेहं संचिणंति, तत्थ णं जीवा इत्थित्ताए पुरिसत्ताए णपुंसगत्ताए विउट्टंति, ते जीवा माओउयं पिउसुक्कं तं तदुभयं संसट्ठं कलुसं किविसं तं पढमत्ताए आहारमाहारेंति, ततो पच्छा जं से माया णाणाविहाओ रसविहीओ आहारमाहारेति ततो एगदेसेणं ओयमाहारेंति, आणुपुव्वेण वुड्ढा पलिपागमणुपवन्ना ततो कायातो अभिनिवट्टमाणा इत्थिं वेगया जणयंति पुरिसं वेगया जणयंति णपुंसगं वेगया जणयंति, ते जीवा डहरा समाणा माउक्खीरं सप्पिं आहारेंति, आणुपुव्वेणं वुड्ढा ओयणं कुम्मासं तसथावरे य पाणे, ते जीवा आहारेंति पुढ-

॥३५३॥

---

१ स्त्रेंष्वादर्शेष्वस्ति पाठ एषः, तथापि टीप्पणीतोऽन्तःप्रविष्ट इति ज्ञायते । २ लोमाहारोऽप्यत्रौजस्त्वया विवक्षितस्तेन केवलः प्रक्षेपः प्रतिषिद्धः ।

विसरीरं जाव सारूविकडं संतं, अवरेऽवि य णं तेसिं णाणाविहाणं मणुस्सगाणं कम्मभूमगाणं अकम्मभूमगाणं अंतरदीवगाणं आरियाणं मिलक्खूणं सरीरा णाणावण्णा भवंतीतिमक्खायं ॥ सूत्रं ५६ ॥

अथानन्तरमेतत् 'पुरा' पूर्वमाख्यातं, तद्यथा—आर्याणामनार्याणां च कर्मभूमिजाकर्मभूमिजादीनां मनुष्याणां नानाविधयोनिकानां स्वरूपं वक्ष्यमाणनीत्या समाख्यातं, तेषां च स्त्रीपुंनपुंसकभेदभिन्नानां 'यथाबीजेने'ति यद्यस्य बीजं, तत्र स्त्रियाः संबन्धि शोणितं पुरुषस्य शुक्रं एतदुभयमप्यविध्वस्तं, शुक्राधिकं सत्पुरुषस्य शोणिताधिकं स्त्रियास्तत्समता नपुंसकस्य कारणतां प्रतिपद्यते, तथा 'यथावकाशेने'ति यो यस्यावकाशो मातुरुदरकुक्ष्यादिकः, तत्रापि किल वामा स्त्रियो दक्षिणा कुक्षिः पुरुषस्योभयाश्रितः पण्ढ इति । अत्र चाविध्वस्ता योनिरविध्वस्तं बीजमिति चत्वारो भङ्गाः, तत्राप्याद्य एव भङ्गक उत्पत्तेरवकाशो न शेषेषु त्रिष्विति । अत्र च स्त्रीपुंसयोर्वेदोदये सति पूर्वकर्मनिर्वर्तितायां योनौ 'मैथुनप्रत्ययिको'रताभिलाषोदयजनितोऽग्निकारणयोररणिकाष्ठयोरिव संयोगः समुत्पद्यते, तत्संयोगे च तच्छुक्रशोणिते समुपादाय तत्रोत्पित्सवो जन्तवस्तैजसकार्मणाभ्यां शरीराभ्यां कर्मरज्जुसदानितास्तत्रोत्पद्यन्ते । ते च प्रथममुभयोरपि स्नेहमाचिन्वन्त्यविध्वस्तायां योनौ सत्यामिति, विध्वस्ते तु योनिः पञ्चपञ्चाशिका (यदा) नारी सप्तसप्ततिकः पुमान् इति, तथा द्वादश मुहूर्तानि यावच्छुक्रशोणिते अविध्वस्तयोनिके भवतः तत ऊर्ध्वं ध्वंसमुपगच्छत इति । तत्र च जीवा उभयोरपि स्नेहमाहार्य स्वकर्मविपाकेन यथास्वं स्त्रीपुन्नपुंसकभावेन 'विउट्टंति'त्ति वर्तन्ते समुत्पद्यन्त इतियावत्, तदुत्तरकालं च स्त्रीकुक्षौ प्रविष्टाः सन्तः स्त्रियाऽऽहारितस्याहारस्य निर्यासं स्नेहमाददति, तत्स्नेहेन च तेषां जन्तूनां क्रमोपचयाद् अनेन क्रमेण निष्पत्तिरूपजायते—'सत्ताहं कललं होइ, सत्ताहं होइ बुब्बुयं' इत्यादि । तदेवमनेन क्रमेण तदेकदेशेन वा मातुराहारमोजसा मिश्रेण वा लोमभिर्वाऽऽनुपूर्व्येणाहारयन्ति 'यथाक्रमम्' आनुपूर्व्येण वृद्धिमुपागताः सन्तो

'गर्भपरिपाकं' गर्भनिष्पत्तिमनुप्रपद्यास्ततो मातुः कायादभिनिवर्तमानाः—पृथग्भवन्तः सन्तस्तद्योनेर्निर्गच्छन्ति । ते च तथाविधकर्मोदयादात्मनः स्त्रीभावमप्येकदा 'जनयन्ति' उत्पादयन्त्यपरे केचन पुंभावं नपुंसकभावं च, इदमुक्तं भवति—स्त्रीपुंनपुंसकभावः प्राणिनां स्वकृतकर्मनिर्वर्तितो भवति, न पुनर्यो यादृगिह भवे सोऽमुष्मिन्नपि तादृगेवेति, ते च तदहर्जातबालकाः सन्तः पूर्वभवाभ्यासादाहाराभिलाषिणो मातुः स्तनस्तन्यमाहारयन्ति, तदाहारेण चानुपूर्व्येण च वृद्धास्तदुत्तरकालं नवनीतदध्योदनादिकं यावत्कुल्माषान् भुञ्जते, तथाऽऽहारलेनोपगतांस्त्रसान् स्थावरांश्च प्राणिनस्ते जीवा आहारयन्ति, तथा नानाविधपृथिवीशरीरं लवणादिकं सचेतनमचेतनं वाऽऽहारयन्ति, तच्चाहारितमात्मसात्कृतं सारूप्यमापादितं सत् 'रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातव' इति सप्तधा व्यवस्थापयन्ति, अपराण्यपि तेषां नानाविधमनुष्याणां शरीराणि नानावर्णान्याविर्भवन्ति, ते च तद्योनिकत्वात्तदाधारभूतानि नानावर्णानि शरीराण्याहारयन्तीत्येवमाख्यातमिति ॥ एवं तावद्भेदेन्युक्रान्तिजमनुष्याः प्रतिपादिताः, तदनन्तरं संमूर्छनजानामवसरः, तांश्चोत्तरत्र प्रतिपादयिष्यामि, साम्प्रतं तिर्यग्योनिकाः, तत्रापि जलचरानुद्दिश्याह—

३ आहारपरिज्ञाध्य.

अहावरं पुरक्खायं णाणाविहाणं जलचराणं पंचिंदियतिरिक्खजोणियाणं, तंजहा—मच्छाणं जाव सुंसुमाराणं, तेसिं च णं अहाबीएणं अहावगासेणं इत्थीए पुरिसस्स य कम्मकडा तहेव जाव ततो एगदेसेणं ओयमाहारेंति, आणुपुव्वेणं वुड्ढा पलिपागमणुपवन्ना ततो कायाओ अभिनिवट्टमाणा अंडं वेगया जणयंति पोयं वेगया जणयंति, से अंडे उब्भिज्जमाणे इत्थिं वेगया जणयंति पुरिसं वेगया जणयंति नपुंसगं वेगया जणयंति, ते जीवा डहरा समाणा आउसिणेहमाहारेंति आणुपुव्वेणं वुड्ढा वणस्सतिकायं तसथा-

॥३५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वरे य पाणे, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं णाणाविहाणं जलचरपंचिंदियतिरिक्खजोणियाणं मच्छाणं सुंसुमाराणं सरीरा णाणावण्णा जावमक्खायं ॥ अहावरं पुरक्खायं णाणाविहाणं चउप्पयथलयरपंचिंदियतिरिक्खजोणियाणं, तंजहा–एगखुराणं दुखुराणं गंडीपदाणं सणप्फयाणं, तेसिं च णं अहाबीएणं अहावगासेणं इत्थिपुरिसस्स य कम्म जाव मेहुणवत्तिए णामं संजोगे समुप्पज्जइ, ते दुहओ सिणेहं संचिणंति, तत्थ णं जीवा इत्थित्ताए पुरिसत्ताए जाव विउट्टंति, ते जीवा माओउयं पिउसुक्कं एवं जहा मणुस्साणं इत्थिंपि वेगया जणयंति पुरिसंपि नपुंसगंपि, ते जीवा डहरा समाणा माउक्खीरं सप्पिं आहारेंति आणुपुव्वेणं वुड्ढा वणस्सइकायं तसथावरे य पाणे, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं णाणाविहाणं चउप्पयथलयरपंचेंदियतिरिक्खजोणियाणं एगखुराणं जाव सणप्फयाणं सरीरा णाणावण्णा जावमक्खायं ॥ अहावरं पुरक्खायं णाणाविहाणं उरपरिसप्पथलयरपंचिंदियतिरिक्खजोणियाणं, तंजहा–अहीणं अयगराणं आसालियाणं महोरगाणं, तेसिं च णं अहाबीएणं अहावगासेणं इत्थीए पुरिस जाव एत्थ णं मेहुणे एवं तं चेव, नाणत्तं अंडं वेगइया जणयंति पोयं वेगइया जणयंति, से अंडे उब्भिज्जमाणे इत्थिं वेगइया जणयंति पुरिसंपि णपुंसगंपि, ते जीवा डहरा समाणा वाउकायमाहारेंति आणुपुव्वेणं वुड्ढा वणस्सइकायं तसथावरपाणे, ते जीवा आहारेंति पुढ-

सूत्रकृ. ६०

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३५५॥

विसरीरं जाव संतं, अवरेऽवि य णं तेसिं णाणाविहाणं उरपरिसप्पथलयरपंचिंदियतिरिक्ख० अहीणं जाव महोरगाणं सरीरा णाणावण्णा णाणागंधा जावमक्खायं ॥ अहावरं पुरक्खायं णाणाविहाणं भुयपरिसप्पथलयरपंचिंदियतिरिक्खजोणियाणं, तंजहा–गोहाणं नउलाणं सिहाणं सरडाणं सल्लाणं सरवाणं खराणं घरकोइलियाणं विस्संभराणं मुसगाणं मंगुसाणं पयलाइयाणं विरालियाणं जोहाणं चउप्पाइयाणं, तेसिं च णं अहाबीएणं अहावगासेणं इत्थीए पुरिसस्स य जहा उरपरिसप्पाणं तहा भाणियव्वं जाव सारूविकडं संतं, अवरेऽवि य णं तेसिं णाणाविहाणं भुयपरिसप्पपंचिंदियथलयरतिरिक्खाणं तं० गोहाणं जावमक्खायं ॥ अहावरं पुरक्खायं णाणाविहाणं जलचरपंचिंदियतिरिक्खजोणियाणं, तंजहा–चम्मपक्खीणं लोमपक्खीणं समुग्गपक्खीणं विततपक्खीणं तेसिं च णं अहाबीएणं अहावगासेणं इत्थीए जहा उरपरिसप्पाणं, नाणत्तं ते जीवा डहरा समाणा माउगाएसिणेहमाहारेंति आणुपुव्वेणं वुड्ढा वणस्सतिकायं तसथावरे य पाणे, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं णाणाविहाणं खहचरपंचिंदियतिरिक्खजोणियाणं चम्मपक्खीणं जावमक्खायं (सूत्रं ५७) ॥

३ आहार. परिज्ञाध्य.

अथानन्तरमेतद्वक्ष्यमाणं पूर्वमाख्यातं, तद्यथा–नानाविधजलचरपञ्चेन्द्रियतिर्यग्योनिकानां संबन्धिनः कांश्चित्स्वनामग्राहमाह, तद्यथा–'मच्छाणं जाव सुंसुमाराण'मित्यादि, तेषां मत्स्यकच्छपमकरग्राहसुंसुमारादीनां यथाबीजेन–यस्य यथा यद्बीजं यथाबीजं तेन तथा यथावकाशेन–यो यस्योदरादाववकाशस्तेन स्त्रियाः पुरुषस्य च स्वकर्मनिर्वर्तितायां योनावुत्पद्यन्ते । ते च तत्राभिव्यक्ता मातुराहारेण वृद्धिमुपगताः स्त्रीपुंनपुंसकानामन्यतमत्वेनोत्पद्यन्ते, ते च जीवा जलचरा गर्भाद्व्युत्क्रान्ताः सन्तस्तदनन्तरं यावद् 'डहर'त्ति लघवस्तावदपूलेहम्–अपूकायमेवाहारयन्ति आनुपूर्व्येण च वृद्धाः सन्तो वनस्पतिकायं तथाऽपरांश्च त्रसान् स्थावरांश्चाहारयन्ति यावत्पञ्चेन्द्रियानप्याहारयन्ति, तथा चोक्तम्–"अस्ति मत्स्यस्तिमिर्नाम, शतयोजनविस्तरः । तिमिङ्गिलगिलोऽप्यस्ति, तद्गिलोऽप्यस्ति राघव! ॥ १ ॥" तथा ते जीवाः पृथिवीशरीरं–कर्दमस्वरूपं क्रमेण वृद्धिमुपगताः सन्त आहारयन्ति, तच्चाहारितं सत्समानरूपीकृतमात्मसात्परिणामयन्ति, शेषं सुगमं, यावत्कर्मोपगता भवन्तीत्येवमाख्यातम् ॥ साम्प्रतं स्थलचरानुद्दिश्याह–'अहावर'मित्यादि, अथापरमेतदाख्यातं नानाविधानां चतुष्पदानां, तद्यथा–एकखुराणामित्यश्वखरादीनां तथा द्विखुराणां–गोमहिष्यादीनां तथा गण्डीपदानां–हस्तिगण्डकादीनां तथा सनखपदानां–सिंहव्याघ्रादीनां यथाबीजेन यथावकाशेन सकलपर्याप्तिमवाप्योत्पद्यन्ते ते चोत्पन्नाः सन्तस्तदनन्तरं मातुः स्तन्यमाहारयन्तीति, क्रमेण च वृद्धिमुपगताः सन्तोऽपरेषामपि शरीरमाहारयन्तीति शेषं सुगमं यावत्कर्मोपगता भवन्तीति ॥ साम्प्रतमुरःपरिसर्पानुद्दिश्याह–'नानाविधानां' बहुप्रकाराणामुरसा ये प्रसर्पन्ति तेषां, तद्यथा–अहीनामजगराणामाशालिकानां महोरगाणां यथाबीजत्वेन यथावकाशेन चोत्पत्त्याऽण्डजत्वेन पोतजत्वेन वा गर्भान्निर्गच्छन्तीति । ते च निर्गता मातुरूष्माणं वायुं चाहारयन्ति, तेषां च जातिप्रत्ययेन तेनैवाहारेण क्षीरादिनेव वृद्धिरुपजायते, शेषं सुगमं, यावदाख्यातमिति ॥ साम्प्रतं भुजपरिसर्पानुद्दिश्याह–नानाविधानां भुजाभ्यां ये परिसर्पन्ति तेषां, तद्यथा–गोधानकुलादीनां स्वकर्मोपात्तेन यथाबीजेन यथावकाशेन चोत्पत्तिर्भवति, ते चाण्डजत्वेन पोतजत्वेन चोत्पन्नास्तदनन्तरं मातुरूष्मणा वायुना चाऽऽहारितेन वृद्धिमुपयान्ति, शेषं सुगमं, यावदाख्यातमिति ॥ साम्प्रतं खचरानुद्दिश्याह–नानाविधानां

॥३५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खेचराणामुत्पत्तिरेवं द्रष्टव्या—तद्यथा—चर्मपक्षिणां—चर्मकीटवल्गुलीप्रभृतीनां तथा लोमपक्षिणां—सारसराजहंसकाकबकादीनां तथा समुद्रपक्षिविततपक्षिणां बहिर्द्वीपवर्तिनामेतेषां यथाबीजेन यथावकाशेन चोत्पन्नानामाहारक्रियैवमुपजायते, तद्यथा—सा पक्षिणी तदण्डकं स्वपक्षाभ्यामावृत्य तावत्तिष्ठति यावत्तदण्डकं तदूष्मणाहारितेन वृद्धिमुपगतं सत् कललावस्थां परित्यज्य चञ्चादिकानवयवान् परिसमाप्य्य भेदमुपयाति, तदुत्तरकालमपि मात्रोपनीतेनाहारेण वृद्धिमुपयाति, शेषं प्राग्वत् ॥ व्याख्याताः पञ्चेन्द्रिया मनुष्यास्तिर्यञ्चश्च, तेषां चाहारो द्वेधा—आभोगनिर्वर्तितोऽनाभोगनिर्वर्तितश्च, तत्रानाभोगनिर्वर्तितः प्रतिक्षणभावी आभोगनिर्वर्तितस्तु यथास्वं क्षुद्वेदनीयोदयभावीति । साम्प्रतं विकलेन्द्रियानुद्दिश्याह—

अहावरं पुरक्खायं इहेगतिया सत्ता णाणाविहजोणिया णाणाविहसंभवा णाणाविहवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोवगा कम्मणियाणेणं तत्थवुक्कमा णाणाविहाणं तसथावराणं पोग्गलाणं सरीरेसु वा सचित्तेसु वा अचित्तेसु वा अणुसूयत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं अणुसूयगाणं सरीरा णाणावण्णा जावमक्खायं ॥ एवं दुरूवसंभवत्ताए ॥ एवं खुरदुगत्ताए ॥ (सूत्रं ५८)

॥३५६॥

अथानन्तरमेतदाख्यातं 'इह' अस्मिन् संसारे एके केचन तथाविधकर्मोदयवर्तिनः 'सत्त्वाः' प्राणिनो नानाविधयोनिकाः कर्मनिदानेन—स्वकृतकर्मणोपादानभूतेन तत्रोत्पत्तिस्थाने 'उपक्रम्य' आगत्य नानाविधत्रसस्थावराणां शरीरेषु सचित्तेषु अचित्तेषु वा 'अणुसूयत्ताए'त्ति अपरशरीराश्रिततया परनिश्रया विवर्तन्ते समुत्पद्यन्ते इतियावत्, ते च जीवा विकलेन्द्रियाः सचित्तेषु मनुष्यादिशरीरेषु यूकालिक्षादिकत्वेनोत्पद्यन्ते,तथा तत्परिभुज्यमानेषु मञ्चकादिष्वचित्तेषु मत्कुणत्वेनाविर्भवन्ति, तथाऽचित्तीभूतेषु मनुष्यादिशरीरकेषु विकलेन्द्रियशरीरेषु वा ते जीवा अनुसूयत्वेन—परनिश्रया कुम्यादित्वेनोत्पद्यन्ते, अपरे तु सचित्ते तेजःकायादौ मूषिकादित्वेनोत्पद्यन्ते, यत्र चाग्निस्तत्र वायुरित्यतस्तदुद्भवा अपि द्रष्टव्याः, तथा पृथिवीमनुश्रित्य कुन्थुपिपीलिकादयो वर्षादावूष्मणा संस्वेदजा जायन्ते, तथोदके पूतरकाडोल्लणकभ्रमरिकाछेदनकादयः समुत्पद्यन्ते, तथा वनस्पतिकाये पनकभ्रमरादयो जायन्ते । तदेवं ते जीवास्तानि स्वयोनिशरीराण्याहारयन्ति इत्येवमाख्यातमिति ॥ साम्प्रतं पञ्चेन्द्रियमूत्रपुरीषोद्भवानसुमतः प्रतिपादयितुमाह—'एव'मिति पूर्वोक्तपरामर्शः, यथा सचित्ताचित्तशरीरनिश्रया विकलेन्द्रियाः समुत्पद्यन्ते तथा तत्संभवेषु मूत्रपुरीषवान्तादिषु अपरे जन्तवो दुष्टं—विरूपं रूपं येषां कुम्यादीनां ते दुरूपास्तत्संभवत्वेन—तद्भावेनोत्पद्यन्ते, ते च तत्र विष्ठादौ देहान्निर्गतेऽनिर्गते वा समुत्पद्यमाना उत्पन्नाश्च तदेव विष्ठादिकं स्वयोनिभूतमाहारयन्ति, शेषं प्राग्वत् ॥ साम्प्रतं सचित्तशरीराश्रयान् जन्तून् प्रतिपादयितुमाह—'एव'मिति, यथा मूत्रपुरीषादावुत्पादस्तथा तिर्यक्शरीरेषु 'खुरदुगत्ताए'त्ति चर्मकीटतया समुत्पद्यन्ते, इदमुक्तं भवति—जीवतामेव गोमहिष्यादीनां चर्मणोऽन्तः प्राणिनः संमूच्छर्यन्ते, ते च तन्मांसचर्मणी भक्षयन्ति, भक्षयन्तश्चर्मणो विवराणि विदधति, गलच्छोणितेषु विवरेषु तिष्ठन्तस्तदेव शोणितमाहारयन्ति, तथा अचित्तगवादिशरीरेऽपि, तथा सचित्ताचित्तवनस्पतिशरीरेऽपि घुणकीटकाः संमूच्छर्यन्ते, ते च तत्र संमूर्च्छन्तस्तच्छरीरमाहारयन्तीति ॥ साम्प्रतमपूकायं प्रतिपिपादयिषुस्तत्कारणभूतवातप्रतिपादनपूर्वकं प्रतिपादयतीत्याह—

अहावरं पुरक्खायं इहेगतिया सत्ता णाणाविहजोणिया जाव कम्मणियाणेणं तत्थवुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा तं सरीरगं वायसंसिद्धं वा वायसंगहियं वा वायपरिग्गहियं उल्लवाएसु उल्लभागी भवति अल्लवाएसु अल्लभागी भवति तिरियवाएसु तिरियभागी भवति, तंजहा—ओसा हिमए महिया करए हरतणुए सुद्धोदए, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं ओसाणं जाव सुद्धोदगाणं सरीरा णाणावण्णा जावमक्खायं ॥ अहावरं पुरक्खायं इहेगतिया सत्ता उदगजोणिया उदगसंभवा जाव कम्मणियाणेणं तत्थवुक्कमा तसथावरजोणिएसु उदएसु उदगत्ताए विउट्टंति, ते जीवा तेसिं तसथावरजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं उदगाणं सरीरा णाणावण्णा जावमक्खायं ॥ अहावरं पुरक्खायं इहेगतिया सत्ता उदगजोणियाणं जाव कम्मणियाणेणं तत्थवुक्कमा उदगजोणिएसु उदएसु उदगत्ताए विउट्टंति, ते जीवा तेसिं उदगजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं उदगजोणियाणं उदगाणं सरीरा णाणावण्णा जावमक्खायं ॥ अहावरं पुरक्खायं इहेगतिया सत्ता उदगजोणियाणं जाव कम्मणियाणेणं तत्थवुक्कमा उदगजोणिएसु उदएसु तसपाणत्ताए विउट्टंति, ते जीवा तेसिं उदगजोणियाणं

॥३५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं उदगजोणियाणं तसपाणाणं सरीरा णाणावण्णा जावमक्खायं ॥ (सूत्रं ५९)

अथानन्तरमेतद्दृश्यमाणं 'पुरा' पूर्वमाख्यातं, 'इह' अस्मिन् जगत्येके सत्त्वास्तथाविधकर्मोदयाद् नानाविधयोनिकाः सन्तो यावत्कर्मनिदानेन 'तत्र' तस्मिन्वातयोनिकेऽपूकाये 'व्युत्क्रम्य' आगत्य 'नानाविधानां' बहुप्रकाराणां 'त्रसानां' दर्दुरप्रभृतीनां 'स्थावराणां च' हरितलवणादीनां प्राणिनां सचित्ताचित्तभेदभिन्नेषु शरीरेषु तदपूकायशरीरं वातयोनिकत्वादपूकायस्य वायुनोपादानकारणभूतेन सम्यक् 'संसिद्धं' निष्पादितं तथा वातेनैव सम्यग् गृहीतमभ्रकपटलान्तर्निर्वृत्तं तथा वातेनान्योऽन्यानुगतत्वात्परिगतं तथोर्ध्वगतेषु वातेषूर्ध्वभागी भवत्यपूकायो, गगनगतवातवशाद्दिवि संमूर्च्छते जलं, तथाऽधस्ताद्गतेषु वातेषु तद्वशाद्भवत्यधोभागी अपूकायः, एवं तिर्यग्गतेषु वातेषु तिर्यग्भागी भवत्यपूकायः, उक्तं भवति—वातयोनिकत्वादपूकायस्य यत्र यत्रासौ तथाविधपरिणामपरिणतो भवति तत्र तत्र तत्कार्यभूतं जलमपि संमूर्च्छते, तस्य चाभिधानपूर्वकं भेदं दर्शयितुमाह—तद्यथा—'ओस'त्ति अवश्यायः 'हिमये'ति शिशिरार्द्रो वातेरिता हिमकणा महिकाः—धूमिकाः करकाः—प्रतीताः 'हरितणुय'त्ति तृणाग्रव्यवस्थिता जलबिन्दवः शुद्धोदकं—प्रतीतमिति । 'इह' अस्मिन्नुदकप्रस्तावे एके सत्त्वास्तत्रोत्पद्यन्ते स्वकर्मवशगास्तत्रोत्पन्नास्ते जीवास्तेषां नानाविधानां त्रसस्थावराणां स्वोत्पत्त्याधारभूतानां स्नेहमाहारयन्ति, ते जीवास्तच्छरीरमाहारयन्ति, अनाहारका न भवन्तीत्यर्थः, शेषं सुगमं यावदेतदाख्यातमिति ॥ तदेवं वातयोनिकमपूकायं प्रदर्श्याधुनाप्कायसंभवमेवाप्कायं दर्शयितुमाह—अथापरमाख्यातं 'इह' अस्मिन् जगति उदकाधिकारे वा एके सत्त्वास्तथाविधकर्मोदयाद्घातवशोत्पन्नत्रसस्थावरशरीराधारोदकं योनिः—उत्पत्तिस्थानं येषां ते तथा, तथोदकसंभवा यावत्कर्मनिदानेन तत्रोत्पित्सवस्त्रसस्थावरयोनिकेषूदकेष्वपरोदकतया 'विवर्तन्ते' समुत्पद्यन्ते, ते चोदकजीवास्तेषां त्रसस्थावरयोनिकानामुदकानां स्नेहमाहारयन्ति अन्यान्यपि पृथिव्यादिशरीराण्याहारयन्ति, तच्च पृथिव्यादिशरीरमाहारितं सत् सारूप्यमानीयात्मसात्कुर्वन्त्यपराण्यपि तत्र त्रसस्थावरशरीराणि विवर्तन्ते, तेषां चोदकयोनिकानामुदकानां नानाविधानि शरीराणि विवर्तन्ते इत्येतदाख्यातम् ॥ तदेवं त्रसस्थावरशरीरसंभवमुदकं योनित्वेन प्रदर्श्याधुना निर्विशेषणमप्कायसंभवमेवाप्कायं दर्शयितुमाह—अथापरमेतदाख्यातं 'इह' अस्मिन् जगत्युदकाधिकारे वा एके सत्त्वाः स्वकृतकर्मोदयादुदकयोनिषूदकेषुत्पद्यन्ते, ते च तेषामुदकसंभवानामुदकजीवानामात्माधारभूतानां शरीरमाहारयन्ति, शेषं सुगमं यावदाख्यातमिति ॥ साम्प्रतमुदकाधारान् परान् पूतरकादिकांस्त्रसान् दर्शयितुमाह—अथापरमेतदाख्यातमिहैके सत्त्वा उदकेषु उदकयोनिषु चोदकेषु त्रसप्राणितया पूतरकादितेन 'विवर्तन्ते' समुत्पद्यन्ते, ते चोत्पद्यमानाः समुत्पन्नाश्च तेषामुदकयोनिकानामुदकानां स्नेहमाहारयन्ति, शेषं सुगमं यावदाख्यातमिति ॥ साम्प्रतं तेजःकायमुद्दिश्याह—

अहावरं पुरक्खायं इहेगतिया सत्ता णाणाविहजोणिया जाव कम्मनियाणेणं तत्थवुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा अगणिकायत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं अगणीणं सरीरा णाणावण्णा जावमक्खायं, सेसा तिन्नि आलावगा जहा उदगाणं ॥ अहावरं पुरक्खायं इहेगतिया सत्ता णाणाविहजोणियाणं जाव कम्मनियाणेणं तत्थ वुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा वाउक्कायत्ताए विउट्टंति, जहा अगणीणं तहा भाणियव्वा, चत्तारि गमा ॥ (सूत्रं ६०) ॥

अथैतदपरमाख्यातं 'इह' अस्मिन् संसारे एके केचन 'सत्त्वाः' प्राणिनस्तथाविधकर्मोदयवर्तिनो नानाविधयोनयः प्राक्सन्तः पूर्वजन्मनि तथाविधं कर्मोपादाय तत्कर्मनिदानेन नानाविधानां त्रसस्थावराणां प्राणिनां शरीरेषु सचित्तेष्वचित्तेषु चाग्नितेन 'विवर्तन्ते' प्रादुर्भवन्ति, तथाहि—पञ्चेन्द्रियतिरश्चां दन्तिमहिषादीनां परस्परं युद्धावसरे विषाणसंघर्षे सति अग्निरुत्तिष्ठते, एवमचित्तेष्वपि तदस्थिसंघर्षादग्नेरुत्थानं, तथा द्वीन्द्रियादिशरीरेष्वपि यथासंभवमायोजनीयं, तथा स्थावरेष्वपि वनस्पत्युपलादिषु सचित्ताचित्तेष्वग्निजीवाः समुत्पद्यन्ते, ते चाग्निजीवास्तत्रोत्पन्नास्तेषां नानाविधानां त्रसस्थावराणां स्नेहमाहारयन्ति, शेषं सुगमं यावद्भवन्तीत्येवमाख्यातम् । अपरे त्रयोऽप्यालापकाः प्राग्वद् द्रष्टव्या इति ॥ साम्प्रतं वायुकायमुद्दिश्याह—'अहावर'मित्यादि, अथापरमेतदाख्यातमित्याद्यग्निकायगमेन व्याख्येयम् ॥ साम्प्रतमशेषजीवाधारं पृथिवीकायमधिकृत्याह—

अहावरं पुरक्खायं इहेगतिया सत्ता णाणाविहजोणिया जाव कम्मनियाणेणं तत्थवुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा पुढवित्ताए सक्करत्ताए वालुयत्ताए इमाओ गाहाओ अणुगंतव्वाओ-'पुढवी य सक्करा वालुया य उवले सिला य लोणूसे । अय तउय तंब सीसग रूप्प सुवण्णे य वइरे य ॥ १ ॥ हरियाले हिंगुलए मणोसिला सासगंजणपवाले । अब्भपडल-

१ दन्तशृङ्गयोः परिग्रहापेक्षया सचित्तांशयुक्तत्वापेक्षया वा अचित्तभेदभिन्नता २ त्रसोत्पत्तियुक्ताः ।

॥३५८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्भवालुय बायरकाए मणिविहाणा ॥ २ ॥ गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य। मरगयमसारगल्ले भुयमोयग इंदणीले य ॥ ३ ॥ चंदण गेरुय हंसगब्भ पुलए सोगंधिए य बोद्धव्वे। चंदप्पभ वेरुलिए जलकंते सूरकंते य ॥ ४ ॥ एयाओ एएसु भाणियव्वाओ गाहाओ जाव सूरकंतत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं पुढवीणं जाव सूरकंताणं सरीरा णाणावण्णा जावमक्खायं, सेसा तिण्णि आलावगा जहा उदगाणं ॥ (सूत्रं ६१) ॥

अथापरमेतत्पूर्वमाख्यातं इहैके सत्त्वाः पूर्वं नानाविधयोनिकाः स्वकृतकर्मवशा नानाविधत्रसस्थावराणां शरीरेषु सचित्तेषु अचित्तेषु वा पृथिवीत्वेनोत्पद्यन्ते, तद्यथा—सर्षपशिरःसु मणयः करिदन्तेषु मौक्तिकानि विकलेन्द्रियेष्वपि शुक्त्यादिषु मौक्तिकानि स्थावरेष्वपि वेण्वादिषु तान्येवेति, एवमचित्तेषूपरादिषु लवणभावेनोत्पद्यन्ते, तदेवं पृथिवीकायिका नानाविधासु पृथिवीषु शर्करावालुकोपलशिलालवणादिभावेन तथा गोमेदकादिरत्नभावेन च बादरमणिविधानतया समुत्पद्यन्ते, शेषं सुगमं यावच्चसारोऽप्यालापका उदकगमेन नेतव्या इति ॥ साम्प्रतं सर्वोपसंहारद्वारेण सर्वजीवान् सामान्यतो विभणिषुराह—

अहावरं पुरक्खायं सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता णाणाविहजोणिया णाणाविहसंभवा णाणाविहवुक्कमा सरीरजोणिया सरीरसंभवा सरीरवुक्कमा सरीराहारा कम्मोवगा कम्मनियाणा कम्मगतीया कम्मठिइया कम्मणा चेव विप्परियासमुवेंति ॥ से एवमायाणह से एवमायाणित्ता आहारगुत्ते सहिए समिए सया जए त्तिबेमि ॥ (सूत्रं ६२) ॥ बियसुयक्खंधस्स आहारपरिण्णा णाम तईयमज्झयणं समत्तं ॥

अथापरमेतदाख्यातं, तद्यथा—सर्वे 'प्राणाः' प्राणिनोऽत्र च प्राणिभूतजीवसत्त्वशब्दाः पर्यायत्वेन द्रष्टव्याः, कथञ्चिद्भेदं वाऽऽश्रित्य व्याख्येयाः, ते च नानाविधयोनिका नानाविधासु योनिषूत्पद्यन्ते, नारकतिर्यङ्नरामराणां परस्परगमनसंभवात्, ते च यत्र यत्रोत्पद्यन्ते तत्तच्छरीराण्याहारयन्ति, तदाहारवन्तश्च तत्रागुप्तास्तद्द्वारायाततत्कर्मवशगा नारकतिर्यङ्नरामरगतिषु जघन्यमध्यमोत्कृष्टस्थितयो भवन्ति, अनेनेदमुक्तं भवति—यो यादृगिह भवे स तादृगेवामुत्रापि भवतीत्येतन्निरस्तं भवति, अपितु कर्मोपगाः कर्मनिदानाः कर्मायत्तगतयो भवन्ति, तथा तेनैव कर्मणा सुखलिप्सवोऽपि तद्विपर्यासं दुःखमुपगच्छन्तीति ॥ साम्प्रतमध्ययनार्थमुपसंजिघृक्षुराह—यदेतन्मयाऽऽदितः प्रभृत्युक्तं, तद्यथा—यो यत्रोत्पद्यते स तच्छरीराहारको भवति आहारागुप्तश्च कर्मोदत्ते कर्मणा च नानाविधासु योनिषु अरहट्टघटीन्यायेन पौनःपुन्येन पर्यटतीत्येवमाजानीत यूयं, एतद्विपर्यासे दुःखमुपगच्छन्तीति । एतत्परिज्ञाय च सदसद्विवेक्याहारगुप्तः पञ्चभिः समितिभिः समितो यदिवा सम्यग्ज्ञानादिके मार्गे इतोगतः समितः तथा सह हितेन वर्तते सहितः सन् सदा—सर्वकालं यावदुच्छ्वासं तावद्यतेत—सत्संयमानुष्ठाने प्रयत्नवान् भवेदिति । इतिः परिसमाप्त्यर्थे, ब्रवीमीतिपूर्ववत् । गतोऽनुगमः । साम्प्रतं नयाः, ते च प्राग्वद् द्रष्टव्याः ॥ समाप्तमाहारपरिज्ञाख्यं तृतीयमध्ययनम् ॥ ३ ॥

इति श्रीसूत्रकृदङ्गे द्वितीयश्रुतस्कन्धे आहारपरिज्ञाख्यं तृतीयमध्ययनं सवृत्तिकं समाप्तिमगात्

अथ द्वितीयश्रुतस्कन्धे चतुर्थप्रत्याख्यानाध्ययनप्रारम्भः ॥

तृतीयाध्ययनानन्तरं चतुर्थमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने आहारागुप्तस्य कर्मबन्धोऽभिहितोऽतोऽत्र तत्प्रत्याख्यानं प्रतिपाद्यते, यदिवोत्तरगुणसंपादनार्थं शुद्धेतराहारविवेकार्थमाहारपरिज्ञोक्ता, सा चोत्तरगुणरूपा प्रत्याख्यानक्रियासमन्वितस्य भवतीत्यत आहारपरिज्ञानन्तरं प्रत्याख्यानक्रियाध्ययनमारभ्यते इत्यनेन संबन्धेनायातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयम्, तद्यथा—इह कर्मोपादानभूतस्यास्रवस्य प्रत्याख्यानं प्रतिपाद्यत इति । साम्प्रतं निक्षेपः, तत्राप्योघनिष्पन्नेऽध्ययनं नामनिष्पन्ने प्रत्याख्यानक्रियेति द्विपदं नाम, तत्र प्रत्याख्यानपदनिक्षेपार्थं निर्युक्तिकृदाह—

णामंठवणादविए अइच्छ पडिसेहए य भावे य। एसो पच्चक्खाणस्स छव्विहो होइ निक्खेवो ॥ १७९ ॥
मूलगुणेसु य पगयं पच्चक्खाणे इहं अहीगारो। होज्ज हु तप्पच्चइया अप्पच्चक्खाणकिरिया उ ॥ १८० ॥

नामस्थापनाद्रव्यादित्साप्रतिषेधभावरूपः प्रत्याख्यानस्यायं षोढा निक्षेपः, तत्रापि नामस्थापने सुगमे, द्रव्यप्रत्याख्यानं तु द्रव्यस्य द्रव्येण द्रव्याद् द्रव्ये द्रव्यभूतस्य वा प्रत्याख्यानं द्रव्यप्रत्याख्यानं, तत्र सचित्ताचित्तमिश्रभेदस्य द्रव्यस्य प्रत्याख्यानं द्रव्यप्रत्याख्यानं, द्रव्यनिमित्तं वा प्रत्याख्यानं यथा धम्मिल्लस्य, एवमपराण्यपि कारकाणि स्वधिया योजनीयानि, तथा दातु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिच्छा दित्सा च दित्सा अदित्सा तथा प्रत्याख्यानमदित्साप्रत्याख्यानं–सत्यपि देये सति च संप्रदानकारके केवलं दातुर्दातुमिच्छा नास्तीत्यतोऽदित्साप्रत्याख्यानं, तथा प्रतिषेधप्रत्याख्यानमिदं, तद्यथा–विवक्षितद्रव्याभावाद्विशिष्टसंप्रदानकारकाभावाद्वा सत्यामपि दित्सायां यः प्रतिषेधस्तत्प्रतिषेधप्रत्याख्यानं, भावप्रत्याख्यानं तु द्विधा–अन्तःकरणशुद्धस्य साधोः श्रावकस्य वा मूलगुणप्रत्याख्यानमुत्तरगुणप्रत्याख्यानं चेति, चशब्दादेतद् द्विविधमपि नोआगमतो भावप्रत्याख्यानं द्रष्टव्यं, नान्यदिति। साम्प्रतं क्रियापदं निक्षेप्तव्यं, तच्च क्रियास्थानाध्ययने निक्षिप्तमिति न पुनर्निक्षिप्यते। इह पुनर्भावप्रत्याख्यानेनाधिकार इति दर्शयितुमाह–मूलगुणाः–प्राणातिपातविरमणादयस्तेषु प्रकृतम्–अधिकारः प्राणातिपातादेः प्रत्याख्यानं कर्तव्यमितियावत् 'इह' प्रत्याख्यानक्रियाध्ययनेऽर्थाधिकारो, यदि मूलगुणप्रत्याख्यानं न क्रियते ततोऽयायं दर्शयितुमाह–प्रत्याख्यानाभावेऽनियतत्वाद्यत्किञ्चनकारितया तत्प्रत्ययिका–तन्निमित्ता भवेद्–उत्पद्येत अप्रत्याख्यानक्रिया–सावद्यानुष्ठानक्रिया तत्प्रत्ययिकश्च कर्मबन्धः तन्निमित्तश्च संसार इत्यतः प्रत्याख्यानक्रिया मुमुक्षुणा विधेयेति। गतो नामनिष्पन्नो निक्षेपः, अधुना सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्–

सूत्रकृ. ६१

सूयं मे आउसंतेणं भगवया एवमक्खायं–इह खलु पच्चक्खाणकिरियाणामज्झयणे, तस्स णं अयमट्ठे पण्णत्ते–आया अपच्चक्खाणी यावि भवति आया अकिरियाकुसले यावि भवति आया मिच्छासंठिए यावि भवति आया एगंतदंडे यावि भवति आया एगंतबाले यावि भवति आया एगंतसुत्ते यावि भवति आया अवियारमणवयणकायवक्के यावि भवति आया अप्पडिहयअपच्चक्खायपावकम्मे यावि भवति,

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३६१॥

४ प्रत्याख्याना० अविरतस्य पापबन्धः

एस खलु भगवता अक्खाए असंजते अविरते अप्पडिहयपच्चक्खायपावकम्मे सकिरिए असंवुडे एगंतदंडे एगंतबाले एगंतसुत्ते, से बाले अवियारमणवयणकायवक्के सुविणमवि ण पस्सति, पावे य से कम्मे कज्जइ ॥ (सूत्रं ६३) ॥

अस्य चानन्तरपरम्परसूत्रैः सह संबन्धो वक्तव्यः, स चायम्–इहानन्तराध्ययनपरिसमाप्तावेदं सूत्रम्–'आहारगुप्तः समितः सहितः सदा यतेते'ति एतन्मया श्रुतमायुष्मता भगवतेदमाख्यातम्, एवमनया दिशा परम्परसूत्रैरपि संबन्धोऽभ्यूह्यः, 'इह' अस्मिन् प्रवचने सूत्रकृताङ्गे वा 'खल्वि'ति वाक्यालङ्कारे प्रत्याख्यानक्रियानामाध्ययनं तस्यायमर्थो–वक्ष्यमाणलक्षणः, अततीत्यात्मा–जीवः प्राणी, स चानादिमिथ्यात्वाविरतिप्रमादकषाययोगानुगततया स्वभावत एवाप्रत्याख्यान्यपि भवति, अपिशब्दात्स एव कुतश्चिन्निमित्तात्प्रत्याख्यान्यपि, तत्रात्मग्रहणमपरदर्शनव्युदासार्थं, तथाहि–सांख्यानामप्रच्युतानुत्पन्नस्थिरैकस्वभाव आत्मा, स च तृणकुड्यीकरणेऽप्यसमर्थतयाऽकिञ्चित्करत्वान्न प्रत्याख्यानक्रियायां भवितुमर्हति, बौद्धानामप्यात्मनोऽभावात् ज्ञानस्य च क्षणिकतया स्थितेरभावात् कुतः प्रत्याख्यानक्रियेति, एवमन्यत्रापि प्रत्याख्यानक्रियाया अभावो वाच्यः, तथा सदनुष्ठानं क्रिया तस्यां कुशलः क्रियाकुशलस्तत्प्रतिषेधादक्रियाकुशलोऽप्यात्मा भवति, तथाऽऽत्मा मिथ्यात्वोदयसंस्थितोऽपि भवति, तथैकान्तेनापरान् प्राणिनो दण्डयतीति दंडस्तदेवंभूतश्चात्मा भवति, तथाऽसारतापादनाद्रागद्वेषाकुलितत्वाद्बालवद्बाल आत्मा भवति, तथा सुप्तवत्सुप्तः, यथा हि द्रव्यसुप्तः शब्दादीन् विषयान् न जानाति हिताहितप्राप्तिपरिहारविकलश्च तथा भावसुप्तोऽप्यात्मैवंभूत एव भवतीति, एवमविचारणीयानि–अशोभनतयाऽनिरूपणीयान्यपर्यालोचनीयानि मनोवाक्कायवाक्यानि यस्य स तथा, तत्र मनः–अन्तःकरणं

॥३६१॥

वाग्-वाणी कायो-देहः अर्थप्रतिपादकं पदसमूहात्मकं वाक्यमेकतिङ् सुबन्तं वा, तत्र वाग्ग्रहणेनैव वाक्यस्य गतार्थत्वाद्यत्पुनर्वाक्यग्रहणं करोति तदेवं ज्ञापयति–इह वाग्व्यापारस्य प्रचुरतया प्राधान्यं, प्रायशस्तत्प्रवृत्त्यैव प्रतिषेधविधानयोरन्येषां प्रवर्त्तनं भवति, तदेवमप्रत्याख्यानाक्रियः सन् आत्माऽविचारितमनोवाक्कायवाक्यश्चापि भवतीति, तथा प्रतिहतं–प्रतिस्खलितं प्रत्याख्यातं–निराकृतं विरतिप्रतिपत्त्या पापकर्म–असदनुष्ठानं येन स प्रतिहतप्रत्याख्यातपापकर्मा तत्प्रतिषेधादसदनुष्ठानपरश्चात्मा भवतीति। तदेवमेष–पूर्वोक्तोऽसंयतोऽविरतोऽप्रतिहतप्रत्याख्यातपापकर्मा सक्रियः ससावद्यानुष्ठानः, तथाभूतश्चासंवृतो मनोवाक्कायैरगुप्तोऽगुप्तत्वाच्चात्मनः परेषां च दण्डहेतुत्वाद्दण्डः, तदेवंभूतश्च सन् एकान्तेन बालवद्बालः सुप्तवदेकान्तेन सुप्तः, तदेवंभूतश्च बालसुप्ततयाऽविचाराणि–अविचारितरमणीयानि परमार्थविचारणया युक्त्या वा विघटमानानि मनोवाक्कायवाक्यानि यस्य स तथा, यदिवा परसंबन्ध्यविचारितमनोवाक्कायवाक्यः सन् क्रियासु प्रवर्त्तते, तदेवंभूतो निर्विवेकतया पटुविज्ञानरहितः स्वप्नमपि न पश्यति, तस्य चाव्यक्तविज्ञानस्य स्वप्नमप्यपश्यतः पापं कर्म बध्यते, तेनैवंभूतेनाव्यक्तविज्ञानेनापि पापं कर्म क्रियत इति भावः॥ तत्र चैवं व्यवस्थिते चोदकः प्रज्ञापकमेवमवादीत्–अत्र चाचार्याभिप्रायं चोदकोऽनूद्य प्रतिषेधयति–

तत्थ चोयए पन्नवगं एवं वयासि–असंतएणं मणेणं पावएणं असंतियाए वतीए पावियाए असंतएणं काएणं पावएणं अहणंतस्स अमणक्खस्स अवियारमणवयकायवक्कस्स सुविणमवि अपस्सओ पावकम्मे णो कज्जइ, कस्स णं तं हेउं ?, चोयए एवं वदीति–अन्नयरेणं मणेणं पावएणं मणवत्तिए पावे कम्मे कज्जइ, अन्नयरीए वतिए पावियाए वतिवत्तिए पावे कम्मे कज्जइ, अन्नयरेणं काएणं पावएणं कायवत्तिए पावे कम्मे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कज्जइ, इणंतस्स समणकस्स सवियारमणवयकायवक्कस्स सुविणमवि पासओ एवंगुणजातीयस्स पावे कम्मे कज्जइ। पुणरवि चोयए एवं ववीति-तत्थ णं जे ते एवमाहंसु-असंतएणं मणेणं पावएणं असंतीयाए वतिए पावियाए असंतएणं काएणं पावएणं अहणंतस्स अमणक्कस्स अवियारमणवयणकायवक्कस्स सुविणमवि अपस्सओ पावे कम्मे कज्जइ, तत्थ णं जे ते एवमाहंसु मिच्छा ते एवमाहंसु॥ तत्थ पन्नवए चोयगं एवं वयासी-तं सम्मं जं मए पुव्वं वुत्तं, असंतएणं मणेणं पावएणं असंतियाए वतिए पावियाए असंतएणं काएणं पावएणं अहणंतस्स अमणक्कस्स अवियारमणवयणकायवक्कस्स सुविणमवि अपस्सओ पावे कम्मे कज्जति, तं सम्मं, कस्स णं तं हेउं ?, आचार्य आह-तत्थ खलु भगवया छज्जीवणिकायहेऊ पण्णत्ता, तंजहा-पुढविकाइया जाव तसकाइया, इच्चेएहिं छहिं जीवणिकाएहिं आया अप्पडिहयपच्चक्खायपावकम्मे निच्चं पसढविउवातचित्तदंडे, तंजहा-पाणातिवाए जाव परिग्गहे कोहे जाव मिच्छादंसणसल्ले॥ आचार्य आह-तत्थ खलु भगवया वहए दिट्ठंते पण्णत्ते, से जहाणामए वहए सिया गाहावइस्स वा गाहावइपुत्तस्स वा रण्णो वा रायपुरिसस्स वा खणं निद्धाय पविसिस्सामि खणं लद्धूणं वहिस्सामि पहारेमाणे से किं नु हु नाम से वहए तस्स गाहावइस्स वा गाहावइपुत्तस्स वा रण्णो वा रायपुरिसस्स वा खणं निद्धाय पविसिस्सामि खणं लद्धूणं वहिस्सामि पहारेमाणे दिया वा राओ वा सुत्ते वा जागरमाणे वा

॥३६२॥

१ हि द्वाए प्र० । २ किण्हु । ३ पुत्तस्स (टीका)।

अमित्तभूए मिच्छासंठिते निच्चं पसढविउवायचित्तदंडे भवति ?, एवं वियागरेमाणे समियाए वियागरे चोयए-हंता भवति॥ आचार्य आह-जहा से वहए तस्स गाहावइस्स वा तस्स गाहावइपुत्तस्स वा रण्णो वा रायपुरिसस्स वा खणं निद्धाय पविसिस्सामि खणं लद्धूणं वहिस्सामित्ति पहारेमाणे दिया वा राओ वा सुत्ते वा जागरमाणे वा अमित्तभूए मिच्छासंठिते निच्चं पसढविउवायचित्तदंडे, एवमेव बालेवि सव्वेसिं पाणाणं जाव सव्वेसिं सत्ताणं दिया वा राओ वा सुत्ते वा जागरमाणे वा अमित्तभूए मिच्छासंठिते निच्चं पसढविउवायचित्तदंडे, तं०-पाणातिवाए जाव मिच्छादंसणसल्ले, एवं खलु भगवया अक्खाए असंजए अविरए अप्पडिहयपच्चक्खायपावकम्मे सकिरिए असंवुडे एगंतदंडे एगंतबाले एगंतसुत्ते यावि भवइ, से बाले अवियारमणवयणकायवक्के सुविणमवि ण पस्सइ पावे य से कम्मे कज्जइ॥ जहा से वहए तस्स वा गाहावइस्स जाव तस्स वा रायपुरिसस्स पत्तेयं पत्तेयं चित्तसमादाए दिया वा राओ वा सुत्ते वा जागरमाणे वा अमित्तभूए मिच्छासंठिते निच्चं पसढविउवायचित्तदंडे भवइ, एवमेव बाले सव्वेसिं पाणाणं जाव सव्वेसिं सत्ताणं पत्तेयं पत्तेयं चित्तसमादाए दिया वा राओ वा सुत्ते वा जागरमाणे वा अमित्तभूते मिच्छासंठिते निच्चं पसढविउवायचित्तदंडे भवइ॥ (सूत्रं ६४)॥

'असंतएण'मित्यादि, अविद्यमानेन-असता मनसाऽप्रवृत्तेनाशोभनेन तथा वाचा कायेन च पापेनासता तथा सत्त्वानभ्रतः तथाऽमनस्कस्याविचारमनोवाक्कायवाक्यस्य स्वप्नमप्यपश्यतः स्वप्नान्तिकं च कर्म नोपचयं यातीत्येवमव्यक्तविज्ञानस्य पापं

कर्म न बध्यते, एवंभूतविज्ञानेन पापं कर्म न क्रियत इतियावत्। 'कस्य हेतोः ?' केन हेतुना केन कारणेन तत्पापं कर्म बध्यते ?, नात्र कश्चिदव्यक्तविज्ञानत्वात्पापकर्मबन्धहेतुरिति भावः। तदेवं चोदक एव स्वाभिप्रायेण पापकर्मबन्धहेतुमाह-'अन्नयरेण'मित्यादि, कर्माश्रवद्वारभूतैर्मनोवाक्कायकर्मभिः कर्म बध्यत इति दर्शयति-अन्यतरेण क्लिष्टेन प्राणातिपातादिप्रवृत्त्या मनसा वाचा कायेन च तत्प्रत्ययिकं कर्म बध्यत इति, इदमेव स्पष्टतरमाह-यतस्तच्चान्समनस्कस्य सविचारमनोवाक्कायवाक्यस्य स्वप्नमपि पश्यतः प्रस्पष्टविज्ञानस्यैतद्गुणजातीयस्य पापं कर्म बध्यते, न पुनरेकेन्द्रियविकलेन्द्रियादेः पापकर्मसंभव इति, तेषां घातकस्य मनोवाक्कायव्यापारस्याभावात्, अथैतद्व्यापारमन्तरेणापि कर्मबन्ध इष्यते एवं च सति मुक्तानामपि कर्मबन्धः स्यात्, न चैतदिष्यते, तस्मान्नैवमस्वप्नान्तिकमविज्ञोपचितं च कर्म बध्यत इति, तत्र यदेवंभूतैरेव मनोवाक्कायव्यापारैः कर्मबन्धोऽभ्युपगम्यते। तदेवं व्यवस्थिते सति ये ते एवमुक्तवन्तः-तद्यथा-अविद्यमानैरेवाशुभैर्योगैः पापं कर्म क्रियते, मिथ्या त एवमुक्तवन्त इति स्थितम्॥ तदेवं चोदकेनाचार्यपक्षं दूषयित्वा स्वपक्षे व्यवस्थापिते सत्याचार्य आह-तत्राचार्यः स्वमतमनूद्य तत्सोपपत्तिकं साधयितुमाह-'तं सम्म'मित्यादि, यदेतन्मयोक्तं प्राग् यथाऽस्पष्टाव्यक्तयोगानामपि कर्म बध्यते तत्सम्यक्-शोभनं युक्तिसंगतमिति, एवमुक्ते परः आह-'कस्य हेतोः ?' केन कारणेन तत्सम्यगिति चेदाह-'तत्थ खलु' इत्यादि, तत्रेति वाक्योपन्यासार्थं खलुशब्दो वाक्यालङ्कारे भगवता वीरवर्द्धमानस्वामिना षड् जीवनिकायाः कर्मबन्धहेतुत्वेनोपन्यस्ताः, तद्यथा-पृथिवीकायिका इत्यादि यावत्रसकायिका

॥३६३॥

१ नोदकस्यैव वाक्यं प्रज्ञापकं प्रति। २ नोदकपक्षे। ३ यद्येवं० प्र० तस्मादित्यादिवाक्यस्यायं हेतुभूतः स्यात्। ४ स्पष्टविज्ञानयुक्तैः। ५ आचार्यवाक्यमिदं पूर्वपक्षे हेतुदर्शनाय।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति । कथमेते षड् जीवनिकायाः कर्मबन्धस्य कारणमित्याह–'इच्चेएहि'मित्यादि, इत्येतेषु पृथिव्यादिषु षड्जीवनिकायेषु प्रतिहतं–विघ्नितं प्रत्याख्यातं–नियमितं पापं कर्म येन स तथा, पुनर्नभूसमासेनाप्रतिहतप्रत्याख्यातपापकर्मा य आत्मा–जन्तुस्तथा तद्भावत्वादेव नित्यं–सर्वकालं प्रकर्षेण शठः प्रशठस्तथा व्यतिपाते–प्राणव्यपरोपणे चित्तं यस्य स व्यतिपातचित्तः स्वपरदण्डहेतुत्वाद्दण्डः प्रशठश्चासौ व्यतिपातचित्तदण्डश्चेति कर्मधारय इति, एतदेव प्रत्येकं दर्शयितुमाह—'तंजहे'त्यादि, तद्यथा प्राणातिपाते विधेये प्रशठव्यतिपातचित्तदण्डः, एवं मृषावादादत्तादानमैथुनपरिग्रहेष्वपि वाच्यं, यावन्मिथ्यादर्शनशल्यमिति । तेषामिहैकेन्द्रियविकलेन्द्रियादीनामनिवृत्तत्वान्मिथ्यात्वाविरतिप्रमादकषाययोगानुगतत्वं द्रष्टव्यं, तद्भावाच्च ते कथं प्राणातिपातादिदोषवन्तो न भवन्ति, प्राणातिपातादिदोषवत्तया चाव्यक्तविज्ञाना अपि सन्तोऽस्वप्नाद्यवस्थायामपि ते कर्मबन्धका एव । तदेवं व्यवस्थिते यत्प्रागुक्तं परेण यथा–नाव्यक्तविज्ञानानामप्रतामनस्कानां कर्मबन्ध इत्येतत् प्रवते ॥ साम्प्रतमाचार्यः स्वपक्षसिद्धये दृष्टान्तमाह—'तत्थ खलु भगवया' इत्येति वाक्योपन्यासार्थमाह, खलुशब्दो वाक्यालङ्कारे, भगवता–ऐश्वर्यादिगुणोपेतेन चतुस्त्रिंशदतिशयसमन्वितेन तीर्थकृता वधकदृष्टान्तः 'प्रज्ञप्तः' प्ररूपितः, तद्यथा नाम वधकः कश्चित्स्यादिति, कुतश्चिन्निमित्तात्कुपितः सन् कस्यचिद्वधपरिणतः कश्चित्पुरुषो भवति, यस्यासौ वधकस्तं विशेषेण दर्शयितुमाह–'गाहावइस्स वे'त्यादि, गृहस्य पतिर्गृहपतिस्तत्पुत्रो वा, अनेन सामान्यतः प्राकृतपुरुषोऽभिहितः, तस्योपरि कुतश्चिन्निमित्ताद्वधकः कश्चित्संवृत्तः, स च वधपरिणामपरिणतोऽपि कस्मिंश्चित्क्षणे पापकारिणमेनं घातयिष्यामीति । तथा राज्ञस्तत्पुत्रस्य वोपरि कुपित एतत्कुर्यादित्याह—'खणं निद्दाय'

१ योग्येऽवसरे । २ अपायस्य ।

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३६४॥

इत्यादि, क्षणम्–अवसरं 'णिद्दाय'त्ति प्राप्य लब्ध्वा वध्यस्य पुरे गृहे वा प्रवेक्ष्यामीत्येतदध्यवसायी भवति, तथा क्षणम्–अवसरं छिद्रादिकं वध्यस्य लब्ध्वा तदुत्तरकालं तं वध्यं हनिष्यामीत्येवं संप्रधारयति, एतदुक्तं भवति–गृहपतेः सामान्यपुरुषस्य राज्ञो वा विशिष्टतमस्य कस्यचिद्वधपरिणतोऽप्यात्मनोऽवसरं लब्ध्वाऽपरकार्यक्षणे सति तथा वध्यस्य च छिद्रमपेक्षमाणस्तदवसरापेक्षी कंचित्कालमुदास्ते, स च तत्रौदासीन्यं कुर्वाणोऽपरकार्यं प्रति व्यग्रचेताः संस्तस्मिन्नवसरे वधं प्रत्यस्पष्टविज्ञानो भवति, स चैवंभूतोऽपि यथा तं वध्यं प्रति नित्यमेव प्रशठव्यतिपातचित्तदण्डो भवति, एवमविद्यमानैरपि प्रव्यक्तैरशुभैर्योगैरेकेन्द्रियविकलेन्द्रियादयोऽस्पष्टविज्ञाना अपि मिथ्यात्वाविरतिप्रमादकषाययोगानुगतत्वात्प्राणातिपातादिदोषवन्तो भवन्तीति, न च तेऽवसरमपेक्षमाणा उदासीना अप्यवैरिण इति, एवमस्पष्टविज्ञाना अप्यवैरिणो न भवन्तीति, अत्र च वध्यवधकयोः क्षणापेक्षया चत्वारो भङ्गाः, तद्यथा–वध्यस्यानवसरो १ वधकस्य च २ उभयोर्वाऽनवसरो ३ द्वयोरप्यवसर इति ४ । नागार्जुनीयास्तु पठन्ति–'अप्पणो अवखणयाए तस्स वा पुरिसस्स छिद्दं अलभमाणे णो वहेइ, तं जया मे खणो भविस्सइ तस्स पुरिसस्स छिद्दं लभिस्सामि तया मे स पुरिसे अवस्सं वहेयवे भविस्सइ, एवं मणो पहारेमाणे'त्ति सूत्रं, निगदसिद्धम् ॥ साम्प्रतमाचार्य एव स्वाभिप्रेतमर्थं परप्रश्नपूर्वकमाविर्भावयन्नाह–'से किं नु हु'इत्यादि, आचार्यः स्वतो हि निर्णीतार्थोऽन्यया परं पृच्छति–किमिति परप्रश्ने, नुरिति वितर्के हुशब्दो वाक्यालङ्कारे, किमसौ वधकपुरुषोऽवसरापेक्षी 'छिद्रम्' अवसरं 'प्रधारयन्' पर्यालोचयन्नहर्निशं सुप्तो जाग्रदवस्थो वा 'तस्य' गृहपते राज्ञो वा वध्यस्याभित्रभूतो मिथ्यासंस्थितो नित्यं प्रशठव्यतिपातचित्तदण्डो भवत्याहोस्वित्रेति ?, एवं पृष्टः परः समतया

४ प्रत्याख्याना० अविरतस्य पापबन्धः

॥३६४॥

१ कश्चित्कारणकोपाद्वधपरिणतोऽप्या० प्र० । २ परचित्तस्था याऽसूया–यथार्थेऽप्यर्थतोद्भावनरूपा तया हेतुभूतया ।

माध्यस्थ्यमवलम्बमानो यथावस्थितमेव व्यागृणीयात्, तद्यथा–हन्ताचार्य ! भवत्यसावभित्रभूत इतीत्यादि । तदेवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकं दर्शयितुमाह–यथाऽसौ वधक इत्यादिना दृष्टान्तमनूद्य दार्ष्टान्तिकमर्थं दर्शयितुमाह–'एवमेवे'त्यादि, एवमेवेति यथासौ वधकोऽवसरापेक्षितया वध्यस्य व्यापत्तिमकुर्वाणोऽप्यभित्रभूतो भवत्येवमेवासावपि बालवद्बालोऽस्पष्टविज्ञानो भवत्येव, निवृत्तेरभावाद्योग्यतया सर्वेषां प्राणिनां व्यापादको भवति यावन्मिथ्यादर्शनशल्योपेतो भवति, इदमुक्तं भवति–यद्यप्युत्थानादिकं विनयं कृतश्चिन्निमित्तादसौ विधत्ते तथाऽप्युदायिनृपव्यापादकवदन्तर्दुष्ट एवेति, नित्यं प्रशठव्यतिपातचित्तदण्डश्च यथा परशुरामः कृतवीर्यं व्यापाद्यापि तदुत्तरकालं सप्तवारं निःक्षत्रां पृथिवीं चकार, आह हि– "अपकारसमेन कर्मणा न नरस्तुष्टिमुपैति शक्तिमान् । अधिकां कुरुतेऽरियातनां द्विषतां मूलमशेषमुद्धरेत् ॥ १ ॥" इत्येवमसावभित्रभूतो मिथ्याविनीतश्च भवतीति । साम्प्रतमुपसंहरन् प्राक् प्रतिपादितमर्थमनुवदन्नाह–'एवं खलु भगवया'इत्यादि, यथाऽसौ वधकः स्वपरावसरापेक्षी सन्न तावद् घातयत्यथ चानिवृत्तत्वादोषदुष्ट एव, एवमसावप्येकेन्द्रियादिकोऽस्पष्टविज्ञानोऽपि तथाभूत एवाविरताप्रतिहतप्रत्याख्यातासत्क्रियादिदोषदुष्ट इति, शेषं सुगमं यावत्पापं कर्म क्रियत इति ॥ तदेवं दृष्टान्तदार्ष्टान्तिकप्रदर्शनेन पूर्वप्रतिपादितार्थस्य निगमनं कृत्वाऽधुना सर्वेषामेव प्रत्येकं प्राणिनां दुष्ट आत्मा भवति इत्येतत्प्रतिपादयितुकाम आह–यथाऽसौ वधकः परात्मनोरवसरापेक्षी तस्य गृहपतेस्तत्पुत्रस्य वाऽभ्यर्हितस्य वा राजादेस्तत्पुत्रस्य वैकमेकं–पृथक् पृथक् सर्वेष्वपि वध्येषु घातकचित्तं समादाय प्राप्तावसरोऽहमेनं वैरिणं मदाधिविधायिनं घातयिष्यामीत्येवं प्रतिज्ञाय दिवा वा रात्रौ वा सुप्तो वा जाग्रद्वा सर्वास्ववस्थासु सर्वेषामेव वध्यानां प्रत्येकममित्रभूतोऽवसरापेक्षितयाऽसन्नपि मिथ्यासंस्थितो नित्यं प्रशठव्यतिपातचित्तदण्डो भवति, एवं रागद्वेषाकुलितो बालवद्बालो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानावृत एकेन्द्रियादिरपि सर्वेषामेव प्राणिनां विरतेरभावात्तद्योग्यतया प्रत्येकं वध्येषु घातकचित्तं समादाय नित्यं प्रशठव्यतिपातचित्तदण्डो भवतीति, इदमुक्तं भवति–यथाऽसौ तस्माद्गृहपतिराजादिर्घातादनुपशान्तवैरः कालावसरापेक्षितया वधमकुर्वाणोऽप्यविरतिसद्भावाद्वैरान्न निवर्त्तते तत्प्रत्ययिकेन च कर्मणा बध्यते एवं तेऽपि एकेन्द्रियविकलेन्द्रियादयस्तत्प्रत्ययिकेन [च] कर्मणा बध्यन्ते, एवं मृषावादादत्तादानमैथुनपरिग्रहेष्वपि प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनार्थविधानेन पञ्चावयवत्वं वाच्यमिति, इहैवं पञ्चावयवस्य वाक्यस्य सूत्राणां विभागो द्रष्टव्यः, तद्यथा–'आया अपच्चक्खाणी यावि भवतीत्यत आरभ्य यावत्पावे य से कम्मे कज्जइ'त्ति इतीयं प्रतिज्ञा, तत्र परः प्रतिज्ञामात्रेणोक्तमनुक्तसममितिकृत्वा चोदयति, तद्यथा–'तत्थ चोयए पण्णवगं एवं वयासीत्यत आरभ्य यावत्ते ते एवमाहंसु मिच्छं ते एवमाहंसु'त्ति । तत्र प्रज्ञापकश्चोदकं प्रत्येवं वदेत् , तद्यथा–यन्मया पूर्वं प्रतिज्ञातं तत्सम्यक्, कस्य हेतोः ?–केन हेतुनेति चेत् , तत्र हेतुमाह–'तत्थ खलु भगवया छ जीवनिकाया हेऊ पण्णत्ता इत्यत आरभ्य यावत् मिच्छादंसणसल्ले'इत्ययं हेतुः, तदस्य हेतोरनैकान्तिकत्वव्युदासार्थं स्वपक्षे सिद्धिं दर्शयितुं दृष्टान्तमाह, तद्यथा–'तत्थ खलु भगवया वहए दिट्ठंते पण्णत्ते इत्यत आरभ्य यावत् खणं लद्धूणं वहिस्सामीति पहारेमाणे'त्ति, तदेवं दृष्टान्तं प्रदर्श्य तत्र च हेतोः सत्तां स्वाभिप्रेतां परेण मार्गयितुमाह–'से किं नु हुं णाम से वहए इत्यादेरारभ्य यावद्धन्ता भवति' तदेवं हेतोर्दृष्टान्ते सत्त्वं प्रसाध्य हेतोः पक्षधर्मत्वं दर्शयितुमुपनयार्थं दृष्टान्तधर्मिणि हेतोः सत्तां परेणाभ्युपगतामनुवदति–'जहा से वहए इत्यत आरभ्य यावण्णिचं पसढविउवायचित्तदंडे'त्ति, साम्प्रतं हेतोः पक्षधर्मत्वमाह–'एवमेव बाले अवीत्यादीत्यत आरभ्य यावत्पावे य से कम्मे कज्जइ'त्ति । तदेवं प्रतिज्ञाहेतुदृष्टान्तोपनयप्रतिपादकानि यथाविधि सूत्राणि विभागतः प्रदर्श्याधुना प्रतिज्ञाहेतोः पुनर्वचनं निगमनमित्येतत्प्रतिपादयितुमाह—'जहा से वहए तस्स वा गाहावइस्स इत्यादि यावण्णिचं पसढविउवायचित्तदंडे'त्ति, एतानि च प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनान्यर्थतः सूत्रैः प्रदर्शितानि, प्रयोगस्त्वेवं द्रष्टव्यः–तत्राप्रतिहतप्रत्याख्यातक्रिय आत्मा पापानुबन्धीति प्रतिज्ञा, सदा षड्जीवनिकायेषु प्रशठव्यतिपातचित्तदण्डत्वादिति हेतुः, स्वपरावसरापेक्षितया कदाचिदव्यापादयन्नपि राजादिवधकवदिति दृष्टान्तः, यथाऽसौ वधपरिणामादनिवृत्तत्वाद्वध्यस्यामित्रभूतस्तथाऽऽत्माऽपि विरतेरभावात्सर्वेष्वपि सत्त्वेषु नित्यं प्रशठव्यतिपातचित्तदण्ड इत्युपनयः, यत एवं तस्मात्पापानुबन्धीति निगमनम् । एवं मृषावादादिष्वपि पञ्चावयवत्वं योजनीयमिति, केवलं मृषावादादिशब्दोच्चारणं विधेयं, तत्रानेन विधिना नित्यं प्रशठमिथ्यावादचित्तदण्डत्वात् तथा नित्यं प्रशठादत्तादानचित्तदण्डत्वादित्यादि ॥ तदेवं सर्वात्मना षट्स्वपि जीवनिकायेषु प्रत्येकममित्रभूततया पापानुबन्धित्वे प्रतिपादिते परो व्यभिचारं दर्शयन्नाह–

णो इणट्ठे समट्ठे [चोदकः] इह खलु अहवं पाणा० जे इमेणं सरीरसमुस्सएणं णो दिट्ठा वा सुया वा नाभिमया वा विन्नाया वा जेसिं णो पत्तेयं पत्तेयं चित्तसमायाए दिया वा राओ वा सुत्ते वा जागरमाणे वा अमित्तभूते मिच्छासंठिते निचं पसढविउवायचित्तदंडे तं० पाणातिवाए जाव मिच्छादंसणसल्ले ॥(सूत्रं६५)

आचार्य आह–तत्थ खलु भगवया दुवे दिट्ठंता पण्णत्ता, तं०–सन्निदिट्ठंते य असन्निदिट्ठंते य, से किं तं सन्निदिट्ठंते ?, जे इमे सन्निपंचिंदिया पज्जत्तगा एतेसि णं छजीवनिकाए पडुच्च तं०–पुढवीकायं जाव तसकायं, से एगइओ पुढवीकाएणं किच्चं करेइवि कारवेइवि, तस्स णं एवं भवइ–एवं खलु अहं पुढवीकाएणं

किच्चं करेमिवि कारवेमिवि, णो चेव णं से एवं भवइ इमेण वा इमेण वा, से एतेणं पुढवीकाएणं किच्चं करेइवि कारवेइवि से णं ताओ पुढवीकायाओ असंजयअविरयअप्पडिहयपच्चक्खायपावकम्मे यावि भवइ, एवं जाव तसकाएत्ति भाणियव्वं, से एगइओ छजीवनिकाएहिं किच्चं करेइवि कारवेइवि, तस्स णं एवं भवइ–एवं खलु छजीवनिकाएहिं किच्चं करेमिवि कारवेमिवि, णो चेव णं से एवं भवइ–इमेहिं वा इमेहिं वा, से य तेहिं छहिं जीवनिकाएहिं जाव कारवेइवि, से य तेहिं छहिं जीवनिकाएहिं असंजयअविरयअप्पडिहयपच्चक्खायपावकम्मे तं० पाणातिवाए जाव मिच्छादंसणसल्ले, एस खलु भगवया अक्खाए असंजए अविरए अप्पडिहयपच्चक्खायपावकम्मे सुविणमवि अपस्सओ पावे य से कम्मे कज्जइ, से तं सन्निदिट्ठंते ॥ से किं तं असन्निदिट्ठंते ?, जे इमे असन्निणो पाणा तं०–पुढवीकाइया जाव वणस्सइकाइया छट्ठा वेगइया तसा पाणा, जेसिं णो तक्का इ वा सन्ना इ वा पन्ना इ वा मणा इ वा वई वा सयं वा करणाए अन्नेहिं वा कारावेत्तए करंतं वा समणुजाणित्तए, तेऽवि णं बाले सव्वेसिं पाणाणं जाव सव्वेसिं सत्ताणं दिया वा राओ वा सुत्ते वा जागरमाणे वा अमित्तभूता मिच्छासंठिया निचं पसढविउवायचित्तदंडा तं०–पाणातिवाते जाव मिच्छादंसणसल्ले, इचेव जाव णो चेव मणो णो चेव वई पाणाणं जाव सत्ताणं दुक्खणयाए सोयणयाए जूरणयाए तिप्पणयाए पिट्टणयाए परितप्पणयाए ते दुक्खणसोयणजावपरितप्पणवहबंधणपरिकिलेसाओ अप्पडिविरया भवंति ॥ इति खलु से असन्निणोऽवि सत्ता अहोनिसिं पाणातिवाए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवक्खाइज्जंति जाव अहोनिसिं परिग्गहे उवक्खाइज्जंति जाव मिच्छादंसणसल्ले उवक्खाइज्जंति, [एवं भूतवादी] सव्वजोणियावि खलु सत्ता सन्निणो हुत्ता असन्निणो होंति असन्निणो हुत्ता सन्निणो होंति, होचा सन्नी अदुवा असन्नी, तत्थ से अविविचित्ता अविधूणित्ता असंमुच्छित्ता अणणुतावित्ता असन्निकायाओ वा सन्निकाए संकमंति सन्निकायाओ वा असन्निकायं संकमंति सन्निकायाओ वा सन्निकायं संकमंति असन्निकायाओ वा असन्निकायं संकमंति, जे एए सन्नि वा असन्नि वा सव्वे ते मिच्छायारा निच्चं पसढविउवायचित्तदंडा, तं०—पाणातिवाए जाव मिच्छादंसणसल्ले, एवं खलु भगवया अक्खाए असंजए अविरए अप्पडिहयपच्चक्खायपावकम्मे सकिरिए असंवुडे एगंतदंडे एगंतबाले एगंतसुत्ते से बाले अविआरमणवयणकायवक्के सुविणमवि ण पासइ पावे य से कम्मे कज्जइ ॥ (सूत्रं ६६) ॥

नायमर्थः समर्थ इति—प्रतिपत्तुं योग्यः, तद्यथा—सर्वे प्राणिनः सर्वेषामपि सत्त्वानां प्रत्येकममित्रभूता इति, तत्र परः स्वपक्षसिद्धये सर्वेषां प्रत्येकममित्राभावं दर्शयितुं कारणमाह—'इह' अस्मिञ्चतुर्दशरज्ज्वात्मके लोके बहवोऽनन्ताः प्राणिनः सूक्ष्मबादरपर्याप्तकापर्याप्तकादिभेदभिन्नाः सन्ति, यद्येवं ततः किमित्याह—ते च देशकालस्वभावविप्रकृष्टास्तथाभूता बहवः संति ये प्राणिनः सूक्ष्मविप्रकृष्टाद्यवस्थाः 'अमुना शरीरसमुच्छ्रयेणे'त्यनेनेदमाह—प्रत्यक्षासन्नवाचित्वादिदमोऽनेनार्वाग्दर्शिज्ञानसमन्वितसमुच्छ्रयेण न कदाचिद्दृष्टाश्चक्षुषा न श्रुताः श्रवणेन्द्रियेण विशेषतो नाभिमता—इष्टा न च विज्ञाताः प्रातिभेन स्वयमेवेत्यतः कथं तद्विषयस्तस्यामित्रभावः स्यात् ?, अतस्तेषां कदाचिदप्यविज्ञातानां कथं प्रत्येकं वधं प्रति चित्तसमादानं भवति, न चासौ तान् प्रति नित्यं प्रशठव्यतिपातचित्तदण्डो भवतीति, शेषं सुगमम्, ॥ एवं व्यवस्थिते न सर्वविषयं प्रत्याख्यानं युज्यते ॥ इत्येवं प्रतिपादिते परेण सत्याचार्य आह—यद्यपि सर्वेष्वपि सत्त्वेषु देशकालस्वभावविप्रकृष्टेषु वधकचित्तं नोत्पद्यते तथाप्यसावविरतिप्रत्ययस्तावेष्वमुक्तदैर एव भवति, अस्य चार्थस्य सुखप्रतिपत्तये भगवता तीर्थकृता द्वौ दृष्टान्तौ 'प्रज्ञप्तौ' प्ररूपितौ, तद्यथा—संज्ञिदृष्टान्तोऽसंज्ञिदृष्टान्तश्च । अथ कोऽयं संज्ञिदृष्टान्तो ?, ये केचन 'इमे' प्रत्यक्षासन्नाः पञ्चभिरपि पर्याप्तिभिः पर्याप्ताः ईहापोहविमर्शरूपा संज्ञा विद्यन्ते येषां ते संज्ञिनः, पञ्चेन्द्रियाणि येषां ते पञ्चेन्द्रियाः, करणपर्याप्त्या पर्याप्तकाः, एषां च मध्ये कश्चिदेकः षड्जीवनिकायान् प्रतीत्यैवंभूतां 'प्रतिज्ञां' नियमं कुर्यात्, तद्यथा—अहं षट्सु जीवनिकायेषु मध्ये पृथिवीकायेनैवैकेन वालुकाशिलोपलक्षणादिस्वरूपेण 'कृत्यं' कार्यं कुर्या, स चैवं कृतप्रतिज्ञस्तेन तस्मिन् तस्यासं वा करोति कारयति च, शेषकायेभ्योऽहं विनिवृत्तः, तस्य च कृतनियमस्यैवंभूतो भवत्यध्यवसायः, तद्यथा—एवं खल्वहं पृथिवीकायेन कृत्यं करोमि कारयामि च, तस्य च सामान्यकृतप्रतिज्ञस्य विशेषाभिसंधिनैव भवति, तद्यथा—अमुना कृष्णेनामुना वा श्वेतेन पृथिवीकायेन कार्यं करोमि कारयामि च, स तस्मात्पृथिवीकायादनिवृत्तोऽप्रतिहतप्रत्याख्यातपापकर्मा भवति, तत्र खननस्नाननिषीदनलग्वर्तनोद्वारप्रश्रवणादिकरणक्रियासद्भावात्, एवमप्तेजोवायुवनस्पतिष्वपि वाच्यं, तत्राप्कायेन स्नानपानावगाहनभाण्डोपकरणधावनादिषु उपयोगः, तेजःकायेनापि पचनपाचनविंतापनप्रकाशनादिषु, वायुनाऽपि व्यञ्जनतालवृन्तोड्डपाविध्यापारादिषु प्रयोजनं, वनस्पतिनाऽपि कन्दमूलपुष्पफलपत्रत्वक्शाखाद्युपयोगः, एवं विकलेन्द्रियपञ्चेन्द्रियेष्वप्यायोज्यमिति । तदेवमसौ 'कार्यं' सावद्यानुष्ठानं स्वयं करोति कारयति च तत्परैः, तस्य च क्वचिदपि निवृत्तेरभावादेवंभूतोऽध्यवसायो भवति, तद्यथा—एवं खल्वहं षड्भिरपि जीवनिकायैः सामान्येन कृत्यं करोमि, न पुनस्तद्विशेषप्रतिज्ञेति, स च तेषु षट्स्वपि जीवनिकायेष्वसंयतोऽविरतोऽप्रतिहतप्रत्याख्यातपापकर्मा भवति, एवं मृषावादेऽपि वाच्यं, तद्यथा—इदं मया वक्तव्यमनृतमीदृग्भूतं तु न वक्तव्यं, स च तस्मान्मृषावादादनिवृत्तत्वादसंयतो भवति, तथाऽदत्तादानमप्याश्रित्य वक्तव्यं, तद्यथा—इदं मयाऽदत्तादानं ग्राह्यमिदं तु न ग्राह्यमित्येवं मैथुनपरिग्रहेष्वपीति । तथा क्रोधमानमायालोभेष्वपि स्वयमभ्यूह्य वाच्यं । तदेवमसौ हिंसादीन्यकुर्वन्नप्यविरतत्वात्तत्प्रत्ययिकं कर्माश्रवति, तथा चासावविरतिप्रत्ययिकं कर्म चिनोतीति, एवं देशकालस्वभावविप्रकृष्टेष्वपि जन्तुष्वमित्रभूतोऽसौ भवति तत्प्रत्ययिकं च कर्माचिनोतीति, सोऽयं संज्ञिदृष्टान्तोऽभिहितः । स च कदाचिदेकमेव पृथिवीकायं व्यापादयति शेषेषु निवृत्तः कदाचिद्द्वावेवं त्रिकादिकाः संयोगा भणनीया यावत्सर्वानपि व्यापादयतीति । स चैवं सर्वेषां व्यापादकत्वेन व्यवस्थाप्यते, सर्वविषयारम्भप्रवृत्तेः, तत्प्रवृत्तिरपि तदनिवृत्तेः, यथा कश्चिद् ग्रामघातादौ प्रवृत्तो यद्यपि च न तेन विवक्षितकाले क्रियते तथाप्यसौ तत्प्रवृत्तिनिवृत्तेरभावात्तद्योग्यतया तद्घातक इत्युच्यते, इत्येवं दार्ष्टान्तिकेऽप्यायोज्यम् ॥ केचन पुरुषा दृष्टास्तथाऽप्यसौ तत्प्रवृत्तिनिवृत्तेरभावात्तद्योग्यतया तद्घातक इत्युच्यते, इत्येवं दार्ष्टान्तिकेऽप्यायोज्यम् ॥ संज्ञिदृष्टान्तानन्तरमसंज्ञिदृष्टान्तः प्रागुपन्यस्तः सोऽधुना प्रतिपाद्यते—संज्ञानं संज्ञा सा विद्यते येषां ते संज्ञिनस्तत्प्रतिषेधादसंज्ञिनो मनसो द्रव्यताया अभावात्तीव्रातीव्रौघ्यवसायविशेषरहिताः प्रसुप्तमत्तमूर्च्छितादिवदिति, ये इमेऽसंज्ञिनः तद्यथा—पृथिवीकायिका यावद्वनस्पतिकायिकाः, तथा षष्ठा अप्येके त्रसाः प्राणिनो विकलेन्द्रिया यावत्संमूर्च्छिनः पञ्चेन्द्रियाः, ते सर्वेऽप्यसंज्ञिनो येषां नो 'तर्को' विचारो मीमांसा विशिष्टविमर्शो विद्यते यथा कस्यचित्संज्ञिनो मन्दमन्दप्रकाशे स्थाणुपुरुषोचिते देशे किमयं

१ कर्तव्याकर्तव्यभेदानपेक्ष्य बहुत्वं । २ व्यापारयति प्र० । ३ न प्रवृत्तः । ४ उपयोगस्य भावमनोरूपतास्वीकारात्, स चास्ति तेषां । ५ तीव्राः संज्ञिपर्याप्तकस्योत्कटयोगिनः अतीव्रास्तु सूक्ष्मसंपरायाणां । ६ गुणदोषान्वेषणपुरस्सरः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थाणुरुत पुरुष इत्येवमात्मक ऊहस्तर्कः संभवति, नैवं तेषामसंज्ञिनां तर्कः संभवन्तीति, तथा संज्ञानं संज्ञा–पूर्वोपलब्धेऽर्थे तदुत्तरकालपर्यालोचना, तथा प्रज्ञानं प्रज्ञा–स्वबुद्ध्योत्प्रेक्षणं स एवायमित्येवंभूतं प्रत्यभिज्ञानं च, तथा मननं मनो–मतिरित्यर्थः, सा चावग्रहादिरूपा, तथा प्रस्पष्टवर्णा वाक् सा च न विद्यते तेषामिति, यद्यपि च द्वीन्द्रियादीनां जिह्वेन्द्रियगलविवरादिकमस्ति तथापि न तेषां प्रस्पष्टवर्णत्वं, तथा न चैषां पापं हिंसादिकं करोमि कारयामि वेत्येवंभूताध्यवसायपूर्विका वागिति, तथा स्वयं करोम्यन्यैर्वा कारयामीत्येवंभूतोऽध्यवसायो न विद्यते तेषां । तदेवं तेऽप्यसंज्ञिनो बालवद्बालाः सर्वेषां प्राणिनां घातनिवृत्तेरभावात्तद्योग्यतया घातका व्यापादकाः, तथाहि—द्वीन्द्रियादयः परोपघाते प्रवर्तन्त एव, तद्भक्षणादिना, अनृतभाषणमपि विद्यते तेषामविरतत्वात्, केवलं कर्मपरतन्त्राणां वागभावः, तथाऽदत्तादानमपि तेषामस्त्येव दध्यादिभक्षणात् तथेदमस्मदीयमिदं च पारक्यमित्येवंभूतविचाराभावाच्चेति, तथा तीव्रनपुंसकवेदोदयान्मैथुनाविरतेश्च मैथुनसद्भावोऽपि, तथाऽशनादेः स्थापनात्परिग्रहसद्भावोऽपीत्येवं क्रोधमानमायालोभा यावन्मिथ्यादर्शनशल्यसद्भावश्च तेषामवगन्तव्यः, तत्सद्भावाच्च ते दिवा रात्रौ वा सुप्ता जाग्रदवस्था वा नित्यं प्रशठव्यतिपातचित्तदण्डा भवंति, तदेव दर्शयितुमाह—'तंजहा'इत्यादि, ते ह्यसंज्ञिनः कश्चिदपि निवृत्तेरभावात्तत्प्रत्ययिककर्मबन्धोपेता भवंति, तद्यथा—प्राणातिपातयावन्मिथ्यादर्शनशल्यवन्तो भवन्ति, तद्वतया च यद्यपि ते विशिष्टमनोवाग्व्यापाररहितास्तथापि सर्वेषां प्राणिनां दुःखोत्पादनतया तथा शोचनतया–शोकोत्पादनतेन तथा 'जूरणतया'जूरणं–वयोहानिरूपं तत्करणशीलतया तथा त्रिभ्यो–मनोवाक्कायेभ्यः पातनं त्रिपातनं तद्भावस्तया यदिवा 'तिप्पणयाए'त्ति परिदेवनतया तथा

॥३६८॥

१ मध्यमाध्यवसायवत्त्वात्, चित्तमत्राध्यवसायस्य तादृशस्य वाचकं भावमनोवाचकं वा ।

'पिट्टणयाए'त्ति मुष्टिलोष्टादिप्रहारेण तथा 'तथाविधपरितापनतया' बहिरन्तश्च पीडया, ते चासंज्ञिनोऽपि यद्यपि देशकालस्वभावविप्रकृष्टानां न सर्वेषां दुःखमुत्पादयन्ति तथापि विरतेरभावात्तद्योग्यतया दुःखपरितापक्लेशादेरप्रतिविरता भवन्ति, तत्सद्भावाच्च तत्प्रत्ययिकेन कर्मणा बध्यन्ते । तदेवं विप्रकृष्टविषयमपि कर्मबन्धं प्रदर्श्योपसंजिहीर्षुराह—इतिरुपप्रदर्शने खलुशब्दो वाक्यालङ्कारे विशेषणे वा, किं विशिनष्टि ?–ये इमे पृथिवीकायादयोऽसंज्ञिनः प्राणिनस्तेषां न तर्को न संज्ञा न प्रज्ञा न मनो न वाक् न स्वयं कर्तुं नान्येन कारयितुं न कुर्वन्तमनुमन्तुं वा प्रवृत्तिरस्ति, ते चाहर्निशममित्रभूता मिथ्यासंस्थिता नित्यं प्रशठव्यतिपातचित्तदण्डा दुःखोत्पादनयावत्परितापनपरिक्लेशादेरप्रतिविरता असंज्ञिनोऽपि सन्तोऽहर्निशं सर्वकालमेव प्राणातिपाते कर्तव्ये तद्योग्यतया तदसंप्राप्तावपि ग्रामघातकवदुपाख्यायन्ते यावन्मिथ्यादर्शनशल्य उपाख्यायन्त इति, उपाख्यानं चासंज्ञिनोऽपि योग्यतया पापकर्मानिवृत्तेरित्यभिप्रायः । तदेवं दर्शिते दृष्टान्तद्वये तत्प्रतिबद्धमेवार्थशेषं प्रतिपादयितुं चोद्यं क्रियते, तद्यथा—किमेते सत्त्वाः संज्ञिनोऽसंज्ञिनश्च भव्याभव्यत्वनियतरूपा एवाहोस्वित्संज्ञिनो भूत्वाऽसंज्ञित्वं प्रतिपद्यन्ते असंज्ञिनोऽपि संज्ञित्वमित्येवं चोदिते सत्याहाचार्यः–'सव्वजोणियावि खलु'इत्यादि, यदिवा सन्त्येवंभूता वेदान्तवादिनो य एवं प्रतिपादयन्ति–'पुरुषः पुरुषत्वमश्नुते पशुरपि पशुत्व'मिति, तदत्रापि संज्ञिनः संज्ञिन एव भविष्यन्त्यसंज्ञिनोऽप्यसंज्ञिन इति, तन्मतव्यवच्छेदार्थमाह—'सव्वजोणियावी'त्यादि, यदिवा किं संज्ञिनोऽसंज्ञिकर्मबन्धं प्राक्तने सत्येव कर्मणि कुर्वन्ति किंवा नेत्येवमसंज्ञिनोऽपि संज्ञिकर्मबन्धं प्राक्तने सत्येव कुर्वन्त्याहोस्विन्नेत्येतदाशङ्क्याह—'सव्वजोणियावी'त्यादि, सर्वा योनयो येषां ते सर्वयोनयः संवृतविवृतो-

१ संज्ञिसमुच्चयाय । २ अप्रतिविरततासद्भावात् । ३ संज्ञित्वावाप्तौ यद्बद्धं तस्मिन्–वेधादिके । यद्वा संज्ञित्वावाप्तिनिमित्ते

भयशीतोष्णोभयसचित्ताचित्तोभयरूपयोनय इत्यर्थः, ते च नारकतिर्यङ्नरामरा अपिशब्दाद्विशिष्टैकयोनयोऽपि, खल्विति विशेषणे, एतद्विशिनष्टि—तज्जन्मापेक्षया सर्वयोनयोऽपि सन्त्वाः पर्याप्यपेक्षया यावन्मनःपर्याप्तिर्न निष्पद्यते तावदसंज्ञिनः करणतः सन्तः पश्चात्संज्ञिनो भवन्त्येकस्मिन्नेव जन्मनि, अन्यजन्मापेक्षया त्वेकेन्द्रियादयोऽपि सन्तः पश्चान्मनुष्यादयो भवन्तीति, तथाभूतकर्मपरिणामात्, न पुनर्भव्याभव्यत्ववत् व्यवस्थानियमो, भव्याभव्यत्वे हि न कर्मायत्ते अतो नानयोर्व्यभिचारः, ये पुनः कर्मवशगास्ते संज्ञिनो भूत्वाऽन्यत्रसंज्ञिनो भवन्त्यसंज्ञिनश्च भूत्वा संज्ञिन इति । वेदान्तवादिमतस्य तु प्रत्यक्षेणैव व्यभिचारः समुपलभ्यते, तद्यथा—संश्यपि कश्चिन्मूर्च्छाद्यवस्थायामसंज्ञित्वं प्रतिपद्यते, तदपगमे तु पुनः संज्ञित्वमिति, जन्मान्तरे तु सुतरां व्यभिचार इति । तदेवं संश्यसंज्ञिनोः कर्मपरतन्त्रत्वादन्योऽन्यानुगतिरविरुद्धा, यथा प्रतिबुद्धो निद्रोदयात्स्वपिति सुप्तश्च प्रतिबुध्यते इत्येवं स्वापप्रतिबोधयोरन्योऽन्यानुगमनमेवमिहापीति । तत्र प्राक्तनं कर्म यदुदीर्णं यच्च बद्धमास्ते तस्मिन् सत्येव तदविविच्य–अपृथक्कृत्य तथाऽविधूय–असमुच्छिद्याऽननुतापैते चाविविच्यादयश्चत्वारोऽप्येकार्थिका अवस्थाविशेषं वाऽऽश्रित्य भेदेन व्याख्यातव्याः । तदेवमपरित्यक्तप्राक्तनकर्मणोऽसंज्ञिकायात् संज्ञिकायं संक्रामन्ति तथा संज्ञिकायादसंज्ञिकायमिति संज्ञिकायात्संज्ञिकायं असंज्ञिकायादसंज्ञिकायं यथा नारकाः सावशेषकर्माण एव नरकादुद्वृत्य प्रतनुवेदनेषु तिर्यक्षूत्पद्यन्ते, एवं देवा अपि प्रायशस्तत्कर्मशेषतया शुभस्थानेषूत्पद्यन्त इत्यवगन्तव्यं, अत्र च चतुर्भंगकसंभवं सूत्रेणैव दर्शयति । साम्प्रतमध्ययनार्थमुपसंजिघृक्षुः प्राक्प्रतिपन्नमर्थं निगमयन्नाह—'जे एते से'त्यादि, ये एते सर्वाभिरपि पर्याप्तिभिः पर्याप्ताः लब्ध्या करणेन च तद्विकलाश्चापर्याप्तकाः अन्योऽन्यसंक्रमभाजः संज्ञिनोऽसंज्ञिनो वा सर्वेऽप्येते मिथ्याचारा अप्रत्याख्यानित्वादित्यभिप्रायः, तथा सर्वजीवेष्वपि

॥३६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नित्यं प्रशठव्यतिपातचित्तदण्डा भवन्तीत्येवंभूताश्च प्राणातिपातादिषु सर्वेष्वप्याश्रवद्वारेषु वर्तन्त इति । तदेवं व्यवस्थिते यदुक्तं चोदकेन–'तद्यथा–इहाविधमानाशुभयोगसंभवे कथं पापं कर्म बध्यत'इत्येतन्निराकृत्य विरतेरभावात्तद्योग्यतया पापकर्मसद्भावं दर्शयति–'एवं खलु'इत्यादि 'एवं' उक्तनीत्या खल्ववधारणेऽलङ्कारे वा भगवता तीर्थकृतेत्यादिना यत्प्राक् प्रतिज्ञातं तदनुवदति यावत्पापं च कर्म क्रियत इति ॥ तदेवमप्रत्याख्यानिनः कर्मसंभवात्तत्संभवाच्च नारकतिर्यङ्नरामरगतिलक्षणं संसारमवगम्य संजातवैराग्यश्चोदक आचार्यं प्रति प्रवणचेताः प्रश्नयितुमाह—

चोदकः–से किं कुव्वं किं कारवं कहं संजयविरयप्पडिहयपच्चक्खायपावकम्मे भवइ ?, आचार्य आह—तत्थ खलु भगवया छज्जीवणिकाय हेऊ पण्णत्ता, तंजहा—पुढवीकाइया जाव तसकाइया, से जहाणामए मम अस्सातं डंडेण वा अट्ठीण वा मुट्ठीण वा लेलूण वा कवालेण वा आतोडिज्जमाणस्स वा जाव उवद्दविज्जमाणस्स वा जाव लोमुक्खणणमायमवि हिंसाकारं दुक्खं भयं पडिसंवेदेमि, इच्चेवं जाण सव्वे पाणा जाव सव्वे सत्ता दंडेण वा जाव कवालेण वा आतोडिज्जमाणे वा हम्ममाणे वा तज्जिज्जमाणे वा तालिज्जमाणे वा जाव उवद्दविज्जमाणे वा जाव लोमुक्खणणमायमवि हिंसाकारं दुक्खं भयं पडिसंवेदेंति, एवं णच्चा सव्वे पाणा जाव सव्वे सत्ता न हंतव्वा जाव ण उद्दवेयव्वा, एस धम्मे धुवे णिइए सासए समिच्च लोगं खेयन्नेहिं पवेदिए, एवं से भिक्खू विरते पाणाइवायातो जाव मिच्छादंसणसल्लाओ, से भिक्खू णो दंतपक्खालणेणं दंते पक्खालेज्जा, णो अंजणं णो वमणं णो धूवणित्तं पिआइत्ते, से भिक्खू अकिरिए अलूसए

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥३७०॥

अकोहे जाव अलोभे उवसंते परिनिव्वुडे, एस खलु भगवया अक्खाए संजयविरयपडिहयपच्चक्खायपावकम्मे अकिरिए संवुडे एगंतपंडिए भवइ त्तिबेमि (सूत्रं ६७)॥ इति बीयसुयक्खंधस्स पच्चक्खाणकिरिया णाम चउत्थमज्झयणं समत्तं ॥ २–४ ॥

४ प्रत्याख्यानाध्य.

अथ किमनुष्ठानं स्वतः कुर्वन् किं वा परं कारयन् 'कथं' वा केन प्रकारेण संयतविरतप्रतिहतप्रत्याख्यातपापकर्मा जन्तुर्भवति ?, संयतस्य हि विरतिसद्भावात्सावद्यक्रियानिवृत्तिस्तन्निवृत्तेश्च कृतकर्मसंचयाभावस्तदभावान्नरकादिगत्यभाव इत्येवं पृष्टे सत्याचार्य आह–'तत्थ खलु'इत्यादि, [ग्रन्थाग्रं ११०००] तत्र–संयमसद्भावे षड् जीवनिकाया भगवता हेतुत्वेनोपन्यस्ताः, यथा प्रत्याख्यानरहितस्य षड् जीवनिकायाः संसारगतिनिबन्धनत्वेनोपन्यस्ताः एवं त एव प्रत्याख्यानिनो मोक्षाय भवन्तीति, तथा चोक्तम्—"जे जत्तिया य हेऊ भवस्स ते चेव तत्तिया मोक्खे । गणणाईया लोगा दोण्हवि पुण्णा भवे तुल्ला ॥ १ ॥"[1]इत्यादि, इदमुक्तं भवति—यथाऽऽत्मनो दण्डाद्युपघाते दुःखमुत्पद्यते एवं सर्वेषामपि प्राणिनामित्यात्मोपमया तदुपघाताद्विरमते, एष 'धर्मः' सर्वापायत्राणलक्षणो 'ध्रुवः' अप्रच्युतानुत्पन्नस्थिरस्वभावो 'नित्य' इति परिणामानित्यतायामपि सत्यां स्वरूपाव्ययवनात् तथा आदित्योद्गतिरिव शश्वद्भवनाच्छाश्वतः–परैः क्वचिदप्यस्खलितो युक्तिसंगतत्वादित्यभिप्रायः, अयमेवंभूतश्च धर्मः 'समेत्य' अवगम्य 'लोकं' चतुर्दशरज्वात्मकं 'खेदज्ञैः' सर्वज्ञैः प्रवेदितः, तदेवं स भिक्षुर्निवृत्तः सर्वाश्रवद्वारेभ्यो दन्तप्रक्षालनादिकाः क्रियाः अकुर्वन् सावद्यक्रियाया अभावादक्रियोऽक्रियत्वाच्च प्राणिनामत्यन्तोपकारकः–अव्यापादको यावदेकान्तेनैवासौ पण्डितो भवति । इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत्, नयाः प्राग्वद्द्रष्टव्येयाः ॥ समाप्तं प्रत्याख्यानाख्यं चतुर्थमध्ययनमिति ॥ ४ ॥

॥३७०॥

१ ये यावन्तो हेतवश्च भवस्य ते तावन्तश्चैव मोक्षस्य । गणनातिगा लोका द्वयोरपि पूर्णा भवेयुस्तुल्याः ॥ १ ॥

अथ पञ्चरमाचारश्रुताध्ययनप्रारंभः ।

साम्प्रतं पञ्चममारभ्यते, अस्य चायमभिसंबन्धः, इहानन्तराध्ययने प्रत्याख्यानक्रियोक्ता, सा चाचारव्यवस्थितस्य सतो भवतीत्यतस्तदनन्तरमाचारश्रुताध्ययनमभिधीयते, यदिवाऽनाचारपरिवर्जनेन सम्यक् प्रत्याख्यानमस्खलितं भवतीत्यतोऽनाचारश्रुताध्ययनमभिधीयते, यदिवा प्रत्याख्यानयुक्तः सन्नाचारवान् भवतीत्यतः प्रत्याख्यानक्रियाऽनन्तरमाचारश्रुताध्ययनं तत्प्रतिपक्षभूतमनाचारश्रुताध्ययनं वा प्रतिपाद्यत इत्यनेन संबन्धेनाऽऽयातस्यास्याध्ययनस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति । तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा—अनाचारं प्रतिषिध्य साधूनामाचारः प्रतिपाद्यते, नामनिष्पन्ने तु निक्षेपे आचारश्रुतमिति द्विपदं नाम, तदनयोर्निक्षेपार्थं निर्युक्तिकृदाह—

णामंठवणायारे दव्वे भावे य होति नायव्वो । एमेव य सुत्तस्सा निक्खेवो चउविहो होति ॥ १८१ ॥
आयारसुयं भणियं वज्जेयव्वा सया अणायारा । अवसुसुयस्स हु होज्ज विराहणा इत्थ जइयव्वं ॥ १८२ ॥
एयस्स उ पडिसेहो इहमज्झयणंमि होति नायव्वो । तो अणगारसुयंति य होई नामं तु एयस्स ॥ १८३ ॥

तत्राचारो नामस्थापनाद्रव्यभावभेदभिन्नश्चतुर्धा द्रष्टव्यः, एवं श्रुतमपीति । तत्राचारश्रुतयोरन्यत्राभिहितयोर्लाघवार्थमतिदेशं कुर्वन्नाह–आचारश्च श्रुतं च आचारश्रुतं द्वन्द्वैकवद्भावस्तदुभयमपि 'भणितम्' उक्तं, तत्राचारः क्षुल्लिकाचारकथायामभिहितः श्रुतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु विनयश्रुते, भावार्थस्तु 'वर्जयितव्याः' परिहार्याः 'सदा' सर्वकालं यावज्जीवं साधुनाऽनाचाराः, तांश्च 'अबहुश्रुतः' अगीतार्थो न सम्यग् जानातीत्यतस्तस्य विराधना भवेत्, हुशब्दोऽवधारणे, अबहुश्रुतस्यैव विराधना न गीतार्थस्येत्यतः 'अत्र' सदाचारे तत्परिज्ञाने च यतितव्यं, यथा हि मार्गज्ञः पथिकः कुमार्गवर्जनेन नापथगामी भवति न चोन्मार्गदोषैर्युज्यते एवमनाचारं वर्जयन्नाचारवान् भवति न चानाचारदोषैर्युज्यत इत्यतस्तत्प्रतिषेधार्थमाह—'एतस्य' अनाचारस्य सर्वदोषास्पदस्य दुर्गतिगमनैकहेतोः 'प्रतिषेधो' निराकरणं सदाचारप्रतिपत्त्यर्थम् इह—अध्ययने ज्ञातव्यः, स च परमार्थतोऽनगारकारणमिति, ततः केषांचिन्मतेनैतस्याध्ययनस्यानगारश्रुतमित्येतन्नाम भवतीति। गतो नामनिष्पन्नो निक्षेपः, तदनन्तरं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

आदाय बंभचेरं च, आसुपन्ने इमं वइं। अस्सिं धम्मे अणायारं, नायरेज्ज कयाइवि ॥ १ ॥ (सूत्रं)

अस्य चानन्तरपरम्परसूत्रैः संबन्धो वाच्यः, तत्रानन्तरसूत्रेण सहायम्—एकान्तपण्डितो भवति, कथम्?—'आदाय ब्रह्मचर्यं'—मिति, परम्परसूत्रसंबधस्त्वयं—'बुध्येत तथा त्रोटयेद् बन्धनं' किं कृत्वेत्याह—आदाय ब्रह्मचर्यमिति, एवमन्यैरपि सूत्रैः संबन्धो वाच्यः, अर्थस्त्वयम्—'आदाय' गृहीत्वा, किं तद्?, ब्रह्मचर्यं—सत्यतपोभूतदयेन्द्रियनिरोधलक्षणं तच्चर्यते—अनुष्ठीयते यस्मिन् तन्मौनीन्द्रं प्रवचनं ब्रह्मचर्यमित्युच्यते तदादाय 'आशुप्रज्ञः' पटुप्रज्ञः सदसद्विवेकज्ञः, क्वाप्रत्ययस्योत्तरक्रियासव्यपेक्षित्वाच्चामाह— ॥३७१॥

'इमां' समस्ताध्ययनेनाभि धीयमानां प्रत्यक्षासन्नभूतां वाचम्—'इदं शाश्वतमेवे'त्यादिकां कदाचिदपि 'नाचरेत्' नाभिदध्यात्, तथाऽस्मिन्धर्मे—सर्वज्ञप्रणीते व्यवस्थितः सन्ननाचारं—सावद्यानुष्ठानरूपं 'न समाचरेत्' न विदध्यादिति संबन्धः, यदिवाऽऽशुप्रज्ञः—सर्वज्ञः प्रतिसमयं केवलज्ञानदर्शनोपयोगित्वात्तत्संबन्धिनि धर्मे व्यवस्थितः 'इमां' वक्ष्यमाणां वाचम् अनाचारं च कदाचिदपि नाचरेदितिश्लोकार्थः ॥ १ ॥ तत्रानाचारं नाचरेदित्युक्तम्, अनाचारश्च मौनीन्द्रप्रवचनादपरोऽभिधीयते, मौनीन्द्रप्रवचनं तु मोक्षमार्गहेतुतया सम्यग्दर्शनज्ञानचारित्रात्मकं, सम्यग्दर्शनं तु तत्त्वार्थश्रद्धानरूपं, तत्त्वं तु जीवाजीवपुण्यपापाश्रवबन्धसंवरनिर्जरामोक्षात्मकं, तथा धर्माधर्माकाशपुद्गलजीवकालात्मकं च द्रव्यं नित्यानित्यस्वभावं, सामान्यविशेषात्मकोऽनाद्यपर्यवसानश्चतुर्दशरज्ज्वात्मको वा लोकस्तत्त्वमिति, ज्ञानं तु मतिश्रुतावधिमनःपर्यायकेवलस्वरूपं पञ्चधा, चारित्रं सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धीयसूक्ष्मसंपराययथाख्यातरूपं पञ्चधैव मूलोत्तरगुणभेदतो वाऽनेकधेत्येवं व्यवस्थिते मौनीन्द्रप्रवचने 'न कदाचिदनीदृशं जग'दितिकृत्वाऽनाद्यपर्यवसाने लोके सति दर्शनाचारप्रतिपक्षभूतमनाचारं दर्शयितुकाम आचार्यो यथावस्थितलोकस्वरूपोद्घट्टनपूर्वकमाह—

अणादीयं परिन्नाय, अणवदग्गेति वा गुणो। सासयमसासए वा, इति दिट्ठिं न धारए ॥ २ ॥ (सूत्रं)
एएहिं दोहिं ठाणेहिं, ववहारो ण विज्जई। एएहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥ ३ ॥ (सूत्रं)

नास्य चतुर्दशरज्ज्वात्मकस्य लोकस्य धर्माधर्मादिकस्य वा द्रव्यस्यादिः—प्रथमोत्पत्तिर्विद्यत इत्यनादिकस्तमेवंभूतं 'परिज्ञाय' प्रमाणतः परिच्छिद्य तथा 'अनवदग्रम्' अपर्यवसानं च परिज्ञायोभयनयात्मकव्युदासेनैकनयदृष्ट्याऽवधारणात्मकप्रत्ययमनाचारं दर्शयति—शश्वद्भवतीति शाश्वतं—नित्यं सांख्याभिप्रायेणाप्रच्युतानुत्पन्नस्थिरैकस्वभावं स्वदर्शने चानुयायिनं सामान्यांशमव-

१ प्रमाणरूपत्वान्मौनीन्द्रागमस्योभयनयात्मकता। २ ०त्मकं प्रत्ययः, प्रत्ययं ज्ञानं, प्रतीत्यस्य वाच्याहारः। ३ मिथ्यात्वकारणकं। ४ ऊर्ध्वतारूपं।

लम्ब्य धर्माधर्माकाशादिष्वनादित्वमपर्यवसानत्वं चोपलभ्य सर्वमिदं शाश्वतमित्येवंभूतां दृष्टिं 'न धारये'दिति एवं पक्षं न समाश्रयेत्। तथा विशेषपक्षमाश्रित्य 'वर्त्तमाननारकाः समुच्छेत्स्यन्ती'त्येतच्च सूत्रमङ्गीकृत्य यत्सत्तत्सर्वमनित्यमित्येवंभूतबौद्धदर्शनाभिप्रायेण च सर्वमशाश्वतम्—अनित्यमित्येवंभूतां च दृष्टिं न धारयेदिति ॥ २ ॥ किमित्येकान्तेन शाश्वतमशाश्वतं वा वस्त्वित्येवंभूतां दृष्टिं न धारयेदित्याह—सर्वं नित्यमेवानित्यमेव वैताभ्यां द्वाभ्यां स्थानाभ्यामभ्युपगम्यमानाभ्यामनयोर्वा पक्षयोर्व्यवहरणं व्यवहारो—लोकस्यैहिकामुष्मिकयोः कार्ययोः प्रवृत्तिनिवृत्तिलक्षणो न विद्यते, तथाहि—अप्रच्युतानुत्पन्नस्थिरैकस्वभावं सर्वं नित्यमित्येवं न व्यवह्रियते, प्रत्यक्षेणैव नवपुराणादिभावेन प्रध्वंसाभावेन वा दर्शनात्, तथैव च लोकस्य प्रवृत्तेः, आमुष्मिकेऽपि नित्यत्वादात्मनो बन्धमोक्षाद्यभावेन दीक्षायमनियमादिकमनर्थकमिति नै व्यवह्रियते। तथैकान्तानित्यत्वेऽपि लोको धनधान्यघटपटादिकमनागतभोगार्थं न संगृह्णीयात्, तथाऽऽमुष्मिकेऽपि क्षणिकत्वादात्मनः प्रवृत्तिर्न स्यात्, तथा च दीक्षाविहारादिकमनर्थकं, तस्मान्नित्यानित्यात्मके एव स्याद्वादे सर्वव्यवहारप्रवृत्तिः, अत एव तयोर्नित्यानित्ययोः स्थानयोरेकान्तत्वेन समाश्रीयमाणयो रैहिकामुष्मिककार्यविध्वंसरूपमनाचारं मौनीन्द्रागमबाह्यरूपं विजानीयात्, तुशब्दो विशेषणार्थः, कथञ्चिन्नित्यानित्ये वस्तुनि सति व्यवहारो युज्यत इत्येतद्विशिनष्टि, तथाहि—सामान्यमन्वयिनमंशमाश्रित्य स्यान्नित्यमिति भवति, तथा विशेषांशं प्रतिक्षणमन्यथा च अन्यथा च नवपुराणादिदर्शनतः स्यादनित्य इति भवति, तथोत्पादव्ययध्रौव्याणि चार्हद्दर्शनाश्रितानि व्यवहाराङ्गं भवंति। ॥३७२॥

१ प्रध्वंसरूपोऽभावः, तेन तद्रूपेणेत्यर्थः, ईर्ष्यया साधुरितिवद् प्रकृत्या चार्वितिवद्वा तृतीया। २ अनर्थकतया निवृत्तिरूपफलदतया। ३ सामान्यांशापेक्षया नपुं०। ४ विशेषांशापेक्षया पुंस्त्वं। ५ भवन्ति (विधेयतोत्पादादीनां) प्र०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा चोक्तम्—"घटमौलिसुवर्णार्थी, नाशोत्पादस्थितिष्वयम् । शोकप्रमोदमाध्यस्थ्यं, जनो याति सहेतुकम् ॥ १ ॥ इत्यादि । तदेवं नित्यानित्यपक्षयोर्व्यवहारो न विद्यते, तथाऽनयोरेवानाचारं विजानीयादिति स्थितम् ॥ ३ ॥ तथाऽन्यमप्यनाचारं प्रतिपेद्धुकाम आह—

समुच्छिहिंति सत्थारो, सव्वे पाणा अणेलिसा । गंठिगा वा भविस्संति, सासयंति व णो वए ॥ ४ ॥
एएहिं दोहिं ठाणेहिं, ववहारो ण विज्जइ । एएहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥ ५ ॥ (सूत्रं)

सम्यक्—निरवशेषतया 'उच्छेत्स्यन्ति' उच्छेदं यास्यन्ति—क्षयं प्राप्स्यन्ति सामस्त्येनोत्—प्राबल्येन सेत्स्यन्ति वा सिद्धिं यास्यन्ति, के ते?—शास्तारः—तीर्थकृतः सर्वज्ञास्तच्छासनप्रतिपन्ना वा 'सर्वे' निरवशेषाः सिद्धिगमनयोग्या भव्याः, ततश्चोच्छिन्नभव्यं जगत्स्यादिति, शुष्कतर्काभिमानग्रहगृहीता युक्तिं चामिदधति—जीवसद्भावे सत्यप्यपूर्वोत्पादाभावादभव्यस्य च सिद्धिगमनासंभवात्कालस्य चाऽनन्त्यादनारतं सिद्धिगमनसंभवेन तद्व्ययोपपत्तेरपूर्वायाभावाद्भव्योच्छेद इत्येवं नो वदेत्, तथा सर्वेऽपि 'प्राणिनो' जन्तवः 'अनीदृशा' विसदृशाः सदा परस्परविलक्षणा एव, न कथञ्चित्तेषां सादृश्यमस्तीत्येवमभ्युपेकान्तेन नो वदेत्, यदिवा—सर्वेषां भव्यानां सिद्धिसद्भावेऽवशिष्टाः संसारे 'अनीदृशा' अभव्या एव भवेयुरित्येवं च नो वदेत्, युक्तिं चोत्तरत्र वक्ष्यति । तथा कर्मोत्पको ग्रन्थो येषां विद्यते ते ग्रन्थिकाः, सर्वेऽपि प्राणिनः कर्मग्रन्थोपेता एव भविष्यन्तीत्येवमपि नो वदेत्, इदमुक्तं भवति—सर्वेऽपि प्राणिनः सेत्स्यन्त्येव कर्मावृता वा सर्वे भविष्यन्तीत्येवमेकमपि पक्षमेकान्तिकं नो वदेत् । यदिवा—'ग्रन्थिका' इति ग्रन्थिकसत्त्वा भविष्यन्तीति, ग्रन्थिभेदं कर्तुमसमर्था भविष्यन्तीत्येवं च नो वदेत्, तथा 'शाश्वता' इति शास्तारः 'सदा' सर्वकालं स्थायिनस्तीर्थकरा भविष्यन्ति 'न समुच्छेत्स्यन्ति' नोच्छेदं यास्यन्तीत्येवं नो वदेदिति ॥४॥ तदेवं दर्शनाचारवा-

सूत्रकृ. ६१

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३७३॥

५ आचारश्रुताध्य.

दनिषेधं[1] वाङ्मात्रेण प्रदर्श्याधुना युक्तिं दर्शयितुकाम आह—'एतयोः' अनन्तरोक्तयोर्द्वयोः स्थानयोः, तद्यथा—शास्तारः क्षयं यास्यन्तीति शाश्वता वा भविष्यन्तीति, यदिवा सर्वे शास्तारस्तद्दर्शनप्रतिपन्ना वा सेत्स्यन्ति शाश्वता वा भविष्यन्ति, यदिवा सर्वे प्राणिनो अनीदृशाः—विसदृशाः सदृशा वा, तथा ग्रन्थिकसत्त्वास्तद्रहिता वा भविष्यन्तीत्येवमनयोः स्थानयोर्व्यवहरणं व्यवहारस्तदस्तित्वे युक्तेरभावान्न विद्यते, तथाहि—यत्तावदुक्तं 'सर्वे शास्तारः क्षयं यास्यन्ती'त्येतदयुक्तं, क्षयनिबन्धनस्य कर्मणोऽभावात्सिद्धानां क्षयाभावः, अथ भवस्थकेवल्यपेक्षयेदमभिधीयते, तदप्यनुपपन्नं, यतोऽनाद्यनन्तानां केवलिनां सद्भावात्प्रवाहापेक्षया तदभावाभावः । यदप्युक्तम्—'अपूर्वस्याभावे सिद्धिगमनसद्भावेन च व्ययसद्भावाद्व्ययशून्यं जगत् स्या'दित्येतदपि सिद्धान्तपरमार्थावेदिनो वचनं, यतो भव्यराशेः सिद्धान्ते भविष्यत्कालस्यैवानन्त्यमुक्तं, तच्चैवमुपपद्यते यदि क्षयो न भवति, सति च तस्मिन् आनन्त्यं न स्यात्, नापि चावश्यं सर्वस्यापि भव्यस्य सिद्धिगमनेन भाव्यमित्यानन्त्याद्भव्यानां तत्सामग्र्यभावाद्योग्यदलिकप्रतिभावत्तर्दनुपपत्तिरिति । तथा नापि शाश्वता एव, भवस्थकेवलिनां शास्तृणां सिद्धिगमनसद्भावात्प्रवाहापेक्षया च शाश्वतसमतः कथञ्चिच्छाश्वताः कथंचिदशाश्वता इति । तथा सर्वेऽपि प्राणिनो विचित्रकर्मसद्भावान्नानागतिजातिशरीराङ्गोपाङ्गादिसमन्वितत्वादनीदृशाः—विसदृशास्तथोपयोगासंख्येयप्रदेशत्वामूर्तत्वादिभिर्धर्मैः कथञ्चित्सदृशा इति, तथोल्लसितसद्वीर्यतया केचिद्विशग्रन्थयोऽपरे च तथाविधपरिणामाभावाद् ग्रन्थिकसत्त्वा एव भवन्तीत्येवं च व्यवस्थिते नैकान्तेनैकान्तपक्षो भवतीति प्रतिषिद्धः, तदेवमेतयोरेव द्वयोः स्थानयोरुक्तनीत्याऽनाचारं विजानीयादिति स्थितम् । अपिच—आगमे अनन्तानन्ताक्षय्युत्सर्पिण्यवसर्पिणीषु भव्यानामनन्तभाग एव सिद्ध्य-

॥३७३॥

१ दर्शनानाचारत्वादनिषेधं प्र० । २ दर्शनाचारविषये वादस्य निषेधं । ३ योग्यता च सामग्र्यायुपेततारूपा । ४ सकलभव्यानां मुक्त्यनुपपत्तेः ।

तीत्ययमर्थः प्रतिपाद्यते, यदा चैवंभूतं तदानन्त्यं तत्कथं तेषां क्षयः?, युक्तिरप्यत्र—संबन्धिशब्दावेतौ, मुक्तिः संसारं विना न भवति, संसारोऽपि न मुक्तिमन्तरेण, ततश्च भव्योच्छेदे संसारस्याप्यभावः स्यादतोऽभिधीयते नानयोर्व्यवहारो युज्यत इति॥५॥ अधुना चारित्राचारमङ्गीकृत्याह—

जे केइ खुद्दगा पाणा, अदुवा संति महालया । सरिसं तेहिं वेरंति, असरिसंती य णो वदे ॥ ६ ॥
एएहिं दोहिं ठाणेहिं, ववहारो ण विज्जइ । एएहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥ ७ ॥ (सूत्रं)

ये केचन क्षुद्रकाः सत्त्वाः—प्राणिन एकेन्द्रियद्वीन्द्रियादयोऽल्पकाया वा पञ्चेन्द्रिया अथवा 'महालया' महाकायाः 'सन्ति' विद्यन्ते तेषां च क्षुद्रकाणामल्पकायानां कुन्थ्वादीनां महानालयः—शरीरं येषां ते महालया—हस्त्यादयस्तेषां च व्यापादने सदृशं 'वैर'मिति वज्रं कर्म विरोधलक्षणं वा वैरं तत् 'सदृशं' समानं तुल्यप्रदेशत्वात्सर्वजन्तूनामित्येवमेकान्तेन नो वदेत्, तथा 'विसदृशम्' असदृशं तद्व्यापत्तौ वैरं कर्मबन्धो विरोधो वा इन्द्रियविज्ञानकायानां विसदृशत्वात् सत्यपि प्रदेशतुल्यत्वे न सदृशं वैरमित्येवमपि नो वदेत्, यदि हि वध्यापेक्ष एव कर्मबन्धः स्यात्तदा तत्तद्वशात्कर्मणोऽपि सादृश्यमसादृश्यं वा वक्तुं युज्येत, न च तद्वशादेव बन्धः अपि त्वध्यवसायवशादपि, ततश्च तीव्राध्यवसायिनोऽल्पकायसत्त्वव्यापादनेऽपि महद्वैरम्, अकामस्य तु महाकायसत्त्वव्यापादनेऽपि स्वल्पमिति ॥ ६ ॥ एतदेव सूत्रेणैव दर्शयितुमाह—आभ्यामनन्तरोक्ताभ्यां स्थानाभ्यामनयोर्वा स्थानयोरल्पकायमहाकायव्यापादनापादितकर्मबन्धसदृशत्वासदृशत्वयोर्व्यवहरणं व्यवहारो निर्युक्तिकत्वान्न युज्यते, तथाहि—न वध्यस्य सदृशत्वमसदृशत्वं

१ अत्र हि ह्रस्वदीर्घत्ववद् घटतदभाववत्सत्त्वापेक्षता न तु कार्यकारणरूपेण, तथा च न मुक्तिमन्तरेण न संसार इत्यत्र विरोधः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैकमेव कर्मबन्धस्य कारणम्, अपितु वधकस्य तीव्रभावो मन्दभावो ज्ञानभावोऽज्ञानभावो महावीर्यत्वमल्पवीर्यत्वं चेत्येतदपि। तदेवं वध्यवधकयोर्विशेषात्कर्मबन्धविशेष इत्येवं व्यवस्थिते वध्यमेवाश्रित्य सदृशत्वासदृशत्वव्यवहारो न विद्यत इति। तथाऽनयोरेव स्थानयोः प्रवृत्तस्यानाचारं विजानीयादिति, तथाहि—यज्जीवसाम्यात्कर्मबन्धसदृशत्वमुच्यते, तदयुक्तं, यतो न हि जीवव्यापत्त्या हिंसोच्यते, तस्य शाश्वतत्वेन व्यापादयितुमशक्यत्वाद्, अपि त्विन्द्रियादिव्यापत्त्या, तथा चोक्तम्—"पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः। प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा ॥ १ ॥" इत्यादि। अपिच भावसव्यपेक्षस्यैव कर्मबन्धोऽभ्युपेतुं युक्तः, तथाहि—वैद्यस्यागमसव्यपेक्षस्य सम्यक् क्रियां कुर्वतो यद्यप्यातुरविपत्तिर्भवति तथापि न वैरानुषङ्गो भावदोषाभावाद्, अपरस्य तु सर्पबुद्ध्या रज्जुमपि ज्ञतो भावदोषात्कर्मबन्धः, तद्रहितस्य तु न बन्ध इति, उक्तं चागमे 'उच्चालियंमि पाए'इत्यादि, तण्डुलमत्स्यान्यानकं तु सुप्रसिद्धमेव ॥ तदेवंविधवध्यवधकभावापेक्षया स्यात् सदृशत्वं स्यादसदृशत्वमिति, अन्यथाऽनाचार इति ॥ ७ ॥ पुनरपि चारित्रमधिकृत्याहारविषयानाचाराचारौ प्रतिपादयितुकाम आह—

अहाकम्माणि भुंजंति, अण्णमण्णे सकम्मुणा। उवलित्तेति जाणिज्जा, अणुवलित्तेति वा पुणो ॥ ८ ॥ (सू०)
एएहिं दोहिं ठाणेहिं, ववहारो ण विज्जई। एएहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥ ९ ॥ (सू०)

साधुं प्रधानकारणमाधाय—आश्रित्य कर्माण्याधाकर्माणि, तानि च वस्त्रभोजनवसत्यादीन्युच्यन्ते, एतान्याधाकर्माणि ये भुञ्ज-

१ असंख्यप्रदेशत्वादिना। २ भवेद्दोषा० प्र०। ३ शास्त्रप्रसिद्धत्वात्पूर्वं व्यतिरेकिणं प्रदर्श्य अन्वयी एष कर्मबन्ध इति। ४ भावदोषरहितस्य। ५ उच्चालिते पादे। ६ मादाय प्र०।

न्ते—एतैरुपभोगं ये कुर्वन्ति 'अन्योऽन्यं' परस्परं तान् स्वकीयेन कर्मणोपलिप्तान् विजानीयादित्येवं नो वदेत्, तथाऽनुपलिप्तानिति वा नो वदेत्, एतदुक्तं भवति—आधाकर्मापि श्रुतोपदेशेन शुद्धमितिकृत्वा भुञ्जानः कर्मणा नोपलिप्यते, तदाधाकर्मोपभोगेनावश्यतया कर्मबन्धो भवतीत्येवं नो वदेत्, तथा श्रुतोपदेशमन्तरेणाहारगृद्ध्याऽऽधाकर्म भुञ्जानस्य तन्निमित्तकर्मबन्धसद्भावात् अतोऽनुलिप्तानपि नो वदेत्, यथावस्थितमौनीन्द्रागमज्ञस्य त्वेवं युज्यते वक्तुम्—आधाकर्मोपभोगेन स्यात्कर्मबन्धः स्यान्नेति, यत उक्तम्—"किंचिच्छुद्धं कल्प्यमकल्प्यं वा स्यादकल्प्यमपि कल्प्यम्। पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा॥१॥" तथाऽन्यैरप्यभिहितम्—"उत्पद्येत हि साऽवस्था, देशकालामयान्प्रति। यस्यामकार्यं कार्यं स्यात्कर्म कार्यं च वर्जयेद् ॥१॥"इत्यादि ॥८॥ किमित्येवं स्याद्वादः प्रतिपाद्यत इत्याह—आभ्यां द्वाभ्यां स्थानाभ्यामाश्रिताभ्यामनयोर्वा स्थानयोराधाकर्मोपभोगेन कर्मबन्धभावाभावभूतयोर्व्यवहारो न विद्यते, तथाहि—यद्यवश्यमाधाकर्मोपभोगेनैकान्तेन कर्मबन्धोऽभ्युपगम्येत एवं चाहाराभावेनापि क्वचित्सुतरामनर्थोदयः स्यात्, तथाहि—क्षुत्प्रपीडितो न सम्यगीर्यापथं शोधयेत् ततश्च व्रजन् प्राण्युपमर्दमपि कुर्यात् मूर्च्छादिसद्भावतया च देहपाते सत्यवश्यंभावी त्रसादिव्याघातोऽकालमरणे चाविरतिरङ्गीकृता भवत्यार्तध्यानापत्तौ च तिर्यग्गतिरिति, आगमश्च—"संवत्थ संजमं संजमाओ अप्पाणमेव रक्खेज्जा"इत्यादिनाऽपि तदुपभोगे कर्मबन्धाभाव इति, तथाहि—आधाकर्मण्यपि निष्पाद्यमाने षड्जीवनिकायवधसद्भावे च प्रतीतः कर्मबन्ध इत्यतोऽनयोः स्थानयोरेकान्तेनाश्रीयमाणयोर्व्यवहरणं व्यवहारो न युज्यते, तथा ऽऽभ्यामेव स्थानाभ्यां समाश्रिताभ्यां सर्वमनाचारं विजानीयादिति स्थितम् ॥९॥ पुनरप्यन्यथा दर्शनं प्रति वागनाचारं दर्शयितुमाह—

१ सर्वत्र संयमं संयमादात्मानमेव रक्षेत्।

जमिदं ओरालमाहारं, कम्मगं च तहेव य (तमेव तं)। सव्वत्थ वीरियं अत्थि, णत्थि सव्वत्थ वीरियं ॥१०॥ (सू०)
एएहिं दोहिं ठाणेहिं, ववहारो ण विज्जई। एएहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥ ११ ॥ (सू०)

यदिदं योऽयमनन्तरमाहारः प्रदर्शितः स सति शरीरे भवति शरीरं च पञ्चधा तस्य चौदारिकादेः शरीरस्य भेदाभेदं प्रतिपादयितुकामः पूर्वपक्षद्वारेणाह—'जमिद'मित्यादि, यदिदं—सर्वजनप्रत्यक्षमुदारैः पुद्गलैर्निर्वृत्तमौदारिकमेतदेवोरालं निस्सारत्वाद् एतच्च तिर्यङ्मनुष्याणां भवति, तथा चतुर्दशपूर्ववित्कदाचित्संशयादावाहियत इत्याहारम्, एतद्ग्रहणाच्च वैक्रियोपादानमपि द्रष्टव्यं, तथा कर्मणा निर्वृत्तं कार्मणम्, एतत्सहचरितं तैजसमपि ग्राह्यम्। औदारिकवैक्रियाहारकाणां प्रत्येकं तैजसकार्मणाभ्यां सह युगपदुपलब्धेः कस्यचिदेकत्वाऽऽशङ्का स्यादतस्तदपनोदार्थं तदभिप्रायमाह—'तदेव तद्' यदेवौदारिकं शरीरं ते एव तैजसकार्मणे शरीरे, एवं वैक्रियाहारकयोरपि वाच्यं, तदेवंभूतां संज्ञां नो निवेशयेदित्युत्तरश्लोके क्रिया, तथैतेषामात्यन्तिको भेद इत्येवंभूतामपि संज्ञां नो निवेशयेत्। युक्तिश्चात्र—यद्येकान्तेनाभेद एव तत इदमौदारिकमुदारपुद्गलनिष्पन्नं तथैतत्कर्मणा निर्वर्तितं कार्मणं सर्वस्यैतस्य संसारचक्रवालभ्रमणस्य कारणभूतं तेजोद्रव्यैर्निष्पन्नं तेज एव तैजसं आहारपक्तिनिमित्तं तैजसलब्धिनिमित्तं चेत्येवं भेदेन संज्ञा निरुक्तं कार्यं च न स्यात्। अथात्यन्तिको भेद एव ततो घटवद्भिन्नयोर्देशकालयोरप्युपलब्धिः स्यात्, न नियता युगपदुपलब्धिरिति, एवं च व्यवस्थिते कथञ्चिदेकोपलब्धेरभेदः कथञ्चिच्च संज्ञाभेदाद्भेद इति स्थितं। तदेवमौदारिकादीनां शरीराणां भेदाभेदौ प्रदर्श्याधुना सर्वस्यैव द्रव्यस्य भेदाभेदौ प्रदर्शयितुकामः पूर्वपक्षं श्लोकपश्चार्द्धेन दर्शयितुमाह—'सव्वत्थ

१ औदारिककार्यस्य धर्माधर्माजीवमुख्यवायादेः प्रसिद्धत्वान्न निर्देशः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीरिय'मित्यादि, 'सर्वं सर्वत्र विद्यत' इतिकृत्वा सांख्याभिप्रायेण सत्त्वरजस्तमोरूपस्य प्रधानस्यैकत्वाच्च सर्वस्यैव कारणत्वात् अतः सर्वं सर्वात्मकमित्येवं व्यवस्थिते 'सर्वत्र' घटपटादौ अपरस्य–व्यक्तस्य 'वीर्यं' शक्तिर्विद्यते, सर्वस्यैव हि व्यक्तस्य प्रधानकार्यत्वात्कार्यकारणयोश्चैकत्वाद्, अतः सर्वस्य सर्वत्र वीर्यमस्तीत्येवं संज्ञां नो निवेशयेत्, तथा 'सर्वे भावाः स्वभावेन, स्वस्वभावव्यवस्थिता'इति प्रतिनियतशक्तित्वान्न सर्वत्र सर्वस्य 'वीर्य'शक्तिरित्येवमपि संज्ञां नो निवेशयेत्। युक्तिश्चात्र–यत्तावदुच्यते 'सांख्याभिप्रायेण सर्वं सर्वात्मकं देशकालाकारप्रतिबन्धात्तु न समानकालोपलब्धि'रिति, तदयुक्तं, यतो भेदेन सुखदुःखजीवितमरणदूरासन्नसूक्ष्मबादरसुरूपकुरूपादिकं संसारवैचित्र्यमध्यक्षेणानुभूयते, न च दृष्टेऽनुपपन्नं नाम, न च सर्वं मिथ्येत्यभ्युपपत्तुं युज्यते, यतो दृष्टहानिरदृष्टकल्पना च पापीयसी । किंच–सर्वथैक्येऽभ्युपगम्यमाने संसारमोक्षाभावतया कृतनाशोऽकृताभ्यागमश्च बलादापतति, यच्चैतत् सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधानमित्येतत्सर्वस्यास्य जगतः कारणं तन्निरन्तराः सुहृदः प्रत्येष्यन्ति, निर्युक्तिकत्वाद्, अपिच–सर्वथा सर्वस्य वस्तुन एकत्वेऽभ्युपगम्यमाने सत्त्वरजस्तमसामप्येकत्वं स्यात्, तद्भेदे च सर्वस्य तद्वदेव भेद इति । तथा यदप्युच्यते–'सर्वस्य व्यक्तस्य प्रधानकार्यत्वात्सत्कार्यवादाच्च मयूराण्डकरणे चञ्चुपिच्छादीनां सतामेवोत्पादाभ्युपगमाद् असदुत्पादे चाम्रफलादीनामप्युत्पत्तिप्रसङ्ग'दित्येतद्बाह्यात्रं, तथाहि–यदि सर्वथा कारणे कार्यमस्ति न तर्ह्युत्पादो निष्पन्नघटस्येव, अपिच मृत्पिण्डावस्थायामेव घटगताः कर्मगुण्यपदेशा भवेयुः, न च भवन्ति, ततो नास्ति कारणे कार्यम्, अथानभिव्यक्तमस्तीति चेन्न तर्हि सर्वात्मना विद्यते, नाप्येकान्तेनासत्कार्यवाद एव, तद्भावे हि व्योमारविन्दानामप्येकान्तेनासतां मृत्पिण्डादेर्घटादेरिवोत्पत्तिः स्यात्, न चैतदृ-

१ कार्यस्य । २ शक्तयः । ३ स्वरूपेण । ४ स्वस्वाधारपदार्थेषु । ५ पपन्नं प्र० ।

ष्टमिष्टं वा, अपिच–एवं सर्वस्य सर्वस्मादुत्पत्तेः कार्यकारणभावानियमः स्याद्, एवं च न शाल्यङ्कुरार्थी शालीबीजमेवादद्याद् अपि तु यत्किञ्चिदेवेति, नियमेन च प्रेक्षापूर्वकारिणामुपादानकारणादौ प्रवृत्तिः, अतो नासत्कार्यवाद इति । तदेवं सर्वपदार्थानां सत्त्वज्ञेयत्वप्रमेयत्वादिभिर्धर्मैः कथञ्चिदेकत्वं तथा प्रतिनियतार्थकार्यतया यदेवार्थक्रियाकारि तदेव परमार्थतः सदितिकृत्वा कथञ्चिद्भेद इति सामान्यविशेषात्मकं वस्त्विति स्थितम् । अनेन च स्यादस्ति स्यान्नास्तीतिभङ्गकद्वयेन शेषभङ्गका अपि द्रष्टव्याः, ततश्च सर्वं वस्तु सप्तभङ्गीस्वभावं, ते चामी–स्वद्रव्यक्षेत्रकालभावापेक्षया स्यादस्ति, परद्रव्याद्यपेक्षया स्यान्नास्ति, अनयोरेव धर्मयोर्यौगपद्येनाभिधातुमशक्यत्वात्स्यादवक्तव्यं, तथा कस्यचिदंशस्य स्वद्रव्याद्यपेक्षया विवक्षितत्वात्कस्यचिच्चांशस्य परद्रव्याद्यपेक्षया विवक्षितत्वात् स्यादस्ति च स्यान्नास्ति चेति, तथैकस्यांशस्य स्वद्रव्याद्यपेक्षया परस्य तु सामस्त्येन स्वपरद्रव्याद्यपेक्षया विवक्षितत्वात्स्यादस्ति चावक्तव्यं चेति, तथैकस्यांशस्य परद्रव्याद्यपेक्षया परस्य तु सामस्त्येन स्वद्रव्याद्यपेक्षया विवक्षितत्वात् स्यान्नास्ति चावक्तव्यं चेति, तथैकस्यांशस्य स्वद्रव्याद्यपेक्षया परस्य तु परद्रव्याद्यपेक्षयाऽन्यस्य तु यौगपद्येन स्वपरद्रव्याद्यपेक्षया विवक्षितत्वात्स्यादस्ति च नास्ति चावक्तव्यं चेति, इयं च सप्तभङ्गी यथायोगमुत्तरत्रापि योजनीयेति ॥ १० ॥ ११ ॥ तदेवं सामान्येन सर्वस्यैव वस्तुनो भेदाभेदौ प्रतिपाद्याधुना सर्वशून्यवादिमतनिरासेन लोकालोकयोः प्रविभागेनास्तित्वं प्रतिपादयितुकाम आह—यदिवा 'सर्वत्र वीर्यमस्ति नास्ति सर्वत्र वीर्य'मित्यनेन सामान्येन वस्त्वस्तित्वमुक्तं, तथाहि—सर्वत्र वस्तुनो 'वीर्यं' शक्तिरर्थक्रियासामर्थ्यमन्तशः स्वविषयज्ञानोत्पादनं, तच्चैकान्तेनात्यन्ताभावाच्छशविषाणादेरप्यस्तीत्येवं संज्ञां न निवेशयेत्, सर्वत्र वीर्यं नास्तीति नो एवं संज्ञां

१ र्थं मनसः प्र० । २ भावाभावा प्र० । ३ सर्वत्र वीर्यमित्येवंरूपां ।

निवेशयेदिति, अनेनाविशिष्टं वस्त्वस्तित्वं प्रसाधितम्, इदानीं तस्यैव वस्तुन ईषद्विशेषितत्वेन लोकालोकरूपतयाऽस्तित्वं प्रसाधयन्नाह–

णत्थि लोए अलोए वा, णेवं सन्नं निवेसए । अत्थि लोए अलोए वा, एवं सन्नं निवेसए ॥ १२ ॥

णत्थि जीवा अजीवा वा, णेवं सन्नं निवेसए । अत्थि जीवा अजीवा वा, एवं सन्नं निवेसए ॥ १३ ॥ (सू०)

'लोकः' चतुर्दशरज्ज्वात्मको धर्माधर्माकाशादिपञ्चास्तिकायात्मको वा स नास्तीत्येवं संज्ञां नो निवेशयेत् । तथाऽऽकाशास्तिकायमात्रकस्त्वलोकः स च न विद्यते एवेत्येवं संज्ञां नो निवेशयेत् । तदभावप्रतिपत्तिनिबन्धनं त्विदं, तद्यथा—प्रतिभासमानं वस्त्ववयवद्वारेण वा प्रतिभासेतावयविद्वारेण वा ?, तत्र न तावदवयवद्वारेण प्रतिभासनमुत्पद्यते, निरंशपरमाणूनां प्रतिभासनासंभवात्, सर्वातीयभागस्य च परमाण्वात्मकत्वात्तेषां च छद्मस्थविज्ञानेन द्रष्टुमशक्यत्वात्, तथा चोक्तम्–"यावद्दृश्यं परस्तावद्भागः स च न दृश्यते । निरंशस्य च भागस्य, नास्ति छद्मस्थदर्शनम् ॥ १ ॥" इत्यादि, नाप्यवयविद्वारेण, विकल्प्यमानस्यावयविन एवाभावात्, तथाहि–असौ स्वावयवेषु प्रत्येकं सामस्त्येन वा वर्त्तेत ? अंशांशिभावेन वा ?, न सामस्त्येनावयविबहुत्वप्रसङ्गात्, नाप्यंशेन पूर्वविकल्पानतिक्रमेणानवस्थाप्रसङ्गात्, तस्माद्विचार्यमाणं न कथञ्चिद्वस्त्वात्मभावं लभते, ततः सर्वमेवैतन्मायास्वप्नेन्द्रजालमरुमरीचिकाविज्ञानसदृशं, तथा चोक्तम्–"यथा यथाऽर्थाश्चिन्त्यन्ते, विविच्यन्ते तथा तथा । यद्येते (तत्) स्वयमर्थेभ्यो, रोचन्ते (ते) तत्र के वयम् ? ॥ १ ॥" इत्यादि । तदेवं वस्त्वभावे तद्विशेषलोकालोकाभावः सिद्ध एवेत्येवं नो संज्ञां निवेशयेत् । किंचास्ति लोक ऊर्ध्वाधस्तिर्यग्रूपो वैशाखस्थानस्थितकटिन्यस्तकरयुग्मपुरुषसदृशः पञ्चास्तिकायात्मको वा, तद्व्यतिरिक्तश्चालोकोऽप्यस्ति, संबन्धिशब्दत्वात्, लोकव्यवस्थाऽन्यथाऽनुपपत्तेरिति भावः, युक्तिश्चात्र–यदि सर्वं नास्ति तत सर्वान्तःपातित्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्प्रतिषेधकोऽपि नास्तीत्यतस्तदभावात्प्रतिषेधाभावः, अपि च–सति परमार्थभूते वस्तुनि मायास्वप्नेन्द्रजालादिव्यवस्था, अन्यथा किमाश्रित्य को वा मायादिकं व्यवस्थापयेदिति ? । अपिच—"सर्वाभावो यथाऽभीष्टो, युक्त्यभावे न सिद्ध्यति । साऽस्ति चेत्सैव नस्तत्त्वं, तत्सिद्धौ सर्वमस्तु सत् ॥ १ ॥" इत्यादि । यदप्यवयवावयविविभागकल्पनया दूषणमभिधीयते तदप्यार्हतमतानभिज्ञेन, तन्मतं त्वेवंभूतं, तद्यथा—नैकान्तेनावयवा एव नाप्यवयव्येव चेत्यतः स्याद्वादाश्रयणात्पूर्वोक्तविकल्पदोषानुपपत्तिरित्यतः कथञ्चिल्लोकोऽस्त्येवमलोकोऽपीति स्थितम् ॥ १२ ॥ तदेवं लोकालोकास्तित्वं प्रतिपाद्याधुना तद्विशेषभूतयोर्जीवाजीवयोरस्तित्वप्रतिपादनायाह—'णत्थि जीवा अजीवे'त्यादि, जीवा उपयोगलक्षणाः संसारिणो मुक्ता वा ते न विद्यन्ते, तथा अजीवाश्च धर्माधर्माकाशपुद्गलकालात्मका गतिस्थित्यवगाहदानच्छायातपोद्योतादिवर्त्तनालक्षणा न विद्यन्त इत्येवं संज्ञां—परिज्ञानं नो निवेशयेत्, नास्तित्वनिबन्धनं ह्येतद्—प्रत्यक्षेणानुपलभ्यमानत्वाज्जीवा न विद्यन्ते, कायाकारपरिणतानि भूतान्येव धावनवल्गनादिकां क्रियां कुर्वन्तीति । तथाऽऽत्माद्वैतवादमताभिप्रायेण 'पुरुष एवेदं ग्निं सर्वं यद्भूतं यच्च भाव्य'मित्यागमात् तथा अजीवा न विद्यन्ते सर्वस्यैव चेतनाचेतनरूपस्यात्ममात्रविवर्त्तत्वात् नो एवं संज्ञां निवेशयेत्, किंत्वस्ति जीवः सर्वस्यास्य सुखदुःखादेर्निबन्धनभूतः स्वसंवित्तिसिद्धोऽहंप्रत्ययग्राह्यः, तथा तद्व्यतिरिक्ता धर्माधर्माकाशपुद्गलादयश्च विद्यन्ते, सकलप्रमाणज्येष्ठेन प्रत्यक्षेणानुभूयमानत्वात्तद्गुणानां, भूतचैतन्यवादी च वाच्यः—किं तानि भवदभिप्रेतानि भूतानि नित्यान्युतानित्यानि ?, यदि नित्यानि ततोऽप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वान्न कायाकारपरिणतिः, नापि प्रागविद्यमानस्य चैतन्यस्य सद्भावो, नित्यत्वहानेः । अथानित्यानि किं तेष्वविद्यमानमेव चैतन्यमुत्पद्यते

१ सर्व वस्तु प्र० । २ पक्षाभ्युपगमे । ३ विवर्ति० प्र० । ४ नरूपः प्र० ।

आहोस्विद्विद्यमानं ?, न तावदविद्यमानमतिप्रसङ्गाद्, अभ्युपेतागमलोपाद्वा, अथ विद्यमानमेव सिद्धं तर्हि जीवत्वम् । तथाऽऽत्माद्वैतवाद्यपि वाच्यः—यदि पुरुषमात्रमेवेदं सर्वं कथं घटपटादिषु चैतन्यं नोपलभ्यते ?, तथा तदैक्येऽभेदनिबन्धनानां पक्षहेतुदृष्टान्तानामभावात्साध्यसाधनाभावः, तस्माद्यैकान्तेन जीवाजीवयोरभावः, अपितु सर्वपदार्थानां स्याद्वादाश्रयणाज्जीवः स्याज्जीवः स्यादजीवः अजीवोऽपि च स्यादजीवः स्याज्जीव इति, एतच्च स्याद्वादाश्रयणं जीवपुद्गलयोरन्योऽन्यानुगतयोः शरीरप्रत्यक्षतयाऽध्यक्षेणैवोपलम्भाद्द्रष्टव्यमिति ॥ १३ ॥ जीवास्तित्वे च सिद्धे तन्निबन्धनयोः सदसत्क्रियाद्वारायातयोर्धर्माधर्मयोरस्तित्वप्रतिपादनायाह—

णत्थि धम्मे अधम्मे वा, णेवं सण्णं णिवेसए । अत्थि धम्मे अधम्मे वा, एवं सण्णं णिवेसए ॥ १४ ॥

णत्थि बंधे व मोक्खे वा, णेवं सण्णं णिवेसए । अत्थि बंधे व मोक्खे वा, एवं सण्णं णिवेसए ॥ १५ ॥ (सू०)

'धर्मः' श्रुतचारित्रात्मको जीवस्यात्मपरिणामः कर्मक्षयकारणम्, एवमधर्मोऽपि मिथ्यात्वाविरतिप्रमादकषाययोगरूपः कर्मबन्धकारणमात्मपरिणाम एव, तावेवंभूतौ धर्माधर्मौ कालस्वभावनियतीश्वरादिमतेन न विद्येते इत्येवं संज्ञां नो निवेशयेत्—कालादय एवास्य सर्वस्य जगद्वैचित्र्यस्य धर्माधर्मव्यतिरेकेणैकान्ततः कारणमित्येवमभिप्रायं न कुर्याद्, यतः त एवैकका न कारणमपि तु समुदिता एवेति, तथा चोक्तम्—"नैं हि कालादीहिंतो केवलएहिंतो जायए किंचि । इह मुग्गरंधणाइवि ता सव्वे समुदिया हेऊ ॥ १ ॥"इत्यादि । यतो धर्माधर्मान्तरेण संसारवैचित्र्यं न घटामियर्त्यतोऽस्ति धर्मः—सम्यग्दर्शनादिकोऽधर्मश्च—

१ अभेदसिद्धिर्निबन्धनानां । भेदनिबन्धनानामिति चेद् भेदजानामित्यर्थः । २ नैव कालादिभ्यः केवलेभ्यो जायते किंचिदपि । इह मुद्गरन्धनाद्यपि ततः सर्वे समुदिता हेतुः ॥ १ ॥ ३ नारकत्वादिविशिष्टजीवनिबन्धनयोः बहुव्रीहिर्वा ।

मिथ्यात्वादिक इत्येवं संज्ञां निवेशयेदिति ॥१४॥ सतोश्च धर्माधर्मयोर्बंधमोक्षसद्भाव इत्येतद्दर्शयितुमाह—बन्धः—प्रकृतिस्थित्यनुभावप्रदेशात्मकतया कर्मपुद्गलानां जीवेन स्वव्यापारतः स्वीकरणं, स चामूर्तस्यात्मनो गगनस्येव न विद्यत इत्येवं नो संज्ञां निवेशयेत्, तथा तदभावाच्च मोक्षस्याप्यभाव इत्येवमपि संज्ञां नो निवेशयेत् । कथं तर्हि संज्ञां निवेशयेदित्युत्तरार्द्धेन दर्शयति—अस्ति बन्धः कर्मपुद्गलैर्जीवस्येत्येवं संज्ञां निवेशयेदिति, यत्तूच्यते—अमूर्तस्य मूर्तिमता संबन्धो न युज्यत इति, तदयुक्तम्, आकाशस्य सर्वव्यापितया पुद्गलैरपि संबन्धो दुर्निवार्यः, तदभावे तद्व्यापित्वमेव न स्याद्, अन्यच्च अस्य विज्ञानस्य हृत्पूरमदिरादिना विकारः समुपलभ्यते न चासौ संबन्धमृते अतो यत्किञ्चिदेतत् । अपिच—संसारिणाममुमतां सदा तैजसकार्मणशरीरसद्भावादात्यन्तिकममूर्त्तत्वं न भवतीति । तथा तत्प्रतिपक्षभूतो मोक्षोऽप्यस्ति, तदभावे बन्धस्याप्यभावः स्यादित्यतोऽशेषबन्धनापगमस्वभावो मोक्षोऽस्तीत्येवं च संज्ञां निवेशयेदिति ॥ १५ ॥ बन्धसद्भावे चावश्यं भावी पुण्यपापसद्भाव इत्यतस्तद्भावं निषेधद्वारेणाह—

णत्थि पुण्णे व पावे वा, णेवं सण्णं णिवेसए । अत्थि पुण्णे व पावे वा, एवं सण्णं णिवेसए ॥ १६ ॥

णत्थि आसवे संवरे वा, णेवं सण्णं णिवेसए । अत्थि आसवे संवरे वा, एवं सण्णं णिवेसए ॥ १७ ॥ (सू०)

'नास्ति' न विद्यते 'पुण्यं' शुभकर्मप्रकृतिलक्षणं तथा 'पापं' तद्विपर्ययलक्षणं 'नास्ति' न विद्यते इत्येवं संज्ञां नो निवेशयेत् । तदभावप्रतिपत्तिनिबन्धनं ह्येतद्—तत्र केषाञ्चिन्नास्ति पुण्यं, पापमेव शुक्लकर्षावस्थं सत्सुखदुःखनिबन्धनं, तथा परेषां पापं नास्ति, पुण्यमेव ह्यपचीयमानं पापकार्यं कुर्यादिति, अन्येषां तूभयमपि नास्ति, संसारवैचित्र्यं तु नियतिस्वभावादिकृतं, तदेतदयुक्तं, यतः पुण्यपाप-

१ मूर्तस्यामूर्तिमता प्र० । २ तद्भावे प्र० कर्मपुद्गलानामनिर्जरणेन मोक्षाभावात्सर्वेषां कालेनादानादपरेषां नाभावाद्बन्धाभावः) । ३ संबन्धिसमत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दौ संबन्धिशब्दौ संबंधिशब्दानामेकांशस्य सत्ताऽपरसत्तानान्तरीयका अतो नैकतरस्य सत्तेति, नाप्युभयाभावः शक्यते वक्तुं, निर्निबन्धनस्य जगद्वैचित्र्यस्याभावात्, न हि कारणमन्तरेण क्वचित्कार्यस्योत्पत्तिर्दृष्टा, नियतिस्वभावादिवादास्तु नष्टोत्तराणां पादप्रसारिकाप्रायः, अपि च–तद्वादेऽभ्युपगम्यमाने सकलक्रियावैयर्थ्यं तत एव सकलकार्योत्पत्तेरित्यतोऽस्ति पुण्यं पापं चेत्येवं संज्ञां निवेशयेत्। पुण्यपापे चैवंरूपे, तद्यथा–"पुद्गलकर्म शुभं यत्तत्पुण्यमिति जिनशासने दृष्टम्। यदशुभमथ तत्पापमिति भवति सर्वज्ञनिर्दिष्टम् ॥१॥" इति ॥१६॥ न कारणमन्तरेण कार्यस्योत्पत्तिरतः पुण्यपापयोः प्रागुक्तयोः कारणभूतावाश्रवसंवरौ तत्प्रतिषेधनिषेधद्वारेण दर्शयितुकाम आह–आश्रवति–प्रविशति कर्म येन स प्राणातिपातादिरूप आश्रवः–कर्मोपादानकारणं, तथा तन्निरोधः संवरः, एतौ द्वावपि न स्त इत्येवं संज्ञां नो निवेशयेत्, तदभावप्रतिपत्त्याशङ्काकारणं त्विदं–कायवाङ्मनःकर्म योगः, स आश्रव इति, यथेदमुक्तं तथेदमप्युक्तमेव—'उच्चालियंमि पाए'इत्यादि, ततश्च कायादिव्यापारेण कर्मबन्धो न भवतीति, युक्तिरपि–किमयमाश्रव आत्मनो भिन्न उताभिन्नः ?, यदि भिन्नो नासावाश्रवो घटादिवद्, अभेदेऽपि नाश्रवत्वं, सिद्धात्मनामपि आश्रवप्रसङ्गात्, तदभावे च तन्निरोधलक्षणस्य संवरस्याप्यभावः सिद्ध एवेत्येवमात्मकमध्यवसायं न कुर्यात्। यतो यत्तदनैकान्तिकत्वं कायव्यापारस्य 'उच्चालयंमि पाए'इत्यादिनोक्तं तदस्माकमपि संमतमेव, यतो नह्यस्माभिरप्युपयुक्तस्य कर्मबन्धोऽभ्युपगम्यते, निरुपयुक्तस्य त्वस्त्येव कर्मबन्धः, तथा भेदाभेदोभयपक्षसमाश्रयणात्तदेकपक्षाश्रितदोषाभाव इत्यस्त्याश्रवसद्भावः, तन्निरोधश्च संवर इति, उक्तं च–"योगः

१ उच्चालिते पादे ईरियासमियस्स संकमट्ठाए। वावज्जिज्ज कुलिंगी मरिज्ज तं जोगमासज्ज ॥ १ ॥ न य तस्स तण्णिमित्तो बंधो सुहुमोऽवि देसिओ समए। अणवज्जो उ पओगेण सा उ समादोत्ति निद्दिट्ठा ॥ २ ॥

सूत्रकृ. १४

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३७९॥

शुद्धः पुण्याश्रवस्तु पापस्य तद्विपर्ययः। कायवाङ्मनोगुप्तिर्निराश्रवः संवरस्तूक्तः ॥ १ ॥" इत्यतोऽस्त्याश्रवस्तथा संवरश्चेत्येवं संज्ञां निवेशयेदिति ॥ १७ ॥ आश्रवसंवरसद्भावे चावश्यंभावी वेदनानिर्जरासद्भाव इत्यतस्तं (तत्) प्रतिषेधनिषेधद्वारेणाह—

णत्थि वेयणा णिज्जरा वा, णेवं सण्णं निवेसए। अत्थि वेयणा णिज्जरा वा, एवं सण्णं निवेसए ॥ १८ ॥

णत्थि किरिया अकिरिया वा, णेवं सण्णं निवेसए। अत्थि किरिया अकिरिया वा, एवं सण्णं निवेसए ॥१९॥ सूत्रं

वेदना—कर्मानुभवलक्षणा तथा निर्जरा—कर्मपुद्गलशाटनलक्षणा एते द्वे अपि न विद्येते इत्येवं नो संज्ञां निवेशयेत्। तदभावं प्रत्याशङ्काकारणमिदं, तद्यथा–पल्योपमसागरोपमशैतानुभवनीयं कर्मान्तर्मुहूर्तेनैव क्षयमुपयातीत्यभ्युपगमात्, तदुक्तम्–"जं अण्णाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं। तं णाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ॥ १ ॥" इत्यादि, तथा क्षपकश्रेण्यां च झटित्येव कर्मणो भस्मीकरणाद्यथाक्रमवर्द्धस्य चानुभवनाभावे वेदनाया अभावः तदभावाच्च निर्जराया अपीत्येवं नो संज्ञां निवेशयेत्। किमिति ?, यतः कस्यचिदेव कर्मण एवमनन्तरोक्तया नीत्या क्षपणात्तपसा प्रदेशानुभवेन च अपरस्य तूदयोदीरणाभ्यामनुभवनमित्यतोऽस्ति वेदना, यत आगमोऽप्येवंभूत एव, तद्यथा–'पुव्विं दुच्चिण्णाणं दुप्पडिकंताणं कम्माणं वेइत्ता मोक्खो, णत्थि अवेइत्ता"इत्यादि, वेदनासिद्धौ च निर्जराऽपि सिद्धैवेत्यतोऽस्ति वेदना निर्जरा चेत्येवं संज्ञां निवेशयेदिति ॥ १८ ॥

५ आचाराङ्गश्रुताध्य.

॥३७९॥

१ आश्रवे बन्धात् ततो वेदना संवरात्तपस्ततो निर्जराया अस्तित्वं। २ निषेधद्वारेण प्र०। ३ जातौ बहुत्वं, तथा च कोटाकोट्याऽनुभवोऽप्यविरुद्धः, तत्र क्षपणेऽपि न वेदनाऽस्तीति हेतुदर्शनाय। ४ यदज्ञानी कर्म क्षपयति बहुकामिर्यैर्षकोटीभिः। तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥ १ ॥ ५ पूर्वं दुश्चीर्णानां दुष्प्रतिक्रान्तानां कर्मणां वेदयित्वा मोक्षो नास्त्यवेदयित्वा।

वेदनानिर्जरे च क्रियाऽक्रियायत्ते, ततस्तत्सद्भावं प्रतिषेधनिषेधपूर्वकं दर्शयितुमाह–क्रिया–परिस्पन्दलक्षणा तद्विपर्यस्ता चाक्रिया, ते द्वे अपि 'न स्तो' न विद्येते, तथाहि–सांख्यानां सर्वव्यापित्वादात्मन आकाशस्येव परिस्पन्दात्मिका क्रिया न विद्यते, शाक्यानां तु क्षणिकत्वात्सर्वपदार्थानां प्रतिसमयमन्यथा चान्यथा चोत्पत्तेः पदार्थसत्तैव, न तद्व्यतिरिक्ता काचित्क्रियाऽस्ति, तथा चोक्तम्–"द्युतिर्यैषां क्रिया सैव, कारकं सैव चोच्यते" इत्यादि, तथा सर्वपदार्थानां प्रतिक्षणमवस्थान्तरगमनात्सक्रियत्वमतोऽक्रिया न विद्यते इत्येवं संज्ञां नो निवेशयेत्, किं तर्हि ?, अस्ति क्रिया अक्रिया चेत्येवं संज्ञां निवेशयेत्, तथाहि–शरीरात्मनोर्देशादेशान्तरावाप्तिनिमित्ता परिस्पन्दात्मिका क्रिया प्रत्यक्षेणैवोपलभ्यते, सर्वथा निष्क्रियत्वे चात्मनोऽभ्युपगम्यमाने गगनस्येव बन्धमोक्षाद्यभावः, स च दृष्टेष्टबाधितः, तथा शाक्यानामपि प्रतिक्षणोत्पत्तिरेव क्रियेत्यतः कथं क्रियाया अभावः ?, अपि च–एकान्तेन क्रियाऽभावे संसारमोक्षाभावः स्यादित्यतोऽस्ति क्रिया, तद्विपक्षभूता चाक्रियेत्येवं संज्ञां निवेशयेदिति ॥१९॥ तदेवं सक्रियात्मनि सति क्रोधादिसद्भाव इत्येतदर्शयितुमाह—

णत्थि कोहे व माणे वा, णेवं सण्णं निवेसए। अत्थि कोहे व माणे वा, एवं सण्णं निवेसए ॥ २० ॥

णत्थि माया व लोभे वा, णेवं सण्णं निवेसए। अत्थि माया व लोभे वा, एवं सण्णं निवेसए ॥ २१ ॥

णत्थि पेज्जे व दोसे वा, णेवं सण्णं निवेसए। अत्थि पेज्जे व दोसे वा, एवं सण्णं निवेसए ॥ २२ ॥ सूत्रं

स्वपरात्मनोरप्रीतिलक्षणः क्रोधः, स चानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनभेदेन चतुर्धाऽऽगमे पठ्यते, तथैतावद्भेद एव मानो गर्वः, एतौ द्वावपि 'न स्तो' न विद्येते, तथाहि–क्रोधः केषांचिन्मतेन मानांश एव अभिमानग्रहगृहीतस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्कृतावत्यन्तक्रोधोदयदर्शनात्, क्षपकश्रेण्यां च भेदेन क्षपणानभ्युपगमात्, तथा किमयमात्मधर्म आहोस्वित्कर्मण उतान्यस्येति ?, तत्रात्मधर्मत्वे सिद्धानामपि क्रोधोदयप्रसङ्गः, अथ कर्मणस्ततस्तदन्यकषायोदयेऽपि तदुदयप्रसङ्गात् मूर्तत्वाच्च कर्मणो घटस्येव तदाकारोपलब्धिः स्याद्, अन्यधर्मत्वे त्वकिञ्चित्करत्वमतो नास्ति क्रोध इत्येवं मानाभावोऽपि वाच्य इत्येवं संज्ञां नो निवेशयेत्, यतः कषायकर्मोदयवर्ती दृष्टोष्ठः कृतभ्रुकुटीभङ्गो रक्तवदनो गलत्स्वेदबिन्दुसमाकुलः क्रोधाध्मातः समुपलभ्यते, न चासौ मानांशः, तत्कार्याकरणात् तथा परनिमित्तोत्थापितत्वाच्चेति, तथा जीवकर्मणोरुभयोरप्ययं धर्मः, तद्धर्मत्वे च प्रत्येकविकल्पदोषानुपपत्तिः, अनभ्युपगमात्, संसार्यात्मनां कर्मणा सार्द्धं पृथग्भवनाभावात्तद्धर्मत्वस्य च नरसिंहवद्वस्त्वन्तरत्वादित्यतोऽस्ति क्रोधो मानश्चेत्येवं संज्ञां निवेशयेत् ॥ २० ॥ साम्प्रतं मायालोभयोरस्तित्वं दर्शयितुमाह—अत्रापि प्राग्वन्मायालोभयोरभावदादिनं निराकृत्यास्तित्वं प्रतिपादनीयमिति ॥ २१ ॥ साम्प्रतमेषामेव क्रोधादीनां समासेनास्तित्वं प्रतिपादयन्नाह—प्रीतिलक्षणं प्रेम—पुत्रकलत्रधनधान्याद्यात्मीयेषु रागस्तद्विपरीतस्त्वात्मीयोपघातकारिणि द्वेषः, तावेतौ द्वावपि न विद्येते, तथाहि—केषाञ्चिदभिप्रायो यदुत—मायालोभावेवावयवौ विद्येते, न तत्समुदायरूपो रागोऽवयव्यस्ति, तथा क्रोधमानावेव स्तः, न तत्समुदायरूपोऽवयवी द्वेष इति, तथाहि—अवयवेभ्यो यद्यभिन्नोऽवयवी तर्हि तदभेदात्त एव नासौ अथ भिन्नः पृथगुपलम्भः स्याद् घटपटवदित्येवमसद्विकल्पमूढतया नो संज्ञां निवेशयेत्, यतोऽवयवावयविनोः कथञ्चिद्भेद इत्येवं भेदाभेदाख्यतृतीयपक्षसमाश्र-

१ मानक्रियायां मानिक्रियायां वा। २ अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणानां युगपत्क्षपणात् संज्वलनक्रोधस्यापि मानदलिकेषु क्षेपेण क्षपणात्। ३ कर्मभूत क्रोधस्य स्वतन्त्राकारोपलब्धिप्रसङ्गात्। ४ तत्कार्यत्वाप्रवृत्तेः प्र०।

यणात्प्रत्येकपक्षाश्रितदोषानुपपत्तिरिति, एवं चास्ति प्रीतिलक्षणं प्रेमाप्रीतिलक्षणश्च द्वेष इत्येवं संज्ञां निवेशयेत् ॥ २२ ॥ साम्प्रतं कषायसद्भावे सिद्धे सति तत्कार्यभूतोऽवश्यंभावी संसारसद्भाव इत्येतत्प्रतिषेधनिषेधद्वारेण प्रतिपादयितुमाह—

णत्थि चाउरंते संसारे, णेवं सन्नं निवेसए। अत्थि चाउरंते संसारे, एवं सन्नं निवेसए ॥ २३ ॥

णत्थि देवो व देवी वा, णेवं सन्नं निवेसए। अत्थि देवो व देवी वा, एवं सन्नं निवेसए ॥ २४ ॥ सूत्रं चत्वारोऽन्ता—गतिभेदा नरकतिर्यङ्नरामरलक्षणा यस्य संसारस्यासौ चतुरन्तः संसार एव कान्तारो भयैकहेतुत्वात्, स च चतुर्विधोऽपि न विद्यते, अपितु सर्वेषां संसृतिरूपत्वात्कर्मबन्धात्मकतया च दुःखैकहेतुत्वादेकविध एव, अथवा नारकदेवयोरनुपलभ्यमानत्वात्तिर्यङ्मनुष्ययोरेव सुखदुःखोत्कर्षतया तद्व्यवस्थानाद् द्विविधः संसारः, पर्यायनयाश्रयणाच्चनेकविधः, अतश्चातुर्विध्यं न कथञ्चिद् घटत इत्येवं संज्ञां नो निवेशयेद्, अपितु अस्ति चतुरन्तः संसार इत्येवं संज्ञां निवेशयेत्। यत्तूक्तम्—एकविधः संसारः, तन्नोपपद्यते, यतोऽध्यक्षेण तिर्यङ्मनुष्ययोर्भेदः समुपलभ्यते, न चासावेकविधत्वे संसारस्य घटते, तथा संभवानुमानेन नारकदेवानामप्यस्तित्वाभ्युपगमाद् द्वैविध्यमपि न विद्यते, संभवानुमानं तु—सन्ति पुण्यपापयोः प्रकृष्टफलभुजः, तन्मध्यफलभुजां तिर्यङ्मनुष्याणां दर्शनाद्, अतः संभाव्यन्ते प्रकृष्टफलभुजो, ज्योतिषां प्रत्यक्षेणैव दर्शनाद्, अथ तद्विमानानामुपलम्भः, एवमपि तदधिष्ठातृभिः कैश्चिद्भवितव्यमित्यनुमानेन गम्यन्ते, ग्रहगृहीतवरप्रदानादिना च तदस्तित्वानुमितिः, तदस्तित्वे तु प्रकृष्टपुण्यफलभुज इव प्रकृष्टपापफलभुग्भिरपि भाव्यमित्यतोऽस्ति चातुर्विध्यं संसारस्य, पर्यायनयाश्रयणे तु यदनेकविधत्वमुच्यते तदयुक्तं, यतः सप्तपृथिव्याश्रिता अपि नारकाः समानजातीयाश्रयणादेकप्रकारा एव, तथा तिर्यञ्चोऽपि पृथिव्यादयः स्थावरास्तथा द्वित्रिचतुःपञ्चेन्द्रियाश्च

द्विपट्टियोनिलक्षप्रमाणाः सर्वेऽप्येकविधा एव, तथा मनुष्या अपि कर्मभूमिजाकर्मभूमिजान्तरद्वीपकसंमूर्च्छनजात्मकभेदमनादृत्यैकविधत्वेनैवाश्रिताः, तथा देवा अपि भवनपतिव्यन्तरज्योतिष्कवैमानिकभेदेन भिन्ना एकविधत्वेनैव गृहीताः, तदेवं सामान्यविशेषाश्रयणाच्चातुर्विध्यं संसारस्य व्यवस्थितं नैकविधत्वं, संसारवैचित्र्यदर्शनात्, नाप्यनेकविधत्वं सर्वेषां नारकादीनां स्वजात्यनतिक्रमादिति ॥ २३ ॥ २४ ॥ सर्वभावानां सप्रतिपक्षत्वात्संसारसद्भावे सति अवश्यं तद्विमुक्तिलक्षणया सिद्ध्यापि भवितव्यमित्यतोऽधुना सप्रतिपक्षां सिद्धिं दर्शयितुमाह—

णत्थि सिद्धी असिद्धी वा, णेवं सन्नं निवेसए। अत्थि सिद्धी असिद्धी वा, एवं सन्नं निवेसए ॥ २५ ॥

णत्थि सिद्धी नियं ठाणं, णेवं सन्नं निवेसए। अत्थि सिद्धी नियं ठाणं, एवं सन्नं निवेसए ॥ २६ ॥ सूत्रं

सिद्धिः अशेषकर्मक्षयनिलक्षणा तद्विपर्यस्ता चासिद्धिर्नास्तीत्येवं नो संज्ञां निवेशयेद्, अपि त्वसिद्धेः—संसारलक्षणायाश्चातुर्विध्येनानन्तरमेव प्रसाधितायाः अविगानेनास्तित्वं प्रसिद्धं, तद्विपर्ययेण सिद्धेरप्यस्तित्वमनिवारितमित्यतोऽस्ति सिद्धिरसिद्धिर्वेत्येवं संज्ञां निवेशयेदिति स्थितम्, इदमुक्तं भवति—सम्यग्दर्शनज्ञानचारित्रात्मकस्य मोक्षमार्गस्य सद्भावात्कर्मक्षयस्य च पीडोपशमादिनाऽध्यक्षेण दर्शनादनः कस्यचिदात्यन्तिककर्महानिसिद्धेरस्ति सिद्धिरिति, तथा चोक्तम्—"दोषावरणयोर्हानिर्निःशेषाऽस्त्यतिशायिनी। क्वचित्यथा स्वहेतुभ्यो, बहिरन्तर्मलक्षयः ॥ १ ॥" इत्यादि, एवं सर्वज्ञसद्भावोऽपि संभवानुमानादवगन्तव्यः, तथाहि—अभ्यस्यमानायाः प्रज्ञाया व्याकरणादि[ना] शास्त्रसंस्कारेणोत्तरोत्तरवृद्ध्या प्रज्ञातिशयो दृष्टः, तत्र कस्यचिदत्यन्तातिशयप्राप्तेः सर्वज्ञत्वं स्यादिति संभवानुमानं, न चैतदाशङ्कनीयं, तद्यथा—तप्यमानमुदकमत्यन्तोष्णतामियान्नाग्निसाद्भवेत्, तथा 'दशहस्तान्तरं व्योम्नि यो नामो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्क्रम्य गच्छति । न योजनमसौ गन्तुं, शक्तोऽभ्यासशतैरपि ॥ १ ॥" इति, दृष्टान्तदार्ष्टान्तिकयोरसाम्यात्, तथाहि—ताप्यमानं जलं प्रतिक्षणं क्षयं गच्छेत् प्रज्ञा तु विवर्द्धते, यदिवा प्रोद्योपलब्धेरव्याहतमग्नित्वं, तथा प्रवनविषयेऽपि पूर्वमर्यादाया अनतिक्रमाद्योजनोत्प्लवनाभावः, तत्परित्यागे चोत्तरोत्तरं वृद्ध्या प्रज्ञाप्रकर्षगमनवद्योजनशतमपि गच्छेदित्यतो दृष्टान्तदार्ष्टान्तिकयोरसाम्यादेतन्नाशङ्कनीयमिति स्थितम्, प्रज्ञावृद्धेश्च बाधकप्रमाणाभावादस्ति सर्वज्ञत्वप्राप्तिरिति । यदिवा अञ्जनभृतसमुद्रकदृष्टान्तेन जीवाकुलत्वाज्जगतो हिंसाया दुर्निवारत्वात्सिद्धस्यभावः, तथा चोक्तम्—"जले जीवाः स्थले जीवा, आकाशे जीवमालिनि । जीवमालाकुले लोके, कथं भिक्षुरहिंसकः ? ॥ १ ॥"इत्यादि, तदेवं सर्वस्यैव हिंसकत्वात्सिद्धस्यभाव इति, तदेतदयुक्तं, तथाहि—सदोपयुक्तस्य पिहिताश्रवद्वारस्य पञ्चसमितिसमितस्य त्रिगुप्तिगुप्तस्य सर्वथा निरवद्यानुष्ठायिनो द्विचत्वारिंशद्दोषरहितभिक्षाभुज ईर्यासमितस्य कदाचिद्द्रव्यतः प्राणिव्यपरोपणेऽपि तत्कृतबन्धाभावः, सर्वथा तस्यानवद्यत्वात्, तथा चोक्तम्—"उच्चालियंमि पाए,"इत्यादि प्रतीतं, तदेवं कर्मबन्धाभावात्सिद्धेः सद्भावोऽभ्याहृतः, सामग्र्यभावादसिद्धिसद्भावोऽपीति ॥ २५ ॥ साम्प्रतं सिद्धानां स्थाननिरूपणायाह—'णत्थि सिद्धी'त्यादि, सिद्धेः—अशेषकर्मच्युतिलक्षणाया निजं स्थानं—ईषत्प्राग्भाराख्यं व्यवहारतो निश्चयतस्तु तदुपरि योजनक्रोशषड्भागः, तत्प्रतिपादकप्रमाणाभावात्स नास्तीत्येवं संज्ञां नो निवेशयेत्, यतो बाधकप्रमाणाभावात्साधकस्य चागमस्य सद्भावात्तत्सत्ता दुर्निवारेति । अपिच—अपगताशेषकल्मषाणां सिद्धानां केनचिद्विशिष्टेन स्थानेन भाव्यं, तच्चतुर्दशरज्ज्वात्मकस्य लोकस्याग्रभूतं द्रष्टव्यं, न च शक्यते वक्तुमाकाशवत्सर्वव्यापिनः सिद्धा इति, यतो लोकालोकव्याप्याकाशं, न चालोकेऽपरद्रव्यस्य संभवः, तस्याकाशमात्ररूपत्वात्, लोकमात्रव्यापित्वमपि नास्ति, विकल्पानुपपत्तेः, तथाहि—सिद्धावस्थायां तेषां व्यापि-

त्वमभ्युपगतमुत प्रागपि ?, न तावत्सिद्धावस्थायां, तद्व्यापित्वभवने निमित्ताभावात्, नापि प्रागवस्थायां, तद्भावे सर्वसंसारिणां प्रतिनियतसुखदुःखानुभवो न स्यात्, न च शरीराद्बहिरवस्थितमवस्थानमस्ति, तत्सत्तानिबन्धनस्य प्रमाणस्याभावात्, अतः सर्वव्यापित्वं विचार्यमाणं न कथञ्चिद् घटते, तदभावे च लोकाग्रमेव सिद्धानां स्थानं, तद्गतिश्च 'कर्मविप्रमुक्तस्योर्ध्वं गति'रितिकृत्वा भवति, तथा चोक्तम्—"लाउ एरंडफले अग्गी धूमे य उसु धणुविप्पमुक्के । गइ पुव्वपओगेणं एवं सिद्धाणवि गईओ ॥ १ ॥"इत्यादि । तदेवमस्ति सिद्धिस्तस्याश्च निजं स्थानमित्येवं संज्ञां निवेशयेदिति ॥ २६ ॥ साम्प्रतं सिद्धेः साधकानां साधूनां तत्प्रतिपक्षभूतानामसाधूनां चास्तित्वं प्रतिपिपादयिषुः पूर्वपक्षमाह—

णत्थि साहू असाहू वा, णेवं सन्नं निवेसए । अत्थि साहू असाहू वा, एवं सन्नं निवेसए ॥ २७ ॥

णत्थि कल्लाण पावे वा, णेवं सन्नं निवेसए । अत्थि कल्लाण पावे वा, एवं सन्नं निवेसए ॥ २८ ॥ सूत्रं

'नास्ति' न विद्यते ज्ञानदर्शनचारित्रक्रियोपेतो मोक्षमार्गव्यवस्थितः साधुः, संपूर्णस्य रत्नत्रयानुष्ठानस्याभावात्, तदभावाच्च तत्प्रतिपक्षभूतस्यासाधोरप्यभावः, परस्परापेक्षित्वादेतद्व्यवस्थानस्यैकतराभावे द्वितीयस्याप्यभाव इत्येवं संज्ञां नो निवेशयेत्, अपि तु अस्ति साधुः, सिद्धेः प्राक्साधितत्वात्, सिद्धिसत्ता च न साधुमन्तरेण, अतः साधुसिद्धिः, तत्प्रतिपक्षभूतस्य चासाधोरिति । यश्च संपूर्णरत्नत्रयानुष्ठानाभावः प्रागाशङ्कितः स सिद्धान्ताभिप्रायमबुद्ध्वैव, तथाहि—सम्यग्दृष्टेरुपयुक्तस्यारब्धद्विष्टस्य सत्संयमवतः श्रुतानुसारेणाऽऽहारादिकं शुद्धबुद्ध्या गृह्णतः कथञ्चिदज्ञानादनेषणीयग्रहणसंभवेऽपि सततोपयुक्ततया संपूर्णमेव रत्नत्रयानुष्ठानमिति,

॥ ३८२ ॥

१ अलाबुकैरण्डफलाग्निधूमेषु धनुर्मुक्ते इषौ पूर्वप्रयोगेण गतिरेवं सिद्धानामपि गतयः ॥ १ ॥

यश्च भक्ष्यमिदमिदं चाभक्ष्यं गम्यमिदमिदं चागम्यं प्रासुकमेषणीयमिदमिदं च विपरीतमित्येवं रागद्वेषसंभवेन समभावरूपस्य सामायिकस्याभावः कैश्चिदुच्यते तत्तेषां चोदनमज्ञानविजृम्भणात्, तथाहि—न तेषां सामायिकवतां साधूनां रागद्वेषतया भक्ष्याभक्ष्यादिविवेकः, अपितु प्रधानमोक्षाङ्गस्य सच्चारित्रस्य साधनार्थम्, अपि च—उपकारापकारयोः समभावतया सामायिकं न पुनर्भक्ष्याभक्ष्ययोः समप्रवृत्त्येति ॥ २७ ॥ तदेवं मुक्तिमार्गप्रवृत्तस्य साधुत्वमितरस्य चासाधुत्वं प्रदर्श्याधुना च सामान्येन कल्याणपापवतोः सद्भावं प्रतिषेधनिषेधद्वारेणाह—'णत्थि कल्लाण पावे वा'इत्यादि, यथेष्टार्थफलसंप्राप्तिः कल्याणं तन्न विद्यते, सर्वाशुचितया निरात्मकत्वाच्च सर्वपदार्थानां बौद्धाभिप्रायेण, तथा तदभावे कल्याणवांश्च न कश्चिद्विद्यते, तथाऽऽत्माद्वैतवाद्यभिप्रायेण 'पुरुष एवेदं सर्व'मितिकृत्वा पापं पापवान् वा न कश्चिद्विद्यते, तदेवमुभयोरप्यभावः, तथा चोक्तम्—"विद्याविनयसंपन्ने, ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च, पण्डिताः समदर्शिनः ॥१॥" इत्येवमेव कल्याणपापकाभावरूपां संज्ञां नो निवेशयेद्, अपि त्वस्ति कल्याणं कल्याणवांश्च विद्यते, तद्विपर्यस्तं पापं तद्वांश्च विद्यते, इत्येवं संज्ञां निवेशयेत्, तथाहि—नैकान्तेन कल्याणाभावो यो बौद्धैरभिहितः, सर्वपदार्थानामशुचित्वासंभवात्, सर्वाशुचित्वे च बुद्धस्याप्यशुचित्वप्राप्तेः, नापि निरात्मानः स्वद्रव्यक्षेत्रकालभावापेक्षया सर्वपदार्थानां विद्यमानत्वात् परद्रव्यादिभिस्तु न विद्यन्ते, सदसदात्मकत्वाद्वस्तुनः, तदुक्तम्—"स्वपरसत्ताव्युदासोपादानापाद्यं हि वस्तुनो वस्तुत्व"मिति । तथाऽऽत्माद्वैतभावाभावात्पापाभावोऽपि नास्ति, अद्वैतभावे हि सुखी दुःखी सरोगो नीरोगः सुरूपः कुरूपो दुर्भगः सुभगोऽर्थवान् दरिद्रस्तथाऽन्यमन्तिकोऽयं तु दवीयान् इत्येवमादिको जगद्वैचित्र्यभावोऽप्यक्षसिद्धोऽपि न स्यात् । यच्च समदर्शित्वमुच्यते ब्राह्मणचाण्डालादिषु तदपि समानपीडोत्पादनतो द्रष्टव्यं, न पुनः कर्मोपादित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैचित्र्यभावोऽपि तेषां ब्राह्मणचाण्डालादीनां नास्तीति, तदेवं कथञ्चित्कल्याणमस्ति तद्विपर्यस्तं तु पापकमिति । न चैकान्तेन कल्याणं कल्याणमेव, यतः केवलिनां प्रक्षीणघनघातिकर्मचतुष्टयानां सातासातोदयसद्भावात्तथा नारकाणामपि पञ्चेन्द्रियत्वविशिष्टज्ञानादिसद्भावाच्चैकान्तेन तेऽपि पापवन्त इति तस्मात्कथञ्चित्कल्याणं कथञ्चित्पापमिति स्थितम् ॥ २८ ॥ तदेवं कल्याणपापयोरनेकान्तरूपत्वं प्रसाध्यैकान्तं दूषयितुमाह—

कल्लाणे पावए वावि, ववहारो ण विज्जइ । जं वेरं तं न जाणंति, समणा बाल पंडिया ॥ २९ ॥
असेसं अक्खयं वावि, सव्वदुक्खेति वा पुणो । वज्झा पाणा न वज्झत्ति, इति वायं न नीसरे ॥ ३० ॥
दीसंति समियायारा, भिक्खुणो साहुजीविणो । एए मिच्छोवजीवंति, इति दिट्ठिं न धारए ॥ ३१ ॥ सूत्रं

कल्यं—सुखमारोग्यं शोभनत्वं वा तद्गतीति कल्याणं तदस्यास्तीति कल्याणो मत्वर्थीयाच्प्रत्ययान्तोऽर्शआदिभ्योऽजित्यनेन, कल्याणवानितियावत् । एवं पापकशब्दोऽपि मत्वर्थीयाच्प्रत्ययान्तो द्रष्टव्यः । तदेवं सर्वथा कल्याणवानेवायं तथा पापवानेवायमित्येवंभूतो व्यवहारो न विद्यते, तदेकान्तभूतस्यैवाभावात्, तदभावस्य च सर्ववस्तूनामनेकान्ताश्रयणेन प्राक्प्रसाधितत्वादिति । एतच्च व्यवहाराभावाश्रयणं सर्वत्र आगमेऽपि योजनीयं, तद्यथा—सर्वत्र वीर्यमस्ति नास्ति वा सर्वत्र वीर्यमित्येवंभूत एकान्तिको व्यवहारो न विद्यते, तथा नास्ति लोकोऽलोको वा तथा न सन्ति जीवा अजीवा इति चेत्येवंभूतो व्यवहारो न विद्यत इति सर्वत्र संबन्धनीयं । तथा वैरं—वज्रं तद्वत्कर्म वैरं विरोधो वा वैरं तद्येन परोपघातादिनैकान्तपक्षसमाश्रयणेन वा भवति तत्ते 'श्रमणाः' तीर्थिका बाला इव रागद्वेषकलिताः 'पण्डिताः' पण्डिताभिमानिनः शुष्कतर्कदर्पाध्माता न जानन्ति, परमार्थभूतस्याहिंसालक्षणस्य धर्मस्यानेकान्तपक्षस्य वाऽऽश्रयणादिति । यदिवा यद्वैरं तत्ते श्रमणा बालाः पण्डिता वा न जानन्तीत्येवं वाचं न निसृजेदित्युत्तरेण संबन्धः, किमिति न निसृजेत् ?, यतस्तेऽपि किञ्चिज्जानन्त्येव । अपिच तेषां तन्निमित्तकोपोत्पत्तेः, यच्चैवंभूतं वचस्तन्न वाच्यं, यत उक्तम्—"अप्पत्तियं जेण सिया, आसु कुप्पिज्ज वा परो । सव्वसो तं ण भासेज्जा, भासं अहियगामिणिं ॥१॥"इत्यादि ॥२९॥ अपरमपि वाक्संयममधिकृत्याह—'असेस'मित्यादि, अशेषं—कृत्स्नं तत्सांख्याभिप्रायेण अक्षतं—नित्यमित्येवं न ब्रूयात्, प्रत्यर्थं प्रतिसमयं चान्यथाऽन्यथाभावदर्शनात् स एवायमित्येवंभूतस्यैकत्वसाधकस्य प्रत्यभिज्ञानस्य लूनपुनर्जातेषु केशनखादिष्वपि प्रदर्शनात्, तथा अपिशब्दादेकान्तेन क्षणिकमित्येवमपि वाचं न निसृजेत्, सर्वथा क्षणिकत्वे पूर्वस्य सर्वथा विनष्टत्वादुत्तरस्य निर्हेतुक उत्पादः स्यात्, तथा च सति 'नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणा'दिति । तथा सर्वं जगदुःखात्मकमित्येवमपि न ब्रूयात्, सुखात्मकस्यापि सम्यग्दर्शनादिभावेन दर्शनात्, तथा चोक्तम्—"तेणसंधारनिसण्णोऽवि मुणिवरो भट्ठरागमयमोहो । जं पावइ मुत्तिसुहं कत्तो तं चक्कवट्टीवि ? ॥१॥" इत्यादि, तथा वध्याश्चौरपारदारिकादयोऽवध्या वा तत्कर्मानुमतिप्रसङ्गादित्येवंभूतां वाचं स्वानुष्ठानपरायणः साधुः परव्यापारनिरपेक्षो न निसृजेत्, तथा हि सिंहव्याघ्रमार्जारादीन्परसत्त्वव्यापादनपरायणान् दृष्ट्वा माध्यस्थ्यमवलम्बयेत्, तथा चोक्तम्—"मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि सत्त्वगुणाधिकक्लिश्यमानाविनेयेष्वि"ति, (तत्त्वा०अ०७सू०६) एवमन्योऽपि

१ अप्रीतिकं यया स्यादाशु कुप्येद्वा परः सर्वथा तां न भाषेत भाषासमितिमास्थितः ॥ २ तृणसंस्तारकनिषण्णोऽपि मुनिवरो भ्रष्टरागमदमोहः । यत्प्राप्नोति मुक्तिसुखं कृतस्तत् चक्रवर्त्यपि ॥ १ ॥ ३ वध्यकथने हिंसादिकर्मणां अवध्यकथने चौर्यादिकर्मणां । ४ एवमर्थप्रतिपाकये समुच्चये इतिवचनात्समुच्चये न वाचं निसृजेत् माध्यस्थ्यं च अवलम्बयेत् इति ।

वाक्संयमो द्रष्टव्यः, तद्यथा—अमी गवादयो वाह्या न वाह्या वा तथाऽमी वृक्षादयश्छेद्या न छेद्या वेत्यादिकं वचो न वाच्यं साधुनेति ॥३०॥ अयमपरो वाक्संयमप्रकारोऽन्तःकरणशुद्धिसमाश्रितः प्रदर्श्यते—'दीसंती'त्यादि, 'दृश्यन्ते' समुपलभ्यन्ते स्वशास्त्रोक्तेन विधिना निभृतः—संयत आत्मा येषां ते निभृतात्मानः, क्वचित्पाठः 'समियाचार'त्ति सम्यक्—स्वशास्त्रविहितानुष्ठानादविपरीत आचारः—अनुष्ठानं येषां ते सम्यगाचाराः, सम्यग्वा—इतो व्यवस्थित आचारो येषां ते समिताचाराः, के ते ?—भिक्षणशीला भिक्षवो—भिक्षामात्रवृत्तयः, तथा साधुना विधिना जीवितुं शीलं येषां ते साधुजीविनः, तथाहि—ते न कस्यचिदुपरोधविधानेन जीवन्ति, तथा क्षान्ता दान्ता जितक्रोधाः सत्यसंधा दृढव्रता युगान्तरमात्रदृष्टयः परिमितोदकपायिनो मौनिनः सदा तायिनो विविक्तैकान्तध्यानाध्यासिनः अकौकुच्यास्तानेवंभूतानवधार्यापि 'सरागा अपि वीतरागा इव चेष्टन्ते' इति मत्वैते मिथ्यात्वोपजीविन इत्येवं दृष्टिं न धारयेत्—नैवंभूतमध्यवसायं कुर्यान्नाप्येवंभूतां वाचं निसृजेद् यथैते मिथ्योपचारप्रवृत्ता मायाविन इति, छद्मस्थेन ह्यवोऽदर्शिनैवंभूतस्य निश्चयस्य कर्तुमशक्यत्वादित्यभिप्रायः, ते च स्वयूथ्या वा भवेयुस्तीर्थान्तरीया वा, तावुभावपि न वक्तव्यौ साधुना, यत उक्तम्—"यावत्परगुणपरदोषकीर्तने व्यापृतं मनो भवति । तावद्वरं विशुद्धे ध्याने व्यग्रं मनः कर्तुम् ॥ १ ॥"इत्यादि ॥ ३१ ॥ किंचान्यत्—

दक्खिणाए पडिलंभो, अत्थि वा णत्थि वा पुणो । ण वियागरेज्ज मेहावी, संतिमग्गं च बूहए ॥ ३२ ॥
इच्चेएहिं ठाणेहिं, जिणदिट्ठेहिं संजए । धारयंते उ अप्पाणं, आमोक्खाए परिव्वएज्जासि ॥३३॥ त्तिबेमि ॥ सूत्रं
इति बीयसुयक्खंधस्स अणायारणाम पंचममज्झयणं समत्तं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानं दक्षिणा तस्याः प्रतिलम्भः–प्राप्तिः स दानलाभोऽस्माद्गृहस्थादेः सकाशादस्ति नास्ति वेत्येवं न व्यागृणीयात् मेधावी–मर्यादाव्यवस्थितः। यदिवा स्वयूथ्यस्य तीर्थान्तरीयस्य वा दानं ग्रहणं वा प्रति यो लाभः स एकान्तेनास्ति–संभवति नास्ति वेत्येवं न ब्रूयादेकान्तेन, तद्दानग्रहणनिषेधे दोषोत्पत्तिसंभवात्, तथाहि–तद्दाननिषेधेऽन्तरायसंभवस्तद्वैचित्र्यं च, तद्दानानुमतावप्यधिकरणोद्भव इत्यतोऽस्ति दानं नास्ति वेत्येवमेकान्तेन न ब्रूयात्। कथं तर्हि ब्रूयादिति दर्शयति–शान्तिः–मोक्षस्तस्य मार्गः–सम्यग्दर्शनज्ञानचारित्रात्मकस्तमुपबृंहयेद्–वर्धयेत्, यथा मोक्षमार्गाभिवृद्धिर्भवति तथा ब्रूयादित्यर्थः, एतदुक्तं भवति–पृष्टः केनचिद्विधिप्रतिषेधमन्तरेण देयप्रतिग्राहकविषयं निरवद्यमेव ब्रूयादित्येवमादिकमन्यदपि विविधधर्मदेशनावसरे वाच्यं, तथा चोक्तम्–'सावज्जणवज्जाणं वयणाणं जो न जाणइ विसेसं'[1] इत्यादि ॥३२॥ साम्प्रतमध्ययनार्थमुपसंजिघृक्षुराह–'इच्चेएहिं'इत्यादि, इत्येतैरेकान्तनिषेधद्वारेणानेकान्तविधायिभिः स्थानैर्वाक्संयमप्रधानैः समस्ताध्ययनोक्तै रागद्वेषरहितैर्जिनैर्दृष्टैः–उपलब्धैर्न स्वमतिविकल्पोत्थापितैः संयतः–सत्संयमवानात्मानं धारयन्–एभिः स्थानैरात्मानं वर्तयन्नामोक्षाय–अशेषकर्मक्षयाख्यं मोक्षं यावत्परिः–समन्तात्संयमानुष्ठाने व्रजेः गच्छेस्त्वमिति विधेयस्योपदेशः। इति परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत्। नया अभिहिताः अभिधास्यमानलक्षणाश्चेति ॥ ३३ ॥ समाप्तमनाचारश्रुताख्यं पञ्चममध्ययनमिति ॥

॥ इति श्रीसूत्रकृताङ्गे द्वितीयश्रुतस्कन्धे पञ्चममनाचाराध्ययनं समाप्तम् ॥

सूत्रक. ६५

१ सावद्यानवद्यानां वचनानां यो न जानाति विशेषं ।

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३८५॥

अथ षष्ठमध्ययनम् ॥

६ आर्द्रकाध्ययन.

उक्तं पञ्चममध्ययनं, साम्प्रतं षष्ठमारभ्यते, अस्य चायमभिसंबन्धः—इहानन्तराध्ययने आचारः प्रतिपादितोऽनाचारपरिहारश्च, स च येनाचीर्णः परिहृतश्चासावधुना प्रतिपाद्यते, यदिवाऽनन्तराध्ययने स्वरूपमाचारानाचारयोः प्रतिपादितं, तच्चाशक्यानुष्ठानं न भवत्यतस्तदासेवको दृष्टान्तभूत आर्द्रकः प्रतिपाद्यत इति, अथवाऽनाचारफलं ज्ञात्वा सदाचारे प्रयत्नः कार्यो यथाऽऽर्द्रककुमारेण कृत इत्येतदर्शनार्थमिदमध्ययनम्। अस्य चत्वार्यनुयोगद्वाराण्युपक्रमादीनि वाच्यानि, तत्रोपक्रमान्तर्गतोऽर्थाधिकारोऽयं, तद्यथा–आर्द्रककुमारवक्तव्यता, यथाऽसावभयकुमारप्रतिमाव्यतिकरात्प्रतिबुद्धः तथाऽत्र सर्वं प्रतिपाद्यत इति। निक्षेपस्त्रिधा–तत्रौघनिष्पन्ने निक्षेपेऽध्ययनं, नामनिष्पन्ने निक्षेपे त्वार्द्रकीयं, तत्रार्द्रपदनिक्षेपार्थं निर्युक्तिकृदाह—

नामंठवणाअद्दं दव्वद्दं चेव होइ भावद्दं। एसो खलु अद्दस्स उ निक्खेवो चउविहो होइ ॥ १८४ ॥
उल्लगद्दं सारद्दं छवियद्दं वसइ तहा सिलेसद्दं। एयं दव्वद्दं खलु भावेणं होइ रागद्दं ॥ १८५ ॥
एगभवियबद्धाउए य अभिमुहए य नामगोए य। एते तिन्नि पगारा दव्वद्दे होंति नायव्वा ॥ १८६ ॥
अद्दपुरे अद्दसुतो नामेणं अद्दओत्ति अणगारो। तस्सो समुट्ठियमिणं अज्झयणं अद्दइज्जंति ॥-१८७ ॥
कामं दुवालसंगं जिणवयणं सासयं महाभागं। सव्वज्झयणाइं तहा सव्वक्खरसण्णिवाया य ॥ १८८ ॥

तहवि य कोई अत्थो उप्पज्जति तम्मि तंमि समयंमि। पुव्वभणिओ अणुमतो अ होइ इसिभासिएसु जहा ॥१८९॥

नामस्थापनाद्रव्यभावभेदाच्चतुर्धाऽऽर्द्रकस्य निक्षेपो द्रष्टव्यः, तत्र नामस्थापने अनादृत्य द्रव्यार्द्रप्रतिपादनार्थमाह–तत्र द्रव्यार्द्रं द्विधा–आगमतो नोआगमतश्च, आगमतो ज्ञाता तत्र चानुपयुक्तः 'अनुपयोगो द्रव्य'मितिकृत्वा, नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तं यदुदकेन मृत्तिकादिकं द्रव्यमार्द्रीकृतं तदुदकार्द्रं, सारार्द्रं तु यद्बहिःशुष्काकारमप्यन्तर्मध्ये सार्द्रमास्ते, यथा श्रीपर्णीसोवर्चलादिकं 'छविअद्दं' तु यत् स्निग्धलघुद्रव्यं मुक्ताफलरक्ताशोकादिकं तदभिधीयते, वसयोपलिप्तं वसार्द्रं, तथा श्लेषार्द्रं वज्रलेपाद्युपलिप्तं स्तम्भकुड्यादिकं यद्द्रव्यं तत्स्निग्धाकारतया श्लेषार्द्रमित्यभिधीयते, एतत्सर्वमप्युदकार्द्रादिकं द्रव्यार्द्रमेवाभिधीयते, खलुशब्दस्यैवकारार्थत्वात्। भावार्द्रं तु पुनः रागः–स्नेहोऽभिष्वङ्गस्तेनार्द्रं यज्जीवद्रव्यं तद्भावार्द्रमित्यभिधीयते। साम्प्रतमार्द्रककुमारमधिकृत्यान्यथा द्रव्यार्द्रं प्रतिपादयितुमाह—एकेन भवेन यो जीवः स्वर्गादेरागत्यार्द्रककुमारत्वेनोत्पत्स्यते तथा ततोऽप्यासन्नतरो बद्धायुष्कः तथा ततोऽप्यासन्नतमोऽभिमुखनामगोत्रो–योऽनन्तरसमयमेवार्द्रकत्वेन समुत्पत्स्यते, एते च त्रयोऽपि प्रकारा द्रव्यार्द्रके द्रष्टव्या इति। साम्प्रतं भावार्द्रकमधिकृत्याह—आर्द्रकायुष्कनामगोत्राण्यनुभवन् भावार्द्रो भवति, यद्यपि शृङ्गवेरादीनामप्यार्द्रकसंज्ञाव्यवहारोऽस्ति तथापि नेदमध्ययनं तेभ्यः समुत्थितमतो न तैरिहाधिकारः, किंत्वार्द्रककुमारानगारात्समुत्थितमतस्तेनैवेहाधिकार इतिकृत्वा तद्वक्तव्यताऽभिधीयते। एतदेव निर्युक्तिकृदाह–अस्याः समासेनायमर्थः–आर्द्रकपुरे नगरे आर्द्रको नाम राजा, तत्सुतोऽप्यार्द्रकाभिधानः कुमारः, तद्देशजाः किल सर्वेऽप्यार्द्रकाभिधाना एव भवन्तीतिकृत्वा, स चानगारः संवृत्तः, तस्य च श्रीमन्महावीरवर्द्धमानस्वामिसमवसरणावसरे गोशालकेन सार्द्धं हस्तितापसैश्च वादोऽभूत्, तेन च ते एतदध्ययनार्थोपन्या-

॥३८५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेन पराजिता अत इदमभिधीयते—'ततः' तस्मादार्द्रकात्समुत्थितमिदमध्ययनमार्द्रकीयमिति गाथासमासार्थः । व्यासार्थं तु स्वत एव निर्युक्तिकृदार्द्रकपूर्वभवोपन्यासेनोत्तरत्र कथयिष्यतीति । ननु च शाश्वतमिदं द्वादशाङ्गमपि गणिपिटकम् आर्द्रककथानकं तु श्रीवर्द्धमानतीर्थावसरे तत्कथमस्य शाश्वततमित्याशङ्क्याह—'काम'मित्येतदभ्युपगमे इष्टमेवैतदस्माकं, तद्यथा—द्वादशाङ्गमपि जिनवचनं नित्यं शाश्वतं 'महाभागं' महानुभावमार्षोपन्यादिऋद्धिसमन्वितत्वात् न केवलमिदं सर्वाण्यप्यध्ययनान्येवंभूतानि, तथा सर्वाक्षरसन्निपाताश्च—मेलापका द्रव्यार्थादेशान्नित्या एवेति । ननु च मतानुज्ञानाम निग्रहस्थानं भवत इत्याशङ्क्याह—'जइवि' यद्यपि सर्वमपीदं द्रव्यार्थतः शाश्वतं तथाऽपि कोऽप्यर्थस्तस्मिन्समये तथा क्षेत्रे च कुतश्चिदार्द्रकादेः सकाशादाविर्भावमास्कन्दति स तेन व्यपदिश्यते । तथा पूर्वमप्यसावर्थोऽन्यमुद्दिश्योक्तोऽनुमतश्च भवति, ऋषिभाषितेषूत्तराध्ययनादिषु यथेति । साम्प्रतं विशिष्टतरमध्ययनोत्थानमाह—

अज्जद्दएण गोसालभिक्खुबंभवतीतिदंडीणं । जह हत्थितावसाणं कहियं इणमो तहा वुच्छं ॥ १९० ॥
गामे वसंतपुरए सामइतो घरणिसहितो निक्खंतो । भिक्खायरियादिट्ठा ओहासियभत्तवेहासं ॥ १९१ ॥
संवेगसमावन्नो माई भत्तं चइत्तु दियलोए । चइऊणं अद्दपुरे अद्दसुओ अद्दओ जाओ ॥ १९२ ॥
पीती य तोण्ह दूओ पुच्छणमभयस्स पट्ठवे सोऽवि । तेणावि सम्मद्दिट्ठित्ति होज्ज पडिमा रहंमि गया ॥१९३॥
दट्ठुं संबुद्धो रक्खिओ य आसाण वाहण पलातो । पच्चावंतो धरितो रज्जं न करेति को अन्नो ? ॥ १९४ ॥
अगणितो निक्खंतो विहरइ पडिमाइ दारिगा वरिओ । सुवण्णवसुहाराओ रन्नो कहणं च देवीए ॥ १९५ ॥
तं नेइ पिता तीसे पुच्छण कहणं च वरण दोवारे । जाणाहि पायचिंबं आगमणं कहण निग्गमणं ॥ १९६ ॥
पडिमागतस्समीवे सप्परीवारा अभिक्ख पडिवयणं । भोगा सुताण पुच्छण सुतबंध पुण्णे य निग्गमणं ॥१९७॥
रायगिहागम चोरा रायभया कहण तेसि दिक्खा य । गोसालभिक्खुबंभी तिदंडिया तावसेहि सह वादो ॥१९८॥
वादे पराइइत्ता सवेवियं सरणमब्भुवगता ते । अद्दगसहिया सव्वे जिणवीरं उगासे निक्खंता ॥ १९९ ॥
ण दुक्करं वा णरपासमोयणं,गयस्स मत्तस्स वणंमि रायं । जहा उवसावलिएण तंतुणा,सुदुक्करं मे पडिहाइ मोयणं२००

॥३८६॥

आर्यार्द्रकेण समवसरणाभिमुखमुच्चलितेन गोशालकभिक्षोस्तथा ब्रह्मव्रतिनां त्रिदण्डिनां यथा हस्तितापसानां च कथितमिदमध्ययनार्थजातं तथा वक्ष्ये सूत्रेणेति ॥ साम्प्रतं सपूर्वभवमार्द्रककथानकं गाथाभिरेव निर्युक्तिकृदाह—'गामे'इत्यादि गाथाष्टकं, आसां चार्थः कथानकादवसेयः, तच्चेदं—मगधाजनपदे वसन्तपुरको ग्रामः, तत्र सामायिको नाम कुटुम्बी प्रतिवसति, स च संसारभयोद्विग्नो धर्मघोषाचार्यान्तिके धर्मं श्रुत्वा सपत्नीकः प्रव्रजितः, स च सदाचाररतः संविग्नैः साधुभिः सार्द्धं विहरति, इतरापि साध्वीभिः सहेति । कदाचिदासावेकस्मिन्नगरे भिक्षार्थमटन्तीं दृष्ट्वा तामसौ तथाविधकर्मोदयात्पूर्वरतानुस्मरणेन तस्यामध्युपपन्नः, तेन चात्मीयोऽभिप्रायो द्वितीयस्य साधोर्निवेदितः, तेनापि च तत्प्रवर्तिन्याः, तयाऽपि तस्याः, तयाऽपि चाभिहितं—न मम देशान्तरे एकाकिन्या गमनं युज्यते, न चासौ तत्राप्यनुबन्धं त्यक्ष्यतीत्यतो ममास्मिन्नवसरे भक्तप्रत्याख्यानमेव श्रेयो न पुनर्व्रतविलोपनमित्यतस्तया भक्तप्रत्याख्यानपूर्वकमात्मोद्बन्धनमकारि, मृता चासौ अगाद्देवलोकं । श्रुत्वा चैनं व्यतिकरमसौ परं संवेगमुपगतश्चिन्तितं च तेन—तया व्रतभङ्गभयादिदमनुष्ठितं मम त्वसौ संजात एवेत्यतोऽहमपि भक्तप्रत्याख्यानं करोमीत्याचार्यस्यानिवेद्यैवासौ मायावी अथ च परमसंवेगापन्नः असावपि भक्तं प्रत्याख्याय दिवं गतः, ततोऽपि च प्रत्यागत्यार्द्रपुरे नगरे आर्द्रकसुत आर्द्रकाभिधानो जातः, साऽपिच देवलोकाच्च्युता वसन्तपुरे नगरे श्रेष्ठिकुले दारिका जाता । इतरोऽपि च परमरूपसंपन्नो यौवनस्थः संवृत्तः, अन्यदाऽसावार्द्रकपिता राजगृहे नगरे श्रेणिकस्य राज्ञः स्नेहाविष्करणार्थं परमप्राभृतोपेतं महत्तमं प्रेषयति, आर्द्रककुमारेणासौ पृष्टो यथा—कस्यैतानि महार्हाण्यत्युग्राणि प्राभृतानि मत्पित्रा प्रेषितानि यास्यन्तीति, असावकथयद्—यथा आर्यदेशे तव पितुः परममित्रं श्रेणिको महाराजः तस्यैतानीति, आर्द्रककुमारेणाप्यभाणि—किं तस्यास्ति कश्चिद्योग्यः पुत्रः ?, अस्तीत्याह, यद्येवं मत्प्रहितानि प्राभृतानि भवता तस्य समर्पणीयानीति भणित्वा महार्हाणि प्राभृतानि समर्प्याभिहितं—वक्तव्योऽसौ मद्वचनात् यथाऽऽर्द्रककुमारस्त्वयि नितरां स्निह्यतीति, स च महत्तमो गृहीतोभयप्राभृतो राजगृहमगात्, गत्वा च राजद्वारपालनिवेदितो राजकुलं प्रविष्टो, दृष्टश्च श्रेणिकः, प्रणामपूर्वकं निवेदितानि प्राभृतानि, कथितं च यथासंदिष्टं, तेनाप्यासनाशनताम्बूलादिना यथार्हप्रतिपत्त्या सन्मानितः, द्वितीये चाह्नयार्द्रककुमारमत्कानि प्राभृतान्यभयकुमारस्य समर्पितानि, कथितानि च तत्प्रीत्युत्पादकानि तत्संदिष्टवचनानि, अभयकुमारेणापि पारिणामिक्या बुद्ध्या परिणामितं—नूनमसौ भव्यः समासन्नमुक्तिगमनश्च तेन मया सार्द्धं प्रीतिमिच्छतीति, तदिदमत्र प्राप्तकालं यदादिनीर्थकरप्रतिमासंदर्शनेन तस्यानुग्रहः क्रियत इति मत्वा तथैव कृतं, महार्हाणि च प्रेषितानि प्राभृतानीति, उक्तश्चासौ महत्तमो यथा—मत्प्रहितप्राभृतमेतदेकान्ते निरूपणीयं, तेनापि तथैव प्रतिपन्नं, गतश्चासावार्द्रकपुरं, समर्पितं च प्राभृतं राज्ञः, द्वितीये चाह्नयार्द्रककुमारस्येति, कथितं च यथासंदिष्टं, तेनाप्येकान्ते स्थित्वा निरूपिता प्रतिमा, तां च निरूपयत ईहापोहविमर्शनेन समुत्पन्नं

॥३८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातिस्मरणं, चिन्तितं च तेन यथा–ममाभयकुमारेण महानुपकारोऽकारि सद्धर्मप्रतिबोधत इति, ततोऽसावार्द्रकः संजातजातिस्मरणोऽचिन्तयत्–यस्य मम देवलोकभोगैर्यथेप्सितं संपद्यमानैस्तृप्तिर्नाभूत् तस्यामीभिस्तुच्छैर्मानुषैः स्वल्पकालीनैः कामभोगैस्तृप्तिर्भविष्यतीति कुतस्त्यमिदं, एतत्परिगणय्य निर्विण्णकामभोगो यथोचितं परिभोगमकुर्वन् राज्ञा संजातभयेन मा क्वचिद्यास्यति अतः पञ्चभिः शतै राजपुत्राणां रक्षयितुमारेभे, आर्द्रककुमारोऽप्यश्ववाहनिकया विनिर्गतः प्रधानाश्वेन प्रपलायितः । ततश्च प्रव्रज्यां गृह्णन् देवतया सोपसर्गं भवतोऽद्यापीति भणित्वा निवारितोऽप्यसावार्द्रको राज्यं तावन्न करोति कोऽन्यो मां विहाय प्रव्रज्यां ग्रहीष्यतीत्यभिसंधाय तां देवतामवगणय्य प्रव्रजितः । विहरन्नन्यदाऽन्यतरप्रतिमाप्रतिपन्नः कायोत्सर्गव्यवस्थितो वसन्तपुरे तया देवलोकच्युतया श्रेष्ठिदुहित्राऽपरदारिकामध्यगतया रमन्त्यै(ममाणयै)ष मम भर्त्तेत्येवमुक्ते सत्यनन्तरमेव तत्सन्निहितदेवतयाऽर्द्धत्रयोदशकोटिपरिमाणा शोभनं वृतमनयेति भणित्वा हिरण्यवृष्टिर्मुक्ता, तां च हिरण्यवृष्टिं राजा गृह्णन् देवतया सर्पाद्युत्थानतो विधृतोऽभिहितं च तया यथा–एतद्धिरण्यजातमस्या दारिकायाः नान्यस्य कस्यचिदित्यतस्तत्पित्रा सर्वं संगोपितम्, आर्द्रककुमारोऽप्यनुकूलोपसर्ग इतिमत्वाऽऽश्वेवान्यत्र गतः, गच्छति च काले दारिकाया वरकाः समागच्छन्ति, पृष्टौ च पितरौ तया–किमेषामागमनप्रयोजनं ?, कथितं च ताभ्यां यथैते तव वरका इति, ततस्तयोक्तं–तात ! सकृत्कन्याः प्रदीयन्ते नानेकशः, दत्ता चाहं तवौ यत्संबन्धि हिरण्यजातं भवद्भिर्गृहीतं, ततः सा पित्राऽभाणि–किं त्वं तं जानीषे ?, तयोक्तं–तत्पादगताभिज्ञानदर्शनतो जानामीति, तदेवमसौ तत्परिज्ञानार्थं सर्वस्य भिक्षार्थिनो भिक्षां दापयितुं निरूपिता, ततो द्वादशभिर्वर्षैर्गतैः कदाचिच्चासौ भवितव्यतानियोगेन तत्रैव विहरन् समायातः, प्रत्यभिज्ञातश्च तया तत्पादचिह्नदर्शनतः, ततोऽसौ दारिका सपरिवारा तत्पृष्ठतो जगाम, आर्द्रककुमारोऽपि

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥३८८॥

६ आर्द्रकाध्ययन.

देवतावचनं स्मरंस्तथाविधकर्मोदयाच्चावश्यंभाविभवितव्यतानियोगेन च प्रतिभग्नस्तया सार्द्धं भुनक्ति भोगान्, पुत्रश्चोत्पन्नः, पुनरार्द्रककुमारेणासावभिहिता–साम्प्रतं ते पुत्रो द्वितीयः अहं च स्वकार्यमनुतिष्ठामि, तया सुतव्युत्पादनार्थं कर्पासकर्त्तनमारब्धं, पृष्टा चासौ बालकेन–किमम्बैतद्व्यर्थया प्रारब्धमितरजनाचरितं ?, ततोऽसाववोचद्–यथा तव पिता प्रव्रजितुकामः त्वं चाद्यापि शिशुरसमर्थोऽर्थार्जने ततोऽहमनाथा स्त्रीजनोचितेनानिन्द्येन विधिनाऽऽत्मानं भवन्तं च किल पालयिष्यामीत्येतदालोच्येदमारब्धमिति । तेनापि बालकेनोत्पन्नप्रतिभया तत्कर्त्तितसूत्रेणैव कार्यं मद्गद्धो यास्यतीति मन्मनभाषिणोपविष्ट एवासौ पिता परिवेष्टितः, तेनापि चिन्तितं–यावन्तोऽमी बालककृतवेष्टनतन्तवस्तावन्त्येव वर्षाणि मया गृहे स्थातव्यमिति, निरूपिताश्च तन्तवो यावद् द्वादश तावन्त्येव वर्षाण्यसौ गृहवासे व्यवस्थितः, पूर्णेषु च द्वादशसु संवत्सरेषु गृहान्निर्गतः प्रव्रजितश्चेति । ततोऽसौ सूत्रार्थनिष्पन्न एकाकिविहारेण विहरन् राजगृहाभिमुखं प्रस्थितः, तदन्तराले च तद्रक्षणार्थं यानि प्राक् पित्रा निरूपितानि पञ्च राजपुत्रशतानि तस्किभयेन नष्टे राजभयाद्वैलक्ष्याच्च न राजान्तिकं जग्मुः, तत्राटवीदुर्गे चौर्येण वृत्तिं कल्पितवन्तः, तैश्चासौ दृष्टः प्रत्यभिज्ञातश्च, ते च तेन पृष्टाः–किमिति भवद्भिरेवंभूतं कर्माश्रितं ?, तैश्च सर्वं राजभयादिकं कथितम्, आर्द्रककुमारवचनाच्च संबुद्धाः प्रव्रजिताश्च । तथा राजगृहनगरप्रवेशे गोशालको हस्तितापसाः ब्राह्मणाश्च वादे पराजिताः । तयाऽऽर्द्रककुमारदर्शनादेव हस्ती बन्धनाद्विमुक्तः, ते च हस्तितापसादय आर्द्रककुमारधर्मकथाक्षिप्ता जिनवीरसमवसरणे निष्क्रान्ताः । राज्ञा च विदितवृत्तान्तेन महाकुतूहलापूरितहृदयेन पृष्टो–भगवन् ! कथं त्वद्दर्शनतो हस्ती निरर्गलः संवृत्त इति ?, महान् भगवतः प्रभाव इत्येवमभिहितः सन्नार्द्रककुमारोऽब्रवीत् नवमगाथयोत्तरं—न दुष्करमेतद्यन्नरपाशैर्बद्धमत्तवारणस्य विमोचनं वने राजन् ! एतत्तु मे प्रतिभाति दुष्करं यच्चतत्रावलितेन तन्तुना बद्धस्य मम प्रतिमोचनमिति । स्नेहतन्तवो हि जन्तूनां दुरुच्छेदा भवन्तीति भावः । गतमार्द्रककथानकम्, नामनिष्पन्ननिक्षेपश्च । तदनन्तरं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदम्—

॥ ३८८ ॥

पुराकडं अद्द ! इमं सुणेह, मेगंतयारी समणे पुरासी । से भिक्खुणो उवणेत्ता अणेगे, आइक्खतिण्हं पुढो वित्थरेणं ॥ १ ॥ साऽऽजीविया पट्ठविताऽथिरेणं, सभागओ गणओ भिक्खुमज्झे । आइक्खमाणो बहुजन्नमत्थं, न संधयाती अवरेण पुव्वं ॥२॥ एगंतमेवं अदुवा वि इण्हिं, दोऽवण्णमन्नं न समेति जम्हा । सूत्रं

यथा गोशालकेन सार्द्धं वादोऽभूदार्द्रककुमारस्य तथाऽनेनाध्ययनेनोपदिश्यते, तं च राजपुत्रकमार्द्रककुमारं प्रत्येकबुद्धं भगवत्समीपमागच्छन्तं गोशालकोऽब्रवीत्—यथा हे आर्द्रक ! यदहं ब्रवीमि तच्छृणु–'पुरा' पूर्वं यदनेन भवत्तीर्थकृता कृतं, तच्चेदमिति दर्शयति–एकान्ते जनरहिते–प्रदेशे चरितुं शीलमस्येत्येकान्तचारी, तथा श्राम्यतीति श्रमणः पुराऽऽसीत्तपश्चरणोद्युक्तः, साम्प्रतं तूपरूपपश्चरणविशेषैर्निर्भर्त्सितो मां विहाय देवादिमध्यगतोऽसौ धर्मं किल कथयति, तथा 'बहून्' भिक्षून् 'उपनीय' प्रभूतशिष्यपरिकरं कृत्वा भवद्विधानां च मुग्धजनानामिदानीं पृथक् पृथग्विस्तरेणाचष्टे धर्ममिति शेषः ॥ १ ॥ पुनरपि गोशालक एव 'साजीविए'त्याद्याह, येयं बहुजनमध्यगतेन धर्मदेशना युष्मद्गुरुणाऽऽरब्धा साऽऽजीविका प्रकर्षेण स्थापिता प्रस्थापिता, एकाकी विहरंल्लोकिकैः परिभूयत इतिमत्वा लोकपक्षिनिमित्तं महान् परिकरः कृतः, तथा चोच्यते–"छत्रं छात्रं पात्रं वस्त्रं यष्टिं च चर्मचयति भिक्षुः । वेषेण परिकरेण च कियताऽपि विना न भिक्षापि ॥ १ ॥" तदनेन दम्भप्रधानेन जीविकार्थमिदमारब्धं । किंभूतेन ?–अस्थिरेण, पूर्वं ह्ययं मया सार्द्धमेकाकिन्यन्तप्रान्ताशनेन शून्यारामदेवकुलादौ वृत्तिं कल्पितवान्, न च तथाभूतमनुष्ठानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिकताकवलवन्निरास्वादं यावज्जीवं कर्तुमलम् अतो मां विहायायं बहून् शिष्यान् प्रतार्यैवंभूतेन स्फाटोपेन विहरतीत्यतः कर्तव्ये 'अस्थिरः' चपलः, पूर्वचर्यापरित्यागेनापरकल्पसमाश्रयात्, एतदेव दर्शयति—'सभायां गतः' सदेवमनुजपर्षदि व्यवस्थितो 'गणओ'त्ति गणशो बहुशोऽनेकश इतियावत् भिक्षूणां मध्ये 'गतो' व्यवस्थित आचक्षाणो बहुजनेभ्यो हितः अर्थो बहुजन्योऽर्थस्तमर्थं बहुजनहितं कथयन् विहरति, एतच्चास्यानुष्ठानं पूर्वापरेण न संधत्ते, तथाहि—यदि साम्प्रतीयं वृत्तं प्राकारत्रयसिंहासनाशोकवृक्षभामण्डलचामरादिकं मोक्षाङ्गमभविष्यत्ततो या प्राक्तन्येकचर्या क्लेशबहुलाऽनेन कृता सा क्लेशाय केवलमस्येति, यदि सा कर्मनिर्जरणहेतुका परमार्थभूता ततः साम्प्रतावस्था परप्रतारकत्वाद्मकल्पेत्यतः पूर्वोत्तरयोरनुष्ठानयोः—मौनव्रतिकधर्मदेशनारूपयोः परस्परतो विरोध इति ॥२॥ अपिच—यद्येकान्तचारित्वमेव शोभनं पूर्वमाश्रितत्वात् ततः सर्वदाऽन्यनिरपेक्षैस्तदेव कर्तव्यम्, अथ चेदं साम्प्रतं महापरिवारवृतं साधु मन्यसे ततस्तदेवादावप्याचरणीयमासीद्, अपिच द्वे अप्येते छायातपवदत्यन्तविरोधिनी वृत्ते नैकत्र समवायं गच्छतः, तथा यदि मौनेन धर्मस्ततः किमियं महता प्रबन्धेन धर्मदेशना ?, अथानयैव धर्मस्ततः किमिति पूर्वं मौनव्रतमनेनालल्म्बे ?, यस्मादेवं तस्मात्पूर्वोत्तरव्याहतिः। तदेवं गोशालकेन पर्यनुयुक्त आर्द्रककुमारः श्लोकपश्चार्द्धेनोत्तरदानायाह—

पुढिं च इंपिंह च अणागतं वा, एगंतमेवं पडिसंधयाति ॥ ३ ॥ समिच्च लोगं तसथावराणं, खेमंकरे समणे माहणे वा। आइक्खमाणोवि सहस्समज्झे, एगंतयं सारयती तहच्चे ॥४॥ धम्मं कहंतस्स उ णत्थि दोसो, खंतस्स दंतस्स जितिंदियस्स। भासाय दोसे य विवज्जगस्स, गुणे य भासाय णिसेवगस्स ॥ ५ ॥ महव्वए पंच अणुव्वए य, तहेव पंचासव संवरे य। विरतिं इहस्सामणियंमि पन्ने, लवावसक्की समणेत्तिबेमि ॥६॥ सूत्रं

'पूर्वं' पूर्वस्मिन्काले यन्मौनव्रतिकत्वं या चैकचर्या तच्छद्मस्थत्वाद् घातिकर्मचतुष्टयक्षयार्थं, साम्प्रतं यन्महाजनपरिवृतस्य धर्मदेशना विधानं तत्प्राग्बद्धभवोपग्राहिकर्मचतुष्टयक्षपणोद्यतस्य विशेषतस्तीर्थकरनाम्नो वेदनार्थं अपरासां चोच्चैर्गोत्रशुभायुर्नामादीनां शुभप्रकृतीनामिति। यदिवा पूर्वं साम्प्रतमनागते च काले रागद्वेषरहितत्वादेकत्वभावनानतिक्रमणाच्चैकत्वमेवानुपचरितं भगवानशेषजनहितं धर्मं कथयन् प्रतिसंदधाति, न तस्य पूर्वोत्तरयोरवस्थयोरार्शसारहितत्वाद्विदोस्ति, अतो यदुच्यते भवता—पूर्वोत्तरयोरवस्थयोरसाङ्गत्यं तत् प्रवत इति ॥३॥ स्यादेतद्—धर्मदेशनया प्राणिनां कश्चिदुपकारो भवत्युत नेति ?, भवतीत्याह—'समिच्च लोय' मित्यादि, सम्यग्यथावस्थितं 'लोकं' षड्द्रव्यात्मकं 'मत्वा' अवगम्य केवललोकेन परिच्छिद्य त्रसन्तीति त्रसाः—त्रसनामकर्मोदया द्वीन्द्रियादयः, तथा तिष्ठन्तीति स्थावराः—स्थावरनामकर्मोदयात्स्थावराः पृथिव्यादयस्तेषामुभयेषामपि जन्तूनां 'क्षेमं' शान्तिः रक्षा तत्करणशीलः क्षेमंकरः श्राम्यतीति श्रमणो—द्वादशप्रकारतपोनिष्टप्तदेहः, तथा मा हणन्ति प्रवृत्तिर्यस्यासौ माहनो ब्राह्मणो वा स एवंभूतो 'निर्ममो' रागद्वेषरहितः प्राणिहितार्थं न लाभपूजाख्यात्मार्थं धर्ममाचक्षाणोऽपि प्राग्वत् छद्मस्थावस्थायां मौनव्रतिक इव वाक्संयत एव, उत्पन्नदिव्यज्ञानत्वाद्भाषागुणदोषविवेकज्ञतया भाषणेनैव गुणावाप्तेः, अनुत्पन्नदिव्यज्ञानस्य तु मौनव्रतिकत्वेनेति, तथा देवासुरनरतिर्यक्सहस्रमध्येऽपि व्यवस्थितः पङ्क्ताधारपङ्क्तिजवृत्तदोषव्यासङ्गाभावान्ममत्वविरहादाशंसादोषविकलत्वादेकान्तमेवासौ 'सारयति' प्रख्यातिं नयति साधयतीतियावत्। ननु चैकाकिपरिकरोपेतावस्थयोरस्ति विशेषः, अत्यक्षेणैवोपलभ्यमानत्वात्, सत्यम्, अस्ति विशेषो बाह्यतो न त्वान्तरतोऽपि, दर्शयति—'तथा' प्राग्वदर्चा—लेश्या शुक्लध्यानाख्या यस्य स तथार्चेः, यदिवा अर्चा—शरीरं तच्च प्राग्वद्यस्य स तथार्चेः, तथाहि—असावशोकाद्यष्टप्रातिहार्योपेतोऽपि नोत्सेकं याति, नापि शरीरं संस्कारायत्तं विदधाति, स हि

भगवानात्यन्तिकरागद्वेषप्रहाणादेकाक्यपि जनपरिवृतोऽप्येकाकी, न तस्य तयोरवस्थयोः कश्चिद्विशेषोऽस्ति, तथा चोक्तम्—"रागद्वेषौ विनिर्जित्य, किमरण्ये करिष्यसि ?। अथ नो निर्जितावेतौ, किमरण्येकरिष्यसि ?॥ १ ॥" इत्यतो बाह्यमनङ्गमान्तरमेव कषायजयादिकं प्रधानं कारणमिति स्थितम् ॥४॥ अपगतरागद्वेषस्य प्रभाषमाणस्यापि दोषाभावं दर्शयितुमाह—तस्य भगवतोऽपगतघनघातिकलङ्कस्योत्पन्नसकलपदार्थाविर्भाविज्ञानस्य जगदभ्युद्धरणप्रवृत्तस्यैकान्तपरहितप्रवृत्तस्य स्वकार्यनिरपेक्षस्य धर्मं कथयतोऽपि तुशब्दस्यापिशब्दार्थत्वात् नास्ति कश्चिद्दोषः। किंभूतस्येत्याह—क्षान्तस्य क्षान्तिसंपन्नस्यानेन क्रोधनिरासमाह, तथा 'दान्तस्य' उपशान्तस्यानेन तु मानव्युदासं, तथा जितानि स्वविषयप्रवृत्तिनिषेधेनेन्द्रियाणि येन स जितेन्द्रियो वश्येन्द्रियोऽनेन तु लोभनिरासमाचष्टे, मायायास्तु लोभनिरासादेव निरासो द्रष्टव्यः, तन्मूलत्वात्तस्याः, भाषाया दोषा—असत्यासत्यामृषाकर्कशासभ्यशब्दोच्चारणादयस्तद्विवर्जकस्य—तत्परिहर्तुस्तथा भाषाया ये गुणा—हितमितदेशकालासंदिग्धभाषणादयस्तन्निषेवकस्य सतो ब्रुवतोऽपि नास्ति दोषः, छद्मस्थस्य हि बाहुल्येन मौनव्रतमेव श्रेयः, समुत्पन्नकेवलस्य तु भाषणमपि गुणायेति ॥ ५ ॥ किंभूतं धर्ममसौ कथयतीत्याह—'महव्वए पंचे'त्यादि, महान्ति च तानि व्रतानि—प्राणातिपातविरमणादीनि तानि च साधूनां प्रज्ञापितवान्, पञ्चापि तदपेक्षयाऽणूनि—लघूनि व्रतानि अणुव्रतानि पञ्चैव तानि श्रावकानुद्दिश्य प्रज्ञापितवान्, पञ्चाश्रवान्—प्राणातिपातादिरूपान् कर्मणः प्रवेशद्वारभूतान् तत्संवरं च सप्तदशप्रकारं संयमं प्रतिपादितवान्, संवरवतो हि विरतिर्भवतीत्यतो विरतिं च प्रतिपादितवान् चशब्दात्तत्फलभूतौ निर्जरामोक्षौ च, 'इह' अस्मिन्प्रवचने लोके वा श्रमणभावः श्रामण्यं—संपूर्णसंयमस्तस्मिन् वा विधेये मूलगुणान्—महाव्रताणुव्रतरूपान् तथोत्तरगुणान्—संवरविरत्यादिरूपान् 'पूर्णे' कृत्स्ने संयमे विधातव्ये 'प्राज्ञ'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वा कचित्पाठः, प्रज्ञावानेतत्प्रतिपादितवानिति । किंभूतोऽसौ ?-लवं-कर्म तस्माद् 'अवसक्कइ'त्ति अवसर्पणशीलोऽवसर्पी श्राम्यतीति श्रमणः-तपश्चरणयुक्त इत्येतदहं ब्रवीमि, स्वयमेव च भगवान्पञ्चमहाव्रतोपपन्न इन्द्रियनोइन्द्रियगुप्तो विरतश्चासौ लवावसर्पी सन् स्वतोऽन्येषामपि तथाभूतमुपदेशं दत्तवानित्येतद् ब्रवीमीति । यदिवाऽऽर्द्रककुमारवचनमाकर्ण्यासौ गोशालकस्तत्प्रतिपक्षभूतं अर्थं वक्तुकाम इदमाह-इत्येतद्वक्ष्यमाणं यदहं ब्रवीमि तच्छृणु! त्वमिति ॥ ६ ॥ यथाप्रतिज्ञातमेवाह गोशालकः—

सीओदगं सेवउ बीयकायं, आहायकम्मं तह इत्थियाओ । एगंतचारिस्सिह अम्ह धम्मे, तवस्सिणो णाभिसमेति पावं ॥ ७ ॥ सीतोदगं वा तह बीयकायं, आहायकम्मं तह इत्थियाओ । एयाइं जाणं पडिसेवमाणा, अगारिणो अस्समणा भवंति ॥ ८ ॥ सिया य बीओदग इत्थियाओ, पडिसेवमाणा समणा भवंतु । अगारिणोऽवी समणा भवंतु, सेवंति उ तंऽवि तहप्पगारं ॥ ९ ॥ जे यावि बीओदगभोति भिक्खू, भिक्खं विहं जायति जीवियट्ठी । ते णातिसंजोगमविप्पहाय, कायोवगा णंतकरा भवंति ॥ १० ॥

भवतेदमुद्भाहितं-परार्थं प्रवृत्तस्याशोकादिप्रातिहार्यपरिग्रहस्तथा शिष्यादिपरिकरो धर्मदेशना च न दोषायेति यथा तथाऽस्माकमपि सिद्धान्ते यदेतद्वक्ष्यमाणं तन्न दोषायेति । शीतं च तदुदकं च शीतोदकम्-अप्रासुकोदकं तत्सेवनं-परिभोगं करोतु, तथा बीजकायोपभोगमाधाकर्मोश्रयणं स्त्रीप्रसङ्गं च विदधातु, अनेन च स्वपरोपकारः कृतो भवतीत्यस्मदीये धर्मे प्रवृत्तस्य 'एकान्तचारिणः'आरामोद्यानादिष्वेकाकिविहारोद्यतस्य तपस्विनो 'नाभिसमेति' न संबन्धमुपयाति 'पापम्' अशुभकर्मेति, इदमुक्तं भवति—एतानि शीतोदकादीनि यद्यपीपत्कर्मबन्धाय तथापि धर्माधारं शरीरं प्रतिपालयत एकान्तचारिणस्तपस्विनो बन्धाय न भवन्तीति ॥ ७ ॥ एतत्परिहर्त्तुकाम आह-'सीतोदग'मित्यादि, 'एतानि' प्रागुपन्यस्तानि अप्रासुकोदकपरिभोगादीनि प्रतिसेवन्तोऽगारिणो-गृहस्थास्ते भवन्ति अश्रमणाश्च-अप्रव्रजिताश्चैवं जानीहि, यतः-'अहिंसा सत्यमस्तेयं, ब्रह्मचर्यमलुब्धता' इत्येवंलक्षणं श्रमणलक्षणं, तच्चैषां शीतोदकबीजाऽऽधाकर्मस्त्रीपरिभोगवतां नास्तीत्यतस्ते नामाकाराभ्यां श्रमणा न परमार्थानुष्ठानत इति ॥८॥ पुनरप्यार्द्रक एवैतदूषणायाह-स्यादेतद्भवदीयं मतं-यथा ते एकान्तचारिणः क्षुत्पिपासादिप्रधानतपश्चरणपीडिताश्च तत्कथं ते न तपस्विन इत्येतदाशङ्क्यार्द्रक आह-यदि बीजाद्युपभोगिनोऽपि श्रमणा इत्येवं भवताऽभ्युपगम्यते एवं तर्ह्यगारिणोऽपि-गृहस्थाः श्रमणा भवन्तु, तेषामपि देशिकावस्थायामार्द्रांशावतामपि निष्किञ्चनतयैकाकिविहारित्वं क्षुत्पिपासादिपीडनं च संभाव्यते । अत आह-'सेवंति उ' तुरवधारणे सेवन्त्येव 'तेऽपि' गृहस्थास्तथाप्रकारमेकाकिविहारादिकमिति ॥ ९ ॥ पुनरप्यार्द्रको बीजोदकादिभोजिनां दोषाभिधित्सयाऽऽह-'जे यावी'त्यादि, ये चापि 'भिक्षवः' प्रव्रजिता बीजोदकभोजिनः सन्तो द्रव्यतो ब्रह्मचारिणोऽपि भिक्षां चाटन्ति जीवितार्थिनस्ते तथाभूता 'ज्ञातिसंयोगं' स्वजनसंबन्धं 'विप्रहाय'त्यक्त्वा कायान् कायेषु वोपगच्छन्तीति कायोपगास्तदुपमर्दकारम्भप्रवृत्तत्वात् संसारस्यानन्तकरा भवन्तीति, इदमुक्तं भवति-केवलं स्त्रीपरिभोग एव तैः परित्यक्तोऽसावपि द्रव्यतः, शेषेण तु बीजोदकाद्युपभोगेन गृहस्थकल्पा एव ते, यस्तु भिक्षाटनादिकमुपन्यस्तं तेषां तद्गृहस्थानामपि केषाञ्चित्संभाव्यते, नैतावता श्रमणभाव इति ॥ १० ॥ अधुनैतदाल्पर्थं गोशालकोऽपरमुत्तरं दातुमसमर्थोऽन्यतीर्थिकान्सहायान् विधाय सोल्लुण्ठमसारं वक्तुकाम आह—

इमं वयं तु तुमं पाउकुव्व, पावाइणो गरिहसि सव्व एव । पावाइणो पुढो किट्टयंता, सयं सयं दिट्ठि करेंति पाउ ॥ ११ ॥ ते अन्नमन्नस्स उ गरहमाणा, अक्खंति भो समणा माहणा य । सतो य अत्थी असतो य णत्थी, गरहामो दिट्ठिं ण गरहामो किंचि ॥ १२ ॥ ण किंचि रूवेणऽभिधारयामो, सदिट्ठिमग्गं तु करेमु पाउं । मग्गे इमे किट्टिए आरिएहिं, अणुत्तरे सप्पुरिसेहिं अंजू ॥ १३ ॥ उड्ढं अहेयं तिरियं दिसासु, तसा य जे थावर जे य पाणा । भूयाहिसंकाभि दुगुंछमाणा, णो गरहती वुसिमं किंचि लोए ॥ १४ ॥ (सू०)

'इमां' पूर्वोक्तां वाचं तुशब्दो विशेषणार्थः त्वं 'प्रादुष्कुर्वन्' प्रकाशयन् सर्वानपि प्रावादुकान् 'गर्हसि' जुगुप्ससे, यस्मात्सर्वेऽपि तीर्थिका बीजोदकादिभोजिनोऽपि संसारोच्छित्तये प्रवर्त्तन्ते, ते तु भवता नाभ्युपगम्यन्ते, ते तु प्रावादुकाः पृथक् पृथक् स्वीयां स्वीयां दृष्टिं-प्रत्येकं स्वदर्शनं कीर्तयन्तः 'प्रादुष्कुर्वन्ति' प्रकाशयन्ति । यदिवा श्लोकपश्चार्द्धमार्द्रककुमार आह-सर्वेऽपि प्रावादुका यथावस्थितं स्वदर्शनं प्रादुष्कुर्वन्ति, तत्प्रामाण्याच्च वयमपि स्वदर्शनाविर्भावनं कुर्मः, तथाहि-अप्रासुकेन बीजोदकादिपरिभोगेन कर्मबन्ध एव केवलं न संसारोच्छेद इतीदमस्मदीयं दर्शनम्, एवं व्यवस्थिते काऽत्र परनिन्दा को वाऽऽत्मोत्कर्ष इति ॥ ११ ॥ किं च—'ते अण्णमण्णस्से'त्यादि, 'ते' प्रावादुकाः 'अन्योऽन्यस्य' परस्परेण तु स्वदर्शनप्रतिष्ठाशया परदर्शनं गर्हमाणाः स्वदर्शनगुणानाचक्षते, तुशब्दात्परस्परतो व्याहतमनुष्ठानं चानुतिष्ठन्ति, ते च 'श्रमणा' निर्ग्रन्थादयो 'ब्राह्मणा'द्विजातयः सर्वेऽप्येते स्वकं पक्षं समर्थयन्ति परकीयं च दूषयन्ति । तदेव पश्चार्द्धेन दर्शयति—'स्वत' इति स्वकीये पक्षे स्वाभ्युपगमेऽस्ति पुण्यं तत्कार्यं च स्वर्गापवर्गादिकमस्ति, असतश्च-पराभ्युपगमाच्च नास्ति पुण्यादिकमित्येवं सर्वेऽपि तीर्थिकाः परस्परव्याघातेन प्रवृत्ताः, अतो वयमपि यथावस्थिततत्त्वप्ररूपणतो युक्तिविकलत्वादेकान्तदृष्टिं 'गर्हामो'जुगुप्सामो-न ह्यसावेकान्तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथावस्थिततत्त्वाविर्भावको भवतीति, एवं च व्यवस्थिते तत्त्वस्वरूपं वयमाचक्षाणा न कंचिद्गर्हामः काणकुण्टोदघट्टनादिप्रकारेण, केवलं स्वपरस्वरूपाविर्भावनं कुर्मो, न च वस्तुस्वरूपाविर्भावने परापवादः, तथा चोक्तम्–"नेत्रैर्निरीक्ष्य विलकण्टककीटसर्पान्, सम्यक् पथा व्रजति तान्परिहृत्य सर्वान्। कुज्ञानकुश्रुतिकुमार्गकुदृष्टिदोषान्, सम्यग्विचारयत कोऽत्र परापवादः? ॥१॥" इत्यादि। यदिवैकान्तवादिनामेव–अस्त्येव नास्त्येव नित्यमेवानित्यमेव सामान्यमेव विशेषा एवेत्याद्यभ्युपगमवतामयं–परस्परगर्हारूपो दोषो, नास्माकमनेकान्तवादिनां, सर्वस्यापि सदसदादेः कथञ्चिदभ्युपगमात्। एतदेव श्लोकपश्चार्द्धेन दर्शयति–'स्वतं' इति, स्वद्रव्यक्षेत्रकालभावैरस्ति, तथा 'परतं' इति परद्रव्यादिभिर्नास्तीत्येवं पराभ्युपगमं दूषयन्तो गर्हामोऽन्यानेकान्तवादिनः, तत्स्वरूपनिरूपणतस्तु रागद्वेषविरहान्न किञ्चिद्गर्हाम इति स्थितम् ॥ १२ ॥ एतदेव स्पष्टतरमाह—न कञ्चन श्रमणं ब्राह्मणं वा स्वरूपेण–जुगुप्सिताङ्गावयवोद्घट्टनेन जात्या तल्लिङ्गग्रहणोद्घट्टनेन वा 'अभिधारयामो' गर्हणाबुद्ध्योद्घट्टयामः, केवलं 'स्वदृष्टिमार्गं' तदभ्युपगतं दर्शनं 'प्रादुष्कुर्मः' प्रकाशयामः, तद्यथा–"ब्रह्मा लूनशिरा हरिर्दशि सरुग्व्यालुप्तशिश्नो हरः, सूर्योऽप्युल्लिखितोऽनलोऽप्यखिलभुक् सोमः कलङ्काङ्कितः। स्वर्नाथोऽपि विसंस्थुलः खलु वपुःसंस्थैरुपस्थैः कृतः, सन्मार्गस्खलनाद्भवन्ति विपदः प्रायः प्रभूणामपि ॥ १ ॥"इत्यादि। एतच्च तैरेव स्वागमे पापठ्यते वयं तु श्रोतारः केवलमिति। आर्द्रककुमार एव परपक्षं दूषयित्वा स्वपक्षसाधनार्थं श्लोकपश्चार्द्धेनाह—अयं 'मार्गः' पन्थाः सम्यग्दर्शनादिकः 'कीर्त्तितो' व्यावर्णितः, कैः?–'आर्यैः' सर्वज्ञैस्त्याज्यधर्मदूरवर्तिभिः, किंभूतो धर्मो?–नास्मादुत्तरः–प्रधानो विद्यत इत्यनुत्तरः पूर्वापराव्याहतत्वाद्यथावस्थितजीवादिपदार्थस्वरूपनिरूपणाच्च, ॥३९२॥

१ व्रजत प्र० क्रियाऽभिव्याहारे तप्रत्ययः लुङ्। २ काणकुण्टादि।

किंभूतैरार्यैः?–सन्तश्च ते पुरुषाश्च सत्पुरुषास्तैश्चतुस्त्रिंशदतिशयोपेतैराविर्भूतसमस्तपदार्थाविर्भावकदिव्यज्ञानैः, किंभूतो मार्गो?–'अंजू' व्यक्तः निर्दोषत्वात्प्रकटः ऋजुर्वा वक्रैकान्तपरित्यागादकुटिल इति ॥१३॥ पुनरपि सद्धर्मस्वरूपनिरूपणायाह–'उड्ढं अहे'त्यादि, ऊर्ध्वमधस्तिर्यक्ष्वेवं सर्वास्वपि दिक्षु प्रज्ञापकापेक्षया भावदिगपेक्षया वा तासु ये त्रसा ये च स्थावराः प्राणिनः चशब्दौ स्वगतानेकभेदसंसूचकौ, 'भूतं' सद्भूतं तथ्यं तत्राभिशङ्कया–तथ्यनिर्णयेन प्राणातिपातादिकं पातकं जुगुप्समानो गर्हमाणो वा यदिवा भूताभिशङ्कया प्राण्युपमर्दशङ्कया सर्वसावद्यमनुष्ठानं जुगुप्समानो नैवापरलोकं कञ्चन 'गर्हति' निन्दति 'दुस्सिमं'ति संयमवानिति। तदेवं रागद्वेषवियुक्तस्य वस्तुस्वरूपाविर्भावने न काचिद्गर्हेति, अथ तत्रापि गर्हा भवति न तर्ह्यष्णोऽग्निः शीतमुदकं विषं मारणात्मकमित्येवमादि किञ्चिद्वस्तुस्वरूपमाविर्भावनीयमिति ॥ १४ ॥ स एवं गोशालकमतानुसारी त्रैराशिको निराकृतो पुनरन्येन प्रकारेणाह—

आगंतगारे आरामगारे, समणे उ भीते ण उवेति वासं। दक्खा हु संती बहवे मणुस्सा, ऊणातिरित्ता य लवालवा य ॥ १५ ॥ मेहाविणो सिक्खिय बुद्धिमंता, सुत्तेहि अत्थेहि य णिच्छयण्णा। पुच्छिंसु मा णे अणगार अत्ते, इति संकमाणो ण उवेति तत्थ ॥ १६ ॥ णो कामकिच्चा ण य बालकिच्चा, रायाभिओगेण कुओ भएणं। विरागरेज्ज पसिणं नवावि, सकामकिच्चेणिह आरियाणं ॥ १७ ॥ गंता च तत्था अदुवा अगंता, विरागरेज्जा समियासुपन्ने। अणारिया दंसणओ परित्ता, इति संकमाणो ण उवेति तत्थ ॥१८॥ (सू०)

स विप्रतिपन्नः सन्नार्द्रकमेवमाह—योऽसौ भवत्संबन्धी तीर्थकरः स रागद्वेषभययुक्तः, तथाहि–असावागन्तुकानां–कार्पटिकादीनामगारमागन्तागारं तथाऽऽरामेऽगारमारामागारं तत्रासौ 'श्रमणो' भवत्तीर्थकरः, तुशब्द एवकारार्थे, भीत एवासौ तदपध्वंसनभयात् 'तत्र' आगन्तागारादौ 'न वासमुपैति' न तत्रासनस्थानशयनादिकाः क्रियाः कुरुते। किं तत्र भयकारणमिति चेत्तदाह 'दक्षाः' निपुणाः प्रभूतशास्त्रविशारदाः, हुशब्दो यस्मादर्थे, यस्माद्बहवः सन्ति मनुष्याः तस्मादसौ तद्भीतो न वासं तत्र समुपैति–न तत्र वासमातिष्ठते। किंभूताः?–'न्यूनाः' स्वतोऽपमा हीना जात्याद्यतिरिक्ता वा ताभ्यां पराजितस्य महांश्छायाश्रंश इति। तानेव विशिनष्टि–लपन्तीति लपा–वाचालाः घोषितानेकतर्कविचित्रदण्डकाः तथा अलपा–मौनव्रतिका निष्ठितयोगाः गुडिकादिमुक्ता वा यद्वशादभिधेयविषया वागेव न प्रवर्तते ततस्तद्भयेनासौ युष्मत्तीर्थकृदागन्तागारादौ नैव व्रजतीति ॥ १५ ॥ पुनरपि गोशालक एवाह–'मेहाविणो'इत्यादि, मेधा विद्यते येषां ते मेधाविनो–ग्रहणधारणसमर्थाः, तथाऽऽचार्यादेः समीपे शिक्षां ग्राहिताः शिक्षिताः तथौत्पत्तिक्यादिचतुर्विधबुद्ध्युपेता बुद्धिमन्तः, तथा 'सूत्रे' सूत्रविषये विनिश्चयज्ञाः तथा अर्थविषये च निश्चयज्ञा यथावस्थितसूत्रार्थवेदिन इत्यर्थः। ते चैवंभूताः सूत्रार्थविषयं मा प्रश्नं कार्षुरन्येऽनगारा एके केचनेत्येवमसौ शङ्कमानः–तेषां विभ्यत् 'तत्र' तन्मध्ये उपैति–उपगच्छतीति, ततश्च न ऋजुमार्गः, इति भययुक्तत्वात्तस्य, तथा म्लेच्छविषयं गत्वा न कदाचिद्धर्मदेशनां च करोति, आर्यदेशेऽपि न सर्वत्र अपितु कुत्रचिदेवेत्यतो विषमदृष्टित्वाद्रागद्वेषवत्त्वेसाविति ॥ १६ ॥ एतद्गोशालकमतं परिहर्तुकाम आर्द्रक आह—स हि भगवान्प्रेक्षापूर्वकारितया नाकामकृत्यो भवति, कमनं कामः–इच्छा न कामोऽकामस्तेन कृत्यं–कर्तव्यं यस्यासावकामकृत्यः, स एवंभूतो न भवति, अनिच्छाकारी न भवतीत्यर्थः, यो ह्यप्रेक्षापूर्वकारितया वर्तते ॥३९३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोऽनिष्टमपि स्वपरात्मनोर्निरर्थकमपि कृत्यं कुर्वीत, भगवांस्तु सर्वज्ञः सर्वदर्शी परहितैकरतः कथं स्वपरात्मनोर्निरुपकारकमेवं कुर्यात्, तथा च बालस्येव कृत्यं यस्य स बालकृत्यो, न चासौ बालवदनालोचितकारी, न परानुरोधादापि गौरवाद्धर्मदेशनादिकं विधत्ते अपितु यदि कस्यचिद्भव्यमन्त्वस्योपकाराय तद्व्यापितं भवति ततः प्रवृत्तिर्भवति, नान्यथा, तथा न राजाभियोगेनासौ धर्मदेशनादौ कथञ्चित्प्रवर्तते, ततः कुतस्तस्य भयेन प्रवृत्तिः स्यादित्येवं व्यवस्थिते केनचित्कचित्संशयकृतं प्रश्नं व्यागृणीयाद् यदि तस्योपकारो भवति, उपकारमन्तरेण—'न च' नैव व्यागृणीयाद्, यदिवाऽनुत्तरसुराणां मनःपर्यायज्ञानिनां च द्रव्यमनसैव तन्निर्णयसंभवादतो न व्यागृणीयादित्युच्यते। यदप्युच्यते भवता—यदि वीतरागोऽसौ किमिति धर्मकथां करोतीति चेदित्याशङ्क्याह—'स्वकामकृत्येन' स्वेच्छाचारिकारितयाऽभावपि तीर्थकृन्नामकर्मणः क्षपणाय न यथाकथंचिद्, अतोऽभावग्लानः 'इह' अस्मिन्संसारे आर्यक्षेत्रे वोपकारयोग्ये, आर्याणां सर्वहेयधर्मदूरवर्तिनां तदुपकाराय धर्मदेशनां व्यागृणीयादसाविति ॥ १७ ॥ किंचान्यत्—'गंते'त्यादि, स हि भगवान् परहितैकरतो गत्वापि विनेयासन्नमथवाऽभ्यगत्वा यथा यथा भव्यसत्त्वोपकारो भवति तथा तथा भगवन्तोऽर्हन्तो धर्मदेशनां विदधति, उपकारे सति गत्वाऽपि कथयन्त्यसति तु स्थिता अपि न कथयन्तीत्यतो न तेषां रागद्वेषसंभव इति, केवलमाशुप्रज्ञ—सर्वज्ञः 'समतया' समदृष्टितया चक्रवर्तिद्रमकादिषु पृष्टोऽपृष्टो वा धर्मं व्यागृणीयात् 'जहा पुण्णस्स कत्थइ तहा तुच्छस्स कत्थइ' इति वचनादित्यतो न रागद्वेषसद्भावस्तस्येति। यत्पुनरनार्यादेशमसौ न व्रजति तत्रेदमाह—अनार्याः क्षेत्रभाषाकर्मभिर्बहिष्कृता दर्शनतोऽपि परि—समन्तादिताः—गताः प्रभ्रष्टा इति—यावत्। तदेवमसौ भगवानित्येतत्तेषु सम्यग्दर्शनमात्रमपि कथञ्चिन्न भवतीत्याशङ्कमानस्तत्र न व्रजतीति। यदिवा—अविपरीत-

दर्शनाः—साम्प्रतेक्षिणो दीर्घदर्शिनो न भवन्त्यनार्याः शाक्यबौद्धादयः, ते हि वर्तमानसुखमेवैकमङ्गीकृत्य प्रवर्तन्ते न पारलौकिकमङ्गीकुर्वन्त्यतः सद्धर्मपराङ्मुखेषु तेषु भगवान्न याति, न पुनस्तद्वेषादिवृद्ध्येति। यदप्युच्यते त्वया—'यथाऽनेकशास्त्रविशारदगुडिकासिद्धविद्यासिद्धादितीर्थिकपराभवभयेन न तत्समाजे गच्छती'त्येतदपि बालप्रलपितप्रायं, यतः सर्वज्ञस्य भगवतः समस्तैरपि प्रावादुकैमुखमप्यवलोकयितुं न शक्यते वादस्तु दूरोत्सादित एवेत्यतः कुतस्तत्पराभवः ?, भगवांस्तु केवलालोकेन यत्रैव स्वपरोपकारं पश्यति तत्रैव गत्वाऽपि धर्मदेशनां विधत्त इति ॥ १८ ॥ पुनरन्येन प्रकारेण गोशालक आह—

पन्नं जहा वणिए उदयट्ठी, आयस्स हेउं पगरेति संगं। तऊवमे समणे नायपुत्ते, इहेव मे होति मती विवक्का ॥ १९ ॥ नवं न कुज्जा विहुणे पुराणं, चिच्चाऽमइं ताइ य साह एवं। एतोवया बंभवतित्ति वुत्ता, तस्सोदयट्ठी समणेत्तिबेमि ॥ २० ॥ समारभंते वणिया भूयगामं, परिग्गहं चेव ममायमाणा। ते णातिसंजोगमविप्पहाय, आयस्स हेउं पगरंति संगं ॥२१॥ विन्नेसिणो मेहुणसंपगाढा, ते भोयणट्ठा वणिया वयंति ॥ वयं तु कामेसु अज्झोववन्ना, अणारिया पेमरसेसु गिद्धा ॥२२॥ आरंभगं चेव परिग्गहं च, अविउस्सिया णिस्सिय आयदंडा। तेसिं च से उदए जं वयासी, चउरंतणंताय दुहाय णेह ॥२३॥ णेगंत णवंतिव ओदए पो, वयंति ते दो विगुणोदयंमि। से उदए सातिमणंतपत्ते, तमुदयं साहयइ ताइ णाई ॥ २४॥ अहिंसयं सव्वपयाणकंपी, धम्मे ठियं कम्मविवेगहेउं। तमायदंडेहिं समायरंता, अबोहीए ते पडिरूवमेयं ॥ २५ ॥

यथा वणिक् कश्चिद् 'उदयार्थी' लाभार्थी 'पण्यं' व्यवहारयोग्यं भाण्डं कर्पूरागरुकस्तूरिकाम्बरादिकं गृहीत्वा देशान्तरं गत्वा विक्रीणाति, तथा 'आयस्स' लाभस्य 'हेतोः' कारणान्महाजनसङ्गं विधत्ते, तदुपमोऽयमपि भवत्तीर्थकरः श्रमणो ज्ञातपुत्र इत्येवं 'मे' मम मतिर्भवति, विवक्षा—मीमांसा वेति ॥ १९ ॥ एतदुक्ते गोशालकेनार्द्रक आह—'नवं न कुज्जा'इत्यादि, योऽयं भवता दृष्टान्त प्रदर्शितः स किं सर्वसाधर्म्येणोत देशतः ?, यदि देशतस्ततो न नः क्षतिमावहति, यतो वणिग्वत् यत्रैवोपचयं पश्यति तत्रैव क्रियां व्यापारयति न यथाकथञ्चिदित्येतावता साधर्म्यमस्त्येव, अथ सर्वसाधर्म्येण तत्र युज्यते, यतो भगवान् विदितवेद्यतया सावद्यानुष्ठानरहितो 'नवं' प्रत्यग्रं कर्म न कुर्यात्, तथा 'विधूनयति' अपनयति पुरातनं बद्धवोपग्राहि कर्म बद्धं, तथा त्यक्त्वा 'अमतिं' विमतिं 'त्रायी' भगवान् सर्वस्य परित्राणशीलो, विमतिपरित्यागेन चैवंभूत एव भवतीति भावः, तायी वा मोक्षं प्रति, अयक्षयमयपयचयतयणय गताविति[1]यस्य रूपं, स एव—भगवानेवाह—यथा विमतिपरित्यागेन मोक्षगमनशीलो भवतीत्येतावता च संदर्भेण **ब्रह्मणो**—मोक्षस्य व्रतं ब्रह्मव्रतमित्येतदुक्तं, तस्मिंश्चोक्ते तदर्थे चानुष्ठाने क्रियमाणे तस्योदयस्यार्थी—लाभार्थी श्रमण इति ब्रवीम्यहमिति ॥ २० ॥ न चैवंभूता वणिज इत्येतदार्द्रककुमारो दर्शयितुमाह—ते हि वणिजश्चतुर्दशप्रकारमपि 'भूतग्रामं' जन्तुसमूहं 'समारभन्ते' तदुपमर्दिकाः क्रियाः प्रवर्त्तयन्ति क्रयविक्रयार्थं शकटयानवाहनोष्ट्रमण्डलिकादिभिरनुष्ठानैरिति, तथा 'परिग्रहं' द्विपदचतुष्पदधनधान्यादिकं 'ममीकुर्वन्ति' ममेदमित्येवं व्यवस्थापयन्ति, ते हि वणिजो 'ज्ञातिभिः' स्वजनैः सह यः संयोगस्तम् 'अविप्रहाय' अपरित्यज्य 'आयस्य' लाभस्य 'हेतोः' निमित्तादपरेण सार्द्धं 'सङ्गं' संबन्धं कुर्वन्ति। भगवांस्तु षड्जीवरक्षापरोऽपरिग्रहस्त्यक्तस्वजनपक्षः सर्वत्राप्रतिबद्धो धर्मोऽयमन्वेषयन् गत्वापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मदेशनां विधत्ते, अतो भगवतो वणिग्भिः सार्द्धं न सर्वसाधर्म्यमस्तीति ॥ २३ ॥ पुनरपि वणिजां दोषमुद्भावयन्नाह—'वित्तेसिणो' इत्यादि, वित्तं—द्रव्यं तदन्वेषणं शीलं येषां ते वित्तैषिणः, तथा 'मैथुने' स्त्रीसंपर्के 'संप्रगाढा' अध्युपपन्नाः, तथा ते 'भोजनार्थम्' आहारार्थं वणिज इतश्चेतश्च व्रजन्ति वदन्ति वा। तांस्तु वणिजो वयमेवं ब्रूमो—यतेते कामेष्वध्युपपन्ना—गृद्धाः, अनार्यकर्मकारित्वादनार्या रसेषु च—सातागौरवादिषु गृद्धा—मूर्छिताः, न त्वेवंभूता भगवन्तोऽर्हन्तः, कथं तेषां तैः सह साधर्म्यमिति ?, दूरत एव निरस्तैषा कथेति ॥ २२ ॥ किंचान्यत्—'आरम्भं' सावद्यानुष्ठानं च तथा परिग्रहं च 'अव्युत्सृज्य' अपरित्यज्य तस्मिन्नेवारम्भे क्रयविक्रयपचनपाचनादिके तथा परिग्रहे च—धनधान्यहिरण्यसुवर्णद्विपदचतुष्पदादिके निश्रयेन श्रिता—अवबद्धा निःश्रिता वणिजो भवन्ति, तथाऽऽत्मैव दण्डयतीति दण्डो येषां ते भवन्त्यात्मदण्डा असदाचारप्रवृत्तेरिति, भावोऽपि चैषां वणिजां परिग्रहारम्भवतां स उदयो लाभो यदर्थं ते प्रवृत्ताः यं च लं लाभं वदसि स तेषां 'चतुरन्तः' चतुर्गतिको यः संसारोऽनन्तस्तस्मै—तदर्थं भवतीति, तथा दुःखाय च भवतीति, न चेहासावेकान्तेन तत्प्रवृत्तस्यापि भवतीति ॥२३॥ एतदेव दर्शयितुमाह—'णेगंतिणवंति' इत्यादि, एकान्तेन भवतीत्येकान्तिकः, तथा न, लाभार्थं प्रवृत्तस्य विपर्ययस्यापि दर्शनात्, तथा नाप्यात्यन्तिकः सर्वकालभावी, तत्क्षयदर्शनात्, स तेषां उदयो—लाभोऽनैकान्तिकोऽनात्यन्तिकश्चेत्येवं तद्विदो वदन्ति। तौ च द्वावपि भावौ विगतगुणोदयौ भवतः, एतदुक्तं भवति—किं तेनोदयेन लाभरूपेण योऽनैकान्तिकोऽनात्यन्तिकश्च, यश्चानर्थायेति। यश्च भगवतः 'से' तस्य दिव्यज्ञानप्राप्तिलक्षणः 'उदयो' लाभो यो वा धर्मदेशनावाप्तिनिर्जरालक्षणः स च सादिरनन्तश्च, तमेवंभूतमुदयं प्राप्तो भगवानन्येषामपि तथाभूतमेवोदयं 'साधयति' कथयति श्लाघते वा। किंभूतो भगवान् ?—'तायी

'अयवयपयमयचयतयणय गता' त्रित्यस्य दण्डकधातोर्णिनिप्रत्यये रूपं, मोक्षं प्रति गमनशील इत्यर्थः, त्रायी वा आसन्नभव्यानां त्राणकरणात्, तथा 'ज्ञानी' ज्ञाताः—क्षत्रिया ज्ञातं वा वस्तुजातं विद्यते यस्य स ज्ञाती, विदितसमस्तवेद्य इत्यर्थः। तदेवंभूतेन भगवता तेषां वणिजां निर्विवेकिनां कथं सर्वसाधर्म्यमिति ? ॥ २४ ॥ साम्प्रतं देवकृतसमवसरणपञ्चवलीदेवच्छन्दकसिंहासनाद्युपभोगं कुर्वन्नप्याधाकर्मकृतवसतिनिषेवकसाधुवत्कथं तदनुमतिकृतेन कर्मणाऽसौ न लिप्यत इत्येतद्दोशालकमतमाशङ्क्याह—असौ भगवान् समवसरणाद्युपभोगं कुर्वन्नप्यहिंसकः, स उपभोगं करोति, एतदुक्तं भवति—न हि तत्र भगवतो मनागप्याशंसा प्रतिबन्धो वा विद्यते, समतृणमणिमुक्तालोष्टकाञ्चनतया तदुपभोगं प्रति प्रवृत्तेः, देवानामपि प्रवचनोद्भिभावयिषूणां कथं नु नाम भव्यानां धर्माभिमुखं प्रवृत्तिर्यथा स्यादित्येवमर्थमात्मलाभार्थं च प्रवर्त्तनादतोऽसौ भगवानहिंसकः, तथा सर्वेषां प्रजायन्त इति प्रजा—जन्तवस्तदनुकम्पी च तान्संसारे पर्यटतोऽनुकम्पते भगवान् तच्छीलश्च तमेवंरूपं 'धर्मं' परमार्थभूतं व्यवस्थितं कर्मविवेकहेतुभूतं भवद्विधा आत्मदण्डैः समाचरन्त—आत्मकल्पं कुर्वन्ति वणिगादिभिरुदाहरणैः, एतच्चाबोधेः—अज्ञानस्य प्रतिरूपं वर्तते, एकं तावदिदमज्ञानं यत्स्वतः कुमार्गप्रवर्तनं द्वितीयं चैतत्प्रतिरूपमज्ञानं यद्भगवतामपि जगद्बन्धूनां सर्वातिशयनिधानभूतानामितरैः समतापादनमिति ॥२५॥ साम्प्रतमार्द्रककुमारमपहस्तितगोशालकं ततो भगवदभिमुखं गच्छन्तं दृष्ट्वाऽन्तराले शाक्यपुत्रीया भिक्षव इदमूचुः—

पिन्नागपिंडीमवि विद्ध सूले, केइ पएज्जा पुरिसे इमेत्ति। अलाउयं वावि कुमारएत्ति, स लिप्पती पाणिवहेण अम्हं ॥ २६ ॥ अहवावि विद्धूण मिलक्खु सूले, पिन्नागबुद्धीइ नरं पएज्जा। कुमारगं वावि अलावु-

१ आधाकर्मकृतवसतेर्निषेधो यस्य स आधाकर्मकृतवसतिनिषेधकः।

यंति, न लिप्पइ पाणिवहेण अम्हं ॥ २७ ॥ पुरिसं च विद्धूण कुमारगं वा, सूलंमि केई पए जायतेए। पिन्नाय पिंडं सतिमारुहेत्ता, बुद्धाण तं कप्पति पारणाए ॥ २८ ॥ (सू०)

यदेतद्वणिग्दृष्टान्तदृष्टेन बाह्यमनुष्ठानं दूषितं तच्छोभनं कृतं भवता यतोऽतिफल्गुप्रायं बाह्यमनुष्ठानं संसारमोक्षयोः प्रधानाङ्गम्, अस्मत्सिद्धान्ते चैतदेव व्यावर्ण्यते, इत्येतदार्द्रककुमार मो राजपुत्र! तमवहितः शृणु श्रुत्वा चावधारयेति भणित्वा ते भिक्षुका आन्तरानुष्ठानसमर्थकमात्मीयसिद्धान्ताविर्भावनायेदमाहुः—'पिन्नागे' त्यादि, 'पिण्याकः' खलस्तस्य 'पिण्डिः' भिक्षुकं तदचेतनमपि सत् कश्चित् संभ्रमे म्लेच्छादिविषये केनचिन्नश्यता प्रावरणं खलोपरि प्रक्षिप्तं, तच्च म्लेच्छेनान्वेष्टुं प्रवृत्तेन पुरुषोऽयमिति मत्वा खलपिण्ड्या सह गृहीतं, ततोऽसौ म्लेच्छो वस्त्रवेष्टितां तां खलपिण्डीं पुरुषबुद्ध्या शूले प्रोतां पावके पचेत्, तथा 'अलाबुकं' तुम्बकं कुमारकोऽयमिति मत्वाऽग्नावेव पपाच, स चैवं चित्तस्य दुष्टत्वात्प्राणिवधजनितेन पातकेन लिप्यते अस्मत्सिद्धान्ते, चित्तमूलत्वाच्छुभाशुभबन्धस्येति, एवं तावदकुशलचित्तप्राधान्यादकुर्वन्नपि प्राणातिपातं प्राणिघातफलेन युज्यते ॥ २६ ॥ अमुमेव दृष्टान्तं वैपरीत्येनाह—अथवापि सत्पुरुषं खलबुद्ध्या कश्चिन्म्लेच्छः शूले प्रोतमग्नौ पचेत्, तथा कुमारकं च लाबुकबुध्याऽग्नावेव पचेत्, न चासौ प्राणिवधजनितेन पातकेन लिप्यतेऽकामिति ॥ २७ ॥ किंचान्यत्—'पुरिस' मित्यादि, पुरुषं वा कुमारकं वा विद्ध्वा शूले कश्चित्पचेत् 'जाततेजसि' अग्नावारुह्य खलपिण्डीयमिति मत्वा 'सतीं' शोभनां, तदेतद्बुद्धानामपि 'पारणाय' भोजनाय 'कल्पते' योग्यं भवति, किमुतापरेषाम् ?, एवं सर्वास्ववस्थास्वचिन्तितं—मनसाऽसंकल्पितं कर्म चयं न ग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छत्यसात्सिद्धान्ते, तदुक्तम्–"अविज्ञानोपचितं परिज्ञानोपचितमीर्यापथिकं स्वप्नान्तिकं चेति कर्मोपचयं न याति" ॥ २८ ॥ पुनरपि शाक्य एव दानफलमधिकृत्याह—

सिणायगाणं तु दुवे सहस्से, जे भोयए णियए भिक्खुयाणं । ते पुन्नखंधं सुमहं जिणित्ता, भवंति आरोप्प महंतसत्ता ॥ २९ ॥ अजोगरूवं इह संजयाणं, पावं तु पाणाण पसज्झ काउं । अबोहिए दोण्हवि तं असाहु, वयंति जे यावि पडिस्सुणंति ॥ ३० ॥ उड्ढं अहेयं तिरियं दिसासु, विन्नाय लिंगं तसथावराणं । भूयाभिसंकाइ दुगुंछमाणे, वदे करेज्जा व कुओ विहऽत्थी ? ॥३१॥ पुरिसेत्ति विन्नत्ति न एवमत्थि, अण्णारिए से पुरिसे तहा हु । को संभवो ? पिन्नगपिंडियाए, वायावि एसा वुइया असच्चा ॥ ३२ ॥ वायाभियोगेण जमावहेज्जा, णो तारिसं वायमुदाहरिज्जा । अट्ठाणमेयं वयणं गुणाणं, णो दिक्खिए बूय सुरालमेयं ॥ ३३ ॥ लद्धे अट्ठे अहो एव तुब्भे, जीवाणुभागे सुविचिंतिए व । पुवं समुद्दं अवरं च पुट्ठे, उल्लोइए पाणितले ठिए वा ॥३४॥ जीवाणुभागं सुविचिंतयंता, आहारिया अन्नविहीय सोहिं । न वियागरे छन्नपओपजीवि, एसोऽणुधम्मो इह संजयाणं ॥ ३५॥ सिणायगाणं तु दुवे सहस्से, जे भोयए णियए भिक्खुयाणं । असंजए लोहियपाणि से ऊ, णियच्छति गरिहमिहेव लोए ॥ ३६ ॥

ज्ञातका–बोधिसत्त्वाः, तुशब्दात्पञ्चशिक्षापदिकादिपरिग्रहः, तेषां भिक्षुकाणां सहस्रद्वयं 'निजे' शाक्यपुत्रीये धर्मे व्यवस्थितः कश्चिदुपासकः पचनपाचनाद्यपि कृत्वा भोजयेत् समांसगुडदाडिमेनेष्टेन भोजनेन, ते पुरुषा महासत्त्वाः श्रद्धालवः पुण्यस्कन्धं महान्तं समावर्ज्य तेन च पुण्यस्कन्धेनारोप्याख्या देवा भवन्त्याकाशोपगाः(भाः), सर्वोत्तमां देवगतिं गच्छन्तीत्यर्थः ॥२९॥ तदेवं बुद्धेन दानमूलः शीलमूलश्च धर्मः प्रवेदितः, तद् 'एहि' आगच्छ बौद्धसिद्धान्तं प्रतिपद्यस्वेत्येवं भिक्षुकैरभिहितः सञ्शार्द्रकोऽनाकुलया दृष्ट्या तान्वीक्ष्योवाचेदं वक्ष्यमाणमित्याह—'अजोगरूव'मित्यादि, 'इह' अस्मिन् भवदीये शाक्यमते 'संयतानां' भिक्षूणां यदुक्तं प्राक्तदत्यन्तेनायोग्यरूपम्–अघटमानकं, तथाहि—अहिंसार्थमुत्थितस्य त्रिगुप्तिगुप्तस्य पञ्चसमितिसमितस्य सतः प्रव्रजितस्य सम्यग्ज्ञानपूर्विकां क्रियां कुर्वतो भावशुद्धिः फलवती भवति, तद्विपर्यस्तमतेस्तज्ज्ञानावृतस्य महामोहाकुलीकृतान्तरात्मतया खलपुरुषयोरपि विवेकमजानतः कुतस्त्या भावशुद्धिः ?, अतोऽत्यंतमसाम्प्रतमेतद्बुद्धमतानुसारिणां यत्खलबुद्ध्या पुरुषस्य शूलप्रोतनपचनादिकं, तथा बुद्धस्य पिण्याकबुद्ध्या पिशितभक्षणानुमत्यादिकमिति । एतदेव दर्शयति—प्राणानाम्–इन्द्रियादीनामपगमेन तुशब्दस्यैवकारार्थत्वान्पापमेव कृत्वा रसमातागौरवादिगृद्धास्तदभावं व्यावर्णयन्ति, एतच्च तेषां पापाभावव्यावर्णनम् 'अबोध्यै' अबोधिलाभार्थं तयोर्द्वयोरपि संपद्यते, अतोऽसाध्वेतत् । कयोर्द्वयोरित्याह—ये वदन्ति पिण्याकबुद्ध्या पुरुषपाकेऽपि पातकाभावं, ये च तेभ्यः शृण्वन्ति, एतयोर्द्वयोरपि वर्गयोरसाध्वेतदिति । अपिच—नाज्ञानावृतमूढजने भावशुद्ध्या शुद्धिर्भवति, यदि च स्यात्संसारमोचकादीनामपि तर्हि कर्मविमोक्षः स्यात्, तथा भावशुद्धिमेव केवलामभ्युपगच्छतां भवतां शिरस्तुण्डमुण्डनपिण्डपातादिकं चैत्यकर्मादिकं चानुष्ठानमनर्थकमापद्यते, तस्मान्नैवंविधया भावशुद्ध्या शुद्धिरुपजायत इति स्थितम् ॥ ३० ॥ परपक्षं दूषयित्वाऽऽर्द्रकः स्वपक्षाविर्भावनायाह–ऊर्ध्वमधस्तिर्यक्षु या दिशः प्रज्ञापकादिकास्तासु सर्वास्वपि दिक्षु त्रसानां स्थावराणां च जन्तूनां यत्रसस्थावरत्वेन जीवलिङ्गं–चलनस्पन्दनाङ्कुरोद्भवच्छेदम्लानादिकं तद्विज्ञाय अतो 'भूताभिशङ्कया' जीवोपमर्दोऽत्र भविष्यतीत्येवंबुद्ध्या सर्वमनुष्ठानं जुगुप्समानः–तदुपमर्दं परिहरन् वदेत् कुर्यादप्यतः कुतोऽस्तीह—अस्मिन्नेवंभूतेऽनुष्ठाने क्रियमाणे प्रोच्यमाने वाऽस्मत्पक्षे युष्मदापादितो दोष इति ॥ ३१ ॥ अधुना पिण्याके पुरुषबुद्ध्या असंभवमेव दर्शयितुमाह—'पुरिसे'त्यादि, तस्यां पिण्याकपिण्ड्यां पुरुषोऽयमित्येवमत्यन्तजडस्यापि विज्ञप्तिरेव नास्ति, तस्माद्य एवं वक्ति सोऽत्यन्तं पुरुषस्तथाभ्युपगमेन हुशब्दस्यैवकारार्थत्वेन अनार्य एवासौ यः पुरुषमेव खलोऽयमितिमत्वा हतेऽपि नास्ति दोष इत्येवं वदेत्, तथाहि—कः संभवः पिन्नाकपिण्ड्यां पुरुषबुद्धेरित्यतो वागपीयमीदृगसत्येति सत्त्वोपघातकत्वात्, ततश्च निःशङ्कप्रहार्यनालोचको निर्विवेकतया वध्यते, तस्मात्पिण्याककाष्ठादावपि प्रवर्त्तमानेन जीवोपमर्दभीरुणा साशङ्केन प्रवर्त्तितव्यमिति ॥३२॥ किञ्चान्यत्—वाचाऽभियोगो वागभियोगस्तेनापि 'यद्' यस्मादावहेत्पापं कर्म अतो विवेकी भाषागुणदोषज्ञो न तादृशीं भाषामुदाहरेत्–नाभिदध्याद्, यत एवं ततोऽस्थानमेतद्वचनं गुणानां, न हि प्रव्रजितो यथावस्थितार्थाभिधायी एतद् 'उदारं' सुष्ठु परिस्थूरं निःसारं निरुपपत्तिकं वचनं ब्रूयात्, तद्यथा–पिण्याकोऽपि पुरुषः पुरुषोऽपि पिण्याकः, तथाऽलाबुकमेव बालको बालक एव वाऽलाबुकमिति ॥३३॥ साम्प्रतमार्द्रककुमार एव तं भिक्षुकं युक्तिपराजितं सन्तं सोल्लुण्ठं विभणिषुराह—'लद्धे'इत्यादि, अहो युष्माभिरथ–अनन्तरं एवंभूताभ्युपगमे सति लब्धोऽर्थो–विज्ञानं यथावस्थितं तत्त्वमिति, तथाऽवगतः सुचिन्तितो भवद्भिर्जीवानामनुभागः–कर्मविपाकस्तत्पीडेति, तथैवंभूतेन विज्ञानेन भवतां यशः पूर्वसमुद्रमपरं च स्पृष्टं, गतमित्यर्थः, तथा भवद्भिरेवंविधविज्ञानावलोकनेनावलोकितः पाणितलस्थ इवायं लोक इति अहो! भवतां विज्ञानातिशयो यदुत–भवन्तः पिण्याकपुरुषयोर्बालालाबुकयोर्वा विशेषानभिज्ञतया पापस्य कर्मणो यथैतद्भावाभावं प्राकल्पितवन्त इति ॥ ३४ ॥ तदेवं परपक्षं दूषयित्वा स्वपक्षस्थापनायाह—मौनीन्द्रशासनप्रतिपन्नाः सर्वज्ञोक्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मार्गानुसारिणो जीवानामनुभागम्—अवस्थाविशेषं तदुपमर्दनं पीडां वा सुष्ठु 'विचिन्त्यन्तः' पर्यालोचयन्तोऽनविधौ शुद्धिम् 'आहृतवन्तः' स्वीकृतवन्तो द्विचत्वारिंशदोषरहितेन शुद्धेनाहारेणाहारं कृतवन्तो न तु यथा भवतां पिशितादापि पात्रपतितं न दोषायेति । तथा 'छन्नपदोपजीवी' मातृस्थानोपजीवी सन् न व्यागृणीयाद् 'एषः' अनन्तरोक्तोऽनु—पश्चाद्धर्मोऽनुधर्मस्तीर्थकरानुष्ठानादनन्तरं भवतीत्यनुना विशिष्यते, 'इह' अस्मिन् जगति प्रवचने वा सम्यग्यतानां संयतानां—सत्साधूनां, न तु पुनरेवंविधो भिक्षूणामिति । यच्च भवद्भिरोदनादेरपि प्राण्यङ्गसमानतया हेतुभूतया मांसादिसादृश्यं चोद्यते तदविज्ञाय लोकतीर्थान्तरीयमतं, तथाहि—प्राण्यङ्गत्वे तुल्येऽपि किञ्चिन्मांसं किंचिच्चामांसमित्येवं व्यवह्रियते, तद्यथा—गोक्षीररुधिरादेर्भक्ष्याभक्ष्यव्यवस्थितिः, तथा समानेऽपि स्त्रीत्वे भार्यास्वसृदौ गम्यागम्यव्यवस्थितिरिति । तथा शुष्कतर्कदृष्ट्या योऽयं प्राण्यङ्गत्वादिति हेतुर्भवतोपन्यस्यते तद्यथा—'भक्षणीयं भवेन्मांसं, प्राण्यङ्गत्वेन हेतुना । ओदनादिवदित्येवं, कश्चिदाहातितार्किकः ॥ १ ॥' सोऽसिद्धानैकान्तिकविरुद्धदोषदुष्टत्वादपकर्णनीयः, तथाहि—निरंशत्वाद्वस्तुनस्तदेव मांसं तदेव च प्राण्यङ्गमिति प्रतिज्ञार्थैकदेशासिद्धः, तद्यथा—नित्यः शब्दो नित्यत्वाद्, अथ भिन्नं प्राण्यङ्गं ततः सुतरामसिद्धो, व्यधिकरणत्वाद्, यथा देवदत्तस्य गृहं काकस्य कार्ष्ण्यात्, तथाऽनैकान्तिकोऽपि स्वादिमांसस्याभक्ष्यत्वात्, अथ तदपि क्वचित्कदाचित्केषाञ्चिद्भक्ष्यमिति चेदेवं च सत्यस्थ्यादेरभक्ष्यत्वादनैकान्तिकत्वं, तथा विरुद्धाव्यभिचार्यपि, यथाऽयं हेतुर्मांसस्य भक्ष्यत्वं साधयत्येवं बुद्धास्थ्नामपूज्यत्वमपि । तथा लोकविरोधिनी चेयं प्रतिज्ञा, मांसौदनयोरसाम्याद्दृष्टान्तविरोधश्चेत्येवं व्यवस्थिते यदुक्तं प्राग् यथा बुद्धानामपि पारणाय कल्पत एतदिति, तदसाध्विति स्थितम् ॥ ३५ ॥ अन्यदपि भिक्षुकोक्तमार्द्रककुमारोऽनूद्य दूषयितुमाह—'सिणायगाणं तु' इत्यादि, 'स्नातकानां' बोधिसत्त्वकल्पानां भिक्षूणां नित्यं यः सहस्रद्वयं भोजयेदित्युक्तं प्राक् तदूषयति—असंयतः सन् रुधिराक्लिन्नपाणिरनार्य इव 'गर्हां' निन्दां जुगुप्सापदवीं साधुजनानामिहलोक एव निश्चयेन गच्छति परलोके चानार्यगम्यां गतिं यातीति ॥ ३६ ॥ एवं तावत्सावद्यानुष्ठानानुमन्तॄणामपात्रभूतानां यदानं तत्कर्मबन्धायेत्युक्तं, किंचान्यत्—

थूलं उरब्भं इह मारियाणं, उद्दिट्ठभत्तं च पगप्पएत्ता । तं लोणतेल्लेण उवक्खडेत्ता, सपिप्पलीयं पगरंति मंसं ॥ ३७ ॥ तं भुंजमाणा पिसितं पभूतं, णो उवलिप्पामो वयं रएणं । इच्चेवमाहंसु अणज्जधम्मा, अणारिया बाल रसेसु गिद्धा ॥ ३८ ॥ जे यावि भुंजंति तहप्पगारं, सेवंति ते पावमजाणमाणा । मणं न एयं कुमला करेंती, वायावि एसा बुइया उ मिच्छा ॥ ३९ ॥ सव्वेसि जीवाण दयट्ठयाए, सावज्जदोसं परिवज्जयंता । तस्संकिणो इसिणो नायपुत्ता, उद्दिट्ठभत्तं परिवज्जयंति ॥४०॥ भूयाभिसंकाए दुगुंछमाणा, सव्वेसि पाणाण निहाय दंडं । तम्हा ण भुंजंति तहप्पगारं, एसोऽणुधम्मो इह संजयाणं ॥४१॥ निग्गंथधम्मंमि इमं समाहिं, अस्सिं सुठिच्चा अणिहे चरेज्जा । बुद्धे मुणी सीलगुणोववेए, अचक्खुतं(ओ) पाउणती सिलोगं ॥४२॥

आर्द्रकुमार एव तन्मतमाविष्कुर्वन्निदमाह, 'स्थूलं' बृहत्कायमुपचितमांसशोणितमुरभ्रम्—ऊरणकमिह—शाक्यशासने भिक्षुकसंघोद्देशेन 'व्यापाद्य' घातयित्वा तथोद्दिष्टभक्तं च प्रकल्पयित्वा विकर्त्य वा तमुरभ्रं तन्मांसं च लवणतैलाभ्यामुपस्कृत्य पाचयित्वा सपिप्पलीकमपरसंस्कारकद्रव्यसमन्वितं प्रकर्षेण भक्षणयोग्यं मांसं कुर्वन्तीति ॥ ३७ ॥ संस्कृत्य च यत्कुर्वन्ति तद्दर्शयितुमाह—'तं भुंजमाणा' इत्यादि, 'तत्' पिशितं शुक्रशोणितसंभूतमनार्या इव भुञ्जाना अपि प्रभूतं तद्गतजन्तु—पापेन कर्मणा न वयमुपलिप्यामह इत्येवं धार्ष्ट्योपेताः प्रोचुः अनार्याणामिव धर्मः—स्वभावो येषां ते तथा अनार्यकर्मकारित्वादनार्या बाला इव बाला विवेकरहितत्वाद्रसेषु च—मांसादिकेषु 'गृद्धा' अध्युपपन्नाः ॥ ३८ ॥ इत्येतच्च तेषां महतेऽनर्थायेति दर्शयति—ये चापि रसगौरवगृद्धाः शाक्योपदेशवर्त्तिनस्तथाप्रकारं स्थूलोरभ्रसंभूतं घृतलवणमरिचादिसंस्कृतं पिशितं 'भुञ्जते' अश्नन्ति तेऽनार्याः 'पापं' कल्मषमजानाना निर्विवेकिनः 'सेवन्ते' आददते, तथा चोक्तम्—"हिंसामूलममेध्यमास्पदमलं ध्यानस्य रौद्रस्य यद्बीभत्सं रुधिराविलं कृमिगृहं दुर्गंधि पूयादिम् । शुक्रासृक्प्रभवं नितान्तमलिनं सद्भिः सदा निन्दितं, को भुङ्क्ते नरकाय राक्षससमो मांसं तदात्मद्रुहः ? ॥१॥" अपिच—"मां स भक्षयिताऽमुत्र, यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं, प्रवदन्ति मनीषिणः ॥२॥" तथा । "योऽत्ति यस्य च तन्मांसमुभयोः पश्यतान्तरम् । एकस्य क्षणिका तृप्तिरन्यः प्राणैर्वियुज्यते ॥३॥" (ग्रन्थाग्रं १२०००) तदेवं महादोषं मांसादनमिति मत्वा यद्विधेयं तदर्शयति—तदेवंभूतं मांसादनाभिलाषरूपं मनः—अन्तःकरणं 'कुशला' निपुणा मांसाशित्वविपाकवेदिनस्तन्निवृत्तिगुणाभिज्ञाश्च न कुर्वन्ति, तदभिलाषात् मनो निवर्त्तयन्तीत्यर्थः, आस्तां तावद्भक्षणं, वाग्व्येषा यथा 'न मांसभक्षणे दोष' इत्यादिका भारत्यप्यभिहिता—उक्ता मिथ्या, तुशब्दान्मनोऽपि तदनुमत्यादौ न विधेयमिति, तन्निवृत्तौ चेहैवानुपमा श्लाघाऽमुत्र च स्वर्गापवर्गगमनमिति, तथा चोक्तम्—"श्रुत्वा दुःखपरम्परामतिघृणां मांसाशिनां दुर्गतिं, ये कुर्वन्ति शुभोदयेन विरतिं मांसादनस्वादगः । मदीर्घायुरदूषितं गदरुजा संभाव्य यास्यन्ति ते, मर्त्येषूद्भटभोगधर्ममतिषु स्वर्गापवर्गेषु च ॥ २ ॥" इत्यादि ॥ ३९ ॥ न केवलं मांसादनमेव परिहार्यम्, अन्यदपि मुमुक्षूणां परिहर्तव्यमिति दर्शयितुमाह—'सव्वेसि'मि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यादि, सर्वेषां जीवानां प्राणार्थिनां, न केवलं पञ्चेन्द्रियाणामेवेति सर्वग्रहणं, 'दयार्थतया' दयानिमित्तं सावद्यमारम्भं महानयं दोष इत्येवं मत्वा तं परिवर्जयन्तः साधवस्तच्छंकिनो-दोषशङ्किनः 'ऋषयो' महामुनयो 'ज्ञातपुत्रीयाः' श्रीमन्महावीरवर्द्धमानशिष्याः 'उद्दिष्टं' दानाय परिकल्पितं यद्भक्तपानादिकं तत्परिवर्जयन्ति ॥ ४० ॥ किञ्च—'भूतानां' जीवानां उपमर्दशङ्कया सावद्यमनुष्ठानं 'जुगुप्समानाः' परिहरन्तः, तथा सर्वेषां प्राणिनां दण्डयतीति दण्डः-समुपतापस्तं 'निधाय' परित्यज्य सम्यगुत्थानेनोत्थिताः सत्साधवो-यतयस्ततो न भुञ्जते तथाप्रकारमाहारमशुद्धजातीयम् एषोऽनुधर्मः 'इह' अस्मिन् प्रवचने 'संयतानां' यतीनां, तीर्थकराचरणादनु-पश्चाच्चर्यत इत्यनुना विशेष्यते, यदिवाऽणुरिति स्तोकेनाप्यतिचारेण बाध्यते शिरीषपुष्पमिव सुकुमार इत्यतोऽणुना विशेष्य इति ॥४१॥ किंचान्यत्—'णिग्गंथधम्म'मित्यादि, नास्मिन्मौनीन्द्रधर्मे बाह्याभ्यन्तररूपो ग्रन्थोऽस्तीति निर्ग्रन्थः स चासौ धर्मश्च निर्ग्रन्थधर्मः स च श्रुतचारित्राख्यः क्षान्त्यादिको वा सर्वज्ञोक्तस्तस्मिन्नेवंभूते धर्मे व्यवस्थितः 'इमं' पूर्वोक्तं समाधिमनुप्राप्तः अस्मिंश्चाशुद्धाहारपरिहाररूपे समाधौ सुष्ठु—अतिशयेन स्थित्वा 'अनिहः' अमायोऽथवा निहन्यत इति निहो न निहोऽनिहः-परीषहैरपीडितो यदिवा 'स्निह वंधने' अस्निह इति स्नेहरूपबन्धनरहितः संयमानुष्ठानं चरेत्, तथा बुद्धोऽवगततत्त्वो 'मुनिः' कालत्रयवेदी 'शीलेन' क्रोधाद्युपशमरूपेण 'गुणैश्च' मूलोत्तरगुणभूतैरुपपेतो-युक्त इत्येवं-गुणकलितोऽत्यर्थतां(तः)-सर्वगुणातिशायिनीं सर्वद्वन्द्वोपरमरूपां संतोषात्मिकां 'श्लाघां' प्रशंसां लोके लोकोत्तरे वाऽऽप्नोति, तथा चोक्तम्—"राजानं तृणतुल्यमेव मनुते शक्रेऽपि नैवादरो, वित्तोपार्जनरक्षणव्ययकृताः प्राप्नोति नो वेदनाः । संसारान्तरवर्त्यपीह लभते शं मुक्तवन्निर्भयः, संतोषात्पुरुषोऽमृतत्वमचिराद्यायात्सुरेन्द्रार्चितः ॥१॥"इत्यादि ॥ ४२ ॥ तदेवमार्द्रककुमारं निराकृतगो-

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥४००॥

शालकाजीवकबौद्धमतमभिसमीक्ष्य साम्प्रतं द्विजातयः प्रोचुः, तद्यथा-भो आर्द्रककुमार! शोभनमकारि भवता यदेते वेदबाह्ये द्वे अपि मते निरस्ते, तत्साम्प्रतमेतदप्यार्हतं वेदबाह्यमेवातस्तदपि नाश्रयणार्हं भवद्विधानां, तथाहि-भवान् क्षत्रियवरः, क्षत्रियाणां च सर्ववर्णोत्तमा ब्राह्मणा एवोपास्या न शूद्राः, अतो यागादिविधिना ब्राह्मणसेवैव युक्तिमतीत्येतत्प्रतिपादनायाह—

सिणायगाणं तु दुवे सहस्से, जे भोयए णियए माहणाणं । ते पुन्नखंधे सुमहऽज्जणित्ता, भवंति देवा इति वेयवाओ ॥ ४३ ॥ सिणायगाणं तु दुवे सहस्से, जे भोयए णियए कुलालयाणं । से गच्छति लोलुवसंपगाढे, तिव्वाभितावी णरगाभिसेवी ॥ ४४ ॥ दयावरं धम्म दुगुंछमाणा, वहावहं धम्म पसंसमाणा । एगंपि जे भोययती असीलं, णिवो णिसं जाति कुओ सुरेहिं ? ॥ ४५ ॥ दुहओवि धम्मंमि समुट्ठियामो, अस्सिं सुट्ठिच्चा तह एसकालं । आयारसीले बुइएह नाणी, ण संपरायंमि विसेसमत्थि ॥ ४६ ॥

तुशब्दो विशेषणार्थः, षट्कर्माभिरता वेदाध्यापकाः शौचाचारपरतया नित्यं स्नायिनो ब्रह्मचारिणः स्नातकास्तेषां सहस्रद्वयं नित्यं ये भोजयेयुः कामिकाहारेण ते समुपार्जितपुण्यस्कन्धाः सन्तो देवाः स्वर्गनिवासिनो भवन्तीत्येवंभूतो वेदवाद इति ॥ ४३ ॥ अधुनाऽऽर्द्रककुमार एतद्दूषयितुमाह—'सिणायगाणं तु'इत्यादि, स्नातकानां सहस्रद्वयमपि नित्यं ये भोजयन्ति, किंभूतानां ?-कुलानि-गृहाण्यामिषान्वेषणार्थिनो नित्यं येऽटन्ति ते कुलाटाः—मार्जाराः कुलाटा इव कुलाटा ब्राह्मणाः, यदिवा—कुलानि-क्षत्रियादिगृहाणि तानि नित्यं पिण्डपातान्वेषिणां परतर्कुकाणामालयो येषां ते कुलालयास्तेषां-निन्द्यजीविकोपगतानामेवंभूतानां स्नातकानां यः सहस्रद्वयं भोजयेत्सोऽसत्पात्रनिक्षिप्तदानो गच्छति बहुवेदनासु गतिषु । किंभूतः सन् ?-'लोलुपैः' आमिषगृद्धै

६ आर्द्रकाध्ययन.

॥४००॥

रसमातागौरवाद्युपपन्नैः जिह्वेन्द्रियवशगैः संप्रगाढो-व्याप्तो, यदिवा किंभूते नरके याति ?-लोलुपैः—आमिषगृद्धुभिरसुमद्भिर्व्याप्तो यो नरकस्तस्मिन्निति, किंभूतश्चासौ दाता नरकाभिसेवी भवति तद्दर्शयति-तीव्रः-असह्यो योऽभितापः-ऋकचपाटनकुम्भीपाकतप्तत्रपुपानशाल्मल्यालिङ्गनादिरूपः स विद्यते यस्यासौ स तीव्राभितापीत्येवंभूतवेदनाभितप्तस्त्रयस्त्रिंशत्सागरोपमाणि यावद्प्रतिष्ठाननरकाधिवासी भवतीति ॥ ४४ ॥ अपिच—दया-प्राणिषु कृपा तया वरः-प्रधानो यो धर्मस्तमेवंभूतं धर्मं 'जुगुप्समानो' निन्दन् तथा वधं-प्राण्युपमर्दमावहतीति वधावहस्तं तथाभूतं धर्मं 'प्रशंसन्' स्तुवन् एकमप्यशीलं-निश्शीलं निर्व्रतं षड्जीवकायोपमर्देन यो भोजयेत्, किं पुनः प्रभूतान् ?, नृपो राजन्यो वा यः कश्चिन्मूढमतिर्धार्मिकं आत्मानं मन्यमानः, स वराको निशेव नित्यान्धकारत्वान्निशा-नरकभूमिस्तां याति, कुतस्तस्यास्तेरश्चेष्वपि-अधमदेवेष्वपि प्राप्तिरिति?। तथा कर्मवशादसुमतां विचित्रजातिगमनाज्जातेरशाश्वतत्वमतो न जातिमदो विधेय इति । यदपि कैश्चिदुच्यते-यथा 'ब्राह्मणा ब्रह्मणो मुखाद्विनिर्गता बाहुभ्यां क्षत्रिया ऊरुभ्यां वैश्याः पद्भ्यां शूद्राः' इत्येतदप्यप्रमाणत्वादतिफल्गुप्रायं, तदभ्युपगमे च न विशेषो वर्णानां स्याद्, एकस्मात्प्रसूतेर्वृक्षशाखाप्रतिशाखाप्रभूतपनसोदुम्बरादिफलवद्, ब्रह्मणो वा मुखादेरवयवानां चातुर्वर्ण्यावाप्तिः स्याद्, न चैतदिष्यते भवद्भिः, तथा यदि ब्राह्मणादीनां ब्रह्मणो मुखादेरुद्भवः साम्प्रतं किं न जायते?, अथ युगादावेतदिति एवं च सति दृष्टहानिरदृष्टकल्पना स्यादिति । तथा यदपि कैश्चिदभ्यधायि सर्वज्ञनिषेधावसरे, तद्यथा-सर्वज्ञरहितोऽतीतः कालः कालत्वाद्वर्तमानकालवत्, एवं च सत्येतदपि शक्यते वक्तुं यथा-नातीतः कालो ब्रह्ममुखादिविनिर्गतचातुर्वर्ण्यसमन्वितः कालत्वाद्वर्तमानकालवद्, भवति च विशेषे पक्षीकृते सामान्यं हेतुरित्यतः प्रतिज्ञार्थैकदेशासिद्धता नाशङ्कनीयेति । जातेश्चानित्यत्वं युष्मत्सिद्धान्त एवाभिहितं, तद्यथा—'शु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गालो वै एष जायते यः सपुरीषो दह्यत'इत्यादिना, तथा 'सद्यः पतति मांसेन, लाक्षया लवणेन च । त्र्यहेन शूद्रीभवति, ब्राह्मणः क्षीरविक्रयी ॥ १ ॥'इत्यादि, परलोके चावश्यंभावी जातिपातः, यत उक्तम्—"कायिकैः कर्मणां दोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां, मानसैरन्त्यजातिताम् ॥ १ ॥"इत्यादि, गुणैरप्येवंविधैर्न ब्राह्मणत्वं युज्यते, तद्यथा—"पट् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः ॥ १ ॥"इत्यादि, वेदोक्तत्वान्नायं दोष इति चेत् नन्विदमभिहितमेव—'न हिंस्यात्सर्वभूतानी'त्यतः पूर्वोत्तरविरोधः, तथा "आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ १ ॥" तथा 'शूद्रं हत्वा प्राणायामं जपेत् अपहसितं वा कुर्यात् यत्किञ्चिद्वा दद्यात्', तथा 'अनस्थिजन्तूनां शकटभरं मारयित्वा ब्राह्मणं भोजयेद्'इत्येवमादिका देशना विद्वज्जनमनांसि न रञ्जयतीत्यतोऽत्यर्थमसमञ्जसमिव लक्ष्यते युष्मद्दर्शनमिति । तदेवमार्द्रककुमारं निराकृतब्राह्मणविवादं भगवदन्तिकं गच्छन्तं दृष्ट्वा एकदण्डिनोऽन्तराले एवोचुः, तद्यथा—भो आर्द्रककुमार ! शोभनं कृतं भवता यदेते सर्वारम्भप्रवृत्ता गृहस्थाः शब्दादिविषयपरायणाः पिशिताशनेन राक्षसकल्पा द्विजातयो निराकृताः, तत्साम्प्रतमसत्सिद्धान्तं शृणु श्रुत्वा चावधारय, तद्यथा—सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकस्तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि, तथा चैतन्यं पुरुषस्य स्वरूपमित्येतच्चार्हतैरप्याश्रितम्, अतः पञ्चविंशतितत्त्वपरिज्ञानादेव मोक्षावाप्तिरित्यतोऽसत्सिद्धान्त एव श्रेयान्नापर इति ॥ ४५ ॥ तथा न युष्मत्सिद्धान्तोऽतिदूरेण भिद्यत इत्येतद्दर्शयितुमाह—'दुहओऽवी'त्यादि, योऽयमसद्धर्मो भवदीयश्चार्हतः स उभयरूपोऽपि कथञ्चित्समानः, तथाहि—युष्माकमपि जीवास्तित्वे सति पुण्यपापबन्धमोक्षसद्भावो न लोकायतिकानामिव तदभावे प्रवृत्तिः नापि बौद्धानामिव सर्वाधारभूतस्यान्तरात्मन एवाभावः, तथाऽस्माकमपि पञ्च यमाः अहिंसादयो भवतां च त एव पञ्च महाव्रतरूपाः, तथेन्द्रियनोइन्द्रियनियमोऽप्यावयोस्तुल्य एव, तदेवमुभयस्मिन्नपि धर्मे बहुसमाने सम्यगुत्थानोत्थिता यूयं वयं च तस्माद्धर्मे सुष्ठु स्थिताः पूर्वस्मिन् काले वर्तमाने एष्ये च यथागृहीतप्रतिज्ञानिर्वोढारो, न पुनरन्ये, यथा व्रतेश्वरत्यागविधानेन प्रव्रज्यां मुक्तवन्तो मुञ्चन्ति मोक्षन्ति चेति, तथाऽऽचारप्रधानं शीलमुक्तं यमनियमलक्षणं न फल्गु कल्ककुहकाजीवनरूपम् अथानन्तरं ज्ञानं च मोक्षाङ्गतयाऽभिहितं, तच्च श्रुतज्ञानं केवलाख्यं च यथास्वमावयोर्दर्शने प्रसिद्धं, तथा संपर्व्यन्ते—स्वकर्मभिर्भ्राम्यन्ते प्राणिनो यस्मिन्स संपरायः—संसारस्तस्मिन्नावयोर्न विशेषोऽस्ति, तथाहि—यथा भवतां कारणे कार्यं नैकान्तेनासदुत्पद्यते अस्माकमपि तथैव, द्रव्यात्मतया नित्यत्वं भवद्भिरप्याश्रितमेव, तथोत्पादविनाशावपि युष्मदभिप्रेतावाविर्भावतिरोभावाश्रयादस्माकमपीति ॥ ४६ ॥ पुनरपि त एवैकदण्डिनः सांसारिकजीवपदार्थसाम्यापादनायाहुः—

अवत्तरूवं पुरिसं महंतं, सणातणं अक्खयमव्वयं च । सव्वेसु भूतेसुवि सव्वतो से, चंदो व ताराहिं समत्तरूवे ॥ ४७ ॥ एवं ण मिज्झंति ण संसरंती, ण माहणा खत्तिय वेस पेसा । कीडा य पक्खी य सरीसिवा य, नरा य सव्वे तह देवलोगा ॥ ४८ ॥

पुरि शयनात्पुरुषो—जीवस्तं यथा भवन्तोऽभ्युपगतवन्तस्तथा वयमपि, तमेव विशिनष्टि—अमूर्त्तत्वादव्यक्तं रूपं—स्वरूपमस्यासावव्यक्तरूपः तं, करचरणशिरोग्रीवाद्यवयवतया स्वतोऽनवस्थानात्, तथा 'महान्तं' लोकव्यापिनं तथा 'सनातनं' शाश्वतं द्रव्यार्थतया नित्यं, नानाविधगतिसंभवेऽपि चैतन्यलक्षणात्मस्वरूपस्याप्रच्युतेः, तथा 'अक्षयं' केनचित्प्रदेशानां खण्डशः कर्तुमशक्यत्वात्, तथा 'अव्ययम्' अनन्तेनापि कालेनैकस्यापि तत्प्रदेशस्य व्ययाभावात्, तथा सर्वेष्वपि भूतेषु कायाकारपरिणतेषु प्रतिशरीरं सर्वतः सामस्त्याच्चिरंशत्वादसावात्मा संभवति, क इव ?—'चन्द्र इव' शशीव 'ताराभिः' अश्विन्यादिभिर्नक्षत्रैः यथा 'समस्तरूपः' संपूर्णः संबन्धमुपयाति एवमसावपि आत्मा प्रत्येकं शरीरैः सह संपूर्णः संबन्धमुपयाति । तदेवमेकदण्डिभिर्दर्शनसाम्यापादनेन सामवादपूर्वकं स्वदर्शनारोपणार्थमार्द्रककुमारोऽभिहितो, यत्रैतानि संपूर्णानि—निरूपचरितानि पूर्वोक्तानि विशेषणानि धर्मसंसारयोर्विद्यन्ते स एव पक्षः सश्रुतिकेन समाश्रयितव्यो भवति । एतानि चास्मदीय एव दर्शने यथोक्तानि सन्ति, नाऽऽर्हते, अतो भवताऽप्यस्मद्दर्शनमेवाभ्युपगन्तव्यमिति ॥४७॥ तदेवमभिहितः सन्नार्द्रककुमारस्तदुत्तरदानायाह—'एव'मित्यादि, यदिवा प्राक्तनः श्लोकः 'अवत्तरूव'मित्यादिको वेदान्तवाद्यात्माद्वैतमतेन व्याख्यातव्यः, तथाहि—ते एकमेवाव्यक्तं पुरुषम्—आत्मानं महान्तमाकाशमिव सर्वव्यापिनं सनातनम् अनन्तमक्षयमव्ययं सर्वेष्वपि भूतेषु—चेतनाचेतनेषु सर्वतः—सर्वात्मतयाऽसौ स्थित इत्येवमभ्युपगतवन्तो, यथा सर्वास्वपि तारास्वेक एव चन्द्रः संबन्धमुपयात्येवमसावपीति । अस्य चोत्तरदानायाह—'एव'मित्यादि, 'एव'मिति यथा भवतां दर्शने एकान्तेनैव नित्योऽविकार्यात्माऽभ्युपगम्यते इत्येवं पदार्थाः सर्वेऽपि नित्याः, तथा च सति कुतो बन्धमोक्षसद्भावः ?, बन्धाभावाच्च न नारकतिर्यङ्नरामरलक्षणश्चतुर्गतिकः संसारः, मोक्षाभावाच्च निरर्थकं व्रतग्रहणं भवतां पञ्चरात्रोपदिष्टयमनियमप्रतिपत्तिश्चेति, एवं च यदुच्यते भवता—यथा 'आवयोस्तुल्यो धर्म' इति, तदयुक्तमुक्तं, तथा संसारान्तर्गतानां च पदार्थानां न साम्यं, तथाहि—भवतां द्रव्यैकत्ववादिनां सर्वेषां प्रधानादभिन्नत्वात्कारणमेवास्ति, कार्यं च कारणाभिन्नत्वा-

१ वक्ष्यमाणानां विशेषणानां सापेक्षमभ्युपगमापेक्षया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्सर्वात्मना तत्र विद्यते, अस्माकं च द्रव्यपर्यायोभयवादिनां कारणे कार्यं द्रव्यात्मतया विद्यते न पर्यायात्मकतया, अपिच—अस्माकमुत्पादव्ययध्रौव्ययुक्तमेव सदित्युच्यते, भवतां तु ध्रौव्ययुक्तमेव सदिति, यावप्याविर्भावतिरोभावौ भवतोच्येते तावपि नोत्पादविनाशावन्तरेण भवितुमुत्सहेते, तदेवमैहिकामुष्मिकचिन्तायामावयोर्न कथञ्चित्साम्यं। किंच—सर्वव्यापित्वे सत्यात्मनामविकारित्वे चात्माद्वैते चाभ्युपगम्यमाने नारकतिर्यङ्नरामरभेदेन बालकुमारसुभगदुर्भगाढ्यदरिद्रादिभेदेन वा न मीयेरन्—न परिच्छिद्येरन्, नापि स्वकर्मचोदिता नानागतिषु संसरन्ति, सर्वव्यापित्वादेकत्वाद्वा, तथा न ब्राह्मणा न क्षत्रिया न वैश्या न प्रेष्या—न शूद्रा नापि कीटपक्षिसरीसृपाश्च भवेयुः, तथा नराश्च सर्वेऽपि देवलोकाश्चेत्येवं नानागतिभेदेन न भिद्येरन्, अतो न सर्वव्यापी आत्मा, नाप्यात्माद्वैतवादो ज्यायान्, यतः प्रत्येकं सुखदुःखानुभवः समुपलभ्यते, तथा शरीरव्यतिरिक्तपर्यन्तमात्र एवात्मा, तत्रैव तद्गुणविज्ञानोपलब्धेरिति स्थितम्, तदेवं व्यवस्थिते युष्मदागमो यथार्थाभिधायी न भवति, असर्वज्ञप्रणीतत्वाद्, असर्वज्ञप्रणीतत्वं चैकान्तपक्षसमाश्रयणादिति ॥ ४९ ॥ एवमसर्वज्ञस्य मार्गोद्भावने दोषमाविर्भावयन्नाह—

लोयं अयाणित्तिह केवलेणं, कहंति जे धम्ममजाणमाणा। णासंति अप्पाण परं च णट्ठा, संसार घोरंमि अणोरपारे ॥ ४९ ॥ लोयं विजाणंतिह केवलेणं, पुन्नेण नाणेण समाहिजुत्ता। धम्मं समत्तं च कहंति जे उ, तारंति अप्पाण परं च तिन्ना ॥ ५० ॥

'लोकं' चतुर्दशरज्ज्वात्मकं चराचरं वा लोकमज्ञात्वा केवलेन दिव्यज्ञानावभासेन 'इह' अस्मिन् जगति ये तीर्थिका 'अजानाना' अविद्वांसो 'धर्मं' दुर्गतिगमनमार्गस्वर्गलाभूतं 'कथयन्ति' प्रतिपादयन्ति ते स्वतो नष्टा अपरानपि नाशयन्ति, क ?—'घोरे' भयानके संसारसागरे 'अणोरपारे'त्ति अर्वाग्भागपरभागवर्जितेऽनाद्यनन्ते इति, एवंभूते संसारार्णवे आत्मानं प्रक्षिपन्तीति यावत् ॥ ४९ ॥ साम्प्रतं सम्यग्ज्ञानवतामुपदेष्टृणां गुणानाविर्भावयन्नाह—'लोयं'मित्यादि, 'लोकं' चतुर्दशरज्ज्वात्मकं केवलालोकेन केवलिनो विविधम्—अनेकप्रकारं जानन्ति—विदन्तीह—अस्मिन् जगति, प्रकर्षेण जानाति प्रज्ञः, पुण्यहेतुत्वाद्वा पुण्यं, तेन तथाभूतेन ज्ञानेन समाधिना च युक्ताः समस्तं 'धर्मं' श्रुतचारित्ररूपं ये तु परहितैषिणः 'कथयन्ति' प्रतिपादयन्ति ते महापुरुषाः स्वतः संसारसागरं तीर्णाः, परं च तारयन्ति सदुपदेशदानत इति। केवलिनो लोकं जानन्तीत्युक्तेऽपि यत्पुनर्ज्ञानेनेत्युक्तं तद् बौद्धमतोच्छेदेन ज्ञानाधार आत्मा अस्तीति प्रतिपादनार्थमिति, एतदुक्तं भवति—यथा देशिकः सम्यग्मार्गज्ञ आत्मानं परं च तदुपदेशवर्तिनं महाकान्ताराद्विवक्षितदेशप्रापणेन निस्तारयति, एवं केवलिनोऽप्यात्मानं परं च संसारकान्ताराभिस्तारयन्तीति ॥ ५० ॥ पुनरप्यार्द्रककुमार एवमाह—

जे गरहियं ठाणमिहावसंति, जे यावि लोए चरणोववेया। उदाहडं तं तु समं मईए, अहाउसो विप्परियासमेव ॥ ५१ ॥ संवच्छरेणावि य एगमेगं, पाणेण मारेउ महागयं तु। सेसाण जीवाण दयट्ठयाए, वासं वयं वित्ति पकप्पयामो ॥ ५२ ॥

असर्वज्ञप्ररूपणमेवंभूतं भवति, तद्यथा—ये केचित्संसारान्तर्वर्तिनोऽशुभकर्मणोपपेताः—समन्वितास्तद्विपाकसहाया 'गर्हितं' निन्दितं जुगुप्सितं निर्विवेकिजनाचरितं 'स्थानं' पदं कर्मानुष्ठानरूपमिह—अस्मिन् जगत्यासेव(वस)न्ति—जीविकाहेतुमाश्रयन्ति, तथा ये च सदुपदेशवर्तिनो लोकेऽस्मिन् 'चरणेन' विरतिपरिणामरूपेणोपपेताः—समन्विताः, तेषामुभयेषामपि यदनुष्ठानं—शोभनाशोभनस्वरूपमपि सत् तदसर्वज्ञैः—अर्वाग्दर्शिभिः 'समं' सदृशं तुल्यमुदाहृतं—उपन्यस्तं 'स्वमत्या' स्वाभिप्रायेण, न पुनर्यथावस्थितपदार्थनिरूपणेन, अथवाऽऽयुष्मन् हे एकदण्डिन् ! 'विपर्यासमेव' विपर्ययमेवोदाहरेद् असर्वज्ञो—यदशोभनं तच्छोभनत्वेनेतरच्चेतरत्वेति, यदिवा विपर्यास इति मदोन्मत्तप्रलापवदित्युक्तं भवतीति ॥५१॥ तदेवमेकदण्डिनो निराकृत्यार्द्रककुमारो यावद्भगवदन्तिकं व्रजति तावद्धस्तितापसाः परिवृत्य तस्थुरिदं च प्रोचुरित्याह—'संवच्छरेण' इत्यादि, हस्तिनं व्यापाद्यात्मनो वृत्तिं कल्पयन्तीति हस्तितापसास्तेषां मध्ये कश्चिद्बुद्धतम एतदुवाच, तद्यथा—भो आर्द्रककुमार ! सश्रुतिकेन सदाऽल्पबहुतमालोचनीयं, तत्र ये अमी तापसाः कन्दमूलफलाशिनस्ते बहूनां सत्त्वानां स्थावराणां तदाश्रितानां चोदुम्बरादिषु जङ्गमानामुपघाते वर्तन्ते, येऽपि च भैक्ष्येणात्मानं वर्तयन्ति तेऽप्यार्द्रसादोषदूषिता इतश्चेतश्चाटाट्यमानाः पिपीलिकादिजन्तूनां उपघाते वर्तन्ते, वयं तु संवत्सरेणापि अपिशब्दात् षण्मासेन चैकैकं हस्तिनं महाकायं बाणप्रहारेण व्यापाद्य शेषसत्त्वानां दयार्थमात्मनो वृत्तिं वर्त्तनं तदामिषेण वर्षमेकं यावत्कल्पयामः, तदेवं वयमल्पसत्त्वोपघातेन प्रभूततरसत्त्वानां रक्षां कुर्म इति ॥ ५२ ॥ साम्प्रतमेतदेवार्द्रककुमारो हस्तितापसमतं दूषयितुमाह—

संवच्छरेणावि य एगमेगं, पाणं हणंता अणियत्तदोसा। सेसाण जीवाण वहेण लग्गा, सिया य थोवं गिहिणोऽवि तम्हा ॥ ५३ ॥ संवच्छरेणावि य एगमेगं, पाणं हणंता समणव्वएसु। आयाहिए से पुरिसे अणज्जे, ण तारिसे केवलिणो भवंति ॥ ५४ ॥ बुद्धस्स आणाए इमं समाहिं, अस्सिं सुठिच्चा तिविहेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताई । तरिउं समुद्दं व महाभवोघं, आयाणवं धम्ममुदाहरेज्जा ॥ ५५ ॥ त्तिबेमि, इति अद्दइज्जणाम छट्ठमज्झयणं समत्तं ॥

संवत्सरेणैकैकं प्राणिनं म्रतोऽपि प्राणातिपातादनिवृत्तदोषास्ते भवन्ति, आशंसादोषश्च भवतां पञ्चेन्द्रियमहाकायसत्त्ववधपरायणानामतिदुष्टो भवति, साधूनां तु सूर्यरश्मिप्रकाशितवीथिषु युगमात्रदृष्ट्या गच्छतामीर्यासमितिसमितानां द्विचत्वारिंशद्दोषरहितमाहारमन्वेषयतां लाभालाभसमवृत्तीनां कृतस्य आशंसादोषः पिपीलिकादिसत्त्वोपघातो वेत्यर्थः, स्तोकसत्त्वोपघातेनैवंभूतेन दोषाभावो भवताऽभ्युपगम्यते, तथा च सति गृहस्था अपि स्वारम्भदेशवर्तिन एव प्राणिनो म्रन्ति शेषाणां च जन्तूनां क्षेत्रकालव्यवहितानां भवदभिप्रायेण वधे न प्रवृत्ताः, यत एवं तस्मात्कारणात्स्यादेवं 'स्तोक'मिति स्वल्पं यस्मात् म्रन्ति ततस्तेऽपि दोषरहिता इति ॥५३॥ साम्प्रतमार्द्रककुमारो हस्तितापसान्दूषयित्वा तदुपदेष्टारं दूषयितुमाह—'संवच्छरेणे'त्यादि, श्रमणानां—यतीनां व्रतानि श्रमणव्रतानि तेष्वपि व्यवस्थिताः सन्त एकैकं संवत्सरेणापि ये म्रन्ति ये चोपदिशन्ति तेऽनार्याः, असत्कर्मानुष्ठायित्वात् , तथा आत्मानं परेषां चाहितास्ते पुरुषाः, बहुवचनमार्षत्वात् , न तादृशाः केवलिनो भवन्ति, तथाहि—एकस्य प्राणिनः संवत्सरेणापि घाते येऽन्ये पिशिताश्रितास्तत्संस्कारे च क्रियमाणे स्थावरजङ्गमा विनाशमुपयान्ति ते तैः प्राणिवधोपदेष्टृभिर्न दृष्टाः, न च तैर्निरवद्योपायो माधुकर्या वृत्त्या यो भवति स दृष्टः, अतस्ते न केवलमकेवलिनो विशिष्टविवेकरहिताश्चेति । तदेवं हस्तितापसान्निराकृत्य भगवदन्तिकं गच्छन्तमार्द्रककुमारं महता कलकलेन लोकेनाभिद्रूयमाणं तं समुपलभ्य अभिनवगृहीतः सर्वलक्षणसंपूर्णो वनहस्ती समुत्पन्नतथाविधविवेकोऽचिन्तयत्—यथाऽयमार्द्रककुमारोऽपाकृताशेषतीर्थिको निष्प्रत्यूहं सर्वज्ञपादपद्मान्तिकं वन्दनाय व्रजति तथाऽहमपि यद्यपगताशेषबन्धनः स्यां तत एनं महापुरुषमार्द्रककुमारं प्रतिबुद्धतस्करपञ्चशतोपेतं तथा प्रतिबोधितानेकवादिगणसमन्वितं परमया भक्त्यैतदन्तिकं गत्वा वन्दामीत्येवं यावदसौ हस्ती कृतसंकल्पस्तावत्त्रटत्त्रटदिति त्रुटितसमस्तबन्धनः सन्नार्द्रककुमाराभिमुखं प्रदत्तकर्णतालस्तथोर्ध्वप्रसारितदीर्घकरः प्रधावितः, तदनन्तरं लोकेन कृतहाहारवगर्भकलकलेन पूत्कृतं—यथा धिक् कष्टं हतोऽयमार्द्रककुमारो महर्षिर्महापुरुषः, तदेवं प्रलपन्तो लोका इतश्चेतश्च प्रपलायमानाः (सन्ति), असावपि वनहस्ती समागत्यार्द्रककुमारसमीपं भक्तिसंभ्रमावनताग्रभागोत्तमाङ्गो निवृत्तकर्णतालस्त्रिः प्रदक्षिणीकृत्य निहितधरणीतलदन्ताग्रभागः स्पृष्टकराग्रतच्चरणयुगलः सुप्रणिहितमनाः प्रणिपत्य महर्षिं वनाभिमुखं ययाविति । तदेवमार्द्रककुमारतपोऽनुभावाद्बन्धनोन्मुक्तं महागजमुपलभ्य सपौरजनपदः श्रेणिकराजस्तमार्द्रककुमारं महर्षिं तत्तपःप्रभावं चाभिनन्द्याभिवन्द्य च प्रोवाच—भगवन्नाश्चर्यमिदं यदसौ वनहस्ती तादृग्विधाच्छृङ्खलाच्छेद्याच्छृङ्खलाबन्धनाद्युष्मत्तपःप्रभावान्मुक्त इत्येतदतिदुष्करमित्येवमभिहिते आर्द्रककुमारः प्रत्याह—भोः श्रेणिकमहाराज! नैतदुष्करं यदसौ वनहस्ती बन्धनान्मुक्तः, अपि त्वेतदुष्करं यत्स्नेहपाशमोचनं, एतच्च प्राङ्निर्युक्तिगाथया प्रदर्शितं । सा चेयं—"ण दुक्करं वा णरपासमोयणं, गयस्स मत्तस्स वणंमि रायं! । जहा उ चत्तावलिएण तंतुणा, सुदुक्करं मे पडिहाइ मोयणं ॥१॥' एवमार्द्रककुमारो राजानं प्रतिबोध्य तीर्थकरान्तिकं गत्वाऽभिवन्द्य च भगवन्तं भक्तिभरनिर्भरं आसांचक्रे, भगवानपि तानि पञ्चापि शतानि प्रव्राज्य तच्छिष्यत्वेनोपनिन्य इति ॥५४॥ साम्प्रतं समस्ताध्ययनार्थोपसंहारार्थमाह—'बुद्धस्से'त्यादि, 'बुद्धः' अवगततत्त्वः सर्वज्ञो वीरवर्द्धमानस्वामी तस्याज्ञया—तदागमेन इमं 'समाधिं' सद्धर्मावाप्तिलक्षणं अवाप्यासिञ्च समाधौ सुष्ठु स्थित्वा मनोवाक्कायैः सुप्रणिहितेन्द्रियो न मिथ्यादृष्टिमनुमन्यते, केवलं तदावरणजुगुप्सां त्रिविधेनापि करणेन विधत्ते, स एवंभूत आत्मनः परेषां च त्रायी—त्राणशीलस्त्रायी वा—गमनशीलो मोक्षं प्रति, स एवंभूतस्तरीतुम् अतिलङ्घ्य समुद्रमिव दुस्तरं महाभवौघं मोक्षार्थमादीयत इत्यादानं—सम्यग्दर्शनज्ञानचारित्ररूपं तद्विद्यते यस्यासावादानवान्—साधुः, स च सम्यग्दर्शनेन सता परतीर्थिकतपःसमृद्ध्यादिदर्शनेन मौनीन्द्रादर्शनान्न प्रच्यवते, सम्यग्ज्ञानेन तु यथावस्थितवस्तुप्ररूपणतः समस्तप्रावादुकवादनिराकरणेनापरेषां यथावस्थितमोक्षमार्गमाविर्भावयतीति, सम्यक्चारित्रेण तु समस्तभूतग्रामहितैषितया निरुद्धाश्रवद्वारः सन् तपोविशेषाच्चानेकभवोपार्जितं कर्म निर्जरयति स्वतोऽन्येषां चैवंप्रकारमेव धर्ममुदाहरेद्—व्याकुर्वीयात् आविर्भावयेदित्यर्थः । इतिः परिसमाप्त्यर्थे । ब्रवीमीति नयाश्च प्राग्वदेव वाच्याः, वक्ष्यन्ते चोत्तरत्र ॥ ५५ ॥ समाप्तं चेदमार्द्रकीयाख्यं षष्ठमध्ययनमिति ॥ ६ ॥

इति श्रीसूत्रकृताङ्गे इदमार्द्रकीयाख्यंषष्ठमध्ययनं समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सप्तमनालन्दीयाध्ययनप्रारम्भः ।

व्याख्यातं षष्ठमध्ययनम्, अधुना सप्तममारभ्यते, अस्य चायमभिसंबन्धः—इह प्राग्व्याख्यातेनाखिलेनापि सूत्रकृताङ्गेन स्वसमयपरसमयप्ररूपणाद्वारेण प्रायः साधूनामाचारोऽभिहितोऽनेन तु श्रावकगतो विधिरुच्यते, यदिवाऽनन्तराध्ययने परवादनिराकरणं कृत्वा साध्वाचारस्य य उपदेष्टा स उदाहरणद्वारेण प्रदर्शितः, इह तु श्रावकधर्मस्य य उपदेष्टा स उदाहरणद्वारेणैव प्रदर्श्यते, यदिवाऽनन्तराध्ययने परतीर्थिकैः सह वाद इह तु स्वयूथ्यैरिति । अनेन संबन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराण्युपवर्णितव्यानि उपक्रमादीनि, तत्रापि नामनिष्पन्ने निक्षेपे नालन्दीयाभिधानमिदमध्ययनम्, इदं चैवं व्युत्पाद्यते—प्रतिषेधवाचिनो नकारस्य तदर्थस्यैवालंशब्दस्य 'डुदाञ् दाने' इत्येतस्य धातोर्मीलनेन नालं ददातीति नालंदा, इदमुक्तं भवति—प्रतिषेधप्रतिषेधेन धात्वर्थस्यैव प्राकृतस्य गमनात्सदाऽर्थिभ्यो यथाऽभिलषितं ददातीति नालन्दा—राजगृहनगरबाहिरिका तस्यां भवं नालन्दीयमिदमध्ययनं, अनेन चाभिधानेन समस्तोऽप्युपोद्घात उपक्रमरूप आवेदितो भवति, तत्स्वरूपं च पर्यन्ते स्वत एव निर्युक्तिकारः 'पासावच्चिज्जे' इत्यादिगाथया निवेदयिष्यतीति । साम्प्रतं संभविनमलंशब्दस्य निक्षेपं नदीं परित्यज्य कर्तुमाह—

णामअलं ठवणअलं दव्वअलं चेव होइ भावअलं । एसो अलसद्दंमिउ निक्खेवो चउविहो होइ ॥ २०१ ॥
पज्जत्तीभावे खलु पढमो बीओ भवे अलंकारे । ततितो उ पडिसेहे अलसद्दो होइ नायव्वो ॥ २०२ ॥

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥४०६॥

पडिसेहणगारस्सा इत्थिसद्देण चेव अलसद्दो । रायगिहे नयरंमी नालंदा होइ बाहिरिया ॥ २०३ ॥
नालंदाए समिवे मणोरहे भासि इंदभूइणा उ । अज्झयणं उदगस्स उ एयं नालंदइज्जं तु ॥ २०४ ॥

७ नालन्दीयाध्य.

तत्र अमानोनाः प्रतिषेधवाचकाः, तद्यथा—अगौः अघट इत्याद्यकारः प्रायो द्रव्यस्यैव प्रतिषेधवाचीत्यलंदानेन सहास्य प्रयोगाभावः, माकारस्त्वनागतक्रियाया निषेधं विधत्ते, तद्यथा—मा कार्षीस्त्वमकार्यं मा मंस्थाः संस्था नो युष्मदधिष्ठितदिगेव वीतायेत्यादि, नोकारस्तु देशनिषेधे सर्वनिषेधे च वर्त्तते, तद्यथा—नो घटो घटैकदेशो घटैकदेशनिषेधेन, तथा हास्यादयो नोकषायाः कषायमोहनीयैकदेशभूताः, नकारस्तु समस्तद्रव्यक्रियाप्रतिषेधाभिधायी, तद्यथा—न द्रव्यं न कर्म न गुणोऽभावः, तथा नाकार्षं न करोमि न करिष्यामीत्यादि, तथाऽन्यैरप्युक्तं—"न याति न च तत्रासीदस्ति पश्चान्नवांशवत्। जहाति पूर्वं नाधारमहो व्यसनसंततिः ॥ १ ॥" किंचान्यत्—"गतं न गम्यते तावद्गतं नैव गम्यते । गतागतविनिर्मुक्तं, गम्यमानं तु गम्यते ॥" इत्यादि । तदेवमत्र नकारः प्रतिषेधविधायकोऽप्युपात्तः, अलंशब्दोऽपि यद्यपि 'अलं पर्याप्ति 'वारणभूषणेष्वपी'ति त्रिष्वर्थेषु पठ्यते, तथाऽपीह प्रतिषेधवाचकेन नञा साहचर्यात्प्रतिषेधार्थ एव गृह्यते, तत्र चालंशब्दे नामस्थापनाद्रव्यभावभेदाच्चतुर्विधो निक्षेपो भवति, तत्र नामालं यस्य चेतनस्य अचेतनस्य वाऽलमिति नाम क्रियते, स्थापनालं तु यत्र क्वचिच्चित्रपुस्तकादौ पापनिषेधं कुर्वन्साधुः स्थाप्यते, द्रव्यनिषेधस्तु नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यस्य चौराद्याहृतस्यैहिकापायभीरुणा यो निषेधः क्रियते स द्रव्यनिषेधः, एवं द्रव्येण द्रव्याद् द्रव्ये वा निषेधः, भावनिषेधं तु स्वत एव निर्युक्तिकारोऽलंशब्दस्य संभविनमर्थं दर्शयन्विभणिषुराह—पर्याप्तिभावः—सामर्थ्यं तत्रालंशब्दो वर्तते, अलं मल्लो मल्लाय, समर्थ इत्यर्थः, लोकोत्तरेऽपि "नालं ते तव ताणाए वा सरणाए वा" । अन्यैरप्युक्तम्—"द्रव्यास्तिकरथारूढः, पर्यायोद्यतकार्मुकः । युक्तिसन्नाहवान्वादी, कुवादिभ्यो भवत्यलम् ॥ १ ॥" अयं प्रथमोऽलंशब्दार्थो भवति, खलुशब्दो वाक्यालङ्कारे, द्वितीयस्त्वर्थोऽलङ्कारे—अलङ्कारविषये भवेत्, संभावनायां लिङ्, तद्यथा—अलं कृतं देव ! देवेन स्वकुलं जगच्च नाभिसूनुने'त्यादि । तृतीयस्त्वलंशब्दार्थः प्रतिषेधे ज्ञातव्यो भवति, तद्यथा—अलं मे गृहवासेन, तथा 'अलं पापेन कर्मणा' उक्तं च—"अलं कृतीर्थैरिह पर्युपासितैरलं वितर्काकुलकाहलैर्मतैः । अलं च मे कामगुणैर्निषेवितैर्भयंकरा ये हि परत्र चेह च ॥ १ ॥" तदिह प्रतिषेधवाचिनाऽलंशब्देनाधिकार इत्येतद्दर्शयितुमाह—सत्यप्यलंशब्दसार्थत्रये नकारस्य सान्निध्यात्प्रतिषेधविधाय्येवेह गृह्यते, ततश्च निरुक्तविधानादयमर्थः—नालं ददातीति नालन्दा, बाहिरिकायाः स्त्रियोद्देशकत्वेन वाचकत्वेन च नालन्दशब्दस्य स्त्रीलिंगता, सा च सदैहिकामुष्मिकसुखहेतुत्वेन सुखप्रदा राजगृहनगरबाहिरिका धनकनकसमृद्धत्वेन सत्साध्वाश्रयत्वेन च सर्वकामप्रदेति । साम्प्रतं प्रत्ययार्थं दर्शयितुकाम आह—नालन्दायाः समीपे मनोरथाख्ये उद्याने इन्द्रभूतिना गणधरेणोदकाख्यनिर्ग्रन्थपृष्टेन तुशब्दस्यैवकारार्थत्वात्तस्यैव भाषितमिदमध्ययनं । नालन्दायां भवं नालन्दीयं नालन्दासमीपोद्यानकथनेन वा निर्वृत्तं नालन्दीयं । यथा चेदमध्ययनं नालन्दायां संवृत्तं तथोत्तरत्र "पासावच्चिज्जे" इत्यादिकया सूत्रस्पर्शिकगाथयाऽऽविष्करिष्यते, साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारयितव्यं, तच्चेदं—

॥४०६॥

तेणं कालेणं तेणं समएणं रायगिहे नामं नयरे होत्था, रिद्धित्थिमियसमिद्धे वण्णओ जाव पडिरूवे, तस्स णं रायगिहस्स नयरस्स बहिया उत्तरपुरच्छिमे दिसीभाए, एत्थ णं नालंदानामं बाहिरिया होत्था, अणेगभवणसयसन्निविट्ठा जाव पडिरूवा ॥(सू० ६८)॥ तत्थ णं नालंदाए बाहिरियाए लेवे नामं गाहावई होत्था,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अड्ढे दित्ते वित्ते विच्छिण्णविपुलभवणसयणासणजाणवाहणाइण्णे बहुधणबहुजायरूवरजते आओगपओगसंपउत्ते विच्छड्डियपउरभत्तपाणे बहुदासीदासगोमहिसगवेलगप्पभूए बहुजणस्स अपरिभूए यावि होत्था॥

अस्य चानन्तरपरम्परसूत्रैः सह संबन्धो वाच्यः, तत्रानन्तराध्ययनपर्यन्ते सूत्रमिदम्—आदानवान् धर्ममुदाहरेत्, धर्मश्च साधुश्रावकभेदेन द्विधा, तत्र पूर्वोक्तेनाङ्गद्वयेन प्रायः साधुगतो विधिरभिहितोऽनेन तु श्रावकगतो विधिरुच्यते। परम्परसूत्रसंबन्धस्त्वयं-'बुध्येते'त्येतदादि सूत्रं, किं तत्र बुध्येत?, यदेतद्वक्ष्यत इति। सूत्रार्थस्त्वयं-सप्तम्यर्थे तृतीया, यस्मिन्काले यस्मिंश्चावसरे राजगृहं नगरं यथोक्तविशेषणविशिष्टमासीत्, तस्मिन् काले तस्मिंश्च समये इदमभिधीयते। राजगृहमेव विशिनष्टि-प्रासादाः संजाता यस्मिंस्तत्प्रासादीयं-दर्शनीयं-दर्शनयोग्यं दृष्टिसुखहेतुत्वात्, तथाऽभिरूप्येण रूपं यस्य तदभिरूपं, तथाऽप्रतिरूपमनन्यसदृशं, प्रतिरूपं वा-प्रतिबिम्बं वा स्वर्गनिवेशस्य, तदेवंभूतं राजगृहं नाम नगरं 'होत्थ'त्ति आसीत्, यद्यपि तत्कालत्रयेऽपि सत्तां बिभर्त्ति तथाप्यतीतारव्यानकसमाश्रयणादासीदित्युक्तं। तस्य च राजगृहस्य बहिरुत्तरपूर्वस्यां दिशि नालन्दा नाम बाहिरिका आसीत्, सा चानेकभवनशतसन्निविष्टा-अनेकभवनशतसंकीर्णेत्यर्थः॥ तस्यां च लेपो नाम 'गृहपतिः' कुटुम्बिक आसीत्,स चाढ्यो दीप्तः-तेजस्वी 'वित्तः' सर्वजनविख्यातो वित्तीर्णविपुलभवनशयनासनयानवाहनाकीर्णो बहुधनबहुजातरूपरजतः आयोगाः-अर्थोपाया यानपात्रोष्ट्रमंडलिकादयः तथा प्रयोजनं प्रयोगः-प्रायोगिकत्वं तैरायोगप्रयोगैः संप्रयुक्तः-समन्वितः, तथैतश्चे-

---

१ टीयमा० प्र० आभोगव० प्र० वहणच्छत्रयत्रयोरिति यंत्रबद्धा मूलपाठे तु परिपूर्णतावत्।

तश्च विशिष्टप्रचुरभक्तपानो बहुदास्यादिपरिवृतो बहुजनस्यापरिभूतश्चासीत्। तदियता विशेषणकदम्बकेनेहिकगुणा विष्करणेन द्रव्यसंपदभिहिता॥ अधुनाऽऽमुष्मिकगुणाविर्भावेन भावसंपदभिधीयते—

से णं लेवे नामं गाहावई समणोवासए यावि होत्था, अभिगयजीवाजीवे जाव विहरइ, निग्गंथे पावयणे निस्संकिए निक्कंखिए निव्वितिगिच्छे लद्धट्ठे गहियट्ठे पुच्छियट्ठे विणिच्छियट्ठे अभिगहियट्ठे अट्ठिमिंजापेमाणुरागरत्ते, अयमाउसो! निग्गंथे पावयणे अयं अट्ठे अयं परमट्ठे सेसे अणट्ठे, उस्सियफलिहे अप्पावयदुवारे चियत्तंतेउरपरघरप्पवेसे चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु पडिपुन्नं पोसहं सम्मं अणुपालेमाणे समणे निग्गंथे तहाविहेणं एसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे बहूहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं अप्पाणं भावेमाणे एवं च णं विहरइ॥ (सू० ८९)॥

णमिति वाक्यालङ्कारे, स लेपाख्यो गृहपतिः श्रमणान्—साधूनुपास्ते-प्रत्यहं सेवत इति श्रमणोपासकः, तदनेन विशेषणेन तस्य जीवादिपदार्थाविर्भावकश्रुतज्ञानसंपदावेदिता भवति, एतदेव दर्शयति अभिगतजीवाजीवेत्यादिना ग्रन्थेन यावदसहायोऽपि देवासुरादिभिर्देवगणैरनतिक्रमणीयः-अनतिलङ्घनीयो धर्मादप्रच्यावनीय इतियावत्, तदियता विशेषणकलापेन तस्य सम्यग्ज्ञानित्वमावेदितं भवति। साम्प्रतं तस्य विशिष्टसम्यग्दर्शनित्वं प्रतिपादयितुमाह-'निग्गंथे'इत्यादि, 'निर्ग्रन्थे' आर्हते प्रवचने निर्गता शङ्का देशसर्वरूपा यस्य स निःशङ्कः, 'तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदित'मित्येवं कृताध्यवसायः, तथा निर्गता काङ्क्षा-अन्यान्यदर्शनग्रहणरूपा यस्यासौ निराकाङ्क्षः, तथा निर्गता विचिकित्सा—चित्तविप्लुतिर्विद्वज्जुगुप्सा वा यस्यासौ निर्विचिकित्सो, यत

एवमतो लब्धः—उपलब्धोऽर्थः-परमार्थरूपो येन स लब्धार्थो ज्ञाततत्त्व इत्यर्थः, तथा गृहीतः-स्वीकृतोऽर्थो-मोक्षमार्गरूपो येन स गृहीतार्थः, तथा-विशेषतः पृष्टोऽर्थो येन स पृष्टार्थो, यत एवमतो विनिश्चितार्थः ततोऽभिगतः-पृष्टनिर्वचनतः प्रतीतोऽर्थो येन सोऽभिगतार्थः, तथाऽस्थिमिञ्जा-अस्थिमध्यं यावद् स धर्मे प्रेमानुरागेण रक्तः अत्यन्तं सम्यक्त्ववासितान्तश्चेता इतियावत्, एतदेवाविर्भावयन्नाह—'अयमाउसो'इत्यादि, केनचिद्धर्मसर्वस्वं पृष्टः सन्नेतदाचष्टे, तद्यथा-भो आयुष्मन्निदं नैर्ग्रन्थं मौनीन्द्रप्रवचनमर्थः-सद्भूतार्थः तथाप्ररूपणतया, तथेदमेवाह—अयमेव परमार्थः, कषतापच्छेदैरेव शुद्धत्वेन निर्वेटितत्वात्, शेषस्तु सर्वोऽपि लौकिकतीर्थिकपरिकल्पितोऽनर्थः, तदनेन विशेषणकदम्बकेन सम्यक्त्वगुणाविष्करणं कृतं भवति। साम्प्रतं तस्यैव सम्यग्दर्शनज्ञानाभ्यां कृतो यो गुणस्तदाविष्करणायाह—'उस्सिय'इत्यादि, उच्छ्रितं-प्रख्यातं स्फटिकवन्निर्मलं यशो यस्यासावुच्छ्रितस्फटिकः, प्रख्यातनिर्मलयश इत्यर्थः, तथाऽप्रावृतम्—अस्थगितं द्वारं—गृहमुखं यस्य सोऽप्रावृतद्वारः, इदमुक्तं भवति-गृहं प्रविश्य परतीर्थिकोऽपि यद्यत्कथयति तदसौ कथयतु न तस्य परिजनोऽप्यन्यथा भावयितुं—सम्यक्त्वाच्यावयितुं शक्यत इतियावत्, तथा राज्ञां बल्लभान्तःपुरद्वारेषु प्रवेटुं शीलं यस्य स तथा, इदमुक्तं भवति-प्रतिषिद्धान्यजनप्रवेशान्यपि यानि स्थानानि भाण्डागारान्तःपुरादीनि तेष्वप्यसौ प्रख्यातश्रावकाख्यगुणलेनास्खलितप्रवेशः, तथा चतुर्दश्यष्टम्यादिषु तिथिषूपदिष्टासु-महाकल्याणकसंबन्धितया पुण्यतिथित्वेन प्रख्यातासु तथा पौर्णमासीषु च तिसृष्वपि चतुर्मासकतिथिष्वित्यर्थः, एवंभूतेषु धर्मदिवसेषु सम्यु—अतिशयेन प्रतिपूर्णो यः पौषधो-व्रताभिग्रहविशेषस्तं प्रतिपूर्णम्—आहारशरीरसत्कारब्रह्मचर्याव्यापाररूपं पौषधमनुपालयन् संपूर्णं श्रावकधर्ममनुचरति, तदनेन विशेषणकलापेन विशिष्टं देशचारित्रमावेदितं भवति। साम्प्रतं तस्यैवोत्तरगुणख्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पनेन दानधर्ममधिकृत्याह–'समणे निग्गंथे'इत्यादि, सुगमं यावत्'पडिलाभेमाणे'त्ति, साम्प्रतं तस्यैव शीलतपोभावनात्मकं धर्ममावेदयन्नाह—'बहूहि'मित्यादि, बहुभिः शीलव्रतगुणविरमणप्रत्याख्यानपौषधोपवासैस्तथा यथापरिगृहीतैश्च तपःकर्मभिरात्मानं भावयन्, एवं चानन्तरोक्तया नीत्या विहरति—धर्ममाचरंस्तिष्ठति चः समुच्चये णमिति वाक्यालङ्कारे ॥

तस्स णं लेवस्स गाहावइस्स नालंदाए बाहिरियाए उत्तरपुरच्छिमे दिसिभाए एत्थ णं सेसदविया नामं उदगसाला होत्था, अणेगखंभसयसन्निविट्ठा पासादीया जाव पडिरूवा, तीसे णं सेसदवियाए उदगसालाए उत्तरपुरच्छिमे दिसिभाए, एत्थ णं हत्थिजामे नामं वणसंडे होत्था, किण्हे वण्णओ वणसंडस्स॥(सू.७०)

तस्सिं च णं गिहपदेसंमि भगवं गोयमे विहरइ, भगवं च णं अहे आरामंसि। अहे णं उदए पेढालपुत्ते भगवं पासावच्चिज्जे नियंठे मेयज्जे गोत्तेणं जेणेव भगवं गोयमे तेणेव उवागच्छइ, उवागच्छइत्ता भगवं गोयमं एवं वयासी—आउसंतो! गोयमा अत्थि खलु मे केइ पदेसे पुच्छियव्वे, तं च आउसो! अहासुयं अहादरिसियं मे वियागरेहि सवायं, भगवं गोयमे उदयं पेढालपुत्तं एवं वयासी–अवियाइ आउसो! सोच्चा निसम्म जाणिस्सामो सवायं, उदए पेढालपुत्ते भगवं गोयमं एवं वयासी–॥ (सू.७१)

तस्य चैवंभूतस्य लेपोपासकस्य गृहपतेः संबन्धिनी नालन्दायाः पूर्वोत्तरस्यां दिशि शेषद्रव्याभिधाना–गृहोपयुक्तशेषद्रव्येण कृता शेषद्रव्येत्येतदेवाभिधानमस्या उदकशालायाः, सैवंभूताऽऽसीदनेकस्तम्भशतसन्निविष्टा प्रासादीया दर्शनीयाऽभिरूपा प्रतिरूपेति, तस्याश्चोत्तरपूर्वदिग्विभागे हस्तियामाख्यो वनखण्ड आसीत्, कृष्णावभास इत्यादिवर्णकः ॥ तस्मिंश्च वनखण्डगृहप्रदेशे भगवान् गौतमस्वामी श्रीवर्धमानस्वामिगणधरो विहरति। अथानन्तरं भगवान् गौतमस्वामी तस्मिन्नारामे सह साधुभिर्व्यवस्थितः, 'अथ' अनन्तरं णमिति वाक्यालङ्कारे उदकाख्यो निर्ग्रन्थः पेढालपुत्रः 'पार्श्वापत्यस्य' पार्श्वस्वामिशिष्यस्यापत्यं–शिष्यः पार्श्वापत्यीयः, स च मेदार्यो गोत्रेण, येनैवेति सप्तम्यर्थे तृतीया, यस्यां दिशि यस्मिन्वा प्रदेशे भगवान् श्रीगौतमस्वामी तस्यां दिशि तस्मिन्वा प्रदेशे समागत्येदं—वक्ष्यमाणं प्रोवाचेति। अत्र निर्युक्तिकारोऽध्ययनोत्थानं तात्पर्यं च गाथया दर्शयितुमाह—

पासावच्चिज्जो पुच्छियाइओ अज्जगोयमं उदगो। सावगपुच्छा धम्मं सोउं कहियंमि उवसंता ॥ २०५ ॥

पार्श्वनाथशिष्य उदकाभिधान आर्यगौतमं पृष्टवान्, किं तत्?—श्रावकविषयं प्रश्नं, तद्यथा—भो इन्द्रभूते! साधोः श्रावकाणुव्रतदाने सति स्थूलप्राणातिपातादिविषये तदन्येषां सूक्ष्मबादराणां प्राणिनामुपघाते सत्यारंभजनिते तदनुमतिप्रत्ययजनितः कर्मबन्धः कस्मान्न भवति?, तथा स्थूलप्राणातिपातव्रतिनस्तमेव पर्यायान्तरगतं व्यापादयतो नागरिकवधनिवृत्तस्य तमेव बहिःस्थं व्यापादयत इव तद्व्रतभङ्गजनितः कर्मबन्धः कस्मान्न भवतीत्येतत्प्रश्नस्योत्तरं गृहपतिचौरग्रहणविमोक्षणोपमया दत्तवान्, तच्च श्रावकप्रश्नस्यौपम्यं गौतमस्वामिना कथितं श्रुत्वोदकाख्यो निर्ग्रन्थः 'उपशांतः' अपगतसंदेहः संवृत्त इति। साम्प्रतं सूत्रमनुस्रियते—'स' उदको गौतमस्वामिसमीपं समागत्य भगवन्तमिदमवादीत्, तद्यथा—आयुष्मन्गौतम! 'अस्ति मम विद्यते कश्चित्प्रदेशः प्रष्टव्यः' तत्र संदेहात्, तं च प्रदेशं यथाश्रुतं भवता यथा च भगवता संदर्शितं तथैव मम 'व्याकुर्वीहि' प्रतिपादय। एवं पृष्टः, स चायं भगवान्, यदिवा सह वादेन सवादं पृष्टः सद्भावं वा—शोभनभारतीकं वा प्रश्नं पृष्टः, तमुदकं पेढालपुत्रमेवमवादीत्, तद्यथा–अपिचायुष्मन्नुदक! श्रुत्वा भवदीयं प्रश्नं निशम्य च—अवधार्य च गुणदोषविचारणतः सम्यगहं ज्ञास्ये, तदुच्यतां विश्रब्धं भवता स्वाभिप्रायः 'सवायं' सद्भावं चोदकः, सवादं सद्भावं वोदकः पेढालपुत्रो भगवन्तं गौतममेवमवादीत् ॥

आउसो! गोयमा अत्थि खलु कुमारपुत्तिया नाम समणा निग्गंथा तुम्हाणं पवयणं पवयमाणा गाहावइं समणोवासगं उवसंपन्नं एवं पच्चक्खावेंति—णण्णत्थ अभिओएणं गाहावइचोरग्गहणविमोक्खणयाए तसेहिं पाणेहिं णिहाय दंडं, एवं एहं पच्चक्खंताणं दुप्पच्चक्खायं भवइ, एवं एहं पच्चक्खावेमाणाणं दुपच्चक्खावियव्वं भवइ, एवं ते परं पच्चक्खावेमाणा अतियरंति सयं पतिण्णं, कस्स णं तं हेउं?, संसारिया खलु पाणा थावरावि पाणा तसत्ताए पच्चायंति, तसावि पाणा थावरत्ताए पच्चायंति, थावरकायाओ विप्पमुच्चमाणा तसकायंसि उववज्जंति, तसकायाओ विप्पमुच्चमाणा थावरकायंसि उववज्जंति, तेसिं च णं थावरकायंसि उववण्णाणं ठाणमेयं धत्तं ॥ (सू.७२) एवं एहं पच्चक्खंताणं सुपच्चक्खायं भवइ, एवं एहं पच्चक्खावेमाणाणं सुपच्चक्खावियं भवइ, एवं ते परं पच्चक्खावेमाणा णातियरंति सयं पइण्णं, णण्णत्थ अभिओगेणं गाहावइचोरग्गहणविमोक्खणयाए तसभूएहिं पाणेहिं णिहाय दंडं, एवमेव सइ भासाए परक्कमे विज्जमाणे जे ते कोहा वा लोहा वा परं पच्चक्खावेंति अयंपि णो उवएसे णो णेआउए भवइ, अवियाइं आउसो! गोयमा! तुब्भंपि एवं रोयइ? ॥(सू.७३) सवायं भगवं गोयमे! उदयं पेढालपुत्तं एवं वयासी–आउसंतो! उदगा नो खलु अम्हे एयं रोयइ, जे ते समणा वा माहणा वा एवमाइक्खंति

सूत्रकृ. १९ सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥४०९॥

७ नालन्दीयाध्य

॥४०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाव परूवेंति णो खलु ते समणा वा णिग्गंथा वा भासं भासंति, अणुतावियं खलु ते भासं भासंति, अब्भाइक्खंति खलु ते समणे समणोवासए वा, जेहिंवि अन्नेहिं जीवेहिं पाणेहिं भूएहिं सत्तेहिं संजमयंति तेणावि ते अब्भाइक्खंति, कस्स णं तं हेउं ?, संसारिया खलु पाणा, तसावि पाणा थावरत्ताए पच्चायंति थावरावि पाणा तसत्ताए पच्चायंति तसकायाओ विप्पमुच्चमाणा थावरकायंसि उववज्जंति थावरकायाओ विप्पमुच्चमाणा तसकायंसि उववज्जंति, तेसिं च णं तसकायंसि उववन्नाणं ठाणमेयं अधत्तं ॥(सू.७४)

तद्यथा—भो गौतम! अस्तीत्ययं विभक्तिप्रतिरूपको निपात इति वृद्धर्थवृत्तिर्गृहीतः, ततश्चायमर्थः—'सन्ति' विद्यन्ते कुमारपुत्रा नाम निर्ग्रन्था युष्मदीयं प्रवचनं प्रवदन्तः, तद्यथा—गृहपतिं श्रमणोपासकमुपसंपन्नं—नियमायोत्थितमेवं 'प्रत्याख्यापयन्ति' प्रत्याख्यानं कारयन्ति, तद्यथा—स्थूलेषु प्राणिषु दण्डयतीति दण्डः—प्राण्युपमर्दस्तं 'निहाय' परित्यज्य, प्राणातिपातनिवृत्तिं कुर्वन्ति, तामेवापवदति—नान्यत्रेति, स्वमनीषिकाया अन्यत्र राजाद्यभियोगेन यः प्राण्युपघातो न तत्र निवृत्तिरिति। तत्र किल स्थूलप्राणिविशेषणात्तदन्येषामनुमतिप्रत्ययदोषः स्यादित्याशङ्क्यावानाह—'गाहावइ'इत्यादि, अस्य चार्थस्योत्तरत्राविर्भावयिष्यामः। येनाभिप्रायेणोदकश्चोदितवांस्तमाविष्कुर्वन्नाह—'एवं णह'मित्यादि, ह्नमिति वाक्यालङ्कारे, अवधारणे वा, एवमेव त्रसप्राणिविशेषणतेनापरत्रसभूतविशेषणरहिततेन प्रत्याख्यानं गृह्णतां श्रावकाणां दुष्प्रत्याख्यानं भवति, प्रत्याख्यानभङ्गसद्भावात्, तथैवमेव प्रत्याख्यापयतामपि साधूनां दुष्टं प्रत्याख्यानदानं भवति, किमित्यत आह—एवं ते श्रावकाः प्रत्याख्यानं गृह्णन्तः साधवश्च परं प्रत्याख्यापयन्तः स्वां प्रतिज्ञामतिचरन्ति—अतिलङ्घयन्ति। 'कस्स णं हेउं'ति प्राकृतशैल्या कस्मा-

द्धेतोरित्यर्थः। तत्र प्रतिज्ञाभङ्गकारणमाह—'संसारिया'इत्यादि, संसारो विद्यते येषां ते सांसारिकाः, खलुरलङ्कारे, 'प्राणाः' जन्तवः स्थावराः 'प्राणिनः' पृथिव्यप्तेजोवायुवनस्पतयः सन्तोऽपि तथाविधकर्मोदयात्त्रसत्वया—त्रसत्वेन द्वीन्द्रियादिभावेन प्रत्यायान्ति—उत्पद्यन्ते, तथा त्रसा अपि स्थावरतयेति, एवं च परस्परगमने व्यवस्थिते सत्यवश्यंभावी प्रतिज्ञाविलोपः, तथाहि—नागरिको मया न हन्तव्य इत्येवंभूता येन प्रतिज्ञा गृहीता स यदा बहिरारामादौ व्यवस्थितं नागरिकं व्यापादयेत् किमेतावता तस्य न भवेत्प्रतिज्ञाविलोपः?, एवमत्रापि येन त्रसवधनिवृत्तिः कृता स यदा तमेव त्रसं प्राणिनं स्थावरकायस्थितं व्यापादयेत् किं तस्य न भवेत्प्रतिज्ञाविलोपः ?, भवत्येवेत्यर्थः। एवमपि त्रसस्थावरकाये समुत्पन्नानां त्रसानां यदि तथाभूतं किञ्चिदसाधारणं लिङ्गं स्यात् ततस्ते त्रसाः स्थावरत्वेनाप्युत्पन्नाः शक्यन्ते परिहर्तुं, न च तदस्तीत्येतद्दर्शयितुमाह—'थावरकायाओ'इत्यादि, स्थावरकायात्सकाशाद्विविधम्—अनेकैः प्रकारैः प्रकर्षेण मुच्यमानाः स्थावरकायायुषा तद्योग्यैश्चापरैः कर्मभिः सर्वात्मना त्रसकाये समुत्पद्यन्ते, तथा त्रसकायादपि सर्वात्मना विमुच्यमानास्तत्कर्मभिः स्थावरकाये समुत्पद्यन्ते, तत्र चोत्पन्नानां तथाभूतत्रसलिङ्गाभावात्प्रतिज्ञालोप इत्येतत्सूत्रेणैव दर्शयितुमाह—'तेसिं च ण'मित्यादि, 'तेषां च' त्रसानां स्थावरकाये समुत्पन्नानां गृहीतत्रसप्राणातिपातविरतेः श्रावकस्याप्यारम्भप्रवृत्तत्वेनैतत्स्थावराख्यं घात्यं स्थानं भवति, तस्मादनिवृत्तत्वात्तस्येति ॥ तदेवं व्यवस्थिते नागरिकदृष्टान्तेन त्रसमेव स्थावरत्वेनायातं व्यापादयतोऽवश्यंभावी प्रतिज्ञाविलोपो यतः तत एव मदुक्तया वक्ष्यमाणनीत्या प्रत्याख्यानं कुर्वतां सुप्रत्याख्यातं भवति, एवमेव च प्रत्याख्यापयतां सुप्रत्याख्यापितं भवति, एवं च ते प्रत्याख्यापयन्तो नातिचरन्ति स्वीयां प्रतिज्ञामित्येतद्दर्शयितुमाह—'णण्णत्थे'त्यादि, तत्र गृहपतिः प्रत्याख्यानमेवं गृह्णाति, तद्यथा—'त्रसभूतेषु' वर्तमानकाले

त्रसत्वेनोत्पन्नेषु प्राणिषु दण्डयतीति दण्डः—प्राण्युपमर्दस्तं 'विहाय' परित्यज्य प्रत्याख्यानं करोति, तदिह भूतत्वविशेषणात्स्थावरपर्यायापन्नवधेऽपि न प्रतिज्ञाविलोपः। तथा 'नान्यत्राभियोगेने'ति राजाद्यभियोगादन्यत्र प्रत्याख्यानमिति। तथा गृहपतिचौरविमोक्षणतयेति, एतच्च भवद्भिः सम्यगुक्तं, एतदपि त्रसकाये भूतत्वविशेषणमभ्युपगम्यतामिति, एतदभ्युपगमेऽपि हि यथा क्षीरविकृतिप्रत्याख्यायिनो दधिभक्षणेऽपि न प्रतिज्ञाविलोपः तथा त्रसभूताः सत्त्वा न हन्तव्या इत्येवं प्रतिज्ञावतः स्थावरहिंसायामपि न प्रत्याख्यानातिचारः। तदेवं विद्यमाने सति 'भाषायाः' प्रत्याख्यानवाचः 'पराक्रमे' भूतविशेषणादोषपरिहारसामर्थ्ये एवं—पूर्वोक्तया नीत्या सति दोषपरिहरणोपाये ये केचन क्रोधाद्या लोभाद्या 'परं' श्रावकादिकं निर्विशेषणमेव प्रत्याख्यापयन्ति, तेषां प्रत्याख्यानं ददतां मृषावादो भवति, गृह्णतां चावश्यंभावी व्रतविलोप इति, तदेवमयमपि नः अस्मदीयोपदेशाभ्युपगमो भूतत्वविशेषणविशिष्टः पक्षः किं भवतां 'नो' नैव 'नैयायिको'न्यायोपपन्नो भवति?, इदमुक्तं भवति—भूतत्वविशेषणेन हि त्रसान् स्थावरोत्पन्नान् हिंसतोऽपि न प्रतिज्ञातिचार इति, अपि चैतदायुष्मन् गौतम! तुभ्यमपि रोचते—एवमेतद्यथा मया व्याख्यातम्। एवमभिहितो गौतमः सद्वाचं सवादं वा तमुदकं पेढालपुत्रमेवं—वक्ष्यमाणमवादीत्, तद्यथा—नो खल्वायुष्मन्नुदक! अस्माभ्यमेतदेवं यथा त्वयोच्यते तद्रोचत इति, इदमुक्तं भवति—यदिदं त्रसकायविरतौ भूतत्वविशेषणं क्रियते तन्निरर्थकतयाऽस्माभ्यं न रोचत इति। तदेवं व्यवस्थिते भो उदक! ये ते श्रमणा वा ब्राह्मणा वा एवं भूतशब्दविशेषणतेन प्रत्याख्यानमाचक्षते, परैः पृष्टास्तथैव भाषन्ते प्रत्याख्यानं, स्वतः कुर्वन्तः कारयन्तश्चैवमिति—सविशेषणं प्रत्याख्यानं भाषन्ते, तथैवमेव सविशेषणप्रत्याख्यानप्ररूपणावसरे सामान्येन प्ररूपयन्ति, एवं च प्ररूपयन्तो न खलु ते श्रमणा वा निर्ग्रन्था वा यथार्थां भाषां भाषन्ते, अपितु अनुताप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतीत्यनुतापिका तां, तथाभूतां च खलु ते भाषां भाषन्ते, अन्यथाभाषणे ह्यपरेण जानता बोधितस्य मतोऽनुतापो भवतीत्यतोऽनुतापिकेत्युच्यत इति । पुनरपि तेषां सविशेषणप्रत्याख्यानव्रतामुल्बणदोषोद्भिभावयिषयाऽऽह—'अब्भाइक्खंती'त्यादि, ते हि सविशेषणप्रत्याख्यानवादिनो यथावस्थितं प्रत्याख्यानं ददतः साधून् गृहतश्च श्रमणोपासकानभ्याख्यान्ति—अभूतदोषोद्भावनतोऽभ्याख्यानं ददति । किंचान्यत्—'जेहिंवि'इत्यादि, येष्वप्यन्येषु प्राणिषु भूतेषु जीवेषु सत्त्वेषु विषयभूतेषु विशिष्य ये संयमं कुर्वन्ति संयमयन्ति, तद्यथा—ब्राह्मणो न मया हन्तव्य इत्युक्ते स यदा वर्णान्तरे तिर्यक्षु वा व्यवस्थितो भवति तद्वधे ब्राह्मणवध आपद्यते, भूतशब्दाविशेषणात्, तदेवं तान्यपि विशेषव्रतानि सूकरो मया न हन्तव्य इत्येवमादीनि ते भूतशब्दविशेषणवादिनोऽभ्याख्यान्ति—दूषयन्ति । किमित्यत आह—'कस्स ण'मित्यादि कस्याद्धेतोस्तदसद्भूतं दूषणं भवतीति ?, यस्मात्संसारिकाः खलु प्राणाः परस्परजातिसंक्रमणभाजो यतस्ततस्त्रसाः प्राणिनः स्यावरत्वेन प्रत्यायान्ति स्यावराश्च त्रसत्वेनेति । त्रसकायाच्च सर्वात्मना त्रसायुष्कं परित्यज्य स्थावरकाये तद्योग्यकर्मोपादानादुत्पद्यन्ते, तथा स्थावरकायाच्च तदायुष्कादिना कर्मणा विमुच्यमानास्त्रसकाये समुत्पद्यन्ते, तेषां च त्रसकाये समुत्पन्नानां स्थानमेतत्त्रसकायाख्यमधात्यम्—अधातार्हं भवति, यस्मात्तेन श्रावकेण त्रसानुद्दिश्य स्थूलप्राणातिपातविरमणं कृतं, तस्य तीव्राध्यवसायोत्पादकत्वाल्लोकगर्हितत्वाच्चेति, तत्रासौ स्थूलप्राणातिपातान्निवृत्तः, तन्निवृत्त्या च त्रसस्थानमधात्यं वर्तते, स्थावरकायाच्चानिवृत्त इति तद्योग्यतया तत्स्थानं धात्यमिति । तदेवं भवदभिप्रायेण विशिष्टसत्त्वोद्देशेनापि प्राणातिपातनिवृत्तौ कृतायामपरपर्यायापन्नं प्राणिनं व्यापादयतो व्रतभङ्गो भवति, ततश्च न कस्यचिदपि सम्यग्व्रतपालनं स्यादित्येवमभ्याख्यातम्—असद्भूतदोषोद्भावनं भवन्तो ददति । यदपि भवद्भिर्वर्तमानकालविशेषणतेन किलायं भूतशब्द उपादीयते असावपि व्यामोहाय केवलमुपतिष्ठते, तथाहि—भूतशब्दोऽयमुपमानेऽपि वर्तते, तद्यथा—देवलोकभूतं नगरमिदं, न देवलोक एव, तथात्रापि त्रसभूतानां—त्रससदृशानामेव प्राणातिपातनिवृत्तिः कृता स्यात्, न तु त्रसानामिति, अथ तादर्थ्ये भूतशब्दोऽयं, यथा शीतीभूतमुदकं, शीतमित्यर्थः, एवं त्रसभूतास्त्रसत्वं प्राप्ताः, तथा च सति त्रसशब्देनैव गतार्थत्वात्पौनरुक्त्यं स्याद्, अथैवमपि स्थिते भूतशब्दोपादानं क्रियते, तथा च सत्यतिप्रसङ्गः स्यात्, तथाहि—क्षीरभूतविकृतेः प्रत्याख्यानं करोम्येवं घृतभूतं मे ददस्वैवं घटभूतः पटभूत इत्येवमादावप्यायोज्यमिति ॥ तदेवं निरस्ते भूतशब्देसत्युदक आह—

सवायं उदए पेढालपुत्ते भगवं गोयमं एवं वयासी—कयरे खलु ते आउसंतो गोयमा ! तुब्भे वयह तसा पाणा तसा आउ अन्नहा ?, सवायं भगवं गोयमे उदयं पेढालपुत्तं एवं वयासी—आउसंतो उदगा ! जे तुब्भे वयह तसभूता पाणा तसा ते वयं वयामो तसा पाणा, जे वयं वयामो तसा पाणा ते तुब्भे वयह तसभूया पाणा, एए संति दुवे ठाणा तुल्ला एगट्ठा, किमाउसो ! इमे भे सुप्पणीयतराए भवइ तसभूया पाणा तसा, इमे भे दुप्पणीयतराए भवइ—तसा पाणा तसा, ततो एगमाउसो ! पडिक्कोसह एक्कं अभिणंदह, अयंपि भेदो से णो णेआउए भवइ ॥ भगवं च णं उदाहु—संतेगइआ मणुस्सा भवंति, तेसिं च णं एवं वुत्तपुवं भवइ—णो खलु वयं संचाएमो मुंडा भवित्ता अगाराओ अणगारियं पव्वइत्तए, सावयं णं अणुपुव्वेणं गुत्तस्स लिसिस्सामो, ते एवं संखवेंति ते एवं संखं ठवयंति ते एवं संखं ठावयंति नन्नत्थ अभिओएणं गाहावइचोरग्गहणविमोक्खणयाए तसेहिं पाणेहिं निहाय दंडं, तंपि तेसिं कुसलमेव भवइ ॥ (सू० ७८)

सद्वाचं सवादं वोदकः पेढालपुत्रो भगवन्तं—गौतममेवमवादीत्, तद्यथा—हे आयुष्मन् गौतम ! कतरान्प्राणिनो यूयं वदथ, त्रसा एव ये प्राणाः—प्राणिनस्त एव त्रसाः प्राणा इत्युतान्यथेति, एवं पृष्टो भगवान् गौतमस्तमुदकं सद्वाचं पेढालपुत्रमेवमवादीत्, तद्यथा—आयुष्मन्नुदक ! यान्प्राणिनो यूयं वदथ त्रसभूताः—त्रसत्वेनाविर्भूताः प्राणिनो नातीता नाप्येष्याः, किं तु ? वर्तमानकाल एव त्रसाः प्राणा इति, तानेव वयं वदामस्त्रसाः—त्रसत्वं प्राप्तास्तत्कालवर्तिन एव त्रसाः प्राणा इति, एतदेव व्यत्ययेन विभणिषुराह—'जे वय'मित्यादि, यान् वयं वदामस्त्रसा एव प्राणास्त्रसाः प्राणास्तानेव यूयमेवं वदथ—त्रसभूता एव प्राणास्त्रसभूताः प्राणाः, एवं च व्यवस्थिते एते अनन्तरोक्ते द्वे अपि स्थाने एकार्थे—तुल्ये भवतो, न ह्यत्रार्थभेदः कश्चिदस्त्यन्यत्र शब्दभेदादिति, एवं च व्यवस्थिते किमायुष्मन् ! युष्माकमयं पक्षः सुष्ठु प्रणीततरो—युक्तियुक्तः प्रतिभासते ?, तद्यथा—त्रसभूता एव प्राणास्त्रसभूताः प्राणा इति, अयं तु पक्षो दुष्प्रणीततरो 'भवति' प्रतिभासते भवतां ?, तद्यथा—त्रसा एव प्राणास्त्रसाः प्राणाः, सन्ति चैकार्थत्वेन (सति चैकार्थत्वे) भवतां कोऽयं व्यामोहो ? येन शब्दभेदमात्रमाश्रित्यात एकं पक्षमाक्रोशथव द्वितीयं चाभिनन्दथ इति । तदयमपि तुल्येऽप्यर्थे सत्येकस्य पक्षस्याक्रोशनमपरस्य सविशेषणपक्षस्याभिनन्दनमित्येष दोषाभ्युपगमो भवतां 'नो नैयायिको' न न्यायोपपन्नो भवति, उभयोरपि पक्षयोः समानत्वात्, केवलं सविशेषणपक्षे भूतशब्दोपादानं मोहमावहतीति ॥ यच्च भवताऽस्माकं प्राग्दोषोद्भावनमकारि, तद्यथा—त्रसानां वधनिवृत्तौ तदन्येषां वधानुमतिः स्यात साधोः, तथा भूतशब्दानु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादानेऽनन्तरमेव त्रसं स्थावरपर्यायापन्नं व्यापादयतो व्रतभङ्ग इत्येतत्कुचोद्यजातं परिहर्तुकाम आह—णमिति वाक्यालङ्कारे, भगवान्गौतमस्वामी, चशब्दः पुनःशब्दार्थे, पुनराह, तद्यथा—'सन्ति' विद्यन्ते एके केचन लघुकर्माणो मनुष्याः प्रव्रज्यां कर्तुमसमर्थाः, तद्व्यतिरेकेणैव धर्मं चिकीर्षवः, तेषां चैवमध्यवसायिनां साधोर्धर्मोपदेशश्रवणस्याग्रत इदमुक्तपूर्वं भवति, तद्यथा—भोः साधो! न खलु वयं शक्नुमो मुण्डा भवितुं-प्रव्रज्यां ग्रहीतुमगारादू-गृहादनगारतां-साधुभावं प्रतिपत्तुं, वयं त्वानुपूर्व्येण-क्रमशो 'गोअस्से'ति गां त्रायत इति गोत्रं-साधुतं तस्य साधुभावस्य पर्यायेण-परिपाट्याऽऽत्मानमनुश्लेषयिष्यामः, इदमुक्तं भवति-पूर्वं देशविरतिरूपतया श्रावकधर्मं गृहस्थयोग्यमनिन्द्यमनुपालयामः, ततोऽनुक्रमेण पश्चाच्छ्रमणधर्ममिति। तत एवं ते 'संख्यां'व्यवस्थां 'श्रावयन्ति' प्रत्याख्यानं कुर्वन्तः प्रकाशयन्ति, तद्यथा—नान्यत्राभियोगेन, स चामियोगो राजाभियोगो गणाभियोगो बलाभियोगो देवताभियोगो गुरुनिग्रहश्चेत्येवमादिनाऽभियोगेन व्यापादयतोऽपि त्रसं न व्रतभङ्गः। तथा गृहपतिचौरविमोक्षणतयेत्यस्यायमर्थः—कस्यचिद्गृहपतेः षट् पुत्राः, तैश्च सत्यपि पितृपितामहक्रमायाते महति वित्ते तथाविधकर्मोदयाद्राजकुलभाण्डागारे चौर्यमकारि, राजपुरुषैश्च भवितव्यतानियोगेन गृहीतास्ते इत्येके, परे त्वन्यथा व्याचक्षते, तद्यथा-रत्नपुरे नगरे रत्नशेखरो नाम राजा, तेन च परितुष्टेन रत्नमालाग्रमहिषीप्रमुखान्तःपुरस्य कौमुदीप्रचारोऽनुज्ञातः, तदवगम्य नागरलोकेनापि राजानुमत्या स्वकीयस्य स्त्रीजनस्य तथैव क्रीडनमनुमतं, राज्ञा च नगरे सडिण्डिमशब्दमाघोषितं, तद्यथा—अस्तमनोपरि कौमुदीमहोत्सवे प्रवृत्ते यः कश्चित्पुरुषः समुपलभ्यते नगरमध्ये तस्याविज्ञप्तिकः शरीरनिग्रहः क्रियत इति, एवं च व्यवस्थिते सत्येकस्य वणिजः षट् पुत्राः, ते च कौमुदीदिने क्रयविक्रयसंव्यवहारव्यग्रतया तावत्स्थिता यावत्सवितास्तमुपगतः। तदनन्तरमेव स्थगितानि च

नगरद्वाराणि, तेषां च तत्कालात्ययान्न निर्गमनमभूत्, ततस्ते भयसंभ्रान्ता नगरमध्य एवात्मानं गोपयित्वा स्थिताः, ततो निष्क्रान्ते कौमुदीप्रचारे राज्ञाऽऽरक्षिकाः समाहूयादिष्टाः—यथा सम्यक् निरूपयत यूयं नात्र नगरे कौमुदीचारे कश्चित्पुरुषो व्यवस्थित? इति, तैरप्यारक्षिकैः सम्यग् निरूपयद्भिरुपलभ्य षड्गणिकपुत्रवृत्तान्तो यथावस्थित एव राज्ञे निवेदितः, राज्ञाऽप्याज्ञाभङ्गकुपितेन तेषां षण्णामपि वधः समादिष्टः, ततस्तत्पिता पुत्रवधसमाकर्णनगुरुशोकविह्वलोऽकाण्डापतितकुलक्षयोद्भ्रान्तलोचनः किंकर्तव्यतामूढतया गणितविधेयाविधेयविशेषो राजानमुपस्थितोऽवादीच्च गद्गदया गिरा—यथा मा कृथा देवास्माकं कुलक्षयं, गृह्यतामिदमस्मदीयं कुलक्रमायातं स्वभुजोपार्जितं प्रभूतं द्रविणजातं, मुच्यतां मुच्यताममी षट् पुत्राः, क्रियतामयमस्माकमनुग्रह इति। एवमभिहितो राजा तद्वचनमनाकर्ण्य पुनरपि सविशेषमादिदेश, असावपि वणिक्सर्ववधाशङ्की सर्वमोचनानभिप्रायं राजानमवेत्य पञ्चानां मोचनं याचितवान्, तानप्यसौ राजा न मोक्तुमना इत्येवमभिगम्य चतुर्मोचनकृते सादरं विज्ञप्तवान् तं, तथापि राजा तमनादृत्य कुपितवदन एव स्थितः, ततस्त्रयाणां विमोचने कृतादरस्तस्थिताऽभूत्, तानप्यमुञ्चन्तं राजानं ज्ञात्वा गणितस्यापराधो द्वयोर्मोचनं प्रार्थितवान्, तत्राप्यवज्ञाप्रधानं नृपतिमवगम्य ततः पौरमहत्तमसमेतो राजानमेवं विज्ञप्तवान्, तद्यथा—देवाकाण्ड एवास्माकं कुलक्षयः समुपस्थितः, तस्माच्च भवन्त एव त्राणायालम्, अतः क्रियतामेकमत्पुत्रविमोचनेन प्रसाद इति भणित्वा पादयोः सपौरमहत्तमः पतितो, राज्ञापि संजातानुकम्पेन मुक्तस्तदेको ज्येष्ठपुत्र इति। तदेवमस्य दृष्टान्तस्य दार्ष्टान्तिकयोजनेयं, तद्यथा—साधुनाऽभ्युपगतसम्यग्दर्शनमवगम्य श्रावकमखिलप्राणातिपातविरतिग्रहणं प्रति चोदितोऽप्यशक्नितया यदा न सर्वप्राणातिपातविरतिं प्रतिपद्यते, यथाऽसौ राजा वणिजाऽत्यर्थं विज्ञापितोऽपि न षडपि पुत्रान् मुमुक्षति, नापि पञ्चचतुस्त्रिद्वि-

संख्यान् पुत्रानिति, तत एकविमोक्षणेनात्मानं कृतार्थमिव मन्यमानः स्थितोऽसौ, एवं साधोरपि श्रावकस्य यथाशक्ति व्रतं गृह्णतस्तदनुरूपमेवाणुव्रतदानमविरुद्धमिति, यथा च तस्य वणिजो न शेषपुत्रवधानुमतिलेशोऽप्यस्ति, एवं साधोरपि न शेषप्राणिवधानुमतिप्रत्ययजनितः कर्मबन्धो भवति, किं तर्हि?, यदेव व्रतं गृहीत्वा यानेव सत्त्वान् बादरान् संकल्पजप्राणिवधनिवृत्त्या रक्षति तन्निमित्तः कुशलानुबन्ध एवेत्येतत्सूत्रेणैव दर्शयितुमाह—'तसेहि'मित्यादि, त्रसन्तीति त्रसाः—द्वीन्द्रियादयस्तेभ्यः सकाशान्निधाय निहाय वा परित्यज्येतियावत् कं?-दण्डयतीति दण्डस्तं परित्यज्य, त्रसेषु प्राणातिपातविरतिं गृहीत्वेत्यर्थः, 'तदपि च' त्रसप्राणातिपातविरमणव्रतं 'तेषां' देशविरतानां कुशलहेतुत्वात्कुशलमेव भवति॥ यच्चागमिहितं, तद्यथा-तमेव त्रसं स्थावरपर्यायापन्नं नागरकमिव बहिःस्थं व्यापादयतोऽवश्यंभावी व्रतभङ्ग इत्येतत् परिहर्तुकाम आह—

तसावि वुच्चंति तसा तससंभारकडेणं कम्मुणा णामं च णं अब्भुवगयं भवइ, तसाउयं च णं पलिक्खीणं भवइ, तसकायट्ठिइया ते तओ आउयं विप्पजहंति, ते तओ आउयं विप्पजहित्ता थावरत्ताए पच्चायंति। थावरावि वुच्चंति थावरा थावरसंभारकडेणं कम्मुणा णामं च णं अब्भुवगयं भवइ, थावराउयं च णं पलिक्खीणं भवइ, थावरकायट्ठिइया ते तओ आउयं विप्पजहंति तओ आउयं विप्पजहित्ता सुद्धो परलोइयत्ताए पच्चायंति, ते पाणावि वुच्चंति, ते तसावि वुच्चंति, ते महाकाया ते चिरट्ठिइया॥ (सूत्रं ७६)

'त्रसा अपि' द्वीन्द्रियादयोऽपि त्रसा इत्युच्यन्ते च त्रसाः त्रससंभारकृतेन कर्मणा भवन्ति, संभारो नामावश्यंतया कर्मणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपाकानुभवेन वेदनं, तच्चेह त्रसनाम प्रत्येकनामेत्यादिकं नामकर्माभ्युपगतं भवति, त्रसत्वेन यत्परिबद्धमायुष्कं तद्यदोदयप्राप्तं भवति, तदा त्रससंभारकृतेन कर्मणा त्रसा इति व्यपदिश्यन्ते, न तदा कथञ्चित्स्थावरत्वव्यपदेशः, यदा च तदायुः परिक्षीणं भवति, णमिति वाक्यालङ्कारे, त्रसकायस्थितिकं च कर्म यदा परिक्षीणं भवति, तच्च जघन्यतोऽन्तर्मुहूर्तमुत्कृष्टतः सातिरेकसहस्रद्वयसागरोपमपरिमाणं, तदा ततस्त्रसकायस्थितेरभावात्तदायुष्कं ते परित्यजन्ति, अपराण्यपि तत्सहचरितानि कर्माणि परित्यज्य स्थावरत्वेन प्रत्यायान्ति, स्थावरा अपि स्थावरसंभारकृतेन कर्मणा तत्रोत्पद्यन्ते, स्थावरादिनाम च तत्राभ्युपगतं भवति, अपराण्यपि तत्सहचरितानि सर्वात्मना त्रसत्वं परित्यज्य स्थावरत्वेनोदयं यान्ति इति, एवं च व्यवस्थिते कथं स्थावरकायं व्यापादयतो गृहीतत्रसकायप्राणातिपातनिवृत्तेः श्रावकस्य व्रतभङ्ग इति ? । किंचान्यत्—'थावराउयं च ण'मित्यादि, यदा तदपि स्थावरायुष्कं परिक्षीणं भवति तथा स्थावरकायस्थितिश्च, सा जघन्यतोऽन्तर्मुहूर्तमुत्कृष्टतोऽनन्तकालमसंख्येयाः पुद्गलपरावर्ता इति, ततस्तत्कायस्थितेरभावात्तदायुष्कं परित्यज्य 'भूयः' पुनरपि पारलौकिकत्वेन स्थावरकायस्थितेरभावात् त्रसत्वेन सामर्थ्यात्प्रत्यायान्ति, तेषां च त्रसानामन्वर्थिकान्यभिधानान्यभिधित्सुराह—'ते पाणावी'त्यादि, ते त्रससंभारकृतेन कर्मणा समुत्पन्नाः सन्तः सामान्यसंज्ञया प्राणा अप्युच्यन्ते, तथा विशेषतः 'त्रस भयचलनयो'रिति धात्वर्थानुगमाद्भयचलनाभ्यामुपेतास्त्रसा अप्युच्यन्ते, तथा महान् कायो येषां ते महाकायाः योजनलक्षप्रमाणशरीरविकुर्वणात्, तथा चिरस्थितिका अप्युच्यन्ते, भवस्थित्यपेक्षया त्रयस्त्रिंशत्सागरोपमायुष्कसद्भावात्, ततस्त्रसपर्यायव्यवस्थितानामेव प्रत्याख्यानं तेन गृहीतं, न तु स्थावरकायत्वेन व्यवस्थितानामपीति । यस्तु नागरकदृष्टान्तो भवतोपन्यस्तः असावपि दृष्टान्तदार्ष्टान्तिकयोरसाम्यात्केवलं भवतोऽनुपासितगुरुकुलवासित्वमावि-

सूत्रक. ७७

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥४१५॥

७ नालन्दीयाध्य. श्रावकप्रत्याख्यानस्य सविषयता

॥४१५॥

ष्करोति, तथाहि—नगरधर्मैर्युक्तो नागरिकः स च मया न हन्तव्य इति प्रतिज्ञां गृहीत्वा यदा तमेव व्यापादयति बहिःस्थितं पर्यायापन्नं तदा तस्य किल व्रतभङ्ग इति भवतः पक्ष इति, स च न घटते, यतो यो हि नगरधर्मैरुपेतः स बहिःस्थोऽपि नागरिक एव, अतः पर्यायापन्न इत्येतद्विशेषणं नोपपद्यते, अथ सामस्त्येन परित्यज्य नगरधर्मानसौ वर्तते अतस्तमेवेत्येतद्विशेषणं नोपपद्यते, तदेवमत्र त्रसः सर्वात्मना त्रसत्वं परित्यज्य यदा स्थावरः समुत्पद्यते तदा पूर्वपर्यायपरित्यागादपरपर्यायापन्नत्वात्त्रस एवासौ न भवति, तद्यथा—नागरिकः पल्ल्यां प्रविष्टस्तद्धर्मोपेतत्वात्पूर्वधर्मपरित्यागाच्च नागरिक एवासौ न भवतीति ॥

पुनरप्यन्यथोदकः पूर्वपक्षमारचयितुमाह—

सवायं उदए पेढालपुत्ते भयवं गोयमं एवं वयासी—आउसंतो गोयमा ! णत्थि णं से केइ परियाए जण्णं समणोवासगस्स एगपाणातिवायविरएवि दंडे निक्खित्ते, कस्स णं तं हेउं ?, संसारिया खलु पाणा, थावरावि पाणा तसत्ताए पच्चायंति, तसावि पाणा थावरत्ताए पच्चायंति, थावरकायाओ विप्पमुच्चमाणा सव्वे तसकायंसि उववज्जंति, तसकायाओ विप्पमुच्चमाणा सव्वे थावरकायंसि उववज्जंति, तेसिं च णं थावरकायंसि उववन्नाणं ठाणमेयं घत्तं ॥ सवायं भगवं गोयमे उदयं पेढालपुत्तं एवं वयासी—णो खलु आउसो ! अस्माकं वत्तव्वएणं तुब्भं चेव अणुप्पवादेणं अत्थि णं से परियाए जे णं समणोवासगस्स सव्वपाणेहिं सव्वभूएहिं सव्वजीवेहिं सव्वसत्तेहिं दंडे निक्खित्ते भवइ, कस्स णं तं हेउं ?, संसारिया खलु पाणा, तसावि पाणा थावरत्ताए पच्चायंति, थावरावि पाणा तसत्ताए पच्चायंति, तसकायाओ विप्पमुच्चमाणा सव्वे थावरकायंसि उववज्जंति, थावरकायाओ विप्पमुच्चमाणा सव्वे तसकायंसि उववज्जंति, तेसिं च णं तसकायंसि उववन्नाणं ठाणमेयं अधत्तं, ते पाणावि वुच्चंति, ते तसावि वुच्चंति, ते महाकाया ते चिरट्ठिइया, ते बहुयरगा पाणा जेहिं समणोवासगस्स सुपच्चक्खायं भवति, ते अप्पयरागा पाणा जेहिं समणोवासगस्स अपच्चक्खायं भवइ, से महया तसकायाओ उवसंतस्स उवट्ठियस्स पडिविरयस्स जन्नं तुब्भे वा अन्नो वा एवं वदह—णत्थि णं से केइ परियाए जंसि समणोवासगस्स एगपाणाएवि दंडे णिक्खित्ते, अयंपि भेदे से णो णेयाउए भवइ ॥ सूत्रं ७७ ॥

सद्धाचं सवादं वोदकः पेढालपुत्रो भगवन्तं गौतममेवमवादीत्, तद्यथा—आयुष्मन् गौतम ! नास्त्यसौ कश्चित्पर्यायो यस्मिन्नेकप्राणातिपातविरमणेऽपि श्रमणोपासकस्य विशिष्टविषयामेव प्राणातिपातनिवृत्तिं कुर्वतो दण्डः—प्राण्युपमर्दनरूपो निक्षिप्तपूर्वः—परित्यक्तपूर्वो भवति, इदमुक्तं भवति—श्रावकेण त्रसपर्यायमेकमुद्दिश्य प्राणातिपातविरतिव्रतं गृहीतं, संसारिणां च परस्परगमनसंभवात् ते च त्रसाः सर्वेऽपि किल स्थावरत्वमुपगतास्ततश्च त्रसानामभावान्निर्विषयं तत्प्रत्याख्यानमिति । एतदेव प्रश्नपूर्वकं दर्शयितुमाह—'कस्स णं तं हेउ'मित्यादि, णमिति वाक्यालङ्कारे, कस्य हेतोरिदमभिधीयते, केन हेतुनेत्यर्थः । संसारिकाः प्राणाः परस्परसंसरणशीला यतस्ततः स्थावराः सामान्येन त्रसतया प्रत्यायान्ति, त्रसा अपि स्थावरतया प्रत्यायान्ति । तदेवं संसारिणां परस्परगमनं प्रदर्श्याधुना यत्परेण विवक्षितं तदाविष्कुर्वन्नाह—'थावरकायाओ'इत्यादि, स्थावरकायाद्विप्रमुच्यमानाः स्वायुषा तत्सहचरितैश्च कर्मभिः सर्वे—निरवशेषास्त्रसकाये समुत्पद्यन्ते, त्रसकायादपि तदायुषा विप्रमुच्यमानाः सर्वे स्थावरकाये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुत्पद्यन्ते, तेषां च त्रसानां सर्वेषां स्थावरकायसमुत्पन्नानां स्थानमेतद् घात्यं वर्तते, तेन श्रावकेण स्थावरकायवधनिवृत्तेरकरणाद्, अतः सर्वस्य त्रसकायस्य स्थावरकायत्वेनोत्पत्तेर्निर्विषयं तस्य श्रावकस्य त्रसवधनिवृत्तिरूपं प्रत्याख्यानं प्राप्नोति, तद्यथा—केनचिद्व्रतमेवंभूतं गृहीतं यथा—मया नगरनिवासी न हन्तव्यः, तच्चोद्वसितं नगरम्, अतो निर्विषयं तत्तस्य प्रत्याख्यानम्, एवमत्रापि सर्वेषां त्रसानामभावान्निर्विषयत्वमिति ॥ एवमुदकेनाभिहिते सति तदभ्युपगमेनैव गौतमस्वामी दूषयितुमाह—सद्वाचं सवादं वा तमुदकं पेढालपुत्रं गौतमस्वाम्येवमवादीत्, तद्यथा—नो खल्वायुष्मन्नुदक! अस्माकमित्येतन्मगधदेशे आगोपालाङ्गनादिप्रसिद्धं संस्कृतमेवोच्चार्यते तदिहापि तथैवोच्चारितमिति, तदेवमस्माकं संबन्धिना वक्तव्येन नैतदशोभनं, किं तर्हि?, युष्माकमेवानुप्रवादेनैतदशोभनं, इदमुक्तं भवति—अस्मद्वक्तव्येनास्य चोद्यस्यानुत्थानमेव, तथाहि—नैतद्भूतं न च भवति नापि कदाचिद्भविष्यति यदुत—सर्वेऽपि स्थावरा निर्लेपतया त्रसत्वं प्रतिपद्यन्ते, स्थावराणामानन्त्यात्त्रसानां चासंख्येयत्वेन तदाधारत्वानुपपत्तेरित्यभिप्रायः, तथा त्रसा अपि सर्वेऽपि न स्थावरत्वं प्रतिपन्ना न प्रतिपद्यन्ते नापि प्रतिपत्स्यन्ते, इदमुक्तं भवति—यद्यपि विवक्षितकालवर्तिनस्त्रसाः कालपर्यायेण स्थावरकायत्वेन यास्यन्ति तथापि अपरापरत्रसोत्पत्त्या त्रसजात्यनुच्छेदान्न कदाचिदपि त्रसकायशून्यः संसारो भवतीति, तदेवमसन्मतेन चोद्यानुत्थानमेव, अभ्युपगम्य च भवदीयं पक्षं युष्मदभ्युपगमेनैव परिहियते—तदेव पराभिप्रायेण परिहरति—अस्त्यसौ पर्यायः—स चार्थ—भवदभिप्रायेण यदा सर्वेऽपि स्थावरास्त्रसत्वं प्रतिपद्यन्ते यस्मिन्पर्याये—अवस्थाविशेषे श्रमणोपासकस्य कृतत्रसप्राणातिपातनिवृत्तेः सतः त्रसत्वेन च भवदभ्युपगमेन सर्वप्राणिनामुत्पत्तेः तैश्च सर्वप्राणिभिस्त्रसत्वेन भूतैः—उत्पन्नैः करणभूतैस्तेषु वा विषयभूतेषु दण्डो निक्षिप्तः—परित्यक्तः, इदमुक्तं भवति—यदा

सर्वेऽपि स्थावराः भवदभिप्रायेण त्रसत्वेनोत्पद्यन्ते तदा सर्वप्राणिविषयं प्रत्याख्यानं श्रमणोपासकस्य भवतीति। एतदेव प्रश्नपूर्वकं दर्शयितुमाह—'कस्स णं हेउ'मित्यादि, सुगमं यावत्रसकाये समुत्पन्नानां स्थानमेतदद्यात्वम्—अधातहं, तत्र विरतिसद्भावादित्यभिप्रायः। ते च त्रसा नरकतिर्यङ्नरामरगतिभाजः सामान्यसंज्ञया प्राणिनोऽप्यभिधीयन्ते, तथा विशेषसंज्ञया भयचलनोपेतत्वात्त्रसा अप्युच्यन्ते, तथा महान् कायः—शरीरं येषां ते महाकायाः, वैक्रियशरीरस्य योजनलक्षप्रमाणत्वादिति। तथा चिरस्थितिकाः त्रयस्त्रिंशत्सागरोपमपरिमाणत्वाद्भवस्थितेः, तथा (च) ते प्राणिनस्त्रसा बहुतमा—भूयिष्ठा यैः श्रमणोपासकस्य सुप्रत्याख्यानं भवति, त्रसानुद्दिश्य तेन प्रत्याख्यानस्य ग्रहणात् तदभ्युपगमेन च सर्वस्थावराणां त्रसत्वेनोत्पत्तेरतस्तेऽल्पतरकाः प्राणिनो यैः करणभूतैः श्रावकस्याप्रत्याख्यानं भवति, इदमुक्तं भवति—अल्पशब्दस्याभाववाचित्वाच्च सन्त्येव ते येष्वप्रत्याख्यानमितीत्येवं पूर्वोक्तया नीत्या 'से' तस्य श्रमणोपासकस्य महतस्त्रसकायादुपशान्तस्य—उपरतस्य प्रतिविरतस्य सतः सुप्रत्याख्यानं भवतीति संबन्धः, तदेवं व्यवस्थिते णमिति वाक्यालङ्कारे यद्यूयं वदथान्यो वा कश्चित्तद्यथा—नास्त्यसावित्यादि सुगमं यावत् 'णो णेयाउए भवइ'त्ति ॥ साम्प्रतं त्रसानां स्थावरपर्यायापन्नानां व्यापादनेनापि न व्रतभङ्गो भवतीत्यर्थस्य प्रसिद्धये दृष्टान्तत्रयमाह—

भगवं च णं उदाहु नियंठा खलु पुच्छियव्वा—आउसंतो! नियंठा इह खलु संतेगइया मणुस्सा भवंति, तेसिं च एवं वुत्तपुव्वं भवइ—जे इमे मुंडे भवित्ता अगाराओ अणगारियं पव्वइए, एसिं च णं आमरणंताए दंडे णिक्खित्ते, जे इमे अगारमावसंति एएसि णं आमरणंताए दंडे णो णिक्खित्ते, केई च णं समणा

जाव वासाइं चउपंचमाइं छद्दसमाइं अप्पयरो वा भुज्जयरो वा देसं दूइज्जित्ता अगारमावसेज्जा?, हंतावसेज्जा, तस्स णं तं गारत्थं वहमाणस्स से पच्चक्खाणे भंगे भवइ?, णो तिणट्ठे समट्ठे, एवमेव समणोवासगस्सवि तसेहिं पाणेहिं दंडे णिक्खित्ते, थावरेहिं पाणेहिं दंडे णो णिक्खित्ते, तस्स णं तं थावरकायं वहमाणस्स से पच्चक्खाणे णो भंगे भवइ, से एवमायाणह? णियंठा!, एवमायाणियव्वं ॥ भगवं च णं उदाहु नियंठा खलु पुच्छियव्वा—आउसंतो नियंठा! इह खलु गाहावईइ वा गाहावइपुत्तो वा तहप्पगारेहिं कुलेहिं आगम्म धम्मं सवणवत्तियं उवसंकमेज्जा?, हंता उवसंकमेज्जा, तेसिं च णं तहप्पगाराणं धम्मं आइक्खियव्वे?, हंता आइक्खियव्वे, किं ते तहप्पगारं धम्मं सोच्चा णिसम्म एवं वएज्जा—इणमेव निग्गंथं पावयणं सच्चं अणुत्तरं केवलियं पडिपुण्णं संसुद्धं णेयाउयं सल्लकत्तणं सिद्धिमग्गं मुत्तिमग्गं निज्जाणमग्गं निव्वाणमग्गं अवितहमसंदिद्धं सव्वदुक्खप्पहीणमग्गं, एत्थं ठिया जीवा सिज्झंति बुज्झंति मुच्चंति परिणिव्वायंति सव्वदुक्खाणमंतं करेंति, तमाणाए तहा गच्छामो तहा चिट्ठामो तहा णिसियामो तहा तुयट्टामो तहा भुंजामो तहा भासामो तहा अब्भुट्ठामो तहा उट्ठाए उट्ठेमोत्ति पाणाणं भूयाणं जीवाणं सत्ताणं संजमेणं संजमामोत्ति वएज्जा?, हंता वएज्जा, किं ते तहप्पगारा कप्पंति पव्वावित्तए?, हंता कप्पंति, किं ते तहप्पगारा कप्पंति मुंडावित्तए?, हंता कप्पंति, किं ते तहप्पगारा कप्पंति सिक्खावित्तए?, हंता कप्पंति, किं ते तहप्पगारा कप्पंति उवट्ठावित्तए?, हंता कप्पंति, तेसिं च णं तहप्पगाराणं सव्वपाणेहिं जाव सव्वसत्तेहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दंडे णिक्खित्ते ?, हंता णिक्खित्ते, से णं एयारूवेणं विहारेणं विहरमाणा जाव वासाइं चउपंचमाइं छद्दसमाइं वा अप्पयरो वा भुज्जयरो वा देसं दूइज्जेत्ता अगारं वएज्जा ?, हंता वएज्जा, तस्स णं सव्वपाणेहिं जाव सव्वसत्तेहिं दंडे णिक्खित्ते ?, णो इणट्ठे समट्ठे, से जे से जीवे जस्स परेणं सव्वपाणेहिं जाव सव्वसत्तेहिं दंडे णो णिक्खित्ते, से जे से जीवे जस्स आरेणं सव्वपाणेहिं जाव सत्तेहिं दंडे णिक्खित्ते, से जे से जीवे जस्स इयाणिं सव्वपाणेहिं जाव सत्तेहिं दंडे णो णिक्खित्ते भवइ, परेणं असंजए आरेणं संजए, इयाणिं असंजए, असंजयस्स णं सव्वपाणेहिं जाव सत्तेहिं दंडे णो णिक्खित्ते भवइ, से एवमायाणह ? णियंठा !, से एवमायाणियव्वं ॥ भगवं च णं उदाहु णियंठा खलु पुच्छियव्वा-आउसंतो ! नियंठा इह खलु परिव्वाइया वा परिव्वाइआओ वा अन्नयरेहिंतो तित्थायतणेहिंतो आगम्म धम्मं सवणवत्तियं उवसंकमेज्जा ?, हंता उवसंकमेज्जा, किं तेसिं तहप्पगारेणं धम्मे आइक्खियव्वे ?, हंता आइक्खियव्वे, तं चेव उवट्ठावित्तए जाव कप्पंति ?, हंता कप्पंति, किं ते तहप्पगारा कप्पंति संभुंजित्तए ?, हंता कप्पंति, तेणं एयारूवेणं विहारेणं विहरमाणा तं चेव जाव अगारं वएज्जा ?, हंता वएज्जा, ते णं तहप्पगारा कप्पंति संभुंजित्तए ?, णो इणट्ठे समट्ठे, से जे से जीवे जे परेणं नो कप्पंति संभुंजित्तए, से जे से जीवे आरेणं कप्पंति संभुंजित्तए, से जे से जीवे जे इयाणीं णो कप्पंति संभुंजित्तए, परेणं अस्समणे आरेणं समणे, इयाणिं अस्समणे, अस्समणेणं सद्धिं णो कप्पंति समणाणं निग्गंथाणं संभुंजित्तए, से एवमायाणह ? णियंठा !, से एवमायाणियव्वं ॥ सूत्रं ७८ ॥

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥४१८॥

णमिति वाक्यालङ्कारे, चशब्दः पुनःशब्दार्थे, पुनरपि भगवान् गौतमस्वाम्येवाह—स्वोद्भूत्यपरिहरणार्थमपरानपि तत्स्थविरान् साक्षिणः कर्तुमिदमाह—'निर्ग्रन्था' युष्मत्स्थविराः खलु प्रष्टव्याः, तद्यथा—आयुष्मन्तो निर्ग्रन्था ! युष्माकमप्येतद्वक्ष्यमाणमभिमतमाहोस्विन्नेति, अवष्टम्भेन चेदमाह, युष्माकमप्येतदभिप्रेतं यदहं वच्मि, तद्यथा—शान्तिः-उपशमस्तत्प्रधाना एके केचन मनुष्या भवन्ति, न नारकतिर्यग्देवाः, किं तर्हि ?, मनुष्याः, तेऽपि नाकर्मभूमिजा नापि म्लेच्छा अनार्या वा, तेषां चार्यदेशोत्पन्नानामुपशमप्रधानानाम् एतद् उक्तपूर्वं भवति—अयं व्रतग्रहणविशेषो भवति, तद्यथा—य इमे मुण्डा भूत्वाऽगारात् गृहान्निर्गत्यानगारतां प्रतिपन्नाः—प्रव्रजिता इत्यर्थः, एतेषां चोपर्यामरणान्तं मया दण्डो निक्षिप्तः—परित्यक्तो भवति, इदमुक्तं भवति—कश्चित्तथाविधो मनुष्यो यतीनुद्दिश्य व्रतं गृह्णाति, तद्यथा—न मया यावज्जीवं यतयो हन्तव्याः, तथा ये चेमेऽगारं—गृहवासमावसन्ति तेषां दण्डो निक्षिप्त इत्येवं केषांचिद् व्रतग्रहणविशेषे व्यवस्थिते सति इदमपदिश्यते—तत्र केचन श्रमणाः प्रव्रजिताः कियन्तमपि कालं प्रव्रज्यापर्यायं प्रतिपाल्य, तमेव कालविशेषं दर्शयति—यावद्वर्षाणि चत्वारि पञ्च वा षड् दश वा, अस्य चोपलक्षणार्थत्वादन्योऽपि कालविशेषो द्रष्टव्यः, तमेवाह—अल्पतरं वा प्रभूततरं वा कालं तथा देशं च 'दूइज्जित्त'त्ति विहृत्य कुतश्चित्कर्मोदयात्तथाविधपरिणतेरगारं—गृहवासं वसेयुः—गृहस्था भवेयुरित्येवंभूतः पर्यायः किं संभाव्यते ? उत नेत्येवं पृष्टा निर्ग्रन्थाः प्रत्यूचुः—हन्त गृहवासं व्रजेयुः, तस्य च यतिवधगृहीतव्रतस्य तं गृहस्थं व्यापादयतः किं व्रतभङ्गो भवेदुत नेति ?, आहुर्नेति, एवमेव श्रमणोपासकस्यापि त्रसेषु दण्डो निक्षिप्तो न स्थावरेष्विति, अतस्त्रसं स्थावरपर्यायापन्नं व्यापादयतस्तत्प्रत्याख्यानभङ्गो न भवतीति ॥ साम्प्रतं पुनरपि पर्यायापन्नस्यान्यथात्वं दर्शयितुं द्वितीयं दृष्टान्तं प्रत्याख्यातृविषयगतं दर्शयितुकाम आह—भगवानेव गौतमस्वाम्याह,

७ नालन्दीयाध्य. श्रावकप्रत्याख्यानस्य सवियता ॥४१८॥

तद्यथा—गृहस्थाः यतीनामन्तिके समागत्य धर्मं श्रुत्वा सम्यक्त्वं प्रतिपद्य तदुत्तरकालं संजातवैराग्याः प्रव्रज्यां गृहीत्वा पुनस्तथाविधकर्मोदयात्तामेव त्यजन्ति, ते च पूर्वं गृहस्थाः सर्वारम्भप्रवृत्तास्तदारतः प्रव्रजिताः सन्तो जीवोपमर्दपरित्यक्तदण्डाः पुनः प्रव्रज्यापरित्यागे सति नो परित्यक्तदण्डाः, तदेवं तेषां प्रत्याख्यातॄणां यथावस्थात्रयेऽप्यन्यथात्वं भवत्येवं त्रसस्थावरयोरपि द्रष्टव्यम्, एतच्च 'भगवं च णमुदाहु'रित्यादेर्ग्रन्थस्य 'से एवमायाणियव्वं' इत्येतत्पर्यवसानस्य तात्पर्यं, अक्षरघटना तु सुगमेति स्वबुद्ध्या कार्या ॥ तदेवं द्वितीयं दृष्टान्तं प्रदर्श्याधुना तृतीयं दृष्टान्तं परतीर्थिकोद्देशेन दर्शयितुमाह—'भगवं च णं उदाहु इत्यादि, यावत् से एवमायाणियव्वं'ति उत्तानार्थं । तात्पर्यार्थस्त्वयं—पूर्वं परिव्राजकादयः सन्तोऽसंभोग्याः साधूनां गृहीतश्रामण्याः साधूनां संभोग्याः संवृत्ताः पुनस्तदभावे त्वसंभोग्या इत्येवं पर्यायान्यथात्वं त्रसस्थावराणामप्यायोजनीयमिति ॥ तदेवं दृष्टान्तत्रये प्रथमे दृष्टान्ते हन्तव्यविषयभूतो यतिगृहस्थभोजन पर्यायभेदो दर्शितो द्वितीये दृष्टान्ते प्रत्याख्यातृविषयगतो गृहस्थयतिपुनर्गृहस्थभेदेन पर्यायभेदः प्रदर्शितः, तृतीये तु दृष्टान्ते परतीर्थिकसाधुभावोज्झित्कमणभेदेन संभोगासंभोगद्वारेण पर्यायभेदो व्यवस्थापित इति। तदेवं दृष्टान्तप्राचुर्येण निर्दोषां देशविरतिं प्रसाध्य पुनरपि तद्गतमेव विचारं कर्तुकाम आह—

भगवं च णं उदाहु संतेगइया समणोवासगा भवंति, तेसिं च णं एवं वुत्तपुव्वं भवइ—णो खलु वयं संचाएमो मुंडा भवित्ता अगाराओ अणगारियं पव्वइत्तए, वयं णं चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु पडिपुण्णं पोसहं सम्मं अणुपालेमाणा विहरिस्सामो, थूलगं पाणाइवायं पच्चक्खाइस्सामो, एवं थूलगं मुसावायं थूलगं अदिन्नादाणं थूलगं मेहुणं थूलगं परिग्गहं पच्चक्खाइस्सामो, इच्छापरिमाणं करिस्सामो, दुविहं तिविहेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेणं, मा खलु ममट्ठाए किंचि करेह वा करावेह वा तत्थवि पच्चक्खाइस्सामो, ते णं अभोच्चा अपिच्चा असिणाइत्ता आसंदीपेढियाओ पच्चोरुहित्ता, ते तहा कालगया किं वत्तव्वं सिया–सम्मं कालगतत्ति ?, वत्तव्वं सिया, ते पाणावि वुच्चंति ते तसावि वुच्चंति ते महाकाया ते चिरट्ठिइया, ते बहुतरगा पाणा जेहिं समणोवासगस्स सुपच्चक्खायं भवइ, ते अप्पयरागा पाणा जेहिं समणोवासगस्स अपच्चक्खायं भवइ, इति से महयाओ जण्णं तुब्भे वयह तं चेव जाव अयंपि भेदे से णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया समणोवासगा भवंति, तेसिं च णं एवं वुत्तपुव्वं भवइ, णो खलु वयं संचाएमो मुंडा भवित्ता अगाराओ जाव पव्वइत्तए, णो खलु वयं संचाएमो चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु जाव अणुपालेमाणा विहरित्तए, वयं णं अपच्छिममारणंतियं संलेहणाजूसणाजूसिया भत्तपाणं पडियाइक्खिया जाव कालं अणवकंखमाणा विहरिस्सामो, सव्वं पाणाइवायं पच्चक्खाइस्सामो जाव सव्वं परिग्गहं पच्चक्खाइस्सामो तिविहं तिविहेणं, मा खलु ममट्ठाए किंचिवि जाव आसंदीपेढियाओ पच्चोरुहित्ता एते तहा कालगया, किं वत्तव्वं सिया सम्मं कालगयत्ति ?, वत्तव्वं सिया, ते पाणावि वुच्चंति जाव अयंपि भेदे से णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया मणुस्सा भवंति, तंजहा–महइच्छा महारंभा महापरिग्गहा अहम्मिया जाव दुप्पडियाणंदा जाव सव्वाओ परिग्गहाओ अप्पडिविरया जावज्जीवाए, जेहिं समणोवासगस्स आयाणसो आमरणंताए दंडे णिक्खित्ते, ते तओ आउगं विप्पजहंति, ततो भुज्जो सगमादाए दुग्गइगामिणो भवंति, ते पाणावि वुच्चंति ते तसावि वुच्चंति ते महाकाया ते चिरट्ठिइया ते बहुयरगा आयाणसो, इति से महयाओ णं जण्णं तुब्भे वदह तं चेव अयंपि भेदे से णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया मणुस्सा भवंति, तंजहा–अणारंभा अपरिग्गहा धम्मिया धम्माणुया जाव सव्वाओ परिग्गहाओ पडिविरया जावज्जीवाए, जेहिं समणोवासगस्स आयाणसो आमरणंताए दंडे णिक्खित्ते ते तओ आउगं विप्पजहंति ते तओ भुज्जो सगमादाए सोग्गइगामिणो भवंति, ते पाणावि वुच्चंति जाव णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया मणुस्सा भवंति, तंजहा–अप्पेच्छा अप्पारंभा अप्पपरिग्गहा धम्मिया धम्माणुया जाव एगच्चाओ परिग्गहाओ अप्पडिविरया, जेहिं समणोवासगस्स आयाणसो आमरणंताए दंडे णिक्खित्ते, ते तओ आउगं विप्पजहंति, ततो भुज्जो सगमादाए सोग्गइगामिणो भवंति, ते पाणावि वुच्चंति जाव णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया मणुस्सा भवंति, तंजहा–आरण्णिया आवसहिया गामणियंतिया कण्हुई रहस्सिया, जेहिं समणोवासगस्स आयाणसो आमरणंताए दंडे णिक्खित्ते भवइ, णो बहुसंजया णो बहुपडिविरया पाणभूयजीवसत्तेहिं, अप्पणा सच्चामोसाइं एवं विप्पडिवेदेंति–अहं ण हंतव्वो अन्ने हंतव्वा, जाव कालमासे कालं किच्चा अन्नयराइं आसुरियाइं किब्बिसियाइं जाव उववत्तारो भवंति, तओ विप्पमुच्चमाणा भुज्जो एलमूयत्ताए तमोरूवत्ताए पच्चायंति, ते पाणावि वुच्चंति जाव णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया पाणा दीहाउया जेहिं समणोवासगस्स आयाणसो आमरणंताए जाव दंडे णिक्खित्ते भवइ, ते पुव्वामेव कालं करेंति, करित्ता पारलोइयत्ताए पच्चायंति, ते पाणावि वुच्चंति ते तसावि वुच्चंति ते महाकाया ते चिरट्ठिइया ते दीहाउया ते बहुयरगा, जेहिं समणोवासगस्स सुपच्चक्खायं भवइ, जाव णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया पाणा समाउया, जेहिं समणोवासगस्स आयाणसो आमरणंताए जाव दंडे णिक्खित्ते भवइ, ते सयमेव कालं करेंति करित्ता पारलोइयत्ताए पच्चायंति, ते पाणावि वुच्चंति तसावि वुच्चंति ते महाकाया ते समाउया ते बहुयरगा जेहिं समणोवासगस्स सुपच्चक्खायं भवइ जाव णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया पाणा अप्पाउया, जेहिं समणोवासगस्स आयाणसो आमरणंताए जाव दंडे णिक्खित्ते भवइ, ते पुव्वामेव कालं करेंति करेत्ता पारलोइयत्ताए पच्चायंति, ते पाणावि वुच्चंति ते तसावि वुच्चंति ते महाकाया ते अप्पाउया ते बहुयरगा पाणा, जेहिं समणोवासगस्स सुपच्चक्खायं भवइ, जाव णो णेयाउए भवइ ॥ भगवं च णं उदाहु संतेगइया समणोवासगा भवंति, तेसिं च णं एवं वुत्तपुव्वं भवइ–णो खलु वयं संचाएमो मुंडे भवित्ता जाव पव्वइत्तए, णो खलु वयं संचाएमो चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु पडिपुण्णं पोसहं अणुपालित्तए, णो खलु वयं संचाएमो अपच्छिमं जाव विहरित्तए, वयं च णं सामाइयं देसावगासियं पुरत्था पाईणं वा पडिणं वा दाहिणं वा उदीणं वा एतावता जाव सव्वपाणेहिं जाव सव्वसत्तेहिं दंडे णिक्खित्ते सव्वपाणभूयजीवसत्तेहिं खेमंकरे अहमंसि, तत्थ आरेणं जे

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः ॥४२०॥

७ नालन्दीयाध्य. श्रावकप्रत्याख्यानस्य सविषयता

॥४१९॥

॥४२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तसा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए दंडे णिक्खित्ते, तओ आउं विप्पजहंति विप्पजहित्ता तत्थ आरेणं चेव जे तसा पाणा जेहिं समणोवासगस्स आयाणसो जाव तेसु पच्चायंति, जेहिं समणोवासगस्स सुपच्चक्खायं भवइ, ते पाणावि जाव अयंपि भेदे से० ॥ (सूत्रं ७९) ॥

पुनरपि गौतमस्वाम्युदकं प्रतीदमाह—तद्यथा—बहुभिः प्रकारैस्त्रससद्भावः संभाव्यते, ततश्चाशून्यस्तैः संसारः, तदशून्यत्वे न निर्विषयं श्रावकस्य त्रसवधनिवृत्तिरूपं प्रत्याख्यानं । तदधुना बहुप्रकारत्रससंभूत्याऽशून्यतां संसारस्य दर्शयति—भगवानाह 'सन्ति' विद्यन्ते शान्तिप्रधाना वा एके केचन श्रमणोपासका भवन्ति, तेषां चेदमुक्तपूर्वं भवति—संभाव्यते च श्रावकाणामेवंभूतस्य वचसः संभव इति, तद्यथा—न खलु वयं शक्नुमः प्रव्रज्यां ग्रहीतुं, किंतु ? वयं णमिति वाक्यालङ्कारे चतुर्दश्यष्टमीपौर्णमासीषु संपूर्णं पौषधमाहारशरीरसत्कारब्रह्मचर्याव्यापाररूपं पौषधं सम्यगनुपालयन्तो विहरिष्यामः, तथा स्थूलप्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहं प्रत्याख्यास्यामो 'द्विविध' मिति कृतकारितप्रकारद्वयेन अनुमतेः श्रावकस्याप्रतिषिद्धत्वात् तथा 'त्रिविधेने'ति मनसा वाचा कायेन च, तथा 'मा' इति निषेधे 'खलु' इति वाक्यालङ्कारे मदर्थं पचनपाचनादिकं पौषधस्यस्य मम कृते मा कार्षीत्, तथा परेण मा कारयत, तत्राप्यनुमतावपि सर्वथा यदसंभवि तत्प्रत्याख्यास्यामः, ते एवंभूतकृतप्रतिज्ञाः सन्तः श्रावकाः अभुक्त्वाऽपीत्वाऽस्नात्वा च पौषधोपेतत्वादासन्दीपीठिकातः प्रत्यारुह्य अवतीर्य सम्यक् पौषधं गृहीत्वा कालं कृतवन्तः, ते तथाप्रकारेण कृतकालाः सन्तः किं सम्यक्कृतकाला उतासम्यगिति ?, कथं वक्तव्यं स्यादिति ?, एवं पृष्टैर्निर्ग्रन्थैरेवमेवं वक्तव्यं स्यात्—सम्यक्कालगता इति, एवंच कालगतानामवश्यंभावी तेषां देवलोकेषूत्पादः, तदुत्पन्नश्च त्रस एव, ततश्च कथं

सूत्रकृ. ७१

सूत्रकृताङ्गे २ श्रुतस्कन्धे शीलाङ्कीयावृत्तिः

॥४२१॥

निर्विषयता प्रत्याख्यानस्योपासकस्येति ॥ पुनरन्यथा श्रावकोद्देशेनैव प्रत्याख्यानस्य विषयं प्रदर्शयितुमाह—गौतमस्वाम्येवाह—तद्यथा 'सन्ति' विद्यन्ते एके केचन श्रमणोपासकाः, तेषां चैतदुक्तपूर्वं भवति, तद्यथा—खलु न शक्नुमो वयं प्रव्रज्यां ग्रहीतुं, नापि चतुर्दश्यादिषु सम्यक् पौषधं पालयितुं, वयं चापश्चिमया संलेखनक्षपणया क्षपितकाया यदिवा संलेखनाजोषणया—सेवनया जोषिताः—सेविता उत्तमार्थगुणैरित्येवंभूताः सन्तो भक्तपानं प्रत्याख्याय 'कालं' दीर्घकालमनवकाङ्क्षमाणा विहरिष्यामः, इदमुक्तं भवति—न वयं दीर्घकालं पौषधादिकं व्रतं पालयितुं समर्थाः, किंतु वयं सर्वमपि प्राणातिपातादिकं प्रत्याख्याय संलेखनया संलिखितकायाश्चतुर्विधाहारपरित्यागेन जीवितं परित्यक्तुमलमिति, एतत्सूत्रेणैव दर्शयति—'सव्वं पाणाइवाय'मित्यादि, सुगमं, यावत्ते तथा कालगताः किं वक्तव्यमेतत्स्यात्—सम्यक् ते कालगता इति ?, एवं पृष्टा निर्ग्रन्था एतदूचुः, यथा—ते सन्मनसः—शोभनमनसस्ते कालगता इति, ते च सम्यक्संलेखनया यदा कालं कुर्वन्ति तदाऽवश्यमन्यतमेषु देवलोकेषूत्पद्यन्ते, तत्र चोत्पन्ना यद्यपि ते व्यापादयितुं न शक्यन्ते तथापि त्रसत्वात्ते श्रावकस्य त्रसवधनिवृत्तस्य विषयतां प्रतिपद्यन्ते ॥ पुनरप्यन्यथा प्रत्याख्यानस्य विषयमुपदर्शयितुमाह—भगवानाह—एके केचन मनुष्या एवंभूता भवन्ति, तद्यथा—महेच्छा महारम्भा महापरिग्रहा इत्यादि सुगमं, यावद्यैर्येषु वा श्रमणोपासकस्यादीयत इत्यादानं—प्रथमव्रतग्रहणं, तत आरभ्याऽऽमरणान्ताद्दण्डो निक्षिप्तः—पारत्यक्तो भवति, ते च तादृग्विधास्तस्माद्भवात्कालात्क्षये क्षायुषं विजहन्ति, त्यक्त्वा त्रसजीवितं ते भूयः पुनः स्वकर्म—स्वकृतं किल्बिषमादाय—गृहीत्वा दुर्गतिगामिनो भवन्ति, एतदुक्तं भवति—महारम्भपरिग्रहत्वात्ते मृताः पुनरन्यतरपृथिव्यां नारकत्रसत्वेनोत्पद्यन्ते, ते च सामान्यसंज्ञया प्राणिनो विशेषसंज्ञया त्रसा महाकायाः चिरस्थितिका इत्यादि पूर्ववद्यावत् 'णो णेयाउए'त्ति पुनरप्यन्ये-

७ नालन्दीयाध्य.

॥४२१॥

न प्रकारेण प्रत्याख्यानस्य विषयं दर्शयितुमाह 'भगवं च णं उदाहु'रित्यादि, पूर्वोक्तेभ्यो महारम्भपरिग्रहवदादिभ्यो विपर्यस्ताः सुशीलाः सुव्रताः सुप्रत्यानन्दाः साधव इत्यादि सुगमं यावत् 'णो णेयाउए भवइ'त्ति, एते च सामान्यश्रावकाः, तेऽपि त्रसेष्वेवान्यतरेषु देवेषूत्पद्यन्ते, ततोऽपि न निर्विषयं प्रत्याख्यानमिति ॥ किञ्चान्यत्—'भगवं च णं उदाहु'रित्यादि सुगमं यावत् 'णो णेयाउए भवइ'त्ति, एते चालेप्रेच्छादिशेषणविशिष्टा अवश्यं प्रकृतिभद्रकतया सद्गतिगामित्वेन त्रसकायेषूत्पद्यन्त इति द्रष्टव्यं ॥ किञ्चान्यत् 'भगवं च णं उदाहु' रित्यादि—गौतमस्वाम्येव प्रत्याख्यानस्य विषयं दर्शयितुमाह—एके केचन मनुष्या एवंभूता भवन्ति, तद्यथा—अरण्ये भवा आरण्यकाः—तीर्थिकविशेषाः तथा आवसथिकाः—तीर्थिकविशेषा एव, तथा ग्रामनिमन्त्रिकाः तथा 'कण्हुईरहस्सिय'त्ति क्वचित्कार्ये रहस्यकाः क्वचिद्रहस्यकाः, एते सर्वेऽपि तीर्थिकविशेषाः, ते च नो बहुसंयता हस्तपादादिक्रियासु, तथा ज्ञानावरणीयावृतत्वात् न बहुविरताः सर्वप्राणभूतजीवसत्त्वेभ्यस्तत्स्वरूपापरिज्ञानाच्चद्यादविरता इत्यर्थः । ते तीर्थिकविशेषा बहुसंयताः स्वतोऽविरता आत्मना सत्यामृषाणि वाक्यानि 'एव'मिति वक्ष्यमाणनीत्या वियुञ्जन्ति, 'एवं विप्पडिवेदेंति' क्वचित्पाठोऽस्यायमर्थः—एवंविधप्रकारेण परेषां प्रतिवेदयन्ति—ज्ञापयन्ति, तानि पुनरेवंभूतानि वाक्यानि दर्शयति, तद्यथा—अहं न हन्तव्योऽन्ये पुनर्हन्तव्याः तथाऽहं नाज्ञापयितव्योऽन्ये पुनराज्ञापयितव्या इत्यादीन्युपदेशवाक्यानि ददति, ते चैवमेवोपदेशदायिनः स्त्रीकामेषु मूर्च्छिता गृद्धा अध्युपपन्ना यावद्वर्षाणि चतुःपञ्चमानि वा षड्दशमानि वा अतोऽप्यल्पतरं वा प्रभूततरंवा कालं भुक्त्वा उत्कटा भोगा भोगभोगास्तान् ते तथाभूताः किञ्चिदज्ञानतपःकारिणः कालमासे कालं कृत्वाऽन्यतरेष्वासुरीयेषु स्थानेषु किल्बिषेष्वसुरदेवाधमेषु स्थानेषूपपत्तारो भवन्ति, यदिवा प्राण्युपघातोपदेशदायिनो भोगाभिलाषुका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'असूरियेसु' नित्यान्धकारेषु किल्बिषप्रधानेषु नरकस्थानेषु ते समुत्पद्यन्ते, ते च देवा नारका वा त्रसत्वं न व्यभिचरन्ति, तेषु च यद्यपि द्रव्यप्राणातिपातो न संभवति तथापि ते भावतो यः प्राणातिपातस्तद्विरतेर्विषयतां प्रतिपद्यन्ते, ततोऽपि च देवलोकाच्युता नरकोद्धृताः क्लिष्टपञ्चेन्द्रियतिर्यक्षु तथाविधमनुष्येषु चैडमूकतया समुत्पद्यन्ते, तथा 'तमोरूवत्ताए'त्ति अन्धबधिरतया प्रत्यायान्ति, ते चोभयोरप्यवस्थयोस्त्रसत्वं न व्यभिचरन्ति इत्यतो न निर्विषयं प्रत्याख्यानम्, एतेषु च द्रव्यतोऽपि प्राणातिपातः संभवतीति ॥ साम्प्रतं प्रत्यक्षसिद्धमेव विरतेर्विषयं दर्शयितुमाह–'भगवं च णं उदाहु'रित्यादि, भगवानाह–यो हि प्रत्याख्यानं गृह्णाति तस्यादीर्घायुष्काः 'प्राणाः' प्राणिनः, ते च नारकमनुष्यदेवा द्वित्रिचतुःपञ्चेन्द्रियतिर्यञ्चश्च संभवन्ति, ततः कथं निर्विषयं प्रत्याख्यानमिति?, शेषं सुगमं, यावत् 'णो णेयाउए भवइ' ॥ एवमुत्तरसूत्रमपि तुल्यायुष्कविषयं सभानयोगक्षेमत्वाद्व्याख्येयं ॥ तथाऽल्पायुष्कसूत्रमप्यतिस्पष्टत्वात्सूत्रसिद्धमेव, इयांस्तु विशेषो—यावत्ते न म्रियन्ते तावत्प्रत्याख्यानस्य विषयत्वेषु वा समुत्पन्नाः सन्तो, विषयतां प्रतिपद्यन्त इति ॥ पुनरपि श्रावकाणामेव दिग्व्रतसमाश्रयणतः प्रत्याख्यानस्य विषयं दर्शयितुमाह—'भगवं च णमित्यादि सुगमं यावत् 'वयं णं सामाइयं देसावकासियं'ति देशेऽवकाशो देशावकाशः तत्र भवं देशावकाशिकं, इदमुक्तं भवति—पूर्वगृहीतस्य दिग्व्रतस्य योजनशतादिकस्य यत्प्रतिदिनं संक्षिप्ततरं योजनगव्यूतिपत्तनगृहमर्यादादिकं परिमाणं विधत्ते तद्देशावकाशिकमित्युच्यते । तदेव दर्शयति—'पुरत्था पाईण'मित्यादि, 'पुरत्थि' त्ति प्रातरेव प्रत्याख्यानावसरे दिगाश्रितमेवंभूतं प्रत्याख्यानं करोति, तद्यथा—'प्राचीनं' पूर्वाभिमुखं प्राच्यां दिश्येतावन्मयाऽद्य गन्तव्यं, तथा 'प्रतीचीनं' प्रतीच्यामपरस्यां दिशि, तथा दक्षिणाभिमुखं–दक्षिणस्यामेवमुदीच्यां दिश्येतावन्मयाऽद्य पञ्चयोजनमात्रं तदधिकमूनतरं वा गन्तव्यमित्येवंभूतं ॥४२२॥

स प्रतिदिनं प्रत्याख्यानं विधत्ते, तेन च गृहीतदेशावकाशिकेनोपासकेन सर्वप्राणिभ्यो गृहीतपरिमाणात्परेण दण्डो निक्षिप्तः–परित्यक्तो भवति, ततश्चासौ श्रावकः सर्वप्राणभूतजीवसत्त्वेषु क्षेमंकरोऽहमस्मि इत्येवमध्यवसायी भवति, तत्र गृहीतपरिमाणे देशे ये आरेण त्रसाः प्राणा येषु श्रमणोपासकस्यादान इत्यादेरारभ्याऽऽमरणान्तो दण्डो निक्षिप्तः–परित्यक्तो भवति, ते च त्रसाः प्राणाः स्वायुष्कं परित्यज्य तत्रैव गृहीतपरिमाणदेश एव योजनादिदेशाभ्यन्तर एव त्रसाः प्राणालेषु प्रत्यायान्ति, इदमुक्तं भवति–गृहीतपरिमाणदेशे त्रसायुष्कं परित्यज्य त्रसेष्वेवोत्पद्यन्ते, ततश्च तेषु श्रमणोपासकस्य सुप्रत्याख्यानं भवति, उभयथापि त्रसत्वसद्भावात्, शेषं सुगमं, यावत् 'णो णेयाउए भवति' ॥

तत्थ आरेणं जे तसा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए दंडे णिक्खित्ते ते तओ आउं विप्पजहंति विप्पजहित्ता तत्थ आरेणं चेव जाव थावरा पाणा जेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए दंडे णिक्खित्ते तेसु पच्चायंति, तेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए दंडे णिक्खित्ते ते पाणावि वुच्चंति ते तसा ते चिरट्ठिइया जाव अयंपि भेदे से० ॥ तत्थ जे आरेणं तसा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० तओ आउं विप्पजहंति विप्पजहित्ता तत्थ परेणं जे तसा थावरा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० तेसु पच्चायंति, तेहिं समणोवासगस्स सुपच्चक्खायं भवइ, ते पाणावि जाव अयंपि भेदे से० ॥ तत्थ जे आरेणं थावरा पाणा जेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए णिक्खित्ते ते तओ आउं विप्प-

जहित्ता तत्थ आरेणं चेव जे तसा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० तेसु पच्चायंति तेसु समणोवासगस्स सुपच्चक्खायं भवइ, ते पाणावि जाव अयंपि भेदे से णो० ॥ तत्थ जे ते आरेणं जे थावरा पाणा जेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए णिक्खित्ते, ते तओ आउं विप्पजहंति विप्पजहित्ता ते तत्थ आरेणं चेव जे थावरा पाणा जेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए णिक्खित्ते तेसु पच्चायंति, तेहिं समणोवासगस्स अट्ठाए अणट्ठाए ते पाणावि जाव अयंपि भेदे से णो० ॥ तत्थ जे ते आरेणं थावरा पाणा जेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए णिक्खित्ते तओ आउं विप्पजहंति विप्पजहित्ता तत्थ परेणं जे तसथावरा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० तेसु पच्चायंति तेहिं समणोवासगस्स सुपच्चक्खायं भवइ, ते पाणावि जाव अयंपि भेदे से णो णेयाउए भवइ ॥ तत्थ जे ते परेणं तसथावरा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० ते तओ आउं विप्पजहंति विप्पजहित्ता तत्थ आरेणं जे तसा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० तेसु पच्चायंति, तेहिं समणोवासगस्स सुपच्चक्खायं भवइ, ते पाणावि जाव अयंपि भेदे से णो णेयाउए भवइ ॥ तत्थ जे ते परेणं तसथावरा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० ते तओ आउं विप्पजहंति विप्पजहित्ता तत्थ आरेणं जे थावरा पाणा जेहिं समणोवासगस्स अट्ठाए दंडे अणिक्खित्ते अणट्ठाए णिक्खित्ते तेसु पच्चायंति, जेहिं समणोवासगस्स अट्ठाए अणि- ॥४२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्खित्ते अणट्ठाए णिक्खित्ते जाव ते पाणावि जाव अयंपि भेदे से णो० ॥ तत्थ ते परेणं तसथावरा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० ते तओ आउं विप्पजहंति विप्पजहित्ता ते तत्थ परेणं चेव जे तसथावरा पाणा जेहिं समणोवासगस्स आयाणसो आमरणंताए० तेसु पच्चायंति, जेहिं समणोवासगस्स सुपच्चक्खायं भवइ, ते पाणावि जाव अयंपि भेदे से णो० ॥ भगवं च णं उदाहु ण एतं भूयं ण एतं भवं ण एतं भविस्संति जण्णं तसा पाणा वोच्छिज्जिहिंति थावरा पाणा भविस्संति, थावरा पाणावि वोच्छिज्जिहिंति तसा पाणा भविस्संति, अवोच्छिन्नेहिं तसथावरेहिं पाणेहिं जण्णं तुब्भे वा अन्नो वा एवं वदह–णत्थि णं से केइ परियाए जाव णो णेयाउए भवइ ॥ (सूत्रं ८०) ॥

एवमन्यान्यप्यष्ट सूत्राणि द्रष्टव्यानि सर्वाण्यपि, नवरं तत्र प्रथमे सूत्रे तदेव यद्व्याख्यातं तच्चैवंभूतं, तद्यथा–गृहीतपरिमाणे देशे ये त्रसास्ते गृहीतपरिमाणदेशस्थास्तेष्वेव त्रसेषूत्पद्यन्ते । तथा द्वितीयं सूत्रं त्वारादेशवर्तिनस्त्रसाः आरादेशवर्तिषु स्थावरेषूत्पद्यन्ते ॥ तृतीये त्वारादेशवर्तिनस्त्रसा गृहीतपरिमाणादेशाद्बहिर्ये त्रसाः स्थावराश्च तेषूत्पद्यन्ते ॥ तथा चतुर्थसूत्रं त्वारादेशवर्तिनो ये स्थावरास्ते तदेशवर्तिष्वेव त्रसेषूत्पद्यन्ते ॥ पञ्चमं सूत्रं तु आरादेशवर्तिनो ये स्थावरास्ते तदेशवर्तिष्वेव स्थावरेषूत्पद्यन्ते ॥ षष्ठं सूत्रं तु परदेशवर्तिनो ये स्थावरास्ते गृहीतपरिमाणस्थे(परदेशवर्त्ति)षु त्रसस्थावरेषूत्पद्यन्ते ॥ सप्तमसूत्रं त्विदं–परदेशवर्तिनो ये त्रसस्थावरास्ते आरादेशवर्तिषु त्रसेषूत्पद्यन्ते ॥ अष्टमसूत्रं तु परदेशवर्तिनो ये त्रसस्थावरास्ते आरादेशवर्तिषु स्थावरेषूत्पद्यन्ते ॥ नवमसूत्रं तु परदेशवर्तिनो ये त्रसस्थावरास्ते परदेशवर्तिष्वेव त्रसस्थावरेषूत्पद्यन्ते । एवमनया प्रक्रियया नवापि सूत्राणि भणनीयानि, तत्र यत्र यत्र त्रसास्तत्रादानशः—आदेरारभ्य श्रमणोपासकेनामरणान्तो दण्डस्त्यक्त इत्येवं योजनीयं, यत्र तु स्थावरास्तत्रार्थाय दण्डो न निक्षिप्तो—न परित्यक्तोऽनर्थाय च दण्डः परित्यक्त इति । शेषाक्षरघटना तु स्वबुद्ध्या विधेयेति ॥ तदेवं बहुभिर्दृष्टान्तैः सविषयतां श्रावकप्रत्याख्यानस्य प्रसाध्याधुनात्यन्तासंबद्धतां चोद्यस्य सूत्रेणैव दर्शयितुमाह–'भगवं च णं उदाहु' रित्यादि, भगवान् गौतमस्वाम्युदकं प्रत्येतदाह, तद्यथा–नैतद्भूतमनादिके काले ग्रामतिक्रान्ते नाप्येतदेष्येऽनन्ते काले भाव्यं नाप्येतद्वर्तमानकाले भवति ये (यत्) त्रसाः प्राणाः सर्वथा निर्लेपतया स्वजात्युच्छेदेनोच्छेत्स्यन्ति–स्थावरा भविष्यन्तीति, तथा स्थावराश्च प्राणिनः कालत्रयेऽपि नैव समुच्छेत्स्यन्ति–त्रसा भविष्यन्ति, यद्यपि तेषां परस्परसंक्रमेण गमनमस्ति तथापि न सामस्त्येनान्यतरेणामितरत्र सद्भावः, तथाहि–न ह्येवंभूतः संभवोऽस्ति यदुत प्रत्याख्यानिनमेकं विहायापरेषां नारकाणां द्वीन्द्रियादीनां तिरश्चां मनुष्यदेवानां च सर्वदाऽप्यभावः, एवं च त्रसविषयं प्रत्याख्यानं निर्विषयं भवति यदि तस्य प्रत्याख्यानिनो जीवत एव सर्वेऽपि नारकादयस्त्रसाः समुच्छिद्यन्ते, न चास्य प्रकारस्य संभवोऽस्त्युक्तन्यायेनेति, स्थावराणां चानन्तानामनन्तत्वादेव नासंख्येयेषु त्रसेषूत्पाद इति सुप्रतीतमिदं । तदेवमव्यवच्छिन्नैस्त्रसैः स्थावरैश्च प्राणिभिर्यद्वदत यूयमन्यो वा कश्चिद्वदति, तद्यथा–नास्त्यसौ पर्यायो यत्र श्रमणोपासकस्यैकत्रसविषयोऽपि दण्डपरित्याग इति, तदेतदुक्तनीत्या सर्वमशोभनमिति ॥ साम्प्रतमुपसंजिघृक्षुराह–

भगवं च णं उदाहु आउसंतो ! उदगा जे खलु समणं वा माहणं वा परिभासेइ मित्ति मन्नंति आगमित्ता णाणं आगमित्ता दंसणं आगमित्ता चरित्तं पावाणं कम्माणं अकरणयाए से खलु परलोगपलिमंथत्ताए चिट्ठइ, जे खलु समणं वा माहणं वा णो परिभासइ मित्ति मन्नंति आगमित्ता णाणं आगमित्ता दंसणं आगमित्ता चरित्तं पावाणं कम्माणं अकरणयाए से खलु परलोगविसुद्धीए चिट्ठइ, तए णं से उदए पेढालपुत्ते भगवं गोयमं अणाढायमाणे जामेव दिसिं पाउब्भूते तामेव दिसिं पहारेत्थ गमणाए ॥ भगवं च णं उदाहु आउसंतो उदगा ! जे खलु तहाभूतस्स समणस्स वा माहणस्स वा अंतिए एगमवि आरियं धम्मियं सुवयणं सोच्चा निसम्म अप्पणो चेव सुहुमाए पडिलेहाए अणुत्तरं जोगखेमपयं लंभिए समाणे सोवि ताव तं आढाइ परिजाणेति वंदति नमंसति सक्कारेइ संमाणेइ जाव कल्लाणं मंगलं देवयं चेइयं पज्जुवासति ॥ तए णं से उदए पेढालपुत्ते भगवं गोयमं एवं वयासी–एतेसि णं भंते ! पदाणं पुव्विं अन्नाणयाए असवणयाए अबोहिए अणभिगमेणं अदिट्ठाणं असुयाणं अमुयाणं अविन्नायाणं अबोगडाणं अणिगूढाणं अविच्छिन्नाणं अणिसिट्ठाणं अणिवूढाणं अणुवहारियाणं एयमट्ठं णो सद्दहियं णो पत्तियं णो रोइयं, एतेसि णं भंते ! पदाणं एण्हिं जाणयाए सवणयाए बोहिए जाव उवहारणयाए एयमट्ठं सद्दहामि पत्तियामि रोएमि एवमेव से जहेयं तुब्भे वदह ॥ तए णं भगवं गोयमे उदयं पेढालपुत्तं एवं वयासी–सद्दहाहि णं अज्जो ! पत्तियाहि णं अज्जो रोएहि णं अज्जो ! एवमेयं जहा णं अम्हे वयामो, तए णं से उदए पेढालपुत्ते भगवं गोयमं एवं वयासी–इच्छामि णं भंते ! तुब्भं अंतिए चाउज्जामाओ धम्माओ पंचमहव्वइयं सपडिक्कमणं धम्मं उवसंपज्जित्ता णं विहरित्तए ॥ तए णं से भगवं गोयमे उदयं पेढालपुत्तं गहाय जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ, उवागच्छइत्ता तए णं से उदए पेढालपुत्ते समणं भगवं महा-

॥४२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीरं तिक्खुत्तो आयाहिणं पयाहिणं करेइ, तिक्खुत्तो आयाहिणं पयाहिणं करित्ता वंदइ नमंसति, वंदित्ता नमंसित्ता एवं वयासी–इच्छामि णं भंते ! तुब्भं अंतिए चाउज्जामाओ धम्माओ पंचमहव्वइयं सपडिक्कमणं धम्मं उवसंपज्जित्ता णं विहरित्तए, तए णं समणे भगवं महावीरे उदयं एवं वयासी–अहासुहं देवाणुप्पिया ! मा पडिबंधं करेहि, तए णं से उदए पेढालपुत्ते समणस्स भगवओ महावीरस्स अंतिए चाउज्जामाओ धम्माओ पंचमहव्वइयं सपडिक्कमणं धम्मं उवसंपज्जित्ता णं विहरइ त्तिबेमि ॥ (सूत्रं ८१) ॥ इति नालंदइज्जं सत्तमं अज्झयणं समत्तं ॥ इति सूयगडांगवीयसुयक्खंधो समत्तो ॥ ग्रंथाग्रं० २१०० ॥

'भगवं च णं उदाहु'रित्यादि गौतमस्वाम्याह–आयुष्मन्नुदक ! यः खलु श्रमणं वा–यथोक्तकारिणं माहनं वा–सद्ब्रह्मचर्योपेतं 'परिभाषते' निन्दति मैत्रीं मन्यमानोऽपि, तथा सम्यग् ज्ञानमागम्य तथा दर्शनं चारित्रं च पापानां कर्मणामकरणाय समुत्थितः, स खलु लघुप्रकृतिः पण्डितंमन्यः 'परलोकस्य' सुगतिलक्षणस्य तत्कारणस्य वा सत्संयमस्य 'पलिमन्थाय' तद्विलोडनाय तद्विघाताय तिष्ठति, यस्तु पुनर्महासत्त्वो रत्नाकरवद्गम्भीरो न श्रमणादीन् परिभाषते तेषु च परमां मैत्रीं मन्यते सम्यग्दर्शनज्ञानचारित्राण्यनुगम्य तथा पापानां कर्मणामकरणायोत्थितः स खलु परलोकविशुद्ध्याऽवतिष्ठते, अनेन च परपरिभाषावर्जनेन यथावस्थितार्थस्वरूपदर्शनतो गौतमस्वामिना स्वौद्धत्यं परिहृतं भवति, तदेवं यथावस्थितमर्थं गौतमस्वामिनाऽवगमितोऽप्युदकः पेढालपुत्रो यदा भगवन्तं गौतममनादियमाणो यस्या एव दिशः प्रादुर्भूतस्तामेव दिशं गमनाय संप्रधारितवान् ॥ तं चैवमभिप्रायमुदकं दृष्ट्वा भगवान्गौतमस्वाम्याह, तद्यथा–आयुष्मन्नुदक ! यः खलु तथाभूतस्य श्रमणस्य ब्राह्मणस्य वाऽन्तिके–समीपे एकमपि

योगक्षेमाय पद्यते–गम्यते येनार्थस्तत्पदं योगक्षेमपदं, किंभूतम् ?–आर्यम् आर्यानुष्ठानहेतुत्वादार्यं, तथा धार्मिकं तथा शोभनवचनं सुवचनं सद्गतिहेतुत्वात् तदेवंभूतं पदं श्रुत्वा निशम्य–अवगम्य चात्मन एव तदनुत्तरं योगक्षेमपदमित्येवमवगम्य सूक्ष्मया कुशाग्रीयया बुद्ध्या 'प्रत्युपेक्ष्य' पर्यालोच्य तद्यथा अहमनेनैवंभूतमर्थपदं 'लम्भितः' प्रापितः सन्नसावपि तावल्लौकिकस्तमुपदेशदातारमाद्रियते–पूज्योऽयमित्येवं जानाति, तथा कल्याणं मङ्गलं देवतामिव स्तौति पर्युपास्ते च, यद्यप्यसौ पूजनीयः किमपि नेच्छति तथापि तेन तस्य परमार्थोपकारिणो यथाशक्ति विधेयम् ॥ तदेवं गौतमस्वामिनाऽभिहित उदक इदमाह–तद्यथा–एतेषां पदानां पूर्वमज्ञानतयाऽश्रवणतयाऽबोध्या चेत्यादिना विशेषणकदम्बकेन न श्रद्धानं कृतवान्, साम्प्रतं तु युष्मदन्तिके विज्ञायैनमर्थं श्रद्धेऽहं ॥ एवमवगम्य गौतमस्वाम्युदकमेवाह–यथा अस्मिन्नर्थे श्रद्धानं कुरु, नान्यथा सर्वज्ञोक्तं भवतीतिमत्वा, पुनरप्युदक एवमाह—इष्टमेवैतन्मे, किं त्वयुष्माच्चातुर्यामिकाद्धर्मात्पञ्चयामिकं धर्मं सम्प्रति सप्रतिक्रमणमुपसंपद्य विहर्तुमिच्छामि ॥ ततोऽसौ गौतमस्वामी तं गृहीत्वा तीर्थकरान्तिकं जगाम । उदकश्च भगवन्तं वन्दित्वा पञ्चयामिकधर्मग्रहणायोत्थितः, भगवताऽपि तस्य सप्रतिक्रमणः पञ्चयामो धर्मोऽनुज्ञातः, स च तं तथाभूतं धर्ममुपसंपद्य विहरतीति । इति परिसमाप्त्यर्थे । ब्रवीमीति पूर्ववत्, सुधर्मस्वामी स्वशिष्यानिदमाह, तद्यथा—सोऽहं ब्रवीमि येन मया भगवदन्तिके श्रुतमिति । गतोऽनुगमः ।

सांप्रतं नयाः, ते चामी–नैगम१संग्रह२व्यवहार३र्जुसूत्र४शब्द५समभिरूढै६वंभूता७ख्याः सप्तैव, तेषां च मध्ये नैगमाद्याश्चत्वारोऽप्यर्थनयाः अर्थमेव प्राधान्येन शब्दोपसर्जनमिच्छन्ति, शब्दाद्यास्तु त्रयः शब्दनयाः शब्दप्राधान्येनार्थमिच्छन्ति । तत्र नैगमस्येदं

१ देवताप्रतिमारूपत्वाच्चैत्यस्य देवतया गतार्थत्वान्न पृथन्निर्देशः, सूत्रे तु स्थापनायाः पूज्यतमत्वापेक्षया स्पष्टं पृथन्निर्देशः इति भाति ।

स्वरूपं, तद्यथा–सामान्यविशेषात्मकस्य वस्तुनो नैकेन प्रकारेणावगमः–परिच्छेदो निगमस्तत्र भवो नैगमो, नैकगमो वा नैगमः–महासामान्यापान्तरालसामान्यविशेषाणां परिच्छेदकः, तत्र महासामान्यं सर्वपदार्थानुयायिनी सत्ता अपान्तरालसामान्यं द्रव्यत्वजीवत्वाजीवत्वादिकं, विशेषाः परमाण्वादयस्तद्गता वा शुक्लादयो गुणाः, तदेतत्त्रितयमप्यसाविच्छतीति, निलयनप्रस्थकादिदृष्टान्तैरनुयोगद्वारप्रसिद्धैस्तत्स्वरूपमवसेयम्, अयं च नैगमः सामान्यविशेषात्मकवस्तुसमाश्रयणेऽपि न सम्यग्दृष्टिः, भेदेनैव सामान्यविशेषयोराश्रयणात्, तन्मताश्रितनैयायिकवैशेषिकवत् । तथा संग्रहोऽप्येवंस्वरूपः, तद्यथा–सम्यक् पदार्थानां सामान्याकारतया ग्रहणं सङ्ग्रहः, तथाहि–अप्रच्युतानुत्पन्नस्थिरैकस्वभावमेव सत्तारूपं वस्त्वसावभ्युपगच्छति, सत्तातो व्यतिरिक्तस्यावस्तुत्वं खरविषाणस्येव, स च संग्रहः सामान्यविशेषात्मकस्य वस्तुनः सामान्यांशस्यैवाश्रयणान्मिथ्यादृष्टिः, तन्मताश्रितसांख्यवत् । व्यवहारनयस्य तु स्वरूपमिदं, तद्यथा—यथालोकग्राहमेव वस्तु, यथा च शुष्कतार्किकैः स्वाभिप्रायकृतलक्षणानुगतं तथाभूतं वस्तु न भवत्येव, नाहि प्रतिलक्षणमर्थानामात्मभेदो भवति, किं तर्हि ?, यथा यथा लोकेन विशिष्टभूयिष्ठतयाऽर्थक्रियाकारि वस्तु व्यवहियते तथैव तद्वस्तित्वाबालगोपालाङ्गनादिप्रसिद्धत्वाद्वस्तुस्वरूपसेति, अयमप्युत्पादव्ययध्रौव्ययुक्तस्य वस्तुनोऽन्यभ्युपगमात् मिथ्यादृष्टिः, तथाविधरथ्यापुरुषवदिति । ऋजुसूत्रमतं त्विदं–ऋजु–प्रगुणं तच्च विनष्टानुत्पन्नतयाऽतीतानागतवक्रपरित्यागेन वर्त्तमानकालक्षणभावि यद्वस्तु तत्सूत्रयति–प्रतिपादयत्याश्रयतीति ऋजुसूत्रः, तस्यैवार्थक्रियाकारितया वस्तुबलक्षणयोगादिति, अयमपि सामान्यविशेषोभयात्मकस्य वस्तुनः सामान्यांशपरित्यागेन विशेषांशस्यैव समाश्रयणाच्छौद्धोदनिवच्च सम्यग्दृष्टिः, कारणभूतद्रव्यानभ्युपगमेन तदाश्रितविशेषस्यैवाभावादिति । शब्दनयस्वरूपं त्विदं, तद्यथा—शब्दद्वारेणैवास्यार्थप्रतीत्यभ्युपगमाल्लिङ्गवचनसाधनोप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहकालभेदाभिहितं वस्तु भिन्नमेवेच्छति, तत्र लिङ्गभेदाभिहितं वस्त्वन्यदेव भवति, तद्यथा—पुष्यस्तारका नक्षत्रमेवं संख्याभिन्नं जलमापो वर्षा ऋतुः, साधनभेदस्त्वयं—एहि मन्ये रथेन यास्यसि, नहि यातस्तेपिता, अस्यायमर्थः—एवं त्वं मन्यसे यथाऽहं रथेन यास्यामीत्यत्र मध्यमोत्तमपुरुषयोर्व्यत्ययः, उपग्रहस्तु परस्मैपदात्मनेपदयोर्व्यत्ययः, तद्यथा—तिष्ठति प्रतिष्ठते रमते उपरमतीत्यादि, कालभेदस्तु अग्निष्टोमयाजी पुत्रोऽस्य भविता, अस्यायमर्थः—अग्निष्टोमयाजी अग्निष्टोमेनेष्टवान्, भूते णिनिः, भवितेति भविष्यदनद्यतने लुट्, तत्रायमर्थः—णिनिप्रत्ययो भवितेत्यस्य संबन्धाद्भूतकालता परित्यज्य भविष्यत्कालतां प्रतिपद्यते, तेनेदमुक्तं भवति—एवंभूतोऽस्य पुत्रो भविष्यति योऽग्निष्टोमेन यक्ष्यति। तदेवंभूतं व्यवहारनयं शब्दनयो नेच्छति, लिङ्गाद्यभिन्नांस्तु पर्यायान् अनेकविषयत्वेनेच्छति, तद्यथा—घटः कुटः कुम्भः इन्द्रः शक्रः पुरन्दर इत्यादि, अयमप्यर्थव्यञ्जनपर्यायोभयरूपस्य वस्तुनो व्यञ्जनपर्यायस्यैव समाश्रयणान्मिथ्यादृष्टिरिति। तथा पर्यायाणां नानार्थतया समभिरोहणात्समभिरूढो, न ह्ययं घटादिपर्यायाणामेकार्थतामिच्छति, तथाहि—घटनाद् घटः कुटनात्कुटः कौ भातीति कुम्भो, नहि घटनं कुटनं भवति, तथेन्दनादिन्द्रः पुर्दारणात्पुरन्दर इत्यादेरपि शब्दप्रवृत्तिनिमित्तस्य न परस्परानुगतिरिति, तदयमपि मिथ्यादृष्टिः, पर्यायाभिहितधर्मवद्वस्तुनोऽनाश्रयणाद् गृहीतप्रत्येकावयवान्धहस्तिज्ञानवदिति। एवंभूताभिप्रायस्त्वयं—यदैव शब्दप्रवृत्तिनिमित्तं चेष्टादिकं तस्मिन्घटादिके वस्तुनि तदैवासौ युवतिमस्तकारूढ उदकाद्याहरणक्रियाप्रवृत्तो घटो भवति, न निर्व्यापारः, एवंभूतस्यार्थस्य समाश्रयणादेवंभूताभिधानो नयो भवति, तदयमप्यनन्तधर्माध्यासितस्य वस्तुनोऽनाश्रयणान्मिथ्यादृष्टिः, रत्नावल्यवयवे पद्मरागादौ कृतरत्नावलीव्यपदेशपुरुषवदिति। तदेवं सर्वेऽपि नयाः प्रत्येकं मिथ्यादृष्टयोऽन्योऽन्यसव्यपेक्षास्तु सम्यक्त्वं भजन्ति। अत्र च ज्ञानक्रियाभ्यां मोक्ष इति-

सूत्रकृ. ७२ प्रकृताङ्गे श्रुतस्कन्धे शीलाचार्यावृत्तिः ॥४२७॥

कृत्वा ज्ञानक्रियानययोः सर्वेऽप्येते स्वधिया समवतारणीयाः। तत्रापि ज्ञाननय ऐहिकामुष्मिकयोर्ज्ञानमेव फलसाधकत्वेनेच्छति न क्रियां, क्रियानयस्तु क्रियामेव न ज्ञानं, परमार्थस्तूभयमपि समुदितमन्योऽन्यसव्यपेक्षं पंग्वन्धवदभिप्रेतफलसिद्धयेऽलमिति एतदुभययुक्त एव साधुरभिप्रेतमर्थं साधयति, उक्तं च—"सव्वेसिंपि णयाणं बहुविहवत्तव्वयं णिसामेत्ता[1]। तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ १ ॥" समाप्तमिदं नालन्दाख्यं सप्तममध्ययनम् ॥ इति समाप्तेयं सूत्रकृतद्वितीयाङ्गस्य टीका। कृता चेयं शीलाचार्येण वाहरिगणिसहायेन ॥ यदवाप्तमत्र पुण्यं टीकाकरणे मया समाधिभृता। तेनापेततमस्को भव्यः कल्याणभाग् भवतु ॥ १ ॥ ग्रंथाग्रं (१२८५०) ॥

१ सर्वेषामपि नयानां बहुविधवक्तव्यतां निशम्य। तत् सर्वनयसंमतं यत् चरणगुणस्थितः साधुः ॥ १ ॥

इति श्रीमच्छीलाङ्काचार्यविरचितविवृतियुते श्रीसूत्रकृताङ्गे द्वितीयः श्रुतस्कन्धः समाप्तः
समाप्तं च द्वितीयमङ्गमेवम् ॥

॥ नालन्दीयाध्य. ॥४२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

शीलाङ्काचार्यविरचितविवरणसमन्वितस्य श्रीआचाराङ्गसूत्रस्य

॥ परिशिष्टानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीशंखेश्वरपार्श्वनाथाय नमः ॥

[1]वृद्धिपत्रकम्

(ADDENDA & CORRIGENDA)

P.	L.	
2	37	वंदित्तु सव्वसिद्धे इत्यादि । [2]तत्र
3	9	आयारे इत्यादि । आचार-
3	14	चरणेत्यादि । चरण-
3	17	जत्थ य जमित्यादि । यत्र
3	21	आयारेत्यादि । क्षुल्लिका-
3	24	तस्सेत्यादि गाथा । तस्य
3	29	आयारो इत्यादि । आचर्यते
4	22	सव्वेसिमित्यादि । सर्वेषां
4	25	आयारो इत्यादि । अयमाचारो
4	30	आयारम्मीत्यादि । यस्माद्
5	4	आयारेत्यादि, सत्थेत्यादि, पंचेत्यादि । उत्तानार्थाः
5	22	अंगाणमित्यादि । स्पष्टा
5	24	सारो इत्यादि । स्पष्टैव
5	27	बंभम्मि(म्मी)त्यादि । तत्र
5	37	संजोगे इत्यादि । संयोगेन
6	1	पगई इत्यादि । प्रकृतय-
6	5	अम्बेत्यादि । अम्बष्ठ
6	10	एगंते इत्यादि, पडिलोमे इत्यादि, बीयंतरिए इत्यादि । आसामर्थो
6	10	उग्गेणेत्यादि, सुद्दीए इत्यादि । अनयोरप्यर्थो
6	24	दव्वमित्यादि । ज्ञ-
6	30	चरणमि(म्मी)त्यादि । चरणं
6	35	भावे इत्यादि । भाव-
6	41	सत्थेत्यादि, अट्ठमए इत्यादि । स्पष्टे
7	3	जिय इत्यादि, निस्संगेत्यादि । तत्र
7	17	जीवो इत्यादि । तत्र
7	21	दव्वमित्यादि । शस्त्रस्य
7	26	दव्वमित्यादि । तत्र
8	2	सुयं मे आउसं तेणं भगवया एवमक्खायं— इहमेगेसिं नो सन्ना भवति । अस्य
8	30	दव्वे इत्यादि । संज्ञा
8	36	आहारेत्यादि । आहारा-
9	9	नाममित्यादि । नाम-
9	17	तेरसेत्यादि । द्रव्यदिग्
9	23	अट्ठेत्यादि । तिर्यग्-
9	27	इंदग्गेत्यादि । आसा-
